॥ श्रीः ॥

चौखम्बा संस्कृत ग्रन्थमाला

( ग्रन्थ-संख्या १०२ )

श्रीश्वेतायनव्यासविरचिता

# श्रीलक्ष्मीनारायणसंहिता

## त्रेतायुगसन्तानाख्यः द्वितीयः खण्डः

रचयिता

न्यायाचार्यः

**स्वामी श्रीकृष्णवल्लभाचार्यः शास्त्री**

( नवानगर, सौराष्ट्र )

सस्नेह भेंट
ब्रजमोहन दास गुप्त
लेखक
दि० ५-२-७१ ई०

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९७१

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : प्रथम, वि० सं० २०२८
मूल्य : ४५–०० ( द्वितीय खण्ड )

©
चौखम्बा संस्कृत सीरीज आफिस
पोस्ट आफिस 'चौखम्बा', पोस्ट बाक्स नं० ८
वाराणसी–१ ( उ० प्र० )
भारतवर्ष
फोन नं० ६३१४५

THE
CHOWKHAMBA SANSKRIT SERIES
( WORK NO. 102 )

# ŚRĪLAKṢMĪNĀRĀYAṆASAṂHITĀ

OF

ŚRĪ ŚVETĀYANA VYĀSA

## VOL. II

**( TRETĀYUGASANTĀNA )**

BY

NYĀYĀCĀRYA

SWAMĪ SRĪKṚṢṆAVALLABHĀCĀRYA, ŚĀSTRĪ

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-1 ( India )
1971

Publisher : The Chowkhamba Sanskrit Series office, Varanasi–1
Printer : Vidya Vilas Press, Varanasi–1
Edition : First Edition, 1971
Price : Rs. 45–00 ( Vol. II )

© The Chowkhamba Sanskrit Series Office
Oriental and Foreign Book–Sellers and Publishers
P. O. Chowkhamba, Post Box 8,
Varanasi–1 ( India )
1971
Phone : 63145

ओम्

श्रीलक्ष्मीनारायणसंहितायाः

# द्वितीयखण्डस्य त्रेतासन्तानस्याऽनुक्रमणिका


| अध्यायाः | पृष्ठाः |
| --- | --- |
| १. श्रीपुरुषोत्तमनारायणस्वामिनः सार्वभौममहिम्नो वर्णनम् । | १ |
| २. अक्षरपरधामाधिपतेर्बहुधा वंशविस्तारे हिरण्याण्डकोशकूर्चजन्ययोर्हिरण्यकूर्चहिरण्याण्डयोरसुरयोः संकर्षणद्वारा नाशः, पृथ्वीगोलकस्य तु मेरोर्दक्षिणखण्डात्मकस्यैवाऽवशेषतया राधिकायै श्रीकृष्णस्य परिचयदानमित्यादि । | ४ |
| ३. श्रीपुरुषोत्तमनारायणस्य सर्वसृष्टिषु सुमूर्ततया वर्तमानता, सौराष्ट्रे आनर्तमहाक्षेत्रे (लोमशाश्रमक्षेत्रे) कृपया प्राकट्यं चेत्यादि । | ७ |
| ४. परमेश्वरस्य प्राकट्यदिनेऽवतारा ईश्वरा लोकपालाः प्रजाः समागताः, विविधदानानि चेत्यादि। | १० |
| ५. बालस्वरूपप्रभोः षष्ठीकृतरक्षणम्, दैत्यैः कृतं पाताले सूतकपुरुषद्वाराऽपहरणम्, सूतकाद्युत्पत्तिः, शेषनारायणकृतं रक्षणं, सूतकस्य भक्तत्वं सूतत्वं चेत्यादि । | १३ |
| ६. परमेश्वरस्य नामकरणसंस्कारविधिः, साणासुरस्य व्याघ्ररूपधरस्य हरिं हन्तुमिच्छश्चक्रेण विनाशनं शान्तिकरणमित्यादि । | १७ |
| ७. श्रीकृष्णनारायणप्रभोः प्रेंखाऽऽरोहणोत्सवे तलपुत्र्यास्तलाजाराक्षस्याः कापट्येनाऽऽगताया अपि हरौ मोहिताया मुक्त्यादिदानमित्यादि । | २० |
| ८. श्रीबालकृष्णस्य द्वितीयमासारंभे क्षीरपानोत्सवे नैकरूपैर्दिव्यगवां दुग्धपानं, गोमहोत्सवः, गोरूपधारिणां कपटिनां राक्षसानां पत्नीनां गोरूपाणां सप्राणदुग्धधावनपाने नाशो मुक्तिश्च भगवता कृतेति । | २३ |
| ९. श्रीबालकृष्णप्रभोस्तृतीये मासि शुक्लदले गृहाद् बहिर्निष्क्रमणसंस्कारे योषिद्भिः कारिते लालनरमणे बहुरूपता, दिव्यदर्शनम्, लोमशाश्रमे सुरप्रभा कृष्णकान्तं नीत्वा ययौ, तत्र क्रोधनोऽसुरः क्रोधना कन्या भूत्वा हरिमहरत्, व्योम्नि सा हरिणा दग्धा तं मुमोच, तां दिव्यां त्रिरूपां कृत्वा लोमशाश्रमे, मोक्षे, दुर्वासोभाविजन्मनि, चेति व्यधात् । विधुदर्शनम्, चमत्कारश्चेत्यादि । | २६ |
| १०. श्रीबालकृष्णस्य प्रभोर्भूम्युपवेशनसंस्कारे भूमेर्युतपुत्रीणां सिंहिकादिकन्दराणां श्रीकृष्णनारायणप्राप्तिश्चेत्यादि । | २९ |
| ११. श्रीबालकृष्णस्य प्रभोः कर्णवेधसंस्कारः, सूच्यै चमत्कारदर्शनम्, अश्विनीकुमारतीर्थम्, अन्नप्राशनसंस्कारः, वनदेवताकारितप्राशनम्, वनदेवताभ्यो बहुरूपैश्चमत्कारः, कान्तप्राप्तिः, हरेर्वृत्तिज्ञानार्थं पुरोधृतवस्त्रशास्त्रादिवस्तूनि ग्रहीतुं बहुरूपतादिव्यता चेत्यादि । | ३१ |
| १२. दक्षिणोदधिस्थदमनकदैत्यस्य कन्यका हर्तुं लोमशाश्रममागतस्य लोमशेन कृतो जडीभावः, बालकृष्णेन सुदर्शनेन कृतः ससैन्यस्य ध्वंसो मोक्षश्चेत्यादि । | ३४ |
| १३. राक्षसीनां कन्यकानां चाऽश्वपट्टसरःसन्निधौ तुमुलयुद्धारंभ इत्यादि । | ३७ |
| १४. असंख्यकन्यकाभिर्युद्धसमर्थाभिः सह राक्षसीनां युद्धे राक्षसीनां विनाशाभिमुखपराजयेऽन्ते शरणागतिः, मुक्तिपदं कन्यकापदं च बालकृष्णकृपयेत्यादि । | ४० |
| १५. नूत्नकन्यकानां लोमशदर्शितैकादशीव्रतपातिव्रत्यगोगुर्वादिसेवनमाहात्म्यप्रभृति । | ४४ |

अध्यायाः पृष्ठाः

१६. आषाढशुक्लैकादश्यां श्रीबालकृष्णस्य प्रभोः कन्यकाकृतपूजनं, बहुस्वरूपधारणं, व्रतानि, शत्रुञ्जयपर्वतस्थकंकतालानां दैत्यानां युद्धं मोक्षणं, शेषाणां कन्यारूपधारिणां लोमशाश्रमे वासश्चेत्यादि । ४६

१७. कंकतालदैत्यपत्नीनां युद्धे लोमशक्षेत्रे कृष्णकान्तात्वं लोमशकृतबालकृष्णात्मकनिवेदितोपदेशश्चेत्यादि । ४९

१८. पितृपक्षे पितृकन्याकृतहरिपूजनं, हरिकृतपितृतर्पणादि, नारकाणां मोक्षणं, पितृस्त्रीजातिपरिचयः, प्रेतानां मुक्तिश्चेत्यादि । ५२

१९. कार्तिककृष्णाष्टम्यां बालकृष्णस्य प्रभोर्द्वितीयवर्षारंभोत्सवे सर्वलोकेष्वामन्त्रणपत्रिकाप्रेषणं राशिकृतवस्तूपस्थापनं महामण्डपनिर्माणं चेत्यादि । ५६

२०. मण्डपस्य शोभावर्णनं, समाजासनानि, श्रीबालकृष्णस्य प्रभोर्मूर्तिशृंगारादि । ६०

२१. श्रीबालकृष्णस्य प्रभोर्द्वितीयवर्षारंभे महोत्सवे मण्डपे महाऽऽसनवर्णनं, सर्वकृतपूजाशीर्वादाश्चेत्यादि । ६३

२२. च्यवनयोगेन प्रह्लादस्य रसातलात्तीर्थार्थे भूमावागमनं, नरनारायणेन सह युद्धं, भक्त्या नारायणपराजयः, प्रह्लादच्यवनयोर्लोमशाश्रमागमश्चेत्यादि । ६६

२३. रसातलादिस्थितदशसाहस्रदानवानां मोक्षणम्, पञ्चसाहस्रकन्यकानां बालकृष्णशरणं चेति । ६९

२४. श्रीबालकृष्णस्य प्रभोश्चौलसंस्कारे रोमसु पापानां कथानकम्, हरेः रोम्णां तु नारायणरूपतेत्यादि । ७२

२५. वसन्तविकासः, पुष्पदोलोत्सवः, तिमिंगिलरूपसालमालासुरस्य हरिनाशार्थमागतस्य हरिकृतनाशश्चेत्यादि । ७५

२६. श्रावण्यां सरस्तटे यज्ञसूत्रोत्सवे सालमालवंशीयदैत्यानामागमनं, युद्धं, प्रभुणा तेषां विनाशः, मोक्षधर्मा लोमशोपदिष्टाश्चेत्यादि । ७८

२७. दैत्यनारीणां धर्मोपदेशे सुकेशिसमाख्यानम्, अशून्यशयनव्रतशिवपुण्यकव्रतादि, देवानां भिन्नतिथिषु स्वापाः, पूजा चेत्यादि । ८१

२८. प्रभोश्चतुर्थवर्षारंभोत्सवे पातालनागस्य स्वस्तिकस्य गरुडद्वारा पातालराजमन्त्रिणः सुमधोः सकाशादागतकष्टमोक्षणं, नागकन्यानां लोमशाश्रमाऽऽनयनं चेत्यादि । ८४

अध्यायाः पृष्ठाः

२९. आरक्तदेशीयराज्ञा पुत्रार्थं शावदीनाकाल्यै बालबलिदानार्थबद्धबालानां मोक्षणार्थं श्रीहरेस्तत्र गमनं, सहस्रकन्यकानां हरौ स्निग्धता चेत्यादि । ८७

३०. प्रभोः राजकृतदेवीपशुसंस्कारः, देव्या राजादिसंहारः, बद्रीं कुरुक्षेत्रं लोमशाश्रमं प्रत्यागमनम्, बालकानां तज्जनकेभ्योऽर्पणम्, मातॄणां मुक्तिश्चेत्यादि । ९०

३१. कन्यकानां पयोव्रतं, पुराधर्मतत्त्वे श्वेतकेतुकृतमर्यादा, सौदासपत्न्यां वशिष्ठपुत्रोऽश्मकः, उतथ्यभार्या बृहस्पतिस्पृष्टा, दीर्घतमा बलेर्दास्यां राज्ञ्यां च पुत्रानुत्पादयामास, ततो मर्यादाकरणं चेत्यादि । ९३

३२. बालग्रहादीनां पूजने तेषां प्रत्यक्षागमनं, तेषां नामरूपादिभिर्वर्णनं चेति । ९६

३३. गौरीपूजनविसर्जने, वल्लीदीनाख्यव्याघ्रासुरस्य शतेन व्याघ्रसिंहरूपधारिणाऽसुरव्रजेन सह विनाशनमित्यादि । ९९

३४. प्रभोः पञ्चमाब्दिके महोत्सवे विविधगन्धर्वाणां गायनानि, दाल्भ्यबकादिसहस्रर्षीणां सिंहव्याघ्रादिचर्मभ्यः सिंहादीनां सजीवीकरणम्, अंगुष्ठात्तत्तच्चर्माविर्भावश्चेत्यादि । १०२

३५. कैलासीयाऽर्धनारीश्वरनाट्यमण्डलेन लोमशक्षेत्रे कृताऽलौकिकनाट्यैः प्रभुः सन्तुष्टः सन् शंकरगर्वगंजनो मोक्षदश्चाऽभवत्, नटनाट्यतीर्थं चेत्यादि । १०५

३६. प्रभोर्विद्यारंभे सर्वमूर्तिमद्विद्यानामागमः, बुद्धिपरीक्षा, बृहस्पतिकृतो वराटकदैत्याय यत्नशीलतोपदेशः, दैत्यतपोनिरोधश्चेत्यादि । १०८

३७. वराटकाख्याऽसुरसैन्यादिपराजयदण्डादिकं, डफ्फरजातीयम्लेच्छनाशनं चेत्यादि । १११

३८. वनस्पतिनभस्पतिसरस्पतिमहर्षीणां सतीशापाद् राक्षसतामापन्नानां वाटिकायामुपद्रवः, प्रभुणा शापमोक्षणं, नग्नशंकरस्य तापसाश्रमेषु भ्रमणम्, ऋषिकृतापराधः, लिंगपातनम्, शापकारणं चेत्यादि । ११४

३९. प्रभोः षष्ठवत्सरारंभेऽष्टम्यां श्रीराधाकृष्णावतारव्यूहदेवमानवादिकृतमहोत्सवपूजनम्, पत्नीसहितदेवायनद्विजस्य चाण्डालयोनित उद्धारश्चेत्यादि । ११८

अध्यायाः पृष्ठाः

४०. मार्गशीर्षे ऊर्जव्रतर्षिकृताया लक्ष्मीनारायणसंहिताकथायाः श्रवणप्रसंगे प्रभोर्दिव्यदर्शनम्, ऋषीणां स्तवनानि, निवासात्तीर्थानि चेत्यादि । १२१

४१. कंथाधरनृपस्य शंकरभक्त्या कालयष्टिप्राप्तिः, पुष्करे सेवया वशिष्ठाशीर्वादेन चिरजीविता, विप्रपुत्रस्य यमगृहगतस्याऽऽनयनं स्वाऽऽयुर्दानं, यमराजपुत्र्या हुडुकायिन्या सह विवाहः, तत्प्रसंगेन नास्तिकता चेत्यादि । १२४

४२. कंथाधरस्य हुडुकायिनीपत्नीयोगेनाऽतिनास्तिक्यं, वेदकर्मादिनिरोधेनैश्वर्यनाशे वने मरणं, म्लेच्छजन्म, पुत्रेण रणंगमेनाऽश्वपट्टसरस्तीर्थे कृतोद्धारश्चेत्यादि । १२७

४३. रणंगमकृतयज्ञः, प्रभोः सप्तमो जन्मोत्सवः, यक्षकन्यया सह रणंगमस्य विवाहः, विमानादिलाभश्चेत्यादि । १३०

४४. रणंगमस्य दक्षिणध्रुवदर्शनार्थं विमानेन गतस्याऽन्तार्किवर्तुलदेशमध्ये भूविवरे प्रविष्टस्य लक्ष्मणाऽऽर्यकृतस्वागतं प्रभोर्दर्शनं, लक्ष्मणस्य राज्ञः सकुटुम्बस्य तद्विमानेन यात्रार्थं पृथ्व्यामागमनप्रयाणं चेत्यादि । १३३

४५. मध्ये रोधयतो मात्रागस्कर राक्षसस्य स्वस्त्रीमातृप्रभृतिताडनात्मकदुष्टवृत्तान्तः, मौंजाम्बिकायाः सस्नुषायाः समुद्रे क्षिप्तायाः श्रीकृष्णनारायणकृतरक्षणं चेत्यादि । १३६

४६. रणंगममात्रागस्करयोर्युद्धं, रणंगमस्य विजयः, लोमशाश्रमागमनं, प्रभोः पूजनं, प्रभौ लक्ष्मणस्यसहस्रद्वयकन्याशरणं चेत्यादि । १३९

४७. लक्ष्मणकन्यकाभ्यो लोमशकृतपुत्रपुत्रीशिष्यपत्न्यादिविवेचनात्मज्ञानादि । १४२

४८. वेधसस्तिस्रः पुत्र्यः सुषुम्णेडापिंगलाः, ता विमानेनागत्य प्रभुं नत्वा स्वीयं मत्वा सम्पूज्य ययुरित्यादि । १४५

४९. सुषुम्णादिका विमानेन पृथ्वीखण्डान् विलोक्य सत्यलोकं ययुः, पुनर्द्वासप्ततिसहस्रकन्यका व्योम्ना विमानेन श्रीहरिदर्शनार्थं प्रस्थिताश्चेत्यादि । १४८

५०. अब्रिक्तदेशीयनृपतिना स्वसैन्याधिपैः सर्वकामविमानं रुद्धं, दूतोक्तिर्नारदस्य प्रत्युक्तिश्च, तत्र शुक्राऽरजादण्डानां विश्वकर्मचित्रांगदासुरथानां कथा चेत्यादि । १५१

५१. अब्रिक्तदेशेषु ब्रह्मविमानेन सह योधिनागरम्लेच्छाश्चैकादशकोटयश्चैकादशलक्षसंख्याकाश्च नष्टा इत्यादि । १५४

५२. श्रीकृष्णराधिकाकृतविवेकादिविज्ञानदर्शनम् । १५८

५३. कापस्थ्यपूर्वा दैत्यानां शरणागतिः, शंकरादीनां तद्राजधानीं प्रति गमनं स्वागतं, पृष्ठतो विमाने युद्धं चेत्यादि । १६०

५४. विमाने सप्तमभूमिकायां दैत्यनारीकृतयुद्धं, कल्पवल्ल्युत्थकृत्याकृतदैत्यानीनाशः, श्रीकृष्णनारायणदर्शनं, राज्ञः प्रार्थना, उपदेशश्चेत्यादि । १६४

५५. अब्रिक्तदेशेषु श्रीहरिर्विहृत्य तीर्थानि कृत्वा मृतानामुद्धारं कृत्वा राजकुटुम्बस्य मोक्षं कृत्वा राज्यं द्वेधा विभज्य भक्ताभ्यां ददावित्यादिनिरूपणम् । १६६

५६. मरुद्देवानां दैत्यरूपेणोत्पत्तिः पुनर्देवत्वप्राप्तिर्जन्मान्तरादिकथनम् , अब्रिक्तीयमुख्यदैत्यजन्मवृत्तान्त इत्यादि । १६९

५७. यमराजद्वारा रक्तबीजादिदशसाहस्रदैत्यानां विनाशः, अरवाख्यदूताय राज्यदानं, बकदानर्षिरक्षा, आरववंशोद्भवश्चेत्यादि । १७२

५८. रक्तबीजाऽऽरबीजाद्यसुरोत्पत्तिर्धुन्धुदैत्योत्पत्तिर्बीजनाशात्मकपातकमित्यादि । १७५

५९. भाद्रैकादश्यामश्वपट्टसरोवरे श्राद्धेन प्रेतानां मुक्तिः, प्रेतवणिक्संवादश्चेत्यादि । १७८

६०. उदयपत्तननृपतेश्चातुर्मास्ये धीरवीरसरोवरतटस्थितस्य प्रभोर्दर्शनं, चातिवृष्ट्या जलमग्नत्वं, प्रभुणा नावा रक्षा कृतेत्यादि । १८१

६१. जलमग्नद्विशतमनुष्यान् नावि गृहीत्वा प्रभुर्मही-नदीद्वारा स्तंभाऽखातसमुद्रद्वारा सोमनाथं स्वर्णपुरं चमत्कारनगरं च प्रदक्षिणीकृत्य नौकात्मकविमानेन कुंकुमवापीक्षेत्रमानिनाय, लोमशोपदिष्टरक्षास्तोत्रं, क्रूरसिंहस्य रक्षसो विप्रद्वारा श्रीकृष्णनारायणप्राप्त्या मुक्तिश्चेत्यादि । १८४

अध्यायाः पृष्ठाः

६२. जलोद्धृतजनकृतस्तुतिः, रुग्णव्यंगषण्ढादीनामष्टवत्सरोत्सवे स्वास्थ्यकरणं, तत्कृतस्तवनम्, आर्यायनकृतस्तोत्रं, जलोद्धतानां स्वदेशप्रापणम्, उदयनृपस्य मोक्षश्चेत्यादि । १८७

६३. चन्द्रोदयपत्तनवासिनो वसुमेधश्रेष्ठिनो नर्मदाद्वारा नौकया तीर्थार्थं सौराष्ट्रसमुद्रे यातस्य झंझावातेन जलमग्नस्य सकुटुम्बस्योत्तारणं श्रीकृष्णनारायणेन कृतं, मुक्तिदानं चेत्यादि । १९०

६४. गोपनाथमाहात्म्ये सौराष्ट्रे श्रीकृष्णस्य सर्वादिजन्मक्षेत्रतीर्थक्षेत्रादिनिरूपणम् । १९२

६५. प्रभोरष्टमे वर्षे वैशाखे यज्ञोपवीतमहोत्सवे मंगलाऽऽमन्त्रणपत्रिकाद्वारा सर्वेषामागमनादि । १९४

६६. श्रीकृष्णनारायणाय यज्ञोपवीतप्रदानविधिपूजादि । १९७

६७. महीमानेभ्यो भोजनदानं सभायोजना नारदोक्तपराविद्योपदेशश्चेत्यादि । २००

६८. महीमानेभ्यः पारितोषिकदानं, प्रभोः पूजनम्, उपदार्पणम्, दिव्यदर्शनं परिहारश्चेत्यादि । २०३

६९. प्रभोः सेवार्चनदानपूजादिफलमाहात्म्यादिनिरूपणम् । २०६

७०. पूर्वस्वभावानुवर्णनं जाड्यमघदृष्टान्तेन षड्भिर्जन्मभिर्विवेचितम् । २०९

७१. ज्यामघनृपः स्वपत्न्यै धनालसायै भगवता इन्द्रद्युतिविप्राय पूर्वं यदुक्तं ज्ञानं तदुक्तवान् मोक्षसाधनमित्यादि । २१२

७२. ज्यामघस्य तत्पत्न्याश्च लोमशक्षेत्रे आत्मनिवेदितभक्त्या मोक्षणमित्यादि । २१५

७३. आमोदपत्तनवास्तव्यसुधनाख्यभक्तस्य वर्चकायनिमहर्षियोगेन प्राप्तभागवतभावस्य चौरेभ्यो रक्षा भगवत्कृता, प्रभोर्दिव्यदर्शनादि चेत्यादि । २१८

७४. किमनद्यास्तटे कुशाम्बापत्तनस्थकौशिकाम्बर्षियोगेनाऽन्त्यजस्य रोगिणः त्र्यष्टकारोः सस्त्रीकस्य प्रभोर्भक्त्या मुक्तिपदलाभ इत्यादि । २२१

७५. हिरण्यकेशर्षिगुरुकुलस्थानां षट्शतबालानां राक्षसैर्नाशे कृते श्रीहरिणा रक्षसां नाशार्थं कृतोद्यमयुद्धादिकम् । २२४

७६. सन्तापनदैत्यमारितानां हिरण्यकेशिशिष्याणां सजीवीकरणम्, दैत्यानां नाशः, दक्षिणादिदिशां नदीसरोवराणां तीर्थीकरणं चेत्यादि । २२७

अध्यायाः पृष्ठाः

७७. बृहद्वर्चोनृपात् तापीतीरे गृहीतघोरप्रतिग्रहेण कृष्णकद्रूपतां गतानां सहस्रविप्राणां सुरतायनर्षियोग इत्यादि । २२८

७८. सुरतायनर्षिकृतोपदेशः, प्रभोः प्राविर्भावेऽऽश्विनीकुमारयोरागमनं विप्राणां निष्कल्मषीकरणं सन्यासस्पष्टता चेत्यादि । २३१

७९. सुरतायनादिपञ्चसाहस्रविप्राणां लोमशतीर्थागमनं, शुभोपदेशश्चेत्यादि । २३४

८०. बलेश्वरराज्ञः कपिलभगवद्योगेन परमभागवतत्वं तारकायनमहर्षियोगेन कार्तिकव्रते परीक्षार्थं श्रीकृष्णनारायणस्य वनेचररूपेणाऽऽगमनं, राज्ञः पुत्रपुत्रीस्त्रीकुटुम्बार्पणेन प्रभोर्दर्शनं चेत्यादि । २३७

८१. बलेश्वरराज्ञः सकुटुम्बस्य श्रीहरिस्तुतिः, द्वेधा दिव्यदेहादिप्राप्तिश्चेत्यादि । २४०

८२. जयध्वजस्य राज्ञो विश्वामित्रोपदिष्टपरब्रह्मोपासनाबलाद् यज्ञे हरिप्राप्तिः, विदेहराक्षसविनाशः, चतुःपर्वतानामवभृथस्नानादि चेति । २४३

८३. जयध्वजेन प्रदत्तं ज्ञानं द्रोणैलनीलश्रीपर्वतानां कोलाटचिलशंभलनारायणसरसां दिव्यतीर्थता भक्तता मुक्तिश्च, जयध्वजस्य मुक्तिश्चेत्यादि । २४६

८४. पुलस्त्योक्तचतुर्युगधर्माः, ऐलविलायै वरदानं तपश्चर्या चेत्यादि । २४९

८५. अनादिश्रीकृष्णनारायणस्वामिना ऐलविलायै कथिताऽक्षरक्षेत्रमाहात्म्यादि । २५२

८६. ऐलविलायाः लोमशाश्रमाऽऽगमनं रूपद्वयं, हरिवंशीयप्रजायाः सह्याद्रौ वासश्चेत्यादि । २५५

८७. खरपुत्रस्याऽधर्मजीवस्य नास्तिक्यं, हरेर्गुणेष्वगुणकल्पना, श्रीहरौ द्वेषोऽसद्गतिश्च, ततः कालान्तरे सद्गत्यर्थं वरदानमित्यादि । २५७

८८. श्रीसनत्कुमारर्षिप्रदर्शिताऽश्वपट्टसरोमाहात्म्येन सर्वतीर्थानां प्रयागतः लोमशतीर्थं प्रति यात्रावर्णनमित्यादि । २६०

८९. सर्वतीर्थदेवादीनां लोमशाश्रमक्षेत्रयात्रागमनं श्रीहरेर्जन्मदिनोत्सवश्चेत्यादि । २६२

९०. प्रभोर्बदर्यां गमनं, राक्षसीनां लोमशक्षेत्रमागमनं, महामायां भैरव्या राक्षसीनां नाशनम्, ततः पापिप्रजासु भक्षणार्थं व्यापकतेत्यादि । २६५

| अध्यायाः | | पृष्ठाः |
|---|---|---|
| ९१. | महामारीभिर्बहुमानवनाशे साध्वीसाधुविप्रर्षिगणो बदरीं गत्वा प्रभुं निवेदयित्वा श्रीहरिमानयामास, हरिर्मृतान् जीवयामासेत्यादि । | २६८ |
| ९२. | वासुदेवगीतायां परब्रह्मणो विशिष्टाऽद्वैताऽद्वैतविज्ञानेन तत्पदप्राप्त्यादि । | २७१ |
| ९३. | वासुदेवगीतायां प्रभोः प्राप्त्यर्थं साधनात्मकविभूतीनां निरूपणम् । | २७४ |
| ९४. | वासुदेवगीतायां व्यूहचतुष्टयस्य श्रीचतुष्टयस्य च श्रीलोमशक्षेत्रतीर्थागमनं, स्वतःप्रकाशतीर्थं, व्यूहचतुष्टयतीर्थं चेत्यादि । | २७६ |
| ९५. | उष्णालयखण्डेऽगस्त्यप्रवासस्तत्रत्यर्षिगणेन झंझावाताब्धिजलक्षोभादिभिर्जले लये प्राप्ते श्रीकृष्णनारायणः स्मृत इत्यादि । | २७९ |
| ९६. | उष्णालयभूखण्डीयप्रजामहर्षीणां प्रार्थना, प्रभोर्गमनम्, उपद्रवशान्तिः, सर्वेषां जीवनदानं चेत्यादि । | २८२ |
| ९७. | उष्णालयदेशे हेमशालायनाश्रमे श्रीहरेर्विमानस्याऽवतरणं, स्वस्वरक्षावृत्तान्तकथनं चेत्यादि । | २८४ |
| ९८. | उष्णालयदेशे हेमशालायनेन पृष्टस्य चक्रवाकीमार्जारीप्राग्जन्मवृत्तान्तस्य कथनमित्यादि । | २८७ |
| ९९. | मार्जारिकाऽपत्यानां कुम्भकारनिम्भाण्डभट्ठीवह्नितो नारायणकृतरक्षणं मार्जारिकायाः शापमुक्तिश्चेत्यादि । | २९० |
| १००. | चक्रवाक्यास्तीर्थयात्रायां गण्डकीतीरे स्वमातुर्लक्ष्म्या मेलनं मातृमहिमवर्णनं चेत्यादि । | २९३ |
| १०१. | महावैकुण्ठे लक्ष्मीशयनस्थिते भगवति सति धेनुपालादिभक्तानां सतीशंकरयोश्चागमने लक्ष्म्या नारायणेन सह शयनसुखभंगे लक्ष्म्याः शापेनाऽशोकादीनां मानवेष्ववतरणमित्यादि । | २९६ |
| १०२. | श्रीलक्ष्म्याः शंभ्वादौ शापोत्तरं श्रीनारायणस्य कमलां त्यक्त्वा वैकुण्ठान्निर्गम इत्यादि । | २९९ |
| १०३. | वैकुण्ठाल्लक्ष्म्याः पार्षदानां पार्षदानीनां सत्यलोकागमस्ततोऽश्वपट्टसरोवरागमस्ततो हिमप्रदेशे शिवेश्वरगृहे लक्ष्म्याः प्राकट्यं पार्षदादीनां विभिन्नप्रदेशेषु च प्राकट्यमित्यादि । | ३०२ |
| १०४. | मातापित्राज्ञां गृहीत्वा लक्ष्म्युर्वश्योस्तपोऽर्थं हिमालये हनुमदाश्रमगमनं वर्षान्ते फलं दातुं तत्र नारायणस्य साक्षाद् गमनमित्यादि । | ३०४ |
| १०५. | नारायणप्रोक्षितजलेन लक्ष्मीचक्रवाक्योः प्राणसञ्चारः, वरदानार्थं चोक्ता चक्रवाकी शिखरे जलपानं वव्रे, ततश्च मोक्षणं वव्रे, हरिणा वृष्टिभिर्देशं निमज्जयित्वा शिखरे जलं दत्तम्, पीत्वा शापमुक्तिः, वृष्टिभयमिषेण शिवस्वामिकुटुम्बस्य वैकुण्ठीयपार्षदादीनां मानवरूपाणां च काश्यामागत्य वरणातटे काशीराजप्रासादेषु चाम्रवने वासादिः, काशीविश्वनाथाऽन्नपूर्णादिकृतसत्कारादि चेत्यादि । | ३०७ |
| १०६. | हनुमते वरदानम्, तत्कथोत्तरम् उष्णालयखण्डे सर्वनदीसरःपर्वतादिषु प्रभोः स्नानविचरणतीर्थीकरणम्, तत्खण्डस्य सम्राजा दक्षजवंगरनृपतिना विष्णुयागः कृतः, ततः शतविमानैर्दशसाहस्रप्रजासहितस्य नृपस्य हरिणा सहाऽश्वपट्टसरःक्षेत्रागमनं, प्रभोर्द्वादशजन्मदिने पूजोपदादिदानं, राज्ञः शतं कन्याः प्रजानां सहस्रं कन्यकाश्च बालकृष्णस्य नृपत्यादिभिः शरणे प्रापिताः, राजादीनां स्वदेशगमनं चेत्यादि । | ३१० |
| १०७. | पितृकन्यकानां किम्पुरुषखण्डे राक्षसादिकृतस्य निरोधस्य विनिवृत्तये ब्रह्मादिदेवकृतं युद्धं, मृतानां प्राणदानं, जीवितैर्मोक्षयाचना कृता, परममोक्षप्रदस्त्वनादिश्रीकृष्णनारायण एवेत्यादि । | ३१४ |
| १०८. | श्रीलोमशक्षेत्रतः ऋषीणां प्रेषणं, ततः पितृभ्यां सह हरेः प्राग्ज्योतिषादिदेशेषु गमनं, यज्ञान्ते युद्धसंभवश्चेत्यादि । | ३१७ |
| १०९. | मकरकेतुमदादिपञ्चदशभूभृतां सपादचतुष्कोटिसैन्यसहितानां शंभ्वादिभिः सह युद्धे मरणात् शिष्टानां पञ्चविंशतिलक्षाणां शरणागतिरित्यादि । | ३२० |
| ११०. | प्राग्ज्योतिषादिदेशानां वैष्णवनृपव्यवस्था ऋषिव्यवस्था कृपया दिव्यदर्शनं चेत्यादि । | ३२२ |
| १११. | ब्रह्मपुत्र्यादिभ्यः पितृकन्याभ्यो हरिणा प्रदत्तदिव्यदर्शनम्, दशसहस्राणि विंशतिश्चेति कन्यकानां शरणागतिः अर्यम्णे कश्मेराप्रदेशराज्यदानम्, ब्रह्मपुत्र्यादीनां नदीरूपेणापि भवनम्, तासु सर्वासु हरिकृतस्नानम्, तीर्थीकरणम्, ताभ्यो वरदानानि, तीर्थफलादिकं चेत्यादि । | ३२५ |
| ११२. | द्वितीययज्ञभूमिरूपलाशहासरोवरसरितां मूर्त्यादिपूजनप्रतिष्ठादि महिमा चेत्यादि । | ३२८ |

अध्यायाः — पृष्ठाः

११३. श्रीहरिप्रसन्नताकारकभक्तिविविधांगनिरूपणम् । ३३१

११४. भगवता पितृकन्यात्मकनदीभ्यः स्वात्मस्वरूपसाधुजनाऽतिभक्तिप्रदर्शनम् । ३३४

११५. प्रभुर्भूतासनराज्यं भैरवाय नम्रपर्वतराज्यं सामराज्यं च शिष्टयोद्भ्यः प्रदत्तवान्, सुन्दरवने नदीः स्वप्रदेशान् गन्तुमाज्ञाप्य श्रीलोमशक्षेत्रं प्रति आगमने सति पुष्पदोलोत्सवं श्रावणोत्सवं च कृतवानित्यादि । ३३७

११६. प्रभोस्त्रयोदशजन्मदिनोत्सवः, समीरणराज्ञो मृगयार्थं गतस्य पार्ष्णिगृहर्षिशापेन शरभत्वं ततो रैवताद्रौ दत्तात्रेयद्वारा श्रीलोमशक्षेत्रे मोक्षणं दत्तात्रेयतीर्थं चेत्यादि । ३३९

११७. पिच्छलर्षिदत्तशापनिवृत्तये वराहं प्रभुं गृहीत्वाऽश्वपट्टसरोवरं प्रति पवमानस्य गमनं, हरेर्योगाच्छापमुक्तिर्वराहतीर्थं पवमानतीर्थं चेत्यादि । ३४२

११८. हरेश्चतुर्दशजन्मदिनोत्सवेऽश्वपट्टसरसि प्रातर्मग्नानां सन्तारणादिविप्राणां समुद्धारणं श्रीबालकृष्णेन कूर्मरूपेण कृतमित्यादि । ३४५

११९. देवायतनर्षिभक्तो यमपुर्यां श्रीहरेर्नामसंकीर्तनं कृत्वा याम्यान् सर्वान् मोचयामासेत्यादि । ३४८

१२०. देवायतनर्षेर्भक्त्या प्रसन्नो बालकृष्णस्तद्वशीभूतो जलात् तं ररक्ष, अष्टदिक्पालप्रजाभ्यः श्रीहरेर्नाम श्रावयित्वा तद्द्वारा तासां मोक्षणं चेत्यादि । ३५१

१२१. किंपुरुषखण्डे राशियानप्रदेशेषु हरिनामकीर्तनबोधार्थं प्रेषितेन देवायतनर्षिणा मेषायनादिद्वादशरौद्रमहर्षिसमागमादि । ३५४

१२२. राशियानप्रदेशेषु महर्षिभिः राजभिश्च सह विमानेन भ्रमित्वा प्रजासु हरेर्नामश्रावणं प्रजाभ्यो मन्त्रदानं च देवायनर्षिश्चकारेत्यादि । ३५७

१२३. बालकृष्णसरोवरतटे यज्ञमण्डपादिकरणम्, महीमानागमः श्रीबालकृष्णाद्यागमश्चेत्यादि । ३६०

१२४. शिबिदेवराज्ये बालकृष्णसरोवरतटे महायज्ञे याज्ञिकव्यवस्था यज्ञकार्यनिर्वृत्तिः, श्रीहरये नृपकृतशतकन्यादानं चेत्यादि । ३६२

१२५. प्रभुणा बालकृष्णमूर्तिना प्रदत्तोपदेशाऽऽशिषः, द्वितीययज्ञार्थमाज्ञा, बालकृष्णसरस्तीर्थमाहात्म्यादि चेति । ३६५

१२६. थर्कूटस्थमहाराजराज्ये द्विकलसरोवरे द्वितीयविष्णुयागकरणम्, प्रजाभ्यो मन्त्रोपदेशदानादि चेति । ३६८

१२७. प्रेतोद्धारः, थर्कूटस्थनृपाय राजनीतिसद्धर्मोपदेशादि च । ३७१

१२८. वीरजारनृपराज्ये ओबीरात्रिशासंगमे तृतीयविष्णुयागकरणम्, मन्त्रादिदानं तीर्थमाहात्म्यं चेति । ३७४

१२९. वीरजारपितुः शूरजारस्य सकुटुम्बस्य हिरण्यमयदेवस्याऽऽक्षरगमनयोग्यदिव्यदेहार्पणादिना मुक्तिरिति । ३७६

१३०. शत्तयक्षिनृपतेः राज्ये चतुर्थविष्णुयागकरणमवभृथमहिमादि । ३७९

१३१. चतुर्थयज्ञोत्तरं देवर्षीणां पञ्चमयज्ञार्थं कालिमाब्धिप्रतिप्रेषणम्, शत्तयक्षिराजेन षष्टिकन्यानां श्रीहरिशरणाप्तिः, एकाधिकशतपिशाचिनीमोक्षणं चेति । ३८२

१३२. कालिमेशनृपराज्ये पञ्चमयज्ञकरणम्, अवभृथम्, भोजनम्, कथानकम्, पूजनम्, शतद्वयकन्यादानं, दिव्यदर्शनम्, नैकद्वीपीय प्रजाकृतपूजा, साधुलालासनभोजनम्, निसर्गशंखादितूर्यनिनदाश्चेत्यादि । ३८५

१३३. श्रीहरिः साधुलालासनयोगिने तथा पञ्चसहस्रेभ्योऽन्येभ्यः साधवीं दीक्षां ददावित्यादि । ३८८

१३४. सर्वमहीमानानां विदायसत्कारः, वैष्णवीघोषणा, सच्चिदानन्दलालायनस्योत्तरकुरून् प्रति प्रेषणं, शूरजारदम्पतीमोक्षः, त्रिंशद्रौद्रीरौद्रात्मजानां वैष्णवीभवनम्, तानि च तीर्थानीत्यादि । ३९१

१३५. श्रीहरेर्बालकृष्णसरोवरात् काशीं गत्वाऽश्वपट्टसरोवरं प्रत्यागमनम्, अक्षरधामनि सतां हृत्सु देवालयमूर्तौ चेति हरेस्त्रेधा वासः, देवायनमहर्षेर्देवालयस्वरूपता, देवायतनमुनये देवालयस्वरूपेण भवेत्याशीर्वादः, देवालयांगदेवानामपि स्थैर्याद्याशीर्वादश्चेति । ३९४

१३६. प्रासादरूपे मन्दिरनिर्माणे खातादारभ्य पीठकर्णादिपर्यन्तं मन्दिरांगानां निर्देशप्रमापणादि । ३९७

१३७. प्रासादरूपे मण्डोवरकुंभीछज्जुनासामण्डपद्वारोदुम्बराद्यवयवनिरूपणम् । ४००

अध्यायाः पृष्ठाः

१३८. प्रासादरूपे मण्डपघूम्मटसिंहासनतद्देवादि तत्तदंशप्रमापणादि चेति । ४०२

१३९. प्रासादरूपे शिखरपद्मकोशकलशध्वजादिनिरूपणम् । ४०५

१४०. प्रासादरूपे मेर्वादिजातीय-तदन्याऽक्षरादिजातीय-तथाऽन्यजातीयप्रासादनिरूपणम् । ४०८

१४१. प्रतिष्ठोत्सवे उत्तममध्यमकनिष्ठमेरुमन्दिराणां गणेशमूर्तीनां च मानानुमापादिनिरूपणादि । ४११

१४२. प्रतिष्ठोत्सवे ब्रह्मवेददेवदेव्यादिमूर्तिमानोपमण्डपकुण्डसंक्षिप्तप्रतिष्ठादि । ४१४

१४३. प्रतिष्ठोत्सवे वास्तुपुरुषतद्देवस्थापनादिप्रकारः । ४१७

१४४. मूर्तिप्रतिष्ठोत्सवे आचार्यवरणयज्ञसामग्रीसमर्जनगणेशपूजनादि । ४१९

१४५. प्रतिष्ठोत्सवे कलशस्थापनपुण्याहवाचनमातृकाद्यावाहननान्दीश्राद्धाऽऽसनपूजनभोजनदक्षिणादानविसर्जनादि । ४२२

१४६. प्रतिष्ठोत्सवे आचार्यर्त्विगादिवरणं संभारप्रोक्षणं स्वस्तिवाचो मण्डपपूजा वास्तुपीठदेवानामावाहननमनादि । ४२५

१४७. प्रतिष्ठोत्सवे कलशस्थापनं वास्तोः प्रतिष्ठानं पूजनं वास्तुदेवानां पूजनं नैवेद्यं बलिस्त्रिसूत्र्या मण्डपवेष्टनं मन्त्राश्चेत्यादि । ४२९

१४८. देवप्रतिष्ठाने चतुष्षष्टियोगिनीपञ्चाशत्क्षेत्रपालषोडशमण्डपस्तंभदेवाऽऽवाहनपूजनादि । ४३३

१४९. तोरणकलशद्वारशाखादेहलीतत्तद्देवादिनां षोडशोपचारपूजनादि । ४३६

१५०. अग्निस्थापनं कुण्डमेखलायोनितद्देवादिपूजनं वह्नेर्नवग्रहाणामधिदेवानां पूजनं चेत्यादि । ४४१

१५१. प्रत्यधिदेवताऽऽवाहनलोकपालत्रिदेवदेवीग्रहावाहनादिघटस्थापनसर्वतोभद्रपूजनषट्पञ्चाशद्देवपूजनादि । ४४४

१५२. कलशतद्देवद्वारपालपूजनं वरणं प्रोक्षणीपात्रादि, चरुः, आज्याहुतिः, वारणं, ग्रहाधिदेवप्रत्यधिदेवलोकपालदिक्पालानां होमश्चेत्यादि । ४४८

१५३. वास्तुदेवहवनं, योगिनीक्षेत्रपालमातृकावस्वादित्यरुद्रमातृगणेशपितामहविष्णुलक्ष्मीसूर्यादिहवनम् । ५१४

१५४. राधिकादिषट्कपराविद्यादिचत्वारिंशदधिकशतसंतुष्टां कंभराद्वयपरमेशावतारविष्णुलोकपालभूतादिपूजाबलिसमर्पणादि । ४५४

१५५. यूपारोपणं तद्देवादिपूजनं प्रतिमाया जलाधिवासनं नगरभ्रामणं मण्डपानयनं चेत्यादि । ४५७

१५६. स्नानार्थकलशस्थापनदिक्पालबलिस्वर्णशलाकानेत्रांऽजनबहुघटस्नानपल्लवस्नानपूजनाऽऽभरणनैवेद्यहोमप्रणवन्यासमातृकान्यासनक्षत्रन्यासादि । ४६०

१५७. मूर्तौ मासर्तुयुगवर्णवेदवसुदिक्पाललोकपाल क्षेत्रपालभगवदवतारयज्ञाऽग्निहेतिभूषणप्रियातत्त्वमूलमन्त्रगायत्रीद्वयाऽर्पणमन्त्रपुरुषसूक्तन्यासपूजाबलिप्रदानहवनादि । ४६३

१५८. पूर्णाहुतिः, न्यासाः, अधिवासनं, कुंभजलानि, शिखरस्नानं, चरुश्रपणं, प्रासादपुरुषाकारताध्यानं, पूजनं, कूर्मशिला, ब्रह्मशिला, पिण्डिका, रत्नानि, देवार्घ्यं चेत्यादि । ४६६

१५९. देवस्य रथे स्थापनं नगरे भ्रामणं पिण्डिकायां सिंहासने देवस्य स्थापनं प्राणप्रतिष्ठान्यासाः जीवावाहनं नीराजनं होमः, महापूर्णाहुतिहवनम् आशीर्वादशान्तिस्वस्तिवाचो देवानां विदायः पूर्णतावाचोऽवभृथं चेति । ४६९

१६०. सुवर्णकलशारोहणमानस्तंभध्वजारोपणम्, चलमूर्तिप्रतिष्ठाविधिः, जीर्णोद्धारश्चेत्यादि । ४७२

१६१. तुरीलक्ष्म्या आशीर्वादेन धनमेदधीवरस्य यात्रालोः दिव्यवाप्यां मत्स्याऽवतारदर्शनोत्तरं मुक्तिर्मत्स्यतीर्थे चेत्यादि । ४७६

१६२. शिबिकावाहशतोद्धतपस्यया लब्धस्य मूकपुत्रस्य वोढोः अश्वपट्टसरसि तपसा कपिलरूपेण श्रीहरेर्दर्शनं सांख्यज्ञानवाणीसिद्धिप्राप्तिश्चेत्यादि । ४७९

१६३. द्युविश्रामाख्यकृषिकारस्य सिंहप्रधर्षितगोधनस्याऽवनं हरिरूपेण भगवता कृतं हरितीर्थगोतीर्थमित्यादि । ४८२

१६४. नीलकर्णचाट्वालकुटुम्बस्याऽतिवृष्टौ वृकायनर्षिद्वारा भगवता कृतं रक्षणं, लक्ष्मीवापीमागतस्य नीलकर्णस्य शतपरिजनस्य दिव्यता, केतुमालखण्डं प्रति तस्य भगवता कृतं प्रेषणं चेति । ४८५

| अध्यायाः | | पृष्ठाः |
|---|---|---|
| १६५. | वृकायननीलकर्णादिमहर्षीणां केतुमालं प्रति विमानेन गमनं देशनिरीक्षणं गांगेयाऽपत्यषष्टि-सम्मेलनमित्यादि । | ४८७ |
| १६६. | गांगेयानामुद्भववृत्तान्तम्, तन्नामानि, वृकायनस्य लोमशक्षेत्रागमनं हरेरामन्त्रणं सुदर्शनेन सह केतुमाले वृकायनागमः, सुदर्शनस्थैर्यदर्शित-क्रतुस्थलीनिर्णयः, यज्ञोद्घोषणा चेत्यादि । | ४९० |
| १६७. | लोमशादिमहर्षीणां देवायतनविश्वकर्मणोः केतुमालीयभूभृतां प्रजानां च यज्ञभूमावागमनं मण्डपकुण्डहव्योपकरणाद्युपस्थितिरित्यादि । | ४९३ |
| १६८. | यज्ञमंगलपत्रिकाप्रकाशनं सर्वसृष्टिवासिनामागमनम्, श्रीहरेः सकुटुम्बसौराष्ट्रीयप्रजासहितस्य विमानैर्यज्ञभूगमनं स्वागतं भ्रमणं विश्रान्तिर्मनोरंजनादीनि चेत्यादि । | ४९६ |
| १६९. | यज्ञे भूमिपूजनं वास्तुकुण्डमण्डपादिदेवानां पूजनं ब्रह्मसृष्टीश्वरसृष्टिजीवसृष्टिदेहिनां पूजनं हवनं महापूर्णाहुतिदानं भोजनदानं चेत्यादि । | ४९९ |
| १७०. | सप्ताहयज्ञे समर्पितोपदाः, बालकृष्णस्य कोस्त्यब्ज-स्वरूपधारित्वं यज्ञभूमिमाहात्म्यं चेत्यादि । | ५०२ |
| १७१. | प्रत्यक्षहरिर्महापूर्णाहुतीर्जग्राह, सर्वेषां भोजनानि, अवभृथस्नानम्, अवभृथाख्यकुमारप्राकट्यम्, तृप्त्याख्यकुमारीप्राकट्यम्, कुमार्यै वरं याचमानायै अवभृथाख्यस्य कुमारस्य दानम्, विवाहविधौ कुमारदानानि, महादानानि, स्वस्वस्थानेषु विश्रान्तिश्चेत्यादि । | ५०५ |
| १७२. | कुमारदानविवाहविधिः, महीमानानां विदायः, उरलकेतुराजधान्यां मोक्षिकायां प्रभोर्गमनम्, नगरे भ्रामणं, पूजनं, राजपूर्वजानां मोक्षणं चेत्यादि । | ५०८ |
| १७३. | उरलकेतुराजर्षियवक्रीतमहर्षि-प्रजाभ्यश्च हरिणा स्वस्वरूपज्ञानं सम्प्रदायशाश्वतिकताज्ञानं च दत्तमित्यादि । | ५११ |
| १७४. | क्रथकराजधान्याम् ओंकारेष्टायां गत्वा पूजामागृह्य विश्रम्य श्रावणशुक्लचतुर्दश्यां प्रगे नृपपृष्टो हरिर्मन्दिरादिनिर्माणे शुभकालादीनाहेत्यादि । | ५१४ |
| १७५. | नक्षत्रेषु शुभाऽशुभकार्यतत्फलयोगकरणभद्राचक्र-शुभाऽशुभचन्द्रफलताराबलचन्द्रबलभ्रमणसिद्धियोगचक्रशुभाऽशुभयोगरवियोगबलानीत्यादि । | ५१७ |
| १७६. | आनन्दाद्यष्टाविंशतियोगतिथिवारनक्षत्रोत्पन्नदुष्टयोगत्रिविधगण्डान्तयोगकुलिकादिमुहूर्तदुष्टमुहूर्ताऽभिजित्सिद्धछायामुहूर्तादि । | ५२० |
| १७७. | उच्चनीचग्रहफलं, प्रतिष्ठाने लग्नकुण्डलीस्थग्रहफलं चन्द्रफलम् आपीडादियोगाः, युतिदोषः, लग्नबलं, पृथिवी सुतेति परीक्षा, ततो नगरीभ्रामणं पूजनं विदायं, पृथुराजधानीं जरस्थलीमागमश्चेत्यादि । | ५२२ |
| १७८. | पृथोः राजधानीं जरस्थलीं गत्वा स्वागतमासाद्य हरिरुपादिदेश, षड्विंशतिनृपाणां प्राक्कल्पे ऋषित्वं मनुत्वं सूर्यत्वं चेत्याह, ततो विश्रम्य पूर्णायाम् उष्ट्रायराष्ट्रमुपागमदित्यादि । | ५२४ |
| १७९. | उष्ट्रायस्य हंकारस्य जयकाष्ठलस्य च नृपस्य राजधानीषु विमानैर्गमनं नगरेषु भ्रामणं पूजनं, प्रतिपदिप्रगे च तीराणराजधानीं प्रतिगमनमित्यादि । | ५२७ |
| १८०. | तीराणपुरीं गत्वा ससैन्यस्वागतरूपेण भ्रमित्वा भोजनादि कृत्वा सायं सभायां विघसाशित्वधर्मोपदेशेन निर्बन्धनतामुक्त्वा रात्रौ विश्रम्य प्रातः पूजां प्रगृह्य भुक्त्वा सज्जो भूत्वा हरिः अल्वीनरराज्यमाजगामेत्यादि । | ५३० |
| १८१. | श्रीहरिर्भाद्रकृष्णद्वितीयायाम् अल्वीनरराज्यं गत्वाऽर्थश्रीनगरीं भ्रमित्वा भुक्त्वा राक्षसमुक्तिं कृत्वा तं तुषितदेवम् उत्तरान् कुरून् प्रेषयित्वा सभायामुपविश्य पूजामागृह्य निद्रोत्तरं पूजामागृह्य च विश्रम्य च प्रातर्भोजनोत्तरं जिनवर्द्धिनृपराजधानीं प्रति प्रतस्थे चेत्यादि । | ५३३ |
| १८२. | जिनवर्द्धिनृपराज्ये रामपुरीं पावनीकृत्य जनानुपदिश्य भुक्त्वा विश्रम्य पूजामागृह्य जनहारिराक्षसविनाशार्थं सविदायम् अविनायाऽद्रिं हरिर्जगामेत्यादि । | ५३६ |
| १८३. | राक्षसानां राजभ्यां तत्सैन्यैः सह योधनं राक्षसीनां दुर्गया सह योधनं, चक्रेण राक्षसानां नाशनं, निगडस्थप्रजानां रक्षणम्, पर्वतस्य सुदर्शनतेजसा रसशिलामयत्वं चेत्यादि । | ५३९ |
| १८४. | अनाथबालोद्धरणार्थे राक्षसनाशोत्तरं ह्यधिकशतयुक्सहस्रकन्याभिः हरिशरणग्रहणम्, राक्षसमारिताऽस्थिभ्योमृतानामुज्जीवनम्, ईशानराज्यस्थापनं रविवारमाहात्म्यं पूजाशीर्वादाः, निशाविश्रान्तिः, प्रातर्भोजनोत्तरम् अल्पकेतुनृपस्य जीवनीं नगरीं प्रति भाद्रकृष्णपञ्चम्यां गमनमित्यादि । | ५४२ |

| अध्यायाः | पृष्ठः |
|---|---|
| १८५. अल्पकेतोर्जीवन्यां नगर्यां श्रीहरेर्भ्रमणं पूजनं सभायां शंखलिखितदृष्टान्तेनोपदेशनं भोजनम्, रात्रौ विश्रमणं प्रातर्भोजनोत्तरं स्वेष्टजरर्षिप्रदेशेषु जयकृष्णवनृपतेः षष्ठ्यां वरणानगर्यामागमनमित्यादि । | ५४५ |
| १८६. हरिर्जयकृष्णवराजर्षिराज्ये विमानादवतीर्य वरणानगरीं परिभ्रम्य पूजामाग्रह्योपदिश्य रात्रौ भोजनं विश्रान्तिं च लब्ध्वा प्रातश्चाह्निकं कृत्वा दुग्धपानाद्युत्तरं षष्ठ्यां फेरुनसर्षिदेशान् परीशाननृपराज्यं जगामेत्यादि । | ५४७ |
| १८७. परीशानानगर्यां प्रजानां सम्मर्दः, हरेः शोभा, गजयानाऽऽरोहणम्, प्रजानामाकर्षणं नगर्यां भ्रमणं राजसौधागमनमित्यादि । | ५५० |
| १८८. परीशानाप्रजादिभ्य उपदेशदानं हरिपूजनं, विमानैः सप्तम्यां प्रातः परीजराष्ट्रगमनं चेति । | ५५५ |
| १८९. इन्दुरायराष्ट्रे तत्सौधे हरेः पूजनं भोजनं वायूनानगरीभ्रमणम् उपदेशनं विदार्य, सप्तम्यां सायम् इन्दिरानदीस्नानं वेतालोद्धारो मुद्राण्ड्रराजराष्ट्रगमनं चेत्यादि । | ५५७ |
| १९०. मद्रिरानगर्यां भ्रमणं राजवेश्यागमनं पूजनम् उपदेशो भोजनं निशोत्तरं प्रातःकृत्योत्तरं प्रयाणं शैवालनगरीं भ्रमित्वा पूर्तगण्डर्षिप्रदेशेषु गण्डनृपस्य लीशवनपत्तनं प्रतिहरेर्गमनमित्यादि । | ५६० |
| १९१. हरेर्गण्डकराजधानीं लीशवनां प्रति गमनं भ्रमणं पूजनं भोजनम् उपदेशनं रात्रौ विश्रमणं चेत्यादि । | ५६३ |
| १९२. हरेर्लीनोर्णराष्ट्रगमनं वारुण्यां नगर्यां भ्रमणं पूजनं भोजनं विदार्य ततो बृहच्छरनृपराष्ट्रागमनं धीवरायां नगर्यां भ्रमणं पूजनं ततोऽगराजस्य मिलिन्दानगरीं प्रति गमनं भ्रामणमुपदेशनं भोजनं रात्रौ विश्रमणम् भाद्रकृष्णैकादश्यां प्रहरद्वये बललीननृपराष्ट्रगमनमित्यादि । | ५६५ |
| १९३. हरेर्बालीनानगर्यां भ्रमणं पूजनं जागरणमुपदेशनं भाद्रकृष्णद्वादश्यां पारणं ततो वाशीलानगरीं प्रति गमनं चेत्यादि । | ५६८ |
| १९४. वरसिंहनृपस्य वाशीलानगर्यां हरेर्भ्रमणं पूजनं युगोपदेशनं भोजनं विश्रमणं निद्रोत्तरं त्रयोदश्यां मध्याह्नपूर्वं रायगामलराष्ट्रगमनमित्यादि । | ५७१ |
| १९५. हरेः रायगामलराष्ट्रे रिगानगर्यां भ्रमणं पूजनमुपदेशनं भोजनं विश्रमणं रात्रियापनं चतुर्दशीप्रातर्दुग्धादिपानोत्तरं फेनतन्तुनृपराष्ट्रागमनमिति । | ५७४ |
| १९६. फेनतन्तुनृपस्य त्रिनयानगर्यां श्रीहरेरवतरणं भ्रामणं पूजनम् उपदेशनं भोजनं विश्रमणं रात्र्यनन्तरं भाद्रकृष्णाऽमायां प्रातर्दुग्धपानोत्तरं स्तोकहोमनृपराष्ट्रागमनमित्यादि । | ५७७ |
| १९७. स्तोकहोमनृपस्योमापुर्यां हरेरवतरणं भ्रमणं पूजनमुपदेशनं भोजनं रात्रौ विश्रमणं भाद्रशुक्लप्रतिपदि प्रातः काष्ठयाननृपराष्ट्रागमनमित्यादि । | ५८० |
| १९८. काष्ठयाननृपस्य तुन्नत्रायापुर्यां श्रीहरेर्भ्रमणं पूजनमुपदेशनं भोजनं निशोत्तरं प्रातः कोलकनृपराष्ट्राभिगमनमित्यादि । | ५८२ |
| १९९. कोलकनृपस्य मुरमाषानगर्यां श्रीहरेस्तृतीयायां भ्रमणं पूजनमुपदेशनं भोजनं गांगेयकन्यादिप्रार्थनया तज्जलेषु बहुरूपाणि धृत्वा युगपत्स्नानेन तीर्थीकरणता, रात्रौ विश्रान्तिः, भाद्रशुक्लचतुर्थ्यां दिनमानार्कनृपखण्डं प्रति गमनमित्यादि । | ५८४ |
| २००. दिनमानार्कनृपस्य गरिमाखण्डे हरेरपरानाविकापुर्याम् अवतरणम्, भ्रामणं पूजनं भोजनं विश्रमणं समन्ततो देशे विमानेन भ्रमणं रात्रौ विश्रमणं प्रातर्भोजनं प्रस्थानं केनाटकप्रदेशेषु विनिपारसरोवरं प्रत्यागमनमित्यादि । | ५८७ |
| २०१. केनाटकेषु क्रतोर्मंगलपत्रिकाप्रेषणं, समागतहरेर्दशभूपादिकृतस्वागतम्, कुशलप्रश्नादिकम्, मण्डपादिनिर्माणाज्ञा, भोजनादिकम्, क्रतूपकरणसज्जयादि । | ५९० |
| २०२. मणिसेवापुर्यां यज्ञपत्तने च हरेर्भ्रमणं पूजनं भोजनं रात्रौ विश्रमणं भाद्रशुक्लषष्ठ्यां प्रातः कर्मचारयोजनेत्यादि । | ५९३ |
| २०३. रायकिन्नरनृपाय सौवर्णमूर्तिविधापनाऽऽदेशः, नारदादीनां कुंकुमाऽऽमन्त्रणपत्रिकायुक्तानां सृष्टिषु प्रेषणं, हरेः रायरोकीश्वरनृपराष्ट्राभिगमनं पूजनं स्फूर्तिनारीनगर्यां देशे च भ्रमणं पुनर्यज्ञस्थानाऽऽगमनं महीमानानामागमश्चेत्यादि । | ५९७ |

अध्यायाः पृष्ठः

२०४. सर्वेषामागन्तुकानां स्वागतमावासनं चोपकरणसंक्लृप्तिः, स्वतःप्रकाशस्य मखे सर्वद्रष्टृत्वविधानं, मंगलवाद्यघोषाः, सर्वदेवदेव्यादीनां यज्ञमण्डपभूम्यागमनं श्रीहरेरागमनं चेत्यादि । ६००

२०५. राज्ञामृषीणां मण्डपे चागमनं देवपीठानां देवानां स्थापनम् ऋत्विगाचार्यादिवरणं प्रत्यक्षदेवानां विराजमानतेत्यादि । ६०२

२०६. सौवर्णीमूर्तिपूजा, गणेशादिपूजा, कलशस्थापनं मण्डलं वास्तुस्थापनं सर्वेश्वरेश्वरदेवादिपूजा कुण्डमण्डपशाखादिदेवदेव्यादिपूजा योगिनीक्षेत्रपालादिपूजाऽऽत्मपूजा देहशुद्ध्यादि, ब्रह्मपूजाऽग्निस्थापनादीत्यादि । ६०५

२०७. श्रीहरेर्यज्ञे पूजा वह्नावाहुतिदानं सृष्टित्रयदेहिभ्यः सर्वेभ्य आहुतिदानं परिहारो भोजनं रायरणजिद्राष्ट्रं प्रति गमनम्, मीनार्ककृष्णनगर्यां भ्रमणं पूजनं चाऽर्पणं चेत्यादि । ६०८

२०८. मीनार्ककृष्णपत्तने रायरणजित्प्रभृतिजनान् हरिः समुपादिदेश, ततो यज्ञभूमिमाजगाम, रात्रौ सुष्वाप, प्रातः प्रबुबोधेत्यादि । ६११

२०९. भाद्रशुक्लाऽष्टम्यां यज्ञे सर्वकर्मणामाहुतिपर्यन्तानां करणम्, भोजनं ततो रायवाकक्षनृपस्य द्वीपं विषतुरीयं राष्ट्रं द्विनरकं मिल्विलं गत्वा पावयित्वोपदिश्य रात्रौ पुनर्मखभूमिमाजगाम विशश्राम चेत्यादि । ६१४

२१०. नवम्यां यज्ञकार्योत्तरं रायमारीषराष्ट्रे आलीस्मरद्वीपे ऋद्धीशापुरीं प्रतिगमनं भ्रमणं पूजनम् उपदेशनं काशिमद्विवाममीलवीलद्वीपान् पावयित्वा मखभूमावागमनं रात्रौ विश्रान्तिश्चेत्यादि । ६१७

२११. दशम्यामध्वरदेवतापूजनहोमाद्युत्तरं भोजनं रायबालेश्वरनृपराष्ट्रद्वैपायनद्वीपगमनं वायुफेनापुर्यां भ्रमणं पूजनं चोपदेशनं चेत्यादि । ६२०

२१२. एकादश्यां सर्वयज्ञक्रियामहापूर्णाहुतिप्रदानं सर्वेषां तृप्तिः परिहारश्चेत्यादि । ६२३

२१३. वह्नेराशीर्वादा भोजनम् अवभृथं पारितोषिकाणि, सायं हरेः रायलम्बारनृपराष्ट्रागमनं किमुवक्रापुर्यां भ्रमणं पूजनं भोजनं रात्रौ विश्रमणं द्वादश्यां प्रातर्यज्ञभूमिमागमनं महीमानसभाकरणं सम्माननधन्यवादोपदापारितोषिकादिदानं भोजनानि विदायं चेत्यादि । ६२७

अध्यायाः पृष्ठः

२१४. हरेस्त्रयोदश्यां प्रातः रायनवार्कभूपराष्ट्रगमनं चिञ्चागोपुरिकापुर्यां भ्रमणं पूजनं ततः स्वर्लतिकापुरीं प्रतिगमनं भ्रमणं पूजनं ततः सायं रायहण्डेश्वरनृपराष्ट्रगमनं माक्षिकानगर्यां भ्रमणं पूजनं ह्युपदेशनं रात्रौ विश्रमणं, भाद्रशुक्लचतुर्दश्यां प्रातर्वीराकजनर्षिमुक्तिः, ततो रायकूपेशनृपराष्ट्रगमनं चेत्यादि । ६३०

२१५. हरेर्हवानानगर्यां भ्रमणं पूजनं ततः कालीमण्डलीनभूपराष्ट्रगमनं विगोष्ठिकानगर्यां भ्रमणं पूजनं चोपदेशनं भोजनं रात्रौ विश्रमणं चेत्यादि । ६३३

२१६. हरेर्भाद्रशुक्लपञ्चदश्यां प्रभाते प्रबोधनं कृताह्निकत्वं पूजनं ततो वनज्वालाराष्ट्रगमनं सानुज्योष्ठ्रीनगर्यां भ्रमणं पूजनं दिव्यदर्शनमुपदेशनं भोजनं ततो गतैनसराष्ट्रगमनं स्वागतं चेत्यादि । ६३७

२१७. हरेः कायनीनगर्यां भ्रमणं पूजनं राजालये समुपदेशनं भोजनं स्वपनं प्रातर्विदायम्, आश्विनकृष्णप्रतिपदि कोटीश्वरनृपस्य राष्ट्रं प्रति गमनं चेत्यादि । ६३९

२१८. हरेः पेयिस्थानगर्यां भ्रमणं पूजनं चोपदेशनं भोजनं विदायं ततः पारूपराष्ट्रगमनं स्वागतं पूजनं चेत्यादि । ६४२

२१९. हरेः सञ्चालानगर्यां भ्रमणं पूजनं चोपदेशनं भोजनं रात्रौ विश्रमणं द्वितीयाप्रातर्विदायं सम्माननं चेत्यादि । ६४५

२२०. आश्विनकृष्णद्वितीयायां प्रातः फान्कलाशीनगर्यां गमनं भ्रमणं पूजनं भोजनम् उपदेशनम् विदायं मध्याह्नोत्तरम् आण्डजरानृपराष्ट्रगमनम् आन्तःप्रागस्थानगर्यां भ्रमणं पूजनं चेत्यादि । ६४८

२२१. हरेः अन्तःप्रागस्थनगर्याम् उपदेशनम् भोजनं रात्रौ विश्रमणम् आश्विनकृष्णतृतीयायां प्रातर्बाल्यरजोनृपराष्ट्रगमनं मन्त्रिणांगानगर्यां भ्रमणं पूजनं भोजनं विदायं यौतकं, सायं च रायसोमननृपराष्ट्रगमनं वायुमानानगर्यां स्वागतं भ्रमणं पूजनं भोजनं रात्रौ विश्रमणं चेत्यादि । ६५१

२२२. प्रातरुपदेशनं विदायं राजारायपतिराज्यम् आर्षजतनुराष्ट्रं प्रतिगमनाय प्रार्थनां स्वीकृत्य तत उरोगमनराष्ट्रं प्रति यानम्, उरुगवाक्षनृपकृतसम्मानमित्यादि । ६५३

अध्यायाः पृष्ठः

२२३. हरेः रायग्रामानगर्या भ्रमणम् उपदेशनं पूजनं भोजनं विदायं ततः पराङ्व्रतनृपस्य पारावात-राज्यं प्रति गमनम्, आशासनापुर्याम् आश्विन-कृष्णचतुर्थ्याः सायं भ्रमणं पूजनं चेत्यादि। ६५६

२२४. पारावातराष्ट्रप्रजादिभ्य उपदेशनं पूजनं भोजनं रात्रौ विश्रमणं विदायम् आश्विनकृष्णपञ्चम्यां व्राझीलराष्ट्रे मखस्थलीं प्रति चागमनं महीमाना-दीनां संभावना चेत्यादि। ६५९

२२५. आश्विनकृष्णपञ्चम्यां प्रातर्हरिणा सार्धं यज्ञभूमिं प्रति महीमानानामागमनम् मण्डपे सर्वेषामागमनं स्वस्तिवाचनादि, महाघृताहुतिहोमदानपर्यन्त-कार्याणां विनिवर्तनं परिहारश्चेति। ६६२

२२६. पञ्चम्यां रात्रौ प्रजाभ्य उपदेशनं विश्रान्तिः, षष्ठ्यां प्रातश्चाह्निकोत्तरं यज्ञीयसमस्तकर्मनिर्वर्तनोत्तरं भोजनादि चेति। ६६५

२२७. षष्ठ्यां सायं सभायामुपदेशादि भोजनं शयनं, सप्तम्यां प्रातर्यज्ञमण्डपागमनं चेत्यादि। ६६७

२२८. सप्तम्यां प्रातर्मखकार्याणि निर्वर्त्य श्रीहरिकृतं स्वस्य सर्वात्मकत्वाद्युपदेशनं भोजनं रात्रावुत्सवस्ततः प्रातरष्टम्यां मखकार्यविनिवर्तनं भोजनं चेत्यादि। ६७०

२२९. आश्विनकृष्णनवमीदशम्येकादशीषु यज्ञादिकार्य-निर्वर्तनं महापूर्णाहुतिप्रदानं परिहारो भोजनं चेत्यादि। ६७३

२३०. आम्रजान्यादिसप्तसरित्सु देवतीर्थानां वासो महात्म्यमवभृथं पारितोषिकमुपदा भोजनं रात्रौ विश्रान्तिः प्रातर्विदायं भोजनं यानं महीमान-मण्डपादिपरिहारस्ततो राजारायपतिराष्ट्रगमनं व्येनोजराशापुर्यां त्रयोदश्यां रात्रौ भ्रमणं शयनं चेत्यादि। ६७५

२३१. हरेः पूजनमुपदेशनम् अमावास्यायां पितृपिण्ड-दानवारिदानश्राद्धादिकं कृत्वा विश्रम्य निद्रोत्तरं प्रातः प्रतिपदि पूजनादिकं चेति ६७८

२३२. आश्विनशुक्लप्रतिपदि लापलात्रीपुरीं हरिर्ययौ, तत्र सामुद्रदैत्यो नृपस्वसारं विद्युन्मणिसंज्ञां जहार, नृपो हरिश्च विमानाभ्यामनुदुद्रुवतुः, नवजीवद्वीपे युद्धे विंशतिलक्षदैत्याहताः, नृप-स्वसा हरिशरणं वव्रे, शंभोर्दशलक्षगणप्रजानामा-धिपत्ये कामनायकगणाय राज्यं ददौ, द्विनेष्ठपुरं पावयित्वा पंचम्यां विमानेनोष्णालये त्रासमान-द्वीपमागत्य ततो वन्दारुकामागत्य ततः सिंह-लद्वीपमागत्य पम्पासरश्चागत्याऽऽश्विनशुक्लसप्तम्यां सायंपूर्वं श्रीलोमशक्षेत्रमवाप, स्वागतं कुशलं भोजनं शयनादिकं चेत्यादि। ६८१

२३३. आश्विनशरत्पूर्णिमारात्रौ सर्वनिजपत्नीभिर्बाल-कृष्णस्य रासानन्दरमणक्रीडावर्णनमित्यादि। ६८४

२३४. श्रीहरेः पञ्चदशजन्मजयन्त्यामष्टम्यां दिव्यमण्डप-शोभाऽऽमन्त्रणमामन्त्रितानामागमनं श्रीबालकृष्ण-पूजनं सत्कारः सम्माननमित्यादि। ६८७

२३५. मण्डपस्योपसंहारो महीमानविदायं तामसाक्षि-नामकचाण्डालभक्तस्य सकुटुम्बस्य जलतो रक्षणं पोषणं मोक्षणं चेत्यादि। ६९०

२३६. श्रीहरिणा धनत्रयोदश्यां धनलक्ष्मीपूजा ब्रह्मप्रिया-पूजा बर्बुरनृपस्य आश्वलायनर्षिशप्तस्य बर्बुरवृक्षी-भूतस्य मोक्षणं पृथुतीर्थस्थानं बर्बुरस्य स्वर्गे प्रतिप्रेषणमित्यादि। ६९३

२३७. श्रीहरिणा कालीचतुर्दश्यां शंकरतद्गणभृत्यदास-दासीनां पूजा दीपावल्यां शारदादिपूजा प्रतिपदि महामारीरोगपीडितसंपर्कनृपतत्सैन्यादीनां दत्ता-त्रेयस्वरूपेण रोगो नाशितो दत्तात्रेयतीर्थं च कृतमित्यादि। ६९६

२३८. श्रीहरिणाऽन्नकूटोत्सवो विहितः सर्वप्रजानां भोजनादि कारितं चेत्यादि। ६९९

२३९. कार्तिकैकादशीव्रतेन पुण्डरीकनृपतेर्हंसरूपहरिं प्राप्तस्य मोक्षः, अश्वपट्टसरसि हंसतीर्थम्, चोल-राज्ञाऽपि नृसिंहयोगेनाऽश्वपट्टसरस्तीरे नृसिंहस्था-पनं नृसिंहतीर्थं चेत्यादि। ७०२

२४०. वीतिहोत्रयोगेश्वराय ऋषभरूपेण सहस्ररूपैश्च हरेर्दर्शनदानम् ऋषभतीर्थख्यातिरित्यादि। ७०५

अध्यायाः पृष्ठः

२४१. पतञ्जलिच्यवनयोर्गोऽश्वपट्टसरसः पूर्वतटे वैवस्वतकृतं संकर्षणपतञ्जलिशेषादिमन्दिरं जले च संकर्षणपतञ्जलिशेषादितीर्थजातमित्यादि । ७०७

२४२. दाक्षीदेवीवामदेवयोर्मानसपुत्रस्य पंकिलर्षेर्ज्येष्ठपञ्चभगिनीसेवालभ्याशीर्वादैः पञ्चकल्पचिरजीवित्वं युगपर्यन्तमश्वपट्टसरोवरे समाधौ स्थितस्य वामनपादांगुष्ठांगुलिस्पर्शेन जाग्रतस्तस्य वामनमन्दिरनिर्माणादि कारितं वामनादितीर्थानि चेत्यादि । ७१०

२४३. वामदेवीयपञ्चकन्यानां श्रीकृष्णशरणलब्धिः, हैमकलिङ्गनृपस्य भक्त्या हरेर्नित्यं प्रत्यक्षम्, नृपात् पर्शुरामपराभवः, अश्वपट्टसरसि पर्शुरामतीर्थं हैमकलिंगतीर्थं चेत्यादि । ७१३

२४४. मार्गशीर्षकृष्णाष्टम्यामश्वपट्टसरस्तीरेऽश्वपाटलनृपतिः सोमयागमारब्धवान्, प्रथमदिवसीयाऽनुष्ठानम्, लोमशकृतोपदेशश्चेत्यादि । ७१६

२४५. सोमयागे द्वितीयदिवसस्य नवम्याः कृत्यं प्रवर्ग्यादिकं हवनं परिहारं भोजनम् उपदेशादिकं च लोमशः कृतवानित्यादि । ७१९

२४६. तृतीयदिने दशम्यां सोमयागकृत्योत्तरं भोजनं लोमशस्योपदेशनं चेत्यादि । ७२१

२४७. चतुर्थदिवसे सोमयागस्यैकादश्यां कृत्यम्, जागरणमुद्यापनमुपदेशनं चेत्यादि । ७२४

२४८. पञ्चमदिवसे मार्गशीर्षकृष्णद्वादश्यां सोमयागे प्रातःसवनं माध्यन्दिनसवनं तदुत्तरसवनं पूर्णाहुतिरवभृथेष्टिरित्यादि । ७२७

२४९. लोमशगीतायाम् अश्वपाटलनृपतये लोमशेन शङ्खोपनिषदमृतगुप्त्याद्युपदिष्टम् । ७३०

२५०. लोमशगीतायाम् अश्वपाटलकृतस्त्यागमार्गस्य प्रत्यक्षफलप्रश्नो निरामयताप्रश्नस्त्रिवर्गेषु किंश्रेष्ठताप्रश्नो लोमशकृतोत्तराणि चेत्यादि । ७३३

२५१. लोमशगीतायाम् आत्मनः पापात्मकत्वे पुण्यात्मकत्वे मुक्तिभावे दोषविनाशभावे नृपकृतप्रश्नानां लोमशदत्तोत्तराणीत्यादि । ७३६

२५२. लोमशगीतायां नृपकृतोऽक्षरगतिसाधनप्रश्नः, सन्यासाद् गार्हस्थ्याद्वा गतिप्रश्नः सृष्टित्रयसर्गप्रश्नः श्रेयःप्रश्नो लोमशकृतोत्तराणिचेति । ७३९

२५३. गीतायां नृपकृतोऽभ्युदयप्रश्नः श्रेयोमूलादिप्रश्नो लोमशकृतोत्तराणि च । ७४२

२५४. लोमशगीतायां देवादीनां तोषणहेतुप्रश्नो विवेकोपासनायोगधर्मगुरुभिःकीदृशी मुक्तिरितिप्रश्नः, लोमशोक्तोत्तराणि चेत्यादि । ७४५

२५५. लोमशगीतायां योगस्य बलाबलप्रश्नः क्षराऽक्षरलोकप्रश्नः, लोमशकृतोत्तराणि चेत्यादि । ७४८

२५६. लोमशगीतायां नृपकृत आत्मनः क्षरमोचनं चाऽक्षरमोचनं कथंनेतिप्रश्नः । लोमशकृतं तन्मोचनं तद्गतिश्चेत्युत्तराणीत्यादि । ७५१

२५७. लोमशगीतायाम् आत्मनो देहाद्विनिष्क्रमणे हेतुप्रदर्शनं, सन्यस्ताऽसन्न्यस्तविचारे आनर्तनृपकुशलायोगिनोसम्वादश्चेति । ७५४

२५८. लोमशगीतायाम् आनर्त्तराजेन सह ब्रह्मपुत्रीकुशलासाध्व्या विवादः, गार्हस्थ्येऽपि त्यागात् साधुसमागमद्वारा मुक्तिरित्यादि । ७५७

२५९. लोमशगीतायां ब्रह्मकल्लोलपुत्रस्य अनादिश्रीकृष्णनारायणोपदेशजन्यपावनाध्यवनं मोक्षस्थितिश्चेत्यादि । ७६०

२६०. लोमशगीतायां योगिनोऽपि दत्तेष्टगुरुशुश्रूषादिफलावाप्तिर्यज्ञे हरेर्दैवतानां भागारंभकथेत्यादि । ७६३

२६१. लोमशगीतायां लोमशकृतम् अश्वपाटलायाऽनादिश्रीकृष्णनारायणसाक्षात्परब्रह्मत्वबोधदानं परब्रह्मपरायणधर्मबोधदानं चेति । ७६६

२६२. लोमशगीतायाम् अश्वपाटलनृपो रामादित्यतीर्थं प्राप्य माणवीर्यभक्तकथां श्रुत्वा विधिना स्नानदानादिकं चकार, राज्ञोर्मिथः संवादश्चेत्यादि । ७७०

२६३. गलत्कुष्ठिन ऊर्जव्रताख्यकायस्थस्य सूर्योपासनया नीरोगित्वं मुक्तिः सूर्यतीर्थं चेत्यादि । ७७२

२६४. निन्दकहिंसकशूद्रस्य गोदावर्यां मरणाद्धर्मारण्ये मूकविप्रजन्म, तपसा धूतपापस्य कुंकुमवाप्यामोषधिविज्ञानं मूकतानाशः शार्ङ्गधरसंहिताकरणं शार्ङ्गधरतीर्थम् आश्वशिरसतीर्थं चेत्यादि । ७७५

२६५. पार्ष्णिरदनामकाऽजापालशूद्रस्याऽश्वपट्टसरोवरे स्नानादिना क्षयरोगनिवारणं नारदतीर्थं चेत्यादि । ७७८

अध्यायाः पृष्ठः

२६६. अर्कपुरीनृपस्य धर्मसुमन्तुऋषिशापेन सर्पता, विप्रस्य सर्पदंशः, सर्पमोक्षः, अश्वपट्टसरोवरे श्रीकृष्णनारायणेन विप्रपत्न्याः सत्याः प्रार्थनया विप्रोजीवितः, श्वेतव्याससतीर्थं सतीतीर्थं चेत्यादि । ७८१

२६७. सौराष्ट्रे स्वर्णपत्तने नृपस्य रक्षांगारकस्य मलेच्छैर्हनने तत्पत्न्या राणिकासत्याः अश्वपट्टसरस्तटे सतीत्वं सतीतीर्थमाहात्म्यं चेत्यादि । ७८४

२६८. अमोहाक्षनृपतेः प्रबुद्धगुरोरुपदेशेन श्रीलोमशक्षेत्राऽऽगमे साक्षात् परब्रह्मप्राप्तिर्मोक्षो बुद्धतीर्थं चामोहतीर्थं चेत्यादि । ७८७

२६९. अभयाक्षनृपतेर्भक्तिर्वैराग्यं मखः, अश्वपट्टसरस्तीरे त्यागिदीक्षाग्रहणं लक्ष्मीनारायणादिदर्शनं मन्दिरनिर्माणं लक्ष्मीतीर्थं नारायणतीर्थं चेत्यादि । ७९०

२७०. देवानीककर्षुकस्य जले मग्नस्य विष्णुना रक्षितस्य स्थले विष्णुतीर्थं, भद्रायनग्रामस्य ब्रह्मस्तम्बविप्रस्य तपतः पुरुषोत्तमप्राप्तेः पुरुषोत्तमतीर्थं, देवमूलककन्ययाऽमरीदेव्या तपसाऽऽराधितो महाविष्णुर्भगवान् तां विधिना जग्राहेति महाविष्णुतीर्थं, कूप्यवालकाष्ठहारस्य गजेन धृतस्य सनत्कुमारो रक्षां कृतवान्, तत्र तत् सनत्कुमारतीर्थं चेत्यादि । ७९३

२७१. कुंकुमविप्रकृतं कुंकुमेश्वरतीर्थं कुंकुमवापिकातीर्थं सतीशाचारणीकृत दुर्गासतीतीर्थं वणिक्पत्नीधन्येश्वरीकृतं लक्ष्मीतीर्थं चैत्यब्रह्मद्विजकृतं शालग्रामतीर्थं चेत्यादि । ७९७

२७२. नरनारायणतीर्थं हरिकृष्णतीर्थं माणिकीतीर्थमश्वपट्टसंज्ञाऽश्वपाटलप्राग्वृत्तान्तं सर्वतीर्थागमो वैराजस्तुत्या परब्रह्माऽवतरणमश्वपाटलस्य साधुदीक्षेति । ८००

२७३. अनादिश्रीकृष्णनारायणेन साधुसाध्वीभ्यो मन्त्रदीक्षाज्ञानोपदेशादि दत्तम्, काशीतः शिवेश्वरप्रेषितयोगपत्रिकासहितस्य बृहस्पतेर्नारदेन सह लोमशक्षेत्रमागमनं पत्रप्रदानं स्वागतं चेत्यादिनिरूपणम् । ८०३

२७४. बृहस्पतिप्रदत्तपत्रिकाया लोमशकृतसविधिपूजनवाचनादि, ततो भोजनसम्मानादि, नारदो गोपालकृष्णाय विविधैश्वर्यगुणदिव्यलक्षणान्याह बालकृष्णाय रहस्यार्थं चाहेत्यादि । ८०६

अध्यायाः पृष्ठः

२७५. शिवायै नारदोक्तश्रीकृष्णनारायणमहिमा, लक्ष्मीमहिमा, सतां समागमलाभकारणानि नारदसम्माननवृत्तान्तादि । ८०९

२७६. सुरहस्यं नारदो बालकृष्णाय प्राह ततः श्रीकंभरादेव्यै प्राहेत्यादिगुणवर्णनम् । ८१२

२७७. अमायां गोपालकृष्णालये त्रैलोक्ययोषितां मंगलगीतयो गृहे गृहे महोत्सवा वाद्यवादनानि बृहस्पतेः सम्मानम्, पत्रिकाप्रकाशनं तत्प्रत्युत्तरं प्रगृह्य प्रपूजितबृहस्पतेः काशीं प्रत्यागमनस्त्रैलोक्ये कृताऽऽमन्त्रणमित्यादि । ८१६

२७८. मार्गशुक्लप्रतिपदि प्रातर्मंगलानि कुंकुमवापीसरसोः शोभा दिव्यांगनमण्डपशोभा चेत्यादि । ८१९

२७९. मण्डपे माणिक्यस्तंभस्य कलशस्य गणेशस्य मातृकाणां वास्तोर्विष्णोः कुलदेवतायाश्च सर्वतोभद्रस्य च पूजने फलमित्यादि । ८२२

२८०. महामुक्तकृतमहामण्डपदिव्यतावर्णनमित्यादि । ८२५

२८१. पत्रिकाया लेखनं पूजनं सर्वसृष्टिषु प्रेषणं, ताम्बूलपूगीफलदानभोजनमहोत्सवः, रात्रौ गायननर्तनवादनमल्लयोधनताव्यकरणकाव्यरचनपारितोषिकप्रदानभोजनदानपरिहाराद्युत्सवाश्चेत्यादि । ८२८

२८२. द्वितीयायाः प्रातर्मंगलदृश्यानि देवपूजनानि बालकृष्णस्य महास्नानमर्दनं स्नानं श्रृंगारो महीमानादीनां भोजनादि, सृष्टित्रयाऽऽगमः, कृष्णयोर्मंगलजन्योत्साहलाभादिश्चेति । ८३१

२८३. मार्गशुक्लतृतीयायां प्रातःकृत्यानि मध्याह्ने भोजनादीनि, काशीं प्रतियात्रार्थं सज्जता, श्रृंगारः, मांगलिककर्तव्यानि, ब्रह्मप्रियादिकन्यकानां पित्रादिभिः सह विमानाधिरोहणं चेत्यादि । ८३४

२८४. महीमानानां संज्ञा कन्यकादीनामृषीणां च विमानाऽऽरोहणं कृष्णयान्याः काशीं प्रतिगमनं चेत्यादि । ८३७

२८५. योगयानीसम्मानार्थं शिवकारितवाद्यनिनदाः, अम्बरात् काश्याः शिवपुरस्य पार्वतीपुरस्य च वीक्षणम्, पुरवर्णनम्, महीमानसहितशिवेश्वरेण कृष्णस्वागतार्थमम्बरे घटिकास्थायि कैलासं रचितमित्यादि । ८४०

अध्यायाः पृष्ठः

२८६. आकाशकैलासे वादित्रैः योगवाहिन्याः शंकरेण बहुरूपैः सम्मानं स्वागतं पूजनममित्रर्धनं च कृतम्, मिष्टान्नजलपानताम्बूलदानं च कृतम्, नराणां च नारीणां च मिथः कुशलप्रश्नाः, कैलासस्य तिरोभावः, सर्वेषां शिवपुरेऽवतरणम्, भोजनादि रात्रौ विश्रान्तिश्चेत्यादि । ८४३

२८७. चतुर्थ्यां प्रातः कृतमंगलानि, कुलदेवतापूजनम्, महीमानानां मध्याह्ने भोजनादि, विश्रान्तिः, बालकृष्णस्य श्रीकृष्णरूपस्य शिवेश्वरेण साकं विवादस्तदुत्तराणि चेति । ८४६

२८८. बालकृष्णस्य राधारूपस्य गिरिजया सह सम्वादः, विप्ररूपस्य लक्ष्म्या सह सम्वादस्तदुत्तराणि दार्ढ्यं चेत्यादि । ८४९

२८९. भूषाम्बरोपकरणादिप्रेषणम्, वाहिनीमहीमानशृंगारादि, मण्डपं प्रति निर्याणं मण्डपशोभा चेत्यादि । ८५२

२९०. चन्द्रशालायां पार्वती देव्यै ऋग्वेदेन कृष्णाययतीस्थमहीमानपरिचयः प्रदर्शित इति च । ८५५

२९१. सुवेषिते श्रीबालकृष्णे प्रत्येकांऽगे नरनारीणां वृत्याकर्षणेन मुग्धता, दिव्यदर्शनं गोपुरं प्रत्यागमनं चेति । ८५९

२९२. बालकृष्णस्य गोपुरे पूजनं दर्शनं, तदग्रे नर्तनं यन्त्राणां चाऽऽस्फोटनं, विश्रान्तिमन्दिरे विश्रमणं मधुपर्कदानम्, शृंगारः, श्रीकृष्णस्य मण्डपमुख्यद्वारं प्रत्यागमनं चेति । ८६२

२९३. शिवेश्वरकृतं पूजनं, शिवाकृतं गृहोपकरणोत्तारणं, श्रीहरेः मण्डपासने निषदनम्, कन्यकानां चाऽऽगमः, पूजा, देवतापूजा, कामफलबन्धनं दानं, हस्ते दानानि, अर्बुदरूपधारणम्, सर्व करग्रहः, सर्व मालाधृतिः, वह्निप्रदक्षिणम्, गोत्रादिप्रकाशनविध्यर्पणं चेति । ८६५

२९४ वह्निसाक्ष्ये निर्देशः, गृहधर्मोपदेशः, कर्मपरिहारः, दम्पतीभोजनम्, सर्वभोजनम्, मण्डपे बहुरूप परिहारः, कोट्यर्बुदाब्जदानोत्तरं दम्पतीमन्दिरे शयनमित्यादि । ८६९

२९५. दानसंख्या, पञ्चम्यां प्रातः फुल्लकयात्राभ्रमणं, ग्रन्थिमोचनं मध्याह्नभोजनानि शिवपुरे विश्रान्तिः पारितोषिकादिकम्, गंगायां तीर्थस्नानं दानं पञ्चगंगायां योगतीर्थे, शंकराय भिक्षादानं शिवपुरागमश्चेत्यादि । ८७२

२९६. प्रोद्वाहतीर्थे कोटितीर्थे यज्ञतीर्थे, महीमानानां विदायं, मिथः क्षमायाचना, वियोगे शोकः, विमानानां प्रगमनं, लोमशक्षेत्रांऽऽगमो दानं मंगलं गृह प्रवेशो भोजनानि आनन्दविहारा निद्रा चेत्यादि ।

२९७. षष्ठ्यां प्रातः स्नानपूजाद्युत्तरं मन्त्रग्रहणम्, महीमान भोजनम्, विमानेन वनावलोकनार्थं विहरणम्, रात्रिभोजनम्, द्यौः कन्यारूपा लीलां द्रष्टुं समायाता, कोट्यर्बुदाब्जगृहेषु भिन्नलीलं श्रीकृष्णनारायणं वीक्ष्य मुग्धा प्रपूज्य स्वर्गं गता, हरेर्निद्रा चेति । ८७८

२९८. सप्तम्यां प्रातः समाधौ सृष्टित्रयाऽक्षरधामादिप्रदर्शनं, तासां शाश्वतदिव्यमुक्तस्वभावीकरणम्, महीमानभोजनपूजन क्षमाविदायादि, क्षेत्रदेवपारितोषिकादि चेति । ८८२

२९९. चिरेण लोमशाश्रमस्थितानां पित्रादिभिः सह स्वदेशगमनं, मण्डपादिपरिहारः, लक्ष्म्यादिकाशिकाऽऽत्मजाकृतसेवाप्रकारः, षोडशजन्मोत्सवे कार्तिककृष्णाष्टम्यां यावत्परिग्रहागमनम्, महोत्सवः, शिवशंम्भ्वादीनां मोक्षोपदेशो मोक्षश्च, षोडशे वत्सरे उत्तरायणदानादि, संहितायास्त्रेतायुगसन्तानस्य माहात्म्यमित्यादि ८८५

३००. लक्ष्मीनारायणमहिमा, त्रेताखण्डस्थकथानां संक्षिप्तनिर्देशः द्वापरसन्तानप्रस्तावः, आशीर्वादाश्चेति । ८८८

**इति श्रीलक्ष्मीनारायणीयसंहितायाः त्रेतायुगसन्तानात्मकस्य द्वितीयखण्डस्य विषयाणाम् अनुक्रमणिका**

# श्रीलक्ष्मीनारायणसंहितायां द्वितीयत्रेतासन्तानशुद्धिपत्रम्

| पृष्ठं | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ८ | ४३ | वैराजानं | वैराजानां |
| ११ | २५ | वक्रः | वत्रुः |
| १५ | ६३ | वक्रः | वत्रुः |
| १८ | २४ | मस्तस्य | मस्त्यस्य |
| १८ | ३५ | कृष्णऽस्य | कृष्णाऽस्य |
| ३१ | ७२ | स्यास्यामि | स्थास्यामि |
| ३५ | ४९ | पान्नाथ | पान्न्याय |
| ३९ | ६४ | इत्युचावित | इत्युचारित |
| ४० | ९३ | युद्धर्मोदि | युद्धवर्मादि |
| ४१ | ३९ | ख्याक्षस्या | खराक्षस्या |
| ४६ | ९५ | कृष्णेमा | कृष्णमेवा |
| ५२ | ८९ | रत्ना | रन्ता |
| ५३ | ३२ | रौत्य | शैत्य |
| ६२ | ९२ | निम्नगेय | निम्नगेव |
| ६२ | १०१ | करिः | कटिः |
| ७५ | २६ | कदर्मितं | कर्दमितं |
| ७६ | ४९ | राधिकाः | रधारिकाः |
| ८१ | ३ | सुश्र | सुराश्र |
| ८५ | ४९ | क्रुद्धा | क्रुधा |
| ८७ | १९ | चेत्तवेच्चास्ति | चेत्तवेच्छाऽस्ति |
| ८८ | २२ | दहेत् | ददेत् |
| ८८ | ५४ | दीर्घरोगा | दीर्घरोमा |
| ९६ | ११ | ब्राह्मयद्यु | ब्राह्मयाद्यु |
| ११० | ८१ | गाद्यशोवधिः | गाऽघशोवधिः |
| ११४ | ९४ | विंरा | वींरा |
| १२८ | २३ | फलानि | फलानि पक्वानि |
| १३२ | ७७ | वासना | वासाना |
| १३२ | ८५ | उपावेशया | उपावेशय्या |
| १३४ | २५ | कश्चित् | कथञ्चित् |
| १३८ | ७३ | दौ | ददौ |
| १४६ | २८ | वनदेवश्च | वनदेव्यश्च |
| १४७ | ६६ | प्रत्न्या | पत्न्या |
| १५८ | १३ | रण्यदने | रण्यघासादने |
| १५९ | ४३ | विमान् | निमान् |
| १६४ | ३२ | कृत्रवान् | कृतवान् |
| १६५ | ६६ | व्योपेताः | व्ययोपेताः |
| १७० | २९ | ऋज्या | ऋष्या |
| १७१ | ८३ | मसतः | मरुतः |
| १७९ | ५२ | तदत्तं | तद्दत्तं |
| १८३ | १०१ | आयर्यिनं | आर्यायनं |
| १८८ | ५६ | देवमती | देवमयो |
| २०९ | ४ | द्योटिकायां | घोटिकायां |
| २२७ | ९ | श्चिद्यन्त | छिद्यन्त |
| २३१ | ८८ | निगरच्छत् | निरगच्छत् |
| २३५ | २१ | कृष्णबिद्धि | कृष्णबिन्द्वि |
| २३६ | ८३ | निज्यं | निजं |
| २४४ | ३० | मपास्यते | मुपास्यते |
| २५० | २८ | दुष्टास्तुष्टा | हृष्टास्तुष्टा |
| २५३ | ३० | वाह्मत् | वाहयत् |
| २५३ | ३५ | स्वति | स्वस्ति |
| २५४ | ८५ | वत्त्वम् | तत्त्वम् |
| २६६ | २४ | वह्निमान् | वह्निभान् |
| २७२ | २४ | काना | कान्ता |
| २७५ | ५७ | श्वेधाम्नि | श्वेतधाम्नि |
| २८१ | ९१ | त्यभन् | त्यभवन् |
| ३११ | २८ | बालादि | बालाद्रि |
| ३१३ | ११५ | वक्रः | वत्रः |
| ३२३ | २५ | द्विर्त्रिंश | द्वात्रिंश |
| ३२८ | १०५ | कारि | कारयि |
| ३३५ | ४९ | भग्नोत्साद्वा | भग्नोत्साहा |
| ३८९ | ३१ | सनेवेद्यां | सनैवेद्यां |
| ३९५ | ४४ | सहस्रः हस्त | सहस्रहस्त |
| ४०० | ९ | जंद्या | जंघा |
| ४५२ | ४३ | सन्नो | शन्नो |
| ४५७ | ११ | माभि | मभि |
| ४५७ | १६ | मृजं | मृतं |

| पृष्ठं | श्लोकः | अशुद्धम् | शुद्धम् |
|---|---|---|---|
| ४८१ | ९८ | शुभिः | शुचिः |
| ५०४ | ८७ | शिक्षाद्याः | शिक्षादाः |
| ५०६ | ५५ | नर्गवै | निर्गत्य वै |
| ५३२ | ४८ | यस्ततः | यतस्ततः |
| ५३५ | ८३ | ऽनसरन्ति | ऽनुसरन्ति |
| ५४९ | ५३ | धिनानि | धीनानि |
| ५८८ | ३४ | श्रयन्व | श्रयन्त्व |
| ६१७ | १८ | मीक्षाघं | मीक्षाद्यं |
| ६१८ | २६ | वर्धि | वार्धि |
| ६३४ | ३७ | सुसः | सुराः |
| ६३५ | ६३ | जीवन | जीवन् |
| ६४० | ६८ | भवेन्नन् | भवेन्नु |
| ६४५ | ६ | प्रजानना | प्रजाजना |
| ६५१ | १५ | पाणियन्तो | पाणिमन्तो |
| ६६२ | ९ | स्वस्तश्चय | स्वस्तयश्च |
| ६६५ | ३ | प्रेर्यत | प्रेर्यते |
| ६९९ | २५ | भक्षान्यपि | भक्ष्याण्यपि |
| ७०३ | ३४ | चोन्मीलम | चोन्मील्य |
| ७०७ | ९७ | संस्नान् | संस्नानान् |
| ७१२ | ५७ | घाटेश्च | घाटैश्च |
| ७१९ | २२ | वीरऽऽगम् | वीरगम् |
| ७२६ | ७२ | चाऽस्थार्थः | चाऽस्वार्थ |
| ७३० | ३ | फलवन्ति | फलन्ति |
| ७३२ | ७३ | तोयितेषु | तोषितेषु |
| ७३५ | ८२ | अथो | अर्थो |
| ७३८ | ५० | तारभ्यां | तारभ्वां |
| ७४६ | ३१ | कृष्णस्य | कृष्णो |
| ७५१ | ९६ | वारिक्ष्ये | वारिक्ष्मे |
| ७५३ | ८० | यो बद्धः | यो न बद्धः |
| ७५७ | ९४ | हृदौरेक्ये | हृदौरैक्ये |
| ७६४ | ३६ | ब्रह्मवती | ब्रह्मव्रती |
| ७६८ | ४५ | मुरो | गुरो |
| ७८५ | १७ | निर्ददौ | निर्ययौ |
| ७८५ | ३८ | बहिम्लच्छः | बहिर्म्लेच्छाः |
| ८२८ | १०८ | स्मर्थसे | स्मर्यसे |
| ८३१ | ९७ | मास्वाद्य | मासाद्य |
| ८३२ | ५१ | ततोत्सवो | तत्रोत्सवो |
| ८३६ | ७० | विमानो | विमाने |
| ८४१ | १४ | शवेश्वरेण | शिवेश्वरेण |
| ८५३ | २१ | हरिक | हीरक |
| ८५४ | ५४ | प्रोवाह | प्रोद्वाह |
| ८५६ | ९६ | प्रोवाहे | प्रोद्वाहे |
| ८५९ | १३७ | कृष्णायती | कृष्णयानी |
| ८५९ | १३८ | कृष्णयाती | कृष्णयानी |
| ८६९ | ८ | प्रोवाहः | प्रोद्वाहः |
| ८७८ | १०३ | चावायतुश्च | चावापतुश्च |
| ८८६ | ३७ | परिपरायणा | पतिपरायणा |
| ८८७ | ७६ | शितजा | शिवजा |
| ८९० | ४६ | कुरुंगतः | कुसंगतः |

❀ अनादिश्रीकृष्णनारायणाय नमः ❀

❀ श्रीगणेशाय नमः ❀

# ॐ श्रीलक्ष्मीनारायणसंहिता

## द्वितीयः—

## ॥ त्रेतायुगसन्तानः ॥

श्रीराधिका उवाच—

ओं नमः श्रीपरब्रह्मपरेशपरमात्मने ।
अनादिश्रीकृष्णनारायणायाऽक्षरशासिने ॥ १ ॥
त्रेतासन्तानसत्पित्रे राधाकान्ताय योगिने ।
लक्ष्मीनारायणाय श्रीमाणिक्यावाहिने नमः ॥ २ ॥
स्वप्रभास्वामिने मञ्जुलालकायात्मवासिने ।
ईशापारवतीशाय नमः सगुणमूर्तये ॥ ३ ॥
हंसज्योतिस्वरूपाय शक्त्यैश्वर्यादिसंभृते ।
कुंकुमवापिकाक्षेत्रप्रकटाय नमो नमः ॥ ४ ॥
सर्वधामाऽधिपेशाय नमोऽन्तर्यामिणे मुहुः ।
स्वर्गमोक्षादिदात्रे ते नमः श्रीहरये नमः ॥ ५ ॥
निरवधिसमैश्वर्यगुणवैभवशालिने ।
असंख्यमुक्तसेव्यायाऽक्षराधिपतये नमः ॥ ६ ॥
एकोऽपि बहुधा दृष्टः कृष्णनारायणादिमान् ।
ईशेशान्यादिरूपश्च तस्मै श्रीस्वामिने नमः ॥ ७ ॥
परविद्याधिदेवाय ब्रह्मप्रियाऽधिशायिने ।
गीतोपनिषत्पतये जयन्तीपतये नमः ॥ ८ ॥
एकादशीप्रियायाऽऽराधनाकान्ताय शार्ङ्गिणे ।
महालक्ष्मीश्वरायापि भक्तीशाय नमो नमः ॥ ९ ॥
मुक्तेशाय रमेशाय गंगेशाय नमो नमः ।
पतिव्रताधिपतये रुक्मिणीशाय ते नमः ॥१०॥
कामदुघाधिनाथस्त्वं पृथ्वीशस्त्वं रतीश्वरः ।
विभूतीशोऽसि संज्ञेशः शं करोतु प्रसेविनाम् ॥११॥
कमलाकान्त देवीश मोहिनीधव सिद्धिप ।
उर्वशीश्वर बुद्धीश पार्वतीश विधेहि शम् ॥१२॥
दीक्षाधीश च लीलेश नारायणीपते प्रभो ।
विरजाकान्त भगवन् वृन्दानाथ विधेहि शम् ॥१३॥
सरस्वतीप्रिय स्वर्णरेखाप्रिय सितापते ।
देविकेश्वर तुलसीविहार प्रविधेहि शम् ॥१४॥
विभावर्यधिनाथस्त्वं मूर्तीश्वरो जयेश्वरः ।
गोमतीशो मौक्तिकेशो भवान् भवतु रुक्मदः ॥१५॥
प्रेमसखीपते गोदावरीश कपिलेश्वर ।
धात्रीपते स्वर्णगौरीपते सर्वप्रदो भव ॥१६॥
ललितेश्वर रंभेश कुमुद्वतीपते प्रभो ।
शीतलाधिपते चम्पाकान्त विधेहि शं सदा ॥१७॥
हेमन्तेश्वर नन्देश शान्तिस्वामिन् कलापते ।
नन्दिनीनाथ दुर्गेश विजयेश विधेहि शम् ॥१८॥
सन्ध्याधिनाथ कस्तूरीप्रिय धन्याऽधिनायक ।
सावित्रीवर दोलाधिरोह पुष्पासुगन्धभाक् ॥१९॥
सविताधिपते चित्रलेखेश्वर नमोऽस्तु ते ।
पूर्णिमाधिपते ब्रह्मन् शारदाकान्त माधव ॥२०॥
मञ्जरीश्वर योगिनीचक्रकान्त विधेहि शम् ।
प्रेयसीश श्रेयसीश विकुण्ठेशाऽरुणापते ॥२१॥

जोष्ट्रीश्वर शबरीश पम्पेश गालवीपते ।
याज्ञसेनीपते वसुमतीश विजयोऽस्तु ते ॥२२॥
सुदुघानाथ च पद्मावतीपालक केशव ।
भार्गवीपाणिसंग्राह पद्मिनीवर चाऽच्युत ॥२३॥
श्रीमतीश जरत्कार्वीपते लीलावतीश्वर ।
कलावतीप्राणनाथ कदलीश जयोऽस्तु ते ॥२४॥
कान्तिमतीपते कालिन्दीश रेवापते प्रभो ।
वर्धिनीश सुमित्रेश पुण्यनैधेयिकापते ॥२५॥
बन्दुलेश सुशीलेश मानसेश जनार्दन ।
शर्मवतीश्वर कृष्ण माधवीश नमोऽस्तु ते ॥२६॥
कर्णोत्पलेश दीर्घिकापतेऽक्षमालिकापते ।
उदुम्बरीपते ऋतम्भराधीश जयोऽस्तु ते ॥२७॥
बदरीश च कुब्जेश हैमीश मंगलापते ।
महावेदीपते कृष्णापते त्वां चिन्तये हृदि ॥२८॥

**श्रीकृष्ण उवाच—**

यश्चाऽस्ति दिव्येऽक्षरधाम्नि दिव्यो
ह्यनन्तमुक्ताऽभिसुसेव्यमानः ।
परेऽक्षराद्धाम्नि विराजमानः
सोऽयं पृथिव्यां समवाततार ॥२९॥
श्रीकृष्णनारायणनामधेयो
ह्यनादिकृष्णः परमेश्वरश्च ।
गोलोकवैकुण्ठनिवासिभिश्च
प्रगेऽर्चने वै हृदि चिन्त्यमानः ॥३०॥
सोऽयं कृपाभिः पृथिवीतले
कुंकुमाख्यवाप्यां हि सुराष्ट्रदेशे ।
श्रीकम्भरालक्ष्मिसतीगृहेऽत्र
गोपालकृष्णात्मजतामवाप ॥३१॥
यस्मादहं पूर्णतमोऽपि कृष्णो
राधापतिश्चाप्यभवं पुराणः ।
लक्ष्मीपतिश्चाप्यभवद् यतो वै
वैकुण्ठधामाधिपतिर्महात्मा ॥३२॥
कैलासवासोऽपि यतोऽभवच्चा-
मृताधिवासोऽपि यतोऽभवच्च ।
अव्याकृतेशोऽपि यतोऽभवच्चा
हिरण्यगर्भोऽपि यतोऽभवच्च ॥३३॥
श्रीबद्रिकेशोऽपि यतोऽभिजातः
क्षीरोदवासी च यतोऽस्ति जातः ।
श्वेताख्यधामेश नरायणोऽपि
यतोऽस्ति जातः कमलापतिर्वै ॥३४॥
असंख्यधामाधिपरेश्वराश्च
यतो भवन्त्येव हरेस्तु राधे ।
तस्याऽऽत्मदेवस्य गुणानुकीर्ति
वदामि राधे परमेश्वरस्य ॥३५॥
त्वया स्तुतः श्रीपुरुषोत्तमो यः
परात्परः कारणकारणं च ।
सर्वावताराधिपतिः पुराणः
स्मरामि तं श्रीपुरुषोत्तमेशम् ॥३६॥
द्विषट्कयुक्तं कथितं च यत् शतं
त्वया परेशस्य तु मुख्ययोषिताम् ।
दिव्यांगनानां चरणान्यहं सदा
नमामि तासां पतये नमो नमः ॥३७॥
अहं पुरोद्भाव्य विलोकितस्त्वया
साकं परेशेन निवासनाय वै ।
गोलोकसंज्ञं मम धाम चार्पितं
राधे विहारार्थमनेन ते नमः ॥३८॥
ततः परं येन नरायणः कृतो
लक्ष्म्या सुयुक्तश्च विलोकितश्च सः ।
वैकुण्ठसंज्ञं प्रददौ च धाम यत्
तस्मै प्रदात्रे परमात्मने नमः ॥३९॥
अथापि रूपं च विधाय शांभवं
सत्या समं यत्प्रविलोकितं पुनः ।
कैलाससंज्ञं प्रददौ च धाम यत्
निवासदात्रे गुणधारिणे नमः ॥४०॥

**श्रीराधिकोवाच—**

कृष्ण कान्त दयासिन्धो परमेश्वर शाश्वत ।
परमेश्वरसंज्ञो यः परमात्मा परात्परः ॥४१॥
गुणैश्वर्यविभूत्यादिकान्तापार्षदभूषणैः ।
सेवितो यत्र मह्यां वै ह्यवाततार धर्मधृक् ॥४२॥
तन्मूर्ति तद्गुणाँस्तस्य रूपमैश्वर्यमित्यपि ।
लीला मोक्षप्रदाः सर्वा वद लोकहितप्रदाः ॥४३॥
अहं गोलोकसंस्थैव श्रोतुमिच्छामि तं प्रभुम् ।
यत्राऽऽवयोश्च जननं भविष्यति भुवस्तले ॥४४॥
तद् ब्रह्माण्डं च तल्लोकं तत्स्थलं पावनं परम् ।
सर्वाभिः स्वसृभिः सार्धं श्रोतुमिच्छामि तद्वद ॥४५॥

श्रीहरेस्तस्य पत्नीनां तन्मूर्तीनां प्रसेविनाम् ।
आविर्भावस्वरूपाणां कथा मोक्षाय देहिनाम् ॥४६॥
स्वं रूपं यो विजानाति मूलं जानाति नैव च ।
न स किञ्चिद् विजानाति तस्मात्तं वद कान्त मे ॥४७॥
अहं मायास्वरूपाऽस्मि तव देहाऽर्धधारिणी ।
त्वय्यधिशायिनं कृष्ण वद मे पुरुषोत्तमम् ॥४८॥
तव मूर्तौ सदा प्रातस्तं पश्यामि परेश्वरम् ।
हृदये ते निवसन्तं हसन्तं तेऽतिशायिनम् ॥४९॥
मानसं मे विकर्षन्तं रूपसौन्दर्यवारिधिम् ।
त्वयि कृष्णे श्वेतवर्णे वद मे पुरुषोत्तमम् ॥५०॥

श्रीकृष्ण उवाच—

शृणु राधे ! प्रवक्ष्यामि श्रीहरिं पुरुषोत्तमम् ।
कोटिकृष्णा मादृशा यत्स्वरूपेऽन्तर्भवन्ति हि ॥५१॥
कोटिनारायणा यस्य मूर्तौ लीना भवन्ति च ।
तादृशः श्रीमहाराजाधिराजपरमेश्वरः ॥५२॥
अब्जराधारमाद्याश्च यद्रोमात् प्रभवन्ति हि ।
असंख्या अवताराश्च यन्मूर्तेः संभवन्ति च ॥५३॥
अनन्ता व्यूहसंज्ञाश्च लीनास्तिष्ठन्ति यद्धरौ ।
भूमानश्चाप्यनन्ताश्च यदैश्वर्ये वसन्ति च ॥५४॥
यस्य तेजसि धामानि गोलोकादीनि राधिके ।
वसन्ति च समानाभिहार कृतानि सर्वदा ॥५५॥
यस्यैककिरणात्सर्वे प्राविर्भावा भवन्ति च ।
तद्रूपं किमहं राधे वर्णयेऽक्षिप्रसाक्षिकम् ॥५६॥
यस्यैकमुक्तोऽपि च मे धाम्नि चायाद् यदृच्छया ।
मया साकं च गोलोकं सर्वं तेजोहृतं भवेत् ॥५७॥
तस्यैका ललिता पत्नी जया वा मुक्तमाणिकी ।
प्रभा लक्ष्मीः पार्वती वा समायात्तव सन्निधौ ॥५८॥
तस्यास्तेजसि मे पत्न्यो यूयं स्युस्तेजसा हृताः ।
तादृशं रूपरूपाणां रूपातिरूपरूपिणम् ॥५९॥
किं वर्णये राधिकेऽत्र चक्षुश्चरं न वाक्चरम् ।
मणिर्यस्य मुकुटस्य स्वेनैवोद्भावितस्तनोः ॥६०॥
एक एव समर्थोऽस्ति तेजो दातुं हि धामिनाम् ।
तमहं चिन्तये नित्यमनादिकृष्णमच्युतम् ॥६१॥
अन्ये धामनिवासाश्च चिन्तयन्ति हि तं प्रभुम् ।
अनादिश्रीकृष्णनारायणस्वामिपुमुत्तमम् ॥६२॥
राधेऽहं तं चिन्तयामि महानन्दपयोदधिम् ।
पितरं कारणं सर्वावताराणां परात्परम् ॥६३॥
यस्यैकनेत्रकोणे तु कटाक्षे वौष्ठमध्यमे ।
सर्वे रसाः सर्वकामाः सर्वानन्दा वसन्ति च ॥६४॥
यस्य कुक्षौ तु धामानि परमेशा महेश्वराः ।
व्यूहा विभवा आवेशा निवसन्ति सुखाश्रयाः ॥६५॥
गुणा निरवधयश्च निरतिशयशायिनः ।
समूर्ता यस्य वै मूर्तौ वर्तन्ते हृदयादिषु ॥६६॥
सृष्टिस्तु पन्नखे यस्य महामाया नखान्तरे ।
ईश्वराः करगा यस्य चिन्तयामि हरिं च तम् ॥६७॥
चिन्तय त्वं सदा राधे कान्ताधिकान्तमेव तम् ।
मम कान्तस्तव कान्तः स एव भगवान् पतिः ॥६८॥
ध्यात्वाऽनादिकृष्णनारायणं सौभाग्यदा भव ।
संसेव्य तं परेशं चाऽखण्डसौभाग्यधा भव ॥६९॥
प्रपूज्य तं च संसेव्य निजरूपबुधा भव ।
त्वं तस्याऽस्यक्षरंधाम परधामात्मकोऽस्म्यहम् ॥७०॥
मयि वासः सदा तस्य तेन दृष्टस्त्वया मयि ।
स एव हृदये मेऽस्ति ते हृदि निवसाम्यहम् ॥७१॥
त्वं चेच्छा शाश्वती राधे सर्वेषां हृदयेष्वसि ।
तस्मात्सर्वमयी त्वं वै प्रोच्यसे त्वन्मयोऽप्यहम् ॥७२॥
मन्मयः श्रीकृष्णनारायणोऽनादिश्च वर्ण्यते ।
एकं तत्त्वं परब्रह्म द्वैधा चैवं प्रतिष्ठितम् ॥७३॥
त्रेधा चापि चतुर्धा वाऽनन्तधाऽपि प्रतिष्ठितम् ।
तन्तुना तेन देवेन ग्रथितं नातिरिच्यते ॥७४॥
नास्ति तस्य पृथग्भावश्चान्तरात्मा यतो हि सः ।
व्यतिरेके परे धाम्नि पृथग्भावस्तु सर्वराट् ॥७५॥
एवं ज्ञात्वा भजेद् ध्यायेत् प्राप्नुयात्तं परेश्वरम् ।
भगवतां भगवन्तं देवानां चापि दैवतम् ॥७६॥
ईश्वराणां महैश्वर्यमवताराऽवतारिणम् ।
भुक्तिमुक्तिप्रदं रक्षाकरमात्मानमात्मनाम् ॥७७॥
स्रष्टॄणां सर्गिणं रक्षकाणां परमरक्षकम् ।
संहर्तॄणां हारकं च ध्यातॄणां ध्येयमेव तम् ॥७८॥
प्राप्याणां परमं प्राप्यं सर्वज्ञानां च संविदम् ।
प्रभूणां प्रभवं नाथं दयालूनां कृपाऽऽलयम् ॥७९॥
प्रसन्नानां प्रसन्नं च निर्मलानां च निर्मलम् ।
विशदानां च विशदं दिव्यानां दिव्यमीश्वरम् ॥८०॥
तीर्थानां परमं तीर्थं धर्माणां धर्ममुत्तमम् ।
शान्तानां परमं शान्तं मोदानां च प्रमोदनम् ॥८१॥

उत्सवानामुत्सवाग्र्यं प्रियाणां परमं प्रियम् ।
कान्तानां परमं कान्तं प्रेमाढ्यानां शुभास्पदम् ॥८२॥
धार्याणां परमं धार्यं साधूनां साधुसत्तमम् ।
विभूषाणां भूषणाग्र्यं सिद्धीनां सिद्धमुत्तमम् ॥८३॥
शीलानां परमं शीलं व्रतिनां व्रतमुत्तमम् ।
अर्थानां परमार्थं च समिष्टानां परेष्टकम् ॥८४॥
सत्यानां परमं सत्यं सतां सन्तं विचिन्तयेत् ।
अक्षयाणामक्षयाग्र्यं सतीनां सत्त्वमग्रगम् ॥८५॥
वेदानां परमाग्र्यं च जपानां जपमुत्तमम् ।
दानानां परमं पात्रं होमानां हवनं परम् ॥८६॥
तपः श्रेष्ठं तपतां च यज्ञानां यागमुत्तमम् ।
पितॄणां प्रप्रपितरमृषीणामार्षमुज्ज्वलम् ॥८७॥
स्वच्छानामच्छतत्त्वं श्रीपुरुषोत्तममर्चयेत् ।
राधानां परमं राधं स्मृद्धानां सम्पदं पराम् ॥८८॥
धनानां चाऽव्ययं द्रव्यं गृहाणां शाश्वतालयम् ।
स्तंभानां शाश्वताधारं बीजबीजं तमर्चयेत् ॥८९॥
नावामक्षय्यनावं तं खनीनामक्षयां खनिम् ।
बलानां बलमुग्रं च नेत्राणां चक्षुरुत्तमम् ॥९०॥
भावनानां परं भावं व्यापकानां समापकम् ।
सर्वज्ञं स्वामिनं ब्रह्मचारिणं संस्मरेत् सदा ॥९१॥
वीर्याणां परमं वीर्यं प्रभावाणां च भावनम् ।
आकर्षणानां सर्वेषामाकर्षणं परेश्वरम् ॥९२॥
शरण्यानां शरणदं क्षन्तारं च क्षमावताम् ।
धैर्यं शौर्यं चाप्रधृष्यं धीरशूराऽधृष्यां तथा ॥९३॥
मात्राणां परमं मात्रं जननीं जन्मदायिनाम् ।
मातरं पोषकाणां च श्रीहरिं प्रभजेत् सदा ॥९४॥
प्रलयानां प्रलयं तं कोशानां कोशमुत्तमम् ।
संयमिनां संयमं च भजेऽहं राधिके सदा ॥९५॥
यस्माज्जातो महाकालः परिच्छेदविधायकः ।
प्रकृतिपूरुषौ यस्मात्समुत्पन्नौ हि लीलया ॥९६॥
महापूरुषनामाऽपि पुरा यस्मात्प्रवर्तते ।
वासुदेवः स वसनाद् यतः समुपजायते ॥९७॥
अनिरुद्धो जनयिता प्रद्युम्नः पुष्टिदो यतः ।
संकर्षणः कर्षयिता यतस्तं नौमि मत्पतिम् ॥९८॥
पादोऽस्य विश्वाभूतानि संकर्षणवशानि वै ।
सर्वसृष्टिः करे यस्य संकर्षणस्य पुष्पवत् ॥९९॥
सृष्ट्यधिकं देहमानं यस्याऽऽस्ते यत्कृपावशात् ।
गदाग्रकोशवत् सृष्टिः सर्वा यस्य विभाति हि ॥१००॥
तादृग्गदाधरो यस्य दासदासप्रदासकः ।
तं परेशं च सर्वेशं भजामि राधिके पतिम् ॥१०१॥
पठनाच्छ्रवणाच्चाऽस्य स्मरणात्कथनादपि ।
परधामनिवासी स्यात्तं सदा भज राधिके ! ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीपुरुषोत्तमनारायणस्वामिनः सार्वभौममहिम-वर्णननामा प्रथमोऽध्यायः ॥ १ ॥

श्रीकृष्ण उवाच—

शृणु राधे प्रवक्ष्यामि शान्तिदं माणिकीश्वरम् ।
यतश्चाहं ततश्च त्वं त्वत्तो हिरण्मयः पुमान् ॥ १ ॥
महाविष्णुः समुत्पन्नस्ततो विराडजायत ।
अष्टावृत्तियुताण्डानि वैराजात् संप्रजज्ञिरे ॥ २ ॥
वैराजस्य नाभिदेशान्नालं विश्वसृजा युतम् ।
समुत्पन्नं जले तत्र ब्रह्मणे चाण्डमर्पितम् ॥ ३ ॥
पञ्चाशत्कोटिसंख्याकयोजनं त्वेकमण्डकम् ।
पीठयुक् कानकं तेजोव्याप्तं शुभास्पदं बहिः ॥ ४ ॥
अन्तर्लोकांस्ततो ब्रह्मा कल्पयामास योगतः ।
चतुर्दशप्रसंख्यातान् ह्युपर्युपरि संस्थितान् ॥ ५ ॥
मध्ये मेरुर्महाशैलश्चाधारस्तंभ इत्यपि ।
कृतवाँस्तं स्वयं ब्रह्मा यदाधारास्तरा मताः ॥ ६ ॥
पृष्ठदण्डो यथा देहे ब्रह्माण्डे मेरुराट् तथा ।
वैराजस्य च देहाद् यज्जलं तत्र व्यजायत ॥ ७ ॥
तस्मिंस्तु कमलं नाभेर्जातं ब्रह्मात्र साऽण्डकः ।
ववृते सर्वथा पूर्वं दिव्यवर्षसहस्रकम् ॥ ८ ॥
स्वोत्पन्ने च जले शिश्ये वैराजोऽब्दसहस्रकम् ।
अथ यस्मात्स्वयं जातो वैराजः स हिरण्मयात् ॥ ९ ॥
सोऽपि हिरण्मयः कोशो द्वेधा मध्याद् व्यजायत ।
द्वौ तौ जातौ कूर्चभागौ स्थितौ तौ तु महाजले ॥१०॥
यथा शकुनिबालं च पक्वं सम्पूर्णगात्रकम् ।
अण्डं भित्त्वा बहिर्याति बहिस्तस्मात्तथा विराट् ॥११॥
निर्यात्येव जले तत्र विद्यमानः स्वपित्ययम् ।
तदाऽण्डकोशभागौ द्वौ कूर्चौ स्थितौ तु यौ जले ॥१२॥
क्लिद्यमानौ जलपक्वौ बहुवर्षसहस्रकम् ।
कूर्चाभ्यां जलपक्वाभ्यामुत्पन्नावसुरौ तदा ॥१३॥
हिरण्यकूर्चनामा च हिरण्याण्डाभिधः परः ।
वैराजतुल्यदेहौ तौ ब्रह्माण्डाऽधिकवर्ष्मणौ ॥१४॥

क्षुधितौ बलगर्वाढ्यौ गदावर्मान्वितौ दृढौ ।
नर्दन्तौ सुमहानादान् भ्रामयन्तौ गदे निजे ॥१५॥
जलान्यालोडयन्तौ च स्फोटयन्तौ स सक्थिनी ।
गर्जयन्तौ दिशः सर्वास्त्रासयन्तौ महेश्वरान् ॥१६॥
हसन्तौ त्वट्टहासाँश्च मुञ्चन्तौ लीलयाऽन्वितौ ।
पश्यन्तौ चाभितस्तत्र भक्ष्याणि वारिधौ तदा ॥१७॥
धावमानौ च परितो दृष्ट्वा छायां जलादिषु ।
भ्रान्त्या भक्ष्याणि मत्वैवाऽलाभे निराशतां गतौ ॥१८॥
मार्गणेऽपि न लब्ध्वा तौ भक्ष्यं जलसमुद्भवम् ।
तदा सुप्तं तु वैराजं भक्षयितुमुपागतौ ॥१९॥
एकेन संधृतश्चायं वैराजो मस्तके तदा ।
अपरेण धृतश्चायं पादयोर्जलमध्यतः ॥२०॥
उत्तोल्य च ततः स्थानाद् गन्तुमुद्यमितावुभौ ।
तौ विलोक्य तु वैराजः स्वसदृशौ महासुरौ ॥२१॥
अप्रधृष्यौ भक्षणार्थमुद्यन्तौ तामसावुभौ ।
सस्मार स्वजनकं च महाविष्णुं शरण्यकम् ॥२२॥
तुष्टाव परया भक्त्या कर्षयन्द्वयां प्रपीडितः ।
वैराजस्तौ गदाचक्रैस्ताडयामास वै तदा ॥२३॥
पल्लताभिर्मुष्टिभिश्च ताडयामास वेगतः ।
तथाऽप्यगणयन्तौ तत् जहृतुस्तं जलान्तरे ॥२४॥
तदा परवशः सोऽयं वैराजः पितरं निजम् ।
एकाग्रमानसो भूत्वा दध्यौ रक्षार्थमेव च ॥२५॥
ब्रह्मणः कमलं नालं ब्रह्माण्डं सर्वमेव च ।
जले विलुलितं तत्राऽभवत् प्रलयकालवत् ॥२६॥
ब्रह्माऽपि भयमापन्नो रक्षार्थं परमेश्वरम् ।
सस्मार प्रपितरं स्वं महाविष्णुं हिरण्मयम् ॥२७॥
काविमौ भगवन् दैत्यौ महावार्षु विनाशकौ ।
रक्ष रक्ष महाविष्णो शीघ्रं नाशय तावुभौ ॥२८॥
एवं स्मृतो विराजेन ब्रह्मणाऽपि मुहुर्मुहुः ।
महाविष्णुः शंखचक्रगदापद्माऽसिशक्तिमान् ॥२९॥
नाराचमुद्गरशूण्डीशतघ्नीसहितः प्रभुः ।
दिव्यं यानं समारुह्योपतस्थे दैत्यसन्निधौ ॥३०॥
दृष्टौ तेन समुत्पन्नौ शकलाभ्यामुभौ दृढौ ।
हन्तुं समिच्छुकौ पुत्रं वैराजं जलशायिनम् ॥३१॥
शंखनादः कृतस्तेन विष्णुना प्रभविष्णुना ।
ईशलोकानभिव्याप्य गोलोकं व्याप्तवान् ध्वनिः ॥३२॥
वैकुण्ठं च तदा व्याप्तोऽव्याकृतं धाम सर्वशः ।
अमृताख्यं तथा धाम संव्याप्तो युद्धबोधकः ॥३३॥
ध्वनिस्तेन महाराजः संकर्षणः प्रतापवान् ।
युद्धं ज्ञात्वा क्षणं ध्यात्वा ब्रह्माण्डरक्षणाय सः ॥३४॥
वैराजस्य महाविष्णोर्ब्रह्मणो रक्षणाय च ।
स्मृतमात्रं दिव्यदेहो ययौ दिव्यगदान्वितः ॥३५॥
यत्र दैत्यौ महाविष्णुर्विराडपि जले स्थिताः ।
महाविष्णुः सृष्टिपालं संहारकं दुरात्मनाम् ॥३६॥
तुष्टाव नमनं कृत्वाऽर्थयामास प्ररक्षणम् ।
संकर्षणस्तदा रूपं विकरालं समातनोत् ॥३७॥
सहस्रदशकं यस्य बाहूनां वर्तते तदा ।
शिखाः यस्य तु वैकुण्ठमभिव्याप्योर्ध्वमागताः ॥३८॥
सहस्रदशकं तस्य पादानां तु महाजले ।
कच्छपस्याऽप्यधो यातं मध्ये ब्रह्माण्डकोटयः ॥३९॥
करकन्दुकतुल्यास्ताः शिलाः शस्त्राणि चाऽभवन् ।
क्षेपयित्वा करैस्तानि ब्रह्माण्डानि परस्परम् ॥४०॥
युयुधुस्तेऽसुराभ्यां वै संकर्षणादयस्तदा ।
अनेकाऽण्डानि नष्टानि प्रक्षिप्तानि परस्परम् ॥४१॥
गदाभिस्ताड्यमानानि बभञ्जुश्चूर्णवत्तदा ।
दैत्यावपि च तान्येव समादायाऽण्डकानि वै ॥४२॥
चिक्षिपाते महाविष्णौ संकर्षणे दृढौ दृढौ ।
संकर्षणस्तु गदया निजघान च तान्यपि ॥४३॥
व्योममार्गे तथा युद्धं घोरं ताभ्यामजायत ।
हिरण्यकूर्चेनोत्प्लुत्य महाविष्णुर्ललाटके ॥४४॥
प्रताडितोऽगमन्मूर्छां हिरण्याण्डेन मस्तके ।
ताडितो गदया रोषं संकर्षणो जगाम ह ॥४५॥
हिरण्याण्डकटिनिम्ने जघान गदया रुषा ।
हिरण्याण्डः क्षणं मूर्छामवाप पुनरुत्थितः ॥४६॥
स्वस्थो बभूव च यावत् तावत्संकर्षणः प्रभुः ।
गदया ताडयामास हिरण्यकूर्चकं हृदि ॥४७॥
भग्नं वै हृदयं तस्य ममार गदयैकया ।
हिरण्याण्डस्तदा मूर्ध्नि महाविष्णुं जघान ह ॥४८॥
महाविष्णुः समुत्प्लुत्य हिरण्याण्डं जघान के ।
उत्प्लुत्य स विदुद्राव संकर्षणं तु पृष्ठके ॥४९॥
ताडयामास गदया संकर्षणस्तदाऽसुरम् ।
गदया ताडयामासाऽसुरोऽपि गदया तदा ॥५०॥
ताडनं तत् प्रतिगृह्य चाट्टहासं मुमोच वै ।
भ्रामयित्वा गदां व्योम्नि दशब्रह्माण्डसदृशीम् ॥५१॥
प्राहिणोद्धस्तमुक्तां तां संकर्षणजिघांसया ।
महाविष्णुः स्वगदया मध्ये तताड तां गदाम् ॥५२॥

बभञ्ज सा गदा तत्र जले वै शतधाऽभवत् ।
संकर्षणो गदायुक्तो दुद्राव चाऽसुरं प्रति ॥५३॥
असुरः स्वस्य रक्षार्थं जग्राहाऽण्डं महत्तमम् ।
षट्पञ्चाशत्स्तरयुक्तं चिक्षेप कर्षणं प्रति ॥५४॥
गदया चूर्णतां यातं संकर्षणस्य तत्तदा ।
ततः परं धावमानोजग्राहान्यन्महाण्डकम् ॥५५॥
महाविष्णोश्च गदया हतं तच्छतधाऽभवत् ।
ततः परं धावमानस्तृतीयाण्डं करे तदा ॥५६॥
गृहीत्वा प्राक्षिपत्तूर्णं संकर्षणस्य वै हृदि ।
हृदि लग्नं त्रिभेदाऽपि चूर्णतां चागमद्धि तत् ॥५७॥
अथ संकर्षणो देवः क्रुद्धः सृष्टिविनाशकम् ।
हन्तुं वै प्राणतस्तत्र समैच्छद् गदया प्रभुः ॥५८॥
पृष्ठे दैत्यस्य तु संकर्षणोऽधावन्महाजले ।
दैत्योऽपि च प्रदुद्राव गृहीत्वाऽण्डं समीपगम् ॥५९॥
ब्रह्मनालस्थितं यत्तत् सावरणं समेरुकम् ।
साऽण्डकटाहकं पद्मे ब्रह्मणा सह यत् स्थितम् ॥६०॥
सर्वां पृथ्वीं गृहीत्वैव संकर्षणभयात् स च ।
दुद्राव व्योममार्गेण संकर्षणोऽन्वगात्तदा ॥६१॥
अथाऽसुरः प्रविवेश महाजलतले तदा ।
संकर्षणोऽपि च पृष्ठलग्नो विवेश वै जलम् ॥६२॥
संकर्षणेन च धृतो केशेषु च महासुरः ।
तावत् सूक्ष्मं तदा रूपं धृत्वाऽसुरो महाजले ॥६३॥
भयाद् युद्धश्रमाच्चापि साहाय्यरहितः खलु ।
अष्टावरणमाविश्य ब्रह्माण्डस्योदरेऽगमत् ॥६४॥
तत्र संकर्षणो देवः सूक्ष्मरूपधरः प्रभुः ।
ब्रह्माणं सह नीत्वैव क्षणमात्रे समाययौ ॥६५॥
ब्रह्माणं स्थापयामास सत्यलोके परस्तरे ।
संकर्षणस्तदा रौद्रं रूपं दधार लीलया ॥६६॥
महाविष्णुस्तदा सूक्ष्मं विष्णुरूपं दधार ह ।
अथ ते च त्रयस्त्वत्र ब्रह्माण्डान्तर्निवासिनः ॥६७॥
असुरं मार्गयामासुर्मेरावदृश्यतां गतम् ।
हिरण्याऽण्डोऽण्डरूपः सन्मेरुकक्ष्यां व्यवस्थितः ॥६८॥
दृश्यते नैव देहेन मृग्यमाणोऽपि वै तदा ।
योगं चकार वै विष्णुर्ददर्श छन्नविग्रहम् ॥६९॥
मेरुकक्ष्यां गुप्तभागे स्थितं भीतं महाश्रमम् ।
अथ संकर्षणो रुद्रो धृत्वा सूक्ष्माणुरूपकम् ॥७०॥
विवेश मेरुकक्ष्यां स योगास्त्रेण च तं तदा ।
प्रजग्राह महादैत्यं प्रच्छन्नवासकारिणाम् ॥७१॥
असुरो मायया तत्र शीघ्रं स्थूलो बभूव च ।
विनिर्गत्य करात् तस्य संकर्षणस्य शूलिनः ॥७२॥
मेरुं प्रदक्षिणं कृत्वा पलायनं चकार सः ।
संकर्षणोऽपि च तस्य पृष्ठे दुद्राव वेगतः ॥७३॥
असुरस्त्वाश्रयं मेरुं मत्वा बभ्राम चक्रवत् ।
शतोत्तराणि च तदा कृतानि भ्रमणानि वै ॥७४॥
तेनाऽत्यतीव श्रान्तेन मर्तुकामेन वै तदा ।
संकर्षणः परावृत्त्य मुद्गलेन प्रताडितः ॥७५॥
संकर्षणोऽपि च गदां प्राहिणोत् करमुक्तगाम् ।
हिरण्याण्डं प्रति हन्तुं तावद् दैत्यो बलेन वै ॥७६॥
सांकर्षणीं गदां धृत्वा संकर्षणमताडयत् ।
पुनर्दुद्राव च मेरुं बभ्राम भयतस्तथा ॥७७॥
संकर्षणो ययौ पृष्ठे यत्र यत्र स धावति ।
संकर्षणो गदां धृत्वा तस्य पृष्ठेऽप्यताडयत् ॥७८॥
एवं प्रधावमानाभ्यां मेरुकम्पो व्यजायत ।
पृथिवी सप्तलोकाश्च दिवः पातालकान्यपि ॥७९॥
ह्यकम्पयन् पदन्यासैर्गदाशब्दैश्च घोषणैः ।
संकर्षणस्य स गदां नीत्वा चक्रे पलायनम् ॥८०॥
संकर्षणो महाविष्णोर्गदां जग्राह कानकीम् ।
मेरोः कक्ष्यां गदाभ्यां तौ युयुधाते परस्परम् ॥८१॥
द्वयोर्गदाप्रहननान्मेरुश्चुक्षोभ शैलराट् ।
मेरोः पार्श्वानि सर्वाणि चुक्षुभिरे समन्ततः ॥८२॥
भूकम्पो मेरुकम्पश्च श्रृंगकम्पो व्यजायत ।
निष्फलं हननं मेरोः कक्ष्यां यदा प्रवर्तते ॥८३॥
तदा विशीर्यते खण्डो मेरोः कक्ष्याः पुनः पुनः ।
एवं विशीर्णभावेन वह्निस्तत्र च घर्षणात् ॥८४॥
समुत्पन्नो लोकदावानलो जज्वाल वै दिवम् ।
गदाहननसञ्जाताऽनलप्रवाहरश्मयः ॥८५॥
यावत्कटाहमायान्ति ब्रह्माण्डं परितस्तदा ।
सविमानं च देवानां प्रजज्वाल समन्ततः ॥८६॥
महाविष्णुश्चामृतेन शमयामास चानलम् ।
हाहाकारो महानासीत् सर्वलोकनिवासिषु ॥८७॥
गदापातैस्तदा मेरोः पार्श्वखण्डाः समन्ततः ।
पृथग् व्योम्नि निपेतुश्च ताडिताश्च वियोजिताः ॥८८॥
लक्षयोजनदीर्घाश्च केचिच्चाऽयुतयोजनाः ।
अन्ये विंशतिसाहस्रयोजना द्विगुणास्ततः ॥८९॥
पञ्चविंशतिसाहस्रत्रिंशत्साहस्रयोजनाः ।
चत्वारिंशत्सहस्रयोजनाः खण्डास्तथाऽपरे ॥९०॥

केचित् षष्टिसहस्रयोजनाऽऽयतास्तदाऽभवन् ।
केचिद् दीर्घाश्च पञ्चाशद्साहस्रयोजनाः परे ॥९१॥
प्रसप्ताशीतिसाहस्रा बभूवुरायता हि ते ।
एवं भिन्ना ग्रहाः कृष्णवर्णा मेरोः समन्ततः ॥९२॥
स्वर्लोकस्य निम्नदेशे स्मोड्डयन्तेऽन्तरीक्षके ।
केचित् खण्डा जले केचिद् वायौ वर्तन्त एव ते ॥९३॥
आकर्षणेन वै सर्वे तूड्डयन्ते व्यवस्थया ।
तारकावत् ग्रहाः सर्वे केतवश्चाऽभवंस्तदा ॥९४॥
मेरोर्वै दक्षिणे भागे हिरण्याण्डं महासुरम् ।
जघान वक्षसि पार्श्वे मस्तके पतितं तदा ॥९५॥
संकर्षणस्तु गदया प्राणतो हि जघान तम् ।
तदा गदाप्रहारैश्च गदामारैरनेकधा ॥९६॥
प्रभिन्नो दक्षिणो भागः पृथ्व्या मेरोरवाऽक्षरत् ।
लक्षक्रोशमितः खण्डो युतो लावणवारिभिः ॥९७॥
यत्र हैमश्च माहेन्द्र उरलश्चाग्निकाचलः ।
अब्रिक्तशैलराजोऽपि चान्ये शैलाः प्रसन्त्यपि ॥९८॥
भ्रुवाकर्षणयोगेनाऽन्तरीक्षे तदधः स्थितः ।
यत्रोत्तराः कुरवश्च किंपुरुषाः प्रदेशकाः ॥९९॥
नरनामास्तथा देशा दक्षिणे लावणे जले ।
पश्चिमे तत्र वै भागे चाब्रिक्ताश्च प्रदेशकाः ॥१००॥
द्वीपा लावणमध्याश्च दशसाहस्रयोजनाः ।
सहस्रयोजनाश्चान्ये स्वल्पास्त्वन्ये सहस्रशः ॥१०१॥
त्रयो दाक्षिणखण्डास्ते पृथ्व्या मेरोः पृथक्कृताः ।
षष्टिसाहस्रकक्रोशायतो लावणवारिधिः ॥१०२॥
चत्वारिंशत्सहस्रक्रोशात्मा भूतलभागवान् ।
एवं लक्षक्रोशमानो ग्रहोऽन्तरीक्षकेऽभवत् ॥१०३॥
तत्र कालेन च वारिस्थलयोः पर्ययान्मुहुः ।
मध्यसामुद्रकखण्डाः पर्यावर्तन्त कालतः ॥१०४॥
जलं स्थलं स्थले वारि वने वासो गृहे वनम् ।
एवं कालेन जायेरन् भ्वां परिवर्तनानि वै ॥१०५॥
खण्डमध्ये समुद्राश्च भवन्ति कालयोगतः ।
जलमग्नं चाजनाभं पृथक् करोति पश्चिमम् ॥१०६॥
सिंहारण्यं जलमग्नं चाब्रिक्तं वियुनक्ति च ।
शुक्रः कुरुर्जलमग्नश्चोत्तरं किन्नरीयकम् ॥१०७॥
विभजते किंपुरुषं राशनीं जापनीं भुवम् ।
मध्ये निम्नाऽखातदेशा अवान्तरप्रदेशकान् ॥१०८॥
विभजन्ते यत्र लोके हैमे पार्थिवगोलके ।
नारनारायणो यत्र हिमाद्रौ राजते प्रिये ॥१०९॥
तदेतस्मिन् मम राधे चानर्तमणिभूतले ।
कुंकुमवापिकाक्षेत्रे सौराष्ट्रे पुरुषोत्तमः ॥११०॥
अश्वपट्टसरस्तीरे गोपालकृष्णबालकः ।
प्राविर्बभूव च श्रीकम्भरालक्ष्मीसमुद्भवः ॥१११॥
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ।
तत्र याहि प्रिये राधे कृष्णनारायणी भव ॥११२॥
येन दत्ता च यस्याऽसि तं प्रसेव्य सुखं लभ ।
पुनर्यास्यसि मे धाम गोलोकं तदनुज्ञया ॥११३॥
हिरण्याण्डो मृतो मेरौ संकर्षणकरेण वै ।
हिरण्मयी तु सा भूमिरण्डमध्ये व्यजायत ॥११४॥
हिरण्यकूर्चनामा च लोकालोकाचलाद् बहिः ।
जले मृतश्च तद्देहाज्जाता भूस्तत्र काञ्चनी ॥११५॥
इत्येतत् कथितं राधे प्रागाख्यानं भुवस्तव ।
प्रत्ययार्थं तथाऽण्डस्य परिचयार्थमत्र वै ॥११६॥
अनादिश्रीकृष्णनारायणो यत्र तु गोलके ।
प्राविर्बभूव भगवान्नरनारायणाश्रये ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने-ऽक्षरपरधामाधिपतेर्बहुधा वंशविस्तारे हिरण्याण्डकोश-कूर्चजन्ययोर्हिरण्यकूर्चहिरण्याण्डयोरसुरयोः संकर्षण-द्वारा नाशः, पृथ्वीगोलकस्य तु मेरोर्दक्षिणखण्डा-त्मकस्यैवाऽवशेषतया राधिकायैश्रीकृष्णस्य परिचयदानमित्यादिनिरूपणनामा द्वितीयोऽध्यायः ॥ २ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे प्रवक्ष्यामि कथा दिव्या मनोहराः ।
अनादिश्रीकृष्णनारायणस्याऽऽनन्दसंभृताः ॥ १ ॥
सृष्ट्वा श्रीभगवान् कृष्णनारायणपरेश्वरः ।
ईशलोकानगणितान् वैराजाँश्चापि कोटिशः ॥ २ ॥
भूम्नश्च कोटिशः सदाशिवाँश्चापि च कोटिशः ।
ब्रह्माण्डानां तु संख्या वै विद्यते नैव नैव च ॥ ३ ॥
देवान् दैत्यान् राक्षसाँश्च मुनीन् ऋषीन् सतः सतीः ।
सूर्यचन्द्रान् ग्रहान्नागान्नगान्नदीः सरीसृपान् ॥ ४ ॥
स्थावरान् जंगमाँश्चापि लोकान् लोकप्ररक्षकान् ।
धामानि धामपालाँश्च धामेश्वराँश्च धामिनः ॥ ५ ॥
ब्रह्माण्डानामीश्वराँश्च रक्षकान् वासभूमिकाः ।
सर्वं सृष्ट्वा परब्रह्मान्तर्यामी तत्र यद्यपि ॥ ६ ॥

वर्तते सर्वथा देवस्तथापि दृष्ट्यगोचरः ।
यावन्नैव विभात्येषां तावच्छान्तिर्न जायते ॥ ७ ॥
एवमेव विचार्यैवाऽनादिकृष्णनरायणम् ।
प्रार्थयामासुरेवैतेऽवतारा ईश्वराः सुराः ॥ ८ ॥
स्वस्वधामसु लोकेषु नैजेष्वपि च भूमिषु ।
प्रत्यक्षदर्शनार्थाय तदा श्रीपुरुषोत्तमः ॥ ९ ॥
परे धाम्नि स्थितश्चापि प्रार्थितोऽक्षरधामिभिः ।
अक्षराधिपतिर्भूत्वा द्विबाहुश्चाक्षराधिपः ॥१०॥
अक्षराख्ये महासिंहासने द्वितीयरूपवान् ।
वर्तते त्वक्षरे धाम्नि चाक्षरेण प्रपूजितः ॥११॥
अक्षरे वर्तमानानां मुक्तानां भावनानुगः ।
तत्कृतार्चनभोज्यादि गृह्णाति त्वक्षराधिपः ॥१२॥
दिव्यरूपः स भगवान् राजतेऽक्षरधामनि ।
नैजद्वितीयरूपेणाऽक्षरवासिप्रकाम्यया ॥१३॥
भक्तानन्दप्रदानार्थं मुक्तानुग्रहकाम्यया ।
आक्षरेषु च मुक्तेषु राजते पुरुषोत्तमः ॥१४॥
अथ राधे मया त्वत्राऽर्थितः स भगवान् प्रभुः ।
गोलोके राजते कृष्णनारायणो मदिच्छया ॥१५॥
मया प्रपूज्यते नित्यमनादिश्रीनरायणः ।
मम देवगृहे राधे पश्य मूर्तिं सनातनीम् ॥१६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इतिजापं करोम्येव स्मरामि पुरुषोत्तमम् ॥१७॥
मदर्थे च त्वदर्थे च गोप्यर्थे पुरुषोत्तमः ।
गोपार्थे मम धामार्थे तृतीयरूपधारकः ॥१८॥
अनादिश्रीकृष्णनारायणस्त्वत्र हि वर्तते ।
गोलोकवासिभक्तानां पूजासंग्रहणाय सः ॥१९॥
दर्शनस्य प्रदानार्थं विराजते परेश्वरः ।
एष श्रीभगवान् साक्षाच्चतुर्थरूपधारकः ॥२०॥
वैकुण्ठे राजते लक्ष्मीनारायणसमर्चितः ।
नारायणेन पूजार्थं प्रार्थितः पुरुषोत्तमः ॥२१॥
तद्धामवासी भवति सहानन्दप्रदायकः ।
मत्स्यधाम्नि तथा कूर्मधाम्नि वाराहधाम्नि च ॥२२॥
कपिलस्यापि धाम्न्येषो राजते पूजितः स्वयम् ।
हरेरव्याकृते धाम्नि वासुदेवस्य धामनि ॥२३॥
संकर्षणगृहे प्रद्युम्नस्य गृहे विराजते ।
अनिरुद्धगृहे चापि महापुरुषपत्तने ॥२४॥
महाकालालये मायाधाम्नि सदाशिवालये ।
विष्णोः समालये स्वामी महाविष्णोस्तथाऽऽलये ॥२५॥
विराजते च प्रकृतिपुरुषस्य गृहेऽपि च ।
प्रधानपुरुषाऽऽगारे भूम्नो धाम्न्यपि राजते ॥२६॥
महाविष्णोस्तथा धाम्नि वैराजधाम्नि राजते ।
तैस्तैः सम्प्रार्थितश्चायं परेश्वरनरायणः ॥२७॥
पूजितो वन्दितस्तैश्च सेवितो हरिरस्ति सः ।
ब्रह्मविष्णुमहेशानां लोकेषु भवनेषु च ॥२८॥
जलोपर्यपि वैकुण्ठे राजते श्रीहरिः स्वयम् ।
प्रार्थितः स तु भगवान् ऋषिभिः पितृभिस्तथा ॥२९॥
द्विभुजो राजते तेषां लोकेष्वपि गृहेष्वपि ।
सुरैश्चेन्द्रादिभिश्चापि मुहुः सम्प्रार्थितः प्रभुः ॥३०॥
पृथोर्धाम्नि तथा दत्तात्रेयधाम्न्यपि राजते ।
हंसधाम्नि नृसिंहस्य धाम्नि ऋषभधामनि ॥३१॥
वामनस्यालये पर्शुरामधाम्नि विराजते ।
यज्ञधाम्नि रामधाम्नि सनत्कुमारधामनि ॥३२॥
हयग्रीवाश्रमे नारदस्य लोके विराजते ।
राजराजस्य च राजधान्यां संराजते प्रभुः ॥३३॥
व्यासधाम्नि बुद्धधाम्नि चेशधाम्नि विराजते ।
वारुणे पत्तने वासे कौबेरे चेन्द्रधामनि ॥३४॥
यमधाम्नि च नैर्ऋते लोकेऽनिलस्य धामनि ।
वह्निलोके सूर्यवासे चान्द्रलोके विराजते ॥३५॥
ध्रुवधाम्नि तथा शुक्रालये च मंगलालये ।
बुधालये बृहस्पतेराश्रये शनिमण्डले ॥३६॥
ग्रहैस्त्वाराधितस्तत्र नक्षत्रैरर्थितस्तथा ।
ताराभिर्वन्दितः कृष्णनारायणो विराजते ॥३७॥
मेरौ द्विपेषु सर्वेषु सामुद्रद्वीपकेषु च ॥
अलोकेषु च लोकेष्वन्तरीक्षे व्योमवासिषु ॥३८॥
नगवासिष्वपि कृष्णनारायणो विराजते ।
तीर्थेषु तोयपूर्णेषु पार्थिवेषु गृहेष्वपि ॥३९॥
चैत्येष्वायतनेष्वीशः स्थानिभिस्त्वर्थितो मुहुः ।
आहूतः पूजनाद्यर्थं दर्शनार्थं सदा गृहे ॥४०॥
वासं करोति भगवान् कृष्णनारायणो हरिः ।
तत्तत्स्थानालयवासपत्तनस्थलभूमिषु ॥४१॥
मूर्तिरूपो महाराजो द्विभुजश्चातिसुन्दरः ।
किशोरभावमाश्रित्य प्रोद्भिन्नयौवनोऽपि च ॥४२॥
यथाभक्तास्तथा भूत्वाऽऽनन्दप्रदो विराजते ।
वैराजानं च लोकेषु तथा स्वर्गादिधामसु ॥४३॥
वसूनामाश्रमेष्वेवाऽऽदित्यानां मण्डलेष्वपि ।
रुद्राणामाश्रमेष्वेवाऽश्विनीकुमारधामनि ॥४४॥

धन्वन्तरेर्गृहे चाब्धौ क्षीरसागरकेऽपि च ।
श्वेतद्वीपे बदर्यां च माहेन्द्रे रैवते गिरौ ॥४५॥
द्विभुजः स सदाऽऽस्ते श्रीभगवान् पुरुषोत्तमः ।
दिव्यक्षेत्रेष्वरण्येषु वनेषूपवनेष्वपि ॥४६॥
भक्तैः सम्प्रार्थितः सोऽयमवतीर्य विराजते ।
पाताले सुतले लोके नागेष्वप्यसुरेष्वपि ॥४७॥
अतले वितले चास्ते तलातले रसातले ।
महातलेऽपि तत्रत्यैः प्रार्थ्यमानो विराजते ॥४८॥
भुवर्लोके हरिकृष्णो भूतप्रेतपिशाचकैः ।
यक्षराक्षसकूष्माण्डविनायकैः समर्थितः ॥४९॥
तथाऽन्यैर्वल्लिकाद्यैश्च द्रुमैः स्तम्बैस्तृणादिभिः ।
प्रार्थितः परमात्माऽयं राजते तद्गृहे हरिः ॥५०॥
शेषगृहे कमठस्य गृहे दानवदैत्ययोः ।
गृहयोः राजते स्वामिकृष्णनारायणोऽर्चितः ॥५१॥
भक्तानां भवने राधे ! भक्तानां हृदयेषु च ।
अनादिश्रीकृष्णनारायणस्वामी विराजते ॥५२॥
मुक्तानीनां भवनेषु दासीनां भवनेष्वपि ।
ईशानीनां च राज्येषु देवीनां भवनेषु च ॥५३॥
पतिव्रतानां सौधेषु साध्वीनां चाश्रमेषु च ।
आलयेषु गृहिणां च गह्वरा सुंदरीष्वपि ॥५४॥
योगिनां च सतामाश्रमेषु गृहेषु राजते ।
कुमारीणां हृदयेषु योगिनीनां गृहेष्वपि ॥५५॥
मातृणां च निवासेषु सखीनां मण्डपेष्वपि ।
शयनेषु प्रियाणां च कान्तः स्वामी विराजते ॥५६॥
तत्तल्लोकीयवसतिप्रार्थितो भगवान् हरिः ।
अनादिश्रीकृष्णनारायणस्तेषां समीहया ॥५७॥
तेषामिष्टप्रपूर्त्यर्थं द्विभुजः परमेश्वरः ।
यथा भक्ताभिलषितरूपशीलगुणाश्रयः ॥५८॥
दिव्यरूपधरो देवो राजते श्रीमहाप्रभुः ।
सर्वैरुपास्यते सोऽयं सर्वैराराध्यते च सः ॥५९॥
सर्वैः संस्मर्यते प्रातः सर्वैः सम्पूज्यते सदा ।
सर्वैः समर्प्यते तस्मिन् सर्वं नैजं यदर्थितम् ॥६०॥
सर्वे तस्मात् समिच्छन्ति ऋद्धिविभूतिसम्पदः ।
तं विना नान्यसंयत्तं चेष्टं भवति कस्यचित् ॥६१॥
स्मृतः स एव विषमे समे समुपतिष्ठति ।
सृष्टौ सृष्टौ समुत्पन्ना ईशाः सुराश्च मानवाः ॥६२॥
प्रार्थयन्ति स्म रक्षार्थं ब्रह्माण्डानां महापदि ।
तेषामापद्विनाशार्थं तदा तत्राऽभिजायते ॥६३॥

कदाचित् कृपया लोके भक्ताधीनः प्रजायते ।
कृपा तु कारणं मुख्यं जीवानां स्वस्य योगदः ॥६४॥
कृपया याति भात्येव साक्षाद् भवति देहिनाम् ।
एवं कृत्वा कृपां सर्वब्रह्माण्डेषु पुमुत्तमः ॥६५॥
सृष्ट्यारंभे समायाति ब्रह्माण्डस्थितसदृशः ।
क्वचिद्देवे क्वचित्त्वार्षे मानवे च कुले क्वचित् ॥६६॥
क्वचित् पाशवसञ्चारे कामरूपधरः क्वचित् ।
स्थले जले दिवि चैत्येऽरण्ये गृहे नभस्तले ॥६७॥
भवने च रणे वापि यथेष्टं सः प्रजायते ।
वासं करोति कार्यार्थं भक्तानां भावना यथा ॥६८॥
राधे यत्र यमुनाऽस्ति यत्र गंगा प्रवर्तते ।
यत्र रैवतशैलश्च नरनारायणाश्रमः ॥६९॥
यत्र खण्डत्रयं चास्ते गोलके खण्डिते पुरा ।
तत्राऽयं कृपया स्वामी कृष्णनारायणो हरिः ॥७०॥
कुंकुमवापिकाक्षेत्रे चाश्वपट्टसरोवरे ।
आद्ये युगे जनिं लेभे गोपालकंभरागृहे ॥७१॥
अहं यत्र समुत्पन्नो वसुदेवगृहे तथा ।
त्वं च यत्र समुत्पन्ना वृषभानुकलागृहे ॥७२॥
शतसाहस्रक्रोशात्मा गोलकः खण्डगोलकः ।
पावितः श्रीकृष्णनारायणेनाऽनादिना हि सः ॥७३॥
मास्यूर्जे चाद्यपक्षे च कृष्णेष्टमीदिने प्रभुः ।
प्रास्तत्र समुत्पन्नः कंभराशयने हरिः ॥७४॥
सर्वरक्षणकार्यार्थं सर्वसौभाग्यसिद्धये ।
यावन्मांगल्यदानार्थं पावनार्थं च देहिनाम् ॥७५॥
यदेयेष हरिस्तत्र कृपया गन्तुमीश्वरः ।
आनर्त पार्षदं स्वस्य प्रेषयामास भूतले ॥७६॥
मह्यं चाज्ञापयामास मणेर्दानार्थमेव सः ।
मयाऽर्पितो मणिस्तस्मायानर्ताय महात्मने ॥७७॥
तेन दिव्यः कृतो लोकः सौराष्ट्रः पश्चिमे भुवः ।
पत्नीव्रतो द्विजस्तत्र कृष्णोऽहं प्रेषितस्तदा ॥७८॥
महालक्ष्मीः प्रेषिता च महाविष्णुश्च वै तथा ।
त्वं च राधा महालक्ष्मीरूपिणी संबभूविथ ॥७९॥
पतिव्रता महाभागा बहुवर्षतपस्विनी ।
अहं पत्नीव्रतश्चापि गोपालकृष्णसंज्ञकः ॥८०॥
जातस्तत्र दिव्यविप्रो वेदशास्त्रप्रवर्तकः ।
मया गर्भः प्रदत्तस्ते कम्भरायै तदा प्रिये ॥८१॥
दिव्यं तद्गर्भदानं वै वायुपूरणमात्रकम् ।
दृश्यमात्रं गर्भवासं दधार कम्भरा तदा ॥८२॥

संकल्पमात्रजा सृष्टिस्तस्मिन् युगे बभूव ह ।
का कथा गर्भवासस्य रीतिवद् वर्णनं मम ॥८३॥
हरिः संकल्पितस्तत्र त्वाजगाम स सुन्दरि ।
निवासमाचरत् पितृहृदि मातृप्रकुक्षिके ॥८४॥
दर्शनं प्राददाद् बालो यथा जन्म समालभेत् ।
शय्या समुज्ज्वला तत्र जाता दिशः समुज्ज्वलाः ॥८५॥
अवताराः समागत्य यत्प्रमुख्याः प्रवर्षणम् ।
पुष्पाणां चन्दनानां च लाजानां चक्रुरादरात् ॥८६॥
धामधामनिवासिन्यः सख्यस्तत्र तदाऽऽगताः ।
गीतीश्चक्रुर्मिष्टकण्ठैर्गीयमानाः प्रमीलिताः ॥८७॥
वर्धयामासुरीशेशं पूर्णं ब्रह्मपतिं प्रभुम् ।
देव्यश्च कन्यकाः सृष्टेः सर्वशस्तत्र चागताः ॥८८॥
दृष्ट्वा मुखं हरेस्ताश्च प्रसन्नहृदया मुहुः ।
ददुश्चाशिष एवाऽस्मै कृष्णनारायणाय ताः ॥८९॥
ईश्वरा लोकपालाश्च मुक्ताः सुरेश्वराः सुराः ।
ब्रह्मसरसस्तथा चाप्सरसः सर्वा आययुः ॥९०॥
नमस्कृत्य प्रभुं कान्तं नर्तनं चक्रुरादरात् ।
गान्धर्व्यो देवगान्धर्व्यश्चारण्यः किन्नरीगणाः ॥९१॥
विद्याधर्यः समायाता गोप्यो मुक्तान्य इत्यपि ।
वाद्यानि वादयामासुर्जहृषुर्वीक्ष्य तं प्रभुम् ॥९२॥
भूवासिन्यः समायाता मानव्यः कृतमंगलाः ।
दृष्ट्वा युयुजुः सौम्याभिर्वाग्भिस्तं पुरुषोत्तमम् ॥९३॥
नागिन्यश्चान्यदेव्यश्च तिर्यङ्मानवयोनिजाः ।
अन्या दिव्या अदिव्याश्च तृणादिस्थाः समागताः ॥९४॥
वीक्ष्य कान्तं परं कान्तं बालरूपं महाप्रभुम् ।
आनन्दं लेभिरे सर्वा वर्धयामासुरक्षतैः ॥९५॥
पृथ्व्यां तदुत्सवस्तत्र सर्वत्राऽभून्महोज्ज्वलः ।
ख्यातः सर्वत्र भुवने ब्रह्माण्डेऽन्यासु सृष्टिषु ॥९६॥
अनन्तमस्तका लक्षमस्तकाः कोटिमस्तकाः ।
शतायुतसहस्रादिमस्तकाः परमेष्ठिनः ॥९७॥
विष्णवश्च तथा रुद्रास्तत्पत्न्यश्चापि कोटिशः ।
वीक्षणार्थं चाययुर्वै प्रभोः कुंकुमवापिकाम् ॥९८॥
कृत्वा ते दर्शनं प्राप्य चाशिषः सुखमाव्रजन् ।
अनादिश्रीकृष्णनारायणः श्रीभगवाँस्तदा ॥९९॥
परमाक्षरधामस्थं दर्शयामास वै जनान् ।
दिव्यरूपं परधामस्थितं द्विभुजमुत्तमम् ॥१००॥
कोटिकृष्णस्वरूपं च कोटिनारायणात्मकम् ।
कोटिवैराजरूपं च महाविष्णुसहस्रकम् ॥१०१॥
अनन्तशक्तिसामर्थ्यगुणजुष्टं मनोहरम् ।
द्विभुजं च किशोरं च दर्शयामास चेश्वरान् ॥१०२॥
राधे ! चैवं दिव्यरूपं प्रदर्श्य बालरूपताम् ।
पुनश्च दर्शयामास पुपूजुस्तं महेश्वराः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीपुरुषोत्तमनारायणस्य सर्वसृष्टिषु समूर्ततया वर्तमानता सौराष्ट्रे कुंकुमवापिकाक्षेत्रे कृपया प्राकट्यं चेत्यादिनिरूपणनामा तृतीयोऽध्यायः ॥ ३ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे कम्भराया गृहे तत्र महोत्सवः ।
सञ्जातः सुमहान् सौराष्ट्रस्थानां च गृहेषु च ॥ १ ॥
ज्ञात्वा ब्रह्माण्डपालाश्च दिक्पाला ईश्वरादयः ।
मानवाश्च सुरा देव्यो विमानैर्व्योममार्गतः ॥ २ ॥
दर्शनार्थं समायाताः सर्वे व्योमप्रचारिणः ।
आकाशं चाभवच्छन्नं विमानैर्दिव्यभास्वरैः ॥ ३ ॥
कम्भराया गृहे पुष्पवृष्टिश्चन्दनवर्षणम् ।
दिव्यधामगतानां चाऽक्षतानां वर्षणं ह्यभूत् ॥ ४ ॥
निपेतुश्च तदा व्योम्नो दिव्यकुंकुमबिन्दवः ।
जयशब्दा वाद्यशब्दा गीतयश्चाऽभवँश्च खे ॥ ५ ॥
यथाऽपरं च गोलोकं वैकुण्ठं चाऽपरं च वा ।
अव्याकृतं द्वितीयं वाऽक्षरं धामाऽपरं यथा ॥ ६ ॥
तथा कुंकुमवाप्याख्यं क्षेत्रं कामसमं ह्यभूत् ।
अवतारा ईश्वराश्च सुराः स्तवनमादधुः ॥ ७ ॥
उपदाश्च न्यधुर्नत्वा कृत्वा दर्शनमुत्तमम् ।
वयं यस्मात्समुत्पन्ना यदैश्वर्यप्रभोगिनः ॥ ८ ॥
यन्नियम्याः सर्वदा स्मो नमामस्तं परेश्वरम् ।
सत्स्वरूपं पररूपं सर्वधामसु वासिनम् ॥ ९ ॥
कृपया लोकरक्षायां धर्मवन्तं परात्परम् ।
बालं च कम्भरालक्ष्मीनन्दनं च नुमः प्रभुम् ॥१०॥
यस्यैश्वर्यविभूतीनां नैव पारो हि विद्यते ।
सत्वं संक्षिप्य सञ्जातः कृपया त्वां नुमः प्रभुम् ॥११॥
मोक्षदः सर्वलोकानां धामदः पुण्यशालिनाम् ।
स्वर्गदो रागयुक्तानां यस्तं नुमः पुमुत्तमम् ॥१२॥
दैत्ये देवे राक्षसे च मानवे च पिशाचके ।
नागे नगे मुनौ नार्यां तिर्यक्षु च द्रुमे तृणे ॥१३॥

समदृष्ट्या च चाण्डाले वर्तसे त्वं कृपावशः।
समानपितरं तं त्वां वन्दामहे नरोत्तमम् ॥१४॥
भावियुगेषु चान्यानि क्षेत्रतीर्थानि वै भुवि।
भविष्यन्ति तथाप्येतत्सदृशानि न तानि वै ॥१५॥
मत्स्याद्या अवताराश्च भविष्यन्ति ह्यतः परम्।
एतत्क्षेत्रं समासाद्य निवत्स्यन्ति तवाऽन्तिके ॥१६॥
यत्राऽऽस्से त्ववताराणां कारणं परमेश्वरः।
तत्क्षेत्रं सर्वधाम्नां च वन्द्यं सदा भविष्यति ॥१७॥
अन्याऽण्डेभ्यश्चाऽधिकं वै स्वस्तिमच्चाऽण्डकं त्विदम्।
यदत्र खण्डकेऽखण्डपूर्णप्रभुर्विराजसे ॥१८॥
तवाऽनुग्रहहीनोऽपि सम्राट् दीनतरो मतः।
तवाऽनुग्रहयुक्तस्तु हीनोऽपि भूभृतायते ॥१९॥
तव पत्कजहीना तु दिव्या भूरपि कल्मषा।
तव पत्कजयुक्ता तु कृष्णा भूरपि भास्वरा ॥२०॥
धन्येयं कम्भरालक्ष्मीर्धन्यो गोपालकृष्णकः।
धन्यः सुराष्ट्रको देशो धन्या कुंकुमवापिका ॥२१॥
अश्वपट्टसरो धन्यं धन्यास्ता वृक्षवल्लिकाः।
धन्या नराः स्त्रियश्चात्र ह्यपि कीटपतंगिकाः ॥२२॥
यासां येषां नित्ययोगोऽनादिकृष्णनरायणे।
जय स्वामिन् जय चाऽऽद्य जय देव नमोऽस्तु ते ॥२३॥
इति स्तुत्वा प्रभुं सर्वे राधिके! मौनमास्थिताः।
हसन् श्रीभगवाँस्ताँश्च देवान् देवीस्तथाऽपरान् ॥२४॥
वरं वृणुतेत्युवाच भगवान् करुणालयः।
वव्रुः सर्वे नमस्कृत्य जन्म कुंकुमवापिके ॥२५॥
क्षेत्रे देशे सुराष्ट्रे च यत्र तत्पादपङ्कजौ।
धामधामनिवासिन्यो देव्यो वव्रुस्तथा वरम् ॥२६॥
तव पार्श्वे निवसामो गृहीत्वा जन्म कन्यकाः।
कोट्योऽर्बुदानि तासां च सौराष्ट्रादौ प्रलेभिरे ॥२७॥
प्राकट्यं च तथा देवाः कुमाराद्यभवँस्तदा।
संकल्पमात्रजन्मानो गृहे गृहे च देवताः ॥२८॥
वृक्षा वल्ल्यश्च ताः सर्वा अनन्ता देव्य एव ताः।
गावो वृषास्तथा चान्ये करिणो वाजिनस्तथा ॥२९॥
मृगाश्च मेध्यपशवो दिव्यदेहास्तदाऽभवन्।
कल्पद्रुमाः कल्पलताः कल्पस्तम्बास्तदाऽभवन् ॥३०॥
चिन्तामणयः सततं कामदुघाश्च कोटिशः।
हंससारसमेनाकोकिलकीरमयूरकाः ॥३१॥
देवतास्तत्स्वरूपाश्चाऽभवन् कुंकुमवापिके।
यतयो मुनयश्चान्ये ऋतवः साधवोऽपरे ॥३२॥
बभूवुस्तत्र वृक्षादौ शकुनानि समन्ततः।
नद्यो नद्यश्च तीर्थानि वासं चक्रुस्तदन्तिके ॥३३॥
मूर्ताऽमूर्तानि तत्त्वानि कीटपतंगरूपिणः।
अश्वपट्टसरस्तीरे भूत्वा चक्रुर्निवासनम् ॥३४॥
गान्धर्वा गायिकाश्चान्या देव्यश्च नागकन्यकाः।
तत्र जले निवासं च दिव्यदेहा व्यधुर्मुदा ॥३५॥
स्वर्णस्थलं रत्नपूर्णं दिव्यतां प्राप तत्स्थलम्।
यानि रत्नानि चाब्धौ वै यानि स्वर्गादिके स्थले ॥३६॥
यानि मेर्वादिशैलेषु देवानां त्वाश्रमेष्वपि।
सिद्धानां सम्पदो याश्च भूमिपानां विभूतयः ॥३७॥
ताः सर्वाः कुंकुमवाप्यामागता हरिपादयोः।
रैवताचलतः पूर्वे शत्रुंजितायाः पश्चिमम् ॥३८॥
भद्रानद्या दक्षिणं च पञ्चाशत्क्रोशवर्तुलम्।
कुंकुमवापिकाक्षेत्रं परंधाम विराजते ॥३९॥
हरिस्तत्र बालभावैः राजते परमेश्वरः।
ब्रह्मा तत्र समायातस्तस्मै श्रीहरिणाऽर्पितम् ॥४०॥
परमेष्ठिपदं चाद्ये जन्मनो दिवसे स्वके।
विष्णवे लोकरक्षार्थं वैकुण्ठं च जलोपरि ॥४१॥
अर्पितश्च तथा श्वेतद्वीपो नारायणाय च।
क्षीरोदश्चार्पितस्तेन शेषनारायणाय च ॥४२॥
अर्यम्णे चार्पितं पितृराज्यं श्रीहरिणा तदा।
तेन सनत्कुमारायाऽर्पितं चार्षं पदोत्तमम् ॥४३॥
नारदाय तदा दत्तं देवर्षित्वं च मानसम्।
माहेन्द्रं च पदं दत्तमिन्द्राय दिवि राजसम् ॥४४॥
धर्मराजाय च याम्यं पदं तेन समर्पितम्।
कुबेराय धनाढ्यत्वं वारुणं वरुणाय च ॥४५॥
वायवे चाग्नये ईशानाय निर्ऋतये तथा।
दिक्पालत्वं प्रदत्तं च सूर्याय तैजसं स्थलम् ॥४६॥
सोमायौषधिनाथत्वं तथा नक्षत्रराजता।
मेरवे पर्वतराज्यं सरिद्राज्यं च सागरे ॥४७॥
तत्त्वानां परमं राज्यं तत्तत्तत्त्वेषु चाहितम्।
एवं तेन कृता लोके व्यवस्था परमात्मना ॥४८॥
रत्नसिंहासने स्थित्वा मुकुटान्यार्पयत् प्रभुः।
ते च सत्ताशासनानि गृहीत्वा हरिमार्चयन् ॥४९॥
जन्ममध्याह्नपूर्वं वै व्यवस्था लोकधारिणी।
अनादिश्रीकृष्णनारायणेन रचिता पुरा ॥५०॥
तदा जन्मनिमित्तानि राज्यनिमित्तकानि च।
पिता देवाः प्रददुश्च दानान्यसंख्यकानि च ॥५१॥

रुद्रः संहारकृद्धिष्ण्यं लब्ध्वा दानानि सन्ददौ ।
गोपालकृष्णो दानानि गवां लक्षायुतानि च ॥५२॥
रत्नानि स्वर्णपात्राणि मणीन् गृहाणि सन्ददौ ।
रम्याणि भवनानि श्रीमन्ति दाने ददौ हि सः ॥५३॥
यानानि स्वर्णवर्णानि सवितानानि सन्ददौ ।
व्योमयानानि दिव्यानि गजाश्वरथवन्ति च ॥५४॥
कन्यादानानि विप्रेभ्यो ददौ द्रव्याणि वै मुदा ।
भोजनानि विचित्राणि सुमृष्टानि घृतानि च ॥५५॥
शर्करा दिव्यवस्त्राणि विभूषा हीरकाञ्चिताः ।
शारीरसाधनलेपान् विष्णुतैलादिकान् ददौ ॥५६॥
ऊर्मिकाः कंकणान् दिव्यान् शय्यापर्यङ्कवल्कलान् ।
कलशान् स्थालिका कमण्डलूनास्तरणानि च ॥५७॥
पूजापात्राणि दिव्यानि पात्राण्यक्षयकानि च ।
वाहनानि वृषान् योग्यानन्नानां सञ्चयान् ददौ ॥५८॥
कल्पवृक्षान् कल्पकल्मान् कल्पवल्लीर्ददौ मुदा ।
चिन्तामणीन् दासदासीः सेवकान् किंकरान् ददौ ॥५९॥
स्वर्णपद्मानि चान्द्राणि पाषाणानि ज्वलन्ति च ।
प्रकाशकप्रदीपाँश्च स्वर्णपेटीश्चटीर्ददौ ॥६०॥
आसनानि स्वर्णरूप्यतन्तुजन्यानि सद्बृसीः ।
कटानि धौत्रकञ्चुकादीन्यसंख्यानि वै ददौ ॥६१॥
भक्ष्यभोज्यानि पेयानि चाऽमृतान्यक्षयाणि च ।
मण्डपान् सवितानाँश्च सुवर्णशकटीर्ददौ ॥६२॥
उष्ट्रानजानाविकाश्च घोटकान् गवयान् ददौ ।
जलयानानि सामुद्रान्तःसञ्चारीणि सन्ददौ ॥६३॥
गौमुखीर्जपमालाश्च मृगचर्माणि वै ददौ ।
आसनानि विचित्राणि कम्बलानि घटीर्ददौ ॥६४॥
कालवेधकयन्त्राणि विषहारमणीनपि ।
कायाकल्पकररसान् दंशावरणकानि च ॥६५॥
ध्रुववीक्षकयन्त्राणि वह्निकान्तमणीन् ददौ ।
महिषीश्चामरीगाश्च तदा कृष्णामृगान् ददौ ॥६६॥
उपस्कराणि सर्वाणि गृहयोग्यानि वै ददौ ।
यज्ञपात्राणि सर्वाणि विप्रेभ्यो ब्रह्म वै ददौ ॥६७॥
मोक्षपात्राणि दिव्यानि देवमूर्तीर्ददौ मुदा ।
तथा चाऽभयदानानि सन्तोषाँश्च ददौ तदा ॥६८॥
रम्ययज्ञोपवीतानि दूरदर्शकयन्त्रकान् ।
दूरश्रवणयन्त्राणि शीतहारमणीन् ददौ ॥६९॥
सूर्यकान्तानयस्कान्तानसंख्यान् वै ददौ तदा ।
चिन्तामणीन् भोग्यमणीन् संहारकृन्मणीन् ददौ ॥७०॥

पौष्पबाणान् विलासाँश्च फलपत्राणि गन्धकान् ।
वृष्टिवाहान् भूगदण्डान् चमत्कारद्रवान् ददौ ॥७१॥
दिव्यमन्त्रान् सिद्धभावान् कामरूपधरान् ददौ ।
कल्पजालचमत्कारान् ब्राह्मसंकल्पकान् ददौ ॥७२॥
उज्ज्वलाश्च शुभा विद्या शारदाः कन्यका ददौ ।
विप्रेभ्यो विप्रयोग्यानि ऋषियोग्यानि यानि च ॥७३॥
क्षत्रियेभ्यः क्षात्रधर्मपुष्टिदानि ददौ तदा ।
ध्वानयन्त्राणि च वायुयन्त्राणि गूटिकास्तथा ॥७४॥
वैश्ययोग्यानि च सर्वकरणानि तदा ददौ ।
सेवकानां च योग्यानि वर्गाणां नियतानि च ॥७५॥
यानि यानि यदिष्टानि तानि तानि तदा ददौ ।
अदेयं न तदा तस्य किञ्चिदासीन्महोत्सवे ॥७६॥
सिद्धिजं योगजं दिव्यं मानसोत्थं च तत्त्वजम् ।
भौतिकं मान्त्रिकं बौद्धं मन्त्रजं चात्मजं च वा ॥७७॥
यत् किञ्चिद् येन यच्चेष्टं वाञ्छितं वै तदा तदौ ।
मया दत्तं चाऽक्षयं वै यस्मादक्षयमेव तत् ॥७८॥
सर्वेषां लोकवासानां तन्तुश्चाऽक्षयतां व्रजेत् ।
इति मत्वा सम्पदां वर्धकं सम्पत्प्रदं ददौ ॥७९॥
कल्पपुत्तलिका रम्याः सर्वकामदुघा ददौ ।
कल्पाङ्गुलीयकान्यपि मणियुक्तानि वै ददौ ॥८०॥
एवं ह्यनादिश्रीकृष्णनारायणजनेर्दिने ।
दानान्यारात्रिं प्रददौ श्रीमद्गोपालकृष्णकः ॥८१॥
कम्भरा च महालक्ष्मीर्ददौ दानानि वै हृदा ।
शाटिकाः कंकतीश्चापि दर्पणानि च कञ्चुकीः ॥८२॥
घर्घरीश्चोलिकाश्चापि कुंकुमाऽलक्तकानि च ।
तैलानि च सुगन्धीनि कंकणानि च शृंखलाः ॥८३॥
योषिद्भ्यः कन्यकाभ्यश्च बालिकाभ्यश्च बंगिडीः ।
बलयानैरेयकाँश्च नत्थीश्चिबूकबिन्दिकाः ॥८४॥
चन्द्रकारशना हारानूर्मिका नूपुराणि च ।
कौशेयकानि वस्त्राणि सौभाग्यस्य द्रवाणि च ॥८५॥
भोजनानि विचित्राणि बालक्रीडनकानि च ।
बालासनानि दोलाश्च प्रेङ्खा हिन्दोलिकास्तथा ॥८६॥
घोटिकाः खट्विकाः पर्यङ्किकाश्च चमचानि च ।
मृदूनि बालवस्त्राणि कन्यावस्त्राणि सन्ददौ ॥८७॥
कलशान् गर्गरीश्चापि द्रोणान् हाण्डानि भाण्डकान् ।
पात्रान् दर्वीन् स्रुवान् स्थालीः पात्राणि विविधानि च ॥८८॥
किंकिणीजालसन्नद्धप्रकोष्ठभूषणानि च ।
हस्तिदन्तजरम्याभूषणानि सन्ददौ सती ॥८९॥

क्षेत्राणि वाटिका ग्रामानुद्यानानि वनानि च ।
सस्यान्युत्तमधान्यानि मृष्टान्नानि ददौ तदा ॥९०॥
सिन्दूरान् पत्रिकाः सूत्राण्यपि कानकचीपिटान् ।
स्वर्णहारान् मणिनद्धान् हीरकाञ्चितमालिकाः ॥९१॥
केयूरकाँश्च मुकुटान् चूलिका वेल्लणानि च ।
ताम्रपेटास्तालिकाश्च चामरव्यजनानि च ॥९२॥
कशिपुगेन्दुकगुप्तदोरकादीनि सन्ददौ ।
दुग्धं दधि घृतमाज्यं मिष्टं मिश्रं ददौ तदा ॥९३॥
पेयं स्वाद्यं च सम्मृज्यं सुगन्धद्रव्यमाददौ ।
पिष्टं शालीनक्षताँश्च जारिका बर्जरान् ददौ ॥९४॥
गोधूमान् मुद्गमाषाँश्च राजमाषादिकान् ददौ ।
यवान् व्रीहींश्चणकाँश्च कणान् कुलत्थिकान् ददौ ॥९५॥
गुडान् मधूनि च तिलान् मधुपर्कांस्तदा ददौ ।
सर्पिर्हैयंगवीनं च पायसानि तदा ददौ ॥९६॥
यद् यदासीत् स्मृतौ तत्र तत्तत् दानं तदा ददौ ।
देवा दैत्या ऋषयश्च मानवा विस्मयं ययुः ॥९७॥
ईश्वरा लोकपालाश्च दृष्ट्वा जग्मुश्च विस्मयम् ।
सुवर्णरसवल्लीश्च सन्धिन्याद्यौषधीर्ददौ ॥९८॥
गृहीत्वा दिव्यवल्लीश्च दिव्यबीजादिगूटिकाः ।
कामरूपप्रदाः सर्वा गूटिकाः प्राप्य योषितः ॥९९॥
मुमुदुश्चाप्यतीवाति ददुराशिष ईशिकाः ।
महोत्सवो महान् जातो भोज्यदानाऽभिनन्दनैः ॥१००॥
चतुर्दशानां लोकानां श्रीहरिं वीक्ष्य वासिनः ।
उपदाः सम्प्रदायैव गृहीत्वा च प्रतिग्रहान् ॥१०१॥
भुक्त्वा पीत्वा च संभूय तृप्तिमासाद्य शाश्वतीम् ।
नीत्वा प्राप्तं दानमानं सायं लोकान् ययुः स्वकान् ॥१०२॥
जन्मोत्तरं दर्शितं च नालच्छेदादिकं तदा ।
महामाया महापुंसः पत्नी स्वयं चकार ह ॥१०३॥
स्नानसंस्कारकान् शुद्धिं वह्निसेवनमित्यपि ।
देववल्लोकवत् सर्वं सूतिकागृहमान्तरम् ॥१०४॥
स्नानादिं योग्यमेवापि चकार जनकोऽपि च ।
भगवान् बालवज्जातः सुष्वाप योगनिद्रया ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने परमेश्वरस्य जन्मदिनेऽवतारा ईश्वरा लोकपालाः प्रजाः समागताः, विविधदानानि चेति-निरूपणनामा चतुर्थोऽध्यायः ॥ ४ ॥

श्रीकृष्ण उवाच—

शृणु राधे परेशस्य सेवां देवी तु मानसा ।
षष्ठीनाम्ना प्रसिद्धा या बालरक्षाकरी मता ॥ १ ॥
सा तु सन्निहिता नित्यं करोति दिव्यरूपिणी ।
राधिकासदृशी रूपे लक्ष्मीसदृशी पोषणे ॥ २ ॥
पार्वतीसदृशी प्रेम्णि रमासदृशी रामणे ।
कमलासदृशी स्पर्शे स्नेहे वै मातृसदृशी ॥ ३ ॥
चिकित्सायां धन्वन्तरिसमा सा सेवते हरिम् ।
बालभावेन च वर्तमानस्याऽशक्तकस्य च ॥ ४ ॥
असमर्थस्येव तस्याऽवनं भूतादितत्त्वतः ।
मूर्ताऽमूर्तात्मकाद् विघ्नाद् रक्षां करोति षष्ठिका ॥ ५ ॥
अविघ्नस्य कुतो विघ्नं तथाऽप्यनुकरोति सा ।
लोकरीतिं भगवत इच्छया मानसा सती ॥ ६ ॥
षष्ठ्यां षष्ठीपूजनं च कारयामास वाडवैः ।
रक्षां च कारयामास पिता वै लोमशर्षिणा ॥ ७ ॥
दानानि भोजनानां च स्वर्णानामपि दक्षिणाः ।
ददौ गोपालकृष्णश्च परकृष्णनिमित्तजाः ॥ ८ ॥
ग्रहाणां पूजनं देवपूजनं विप्रपूजनम् ।
मातृकापूजनं चापि कारयामास वाडवः ॥ ९ ॥
सौराष्ट्रीया वाडवाश्च भुक्त्वा चानन्ततृप्तिदम् ।
आशीर्भिर्योजयामासुर्बालं प्राप्य धनानि च ॥१०॥
उत्सवं चक्रिरे षष्ठ्यास्त्रयोदश्या दिने शुभे ।
रात्रौ देव्यो नर्तनं च चक्रुः श्रीकृष्णसन्निधौ ॥११॥
भगवान् दिव्यरूपश्च कैशोरं भावमास्थितः ।
नृत्यं सेवां गीतिकाद्या लोकयामास वै हसन् ॥१२॥
अथ रात्र्यां व्यतीतायां प्रातर्बालो बभूव सः ।
शयने मातुरेवाऽयं स्वपिति नित्यजागरः ॥१३॥
षष्ठी रक्षति कान्तं श्रीकृष्णनारायणं प्रभुम् ।
दिवसे दुग्धपानेनाऽतर्पयज्जननी सुतम् ॥१४॥
कृष्णचतुर्दशीरात्रौ स्वापयामास पार्श्वके ।
स्वर्णपर्यंकके चन्द्रोज्ज्वले दिव्यमनोहरे ॥१५॥
षष्ठी जागर्ति रक्षार्थं माता स्वपिति निद्रया ।
अथ रात्रौ समायाता दैत्याः पातालवासिनः ॥१६॥
कामरूपधरा नारीस्वरूपैः कन्यका यथा ।
देव्यो दिव्याश्च ता भूत्वा बालं रमयितुं ययुः ॥१७॥
जन्मोत्सवे समायातैः प्रतिगतैश्च दैत्यकैः ।
बोधिता भगवद्रूपं प्रति पातालगाश्च ये ॥१८॥

मन्त्रिता भययुक्तैस्ते निवेदिताश्च वै तदा ।
भो भो दैत्येश्वराः सर्वे वित्त पृथ्व्यां महाप्रभुः ॥१९॥
सर्वावतारहेतुश्च धाम्नां परे स्थितस्तु यः ।
जग्राह स च जन्मैव निवासार्थं सदा भुवि ॥२०॥
अस्मद्बलविनाशार्थं काले काले स वै हरिः ।
यतिष्यते धरिष्यति चावतारान् पुनः पुनः ॥२१॥
अस्मत्कुटुम्बनाशश्च तदंशेन भविष्यति ।
देवरक्षां दैत्यनाशं भूतलादौ करिष्यति ॥२२॥
स एव मूलहेतुश्च सर्वाऽऽविर्भावकारणम् ।
तद्विनाशे भवेन्नाशः सदा दैत्यविरोधिनाम् ॥२३॥
मूलनाशे कुतः शाखास्तस्मान्मूलं निकर्तयेत् ।
विद्यते बाल एवाऽयं तावन्निकृन्तनं भवेत् ॥२४॥
रोगः शत्रुरनलश्च हन्तव्या बालतः खलु ।
कृतमूला दुराधर्षास्त्रयो विनाशकारकाः ॥२५॥
अनादिश्रीकृष्णनारायणोऽस्मच्छत्रुकारणम् ।
शत्रवो नरस्त्ववतारास्तस्य पुंसः परात्मनः ॥२६॥
सर्वेषामवताराणां मूलं चायं परेश्वरः ।
प्रतिकल्पं भवत्येव रामकृष्णादिकारणम् ॥२७॥
अस्य नाशे रामकृष्णनृसिंहपर्शुरामकाः ।
हयग्रीवो वामनश्च वासुदेवादयस्तथा ॥२८॥
कदापि न भविष्यन्ति तस्माद्धन्तव्य एव सः ।
यद्यप्यमोघसामर्थ्यो हन्तव्योऽपि न हन्यते ॥२९॥
तथापि कृतयत्नानां फलं किञ्चिद् भवेच्छुभम् ।
मत्वैवं तं मारयितुं कर्तव्यो यत्नकस्तथा ॥३०॥
यथा शाखा न जायेत न नश्येद् दैत्यमण्डलम् ।
इत्येवं कृतसंकल्पाः कल्मषः कज्जलस्तथा ॥३१॥
कच्चरश्च मलश्चापि कर्दमः क्लेदनस्तथा ।
मेहनश्छिक्कनश्चापि क्षुवनः पर्दनस्तथा ॥३२॥
लालनो हंगनश्चापि ष्ठीवनो मेषनस्तथा ।
मर्दनो नोदनश्चैव कम्पनः स्फुर्जथुस्तथा ॥३३॥
खञ्जनः शोणघोणश्च कुदर्शश्च कुचेलकः ।
खातनासो दुर्गजंघोऽरण्यरोमा दरीश्रवाः ॥३४॥
गिर्यङ्गुष्ठोऽयुतहस्तो रसातलोदरस्तथा ।
एते चान्ये महादैत्या मन्त्रयित्वा परस्परम् ॥३५॥
यत्र पश्चात् स्थितोऽद्रिः रैवतस्तद्विवरेण ते ।
आययुः करशस्त्राश्च सोत्साहा युद्धदुर्मदाः ॥३६॥
कुंकुमवापिकाक्षेत्रे समया निर्भया इव ।
पातालयानयुक्ताश्च शस्त्रशरेन्द्रजालिनः ॥३७॥
मायामन्त्रदैत्यविद्याकृतसैन्यातिसंकुलाः ।
अश्वपट्टसरसस्ते पश्चिमेऽरण्यकेऽवसन् ॥३८॥
प्रच्छन्नाश्च समागत्य बालं घातयितुं मुहुः ।
पश्यन्ति स्म च छिद्राणि चतुर्दश्या निशाऽऽन्तरे ॥३९॥
कोकिलारूपमागृह्य केचिद् घूकस्वरूपिणः ।
गोमायूरूपमापन्नाश्चान्ये सारसरूपिणः ॥४०॥
कुररीरूपकाश्चान्ये परे मार्जाररूपिणः ।
सर्परूपास्तथाऽन्ये च घोरखननरूपिणः ॥४१॥
चित्रपर्णस्वरूपाश्च चिबरीरूपधारिणः ।
नकुलादिस्वरूपाश्च सरमारूपिणस्तथा ॥४२॥
कंसारिकागृहगोधादंशमशकरूपिणः ।
आययुस्तत्र भगवाननादिश्रीपुमुत्तमः ॥४३॥
सूतिकाया भवनाभ्यन्तरे प्रच्छन्नवर्तनाः ।
अनादिश्रीकृष्णनारायणो जानाति तानपि ॥४४॥
करोति बालवन्निद्रां षष्ठी जानाति तानपि ।
दंशमशकगोधाद्या मार्जारनागकुक्कुराः ॥४५॥
षष्ठ्या तत्रैव च हता रात्रौ नारायणेच्छया ।
मृतास्ते तु मृता एव मनसायाः पराक्रमात् ॥४६॥
घूककोकिलगोमायूसारसाद्यास्तु चाम्बरे ।
आगता ये हरिं हन्तुं तेऽपि षष्ठ्या प्रभारिताः ॥४७॥
अन्ये विलोक्य तान्नष्टान् रात्रावेव तु तच्छवान् ।
नीत्वा ययुस्तदारण्यं यत्र तेषां निवासनम् ॥४८॥
प्रातर्वै सूतिकागारे चिह्नानि रक्तजानि च ।
दृष्टानि तानि संशुद्धय दिने दीपोत्सवे प्रगे ॥४९॥
गोपालकृष्णकाद्याश्च शान्तिपाठानकारयत् ।
अथ ते दुःखमापन्ना मृतमित्रकुटुम्बिनः ॥५०॥
दीपोत्सवतिथेः रात्रौ समाजग्मुश्च शस्त्रिणः ।
प्रच्छन्नाः श्रीप्रभुं हन्तुमसमर्थास्तु वै रुषा ॥५१॥
निन्युर्देवीं मनसां तां षष्ठिकां निजघातिनीम् ।
सापि कान्तं महाकान्तं स्वामिनं श्रीपुमुत्तमम् ॥५२॥
जजाप हृदये तत्र नीयमाना महासुरैः ।
अथाऽस्या विदधे रक्षां तदात्मनि स्थितः प्रभुः ॥५३॥
महाकालाऽनलैश्चर्ये दाहकं भस्मकारकम् ।
षष्ठ्यां मुमोच भगवान् तेन दग्धाश्च तेऽभवन् ॥५४॥
तां देवीं ते समुत्सृज्य दूरं सर्वे पलायिताः ।
तदा देव्या स्वदेहाद्वै देवीसैन्यं प्रकाशितम् ॥५५॥
कन्यकानां तु लक्षाणां सैन्यं विमानगं तथा ।
हंसस्थानां लक्षसैन्यं व्याघ्रस्थानां तु कोटिकम् ॥५६॥

सिंहस्थानां चार्बुदं च शरभस्थं दशाऽयुतम् ।
शक्तितोमरपाशादिशस्त्रयन्त्रादिशोभितम् ॥५७॥
असुरान् हन्तुमेवैताः कुमार्यश्चण्डविक्रमाः ।
अक्षताऽङ्गास्तदा शस्त्रैर्दिव्याश्चक्रुः प्रयोधनम् ॥५८॥
ताभिस्तत्र महारण्ये दैत्येशा बहवो हताः ।
विवरे ते मृताः क्षिप्ता अथाऽन्ये दैत्यपुंगवाः ॥५९॥
मुखे तृणानि संगृह्य नेमुः षष्ठीं महासतीम् ।
शरणं ते प्रपन्ना वै ते तदा नैव घातिताः ॥६०॥
ते तु तत्र वने जग्मुर्नतकन्धरमानसाः ।
अथ देव्यः कोटिशस्ता मुहुस्तत्र प्रशंसिताः ॥६१॥
षष्ठ्या विजयकारिण्यो वरयोग्या हरिं प्रति ।
आनीता दर्शिताः सर्वा बालकृष्णाय वै तया ॥६२॥
स्वामिना श्रीकृष्णनारायणेन वरदानकम् ।
वृणुतेत्यभिसंप्रोक्ता वव्रुस्ताः सरसस्तटे ॥६३॥
वासं सेवां तथा मुक्तिं नाम तीर्थं तथा पतिम् ।
तथाऽस्त्विति हरिः प्राह ततस्ताश्च कुमारिकाः ॥६४॥
कुंकुमवापिकाक्षेत्रे चक्रुर्निवासमन्वहम् ।
तासां श्रीभगवान्नाम दीपावलीतिशोभनम् ॥६५॥
दिव्यतेजोमयरूपं चकार निजयोग्यकम् ।
कृत्वा तासां च रूपाणि द्वेधा दिव्यानि धामनि ॥६६॥
प्रेषयामास चान्यानि ररक्ष लोमशाऽऽश्रमे ।
लोमशर्षिर्हरिं प्राह नत्वाऽतिदयया मुनिः ॥६७॥
एता देव्यस्तव पत्न्यो भविष्यन्ति तवेच्छया ।
कुंकुमवापिकाक्षेत्रे तिष्ठन्तु ता मदाश्रमे ॥६८॥
लोमशस्याऽऽश्रमे तास्तु चक्रुर्वासं प्रहर्षिताः ।
दीपोत्सवं स्वर्गतुल्यं चक्रुस्तास्तत्र चाश्रमे ॥६९॥
अथोर्जशुक्लप्रथमे दिवसे प्रातरेव ह ।
चक्रुर्महोत्सवं तत्र नवान्नानां गृहे गृहे ॥७०॥
पक्वान्नानि विचित्राणि कृत्वा दिव्यस्वरूपिणे ।
अर्पयामासुरीशान्यो वाद्यं चक्रुश्च नर्तनम् ॥७१॥
प्रसादं भक्षयामासुश्चक्रुः रात्रौ महोत्सवम् ।
अनादिश्रीकृष्णनारायणमानर्चुरेव ताः ॥७२॥
रात्रौ सुप्तास्तदा सर्वे षष्ठी रक्षति बालकम् ।
अथ दैत्याः समायाताः पुनर्हन्तुं हरिं तदा ॥७३॥
षष्ठ्या विद्राविताः सर्वे पुनस्तत्र हरेर्बलात् ।
अथ ते सूतकं दैत्यं ययुर्नीत्वा निजाश्रयम् ॥७४॥

श्रीराधिकोवाच—

कोऽयं वै सूतको दैत्यो यश्चाऽवर्तत कुत्र च ।
किं जातं च ततः कृष्ण ! वद कौतुहलं हि मे ॥७५॥

श्रीकृष्ण उवाच—

सूतकोऽयं महादैत्यो राधिकेऽसुरवंशभूः ।
यथोत्पन्नः शृणु यत्र वसत्येषो वरात्तथा ॥७६॥
पुरा हिरण्यकूर्चस्य युद्धं संकर्षणेन तु ।
समं ह्यभूत् यदा तत्र कमलं ब्रह्मणो मुहुः ॥७७॥
अकम्पत धृतं तेनाऽसुरेण च तदा ह्यजः ।
कम्पमानोऽभवद् भीतो ब्रह्मणो हृदयात्तदा ॥७८॥
कम्पाख्यश्चाऽभवत् पुत्रो भयनामा द्वितीयकः ।
स्वेदनाम तृतीयश्च शोकनामा चतुर्थकः ॥७९॥
विह्वलाख्यः पञ्चमश्च हाहाकारस्तु षष्ठकः ।
निराश्रयः सप्तमश्च परायत्तस्तथाऽष्टमः ॥८०॥
त एते संपरिवृत्य ब्रह्माणं प्राहुरीश्वराः ।
कथं वयं समुत्पन्नाः पितस्त्वत्तोऽत्र वारिधौ ॥८१॥
वद नोऽत्र तु कर्तव्यं शीघ्रं कुर्मोऽत्र तत्तथा ।
ब्रह्मा प्राह तदा पुत्रान् ब्रह्मकूर्चं महासुरम् ॥८२॥
वल्गतैतद्विनाशार्थं धैर्यहीनो यतो भवेत् ।
इत्याज्ञप्तास्तदा पुत्रा द्रुतं गत्वा महासुरम् ॥८३॥
ववल्गुर्ब्रह्मकूर्चं तं तदा संकर्षणाद्धि सः ।
गदया मृत्युमापन्नस्तस्य देहमलानि तु ॥८४॥
निःसृतानीन्द्रियेभ्यश्च मारविह्वलतावशात् ।
वीर्यमेहनजस्तस्य जन्माख्यः समभून्नरः ॥८५॥
मूत्रमेहनजस्तस्य सूतकाख्योऽभवन्नरः ।
मलापसरणात्तस्य निधनाख्योऽभवन्नरः ॥८६॥
करुणाऽऽक्रन्दनात्तस्य गर्जनाख्यो जलेऽभवत् ।
पर्दनाच्च तदा तस्य दुर्गन्धाख्योऽभवन्नरः ॥८७॥
कुक्षेस्तस्याऽभवद्रक्तनामा पुत्रस्तदाऽशुभः ।
शवाख्यस्तु च मलिनः पूयाख्यश्च ततोऽभवत् ॥८८॥
अनिष्टा धातवश्चैतेऽसुरा बभूवुरुद्धताः ।
शुभास्तु धातवस्तस्य कनकान्यभवंस्तदा ॥८९॥
त एतेऽसुरतो जाताः कुमारा वै भयान्विताः ।
शरण्यं श्रीमहासंकर्षणं नेमुश्च तुष्टुवुः ॥९०॥
रक्ष रक्ष महावीर सर्वसंहारकृद्बलिन् ।
वयं त्वस्ते गदापुत्रा जीवदानं प्रदेहि नः ॥९१॥

तदा संकर्षणस्तांश्चाऽभयदानं समाददात् ।
वासस्थानं भोजनं चाऽर्थयद्भ्यस्तेभ्य उत्तमम् ॥९२॥
संकर्षणो ददौ जन्मनराय दिवसान् दश ।
या नारी सूयते तस्या गृहे तिष्ठतु सूतकः ॥९३॥
रक्तदुर्गन्धपूयेभ्यो ददौ वासाय सूतिकाम् ।
जन्मा च सूतको रक्तो दुर्गन्धो पूय एव ते ॥९४॥
सहवासा निवसन्ति सूतिकायां ततः सदा ।
दशाहोत्तरमेवैते यान्ति जालेन सागरम् ॥९५॥
एवं जन्मसूतकाद्या आसुराः सन्ति दुःखदाः ।
अयं सूतकनामाऽसौ कम्भराया गृहे तदा ॥९६॥
लोकरीत्या निवासं चाकरोद् दशदिनानि वै ।
अथाऽन्ये निधनाख्यश्च शवो मलिनकस्तथा ॥९७॥
आसँस्तदाऽर्थयामासुर्निवासं भोजनादिकम् ।
संकर्षणश्च तान् सर्वान् ददौ वै मृत्यवे तदा ॥९८॥
तदा च कालपुत्राय मृत्युर्यत्र च तत्र ते ।
निधनश्च शवो मृत्युर्मलिनः सूतकस्तथा ॥९९॥
एते तिष्ठन्ति तत्रैव यत्र कालनिदेशनम् ।
तदेते त्वासुराः सर्वे भयदा दुःखदास्तथा ॥१००॥
अथाऽन्ये ब्रह्मणः पुत्राः कम्पाद्यास्तेऽपि वै तदा ।
यत्र मृत्युः समायाति तत्र गत्वा पुरा हि ते ॥१०१॥
निवसन्ति शवे जाते निःसरन्ति ततः स्थलात् ।
एवमेते कथितास्ते सुता पञ्चत्वदायिनः ॥१०२॥
अथ श्राद्धाख्यपुरुषस्तत्राऽपि ब्रह्मणा कृतः ।
यत्र वै निधनं तस्य कुटुम्बे वासमाचरत् ॥१०३॥
निमिना स्वस्य पुत्रस्य आत्रेयस्य विनाशने ।
श्राद्धं पूर्वं कृतं श्राद्धस्ततो लोके स्थिरोऽभवत् ॥१०४॥
एवं राधे कथितस्ते सूतकाख्योऽसुरो ह्ययम् ।
वर्तते सूतिकासौधे भ्रातृभिश्च समन्वितः ॥१०५॥
तमेनं सूतकं कृष्णगृहे स्थितं तु दैत्यकाः ।
निन्युः शिबिरं नैजं च दशमे दिवसे बलात् ॥१०६॥
श्रीहरेस्ते विनाशार्थं मन्त्रयामासुरुग्रजाः ।
आज्ञां चक्रुः सूतकं ते शीघ्रमानय बालकम् ॥१०७॥
पातालं संप्रवेक्ष्यामो नीत्वा तं श्रीहरिं प्रभुम् ।
तत्रैव मारयिष्यामो घातयिष्याम आत्मतः ॥१०८॥
अन्यथा घातयिष्यामस्त्वामेव सूतकोत्तम ।
याहि शीघ्रं कुरु कार्यं रात्रौ बालं समानय ॥१०९॥
दैत्यानां तु च साहाय्यं त्वया कार्यं वृषस्तव ।
इत्युक्तः स सूतकश्च सूतिकागृहमागतः ॥११०॥
अर्धरात्रे व्यतीते च निद्रां यातः सखीजनः ।
षष्ठी चापि क्षणं तत्र योगनिद्रामवाप ह ॥१११॥
अनादिश्रीकृष्णनारायणस्वामीच्छया तु सः ।
सूतकः श्रीहरिं शय्यास्थानाज्जहार तामसे ॥११२॥
अन्धकारे निनायैनं शिबिरं दैत्यवासितम् ।
दैत्या जहृषुर्बहुधा चक्रुः किलकिलायितम् ॥११३॥
उत्थाप्य शिबिरं सर्वं ययुः पातालमाक्षणात् ।
मारयितुं च ते कृष्णनारायणं परेश्वरम् ॥११४॥
निन्युर्घातकशालां च तावद् यमाधिपस्य यः ।
श्रावणाख्यो महादूतः सर्वज्ञः सर्वगोऽतिद्दक् ॥११५॥
शेषनारायणायैतद् विज्ञापयितुमागतः ।
नाथनाथ जगन्नाथ जगदाधार केशव ॥११६॥
अनादिश्रीकृष्णनारायणो दैत्यैर्विहन्यते ।
पाताले बालको नीतो घातकीकुटिकां प्रति ॥११७॥
रक्ष रक्ष महाराज सर्वकारणकारणम् ।
एवं विज्ञापितो देवो क्षीरोदे शेषशायनः ॥११८॥
तूर्णं क्षणाच्च पाताले स चक्रबलवाहनः ।
समायातस्तदा दध्मौ शंखं तीव्रं प्रतापवान् ॥११९॥
ध्मायमानेन शंखेन कृतशब्दैस्तदा स्त्रियः ।
गर्भानमुञ्चन् दैत्यानां कर्णस्फोटास्तथाऽभवन् ॥१२०॥
नागाः सर्वे च शेषेण मिलिता रणगामिनः ।
दैत्यैर्युद्धं तदा कर्तुं निर्ययुर्धृतसाधनाः ॥१२१॥
दैत्या अपि तदा बालं त्यक्त्वा योद्धुं समागताः ।
सूतको रक्षति बालं बालभक्तो दयावशः ॥१२२॥
कृष्णनारायणस्याऽग्रे लक्ष्मीः सुदर्शनं तथा ।
गरुडो नन्दसुनन्दौ पार्षदा पार्वती प्रभा ॥१२३॥
राधा रमा च माणिक्या मञ्जू हंसा तथाऽपराः ।
सगुणा ललिता मुक्ता जया हैमी च देविका ॥१२४॥
दया चम्पा मौक्तिका च शान्तिः शान्ता मनुस्तथा ।
अन्याः सख्यस्तथा मुक्ताः श्रुत्वा शंखनिनादनम् ॥१२५॥
आययुस्तत्र पाताले यत्र कृष्णनरायणः ।
सूतको दीनवज्ज्ञातस्त्वपराधकरो यतः ॥१२६॥
किन्तु रक्षति संछन्नो यतो भक्तो हरेर्हि सः ।
प्रसह्य दैत्यभीतेस्तु नीतवान्न निजेच्छया ॥१२७॥
तेनाऽयं रक्षितस्तत्र पुमुत्तमेन लीलया ।
इच्छाऽप्येवं हरेरासीत् कस्तां वारयितुं क्षमाः ॥१२८॥
सूतकेन च पृष्टेन कथितं हरणं यथा ।
कृतं सुरक्षणं सर्वं लक्ष्म्याद्यास्तेन तोषिताः ॥१२९॥

धन्यवादं ददुस्तस्य कान्तं चांऽके दधुस्तदा ।
सेवयामासुरेवैनं रात्रौ क्षणान्तरे तदा ॥१३०॥
दैत्यानां शेषनाथेन युद्धं चाऽभूद्भयानकम् ।
चक्रेण भेदिता दैत्या अनुत्थानपुनर्भवाः ॥१३१॥
मृता ये ते गताः सर्वे त्वैन्द्रजालिकया सह ।
यमराजपुरं प्राप्ताः शेषाः सर्वे पलायिताः ॥१३२॥
सूतकश्च हरिं नीत्वा सहलक्ष्म्यादिभिर्ययौ ।
यत्र शेषप्रियो नाथो विष्णुर्नारायणः प्रभुः ॥१३३॥
ददौ नारायणाय श्रीविष्णवे बालकं प्रभुम् ।
शेषनाथो ययौ नत्वा क्षीरोदं च रमादिकाः ॥१३४॥
सूतकेन सह जग्मुः सूतिकाभूतलग्रहम् ।
तावत्प्रातः प्रसञ्जातं जगुश्च कृकवाकवः ॥१३५॥
निद्रां त्यक्त्वा च बुबुधुर्बालं हरिं तु निद्रितम् ।
बोधयामासुरेवैते मात्राद्याः परमेश्वरम् ॥१३६॥
नैव जानन्ति ते कृष्णचरित्रं रात्रिजं यतः ।
लक्ष्म्या निवेदितं सर्वं सूतकस्य च वर्तनम् ॥१३७॥
तदा शान्तिप्रपाठाँश्च कारयामास वै पिता ।
पुत्रं पुनर्नवं जातममन्यन्त कुटुम्बिनः ॥१३८॥
सूतकाय च भक्ताय दिने त्वेकादशे प्रगे ।
वरं ददौ हि भगवान् दिव्यां पूजां सुलप्स्यसे ॥१३९॥
एकादशे दिने त्वां वै लोका दिव्यविशेषकैः ।
स्नानपानसुभोज्याद्यैस्तोषयिष्यन्ति भावतः ॥१४०॥
दिव्यो मम कथाकारः सूतरूपो भविष्यसि ।
यत्राऽहं तत्र ते वासोऽन्यरूपेण भविष्यति ॥१४१॥
सर्वप्रजासु ते वासो भविष्यति न संशयः ।
विलयं यास्यति तेऽद्यदिनादासुरभावनम् ॥१४२॥
इत्युक्तः सोऽभवद् भक्तः सूतकोऽपि हरेर्वशः ।
सूततां च गतो गाथाः श्रावयन् मोक्षदोऽपि च ॥१४३॥
इत्येवं कथितो राधे चमत्कारो हरेर्यथा ।
दशमे दिवसे जातो नामकर्म वदामि ते ॥१४४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालरूपप्रभोः षष्ठीकृतरक्षणं, दैत्यैः कृतं पाताले सूतकपुरुषद्वाराऽपहरणं, सूतकाद्युत्पत्तिः, शेषनारायणकृतरक्षणं, सूतकस्य भक्तत्वं, सूतत्वं, चेति निरूपणनामा पञ्चमोऽध्यायः ॥ ५ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणस्य वै ।
प्राप्ते त्वेकादशे चाह्नि लोमशाद्या महर्षयः ॥ १ ॥
शीलव्रताः साधवश्च ब्रह्मविद्यापरा जनाः ।
पित्राऽऽहूता आययुस्ते कृष्णनारायणग्रहम् ॥ २ ॥
नामकरणसंस्कारं चक्रुस्ते तु विधानतः ।
आद्यं ग्रहार्चनं चक्रुर्देवतापूजनादिकम् ॥ ३ ॥
गणेशार्चनमीशादिपूजनं चक्रुरादरात् ।
मातृकापूजनं चार्षं पूजनं चक्रुरीश्वराः ॥ ४ ॥
ऊर्जाऽष्टम्यां कृष्णपक्षे मिथुने चन्द्रके स्थितौ ।
जन्माऽस्य तेन नामाऽस्य कृष्णनारायणेति हि ॥ ५ ॥
यस्य नाऽऽदिर्नचैवाऽन्तोऽनादिनारायणस्ततः ।
अवतारपतिः सोऽयमवतारी निगद्यते ॥ ६ ॥
सर्वदुःखहरश्चाऽयं हरिरित्यभिधीयते ।
दुःखानां कर्षणात् कृष्णो नरस्थत्वान्नरायणः ॥ ७ ॥
नारस्थोऽस्ति यतश्चाऽयं नारायणोऽपि गद्यते ।
अक्षराधिपतिश्चाऽयमक्षरातीत उच्यते ॥ ८ ॥
पुरुषेषूत्तमश्चायं पुरुषोत्तम उच्यते ।
पुंसामुत्तम एवाऽयं पुमुत्तमः सदोच्यते ॥ ९ ॥
बृहत्वाद् व्यापकत्वाच्च परत्वात् सर्वतस्तथा ।
परब्रह्मेत्यभिधानं कृष्णवल्लभते यतः ॥१०॥
श्रिया जुष्टः सदा तस्माच्छ्रीकृष्णवल्लभः स्वयम् ।
ईश्वराणामीश्वरोऽस्ति परमेश्वर उच्यते ॥११॥
मायानामीश्वरश्चायं धवो माधव उच्यते ।
सर्वात्मनामतं स्वामी स्वामिनारायणो यतः ॥१२॥
घनश्यामस्तथा छत्रशाल्याचार्योऽस्ति सर्वदा ।
जयारमाललितामाणिक्यालक्ष्मीपतिः प्रभुः ।
प्रभापारवतीमंजूहंसासगुणिकापतिः ॥१३॥
द्वादशोत्तरशतसुराज्ञीनां परमेशिता ।
अन्यासां कोट्यर्बुदानां पतिश्चायं भविष्यति ॥१४॥
अस्य हस्ते धनुर्मत्स्यो ध्वजः स्वस्तिर्विराजते ।
वज्रं शरस्त्रिशूलं च पादयोः शिखरादिकम् ॥१५॥
षोडशानां च चिह्नानां रेखाः सन्ति शुभाः स्फुटाः ।
ललाटे कानकी रेखा तिलकस्य विराजते ॥१६॥
नेत्रकोणेषु च रक्ता रेखाः सन्ति विमोहिकाः ।
आकर्णान्ते तथा नेत्रे चन्द्रकोट्याननोज्ज्वलः ॥१७॥
ओष्ठौ स्वभावतो रक्तौ कण्ठे तिलश्च वर्तते ।
वक्षसि चास्य रोम्णां च दक्षावर्तोऽपि वर्तते ॥१८॥
कानकी च शुभा लक्ष्मीरेखा मणिप्रलेखिका ।
असूत्रहारः सौवर्णो वर्तते हृदयेऽस्य च ॥१९॥
नखाश्चन्द्रसमाः सन्ति करपादतलानि तु ।
पद्मगर्भनिभान्येव चतुश्चक्राणि सन्ति च ॥२०॥

शंखचिह्नं स्वकं चास्य वर्तते शोभनं हरेः ।
सक्थिमूले क्षतचिह्नं वर्तते वामसंज्ञिते ॥२१॥
वामजान्वोपरि सक्थ्नि पाण्डुरश्चन्द्रमा अपि ।
वर्तते कोटिपत्नीनां स्वामित्वबोधको हि सः ॥२२॥
जघने नाभ्यधोभागे स्त्रीचिह्नं चास्य वर्तते ।
अर्धनारीश्वरश्चायं पतिपत्नीस्वरूपवान् ॥२३॥
आजानुलम्बभूजौ च वर्ततेऽस्य प्रभोस्तथा ।
घूटिकात्रयमस्तस्य प्रत्येके चरणेऽस्ति वै ॥२४॥
दक्षिणे सक्थिनि मध्ये रथचिह्नं हि वर्तते ।
गरुडस्तिष्ठति तत्र रेखयाऽतो नरायणः ॥२५॥
सहस्रभुजवान्नाऽयं भवत्येव परेश्वरः ।
लिंगे चास्योपरि चास्ते तिलः कृष्णो हि पार्श्वके ॥२६॥
वामे सक्थिमूलके च ततोऽसौ वीर्यवान् बहु ।
चत्वारश्चास्य वृषणा द्वौ पार्श्वे द्वावधःस्थितौ ॥२७॥
ततोऽसौ कोटिनारीणां तृप्तिदोऽस्खलितो बली ।
अस्योदरे तु नाभेर्वै ह्युपरि कुंभलेखिका ॥२८॥
विद्यते कुंभवद् रेखा प्राणायामनिरोधिका ।
ततोऽसौ योगिराट् नैकरूपधारी भवेदपि ॥२९॥
नेत्रेऽस्य चान्धकारेऽपि सूर्यवत्तु प्रकाशते ।
ततोऽसौ दिव्यदर्शी च वर्तते परमेश्वरः ॥३०॥
जिह्वाग्रं रक्तमस्याऽस्ति लिंगाग्रं रक्तमित्यपि ।
अंगुल्यग्राणि रक्तानि विद्यन्तेऽस्य स्वभावतः ॥३१॥
ततश्चाऽयं भवेद् राजाधिराजः परमेश्वरः ।
रोमाग्राणि स्वर्णवर्णसमानानि लघूनि च ॥३२॥
प्रकाशन्ते चान्धकारे विद्युल्लता यथा स्थिताः ।
ततोऽसौ परधामस्थो भगवान् पुरुषोत्तमः ॥३३॥
दन्तेष्वस्य च धावल्यं चमत्कृतिकरं तथा ।
कान्तिप्रदं च हास्यादौ दृश्यतेऽतो नरायणः ॥३४॥
पश्य गोपालकृष्णऽस्य बाह्वोर्मूले कराबुभौ ।
स्वर्णरेखामयौ दिव्यौ राजेतेऽतो नरायणः ॥३५॥
उज्ज्वला त्रिवली चास्य मध्यनाभौ प्रवर्तते ।
ललाटं चोन्नतं नेत्रे दीर्घे नासाग्रवक्रता ॥३६॥
विद्यते दन्तकलिकाः समानाः पूर्णसंख्यया ।
सुगन्धश्चास्य च पारिजातकुसुमवत् सदा ॥३७॥
मूर्तौ संवर्तते श्वासे कैसरो वास इत्यपि ।
स्वेदे शैत्यं च धावल्यं नैर्मल्यं च सुगन्धिता ॥३८॥
मेहनादावपि चास्य दौर्गन्ध्यं न मनागपि ।
औज्ज्वल्यं चान्तरे भागे कुक्षौ कुक्षौ च रक्तता ॥३९॥

श्यामता रोममध्येषु कृष्णता मूलकेषु च ।
वक्रता नाडिकाः श्यामा रक्ताः पिशंगिकास्तथा ॥४०॥
मर्माणि धवलान्यस्य रम्यता च मनोहरा ।
स्थलपद्मसमं चास्य सौकुमार्यं प्रविद्यते ॥४१॥
वाणी वेदमयी गीतिः स्वरा घोषाश्च शारदाः ।
सर्वज्ञाननिधिश्चायं परमात्मा परेश्वरः ॥४२॥
नामान्यस्य त्वनन्तानि गुणाश्चाऽसंख्यकास्तथा ।
ऐश्वर्याण्यप्यनन्तानि गणनारहितानि वै ॥४३॥
अनादिश्रीकृष्णनारायणोऽयं सर्वदा भुवि ।
ख्यातिमाप्स्यति ऋषिभिः संहिताभिश्च सर्वथा ॥४४॥
कथाभिर्बहुभिश्चापि पत्नीनां चार्बुदैस्तथा ।
अवतारैरनेकैश्च कार्यैश्चमत्कैरैस्तथा ॥४५॥
एवमुक्त्वा विरराम लोमशो मुनिसत्तमः ।
ऋषयोऽपि तदा चान्ये शुभाशीर्वादमाददुः ॥४६॥
कुमारिका अपि कान्तं सेवयामासुरुत्सुकाः ।
अथ नामानि च पिता श्रावयामास चाऽच्युतम् ॥४७॥
वाद्यानि वादयामासुर्गापयामासुरुत्तमाः ।
गीतिका नर्तयामासुर्नृत्यवेत्र्यः सतालिकाः ॥४८॥
वर्धयामासुराशीर्भिर्देव्यः सर्वभुवां तदा ।
रमयामासुरत्यर्थं कृष्णनाममहोत्सवे ॥४९॥
प्रजा जनाश्च भोज्यानि भोजयामासुरत्यति ।
ददौ दानानि च तदा श्रीमान् गोपालकृष्णकः ॥५०॥
पूजयामासुरीशाश्चाऽनादिकृष्णनरायणम् ।
उपायनानि च ददुः स्वर्गधामाऽभिजानि च ॥५१॥
एवं नामविधिं कृत्वा लोमशाद्या ययुर्गृहान् ।
देवाः सर्वे यथास्थानं ययुः प्रजाजना ययुः ॥५२॥
शृण्वत्र राधिके नाममहोत्सवेऽसुरो महान् ।
द्रष्टुं देवं समायातो व्याघ्रारण्यनिवासकृत् ॥५३॥
साणनामाऽसुरो गिरेर्गह्वरे कृतकेतनः ।
यत्र साणो वसत्येव गिरयोऽपि तदा च ते ॥५४॥
साणस्य गिरयश्चैवं ख्यातिमातास्तदाऽभवन् ।
साणोऽयं तु पुरोत्पन्नो हिरण्याण्डस्य मेहतः ॥५५॥
असुरस्य मृतेः काले संकर्षणसमीपतः ।
स च विलोक्य संहारकारणं कर्षणं बलम् ॥५६॥
तुष्टाव भयसम्पन्नः शरणं समियेष च ।
तदा संकर्षणस्तं तु जीवनं दानमाददौ ॥५७॥
साणः पृथ्वीं खण्डभूतां वियुक्तां च विलोक्य वै ।
तत्र वासं तदा कर्तुं चाययौ समरण्यकम् ॥५८॥

अरण्यं चायतं वृक्षान् निबिडान् शतयोजनम् ।
वीक्ष्य तत्र शतक्रोशक्षितौ पर्वतकोच्छ्रयान् ॥५९॥
साणश्चकार वसतिं चासुरस्तत्र निर्भयः ।
स च तत्र समायातो नामसंस्कारके दिने ॥६०॥
यत्राऽनादिः प्रभुः कृष्णनारायणो गृहेऽस्ति वै ।
साणो विप्रस्वरूपेण चागत्य प्राप्य भोजनम् ॥६१॥
दक्षिणां विविधां नीत्वा ययौ साणाद्रिगह्वरम् ।
द्वादशे दिवसे तस्य मतिर्जाताऽतितामसी ॥६२॥
सस्मार पितृवैरं च मारकं बालकं च तम् ।
संकर्षणात्मकं नारायणं निश्चित्य माधवम् ॥६३॥
अस्त्रशस्त्राणि नीत्वैव सन्नद्धश्चागतोऽसुरः ।
कृष्णं नाशयितुं राधे वैरिणं बालरूपिणम् ॥६४॥
दिवा विप्रो हि स भूत्वाऽतिथिरूपेण वर्तते ।
मार्गयन् हर्तुमेवैनं छिद्रं दिने न लब्धवान् ॥६५॥
षष्ठीकन्याः कुमार्यस्ताः संभूय कान्तमच्युतम् ।
रामयन्ति रमयन्ति रमन्ते स्माऽविरामतः ॥६६॥
रात्रौ तास्तं विहायैव लोमशस्याऽऽश्रमं ययुः ।
तदा छिद्रं परं प्राप्य व्याघ्ररूपधरोऽसुरः ॥६७॥
रात्र्यर्धे विगते बालं भक्षितुं क्रूररूपवान् ।
क्रूरकर्मा क्रूरनेत्रः क्रूरारावोऽभवत्क्षणम् ॥६८॥
सूतिकागृहमागत्य गर्जनां प्रचकार ह ।
चकाराऽन्या गर्जनाश्च वनं कम्पयुतं तदा ॥६९॥
भूः सर्वा कम्पिता लोकास्त्रासं ययुश्च विह्वलाः ।
माता च विह्वला त्रस्ता पिता भीतिं जगाम ह ॥७०॥
जना व्याघ्रभयात्तत्र निलिल्युश्च गृहेष्वपि ।
हाहाव्याक्रोश एवाऽऽसीत् कृष्णशय्यास्थले तदा ॥७१॥
अहो व्याघ्रो वनाद् यातो मृत्युरूपोऽर्भकस्य वै ।
रक्षन्तु देवता देवं देव्यश्चेति जगुर्जनाः ॥७२॥
अनादिश्रीकृष्णनारायणं रक्षन्तु रक्षकाः ।
इति माताऽवदत्तत्र साक्रोशं वै मुहुर्मुहुः ॥७३॥
व्याघ्रस्तावत्समुत्प्लुत्य सूतिकाशयनं ददौ ।
बालं करेण जिघृक्षुर्यावद् यतते श्वापदः ॥७४॥
तावत् कृष्णोऽभवत्तत्र किशोरः ससुदर्शनः ।
माता मूर्छां गता वीक्ष्य मत्वा व्याघ्रहृतं सुतम् ॥७५॥
सुदर्शनं परं चक्रं कृष्णनारायणेन वै ।
अङ्गुलिमध्यतो मुक्तं वह्निव्याप्तं महोज्ज्वलम् ॥७६॥
भ्रमत्सहस्रारयुक्तं शतसूर्यातिशायि तत् ।
तदा चोग्रमभूद् व्यग्रं यावद् व्याघ्रं जिघांसति ॥७७॥
तावन्मृत्युभयाद् व्याघ्रः समुत्प्लुत्य गृहाद् बहिः ।
विनिपत्य प्रदुद्रावाऽरण्यं जीवितुमुत्सुकः ॥७८॥
चक्रं पृष्ठे तस्य लग्नं तं ददाह पुनः पुनः ।
क्वचित्क्वचित् पृष्ठदेशं स्पृष्ट्वा चकर्त भागतः ॥७९॥
व्याघ्रो निहन्यमानोऽसौ प्लवते स्माति वेगतः ।
आक्रोशति स्म दीनार्तो वाचा भीभृतया तदा ॥८०॥
क्रोशमात्रं गतो यावद् दक्षिणां दिशमेव सः ।
सुदर्शनेन निहतः साणः सव्याघ्रदेहभृत् ॥८१॥
व्याघ्रहणं च तत्तीर्थं सुदर्शनकृतं स्थलम् ।
प्रख्यातं कुंकुमवाप्या दक्षिणेऽश्वसरोवरात् ॥८२॥
साणो नष्टो योजनोच्छ्रं शरीरं प्राज्वलत्तदा ।
सुदर्शनाग्निना भस्म जातं पुण्येन तेन वै ॥८३॥
साणात्मा तद्विनिर्गत्य भूत्वा चतुर्भुजस्तदा ।
दिव्यो वै पार्षदो भक्तो धौतात्मा पापवर्जितः ॥८४॥
अनादिश्रीकृष्णनारायणेतिमुखतो वदन् ।
सुदर्शनस्य वशगोऽनादिकृष्णं प्रति द्रुतम् ॥८५॥
व्योम्ना समाजगामाथ प्रभौ विलीनतां गतः ।
अथाऽक्षरस्य मुक्तास्तं नेतुं विमानसंस्थिताः ॥८६॥
आययुः श्रीहरेः क्षेत्रे तदाऽयं कृष्णमूर्तितः ।
विनिर्गत्य ययौ धामाऽक्षरं साणस्तु शाश्वतम् ॥८७॥
सुदर्शनं तदा शान्तं कृष्णाङ्गुलौ लयं गतम् ।
अनादिश्रीकृष्णनारायणोऽपि निद्रितः सुखम् ॥८८॥
अन्ये मात्रादयो योगनिद्रां कृत्वा प्रगे तदा ।
विघ्नशान्तिक्रियां चक्रुर्लोमशाद्या अपीश्वराः ॥८९॥
व्याघ्रासुरो हतश्चेति श्रुत्वा निश्चिक्युरीश्वरम् ।
साधारणा जना बालं देवाश्चक्रुः प्रपूजनम् ॥९०॥
श्रुत्वा च कन्यकाः सर्वा रुरुदुर्विघ्नमुल्बणम् ।
रक्षणं च बलं श्रुत्वा जहृषुश्चागताः पुरः ॥९१॥
दर्शनं च समाचक्रुः कान्तस्याऽतीव भावतः ।
शुभाशिषः प्रददुश्च मेनिरे नवमागतम् ॥९२॥
पिता विघ्नस्य शान्त्यर्थं होमं जपं चकार ह ।
साध्वादींस्तर्पयामास भोज्यान्नपानसद्धनैः ॥९३॥
वस्त्रभूषादिदानानि कन्यकाभ्यो ददौ सती ।
गोभ्यो ददौ च घासानि मिष्टान्नान्यपि भूरिशः ॥९४॥
पिपीलिकादिसूक्ष्मेभ्यः पिष्टकणादिकं ददौ ।
एवं शान्तिं कारयित्वा रमयामास माधवम् ॥९५॥
माता पिता तथा चान्यवर्गः कुमारिकागणः ।
इत्येतत् कथितं राधे बालकृष्णपराक्रमम् ॥९६॥

पठनाच्छ्रवणाच्चापि मोक्षदं स्वर्गदं परम् ।
पुत्रदं धनदं समृद्धिप्रदं रोगविनाशकम् ॥९७॥
शोकविघ्नहरं रम्यं रक्षाकरसुखावहम् ।
नारीणां शोकहरणं शुभं सौभाग्यवर्धनम् ॥९८॥
अवैधव्यकरं कृष्णचरित्रं पावनोत्तमम् ।
श्रोतव्यं सततं चैतदैश्वर्यार्थिभिरादरात् ॥९९॥
षण्मासाभ्यन्तरे श्रोतुरुपतिष्ठन्ति सिद्धयः ।
अणिमाद्या दिव्यगुणा दिव्याः समृद्धयस्तथा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने परमेश्वरस्य नामकरणसंस्कारविधिः, साणाऽसुरस्य व्याघ्ररूपधरस्य हरिं हन्तुमिच्छतश्चक्रेण विनाशनं शान्तिकरणं चेत्यादिनिरूपणनामा षष्ठोऽध्यायः ॥ ६ ॥

श्रीकृष्ण उवाच—

श्रूयतां च त्वया राधे कृष्णकान्तस्य चाद्भुतम् ।
चमत्कारं द्वादशेऽह्नि प्रेंखायां यो व्यजायत ॥ १ ॥
गोपालकृष्णको देवो नामकरणके दिने ।
पुत्रस्यार्थे शुभां दोलां कारयामास चन्दनैः ॥ २ ॥
मृदुलां शायनीं शय्यां क्लृप्तयामास तत्र च ।
सद्रत्नसारमौक्तिकहीरकादिसमञ्चिताम् ॥ ३ ॥
स्वर्णदर्पणशोभाढ्यां धामचित्राण्यलंकृताम् ।
स्वर्णमयूरकीराद्यैः शोभितां सुचतुष्पदाम् ॥ ४ ॥
चतुर्गारुडमूर्तिस्थां चतुर्हंसमुखेषु च ।
हीरसूत्रालम्बितां च मौक्तिकदण्डिकाश्रिताम् ॥ ५ ॥
सुखस्पर्शकुसुमानां दिव्यवल्लीचतुष्टयाम् ।
पीयूषकिरणस्राविमध्यवितानछत्रिताम् ॥ ६ ॥
नैसर्गाऽनिलयोगेन वेणुगीतिमनोहराम् ।
विनैवाकर्षणं बालेच्छया रक्षितसञ्चराम् ॥ ७ ॥
क्वचिद्व्योम्नि क्वचिद्भूमौ क्वचिन्निम्नां क्षितिस्पृशाम् ।
क्वचिदूर्ध्वां च धवलां क्वचित्सुवर्णरूपिणीम् ॥ ८ ॥
क्वचिदान्दोलनं याति क्वचित् स्वभावतः स्थिरा ।
कामावसायितायुक्तां प्रातिसिद्धिसमन्विताम् ॥ ९ ॥
एवंविधां शुभां दोलामुपस्करविलासिताम् ।
विश्वकर्माणमाहूय कारयामास वै पिता ॥१०॥
नामविधानदिवसे क्षणे श्रेष्ठे हरिं सुतम् ।
प्रेंखामारोहयन्याता पुत्रं प्राक्शिरसं प्रभुम् ॥११॥
शोभितायां तु दोलायामस्वापयत्पुमुत्तमम् ।
अथ दोला नूतनाश्च देवा नीत्वा समाययुः ॥१२॥
अनादिश्रीकृष्णनारायणस्य शयनाय वै ।
राधे ययिथ तत्र त्वं प्रेंखां गोलोकजां पराम् ॥१३॥
दिव्यां नीत्वा महामूल्यां विमानवरशोभिताम् ।
लक्ष्मीस्तत्राऽऽजगामाऽपि प्रेंखां वैकुण्ठजां शुभाम् ॥१४॥
दिव्यां विभूतितत्त्वाढ्यां व्योममार्गस्थिरां पराम् ।
अक्षरस्य तथा पत्न्यः प्रेंखां परमशोभनाम् ॥१५॥
दिव्यसिंहासनाकारां समादाय ददुस्तदा ।
ईश्वर्यश्च महाविष्णुवैराजपत्निकास्तथा ॥१६॥
ब्रह्मविष्णुमहेशानां पत्न्यो वै दिव्यशोभनाः ।
प्रेंखा ददुर्हि विविधा बालकृष्णाय ताः स्त्रियः ॥१७॥
चतुष्कोणा वर्तुलाश्च कमलाकारनिर्मिताः ।
मत्स्याकाराः कूर्माकाराः शंखाकारास्तथा शुभाः ॥१८॥
हस्त्याकारा घोटिकाश्च पर्यंकिकाश्च खट्विकाः ।
दोलाकाराश्चैकस्तम्भा द्विस्तम्भा बहुपादिकाः ॥१९॥
चक्राधाराः पदाधारा दारवीः स्वर्णनिर्मिताः ।
राजतीस्तैजसीश्चापि चान्द्रीर्माणिक्यमौक्तिकीः ॥२०॥
शची तत्र समायाता चैकशृंखलयाऽन्विताम् ।
ध्रुवाकर्षणकाधाराऽन्तरीक्षस्थायिनीं शुभाम् ॥२१॥
आन्दोलनिकां नीत्वैव वज्रसारमयीं पराम् ।
ददौ च कम्भरादेव्यै पारिजातसुगन्धिनीम् ॥२२॥
अमृतस्राविणीं भद्रां विमानवद् विहारिणीम् ।
तारा च रोहिणी मेना सिद्धिर्वसुन्धरा सती ॥२३॥
विविधाश्चानयामासुः प्रेंखाः कृष्णमनोहराः ।
दिव्यद्रव्यसमोपेता दिव्यसंकल्पजास्तथा ॥२४॥
यत्रैकैके प्रदेशे वै स्वर्गं वैकुण्ठमित्यपि ।
गोलोकं चाक्षरं धाम दृश्यते भूमिमण्डलम् ॥२५॥
यत्रैकैकमणौ तत्र ससागरवनान्विता ।
क्षितिः सन्दृश्यते तत्र मेर्वाद्याः पर्वतास्तथा ॥२६॥
क्वचिन्मणौ तदा सूर्यः क्वचिन्मणौ सुधाकरः ।
क्वचिद् विभावसुर्भाति क्वचिद् विलोक्यते दिवम् ॥२७॥
क्वचिद् विलोक्यते सत्यलोको ब्रह्मसभा तथा ।
कुत्रचित्तु मणौ तत्राऽऽलोक्यते गोपिकागणः ॥२८॥
कुत्रचिद् दृश्यते तत्र विशालं रासमण्डलम् ।
कुत्रचिच्च मणौ विलोक्यते सागरसप्तकम् ॥२९॥
अरण्यानि विलोक्यन्ते मण्यन्तरे तथा परे ।
मणौ चालोक्यते शुभ्रं नन्दनं च वनं महत् ॥३०॥

पातालानि विलोक्यन्ते चान्येषु मणिषु प्रिये।
कुत्रचित् क्षीरवार्धिश्च कुत्रचिन्नागमण्डलम् ॥३१॥
विमानानि विलोक्यन्ते सर्वं देवगृहादिकम्।
कुत्रचिद् दृश्यते द्वादशाधिकं शतमुत्तमम् ॥३२॥
परधामस्थपत्नीनां निजसेवापरायणम्।
सप्तर्षिमण्डलं ध्रुवमण्डलं च ग्रहादिकम् ॥३३॥
आश्चर्याणि विलोक्यन्ते हीरकेषु तु केषुचित्।
उद्यानानि विलोक्यन्ते केषुचिद् विमलानि वै ॥३४॥
इत्येवं दिव्यतायुक्तप्रेंखाश्चादाय योषितः।
समायाता ददुस्ताश्च बालकृष्णार्थमेव ताः ॥३५॥
चारण्यश्चापि गान्धर्व्यः किन्नर्यश्चापि कन्यकाः।
नृत्यगीतिपराः कृष्णप्रेङ्खादानार्थमाययुः ॥३६॥
कम्भरायै ददुस्ताश्च गोप्यो ददुश्च खट्विकाः।
मानव्योऽपि ददुस्तस्यै समान्दोलनघोटिकाः ॥३७॥
हीररश्मिसमायुक्ताः किंकिणीजालराविताः।
वाद्यमिष्टस्वरश्रावाः वस्त्रग्रन्थनकारिताः ॥३८॥
एवमासाद्य सा माता प्रसन्नाऽति बभूव ह।
कृष्णस्तासु च सर्वासु युगपत्कृतकेतनः ॥३९॥
यावत्संख्याश्च ता दोलास्तावद्रूपधरो हरिः।
बालरूपः स्वयमान्दोलनं चक्रे हसन् मुहुः ॥४०॥
दृष्ट्वा चैनं चमत्कारं महाश्चर्यप्लुताः स्त्रियः।
कृष्णं कान्तं हृदि कृत्वा दध्यू रूपं पतिं प्रभुम् ॥४१॥
अक्षराधिपतिः श्रीमाननादिर्भगवानयम्।
सर्वासां कामनापूर्णकरः का चित्रताऽत्र वै ॥४२॥
तदा तं परमब्रह्म दृष्ट्वा तेजस्विनं हरिम्।
प्रेमपूर्णहृदयास्ताः स्वस्वपालनगं प्रभुम् ॥४३॥
आन्दोलयित्वा गृह्णन्ति यावद् रामयितुं हरिम्।
तावद् दोलानद्धमणिष्वनेकरूपतां गतः ॥४४॥
प्रत्येकायां च दोलायां बहुरूपमयं प्रभुम्।
विलोक्य यावद् गृह्णाति प्रतिबिम्बं च तद् भवेत् ॥४५॥
नैव हस्तगतः कृष्णो भवत्याश्चर्यकारकः।
तदा निवृत्तिमापन्ना जडेव तिष्ठति प्रिया ॥४६॥
एवं सर्वासु दोलासु बहुरूपं हरिं च ताः।
अगृह्णन्त्योऽभवन्मुग्धाः कथं कृष्णो न लभ्यते ॥४७॥
तदा तु ललिता लक्ष्मीः प्रभा पारवती जया।
माणिक्या नित्ययोगिन्यस्तासां प्रत्ययहेतवे ॥४८॥
सर्वाभ्यः प्राह शृणुत भगिन्यः सत्यमाधवम्।
ग्रहीतुं चेच्छथ यदि वदामः प्रत्ययं हरेः ॥४९॥

तस्य दक्षे करे सन्ति मीनशूलधनुर्ध्वजाः।
बिम्बे दक्षकरे ते स्युः प्रतिबिम्बे तु वामके ॥५०॥
सचिह्नं वामहस्तं मा स्पृशत प्रतिबिम्बकम्।
सचिह्नदक्षहस्तं तं गृह्णत श्रीहरिम् ऋतम् ॥५१॥
इत्युक्तास्तास्तथा धृत्वा समुत्तोल्य परेश्वरम्।
हसन्ति हासयन्ति श्रीकान्तं कट्यां निधाय च ॥५२॥
चूम्बयित्वा प्रभुं कृष्णं बालं कान्तं पुनः पुनः।
करतलयोर्दोलावत् कृत्वा त्वान्दोलनं मुहुः ॥५३॥
उत्क्षेपयित्वा गृह्णन्ति रामयन्ति स्म तत्पराः।
एवमानन्दमासाद्य चक्रुर्दोलागतं हरिम् ॥५४॥
तावद्रूपाणि संहृत्य त्वेकरूपोऽभवत्प्रभुः।
रिक्ता दोलाश्च या जातास्ताश्च ताभ्यः प्रसादजाः ॥५५॥
कम्भराश्रीर्ददौ सर्वाः प्रत्यर्पणविधानतः।
एका प्रेंखाऽक्षररूपा गोपालकृष्णकारिता ॥५६॥
बालयुक्ता शिष्यते स्म चान्दनी दारवी शुभा।
तास्तु प्रसादरूपाश्च दिव्याः प्रेंखाः सुपावनीः ॥५७॥
गृहीत्वा कन्यका देव्य ईशान्यो हर्षमागताः।
अथैका तलदैत्यस्य सिंहारण्यनिवासिनः ॥५८॥
पुत्री कन्या तलजाख्या तलपर्वतवासिनी।
आगता चोत्सवं श्रुत्वा कृत्वा रूपद्वयं तदा ॥५९॥
एका सा कन्यकारूपा यथेन्द्रस्य कुमारिका।
सर्वावयवशोभाढ्या दिव्यरूपविलासिनी ॥६०॥
सर्वभूषणसंशोभत्स्वर्णवस्त्रादिधारिणी।
दिव्यहस्तिसमारूढा दिव्याम्बालिकसंस्थिता ॥६१॥
द्वितीयं चाकरोद् रूपं दोलाख्यं बहुहीरकम्।
बहुचित्रसमायुक्तं बहुरत्नसुमौक्तिकम् ॥६२॥
असंख्यमालिकाहारशकुन्तव्रातशोभितम्।
अन्तरीक्षगतौ दीपौ विद्येते चोर्ध्वयायिनौ ॥६३॥
तदाधारा च सा प्रेंखा निराधाराऽन्तरीक्षगा।
दीपोष्मकृतसञ्चारा दिव्यकौशेयगेन्दुका ॥६४॥
एवंविधा च कमलपुष्पाकारा सुवर्तुला।
मध्यक्लृप्तसुशयना कोमला क्षीरवर्णगा ॥६५॥
तलजयाऽवतीर्यैव हस्तितो भूतलं प्रति।
व्योमचारा तु सा दोला शनैश्च करचेष्टया ॥६६॥
अप्यवतारिता भूमौ तथापि सा तदाऽम्बरे।
हस्तमात्रे भुवस्तूर्ध्वे स्थिराऽभवन्न भूगता ॥६
एवंविधां शुभां दोलां दृष्ट्वा देवस्त्रियस्तद
मुमुहुश्च जहृषुश्च प्रशशंसुः पुनः पु

तलाजा तु हरिं कृत्वा कुंकुमाऽक्षतपूजितम् ।
अर्पयामास दोलायां कम्भरासन्निधौ स्थिता ॥६९॥
हरिं च चान्दनीदोलासुतं धृत्वा शनैः शनैः ।
स्वदोलायां धृतवती मनोमालिन्यसंभृता ॥७०॥
तलेन प्रेषिता शत्रुं कृष्णं मारयितुं तथा ।
तादृग्रूपधरा दुष्टा प्रेंखास्थं बालकं शनैः ॥७१॥
उत्तोल्य व्योममार्गेण शीघ्रं दुद्राव चाम्बरे ।
अष्टयोजनदूरं सा गताऽरण्यं निजाश्रमम् ॥७२॥
हरिणैषा च विदिता हन्तुमिच्छावती तदा ।
तलाजाया गह्वरे स प्रभुश्चतुर्भुजोऽभवत् ॥७३॥
द्वितीयं बालरूपं च कुंकुमवापिकागताम् ।
आश्रित्य चान्दनीं दोलां वर्तते चेत्यदर्शयत् ॥७४॥
तत्र देव्यो रामयन्ति दोलायां परमेश्वरम् ।
यतो नाऽसां भवेच्छोकः प्रेंखोत्सवे तथाऽकरोत् ॥७५॥
शंखचक्रगदापद्मधरोऽपि बालरूपवान् ।
अत्युज्ज्वलः स भगवान् हासयामास राक्षसीम् ॥७६॥
हास्यैर्विविधैश्चेष्टाभिर्बालकम्पनकैस्तदा ।
चन्द्रतुल्यं हरिं दृष्ट्वा सा तु मुमोह राक्षसीम् ॥७७॥
मारयितुं मयाऽऽनीतो बालोऽयं कोमलांगकः ।
कथमेनं मारयामि रामयितुं सुयोग्यकम् ॥७८॥
न चायं मारयितव्यो रामयितव्य एव ह ।
वृद्धिं गतो मम स्वामी भविष्यति युवा दृढः ॥७९॥
इति सा चिन्तयित्वैव गह्वरे शयने शुभे ।
फलैः सुमधुभिश्चैनं रसैर्दुग्धादिभिः सदा ॥८०॥
पोषयति स्म तत्रैव रक्षति स्माति नित्यदा ।
बालोऽपि चेष्टते नित्यं यथा सा रञ्जिता भवेत् ॥८१॥
कृष्णपतित्वसंकल्पः पुण्यं तस्यास्तदाऽभवत् ।
तेन शुद्धां निजभक्तां मत्वा कृष्णनरायणः ॥८२॥
पापिन्याः सेवया पापध्वंसं चकार माधवः ।
सेवां जग्राह सततं प्रेमदुग्धं पपौ मुहुः ॥८३॥
एवं दिनाष्टकं यातं तलः प्रतीक्षते सुताम् ।
अनायातां तदाऽरण्ये तलस्याऽऽश्रममित्यतः ॥८४॥
ज्ञातवान् स मृता सेति यद्वा कृष्णगृहे स्थिता ।
यद्वाऽन्येन बलिष्ठेन धर्षिता च हृता च वा ॥८५॥
मार्गयामीति कृत्वैवाऽऽश्रमं त्यक्त्वा वनं वनम् ।
वृक्षं शृंगं तलं चाद्रिं पश्यन् याति यदा तदा ॥८६॥
दृष्टवान् पादविन्यासान् गह्वरस्य मुखे स्त्रियाः ।
आह्वयामास तां नाम्ना सा श्रुत्वा भयमागता ॥८७॥
मारणार्थं मयाऽऽनीतो रक्ष्यते चेति कारणात् ।
पिता मां क्रोधमापन्नो सबालां मारयिष्यति ॥८८॥
इति सा भयमापन्ना तुष्टाव मौनमास्थिता ।
कृष्णं चतुर्भुजं कान्तं सर्वथा शरणागता ॥८९॥
रक्ष रक्ष हरे कान्त परमेश्वर केशव ।
त्वयि मे मानसं लग्नं पिता मां घातयिष्यति ॥९०॥
इति स्तुत्वा च तं बालं कृत्वा वक्षसि भामिनी ।
अश्रुपातं चकाराऽथ कृष्णो युवा दृढोऽभवत् ॥९१॥
पुष्टो दानवनाशार्थं धृतचक्रो बभूव ह ।
तलाजा तं विलोक्यैव क्षणं चुचुम्ब तं पतिम् ॥९२॥
भगवाँस्तु क्षणानन्दं दत्त्वा दिव्यां विधाय च ।
कृत्वा लीनां निजदेहे श्यामरूपो बभूव ह ॥९३॥
आजगाम गुहायास्तु बहिर्यत्र तलः स्थितः ।
तलो गदायुतश्चापि जीवने शंकितोऽभवत् ॥९४॥
शंखं दध्मौ हरिस्तत्र तलो दुद्राव भीतितः ।
पृथिव्यन्तस्तले लीनोऽभवत् तत्र हरिस्तदा ॥९५॥
त्यक्त्वा तं च स्वयं कन्यायुतः कुंकुमवापिकाम् ।
समाजगाम सततं लोमशस्याऽऽश्रमे हरिः ॥९६॥
विधाय कन्यकारूपद्वयं चैकां तदैव सः ।
हंसयानेन च नैजं धाम चाप्रेषयत् प्रियाम् ॥९७॥
द्वितीयं कन्यकारूपं लाजाख्यं समरक्षयत् ।
लोमशस्याऽऽश्रमे चान्यकन्याभिः सममेव सः ॥९८॥
कृष्णार्पणं गता सा च तलाजा दिव्यरूपिणी ।
लाजारूपाभवत् सर्वपूजायां मंगलात्मिका ॥९९॥
श्रीहरिं लाजया नित्यं वर्धयन्ति सुरस्त्रियः ।
एवं तलाजा प्रेंखा सा लाजारूपाऽभवत्तथा ॥१००॥
प्रेंखारूपा तथा चास्ते कृष्णस्याऽनुग्रहात् सदा ।
कन्यारूपा कृष्णपत्नी कुमारिकादिषु स्थिता ॥१०१॥
तथा दिव्यस्वरूपा च परे धाम्नि विराजते ।
कृष्णनारायणयोगाच्चतुर्धारूपधारिणी ॥१०२॥
अनादिश्रीकृष्णनारायणसेवास्थिताऽभवत् ।
लाजा प्रेंखा कन्यका च मुक्तरूपेतिभामिनी ॥१०३॥
यथा गंगाम्बुनो योगाद् रथ्याम्बु याति गांगताम् ।
तथाऽनादिकृष्णयोगाद् राक्षसी याति मुक्तताम् ॥१०४॥
किमत्र तु महाश्चर्यं राधे वदामि वै हरेः ।
त्वादृशी सा हरेः पत्नी विवाहेन भविष्यति ॥१०५॥
अथ श्रीभगवान् मातृसन्निधौ बालके पुनः ।
बालरूपः समागत्य चान्तर्लीनोऽभवत्तदा ॥१०६॥

तलाजयेदं कथितं लोमशाय महर्षये ।
लोमशेन च कथितं पितृभ्यां दैवतं च तत् ॥१०७॥
सर्वैर्ज्ञातश्चमत्कारो याते दिनाष्टके तदा ।
मेनिरे ते महाश्चर्यं शान्तिपाठान् प्रचक्रिरे ॥१०८॥
अथोत्सवे समायाता देवा देव्यश्च भोजिताः ।
वन्दिताश्चाऽर्पिता दानैर्गमिताः शं निजगृहान् ॥१०९॥
त्रयोदशे दिने गत्वा गृहानष्टदिनोत्तरम् ।
ज्ञात्वा कृष्णप्रतापं च चमत्कारभरं परम् ॥११०॥
परम्परया ते देवा देव्यो मुमुदुरान्तरे ।
नेमुः प्रसस्मरुः स्वामिकृष्णनारायणं हृदि ॥१११॥
इत्येवं कथितो राधे ! प्रेंखोत्सवो महान् शुभः ।
चमत्कारश्च कथितः श्रोतृवक्त्रोः प्रमुक्तिदः ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीकृष्णनारायणप्रभोः प्रेंखाऽऽरोहणोत्सवे तलपुत्र्यास्तलाजाराक्षस्याः कापट्येनाऽऽगताया अपि हरौ मोहिताया मुक्त्यादिचमत्कारवर्णननामा सप्तमोऽध्यायः ॥ ७ ॥

**श्रीकृष्ण उवाच—**

श्रूयतां सुभगे राधे कथां पुमुत्तमाश्रिताम् ।
प्रेंखोत्सवोत्तरं कृष्णनारायणः परः प्रभुः ॥ १ ॥
दुहितृहारकश्चेतिमत्वा तलाख्यरक्षसा ।
प्रद्विष्टो बहुधा बालकृष्णो वै कम्भरागृहे ॥ २ ॥
नाऽस्य क्लेशः परेशस्य फलं क्लेशस्तु रक्षसः ।
तलेन गत्वा चार्जन्तां गुफां तत्र स्थितास्तु ये ॥ ३ ॥
राक्षसा निजजातीया बोधितास्ते च मन्त्रिताः ।
सौराष्ट्रे कुंकुमवाप्यां कृष्णं नाशयितुं मुदा ॥ ४ ॥
सर्वे चाकर्ण्य वृत्तान्तं तलाजाऽऽहरणादिकम् ।
तलेन सह चागत्य सिंहारण्ये स्थिता हि ते ॥ ५ ॥
भ्रमन्तो निशिथे ग्रामान् रन्ध्रान्वेषणतत्पराः ।
घातयितुं हरिं ते वै प्रयतन्ते स्म नित्यदा ॥ ६ ॥
प्रच्छन्नास्ते समायान्ति चाऽनासाद्य क्षणं ततः ।
वियन्ति च निराशास्ते प्रभोश्चक्राद् भयं गताः ॥ ७ ॥
एवं मासः प्रथमस्तु बालकृष्णस्य चाऽभवत् ।
जनैर्द्वितीयमासस्य प्रथमे वै दिने ततः ॥ ८ ॥
माता पिता लोमशश्च प्रभुं श्रीपुरुषोत्तमम् ।
इच्छन्ति स्म दिव्यदुग्धं पाययितुं तदा हरिः ॥ ९ ॥
मार्गकृष्णनवम्यां च प्रातरुत्थाय चैव सः ।
रमते स्म हसति स्म प्रेंखायां ज्ञापयन् कृपाम् ॥१०॥
माता चातिप्रसन्नाऽस्ति दुग्धं पाययितुं हरिम् ।
दुदोह मंगलागौरीनाम्नीं कामदुघां तु गाम् ॥११॥
उष्णं कृत्वा शर्करार्क्तं कवोष्णं कम्बुसन्धृतम् ।
वस्त्रपूतं च गोक्षीरं कम्बुनाऽपाययद्धरिम् ॥१२॥
ज्ञात्वा दुग्धोत्सवं गावः कामरूपधराः शुभाः ।
दिव्यलक्षणसम्पन्ना मानवीवाग्विवेचिकाः ॥१३॥
जगदुर्मातरं चास्मद्दुग्धं पायय गोपतिम् ।
गोसहस्रस्याऽर्थनां संश्रुत्वा माताऽऽह गास्तदा ॥१४॥
बालोऽयं स्यात्कथं त्वर्हः सर्वदुग्धातिपानकृत् ।
अपथ्यं तद् भवेत् सर्वं किं करोमि हि शंसत ॥१५॥
गावः प्राहुः किमभाग्यमस्माकं तादृशं भवेत् ।
वयं गावो भवत्याः स्म हरेः सेवां न चाप्नुमः ॥१६॥
गवामभ्यर्थनां माता यावच्छृणोति तावता ।
व्योममार्गाद् गवां लक्षं गोलोकादागतं तदा ॥१७॥
अक्षराचापि वैकुण्ठादव्याकृताद् दिवस्तथा ।
भूमेश्चापि वृषारण्यात् कोटयस्त्वाययुर्गवाम् ॥१८॥
अनादिश्रीकृष्णनारायणेच्छया समाययुः ।
व्योम्नि विमानगाः काश्चिदन्तरीक्षगताः पराः ॥१९॥
जलस्थाः क्षितिगाश्चान्यास्तस्थुर्नेमुर्हरिं मुदा ।
दुग्धस्रावान् प्रचक्रुश्च दुग्धसरित् ततोऽभवत् ॥२०॥
अश्वपट्टसरस्येव दुग्धं जले च मिश्रितम् ।
दुग्धतीर्थं तु तज्जातं पापतापप्रणाशनम् ॥२१॥
हरिर्ज्ञात्वा गवामिच्छाः मातरं प्राह तत्क्षणम् ।
मातः कथय सर्वास्ताः क्षीरं पास्यति मे सुतः ॥२२॥
गावश्चक्रुः स्तुतिं तं च पिब नः क्षीरमच्युत ।
ब्रह्माण्डोदर विश्वात्मन् साफल्यं नो विधेहि च ॥२३॥
अनादिश्रीकृष्णनारायणस्तत्प्रार्थनां तदा ।
स्वीकृत्याऽनुग्रहेणैव कोटिरूपो बभूव ह ॥२४॥
प्रतिधेनुं तु बालोऽसौ दुग्धदोहकवत् स्थितः ।
प्रतिधेनुस्तनं प्राप्य दुग्धधारां निसर्गजाम् ॥२५॥
स्नेहजां चातिमिष्टां च हरिः स्वस्य मुखेऽग्रहीत् ।
पपौ पयांसि चाऽऽतृप्तिं गोभ्यः स्तन्यमपाययत् ॥२६॥
प्रासादिकं च देवेभ्यः कन्याभ्यः पितृभ्यस्तथा ।
ददौ पश्चादेकरूपोऽभवत् कृष्णनरायणः ॥२७॥
धेनवस्तास्तदा कृष्णं प्रार्थयामास सत्पतिम् ।
सदा रक्षय नो नाथ तवाऽग्रे सेवनाय वै ॥२८॥

कृष्णनारायणः प्राह तथाऽस्त्विति हसन् प्रभुः ।
धेनूनां च तदा देवो रूपद्वयं चकार ह ॥२९॥
एकं धेनुस्वरूपं च द्वितीयं कन्यकात्मकम् ।
कन्यास्ता लोमशाऽग्रे च ररक्ष भगवान् हरिः ॥३०॥
गावः सर्वा दिव्यदेहा ययुः स्वस्वस्थलानि वै ।
एवं महोत्सवं वीक्ष्य देवा देव्यः स्मयं ययुः ॥३१॥
अथाऽसुरास्ते समयं दुग्धोत्सवं विलोक्य च ।
धेनुरूपास्तदा भूत्वा स्तन्यदानार्थमाययुः ॥३२॥
अर्जन्ताद्यास्तथा तेषां नार्यो गोरूपधारिकाः ।
कपिलाः पिंगला रक्ताः श्यामाः शबलिकाः पराः ॥३३॥
भूत्वा श्रीबालकृष्णस्य सन्निधावाययुस्तदा ।
ओधःसु संभृतं क्ष्वेडं श्वेतदुग्धनिभं तदा ॥३४॥
ज्ञात्वा वसुन्धरा देवी कृत्यं तद् रक्षसां तथा ।
गौश्च भूत्वा स्वयं चायात् प्रथमं श्रीहरिं प्रति ॥३५॥
प्राह गोस्वामिनं बालं नाथ पिब पयो मम ।
यथा तृप्तिर्यथेष्टं च पिब सर्वं पयो मम ॥३६॥
इमा गावोऽरण्यवासा आगता मोक्षकांक्षया ।
तासामाकण्ठमापीय स्तन्यं मोक्षं प्रदेहि ताः ॥३७॥
श्रुत्वैतद् भगवाँस्तस्या वसुमत्यास्तु भावभृत् ।
ओमित्युक्त्वा शतरूपो बभूव लीलया पुनः ॥३८॥
तासामोधांसि भगवान् कराभ्यां दृढमादधे ।
स्तनानि चानने कृत्वा पपौ क्ष्वेडपयोऽतिगम् ॥३९॥
क्ष्वेडं त्वमृततापन्नं भगवन्मुखमागतम् ।
सप्राणं सर्वथा स्तन्यमपिबत् ताः प्रसह्य सः ॥४०॥
एवं कृते तु ते दैत्या दैत्यनार्यश्च वै तदा ।
त्राहि त्राहि कृपासिन्धो मुञ्च मुञ्चेति पाहि च ॥४१॥
क्षमां तदाऽर्थयामासुरासन् दैत्यस्वरूपगाः ।
माता पिता कुमार्यश्च भयमुद्वेगमागताः ॥४२॥
त्रेसुर्दैत्यकुकृत्येन कृष्णघातककर्मणा ।
दैत्यान् विलोक्य रुरुदुर्लोमशस्ता असान्त्वयत् ॥४३॥
अर्जन्ताद्या राक्षसास्ते तुष्टुवुः परमेश्वरम् ।
नमस्ते देवदेवेश परमेश नमोऽस्तु ते ॥४४॥
कृपालो तव पुत्राः स्म दासिकास्ते इमाः स्त्रियः ।
वृश्चिकानामविनये रोषं याति न सज्जनः ॥४५॥
आसुराणां निसर्गे त्वं मा याहि रोषमच्युत ।
प्राणान् रक्षय मुक्तेश क्ष्वेडं त्वयाऽमृतं कृतम् ॥४६॥
क्ष्वेडाश्रयाँस्तथा चास्मानमृतान् संविधेहि च ।
अवतारास्तथा मुक्ता ईश्वरा मुनयः सुराः ॥४७॥
ऋषयः पितरो मर्त्याः पिशाचा यक्षराक्षसाः ।
किन्नराश्चारणाः सूताः किंपूरुषा यमानुगाः ॥४८॥
तिर्यञ्चः पशवो वृक्षा वल्ल्यः सरीसृपा मृगाः ।
गुल्मास्तृणानि पक्ष्याद्याः कीटा मशकजातयः ॥४९॥
दैत्याश्च दानवा वर्णसंकरा असुराः शठाः ।
नागाः सर्पा जडाश्चैत्या नरा नार्यस्त्वदात्मजाः ॥५०॥
तव पुत्राः प्रभो सर्वे सत्त्वरजस्तमोयुताः ।
सर्वेष्वेव समा प्रीतिस्तव कृष्ण भवेदिति ॥५१॥
पितुर्मातुः समा प्रीतिर्बालेषु विषमेष्वपि ।
रक्ष रक्ष महाराज मा प्राणेभ्यो वियोजय ॥५२॥
वयं पितृहनो जाता गरदाः पापचेतसः ।
मा गणयाऽपराधान् नो ह्यज्ञानां क्रूरकर्मिणाम् ॥५३॥
वारं वारं प्रणमामस्तृणान्यादाय वै मुखे ।
रक्ष जीवय नो नाथ मा प्राणेभ्यो वियोजय ॥५४॥
इत्यभ्यर्थ्य हरिं दैत्या निपेतुः पादयोर्हरेः ।
मोक्षयिष्ये हरिस्ताँश्चाऽवत पृथ्वीसमीपतः ॥५५॥
श्रीकृष्णस्य सुयोगेन तेषां पापानि जज्वलुः ।
अर्जन्तो दैत्यवर्यस्तु राक्षसीयोनिकारणम् ॥५६॥
वर्णयामास शुद्धेन ज्ञात्वा वै हृदयेन ह ।
वयं पूर्वे मरुस्थाने गालवस्याऽऽश्रमस्थिताः ॥५७॥
विप्रा वेदाध्यायवन्तः शुद्धयज्ञपरास्तथा ।
अपरिग्रहधर्माणः कन्दमूलफलाशिनः ॥५८॥
कल्पवृक्षकल्पवल्लीकल्पमणिप्रजीविनः ।
कामरूपधरा व्योम्ना यायिनः सूर्यवर्चसः ॥५९॥
तीर्थयात्राकराश्चापि परिग्रहविवर्जिताः ।
आस्म तथापि शूद्रस्य तपसा मरुभूतले ॥६०॥
अनावृष्टिरभूत्तेन ध्वस्ताः कन्दफलादयः ।
भूत्वा च भिक्षुकाः सर्वे ह्यभूम सपरिग्रहाः ॥६१॥
दानग्राहाश्चान्नलुब्धाः प्रसह्य धनहारिणः ।
अभक्ष्यभक्षका जाता बुभुक्षिता हि पापिनः ॥६२॥
वृक्षा नष्टस्तथा नष्टा वल्लयः कामदास्तु याः ।
ततो वने विचरामो यथाकामं विधर्मिणः ॥६३॥
यः कश्चिन् मिलति मार्गे तद्धनं चाम्बरादिकम् ।
तदन्नं च तत्सलिलं हरामस्तस्य तत्तदा ॥६४॥
एवं वै वर्तमानानां पञ्चदशकुटुम्बिनाम् ।
सन्निधावेकदा विप्रयुगलं समुपागतम् ॥६५॥
धर्मयुक्तं दयायुक्तं ब्रह्ममार्गपरं तथा ।
वेदध्यायनसम्पन्नं षट्कर्मसंपरायणम् ॥६६॥

पत्नी पतिव्रता चासीत् स्वामिमात्रपरायणा ।
पतिसेवाकरी साध्वी स्नानपूजादिकारिणी ॥६७॥
एकभुक्तव्रतं द्वयोर्व्रतेषु जागरस्तथा ।
ब्राह्मणानां पूजने तौ प्रसन्नौ सर्वसम्प्रदौ ॥६८॥
श्रद्धाभावसमायुक्तौ गुरुपितृपरायणौ ।
तावागत्याश्रमेष्वेव विश्रान्तौ नः समीपतः ॥६९॥
तयोरग्रे पक्वसक्तून्यासन् यवास्तथाऽक्षताः ।
अस्माभिस्ते त्वपहृता भोज्यं चापहृतं तयोः ॥७०॥
वस्त्राण्यवस्कन्दितानि धनं चापहृतं तथा ।
द्वयोः कौपीनयोग्यं च वस्त्रं तदाऽवशेषितम् ॥७१॥
पतिर्हरिं स्मरत्येव ह्रियमाणेऽपि तद्धने ।
साध्वी सापि न च वक्ति जपत्येव हरिं मुहुः ॥७२॥
एवं तौ लुण्टतौ तत्राऽस्माभिर्दयाविवर्जितैः ।
प्रसह्य चौररूपैर्वै ब्राह्मणैर्ब्राह्मणौ तदा ॥७३॥
धर्मिष्ठौ पीडितौ वीक्ष्य भूकम्पः समजायत ।
अश्मवृष्टिरभूत्पांसुवर्षणं चाभवत्तदा ॥७४॥
द्वावेतौ वृक्षमाश्रित्य तिष्ठतश्च हरिस्मृती ।
पतिव्रता सा मन्वाना सर्वं हरीच्छयेति च ॥७५॥
पतिं संवाहयामास मर्दयामास वर्ष्म च ।
सत्यां पाषाणवृष्टौ च पांसूनां वर्षणेऽपि च ॥७६॥
चक्रतुर्न च शोकं तौ रक्षेच्छां चक्रतुर्न च ।
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ॥७७॥
इति जापं प्रकुर्वन्तौ सस्मरतुर्हरिं गुरुम् ।
तावत्तत्र समायातः सछत्रवस्त्रभोजनः ॥७८॥
ब्राह्मणोऽन्यः सतिलको हृदि श्रीवत्सशोभितः ।
उज्ज्वलश्चन्द्रसदृशो ददौ पृष्ट्वा सुभोजनम् ॥७९॥
वस्त्राणि च तथा छत्रं ददौ तद्युगलाय सः ।
अस्माभिस्तद्वीक्षितं च वर्तमाने तु वर्षणे ॥८०॥
तत्र गत्वा च तदपि पुनर्हृतं समस्तकम् ।
तदा दाता तिरोऽभूच्च दिव्यदेवोऽथवा ऋषिः ॥८१॥
शशापाऽस्मान् ब्रह्मपुत्रा भवन्तः क्रूरनिर्दयाः ।
स्वज्ञातिखादका यस्मात् तस्माद् भवन्तु राक्षसाः ॥८२॥
येषां नास्ति दयालेशो नार्यां नरेऽपि वै द्विजे ।
प्राप्तं पूर्वं तु तत्प्राप्तं यववस्त्रादिकं तु तत् ॥८३॥
देशकालप्रवैषम्यात् क्षान्तं पापापवर्तनम् ।
पुनः प्राप्तौ पुनर्हृतं निर्दयैश्च दुरात्मभिः ॥८४॥
तस्मात् पाषाणवर्षैश्च मृतिं गत्वा हि राक्षसाः ।
भवन्तु मरुधर्माणो वसन्तु शुष्कपर्वते ॥८५॥
पश्चाहाराश्च मांसादा भवन्तु सुखवर्जिताः ।
इति शप्ता हि तेनैव व्योमवाण्या तदा वयम् ॥८६॥
शपन्तं प्रार्थयामासुः क्षमां मोक्षं सुखं पुनः ।
तदा व्यक्तस्वरूपः स ऋषिर्वै गालवः स्वयम् ॥८७॥
आसीत्पूर्वगुरुर्नश्च जगाद दयया पुनः ।
सौराष्ट्रे श्रीकृष्णनारायणस्य च परात्मनः ॥८८॥
योगेन भवतां मुक्तिर्भविष्यति व्रजन्तु तम् ।
ततोऽस्माभिर्वन्दितश्च मुनिस्तद्युगलं तथा ॥८९॥
क्षमार्थं याचितं द्रव्यं चार्पितं प्रतिपूजितम् ।
प्रत्यर्पितं च वस्त्रान्नं ततो वयं तु वृष्टिभिः ॥९०॥
शापेन वै मृतास्तत्र राक्षसीं योनिमागताः ।
अर्जन्ताद्या वयं सर्वे राक्षसा वै कुटुम्बिनः ॥९१॥
पर्वतादौ निवासाँश्च कृत्वा नारायणं प्रभुम् ।
चिन्तयामः कदा मुक्तिप्रदः श्रीभगवान् भवेत् ॥९२॥
जातिस्मरा वयं सर्वे तत्तस्य कथनात् खलु ।
ज्ञानवन्तो परब्रह्म मोक्षदं चात्र राजते ॥९३॥
तद् वयं कृतकृत्याः स्म दैत्यभावाद् विमोचिताः ।
तव योगेन देवेश पापं प्रज्वलितं तु नः ॥९४॥
पापात्मानो वयं नाथ तारिता ब्रह्मराक्षसाः ।
क्ष्वेडं त्वस्मत्कृते जातं ह्यमृतं त्वपराधिनाम् ॥९५॥
पारः कृपायास्ते नास्ति नास्ति पारः क्षतेश्च नः ।
पारकृत् प्रकरोत्येव पारधीन् भवपारगान् ॥९६॥
इत्युक्त्वा रुरुदुर्दैत्या जातिस्मरा मुहुर्मुहुः ।
प्रणेमुर्दण्डवत् कृष्णनारायणं जगुर्जयम् ॥९७॥
भगवाँस्तान् करुणया लोकयामास सत्वरम् ।
त्याजयामास देहाँस्तान् कारयामास देवताः ॥९८॥
रूपद्वययुतास्ताश्च कन्यकास्तास्तदाऽभवन् ।
कुमार्यः शतसंख्याका रक्षिता लोमशाश्रमे ॥९९॥
दिव्या देव्यो दिव्ययानैः प्रेषिता ब्रह्मधामनि ।
एवं तेषां ब्राह्मणानां तत्सयोगात् प्रयोगिनाम् ॥१००॥
कृपया वै कृता मुक्तिः पृथ्वीगौस्तु तिरोऽभवत् ।
अनादिश्रीकृष्णनारायणो बालो बभूव ह ॥१०१॥
रेमे रञ्जनदोलायां कन्यकाभिः सुलालितः ।
आवेदितं गोस्वरूपपृथिव्या तत्र चोत्सवे ॥१०२॥
मात्रे पित्रे कन्यकाभ्यो ज्ञातं कृष्णस्य चेष्टितम् ।
मया ते कथितं राधे पाठे श्रवेऽपि मुक्तिदम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णस्य द्वितीयमासारम्भे क्षीरपानोत्सवे नैकरूपैर्दिव्यगवां दुग्धपानं, गोरूपधारिणीं कपटिनीं राक्षसानां पत्नीनां गोरूपाणां सप्राणदुग्धधावने नाशो मुक्तिश्च भगवता कृतेत्यादिनिरूपणनामाऽष्टमोऽध्यायः ॥ ८ ॥

श्रीकृष्ण उवाच—

शृणु चान्यचरित्रं च राधिके परमात्मनः ।
मासे याते द्वितीये च तृतीये शुक्लपक्षके ॥ १ ॥
गृहाद् बहिर्निष्क्रमणं चक्रे माता सुतस्य वै ।
पुण्याहवाचनं तत्र नान्दीश्राद्धादिकं तथा ॥ २ ॥
अकारयत् पिता विप्रैराशीर्भिः समयोजयत् ।
लोमशस्याऽऽश्रमं गत्वा ह्यनामयच्च पादयोः ॥ ३ ॥
गुरुस्तस्य हि तिलकं भाले कुंकुमचन्द्रकम् ।
कृत्वा के स्वकरौ दत्वा ददौ मन्त्रं च कर्णके ॥ ४ ॥
'अनादिश्रीकृष्णनारायणो मे शरणं नमः' ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥ ५ ॥
बालः श्रुत्वा प्रत्युवाच मन्त्रं वारत्रयं पुनः ।
लोमशर्षिस्तथा माता जनकाद्या मुदं ययुः ॥ ६ ॥
कण्ठीं द्विरावृतां कण्ठे तौलसीं स न्यधारयत् ।
पुष्पहारं ददौ कण्ठे कृष्णस्य लोमशो मुनिः ॥ ७ ॥
मुखे कणं शर्करायाः ददौ हस्तेन लोमशः ।
दुग्धं चापाययत् कृष्णं मुहुः पस्पर्श पाणिना ॥ ८ ॥
ददौ माता तदा बालं खेलनार्थं तदाश्रमे ।
स्थिताभ्यः कन्यकाभ्यः श्रीकृष्णकान्ताभ्य एव च ॥ ९ ॥
ताश्चुचुम्बुर्मुहुः कान्तं हासयामासुरुत्सुकाः ।
निन्युरुद्यानकं पार्श्वे पुष्पवल्लीनिकुंजके ॥१०॥
अहं पूर्वमहं पूर्वमित्यास कलहस्तदा ।
कान्तं चैकं रामयितुं कन्यकानां च योषिताम् ॥११॥
कोटीनां कन्यकानां च विलोक्य भावनां प्रभुः ।
कोटिरूपाणि च चक्रे तदुद्याने विशेषतः ॥१२॥
बालचन्द्रो यथा तासां सुखदः संभवेत् तथा ।
प्रावर्तत सदा तासां त्वधीनः कृष्णकान्तकः ॥१३॥
काचित्कृष्णं रमयति चुम्बयति मुहुर्मुहुः ।
काचित्तु वक्षसि कृत्वा दत्वा स्नेहभरं वचः ॥१४॥
हासयति स्वकं कान्तं बालरूपं मनोहरम् ।
काचिदंके निधायैनं गण्डयोः करशाखया ॥१५॥
स्पृष्ट्वा मुहुर्मुहुः कान्तं चित्तं रञ्जयति स्थिरम् ।
काचित्तन्मस्तके दत्वा हैयंगवीनमुत्तमम् ॥१६॥
शनैर्मर्दयति हस्ततलेन बालरूपिणम् ।
काचिच्छलाकया बिन्द्वीं ददाति भालकेऽरुणाम् ॥१७॥
काचित् करोति तिलकं रक्तं स्वर्णशलाकया ।
कौंकुमं राजसं मनोहरं चाकर्षकं प्रभुम् ॥१८॥
काचिद् बालं गण्डके च चिबुके च मनोहराम् ।
बिन्द्वीं करोति रक्तां च मानसस्य सुखावहाम् ॥१९॥
काचित्तु स्थलपद्मानां दलानां मालिकां नवाम् ।
मृद्वीं कृत्वा गले तस्य ददाति शान्तगन्धिनीम् ॥२०॥
अन्या तु नेत्रयोस्तस्य घृतजं कज्जलं शुभम् ।
अञ्जयति प्रतेजोऽर्थं रूपार्थं रङ्गमादिनी ॥२१॥
अन्या बालं करे प्रोच्छालयत्येव तदाऽम्बरे ।
अपरा वक्षसि त्वेनं तथोदरे मुहुर्मुहुः ॥२२॥
मुखेनोष्ठेन प्राणेन भंभंभंभं करोति च ।
वादयते शनैर्गालं किलिकिलायति चापरा ॥२३॥
काचित् स्ववक्षसि पादौ तस्य धृत्वा प्रमोदते ।
काश्चित् कट्यां तु संस्थाप्य बाहुना तं धृतं प्रभुम् ॥२४॥
नृत्यन्तं च मयूरं वै दर्शयत्येव चेष्टया ।
इतरा पादयोस्तस्य करयोश्च मनोहरम् ॥२५॥
मनाक् संरञ्जनद्रव्यं योजयति सुदर्शनम् ।
अन्या कूजन्तमेवैनं कोकिलं त्वाम्रसंगतम् ॥२६॥
दर्शयति प्रतिकूजयति हासयते हरिम् ।
काचित् कृष्णस्य वै नासां संस्करोत्यम्बरेण च ॥२७॥
काचिच्च वायुना लग्नं रजो मार्जयति द्रुतम् ।
अन्याऽङ्गुल्या शाखिसंस्थं मर्कटं दर्शयत्यपि ॥२८॥
तथाऽन्या शुक्लपुष्पाणां गुच्छान् धृत्वा नवान्नवान् ।
सौगन्ध्यं बालकृष्णाय समर्पयति सादरम् ॥२९॥
तमन्या गद्गदं शब्दं श्रावयते च मोदते ।
अपरा तु रसं मिष्टं मनाग्ददाति वै मधु ॥३०॥
तथाऽन्या गायति गीतिं काचिन्नृत्यति भूतले ।
अपरा चक्रवद् बालं भ्रामयति भ्रमत्यपि ॥३१॥
काचित् सौगन्धिकं विष्णुतैलं सम्मर्दयत्यपि ।
तथाऽन्या वल्लिकादोलामारुह्याऽऽन्दोलयत्यपि ॥३२॥
द्वितीया शीतनाशार्थं कम्बलिकां ददात्यपि ।
अन्या वह्निं ज्वालयित्वा पार्श्वे तिष्ठति तद्युता ॥३३॥
अपरा मृगपृष्ठे तं समारोहयति प्रिया ।
तथाऽन्या मृगशावाग्रे नीत्वा स्थापयति प्रियम् ॥३४॥
गवां वत्सान् प्रति नीत्वा तांश्च दर्शयति प्रियान् ।
शशकर्णौ परा धृत्वा कृष्णं दर्शयते तु खे ॥३५॥
दर्पणे च मुखं तस्य तथा दर्शयति प्रिया ।
पराभ्यः संश्रावयन्ति त्वन्याश्चिह्नानि यानि च ॥३६॥
नूतनाश्च समागत्य पश्यन्ति तानि वै मुदा ।
श्रीकृष्णश्चाम्बरं दृष्ट्वा किलकिलेति करोति च ॥३७॥
काश्चिन्मुखं स्वमुद्घाट्य ब्रह्माण्डं दर्शयत्यपि ।
अन्या गोलोकमाद्यं चाक्षरं वैकुण्ठमित्यपि ॥३८॥

स्वतनौ भगवाँस्तत्र निजाभ्यो दर्शयत्यपि ।
एवं सर्वाः कुमार्यश्च मोदन्ते कृष्णलीलया ॥३९॥
आनन्दं ब्रह्मणो लब्ध्वा बभूवुः कृतवाञ्छिताः ।
ततः श्रीभगवाँस्तानि रूपाण्यन्तर्जहार च ॥४०॥
एक एवाऽभवल्लक्ष्मीकरगो वै चतुर्भुजः ।
माणिक्यायास्तथा चाऽङ्के द्विभुजो हि ततोऽभवत् ॥४१॥
ततः श्रीकम्भरालक्ष्मीकट्यामेकलकोऽभवत् ।
सर्वा विलोक्य सामर्थ्यं तृप्ता जातास्ततः पिता ॥४२॥
पूजयामास विधिना लोमशं च गुरुं मुनिम् ।
चन्दनेनाऽर्चयामास ललाटं तिलकान्वितम् ॥४३॥
चन्द्रकं कारयामासाऽक्षतैर्लाजासुपुष्पकैः ।
हारैश्च पादुकाभिश्च फलैः पत्रैः सुकन्दकैः ॥४४॥
मूलैर्मृगाजीनवयैर्दुग्धैर्घृतैश्च तन्दुलैः ।
वस्त्रैश्च वल्कलैः कृतावुपयुक्तसुवस्तुभिः ॥४५॥
लोमशं तोषयामास जगृहुस्तस्य चाशिषः ।
कन्यकाभ्यश्च सौभाग्यद्रव्याणि जननी ददौ ॥४६॥
वस्त्राणि वलयाँश्चापि तथोपकरणानि च ।
भक्ष्यभोज्यानि पेयानि मृष्टान्नानि घृतानि च ॥४७॥
ददौ माता च केशानां प्रसाधनानि वै तदा ।
अनन्तानि तदिष्टानि सर्ववस्तूनि वै ददौ ॥४८॥
माता रक्षति कौमारे सर्वास्ताः पुत्रिका यथा ।
स्वर्गे द्वितीयं वै तत्र ब्रह्मचर्याश्रमं महत् ॥४९॥
वैकुण्ठमिव मायादिशून्यं हरेरनुग्रहात् ।
लोमशस्याऽऽश्रमं त्वासीन्मुक्तकन्याविराजितम् ॥५०॥
अहर्निशं हरिः कृष्णो नारायणोऽत्र चिन्त्यते ।
नारायणप्रियाः सर्वे सर्वाश्चासन् न चेतरे ॥५१॥
लोमशो वर्तते नित्यमुक्तो मायाविवर्जितः ।
अक्षरोऽव्यय एवाऽसौ मुक्तात्मा ब्रह्मपारगः ॥५२॥
यदाश्रमे न कामोऽस्ति न च क्रोधो विराजते ।
न लोभो नैव मोहोऽस्ति मदाद्यास्तु कथं तदा ॥५३॥
यत्र लिंगविकारो न यत्र योनिक्रिया न च ।
यत्र कामो न वै चाऽस्ति लोमशस्याऽऽश्रमस्तथा ॥५४॥
लीनमूर्ध्वे महत्स्थाने शान्तिर्यत्र तु शाश्वती ।
लोमशश्चाऽऽक्षराणां वै चतुष्टयं शुभार्थकम् ॥५५॥
एतादृशं ब्रह्मविदं यदा पूजयते पिता ।
तदा प्रभाभिधा कन्या बालकृष्णं प्रियं प्रभुम् ॥५६॥
रन्तुं रमयितुं नीत्वा ययावुद्यानजं द्रुमम् ।
राजचम्पकवृक्षं तं समाश्रित्य प्रिया सखी ॥५७॥
निषसाद ददौ बाला वृत्तीः सर्वा हरौ किल ।
तावत् तत्र समायातो व्योम्ना क्रोधनकोऽसुरः ॥५८॥
यस्तु रुद्रललाटाद्वै जलमध्ये व्यजायत ।
ब्राह्मणा स्वललाटाद्वै यदा रुद्रः प्रकाशितः ॥५९॥
उक्तः सृष्ट्यर्थमेवाऽथ स वै व्याकुलमानसः ।
जलाऽन्तःस्थोऽभवत् तत्रोद्वेगं प्राप क्षणं स्मरन् ॥६०॥
तेन जातो ललाटेऽस्य रुद्रस्य स्वेदबिन्दुकः ।
तद्बिन्दुजोऽभवत् क्रूरो देवद्वेष्टा सुरेतरः ॥६१॥
क्रोधनोऽयं बलवाँश्च तपस्तेपेऽतिदारुणम् ।
तपसा सिद्धिमापन्नो व्योमगः कामरूपधृक् ॥६२॥
सोऽयं योगेन वै ज्ञात्वा कुंकुमवापिकाभुवि ।
अनादिश्रीकृष्णनारायणं दैत्यविरोधिनम् ॥६३॥
उद्याने वर्तते कन्याकरे मत्वेति वै तदा ।
जिघृक्षुर्बालकं तत्र त्वाययौ रभसाऽसुरः ॥६४॥
कन्यारूपधरो भूत्वा रामयितुं समागतः ।
प्रभाहस्तगतं कृष्णमनापृच्छ्य तदाऽऽददे ॥६५॥
बालकृष्णो विदित्वैव तस्य वै दुष्टभावनाम् ।
हस्तौ कृत्वा लम्बमानौ तस्य विनाशनाय च ॥६६॥
मुक्तिदानाय च देवस्तस्या हस्तगतोऽभवत् ।
प्रभा ज्ञात्वा सखीं कांचिद् ददौ तस्मै तु बालकम् ॥६७॥
क्रोधना कन्यका सा तु बालं नीत्वा क्षणान्तरे ।
वृक्षवल्लीषु च तूर्णमदृश्यभावतां गता ॥६८॥
प्रभा न पश्यति त्वेनां समाजुहाव तां तदा ।
क्रोधना त्वम्बरे नीत्वा ययावभ्रपथं द्रुतम् ॥६९॥
मारयितुं च तं बालं कृतयत्ना मुहुर्मुहुः ।
गले पाशं ददात्येषा किन्तु सा हस्तयोस्तदा ॥७०॥
वह्निना दह्यमाना च बालकण्ठं प्रमुञ्चति ।
आकाशस्था वह्निदग्धा शिखाभ्यासाऽभवत्तदा ॥७१॥
श्रीकृष्णदेहजाद् वह्नेर्ज्वालाभिर्दग्धदेहिका ।
हाहेत्यवोचत् कृष्णं संप्राक्षिपद् भूतले तदा ॥७२॥
किन्तु कृष्णशरीरोत्थो वह्निस्तां नैव मुञ्चति ।
वह्निर्ज्वलंश्च बहुधा धूम्रकेतुर्यथा च खे ॥७३॥
तां कन्यां दहति क्रूरो वह्निस्त्राणं न विद्यते ।
तदा सा क्षिप्रमुत्प्लुत्य बालमनु ह्यवातरत् ॥७४॥
बालस्तु प्रभया गत्वा धृतः शीघ्रं करेण ह ।
प्रभा प्राप्तं हरिं धृत्वा दुद्राव लोमशं प्रति ॥७५॥
तावत् सा क्रोधना प्राह स्वसमेऽग्निं प्रशामय ।
ज्वलामि कर्मणा मेऽत्र रक्ष दुष्टां तु पापिनीम् ॥७६॥

इत्युक्त्वा चाग्रतो मार्गे रुद्ध्वा तुष्टाव बालकम् ।
नाथ कृष्ण कृपासिन्धो मां त्वं तारय कष्टतः ॥७७॥
शंकरस्य तु पुत्रोऽहं नाम्ना क्रोधनकोऽस्मि च ।
सुराणां द्वेषकर्ताऽहं तालनाम्नाऽसुरेण च ॥७८॥
प्रेषितस्तव नाशार्थे पापं चोपार्जितं मया ।
अघात्ये यन्मम बुद्धिर्घातनार्थमुपासिता ॥७९॥
तदहं च क्षमां याचे रक्ष मां मोक्षणं कुरु ।
इत्युक्तो बालकृष्णोऽसौ करुणावरुणालयः ॥८०॥
नैसर्गिककृपापूर्णः क्रोधनं प्राह वै तदा ।
कथं त्वं कन्यका जाता मम नाशाय मानिनि ! ॥८१॥
नैव जानासि मां सर्वान्तरात्मानं परेश्वरम् ।
नाडीप्राणा मम हस्ते सृष्टेर्मुक्तेर्भवन्ति च ॥८२॥
वद त्वं चापराधं मे कृतवत्यसि शोभने ।
कं दण्डं निर्ममे तेऽर्थं वदाऽत्र तत् करोमि ते ॥८३॥
क्रोधना प्राह तं कृष्णं कान्तं मनोहरं प्रभुम् ।
उवाच मे गात्रदाहं प्रशामय प्रभो तथा ॥८४॥
कान्तो मे भव देवेश कन्या त्वां प्रवृणोम्यहम् ।
मानसं मे त्वयि कृष्णनारायण प्रधावति ॥८५॥
मोक्षं देहि तथा चान्ते त्वासुरत्वं विनाशय ।
हरिः प्राह तथाऽस्त्वेतत् तव सर्वं भविष्यति ॥८६॥
मम स्पर्शात् तव गात्रं दिव्यं सदा तु कान्यकम् ।
मदर्थे जायतां रम्यं लोमशाश्रमवृत्ति च ॥८७॥
कन्यासु च त्वया स्थेयं कन्यारूपेण भामिनि ! ।
द्वितीयं ते तथारूपं मोक्षं यात्वक्षरं पदम् ॥८८॥
तृतीयं ते तथा रूपं पौरुषं वह्निसदृशम् ।
क्रोधनं सर्वथा क्रूरं क्रोधनाख्यं भुवस्तले ॥८९॥
मुनिरूपं भवत्वेव क्रोधनस्त्वं सदा भव ।
एवं रूपत्रयं कृष्णो दत्तवान् क्रोधनाय वै ॥९०॥
जन्मान्तरे च दुर्वासाः क्रोधनोऽयं भविष्यति ।
सर्वदा वैष्णवश्रेष्ठो नारायणसमो गुणे ॥९१॥
नारायणाऽवतारेषु निमित्तोऽयं भविष्यति ।
इत्युक्त्वा भगवान् राधे क्रोधनां कन्यकां शुभाम् ॥९२॥
कृत्वा शश्वत्कन्यकां सुरूपां तस्यास्तथेष्टकम् ।
द्वितीयं कान्यकं रूपं चापि तस्याः सुमोक्षगम् ॥९३॥
कृत्वाऽत्वप्रेषयद् धामाऽक्षरं विमानतः क्षणात् ।
तृतीयं पौरुषं रूपं तामसं च तदाऽभवत् ॥९४॥
तपश्चचार परमं लोमशाश्रमसन्निधौ ।
क्रोधनाख्यं परं तीर्थं चाश्वपद्मसरस्तटे ॥९५॥
जातं तदिति विज्ञेयं राधे मोक्षप्रदं शुभम् ।
अथ प्रभा तथा कन्या क्रोधना बालकृष्णकम् ॥९६॥
नीत्वा लोमशपूजायाः स्थानमाययतुस्तदा ।
नवीना कन्यका केयं चेति पृष्टा प्रभाऽवदत् ॥९७॥
नारायणचमत्कारं श्रुत्वाऽऽश्चर्यं ययुर्हि ते ।
लोमशस्य पूजनं च कृत्वा माता पिता हरिः ॥९८॥
ययुर्गृहं कन्यका सा कन्यासु हरिवाञ्छया ।
सदा निवासमकरोत् कृष्णकान्तप्रियाऽभवत् ॥९९॥
अथ प्रदोषसमये विधिवच्छशिनोऽर्चनम् ।
अकारयत् पिता माता वामदेव्यमगापयत् ॥१००॥
पुत्रस्याऽकारयन्माता सौम्यं वै विधुदर्शनम् ।
चन्द्रपत्न्यस्तथा चन्द्रो जहृषुर्वीक्ष्य माधवम् ॥१०१॥
हरिश्चन्द्रं विलोक्यैवाऽङ्गुल्याऽऽह मातरं तदा ।
चन्द्रमानय मातर्मे सन्निधौ चेति वै हृदा ॥१०२॥
चन्द्रो ज्ञात्वा हरेर्भावं सप्तविंशतिसंयुतः ।
सप्तविंशतिपत्नीनां रथैर्युक्तः समाययौ ॥१०३॥
कुंकुमवापिकाक्षेत्रं चान्द्रमण्डलसदृशम् ।
अभवत् सर्वथा दिव्यं यदा चन्द्रोऽगमत् तदा ॥१०४॥
चन्द्रेण तु समानीता मणयो विविधास्तथा ।
मालिका दिव्यतेजःसंभृताः शीताऽमृतावहाः ॥१०५॥
हरये त्वर्पितास्तत्र मात्रा चन्द्रमसस्तथा ।
तत्पत्नीनां स्वागतादिसत्कारश्च कृतः शुभः ॥१०६॥
पाद्यं चार्घ्यं मधुपर्कं दत्तं भोजनपानकम् ।
पूजयित्वा हरिं चन्द्र आशीर्वादान् प्रयुज्य च ॥१०७॥
ययौ स्वभवनं स्वर्गे श्रीकृष्णो मुदितोऽभवत् ।
अथ सर्वेऽपि पित्राद्या लोमशं मुनिसत्तमम् ॥१०८॥
कृत्वा च दण्डवद्भक्त्या समर्प्योपायनानि च ।
सुप्रसादं गृहीत्वापि गृहीत्वाऽऽशिष एव च ॥१०९॥
कन्याभ्यश्चाशिषो दत्वा ययुः स्वं भवनं प्रति ।
एवं वै राधिकेऽनादिकृष्णनारायणस्य हि ॥११०॥
संस्कारं पावनं चमत्कारयुक्तं सुखावहम् ।
श्रोतॄणां मुक्तिदं तस्य स्मर्तॄणां सम्पदांप्रदम् ॥१११॥
लोकपुत्रधनेच्छूनां स्वर्गाऽपत्यधनप्रदम् ।
विद्यैश्वर्यादिवाञ्छानां विद्यासिद्धिप्रदं परम् ॥११२॥
भुक्तिदं मुक्तिदं चापि सौभाग्यदं तु योषिताम् ।
आवेदितं च ते राधे ! बालरूपस्य पावनम् ॥११३॥
सर्वतीर्थफलाऽवाप्तिरस्य वै चिन्तया भवेत् ।
सर्वक्रतूनामवभृथजं पुण्यं लभेत्तथा ॥११४॥

सर्वदानफलं चापि सर्वयोगफलं तथा ।
प्राप्तौ श्रीकृष्णकान्तस्य समाप्यते तु राधिके ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णप्रभोस्तृतीये मासि शुक्लदले बहिर्निष्क्रमण-संस्कारे योषिद्भिः कारिते लालनरमणे बहुरूपता, दिव्यदर्शनम्, लोमशाश्रमे प्रभा कृष्णकान्तं नीत्वा ययौ, तत्र क्रोधनोऽसुरः क्रोधना कन्या भूत्वा हरिमहरत् । व्योम्नि सा हरिणा दग्धा तं मुमोच, तां दिव्यां त्रिरूपां कृतवा लोमशाश्रमे, मोक्षे, दुर्वासोभाविजन्मनि चेतिन्यरूपयत् । विधुदर्शनं चमत्कारश्चेत्येवमादिनिरूपणनामा नवमोऽध्यायः ॥ ९ ॥

श्रीकृष्ण उवाच—

अपरं चापि चरितं श्रीकृष्णस्य परात्मनः ।
शृणु राधे कथयामि ब्रह्मानन्दरसप्रदम् ॥ १ ॥
पञ्चमे च पिता मासि चक्रे पुत्रस्य वै क्षितौ ।
उपवेशनसंस्कारं ददौ दानानि वै तदा ॥ २ ॥
एकादश्यां कृष्णपक्षे प्रातरुत्थाय वै पिता ।
स्नात्वा च नैत्यकं कृत्वा सौधांऽगनसमीपतः ॥ ३ ॥
मण्डपं कारयामास कदलीदलशोभितम् ।
अशोकाऽम्रादिपत्राणां तोरणानि शुभानि च ॥ ४ ॥
बन्धयामास कलशान् स्थापयामास चोपरि ।
ध्वजमारोहयामास वेष्टयामास चाम्बरैः ॥ ५ ॥
उल्लोचं योजयामास बबन्ध च पताकिकाः ।
कुण्डस्तम्भाँश्च परितः क्लृप्तयामास वल्लिकाः ॥ ६ ॥
फलपुष्पितवृक्षाँश्च चलानस्थापयत्तदा ।
मण्डपे दीपकाचाँश्च मणीन् प्रकाशकाँस्तथा ॥ ७ ॥
निदधे खचितान् स्थाने मालासु मौक्तिकीष्वपि ।
तथाऽवलम्बयामास चित्राणि च वितानके ॥ ८ ॥
स्तम्भेष्वपि च मध्ये च कोणेष्वपि मनोहराः ।
देवी सुरान् मूर्तिरूपान् नद्धयामास रूपिणः ॥ ९ ॥
कानकीभिर्वालुकाभिर्मृद्वीभिस्तदधस्तलम् ।
कृत्वा हृद्यं निषाद्यं चासनान्यनुत्तमानि च ॥१०॥
चित्ररंगानि रम्याणि त्वौर्णकौशेयकानि च ।
आस्तीर्य परितस्तत्र बृसीः स्वल्पाश्च दीर्घिकाः ॥११॥
सिंहासनानि च श्रेष्ठः पट्टिकां निदधे पिता ।
अनादिश्रीकृष्णनारायणस्य भुवि चासनम् ॥१२॥
दिव्यं सौवर्णसाराढ्यं स्थापयामास मध्यके ।
भूमिं दिव्यां कृष्णमृत्तिकामयीं मण्डपेऽपि च ॥१३॥
बालनिषादनार्थं च रक्षयामास शोभनाम् ।
वेदिकां कारयामास पवित्रां चतुरस्रिकाम् ॥१४॥
सौवर्णपट्टिकां दीर्घां सद्रत्नसारकाञ्चिताम् ।
निधाय तत्र च क्षौममौर्णं वस्त्रं च पाण्डुरम् ॥१५॥
रक्तं चाम्बरमेवाऽपि गोधूमेषु निधाय च ।
सजलं कलशं पार्श्वे तण्डुलान् कुंकुमादिकम् ॥१६॥
पुष्पं चन्दनं कर्पूरं मालिकाः कज्जलादिकम् ।
नैवेद्यं विविधं पेयं ताम्बूलैलादिकं तथा ॥१७॥
पञ्चपात्रं स्थालिकां चाचमनीं च फलानि च ।
सर्वं पूजोपकरणं तौलसीदलजानि च ॥१८॥
दानवस्तूनि सर्वाणि स्थापयामास वै पिता ।
धरादेव्याः सुवर्णस्य वराहस्य प्रभोस्तथा ॥१९॥
कारयामास च मूर्तिद्वयं सर्वांगशोभनम् ।
सभूषं साम्बरं सौम्यं दिव्यं देवस्वरूपिणम् ॥२०॥
पृथ्वीं देवीं सुरूपां च लक्ष्मीरूपां सुशोभनाम् ।
समासीनां प्रकृत्वैव स्वस्तिकासनदर्शनाम् ॥२१॥
पादौ तस्यास्तु पातालं जङ्घे तस्या रसातलम् ।
जानू महातलं तस्याः सक्थिनी च तलातलम् ॥२२॥
सक्थिमूले सुतलं च श्रोण्युभे वितलं तथा ।
जघनं चाऽतलं तस्या गर्भस्तु भूतलं तथा ॥२३॥
उदरं भुवरेवास्या हृदयं स्वः शुभावहम् ।
कण्ठो महो मुखं जनश्चक्षूंषी तप उत्तमम् ॥२४॥
ललाटं सत्यलोकश्च मूर्तावितिं तथाऽकरोत् ।
साक्षाद्वै दृश्यते यत्र साऽब्धिपर्वतकानना ॥२५॥
वाराहस्य तथा मूर्तिं द्विपादां च समासने ।
समासीनां शुभ्रवर्णां दृढरोमसमुज्ज्वलाम् ॥२६॥
लम्बघोणां पिङ्गकेशां सूक्ष्मनेत्रां सकेशराम् ।
वक्रीकृत्य च पादौ द्वौ नितम्बाभ्यां भुवि स्थिताम् ॥२७॥
हस्ताभ्यामग्रगाभ्यां च गदाचक्रधरां वराम् ।
वनमालाधरां दन्तोत्तमोद्धृतधरां तथा ॥२८॥
समुकुटां सकटकां सकुण्डलां ससूत्रिकाम् ।
सधौत्रां सकटिसूत्रां जलोपरि व्यवस्थिताम् ॥२९॥
एवंविधां शुभां रम्यां कानकीं च वराहिकाम् ।
प्रतिमां कारयामास गोपालकृष्ण एव च ॥३०॥

तत्पूजाद्युपचारांश्च स्थापयामास मण्डपे ।
अथ प्राप्ते शुभे रम्ये क्षणे पिता तु लोमशम् ॥३१॥
महर्षिं वाद्यघोषाद्यैराह्वयामास सादरम् ।
आनाय्य चासने न्यस्य पूजां तस्य चकार ह ॥३२॥
ततः प्रवर्तिताः स्वस्तिवाचो गिरश्च योषिताम् ।
कीर्तनानि च वाद्यानि तदावाद्यन्त चाभितः ॥३३॥
दुग्धं दधि घृतं तोयं शर्करां नूतनं मधु ।
पञ्चामृतं समानीय पिता चास्थापयत् पुरः ॥३४॥
पुत्रं शुद्धिं कारयित्वा माता चानाय्य मण्डपे ।
अंके कृत्वा स्थिता तत्र रिक्तभूभागकोत्तमे ॥३५॥
लोमशेन गणेशस्य मातॄणां पूजनं शुभम् ।
कारितं च सुराणां भूदेवानां च सतां तथा ॥३६॥
अथ वैदिकमन्त्रैश्च लोमशो भूवराहयोः ।
पूजनं कारयामास दम्पतीभ्यां शुभावहम् ॥३७॥
कन्यका बालकृष्णस्य गुणान् गायन्ति गीतिकाः ।
पृथ्वी देवी दिव्यकन्या समागत्य ततो हरिम् ॥३८॥
नत्वा स्वस्याः प्रतिमायामावाहने स्थिराऽभवत् ।
हरिश्चाऽऽवाहने जाते चतुर्बाहुस्वरूपवान् ॥३९॥
समागत्य ततो देवे वराहेऽन्तः स्थितोऽभवत् ।
लोमशस्तौ तथाऽऽवाह्याऽऽचमनं प्रददौ प्रियम् ॥४०॥
अर्घं ददौ च पाद्यं चाऽऽसनं ददौ शुभावहम् ।
पञ्चामृतेन च स्नानं स्नानं शुद्धोदकेन च ॥४१॥
वस्त्रैः सम्मार्जनं कृत्वा सौगन्धिकं ददौ ततः ।
वस्त्राणि धातुसूत्राढ्यऽमूल्यानि प्रददौ भूषाः ॥४२॥
उपवीतं ददौ चन्द्र तिलकं कुंकुमं तथा ।
कज्जलं सिन्दूरकं च विष्णुतैलं ततो ददौ ॥४३॥
अलक्तकं कैसरं चन्दनं पुष्पदलानि च ।
तुलसीपत्रकं माला हारान् मनोहरान् ददौ ॥४४॥
शृंगारं चार्पयत् सर्वविधं सौभाग्यसद्द्रवान् ।
ददौ च शृंखलाः सौम्यकटकानूर्मिकादिकान् ॥४५॥
कुंकुमं चाऽबीरकं चाऽक्षतान् गुलालकादिकम् ।
दत्वा धूपं तथा दीपं नैवेद्यं पायसं ददौ ॥४६॥
सर्वधान्यसुमिष्टान्नं जलं शार्करमिश्रितम् ।
पानार्थं प्रददौ ताम्बूलकं चैलालविंगकम् ॥४७॥
फलं सौगन्धिकद्रव्यं शोभनं कानकासनम् ।
दक्षिणां स्वर्णरूप्यादि प्रददौ लोमशो मुनिः ॥४८॥
धरादेव्याश्च देवस्याऽऽरार्त्रिकं प्रचकार च ।
नमः स्तुतिं प्रदक्षिणमाशिषः कुसुमाञ्जलिम् ॥४९॥
दण्डवत् प्रार्थनां क्षमायाचनां प्रचकार सः ।
एवं देवं पूजयित्वा वैदिकान् ब्राह्मणाँस्तदा ॥५०॥
आसीनान् सन्निधौ सम्पूजयामास पिता तदा ।
वाद्यानि च तदाऽवाद्यन्तातीव नर्तनं शुभम् ॥५१॥
देव्यश्चकुश्च किन्नर्यो ह्यगायन्त सुगीतिकाः ।
माता पुत्रं पूजनान्ते लोमशोक्तविधानतः ॥५२॥
पूजिताया धरायाश्च सन्निधौ प्रोक्षिते स्थले ।
अर्चिते वन्दिते क्षमायाचिते सन्यषादयत् ॥५३॥
तदा देवी धरा मूर्तिमती प्राविर्बभूव ह ।
अंके कृत्वा हरिं कृष्णं पूजयामास चाशिषा ॥५४॥
कुंकुमाद्यैस्तथा मिष्टपायसेनाऽऽदयत् हरिम् ।
अन्या देव्यः पुपूजुश्चानर्चुश्च कन्यकास्तदा ॥५५॥
धरादेव्या श्रीहरये दुःखवारणकाञ्जलिः ।
मस्तके निहितः स्वस्या मस्तके चावतारितः ॥५६॥
वाराहश्च स्वयं विष्णुर्दिव्यस्तदा चतुर्भुजः ।
समभूत् सर्वप्रत्यक्षो बालकृष्णं ननाम च ॥५७॥
स्वर्णसिंहासनं बालकृष्णाय सूकरो ददौ ।
स्वर्णशय्यां वसुमतीं ददौ धरा तु शाश्वतीम् ॥५८॥
ताभ्यां तत्र स्थापितश्च बालकृष्णः क्रमादथ ।
विसर्जनं च पूजायाश्चकार लोमशो मुनिः ॥५९॥
तदा वै कम्भरालक्ष्मीर्भोजयामास लोमशम् ।
ब्राह्मणानृषिमुख्याँश्च सतः साध्वीश्च कन्यकाः ॥६०॥
दक्षिणाः सर्वशो दत्वा नत्वा कृत्वा च वन्दनम् ।
सर्वान् विसर्जयामास शाययामास वै सुतम् ॥६१॥
एवं भूम्युपवेशस्योत्सवं पिता चकार ह ।
परिहारं ततश्चक्रे पुत्रः स्वपिति शान्तिमान् ॥६२॥
अथाऽऽगता तदा तत्र भिक्षुकी भोजनेच्छया ।
दीनवेषा दीनरवा दिव्यरूपाऽतिमानिनी ॥६३॥
अदृष्टपूर्वा काचित् सा पुत्रं द्रष्टुं समिच्छति ।
मात्रा पृष्टा च काऽसि त्वं किमिच्छसि ददामि ते ॥६४॥
सा प्राह यदि सत्याऽसि देहि मेऽत्र सुतं तव ।
कन्दरा सिंहिका नाम्नी धरापुत्री कुमारिका ॥६५॥
अस्मि वसामि शैलेषु विहरामि वनेष्वपि ।
मम माता धरादेवी पूजिताऽद्य दिने त्वया ॥६६॥
ज्ञात्वाऽहं त्वत्र चायता दर्शनार्थं सुतस्य ते ।
अयं मनोहरो बालः कृष्णनारायणः प्रभुः ॥६७॥
दृष्टमात्रो हृदये मे वासं चकार दुःखहाः ।
अहं तथाम्यरण्येषु कान्तार्थे तमसाऽऽवृता ॥६८॥

निराहारा च निस्तेजस्कोदरा चाप्यसंस्कृता ।
अन्या अपि भगिन्यो मे सन्त्यद्रिषु सहस्रशः ॥६९॥
कुमारिका हि ताः सर्वास्तपन्ति कान्तलब्धये ।
यदि त्वं मन्यसे मातर्देहि मे पुत्रकं तव ॥७०॥
रामयिष्ये सुतं तेऽत्र लब्ध्वा शान्तिं प्रमोदनम् ।
तपःफलं परं प्राप्य दत्वा सुतं तु ते पुनः ॥७१॥
यास्यामि कान्तनिर्दिष्टं स्थानं स्यास्यामि तत्र च ।
मातस्तेऽनुग्रहश्चेन्मे वद देहि सुतं तव ॥७२॥
सत्यं शपे धरापुत्री चास्मि कान्तविमर्षिणी ।
श्रुत्वैवं भिक्षुकीं माता कन्दरां प्राह कन्यके ॥७३॥
यद्येवं चेद् धरापुत्रि ! रमयैनं गृहाण च ।
श्रुत्वा तु कन्दरा तुष्टा प्रसन्ना मोदसंभृता ॥७४॥
शीघ्रं जग्राह सुतं तं बालं रामयितुं करे ।
स्पृष्ट्वा चुचुम्ब तं प्रेम्णा निद्रास्थं वीक्ष्य सा मुहुः ॥७५॥
मात्रा दत्तं भोजनं च भक्षयामास कन्यका ।
बालकृष्णं च दोलायामारोप्याऽऽन्दोलनं च सा ॥७६॥
करोति स्म दर्शनं च मुहुः करोति भामिनी ।
अथ स्वसृस्नेहवशा सुनत्वा कम्भरां सतीम् ॥७७॥
आज्ञां गृहीत्वा त्वानेतुं गता स्वभगिनीस्तदा ।
मेर्वादिशैलवर्तिन्यो या या यत्राऽभवँश्च ताः ॥७८॥
तापसीः सा समाहूय सम्भूय पुनरागता ।
तापस्यो गह्वराः सर्वाः कन्दराऽग्रसराः शुभाः ॥७९॥
आगत्याऽयुतसाहस्रकन्यकाः परमेश्वरम् ।
सन्द्रष्टुं कुंकुमवाप्यधिष्ठात्रीं मातरं सतीम् ॥८०॥
कम्भरां तुष्टुवुः प्रेम्णा प्रार्थयामासुरच्युतम् ।
देहि नो मातरित्येवमर्थयामासुरच्युतम् ॥८१॥
श्रुत्वा मिश्रस्वरान् बालो बुबुधे शीघ्रमेव तु ।
माता दुग्धं पाययित्वा ददौ ताभ्यः कृपानिधिम् ॥८२॥
तावत्तासामाग्रहोऽभून्मम पूर्वं ममेति च ।
तस्यास्तस्या ग्रहणेऽयं द्वितीयरूपवान् मुहुः ॥८३॥
भवत्येवं बालदात्र्या दीयते यावदेव न ।
तावद् द्वितीयरूपेण ग्रहित्र्या हस्तगोऽभवत् ॥८४॥
कन्दराणामयुतं च बालकृष्णान्वितं तदा ।
ह्यभवच्छान्तिमापन्नं रमते स्म च तेन ताः ॥८५॥
मेनिरे जनुसाफल्यं सर्वास्ताः कन्यकास्तदा ।
पूजयामासुरेतास्तं मनोज्ञं बालमोहनम् ॥८६॥
हरिर्हसँश्च ताः प्राह वरदानाय तास्तदा ।
अर्थयामासुरस्यैव प्रभोः सेवां सदाऽनघाम् ॥८७॥
कैंकर्यं च यशः कीर्तिं सत्सेवां कृष्णकान्तताम् ।
तथास्त्विति हरिः प्राह वासं च लोमशाश्रमम् ॥८८॥
ददौ तासां कन्यकानां पुनः प्राह हरिश्च ताः ।
कन्दरासु च सर्वासु कार्यरूपासु सर्वदा ॥८९॥
साधवो मे योगिजना निवत्स्यन्ति विरागिणः ।
सतां समागमो नित्यं भवतीनां भविष्यति ॥९०॥
यशः कीर्तिः सतां सेवा सदा वः संभविष्यति ।
सतां भक्त्या च मे भक्तिः पावित्र्यं च भविष्यति ॥९१॥
युष्माकं मम योगश्च सदाऽत्र कन्दरासु वै ।
स्थितानां नित्यं भवतु मुक्तिं दास्यामि शाश्वतीम् ॥९२॥
अहं च कन्दरे साध्वि वत्स्यामि तव गह्वरे ।
सिंहगह्वरसंज्ञं तद् गह्वरं संभविष्यति ॥९३॥
यत्रैकादशिका कन्याः जन्म प्राप्स्यति गह्वरे ।
तद्व्रतं तव पुत्र्याश्चैकादश्याः सर्वथा प्रजाः ॥९४॥
करिष्यन्ति गह्वराणि तीर्थानि कन्दराणि च ।
भविष्यन्ति तारकाणि ममाऽनुग्रहतः सदा ॥९५॥
एवमुक्त्वा च भगवान् स्वमातृसन्निधौ च ताः ।
आभाष्याऽऽहूय च गुरुं लोमशाय ददौ तु ताः ॥९६॥
कृष्णनारायणं नत्वा भुक्त्वा पीत्वाऽऽश्रमं ययुः ।
कृष्णश्चैकस्वरूपोऽभून्माताऽऽश्चर्यं जगाम च ॥९७॥
कृतपुण्याश्च ता मेने कृतकृत्या निजात्मसु ।
लब्धव्ये परमे लब्धे किमन्यत्त्ववशिष्यते ॥९८॥
कृपानाथः कृपां कृत्वा मिलत्येव हि राधिके ।
कृपानुग्रहलाभार्थे प्राकट्यं परमात्मनः ॥९९॥
पठनाच्छ्रवणाच्चास्य स्मरणाच्छ्रावणादपि ।
भुक्तिं मुक्तिं कोटियज्ञफलं कान्तं लभेत च ॥१००॥

इति श्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णस्य प्रभोर्भूम्युपवेशनसंस्कारे भूमेरयुतपुत्रीणां सिंहिकादिकन्दराणां श्रीकृष्णनारायणपतिप्राप्त्यादिनिरूपणनामा दशमोऽध्यायः ॥१०॥

**श्रीकृष्ण उवाच—**

शृणु वै राधिकेऽनादिकृष्णनारायणो हरिः ।
मात्रादिपोषितो नित्यं वर्धते बालचन्द्रवत् ॥ १ ॥
नित्यं ताभिश्च कन्याभिः सेव्यते पुरुषोत्तमः ।
निर्मलः स्वच्छहृदयः परमात्मा निराश्रयः ॥ २ ॥
मात्रानन्दकरः पितृप्रतिबिम्बाम्बकोज्ज्वलः ।
तं वीक्ष्य बालकं कृष्णं सर्वरूपानुरूपिणम् ॥ ३ ॥

प्रजा दर्शनकारिण्यो निजपुण्यं हि मेनिरे ।
एनं च योगिनो दृष्ट्वा परमेशं हि मेनिरे ॥ ४ ॥
लोमशं त्वेकदाऽऽहूय पिता गोपालकृष्णकः ।
मासे षष्ठे कर्णवेधं रौप्यसूच्याऽप्यकारयत् ॥ ५ ॥
द्विगुणेन तु सूत्रेण पुष्ट्यायुः श्रीविवृद्धये ।
अस्मिन् दिने प्रगे स्नात्वा पिता गोपालकृष्णकः ॥ ६ ॥
लोमशस्य तु हस्तेनाऽश्विनीकुमारपूजनम् ।
कारयामास तन्मूर्तिं कारयित्वा तु राजतीम् ॥ ७ ॥
तत्राऽऽवाह्य तदा देववैद्यं पिता यदार्चयत् ।
तावत् साक्षात् समायातः सूर्यतुल्यः सकुण्डलः ॥ ८ ॥
गृहीत्वा स कृतां पूजां पस्पर्श पाणिना हरेः ।
कर्णौ सुकोमलौ रम्यौ शष्कुलीचक्रशोभनौ ॥ ९ ॥
सर्वश्रवणसिद्ध्यादिकृतशाश्वतिकाऽऽश्रयौ ।
नैरुण्येन रसेनाऽऽदौ प्रलिप्तौ च श्रवावुभौ ॥१०॥
ततश्च पूजिता सूची सूक्ष्मा नवा च कानकी ।
दृढया च तया कर्णौ विद्धौ यथास्थलं तदा ॥११॥
देववैद्येन तु शनैर्लाघवेन सुखेन च ।
सूचीस्पर्शोऽपि बालेन न ज्ञातो रसवैभवात् ॥१२॥
अथ विद्धौ यथापेक्षं कर्णौ सूची तदाऽभवत् ।
कन्या मूर्तिमती देवी दिव्याम्बरविभूषणा ॥१३॥
सर्वावयवशोभाढ्या चन्द्रोज्ज्वला च कोमला ।
उवाच सा तदा देवी मातरं पितरं मुदा ॥१४॥
यस्या नारायणस्पर्शस्तस्या मायाक्षयो ध्रुवम् ।
मम माया विनष्टाऽद्य रक्ष मां कृष्णसन्निधौ ॥१५॥
माता श्रुत्वा च तामाह कस्य त्वं विद्यसे सुता ।
वदाऽत्र कानकि ! देवि ! तवेष्टं संभविष्यति ॥१६॥
सूची श्रुत्वाऽऽह च नैजं वृत्तान्तं वै यथोद्भवम् ।
अहं वै मानसी कन्या ब्रह्मणोऽस्मि समुद्भवा ॥१७॥
मम कार्यं पारगत्वं छिद्रीकरणमित्यपि ।
एकलयास्तथा कण्टकादिदैत्यविनाशनम् ॥१८॥
तुन्नवायः श्वशुरो मे विश्वकर्मसुतश्च सः ।
तुन्नवायस्य पुत्राय दोरकाय समर्पिता ॥१९॥
सकान्ताया मम कार्यं सन्धानं वै वियुक्तयोः ।
जडाऽहं धातुरूपाऽस्मि चेतनाऽस्मि च देवता ॥२०॥
कुटुम्बं मे तथा द्वेधा कार्यं च कारणं सदा ।
कारणं देवतारूपं कार्यं भौतिकमित्यपि ॥२१॥
इत्येवं कथितं तेऽत्र दोरकस्य प्रियाऽस्म्यहम् ।
मातश्चाऽहं तव पुत्रभक्ता जाताऽस्मि चाद्यतः ॥२२॥
दिव्यां दिव्यस्वरूपां च कृत्वा विशेषतोऽत्र वै ।
सेवायां तव पुत्रस्य रक्ष नारायणस्य माम् ॥२३॥
श्रुत्वैवं कम्भरालक्ष्मीस्तामुवाच तदा पुनः ।
स्वामिना सह देवेशि ! वसाऽस्मिंल्लोमशाश्रमे ॥२४॥
स्वामिकुटुम्बसहिता चाश्वपट्टसरस्तटे ।
वसाऽत्र निर्भरा कृष्णं सेवितुं हृष्टमानसा ॥२५॥
इत्युक्ता सा प्रजहर्ष नत्वाऽश्विनीकुमारकम् ।
मातरं श्रीहरिं तूर्णं श्वशुरस्य गृहं गता ॥२६॥
वार्ता सम्मन्त्र्य च शीघ्रं सकुटुम्बा समाययौ ।
अश्वपट्टसरसश्च तीरे पूर्वस्थले तु सा ॥२७॥
वर्तते सकुटुम्बा वै कृष्णभक्तिपरायणा ।
कन्यकाः कृष्णमादाय विहर्तुं यान्ति तत्स्थलम् ॥२८॥
तुन्नवायाश्रमं तीर्थं पूर्वतीरे ततोऽभवत् ।
अथैकदा तु सा कृष्णं कक्ष्यां निधाय मोदते ॥२९॥
विचारयति नाथो मे भगवाँस्तु कदा भवेत् ।
ज्ञात्वा मनोगतं तस्याः कृष्णः प्राह हसँश्च ताम् ॥३०॥
वितरामि च ते सिद्धिं बहुरूपधरात्मिकाम् ।
भव कन्यास्वरूपा च वस वै लोमशाश्रमम् ॥३१॥
मम प्राप्तिर्यथाकाले भविष्यति तवाऽनघे ।
इत्युक्तमात्रे सा देवी दिव्यरूपा हि कन्यका ॥३२॥
चारुचम्पकवर्णाभा द्वितीयरूपधारिणी ।
बभूव श्रीबालकृष्णसन्निधौ सरसस्तटे ॥३३॥
सा ययौ कृष्णकान्तेन सह वै लोमशाश्रमम् ।
दोरकस्य गृहिण्याख्या दोरकस्य गृहे स्थिता ॥३४॥
सा च कृष्णार्पितसिद्ध्या कोटिरूपधराऽभवत् ।
जगत्सु सूचिकारूपा समव्याप्नोत् प्रसन्धिनी ॥३५॥
एवं साऽनुग्रहलाभात् कृष्णकान्तं सदाऽलभत् ।
अश्विनीपुत्रकौ वैद्यौ वरदानाय सूचितौ ॥३६॥
तावप्याराधनार्थं च ययाचाते निवासनम् ।
तथाऽस्त्विति च तौ प्राह कृष्णः प्रसन्नमानसः ॥३७॥
तत्तीर्थं चाश्विनीपुत्रारामनाम बभूव ह ।
अश्वपट्टसरसस्तु पूर्वे तीरे द्रुमेषु च ॥३८॥
एवं कृष्णप्रभुर्वासं ताभ्यां तस्यै च वै ददौ ।
स्वयं कन्याधृतश्चायात् स्वसौधं पारमेश्वरम् ॥३९॥
लोमशोऽपि मुनिस्तत्र कर्णवेधाख्यसद्व्रते ।
पूजनं दक्षिणां लेभे गोपालकृष्णतो बहु ॥४०॥
ययौ निजाश्रमं दिव्यो लोमशो मुनिराट् ततः ।
चैत्रशुक्लस्य पूर्णायां तिथौ मासे तु षष्ठके ॥४१॥

समागतायां तत्रैव समाहूय च लोमशम् ।
कारयामास विधिना पिताऽन्नप्राशनं शुभम् ॥४२॥
दध्याज्यमधुमिश्रं च बालकृष्णस्य वै प्रभोः ।
मंगलस्नानमेवादौ संकृत्वा मातृकार्चनम् ॥४३॥
प्रतिष्ठाप्य शुचिं वह्निं चरुहोमं चकार सः ।
ब्रह्मादिपूजनं चक्रे सदन्नान्यप्यभोजयत् ॥४४॥
ब्राह्मणेभ्यस्तथा सद्भ्यो दीनान्धेभ्यश्च वै तथा ।
सतीभ्यः कन्यकाभ्यश्च कुमारेभ्योऽप्यदाद् धनम् ॥४५॥
गोभ्यो मृगेभ्यो ग्रासाँश्च कीटकादिभ्यश्च पिष्टकम् ।
जलौकः कूर्ममत्स्येभ्यश्चापि कणान् ददौ तदा ॥४६॥
काकपारावतादिभ्यः कणान् ददौ तदा पिता ।
वृक्षवल्लीतृणादिभ्यो जलानि प्रददौ तदा ॥४७॥
पितृभ्यश्च सुरेभ्यश्च मानुषेभ्यो ददौ तदा ।
यथेष्टानि च भोज्यानि तथोपकरणान्यपि ॥४८॥
कुमारिकाभ्यः सर्वाभ्यो द्रव्यभूषाम्बराणि च ।
देहयोग्यानि शृंगारवस्तूनि साधनानि च ॥४९॥
भोजनासनयानानि पत्त्राणावरणानि च ।
विद्यासाधनग्रन्थाँश्च भक्तिसाधनकानि च ॥५०॥
ददौ पिता तु दिव्यानि भोग्यानि विविधानि च ।
अथौषधयो भूमिस्थाः सस्यरूपाः कणप्रदाः ॥५१॥
हव्यदाः फलदाः कन्दमूलदा गोधूमादिदाः ।
रसदा मधुदा गुन्द्रसारदाः शर्कराप्रदाः ॥५२॥
पत्रदाः पुष्पदा भक्ष्यभोज्यलेह्यकचोष्यदाः ।
रोगहन्त्र्यः पुष्टिकर्त्र्यो वृक्षगुल्मलतादिकाः ॥५३॥
स्वस्वजन्याऽऽस्वाद्यवस्तून्यादाय कन्यकात्मिकाः ।
स्थालेषु सन्निधायैव नवान्नादीनि सर्वशः ॥५४॥
सवादित्रकीर्तनानि कुर्वन्त्यश्च विभूषिताः ।
वह्निवर्णोज्ज्वलाः कृष्णं भोजयितुं समागताः ॥५५॥
कुंकुमवापिकोद्याने पश्चिमे योजनायते ।
स्थालानि रक्षयित्वैव सस्मरुः श्रीपतिं प्रभुम् ॥५६॥
कल्पोद्याने चागतास्ता ज्ञात्वा कृष्णनरायणः ।
लक्षरूपधरो भूत्वा प्रत्येकांऽकगतोऽभवत् ॥५७॥
प्रत्येकया सुवर्णस्याऽऽसने संस्थाप्य वल्लभः ।
भोजितः पूजितो मोदितो मुहुश्चुम्बितः प्रभुः ॥५८॥
भगवानपि कैशोररूपाणि प्राप्य वै ततः ।
भोजनानि सुमृष्टानि चखाद स्नेहतस्तदा ॥५९॥
सर्वाभ्यः स्वप्रसादश्च प्रदत्तः स्थालपूरितः ।
यद्यद् भुंक्ते च तत्सर्वं श्रीहरेर्योगतस्तदा ॥६०॥

लक्ष्म्या संवर्धितं न्यूनं न किञ्चिदपि दृश्यते ।
ताः सर्वाः करकमलैर्भोजयन्ति पतिं प्रभुम् ॥६१॥
भगवाँश्च पुनर्भुक्ते तासां भावानुबन्धनः ।
वारंवारं भोजितः पायितः प्रपूजितस्तथा ॥६२॥
तासां च पूरयामास संकल्पान् दिव्यरूपधृक् ।
अन्नप्राशनके चाद्यदिनेऽन्नानि चखाद यत् ॥६३॥
ऐश्वर्यं वीक्ष्य तत्सर्वं मुमुहुस्तत्र केशवे ।
भगवाँश्च जलं पीत्वा बालरूपो बभूव ह ॥६४॥
उद्गारं तृप्तिदं पुनः पुनर्गृह्णाति मोदते ।
अथ ताभिर्हरिस्तत्र वन्दितः सेवनाय च ॥६५॥
यथा सेवां तव कुर्मो नित्यं वयं तथा कुरु ।
त्वमात्मा त्वं परात्मा च त्वं रसस्त्वं बलं च नः ॥६६॥
त्वं फलं त्वं दलं पुष्पं त्वं गर्भस्त्वं च मञ्जरी ।
त्वं मूलं मध्यमस्तम्भस्त्वं शाखाऽङ्कुर इत्यपि ॥६७॥
त्वं प्राणस्त्वं जीवनं च खाद्यं त्वं खादकोऽपि च ।
भोक्ता त्वं भोज्यमेवाऽसि चाऽन्तरात्माऽसि नस्तथा ॥६८॥
स्रष्टा पाता रक्षिता पोषयिता लयभूस्तथा ।
त्वमेवाऽसि परब्रह्म स्वामी प्राणप्रियः पतिः ॥६९॥
अस्माकमान्तरं हृद्यं गृहाण पुरुषोत्तम ।
सेवायां रक्षय नाथ कुर्मः सेवां यथा तव ॥७०॥
इत्युक्तश्चांऽकगो विष्णुः प्रहस्याऽऽह च देवताः ।
वनदेव्यो भवत्योऽत्र वसन्तु लोमशाश्रमे ॥७१॥
कन्यारूपास्तथा वृक्षवल्लीरूपा अपि ध्रुवम् ।
वल्लीरूपा द्रुमरूपा उद्यानावासमंगलाः ॥७२॥
तिष्ठन्तु फलपुष्पाद्यैः सेवार्थं मम सर्वदा ।
इत्युक्तास्ताः परं प्रेम ज्ञात्वा नारायणस्य वै ॥७३॥
गृहीत्वाऽनुग्रहं श्रेष्ठं बभूवुर्द्विस्वरूपिकाः ।
वृक्षवल्लीस्वरूपास्ताः कल्पोद्याने वसन्ति च ॥७४॥
अथ कन्यास्वरूपास्ता यावत् पश्यन्ति केशवम् ।
पुनः पुनश्चांकगं तं तावत् संहृत्य लोमशः ॥७५॥
रूपाणि चैकरूपोऽभूत् श्रीवल्लीकन्यकांऽकगः ।
हसन् सस्मार च मुनिं लोमशं शाश्वतं गुरुम् ॥७६॥
द्रागेव स्मृतमात्रोऽसौ दिव्यदेह उपस्थितः ।
तुष्टाव परमेशं च का त्वाज्ञा वद मां प्रभो ॥७७॥
हरिस्तस्मै कन्यकास्ता वनदेवीर्ददौ मुदा ।
लोमशस्ता नमस्कृत्याऽऽश्रमं निनाय देवताः ॥७८॥
कृष्णनारायणपरा ब्रह्मरूपास्तु सेविकाः ।
हरिस्ततोऽभवल्लुप्तो ययौ नैजं गृहं तदा ॥७९॥

लोमशेनाऽऽवेदितश्च पिता पुत्रपराक्रमम् ।
ऐश्वर्यं चातुलं सर्वं ज्ञातवान् मुदमाप्तवान् ॥८०॥
अथ वै लोमशं प्राह गोपालकृष्णकस्तदा ।
बालोऽयं विद्यते बालो वस्तुतो बालको न वै ॥८१॥
चमत्कारा भवन्त्यस्य दिव्यपुरुषचेष्टिताः ।
तस्माद् भाव्योऽप्रतर्क्यश्च कश्चित् सर्वेश्वरः प्रभुः ॥८२॥
वृत्तिर्मुख्या क्रिया मुख्या काऽस्य वै संभविष्यति ।
राजा वा देववर्यो वा गुरुर्वा त्यागवानपि ॥८३॥
वद काऽस्य निश्चितैका वृत्तिर्भाव्या शुभाश्रया ।
इत्युक्तो लोमशः प्राह वस्त्रपात्रधनादिकम् ॥८४॥
निधेहि पुरतश्चाऽस्य यद् गृह्णीयात्तु विद्धि तत् ।
इत्युक्तो वै पिता शीघ्रं वृत्तिं ज्ञातुं पुरोऽस्य च ॥८५॥
वस्त्रं पात्रं चायुधं च धनं ग्रन्थं च लेखिनीम् ।
यष्टिं दर्भं हीरकं च मालिकां कणमुष्टिकाम् ॥८६॥
स्रुवं पूगीफलं तन्तुं फलं शंखं कपर्दिकाम् ।
जलपात्रं दर्पणं च सस्यं कृत्रिमहंसकम् ॥८७॥
दीपं छत्रं च पाषाणं घृतं काष्ठं तथौषधम् ।
पुष्पं लोष्ठं पादुकां च सूचीं कलिं न्यधात् पुनः ॥८८॥
द्वात्रिंशत्तानि वस्तूनि विलोक्य भगवानपि ।
द्वात्रिंशद्भुजवान् भूत्वा पस्पर्श युगपत् प्रभुः ॥८९॥
सर्वाण्यपि च वस्तूनि जानात्येव कलानिधिः ।
सर्ववृत्तिमयो योऽस्ति किमवेद्यं परात्मनः ॥९०॥
किमसाध्यं किमकार्यं किमज्ञातं हरेः खलु ।
आश्चर्यं प्राप च पिता हरिर्जहास वै तदा ॥९१॥
लोमशः प्राह च कलाश्चतुःषष्टिरनुत्तमाः ।
वर्तन्तेऽत्रैव देवेशे पुराणपुरुषे गुरौ ॥९२॥
सर्वकर्ता सर्ववृत्तिदाता पोष्टा भविष्यति ।
सर्वकार्यकरश्चायं परमात्माऽस्ति शाश्वतः ॥९३॥
माता जहर्ष संश्रुत्वा दृष्ट्वा सुतस्य वैभवम् ।
पश्यतां यावतां तावत् कृष्णनारायणो हसन् ॥९४॥
पुस्तकं मालिकां द्वाभ्यां कराभ्यां लेखिनीं कुशम् ।
अन्याभ्यां च कराभ्यां तु धृत्वा चतुर्भुजोऽभवत् ॥९५॥
मालां च पुस्तकं धृत्वा द्विभुजश्च ततोऽभवत् ।
अंके कृत्वा पुस्तकं च क्षिप्त्वा कण्ठे च मालिकाम् ॥९६॥
कल्गीं चादाय हस्तेन हसन् न्यधात् स्वमस्तके ।
कुसुमं समजिघ्रच्च हरिर्बालस्वरूपवान् ॥९७॥
शंखचक्रगदापद्मधरोऽदृश्यत वै तदा ।
बाल एव स्वयं तैस्तैर्धर्तैर्विशेषतस्तदा ॥९८॥
शापयामास पित्राद्यान् तत्तद्विशेषवृत्तिकम् ।
लोमशोऽपि प्रसन्नश्च पूजामादाय सत्कृतिम् ॥९९॥
ययौ निजाश्रमं नित्यं भजते तं नरायणम् ।
राधिके ! तेऽनादिकृष्णचमत्कारो मया मुहुः ॥१००॥
कथितो भक्तगम्यः स पाठश्रवाच्च मोक्षदः ।
मया दिव्येन ता लीलाः प्रत्यक्षमवलोकिताः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णस्य प्रभोः कर्णवेधसंस्कारः, सूच्यै चमत्कारदर्शनम्, अश्विनीकुमारतीर्थम्, अन्नप्राशनसंस्कारः, वनदेवताकारितप्राशनं, वनदेवताभ्यो बहुरूपैश्चमत्कारः कान्तप्राप्तिः, हरे वृत्तिज्ञानार्थं पुरोधृतवस्त्रशास्त्रादिवस्तूनि ग्रहीतुं बहुरूपता दिव्यता चेतिनिरूपणनामैकादशोऽध्यायः ॥११॥

**श्रीकृष्ण उवाच—**

राधिके पावनीं रम्यां समाकर्णय चापराम् ।
श्रीहरेरैश्वर्ययुक्तां कथामष्टममासजाम् ॥ १ ॥
सौराष्ट्रे दक्षिणे भागे व्याघ्रारण्यं परं महत् ।
सिंहारण्यं ततोऽवाच्यां ततोऽब्धिर्द्वीपशोभितः ॥ २ ॥
द्वीपस्याऽस्याऽभवद् राजा दमनाख्योऽतिदारुणः ।
पश्चिमादब्रिक्तदेशादागत्याऽसुरभावनः ॥ ३ ॥
वासं राज्यं प्रसह्यैव करोति स्माऽतिदारुणः ।
न मनुते बलिष्ठो वै धर्मं स्वर्गं पुनर्भवम् ॥ ४ ॥
बलं धर्मो बलं राज्यं बलं स्वर्गं बलं सुखम् ।
बलेन भुज्यते राज्यं स्वर्गं बलेन लभ्यते ॥ ५ ॥
नाऽऽहुतोऽग्निर्ददात्यन्यद् घृतक्षयं करोति च ।
न जपाल्लभ्यते राज्यं शस्त्राद् राज्यं तु लभ्यते ॥ ६ ॥
न स्मृद्धिर्गम्यते स्तुत्या युद्धेन श्रीरवाप्यते ।
न कन्या लभ्यते दैन्यात् हरणात् कन्यकाऽऽप्यते ॥ ७ ॥
नाऽनुयाति प्रजा साम्नाऽनुयाति दण्डजाद् भयात् ।
देवास्तु कल्पनामात्रा न चाऽऽयान्ति न भान्ति च ॥ ८ ॥
वृथा भोज्यं ब्राह्मणानां वृथाऽर्चनं सतां तथा ।
मृषा ज्ञानं कथकानां सत्यं तु पुरुषार्थिनाम् ॥ ९ ॥
बलिनं लम्बते पृथ्वी दासा दास्यः श्रयन्ति च ।
पुरुषार्थविहीनस्य न दारा न गृहं धनम् ॥१०॥
बलेन लभ्यते यत्तत् स्वीयं नैतिकमेव च ।
बलहीनमधर्माढ्यं तस्मात् कुर्याद् बलं परम् ॥११॥

धर्मार्थकाममोक्षाश्च बलमेव च नेतरत् ।
पापं पुण्यं बलं सर्वं नाऽन्योऽर्थस्तस्य विद्यते ॥१२॥
बलिनः सुखिनः सन्ति निर्बलास्तु दरिद्रकाः ।
बलिनं चोपतिष्ठन्ति चला लक्ष्मीश्च सम्पदः ॥१३॥
अलसस्य क्षुधितस्य मुखे नायाति भोजनम् ।
विहरतस्तु सिंहस्य वने सम्पद्यतेऽदनम् ॥१४॥
इमे हिंस्या इमे नेति धर्मो लोके व्यवस्थितः ।
न तु मुख्यः स शूराणां मुख्यत्वे बलवान् क्षयेत् ॥१५॥
विविधासु प्रजास्वत्र बलवानग्रगो भवेत् ।
पशुपक्षिपतंगानां बलवानूर्जितो भवेत् ॥१६॥
भुंक्ते स्वर्गे बलवाँश्च भाग्यं बले व्यवस्थितम् ।
श्रूयते बलवानत्र भुवि सौराष्ट्रमण्डले ॥१७॥
सुसमृद्धोऽतिबलवान् नाम्ना गोपालकृष्णकः ।
कुंकुमवापिकाक्षेत्रे पिता कृष्णस्य शार्ङ्गिणः ॥१८॥
बालकृष्णोऽत्र बालत्वे स्थितोऽपि वर्तते प्रभुः ।
अनेकबलसाहस्रो लोमशस्याऽऽश्रयेऽस्ति च ॥१९॥
तलाऽर्जुन्तादिकन्याश्च सन्ति लोमशकाश्रमे ।
रक्षसां च सुराणां च वनिनां कन्यकास्तथा ॥२०॥
युवत्यश्चातिरूपाढ्या बालकृष्णबलेन वै ।
रक्षितास्तत्र विद्यन्ते मम योग्या हि ता यतः ॥२१॥
मया वै लोमशं हत्वा हत्वा गोपालकृष्णकम् ।
बालकृष्णं तथा हत्वाऽऽनेतव्या मे वशे तु ताः ॥२२॥
इति विचार्य दमनो महासुरो निजान् भटान् ।
समाहूय सभायां स प्रकाशं हृदयं न्यधात् ॥२३॥
मार्तण्डं च प्रचण्डं च कूष्माण्डं भाण्डकं तथा ।
दुष्टाण्डं च कटाहाण्डं गर्ताण्डं ताण्डवं तथा ॥२४॥
भण्डं षण्डं कुभाण्डं च शैलाण्डं भ्रमराण्डकम् ।
हर्जाण्डं चापि गर्जाण्डं जठ्राण्डं गृध्रकाण्डकम् ॥२५॥
गोक्राण्डं घुर्घुराण्डं च मायाण्डं सैन्यनायकान् ।
सर्वान् वीरवतीं वाणीमुवाच दानवेश्वरान् ॥२६॥
लक्षसैन्यसमायुक्ताः सन्नद्धा भवताऽत्र वै ।
सौराष्ट्रे वीरकन्याश्च कोटिशो लोमशाश्रमे ॥२७॥
अनादिश्रीकृष्णनारायणार्थे सन्ति रक्षिताः ।
तलाजा तिष्ठति तत्र तथाऽन्याश्च सहस्रशः ॥२८॥
आनेतव्या बलात्ताश्च बलं वै राज्यमुच्यते ।
तासामिष्टतमो बालोऽष्टमे मासे प्रवेक्ष्यति ॥२९॥
श्रूयते स महैश्वर्ययुतो नित्यं न बालकः ।
तस्मात् सावधानभावा भवताऽस्मादियोगिनः ॥३०॥
चतुरंगं बलं सर्वं सन्नह्य यात चाऽग्रतः ।
विमानैः कमलाकारैर्वाहनैर्व्योमगामिभिः ॥३१॥
सर्वाऽऽयुधैः सह यात चाग्रे कुंकुमवापिकाम् ।
कार्यं त्रयं प्रकर्तव्यं साध्यं प्राणप्रदानकैः ॥३२॥
आहर्तव्याः कन्यकास्ताः प्राणैरपि धनैरपि ।
लोमशेन समं युद्धं कर्तव्यं तद्विनाशकम् ॥३३॥
यदि कृष्णो बालरूपो महान् भूत्वा रणं चरेत् ।
घातयितव्य एवाऽयं कार्यं चैतन्महत्तरम् ॥३४॥
एवं कार्यत्रयं कार्यं प्रतिज्ञां यात मत्पदे ।
इत्युक्तास्तत्र कूष्माण्डः प्राह विनयगर्भितम् ॥३५॥
भृत्योक्तं हितकृद्वाक्यं मन्तव्यं कटु वा भवेत् ।
अहं कूष्माण्डकेष्वेव गणेषु शंकरस्य च ॥३६॥
स्थित्वा वै श्रुतवान् पूर्वं कृष्णनारायणो हरिः ।
परमात्माऽसुरहाश्च दैत्यहा दानवक्षयः ॥३७॥
कुंकुमवापिकाक्षेत्रे वर्तते दिव्यविग्रहः ।
हिरण्यकूर्चप्रभृतेर्नाशकानां गुरोर्गुरुः ॥३८॥
यस्यैकरोम्णि पद्मानि दशकोट्ययुतानि वै ।
वर्तन्ते देवताः सर्वा बलवद्दैत्यनाशिकाः ॥३९॥
ब्रह्मविष्णुमहेशाद्या रुद्रा विद्याधरादयः ।
नागाः सर्पाः पत्तलस्थाः किंकरा यस्य वै मताः ॥४०॥
तस्य चेच्छ्रीकृष्णनारायणस्य धनमेव ताः ।
कन्यका यदि वर्तन्ते मा स्प्रष्टव्यास्तु ताः क्वचित् ॥४१॥
शरणं मरणं तत्र पश्यामि नेतरत् परम् ।
नाऽतिलोभः प्रकर्तव्यः शाश्वतं सुखमिच्छता ॥४२॥
परद्रव्यं न हर्तव्यं दीर्घं जीवनमिच्छता ।
यत् स्वस्य भाग्यतः प्राप्तं तन्न कैश्चिद्वियुज्यते ॥४३॥
यत्परार्थे समुत्पन्नं तन्नात्मार्थे हि जायते ।
कृते तत्र पुरुषार्थे वैपरीत्यं प्रजायते ॥४४॥
स्त्रियो द्रव्यं क्षितिश्चेति पोषयन्ति निजाश्रयम् ।
यदि पुण्येन लब्धाश्चेद् विपरीतास्तु नाशकाः ॥४५॥
आयुर्यशो बलं द्रव्यं सन्तानं राज्यमित्यपि ।
विपरीता यदि ते स्युर्नाशयन्ति न संशयः ॥४६॥
तव राजन् बहु चास्ति पत्न्यो द्रव्यं प्रजाजनः ।
दासा दास्यो गजाश्चेति कथं तृष्णां न मुञ्चसि ॥४७॥
तृष्णाया बहवो नष्टाः पद्मभ्रमरवन्निशि ।
सन्तोषेण तु बहवो मोदन्ते निजवस्तुषु ॥४८॥
मयोक्तं कटु चाप्यस्ति किन्तु मिष्टं तु भाविनि ।
संक्षेपान्नाययुक्ताऽन्यद् दुःखदं चेति वेद्म्यहम् ॥४९॥

तथापि मन्यसे राजन् कर्तव्यं चानुगा वयम् ।
अवश्यं हि करिष्यामो मरणार्थं तवेहितम् ॥५०॥
इत्युक्त्वा विररामाऽसौ कूष्माण्डश्च ततः परम् ।
मार्तण्डाद्या अपि तत्त्वं विमृश्योचुर्निजाधिपम् ॥५१॥
वह्नौ रत्नं रवौ पुष्पं रत्नाकरतले मणिम् ।
हृदयस्थं च रक्तं त्वं कृष्णकान्ताः समिच्छसि ॥५२॥
लब्धं चापि न सुखदं लब्धव्यं च दुरन्तकम् ।
भृत्यैस्तथापि नोल्लंघ्या राजाज्ञा पारमेश्वरी ॥५३॥
जम्राण्डश्च तदा वृद्धो मघाण्डश्च सहायकः ।
उभौ बलेन तान् सत्यान् शौर्याभं प्राहतुस्तदा ॥५४॥
मनोरस्थास्तु जायन्ते प्रवर्तन्ते जनास्तथा ।
शूरा निर्माल्यवल्लोके भवन्ति यदि निष्क्रियाः ॥५५॥
प्रवृत्तिं के करिष्यन्ति परीक्षार्हे तु वस्तुनि ।
शूराणां मरणं युद्धे निमित्तं स्त्रीधनादिकम् ॥५६॥
विजये सति चायान्ति पराजये विनाशनम् ।
परलोकप्रदं श्रेष्ठं मरणं रणमध्यतः ॥५७॥
इत्येवमेव मत्वैव यत्र रत्नानि सन्ति च ।
तत्र गत्वैव शूरैश्च प्राप्तव्यानि समर्पणात् ॥५८॥
तस्माद् युद्धं प्रकर्तव्यं प्राप्तव्याः कन्यकाश्च ताः ।
लोमशो बालकृष्णश्च तथा गोपालकृष्णकः ॥५९॥
अन्ये तेषां सहायाश्च हन्तव्या विघ्नदा हि नः ।
इति श्रुत्वा जाग्रताण्डो विचार्याऽऽह सभाजनान् ॥६०॥
हरिर्बालो विद्यते च रुद्राद्या नहि बालकाः ।
त्रयस्त्रिंशत्कोटिदेवा न बालाः कृष्णपूजकाः ॥६१॥
अकाण्डं प्रलयं द्रष्टुं यदिच्छथ प्रशूरकाः ।
कुरुत विजयं गन्तुं धर्मराजाऽऽतिथेयकम् ॥६२॥
दमनस्तु तदा श्रुत्वा सर्वेषां निर्बलात्मकम् ।
एषोऽहं प्रथमं यामीत्युक्त्वाऽसिं धृतवान् करे ॥६३॥
ये जीवलुब्धा गच्छन्तु नैजं गृहं विहाय माम् ।
रणशूराः समायान्तु शीघ्रं सैन्यसमन्विताः ॥६४॥
राजा दमनकश्चैवं क्रुधा शौर्येण जल्पवान् ।
अमनस्काः समनस्काः सर्वे सज्जास्तदाऽभवन् ॥६५॥
गमने चाऽशकुनानि जातान्येषां पुनः पुनः ।
कृष्णसर्पाऽवलोकश्च घूकदर्शनमित्यपि ॥६६॥
मुकुटानां च शस्त्राणां पातनं यानभञ्जनम् ।
दारिद्र्यदर्शनं रिक्तपात्राणां दर्शनं तथा ॥६७॥
अग्रे याति रजको नापितस्तमनुगच्छति ।
शुष्ककाष्ठे रौति काको भूकम्पोऽपि व्यजायत ॥६८॥
तेषां स्त्रीणां च केशेभ्यः स्रस्तानि कुसुमानि च ।
अकालेऽपि रजोभावो गृहं वह्निर्ददाह च ॥६९॥
पशुपक्षिविरावाश्च त्रासदाश्चाऽभवँस्तदा ।
अनादिश्रीकृष्णनारायणप्रेरितमेव हि ॥७०॥
काले सर्वे भवत्येव दमनस्य तु का कथा ।
इत्येवं चाऽपशकुने जायमानेऽपि राधिके ! ॥७१॥
कन्यकालालसाव्याप्तो दमनः सैन्यसंयुतः ।
कुंकुमवापिकाक्षेत्रं त्वागतो लोमशाश्रमम् ॥७२॥
चकार शंखनिर्घोषं वादयामास दुन्दुभिम् ।
रणतूर्याणि बहुधा ताडयामास तर्जनैः ॥७३॥
दूतं स्वं प्रेषयामास लोमशं प्रति खर्वटम् ।
खर्वटस्तु समागत्य ननाम पादयोः ऋषेः ॥७४॥
सन्देशं कथयामास दमनस्य नयेन ह ।
ऋषे ! राजा दमनकः सामुद्रक्षितिराज्यवान् ॥७५॥
आवेदयति मान्यस्य पूज्यस्य पादयोर्नमन् ।
कन्यकाः कोटिशो राजयोग्याः सन्ति तवाऽऽश्रमे ॥७६॥
देहि नः कृपया शान्त्या विनयेन रणेन वा ।
लोमशस्तं खर्वटं च प्राह नेमा धनं मम ॥७७॥
बालकृष्णस्य तु धनं कथं दातुं समुत्सहे ।
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ॥७८॥
तस्य शाश्वतनिक्षेपः कथं दीयेत वै मया ।
यातच बालकृष्णं तं यथेष्टं कुरुताऽथवा ॥७९॥
इत्युक्तः स खर्वटस्तु नत्वा ययौ नृपं प्रति ।
उवाचाऽनुपूर्विकायुग्वाक्यं श्रुत्वा दमस्तदा ॥८०॥
प्रैरयत् कन्यका हर्तुं सर्वान् दैत्यान् भयंकरान् ।
सैन्यं लोमशभूभागं समावृणोत् समन्ततः ॥८१॥
धर्षयन्तु चाहरन्तु मर्दयन्तु च कन्यकाः ।
नीत्वा नीत्वा समायान्तु त्वेवं सैन्यभटास्तदा ॥८२॥
आक्रोशन्तो दुद्रुवुश्च गर्जयन्तः परस्परम् ।
यत्र ताः कन्यकाः सन्ति दृष्ट्वा दुद्रुवुरन्तिकम् ॥८३॥
कोलाहलं तथा दृष्ट्वा भीतास्तु कन्यका हरिम् ।
सस्मरुर्लोमशं निवेदयामासुर्महाभयम् ॥८४॥
ध्यानस्थो लोमशस्तत्र बालकृष्णं हरिं प्रभुम् ।
स्मृत्वा वै स्तम्भनमन्त्रं प्राक्षिपत् क्षणमात्रतः ॥८५॥

तावत् सैन्यं जडीभूतं वृक्षस्तम्बा यथा तथा ।
सर्वं निश्चेष्टमेवाऽऽसीत् काष्ठपुत्तलिका यथा ॥८६॥
हाहाकारो महानासीद् दमनस्य भटेषु च ।
नायकाश्चाति सन्त्रस्ता मृत्युमुखे गता इव ॥८७॥
अथ बालः कृष्णनारायणो ज्ञात्वाऽतिदारुणम् ।
प्रियाणां च तदा कष्टं चागच्छत् कन्यकाः प्रति ॥८८॥
लोमशं च मुनिं नत्वा शंखचक्रधरः प्रभुः ।
सौम्यदृष्ट्या प्रिया वीक्ष्य हसँस्तस्थौ क्षणं पुरः ॥८९॥
लोमशेन प्रदत्ते त्वासने वै निषसाद सः ।
भयोद्विग्नाः कन्यकाश्च रक्ष नाथेति वै जगुः ॥९०॥
अथ ते जडतां प्राप्ता दमनाद्याः शिला इव ।
मनसा शरणं जग्मुर्लोमशं परमेश्वरम् ॥९१॥
अपराद्धं युद्धबलैर्नात्मबलैः कृपां कुरु ।
आत्मबलांशलेशेन बलं नो विलयं गतम् ॥९२॥
निर्बलाश्चाऽबलास्तुल्यास्ततो नश्चाऽबलाजनान् ।
जडभावात् प्रविच्याव्य जीवनं देहि नः प्रभो ॥९३॥
इत्येवं ते हृदा मुनेर्लोमशस्य तु पादयोः ।
शरणं नेमुरत्यर्थं तदाऽनुग्रहवान् मुनिः ॥९४॥
जडभावं स्तम्भनं मोचयामास हरेः पुरः ।
अथ दुष्टस्वभावेन दमनेन नियोजिताः ॥९५॥
पुनः कन्याः समाक्रष्टुं निपेतुः श्येनवत्तदा ।
दृष्ट्वाऽपराद्धं भगवान् सुदर्शनं मुमोच ह ॥९६॥
वह्निज्वालामयं नैकरूपधृक् सर्वतोदिशम् ।
चिच्छेद सस्यवद् दैत्यान् लक्षशस्तत्र रंहसा ॥९७॥
क्षणमात्रेण सैन्यं तत् नायका दमकस्तथा ।
सर्वे छिन्नास्तदा द्वेधा नैकः शेषोऽपि विद्यते ॥९८॥
दग्धाः सर्वेऽपि तत्रैव सौदर्शनेन वह्निना ।
सुदर्शनं हरेर्हस्ते नीत्वाऽऽत्मनः समागतम् ॥९९॥
कृष्णमूर्तौ लयं याता लक्षात्मानस्तु राधिके ।
भगवाँश्चक्रमादाय नत्वा च लोमशं मुनिम् ॥१००॥
वीक्ष्याऽऽभाष्य प्रियाः सर्वाः कन्यका हि मुहुर्मुहुः ।
बालरूपं विधायैव पर्यंकिकां समाययौ ॥१०१॥
इत्येवं भगवाँश्चक्रे दैत्यलक्षप्रणाशनम् ।
क्षणाद्वै किमसाध्यं श्रीपतेः श्रीराधिकापतेः ॥१०२॥
यत्राऽसुरा विनष्टास्ते चक्रेण निहतास्तदा ।
चक्रखाताऽभवत्प्रख्या भूमिः सा सरसस्तटे ॥१०३॥
चक्रतीर्थं तु तज्जातं चाश्वपट्टसरोवरे ।
एवं भगवता तत्र भूभारहरणं कृतम् ॥१०४॥
श्रोतुः श्रावयितुः स्मर्तुर्वाचयितुश्चमत्कृतेः ।
मोक्षः स्यादेव वा स्मृद्धिर्भवेत् सुकाम इत्यपि ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने दक्षिणोदधिस्थदमनकदैत्यस्य कन्यका हर्तुं लोमशाश्रममागतस्य लोमशेन कृतो जडीभावो बालकृष्णेन सुदर्शनेन कृतः ससैन्यस्य ध्वंसो मोक्षश्चेत्यादिनिरूपणनामा द्वादशोऽध्यायः ॥१२॥

**श्रीकृष्ण उवाच—**

शृणु राधे ह्यसुराणां पावकः श्रीनरायणः ।
सर्वान् दैत्यान् निजलीनान् कृत्वा धाम्नि स्वकोऽनयत् ॥ १ ॥
अधमोद्धार एवं श्रीभगवान् पुरुषोत्तमः ।
दैत्यानां दानवानां रक्षसां द्विषां विरोधिनाम् ॥ २ ॥
शरणं स्वं प्रपन्नानामार्त्तिहा मोक्षदो हि सः ।
अनुग्रहोऽयं कृष्णस्य श्रीपतेः परमात्मनः ॥ ३ ॥
कृपासाध्यो ह्ययं मोक्षः पारितोषिकवन्मतः ।
शृणु त्वं राधिके दैत्या मोक्षं गता मृता इति ॥ ४ ॥
श्रुत्वा दमनपत्नी च शीलहाख्या तथाऽपराः ।
मार्तण्डादिप्रधानानां वीररश्मिग्रहनादिकाः ॥ ५ ॥
धीभक्ष्या वानसी शौण्डी मातीर्या कण्डिका हृति ।
कुण्ठा कालुषिकी धूम्रा पाघूली च रजोऽण्डिका ॥ ६ ॥
करंधमी च विकटी दत्कटी दामनी रुखा ।
दामिनी तालजंघा च दीर्घिका दण्डिका घटी ॥ ७ ॥
होरा आया दमा दिष्टिः पिष्टिः पाम्पी प्रकुण्डिका ।
करण्डिकाद्याश्च तथा प्रधानानां प्रियास्तु ताः ॥ ८ ॥
समाकर्ण्य तु दैत्यानां मृत्युं रुरुदुरुत्स्वराः ।
हा हताःस्मेति चुक्रुशुर्व्यस्तकेशा विमूर्छिताः ॥ ९ ॥
विनष्टसर्वशृंगाराः सर्वसौभाग्यवर्जिताः ।
प्राणहीना इव लक्षाधिका वैधव्यपीडिताः ॥१०॥
अथाऽऽयात् तत्र वै तासां गुर्वी वै शुक्रजीवनी ।
सान्त्वयामास बोधेन वैरनिर्यापनं तथा ॥११॥
वयं सर्वा गमिष्यामो हनिष्यामश्च लोमशम् ।
बालं हत्वा करिष्यामो विनाथाः सर्वकन्यकाः ॥१२॥
सज्जाभवथ सर्वाश्च पत्यर्थं प्राणदायिकाः ।
स्वामिमार्गं गमिष्यामः कृत्वा वैरस्य तर्पणम् ॥१३॥
या न पत्युः कृते नष्टा जीविताऽपि मृता हि सा ।
पतिर्धनं हि नारीणां तद्गते विगतं धनम् ॥१४॥

पतिर्दैवं पतिर्भाग्यं सौभाग्यं पतिरेव च ।
स्वामी मानं पतिः शोभा प्रतिष्ठा स्वामिनि स्थिता ॥१५॥
केशाः कंकणमाभोगाः शोभन्ते पतिजीवनाः ।
तेषां नाशे जीवनं तु नष्टं स्त्रीणां ततो जनुः ॥१६॥
निरर्थकं भवेत् पश्चान्मरणं सार्थकं भवेत् ।
सतीरूपेण मर्तव्यं वैरनिर्यापनं विना ॥१७॥
निरर्थिका मृतिः साऽत्र न सा पत्युः प्रशान्तये ।
वैरनिर्यापनं कृत्वा मृतिः पत्युः प्रशान्तिदा ॥१८॥
तस्मादायात सर्वाश्च सम्भूय कृतनिश्चयाः ।
सन्नह्य सर्वा योत्स्यामो हनिष्यामश्च कन्यकाः ॥१९॥
लोमशस्य जटाजूटान् त्रोटयिष्याम एव च ।
बालकृष्णं हरिष्यामो मारयिष्याम एव वा ॥२०॥
इत्यामन्त्र्य तदा दैत्यपत्न्यो लक्षाऽतिलक्षकाः ।
शीलहाद्याः शस्त्रयुक्ताः समुत्पेतुर्विहायसा ॥२१॥
शक्तितोमरखड्गाऽसिभूशुण्डीमुद्गराऽऽयसान् ।
चिपीटकान् मुशलांश्च दण्डान् दन्त्रान् त्रिशूलकान् ॥२२॥
कुन्तान् सिताः कृपाणांश्च चक्राणि पट्टिशान् शरान् ।
कुन्तलान् छुरिका वेधान् दृषदो यष्टिकाः कशान् ॥२३॥
शंकूनंकुशकान् भल्लान् वंशानग्निमुखान् करान् ।
क्षेपणान् बन्धनान् पाशान् रश्मीन् पन्निगडान् कटान् ॥२४॥
कुठारान् परशून् काष्ठोपलाः पादाँश्च शृंखलाः ।
एवं बहुविधान् शस्त्रहेतीन् धृत्वाऽसुरस्त्रियः ॥२५॥
वर्मयुक्ताश्चर्मयुक्ताः स्थालीगोपितमूर्धजाः ।
सकच्छा बद्धकटिकाः सुदृढाम्बरबन्धनाः ॥२६॥
सत्राणसाधना यानैर्व्योम्ना वादित्रनिःस्वनैः ।
त्रासयन्त्यो जगत्सर्वं चाययुर्लोमशाश्रमम् ॥२७॥
मद्यपानारक्तनेत्रा मांसादनप्रमादिकाः ।
उन्मत्तवत्प्रलापिन्यश्चावतेरुर्भुवं प्रति ॥२८॥
कृष्णकज्जलशृंगादिकृतचित्राननास्तदा ।
स्तनयोः रक्तचन्द्राभिचक्रादिभिर्भयंकराः ॥२९॥
छिन्धि मारय भिन्धीति खादयैनं च मर्दय ।
चर्वय प्राणतश्चैनं प्रचूर्णय मदादिभिः ॥३०॥
आन्त्राण्यासां कर्षयन्तु पेषयन्तु शिलातले ।
मस्तकानि स्फोटयन्तु पिबन्तु रुधिराणि च ॥३१॥
चर्वयन्तु च मांसानि कन्यकानां हरेस्तथा ।
लोमशं खण्डशः सख्यः कुर्वन्तु भवतीव्रजाः ॥३२॥
अनेनाऽस्मत्स्वामिनो वै हता भस्माऽत्र विद्यते ।
लोमशं प्रथमं चात्र मारयन्तु प्रहारकैः ॥३३॥
कर्षयन्तु ततो मूत्रकर्दमे मलमिश्रितम् ।
कर्दमं चास्य च मुखे निक्षिपन्तु च चक्षुषोः ॥३४॥
नेत्रे चोत्पाटयन्त्वस्य शूले चारोपयन्तु च ।
द्वेधा पद्भ्यां विनिष्पीड्य द्विदलं कारयन्तु च ॥३५॥
एवं ता वदमाना वै लोमशस्याऽऽश्रमं गताः ।
परितो वनवृक्षाद्यान् नाशयामासुरुग्रगाः ॥३६॥
वल्लीर्विनाशयामासुर्ग्राहयामासुरुत्कराः ।
मयूरादीन् शुकान् हंसान् हरिणान् जघ्नुरुल्बणाः ॥३७॥
लोमशर्षियोंषितां तान् गणान्नैवाऽवलोकयत् ।
स्त्रीणामभिभवः पुंसा नैव कार्यः कदाचन ॥३८॥
तत्रापि मुनिना नैवं विचार्येति ददौ न हृत् ।
तावत्तास्तु समायाताः सशस्त्रा धर्तुमेव तम् ॥३९॥
ऋषिं सर्वाः कन्यकाश्च नाशयितुं प्रचक्रिरे ।
विलोक्यैतत्तु ऋषिणा जलमादाय सर्वतः ॥४०॥
स्वस्य रक्षा कन्यकानां तथा रक्षा कृता तदा ।
क्षिप्तं जलं वह्निरूपं व्यजायत ददाह ताः ॥४१॥
वह्निः प्राकाररूपेणाऽव्याप्नोत् संपरितस्तदा ।
दैत्यस्त्रीणां महत् सैन्यं वर्तुलाकारवह्निराट् ॥४२॥
ऊर्ध्वे वितानरूपश्च भूत्वा रुरोध राक्षसीः ।
दद्रुवुर्दह्यमानास्ता बालकृष्णालयं प्रति ॥४३॥
अथ कन्या अपि सर्वा लोमशो मुनिराडपि ।
मिथो जगुरिमा राक्षस्यो वै यान्ति हरिं प्रति ॥४४॥
मारयिष्यन्ति तं बालं मातरं पितरं च वा ।
अथ स्त्रीभिर्न योद्धव्यं पुरुषैः सर्वथा यतः ॥४५॥
स्त्रीभिः साकं सुयोद्धव्यं स्त्रीभिरेव हि धर्मतः ।
भवत्यः कन्यकाः सर्वा धारयन्तु हि वर्म च ॥४६॥
शस्त्राणीमानि सर्वाणि धारयन्तु यथायथम् ।
मन्त्रान् दिव्यान् धारयन्तु नाशयन्तु च ता द्रुतम् ॥४७॥
इत्युक्त्वा लोमशः शीघ्रं पत्यर्थप्राणरक्षिकाः ।
कन्यकाः श्रावयामास श्रीस्वामिकवचं तदा ॥४८॥
त्रिराचम्य हरिं ध्यात्वा प्राणानायम्य त्रिस्तथा ।
मस्तके मे हरेरस्तु मस्तकं च मुखे मुखम् ॥४९॥
नेत्रयोर्मेऽस्य नेत्रे स्तां श्रवसोर्मेऽस्य वै श्रवौ ।
ममकण्ठे हरेः कण्ठो हस्तयोर्मे हरेः करौ ॥५०॥
वक्षसि स्तनयोर्मे च हरेर्वक्षःस्तनौ तथा ।
उदरे मे हरे रस्तूदरं कट्यां हरेः कटिः ॥५१॥
पृष्ठे पृष्ठं नितम्बयोर्मे नितम्बौ हरेस्तथा ।
गुह्ये गुह्यं तथा सक्थ्नोः सक्थिनी पादयोः पदे ॥५२॥

सर्वा मूर्तिर्हरेरस्तु मयि सर्वांगमूर्तिके ।
इतिन्यासान् विधायैव स्वामिकवचमुच्चरेत् ॥५३॥
ओम् अनादिश्रीकृष्णनारायणः सर्वप्रहेतिमान् ।
दिव्यविमानमारूढः सर्वरक्षां करोतु नः ॥५४॥
शंखचक्रगदापद्मचर्मासिचापपाशवान् ।
धनुस्त्रिशूलशरवान् शस्त्रेभ्योऽवतु नो हरिः ॥५५॥
व्योम्नि दिव्यक्रमोऽव्यान्नोऽनले कृष्णनरायणः ।
वायौ प्राणपतिः पायाज्जले स्वामी परात्परः ॥५६॥

पृथ्व्यामव्याद् बालकृष्णो युद्धेऽव्यात्पुरुषोत्तमः ।
शस्त्रास्त्रमन्त्रपातेभ्योऽव्यान्नः पतिः फलस्थितः ॥५७॥
इन्द्रजालादिमायाभ्योऽन्तरात्माऽव्यात् श्रियः पतिः ।
प्रियस्वामी कृष्णनारायणोऽव्यात्कालवेगतः ॥५८॥
राक्षसीभ्यः कृष्णकान्तश्चाव्यादनवधानतः ।
मृत्युरोगाऽचिन्त्यभीभ्यः पातु न कृष्णवल्लभः ॥५९॥
भौतिकेभ्यो विकारेभ्यः पातु नोऽक्षरधामपः ।
सर्वावस्थासु सर्वेभ्यः पातु त्वन्तरगः प्रभुः ॥६०॥

संहर राक्षसीसैन्यं रक्षय कन्यकाकुलम् ।
आनन्दय ततो नश्च जयं देहि परेश्वर ॥६१॥
ओमनादिकृष्णनारायणोऽस्य देवताऽवतु ।
लोमशाय नमः स्वामिकवचस्यर्षये सदा ॥६२॥
कम्भराश्रीमहालक्ष्म्यै रक्षाकर्त्र्यै नमोऽवतु ।
नारायणाय गोपालकृष्णाय च नमोऽवतु ॥६३॥
इत्युच्चावितमेवैतत् कवचं कोटिरूपधृक् ।
क्षणादजायत कोटिसूर्यवर्चुलमुज्ज्वलम् ॥६४॥

कन्यास्ता धारयामासू राधिके च त्वया सह ।
मञ्जुला पार्वती लक्ष्मीः प्रभा हंसा च माणिकी ॥६५॥
कोटिकोटयः स्वर्णवर्णं दध्युस्तच्छेदवर्जितम् ।
अव्रणं चाऽवियुक्तं च वर्म वर्ष्मसु पूरितम् ॥६६॥
कोमलं निष्ठुरं चापि सुखस्पर्शं च रक्षकम् ।
धृत्वा जलेन साकं च शस्त्रास्त्रमन्त्रकान् पपुः ॥६७॥
कन्यकावर्ममन्त्राढ्या युगपत् कृपयाऽभवन् ।
'ग्रसत्वेतत् कृष्णकान्तः कान्तार्थमों क्षः फट् स्वाहा' ॥६८॥

जजपुस्ता मन्त्रमेवं चाष्टोत्तरशतं तदा ।
युद्धे सर्वत्र चान्यत्र यः स्मृतो रक्षकोऽस्ति वै ॥६९॥

मन्त्रश्चायं धृतस्ताभिर्जसश्चापि ततः परम् ।
लोमशः प्रददौ ताभ्योऽणिमाद्याः सिद्धयस्तथा ॥७०॥
ऐश्वर्याणि समस्तानि चाऽप्रधृष्याणि यान्यपि ।
सन्धिनीयोजिनीक्षतवारिणीशूलहारिणीः ॥७१॥

जलाऽऽचमनसार्धं वै ददौ विद्याः सहस्रशः ।
अनेकरूपभवनं मृषासत्यविधारणम् ॥७२॥
अन्तर्धानं पुनर्भावं सर्वविद्या ददौ तदा ।
कोट्यर्बुदानां कन्यानां सैन्यवेषाँस्तदा द्रुतम् ॥७३॥
जलबिन्द्वभ्युक्षणेन कृतवान् लोमशो मुनिः ।
तूर्यवादित्रयानानि गजसिंहाऽश्वकानि च ॥७४॥
हंसगरुडयानानि क्षणाज्जलेन चाऽकरोत् ।
तावत् तूर्याण्यवाद्यन्तोत्पेतुर्व्योम्नि कुमारिकाः ॥७५॥

यत्राऽस्ते भगवान् कृष्णो बालः स्वामी गृहान्तरे ।
क्षणध्यानेन गत्वैताश्चाऽम्बरं प्राप्य चाग्रतः ॥७६॥
राक्षसीनां तु सैन्यानां वारणार्थं व्यवस्थिताः ।
राधा लक्ष्मीः रमा श्रीश्च पार्वती माणिकी प्रभा ॥७७॥
मंगला मनसा रेवा भार्गवी च सरस्वती ।
गंगा च मञ्जुला भक्तिर्मुक्तिरेकादशी रतिः ॥७८॥
हंसा सगुणा तुलसी कमला विरजा सती ।
मूर्तिश्च गोमती स्वर्णरेखा जया च नन्दिनी ॥७९॥

दुर्गा ललिता सावित्री दोला पुष्पा कलावती ।
बदरी माधवी पम्पा षष्ठी प्रीतिः ऋतध्वजी ॥८०॥
मौक्तिका लाडकी देवी मनुः कस्तूरिका सिता ।
हैमी शान्तिः प्रशान्ता च चम्पा गोदावरी यमी ॥८१॥
ओजस्वती च सविता रत्ना मिष्टाऽमृता धनिः ।
चतुरा वज्रिका मुक्ता सुशीला श्यामिकाऽमला ॥८२॥
सन्तुष्टा चन्द्रिका कान्तिः कुंवरी च शिवादिकाः ।
एताश्चान्याः शतं चापि चत्वारिंशत्तदग्रगाः ॥८३॥

सैनापत्येऽभवन्नग्रगताः कोट्यो बलात्मिकाः ।
हर्षनादाँस्तदा चक्रुर्जयकृष्णनरायण ॥८४॥

जय कान्त महाकान्त परमेश्वर वै जय ।
जय स्वामिन् जय नाथ, लोमशोऽपि जयत्विह ॥८५॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
एवं मन्त्रं रटन्त्यश्च रोधयामासुरासुरीः ॥८६॥

'ग्रसत्वेतत् कृष्णकान्तः कान्तार्थम् ओं क्षः फट् स्वाहा' ।
मन्त्रजापं तदाऽकुर्वन् वारयामासुरासुरीः ॥८७॥

आकस्मिकं राक्षसीनां सैन्यं चाम्बरमार्गतः ।
समायातं वीक्ष्य मातापितरौ वासिनोऽपरे ॥८८॥
भयं प्रापुस्तदा बालकृष्णो भूत्वा किशोरकः ।
पितृभ्यामाह भेतव्यं नैव नैव च नैव च ॥८९॥
निर्यातुं विधवा वैरं राक्षस्यो योद्धुमागताः ।
स्त्रियो नैव प्रहन्तव्या मया क्वापि नरेण यत् ॥९०॥

लोमशेनापि हन्तव्या नैव नैव कदाचन ।
वह्निनाऽऽश्रमरक्षां स चकार गुरुराड् यतः ॥९१॥
ता भीताश्च ततोऽत्रापि मां हन्तुं चागताः खलु ।
लोमशप्रेषितास्ताभिर्युद्धयन्तां कन्यकास्त्विमाः ॥९२॥
सन्नद्धा मन्त्रशास्त्रास्त्रयुद्धधर्मादिबृंहिताः ।
कोटिशस्ता इमाः सैन्यरूपेणाऽम्बरसंस्थिताः ॥९३॥
युयुत्सन्तीच्छया मेऽम्ब ! नाऽत्र चित्रं कथंचन ।
इति कृष्णे प्रवदिते गरुडान् हंसवाजिनः ॥९४॥
गजान् यानानि दिव्यानि ब्रह्मविष्णुमहेश्वराः ।
ददुर्व्योम्नि कन्यकाभ्यो रथान् विमानकानि च ॥९५॥
वीरकन्यामहासैन्यं वाहनैरुपशोभितम् ।
यावत् तावत्तु राक्षस्यः समुत्पेतुः समन्ततः ॥९६॥
ताडयामासुरत्युग्रं वीरकन्यागणं तदा ।
कन्यका रणचण्ड्यस्ताः प्रतिताडनमाचरन् ॥९७॥
गजानां वाजिनां हंसगरुडानां निनादनम् ।
सिंहानां देवयानानां गर्जनं चाण्डमावृणोत् ॥९८॥
गर्दभानां तथोष्ट्राणां कुक्कुटानां च रक्षसाम् ।
शुनां च जम्बुकानां चाऽऽक्रोशास्तत्राऽभवन् प्रति ॥९९॥
हेतीनां चाऽऽयुधानां च शराणां पातनानि वै ।
हन्त्रीणां योषितां चान्योन्यं देहेष्वभवन् मुहुः ॥१००॥
निजघ्नुस्तोमरैः काश्चित् काश्चिजघ्नुः कृपाणकैः ।
काश्चित् केशान् प्रगृह्यैव चिक्षिपुः पृथिवीतले ॥१०१॥
अन्या जघ्नुर्गदाभिश्च तथाऽपरास्तु मूशलैः ।
भिन्दीपालैश्चेतराश्च निजघ्नुश्चाऽसिभिः पराः ॥१०२॥
खड्गैश्चान्या उपलाभिः पाषाणैः क्षेपणैस्तथा ।
शृंखलाभिस्तथा दण्डैर्नाराचैश्च शरैः पराः ॥१०३॥
हन्यन्ते तत्र राक्षस्यो जीवतो न तु कन्यकाः ।
शक्तिभिर्मुद्गरैश्चान्या भूशुण्डीभिस्तथाऽपराः ॥१०४॥
घ्नन्ति क्रोधानलदग्धा ओष्ठचर्वणरोषिताः ।
दण्डैर्दन्तैस्त्रिशूलैश्च चिपीटकैश्च पट्टिशैः ॥१०५॥
मूढमाराण्यपतन् वै सिताभिश्च कृपाणकैः ।
कुन्तैः कुन्तलकैश्चापि शरैश्चक्रैश्च मूशलैः ॥१०६॥
छुरिकाभिर्दृषद्भिश्च यष्टिकाभिश्च वेधनैः ।
भिद्यन्ते ब्रह्मरन्ध्राणि छिद्यन्ते सक्थिबाहवः ॥१०७॥
शंकुभिः कुशकैर्भल्लैर्वैशैरग्निमुखैः करैः ।
विदीर्यन्ते हृदयानि स्तनानि मस्तकानि च ॥१०८॥
बद्ध्यन्ते रश्मिपाशैश्च क्षिण्यन्ते कटकादिभिः ।
कुठारैः परशुभिश्च विभिद्यन्ते कबन्धकाः ॥१०९॥
शृंखलाभिः प्रताड्यन्ते ज्वाल्यन्ते चानलैस्तदा ।
राक्षस्यः कन्यका हन्यन्तेऽन्धताडनकैर्मिथः ॥११०॥
एवं वै तुमुलस्तत्र संग्रामः समजायत ।
न कस्याश्चिच्छ्रूयतेऽत्र शब्दो युद्धप्रगर्जनैः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने राक्षसीनां कन्यकानां च अश्वपट्टसरःसन्निधौ तुमुलयुद्धारंभो नाम त्रयोदशोऽध्यायः ॥१३॥

**श्रीकृष्ण उवाच—**

श्रूयतां राधिके युद्धं नारीणां चण्डयोषिताम् ।
फेरुराजगृहिणीनां राक्षसीनां भयानकम् ॥ १ ॥
दारुणं सर्वथानाशकरं प्राणार्पणात्मकम् ।
पतयोऽत्र मृता यस्मान्मर्तव्यं तत्र भस्मसु ॥ २ ॥
इति कृत्वा युयुधुस्ता मरणांकगता यथा ।
भयं त्यक्त्वा हरिं दृष्ट्वा हन्यतां हन्यतामिति ॥ ३ ॥
खण्डशः कूर्चभागाश्च विधीयन्तां प्रचुक्रुशुः ।
समुद्रस्य यथा पूरप्रवाहः पूर्णिमादिने ॥ ४ ॥
तथा सैन्यं राक्षसीनां बालकृष्णगृहेऽपतत् ।
कन्यकानां महासैन्यं मिश्रितं न तदा पृथक् ॥ ५ ॥
भाति यतश्च ताः क्रूरा मृत्वाऽपि बालकृष्णकम् ।
उद्धर्तुं पूरवच्चापि प्रसह्यापि यथाकथम् ॥ ६ ॥
धर्तव्यो मारयितव्यो जीवतो नाऽसुमान् भवेत् ।
इत्येवं मरणं चाऽग्रे कृत्वा हन्तुं प्रधाविताः ॥ ७ ॥
प्रलये शलभा व्योम्नो यथा पतन्ति भूतले ।
तथा पतन्ति ताः सर्वा राक्षस्यो बालमन्दिरे ॥ ८ ॥
दृष्ट्वैवं वैपरीत्यं तु बालकृष्णस्तदा प्रभुः ।
प्रहसन् कुंकुमवापीक्षेत्रं लीनं चकार ह ॥ ९ ॥
राक्षस्यस्तत्र ह गृहस्थले वने जलात्मकम् ।
सर्वे चाकस्मिकं दृष्ट्वा निराशा ययुरम्बरम् ॥१०॥
कन्यकाभिर्महायुद्धं चक्रुः रोषातिसंभृताः ।
कन्यका दिव्यदेहास्ता वध्यन्ते शस्त्रकोटिभिः॥११॥
न च तासां शरीराणि भिद्यन्ते वह्निपिण्डवत् ।
न च दुःखानि जायन्ते छेदनानि भवन्ति न ॥१२॥
स्वामिवर्मसमावृत्ता रक्षामन्त्राभिरक्षिताः ।
न म्रियन्ते कृष्णपत्न्यो म्रियन्ते दैत्ययोषितः ॥१३॥
छिद्यन्ते बहुधा शस्त्रैः कन्यकानां तदोल्बणैः ।
द्वेधा भूता राक्षसी या सा नैका पुनरस्ति वै ॥१४॥

हता सा जीवतो याता गता नायाति वै पुनः ।
आकाशं युद्धसंव्याप्तं रणचण्डीविभूषितम् ॥१५॥
अभवन्मोदमापन्नं चावकाशान् ददौ बहून् ।
सहस्रक्रोशपारे वै युद्धाकाशोऽभवत्तदा ॥१६॥
समन्ततः सुराष्ट्रे वै कोट्यब्जार्बुदयोषिताम् ।
एकोऽपि विद्यते नाऽत्र पुमान् रणग्लहे तदा ॥१७॥
राक्षसीनां कबन्धाश्च शिरांसि बाहवः स्तनाः ।
सक्थीनि च नितम्बाश्च व्योम्नो निपेतुरम्बरात् ॥१८॥
रक्तवर्षं मांसवर्षं पिण्डवर्षं बभूव ह ।
केशवर्षं शस्त्रवर्षं शववर्षं बभूव ह ॥१९॥
अंगवर्षं चन्द्रनिभखण्डवर्षं बभूव ह ।
नवनीतसमा देहा विदार्यन्तेऽतिकोमलाः ॥२०॥
पात्यन्ते पतिदेवार्थे परस्परं प्रियागणैः ।
यमराजः क्षणं युद्धं द्रष्टुं श्रुत्वा समागतः ॥२१॥
देवा आकाशगा युद्धं लोकयन्ति न भूतजम् ।
यदा दैत्यस्त्रीगणैश्च विज्ञातं निजनाशनम् ॥२२॥
कन्यकाशाश्वतिकत्वं तदा मन्त्रैः प्रमन्त्र्य च ।
मुक्तान्यस्त्राणि दिव्यानि भूतसंहारकाणि वै ॥२३॥
राक्षसीभिः प्रथमं च बाष्पास्त्रं प्रहितं तदा ।
बाष्पं चाऽभूदम्बरेति नाऽज्ञायत तृणादिकम् ॥२४॥
लक्ष्म्या मुक्तं किरणास्त्रं बाष्पनाशो बभूव ह ।
अथ मुमोच वै शुक्रजीवनी धूम्रमस्त्रकम् ॥२५॥
अम्बरं धूम्रसंछन्नं नेत्रयोर्ज्वलनं ह्यभूत् ।
अञ्जनी च तदा धूम्रपानं सर्वं विधाय च ॥२६॥
मुमोच तत्र वह्न्यस्त्रं राक्षसीलयकारकम् ।
शुक्रसञ्जीवनी तत्र मेघास्त्रं प्रमुमोच ह ॥२७॥
वृन्दा तदा प्रमुमोच शालग्रामास्त्रकं महत् ।
आकाशे शालशैला वै ताडयन्ति तु राक्षसीः ॥२८॥
कोटरा राक्षसी शालग्रामास्त्रं त्वगिलत् तदा ।
पांश्वस्त्रं प्रमुमोचाऽत्र धूल्याढ्यं शुक्रजीवनी ॥२९॥
अञ्जनी तु तदा वायुमन्त्रास्त्रं प्रमुमोच ह ।
नागास्त्रं षण्ढिका तत्र प्रेरयामास सर्वतः ॥३०॥
गारुडास्त्रं च कमला प्रमुमोच सुखावहम् ।
वृश्चिकास्त्रं प्रमुमोच विख्याता राक्षसी तदा ॥३१॥
चिल्लिकास्त्रं प्रमुमोच गरुत्मती तदा पुनः ।
वह्न्यणुवृष्टिमकरोत् प्राणहां शुक्रजीवनी ॥३२॥
शारदा वह्निवृष्टिं च जग्रास लीलया तदा ।
अथ राक्षसपत्न्यस्ता मायायुद्धं तदा व्यधुः ॥३३॥

पाषाणान् मरुतो वृक्षान् मांसलोहितपूयकान् ।
ससृजुर्मद्यधाराश्च बाणान् शस्त्राणि सर्वशः ॥३४॥
वर्षयामासुरत्युग्रान् स्फोटचूर्णान् सवह्निकान् ।
हेतीन् समन्ततस्तीक्ष्णान् मलमूत्रादिकाँस्तथा ॥३५॥
हाहाकारस्तदा जातो भूतले कन्यकागणे ।
तदा तु योगिनीचक्रं चतुःषष्टिगणात्मकम् ॥३६॥
विधाय निजरूपाणि धराधरसमानि वै ।
जग्रसुस्ताः समस्ताश्च माया मृषोद्भवा मुहुः ॥३७॥
आमूलाल्लयमापन्ना योगिनीबलधर्षिताः ।
माया वृष्टिस्वरूपास्ता लयं यातास्तदा पुनः ॥३८॥
फेरुचिताग्ख्याक्षस्या शवानां वर्षणं कृतम् ।
कोटिशो वै शवा व्योम्नो निपेतुर्योषितां तथा ॥३९॥
कुक्कुटीनां च गृध्रीणां काकीनां शुकयोषिताम् ।
श्येनीनां भासनारीणां कपोतीनां शवास्तथा ॥४०॥
क्रव्यादीनामुलूकीनां श्येनीनां चिब्बरीशवाः ।
निपेतुरम्बरात्तत्र भूतलं छन्नतां गतम् ॥४१॥
तदा विलोक्य वै शंभोर्भैरवी हि महासती ।
रूपं चकार वै नैजं दशयोजनमायतम् ॥४२॥
लक्षबाहुयुतं लक्षराक्षसी शवसर्जिनीः ।
जग्राह युगपत्सर्वा मर्दयामास तास्ततः ॥४३॥
लक्षपादैर्मूढमारैस्तदा चक्रुशुरुल्बणम् ।
शवसृष्टिर्लयं याता मृषा माया लयं गता ॥४४॥
अथ तदा तु भैरव्या हस्तगा दैत्ययोषितः ।
प्रतारयितुं हस्तेभ्यो निर्गन्तुं यत्नमाचरन् ॥४५॥
एकैकास्ताः करे चक्रु रूपाण्यसंख्यकानि हि ।
काश्चिद् दश तथा काश्चित् पञ्चाशच्चापराः शतम् ॥४६॥
यथा हस्ते ममुर्नैव तथा ता व्यचरत् कलाः ।
भैरवी निजहस्तानां वर्धनं त्वकरोत्तदा ॥४७॥
तथा ता अपि राक्षस्यो वृद्धिं नैजां दधुस्तदा ।
एवं भारे तु महति त्वसंख्यदेहसर्जने ॥४८॥
भैरवीकरतस्ता वै विनिर्गत्य विमुष्टिकात् ।
जगर्जुर्व्योममार्गस्था भैरवीं मस्तके मुहुः ॥४९॥
ताडयामासुरत्यर्थमसंख्या राक्षसस्त्रियः ।
प्राणग्लहे स्थितास्ताभिर्मृत्युभीर्नैव गण्यते ॥५०॥
अथ दृष्ट्वा महालक्ष्मीरसंख्या राक्षसीस्तदा ।
कोट्यसंख्यस्वरूपास्ता अनन्तरूपधारिणीः ॥५१॥
स्वयं माता महालक्ष्मीः स्मृत्वा कृष्णनरायणम् ।
दधार रूपं ब्रह्माण्डतुल्यं कोटिभुजायुतम् ॥५२॥

ग्रहनक्षत्रताराद्या लम्बन्ते मूर्धजेषु वै ।
यस्याः सा तु महाघोरा सर्वशस्त्रप्रहारिणी ॥५३॥
मारयामास संगृह्य संगृह्य राक्षसीर्मुहुः ।
अन्या लक्ष्म्यश्चतुर्हस्ता अष्टहस्तास्तथाऽपराः ॥५४॥
षोडशहस्तिकाश्चान्या द्वात्रिंशद्धस्तसंयुताः ।
चतुःषष्टिबाहुयुक्ताः शतसाहस्रसत्कराः ॥५५॥
दशसाहस्रहस्ताश्च महालक्ष्म्या विनिर्मिताः ।
घ्नन्ति ता राक्षसीर्व्योम्नि समुत्प्लुत्य पुनः पुनः ॥५६॥
बह्वयस्तत्र हता नष्टा व्यसवः पेतुरर्दिताः ।
मृतास्तास्तु मृता एव पुनरुत्थानवर्जिताः ॥५७॥
तदात्मानो महालक्ष्म्यामन्तर्भावं प्रपेदिरे ।
बलं त्वर्धाधिकं सर्वं नष्टं राक्षसयोषिताम् ॥५८॥
महालक्ष्मीर्भीरुलक्ष्मीरन्या लक्ष्म्यस्ततः क्षणम् ।
विलोक्य विजयं नैजं रणतूर्याण्यवादयन् ॥५९॥
कन्यकाः श्रीबालकृष्णयुता मोदमथाऽलभन् ।
अथैका रूढिका तत्र राक्षसी शैलरूपिणी ॥६०॥
भूत्वा पपात वै व्योम्नो बालकृष्णोपरि द्रुतम् ।
तावत्तलाजा ह्यभवन्महच्छैलग्रहोपमा ॥६१॥
कुंकुमवापिकाक्षेत्रं तलाजाशैलरक्षितम् ।
अभवत् कन्यका गर्भं भयं दूरं ततो गतम् ॥६२॥
रूण्ढिका वेगतो यावत्तलाजापर्वतेऽपतत् ।
छिन्ना भिन्ना च शिखरैर्विदीर्णा च मृताऽभवत् ॥६३॥
अथाऽपरा भूमितलं प्रविश्य क्षितिजात्मिका ।
ह्यभवद् दीर्घरूपा वै शतयोजनमायता ॥६४॥
दर्दूरीरूपमापन्ना दशयोजनमुच्छ्रिता ।
अधरोष्ठः कृतः पृथ्व्यास्तलरूपः सुशोभनः ॥६५॥
ऊर्ध्वोष्ठश्च कृतः स्वर्गसमस्ताराम्बरान्वितः ।
यत्र नैव हि कासाञ्चिद् विभ्रमो भयदो भवेत् ॥६६॥
कापट्येन तथा कृत्वा सर्वास्तु कन्यकास्तथा ।
कुंकुमवापिकाक्षेत्रं चाश्वपट्टसरोवरम् ॥६७॥
लोमशस्याऽऽश्रमश्चापि मुखमध्ये चकार सा ।
तावन्नारायणः कृष्णो ज्ञात्वा दुश्चेष्टितं तदा ॥६८॥
राक्षस्यास्तु विनाशार्थं तथा कौतुकसृष्टये ।
स्वयं वै कन्यकारूपं दधार कन्यकासु वै ॥६९॥
चक्रं सुदर्शनं दिव्यं करे कृत्वा गले स्थितः ।
कृष्णः कृष्णानामकन्या व्यराजत क्षणं तदा ॥७०॥

सुदर्शनं महातेजोवह्नियुक्तं मुमोच सः ।
वह्नियुक्तेन चक्रेण तस्या गलमुखोदरम् ॥७१॥
चकर्त खण्डशस्तां वै मण्डुकीं रूण्ढिकां क्षणात् ।
तस्या मेदाऽस्थितो जाताश्चाकचक्यचिरोटिकाः ॥७२॥
अथाऽन्या दामिनीनाम्नी राक्षसी वीक्ष्य वै मृताम् ।
दर्दूरिकां स्वयं तेजोमयं रूपं दधार च ॥७३॥
व्योमव्याप्तं महाविद्युज्ज्वालामालाकुलं ततः ।
सुदर्शनमगिलत् सा मुखं व्यादाय वैष्णवम् ॥७४॥
तां च भित्त्वा विनिर्यातं द्रागेव तत् सुदर्शनम् ।
यथा विद्युल्लतांशाश्च निपतेयुः क्षितौ तथा ॥७५॥
दामिनी राक्षसी खण्डमयी पपात भूतले ।
अथाऽन्या ग्रहना तत्र वपुर्निर्माय सूर्यवत् ॥७६॥
बालकृष्णं मुखे न्यस्योत्पपात खं दिवं प्रति ।
वीरशिरस्तावदेवाऽत्र संवीक्ष्य लोमशं मुनिम् ॥७७॥
मुखे न्यस्योत्पपातोर्ध्वं ययौ दूरं यदाऽम्बरम् ।
कृष्णनारायणो बालो लोमशोऽपि च योगिराट् ॥७८॥
वह्निरूपावुभो तत्रौदरे जातौ हि दारुणौ ।
वह्निना जज्ज्वलतुश्च राक्षस्यौ मम्रतुस्तथा ॥७९॥
उदरे च विनिष्पाट्य निर्गतौ लोमशाऽच्युतौ ।
अथाऽन्या दामिनी वह्निरूपाऽभवत् तदाश्रमे ॥८०॥
लोमशस्याऽऽश्रमं सर्वं क्षेत्रं कुंकुमवापिकम् ।
ददाह वह्निना यावत् किञ्चिन्मात्रं तदा द्रुतम् ॥८१॥
बालाहकी महालक्ष्मीर्वृष्टिरूपा बभूव ह ।
वह्निं च रुन्धयामास शान्तयामास वर्षणैः ॥८२॥
धृत्वा तु दामिनीं तत्र जघान प्राणतः सती ।
मृता सा दामिनी तत्र प्रसार्य पादहस्तकौ ॥८३॥
अथाऽपरा च धीभक्ष्यानाम्नी राक्षसकामिनी ।
देवीं तु कम्भरालक्ष्मीं स्कन्धे निधाय खं ययौ ॥८४॥
दृष्ट्वा तदा तु सा साध्वी मुष्ट्या जघान धीमखीम् ।
ब्रह्मरन्ध्रे मृता धीभक्षिणी तूर्णं पपात ह ॥८५॥
शौण्डी व्याघ्रीरूपधरी भूत्वा गोपालकृष्णकम् ।
जग्राह पितरं यावत्तावत् पार्वती कारमी ॥८६॥
भूत्वा व्याघ्रीं चखादैनां पिता स्वस्थोऽभवत्तदा ।
अथाऽन्या रणचण्डीभिः कन्याभिः सर्वतोबलैः ॥८७॥
हतास्तत्रमृताः सर्वाः शतमात्राऽवशेषिताः ।
तास्तदा शरणं प्राताः कुण्ठादिदिष्टिदमादिकाः ॥८८॥

कन्याभिस्ता निगडेषु धृताः शस्त्रविहीनकाः ।
विधवास्ताः कृष्णनारायणं स्मृत्वा प्रणेमिरे ॥८९॥
रुरुदुर्भयमग्नाश्च प्रार्थयामासुरीश्वरम् ।
हता नाथा हि नः कृष्ण वयं ते शरणं गताः ॥९०॥
उद्धारय महादुःखात् परात्पर महाप्रभो ।
लक्षलक्षप्रलक्षाणां मूलकृत्रिमयोषिताम् ॥९१॥
राक्षसीनां मृतानां त्वं समुद्धारं समाचर ।
वयं तु चाऽबलाः कृष्ण तव प्रिया हताः खलु ॥९२॥
क्व गच्छामः कृपासिन्धो तलाजावत् निजाः कुरु ।
यथालक्ष्मीः रमा राधा श्रीः सती पार्वती प्रभा ॥९३॥
माणिक्या मंजुला तासां दासीर्नैजाः कुरु प्रभो ।
यद्वा तासां च दासीनां दासीर्विधेहि माधव ॥९४॥
त्वां विना न गृहं चान्यत् सुखदं त्वायतौ मतम् ।
वयं तूभयतोभ्रष्टा लभामो वै कथं सुखम् ॥९५॥
तस्मान्नैजाः कुरु कृष्ण क्षमाप्याऽस्मत्सुदारुणम् ।
कर्मप्रज्वाल्य रक्षत्वं दिव्यभावं प्रदेहि नः ॥९६॥
सुराश्च भोगिनो दैत्या दानवा राक्षसाः खगाः ।
ऋषयो मुनयो मर्त्या वृक्षाद्यास्ते प्रसूतयः ॥९७॥
तव वंश समुत्पन्नास्तव योगमुपागताः ।
कथं पापेन जीवामोऽलभ्यकान्तमुपागताः ॥९८॥
कुरु नः पावनीः सर्वा रक्षोभावविवर्जिताः ।
इत्येवं त्वर्थितस्ताभिः कृष्णनारायणः प्रभुः ॥९९॥
ताः सर्वा दिव्यदृष्ट्या च दिव्याऽऽप्प्रोक्षणकेन च ।
द्वेषभावेन च स्वस्य सततस्मरणेन च ॥१००॥
धूतपापा गतरक्षोभावाश्च ता व्यधात्तदा ।
कामधेनुगवामास्यैरन्तःकृत्वा गवोदरात् ॥१०१॥
मूत्रद्वारेण तत्रैव लोमशेन निकासिताः ।
ब्रह्मयोग्या अभवँस्ता दिव्यदेहा रमा यथा ॥१०२॥
विसस्मरुस्तदा नैजान् जन्मसंस्कारविग्रहान् ।
दिव्या देव्यो यथा तद्वज्जाताश्चन्द्रकला यथा ॥१०३॥
सर्वास्ताः कन्यकाः कृष्णनारायणस्य वाञ्छया ।
सौम्या द्वादशवार्षिक्यो वैष्णव्यस्तिलकान्विताः ॥१०४॥
अन्यथाकर्तृकृष्णस्य प्रभावेण हि राधिके ! ।
अथ याश्च मृताः कृष्णमूर्तौ लीना रणे तदा ॥१०५॥
ताश्च सर्वाः कृष्णमूर्तेर्निर्गता दिव्यकन्यकाः ।
लक्षसंख्याश्च ताः सूर्योज्ज्वलाम्बराश्च निर्मलाः ॥१०६॥
कटकमुकुटचक्रकुण्डलरशनान्विताः ।
अजायन्त क्षणात् कृष्णनारायणेहया प्रियाः ॥१०७॥
'ओंनमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
मन्त्रं श्रीलोमशस्ताभ्यो ददौ श्रीहरिसन्निधौ ॥१०८॥
हवनं कारयित्वा च ताभ्योऽन्याभ्यश्च लोमशः ।
ददौ यज्ञोपवीतानि पीताम्बराणि मालिकाः ॥१०९॥
तौलसीर्जपमालाश्च कण्ठीश्चापि ददौ तदा ।
शंखचक्रगदापद्मचिह्नान्यपि ददौ तदा ॥११०॥
भोजिता दीक्षिताः सर्वा रक्षिता लोमशाश्रमे ।
याश्च युद्धेऽभवँस्तत्र रमाद्याः कोटिकन्यकाः ॥१११॥
ताभ्यः कृष्णपतिस्तत्र परात्परसुखं ददौ ।
बाहूभ्यां ताः परिगृह्य निपीड्य निजवक्षसि ॥११२॥
धन्याऽऽशीर्वादशब्दाँश्च चुम्बनानि ददौ प्रभुः ।
युद्धश्रमोऽस्त्रशस्त्रादिस्पर्शश्रमादिकं तदा ॥११३॥
क्षणात् सर्वं निवृत्तं च रोममात्राऽपि न क्षतिः ।
सर्वासामभवत्तत्र जयकारो महानभूत् ॥११४॥
भोजिताः पूजिताः सर्वाः परिरब्धा दयालुना ।
चुम्बिता वक्षसि स्वस्य पीडिताश्चामृतीकृताः ॥११५॥
महोत्सवः कृतस्तत्र जयनिमित्तजोऽत्र च ।
देवाद्याश्च समाजग्मुः पूजिता भोजिताश्च ते ॥११६॥
यथागतं गतास्ते तु लोमशो मुनिराट् ततः ।
नामानि लक्षकन्यानां विदधे तु नवानि वै ॥११७॥
सुशीला सुसहा विद्युत् किरणा चन्द्रिका द्युतिः ।
इत्यादिशुभनामानि कृतवान् लोमशो मुनिः ॥११८॥
आश्रमं नीतवान् सर्वाः कृष्णनारायणाज्ञया ।
अथ पृथ्वी समाहूता कृष्णनारायणेन तु ॥११९॥
युद्धस्थलीं स्वयं भूमिः समीचकार वै तदा ।
अशुद्धिं लोपयामास शुद्धां भूमिं चकार सा ॥१२०॥
वृष्ट्या चापि क्षालिता सा देवेनापि ततः शुभा ।
भूमिः सा लक्षतीर्थाख्या ह्यभवत् कृष्णवन्दिता ॥१२१॥
शस्त्राणि भगवान्नैजे सौधे ररक्ष यानि च ।
युद्धे तत्र पतितानि दिव्यानि भौतिकानि च ॥१२२॥
एवं वै राधिके युद्धं पुरा तत्र बभूव ह ।
न भूतं न भविष्यच्च स्त्रीणां दिव्यगतिप्रदम् ॥१२३॥
लक्षाणां कन्यकानां तु रूपद्वयं हरीच्छया ।
व्यजायत च प्रत्येकं तत्रैकैकं विमानगम् ॥१२४॥
भूत्वा च पार्षदैर्नीतं परमाक्षरसत्पदम् ।
कन्यारूपं द्वितीयं च लोमशाश्रमसंस्थितम् ॥१२५॥
इत्येवं राधिके तेऽत्र कथितं परमाऽद्भुतम् ।
कथानकं हरेर्दिव्यं नारीयुद्धमयं परम् ॥१२६॥

पठनाच्छ्रवणाच्चास्य चिन्तनाच्चार्पणात्तथा ।
कृष्णप्रियात्वमासाद्य ब्रह्मलोके गतिर्भवेत् ॥१२७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽसंख्य-
कन्यकाभिः युद्धसमर्थाभिः सह राक्षसीनां युद्धे राक्षसीनां
विनाशाभिमुखपराजयेऽन्ते शरणागतिर्मुक्तिपदं
कन्यकापदं च बालकृष्णकृपयेतिनिरूपणनामा
चतुर्दशोऽध्यायः ॥१४॥

**श्रीकृष्ण उवाच—**

शृणु वै राधिके तासां कथां परमपावनीम् ।
श्रीकृष्णस्वामिसंयोगाद् रमात्वप्राप्तयोषिताम् ॥ १ ॥
अनादिश्रीकृष्णनारायणेन लोमशाय ताः ।
तदाश्रमे निवासार्थं रक्षार्थं प्रसमर्पिताः ॥ २ ॥
प्राप्तदिव्यस्वरूपास्ताः प्राप्ताऽऽनवकुमारताः ।
अप्यप्राप्तज्ञानदीपा अत एव कथानके ॥ ३ ॥
व्याख्याने वा रसवर्ज्या अनाविष्कृतबुद्धयः ।
मौनीभावेन वर्तन्ते मुग्धा इव हि संसदि ॥ ४ ॥
आत्मज्ञानं न जानन्ति न जानन्ति वृषं तपः ।
अज्ञाता मोक्षधर्मेषु ता आसन् छन्नदीपवत् ॥ ५ ॥
किन्तु मुमुक्षाभावाढ्या ज्ञानोदयपरायणाः ।
पप्रच्छुः राधिके सर्वा लोमशं ज्ञानभास्करम् ॥ ६ ॥
कीटान् भ्रमरी भ्रमरीव करोति नैजदंशतः ।
ज्ञानी ज्ञानप्रदस्त्वन्धान् चक्षुष्मतः करोति च ॥ ७ ॥
ज्ञानं देहि गुरोऽस्मभ्यं मोक्षदं चात्मशान्तिदम् ।
नारीरूपं सदा ज्ञानवर्जितं वासनाऽऽश्रयम् ॥ ८ ॥
दोषाश्रयं भवत्येव मोक्षस्तस्मान्न जायते ।
यथा मोक्षो भवेन्नश्च दोषनाशो यथा भवेत् ॥ ९ ॥
यथा कृष्णः प्रसन्नः स्यात्तथा वै सरलान् वृषान् ।
कर्तव्यार्थभूतानस्मान् प्रशाधि चाऽबलाजनान् ॥१०॥
इत्यर्थितो लोमशस्तु ज्येष्ठे चैकादशीदिने ।
उपादिदेश सर्वाभ्यो व्रतधर्मान् शुभप्रदान् ॥११॥
एकादशीव्रतं पुत्र्यः ! सर्वपापहरं परम् ।
निर्जलं च निराहारं कृतं सजागरं तथा ॥१२॥
सश्रीकृष्णार्चनश्राद्धं सकृष्णाराधनान्वितम् ।
ससत्संगेन्द्रियदमं पापहं मोक्षदं हि तत् ॥१३॥
कृष्णप्रसन्नतादं च भुक्तिमुक्तिप्रदं तथा ।
प्रातः पूजां व्रते त्वद्य बालकृष्णस्य वै हरेः ॥१४॥

गत्वा कुरुत पुष्पाद्यैः फलैर्जलैश्च चन्दनैः ।
आत्मार्पणैः प्रदक्षिणैर्हृद्भवैः सुमनोहरैः ॥१५॥
भोज्यदानैः पानदानैर्दोलाऽऽन्दोलनकैरपि ।
नृत्यगीतैर्हावभावै रञ्जनैः सेवनैर्मुहुः ॥१६॥
इन्द्रियाणां निग्रहैश्च मौनैर्विषयवर्जितम् ।
व्रतं कुरुत कृष्णस्य प्रसन्नतार्थमेव वै ॥१७॥
इत्युक्तास्तानूत्नकन्या व्रतं तु निर्जलोद्भवम् ।
ज्येष्ठशुक्लैकादश्याः संचक्रुः सजागरान्वितम् ॥१८॥
बालकृष्णः प्रसन्नश्च तास्तु वैकुण्ठदर्शनम् ।
कारयामास च नैजं दर्शनं सुचतुर्भुजम् ॥१९॥
नैकपार्षदलक्ष्म्यादिविभूतिसेवितं ददौ ।
ताश्चात्मानं कृतकृत्यं मेनिरे श्रीहरिप्रियाः ॥२०॥
रात्रौ जागरणं चक्रुः प्रातश्चक्रुर्हि पारणाम् ।
आसीनं लोमशं ताश्च पप्रच्छुर्धर्मसंग्रहम् ॥२१॥
किं सेव्यं सर्वदा पापनाशकं पुण्यदायकम् ।
मोक्षदं स्वर्गदं चापि याम्यकष्टनिवारकम् ॥२२॥
लोमशस्तास्तदा प्राह सेव्या गावस्तथाविधाः ।
सर्वदेवमया गावो देव्यश्चामृतवार्धयः ॥२३॥
तारिकास्तीर्थरूपाश्च पवित्राः पुष्टिदायिकाः ।
तासां सेवा प्रकर्तव्या सर्वलाभप्रदा सदा ॥२४॥
सकृत् गव्यप्रदत्तेन प्रीयन्ते देवतादयः ।
दध्ना हि त्रिदशाः सर्वे क्षीरेण च महेश्वरः ॥२५॥
घृतेन पावको नित्यं पायसेन पितामहः ।
गां दत्वा गोपयः पीत्वा प्रीतो मेध्यः पुमान् भवेत् ॥२६॥
पञ्चगव्यं परं मेध्यं वाजिमेधफलप्रदम् ।
मरुतो धेनुदन्तेषु जिह्वायां च सरस्वती ॥२७॥
खुरमध्ये च गान्धर्वाः खुराग्रेषु तु पन्नगाः ।
सर्वसन्धिषु साध्याश्च चन्द्रादित्यौ तु लोचने ॥२८॥
ककुदे सर्वक्षत्राणि लाङ्गूले धर्म आश्रितः ।
अपाने सर्वतीर्थानि प्रस्रावे जाह्नवी नदी ॥२९॥
स्तनेषु सागराः रोमकूपेषु तु महर्षयः ।
लक्ष्मीरास्ते गोमये गोः रोमेषु सर्वशक्तयः ॥३०॥
धैर्यं धृतिश्च शान्तिश्च पुष्टिर्वृद्धिस्तथा स्मृतिः ।
मेधा लज्जा वपुः कीर्तिर्विद्या मतिश्च सन्ततिः ॥३१॥
धर्मपत्न्यो भक्तिमूर्ती गोषु तिष्ठन्ति सर्वदा ।
परेतमनुगच्छन्ति दत्ता गावः सुपात्रके ॥३२॥
यत्र गावस्तत्र लक्ष्मीर्धर्मो ज्ञानं च देवताः ।
अमरा अपि गोभिश्च प्रदत्ताभिर्विनिर्मिताः ॥३३॥

तस्मात् पुत्र्यः कामधेनूः प्रपूजयत चाश्रमे
अयं धर्मो महानत्र वने प्रोक्तो मया शुभः ॥३४॥
श्रुत्वैवं ता नूत्नकन्या गोसेवां विदधुः शुभाम् ।
अथाऽन्यमपि पप्रच्छुर्धर्मभृतं शुभावहम् ॥३५॥
गोसेवासदृशी कच्चिदन्यसेवाऽस्ति वा न वा ।
यया भुक्तिश्च मुक्तिश्च नारीणां शुभदा भवेत् ॥३६॥

लोमशस्तु तदा प्राह पत्युः सेवाऽस्ति तादृशी ।
स्वामिशुश्रूषया स्वर्गो मोक्षः सुखं हि लभ्यते ॥३७॥
पत्युः पादोदकं पीत्वा ब्रह्मलोके महीयते ।
पतिरेव परब्रह्म पतिर्दानं व्रतं क्रतुः ॥३८॥
पत्याज्ञा परमो धर्मस्तेन मुक्तिर्हि योषिताम् ।
सर्वदेवाश्च विधयः पत्युर्वाक्ये वसन्ति हि ॥३९॥
यासां तुष्टः पतिर्देवस्तासां तुष्टः परेश्वरः ।
प्रसुप्ते या प्रस्वपिति जागर्ति जाग्रति ध्रुवम् ॥४०॥
भुङ्क्ते तु भोजिते पुत्र्यः ! सा मृत्युं जयति ध्रुवम् ।
मौने मौना भवेद् या तु स्थिते स्थिता तु या स्वयम् ॥४१॥
सा मृत्युं जयते पुत्र्यो ! नान्यन्मृत्युजयावहम् ।
एकदृष्टिरेकचित्ता भर्तृर्वचनकारिणी ॥४२॥

तस्या बिभ्यति याम्याश्च सा साध्वी पूज्यते सुरैः ।
भर्त्रा चाभिहिता प्रेम्णा न प्रत्याख्यायिनी भवेत् ॥४३॥
नान्यं वै दैवतं याति पत्युरन्यं पतिप्रिया ।
सा न मृत्युमुखं याति लक्ष्मीतुल्या पतिव्रता ॥४४॥
एष माता पिता बन्धुरेष मे दैवतं परम् ।
एवं शुश्रूषयते या सा मृत्युं जयति ध्रुवम् ॥४५॥
भर्तारं ध्यायमाना च भर्तारमनुवर्तना ।
भर्तारं चिन्तयमाना न याम्यं पश्यति क्वचित् ॥४६॥
स्नाने तथाऽऽसने याने केशप्रसाधनादिषु ।
नान्यं या मनसा पश्येत् सा यमं नैव पश्यति ॥४७॥
देवता अर्चयन्तं वा भुञ्जानं सुखशायिनम् ।
त्यजति स्वामिनं या न मृत्युं कालं जयेत्तु सा ॥४८॥

भानौ चानुदिते या स्त्री गृहं मार्जयते सदा ।
स्वामिसेवापरा स्याच्च यमलोकं न पश्यति ॥४९॥
शौचाचारसमायुक्ता भर्तुर्मुखाग्रदर्शना ।
वर्तते च हि ते भर्तुर्मृत्युद्वारं न पश्यति ॥५०॥

पतिव्रताः सत्यवाक्या अजिताः स्वामिसेविकाः ।
हिंसाहीना न वै यान्ति याम्यलोकं कदाचन ॥५१॥
ब्रह्मचर्यपराः कन्या विधवा धर्मसंभृताः ।
हरेर्भक्ताः सतां दास्यो न यान्ति यमपत्तनम् ॥५२॥

ज्ञानाश्रयास्तथा विद्यां परां प्राप्ताः समाहिताः ।
स्वाम्यर्थे प्राणदात्र्यश्च न यान्ति यमपत्तनम् ॥५३॥
दात्र्यः शुश्रूषिका मातापित्रोः पत्युश्च सद्गुरोः ।
तिलगोस्वर्णदात्र्यश्च न यान्ति यमपत्तनम् ॥५४॥
चातुर्मास्यव्रतकर्त्र्यो गुरुचित्तानुपालिकाः ।
नित्यकथाश्रवणाश्च न गच्छन्ति यमालयम् ॥५५॥

तपसा प्राप्यते स्वर्गो यशश्चायुःसुखादिकम् ।
ज्ञानविज्ञानमारोग्यं रूपसौभाग्यसम्पदः ॥५६॥

प्राप्यन्ते तपसा भोगा भक्त्या विष्णोः परं पदम् ।
पयोभक्ष्या दिवं यान्ति धनदा द्रविणाढ्यताम् ॥५७॥

गुरुशुश्रूषया भुक्तिं मुक्तिं ध्यानात् प्रयान्ति च ।
श्राद्धेन सन्ततिं यान्ति स्वर्गः पर्णाशिनां भवेत् ॥५८॥

फलमूलाशिनां राज्यं मोक्षो गोसेविनां भवेत् ।
रसानां सम्प्रदानेन सौभाग्यमनुजायते ॥५९॥
अन्नपानीयदानेन तृप्तिर्भवति शाश्वती ।
सौगन्धिकप्रदानेन कामभोगैः प्रतृप्यते ॥६०॥

फलैस्तु लभते पुत्रं पुष्पैः सौभाग्यमुत्तमम् ।
अभयस्य प्रदानेन सर्वान् कामानवाप्नुयात् ॥६१॥

अभयस्य प्रदाता योऽभयं ददाति देहिने ।
पात्रेण देहिना भाव्यं तदोद्धारो भवेद् द्वयोः ॥६२॥

अनादिश्रीकृष्णनारायणस्वामिप्रसंगतः ।
सतां च सेवया याति क्षयं त्वशुभमित्यतः ॥६३॥

मोक्षदा चात्मफलदा शुभा बुद्धिः प्रवर्तते ।
क्लेशक्षयं पापहरं शुभं कर्माऽपि जायते ॥६४॥
स्वर्गः शुभफलप्राप्तिर्निरयः पापसंभवः ।
अर्जयेत्तु सदा श्रेष्ठं फलदं नाऽशुभं क्वचित् ॥६५॥

अहिंसा सर्वभूतानां तृष्णाक्रोधविवर्जिता ।
अपापकारिणी सार्वभौमा तारयति ध्रुवम् ॥६६॥

अनाशा या सदा तिष्ठेदिष्टार्थेषु न लोलुपा ।
सवैराग्या हरौ लग्ना नारी तरति सागरम् ॥६७॥
श्रद्दधानाऽनसूया च गुरुशुश्रूषणे रता ।
अक्षुद्रशीला धर्माढ्या नारी तरति सागरम् ॥६८॥

प्रशस्तानि च या कुर्यादप्रशस्तानि वर्जयेत् ।
मंगले वर्तमाना च मुच्यते सर्वपापतः ॥६९॥

स्थावरं जंगमं तीर्थं सेवते शुद्धमानसा ।
साधुं च सेवते नित्यं सा याति परमां गतिम् ॥७०॥

**श्रीनूत्नकुमारिका ऊचुः—**

अल्पोपायकरं चैव सुखोपायं च सर्वशः ।
कर्मणामशुभानां च विविधोत्पत्तिजन्मनाम् ॥७१॥
यत् समर्थं स्फोटयितुं तन्नो ब्रूहि तपोधन ।

**श्रीलोमश उवाच—**

मोक्षप्रदे हरौ प्राप्ते प्राप्ते साधुजने गुरौ ॥७२॥
सेवां कुर्यात्तु या तस्या विशुद्धेनाऽऽन्तरात्मना ।
सा सेवा सरलोपायो ह्यसत्कर्मप्रणाशनः ॥७३॥
दृष्ट्वा साधून्नमस्येद् या सा पापेभ्यः प्रमुच्यते ।
मनसा कर्मणा वाचा यत् किञ्चित् कलुषं कृतम् ॥७४॥
कृष्णकान्ताय चार्पय्य शुद्धा मोक्षगता भवेत् ।
सूर्ये कृष्णं चन्द्रमसि कृष्णं गोषु जनार्दनम् ॥७५॥
गुरौ कृष्णं प्रपश्येद् या सा प्रमुच्येत बन्धनात् ।
साधुं पतिं गुरुं देवं गां पितरौ सतीं द्विजम् ॥७६॥
दृष्ट्वा प्रणमेद् ध्यायेच्च या च कुर्यात् प्रदक्षिणम् ।
द्रागेव दुष्कृतान् हित्वा मुच्यते सा प्रबन्धनात् ॥७७॥
गावः पवित्रा मंगल्या देवानामपि देवताः ।
या ताः प्रसेवते भक्त्या सा पापेभ्यः प्रमुच्यते ॥७८॥
सौम्ये मुहूर्ते संयुक्ते पञ्चगव्यं तु या पिबेत् ।
यावज्जीवकृतात्पापात् तत्क्षणादेव मुच्यते ॥७९॥
लांगूलेनोद्धृतं तोयं मूर्ध्ना गृह्णाति या सती ।
सर्वतीर्थफलं प्राप्य सा पापेभ्यः प्रमुच्यते ॥८०॥
धेनुस्तनाद्विनिष्क्रान्तां धारां क्षीरस्य या सती ।
शिरसा प्रतिगृह्णाति सा पापेभ्यः प्रमुच्यते ॥८१॥
साधुं संसेव्य विधिवद् भोजयित्वा प्रपूजयेत् ।
तस्यास्तु किल्बिषं सर्वं तत्क्षणादेव नश्यति ॥८२॥
'प्राचीनाग्रान् कुशान् कृत्वा स्थापयित्वा वृषं पुरः ।
तत्पुच्छजलसंस्नाता शुद्धा भवति सर्वथा ॥८३॥
दक्षिणावर्त्तशंखस्थजलेनाऽऽप्लाव्य शुद्ध्यति ।
कृष्णतिलाऽन्वितजलैः स्नात्वा शुद्ध्यति तत्क्षणात् ॥८४॥
अच्छिद्रपद्मपत्रेण सर्वरत्नोदकेन च ।
साधुपादोदकेनाऽपि स्नात्वा पापैः प्रमुच्यते ॥८५॥
कार्तिके बोधिनीं कृत्वा कृत्वा च द्वादशीं तथा ।
जन्मकोटिकृतपापान्याशु नाशयति व्रती ॥८६॥
अनादिश्रीकृष्णनारायण लक्ष्मीपते प्रभो ।
माणिक्येश्वर हंसेश कीर्तनात् तल्लयं व्रजेत् ॥८७॥
जन्मातरसहस्रेषु समाराध्य परेश्वरम् ।
वैष्णवीत्वं लभेत् काचित् सर्वपापक्षये सति ॥८८॥
भवतीभिः कृष्णनारायणाऽनुग्रहणेन तत् ।
दुर्लभं वैष्णवीत्वं वै लब्धं कृपालभं सुताः ! ॥८९॥
वैष्णव्यो हि महाभागाः पुनन्ति सकलं जगत् ।
संस्मृताः कीर्तितो वाऽपि दृष्टः स्पृष्टोऽपि वा सुताः ! ॥९०॥
पुनाति भगवान् द्राक् च सहस्रजन्मपावनः ।
एतज्ज्ञात्वा भवतीभिः पूजनीयो विशेषतः ॥९१॥
अनादिश्रीकृष्णनारायणो बालस्वरूपवान् ।
इत्युक्त्वाऽऽचमनं दत्वा दत्वाऽऽत्मज्ञानमुज्ज्वलम् ॥९२॥
लोमशो विररामाऽपि ता अपि नूत्नकन्यकाः ।
त्यक्त्वा धर्ममधर्मं च शाश्वतीं धियमास्थिताः ॥९३॥
जगृहुर्नियमाँस्ताँस्तान् भयहीनाननिन्दितान् ।
प्रीत्या परमया युक्ताः कृष्णेमाऽन्वचिन्तयन् ॥९४॥
लोमशोऽपि सदा सायं कृष्णनारायणस्य ह ।
कथास्ताः श्रावयामास पातिव्रत्यादिभक्तिदाः ॥९५॥
लक्ष्मीनारायणसंहितां च सर्वां समन्ततः ।
श्रावयामास ताः सर्वाश्चातुर्मास्ये व्रतस्थिताः ॥९६॥
नूत्नकन्या लक्षकन्यास्तथाऽन्या अपि सर्वदा ।
अनादिश्रीकृष्णनारायणं जेपुः समादरात् ॥९७॥
जाग्रति चापि निद्रायां सुषुप्तावपि ता हरिम् ।
पतिं श्रीस्वामिनं हृत्सु धारयामासुरुत्सुकाः ॥९८॥
कम्भरानन्दनं बालकृष्णं हृद्भिः प्रवव्रिरे ।
भेजुस्तं चात्मनि चात्मान्तरात्मानं प्रियं प्रभुम् ॥९९॥
एवं ता राधिके दिव्या जातास्तामसजा अपि ।
परमेश्वरयोगेन किमाश्चर्यं वदामि ते ॥१००॥
कृपामात्रधृतजन्मा कृष्णोऽनुग्रहवानयम् ।
पापिपापानि चोग्राणि नाशयित्वाऽकरोन्निजान् ॥१०१॥
नरान्नारीः पशून् वृक्षान् वल्लीदैत्यादिकाँस्तथा ।
पाठकान् श्रोतृवर्गांश्च नैजान् करोति वै तथा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नूत्नकन्यकानां लोमशदर्शितैकादशीव्रतपातिव्रत्यगोगुर्वादिसेवनमाहात्म्यनिरूपणनामा पञ्चदशोऽध्यायः ॥१५॥

**श्रीकृष्ण उवाच—**

राधिके न त्वया पूर्वं श्रुतं दिव्यकथानकम् ।
कथयामि चमत्कारं सावधाना निबोध मे ॥ १ ॥

आषाढे कन्यकाः सर्वाश्चातुर्मास्यव्रतानि वै ।
चक्रुर्लोमशदिष्टानि बालकृष्णस्य तुष्टये ॥ २ ॥
आषाढशुक्लपक्षस्यैकादश्यां प्रातरेव ताः ।
स्नात्वा ध्यात्वा कृपानाथं नत्वा समर्च्य लोमशम् ॥ ३ ॥
चन्दनाऽक्षतपुष्पाणि कुंकुमाऽम्बरमालिकाः ।
गोक्षीरं शर्करैलाकेसराढ्यं क्वथितं तथा ॥ ४ ॥
नीत्वा भूषाम्बरहारशृंगारशोभिताः प्रभुम् ।
अनादिश्रीकृष्णनारायणं द्रष्टुमुपागताः ॥ ५ ॥
गायन्ति गीतिका मिष्टस्वरैः श्रीस्वामिमानसाः ।
मौक्तिकनद्धहिन्धानीधृतकलशमस्तकाः ॥ ६ ॥

हस्तधृतफलपूजापात्रा नेत्राग्रमाधवाः ।
हृदयेषु धृतकृष्णाः कृतकौतुकमंगलाः ॥ ७ ॥
स्मरन्ति श्रीपतिं चाहमहमिकया त्वग्रगाः ।
चमत्कारस्तदा प्रातर्बालकृष्णेन दर्शितः ॥ ८ ॥
मम पूजाकृते कोटिकन्याश्चायान्ति मे गृहम् ।
सम्मर्दोऽत्र महान् भावी मया गम्यं सरस्तटे ॥ ९ ॥
ग्राह्या पूजा च युगपत् सम्मर्दो न यथा भवेत् ।
इति निर्णीय भगवान् कोटिरूपाणि तत्क्षणम् ॥१०॥
धृत्वा हसन् किशोरात्मा तासामभिययौ पथि ।
एकया दृश्यते त्वेको नान्यया दृश्यतेऽपरः ॥११॥
एका जानाति मामेव हसन्नायाति मां प्रति ।
नान्याः प्रति ययौ नाथो मम प्रेम्णाऽतिरेकिणा ॥१२॥
अन्या जानाति मामेवाभियाति नेतराः प्रति ।
परा पश्यति चायान्तं स्वां प्रत्येव कृपाकरम् ॥१३॥
एवं सर्वा हि प्रत्येकं कान्तं पश्यन्ति वै निजम् ।
मत्वा सौभाग्यमतुलं द्रुतं मिलन्ति वक्षसि ॥१४॥
लोमशं श्रीहरिर्नेमे लोमशोऽपि हरिं मुदा ।
अथ तत्कोटियुगलैर्भूतलं द्यौरिवाऽभवत् ॥१५॥

कृष्णो वार्तां कुशलाढ्यां पृच्छन् प्रयाति चाग्रतः ।
पार्श्वे पार्श्वे मनाक् पृष्ठे वामे प्रयाति कन्यका ॥१६॥
अश्वपट्टसरस्तीरे विशाले बहुयोजने ।
मेघच्छत्रसमच्छाये पुष्पितद्रुमवल्लिके ॥१७॥
शुभकोमलस्याऽऽसे शीतगन्धयनिलाऽन्विते ।
पूजापात्राणि सन्न्यस्य कान्तं कृत्वाऽऽसने पुरः ॥१८॥
सर्वाः सम्पूजयामासुर्भाविभृद्द्रव्यवस्तुभिः ।
ललाटे पत्रिका[illegible]चन्दनेन सुगन्धिना ॥१९॥
नेत्रयोः कज्जलं तिलकं च ललाटके ।
दक्षगण्डे रक्तबिन्दुं दत्वा चुचुम्बुरुत्सुकाः ॥२०॥

मस्तके पुष्पमुकुटं मयूरपत्रकलिंगकम् ।
कर्णयोः पुष्पगुच्छौ च शेखरान् विविधान् ददुः ॥२१॥
पुष्पहारान् तौलसेयान् कटकान् रशनास्तथा ।
पुष्पप्रच्छदवस्त्राणि धारयामासुरीश्वरम् ॥२२॥
अलक्तकुंकुमं तस्य पादयोः करयोर्ददुः ।
सकिंकिणीनुपूरौ च पादप्रकोष्ठयोर्ददुः ॥२३॥
पीताम्बराणि क्षौमाणि कौशेयकानि ता ददुः ।
मुरलीं चाप्यंकुराणि कर्णयोर्गुच्छकौ ददुः ॥२४॥
पद्मपत्रं करे दक्षे सुगन्धिप्रोक्षणं ददुः ।
शीतं मिष्टं जलं भोज्यं फलं रसान् पयो ददुः ॥२५॥
एलालवंगबीजानि मुखशुद्धिं दलं ददुः ।
एवं सम्पूज्य तं कृष्णनारायणं पुनः पुनः ॥२६॥
आरार्त्रिकं कम्बुजलं वस्त्रमार्जनमादधुः ।
नमः स्तुतिं दण्डवच्च प्रदक्षिणं च दक्षिणाम् ॥२७॥
आत्मनां चार्पणं पुष्पाञ्जलिं क्षमाऽर्थनं व्यधुः ।
पादयोः क्षालनजलं पपुर्न्यधुश्च मस्तके ॥२८॥
वक्षःसु कृष्णचरणौ निधायाऽऽनन्दमागताः ।
प्रसन्नाः प्रार्थयामासुर्व्रतानि निजनाथतः ॥२९॥
काचिच्चतुर्षु मासेषु ययाचे फलभोजनम् ।
काचित्कन्दाऽदनं काचित्पत्रादनं पयोऽदनम् ॥३०॥
काचिदेकान्नभक्ष्यं च काचिन्मुन्यन्नभक्षणम् ।
काचिद्यवादनं काचिद्गोधूमादनमात्रकम् ॥३१॥
काचित् तण्डुलकवलान् काचिद्रसविवर्जितम् ।
काचिदक्षारभोज्यं च काचिन्मिष्टविवर्जितम् ॥३२॥
काचित् तिक्तविहीनं च काचित् कटुविवर्जितम् ।
काचिदनग्निपक्वं च काचिच्छुष्कं तु भर्जितम् ॥३३॥
काचिन्निरन्नमेवाऽपि काचिच्छाकविवर्जितम् ।
काचित्तु द्विदलावर्ज्यं काचिदनारनालकम् ॥३४॥
काचित्तक्रविहीनं च काचिद्दुग्धविवर्जितम् ।
काचिदघृतभोज्यं च काचिदतैलमित्यपि ॥३५॥
अन्या नक्तं चैकभुक्तं काचित्कालचतुर्थकम् ।
षट्कालादनमित्यन्या सप्ताहादनमित्यपि ॥३६॥
पक्षादनं तथा मासादनं चान्द्रायणादिकम् ।
कृच्छ्रं बहुविधं चापि एकद्वित्रिदिनादिजम् ॥३७॥
एवं व्रतानि जगृहुः कृष्णप्रसन्नतेच्छया ।
श्रुत्वा श्रीलोमशः प्राह शृणुत कन्यका ! हितम् ॥३८॥
येन कृष्णः प्रसन्नः स्यात् तद्व्रतं चोत्तमोत्तमम् ।
व्रतेन तपसा वाप्याराधनेन यमादिभिः ॥३९॥

तोषणीयः कृष्णनारायणः साधनकोटिभिः ।
अव्रतेऽपि प्रसन्नः स्यादव्रतं व्रतमेव तत् ॥४०॥
व्रते नास्ति प्रसन्नश्चेद् व्रतं चाऽव्रतमेव तत् ।
तस्मात् पुत्र्यो ! हरिर्येन तुष्येत् प्रष्टव्यमेव तत् ॥४१॥
ज्ञात्वा तोषप्रदं चातुर्मास्ये कुरुततद्व्रतम् ।
इत्युक्ताः सुकुमार्यस्ता हरिं कृष्णनरायणम् ॥४२॥
पप्रच्छुः सुखमासीना येन तुष्यसि तद् वद ।
श्रुत्वा हसन् हरिः प्राह भक्त्या तुष्यामि नान्यथा ॥४३॥
न व्रतैर्नैव दानैश्च न यमैर्नियमैस्तथा ।
न यज्ञैर्दक्षिणाभिश्च न देहक्षपणैस्तथा ॥४४॥
न विचारैर्न च धनैर्न सौकुमार्यभावनैः ।
किन्तु प्रेम्णा प्रसन्नः स्यां निर्व्याजेनाऽनिवर्तिना ॥४५॥
प्रेमवत्तं मदर्थे च कार्यं युष्माभिरेव यत् ।
प्रेम्णा पूज्यो वन्दनीयः प्रेम्णा स्मर्तव्य एव च ॥४६॥
प्रेम्णा दास्यं प्रकर्तव्यं कैंकर्यलक्षणं मयि ।
स्नाने ध्याने भोजनादौ देहकार्येऽपि सर्वथा ॥४७॥
अहं कृष्णः प्रयोक्तव्यस्तद्व्रतं मोक्षदं भवेत् ।
अबलानां बलं चाहं बालानां बलभागहम् ॥४८॥
कन्यानां कं सुखं कुर्वे नारायणोऽस्मि मोक्षदः ।
चातुर्मास्ये मदर्थे वै प्रदक्षिणं नमस्क्रिया ॥४९॥
मम मालाजपो ध्यानं मम नाम्नां सुकीर्तनम् ।
मम गाथा मम कथा मदर्थे जीवनं प्रियाः ॥५०॥
सर्वं कृष्णार्पणं तद्वै व्रतं श्रेष्ठं मया कृतम् ।
भवतीनां कृते दिव्यं साक्षान्मद्योगसंभृतम् ॥५१॥
नैतत्तुल्यं व्रतं त्वन्यत्तेन मोक्षसुखं भवेत् ।
व्रतेर्यः खलु चाप्तव्यः सोऽहं प्राप्तोऽस्मि सर्वथा ॥५२॥
तद्व्रतं किं व्रतं चान्यत् तिष्ठतैवं व्रते मयि ।
इत्युक्त्वा भगवाँस्तासां जग्राहार्चनवस्तुकम् ॥५३॥
दर्शस्पर्शसुखं ताभ्यो ददौ कोटिस्वरूपभाक् ।
ताः सर्वाश्च हरिं नत्वा तदोचुः परमेश्वरम् ॥५४॥
नाथ नित्यं तव पूजां करिष्यामोऽत्र संगताः ।
एवमेव सुखं देहि पूजाग्रहणानुग्रहात् ॥५५॥
तथाऽस्त्विति हरिः प्राह तावदाश्चर्यमत्र यत् ।
जातं तद् राधिके तेऽत्र, कथयामि शृणु प्रिये ॥५६॥
शत्रुञ्जयाख्यशैलो वै वर्तते त्वग्निदिग्भवः ।
सौराष्ट्रे तत्र दैत्या वै समासन् कंकतालकाः ॥५७॥
सहस्रशः कंकताला मद्यमांसपरायणाः ।
अद्रिशृंगसमाकारा हलवद्दन्तमूर्धजाः ॥५८॥
सप्ततालोच्छ्रया मेघमार्गमस्तकसंस्पृशाः ।
सामुद्रमत्स्यभक्षाश्च नरमांसादनास्तथा ॥५९॥
वनारण्यपशुभक्षाः पक्षिप्राणिप्रभक्षिणः ।
आययुस्ते तदा ज्ञात्वा कृष्णपूजनकोत्सवम् ॥६०॥
व्रतघ्नास्तेऽसुराः सर्वे खलाः शस्त्रास्त्रधारिणः ।
निपेतुर्व्योममार्गात्ते हंतुं बालनरायणम् ॥६१॥
मारयैनं घातयैनं बालकृष्णं विरोधिनम् ।
असुराणां महाशत्रुं लक्षाणां घातकं परम् ॥६२॥
तत्पत्नीनां हारकं च मारयत द्रुतं प्रभुम् ।
लोमशं नाशयत क्षिप्रं बध्वा रज्ज्वा गले पुनः ॥६३॥
विप्राणं त्वत्र कुरुत ध्वंसध्वं च तदा श्रयान् ।
इत्युक्त्वा त्वम्बराद् यावन्निपेतुर्हननाशयाः ॥६४॥
लोमशः स्तम्भयामासाऽऽकाशे तान् वै तथाविधान् ।
अनादिश्रीकृष्णनारायणः श्रीभगवान् स्वयम् ॥६५॥
नैजानि सर्वरूपाणि संगृह्य क्षणमात्रतः ।
वैराजरूपमास्थाय बभौ गिरिवरोपमः ॥६६॥
सस्मार गरुडं दिव्यं समाययौ क्षणाद्धि सः ।
पक्षाभ्यां विवृताभ्यां च कन्यकाश्चाश्रमं तथा ॥६७॥
अश्वपट्टसरश्चापि स ररक्ष वितानवत् ।
दशयोजनविस्तारं क्षेत्रं संरक्ष्य पक्षिराट् ॥६८॥
व्यात्तपक्षश्च तस्थौ स निर्भयश्चाच्युताज्ञया ।
भगवान् द्राक् तस्य पृष्ठं समारुरोह हेतिमान् ॥६९॥
सुदर्शनं तथा चक्रं मुमोच लीलया वदन् ।
शत्रुञ्जयाः कंकतालाः कथं तिष्ठथ निष्क्रियाः ॥७०॥
प्रयत्यन्तां प्राणग्लहैर्भवद्भिर्नष्टभालकैः ।
एष चास्ते लोमशोऽत्र जडभावं विकर्षति ॥७१॥
एवमुक्ते जडभावे संहृते तेऽसुरास्तदा ।
श्रीकृष्णमायया दग्धा हतभाग्या पुनर्बलम् ॥७२॥
चक्रुः कृष्णविनाशार्थं दुद्रुवुर्वेगतो ह्यभि ।
श्रीकृष्णे गरुडे यावत् शस्त्राणि प्रथमं तु ते ॥७३॥
योजयन्ति प्रहारार्थं तावच्चक्रं सुदर्शनम् ।
प्रलयाग्निसमाकारं भ्रमत्तीक्ष्णारदुःसहम् ॥७४॥
कंकतालासुराणां तु मस्तकान्यभ्यकर्तयत् ।
निपेतुश्चार्धभिन्नास्तद्देहा व्योम्नः समन्ततः ॥७५॥
शिरांसि चापि गलतश्छिन्नान्यपि तदाऽपतन् ।
हस्तौ पादौ कटिभागा न्यपतन् भूतलेऽभितः ॥७६॥
हस्तशस्त्रा अपि चक्रकर्तिता निर्बला यथा ।
हन्तुं कृष्णं गरुडं वा लोमशं नाऽशकँस्तदा ॥७७॥

सहस्रं तु तदा तेषां शस्त्रच्छिन्नं लयं गतम् ।
शेषा विदुद्रुवुस्तांश्च गदा कौमोदकी स्वयम् ॥७८॥
मूर्तिमती चाद्रितुल्या बहुशस्त्रकरान्विता ।
मार्गमारुद्धय परितो धावमाना ह्युपस्थिता ॥७९॥
यत्र यत्र दिशि दैत्या दुद्रुवुस्तत्र तद्दिशि ।
गदा नैकस्वरूपा सा भयंकरी महासती ॥८०॥
समुत्प्लुत्य पुरस्तस्थौ ममाराऽति तु तांस्तदा ।
गदया ते हताश्चान्ये पञ्चषश्चावशेषिताः ॥८१॥
कन्यारूपाणि धृत्वैव गरुडस्याश्रयं गताः ।
कन्यकासु प्रविश्यैव रक्षणं चक्रुरीश्वरात् ॥८२॥
अथ नारायणश्चक्रं गदा च गरुडस्तथा ।
दैत्यान् हत्वा च नैजं वै सूक्ष्मं रूपं दधुस्ततः ॥८३॥
गरुडः श्रीहरिं तत्र समच्‍र्य परमेश्वरम् ।
वैकुण्ठं प्रययौ शीघ्रं सुदर्शनं करागतम् ॥८४॥
भगवानपि चैकैकः कन्याधैर्यप्रदस्तदा ।
जहास लोमशं प्राह नूत्नाः कन्यास्तु पंचषः ॥८५॥
वर्तन्ते कन्यकास्त्वत्र पश्य गुरो ! मृतेर्भयात् ।
दैत्याः समभवन् प्राणहेतोः कपटयोषितः ॥८६॥
तासां प्राणपरित्राणं कार्यं मया दयालुना ।
इत्युक्तास्ता रुरुदुश्च प्रणेमुश्च ययाचिरे ॥८७॥
रक्षणं पालनं चापि नित्यं दासीपदं तथा ।
कृष्णः प्राह तथाऽस्त्वेतन्नारीरूपं सदा च वः ॥८८॥
शाश्वतं कन्यकारूपं भवत्वत्र ममाऽऽलये ।
लोमशस्याश्रमे तासां वासं त्वकारयद्धरिः ॥८९॥
लोमशश्च ददौ मन्त्रं वैष्णवं गलमालिकाम् ।
तौलसीं तिलकं नाममन्त्रं च दिव्यरूपताम् ॥९०॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
जगृहुर्मन्त्रमव्यग्राः साध्व्यः कन्यास्तु नूतनाः ॥९१॥
वैष्णव्यस्ताश्च सञ्जाता भेजिरे श्रीहरिं ततः ।
प्रार्थयामासुरीशेशं मोक्षार्थं मृतयोधिनाम् ॥९२॥
दैत्या युद्धे मृता ये ते कृष्णनारायणेच्छया ।
सहस्रशः समायाताः सूक्ष्मदेहा विकल्मषाः ॥९३॥
आसुरत्वं विनाश्यैव श्रीकृष्णेन परात्मना ।
दिव्यत्वं तु तदा दत्वा विमानैर्दिव्यपार्षदैः ॥९४॥
वैकुण्ठं प्रापिताः सर्वे शत्रुञ्जयनिवासिनः ।
एवं मुक्तिं प्रपन्नास्ते चैकादश्यां हरिश्रिताः ॥९५॥
अथ ताः सर्वकन्याश्च नीत्वा श्रीलोमशो मुनिः ।
निजाश्रमं ययौ कृष्णो बालकृष्णो बभूव ह ॥९६॥
तत्तीर्थं कंकतालाख्यं चाऽश्वपट्टसरोवरे ।
जातं ख्यातं दक्षपार्श्वे यत्र पूजा हरेः कृता ॥९७॥
बालकृष्णो विधायैवमानन्दं व्रतियोषिताम् ।
तिरोऽभवत् क्षणान्ते वै गृहपर्यंकिकां गतः ॥९८॥
एतच्चरित्रं सुभगं राधिके ! देवदेविनः ।
ज्ञात्वा श्रुत्वा पठित्वाऽपि स्मृत्वा मुक्तिं लभेद् ध्रुवाम् ॥९९॥
धनवान् पुत्रवान् श्रीमाननन्तस्वर्गवान् भवेत् ।
नारी सौभाग्यकीर्त्याढ्या वंशसन्तानदा भवेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आषाढशुक्लैकादश्यां बालकृष्णस्य प्रभोः कन्यकाकृतपूजनं बहुरूपधारणं व्रतानि, शत्रुञ्जयपर्वतस्थकंकतालानां दैत्यानां युद्धं मोक्षणं, शेषाणां कन्यारूपधारिणां लोमशाश्रमे वासश्चेत्यादिनिरूपणनामा षोडशोऽध्यायः ॥ १६ ॥

श्रीकृष्ण उवाच—

शृणु राधे च ते दैत्या यदा गृहं न चाययुः ।
तत्पत्न्यो दैत्यसैन्यस्याऽन्वेषणार्थं समाययुः ॥ १ ॥
अयुतं श्रावणे मासे वर्षान्विते स्थले तदा ।
कुंकुमवापिकाक्षेत्रे जलादिसंप्लुते शुभे ॥ २ ॥
समागत्य हि दैत्यानां पत्न्यो व्योमप्रदेशतः ।
व्यपश्यन् रमणीयं चारण्यस्थं महदाश्रमम् ॥ ३ ॥
कोटिकन्याश्रयं चापि लोमशर्षिनिषेवितम् ।
केचिद् वैखानसास्तत्र केचिदासन्निरासनाः ॥ ४ ॥
यायावरास्तथा चान्ये वानप्रस्थास्तथाऽपरे ।
शालीनाश्च तथा केचित् कापोतीं वृत्तिमाश्रिताः ॥ ५ ॥
तथा चान्ये श्रिता वृत्तिं सर्वभूतदयां शुभाम् ।
शिलोञ्छाश्च तथैवाऽन्ये काष्ठपात्रादनाः परे ॥ ६ ॥
अपाकपाचिनः केचित् पाकिनश्च क्वचित्पुनः ।
नानाविधिधराः केचिज्जितात्मानस्तु केचन ॥ ७ ॥
स्थानमौनव्रताः केचित्तथाऽन्ये जलशायिनः ।
तथोर्ध्वशायिनश्चान्ये तथाऽन्ये मृगचारिणः ॥ ८ ॥
पञ्चाग्नयस्तथा केचित् केचित् पर्णफलाशिनः ।
अब्भक्षा वायुभक्षाश्च तथाऽन्ये शाकभक्षिणः ॥ ९ ॥
अतोऽन्येऽप्यतितीव्रां वै तपश्चर्यां प्रपेदिरे ।
यत्रारण्ये साधवश्च साध्व्यो वसन्ति कोटिशः ॥१०॥
यत्राऽऽश्रमे हरेः पत्न्यः कोटिकन्या वसन्ति च ।
यत्र मोक्षप्रदा त्वास्ते दिव्या कुंकुमवापिका ॥११॥

यत्र दिव्यं त्वश्वपङ्कसरोवरं प्रवर्तते ।
स देशो दिव्यतासम्पादको यत्र हरेर्महान् ॥१२॥
प्रासादो विद्यते रम्यो गोलोकादधिकोज्ज्वलः ।
यत्र श्रीकम्भरालक्ष्मीर्यत्र गोपालकृष्णकः ॥१३॥
राजन्ते श्रीबालकृष्णान्विताः समन्ततः प्रजाः ।
तादृशः स महादिव्यो नन्दनोपवनद्युतिः ॥१४॥
प्रदेशो वीक्षितस्ताभिर्दैत्याभिर्व्योममार्गतः ।
वज्रस्फटिकपाषाणः प्रवालांकुरशर्करः ॥१५॥
नीलाऽमलमृत्तिकाढ्यो जलनिर्झरशोभितः ।
विचित्रकुसुमोपेतैर्लतामञ्जरीधारिभिः ॥१६॥
रेजे यः प्रांशुभिर्वृक्षैरुल्लिखद्भिरिवाऽम्बरम् ।
स्थल्यस्तत्राऽधिकं रेजुर्नानाधातुपरिस्रवैः ॥१७॥
विचित्रकुसुमोपेताश्चित्रिता इव सर्वतः ।
तासु केतकिखण्डाश्च कुन्दषण्डाश्च पुष्पिताः ॥१८॥
उन्मीलिता इवाऽऽभान्ति धातकीवनराजिभिः ।
भिन्नेन्द्रनीलविमलैर्धौतैः प्रस्रवणाम्बुभिः ॥१९॥
चित्रैः कुसुमसंछन्नैर्धातुप्रस्तरविस्तरैः ।
क्रीडद्भिर्देवमिथुनैर्नृत्यद्भिश्चाप्सरोगणैः ॥२०॥
कूजद्भिः शिखिभिर्मत्तैः शोभितो देश उज्ज्वलः ।
कल्हारकुसुमोपेतो हंससारससेवितः ॥२१॥
प्रसन्नसलिलाकीर्णः सरोभिः फुल्लपंकजैः ।
सिंहयूथानुकीर्णाभिर्जुष्टाभिर्मृगपक्षिभिः ॥२२॥
सेविताभिर्मुनिगणैः स्थालीभिरुपशोभितः ।
किन्नरोद्गीतललितः परपुष्टाभिनादितः ॥२३॥
विद्याधरशताकीर्णो देवगन्धर्वसेवितः ।
धारापातैश्च मेघानां विस्फुल्लिंगैः सहस्रशः ॥२४॥
प्रकाशितो मुहुर्मृदुरम्यहरितशाद्वलः ।
सर्वर्तुकवनोद्यानः पुष्पाकरसुशोभितः ॥२५॥
यक्षकिम्पुरुषावासो गुह्यकानामथाश्रयः ।
मुक्तानां पार्षदानां वैष्णवानां वासशोभनः ॥२६॥
वरदो यत्र भगवान् कृष्णनारायणः प्रभुः ।
सर्वामरगुरुर्देवो नित्यं सन्निहितो हरिः ॥२७॥
भक्तानुकम्पी स श्रीमान् चाध्यास्ते पार्षदैः सह ।
विमानयायिनः सर्वे यं देवं परमेश्वरम् ॥२८॥
आयान्ति सेवितुं देवा वरेण्यमजमच्युतम् ।
अन्ये देवनिकायाश्च सेवितुं प्रपतन्ति यम् ॥२९॥
तदधिष्ठानरूपोऽयं देशः स्त्रीभिर्विलोकितः ।
दैत्याभिर्वीक्षितो देशः श्रावणेऽतिमनोहरः ॥३०॥
वृक्षशाखासु कन्याभिश्चान्दोलितो हरिः पतिः ।
प्रतिद्रुलम्बिदोलायां वीक्षितः परमेश्वरः ॥३१॥
आश्चर्यं ता गता दृष्ट्वा पतिनाशकरं हरिम् ।
चुक्रुधुश्चाति तं कृष्णं हन्तुं पेतुर्द्रुमे द्रुमे ॥३२॥
यद्यद्द्रुमस्य शाखायां प्रेंखा कृष्णस्य लम्बते ।
स स वृक्षोऽभवद् देवो वृक्षरूपी प्रसेवकः ॥३३॥
स स वृक्षोऽभवत् द्राक् च शस्त्रधृक् देवपूरुषः ।
रक्षितुं तं भगवन्तं हन्तुं ता दैत्ययोषितः ॥३४॥
आकाशे एव राक्षस्यो युद्धं देवैर्व्यधुस्तदा ।
भिन्दीपालैस्तोमरैश्च मूशलैरस्थिहेतिभिः ॥३५॥
वृक्षशाखाभिरुग्राभिर्वंशैः प्रस्तरकण्टकैः ।
पाषाणैर्यष्टिभिश्चापि केशाकेशि ततः पुनः ॥३६॥
देवा वृक्षा राक्षसीभिर्युयुधुर्न च जीवतः ।
न जघ्नुर्मर्मभागेषु कोमलांगेषु नैव च ॥३७॥
स्त्रीजातिं न विहन्याद्वै मत्वैवं प्राणतो न ताः ।
नाशयामासुरुग्रास्तास्ततः कन्याभिरेव च ॥३८॥
स्मृतः कृष्णप्रभुर्ज्ञात्वा नारीर्युद्धप्रमर्दिनीः ।
द्रागेव भगवाँस्तत्र द्वेधा भूत्वा समागतः ॥३९॥
काललक्ष्मीरूपधरः सर्वशस्त्रान्वितः प्रभुः ।
सहस्रभुजवान् हस्तिस्थितो व्योम्ना समाययौ ॥४०॥
श्वेतो हस्तिः पक्षयुक्तो जगर्ज त्वम्बरे यदा ।
प्रतिध्वन्या स्फुटकर्णा राक्षस्यो विह्वलास्तदा ॥४१॥
मूर्छामवापुराकाशे निपेतुर्वनभूतले ।
अन्यास्तु दुद्रुवुर्हस्तिनं तु नाशयितुं हरिः ॥४२॥
काललक्ष्मीस्वरूपस्ता जघान जीवतस्तदा ।
म्रियमाणा द्विधा छिन्ना भिन्नाः पेतुर्मृताः स्त्रियः ॥४३॥
तासामात्मा काललक्ष्म्यां लयं यातो मुहुर्मुहुः ।
किशोरश्चापररूपः कृष्णनारायणस्तदा ॥४४॥
कन्यकामध्यवर्ती च विरेजे लोमशाश्रमे ।
काश्चिद् दैत्ययूथपत्न्यो हस्तिना शुण्डया हताः ॥४५॥
अन्याः शस्त्रैर्हता लक्ष्म्या निःशेषा नष्टतां गताः ।
मृतास्ता दिव्यतां प्राप्ता यथा देव्यो विरेजिरे ॥४६॥
मुमुहुः श्रीकृष्णनारायणं दृष्ट्वा किशोरकम् ।
अर्थयामासुरत्यर्थं परमेश्वरमीश्वरम् ॥४७॥
कान्तो भव सदाऽस्माकं ह्यनाथानां प्ररक्षकः ।
मृता दैत्यगुणैर्हीना जातास्तव प्रतापतः ॥४८॥
कन्यकासु च नो वासं देहि लोमशसन्निधौ ।
सेवां कर्तुं समीहा नः सदा तेऽस्ति कृपाकर ॥४९॥

तथाऽस्त्विति हरिः प्राहाऽयुतदिव्यास्तु कन्यकाः।
ऊनद्वादशवार्षिक्योऽभवन् कृष्णप्रतापतः॥५०॥
रूपानुरूपावयवा प्रिया राधारमासमाः।
ताभ्यो ददौ लोमशश्च मन्त्रं श्रीवैष्णवोत्तमम्॥५१॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा'।
तौलसीं मालिकां कण्ठे ललाटे तिलकं शुभम्॥५२॥
पीतशाटीर्ददौ हस्ते मालिकां जपसाधनीम्।
ज्ञानं विद्यां ददौ ताभ्यो वासं ददौ निजाश्रमे॥५३॥
ताश्च सर्वा बालकृष्णचरणौ दुग्धधारया।
प्रक्षाल्य च पपुस्तस्य प्रसादान्नं फलादिकम्॥५४॥
भक्षयामासुरत्यात्तप्रेम्णा दास्येन तास्तदा।
लोमशश्च ततस्ताभ्यः सर्वाभ्यः शरणागतिम्॥५५॥
बोधयामास वै षोढा सर्वसमर्पणात्मिकाम्।
कन्याः! शृणुत सर्वा वै कृष्णार्थकृतनिश्चयाः॥५६॥
नारीदेहः परार्थोऽस्ति परः श्रीपुरुषोत्तमः।
तदर्थं सर्वथा भाव्यं नारीभिः पतिभक्तिभिः॥५७॥
पतिरेव परब्रह्म तारको मोक्षदायकः।
शतजन्मकृतपुण्यात् कन्या भवति धार्मिकी॥५८॥
सहस्रजन्मपुण्यैस्तु भवेत् कृष्णार्पिता तु सा।
लक्षजन्मार्जितपुण्यैः कृष्णपत्नी भवेत् सती॥५९॥
यूयं सर्वाः कृष्णपत्न्यः कृपया स्थ न संशयः।
कस्मात् कुतश्च तावद्वै पुण्यमुपार्जितं भवेत्॥६०॥
हरेर्योगात्पुण्यवार्धिः शेवधिरिव वर्धते।
कामात् क्रोधाच्च संयोगाल्लोभान्मोहादपि प्रभौ॥६१॥
तल्लीनास्तदधीनाश्चेत् सर्वं पुण्यमुपार्जितम्।
एवं यूयं चात्र जाता लक्ष्मीहस्तगताः स्त्रियः॥६२॥
वैरेणापि हरेर्योगात् पुण्यं प्राप्ता हि शाश्वतम्।
अनादिश्रीकृष्णनारायणस्याऽनुग्रहान्मम॥६३॥
आश्रमे परितो माया नैवाऽऽविशति काचन।
मायापरोऽयं देशोऽस्ति लोमशस्य ममाश्रयः॥६४॥
कामक्रोधादिदोषास्तु दोषिणां प्रज्वलन्ति वै।
ये ममाश्रमभागस्योपरि व्योम्नि प्रयान्ति तु॥६५॥
उपरितोऽपि गच्छन्ति तेषां नश्यन्ति वै हृदः।
दोषा रागादयश्चापि पशूनामपि पक्षिणाम्॥६६॥
देवानां दानवानां च दैत्यानां चापि योषिताम्।
संसारिणां च संसारो मिथ्याविद्वासनात्मकः॥६७॥
आमूलतो लयं याति ममाश्रमनिषेवणात्।
अत्राश्रमे कृतवासा दिव्या भवन्ति देहिनः॥६८॥
शान्तिस्तेषां सदा दास्ये श्रीकृष्णस्य प्रतापतः।
यूयं सर्वा हरिं कृष्णं भजथाऽत्र तदाश्रिताः॥६९॥
हरेः प्राप्तिं विना नान्यद् वाञ्छनीयं विशिष्यते।
तस्य भक्तिं हि कुरुत ध्यानं चरत तस्य वै॥७०॥
सेवां लभध्वं तस्यैव नित्यं नित्यमतन्द्रिताः।
गतं पापं गतो भावो दैत्यता वृद्धता गता॥७१॥
गता भीर्मरणं चापि गतं युष्माकमार्तिदम्।
सर्वं लब्धं च लब्धव्यं प्राप्तव्यं प्राप्तमित्यपि॥७२॥
कृतं कृत्यं च यावद्वै नाऽतोऽन्यदवशिष्यते।
सेवध्वं षड्विधं दास्यं हृदि कृत्वा तु कन्यकाः॥७३॥
विश्वासो माधवे कार्यो यथाऽपत्यस्य मातरि।
वरदानं वरणं च तस्मिन् कार्यं त्वमेव मे॥७४॥
सन्न्यासः सर्वथा तस्मिन् कृष्णे देहस्य देहिनाम्।
कार्पण्यं चापि कैंकर्यं भृत्यवत् परमात्मनि॥७५॥
सदा स्थैर्यं सुखे दुःखे पातिव्रत्यं न चेतरत्।
मम कान्तस्याऽनुकूल्यं तदिच्छेच्छा तु मामकी॥७६॥
प्रातिकूल्यं न मे तस्य तदनिष्टं तु नेष्यते।
इत्येवं स्वामिसौख्ये स्वसौख्यं मन्येत मानिनी॥७७॥
स्वामिदुःखे तु याऽशान्ता दुःखिनी भवति ध्रुवम्।
स्वात्मवद् वर्तते तस्मिन् कान्ते देवे परात्मनि॥७८॥
सर्वं तस्मै प्रदातव्यं शरणं या समिच्छति।
स एवाऽत्र पिता पाता स एव जननी जनुः॥७९॥
कृष्ण एव महान् बन्धुर्भ्राता स्वसा हरिः स्वयम्।
कृष्ण एव कनिष्ठोऽपि चानुजो दुहिताऽपि सः॥८०॥
कृष्ण एव पतिः पत्नी स्नुषा वधूर्हरिर्मम।
कृष्ण एव श्वशुरश्च श्वश्रूर्ननान्दा चात्मजा॥८१॥
पुत्रः पुत्री सखी मित्रं कृष्ण एव सदा मम।
कृष्णनारायणो भ्राता राजा भृत्यश्च किंकरः॥८२॥
सेवकश्च गुरुः कृष्णः शिक्षकश्च पुरोहितः।
दर्शकः सार्थ एवाऽयं गृहं गृहपतिः प्रभुः॥८३॥
आश्रयः फलदश्चापि मम श्रेष्ठी स माधवः।
मम क्षेत्रं वाटिका च मम द्रव्यं हरिः स्वयम्॥८४॥
सम्बन्धी मे केशवः स बालः स बालिका मम।
मम हृद्यो महीमानः प्राघूणिको मम प्रभुः॥८५॥
सपत्नी मे सदा कृष्णः सपत्नो मायिके मम।
मयि द्रष्टा मयि श्रोता मयि स्प्रष्टा जनार्दनः॥८६॥
घ्राता रसयिता कृष्णो मयि मन्ता हरिः स वै।
गन्ता मयि ग्रहिता स वक्ताऽऽनन्दयिता मयि॥८७॥

विसर्जयिता कृष्णः स बोद्धा चिन्तयिता मयि ।
निर्णेता सः प्रापयिता वेत्ता विद्वान् स वै मयि ॥८८॥
तर्पयिता मोदयिता रन्ता मयि हरिः स च ।
गोप्ता चाकर्षयिता च गर्भे कुक्षौ स मे हृदि ॥८९॥
प्राणयिता जीवयिताऽन्तरात्मा मे पुमुत्तमः ।
साक्षी चेता पतिः कृष्णः सर्वाऽहं तन्मयी वधूः ॥९०॥
तस्य सर्वं मयि चाहं तस्मिन् श्रीपरमात्मनि ।
इत्येवं पुत्रिका ! यूयं भवताऽस्मिन्निवेदिताः ॥९१॥
यन्मिष्टं यच्च मे हृद्यं यन्माधुर्यं यच्छीतलम् ।
तत्सर्वं मे बालकृष्णश्चैवं भवत दासिकाः ॥९२॥
गोपायन्ति यथा गोप्यं प्रभुर्गोप्यतमो हरिः ।
कान्तः सोऽयं गोपनीयः कर्तव्यं नाऽवशिष्यते ॥९३॥
कान्तार्थं गोपनं सर्वं कान्ताग्रे नैव गोपनम् ।
कान्तवद् भाव्यते कृष्णस्ततः कान्तायते हि सः ॥९४॥
कान्तायते यथा कान्ता कान्तं प्रत्यभिकामुकी ।
कृष्णः कृष्णायते कृष्णां कृष्णं प्रत्यभिकामुकीम् ॥९५॥
अनादिश्रीकृष्णनारायणो युष्मासु वर्तते ।
अभिन्नस्तिष्ठति द्रव्यं शाश्वतं चाव्ययं हि सः ॥९६॥
स एव मिलितश्चाऽत्र गोपालकृष्णमन्दिरे ।
कम्भराश्रीनन्दनः स प्राप्तो युष्मद्व्रतं हि सः ॥९७॥
भोजने शयने स्नाने ध्याने याने समासने ।
विहारे रमणे पाने विश्रामे च प्रवर्तने ॥९८॥
विकृतौ सुकृतौ सौम्ये जुषध्वं तं विषादने ।
निवर्तने च निद्रायां जुषध्वं तं प्रियं पतिम् ॥९९॥
एवं क्रियाकलापं स्वं समर्पयत तत्र वै ।
एतावच्छास्त्रविस्तारश्चैतावत्त्वनुशासनम् ॥१००॥
ओं शान्तिरस्तुविरतिर्भवतीनां नरायणे ।
सर्वकामलयश्चाऽस्तु भवतीनां परात्मनि ॥१०१॥
इत्युपादिश्य मुनिराट् मायाक्षालनसद्बलः ।
कन्याभ्यः स च संवासान् ददौ पर्णालयेषु वै ॥१०२॥
स्वयं ध्याने निमग्नोऽभूत् कन्याभिर्भोजिताश्च ताः ।
पूजिता वन्दिताः स्वागतादिभिश्चाऽभियोजिताः ॥१०३॥
ततस्ता अपि नित्यं वै शुश्रुवुः परमाः कथाः ।
लक्ष्मीनारायणसंहितायाः प्रातः सायं दिने दिने ॥१०४॥
प्रातर्नित्यं पूजयन्ति स्म श्रीकृष्णं पतिं प्रियम् ।
जन्मनः सफलत्वं च कुर्वन्त्येव दिवानिशम् ॥१०५॥
इत्येवं राधिके ! तेऽत्र कथितां दिव्यताप्रदाम् ।
पत्यर्थं प्राणदात्रीणां कथां कृष्णनिवेदिनीम् ॥१०६॥
यासु नास्ति सदाचारो यासु नास्ति च सेवनम् ।
भक्तिराराधना यासु नास्ति कृष्णस्य भावनम् ॥१०७॥
तासां तुष्टो हरिश्चायं त्वनुग्रहपरायणः ।
कृपासाध्यो महाराजो ववर्ष सीमतोऽतिगः ॥१०८॥
कर्तुमकर्तुमन्यथाकर्तुं शक्तः परात्परः ।
दैत्यजातीन् देवजातीन् ब्रह्मजातीन् करोति वै ॥१०९॥
पापात्पापतमश्चापि पठनाच्छ्रवणादपि ।
देववन्मुक्तवत् कृष्णपत्नीवत् संप्रजायते ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कंकतालदैत्यपत्नीनां युद्धे कुंकुमवापिकाक्षेत्रे कृष्णकान्तात्वं लोमशकृतबालकृष्णात्मनिवेदितोपदेशश्चेत्यादिनिरूपणनामा सप्तदशोऽध्यायः ॥ १७ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे भाद्रपदे पितृपक्षे हरेर्गृहम् ।
अर्यमादिकपितृणां हरयेऽर्पयितुं सुताः ॥ १ ॥
कन्याः समागता मिष्टपायसान्नतिलान्विताः ।
फलपुष्पाऽगुरुकस्तूरिकाकुंकुमतण्डुलैः ॥ २ ॥
कर्पूराद्यैर्युक्तसौवर्णादिपात्रसमन्विताः ।
पुराणदेवपूजार्थं सर्वशृंगारशोभिताः ॥ ३ ॥
विमानैर्दिव्यसामग्रीसंभृतैः प्रेमसंप्लुताः ।
अमावास्यादिने सर्वाश्चाययुर्लोमशाश्रमम् ॥ ४ ॥
लोमशं प्रथमं नत्वा गुरुं च पितरं परम् ।
सस्मरुश्च हरिं तत्र कृष्णनारायणं हि ताः ॥ ५ ॥
तावत्तत्र बालकृष्णश्चाययौ लोमशाश्रमम् ।
कन्याप्रदत्तपूजादिग्रहणार्थं दयावशः ॥ ६ ॥
पितृकन्याः कृष्णनारायणमायान्तमुज्ज्वलम् ।
मनोहरं किशोरं च विलोक्योत्थाय सत्वरम् ॥ ७ ॥
अभिजग्मुः प्रमोदेन नेमुर्लाजाऽक्षतादिभिः ।
वर्धयामासुरत्यर्थं निपेतुः पादयोर्हरेः ॥ ८ ॥
अभिभाष्य च कुशलं परस्परमनामयम् ।
पुष्पहारान् ददुस्तस्य गले सहस्रकन्यकाः ॥ ९ ॥
पद्रजो मस्तके धृत्वा मूर्तिं न्यधुश्च मानसे ।
न्यधू रूपं नेत्रयोश्च स्नेहं न्यधुस्तदन्तरे ॥१०॥
स्वयं न्यधुश्चार्पणेऽथ मिलित्वाऽऽश्रममाययुः ।
ब्रह्मसरोभिः कन्याभिः सत्यलोकीयमुत्तमम् ॥११॥
दिव्यमर्पितमेवादौ हंसासनं विमानवत् ।
शतचन्द्राभिनद्धं च स्वर्णवरूथशोभितम् ॥१२॥

अमृतस्राविं परितः सुगन्धनिर्झरान्वितम् ।
स्वयं दोलायमानं च गीतिस्वरमनोहरम् ॥१३॥
यथाकामं च गतिमच्चैतन्यरतम्बभूषितम् ।
मणिसोपानसंराजत् स्फाटिकपार्श्वघट्टितम् ॥१४॥
मृदुविभूतिगद्दीकातुलिकापट्टराजितम् ।
अध्यारुरोह भगवान् कृष्णनारायणश्च तत् ॥१५॥
सिंहासनाच्छतगुणा शोभा हरेस्तदाऽभवत् ।
अथाऽप्सरोभिः कन्याभिरुपानहौ सुकोमले ॥१६॥
मखमल्लकृते मृद्व्यौ विद्युच्चन्द्रिकतारकैः ।
स्वर्णराजतसन्तानैर्भरतेन विराजिते ॥१७॥
इन्द्रगोसन्निभे रम्ये चार्पिते पादयोर्हरेः ।
निर्यातस्ते यथाकामं यथाकामं धृतिक्रिये ॥१८॥
कृष्णेन च प्रमोदेन धृते तूपानहौ यदा ।
आक्षरं दिव्यमेवाऽऽम्यां तेजः प्रकटितं बहु ॥१९॥
यद्व्याप्नोद् दिगन्तांश्च कोटिचन्द्रनिभं तदा ।
अथाऽर्यमादिसूर्याणां कन्याभिश्छत्रमर्पितम् ॥२०॥
सुवर्णकटवस्त्राढ्यं राजतीकिंकिणीयुतम् ।
सुवर्णकलशं रत्नदण्डं भासुरमुज्ज्वलम् ॥२१॥
कौशेयमञ्जरीयुक् च आदित्यचित्रराजितम् ।
अथ कुबेरकन्याभिः पादपीठः समर्पितः ॥२२॥
मृदुसुवर्णखचितश्चन्दनद्रुमनिर्मितः ।
सिंहपादसुशोभाढ्यश्चाष्टकोणसमन्वितः ॥२३॥
पद्मपत्रमिव स्वच्छः शीतलस्तेजसान्वितः ।
आदर्शखचितः पार्श्वे मध्ये चन्द्रविराजितः ॥२४॥
तत्र न्यधाच्चरणौ श्रीपतिः स्वामिपुमुत्तमः ।
अथ शैलस्य कन्याभिश्चामरौ श्वेतगोभवौ ॥२५॥
रत्नसुवर्णदण्डौ चार्पितौ कृष्णाय तुष्टये ।
अथेन्द्रकन्यकाभिश्चार्पितं वेत्रं तु कानकम् ॥२६॥
वेधोमरतकसंशोभं कम्बुकण्ठं च वक्षसि ।
वलयैर्विविधैर्युक्तं ततो वल्ल्युदरं शुभम् ॥२७॥
पीतपटकबद्धं च प्रान्ते शेषफणायुतम् ।
मध्ये मौक्तिकहीरकमणिनद्धं समन्ततः ॥२८॥
अथ च धर्मराजस्य कन्याभिर्यष्टिरर्पिता ।
कानकी संहृतिशक्तिमस्तका जीवनीपदा ॥२९॥
समाधिशक्तिमध्या च धर्ममूर्तिमुखान्विता ।
मध्ये याम्यसभायुक्ता प्रान्ते दूतगणान्विता ॥३०॥
अथ वायोश्च कन्याभिर्व्यजने रत्नयष्टिके ।
सौवर्णकटकैर्नद्धे कौशेयप्रान्तझल्लरे ॥३१॥
सौवर्णपटवाक्षेपे सूर्यचन्द्रोभयान्विते ।
वर्तुले तैजसमणिनद्धे रौप्यनिसर्गजे ॥३२॥
अथर्तुकन्यकाः कृष्णे ददुः शेखरगुच्छकौ ।
पुष्पाणां कन्दुकं हारान् तोरान् सुगन्धिसंभृतान् ॥३३॥
अम्लानान् दिव्यरूपाँश्च मिष्टस्वेष्टसुगन्धिकान् ।
अथ विश्वकर्मकन्या ददुर्मुकुटमुज्ज्वलम् ॥३४॥
आभूषणानि च स्वर्णनिर्मितानि च मालिकाः ।
ऊर्मिका रशनाश्चाङ्गुलीयकानि च मेखलाम् ॥३५॥
कटकानंगदान् शृंखलाश्च नुपूरकिंकिणीः ।
कण्ठभूषा विचित्राश्च ददुर्नारायणाय ताः ॥३६॥
अथ द्रुकन्यकास्तस्मै ददुर्वस्त्राणि भावतः ।
अंगरक्षकं धौत्रं चोत्तरीयकं शिरःपटम् ॥३७॥
स्कन्धवस्त्रं कटिपटं सौवर्णतारसंहितम् ।
नक्तकं करवस्त्रं च पट्टकं सत्पटीं ददुः ॥३८॥
अथ श्रवणपितॄणां कन्याः श्रावण्य इत्यपि ।
ददुः श्रीहरये वारिभृतान् स्वर्णघटान् शुभान् ॥३९॥
अथ संवत्सरपितृकन्याः पक्वान्नपूरिकाः ।
पायसानि च शाकानि भोज्यानि हरये ददुः ॥४०॥
कालकन्या ददुर्दिव्यं करे त्वभयचक्रकम् ।
वह्निपितृकन्यकाश्च ददुः पात्राणि भूरिशः ॥४१॥
स्थालीश्च वटकीश्चापि कलशान् तापलीनिकाः ।
चमम्वान् जलपाँश्चापि सौवर्णान् राजतादिकान् ॥४२॥
अथ प्रेतपितृपुत्र्यो ददुस्ताम्बूलकानि च ।
खनिजन्मपितृकन्या ददुर्मांगल्यवस्तुकम् ॥४३॥
द्रवाँश्च विविधान् धातुविकारोत्थान् सुरंगिणः ।
एवमन्याश्च पित्र्यश्च न्यधुर्योग्यं हरेः पुरः ॥४४॥
वार्क्ष्यो ददुश्चटन्यादि तिक्ताम्ब्लकटुमिश्रितम् ।
एवं भाद्रे ह्यमायां तु पित्र्यः सर्वा हरिं प्रभुम् ॥४५॥
अर्चयामासुरत्यर्थं नैजाऽसामान्यवस्तुभिः ।
तर्पयामासुरत्यर्थं भोजयित्वा पुनः पुनः ॥४६॥
पायसादीनि चान्नानि फलानि विविधानि च ।
मिष्टपानानि शीतानि स्वाद्यानि रसवन्ति च ॥४७॥
विश्वंभरो हि भगवान् बुभुजे बहुरूपधृक् ।
सर्वेषां पितॄणां लक्षकन्यानां भावनानुगः ॥४८॥
लक्षरूपो हरिर्भूत्वा श्राद्धं जग्राह तत्कृतम् ।
अथ श्रीभगवान् तत्र सस्मार पितृदेवताः ॥४९॥
ब्रह्मादि मुख्यदेवांश्च ब्रह्मोर्ध्वरेतसोऽपि च ।
मुनीनृषीन् सुराँश्चापि लोकपालान् दिगीश्वरान् ॥५०॥

श्रावणान् याम्यपितॄँश्च प्रेतपितॄँश्च कालिकान् ।
साम्वत्सरिकपितॄँश्च खानेयाँश्चापि सर्वशः ॥५१॥
आज्यपान् सोमपाँश्चापि बर्हिषदाँस्तथा पितॄन् ।
अग्निष्वात्तान् कर्मवशान् सर्वानतर्पयद्धरिः ॥५२॥
जलैस्तिलैः फलैराज्यैः पायसैर्मिष्टभोजनैः ।
शाकैर्मधुभिर्दध्यन्नैर्विविधैर्भोज्यवस्तुभिः ॥५३॥
अन्नवस्त्रवारिपानैर्मुखचूर्णादिभिस्तथा ।
आगतान् सर्वपितॄँश्च तर्पयामास माधवः ॥५४॥
कोटिशः पितृदेवान् स तर्पयामास केशवः ।
प्रासादिकं महापुण्यं भोजयामास भावतः ॥५५॥
ततो दानानि च ददौ कोटिरत्नानि वै तदा ।
कन्याभ्यः कोट्यर्बुदेभ्यः सर्वाभ्यो भगवान् स्वयम् ॥५६॥
भोजयामास विधिना पायसादीनि सर्वथा ।
मिष्टान्नानि च बहूनि पेयानि विविधानि च ॥५७॥
स्वप्रासादिकताम्बूलादीन्यपि प्रददौ प्रभुः ।
तृप्तास्ताः कन्यकाः सर्वाः प्राच्योऽवाच्यश्च पितृजाः ॥५८॥
अथ सायं कृष्णनारायणं पुपूजुरादरात् ।
आरार्त्रिकं ततश्चक्रुर्वन्दनं च यथेप्सितम् ॥५९॥
अर्थयामासुरेता याः पितृकन्याः समाययुः ।
कृष्णसेवनलाभं वै दातुं यावच्च जीवनम् ॥६०॥
अनादिश्रीकृष्णनारायणः प्राह तथाऽस्त्विति ।
सर्वास्तास्तस्थुरौत्सुक्याल्लोमशस्याऽऽश्रमे सदा ॥६१॥
बालकृष्णाज्ञया कृष्णसेवापराः सदाऽभवन् ।
पितरो ये च तृप्ताश्च गता नैजं स्वरादिकम् ॥६२॥
भगवान् बालरूपश्च लोमशं सुसमर्च्य च ।
भोजयित्वा पूजयित्वा त्वेकरूपो हरिर्ययौ ॥६३॥
नैजं सौधं कंभराश्रीनिवासं सम्पदाश्रयम् ।
अथ सन्ध्यासमये श्रीहरिः सस्मार सूर्यजम् ॥६४॥
नारकिणां तु जीवानां विमोक्षार्थं हि पापिनाम् ।
तथा प्रमुक्तशेषाणां भुज्यमानशरीरिणाम् ॥६५॥
धर्मराज्यस्य याम्यानां त्वभयं कर्तुमेव च ।
धर्मराजः समायातस्तत्कालं हरिसन्निधौ ॥६६॥
जरया व्याधिभिश्चापि महाकालेन मृत्युना ।
चित्रगुप्तेन सहितो द्वितीयरूपधृक् नयः ॥६७॥
एतानाह प्रभुश्चाऽऽद्य पितॄणां दिवसो महान् ।
तृप्तिप्रदस्ततश्चाऽहं त्वाज्ञापयामि सर्वथा ॥६८॥
यमलोकगताः सर्वे भोजनीयास्तु पायसैः ।
मम प्रसादशाकाद्यैः पावनीया मदिच्छया ॥६९॥
सर्वे शुद्धा भवन्त्वद्य यात स्वर्गं च मोक्षणम् ।
इत्युक्त्वा प्रददौ कृष्णस्तेभ्यः प्रसादपायसम् ॥७०॥
यमाद्या जगृहुस्तत्र भक्षयामासुरादरात् ।
जलपानादिकं कृत्वा कृतकृत्यान् हि मेनिरे ॥७१॥
अथ कृष्णो ददौ तेभ्यः पायसान्नं सुपुष्कलम् ।
याम्येभ्यश्च प्रदानार्थं यमाद्या जगृहुश्च तत् ॥७२॥
श्रीहरेराज्ञया धर्मराजाद्याः परिपूज्य तम् ।
नत्वा स्तुत्वा पादयोश्च पतित्वा च यमक्षयम् ॥७३॥
ययुः सम्यक् प्रसन्नाश्च याम्यानाहूय नाटकान् ।
यथाज्ञं भोजयामासुः प्रसादं पायसं हरेः ॥७४॥
भुक्त्वा पापानि तूर्णं ते क्षालयित्वाऽऽन्तराण्यपि ।
निर्मलास्ते च सञ्जाता धर्मराजाज्ञया ततः ॥७५॥
स्वर्गं सत्यं परं लोकं मोक्षं चापि ययुस्तदा ।
हरेः प्रतापादेवं वै प्रेताद्याः पितरो गणाः ॥७६॥
तारिता हरिणा लोकपितरः कर्मवर्तिनः ।
अवगतिं गताश्चापि तारितास्ते दयालुना ॥७७॥
अनुग्रहार्थं जीवेषु यतो जन्माऽस्ति भूतले ।
एवं वै राधिके कृष्णनारायणः परात्परः ॥७८॥
परं धाम जनान् जीवान्नयत्येव कृपावशः ।
निजयोगं ददात्येषः भक्तसंकल्पतत्परः ॥७९॥
पठनाच्छ्रवणाच्चास्य पितृमोक्षो भवेद्ध्रुवम् ।
तथैव योषितः पित्र्यो मुक्तिं प्रयान्ति वै श्रुतेः ॥८०॥

**श्रीराधिकोवाच—**

पितरस्तु श्रुता देवपितरः श्रावणास्तथा ।
प्रेता याम्याः साम्वत्सराः काला खानेयकास्तथा ॥८१॥
अग्निष्वात्ता बार्हिषदा आज्यपाः सोमपास्तथा ।
अर्यमाद्या ऋषिरूपा ऊर्ध्वरेतस ऐश्वराः ॥८२॥
ब्रह्मविष्णुमहेशाश्च मानवा राक्षसाः खगाः ।
यक्षा दूताः पिशाचाश्च भूताः कूष्माण्डकास्तथा ॥८३॥
वैनायकाश्च वेताला अधोगतिं गताश्च ये ।
त एते पितरः सर्वे श्रुतास्त्वत्तः प्रसंगतः ॥८४॥
किन्तु पुत्र्यस्त्वयोच्यन्ते यास्तु कृष्णेन तर्पिताः ।
कास्ताः पित्र्यो भवन्त्यत्र श्राद्धभोजनवासनाः ॥८५॥
रासेश्वर कृपासिन्धो तन्मे कृष्ण प्रदर्शय ।
यास्ता नार्यो पित्रीभूताः क्व कथं निवसन्ति ताः ॥८६॥

श्रीकृष्ण उवाच—

सम्यक् पृष्टं त्वया राधे लोकानुग्रहकाम्यया ।
त्वं तु जानासि वै सर्वं निबोध कथयाम्यपि ॥८७॥
नारीवर्गो मया सृष्टो गोलोके मम वामतः ।
राधा लक्ष्मीः सती गंगा सरस्वती तथाऽपराः ॥८८॥
विरजा श्रीर्यमी दुर्गा सावित्री च तथेतराः ।
ताः पित्र्यः पूर्वजाः श्राद्धे भुञ्जते तर्पिताः प्रियाः ॥८९॥
पितामही तु सावित्री श्रीश्च वै प्रपितामही ।
प्रप्रपितामही दुर्गा श्राद्धे चायान्ति तास्तदा ॥९०॥
माता लक्ष्मीश्च वै मातामही सरस्वती तथा ।
सती प्रमातामही च श्राद्धे चायान्ति सर्वथा ॥९१॥
याश्च वध्वः स्नुषा बाला विधवा वा कुमारिकाः ।
अधवाऽप्यदती चाऽक्षता जरठाः सवासनाः ॥९२॥
विच्चित्ताः कृतवाग्दाना विवासिताः स्वतन्त्रिकाः ।
निर्वंशा निष्कुटुम्बाश्च निराधारा निराश्रयाः ॥९३॥
अकृतोदकश्राद्धाश्च तथाऽप्रदत्तवह्निकाः ।
अतीर्थवाहिका याश्चाऽसम्बन्धिस्पृष्टयच्छवाः ॥९४॥
अकालमृत्युमापन्ना आकस्मिकमृतिं गताः ।
गर्भप्रसूतिदोषेण मृता याश्चाभिचारिकाः ॥९५॥
अभिचारमृताश्चापि प्रसह्याऽपि च या मृताः ।
प्रसह्य मैथुने मृता यक्षराक्षससंहृताः ॥९६॥
योनिदुष्टा मृता याश्च वैधव्यधर्मवर्जिताः ।
बहुयोगं गता याश्च पराधीनमृतिं गताः ॥९७॥
भूतप्रेतपिशाचादिच्छायावशमृतिं गताः ।
पश्चात्पुण्यविहीनाश्चाऽकृतपुण्यव्रतोत्सवाः ॥९८॥
एता निर्वंशजाः सर्वाः पित्र्यो भवन्ति राधिके ।
याम्ये वसन्ति निर्वंशाः कुमार्यः सत्यलोकके ॥९९॥
महर्जनतपस्स्वेव तदन्याश्चापमृत्युजाः ।
स्वर्गे पुण्यकृताश्चापि निर्वंशा अप्सरोगणाः ॥१००॥
भूर्लोके निवसन्ति भूती प्रेती पिशाच्चिनी ।
डाकिनी शाकिनी कूष्माण्डिनी वैनायकी तथा ॥१०१॥
वैताली भैरवी रण्डा कृत्या षण्ढा च सूतकी ।
शवी चिता ननाम्नी च श्मशानी चेति राधिके ॥१०२॥
एताः पित्र्यो भवन्त्येव भुवर्भूलोकसंस्थिताः ।
नागिनी भिक्षुकी पिपीलिका मत्स्यी च राक्षसी ॥१०३॥
काकी गृध्री च मकरी पाताले च जले स्थिताः ।
एता निर्वंशमृतजाः पित्र्यो भवन्ति राधिके ॥१०४॥
मातरो देवता याश्च सात्त्विक्यस्ता अपि स्त्रियः ।
क्रूरदशोऽथवा वंशयुता अपि मृतेः परम् ॥१०५॥
भवन्ति पित्र्यः पापेन यथाकर्मनिवासिकाः ।
ताभ्यः श्राद्धं प्रदातव्यं जानता विदुषा सदा ॥१०६॥
अनादिश्रीकृष्णनारायणेन ताभ्य एव च ।
जलान्नादि तदा दत्तं विश्वंभरेण तृप्तये ॥१०७॥
ताः सर्वा अपि संगृह्य प्रसादमधिगम्य च ।
ययुः स्वर्गादिकं सौख्यानन्दस्थलं वृषान्विताः ॥१०८॥
शृणु त्वं राधिके तत्र चमत्कारो महानभूत् ।
निशिथे राक्षसा गुरोर्मन्दिरं समुपाययुः ॥१०९॥
शिरोहीनस्तेषु चैकोऽपरो नेत्रविहीनकः ।
तृतीयो नासिकाहीनश्चतुर्थः कर्णशून्यकः ॥११०॥
पञ्चमः पादहीनश्च षष्ठः कटितृणोपमः ।
सप्तमः पादपृष्ठश्चाऽष्टमः पृष्ठाननस्तथा ॥१११॥
नवमोऽन्धो बधिरश्च पंगुर्मूकश्च कुष्ठवान् ।
चतुर्दशो वातरोगी जलोदरी नपुंसकः ॥११२॥
सप्तदशो मलिनश्च परितो लग्नमक्षिकः ।
अष्टादशो गलपाशः सशूलश्च तथेतरः ॥११३॥
विंशः श्वफाटितः क्रोडत्रोटितश्च तथाऽपरे ।
एवमाद्या गणाश्चाऽश्वपट्टसराः समाययुः ॥११४॥
क्रोशन्तो बहुधाऽऽक्रोशान् निवेदयन्तो दुष्कृतान् ।
अन्नहीना जलहीनाः शुष्ककण्ठौष्ठतालुकाः ॥११५॥
छन्नोदराश्च वै प्रेताश्चाययुर्बहुधा तदा ।
रुरुदुर्लोमशस्याऽग्रे स्वोद्धारार्थं भृशं ततः ॥११६॥
लोमशः परिपप्रच्छ कथं वै प्रेततां गताः ।
तत्रैकः प्राह च मया छिन्नं द्विजशिरः पुरा ॥११७॥
तेन पापिन वै जातः शिरोहीनोऽत्र राक्षसः ।
अपरः प्राह च मया चौर्यकार्ये गृहेशितुः ॥११८॥
नेत्रे प्रस्फोटिते तेन नेत्रहीनोऽभवम् ऋषे ! ।
तृतीयः प्राह च मया पत्न्याश्छिन्ना तु नासिका ॥११९॥
तेनाऽहं नासिकाहीनः प्रेतो भवामि दुःखवान् ।
चतुर्थः प्राह च मया कर्णौ छिन्नौ द्विजस्य वै ॥१२०॥
भूषायुक्तौ भूषणानां मयाऽपहरणं कृतम् ।
तेन जातः कर्णहीनः प्रेतो भवामि दुःखवान् ॥१२१॥
पञ्चमस्तु तदा प्राह मया प्रवासिनः पुरा ।
हतौ पादौ वने द्रव्यहरणार्थं ततोऽप्यहम् ॥१२२॥
पादहीनः समभवं गच्छाम्यधोमुखः सदा ।
षष्ठः प्राह मया यष्ट्या मारेण घातिता कटिः ॥१२३॥

गोः पूर्वं तेन पापेन भग्नकटिर्भवाम्यहम् ।
सप्तमः प्राह च मया पादौ बध्वा मम स्त्रियाः ॥१२४॥
क्लेशिता सा विना दोषं तेन दोषेण राक्षसः ।
पृष्ठपादो भवाम्यत्र गतिशक्तिविहीनकः ॥१२५॥
अष्टमः प्राह च मया त्वजाबालस्य कण्ठतः ।
मस्तकं म्रोडितं पश्चान्मारितं चाजबालकम् ॥१२६॥
तेन दोषेण जातोऽस्मि पृष्ठाननः सुदुःखितः ।
नवमः प्राह च मया मृगयाकरणे पुरा ॥१२७॥
चक्षुः प्रस्फोटितं चैकमृगस्य जीवतस्ततः ।
जातोऽस्मि तेन दोषेण जात्यन्धो दुःखदुःखितः ॥१२८॥
दशमः प्राह च मया निन्दा विष्णोः पुरा श्रुता ।
तेनाऽहं जन्मबधिरश्चैकादशोऽप्युवाच तम् ॥१२९॥
मया पादे हतः श्वा च तेनाऽहं पंगुतां गतः ।
द्वादशः प्राह साधूनां निन्दया मूकतां गतः ॥१३०॥
अगम्यागमनात् कुष्ठी त्रयोदशोऽवदत्तदा ।
चतुर्दशो वातरोगी विश्वासघातकोऽभवम् ॥१३१॥
मत्स्यादोऽयं जलोदरी नातोऽस्तीति जगाद च ।
षोडशोऽयं व्यवायी च नपुंसकोऽण्डनाशकः ॥१३२॥
वृषभाणां ततो जातस्तथा चण्डालकर्मकृत् ।
मक्षिकासमभिव्याप्तः संजातोऽयं तथाऽवदत् ॥१३३॥
गलपाशप्रदश्चायं गलपाशोऽभवत्तथा ।
शूलप्रदश्च जीवानां शूलरोगी ततो ह्ययम् ॥१३४॥
विंशः प्राह मया पूर्वं शशाद्याः श्वापदादिभिः ।
विदारिता बहुपापो भवाम्यद्य विदारितः ॥१३५॥
अतिकष्टं च भुञ्जामो भोजनं नोपलभ्यते ।
तृषिता दुःखिताः स्मोऽद्य कृपालुर्भगवान् यदि ॥१३६॥
अनादिश्रीकृष्णनारायण उद्धारयेत्तु नः ।
मुक्तिं गता भविष्यामो विप्र ! मुक्तिं प्रदापय ॥१३७॥
इत्युक्तो लोमशस्तेभ्यो ददौ मन्त्रं जलान्वितम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१३८॥
सस्मार बालकृष्णं च कृष्णो द्राक् तत्र चाययौ ।
निजपादजलं तेभ्यो पाययित्वा हरिश्च तान् ॥१३९॥
विधाय दिव्यदेहाँश्च चतुर्भुजस्वरूपिणः ।
विमानैः प्रेषयामास वैकुण्ठं धाम शाश्वतम् ॥१४०॥
एवं मुक्तिं प्रदत्वैव हरिर्नैजालयं ययौ ।
पापिनां मुक्तिदाताऽयं जयते परमेश्वरः ॥१४१॥
पठनाच्छ्रवणाच्चास्य पितुद्धारो भवेद्ध्रुवम् ।
यशः कीर्तिर्धनं धान्यं गावश्चारोग्यमित्यपि ॥१४२॥
पुत्राः पौत्राः सुताः स्वर्णं मोक्षो लक्ष्मीर्विभूतयः ।
भवेयुः सम्पदः सर्वाः श्रोतुर्वक्तुर्न संशयः ॥१४३॥
नमस्तस्मै भगवते सर्वोद्धारदयालवे ।
कर्माणि पापिनां चाऽविगणय्य मोक्षदायिने ॥१४४॥
दैत्यदानवपापानां रक्षसां पावनाय च ।
भूतप्रेतपिशाचानां मोक्षकर्त्रे नमोनमः ॥१४५॥
दयालोः श्रीहरेर्नास्ति दयायाः पार इत्यपि ।
पापिनां तु क्वचिन्नास्ति दोषाणामन्त इत्यपि ॥१४६॥
इत्येवं राधिके कृष्णनारायणं परेश्वरम् ।
ज्ञात्वा भजन्ति सततं ते मोक्षस्था न संशयः ॥१४७॥
चित्ते कृष्णो हृदि कृष्णश्चक्षुषोः कृष्ण आत्मनि ।
ब्रह्मरन्ध्रे यस्य कृष्णः स भवेन्मोक्षगो ध्रुवम् ॥१४८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पितृपक्षे पितृकन्याकृतहरिपूजनं, हरिकृतपितृतर्पणादि, नारकाणां मोक्षणं, पितृस्त्रीजातिपरिचयः प्रेतानां मुक्तिश्चेत्यादिनिरूपणनामाऽष्टा-दशोऽध्यायः ॥ १८ ॥

**श्रीकृष्ण उवाच—**

अथाऽस्य वत्सरे याते द्वितीये वत्सरे शुभे ।
प्रारब्धे कार्तिककृष्णाष्टम्यां जन्मोत्सवं पिता ॥ १ ॥
प्रचकार तदा गुरोर्लोमशस्याऽपि पूजनम् ।
ब्राह्मणान् भोजयामास ददौ दानानि भूरिशः ॥ २ ॥
सर्वं तद् राधिके तुभ्यं कथयामि समासतः ।
अनादिश्रीकृष्णनारायणपुमुत्तमस्य वै ॥ ३ ॥
सप्तम्यां प्रातरुत्थाय श्रीमद्गोपालकृष्णकः ।
स्मृत्वा कृष्णं हरिं राधे ! स्नात्वा प्रपूज्य केशवम् ॥ ४ ॥
पत्रिकां लेखयामास वार्षिकाद्यमहोत्सवे ।
वर्षे मे नन्दनस्यौर्जकृष्णाष्टमीप्रगे शुभम् ॥ ५ ॥
पूर्णं प्रजायते चाथ द्वितीयवत्सरक्षणे ।
शुभे दिने च तत्रैव महोत्सवे मुदावहे ॥ ६ ॥
क्रियमाणे मयाऽऽगत्य भवद्भिरुपबृंहिते ।
स्वात्माऽयमिति मत्वैव शोभावृद्धिर्विधीयताम् ॥ ७ ॥
अनादिश्रीकृष्णनारायणश्चाशीर्निधिः स्वयम् ।
नीयन्तां चापि दीयन्तां यथास्नेहं शुभाशिषः ॥ ८ ॥
मत्वा गृहं स्वकीयं चाऽऽगन्तव्यं प्रार्थयामि वः ।
कुटुम्बभृत्यसुजनसुहृत्सम्बन्धिसंहितान् ॥ ९ ॥

देवर्षिपितृवृद्धानां सतां ब्रह्मानुशीलिनाम् ।
पतिव्रतानां साध्वीनां देवीनां ब्रह्मयोषिताम् ॥१०॥
विप्रधर्मवतां भक्तसत्संगकारिणां तथा ।
शुभाशीर्भिः शिशुः श्यामो घनश्यामो हरिर्भवेत् ॥११॥
कुंकुमवापिकातीर्थे चाश्वपट्टसरस्तटे ।
सौराष्ट्रे भूतले सर्वैरागन्तव्यं मम गृहम् ॥१२॥
भद्रा यस्योत्तरे चास्ति पूर्वे शत्रूञ्जिता नदी ।
दक्षिणे वर्तते व्याघ्रारण्यं च पश्चिमे गिरिः ॥१३॥
मध्ये सरोवरं दिव्यं दशक्रोशादिवर्तुलम् ।
मध्ये द्वीपो महानस्ति प्रासादो लोमशाश्रमः ॥१४॥
तत्र गोपालकृष्णस्य ममालयो विराजते ।
आगन्तव्यं महाभागैर्द्वितीयवार्षिकोत्सवे ॥१५॥
अनादिश्रीकृष्णनारायणस्य परमात्मनः ।
धन्योऽहं कृतकृत्योऽहं भविष्याम्यागमात्तु वः ॥१६॥
वैकुण्ठेन समेयं भूर्भविष्यत्यागमात्तु वः ।
पुत्रस्य जन्मसाफल्यं भविष्यत्यागमाच्च वः ॥१७॥
वारं वारं प्रणम्याऽऽमन्त्रयाम्यागमनाय वः ।
चतुर्दशस्तरस्थानां समाजोऽत्र भविष्यति ॥१८॥
परस्परप्रसंगेन लाभोऽलभ्यो भविष्यति ।
सेविष्ये च यथाशक्ति महीमानान् समाहितः ॥१९॥
कृपणोऽयमिति मत्वाऽनुग्राह्यो दास एव यत् ।
कम्भराश्रीस्तथा चानुग्राह्या नारीभिरागमात् ॥२०॥
सर्वमानसयुक्तांश्च तत्त्वानि चार्थयाम्यपि ।
द्रव्यगुणक्रियाजातिसंसर्गानर्थयाम्यपि ॥२१॥
चेतनाचेतनान् सर्वानामन्त्रयामि भावतः ।
मम पुत्रो भवत्पुत्रो वर्धनीयः शुभाशिषा ॥२२॥
अनागमे तु चिन्ता मे सर्वदाऽनागमात्मिका ।
उत्थिता स्याच्च सा माभूत् कृपा मा खण्डिता भवेत् ॥२३॥
शाश्वतिकता संरक्ष्या शाश्वतिकमहोत्सवे ।
इत्यभ्यर्थ्य विरमेऽतिप्रतिक्षन् ऋतयाचनाम् ॥२४॥
इत्येवं राधिके ! पित्रा प्रभोः कुंकुमपत्रिका ।
लिखिता भावगर्भा च प्रेषिता वै दिगन्तरे ॥२५॥
कृष्णायुधानि सर्वाणि ययुर्नीत्वा दिवं प्रति ।
ईशलोकान् गुणा ययुर्धामान्यैश्वर्यमण्डलम् ॥२६॥
पातालादौ भूषणानि ययुर्नीत्वा च पत्रिकाः ।
राधिके ! मूर्तिमन्तस्ते कृष्णदूता यथा ययुः ॥२७॥
आमन्त्रिताश्च ते यातुं प्रयाणं चक्रिरे मुदा ।
स्वस्वलोकस्थवस्तूनि श्रेष्ठप्रेष्ठानि सर्वथा ॥२८॥

दिव्यान्युपदायोग्यानि सौवर्णराजतानि च ।
तान्तवानि रासनानि विमानादौ दधुश्च ते ॥२९॥
आनन्दं मेनिरे कृष्णनारायणमहोत्सवम् ।
द्रष्टुं भाग्यं समायातं मत्वा बभूवुरुत्सुकाः ॥३०॥
कुंकुमवापिकाक्षेत्रे गोपालकृष्णलोमशौ ।
सतम्यामेव सामग्रीसमवायं प्रचक्रतुः ॥३१॥
घृतकुल्या दधिकुल्या गुडकुल्याश्च शर्कराः ।
मधूनि च विचित्राणि मिष्टान्नान्यपि सर्वशः ॥३२॥
पेयानि मुखचूर्णानि कारयामासतुर्मुदा ।
कान्दविकाश्च देवानां तथा लक्ष्म्यादियोषितः ॥३३॥
कन्यकाश्च हरेर्भक्ताश्चक्रुर्माहानसीयकम् ।
पाथेयं जाठराप्यं च यत्किञ्चिद्भिन्नजातिकम् ॥३४॥
सर्वं व्यञ्जनसाहाय्यं चारनालादिबृंहितम् ।
लेह्यं चोष्यं भोज्यमिष्टं भक्ष्यं भर्जितमित्यपि ॥३५॥
क्वाथितं पाचितं प्रतापितं चार्द्रीकृतं तथा ।
पेषितं कूर्चितं दग्धं सारीकृतं प्रपेच्चितम् ॥३६॥
छूंकारितं वाष्पितं च मिश्रितं मथितं तथा ।
यद्यद् योग्यं च तत्सर्वं चक्रुर्वै निशि सर्वथा ॥३७॥
दर्वी चुल्ली कटाही च स्थाली कुंभी महानसी ।
चिपिटी गर्गरी भ्राष्ट्री चागमिनी च वर्धिनी ॥३८॥
मूशली वल्लरीत्याद्या देव्यः पाकसहायदाः ।
कुशलिन्यो रमादीनां कैंकर्यं चक्रुरादरात् ॥३९॥
द्वादश राशयश्चापि तदा सर्वप्रदेशतः ।
नियोजिताः समानेतुं वस्तून्यानिन्युरादरात् ॥४०॥
राशीनां यत्र संचारा यत्र यत्र वसन्ति च ।
तत्तद्वस्तूनि चादाय समाययुस्तदोत्सुकाः ॥४१॥
मेषी राशिर्निवसति धान्यरत्नाकरादिषु ।
नवशाद्वलसंछन्नवसुधायां च सर्वशः ॥४२॥
नित्यं चरति फुल्लेषु सरसां पुलिनेषु च ।
अजाविकधनादौ च सस्येषु विविधेषु च ॥४३॥
सा च नैजनिवासेभ्यो धान्यानि रसवन्ति च ।
रत्नानि मौक्तिकादीनि हीरकांश्च मणींस्तथा ॥४४॥
पादत्राणे शिरस्त्राणं वर्म चौर्णं समुज्ज्वलम् ।
हस्तत्राणं कटित्राणं कम्बलिकाश्च कम्बलान् ॥४५॥
वसून् वसुमतीगर्भात् शाकपत्राणि सर्वतः ।
फुल्लपुष्पाणि हारांश्च पक्वाऽऽमकणिकांस्तथा ॥४६॥
फलकन्दान् मुखचूर्णानानिनाय सुपुष्कलान् ।
दिव्या च मेषदेवी साऽर्पयामास तु शार्ङ्गिणे ॥४७॥

अथ राशिर्वृषीनाम्नी चरते गोकुलादिषु ।
निवासो वर्तते तस्याः कृषीवलधरादिषु ॥४८॥
शंकरस्य गृहे चापि धर्मदेवीस्वरूपिणी ।
गोलोके वर्तते चापि सापि दिव्या तदुत्सवे ॥४९॥
आनिनाय च गोलोकात् कामधेनूः सहस्रशः ।
धान्यान्यक्षतगोधूमादीनि दुग्धाज्यकानि च ॥५०॥
भूरीणि नवनीतानि दधितक्राणि सर्वशः ।
यानवाहनशिबिका भोग्यवस्तूनि यानि च ॥५१॥

आनिनाय च कैलासादसंख्यरत्नकानि च ।
ददौ श्रीहरये तत्रोत्सवार्थं वस्तुपुष्कलम् ॥५२॥
मिथुनीनामिका राशिर्गीतनर्तनशिल्पिषु ।
वर्तते चापि दम्पत्योः शय्यासनपरिग्रहे ॥५३॥
वीणावाद्यादिषु चापि क्रीडायां च रतौ तथा ।
अध्वादौ च विहारोऽस्या वर्तते गृहमेधिषु ॥५४॥
राज्ञि गुरौ महालोके महाजने च सर्वथा ।
सापि दिव्या दिव्यवस्तून्यानिनायोपदात्मिकाः ॥५५॥
गीतिकानृत्यशिल्पादिकलाश्चतुःप्रषष्टिकाः ।
कन्यकाः सा समानीयोत्सवे श्रीहरये ददौ ॥५६॥

दुग्धफेननिभाः शय्याश्चासनानि द्युमन्ति च ।
गृहसाहाय्यसामग्रीः सर्वाश्चानाय्य वै ददौ ॥५७॥
वीणावाद्यानि सर्वाणि राजभोग्यसुवैभवान् ।
गुरुयोग्यान् देवयोग्यानानाय्य वैभवान् ददौ ॥५८॥
मर्त्ययोग्यांस्तथा सर्वदेहियोग्यांश्च वैभवान् ।
निजाश्रमस्थलेभ्यश्चानाय्य श्रीहरये ददौ ॥५९॥

कर्किनाम्नी च या राशिः कृकलासी हि देवता ।
सलिलस्था च केदारवापिपुलिनवासिनी ॥६०॥
विविक्ताऽवनिसंस्था चाऽऽनिनाय जलमौक्तिकान् ।
कमलानि विचित्राणि रसांश्च विविधांस्तथा ॥६१॥
नूत्नकेदारसस्यानां सुपक्वाः शिम्बिकास्तथा ।
आनिनाय ददौ कृष्णनारायणाय चोत्सवे ॥६२॥
सिंही तु पर्वतारण्यदुर्गकन्दरभूमिषु ।
बसति व्याधपल्लीषु गह्वरेषु गुहासु च ॥६३॥
सा च नैजावासभूमेरानिनाय सुचामरौ ।
कस्तूरीधातुसौगन्ध्यं कर्पूरचन्दनानि च ॥६४॥
कौशेयकानि वस्त्राणि गजमौक्तिककानि च ।
और्णकम्बलवस्त्राणि मृदुनि शीतहानि च ॥६५॥
मृगचर्माणि रम्याणि सिंहचर्माणि वै तथा ।
व्याघ्रहस्तिप्रचर्माणि करिदन्तांश्च हीरकान् ॥६६॥

स्वर्णरसान् कुप्यरसान् खानेयकान् रसांस्तथा ।
गूटिकाश्चौषधीन् दिव्यस्तम्बानक्षयकृल्लताः ॥६७॥
दिव्यगन्धान् दिव्यफलान्यपि कल्पद्रुमांस्तथा ।
दिव्यप्रदीपपत्राण्यानिनाय हरये ददौ ॥६८॥
अथ वै कन्यकाराशिः सर्वसौभाग्यसुन्दरी ।
सर्वमंगलमांगल्या स्वर्णचम्पकसूज्ज्वला ॥६९॥

कल्पकन्यास्वरूपा च भावनाफलदा सदा ।
व्रीहिप्रदीपककरा वसति दम्पतीशये ॥७०॥
ताम्बूलदा गन्धरससारदाऽऽनन्ददायिनी ।
नड्वलेषु चामरेषु पुष्पेषु कलिकादिषु ॥७१॥
नगरेषु च देवानां गृहेषु वसति तथा ।
स्वर्गे सत्ये मर्त्यलोके पातालादौ हरेर्गृहे ॥७२॥
सर्वत्र वसति कन्या चानिनाय शुभद्रवान् ।
कुंकुमाऽक्षतसौभाग्यविभूषा रत्नझुल्लरीः ॥७३॥
कंचुकान् चन्द्रसन्नद्धान् टोपीं चान्द्रीं च शारदीम् ।
हिरण्यगर्भोपस्करान् पात्राणि कटकांस्तथा ॥७४॥

असंख्यानन्तपात्राणि कानकानि महोत्सवे ।
कलशान् गर्गरीर्हाण्डान् वटिकाः स्थालिकास्तथा ॥७५॥
हारान् विचित्रान् प्रमणीन् सूर्यकान्तान् मनोहरान् ।
चन्द्रकान्तान् वह्निकान्तान् देवकान्तान् निनाय सा ॥७६॥
चामरान् रत्नदण्डांश्च छत्राणि कानकानि च ।
वेत्रान् यष्टीन् वेल्लणादीन् वर्धनीः कण्डनीस्तथा ॥७७॥
ताम्बूलानि विचित्राणि गुच्छान् चाम्पककेसरान् ।
कादम्बकांश्च कौन्दांश्च कल्पयष्टींश्च कानकीः ॥७८॥

मिष्टान्नस्थालिका दीर्घा नैसर्गिकप्रदीपकान् ।
गन्धान् रसान् गन्धसारान् निनाय हरये ददौ ॥७९॥
तुलाराशिश्च वै दिव्या तुलानाम्नी तु सुन्दरी ।
बीथ्याऽऽपणक्रयशालानगराध्वगृहादिषु ॥८०॥
धनाढ्यव्यापृतिस्थाने वसति चरते तथा ।
साऽपि दिव्या कृष्णकान्तकृते निनाय चोत्सवे ॥८१॥
अन्नानां वेषवाराणां पौष्कल्यं ह्रासवर्जितम् ।
तुलां दिव्यां ददौ यत्र धृतं त्वक्षयमेव हि ॥८२॥
धनानि स्वर्णरौप्याणि मुद्राः पाशान् ददौ तु सा ।
कुबेरभवनान्नीत्वा बह्वीः समृद्धीर्ददौ तदा ॥८३॥
वृश्चिकी या च वै तीव्रा राशिः श्वभ्रे च भूस्तरे ।
वल्मीके गोमये दीर्णे स्थले भूगर्भके तथा ॥८४॥
पाषाणादौ च वसति चरति द्रुत्वगादिषु ।
गृहभित्तौ वने क्षेत्रेऽरण्ये कचरके त्रुटौ ॥८५॥

दिव्यकन्या च सा कृष्णकृते निनाय शैलजान् ।
शिलारसान् द्रुमरसान् भूमिकन्दाँश्च मूलकान् ॥८६॥
रणजन्यान् भूमिजन्यान् रसान् लावणसंज्ञितान् ।
कट्वम्ल्लमधुराँश्चापि विषहाँश्च रसान् ददौ ॥८७॥
धनूराशिर्दिव्यकन्या तुरंगरूपधारिणी ।
धनुर्युक्ता शरतूणा शूराऽस्त्रशस्त्रविद्वरा ॥८८॥
गजे रथे तुरगे च याने विमानके क्षितौ ।
शकटे शिबिकायां च तिष्ठति चरते तथा ॥८९॥
तत्तत्स्थलानि यानानि गजवाजिरथादिकान् ।
व्योमयानानि दिव्यानि व्योमोद्यानयुतानि च ॥९०॥
हंसतुरगहस्त्यादिशोभितानि नवानि वै ।
विमानानि ददौ कृष्णनारायणाय चोत्सवे ॥९१॥
मकरीनामतो राशिर्मृगास्या दिव्यकन्यका ।
नदीषु वसति वार्धौ महासरोवरादिषु ॥९२॥
खातेषु देवपरिखादिषु सञ्चरते तथा ।
तत्तत्स्थानप्रजातानि रत्नानि हरये ददौ ॥९३॥
कुंभिकाराशिरित्याख्या पुरुषस्कन्धवासिनी ।
रिक्तकुंभात्मिका कन्यारूपा शौण्डिकसद्मसु ॥९४॥
द्यूतगृहेषु शालासु वसति चरते तथा ।
सा च ददौ कोटिकुंभान् सौवर्णान् हरये तदा ॥९५॥
मीनराशिर्युगलं सप्रेम तीर्थाब्धिसञ्चरम् ।
वसति पुण्यतीर्थेषु देवब्राह्मणसद्मसु ॥९६॥
मीनी कन्यात्मिका दिव्या चागत्य हरये ददौ ।
पूजापात्राणि सर्वाणि पूजाद्रव्योत्तमानि च ॥९७॥
उपचारान् षोडश संप्रददौ हरये मुदा ।
एवं राशिर्द्वादशात्मा दिव्यकन्यागणस्तदा ॥९८॥
सत्यपातालपर्यन्तान् सारान् श्रीहरये ददौ ।
विश्वकर्माऽऽहूत एवाऽऽगतो मण्डपमद्भुतम् ॥९९॥
चकार शतभौमं च क्षेत्रगर्भे दिगन्तगम् ।
व्योमवाटं यानवाटं समुद्यानसुशोभितम् ॥१००॥
धर्मसभा चेन्द्रसभा सभा चापि बृहस्पतेः ।
शुक्रसभा ब्रह्मसभा सभा विष्णोः शिवस्य च ॥१०१॥
यत्र वै मण्डपे तत्र समावेशगतास्तदा ।
सिंहासनानि दिव्यानि केतवः कानकास्तथा ॥१०२॥
कलशाः स्वर्णनिर्माणाः शतैकसंख्यया स्थिताः ।
सहस्रैकशिखराढ्यो नैसर्गिकदिवाकरः ॥१०३॥
नैसर्गिकशशिभ्राजत्तेजःपुञ्जविराजितः ।
विद्युद्दीपार्बुदशोभः कोटितारकराजितः ॥१०४॥
वापीकूपतडागादिगृहसाधनमण्डितः ।
भोज्यपानप्रमृद्याादिदिव्यद्रव्यविराजितः ॥१०५॥
दिव्यमण्डनमालाद्यैर्दिव्यमाणिक्यभित्तिकः ।
दिव्यमौक्तिकमण्याद्यैर्हीरकाद्यैः सुबृंहितः ॥१०६॥
नैकगोपुरवाटैश्च सहस्रध्रुवशाश्वतः ।
मध्येवेदीमहादिव्यानलनैसर्गिकाज्यवान् ॥१०७॥
लक्षलक्षातिलक्षाणां स्तम्भानां राजिराजितः ।
सर्वदेवर्षिमुनिभिर्जगतां पालकैः शुभैः ॥१०८॥
स्तम्भोपरिक्लृप्तस्थानो दिव्यकीरमयूरकः ।
दिव्यश्रवणवीक्षादिदिव्यभोज्यगृहादिभिः ॥१०९॥
दिव्यारामविहारादिदिव्यभोज्यगृहादिभिः ।
दिव्याप्लवनभागैश्च वरांगणैर्विराजितः ॥११०॥
व्योमगः कामगः कोट्यर्बुदकन्याभिशोभितः ।
दिव्यप्रदर्शनव्यासो दिव्यमल्लरणांगणः ॥१११॥
दिव्यगान्धर्वविद्यश्च दिव्यनाटकरञ्जितः ।
दैवीवाद्यकृतालापस्वरमिष्टाद्यमण्डितः ॥११२॥
गजसिंहादिप्रतिमः सर्वदेवविराजितः ।
ब्रह्माण्डे चैश्वरे लोके धाम्नि नास्ति च यत् खलु ॥११३॥
तत्तत्र नास्ति वै विश्वकर्मनिर्मितमण्डपे ।
जीवसृष्टौ चेशसृष्टौ ब्रह्मसृष्टौ परे स्थले ॥११४॥
यत् किञ्चिद् विद्यते ख्यातं तदत्र मण्डपे कृतम् ।
विश्वकर्माऽकरोच्छैल्पं ब्रह्माऽकरोद् विधानकम् ॥११५॥
वासुदेवोऽकरोद् वस्तुरूपाणि ख्यातिमन्ति च ।
अक्षरं ब्रह्म रूपाणां व्यक्ततामकरोत्तदा ॥११६॥
राधिके त्वं महामाया न्यूनतामहरः स्वयम् ।
लक्ष्मीः पूर्णत्वमातिष्ठज्जया जयमकारयत् ॥११७॥
इत्येवं सप्तमीसायं मण्डपः शोभनोऽभवत् ।
रात्रिर्न दृश्यते तत्र शाश्वते धाम्नि चागते ॥११८॥
निद्रा कुंकुमवाप्याश्च क्षेत्रात् क्रोशगतं गता ।
आनन्दिनी महाब्राह्मी शक्तिः सौराष्ट्रके स्थिता ॥११९॥
सूर्यस्योदयनं पूर्वं बिम्बदर्शनमात्रकम् ।
रात्र्यागमो दिगन्तानां कार्ष्ण्यमात्राभिवेदितः ॥१२०॥
विगमश्च दिगन्तानां प्रभाधावल्यनिश्चितः ।
वालखिल्यागमेनैव सूर्योदयस्तु तर्कितः ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कार्तिककृष्णाष्टम्यां बालकृष्णस्य प्रभोर्द्वितीयवर्षारम्भोत्सवे सर्वलोकेष्वामन्त्रणपत्रिकाप्रेषणं राशिकृतवस्तूपस्थापनं महामण्डपनिर्माणं चेत्यादिनिरूपणनामैकोनविंशोऽध्यायः ॥ १९ ॥

श्रीकृष्ण उवाच—

एवंविधे कृते तत्र मण्डपे कुंजलक्षकैः ।
शोभिते रंगरंगोलीस्वस्तिकवल्लरीयुते ॥ १ ॥
दध्यंकुशाक्षतलाजास्तम्बमण्डनमंगले ।
परितो झल्लरीमध्ये न्यस्तश्लोकाभिबोधके ॥ २ ॥
कम्मानिकोपरिन्यस्तमुख्यदेवाभिधानके ।
तत्तद्ध्वजेषु विन्यस्ततत्तत्प्रधानवाहने ॥ ३ ॥
तत्तद्गोपुरपालानामम्बरे कंम्रवेष्टने ।
तत्तत्प्रधानदेवानां नामभिश्चित्तरञ्जने ॥ ४ ॥
सप्तरूपाभिरूपाढ्याम्बरवेष्टितयष्टिके ।
दिव्यसौवर्णवस्त्रैश्च वेष्टितस्तम्भमण्डले ॥ ५ ॥
दिव्यदेवीप्रतिमाभिः स्तम्भशिरोमनोहरे ।
स्थले जलं जले स्थलं चोभयोरनलेक्षणे ॥ ६ ॥
अनले नलवद्राजच्चामरैरुपशोभिते ।
विद्युल्लताभिः परितः पारदर्शननिर्मले ॥ ७ ॥
मध्योल्लोचेषु वर्तुले रासमण्डलराजिते ।
अज्ञातमूलतो निर्यन्नवरंगसुकान्तिके ॥ ८ ॥
विद्युत्पटेषु नाम्यानां नवदर्शनरञ्जने ।
व्यूहावतारदेवानां चमत्कारैः सुचित्रिते ॥ ९ ॥
कृष्णकान्तार्बुदानां च लीलाललिततामये ।
सर्वस्मृद्धे कामयाने कामगे कामगह्वरे ॥१०॥
कामोपस्थितसत्ये च सत्यसंकल्पमण्डपे ।
एतादृशेऽष्टमीप्रातः श्रीमद्गोपालकृष्णकः ॥११॥
चन्दनादिजलैर्भूमिं सेचयामास शीतलैः ।
धूपैः सुगन्धयामासाऽऽमोदैर्विविधजातिकैः ॥१२॥
स्वस्तिकान् सर्वतोभद्रान् चक्राणि वर्तुलानि च ।
मण्डलानि विविधानि कारयामास रंगकैः ॥१३॥
अक्षतैः कुसुमैश्चापि कुंकुमैर्दधिपल्लवैः ।
भद्रौस्तान् शोभयामास गोपुरांश्चापि तोरणैः ॥१४॥
आम्राऽशोकादिपत्रैश्च कदलीस्तम्भपत्रकैः ।
सफलैः कदलीस्तम्भैः शाखाप्रान्तैः फलाञ्चितः ॥१५॥
पुष्पितैः स्तबकैश्चापि शोभयामास वाटगान् ।
ध्वजानारोहयामासोत्सवबोधकशब्दितान् ॥१६॥
पताकाश्चापि सर्वत्र बन्धयामास मण्डपे ।
दिव्यकाचादियन्त्राणि विद्युद्दीपादिभिस्तथा ॥१७॥
सम्यक् प्रभासयामास मण्डपादौ समन्ततः ।
मण्डपस्याऽतिरम्यस्य स्तम्भे स्तम्भेऽष्टसिद्धयः ॥१८॥
इष्टापूरकरूपिण्यः पूरयामासुरीहितम् ।
ध्रुवयन्त्रं कालयन्त्रं वेधयन्त्रं महत्तरम् ॥१९॥
दूरदर्शनयन्त्राणि दूरश्रावणकानि च ।
प्रतिबिम्बप्रयन्त्राणि प्रतिस्थलं प्रतिगृहम् ॥२०॥
प्रतिस्तम्भं च नद्धानि विद्यन्ते दिव्यमण्डपे ।
सुदीर्घोर्णास्तरणानि शाद्वलादिनिभानि वै ॥२१॥
बृस्यः कटानि प्रास्यानि सिंहासनानि वेदिकाः ।
गजासनानि हंसास्या गारुडास्यानि चत्वराः ॥२२॥
सुवर्णवालुकादीनि मणिनद्धासनानि च ।
दोला बहुविधाश्चापि मञ्चा दीर्घाः समन्ततः ॥२३॥
विद्यन्ते बहुमूल्यानि तथा सोपानतूलिकाः ।
स्वर्णरत्नमणिस्मृद्धाः शोभन्ते च समन्ततः ॥२४॥
मृन्मयास्तत्र केदारास्तूलसीद्रुमशोभिताः ।
अनंगशार्ङ्गसञ्जाता जात्यादिपुष्पजातयः ॥२५॥
चम्पकाद्याः शुभाः खर्वा द्रुमास्तिष्ठन्ति मण्डपे ।
सुवर्णवालुकाभूमिः काशते वै समन्ततः ॥२६॥
मृद्वी मृदुकुमारीणां पत्तलाऽर्हाऽतिकोमला ।
यज्ञवाटाः खण्डरथ्याः सृतयश्च प्रदक्षिणम् ॥२७॥
मार्गाः पल्लववल्ल्याद्यैः शोभन्ते यत्र मण्डपे ।
दर्शकानामासनानि पर्यङ्कमञ्चवन्ति च ॥२८॥
परितश्चोर्ध्वमूर्ध्वं च क्लृप्तानि व्योमगानि वै ।
भृत्यचारणभाट्टानां भट्टमागधबन्दिनाम् ॥२९॥
विप्रविद्वद्विदुषीणां कविवाचालगायिनाम् ।
शोभन्ते चासनान्युच्चस्थानि विद्युल्लता यथा ॥३०॥
मनुष्याणां ततश्चान्तर्भागेष्वासनपंक्तयः ।
परितो बहुविस्ताराः शोभन्ते चन्द्रिका यथा ॥३१॥
ततोऽन्तःस्था यक्षरक्षोभूतप्रेतपिशाचकाः ।
कूष्माण्डा वैनायकाश्च वेतालाः किन्नरास्तथा ॥३२॥
किंपुरुषाश्च विद्याध्रा योगिनीनां गणास्तथा ।
ततोऽन्तःस्था दिव्यदेहा मुकुटकटकोज्ज्वलाः ॥३३॥
देवा देव्यो देवपाला देवेश्वराः सुरानुगाः ।
स्थले स्थले चतुष्क्यश्च पट्टिका निहितास्तथा ॥३४॥
चतुष्पाद्यश्चाष्टपाद्यस्तथा षोडशपादुकाः ।
तत्र तिष्ठन्ति देवानां मूर्धन्या देवभूभृतः ॥३५॥
अथ सिंहासनान्यासन् सफणाछत्रकानि च ।
सौवर्णान्यतिदिव्यानि ह्यधिष्ठितानि पितृभिः ॥३६॥
अथान्तः ऋषयश्चासन् जापका ब्रह्मचिन्तकाः ।
वेदपाठकरा लक्ष्मीसंहितापाठकास्तथा ॥३७॥

रुद्रस्य ब्रह्मणश्चापि संहितयोः प्रपाठकाः ।
अगस्त्यस्य संहितायाः पाठकाश्चापि केचन ॥३८॥
और्णासनेषु पट्टिकानिहितेषु स्थितास्तदा ।
ततोऽन्तर्मण्डपस्थाऽधःपीठिकायां महर्षयः ॥३९॥
सत्यलोकनिवासा ये तथा वैराजवासिनः ।
ब्रह्मचर्यपराश्चासन् ब्रह्मजापपरायणाः ॥४०॥
यज्ञकर्मपराश्चासन् ऋत्विजो ब्रह्मवित्तमाः ।
ब्रह्मा होता तथोद्गाताऽध्वर्युश्चेति प्रतिक्रमाः ॥४१॥
सामगा गीतिगाश्चान्ये मन्त्रप्रयोगिणस्तथा ।
आसन् स्वकर्मकुशला भार्गवाद्याः सशक्तिकाः ॥४२॥
यज्ञपात्राणि चरवः स्रुक्स्रुवाद्यास्तथा द्रवाः ।
याज्ञेयानि च काष्ठानि व्रीह्यादीन्यभवत् स्फिरम् ॥४३॥
आज्यं हव्यं समग्रं च विविधं वर्तते तदा ।
यज्ञकुण्डो विशालश्च वैष्णवो यज्ञदेवता ॥४४॥
वह्निश्च वैष्णवो यत्राहवनीयो विराजते ।
स्वस्तिवाचनपूर्वं च यज्ञकर्म प्रवर्तते ॥४५॥
माता श्रीकम्भरालक्ष्मीः पिता गोपालकृष्णकः ।
यजमानस्थले तत्र राजेते लोमशाग्रतः ॥४६॥
लोमशो विधिवत्तत्र नारायणस्य पूजनम् ।
कारयामास च ततो हवनं सम्प्रवर्तते ॥४७॥
दक्षिणे कुण्डतस्तत्राऽक्षरमुक्ताः स्थिताः शुभाः ।
पार्श्वे गोलोकमुक्ताश्च पार्श्वे वैकुण्ठवासिनः ॥४८॥
ततोऽन्ये वैकुण्ठवासाः क्षीरोदश्वेतवासिनः ।
बद्रीस्थाश्चापि कैलासस्थाश्चान्यधामगास्तथा ॥४९॥
तिष्ठन्ति दक्षिणे भागे पूर्णब्रह्मपरायणाः ।
वेदिकायां परब्रह्म स्वयं कृष्णनरायणः ॥५०॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
साक्षाद्विराजते बालः स्वामी किशोररूपधृक् ॥५१॥
यद्यप्यास्ते लोकरीत्या द्वितीयवर्षसञ्चरः ।
तथापि धामरूपाढ्यो राजते परमेश्वरः ॥५२॥
वेद्यां सिंहासने रम्ये विमाने भगवान् स्वयम् ।
तत्पार्श्वे राधिके चाहमासं कृष्णस्तव प्रियः ॥५३॥
मत्पार्श्वे श्रीपतिश्चास्ते तत्पार्श्वे नूनरायणः ।
तत्पार्श्वे श्वेतवासी च क्षीरवासी ततस्तथा ॥५४॥
भूमाद्या वासुदेवाद्याः कपिलाद्यास्ततः परम् ।
आसते वेदिकासिंहासनेषु च विमानके ॥५५॥
तत्पत्न्यस्तत्कुमार्यश्च तन्मुक्ता वेत्रधारिणः ।
छत्रधाः पार्श्ववासाश्च तिष्ठन्ति तत्समन्ततः ॥५६॥
अवाद्यन्त च तूर्याणि वेदिकायाश्च पृष्ठतः ।
कोटिदेव्यो विराजन्ते समन्यूनासनेषु च ॥५७॥
गायन्ति गीतिका रम्या कृष्णमहोत्सवप्रियाः ।
अनादिश्रीकृष्णलीलागर्भा दिव्यमनोहराः ॥५८॥
होमो वै जायते तत्र तृप्यन्ति चेश्वरादयः ।
देवाश्च पितरः सर्वेऽवतारा मुक्तकोटयः ॥५९॥
श्रीमद्गोपालकृष्णेनार्पितं हव्यं नवं नवम् ।
साक्षाद् गृह्णन्ति ते सर्वे वह्निव्याजेन वै पुनः ॥६०॥
पायसानि विचित्राणि फलपुष्पमधून्यपि ।
हूयन्ते व्रीहयश्चापि नारिकेलान्यभीक्ष्णशः ॥६१॥
परिहारे कृते चाथ पूर्णाहुतौ तथोत्थितः ।
समाजो मण्डपे तत्र जुहोति दिव्यसद्रसान् ॥६२॥
रुद्रो विष्णुस्तथा ब्रह्मा ग्रहा गणपतिस्तथा ।
मातरः कलशाश्चापि दिक्पाला देवतेश्वराः ॥६३॥
ये ये संस्थापितास्तत्र तत्तदायतनात्मकाः ।
पूजिता मूर्तिमन्तस्ते हवने समवायिनः ॥६४॥
साक्षात्कृत्वा हवनं च गृह्णन्त्यग्निमुखैस्तदा ।
तृप्तिर्जाता यज्ञकार्यं समाप्तं दक्षिणायुतम् ॥६५॥
अनन्तदक्षिणादानैस्तृप्तास्ते ब्राह्मदेवताः ।
अथाऽनादिबालकृष्णपूजनं कर्तुमुद्यताः ॥६६॥
अवतारास्तथा मुक्ता ब्रह्मर्षयो महर्षयः ।
तत्तल्लोकनिवासाश्च सोपदाः सम्प्रतस्थिरे ॥६७॥
वादित्राणि च तूर्याणि तारपावनकानि च ।
मृदंगपटहाद्याश्चाऽवाद्यन्त जलयन्त्रिकाः ॥६८॥
सुतन्त्र्यो मुरजाः शंखा घण्टा झल्लरिकास्तथा ।
वीणा भेर्यश्च शृंगाणि त्ववाद्यन्त च तुम्बिराः ॥६९॥
गालवाद्याः स्वरवाद्याः फुद्वाद्याः स्पर्शवादनाः ।
अवाद्यन्त तदा मिष्टान्यश्रुतानि पुरा यथा ॥७०॥
स्वरा वैदिकमन्त्राणां प्रवर्तन्ते द्विजैस्तदा ।
आशिषां च प्रवाहाश्च कृष्णनारायणेऽवहन् ॥७१॥
अभ्युक्षितो हरिः कृष्णः सामुद्रतीर्थवारिभिः ।
ब्रह्महृदजलैर्गंगाविरजायमुनाजलैः ॥७२॥
सरस्वतीस्वर्णरेखागण्डकीसलिलैस्तथा ।
किशोरो राजते कृष्णस्तदा तेजोभिरुद्यतः ॥७३॥
मस्तके राजते यस्य मुकुटः कोटिसूर्यवत् ।
कोटिचन्द्रैः प्रणद्धश्च कलिधर्मविराजितः ॥७४॥
दिव्यमायूरपिच्छानां पारिधेयप्रमण्डितः ।
कुण्डले श्रवणाकारे सौवर्णे नद्धरत्नके ॥७५॥

विराजेते कर्णयोश्च बालकृष्णस्य शोभने ।
तैलेन साधितकेशजटाग्रन्थियुतं शिरः ॥७६॥
ललाटं चोर्ध्वपुण्ड्रेण केसरेण विराजितम् ।
चन्दनेन तथा चन्द्रः कुंकुमेन शुभावहः ॥७७॥
विराजते तथा भास्वत्कज्जलं नेत्रगोलयोः ।
चन्दनेनाऽक्षतेनाऽपि चर्चनं लम्बदण्डितम् ॥७८॥
सुरेखं मध्यबिन्द्वीभिः शोभतेऽस्य ललाटके ।
दक्षगण्डे सूक्ष्मबिन्दुः पाण्डुरोऽतिभ्रुवायते ॥७९॥
चिबुके तिलबिन्दुश्च कण्ठेऽपि तिलबिन्दुकः ।
राजते तेजसा युक्तः कपोलौ वर्तुलौ शुभौ ॥८०॥
राजीवभावमापन्ने प्रेमपूरितनेत्रके ।
रक्तप्रवालरेखाभिः शोभेते सुमनोहरे ॥८१॥
आकर्णान्तायतकोणे, कर्णौ दूरश्रवौ समौ ।
कम्बुकण्ठककाटश्च रक्तावोष्ठौ प्रमोहकौ ॥८२॥
धनुःकम्मानिकाकारावनुद्भूतरुहान्वितौ ।
राजेते रतिबीजौ तौ हृदाकर्षणकौ हरेः ॥८३॥
पुष्टस्कन्धौ पूरबाहू बलिप्रकोष्ठराजितौ ।
विशालतलसम्पन्नौ त्रिसन्धिशाखशोभितौ ॥८४॥
अक्तालक्तकरक्तौ सूक्ष्मचन्द्राग्रराजितौ ।
चक्रमीनधनुःशूलैः स्वस्तिकवज्रराजितौ ॥८५॥
अनामिकाऽऽरूढधाराऽऽयुष्यरेखामनोहरौ ।
आदर्शवत् सदा स्वच्छौ प्रतिबिम्बाऽभिधायकौ ॥८६॥
उपर्युपरि रोम्णां वै सूक्ष्मग्रामांगुलिप्रियौ ।
भुजौ पार्श्वाभिमुखतः पाण्डुरौ शारदोपमौ ॥८७॥
पार्श्वौ कामनिवासौ च वक्षः श्रीवासि शोभनम् ।
मध्ये रोम्णां दक्षिणावर्तेन कान्तेन राजितम् ॥८८॥
स्वर्णरेखापरिच्छन्नमणिश्रेष्ठविराजितम् ।
असूत्रहारततिभ्यां कामलीभ्यां प्रकाशते ॥८९॥
नीलद्वितारकशोभं राजते हि स्तनद्वयम् ।
सुवर्णतन्तुरोमालिस्तबकेन युतं तथा ॥९०॥
अकापत्यगुणाऽऽवेदि रोमोद्यानं विराजते ।
उभयोर्नलयोर्मध्ये सन्धौ दीर्घा च कानकी ॥९१॥
रोमावली जघनगा लक्ष्मीचित्रप्रवेशिता ।
राजते यस्य नाभिस्तु निम्नगेय कमण्डलोः ॥९२॥
लिङ्गं सूज्ज्वलं वामे तिलशोभाविराजितम् ।
सक्थिनी चन्द्रकदलीगर्भशोभौ च रोमभिः ॥९३॥
प्रान्तस्वर्णस्वरूपैश्च राजेतेऽक्षरयायिनौ ।
चारुचम्पकवर्णाभौ पुष्टौ वीर्यभरौ शुभौ ॥९४॥
पार्ष्णितो पिण्डिकां व्याप्य सक्थ्नोः पृष्ठे तथोर्ध्वगे ।
विलक्षणे रोमरेखे जघनश्रान्तिमागते ॥९५॥
वर्तेते गोलोकवैकुण्ठयोः सृती मनोहरे ।
वामसक्थ्नो मूलभागादंगुलद्वयनिम्नगम् ॥९६॥
कीलकक्षतचिह्नं च वर्ततेऽङ्गुलतोऽधिकम् ।
वामजानूपरिभागे सक्थ्नि पाण्डुरवर्णकम् ॥९७॥
चिह्नं श्रीकमलावासं कमलं चाष्टपत्रकम् ।
वर्तते बहुशोभाढ्यं प्रत्यक्षं कमलाश्रयम् ॥९८॥
अक्षयवीर्यकोशौ द्वौ मणी बाह्यौ वृषाश्रयौ ।
अन्यौ चान्तर्निगूढौ द्वौ लिङ्गपार्श्वस्थितावपि ॥९९॥
त्रिगुणावलिसंराजन्नाभिकूपः प्रशोभते ।
नितम्बौ चन्द्रधवलौ कोमलौ नवनीतवत् ॥१००॥
कटिः सौवर्णरशनानिभचर्मविराजिता ।
पृष्ठं देवालयं चाग्रं कामालयं प्रकाशते ॥१०१॥
जंघे वर्तुलगोले च कानकी रोमशोभिते ।
दक्षायां नलिकापार्श्वे जंघायां कृष्णबिन्दुकः ॥१०२॥
दक्षभुजे तथा बिन्दुः राजते घूटिकात्रयम् ।
कम्मानिकाकृतितले पादयोः कमलस्पृशे ॥१०३॥
ऊर्ध्वरेखान्विते सौधशिखराद्रिप्रचिह्निते ।
पद्मकलशवज्रादियवादिभिरलंकृते ॥१०४॥
षोडशद्वात्रिंशदष्टचिह्नरेखाऽभिराजिते ।
नखचन्द्राश्रितमृद्वंगुलिकाशोभिते शुभे ॥१०५॥
पुण्डरीकनिभे सौम्ये कोटिदेवप्रपूजिते ।
कोटिकन्याकृतस्पर्शे कोट्यैश्वर्यनिवासिते ॥१०६॥
नुपूरहारपिशंगधृतधौत्राभिरञ्जिते ।
विजयेते स्वर्णपीठे स्थापिते चरणे हरेः ॥१०७॥
कटिः सौवर्णरशनालक्षिता राजते शुभा ।
हारांगुलीयोर्मिकादिभूषाभूषितविग्रहः ॥१०८॥
मध्यांगुल्योः कम्बुचिह्नेऽष्टासु चक्राणि सन्ति च ।
वामहस्ततले चोर्ध्वगता रेखा महत्यपि ॥१०९॥
मध्यांगुलिमूलतश्चाऽऽप्रकोष्ठं लम्बते तु सा ।
पौष्पगुच्छसुकन्दुकमालामालितमूर्तिकः ॥११०॥
सौवर्णमणिरत्नादिमौक्तिकमालिकादिभिः ।
तथा श्रृंगारभूषाभिर्विराजतेऽतिसुन्दरः ॥१११॥
अनादिश्रीकृष्णनारायणो नैजमहोत्सवे ।
विराजितः सभामध्ये मण्डपेऽन्तर्गजासने ॥११२॥
श्रीः रमा कमला लक्ष्मीः पद्मा भिन्नस्वरूपिणी ।
तदा कान्ते हरौ सर्वा विद्योतन्ते समन्विताः ॥११३॥

एवंविधोऽयं भगवान् श्रीकृष्णः पुरुषोत्तमः ।
राधिके वार्षिके जन्मदिने सम्राजते विभुः ॥११४॥
शोभाढ्ये सर्वशोभाढ्ये लोकशोभाभिवर्धिते ।
मण्डपे चैश्वरे रम्ये मध्ये संराजते हरिः ॥११५॥
ब्रह्मजलैः सुगन्धैश्च प्रोक्षितः स महर्षिभिः ।
सर्वेषां देहिनां कृष्णो बालश्चैकल एव हि ॥११६॥
चक्षुषां विषयश्चासीन्मनसां च हृदामपि ।
अन्तर्बहिः स एवाऽऽसीद् यथा ब्रह्मपदेऽतिगे ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महामण्डपस्य शोभावर्णनं समाजासनानि श्रीबालकृष्णस्य प्रभोर्मूर्तिशृंगारादि चेतिनिरूपणनामा विंशोऽध्यायः ॥ २० ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके धाम्नि परे यथा विराजते ।
परमात्माऽवतारी स तथारूपोऽभवद्धरिः ॥ १ ॥
अनादिश्रीकृष्णनारायणः कृष्णाऽर्बुदाऽधिकः ।
रूपानुरूपरूपाढ्यः सर्वोपरिस्वरूपवान् ॥ २ ॥
सर्वेषां प्राणिनां चक्षुर्विषयश्चैक एव सः ।
मनोऽहंबुद्धिविषयश्चात्मविषय एकलः ॥ ३ ॥
दिव्यरूपधरो न्यूनषोडशाब्दो युवा यथा ।
भ्राजमानोऽतितेजस्वी भ्राजद्वह्निसमाम्बरः ॥ ४ ॥
कच्छनी स्वर्णवर्णाऽस्य मञ्जुलं कटिकञ्चुकम् ।
स्वर्णबुट्टाभरताढ्यं तथा धौत्रं च कैसरम् ॥ ५ ॥
स्वर्णतारावलिव्याप्तं काटेयं पटमुत्तमम् ।
स्थितं कट्यां तथा स्कन्धे चोत्तरीयं सुतैजसम् ॥ ६ ॥
मुकुटो मस्तके त्वस्य स्थितः श्रीपरमात्मनः ।
सर्वसौगन्ध्यसंव्याप्तो दिव्यामोदसमन्वितः ॥ ७ ॥
मण्डपे निजयोग्ये स निषसादोच्छ्रये शुभे ।
महावेदीस्थितास्तत्र चन्दनानां सुपट्टिकाः ॥ ८ ॥
चतस्रो दृढपादाढ्याः स्वर्णकुंभीपदाः शुभाः ।
सहस्रमल्लसन्तोल्या ह्येकैका पट्टिका हि सा ॥ ९ ॥
गारुडी नारसिंही च शारभी काच्छपी तथा ।
पादेषु शक्तयस्तासां राजन्ते बलमण्डिताः ॥१०॥
चतुष्पट्टयश्चतुर्हस्त्यधिष्ठिताः षष्टिहायनाः ।
करिणस्तत्र शोभन्ते चोत्थिताश्चाम्बरस्पृशः ॥११॥
सर्वभूषाम्बरधरा द्योतन्ते स्वर्णवर्णिजः ।
श्वेतोदराः श्वेतशुण्डाः श्वेतदन्ताः पयोनिभाः ॥१२॥
हस्तिपृष्ठे स्थिताः सिंहाः कानका भूषिताः शुभाः ।
चत्वारः केसरिणस्ते सशुण्डा गगनस्पृशः ॥१३॥
चतुःकेसरिणां पृष्ठदेशेषु कच्छपो महान् ।
राजते च हरिद्वर्णो लम्बवर्तुलमण्डलः ॥१४॥
तत्पृष्ठे माणिकी शक्तिरश्विनी दिव्यविग्रहा ।
सर्वोपस्करशोभाढ्या निषण्णा समपृष्ठिका ॥१५॥
तस्याः पृष्ठे स्वर्णवर्णं मृदु चास्तरणं शुभम् ।
तुलिका राजते तत्र कौशेयी चित्रवर्णिनी ॥१६॥
पार्श्वपृष्ठस्थितदिव्यकशिपूत्तमसुन्दरी ।
मखमल्लास्तरणैः शोभिता सात्तपदी शुभा ॥१७॥
उपरि वर्तते छत्रं शेषभोगिफणात्मकम् ।
दिव्यहीरकचक्षुर्भिर्दिव्यतेजःप्रदं शुभम् ॥१८॥
तुलिकायां हरिस्तत्र पादौ पीठे निधाय च ।
निषसाद महाराजो राजराजाधिराजकः ॥१९॥
श्रीकृष्णोऽहं तथा नारायणः पार्श्वे स्थितावुभौ ।
चामराभ्यां च सहितौ पादाग्रे चाक्षरः स्थितः ॥२०॥
लोमशः पादपार्श्वे च पूजास्थालीकरः स्थितः ।
माता पिता निषण्णौ च कृष्णनारायणान्तिकम् ॥२१॥
एवं स्थिते तदा व्योम्नि विमानानां तु कोटयः ।
द्रष्टुं देवभृता दिव्या वर्तन्ते युगलाश्रिताः ॥२२॥
पूजार्थं भूमितलतश्चारोढुं शोभनोच्छ्रिता ।
निःश्रेणिका कृता सोपानानां परम्परायुता ॥२३॥
भूमिभागे तु पट्टीनां कृतं सोपानसप्तकम् ।
ततो हस्तिलम्बशुण्डाद्वयं पट्टीस्पृशं च यत् ॥२४॥
सोपानाधारताप्राप्तं निःश्रेणीदण्डवत् स्थितम् ।
शुण्डयोः कुंभपर्यन्तं कॢप्तान्यारुणकानि च ॥२५॥
सोपानानि शृंखलाभिर्बद्धानि सुदृढानि च ।
कुंभस्थलयोस्तत्रैव कॢप्ता विश्रामशालिका ॥२६॥
तत ऊर्ध्वे केसरिणोः शुण्डयोर्दण्डभान्तयोः ।
सोपानानि सुरम्याणि कॢप्तानि चापराण्यपि ॥२७॥
केसरिमस्तकं यावत् सा निःश्रेणी कृता ततः ।
चतुष्की सिंहशिरसोर्धृता कच्छपलग्निका ॥२८॥
कच्छपस्य गलपार्श्वे स्थितं हंसद्वयं शुभम् ।
तयोरन्तर्भुजयोश्च कॢप्ता निःश्रेणिका परा ॥२९॥
माणिकीमुखसंस्पर्शा पार्श्वयोर्गरुडद्वयम् ।
पक्षाभ्यां विवृताभ्यां च हंसपृष्ठे तु पिच्छिकाः ॥३०॥
सृष्टाः क्रमाद् यथा सोपानानि पक्षात्मकानि वै ।
माणिकीपार्श्वयोर्लग्नान्येव चोपरि पिच्छके ॥३१॥

स्थित्वा पूजा हरेर्यत्र निर्वर्त्यते सुरादिभिः ।
एवं दिव्ये चायते चोच्छ्रिते रम्यासने प्रभुः ॥३२॥
अनादिश्रीकृष्णनारायणः सर्वैः प्रपूज्यते ।
न श्रुतं नापि सन्दृष्टं चासनं श्रीप्रभोः पुरा ॥३३॥
तत्र तं राजमानं श्रीराजाधिराजशोभया ।
पूजयितुं कम्भराश्रीः प्रथमं समुपस्थिता ॥३४॥
धृत्वा हस्ते स्वर्णपात्रं कुंकुमाऽक्षतचन्दनैः ।
कस्तूरिकाऽबिरद्रव्यैस्तुलसीमञ्जरीयुतैः ॥३५॥
गुलालांऽकुरलाजाभिः पुष्पमालाविभूषणैः ।
फलैर्जलैः शर्कराद्यैर्गन्धसारैः प्रपूरितम् ॥३६॥
लोमशः प्राह वै चाशीर्वचनानि तदा क्षणे ।
"ओं स्वस्ति बालकृष्णस्य मुक्ताः स्वस्ति चरन्तु च ॥३७॥
करोतु चाक्षरं ब्रह्म स्वस्ति दीर्घायुरेव च ।
ओं स्वस्ति तं वितन्वन्तु श्रीश्रीकृष्णनरायणाः ॥३८॥
वासुदेवादयः स्वस्ति स्वस्ति कुर्वन्तु चेश्वरा ।
स्वस्ति कुर्वन्त्ववतारा देवेशाः शंकरादयः ॥३९॥
ऋषयः पितरः सिद्धाः साधवः सांख्ययोगिकाः ।
स्वस्ति कुर्वन्तु बालस्य हरेर्देवाश्च मानवाः ॥४०॥
सर्वतीर्थानि चादित्या रुद्राः स्वस्ति भवन्तु च ।
वसवो निधयो वैद्यो स्वस्ति कुर्वन्तु वै हरेः ॥४१॥
सत्यः साध्व्यः कुमार्यश्च पतिव्रताश्च योषितः ।
देवता वनवासिन्यः स्वस्ति कुर्वन्तु वै हरेः ॥४२॥
वृक्षा वल्ल्यश्चारणाश्च किन्नराद्याश्च सूतकाः ।
भृत्या दासा नदा नद्यः स्वस्ति कुर्वन्तु वै हरेः ॥४३॥
यक्षाः ऋक्षाश्च गन्धर्वा मागधाः किम्पुमंशकाः ।
विद्याधरास्तथा साध्याः स्वस्ति कुर्वन्तु वै हरेः ॥४४॥
पर्वताः खनयो यूपाः खाता रणा वनानि च ।
पातालाः सर्पदैत्याश्च दानवा आसुरास्तथा ॥४५॥
राक्षसा भूतकूष्माण्डाः प्रेताः पिशाचकास्तथा ।
मातरः कृत्यकाश्चापि जलेशयाः स्थलेशयाः ॥४६॥
वनेशया विशयाश्च स्वस्ति कुर्वन्तु वै हरेः ।
चैत्या मन्त्रा दिव्यदेहाः शस्त्राऽस्त्राद्या विभूतयः ॥४७॥
बालाश्च बालिकावर्गा वृद्धा विप्रा जरायुजाः ।
अण्डजाः स्वेदजाश्चांकुरजाः स्वस्तिधराश्च ये ॥४८॥
विनायका गणेशाद्या हनुमान् गरुडस्तथा ।
पार्षदा नन्दमुख्याश्च स्वस्ति भवन्तु वै हरेः ॥४९॥
राधा रमा च ललिता पद्मा जया सरस्वती ।
माणिकी श्रीः कमला च पार्वती च प्रभा रतिः ॥५०॥
शारदा विरजा गंगा लक्ष्मीः सती च नर्मदा ।
सावित्री मंजुला हंसाऽमृता दुर्गा च मंगला ॥५१॥
सगुणा द्वादश स्वस्ति शतं कुर्वन्तु सुप्रियाः ।
अन्याः षोडशसाहस्राः कोट्यर्बुदाब्जशक्तयः ॥५२॥
सूर्यचन्द्रग्रहाद्याश्च स्वस्ति भवन्तु वै हरेः ।
तत्त्वानि भूतजा भावा माया मायापरे स्थिताः ॥५३॥
योगिनो ब्रह्मचर्यस्था वैराजा गुणमूर्तयः ।
आभूषणानि दिव्यानि स्वस्ति भवन्तु वै हरेः ॥५४॥
श्रृंगारा विविधाकाराः स्वराश्च गीतयस्तथा ।
दिव्यवाद्यानि वै स्वस्ति कुर्वन्तु श्रीहरेः सदा ॥५५॥
संकर्षणोऽनिरुद्धश्च प्रद्युम्नो धर्मराजकः ।
धर्मदेवो भक्तियुक्तः स्वस्ति कुर्वन्तु ते हरेः ॥५६॥
जनकः कम्भरास्वामी स्वस्ति करोतु वै हरेः ।
अन्तरात्मा परमात्मा स्वस्ति स्वस्य करोतु सः ॥५७॥
मुक्ता चम्पा जया हैमी रमा शान्ता व्रजा दया ।
भानुर्दीपावली चोर्जा स्वस्ति कुर्वन्तु वै हरेः ॥५८॥
ओं सुशान्तिः सदा चास्तु दीर्घायुश्चान्तवर्जितम् ।
आरोग्यं नित्यसौख्यं च शाश्वतं चास्तु वै हरेः" ॥५९॥
इत्येवं लोमशः स्वस्तिवाग्भिः प्रोक्ष्य जलादिना ।
यवांकुरैश्च कुसुमैस्तिलकं चन्द्रकं शुभम् ॥६०॥
मात्रा संकारयामास पूजनं सांगकर्मभिः ।
मिष्टं मुखे ददौ माता दुःखहां चांजलिं मुहुः ।
शिरस्यावातारयच्चाशीर्वचो जननी ददौ ॥६१॥
शाश्वतायुर्युतस्त्वं वै भव सर्वेश्वरः प्रभुः ।
इत्युक्त्वा दिव्यपुष्पाणां कल्पमालां गले ददौ ॥६२॥
विकीर्य मस्तके तस्याऽक्षतान् नीराजनं व्यधात् ।
पुष्पांजलिं ददौ माता नत्वा स्वासनमागता ॥६३॥
पिता पूजां चकारैवं स्वस्तिमान् भव पुत्रक ।
सन्तानतन्तुसन्धाता शाश्वतायुर्युतो भव ॥६४॥
अथ श्रीलोमशो देवेश्वरं समर्चयन्मुदा ।
सर्वोपचारकैर्मन्त्रैराशीर्वादं ददौ शुभम् ॥६५॥
बुद्ध्या गुणैर्विचारैश्चात्मना भक्त्या च विद्यया ।
धर्मैर्योगैश्वर्यवर्यैः शाश्वताऽभ्युदयो भव ॥६६॥
आयुषाऽचरणैर्दिव्यैस्तेजसा च बलेन च ।
कारुण्येन विरागेण शाश्वताऽभ्युदयो भव ॥६७॥
मातापित्रोः सेवया श्रीगुरोः शुश्रूषया तथा ।
शरणागतरक्षाकृत् शाश्वताभ्युदयो भव ॥६८॥

ब्रह्ममार्गपरो नित्यं मानसेष्टप्रपूरकः ।
समदृष्टिर्महाश्रेष्ठी दानधर्मपरायणः ।
सर्वसन्तोषदाता च शाश्वताभ्युदयो भव ॥६९॥
इत्याशीर्भिर्लोमशेन वर्धितो बालनन्दनः ।
अनादिश्रीकृष्णनारायणो लाजाविकीरितः ॥७०॥
अथाऽन्येभ्यस्ततः पूजाऽवसरः सम्प्रदापितः ।
परधामगताः पत्न्यः पूजार्थे श्रीहरिप्रियाः ॥७१॥
दिव्यसाधनसम्पद्भिर्गन्धचन्दनवारिभिः ।
रत्नहारसुमालाभिः पुष्पैः संहृदयैस्तथा ॥७२॥
पूजां चक्रुस्तत आरात्रिकं चक्रुश्च दुःखहाम् ।
अञ्जलिं शिरसो नीत्वा चरणोदकमित्यपि ॥७३॥
पीत्वोपदाः समर्प्यैव धृत्वा प्रसादकुंकुमम् ।
गाले स्पृष्ट्वा मुहुः प्रेम्णा निरीक्ष्य प्राणवल्लभम् ॥७४॥
ययुर्नैजविमानानि ततस्तत्राऽक्षरादयः ।
अक्षरस्थास्तथा मुक्ता मुक्तान्योऽप्यर्चयन् पतिम् ॥७५॥
श्रीकृष्णो राधिकायुक्तः श्रीयुक्तश्च नरायणः ।
गोलोकवासिनः सर्वे तथा वैकुण्ठवासिनः ॥७६॥
चतुर्वैकुण्ठवासाश्चाऽमृताऽव्याकृतवासिनः ।
अन्यधामनिवासाश्च मुक्ता व्यूहास्तथा परे ॥७७॥
अवतारा ईश्वराश्च सदाशिवप्रभूत्तमाः ।
महाविष्णुसमकक्षा मायाप्रधानपूरुषाः ॥७८॥
वैराजा ब्रह्मदेवेशा मुनयः ऋषयस्तथा ।
पितरः सुरकोट्यश्च भुवर्लोकनिवासिनः ॥७९॥
बृहस्पतिपुरोगाश्च शुक्राचार्यपुरोगमाः ।
नदा नद्यो मानवाश्च पर्वता द्रुलतादयः ॥८०॥
स्तम्बास्तीर्थानि चैत्याश्च मानवाः सूतबन्दिनः ।
तृणानि रणवासाश्च पशवः पक्षिणस्तथा ॥८१॥
नागा गन्धर्ववर्याश्च सौराष्ट्रा भूनिवासिनः ।
सामुद्रा व्योमयानाश्च कोट्यर्बुदाश्च कन्यकाः ॥८२॥
लोकपालास्तथा सर्वे दिशामग्रेसरेश्वराः ।
राजानो दिव्यराजाश्च ब्रह्मक्षत्रा दिवौकसाम् ॥८३॥
सर्वे पुपूजुरत्यर्थं बालकृष्णं पुमुत्तमम् ।
तिलकं चन्द्रकं चक्रुर्ददुश्चोपायनानि च ॥८४॥
भव शाश्वतजीवश्चेत्याशीर्वादान् ददुर्मुहुः ।
सर्वब्रह्माण्डदेव्यश्च मिलित्वा कोटिवर्तिकम् ॥८५॥
आरात्रिकं हरेश्चक्रुः शतैकवारभ्रामितम् ।
पुष्पाञ्जलिं ददुश्चाथ पादवारि पपुस्ततः ॥८६॥
दुःखहां चाऽञ्जलिं प्राप्य ययुर्नैजविमानकम् ।
एवं वै पूजने चाशीर्वचने विनिर्वर्तिते ॥८७॥
लोमशः सर्वसत्कारं भाषणं विदधे ततः ।
स्वागतं श्रीहरिकृष्णः स्वयं करोति वः शुभम् ॥८८॥
भवतां श्रीमतां सर्वपूज्यानां चाशिषाऽप्यहम् ।
शाश्वताऽभ्युदयश्चास्मीत्येवं चार्थयते हरिः ॥८९॥
कृतकृत्योऽस्मि सञ्जातो बालकृष्णो भवत्सुतः ।
पुनश्चापि निभाल्योऽहं प्रत्यब्दं च प्रतिव्रतम् ॥९०॥
प्रत्युत्सवं प्रकर्षेण योजनीयः शुभाशिषा ।
एषोऽहं बालपुत्रो वै नमस्करोमि सादरम् ॥९१॥
क्षतिः स्वागतकर्मादौ क्षन्तव्या मम वै पितुः ।
लोमशस्य महर्षेश्च मातुर्मेऽपि तथेश्वराः ॥९२॥
इत्युक्त्वा लोमशः प्राह भोजनस्य क्षणः शुभः ।
वर्तते भोजनं युष्मन्निवासेष्वागमिष्यति ॥९३॥
सदसः परिहारश्च जायते विजयोऽस्तु वः ।
इत्युक्ते प्रोत्थितः कृष्णः समाजोऽपि तदोत्थितः ॥९४॥
ययुर्नैजान्निवासाँस्ते भोजनं तत्तदर्हकम् ।
नैकरूपं तथा पानं कन्याः परार्धसंख्यकाः ॥९५॥
नैकरूपधरा दास्यो भूत्वा निन्युस्तदालयान् ।
तर्पयित्वा समाजाँश्च विश्रान्तिशयनानि च ॥९६॥
ददुः सेवां तथा चक्रुर्मध्याह्नोत्तरमुत्तमाम् ।
विदायं प्राप्य च ययुर्नैजधामानि सोत्सुकाः ॥९७॥
पिता ददौ तदा विश्वकर्मणे पारितोषिकम् ।
कल्पहारं कल्पसूत्रं कल्पवल्लीं त्रयं त्विदम् ॥९८॥
अन्येभ्यः कर्मचारेभ्यो ददावुपायनानि च ।
लोमशाय ददौ कल्पकन्यां शाश्वतसूत्रजाम् ॥९९॥
हरेः प्रसादं सर्वेभ्यो ददौ यास्यद्भ्य उत्तमम् ।
मण्डपस्योपसंहारं कारयामास वै ततः ॥१००॥
वस्तूनि यानि सर्वाणि त्ववशिष्टानि तत्र तु ।
तानि दत्तान्यनाथेभ्यो भिक्षुकेभ्यः समन्ततः ॥१०१॥
नृत्यन्तीभ्यश्चाप्सरोभ्यो ददौ शृंगारकोत्तमम् ।
हारान् भूषाः कल्पवृक्षादीन्यमूल्यानि यानि च ॥१०२॥
श्रीमद्गोपालकृष्णश्च संहृत्य सायमुत्सवम् ।
रात्रौ शान्तिं परां लेभे भगवान् बालरूपधृक् ॥१०३॥
आस्ते दोलासमारूढो लोकरीत्यनुसारतः ।
लोमशः कन्यकाश्चापि लोमशस्याऽऽश्रमं ययुः ॥१०४॥

इत्येवं राधिकेऽनादिकृष्णनारायणस्य वै ।
कृतो महोत्सवो दिव्यो द्वितीयवत्सराग्रके ॥१०५॥
दिवसे सर्वसौभाग्यवर्धनो मोक्षदस्तथा ।
स्मर्तॄणां पाठकानां च श्रोतॄणां चास्य भावतः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीबालकृष्णस्य प्रभोर्द्वितीयवर्षारम्भे महोत्सवे मण्डपे महदासनवर्णनं सर्वकृतपूजाशीर्वादाश्चेत्यादि-निरूपणनामैकविंशतितमोऽध्यायः ॥ २१ ॥

श्रीकृष्ण उवाच—

राधिके त्वेकदा पूर्वं महान् वै तपसां निधिः ।
ऋषिवर्यश्च्यवनाख्यो भार्गवेन्द्रो महातपाः ॥ १ ॥
कुर्वन् तीर्थानि पातालं ययौ यदृच्छया स्वयम् ।
ततो रसातलं प्राप तत्र ददर्श शोभनम् ॥ २ ॥
महत् पुरं दानवानां प्रविवेश स तत्पुरम् ।
चचार नागकन्याभिः पूज्यमानः समन्ततः ॥ ३ ॥
तमेनं च्यवनं वीक्ष्य प्रह्लादाख्यो रसाधिपः ।
भृगुपुत्रस्य सम्पूजां चक्रे त्वग्र्यां यथार्हतः ॥ ४ ॥
परस्परं सुकुशलं पप्रच्छतुर्निरामयम् ।
उपविष्टं मुनिं नत्वा प्रह्लादः प्राह भार्गवम् ॥ ५ ॥
अद्य ते दर्शनादस्मि सम्प्राप्तः कृतकृत्यताम् ।
साधूनां दर्शनं पापहरं पुण्यप्रदं शुभम् ॥ ६ ॥
साधवस्त्वादृशा लोकाँस्तारयन्ति च मादृशान् ।
कृपालवः पर्यटन्ति पापिनां तारणाय ते ॥ ७ ॥
मदुद्धारपरः साधो त्वमत्र यदुपागतः ।
पावितोऽस्मि ऋषे चाऽहं दैत्यदानवमध्यगः ॥ ८ ॥
वसाऽत्र चर धर्मं च क्रतुं चापि जपादिकम् ।
तवैवेदं मम राज्यं सेवयिष्यामि दासवत् ॥ ९ ॥
ऋषिः प्राह तव भक्त शोभते वैष्णवो यतः ।
त्वयि शासति भक्तेन्द्रे देवब्राह्मणपूजके ॥१०॥
मखान् भूमौ नृपतयो यजन्ते विधिवत् सदा ।
ब्राह्मणाद्यास्तपो धर्मं तीर्थे यात्रां च कुर्वते ॥११॥
देवाः सन्ति च निश्चिन्ताः सन्ति धर्माः प्रजासु च ।
त्वयि राज्ये स्थिते दैत्य धर्मस्थे तिष्ठते वृषः ॥१२॥
रसातलेऽथवा भूमौ स्वर्गे वा समता मम ।
यत्र भक्तस्तत्र सर्वं स्वर्गं मे सम्मतं नृप ॥१३॥
तवेच्छापूरणार्थं वै स्थास्याम्यत्रोत्तरायणम् ।
ततो यास्यामि वै दर्शनार्थं बालप्रभोर्भुवम् ॥१४॥

प्रह्लादस्तु तदा प्राह यद्यप्येतन्मया श्रुतम् ।
दैत्यमुखाद्धरिस्तत्र कृष्णनारायणः प्रभुः ॥१५॥
पृथ्व्यां संराजते बालस्तथापि वद मेऽधिकम् ।
कः कथं कीदृशश्चाऽऽस्ते पावनः पुरुषोत्तमः ॥१६॥
द्रष्टुमिच्छाम्यहं त्वेनमनादिपुरुषोत्तमम् ।
चमत्कारान् वद तस्य तीर्थान्यन्यानि मे वद ॥१७॥
श्रेष्ठानि कानि तीर्थानि पृथिव्यां कानि चाम्बरे ।
रसातले च कानि स्युरेतद् वद ततोऽप्यहम् ॥१८॥
तीर्थयात्रां गमिष्यामि कर्तुं कर्तुं च दर्शनम् ।
अनादिश्रीकृष्णनारायणस्य परमात्मनः ॥१९॥
च्यवनो हि तदा प्राह प्रह्लादं भक्तपुंगवम् ।
सौराष्ट्रे परमं तीर्थं चाऽश्वपट्टसरोवरम् ॥२०॥
पृथिव्यां नैमिषारण्यं चान्तरीक्षे तु पुष्करम् ।
रसातले चक्रतीर्थं पाताले हाटकेश्वरम् ॥२१॥
पर्वते बदरीतीर्थं चारण्ये नारसिंहकम् ।
जले क्षीरोदशायि स्वर्गे च मेरौ हरेर्गृहम् ॥२२॥
इत्येवं सन्ति तीर्थानि पावनानि तु पापिनाम् ।
श्रुत्वैवं भार्गववाक्यं दैत्यराजस्तु राधिके ॥२३॥
तीर्थानि गन्तुकामोऽभूद् दानवानिदमब्रवीत् ।
उत्तिष्ठध्वं गमिष्यामः स्नातुं तीर्थानि वै भुवि ॥२४॥
द्रक्ष्यामः परमात्मानं कृष्णनारायणं प्रभुम् ।
इत्युक्ता दानवा दैत्या आसुरा राक्षसास्तथा ॥२५॥
चक्रुरुद्योगमतुलं निर्जग्मुश्च रसातलात् ।
सहितास्ते च्यवनेन ययुः श्रीहाटकेश्वरम् ॥२६॥
विधिना स्नानपूजादि कृत्वा श्रीहाटकेशितुः ।
पातालादूर्ध्वमायाताः सौराष्ट्रे विवरैर्भुवम् ॥२७॥
कुंकुमवापिकाक्षेत्रे चाऽश्वपट्टसरोवरे ।
लोमशस्याऽऽश्रमपूर्वं स्नानं चक्रुर्मुदान्विताः ॥२८॥
स च्यवनः स प्रह्लादः सर्वदैत्यसमन्वितः ।
अनादिश्रीकृष्णनारायणं बालस्वरूपिणम् ॥२९॥
सर्वावतारसंजुष्टं मुक्तकन्यादिसेवितम् ।
ददर्श पूजयामास दध्यौ सर्वमनोहरम् ॥३०॥
ततः श्रीकम्भरालक्ष्मीं नत्वा गोपालकृष्णकम् ।
लोमशं पूजयित्वा च सरो वै पुष्करं ययौ ॥३१॥
सरस्वतीं चावगाह्य धर्मारण्यं गतोऽभवत् ।
मेरोः कृत्वा सुतीर्थानि ततः श्रीबदरीं ययौ ॥३२॥
नरनारायणौ यत्र तेपाते तप उत्तमम् ।
समुन्नतजटाभारौ तपस्यासक्तमानसौ ॥३३॥

अतिसौम्यस्थरूपौ च कृष्णाजिनधरौ मुनी ।
ददर्श विमलौ देवौ पुपूजाऽतीव भावतः ॥३४॥
स्नात्वा गंगां शालवृक्षं नैमिषारण्यसन्निधौ ।
ययौ दैत्येन्द्र एवासौ ददर्श तत्र तौ पुनः ॥३५॥
शालद्रुमकृतावासौ तापसौ तौ नरोत्तमौ ।
तयोश्च पार्श्वयोर्दिव्ये धनुषी लक्षणान्विते ॥३६॥
शार्ङ्गमाजगवं चाप्यक्षय्यावपि महेषुधी ।
शालवृक्षं महाशाखं शरैश्चितं च हेतिभिः ॥३७॥
ददर्श बाणानपरान् मुखे लग्नान् परस्परम् ।
ततस्तानद्भुताकारान् बाणान्नागोपवीतकान् ॥३८॥
दृष्ट्वाऽतुलं रुषं चक्रे दैत्यो द्विरूपदर्शनात् ।
तापसौ तौ सशस्त्रौ च दृष्ट्वाऽमन्यत दाम्भिकौ ॥३९॥
बलगर्वेण च व्याप्तः प्रोवाच पुरुषोत्तमौ ।
किं भवद्भ्यां समारब्धो दम्भो धर्मविनाशनः ॥४०॥
क्व तपः क्व जटाभारः क्व चेमौ प्रवरायुधौ ।
अथोवाच नरो दैत्यं का ते चिन्ता परकृते ॥४१॥
सामर्थ्ये सति यत् कुर्याद् घटते तस्य तत्तथा ।
आवां वै तापसौ रक्षाकरौ दैत्यनिषूदनौ ॥४२॥
उभयं कुर्वो दैत्येन्द्र याहि मा वह गर्वकम् ।
अथोवाच दितीशस्तौ का शक्तिर्युवयोरिह ॥४३॥
दैत्यनाशकरी धर्मरक्षके मयि तिष्ठति ।
नरः प्राह च दैत्येन्द्र आवाभ्यां शक्तिरर्जिता ॥४४॥
न कश्चिच्छक्नुयाज्जेतुं नरनारायणौ युधि ।
अनादिश्रीकृष्णनारायणात्मानौ परेश्वरौ ॥४५॥
प्रह्लादस्तु ततो गर्वात् प्रतिज्ञामकरोत् पुरः ।
यथाकथञ्चिज् जेष्यामि नरनारायणौ रणे ॥४६॥
च्यवनस्तं तदा प्राह मा वोचः श्रीहरिं प्रति ।
नाऽयं जय्यो हि भगवान् क्षय्येन तु त्वया क्वचित् ॥४७॥
दैत्यः प्राह प्रतिज्ञा सा मयोक्ता नान्यथा भवेत् ।
करिष्ये सर्वथा यत्नं विजेष्यामि ध्रुवं हि तौ ॥४८॥
इत्युक्त्वा च्यवनं नत्वा सज्यं चापं वितत्य च ।
चकार गर्जनं ज्यायास्तलध्वनिं चकार च ॥४९॥
संक्षिप्तं स्वबलं स्थाप्य वने युद्धार्थमुद्यतः ।
ततो नरस्त्वाजगवं चापमानम्य वै शरान् ॥५०॥
मुमोच तान् पृषत्कैश्च चिच्छेद दैत्यपुंगवः ।
छिन्नान् समीक्ष्याऽथ नरो बाणान् दैत्येन तत्क्षणम् ॥५१॥
महाबाणान् मुमोचापि क्रमशो दैत्यनाशकान् ।
नरश्चैकं दितिजो द्वौ नरस्त्रीन् चतुरोऽसुरः ॥५२॥

नरः पञ्च दितिजः षड् बाणान् मुमोच नाशकान् ।
नरः सप्त दितिजोऽष्टौ नरो मुमोच त्रीणि षट् ॥५३॥
दैत्यो दश नरश्चैकादश दैत्यश्च षोडश ।
नरो द्वात्रिंशत्पृषत्कान् दैत्यः षष्टिशराँस्तदा ॥५४॥
शतं नरो मुमोचाऽपि दैत्यः शतद्वयं पुनः ।
नरः शतत्रयं दैत्यः षट्शतानि ससर्ज वि ॥५५॥
नरः सहस्रं दैत्यश्च पारेसहस्रमाहिनोत् ।
एवं चाऽसंख्यबाणाँस्तौ मिथो गर्वान्मुमोचतुः ॥५६॥
नरोसंख्यशरव्रातैरवास्तरत् खदिग्भुवः ।
दैत्योऽप्यसंख्यबाणैस्तान् छिच्छेद बहुयत्नतः ॥५७॥
तदा वरास्त्रैर्युध्येतां समन्त्रैर्नरदानवौ ।
वह्निं नरो जलं दैत्यो वाय्वस्त्रं पर्वतास्त्रकम् ॥५८॥
नागास्त्रं गारुडास्त्रं च धूम्रास्त्रं तैजसास्त्रकम् ।
नार्यस्त्रं च नरास्त्रं च षण्ढास्त्रं यौवनास्त्रकम् ॥५९॥
एवं परस्परं तौ च चिक्षिपतुर्जिघांसया ।
ब्रह्मास्त्रं दैत्यवर्यः स मुमोचातिभयंकरम् ॥६०॥
नारायणाऽस्त्रमुग्रं च नरो मुमोच तत्क्षणम् ।
संहृते ते ह्युभे चाथ प्रल्हादः क्रोधमूर्छितः ॥६१॥
गदां प्रगृह्य तरसा प्रचस्कन्द रथोत्तमात् ।
नारायणश्च तं वीक्ष्य समायान्तं गदायुतम् ॥६२॥
नरं स्वपृष्ठतः कृत्वा योद्धुमग्रगतोऽभवत् ।
दैत्यो भ्रान्त्वा गदां वेगान्मूर्ध्नि कृष्णमताडयत् ॥६३॥
ताडितस्य हरेर्नेत्रद्वयाद् वार्यपतद् बहु ।
गदापि शतधा भिन्ना न्यपतद् भुवि खण्डशः ॥६४॥
दैत्यस्तूर्णं रथे स्थित्वा कार्मुकं प्रसमाददे ।
बाणान् शिलीमुखान् तीक्ष्णान् मुमोचार्धशशिप्रभान् ॥६५॥
हरिश्छिच्छेद तान् बाणैर्निर्बिभेद च दानवम् ।
दानवोऽपि हरिं बाणैर्विव्याध च शिलीमुखैः ॥६६॥
एवं परस्परं चाविध्येतां मर्मसु रोषतः ।
तदाऽम्बरे दिदृक्षूणां देवानां देहिनां तथा ॥६७॥
सन्निपातोऽभवद् व्योम्नि दुन्दुभयो महास्वनाः ।
अवाद्यन्त तथा पुष्पवर्षं चाभूत् तयोः कयोः ॥६८॥
अथैवं बलमापन्नौ दैत्यनारायणावुभौ ।
बबन्धतुस्तदाऽऽकाशं सुतीक्ष्णशरवृष्टिभिः ॥६९॥
सर्वदिशोऽच्छादयतामयुध्येतामसुग्लहम् ।
नारायणस्तु दैत्यं तं शरैर्बिभेद मर्मसु ॥७०॥
दैत्यो बिभेद हृदये बाह्वोर्मुखे नरायणम् ।
नारायणोऽर्धचन्द्रेण चिच्छेद दैत्यकार्मुकम् ॥७१॥

दानवश्चापरं सज्यं धनुः कृत्वा शरैर्हरिम् ।
ववर्ष तान् हरिश्छित्वा दैत्यं बाणैरवाकिरत् ॥७२॥
कार्मुकं च क्षुरप्रेण चिच्छेद चापरं ततः ।
तृतीयं च चतुर्थं च चिच्छेद पञ्चमं धनुः ॥७३॥
अथ दैत्यो लोहमयं जग्राह परिघं दृढम् ।
भ्रामयामास यावत्तं चिच्छेद भगवान् शरैः ॥७४॥
प्रह्लादो मुद्गरं भ्रान्त्वा चिक्षेप च नरायणे ।
हरिर्दशभिर्नाराचैश्चिच्छेद मुद्गरं यदा ॥७५॥
दैत्यः पाशयुतस्तूर्णं दुद्राव श्रीहरिं प्रति ।
हरिः पाशं तु बाणेन चिच्छेद बहुखण्डशः ॥७६॥
दैत्यः शक्तिं सप्ततालदीर्घामादाय माधवम् ।
प्रति चिक्षेप च हरिस्तां चिच्छेद क्षुरप्रकैः ॥७७॥
दैत्यश्च पर्वतशृंगं चिक्षेप माधवोपरि ।
हरिः शक्त्या विदार्यैतद् दानवस्य तु वक्षसि ॥७८॥
शूलं शक्तिसमं वेगात् प्राहिणोद् दानवस्तदा ।
प्रभिन्नहृदयो राथे पपात रथमध्यगः ॥७९॥
विसंज्ञं सारथिर्ज्ञात्वा तमपोवाह वै रणात् ।
नारायणो विशश्राम तावत् संज्ञान्वितोऽसुरः ॥८०॥
सुदृढं चापमादाय भूयो योद्धुमुपागतः ।
तावत् सायं हरिर्दृष्ट्वा प्रत्युवाच महासुरम् ॥८१॥
गच्छ दैत्येन्द्र योत्स्यामः प्रातस्त्वाह्निकमाचर ।
एवमुक्तो ययौ नत्वा नैमिषं चाह्निकं व्यधात् ॥८२॥
एवं नित्यं महायुद्धं प्रववृते तयोर्दिने ।
रात्रौ विश्रान्तिसमये चिन्तयत्यपि दानवः ॥८३॥
कथं जेष्यामि तं वीरं दाम्भिकं साध्यमीश्वरम् ।
अथैवं दानवस्तेनाऽयुध्यत बहुवत्सरान् ॥८४॥
न चाऽजयत् तदा वर्षसहस्रान्तेऽजितं हरिम् ।
नारायणं समभ्येत्य दानवो वाक्यमब्रवीत् ॥८५॥
किमर्थं देवदेवेश त्वामहं साध्यमीश्वरम् ।
विजेतुं नात्र शक्नोमि तस्य मे कारणं वद ॥८६॥
नारायणश्च तं प्राह दुर्जयोऽहं सुराऽसुरैः ।
अपि कोटयस्त्रशस्त्राद्यैर्बलैः सर्वविधैरपि ॥८७॥
प्रह्लादस्तु तदा प्राह यद्यसाध्यश्च दुर्जयः ।
प्रतिज्ञातं मया जेतुं तदसत्यं भवेदिह ॥८८॥
ख्यातो हतप्रतिज्ञोऽहं कथं जीवेयमीश्वर ।
तस्मात्ते सन्निधौ विष्णो सन्त्यक्ष्ये जीवनं मम ॥८९॥
इत्युक्त्वा निषसादाऽग्रे गृणन् ब्रह्मसनातनम् ।
हरिः प्राह कृपालुः स्वं भक्तं श्रद्धान्वितं परम् ॥९०॥
गच्छ जेष्यसि भक्त्या मां न युद्धेन कदाचन ।
प्रह्लादश्च तदा प्राह त्रैलोक्यं विजितं मया ॥९१॥
परं न विजितोऽसि त्वं लोकरक्षाकरो यतः ।
धर्मप्रवर्तनार्थाय तपश्चर्यां समास्थितः ॥९२॥
तत्त्वां जेतुं परां भक्तिं करिष्ये जयदां शुभाम् ।
शुश्रूषां तव देवेशाऽऽराधनां सेवनादिकम् ॥९३॥
करिष्ये येन युद्धेन त्वं पराजयमाप्नुयाः ।
तद् युद्धं वै प्रतिज्ञातं फलदं मे भविष्यति ॥९४॥
शस्त्रं भक्त्यात्मकं कृष्णे योजयिष्ये ह्यतः परम् ।
इत्युक्त्वा दैत्यवर्यः स हिरण्याक्षसुताऽन्धकम् ॥९५॥
समाहूयाऽब्रवीत् हृष्टः साध्यं साधयितुं व्रती ।
दैत्याश्च दानवाश्चापि परिपाल्यास्त्वयाऽन्धक ॥९६॥
मयोत्सृष्टमिदं राज्यं प्रतीच्छ परिपालय ।
अहं युद्धेन तपसा भक्त्याऽऽराधनया तथा ॥९७॥
विजेष्ये श्रीहरिं देवेश्वरं दाम्भिकमीश्वरम् ।
इत्युक्तोऽन्धकदैत्यश्च जग्राह राज्यमुत्तमम् ॥९८॥
प्रह्लादः प्रययौ पुण्यं हरेर्बदरिकाश्रमम् ।
यावास्तां नैमिषे क्षेत्रे शालग्रामे च यौ प्रभू ॥९९॥
तावेव वीक्ष्य देवौ स नरनारायणावुभौ ।
कृताञ्जलिपुटो भूत्वा ववन्दे चरणौ तयोः ॥१००॥
नारायणश्च तं प्राह मामजित्वा महासुर ।
किमर्थं प्रणतोऽस्यत्र वद यत्ते समीहितम् ॥१०१॥
प्रह्लादः प्राह भगवन् कस्त्वां जेतुं प्रभुः पुमान् ।
कस्त्वत्तोऽस्ति पुमान् श्रेष्ठस्त्वमेव पुरुषोत्तमः ॥१०२॥
त्वमेव तपसा द्योतज्जटाजूटधनुर्धरः ।
त्वां योगिनश्चिन्तयन्ति चार्चयन्ति मनीषिणः ॥१०३॥
जपन्ति स्नातकास्त्वां च यजन्ते त्वां च याज्ञिकाः ।
रामयन्ति च रामास्त्वां पूजयन्ति पतिव्रताः ॥१०४॥
ऐन्द्रियिकस्तपर्यन्ति त्वामेव परमेश्वरम् ।
त्वममर्त्यो हृषीकेशश्चक्रपाणिर्धराधरः ॥१०५॥
महामीनो हयशिरास्त्वमेव कच्छपाकृतिः ।
क्रोडरूपः केसरी त्वं ब्रह्मा श्रीशः सतीपतिः ॥१०६॥
कुबेरो वरुणस्त्वं च समीरो भास्करः शशी ।
सर्वभूतात्मभूतस्त्वं कस्त्वां जेष्यति माधव ॥१०७॥
भक्त्या चेत् त्वं वशं याहि भक्तिं कर्तुं समागतः ।
इत्युक्त्वा च पुनस्तस्य पादयोः प्रणनाम सः ॥१०८॥
नारायणश्च तं प्राह परितुष्टोऽस्मि तेऽनघ ।
भक्त्या त्वनन्यया चाहं त्वया चाद्य पराजितः ॥१०९॥

पराजितश्च पुरुषो जेत्रे दण्डं प्रयच्छति ।
दण्डार्थं ते प्रदास्यामि वरं वृणु यमिच्छसि ॥११०॥
प्रल्हादः प्राह मे पापं शारीरं मानसं च वा ।
वाग्भवं नाशमायातु यन्मया युध्यता कृतम् ॥१११॥
या या जायेत मे बुद्धिः सा सा विष्णो त्वदाश्रिता ।
देवार्चनेऽतिनिरता त्वच्चित्ता त्वत्परायणा ॥११२॥
त्वत्पादपद्मयोर्नित्यं रतिश्चास्तु परा मम ।
नारायणश्च तं प्राह तथैवाऽस्तु सदा तव ॥११३॥
अपरं चास्तु भक्तेन्द्रो नित्यमेवाऽक्षयोऽव्ययः ।
अजरश्चामरश्चापि मत्प्रसादाद्भविष्यसि ॥११४॥
इतो गच्छ परं श्रेष्ठं चाश्वपट्टसरोवरम् ।
कुंकुमवापिकाक्षेत्रे यत्राऽऽस्ते पुरुषोत्तमः ॥११५॥
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ।
तं दृष्ट्वा श्रीहरिं ध्यात्वा निधाय हृदि तं प्रभुम् ॥११६॥
लोमशाच्च महामन्त्रं गृहीत्वा पावनस्ततः ।
गच्छ त्वं भक्तशार्दूल स्वमावासं क्रियारतः ॥११७॥
प्रशासयन् सर्वदैत्यान् राज्यं पालय शाश्वतम् ।
स्वजातिसदृशं दम्भं कुरु भक्तिं च शासनम् ॥११८॥
न कर्मबन्धो भवतो मच्चित्तस्य भविष्यति ।
हितोपदेष्टा दैत्यानां दानवानां गुरुर्भव ॥११९॥
एवमुक्तो हरिं नत्वा क्षमाप्य श्रीहरिं नरम् ।
ययौ च्यवनसंयुक्तः सौराष्ट्रे लोमशाश्रमम् ॥१२०॥
कुंकुमवापिकाक्षेत्रे ददर्श पुरुषोत्तमम् ।
अश्वपट्टसरोवारिस्नानं कृत्वाऽऽर्च्य केशवम् ॥१२१॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः ।
मन्त्रं प्राप्य मासमात्रमुषित्वा प्रययौ गृहम् ॥१२२॥
अश्मकं नाम नगरं शशास च रसातलम् ।
दृष्टः सभाजितश्चापि दानवैरन्धकादिभिः ॥१२३॥
भक्तिं चकार नवधा ध्यानमाराधनादिकम् ।
अनादिश्रीकृष्णनारायणमूर्तिं प्रपूजयन् ॥१२४॥
इत्येवं कथितं राधे भक्त्या जय्यो जनार्दनः ।
दैत्येनापि पराभक्त्या विजितः परमेश्वरः ॥१२५॥
द्वितीयेऽब्दे हरेर्दैत्यश्च्यवनो मार्गशीर्षके ।
न्यूषतुस्तन्महत्तीर्थे च्यावनं दक्षिणे तटे ॥१२६॥
अश्वपट्टसरसो वै प्राह्लादिकं तथोच्यते ।
प्रह्लादो दैत्यदनुजान् बोधयामास तन्मनुम् ॥१२७॥
रसातलमतास्तेऽपि भक्ता बभूवुरीश्वराः ।
अनादिश्रीकृष्णनारायणं भेजुरहर्निशम् ॥१२८॥
इत्येतत् कथितं राधे सर्वपातकनाशकम् ।
परमं साधनं दैत्योद्धारकं चाक्षयं दृढम् ॥१२९॥
जयदं शान्तिदं स्मृद्धिप्रदं शाश्वतमोददम् ।
हरेश्वरणदं पाठश्रुतिभ्यां मोक्षदं परम् ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने च्यवनयोगेन प्रह्लादस्य रसातलात्तीर्थार्थं भूमावागमनं नरनारायणेन सह युद्धं भक्त्या नारायणपराजयः, प्रह्लादच्यवनयोर्लोमशाश्रमागमश्चेत्यादिनिरूपणनामा द्वाविंशतितमोऽध्यायः ॥ २२ ॥

**श्रीकृष्ण उवाच—**

अथ ते दानवाः कृष्णं द्रष्टुमिच्छन्ति सत्वरम् ।
अनादिश्रीकृष्णनारायणं बालं हि राधिके ॥ १ ॥
यत्प्रतापादयं दैत्येश्वरो जिग्ये हरिं प्रभुम् ।
तां भक्तिं कर्तुमिच्छन्ति प्रह्लादेनोपबोधिताः ॥ २ ॥
शृणु राधे कथां तां च यथा ते दानवेश्वराः ।
समागता हरेर्भक्ता जाताश्चाराधनान्विताः ॥ ३ ॥
अन्धकस्य च वंशीयाः प्रह्लादस्य च वंशजाः ।
कुजम्भस्य च जम्भस्य शंकुकर्णस्य वंशजाः ॥ ४ ॥
मयस्य वंशजाश्चापि दुन्दुभेः शम्बरस्य च ।
अयःशंकोश्च वृत्रस्य वंशजा दानवादयः ॥ ५ ॥
सस्मरुश्च्यवनं विप्रं प्रह्लादमार्गदर्शकम् ।
च्यवनः शीघ्रमेवैषां पुरतः समुपस्थितः ॥ ६ ॥
वन्दितः पूजितश्चापि पृष्टश्च श्रेयसं प्रति ।
विद्युत्केशिसुतो ज्येष्ठः सुकेशिः समुवाच तम् ॥ ७ ॥
प्रष्टुमिच्छामि भवतः संशयोऽयं हृदि स्थितः ।
किंस्विच्छ्रेयः परे लोके किंमु चेह द्विजोत्तम ॥ ८ ॥
केन पूज्यो भवेत् सत्सु केनाऽसौ सुखमेधते ।
इति पृष्टश्च्यवनस्तान् दैत्यसन्तानजाँस्तदा ॥ ९ ॥
विमृश्योवाच श्रेयोऽर्थमिह लोके परत्र च ।
श्रेयः पुण्यं तथा धर्मः परत्रेह च सर्वथा ॥१०॥
धर्मे समाश्रिते सत्सु पूज्यः सुखी सदा भवेत् ।
धर्मः स्वस्य सदाचारः परात्मशान्तिदः सुखः ॥११॥
स्वात्मशान्तिप्रदश्चापि पुण्यं तत्सुखदं सदा ।
मानवानां परो धर्मः सदा यज्ञादिकाः क्रियाः ॥१२॥
स्वाध्यायस्तत्त्ववेदित्वं विष्णुपूजनमित्यपि ।
केनाऽर्जितेन मनुजाः सुखिनोऽमुत्र चेह च ॥१३॥

देवानां भक्तरक्षा च पूजाग्रहणमित्यपि ।
प्रजापालनमित्यादि तेनाऽर्जितेन ते सुखाः ॥१४॥
दैत्यानां बाहुशालित्वं युद्धं वन्दनमित्यपि ।
नीतिर्भक्तिः प्रपत्तिश्च तेनाऽर्जितेन ते सुखाः ॥१५॥
सिद्धानां योगसिद्धिश्च स्वाध्यायोब्रह्मचिन्तनम् ।
भक्तिश्चोपासना शान्तिस्तेनाऽर्जितेन ते सुखाः ॥१६॥
गान्धर्वाणां गीतनृत्ये वाद्यं वाणी मधुस्रवा ।
उपासनं च महतां तेनाऽर्जितेन ते सुखाः ॥१७॥
विद्याध्राणां शुभा विद्या विज्ञानं पौरुषं मतिः ।
नारायण्यां सदा भक्तिस्तेनार्जितेन ते सुखाः ॥१८॥
किन्नराणां सूर्यभक्तिर्गान्धर्वं गायनादिकम् ।
कौशल्यं हास्यभावादौ तेनार्जितेन ते सुखाः ॥१९॥
शिल्पिनां शिल्पकौशल्यं नारायणाऽभिचिन्तनम् ।
परोपकारशालित्वं तेनाऽर्जितेन ते सुखाः ॥२०॥
पितॄणां चेन्द्रियवृत्तिनिग्रहो मानहीनता ।
परमेशे सदा भक्तिस्तेनाऽर्जितेन ते सुखाः ॥२१॥
ऋषीणां शीलता सत्यं जप्यं ज्ञानं क्षमा दया ।
निर्मलाऽन्तःकरणं च तेनाऽर्जितेन ते सुखाः ॥२२॥
त्यागिनां च सतीनां च साध्वीनां स्वामिसेवनम् ।
अनादिश्रीकृष्णनारायणार्पणमरागिता ॥२३॥
हरेर्भक्तिः सदा कार्या तेनाऽर्जितेन ते सुखाः ।
धनरक्षा भोगदानं सेवकत्वं परार्थकम् ॥२४॥
हरौ भक्तिर्गुह्यकानां तेनाऽर्जितेन ते सुखाः ।
परावमर्षिता पारक्यार्थे लौल्यं हि रक्षसाम् ॥२५॥
हरौ भक्ते च वा भक्तिस्तेनाऽर्जितेन ते सुखाः ।
अविवेकः पिशाचानां शौचहानिरसत्यता ॥२६॥
भक्तप्रसादिभक्ष्यं च तेनाऽर्जितेन ते सुखाः ।
तिरश्चां परसेवित्वं तेनाऽर्जितेन ते सुखाः ॥२७॥
इत्येवं कथिताः पुण्या धर्माः षोडश मोक्षदाः ।
स्वस्वजात्यनुसारेण धर्मस्थाः सुखिनः सदा ॥२८॥
सर्वधर्मेषु चोत्कृष्टाः सर्वसाधारणा वृषाः ।
तीर्थयानं प्रभोः पूजा परोपकरणं तपः ॥२९॥
अहिंसनं च सन्तोषो नीतिलभ्ये जपो हरेः ।
एतान् धर्मान् समाश्रित्य ये केऽपि स्युश्च देहिनः ॥३०॥
अवश्यं ब्रह्मशरणा मुक्तिमायान्ति शाश्वतीम् ।
न्याय्यचरणाः सुखिनो दुःखिनस्वपनीतयः ॥३१॥
श्रुत्वैवं च्यवनस्याऽऽर्थी वाचं दैत्याः सुखार्थिनः ।
प्रह्लादपादशरणास्तीर्थं श्रेयो हि मेनिरे ॥३२॥
च्यवनं ते पप्रच्छुश्च सर्वतीर्थोत्तमोत्तमम् ।
च्यवनस्तांस्तदा प्राह तीर्थं श्रीहाटकेश्वरम् ॥३३॥
तीर्थोत्तमं च बदरीवनं श्रीपुरुषोत्तमम् ।
क्षेत्रं श्रीगण्डकीतीर्थं माथुरं पुष्करं तथा ॥३४॥
तीर्थोत्तमोत्तमं त्वास्ते चाश्वपट्टसरोवरम् ।
कुंकुमवापिकाक्षेत्रं लोमशस्याऽऽश्रमस्तथा ॥३५॥
सौराष्ट्रं सर्वतः श्रेष्ठं परमेश्वरशोभितम् ।
अनादिश्रीकृष्णनारायणो बालस्वरूपवान् ॥३६॥
वर्तते भगवान् यत्र परमेशः पुमुत्तमः ।
सर्वधामाऽधिपस्वामी सर्वकारणकारणम् ॥३७॥
सर्वाऽवतारनाथश्च सर्वलक्ष्म्यादिसत्पतिः ।
सर्वमोक्षर्द्धिदाता च सर्वतुल्यदयालयः ॥३८॥
तत्तीर्थं सर्वतीर्थानां तीर्थोत्तमोत्तमोत्तमम् ।
यत्कृत्वा स्वेष्टमासाद्य मोदते सर्वशान्तिषु ॥३९॥
एतच्छ्रुत्वा च्यवनस्य दैत्यास्तीर्थेच्छवस्तदा ।
च्यवनं सह नीत्वैव चाश्वपट्टसरो ययुः ॥४०॥
दैत्याश्च दानवाश्चापि तेषां नार्यः सुतादयः ।
कुंकुमवापिकाक्षेत्रे तीर्थार्थे प्रययुर्मुदा ॥४१॥
च्यवनस्य प्रसंगेन प्रह्लादाद्युपदेशतः ।
अनादिश्रीकृष्णनारायणं द्रष्टुमुपागताः ॥४२॥
लोमशस्याऽऽश्रमं व्योम्नश्चावतीर्य च दानवाः ।
च्यवनेन समं नेमुर्लोमशं ते कुटुम्बिनः ॥४३॥
दानवानां परां भक्तिं संवीक्ष्य लोमशो मुनिः ।
च्यवनेन सह तेषां स्वागतं कृतवान् परम् ॥४४॥
मधुपर्कं चासनादि जलपानादिकं ददौ ।
आवासान् प्रददौ रम्यान् कल्पितान् कल्पवृक्षजान् ॥४५॥
अश्मकाख्यनगर्याश्च शतोत्तरान् सुशोभनान् ।
सुसमृद्धान् सर्ववस्त्वाढ्यान् प्रासादान् चन्द्रमोनिभान् ॥४६॥
स्नानभोजनशय्याढ्यान् सभाशालाविराजितान् ।
उद्यानकुंजसंव्याप्तान् शीतरम्यसुखानिलान् ॥४७॥
चन्दनागुरुकस्तूरीगन्धामोदप्रमोदितान् ।
सर्वोपकरणाद्युक्तान् सेवाभक्तान् ददौ मुनिः ॥४८॥
च्यवनः सुप्रसन्नोऽभूल्लोमशस्याऽतिभावतः ।
दैत्यांश्च दानवानाह ऋषयस्त्वपरिग्रहाः ॥४९॥
पक्षपातादिशून्याश्च रागद्वेषविवर्जिताः ।
सर्वजीवहिताः शान्ता मोचयन्ति ह्यघाज्जनान् ॥५०॥
यस्य शत्रौ च मित्रे च समभावो विलोक्यते ।
स एव मोक्षदो बोध्यः पावनं तीर्थमुत्तमम् ॥५१॥

लोमशस्य प्रसादेन वारिणा पूर्वजन्मजाः ।
घोरपातकपुञ्जा वै लयमेष्यन्ति वोऽखिलाः ॥५२॥
तस्माच्छ्रीलोमशं विप्रं प्रसेवध्वं मुदान्विताः ।
कंचित्कालं वसताऽत्र समर्जयत देशनाम् ॥५३॥
स्थावरेभ्यस्तु तीर्थेभ्यो जंगमं द्राग् विशोधकम् ।
साधवः परमं तीर्थं स्पर्शनात् पापनाशकम् ॥५४॥
वन्दनात् सेवनात् पादसंम्मर्दनात् प्रतोषणात् ।
यथेष्टवस्तुदानाच्च तारयन्त्यपि पापिनः ॥५५॥
महापापातिपापानां दाहकं साधुसेवनम् ।
भोजनीया वन्दनीया दर्शनीया हि साधवः ॥५६॥
स्पर्शनीया नमनीयास्तोषणीया हि साधवः ।
सर्वार्पणेन च परिचरणीया हि साधवः ॥५७॥
संगतिः सुलभा सर्वा दुर्लभा साधुसंगतिः ।
कायेन मनसा वाचा तोषणीया हि साधवः ॥५८॥
ध्याननिष्ठापराः पुण्यशेवधयस्तपःप्रभाः ।
परब्रह्मपराः शिष्यश्रेयःपरायणाः प्रियाः ॥५९॥
सर्वकल्याणदाः सन्तः सेवनीयाः स्वमुक्तये ।
दानवत्वं च दैत्यत्वं मानवत्वं सुरेशता ॥६०॥
न नैत्यिकी चात्मनां वै देहजन्मादिजं हि तत् ।
देहस्य विगमे सर्वं चागन्तुकं विनश्यति ॥६१॥
ममेदं च कुटुम्बादि राज्यं मे मम बान्धवाः ।
सुताः पत्नी पतिश्चेति चाहंकारकृतं मृषा ॥६२॥
अहंकारात्मके बीजे याते यास्यति वासना ।
कर्माशयविनाशे च क्व दैत्यत्वं क्व शिष्यता ॥६३॥
आत्मा तु मायिकवर्ष्मयोगान्नामनिरुक्तिमान् ।
दितेर्जातो यतो दैत्यो दनोर्जातस्तु दानवः ॥६४॥
अजातो यश्चेतनः स जातेन जात उच्यते ।
जातं देहं न वै चात्मा ततश्चात्मा न नामभाक् ॥६५॥
यत्र स्थाने तु यो जातस्तत्रैवाऽस्य प्रजायते ।
मृषा त्वभिनिवेशोऽत्र मायायां ममतावशात् ॥६६॥
तस्माद् यूयं न पातालरसातलादिवासिनः ।
न च दैत्या न वै शूरास्तत्सर्वं देहभाग् यतः ॥६७॥
सतां योगेन च सन्तो जाताश्चात्र सरोवरे ।
स्नात्वा पीत्वा जलं चात्र लोमशस्य रजोधराः ॥६८॥
पूताः स्थ तीर्थयोगेन मनुं गृह्णत चोत्तमम् ।
पूजयत गुरुं चैनं पश्चात् कृष्णनरायणम् ॥६९॥
यास्यामो दर्शनार्थं वै श्रेयः प्राप्स्यथ निश्चितम् ।
इत्युक्ता दानवा दैत्या दशसाहस्रसंख्यकाः ॥७०॥
अश्वपट्टसरस्तीर्थे स्नात्वा प्राह्लादिकं स्थलम् ।
नत्वा च लोमशं विप्रं पूजयामासुरादरात् ॥७१॥
पादपूजाजलं पीत्वा नेमुस्तं लोमशं मुनिम् ।
चन्दनाद्यैः पुष्पहारैरर्चयामासुरादरात् ॥७२॥
जगृहुश्च महामन्त्रं पावनं सर्वसौख्यदम् ।
"ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा" ॥७३॥
एनं गृहीत्वा मन्त्रं च गृणन्तो वैष्णवाश्च ते ।
मालां च तौलसीं भाले सबिन्दुं तिलकं तथा ॥७४॥
गृहीत्वा पंक्तिशो भूत्वा लोमशाऽर्पितमुत्तमम् ।
भक्ष्यं भोज्यं च लेह्यं च चोष्यं भोजनमुत्तमम् ॥७५॥
पानं मिष्टं ताम्बूलकं जगृहुर्लोमशाश्रमे ।
च्यवनोऽपि कृतसन्ध्यावन्दनो बुभुजे मुदा ॥७६॥
ततः सर्वे निजावासान् ययुर्विश्रान्तिलब्धये ।
अथ सायं तु ते सर्वे गृहीत्वोपायनानि वै ॥७७॥
अनादिश्रीकृष्णनारायणदर्शनकांक्षिणः ।
ययुः श्रीकम्भरालक्ष्मीप्रासादं सप्तभूमिकम् ॥७८॥
यत्र श्रीबालकृष्णोऽसौ दोलायां राजते प्रभुः ।
श्रीमद्गोपालकृष्णश्च पिता पुत्रं करे स्वके ॥७९॥
धृत्वा सिंहासने चायात् निषसाद तदोचितः ।
लोमशश्च्यवनश्चोभौ शिष्यदैत्यगणान्वितौ ॥८०॥
आययतुश्च ताभ्यां वै दत्तासनः पिता स्वयम् ।
दैत्यानामपि सत्कारं स्वागतं कृतवाँस्तदा ॥८१॥
दत्तासनास्तु ते दैत्याः प्रह्वीभावपरिप्लुताः ।
आत्मनो मेनिरे दृष्ट्वा कृतकृत्यान् प्रभुं हरिम् ॥८२॥
क्षणं स्थैर्ये प्रजग्मुस्ते स्थिरनेत्राः स्ववृत्तयः ।
आश्चर्यं परमं ते च लोकयामासुरैश्वरम् ॥८३॥
क्षणं दृष्ट्वा बालकृष्णं ततः किशोररूपिणम् ।
दिव्यरूपानुरूपाभिरूपमुज्ज्वलमुत्तमम् ॥८४॥
तत्र मूर्तौ च प्रह्लादं शुक्राचार्यं ततः परम् ।
ततश्च कश्यपं दितिं दनुं दक्षं प्रजापतिम् ॥८५॥
हिरण्याक्षं च हिरण्यकशिपुं च पितामहान् ।
ब्रह्माणं च तथा रुद्रं विष्णुं ततश्चतुर्भुजम् ॥८६॥
ततो वैराजरूपं च चतुर्दश च भूमिकाः ।
तत्र रसातलं तत्राऽश्मकपत्तनमुत्तमम् ॥८७॥
तत्र नैजनिवासाँश्च तत्र नैजकुटुम्बिनः ।
नैजरूपाणि च सर्वे लोकयामासुरद्भुतम् ॥८८॥
तत्र पञ्चसहस्राणि कन्यानां भावितात्मनाम् ।
वरं श्रीबालकृष्णं च किशोरं वव्रिरे पतिम् ॥८९॥

एवं विलोकयामासुस्ततश्च बालरूपधृक् ।
हरिर्जातः पुनश्चात्र कैशोरं रूपमाप्तवान् ॥९०॥
इत्येवं ते विलोक्यैव परमाश्चर्यसंप्लुताः ।
पुपूजुः श्रीहरिं कृष्णनारायणं जगत्पतिम् ॥९१॥
उपदाः सन्न्यधुस्त्वग्रे पादप्रक्षालनाम्बु च ।
पपुः सर्वे तदा दैत्यदानवास्तस्त्रियोऽपि च ॥९२॥
तेषां कन्या दिव्यरूपाः पञ्चसाहस्रसंख्यकाः ।
मुमुहुः श्रीहरौ लग्ना ध्यानमग्नास्तदा स्थिराः ॥९३॥
बभूवुश्च ततः कृष्णं वरयामासुरिच्छया ।
तव पादाम्बुजे देहि भक्तिं देहि जगत्प्रभो ॥९४॥
मुक्तिं देहि शाश्वतं च सुखं देहि जगत्प्रभो ।
अनादिश्रीकृष्णनारायणः प्राह तथाऽस्तु वः ॥९५॥
दत्तं पदं प्रदत्ता च भक्तिर्मुक्तिः सुखं तथा ।
इत्युक्तास्ता दिव्यरूपास्तदा जाता हि तत्क्षणम् ॥९६॥
पञ्चसाहस्रसंख्यास्ता पत्न्यो जाता द्रुतं हरेः ।
पादौ धृत्वा तत्र तस्थुः पतिं प्राप्य प्रभुं हरिम् ॥९७॥
लोमशस्याऽऽश्रमे तस्थुः श्रीकान्तरक्षिता हि ताः ।
लोमशश्च्यवनश्चोभौ सम्पूज्य श्रीहरिं ततः ॥९८॥
कन्याः संरक्षयामासतुर्वै नैजाश्रमे मुदा ।
श्रीहरेराज्ञया ताश्चाऽर्बुदकन्यासु संस्थिताः ॥९९॥
दैत्या दशाधिसाहस्राः श्रीहरेः कृपया द्रुतम् ।
वैकुण्ठं गन्तुमिच्छन्तो वव्रिरे धाम तत्र च ॥१००॥
हरिणा प्रापितास्ते तु वैकुण्ठं दिव्यरूपिणः ।
अथोपदाः समस्ता याः कन्याभ्यः प्रददौ प्रभुः ॥१०१॥
ऋषिभ्यां च ददौ योग्यवस्तूनि श्रीहरिः स्वयम् ।
ततो बालस्वरूपः स भूत्वा दोलागतोऽभवत् ॥१०२॥
च्यवनो लोमशं नत्वा कन्याभ्यश्च शुभाशिषः ।
दत्वा ययौ तीर्थयात्रां पुष्करारण्यमुत्तमम् ॥१०३॥
प्रह्लादश्चिरजीवी वै रसातलमुपाययौ ।
इत्येवं राधिके तस्य परेशस्य जगत्कृतः ॥१०४॥
अतीव दिव्यमावेद्यं चरितं श्रावणेऽभवत् ।
वर्षे द्वितीयके पाठाच्छ्रवणान्मोक्षदं परम् ॥१०५॥
स्मृद्धिदं चायुष्यदं च पुत्रपौत्रधनप्रदम् ।
अखण्डसौभाग्यकरं कृपासाध्यो यतो हरिः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रसातलादिस्थितदशसाहस्रदैत्यदानवानां मोक्षणं पञ्चसाहस्रकन्यकानां बालकृष्णवरणं चेत्यादिनिरूपणनामा त्रयोविंशतितमोऽध्यायः ॥ २३ ॥

श्रीकृष्ण उवाच—

शृणु राधे तृतीयेऽस्य वर्षारंभे महोत्सवम् ।
पिता चकार विधिवत् श्रेष्ठं द्वितीयवर्षवत् ॥ १ ॥
मार्गशीर्षत्रयोदश्यां चौलसंस्कारमाचरत् ।
कृत्वा तु मंगलस्नानं मातृकापूजनादिकम् ॥ २ ॥
नान्दीश्राद्धं स्वस्तिपाठं होमं सभ्याऽनले तथा ।
पात्रासादनमाधत्य वह्नेस्तु दक्षिणे स्थले ॥ ३ ॥
शुभैकविंशतिदर्भपिञ्जुलीर्न्यस्य वै ततः ।
वह्नेर्वामस्थले न्यस्य रक्तगोगोमयादि च ॥ ४ ॥
कृशरस्थालिकापाकं न्यधात् पिता ततः परम् ।
कृत्वा व्याहृतिहोमादि क्षुरमादाय चाऽऽयसम् ॥ ५ ॥
दक्षिणोत्तरभागस्थस्वल्पशिखाऽवतारणम् ।
कृत्वा पिता ततो गर्भकेशानां मुण्डनं शनैः ॥ ६ ॥
सशिखं कारयामास नापितेन सुतस्य च ।
गोदानादि ददौ विप्रान् भोजयामास योगिनः ॥ ७ ॥
चतुर्दशभुवनानां तर्पयामास वासिनः ।
लोमशं पूजयामास भोजयामास कन्यकाः ॥ ८ ॥
साधून् साध्वीश्चातिथींश्च भोजयामास तद्दिने ।
गोग्रासान् दापयामास जन्तुभ्यः पिष्टकं कणान् ॥ ९ ॥
एवं वै चौलसंस्कारं चकाराऽघविनाशनम् ।
यद्यपि श्रीहरेः पापनाशकस्य कथं ह्यघम् ॥१०॥
तथापि लोकरक्षार्थं वेदमार्गस्य गुप्तये ।
संस्कारं तादृशं योग्यं कृतवान् वै पिता शुभम् ॥११॥
राधा श्रुत्वा तदा कृष्णं पप्रच्छ विनयान्विता ।
बालानां बालिकानां वा प्रोद्भूयाऽच्छं हि वर्तताम् ॥१२॥
विशुद्धानां नातिविदां स्वच्छदर्पणवद्धृदाम् ।
कामचारकामभक्ष्यकामविहारसञ्जुषाम् ॥१३॥
किन्नाम पातकं तेषां यच्चौलेन विनाश्यते ।
श्रीकृष्णः प्राह बालानां राधिके त्वमघं शृणु ॥१४॥
पूर्वकृतादि पापानि जन्मान्तरेऽभियान्ति वै ।
स्वर्गाद्वा नरकाद्वापि शेषलिप्तिः प्रयाति तम् ॥१५॥
गर्भे मूत्राशये वह्नेः पातात्मके रजोऽन्विते ।
धातौ वासश्चात्मनो यः स एवाऽघेन जायते ॥१६॥
शरीरोद्भवनं तत्र पुण्यपापेन जायते ।
मूर्छायां च जले वासः पापायैव प्रजायते ॥१७॥
जन्मदुखं महद्वै यत् पारवश्यं च पापतः ।
जीवनं दुग्धपानादि पुण्यपापेन जायते ॥१८॥

मलमूत्रादिसंसर्गो दंशादिदर्शनं तथा ।
अवाक्त्वं चाप्यशक्तत्वं पापमात्रेण जायते ॥१९॥
इत्येतानि तु पापानि तेन पूर्वकृतानि वै ।
जन्मभावे प्रपद्यन्ते दुःखदान्येव सर्वथा ॥२०॥
येषां पापं न वै चास्ति स चात्मा रुद्रवत् प्रिये ।
सनकादिसमः स्यान्मानसो विज्ञो न गर्भजः ॥२१॥
अथाऽशुद्धेः परिहारः संस्कारेणैव जायते ।
असंस्कृतशरीरस्य शुद्धिः कार्या स्वभावतः ॥२२॥
पूर्वजन्मनः पापानि ह्यशुद्धया सह मस्तके ।
रोहन्ति रोमरूपैस्तु कृष्णवर्णानि तानि वै ॥२३॥
गर्भकेशाः पापरुहस्तन्नाशे पापनाशनम् ।
तस्माद्वै बालकानां तु चौलसंस्कृतिरिष्यते ॥२४॥
चूं पापं लीयते येन चौलं तन्मुण्डनं स्मृतम् ।
अथाऽन्यच्छृणु राधे त्वं केशा वै कृतछेदनाः ॥२५॥
जटारूपाः प्रवर्धन्ते वेगादित्यस्ति कारणम् ।
नूतनेषु च केशेषु मूलानि कारणानि वै ॥२६॥
पुनश्च कर्मणा शुक्लसंज्ञेन सा जटा भवेत् ।
तस्माज्जटा सदा रक्ष्या शिखा वा शुक्लसंहिता ॥२७॥
यथा यथा च बालो वै वर्धते तु तथा तथा ।
कर्मणा जायते पुण्यं पापं वा मिश्रकर्म च ॥२८॥
आपञ्चवर्षं भोग्यं तत्पितुः सम्प्रोच्यतेऽत्र वै ।
पञ्चोत्तरं स्वभोग्यं तद् रोमस्वेव निषीदति ॥२९॥
तस्मात्केशाश्च रोमाणि पापाश्रीणि भवन्ति हि ।
कचरस्य पिबाः सर्वे व्यर्थकर्दमशोधकाः ॥३०॥
तीर्थे वै वपनं तस्मात् कारणीयं विशेषतः ।
पापाऽवतारणं तद्वै बोद्धव्यं केशकर्तनम् ॥३१॥
एवं केशावपनीयास्तृतीये वत्सरे ततः ।
यथेष्टं वपनीयास्ते ब्रह्मरन्ध्रं विनाऽभितः ॥३२॥
यद्वा पुण्या जटा रक्ष्या संस्कृता शोभनाऽनघा ।
कृष्णाः केशा जनानां तु यावद् दृश्यन्त एव ते ॥३३॥
तावत् पापानि विषयाः कारयन्ति तु देहिनः ।
आकर्णशुक्लरोमाणो वृद्धा लिप्यन्त एव न ॥३४॥
तस्माद् वृद्धस्य नैवाऽस्ति त्वाम्नायः पुण्यपापयोः ।
मध्यावस्थस्य तत् सर्वं विशेषेण निगद्यते ॥३५॥
इत्येवं राधिके चौलसंस्कारः शोधकः कृतः ।
राधिका प्राह भगवन् पूर्वजन्माऽघसञ्चयः ॥३६॥
कथं रोमसु गर्भस्थबालकस्य प्रतिष्ठति ।
श्रीकृष्णः प्राह च राधे ! शृणु तत्कथयामि ते ॥३७॥
पुरा ह्यधर्मः पुरुषो ब्रह्मपृष्ठसमुत्थितः ।
हिंसापत्नीसुसंयुक्तः पापपुत्रस्ततोऽभवत् ॥३८॥
पितृभक्तश्च पापः स्वं मातरं पितरं तथा ।
न मुञ्चति क्षणं दूरं सर्वावस्थासु सर्वदा ॥३९॥
यत्राऽधर्मश्च हिंसा च तत्र पापः प्रवर्तते ।
यत्राऽधर्मो न हिंसा न तत्र पापो न वर्तते ॥४०॥
आत्मानो ये तु गर्भस्था अपक्वा निष्क्रिया वशाः ।
अगुणाश्चोल्बसंवृत्तास्तेषां नाऽधर्महिंसने ॥४१॥
कथं पापेन वै तत्र स्थेयं पूर्वकृताधिनि ।
पापिनं चेत् परित्यज्य पापं विनाऽवमर्षणम् ॥४२॥
दूरं याति तदा तेन कुत्र स्थेयं विनाऽऽश्रयम् ।
अन्यकृतं न चान्यत्र तिष्ठत्येव च गच्छति ॥४३॥
येन कृतं तु तत् तस्मिन्नेव तिष्ठति सर्वथा ।
भोगोत्तरं विनाशः स्याद् यावत्त्वेन विनिर्णयः ॥४४॥
इतिन्यायात् पापसंज्ञः सुतः पित्रे न्यवेदयत् ।
यत्र गर्भे गते बाले नाऽधर्मो न च हिंसनम् ॥४५॥
ताभ्यां विना मया तत्र कथं स्थेयं तदात्मनि ।
अधर्मस्तं च पापाख्यं सुतं प्राह विचार्य वै ॥४६॥
पुत्राऽऽगच्छ मया साकं चार्थयामि पितामहम् ।
स तदा ते निवासार्थं यद् ददेत् तत्र संवस ॥४७॥
इत्युक्त्वा तं सुतं नीत्वा सहाऽधर्मो ह्यजं ययौ ।
पितरं च नमस्कृत्य निषसाद पुरस्ततः ॥४८॥
ब्रह्मा पप्रच्छ तं पुत्रं सपुत्रं चागमे कृतिम् ।
कथं किमर्थमायातः सपुत्रो वद मेऽचिरम् ॥४९॥
अधर्मः प्राह भगवन् पुत्रोऽयं पापसंज्ञकः ।
यत्र हिंसा तथा चाऽहं तत्र वासपरः सदा ॥५०॥
गर्भस्थानां तु जीवानां विद्येते न तु तावुभौ ।
तत्र तेषां पूर्वपापैः कथं स्थेयं वदाऽत्र मे ॥५१॥
ब्रह्मा विचार्य च तथा प्राह गर्भगतस्य वै ।
केशरूपेण पापेन स्थातव्यं वै ममाऽऽज्ञया ॥५२॥
ततः पापः परां तुष्टिं जगाम स्वाश्रये स्थितः ।
विनापि पितरौ तत्र वर्षत्रयं प्रतिष्ठिते ॥५३॥
अथ ब्रह्मा स्वसंकल्पान् पुत्रान् षोडश पावनान् ।
संस्कारान् जनयामास पापनाशनहेतवे ॥५४॥
तत्र चौलश्च संस्कारः केशात्माऽघविनाशनः ।
विहितश्चैवमेवाऽन्ये पापनाशकराः कृताः ॥५५॥
इत्येवं राधिके सृष्टिपालनाय तु वेधसा ।
पूर्वसृष्ट्यनुरूपेणाऽनुष्ठितं वर्णितं तथा ॥५६॥

तथारीत्यैव लोकानां शिक्षणार्थं हरेरपि ।
पित्रा चौलाख्यसंस्कारः सम्पादितः शुभावहः ॥५७॥
अथ तत्र चमत्कारस्तदा जातो वदामि ते ।
अदृष्टश्चाऽप्यश्रुतश्च पूर्वैः पूर्वतरैस्तथा ॥५८॥
मया गतवता राधे तदानीं तत्र वीक्षितः ।
नापितेन तु ये केशा मस्तकादवतारिताः ॥५९॥
ते सर्वेऽश्वपट्टसरोजले क्षिप्ता यदा तदा ।
दिव्याः सहस्रशो नारायणाश्चतुर्भुजाः शुभाः ॥६०॥
शंखचक्रगदापद्मधरा मुकुटशोभिताः ।
सुवर्णकुण्डला वह्निवस्त्रा रमानिषेविताः ॥६१॥
विनतातनुजाऽऽरूढाः कोटिसूर्यसमप्रभाः ।
सकौस्तुभाः सतिलका भगवन्तो विरेजिरे ॥६२॥
सर्वे समानाः सदृशास्तेऽदृश्यन्त तदा ततः ।
अष्टभुजास्तत एव ततः षोडशबाहवः ॥६३॥
द्वात्रिंशद्बाहवः पश्चाच्छतसाहस्रबाहवः ।
सहस्रशो दिव्यरूपा अदृश्यन्त नरायणाः ॥६४॥
एवं लक्षं शिरोरोम्णां नारायणात्मकं हि तत् ।
अदृश्यत तदा ह्रस्वाः केशाश्चतुर्भुजा हि ते ॥६५॥
अदृश्यन्त ततो लम्बा अष्टभुजा नरायणाः ।
ततो लम्बतराः केशा ये ते षोडशबाहवः ॥६६॥
ततो लम्बतमाः केशा द्वात्रिंशद्बाहवो हि ते ।
एवं दीर्घातिदीर्घाश्च केशाः शतादिबाहवः ॥६७॥
सहस्रबाहवश्चेति व्यदृश्यन्त नरायणाः ।
तैः सह याः श्रियस्ताश्च व्यदृश्यन्त तथाभुजाः ॥६८॥
युगलास्ते लक्षसंख्यास्तुष्टुवुः परमेश्वरम् ।
तव मूर्तौ स्थिता नारायणा वयं शिरोरुहाः ॥६९॥
अनादिश्रीकृष्णनारायणः परेश्वरो भवान् ।
अप्रसंख्यावताराणामवतारी परात्परः ॥७०॥
वयं लीनास्तव मूर्तौ वसामस्तव वाञ्छया ।
निर्गच्छामश्च वै काले काले ब्रह्माण्डरक्षकाः ॥७१॥
भवामो भगवन्तश्च यावत्तव निदेशनम् ।
लयेच्छया च ते कृष्ण ह्युपसंहारमाप्नुमः ॥७२॥
पूजयामो नमामस्त्वां वहामस्ते निदेशनम् ।
पृथग् जाता वयं कृष्ण तव मूर्तितः प्रभो ॥७३॥
क्व गन्तव्यं चोषितव्यमस्माभिर्देहि देशनाम् ।
तथा कुर्मो हरे कृष्णनारायणाऽक्षराधिप ॥७४॥
तव मूर्तौ च ये त्वन्ये ह्यपि रोमगणा हि ते ।
अनादिनो हि ते मुक्तास्तथा चागन्तुका अपि ॥७५॥
मुक्ता भवन्ति मुक्तान्यो ब्रह्माण्यो ब्रह्मपूरुषाः ।
तव मूर्तौ च ये दिव्या गुणा वसन्ति ते हरे ॥७६॥
सर्वे च विष्णवः सन्ति लक्ष्मीदासीनिषेविताः ।
तव मूर्तौ च ये भूषाः सन्ति ते तव शक्तयः ॥७७॥
राधारमाजयालक्ष्मीपार्वतीललिताप्रभाः ।
माणिकीमञ्जुलाद्यास्ताः प्रेमरूपा वसन्ति हि ॥७८॥
आभूषणस्वरूपास्ता मुक्ता मुक्तान्य एव ह ।
तव शृंगारतत्त्वानि वासुदेवादयश्च ते ॥७९॥
व्यूहाः सन्ति हरे कृष्ण नखाद्या ईश्वरेश्वराः ।
त्वदभिन्ना अवतार्यपृथगसिद्धविशेषणाः ॥८०॥
तव मूर्त्यात्मकाः सर्वे निगूढा निवसन्ति ते ।
वयं केशस्वरूपास्ते पृथग्भूतास्तवेच्छया ॥८१॥
चौलसंस्कारमासाद्य तेऽवतारस्वरूपिणः ।
तत आज्ञां निवासाय देहि नः कुर्महे तथा ॥८२॥
अनादिश्रीकृष्णनारायणश्चैवं प्रभाषितः ।
प्रार्थितश्चाज्ञयाऽर्थे च प्रसन्नस्तान्निजान्तिके ॥८३॥
समाहूय च तिलकान् बिन्दून् कुंकुमकेसरान् ।
तेषां भालेषु कृत्वैव समुवाचाऽक्षरेशिता ॥८४॥
यूयं ममाऽवताराश्च ममैश्वर्यभराः शुभाः ।
निबोधत मया नित्यमुत्पाद्यन्तेऽण्डराशयः ॥८५॥
अद्योत्पादितगोलेषु लक्षेषु चैकदेशिषु ।
यात मदाज्ञया तत्र भवत श्रीनरायणाः ॥८६॥
चतुर्दशतलाण्डेषु तथा यात चतुर्भुजाः ।
अष्टाविंशतिभूगोलेषु तथा याताऽष्टबाहवः ॥८७॥
षट्पञ्चाशास्तराण्डेषु यात षोडशबाहवः ।
शताष्टभूमिकाण्डेषु यात द्वात्रिंशबाहवः ॥८८॥
शतादिबाहवो यात पञ्चशतस्तराण्डके ।
सहस्रबाहवो यात सहस्रभूमिकाण्डके ॥८९॥
एकैकाण्डे मया चैकैक एवाऽत्राऽधिक्रियते ।
तथा तथा नवं नूत्नं ब्रह्माण्डं यात चैकशः ॥९०॥
पश्यत स्वकरेदक्षे यस्य यद् दृश्यतेऽण्डकम् ।
स च तत्तद् विशत्वेव मम योगप्रतापतः ॥९१॥
इत्युक्तास्ते ययुर्नत्वा श्रीनारायणमूर्तयः ।
स्वस्वब्रह्माण्डमालोक्य यावदायुर्विशश्रमुः ॥९२॥
तेषु गतेषु सर्वेषु लोमशः प्राह केशवम् ।
मह्यं दर्शय तान्येव ब्रह्माण्डानि च येषु ते ॥९३॥
श्रुत्वा विहस्य च हरिर्लोमशं नेत्रयोस्तदा ।
अंगुल्या जलयोगेनाऽस्पृशद् दिव्योऽभवत्तदा ॥९४॥

दिव्यनेत्रो ददर्शैतानवतारांश्च गोलकान् ।
परमाश्चर्यमापन्नो महिमानं विवेद ह ॥९५॥
अनादिश्रीकृष्णनारायणस्य यादृशं ततः ।
चौलाख्यसंस्कारविधेः परिहारं चकार सः ॥९६॥
दत्वा दानानि बहूनि प्रासादं हरिराययौ ।
पिता माता चमत्कारं दृष्ट्वोपाययतुर्मुदम् ॥९७॥
लोमशः कन्यकावृन्दसहितश्चाश्रमं ययौ ।
इत्येवं कथितं राधेऽनादिकृष्णस्य चेष्टितम् ॥९८॥
अगम्यं सर्वथा लोकैर्दिव्यानुग्रहवेद्यकम् ।
पठनाच्छ्रवणाच्चापि भुक्तिमुक्तिप्रदायकम् ॥९९॥
पशुपुत्रप्रदं धान्यधनदं पापनाशकम् ।
कृष्णभक्तिप्रदं नारायणपदप्रदं तथा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीबालकृष्णस्य प्रभोश्चौलसंस्कारे रोमसु पापानां कथानकं हरेः रोम्णां तु नारायणरूपतेत्यादिनिरूपणनामा चतुर्विंशतितमोऽध्यायः ॥ २४ ॥

श्रीकृष्ण उवाच—

शृणु राधे कृष्णनारायणकथां प्रपावनीम् ।
तृतीयवर्षे सञ्जातां फाल्गुने प्रतिपत्तिथौ ॥ १ ॥
फाल्गुनस्य शुक्लपक्षे पुष्पदोलमहोत्सवम् ।
चकार कुंकुमवापीक्षेत्रे गोपालकृष्णकः ॥ २ ॥
वसन्ते तत्र सम्प्राप्ते किंशुका ज्वलनप्रभाः ।
निष्पत्राः सततं रेजुः शोभयन्तो धरातलम् ॥ ३ ॥
शिशिरं नाम मातंगं विदार्य नखरैरिव ।
वसन्तकेसरी प्राप्तः पलाशकुसुमैः प्रिये ॥ ४ ॥
कुन्दा हसन्ति सततं कलिकादन्तकैस्तदा ।
वनानि कर्णिकाराणां पुष्पितानि विरेजिरे ॥ ५ ॥
रक्ताऽशोकवना भान्ति पुष्पिताः सहस्रोज्ज्वलाः ।
भृङ्गवृन्दाः पिञ्जरिता राजन्ते गहने वने ॥ ६ ॥
मञ्जरीभिर्विराजन्ते नदीकूलेषु वेतसाः ।
रक्ताऽशोककरा तन्वी राधिके किंशुकांऽघ्रिका ॥ ७ ॥
नीलाशोककरा श्यामा विकासिकमलानना ।
नीलेन्दीवरनेत्रा च मध्यबिल्वफलस्तनी ॥ ८ ॥
प्रोत्फुल्लकुन्ददशना मञ्जरीकरशोभिता ।
बन्धुजीवाधरा शुभ्रसिन्दुवारनखाङ्कुरा ॥ ९ ॥
पुंस्कोकिलस्वना दिव्या कंकोलवसना शुभा ।
बर्हिवृन्दकलापा च सारसस्वरनूपुरा ॥१०॥
प्राग्वंशरशना रम्या मत्तहंसगतिस्तथा ।
पुत्रजीवांशुकासङ्गरोमराजिविराजिता ॥११॥
वसन्तलक्ष्मीः सम्प्राप्ता चाश्वपट्टसरस्तटे ।
पद्मानि जलचक्षूंषि पश्यन्ति प्रेमवन्ति च ॥१२॥
तरंगा जलहस्ताश्चाऽऽह्वयन्ति स्नायिनो मुहुः ।
जलस्य गर्जनाहास्यं वेदयन्ति प्रमोदनम् ॥१३॥
शुकाः पार्श्वचराः कृष्णागमं चावेदयन्ति च ।
शीतशीकरपवनाश्चाकर्षयन्ति मानसम् ॥१४॥
जलहंसास्तारकाढ्यां निमन्त्रयन्ति ग्रामपि ।
मत्स्याश्च रोहिणाः साधून् स्मारयन्ति जलप्लुतान् ॥१५॥
टिट्टिभध्वानमेवात्र बालान् स्नानाभिलाषुकान् ।
करोति रञ्जयत्यपि नृत्यं मायूरमुत्तमम् ॥१६॥
कोकिलाः पुष्पशाखासु कूजनेन मुहुर्हरिम् ।
स्नानार्थं चाह्वयन्तीव प्राप्ते वसन्तयौवने ॥१७॥
एवंविधं प्रसन्नं च वनं विकसितं च तत् ।
विलोक्य ब्राह्मणाः सर्वे चाश्वपट्टसरस्तटे ॥१८॥
सहस्रशस्तदा बाला बालिकाश्च स्त्रियस्तथा ।
पुष्पदोलोत्सवं कर्तुं ययुश्चोत्सुकमानसाः ॥१९॥
कदम्बानां च शाखासु दोला बद्ध्वा सुखावहाः ।
आन्दोलयन्ति बालांश्च बालिकाः कन्यकादिकाः ॥२०॥
केसरैश्च तथा पालाशकैः पीतैश्च रक्तकैः ।
हरितैः कपिशै रंगैर्भृत्वा गर्गरिकादिकाः ॥२१॥
रंगैः संरेमिरे सेतौ नरा नार्यो वसन्तके ।
धूलीक्षेपैर्जलक्षेपै रंगक्षेपैर्गुलालकैः ॥२२॥
कुंकुमै रक्तचूर्णैश्च रेमिरे सरसस्तटे ।
प्रातः परस्परं धृत्वा प्रसह्य विनिपात्य च ॥२३॥
गर्गरीरंगसलिलं सिञ्चन्त्यभीक्ष्णमुत्सुकाः ।
सरसो मृत्तिकां पुण्यां लेपयन्ति मुखादिषु ॥२४॥
जलधाराः प्रसिञ्चन्ति शिरस्युपरि यन्त्रकैः ।
पुष्पगुच्छान् कर्णयोश्च धृत्वा नृत्यन्ति केचन ॥२५॥
प्रगायन्ति कृष्णगीतीः काश्चन मोदसंभृताः ।
अन्ये कर्दमितं देहं वेषं प्रक्षालयन्ति च ॥२६॥
विधुन्वन्ति शिरःकेशान् रजोधूलितधूसरान् ।
प्रमृजन्ति नेत्रधूलीः प्रविशन्ति सरोजले ॥२७॥
तरन्ति नैकतरणैः सम्भूय स्नान्ति वारिषु ।
वस्त्राणि रंगरक्तानि क्षालयन्ति नराः स्त्रियः ॥२८॥
स्तबकानां निकुञ्जेषु रमन्ते बालबालिकाः ।
नरा नार्यः स्वयूथेषु रमन्ते वर्षयन्ति च ॥२९॥

वाद्यानि वादयित्वा च वसन्तं प्रार्चयन्त्यपि ।
प्रतिमां कानकीं कृत्वा पीताम्बरविभूषिताम् ॥३०॥
रक्तपुष्पैरञ्चितां च सकलिंगमुकुटान्विताम् ।
रशनामञ्जीरयुतां सकञ्चुकां सुशोभनाम् ॥३१॥
किशोरभावमापन्नां सकटाक्षां मनोहराम् ।
पुष्परथस्थितां सौम्यां मञ्जरीकृतशेखराम् ॥३२॥
गुच्छस्तबककर्णाढ्यां सुगन्धद्रवचर्चिताम् ।
केशजूटलसत्स्कन्धां स्वर्णछत्रविराजिताम् ॥३३॥
नद्धसूर्यमणिप्रान्तमध्यचन्द्रोत्तरीयकाम् ।
हीररत्नसुमौक्तिकाऽञ्चितमुकुटशोभिताम् ॥३४॥
पुष्पोत्तंसां पुष्पकटिं पुष्पावरणसंभृताम् ।
कदम्बपुष्पमालाढ्यां चाम्पकेयललाटिकाम् ॥३५॥
कर्णिकारप्रकोष्ठां च पालाशबाहुशोभिताम् ।
जपापुष्पौष्ठललितामैन्दीवारश्मश्रूलिकाम् ॥३६॥
चित्रकुसुमनेत्रान्तां कुन्ददन्तविराजिताम् ।
तिलपुष्पसुनासाढ्यां कादम्बगण्डमण्डिताम् ॥३७॥
कदलीपुष्पमालाढ्यां कदलीस्तम्भसक्थिनीम् ।
काल्हारजघनभ्रामां कामळाभसुनाभिकाम् ॥३८॥
हस्तिशुण्डसमजङ्घां पद्मपादतलान्विताम् ।
चन्द्रसूक्ष्माकृतिनखां पाण्डुरां मन्दहासिनीम् ॥३९॥
मूर्तिं वसन्तदेवस्य पुपूजुः सर्वमानवाः ।
सुपुष्पैः कुंकुमाद्यैश्च सस्यशुकैः सुशिम्रुभिः ॥४०॥
कुंकुमाऽबिलचूर्णैश्च गुलालैर्विमलद्युभिः ।
मञ्जरीभिः रक्तपत्रैः फलैर्विविधकैस्तथा ॥४१॥
दुग्धपाकैः सुद्रवैश्च पुपूजुः श्रीवसन्तकम् ।
रंगैर्बहुविधैश्चापि संस्नाप्य श्रीवसन्तकम् ॥४२॥
वासन्तिकैरम्बराद्यैर्भूषाभिः पुष्पपट्टकैः ।
पुष्पहारैश्च पुपूजुर्वसन्तं कलिकापतिम् ॥४३॥
मञ्जरीपल्लवानाथं चांकुराधिपतिं प्रभुम् ।
पुष्पाधिपं नालिकेशं काण्डिकाधिपतिम् ऋतुम् ॥४४॥
शाद्वलेशं सुकिशोरं पुपूजुः सरसस्तटे ।
बसन्तस्य प्रियाश्चान्याः कोकिलां हंसिकां तथा ॥४५॥
सारसीं सुमनां मेनां मायूरिकां च भासिकाम् ।
शुकीं च गारुडीं चैव पुपूजुः षोडशप्रियाः ॥४६॥
सर्वा लक्ष्मीस्वरूपास्ता विचित्ररंगशोभनाः ।
कन्यकाः काञ्चनभासाश्चन्द्रकान्तिभराननाः ॥४७॥
श्वेताम्बराः पिंगवस्त्रा हरिताम्बरधारिकाः ।
कपिशाम्बरयुक्ताश्च चित्राम्बरधरास्तथा ॥४८॥
कानकाभाम्बरधराः कपिशाम्बरधारिकाः ।
नीलाम्बराः पयोवस्त्राः कर्बुराम्बराधिकाः ॥४९॥
कैसराम्बरयुक्ताश्च पाण्डुराम्बधारिकाः ।
यावच्छृंगारशोभाश्चाऽऽनर्चुर्वसन्तयोषितः ॥५०॥
चन्दनागुरुकस्तूरीकुंकुमाक्षतवारिभिः ।
दुग्धपाकादिभिश्चापि ताम्बूलकैरपूजयन् ॥५१॥
अथ श्रीभगवाँस्तत्राऽनादिकृष्णनरायणः ।
कैशोररूपमास्थाय चाश्वपट्टसरस्तटे ॥५२॥
दोलायां श्रीवसन्ताख्यं षोडशाऽऽर्यायुतम् ऋतुम् ।
संस्थापयित्वा विविधैरुपचारैरपूजयत् ॥५३॥
आरार्त्रिकं च कृतवान् ततस्तत्र वसन्तकः ।
भार्याषोडशयुक्तः सः प्रत्यक्षो ह्यभवत्तदा ॥५४॥
यथावर्णितरूपश्च जगाद पूजकं प्रभुम् ।
अनादिश्रीकृष्णनारायणं कान्तं मनोहरम् ॥५५॥
परमेश्वर पूजां मे लौकिकीं रीतिमाश्रितः ।
करोषि सर्वदेवाद्यैः पूज्यस्त्वं पुरुषोत्तमः ॥५६॥
अद्याऽहं पावनो जातः सस्त्रीकस्तव सेवकः ।
त्वामर्चयितुमिच्छामि निषीद त्वं वरासने ॥५७॥
इत्युक्त्वा श्रीवसन्तश्च सप्रियो हि निजासनात् ।
अवतीर्य भुवि स्थित्वा स्वामिनं पुरुषोत्तमम् ॥५८॥
दोलायां प्रसमारोप्य पूजयामास भावतः ।
षोडशवस्तुभिः सर्वभार्याभिः सहितः ऋतुः ॥५९॥
आनर्च श्रीहरिं तत्र कैशोरं रूपमास्थितम् ।
रूपानुरूपावयवं विलोक्य पुरुषोत्तमम् ॥६०॥
मुमुहुर्दिव्यरूपे ते वसन्ताद्या जनास्तथा ।
वसन्तयोषितः सर्वा मुग्धा बभूवुरीश्वरे ॥६१॥
ऋषयः ऋषिपत्न्यश्च मुमुहुः परमेश्वरे ।
एवं क्षणं च निश्चेष्टाः स्तब्धाः समभवन् सुखाः ॥६२॥
श्रीकृष्णस्य कटाक्षेण हास्यप्रसन्नताभृता ।
अथ क्षणान्ते बुबुधुर्नैजात्मानं च ते तदा ॥६३॥
तुष्टुवुः श्रीहरिं कान्तं परमेश्वरमिष्टदम् ।
त्वमेव भगवानास्से सर्वलोकेश्वरेश्वरः ॥६४॥
सर्वैश्वर्ययुतः साक्षादनादिपुरुषोत्तमः ।
देहि पदं सदा नाथ सेवार्थे चरणं तव ॥६५॥
विना त्वां सर्वमेवास्ति निष्फलं सुखवर्जितम् ।
इत्युक्त्वा च जना नार्यो निपेतुश्चरणे हरेः ॥६६॥
हरिः प्राह तथास्त्वेवं भविष्यति न संशयः ।
ततः पुनश्चमत्कारं दर्शयामास केशवः ॥६७॥

वसन्तदेहे नैजं चाभिव्याप्तं रूपमैश्वरम् ।
सर्ववसन्तकान्ताभिर्दृश्यते श्रीहरिः स्वयम् ॥६८॥
वसन्ते स्वामिनि नाथे कृष्णनारायणः प्रभुः ।
तदा मुमुहुस्तं दृष्ट्वा कलिकाद्याः पतिं प्रभुम् ॥६९॥
वरयामासुरेवैनं किशोरं पुरुषोत्तमम् ।
प्रियाः षोडश एवैताः पुपूजुस्तुष्टुवुः पुनः ॥७०॥
मालाः समर्पयामासुर्विदधुश्चन्द्रकं ततः ।
आत्मार्पणं हरिर्ज्ञात्वा मानसेष्टं सुभावितम् ॥७१॥
तथास्त्विति हरिः प्राह किशोररूपधृक् प्रभुः ।
षोडशकन्यकानां श्रीप्रभुश्चैवाऽकरोत्तदा ॥७२॥
रूपद्वयं तु प्रत्येकं दिव्यं चाऽदिव्यमित्यदः ।
अदिव्यं देवतुल्यं यत् षोडशं रूपमेव तत् ॥७३॥
वसन्ताय ददौ चाथ दिव्यं षोडशरूपकम् ।
कन्यकानां सुरूपं तत् निजप्रियास्वरक्षयत् ॥७४॥
लोमशाय ददौ तत्राश्रमे कन्यासु कोटिषु ।
निवासार्थं ततः कृष्णो बालरूपो बभूव च ॥७५॥
रंगक्लिन्नं हरिं स्नापयितुं माता सरस्तटे ।
ययौ तावन्महादैत्यो मीनरूपो जलस्थितः ॥७६॥
जग्राह बालकं कृष्णं त्रिंशद्धस्तप्रमाणवान् ।
माताऽत्र विह्वला जाता पुत्रनाशाऽभिशंकया ॥७७॥

**श्रीराधिकोवाच—**

कोऽसौ कृष्ण ! महामीनो दैत्यराट् तत्र चागतः ।
योऽनादिश्रीकृष्णनारायणं भक्षयितुं स्थितः ॥७८॥

**श्रीकृष्ण उवाच—**

सालमालो महादैत्यो हिरण्यकूर्चचर्मजः ।
सालेमालवने तिष्ठन्नासील्लोकभयंकरः ॥७९॥
सौराष्ट्रपूर्वदिग्भागे वन्यभक्ष्यो महासुरः ।
सप्ततालोच्छ्रयश्चैकतालायतोऽद्रिशृंगवत् ॥८०॥
गदामुद्गरधारी च पितृवैरं स्मरन्नटन् ।
अश्वपट्टसरोमध्ये तिमिरूपोऽभवत्तदा ॥८१॥
कामरूपधरो दैत्यस्त्रिंशद्धस्ततिमिः स वै ।
पुच्छेन प्रचकर्षैनं बालं स्नान्तं तटे तदा ॥८२॥
मातृपार्श्वे च सोपाने स्थितं रम्यं मनोहरम् ।
बालो ज्ञात्वा कृपावार्धिरासुरं दमनोचितम् ॥८३॥
हन्तुं समागतं शीघ्रं नयन्तं च जले तलम् ।
बालकृष्णस्तदा द्वेधाऽभवद् बालश्च नक्रकः ॥८४॥
बालो भूत्वा द्रुतं सरस्तटे सोपानमास्थितः ।
नक्रो भूत्वा जलमध्ये पञ्चाशद्धस्तमानवान् ॥८५॥
महामत्स्यं ग्रसितुं वै शीघ्रं पृष्ठे बभूव सः ।
मरणस्य भयान्मत्स्यो दुद्राव जलभूतलम् ॥८६॥
नक्रो जग्राह तं मत्स्यं मत्स्यरूपं विहाय सः ।
सालेमालो महादैत्यो नरो भूत्वा गदाकरः ॥८७॥
नक्रं जघान तरसा नक्रस्तावल्लयं गतः ।
गदाधारी तु पुरुषः सप्ततालोऽपि सोऽभवत् ॥८८॥
सालेमालस्य च नारायणस्य समरो महान् ।
बलातिबलिनोस्तत्र गदाभ्यां समजायत ॥८९॥
सालेन तु हरेर्मूर्ध्नि ताडिता बलतो गदा ।
बभंज शतखण्डा सा हरिर्वज्रदृढस्तदा ॥९०॥
प्रतिजघान तं दैत्यं गदयैव महाप्रभुः ।
वक्षस्येव हतः शीघ्रं निपपात विमूर्छितः ॥९१॥
पुनरुत्थाय च नैजं मुद्गरं प्राहिणोद् बलात् ।
गदया हरिणा तत्तु मुष्टिदण्डे प्रभञ्जितम् ॥९२॥
अशस्त्रः सालमालोऽसौ खमुत्पपात शृंगवत् ।
मुद्गलाग्रं समादाय पातयामास के हरेः ॥९३॥
भगवाँश्च स्वगदया पोथयामास मुद्गरम् ।
सुदर्शनं मुमोचैनं नाशयितुं महाप्रभुः ॥९४॥
शतसूर्यसमं वह्निज्वालामालाकुलं भ्रमत् ।
शीघ्रं न्यपतत् शालस्य मूर्ध्नि चकर्त तच्छिरः ॥९५॥
हाहाकारोऽभवत्तत्र प्रसन्नाः सर्वदेवताः ।
सालेमालो मृतश्चायं क्रोशदेहप्रमाणवान् ॥९६॥
न्यपतद् भूतले वृक्षान् नाशयन् कम्पयन् महीम् ।
आत्मा तस्य हरेश्चक्रयोगेन मुक्ततां गतः ॥९७॥
विमानेन सुदिव्येन वैकुण्ठं प्राप सालकः ।
गरुडस्तस्य देहन्तु चाश्वपट्टसरोवरात् ॥९८॥
पद्भ्यां धृत्वा निनायैनमत्यजद् व्योममार्गतः ।
यशोदानोत्तरं शैले सालेमालाह्वये वने ॥९९॥
तत्र ये दैत्यवर्याः संवर्तन्ते तस्य जातिजाः ।
प्रापुः शोकं परं तस्य नार्योऽपि शतमित्यपि ॥१००॥
रुरुदुर्वै भृशं व्योम्नः पतितं वीक्ष्य वल्लभम् ।
और्ध्वदैहिकमेवाऽस्य चक्रुर्जात्यनुसारतः ॥१०१॥
पञ्चशतानि दैत्यानां शतं च तस्य योषिताम् ।
सहस्रं चापि पुत्राणां सुखं न लेभिरे शुचा ॥१०२॥
सततं चिन्तयामासुस्ते सर्वे वैरयापनम् ।
अथाऽत्र भगवान् बालो भूत्वाऽश्वपट्टसन्निधौ ॥१०३॥

पुष्पदोलोत्सवं कृत्वा पितृभ्यां गृहमाययौ ।
कन्यकाः श्रीलोमशस्याश्रमं ययुस्तदाज्ञया ॥१०४॥
ऋषयस्तल्ललनाश्च स्वस्वालयान् ययुस्ततः ।
पिता हरेः करे रक्षासूत्रं बबन्ध चौर्णकम् ॥१०५॥
एवं दोलोत्सवे नारायणेन परमात्मना ।
राधिके दर्शितश्चमत्कारो दैत्यो निषूदितः ॥१०६॥
पठनाच्छ्रवणाद्वापि सर्वसौभाग्यमाप्नुयात् ।
नरो नारी कन्यका वा बालो यतिर्युवाऽपि वा ॥१०७॥
प्राप्नुयात् परमं धाम श्रुत्वा भावेन तत्कथाम् ।
कृपासाध्यहरेः राधे पारवतीशिशुः प्रिये ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वसन्तविकासः, पुष्पदोलोत्सवः तिमिंगिलरूपसालमालासुरस्य हरिर्नाशार्थमागतस्य हरिकृतनाशश्चेत्यादिनिरूपणनामा पञ्चविंशतितमोऽध्यायः ॥ २५ ॥

**श्रीकृष्ण उवाच—**

आकर्णय वृषभानुसुते चमत्कृतिं हरेः ।
अन्यां तृतीयवर्षोत्थां कथयामि सुखप्रदाम् ॥ १ ॥
श्रावण्यां ब्राह्मणाः सर्वे कुंकुमवापिकाश्रयाः ।
अश्वपट्टसरस्तीरे ब्रह्मसूत्रक्रतूत्सवे ॥ २ ॥
मिलिता ब्रह्मसूत्रस्य नव संस्कारशुद्धये ।
सहस्रशस्ते ऋषयो लोमशाद्याः सदर्भकाः ॥ ३ ॥
सपात्रा हव्यकव्यादिसहिता देहशोधनम् ।
संचक्रुः पञ्चगव्याद्यैः स्नानैः पितृप्रतर्पणम् ॥ ४ ॥
देवानां पूजनं चापि चक्रुश्च हवनादिकम् ।
नवं यज्ञोपवीतं च धारयामासुरुज्ज्वलम् ॥ ५ ॥
तन्निमित्तं महारुद्रं विष्णुयज्ञं च नैत्यकम् ।
चक्रुर्महोत्सवं तीरे गीतवाद्यप्रनर्तनैः ॥ ६ ॥
लक्ष्मीनारायणसंहितायाः कथोपदेशनैः ।
आन्धसिकाः सरस्तीरे वटाऽधस्तान्महानसे ॥ ७ ॥
चूर्णमौक्तिकलड्डुकान् पूरिकाऽपूपपायसान् ।
श्रीखण्डक्वथिकाफुल्लवटीव्यञ्जनभाजिकाः ॥ ८ ॥
सूपोदनानि च तथा मिष्टतिक्तद्रवाणि च ।
राजिकाराद्धचटनीश्चारनालानि पोलिकाः ॥ ९ ॥
पाचयामासुरत्यर्थं कोट्यर्बुदद्विजार्थकम् ।
पक्वान्नानां पर्वताश्च घृतानां पयसां ह्रदा ॥१०॥
तक्राणां सरितश्चापि पायसानां सरांसि च ।
कृतानि करितान्येव कल्पवृक्षैर्महर्षिभिः ॥११॥

मध्याह्ने हवने तत्र प्रवर्तिते मखानले ।
तावद् व्योम्नः समायातं सैन्यं दैत्यजनात्मकम् ॥१२॥
क्रोशमात्रं तु तद् दूरमभवद् यज्ञभूमितः ।
तावदाक्रोशनं तेषां श्रुत्वा वै लोमशो मुनिः ॥१३॥
शीघ्रं चालोकयामास दिव्यदृष्ट्या तु दानवान् ।
दानवीभिः सहितांश्च धृतशस्त्राऽस्त्रबन्धनान् ॥१४॥
सालमालस्य तु वैरनिर्यातनार्थमेव तान् ।
समागतान् महाक्रूरान् योद्धुकामानवस्थितान् ॥१५॥
एषः प्रदेशः शत्रोर्नः कृष्णसौधोऽयमेव च ।
द्विजाग्र्यो लोमशश्चायं घ्नन्तु तान्मारयन्तु च ॥१६॥
अनेन बालकृष्णेन मारितोऽस्मत्पिता प्रभुः ।
मर्दयन्तु बालकृष्णं तत्पितरौ च लोमशम् ॥१७॥
एष आश्रमग्रामश्च ब्राह्मणानां द्रुमेष्वपि ।
भिद्यतां छिद्यतां प्रज्वाल्यतां विनाश्यतां क्षणात् ॥१८॥
सालपुत्राः सहस्रं च भृत्या नार्यश्च दासिकाः ।
बान्धवाः सालमालस्य निपेतुः सरसस्तटे ॥१९॥
अन्ये चाकाशमार्गेण समापतन्ति वेगतः ।
कन्यका दैत्यपत्न्यश्च बाला वृद्धाः सुयौवनाः ॥२०॥
यावद्यज्ञक्षितिं नैते चायातास्तावदेव च ।
लोमशः स्तंभयामास त्वाथर्वणैर्विहायसि ॥२१॥
तटस्थान् तटपार्श्वे च स्तम्भयामास तत्क्षणात् ।
पक्वान्नानि तथा यज्ञो यथा गच्छेन्न भ्रष्टताम् ॥२२॥
तथा वै लोमशः कृत्वा सस्मार श्रीपतिं प्रभुम् ।
बालकृष्णः किशोरः सन्नुपाययौ क्षणात् क्रतुम् ॥२३॥
विप्रैः सम्मानितः कृष्णोऽर्चितः सुदर्शनान्वितः ।
प्रार्थितः सगरुडश्च दैत्याऽनीकनिवारणे ॥२४॥
शीघ्रं नत्वा ऋषिभ्यश्च शंखचक्रगदाधरः ।
आरुह्य गरुडं शीघ्रं व्योममार्गे जगाम ह ॥२५॥
सैन्यस्य सन्निधौ गत्वा दध्मौ शंखं हरिः स्वयम् ।
लोमशश्चाथर्वमन्त्रान् वारयामास तावता ॥२६॥
सैन्यं सचेतनं योद्धुं न्यपतत् श्रीहरिं प्रति ।
गदया श्रीहरिः सैन्यं पोथयामास सर्वतः ॥२७॥
पक्षाभ्यां च नखाभ्यां च चञ्च्वा च गरुडस्तदा ।
ताडयामास बहुधा पातयामास भूतले ॥२८॥
द्रावयामास शेषाँश्च रक्षयामास योषितः ।
अथ विद्राविता दैत्या धृत्वा शिला द्रुमाँस्तथा ॥२९॥
प्रत्यावृत्य निजघ्नुश्च श्रीकृष्णं पुरुषोत्तमम् ।
ततः सुदर्शनं चक्रं मुमोच भगवान् स्वयम् ॥३०॥

कर्तयामास तान् सर्वानसुरान् साल्वंशजान् ।
तेषां तेजांसि च हरौ समागत्य विशश्रमुः ॥३१॥
नार्यस्तेषां कन्यकाश्च तुष्टुवुः परमेश्वरम् ।
वंशवटे स्थिताः सर्वा वव्रुश्च वरदानकम् ॥३२॥
एतेषां कृष्ण दैत्यानां मोक्षं कुरु तथा च नः ।
रक्ष रक्ष कृपासिन्धो शरणं ते प्रदेहि नः ॥३३॥
अनादिश्रीकृष्णनारायणः श्रीगरुडस्थितः ।
चक्रस्य तेजसा तासां पापान्यदाहयत्तदा ॥३४॥
कायाकल्पान् विधायैव दिव्यरूपधराश्च ताः ।
शरण्यो भगवाँस्ताभ्यः शरणं स्वं ददौ मुदा ॥३५॥
लोमशस्याऽऽश्रमे स्थातुं नियुयोज परेश्वरः ।
लोमशस्ता जलेनापि संप्रोक्ष्याऽऽप्लाव्य वारिभिः ॥३६॥
पञ्चगव्येन च शुद्धिं कारयित्वा ततः परम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥३७॥
दत्वा मन्त्रं च तुलसीस्रजं च तिलकादिकम् ।
ताः सर्वा दीक्षयामास वैष्णवीः प्रचकार ह ॥३८॥
ततस्ता भोजयामास शतं पञ्चशतानि च ।
मातृश्च कन्यकाश्चापि प्रेषयामास चाश्रमम् ॥३९॥
लोमशाद्या ऋषयश्च कृत्वा क्रतुविधिं ततः ।
यज्ञसूत्राणि सन्धृत्वाऽन्तिमं होमं विधाय च ॥४०॥
भोजयामासुरत्यर्थं कन्यकाः कोटिसंख्यकाः ।
कुटुम्बिनस्तथाऽतिथीन् भोजयामासुरैश्वराः ॥४१॥
ददुर्दानानि च तथोत्तमानि विविधानि च ।
गोक्षेत्रारण्यरत्नानि वस्त्रभूषागृहाणि च ॥४२॥
सोपस्कराणि यानानि वाहनाऽन्नजलान्यपि ।
एवं दानानि दत्वैव यज्ञकार्यं समाप्य च ॥४३॥
वदन्तः परमाश्चर्यं स्वस्वगृहं ययुर्मुदा ।
गोपालकृष्णकश्चापि बालकृष्णयुतस्ततः ॥४४॥
निजालयं ययौ पक्षी वैकुण्ठं प्रययौ ततः ।
लोमशाद्या ययुर्नैजाश्रमान् सुखान्वितास्तदा ॥४५॥
एवं वै राधिके सालेमालीया दैत्यपुंगवाः ।
हताः श्रीहरिणा सर्वे ययुर्वैकुण्ठमेव ते ॥४६॥
तत्कन्यका हरिं वव्रुर्लोमशस्याश्रमस्थिताः ।
तन्मातरो दैत्यपत्नो याश्च वैधव्यमाश्रिताः ॥४७॥
आत्मश्रेयः पप्रच्छुस्ता लोमशं मुनिपुंगवम् ।
केनाऽत्र कर्मणा विद्वन् श्रेयः स्यादुभयत्र नः ॥४८॥
तद्वदाऽत्र दैत्यपत्नीः कृपया मुनिपुङ्गव ।
लोमशश्च तदा ताभ्यस्तत्सुताभ्यश्च सर्वथा ॥४९॥
सदाश्रेयस्करान् धर्मानुवाचाऽभ्युदयप्रदान् ।
अहिंसा सत्यमस्तेयं दानं क्षमा दमो दया ॥५०॥
अमानित्वं च शौचं च तपश्च ब्रह्मचारिता ।
शुभा वाक् साधुसेवा च परश्रेयःप्रदायकाः ॥५१॥
त्रयोदशांऽशो धर्मोऽयं नरनारीप्रपालितः ।
ऐहिकं सुखदं श्रेयो ददाति शाश्वतं ह्यपि ॥५२॥
श्रीकृष्णभजनं चाग्निसेवनं स्नानमित्यपि ।
भिक्षादनं गुरोः सेवा गुरोः प्रीत्युपपादनम् ॥५३॥
ऐहिकं सुखदं श्रेयो ददाति ह्यपि शाश्वतम् ।
गुरोर्गेहे वसेन्नित्यं तत्पत्नीं तत्सुतादिकम् ॥५४॥
देवान्मत्वा तथा देवीर्मत्वा संपूजयेत् सदा ।
शुश्रूषयेच्च निर्माना सा मृत्युं जयति ध्रुवम् ॥५५॥
आत्मभावनया साध्वी पितृदेवाऽतिथीनपि ।
सम्यक् सम्प्रीणयेद् भक्त्या सा मृत्युं जयति ध्रुवम् ॥५६॥
सदाचारः सदा रक्ष्यो दैत्यैर्देवैश्च मानवैः ।
न चाऽऽचारविहीनाया भद्रमत्र परत्र च ॥५७॥
यज्ञदानतपांसीह सदा भवन्ति भूतये ।
सदाचारविहीनाया निष्फलान्येव तान्यपि ॥५८॥
दुराचारा हि वामाङ्गी नेह नामुत्र नन्दति ।
कार्यो यत्नः सदाचारे स त्वभद्रस्य नाशकः ॥५९॥
सदाचारस्तरुश्चास्ति नारीदेहे हि वर्तते ।
स चापत्यशरीरेऽपि ह्यवतरति सौख्यकृत् ॥६०॥
धर्मो मूलं तरोस्तस्य ह्यर्थः शाखाः सुसम्पदः ।
कामः पुष्पाणि रम्याणि मोक्षः फलं रसान्वितम् ॥६१॥
सोऽयं प्रसेवितो नार्या भद्रदोऽत्र परत्र च ।
ब्राह्मे मुहूर्ते प्रथमं बुध्येदनुस्मरेद्धरिम् ॥६२॥
देवानृषीन् सतीश्चापि वदेत् प्रभातमंगलम् ।
शंकरो वैष्णवश्रेष्ठश्चोक्तवान् मंगलं परम् ॥६३॥
प्रभाते यत् पठन्मर्त्यो मुच्यते पापबन्धनात् ।
प्राभातिकं मंगलं तत्कथयामि निबोधत ॥६४॥
श्रुत्वा स्मृत्वा पठित्वा च सर्वपापैः प्रमुच्यते ।
एतन्मंगलरटनाद् बहवो मोक्षणं गताः ॥६५॥

सर्वावतारजनकोऽक्षरतः परश्चा-
ऽनादिश्चकृष्णभगवान् परमेश्वरश्च ।
मुक्तास्तथाऽगणितसृष्टिषु वर्तमानाः
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥६६॥
राधायुतोऽगणितगोपसुगोपिकाभिः
संसेवितो हृदयपद्मगतश्च कृष्णः ।
लक्ष्मीरमापतिरथाऽस्य च पार्षदाद्याः
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥६७॥

श्रीवासुदेवसहिताः- परमेश्वराश्च
नारायणा विविधधामगताश्च मुक्ताः ।
माणिक्यपारवतिकाकमलाप्रभाश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥६८॥

हैरण्यगर्भहरिशंकरसूर्यचन्द्राः
पृथ्वीसुतः शशिसुतो गुरुशुक्रधर्माः ।
आर्षाः शनिः पितर ऐशगणेश्वराश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥६९॥

रैभ्यश्च गौतमपुलस्त्यमरीचयश्च
भृग्वङ्गिरःपुलहलोमशगालवाद्याः ।
वासिष्ठभार्गवरिभुच्यवनादिकाश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥७०॥

श्रीपार्षदाः सनकनन्दनसत्कुमाराः
सौजातपिङ्गलसनातननारदाद्याः ।
इन्द्रादयो दिगधिपाः सुरकोटयश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥७१॥

सप्तस्वराः क्षितितलाश्च सुसूक्ष्मभूताः
स्थूलाश्च तत्त्वनिकरा गिरिवार्धयश्च ।
तीर्थानि चापगवराश्च पतिव्रताश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥७२॥

रुक्मांगदो ध्रुवसुयज्ञकपुण्डरीक
प्रह्लादसूतशतसुव्रतकाऽम्बरीषाः ।
श्रीकृष्णवल्लभदिवोदशुकादिकाश्च
कुर्वन्तु मोक्षफलकं मम सुप्रभातम् ॥७३॥

इत्थं प्रभाते परमं पवित्रं शृणुयात्पठेत् ।
स्मरेद् भक्त्या सुप्रभातं भवेदेव न संशयः ॥७४॥
हरिं स्मृत्वा देहशुद्धिं कृत्वा स्नात्वा विधानतः ।
तर्पणं च तथा सन्ध्यां कुर्याच्छ्रीहरिपूजनम् ॥७५॥
तिलकं चन्द्रकं कुर्याद् देवपूजनमित्यपि ।
सूर्याय नमनं कुर्यात् प्रणमेत् पितरौ पतिम् ॥७६॥
गुरुं नत्वा सतीं नत्वा गां नत्वा होममाचरेत् ।
पश्येत् प्रातर्दधि दूर्वां सर्पिर्धेनुं सवत्सिकाम् ॥७७॥
उदकुंभं च वृषभं सुवर्णं स्वस्तिकं मधु ।
गोमयं चाऽक्षतान् लाजा मृदं ब्राह्मणकन्यकाः ॥७८॥
श्वेतपुष्पाणि सस्यानि वह्निं चन्दनमर्ककम् ।
अश्वत्थं साधुपुरुषं दर्पणं प्रतिमां हरेः ॥७९॥
अतिथिं पूजयेद्भावात् साधुसङ्गं समाचरेत् ।
अर्केऽभ्यङ्गं न वै कुर्यान्मंगले क्षौरमेव न ॥८०॥
बुधे न योषितं गच्छेन् पतिं गच्छेन्न पर्वणि ।
उदक्छिराः स्वपेन्नैव प्रतीचीमस्तको न च ॥८१॥
देवालयं चैत्यतरुं विद्वांसं च चतुष्पथम् ।
गुरुं वृद्धं प्रकुर्यात्तु प्रदक्षिणं वृषप्रदम् ॥८२॥
अन्यधृतं च मलिनं वस्त्रं नैव हि धारयेत् ।
स्नायान्नित्यं ग्रहादौ च देवदानादिकं चरेत् ॥८३॥
सत्सु वसेन्न त्वसत्सु पुण्यदेशेषु संवसेत् ।
बद्धवैरे वसेन्नैव धर्महीने जनेऽपि च ॥८४॥
अभोज्याः सूतिकाः षण्डो मार्जाराखू च कुक्कुटाः ।
पतिताऽपविद्धनग्नाश्चाण्डाला अधमाश्च ये ॥८५॥
ब्राह्मणी ब्राह्मणश्चापि भिक्षुकौ व्यभिचारिणौ ।
तावुभौ सूतिकेत्युक्तौ तयोरन्नं विगर्हितम् ॥८६॥
न जुहोत्युचिते काले न स्नाति न ददाति च ।
पितृदेवार्चनाद्धीनः स षण्डः परिगीयते ॥८७॥
दंभार्थं जपति यश्च तपति पठतीत्यपि ।
न परत्रार्थमुद्युक्तो मार्जारः परिकीर्तितः ॥८८॥
विभवे सति नैवाऽत्ति न ददाति न जुहोति न ।
तमाहुराखुं तस्यान्नं भोक्तव्यं नैव धर्मिणा ॥८९॥
सभागतानां यः सभ्यः पक्षपातं समाश्रयेत् ।
तमाहुः कुक्कुटं तस्य जलान्नं बहु गर्हितम् ॥९०॥
स्वधर्महाः परधर्मग्राहकः पतितः स्मृतः ।
देवपितृगुरुत्यागी गोविप्रस्त्रीविघातकः ॥९१॥
अपविद्धस्तदन्नं न भोक्तव्यं पापदूषितम् ।
येषां कुले न वेदोऽस्ति न कथा नैव च व्रतम् ॥९२॥
ते नग्नाः कीर्तितास्तेषामन्नं संस्कारदूषितम् ।
आशार्त्तानामदाता च दातुश्च प्रतिषेधकः ॥९३॥
शरणागतसन्त्यक्ता स चाण्डालोऽधमो जनः ।
तेषामन्नं न भोक्तव्यं दोषभागन्यथा भवेत् ॥९४॥
यच्चापि कुर्वतो नात्मा जुगुप्सामेति सर्वथा ।
तत्कर्तव्यमशंकेन यत् स्यात् कल्याणदं परम् ॥९५॥
एवमाचारवत्याश्च सत्या गृहे वनेऽपि वा ।
धर्मार्थकाममोक्षा वै भवन्त्येव न संशयः ॥९६॥
भूमौ शय्या ब्रह्मचर्यं तपोभिश्चात्मदर्शनम् ।
सर्वसंगपरित्यागः श्रीकृष्णस्मरणं सदा ॥९७॥
सर्वार्पणं हरौ कृष्णे गुरौ सर्वान्तरात्मनि ।
यया कृतं न लिप्येत देहजैः कर्मभिः क्वचित् ॥९८॥

भवत्यः सर्वथाऽनादिकृष्णनारायणं हरिम् ।
बालरूपं प्रसेवन्ताम् परो मोक्षो भविष्यति ॥९९॥
अत्र चात्मनिवेदित्वं कृतं यया तु योषिता ।
तस्या धाम्नि परा मुक्तिर्भवत्येव न संशयः ॥१००॥
निद्रायां जाग्रति स्वप्ने स्थूले सूक्ष्मे हृदन्तरे ।
राजसे तामसे सत्वभावे स्मरन्तु माधवम् ॥१०१॥
आत्मना चेन्द्रियैर्वापि देहेन सेवया हरिम् ।
अन्तःकरणैः कर्मभिः प्रसादयन्तु तं पतिम् ॥१०२॥
इत्युक्तास्ताश्च जगृहुर्नाममन्त्रं हि लोमशात् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥१०३॥
इत्यस्य रटणं चक्रुर्दिवारात्रमतन्द्रिताः ।
शतं ता दिव्यतां प्राप्ताः सततं जपकारणात् ॥१०४॥
अनादिश्रीकृष्णनारायणो बालो विमानगः ।
शतेन तु विमानानां सहितः समुपाययौ ॥१०५॥
ताः समारोहयामास विमानाग्र्येषु माधवः ।
निनाय ताः परंधामाऽक्षरादप्युत्तरं हि यत् ॥१०६॥
अथ याः कन्यकास्तास्तु गृहीत्वा लोमशाद् गुरोः ।
उपदेशं च तं कृष्णं बालं मत्वा पतिं निजम् ॥१०७॥
भेजुस्तत्रैव कन्यासु स्थित्वा सहस्रशस्तदा ।
पठनाच्छ्रवणाच्चापि बालकृष्णं लभेत् सती ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रावण्यां सरसस्तटे यज्ञसूत्रोत्सवे साल्मालवंशीयदैत्याना-मागमनं युद्धं प्रभुणा तेषां नाशो मोक्षधर्मा लोम-शोपदिष्टाश्चेत्यादिनिरूपणनामा षड्विंशति-तमोऽध्यायः ॥ २६ ॥

श्रीकृष्ण उवाच—

शृणु वै राधिके देवा दैत्या दानवकोटयः ।
मानवाः ऋषयः सन्तो हरेः पुत्राः समानकाः ॥ १ ॥
नाऽप्रियो न प्रियः कश्चित्तस्य भवति राधिके ।
भक्तः प्रियो न त्वभक्तो भक्तिप्रियो हि माधवः ॥ २ ॥
आत्मनो नाऽसुरा देवा दैत्या वा मानवाः प्रिये ।
स्वभावा गुणजा दैत्या देवाऽसुश्च मानवाः ॥ ३ ॥
स्वभावाश्चागमापायाः प्रयोजनवशानुगाः ।
प्रयोजनं सुखं तच्च देहजात्यनुसारगम् ॥ ४ ॥
देहो नारी नरश्चेति षण्ढश्चेति त्रिधा मतः ।
बालो युवा च वृद्धश्च गृही त्यागी व्रती वनी ॥ ५ ॥
क्रिया देहानुकूला च वाञ्छा देहानुसारिणी ।
बाल्ये क्रीडति वार्धक्ये शर्म याति युवा तु न ॥ ६ ॥
नारी नराश्रया सर्वा नरः स्वातन्त्र्ययन्त्रितः ।
ब्राह्मणो भिक्षुकः क्षत्त्रं प्रसह्य बलवत् सदा ॥ ७ ॥
श्वादौ सहनता नित्या सर्पे सा नैव विद्यते ।
वृक्षे परोपकारश्च वानरे स्वार्थ एव च ॥ ८ ॥
साधौ दया धनाढ्ये तु गर्वो रंके तु नम्रता ।
मातरि वत्सलो भावः शत्रौ निर्दयता स्थिता ॥ ९ ॥
चौरे निर्घृणता विद्यावति विचार्यकारिता ।
लज्जा युवतीवर्गे च बालायां दोषहीनता ॥१०॥
दिगम्बरत्वं वैराग्ये सरागे नववस्त्रिता ।
व्योमवद् विद्यते चात्मा देहः सन्ध्या दिवा निशा ॥११॥
आयान्ति च वियन्त्यस्य गुणवेगाः प्रयोजनात् ।
तद्गुणा मायिकी माया जडा कर्ममयी सदा ॥१२॥
सा न चात्मनि संलग्ना नात्मा तत्र च जन्मितः ।
द्वयोः पन्था विभिन्नोऽस्ति नित्यबद्धाऽतिमुक्तयोः ॥१३॥
इत्येवं राधिके ज्ञात्वा पुमान्नैव विलुप्यते ।
अज्ञाने जायते रागो द्वेषश्चेत्युभदूषणे ॥१४॥
रागाद्भवति प्रवृत्तिर्वासनाप्रचुरा दृढा ।
द्वेषान्निवर्तते यद्वा प्रवर्ततेऽतिदारुणम् ॥१५॥
अनिष्टं वहते चेष्टच्छन्नं चासुरभावनम् ।
त एते दैत्यदेहाश्च वियन्ति परमात्मनः ॥१६॥
अभियन्ति यदा ते च सुरा भवन्ति दैविनः ।
अहिंसा सत्यमस्तेयं शौचमिन्द्रियसंयमः ॥१७॥
दानं दया च क्षान्तिश्च ब्रह्मचर्यममानिता ।
शुभा सत्या च मधुरा वाङ् नित्यं सत्क्रियारतिः ॥१८॥
सदाचारनिषेवित्वं धर्मा दैवत्वदायकाः ।
सुकेश्यभूत् पुरा दैत्यो लोमशस्याऽऽश्रमं गतः ॥१९॥
धर्मान् पप्रच्छ कुशलान् श्रुत्वा चैतान् त्रयोदश ।
लोमशात्तु महर्षेः स ययौ नैजं पुरं ततः ॥२०॥
समाहूयाऽब्रवीत् सर्वान् राक्षसान् धार्मिकं वचः ।
अहिंसाद्यान्महाधर्मान् पालयन्तु सदाऽसुराः ॥२१॥
सोऽहमाज्ञापये सर्वान् क्रियतामविकल्पितम् ।
ततः सुकेशिवचनात् सर्व एव निशाचराः ॥२२॥
त्रयोदशांशतो धर्मं चक्रुर्मुदितमानसाः ।
ततः प्रवृद्धिं सुतरामगच्छँस्ते निशाचराः ॥२३॥
प्रासादवाटिकाक्षेत्रोद्यानयानमहर्द्धयः ।
पुत्रपौत्रार्थसंयुक्ता ह्यभवन् सुखसंभृताः ॥२४॥

निशाचराणां नगरं तेजोमयं ह्यभूत्तु खे ।
यत्र सूर्यस्य चन्द्रस्य तेजोऽऽपेक्षा न चाऽभवत् ॥२५॥
ततस्तु तेजसा तेषां राक्षसानां महात्मनाम् ।
गन्तुं नाऽशक्नुवन् सूर्यो नक्षत्राणि च चन्द्रमाः ॥२६॥
एवं धर्मप्रभावोऽस्ति राधिके तेजसोर्जितः ।
ततस्त्रिभुवने दीप्तं निशाचरपुरं ह्यभूत् ॥२७॥
दिवा सूर्यस्य सदृशं रात्रौ चन्द्रसमं ह्यभूत् ।
यत्र सूर्यस्य चन्द्रस्य तेजोऽपेक्षा न विद्यते ॥२८॥
प्रत्युत तत्पुरेणैव पृथ्व्यां सर्वग्रहेषु च ।
दिवसः सर्वदा चास्ते तेजोवैभवकारणात् ॥२९॥
न ज्ञायते गतिर्व्योम्नि भास्करस्य ततोऽम्बरे ।
चन्द्रस्यापि गतिर्नैव ज्ञायतेऽन्यगतिः कुतः ॥३०॥
कौशिकाद्यास्तु मुमुहुर्विना रात्रिं निशाचराः ।
गृहस्था दुःखमापन्नाः स्त्रीधर्मा रात्रिमन्तरा ॥३१॥
तर्कयन्ति तदा केचिन्नूनं रात्रौ सुदुःखिता ।
पतियोगं विना कान्ता सती पतिव्रता सखी ॥३२॥
परदेशगते कान्ते वियोगदुःखिता हि सा ।
तपसा सूर्यास्तमनं रुरोध यावता भवेत् ॥३३॥
प्रियस्य दर्शनं योगस्तावताऽऽयान्न वै निशा ।
यज्वानो होमशालासु सहर्त्विग्भिरथाऽध्वरे ॥३४॥
प्रावर्तयन्त कर्माणि रात्रावपि च राधिके ।
महाभागवताः पूजां विष्णोः कुर्वन्ति भक्तितः ॥३५॥
रवेः शशिनश्चाप्यन्ये ब्रह्मणोऽन्ये हरस्य च ।
कुर्वन्ति पूजनं मत्वा दिवा रात्रावपि प्रजाः ॥३६॥
विवेकिनस्तु जानन्ति विकसितैर्हि पङ्कजैः ।
सूर्यस्योदयनं चन्द्रोदयं तु कुमुदोत्करैः ॥३७॥
एवं प्रतापमापन्ने निशाचरपुरे वृषैः ।
सूर्यस्त्वसहमानस्तत् तद्विघातमचिन्तयत् ॥३८॥
स भानुना तदा दृष्टः क्रोधाध्मातेन चक्षुषा ।
सुकेशी ग्रामसहितः प्रजज्वाल तदाऽम्बरे ॥३९॥
सूर्यश्चक्रं च सौरं स्वं मुमोचाऽस्मै द्रुतं च तत् ।
चक्रं वै भेदयामास पुरं निशाचरस्य तत् ॥४०॥
निपपाताऽम्बराद् भ्रष्टं केशिना सह राक्षसैः ।
सुकेशी शंभवे नम इदमुच्चैरुदैरयत् ॥४१॥
तदाक्रन्दितमाकर्ण्य कैलासे शंकरः प्रभुः ।
ज्ञात्वा ध्यानेन सूर्येण पातितं भक्तपत्तनम् ॥४२॥
क्रुद्धस्तृतीयनेत्रेण सूर्यं शंभुरपश्यत ।
सूर्यो व्योम्नः परिभ्रष्टो निपपात भुवस्तलम् ॥४३॥
योगिशायिनमारभ्य यावत्केशवदर्शनम् ।
प्रयागात् केशवं यावत् विस्तृतं भूतलं शुभम् ॥४४॥
एतत् क्षेत्रं हरेः पुण्यं नाम्ना वाराणसी पुरी ।
वरणायास्तथैवाऽस्यास्त्वन्तरे निपपात सः ॥४५॥
भानुर्दहन् क्षणं चास्यां लुलन् ह्रदे ततः पुनः ।
वरणायां च गङ्गायां लुलन् लोलार्कनामवान् ॥४६॥
अभवच्चाऽथ सूर्यः स क्षमां हरादयाचत ।
हरोऽपि भानुमादाय पाणिनाऽऽरोपयद् रथम् ॥४७॥
सुकेशिनं पुरं चाप्यारोपयद् दिवि दैववत् ।
एवं धर्मेण बलवान् जायते राक्षसोऽपि हि ॥४८॥
शंभुर्यस्य सहायोऽभूत् सूर्योऽवाप रुषः फलम् ।
एवं वै लोमशो दैत्यकन्याभ्यस्तु वृषान् शुभान् ॥४९॥
प्राह श्रेयस्करान् ताश्च पुनः पप्रच्छुरादरात् ।
कस्य पूजा कथं कार्या वद नो गुरुराट् प्रभो ॥५०॥
लोमशस्ताः समुवाच नारायणः श्रियाः पतिः ।
आषाढैकादशीप्रातर्भोगिभोगे स्वपित्यतः ॥५१॥
शेषाऽहिभोगपर्यङ्के कृत्वा सम्पूज्य केशवम् ।
प्रास्वापयेदनादिश्रीकृष्णनारायणं क्षणम् ॥५२॥
त्रयोदश्यां स्वपित्यैव कामः स्वशयने शुभे ।
कदम्बानां सुगन्धानां कुसुमैः परिकल्पिते ॥५३॥
तत्र तदा सुशृंगारैः कामः प्रीतिरतिप्रभुः ।
पूजनीयो विशेषेण कृष्णमूर्तौ सुखप्रदः ॥५४॥
चतुर्दश्यां ततो यक्षाः स्वपन्ति सुखशीतले ।
सौवर्णपङ्कजकृते सुखास्तीर्णोपधानके ॥५५॥
यक्षेशो यक्षयुक्तश्च मणिभद्रादिभिर्युतः ।
पूजनीयोऽन्नपानाद्यैस्तर्पणीयो विशेषतः ॥५६॥
पूर्णमास्या स्वपित्युमानाथः स्वचर्मसंस्तरे ।
वैयाघ्रे च जटाभारं समुद्ग्रथ्याऽन्यचर्मणा ॥५७॥
शंभुस्तत्राऽर्चनीयश्च धत्तूरस्य सुमादिभिः ।
ततो दिवाकरो राशिं सम्प्रयाति तु कर्कटम् ॥५८॥
तेनामराणां रजनी भवते दक्षिणायनम् ।
ब्रह्मा ततः प्रतिपदि नीलोत्पलमये प्रिये ॥५९॥
तल्पे स्वपिति लोकानां शुभचिन्तनकाम्यया ।
विश्वकर्मा द्वितीयायां तृतीयायां तु पार्वती ॥६०॥
विनायकश्चतुर्थ्यां च पञ्चम्यामपि धर्मराट् ।
षष्ठ्यां स्कन्दः प्रस्वपिति सप्तम्यां भगवान् रविः ॥६१॥
कात्यायनी तथाऽष्टम्यां नवम्यां कमलालया ।
दशम्यां भुजगेन्द्राश्च स्वपन्ति वायुभोजनाः ॥६२॥

एकादश्यां तु कृष्णायां साध्या देवाः स्वपन्ति च।
तत्तत्तिथौ तत्सुराणां पूजनं प्राचरेत् सती ॥६३॥
तेन श्रेयः सर्वविधं त्वाप्नुयाद् व्रतिनी सती।
द्वितीयायां प्रस्वपिति विश्वकर्मा प्रजापतिः ॥६४॥
तस्य मूर्तिर्विधातव्या यदा लक्ष्म्या युतो हरिः।
सौवर्णस्य विधातव्यः श्रीवत्सांकश्चतुर्भुजः ॥६५॥
पर्यंके तं समं लक्ष्म्या गन्धपुष्पादिभिर्युते।
शय्यायां पूजयेत् कृष्णं प्रक्षिपेत् सत्फलानि च ॥६६॥
सुरभीणि निवेद्येत्थं प्रार्थयेत् श्रीयुतं हरिम्।
अशून्यशयने नाथ यथा त्वं राजसे श्रिया ॥६७॥
तथा चाऽशून्यशयनं रक्ष मे सर्वदाऽस्तु च।
लक्ष्म्या युक्तं शयनं ते यथा शून्यं कदापि न ॥६८॥
तथा ममापि भगवान् गार्हस्थ्यं माऽस्तु शून्यकम्।
लक्ष्मीधरः प्रसन्नोऽस्त्वित्युच्चार्य व्रतमाचरेत् ॥६९॥
चातुर्मास्ये प्रभुञ्जीत तैलक्षारविवर्जितम्।
लक्ष्मीधरः प्रीयतां मे इत्युच्चार्य द्विजातये ॥७०॥
फलं स्वर्णं वस्त्रशय्यां गां दानं वितरेद् व्रती।
व्रतिनस्तेन पुण्येन गार्हस्थ्यं मोदते सुखम् ॥७१॥
रविराषाढमासाद्य मिथुनाऽभिमुखो भवेत्।
तत आरभ्य यावत्स वृश्चिकस्थो विभाति हि ॥७२॥
चातुर्मास्यं चान्तरे वै काले बोध्यं व्रतार्थिना।
सुरास्ततो विबुध्यन्ते क्रमशस्तत्र राधिके ॥७३॥
तुलास्थे च रवौ पूर्वं हरिः कृष्णः प्रबुध्यते।
तस्य पूजा प्रकर्तव्या महादानार्पणादिभिः ॥७४॥
कामदेवस्तत्र ततः प्रबुध्यते तमर्चयेत्।
द्वितीयायां सुवर्णस्य मूर्तिर्लक्ष्मीधरस्य तु ॥७५॥
शय्या चास्तरणोपेता यथाविभवमात्मनः।
दातव्यैतद्व्रतेनाऽत्र दम्पत्योर्न वियोगिता ॥७६॥
अथ भाद्रपदे कृष्णाष्टमी कालाष्टमी मता।
युक्ता मृगशिरेणाऽस्यां लिंगे स्वपिति शंकरः ॥७७॥
गोमूत्रेण जलेनाऽपि स्नायात् संस्नापयेच्छिवम्।
ततः सम्पूजयेत्पुष्पैर्धत्तूरस्य च चन्दनैः ॥७८॥
धूपं केसरनिर्यासं नैवेद्यं मधुसर्पिषी।
प्रीयतां मे विरूपाक्षस्त्विति कुर्यात्तदर्थनाम् ॥७९॥
आश्विने स्नापयेत् स्नायाद् गोमयेनाऽथ पूजनम्।
पंकजैर्धूपयेत् सर्जनिर्यासैर्मधुमोदकान् ॥८०॥
भोजयेत् प्रीयतां हिरण्याक्षो मे चेति चार्थयेत्।
कार्तिके पयसा स्नानं करवीरेण चार्चनम् ॥८१॥
धूपं श्रीवासनिर्यासं नैवेद्यं मधुपायसम्।
प्रीयतां स्थाणुरुच्चार्य देयं रजतदानकम् ॥८२॥
मार्गशिरे दधिस्नानं नैवेद्यं मधुनौदनम्।
धूपं श्रीवृक्षनिर्यासं प्रीयतां शर्व आर्थयेत् ॥८३॥
पौषे स्नानं तु हविषा पूजा बिल्वैस्तथा फलैः।
धूपो मधुकनिर्यासो नैवेद्यं मधुसक्तुकैः ॥८४॥
प्रीयतां त्र्यम्बक इत्यभ्यर्थयेन्मुद्रिकां ददेत्।
माघे कुशोदकस्नानं कुमुदेन शिवार्चनम् ॥८५॥
धूपः कदम्बनिर्यासो नैवेद्यं सतिलौदनम्।
प्रीयतां मे महादेव इत्यभिप्रार्थयेन्नमः ॥८६॥
एवं षाण्मासिकं चैतद्व्रतं सौभाग्यदं सदा।
अथ च फाल्गुने पञ्चगव्यस्नानं प्रकारयेत् ॥८७॥
पूजयेत् कुन्दकुसुमैर्धूपयेच्चन्दनेन च।
नैवेद्यं सघृतं दद्यात्ताम्रपात्रे गुडौदनम् ॥८८॥
प्रीयतां रुद्र मे प्रोच्य वस्त्रयुग्मं प्रदापयेत्।
चैत्रे चौदुम्बरजलैः स्नानं मन्दारकार्चनम् ॥८९॥
धूपं च गुग्गुलकृतं मोदकान् विनिवेदयेत्।
मृगचर्मप्रदानं प्रीयतां नागेश्वरो मम ॥९०॥
वैशाखे गन्धकुसुमैः स्नानं पूजाऽऽम्रपुष्पकैः।
धूपः सर्जस्य निर्यासो नैवेद्यं सफलं घृतम् ॥९१॥
शालघ्नः प्रीयतां चेति जलकुंभप्रदानकम्।
ज्येष्ठे स्नानं चामलकैः पूजाऽर्ककुसुमैस्तथा ॥९२॥
दधिसक्तूभोजनं च छत्रोपानत्प्रदानकम्।
धूपं तु चान्दनं भगनेत्रघ्नः प्रीयतां मम ॥९३॥
आषाढे श्रीफलैः स्नानमर्चनं कानकैः सुमैः।
धूपयेत् सल्लिकया च पूपा नैवेद्यमुत्तमम् ॥९४॥
प्रीयतां दक्षयज्ञघ्नो दानं यवकणादिकम्।
श्रावणे भृंगराजेन स्नानं श्रीद्रुदलार्चनम् ॥९५॥
अगुरुधूपनं नैवेद्यं दधि मोदकास्तथा।
स्वर्णगोवस्त्रदानं मे गंगाधरः प्रसीदतु ॥९६॥
एभिः षड्भिस्तथा मासैः पूजनं व्रतपुष्टिदम्।
नवम्यां पारणं कुर्यात् पूर्णे संवत्सरे ततः ॥९७॥
द्वादशकृष्णपक्षीयाऽष्टम्युपवासनं सदा।
तत उद्यापनं कुर्यान्महेश्वरवचो यथा ॥९८॥
अक्षयं लभते सौख्यं दम्पती पुण्यकव्रतात्।
धर्मार्थकाममोक्षकृत् तत्तथा न तदन्यथा ॥९९॥
पद्मं प्रजापतेर्नाभ्या निर्यातं चाश्विने यतः।
ब्रह्मणः पूजने पद्मं देयं प्रीतिविवर्धनम् ॥१००॥

कामकरे कदम्बश्च यक्षकरे वटद्रुमः ।
धत्तूरश्च शिवहृदि वेधोमध्याद्धि खादिरः ॥१०१॥
विश्वकर्ममध्यदेहात् कण्टकी समजायत ।
गिरिजायाः करतले कुन्दगुल्मस्त्वजायत ॥१०२॥
गणाधिपस्य कुंभस्थो राजते सिन्दुवारकः ।
यमस्य दक्षिणे पार्श्वे पालाशो वै व्यजायत ॥१०३॥
यमस्य दक्षिणोत्तरे जातः कृष्ण उदुम्बरः ।
स्कन्दस्य बन्धुजीवश्च रवेरश्वत्थ एव च ॥१०४॥
कात्यायन्याः शमी जाता बिल्वो लक्ष्म्याः करेऽभवत् ।
नागमुखे शरस्तम्बा दूर्वा वासुकिपृष्ठके ॥१०५॥
साध्यहृदि चन्दनश्च व्यजायत च राधिके ।
कल्पान्तरकथा चेयं सृष्ट्यादौ समजायत ॥१०६॥
तैः पूजने तत्सुराणां प्रीतिः सर्वाऽधिका भवेत् ।
धर्मार्थकाममोक्षाश्च दीयन्ते तैः प्रसादितैः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने दैत्यनारीणां धर्मोपदेशे सुकेशिसमाख्यानम्, अशून्यशयनव्रतशिवपुण्यकव्रतादि, देवानां भिन्नतिथिषु स्वापाः, पूजा चेत्यादिनिरूपणनामा सप्तविंशतितमोऽध्यायः ॥ २७ ॥

श्रीकृष्ण उवाच—

एवं वै राधिके दैत्यकन्याभ्यो लोमशो मुनिः ।
उपादिदेश च वृषान् व्रतानि विविधानि च ॥ १ ॥
ताश्च चक्रुर्वृषाचारान् व्रताचरणमित्यपि ।
अशून्यशयनं चापि चातुर्मास्यव्रतानि च ॥ २ ॥
वत्सरीयं शिवकालाष्टमीव्रतं च पुण्यकम् ।
चक्रुः श्रीगुरुसेवां च भेजुः कृष्णनरायणम् ॥ ३ ॥
भूत्वा पावनदेहाश्च पावनात्मान इत्यपि ।
विमानैः पार्षदवरैर्वाहितैर्धाम चाक्षरम् ॥ ४ ॥
गत्वा दृष्ट्वा दिव्यरूपाश्चाययुर्लोमशाश्रमम् ।
प्रपूज्य कन्यकाः सर्वा लोमशं च गुरुं हरेः ॥ ५ ॥
ज्ञात्वा पूर्णं महिमानं बालकृष्णस्य शार्ङ्गिणः ।
परं कान्तं हरिकृष्णं भेजुस्तं पतिमीश्वरम् ॥ ६ ॥
एवं तु वत्सरे याते तृतीये सुमहोत्सवे ।
चतुर्थवर्षारम्भे च कृतजन्ममहोत्सवे ॥ ७ ॥
पिता सुभोजयामास कोटिशो देहिनस्तदा ।
दानानि दापयामास रत्नसौवर्णजानि च ॥ ८ ॥
तत्राऽभूदेकमाश्चर्यं राधे शृणु वदामि ते ।
पातालान्नागदेहश्च तथा मानवमस्तकः ॥ ९ ॥
कृतहस्ताञ्जलिर्नागस्ताम्यमानोऽतिदुःखितः ।
स्वस्तिकाख्यो रुदन् कृष्णनारायणसमीपतः ॥१०॥
त्राहि त्राहीत्यर्थयँश्चाययौ कुटुम्बशून्यकः ।
अनादिश्रीकृष्णनारायणश्चास्ते गजासने ॥११॥
तत्रागत्य च पतितः पादयोः श्रीहरेर्मुहुः ।
उवाच भगवँस्त्राहि मां नागं शरणागतम् ॥१२॥
त्वां विना रक्षको मे न विद्यते भुवनत्रये ।
श्रीहरिः प्राह किं दुःखं त्वागतं ते निरूपय ॥१३॥
नागः सर्वेषु शृण्वत्सूत्सवे समागतेषु च ।
वर्णयामास दुःखं स्वं पाताले युद्धजं यथा ॥१४॥
पाताले भगवन्नागा वसन्ति बहुजातयः ।
शेषस्य जातिमन्तो ये ते राजानो भवन्ति च ॥१५॥
वासुकेर्जातिमन्तश्च मन्त्रिणस्ते भवन्ति च ।
तक्षकस्य च जातीया राजमान्या हि नागराः ॥१६॥
अहं स्वस्तिकजातीयो ब्राह्मणोऽस्मि गुरुक्रियः ।
धृतराष्ट्राः क्षत्रियास्ते कर्कोटका भटक्रियाः ॥१७॥
कुहकस्य तु जातीया व्यापारिणो भवन्ति च ।
सुषेणस्य तु जातीयाः शाकादिकृषिकारिणः ॥१८॥
हारिता वनवासाश्चारण्यरक्षाकरा हि ते ।
कार्बुरकाः सदा दास्यं कुर्वन्ति राजमण्डले ॥१९॥
कृष्णजातीयनागाश्च सैन्याधिपत्यभोगिनः ।
पुण्डीकास्तथा नागा भवन्ति वाटिकाकराः ॥२०॥
अम्बरीषाः सूतकार्यकरा वाहनरक्षिणः ।
गोधूमीयाश्च ते नागाश्चारणा वंशबोधकाः ॥२१॥
भद्रजातीयनागाश्च पण्डिता ब्राह्मणा इमे ।
वाचयन्ति कथाकाण्डान् बालानध्यापयन्ति च ॥२२॥
कुमुदा भोगिनो दासा भवन्ति पारवश्यगाः ।
पिशंगाः सूदकर्माणो भृत्या भवन्ति सर्वथा ॥२३॥
केशीया नाट्यकुशलाः शैलूषा नृत्यकारिणः ।
आमृतिका गीतिकारा डांडिका वृद्धसम्मताः ॥२४॥
भूफालास्तु समुद्यानकराः शुकाः कथार्थिनः ।
कपर्दजातीयकास्ते ग्रामशुद्धिकराः सदाः ॥२५॥
एवमन्ये बहुसंज्ञा भवन्ति तत्र वासिनः ।
तेषां राजा वर्ततेऽद्य नाम्ना कारण्डवो महान् ॥२६॥
मन्त्री तस्य सुमध्वाख्यो विद्यते सर्पमण्डले ।
मान्यः पूज्यो बुद्धिमाँश्च महाबलपराक्रमः ॥२७॥
अन्यायी स्वार्थमात्रेऽपि परार्थकृद्धि वर्तते ।
प्रजानां हितकर्ताऽस्ति शरणागतमानकृत् ॥२८॥

अतः प्रजास्तु तं सम्यङ्मानयन्ति यथा नृपम् ।
राजा महोत्सवं तत्र हाटकेश्वरशूलिनः ॥२९॥
करोति श्रावणे मासि बिल्वादिभिः प्रपूजनम् ।
दानं च दक्षिणायुक्तं ददाति द्विजतृप्तये ॥३०॥
अस्मिन् वर्षे सुमधुना मन्त्रिणा तन्नृपस्य वै ।
आहूता ब्राह्मणास्तत्र शतरुद्रीयजापने ॥३१॥
सहस्रशोऽभवँस्तत्र जापकाः पाठकास्तथा ।
पूजका होमकर्तारस्तत्राऽहं जापकोऽभवम् ॥३२॥
मम पुत्राः शतं सन्ति कन्यका विंशतिस्तथा ।
ते च तत्र पाठकाश्चाऽभवन् मन्त्रिकृपावशात् ॥३३॥
कन्यका ब्राह्मणपुत्र्यश्चायान्ति यान्ति नित्यशः ।
हाटकेशस्य पूजार्थे दर्शनार्थे वियन्ति च ॥३४॥
मम विंशतिकन्याश्च सुरूपाः प्राप्तयौवनाः ।
एकगर्भप्रसूताश्च सर्वा उर्वशीरूपिताः ॥३५॥
विलोकिताः सुमधुना सर्वावयवशोभनाः ।
रूपे चम्पकवर्णाभाः श्रीतुल्यादीर्घलोचनाः ॥३६॥
पिंगनेत्राश्च शिरसः परितः कान्तिमण्डलाः ।
पारदृश्याऽच्छदेहाश्च तेजोमणिनखान्विताः ॥३७॥
कामरूपधराः सर्वास्तनुमध्याः सुकेशिकाः ।
वह्निवस्त्रधरा मिष्टकण्ठा माधुर्यसंभृताः ॥३८॥
सुगन्धपूर्णदेहाश्च पवित्रा द्विजकन्यकाः ।
पद्मिनीलक्षणाः सर्वा विलोक्य सुमधुश्च माम् ॥३९॥
प्रोवाचाऽऽहूय निलयं देहि विंशतिकन्यकाः ।
मम योग्या राजयोग्या भवन्त्येताः प्रदेहि मे ॥४०॥
मया विचार्य तु तदा प्रोक्तो मन्त्रिवरः प्रभो ।
कन्यका मे यदीच्छेयुर्दास्याम्येव न संशयः ॥४१॥
तासां मानसमिष्टं यत् कर्तव्यं तन्मया सदा ।
ततः पृष्टा मया सर्वास्तन्मात्रा चापि बोधिताः ॥४२॥
वरयोग्या भवत्यो वै वदन्त्विच्छन्ति कं वरम् ।
ताः प्राहुर्वै श्रुतं तात मातर्मानवभूतले ॥४३॥
अनादिश्रीकृष्णनारायणः सर्वपतिः प्रभुः ।
वर्तते श्रीकम्भराया गृहे गोपालबालकः ॥४४॥
रूपरूपानुवयवश्चातिकान्तमनोहरः ।
श्रुतं चास्माभिरत्रैव सखीभ्य सर्वथा हि सः ॥४५॥
वरयोग्योऽसि भगवान् श्रीपतिः पुरुषोत्तमः ।
अन्या अपि च नागानां कन्यकास्तं परेश्वरम् ॥४६॥
विवाहेन पतिं कर्तुं समिच्छन्ति सहस्रशः ।
ततो वयं शेषपतिं श्रीपतिं श्रीधरं विना ॥४७॥
नान्यं वरितुमिच्छामो यदि नः श्रेय इच्छसि ।
इत्युक्तः कन्यकाभिश्च स्वस्तिकोऽहं च तत्पिता ॥४८॥
मन्त्रिणे चोक्तवान् कन्याभिप्रायं मन्त्रिराट् ततः ।
क्रुद्धाऽऽह मां पितुः कन्यास्त्वधीना न स्वतन्त्रिकाः ॥४९॥
त्वं देहि मे वदाम्येवं सर्वसौख्यमवाप्स्यसे ।
नो चेद् दुःखं भवेत्तेऽत्र सर्वस्वं ते हृतं भवेत् ॥५०॥
यद्वा राक्षसविधिना हरिष्ये तव कन्यकाः ।
ततो नम्रतया कन्याश्चानुसरन्तु मां तव ॥५१॥
वद ता यदि नेच्छन्ति श्वो हरिष्ये शुभे दिने ।
इत्युक्तवानहं पश्चात् पुनस्ता मम कन्यकाः ॥५२॥
अकथयं च तत्सर्वं तथापि ता न मेनिरे ।
ततोऽहं गतवान् भूपं प्रत्यनिवेदयं च तत् ॥५३॥
भूपोऽपि तत्पक्षपातीतल्लाभं प्रजगाद मे ।
देहि त्वं कन्यकास्तस्मै मन्त्रिणे प्रमुखी भव ॥५४॥
मम श्रुतं न वै राज्ञा मेऽनुमोदनमाहितम् ।
मया श्रुत्वा पुनः सर्वं कन्यकाभ्यो निवेदितम् ॥५५॥
ताः प्राहुः सप्रतिज्ञं वै वरयामो हरिं प्रभुम् ।
अनादिश्रीकृष्णनारायणं बालस्वरूपिणम् ॥५६॥
अन्यथा मरणं तात चाश्रयामस्तथैव तत् ।
मया निवेदितं तत्तु ज्ञातिवर्गाय सर्वथा ॥५७॥
ज्ञातिजनैश्चापि तथा देहीति चानुमोदितम् ।
न राज्ञा तज्जनेनापि विरोधः श्रेयसां पदम् ॥५८॥
तस्माद् देया मन्त्रिणे वै कन्यका विघ्ननाशनम् ।
अथाऽहं प्रावदं सर्वं मम पत्न्यै तदा तु सा ॥५९॥
प्रोवाच मां न वै देया मन्त्रिणे कुष्ठिने त्वया ।
यद् भवेत् तद् भवत्वेव न देयाः कुष्ठिने पते ॥६०॥
मयोक्तं स कथं कुष्ठी ज्ञायते तु त्वया प्रिये ।
प्रिया प्रोवाच मां दासी तस्य नाम्ना करण्टिका ॥६१॥
सुमधोः सेविका भृत्या तस्य सेवां करोति या ।
पादसंवाहनं स्नानं तैलमर्दनकादिकम् ॥६२॥
करोति नित्यशो मन्त्रिवर्यं पश्यति सा रहः ।
तच्छरीरे गुप्तभागे वर्तन्ते रक्तकुष्ठकाः ॥६३॥
रोगवार्ताप्रलापे सा मन्त्रिकुष्ठानवर्णयत् ।
ततो न कन्यका देयास्तस्मै वै कुष्ठिमन्त्रिणे ॥६४॥
इत्युक्त्वा विररामेयं भाविकष्टशुचं गता ।
स्वस्तिकोऽहं शोकमाप्तो वैपरीत्यं भविष्यति ॥६५॥
सहितव्यं च तत्कष्टं दैवाच्चेत् समुपागतम् ।
दैवं तु भगवान् कृष्णनारायणः परेश्वरः ॥६६॥

यस्माचायं हाटकेशः समुत्पन्नः स चाऽवतु ।
एवं विचार्य चाऽहं वै दक्षिणां प्रतिगृह्य च ॥६७॥
गृहं गतोऽपि निद्रां न लेभे न स्त्रीर्न कन्यकाः ।
प्रातर्जातं तदा मन्त्रिभटास्तत्र समागताः ॥६८॥
विंशतिकन्यकाः सर्वा मन्त्रिणा वाञ्छिता यतः ।
आरोहन्तु रथान् दिव्यान् उद्वाहार्थं हि मन्त्रिणा ॥६९॥
इत्येवं राजवचसा मन्त्रिवाक्येन वै वयम् ।
राजभटाः कथयामोऽन्यथा नेष्याम आग्रहात् ॥७०॥
कन्याः पिता च माता च पुत्रा दीनजना यतः ।
रुरुदुश्च पुनर्योद्धुं कृतादरास्तदाऽभवन् ॥७१॥
प्रहरं तत्र युद्धेन भटैः सर्वैर्धृता वयम् ।
पाशिताः कन्यकाः पुत्रा नीत्वा कारागृहे धृताः ॥७२॥
मोचितोऽहं मम पत्न्या सहितो भाद्रमासि वै ।
कन्या नेच्छन्ति वरितुं कारागृहे वसन्ति ताः ॥७३॥
त्राहि वै भगवन् पत्न्या प्रेषितोऽत्र समागतः ।
त्वदर्थं कृतजीवास्ताः समुद्धारय केशव ॥७४॥
इत्युक्तो बालकृष्णस्तं चाभयं प्रददौ हसन् ।
प्रसस्मार च गरुडं भयानकसुदर्शनम् ॥७५॥
तावुभौ द्राक् समायातौ कोटिसूर्यसमक्रमौ ।
आज्ञापितौ ययतुश्च नीत्वा स्वस्तिकमेव तम् ॥७६॥
पातालं यत्र ते सर्पाः कृतराज्या वसन्ति च ।
गरुडः प्राह राजानं न्यायं करोतु सर्पराट् ॥७७॥
प्रसह्य कन्याहरणं मन्त्रिणा धर्मविप्लवः ।
कृतो राजन् विप्रकन्याः प्रयच्छ स्वस्तिकाय वै ॥७८॥
साम्ना सर्वं प्रकर्तव्यं वैरं दुरन्तमेव यत् ।
अनादिश्रीकृष्णनारायणेन भूतलादिह ॥७९॥
प्रेषितश्चागतोऽस्म्यत्र गरुडः सर्पभक्षकः ।
नारायणेन मे दत्तं प्रायुधं वै सुदर्शनम् ॥८०॥
यदि नो मुञ्चसि कन्या युद्धं कुरु मया सह ।
इत्येवं बोधितो राजा कारण्डवो रुषा ज्वलन् ॥८१॥
मन्त्रिणं च समाहूय युद्धार्थं तत्परोऽभवत् ।
शेषा वासुकयश्चापि तक्षकाः कुहकास्तथा ॥८२॥
धृतराष्ट्राः सुषेणाश्च हारिताः कर्बुरादिकः ।
कृष्णाश्च पुण्डरीकाश्चाऽम्बरीषा भद्रकास्तथा ॥८३॥
कुमुदाश्च पिशंगाश्च केशीयाश्चामृतास्तथा ।
शैलूषाश्च कपर्दाश्च भूफाला डाण्डिकाः शुकाः ॥८४॥
एतेऽन्ये नृपतेर्वाक्यात् सैन्यान्यादाय संगरम् ।
कर्तुं समाययुः सर्वे मृधे शस्त्रास्त्रहेतिभिः ॥८५॥
ज्ञात्वा तु पक्षिणं स्वल्पं चक्रं स्वल्पबलं तदा ।
किन्तु श्रीगरुडस्तत्र सस्मार परमेश्वरम् ॥८६॥
रूपं दधार विपुलं दिगन्तव्याप्तिमत्तदा ।
पक्षाभ्यां सर्वपातालं प्रच्छाद पिच्छकैरथ ॥८७॥
देहेनापूरयद् व्योम पद्भ्यां पातालकं तलम् ।
चञ्च्वा नखाभ्यां पक्षैश्च संहारमकरोत्तदा ॥८८॥
युद्धारम्भं प्रकर्तॄणां नागानां हेतिघातिनाम् ।
चञ्च्वा राजा धृतस्तूर्णं भक्षितो मन्त्रिणा सह ॥८९॥
सैन्यानि घातितान्यस्य तीक्ष्णतुण्डेन पक्षिणा ।
तीक्ष्णनखैस्तथा पक्षैर्घातितान्यपि लक्षशः ॥९०॥
अन्ये प्रदुद्रुवुः पारे क्षीरोदस्य तटस्य वै ।
शेषं निवेदयामासुरनन्तसंज्ञकं मृधम् ॥९१॥
शेषस्तत्र समायातो दृष्टवान् गरुडं तथा ।
सुदर्शनं विलोक्यैव नेमे परमभावतः ॥९२॥
सर्पान्निवारयामास योद्धॄन् तथापि ते यदा ।
न न्यवर्तन्त वै चक्रं मुमोच गरुडो मृधे ॥९३॥
प्रजज्वाल च पातालं सर्वसर्पकुलान्यपि ।
हाहाकारो महानासीत् सम्मर्दोऽभून्महाँस्तदा ॥९४॥
शेषस्तुष्टाव तच्चक्रं गरुडं चातिभावतः ।
गरुडेन कृतं शान्तं चक्रं शेषस्य तुष्टये ॥९५॥
समर्प्याऽनन्तशेषाय पातालराज्यमित्यपि ।
स्वस्तिके तन्मन्त्रिपदं सन्न्यस्य गरुडस्ततः ॥९६॥
स्वस्तिकस्य सुतान् पुत्रीर्मोचयामास बन्धनात् ।
शेषस्वस्तिकगरुडाश्चक्रं सस्मरुरीश्वरम् ॥९७॥
अनादिश्रीकृष्णनारायणं बालस्वरूपिणम् ।
तावत् किशोररूपोऽयं भूत्वा श्रीभगवान् हरिः ॥९८॥
ब्राह्मं गजं समारुह्य पाताले चाजगाम ह ।
स्वागतं कृतवन्तस्ते भक्ताः कृष्णस्य वै ततः ॥९९॥
हरिणा तिलकं तत्राऽनन्तशेषकपालके ।
कृतं पातालराज्याभिषेचनं तस्य सर्वथा ॥१००॥
मन्त्रिणा स्वस्तिकेनापि कृष्णनारायणाय वै ।
अर्पिताः कन्यकाः स्वस्य मुदा विंशतिसंख्यिकाः ॥१०१॥
चक्रं च गरुडं नीत्वा गजस्थाः कन्यकास्तदा ।
नीत्वा श्रीभगवान् शीघ्रं चाऽश्वपट्टसरोवरम् ॥१०२॥
कुंकुमवापिकाक्षेत्रं योगतः प्रसमाययौ ।
स्नापयित्वा कन्यकास्तु चाऽश्वपट्टसरोवरे ॥१०३॥
लोमशस्याऽऽश्रमे स्थातुं समादिदेश तं मुनिम् ।
ताभ्यो मन्त्रान् ददौ माला लोमशश्चाश्रमे तथा १०४॥

ररक्ष गरुडश्चाज्ञामाप्य वैकुण्ठकं ययौ ।
चक्रं शान्तं हरेर्हस्ते कन्यास्तस्थुस्तथाश्रमे ॥१०५॥
एवं श्रीभगवाँश्चक्रे चमत्कारं हि राधिके ।
चतुर्थवत्सरारम्भे दिव्यसद्गुणशेवधिः ॥१०६॥
अथ पातालके तत्र शेषपत्नी सुनन्दिनी ।
बालकृष्णं प्रसस्मार कार्तिके दर्शनाय वै ॥१०७॥
श्रीहरिस्तन्मनो ज्ञात्वा ययौ किशोररूपवान् ।
तया सम्पूजितश्चाऽयं ददौ तस्यै मनुं निजम् ॥१०८॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
मालां च तिलकं प्रादाद् भक्ताऽभजद्धरिं तु सा ॥१०९॥
मृतानां भोगिनां कन्याः सहस्राणि दशाऽभवन् ।
ताभ्यो मनुः सुनन्दिनी ददौ मालादिकं ददौ ॥११०॥
ताः सर्वा वैष्णवीश्रेष्ठतमा जाता हरेः प्रियाः ।
श्रीहरिणा समं सर्वाश्चाययुर्भूतलं शुभाः ॥१११॥
अनन्तेनाऽर्पिता व्योमयानस्थाः सोपदा हि ताः ।
लोमशस्याऽऽश्रमे ताश्च रक्षिताः परमात्मना ॥११२॥
धन्यास्ता योषितो राधे याः कृष्णाय प्रकल्पिताः ।
परब्रह्म स्वयं यासु रमिष्यते सुमुक्तिकृत् ॥११३॥
सर्वस्वं यत्र वै देयं दातव्यं नाऽवशिष्यते ।
अवाप्तव्यं च यत् प्रोक्तं तेन चेद् यदि गृह्यते ॥११४॥
को लाभोऽस्मात्परो लोके तन्वा प्रीणाति चेद्धरिः ।
पठनाच्छ्रवणाच्चास्याऽऽनन्दप्रदो भवेत्प्रभुः ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोश्चतुर्थवर्षारम्भोत्सवे पातालनागस्य स्वस्तिकस्य गरुडद्वारा पातालराजमन्त्रिणः सुमृधोः सकाशादागतकष्टमोक्षणम् । नागकन्यानां लोमशाश्रमानयनं चेत्यादिनिरूपणनामाऽष्टाविंशतितमोऽध्यायः ॥ २८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके वर्षे चतुर्थे माघमासि च ।
नियमं जगृहुर्माघस्नानस्याऽश्वसरोजले ॥ १ ॥
ब्राह्मणा ऋषयः कन्यास्तथाऽन्ये तत्र वासिनः ।
ब्राह्ममुहूर्तमारभ्य जनाः स्नान्ति सरोवरे ॥ २ ॥
नित्यं जले निमज्जन्ति पञ्चषो बालबालिकाः ।
अकस्मात्ते न दृश्यन्ते स्नानकृद्भिर्जलस्थितैः ॥ ३ ॥
जनैरपीति तीरस्थैर्वीक्ष्यते नैव कारणम् ।
कल्पयन्ति जनास्तत्र मकराः सन्ति घातकाः ॥ ४ ॥
अन्ये वदन्ति च ग्राहा विद्यन्तेऽत्र समागताः ।
परे तु तर्कयन्त्येवं पिशाचाः सन्ति वासिनः ॥ ५ ॥
राक्षसा भक्षयन्त्येतान् बालान् घातकिनः खलु ।
किमिदं कारणं तत्तु प्रत्यक्षं ज्ञायते नहि ॥ ६ ॥
आक्रोशोऽभूत्तदा देशे सौराष्ट्रे सर्वतोदिशि ।
अश्वपट्टसरोवारि जीवान् ग्रसति पञ्चषट् ॥ ७ ॥
स्नानं तत्र न कर्तव्यं म्रियन्ते बालका यतः ।
केनचिद्वै जले बाला ह्रियन्तेऽश्वसरोवरे ॥ ८ ॥

**श्रीराधिकोवाच—**

कोऽयं बालप्रहर्ता वै जले तत्राऽभवत्तदा ।
वद मे कारणं तस्य बालानामभवच्च किम् ॥ ९ ॥

**श्रीकृष्ण उवाच—**

शृणु तद् राधिके सर्वं कथयामि समासतः ।
पश्चिमे आरक्तदेशे राजाऽभूत् शावदीनकः ॥१०॥
शवे देहे भवश्चात्मा शावस्तत्रैव दीनवत् ।
वर्तते ज्ञानवृत्त्येति शावदीनाऽभिधानवान् ॥११॥
तस्य भार्याशतं चासीत् किन्तु पुत्रो न चाऽभवत् ।
पुत्र्यस्तस्य सहस्रं वै विद्यन्ते पुत्र एव न ॥१२॥
ततः शोकं गतो राजा पप्रच्छ स्वगुरुं यतिम् ।
कथं पुत्रः प्रजायेत कारणं मे वदाऽत्र नु ॥१३॥
यतिदीनो गुरुस्तस्योवाच ध्यात्वा क्षणं च तम् ।
ऋणानुबन्धनात्पुत्रो जायते ऋणकाम्यया ॥१४॥
अनिर्वृत्ते ऋणे मृत्युर्यस्य लोके प्रजायते ।
ऋणं दातुं गृहे तस्य पुत्रो वृषोऽश्व एव वा ॥१५॥
उष्ट्रोऽजः खर एवाऽसौ जायते कर्मबन्धनात् ।
अधमर्णगृहे यद्वा उत्तमर्णः सुतो भवेत् ॥१६॥
पूर्वं दत्तं धनं नीत्वा मृत्युं गच्छति निर्ऋणः ।
राजँस्त्वं कस्यचिन्नाऽऽसे ह्यधमर्णः पुरा भवे ॥१७॥
तेन कोऽपि तव नाऽऽसीदुत्तमर्णो धनप्रदः ।
तद्दणं ते च नैवाऽस्ति कस्ते सुतोऽत्र संभवेत् ॥१८॥
आनृण्यं सर्वथा श्रेष्ठं चेष्टं मुक्तिप्रदं भवेत् ।
तथापि चेत्तवेच्छाऽस्ति पुत्रार्थं कुरु पूजनम् ॥१९॥
शावदीना महाकाली पूजिता बलिदानतः ।
पुत्रं ते दास्यति सार्वभौमं चिरप्रजीविनम् ॥२०॥
शावदीनामहाकाल्यै बालस्य बलिदानतः ।
बाललाभो भवेत्तत्र बलिः श्रेष्ठ उदाहृतः ॥२१॥

पञ्चमाद् वत्सरान्न्यूनो बालश्चेच्छुभलक्षणः ।
दीयेत यदि शाविन्यै तदा सापि दहेत् सुतम् ॥२२॥
राजा प्राह कथं कीदृग्लक्षणो बालकोऽर्प्यते ।
वद तल्लक्षणं येन सार्वभौमो भवेत् सुतः ॥२३॥
यतिदीनोऽवदत्तं च शृणु राजन् वदामि तत् ।
यस्य हस्ते मत्स्यरेखा धनुष्यं ज्याशरान्वितम् ॥२४॥
ध्वजः शूलं स्वस्तिकं च चक्रं यवो भवेच्च वा ।
यस्य पादे त्रिगुल्फानि च वा प्रासादलेखनम् ॥२५॥
यल्ललाटे त्वेकरेखा कण्ठे श्यामतिलश्च वा ।
यद्रूपं चम्पकाभं च , नेत्रप्रान्ते दलायते ॥२६॥
यज्जघने पुत्तली च रेखारूपा विराजते ।
यद्वा वामे सक्थिनि यत् पाण्डुरं कमलं भवेत् ॥२७॥
स बालो वै महाकाल्यै देयो बलिविधानतः ।
तेन ते भविता पुत्रश्चक्रवर्तीमहानृपः ॥२८॥
यतिदीनात्तथा श्रुत्वा शावदीनो नरेश्वरः ।
तादृग्बालान्वेषणार्थं सिद्धयतीन् युयोज ह ॥२९॥
व्योमगाः सिद्धयतयो हस्तरेखापरीक्षकाः ।
नीलाम्बरधरा उर्व्यां विचेरुर्बाललब्धये ॥३०॥
पश्यन्ति बालरेखास्ते तथा ज्योतिर्ग्रहादिकान् ।
सर्वखण्डेषु यतयश्चरन्ति स्म तदा प्रिये ॥३१॥
तत्रैकः कासदीनाख्यः सौराष्ट्रं त्वाययौ तदा ।
अश्वपट्टसरस्तीरं चाययौ लोमशाश्रमम् ॥३२॥
उक्तलक्षणबालं श्रीकृष्णनारायणाह्वयम् ।
श्रुतवान् लोमशात् सोऽपि कम्भरानन्दनं तदा ॥३३॥
वीक्ष्य लक्षणसम्पन्नं सर्वरेखान्वितं शुभम् ।
ययौ व्योम्ना द्रुतम् आरक्तदेशे नृपतिं प्रति ॥३४॥
उवाच विद्यते देशे सौराष्ट्रे बालकस्तथा ।
कुंकुमवापिकाक्षेत्रे गोपालकृष्णपुत्रकः ॥३५॥
श्रुत्वा स्वेष्टं तदा राजा यतये ग्रामपञ्चकम् ।
ददौ चाथ यतीन् पञ्च त्विन्द्रजालविदस्तदा ॥३६॥
प्रेषयामास सौराष्ट्रं चाश्वपट्टसरोवरम् ।
माघे स्नानपरा लोका यत्र स्नान्ति जले शुभे ॥३७॥
तत्र ते यतयो नित्यमचक्षुर्गोचरास्तटे ।
भ्रमन्ति स्म च तद्बालं हर्तुं यत्नपुरःसराः ॥३८॥
पञ्चषड् बालकान् नित्यं जलेऽन्तर्भावयन्ति ते ।
नयन्ति तान् द्रुतं चारक्तदेशं भूमिपालये ॥३९॥
जीवतस्तान् प्ररक्षन्ति राजभृत्याः सुखप्रदाः ।
यतयोऽश्वपट्टतटे कुर्वन्त्येवं दिवानिशम् ॥४०॥
रेखान्वितस्य बालस्य लाभार्थं चाऽविदो हि ते ।
रेखाऽनभिज्ञास्ते सर्वे हरन्ति बहुबालकान् ॥४१॥
यतिदीनस्तु रेखाणां वीक्षणं प्रकरोति हि ।
दृश्यते नैव रेखा सा तावन्नैव विमुञ्चति ॥४२॥
ह्रियन्ते बालकास्तत्र हाहाकारो हि वर्तते ।
अनादिश्रीकृष्णनारायणः स्नाति गृहान्तरे ॥४३॥
यतीनां करगो नाऽभूदशृणोद् बालनाशनम् ।
ततोऽसौ भगवान् मात्रा समं प्रसह्य वै गृहात् ॥४४॥
विनिर्गत्य ययौ त्वश्वपट्टसरोऽवगाहितुम् ।
माता स्नाति तटे बालो वर्तते सन्निधौ यदा ॥४५॥
तं जिघृक्षुर्यतिस्तत्राऽदृश्यः शीघ्रमुपाययौ ।
जलमानवरूपोऽसौ भूत्वा जग्राह बालकम् ॥४६॥
रूपद्वयधरो बालस्तस्य हस्तगतोऽभवत् ।
द्वितीयेन स्वरूपेण रमते मातृसन्निधौ ॥४७॥
माँ माँ माई पश्य अम्माँ जलमानुषमुल्बणम् ।
बालकं प्रतिगृह्णन्तं मां पश्यन्तं मुहुर्मुहुः ॥४८॥
अपरं बालकं नीत्वा यान्तं जलतलं च माँ ।
पश्य पश्य सबालं तं जले विशन्तमायतम् ॥४९॥
त्रितालमानं चन्द्राभं पिशंगकेशमस्तकम् ।
सिंहचक्षुःसमभ्राजच्चक्षुःपिशंगतारकम् ॥५०॥
रज्जुवद्दीर्घिकाः सर्वांगुलयो भुजयोर्द्वयोः ।
शाखावल्लम्बमानौ च भुजौ पीनौ च शुण्डवत् ॥५१॥
मुखं वानरतुल्यं च रक्तश्मश्रुसमन्वितम् ।
दंष्ट्राचतुष्टयं पार्श्वे दृश्यते बहिरुल्बणम् ॥५२॥
शृंगं चांकुशवत्तस्य कपालोर्ध्वे च विद्यते ।
स्कन्धे पुच्छद्वयं पुच्छद्वयं तस्य नितम्बयोः ॥५३॥
रज्जुचतुष्टयतुल्यं विद्यतेऽस्य सुदीर्घकम् ।
हृदये पृष्ठके चाऽस्य दीर्घरोमाढ्यताऽस्ति च ॥५४॥
हस्तपादांगुलिमध्ये जालचर्माणि सन्त्यपि ।
नाभौ चास्य पतंगोऽस्ति दीपवद्वै प्रकाशते ॥५५॥
सजालपादाऽङ्गुलिका दीर्घा विद्यन्त एव च ।
उदरे कोष्ठली चास्ते बालशालासमाऽस्य तु ॥५६॥
पादौ कुरुतः करयोः करौ कार्यं च पादयोः ।
अस्तनश्चाप्यकर्णश्च वह्निरोमा भयप्रदः ॥५७॥
चिंचिंहुक् चिंचिंशब्दं कुर्वन् जलतले गतः ।
पश्यैनं बालकानत्र हरन्तं दैत्यसन्निभम् ॥५८॥
पश्यन्तु च जनाः सर्वे मारयन्तु च तं यतः ।
घातिनं हिंसकं शीघ्रं नाशयेत् सर्वयत्नकैः ॥५९॥

इत्युक्त्वा तद्धस्तगतो हरिर्विनिर्ययौ जलात् ।
दर्शकाश्च जनास्तत्र नरा नार्यश्च संहताः ॥६०॥
अभवन् त्रासमापन्नाः शुशुचुर्बहुबालकान् ।
हृतान् बालांश्च संस्मृत्य हननोपायमाचरन् ॥६१॥
शतघ्नी रक्षिता तीरे कृत्रिमाबालपुत्तलाः ।
नेतुं तान् पुत्तलाँश्चायाद् यदा तीरे जलेऽपि च ॥६२॥
शतघ्न्या नाशयितव्य इत्येवं निर्णयं व्यधुः ।
अथाऽयं वायुरूपेण झंझावातं विधाय च ॥६३॥
सिद्धदीनोऽहरद्वेगात् शतघ्नीं पुत्तलीस्तथा ।
त्रस्ताश्च दिवसे लोकाः स्वस्वगृहमुपाययुः ॥६४॥
पुत्तल्यश्च शतघ्नी च सर्वं नष्टं तदाऽभवत् ।
आश्चर्ये हि जनाः प्राप्ता लोमशं शरणं ययुः ॥६५॥
जलमानवनाशार्थं किं कार्यमृषिसत्तम ।
बालान् हरति दुष्टात्मा संहारोऽयं भयंकरः ॥६६॥
श्रुत्वा वै लोमशः प्राह संविचार्य क्षणं हृदि ।
एते चारक्तदेशीयाः यतयः पञ्च सन्ति ते ॥६७॥
इन्द्रजालमहाविद्या बहुरूपधरास्तथा ।
म्लेच्छा म्लेच्छक्रिया म्लेच्छनृपाऽऽज्ञयाऽत्र चागताः ॥६८॥
आसुराः कार्मणकाश्च हिंसका निर्दयास्तथा ।
तेषां विनाशनं कृष्णः स्वयमेव करिष्यति ॥६९॥
अनादिश्रीकृष्णनारायणो जानाति तद्विधाम् ।
आसुराणां विनाशार्थं प्राकट्यं श्रीहरेर्यतः ॥७०॥
राक्षसानामौषधं च स्वयमेव करिष्यति ।
एवमुक्त्वा लोमशोऽत्र सस्मार बालकृष्णकम् ॥७१॥
हरिर्हसन् समायाच्च प्रभुः कैशोररूपधृक् ।
गरुडस्थः सचक्रश्च प्रोवाच लोमशादिकान् ॥७२॥
कथं संस्मृतवानस्मि वदन्तु शीघ्रमेव मे ।
लोमशाद्यास्तदा नत्वा प्राहुर्बालाद्युपद्रवम् ॥७३॥
जलमानुषरूपेण राक्षसानां सरःस्थितिम् ।
श्रुत्वा सर्वं हरिः प्राह मत्स्यशूलधनुर्धरम् ॥७४॥
सध्वजं बालकं ते च मार्गयन्ति जले स्थिताः ।
मदर्थं ते यतन्ते च शावदीनाप्रपूजने ॥७५॥
अर्पणीयो बालकः समत्स्यशूलधनुर्ध्वजः ।
बलिदानेन राजा च सुतं वै तादृशं लभेत् ॥७६॥
अहं हस्तगतस्तेषां नाऽभवं चाऽत एव ते ।
व्यापारयन्ति बालानां हरणे शिक्षयामि तान् ॥७७॥
इत्युक्त्वा भगवान् बालो ययावश्वसरस्तटम् ।
तावत् स धृतवान् कृष्णं जलमानुषरूपधृक् ॥७८॥

सहस्रेषु च लोकेषु पश्यत्स्वेव हि राधिके ।
अथ हाहाकृतं सर्वं चासीत् तत्र सरस्तटे ॥७९॥
हरिर्जले सचक्रश्च प्रविष्टो दिव्यरूपवान् ।
असुरेण धृतस्तेन युयुधे च जलान्तरे ॥८०॥
चक्रेण भगवाँस्तस्य रज्जुबन्धचतुष्टयम् ।
छेदयित्वा शिरःशृंगं हस्तपादप्रकोष्ठकान् ॥८१॥
तालत्रयसमः कृष्णश्चाबद्धय तं च रज्जुभिः ।
आनयामास च बहिर्जलाजीवन्तमेव च ॥८२॥
तालत्रयप्रमाणं च श्वेतं तं जलमानुषम् ।
दृष्ट्वा जना महाश्चर्यमवापुर्विस्मयं गताः ॥८३॥
अथाऽन्ये यतयस्तत्र चत्वारो ये जले स्थिताः ।
तेऽपि वारिमनुष्याणां रूपैर्बहिः समाययुः ॥८४॥
प्रार्थयामासुरत्यर्थं प्राणरक्षणहेतवे ।
बालका मारिता नैव सर्वे जीवन्ति ते जगुः ॥८५॥
आनयिष्याम एवाऽत्र प्राणदानं तु देहि नः ।
इत्युक्तो भगवान् विष्णुः कृष्णनारायणः प्रभुः ॥८६॥
जीवदानं ददौ तेभ्यः समुवाच प्रभुः पुनः ।
आगच्छन्तु मया सार्धं व्योम्ना गरुडगामिना ॥८७॥
यत्रैते बालकाः सन्ति रक्षिता जीविनः खलु ।
म्लेच्छा वारिमनुष्यास्ते श्रुत्वा कृष्णवचस्तदा ॥८८॥
व्योम्ना ययुर्हरिं नीत्वा देशमारक्तमुज्ज्वलम् ।
रक्तवर्णं रक्तजलं रक्तमानवमण्डलम् ॥८९॥
यत्रास्ते सर्वमारक्तं प्रायशो भूस्तरं तथा ।
शावदीनो महाराजो यतिदीनो गुरुस्तथा ॥९०॥
शावदीना महाकाली यत्रास्ते भूमिपालये ।
तत्र कृष्णो यतयस्ते ययुः राज्ञा सुसत्कृताः ॥९१॥
बालका दर्शितास्तत्र पञ्चाशत् सुखिनोऽव्यथाः ।
सुन्दरं बालकृष्णं च दृष्ट्वा नृपादयः खलु ॥९२॥
ज्ञात्वा सिद्धयतिभ्यश्च चमत्कारं परं शुभम् ।
राजपत्न्यो राजकन्याः श्रीहरिं पुरुषोत्तमम् ॥९३॥
सम्मृज्य चोत्तरतैलैः सुगन्धिचूर्णकैस्तथा ।
स्नपयामासुरत्यर्थं कवोष्णैर्वारिभिस्तदा ॥९४॥
रूपानुरूपावयवं मीनशूलधनुर्धरम् ।
सध्वजं च करं दृष्ट्वा मुमुहुर्मुमुदुस्तथा ॥९५॥
अहोऽयं बलियोग्योऽस्ति स दिष्ट्याऽत्र समागतः ।
एवमावेदयाञ्चक्रुः राजानं सत्वरं स्त्रियः ॥९६॥
राजा विचार्य तूर्णं हि भटान् सेनापतींस्तथा ।
कारागारे तु तं धर्तुमाज्ञां ददौ प्रहस्य वै ॥९७॥

रूपमुग्धाश्च ताः कन्या नेच्छन्ति मरणं हरेः ।
राज्ञ्यः पुत्रेच्छया तत्र बलिमिच्छन्ति वै हरिम् ॥९८॥
बालरूपधरः कृष्णो धृतो भटैस्तु तत्क्षणम् ।
अवाद्यन्त च वाद्यानि राजा मेने कृतार्थताम् ॥९९॥
सुदर्शनं च गरुडो बालौ भूत्वा शुभास्यकौ ।
बालेषु च मिलित्वैव धैर्यं ददतुः रक्षकौ ॥१००॥
अथ कृष्णो निगडस्थः कारागारे कृतो भटैः ।
कन्यका मोहमापन्नाः सहस्रसंख्यकास्तदा ॥१०१॥
शावदीनामहाकालीनियमं जगृहुर्मुदा ।
यदि बालो विमुच्येत भवेच्चास्मत्पतिस्तदा ॥१०२॥
करिष्यामो व्रतं मासं केवलं हि पयोव्रतम् ।
शावदीनापूजनं च करिष्यामो दिवानिशम् ॥१०३॥
अद्यतस्त्यज्यते मिष्टं मधु शृंगारकादिकम् ।
शावदीनादेविकायाः कुर्मो मालाद्विपञ्चकम् ॥१०४॥
इत्येवं नियमं ताश्च जगृहुर्बालरक्षकम् ।
अथ रात्रौ प्रसुप्ताश्च प्रजा राजा भटादयः ॥१०५॥
श्रीहरिर्बन्धने सुप्तो लोकलीलाप्रदर्शकः ।
द्वितीयेन स्वरूपेण वर्तते स्वगृहे प्रभुः ॥१०६॥
कुंकुमवापिकाक्षेत्रे सर्वानन्दकरो हरिः ।
वक्ति चारक्तदेशोत्थां वार्तां श्रीलोमशर्षये ॥१०७॥
शृण्वन्ति सर्वे साश्चर्यं मन्वते दूरभूमिजम् ।
एवं रात्रिर्व्यतीता च प्रभातं समजायत ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आरक्तदेशीयराज्ञा पुत्रार्थं शावदीनाकाल्यै बालबलिदानार्थकबद्धबालानां मोक्षणार्थं श्रीहरेस्तत्र गमनं सहस्रकन्यकानां हरौ मुग्धता चेत्यादिनिरूपणनामा एकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

**श्रीकृष्ण उवाच—**

श्रूयतां राधिके वृत्तं तत्रत्यं प्रातरागते ।
यज्जातं तद्वदाम्यत्र कृष्णनारायणस्य ते ॥ १ ॥
शावदीनो नृप उद्घोषयामास प्रजाजने ।
पुत्रार्थं बलिदानार्थं बालः प्राप्तः सुलक्षणः ॥ २ ॥
करे मीनध्वजधनुःशूलचक्रादिरेखितः ।
माघ्यां च पूर्णिमायां च बलिदानं भविष्यति ॥ ३ ॥
पञ्चदशदिनान्यत्र वर्तन्ते शुक्लपक्षके ।
प्रतिपत्तः समारभ्य नित्यं देवीप्रपूजनम् ॥ ४ ॥
कर्तव्यं पुत्रकांक्षार्थिजनैर्नित्यं महोत्सवम् ।
श्वः प्रतिपद्दिने प्रातर्बालमादाय मन्दिरम् ॥ ५ ॥
अहं राजा गमिष्यामि देव्यग्रे गुरुणा सह ।
अपाकस्य च बालस्य देव्यग्रे पाकतां गुरुः ॥ ६ ॥
म्लेच्छकाण्डैर्मद्यदानैः सुरासंस्कारकैस्तथा ।
करिष्यति विधानेन बालो देवीपशुस्ततः ॥ ७ ॥
प्रजायते देवरूपस्तस्य सेवा जनैः सदा ।
भोजनैः सेवनैर्वस्त्रैर्जलैः पानैः प्रमर्दनैः ॥ ८ ॥
यानखेलनक्रीडाभिः कर्तव्या सर्वमानवैः ।
बालार्चने महादेवी प्रसन्ना संभविष्यति ॥ ९ ॥
तस्मात् पशुः पूजनीयो दानमानाऽर्हणादिभिः ।
एवमुद्घोषितं राज्ञा प्रजास्वप्रसरत् क्षणात् ॥१०॥
प्रातः प्रतिपदि क्ष्मेशः स्नात्वा सैन्येन शोभितः ।
सोत्सवो बालमादाय स्वांके देवीगृहं ययौ ॥११॥
म्लेच्छमन्त्रैस्तु गुरुणा बालो देवीपशुः कृतः ।
संस्कृतः पूजितश्चापि महान्महोत्सवः कृतः ॥१२॥
शावदीना महाकाली दृष्ट्वा श्रीपुरुषोत्तमम् ।
लज्जामवाप शीघ्रं सा मूर्तेर्दूरं गताऽभवत् ॥१३॥
शुशोच परमं देवी सर्वान् हन्तुं समिच्छति ।
किन्तु कृष्णस्य कर्तव्यं पालनीयं भवेदिति ॥१४॥
विचार्याऽऽज्ञां विना नैव किंचित् कर्तुं समिच्छति ।
इति मौनाऽभवद्देवी यावत्पूजा निवर्तिता ॥१५॥
अथ दानानि बहूनि राजा प्रादान्महोत्सवे ।
बालकृष्णोऽपि परवत् पारवश्योऽभवत्तदा ॥१६॥
प्राकृतो बालसदृशो बालोऽभवन्निजेच्छया ।
देवीगृहे दृष्टिसौधे रक्षितो निशि केवलैः ॥१७॥
बालकैः कन्यकाभिश्च सह तत्र प्रसन्नहृत् ।
भवेत् तथा सेव्यते च सर्वैरप्युपचारकैः ॥१८॥
अर्धरात्रे गते सर्वे निद्रामापुस्ततः सती ।
शावदीना महाकाली श्रीहरेः सन्निधौ शुभा ॥१९॥
कन्या भूत्वा चाजगाम वेपमाना च किंकरी ।
पादयोर्मस्तकं धृत्वा विमुञ्च्याऽश्रूणि जिह्वया ॥२०॥
प्रविलिह्य हरेः पादौ क्षमस्वेति जगाद सा ।
नेमे मुहुस्तथाऽऽज्ञां चार्थयामास हरेर्हि सा ॥२१॥
नाथाऽपराधिनश्चैते राजाद्याः पुत्रलालसाः ।
हन्तव्यास्ते मया सर्वे देह्याज्ञां मे करोति तत् ॥२२॥
यतिदीनो गुरुस्तस्य शावदीनश्च भूपतिः ।
कासदीनश्च सौराष्ट्रसरोवार्ष्वमार्गकः ॥२३॥

म्लेच्छाश्च सिद्धयतयो हन्तव्यास्ते मया प्रभो ।
अन्येऽपि चेत् सहायस्था हन्तव्यास्ते मयाऽत्र वै ॥२४॥
ओमित्याह हरिस्तस्यै शावकाल्यै पुमुत्तमः ।
खड्गं भल्लं तथा शक्तिं परशुं पाशमित्यपि ॥२५॥
दण्डं वज्रं चर्मासिं मुद्गरं गदां त्रिशूलकम् ।
अंकुशं मूशलं चक्रं सशरं धनुषं तथा ॥२६॥
शंखं चेति तदा हेतीनष्टादशकरेषु सा ।
धृत्वा प्रातर्नृपगेहे प्रविवेश रुषान्विता ॥२७॥
केसरिस्था क्रूररूपा वह्निनेत्रा विषोल्बणा ।
नृपं जग्राह केशेषु शिरश्चिच्छेद चासिना ॥२८॥
गुरुं द्वेधा विभिद्यैव शूलेन च ततः परम् ।
हत्वा कासं सिद्धयतीन् म्लेच्छाँश्च तत्सहायदान् ॥२९॥
कारागृहपतीन् हत्वा मोचयामास बालकान् ।
हाहाकारो महानासीदन्तःपुरजनेषु वै ॥३०॥
कुपिता राजपूज्या सा कुलदेवीति वै जगुः ।
नाशयामास राजानं गुरुं यतीन् तथाऽपरान् ॥३१॥
बालानां वधपूर्वं वै पापं राज्ञः समागतम् ।
बाला नैव कदाचिद्वै पीडनीया यतो जनैः ॥३२॥
बालत्रासप्रदातॄणां सर्वनाशो भवेदिह ।
बाला निर्दोषपुष्पाणि न हन्तव्यानि वै द्रुदा ॥३३॥
बाला ईशनिवासास्ते ज्वालनीया न वै क्वचित् ।
कायादिदोषहीनास्ते ब्रह्मसाधुस्वरूपिणः ॥३४॥
अर्चनीया रञ्जनीयास्तोषणीया हि बालकाः ।
दातव्यं भोजनं तेषां सर्वदाऽभयदानकम् ॥३५॥
दातव्यस्त्वाश्रयस्तेषां मा दातव्यं मृतेर्भयम् ।
अपक्वफलरूपास्ते पराधीनप्रजीवनाः ॥३६॥
मातापितृसमाधारा न हन्तव्याः कदाचन ।
बालोद्वेगफलं तत्र मरणं जायते हि तत् ॥३७॥
उद्वेजयिता बालानामपहर्ता जनोऽधमः ।
राजाऽवाप फलं तूर्णं मरणं धर्मघातकः ॥३८॥
अथ केसरिपृष्ठस्था ययौ बालगृहाणि सा ।
यत्र कारागृहवासे ते हि तिष्ठन्ति बालकाः ॥३९॥
यत्रास्ते गरुडश्चक्रं तथा कृष्णनरायणः ।
तत्रेयं सहसा याता युद्धरूपधरा सती ॥४०॥
क्रौर्यं त्यक्त्वाऽतिसौम्याऽभूद् द्विभुजा कन्यका शुभा ।
हसमाना च तान् बालानाह पश्यत मां प्रति ॥४१॥
बालैस्त्वालोकिता साऽपि स्वस्वमातृस्वरूपिणी ।
प्रागेव तद्गलं धृत्वा रेमिरेऽङ्के हि बालकाः ॥४२॥

अति प्रसन्नतां प्राप्ता मेनिरे रक्षणं निजम् ।
अथ सा बालकृष्णं वै नेमे क्षमामयाचत ॥४३॥
पयः फलानि प्रददौ सर्वबालेभ्य ऐश्वरी ।
अर्भका भक्षयामासुर्बभूवुः सुखिनस्तथा ॥४४॥
अथ श्मशानयात्रां च प्रजाश्चक्रुर्नृपस्य वै ।
राज्ञस्तु विधवाः सर्वा देवीमागत्य चुक्रुशुः ॥४५॥
कन्यास्ता रुरुदुः सर्वा गुर्वादीनामपि स्त्रियः ।
देवी मूर्तेर्विनिर्गत्य कन्यारूपा व्यजायत ॥४६॥
साक्षाद् भूता हि सर्वासामुवाच मधुरं वचः ।
मा शोकं कुरत प्रेष्ठाः राज्ञा प्राप्तं फलं निजम् ॥४७॥
अहं भवामि यत्पत्नी तं राजा हन्तुमुद्यतः ।
अनादिश्रीकृष्णनारायणः कान्तोऽस्ति मे प्रभुः ॥४८॥
मीनध्वजधनुःशूलचक्रधारी जनार्दनः ।
बालरूपो भवत्येव कारागारगतोऽत्र सः ॥४९॥
मे पतिर्मत्पशुः राज्ञा कृतः पुत्रे हयाऽपि तु ।
तत्फलं मरणं तस्य मया दत्तं महाधिने ॥५०॥
भवतीनां महाश्रेयो भविष्यति हरिकृतम् ।
अनादिश्रीकृष्णनारायणं स्तुवन्तु मुक्तये ॥५१॥
इत्युक्ता राधिके सर्वा ययुर्नारायणं प्रति ।
तुष्टुवुः परया प्रीत्या पापमोक्षणहेतवे ॥५२॥
हरिस्ताभ्यो निजं रूपं दर्शयामास धामगम् ।
पार्श्वे लक्ष्मी स्वरूपां च शावदीनां सतीं प्रियाम् ॥५३॥
गरुडं बालकं चापि चक्रं सुदर्शनं तथा ।
ततो वै दर्शयामास चाश्वपट्टसरोवरम् ॥५४॥
कुंकुमवापिकाक्षेत्रं लोमशस्याश्रमं तथा ।
कोट्यर्बुजाऽब्जकन्याश्च दिव्यतां पारमेश्वरीम् ॥५५॥
दृष्ट्वाऽऽश्चर्यं परं प्राप्ता मातरः कन्यकास्तथा ।
ययाचिरे वरं शीघ्रमस्माकं त्वं पतिर्भव ॥५६॥
अथ कृष्णस्तु सर्वाभ्यो यथेष्टं वै वरं ददौ ।
गरुडं प्राह यास्यामः श्रीमद्बदरिकावनम् ॥५७॥
सुदर्शनं सह नीत्वा गरुडस्थो हरिस्तदा ।
सस्मार दिव्ययानं च योजनायतमुज्ज्वलम् ॥५८॥
सौवर्णं निजधामस्थं शीघ्रं चोपस्थितं हि तत् ।
सपार्षदे विमाने च सर्वाः स्त्रीः कन्यकास्तथा ॥५९॥
शावदीनां महाकालीं निषाद्य श्रीहरिः स्वयम् ।
प्रातः राजमुकुटं च भक्तं जल्लाउद्दीनकम् ॥६०॥
तृतीयां चार्पयित्वा व्योम्ना बद्र्याश्रमं ययौ ।
गंगायां स्नापयित्वा च देहशुद्धिं विधाप्य च ॥६१॥

सर्वाभ्यः पाययामास श्रीहरेश्चरणामृतम् ।
नरनारायणपूजां कारयित्वा ततो हरिः ॥६२॥
कुरुक्षेत्रं त्वाययौ च दशक्रोशविशालकम् ।
पावनं परमं श्रेष्ठं हिमाद्रेः पादमाश्रितम् ॥६३॥

श्रीराधिकोवाच—

कुरुक्षेत्रं कदा केन कृतं तद् विस्तराद् वद ।
कथं वै पावनं तद्धि प्रशस्तं गण्यते सदा ॥६४॥

श्रीकृष्ण उवाच—

सोमवंशोद्भवो राजा ऋक्षो नाम महाबलः ।
कृतस्यादौ समभवद् ऋक्षात्संवरणोऽभवत् ॥६५॥
स तु पित्रा निजे राज्येऽभिषिक्तो बाल एव सः ।
बाल्येऽपि धर्मनिरतो मद्भक्तः स सदाऽभवत् ॥६६॥
पुरोहितस्तु तस्याऽऽसीद् वसिष्ठो वरुणात्मजः ।
स तं त्वध्यापयामास सांगान्वेदानुदारधीः ॥६७॥
अनध्याये दिने राजा ययौ वनानि वीक्षितुम् ।
वैभ्राजं सुवनं रम्यं विवेश बहुविस्तरम् ॥६८॥
द्वैतवनं विवेशाऽसौ रुद्रागौ द्वौ गतौ यतः ।
स वनान्तं ददर्शाऽथ फुल्लकोकनदावृतम् ॥६९॥
तत्र ददर्श देवानां कन्यकास्तासु मध्यगाम् ।
सूर्यपुत्रीं तपतीं स ददर्श सर्वतोऽधिकाम् ॥७०॥
तत्र लग्नमना राजा ययौ मेरुं प्रति प्रभुः ।
प्रतिष्ठानपुरं रम्यं तिष्ठत्येव च तां स्मरन् ॥७१॥
यदा नाऽयं गृहं प्रत्यायातस्तथा पुरोहितः ।
ज्ञात्वा तं मेरुसंस्थं च तपतीलग्नमानसम् ॥७२॥
समुत्पत्य वसिष्ठः प्राययौ भास्करमण्डलम् ।
ननाम भास्करं सूर्यो ननामैनं पुपूज च ॥७३॥
पप्रच्छाऽऽगमने हेतुमृषिः सूर्यमुवाच ह ।
समायातोऽस्मि देवेश याचितुं त्वां महाद्युते ॥७४॥
सुतां संवरणस्यार्थे त्वं तापीं दातुमर्हसि ।
तापीं दृष्ट्वा ततः सूर्यो ददौ तापीं जहर्ष च ॥७५॥
ऋषिर्नीत्वा राज्यमायात् सम्वरणोऽपि चाययौ ।
तं दृष्ट्वा चकमे तापी तस्मै महर्षिणाऽर्पिता ॥७६॥
तस्यां पुत्रोऽभवत् काले कुरुर्नाम्ना स वै कृतः ।
षोडशाब्दः समुवाह सुदाम्नो नृपतेः सुताम् ॥७७॥
कीर्तिनाम्ने धुरं दत्वा राज्यस्य वनमाविशत् ।
सौदाम्न्या सह पत्न्या वै तेपे द्वैतवने नृपः ॥७८॥

तत्र देवीं हरिजिह्वां स ददर्श सरस्वतीम् ।
सुदर्शनस्य जननीं ब्रह्मपुत्रीं च प्लक्षजाम् ॥७९॥
स्नात्वा तत्र जलं पीत्वा ब्रह्मवेदीमुपाययौ ।
उत्तरा सा ब्रह्मवेदिरुच्यते यज्ञभूमिका ॥८०॥
मध्यमा ब्रह्मवेदिस्तु प्रयागराज उच्यते ।
प्राग्वेदिका गयावेदिर्विरजा दक्षिणा तु वै ॥८१॥
प्रतीची पुष्करा वेदिस्त्रिभिः कुण्डैरलंकृता ।
स्यमन्तपञ्चकं धर्मस्थानं चोत्तरवेदिका ॥८२॥
आसमन्ताद् योजनानि पञ्च पञ्च च सर्वतः ।
तदमन्यत राजर्षिः क्षेत्रं पुण्यं महाफलम् ॥८३॥
हृदं कृत्वा पर्णशालां विधाय वासमाचरत् ।
कृत्वा सीरं रुद्रवृषं यमस्य महिषं तथा ॥८४॥
वोढारं संविधायैव स्वयं कृष्टुं समुद्यतः ।
कर्षन्तं तं महेन्द्रश्चागत्य पप्रच्छ कारणम् ॥८५॥
राजन् किमिदं कार्षेयं भवान् कर्तुमिहोद्यतः ।
राजाऽब्रवीत् तपः सत्यं शौचं दानं दया क्षमा ॥८६॥
योगश्च शीलवृत्तिश्चेत्यष्टकं चात्र विद्यते ।
इन्द्रः प्राह तथा राजन् भूयात्तवाऽभिवाञ्छितम् ॥८७॥
इन्द्रे गते तु राजाऽसौ कर्षति स्म निरन्तरम् ।
सप्तक्रोशाधिकां भूमिं सीरकृष्टां चकार सः ॥८८॥
ततोऽहं राधिके विप्रो भूत्वाऽगच्छं नृपान्तिकम् ।
अपृच्छं च त्वया राजन् कथं वै क्लेश उह्यते ॥८९॥
तदाऽष्टांगो महाधर्मः समाख्यातो नृपेण मे ।
ततो मयाऽस्य गदितं नृप बीजं क्व वर्तते ॥९०॥
स चाऽऽह मम देहेऽत्र मानसं बीजमस्ति हि ।
तमब्रुवं देहि मह्यं बीजं निष्कास्य देहतः ॥९१॥
वाटिकां खलु वप्स्यामि सीरं कर्षतु वै भवान् ।
ततो नृपतिना बाहुर्दक्षिणः प्रसृतः कृतः ॥९२॥
मया चक्रेण छिन्नः सोऽभवत्तत्र सहस्रधा ।
एवं वामभुजः पादौ कटितश्च द्विधा कृताः ॥९३॥
तानि बीजानि जातानि कोट्यधिकानि सर्वतः ।
अथ स मे शिरः प्रादात् तेन प्रीतोऽस्मि तस्य च ॥९४॥
वरदोऽस्मीत्यथेत्युक्ते कुरुर्वरमयाचत ।
यावदेतन्मया कृष्टं धर्मक्षेत्रं तदस्तु ते ॥९५॥
स्नातानां च मृतानां च महापुण्यफलं त्विह ।
उपवासश्च दानं च स्नानं जाप्यं च पूजनम् ॥९६॥
होमयज्ञादिकं सर्वमत्राऽक्षयं भवेत् प्रभो ।
तथा भवान् सुरैः सार्धं ब्रह्मणा शंभुना तथा ॥९७॥

वसाऽत्र पुण्डरीकाक्ष मन्नामन्यञ्जकेऽत्र वै ।
इत्येवमुक्तस्तेनाऽहं तदा बाढमुवाच तम् ॥९८॥
तथा च त्वं दिव्यवपुर्मेव भूयोऽपि स्वस्तिमान् ।
अन्तकाले चिरकाले लयमेष्यसि मत्तनौ ॥९९॥
शाश्वती तव कीर्तिश्च भविष्यति मदाश्रयात् ।
अत्र त्वं याजको यज्ञान् यजिष्यसे सहस्रशः ॥१००॥
क्षेत्रस्य रक्षकान् चन्द्रयक्षं पन्नगवासुकिम् ।
विद्याधरं शंकुकर्णं सुकेशं राक्षसं तथा ॥१०१॥
अजावनं च नृपतिं महादेवं च पावकम् ।
ददामि तेऽत्र बलिनोऽष्टसहस्राणि धन्विनाम् ॥१०२॥
कुरुजांगलमध्ये च पृथूदकं सरो महत् ।
नदी सरस्वती चापि वर्तते पावनी शुभा ॥१०३॥
सरस्वतीदृषद्वत्योरन्तरे कुरुजांगले ।
ब्रह्मसरः शुभं तीर्थं समन्तादर्धयोजनम् ॥१०४॥
आद्यैषा ब्रह्मणो वेदिस्ततो रामह्रदः स्मृतः ।
कुरुक्षेत्रं ततः प्रोक्तं धर्मक्षेत्रं हि पावनम् ॥१०५॥
तरन्तुकारन्तुकयोरन्तरं यत्तु विद्यते ।
रामह्रदपञ्चकाच यदन्तरं हि विद्यते ॥१०६॥
कुरुक्षेत्रं विशालं तत् समन्तपञ्चकाऽऽह्वयम् ।
तत्राऽनादिकृष्णनारायणो व्योम्ना समाययौ ॥१०७॥
सरस्वत्यां दृषद्वत्यां ब्रह्मसरसि योषितः ।
स्नापयित्वा च यानेन क्षणमात्रेण राधिके ॥१०८॥
अश्वपट्टसरःक्षेत्रे लोमशाश्रममाययौ ।
बालकाः कन्यका नार्यो देवी च गरुडो हरिः ॥१०९॥
अवतेरुः क्षितिं तत्र जयशब्दास्तदाऽभवन् ।
अवाद्यन्त च वाद्यानि देवीशंखोऽप्यवाद्यत ॥११०॥
लोमशाद्या ऋषयश्च प्रजाः शीघ्रं समाययुः ।
आभाष्य मंगलाचारमकुर्वन् ब्राह्मणादयः ॥१११॥
सस्नुः सरोवरे भुक्तवन्तो भोज्यानि सर्वशः ।
आरामं कृतवन्तश्च प्रवासादागमश्रमाः ॥११२॥
जयोत्सवः कृतो रात्रौ राज्ञो नाशः प्रवर्णितः ।
बालका निजपितृभ्यश्चार्पिता हरिणा तदा ॥११३॥
कन्यका योषितः सर्वा लोमशाय निवेदिताः ।
आश्रमे रक्षणार्थं च मन्त्रदानार्थमित्यपि ॥११४॥
लोमशश्च पवित्राभ्यो ददौ मत्रं च मालिकाः ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥११५॥
वैष्णव्यस्ता दिव्यरूपा अभवन् ब्रह्मतेजसा ।
मातरस्ता भजनं च चक्रुः कृष्णकृपावशात् ॥११६॥
दिव्यदेहा विमानैश्च ययुर्वैकुण्ठमेव ताः ।
कन्यकास्तत्र तस्थुश्च श्रीहरेरिच्छया सदा ॥११७॥
इत्येवं रक्षिता बाला म्लेच्छा विनाशितास्तथा ।
पठनाच्छ्रवणाच्चास्य स्वर्गमोक्षफलं भवेत् ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोः राजकृतदेवीपशुसंस्कारः, देव्या राजादिसंहारः, बद्रीं कुरुक्षेत्रं कुंकुमवापिकां प्रत्यागमनम्, बालकानां तज्जनकेभ्योऽर्पणम् , मातॄणां मुक्तिश्चेत्यादि-निरूपणनामा त्रिंशत्तमोऽध्यायः ॥ ३० ॥

श्रीकृष्ण उवाच —

श्रूयतां राधिके देवी शावदीना तु कालिका ।
अश्वपट्टसरस्तीरे दिव्योवास वटाश्रिता ॥ १ ॥
क्षेत्ररक्षां करोत्येव चाष्टादशभुजा प्रिया ।
सिंहवाहनयुक्ता च कृष्णनारायणांगना ॥ २ ॥
कन्यकानां सदा रक्षां करोति दिव्यविग्रहा ।
प्रत्यक्षा दृश्यते लोकैः कृष्णनारायणेच्छया ॥ ३ ॥
तत्तीर्थं कालिकातीर्थं वर्ततेऽश्वसरोवरे ।
पश्चिमे तत्र सेतौ वै कृतप्रासादसन्निधौ ॥ ४ ॥
माघस्नानसमाप्तौ च कृष्णनारायणं प्रभुम् ।
पूजयामासुरत्यर्थं प्रजा विप्राश्च कन्यकाः ॥ ५ ॥
महोत्सवो महान् जातो दिव्यो मोक्षप्रदो हि सः ।
अथ सर्वत्र वार्ता सा प्रासरद् वायुवेगतः ॥ ६ ॥
जलमानववीक्षार्थं जनास्त्वायान्ति दूरतः ।
दृष्ट्वा दृष्ट्वा महाश्चर्यं मन्यन्ते श्रीहरेर्बलम् ॥ ७ ॥
हरिणा स वारिनरो वारिणा प्रोक्षितस्तदा ।
दिव्यरूपो हस्तपादावयवः समपद्यत ॥ ८ ॥
तुष्टाव श्रीहरिं सेवामार्थयत्पादयोः सदा ।
श्रीहरिस्तं सरस्येव क्षेत्रपालं व्यधात्सदा ॥ ९ ॥
तव वंशो मानसश्च सर्वत्र प्रसरिष्यति ।
जलमानुषसृष्टिः सा भविष्यतीति चाह तम् ॥१०॥
जडदेहं तदा तस्य जलमध्ये व्यसर्जयत् ।
ततो दिव्या जलनरा जलनार्योऽभवन् शतम् ॥११॥
अथ लोका महाकालीं पश्यन्त्यथ व्रजन्ति च ।
कथयन्ति प्रतापं श्रीकृष्णनारायणस्य ते ॥१२॥
भजन्ते श्रीकृष्णनारायणं श्रीपरमेश्वरम् ।
मुक्तिं यान्ति बहवश्च श्रीशस्वामिप्रतापतः ॥१३॥

पयोव्रतं ताः कन्याश्च चक्रुस्तत्राश्रमे यतः ।
हरिः कान्तः प्रभुः प्राप्तस्तदर्थं मानितं तु प्राक् ॥१४॥
राधिके व्रतपुष्ट्यर्थं गावः कामदुघास्तदा ।
पयो ददति नित्यं वै व्रतं कुर्वन्ति कन्यकाः ॥१५॥
श्रीहरिं निर्मलदुग्धैः स्नपयन्ति प्रगे च ताः ।
पश्चाद्वार्भिः स्नापयित्वा वस्त्रभूषादिभिः प्रभुम् ॥१६॥
शृंगारयन्ति भावेन सुगन्धयन्ति सद्द्रवैः ।
मर्दयन्ति प्रभोर्देहं रञ्जयन्ति सुगीतिकैः ॥१७॥
हासयन्ति सुमाधुर्यैस्तोषयन्ति सुनर्तनैः ।
आनन्दयन्ति सुस्पर्शैस्तर्पयन्ति सुभोजनैः ॥१८॥
स्तुवन्ति वर्धयन्त्येव नीराजनक्षमापनैः ।
एवं कृष्णव्रतकर्त्र्यः पिबन्ति दुग्धमेव ताः ॥१९॥
मासपूर्णं व्रतं कृत्वा चक्रुः कृष्णार्पणं च तत् ।
दानहोमोत्सवमुद्यापनं कृत्वा च पूर्णताम् ॥२०॥
तस्थुस्तत्रैव संभेजुः श्रीकृष्णं पुरुषोत्तमम् ।
अनादिश्रीकृष्णनारायणं प्राणपतिं प्रभुम् ॥२१॥

श्रीराधिकोवाच—

कथं कृष्णः परब्रह्म म्लेच्छराक्षसकन्यकाः ।
जातिनिकृष्टभावोत्था जग्राह पावनः प्रभुः ॥२२॥

श्रीकृष्ण उवाच—

शृणु राधे कथयामि मम दिव्यां कथां तव ।
परेण ब्रह्मणा चाहं पुरा स्वांशः प्रकाशितः ॥२३॥
मया राधा तदंशा च पत्नीरूपा कृता तदा ।
साहोदर्यं रोधते न तेजस्विनां तदत्र वै ॥२४॥
परेण ब्रह्मणा नारायणश्चतुर्भुजः कृतः ।
परब्रह्मसमुत्था च लक्ष्मीस्तेन प्रिया कृता ॥२५॥
साहोदर्यं बाधते न नारायणावतारके ।
ब्रह्मणा स्वस्य वंशीया सावित्री संविवाहिता ॥२६॥
गायत्री वंशजा पुत्री ब्रह्मणा स्वप्रिया कृता ।
सरस्वती तथा पुत्री पत्नीत्वेन सुमानिता ॥२७॥
ब्रह्मपौत्रस्य पुत्र्यश्च दक्षजाः कुलजाश्च ताः ।
ब्रह्मपुत्रैः प्रपुत्रैश्च सर्वा एव विवाहिताः ॥२८॥
कश्यपेन पुरा तिर्यग्जातीयाः स्वप्रियाः कृताः ।
दनुश्च दितिरेवेमे राक्षस्यौ कश्यपस्त्रियौ ॥२९॥
अरुन्धती श्वपची च वसिष्ठेन विवाहिता ।
काली च भैरवी दुर्गा तामस्यः शंकरप्रियाः ॥३०॥

वृन्दा तुलसी दैत्यस्य पत्न्यौ विष्णुविवाहिते ।
म्लेच्छा गोरोमतो जाता गवां वंशास्तु ते स्मृताः ॥३१॥
समर्थो भगवान् सर्वान् पवित्रयति तत्क्षणात् ।
न तस्याग्रे जातिभावो नोच्चता नीचता न च ॥३२॥
भावगम्यो हि भगवान् भावितो भावयत्यपि ।
सर्वं तस्य सः सर्वस्मिन् तदात्मकः स एव ह ॥३३॥
सर्वभोक्ता सर्वकर्ता सर्वपतिः पतीश्वरः ।
तस्याऽऽज्ञया पुरा ब्रह्मा युगलानि समसृजत् ॥३४॥
तद्युगलं भ्रातृस्वसृरूपं सहस्रमास ह ।
ततः सृष्टिः कृतयुगे भवत्येव न दूषणम् ॥३५॥
तदा कन्याः परस्मै वै दातुं प्रथा न चाऽभवत् ।
अथ कन्याविहीनानां वंशसन्तानसिद्धये ॥३६॥
कन्यादानं प्रदातव्यमन्यस्मै नियमोऽभवत् ।
परगोत्रे प्रदातव्या कन्येति नियमस्त्वनु ॥३७॥
असपिण्डे प्रदातव्या साजात्ये नियमोऽभवत् ।
एवं सर्वैर्लभ्यते वै कन्या वंशप्रदा ततः ॥३८॥
अन्ये धर्माः पुरा सृष्टौ सृष्ट्यारंभेऽपि चापराः ।
अन्ये धर्माः कृते त्वाद्ये त्रेतादावपरे वृषाः ॥३९॥
कलौ धर्मा अधर्मास्ते तदानीमभवन् प्रिये ।
कृतधर्माः कलौ सर्वे न तु धर्मतया मताः ॥४०॥
तेजोभेदाद् भिन्नधर्माः प्रवर्तन्ते युगे युगे ।
तस्मात् कृष्णस्य दोषो न तत्क्रिया धर्म एव सः ॥४१॥
तत्कृतः सः पराम्नायः शास्ति सर्वं जगत् सदा ।
स चाम्नायो नैव कृष्णं शासितुं क्षमते क्वचित् ॥४२॥
आम्नायस्य महामाता क्रिया कृष्णस्य वर्तते ।
तस्मात् कृष्णक्रियाः सर्वा आत्माम्नायस्वरूपिणी ॥४३॥
न सः कामो न सः क्रोधो न व्यवायो न हिंसनम् ।
न तच्चौर्यं न सांकर्यं कृष्णकृतं तु यद्भवेत् ॥४४॥
कामो दिव्यस्तथा क्रोधो व्यवायो दिव्य एव सः ।
हिंसा चौर्यं च सांकर्यं दिव्यं कृष्णकृतं सदा ॥४५॥
राधा दिव्या रतिर्दिव्या दिव्या वैभवभोग्यता ।
सर्वं दिव्यं परब्रह्ममयं तत्र न दूषणम् ॥४६॥
यत्राऽस्ति तेजसां राशिस्तमस्तत्र न विद्यते ।
तमस्तु दूषणं प्रोक्तं तेजस्विषु न संभवेत् ॥४७॥
अल्पदृष्ट्या विलोक्यन्ते दूषणानि तमोऽधिकैः ।
ब्रह्मदृष्ट्या तु तान्येव भूषणानि भवन्ति हि ॥४८॥
यादृक् स्नेहः स्त्रियां पुत्रे सुतायां जनकादिषु ।
स एव साधुषु कृतो मोक्षं ददाति निर्गुणः ॥४९॥

सत्सु साध्वीषु च दोषा भस्मतां यान्ति योगतः ।
हरेर्योगाद् दिव्यभावाः सन्तः साध्व्यो भवन्ति हि ॥५०॥
यथा राधे तव पुत्राः क्षारोदा अपि सर्वथा ।
पावनास्तीर्थरूपास्ते दिव्यरूपा भवन्ति हि ॥५१॥
यथा लिंगं काममूलं दोषात्मकं जगत्सु वै ।
शंकरस्य तु योगेन ब्रह्मवत्पूज्यते हि तत् ॥५२॥
पाषाणाद्या ब्रह्मयोगात् पूज्यन्ते प्रतिमात्मकाः ।
तथा सर्वं त्वया राधे पूजनीयं मदन्वयात् ॥५३॥
म्लेच्छता कृष्णयोगेन व्रजत्येवाऽच्छतां प्रिये ।
भगं वै ब्रह्मयोगेन यज्ञकुण्डे प्रदृश्यते ॥५४॥
पत्नीहस्ते त्वश्वलिंगं त्वश्वमेधे प्रदीयते ।
सर्वत्र ब्रह्मयोगेन पावित्र्यं कल्पते प्रिये ॥५५॥
तस्माच्छंका न कर्तव्या म्लेच्छकन्याः कथं प्रियाः ।
यत्प्रियं श्रीहरेस्तत्तु शुद्धमेव न संशयः ॥५६॥
अथ त्विदं प्रवक्ष्यामि धर्मतत्त्वं निबोध मे ।
प्राग्भवम् ऋषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः ॥५७॥
अनावृताः पुरा किल स्त्रियस्त्वासन् वरानने ।
कामचारविहारिण्यः स्वतन्त्राश्चारुहासिनी ॥५८॥
तासां व्युच्चरमाणानां कौमारात् सुभगे पतीन् ।
नाऽधर्मोऽभूद् वरारोहे स हि धर्मः पुराऽभवत् ॥५९॥
तं चैव प्राचीनधर्मं तिर्यग्योनिगताः प्रजाः ।
सर्वदाऽनुविधीयन्ते ऋतुधर्ममनुस्रुताः ॥६०॥
प्रमाणदृष्टो धर्मोऽयं पूज्यते च महर्षिभिः ।
उत्तरेषु च देशेषु कुरुष्वपि प्रवर्तते ॥६१॥
पर्वतीयप्रजास्वेषः धर्मो बहुपतित्वकः ।
देवीष्वपि च स्वर्गादौ वर्तते धर्म एव सः ॥६२॥
दासीष्वपि च सर्वत्र वर्तते धर्म एव सः ।
स्त्रीणामनुग्रहप्राप्तः स वै धर्मः सनातनः ॥६३॥
अथोद्दालकपुत्रेण कदाचित् श्वेतकेतुना ।
मर्यादा स्थापिता तेन कोपात्तामपि संश्रृणु ॥६४॥
श्वेतकेतोः किल पुरा समक्षं मातरं पितुः ।
जग्राह ब्राह्मणः पाणौ गच्छाव इति चाब्रवीत् ॥६५॥
ऋषिपुत्रस्तदा कोपं चकाराऽमर्षनोदितः ।
मातरं तां नीयमानां बलाद् दृष्ट्वा पितुः पुरः ॥६६॥
क्रुद्धं पुत्रं पिता दृष्ट्वा श्वेतकेतुमुवाच ह ।
मा पुत्र कोपं कार्षीस्त्वमेष धर्मः सनातनः ॥६७॥
अनावृता हि सर्वेषां वर्णानामंगना भुवि ।
यथा गावः स्थिताः स्वे स्वे भोक्तरि प्रमदास्तथा ॥६८॥
श्वेतकेतुस्तु तं धर्मं सर्वथा वै न चक्षमे ।
चकार चैव मर्यादामिमां स्त्रीपुंसयोर्भुवि ॥६९॥
मानुषेष्वेव नान्येषु श्रृणु तां राधिके प्रिये ।
व्युच्चरन्त्याः पतिं नार्या अद्यप्रभृति पातकम् ॥७०॥
भ्रूणहत्यासमं घोरं भविष्यत्यसुखावहम् ।
भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीम् ॥७१॥
पतिव्रतामेतदेव भविता पातकं भुवि ।
पत्या नियुक्ता या चैव पत्नी पुत्रार्थमेव वा ॥७२॥
न करिष्यति तस्याश्च भविष्यति तदेव हि ।
उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना ॥७३॥
मर्यादा स्थापिता तस्मात् स वै धर्मो व्यवस्थितः ।
ऋतौ ऋतौ स्त्रिया भर्ता नातिवर्तव्य एव च ॥७४॥
शेषेष्वन्येषु कालेषु स्वातन्त्र्यं स्त्री किलाऽर्हति ।
सौदासेन निजपत्नी नियुक्ता पुत्रजन्मनि ॥७५॥
मदयन्ती जगामर्षिं वसिष्ठं गुरुमेव तु ।
तस्माल्लेभे च सा पुत्रमश्मकं नाम विश्रुतम् ॥७६॥
अथोतथ्य इति ख्यात आसीद्धीमान् ऋषिः पुरा ।
ममता नाम भार्याऽऽसीत्तस्य परमसंमता ॥७७॥
उतथ्यस्य यवीयाँस्तु पुरोधास्त्रिदिवौकसाम् ।
बृहस्पतिर्महातेजा ममतामन्वपद्यत ॥७८॥
उवाच ममता तं तु देवरं वदतांवरम् ।
अन्तर्वत्नी त्वहं भ्रात्रा तव तस्मात्तु देवर ॥७९॥
अमोघरेतास्त्वं चापि द्वयोर्गर्भे न संभवः ।
एवमुक्तोऽपि स कामं नियन्तुं न शशाक ह ॥८०॥
रेमे सार्धं तया चाथोत्सृजन्तं रेत एव तम् ।
अभ्यभाषत गर्भस्थ औतथ्योऽत्र न संभवः ॥८१॥
द्वयोः कृते नावकाशो न पीडां कर्तुमर्हसि ।
अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतिः ॥८२॥
शुक्रोत्सर्गं चकारैव तच्छुक्रं गर्भबालकः ।
पद्भ्यां हतं पपातोर्व्यां ततः क्रुद्धो बृहस्पतिः ॥८३॥
शशाप गर्भं मूर्खं त्वं तमो दीर्घं प्रवेक्ष्यसि ।
स वै दीर्घतमा ऋषिर्जात्यन्धः समजायत ॥८४॥
किन्तु विद्वानतः पत्नीं प्रद्वेषीं नाम लब्धवान् ।
स पुत्रान् जनयामास गौतमादीन् तपस्विनः ॥८५॥
दीर्घतमा वृषवच्च प्रकाशे मैथुनक्रियाम् ।
जनानां सन्निधौ चक्रे मर्यादानाशकृद् यथा ॥८६॥
ऋषयस्तं तिरश्चक्रुर्भिन्नमर्यादमेव च ।
प्रद्वेषी तं सेवते न ततस्तामब्रवीन्मुनिः ॥८७॥

भार्ये त्वं मां कथं नैव सेवसे वद कारणम् ।
प्रद्वेषी तु पतिं प्राह भर्ता तु भरणान्मतः ॥८८॥
पतिश्च पालनाच्चापि त्वयि द्वयं न विद्यते ।
प्रत्युताऽहं भरणे ते ससुता क्लेशभागिनी ॥८९॥
भवाम्यशक्ता च ततो भर्त्रन्तरं करोमि च ।
यथेष्टं कुरु विप्रेन्द्र गच्छाम्यहं जनान्तरम् ॥९०॥

**दीर्घतमा उवाच—**

अद्यप्रभृति मर्यादा मया लोके वितन्यते ।
एक एव पतिर्नार्या यावज्जीवं परायणम् ॥९१॥
मृते जीवति वा पत्यौ नाऽपरं प्राप्नुयान्नरम् ।
परे प्राप्ते पतिता सा भवेदिति नियम्यते ॥९२॥
श्रुत्वा कोपयुता पुत्रानुवाच पितरं प्रति ।
बध्वोडुपे क्षिपन्त्वेनं चान्धं विप्रियवादिनम् ॥९३॥
पुत्रा बध्वा पितरं तं चोडुपे समवासृजन् ।
गंगायां स चानुस्रोतः प्लवमानः प्रवाहके ॥९४॥
नौका प्रवाहपतिता दूरदेशं गता यदा ।
नौकास्थमेकलमन्धं श्रीशनामजपान्वितम् ॥९५॥
अपश्यद्वै बलिः राजा जग्राहैनं निनाय च ।
गृहं ज्ञात्वा ऋषिं पत्न्यां नियुयोज सुतार्थकः ॥९६॥
सुदेष्णा राजपत्नी सा न स्वीचकार तं मुनिम् ।
स्वां तु धात्रेयिकां तस्मै वृद्धाय प्राहिणोत्तदा ॥९७॥
तस्यां काक्षीवदादींश्चैकादश पुत्रकान् मुनिः ।
जनयामास च ततः सुदेष्णा तं ह्यरोचयत् ॥९८॥
ततो जाताः सुदेष्णायां कुमाराः पञ्च तत्सुताः ।
अंगो वंगः कलिंगश्च पुण्ड्रः सुह्मश्च ते बलाः ॥९९॥
तेषां देशा भविष्यन्ति तत्तन्नामभिरेव ते ।
एवं बलेः पुरा वंशः प्रख्यातो वै महर्षिणा ॥१००॥
पराशरो मत्स्यगन्धां धीवरीं समपद्यत ।
एवं पूर्वतरो धर्मो नारायणस्य का कथा ॥१०१॥
सर्वं नारायणभोग्यं नारायणस्य वर्ष्म च ।
सर्वं नारायणपत्नीरूपं पतिर्नरायणः ॥१०२॥
मा शंकां त्वं कुरु राधे कृष्णनारायणं प्रति ।
मायायां गर्भदो यः स मायिक्यामपि गर्भदः ॥१०३॥
स्रष्टा पाता च संहर्ता स एव परमेश्वरः ।
सर्वकन्याश्च गृह्णीयाद् योग्यं तस्य सदा हि तत् ॥१०४॥
पठनाच्छ्रवणाच्चास्य धर्मतत्त्वं पुराभवम् ।
ज्ञायेत च विलीयेत संशयः पुण्यभाग् भवेत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कन्यकानां पयोव्रतं, पुराधर्मतत्त्वे श्वेतकेतुकृतमर्यादा, सौदासपत्न्यां वसिष्ठपुत्रेऽश्मकः, उतथ्यभार्या बृहस्पतिस्पृष्टा, दीर्घतमा बलेर्दास्यां राज्ञ्यां च पुत्रानुत्पादयामास, ततो मर्यादाकरणं चेत्यादिनिरूपणनामा एकत्रिंशोऽध्यायः ॥ ३१ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके माघे जातविघ्ननिमित्तकम् ।
ग्रहादिपूजनं चक्रे स्वयं गोपालकृष्णकः ॥ १ ॥
फाल्गुने विष्णुयागं च कारयामास भूसुरैः ।
क्षेत्रविघ्नप्रशान्त्यर्थं ग्रहशान्त्यर्थमित्यपि ॥ २ ॥
सौराष्ट्रवर्तिबालानां योगक्षेमौ यथा शुभौ ।
भवेतां च यथा दानान्यसंख्यानि ह्यदात्तदा ॥ ३ ॥
देवानां च विभिन्नानां पूजां पिता ह्यकारयत् ।
मात्रादीनां तथा पूजां बलिं श्रेष्ठमदापयत् ॥ ४ ॥

**श्रीराधिकोवाच—**

ग्रहा बालग्रहाः के ते येऽर्दयन्तीह बालकान् ।
कथंरूपा ग्रहा ह्येते वदात्र कृष्णकान्त मे ॥ ५ ॥

**श्रीकृष्ण उवाच—**

पुरा स्कन्दोऽभवत्पुत्रो रुद्रस्य वीर्यसंभवः ।
पार्वत्याश्च तथा वह्नेः गंगाया दर्भकस्य च ॥ ६ ॥
षण्णां च ऋषिपत्नीनां बालः स्कन्दस्तदाऽभवत् ।
देवसेनापतिर्जातो लक्ष्मीस्तमाश्रयत्ततः ॥ ७ ॥
श्रीजुष्टः पञ्चमीं स्कन्दस्तस्माच्छ्रीपञ्चमी स्मृता ।
षष्ठ्यां कृतार्थोऽभूद् यस्मात् तस्मात् षष्ठी महातिथिः ॥ ८ ॥
श्रिया जुष्टं महासेनं देवसेनापतिं कृतम् ।
सप्तर्षिपत्न्यः षड्देव्यस्तत्सकाशमथाऽगमन् ॥ ९ ॥
ऋषिभिः सम्परित्यक्ता ऊचुः पुत्रं तु कार्तिकम् ।
वय पुत्र परित्यक्ता भर्तृभिश्चाल्पकारणात् ॥१०॥
अस्माभिः किल जातस्त्वमिति ब्राह्म्यप्युदाहृतम् ।
तेन दोषेणोज्झिताः स्म तस्मान्नस्त्रातुमर्हसि ॥११॥

स्वर्गस्थानाच्च्युताः प्रशंकिता वै ऋषिभिर्वयम् ।
तदक्षयो भवेत् स्वर्गस्त्वत्प्रसादाद्धि नः कुरु ॥१२॥
त्वां पुत्रं चाप्यभीप्सामः कृत्वैतदनृणो भव ।
एतत्काले महेन्द्रश्च स्कन्दं प्राह महामतिः ॥१३॥
अभिजिन्नामभगिनी तपस्तप्तुं वनं गता ।
रोहिण्यास्तु कनिष्ठा सा ज्येष्ठतां तपसेच्छति ॥१४॥
तत्स्थानं वर्तते रिक्तं स्कन्द पूरय तत्स्थलम् ।
कृत्तिकाभिश्च नक्षत्रसंख्यापूर्तिं विधेहि वै ॥१५॥
स्कन्दस्ताः कृत्तिकारूपा मातृः षड् पर्ययोजयत् ।
नक्षत्रं कृत्तिकाख्यं तद् भाति वै वह्निदैवतम् ॥१६॥
ननु षट्कृत्तिकास्तत्र सप्तशीर्षामता कथम् ।
इति चेच्छ्रूयतां तत्र कारणं तद्वदामि च ॥१७॥
विनता चाब्रवीत् स्कन्दं मामपि तत्र सन्नय ।
स्कन्दो ददौ सप्तमं च स्थानं तस्यै तदा शुभम् ॥१८॥
एवं तत् कृत्तिकानक्षत्रं मतं सप्तशीर्षकम् ।
अथ ताः कृत्तिकाः प्रोचुः स्कन्दं पुनर्यथेप्सितम् ॥१९॥
ब्राह्मी माहेश्वरी चैव वैष्णवी च नरायणी ।
गायत्री दुर्गिका माया याश्चैताः सप्तमातरः ॥२०॥
अनादिकालतः पूर्वं या लोकस्य प्रकल्पिताः ।
अस्माकं तु भवेत् स्थानं तासां चैव न तद्भवेत् ॥२१॥
भवेम पूज्या लोकस्य न ताः पूज्या हि कार्तिक ।
ताभिश्चोक्त्वा वियोगो नः ऋषिभ्यः कारितो यतः ॥२२॥
इच्छाम आसां मातॄणां प्रजा याः पितृदेवताः ।
ता अस्माकं भोगकर्त्र्यो भवन्तु ऋषिवत् सदा ॥२३॥
स्कन्दः प्राह प्रदत्तं तच्चन्द्रपत्न्यो भवन्तु वै ।
परिरक्षत चान्याँश्च पुत्रतुल्यान् सदा तु नः ॥२४॥
कृत्तिकाश्च तदा प्राहुः पुत्र कुर्मस्तथा वयम् ।
किन्तु षोडशवर्षीया भवन्ति तरुणाः प्रजाः ॥२५॥
भोक्तुं देहि च नो मर्त्यप्रजा रूपैः पृथग्विधैः ।
स्कन्दः प्राह तथाऽस्त्वेतत् सुखयुक्ता भवन्तु च ॥२६॥
अहं तु वः प्रदास्यामि रौद्रमात्मानमव्ययम् ।
परमं तेन सहिताः सुखं स्वर्गे वसन्तु वै ॥२७॥
इत्युक्त्वा कार्तिको देहात् पुरुषं पावकप्रभम् ।
उत्पाद्य ग्रहरूपं तं ददौ ताभ्यः सुखाप्तये ॥२८॥
तं नीत्वा रौद्ररूपं ता ययुश्चान्द्रमसीं भुवम् ।
स्कन्दापस्मारमित्याहुर्ग्रहं तं तत्त्ववेदिनः ॥२९॥
विनता तु महारौद्रा कथ्यते शकुनिग्रहः ।
पूतनां राक्षसीं प्राहुस्तं विद्यात्पूतनाग्रहम् ॥३०॥
कष्टां दारुणरूपेण घोररूपां निशाचरीम् ।
पिशाची दारुणाकारा कथ्यते शीतपूतना ॥३१॥
गर्भान् सा मानुषीणां तु हरते घोरदर्शना ।
अदितिं रेवतीं प्राहुर्ग्रहस्तस्यास्तु रैवतः ॥३२॥
सोऽपि बालान् महाघोरो बाधते वै महाग्रहः ।
दैत्यानां या दितिर्माता तामाहुर्मुखमण्डिकाम् ॥३३॥
अत्यर्थं शिशुमांसेन संप्रहृष्टां दुरासदाम् ।
कुमाराश्च कुमार्यश्च या जाताः स्कन्दसंभवाः ॥३४॥
तास्ते गर्भभुजः सर्वे क्रूरकार्या महाग्रहाः ।
कुमाराणां स्त्रियो याश्च कुमारीणां नराश्च ये ॥३५॥
ते जायमानान् गृह्णन्ति बालकान् रौद्रकर्मिणः ।
गवां माता तु सुरभिर्या विद्यते सुरालये ॥३६॥
शकुनिस्तामथाऽऽरुह्य सह भुंक्ते शिशून् भुवि ।
सरमा नाम या माता शुनां देवी तु राधिके ॥३७॥
सापि गर्भान् समादत्ते मानुषीणां सदैव ह ।
पादपानां तु या माता करञ्जनिलयाभिधा ॥३८॥
सैका तु वरदा रक्षाकरी भूतानुकम्पिनी ।
तां करञ्जद्रुमे पुत्रार्थिनोऽर्चयन्ति मानवाः ॥३९॥
अथाऽप्यन्या मातरश्च ग्रहा मांसमधुप्रियाः ।
दिवा च रात्रौ तिष्ठन्ति सततं सूतिकागृहे ॥४०॥
कद्रूः सूक्ष्मवपुर्भूत्वा गर्भिणीं प्रविशत्यथ ।
तत्र भुंक्ते च तं गर्भं नागतुल्यं प्रसूयते ॥४१॥
गन्धर्वाणां च जननी गर्भं नीत्वैव गच्छति ।
तेन विलीनगर्भा च मानुषी दृश्यते जनैः ॥४२॥
अप्सरसां जनित्री तु गर्भमास्ते प्रगृह्य तु ।
उपनष्टो गर्भ इति जना वदन्ति तादृशि ॥४३॥
रक्तोदधेस्तु या कन्या धात्री स्कन्दस्य या स्मृता ।
सा लोहितायनी नाम्ना कदम्बे पूज्यते जनैः ॥४४॥
पुरुषेषु यथा रुद्रस्तथाऽऽर्या प्रमदासु सा ।
आर्या माता कुमारस्य पृथक्कामार्थमिज्यते ॥४५॥
एते सर्वे कुमाराणां भक्षका वै महाग्रहाः ।
यावत्षोडशवर्षाणि शिशूनामशिवा हि ते ॥४६॥
ये तु मातृगणाश्चापि ये च नरगणा ग्रहाः ।
सर्वे स्कन्दग्रहा नाम लोके बोध्या दुःखप्रदाः ॥४७॥
तेषां प्रशमनं कार्यं स्नानं धूपमथाऽञ्जनम् ।
बलिकर्मोपहाराश्च स्कन्दस्येज्या विशेषतः ॥४८॥
एवमभ्यर्चिताः सर्वे आयुर्वीर्यबलप्रदाः ।
अथोर्ध्वं षोडशाद्वर्षाद् ये भवन्ति नृणां ग्रहाः ॥४९॥

तान् वदामि श्रृणु राधे माहेश्वरा हि ते मताः ।
यः पश्यति नरो देवान् जाग्रत् वा शयितोऽपि वा ॥५०॥
उन्मादयति तदा क्षिप्रं तं तु देवग्रहं विदुः ।
आसीनश्च शयानश्च यः पश्यति नरः पितॄन् ॥५१॥
उन्मादयति तदा क्षिप्रं स तु पितृग्रहः स्मृतः ।
अवमन्यते यः सिद्धान् शप्तः क्रोधेन साधुभिः ॥५२॥
उन्मादयति च क्षिप्रं यः स तु सिद्धग्रहः स्मृतः ।
सञ्जिघ्राति च यो गन्धान् रसाँश्चाऽऽस्वादयत्यपि ॥५३॥
समुन्मादयति क्षिप्रं च स ज्ञेयो राक्षसो ग्रहः ।
गन्धर्वाश्चापि यं दिव्याः संविशन्ति नरं प्रियम् ॥५४॥
उन्मादयति स तु क्षिप्रं ग्रहो गान्धर्व एव सः ।
अधिरोहन्ति यं नित्यं पिशाचाः पुरुषं प्रति ॥५५॥
उन्मादयति स तु क्षिप्रं ग्रहः पैशाच एव सः ।
आविशन्ति च यं यक्षाः पुरुषं कालपर्यये ॥५६॥
उन्मादयति स तु क्षिप्रं ज्ञेयो यक्षग्रहस्तु सः ।
दोषो ग्रहश्च वैक्लव्यं भयं च घोरदर्शनम् ॥५७॥
कश्चित् क्रीडितुकामो वै भोक्तुकामस्तथाऽपरः ।
अभिकामस्तथैवाऽन्य इत्येषः त्रिविधो ग्रहः ॥५८॥
यावद्वार्धक्यसंवेशो भवन्त्येते ग्रहा नृणाम् ।
अतः परं देहिनां तु ग्रहतुल्यो भवेज्ज्वरः ॥५९॥
संयमितेन्द्रियं भक्तं शुचिं नित्यमतन्द्रितम् ।
आस्तिकं श्रद्दधानं च वर्जयन्ति ग्रहाः सदा ॥६०॥
न स्पृशन्ति ग्रहा भक्तान् सतीः साधून् प्रशीलिनः ।
अथ स्वाहाऽब्रवीत् स्कन्दं मम पुत्रोऽसि वै प्रियः ॥६१॥
देहि मे शाश्वतं वासं वस्तुं पुत्र सहाऽग्निना ।
स्कन्दः प्राह द्विजैर्मन्त्रैः स्तुतं हव्यं च कव्यकम् ॥६२॥
होष्यत्यग्नौ सदा स्वाहेत्युक्त्वा वासः सदाऽस्तु ते ।
यत्र गृहे न हवनं तत्र त्वं ग्रहरूपिणी ॥६३॥
भविष्यसि न सन्देहः पञ्चके पञ्चखादिनी ।
इत्युक्ता वह्निना सार्धं स्वाहा वसति नित्यदा ॥६४॥
इत्येवं ते ग्रहाः प्रोक्ता विनाशकाः क्वचित् क्वचित् ।
तस्मात्ते पूजनीया वै सन्तुष्टाः सुखदाः स्मृताः ॥६५॥
गोपालकृष्णः फाल्गुन्यामष्टम्यां तत्समर्चनम् ।
कारयामास मन्त्रैश्च तत्तद्बलिप्रदानकैः ॥६६॥
पायसैः पोलिकाभिश्च शाकैर्भर्जितसत्कणैः ।
हव्यैः कव्यैर्ग्रहान् सर्वान् तर्पयामास भावतः ॥६७॥
अथ स्कन्दस्तथा कृत्या विनता पूतनादिकाः ।
दित्यदितिपिशाच्यश्च सुरभिः शकुनिस्तथा ॥६८॥
सरमा कद्रुकी गन्धर्वाप्सरसां च मातरः ।
धात्री रक्तायनी देवपितृसिद्धग्रहास्तथा ॥६९॥
पैशाचरक्षोगान्धर्वा यक्षाः कामा ज्वरास्तथा ।
स्वाहाश्चेत्यपरे वंशाः षड्विंशतिगणाश्च ते ॥७०॥
प्रत्यक्षाश्चाययुर्व्योम्ना चाऽवतेरुः सरोवरे ।
यत्र पूजा भवत्येषां सौम्यरूपधराश्च ते ॥७१॥
पूजां प्राप्य बलिं दुग्धपाकादि प्राप्य सर्वथा ।
तृप्ताश्च तुष्टुवुर्नारायणं श्रीपरमेश्वरम् ॥७२॥
वयं नारायण विष्णो दुष्टकार्यकरा ग्रहाः ।
पापपारं न यास्यामस्तथैव निर्मिता यतः ॥७३॥
तरेम तु यथा मायासागरं तत्कृपां कुरु ।
क्षमस्व दुष्टभावानामपराधान् सदा हि नः ॥७४॥
यत्र नारायणः कृष्णस्तत्र नाऽस्मत्प्रपीडनम् ।
नात्र क्षेत्रे प्रविशामः पीडनार्थं कदाचन ॥७५॥
कुर्वस्मान्पावनान् कृष्ण चरणामृतदानतः ।
त्वं ग्रहाणां ग्रहो देवो नियामकः परेश्वरः ॥७६॥
वासं त्वच्चरणे देहि पावयित्वा सदा शुभान् ।
प्रपन्नाः स्मस्तव चांके गृहाण नः स्वकिंकरान् ॥७७॥
इत्यभ्यर्थ्य निपेतुस्ते पादयोः श्रीहरेस्तदा ।
अनादिश्रीकृष्णनारायणेनाऽद्भिः सुसंस्कृताः ॥७८॥
प्रोक्षिताः पाविताश्चापि जलपानेन तर्पिताः ।
स्पृष्टाश्च भोजिताः सर्वे दिव्यभावं तदा गताः ॥७९॥
उज्ज्वला देवरूपास्ते यथा वै पार्षदा हरेः ।
ततः प्राह हरिस्तांश्च दिव्यरूपैः सरस्तटे ॥८०॥
नित्यं वसन्तु चात्रैव निरातंका निरामयाः ।
निरुपद्रवरूपाश्च सदा श्रेयस्कराः सुराः ॥८१॥
ग्रहतीर्थे दक्षिणेऽत्र तटे ख्यातं भविष्यति ।
सदा वः प्रतिमाश्चात्र पूजयिष्यन्ति ये जनाः ॥८२॥
देशान्तरस्थितानां वै तेषां वंशजबालकाः ।
मा पीड्यन्तां भवद्भिर्वै देशान्तरगतैरपि ॥८३॥
अथ द्वितीयरूपैश्च विचरन्तु महीमिमाम् ।
यथाकार्यं प्रकुर्वन्तु ग्रहकृत्यं नियामितम् ॥८४॥
कुंकुमवापिकाक्षेत्रं दशयोजनविस्तृतम् ।
विहायाऽन्यत्र वै छिद्रे सति कुर्वन्तु धर्षणम् ॥८५॥
तत्रापि मम भक्तानां मा कुर्वन्तु प्रधर्षणम् ।
ब्रह्मशीलव्रतानां च मा कुर्वन्तु प्रधर्षणम् ॥८६॥
सतां सतीनां विप्राणां ब्रह्मिष्ठानां न धर्षणम् ।
कुर्वन्तु तपतां चापि व्रतिनां पुण्यकर्मणाम् ॥८७॥

गोभूदेवसतां सेवां प्रकुर्वतां च नापि वै ।
शुचीनां योगिनां चापि भक्तिजुषां कुटुम्बिनाम् ॥८८॥
प्रधर्षणं पीडनं वा कुर्वन्तु नैव सर्वथा ।
नास्तिकानां निन्दकानां पिशुनानां तु धर्षणम् ॥८९॥
हिंसकानां मत्सरिणां दुष्टानां त्वाचरन्तु तत् ।
अदैवानां चापितॄणामनग्नीनां प्रधर्षणम् ॥९०॥
चौराणां मद्यपानां च परदुःखप्रदायिनाम् ।
खलानां धर्महीनानां कुर्वन्तु धर्षणं मुहुः ॥९१॥
अन्यायिनां परन्यासभक्षिणां भेदिनां तथा ।
भवत्यो धर्षणं कुर्वन्तु सत्कार्यविरोधिनाम् ॥९२॥
कुंकुमवापिकाक्षेत्रं महादिव्यं सुखात्मकम् ।
कृष्णनारायणतुल्यं पुण्यपापविवर्जितम् ॥९३॥
ब्रह्मार्पणमयं 'मोक्षभूमिकं मन्निवासनम् ।
तत्र मुक्तस्वरूपाश्च निवसन्तु मदाश्रये ॥९४॥
गुरुर्मे लोमशस्त्वत्र मन्त्रं दास्यति मे तु वः ।
यान्तु तत्र मनुं प्राप्य तिष्ठन्तु वैष्णवा ग्रहाः ॥९५॥
इत्युक्तास्ते ग्रहाः सर्वे द्वेधारूपाः शुभाशुभाः ।
बभूवुः कृष्णसंकल्पात् छायात्मानो ह्यसौख्यकाः ॥९६॥
मूलरूपास्तु ते दिव्याः प्रययुर्लोमशाश्रमम् ।
लोमशः प्रददौ मन्त्रं कृष्णनारायणात्मकम् ॥९७॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
स्रजं च तौलसीं कण्ठे ददौ तेभ्यः सुपुण्ड्रकम् ॥९८॥
एवं ते वैष्णवा भूत्वा तस्थुश्चाऽश्वसरस्तटे ।
छायात्मानो ययुर्देशान्तराणीष्टानि यानि वै ॥९९॥
इत्येवं भगवान् सर्वग्रहशान्तिं चकार ह ।
भक्तानां सुखदास्ते च मुक्ताः श्रेयस्कराः सदा ॥१००॥
इत्येवं राधिके दिव्यश्चमत्कार उदाहृतः ।
श्रृणुयात्तं पठेद्वा यस्तस्य मोक्षो भवेत् सुखम् ॥१०१॥
धनधान्यपशुपक्षिधनानि च बहून्यपि ।
पुत्रपौत्रसुतापुत्रतद्वंशाश्च निरामयाः ॥१०२॥
भविष्यन्ति देवतुल्याः सर्वानन्दपरिप्लुताः ।
सर्वेतिवर्जिता द्वन्द्ववर्जिताः स्वर्गविग्रहाः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालग्रहादीनां पूजने तेषां प्रत्यक्षाऽऽगमनं तेषां नामरूपादिभिर्वर्णनं चेतिनिरूपणनामा द्वात्रिंशोऽध्यायः ॥ ३२ ॥

**श्रीकृष्ण उवाच—**

चतुर्थे वत्सरे भाद्रपदेऽष्टम्या दिने कृतम् ।
राधिके श्रीहरिकृष्णचरित्रं कथयामि ते ॥ १ ॥
कुंकुमवापिकानार्यः कन्यकाश्चापि कोटिशः ।
व्रतं च ऋषिपञ्चम्याश्चक्रुर्वै ऋषिपूजनम् ॥ २ ॥
राजस्वल्यस्थितौ स्पर्शदोषसंसर्गहानये ।
व्रतांगं पूजनं दानं चक्रुः सर्वास्ततः परम् ॥ ३ ॥
षष्ठ्यां गौरीव्रतं चक्रुरावाह्य पुपुजुश्च ताम् ।
सप्तम्यां भोजयामासुः पायसादिनिवेदनैः ॥ ४ ॥
अष्टम्यां दूर्वया गौरीं पूजयामासुरेव च ।
अष्टवर्षीयकन्यानां गौरीरूपेण पूजनम् ॥ ५ ॥
चन्दनाद्यैः कुंकुमाद्यैरक्षताद्यैः सुगन्धिभिः ।
श्रृंगारैर्विविधैर्वस्त्रैरलंकारैर्विभूषणैः ॥ ६ ॥
फलैः पुष्पैश्च मिष्टान्नैः पानैस्ताम्बूलकैस्तथा ।
इष्टवस्तुप्रदानैश्च चक्रुर्नीराजनादिकम् ॥ ७ ॥
गीतं नृत्यं तथा चक्रुरथ गौरीविसर्जनम् ।
कर्तुं सर्वाः स्त्रियः कन्या ययुश्चाश्वसरोवरम् ॥ ८ ॥
गौर्याः प्रतिमा सर्वाभिर्धृता स्कन्धेषु पार्थिवी ।
सर्वश्रृंगारशोभाढ्या दिव्यकेसरिपृष्ठगा ॥ ९ ॥
दिव्यायां शिबिकायां च धृता चामरच्छत्रिणी ।
एवं नीत्वा प्रतिमां श्रीगौरीं गायन्ति योषितः ॥१०॥
वादित्राणां निनादाश्च भवन्त्युत्सवबोधकाः ।
दर्शकाश्च नरा नार्यो ययुः सहस्रशश्च ताम् ॥११॥
गौरीं चान्ते वीक्षितुं वै त्वश्वपट्टोत्तरे तटे ।
ययौ साकं गोपिकाभिः कम्भराश्रीहरेः प्रसूः ॥१२॥
हरिं बालं सह नीत्वा गौरीविसर्जनोत्सवे ।
तीरे गत्वा स्त्रियो गौरीं स्थापयामासुरुत्सुकाः ॥१३॥
नाव्यारोप्य तदा पूजां प्रचक्रुः प्रार्थनां तथा ।
अनादिश्रीकृष्णनारायणः शंकरवत्तु नः ॥१४॥
तवेव कान्तिमान् कान्तो भूयादिति प्रसीद नः ।
एवं सम्प्रार्थ्य च पुष्पाञ्जलिं ददुस्ततः परम् ॥१५॥
वादित्राणां निनादेषु चक्रुर्जले विसर्जनम् ।
जयशब्दास्तदा स्वर्गद्वारमासाद्य योषिताम् ॥१६॥
देवान् संहर्षयामासुः पितॄँश्चर्षिवरांस्तथा ।
कृते विसर्जने गौर्याश्चमत्कारोऽभवत्तदा ॥१७॥
व्याघ्रः कश्चिन्महापुष्टो वटवृक्षोच्छ्रयायतः ।
अकस्मादागतस्तत्र यत्र श्रीबालकृष्णकः ॥१८॥
नेत्रे प्रस्फार्यं च मुखं व्यादाय वासनां सृजन् ।
कर्णावुत्थाप्य पुच्छं च धुन्वन् रोमाणि चर्म च ॥१९॥
क्रोधं प्रदर्शयन् पूर्वपादाग्रेण महीं लिखन् ।
कूर्दनं कृतवान् शीघ्रं धर्तुं श्रीबालकृष्णकम् ॥२०॥

स्तब्धाः सर्वा नरा नार्यो निश्चेष्टा भीतितोऽभवन् ।
गर्जनयाऽन्तरीक्षं च कम्पमानं तदाऽभवत् ॥२१॥
वृक्षाश्चकम्पिरे वायुः क्षणं निर्गतिकोऽभवत् ।
क्षितिः कम्पमयी जाता हृदयानि चकम्पिरे ॥२२॥
हाहाकारो महान् जातो व्याघ्रे चोत्पतिते तदा ।
दुद्रुवुः परितो लोका मृत्युरूपविलोकनाः ॥२३॥
माता तु कम्भरालक्ष्मीः प्राह गौरी प्ररक्षतु ।
अन्याश्च कन्यकास्तत्र चक्रुर्वै नियमं तदा ॥२४॥
रक्षिते कृष्णकान्तेऽत्र पूजां कुर्मो निशामुखे ।
गौर्याश्चापि च दुर्गायाः पुनः सर्वोपचारकैः ॥२५॥
इत्येवं नियमं चक्रुर्जेपुर्वै श्रीनरायणम् ।
तस्थुर्नेत्रे कराभ्यां च प्रावृत्य द्रष्टुमक्षमाः ॥२६॥

श्रीराधिकोवाच—

क आसीत् स महाव्याघ्रः सायं कस्मात् समागतः ।
अन्यान् त्यक्त्वा हि तं बालं धर्तुमेव समुद्यतः ॥२७॥

श्रीकृष्ण उवाच—

आरक्तदेशजश्चासीत् शावदीनस्य चानुजः ।
म्लेच्छो वै राक्षसो भ्रातुर्वैरनिर्यातनेच्छुकः ॥२८॥
कामरूपधरो व्योम्नि जले प्रगतिमानपि ।
अरण्येऽपि कृतावासो व्याघ्रायते क्वचित् क्वचित् ॥२९॥
जनायते मनुष्येषु पक्षिषु विहगायते ।
एवंविधो हि मलिनो मलिनाशय एव सः ॥३०॥
यदा श्रीहरिणा तस्य भ्राता चारक्तदेशके ।
हतस्तदा समुद्रेऽयं गत आसीत् प्रवासकृत् ॥३१॥
अब्रिक्तदेशे सरितो नाविलायास्तटादति ।
विप्रकृष्टे स्थले क्रेतुं सुवर्णादिखनिमृदः ॥३२॥
स्वर्णमृदः समादाय स्वगृहं स समागतः ।
श्रुतवान् स्वाग्रजमृत्युं कन्यानां हरणादिकम् ॥३३॥
गुरोर्मृत्युं विप्लवं च राज्यं जह्लावशं तथा ।
बालोत्सवाद् वैपरीत्यं बल्युत्सवेऽत्यनर्थदम् ॥३४॥
विलोक्य वैशसं सर्वं चुक्रोधातिशुशोच ह ।
राज्यं सैन्यं व्योमगतिर्गुरुर्देवी यतिप्रथाः ॥३५॥
समर्थेषु सत्सु नाशो बलीयो भाललेखनम् ।
समर्थे भ्रातरि द्रव्ये विपुलेऽब्धिप्ररक्षिते ॥३६॥
देशे भटैर्युते नाशो गृहे एवेति शोचनम् ।
असैन्योऽपि समागत्य हत्वा विदेशजो जनः ॥३७॥
पक्षिणा नाशयित्वा चाक्षतस्य तस्य सर्वथा ।
कन्यकामातृहरणं यत्कार्यं तद्धि शोचनम् ॥३८॥
अहो श्रुत्वा न मे मृत्युर्न वा शौर्यं प्रवर्धते ।
किं वृथा जीवनेनैवं पराभूतस्य देहिनः ॥३९॥
घातयिष्यामि तं शत्रुमानयिष्यामि पुत्रिकाः ।
यद्वा प्राणान् प्रदास्यामि धिग्बलं यद् वृथाबलम् ॥४०॥
विचिन्त्यैवं स्वर्णनावं परित्यज्य गृहादिकम् ।
सह नीत्वा जनान् नैजान् बहुरूपधरान् यतीन् ॥४१॥
सौराष्ट्रे चाययौ हन्तुं कृष्णनारायणं प्रभुम् ।
कुंकुमवापिकाक्षेत्रे चाश्वपट्टसरोवरम् ॥४२॥
विशालं च ददर्शाऽसौ लोमशस्याऽऽश्रमं शुभम् ।
सर्वं ददर्श च मुहुश्छिद्रं हन्तुं समीक्षते ॥४३॥
नित्यं चरति द्रुगुल्मे वसत्यपि द्रुमेषु च ।
सगणो भ्रमति क्षेत्रे नैकरूपधरः खलु ॥४४॥
तत्र केचन वृक्षेषु काकायन्ते क्वचित् क्वचित् ।
गृध्रायन्ते तथा चान्ये वृकायन्ते सरोऽन्तिके ॥४५॥
शुकायन्ते चापरे तु गवायन्ते तथेतरे ।
केचित्तु वृषभायन्ते मार्जारायन्त इत्यपि ॥४६॥
मशकायन्ते केचिच्च छिद्रं द्रष्टुं पुनः पुनः ।
लब्धुं चाऽवसरं हन्तुं कृष्णनारायणप्रभुम् ॥४७॥
मीनायन्ते जले त्वन्ये बालायन्ते च केचन ।
कन्यारूपधराश्चान्ये भवन्ते तत्सहायिनः ॥४८॥
एवं कृतेऽपि कृष्णं तं हन्तुं छिद्रं न चाऽऽप्नुवन् ।
तदा निराशाः सततं भूत्वा राजानुजं क्रुधा ॥४९॥
प्राहुर्नैव हि लभ्येत छिद्रं वर्षशतैरपि ।
तस्मात् प्रसह्य हन्तव्यो यद्भवेत् तद्भवेदिति ॥५०॥
एवं तु संविदं कृत्वा त्वाययुः सरसस्तटे ।
शतं वीरा मिलित्वैव हन्मस्तं राजघातिनम् ॥५१॥
एकैकेन क्रमाद् भाव्यं व्याघ्ररूपेण वै शनैः ।
प्रथमं कन्यकारूपैर्विशन्तु स्त्रीजनेषु हि ॥५२॥
इत्येवं तु शतं कन्याः कन्यासु विविशुस्तदा ।
हन्तुं श्रीबालकृष्णं तं सन्ध्यायां क्रूरवृत्तयः ॥५३॥
दृष्ट्वा हन्तुं सुसारल्यं स्त्रीषु मध्ये नरायणम् ।
एकलं चाऽरक्षकं च मत्वा राजाऽनुजः स्वयम् ॥५४॥
वैरनिर्यातनार्थाय व्याघ्रः स प्रथमोऽभवत् ।
उत्प्लुत्य बालकं कृष्णं यावद्धर्तुं गतोऽसुरः ॥५५॥
तावत् कृष्णः स्वयं तत्र शरभोऽभूज्जनार्दनः ।
जग्राह व्याघ्ररूपं तं वल्लीदीनं नृपानुजम् ॥५६॥

गले धृत्वा हरिर्व्यापादयामासाऽसुरं द्रुतम् ।
जयशब्दा हरेस्तत्राऽभवन् पुष्पप्रवर्षणम् ॥५७॥
देवैः कृतं दुःखहानं स्त्रीभिः शिरोऽवतारितम् ।
शावदीना महाकाली कन्या गौरीस्वरूपिणी ॥५८॥
स्वयं शरभचरणे समागत्य ननाम तम् ।
भगवाँस्तु तदा बालोऽभवत् स्त्रीषु यथा पुरा ॥५९॥
व्याघ्रो व्याघ्रान् समुत्पाद्य ततो ममार तत्र ह ।
तत्तीर्थं शारभं तत्र जातमश्वसरोवरे ॥६०॥
यत्र स्नातं च कृष्णेन हत्वा तं त्वसुरं तदा ।
अथ देवी महाकाली कृष्णं तुष्टाव किंकरी ॥६१॥
मया ज्ञातं न भगवन् विघ्नं ते यदुपस्थितम् ।
क्षेत्रपालेन न ज्ञातं कथं कस्मादिदं न्विति ॥६२॥
श्रीहरिः प्राह सुभगे मदिच्छाऽऽसीत्तथाविधा ।
हन्तव्योऽयं मया दुष्टो जानीयान्न यथा सती ॥६३॥
क्षेत्रपालो न जानीयात्तथा कार्यं मया यतः ।
त्वया च क्षेत्रपालेन न ज्ञातं तत्प्रवेशनम् ॥६४॥
इदानीं पश्यतं कन्याश्चैताः शतं सुनूतनाः ।
तत्सहाया असुरास्ते छन्नरूपा भवन्ति वै ॥६५॥
हन्तुं मां त्वागतास्तेऽत्र क्रमाद् व्याघ्रभवेच्छवः ।
हतोऽयमग्रणीस्तेन त्रस्तारछन्ना भवन्ति ते ॥६६॥
देव्या च क्षेत्रपालेन यावद् दृष्टाश्च कन्यकाः ।
अभवन् व्याघ्ररूपास्ते मिलिता व्याघ्रजेषु च ॥६७॥
देवीं कन्या हरिं हन्तुमुत्पेतुर्युगपत्तदा ।
मर्तव्यं वा मारणीयाश्चेति कृत्वा विनिश्चयम् ॥६८॥
तावत् कृष्णो युद्धशंखं दध्मौ शीघ्रं भयंकरम् ।
सिंहो देवीवाहनश्च द्रागेव प्रसमागतः ॥६९॥
व्याघ्राणां निनदास्तत्र बभूवुर्विश्वभञ्जकाः ।
व्याघ्रारण्यं समग्रं तु निदादैश्चाभिपूरितम् ॥७०॥
ग्रहाः प्रकम्पिरे वृक्षा भूश्चचाल सरस्तथा ।
सिंहोऽपि गर्जनां चक्रे फेनानि न्यपतद् भुवि ॥७१॥
उड्डीयन्ते स्म च व्योम्नि फेनजालानि गर्जनात् ।
तेभ्यः सिंहा व्यजायन्त क्षणात् पञ्चशतानि हि ॥७२॥
सिंहान् दृष्ट्वा बलिव्याघ्राः केचित् सिंहास्तदाऽभवन् ।
सिंहानां वै तदा तत्र संग्रामोऽभूद् भयंकरः ॥७३॥
सिंहसैन्योभययोश्च घातनं मुखपन्नखैः ।
आन्त्राणां कर्षणं कण्ठचोषणं बह्वजायत ॥७४॥
नारी नैव हि हन्तव्या चेत्यभूद् धर्मसंगरः ।
सिंहाः पतन्ति संग्रामे हन्यन्ते कृत्रिमाश्च ते ॥७५॥

मूलभूतास्तु हन्यन्ते शात्रवाः केशराश्रयाः ।
न्यूना भवन्ति संख्यायां मृतास्ते सर्वथा मृताः ॥७६॥
वर्धन्ते च तदा देवीसिंहा मृतोद्भवाः पुनः ।
वीक्षितुं सिंहसंग्रामं नृसिंहो भगवानपि ॥७७॥
त्वाययौ धामतस्तत्र गर्जयन् स्वर्गमण्डलम् ।
क्रोशात् क्रोशं समुत्पत्य व्योम्नि युद्ध्यन्ति सिंहजाः ॥७८॥
ददर्श भगवाँश्चापि जगर्जाऽम्बरसंस्थितः ।
देवीसिंहो ययौ चाभि चक्रे स्वागतमम्बरे ॥७९॥
सिंहजास्तु तदा सिंहा निजघ्नुः शेषतोऽसुरान् ।
निपेतुर्व्यसवः सर्वे मृताः शतं पुरो हरेः ॥८०॥
तदात्मानो हरेश्चानुग्रहाच्छ्रीनृसिंहात्मनि ।
प्रययुर्विलयं तत्र निष्पापाः क्षेत्रयोगतः ॥८१॥
कृत्रिमाश्चाऽकृत्रिमाश्च मृतास्ते नरसिंहके ।
लयं याता ययुर्धाम्नि नृसिंहेन समं तदा ॥८२॥
ये देवीसिंहजाश्चान्ये शिष्टाः फेनोद्भवा अपि ।
श्रीहरिस्तन्निवासार्थं ददौ दक्षिणगं वनम् ॥८३॥
सिंहारण्यं तु तज्जातं सिंहवासमयं सदा ।
वंशस्त्वविचलस्तेषां भवेदिति हरिर्ददौ ॥८४॥
वरदानं तथा भोज्यं वन्यं पशुकुलं ददौ ।
अथ व्याघ्रो मृतो यश्च वल्लीदीनस्तदा ततः ॥८५॥
जाता व्याघ्रा ह्यभवन् ये सिंहरूपाऽविधारकाः ।
हता अपि मृता नैव तेभ्यो नारायणः प्रभुः ॥८६॥
स्तुवद्भ्यः प्रददौ जीवदानं स्वास्थ्यं निरामयम् ।
वासारण्यं ददौ नित्यं व्याघ्रारण्यं तु तद्व्ययभूत् ॥८७॥
व्याघ्राणां वनयोग्यानां वंशाः सिंहैर्हि मिश्रिताः ।
व्याघ्रारण्ये तथा सिंहारण्ये स्युःतद्धरिर्ददौ ॥८८॥
वरदानं च सौराष्ट्रेऽरण्ये वसन्ति तेऽनिशम् ।
व्याघ्रास्ते चाऽसुरा म्लेच्छाः सिंहास्तु दैविका हि ते ॥८९॥
एवं वसन्ति सौराष्ट्रे दक्षिणारण्यकेषु वै ।
अश्वपट्टसरस्तीरे सिंहव्याघ्रमहामृधम् ॥९०॥
यत्राऽभून्नरसिंहश्च व्योम्नो यत्राऽऽययौ तदा ।
सिंहव्याघ्रमहातीर्थं पावनं तत्प्रकथ्यते ॥९१॥
युद्धोत्तरं निशारम्भे बभूव वृष्टिरुत्तमा ।
भूतलं स्वच्छतां प्राप्तं सर्वे स्वं स्वं गृहं ययुः ॥९२॥
कन्यकास्तास्ततश्चक्रुर्व्रतं पूजां च जागरम् ।
दुर्गायाश्च तथा गौर्याः कृष्णरक्षानिमित्तकम् ॥९३॥
रात्र्यन्ते पूजितां दुर्गां गौरीं क्षमाप्य वै जले ।
चक्रुर्विसर्जनं दुर्गागौर्योस्ततो हरिं प्रति ॥९४॥

ययुः सर्वा दर्शनार्थं मेनिरे कृतकृत्यताम् ।
अथ दानानि दत्त्वैव सम्पूज्य लोमशं गुरुम् ॥९५॥
पितरौ पूजयित्वा च चक्रुर्वै पारणां ततः ।
ययौ काली स्वनिलयं सिंहोऽप्यदृश्यतां गतः ॥९६॥
स्वस्थं चाभूत्तु सौराष्ट्रं निर्भयं राधिके ततः ।
अनादिश्रीकृष्णनारायणस्यैषा चमत्कृतिः ॥९७॥
श्रूयते पठ्यते येन तस्य श्रेयः परं भवेत् ।
ऐहिकं चापि सौभाग्यं भवेत् सन्तानतन्तुजम् ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने गौरीपूजनविसर्जने, वल्लीदीनाख्यव्याघ्रासुरस्य शतेन व्याघ्रसिंहरूपधारिणाऽसुरव्रजेन सह विनाशनमित्यादि-निरूपणनामा त्रयस्त्रिंशत्तमोऽध्यायः ॥ ३३ ॥

**श्रीकृष्ण उवाच—**

आकर्णय महाप्राज्ञे राधिके पञ्चमाब्दिकम् ।
चमत्कारं कृष्णनारायणस्याऽऽत्माऽऽत्मनः परम् ॥ १ ॥
पञ्चमे वत्सरे प्राप्ते प्रभोर्जन्मोत्सवं पिता ।
कारयामास विधिवत् सर्वदेवप्रपूजनम् ॥ २ ॥
गान्धर्वाणां समाजं च योजयामास गायने ।
मण्डपं कारयामास सौवर्णाम्बरभूषितम् ॥ ३ ॥
नैकपुत्तलिकाशोभं सर्वदृश्यविराजितम् ।
विश्वकर्मा स्वयं तत्र रचयामास देवताः ॥ ४ ॥
मयश्च शम्बरश्चापि दधतुस्तत्सहायताम् ।
जले स्थल्याः स्थले चाऽपां पृथ्व्यां चाब्धेश्च दर्शनम् ॥ ५ ॥
भित्तौ सभासदां चापि पर्षदि योषितां तथा ।
व्योम्नि स्तरस्य कोणेषूद्यानानां दर्शनं यथा ॥ ६ ॥
राजमार्गे नदीनां च निःश्रेण्यां गर्तदर्शनम् ।
गोपुरे दीर्घकोष्ठानां कोष्ठे गोपुरदर्शनम् ॥ ७ ॥
एवं विलोकने भ्रान्ता अपि वैज्ञानिकेश्वराः ।
अशक्ताश्चाऽभवन् गन्तुं मार्गदर्शकमन्तरा ॥ ८ ॥
प्रवेशे गमने स्थाने निषदने विलोकने ।
कुण्ठितवृत्तयश्चासन् सभ्या विना तु दर्शकान् ॥ ९ ॥
एवंविधे मण्डपेऽत्र बालकृष्णं निषाद्य च ।
दिव्ये सिंहासने रम्ये पुपूजुः परमेश्वराः ॥१०॥
उपदास्ते ददुर्दिव्याः पिता ताः प्रतिगृह्य च ।
प्रासादिकं ददौ तेभ्यः पुत्रोत्सवेऽतिहर्षितः ॥११॥
एवं समर्चनं कृत्वा पूरुषाः सदसि स्थिताः ।
अथ देव्यः समायाताः पूजनार्थं हरेस्ततः ॥१२॥
कुंकुमाऽक्षतगन्धाद्यैः पुष्पदर्भादिभिस्तथा ।
अंकुरैर्विविधैश्चापि नवधान्यादिभिस्तथा ॥१३॥
वस्त्रालंकारभूषाद्यैः रामणीयकवस्तुभिः ।
नीराजनैर्दुःखहाराऽवतारैः समपूजयन् ॥१४॥
उपदाः प्रददुस्ताश्च भोज्यस्थालीर्न्यधुः पुरः ।
शर्कराफलबीजानि न्यधुः रसान् पुरस्त्रियः ॥१५॥
अथ पत्तनवास्तव्याः पुपूजुः परमेश्वरम् ।
पुपूजुः कन्यकाश्चापि ह्याशीर्वादान् ददुर्द्विजाः ॥१६॥
यतयो मुनयश्चान्याः सत्यः साध्व्यः पतिव्रताः ।
आशीर्वादान् ददुस्तस्मै कृष्णाय परमात्मने ॥१७॥
अथ पूजोत्तरं तत्र तस्थिरे गायका जनाः ।
गान्धर्वा वादकाश्चापि देवमानवजातिजाः ॥१८॥
हाहा हूहूर्नारदश्च पर्वतश्चित्रदर्शनः ।
सुदर्शनस्तुम्बुरुश्च विश्वावसुः परावसुः ॥१९॥
मेघस्वनस्तारनादो धरणिश्रोऽनुगालवः ।
बंशधरस्तरणिको जलघोषश्च वैणिकः ॥२०॥
आम्रमञ्जुश्चालंबुषो रांभेयः शंखकर्टकः ।
इत्येते देवगान्धर्वाश्चूडवर्मपुरोगमाः ॥२१॥
चक्रुर्वै गायनं तत्रोत्सवे मण्डपवर्तिनः ।
सवादित्रं तालमानग्राममूर्छादिशोभितम् ॥२२॥
अथैभ्यो भगवाँस्तुष्टो हीरकमौक्तिकस्रजः ।
ददौ ततो मनुष्याणां गन्धर्वा आययुः सभाम् ॥२३॥
चित्ररथः प्रतोलश्च सारंगो मणिरञ्जकः ।
तारमेरुस्तानसैन्यो जगन्नाथो हरीतकः ॥२४॥
बाष्पवर्षी धूम्रमेधा शशकुन्दः कपर्दकः ।
एते चान्ये च गन्धर्वाश्चक्रुर्गायनवादने ॥२५॥
तेभ्यो हरिर्ददौ रम्यं विभिन्नं पारितोषिकम् ।
स्वर्णरूप्याभूषणानि स्वर्णमुद्राऽम्बराणि च ॥२६॥
अथ दानवदैत्यानां गान्धर्वा आययुः सभाम् ।
कम्बुकीर्तिर्गालवादो नस्स्वनो भुजघोषणः ॥२७॥
खातध्वानो गोलभूपश्चैते चक्रुः प्रगायनम् ।
तेभ्यो ददौ हरिर्मुक्तामणिप्रवालमालिकाः ॥२८॥
अथ नागाश्चारणाश्च सूतमागधबन्दिनः ।
ब्रह्मभट्टाश्च विद्याध्राः किन्नराः किंपुर्मशकाः ॥२९॥
आययुः काव्यरचनैः सहिताः पर्षदि द्रुतम् ।
कौशल्यं दर्शयामासुः स्वस्वकृतेः समाजके ॥३०॥
वर्णयामासुरत्यर्थं कृष्णनारायणं प्रभुम् ।
पिता तेभ्यो ददौ योग्यं पारितोषिकवस्तुकम् ॥३१॥

नर्तक्यो गायिकाश्चापि सगीतिनृत्यवर्तनम् ।
चक्रुर्हरेः प्रतोषार्थं हरिस्तुष्टो ददौ धनम् ॥३२॥
भूषाः शृंगारपात्राणि द्रव्याणि विविधानि च ।
मालाऽम्बराणि दिव्यानि स्त्रीयोग्यं पारितोषिकम् ॥३३॥
एवं सन्तोषितास्तत्र जन्मोत्सवेऽर्थिनो जनाः ।
गतेषु तेषु सर्वेषु मुक्ता धामनिवासिनः ॥३४॥
अक्षराऽमृतगोलोकवैकुण्ठादिनिवासिनः ।
आशीर्वादान् ददुस्तस्मै स्वेष्टाय परमात्मने ॥३५॥
तान् सर्वान् श्रीहरिकृष्णः उत्थायोत्थाय चासनात् ।
कृत्वा वक्षसि युगपन्नैकधा परिषस्वजे ॥३६॥
बहुरूपधरः कृष्णो जग्राह पुष्पमालिकाः ।
चन्दनाऽक्षतचन्द्रांश्च पूजां तैः परितः कृताम् ॥३७॥
तेभ्यः प्रासादिकं दत्वा परिहारं चकार सः ।
सभायाः परिहारान्ते पिता तेभ्यस्तु भोजनम् ॥३८॥
ददौ नैकविधं पानं ताम्बूलं तोषिकं तथा ।
सर्वे तदुत्सवं कृत्वा ययुर्नैजं स्थलालयम् ॥३९॥
एवं महोत्सवे जाते जयकारोऽभवन्महान् ।
सर्वलोकेषु जयतात् कृष्णनारायणोऽर्भकः ॥४०॥
इत्येवं जनवाचस्त्वश्रूयन्त सर्वतो भुवि ।
महादानेश्वरस्त्वास्ते श्रीमद्गोपालकृष्णकः ॥४१॥
अर्थिनामर्थनां चातिक्रम्याऽर्पयति चेप्सितम् ।
अन्नं पानं भोजनं च द्रव्यं वस्त्रं च वाहनम् ॥४२॥
यद्यदिष्टमादत्तेऽर्थी श्रीमद्गोपालकृष्णतः ।
इत्येवं भुवने जातं यशो व्याप्तं जनेषु च ॥४३॥
श्रुत्वा हिमगिरौ दाल्भ्यो बको गवायनस्तथा ।
सालायनः स्वस्तिधर्मा ऋषयो वनवासिनः ॥४४॥
सहस्रं ब्राह्मणानां तत् तपतां वेदपाठिनाम् ।
साधुधर्मस्थितानां त्वग्जटावल्कलधारिणाम् ॥४५॥
सिंहव्याघ्रमृगहस्तिचर्माम्बरप्रधारिणाम् ।
आगतं तीर्थयात्रार्थं कृत्वा कुरुस्थलाप्लवम् ॥४६॥
पुष्करं सिद्धभूमिं च कृत्वा सौराष्ट्रमाययौ ।
केचनाऽत्राऽभवन् दिव्याः साधवो ब्रह्मचारिणः ॥४७॥
वानप्रस्थास्तथाऽन्ये च गृहस्थाः साधुसदृशाः ।
तपोधर्मरताः शास्त्रविशारदाश्च योगिनः ॥४८॥
कुंकुमवापिकाक्षेत्रं त्वाययुः पावनं परम् ।
विश्रुतं त्रिषु लोकेषु मोक्षदं भगवत्स्थलम् ॥४९॥
अश्वपट्टसरो रम्यं नैकक्रोशसुविस्तरम् ।
देवखातं महामिष्टजलं रम्यं शशिप्रभम् ॥५०॥
सर्वतीर्थनिवासं च विश्वंभरसमाश्रितम् ।
विलोक्य सुन्दरं पूर्वे वनं पुष्पफलान्वितम् ॥५१॥
सर्वर्तुसमृद्धमम्लानं शान्तिं ते लेभिरे स्थिराम् ।
लोमशस्याऽऽश्रमदेशे माया यत्र न विद्यते ॥५२॥
आम्रवणे तु ऋषयः स्वासनानि प्रचक्रिरे ।
सस्नुः पूजादिकं कृत्वा बुभुजिरे फलानि च ॥५३॥
अथ प्रदक्षिणं चक्रुरश्वपट्टसरोवरम् ।
आययुर्लोमशं द्रष्टुं महाभागवतं मुनिम् ॥५४॥
आश्रमे स्थितवन्तं च जम्बूवृक्षतलाश्रयम् ।
नत्वा सहस्रमुनयश्चात्मानं धन्यमाप्नुवन् ॥५५॥
लोमशः स्वागतं चक्रेऽर्घ्याऽऽसनवन्दनादिभिः ।
फलैः पानैः स्वर्गकदल्यादिफलैः सुभोजनैः ॥५६॥
एवमृषिकृतं सर्वं स्वागतं जगृहुश्च ते ।
अथाऽऽययुर्हरेः सौधं द्रष्टुं श्रीपरमेश्वरम् ॥५७॥
अनादिश्रीकृष्णनारायणं बालस्वरूपिणम् ।
सहस्ररूपधृक् कृष्णो युगपत्तान् सुषस्वजे ॥५८॥
आश्चर्यं परमं प्रापुर्दाल्भ्याद्याः ऋषयस्तदा ।
चतुर्भुजं तथा चाष्टभुजं सहस्रबाहुकम् ॥५९॥
ददृशुः केचन बालं ब्रह्मधामगतं प्रभुम् ।
पूजनं पादसलिलं वन्दनं संविधाय ते ॥६०॥
ययुः पूर्वदिशां नैजासनं त्वाम्रवणं ततः ।
अथ द्वितीयदिवसे भिक्षार्थं कृष्णमन्दिरम् ॥६१॥
आययुस्ते तु ऋषयस्तदा श्रीबालकृष्णकः ।
घृतपात्रं गोधूमानां पिष्टपात्रं च शर्कराम् ॥६२॥
व्यञ्जनानि तथा तैलपात्रं च वेषवारकम् ।
द्विदलां तण्डुलाँश्चापि पार्श्वे न्यस्य हरिस्ततः ॥६३॥
स्वहस्ताभ्यां ददौ तेभ्यो विपुलं च यथेष्टकम् ।
एकैकस्मादपि पात्राद् दत्तं न न्यूनतां गतम् ॥६४॥
सहस्राधिकसाधूनामृषीणां भोजनाय च ।
तदाश्चर्यं तु ते जग्मुः कृष्णप्रतापवेदिनः ॥६५॥
गतास्ते संगृहीत्वा चामान्नानि सुबहून्यपि ।
पाचयित्वा बुभुजिरे शान्तिमापुस्तदाऽऽमृतीम् ॥६६॥
अथ सायं हरिः पित्रा साकं साधुसमाजकम् ।
द्रष्टुं तत्र गतो यत्रर्षयः केसरिचर्मसु ॥६७॥
कृतासना विराजन्ते ब्रह्मध्यानपराः शुभाः ।
बालकृष्णश्च पितरं समुवाच तदा हठात् ॥६८॥
सिंहचर्म च तात प्रदापयाऽऽसनाय मे ।
इत्युक्त्वा चांगुलिं दीर्घां कृत्वा तातं पुरः पुनः ॥६९॥

सिंहचर्मणः प्राप्त्यर्थमनुरोधं चकार सः ।
तद् दृष्ट्वा च ऋषिर्दाल्भ्यः पितरं प्राह वै हसन् ॥७०॥
किमयं चेच्छति बालः किंच वक्ति पुनः पुनः ।
पिता प्राह वृथा बालः करोति हठमेव वै ॥७१॥
इच्छत्ययं सिंहचर्म यत्प्राप्यं नैव जायते ।
दाल्भ्यः प्राह कुमार ! त्वं सिंहमारोढुमिच्छसि ॥७२॥
सिंहोऽयं विद्यते नैनमारोढुं शक्यतेऽन्यकैः ।
कुमारः प्राह च ऋषे देहि मे त्वासनाय तत् ॥७३॥
दाल्भ्यः प्राह वनस्थानामृषीणां योग्यमेव तत् ।
नान्ययोग्यं ततः पुत्र दातव्यं नैव विद्यते ॥७४॥
श्रुत्वा श्रीमत्कृष्णनारायणः प्राह प्रदेहि मे ।
नैतद् देयमृषिः प्राह तदा श्रीमन्नरायणः ॥७५॥
सिंहशब्दं चकारोच्चैर्गर्जिनारूपमुल्बणम् ।
तच्छ्रुत्वा चर्मरूपास्ते सिंहा व्याघ्रा मृगादयः ॥७६॥
सर्वे सजीवतां प्राप्ताः कृष्णनारायणेच्छया ।
चर्मोपरिस्थाः ऋषयो निपेतुर्भूतलेऽभितः ॥७७॥
त्रासं प्रापुः सत्यसिंहान् व्याघ्रान् दृष्ट्वा भयंकरान् ।
दुद्रुवुस्ते तु परितो व्याघ्रास्तु गर्जनादिभिः ॥७८॥
अरण्यं चान्तरीक्षं च पूरयामासुरुच्छ्रितम् ।
आसमुद्रान्तमेवैषां शब्दाश्चाकम्पयन् महीम् ॥७९॥
धावमानाः शतशस्ते सिंहास्तथा मृगादयः ।
येषां येषामभवँश्च चर्माण्येते सजीवकाः ॥८०॥
भूत्वा कृष्णपदे नत्वाऽरण्यं सिंहादयो ययुः ।
दाल्भ्याद्याः ऋषयो योगैस्तान्निरोद्धुं न शेकिरे ॥८१॥
इत्येवं तु तदा वीक्ष्य चमत्कारं हरेः पुनः ।
प्रपन्नाः पादयोर्विष्णोर्नारायणस्य तेऽस्तुवन् ॥८२॥
एकमेवाऽद्वितीयं यद् ब्रह्मोत्तमं प्रचक्षते ।
तं त्वामात्मेश्वरं विष्णो प्रणताः स्म प्रसीद नः ॥८३॥
एकराट् सद्धर्मसिन्धोऽनादिसंभव हृत्स्थित ।
विश्वक्सेन वृषावर्त प्रणताः स्म प्रसीद नः ॥८४॥
शुचिश्रवोऽमृतवार्धे सनातनाऽक्षयाऽक्षर ।
हव्यभुङ् मञ्जुकेशाऽज प्रणताः स्म प्रसीद नः ॥८५॥
हृषीकेशाऽग्रज पुष्पहास बाल जनार्दन ।
चराचरनियन्तस्त्वां प्रणताः स्म प्रसीद नः ॥८६॥
सवितुस्त्वं वरेण्योऽसि हिरण्यगर्भसंस्थितः ।
वासुदेव कृपासिन्धो प्रणताः स्म प्रसीद नः ॥८७॥
अनन्ताऽऽस्याऽनन्तपादाऽनन्तशक्तिगुणाश्रय ।
होतः पोतर्होमहेतो प्रणताः स्म प्रसीद नः ॥८८॥
नारायण परब्रह्म श्रीमद्गोपालबालक ।
कम्भराश्रीगृहजन्म प्रणताः स्म प्रसीद नः ॥८९॥
पुरुषोत्तम विश्वात्मन्नूर्ध्वकर्मन् दिवस्पते ।
सर्वसाक्षिन् सुराधीश प्रणताः स्म प्रसीद नः ॥९०॥
सर्वेभ्यः श्रेयसां दाता देवानां दैवतं महत् ।
त्राता भर्ता च पोष्टा च शरणं भव नः प्रभो ॥९१॥
यं न पश्यन्ति पश्यन्तोऽस्मादृशाः ऋषयोऽपि च ।
तान् पश्यन् बालरूपस्त्वं शरणं भव नः प्रभो ॥९२॥
भूमादिस्तम्बपर्यन्तं व्याप्तं येन चराचरम् ।
मायाजालं कृतं येन नमामस्तं शुभार्भकम् ॥९३॥
यस्याऽक्षिणी सूर्यचन्द्रौ यद्बाहू भूमशंकरौ ।
यत्पादौ क्षीरशुक्लेशौ नमामस्तं कृपाऽर्भकम् ॥९४॥
आसनानि विनष्टानि केसरिणो वनं ययुः ।
आसनार्थं बालकृष्ण पूर्यन्तां नो मनोरथाः ॥९५॥
एवं स्तुतोऽथ भगवान् राधिके प्राह वै ऋषीन् ।
आगच्छन्तु महाभागाः स्पृशन्तु मम पन्नखम् ॥९६॥
भवतां त्वासनान्याऽऽविर्भविष्यन्ति दधत्विह ।
इत्युक्तास्ते ऋषयस्तु दाल्भ्यबकादयस्तदा ॥९७॥
पस्पृशुः श्रीहरेर्वामपादांगुष्ठं क्रमात्ततः ।
अंगुष्ठस्य नखात्तत्र सिंहचर्मादि यस्य यत् ॥९८॥
तत्तदाविर्बभूवैतज्जग्राह मुनिराट् तु तत् ।
सर्वेषां तानि चर्माणि श्रीहरिणाऽर्पितानि वै ॥९९॥
ततः सर्वे हरिं नारायणं समर्चयन् मुदा ।
जगृहुश्च मनुं तत्र गोपालकृष्णतोऽखिलाः ॥१००॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
तिलकं तौलसीं मालां नाम कृष्णनरायणम् ॥१०१॥
वैष्णवाः ऋषयो भूत्वा दिव्यदृष्टियुजस्ततः ।
तीर्थयात्रा समाप्यैव हिमशैलं पुनर्गताः ॥१०२॥
तत्तीर्थं दाल्भ्यतीर्थेति नाम्ना पूर्वतटेऽभवत् ।
श्रावणात्पठनाच्चापि भुक्तिमुक्तिफलप्रदम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोः पञ्चमाऽब्दिके महोत्सवे विविधगन्धर्वाणां गायनानि दाल्भ्यबकादिसहस्रर्षीणां सिंहव्याघ्रादिचर्मभ्यः सिंहादीनां सजीवीकरणं अंगुष्ठात्तत्तच्चर्माविर्भावश्चेत्यादिनिरूपणनामा चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके कृष्णनारायणस्य शोभनाम् ।
चमत्कारमयीं लीलां भुक्तिमुक्तिप्रदायिनीम् ॥ १ ॥
एकदा तु नटास्तत्राऽऽययुः कैलासदेशजाः ।
नैकनाट्यक्रियाविज्ञाः समाजस्तब्धताकराः ॥ २ ॥
बहुसाधनसम्पन्नाश्चैन्द्रजालिकबोधिनः ।
सहस्रमानवास्तत्र पञ्चशतानि कन्यकाः ॥ ३ ॥
शतं गजाः शतं चाश्वाः शतं च गवयास्तथा ।
शतमुष्ट्रा गर्दभाश्च शतं केसरिणो दश ॥ ४ ॥
व्याघ्राश्च विंशतिसंख्या भल्लुका दश इत्यपि ।
वानराः शतमेवापि हंसाः शुकाः शतं शतम् ॥ ५ ॥
श्वानस्त्रीणि शतान्येव गण्डका दश इत्यपि ।
मल्लाश्च विंशतिस्तत्र संहत्य बहुविस्तरम् ॥ ६ ॥
नाट्यमण्डलमूर्धन्यं ख्यातं तद् भूमिमण्डले ।
अर्धनारीश्वराख्येन नटेन परिपालितम् ॥ ७ ॥
शतं तु गरुडास्तत्र शतं चाऽनलपक्षिणः ।
कामरूपधराः सर्वे कल्पद्रुलब्धभोजनाः ॥ ८ ॥
अन्तरीक्षगतयश्च व्योमनगरदर्शकाः ।
विद्युत्कलाप्रयोक्तारो बहुरूपप्रदर्शकाः ॥ ९ ॥
विद्यन्ते कृतशिक्षाश्च यत्र नृपशुपक्षिणः ।
सौराष्ट्रे कुंकुमवापीक्षेत्रे तन्नाट्यमण्डलम् ॥१०॥
अश्वपट्टसरस्तीरे चोत्तरे समुवास ह ।
कृतस्थानं जलपानं स्नानं चकार वारिषु ॥११॥
पौषमासे पूर्णिमायां नाट्यं रात्रौ चकार तत् ।
विशालो मण्डपस्तत्र रम्यः क्रोशमितोऽभवत् ॥१२॥
लक्षशो मानवास्तत्र द्रष्टुं सौराष्ट्रवासिनः ।
आययुः परितस्तत्र निषेदुर्दृष्टिहेतवे ॥१३॥
अनादिश्रीकृष्णनारायणश्च लोमशो मुनिः ।
माता पिता कन्यकाश्च निषेदुर्नरयोषितः ॥१४॥
विद्युद्दीपा निसर्गाश्च मण्डपस्थितरश्मिषु ।
चकाशिरे चन्द्रतुल्या दिवाभ्रान्तिस्तदाऽभवत् ॥१५॥
तावन्निसर्गवाद्यानि त्ववाद्यन्त च मण्डपे ।
स्तम्भशिरस्सु मिष्टानि ब्रह्मपर्षन्निभानि वै ॥१६॥
स्तम्भकुम्भीषु च तत्र बभूवुर्गीतिकाः शुभाः ।
व्योमवाणीस्वरूपिण्यो गायकैर्वादकैर्युताः ॥१७॥
स्तम्भमध्येषु लोक्यन्ते कन्यानामयुतानि च ।
श्रीरमाकमलागौरीतुल्यरूपाणि सर्वशः ॥१८॥
वितानेषु तदा स्वर्गे सुधर्मा चापि वीक्ष्यते ।
अलका चाऽमृता स्वर्णा हिरण्या चाश्मका च पूः ॥१९॥
कल्पपर्षत् विलोक्यन्ते शोभोत्तरविराजिताः ।
वस्त्रभित्तिषु लोक्यन्ते सुरा दैत्याश्च दानवाः ॥२०॥
ऋषयः पन्नगाश्चेशाः पितरो मानवोत्तमाः ।
निसर्गदर्शनाश्चैते विलोक्यन्ते समन्ततः ॥२१॥
कृत्रिमं सर्वमेवेदं त्वैन्द्रजालिकदर्शनम् ।
मण्डपे संविलोक्यैव पर्षत् स्तब्धाऽभवत् क्षणम् ॥२२॥
अथ गीतिः स्वस्तिवाच्यं नान्दीबोधकमंगलम् ।
अश्रूयत कृष्णनारायणस्तुत्यात्मकं तदा ॥२३॥
जय जय जगदिष्टो जय जय जगदिष्टः ।
जय जनवन्दित नन्दितवदनः कृतमदरिपुदमनः ।
जय जय जगदिष्टः ॥२४॥
जय पुरुषोत्तम मुक्तसुवन्दित नन्दितनिजशरणः ।
जय राधाधिप जय कमलाधिप, जय माधव धवगः ॥२५॥
जय जडचेतनमध्यकृताश्रय पारवतीवरणः ।
जय नारायण चामृतनिवसन, ब्रह्मपरं हृदयः ॥२६॥
जय माणिक्यपतेऽक्षरपालक सुरमुनिपितृधरः ।
जय चात्मन् जय प्रभापते जय, कम्भराश्रीतनुजः ॥२७॥
जय गोपालतनूद्भवबालक जय ब्रह्माण्डधरः ।
जय शंकरचरितात्मनिवेदन, वैष्णवकष्टहरः ॥२८॥
जय कन्याऽर्बुदपद्मपते प्रिय लक्ष्मीश्वर सुखदः ।
जय कुंकुमवापीधृतचरण जय, चाश्वसरस्तरणः ॥२९॥
जय धामाधिपतेऽधिपते जय मञ्जुलमूर्तिधरः ।
जय चानन्दनिधे सगुणेश्वर, स्वस्तिकरः सुकरः ॥३०॥
जय सौराष्ट्रमणे ह्यवतारिन् हंसग जनलीलः ।
जय सर्जक रक्षक हारक जय, जडचेतनतनुगः ॥३१॥
इत्यश्रूयन्त मांगल्यवाचस्तत्र ततः परम् ।
प्रस्तावकृत् कृष्णवेषो रङ्गमध्ये ह्युपस्थितः ॥३२॥
नेमुः पारिषदा मां च प्रणमन्तं सभेश्वरम् ।
अवोचं च तदा चाहं नाट्यमाद्यन्तगर्भितम् ॥३३॥
परब्रह्म जगद्योनिर्जगदादिरजः प्रभुः ।
परावराणां परमः सर्वलोकगुरोर्गुरुः ॥३४॥
कृपया लोकश्रेयोऽर्थं कम्भरागर्भगो ह्ययम् ।
प्रभुः प्रभूणां परमश्चावतीर्णोऽस्ति भूतले ॥३५॥
सोऽयमायाति बालात्मा पश्यन्तु तं परेश्वरम् ।
इत्युक्त्वाऽहं च तिष्ठामि राधे ! बालं प्रदर्शयन् ॥३६॥

तावद्बालः कृष्णवेषस्तत्र रङ्गे समाययौ ।
ददर्श च समाजस्तं कोटिकोट्यर्कसन्निभम् ॥३७॥
अथाऽस्य वर्ष्मणः कोटिकृष्णरामनरायणाः ।
निर्ययुर्वासुदेवाद्या व्यूहाश्चापि तथाऽर्बुदाः ॥३८॥
भूमानश्च महाविष्णुर्वैराजवेधसोऽपि च ।
सदाशिवोऽवताराश्च निर्ययुर्बालदेहतः ॥३९॥
पितरः ऋषयो देवास्तत्त्वानि मानवास्तथा ।
नागा दैत्या दानवाश्च वृक्षाः शैलास्तथाऽऽपगाः ॥४०॥
निर्ययुर्जङ्गमा देव्यो स्थिरमानससृष्टयः ।
सर्वं प्रदर्शितं बाले कृष्णे नारायणे तदा ॥४१॥
समाजस्तं विलोक्यैव स्वं स्वलोकान् नरायणे ।
आश्चर्यं परमापन्नो जयशब्दानुवाच ह ॥४२॥
अथोपहारं कृत्वाऽहमवोचं दर्शकाँस्तदा ।
सोऽयं बालः परमात्मा भवन्मध्ये विराजते ॥४३॥
श्रीमद्गोपालकृष्णस्य पार्श्वे श्रीपरमेश्वरः ।
इत्युक्तो हि मया यावज्जनस्तावन्नरायणः ॥४४॥
पटपृष्ठे ययौ नीत्वा पारिषदनमःक्रियाम् ।
अथाऽऽययुः पारवती लक्ष्मीः राधा प्रभा पुरः ॥४५॥
तावत् किशोररूपोऽसौ बालकृष्णः समाययौ ।
चतस्रो वन्दनं चक्रुः पत्युः पुमुत्तमस्य ताः ॥४६॥
पादप्रक्षालनं चक्रुः पपुश्चरणवारि तत् ।
ततस्तं पूजयामासुश्चक्रुर्नीराजनं तथा ॥४७॥
राजते श्रीहरिस्तत्र स्वर्णासनेऽर्पिताञ्जलिः ।
अथ ताः श्रीहरेर्मूर्तौ चतस्रोऽपि लयं ययुः ॥४८॥
जनाः पुनश्च ददृशुश्चोद्भूताः श्रीहरेस्तनोः ।
शतं च द्वादश चापि चोद्भूताः श्रीहरेः प्रियाः ॥४९॥
तथा च ददृशुर्लोका लोमशस्याश्रमं महत् ।
कन्यकाया हरेः पत्न्यः कोट्यर्बुदाब्जसंख्यकाः ॥५०॥
निर्ययुः श्रीहरेर्मूर्तेर्नाट्यवेद्यां लुलोफिरे ।
रङ्गस्थास्ताः स्वकं रूपं नाट्ये दृष्ट्वा तु विस्मिताः ॥५१॥
ब्रह्मसरसो देव्यश्चाप्सरसो निर्ययुर्हरेः ।
रङ्गे दृष्ट्वा पारिषदाः सतालजयघोषणाम् ॥५२॥
चक्रुः प्रसन्नाः परितः परिहारस्ततोऽभवत् ।
अथाऽऽययौ रङ्गपीठे श्रीमद्गोपालकृष्णकः ॥५३॥
कम्भराश्रीमहालक्ष्मीसहितो बालकृष्णवान् ।
दत्वा देवेभ्य आशीर्वादान् सपुत्रो गृहं ययौ ॥५४॥
एवं प्रदर्श्य रङ्गेशः पटपृष्ठे ययौ पुनः ।
इत्येवं राधिके सर्वमवतारित्वबोधकम् ॥५५॥

चरित्रं सम्प्रदर्श्यैव तत्परिहारमाचरत् ।
अथाऽन्यद् दृश्यमापेदे मण्डपे व्योममार्गके ॥५६॥
रज्जुजालेषु बद्धेषु नटा दृढसुवेषिणः ।
शतसंख्याश्चावतेरुः प्रतिरज्जुं विहंगमाः ॥५७॥
उड्डयन्ते शतहस्तान् रश्मेः रश्म्यन्तरं प्रति ।
छत्राभ्यां चापि गच्छन्ति सहस्रहस्तकाम्बरम् ॥५८॥
रज्जुप्रान्तं समादाय क्षितो याति शतोत्तरम् ।
धनुषा शरवत् क्षिप्तः सहस्रोत्तरमाययौ ॥५९॥
पद्भ्यां क्षिप्तः प्रयात्येव शतहस्तोच्छ्रयं पुनः ।
निरालम्बोऽवतरति रज्जुमध्येऽवलम्बते ॥६०॥
वंशाद्वंशान्तरं याति स्थलात् स्थलान्तरं च खे ।
एकरश्मौ च बहूनां परस्पराभियायिनाम् ॥६१॥
स्थाल्यां दत्तपदानां च मध्ये सन्निहितात्मनाम् ।
अस्पृष्टाऽन्योन्यमेवाऽत्र रश्मौ त्वग्रे प्रवासनम् ॥६२॥
तत उड्डयनं प्रान्ते प्रान्तान्तरेऽवलम्बनम् ।
मध्ये व्योम्न्यवलम्बन्तं चूम्बयित्वा जनान्तरम् ॥६३॥
अथ रज्जुनिषदनोड्डयनं सर्वतो दिशम् ।
अनालम्बं करेणापि पद्भ्यां वाऽन्येन चर्मणा ॥६४॥
एवमुड्डयनं नाट्ये दर्शयित्वा ततश्च ते ।
चक्रुश्च गोपुरं रम्यं पञ्चाशन्नाट्यशिक्षिताः ॥६५॥
द्वितीयं गोपुरं चक्रुः शतं चैकोर्ध्वगं ततः ।
तृतीयं गोपुरं चक्रुस्त्रिशतं द्वितीयोपरि ॥६६॥
पञ्चाशत्पुरुषा मध्ये स्तंभदृश्यास्तदाऽभवन् ।
इत्येवं च सुधर्माया गोपुरं रमणीयकम् ॥६७॥
कम्मानिकात्रययुतं पञ्चाशन्मानवा व्यधुः ।
तत्र पार्श्वे स्थिताः कन्याः पुत्तल्य इव सर्वशः ॥६८॥
दिव्यरूपधराः सर्वाः पर्यो देव्यः सुशोभनाः ।
हस्तचामरशोभाश्च सप्तकलशमस्तकाः ॥६९॥
शोभन्ते गोपुरे तत्र सर्वसिद्धिपरायणाः ।
इत्येवं गोपुरं राधे कारयित्वा नटेश्वरः ॥७०॥
साऽम्बालिकं गजसैन्यं न्यवेशयत्तदन्तरम् ।
गतं पुनर्निर्गतं च यदा प्रत्येकतोगजम् ॥७१॥
गजं गजं प्रति तत्र गोपुरमानवस्त्रियः ।
ऊर्ध्वमुत्प्लुत्य च शनैरवतेरुर्गजे गजे ॥७२॥
गजसैन्यं सान्तमेव गोपुरा अपि सन्ति न ।
एवं दृष्ट्वा महायत्नं महाकौशल्यमेव च ॥७३॥
जयकारोऽभवन्नटेश्वरनटनटीकृते ।
नैतादृशं पुरा दृष्टं गोपुरं द्रक्ष्यते न वा ॥७४॥

कुंभकं तु विनाऽऽयामं कैश्चित् कर्तुं न शक्यते।
विहायसगतीनां तु सरला गोपुराकृतिः ॥७५॥
अथ हस्त्युष्ट्रकाश्वानां प्रासादास्तत्र निर्मिताः।
सप्तभौमा यत्र नरा नार्यो दोलासु सर्वतः ॥७६॥
आन्दोलनं प्रकुर्वन्ति स्थिरप्रासादभूमिषु।
मध्ये सोपानमार्गाश्च गवयाऽजवृषादिजाः ॥७७॥
भूमिकाश्चानलपक्षिगारुडपक्षिकल्पिताः।
छत्रं पन्नगवर्याणां रश्मयः पन्नगाश्च वै ॥७८॥
शुका हंसाः कूजनं च कुर्वन्ति रज्जुसंस्थिताः।
उद्यानानि च परितस्तदैन्द्रजालकारिताः ॥७९॥
अरण्ये वह्निजालानि वृष्टिजालानि चाम्बरे।
वायुवेगास्तथा सौधे सूर्यचन्द्रौ च कृत्रिमौ ॥८०॥
सौधेषु वानरास्तत्रोद्यानफलानि भुञ्जते।
एवं प्रदर्श्य प्रासादान् परिहारं तदाऽकरोत् ॥८१॥
अथ मल्लाः समायाता मल्लयुद्धार्थमुत्सुकाः।
विविधं मल्लयुद्धं ते नरा नार्यस्तदा व्यधुः ॥८२॥
परिहारं तस्य कृत्वा तदा हास्यकरं परम्।
सुसैन्यं वानराणां वै भल्लुकानां महत्तरम् ॥८३॥
मानुषवेषयुक्तानां भटानां शस्त्रधारिणाम्।
सिंहगर्दभगण्डकव्याघ्रवाहनयायिनाम् ॥८४॥
आगतं रङ्गमध्ये तद् यत्र श्वानः शृगालकाः।
युद्धवादित्रसंवादा महिषारोहिणस्तदा ॥८५॥
सेनापतिश्च शरभस्तत्सैन्यं च परस्परम्।
द्वेधा भूत्वा पटपृष्ठे समारेभे महारणम् ॥८६॥
युद्धे हतास्तदा तत्र प्रायशः ऋक्षवानराः।
भल्लुका गर्दभाः श्वानः शृगालाः सिंहनाशिताः ॥८७॥
ऐन्द्रजालिकमेवाऽऽसीत् हतं यद्यत् तदाऽभवत्।
सत्यास्तु वानराः ऋक्षा भल्लुकाद्या हता न वै ॥८८॥
अथ तस्य परिहारं चक्रे नटेश्वरस्ततः।
व्योमयुद्धं कुमारीणामभूत्तदिन्द्रजालकृत् ॥८९॥
हता भिन्नाः पतन्त्येव व्योम्नः कुमारिका भुवि।
सर्वं कुमारिकासैन्यं हतं सुप्तं भुवस्तले ॥९०॥
तदा नारीश्वरः सेनापतिः रुरोद वै बहु।
अहो मे कन्यका नष्टाः सर्वं सैन्यं हतं मम ॥९१॥
तदा बालः स्वयं कृष्णो जीवयामास कन्यकाः।
रुद्रच्छाया स्वरूपास्ताः कन्या रौद्र्यः सहस्रशः ॥९२॥
नवीना एव भगवान्निर्ममे ऐन्द्रजालिकाः।
नारीश्वरो महाश्चर्यं प्राप्तो गर्वं विमुच्य च ॥९३॥
पपात पादयोस्तत्र बालकृष्णस्य वै तदा।
परिहारं चकाराऽथ दृश्यस्याऽस्य नटाधिपः ॥९४॥
ऐन्द्रजालिककन्यास्ताः सहस्रं रुद्रसन्निभाः।
मुमुहुः श्रीहरौ तत्र वव्रुश्च वरदानकम् ॥९५॥
त्वं नाथाऽस्मत्पतिः प्राणरक्षको भव सर्वदा।
हरिः प्राह तथाऽस्त्वेव लोमशाय न्यवेदयत् ॥९६॥
लोमशस्याऽऽश्रमे ताश्च ररक्ष भगवान् स्वयम्।
अथ सिंहा रङ्गभूमौ समानीतास्तु पंक्तिशः ॥९७॥
तस्य शिक्षकवर्येण मुखव्यापादनं तदा।
कारितं तन्मुखमध्ये नरा नाट्यकरास्तदा ॥९८॥
ददुः शिरांसि नैजानि तदाश्चर्यं महद्ध्यभूत्।
अथ तत्परिहारं च कृत्वा नारीश्वरः स्वयम् ॥९९॥
कारयित्वा केसरिणो मुखव्यापादनं तदा।
स्वस्यैव मस्तकं मुखे ददावाश्चर्यकृद् यथा ॥१००॥
अथ तस्य महागर्वं ज्ञात्वा कृष्णनरायणः।
गर्वविनाशनार्थाय मतिं केसरिणे ददौ ॥१०१॥
अयं मे रक्षकस्त्वास्ते पीडां नित्यं करोति हि।
तस्मादद्य शिरस्तस्य भक्षयामि प्रसह्य वै ॥१०२॥
इति निर्णीय च रुषा मुखे धृतं तु मस्तकम्।
अचूर्णयद् बलान्मुखं दृढं पिधाय केसरी ॥१०३॥
हाहाकारो महानासीद् दृश्यान्ते शोकसागरः।
रुरुदुश्च नटा नट्यः शतशोऽथ सहस्रशः ॥१०४॥
यद्यपि च स्वयं रुद्रस्त्वर्धनारीश्वरः प्रभुः।
नटेश्वरो ददौ स्वस्य शिरः कालमुखे तदा ॥१०५॥
निर्भयोऽभूत् सिद्धिमाँश्च तथापि परवश्यता।
देवैर्ज्ञाता स्वयं तत्र चाथ कृष्णनरायणः ॥१०६॥
बालकः स्वासनाच्छीघ्रमुत्थाय हरसन्निधौ।
जगाम तु सती शंभुमंके निधाय शोचति ॥१०७॥
सतीमाह प्रदेह्येतन्मस्तकं कूर्चितं तु यत्।
हस्तस्पर्शेन वै स्वस्थं यथापूर्वं करोमि वै ॥१०८॥
इत्युक्त्वा वामहस्तेन पस्पर्श श्रीनरायणः।
राधिके सत्वरं शंभोः शिरः पूर्ववदाभवत् ॥१०९॥
शंभुरुत्थाय च कृष्णनारायणं परेश्वरम्।
प्रणनाम प्रसन्नः सन् गर्वं जहौ हरः स्वयम् ॥११०॥
अथ बालो हरं प्राह दर्शनं देहि वै हर।
अर्धनारीश्वरो भूत्वा पारिषदेभ्य एव तु ॥१११॥
शंभुस्तदाऽभवत् तत्र चार्धनारीश्वरः स्वयम्।
अर्धे नारीस्वरूपं चाऽऽननखकेशं सुशोभनम् ॥११२॥

केशा जटाः श्मश्रवश्मश्रूः स्तनाऽस्तनं तदाऽभवत् ।
योनिर्लिंगं वृषणैकं लोमालोमं तदाऽभवत् ॥११३॥
शाटीचर्म भूषणाऽभूषणं रूपं तदाऽभवत् ।
रङ्गे तं तादृशं दृष्ट्वा तदन्तः श्रीहरिं तथा ॥११४॥
दृष्ट्वा समाजः सहसा तुतोषाऽतीव तत्क्षणे ।
नटेश्वरः स्वयं शंभुर्नटास्तस्य गणा इमे ॥११५॥
पश्चाद्यास्तस्य भक्ताश्च हरिं तोषयितुं ननु ।
आयाता नाट्यविधये तुष्टो हरिः स्वयं ततः ॥११६॥
ददौ वासं चाश्वपट्टसरस्येवोत्तरे तटे ।
दिव्यदेहान् प्रचक्रे तान् सर्वान् नटान् नटीः प्रभुः ॥११७॥
पारितोषिकमिष्टं च परधामगतिं ददौ ।
तीर्थं तन्नटनाट्याख्यं सर्वोद्धारकरं परम् ॥११८॥
पापिनां तारकं स्वर्गप्रदं श्रेष्ठं बभूव ह ।
श्रवणात्पठनाच्चापि भुक्तिर्मुक्तिः प्रजायते ॥११९॥
परिहारं ततः कृत्वा हरिः स्वस्याऽऽलयं ययौ ।
सौराष्ट्रमानवा देवाः ऋषयः पितरस्तथा ॥१२०॥
अन्ये च दर्शकाः सर्वे ययुः स्वस्वालयान् मुदा ।
इत्येवं राधिके ! कृत्वा नाट्यं श्रीशंकरः स्वयम् ॥१२१॥
निवासमकरोत्तत्र गणैः पशुपतत्रिभिः ।
प्राणिभिः सर्वथा चाश्वसरसश्चोत्तरे वने ॥१२२॥
वटबिल्वकदम्बानामरण्ये वासमाचरत् ।
यावत् पृथ्वी स्थिरा स्याच्च तावत् तत्र निवत्स्यति ॥१२३॥
कृष्णवेषस्त्वया साकं राधिकेऽदृश्यतां गतः ।
कृत्रिमो नाट्यसौधश्च तदानीं विलयं गतः १२४॥
अनादिश्रीकृष्णनारायणः श्रीशंकराय वै ।
जगादाऽनुग्रहं कुर्वन् नाट्ये ये देहिनोऽत्र च ॥१२५॥
भवान् गणा नरा नार्यः कन्यकाः पशुपक्षिणः ।
सर्वे भवन्तु च द्वेधा कृपया मम सर्वथा ॥१२६॥
दिव्यरूपा मम मुक्ता मम धाम्न्यक्षराभिधे ।
दिव्ययानैः प्रयान्त्वेव चतुर्धामुक्तिमास्थिताः ॥१२७॥
एतद् ददामि कृपया पारितोषिकमुत्तमम् ।
अन्यरूपैर्वसन्त्वत्र वटबिल्ववने सदा ॥१२८॥
इत्येवं श्रीहरिः प्राह न्यूषुर्हरादयः सदा ।
वसति श्रीहरिः सौधे शंभोः सौधं च निर्ममे ॥१२९॥
इत्येवं शंकरो देवः कृष्णनारायणं हरिम् ।
तोषयितुं कृतवाँश्च दिव्यं नाट्योत्सवं परम् ॥१३०॥
भगवानपि सर्वात्मा शंभुं तोषयितुं तदा ।
भूत्वा तु दर्शकस्तत्र नाट्यभूमौ स्थितोऽभवत् ॥१३१॥
पूरयामास भक्तस्य शंभोर्मनोरथं हरिः ।
भक्ताधीनो यतः कृष्णनारायणोऽस्ति राधिके ॥१३२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कैलासीयाऽर्धनारीश्वरनाट्यमण्डलेन कुंकुमवाप्यां क्षेत्रे कृताऽलौकिकानेकनाट्यैः प्रभुः सन्तुष्टः सन् शंकरगर्वगञ्जनो मोक्षदश्चाऽभवत्, नटनाट्यतीर्थं चेत्यादिनिरूपणनामा पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥

**श्रीकृष्ण उवाच—**

अथाऽन्यत्ते प्रवक्ष्यामि चमत्कारं हरेः शृणु ।
पञ्चमे वत्सरे माघे गुरोर्बलं विलोक्य तु ॥ १ ॥
गत्वा श्रीलोमशस्याग्रे बालकृष्णस्य शोभनम् ।
पिता हि विधिवद् विद्यारंभं तेनाऽप्यकारयत् ॥ २ ॥
लक्ष्मीं नारायणं सरस्वतीं वेदानपूजयत् ।
गणेशस्याऽर्चनं कृत्वा घृतहोमं चकार सः ॥ ३ ॥
विप्रान् संभोजयामास गोदानानि चकार च ।
सरस्वती प्रसन्ना वै साक्षात्तदा समागता ॥ ४ ॥
मयूरासनशोभाढ्या हस्ते वीणां निधाय च ।
चतुर्दशस्वरूपाभिर्विद्याकन्याभिरर्चिता ॥ ५ ॥
सर्वाभूषणवस्त्रालंकारशोभासमन्विता ।
अनादिश्रीकृष्णनारायणं समर्च्य शारदा ॥ ६ ॥
बालकृष्णेऽदृश्यभावमुपागता हरेः प्रिया ।
ततस्तस्यास्तु याः सख्यः श्रुतयः स्मृतयस्तथा ॥ ७ ॥
आख्यायिकाश्च कवितास्तर्कशक्तिश्च काण्डिकाः ।
मिमांसाश्च समाधिश्च विविक्तिश्च कथास्तथा ॥ ८ ॥
मान्त्रिकी तान्त्रिकी चापि यान्त्रिकी भौतिकी तथा ।
कलाश्च गणनाश्चापि विन्यासाश्च क्रियास्तथा ॥ ९ ॥
रासायनी कल्पना च सांग्रामिकीन्द्रजालिका ।
ज्योतिर्मयी ऋचः साम्नी चाथर्वी च यजुर्मयी ॥१०॥
शाब्दी छान्दसी नैरुक्ती कार्षेयी लेखिनी तथा ।
सामुद्री वायवी चापि स्वाप्नी मोहिनी शाकुनी ॥११॥
शारीरिकी मानसी च जैवेयी सामरी तथा ।
सञ्जीवनी च वैवर्ती चार्तवी धातवी तथा ॥१२॥
चिकित्साऽस्त्रमयी दिव्या संहारिणी च पोषणी ।
शिल्पिनी भूस्तरी तत्त्वशोधिनी खनिमार्गिणी ॥१३॥
वैद्युती बहुभवनी सीवनी गर्भवेदिनी ।
द्राविणी मूर्छिनी चैवमाद्या विद्याश्च कन्यकाः ॥१४॥

धावल्यकान्तिधारिण्यश्चम्पकाभाः किशोरिकाः ।
सरस्वतीमनु कृष्णे विविशुः प्रतिमात्मिकाः ॥१५॥
एवं बाले गुरोर्द्वारा विद्याप्राप्तिरभूत्तदा ।
तथापि लोकरीत्यैव रेखाऽभ्यासं तदाऽकरोत् ॥१६॥
अक्षराणां च शब्दानामभ्यासं च तथाऽकरोत् ।
वेदशास्त्रादिविद्यानां निधानं दृश्यते जनैः ॥१७॥
अथ ताः कन्यकाः सर्वाः सेवन्ते बहिरेव तम् ।
अन्तर्हितास्तु वर्तन्ते सेवन्ते चान्तरे सदा ॥१८॥
प्राविर्भूताश्च वर्तन्ते सेवन्ते कान्तमेव तम् ।
शारदायास्तु ताः सख्यो वव्रिरे श्रीनरायणम् ॥१९॥
अनादिश्रीकृष्णबालं परमेशं पतिं प्रभुम् ।
समूर्तास्ताः सदा न्यूषुर्लोमशस्याश्रमे शुभाः ॥२०॥
कृष्णनारायणस्यैवाऽऽश्रया विद्याः सुशोभनाः ।
नित्यं बालः प्रयात्येवाभ्यसनार्थं गुरुं प्रति ॥२१॥
लोमशस्तं सदा प्रातरध्यापयति सार्थकम् ।
गृह्णाति लोकवत् कृष्णो गुरुस्तुतोष चाप्यति ॥२२॥
सेवां गृह्णाति कन्यायां ततो याति गृहं निजम् ।
अथैकदा देवगुरुः समायाल्लोमशाश्रमम् ॥२३॥
बालकृष्णो ननामैनं बृहस्पतिं सुरेडितम् ।
बृहस्पतिस्तदा बुद्धिपरीक्षार्थं हरेः खलु ॥२४॥
सन्निधौ लोमशस्यैव पप्रच्छ तर्कसम्मितम् ।
गुञ्जाभारसुवर्णस्य कति मूल्यं भवेद् वद ॥२५॥
बालः प्राह स्थिरं चेत् स्याद् गुञ्जैकमात्रमूल्यकम् ।
यदि स्यान् नैकधा नित्यं क्रयविक्रययोजितम् ॥२६॥
स्वत्वानि परिवर्तन्ते यावत्संख्यानि तत्र तु ।
तावद्गुणं ददात्येव वस्तु भिन्नं विभिन्नकम् ॥२७॥
लक्षवर्षं कोटिवर्षं यावद्धस्तगतं भवेत् ।
तावद्गुणं भवेन्मूल्यं तस्मादनन्तमूल्यकम् ॥२८॥
गुञ्जामात्रं सुवर्णं तत् तदेव परिवर्तते ।
तत्क्रीतं नूतनं वस्तु नूतनं नूतनं मिलेत् ॥२९॥
एवमनन्तमूल्यं तत् सुवर्णं मीयते गुरो ।
श्रुत्वैवं चोत्तरं गुरुस्तुतोष तार्किकं च तम् ॥३०॥
आशीर्भिर्योजयामास सर्वज्ञः सर्वविद् भव ।
कौमारं पञ्चमाऽब्दान्तं पूर्णं भवतु पुष्टिदम् ॥३१॥
विद्योदययुतं स्तात्ते पौगण्डं दशमावधिम् ।
कैशोरमापञ्चदशान्महोदयपरं तव ॥३२॥
ततः परं यौवनं ते त्वनन्तानन्दभृद् भवेत् ।
शाश्वतं जीवनं तेऽस्तु सनातनस्वरूपता ॥३३॥
इत्येवमाशिषो दत्वा प्राप्य पूजां तदा कृताम् ।
पप्रच्छ श्रीहरिं यास्यन् वराटकं महासुरम् ॥३४॥
पश्चिमाऽब्धितटस्थं च तपन्तं तप उत्तमम् ।
अहिंसन्तं वदन् सत्यं व्रतमस्तेयमास्थितम् ॥३५॥
ब्रह्मचर्यपरं सर्वपरिग्रहविवर्जितम् ।
शौचान्वितं च सन्तुष्टं स्वाध्याये च रतं सदा ॥३६॥
ब्रह्मपरं समिच्छन्तं राज्यं सौराष्ट्रभूमयम् ।
समुद्रोत्थं सालमालासुरपुत्रं बलाधिकम् ॥३७॥
भगवन्नत्र सौराष्ट्रे पश्चिमाब्धितटान्तिके ।
तपत्युग्रं राज्यलब्ध्यै सालपुत्रो वराटकः ॥३८॥
पञ्चाग्नौस्तपति ग्रीष्मे शिशिरे तिष्ठते जले ।
वर्षास्वेव तथा चास्ते वाय्वाहारो निरन्तरम् ॥३९॥
शिरो भूमौ चाम्बरे च पादौ कृत्वा दिवानिशम् ।
ओमितिव्याहरन्नास्ते राज्यार्थं स महासुरः ॥४०॥
इन्द्रेणैतत्तपो ज्ञात्वा प्रेषितोऽहं व्रजाम्यतः ।
उपदेक्ष्यामि तं तादृग् यतस्तपो निवर्तते ॥४१॥
उपदेशय मां तादृक् तन्निवृत्तिर्यथा भवेत् ।
अनादिश्रीकृष्णनारायणोऽसि परमेश्वरः ॥४२॥
देवानां रक्षकश्चाऽसि दैत्यानां दमनप्रदः ।
तद्यथा देवशूलोऽयं राज्यं नाऽऽसादयेत्तथा ॥४३॥
शाधि मां भगवन् गत्वा करिष्यामि च तत्तथा ।
श्रुत्वैव भगवानाह श्रीमत्कृष्णनरायणः ॥४४॥
इच्छाम्यहं च दैत्यस्य तपोरोधो यथा भवेत् ।
साम्ना दैत्यो वारणीयो गुरो तद्योग्यबोधिना ॥४५॥
कथयामि दैत्यधर्मान् दैत्यज्ञानक्रियादिकम् ।
त्वया ब्राह्मणरूपेण ह्युपदेशः प्रदीयताम् ॥४६॥
प्रायो दैत्या आसुराश्च दानवा इन्द्रियतृपाः ।
देहात्मवादमाश्रित्य वर्तन्ते कामकारतः ॥४७॥
दैत्यानां तु बलं धर्मो युद्धात्सम्पत्समर्जनम् ।
प्रसह्य हरणं कृत्वा स्वायत्तीकरणं तथा ॥४८॥
पराक्रमं दैत्यधर्मस्तपो धर्मो विरागिणाम् ।
तस्मात्तपसः प्रच्याव्य देहधर्मान्निबोधय ॥४९॥
देवधर्मविरोधं च नास्तिक्यं पापशून्यताम् ।
हिंसनं च पुरस्कृत्य दैत्यधर्मान्निबोधय ॥५०॥
प्रत्यक्षं च प्रमाणं वै परलोको न विद्यते ।
तपःफलं सदा फल्गु तथा तं वै निबोधय ॥५१॥
ईश्वरः पक्षपाती च देवानां हितकारकः ।
दैत्ये कापट्यमादाय विरुद्धोऽस्तीति बोधय ॥५२॥

वरदानेऽपि राज्येऽपि चान्ते दैत्यविनाशकः ।
परमेशश्च दैत्येन घात्य एवेति बोधय ॥५३॥
इत्येवं च समादिष्टो गुरुर्बृहस्पतिः स्वयम् ।
नत्वा कृष्णं हृदि कृत्वा लोमशं संप्रणम्य च ॥५४॥
ययौ वराटकं दैत्यं पश्चिमाऽब्धितटस्थितम् ।
विप्रो भूत्वाऽम्बरादेवाऽवततार महामुनिः ॥५५॥
तेजसा प्रज्वलन् सौम्यः प्रसादेन समन्वितः ।
ध्यानमग्नोऽभवद् दैत्यो भूमिकोऽम्बरपादवान् ॥५६॥
विप्रो विलोकयामास श्रद्धाकष्टसहं क्षणम् ।
ततः शनैर्जगादैनं वराटक ! प्रपश्य माम् ॥५७॥
तव कामप्रपूर्त्यर्थं समागतोऽस्मि चाऽम्बरात् ।
पश्य वरय भद्रं ते किमिच्छसि वदाऽधुना ॥५८॥
त्वयि सर्वं बलवति वर्तते पश्य मां द्विजम् ।
किमनेन महाघोरकष्टदेन तव प्रियम् ॥५९॥
कर्तव्यं तपसा तद्धि यदसाध्यं बलात् किल ।
बलसाध्यं बलेनैव चासव्यं बलधर्मिणा ॥६०॥
इत्युक्तः स द्विजं दृष्ट्वा मनसा प्रणनाम ह ।
उवाच वद मे सर्वं देहि तथेप्सितं वरम् ॥६१॥
बृहस्पतिस्तदा तं तु राधिके समबोधयत् ।
किमिच्छसि वद कष्टं कथं समुह्यते न्विदम् ॥६२॥
आगतोऽस्मि वरं दातुं ब्राह्मणोऽहं सनातनः ।
श्रुत्वा वराटकः प्राह स्वागतं द्विज तेऽस्तु वै ॥६३॥
राज्यार्थं तु करोम्येतत्तपः परमदारुणम् ।
शाधि मां प्रतपन्तं च वरं देहि तथाविधम् ॥६४॥
यथा सौराष्ट्रराज्यं च प्रविन्दामि सुखप्रदम् ।
श्रुत्वा बृहस्पतिः प्राह शृणु दैत्य बली भवान् ॥६५॥
कथं कष्टं हि सहसे तपो धर्मो विरागिणाम् ।
राज्ञां धर्मस्तु समरो निर्बलानां वृषस्तपः ॥६६॥
सबलस्त्वं तपस्त्यक्त्वा समाचर पराक्रमम् ।
उद्यमेन प्रसिद्ध्यन्ति बलिनां वै मनोरथाः ॥६७॥
तपसा निर्बलानां च धर्मेण यज्विनां तथा ।
सैन्येन तु नृपाणां वै विद्यया विदुषां तथा ॥६८॥
रोदनेन तु बालानां मोहनेन तु योषिताम् ।
कृच्छ्रेण तु पराधीनवृत्तीनां सेवनादिभिः ॥६९॥
प्रायोपवेशनेनैव प्रजानां नृपतिं प्रति ।
शत्रूणां घातनेनैव सिद्धिर्भवति वै द्विषाम् ॥७०॥
एवं सर्वं समालोक्य यत्नं त्वं बलवान् कुरु ।
अन्यः कश्चित्प्रदाता मे तपसेति मतिं त्यज ॥७१॥
भूत्वा वै बलिनां श्रेष्ठः कृच्छ्रं सहसे यद्वृथा ।
शरीरं बलहीनं स्याद् भोगयोग्यं न वै भवेत् ॥७२॥
परदत्तं प्रभुञ्जानः प्रशस्यते न सर्वथा ।
क्षुधया त्विन्द्रियग्रामः शैथिल्यं विन्दति द्रुतम् ॥७३॥
वार्धक्यं जायते शीघ्रं यद्वा नाशोऽपि जायते ।
तस्मात् क्षुधां परित्यज्य देहपुष्टिं विधत्स्व वै ॥७४॥
पुष्टिरेव परो धर्मो भोगा मोक्षः परोऽत्र वै ।
आनन्दः सुखवैपुल्यं स्वर्गो वै जीवतः स्मृतः ॥७५॥
भोगहीनं गतं चायुर्दिनं वा व्यर्थमेव तत् ।
देहनाशे कथं सौख्यं विगतं न हि लाभकृत् ॥७६॥
मृत्युत्तरं न चायाति वाङ्मात्रकल्पितं फलम् ।
अनेन यत्र वै दृष्टं परेण दृश्यते कथम् ॥७७॥
अत्र योग्येऽपि भुक्तं न चायोगे भुज्यते कथम् ।
ग्रहकाले परित्यागं मूर्खो मुख्यं समीहते ॥७८॥
शरीरं चेन्द्रियं जीवमनादृत्य स्वकं सुखम् ।
कष्टं सहते पापात्मा स्वघाती स तु गीयते ॥७९॥
सुखघातश्चात्मघातो नरकं दुःखवेदनम् ।
नरकं त्वं परित्यज्य निवर्तस्वात्मघातनात् ॥८०॥
केनाऽयं दोरकस्तेऽत्र प्रग्राहितस्तपोमयः ।
आत्महिंसामयो व्यर्थः पापोद्वेगाऽयशोवधिः ॥८१॥
देहिना देहसंसृष्टं मन्तव्यं सत्यमेव च ।
देहसंसर्गहीनं तु सर्वमसत्यमेव यत् ॥८२॥
रागोत्सवाश्च भोगाश्च देहे सत्येव सन्ति हि ।
भोगाभावस्तपस्तत्तु जरठानां स्वभावजम् ॥८३॥
बलेन प्राप्यते लक्ष्मीः पृथ्वी युद्धेन चाप्यते ।
भाग्येन चाप्यते नारी सम्पदुद्यमतो मता ॥८४॥
जन्मतो मरणान्तं च जीवनं न पुनर्भवः ।
दृष्टः केनापि तस्मात् त्वं तपो हित्वा सुखं व्रज ॥८५॥
जन्मतो जीव इत्युक्तो मरणे मोक्ष उच्यते ।
द्वयोर्मध्ये सुखं स्वर्गो देहश्चात्माश्रयो मतः ॥८६॥
विविधा विषयास्तत्र भोक्तव्या नित्यदाऽसुर ।
विना भोगं गतं चाऽहस्तदेव हानिकारकम् ॥८७॥
गतं तत्तु गतं नैतत् पुनरायास्यति क्वचित् ।
अभुक्तं च गतं दाने गतं तद् विफलं निजम् ॥८८॥
निजसौख्यप्रदं यत्तत्सफलं स्वस्य सौख्यदम् ।
न करोति स्वयं यत्नः कोऽन्यस्तस्मै प्रदास्यति ॥८९॥
तस्मादुत्तिष्ठ दुखास्त्वं यत्नं कुरु वराटक ।
पुण्यं तु सुखदं कर्म भोगात्मकं च तन्मतम् ॥९०॥

कुरु कर्म सुखदं वै मा तपो दुःखदं कुरु ।
प्रसुप्तस्य मुखे नैव कवलं जायते स्वतः ॥९१॥
प्रयतस्य करेऽवश्यं समायाति धनादिकम् ।
नहि कश्चित्फलदाता न च कश्चित्परेश्वरः ॥९२॥
आत्मनो न परः कश्चित् कं परं त्वं प्रतीक्षसे ।
त्यज सर्वं चेन्द्रजालं कुरु सन्नाहमुल्बणम् ॥९३॥
बहुसैन्यान्वितो भूत्वा स्वायत्तीकुरु मेदिनीम् ।
को निजः कः परश्चेति यद्भोग्यं तन्निजं मतम् ॥९४॥
यद्भोग्यं परं तत्तु तद् बलादर्जयेद् बुधः ।
अभ्युदयेऽनुकूला ये ते धर्मा वस्तुतो मताः ॥९५॥
तत्र ये प्रतिकूलास्ते परिहार्याः प्रयत्नतः ।
अनुकूलान् दैत्यवर्यान् संगृह्य राज्यमर्जय ॥९६॥
सुखं भुंक्ष्व परं श्रेष्ठं दैत्यांश्च सुखिनः कुरु ।
यदि ते रोचते वाक्यं दमनं दैत्य चिन्तय ॥९७॥
शुक्राचार्यं तथा चान्यान् मिलित्वा बलमाप्य च ।
ईशमन्यान् विजयस्व दानवीयं वृषं चर ॥९८॥
मृषा पूजा मृषा ध्यानं संयमोऽपि मृषैव च ।
मृषा व्रतं मृषा पापं मृषा स्वानुपयोगि च ॥९९॥
मृषा चेशो मृषा चाऽऽस्था मृते सर्वं मृषा मृषा ।
मृषा चाऽऽशा निष्फला या मृषा वाणी ह्यनर्थिका ॥१००॥
मृषा बलं विना शौर्यं मृषा शौर्यं विना मतिम् ।
मृषा मतिर्दुःखफला मृषा सर्वं नपुंसके ॥१०१॥
यदि चेत्त्वं पुमानास्से मैतन्मृषाऽनुगो भव ।
यत्नसाध्यं कुरु शीघ्रं मा मृषा मद्वचः कुरु ॥१०२॥
पिपीलिकाश्च कीटाश्च यतन्ते ऋतुमाश्रिताः ।
कणान् संगृह्य बलतो भुञ्जते शीतपीडिताः ॥१०३॥
सिंहा विक्रममासाद्य लब्ध्वा वन्यगजादिकम् ।
बलेन भुञ्जते मेदं मेदिनीं भुंक्ष्व तत्तथा ॥१०४॥
भूमिर्नारी च सम्पच्च यत्नं विना न लभ्यते ।
यशः शौचं साधुता च तपो विना न लभ्यते ॥१०५॥
अन्यसाधनतं तत्त्वं साधनान्तरतो न वै ।
विचार्य त्वं यथेष्टं वै कुरु दानवपुंगव ॥१०६॥
हंसा मानसरस्त्यक्त्वा समुद्रं यान्ति यत्नतः ।
मौक्तिकानां भोजनानि लभन्ते च वियन्ति च ॥१०७॥
काका अपि पर्युषितं लभन्ते यत्ननोदिताः ।
नीडे गता नाप्नुवन्ति चालसा इव मानवाः ॥१०८॥
कर्षुका यतमानास्तु लभन्ते सस्यजं फलम् ।
नहि तत्तपसा लभ्यमन्नं राज्यं च कामना ॥१०९॥
मुखे घृतं घृतं मिष्टरसं पुष्टिं ददाति हि ।
नहि वह्नौ घृतं तृप्तिं ददाति भस्मतां गतम् ॥११०॥
त्वं कथं यौवनं वीर्यं बलं शून्ये जुहोषि वै ।
किं फलं लप्स्यसे तत्र चोषरे तपआत्मनि ॥१११॥
तस्मादुत्तिष्ठ विज्ञानं मया दत्तमुपाश्रय ।
धर्मं दानववर्याणां गृहाण त्यज रोगिणाम् ॥११२॥
इत्युक्तो दानवस्तेन गुरुणा राधिके क्षणम् ।
विचार्य च तपस्त्यक्त्वा कृतार्थोऽस्मीत्यभाषत ॥११३॥
यदहं बोधितः सत्ये निराशापरिपन्थिनि ।
वरं देहि यथाहं स्यां भूभृत् तथा कृपां कुरु ॥११४॥
तथाऽस्त्विति गुरुः प्राह तपस्तत्याज दानवः ।
विप्रो बृहस्पतिस्तुष्टस्तपोरोधनसत्फलः ॥११५॥
जगाद दानवैर्युक्तः समारभस्व मेदिनीम् ।
स्वायत्तीकर्तुमेवाऽस्मात् स्थानाद् राज्यं यथा भवेत् ॥११६॥
शुभं भूयाच्च सर्वेषां तव भूयाद् यथेष्टकम् ।
मम वरानुसारेण भूभृत्त्वं ते भविष्यति ॥११७॥
इत्युक्त्वा प्रययौ विप्रः पूजां नीत्वा दिवं प्रति ।
वराटकोऽपि दैत्येन्द्रान् संगृह्य मन्त्रणां व्यधात् ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोर्विद्यारम्भे सर्वविद्याप्राप्तिः, बुद्धिपरीक्षा, बृहस्पतिकृतो वराटकदैत्याय यत्नशीलतोपदेशः, दैत्यस्य तपस्त्यागश्चेत्यादिनिरूपणनामा षट्त्रिंशोऽध्यायः ॥ ३६ ॥

श्रीकृष्ण उवाच—

अथ दैत्यस्ततो राधे ! दैत्यानाह महत्तमान् ।
पावदुर्गं मख्खनं च सैंहिकेयं च चोटिलम् ॥ १ ॥
धारेयं च विश्वसनं योद्धृमुख्यान्महाबलान् ।
ऐरकं थूरकं नीम्बं चैरकं बर्बुरं तथा ॥ २ ॥
शाल्मलिं झिम्पटं कूर्चिं कर्कशं गुञ्जकं तथा ।
तमलाकं च लशुनं पलाण्डुकं च भंगकीम् ॥ ३ ॥
अहिफेनं महाजिह्वं वत्सनागमफेनकम् ।
हिरकं विषकन्दं च ह्येतान् दैत्यधुरन्धरान् ॥ ४ ॥
सौराष्ट्रराज्यलब्ध्यर्थं युद्धार्थं समुवाच सः ।
कर्कं च कृकलासं च शिल्लकं गोधकं तथा ॥ ५ ॥
घोरखादं वृकं द्वीपं शीतधारं च नायकान् ।
मन्त्राणार्थं च युद्धार्थं प्राह वराटको बली ॥ ६ ॥

विप्रः कश्चित्तु मां प्राह तपः कष्टं महत्तरम् ।
निष्किञ्चनानां धर्मः स निर्बलानां विशेषतः ॥ ७ ॥
सबलानां तु समरो धर्मो राज्यं यतो लभेत् ।
तस्मात् सौराष्ट्रदेशानां स्वायत्तीकरणं यथा ॥ ८ ॥
अस्माकं दैत्यवर्याणां तथा स्यात् कुरुत द्रुतम् ।
विना रणं न वै भूमिर्विना यूथं न वै जयः ॥ ९ ॥
विनोद्योगं न वै सम्पद् यूथोद्योगरणाः सुखाः ।
अस्माभिश्च प्रकर्तव्यं हरणं सम्पदां बलात् ॥१०॥
सौराष्ट्रस्य तु देशस्य तथा राज्यमकण्टकम् ।
सर्वे प्राहुस्तदा मन्ना ओं बाढं विजयोऽस्तु ते ॥११॥
अथ पश्चिमवार्धेस्तु समारभ्याऽसुरास्तु ते ।
ग्रामस्थान् पीडयामासुर्जहुश्च गृहसम्पदः ॥१२॥
ग्रामाणां तु सहस्रं वै पश्चिमोदधिसन्निधौ ।
प्रसह्य दैत्यैः स्वायत्तीकृतं भूश्च तथोत्तरा ॥१३॥
खाडिकासन्निधौ स्वायत्तीकृता प्रायशश्च तैः ।
शुश्राव राजा खट्वांगः सार्वभौमोऽसुरैः कृतम् ॥१४॥
प्रजानामर्दनं सम्पद्धरणं ब्राह्मणार्दनम् ।
राज्यसंस्थापनं चेति विज्ञाय नृपतीश्वरः ॥१५॥
व्योममार्गेण तु सैन्यं प्रेषयामास भूरि सः ।
परितो व्यूहमारच्य युयुधिरे च तद्भटाः ॥१६॥
दैत्या अपि तदा व्योम्नि युयुधिरे च तैः सह ।
अस्त्रैः शस्त्रैः शरैः कुन्तैर्भल्लैस्तोमरशक्तिभिः ॥१७॥
प्रासैर्बाणैः खड्गवर्यैरसिभिर्मुद्गरादिभिः ।
परिघैश्च गदाभिश्च वह्निगोलैः सुरंगकैः ॥१८॥
जलगोलैर्विषगोलैरश्रुबाष्पैर्विषाऽनिलैः ।
क्ष्वेडाऽनलैः शीतवृष्ट्या विद्युद्वृष्ट्या विहायसि ॥१९॥
झंझावातैर्धूम्रवातैः शिलावृष्ट्या च पांसुभिः ।
परस्परं सुबह्वीभिः कृतेन्द्रजालसृष्टिभिः ॥२०॥
मायाप्रयोगकैर्व्योमकृत्रिमपुत्तलैस्तथा ।
कृत्रिमयानगभटैः सैन्यानि युयुधुस्तदा ॥२१॥
नष्टास्तत्राऽसुराश्चाऽन्ये मानवा बहुदेहिनः ।
पराजिता असुरास्ते निराशा अभवन् यदा ॥२२॥
अब्धिं प्रविष्टुं चेच्छन्ति धावमाना इतस्ततः ।
किन्तु खट्वांगदसैन्यान्यभितः परितस्तथा ॥२३॥
भूमौ व्योम्नि जले कृत्वा प्राकाराणि समन्ततः ।
विद्यन्तेऽतो न निर्गन्तुं शेकुर्देशाद् बहिर्हि ते ॥२४॥
अथ मुग्धा हि ते दैत्या जीवनेच्छापरास्तदा ।
अश्वपद्मसरो दिव्यं विशालं चाप्यगाधकम् ॥२५॥

विचार्य सम्प्रधाव्यैव विविशुस्तज्जले तलम् ।
मनसा ते तु रक्षार्थं तुष्टुवुः परमेश्वरम् ॥२६॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
कम्भरानन्दनं श्रीमद्गोपालकृष्णबालकम् ॥२७॥
करुणाशेवधिं देवं शरण्यं श्रीपतिं प्रभुम् ।
उद्धारार्थं जगत्यस्मिन् प्रादुर्भावगतं हरिम् ॥२८॥
दिनाऽनाथ कृपासिन्धो दुःखोद्धारकर प्रभो ।
शरणागतरक्षाकृज्जीवदानं प्रदेहि नः ॥२९॥
खट्वांगदस्य सैन्यानि नाशयन्त्यभितो हि नः ।
अपराधप्रकर्तॄंस्तन्नः प्रपन्नानव प्रभो ॥३०॥
युद्धधर्मं समाश्रित्य बलधर्मं तथाऽपराम् ।
दैत्यदानवरीतिं च राज्यमाप्तुं कृतोद्यमाः ॥३१॥
तत्रैव यद्यपराद्धं तव केशव रक्षय ।
क्षमां कुरु कृपासिन्धो शाधि दण्डं विधेहि च ॥३२॥
इत्येवं जलमध्यस्थाः स्तुतिं चक्रुर्यदाऽसुराः ।
बालकृष्णस्तदा शंखं दध्मौ स्वस्य रणाऽङ्गणे ॥३३॥
कोटिरूपोऽभवत्तत्र व्योम्नि भूमौ जलेऽपि च ।
वीक्ष्य सैन्यानि तत्रैव विगर्वा ह्यभवन् क्षणात् ॥३४॥
अथ सेनाधिपतयो व्योम्ना तं शरणं ययुः ।
हरिश्चाऽऽज्ञापयत् तांश्च, मा घात्याः शरणागताः ॥३५॥
जीवग्राहान् गृहीत्वैव दास्याम्येतानहं भटाः ।
यथापराधदण्डं वै करिष्यामि प्रयान्तु शम् ॥३६॥
स्वागतं चापि सत्कारं भोजनं पानमित्यपि ।
गृह्णन्तु लोमशात्त्वत्र गुरोर्योगिवराच्छुभाः ॥३७॥
इत्युक्तास्ते तु सैन्यानां परिहारं व्यधुर्द्रुतम् ।
लोमशेन यथाज्ञं च सत्कृता भोजनादिभिः ॥३८॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इति मन्त्रप्रदानेन वैष्णवास्ते भटाः कृताः ॥३९॥
अथ तेषां सन्निधौ च लोमशस्याऽऽश्रमे शुभे ।
निशि दैत्यान् समाहूय बालकृष्णः स्वयं प्रभुः ॥४०॥
चक्रेऽपराधवद्दण्डं तेषां वै राधिके यथा ।
तत्र वराटकं दैत्यं दण्डं गिरिं व्यधाद्धरिः ॥४१॥
पश्चिमे त्वब्धितीरे स वराडो नाम पर्वतः ।
समभूच्छ्रीहर्षदेवीसेवितश्च बृहस्पतेः ॥४२॥
वरदानाद् भूभृदयं पर्वतः समजायत ।
पावदुर्गं हरिश्चापि पावादुर्गं तु पर्वतम् ॥४३॥
निर्ममे दण्डरूपं तत्सौराष्ट्रपूर्वतो दिशि ।
मखनं पर्वतं चापि निर्ममे मखनाभिधम् ॥४४॥

सैंहेयकं च सिंहाद्रिं चोटिलं चापि पर्वतम् ।
चोटीलकं निर्ममे च धारेयं धाररूपिणम् ॥४५॥
विश्वसनं च वै विश्वामित्रं नाम तु पर्वतम् ।
चक्रे श्रीभगवाँस्तेषां तीर्थावासेन पुण्यता ॥४६॥
श्रीनारायणशरणागतैः प्राप्तं शुभं फलम् ।
यत्र वै मुनयः सन्तः सदा वसन्ति पावनाः ॥४७॥
अथ यास्यन्ति मुक्तिं ते कल्पान्ते ब्रह्मणा समम् ।
अथ येऽन्येऽपि दैत्या वै योद्धारस्तेभ्य इत्यपि ॥४८॥
ददौ दण्डं वदाम्यत्र राधिके तूद्रिदुद्भवम् ।
ऐरकं तु समुद्रे वै स्तम्बं पत्रान्वितं तदा ॥४९॥
कृत्वा ददौ वरं कृष्णप्राप्तिः क्वचिद्भविष्यति ।
चैरकाचापि वै वार्धौ वासं स्तम्बात्मकं ददौ ॥५०॥
थूटकं कण्टकं हस्तान्वितं प्राकारवद् भुवि ।
रक्षाकरं चकारापि चिरंजीवित्वमित्यपि ॥५१॥
निम्बं कटुं कृतं वृक्षं तं ररक्ष नृपांगणे ।
बर्बुरं कण्टकव्याप्तं दन्तधावनपादपम् ॥५२॥
नदीशैलादितीर्थेषु न्यवासयच्छुभाश्रयम् ।
शाल्मलिं पर्वतेऽरण्ये मृदुरुफलभूषितम् ॥५३॥
वृक्षं कृत्वा ददावस्मै रुफलं चौपधानिकम् ।
तूलैर्भवति सर्वत्र सुखदं श्रेष्ठिनां हि तत् ॥५४॥
अथ वै झिम्पटं स्तम्बं शलाकाढ्यं चकार सः ।
दीर्घा मार्जनिका येषां भवन्ति ह्युपकारिकाः ॥५५॥
कूर्चिं खर्जनिकावल्लीं चकार भगवान् वने ।
कर्कटं चातिकटुकं वल्लीरूपं व्यधात्प्रभुः ॥५६॥
गञ्जकं च तमालं च धूम्रपानार्थकं व्यधात् ।
लशुनं च पलाण्डुं च कन्दरूपे व्यधात्प्रभुः ॥५७॥
अहिफेनं महाजिह्वं भंगां च वत्सनागकम् ।
विषरूपान् व्यधात् कृष्णोऽफेनकं क्षारकं व्यधात् ॥५८॥
हीरकं खनिजन्यं तु विषाक्तं कंकरं व्यधात् ।
विषकन्दं भूमिगर्भे व्यधात्कन्दं विनाशकम् ॥५९॥
कृकलासं शिल्लकं गोधकं कर्कं सरीसृपान् ।
घोरखादं वृकं द्वीपं शितधारं पशून् व्यधात् ॥६०॥
तान्सर्वानसुरान् कृष्णनारायणः पृथक् पृथक् ।
आवासयद् वने भूमौ जले वृक्षे च भित्तिषु ॥६१॥
एते सर्वे ह्यसुराश्च वंशविस्तारवर्धिताः ।
तीर्थयोगेन तु मुक्तियोग्याः कृता हि शार्ङ्गिणा ॥६२॥
ततः प्रजानां क्षेमं च कुशलं च व्यजायत ।
बृहस्पतिर्महेन्द्रं च ययौ प्राह वराटकः ॥६३॥
तपसा च्यावितो युद्धबुद्धिमारोपितस्तदा ।
युद्धं चकार राज्यार्थं प्रापितः शैलतां स हि ॥६४॥
अन्येऽपि च तथा दैत्या दण्डेन यमिता दृढम् ।
श्रुत्वा शान्तिं जगामाऽथ सौराष्ट्रमभवत् सुखम् ॥६५॥
एवं प्रभोः शुभैश्वर्यं राधिके ! कथितं तव ।
सतां तीर्थप्रसंगेन ते वै यास्यन्ति मोक्षणम् ॥६६॥
अथाऽन्यच्चे कथयामि चरित्रं पापिशोधकम् ।
अनादिश्रीकृष्णनारायणस्य राधिके शृणु ॥६७॥
म्लेच्छा डफ्फरजातीया अटवीमनुसृत्य च ।
समुद्रयानमार्गैश्च न्यूषुर्गत्वा सुराष्ट्रके ॥६८॥
पापाः पापसमाचाराः पशुमांसादनास्तथा ।
पश्चिमस्स्याशनाः पल्लीपतिधर्मविवर्जिताः ॥६९॥
पाशवीं वृत्तिमारूढाः परसम्पत्प्रजीवनाः ।
चौर्यकर्मकराः शश्वत् दानधर्मादिवर्जिताः ॥७०॥
यत्र क्वापि निवासाश्च परक्षेत्रान्नहारकाः ।
अस्त्रशस्त्रधराः श्वादिक्रूरप्राणिप्रपोषकाः ॥७१॥
व्याधधर्मपराः शश्वदटव्यां वासिनः खलाः ।
लुण्टका मारकाः सर्वहारकाः क्रूरचारिणः ॥७२॥
शकटोष्ट्रखरवाहाः परभाग्योदरंभराः ।
सस्यविनाशकाः कृषिकर्मकारप्रपीडकाः ॥७३॥
सहस्रमानवाः साक्षाद् यमदूतभयंकराः ।
मद्यपानकराः क्वापि मनुष्यज्ञातिनाशिकाः ॥७४॥
निर्दया धूर्ततायुक्ता देवधर्मादिनिन्दकाः ।
सौराष्ट्रवासिनः सर्वान् पीडयन्ति स्म सर्वतः ॥७५॥
हाहाकारोऽभवद् देशे दिक्षु विदिक्षु तत्कृतः ।
जनास्तु पीडितास्तैश्च स्वश्वपट्टसरोवरम् ॥७६॥
आययुर्निजरक्षायाः प्रार्थनार्थं हरिं प्रति ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥७७॥
न्यवेदयन् स्वकां पीडां तज्जातां सर्वघातिनीम् ।
श्रुत्वा श्रीभगवानाह करोमि तस्य चौषधम् ॥७८॥
इत्युक्त्वा स प्रसस्मार चक्रं स्वस्य सुदर्शनम् ।
तथा तत्क्षेत्रपालाँश्च कालीं म्लेच्छविनाशिनीम् ॥७९॥
अर्धनारीश्वरसैन्यं सर्वशस्त्रास्त्रमण्डितम् ।
गरुडं च गजं दिव्यं प्रसस्मार हरिस्तदा ॥८०॥
आययुः शीघ्रमेवैते नेमुश्च पादयोर्हरेः ।
ज्ञापयामासुराज्ञार्थं श्रीहरिस्तानुवाच ह ॥८१॥
म्लेच्छा दफ्फरजातीयाः पीडयन्ति सुराष्ट्रकम् ।
चोरयन्ति धनान्नानि कृषिवस्तूनि सर्वथा ॥८२॥

कृषेश्चाऽप्युपकरणान्यटवीस्थानि यानि तु ।
छेदयन्ति सुवल्ल्यादि वृक्षान् स्तम्बान् लतादिकाः ॥८३॥
गुल्मान् पुष्पफलाढ्यांश्च शाककन्दान् हरन्ति च ।
पत्रसस्यादिधान्यानि चारयन्ति पशून् निजान् ॥८४॥
पक्वकणिशशूकांश्च हरन्ति क्षेत्रसस्यतः ।
घ्नन्ति क्वचिन्मनुष्यांश्च हरन्ति वृषगोधनम् ॥८५॥
हरिणांश्च शशादींश्च मारयन्ति हि पापिनः ।
प्रजाजनान् प्रसह्याऽपि बध्वा नयन्ति वै क्वचित् ॥८६॥
नरान् नारीर्बालकांश्च पीडयन्ति प्रजाजनान् ।
सहस्रशोऽत्र वर्तन्ते ह्यटव्यामित उत्तराम् ॥८७॥
दिशं यान्त्वपराधिभ्यो दण्डं ददतु तान् यथा ।
यथा नैवं पुनः कुर्युर्यद्वा घ्नन्तु समन्ततः ॥८८॥
इत्युक्ता मूर्तिमत् चक्रं सुदर्शनं च कालिका ।
अर्धनारीश्वरं सैन्यं गरुडश्चेति सेवकाः ॥८९॥
मिलित्वा प्रययुः शीघ्रं दिक्फरान् शासितुं तदा ।
दिक्फरास्ते विलोक्यैतान् शिक्षकान् हन्तुमुद्यताः ॥९०॥
प्रासतोमरभल्लैश्च गदामुद्गरखड्गकैः ।
बन्धूकीभिः शरैश्चापि चक्रादिभिर्व्यधुर्मृधम् ॥९१॥
तदा सैन्यं त्वर्धनारीश्वरस्यैतान् जघान ह ।
प्रासैस्तोमरभल्लाद्यैर्गदादण्डाऽसिमुद्गरैः ॥९२॥
शरैर्बाणैः क्षेपणैश्च प्रस्तरैर्गोलिकादिभिः ।
शक्तिभिः पाशभेदैश्च युयुधे दफ्फरैः सह ॥९३॥
प्राणग्लहं समभवद् युद्धं परमदारुणम् ।
उभयोः पक्षयोर्वीरा निद्रां गच्छन्ति शाश्वतीम् ॥९४॥
विलोक्यैवं तदा चक्रं सुदर्शनं स्वयंप्रभम् ।
वह्निचक्रं स्वयं भूत्वा डफ्फराऽनीकमापतत् ॥९५॥
कबन्धेभ्यो मस्तकानि निकृन्तति स्म वेगतः ।
यस्य यस्य गले लग्नं द्वेधा कृत्वा प्रगच्छति ॥९६॥
डफ्फरास्ते बहवो वै हतास्त्वन्ये विदुद्रुवुः ।
अनादिश्रीकृष्णनारायणं ते शरणं ययुः ॥९७॥
शरणागतरक्षा संकर्तव्या प्रभुणा यतः ।
जीवतो न हताः शेषा देशपारं निवासिताः ॥९८॥
शतानि पञ्च जीवन्तो ययुर्नत्वाऽन्यतः स्थलम् ।
किन्तु स्वकृतपापैस्ते समुद्रे नौप्रभञ्जनात् ॥९९॥
जले मग्ना ययुर्मृत्युं दफ्फना म्लेच्छजातयः ।
सौराष्ट्रः सुखवानास्ते श्रीकृष्णस्य प्रतापतः ॥१००॥
पीडाः सर्वा गता लोपं प्रजाः सौख्यं समाश्रिताः ।
सुदर्शनाद्यास्तत्कार्यं कृत्वा श्रीहरिसन्निधौ ॥१०१॥
सजीवनाः स्वयं भूत्वा दिव्या ये युद्धमर्दिताः ।
तेऽप्यागत्य नमश्चक्रुस्ततो मूर्तौ लयं गताः ॥१०२॥
अर्धनारीश्वरसैन्यं सरस्तीरे तिरोऽभवत् ।
जयकारोऽभवत् पृथ्व्यामायुधानां हरेरपि ॥१०३॥
इत्येतद् राधिके बालकृष्णस्य चरितं तव ।
कथितं श्रावपाठाभ्यां स्वर्गमोक्षप्रदं शुभम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वराटकाख्याऽऽसुरसैन्यादिपराजयदण्डादिकं, डफ्फर-जातीयम्लेच्छनाशनं चेत्यादिनिरूपणनामा सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके! कृष्णनारायणोहि पञ्चमे ।
वर्षे वैशाखमासे च धवले पूर्णिमातिथौ ॥ १ ॥
सायं ब्रह्मवाटिकायां पूर्वस्यां दिशि संययौ ।
कुन्दकुसुमसौगन्ध्याऽनिलोद्याने वयस्ययुक् ॥ २ ॥
इतस्ततो विहरति रमते याति बालकैः ।
प्रायः सायं समयस्य सन्निधौ परमेश्वरः ॥ ३ ॥
वाटिकायां समुद्भूतां मकार्यौं जारिकां तथा ।
पश्यन् हरिद्रसपत्रां डोडिकाकणशोभनाम् ॥ ४ ॥
गृह्णन् तद्डोडिकास्तासां वह्नौ सेकं विधाय च ।
बालकैः सह संभुक्ते डोडिकानां कणांस्तदा ॥ ५ ॥
अथ पार्श्वे पवनैश्च पक्वान्याम्रफलान्यपि ।
पतितानि समादाय भुङ्क्ते वयस्यकैः सह ॥ ६ ॥
नारङ्गिसन्तरामिष्टसुसम्बिखर्जुरादिकान् ।
भुंजते बालकाः सर्वे वाटिकायां मुदाऽन्विता ॥ ७ ॥
अथाऽऽययुस्तदा तत्र त्रयो वै राक्षसाः खलाः ।
बालरूपा बभूवुस्ते सहचोष्यं प्रचक्रिरे ॥ ८ ॥
रेमिरे बुभुजुस्तत्र वहन्ते वाहयन्त्यपि ।
धावन्ति चापि कूर्दन्ति हसन्ति हासयन्ति च ॥ ९ ॥
अनादिश्रीकृष्णनारायणं हन्तुं समिच्छुकः ।
एको वै राक्षसस्तत्राऽभवच्छकटरूपधृक् ॥१०॥
वाटिकायां प्लक्षवृक्षस्याऽधो वासं विधाय सः ।
बालकृष्णं नाशयितुं समीक्षतेऽतिरागतः ॥११॥
द्वितीयो राक्षसस्तत्र वाराहं रूपमाश्रितः ।
बालका यत्र वै क्षेत्रे क्रीडां कुर्वन्ति तत्पुरः ॥१२॥
गत्वा दन्तं विनिष्कास्य घूर्णं क्रूरं प्रदर्शयन् ।
पुच्छं विधुन्वन् नैजां स गर्जनां सम्प्रवर्तयन् ॥१३॥

धावँस्ततश्चातिवेगान्मारयितुं समाययौ ।
बालास्तं विकरालं वै दृष्ट्वा गन्त्रीं विलोक्य च ॥१४॥
प्लक्षं प्रत्येव शीघ्रं तु धावन्ति स्म भयान्विताः ।
चक्रुशुः शीघ्रमेवैताः शकटं प्राप्य वै द्रुतम् ॥१५॥
चक्राद् धुराद् यथामार्गं गन्त्रीं त्वारुरुहुस्तदा ।
कृष्णस्तत्र प्रसस्मार कालीकेसरिणं द्रुतम् ॥१६॥
काल्याः श्रीक्षेत्रपालिन्या वाहनं सिंह एव सः ।
तूर्णं तत्राऽऽययौ दिव्यो दिशो निनादयन् दृढः ॥१७॥
गर्जनां परितः कृत्वा शकटस्थान् प्रणम्य च ।
उत्प्लुत्य सूकरं तं च राक्षसं धृतवान् बलात् ॥१८॥
सूकरोऽपि तु सिंहेन युयुधे बलतस्तदा ।
सिंहरूपं दधाराऽथ क्षणेन गर्जयन् मुहुः ॥१९॥
निनादयन् दिशः सर्वाः पूरयन् युयुधे भृशम् ।
कृत्रिमस्याऽस्य सिंहस्य किं बलं कृत्रिमं मृषा ॥२०॥
कालीसिंहेन सहसा लीलया विधृतो गले ।
कव्यां च नखैस्तीक्ष्णैरुदरे भेदितस्तदा ॥२१॥
व्यापादितः समन्ताच्चाऽऽक्रोशन्मृतः क्षणादनु ।
तदात्मा श्रीकालिकायाः सिंहे चाभिन्नतां गतः ॥२२॥
अथाऽत्रावसरे ज्ञात्वा शकटं च निराश्रयान् ।
स्वाधीनान् बालकान् सर्वानम्बरे चोच्छ्रितं ह्यभूत् ॥२३॥
आकाशपथमाश्रित्य बालान्नाशयितुं तदा ।
प्रक्षिप्तुं भूतले व्योमचरं भूत्वा ययौ द्रुतम् ॥२४॥
तावच्छ्रीबालकृष्णेन गुरुत्वं स्वस्य वर्धितम् ।
अतिभारेण शकटं भूतलं प्रत्यवातरत् ॥२५॥
यथा बाला न नश्येयुः कृष्णस्तथाऽवतारयत् ।
बालकाश्चाऽवतीर्यैव प्लक्षमूलं समाश्रिताः ॥२६॥
बालकृष्णस्ततो गन्त्यास्त्रिवेणीमूलतः क्षितौ ।
पादं वामं प्रलम्बं च कृत्वाऽथ दक्षिणं पदम् ॥२७॥
त्रिवेण्युपरि संस्थाप्य कराभ्यामवलम्ब्य ताम् ।
यावत् समावतरितुं यतते तावदेव तु ॥२८॥
शकटाख्याऽसुरेणाऽधस्त्रिवेण्याः कीलको महान् ।
शंकुवद् वर्धितः कृष्णं प्रहन्तुं तूदरान्तरे ॥२९॥
त्रिशंकुकीलकश्चातितीक्ष्णो दीर्घो हरिं प्रति ।
लम्बमानस्तीक्ष्णधारो दृष्टो वै बालकैस्तदा ॥३०॥
हरिं प्राहुस्तु ते बाला बालकृष्णोऽपि लीलया ।
नाऽवातरद् यतो यावदुदरं स्वं ररक्ष वै ॥३१॥
लम्बमाने वामपदे सक्थिनी मूलसन्निधौ ।
शंकुस्तीक्ष्णः शकटेन प्रसह्य सम्प्रवेशितः ॥३२॥
सक्थिमध्यात्तदा रक्तधारा सुस्राव राधिके ।
बालकृष्णस्तदा शीघ्रं समुत्प्लुत्य तु गन्त्रिकाम् ॥३३॥
पुनश्चावाऽऽरुरोहाऽथ ज्ञात्वा दुष्टं महासुरम् ।
हन्तुं पुनर्गुरुत्वं च शैलतुल्यं दधार ह ॥३४॥
तेन भारेण नमितं शकटं भग्नमेव च ।
पतितं चोन्धिका चेषा चोष्ट्रश्चक्रे धरोऽर्दिताः ॥३५॥
अदृश्यशैलभारेण शकटश्चूर्णतां गतः ।
विसिस्मिरेऽर्भकाः सर्वेऽसुरश्च जीवतो हतः ॥३६॥
तत्तेजो निःसृतं गन्त्र्या बालकृष्णे तिरोऽभवत् ।
अथैवं शकटं नष्टं वीक्ष्य नष्टं च सूकरम् ॥३७॥
तृतीयो राक्षसो बालस्वरूपस्त्रासमावहत् ।
मरणं त्वन्तिकं ज्ञात्वाऽविचारयद्धरेर्मूर्तिम् ॥३८॥
कथं बालः प्रहन्तव्यश्चैवमेव मयाऽत्र वै ।
विना शैलस्वरूपं न बालस्याऽस्य विघातनम् ॥३९॥
तस्माच्छैलो भवाम्येव निपतामि द्रुतं तथा ।
इत्यध्यवस्य सहसा व्योममार्गं गतोऽभवत् ॥४०॥
तत्र शैलस्वरूपोऽभूद् यावत्पतितुमिच्छति ।
तावत् कृष्णो गरुडं स्वं प्रेरयामास वेगतः ॥४१॥
गरुडो दिव्यरूपश्च सप्रकाशं विहायसा ।
उड्डयमानः पद्भ्यां तं शैलं जग्राह यत्नतः ॥४२॥
तावद्धरिणा चक्रं स्वं सुदर्शनं बहूल्बणम् ।
ज्वालामालाभरं शैलदाहकं संविधाय च ॥४३॥
मुक्तं भूभृदधोभागे शैलस्तेन द्रुतं महान् ।
विद्युज्ज्वालानिभचक्रवह्निना दग्धतां गतः ॥४४॥
तद्भस्म भूतले वह्नियोगात् सहायिवायुना ।
उड्डीयोड्डीय पतितं विप्रकीर्णासु भूमिषु ॥४५॥
गौरमृद् सा बभूवाऽपि पाण्डुरा भूतलस्तरे ।
गरुडः सूक्ष्मतां प्राप्य चक्रं भूत्वा च शीतलम् ॥४६॥
स्वस्थानं तु समायातं कृष्णो बाला निरामयाः ।
निर्विघ्नाः सुखिनो जाता बालकृष्णस्य सक्थिनि ॥४७॥
रक्तं च निःसृतं यत्तु तत्र पृथ्व्यां स्वयं तदा ।
नीरुजीकरणायाश्चोषध्याः पत्ररसोऽर्पितः ॥४८॥
शीघ्रं शान्तिस्तदा जाता शंकुचिह्नं तु सर्वदा ।
ध्यानिनां ध्यानयोगार्थं क्षतरूपं प्ररक्षितम् ॥४९॥
सर्वदा राधिके बालकृष्णसक्थ्नः शुभावहम् ।
चिह्नं तद् विद्यते मूर्तौ ध्यानार्थं नेत्रवन्महत् ॥५०॥
आर्धनारीश्वरभावव्यञ्जकं वामसक्थिजम् ।
चिह्नं वै शाश्वतं दृष्ट्वा कन्या देव्यस्तदर्चयत् ॥५१॥

पृथ्वी पूजां चकाराऽस्य चिह्नस्य चन्दनादिभिः ।
लोमशाद्याः ऋषयश्च ध्याने चिह्नं दधुस्ततः ॥५२॥
बालाः सायं गृहं याताः काली सिंहादिसेविता ।
स्वस्थानं चोत्तरभूमौ सरसस्तत्र संययौ ॥५३॥
कालिकातश्च बालेभ्यः श्रुत्वा राक्षसघातनम् ।
पित्राद्या विस्मिताः सर्वे विघ्नशान्तिं व्यधुस्तदा ॥५४॥
ददृशुः सूकरं गन्त्रीचूर्णं च गौरभस्म च ।
राक्षसास्ते मृता यत्र तत्र गत्वा हि मानवाः ॥५५॥
आश्चर्यं लेभिरे सर्वे क्रोशदेहं तु सूकरम् ।
गन्त्रीचूर्णं क्रोशलग्नं गौरभस्म द्वियोजनम् ॥५६॥
महासामर्थ्यवान् बालः कृष्णो येन महासुराः ।
विघातितास्त्रयस्त्वेते घातका बालघातिनः ॥५७॥
सम्यक्कृतं निहननं त्वेतेषां बालदेहिना ।
पुत्रास्तु रक्षिता नश्च वर्धन्तां बालकाः सदा ॥५८॥
एवमाशीर्वचः प्राहुः प्रसन्ना भेजुरीश्वरम् ।
राधिका प्राह भगवन् राक्षसाः के त्रयोऽपि ते ॥५९॥
आसन् यैरिह चागत्य हरेर्नाशो विचिन्तितः ।
श्रीकृष्णः प्राह राधेशि ! श्रृणु तां पुण्यपावनीम् ॥६०॥
कथां धर्मवतीं रम्यां देवद्रोहोत्थितां पराम् ।
पूर्वं चिन्तयतः सृष्टिं ब्रह्मणस्त्वण्डजन्मनः ॥६१॥
वालखिल्याः समुत्पन्ना मानसाः शुद्धरूपिणः ।
अष्टाशीतिसहस्राणि बभूवुश्चोर्ध्वरेतसः ॥६२॥
तत्र वनस्पतिर्नाम सर्वश्रेष्ठोऽभवन्मुनिः ।
पुनश्चिन्तयतस्तस्य प्रजाकामस्य वेधसः ॥६३॥
सहस्रऋषयो जाता गृहस्थाः स्कन्नधर्मिणः ।
सदारा वनवासाश्च रागद्वेषादिमानसाः ॥६४॥
तत्र नभस्पतिर्नाम गृहिश्रेष्ठोऽभवन्मुनिः ।
पुनश्चिन्तयतस्तस्य रजसा मोहितस्य तु ॥६५॥
वालखिल्याः पुनर्जाताः षष्टिसहस्रसंख्यकाः ।
सर्वे वै दारसहितास्तपःस्वाध्यायतत्पराः ॥६६॥
कामक्रोधादिहृदयाः स्नानपूजापरायणाः ।
महारण्यनिवासाश्च कैलासशैलसन्निधौ ॥६७॥
आराधयन्ति त्रिनेत्रं कृशा धर्मनिसन्तताः ।
व्रतोपवासनिरताः सहस्रवर्षतापसाः ॥६८॥
तेषु सरस्पतिर्नाम व्रतश्रेष्ठोऽभवन्मुनिः ।
गृहिधर्मपरश्चापि यज्ञस्वाध्यायतत्परः ॥६९॥
तान् समाराधयतोऽपि नैव तुष्यति शंकरः ।
तदा श्रीपार्वती देवी सदया प्राह शंकरम् ॥७०॥
क्लिश्यन्ति ते मुनिगणा देवदारुवनाश्रयाः ।
तेषां क्लेशक्षयं शंभो विधेहि कुरु मे दयाम् ॥७१॥
कथं न दीयते सिद्धिर्गतेऽप्यब्दसहस्रके ।
शुष्कस्नाय्वस्थिदेहानां तपतां गृहधर्मिणाम् ॥७२॥
तच्छ्रुत्वा शंकरः प्राह धर्मस्य गहनां गतिम् ।
देवि त्वं नैव जानासि न ते कामविवर्जिताः ॥७३॥
न च क्रोधेन निर्मुक्ताः केवलं मूढतापसाः ।
नैते धर्मं विजानन्ति ततो न दीयते फलम् ॥७४॥
सती प्राह कथं ह्येते कामक्रोधादिदूषिताः ।
मे प्रदर्शय तच्छंभो परं कौतूहलं हि मे ॥७५॥
शंभुः प्राह सति ! चात्र तिष्ठ पश्य कुतूहलम् ।
अहं गच्छामि तपतामाश्रमेषु कुचेष्टया ॥७६॥
इत्युक्त्वा वस्त्ररहितो नग्नो भूत्वा हि शंकरः ।
वनमालासुगन्धाढ्यो युवा सर्वांगसुन्दरः ॥७७॥
भिक्षाकपालभृद् देहि भिक्षामुक्त्वाऽऽश्रमान् ययौ ।
तं विलोक्याऽऽश्रमप्राप्तं योषितो ब्रह्मवादिनाम् ॥७८॥
सुराजसस्वभावैस्तं नग्नं दृष्ट्वा प्रमोहिताः ।
नीत्वा मूलं फलं भिक्षां गृहाणेत्यन्तिकं ययुः ॥७९॥
शंभुर्भिक्षाकपालं तत्प्रसार्य बहुसादरम् ।
दत्त भिक्षां शिवं वोऽस्तु भवतीनां तपःप्रियाः ॥८०॥
मुहुर्हसन् चेष्टमानः कुर्वाणो लिङ्गजाग्रतिम् ।
मनांसि प्रजहाराऽसौ बभूवुस्ताः स्मरातुराः ॥८१॥
नार्यः प्राहुस्त्वया कोऽयं व्रतधर्मः प्रसेव्यते ।
नग्नेन भिक्षुवेषेण हृद्योऽसि त्वं सुभिक्षुक ॥८२॥
एहि त्वस्मद्गृहान् कुर्मः सेवनं मर्दनं तव ।
इत्यूचुस्ताः शिवः प्राह रहस्यं मे व्रतं खलु ॥८३॥
न प्रकाश्यं व्रतं मेऽत्र यूयं यात गृहान्निजान् ।
नार्यः प्राहुर्गृहानस्माकमेहि रञ्जनोऽसि यत् ॥८४॥
इत्युक्त्वा तं जगृहुस्ताः सकामाः पाणिपल्लवैः ।
काचिद्धस्तेऽपरा कण्ठेऽन्या जान्वोरितरा हनौ ॥८५॥
परा केशेषु कट्यां च पादयोः पार्श्वपृष्ठयोः ।
एवं विचेष्टितं शंभुं तथा क्षोभं च योषिताम् ॥८६॥
ध्याने ते तापसा वीक्ष्य तपो विहाय दुद्रुवुः ।
हन्यतामिति संभाष्य काष्ठपाषाणयष्टयः ॥८७॥
निजघ्नुर्वर्ष्मणि शंभोस्तत्र त्रयस्तु मूर्धजाः ।
वनस्पतिर्महर्षिस्तु काष्ठमादाय सत्वरम् ॥८८॥
नभस्पतिस्तु पाषाणं समादाय तदा द्रुतम् ।
सरस्पतिस्तु संगृह्य लोष्ठस्य दात्रकं द्रुतम् ॥८९॥

लिङ्गं शंभोर्जाग्रतं तत्पातयामासुरीश्वराः ।
अन्ये दर्भैस्तथा यष्ट्या निजघ्नुः कटिपार्श्वतः ॥९०॥
लिङ्गे तु पतिते शंभुस्त्वन्तर्धानं जगाम ह ।
सतीं प्राप्य तदा तस्थावदृश्यः शंकरस्ततः ॥९१॥
लिङ्गं तूत्पत्य तूत्पत्य जगत्क्षोभं चकार ह ।
ब्रह्माण्डं क्षोभमापन्नं श्रीशंभुर्दुःखितोऽभवत् ॥९२॥
सती लिङ्गविहीनं संवीक्ष्य शशाप तान् द्विजान् ।
वनस्पतिः काष्ठभावं नभस्पतिः शिलात्मताम् ॥९३॥
सरस्पतिर्दत्ररूपं प्राप्नुवन्तु हि निर्दयाः ।
मम पत्युस्त्वपराद्धं भवद्भिस्त्वतिनिष्ठुरम् ॥९४॥
ततो यूयं राक्षसाः स्वलिङ्गहीना भवन्त्वपि ।
इतिशप्तास्त्रयस्ते हि प्रधानाः ऋषयो द्रुतम् ॥९५॥
वनस्पतिः सर्जवृक्षोऽभवत्तत्र वनान्तरे ।
कामरूपधरः काष्ठरूपवान् राक्षसोऽपि सः ॥९६॥
नभस्पतिर्बभूवापि शैलो दारुवने तदा ।
कामरूपधरः कृष्णशिलारूपोऽपि राक्षसः ॥९७॥
सरस्पतिस्तदा जातो दत्रयुक्तो हि सूकरः ।
लिङ्गहीनो राक्षसः सः कामरूपधरोऽपि हि ॥९८॥
त्रयस्ते राक्षसा जाता दारुद्रुमवनान्तरे ।
अन्ये शप्ता वालखिल्याः स्तबकास्ते जलोपरि ॥९९॥
समूला अपि निर्ग्रन्थाः पत्रमात्रसमृद्धयः ।
अलिङ्गा जलवासास्ते बभूवुर्जलमस्तके ॥१००॥
अपृथ्वीभोजनाः सर्वे ब्रह्मपुत्रनदादिषु ।
वालखिल्याः स्तबकास्ते जलमात्रप्रजीविनः ॥१०१॥
शापकाले दुःखमग्ना मनसा तुष्टुवुः सतीम् ।
समुद्धारो यथाऽस्माकं भवेत्तत् संविधीयताम् ॥१०२॥
न वयं विद्मः सद्भावं शंकरस्य महात्मनः ।
अपराद्धं ततोऽस्माभिः शापान्तो नो विधीयताम् ॥१०३॥
ऋषिपत्न्यस्तु रुरुदुस्तुष्टुवुर्मातरं सतीम् ।
तदा प्राह सती कृष्णनारायणपरेश्वरः ॥१०४॥
सौराष्ट्रे पश्चिमेदेशे कम्भराश्रीसुतः प्रभुः ।
अनादिश्रीकृष्णनारायणः श्रीभगवान् हरिः ॥१०५॥
वर्तते तस्य योगेन व उद्धारो भविष्यति ।
ऋषीणां प्रसमुद्धारं स प्रभुः संकरिष्यति ॥१०६॥
इत्युक्त्वाऽदृश्यभावं सा गता सुदुःखिता सती ।
अथ ये ऋषिपुत्राद्या अपराधविवर्जिताः ॥१०७॥
अन्येऽपि चर्षयस्तत्र दर्शका ब्राह्मणादयः ।
ते तु दृष्ट्वा महाक्षोभं ब्रह्माण्डस्य लयप्रदम् ॥१०८॥

ब्रह्माणं सस्मरुस्तत्र ब्रह्माणं शरणं ययुः ।
देवाद्याः प्रार्थयामासुर्लिंगवह्निप्रशान्तये ॥१०९॥
ब्रह्मणा बोधितास्ते च ब्रह्मधर्मैः पृथग्विधैः ।
तेजस्विनं ब्रह्मनिष्ठं ब्रह्मरूपं सनातनम् ॥११०॥
कामधर्मैरबद्धं तं विज्ञाय ग्राम्यधर्मिणम् ।
अपराद्धं कृतवन्तस्ततः क्षोभो महानयम् ॥१११॥
लिंगपूजनधर्मेण शान्तिमेष्यति नान्यथा ।
अहो मुग्धाः ऋषयस्ते क्रोधस्य वशतां गताः ॥११२॥
देहे चात्मनि यद्ब्रह्म नियतं निर्मलं च तत् ।
तपसा कर्मणा वापि शुद्धहृदोऽपि चीयते ॥११३॥
कामक्रोधादिभावानां निष्कासनं हि शुद्धता ।
तन्मनः शोधयेद्धीमान् ज्ञानयोगपमुक्रमैः ॥११४॥
शुद्धिमाप्नोति पुरुषः संशुद्धं यस्य वै मनः ।
ऋषयः क्रोधकामाभ्यामभिभूताऽऽश्रमे स्थिताः ॥११५॥
कामक्रोधाभिभूतानां यज्ञो दानं वृषस्तपः ।
व्रतं कृच्छ्रं धृतिर्ध्यानं सर्वे निष्फलतां व्रजेत् ॥११६॥
तस्मात् प्रयान्तु तत्स्थानं कामक्रोधौ विहाय च ।
आराधयन्तु तं देवं शंकरं कामभासिनम् ॥११७॥
लिंगं प्रपूजयन्त्वेव ततः शान्तिर्भविष्यति ।
इत्युक्ताः प्रययुः सर्वे लिङ्गं पुपूजुरादरात् ॥११८॥
यथास्थानं च तल्लग्नं सलिंगः शंकरोऽभवत् ।
यत्रैतत् पतितं तत्र ज्योतिर्लिंगानि जज्ञिरे ॥११९॥
द्वादशधा तु तद्भिन्नं दिव्यं मोक्षप्रदं हि तत् ।
इत्येवं शान्तिमापेदे जगत् सर्वे हि राधिके ॥१२०॥
अथ तेऽपि त्रिमुनयः शापजा राक्षसाः खलु ।
जातिस्मराः स्वमोक्षार्थं सौराष्ट्रं त्वाययुस्ततः ॥१२१॥
वनस्पतिः काष्ठरूपः शकटात्मा व्यजायत ।
नभस्पतिः शिलारूपः पर्वतः समजायत ॥१२२॥
सरस्पतिर्दन्तमाँश्च सूकरः समजायत ।
हरेः कृष्णस्य योगेन मुक्ताः शापात्तदाऽभवन् ॥१२३॥
अस्तुवँस्ते हरिं दिव्याः ऋषयो वै तपोधनाः ।
शेषर्षीणां तु सर्वेषामुद्धारार्थं पुनः पुनः ॥१२४॥
तदा श्रीभगवानाह यान्तु तत्राऽप्यहं शुभम् ।
दारुवनं समागत्योद्धारयिष्यामि शापतः ॥१२५॥
गरुडं तु समारुह्य भगवान् बालकृष्णकः ।
वालखिल्यस्तम्बरूपानुद्दधार हरिः स्वयम् ॥१२६॥
सर्वे ते दारुवनजास्तपः कुर्वन्ति राधिके ।
ततः शान्तारयः सर्वेऽभवन् ऋषिस्वरूपिणः ॥१२७॥

तद्वंशा वालखिल्याश्च स्तम्बा भवन्ति वारिषु ।
हरिरुद्धारयित्वा तान् प्राप्य पूजनमादरात् ॥१२८॥
आययौ कुंकुमवापीक्षेत्रं स्वं गरुडान्वितः ।
पठनाच्छ्रवणाद् राधे शापपापं प्रशाम्यति ॥१२९॥
आश्चर्यं भक्तियुक्तेषु राक्षसत्वे ह्युपस्थिते ।
द्वेषभावेन मुक्तिर्वै देवमाया हि तादृशी ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वनस्पतिनभस्पतिसरस्पतिमहर्षीणां सतीशापाद् राक्षसभावमापन्नानां वाटिकायामुपद्रवः, प्रभुणा शापमोक्षणं, नग्नशंकरस्य तापसाश्रमेषु भ्रमणं ऋषिकृतापराधः लिंगपातनं शापकारणं चेत्यादिनिरूपणनामाऽष्टत्रिंशोऽध्यायः ॥ ३८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ज्ञानं तपो यस्मान्न शिष्यते ।
पूर्वमेकार्णवे घोरे नष्टे स्थावरजङ्गमे ॥ १ ॥
बृहदण्डमभूदेकं प्रजानां बीजसंभृतम् ।
महाविष्णोः समुद्भूतं यस्मिन् विराड् विराजते ॥ २ ॥
अण्डं विभिद्य भगवान् वैराजं बहिरानयत् ।
वैराजात् त्रिगुणा देवा ब्रह्मविष्णुमहेश्वराः ॥ ३ ॥
सत्त्ववान् वै तदा ब्रह्मा शून्यं लोकमपश्यत ।
ततो राजसभावेन प्रवृत्तिं स्वीचकार ह ॥ ४ ॥
सस्मार दर्शकं दिव्यं नारायणमतीन्द्रियम् ।
गुणातीतं भगवन्तं व्यापकं पुरुषं परम् ॥ ५ ॥
येनेदं सकलं व्याप्तं स्थिरचेतनसंज्ञितम् ।
यस्तं वेद महात्मानं स सर्वं वेद निश्चितम् ॥ ६ ॥
गुणातीतं च पुरुषं परब्रह्म सनातनम् ।
यस्तं वेद परात्मानं स सर्वं वेद मोक्षवित् ॥ ७ ॥
किं तेषां सकलैस्तीर्थैराश्रमैर्वा प्रयोजनम् ।
येषां त्वनन्तकं चित्तमात्मन्येव व्यवस्थितम् ॥ ८ ॥
आत्मा नदी शीलतीर्था सत्यजला शमान्विता ।
तत्स्नातः शुद्ध्यति पुण्यो वारिणाऽऽत्मा न शुद्ध्यति ॥ ९ ॥
श्रेष्ठं जनस्य कर्तव्यं चात्मबोधसुखे स्थितिः ।
ज्ञेयं सतां तदेवाऽस्ति यत्प्राप्तौ कामनाक्षयः ॥१०॥
नैतादृशं परं वित्तं ब्रह्मलग्नस्य विद्यते ।
समता सत्यता शीलं चार्जवं विरतिस्तथा ॥११॥
तल्लाभे ब्रह्म परमं प्राप्नोत्येव न संशयः ।
विदित्वा तं प्रभुं राधे ! धर्मस्य फलमाप्नुयात् ॥१२॥
योऽसावात्मनि देहेऽस्मिन् विभुर्नित्यो व्यवस्थितः ।
सोऽनादिः श्रीपतिः कृष्णो नारायणः परात्परः ॥१३॥
कम्भराश्रीनन्दनः सः श्रीमद्गोपालबालकः ।
कुंकुमवापिकाक्षेत्रे वर्तते बालकृष्णकः ॥१४॥
पञ्चमे वत्सरे पूर्णे यावत्तं वीक्षितुं प्रिये ।
इत्युक्ता राधिका देवी सोत्साहा वेषमुज्ज्वलम् ॥१५॥
दधार सर्वशोभाढ्यं स्वर्णमाणिक्यसंभृतम् ।
मौक्तिकैर्हीरकैः रत्नैः खचितं शोभनं शुभम् ॥१६॥
शृंगारं विविधं धृत्वा सुगन्धसारमिश्रितम् ।
बिन्द्रीपत्रीरङ्गरेखाऽलक्तकज्जलबृंहितम् ॥१७॥
तन्तुतन्तीशृंखलोर्मिकाम्बराभूषणाऽन्वितम् ।
स्वर्णचूर्णपुष्पगुच्छकबरीभारशोभितम् ॥१८॥
सनक्तकार्चनवस्तुभृतपात्रकरा पतिम् ।
कृष्णं शृंगारयामास सुशोभं संस्कृतं शुभम् ॥१९॥
विमानं बृषयानं च वाहयामास सत्वरम् ।
फलपुष्पैः स्वादुभोज्यैरमृतैर्भृतपात्रकम् ॥२०॥
स्वयं कृष्णः सारथिश्च श्रीराधा रथिनी स्वयम् ।
श्रीमद्गोलोकधाम्नस्तावीशलोकान् विलंघ्य च ॥२१॥
ब्रह्मादिस्तरमुल्लंघ्य भूतले तु सुराष्ट्रके ।
व्योम्नोऽवतरेत् राधाकृष्णौ कुंकुमवापिकाम् ॥२२॥
अश्वपट्टसरस्तीरे बालकृष्णाऽऽलयाऽऽङ्गणे ।
श्रीकृष्णस्य रथस्यादौ ब्रह्माण्डे व्याप तन्महः ॥२३॥
सूर्यचन्द्रौ न दृश्येते तेजसाऽभिभवंगतौ ।
राधायास्तेजसा पृथ्वी दिशश्चात्युपबृंहिताः ॥२४॥
लोमशस्याश्रमश्चापि चान्द्रलोक इवाऽभवत् ।
सर्वाश्च कन्यका राधारूपाऽतिरूपकान्विताः ॥२५॥
राजन्ते राधिकां दृष्ट्वा शतराधाऽधिकैकका ।
राधा दृष्ट्वा तु ताः कन्या गर्वहीना बभूव ह ॥२६॥
गलितं रूपसौन्दर्यमानं तस्यास्तदा क्षणात् ।
उत्थ कृष्णं प्रति प्राह बालकृष्णं विलोक्य सा ॥२७॥
अहो मे व्यक्तिसाफल्यं कारितं हि त्वया प्रभो ।
मयाऽस्य दर्शनं प्राप्तं कृष्णनारायणस्य यत् ॥२८॥
षष्ठवर्षसमारंभे प्रातरष्टमिकातिथौ ।
बालकृष्णं राधिका संपूजयामास वस्तुभिः ॥२९॥
गोलोकपयसा बालं स्नापयामास राधिका ।
सर्वतीर्थादिसलिलैरभिषेकं चकार सा ॥३०॥

चन्दनाऽगुरुकस्तूरीरससारद्रवादिभिः ।
सम्पूज्याऽऽभरणैर्वस्त्रैरलंकारैरशोभयत् ॥३१॥
आरार्त्रिकं चकाराऽथ मयूरपिच्छशोभनम् ।
मुकुटं धारयामास, बालकृष्णस्य मस्तके ॥३२॥
मुरलीं सा ददौ हस्ते दक्षबाहुं ददौ गले ।
हासयित्वा सुतिलकं चन्द्रकं साक्षतं शुभम् ॥३३॥
भाले दत्वा राधिका सा नीराजनविधिं व्यधात् ।
पुष्पाञ्जलिं प्रदत्वैव नमस्कारं चकार सा ॥३४॥
आशीर्वादान् ददौ कान्तकान्त त्वं कान्तवद्भव ।
दुःसहां चाञ्जलिं राधा समुच्चार्य च मस्तकात् ॥३५॥
ददौ भोज्यं च गोलोकादानीतं पायसादिकम् ।
दुग्धपिण्डान् वरफींश्च दुग्धसारस्य पूरिकाम् ॥३६॥
मिष्टां दिव्यां दधि श्रेष्ठं ददौ चान्यत् तदिष्टकृत् ।
भोजयित्वा ततो रम्यं ताम्बूलकं ददौ शुभम् ॥३७॥
अथैवं सम्प्रपूज्यैव विरराम ततः स्वयम् ।
श्रीकृष्णस्तं कृष्णनारायणं पुपूज सादरम् ॥३८॥
सुरवालं पीतपटं कञ्चुकं स्वर्णतारकम् ।
शिरस्त्राणं सकलिंगं चावतंसकौ कौसुमौ शुभौ ॥३९॥
पुष्पहारान् पारिजातकृतान् ददौ गलेऽर्भकम् ।
उपानहौ स्वर्णसाध्यौ कोमलौ प्रददौ तथा ॥४०॥
छत्रं सुचामरे रम्ये रशनां कुण्डले ददौ ।
मणिं कौस्तुभजातीयोत्तमं मालां च मौक्तिकीम् ॥४१॥
ददौ श्रीबालकृष्णाय वंशीं ददौ मृदुस्वराम् ।
यष्टिं सिद्धिमयीं चापि ददौ सिंहासनं वरम् ॥४२॥
एवं बालप्रभुं कृष्णः पूजयित्वा स्तुतिं व्यधात् ।
सर्वसाक्षिन्नमस्तेऽस्तु सर्वावतारकारण ॥४३॥
पुरुषोत्तम मुक्तेश परधामन् नमोऽस्तु ते ।
वर्तमानं च भूतं च भविष्यत्सर्वथा यतः ॥४४॥
अन्वितं राजते सौम्यं सुव्यवस्थं क्रमानुगम् ।
अनन्वितः प्रशास्ता त्वं तस्मै देवाय ते नमः ॥४५॥
अनन्ताः शक्तयस्तेऽत्र कृष्णनृसिंहरूपिषु ।
राधारमाश्रीस्वरूपास्तं नमामि परेश्वरम् ॥४६॥
अहं मे धाम गोलोकस्तथा नारायणो रमा ।
श्रीवैकुण्ठं चामृतं सत्पदं यस्मात्प्रवर्तते ॥४७॥
अक्षरं धाम यस्याऽग्रे समूर्तं सेवकं सदा ।
ईश्वरा अवताराश्च यदंशगुणभूषणम् ॥४८॥
व्यूहाश्चेश्वरपालाश्च लोकपाला महर्षयः ।
क्रतूच्छ्रयाः सुरा यस्य गुणैकैकांशमूर्तयः ॥४९॥
भवन्तीह तु संसारे तं नमामि परेश्वरम् ।
अन्तरात्मन्ननन्तात्मन्मदात्मँस्ते नमो नमः ॥५०॥
त्वं परात्मन् लोकसाक्षिन्ननन्तेश नमोऽस्तु ते ।
सर्वज्ञ त्वं परमेष्ठिन् ज्ञानज्ञेय नमोऽस्तु ते ॥५१॥
आदिदेव दुराराध्य परमेश्वर ते नमः ।
महायोगेश्वर साधो दयालो ते नमो नमः ॥५२॥
परंज्योतिर्वषट्कार स्वाहाकार नमोऽस्तु ते ।
सर्वदर्शन संवर्ताऽग्निषोमात्मन्नमोऽस्तु ते ॥५३॥
महाराजिक सिद्धार्च्य हिरण्यवाह ते नमः ।
मञ्जुकेशिन् बालकेशिन् दयादेशिन्नमोऽस्तु ते ॥५४॥
विभो याज्ञिक यज्ञेश भक्तानुकम्प ते नमः ।
प्रसीद श्रीकृष्णनारायण तुभ्यं नमोनमः ॥५५॥
इत्युक्त्वा श्रीकृष्णदेवो नत्वा राधा तथा प्रभुम् ।
ययतुः श्रीकम्भरायाः सन्निधौ भुवनान्तरे ॥५६॥
नत्वा तां च तथा नत्वा श्रीमद्गोपालकृष्णकम् ।
तत्कृतं स्वागतं प्राप्य पुत्रोत्सवं प्रशस्य च ॥५७॥
विमानेन ययतुश्च गोलोकं कृष्णराधिके ।
अथाऽऽययौ च वैकुण्ठान्नारायणो रमापतिः ॥५८॥
गरुडस्थः प्रभुर्बालकृष्णपूजार्थमित्यथ ।
वासुदेवस्तथा भूमा चाययतुर्मुदान्वितौ ॥५९॥
महाविष्णुस्तथा नारायणो नरः समाययुः ।
शेषनारायणश्चापि मत्स्यः कूर्मः समाययुः ॥६०॥
वाराहश्च कपिलश्च हरिः पृथुः समाययुः ।
दत्तात्रेयस्तथा हंसो नृसिंहश्च समाययुः ॥६१॥
ऋषभश्च वामनश्च पर्शुरामः समाययुः ।
यज्ञो रामः कुमाराश्च हयग्रीवः समाययुः ॥६२॥
नारदो राजराजश्च परमेशाः समाययुः ।
अनादिश्रीकृष्णनारायण जयेति ते जगुः ॥६३॥
पञ्चामृतैरमृतैश्च बालाऽङ्कुष्ठाऽभिषेचनम् ।
चक्रुः पश्चाद् दर्भजलैरमृतैः प्रोक्षणं व्यधुः ॥६४॥
चन्दनं साऽक्षतं भाले त्वर्चयामासुरादरात् ।
तिलकं कुंकुमाढ्यं च चक्रुर्ददुः सुगन्धकम् ॥६५॥
पुष्पहारान् ददुः कण्ठे मुकुटं पुष्पमालिकाः ।
ददुस्तुलसीपत्राणि विभूषणानि चामरे ॥६६॥
छत्रं चोपानहौ दिव्येऽम्बराणि विविधान्यपि ।
कर्पूराद्यैर्वर्तिकाभिर्नीराजनं प्रचक्रिरे ॥६७॥
धूपं दीपं सुनैवेद्यं चामृतान्नं फलानि च ।
ददुः सर्वेऽवताराश्च जलं ताम्बूलकानि च ॥६८॥

अर्पयामासुरत्यर्थं स्वस्वलोकभवानि च ।
इत्येवं पूजनार्थं तद्ग्रामवासाः स्त्रियोऽपि च ॥६९॥
आययुर्बहुभिर्वस्तूत्तमैः पुपूजुरीश्वरम् ।
एवं समर्चयित्वा ताः प्रययुर्निजधाम ते ॥७०॥
ततो देवाश्च पितरो मुनयः ऋषयस्तथा ।
मानवा ब्राह्मणाद्याश्चाऽऽययुः कृष्णार्चनाय वै ॥७१॥
दिव्यविमानमारुह्य चाश्वपट्टसरोवरम् ।
अभितो व्योममार्गेषु विश्रम्य कृष्णमन्दिरम् ॥७२॥
आययुः पूजयामासुर्विविधैश्चोपदादिभिः ।
रञ्जयामासुरत्यर्थं बालकृष्णं परेश्वरम् ॥७३॥
ततोऽन्ये भूमयः शैला नद्यः सरांसि सागराः ।
तीर्थानि देवतरवो वल्लिकाः स्तबकास्तथा ॥७४॥
वनदेव्यश्च गुल्माश्च तत्त्वानि विविधान्यपि ।
आययुः श्रीबालकृष्णपूजार्थं चार्हणां व्यधुः ॥७५॥
ततो यक्षा गुह्यकाश्चारणा किंपुरुषास्तथा ।
भाटाश्च किन्नराश्चापि गन्धर्वा देवयोषितः ॥७६॥
मागधा बन्दिनः सूता विद्याध्राः पन्नगादयः ।
आययुः श्रीबालकृष्णोत्सवे पूजार्थमेव ते ॥७७॥
पूजनं ते प्रचक्रुश्च नर्तका नृत्यमाचरन् ।
अवाद्यन्त सुवाद्यानि गायकाः संजगुस्तदा ॥७८॥
कथकास्तत्कथां चक्रुर्नाट्यिश्च नाट्यमाचरन् ।
याज्ञिकाश्चाचरन् यज्ञं साधवो जपमाचरन् ॥७९॥
सत्यो नार्यो ददुश्चाशीर्वादान् वृद्धाः शुभाशिषः ।
श्रीमद्गोपालकृष्णश्च लोमशोऽपि मुनिस्तदा ॥८०॥
तथान्ये ऋषयस्तत्र स्थिताश्च ब्रह्मकन्यकाः ।
श्रीहरेः पूजनं चक्रुर्योजयामासुराशिषा ॥८१॥
ततः पिता तु तान् सर्वान् महीमानान् समन्ततः ।
दुग्धपाकादिसद्भोज्यैस्तर्पयामास लड्डुकैः ॥८२॥
भोजयित्वा च तान् सर्वानागतान् तत्परं हरिः ।
दापयामास दानानि विप्रान् दासीश्च सेवकान् ॥८३॥
पात्रेभ्यश्च यथायोग्यं यथाभिक्षुकभिक्षितम् ।
रत्नं हिरण्यं रजतं मिष्टान्नं चाम्बराण्यपि ॥८४॥
मुद्रिकाश्च विभूषाश्च पात्राण्यपि धनानि च ।
ददौ यथेष्टं सर्वेभ्यश्चागतेभ्यः पुनः पुनः ॥८५॥
ततो गतेषु सर्वेषु स्वस्वधामगृहाणि च ।
लोमशः कन्यकायुक्तो यथा नैजाश्रमं मुदा ॥८६॥
अथाऽन्ये कुंकुमवापीक्षेत्रीया ब्राह्मणादयः ।
प्रेम्णा पुपूजुरागत्य परमेशं हरिं प्रभुम् ॥८७॥
ययुः स्वस्वगृहं पश्चान्महाश्चर्यं बभूव ह ।
शृणु त्वं राधिके तत्र युगलं चैकमागतम् ॥८८॥
नारी कज्जलवर्णीया नरः कुष्ठाढ्यविग्रहः ।
अनादिश्रीकृष्णनारायणं नत्वाऽऽह बालक ॥८९॥
पापोद्धारं कुरु कृष्ण पतितयोर्विवंशयोः ।
हरिर्जानन्नपि तौ तु पप्रच्छ दीनमानसौ ॥९०॥
कौ युवां वदतं पापं किं कृतं च कथं च रुक् ।
नरः प्राहाऽभवं विप्रो देवायनो हि नामतः ॥९१॥
गौर्जरे श्रीपत्तने च तत्रेयं मम भामिनी ।
देवपूजापरौ चावां नित्यकर्मपरायणौ ॥९२॥
शैत्याभिपीडितौ स्नानं विना पूजनतत्परौ ।
समभूव ततो दोषादायुष्यं त्वन्ततां गतम् ॥९३॥
मृतौ ज्वरेण च शीघ्रं सहैव श्वपचगृहे ।
जातौ तत्रैव नगरे विवाहितौ पुनस्तथा ॥९४॥
जातिस्मरौ कुष्ठिकृष्णौ दुःखितौ पापनाशक ! ।
ज्ञात्वा स्वप्नप्रभावेण नारायणोऽसि माधवः ॥९५॥
पापं विधूय नौ मोक्षं कुरु नारायणप्रभो ।
अद्य ते दिवसो नाथ बद्धमुक्तिप्रदापने ॥९६॥
पापिनां पापहर्ता त्वं वर्तसे चेति लोकतः ।
समाकर्ण्य च वै पद्भिस्त्वायातौ शरणं तव ॥९७॥
अनादिश्रीकृष्णनारायणः श्रुत्वा दयापरः ।
तावुवाच कृपासिन्धू राधिके पापनाशनः ॥९८॥
अश्वपट्टसरस्येव स्नात्वा पीत्वा जलं च तत् ।
प्रदक्षिणां ततः कृत्वा पिबतं चरणामृतम् ॥९९॥
शुद्धौ भूत्वा ब्रह्मलोकं व्रजिष्यथोऽतिमानवौ ।
एवं श्रुत्वा ततस्ताभ्यां यथोक्तं चानुवर्तितम् ॥१००॥
द्राग् भूत्वा दिव्यदेहौ तौ दिव्ययाने स्थितौ पुनः ।
लक्षातिलक्षयज्ञानां फलं प्राप्य गतौ दिवम् ॥१०१॥
श्रीपत्तनात् समारभ्य कुंकुमवापिकावधिम् ।
यावन्ति चंक्रमणानि तावद् यज्ञफलं ह्यभूत् ॥१०२॥
एवं श्रीकान्तसाधूनामप्यभिगमने फलम् ।
जायते किं पुनः कृष्णनारायणस्य सन्निधौ ॥१०३॥
राधिके श्रीहरिः सेव्यः सेव्याश्च साधवोऽस्य च ।
तीर्थं क्षेत्रं व्रतं सेव्यं कोटियज्ञफलप्रदम् ॥१०४॥

पदे पदेऽश्वमेधस्याऽभिगमे जायते फलम् ।
इत्येवं तौ कृतौ मुक्तौ नारायणेन शार्ङ्गिणा ॥१०५॥
षष्ठवर्षसमारम्भाष्टमीदिने शुभोत्सवे ।
पठनाच्छ्रवणाच्चापि मोक्षो मुक्तिस्तथा भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोः षष्ठवत्सरस्याऽष्टम्यां श्रीराधाकृष्णाऽवतारव्यूहदेवमानवादिकृतमहोत्सवपूजनं देवायनद्विजस्य तत्पत्न्याश्च श्वपचजन्ममोक्षणं चेत्यादिनिरूपणनामैकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके तत्र चाश्वपट्टसरोवरे ।
बालकृष्णं प्रपूज्यैव निवासं प्रभुसन्निधौ ॥ १ ॥
प्रचक्रुः सरसस्तीरे पश्चिमे सेतुकोच्छ्रये ।
दत्तात्रेयं परं तीर्थं तथा बाराहतीर्थकम् ॥ २ ॥
कूर्मतीर्थं मत्स्यतीर्थं कपिलं तीर्थमित्यपि ।
हरितीर्थं पृथुतीर्थं वासुदेवाभिधं तथा ॥ ३ ॥
हंसतीर्थं दत्तात्रेयतीर्थं नृसिंहतीर्थकम् ।
तीर्थमृषभसंज्ञं च योगेश्वराख्यतीर्थकम् ॥ ४ ॥
तीर्थं च वामनं पर्शुरामतीर्थं शुभं ततः ।
यज्ञतीर्थं रामतीर्थं तीर्थं हयशिरोऽभिधम् ॥ ५ ॥
सनत्कुमारतीर्थं च तीर्थं नारदसंज्ञकम् ।
व्यासतीर्थं कृष्णतीर्थं बुद्धतीर्थं तथा परम् ॥ ६ ॥
तीर्थं नारायणं विष्णुतीर्थं श्रीपुरुषोत्तमम् ।
महाविष्णुकृतं तीर्थं नरनारायणाभिधम् ॥ ७ ॥
अर्धनारीश्वरतीर्थं लक्ष्मीतीर्थं परं शुभम् ।
राधिके च त्वया साकं स्नातं यत्र मया च तत् ॥ ८ ॥
राधातीर्थं कृष्णतीर्थं चाश्वपट्टसरोवरे ।
पापतापक्षयकरं मोक्षदं धामवासदम् ॥ ९ ॥
एवमेतानि तीर्थानि जातानि तत्र राधिके ।
अथ षष्ठे मार्गमासे महाकालवनस्थिताः ॥१०॥
ऋषयस्त्वाययुश्चाऽश्वपट्टक्षेत्रे हि तैर्थिकाः ।
समीरणः पवमानः सन्तारणश्च बर्बुरः ॥११॥
वोढुश्च घनमेदश्च द्युविश्रामश्च पङ्किलः ।
नीलकर्णस्तथाऽलर्कः पुण्डरीकः कलायनः ॥१२॥
वीतिहोत्रश्च चमसः पर्णकुत्सोऽश्वपाटलः ।
भाल्लवेयश्चोर्जव्रतश्चाश्वलायन इत्यपि ॥१३॥

पार्ष्णिरदः सुमन्तुश्च ह्यशोकाक्षोऽभयाऽक्षकः ।
ब्रह्मस्तम्बः कूप्यवालश्वेतनब्रह्म इत्यपि ॥१४॥
देव्यः श्रीः कमला पृथ्वी राणिकाऽमरपुत्रिका ।
धन्येश्वरी सतीशा च देवानिकी च कृष्णिका ॥१५॥
पम्पा नारायणी गङ्गा यमुना गण्डकी कुशा ।
सरस्वती हिरण्या च स्वर्णरेखा च गोमती ॥१६॥
गौतमी वल्लयो वृक्षास्तत्त्वान्यप्याययुस्तदा ।
मार्गमासे सिते पक्षे द्वितीयायां समाहिताः ॥१७॥
अश्वपट्टसरःस्नानं चक्रुः प्रातश्च देवताः ।
अनादिश्रीकृष्णनारायणं नेमुर्गृहं गताः ॥१८॥
लोमषर्षिं ततो नेमुर्नेमुस्तेभ्योऽपि कन्यकाः ।
सत्कृता भोजिताः सर्वे वन्दिताः पूजितास्तथा ॥१९॥
अश्वपट्टसरस्तीरं पश्चिमं कुन्दशोभितम् ।
कुञ्जनिकुञ्जरहितं विशालस्थलगौरवम् ॥२०॥
पारिजातवनाढ्यं च सुगन्धिद्रुममञ्जुलम् ।
ययुर्मध्याह्नकाले ते नित्यकर्मपरायणाः ॥२१॥
तत्र गुन्द्रकदाडीमतिन्तिडीद्रुमशोभिते ।
छायिते भूतले रम्ये बालकृष्णालयान्तिके ॥२२॥
विश्रामं परमं चक्रुः सायं कथामवाचयत् ।
लक्ष्मीनारायणसंहिताया ऊर्जव्रतो मुनिः ॥२३॥
मार्कण्डेयः कालजितः पञ्चशिखश्च लोमशः ।
आसुरिर्जमदग्निश्च हनुमान् जाम्बवाँस्तथा ॥२४॥
विभीषणश्च व्यासश्च प्रह्लादश्च बलिः ऋभुः ।
गालवश्च कृपश्चाऽन्ये शतकल्पायुषश्च ये ॥२५॥
सप्तकल्पजीवनाश्चाऽयुतकल्पप्रजीवनाः ।
कथाश्रवणमूर्धन्या निषेदुः सदसि स्थिताः ॥२६॥
कम्भरानन्दनस्तत्र पितृभ्यां सहितः प्रभुः ।
मध्यासने ब्रह्मविद्भिर्निवेशितो विराजते ॥२७॥
देवाः सुराः सगन्धर्वाः सविद्याधरमानवाः ।
देवीसमूहसहिताः शृण्वन्ति स्म कथां शुभाम् ॥२८॥
ऊर्जव्रतो महर्षिश्च लक्षकल्पायुरीश्वरः ।
प्रत्यक्षस्य हरेराद्यं मंगलं प्रजगाद ह ॥२९॥
नासीदक्षरमेकलं नहि गवां
धामाऽपि चाऽऽसीद् यदा,
वैकुण्ठं च यदाऽपि नामृतपदं
धामाऽपि नाऽभूद् यदा ।
जीवेशादिकसर्जनं च तु यदा
नासीत्तदासीच्च यः,
सोऽनादिर्हरिकृष्णबालसुरूपो
मे स्तान्नमो भूमिका ॥३०॥

यो नैजे परधाम्नि मुक्तपुरुषैश्चान्येषुतच्छक्तिभि-
मूर्तैर्ग्राह्यगुणैर्विभूतिभिरजैः संसेव्यते चार्थिभिः ।
यो द्वेधाऽभितरतोऽपि चैकल इह प्रालोक्यते बालव-
च्छ्रीमत्कृष्णनरायणोऽस्तु मम वाक्प्रस्थानभूमिः प्रभुः ॥३१॥

यदिह ऋषिकथायां वर्तते त्वन्तरात्मा,
मनुतनुजनिभोऽयं बालकः कंभरायाः ।
अकलकलविलासो विश्वभारोदरोऽयं,
सफलयतु जनान् गोपालकृष्णालयस्थः ॥३२॥

स जयतु भुवि रम्या कुंकुमी वापिकेयं
जगदघहरमर्घ्यं चाश्वपट्टं सरश्च ।
विजयतु मुनिमान्यो लोमशः साधुवर्यः
प्रविजयतु च लक्ष्मीसंहिता मोक्षदात्री ॥३३॥

आदौ मध्ये चावसानेऽनादिकृष्णनरायणः ।
गीयतेऽत्र परब्रह्म सोऽयं तनोतु मङ्गलम् ॥३४॥
ज्येष्ठो भ्राता च भगवान् सन्तुष्टा च स्वसा सती ।
शुको भ्राता ततो विज्ञोऽनुजः श्रीवल्लभस्तथा ॥३५॥
माता च कंभरालक्ष्मीः पिता गोपालकृष्णकः ।
शतं द्वादश कान्ताश्च विजयन्तु सबालकाः ॥३६॥
स्वयंप्रकाशः शिष्यश्च मूर्धन्यः शिष्यमण्डले ।
कोटिशिष्यगणाश्चान्ये कोट्यर्बुदाऽब्जयोषितः ॥३७॥
लोमशो गुरुमुख्यश्च ऋषयोऽन्ये हरिविदः ।
नमस्यामो ब्रह्मवंश्या जंगमास्तैर्थिकार्चिताः ॥३८॥
अपरोक्षः परोक्षोऽयं बालोऽबालबृहत्परः ।
करोतु श्रेय इष्टं नः श्रीहरिः पुरुषोत्तमः ॥३९॥
लक्ष्मीशो माणिकीशश्च पार्वतीशः प्रभापतिः ।
श्रीराधारुक्मिणीकान्तः करोतु मंगलं सदा ॥४०॥
जानन्तु ऋषयश्चैनं परमेशं परात्परम् ।
अनादिनिधनं कृष्णं स्वामिनं परमेश्वरम् ॥४१॥
अनेन हि पुरा वेदा उद्धृताः सागरात्तथा ।
उद्धृता पृथिवी देवी दन्ताग्रेण पुरा तथा ॥४२॥
अनेन पृष्ठभागे च शेषो धृतो हि विद्यते ।
अनेन निजपर्यंके धृतो नारायणः स्वयम् ॥४३॥
अनेन सांख्यविज्ञानं स्वप्रकाशाय चार्पितम् ।
अनेन ब्रह्मणे ज्ञानं पुरा श्रीहरिणाऽर्पितम् ॥४४॥
दैत्या निषूदिताश्चापि वासुदेवेन शार्ङ्गिणा ।
जन्मरक्षालयाँश्चक्रे सोऽयं व्यूहात्मको हरिः ॥४५॥
पृथ्वी प्रपालिताऽनेन राजराजोऽप्ययं ह्यभूत् ।
तपस्तप्तं तथाऽनेन हंसः सोऽयं पुराऽभवत् ॥४६॥
केशरी सोऽयमेवाऽऽसीत् हिरण्यकोशकान्तकः ।
साधुचेष्टो वन्यवासोऽभवत् सोऽयं दयापरः ॥४७॥
ह्रस्वरूपो भूमिहर्ता महेन्द्राऽनुज एव च ।
अत्रातारः क्षताः पर्शुघातेनाऽनेन सूरिणा ॥४८॥
वह्वावाज्यपिबोऽयं वै वृष्टियोगप्रदोऽप्ययम् ।
दक्षिणापथगान् दैत्यान् याम्यं प्रापयिता ह्ययम् ॥४९॥
ब्रह्मपुत्रः साधुश्रेष्ठो बालरूपः पुरा तु यः ।
स एवाऽद्य बालवेषो वर्ततेऽत्र नरोत्तमः ॥५०॥
वीणामग्नो महर्षिश्च वेदविद्याविभाजकः ।
राधाकान्तः सतीसेव्यो बोधवार्धिरयं हि- सः ॥५१॥
स्वामी कान्तः पतिः पाता रक्षको जनकः पिता ।
राजा द्रष्टाऽन्तरात्मा च बालोऽयं ऋषिसम्मतः ॥५२॥
भजध्वं भावतो भक्त्या शाश्वतालयदो यतः ।
प्रपद्ये परमेशानं तं ह्यजं वैष्णवप्रियम् ॥५३॥
परब्रह्म महात्मानं विश्वस्य जगतः पतिम् ।
नमस्तस्मै देवदैत्येश्वरमुक्तादिसेविने ॥५४॥
सर्वाक्षाय सर्वव्याप्तात्मनेऽन्तर्यामिणे नमः ।
गायन्ति यं गायत्रिणोऽर्चयन्त्येनं समर्पिताः ॥५५॥
यत्र सर्वं कारणं च कार्यं क्रिया च साधनम् ।
दैवतं सदसश्चापि नमस्तस्मै विलासिने ॥५६॥
नमः शान्ताय वरिणे शंखचक्रध्वजाब्जिने ।
शूलिने शार्ङ्गिणे चापि वज्रिणे शरिणे नमः ॥५७॥
स्वस्तिमते मीनवते नमस्ते प्रभविष्णवे ।
नमोऽस्त्वप्रतिरूपाय स्वरूपध्वजधारिणे ॥५८॥
नमो नानाभिरामाय नमः पद्धतराय च ।
नमः सांख्यप्रवक्त्रे ते योगवक्त्रे च ते नमः ॥५९॥
नमः श्रुतिप्रवक्त्रे ते न्यायवक्त्रे नमो नमः ।
नमो मुक्तिप्रवक्त्रे ते नमः शिक्षाप्रदाय च ॥६०॥
नमो मीमांसनवक्त्रे नमोऽमृतप्रदाय च ।
नमो हिरण्यवपुषे नमश्चम्पकवर्चसे ॥६१॥
नमः स्तुत्याय मन्त्राय सर्वभूतशरीरिणे ।
नमो होत्रे नमः शीलव्रतस्थायाऽतिरूपिणे ॥६२॥
नमो दीर्घाक्षिणे तुभ्यं सर्वकामप्रदायिने ।
नमश्चान्तरनेत्राय सर्वनेत्राय ते नमः ॥६३॥
भेदाऽभेदप्रभिन्नाय नमस्ते व्यतिरेकिणे ।
छायातपनरूपाय शान्तसत्त्वाय ते नमः ॥६४॥

यज्ञभागप्रियायैकमूर्तये ब्रह्मणे नमः ।
पञ्चालपुत्रीरक्षाय भृगुपुत्रीप्रवाहिने ॥६५॥
अनरण्यसुतेशाय नमो नारायणीशिने ।
अन्नदायाऽन्नपतये कोशात्मकाय ते नमः ॥६६॥
बालानुरूपगोत्रे च बाललीलाविलासिने ।
नमो बालाय वृद्धाय मञ्जुकेशाय ते नमः ॥६७॥
नमः षट्कर्मतुष्टाय सहस्राभरणाय च ।
धर्मार्थकाममोक्षाणामाश्रयाय च ते नमः ॥६८॥
नमोऽनन्तगुणैश्वर्यविभूत्याश्रयिणे नमः ।
मेघशोभाय चन्द्रार्कताराप्रभाय ते नमः ॥६९॥
त्वमन्नमन्नभोक्ता च पक्वभुक् पावनोऽनलः ।
वारि त्वं त्वं तथातृप्तिः सुखमानन्द ते नमः ॥७०॥
जरायुजाऽण्डजाश्चापि स्वेदोद्भिज्जास्त्वया कृताः ।
त्वमेव चावतारेश भूतग्रामश्चतुर्विधः ॥७१॥
स्रष्टा चराचरस्याऽस्य पाता हन्ता त्वमेव ह ।
त्वामाहुर्ब्रह्म विद्वांसः परं ब्रह्मविदां गतिः ॥७२॥
मनसः परमं ज्योतिर्ज्योतिस्त्वं ज्योतिषामपि ।
हंसो वृक्षो मधुकरः प्राहुस्त्वां ब्रह्मवादिनः ॥७३॥
यज्ञेष्टकृत् फलनरत्वं त्वामाहुर्मुनयस्तथा ।
पठ्यसे स्तुतिभिर्नित्यं वेदोपनिषदां गणैः ॥७४॥
नरा नार्यः स्थावरा जङ्गमास्तिर्यञ्च इत्यपि ।
त्वमेव विद्यसे कृष्णनारायण जगत्प्रभो ॥७५॥
त्वमेव मेघसंघाश्च विद्युतोऽशनिगर्जितम् ।
संवत्सरस्त्वमृतवो मासो मासार्धमेव च ॥७६॥
युगानिमेषाः काष्ठाश्च नक्षत्राणि ग्रहास्तथा ।
त्वं शरी त्वं गदी चक्री खड्गी वज्री शरासनी ॥७७॥
छेत्ता भेत्ता प्रहर्ताऽसि मन्ता नेता सनातनः ।
समुद्राः सरितः शैला वृक्षाः सरांसि भूस्तराः ॥७८॥
लतातृणौषधिवल्लीपशवो मृगपक्षिणः ।
पृथुकर्मगुणारम्भः कालः पुष्पफलोदयः ॥७९॥
मध्यं बीजं चाऽङ्कुरं च पत्रं काण्डं च ग्रन्थिका ।
नालं पुष्पं फलं चापि रसो गन्धस्त्वमेव च ॥८०॥
पिष्टं मिष्टं सदेष्टं च त्वमेव परमेश्वर ।
पवित्रं च पवित्राणां मंगलानां च मंगलम् ॥८१॥
उदयानामुदयाग्र्यं त्वमेव परमा गतिः ।
प्राणा निमेषा जृम्भश्च क्षुतं चाऽभ्याहतिस्तथा ॥८२॥
ब्रह्मकालयमाग्नीनां शास्ता बोधयिता भवान् ।
चतुर्युगश्चतुर्वेदश्चातुर्होत्रप्रवर्तकः ॥८३॥

चातुराश्रम्यनेता च चातुर्वर्ण्यकरस्तथा ।
प्रशिल्पी गणको माता सर्वशिल्पप्रवर्तकः ॥८४॥
स्वाहा स्वधा वषट्कारो नमस्कारः स्तुतिस्तथा ।
प्रार्थना प्रार्थनीयं च त्वमेव ते नमोनमः ॥८५॥
गूढव्रतो गुह्यतपास्तारको भूमिसन्धरः ।
धाता विधाता सन्धाता त्वमेव ते नमोनमः ॥८६॥
ब्रह्मा शंभुस्तथा विष्णुर्विराड् भूमा त्वमेव च ।
तपः सत्यं ब्रह्मचर्यमार्जवं त्वं प्रतोषणम् ॥८७॥
भूर्भुवः स्वं जीवसृष्टिरीशसृष्टिस्त्वमेव च ।
ब्रह्मसृष्टिः ऋतं दीक्षा दमनं त्वं जनार्दनः ॥८८॥
कान्तः प्रियः पतिः स्वामी नारायणस्त्वमेव च ।
बिन्दुर्नादो ध्वनिर्ब्रह्म विमर्शः स्फोट इत्यपि ॥८९॥
पश्यन्ती च परा मध्या विशिष्टा वाक् त्वमेव च ।
गौर्भूमिर्ब्राह्मभक्तश्च साधुः सती च किंकरी ॥९०॥
वश्यः सर्वं त्वमेवाऽऽस्से त्वां विना नास्ति नास्त्यपि ।
शशांकाऽनलशीतोष्णक्षुत्तृषाश्च जरामयाः ॥९१॥
आधयो व्याधयः शान्तिर्भैषजं त्वं जनार्दन ।
सोमपास्त्वं च माधुर्यं मरुत्पतिर्जगत्पतिः ॥९२॥
अमृताशी जगन्नाथाः कुंकुमेशस्त्वमेव च ।
अक्षतेशो गणेशश्च मुक्तेशस्त्वं परेश्वरः ॥९३॥
विषाग्निपाः सोमपाश्च क्षीरपा नवनीतपाः ।
आज्यपा मधुपाः सर्वभोक्ता त्वं च पितामहः ॥९४॥
हिरण्यरेताः पुरुषश्रेष्ठस्त्वमेव चैकलः ।
त्वं स्त्रीपुमान् त्वं तृतीयो भावद्वयविवर्जितः ॥९५॥
भावत्रयातिगश्चापि भावत्रये प्रवर्तसे ।
बालो युवा स्थविरश्च जीर्णदंष्ट्रोऽसि विश्वकृत् ॥९६॥
चन्द्रादित्यौ चक्षुषी ते जिह्वा ते च सरस्वती ।
अहोरात्रे निमिषोभे आत्मानस्ते गृहालयाः ॥९७॥
न ब्रह्मा न शिवो विष्णुः पौराणा ऋषयो न ते ।
माहात्म्यं वेदितुं शक्ता याथातथ्येन बालक ॥९८॥
पुंसामीशेश्वराणां मुक्तानां कोट्यर्बुदानि च ।
तिष्ठसे त्वं समावृत्य चान्तर्बहिस्त्वमेव सः ॥९९॥
महतस्तमसः पारेऽक्षरस्याऽपि परे सदा ।
परे धाम्नि परेशस्त्वं राजसे सोऽत्र मूर्तिमान् ॥१००॥
यं विनिद्रा जितप्राणाः सत्त्वस्था ब्रह्मवर्तिनः ।
परं पश्यन्ति युञ्जानास्तस्मै योगात्मने नमः ॥१०१॥
या या मूर्तयः सूक्ष्मास्ते शक्या दर्शयितुं न ताः ।
ताभ्यः सर्वाभ्य एवाऽत्र त्वद्रूपाभ्यो नमो नमः ॥१०२॥

भक्तानुकम्पी भगवान् भक्तेषु वर्तसे सदा ।
केशा मेघा यस्य नाड्यो नद्यः कुक्षौ महाब्धयः ॥१०३॥
शयानाय जले हैमे तपस्यते च ते नमः ।
येऽङ्गुष्ठमात्राः पुरुषाश्चिदः स्थावरजङ्गमाः ॥१०४॥
ये नदीषु समुद्रेषु पर्वतेषु गुहासु च ।
वृक्षमूलेषु गोष्ठेषु कान्तारगहनेषु च ॥१०५॥
चतुष्पथेषु रथ्यासु चत्वरेषु सभासु च ।
हस्त्यश्वरथशालासु जीर्णोद्यानालयेषु च ॥१०६॥
येऽपि पञ्चसु भूतेषु दिशासु विदिशासु च ।
चन्द्रे सूर्ये सत्यलोके वैकुण्ठाख्यचतुष्टये ॥१०७॥
रसातलगता ये च ये च तस्मात् परंगताः ।
तव भक्तास्तव दासाः किंकरास्तव केशव ॥१०८॥
दास्यः सत्यस्तव भक्ताः किंकर्यस्तव माधव ।
तमस्तेभ्यो नमस्ताभ्य उभाभ्यां च नमोऽच्युत ॥१०९॥
येषां न विद्यते संख्याः प्रमाणं रूपमेव च ।
असंख्यास्ते मुक्तगणा नमस्तेभ्योऽस्तु नित्यशः ॥११०॥
प्रसीद बालरूप त्वं स्वकं भावं प्रदर्शय ।
त्वयि नो हृदयान्यत्र भवन्तु सत्कथाफलम् ॥१११॥
इत्येवं राधिके ! तेन स्तुतः कृष्णनरायणः ।
कथारम्भे प्रसन्नः सन्नात्मनो दर्शनं ददौ ॥११२॥
दिव्यकोट्यर्कभापूर्णं रोमैकैकं तु यस्य वै ।
सर्वेऽवतारा यन्मूर्तौ सर्वधामानि यत्र च ॥११३॥
सर्वेश्वराः ऋषयश्च देवा मानवकोटयः ।
दैत्या ब्रह्माण्डसन्नाहा यद्रोम्ण्येव चरन्ति च ॥११४॥
कोटिमुक्ताः कोटिकान्ताः कोटिपाला महेश्वराः ।
यत्कुक्षौ भासमानाश्च सर्वतेजांसि यत्र च ॥११५॥
सर्वे वै प्रलया यत्र यत्र सर्वाश्च सृष्टयः ।
यत्र सर्वे आत्मवर्गा भासन्ते दिव्यदृष्टितः ॥११६॥
तादृशं परमं दिव्यं मूर्तं कैशोरशोभनम् ।
दर्शयामास भगवान् कृष्णनारायणः स्वयम् ॥११७॥
विहस्याऽऽभाष्य कुशलं दिव्यदृष्टिं च सन्ददौ ।
विलोक्य ऋषयः सर्वे तथाऽन्ये श्रवणे रताः ॥११८॥
लक्ष्मीनारायणसंहितायास्ते ददृशुः प्रभुम् ।
अदृष्टपूर्वं हृद्यं च दृष्ट्वा न्यधुर्हरिं हृदि ॥११९॥
एवं प्रदर्श्य च पुनः परिहारं चकार ह ।
यथा बालो वर्ततेऽत्र तथा बालोऽभवत्पुनः ॥१२०॥
तथा दृष्ट्वा कृतकृत्यान् मत्वा स्वान् मुनिपुङ्गवाः ।
आनन्दं परमं प्रापुः शश्वन्निर्वाणगा यथा ॥१२१॥
एवं साक्षात् संहितायाः पात्रं श्रीपरमेश्वरम् ।
साक्षात्कृत्य ततो नित्यं शृण्वन्त्येव कथामृतम् ॥१२२॥
एवं मासत्रयं जातं पारायणं परं शुभम् ।
कुंकुमवापिकाक्षेत्रे राधिके मोक्षदं तदा ॥१२३॥
कथान्ते फाल्गुनीं कृत्वाऽऽस्थाप्य तिर्थानि सर्वथा ।
स्वस्वनाम्ना ऋषयश्च वासं तत्रैव चक्रिरे ॥१२४॥
तदेतत् संहितातीर्थं कोटितीर्थं प्रगीयते ।
ऋषितीर्थं कथातीर्थं दिव्यतीर्थं तदेव च ॥१२५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मार्गशीर्षे ऊर्जव्रतर्षिकृतायालक्ष्मीनारायणसंहिताकथायाः श्रवणप्रसंगे प्रभोर्दिव्यदर्शनम्, ऋषीणां स्तवनानि, ऋषीणां निवासात्तीर्थानि चेतिनिरूपणनामा चत्वारिंशोऽध्यायः ॥ ४० ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके तस्य कृष्णनारायणस्य वै ।
कथां दिव्यां पावनीं च चमत्कारमयीं पराम् ॥ १ ॥
आसीद् राजा धार्मिकश्च भक्तः कन्थाधराऽभिधः ।
सौराष्ट्रे वै नैजराज्ये शासनं प्रचकार ह ॥ २ ॥
स हि राजा शंभुभक्तोऽभवत् स्थाणुप्रपूजकः ।
सिंहारण्ये वसन् कोटीनाराधिपः प्रतापवान् ॥ ३ ॥
शंभुं प्रसाद्य तपसा कालदण्डमवासवान् ।
दण्डो यत्र भवेत्तत्र याम्यपाशो न विद्यते ॥ ४ ॥
यमदूतस्तथा कालो दण्डं दृष्ट्वा निवर्तते ।
नित्यं सहस्रकमलैः पार्थिवं शंकरं नृपः ॥ ५ ॥
पूजयित्वा प्रगे चैकपादेन शतमालिकाः ।
'ओं नमः कालकालाय संकर्षणाय शंभवे ॥ ६ ॥
मृत्यवे याम्यवाराय निर्भयं पदमर्पय' ।
एवं जपति मन्त्रं स आवर्तयति नित्यशः ॥ ७ ॥
तत एकावर्तनेन जुहोत्यष्टोत्तरं शतम् ।
पराह्णे तु फलं शाकं पक्वं निर्बीजमेव सः ॥ ८ ॥
गृह्णाति देहयात्रार्थं रात्रौ भूशयनः सदा ।
सत्यपि यौवने भावे नारीं वाञ्छति नैव सः ॥ ९ ॥
इत्येवं वर्तमानस्य प्रतापिनस्तु भूभृतः ।
राज्ये चौर्यं भयं व्याधिः पारदार्यं न चाऽभवत् ॥१०॥
मद्यमांसाऽभक्ष्यवर्ज्यं हव्यं प्रजाऽनुसेवते ।
त्रयोदश्यां चोभयायां सोमतीर्थस्य सेवनम् ॥११॥

भवनाथस्य च तथा दर्शनं सेवनं शुभम् ।
अश्वपट्टसरसश्च स्नानं लोमशदर्शनम् ॥१२॥
यात्रां करोति चेत्येवं ततो गृहं प्रयाति सः ।
तीर्थयात्राजलं कोटीनारीयजनतासु सः ॥१३॥
प्रापयत्यैव च प्रजाकल्याणार्थं मुहुर्मुहुः ।
मासे मासे पूर्णिमायां प्रजाभ्यो मिष्टभोजनम् ॥१४॥
ददात्याबालवृद्धेभ्यः पशुपक्षिभ्य इत्यपि ।
मत्स्यकीटपतंगेभ्यो वृक्षेभ्यः सलिलं तथा ॥१५॥
एवं धर्मपरस्याऽस्य राज्यप्रजा च निर्भया ।
स्वयमन्यत्र तु गते भयं राज्ये न विद्यते ॥१६॥
अकालमरणं नास्ति नास्ति चेतिभयं तथा ।
एवं काले गते त्वस्य वाञ्छाऽभूत् पुष्करं प्रति ॥१७॥
तीर्थं कर्तुं ययौ चापि मासस्तत्र गतस्तदा ।
वसिष्ठं तत्र राजा चाऽप्रसादयत् सुसेवया ॥१८॥
चिरञ्जीवेति तेनोक्तं तथास्त्वित्याह वै नृपः ।
दीर्घायुष्कं परं लब्ध्वा श्रेयो लब्ध्वाऽप्यनन्तकम् ॥१९॥
तीर्थदानानि सन्दत्वा स्नात्वा सम्पूज्य वेधसम् ।
ततः सरस्वतीं स्नात्वा सिद्धान् सम्पूज्य भूपतिः ॥२०॥
अश्वपट्टसरः स्नात्वा शीघ्रं स्वगृहमाययौ ।
स्वप्ने स दृष्टवान् मार्गे विप्रपुत्रस्तु नीयते ॥२१॥
केनचित् कृष्णवर्णेन रक्षयामीति भूपतिः ।
विचार्य यावत् त्वरया धावत्येनं प्ररक्षितुम् ॥२२॥
तावन्निद्रा विलीना च किञ्चिन्नास्तीत्यलोकयत् ।
शंकितः स शीघ्रमेव राज्यं प्रति समाययौ ॥२३॥
ग्रामसीमाऽऽगते सर्वं स्वप्नं सत्यं व्यजायत ।
यतोऽस्य राज्ये विप्रस्य ग्रामपुरोहितस्य तु ॥२४॥
पुत्रो मृत्युंगतश्चायुषोऽन्ते पितरि जीवति ।
याम्यदूतैर्धृतो नीतो याम्यलोकं क्षणान्तरे ॥२५॥
तावद् राजा त्वाययौ वै यात्रां कृत्वाऽत्र तत्क्षणम् ।
रोदनं शोचनं ज्ञात्वा राजा दुःखमवाप ह ॥२६॥
उदन्तं सम्परिज्ञाय ज्ञात्वा मृत्युमृतं ततः ।
दण्डं च शंकरं नीत्वा समाश्वास्य च तं द्विजम् ॥२७॥
ययौ पृष्ठे मृतं पुत्रं विप्रं चानेतुमिष्टकृत् ।
दण्डं नीत्वा यत्र याति तत्र मार्गोऽस्य विद्यते ॥२८॥
पृथ्व्यां जलेऽनले वायौ चाम्बरे तमसि ग्रहे ।
चतुर्दशसु लोकेषु सदण्डस्य गतिर्यतः ॥२९॥
विना दण्डं तु नैवाऽस्य गतिः स्याद्भूतलं विना ।
शिवदण्डेन राजाऽसौ ययौ व्योम्ना यमालयम् ॥३०॥

निरुद्धो मानवदेहो यमदूतेन वै यदा ।
दण्डेन राज्ञा संस्पृष्टो याम्यो दूरं पपात ह ॥३१॥
विनिपत्य समुत्थाय भयव्याप्तो यमानुगः ।
दधाव यमराजानं जगाद स्वपराभवम् ॥३२॥
आयातोऽस्ति यमपूर्यां कश्चिन्मानवदेहवान् ।
सदण्डो वर्तते देव मया रुद्धोऽतिवेगतः ॥३३॥
तथापि नैवरुद्धोऽभूत् स मां पस्पर्श दण्डतः ।
तावत्पराजितश्चाहं यथा वज्रहतोऽभवम् ॥३४॥
पृथ्व्यां निपत्य चोत्थाय त्वायाम्यत्र यमेश्वर ।
निवेदयितुं तद्वृत्तं कोऽयं कस्माद्धि चाययौ ॥३५॥
न जानामि महाराज यथेष्टं तत्र चिन्तय ।
इत्युक्तो यमदूतेन धर्मराजस्तदाऽनुगम् ॥३६॥
मृत्युनामानमाहूय विवासयितुं चादिशत् ।
मृत्युर्गत्वा करेणैनं नृपं दधार वेगतः ॥३७॥
याहीत्युवाच राजानं न चेन्मृत्युस्तवाऽत्र वै ।
श्रुत्वैवं नृपतिर्दण्डं योजयामास मृत्यवे ॥३८॥
मृत्युः पपात भूभागे समुप्लुत्य ययौ द्रुतम् ।
बलं निवेदयामास यमराजाय मानवम् ॥३९॥
ततो यमो महाकालं प्रेषयामास तत्क्षणम् ।
कोऽयं कस्मात् समायातो ममान्तिकं समानय ॥४०॥
इत्युक्तश्च स्वयं कालस्तस्याऽन्तिकं समाययौ ।
नत्वोवाच भवान् कोऽत्र धर्मराजो जिज्ञासति ॥४१॥
नृपः प्राह च सौराष्ट्रे कोटीनारस्य भूपतिः ।
अस्म्यहं तु समायातो विप्रबालं प्रवीक्षितुम् ॥४२॥
स तु क्वाऽऽस्ते कथं चात्राऽऽनीतोऽस्ति यमचारिणा ।
इति जिज्ञासितुं त्वत्र समायातोऽस्मि मानद ॥४३॥
कालः प्राह समागच्छ यमराजं निवेदय ।
स ते दास्यति प्रत्युक्तिं नाऽहं योग्योऽस्मि तत्र वै ॥४४॥
इत्युक्त्वा सह नीत्वा च यमराजं प्रति नृपम् ।
काल आवेदयामास यमराजोऽप्यमानयत् ॥४५॥
पप्रच्छ स्वागतं कृत्वा किमागमनकारणम् ।
राजा ननाम धर्मं च प्रोवाच विप्रबालकम् ॥४६॥
मार्गयितुं समायातः क्वास्ते स द्विजबालकः ।
पिता तस्याऽतिकरुणं रौति पुत्रस्य कारणात् ॥४७॥
एक एवाऽस्य पुत्रोऽस्ति मृत्युस्तस्याऽभवत्तथा ।
तच्छोकं त्वपनेतुं च मयोक्तं भूसुराय वै ॥४८॥
तस्य बालं पुनर्नीत्वा दातुमिच्छामि धर्मराट् ।
तच्छवं रक्षितं चास्ते यावच्चाहं न यामि तम् ॥४९॥

तस्माद् देहि द्विजपुत्रं याञ्चां मे प्रतिप्रालय ।
यमः प्राह च तत्रस्थं दूतं यमं च सत्वरम् ॥५०॥
चित्रगुप्तं सलेखं च ब्राह्मणार्थे समाह्वय ।
आकारितश्चित्रगुप्तः सलेखस्तत्र चाययौ ॥५१॥
पश्याऽस्य विप्रबालस्य कियदायुर्भवेदिति ।
चित्रगुप्तः पूर्णमायुः समाप्तं स मृतो यतः ॥५२॥
विप्रदेहेऽस्य नास्त्येव भोगायुर्वै मनागपि ।
यमराजस्तु तच्छ्रुत्वा राजानं चाभ्यवेदयत् ॥५३॥
नास्त्यायुस्तस्य तद्देहे स्थातुं भोक्तुं ततो नृप ।
मृतोऽयं लप्स्यसे नैव कर्मन्यायोऽत्र विद्यते ॥५४॥
यत्कृतं येन वै यादृक् यं यस्मै यस्य वै यतः ।
यत्र यदर्थं तत्सर्वं तथैव स्यान्न चान्यथा ॥५५॥
राजा प्राहाऽस्य बालस्य किं कर्म पापकृद्धयभूत् ।
येनाऽस्य प्राणवाहश्च यमदूतो ह्यजायत ॥५६॥
चित्रगुप्तस्तदा प्राह यमराजानुदेशतः ।
विप्रश्चायं पूजकश्च देवस्याऽऽसीन्निरन्तरम् ॥५७॥
मन्दिरे वासुदेवस्य शैत्ये स्नानं विना ह्ययम् ।
देवमुत्थापयामास तेन पापेन चास्य वै ॥५८॥
यमलोको निश्चितोऽस्ति दण्डं विना न शुद्ध्यति ।
पुण्यं नास्ति मानवार्थे आयुर्नास्ति तथोत्तरम् ॥५९॥
कथं नेष्यसि राजेन्द्र विना कर्म द्विजार्भकम् ।
राजा प्राह ददाम्यस्य त्वायुर्मे नूतनं, मया ॥६०॥
वसिष्ठस्याऽऽशिषा लब्धा पुष्करे चिरजीविता ।
तन्मध्यतोऽयुतवर्षं ददाम्यस्य तु मानवम् ॥६१॥
इत्युक्त्वा सलिलं हस्ताद्विसृज्य जीवितं ददौ ।
चित्रगुप्तो लिलेखाऽस्य वर्षाऽयुतं सुजीवनम् ॥६२॥
धर्मराजौ ददौ बालं चायुताब्दप्रजीवनम् ।
ततः पप्रच्छ राजानं बलं लब्धं कुतस्त्वया ॥६३॥
यदत्र नरदेहेन समायातो विहायसा ।
यमो मृत्युस्तथा कालोऽप्रधृष्यो धर्षितस्त्वया ॥६४॥
वद केन प्रतापेन प्राप्तमैश्वर्यमुत्तमम् ।
श्रुत्वा राजा तदा प्राह शंकरस्य प्रतापतः ॥६५॥
प्राप्तं बलं धर्मराज येनाऽहं चाऽत्र वीक्षितः ।
बालोऽपि च मया प्राप्तो महतां कृपया त्विदम् ॥६६॥
धर्मराजस्तदा प्राह यष्टिं मे देहि भूपते ।
राजा प्राहाऽत्र वै यष्ट्यां सर्वं तत्त्वं ममाऽस्ति हि ॥६७॥
यष्टिलोपे न मे चास्ति गतिर्वैहायसी वृष ।
तस्माद् यष्टिं न दास्यामि यष्टिः सांकर्षिणी त्वियम् ॥६८॥

कालसंहारिणी त्वास्ते तदाऽन्यस्य तु का कथा ।
त्वयि चेद् योजये यष्टिं तव नाशो भवेद् ध्रुवम् ॥६९॥
इत्युक्त्वा धर्मराजे तां यष्टिं योजयितुं नृपः ।
हस्तं स्वं लम्बयामास तावत् क्षोभं ययौ वृषः ॥७०॥
क्षुब्धं तस्यासनं चापि धर्मो ननाम तं नृपम् ।
बलं देवबलं दीर्घं सत्ताबलं न वै बलम् ॥७१॥
मेने तदा धर्मराजस्ततस्त्वसान्त्वयत् नृपम् ।
मा मैवं कुरु राजेन्द्र मान्योऽसि देवदर्शितः ॥७२॥
कालकालस्य कृपया सर्वे ते वर्तते करे ।
तस्माद् ददामि राजेन्द्र कन्यां मे ह्रड्डुकायिनीम् ॥७३॥
यौवनोद्भिन्नसर्वांगां रमणीं देहसुन्दरीम् ।
त्वां दृष्ट्वा चेच्छमानां संगृहाणैनां तव प्रियाम् ॥७४॥
इत्युक्त्वा च बलं ज्ञात्वा प्रददौ ह्रड्डुकायिनीम् ।
कन्यां पत्नीस्वरूपां तां तथा विप्रार्भकं नृपः ॥७५॥
नीत्वा वैहायसा धर्माऽर्पितेन वाहनेन वै ।
समाययौ स सौराष्ट्रे कोटीनाराख्यपत्तनम् ॥७६॥
विमानमम्बरात्तस्य द्विजस्यैव गृहान्तिकम् ।
अवातारयच्छनकैः सूर्यतुल्यं समृद्धिमत् ॥७७॥
दिव्यनारीयुतं दिव्योपस्करणसुशोभितम् ।
अनेकैश्वर्यसिद्ध्यादिवासितं यमनिर्मयम् ॥७८॥
दृष्ट्वा लोकाः सतीं पत्नीं तथा विप्रस्य बालकम् ।
नृपं प्रति हर्षनादान् जयनादान् व्यधुर्मुदा ॥७९॥
राजा पुत्रं ददौ तस्मै विप्राय प्रणनाम च ।
स वै नाम्नाऽभवत्तत्र वृषपर्वा ऋषिस्तदा ॥८०॥
वृषपर्वा समुत्तस्थौ मृते देहे विवेश ह ।
विप्रः प्रजाः प्रसन्नाश्चाऽभवँस्तस्याऽऽशिषो ददुः ॥८१॥
विप्रपुत्रः समुत्तस्थौ नेमे वृद्धान् पुनः पुनः ।
पितरौ नृपतिं चापि राजा यज्ञं चकार ह ॥८२॥
यमपुत्रीं निजराज्ञीं कृत्वाऽग्रे ह्रड्डुकायिनीम् ।
होमं दानं दक्षिणां च भोजनानि ददौ नृपः ॥८३॥
यद्यद् दत्तं च तद् दृष्ट्वा प्रजज्वालाऽन्तरे नृपी ।
तामसी गर्वमन्या च स्वार्थमात्रपरायणा ॥८४॥
स्ववर्चस्वाऽतिलुब्धा परोपकारविरोधिनी ।
दाने प्रभोजने होमे राजान ह्रड्डुकायिनी ॥८५॥
पुनः पुनः समुवाच मा विधेहि व्ययं नृप ।
त्वं ब्रह्म परमं चास्से त्वं वै नारायणः स्वयम् ॥८६॥
त्वं विष्णुस्त्वं शिवो ब्रह्मा त्वं प्रजापतिरस्यपि ।
त्वं भोक्ता त्वं विधाता च त्वमग्निस्त्वं दिवस्पतिः ॥८७॥

त्वं पात्रं त्वं परः शास्ता त्वं यज्ञस्त्वं परायणम् ।
त्वं स्वाहेशः स्वधेशश्च त्वं वषट्कारभूमिका ॥८८॥
त्वं होता त्वं यजमानः कोऽन्यो देवस्त्वदुत्तमः ।
तस्मात्सर्वं परं तत्त्वं त्वमेव विद्यसे प्रभो ॥८९॥
प्रभुं प्रत्यक्षमेवाऽत्र त्वादृशं च विमानगम् ।
यमराजस्य च पुत्र्याः पतिमैश्वर्यवर्धितम् ॥९०॥
परित्यज्य च को लोके यजनीयो महेश्वरः ।
तस्मात्त्वं त्वां परं तत्त्वं विजानीहि मखेश्वरम् ॥९१॥
कालं हन्तुं तथा हन्तुं मृत्युं त्वं शक्तिमानसि ।
मृतं जीवयितुं त्वं च समर्थो विद्यसे प्रभुः ॥९२॥
नेन्द्रो वरुणः पवनः कुबेरोऽग्निश्च निर्ऋतिः ।
दिक्पाला लोकपाला वा त्वादृशाः कान्त सन्ति न ॥९३॥
सर्वे ते संवशे लोके ष्वोपास्से चेतरे तु कम् ।
त्यज यज्ञं तथा दानं त्यजाऽऽस्थां पारलौकिकीम् ॥९४॥
भज स्वं च सुखं विद्धि मया दत्तं हि सेवया ।
पुण्यं निजात्मसेवा च पापं निजात्मपीडनम् ॥९५॥
मिष्टं स्वकान्तावचनं विद्ध्यन्यत् कटु नाशकृत् ।
एवं ज्ञात्वा परं राज्यं कुरु स्वमानसंभृतम् ॥९६॥
एवं नित्यं राधिके सा वक्ति तं ह्वडुकायिनी ।
सोऽपि तस्याः सङ्गदोषाच्छनैर्नास्तिकतां गतः ॥९७॥
शयने भोजने याने स्पर्शे श्वासग्रहे तथा ।
विलोकने च करणे पार्श्वस्ते क्रमते गुणः ॥९८॥
सहवासे च वार्तायामध्ययने च चूम्बने ।
शिष्टभक्ष्ये मनुष्याणां पापं संक्रमते जने ॥९९॥
उपरि वायुग्रहणे धृतवस्त्रस्य धारणे ।
प्रदत्तजलपाने च व्रजेत् तद्गुणितां मतिः ॥१००॥
क्षुधायोगात् क्रूरतां च शत्रुयोगाद् विनाशिताम् ।
कान्तायोगाद् भोग्यतां च यायाद् बुद्धिर्विवर्तिनी ॥१०१॥
साधुयोगात् सत्त्वभावं शास्तृयोगात्तु दीनताम् ।
भृत्ययोगात् स्वामिभावं व्रजत्येव मतिः सदा ॥१०२॥
एवं वै राधिके राज्ञो मतिः सम्पर्यवर्तत ।
स्वार्थमात्रपरा जाता यथाऽऽह ह्वडुकायिनी ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितातां द्वितीये त्रेतासन्ताने कंथाधरनृपतेः शंकरभक्त्या काल्यष्टिप्राप्तिः, ततः पुष्करे सेवया वशिष्ठाशीर्वादेन चिरजीविता, विप्रपुत्रस्य यमपुरगतस्याऽऽनयनम्, स्वायुर्दानम्, यमराजपुत्र्या ह्वडुकायिन्या विवाहः, तत्प्रसंगेन नास्तिकता चेतिनिरूपणनामैकचत्वारिंशोऽध्यायः ॥ ४१ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! राजा कन्थाधरो हि नित्यशः ।
नारीयोगादभवच्च नास्तिकः स्वार्थतत्परः ॥ १ ॥
घोषयामास नगरे दुरात्मा वेदनिन्दकः ।
न दातव्यं न यष्टव्यं न होतव्यं कदाचन ॥ २ ॥
अहमेकोऽत्र वै वन्द्यः पूज्योऽहं भवतां सदा ।
मया वै पालिता यूयं निवसध्वं प्रजाः सुखे ॥ ३ ॥
तन्मत्तोऽन्यो न देवोऽस्ति युष्माकं यत्परायणम् ।
मह्यं देयं च हवनं हव्यं दानं च दक्षिणा ॥ ४ ॥
राजाऽहं लोकपालोऽहं प्रजापालोऽहमेव च ।
दाता धाता विधाता च प्रजानामहमेव च ॥ ५ ॥
प्राणदाता सस्यदाता धन्यदाताऽहमेव च ।
सुखदो दण्डदश्चापि रक्षाप्रदोऽहमेव च ॥ ६ ॥
मन्मुखं वह्निरेवाऽस्ति देयं तत्रैव नाऽनले ।
मत्करौ पात्रमूर्धन्यौ दानं तत्रैव युज्यते ॥ ७ ॥
करो दानं न तु भिक्षा करो देयो हि नीतिजः ।
वस्त्राणि पशवो गावो महिष्योऽजाऽविकादिकम् ॥ ८ ॥
धनं सर्वं प्रदेयं मे यत्पुनश्च प्रजाकृते ।
दुर्भिक्षादौ प्रयुज्येत प्रजानां सुखहेतवे ॥ ९ ॥
एतच्छ्रुत्वा तु वचनं ब्राह्मणा ब्रह्मदर्शिनः ।
प्रजावृद्धाश्च विद्वांसो वेदनेत्रा विदुत्तमाः ॥१०॥
परस्परं सुसम्भूय राजशिक्षार्थमाययुः ।
प्रणिपत्य च राजानं सत्कृता वाक्यमब्रुवन् ॥११॥
श्रुतिः प्रमाणं धर्मस्य ततो यज्ञः प्रतिष्ठितः ।
यज्ञैर्विना म्रियन्ते न देवाः सस्यप्रदा दिवि ॥१२॥
अप्रीतेषु च देवेषु दुर्भिक्षं सम्प्रजायते ।
प्रजानाशो भवेद् राजन् देशविप्लव इत्यपि ॥१३॥
तस्माद् राजन् भूतशान्तिर्ग्रहशान्तिस्तथा सदा ।
देवतृप्तिः पितृतृप्तिर्विधातव्या महाध्वरैः ॥१४॥
यज्ञो नैव निरोद्धव्यः श्रुतिमूलो यतो मखः ।
वह्निमुखाः सदा देवास्तर्पणीयाः सुखप्रदाः ॥१५॥
इत्युक्तोऽपि नृपः कन्थाधरोऽमन्यत नैव च ।
वेदान् विनिन्द बहुधा प्रतारणपरा इति ॥१६॥
विप्राः स्वार्थपरा धूर्तकल्पिता वेदराशयः ।
द्विजा मिष्टान्नलुब्धाश्च वह्निमुद्दिश्य देवताः ॥१७॥
किंचित्प्रक्षिप्य वह्नौ च स्वयं मिष्टानि भुंजते ।
दक्षिणाधनपात्राणि गोवाजिकरिणः स्वयम् ॥१८॥

गृह्णन्ति तन्निमित्तेन तस्मात्स्वार्थपरा हि ते।
मूर्तिस्थो नैव देवोऽस्ति न भुंक्ते नाऽस्य रोचते॥१९॥
विप्रो देवस्तु प्रत्यक्षः सर्वं यदस्य रोचते।
देवं निमित्तमुद्भाव्य मिष्टान्नं मिष्टवारि च॥२०॥
आभूषणं पुष्पमालां भुंक्ते गन्धं च भूसुरः।
गोदानं दुग्धपानं च शय्यादानं गृहार्पणम्॥२१॥
वाटिका देवतार्थे या भुंक्ते सर्वं च भूसुरः।
यानं पात्राणि रम्याणि छत्रं चामरवाहनम्॥२२॥
मृद्वास्तरणं भोग्यानि भुंक्ते सर्वं तु भूसुरः।
रसान् फलानि पक्वान्नान्युत्तमानि च॥२३॥
दासान् दासीश्च भृत्यांश्चोपभुंक्ते पूजको द्विजः।
तस्मात् स्वार्थपरा विप्रा मखमुद्दिश्य भुञ्जते॥२४॥
अतो नैव हि यष्टव्यं दातव्यं नैव नैव च।
इत्याज्ञा ढुङ्कायिन्या राज्ञ्या मे वर्तते दृढा॥२५॥
उल्लङ्घ्यैतां कामकारो मद्दण्डभाग्भविष्यति
इत्येवं डिण्डिमा राज्ञा राष्ट्रे सर्वत्र कारिता॥२६॥
तत आरभ्य देवानां पूजा मखा न चाऽभवन्।
दुर्भिक्षं चाऽभवत्तेन प्रजाश्च दुःखपीडिताः॥२७॥
प्रसह्य प्रबला द्रव्यं निर्बलानां हरन्ति च।
राजा च विषयासक्तो रक्षाकार्यं करोति न॥२८॥
कालवेगात् तदा राष्ट्रं विपरीतमभूत् खलु।
दण्डः सिद्धिप्रदः शंभोस्त्यक्त्वा भूपं तिरोऽभवत्॥२९॥
तदा राजा शुशोचाऽति मम नष्टं हि जीवनम्।
ऐश्वर्यं विगतं चापि देवानामवमाननात्॥३०॥
प्रजा रुष्टाश्च धान्यार्थं रुरुधुर्भूभृदङ्गणम्।
धान्यं गृहीत्वा प्रययुस्ततो द्रव्यं गवादिकम्॥३१॥
राज्यसमृद्धिं प्रजहुश्च प्रजाश्चातीव निर्धनाः।
अथ कन्थाधरस्तस्य पत्नी च ढुङ्कायिनी॥३२॥
उभौ भयात् प्रययतुररण्यं चातिदुःखितौ।
तयोश्चासीत् कुमारस्तु वर्षमात्रोऽतिकोमलः॥३३॥
ब्राह्मणास्तं प्रजहुश्च रक्षणार्थं निजालयम्।
विमानं दिव्यदण्डश्च दिव्योपकरणानि च॥३४॥
विगतानि निजं स्थानं राज्यं शून्यमभूत्तदा।
पुण्यपुञ्जे वर्धिते तु वर्धन्ते वै विभूतयः॥३५॥
पुण्यनाशे विनश्यन्ति देवानामस्य का कथा।
राधिके स नृपोऽरण्ये कालधर्ममुपागतः॥३६॥
अन्नं जलं परित्यज्य मृताऽपि ढुङ्कायिनी।
वार्धेस्तीरे म्लेच्छजन्माऽवापतुस्तौ च नास्तिकौ॥३७॥

निकटे तौ भाग्ययोगादुत्पन्नौ दुःखभागिनौ।
कुमारो द्वादशवर्षोऽभवद् रणंगमाऽभिधः॥३८॥
सोपवीतो विप्रवाक्यैर्ज्ञात्वा पितृविचेष्टितम्।
असद्गतिं वने चापि चिन्तयामास वै मुहुः॥३९॥
विद्याभ्यासं विधायैव राज्यभारवहोऽभवत्।
तं योग्यं च परं मत्वा धर्मकार्यपरायणम्॥४०॥
अभ्यषिञ्चन् ब्राह्मणास्तं राजानं भूमिपालकम्।
ततः स रञ्जयामास प्रजा धर्मेण पालयन्॥४१॥
यज्ञं चकार धर्मात्मा देवपूजामवर्तयत्।
ततो ब्राह्मणमध्यस्थो जगाद प्रणिपत्य तान्॥४२॥
पिता मम तथा माता यज्ञविच्छेदकारकौ।
मृतौ वने क्रिया तयोः कथं कार्या मया द्विजाः॥४३॥
आवेदयत इत्येवं ब्राह्मणानां च सन्निधौ।
तेजसा भासमानश्च स्वयंप्रकाशनामकः॥४४॥
अनादिश्रीकृष्णनारायणशिष्यो विहायसा।
सोमक्षेत्रं प्रयास्यन् वै कोटीनारमवातरत्॥४५॥
विप्रान् विलोक्य सहसा तान्प्रत्यभ्याजगाम ह।
तस्मै ते त्वासनं दत्वा पप्रच्छुः प्रणिपत्य च॥४६॥
धन्या वयं समये च प्राप्ता महर्षिदर्शनम्।
लोकानां दुःखनाशार्थं श्रेयोऽर्थं चरणं तव॥४७॥
भगवन् सर्वलोकस्य जानासि त्वं शुभाशुभम्।
साक्षादनादिकृष्णस्य शिष्योऽसि हृदयंगमः॥४८॥
पिताऽस्य राज्ञो दुष्टात्मा देवब्राह्मणनिन्दकः।
स्वधर्मरहितः पत्निसहितोऽरण्यमाश्रितः॥४९॥
वने मृत्युं गतो भाति क्वास्ते वा पापकर्मणा।
कथं तस्य भवेन्मुक्तिर्वद बालोऽस्य पृच्छति॥५०॥
स्वयं प्रकाशो दिव्यात्मा ज्ञात्वा दिव्येन चक्षुषा।
कुंकुमवापिकास्थं श्रीकृष्णं स्मृत्वाऽब्रवीदिदम्॥५१॥
पश्चिमाऽब्धितटे चास्ते राजा राज्ञीयुतः खलु।
म्लेच्छमध्ये समुत्पन्नः क्षयकुष्ठसमन्वितः॥५२॥
तस्योद्धारश्च कर्तव्यः पुत्रेणाऽनेन सर्वथा।
पुत्रः स कथ्यते लोके यः पितॄंस्त्रायते भयात्॥५३॥
गच्छतु तत्र पुत्रोऽयं म्लेच्छं नीत्वा सभार्यकम्।
अश्वपट्टसरस्तीर्थे कृष्णनारायणाश्रिते॥५४॥
तस्य देहं तीर्थजले करोतु निर्मलं ततः।
निष्पापः सप्रियो मुक्तिं प्रयास्यति न संशयः॥५५॥
स्वयंप्रकाशवचनं श्रुत्वा विप्रा प्रजाजनाः।
रणंगमं कुमारं तं प्राहुर्याहीति तं प्रति॥५६॥

कुमारः स च विप्रैश्च परिमेयपुरःसरैः ।
सहितः प्रययौ चाब्धितटं यत्र पिता स्थितः ॥५७॥
स गत्वा पश्चिमं स्थानं म्लेच्छाश्रयं द्रुमान्वितम् ।
मकरालयनामाढ्यं मार्गयामास किंकरैः ॥५८॥
ददृशुः किंकरास्तं च कुष्ठिनं क्षयरोगिणम् ।
ददृशुस्तां हुडुकिनीं सकुष्ठां क्षयरोगिणीम् ॥५९॥
उभौ जातिस्मरौ चास्तां प्रतीक्षमाणौ पुत्रकम् ।
उद्धारकं चागतं संश्रुत्वाऽतिमुदितौ तदा ॥६०॥
म्लेच्छो म्लेच्छी सोत्सुकौ च किंकरैः सह सत्वरम् ।
आययतुर्यत्र चास्ते कुमारस्तु रणंगमः ॥६१॥
रुरुदतुश्च तं वीक्ष्योद्धारं प्रति पुनः पुनः ।
प्रार्थयामासतुस्तत्र तस्थतुस्तस्य सन्निधौ ॥६२॥
पुत्रस्तौ कुष्ठिनौ वीक्ष्य तथा क्षयसमन्वितौ ।
स्वयं शोकेन महता सन्तप्तो वाक्यमब्रवीत् ॥६३॥
आज्ञां पित्रोस्तु युवयोः समादाय नयाम्यहम् ।
अश्वपट्टसरस्तीर्थे करिष्यामि निरामयौ ॥६४॥
अथाऽनयोः पितृवर्गे गत्वा राजाऽब्रवीदिदम् ।
हा म्लेच्छा नौमि वश्चात्र कुष्ठिनौ द्वाविमौ जनौ ॥६५॥
चिकित्सार्थं क्षयस्यापि स्वगृहं च नयाम्यहम् ।
तत्राऽहमेतौ निरुजौ करिष्ये, चेद् भवन्मतम् ॥६६॥
तथेति सर्वतो म्लेच्छाः कुमारं तं दयापरम् ।
ऊचुः प्रणतसर्वांगा यथा जानासि तत् कुरु ॥६७॥
तत आनीय पुरुषान् शिबिकावाहनान्वितान् ।
द्वौ पूर्वपितरौ राजा शिबिकायां न्यषादयत् ॥६८॥
राजा चानुचराश्चापि विप्राश्च प्रातरेव ह ।
प्रययुः सत्वरं सायं चाश्वपट्टसरो ययुः ॥६९॥
ऋषिः स्वयंप्रकाशोऽपि चाश्वपट्टाश्रमं ययौ ।
नृपाद्यास्तु निजं स्थानं विदधुर्वटसन्निधौ ॥७०॥
पश्चिमे तु तटे चास्य सरसो वायुदिग्भुवि ।
रात्रौ सर्वे तीर्थभूमौ चक्रुर्विश्रान्तिमुत्तमाम् ॥७१॥
राजा विप्राश्च तौ प्रातः स्नापयितुं सरोवरे ।
समुद्यतास्तदा वायुरन्तरीक्षेऽब्रवीदिदम् ॥७२॥
मा राजन् साहसं कार्षीस्तीर्थं रक्ष प्रयत्नतः ।
इमौ पापेन घोरेण सर्वविधेन वेष्टितौ ॥७३॥
वेदनिन्दाकरौ देवद्रोहिणौ यज्ञनाशकौ ।
धर्मनाशकरौ पापौ पापान्तो नैव विद्यते ॥७४॥
पाते सरस्यनयोस्तु सरः शुष्कं भविष्यति ।
इमौ स्नातौ महत्तीर्थं नाशयिष्यत उल्बणौ ॥७५॥
तस्मान्नैतौ सरस्तीरे जले समवगाहय ।
एतद् व्योमवचः श्रुत्वा दुःखेन महताऽन्वितः ॥७६॥
उवाच शोकसन्तप्तो व्योमवाणीं प्रति प्रभो ! ।
यद्येतौ घोरपापिष्ठौ स्नानार्हौ नैव नैव च ॥७७॥
प्रायश्चित्तं करिष्येऽहं तयोरर्थे वद प्रभो ।
ततो वायुश्च देवाश्च तीर्थान्यपि समन्ततः ॥७८॥
अभिलक्ष्य च राजानं सर्वे वचनमब्रुवन् ।
स्नात्वा स्नात्वा च तीर्थेषु अश्वसरःस्थितेषु च ॥७९॥
मुहुस्त्वमभिषिञ्चस्व तीर्थकलशवारिभिः ।
आगसां लुम्पनं यावत् तयोः स्यात् तावदेव ह ॥८०॥
स्वार्थपोषयितुर्देवदूषयितुर्जनस्य वै ।
सकृत् स्नानेन शुद्धिर्न जायते कुत्रचित्क्वचित् ॥८१॥
तस्मादेतौ समुद्दिश्य स्नात्वा तीर्थेषु भक्तितः ।
अभिषिञ्चस्व तोयेन मुहुः पूतौ भविष्यतः ॥८२॥
इत्येवं वचनं श्रुत्वा कृत्वा तत्राश्रमं ततः ।
तीर्थे तीर्थे मुहुः स्नात्वा समानीय घटे जलम् ॥८३॥
दिने दिने च तीर्थेषु कृत्वा चाप्लवनं नृपः ।
अभ्यषिञ्चत् स्वपितरौ तीर्थतोयेन नित्यशः ॥८४॥
एवं तीर्थजलैः सर्वैरभिषिक्तौ पुनः पुनः ।
अश्वतीर्थस्य माहात्म्यात् तौ पुत्रेण च पावितौ ॥८५॥
निष्पापौ तु यदा जातौ तीर्थान्याहुस्तदा नृपम् ।
एतौ पवित्रौ परमौ सरसि चावगाहय ॥८६॥
इत्युक्तो रणगो राजा वैशाखे तावगाहयत् ।
नियतौ तत्क्षणाज्जातौ दिव्यदेहसमन्वितौ ॥८७॥
म्लेच्छता लयमापन्ना दिव्यप्रभा प्रवर्धिता ।
कन्थाधरो विमानस्थो सस्त्रीको देवताऽभवत् ॥८८॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
तुष्टाव परया प्रीत्या विमानस्थोऽतिहर्षितः ॥८९॥
परब्रह्म परोद्धारकृपानुग्रहविग्रह ।
तव शिष्येण ऋषिणा तारितौ पापिनौ प्रभो ॥९०॥
पुत्रेण तारितौ चापि त्वयाऽपि तारितौ हरे ।
तीर्थैश्च तारितौ दुष्टौ परोपकृतिशालिभिः ॥९१॥
विप्रैश्च तारितौ घोरात्तमसोऽज्ञानवैभवात् ।
नारकौ तारितौ कृष्णनारायण तवाऽऽश्रयात् ॥९२॥
परेश्वराय हृत्स्थाय विप्रस्थाय च ते नमः ।
स्वयंप्रकाशरूपाय तीर्थात्मकाय ते नमः ॥९३॥
नमः शरण्यदेवाय पापिप्राणहिताय च ।
श्रितमोक्षाय बालाय बालकृष्णाय ते नमः ॥९४॥

त्वत्प्रतापात् तरन्त्येव यक्षराक्षसपन्नगाः ।
दैत्याश्च दानवा दुष्टा आसुरास्तामसास्तथा ॥९५॥
मायिका वासनायुक्ता गर्विष्ठाश्चाभिमानिनः ।
व्यवायिनः पिशितादाः स्तेना आसवपायिनः ॥९६॥
वर्णसंकरकाराश्च गोस्त्रीहत्याकरास्तथा ।
त्वत्प्रतापात्तरन्त्येव कृपानुग्रहशेवधेः ॥९७॥
आवां च तारितौ यामस्तव धामाऽमृतं प्रभो ।
इत्युक्त्वा प्रणिपत्यैतौ पुत्र स्वस्ति तवाऽस्तु च ॥९८॥
दत्वाऽऽशिषो ययतुश्च लोमशस्याऽऽश्रमं प्रति ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥९९॥
इतिमन्त्रं लोमशाच्च गृहीत्वा तुलसीस्रजम् ।
परमौ वैष्णवौ भूत्वा ययतुर्वैष्णवं पदम् ॥१००॥
आश्चर्यं परमं प्रापास्तैर्थिकाश्च कुटुम्बिनः ।
यदत्र स्नानमात्रेण मुक्तिर्जाता हि शाश्वती ॥१०१॥
अनादिश्रीकृष्णनारायणस्येयं दया परा ।
राधिके प्रबलेच्छा च करुणा प्रबला हरेः ॥१०२॥
यत्र मुक्तावभवतां कन्थाध्रो हड्डुकायिनी ।
कन्थाध्रं तत्परं तीर्थं ख्यातिमापद्धरातले ॥१०३॥
रूपद्वयं दधाराऽथ देवी सा हड्डुकायिनी ।
छायारूपा ययौ नैजं पितरं यमराजकम् ॥१०४॥
यमराजाऽऽज्ञया सा चाऽभवत् हिक्कास्वरूपिणी ।
सर्वप्रजासु नियतावासं चकार योगिनी ॥१०५॥
द्वितीयेन स्वरूपेण दिव्या हृच्छायिनी सती ।
मुक्तिमार्गं गता दिव्यपतिना साकमेव सा ॥१०६॥
मुक्तिभावं गता साऽपि पितृमार्गानुगामिनी ।
हिक्कारूपा वासनया छायारूपा बभूव ह ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कन्थाधरस्य हड्डुकायिनीपत्नीयोगेन नास्तिक्यं, वेदकर्मादिनिरोधेनैश्वर्यनाशे वने मरणं म्लेच्छजन्म, पुत्रेण रणंगमेनाऽश्वपट्टसरस्तीर्थे कृतोद्धारश्चेतिनिरूपणनामा द्वाचत्वारिंशोऽध्यायः ॥ ४२ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके भक्तकथां परमपावनीम् ।
ततोऽयं नृपतिः रणंगमस्तीर्थेऽत्र नित्यशः ॥ १ ॥
चकार विधिवत्पूर्वदैहिकं श्राद्धतर्पणम् ।
भोजयामास विप्रांश्च साधून् साध्वीश्च कन्यकाः ॥ २ ॥
बालान् ऋषींश्च देवाँश्च भिक्षुकान् किंकराँस्तथा ।
ददौ दानानि बहुधा स्वर्णरूप्याणि भावतः ॥ ३ ॥
जग्राह लोमशान्मन्त्रं वैष्णवं परमं द्रुतम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥ ४ ॥
व्रतं चकार विधिवत् तीर्थविधिं चकार ह ।
जग्राह तुलसीमालां प्रतिमां पारमेश्वरीम् ॥ ५ ॥
भेजे कृष्णं बालकृष्णं लोमशस्याऽऽश्रमे ततः ।
उवास परमप्रीत्या विप्रभृत्यादिभिः सह ॥ ६ ॥
समागमं च साधूनां करोत्येव दिवानिशम् ।
संस्मृत्य पूर्वजाँस्तत्र यज्ञं कर्तुमियेष च ॥ ७ ॥

**श्रीराधिकोवाच—**

कोऽयं राजा कस्य वंशेऽभवत् के तस्य पूर्वजाः ।
कथं यज्ञं चकाराऽसौ कदा कुत्र वदात्र मे ॥ ८ ॥

**श्रीकृष्ण उवाच—**

चन्द्रपुत्रोऽभवद्दक्षोऽर्बुदायुर्धर्मयोगवित् ।
तस्य पुत्रः संवरणो बभूव सार्वभौमपः ॥ ९ ॥
सूर्यपुत्रीं स तपतीं समुद्वाह सुकन्यकाम् ।
ताभ्यां कालान्तरे जातः कुरुराजा विरागवान् ॥१०॥
पितृराज्यं त्वग्रजेभ्यो पित्रा दत्तमतो ह्ययम् ।
स्वभागं प्राप्य च द्वैतवने गत्वा कृषिं शुभाम् ॥११॥
चकार परमां श्रेष्ठां ब्रह्मदृष्ट्या हलेन वै ।
विष्णुं साक्षात् क्रतौ कृत्वा मोक्षलोकं जगाम ह ॥१२॥
कुरोः कनिष्ठो भ्राता यः कन्थाधराऽभिधः शुभः ।
संवरणसुतः सोऽपि दायभागं सुराष्ट्रकम् ॥१३॥
आप्तवान् खण्डराज्यं वै जीवनार्थकमात्रम् ।
सिंहारण्ये कोटिनारपत्तने समुवास सः ॥१४॥
एवं सोऽपि चन्द्रवंशस्तस्य पुत्रो रणंगमः ।
सस्मार पूर्वजानश्वपट्टसरसि तैर्थिकः ॥१५॥
ब्रह्माणं च मरीचिं कश्यपं चन्द्रं च ऋक्षकम् ।
संवरणं च कन्थाध्रं तिलवार्भिरतर्पयत् ॥१६॥
सावित्रीं च कलां चाप्यदितिं तथा च रोहिणीम् ।
घटिकां तपतीं हिक्कां तिलाद्भिः समतर्पयत् ॥१७॥
अश्वपट्टसरःपार्श्वे पश्चिमे भूस्तरे क्रतुम् ।
कर्तुं चेयेष नृपतिः रणंगमोऽतिधार्मिकः ॥१८॥
अनादिश्रीकृष्णनारायणस्य षष्ठवर्षके ।
चातुर्मास्ये वैष्णवं स महायागं चिकीर्षति ॥१९॥

निजराज्यात्तु सामग्रीरानयामास सत्वरम् ।
कुशान् सम्पादयामास समिधश्च पृथग्विधान् ॥२०॥
मण्डपाग्र्यं मण्डपाँश्च रचयामास शोभनान् ।
पर्णशाला वासयोग्याः कारयामास शिल्पिभिः ॥२१॥
कुण्डं कुण्डान् वेदिकाश्च पट्टिका आसनानि च ।
यज्ञपात्राण्युत्तमान्यौदुम्बरं पात्रमुत्तमम् ॥२२॥
कौशेयानि सुवस्त्राणि कारयामास सत्वरम् ।
रसशालाः पाकशाला भोज्यशाला द्रुमादिषु ॥२३॥
क्लृप्तयामास सुभगाः पेयशालाः प्रपादिकाः ।
गौशाला हयशालाश्च पत्नीशाला व्रतस्थलीः ॥२४॥
कारयामास विधिना त्वानयामास चाक्षतान् ।
गोधूमकान् यवान् व्रीहीन् तिलान् फलानि शर्कराः ॥२५॥
हव्यद्रव्याणि सर्वाणि रङ्गद्रव्याणि यानि च ।
पूजाद्रव्याण्युत्तमानि दक्षिणा भूयसीस्तथा ॥२६॥
जपजाप्योपकरणान्यखिलान्यम्बराणि च ।
कलशान् रङ्गपटकान् पत्राणि पञ्चधा तथा ॥२७॥
घृतपात्राणि च चरुं देवानां स्थापनानि च ।
कारयामास विधिना स्वस्तिवाच्यानि मंगलम् ॥२८॥
नान्दीश्राद्धं च संस्कारान् शुद्धिं प्रोक्षणकादिकम् ।
शतमष्टोत्तरं चाथ सहस्रं ब्राह्मणास्तथा ॥२९॥
याज्ञेयाः समतिष्ठन्त ब्रह्माद्याश्चापरे तथा ।
होतोद्गाता प्रत्युद्गाता सामज्ञा यन्त्रवेदिनः ॥३०॥
आहर्ता प्रतिहर्ता च यजमानाश्च जापकाः ।
पाठका ब्रह्मचिन्ताश्च गुणकार्यकरास्तथा ॥३१॥
मृगशृंगादियुक्ताश्च न्यदीषन् मण्डपेषु च ।
प्रावर्तत क्रतुकार्यं वह्निर्न्यधायि हव्यभुक् ॥३२॥
विष्णुर्नारायणः कृष्णनारायणः परेश्वरः ।
चतुर्विंशत्यवतारैः सहितः पूजितः पुरः ॥३३॥
ब्रह्म मुक्ता राधिकाद्या मुक्तान्यो विष्णुयोषितः ।
पार्वती च प्रभा लक्ष्मीः श्रीः सती कमलादिकाः ॥३४॥
हंसा परमहंसा च सगुणा मञ्जुला प्रियाः ।
पूजिताः मातरश्चापि शंभुर्देवा गणाधिपः ॥३५॥
ब्रह्मचराः ऋषयोऽन्ये पार्षदाः शक्तयस्तथा ।
पद्मकन्याश्च दुर्गाद्या ग्रहा देवाश्च क्षेत्रपाः ॥३६॥
दिक्पाला लोकपालाश्च सिद्धयो योगिनीगणाः ।
सात्त्विकाः पितृवर्गाश्च स्थापिता देवमण्डले ॥३७॥
ब्रह्मसृष्टिरीशसृष्टिर्जीवसृष्टिर्वरीयसी ।
मण्डपे पूजिता तत्र यज्ञभागार्थिनी च या ॥३८॥
राजसास्तामसाश्चापि देवकिंकरवादिनः ।
पूजिता लोमशेनाऽत्र विष्णुयज्ञे महोत्सवे ॥३९॥
रणंगमो यजमानो गुरुर्वै लोमशो मुनिः ।
अनादिश्रीकृष्णनारायणो यज्ञाग्र्यदेवता ॥४०॥
सर्वं तत्र सुसम्पन्नं चातुर्मास्येऽन्वहं क्रतौ ।
विधिवन्नित्यमेवैतदाद्यन्तं कर्म पुष्कलम् ॥४१॥
आषाढे तु समारंभः कार्तिकेऽस्य समापनम् ।
नित्यं वै हवनं तत्राऽयुतविप्रप्रभोजनम् ॥४२॥
अन्येषां नैव पारोऽस्ति कोटिकन्यादिभोजनम् ।
कोटिबालादिभोज्यानि वस्त्रदानानि नित्यशः ॥४३॥
घृतकुल्या दधिकुल्याः पयःकुल्याः सहस्रशः ।
रसकुल्या मधुकुल्या मधुपर्कादिवैभवाः ॥४४॥
मिष्टपानानि मिष्टान्नोत्तमान्यगणितान्यपि ।
दीयन्ते भोजने तत्र तृप्ता भवन्ति देहिनः ॥४५॥
वह्निर्नित्यं मूर्तिमान् स्वकराभ्यां ग्रसते हविः ।
स्वयंप्रकाशो भगवान् जुहोति घृतधारया ॥४६॥
कृष्णनारायणो वह्निर्गृह्णाति मुखपंकजे ।
यज्ञात्मानः परां तृप्तिं प्राप्नुवन्ति क्रतूत्तमे ॥४७॥
कोटिदानानि दीयन्ते रणंगमेन नित्यशः ।
एवं नित्यं जायमाने यज्ञे त्रैलोक्यवासिनः ॥४८॥
दर्शनार्थं हवनार्थं समायान्ति वियन्ति च ।
नित्यं सहस्रकमलैः पूजयन्ति सुरा हरिम् ॥४९॥
यत्र सा कम्भरा लक्ष्मीस्तथा गोपालकृष्णकः ।
विराजेते च जनकौ पूजोपकरणप्रदौ ॥५०॥
यज्ञद्रव्यप्रदौ चापि तत्र का न्यूनता खलु ।
पत्नीव्रतो महर्षिश्च सर्वाध्यक्षोऽत्र वर्तते ॥५१॥
तत्र का न्यूनता सर्वसत्कारे पानभोजनैः ।
इत्येवं राधिके यज्ञः प्रावर्तत दिने दिने ॥५२॥
वृष्टिः प्रजायते नित्यं मोदन्ते सस्यजातयः ।
कन्थाधरनिमित्तेन कृतो यज्ञः सुतेन वै ॥५३॥
कन्थां विना सर्वमदाद् दाने रणंगमः सुतः ।
कृष्णस्तुष्यतु प्रत्यक्षश्चेत्युक्त्वाऽदात् सुपात्रके ॥५४॥
देवाः स्वर्गात् समागत्य घ्रात्वा धूमान् घृतस्य वै ।
शुकरूपाश्चाब्रुवँश्च दिव्यवाण्या परस्परम् ॥५५॥
धन्यो रणंगमो लोके धन्यः कन्थाधरोऽपि च ।
धन्यश्चन्द्रादयो वृद्धा यद्दृशो यज्ञविस्तरः ॥५६॥
यत्क्रतौ विंशतितमोऽक्षरो लुप्तोऽनुनासिकः ।
सर्वं प्रदीयते यत्र कन्थां कौपीनमन्तरा ॥५७॥

क्षुधा देवी यत्र यज्ञे पराजयं गताऽस्ति वै ।
तृप्तिर्विजयते चात्र धन्यो वै लोमशो मुनिः ॥५८॥
धन्यः पत्नीव्रतो विप्रो धन्यः स्वयंप्रकाशकः ।
अनादिश्रीकृष्णनारायणो येषां सहायकृत् ॥५९॥
चातुर्मास्ये सदा देवा ! वस्तव्यं त्वत्र सर्वथा ।
गमनागमने नित्यं वृथा यत्नो न चेष्यते ॥६०॥
दुर्लभं पुण्यतीर्थं दुर्लभा सत्संगतिस्तथा ।
दुर्लभं चाऽर्हणं नित्यं दुर्लभं शरणं हरेः॥६१॥
दुर्लभा पुण्यकीर्तिश्च दुर्लभश्च कथाश्रवः ।
दुर्लभं प्रियमित्राणां नित्यमेवाऽनुदर्शनम् ॥६२॥
दुर्लभा श्रीहरेर्भक्तिर्दुर्लभं चरणामृतम् ।
दुर्लभं तत्प्रसादस्य नित्यमेवाऽशनं तथा ॥६३॥
दुर्लभं सुलभं सर्वं धन्या कुंकुमवापिका ।
धन्यं त्वश्वसरस्तीर्थं यत्र यज्ञः प्रवर्तते ॥६४॥
त्रैलोक्यतृप्तिदो देवाः साक्षाच्छ्रीपतिसन्निधौ ।
नेदृग् ब्रह्मसरश्चापि नेदृग्वै पुष्करं सरः ॥६५॥
सरश्च मानसं नेदृङ् नेदृङ् नारायणं सरः ।
नेदृङ् पम्पासरश्चापि न यत्र परमेश्वरः ॥६६॥
अत्र वृक्षाश्च वल्ल्यश्च मुक्ताः सर्वे वसन्ति हि ।
स्तम्बा गुल्मास्तृणात्मानः सर्वे मुक्ता वसन्ति हि ॥६७॥
पशवः पक्षिणो वारिचराः पतंगजातयः ।
पार्थिवाः कीटमशकाः सर्वे मुक्ता वसन्ति वै ॥६८॥
धन्यं रजोऽस्य देशस्य यत्स्पर्शः पापनाशनः ।
धन्यं जलं च सरसो यद्बिन्दुर्मोक्षदायकः ॥६९॥
वयं यज्ञभुजो धन्या येषां लाभोऽयमुत्तमः ।
रणंगमोऽयं धन्यश्च देवदेहो भवत्वयम् ॥७०॥
देवसिद्धियुतश्चास्तु देवसमृद्धिभरोऽस्तु च ।
देवो देवगतिमाँश्च भवत्वयं रणंगमः ॥७१॥
इत्याशीर्भिर्योजितोऽयं रणंगमो हि भक्तराट् ।
तावत् समृद्धं दिव्ययानं समृद्धं तदर्थमागतम् ॥७२॥
कामदं कल्पलतिकायुक्तमानन्दसंभृतम् ।
संस्थितं नित्यसेवायामिन्द्रार्पितं ससारथि ॥७३॥
दासदासीभृत्ययुक्तं भोज्याऽमृतहृदाऽन्वितम् ।
सप्रकाशं सर्वशय्याभोग्यवस्तुसमन्वितम् ॥७४॥
एवं रणंगमो राजा देवानां सुप्रसादतः ।
प्राप्याऽक्षयं विमानं त्वक्षयवस्तुप्रदं सदा ॥७५॥
ददौ दानानि संकल्प्य नित्यं कोट्यर्बुदानि च ।
आहूय विश्वकर्माणं शम्बरं च मयं तथा ॥७६॥
कारयामास तत्तीर्थे त्वश्वपद्मसरोन्तिके ।
परितो देववासनामयुतं सप्तभौमकम् ॥७७॥
स्वर्गवच्छोभयामास देवानस्थापयत्तथा ।
पूजनार्थं च विप्रेभ्यो गृहदानानि वै ददौ ॥७८॥
कल्पवल्लीं च प्रत्येकब्राह्मणाय ददौ तदा ।
सर्वं फलति वल्ल्यां च भोग्यमिष्टं च नित्यशः ॥७९॥
न क्षेत्रस्य न सस्यानां गवां नापि प्रयोजनम् ।
धान्यार्थं च कणार्थं च वसार्थं च तदाऽत्र वै ॥८०॥
अल्पराज्योऽपि राजाऽसौ चान्द्रीं कान्तिं सुनिर्मलाम् ।
कीर्तिं चाप्यभजल्लोके सार्वभौमादिकां तदा ॥८१॥
राधिके ! मम भक्तस्य नाऽपूर्णं विद्यते क्वचित् ।
मह्यं ददाति सर्वस्वं तस्मै सर्वं ददाम्यहम् ॥८२॥
एवं यज्ञे जायमाने देवालयाऽयुतेषु च ।
जायमानेषु च ततो रणंगमो दिवंगमः ॥८३॥
अनादिश्रीकृष्णनारायणस्य सप्तमे शुभे ।
आगते वत्सरेऽष्टम्यां हरेर्जन्मोत्सवं व्यधात् ॥८४॥
तत्र रत्नासनेऽनादिकृष्णनारायणं प्रभुम् ।
उपावेशयाऽर्चयत् तु नैकदिव्योपदादिभिः ॥८५॥
ब्राह्मणान् भोजयामास लक्षशो बालकानपि ।
सुरान् संपूजयामास गापयामास गीतिकाः ॥८६॥
मंगलानि विविधानि कारयामास भावतः ।
साधूनृषीन् सतीः साध्वीः पूजयामास वै नृपः ॥८७॥
दानानि दापयामास स्वर्णरूप्यकहीरकान् ।
वस्त्रभूषागोमहिषीर्गजाश्वरथकिंकरान् ॥८८॥
अथ रात्रौ कथां रम्यां वाचयामास लोमशः ।
लक्ष्मीनारायणसंहितायां द्वितीयखण्डगाम् ॥८९॥
कथान्ते कोटिकन्याभिः कृतं कान्तस्य पूजनम् ।
निशायां रासरमणं कोटिरूपैर्हरिः स्वयम् ॥९०॥
कान्ताभिः कोटिभिः साकं चकार परमेश्वरः ।
स्थलपद्मवाटिकायां विस्तृतायां हरिः स्वयम् ॥९१॥
परिहारं चकाराऽथ सुखयित्वा सखीगणान् ।
प्रातर्यज्ञे हवनं च राजा चकार नित्यवत् ॥९२॥
आगतानां च देवानां जन्मोत्सवजुषां नृपः ।
सेवां चकार बहुधा विसर्जनं चकार च ॥९३॥
कार्तिक्यां पूर्णिमायां च यज्ञहोमोत्तरं नृपः ।
परिहारं चकाराऽस्य क्रतोर्ददौ च दक्षिणाः ॥९४॥
रत्नहीरकमाणिक्यस्वर्णरौप्यविभूषणम् ।
वस्त्रान्नयानवाहादीन् ददौ दानान्यनेकशः ॥९५॥

अवभृथं चकाराऽसौ सहर्षिभिः सरोवरे ।
अवतारास्तथा मुक्ता मुक्तान्य ईश्वरास्तथा ॥९६॥
देवाश्च पितरो मर्त्याः सर्वे स्थावरजङ्गमाः ।
यज्ञान्ते प्रययुर्नैजं नैजमालयमुत्सुकाः ॥९७॥
राजाऽनादिकृष्णनारायणं भजन् सनातनम् ।
विप्रैर्भृत्यैश्च सहितो दिव्ययानस्थितोऽभवत् ॥९८॥
ऋषीन् कृष्णं पितरं मातरं देवान् सुरालयान् ।
तीर्थानि वृक्षवल्लीश्च प्रणम्य प्रययौ गृहम् ॥९९॥
कोटीनाराख्यनगरं प्रजाभिरभिवन्दितः ।
विवेश नगरं नैजं विशश्राम निजालये ॥१००॥
अथ यक्षश्चित्रमालाभिधः शुश्राव तं नृपम् ।
प्रतापिनं महाभक्तं कीर्तिमन्तं सुयौवनम् ॥१०१॥
आजगाम च सौराष्ट्रं चाश्वपट्टसरोवरम् ।
ददर्श भूपतियज्ञभूमिं प्रासादवैभवान् ॥१०२॥
नृपेण कारितान् ज्ञात्वा ज्ञात्वा माहात्म्यमुत्तमम् ।
कृतमालां निजकन्यां दातुं ययौ रणंगमम् ॥१०३॥
रणंगमेन च कल्पवल्ल्या नवीकृतं पुरम् ।
नगरं देवनगरं ददर्श यक्षपुङ्गवः ॥१०४॥
अवातरद् विमानाच्च राज्ञो निवासमम्बरात् ।
कन्यां दासीस्तथा दासान् ददौ रणंगमाय सः ॥१०५॥
राजा विवाहविधिना पाणिग्रहं चकार ह ।
जामाता यक्षवर्यस्य देववद् राजते भुवि ॥१०६॥
यक्षः पुत्रीं प्रदायैव ययौ कौबेरपत्तनम् ।
राधिके ! जायते श्रोता वक्ताऽस्य भुक्तिमुक्तिभाक् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रणंगमकृतयज्ञः, प्रभोः सप्तमो जन्मोत्सवः, यक्षकन्यया रणंगमविवाहो विमानादिलाभश्चेत्यादिनिरूपणनामा त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! पश्चाद् राजा सिद्धिसमाश्रितः ।
पत्तनं रचयामास सोमवेलाह्वयं महत् ॥ १ ॥
यत्र सौवर्णसौधाँश्च दशसहस्रसंख्यकान् ।
रौप्यसौधाँस्तावतश्च मणिसौधान् सहस्रशः ॥ २ ॥
उद्यानानि विचित्राणि वाटिकाः पद्मसारसीः ।
कारयामास बहुधा वासयामास देवताः ॥ ३ ॥
कल्पवल्लीं ददौ तत्र प्रत्येके चालये ततः ।
यक्षान् किंपुरुषान् बन्दीन् चारणान् भूसुरांस्तथा ॥ ४ ॥
मानवान् वासयामास कोटिशो देवसदृशान् ।
एवं कृत्वा सोमवेलाभिधं द्वादशगोपुरम् ॥ ५ ॥
नगरं पश्चिमे भागे सोमतीर्थान्मनोहरम् ।
ततः श्रीसोमनाथस्य सौवर्णं मन्दिरं पुनः ॥ ६ ॥
कारयामास जीर्णं चोत्तार्य वै नूतनं महत् ।
सहस्रहस्तोच्छ्रायं च सप्तभौमं च गोपुरम् ॥ ७ ॥
पञ्चाशद्धस्तविस्तारं शिखरं पर्वतोपमम् ।
तत्र देवः सोमनाथो व्योमस्थो राजतेऽश्रितः ॥ ८ ॥
सुवर्णशृंखलाबोध्यो घण्टो यत्र विराजते ।
दशयोजनसंश्रावः शतभारगुरुत्ववान् ॥ ९ ॥
शतमानवसंबोध्यो यन्त्रमात्रेण शब्दितः ।
यस्य शिखरकलशः सौवर्णः सप्तभागवान् ॥१०॥
पञ्चाशद्धस्तकोच्छ्रायः सूर्यसन्निभभासुरः ।
पञ्चाशद्धस्तकध्वजो दण्डोऽस्य शतहस्तकः ॥११॥
यत्राऽभ्राणि प्रतिष्ठन्ति चातुर्मास्ये निरन्तरम् ।
यत्र स्थितो मनुष्यश्च हंसवत् प्रविलोक्यते ॥१२॥
तत्र भोगान् ब्राह्मणाँश्च योजयामास पूजने ।
विशेषतश्च राजाऽसावन्नसत्रं बबन्ध ह ॥१३॥
यत्राऽयुतं च नारीणां नराणामयुतं तथा ।
पञ्चायुतानि बालानां बालिकानां तथैव च ॥१४॥
भुञ्जते मिष्टमिश्राणि घृतान्नानि च नित्यशः ।
एवं रणंगमो राजा यज्ञपुण्यप्रभावतः ॥१५॥
अनादिश्रीकृष्णनारायणस्योपास्तिवैभवात् ।
लोकपाल इवासीद्वै पृथ्व्यां विमानगोऽभवत् ॥१६॥
अथायं पौषपूर्णायां ययौ वै दक्षिणां दिशम् ।
पारेसमुद्रं यानेन वैहायसा प्रवीक्षितुम् ॥१७॥
दक्षिणं तु भुवं द्रष्टुं ययौ चाग्रे महाबलः ।
भोज्यपानं दासवर्गं वेषं कल्पलतां तथा ॥१८॥
साधनानि सह नीत्वा ययौ विमानगोऽम्बरे ।
सौराष्ट्राद् दक्षिणं देशं सिंहारण्यं विलोक्य च ॥१९॥
शतयोजनकं देशं क्रान्त्वा चाग्रे ययौ नृपः ।
समुद्रं च ददर्शाऽसौ दक्षिणां दिशमाश्रितम् ॥२०॥
तत्र ददर्श च लाक्षादीपद्वीपं सुशोभनम् ।
ततश्चाग्रे ययौ व्योम्ना मालद्वीपं ददर्श सः ॥२१॥
तं दृष्ट्वा प्रययौ व्योम्ना स्वेष्टद्वीपं ददर्श सः ।
तं विलोक्याऽभितः पश्चान्मुरशेषाभिधं शुभम् ॥२२॥
द्वीपं चालोकयामास यत्राऽभवन्मुराऽसुरः ।
स च योद्धुं समायातो व्योम्ना रणंगमेन वै ॥२३॥

कल्पवल्ल्या समुत्पाद्य वारुणं पाशमुल्बणम् ।
राज्ञा चाऽऽबद्ध्य च दैत्यः प्रक्षिप्तः सागरे तदा ॥२४॥
यथाकश्चित् प्राणेन सहितः स्वालयं ययौ ।
अथ राजा ययौ चाग्रे द्वीपे कुरुजटं तदा ॥२५॥
ददर्श परितस्तत्र जटायूमानवान् ततः ।
ययावग्रे विमानेन ददर्शाऽऽन्तरबीजकम् ॥२६॥
द्वीपं शीतमयं यत्र मकरास्या हि मानवाः ।
प्रायशो जलवासाश्च राज्ञा तेनावलोकिताः ॥२७॥
ततो ययौ विमानेन वैहायसेन दक्षिणाम् ।
दिशं तत्र ददर्शाऽयं पृथ्वीं श्वेतां सुवर्तुलाम् ॥२८॥
अप्करकां सशैवालां रूपवच्च प्रभान्विताम् ।
यत्र चापोमयीभूश्च देहिनः श्वेतभास्वराः ॥२९॥
अप्करकादनाः सर्वे जले शैलनिवासिनः ।
नरा नार्यो झषाकारा जलपांशुसहाः सदा ॥३०॥
पिबन्तश्च जलं शीतं खादन्तो जलशर्कराम् ।
शैवालं जलपाकाँश्च भुञ्जन्तो निर्वहन्ति ते ॥३१॥
गृहाणि जलपाषाणैः कृतान्यत्र वसन्ति च ।
शीतचन्द्रसमाभासा जलोत्थाऽमृतभोजनाः ॥३२॥
एवंविधान् जनान् पश्यन् ददर्श दक्षिणं ध्रुवम् ।
प्रथमं कारकीं भूमिं ततो द्रष्टुं व्यवर्तत ॥३३॥
विमानस्थेन राज्ञा सा वर्तुला वीक्षिता क्षितिः ।
जलरूप्यमयी सर्वा वृक्षहीना वसुन्धरा ॥३४॥
यत्र मेघाः सदा सन्ति सूर्यतापो न विद्यते ।
सामुद्रप्रस्तराः सन्ति धातवः करकामयाः ॥३५॥
रसश्चामृतमिष्टो वै जलीयः करकोद्भवः ।
जलं शैवालपुटिका जलपत्राणि वल्लयः ॥३६॥
श्वेतवर्णाः श्वेतफलाचन्द्रखण्डनिभाश्च ताः ।
जलशाकानि भोज्यानि जलपाषाणजा गृहाः ॥३७॥
सामुद्रक्षारकरका जलानां मिष्टशर्कराः ।
जलपाषाणकन्दाश्च भोज्यास्तन्मानवैः सुखैः ॥३८॥
एतत् सर्वं विलोक्यैव वारुणं भवनं तथा ।
दक्षिणध्रुवगोलस्य मध्यबिन्द्वाश्रयं स्थलम् ॥३९॥
विलोक्य पुनरायाच्च राजा रणंगमस्तटम् ।
तत्र कम्पप्रदेशं च ततः कटिसरं पुरः ॥४०॥
विलोक्य सर्वतः पश्चाद् राजसं च प्रदेशकम् ।
ददर्श चाग्रतो गत्वा देशं तु कन्यकालयम् ॥४१॥
ततश्चाग्रे ददर्शाऽसौ काणाक्षं सुप्रदेशकम् ।
ततोऽप्यग्रे ददर्शाऽयं सग्रीवं देशमुत्तमम् ॥४२॥
अद्रिघ्नं च ततो देशं ददर्श जलशैलजम् ।
यातदेशं च वीक्षारिप्रदेशं स ददर्श ह ॥४३॥
ग्रीष्मशून्यकदेशं च कुस्थदेशं ततः परम् ।
ध्रुवबिन्दुं विलोक्यैव ददर्शाऽन्तार्किवर्तुलम् ॥४४॥
एवं भूगृह्यदेशं तं शीतमात्रकृतास्पदम् ।
शीतलं संविलोक्यैव तस्माद् यावन्निवर्तते ॥४५॥
तावद् भूतलगर्भाच्च श्वेतपर्वतसदृशः ।
पुमान् कश्चित् समायातो राधिके व्योममार्गगः ॥४६॥
अनन्तवीर्यो ब्रह्माण्डोदरवासः कुटुम्बवान् ।
श्वेतवर्णः श्वेतवस्त्रः श्वेततेजप्रभान्वितः ॥४७॥
श्वेतश्मश्रुः श्वेतरसः श्वेतशैलगदायुतः ।
यन्मस्तकेऽलगन् मेघाः पादयोः श्वेतपर्वताः ॥४८॥
यत्कक्ष्यां श्वेतशैवाला यन्मुखे स्तनयित्नवः ।
यच्छब्दो दक्षिणध्रुवमभिव्याप्य प्रवर्तते ॥४९॥
विद्युद्वेगा गतिर्यस्य श्वासः समुद्रकम्पनः ।
अट्टहासं दिशामन्तेष्वभिव्याप्य निवर्तते ॥५०॥
रणंगमश्च तं दृष्ट्वा भयं चावाप वै क्षणम् ।
तावत्स शुक्लपुरुषश्चाऽऽजुहाव रणंगमम् ॥५१॥
एह्येहि दिव्यदेव ! त्वं वैहायसविहारकृत् ।
किं ते भयं नु मत्तोऽस्ति कल्पवल्लीश्रितस्य वै ॥५२॥
अनादिश्रीकृष्णनारायणो यस्य हृदि स्थितः ।
तादृशस्त्वं महाभक्तो बलवान् राजसे भुवि ॥५३॥

धन्योऽसि राजन्परमेश्वराश्रय-
त्वं भौतिकोऽपीश्वरनाथदृष्टितः ।
विराजसे देववदीश्वरः स्वयं
पारंगतस्त्वं भवसागरस्य यत् ॥५४॥
आगच्छ मद्धाम पुनीहि मामकं
गृहं सदा भूमिसुगर्भवासितम् ।
मया सदाऽऽराध्यत एव यस्त्वया
रणंगमाऽऽराध्यत ईश्वरेश्वरः ॥५५॥
अहं हि शेषस्य सुवंशजो जनो
वसामि गर्भेऽत्र हि लक्ष्मगाभिधः ।
अनादिनारायणकृष्णबालकं
भजामि नित्यं ससमस्तबान्धवः ॥५६॥
गृहाण सत्कारमनुत्तमं मया
कृतं तथा चार्पय दर्शनं तव ।
निवेदयिष्येऽर्चनयोग्यकोपदा-
स्ताबालकृष्णाय च दातुमर्हसि ॥५७॥
नमो नमस्ते मम नाथभक्त नमो नमस्ते परमात्मवेदिन् ।
नमो नमस्ते परमेशभक्त महाक्रतुकृद् भवते नमोऽस्तु ॥५८॥

इत्येवं राधिके तेन लक्ष्मणेन सुसत्कृतः ।
वाग्भिर्विश्वासमापन्नो रणंगमः स्थिरोऽभवत् ॥५९॥
तावच्छ्रीलक्ष्मणस्तत्र रूपं कृत्वा तु मानवम् ।
सौम्यं सुरूपं भक्तस्य विश्वास्यं तिलकान्वितम् ॥६०॥
वैष्णवं तुलसीयुक्तं गृणन्तं कृष्णनाम च ।
ननाम परया प्रीत्या रणंगमोऽतिभावतः ॥६१॥

लक्ष्मणश्चाह पश्यात्र विश्वासार्थं च मे हृदि ।
अनादिश्रीकृष्णनारायणो विराजते प्रभुः ॥६२॥
रणंगमो ददर्शाऽस्य हृदये परमेश्वरम् ।
अनादिश्रीकृष्णनारायणं चाक्षरसंस्थितम् ॥६३॥
राधापतिं प्रभेशं पारवतीशं सुमङ्गलम् ।
लक्ष्मीशं हंसनाथं च श्रीमद्गोपालनन्दनम् ॥६४॥
सगुणेशं कम्भरालालितं भक्तविनोदकम् ।
दिव्यकटकमुकुटोर्मिकाहारविभूषितम् ॥६५॥
कोटिकन्दर्पशोभाधिरूपरूपानुरूपितम् ।
उज्ज्वलं मन्दहास्यस्थं पश्यन्तं तु रणंगमम् ॥६६॥

एवंविधं तद्धृदये विलोक्य स्वेष्टमाधवम् ।
रणंगमो महाभक्तो विश्वासमगमत्पुनः ॥६७॥
ततः स लक्ष्मणं नागं नरमानवरूपिणम् ।
विमाने हस्तमादायाऽऽरोहयामास सत्वरम् ॥६८॥
तेन दर्शितमार्गेण विमानं वाहितं निजम् ।
प्राप्तं पृथ्वीगुप्तबिन्दुं जलपाषाणभूगतम् ॥६९॥
दक्षिणध्रुवगोलस्य मुखस्य सन्निधौ महत् ।
विवरं तत्र चायातं भूगर्भं गन्तुमेव च ॥७०॥

वर्तुलं योजनमानं श्वेतनागैः सुरक्षितम् ।
शीतपाषाणसोपानं शीतप्राकाररक्षितम् ॥७१॥
लक्ष्मणाऽऽदिष्टमार्गेण विमानं विवरान्तरे ।
विवेश क्षणतो यत्र जयशब्दास्तदाऽभवन् ॥७२॥

द्वारपानां महाशब्दैर्भूगर्भे चान्तराम्बरे ।
विद्युन्मणिप्रकाशानां चन्द्रप्रभासमुज्ज्वले ॥७३॥
कन्याभिर्वर्धितं लाजैः पूजितं पुष्परत्नकैः ।
विमानं चान्तरे देशे गत्वा पृथ्व्यामवातरत् ॥७४॥

तत्र वै पृथिवी रम्या श्वेता कृष्णा च पाण्डुरा ।
ओषधयश्च विविधा द्रुमाः फलसुशोभिताः ॥७५॥
सस्यानां स्मृद्धयश्चापि स्वर्णवर्णा विलोकिताः ।
नद्यो नदा वाटिकाश्च दीर्घिका जलपूरिताः ॥७६॥
अमृतैः संभृताः कूपा रणंगमेन लोकिताः ।
गावः श्वेताः पाण्डुराश्च सपक्षा व्योमगास्तथा ॥७७॥

कामरूपधराश्चान्ये पशवो दुग्धदास्तदा ।
विलोकिता नरा नार्यः सर्वे भूषाविभूषिताः ॥७८॥
उज्ज्वलाश्चन्द्रसदृशा मणिहारविराजिताः ।
शीताश्चन्द्रनिभाः सर्वे पद्मपत्रनिभेक्षणाः ॥७९॥
सुरूपाः पिङ्गनेत्राश्च रक्तनखोष्ठपत्तलाः ।
वह्निशुद्धांऽशुकाः सर्वे दृढाः श्वेतान्नभोजनाः ॥८०॥

यथा भूपरि भागेऽस्मिन् वर्तते सर्वथाऽत्र च ।
तथा तत्राऽपि राजा स विभूतीन् सन्ददर्श ह ॥८१॥
प्रासादाः श्वेतवर्णाश्च सर्वोपकरणानि च ।
नगराणि सुराज्यानि पर्वता जलभूमयः ॥८२॥
श्वेताः सर्वा मनुष्याश्चेत्यालोक्य विस्मयं गतः ।
लक्ष्मणेन विमानं तन्महानगरसम्मुखम् ॥८३॥
चालितं यत्र पुष्पाढ्योद्यानानि सुबहून्यपि ।
परितः सन्ति सौधाश्च प्रासादाः पर्वतोपमाः ॥८४॥
तत्राऽस्योच्छ्रयभूभागे प्राकारान्तरशोभितः ।
लक्ष्मणस्य तु राज्ञो वै प्रासादः पर्वतोपमः ॥८५॥

लक्ष्मणाभिधवर्णाऽङ्कोऽन्तरीक्षे ध्वजशोभितः ।
शतभौमो राजते यो दृष्टो रणंगमेन वै ॥८६॥
विमानं लक्ष्मणेनात्रोद्यानांगणेऽवतारितम् ।
तदा वाद्यान्यवाद्यन्त राजरीत्या हि राधिके ॥८७॥
जयशब्दाः सैन्यपाला राज्यवर्चोपतस्थिरे ।
राजधानी स्वर्गसमा रणंगमेन लोकिता ॥८८॥
भूगोलस्यान्तरे भागे सृष्टिं दृष्ट्वाऽतिमानुषीम् ।
आश्चर्यं परमं प्राप रणंगमो जहर्ष च ॥८९॥

अथ वै लक्ष्मणो निन्ये रणंगमं सभान्तरे ।
यत्र वै शतराज्यश्च कन्यकाद्विसहस्रकम् ॥९०॥
कुमाराः पञ्चसाहस्रा वर्तन्ते लक्ष्मणस्य ह ।
लक्ष्मणेन सभामध्ये पुण्ये सिंहासने स्थितः ॥९१॥
प्रतिष्ठितो देवहर्म्ये कृष्णनारायणः प्रभुः ।
स्वर्णप्रतिमास्वरूपो दर्शितो भगवान् हरिः ॥९२॥
रणंगमाय च ततोऽर्घ्यं मधुपर्कमुत्तमम् ।
ददावमृतपानं सुपुष्पहारादिकं ददौ ॥९३॥

अथ सिंहासने सौम्ये न्यषादयच्च तं ततः ।
कन्यैका पुष्पमालां सङ्गृह्य तत्र निदेशतः ॥९४॥
समायाता ददर्शैनं रणंगमं शुभास्पदम् ।
स्वागतार्थं ललाटेऽस्य कुंकुमाऽक्षतचन्द्रकम् ॥९५॥
चक्रे ददौ पुष्पमालां कण्ठेऽस्य च करे ददौ ।
गुच्छं सुगन्धपुष्पाणां चक्रे सुगन्धकोक्षणम् ॥९६॥

युवानं वैष्णवं रक्तवर्णं दृढं च सुन्दरम् ।
दृष्ट्वा सा कन्यका नाम्ना मालिनी यौवनोद्धरा ॥९७॥
मुमोह मनसा श्रेष्ठं वरं मेनेऽनुरूपकम् ।
अथाऽयं लक्ष्मणो ज्ञात्वा ददौ रणंगमाय ताम् ॥९८॥
सापि भक्तं पतिं लब्ध्वा मुमुदे हृदि सर्वथा ।
अथाऽयं श्रीकृष्णनारायणमन्त्रं जगाद ताम् ॥९९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
लक्ष्मणार्यस्तदा कृष्णनारायणं पुनर्मुदा ॥१००॥
प्रसस्माराऽतिभावेन धन्यं मत्वा निजं गृहम् ।
तावच्छ्रीभगवाँस्तत्राऽनादिकृष्णनरायणः ॥१०१॥
विदित्वा भक्तसद्भावं प्रत्यक्षः संबभूव ह ।
दिव्यकिशोररूपश्च सर्वलावण्यशेवधिः ॥१०२॥
युगपत्सूर्यसाहस्राधिकतेजोविराजितः ।
रूपानुरूपावयवः सभायां प्रकटोऽभवत् ॥१०३॥
उत्थिताः सहसा सर्वे नेमुर्नारायणं प्रभुम् ।
तेजसा छन्ननेत्रास्ते क्षणं तस्थुर्जडा इव ॥१०४॥
शीघ्रं तेजोविमलत्वे दत्तासनः प्रभुर्हरिः ।
लक्ष्मणार्यकृतां पूजां जग्राह दिव्यवस्तुभिः ॥१०५॥
निवेदितान्नं मिष्टान्नं जलं ताम्बूलकं तथा ।
जग्राह सुहसन् कृष्णनारायणस्तु तत्क्षणम् ॥१०६॥
स्वस्तीत्युक्त्वा कुशलं ते कल्याणं शाश्वतं तव ।
वदँस्तिरोऽभवच्छीघ्रं कन्यकास्तु सहस्रशः ॥१०७॥
मुग्धास्तं श्रीहरिं दृष्ट्वा वव्रिरे मनसा पतिम् ।
अभिप्रायं पिता ज्ञात्वा मनसा हरयेऽर्पयत् ॥१०८॥
अथ यात्रा निमित्तेन प्रयाणं प्रचकार सः ।
लक्ष्मणार्यः कुमारैश्च कन्याभिर्मातृभिः सह ॥१०९॥
गृहीत्वा कोटिरत्नानि स्वर्णरूप्यधनानि च ।
मणिमाणिक्यमुक्ताश्च रणंगमविमानकम् ॥११०॥
अध्यारुरोह सुखतः कृत्वा राज्यममात्यसात् ।
कामगे संकल्पमात्राद् विस्तृते योजनायते ॥१११॥
भूद्वारनिर्गमयोग्ये रणंगमो रुरोह च ।
सभास्थानं महापुण्यं यत्र श्रीभगवान् स्वयम् ॥११२॥
प्रत्यक्षोऽभूत्परं तीर्थं नत्वा तूर्णं विहायसा ।
देशं विसृज्य भूद्वारान्निर्गम्याऽन्ताऽर्किवर्तुलम् ॥११३॥
जलपाषाणदेश्यं तं समुल्लंघ्याऽन्तरीक्षके ।
समुद्रोपरि दीर्घे तद्विमानं वेगवद्ध्यभूत् ॥११४॥
यथा सूर्यः समायाति यद्वा चन्द्रः प्रयाति च ।
दृष्टं जलस्थलावासैः राधिके द्योतयद् दिशः ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रणंगमस्य दक्षिणध्रुवदर्शनार्थे विमानेन गतस्य अन्तार्किवर्तुलदेशमध्ये भूविवरे प्रविष्टस्य लक्ष्मणार्यकृतस्वागतं प्रभोर्दर्शनं लक्ष्मणस्य राज्ञः सकुटुम्बस्य तद्विमानेन यात्रार्थे पृथ्व्यागमनप्रयाणं चेत्यादिनिरूपणनामा चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

**श्रीकृष्ण उवाच—**

राधिके तद्विमानं च समुद्रोपरि चोत्तराम् ।
दिशं प्रति प्रयातं कम्पयच्चानिलमण्डलम् ॥ १ ॥
जलं चुक्षोभ सामुद्रं दृष्ट्वा चन्द्रनिभं तदा ।
घटिकामात्रतस्तत्तु द्वीपं कुरुजटात्मकम् ॥ २ ॥
समुल्लंघ्य समायातं द्वीपं रूप्यायनाह्वयम् ।
तथा पार्श्वस्थितं द्वीपं मुरशेषं पराक्रमीत् ॥ ३ ॥
श्रुत्वा तु पश्चिमे दैत्यो मात्रागस्करनामकः ।
शैलतुल्यः स्वगदया सहितः सन्मुखोऽभवत् ॥ ४ ॥
क्रुद्धो म्लेच्छस्वरूपश्च कटिमात्रसमुद्रकः ।
माऽजाऽम्बिकाया राक्षस्याः पुत्रस्तिमिंगिलाशनः ॥ ५ ॥

**श्रीराधिकोवाच—**

कथं चासीदयं मात्रागस्करो राक्षसो महान् ।
कोऽपराधः कृतस्तेन मातुर्मे वद माधव ॥ ६ ॥

**श्रीकृष्ण उवाच—**

सौराष्ट्रे तु तलाजाया राक्षस्याः किंकरी शुभा ।
माँ अजा नामतः ख्याता कामरूपधरा सती ॥ ७ ॥
आसीदरण्यवासा चारण्यविहारकारिणी ।
परवदा च फलादा च सुरूपा दृढयौवना ॥ ८ ॥
एकदा सा महारण्ये भक्ष्यार्थे समुपागता ।
पश्चिमे सोमतीर्थेऽस्या गतिर्यदृच्छयाऽभवत् ॥ ९ ॥
सा हि तत्र पवित्राँश्च तैर्थिकान् वीक्ष्य शोभनान् ।
तैर्थिकैः सह संगत्य मानवीरूपधारिणी ॥१०॥
समुवासैकदिवसं कथां शुश्राव पावनीम् ।
कथायां राधिके चाध्यात्मिकं तत्त्वं समागतम् ॥११॥
जडानां चेतनानां च रक्षकोऽस्ति परेश्वरः ।
परमात्मा परे धाम्नि दिव्यैर्मुक्तैः प्रसेवितः ॥१२॥

सर्वानन्दनिधिः सर्वसौख्यसमृद्धिभाजनः ।
तस्य नारायणनाम्ना भजनेन सुखं भवेत् ॥१३॥
स तु नारायणनाम्नो भक्त्या तुष्यति सर्वदा ।
नारायणेति सततं जपनीयं ततोऽनिशम् ॥१४॥
कीर्तनीयं च सततं नारायण हरे प्रभो ।
प्राणस्वामिन् सुखदातः सर्वसौभाग्यदो भव ॥१५॥

एवं वै भजितः सम्यक् सर्वं ददाति वाञ्छितम् ।
नार्यः सौख्यं सुसौभाग्यं राज्यं धान्यं धनादिकम् ॥१६॥
पतिं यशस्विनं श्रेष्ठं पुत्रपौत्रादिकं तथा ।
आप्नुवन्ति न सन्देहो विमानवाहनान्यपि ॥१७॥
जगत् सर्वं तस्य वशे स च सम्राड् विराजते ।
तस्य राज्यं हि त्रैलोक्ये तदाश्रयी सुखी भवेत् ॥१८॥
कैंकर्यं तस्य कर्तव्यं पुरुषेण विजानता ।
यदिच्छेत् परमं स्वर्गं कामभोगसमन्वितम् ॥१९॥

तस्याश्रयेण सद्भाग्यं वर्धते नित्यमुत्तमम् ।
दुर्भाग्या सुभगा स्याच्च राज्ञी स्याद् दासिका ह्यपि ॥२०॥
पृथ्वी च निर्मिता येन जलं येन कृतं तथा ।
अग्निर्येन कृतश्चास्ते वायुर्येन विनिर्मितः ॥२१॥
तेभ्यो देहाः कृता येन येनात्मा वर्ष्मणि धृतः ।
येन वृक्षफलान्यत्रोत्पादितानि च भुक्तये ॥२२॥
अन्नानि शर्करा दुग्धं रसा येन विनिर्मिताः ।
येन नारी कृता रम्या येन वै निर्मितो नरः ॥२३॥

इन्द्रियाणि प्रभोगार्थं कृतानि येन देहिनाम् ।
येन बुद्धिः प्रदत्ता च विचारो येन निर्मितः ॥२४॥
येन निद्रा विरामश्च कृता येन दिवा निशा ।
येन क्षुधा तृषा तृप्तिः कृता येन सरस्वती ॥२५॥
स्नेहः पुत्रः सुता लक्ष्मीः स्मृद्धिर्येन दिवं कृतम् ।
स्वर्गो भूस्तारकाः सूर्यश्चन्द्रो येन विनिर्मिताः ॥२६॥
समुद्राः ऋतवो मेघाः सुवर्णं येन निर्मिताः ।
तं भजेच्चेत् प्रसन्नः स जायेत परमेश्वरः ॥२७॥

ददाति भजते नित्यं राज्यं धनं प्रियं सुखम् ।
मुमुक्षवो भजन्त्येनं श्रीपतिं बहुधा मुहुः ॥२८॥
बुभुक्षवोऽपि नैजार्थं भजन्त्येनं प्रियं प्रभुम् ।
नारायणे भवेत् स्नेहः पुण्यैस्तु बहुजन्मनाम् ॥२९॥
स्नेहवन्तो भवेयुश्च देवाश्चान्ये तु राक्षसाः ।
मद्यमांसप्रिया हिंसापराः परविघातकाः ॥३०॥
सुखिनो न भवन्त्येते नातिहीनाः परार्तिदाः ।
आत्मा न राक्षसः कश्चिन्न वा देवो भवत्यपि ॥३१॥

कर्मणा राक्षसो देवः कथ्यते विशदोऽपि सः ।
नारीदेहः सदा म्लानो दुःखदः परवश्यगः ॥३२॥
नारायणाश्रयात्पापं दुःखं तरति भामिनी ।
उदरस्य तु पोषार्थं पापं क्वचिन्न चाचरेत् ॥३३॥
न वै मोक्षस्य जन्मेदं पुनः पुनरवाप्यते ।
कथं तत्र समुन्नेया पापदा पाशवी क्रिया ॥३४॥

पापी चात्मा यदारभ्य परमेशं समाश्रयेत् ।
तत आरभ्य एवाऽसौ पुण्यवान् संप्रजायते ॥३५॥
कथायाः श्रवणेनाऽस्य संकल्पश्च शुभो भवेत् ।
ततो मतिश्च सत्संगे जिज्ञासा मोक्षदायिनी ॥३६॥
ततश्चास्य दैवगुणाः सात्त्विकाः संभवन्ति वै ।
धर्मकार्यं पुण्यकार्यं परकार्यं शुभप्रदम् ॥३७॥
स्वभावाज्जायते तेन यशः कीर्तिः प्रवर्धते ।
शान्तिश्च वर्धते नित्यं भाग्यरेखा प्रकाशते ॥३८॥

परोपकारो दानं च सत्यं चाऽहिंसनं व्रतम् ।
शीलं सन्तोषणं शौचं तपो वृद्धस्य सेवनम् ॥३९॥
अन्तर्यामिश्रवणं चाऽस्तेयं चानिन्दनं तथा ।
गुणास्त्वस्य भवेयुर्वै भाग्यरेखाप्रणोदिताः ॥४०॥
तैस्तु लक्ष्मीर्धनं धान्यं गृहं क्षेत्रं सुवाहनम् ।
कुटुम्बं सुतपौत्रादि सर्वं स्वर्गे प्रवर्तते ॥४१॥
शाश्वतं सुसुखं लोके परे लोके प्रजायते ।
तस्माद्वै मानवं देहं लब्ध्वा मा राक्षसो भवेत् ॥४२॥

कर्मणा राक्षसः पश्चाद् देहेऽपि राक्षसो भवेत् ।
देहराक्षसकर्माऽसौ कदापि नैव मुच्यते ॥४३॥
राक्षसोऽपि त्यजेद्धिंसाकर्म चान्यायबृंहितम् ।
तेन शुद्धिः शनैस्तस्य जायते सत्त्वगामिनी ॥४४॥
देहः शुद्ध्यति तीर्थेन सत्समागमतस्तथा ।
अन्तः शुद्ध्यति तपसा आत्मा गुणैः सुशुद्ध्यति ॥४५॥
दैहयं राक्षसभावं स विहाय मानसेऽपि च ।
विशारदो भवेच्छीघ्रं ततश्चात्माऽपि शुद्ध्यति ॥४६॥

नित्यशुद्धोऽप्यसत्संगपाशं त्यजति शुद्ध्यति ।
तेन दैवो भवेत्पश्चान्मोक्षमार्गं प्रयाति वै ॥४७॥
तस्मात्पापानि सन्दह्य गुर्वाश्रयं समाचरेत् ।
गुर्वाश्रयेण च हरेः प्राप्तिर्भवति नैत्यिकी ॥४८॥

तस्मान्नरोऽथवा नारी पापं त्यक्त्वा प्रभुं श्रयेत् ।
दशजन्मकृतं पापं नरदेहं ददाति वै ॥४९॥
शतजन्मकृतं पापं नारीदेहं ददाति वै ।
पुनः पापं पुनर्जन्म नारी वै नारकी व्यथा ॥५०॥

मलमूत्रभरा शश्वन्मलमूत्रक्रियागुणा ।
मलमूत्राऽपत्यवती मलमूलरजस्वला ॥५१॥
मलमूत्राश्रयगर्भा मलमूत्रादिवाटिका ।
मलमूत्रफलोत्पादा मलमूत्रावहा सदा ॥५२॥
कथं पापाद् विमुच्येत यदीशं भजते न सा ।
तस्मान्नारायणः कृष्णो भजनीयः सदैव ह ॥५३॥
यदा ज्ञानं गुरोर्लब्धं तदैव गुरुमाश्रयेत् ।
गतं दिनं कृतं कर्म न चाऽऽयास्यति वै पुनः ॥५४॥
गतं कृतं सरागं यज्ज्ञाने सति ततः परम् ।
विरागाय भवत्येव शोच्यं त्यक्त्वा शुभं श्रयेत् ॥५५॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
जपेन्मन्त्रं सदा यः स पापाय नैव कल्पते ॥५६॥
गृह्णाति तुलसीमालां सर्वपापात् प्रमुच्यते ।
सेवते साधुवर्यान् स मुक्तये जायते सदा ॥५७॥
भजते श्रीहरिं यः स शाश्वतानन्दमृच्छति ।
श्वः कर्तव्यं चरेदद्य चाद्यतनं क्षणेऽत्र च ॥५८॥
कालो नैव विपश्येत्तु कार्यं यदस्य शिष्यते ।
सा हानिर्यो गतः कालश्चात्मश्रेयो विना क्षणः ॥५९॥
स लाभो यः कृतः कालः स्वात्मश्रेयोऽर्थकः क्षणः ।
शास्त्रं ददाति पन्थानं यान्तु श्रेयोऽर्थका जनाः ॥६०॥
नित्यं प्रातस्तथा मध्ये सायं निशि क्षणे क्षणे ।
म्रियन्ते चाथ जायन्ते कीटवन्मानवादयः ॥६१॥
जीवन्तस्ते प्रपश्यन्ति गर्भे नाशं मृतोद्भवम् ।
जीवोद्भवस्य मासे वा नाशं वर्षे विनाशनम् ॥६२॥
बाल्ये कौमारके नाशं कैशोरे यौवने लयम् ।
वार्धक्ये निर्जने नाशं नष्टे किञ्चिन्न शिष्यते ॥६३॥
नष्टे श्रेयः कथं स्याच्च जीवन्नेव प्रसाधयेत् ।
जन्महानिं च मरणं मृत्युशून्यं च जीवनम् ॥६४॥
अर्जयन्तु महाभागाः कालं मृत्युं त्यजन्तु च ।
कालकालाधिकालं च परमेशं श्रयन्त्विह ॥६५॥
स्वार्थमात्रपरा लोकाः परलोकनिरोधकाः ।
मृषा स्नेहं प्रदश्यैव श्रेयोविघातकाः सदा ॥६६॥
माता मोक्षे जन्मदात्री पिता श्रेयःप्रपालकः ।
पत्नी पतितं रक्षेच्च पतिः पातीन्द्रजालतः ॥६७॥
भ्राता भासां हरेद्दिग्यान्पुत्रः पूतस्तु तारयेत् ।
स्वसा सुपुण्यं दद्याच्च श्वशुरः शान्तिमर्पयेत् ॥६८॥
यद्येते न गुणास्तेषु ते मृषास्नेहदर्शकाः ।
सम्बन्धः सर्वथा लोके प्रतारणफलोदयः ॥६९॥
ज्ञात्वा चैवं मृषा सर्वं चानिष्टफलदं तथा ।
विचार्यैव हरिं श्रित्वा भजेत् कृष्णनरायणम् ॥७०॥
देहेन मनसा वाचा कर्मणा स्नेहतस्तथा ।
संसेव्य श्रीहरिं कृष्णं नारायणं गतिं लभेत् ॥७१॥
इत्यादिकां कथां राधे ! श्रुत्वा मुमुक्षुतावती ।
माँ–अजा–राक्षसी भेजे कृष्णनारायणं ततः ॥७२॥
सोमनाथं परं तीर्थं कृत्वा भक्ताऽभवत्तदा ।
तस्यै सोनायनर्षिर्वै दौ मन्त्रं च तूलसीम् ॥७३॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इति जग्राह मन्त्रं सा ततो याता निजालयम् ॥७४॥
तलाजायाश्च सा दास्यं सख्यं करोति नित्यदा ।
वने च पर्वते नित्यं वन्यफलार्थयायिनी ॥७५॥
भ्रमते निर्भया नामजपं करोति सर्वदा ।
अथ तां निर्जने दृष्ट्वा सुरूपा यौवनान्विताम् ॥७६॥
सामुद्रो राक्षसो निन्ये नाम्ना झांझीवरो नृपः ।
नैर्ऋत्यां वै द्विसाहस्रक्रोशेभ्योऽति मुरालये ॥७७॥
मुरशेषो झांझीवरो भ्रातरौ द्वौ बभूवतुः ।
द्वीपत्रये मुरस्यैव राज्यं ह्यभूत्तदाऽल्पकम् ॥७८॥
ततो झांझीवरो नैजे राज्ये तस्मात्तु पश्चिमे ।
पृथ्व्यां चाब्धितटे माँऽजां निन्ये महोत्सवात् नृपः ॥७९॥
तस्यां जातः सुतो दैत्यश्चोत्पन्नमात्रयौवनः ।
कामगो व्योमगश्चापि मायाछालादिवेदनः ॥८०॥
सर्वनाशकरः सर्वद्वेषी लोकार्त्तिवर्धनः ।
सदोद्वेगकरो मातुः पितुर्वाक्ये त्वनादरः ॥८१॥
परकन्याहरो नैजं राक्षसं धर्ममाश्रितः ।
परद्रव्यहरो युद्धे रुचिमान् नित्ययोधनः ॥८२॥
एकदा स समुद्रस्थजलमानवपुत्रिकाम् ।
प्रसह्य चानिनायाऽथ पत्नीं तां विदधे निजाम् ॥८३॥
जलस्थायाः स्थले वासो रोगार्थं हि व्यजायत ।
रोगग्रस्तां दुर्बलां च ज्वरव्याप्तां क्षयान्विताम् ॥८४॥
इति तेनाऽरममाणां पशुमारममारयत् ।
आक्रोशनं तु सा चक्रे क्रन्दितं जननी तदा ॥८५॥
माँऽजा श्रुत्वा समायाता दयया भृतमानसा ।
शिक्षयामास पुत्रं स्वं मा पुत्र हिंसनं कुरु ॥८६॥
अबलाया बलं नास्ति रुग्णायास्तु विशेषतः ।
निर्बला ताड्यते तत्ते श्रेयो नैव भविष्यति ॥८७॥
पत्न्यां प्रतारणं पत्युस्तथा क्रोधेन ताडनम् ।
प्रसह्य भोगकरणं पत्यायुष्यविनाशकम् ॥८८॥

सगर्भायां च रुग्णायां श्रमितायां तथा सुत ।
स्कन्दितायामरक्तायां न गन्तव्यं कदाचन ॥८९॥
अकालगमने हानिर्लाभो नैव च नैव च ।
पत्नी स्वांगं निजात्मा च कथं तां पीडयेत् सुधीः ॥९०॥
अहिंसां कुरु शौचं च दयां रक्ष सुखाय वै ।
सत्ये वर्तय चास्तेये व्रते तिष्ठ सुखाय वै ॥९१॥
गुणे शीले च सन्तोषे नियमे संयमे व्रज ।
परमेशे भव भक्तः श्रद्धावान् विषयाँस्त्यज ॥९२॥
आत्मा पापैर्यदा छन्नस्तदा राक्षसतां गतः ।
परात्मदुःखकारित्वं राक्षसत्वं स्फुटं सुत ॥९३॥
मद्यमांसादनं नीतिवर्ज्यं रक्षष्ठमेव तत् ।
नीतिः पवित्रभोज्यं च परसन्तोषवर्तनम् ॥९४॥
व्रतं शान्तिप्रयोगश्च दैवताऽऽपादकं हि तत् ।
तस्माद् दैवो भव पुत्र ! मा गुणानासुरान् व्रज ॥९५॥
मृते देहे पुनर्नैव शुभलाभो भविष्यति ।
तस्माच्छ्रेयः परे लोके यथा स्यात्तत्प्रसाधय ॥९६॥
भजाऽनादिकृष्णनारायणं स्वात्मनि संस्थितम् ।
मया कथा श्रुता पूर्वं तेनाऽहं सुखिनी सदा ॥९७॥
राज्यसम्पत्समृद्ध्याद्यैः परिपूर्णाऽस्मि पुत्रक ।
त्वं नीत्या कृतकर्मा सन् पुण्यं वर्धय शाश्वतम् ॥९८॥
मात्रैवं तु समादिष्टो राक्षसो दुष्टमानसः ।
क्रोधेन यष्टिमादाय मातरं चाऽप्यताडयत् ॥९९॥
एवं नित्यं तु पुत्रेण ताड्यते जननी तथा ।
पत्नी च शात्रवी चेति मत्वा सन्ताड्यते मुहुः ॥१००॥
नहि वै शर्करावारि निम्बे करोति मिष्टताम् ।
कुपात्रे सूपदेशोऽपि कालुष्यमुपगच्छति ॥१०१॥
जननी जलकन्यायाः पक्षं करोति नित्यशः ।
राक्षसो जननी तेन ताडयत्येव नित्यशः ॥१०२॥
अथाऽयं जनकेनापि बोधितोऽपि न चाददे ।
सूपदेशं च जनकं ताडयितुं समुद्यतः ॥१०३॥
एकदा मातरं पत्नीं रज्जुभ्यां सुदृढं स च ।
बबन्ध चापि चिक्षेप समुद्रे पुण्यवर्जितः ॥१०४॥
मात्रा स्मृतस्तदा कृष्णनारायणः स्वयंप्रभुः ।
शीघ्रं तत्र समागत्य ररक्ष करयोश्च ते ॥१०५॥
उद्धृत्य मातरं चापि स्नुषां कृष्णनरायणः ।
भक्तां स्वगरुडे नीत्वा तद्गृहं प्रत्यपादयत् ॥१०६॥
तावद् देशान्तरं यातो झंझीवरः समाययौ ।
दृष्ट्वा श्रुत्वा च वृत्तान्तं क्रोधं त्ववाप दुःसहम् ॥१०७॥
मुरशेषं भ्रातरं स समाहूय ततोऽनयम् ।
पुत्रस्याऽऽवेदयामास भ्राता बोधयितुं ययौ ॥१०८॥
भ्रातर्येवमनयेन वर्तनं स समाचरत् ।
ततः क्रुद्धो मुरशेषो झंझीवरस्तथाऽनुगाः ॥१०९॥
मत्वा दुष्टं घातनीयं घातयितुं समुद्यताः ।
मात्रागस्करदुष्टोऽयं पित्रादिद्वेषकारकः ॥११०॥
मृत्युभयेन दुद्राव सामुद्रे तु जलान्तरे ।
तत्र वै धर्षयामासुः जामातारं तु तं रिपुम् ॥१११॥
क्रूरं दुष्टं चाऽनयस्थं सर्वेऽपि जलमानवाः ।
द्वीपे निक्षिप्य तं सर्वे पद्मुमारेण रोषतः ॥११२॥
पित्राद्यैर्मिलिता दैत्यं ताडयामासुरुल्बणाः ।
तत्यजुर्दयया तं च तत्र द्वीपे च ते जनाः ॥११३॥
तत्र विवासितश्चाऽयं वासं नम्रश्चकार ह ।
मात्रागस्करनामाऽऽसौ यत्र द्वीपे उवास च ॥११४॥
सोऽपि बली च महता बलेन चाऽनयेन च ।
अस्थापयन्निजं राज्यं ततो द्वीपः समुद्रके ॥११५॥
मात्रागस्करनाम्नैव ख्यातिं जगाम लौकिकीम् ।
झंझीवरस्य राज्यं च झंझीवाराभिधं ह्यभूत् ॥११६॥
मॉंजा च रक्षिता कृष्णनारायणेन सस्नुषा ।
भक्ता सा कीर्तिमापन्ना नारायणप्रतापतः ॥११७॥
मॉंऽजाऽम्बिकेतिनाम्ना सा प्रसिद्धिमगमत्ततः ।
तन्नाम्ना राज्यभूमिश्च मांजाम्बिकेति चाऽभवत् ॥११८॥
तन्नाम्ना त्वालयस्तत्र देवी तत्र च राजते ।
दैत्या म्लेच्छा राक्षसाश्च दानवास्तामुपासते ॥११९॥
इत्येतत्कथितं राधे मात्रागस्करचेष्टितम् ।
मात्रागस्करदैत्योऽयं रणंगमविमानकम् ॥१२०॥
लक्ष्मणार्यकुटुम्बेन संयुक्तं व्योम्न्यरोधयत् ।
अट्टहासं मुहुः कृत्वा योद्धुं समुपचक्रमे ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मध्ये रोधयतो मात्रागस्कर राक्षसस्य स्वस्त्रीमातृप्रभृतिताडनात्मक-दुष्टवृत्तान्तः, मांजाम्बिकायाः सस्नुषायाः समुद्रे क्षिप्तायाः श्रीकृष्णनारायणकृतरक्षणं चेत्यादि-निरूपणनामा पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके पश्चाद् यद्वृत्तं तद्वदाम्यहम् ।
विमानं स्तंभयामास खे मात्रागस्करस्तदा ॥ १ ॥

लक्ष्मणार्यस्य च रणंगमस्य सन्निधौ स्थितः।
गदया तौ विजेतुं च कर्तुं विमानमात्मसात् ॥ २ ॥
ऐच्छन्मदावलिप्तः स गर्जना बहुधा व्यधात्।
गलितास्तेन मेघाश्च वार्धेर्जलानि चुक्षुभुः ॥ ३ ॥
सहस्रयोजनान्ते ये स्थितातेऽप्यावहन् भयम्।
चकम्पे पृथिवी वायुर्विमानं कम्पमावहत् ॥ ४ ॥
कन्यकाश्च कुमाराश्च त्रासमापुः क्षणं तदा।
अथाऽयं भगवद्भक्तो रणंगमो महाबलः ॥ ५ ॥
सान्त्वयामास सर्वांश्च सस्मार बालकृष्णकम्।
द्रागेव तु हरिस्तत्र विमाने प्रादुरास ह ॥ ६ ॥
युद्धं कुरु विजयस्ते चेत्युक्त्वा स तिरोऽभवत्।
वैमानिकानां सर्वेषां तदा धैर्यमभून्महत् ॥ ७ ॥
अथाऽसुरः पुनः प्राह वैमानिक विहंगम।
देहि युद्धं च वा दत्वा विमानं स्वगृहं व्रज ॥ ८ ॥
रणंगमस्तु तं प्राह युद्धं ददामि वीर ते।
बाहुयुद्धं गदायुद्धं शरयुद्धं ददामि ते ॥ ९ ॥
शस्त्रयुद्धं मन्त्रयुद्धं प्राणयुद्धं ददामि ते।
ओमित्युक्त्वा राक्षसः स गदया तं रणंगमम् ॥१०॥
निजघान विमानस्थं मुक्तया वेगतस्तदा।
रणंगमः समुत्प्लुत्य पद्भ्यां गदां प्रताड्य च ॥११॥
अधःपतन्तीं दण्डे तां बाहुभ्यां जगृहे तदा।
तां गदां शतभारां संगृह्य रणंगमो नृपः ॥१२॥
भूत्वा व्योम्नि महाशैलनिभो जघान तं हृदि।
उत्प्लुत्य राक्षसस्तामापतन्तीं व्योममार्गतः ॥१३॥
जग्राह पाणिना यावत् तावद् रणंगमेन वै।
प्रहिता शतभारा च गदाऽन्या त्वनलान्विता ॥१४॥
लग्ना स्कन्धाग्रभागे सा कण्ठजत्रुं बभञ्ज ह।
अथ क्रुद्धो महाशैलो भूत्वा सहस्रभारिकाम् ॥१५॥
गदां धृत्वा महावेगान्मुमोच रणगोपरि।
रणगोऽपि महाशैलो भूत्वा सहस्रभारिकाम् ॥१६॥
कल्पवल्लीसमुत्थां च गदां धृत्वा क्षणान्तरे।
तयाऽऽपतन्तीं शतधा चूर्णयामास वै बली ॥१७॥
अथ मात्रागस्करश्च वीक्ष्याऽऽश्चर्यमवाप ह।
क्रुद्धो दुद्राव रणगं बाहुभ्यां धृतवाँश्च तम् ॥१८॥
रणगश्च महद्रूपं दधार तच्चतुर्गुणम्।
बाहुभ्यां राक्षसकण्ठं दधार पाशवत्तदा ॥१९॥
राक्षसोऽपि तदा सूक्ष्मं रूपं कृत्वाऽप्यपासरत्।
रणंगमस्तदा व्योम्नि स्थितोऽभून्निर्भयः क्षणम् ॥२०॥
तावद् दैत्यो व्योममार्गान्महाशक्तिं प्रगृह्य च।
रणंगमस्य शिरसि प्राहिणोदनलान्विताम् ॥२१॥
रणंगमस्तु त्वरितो लोहाकर्षणकारिणीम्।
शक्तिं नैजां मुमोचैनां समाकृष्याऽसुरोदरे ॥२२॥
लग्नाऽभवत्तु सा भित्त्वाऽऽन्त्रेषु स्थिराऽभवत्ततः।
असुरो बलवान् भिन्नमुदरं शृंखलादिना ॥२३॥
बद्ध्वा शक्तिं विनिष्कास्य क्षणं मूर्छामवाप ह।
व्योम्न्येव संस्थितो विद्युन्मन्त्रेण दीर्घसायकम् ॥२४॥
अभिमन्त्र्य प्राहिणोच्च नाशयितुं रणंगमम्।
रणगः प्रेषयामास वज्रं कल्पलतोद्भवम् ॥२५॥
शरं विनाश्य दैत्यस्य हृदि लग्नं विवेश ह।
दैत्यो मूर्छां गतो व्योम्नो वार्धेर्जले पपात ह ॥२६॥
कटिद्घ्नः समुद्रोऽस्याऽभवन्मूर्छान्वितस्य वै।
अथ शैत्यं समासाद्य विमूर्छश्चाऽभवत्तदा ॥२७॥
नम्रास्यो लज्जया भूत्वा धिक्कारं स्वात्मने ददौ।
ततो वै रचयामास मायां घोरां तु राक्षसीम् ॥२८॥
सहस्रधाऽभवद् दैत्यः सैन्यं रणंगमं ततः।
अभितस्ताडयामास बाणैर्दण्डैश्च मुद्गरैः ॥२९॥
गदाभिर्मुशलैः प्रासैस्तोमरैः प्रस्तरादिभिः।
शक्तिभिश्चाऽसिभिश्चापि हेतिभिर्बहुरूपिभिः ॥३०॥
रणंगमस्तदा कल्पलताबलात् क्षणान्तरे।
अदृश्यतां गतो मध्याद् विमानाग्रे स्थितोऽभवत् ॥३१॥
दैत्यो रुषान्वितो भूत्वा त्यक्त्वा रणंगमं तदा।
धर्षयितुं विमानं लम्बयामास करौ यदा ॥३२॥
तावत्कल्पलतोत्थवह्निना दग्धौ हि तत्करौ।
दग्धहस्तोऽसुरो यानं ग्रहीतुं न शशाक च ॥३३॥
हेतींश्चापि ग्रहीतुं न शशाकापि तु गर्ववान्।
ज्वालामुखोऽभवच्छैलो वह्निदावसमाकुलः ॥३४॥
रणंगमं प्रदग्धुं स मनोऽकरोत्तथापि वै।
कल्पलताऽमृतवर्षी रणंगमो विमानकम् ॥३५॥
ररक्ष च निजात्मानं विमानस्थान् सुधाजलैः।
प्रज्वलत्यसुरस्तत्र विमानं नैव दह्यति ॥३६॥
लक्ष्मणः स्वीयरक्षार्थे स्वस्तिपाठान् जजाप ह।
यत् तत्स्वस्त्ययनं पुण्यं सर्वमांगल्यमंगलम् ॥३७॥
ओं स्वस्ति कुरुतात् कृष्णनारायणः परेश्वरः।
कृष्णो नारायणो ब्रह्मा स्वस्ति नः कुरुताऽच्युतः ॥३८॥
स्वस्ति नः शंकरश्चापि शिवायुक्तः करोत्वपि।
ईश्वरा लोकपालाश्च ग्रहा महर्षयस्तथा ॥३९॥

विश्वेऽश्विनौ साध्यमरुद्गणाऽग्नयो दिवाकराः ।
यक्षाश्च वसवः स्वस्ति कुर्वन्तु किन्नरादयः ॥४०॥
नागाः सुपर्णाः सरितः सरांसि चाऽब्धयस्तथा ।
चक्रं सुदर्शनं मन्त्रा आयुधानि हरेस्तथा ॥४१॥
भक्ताश्च पितरो मुक्ता राधारमादिशक्तयः ।
भूतानि स्वस्ति कुर्वन्तु तेजस्विनोऽनलादयः ॥४२॥
स्वस्ति द्विपादिकेभ्यश्च चतुष्पादेभ्य इत्यपि ।
स्वस्ति नो बहुपादेभ्यस्त्वपादेभ्यस्त्वनामयम् ॥४३॥
विमानस्य स्वस्ति चाऽस्तु स्वस्ति रणंगमस्य च ।
वैमानिकानां कल्याणं स्वस्ति चाऽस्त्वपि मंगलम् ॥४४॥
ज्वालामुखेभ्यः स्वस्त्यस्तु मायाज्वालेभ्य इत्यपि ।
आसुरेभ्यस्तथा स्वस्ति चान्तरात्मा करोतु नः ॥४५॥
इत्येवं लक्ष्मणस्तत्र कृष्णनारायणं हरिम् ।
सस्मार स्वस्तिमांगल्यप्रदं श्रीपुरुषोत्तमम् ॥४६॥
प्रत्यक्षोऽभूद्बालकृष्णो विहस्याऽनलपर्वते ।
शान्तिः शैत्यं विमानस्याऽनामयं वोऽस्त्विति ब्रुवन् ॥४७॥
असुरस्य तु भस्मार्थं कृष्णनारायणः प्रभुः ।
आज्ञापयन्महातेजःपुरुषं पार्षदं निजम् ॥४८॥
महातेजःपुरुषोऽसौ ज्वालामुखं हि दानवम् ।
प्राऽज्वालयत् प्रसह्यैव पतंगं त्वनलो यथा ॥४९॥
विमानं भक्तसहितं ररक्ष भगवान् स्वयम् ।
भस्मीचकार च दैत्यं ज्वालामयं महानले ॥५०॥
दशयोजनविस्तीर्णो भस्मदेशोऽभवत्तदा ।
दैत्यस्य तत्र वै द्वीपे मात्रागस्करनामिनः ॥५१॥
एवं विनाश्य दैत्यं च विमानेन सुराष्ट्रकम् ।
आययुः श्रीहरिलक्ष्मणार्यरणंगमादयः ॥५२॥
कुंकुमवापिकाक्षेत्रे चाश्वपट्टसरोवरम् ।
विलोक्य लोमशं चापि नगरं स्वर्गसदृशम् ॥५३॥
अवतेरुः पृथिव्यां ते नारायणयुताः सुखात् ।
लोमशं प्रथमं नत्वा ययुर्गोपालमन्दिरम् ॥५४॥
सत्कृतास्तत्र च पित्रा बालकृष्णेन वै मुदा ।
मात्रा कम्भरया चापि मुदमापुः सुपूजिताः ॥५५॥
दत्तासनाः कृतावासाः कृतभोजनविश्रमाः ।
कृताभाषासवृत्तान्तास्ततो वै लक्ष्मणादयः ॥५६॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
पूजयितुं चोपदाभिराययुः कम्भरागृहम् ॥५७॥
सिंहासने हरिर्बालो व्यराजत तदिच्छया ।
प्रथमं चामृतवार्भिश्चरणौ सुखदायिनौ ॥५८॥
पुपूजुः श्रीहरिं सर्वाः कन्यका दिव्यविग्रहाः ।
लक्ष्मणस्याज्ञया ताश्च जगृहुश्चरणामृतम् ॥५९॥
पुष्पहारान् रत्नहारान् मौक्तिकीर्मालिकास्तथा ।
मुकुटं कुण्डले कलिंग चन्दनाऽक्षतहीरकान् ॥६०॥
कटकान् रशना भूषाश्चाम्बराणि समार्पयन् ।
फलानि चामृतपानान्यपि पात्राणि कैसरान् ॥६१॥
पदार्थान् विविधाँश्चाऽस्मै बालकृष्णाय ता ददुः ।
आरार्त्रिकं तथा चक्रुश्चक्रुः प्रदक्षिणं नमः ॥६२॥
चरणौ वक्षसि कृत्वाऽऽवापुः परां सुनिर्वृत्तिम् ।
एवं कन्याः प्रसंपूज्य श्रीकान्तं हृत्सु सन्दधुः ॥६३॥
कृष्णनारायणः कान्तस्तासां हृत्सु विवेश ह ।
स्वस्मिन् जहार सर्वासां हृदयानि च माधवः ॥६४॥
ज्ञात्वा श्रीलक्ष्मणो भावं कृष्णे कान्ते तु कान्यकम् ।
अनादिश्रीकृष्णनारायणाय प्रददौ च ताः ॥६५॥
यौतकं बहुरत्नादि ददौ कृतार्थतामगात् ।
ततः कुमाराः सर्वे च कृष्णपूजां समाचरन् ॥६६॥
लक्ष्मणार्यस्ततः पूजां चकार पारमेश्वरीम् ।
रणंगमो मालिनी च चक्रतुर्हरिपूजनम् ॥६७॥
ततः श्रीकम्भरालक्ष्म्याः पूजनं ते प्रचक्रिरे ।
श्रीमद्गोपालकृष्णस्याऽर्चनं दिव्यं प्रचक्रिरे ॥६८॥
ययुः श्रीलोमशं विप्रं तत्पूजां च प्रचक्रिरे ।
बालकृष्णो ददौ कन्या रक्षितुं लोमशाय ह ॥६९॥
लोमशः स्वाश्रमेऽरक्षद् वैष्णवीः कृष्णयोषितः ।
एवं कृतार्थतां सर्वे प्रपेदिरे हरेः पुरः ॥७०॥
पानभोजनसत्कारैरानन्दं लेभिरेऽतिगम् ।
अथ तीर्थविधिं चक्रुर्माघपूर्णाप्रगे च ते ॥७१॥
ददौ दानानि दिव्यानि स्वर्णरत्नाम्बराणि च ।
परिहारं ततः कृत्वा लक्ष्मणो निजराष्ट्रकम् ॥७२॥
गन्तुमियेष च तदा रणंगमोऽवदत्तु तम् ।
लोमशोऽयं महायोगी कुमारेभ्यो ददात्यपि ॥७३॥
मन्त्रं मोक्षकरं राजन् प्रदापय तदग्रतः ।
लक्ष्मणार्यस्ततो मन्त्रं दापयामास पुत्रकान् ॥७४॥
लोमशः श्रीहरिं स्मृत्वा पञ्चशतकुमारकान् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥७५॥
मन्त्रपूतान् प्रसम्पाद्य चक्रे तुलसीस्रग्युतान् ।
दिव्यं ज्ञानं ददौ तेभ्यो वासनाक्षयकारकम् ॥७६॥
पुत्राः शृणुत लोकोऽयं कर्मबन्धनजो मतः ।
सतां सेवा शुभं कर्म श्रीहरेर्भजनं शुभम् ॥७७॥

आत्मश्रेयः शुभं श्रेष्ठं तृष्णानाशः परं सुखम् ।
देहेन्द्रियादिप्राबल्यं वासनोद्भावकं मतम् ॥७८॥
ज्ञाने बलिष्ठे गौणं तज्जायते निग्रहात्मकम् ।
निग्रहो वासनादाहकरो भवति योगिनाम् ॥७९॥
देहेन्द्रियबलं तस्याऽकिञ्चित्करं प्रजायते ।
देहो नारी तदन्तःस्थो जीवो नरो भवत्यपि ॥८०॥
भुंक्ते देहं नरो जीवो भोगोऽस्य सुखदुःखदृक् ।
तस्माज्जीवेन वै भाव्यं ब्रह्मरूपेण सर्वथा ॥८१॥
परब्रह्माश्रयश्चाऽस्य ब्रह्मतापादको मतः ।
परब्रह्म स्वयं चास्ते कृष्णनारायणोऽत्र ह ॥८२॥
तद्योगो भवतां जातः कर्तव्यं नाऽवशिष्यते ।
कोटिजन्मार्ऽर्जितपुण्यैरयं कृष्णो ह्यवाप्यते ॥८३॥
सतां समागमेनात्र तत्प्राप्तिर्जायते द्रुतम् ।
साधुरूपो ह्ययं राजा रणंगमो भवत्सुहृत् ॥८४॥
आनीयात्र च वः श्रेयः परमं प्रत्यपादयत् ।
ततो भक्तिं चास्य नारायणस्य कुरुताऽनघाः ॥८५॥
सर्वार्पणात्मकं तत्र नैष्कर्म्यं कुरुताऽनघाः ।
प्रत्यक्षं तु विना नैव सिद्ध्यन्त्यत्र पुमर्थकाः ॥८६॥
परः पुमर्थो युष्माकं सिद्धः प्रत्यक्षयोगतः ।
येषां कृष्णे परा भक्तिर्यथा कृष्णे तथा गुरौ ॥८७॥
तेषां सर्वे पुमर्थाश्च सिद्ध्यन्त्येव न संशयः ।
ते ब्रह्मज्ञाः परं प्रेयुर्भुक्त्वा भोगान् सुपुष्कलान् ॥८८॥
सर्वार्पणं च विश्वासो माहात्म्यं भावना स्मृतिः ।
आत्मीयस्निग्धता चेति षट् परब्रह्मदायकाः ॥८९॥
शान्तिरास्तिक्यमतृष्णाऽनुद्वेगो निर्भया स्थितिः ।
अपारवश्यं च षट् ते महानन्दप्रदायकाः ॥९०॥
वृद्धाभिवन्दनं सेवोत्साहः कर्तव्यधर्मता ।
न्यायाभिसरणं ममताराहित्यं च मार्दवम् ॥९१॥
षडेते सर्वथा लोके जनानां पुण्यवर्धकाः ।
सहनं सर्वथा रुजां देहाभिमानवर्जनम् ॥९२॥
कीर्त्याद्यननुसन्धानं चाऽपरिग्रहवर्तनम् ।
अलालसा कुत्रचिच्च रागक्रियाविवर्जनम् ॥९३॥
षडेते सर्वथा लोके जीवन्मुक्तिविवर्धनाः ।
देवानां दर्शनं नित्यं तथा विवेकदर्शनम् ॥९४॥
लक्ष्यबिन्दोर्दर्शनं च फल्गुप्रदर्शनं तथा ।
अविघ्नदर्शनं चापि दर्शनस्य च दर्शनम् ॥९५॥
एते षट् मुक्तिदाः सन्ति विजयस्य प्रदास्तथा ।
अकामाश्च तथाऽस्वार्थाः आत्मस्वार्थाः परार्थकाः ॥९६॥
अविनष्टसदाचारा विज्ञाः षट् ते ह्यनन्धकाः ।
गुणमात्रग्रहा ये च गुणमात्रप्रदाश्च ये ॥९७॥
गुणदृष्टिप्रयोक्तारो गुणेष्वन्यान् प्रयुञ्जते ।
तत्त्वज्ञानप्रमोदाश्च उदासते गुणेतरात् ॥९८॥
त एते षट् निर्मलाश्च विदेहाः सन्ति वर्ष्मसु ।
गर्भं बाल्यं यौवनं च वार्धक्यं मरणं तथा ॥९९॥
प्रेतत्वं च समं येषां ते मुक्ता गुणवर्जिताः ।
देहो गृहं धनं क्षेत्रं भूषाम्बरं च भोजनम् ॥१००॥
षडेतेऽतिथिवद् यस्य तस्य पादोऽक्षरेऽस्ति वै ।
पुत्रं नारी पिता माता सुता दासी गवादयः ॥१०१॥
सतामर्थे प्रभोरर्थे कृता यैर्मानवैरिह ।
तेषां पादद्वयं चास्ति प्रभोश्चाक्षरधामनि ॥१०२॥
आत्मार्थे यत्प्रियं चास्ति तद्वै ददेत् सतां कृते ।
जीवं ददेत् पतिं ददेत् प्रियां ददेत् स मोक्षभाक् ॥१०३॥
धनं ददेदात्मनोऽर्थे आत्मनोऽर्थे ददेत् प्रियाम् ।
आत्मनोऽर्थे ददेद् राज्यं मोक्षार्थे सर्वमर्पयेत् ॥१०४॥
लोमशेनेत्युपदिष्टाः कुमारा लब्धचक्षुषः ।
दिव्यज्ञानयुतास्तं च लोमशं प्रणिपत्य च ॥१०५॥
स्वसृः सर्वाः प्रणम्यैवाऽऽभाष्य स्नेहमयं वचः ।
विमानं च समारुह्य पित्रा श्रीलक्ष्मणेन च ॥१०६॥
रणंगमस्य नगरं कोटीनारं ययुर्मुदा ।
सोमेश्वरं तथा तीर्थं कृतवन्तोऽतिभावतः ॥१०७॥
रणंगमार्ऽर्पितपूजां गृहीत्वा व्योममार्गतः ।
विमानेन समं सर्वे ययुरन्तार्किवर्तुलम् ॥१०८॥
भूगर्भं तांश्च प्रापय्य तद्राज्यं च रणंगमः ।
विमानेनाऽऽययौ नैजं कोटीनारपुरं पुनः ॥१०९॥
इत्येवं कथितं राधे ! भगवद्भक्तवर्तनम् ।
भुक्तिमुक्तिप्रदं श्रेष्ठं श्रोतुर्वक्तुः शुभावहम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रणंगममात्रागस्करयोर्युद्धं, रणंगमस्य विजयः, कुंकुमवापिकाऽऽगमनं, प्रभोः पूजनं, लक्ष्मणेन द्विसाहस्रकन्यार्पणं चेत्यादिनिरूपणनामा षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके कन्या लक्ष्मणस्य हरेः प्रियाः ।
सहस्रे द्वे लोमशश्च बोधयामास तत्त्वतः ॥ १ ॥

क्षणं वित्तं क्षणं च्चित्तं क्षणिकं वर्ष्मजीवनम् ।
क्षणिकाश्चापि संकल्पाश्चाऽक्षणिको हरिः प्रभुः ॥ २ ॥
आत्मा तस्य गृहं प्रोक्तं च्चात्मन्येव स्थितो हरिः ।
गृहेशः श्रीकृष्णनारायणः पाता पतिर्हि सः ॥ ३ ॥
जलं सृष्टं कललं च कर्कन्धुः पेषिका ततः ।
पुत्तलं च ततः पूर्णावयवं तेन निर्मितम् ॥ ४ ॥
बाल्यं च यौवनं चापि तेनैव निर्मितं सुताः ! ।
वार्धक्यं च वियोगश्च पञ्चत्वं तेन निर्मितम् ॥ ५ ॥

निर्मेयानां तु मातारं समाश्रयेद्धि मेयगः ।
तदा च्चामेययोगाद्धि भवत्यात्माऽप्यमेयवत् ॥ ६ ॥
अमेयो दृश्यते चात्र मेयवद् बालवत् सुताः ।
भवतीनां हृदये यः कृतावासो विराजते ॥ ७ ॥
स वै सेव्यः स वै पूज्यः स वै ध्येयो निरन्तरम् ।
प्राप्तः प्राप्तव्य एवाऽसौ प्राप्तव्यो नावशिष्यते ॥ ८ ॥
अनित्येन शरीरेण नित्यं मोक्षं प्रसाधयेत् ।
अनित्याभिः क्रियाभिश्च कृष्णं कान्तं प्रसादयेत् ॥ ९ ॥

व्रतं कृष्णो जपः कृष्णो दानं कृष्णे प्रकारयेत् ।
तपः सेवा हरेरेव संयमो नियमो हरौ ॥१०॥
यज्ञः कृष्णार्पणं सर्वं शाश्वतं धनमेव सः ।
समाधिः कृष्णरसता योगः कृष्णेन योजनम् ॥११॥
भजनं तेन चालापः कीर्तनं तद्गुणानुवाक् ।
दर्शनं तस्य साक्षाद्वै स्पर्शनं तत्सुयोजनम् ॥१२॥

तदिच्छयानुसरणं निग्रहो मोक्षदो मतः ।
तस्य प्रसन्नता पुण्यं शाश्वतं नेतरत् सुताः ! ॥१३॥
श्रवणं तस्य कर्तव्यं मननं चापि वै हरेः ।
स्वपनं तत्र कर्तव्यं प्रबोधनं सदा हरौ ॥१४॥
रमन्ते योगिनो यस्मिन् रमणं राम एव सः ।
श्रमितानां विरामोऽयं विरामोऽन्यो निरर्थकः ॥१५॥

रसिकानां रसश्चात्र रसयत्यनिशं हरिः ।
तद्विना रसनं च्चान्यन्निरर्थकं सुपुत्रिकाः ! ॥१६॥
पुत्रीभिः सर्वथा भाव्यं बालाभिः पञ्चवर्षके ।
शिष्याभिः सर्वथा भाव्यं बालाभिर्दशवर्षके ॥१७॥
कुमारीभिस्ततो भाव्यं च्चतुर्दशसमान्तरे ।
पत्नीभिश्च ततो भाव्यं कृष्णनारायणप्रभौ ॥१८॥
तत्र शृणुत पुत्रीत्वं शिष्यात्वं च यथार्थकम् ।
कुमारीतां तथा योग्यं पत्नीत्वं सार्थकं सुताः ॥१९॥
पुन्नाम्नो नरकात् त्रात्री पुत्री तेनेह गीयते ।
शेषपापहरा शिष्या शिष्णैः पापहरा हि सा ॥२०॥

पञ्चवर्षादूर्ध्वमस्याः पापं संक्रमते कृतम् ।
पित्रोः शिरसोर्नैवाऽस्ति यद्भूत्पञ्चपूर्वजम् ॥२१॥
कुं-सूत्रं, मां-च गायत्रीं, राति, या सा कुमारिका ।
सूत्रं यज्ञोपवीतं गायत्रीं विद्यां तु तत्त्वजाम् ॥२२॥
सम्पादयति या कन्या कुमारिका प्रकीर्तिता ।
विद्यास्नाता च सैवोक्ता सैवोक्ता ब्रह्मचारिणी ॥२३॥
पतिं नीयते गर्भे या गर्भात्मानं तु पत्निका ।
पतिधर्मेण या नीता सा पत्नी पत्नमःप्रिया ॥२४॥

शृणुत पुन्नामकानि नरकाणि च यानि वै ।
अनपत्यस्थितावुद्वेजनं यद् दम्पतीगतम् ॥२५॥
तद्दुःखं नरकं चाद्यं सापत्यत्वे विलीयते ।
पितॄणां पिण्डदानादि जलतर्पणमित्यपि ॥२६॥
अनपत्यकृतं सर्वं कवोष्णमुपजायते ।
तद् दुःखं नरकं पितृभोग्यं द्वितीयमुच्यते ॥२७॥
सापत्यत्वे तु पितॄणां तद्दुःखं वै विलीयते ।
अनपत्यगृहे नैव संस्काराश्चोत्सवास्तथा ॥२८॥

षोडशाद्या न जायन्ते तृप्यन्ति देवता न च ।
षष्ठ्याद्या नैव पूज्यन्ते दानानि न भवन्ति च ॥२९॥
तदिदं देवतादुःखं पुण्यप्रतिनिरोधनम् ।
तृतीयं नरकं प्रोक्तं सापत्यत्वे निवर्तते ॥३०॥
अनपत्यस्य समृद्धिर्वंशदायादवर्जिता ।
लक्ष्मीर्विश्वासविहता निरुत्साहा न मोदते ॥३१॥

तदिदं कमलादुःखं सौभाग्यप्रतिरोधकम् ।
चतुर्थं नरकं प्रोक्तं सापत्यत्वे निवर्तते ॥३२॥
अनपत्यगृहे नैव जामाता न तथा स्नुषा ।
मण्डपो न च माणिक्यस्तंभो नाग्निप्रदक्षिणम् ॥३३॥
गार्हपत्यो न वै तुष्येद् वह्निस्तदंगदेवता ।
तदिदं यज्ञदुःखं वै वंशविस्ताररोधकम् ॥३४॥

पञ्चमं नरकं प्रोक्तं सापत्यत्वे निवर्तते ।
अनपत्यगृहे नास्ति कामधर्मफलं मनाक् ॥३५॥
ऋतुधर्मफलं नास्ति ऋतुदानफलं न च ।
अफलं बीजहननं पापसम्पादकं भवेत् ॥३६॥
पापं दुःखप्रदं स्याच्च पुरुषार्थनिरोधकम् ।
षष्ठं तन्नरकं प्रोक्तं सापत्यत्वे निवर्तते ॥३७॥
अनपत्यगृहे नैव तुष्यन्त्यतिथयोऽपि च ।
अनपत्यमुखं नैव प्रातः पश्यन्ति मानवाः ॥३८॥
अनपत्यनिवासं च पार्श्वे नेच्छन्ति पुत्रिणः ।
एतद्वै मानवं दुःखं जनताऽऽदररोधकम् ॥३९॥

सप्तमं नरकं प्रोक्तं सापत्यत्वे निवर्तते ।
अनपत्यौ प्रियाकान्तौ प्रेताविवातिगर्हितौ ॥४०॥
जीवन्तावपि तौ प्रेतौ विशेषो नात्र विद्यते ।
मरणे परहस्तेन ययोर्वै और्ध्वदैहिकम् ॥४१॥
यद्भवेन्न गतिदं च प्रेतगतिनिरोधकम् ।
अष्टम नरकं प्रोक्तं सापत्यत्वे निवर्तते ॥४२॥
अनपत्यगृहे दोषाश्चेमे भवन्ति बोधत ।
अन्येषां संक्रमस्तत्र पापिनामुपसेवनम् ॥४३॥
पारुष्यं दानधर्मादौ निरर्थकमुपार्जनम् ।
असन्तोषः सदा चास्ते भवभूतिविनाशनम् ॥४४॥
भ्रंशनं निजधर्माणां मारणं भयमित्यपि ।
मिष्टैकाशनमेवाऽपि मिथ्याभिशंसनादिकम् ॥४५॥
परजायापरपुंसंसेवनं लुब्धता तथा ।
लोलुपत्वं पुत्रवतां निन्दनं शिष्टलंघनम् ॥४६॥
शिष्टाचारविनाशश्च सत्क्रियादिविलोपनम् ।
संस्कारपरिहीनत्वं परनाशे प्रसन्नता ॥४७॥
हानिर्धर्मार्थकामानामपवर्गस्य दूरता ।
सर्वस्य चाततायित्वं नरकाय निगद्यते ॥४८॥
एतैः पुन्नामकैः पापैर्नरकैरावृतः सदा ।
अनपत्यो जनो घोरान् नरकान् वै निषेवते ॥४९॥
अपत्यं नरकं घोरं विनाशयति सर्वशः ।
एतस्मात् कारणात् पुत्रीपुत्रवत्त्वं दिवं मतम् ॥५०॥
शिष्यः शिष्या च पापानि हरत्येव च तद्यथा ।
शिष्टानां तु भवेच्छिष्यो दासो भृत्यश्च सेवकः ॥५१॥
यद्वा शिष्या सखी दासी भृत्या वा सेविका तथा ।
शिष्टानां वा गुरूणां सा स च साहाय्यकारकौ ॥५२॥
देवसेवा पितृसेवा ऋषिसेवाऽतिथेरपि ।
सेवनं छिद्यते क्वापि विना शिष्यमुपप्लवे ॥५३॥
तद्विघ्नं पापकृत्प्रोक्तं शिष्यस्तस्माद्धि तारयेत् ।
अगृहस्थस्य च शिष्यवर्जितस्य जनस्य तु ॥५४॥
सर्वकार्याणि नैवेह सिद्ध्यन्ति नरकं हि तत् ।
विद्या कलाश्च कौशल्यं मन्त्रो रीतिश्च शाश्वती ॥५५॥
शिक्षणं च क्रमश्चापि पद्धतिश्च परम्परा ।
साजात्यं चेति तत्सर्वं विना शिष्यं विलीयते ॥५६॥
तन्नाशो नरकं प्रोक्तं सशिष्यत्वे निवर्तते ।
विज्ञाने युज्यते शिष्यो दायभागे तु पुत्रकः ॥५७॥
अर्धकार्यकरी पत्नी नरकस्य विनाशकाः ।
विना पत्नीं न कुत्रापि स्थितिर्मान्यं गृहादिषु ॥५८॥
न विश्वासो नाऽवकारो न शान्तिर्नरकं हि तत् ।
न होमादि न वै शुद्धिस्तत्पापं नरकं सदा ॥५९॥
नेह लोके च काचिद्वै सिद्धिः परत्र नैव च ।
नरकं तत्सर्वदृश्यं सपत्नीत्वे निवर्तते ॥६०॥
अज्ञानं नरकं प्रोक्तं सर्वदाऽनक्षरज्ञता ।
सविद्यत्वे विनश्यत्तु कुमारब्रह्मचारिषु ॥६१॥
संसारोऽयं कृतस्तादृग् यत्र साहाय्यमन्तरा ।
कार्यं सिद्ध्यति नैवेह वर्णेषु चाश्रमेष्वपि ॥६२॥
असाहाय्यं च नरकं कार्यहानिकरं यतः ।
ससाहाय्यं तु च स्वर्गं कार्यसिद्धिकरं यतः ॥६३॥
पुत्रो हि बहुकार्येषु बहुकार्येषु शिष्यकः ।
बहुकार्येषु पत्नी च नरकत्राः सहायदाः ॥६४॥
कायिकं वाचिकं वापि मानसं च स्वभावजम् ।
असहायकृतं चापि पापं बहुविधं च यत् ॥६५॥
तत्सर्वं विलयं याति सुतशिष्यप्रियादिभिः ।
तस्माच्च पुत्रशिष्यौ हि विधातव्यौ विपश्चिता ॥६६॥
दायादा बान्धवाः षट् च षट् च प्रजाः प्रकीर्तिताः ।
शिष्यास्त्रयस्तथा पत्न्यस्तिस्रश्चेति प्रकीर्तिताः ॥६७॥
पतयश्च त्रयः प्रोक्ता यथाकर्मानुबन्धिनः ।
शृणुत पुत्रिकाश्चात्र संक्षेपात् तान् वदामि वः ॥६८॥
औरसः क्षेत्रजश्चापि दत्तः कृत्रिम इत्यपि ।
गूढोत्पन्नस्तथाऽऽनीतो दायादा बान्धवास्तु षट् ॥६९॥
अमीषु षट्सु सत्स्वेव ऋणपिण्डधनक्रियाः ।
गोत्रख्यातिः कुले वृत्तिः प्रतिष्ठा वंशविस्तरः ॥७०॥
तत्रौरसो निजजातः प्रतिबिम्बं निजात्मनः ।
पत्न्यामन्येन सञ्जातश्चाज्ञया क्षेत्रजस्तु सः ॥७१॥
मातापितृभ्यां यो दत्तः दत्तकः सहि गीयते ।
मित्रादिपुत्रं पुत्रं यो मन्येताऽयं तु कृत्रिमः ॥७२॥
न ज्ञायते गृहे केन जातस्त्विति तु गूढकः ।
बाह्यतो यः समानीतश्चानीतो गद्यते हि सः ॥७३॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तो निम्नवर्णाजश्चैते नामधारकाः ॥७४॥
कन्याजातस्तु कानीनाः सगर्भोढः सहोढजः ।
मूल्यैर्गृहीतः क्रीतो वै पुनर्भ्वास्तु पुनर्भवः ॥७५॥
दत्ताऽप्येकस्य या कन्या भूयोऽन्यस्य प्रदीयते ।
सा पुनर्भूर्नारी चेति पौनर्भवस्तु तत्सुतः ॥७६॥
दुर्भिक्षादौ स्वयंप्राप्तोऽरण्ये त्यक्तोऽथवा स्वयम् ।
अरक्षको वने प्राप्तः स्वयंदत्त उदाहृतः ॥७७॥

श्रेष्ठवर्णनरान्निम्ननारीजो निम्नवर्णकः ।
अमीषाम् ऋणपिण्डादिकथा नास्त्येव वंशजा ॥७८॥
शिष्यास्त्रयो दीक्षितश्च सेवको भृत्य इत्यमी ।
दायादस्तत्र यो यस्याऽऽजीवनं चात्मसात्कृतः ॥७९॥
पत्न्यस्त्रिधा च विध्यूढा पुनर्व्यूढा निगूढिका ।
व्यवहारे चोत्तमा मध्यमाऽधमा क्रमाद्धि ताः ॥८०॥
पतयस्त्रय ऊढश्च द्व्यूढश्चोपपतिस्तथा ।
उत्तमो मध्यमोऽधमो व्यवहारे क्रमादमी ॥८१॥
उपदेशो यज्ञसूत्रं दातव्यं तेभ्य एव च ।
संस्काराश्चापि कर्तव्या अनपत्यत्वहानये ॥८२॥
दायादा बान्धवा यद्वद् बान्धव्योऽपि तथाविधाः ।
कानीनाद्या यथा पुत्राः पुत्र्यश्चापि तथाविधाः ॥८३॥
शिष्या नरास्त्रयो यद्वत् तिस्रस्तथैव कन्यकाः ।
व्यवहारोऽपि तत्राऽस्ति चोत्तमो मध्यमोऽधमः ॥८४॥
भवत्यो मम शिष्याश्च भवन्त्यत्र हि मन्त्रतः ।
शिष्यपत्न्यः स्नुषाश्चापि ज्ञानपात्र्यो भवन्ति च ॥८५॥
तस्माज्ज्ञानं प्रदातव्यं दायभागात्मकं मम ।
गुरुतो दायभागो वै प्राप्तव्यः शिष्यकोटिभिः ॥८६॥
ज्ञानं मुक्तिस्तथा भक्तिः सेवा देवार्चनादिकम् ।
आत्मयोगो हरेः प्राप्तिः पुण्यं तीर्थादिसेवनम् ॥८७॥
इत्येते दायभागा वै शिष्यवर्गस्य पावनाः ।
अथाऽन्यच्च प्रवक्ष्यामि षोडशारं सुदर्शनम् ॥८८॥
यज्ज्ञात्वा न परं किञ्चिज्ज्ञातव्यमवशिष्यते ।
सुदर्शनं परब्रह्म कृष्णनारायणः स्वयम् ॥८९॥
भवतीनां हृदयस्थो बहिःस्थः कान्त उत्तमः ।
कान्तात्मकं परं योगं स्वदेहे प्रवदामि वः ॥९०॥
आगच्छन्तु जलं हस्ते गृह्णन्तु कन्यकोत्तमाः ।
मन्त्रं गृह्णन्तु सर्वाश्च कृष्णकान्तस्य मन्मुखात् ॥९१॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इति ता राधिके ! मन्त्रं जगृहुर्लोमशाऽऽननात् ॥९२॥
तदर्थं च ततः प्राह योगं षोडशपत्रकम् ।
ओंकारो वर्तते केशेष्वयं श्रीपुरुषोत्तमः ॥९३॥
नकारो ब्रह्मरन्ध्रे च नारायणः स्वयं प्रभुः ।
मकारो मुखमापन्नो माणिक्यापतिरीश्वरः ॥९४॥
श्रीकारश्चक्षुषोरास्ते श्रीपतिः कमलापतिः ।
कृकारः कृष्ण एवासौ कृकाटिकाकृतस्थितिः ॥९५॥
ष्णकारो हृदये चास्ते बालकृष्णोऽयमीश्वरः ।
नाकारो वर्तते नाभौ नरनारायणात्मकः ॥९६॥
राकारो वर्तते रोमस्थानेषु राधिकापतिः ।
यकारो वर्तते योनिपीठे योगजलाशयी ॥९७॥
णाकारो वर्तते नाडीमण्डले हि नरोत्तमः ।
यकारो वर्तते इङ्गितार्थदो मानसे हरिः ॥९८॥
पकारः पादयोरास्ते प्रभुः पारवतीपतिः ।
तकारः पिण्डिकासंस्थः प्रभाकान्तः प्रभुः स्वयम् ॥९९॥
येकारो वर्तते जान्वोरैश्वर्याधिपतिः प्रभुः ।
स्वाकारः सर्वगात्रे मे मञ्जुलात्मा विराजते ॥१००॥
हाकारो हंसजात्मा च कैंकर्ये होममाप्तवान् ।
सगुणेशः पञ्चदशस्वहं वै षोडशी कला ॥१०१॥
कलावान् श्रीकृष्णनारायणः सर्वकलापतिः ।
मम नाथस्त्वेवमर्थं परं ज्ञात्वा न जन्मभाक् ॥१०२॥
एवं ताः कन्यका राधे ! जगृहुर्मन्त्रमालिकाः ।
जेपुर्मेजुः पतिं कान्तं निजाऽभिन्नपरेश्वरम् ॥१०३॥
इमं त्वर्थं परं ज्ञात्वा स्वदेहे श्रीनरायणम् ।
विराजमानं प्रत्यक्षं ये भजन्ति नराः स्त्रियः ॥१०४॥
ते परंपदगाश्चाऽन्ते भविष्यन्ति न संशयः ।
पठनाच्छ्रवणादस्य भुक्तिर्मुक्तिर्भवेद्ध्रुवम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लक्ष्मणकन्यकाभ्यो लोमशकृतपुत्रशिष्यपत्न्यादिरूपोपदेशादि-निरूपणनामा सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके रम्यां चमत्कारमयीं कथाम् ।
चैत्रे श्रीबालकृष्णस्य पूजात्मिकां वदामि ते ॥ १ ॥
पितामहसुता नित्ययौवना व्रतसंस्थिताः ।
ब्रह्मचर्यपरा नित्यं सामवेदस्य पाठिकाः ॥ २ ॥
सूर्यवद्रूपसम्पन्नाः सुषुम्णेडा च पिङ्गला ।
तिस्रः कन्याः कुमार्यश्चाऽनुज्ञया वेधसो भुवि ॥ ३ ॥
मानसयस्ता मनोवेगाश्चाययुस्तीर्थवाञ्छया ।
श्रुतं ताभिः पुरा सत्ये नारदस्य मुखान्ननु ॥ ४ ॥
पृथ्व्यां नारायणः कृष्णो राजते कमलापतिः ।
अनादिश्रीकृष्णनारायणः श्रीपार्वतीपतिः ॥ ५ ॥
ततो जिज्ञासयामासुः पप्रच्छुर्नारदं तु ताः ।
कीदृग्गुणः स भगवान् यत्प्रशंसापरो भवान् ॥ ६ ॥
नारदो हि तदा प्राह भगिन्यो ! भगवान् हि सः ।
अस्मत्पितुः पिता यश्च वैराजस्तस्य यः पिता ॥ ७ ॥

महाविष्णुस्तस्य पिता प्रधानपुरुषस्तु यः ।
तस्य पिता प्रकृतीशस्तत्पिता श्रीहरिः स्वयम् ॥ ८ ॥
अनादिश्रीकृष्णनारायणः सोऽस्ति कुमारकः ।
पृथ्व्यां श्रीकम्भरापुत्रः श्रीमद्गोपालनन्दनः ॥ ९ ॥
अस्मल्लोकः सत्यलोकस्तत्परो धरणिस्तरः ।
तस्मात्परं जलस्यास्त्यावरणं च ततः परम् ॥१०॥
वैकुण्ठं राजते तस्मात्परं तेजःकटं मतम् ।
वैराजा नाम लोकाश्च यत्र वैराजनामकः ॥११॥
ईश्वरो राजते तस्माद् यन्महावैष्णवं पदम् ।
महाविष्णुस्तत्र चास्ते चाथ प्रधानधाम वै ॥१२॥
तत्राऽव्याकृतसंज्ञं च यत्र भूमा विराजते ।
तद्वै वैकुण्ठमपरं लक्ष्मीनारायणाश्रितम् ॥१३॥
ततः प्रकृतिसात्लोके धामगोलोकमुत्तमम् ।
श्रीकृष्णोऽत्र, वासुदेवोऽव्याकृते, राजते प्रभुः ॥१४॥
तत्परं त्वक्षरं धाम यत्र ब्रह्म विराजते ।
अनन्तमुक्तसहितं दिव्यैश्वर्यविराजितम् ॥१५॥
तस्मात्परं बृहत्प्रोक्तं परं धाम हरेः शुभम् ।
शाश्वतं सर्वशोभाढ्यं सर्वधामपरं महत् ॥१६॥
परधामस्थितोऽनादिश्रीकृष्णश्रीनरायणः ।
अनादिश्रीकृष्णनारायणो यो भगवान् स्वयम् ॥१७॥
यस्माद् भवन्ति वै व्यूहा वासुदेवादयस्तथा ।
अवतारा ईश्वराश्च देवा ऋषिवरास्तथा ॥१८॥
अनन्ताः शक्तयो यस्य राधारमाप्रभाश्रियः ।
लक्ष्मीपारवतीहंसाकृष्णावृन्दाजयादिकाः ॥१९॥
शतं च द्वादश चैव श्रेष्ठास्तत्रापि पार्श्वगाः ।
प्रभापारवतीराधालक्ष्म्यश्चतस्र एव ताः ॥२०॥
सदा स्वमूर्त्यभिन्नास्ता राधा हृदन्तरे स्थिता ।
लक्ष्मीः रेखास्वरूपेण वक्षस्युपरि संस्थिता ॥२१॥
प्रभा कृष्णानने तेजःपरिधिरूपिणी स्थिता ।
पारवती पद्मचिह्नात्मिका वामेऽस्य सक्थिनि ॥२२॥
वर्तन्ते एवमन्याश्च शरीरावयवात्मिकाः ।
कोट्यर्बुदाश्च यास्त्वन्यास्तास्तु रोमसु सर्वशः ॥२३॥
तन्मूर्तौ संस्थिता देव्यो मुग्धा भजन्ति तं पतिम् ।
सर्वलावण्यसौन्दर्याऽऽनन्दसौभाग्यशेवधिम् ॥२४॥
भजन्ते ब्रह्मवासिन्यः कोट्यर्बुदकुमारिकाः ।
नालमेध्यश्चतुर्दशसहस्राणि भजन्ति तम् ॥२५॥
दीपावल्यः कोटिशश्च षष्टिस्तत्कन्यकास्तथा ।
तलाजा दैत्यकन्या च गोकन्याश्चार्चयन्ति तम् ॥२६॥
आर्जन्त्याद्याः शतसंख्या भजन्ते तं परेश्वरम् ।
कन्या क्रोधनिकानाम्नी भजते तं नरायणम् ॥२७॥
कन्दराः कन्यकाश्चापि भजन्ते कोटिसंख्यकाः ।
ब्रह्मपुत्री तथा सूत्री वनदेवश्च लक्षकम् ॥२८॥
राक्षसीकन्यका लक्षसंख्या भजन्ति तं पतिम् ।
कंकतालीयजातीयाः पंचषाश्चायुतं तथा ॥२९॥
ब्रह्मसरसोऽप्सरसः कन्यका देवकोटिकाः ।
अर्यम्णः कन्यकाश्चापि कुबेरकन्यकास्तथा ॥३०॥
इन्द्रकन्या यमकन्या वायुकन्याः सहस्रशः ।
ऋतुकन्या विश्वकर्मकन्याश्च द्रुमकन्यकाः ॥३१॥
दैत्यदानवकन्याश्च पञ्चसाहस्रसंख्यकाः ।
भजन्ते श्रीकृष्णनारायणं तं परमेश्वरम् ॥३२॥
वसन्तस्य तथा पत्न्यो भजन्ते तं च षोडश ।
पञ्चशतं साल्मालकन्यकाश्च भजन्ति तम् ॥३३॥
नागकन्यायुतं शावदीनकन्यासहस्रकम् ।
ऐन्द्रजालिकरौद्यश्च कन्याः सहस्रसंख्यकाः ॥३४॥
षष्टिकन्याः किशोर्यश्च विद्यात्मिकाश्चतुर्दश ।
वह्नेः पुत्र्यः श्रवणानां पुत्र्यः संवत्सराऽऽत्मजाः ॥३५॥
वार्क्षीकन्याश्च खनिजास्तं भजन्ति परेश्वरम् ।
द्वेसहस्रे कन्यकाश्च लक्ष्मणस्य भजन्ति तम् ॥३६॥
योगीशं चाऽसंख्यरूपं किशोरं शाश्वतं प्रभुम् ।
तस्य योगेन मुक्तिश्चाऽऽनन्दवार्धिसमर्जनम् ॥३७॥
सर्वदा वर्तते यस्मात्तं भजन्ति मुमुक्षवः ।
अहं तद्दर्शनं कर्तुं नित्यं प्रातः प्रयामि च ॥३८॥
तस्य गुणान् प्रगायामि गायत्येनं सरस्वती ।
इत्युक्ता नारदेनैताः स्वसारस्तिस्र एव तु ॥३९॥
तद्गतमानसाः सत्याद् विमानेन समाययुः ।
मन्दाकिन्यास्तु पन्थानं त्वनुसृत्य हिमालयम् ॥४०॥
अवतेरुः श्रीबदरीपतिं दृष्ट्वा प्रपूज्य च ।
कुरुक्षेत्रं पुष्करं चार्बुदं सरस्वतीं तथा ॥४१॥
दृष्ट्वा चतुष्टिलाद्रिं च अश्वपट्टसरोवरम् ।
आययुस्ता विमानेन कृष्णदर्शनलालसाः ॥४२॥
आकाशमार्गाद् भामिन्यो ददृशुरुज्ज्वलां क्षितिम् ।
चैत्रस्य पूर्णिमासायं चन्द्रोदयक्षणे हि ताः ॥४३॥
व्योम्ना तत् कुंकुमवापीक्षेत्रं सूर्यमिवाऽपरम् ।
भ्राजमानं व्यपश्यँश्च तिमिरं न मनागपि ॥४४॥
ततस्तास्तर्कयामासुः क्षेत्रं तत्पौरुषोत्तमम् ।
सरोवरं च नगरं विशालं ददृशुश्च ताः ॥४५॥

मध्ये तु कानकं श्रेष्ठं प्रासादं सूर्यवर्त्तुलम् ।
सूर्यबिम्बमिवाऽऽत्मानं ख्यापयन्तं च ददृशुः ॥४६॥
उद्यानानि विचित्राणि देवपुष्पमयानि च ।
देवगृहाणि रम्याणि ऋष्याश्रमान् सहस्रशः ॥४७॥
दिव्याश्च देवताश्चापि ददृशुर्वनदेवताः ।
अवताराश्रमांश्चापि तथेश्वरगृहाणि च ॥४८॥
लोमशस्याश्रमं दिव्यं शुभं चन्द्रवदुज्ज्वलम् ।
दिव्यौषधिप्रविततं ददृशुः कन्यकाश्रितम् ॥४९॥
तीर्थसेतुं च परितो ददृशुश्च विहायसा ।
चतुःप्रदक्षिणान्यस्य क्षेत्रस्य संविधाय ताः ॥५०॥
प्रतर्क्यं सूर्यसदृशं कृष्णनारायणालयम् ।
जयशब्देन सहिताः पुष्पाणां वर्षणं व्यधुः ॥५१॥
जयशब्दस्तु देवीनां व्योम्नोऽव्याप्नोत् समन्ततः ।
श्रुत्वा शब्दान् जयमिश्रान् लोका व्योम्नि व्यलोकयन् ॥५२॥
चन्द्रवत्कौमुदीव्याप्तं चाकृत्या पद्मसन्निभम् ।
नेत्रानन्दकरं गन्धसुगन्धाढ्यं विमानकम् ॥५३॥
तेजोभृतं विचित्रं च रंगानुरंगशोभितम् ।
अन्तःप्रविश्य च चक्षुर्दृश्यं कन्याश्रितं शुभम् ॥५४॥
समृद्धं दिव्यवस्त्वाढ्यं वस्त्रतोरणवर्धितम् ।
सौवर्णकलशैर्युक्तं त्रिशृंगं न्यासनान्वितम् ॥५५॥
ददृशुर्मानवाद्याश्च परमाश्चर्यमागताः ।
विमानं श्रीकृष्णनारायणदेवालयोपरि ॥५६॥
स्थिरं चाभूदम्बरे च तत्र तिस्रस्तु कन्यकाः ।
शुश्रुवुः सर्वतो जातान् नीराजनसमुद्भवान् ॥५७॥
निंनदान्नैकसंघोषान् स्तोत्रोत्तमानसंख्यकान् ।
तल्लीनास्तास्तदा जाता आपुः शान्तिं परां तदा ॥५८॥
अथ ज्ञात्वा श्रीकृष्णस्ता भक्ता ब्रह्मसुता रताः ।
स्वयं किशोररूपश्च विमाने प्रादुरास ह ॥५९॥
दिव्यदर्शनजं सौख्यं स्पर्शानन्दं परात्परम् ।
ददौ क्षणं च ताभ्यश्च संश्लेषजं महासुखम् ॥६०॥
विमानं श्रीहरिस्तत्राऽवतारयत् निजालये ।
अदृश्योऽभूत्तदा याने स्वर्णसौधे गतोऽभवत् ॥६१॥
कन्यकास्ता विमानाच्चाऽवतेरुः कृष्णमन्दिरे ।
चन्द्रशालोपरि क्षणं तस्थुर्विमानसन्निधौ ॥६२॥
उपदास्ता विमानाच्च संगृह्य दिव्यभासुराः ।
चन्द्रशालोपरि न्यधुः प्रतीक्षन्त्योऽभिमार्गदम् ॥६३॥
किंकरं किंकरीं चापि जानतीं चावरोहणम् ।
अन्तःप्रवेशनार्थं च प्रतीहारीप्रतीक्षकाः ॥६४॥
तस्थुस्ताश्चन्द्रशालायां तावच्छ्रीकम्भरासुता ।
सन्तोषानामिका तूर्णं सख्या सुशीलया सह ॥६५॥
भ्रातुर्भगवतः प्रत्न्याऽमृतया च सहाऽऽययौ ।
चन्द्रशालास्थिता दिव्याः कन्यास्तेजःशरीरिणीः ॥६६॥
नेमुर्विलोक्य च शीघ्रं स्वागतं जगदुः सुखम् ।
आगच्छत महाभागाः कृष्णनारायणं प्रति ॥६७॥
मातरं पितरं चापि सप्तमम्वां विराजितम् ।
इत्युक्तास्ताः सुषुम्णा च इडा च पिङ्गला तथा ॥६८॥
पुष्पहारान् चन्दनानि कर्पूरं चाऽक्षतांस्तथा ।
कुंकुमं गन्धसारांश्च कैसराण्युत्तमानि च ॥६९॥
रत्नहारान् रत्नभूषा मकुटं कुण्डले तथा ।
दिव्यताम्बूलकं दिव्यफलान्यप्यवलेपनम् ॥७०॥
दिव्यं च कज्जलं रम्यं तैलं ब्राह्मं समत्तमम् ।
सौगन्धिकवारिसारान् वह्निशुद्धांशुकानि च ॥७१॥
सद्रत्नहीरकहारान् पात्राणि कानकानि च ।
आदर्शान् दिव्यदृश्यांश्च दिव्यसम्मर्दचूर्णकान् ॥७२॥
दिव्यनैवेद्ययोग्यांश्च मिष्टभोज्यान्नपाचितान् ।
अमृतान् दुग्धसारांश्चाऽसंख्यबीजफलानि च ॥७३॥
दिव्यपेयाढ्यपात्राणि समादाय तथा पुनः ।
दिव्यशय्यास्तरणानि दिव्यधार्याम्बराणि च ॥७४॥
गृहीत्वा पात्रहस्तास्ताश्चावतेरुः शनैः शनैः ।
भव्यसोपानाऽवरोहमार्गैर्भूम्यन्तरं च ताः ॥७५॥
सन्तोषा कन्यका चाग्रे मध्ये तिस्रोऽजकन्यकाः ।
पृष्ठे चाऽप्यमृता भ्रातृजाया सुशीलिका ततः ॥७६॥
एकां भूमिमवतीर्य विशाले भूमिसंस्तरे ।
विविशुः सप्तमभूमौ यत्र कृष्णनरायणः ॥७७॥
तथा श्रीकम्भरालक्ष्मीर्माता विराजते सती ।
मातरं ताः सम्प्रणम्य बालकृष्णं प्रणम्य च ॥७८॥
दिव्यासनेषु दत्तेषु निषेदुस्ता यथोचितम् ।
आभाषिताश्च ता मात्रा मंगलं कुशलं प्रति ॥७९॥
प्रयोजनं तथा तासां जनकं जननीं प्रति ।
ऊचुः परिचयं सर्वे ब्रह्मणस्तु सुता वयम् ॥८०॥
सुषुम्णा च इडा चापि पिंगला नाम कन्यकाः ।
कुमारिका निजभ्रातुर्नारदस्योपदेशतः ॥८१॥
विज्ञाय श्रीमतीपुत्रं त्वनादिपरमेश्वरम् ।
कृष्णनारायणं चैनं किशोरं कान्तमच्युतम् ॥८२॥
द्रष्टुं वयं समायाता धन्याः स्मोऽस्याऽद्य दर्शनात् ।
अद्य नः सफलं जन्म कौमार्यं सफलं च नः ॥८३॥

देवीत्वं सफलं चापि मातस्तेऽपि च दर्शनात् ।
इत्युक्त्वा चाऽमृतां पृष्ट्वा सन्तोषां च सुशीलिकाम् ॥८४॥
पूजां चक्रुः केशवस्य बालकृष्णस्य सम्मताः ।
प्रथमं कृष्णचरणौ पुपूजुर्गांगवारिभिः ॥८५॥
न्यधुर्मुखे च शिरसि श्रीकान्तचरणामृतम् ।
ततश्चन्दनबिन्द्वादि भाले चक्रुर्हरेस्ततः ॥८६॥
सुगन्धिलेपनं चक्रुर्ददुः सुगन्धवारि च ।
गन्धसारान्ददुश्चापि कज्जलं कुंकुमादिकम् ॥८७॥
पुष्पहारान् रत्नहारान् विभाषा मुकुटं तथा ।
कटके कुण्डले चापि ददुश्चान्यविभूतिकम् ॥८८॥
अम्बराणि शयनानि फलान्नपेयकानि च ।
उपदाश्च न्यधुस्तस्य पुरतश्चामरादिकम् ॥८९॥
नैवेद्यानि ददुश्चापि मिष्टपेयानि यानि च ।
ताम्बूलकं ददुश्चापि चक्रुर्नीराजनं ततः ॥९०॥
प्रदक्षिणं प्रचक्रुश्च मालिकां महतीं गले ।
ददुश्चान्तरभावानां ज्ञापयित्रीं तु शाश्वतीम् ॥९१॥
कान्तः कान्ताकृतां पूजां गृहीत्वा पाणिना च ताः ।
पस्पर्श तत्करान् कृष्णो भावज्ञो भावि बोधयन् ॥९२॥
विहसन् लोकयन् तासामाननानि मुहुर्मुहुः ।
ताश्चाति जहृषुः राधे बालकृष्णाप्तिहेतुना ॥९३॥
अथ ता मातरं तद्वत् सन्तोषां चामृतां तथा ।
अम्लानाः पुष्पमालाश्चार्पयामासुर्गलान्तरे ॥९४॥
नेमुस्ताभ्यो विनम्राश्च भोजिता विश्रमीकृताः ।
पायिताः शायिताश्चापि संवाहिताश्च वर्ष्मसु ॥९५॥
सखीभिः किंकरीभिश्च सेविता निद्रिताश्च ताः ।
प्रातरुत्थाय च स्नात्वा त्वश्वपट्टसरोवरे ॥९६॥
तीर्थविधिं पर कृत्वा गत्वा श्रीलोमशाश्रमम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥९७॥
मन्त्रं मालां तौलसीं च गृहीत्वा वीक्ष्य कोट्यर्बुदम् ।
कन्यकानां मण्डलं च प्रसन्नाः पूज्यभावतः ॥९८॥
नत्वा शीघ्रं पुनः कृष्णकान्तं प्रति समाययुः ।
दर्शनं प्राप्य तृप्तास्ताः कृष्णवश्याः पुनः पुनः ॥९९॥
अतृप्ता इव पश्यन्ति हृदि कृत्वा पतिं प्रभुम् ।
श्रीकृष्णेन हृदा चांगीकृतास्ताः स्वगृहं प्रति ॥१००॥
गन्तुं नेच्छां यदा चक्रुस्तदा प्राह नरायणः ।
पुनराज्ञां पितुर्नीत्वा समायाताऽत्र सत्वरम् ॥१०१॥
भवतीनां मानसानि पूरयिष्ये न संशयः ।
इत्युक्तास्ता हरेरग्रे समर्प्य सर्ववस्तुकम् ॥१०२॥
विमानं वस्तुशून्यं च कृत्वा गोपालकृष्णकम् ।
पूजयित्वा ततो नत्वाऽऽगृह्याऽऽज्ञां भोजनोत्तरम् ॥१०३॥
प्रसाद्य श्रीहरिं कान्तं नत्वा राधे पुनः पुनः ।
प्रसादजं फलं पुष्पं प्राप्य विमानमास्थिताः ॥१०४॥
अश्वपट्टसरो नत्वा नत्वा कुंकुमवापिकाम् ।
कान्तदेवालयं नत्वा व्योम्ना यानेन चाम्बरे ॥१०५॥
तिरोऽभवन् क्षणान्मुक्त्वा जयशब्दान् पुनः पुनः ।
पठनाच्छ्रवणादस्य कृष्णसौभाग्यवान् भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वेधसस्तिस्रः पुत्र्यः सुषुम्णेडापिंगला विमानेनाऽऽगत्य प्रभुं पतिं मत्वा संपूज्य ययुरित्यादिनिरूपणनामाऽष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥

**श्रीराधिकोवाच—**

कथं कान्त ! सुषुम्णाद्याः कृष्णनारायणेन वै ।
लोमशस्याऽऽश्रमे स्थातुं नाज्ञताः स्वीकृता अपि ॥ १ ॥

**श्रीकृष्ण उवाच—**

द्वासप्ततिसहस्राणि कन्याश्चान्यास्तु वेधसः ।
ता मानस्यः समिच्छन्ति कृष्णं कान्तं परेश्वरम् ॥ २ ॥
सत्यलोके वसन्ति स्म प्रतीक्षन्ते स्म भावतः ।
तिस्रोऽग्रजाः समेष्यन्ति दृष्ट्वा कृष्णनरायणम् ॥ ३ ॥
वयं ताभिः समं तत्र गमिष्यामो विलोकितुम् ।
कृष्णनारायणं सेविष्यामहेऽनादिमाधवम् ॥ ४ ॥
इतिप्रतीक्षमाणानामानयनार्थमेव ताः ।
न निरुद्धा इदानीं वै स्थातुं श्रीलोमशाश्रमे ॥ ५ ॥
ब्रह्मणा प्रेषिताः कृष्णो रक्षयिष्यति ताः पुनः ।
अथ ताः स्वविमानेन पश्चिमां दक्षिणां दिशम् ॥ ६ ॥
समुद्रं च तथा द्वीपानरिक्तान् सुप्रदेशकान् ।
पश्यन्त्यो व्योममार्गेण प्रदक्षिणेच्छयोत्तरम् ॥ ७ ॥
यान्त्यः प्रददृशुर्देशं चाब्रिक्तं सुमहत्तरम् ।
पुनः पुनः परावृत्य व्योम्ना यानेन निर्भयाः ॥ ८ ॥
आरबीजं महाद्वीपं रणं दृष्ट्वा ततोऽग्रतः ।
रक्तं च वारिधिं दृष्ट्वा भूमौ नारायणीं नदीम् ॥ ९ ॥
वीक्ष्य दक्षिणभागे च रुद्रबाष्पं सरोवरम् ।
तथा विश्वतुरीयाख्यं दृष्ट्वा श्रेष्ठं सरोवरम् ॥१०॥
तुङ्गानीकसरश्चापि तथा न्याससरोऽपि च ।
दृष्ट्वा लिंगरसाद्रिं च द्राक्षाबीजं च पर्वतम् ॥११॥

कालहरिं रणं दृष्ट्वा उमार्शमुगिरिं तथा ।
कर्माङ्गीं च नदीं दृष्ट्वा कर्मघ्नं पर्वतं तथा ॥१२॥
चण्डसरस्ततो दृष्ट्वा वीक्ष्य नष्टजरां नदीम् ।
सहरिहरसंज्ञं च रणं विलोक्य वै ततः ॥१३॥
अतलेष्टं पर्वतं च तन्मुखं पर्वतं तथा ।
त्रिराशिपर्वतं दृष्ट्वा लीलाबीजरणं तथा ॥१४॥
श्रीरमाया रणं दृष्ट्वा तुरुराज्यं विलोक्य च ।
कश्यपायनवार्धिं च दृष्ट्वा चोरलपर्वतम् ॥१५॥
पश्चिमे च कुकेशाद्रिं नीलाब्धिं प्रविलोक्य च ।
नीपरां च नदीं कार्पन्थायनं चापि पर्वतम् ॥१६॥
दीनयूपां नदीं दृष्ट्वा दृष्ट्वा च ऐलपर्वतम् ।
ईपीनासनशैलं च शारदीद्वीपमित्यपि ॥१७॥
मध्यवार्धिं विलोक्यैव पितृनिजं च पर्वतम् ।
तेगिरां च नदीं वीक्ष्य देशान् समुद्रमध्यगान् ॥१८॥
लुक्वारां च नदीं सेनानदीं वीक्ष्य च खाडिकाम् ।
जरामौनप्रदेशं च बालयमप्रदेशकम् ॥१९॥
ईङ्गद्वीपं तथा चायद्वीपं विलोक्य खाडिकाम् ।
कोटद्वीपं स्वेदद्वीपं फेनद्वीपं ततः परम् ॥२०॥
पिष्टवर्गान् विलोक्याऽथ गिरीनपृथिवीं तथा ।
आलीशामृतपृथिवीं दिवोनद्वीपकादिकान् ॥२१॥
विलोक्य खाडिकाद्वीपान् विक्तुरीयभुवं ययुः ।
खाडीमुत्तीर्य च ततो विविशुश्चोत्तरान् कुरून् ॥२२॥
तेषु महाबृहत्सरो महत्सुल्वभिधं सरः ।
अयाबाष्कं सरो दृष्ट्वा विनिपागच्छकं सरः ॥२३॥
हट्टासनं समुद्रं च द्विफेनद्वीपमित्यपि ।
लम्बोदरादिपृथिवीं सूपर्युपरिकं सरः ॥२४॥
सन्तलुयीप्रदेशं च अतलान्तप्रदेशकम् ।
माक्षिकाऽखातमुल्लंघ्य क्युबाद्वीपं विलोक्य च ॥२५॥
वर्गिद्वीपान् विलोक्याऽथ ग्रीयानामप्यलोकयन् ।
आमार्जुनां नदीं वीक्ष्य शान्तारामप्रदेशकम् ॥२६॥
ब्राह्मीलां पृथिवीं वीक्ष्य समैक्षन्त परैनसाम् ।
आर्जयन्तीप्रदेशाँश्च कोकद्वीपौ व्यलोकयन् ॥२७॥
ग्राहामं चारकोटं च वीक्ष्य चान्तार्किवर्तुलम् ।
जलप्रस्तरदेशाँश्च वीक्ष्य भूगुह्यबिन्दुकम् ॥२८॥
परावृत्य तिरोदेवं पट्टोगानां व्यलोकयन् ।
चीलिकां पेरुकां पृथ्वीं पन्नाम्नीं निर्झरां तथा ॥२९॥
माक्षिकं भूतलं वीक्ष्य निम्नफोर्नां विलोक्य च ।
कीटनाद्रिं रोकिशैलम् इलासनं च पर्वतम् ॥३०॥
रङ्गिलं पर्वतं वीक्ष्य अलांशुकां च भूमिकाम् ।
द्विरिङ्गं चाब्धिमुत्तीर्याऽलोकयन् कामचाटकम् ॥३१॥
कालिमां सरितं यामां बीनां तन्द्राप्रदेशकान् ।
यानेशीं च नदीम् ओबीं नदीं वीक्ष्य ततः परम् ॥३२॥
उरलं पर्वतं वीक्ष्य नावद्वीपं विलोक्य च ।
फियोजानासनद्वीपान् स्फीतवर्गान् विलोक्य च ॥३३॥
स्कन्दनाभमहाशैलं श्वेतवार्धिं विलोक्य च ।
देवीनां सरितं वल्गां नदीं वल्गाख्यपर्वतान् ॥३४॥
उरलं च सरो दृष्ट्वा बाल्कृष्णसरस्तथा ।
श्वेतरक्तप्रदेशांश्च दृष्ट्वा सावरियारणम् ॥३५॥
दृष्ट्वा किम्पुरुषं देशं द्विकलं च सरोवरम् ।
वीक्ष्य प्रभाल्नादिं च स्तेनावासं च भूभृतम् ॥३६॥
अक्षोदावार्धिमालोक्य जलपानादिभूमिकाः ।
पिशङ्गवार्धिमालोक्य अक्षिगं पर्वतं तथा ॥३७॥
गोपीरणं विलोक्याऽथ आपतायिकपर्वतम् ।
त्रियानासनशैलं च कुनलीनं च पर्वतम् ॥३८॥
कारुकोरं पर्वतं च चिपिंगदेशमुज्ज्वलम् ।
अंगशिक्षांगसरितं वीक्ष्य शिक्षांगिकां नदीम् ॥३९॥
फुलिपानद्वीपान् दृष्ट्वा द्वीपाँश्च वारणीयकान् ।
वीक्ष्य द्वीपं नवगीतिं वीक्ष्य द्वीपान् समुद्रजान् ॥४०॥
उष्णालयाऽभिधां पृथ्वीं व्यलोकयन् विहायसा ।
चाटदेशं दिवादिक्पर्वतान् वीक्ष्य ततश्च ताः ॥४१॥
ओकद्वीपं नवजीवद्वीपं वीक्ष्य समुद्रगौ ।
वीक्ष्य द्वीपं त्रासमानम् उष्ट्रालये मुरानदीम् ॥४२॥
तुरुनदीम् ऐतनदीं मेकदानेयपर्वतम् ।
मशकग्रीवशैलं च महारणं वनं तथा ॥४३॥
पञ्चसरांसि च दृष्ट्वा दारालिङ्गं च पर्वतम् ।
बालाद्रिं हेमशालाऽद्रिम् आर्नहेमप्रदेशकान् ॥४४॥
दृष्ट्वा यावान् सुमात्राँश्च मलायां पृथिवीं ततः ।
अन्नदामद्वीपान् श्यामदेशान् मिकांगनां नदीम् ॥४५॥
ईरावतीं नदीं चाराकर्णाद्रिं ब्रह्मदेशकान् ।
सुन्दराख्यवनं दृष्ट्वा हुतलीनां महानदीम् ॥४६॥
गंगां च ब्रह्मपुत्रां च खासीनापर्वतांस्तथा ।
पतत्कार्यमहाशैलं हिमालयप्रदेशकान् ॥४७॥
दृष्ट्वा मानसरश्चापि श्रीदेशं च त्रिवर्तनम् ।
सिन्धुम् इन्दुकुशं दृष्ट्वा दृष्ट्वा कृपालुपर्वतम् ॥४८॥
थररणं च कच्छं च दृष्ट्वा साभरकं सरः ।
आरवल्लीभूभृतं च दृष्ट्वा महीं च नर्मदाम् ॥४९॥

सप्तपुटाख्यशैलं च तपतीं च महानदीम्।
महाबलेश्वरं दृष्ट्वा तथा च मलयं गिरिम् ॥५०॥
सह्याद्रिं संविलोक्यैव दक्षिणाँश्च प्रदेशकान्।
समुद्रस्थं सिंहलाख्यं द्वीपं वीक्ष्य परावृताः ॥५१॥
कावेरीं सरितं कृष्णां गोदावरीं महानदीम्।
जगन्नाथपुरं क्षेत्रं कपिलाश्रममित्यपि ॥५२॥
वंगं चांगं विहारं च भूतानं निपलं तथा।
गण्डकीं च कुरुक्षेत्रं गङ्गाद्वारं विलोक्य ताः ॥५३॥
राधिके ! बदरीं गत्वा न्यूषुस्तत्र निशां सुखम्।
नारायणपरासेवां कृत्वा सम्पूज्य तं प्रभुम् ॥५४॥
गौरीशृंगं शिवशृंगं विलोक्य स्वर्धुनीं तथा।
व्योमगङ्गानुमार्गेण स्वर्लोकात् सत्यलोककम् ॥५५॥
ययुः श्रीब्रह्मणः पार्श्वे महानन्दपरिप्लुताः।
ववन्दुः पितरं चेडा सुषुम्णा पिंगला तथा ॥५६॥
महाहर्षप्लुतास्तीर्थविधिं प्राहुर्यथाकृतम्।
अनादिश्रीकृष्णनारायणस्य चरणामृतम् ॥५७॥
पुष्पहारान् ददुश्चापि मन्त्रं जगुः पुनः पुनः।
नारदस्योपकारं च समूचुश्च परस्परम् ॥५८॥
आगताः कन्यकाश्चापि तिस्रः श्रुत्वाऽन्यकन्यकाः।
द्वासप्ततिसहस्राणि वृत्तान्तं वेदितुं तथा ॥५९॥
स्वागतार्थं चाययुश्च ब्रह्मणः सन्निधौ तदा।
यशस्विनी हस्तिजिह्वा पूषा विश्वोदरा कुहूः ॥६०॥
अलम्बुषा च गान्धारी शंखिनी च पयस्विनी।
सरस्वती वारुणी च तेजस्विनी च रक्तिनी ॥६१॥
पुरीतत् वीर्यवाहा च प्राणवाहा तथाऽऽर्द्रिका।
इत्याद्याश्च द्वासप्ततिसहस्राणि ह्युपस्थिताः ॥६२॥
कन्यकाः षोडशवर्षन्यूना दिव्याः कुमारिकाः।
स्वागतं स्नेहतश्चक्रुस्तिसृणां वै मुहुर्मुहुः ॥६३॥
अनादिश्रीकृष्णनारायणपादजलं पपुः।
प्रसादमालापुष्पाणि जगृहुश्चादरान्विताः ॥६४॥
शुश्रुवुः श्रीहरेर्वार्तां रूपसौन्दर्यमाश्रिताम्।
चमत्कारमयीं सर्वां तथा वै पत्तनस्य च ॥६५॥
लोमशस्याश्रमस्यापि बालकृष्णालयस्य च।
कोट्यर्बुदानां कन्यानां सेवाभावं च शुश्रुवुः ॥६६॥
यशस्विन्यादिका नाडीसरसो ब्रह्मणः सुताः।
ददृशुस्तिसृस्वसॄणां रूपं सौभाग्यमुत्तमम् ॥६७॥
दिव्यतां कृष्णकान्तेन दत्तां तथा च लौकिकीम्।
चिन्तयामासुरत्यर्थं कृष्णसौभाग्यमुत्तमम् ॥६८॥
अमन्यन्त निजाऽभाग्यं दर्शनं न व्यजायत।
दर्शनार्थं गता नैव कुतो वै दर्शनं भवेत् ॥६९॥
पित्राज्ञया ह्यवश्यं वै गन्तव्यं द्रष्टुमच्युतम्।
अनादिश्रीकृष्णनारायणं कान्तं परेश्वरम् ॥७०॥
इत्येवं चिन्तयामासुः पितरं प्राहुरुत्सुकाः।
पितश्चास्मान् दर्शनं त्वं कारयाऽऽभिर्यथा कृतम् ॥७१॥
वरिष्यामस्तमेवेशेश्वरेश्वरं पुमुत्तमम्।
इत्युक्ते ब्रह्मणे ताभिर्ब्रह्मा तुतोष मानसे ॥७२॥
कोऽन्यो लाभः परश्चास्माद् यजामाता हरिर्भवेत्।
धन्यास्ताः कन्यका लोके कौमार्यं सफलं तथा ॥७३॥
पिता धन्यो जननी च धन्या धन्यं कुटुम्बकम्।
धन्यो भृगुः समुद्रश्च केदारश्चानरण्यकः ॥७४॥
सूर्यो नारायणो नान्यो यत्पुत्र्यः कृष्णयोषितः।
धन्या लोके भविष्यन्ति ते जना यत्सुताः शुभाः ॥७५॥
कृष्णपत्न्यो भविष्यन्ति राधालक्ष्मीप्रभादिवत्।
भक्त्या ज्ञानेन तपसा वैराग्येण मखादिभिः ॥७६॥
यः प्राप्तव्यश्च कृच्छ्रैर्वा योगैर्दानादिभिस्तथा।
सेवया वा सतां चेत् स स्नेहेन यदि लभ्यते ॥७७॥
मोहेन यौवनेनापि वासनयेच्छयाऽथ वा।
रूपेणेन्द्रियवेगेन मिलेच्चेत्पुरुषोत्तमः ॥७८॥
स मोहो यौवनं चेच्छा वासना रूपमिन्द्रियम्।
सर्वं धर्मात्मकं बोध्यं कामः क्रोधोऽपि तन्मयः ॥७९॥
कृष्णे कामस्तथा लोभो मोहो मोक्षकरः सदा।
मोक्षस्तु शाश्वतानन्दः स च कृष्णनरायणे ॥८०॥
गर्ह्यं स्तुत्यं च वा किञ्चित् कृतं चेत् कृष्णतुष्टये।
सर्वं वन्द्यं हि तद् बोध्यं पावनं तारकं हि तत् ॥८१॥
अहो पुत्र्यः सदा धन्यो भाग्यवान् वै भवाम्यहम्।
यत् कृष्णाय प्रदास्यामि दानं पात्राय शार्ङ्गिणे ॥८२॥
कृष्णेच्छा कीदृशी चास्ते ज्ञात्वा दास्ये शुभं भवेत्।
इत्युक्त्वा च स्वयं ब्रह्मा सस्मार नारदं मुनिम् ॥८३॥
उपतस्थौ क्षणात्तत्र प्रणम्य चासने स्थितः।
ब्रह्मा प्राह भगिन्यस्ते तिस्रो यत्र नरायणम् ॥८४॥
सुषुम्णाद्याः पूजयित्वा पुनरत्र समागताः।
तत्रैताश्चपराः कन्या द्रष्टुं गन्तुं समुत्सुकाः ॥८५॥
विद्यन्तेऽतस्त्वया तत्र नेतव्या वै विमानकैः।
समायातेऽवसरेऽहं दास्ये कृष्णाय कन्यकाः ॥८६॥
द्वासप्ततिसहस्राणि द्रष्टुमिच्छन्ति केशवम्।
यशस्विन्यादिकाः सर्वा नाडिकासरसः शुभाः ॥८७॥

दशभौमं सहस्रैकशिखरं कामचारि च ।
गृहाणैतन्महायानं योजनायतवर्तुलम् ॥८८॥
कामवल्लीः कामवृक्षान् चिन्तामणीन् धनप्रदान् ।
अमृतमिष्टभोज्यादिप्रदानत्र निवेशय ॥८९॥
शस्त्रशालाः सैन्यशाला भोज्यशालास्तथाऽत्र वै ।
मन्त्रशालाश्चौषधादिसमूहाः सन्ति चात्र वै ॥९०॥
रसशाला वस्त्रशाला रक्षाशालास्तथाऽत्र च ।
सिद्धयः शक्तयो दास्यः किंकर्यः सन्ति लक्षशः ॥९१॥
अस्त्राणि चाप्यनेकानि वेदाश्चत्वार इत्यमी ।
मरणादिप्रयोगाश्च समूर्ताः सन्ति चात्र वै ॥९२॥
इन्द्रजालविनाशार्थं मायानाशार्थमित्यपि ।
दैत्यदानवनाशार्थं सन्त्यत्र मन्त्रमूर्तयः ॥९३॥
अन्ततोऽहं स्वयं ब्रह्मा शंकरोऽपि नरायणः ।
मूर्त्यात्मका यथा साक्षान्निवसामोऽत्र चेतनाः ॥९४॥
अच्छेद्यं चाप्यभेद्यं चाऽविलेप्यं चाऽप्यनाश्यकम् ।
अदाह्यं शाश्वतं चैतद्विमानं त्वं गृहाण च ॥९५॥
सुषुम्णेडापिंगलाभिः सहिताभिः स्वयम् ऋषे ।
द्वासप्ततिसहस्राभिः कन्याभिः सह पुत्रक ॥९६॥
अनादिश्रीकृष्णनारायणं भूस्थं प्रयाहि वै ।
उपदा विविधा नीत्वा कन्येष्टान् दिव्यवैभवान् ॥९७॥
शृंगारहारभूषाद्यानुपकारकरान् शुभान् ।
नयस्व सह यानेऽत्र सुखं चार्पय शार्ङ्गिणे ॥९८॥
इत्युक्तो नारदस्तत्र सनत्कुमारमार्थयत् ।
साधुरूपं ब्रह्मरूपं रक्षकं ब्रह्मवर्चसम् ॥९९॥
तथा रुद्रं धर्मराजं चार्थयद् रक्षणाय वै ।
ब्रह्मा सनत्कुमारं च रुद्रं धर्मं ददौ तदा ॥१००॥
दिव्यवस्तुभृतं यानं चारुरुहुश्च कन्यकाः ।
सर्वशृंगारशोभाढ्या जयशब्दान् प्रचक्रिरे ॥१०१॥
मङ्गलान्यभवँस्तत्र यात्रारम्भे पुनः पुनः ।
सावित्री चाह्वयामास गमने पृष्ठतस्तदा ॥१०२॥
यात पुत्र्यः! सावधानाः पाथेयानि स्त्रजस्तदा ।
गृह्णतेति ददौ ताभ्यश्चैतन्मंगलमुत्तमम् ॥१०३॥
देवशिवा तदा वामे सुस्वरेणाऽऽवहज्जयम् ।
देवहारीतमेवापि पराङ्मुखं पुरोऽभवत् ॥१०४॥
यानस्य गमने वीणा नारदस्याऽपतत् करात् ।
अमङ्गलं तु तज्जातं द्वेधा भिन्नाऽभवद्धि सा ॥१०५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इत्येवं नारदः प्राहाऽमंगलस्य प्रशान्तये ॥१०६॥
विमानं सत्यलोकात् तत् लोकालोकाचलं ह्यनु ।
अवातरत् पश्चिमायां दिशि भुवं प्रति क्षणात् ॥१०७॥
काञ्चन्यां भूमिकायां च क्षणं विश्रान्तिमाप्य च ।
पूर्वाभिमुखमाबद्धय दिग्भागं व्योममार्गतः ॥१०८॥
शनैः शनै समायाति कन्याः पश्यन्ति भूस्तरान् ।
अब्धिन् देशान् विचित्राँश्च मोदन्तेऽन्योन्यमित्यपि ॥१०९॥
इत्येवं राधिके! यानं चाब्रिक्तोपरि चागतम् ।
पश्यन्ति सूर्यतुल्यं तद् राक्षसाः क्रूरमानसाः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सुषुम्णादिका विमानेन पृथ्वीखण्डान् विलोक्य सत्यलोकं ययुः, पुनर्द्वासप्ततिसहस्रकन्यका विमानेन व्योम्ना श्रीहर्यर्थं प्रस्थिताश्चेत्यादिनिरूपणनामा नवाधिक-चत्वारिंशोऽध्यायः ॥ ४९ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके! दिव्यं चमत्कारं हरेस्तथा ।
वीणाभंगस्य च फलं यानस्थास्वभवत्तदा ॥ १ ॥
अब्रिक्तदेशवासा ये म्लेच्छा राक्षसयोनयः ।
आरण्यकाश्च ग्रामस्था वनपर्वतवासिनः ॥ २ ॥
सहस्रयोजनस्थास्ते व्यलोकयन् तदाम्बरे ।
शतसूर्यसमं तत्तु विमानं भास्वराम्बरम् ॥ ३ ॥
सूर्यतेजोऽतितेजोभिर्दशगुणान् प्रभावतः ।
किरणान् व्यसृजद् व्योम्नि अनुष्णाशीतसंसहान् ॥ ४ ॥
सुदृश्यान् सुस्पृशश्चापि मष्टामोदभराँस्तथा ।
आनन्दोत्पादकान् शान्तिप्रदान् विचित्रभासुरान् ॥ ५ ॥
ब्रह्मणा श्रीकृष्णनारायणार्थे चार्पितं तु यत् ।
किं न्यूनं तत्र वै राधे! विमाने मानवद् भवेत् ॥ ६ ॥
घृतदुग्धदधिकुल्या अमृतवारिसद्ध्रदाः ।
गन्धसारद्रवसारचूर्णसारादिगूटिकाः ॥ ७ ॥
रससाराऽऽमोदसारचर्वणोत्तमवीटिकाः ।
विद्यन्ते यत्र सततं कल्पस्तम्बेषु शाश्वताः ॥ ८ ॥
रत्नद्वीपा दर्शनार्हा नैकरङ्गादिभासुराः ।
स्वर्णचम्पकवर्णाभकन्यकाहृदयंगमाः ॥ ९ ॥
हारतोरणकुञ्जादिहरिद्वर्णनिकुञ्जकाः ।
रम्यस्थैर्योद्यानमध्यासनशाद्वलराजिताः ॥१०॥
स्थल्यो यत्र प्रभासन्ते चन्द्रभूमिसमाः शुभाः ।
विमानरूपं कन्यानां रूपं रूपं च चान्द्रिकम् ॥११॥

प्रभारूपं च सर्वे वै रूपप्रदीपजं तथा ।
मणिरत्नादिरूपं च भिन्नं चापि परम्परम् ॥१२॥
अन्योन्योत्कृष्टतां प्राप्तं श्रेष्ठं श्रेष्ठं व्यभासत ।
केषां मनांसि लोकानां सस्पर्द्धचंचलानि वै ॥१३॥
नाकृष्टानि भवेयुर्वै दिव्यैतादृशरश्मिभिः ।
दिव्याभिः कन्यकाभिश्च दिव्यसमृद्धिभिरेव च ॥१४॥
ताभिरुत्तेजिता म्लेच्छा दैत्या चाब्रिक्तवासिनः ।
मायामन्त्रकरा व्योम्नि रुरुधुस्तद्विमानकम् ॥१५॥
आशावहालाभवहा इष्टंमन्याश्च वेगिनः ।
अविचार्य पतन्त्युग्राः प्राणान्तदुःखदेऽपि च ॥१६॥
दृष्ट्वाऽनलं पतंगाश्च गृह्णीम इति वाञ्छया ।
पतन्ति रूपभोगार्थे प्रज्वलन्तेऽतितेजसा ॥१७॥
अपात्राण्यपि कुर्वन्ति प्रयासं बहुले फले ।
अशक्तिगम्ये निक्षिप्यात्मानं मृतिं प्रयान्ति च ॥१८॥
असुरास्ते कालसीदा म्लेच्छा मत्वा बलं निजम् ।
अधिकं त्वरितं रुद्धाः सन्नह्य रणमागमन् ॥१९॥
रक्तवार्धिः रौद्रबाष्पो विज्ञतुरीयकस्तथा ।
तुंगानीको न्याससारो लिङ्गरसोऽतिदारुणः ॥२०॥
ध्वाक्षबीजो मूशलाम्बः कर्मांगः कर्महास्तथा ।
चण्डसारो नष्टजरः सहारश्चातलेष्टकः ॥२१॥
तुङ्गमुखस्त्रिराशश्च लीलाबीजो भयंकरः ।
फल्गुबीजो गम्बिकायः सेनागोलः स्फुटार्दनः ॥२२॥
जीवलश्च कैदण्डश्च कुमेरुः स्थानलिस्तथा ।
तुम्बासुरोऽथ लीनापश्चालिविष्टः किमूषकः ॥२३॥
तूनायश्च तथाऽऽत्रालो रुक्वासनश्च मावुरः ।
बागिवर्लिर्दिनोलूकः कुवंशजः कुरेनूकः ॥२४॥
धोधसादा बहवश्च अम्बिकासश्च शिर्वमः ।
देषलश्च कक्लश्च ईज्यापातो नबीजकः ॥२५॥
सुदानश्च सुमालिश्च काणिमश्च त्रिगोणिकः ।
रुद्रशिराश्च त्रिष्वालः पिलिपश्च नमाकुवः ॥२६॥
दिनमेरश्चाङ्कुलादः फेनगः कामनारुणिः ।
निम्नक्षरो लालवारो ह्रीयोढो मारककर्शः ॥२७॥
अलिजीरश्च रोण्डेगः शाहुदः फकराणकः ।
पार्ष्णिः कृकाटकः पिण्डनलो रन्ध्रप्रमोषकः ॥२८॥
भुजहा जत्रुशमनो लामको मूर्द्धभामकः ।
प्रकोष्ठकः पृष्ठवंशो नितम्बवेणुकस्तथा ॥२९॥
आसवापश्चामीषपः कुक्कुटाशः कृकाशकः ।
इत्येते बलवन्तश्च मायया व्योमचारिणः ॥३०॥
विद्युद्वेगेन वै सर्वे सन्नह्योपस्थिता रणे ।
तत्र राजा जुमासेम्ला दूतं वै रक्तवार्धिकम् ॥३१॥
प्रेषयामास च विमानाग्रे वक्तुं निजेष्टकम् ।
राजा प्राह विमानाग्रे गत्वाऽऽवेदय रक्तक ! ॥३२॥
विमानं त्वस्तु नश्चात्र कन्या भवन्तु नः स्त्रियः ।
विमानस्था नराः स्वर्गं यान्तु चान्यत्र वै सुखम् ॥३३॥
अन्यथा तु प्रसह्यैव हरिष्यामस्तु कन्यकाः ।
हनिष्यामश्च वस्तस्माद् यथेष्टं कुरुताऽत्र यत् ॥३४॥
दूतो नत्वा विमानाग्रे गत्वा प्राह तथैव तत् ।
नारदः प्राह तं दूतं वदाऽसुरनृपं मम ॥३५॥
याश्चात्र सन्ति कन्यास्ता ब्रह्मणः पुत्र्य एव ताः ।
यूयं च ब्रह्मपौत्रस्य कश्यपस्य हि वंशजाः ॥३६॥
दैत्यो हिरण्यचक्षुर्यस्तस्य पुत्राः सुकालिकः ।
अञ्जनः कालमेघश्च जासुरोषो मलीनसः ॥३७॥
हावुको भावुकश्चापि दाउको धावुकस्तथा ।
क्वाश्मकश्चाजमालश्च सैरेयाद्याः शताधिकाः ॥३८॥
हिरण्याक्षे हते दैत्ये विष्णुना सूकरेण ह ।
तद्भयाद् द्रवमानास्ते चाब्रिक्तं रणपर्वतैः ॥३९॥
व्याप्तं देशं समागत्याऽकुर्वन् निवासमत्र ते ।
तद्वंश्या वै भवन्तश्च भवन्त्येव गतत्रपाः ॥४०॥
असंस्कृता म्लेच्छवृत्ता मम भ्रात्रादिवंशजाः ।
अहं च नारदश्चास्मि तथाऽत्रास्ते सनत्-ऋषिः ॥४१॥
धर्मराजस्तथा चात्र विराजते हि दण्डधृक् ।
रुद्रोऽत्र राजते लोकसंहारकृत्परः प्रभुः ॥४२॥
अपुत्रेण पुरा रुद्रो हिरण्याक्षेण वै वने ।
आराधितो हरो देवः पुत्रार्थाय पुरा किल ॥४३॥
तत्प्रतापेन सापत्योऽभवद् भवत्पितामहः ।
तं रुद्रं माऽत्र रुन्धन्तु मा रुन्धन्तु यमाधिपम् ॥४४॥
कन्यका मातरः सर्वा भवतां ता भवन्ति वै ।
अजित्वा तु यमं रुद्रं भवत्कामो हि दुर्लभः ॥४५॥
यस्तरेत् सागरं दोर्भ्यां पातयेद् भुवि भास्करम् ।
मेरुमुत्पाटयेद्वापि स जयेद् यमशंकरौ ॥४६॥
किं न श्रुतं त्वया राजन् पूर्वे वै चाऽन्धकासुरः ।
पार्वतीकामनामूढः सदैत्यो नाशमासवान् ॥४७॥
महीषश्च तथा जम्भः कुजम्भो नाशमागताः ।
शंखचूडस्तथा जालंधरोऽपि नाशमागतौ ॥४८॥
भस्मो मुरस्तथा चान्ये विनष्टा मोहमारिताः ।
परस्त्रीकामनामूढः पुरा दण्डो महीपतिः ॥४९॥

शुक्रपुत्र्यां रतिं कृत्वा सराष्ट्रो नाशमाप्तवान् ।
शृणु दूत ! ततः श्रुत्वा श्रावय त्वं नराधिपम् ॥५०॥
दण्डो राजा महानासीत् प्रभूतबलवाहनः ।
ईजे स विविधैर्यज्ञैर्नृपतिः शुक्रपालितः ॥५१॥
शुक्रश्चाऽस्याऽभवद् यज्ञे पुरोहितः पुनः पुनः ।
शुक्रः कदाचिदगमत् पातालं दैत्यमन्त्रितः ॥५२॥
शुक्रस्यासीत्तु दुहिता अरजा नामतो गृहे ।
एकाकिनी पर्णकुट्यां शुश्रूषन्ती मखाऽनलम् ॥५३॥
राजा तु दर्शनं कर्तुं चायातो पर्णजे गृहे ।
अग्निं प्रणम्य च कन्यामेकाकिनीं सुरूपिणीम् ॥५४॥
सन्दृष्ट्वा कामसन्तप्तस्तत्क्षणादेव पार्थिवः ।
नेमे तां तु गुरोः पुत्रीं पूर्णयौवनशालिनीम् ॥५५॥
सापि तमागतं कन्या प्रत्युत्थाय तपोधना ।
भ्रातृभावेन सत्कृत्य मालां प्रासादिकीं ददौ ॥५६॥
ततस्तामाह नृपतिर्बाले कामाग्नितापितम् ।
मां समाह्लादयस्वाऽत्र स्वपरिष्वंगवारिणा ॥५७॥
सा तं प्राह तदा मे तु पिता त्वां निर्दहेच्च माम् ।
यः समर्थो जीवयितुं देवान् मारयितुं ह्यपि ॥५८॥
भवान् भ्राता धर्मतोऽस्ति शिष्यो यतः पितुर्मम ।
त्वं मैवं मानसं राजन् एकान्ते कर्तुमर्हसि ॥५९॥
सोऽब्रवीद् भीरु मां शुक्रः कालेन परिधक्ष्यति ।
कामाग्निस्त्वद्य मामत्र दहत्येव प्रशामय ॥६०॥
सा प्राह दण्डं नृपतिं मुहूर्तं परिपालय ।
गुरुं तमेव याचस्व स ते दास्यत्यसंशयम् ॥६१॥
दण्डोऽब्रवीत् अरजो ! मे कालक्षेपो न वै क्षमः ।
क्षणे क्षणे नु विघ्नानां पंक्तिः सर्वत्र विद्यते ॥६२॥
विरजा प्राह नात्मानं दातुं शक्ता नराधिप ।
कामभोगे तु सुतरामस्वतन्त्रा हि योषितः ॥६३॥
किं वदामि तव राजन्नेवमुत्पथवर्तिनः ।
राष्ट्रं राज्यं कुटुम्बं च स्वयं चान्यच्च यत् तव ॥६४॥
सर्वं त्वया युतं नाशं शुक्रशापेन यास्यति ।
मैवं वह्नौ पत राजन्नैतद् धर्म्यं हि विद्यते ॥६५॥
राजा प्राह बलात्त्वां वै भोक्ष्ये चेन्नैव मन्यसे ।
अरजा यज्ञवह्निं स्वहस्ते कृत्वा नृपोपरि ॥६६॥
चिक्षेप गच्छ दुष्टात्मन्नितो विभ्रष्टमानस ।
इत्युक्त्वा पर्णशालां च त्यक्त्वा गन्तुं बहिर्हि सा ॥६७॥
यावद्धावति तावत्तां धृत्वा कृत्वा स्ववक्षसि ।
कामोपहतचित्तात्मा व्यध्वंसयत मन्दधीः ॥६८॥

तां कृत्वा च्युतचारित्रां निश्चक्राम ययौ गृहम् ।
सापि शुक्रप्लुता बाला अरजा रजसा प्लुता ॥६९॥
आश्रमादथ निर्गत्य बहिस्तस्थावधोमुखी ।
चिन्तयन्ती स्वपितरं रुदती च मुहुर्मुहुः ॥७०॥
अस्नाना चाऽभोजना च तस्थौ वृक्षं समाश्रिता ।
प्रहरान्ते पिता तस्याः शुक्रः प्रागमदाश्रमम् ॥७१॥
ददर्श कन्यकां नैजां सन्ध्यातुल्यां रजस्वलाम् ।
पप्रच्छ पुत्रि ! केनाऽसि धर्षिता वा कथं न्विदम् ॥७२॥
क्व स दुष्टो ययौ पापी विध्वंसयति कन्यकाम् ।
रुदती सा व्रीडया स्वपितरं प्राह चारजाः ॥७३॥
राज्ञा दण्डेन चागत्य वार्यमाणेन चाऽसकृत् ।
बलादनाथा रुदती नीताऽहमीदृशीं दशाम् ॥७४॥
एतच्छ्रुत्वा ह्युपस्पृश्य शुचिः शुक्रः शशाप तम् ।
यस्मात्तेनाऽविनीतेन ममाऽऽज्ञां मम गौरवम् ॥७५॥
तिरस्कृत्य शुभाचारा च्युतधर्माऽरजाः कृता ।
तस्मात् सराष्ट्रः सबलः सभृत्यो वाहनैः सह ॥७६॥
सप्तरात्रान्तराद् भस्म दण्डो भवतु सानुगः ।
शुक्रः पुत्रीं ततः प्राह शुद्धाचारां तपस्विनीम् ॥७७॥
मासान्ते त्वागते राजस्वल्ये शुद्धा भविष्यसि ।
तावत् तपः कुरु पुत्रि यथेष्टं चोचितं तव ॥७८॥
न ते दोषोऽस्ति वै पुत्रि गर्भस्ते न भविष्यति ।
पिब चोष्णं पञ्चगव्यं मा भयं कुरु पुत्रिके ॥७९॥
अथ दण्डोऽपि नृपतिः सराष्ट्रबलवाहनः ।
भस्मीभूतोऽभवत् शापात्सप्तरात्रान्तरेऽसुर ॥८०॥
एवं भस्मस्थलं जातं दण्डकारण्यमुल्बणम् ।
एवं परकलत्राणि धर्षयन्ति तु ये जनाः ॥८१॥
भस्मीभवन्ति ते सर्वे सराष्ट्रबलवाहनाः ।
धर्मशीला विनीताश्च न्यायमार्गा हि निर्भयाः ॥८२॥
प्रसह्य परदारस्थाश्चेहाऽमुत्र न निर्भयाः ।
धर्मान्वितो रविर्धर्मः पत्नीव्रतश्च भूसुरः ॥८३॥
अगस्त्यश्च मनुः स्वयंप्रकाशोऽन्ये मुनीश्वराः ।
तेजस्विनः शापमोक्षवरक्षमाः सुराऽर्चिताः ॥८४॥
अधर्मस्थाश्चन्द्रदेवेन्द्रान्धका दुःखिनोऽभवन् ।
तस्माद्धर्मो न सन्त्याज्यो धर्मो हि परमा गतिः ॥८५॥
तारणं परमो धर्मः पतनं त्वनयाद् भवेत् ।
तस्मात् त्याज्यं बलान्नित्यं परदारोपसेवनम् ॥८६॥
नयन्ति परदारास्तु महापत्तीर्हि दारुणाः ।
परार्थपरदारस्था नरकार्हाः सदा मताः ॥८७॥

तस्माद्वै दूरतस्त्याज्याः परदारा विचक्षणैः ।
परदारहतप्रज्ञा न भवन्ति विभूतये ॥८८॥
शृणु दूत कथां चान्यां कथयामि समासतः ।
इत्युक्त्वा नारदः प्राह कथां दिव्यां पुरातनीम् ॥८९॥
विश्वकर्मसुता साध्वी नाम्ना चित्रांगदाऽभवत् ।
रूपयौवनसम्पन्ना कमला पद्मिनी यथा ॥९०॥
सा स्नातुं नैमिषे क्षेत्रे सखीयुक्ता जगाम ह ।
स्नान्तीं ददर्श सुरथः सुदेवतनयो नृपः ॥९१॥
साऽपि त्वभूत् सकामाऽति स्वप्रदानमियेष च ।
सख्यस्तामब्रुवन् बाले नैतद् योग्यं हि जायते ॥९२॥
अस्वातन्त्र्यं तवाऽस्त्यत्र प्रदाने स्वात्मनः परे ।
पिता कुर्यात् सुतादानं सुता पितृवशे यतः ॥९३॥
न ते युक्तमिहात्मानं दातुं नरपतेः स्वयम् ।
एतस्मिन्नन्तरे राजा सुरथः कामपीडितः ॥९४॥
उवाचेनां मदिराक्षि ! मुग्धे मोहयसीव माम् ।
तन्मां कुचतले तल्पेऽभिशाययितुमर्हसि ॥९५॥
ततः सा कामसन्तप्ता प्रार्थिता भूभृता मुहुः ।
वार्यमाणा सखीभिस्तु प्रादादात्मानमात्मना ॥९६॥
आत्मा प्रदत्तः स्वातन्त्र्यात् ततस्ता तादृशीं सुताम् ।
पितरं चावमन्यैव कामगामशपत् पिता ॥९७॥
यतो धर्मं परित्यज्य श्रीभावात् मूर्खभूभृते ।
आत्मा प्रदत्तस्तस्मात्ते विवाहो न भविष्यति ॥९८॥
विवाहरहिता नैव सुखं लप्स्यसि भर्तृतः ।
न च पुत्रफलं नैव पतिना योगमेष्यसि ॥९९॥
उत्सृष्टमात्रे शापे तु ह्यपोवाह सरस्वती ।
अकृतार्थं नरपतिं योजनानि त्रयोदश ॥१००॥
अपकृष्टे नरपतौ साऽप्यनिर्वृत्तकामना ।
मूर्छायां पतिता तत्र तदा सख्यो जलेन ताम् ॥१०१॥
सिषिचुः शैत्यमापन्ना क्षणान्तरेऽतिदुःखिता ।
मृतकल्पा हतोत्साहा संज्ञां लेभे शनैः शनैः ॥१०२॥
अपश्यन्तीं नरपतिं दुद्राव वेगतस्तदा ।
निपपात सरस्वत्या मुह्यमाना तरंगकैः ॥१०३॥
निर्गता सा महारण्ये सिंहव्याघ्रसमाकुले ।
तामपश्यद् गुह्यकश्च निन्ये श्रीयमुनातटे ॥१०४॥
तत्र चिक्षेप च मुक्त्वा जले श्रीकृष्णसन्निधौ ।
सा निर्गत्य शिरोनम्रा मध्याह्ने संस्थिताऽभवत् ॥१०५॥
ददर्शैनां तापसस्तु ऋतुध्वजाभिधानकः ।
तां प्राह पुत्रि ! कस्याऽसि सुता कथं समागता ॥१०६॥
ततः सा सर्ववृत्तान्तं याथातथ्यमुवाच वै ।
श्रुत्वा ऋषि क्रुधा तस्याः पितरं शिल्पिनां वरम् ॥१०७॥
अशपद् यत्त्वया त्वष्टर्दानयोग्याऽपि पापिना ।
योजिता नैव पतिना तस्माच्छाखामृगो भव ॥१०८॥
इति शापाद् विश्वकर्मा द्रागेव वा नरोऽभवत् ।
न्यपतन्मेरुशिखराद् भूपृष्ठे शापकारणात् ॥१०९॥
अटन् पृथ्वीं समायातः श्रीकण्ठं वै ऋतुध्वजम् ।
प्रार्थयन्मे महाघोरो दत्तः शापो निवर्त्यताम् ॥११०॥
चित्रांगदायाः पितरं मां त्वष्टारं विभावय ।
मया वानररूपेण पापान्यपि कृतानि हि ॥१११॥
तानि मे संक्षयं यान्तु कृपां कुरु ऋतुध्वज ।
ऋतुध्वजस्ततः प्राह शापस्याऽन्तो भविष्यति ॥११२॥
समुत्पाद्य घृताच्यां वै तनयं सुमहाबलम् ।
तावत् सौम्यां घृताचीं सोऽपश्यत् तत्कामितोऽभवत् ॥११३॥
ददौ गर्भं कामयानां सापि गोदावरीतटे ।
प्राप्ते काले बलवन्तं प्रासूत तनयं नलम् ॥११४॥
वानरः कपितां त्यक्त्वा विश्वकर्माऽभवत् क्षणात् ।
चित्रांगदा सप्तगोदावरं तीर्थं गताऽभवत् ॥११५॥
हाटकेश्वरपूजायां सदा मग्नाऽभवद् यतः ।
तत्राऽयं वानरो विश्वकर्मरूपोऽभवत् तदा ॥११६॥
सर्वं ज्ञातवती पुत्री स्वातन्त्र्यदुःखमीदृशम् ।
विश्वकर्मा ततस्तत्र राजानं सुरथं पुनः ॥११७॥
समाहूय ददौ तस्मै चित्रांगदां सुतां निजाम् ।
ततः सा सुखिनी जाता भुक्त्वा कष्टं शतं समाः ॥११८॥
तस्माद् दूत महादूत रक्तवार्धे सुबुद्धिमन् ।
जुमासेम्लाख्यनृपतिं निवेदय मयोदितम् ॥११९॥
सर्वं यथार्थं विधिवद् याहि गृहं सुखं वस ।
अजित्वा तु विमानं वा कन्यका नहि लप्स्यसे ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अब्रिक्तदेशीयनृपतिना स्वसेनाधिपैः सर्वकामविमानं रुद्धं, दूतोक्तिः, नारदस्य प्रत्युक्तिश्च, तत्र शुक्राऽरजादण्डानां विश्वकर्मचित्रांगदासुरथानां कथा चेत्यादिनिरूपणनामा पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके दूतो रक्तवार्धिर्महासुरः ।
ययौ चाब्रिक्तदेशस्य जुमासेम्लानृपं प्रति ॥ १

क्रमशस्तु यथोक्तं वै श्रावयामास सर्वथा ।
नान्वमन्यत दुष्टात्मा भाविनाशप्रणोदितः ॥ २ ॥
क्रुद्धौ सन्नह्य सर्वांश्च स्वयं व्योम्नि महाबलः ।
गदामादाय च पुरो विमानस्याऽग्रतोऽभवत् ॥ ३ ॥
गर्जनां प्रचकाराऽऽदौ नादयन् रोदसी ह्युभे ।
वायुस्तरान् कम्पयँश्च जगाद कालभाषितम् ॥ ४ ॥
कोऽयं विमाननेताऽऽस्ते त्वग्रतो भव मत्पुरः ।
परिहाय विमानं च याहि दूरं जिजीविषुः ॥ ५ ॥
यदीष्टं जीवनं तेऽस्ति क्रियतां वचनं मम ।
याश्चाऽत्र कन्यकाः सर्वाः प्रदीयन्तां द्रुतं च नः ॥ ६ ॥
कोऽस्ति रुद्रोऽथवा धर्मराजः सनत्कुमारकः ।
क एते भिक्षुकाश्चात्र प्राणनाशार्थमागताः ॥ ७ ॥
भूत्वा वै तापसाः सर्वे विमानभोगमास्थिताः ।
कन्यकागणसंलुब्धाः कपटाचारवर्तनाः ॥ ८ ॥
अभोग्यभोगमध्यस्थाः पापमिषस्य बोधकाः ।
गोत्रभिन्ना भवेद् भार्या भिक्षुकाणां गृहे भवेत् ॥ ९ ॥
दुग्धभिन्ना भवेद् भार्या म्लेच्छानां धर्मवर्तिनाम् ।
क्षेत्रभिन्ना इमाः पत्नीर्ग्रहीष्यामो हि कन्यकाः ॥१०॥
हिरण्याक्षस्य वै भार्याशतमासीच्च तासु वै ।
कन्याः सहस्रशो जाताः कुमाराश्च सहस्रशः ॥११॥
हिरण्याक्षस्य बीजेन समुत्पन्नाश्च ताश्च ते ।
भिन्नदुग्धाः परस्परं विवाहितास्तदाऽभवन् ॥१२॥
एकमातृुद्भवा नैव दम्पतीतां व्रजन्ति वै ।
एकपितृुद्भवा भिन्नगर्भाः सन्ति विवाहिताः ॥१३॥
अस्मत्कुलप्रसूतानां रीतिश्चेयं सदा मता ।
ब्रह्मपुत्र्योऽथवा चान्या अमातृजाः प्रिया हि नः ॥१४॥
नारदः प्राह जित्वैव लप्स्यसे कुरु यद्धितम् ।
तच्छ्रुत्वा दानवपतिः क्रोधदीपेक्षणोऽनुगम् ॥१५॥
सान्नाहिकीं रणभेरीं ताडयितुं शशास ह ।
भृत्यस्तु ताडयामास भेरीं बलेन भूयसा ॥१६॥
सस्वान भैरवान् शब्दान् सोन्मत्ता रासभी यथा ।
तथा तन्नादमाकर्ण्य लक्षसंख्या महासुराः ॥१७॥
समाययुः रणं तूर्णं सन्नद्धा युद्धकांक्षिणः ।
पूर्वोक्ताः सैन्यपाश्चापि गजैरुष्ट्रैर्हयैः रथैः ॥१८॥
यानैः स्वल्पविमानैश्च योद्धुं नानायुधैस्तथा ।
विमानं परितो व्यूहैर्व्योम्नि पृथ्व्यां समन्ततः ॥१९॥
शीघ्रं संरोधयामासुर्गर्जयामासुरुत्सुकाः ।
रुद्रः सस्मार च तदा वह्निं चाप्यथ नन्दिनम् ॥२०॥
आगतौ तावुभौ शीघ्रं शासनं देहि चाहतुः ।
हरो वह्निं प्राह चाग्ने कृत्वा प्राकारमुज्ज्वलम् ॥२१॥
वह्निज्वालामयं व्योम्नि रक्ष यानं स्थिरो भव ।
वह्निर्विमानमभितो रक्षति स्म तथोदितः ॥२२॥
रुद्रश्च नन्दिनं प्राहाऽऽमन्त्रयाऽत्र गणान् द्रुतम् ।
नन्दी जलमुपस्पृश्य सस्मार गणनायकान् ॥२३॥
सहस्रशो गणा गणाधिपाः शस्त्रास्त्रशोभिताः ।
आययुः रुद्रजातीयाः सहस्राणि दशात्र च ॥२४॥
षण्मुखाश्च समाजग्मुः षट्षष्टिशतसंख्यकाः ।
गणेश्वरा हस्तिमुखाः षट्साहस्राः समाययुः ॥२५॥
कालानना गणाश्चान्ये खड्गांगयोधिनस्तदा ।
दिग्वाससः कज्जलाभा दशलक्षाणि चाययुः ॥२६॥
कालाननेभ्यः शंभुस्तु योद्धुमाज्ञां ददौ द्रुतम् ।
चतुर्नेत्राश्चतुर्हस्ताः श्रीवत्सांकितवक्षसः ॥२७॥
समायाताः खगाऽऽरूढाश्चक्रशूलधरा दृढाः ।
वैष्णवाश्च गणास्तत्र लक्षाणि त्वेकविंशतिः ॥२८॥
चतुर्मुखा ब्रह्मगणा दशलक्षात्मसंख्यकाः ।
आययुर्व्योममार्गेण तेऽस्त्रशास्त्रादिवेदिनः ॥२९॥
अथ युद्धं परं घोरं प्रववृते समन्ततः ।
कालानना महाघोरा निजघ्नुर्म्लेच्छजातिकान् ॥३०॥
भिद्यमानाश्च बलिभिर्गणाग्र्यैर्दैत्यदानवाः ।
प्रवृत्तास्ते गणान् हन्तुं कूटमुद्गरपाणयः ॥३१॥
ततो व्योम्नि स्मृता देवाः सेन्द्रविष्णुपितामहाः ।
सूर्यचन्द्रवरुणाद्याः समायाता दिदृक्षवः ॥३२॥
अथ कालाननाः सैन्यं निघ्नन्ति दानवीयकम् ।
चतुरंगबलं म्लेच्छजातीयं मर्दितं ह्यभूत् ॥३३॥
म्लेच्छाः श्मश्रुधरा गोलैर्महागोलैश्च तूपकैः ।
धूष्कृतीभिर्वज्रघातैर्भूशुण्डीभिश्च छूरकैः ॥३४॥
असिभिः खड्गचर्माद्यैर्भल्लैः शक्तिभिरित्यपि ।
प्रासैश्च तोमरैश्चापि जघ्नुः कालाननान् क्रुधा ॥३५॥
कालाननाश्चान्द्रबाणैर्गोलकैर्वह्निजालकैः ।
शरैश्च तूपकाभिश्च धूष्कृतीभिश्च सर्वथा ॥३६॥
क्षेपणैर्बहुयन्त्रैश्च जघ्नुः कालानलाँस्तदा ।
कालानना व्योममार्गैः पतित्वोत्पत्य वेगतः ॥३७॥
म्लेच्छेषु गलपाशान् सन्ददुः श्मश्रुषु चानलम् ।
लक्षभटास्तु ते नष्टाः सेनाग्र्या दुद्रुवुस्तदा ॥३८॥
बिगुलान् वादयामासुर्नवसैन्याह्वनाय च ।
दशलक्षाणि सैन्यानि त्वसुराणां पुनस्ततः ॥३९॥

आगतान्यभितस्तत्र व्योमयानगमानि वै ।
दारुदाहैस्तदा चूर्णैरापूर्याऽऽपूर्य गोलकान् ॥४०॥
चिक्षिपुर्दशलक्षेषु तदा ब्रह्मगणेषु वै ।
ब्रह्मगणास्तदा विद्युद्बाणैर्जघ्नुश्च दानवान् ॥४१॥
दानवा अपि शैलैश्च वृक्षैर्वारिशिलादिभिः ।
वायुप्रहारकेश्चापि निजघ्नुर्ब्राह्मदैवतान् ॥४२॥
रणदेशे निपेतुस्ते दानवा विगतासवः ।
विद्युत्प्रहारैः सर्वत्र गतप्राणा मृतिं ययुः ॥४३॥
कुक्कटपिच्छमूर्धन्याः शंखश्रृंखलभूषणाः ।
घोरखातीचर्मवस्त्रा नीलाञ्चलकटिभ्रमाः ॥४४॥
हरिद्वर्णपटकाढ्या दशलक्षाणि ते मृताः ।
अथ दृष्ट्वा महत्सैन्यविनाशं दानवेश्वरः ॥४५॥
राजा त्वकारयद् भेरीनिनादान् व्योमगर्जनाम् ।
विद्युन्नलीनजाक्रोशान् कोटिसैन्यागमाय वै ॥४६॥
स शब्दो व्यानशे चतुःसमुद्रान्तो महाम्बरे ।
अब्रिक्तदेशीयसैन्यं परितो वायुवेगतः ॥४७॥
एकत्रितं मध्यदेशे परितो वै व्यजायत ।
विजयस्य दीर्घनादा विमानयन्त्रतोऽभवन् ॥४८॥
श्रुत्वा मुमुदिरे देवा म्लेच्छास्त्रासं परं ययुः ।
सैन्यानि परितस्तत्र देवानां विचरन्ति हि ॥४९॥
विश्राम्यन्त्यणिमाद्यैश्च सूक्ष्मा विमानमस्तके ।
एतस्मिन् समये व्योम्नो यथा शलभकोटयः ॥५०॥
तथा दैत्याः सर्वदिग्भ्यो विमानमभि चाययुः ।
मारयन्तु नाशयन्तु खादयन्तु विमानगान् ॥५१॥
अपहरन्तु गृह्णन्तु कन्यकास्तद्धनान्यपि ।
विनश्यन्तु नाशयन्तु प्रध्वंसयन्तु दैवतान् ॥५२॥
छेदयन्तु भेदयन्तु विघ्नन्तु सन्मुखान् भटाः ! ।
विमानं कन्यका दिव्या यस्य हस्तगता तु या ॥५३॥
तत्सर्वं तु भवेत्तस्य विजेतुरिति निश्चयः ।
इत्येवं नदमानास्ते कोटिसंख्या महासुराः ॥५४॥
विविधैर्यन्त्रमाराख्यैः शस्त्रैश्च गोलिकाक्षिपैः ।
निजघ्नुः परितस्तत्र विमानं वह्निरक्षितम् ॥५५॥
अग्निदेशं समागत्य गोलिका विद्रवन्ति च ।
रसरूपास्तु ता भूत्वा प्रज्वलन्ति घृतं यथा ॥५६॥
दैत्यास्तन्नैव जानन्ति जानन्त्येव तु क्षेपणम् ।
गोलिकानां वृष्टिरूपं विमानघातसिद्धये ॥५७॥
तूपियन्त्रैर्मारयन्ति शतघ्नीभिस्तथाऽपरे ।
आतंकयन्त्रैर्निघ्नन्ति श्यूरुपीडान् क्षिपन्ति च ॥५८॥
एवं चतुःप्रहरान्तं चक्रुस्ते मारमात्रकम् ।
दैत्या विमानमालक्ष्य निश्चूर्णा नष्टदारुकाः ॥५९॥
विनष्टगोलिकाश्चासन् वह्निः सर्वं व्यनाशयत् ।
विमानं सुस्थिरं चाप्यखण्डितं व्योम्नि वर्तते ॥६०॥
अथ सैन्यं वैष्णवानामेकविंशतिलक्षकम् ।
चक्रपाशगदाप्रासमुद्गरादिसुशोभितम् ॥६१॥
रुद्राज्ञया न्यपतच्च दैत्यसैन्यस्य कोटिषु ।
सुदर्शनानि चक्राणि लक्षाणि त्वेकविंशतिः ॥६२॥
अव्याहतानि रोषाद्वै प्रयुक्तान्यभवँस्तदा ।
द्विधा छिन्नं हि दैत्यानां सैन्यं कोट्येकमेव तत् ॥६३॥
काँश्चिद् गलेषु चक्राणि स्कन्धयोः कटिपृष्ठयोः ।
सक्थ्नोः कांश्चिद्धस्तयोश्च जान्वोः प्रकोष्ठयोस्तथा ॥६४॥
पादयोर्मध्ययोर्दक्षवामयोर्वामदक्षयोः ।
अर्धनिकृन्तयोर्द्वेधाभूतयोर्विदधुर्व्यसून् ॥६५॥
व्याम्नो निपेतुः पृथ्व्यां ते कोट्यैकसैन्यमित्यपि ।
शलभास्तु यथा वाधौ तथा ययुर्हि ते लयम् ॥६६॥
अथ शोकातुरो राजा क्षणं मूर्छामवाप ह ।
बहूनां च हतानां वै स्मृत्वा निर्नाथयोषितः ॥६७॥
योद्धुमायान्ति ये तेषां मध्यादेकोऽपि नैव च ।
सप्राणो रणपर्जन्यान्नैवाऽऽयातीतिः दुःखितः ॥६८॥
अथ क्षणान्तरे संज्ञामवाप प्राह सैन्यपान् ।
युद्धान्नैवाऽपसर्तव्यं राजधर्मो विलुप्यते ॥६९॥
अजयो वा जयो वाऽस्तु मरणं जीवनं च वा ।
रणापासरणं त्वत्र निकृष्टं नेष्यते मया ॥७०॥
अथाऽन्यत् कोटिसंख्याकं सैन्यं समाजुहाव सः ।
निशायामपि युद्धस्य विरामो नैव विद्यते ॥७१॥
व्याघ्रचर्मधराः शूरा लोहरक्षणरक्षिताः ।
वह्निविद्युत्करयन्त्रा व्योमयानविहारिणः ॥७२॥
कोटिसंख्याकयोधारः सप्ततालोच्छ्रया हि ते ।
आययुः परितस्तत्र विमानं यत्र विद्यते ॥७३॥
दुद्रुवुस्ते विमानं वै नाशयितुं च सन्निधौ ।
वह्निना रक्षकेनैते ज्वलमानाः पराययुः ॥७४॥
असामर्थ्यं तदा तैस्तु ज्ञातं नैजं महत्तरम् ।
पक्षिणोऽप्यम्बरे यान्ति वयं चाऽप्यत्र तादृशाः ॥७५॥
यतो वह्निकृतं दाहं सोढुं शक्ता न वै मनाक् ।
कथं जयमवाप्स्याम इति सन्देहमागताः ॥७६॥
तथापि नृपतेराज्ञा योद्धव्यं सर्वथा भटैः ।
इत्येवं दूरतस्तेऽपि विद्युद्गोलैर्विमानकम् ॥७७॥

लक्ष्यीकृत्य निजघ्नुश्च द्रवन्त्यग्नौ तु गोलकाः ।
आश्चर्यं हि द्वितीयं तद् दृष्ट्वा विमानकोपरि ॥७८॥
ऊर्ध्वे स्थिता ववृषुश्च गोलकान् नाशकारकान् ।
तेऽपि गोला द्रवन्त्येव ज्वलन्त्येव विहायसि ॥७९॥
वह्निना रक्षकेनैव विमानं त्वक्षतं सदा ।
अथ ताँश्च तदा हन्तुं षट्सहस्रगणेश्वरान् ॥८०॥
हस्तिशुण्डमयान् देवान् पाशपर्शुधनुर्धरान् ।
शक्तिप्रासाऽणुगोलाढ्यान् मन्त्राक्तकुशवज्रिणः ॥८१॥
प्रेषयामास रुद्रश्च क्षणात्ते तेभ्य ऊर्ध्वगाः ।
अन्तरीक्षे ययुः शीघ्रं जघ्नुः शस्त्रैश्च गोलकैः ॥८२॥
कोटिसंख्यान् म्लेच्छदैत्यान् दैत्याः पेतुस्तदाऽनले ।
हन्यमाना न वै शक्ताः समन्ताच्च गणेश्वरैः ॥८३॥
धावितुं प्राभवँस्तेन वह्नौ पेतुः प्ररक्षके ।
पातमात्रेण भस्माख्या व्योम्न्येव तेऽभवँस्ततः ॥८४॥
नामशेषाः पुनर्द्रष्टुं राजानं चापि नाऽऽगताः ।
इत्येवं कोटियोद्धारो ययुस्तत्र क्षयं पुनः ॥८५॥
अस्थिशेषं न च प्राप्तं महानलेन भक्षिताः ।
अहो आशा बलवती गर्विणां क्षयकारिणी ॥८६॥
सैव कालस्य दुहिता जराया अग्रजा त्विव ।
ज्ञाते सर्वविनाशे च राजा धैर्यं मुमोच ह ॥८७॥
गन्तुं स्वभवनं तस्मात् स्थानाद् यावत् समिच्छति ।
तावत् सेनापतिर्योऽभूद् रक्तवार्धिस्तथाऽपरः ॥८८॥
रौद्रवाष्पो ह्युभावेतौ राजानं प्राहतुः क्षणम् ।
न गन्तव्यं न गन्तव्यं राज्ञा युद्धान्निवृत्य वै ॥८९॥
यावद्वै विद्यते सैन्यं यावद्बलं च पार्श्वयोः ।
यावद्बलं च भुजयोः सैन्यपाः सन्ति चाऽक्षताः ॥९०॥
यावत् तावन्न गन्तव्यं रणाद् गृहं कथंचन ।
अथ युद्धं करिष्यामो जेष्यामो यानकन्यकाः ॥९१॥
इत्युक्त्वा रणतूर्याणि नादयामासुरुग्रगाः ।
विद्युद्वाद्यानि चोग्राणि विद्युद्वंशाँश्च भूरिशः ॥९२॥
वादयामासुरत्यर्थं सैन्याऽऽवाहनबोधकान् ।
श्रुत्वा सैन्यं दशकोटिसंख्याकं परितोऽभवत् ॥९३॥
एकत्रितं क्षणात्तत्र मध्यदेशे सरोऽमितः ।
कर्मध्नपर्वतादग्रे यावच्चन्डसरस्तथा ॥९४॥
कर्मांगीं च नदीं यावत् यावच्छ्वेतनरायणीम् ।
त्रिराशिपर्वतं यावद् दशकोटिभटाश्रयम् ॥९५॥
स्थलं युद्धमहाभूमिस्तदा वै समजायत ।
तुंगानीकसरसश्च यावन्न्याससरस्तथा ॥९६॥
कोटिसैन्यं भस्मसाद्वै जातमेतपुराऽम्बरे ।
तस्य प्राक् च कालहरिरणादासाम्बपर्वतम् ॥९७॥
विशतुरीयसरितस्तीरे तु दशलक्षकाः ।
हतास्तत्र ततः प्राक् च द्राक्षाबीजाद्रिपश्चिमे ॥९८॥
वालनद्यास्तटे लक्षं हता दैत्या हि राधिके ! ।
एवमेते दशकोटिभटा विद्युत्कृताऽस्त्रकाः ॥९९॥
वह्निमन्त्रविदश्चापि नाशं यातुं समागताः ।
युयुधुस्ते वह्नियन्त्रैर्विद्युद्गोलैस्तथाऽस्त्रकैः ॥१००॥
मन्त्रकृतैः पुत्तलैश्च व्योम्नि विमानसन्निधौ ।
वह्निदेवेन ते सर्वे कृत्रिमा भस्मसात्कृताः ॥१०१॥
अथैते प्रेषयामासुर्विमानानि भ्रमन्ति च ।
यत्र विद्युन्महागोला यन्त्रपुत्तलिकास्तथा ॥१०२॥
यन्त्राश्वा यन्त्रवाहाश्च यन्त्ररथाश्च ताम्रजाः ।
यन्त्राणां हेतयश्चापि विद्युत्ताम्रकृतास्तथा ॥१०३॥
तैः कृतैः साधनैश्चैता भटानां दशकोटयः ।
युयुधुर्निर्भया वह्नेर्वह्नेः प्राकारमध्यमाः ॥१०४॥
वह्निमुल्लंध्य च गतास्तदा तत्र विमानिषु ।
हाहाकारो ह्यभूत् तावच्छंभुरुत्थाय वाडवम् ॥१०५॥
अनलं प्राह गच्छैतान् भस्मसात्कुरु सत्तम ।
तावत्प्रलयकालीनसदृशोत्थस्तु वाडवः ॥१०६॥
शिखाः प्रसार्य परितः कोटिरूपधरोऽभवत् ।
लेलिह्यमानः सर्वांस्तान् योद्धॄंश्च पुत्तलाँस्तथा ॥१०७॥
चकार भस्मसात् स्पर्शाद् दशकोटिभटान् क्षणात् ।
ज्वालामुखो यथा व्योम्नि पर्वतो वा रविर्ग्रहः ॥१०८॥
नाशं प्राप्तो यथा ज्वालामयो ब्रह्माण्डसदृशः ।
विशालः स्याद् वह्निमयस्तथा दृश्यमदृश्यत ॥१०९॥
दशकोटिभटास्तत्र दग्धा वाडववह्निना ।
दुद्रुवुश्च बहिस्तस्मात् प्राणरक्षणकाम्यया ॥११०॥
तदा तेषां निरोधार्थं कार्तिकेयं महाबलम् ।
सार्धषट्कृतसाहस्रं नागपाशैर्न्यरोधयत् ॥१११॥
अनिर्गमाश्च ते तत्र भस्मीभूतास्ततोऽभवन् ।
येषामस्थि नवा केशा न शिरांसि न नाडिकाः ॥११२॥
गम्यं लभ्यं च किमपि तत्र दाहे त्वभूत् किल ।
एवं विनष्टा योद्धारो राधिके ! वीरमानिनः ॥११३॥
प्रातर्जातं ततो राधे ! मायारूपधराः पुनः ।
राजाज्ञया सुसज्जाश्च योद्धुं मन्त्रैरुपाययुः ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अब्रिक्तदेशे ब्रह्मविमानेन योधिनागरम्लेच्छाश्चैकादशकोटयश्चैकादशलक्षाणि च नष्टाश्चेत्यादिनिरूपणनामा एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! त्वेवं दशाकोट्यसुरक्षये ।
हाहाकारो महानासीदसुराणां कुलेषु वै ॥ १ ॥
देशेष्वपि दुराधर्षस्त्रासस्तदा व्यजायत ।
राजा नो धर्महीनो वै न्यायवर्ज्यं प्रगृह्य च ॥ २ ॥
नाशं निमन्त्रयत्यज्ञो देशराष्ट्रकुटुम्बिनाम् ।
धनं राज्यं द्वयं त्वास्ते गर्वस्थानं हि देहिनाम् ॥ ३ ॥
न्यायेन गर्वः सुखदश्चान्यायजस्तु नाशकः ।
अहो माया हि देवस्य वैचित्र्यं कीदृशं यया ॥ ४ ॥
पश्चावधिधने राज्ये चासमुद्रान्तवर्तिनि ।
सत्यप्यज्ञस्य नृपतेः सतीष्वपि प्रियासु च ॥ ५ ॥
परदारधनसम्पद्गृध्ना तस्य विवर्धते ।
शक्तिर्वा बलमैश्वर्यं वस्तुतः शत्रुवन्मतम् ॥ ६ ॥
दुःखदाः शत्रवो बोध्याः शक्त्याद्यास्तादृशा यदि ।
गर्वः कालस्य दूतोऽस्ति पुत्रो धनस्य वर्तते ॥ ७ ॥
बलस्य दत्तकश्चास्ति शिष्यः परिजनस्य च ।
धनं बलं परिजनो वर्तन्ते यत्र वै स्थले ॥ ८ ॥
तत्र गर्वाः समायान्ति कालस्य कार्यसिद्धये ।
जनो जानाति गर्वेण जेष्यामि सकलानपि ॥ ९ ॥
कालः पश्यति गर्विष्ठे सान्तत्वं सत्वरं क्षणात् ।
अन्यायो गर्वपार्श्वस्थ उत्तेजयति मानवान् ॥१०॥
परस्त्रीद्रव्यहरणे ततो नाशे जुहोति च ।
श्वा स्वरथ्यागृहस्थैर्हि दत्ताऽन्नभोजनादिना ॥११॥
तृप्तोऽपि तृष्णया चान्यरथ्यायां याति गर्वतः ।
ततश्चान्यैः श्वभिर्दन्तैः पाट्यतेऽभित उल्बणैः ॥१२॥
महिषः क्षेत्रभूम्यादौ लब्ध्वा तृप्तिं तृणादिभिः ।
तृष्णया चापि गर्वेणाऽऽरण्यदनेच्छुकः ॥१३॥
विदार्यते वने सिंहैस्तृष्णागर्वौ हि नाशदौ ।
गर्वान्धस्तारकैर्हीनस्तरणं नैव वेत्त्यपि ॥१४॥
मदाविष्टः प्रवाहे च क्षिपत्यात्मानमेकलः ।
निमग्नो भ्रमरैस्तूर्णं मरिष्यति न संशयः ॥१५॥
भोजनं वसनं छाया जलं भोग्यं हि देहिनाम् ।
तदाधारा प्राणयात्रा सा चेद् गच्छति सौख्यतः ॥१६॥
वृथाऽऽयासः कथं विज्ञः कुर्यान्मृषाऽवमोहितः ।
क्षणं वित्तं क्षणं चित्तं क्षणं गृहं च बान्धवाः ॥१७॥
क्षणं राज्यं जीवनं च क्षणं देहविरागिता ।
विज्ञायैवं परं श्रेयः साधयेन्न पतेदधः ॥१८॥
पतनं जायते गर्वात् तृष्णया भोगलिप्सया ।
अशक्त्यारब्धभावाच्च तांश्च तृप्त्या परित्यजेत् ॥१९॥
राधिके ! बहवो नष्टा नाशमेष्यन्ति चापरे ।
नश्यन्त्यपि वर्तमानाः क्षितिर्नैभिः समं ययौ ॥२०॥
धनं सम्पद् गृहं दाराः पतिः पुत्रः कुटुम्बकम् ।
नास्ति वास्तविको बन्धो बन्धस्तु तेषु वासना ॥२१॥
भोक्तुः सा वर्तते नित्यमशान्तस्याऽविरागिणः ।
रागोऽशान्तिश्च जायेते वर्धेते ज्ञानहीनके ॥२२॥
यत्र ज्ञानस्य वै शून्यं राजते तत्र सर्वदा ।
कामक्रोधादिसंख्या प्रपूर्यते वसतिं गता ॥२३॥
कामः क्रोधस्तथा लोभो मोहो मदश्च गर्वकः ।
त एते भ्रातरः सर्वे गृहेशस्यापि भक्षकाः ॥२४॥
अन्येषां भक्षणे तत्र का कथा खलु राधिके ।
मांसानां पिण्डिकाः सर्वा गृध्रास्तुदन्ति चञ्चुभिः ॥२५॥
समांस गृध्रान् बलिनस्तुदन्ति च हरन्ति ताः ।
पिण्डिकाः सर्वलोकेषु तुल्या देवेन निर्मिताः ॥२६॥
स्वपर्याप्ताश्च देवेन प्रदत्तास्तोषलब्धये ।
असन्तुष्टास्तत्र ये ते नश्यन्त्यग्नौ पतंगवत् ॥२७॥
शुद्धाहारविवेकानामर्थं सञ्जायते शुभः ।
विचारः शान्तिफलदस्तामसानां न सा कथा ॥२८॥
तमोऽधिका हि असुरा दैत्या म्लेच्छाश्च दानवाः ।
तामसीं वृत्तिमाश्रित्योद्वेजयन्ति जगत् स्थिरम् ॥२९॥
उद्वेगाग्नौ प्रहुताश्च मृत्युमामन्त्रयन्ति ते ।
राधिके ! राज्यमित्युक्तं यत्र धर्मेण राजते ॥३०॥
प्रजा यस्य सदा शान्ताः सुखा अन्नधनादिभिः ।
युद्धेतयो न विद्यन्ते देशे वर्षति सद्वसौ ॥३१॥
परेहाः पापमेवोक्तं फलं दुःखं च तन्मतम् ।
युद्धं कार्यं रक्षणार्थं न परास्कन्दनाय तु ॥३२॥
पारक्यं युद्धमूलं च युद्धं विनाशकारकम् ।
धर्मोऽर्थः काम एवैते मोक्षदाश्चेत् पुमर्थकाः ॥३३॥
यदि श्रेयस्करास्ते न नारकास्ते गृहे स्थिताः ।
येषां पत्न्यां च पत्यौ वा सन्तोषो नास्ति ते गृहे ॥३४॥
नारका एव मन्तव्या असन्तुष्टाः सदाऽऽतपाः ।
येषां वाट्यां गृहे क्षेत्रे धने सम्पदि गोधने ॥३५॥
अन्ने वस्त्रे यथालब्धे देहनिर्वाहकारिणि ।
नास्ति सन्तोषणं ते तु तृष्णावैतरणीस्थिताः ॥३६॥
जीवत्स्वपि न शान्त्यास्था मृता का शान्तिरेष्यति ।
रसनायां च वा स्पर्शे येषां तृष्णा विवर्धते ॥३७॥

तेषां वै नरकं देहे कृतस्थानं विराजते।
कामतृष्णा युगलाख्ये निगडे क्षिपति द्रुतम् ॥३८॥
लोभतृष्णा प्रयासाख्ये प्रवाहे क्षिपति द्रुतम्।
मोहतृष्णा चाऽर्जनाख्ये प्रवासे क्षिपति द्रुतम् ॥३९॥
क्रोधतृष्णा विवादाख्ये क्लेशे क्षिपति प्राणिनम्।
मदतृष्णाऽहंममत्वक्लेशे क्षिपति देहिनम् ॥४०॥
जनकीटपतंगानां विषयाः सर्वथा समाः।
अधिकायासमग्ना ये ते विनाशाय यन्ति वै ॥४१॥

दूती राजानमासाद्य नैजं जयं समिच्छति।
दूता दूत्यः समा बोध्याः सदेहा वाऽप्यदेहिनः ॥४२॥
नैजं जयं समिच्छन्ति पराभवं तु भूभृतः।
मूर्खो मुग्धो न जानाति निजाऽन्ताऽऽमन्त्रणाविमान् ॥४३॥
श्रेष्ठी जानाति वै लाभं कुसीदात्मकमुत्तमम्।
शठो जानाति च धनं मूल देयं न वै क्वचित् ॥४४॥
कुसीदं चापि च मूलान्न्यूनं देयं न वै समम्।
ततो नादानता ख्याप्याऽऽगृह्य चापि पुनः पुनः ॥४५॥

एवं शठस्तु जयति श्रेष्ठी संह्रियते सदा।
शठा वै भुञ्जते श्रैष्ठ्यं श्रेष्ठी शठाँश्च लम्बते ॥४६॥
लम्बमानः पतत्येव निर्लम्बे पतनं कुतः।
धावमानः पतत्येव निषण्णे पतनं कुतः ॥४७॥
योद्धा नश्यति युद्धयँश्च भोगान् कृत्वा मृषासमान्।
मग्नः प्राणान् विमुञ्चेत् सन्तरन् प्राणान्न मुञ्चति ॥४८॥
यदर्थं युद्धयते यद्वा यदर्थं च निमज्जनम्।
यदर्थं पतनं तद्वै कियन्ममेति चिन्तयेत् ॥४९॥

एवं विवेकः कर्तव्यो राज्ञा वा प्रजया प्रिये।
स्वदेहेन्द्रियराज्यस्य राजा क्रोडोऽपि वर्तते ॥५०॥
कीटाद्याः सर्व एवैते राजानः स्वकृतौ मताः।
गृहे तिष्ठन्ति मनुजास्ताननादृत्य चीटिकाः ॥५१॥
कुर्वन्ति निलयं भित्तौ लूताः कोणेषु जालकान्।
चक्रवाका नलिकाधोभित्तिछिद्रेषु चाऽऽलयान् ॥५२॥
मूषका गृहनालेषु भूमौ कीटा वसन्ति च।
काकाः पारावताश्चोर्ध्वं गृहोच्छ्रये वसन्त्यपि ॥५३॥
कस्येदं वै गृहं ज्ञेयं यत्सर्वैर्भुज्यते समम्।
मन्यन्ते तु बलात् स्वान् वै ते सर्वे गृहस्वामिनः ॥५४॥
मुग्धाश्चापि भवन्त्येव गृहनाशे तु तेऽखिलाः।
यस्य यादृङ्ममत्वं च दुःखं तादृक् तदीयकम् ॥५५॥
अहंममताहीनस्य परगृहाधिवासिनः।
मूषिकागृहवासस्य निर्बन्धस्य च भोगिनः ॥५६॥

गृहनाशेऽपि शोकांशो नागस्येव न जायते।
एवं जानाति चेद् राजा कथं नाशाय वै स्वयम् ॥५७॥
मिषमुद्भाव्य जायेत राजधर्मे मृषा विदन्।
राधिके! सर्वथा सर्वं मृषा वै क्लेशदं मतम् ॥५८॥
मृषा तु परिहर्तव्यं सत्यं ग्राह्यं सुवेदिना।
विनाशार्थे न योद्धव्यं योद्धव्यं शाश्वतार्थकम् ॥५९॥
विषयार्थे च देहार्थे युद्धयन्ति पशवोऽपि तु।
अज्ञाना ज्ञानिनां युद्धं तदर्थे तु समं भवेत् ॥६०॥

ज्ञानिनो ज्ञानमासाद्य युद्धयन्ति विषयाय चेत्।
ज्ञानं तत् तुषतुल्यं वै कणहीनं च निष्फलम् ॥६१॥
राजा यद्वा प्रजा वापि देवो वा मानवोऽपि वा।
विषं यातीति विषयः आत्मा तत्र विषायते ॥६२॥
विसिन्वन्तीति विषयाः स्वेषु बध्नन्ति ये मतिम्।
तादृङ्मत्याश्रितश्चात्मा विषयीति निगद्यते ॥६३॥
चित्रकेतोः पुरा कोटिस्त्रियस्त्वासंस्तथापि सः।
तृष्णां भोगेन सिञ्चन्वै तृप्तिं नाऽवाप चान्ततः ॥६४॥

कोट्यर्बुदानि मे पत्न्यो मद्वियोगं न सेहिरे।
कोट्यर्बुदस्वरूपैश्च भोगस्ताभ्योऽर्पितोऽनिशम् ॥६५॥
मयैवं दीयमानेऽपि सर्वदाऽऽनन्दशेवधौ।
न तास्तृप्ता मया ज्ञाताः कदाचित् क्षोभयोगतः ॥६६॥
ययातिर्नहि सन्तृप्तो वव्रे तु यौवनं सुतात्।
नहुषोऽपि न सन्तृप्तो पौलोम्यामकरोन्मनः ॥६७॥
नरनारायणौ तृप्तौ सदाऽऽसेते तपःस्थितौ।
दत्तात्रेयश्च कपिलो लोमशः सनकादिकाः ॥६८॥

नित्यतृप्ता न वाञ्छन्तीन्द्रियसाहाय्यमल्पकम्।
सती तृप्ता सदा शंभुं विना नाऽन्यं समिच्छति ॥६९॥
सन्तः साध्व्यः सदा तृप्ता हरौ मुह्यन्ति नेतरे।
यदर्थं यतते देही स देहो यदि नश्यति ॥७०॥
यत्नः कीदृक् स वै प्रोक्तो वृश्चिकीबालसदृशः।
येनाऽयं शोभते राजा तद्राष्ट्रं यदि नश्यति ॥७१॥
कीदृग् राज्यं कृतं तेन कार्पासेऽग्निकणादिवत्।
दिव्यास्ताराः पतन्त्येव पश्यन्ति नित्यमक्षिभिः ॥७२॥
स्वेषां पातं न पश्यन्ति शाखास्था मूलघातिनः।
देयं दूरं कृतं येन लेयं येन धृतं पुरः ॥७३॥
इष्टं स्वल्पं बह्वनिष्टं लेयं द्वेधा स एष्यति।
लेयं दूरं कृतं येन देयं येनाग्रतः कृतम् ॥७४॥
इष्टं फलं तु विपुलं तस्याऽग्रे स्वयमेष्यति।
राधिके! त्वेकदा विश्वावसुः कन्याशतत्रयम् ॥७५॥

स्वयंप्रकाशऋषयेऽर्पयितुं स समाययौ ।
ननाम परया प्रीत्या सूर्याभं मुनिसत्तमम् ॥७६॥
अवाप्य स्वागतं विश्वावसुः प्राह मनोगतम् ।
ऋषे भवान् महायोगी वर्ततेऽनेकरूपधृक् ॥७७॥
ऊर्ध्वरेतास्तथा चास्ते कृष्णनारायणानुगः ।
एतत्कन्याशतान्यत्र तव योग्यानि सन्ति हि ॥७८॥
गृहाण तासां परमं श्रेयः स्याद् यदि मन्यसे ।
तेजस्विनां न दुर्धर्षे लालनं पालनादिकम् ॥७९॥
स्वयंप्रकाशस्तं प्राह सत्यं ते मानसं तु यत् ।
कन्याश्रेयो विधातव्यं पितॄणां धर्म एष वै ॥८०॥
योग्याय तु प्रदातव्या तदिच्छाशालिने सदा ।
अनिच्छवे तु तद्दानं कन्याक्लेशाय जायते ॥८१॥
अहमनिच्छुः कन्यानां देह्यन्यस्मै महर्षये ।
अहमात्मा द्वन्द्वहीनो द्वेहो द्वन्द्वमरोऽधिकः ॥८२॥
प्रातः सायं मध्यसूर्ये मध्ये च प्रहरादिके ।
मूत्रं मलं तथा लाळां लिटरूपं स्वेदमित्यपि ॥८३॥
ष्ठीवनं छिक्कनं वायुसरणं मेहनादिकम् ।
अकस्मात् प्रकटीत्य स्ववशं मां करोति हि ॥८४॥
तस्य सेवा प्रशुद्धयर्थं मया निर्वर्त्यते सदा ।
परिश्रमस्य शान्त्यर्थं प्रस्वापो दीयते मया ॥८५॥
याने च भोजने पाने होमे जपे तथाऽऽसने ।
पार्श्वभावे स्थितौ वक्रीभावे वा गमनादिके ॥८६॥
परिश्रमं परं प्राप्य गुरुर्भवत्यभीक्ष्णशः ।
तच्छान्त्यर्थे न मे कालश्चाधिकः समपद्यते ॥८७॥
भवत्त्रिशतकन्यानां कृते गान्धर्वराट् कुतः ।
समयं प्राप्य सेवाद्यैः प्रीणयेयं सुखार्थिनीः ॥८८॥
एकदेहस्य सेवां वै कर्तुं न पारयामीह ।
शतत्रयैकदेहानां सेवनं पारये कुतः ॥८९॥
तस्मान्मया न चेष्टव्या दातव्या न त्वयाऽनघ ।
अपूर्णं ब्रह्म तद् बोध्यं यदन्यस्मात् सुखेषणा ॥९०॥
पूर्णं ब्रह्म तु तद् बोध्यं यदात्मानन्दपूर्णता ।
परेभ्यः सुखलौल्येन प्रवर्तन्ते तदाशये ॥९१॥
मध्ये एव विनश्यन्ति सामुद्रमौक्तिकेहुकाः ।
ततो विश्वावसुः कन्याशतत्रयं तु शार्ङ्गिणे ॥९२॥
अनादिश्रीकृष्णनारायणाय प्रददौ तदा ।
निरञ्जनाय कृष्णाय पुमुत्तमाय भावतः ॥९३॥
ताः सर्वाः श्रीपतिः कृष्णो ददौ लोमशकाल्ये ।
रक्षितुं चाज्ञया दिव्यो लोमशस्ता ररक्ष ह ॥९४॥
तस्माज्ज्ञानयुता नैव सजन्ते क्लेशमूर्तिषु ।
राधिके ! धनदारश्रीराज्याद्याः क्लेशमूर्तयः ॥९५॥
तत्राऽऽसक्तस्य तु राज्ञो जुमासेम्लाभिधस्य वै ।
सर्वनाशः समुत्पन्नः प्रतीक्षते क्षणान्तरम् ॥९६॥
कदा विमानं गृह्णामि स्पृशामि कन्यकाः कदा ।
कदा विमानमारुह्य पृथ्वीं वशे करोम्यपि ॥९७॥
इत्यभूद् बहुधा तृष्णा सा न जीर्यति जीर्यतः ।
भूत्वा युवती राजानं प्रचकर्ष प्रमन्त्रणे ॥९८॥
राजा चाज्ञापयामास सैन्याधिपाँस्तदा मुहुः ।
विचारार्थं विनाशस्य विमानस्य वशस्य वा ॥९९॥
मन्त्रणाबोधकं शीघ्रं बिगुलं समनादयत् ।
निर्धारिताश्च वै सैन्याऽधिपास्तूर्णं समाययुः ॥१००॥
यानं नाशयितव्यं वा वशीकर्तव्यमेव वा ।
तदुपायान् रचयन्तु रक्षकाऽनलनाशकान् ॥१०१॥
अन्तिमो रणसंग्रामश्चाऽयं कार्यो हिताऽहितः ।
वयं स्मो वा, न वा स्मो वा, भेतव्यं नात्र धीवरैः ॥१०२॥
इत्युक्ता मन्त्रयामासुः रक्तवार्ध्यादयोऽसुराः ।
द्व्यशीतिसंख्यकाः शूरा ये युद्धे न हताश्च ते ॥१०३॥
दूरतः सैन्यवाहाश्च सैन्ययोधनदर्शकाः ।
सैनापत्यपदभूषा विचारं त्वाचरँस्तदा ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीकृष्णराधिकाकृतविवेकाविवेकादिविज्ञानवर्णन-नामा द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके! पश्चादसुराणां तु मन्त्रणाम् ।
जुमासेम्ला स्वयं राजा रक्तवार्ध्यादियूथपान् ॥ १ ॥
द्व्यशीतिसंख्यकान् प्राह शोकमानसभृद्गिरा ।
सैन्यानि सर्वथा यानि योद्धुं गतानि तानि तु ॥ २ ॥
सर्वशोऽपि विनष्टानि नैकोऽपि तु निवर्तते ।
न शवं दृश्यते वाऽपि भस्ममात्रं तु दृश्यते ॥ ३ ॥
विमानस्याऽभितो वह्निस्ताद्दशोऽगम्य उल्बणः ।
विमानं रक्ष्यते तेन क्रियतेऽन्यत्तु भस्मसात् ॥ ४ ॥
विमानं प्रति चास्माकं यन्त्रगोलकपुत्तलाः ।
गन्तुमेवाऽक्षमा वह्नौ भस्मीभवन्ति वै भटाः ॥ ५ ॥
तत्कथं चात्र कर्तव्यं यद् विमानं विनाश्यते ।
वैमानिका विमानस्था नाश्यन्ते येन ते यथा ॥ ६ ॥

तद्विचार्यैव वक्तव्यं रक्तवार्धे त्वया मम ।
रौद्रबाष्पप्रभृतयो यथान्यायं वदन्त्विह ॥ ७ ॥
तदा ते तु नृपं नत्वा बहुतर्कभृतो गिरः ।
युद्धार्थं प्राजगदुश्च फलं तु नाश ईक्ष्यते ॥ ८ ॥
केचिदाहुर्महामायामासुरीं विरचय्य तु ।
महावृष्ट्या महावह्निं शान्तयन्तु ततः परम् ॥ ९ ॥
शैलवृष्ट्या विमानं तन्नाशयन्तु क्षणान्तरे ।
अन्ये प्राहुर्महावृष्टिं महाशैलानपि ध्रुवम् ॥१०॥
यदि स्तब्धान् करिष्यन्ति महामायाकृतैश्च तैः ।
तदा किं स्यात् ततश्चान्य उपायः परिमृग्यताम् ॥११॥
तदा कश्चिच्चन्डसारः प्राह वै रचनां नवाम् ।
वयं वायुस्वरूपाश्च भूत्वा यामस्तु तत्स्थले ॥१२॥
येन यथा विमानं तदितस्ताद् यास्यति क्षणात् ।
अस्मासु वायुरूपेषु मध्ये यावत्प्रयास्यति ॥१३॥
तावद् वायुस्वरूपैश्च झंझावातैर्महोग्रकैः ।
विमानं क्षेपणीयं वै ह्यकस्मान्नाशमेष्यति ॥१४॥
सर्वावयवकन्यादीर्वियुज्य च विभज्य च ।
भङ्क्त्वाऽवयवशः सर्वं करिष्यामो लयान्वितम् ॥१५॥
अथाऽस्मै चोत्तरं प्राह विश्नुतुरीयकस्तदा ।
योग्यमेतत्तथाप्येषो विमानस्थो महेश्वरः ॥१६॥
श्वासे चास्मान् समस्ताँश्चेद् ग्रसिष्यति ह्यगस्त्यवत् ।
तदा दशा का चास्माकं भविष्यतीति चिन्त्यताम् ॥१७॥
तदाऽतलेष्टकश्चापि प्राह यत्र प्रगच्छति ।
यानं तद्देशरूपं च धरन्तु रामणीयकम् ॥१८॥
मध्येसमुद्रं रम्यं च दृष्ट्वा मत्वा निजं स्थलम् ।
विश्वासादवतारं च करिष्यति सुखं तदा ॥१९॥
तत्राऽस्माभिश्च तद्रूपैर्भाव्यं तेषामभीष्टकैः ।
रात्रौ सुप्तव्यकालोर्ध्वे लयः कार्यो भविष्यति ॥२०॥
तदुत्तरं न्यायसारः सेनापतिरुवाच ह ।
सर्वस्मिन्निर्मिते चापि देवा निद्राविहीनकाः ॥२१॥
यदि निद्रां न यास्यन्ति तदोपायश्च को हि नः ।
अथ रुद्रशिरादैत्यो युक्तियुक्तं जगाद ह ॥२२॥
सर्वथा शरणं कार्यं शरण्याः सन्ति देवताः ।
विश्वासिनश्च जायन्ते तापसे शरणागते ॥२३॥
वरदानस्य दातारो भवन्त्यप्यविचारतः ।
तस्माद् ग्राह्यं शरणं च भाव्यं तेषां प्रशिष्यकैः ॥२४॥
तन्मन्त्रास्तत्प्रदत्ताश्च दीक्षा ग्राह्या कुटुम्बिभिः ।
आमन्त्रणं प्रदातव्यं गृहपावनहेतवे ॥२५॥

गृहे गृहे च गमनं पूजनं कार्यमित्यपि ।
विमानं भूतले न्यस्य सेवाऽस्माभिः शुभा परा ॥२६॥
कर्तव्या दासभक्त्या च यथा विश्वासमाप्नुयुः ।
अन्तःप्रविश्य कालेन विषवद् बलमाचरेत् ॥२७॥
तदा तु समकालेन कन्याभिश्च कुमारकैः ।
वृद्धैर्बालैश्च युवभिः समकालं हि योधनम् ॥२८॥
कर्तव्यं चापि यद्वाऽत्र ये ये मुख्यबलाश्च ते ।
विमानेषुधरा भूत्वा नाशं कुर्वन्तु वै ततः ॥२९॥
यद्वा ये मन्त्रकर्तारो देवानामग्रगा मताः ।
त एव पूर्वं हन्तव्यास्ततः कार्यं भविष्यति ॥३०॥
विजयाख्येन कालेन विश्वासहेतिभिस्त्विह ।
कर्तव्यं वै बलं तत्र पारक्यत्नो भविष्यति ॥३१॥
इत्युक्तिं निदधुः सर्वे स्वान्तरेषु जयप्रदाम् ।
तथास्त्विति विचार्यैव राजा सेनाधरास्तथा ॥३२॥
अन्ये च सम्मताः सर्वे शरणागतिबोधकम् ।
ध्वजमारोहयामासुर्गगने हेतिशून्यताम् ॥३३॥
बोधयामासुरत्यर्थं नेमुः पृथ्व्यां शठाशयाः ।
नारदस्तु तदा प्राह शंभुं किमिदमुत्तमम् ॥३४॥
विजयं ते दत्तवन्तः सम्प्रगृह्य पराजयम् ।
शंभुः प्राह निषेकाद् येऽसुरास्ते न सुराः क्वचित् ॥३५॥
कार्यसिद्ध्यर्थमेवैते समयार्थं नमन्ति वै ।
किन्तु शरणमाप्तानां रक्षणं धर्म उत्तमः ॥३६॥
अस्माभिः रक्षणं कार्यं वैपरीत्ये तु दण्डनम् ।
सत्त्वानां सात्त्विको धर्मो राक्षसानां तु तामसः ॥३७॥
अगतौ तामसा यान्ति वशं, गतौ तु शत्रवः ।
उन्दुरुर्हंसपक्षस्थ इव कृन्तति पक्षकम् ॥३८॥
स्वभावाद् राक्षसः शिष्यो वातापिरिव भक्षति ।
काले प्राप्ते भवेच्छीघ्रमाशीर्विष इवोल्बणः ॥३९॥
तस्माद् भाव्यं तु गुरुणा जानता चेतनेन च ।
काणं प्रति द्विकाणः स्यात् त्रिनेत्रो द्व्यक्षिकं प्रति ॥४०॥
शठं प्रति द्विशठः स्यात् साधुं प्रति द्विसाधुकः ।
तस्माच्छठेऽपि शिष्ये न विश्वसितव्यमत्यति ॥४१॥
कदाचित् स छलं कुर्याद् दुग्धपालितसर्पवत् ।
यदि ते शरणं यातास्तत्रापि विद्यते छलम् ॥४२॥
विद्युद्दण्डाभिघातेन सिंहोऽपि शरणं व्रजेत् ।
स्वार्थकार्यप्रसिद्ध्यर्थं म्लेच्छोऽपि शिष्यतां व्रजेत् ॥४३॥
दितेर्गर्भविनाशार्थमिन्द्रः शिष्योऽभवत्पुरा ।
राज्यचाराः कार्यसिद्ध्यै भृत्याः शिष्या भवन्ति च ॥४४॥

बको मत्स्यार्थमेवाऽऽस्ते मार्जारो मूषकार्थकः ।
व्याघ्रोऽश्वार्थे मौनमास्ते प्राप्ते छिद्रे तु घातकाः ॥४५॥
चौरः स्वार्थप्रसिद्ध्यर्थं सहास्ते सेवको यथा ।
कुलटा स्वार्थसिद्ध्यर्थं श्रयते गृहिणी यथा ॥४६॥
मूषको दंशनार्थं वै फुत्कृत्याऽङ्गं स्पृशत्यपि ।
काको मांसेच्छया चञ्च्वा शनैर्वृषे विटंकते ॥४७॥
व्याधो मृगार्थमुग्रेऽपि देशे तिष्ठति दीनवत् ।
क्रूरोऽपि सहते वाक्यं मर्मभिच्चापि मूकवत् ॥४८॥
राजाऽपि सहते हानिं द्यूतजां नेष्टकामपि ।
शूरोऽपि सहते गालिं निगडस्थः समानतः ॥४९॥
शुद्धाऽपि सहते नारी ऋतुजन्माद्यशुद्धताम् ।
इयमशुद्धिरस्माभिः सहनीया हि पक्षके ॥५०॥
म्लेच्छान् शिष्यान् विधायैव कार्यं श्रेयो यथा भवेत् ।
चेतयितव्यमेष्वत्र जागरितव्यमेषु च ॥५१॥
वह्निसेके जायमाने स्वपतो ज्वलनं ध्रुवम् ।
तथेमे वह्नयो म्लेच्छा नैषु सुप्तव्यमित्यलम् ॥५२॥
सावधानैरेव भाव्यं न कुर्युर्नः पराभवम् ।
इति श्रुत्वा हरवाक्यं सनत्कुमार आह च ॥५३॥
यथा वक्ति हरस्तत्तु योग्यं सर्वं हि विद्यते ।
न हि तेजस्विनां नाशो हीनतेजा विनश्यति ॥५४॥
धर्मः प्राह शरण्या हि वयं पापनिवारकाः ।
रक्षणीयाः शरणस्थाः पात्रता च यथा तथा ॥५५॥
गजसिंहस्तेनपालाः सावधाना वशेष्वपि ।
धर्मराजजनराजौ सावधानौ वशेष्वपि ॥५६॥
हस्तिपकाऽग्निपाकस्थौ सावधानौ वशेष्वपि ।
तथा भाव्यं सावधानैर्वश्येष्वपि च पाकिषु ॥५७॥
इतिकृत्वाऽनुमननं त्वैकमत्येन नारदः ।
प्राह तान् किं वशं याता ब्रूत वशंगता इति ॥५८॥
तेऽब्रुवंश्च वशं यामो यथेच्छसि तथा कुरु ।
नारदः प्राह तान् शस्त्रविहीनान् वै विमानकम् ॥५९॥
अम्बरे स्थास्यति चात्र ब्रूत कीदृङ् किमिष्यते ।
राजा प्राह विमानं तु भूतले स्पृष्टमस्तु च ॥६०॥
वयं दासा भवामोऽत्र दीक्षार्हा नित्यसेवकाः ।
इत्युक्ते सति रुद्रेण विमानं त्ववतारितम् ॥६१॥
नेमुः राजा तथा भृत्याः सैन्यस्य नायकादयः ।
नारीणां च गणाश्चापि प्रजागणाः समन्ततः ॥६२॥
द्रष्टुं तत्र समायातास्ते प्रणेमुश्च सर्वशः ।
रुद्रः स्पृष्ट्वा त्रिशूलेन पावनान् कृतवाँस्तदा ॥६३॥

जलेन प्रोक्षणं सनत्कुमारः प्रचकार ह ।
नारदश्च जलं ब्राह्मपात्रस्थं तेभ्य आर्पयत् ॥६४॥
तैः पीतं पावनार्थं च क्षमाऽपि याचिता मुहुः ।
यमराजः स्वयं तेषां शस्त्राणि दूतसंघकैः ॥६५॥
एकत्र कारयामास स्वायत्तानि तदा क्षणात् ।
अथ ते प्रार्थयामासुरसुरा दीक्षणाय ह ॥६६॥
नारदस्तेभ्य एवाऽऽदौ दीक्षामन्त्रं ददौ तदा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥६७॥
इतिमन्त्रं ददौ पश्चात् प्रददौ तुलसीस्रजः ।
कृत्वा निजाश्रितान् गन्तुमियेषाऽश्वसरोवरम् ॥६८॥
ततस्तैरासुरैर्नैजं गृहं कर्तुं तु पावनम् ।
देशं क्षेत्राणि च कर्तुं पावनानि समन्ततः ॥६९॥
मृतानां सद्गतिं कर्तुं याचिता नारदादयः ।
तथास्त्वित्याह देवर्षिस्तथा श्रीसनकादयः ॥७०॥
विमाने रक्षकान्नैजान् भटान् गणेश्वरादिकान् ।
वह्निं यमान् कार्तिकेयान् रक्षयित्वा महर्षयः ॥७१॥
ययुस्तेषां गृहाण्येव पावनार्थं तु वाहनैः ।
राजा नैजं महासौधं निनाय प्रथमं तदा ॥७२॥
राजधान्यां महादानाभिधायां स पुपूज ह ।
निम्बकटुं चालहोमं शावान्नं चालदामकम् ॥७३॥
आमेदं च युगान्तं च नीरबीजं च कंगुकम् ।
तुङ्गाऽनीकं प्रतारकं सुपालं वीरकेसरम् ॥७४॥
एवमन्यानि राज्यानि खण्डगानि च यान्यपि ।
तत्तद्राज्यप्रधानं तन्नगरं निन्युरादरात् ॥७५॥
सेनानां पतयो ये ते निन्युर्विजगृहाणि च ।
फलानि दुग्धपाकानि भोजनानि ददुश्च ते ॥७६॥
बहुरत्नानि चान्यानि दासान् दासीर्ददुश्च ते ।
ओतप्रोताश्च ते जाता मिश्रिताः शाठ्यसंवृताः ॥७७॥
अथ यानेन ते निन्युर्दूरं साहस्रयोजनम् ।
सहाररणपारं तु मुरार्कनगरं प्रति ॥७८॥
नारदः शंकरश्चापि सनत्कुमार इत्यपि ।
यमराजस्तथा दूता मुरार्कनगरं ययुः ॥७९॥
जुमासेम्लाभिधभूपस्तथा विंशतिसैन्यपाः ।
ययुर्मुरार्कनगरं पश्चात्तस्थुस्तु दानवाः ॥८०॥
तैः शीघ्रं तु विमानस्थैः सेनाधिपैः क्षणान्तरे ।
सैन्यैश्च नूतनैर्नारीनरात्मकैस्तु राक्षसैः ॥८१॥
उपप्लवाः समारब्धा विमाननाशकारकाः ।
कृत्रिमा गोलकास्तत्र प्रक्षिप्ता नाशनाय वै ॥८२॥

अग्निः प्रज्वालितश्चापि कुत्रचित्तु विमानके ।
पाषाणपर्वतवृष्टिर्झञ्झावातोऽपि भावितः ॥८३॥
वस्तूनामपहरणं कृतं तत्र क्षणान्तरे ।
युद्धं विमानके जातं गणैर्देवादिभिः सह ॥८४॥
अथ स्मृताश्च रुद्राद्यास्तथा कल्पलतात्मजाः ।
कोटिशोऽथ गणास्तत्र प्राविर्भूता महाबलाः ॥८५॥
गणास्तद्दानवं सैन्यं निघ्नन्ति स्म सुकोपिताः ।
कार्तिकाश्च तथा रुद्रा गणनाथा विनायकाः ॥८६॥
कल्पवृक्षसमुत्पन्ना दशसाहस्ररुद्रकाः ।
निजघ्नुर्दानवाऽनीकं दानवा नाशमाव्रजन् ॥८७॥
फल्गुबीजं दानवेन्द्रं गदया श्रीगणेश्वरः ।
पोथयामास शिरसि ताडयित्वा व्यसुं व्यधात् ॥८८॥
गम्बिकायं कार्तिकेयः शक्त्या प्राणं जहार च ।
सेनागोलं गणपतिः कुठारेण व्यसुं व्यधात् ॥८९॥
स्फुटार्दनं परिवेन रुद्रश्चैको व्यसुं व्यधात् ।
केडण्डं जीवलं रुद्रश्चान्यः शूलेन तत्क्षणम् ॥९०॥
विप्राणं चाकरोत् तद्वत् कुमेरुं रुद्रकोऽपरः ।
तुम्बासुरं स्थानलिं च शक्त्या जघान विघ्नराट् ॥९१॥
भिन्नहृदौ व्यसू जातौ लीनापो मुद्गरान्मृतः ।
वीरभद्रो गणस्तत्र गदया परितो रिपून् ॥९२॥
चूर्णयामास कणशश्चालिविष्टं किमूषकम् ।
तूनाबं च तथाऽऽबालं रुक्बासनं च मावुरम् ॥९३॥
एकैकया च गदया चक्रे चूर्णं च भद्रकः ।
कालभैरवरुद्रश्च दण्डेन वज्रपट्टिना ॥९४॥
बांगिवलिं दिनोलूकं कुवंशजं कुरेनूकम् ।
दाहयामास दण्डोत्थवह्निना यानमध्यगान् ॥९५॥
धोधसादा दुद्रुवुश्च दृष्ट्वा रुद्रान् महोल्बणान् ।
यमदूता विलोक्यैतानदुद्रुवुरूर्ध्वगाः ॥९६॥
निपत्योत्पत्य तान् सर्वान् जगृहुर्मस्तकेषु च ।
शैलप्राया यमदूता गदाभिर्जघ्नुरम्बरात् ॥९७॥
शैलशृंगैर्मुद्गरैश्च भारचक्रैश्च वज्रकैः ।
धोधसादा मृताः सर्वे सहस्रशोऽभिसारकाः ॥९८॥
एकोऽपि नावशिष्टोऽभून्निपेतुस्ते सरोवरे ।
शैलादिः शक्तिमादाय अम्बिकासं च शिर्वमम् ॥९९॥
देषलं कक्कलं चापि ईज्यापातं नबीजकम् ।
जघाम बहुधा मारैर्नन्दिना वह्निना सह ॥१००॥
अन्ये रुद्राः शैलतुल्याः प्रलयानलशूलिनः ।
वह्निशूलैर्निर्जघ्नुश्च सुमालिं च सुदानकम् ॥१०१॥
त्रिष्वालं रुद्रशिरसं पिलिपं च नमाकुवम् ।
स्वरिरक्षिषया रुद्रशिरा रुद्रेष्वलीयत ॥१०२॥
भक्तोऽस्मि च प्रपन्नोऽस्मि नाऽपराद्धं मया मनाक् ।
इत्याह स गणाँस्तत्र ररक्षुस्तं गणास्ततः ॥१०३॥
अन्यान् सर्वान् व्यसूंश्चक्रुर्वह्निशूलैर्भयंकरैः ।
दिनमेरोऽपि रुद्राणां भक्तोऽभून्नापराधवान् ॥१०४॥
तं ररक्षुस्तदा रुद्रगणे रुद्रा दयालवः ।
अथांगुलादप्रभृतिचतुर्विंशतिनायकाः ॥१०५॥
विमानं च रणं चापि परित्यज्य समन्ततः ।
कृत्वा प्राकाररूपां च बन्धिकां बहुयुक्तितः ॥१०६॥
अभिचारैस्तथा चेन्द्रजालिकैर्बहुविस्तरैः ।
समुत्पाद्य मृषासैन्यसमूहान् व्योमवर्तिनः ॥१०७॥
शस्त्रास्त्रमन्त्रसहितान् बहुसमानरूपकान् ।
योधयामासुरत्यर्थं रुद्रैः सह समन्ततः ॥१०८॥
जलपाषाणकैर्वृक्षैर्वह्निभिःपर्वतैस्तथा ।
हस्तिभिर्वाजिभिश्चापि रथैर्यानैर्विमानकैः ॥१०९॥
रुद्राः सर्वे तदा दशसहस्राणि विमानतः ।
बहिर्गत्वा च मायाभिः प्रतिहन्त्रीभिरेव ते ॥११०॥
निजघ्नुर्दानवीं मायां शस्त्रास्त्रमन्त्ररूपकैः ।
विद्युदस्त्राणि विद्युद्भिर्मेघास्त्राणि तु वायवैः ॥१११॥
अग्न्यस्त्राणि च मेघाद्यैरीश्वरास्ते न्यवारयन् ।
अथ कल्पलतावृक्षमण्युत्था यमपार्षदाः ॥११२॥
हिरण्यकशिपुतुल्यास्ततोऽपि बलिनो हि ते ।
अट्टहासाँस्तु मुमुचुर्ब्रह्माण्डं तैश्च पूरितम् ॥११३॥
श्रुत्वा ब्रह्माण्डभेर्युत्थनादतुल्यनिनादकान् ।
जुमासेम्लाख्यनृपतिस्तथा तस्य च सैन्यपाः ॥११४॥
नारदाद्याश्च ऋषयो विदित्वा युद्धमुग्रगम् ।
पलमात्रेण तु तत्र विमानं प्रति चाययुः ॥११५॥
दृष्ट्वा दैत्यमहासैन्यं नष्टं मायानलेऽपि तु ।
रुद्रैः सह प्रयुध्यन्ति मायेन्द्रजालिनोऽपरे ॥११६॥
शंभुस्तत्राऽकरोन्नैजं ब्रह्माण्डसदृशं वपुः ।
मस्तकस्य जटापाशैर्दैत्यसैन्यं बबन्ध ह ॥११७॥
मृषा सैन्यं जटायां संलीनं सर्वं व्यजायत ।
अन्यत् सैन्यं परं त्रासं त्वापमाहात्म्यवेदनात् ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कामस्वपूर्वा दैत्यानां शरणागतिः, शंकरादीनां तद्राजधानीं प्रति गमनं स्वागतम्, पृष्ठतो विमाने युद्धं चेत्यादि-निरूपणनामा त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके तत्राऽवसरे दैत्ययोषितः ।
लक्षशो युद्धवेत्र्यश्च व्योममार्गानुमार्गगाः ॥ १ ॥
उड्डीयोड्डीय वै क्रूराः सशस्त्राश्च समन्ततः ।
सप्तम्यां भूमिकायां ता विविशुर्यत्र कन्यकाः ॥ २ ॥
द्वासप्ततिसहस्राणि वर्तन्ते कृष्णमानसाः ।
चुक्रुशुः कन्यका वीक्ष्य राक्षसीश्चांजनोज्ज्वलाः ॥ ३ ॥
सखड्गाः साऽसयः काश्चित् कराग्रकृतछूरिकाः ।
सशूलाः सकृपाणाश्च सतोमराः समुद्गराः ॥ ४ ॥
ससीताः सोपलाश्चान्याः समुसलाः शिलान्विताः ।
स्फारनेत्रा रक्तजिह्वा दृश्यदंष्ट्रा भयप्रदाः ॥ ५ ॥
छिन्धि भिन्धीति वादिन्यः खादचर्वयशब्दिताः ।
दाहय ज्वालय सर्वाः प्रमारय प्रचूर्णय ॥ ६ ॥
प्रमर्दय जहाहीति वदन्त्यो युद्धदुर्मदाः ।
कीर्णकेशा हेतियुक्ता दुद्रुवुः परितस्तु ताः ॥ ७ ॥
यावद्विमानमारुह्य मारयितुं प्रयान्ति ताः ।
तावत्तत्र सुषुम्णाद्याः स्पृष्ट्वा कल्पलताद्रुमान् ॥ ८ ॥
कृत्यासैन्यानि दैत्यानां योषितां नाशहेतवे ।
समुद्भवन्तु परितश्चेत्यसंकल्पयन्मुहुः ॥ ९ ॥
कृत्यास्तत्र लताभ्यश्च सहस्रायुतसंख्यकाः ।
समुद्भूता महारौद्रयः कालानलसमाक्षिकाः ॥१०॥
व्योमानुगाः सूक्ष्महस्वाः स्थूलाः शैलनिभा अपि ।
एकैकां परिसंमृग्य केशाकेशि च हेतुभिः ॥११॥
दण्डादण्डि च विविधं युद्धं तासामभूत्तदा ।
कृत्याभिर्दैत्यनारीः संगृह्यगृह्य प्रमर्दिताः ॥१२॥
भग्नाश्च चूर्णिताश्चापि भेदिता नाशिता अपि ।
मूत्रिताश्चानने तासां हृदयेषु विदारिताः ॥१३॥
स्तनेषु भेदितास्ताश्च मर्मस्वप्यर्दिताः शरैः ।
कर्चरिता भस्मिता वह्निज्वालाभिश्च मारिताः ॥१४॥
दशलक्षाणि नारीणां कृत्याभिर्नाशितानि हि ।
सस्मरुः कन्यकाः कृष्णनारायणं प्रभुं प्रियम् ॥१५॥
सद्यः समाजगामाऽसौ गरुडस्थो महाप्रभुः ।
साक्षाद् बभूव तासां वै युद्धारंभे समागतः ॥१६॥
विमाने तिष्ठते नाथो हृदयेषु च तिष्ठति ।
युद्धारंभे स्थितोऽदृश्यो विलोकयति सङ्गरम् ॥१७॥
प्रत्यक्षं त्वागतं नाथं दृष्ट्वा कन्याः सुसंभ्रमाः ।
पुपूजुश्चनिपेतुश्चाऽश्लिक्षन् प्रेमभरोत्सुकाः ॥१८॥
हरिः सिंहासने चास्ते कन्यकामण्डलान्तरे ।
तथा श्रीशंकरादीनां मण्डलेष्वपि भासते ॥१९॥
शंकराद्यैर्गणाद्यैश्च ऋषिभिः पूजितः प्रभुः ।
निषसादाऽऽसने रम्ये श्रेष्ठे योग्ये प्रभासुरे ॥२०॥
नारदः कथयामास वृत्तान्तं युद्धजं तथा ।
राज्ञः परिचयं चापि ददौ मानुषलीलया ॥२१॥
राजा रुरोद बहुधा प्रार्थयच्च क्षमां तदा ।
तथा तत्सैन्यपा ये च दूरं गताः सहाऽभवन् ॥२२॥
अभयं प्रददौ तेभ्यः कृष्णनारायणो हरिः ।
राजाद्याः ददृशुः श्रीमत्कृष्णनारायणोदरे ॥२३॥
भुवनार्णवपातालान् स्थितान् स्थावरजङ्गमान् ।
आदित्यवसुरुद्रांश्च विश्वेदेवगणाँस्तथा ॥२४॥
यक्षान् किंपुरुषाँश्चापि गन्धर्वाऽप्सरसां गणान् ।
मुनीन्मनुजसाध्याँश्च पशुकीटपिपीलिकाः ॥२५॥
सरीसृपान् वृक्षगुल्मफलमूलौषधानि च ।
जलस्थाँश्च स्थलस्थाँश्चाऽनिमेषान् निमिषानपि ॥२६॥
अव्यक्ताँश्चैव व्यक्तांश्च द्विपदोऽथ चतुष्पदः ।
दैतेयान् दानवांश्चैव राक्षसानुरगाँस्तथा ॥२७॥
ब्रह्माण्डाऽऽवरणाँश्चापीश्वरांश्च परमेश्वरान् ।
मुक्तान् मुक्तनिवासाँश्च लक्ष्म्यादिकाश्च पत्निकाः ॥२८॥
पार्षदान् श्रीहरेश्चापि त्वन्यरूपाणि वै हरेः ।
राजा देशं निजं राज्यं स्वं विमानं च योधनम् ॥२९॥
सर्वं ददर्श च तदा भक्तिनम्रो बभूव ह ।
उवाचापि निजान् भावान् स्मृत्वा कर्माणि तानि च ॥३०॥
अहो नारायणः साक्षात्परमात्मा परात्परः ।
तद्भक्ताश्च मया नैव ज्ञाताः संसारलोभिना ॥३१॥
सदाऽकरवं पापानि महापापानि यानि च ।
तेषां यत्र भवेन्नाशस्तत्रापि कृतवानघम् ॥३२॥
वज्रीलेपेन पापेन कथं कदा विमोचनम् ।
नैव स्यादिति देवेज्य ! पापादुद्धर माधव ! ॥३३॥
दैत्यानां तु स्वभावोऽयं सम्पद्योषित्प्रलुब्धता ।
मद्यमांसाशनं चापि तस्मादुद्धर माधव ॥३४॥
कोटिपुण्यार्जितेनाऽत्र मानुषेण तु वर्ष्मणा ।
लभ्यते मुक्तिरेवाऽत्र यत्प्रपत्तिप्रतापतः ॥३५॥
तत्प्रपत्तिर्मया लब्धा युद्धादेशेन माधव ।
पापं च कृतवान् युद्धं फलं पुण्यस्य मेऽभवत् ॥३६॥
यद्युद्धारकृतां योगो भगवतां च दर्शनम् ।
अद्य मां मम देशेषु युद्धे प्रहृतदेहिनाम् ॥३७॥

उद्धारं प्रकरोत्वेव विहृत्य भगवान् स्वयम् ।
उद्धारं च भवत्सेवां वृणे नान्यद् वृणोम्यहम् ॥३८॥
इत्युक्त्वा विररामाऽसौ जुमासेम्लानरेश्वरः ।
सनत्कुमारो भगवानुपादिदेश तं ततः ॥३९॥
शारीरं मानसं वापि दुष्कृतं दुर्विचिन्तितम् ।
तथा ते दानवो भावो व्यपयातु नराधिप ॥४०॥
सुस्थिरा तव सद्भक्तिः परमेशेऽस्तु नित्यदा ।
मुक्तोऽसि दैत्यभावात्त्वं भज कृष्णनरायणम् ॥४१॥
शृणु राजान् ध्रुवं साध्यं नाऽध्रुवं तु कदाचन ।
चलाः श्रियः सदा बोध्यास्ताभिः साध्यं तु शाश्वतम् ॥४२॥
पुरा प्रसन्नो भगवान् लक्ष्म्या रूपचतुष्टयम् ।
धर्तुं दिदेश तां साऽपि चतूरूपा बभूव ह ॥४३॥
श्वेताम्बरधरा चैका श्वेतस्रगनुलेपना ।
श्वेतगजसमारूढा सत्त्वाढ्या श्वेतविग्रहा ॥४४॥
रक्ताम्बरधरा चान्या रक्तस्रगनुलेपना ।
रक्तवाजिसमारूढा रक्तांगी राजसी हि सा ॥४५॥
पीताम्बरा पीतवर्णा पीतस्रगनुलेपना ।
सौवर्णस्यन्दनारूढा तामसं गुणमाश्रिता ॥४६॥
नीलाम्बरा नीलमाल्या नीलगन्धाऽलिप्तप्रभा ।
नीलवृषसमारूढा मिश्रा सा त्रिगुणात्मिका ॥४७॥
श्वेता चन्द्रं वेधसं च सात्त्विकान् प्रत्यभिस्थिता ।
रक्ता चेन्द्रं च राजानं मनून् नृपानुपस्थिता ॥४८॥
पीता प्रजापतीन् याता वैश्यवर्णान् सुधार्मिकान् ।
नीला तु दानवान् दैत्यान् शूद्रांश्च राक्षसादिकान् ॥४९॥
विप्राद्याः श्वेतवर्णां तु सरस्वतीं च जगृहुः ।
यज्ञं मन्त्रान् पूजनादि दैवकार्यं शुभप्रदम् ॥५०॥
क्षत्रिया राजसीं रक्तां जयश्रियं सुभेजिरे ।
वैश्या वृत्तिस्वरूपां तामङ्गीचक्रुः समन्ततः ॥५१॥
शूद्रा नीलां दास्यरूपां सेवादेवीं प्रजगृहुः ।
एवं विभक्ता सा लक्ष्मीर्यावद्भाग्यं हि वर्तते ॥५२॥
एतासां तु स्वरूपाणि भवन्ति निधयोऽव्ययाः ।
वेदाः कथानकाद्याश्च संहिताः शास्त्रसत्क्रियाः ॥५३॥
चतुःषष्टिकलाः श्वेता महापद्मो निधिः स्थितः ।
रत्नानि स्वर्णरजते गजाश्वरथभूषणम् ॥५४॥
शस्त्राऽस्त्रादिकवस्तूनि रक्ता पद्मो निधिः स्मृतः ।
गोमहिष्यः खरोष्ट्राश्च सुवर्णाम्बरभूमयः ॥५५॥
ओषध्यः पशवः पीता महानीलो निधिः स्मृतः ।
सर्वासामपि जातीनां सेवा नित्या प्रतिष्ठिता ॥५६॥
सुखदुःखातिसंव्याप्ता नीला शंखो निधिः स्मृतः ।
एताभिः स्वीकृता ये ये मानवाद्या निजाश्रिताः ॥५७॥
तेषां भवन्ति रूपाणि बोधार्थं संब्रवीमि ते ।
सत्त्वलक्ष्मीयुताः सौम्याः सत्यशौचादिपालकाः ॥५८॥
सुरूपा धर्मकर्तारो दर्शनाह्लाददायकाः ।
दीर्घनेत्रा दीर्घभुजा हास्यतृप्त्यादिशालिनः ॥५९॥
अविखण्डितदेहाश्च अविखण्डकुटुम्बिनः ।
अविखण्डान्नपानाद्या अविखण्डयशोऽमलाः ॥६०॥
सत्यशौचाभिसंयुक्ता बलदानोत्सवे रताः ।
आस्तिक्यदाननैर्मल्यपरोपकृतिशालिनः ॥६१॥
भवन्ति राजन् सुभगा महापद्माश्रिता जनाः ।
यज्विनः सुभगा दृप्ता मालिनो बहुदक्षिणाः ॥६२॥
बहुभोगा बहुरूपा बहुराजसवर्तिनः ।
सर्वोपस्करतेजोभिः प्रभासिनोऽतिकीर्तयः ॥६३॥
यावद्वस्तुभिः सुखिनो राज्यक्षेत्रादिभोगिनः ।
मान्या मानप्रदा हृष्टाः पुष्टा दीर्घशरीरिणः ॥६४॥
मदनेत्रा गर्वभालाः श्मश्रुला वर्ष्मकेशिनः ।
रक्तनखा रक्तवर्णा जनाः पद्माश्रिताः स्थिताः ॥६५॥
सत्याऽनृतसमायुक्ता दानाऽशरणयज्विनः ।
न्यायाऽन्यायव्ययोपेताः सर्वसन्तोषकारकाः ॥६६॥
दानधर्मा नातिरूपा नातिवस्त्रा नशोभनाः ।
रूक्षदेहा मध्यपुष्टा महानीलाश्रिता जनाः ॥६७॥
नास्तिकाः शौचरहिताः कृपणा भोगवर्जिताः ।
स्तेयाऽनृतकथावादाः परदुःखकराः शठाः ॥६८॥
स्वार्थमात्रपराः कृष्णाः कद्रूपा भावहीनकाः ।
अगन्धाः कुस्वभावाश्च मक्षिकाकृतमित्रताः ॥६९॥
मालिन्यवाससहना जनाः शंखाश्रिता नृप ! ।
तस्यां वै वर्तमानायां नरे नार्यां नपुंसके ॥७०॥
समाश्रयन्ति तं चान्या ह्रिः कीर्तिर्द्युतिरित्यपि ।
प्रभा गतिः क्षमा भूतिर्विद्या नीतिर्दया मतिः ॥७१॥
श्रुतिः स्मृतिर्बलं कीर्तिर्धृतिः शान्तिः क्रिया कृतिः ।
पुष्टिस्तुष्टिस्तथा चान्या मुख्यश्रियाऽनुजीविताः ॥७२॥
सा श्रीर्लेखावशा राजन् यावद् रेखा हि वर्तते ।
रेखाया विगमे श्रीश्च सर्वश्रीभिर्निवर्तते ॥७३॥
श्रियः सर्वाः समायान्ति पूर्वकर्मविधानतः ।
सुखदुःखानि दैत्येन्द्र सहनीयानि तानि वै ॥७४॥
पुत्रमित्रकलत्रार्थे राज्यभोगधनाय च ।
आगमे निर्गमे प्राज्ञे विषादो नाविशेत् क्वचित् ॥७५॥

आपदामागमं दृष्ट्वा न विषण्णो भवेद् वशी।
सम्पदं च सुविस्तीर्णां प्राप्य नो फुल्लितो भवेत् ॥७६॥
धनक्षये न मुह्यन्ति न दुष्यन्ति धनागमे।
धीरा त एव तु प्रोक्ता ज्ञानिनः पुरुषोत्तमाः ॥७७॥
तथाऽन्यच्च महाबाहो हितं शृणु महार्थकम्।
शरण्यं शरणं याहि तमेनं पुरुषोत्तमम् ॥७८॥
ये श्रयन्ति हरिं कृष्णं नारायणं पुमुत्तमम्।
ते तरन्ति भवाब्धेर्वै शतैककुलवन्दिताः ॥७९॥
तन्मना दानवश्रेष्ठ तद्भक्तो भव सर्वशः।
स एव भवतां श्रेयो विधास्यति नरायणः ॥८०॥
सर्वकर्माणि तत्रैव शुभान्यप्यशुभानि च।
रागद्वेषप्रजातानि समर्पयाऽत्र माधवे ॥८१॥
नाऽभुक्तं क्षीयते कर्म कल्पकोटिगमेऽपि हि।
नारायणेऽर्पितं चेत् तद् भोक्तव्यं न हि शिष्यते ॥८२॥
चौरश्चौर्यादिदोषेण दण्डं याति यथा कृतम्।
यदि राजा प्रसन्नः स्याद् दण्डं ददाति नैव च ॥८३॥
क्षमते तत्कृतं सर्वं पुनः कर्तुं निषेधति।
एवं श्रीभगवानत्र पापिनां प्राणधारिणाम् ॥८४॥
कृतपापानि विज्ञाय दण्डं ददाति सर्वथा।
यदि कृष्णः प्रसन्नः स्याद् दण्डं नैव ददाति हि ॥८५॥
क्षमते तत्कृतं सर्वं पुनः कर्तुं निषेधति।
प्रसन्नताऽस्य चासव्या साधनैर्विविधैरपि ॥८६॥
प्रत्यक्षे वर्तमाने तु यद् वदेत् तत् समाचरेत्।
अत्रायं विद्यते श्रीमान् प्रत्यक्षः पुरुषोत्तमः ॥८७॥
एहि तच्छरणं याहि यद्वदेत् तत्समाचर।
इत्युक्त्वा नृपतिं म्लेच्छं मुनिः सनत्कुमारकः ॥८८॥
अनादिश्रीकृष्णनारायणपादे निनाय तम्।
राजा प्राह दयासिन्धो समुद्धर यथेष्टकम् ॥८९॥
पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः।
पापिप्रसंगकर्तारं समुद्धर कृपालय ॥९०॥
विहस्य श्रीहरिः प्राह शुद्धो जातोऽसि सर्वथा।
साक्षात् सतां प्रसंगेन दैत्यभावेन मोचितः ॥९१॥
यूयं भृत्यास्तथा सेनापतयो नरयोषितः।
सर्वे मत्साधुयोगेन पावनाः स्थो न संशयः ॥९२॥
तव देशो नगराणि तडागानि तथाऽऽपगाः।
गिरयो रणभूभागाः पावनाः सत्प्रसंगतः ॥९३॥
इत्युक्त्वा विररामाऽसौ श्रीमत्कृष्णनरायणः।
नारदश्च हरिं नत्वा धृत्वा कल्पलतां करे ॥९४॥
विमाने सप्तभौमेषु विचचार मुहुर्मुहुः।
युद्धयोगेन वै यत्र क्वापि कच्चरवत् तथा ॥९५॥
भग्नं त्रुटितमाभग्नं विपरीतं परावृतम्।
सर्वं संकल्प्य तूर्णं हि यथावत् समकारयत् ॥९६॥
जलेन प्रोक्ष्य च शुद्धिं चकार सर्वभूमिषु।
समाययौ हरेरग्रे तस्थौ नम्रो मुदा युतः ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने विमाने सप्तमभूमिकायां दैत्यनारीकृतयुद्धं, कल्पवल्ल्युत्पादितकृत्याभिर्दैत्यादीनां नाशः, श्रीकृष्णनारायणदर्शनं, राज्ञः प्रार्थना, उपदेशश्चेत्यादिनिरूपणनामा चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके! राजा परमेशं तदाऽऽर्थयत्।
मृतानां तु यथा मुक्तिस्तथा कुरु दयां कुरु ॥ १ ॥
विमानेन समागत्य यत्र यत्राऽभवद् रणः।
तत्र तत्र विहृत्यैव कुरु तीर्थानि केशव ॥ २ ॥
भविष्याणां च लोकानां भूर्भवेन्मुक्तिभाजना।
एवं कृपां परां नाथ पापिनां कुरु तारिणीम् ॥ ३ ॥

श्रीकृष्णनारायण उवाच—

धन्या ते विमला राजन्मतिस्त्वद्य प्रवर्तते।
अरिक्तं सर्वथा देशं करिष्ये तीर्थरूपिणम् ॥ ४ ॥
नद्यस्ता ब्रह्मणः पुत्र्यो दैत्ययोगेन दैत्यताम्।
तूपगताः पावनास्ताः पावयिष्येऽद्य वै पुनः ॥ ५ ॥
इत्युक्तमात्रे नद्यश्च सरांसि पर्वतास्तथा।
मूर्तिमन्तः समायाताः प्रार्थयितुं प्रभुं तदा ॥ ६ ॥
ऊचुर्नाथ कृपासिन्धो पावयाऽस्मान् समन्ततः।
हरिः प्राह तथाऽस्त्वेवं पावयिष्ये द्रुतं हि वः ॥ ७ ॥
अथ सम्पूज्य ता नद्यो द्रष्टुं च ब्रह्मकन्यकाः।
स्वभगिनीर्द्रष्टुमेव विमाने चोर्ध्वभूस्तरे ॥ ८ ॥
ययुस्तत्र मिलित्वा ता आमन्त्र्याऽऽभाष्य वै मुहुः।
ययुश्चाऽदृश्यतां द्राक् च ततः कृष्णनरायणः ॥ ९ ॥
विमानेन ययौ कर्तुं तीर्थानि पावनानि च।
उद्धर्तुं च मृतात्मनः प्रदक्षिणक्रमेण वै ॥१०॥
प्रथमं श्रीहरिस्तत्र विमानेन तदोत्तरम्।
ययौ पावयितुं युद्धक्षेत्राच्चण्डनदीं शुभाम् ॥११॥

चण्डनद्यां तथा स्नात्वा चण्डसरसि वै हरिः ।
वैमानिकास्तथा सर्वे नरा नार्यो महत्तमम् ॥१२॥
तीर्थं विधाय च ततस्त्रिराशिपर्वतं ययुः ।
पर्वतं च प्रदक्षिणं कृत्वा स्नात्वा जलादिषु ॥१३॥
तीर्थं तत्पर्वतं कृत्वा नारायण्या द्वितीयके ।
धोधे स्नात्वा तृतीये च धोधे स्नात्वा चतुर्थके ॥१४॥
धोधे स्नात्वा पञ्चमे च स्नात्वा धोधे ततः परम् ।
अन्तवैरासंगमे च स्नात्वा च षष्ठधोधके ॥१५॥
श्वेतनीलस्वरूपिण्योर्नारायण्योश्च संगमे ।
स्नात्वा तूयानसरसि तीर्थानि व्यदधात् प्रभुः ॥१६॥
आब्रालाख्यतडागेषु स्नात्वा चक्रे तु मोक्षदान् ।
तडागान्निर्मलजलान् चतुरश्च ततः परम् ॥१७॥
उक्तेषु तीर्थवर्येषु ये ये मृता महाहवे ।
ताँस्तान् प्रेतान् समाहूय तेषां मोक्षं व्यधात्प्रभुः ॥१८॥
दिव्ययानैस्तु ते सर्वे स्वर्गं ययुर्हि शाश्वतम् ।
अपारकरुणासिन्धुर्मोक्षदो यत्र वै हरिः ॥१९॥
तत्र का कर्मसापेक्षा गतिः का कृपयोद्भवा ।
जुब्वां नदीं ततः स्पृष्ट्वा रुद्रबाष्पसरोवरम् ॥२०॥
स्नात्वा मार्किशनधोधे आलावर्तसरोवरे ।
अन्तावर्ततडागे च स्नात्वा किमुसरोवरे ॥२१॥
विज्ञतूरीयसरसि न्याजासरोवरे तथा ।
तुंगानीके तडागे च स्नात्वा रुक्वसरोवरे ॥२२॥
रफिज्यायां ततः स्नात्वा रोकुमायां समाप्लवत् ।
न्याजासरोवरे स्नात्वा शिवासरोवरे ततः ॥२३॥
जाम्बूजायां ततः स्नात्वा बंगव्यालीसरोवरे ।
मावूरसरसि स्नात्वा कङ्कस्नानं ततोऽकरोत् ॥२४॥
तत्र तत्र च निधनं गतान् प्रेतान् कृपालयः ।
अमोक्षयत् तथा तानि तीर्थान्यप्याकरोत् प्रभुः ॥२५॥
ततो ययौ दिनोलूकतडागं भगवान् हरिः ।
विज्ञतुरीयधोधे च स्नात्वा कुबंगिकांतटे ॥२६॥
तज्जे सरोवरे स्नात्वा लिम्पापगायां चाप्लवत् ।
बालनद्यां ततः स्नात्वा दक्षिणावर्गपर्वतम् ॥२७॥
विमानेनोर्ध्वमुल्लंघ्य कारुवाधिं जगाम ह ।
विमानादवतीर्याऽथ सर्वे सस्नुश्च सागरे ॥२८॥
ततस्ते यानमारुह्य ओरङ्कासरितं ययुः ।
स्नात्वा रणे मृतान् उक्तस्थानेष्वपि मृतासुरान् ॥२९॥
अमोक्षयच्छ्रीभगवान् कालहरिरणात्ततः ।
ययौ कुनयनां स्नात्वा कुरेन्द्रक्यां समाप्लवत् ॥३०॥
गत्वा कुवंशजां स्नात्वा स्थानल्याख्ये जलाशये ।
कर्माङ्गयां च महानद्यां स्नात्वा महासमागमे ॥३१॥
लिम्पासरोवरे स्नात्वा तुम्बासरोवरे तथा ।
स्थानल्याधोधभागेषु स्नात्वा आरुवमीजले ॥३२॥
कर्माङ्गयां च तथोवेण्यां स्नात्वा तयोः समागमे ।
सामुद्रसंगमे स्नात्वा कोटिप्रेतप्रमोक्षणम् ॥३३॥
चकार श्रीहरिस्तत्र मृतानां शाश्वतार्थकृत् ।
तानि विधाय तीर्थानि आगीच्यां प्रययौ ततः ॥३४॥
कर्मध्नं पर्वतं तीर्थं कृत्वा वेनजयातटे ।
स्नानं च संगमे तस्या नष्टजरासमागमे ॥३५॥
केडंडायां तथा नद्यां तथा चण्डसरोवरे ।
फेगविपीनसरसि स्नात्वा सरित्समागमे ॥३६॥
गम्बिकायां स्फुटायां च सेनागोलसरित्सु च ।
फल्गुबीजे तथा स्नात्वा रणमुल्लङ्घ्य वै हरिः ॥३७॥
रणे सरोवरे स्नात्वा अतलेष्टं च पर्वतम् ।
अलजालिसरःपञ्चस्वाप्लवनं चकार सः ॥३८॥
तन्मुखं पर्वतं गत्वा त्रिराशिपर्वतं ततः ।
लीलाबीजरणं गत्वा कृत्वा तीर्थानि वै जले ॥३९॥
भूमध्याब्धौ ततः स्नात्वा नारायणीयसागरे ।
समुद्रसंगमेष्वेव स्नात्वाऽऽग्रे धोधसारके ॥४०॥
नवबीजरणं दृष्ट्वा स्नात्वा रक्तसमुद्रकम् ।
कृत्वा सर्वाणि च तानि पवित्राणि जलानि तु ॥४१॥
नदीर्नदाँस्तडागाँश्च सरो वापीः प्रवाहकान् ।
देशान् रणान् पर्वताँश्च महापगाश्च नालिकाः ॥४२॥
तत्तत्प्रदेशजान् ग्रामान् नगराणि गृहाणि च ।
राजधानीर्जलधानीर्वनधानीश्च भूमिकाः ॥४३॥
पवित्रीकृत्य च तीर्थीकृत्य श्रीमन्नरायणः ।
कोटिगणैः पार्षदैश्च देवीभिः साधुभिः सह ॥४४॥
धर्मराजस्कन्दशंभुविनायकादिभिः सह ।
स्थले च विहृत्य प्रेतोद्धारं विधाय च ॥४५॥
अब्रिक्तं सुमहाखण्डं तीर्थीभूतं विधाय च ।
दशसाहस्रक्रोशात्मभूमिं कृत्वा सुपावनीम् ॥४६॥
जुमासेम्लान्नृपं प्राह भगवान् पुरुषोत्तमः ।
राजन् मनोरथस्तेऽत्र जातो वै सफलः खलु ॥४७॥
अधुना च वयं यामो रैवतेऽश्वसरोवरम् ।
श्रुत्वा राजाऽऽह भगवन् मुक्तिमिच्छामि शाश्वतीम् ॥४८॥
मोक्षदाता मिलेद् यावद् यदि मोक्षं न विन्दति ।
संसारस्तस्य शिरसि ध्रुव एव स्थितो भवेत् ॥४९॥

आपदामागमं दृष्ट्वा न विषण्णो भवेद् वशी ।
सम्पदं च सुविस्तीर्णां प्राप्य नो कुल्लितो भवेत् ॥७६॥
धनक्षये न मुह्यन्ति न दुष्यन्ति धनागमे ।
धीरा त एव तु प्रोक्ता ज्ञानिनः पुरुषोत्तमाः ॥७७॥
तथाऽन्यच्च महाबाहो हितं श्रृणु महार्थकम् ।
शरण्यं शरणं याहि तमेनं पुरुषोत्तमम् ॥७८॥
ये श्रयन्ति हरिं कृष्णं नारायणं पुमुत्तमम् ।
ते तरन्ति भवाब्धिवैं शतैककुलबन्दिताः ॥७९॥
तन्मना दानवश्रेष्ठ तद्भक्तो भव सर्वशः ।
स एव भवतां श्रेयो विधास्यति नरायणः ॥८०॥
सर्वकर्माणि तत्रैव शुभान्यप्यशुभानि च ।
रागद्वेषप्रजातानि समर्पयाऽत्र माधवे ॥८१॥
नाऽभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि हि ।
नारायणेऽर्पितं चेत् तद् भोक्तव्यं न हि शिष्यते ॥८२॥
चौरश्चौर्यादिदोषेण दण्डं याति यथा कृतम् ।
यदि राजा प्रसन्नः स्याद् दण्डं ददाति नैव च ॥८३॥
क्षमते तत्कृतं सर्वं पुनः कर्तुं निषेधति ।
एवं श्रीभगवानत्र पापिनां प्राणधारिणाम् ॥८४॥
कृतपापानि विज्ञाय दण्डं ददाति सर्वथा ।
यदि कृष्णः प्रसन्नः स्याद् दण्डं नैव ददाति हि ॥८५॥
क्षमते तत्कृतं सर्वं पुनः कर्तुं निषेधति ।
प्रसन्नताऽस्य चाप्तव्या साधनैर्विविधैरपि ॥८६॥
प्रत्यक्षे वर्तमाने तु यद् वदेत् तत् समाचरेत् ।
अत्राऽयं विद्यते श्रीमान् प्रत्यक्षः पुरुषोत्तमः ॥८७॥
एहि तच्छरणं याहि यद्वदेत् तत्समाचर ।
इत्युक्त्वा नृपतिं म्लेच्छं मुनिः सनत्कुमारकः ॥८८॥
अनादिश्रीकृष्णनारायणपादे निनाय तम् ।
राजा प्राह दयासिन्धो समुद्धर यथेष्टकम् ॥८९॥
पापोऽहं पापकर्माऽहं पापात्मा पापसंभवः ।
मापिप्रसंगकर्तारं समुद्धर कृपालय ॥९०॥
विहस्य श्रीहरिः प्राह शुद्धो जातोऽसि सर्वथा ।
साक्षात् सतां प्रसंगेन दैत्यभावेन मोचितः ॥९१॥
यूयं भृत्यास्तथा सेनापतयो नरयोषितः ।
सर्वे मत्साधुयोगेन पावनाः स्थो न संशयः ॥९२॥
तव देशो नगराणि तडागानि तथाऽऽपगाः ।
गिरयो रणभूभागाः पावनाः सत्प्रसंगतः ॥९३॥
इत्युक्त्वा विरराऽमाऽसौ श्रीमत्कृष्णनरायणः ।
नारदश्च हरिं नत्वा धृत्वा कल्पलतां करे ॥९४॥
विमाने सप्तभौमेषु विचचार मुहुर्मुहुः ।
युद्धयोगेन वै यत्र क्वापि कच्चरवत् तथा ॥९५॥
भग्नं त्रुटितमाभग्नं विपरीतं परावृतम् ।
सर्वं संकल्प्य तूर्णं हि यथावत् समकारयत् ॥९६॥
जलेन प्रोक्ष्य च शुद्धिं चकार सर्वभूमिषु ।
समाययौ हरेरग्रे तस्थौ नम्रो मुदा युतः ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने विमाने सप्तमभूमिकायां दैत्यनारीकृतयुद्धं, कल्पवल्ल्युत्पादितकृत्याभिर्दैत्यादीनां नाशः, श्रीकृष्णनारायणदर्शनं, राज्ञः प्रार्थना, उपदेशश्चेत्यादिनिरूपणनामा चतुःपञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

श्रीकृष्ण उवाच—

श्रृणु त्वं राधिके ! राजा परमेशं तदाऽऽर्थयत् ।
मृतानां तु यथा मुक्तिस्तथा कुरु दयां कुरु ॥ १ ॥
विमानेन समागत्य यत्र यत्राऽभवद् रणः ।
तत्र तत्र विहृत्यैव कुरु तीर्थानि केशव ॥ २ ॥
भविष्याणां च लोकानां भूर्भवेन्मुक्तिभाजना ।
एवं कृपां परां नाथ पापिनां कुरु तारिणीम् ॥ ३ ॥

श्रीकृष्णनारायण उवाच—

धन्या ते विमला राजन्मतिस्त्वय प्रवर्तते ।
अविरक्तं सर्वथा देशं करिष्ये तीर्थरूपिणम् ॥ ४ ॥
नद्यस्ता ब्रह्मणः पुत्र्यो दैत्ययोगेन दैत्यताम् ।
तूपगताः पावनास्ताः पावयिष्येऽद्य वै पुनः ॥ ५ ॥
इत्युक्तमात्रे नद्यश्च सरांसि पर्वतास्तथा ।
मूर्तिमन्तः समायाताः प्रार्थयितुं प्रभुं तदा ॥ ६ ॥
ऊचुर्नाथ कृपासिन्धो पावयाऽस्मान् समन्ततः ।
हरिः प्राह तथाऽस्त्वेवं पावयिष्ये द्रुतं हि वः ॥ ७ ॥
अथ सम्पूज्य ता नद्यो द्रष्टुं च ब्रह्मकन्यकाः ।
स्वभगिनीर्द्रष्टुमेव विमाने चोर्ध्वभूस्तरे ॥ ८ ॥
ययुस्तत्र मिलित्वा ता आमन्त्र्याऽऽभाष्य वै मुहुः ।
ययुश्चाऽदृश्यतां द्राक् च ततः कृष्णनरायणः ॥ ९ ॥
विमानेन ययौ कर्तुं तीर्थानि पावनानि च ।
उद्धर्तुं च मृतात्मनः प्रदक्षिणक्रमेण वै ॥ १० ॥
प्रथमं श्रीहरिस्तत्र विमानेन तदोत्तरम् ।
ययौ पावयितुं युद्धक्षेत्राच्चण्डनदीं शुभाम् ॥ ११ ॥

चण्डनद्यां तथा स्नात्वा चण्डसरसि वै हरिः ।
वैमानिकास्तथा सर्वे नरा नार्यो महत्तमम् ॥१२॥
तीर्थं विधाय च ततस्त्रिराशिपर्वतं ययुः ।
पर्वतं च प्रदक्षिणं कृत्वा स्नात्वा जलादिषु ॥१३॥
तीर्थं तत्पर्वतं कृत्वा नारायण्या द्वितीयके ।
धोधे स्नात्वा तृतीये च धोधे स्नात्वा चतुर्थके ॥१४॥
धोधे स्नात्वा पञ्चमे च स्नात्वा धोधे ततः परम् ।
अन्तवैरासंगमे च स्नात्वा च षष्ठधोधके ॥१५॥
श्वेतनीलस्वरूपिण्योर्नारायण्योश्च संगमे ।
स्नात्वा तूथानसरसि तीर्थानि व्यदधात् प्रभुः ॥१६॥
आत्रालाख्यतडागेषु स्नात्वा चक्रे तु मोक्षदान् ।
तडागान्निर्मलजलान् चतुरश्च ततः परम् ॥१७॥
उक्तेषु तीर्थवर्येषु ये ये मृता महाहवे ।
तांस्तान् प्रेतान् समाहूय तेषां मोक्षं व्यधात्प्रभुः ॥१८॥
दिव्ययानैस्तु ते सर्वे स्वर्गं ययुर्हि शाश्वतम् ।
अपारकरुणासिन्धुर्मोक्षदो यत्र वै हरिः ॥१९॥
तत्र का कर्मसापेक्षा गतिः का कृपयोद्भवा ।
जुब्वां नदीं ततः स्पृष्ट्वा रुद्रबाष्पसरोवरम् ॥२०॥
स्नात्वा मार्किशनधोधे आलावर्तसरोवरे ।
अन्तावर्ततडागे च स्नात्वा किमुसरोवरे ॥२१॥
विशतूरीयसरसि न्याजासरोवरे तथा ।
तुंगानीके तडागे च स्नात्वा रुक्वसरोवरे ॥२२॥
रफिज्यायां ततः स्नात्वा रोवुमायां समाप्लवत् ।
न्याजासरोवरे स्नात्वा शिवासरोवरे ततः ॥२३॥
जाम्बूजायां ततः स्नात्वा बंगव्यालीसरोवरे ।
मावूरसरसि स्नात्वा कज्जूस्नानं ततोऽकरोत् ॥२४॥
तत्र तत्र च निधनं गतान् प्रेतान् कृपालयः ।
अमोक्षयत् तथा तानि तीर्थान्यप्याकरोत् प्रभुः ॥२५॥
ततो ययौ दिनोल्कतडागं भगवान् हरिः ।
विशतुरीयधोधे च स्नात्वा कुबंगिकातटे ॥२६॥
तजे सरोवरे स्नात्वा लिम्पापगायां चाप्लवत् ।
बालनद्यां ततः स्नात्वा दक्षिणावर्गपर्वतम् ॥२७॥
विमानेनोर्ध्वमुल्लंघ्य कारुवार्धिं जगाम ह ।
विमानादवतीर्याऽथ सर्वे सस्नुश्च सागरे ॥२८॥
ततस्तं यानमारुह्य ओरङ्गासरितं ययुः ।
स्नात्वा रणे मृतान् उत्तरस्थानेष्वपि मृतासुरान् ॥२९॥
अमोक्षयच्छ्रीभगवान् कालहरिरणात्ततः ।
ययौ कुनयनां स्नात्वा कुरेनृक्यां समाप्लवत् ॥३०॥
गत्वा कुबंशजां स्नात्वा स्थानल्याख्ये जलाशये ।
कर्माङ्क्यां च महानद्यां स्नात्वा महासमागमे ॥३१॥
लिम्पासरोवरे स्नात्वा तुम्बासरोवरे तथा ।
स्थानस्याधोधभागेषु स्नात्वा आरुवमीजले ॥३२॥
कर्माङ्क्यां च तथोवेण्यां स्नात्वा तयोः समागमे ।
सामुद्रसंगमे स्नात्वा कोटिप्रेतप्रमोक्षणम् ॥३३॥
चकार श्रीहरिस्तत्र मृतानां शाश्वतार्थकृत् ।
तानि विधाय तीर्थानि आगीब्यां प्रययौ ततः ॥३४॥
कर्मध्नं पर्वतं तीर्थं कृत्वा वेनजयातटे ।
स्नानं च संगमे तस्या नष्टजरासमागमे ॥३५॥
केडंडायां तथा नद्यां तथा चण्डसरोवरे ।
फेगविपीनसरसि स्नात्वा सरित्समागमे ॥३६॥
गम्बिकायां स्कुटायां च सेनागोलसरित्सु च ।
फल्गुबीजे तथा स्नात्वा रणमुल्लङ्घ्य वै हरिः ॥३७॥
रणे सरोवरे स्नात्वा अतलेष्टं च पर्वतम् ।
अलजालिसरःपञ्चस्वाप्लवनं चकार सः ॥३८॥
तन्मुखं पर्वतं गत्वा त्रिराशिपर्वतं ततः ।
लीलाबीजरणं गत्वा कृत्वा तीर्थानि वै जले ॥३९॥
भूमध्याब्धौ ततः स्नात्वा नारायणीयसागरे ।
समुद्रसंगमेष्वेव स्नात्वाऽऽग्रे धोधसारके ॥४०॥
नवबीजरणं दृष्ट्वा स्नात्वा रक्तसमुद्रकम् ।
कृत्वा सर्वाणि च तानि पवित्राणि जलानि तु ॥४१॥
नदीर्नदांस्तडागांश्च सरो वापीः प्रवाहकान् ।
देशान् रणान् पर्वतांश्च महापगाश्च नालिकाः ॥४२॥
तत्तत्प्रदेशजान् ग्रामान् नगराणि गृहाणि च ।
राजधानीर्जलधानीर्वनधानीश्च भूमिकाः ॥४३॥
पवित्रीकृत्य च तीर्थीकृत्य श्रीमन्नारायणः ।
कोटिगणैः पार्षदैश्च देवीभिः साधुभिः सह ॥४४॥
धर्मराजस्कन्दशंभुविनायकादिभिः सह ।
स्थले च विहृत्य प्रेतोद्धारं विधाय च ॥४५॥
अब्रिस्तं सुमहाखण्डं तीर्थीभूतं विधाय च ।
दशसाहस्रक्रोशात्मभूमिं कृत्वा सुपावनीम् ॥४६॥
जुमासेम्लानृपं प्राह भगवान् पुरुषोत्तमः ।
राजन् मनोरथस्तेऽत्र जातो वै सफलः खलु ॥४७॥
अधुना च वयं यामो रैवतेऽश्वसरोवरम् ।
श्रुत्वा राजाऽऽह भगवन् मुक्तिमिच्छामि शाश्वतीम् ॥४८॥
मोक्षदाता मिलेद् यावद् यदि मोक्षं न विन्दति ।
संसारस्तस्य शिरसि ध्रुव एव स्थितो भवेत् ॥४९॥

मया भुक्तं बहु राज्यं दशलक्षसमान्तरम् ।
मम पूर्वं गता दैत्याः कोटिवर्षोपजीविनः ॥५०॥
नैताः कैश्चित् समं याताः पृथ्वी सम्पत् प्रजास्तथा ।
न यास्यन्ति मया साकं ततो मे भगवन् प्रभो ॥५१॥
कुरूद्धारं कृपां कृत्वा लप्स्ये यच्छाश्वतं पदम् ।
पावितं तु कुटुम्बं मे पाविता पृथिवी मम ॥५२॥
पाविताश्च प्रजाः सर्वा प्रेता उद्धारितास्तथा ।
नद्यादीनि च तीर्थानि पावनानि कृतान्यपि ॥५३॥
अहं पत्न्या समं यामि तव धाम सनातनम् ।
तथा मे कुरु जीवेन्द्र कृपां प्रसन्नतोद्भवाम् ॥५४॥
इमाश्च कन्यका मे वै सहस्रं षोडशाब्दिकाः ।
सन्ति सर्वा वरारोहा वरो भव सुहृद्रमः ॥५५॥
अन्ये सन्ति कुमारा मे तेषां यथेष्टकं कुरु ।
कुटुम्बिनां च भृत्यानां कृष्ण यथेष्टकं कुरु ॥५६॥
अनादिश्रीकृष्णनारायणः श्रुत्वाऽतिभावुकम् ।
राजानं प्राह राजेन्द्र पापपुण्ये गते तव ॥५७॥
मोक्षयोग्योऽसि ते मोक्षं करोमि क्षणमात्रतः ।
इत्युक्तश्च तदा धीमान् तत्क्षणं कन्यका निजाः ॥५८॥
हस्ते जलं गृहीत्वैव दत्वा श्रीपतिहस्तके ।
सहस्रकन्यकाः कृष्ण ! ते ददामि, तव स्त्रियः ॥५९॥
भवन्तु सर्वसौभाग्ययुक्ता मत्सन्ततिः सुखा ।
इत्युक्त्वा प्रददौ दिव्यं यौतकं कोटिं चार्बुदम् ॥६०॥
सौवर्णं रूप्यकं मौक्तिजालं हीरकरत्नकम् ।
भूषाम्बराणि दिव्यानि यानवाहनकानि च ॥६१॥
दासान् दासीर्ददौ तावत् सहस्रसंख्यका अपि ।
हस्तिवाज्युष्ट्रगवयान् गोमहिष्यादिकं ददौ ॥६२॥
अनादिश्रीकृष्णनारायणो नीत्वा विमानके ।
कन्याश्च यौतकं याने धृत्वा प्राह नृपं तदा ॥६३॥
राजन् श्रीनारदादत्र गृहाण चरणामृतम् ।
तव राज्यस्त्रिशतानि गृह्णन्तु चरणामृतम् ॥६४॥
तव पुत्राश्च गृह्णन्तु कुटुम्बं चरणामृतम् ।
इत्युक्तास्ते नारदाद्वै जगृहुश्चरणामृतम् ॥६५॥
श्रीहरेः पादधौतं तज्जलं पपुश्च ते मुदा ।
द्राक् समाधौ गताः सर्वे ब्रह्मणि लीननाडिकाः ॥६६॥
द्विरूपाः सर्व एवैते तदा कृष्णेच्छयाऽभवन् ।
छायारूपा देवलोकेऽभवन् मरुत्सुरास्तु ते ॥६७॥
अन्ये दिव्यविमानेषु भूत्वा दिव्यवपुर्धराः ।
अनादिश्रीकृष्णनारायणधाम ययुस्तदा ॥६८॥
अथैताः कन्यकास्तस्य शवखातान् प्रचक्रिरे ।
भूसमाधिं कारयित्वा तथोत्तरक्रियादिकम् ॥६९॥
सर्वं च विधिवत् कृष्णः कारयित्वा यथोचितम् ।
नीलश्वेतनरायण्योर्नद्योर्धोधे तु षष्ठके ॥७०॥
सर्वं समाप्य विधिवद् द्विराज्यं व्यभजत्प्रभुः ।
अदनाखातगे तीरे जीमूतीनगरात्ततः ॥७१॥
पश्चिमे तूनायवारिधानीमेम्बागपत्तनम् ।
उष्णांग्याख्यनदीमूलं कर्मोगाद्रेश्च पश्चिमे ॥७२॥
बुयापर्यन्तमेवास्य खण्डस्य मध्यभागतः ।
सीमां प्रदर्श्य चोल्लिख्य दक्षिणं चोत्तरं तथा ॥७३॥
दक्षिणं प्रददौ रुद्रशिरसे भक्तयोगिने ।
अनादिश्रीकृष्णनारायणभक्ताय केशवः ॥७४॥
उत्तरं च तथा राज्यं दिनमेराह्वयाय च ।
ददौ नारायणः साक्षान्निजभक्ताय केशवः ॥७५॥
रुद्रशिरादिनमेराभिधौ सेनापतिप्रभौ ।
युद्धे चास्तां निर्मनस्कौ भक्तौ नारायणस्य तौ ॥७६॥
ताभ्यां राज्ये प्रदत्ते च ह्यभिषिक्तौ स्वयं तदा ।
हरिणा देवसदृशो कृता मुकुटमर्पितम् ॥७७॥
दक्षिणे च महाराज्ये राजधानी कृता तदा ।
रुद्रशिरेतिविख्याता विज्ञतुरीयपार्श्वगा ॥७८॥
पूर्वस्यां च दशयोजनायता त्वतिशोभिता ।
उत्तरे च तथा खण्डे दिनमेरेण निर्मिता ॥७९॥
राजधानी चण्डसरोऽन्तिके पश्चिमभूतले ।
नाम्ना सा दिनमेरेति दशयोजनविस्तृता ॥८०॥
तस्यां देवालयं कृत्वा सहस्रधनुरुच्छ्रयम् ।
अनादिश्रीकृष्णनारायणस्य मूर्तिरुत्तमा ॥८१॥
कानकी स्थापिता तेन हरेण सहिता शुभा ।
सनता नारदेनापि धर्मदेवेन शोभिता ॥८२॥
एवं रुद्रशिरसाऽपि सहस्रधनुरुच्छ्रयम् ।
कारयित्वाऽऽलयं रम्यं पर्वतशृंगसदृशम् ॥८३॥
अनादिश्रीकृष्णनारायणस्य मूर्तिरुत्तमा ।
सनता शंभुना धर्मदेवेन नारदेन च ॥८४॥
सेविता स्थापिता तत्र कानकी बहुशोभना ।
एवं कृष्णः स्वयं दत्वा भक्ताभ्यां राजधानिके ॥८५॥
भक्तदत्तां दिव्यपूजां गृहीत्वा पुरुषोत्तमः ।
सर्वशुभाशिषो दत्वा विमानमधिरुह्य च ॥८६॥

कन्यावर्गेण च दासीदासव्रातैः प्रपूजितः ।
भूपाभ्यां दासदास्यादीर्दत्वा कृत्वा च वैष्णवाः ॥८७॥
ब्रह्मकन्या द्वासप्ततिसहस्राणि सहस्रकम् ।
राज्यकन्यास्तथा नैजान्पार्षदान्देवसेवकान् ॥८८॥
सर्वमेव समादाय व्योम्ना जगाम पूर्वतः ।
पूर्वस्यां रक्तवार्धिं च समुत्तीर्य हरिस्ततः ॥८९॥
आरबीजं महादेशं ददर्श व्योममार्गतः ।
तत्राह धर्मराजं श्रीकृष्णनारायणः स्वयम् ॥९०॥
पश्य राजन् महादैत्यं देशेष्वत्र प्रसह्य सः ।
नृपो भूत्वा महाराज्यं करोति दानवानुगः ॥९१॥
रक्तबीजश्चारबीजो बलवान् लोकनाशनः ।
सुमहावालुकाव्याप्तरणोत्तरप्रदेशके ॥९२॥
बधीरायननगरं कृत्वा वसति निर्भयः ।
श्रीनायिपर्वतं रम्यं बहुशोभितकन्दरम् ॥९३॥
लताविमानसंछन्नं मत्तसत्त्वसमाकुलम् ।
विविधैः कुसुमैश्चापि सुगन्धितानिलाश्रयम् ॥९४॥
दृष्ट्वा रम्यं रक्तबीजो तथाऽन्ये दानवादयः ।
दशसहस्रसंख्यास्ते आरबीजा वसन्ति हि ॥९५॥
ऊर्ध्वरेतसीसरितं त्वभिव्याप्य हि वर्तते ।
तेषां राज्यं विशालं वै म्लेच्छाचारजुषां यम ! ॥९६॥
देवानां स विरोध्येव दैत्योऽस्य दानवादयः ।
बकदानऋषेस्तत्राऽऽश्रमं विनाश्य तेऽसुराः ॥९७॥
वर्तन्ते स ऋषिस्तत्र तायिग्रासनदीं प्रति ।
गत्वा जलतले स्थित्वा तपः करोति दारुणम् ॥९८॥
तमेनं प्रथमं नत्वा ततोऽसुरान् विनाशय ।
दूतान् याम्यॉंस्तथा रौद्रान् सह नीत्वा प्रयाहि च ॥९९॥
तान् सर्वान् नाशयित्वा वा विद्राव्य वा रसातलम् ।
ऋष्याश्रमं पुनर्भीतिवर्ज्यं विधाय धर्मराट् ! ॥१००॥
तव दूतो मौनधर्मा अरवो नाम नामतः ।
वर्तते योगनिपुणस्तस्मै राज्यं समर्पय ॥१०१॥
इत्युक्त्वा श्रीकृष्णनारायणो हारं ददौ गले ।
यमराजस्य च सैन्यं ददौ कल्पलतां तथा ॥१०२॥
यमस्त्वाज्ञां गृहीत्वैव ससैन्यो व्योममार्गतः ।
ययौ तं दानवं तूर्णं रणमुल्लङ्घ्य यत्नतः ॥१०३॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् स्वयम् ।
आययौ कुंकुमवापीक्षेत्रं श्रीलोमशाश्रमम् ॥१०४॥



जयतूर्णण्यवाद्यन्त जयघोषास्तदाऽभवन् ।
अश्वपट्टसरोराष्ट्रं ब्रह्मानन्दभरं ह्यभूत् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अब्रिक्तदेशेषु श्रीहरिर्विहृत्य तीर्थानि विदधे, मृतानामुद्धारं च विदधे, राज्यं द्वेधा विभज्य भक्ताभ्यां ददौ, राजकुटुम्बस्य मोक्षं चक्रे चेत्यादिनिरूपणनामा पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

श्रीराधिकोवाच—

कः स राजा जुमासेम्लाह्वयस्त्वासीत्पुरा प्रभो ।
के तत्सेनापतयश्च येषां कृष्णाश्रयोऽभवत् ॥ १ ॥

श्रीकृष्ण उवाच—

शृणु तां राधिके पूर्वां कथां दैवसुयोगिनीम् ।
अवधानं परं दत्वा मयोक्तां पापनाशिनीम् ॥ २ ॥
स्वायंभुवस्य पुत्रोऽभून्मनुर्नाम प्रियव्रतः ।
तस्याऽऽसीत् सवनो नाम पुत्रस्त्रैलोक्यविश्रुतः ॥ ३ ॥
स चाऽनपत्यो निधने सति प्रेतगतिं गतः ।
तस्य भार्याऽरुदत् तत्र सुवेदा शोकविह्वला ॥ ४ ॥
न ददाति शवं दग्धुं समाधृत्य स्थिता पतिम् ।
नाथनाथेति बहुशः सविलापा त्वनाथवत् ॥ ५ ॥
तामाह व्योमवाणी मा रुदिहि त्वं शुचं त्यज ।
यदि चास्ते तव स्नेहः सत्यं चापि व्रतं महत् ॥ ६ ॥
तदा सतीव्रतं धृत्वा व्रजाऽग्नौ पतिना सह ।
सुवेदाऽऽश्रुत्य तां वाणीं सती प्रत्युत्तरं ददौ ॥ ७ ॥
नाऽहं शोचामि मां देव मन्दभाग्यां निजार्थिका ।
किन्त्वेनं पुत्रहीनं वै शोचामि गतिवर्जितम् ॥ ८ ॥
अपुत्रस्य गतिर्नास्ति नोद्धारो नरकादपि ।
न च श्राद्धाऽभिलाषाऽपि तेन वै रौरवं ध्रुवम् ॥ ९ ॥
अपुत्रस्य तु कान्तस्य कामिन्यपि तथाविधा ।
गतिहीना रौरवार्हा तस्मात्पुत्रसमिच्छया ॥१०॥
शोचामि श्रेयइच्छार्थे देव श्रेयः कुरु प्रभो ।
व्योमवाणी ततः प्राह राज्ञि रुदिहि मा शुचा ॥११॥
स्वामिनस्ते सप्तपुत्रा भविष्यन्ति न संशयः ।
वह्निमारोह शीघ्रं त्वं श्रद्धस्व सती भव ॥१२॥
राज्ञी प्राह विना देहं मम मे स्वामिनस्तथा ।
मानवा वै कथं पुत्रा भविष्यन्ति वदाऽधुना ॥१३॥

व्योमवाणी तदा प्राह तव सत्येन सुन्दरि ! ।
दाहे सत्येव च द्वयोरत्र देहौ पुनर्नवौ ॥१४॥
मानसौ दिव्यतत्त्वौ च क्षणान्तरे भविष्यतः ।
राज्ञा दत्तोऽत्र गर्भस्ते धातुरूपो भविष्यति ॥१५॥
धातोर्द्वारा तव पत्युर्भविष्यन्ति सुपुत्रकाः ।
इत्युक्ता सा सत्यधर्मं त्वालम्ब्य पतिवर्ष्म तत् ॥१६॥
ददौ काष्ठे स्थापयितुं ततः स्वयं चितां प्रति ।
ययौ हुताशमासाद्य चित्ते ध्यात्वा पतिं सुतान् ॥१७॥
प्रपन्ना ज्वलनं साध्वी दिव्यदेहा बभूव ह ।
राजा दिव्यश्रिया युक्तश्चोत्थितः सह भार्यया ॥१८॥
युतः सुनाभपुत्र्या स उत्पपात तदा तु खम् ।
विमानं त्वम्बरे सर्वैर्दिव्यं दृष्टं सुवर्चुलम् ॥१९॥
तत्र सा महिषी तूर्णं रजस्वला ह्यजायत ।
इतिजातं महाश्चर्यं यथा मतिस्तथा गतिः ॥२०॥
यद्यपि दिव्यदेहे च देवीषु वह्निजासु च ।
तात्कालिको रजोधर्मो नोचितस्तत्र वै क्षणात् ॥२१॥
तथापि वासनायोगाद् भावनावशतस्तथा ।
आशीर्वादेन च व्योमवाण्या रजस्वलाऽभवत् ॥२२॥
विमानं चाम्बरे तत्र पञ्चरात्रं स्थिरं ह्यभूत् ।
इष्यमाणमपि गन्तुं दिवं यातुं शशाक न ॥२३॥
सर्वैर्विलोकितं व्योम्नि दृश्यते चन्द्रसूज्ज्वलम् ।
तर्क्यते कथमेतद्वै स्वर्गं याति न तिष्ठति ॥२४॥
मेघच्छन्नमभूदूर्ध्वे चान्तरीक्षगतं पुनः ।
मेघोपरि भ्रमन्नास्ते तदूर्ध्वं नैव गच्छति ॥२५॥
राजा भार्यासहायश्च पञ्चदिनानि खे स्थितः ।
षष्ठेऽहनि ऋतौ दानं ददौ पत्न्यै सुतेच्छुकः ॥२६॥
किन्तु दैवान्महिष्यास्तु भाग्ये नाऽऽसन् सुताः खलु ।
शुक्रं गर्भे स्थिरं नाऽभूत् तेन प्राच्यवताऽम्बरात् ॥२७॥
शुक्रपातोत्तरं राजा महिष्या भार्यया सह ।
जगाम च विमानेन ब्रह्मलोकं हि राधिके ! ॥२८॥
शुक्रं यत्राऽपतद् भूमौ ऋज्यावसथमण्डले ।
सप्तधा भेदमापन्नं चोज्ज्वलं जलबुद्बुदम् ॥२९॥
एकः कणो महानेभ्यः शीघ्रं भूमौ पपात ह ।
अन्ये कणास्तु षट् वायुहताः प्रत्येकसप्तधा ॥३०॥
पुनः प्रत्येकं च सप्त, ते षट्न्यूनं शतत्रयम् ।
कणास्ते वह्निवर्णा वै राजतं वर्षणं यथा ॥३१॥
सूर्यकरैश्चाकचक्यमापन्नास्तारका इव ।
मणयो वा किमेते च किं वा चामृतबिन्दवः ॥३२॥

इति मत्वा ऋषिपत्न्यः कणान् धर्तुं करैर्निजैः ।
दद्रुवुः पतनाग्रे च तावत्ते वह्निसदृशाः ॥३३॥
आकृष्टा दैवगत्या च देहेष्वदृश्यतां गताः ।
यथा श्वासेन साकं तु वारिकणास्तथा च ते ॥३४॥
महान् कणोऽपि च मणेर्भ्रान्तिमुद्भावयँस्तदा ।
संग्रहीतुं द्रुतं यान्तीं सुमादां समपद्यत ॥३५॥
नलिनी पुष्पती चित्रा विशाला हरिताऽनिला ।
एवमाद्यास्तु ता गर्भयुक्ताः समभवँस्ततः ॥३६॥
ब्रह्मतेजोविहीनास्ता जाताः पत्न्यस्तपस्विनाम् ।
ऋषयो वृत्तमाज्ञाय ब्रह्मतेजोविहीनताम् ॥३७॥
दृष्ट्वा ज्ञात्वाऽन्यगर्भाढ्यास्तत्यजुर्वर्षमात्रकम् ।
अन्यगर्भा हि ताः सर्वा हिमशैलं विहाय च ॥३८॥
व्योम्ना पश्चिमवार्धिं संययुः पुत्रप्रसूतये ।
नारायणीं नदीं प्राप्य अब्रिक्तं स्थलमुत्तमम् ॥३९॥
न्यूषुर्यथावकाशं च फलमूलाऽनिलाऽशनाः ।
सुषुविरे सुताँस्तत्र समकालान् हि योषितः ॥४०॥
रुदन्ति स्म च ते सर्वे भैरवं दैवयोगतः ।
तेषां रुदितशब्देन सर्वं चापूरितं जगत् ॥४१॥
अत्राऽऽजगाम भगवान् ब्रह्मा लोकपितामहः ।
समभ्येत्याऽब्रवीद् बालान् मा रुदत महाबलाः ॥४२॥
मरुद्देशेऽम्बरे गर्भदानात् क्षत्रियपुत्रकाः ।
क्षत्रियायां प्रविश्यैव निर्गता वायुवेगतः ॥४३॥
मरुतां स्पर्शयोगेन ब्राह्मणीषु प्रवेशिताः ।
ब्राह्मणैः सम्परित्यक्ताः प्राप्ताः स्थ जन्म चात्र वै ॥४४॥
एवं पितृपरित्यक्ताः पितृवैरकराः सदा ।
विप्रक्षत्रियवैराढ्या भूतलेऽत्र भविष्यथः ॥४५॥
एवं वै वैरभावेन यद्यपि ब्रह्मक्षत्रियाः ।
मालिन्यं वैरमासाद्य म्लेच्छा दैत्या भविष्यथ ॥४६॥
असंस्कारास्तथा विप्रक्रियाशून्या भविष्यथ ।
मरुतां चाम्बरे शुक्रोत्सर्गेण मरुतां गणाः ॥४७॥
कदाचिद् दितिजा यूयं पुनर्दैत्या भविष्यथ ।
दैत्या अपि सजीवाश्च महेन्द्रेण पुनः पुनः ॥४८॥
गर्भे वज्रेण निकृत्ता देवा अपि भविष्यथ ।
देवत्वे कारणं तत्र शृणुताऽत्र वदामि वः ॥४९॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् स्वयम् ।
महायुद्धनिमित्तेन देशेऽत्राऽप्यागमिष्यति ॥५०॥
तद्धस्तजललाभेन चरणामृतपानतः ।
पावित्र्यं भवतां शीघ्रं तदा त्वत्र भविष्यति ॥५१॥

तेन पुण्येन च यूयं देवत्वं समवाप्स्यथ ।
मरुतो नाम देवा वै यूयं ख्याता भविष्यथ ॥५२॥
एवमुक्त्वा तु तान् बालान् ब्रह्मा लोकपितामहः ।
रक्षितुं च पोषयितुं त्रिशतं योषितां तदा ॥५३॥
स्वपृष्ठोत्पादितं दुग्धप्रदं म्लेच्छस्वभावजम् ।
ददौ तत्र तथा दासान् शतानि त्रीणि सन्ददौ ॥५४॥
पृष्ठजान् कृष्णवर्णांश्च क्रूरस्वभाववर्तिनः ।
धर्मकर्मविहीनाँश्च संस्कारकृतिवर्जितान् ॥५५॥
कल्पनामात्रकार्यस्थान् दत्वा तेभ्यः शिशूँस्ततः ।
अमातृजा नरास्ते चाऽमातृजाभिः सहाऽवसन् ॥५६॥
दम्पतीत्वं सदा प्राप्ता न्यवसँश्च सुखेन ते ।
तेभ्य आरभ्य एवाऽत्र दुग्धभिन्ना प्रभुज्यते ॥५७॥
असहोदरवैवाह्यं तदारभ्य प्रवर्तते ।
एवं ब्रह्मा तु सर्वेभ्यो दत्वा शिशून् ततः परम् ॥५८॥
विप्रपत्नीः समग्राश्च सूतकाऽन्तेऽतिनिर्मलाः ।
शुद्धाः कृत्वा सह नीत्वा ययौ हेमाद्रिमुत्तमम् ॥५९॥
यत्र ते ऋषयः सन्ति ब्रह्मचर्यव्रतस्थिताः ।
व्योममार्गेण च ब्रह्मा विमानाग्र्यादवातरत् ॥६०॥
हस्ते कमण्डलुं कृत्वा वेदाशीर्वादमुच्चरन् ।
ऋषयो ब्राह्मणा दृष्ट्वोत्तस्थुर्मुग्धाः पितामहम् ॥६१॥
नेमुश्च दण्डवत् पृथ्व्यां सम्भूयाऽप्यासनं ददौ ।
पूजां चक्रुर्यथार्हां च ब्रह्मा तत उवाच तान् ॥६२॥
विप्राः सर्वे भवत्येव परमेशसमिच्छया ।
उत्पत्तिः प्रलयश्चेति पोषणं च हरीच्छया ॥६३॥
ईशस्तज्ज्ञानयत्नेच्छाः कालोऽदृष्टं स्वकर्म च ।
यत्रैकतां समायान्ति तत्र कार्यं भवेत् तदा ॥६४॥
मनोः पुत्रस्य विप्रा वै सवनस्य तु धातुतः ।
भवतां वै प्रियास्वेव जाताः त्रिशतपुत्रकाः ॥६५॥
पञ्चन्यूना हि ते सर्वे मया संरक्षिताः सदा ।
पश्चिमायां भुवि दत्ता युष्मद्धर्मविवर्जिताः ॥६६॥
ता एता योषितो वश्च शुद्धाः संस्कारकर्मभिः ।
समानीता मया युष्मत्सेवायां शुद्धभावनाः ॥६७॥
विमाने तास्तु वर्तन्ते गृह्णतैताः पुनः स्वकाः ।
इत्युक्ता ब्राह्मणाः पत्नीनामान्याश्रुत्य हर्षतः ॥६८॥
बाढं बाढं तथा कुर्मो गृह्णीमो वैधसीं श्रुतिम् ।
आज्ञां भवन्मुखोत्पन्नां समानय पितामह ॥६९॥
ब्रह्मा श्रुत्वा विमानं तच्चाम्बरात् पृथिवीं प्रति ।
आह्वयत्त्वागतं शीघ्रं पत्न्यस्तस्मादवातरन् ॥७०॥
ताः सर्वा ब्रह्मवाक्येन निपेतुः स्वामिपादयोः ।
स्वामिनो जगृहुस्ताश्च प्रेम्णा कुशलपूर्वकम् ॥७१॥
महोत्सवं तदा चक्रुर्हवनं जनभोजनम् ।
देवानां पूजनं चापि ततोऽजं ते व्यसर्जयन् ॥७२॥
ब्रह्मा विमानगो नैजं धाम जगाम सत्वरम् ।
ऋषिपत्न्यो ब्रह्मतेजोमय्यः शुशुभिरे द्युति ॥७३॥
एवं ते दैत्यरूपा वै जाता आसन् हि राधिके ।
तत्र कणो महान् यस्तु जुमासेम्लाभिधानकः ॥७४॥
राजाऽभूदब्रिक्तानां तु देशानां सर्वतो बली ।
जन्मतो युद्धवेत्ताऽस्त्रशस्त्रबोधभरोऽसुरः ॥७५॥
आकाशे शुक्रयोगे च मरुतां स्पर्शसंभवात् ।
व्योमगः सोऽभवद् वायुतुल्यश्चातिप्रतापवान् ॥७६॥
अन्ये तेऽपि कणाः सर्वे सर्वे मरुत्समाश्रयात् ।
व्योमगाश्चाऽभवन् दैत्यास्ते नृपस्य हि सैन्यपाः ॥७७॥
अस्त्रशस्त्रविदः सर्वे बलिनोऽसुरवर्तनाः ।
ततः प्रजाः समभवन् कोटिशः कालवेगतः ॥७८॥
भ्रातरश्च भगिन्यश्च असहोदरजा यदि ।
परस्परं हि युज्यन्ते विवाहविधिना ततः ॥७९॥
तेषां तासां पश्चिमं वै यानं प्रथमतोऽभवत् ।
मातृणां पश्चिमं यानं तेन पश्चिमनम्रकाः ॥८०॥
पश्चिमं सर्वमेवेमे वृषं गृह्णन्ति सर्वदा ।
सुमादायां समुत्पन्नो जुमासेम्लाऽभवन्नृपः ॥८१॥
अन्ये तु सैन्यपा जाता बहुशस्त्रधरा हि ते ।
अथ मृता विमानेन सह युद्धे तु ते तदा ॥८२॥
स्वर्गं गत्वा पुनस्तत्र महामरोः क्षितौ पुनः ।
ऋतध्वजस्य पुत्राणां पुत्रास्ते मरुतः सुराः ॥८३॥
भविष्यन्ति जले ग्राहीजठरे धातुपानतः ।
ऋतध्वजसुताः मेरौ करिष्यन्ति तपः परम् ॥८४॥
तपोविघ्नार्थमिन्द्रश्च प्रेषयिष्यति पूतनाम् ।
अप्सरसं च तां दृष्ट्वा स्नान्तीं सुरूपयौवनाम् ॥८५॥
मन्दोदवाहिनीनद्यां क्षरिष्यन्ति च तापसाः ।
तद्धातुं पास्यति ग्राही तत्पुत्रा जलजाश्च ते ॥८६॥
मरुताख्या भविष्यन्ति व्योममार्गानुगाः सुराः ।
अथ पुनः पृथिव्यां ते वपुष्मन्तो नृपस्य तु ॥८७॥
ज्योतिष्मान्नामकः पुत्रस्तत्पत्न्यां धर्मयोषिति ।
देवाचार्यसुतायां वै सुश्रोण्यां मरुतस्तु ते ॥८८॥
भविष्यन्ति पुत्ररूपा देवा व्योमविहारिणः ।
ततः पुनर्दन्तध्वजान्मानुषाच्चपतो भुवि ॥८९॥

होमं प्रकुर्वतो वह्नौ स्वशरीरस्य सर्वथा ।
वीर्यभागात्ततो वह्नेः समुद्भूताः सुतास्तदा ॥९०॥
भविष्यन्ति मरुतस्ते देवा व्योमविहारिणः ।
ततः पुनः पृथिव्यां च रिपुजिन्नृपतेर्गृहे ॥९१॥
सूर्यपुत्र्यां सुरत्यां च भार्यायां मरुतो हि ते ।
मृतायां च चितावह्नौ भविष्यन्ति सुराः सुताः ॥९२॥
सर्वे व्योमविहाराश्च देवा दैवतयोगिनः ।
ततः पुनर्मंकणकर्षेर्धातोः प्रपातनात् ॥९३॥
तुषितां पितृकन्यां च दृष्ट्वा स्नान्तीं सुयौवनाम् ।
सप्तसारस्वते तीर्थे भविष्यन्ति मरुद्गणाः ॥९४॥
सरस्वतीजलेभ्यस्ते मरुतो देवतास्तदा ।
व्योमविहारिणः सर्वे भविष्यन्ति च राधिके ॥९५॥
ततः पुनः कश्यपस्य पत्न्यां दित्यां च ते सुराः ।
भविष्यन्ति चेन्द्रवज्रहतास्ते मरुतः सुराः ॥९६॥
दैत्या अपि हरेर्योगादेवं दैत्यसमुद्भवाः ।
देववासा देवकार्या देवभावाः पुनः पुनः ॥९७॥
भविष्यन्ति तथा सृष्ट्यन्तरेऽप्येवं पुनः पुनः ।
इत्येवं कथितो राधे तेऽत्र मरुत्समुद्भवः ॥९८॥
यथा चासुरभावाश्च यथा देवस्वभाविनः ।
त एते मरुतो देवा उद्धृताः कृपया तदा ॥९९॥
अनादिश्रीकृष्णनारायणेन परमात्मना ।
अब्रिक्ते तु प्रदेशे वै मिषेण संगरस्य ह ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मरुद्देवानां दैत्यरूपेणोत्पत्तिः, पुनर्देवत्वप्राप्तिः, जन्मान्तरादिकथनम्, अब्रिक्तीयमुख्यदैत्यजन्मवृत्तान्त इत्यादिनिरूपणनामा षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥

**श्रीराधिकोवाच—**

आरबीजे गतो यस्तु यमराजः प्रतापवान् ।
किं चकार ततस्तत्र कथां कथय केशव ॥ १ ॥

**श्रीकृष्ण उवाच—**

आरबीजे यमराजो गत्वा व्यनादयन्मुहुः ।
भेरीं रणकृतोत्साहां वाद्यानि विविधानि च ॥ २ ॥
रणतूर्याणि च दूता व्यनादयन्मुहुर्मुहुः ।
शब्दास्ते ध्वनयो व्योम्नि रोदस्युभे समापृताः ॥ ३ ॥
व्योममार्गेण यमराट् निनादयन् दिशो मुहुः ।
आजुहावाऽसुरान् देशेऽरण्येऽद्रौ संस्थितांस्तदा ॥ ४ ॥
ते च श्रुत्वाऽवलोक्याऽपि सशस्त्राश्चर्यसंभृताः ।
निर्ययुर्दशसाहस्रा रक्तबीजोऽग्रणीस्तथा ॥ ५ ॥
व्योमगा जलगाः केचित् केचिद्विमानयायिनः ।
केचित्तु कुक्कुटारोहाः केचित्कुञ्जरवाहनाः ॥ ६ ॥
केचित्तु गर्दभारोहाः केचिदुष्ट्रकृताऽऽसनाः ।
केचिद्द्वयपृष्ठस्थाः केचिन्मेषवृषासनाः ॥ ७ ॥
केचित् खच्चरवाहाश्च केचिद्घोटकवाहनाः ।
अजपृष्ठे स्थिताश्चाऽन्ये मयूरपृष्ठसंस्थिताः ॥ ८ ॥
केचिन्महिषवाहाश्च केचिद् गेन्डकपृष्ठगाः ।
अन्ये च मकरारोहा गोमायूरथसंस्थिताः ॥ ९ ॥
वृकवाहास्तथा चाऽन्ये सूकरारोहिणः परे ।
गृध्रगर्जनपृष्ठस्थास्तथाऽन्ये वाहवर्जिताः ॥१०॥
सगदाः सक्रपाणाश्च सधनुष्काः ससायकाः ।
समुद्गरपरिघाश्च सासिखड्गाः सशक्तिकाः ॥११॥
सतोमराः सवर्माणः सशूलाः गोलकाऽन्विताः ।
सधूष्कृतीतूपयन्त्राः सकुन्ताः पाशवेदिनः ॥१२॥
सयष्टिकाः सानलाश्च विद्युत्तारप्रजालिनः ।
मायापाशधराश्चापि क्षेपणादिसमन्विताः ॥१३॥
शरजालयुताश्चान्ये धनुर्धरा महाभटाः ।
निर्ययुः रणशब्दान् वै श्रुत्वा दैत्याः समन्ततः ॥१४॥
अपश्यद् दानवान् सज्जान् युद्धगान् यमराट् स्वयम् ।
अथाऽऽजुहाव च पुनर्यमराजोऽभिधानकैः ॥१५॥
भो रक्त भो आरबीज भो मर्क भो मदानक ।
भो असीरक भो पेगन् भो अदीन परीमक ॥१६॥
भो हेडेमृत्यो विहरिन् भो हसन् वशरासुर ।
भो इराक दमा तुष्क लीलाबीज त्रिराशिक ॥१७॥
युद्धं कुरुत वा यात पाताले तु निजालयम् ।
कथं दत्थ महाकष्टं बकदानर्षिसाधवे ॥१८॥
फलं ददामि तूर्णं वो यदीतो न प्रयास्यथ ।
इत्युक्तास्ते महागर्वा महाबलपराक्रमाः ॥१९॥
मद्यमांसाशना दुष्टा मत्स्यकुक्कुटभक्षिणः ।
वदन्तः कटुशब्दांश्च किरन्तश्च शरोत्करान् ॥२०॥
सर्वे चाययुरव्यग्रा यमदूतोपमाः खलाः ।
तानागतान् बाणजालैर्यानस्थोऽद्भुतविक्रमः ॥२१॥
यमः संछादयामास स्वदूतैः सह राधिके ।
एवं बाणैरवच्छाद्य सर्वास्तान् दानवान् यमः ॥२२॥

पाकासुरान् जघानापि तीक्ष्णाग्रैर्मार्गणैर्यमः ।
तथाऽन्यान् दीननाम्नश्च दैत्यान् जघान सर्वशः ॥२३॥
दैत्या अपि महाशूरा विजघ्नुर्यमपार्षदान् ।
नाराचैस्तोमरैर्विद्युद्यन्त्रैः शक्त्यादिभिस्तदा ॥२४॥
ऋष्टिभिर्भिन्दिपालैश्च परिघैश्च गदादिभिः ।
गोलकैः पर्वतैश्चापि वृक्षैः शृंगैः शिलादिभिः ॥२५॥
हस्तिभिर्घोटकैश्चापि निजघ्नुर्यमकिंकरान् ।
दूताः शैलसमा दैत्यान् जघ्नुश्चात्यति जीवतः ॥२६॥

रक्तबीजो जघानोरौ गदया त्वतिवेगतः ।
शृंगवन्तं यमदूतं व्यनदच्च पुनः पुनः ॥२७॥
दूतोऽपि तां गदां धृत्वा रक्तबीजं च मस्तके ।
जघान चातिवेगेन दैत्यो मूर्छामवाप ह ॥२८॥
द्वितीयां च गदां धृत्वा बहुभारां यमानुगः ।
आविध्य चाम्बरे गुर्वी मुमोच रक्तबीजके ॥२९॥
तावद्वै रक्तकस्तामायान्तीं संगृह्य चाम्बरे ।
शृंगवन्तं प्रति शीघ्रं मुमोच लीलया यथा ॥३०॥

दूतो धृत्वा गदां नैजां शतबाणैर्हि रक्तकम् ।
भेदयामास बहुधा क्षुरप्रैश्च शिलीमुखैः ॥३१॥
शुशुभे रक्तकस्तत्र पलाशः पुष्पवान् यथा ।
रक्तबीजस्तु तावद्वै समुत्थाय निजायुधम् ॥३२॥
शक्तिं शतप्रघण्टां च प्राहिणोत् शृंगकं यमम् ।
शैलपादो यमः शक्तिमत्प्लुत्य द्रुतमम्बरे ॥३३॥
हस्ते धृत्वा मुमोचैव रक्तबीजस्य वक्षसि ।
शृंगवांश्च गदां तस्य मुमोचोन्मथ्य मस्तके ॥३४॥

युगपत्त्वागते रोद्धुं समर्थो नाऽभवद् यतः ।
शक्तेः ररक्ष चात्मानं तावद् गदा महत्तमा ॥३५॥
शैलसमा ब्रह्मरन्ध्रे पपाताऽतीव वेगतः ।
द्वेधाऽभवत् कटाहं च शिरसः सोऽपतद्भुवि ॥३६॥
दैत्या निन्युर्हि तं दूरं रक्तबीजं महाबलम् ।
आरबीजस्तदा शक्तिं मुमोच शैलपादके ॥३७॥

वह्निभां शतघण्टां च स्वर्णपट्टाभिभूषिताम् ।
शृंगवान् तां परिगृह्य गदां मुमोच आयसीम् ॥३८॥
शैलपादो महाशक्तिं मुमोच वेगतस्तथा ।
गदया ताडितो मूर्ध्नि शक्त्या भिन्नस्तथोरसि ॥३९॥
आरबीजो ममाराऽत्र व्यसुः क्रन्दन् क्षणान्तरे ।
अथ मर्कस्तथा मदानकश्चेत्युभयाऽसुरौ ॥४०॥
शृंगस्यापि विनाशाय दुद्रुवतुश्च रंहसा ।
तदा दूतः शैलपादश्चार्कहनुस्तदावुभौ ॥४१॥

दुद्रुवतुर्गदे धृत्वा व्यनादयतां रोदसी ।
सान्निध्ये च गदायुद्धं प्रावर्तत परस्परम् ॥४२॥
ब्रह्माण्डक्षयकाराश्च घातशब्दास्तदाऽभवन् ।
चन्द्रकर्णोऽपि दूतस्तं मदानकममारयत् ॥४३॥
अर्कहनुस्तदा मर्कं दैत्यं शक्त्या व्यपोथयत् ।
शैलपादश्च नाराचैरर्धचन्द्रैः शिलीमुखैः ॥४४॥
क्षुरप्रैश्चातितीक्ष्णैश्च शरैर्बिभेद दानवान् ।
मर्कहस्तौ स्कन्धभागाच्चिच्छेद बहुलीलया ॥४५॥

मदानकस्य च पादौ चिच्छेद सक्थिमूलतः ।
करपादान् विना जातो मर्कमदानकावुभौ ॥४६॥
तौ परित्यज्य च तदा जयशब्दान् जगुर्यमाः ।
असीरको महादैत्यो बधीरकेण यामिना ॥४७॥
पेगन् दैत्यश्चाग्निमालाभिधेन तु यमेन च ।
युयुधाते हि नाराचैः ववृषतुः शरान् बहून् ॥४८॥
आकाशं छादितं बाणैस्तदा नाराचवृष्टिभिः ।
दैत्यानां धनुरामुक्तैः सहस्रायुतकोटिभिः ॥४९॥

अग्निमालो बधीरश्च दूतौ व्योमचरौ तदा ।
वह्निमुत्पाद्य बाणौघान् ज्वालयामासतुर्द्रुतम् ॥५०॥
बधीरको महाशैलोऽभवद्वै पञ्चयोजनः ।
पपातासीरके पेगन्यपि तौ चूर्णितो मृतौ ॥५१॥
अदीनासुरकस्तत्र धृत्वा तोमरमुज्ज्वलम् ।
विकटास्यं यमं वेगाज्जघानोरसि दूरतः ॥५२॥
परीमकोऽसुरश्चापि नाडीघातं यमं तदा ।
मद्गलेनाऽभिसम्पद्य ताडयामास निर्भयः ॥५३॥

हेडेमृत्युः कालदंष्ट्रं यमं तताड वै बलात् ।
परिघेन महाशैलशृंगनिभेन चोरसि ॥५४॥
आकाशे उड्डयामासुस्त्रयस्ते तु महासुराः ।
वेगेनोड्डीय च दूतान् मारयामासुरुल्बणाः ॥५५॥
तदा त्वेते त्रयो दूतास्तथाऽन्ये षट् महाबलाः ।
मिलिता नव चाकाशे जघ्नुस्त्र्यसुरकान् शरैः ॥५६॥

गदाभिर्मुद्गरैश्चापि महादण्डैश्च पर्वतैः ।
निपेतुस्ते त्रयो भग्नशिरोग्रीवोरुवक्षसः ॥५७॥
व्यसवः समजायन्त दूतास्तत्राऽनर्दंस्तदा ।
अथ दैत्यो विहारी च हसा च वशरासुरः ॥५८॥
मिलित्वा ते त्रयो जघ्नुर्लम्बनासं यमं तदा ।
सहाया रोदनश्चापि नर्मकश्चाद्रिमालकः ॥५९॥
गदाः शक्तीस्तथा ऋष्टीर्धृत्वोत्पेतुस्तदाम्बरे ।
दैत्यान् त्रीन् पोथयामासुर्निपत्योत्पत्य मारतः ॥६०॥

लम्बनासो यमः पाशैर्विहारिणं बबन्ध ह ।
गदया मारयामास व्यसुं क्षणात्तदाऽकरोत् ॥६१॥
रोदनो गदया मूर्ध्नि तताड वशरासुरम् ।
त्रिशूलं मारयामास वक्षस्येव बलादति ॥६२॥
प्रोतं पृष्ठे जगामेदं वशरोऽपि मृतोऽभवत् ।
हसानं नर्मकश्चापि दूतो ममार भल्लकैः ॥६३॥
हसा कण्ठे विभिन्नश्च पादौ क्षिप्त्वा ममार ह ।
इलाकस्य ततो युद्धं चाऽद्रिमालयमेन च ॥६४॥
दमनस्य महायुद्धं मोहपाशयमेन तु ।
तुष्कदैत्यस्यापि युद्धं कालकर्णयमेन वै ॥६५॥
लीलाबीजस्य दैत्यस्य मर्दहस्तयमेन च ।
बहुभिर्हेतिभिश्चासीद् भयानकं च निर्दयम् ॥६६॥
दैत्यास्ते मुशलैर्जघ्नुर्यमान् यमाश्च मुद्गरैः ।
मुशला मुद्गरा भग्ना वज्रलेपनिभेषु वै ॥६७॥
ततस्ते गदया व्योम्नि योधयामासुरुल्बणाः ।
चूर्णीभूता गदास्तत्र गदाभिरेव तत्र च ॥६८॥
अथ शक्तीः समादाय निजघ्नुस्ते महारुषा ।
अन्योन्यशक्तीराग्रह्य भंक्त्वा चिक्षिपुरम्बरे ॥६९॥
अथ पर्वतशृंगैश्च निजघ्नुर्दानवास्तदा ।
यमा वज्रैः शैलशृंगाण्यदारयँश्च लीलया ॥७०॥
अथ बाणैश्च भल्लैश्च त्रिशूलैर्बहुवेगिभिः ।
निजघ्नुर्मारणार्थास्ते परस्परं घृणां विना ॥७१॥
धृत्वा संगृह्य हेतींश्च भंक्त्वा भंक्त्वा परस्परम् ।
चिक्षिपुर्भूतले सर्वे बाणैर्बाणांश्च चिच्छिदुः ॥७२॥
अथ शस्त्राणि सन्त्यज्य मूढमारैरमारयन् ।
मुष्टामुष्टि निजघ्नुश्च कण्ठाकण्ठि ह्यमर्दयन् ॥७३॥
पादापादि तथा केशाकेशि युद्धमभूत्तदा ।
अद्रिमालयमः पृथ्व्यामिलाकं संनिपात्य च ॥७४॥
मोहपाशो दमनं चासुरं निपात्य वै भुवि ।
कालकर्णस्तुष्कदैत्यं निपात्य भुवि चाम्बरात् ॥७५॥
मर्दहस्तोऽपि च लीलाबीजं निपात्य भूतले ।
वायुतुल्यबलैर्दैत्यान् निष्पीड्योरस्सु जानुभिः ॥७६॥
वक्षोऽस्थ्नां ते प्रचक्रुश्च चूर्णानि कणशस्तदा ।
आक्रुश्याऽऽक्रुश्य च प्राणाँस्तत्यजुः रणदुर्मदाः ॥७७॥
यत्र निष्पीडिता दूतैः पृथ्व्यां तत्राऽभवन् भरैः ।
गर्ता योजनविस्तारा याम्यघातैर्मुहुर्मुहुः ॥७८॥
नदा रक्तप्रवाहाश्च जलं रक्तं तदाऽभवत् ।
शैलाभदैत्यदेहानां रुधिरैर्भूस्तदाऽरुणा ॥७९॥
समजायत रक्ताभा राधिके हि रणांगणे ।
अथाऽन्ये दैत्यवर्याश्च पाको दीनस्त्रिराशिकः ॥८०॥
अलीथकः शिरोधाश्च पिण्डितायश्च वायुजः ।
त्रिथुको बंसुरश्चोर्ध्वमीनश्चेति तदग्रगाः ॥८१॥
युयुधुश्च यमैः सार्धं बिन्दुमालादिभिस्तदा ।
गर्वगंजो यमस्तं तु बिन्दुमालो विभूतिकः ॥८२॥
गडेडः खञ्जनश्चापि हडेडो भषकाननः ।
शार्दूलो धडधातश्च कट्कटो दहनाशनः ॥८३॥
इत्येवमाद्याः संजघ्नुर्दैत्यान् दारुणगर्वकान् ।
उद्धृत्योद्धृत्य च पृथ्व्यां ताडयामासुरीश्वराः ॥८४॥
भेदयामासुरेवैतानासुरान् सक्थिमध्यतः ।
पाटयामासुरेवैतान् द्वेधा नितम्बमध्यतः ॥८५॥
मृतास्ते ये हस्तगता यमानां सर्व एव ह ।
अन्ये दूराद् वैदिशास्था दुद्रुवुर्जीवनार्थकाः ॥८६॥
दैत्यसैन्यमभूद् रंकं हतोत्साहं विनायकम् ।
खण्डितं छिन्नभिन्नं च जितप्रायं समन्ततः ॥८७॥
तदा दध्मुर्यमदूताः शंखान् भेरीन् त्रिगूलकान् ।
विजयेन तु सर्वे ते वीतक्लमाः सुखाननाः ॥८८॥
नृत्यन्तश्च हसन्तश्च हासयन्तोऽभवन् सुखाः ।
रक्तबीजो विलोक्यैवं विजयं याम्यभागगम् ॥८९॥
पराजयं निजं वीक्ष्य व्रीडानम्रोऽभवत् क्षणम् ।
अथ सैन्यं धावमानं रुरोध रणवाद्यकैः ॥९०॥
रणसंकेतशब्दैश्च वारयामास सैन्यपान् ।
स्वयं गजं समारुह्य युद्धार्थं चाऽग्रगोऽभवत् ॥९१॥
तावत् सैन्यं सैन्यपाश्चाप्यभ्यधावन् सुरोषिणः ।
यमराजं चाम्बरे ते विमानस्याऽभितः क्षणात् ॥९२॥
परिवव्रुर्विनाशार्थं जगृहुर्यमराजकम् ।
यथा पतङ्गकोट्यश्च शुककोट्यश्च पञ्जरम् ॥९३॥
तथा दानवयूथानि दध्रुर्यमेश्वरं क्षणात् ।
विमानं दृश्यते नैव दैत्याभ्राच्छादितं तदा ॥९४॥
यमराजः स्वयं क्रोधात् कालदण्डं मुमोच ह ।
दण्डाद् दण्डा व्यजायन्त शतशोऽथ सहस्रशः ॥९५॥
यं दैत्यं स्पृशति द्राक् च दण्डयोगात् स नश्यति ।
भस्म भवति तत्रैव नाऽस्थि चाप्यवशिष्यते ॥९६॥
एवं वै बहुसाहस्रा हता दैत्यास्तदाऽम्बरे ।
यमदण्डेन संदग्धा ययुर्याम्यगृहाणि ते ॥९७॥
ये जिजीविषवस्ते तु दृष्ट्वा नाशं क्षणान्तरे ।
दुद्रुवुश्च ययुः सर्वे त्यक्त्वा पातालमेव च ॥९८॥

पुत्रपौत्रान् सुतान् पत्नीः पशून् पक्षिण इत्यपि ।
नैजां सुसम्पदं योग्यां नीत्वा पातालमाविशन् ॥९९॥
रक्तबीजो मृतश्चापि पुनः कालान्तरे हि सः ।
धुन्धुर्नाम्ना महादैत्यो भविष्यतीति राधिके ॥१००॥
अन्ये दैत्यास्तत्सहाया भविष्यन्ति युगान्तरे ।
अथर्षिर्बकदानश्च ज्ञात्वा चासुरनाशनम् ॥१०१॥
जलाद्बहिर्विनिर्गत्य धर्मराजं समागमत् ।
सत्कारं त्वकरोच्चापि प्रशंसामकरोत्तथा ॥१०२॥
रक्षार्थं त्वर्थयद् दूतं धर्मराजो ददौ यदा ।
अरवं नाम दूतं स्वं ददौ दूतीं तथाऽरवीम् ॥१०३॥
शतदासान् शतदासीर्ददौ रक्षार्थमेव च ।
बकदानाश्रमे ते च ताश्च वासं समादधुः ॥१०४॥
आरवा नाम पुत्राश्च युगेऽयुतास्ततोऽभवन् ।
अयुताश्च ततः पुत्र्योऽभवन् दूतीप्रसंगजाः ॥१०५॥
तेषां तासां प्रजास्तत्राऽभवन् कोट्यधिकास्ततः ।
एवं वै राधिके तत्र यमो विनाश्य दानवान् ॥१०६॥
राज्यं दत्वा स्वदूताय मुनेः रक्षां विधाय च ।
ययौ विमानमारुह्य चाश्वपट्टसरोवरम् ॥१०७॥
यमराजो द्वितीयेन स्वरूपेण भटैः सह ।
वैष्णवैर्वैष्णवो भूत्वा न्यवसत् कृष्णसन्निधौ ॥१०८॥
अश्वपट्टसरस्येव स्नात्वा संस्नाप्य किंकरान् ।
महाप्रासादमाकृत्वा तीर्थावासं चकार सः ॥१०९॥
रुद्रो रुद्रगणैः साकं नारदः सनता सह ।
स्वस्वाऽऽवासान् प्रचक्रुस्ते कृष्णनारायणाज्ञया ॥११०॥
द्वासप्ततिसहस्रकन्यकाः स्नाता हरेर्गृहे ।
नत्वा श्रीकम्भरालक्ष्मीं सत्कृता भोजितास्ततः ॥१११॥
कान्ताज्ञया लोमशस्याश्रमे तस्थुर्निरन्तरम् ।
विमानं सर्वदा चास्ते यौतकान्वितमेव च ॥११२॥
श्रीमद्गोपालकृष्णस्योद्याने दिव्यं दिवं यथा ।
कन्यास्ताः पूर्वकामाश्च जाता दृष्ट्वा हरेर्गृहम् ॥११३॥
यस्य कोणे विमानं तत् परिलीयेत तादृशम् ।
पठनाच्छ्रवणादेतच्चरित्रं पुण्यवान् भवेत् ॥११४॥
विघ्ननाशो भवेत्तस्य मालिन्यं परिनश्यति ।
धर्मराजस्य दूतेभ्यो भयं तस्य न विद्यते ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने यमराजद्वारा रक्तबीजादिदशसाहस्रदैत्यानां विनाशः, अरवाख्यदूताय राज्यदानं बकदानऋषिरक्षा आरववंशोद्भवस्चेत्यादिनिरूपणनामा सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

**श्रीराधिकोवाच—**

कोऽयमासीद् रक्तबीजोऽसुरः कृष्ण पुरा भवे ।
कथं पुनः स सञ्जातो धुन्धुः- कः किं करिष्यति ॥ १ ॥

**श्रीकृष्ण उवाच—**

शृणु वै राधिके पूर्वसृष्ट्युत्थां सुकथां शुभाम् ।
पूर्वकल्पे गते रात्रौ महामत्स्यो नरायणः ॥ २ ॥
जले शृंगे स्वके कृत्वा नावं सत्यवता युतम् ।
बीजानि लोकरक्षार्थं पुनः सृष्ट्यर्थमित्यपि ॥ ३ ॥
नावि धृत्वा विचचार प्रालेयजलमस्तके ।
तत्र प्रातर्जलोत्पन्नो महामत्स्योऽब्धिजस्तदा ॥ ४ ॥
नारायणेन मत्स्येन योद्धुं तत्र समागतः ।
नौस्थान् बीजान् भक्षयितुं समिच्छन् युयुधे तदा ॥ ५ ॥
नारायणेन मत्स्येन धृतं सुदर्शनं तदा ।
मुक्तं मत्स्यस्य शिरसि द्वेधा मत्स्यो बभूव ह ॥ ६ ॥
तस्य रक्तकणाज्जाता मत्स्या जले तु कोटिशः ।
चक्रविदार्यमाणस्य चाब्धिमत्स्यस्य वै तदा ॥ ७ ॥
रक्तस्य बिन्दवो देहादुड्डीय नावमागताः ।
केषु चित्तेषु बीजेषु लग्नास्ते भूभृता तदा ॥ ८ ॥
प्रातरेव च नौकातो बहिः क्षिप्ता जले यदा ।
दशसाहस्रसंख्यास्ते रक्तबीजा हि राक्षसाः ॥ ९ ॥
प्रागेव तु जले तत्र समुत्पन्ना निसर्गतः ।
मत्स्यपुत्रास्तु ते सर्वे सामुद्रजलवासिनः ॥१०॥
द्वीपं च मार्गयामासुः शाश्वतावासमुच्छ्रयम् ।
तावज्जलं तु प्रालेयं प्रातर्यातं हि शुष्कताम् ॥११॥
सशैला पृथिवी तत्राऽदृश्यताऽपां सुमध्यगा ।
मत्स्यावतारो भगवान् सत्यवन्तं नृपं तदा ॥१२॥
बीजानां वपनं पृथ्व्यां कुर्वित्याज्ञाप्य वै क्षणात् ।
तिरोबभूव सहसा राजाऽपि बीजशेवधिम् ॥१३॥
पृथ्व्यां जलेऽम्बरे वायौ निचिक्षेप च तेजसि ।
प्रक्षिप्य सर्वबीजानि नावं तत्याज वै जले ॥१४॥
नौकाया अरनद्धेषु काष्ठेषु च व्रणेषु च ।
यानि सूक्ष्माणि बीजानि लग्नान्यासन् हि तानि तु ॥१५॥
भक्षयितुं दुद्रुवुश्च रक्तबीजा हि राक्षसाः ।
नावमारुह्य ते सूक्ष्मबीजान्यभक्षयंस्तदा ॥१६॥
तद्भक्षणात् समुत्पन्ना बालका आरबीजकाः ।
बालिकाश्च तथा जाता आरबीज्यः सुयौवनाः ॥१७॥
तेषु सर्वेषु जातेषु नौकाऽप्यदृश्यतां गता ।
रक्तबीजप्रजाः सर्वा आरबीजाद्ययाश्च ताः ॥१८॥

कामरूपधरा व्योमविहाराश्च निराश्रयाः ।
उड्डीय जलधेः पृथ्व्यां निवासाँश्चाप्यमार्गयन् ॥१९॥
यत्राऽस्माकं भवेद् वासो जलं च परितो भवेत् ।
तत्परितश्च पृथिवी भवेच्चापि वनादिकम् ॥२०॥
रणमरण्यमनुजा बीजपुष्पफलानि च ।
गह्वराणि विचित्राणि भवेयुर्यत्र सर्वतः ॥२१॥
तत्र वस्तव्यमस्माभिरिति मत्वा च तादृशम् ।
भूतलं रक्तबीजैर्हि तत्प्रजाभिश्च सर्वथा ॥२२॥
आरबीजैः स्वीकृतं सद्भूतलं द्वीपकल्पकम् ।
रक्तबीजो महान् राजा मत्स्यबीजोद्भवः पुरा ॥२३॥
तत्प्रजानां तदा जातस्ततस्तदुद्भवो नृपः ।
आरबीजो महान् राजाऽभवद् देवविरोधकृत् ॥२४॥
तं हत्वा यमराजस्तु राज्यं निजानुगाय वै ।
अरवाय ददौ सम्यगृषीणां रक्षणाय च ॥२५॥
रक्तबीजो हतो युद्धे यमलोकं जगाम ह ।
तत्र कर्मभोगान् कश्यपस्यौरसः सुतः ॥२६॥
दनोर्गर्भसमुद्भूतो धुन्धुनामा भविष्यति ।
ब्रह्माणं तपसाऽऽराध्य सुराऽवध्यत्वमेष्यति ॥२७॥
स्वर्गं विजेष्यति द्राक् च स्वयं शक्रो भविष्यति ।
आसुरं तु तदा राज्यं भविष्यति त्रिविष्टपे ॥२८॥
त्रिदशा ब्रह्मलोकं च गमिष्यन्त्यस्य वै भयात् ।
धुन्धुर्वक्ष्यति दैत्याँश्च भो दैत्या हि कथं वयम् ॥२९॥
व्रजेम सत्यलोकं संविजेतुं त्रिदशादिकान् ।
दैत्या निशम्य वक्ष्यन्ति न नो गतिर्हि तत्र वै ॥३०॥
इतो लोको महश्चास्ते महर्षिगणसेवितः ।
येषां दृष्ट्या च दह्यन्ति दैत्याः सरोषकेक्षणैः ॥३१॥
ततः परो जनलोको जना देवा वसन्त्यथ ।
ततस्तपस्ततः सत्यो यत्र ब्रह्मपराः स्थिताः ॥३२॥
येषां वेदध्वनिं श्रुत्वा विकसन्ति सुरादयः ।
संकोचमसुरा यान्ति ये च तेषां सधर्मिणः ॥३३॥
तस्मान्मा त्वं महाबाहो तत्र गन्तुं समादधः ।
वैराज्यभवनं धुन्धो दुरारोहं तु दानवैः ॥३४॥
तेषां तु वचनं श्रुत्वा धुन्धुर्दैत्यान् प्रवक्ष्यति ।
गन्तुकामः स सदनं ब्रह्मणो जेतुमीश्वरान् ॥३५॥
केन तु कर्मणा, कथं गम्यते, तत्र दानवाः ।
इन्द्रः कथं प्रयात्येव देवाः प्रयान्ति वै कथम् ॥३६॥
वदताऽत्र च मे दैत्याः कुर्मो वयं तु तत्तथा ।
ततो दैत्यगुरुः शुक्रः कथयिष्यति साधनम् ॥३७॥
सहस्राक्षः शतं चैकं यज्ञानामयजत् पुरा ।
श्रेष्ठानां वाजिमेधानां तेन ब्रह्मसदोगतिः ॥३८॥
शुक्रवाक्यं निशम्याथ यज्ञान् स वै करिष्यति ।
शुक्रमामन्त्र्य च दैत्यान् दानवान् वसुधां प्रति ॥३९॥
गमिष्यति सरिच्छ्रेष्ठा देविकां सिद्धिदां ततः ।
संविधास्यति यज्ञाँश्च भार्गवैः शुक्रशिष्यकैः ॥४०॥
यज्ञभागभुजस्तत्र स्वर्भानुप्रमुखास्तदा ।
भविष्यन्ति हयत्राताऽग्निधूमाऽसुर एव च ॥४१॥
विचरिष्यति पृथ्व्यां च गन्धो यास्यति वै दिवम् ।
ज्ञात्वा देवा विषण्णाश्च प्रवक्ष्यन्ति तु वेधसम् ॥४२॥
सवेधसो गमिष्यन्ति क्षीरस्थं परमेश्वरम् ।
विज्ञप्तिं च करिष्यन्ति श्रूयतां वै जनार्दन ॥४३॥
धुन्धुनामाऽसुरपतिर्बलवान् बलसंवृतः ।
त्रैलोक्याधिपतिश्चास्ते नत्राता नैव विद्यते ॥४४॥
साम्प्रतं ब्रह्मलोकस्थानपि जेतुं समुद्यतः ।
शुक्रस्य मतमादाय यजते च शतक्रतून् ॥४५॥
आरोढुमिच्छति सत्यलोकं जेतुं च वेधसम् ।
तस्मादकालहीनं च चिन्तयस्व परेश्वर ॥४६॥
उपायं यज्ञनाशे च येन स्याम सुनिर्वृताः ।
श्रुत्वा वक्ष्यति भगवान् यूयं गच्छथ केतनम् ॥४७॥
गच्छाम्यहं विजेतुं तमित्युक्त्वा च गमिष्यति ।
भगवान् वामनो भूत्वा स्नास्यति देविकाजले ॥४८॥
पतिष्यति देविकाया जले यज्ञस्य सन्निधौ ।
क्षणान्मज्जँस्तथौन्मज्जन् जलचेष्टां करिष्यति ॥४९॥
यज्ञीयाश्च निमज्जतीत्येवं मत्वा द्रुतं च तम् ।
उद्धर्तुं च प्रयास्यन्ति समुद्धार्य तटस्थितम् ॥५०॥
वामनं तं ब्राह्मणं च प्रक्ष्यन्ति धुन्धुऋत्विजः ।
कस्त्वं कस्मात् समायातः कथं किं ते प्रयोजनम् ॥५१॥
तदा वक्ष्यति विप्रः स दुःख्यहं गृहवर्जितः ।
मम पिता प्रभासाख्यो गोत्रेणापि तु वारुणः ॥५२॥
मम भ्राता नेत्रभासो गतिभासोऽहमेव च ।
रम्यं चावसथं त्यक्त्वा पिता नौ च मृतस्ततः ॥५३॥
वर्षान्ते चाग्रजश्चोक्तो विभजाम गृहं च नौ ।
तेनोक्तौ नैव भवतो विद्यते भाग इत्यहम् ॥५४॥
कुब्जवामनखञ्जानां क्लीबानां श्वित्रिणामपि ।
उन्मत्तानां तथाऽन्धानां दायभागो न विद्यते ॥५५॥
प्रियं वाक्यं गृहे वासो भोजनाच्छादनादिकम् ।
एतावद् दीयते तेभ्यो दायभागहरा न ते ॥५६॥

ततः क्लेशेन महता निष्कासितोऽस्मि तद्गृहात् ।
यज्ञं श्रुत्वा समायातो स्नातुं जले प्रवेशवान् ॥५७॥
निमज्जितो यतश्चाहं न जाने ह्यवतारणम् ।
के भवन्तोऽत्र सम्प्राप्ताः सस्नेहा बान्धवा यथा ॥५८॥
कोऽयं शक्रप्रतिकाशो युष्मन्मध्ये विभासते ।
अनुकम्पां प्रकुर्वन्तु यद्याश्रयोऽत्र लभ्यते ॥५९॥
इति वै वामनवाक्यं श्रुत्वा विप्राश्च धुन्धुकम् ।
प्रवक्ष्यन्ति च दानार्थं धुन्धुर्दास्यति शोभनम् ॥६०॥
श्रीमदावसथं दासीः रत्नानि विविधानि च ।
सर्वोपस्करयोगाँश्च दासान् गा वाहनानि च ॥६१॥
हिरण्यं स्यन्दनानश्वान् गजान् तथापि वामनः ।
न ग्रहीष्यति विभवान् साधुधर्मं वदँस्तदा ॥६२॥
दासीर्दासाँश्च भृत्याँश्च गृहं रत्नं परिच्छदान् ।
त्यक्त्वा पदत्रयं भूम्यासनं सेत्स्यति वै तदा ॥६३॥
धुन्धुर्दास्यति भूभागं पदत्रयं यदा ततः ।
वैराजरूपमास्थाय पदैकेन महीमिमाम् ॥६४॥
द्वितीयेन कटाहं च तृतीयेन च दानवम् ।
ग्रहीष्यति हरिस्तं च पातालेऽधो नयिष्यति ॥६५॥
देवेभ्यश्च निजं राज्यं दत्वाऽदृश्यो भविष्यति ।
पुनर्बलेर्वर्धितस्य राज्यं खर्वो हरिष्यति ॥६६॥
अथ धुन्धुरन्धकस्य साहाय्यं च करिष्यति ।
अन्धकस्य महायुद्धं शंकरेण भविष्यति ॥६७॥
शुक्राचार्यं तदा शंभुर्मुखे प्रक्षिप्य चोदरे ।
धृत्वा पुनश्च शिश्नेन तदा निष्कासयिष्यति ॥६८॥
शुक्ररूपः शुक्रनाम्ना शंभोः पुत्रो भविष्यति ।
अथेन्धकेन योद्धुं च महेन्द्रोऽपि गमिष्यति ॥६९॥
मूर्ध्नि वज्रं परिभ्राम्याऽन्धकं यदा हनिष्यति ।
अन्धकस्य शिरस्येव वज्रं चूर्णं भविष्यति ॥७०॥
वह्निस्तस्मै तदा शक्तिं दास्यत्येव भयंकराम् ।
तथा च देवगन्धर्वा रथं दास्यन्ति स्वस्तिकम् ॥७१॥
शमीकस्य ऋषेः पत्नी बालं तदा तु भूतले ।
पृथिव्यां कम्पमानायां स्थापयिष्यति वै तदा ॥७२॥
बालौ द्वावेकतश्चैव भविष्यतस्तदा तयोः ।
एको वै मातलिर्नामा गमिष्यति महेन्द्रकम् ॥७३॥
तदा स सारथिर्भूत्वा साहाय्यं च करिष्यति ।
रुद्रस्तदा महेन्द्रश्च तथाऽन्ये देवताः सह ॥७४॥
मारयिष्यन्त्यन्धकं च शंकरो लोकशंकरः ।
शंकरस्य ललाटोर्ध्वाद् गदाघातेन बिन्दवः ॥७५॥

रक्तस्यापि पतिष्यन्ति भविष्यन्ति च भैरवाः ।
विद्याराजो रुद्रराजश्चण्डः प्रचण्ड इत्यपि ॥७६॥
कपाल्येककपाली च तथा ललितराजकः ।
विघ्नराजोऽष्टमश्चापि भैरवास्ते तदोद्भवाः ॥७७॥
ललाटफलकाच्छंभोः कन्याश्चैका भविष्यति ।
चर्चिका नामतः साध्वी हिङ्गुलाद्रिनिवासिनी ॥७८॥
अथाऽन्धकं मारयित्वा भृंगिनामगणं स्वकम् ।
करिष्यति शंकरस्तं ततो धुन्धुर्भयान्वितः ॥७९॥
पातालं यास्यति शीघ्रं ततः कालान्तरे पुनः ।
बलेः साहाय्यतां यदा करिष्यति तदा हरिः ॥८०॥
सुदर्शनेन च धुन्धुं मारयिष्यति जीवतः ।
इत्येवं कथितं राधे रक्तबीजकथानकम् ॥८१॥

**श्रीराधिकोवाच—**

कथं कृष्ण जलमत्स्यो विष्णुचक्रेण घातितः ।
पवित्रतां गतो नैव यद्वंशे राक्षसा यतः ॥८२॥

**श्रीकृष्ण उवाच—**

विष्णुचक्रपरिच्छिन्नो जलमत्स्यस्तु राधिके ।
गतपापोऽभवच्छीघ्रं स्वर्गे महेन्द्रतां गतः ॥८३॥
आद्यः स एव संकल्पजन्योऽभूद् देवतापतिः ।
आद्ययुगप्रवृत्त्यर्थं ततः पृथ्व्यामवातरत् ॥८४॥
विष्णुभक्तोऽभवल्लोके सुवर्णांगदविश्रुतः ।
अनादिश्रीकृष्णनारायणभक्तोऽतिमानवः ॥८५॥
ततो धाम ययौ दिव्यं परं कृष्णस्य राधिके ।
अथ ये रक्तबीजाश्च आरबीजादयस्तथा ॥८६॥
ते सर्वे बीजहन्तारः सृष्ट्यादौ चाऽभवन् यतः ।
सत्यव्रतस्य शापेन राक्षसत्वमुपागताः ॥८७॥
आदिबीजप्रहन्तारश्चाऽलभ्यवस्तुनाशकाः ।
महापापाऽतिपापास्ते यतो वंशविनाशकाः ॥८८॥
विचार्येत्थं तदा राजा शशापैतान् विघातकान् ।
बीजघातप्रकर्तारश्चासुरा वै भविष्यथ ॥८९॥
इत्येवमासुरा जाता यतश्चासुरभावनाः ।
पक्ष्यण्डानां कललादेर्भक्षका राक्षसा हि ते ॥९०॥
पशुबीजप्रहन्तारो रजोवीर्यविनाशकाः ।
बीजकोशप्रहन्तारस्तामसास्तेऽसुरा मताः ॥९१॥
अलभ्यबीजघाते तु महत् पापं प्रजायते ।
प्रथमं पार्वती देवी शंकरस्य समागमे ॥९२॥

बीजलब्धेरवसरे देवैर्विघ्नवती कृता ।
शशाप दयिता साध्वी दुःखितेनाऽन्तरात्मना ॥९३॥
देवा मे गर्भवाञ्छाया घातकाः स्वार्थसिद्धये ।
बीजदाने घातका वै यतो जाता हरं प्रति ॥९४॥
अपुत्राऽहमगर्भाऽहं कृता युष्माभिरित्यतः ।
भवन्तोऽपि ह्यपुत्राश्च भवत्पत्न्योऽप्यगर्भिकाः ॥९५॥
अनपत्याः सदा सन्तु इति देवान् शशाप सा ।
तस्माद्वै राधिके पापं प्रथमं बीजघातनम् ॥९६॥
ततोऽप्यधिकपापं च स्त्रिया वै ऋतुघातनम् ।
ततोऽप्यत्यधिकं पापं गर्भहत्या प्रकथ्यते ॥९७॥
सर्वेभ्यश्चोल्बणं पापं बालकस्य विनाशनम् ।
सद्यो विवाहितयोश्च घातनं पापकोटिकम् ॥९८॥
सगर्भाघातनं पापं पापकोट्यर्बुदाऽधिकम् ।
असमाप्ते तु मिथुने घातनं सृष्टिघातजम् ॥९९॥
पापं वै जायते तस्माद् बीजघ्ना नोद्धरन्ति वै ।
ब्रह्मचारिव्रतं तस्मात् पुण्यदं मोक्षदं मतम् ॥१००॥
यत्र बीजं न हन्येत रक्ष्यते तु स्वभावतः ।
रक्षणस्य महत्पुण्यं धर्मेणाऽपि प्रदानकम् ॥१०१॥
महत् पुण्यं स्वयं ब्रह्मा विष्णुः शिवो जगुः सदा ।
इत्येवं राधिके चोक्तं राक्षसत्वे हि कारणम् ॥१०२॥
बीजघ्नानां स्वयं कृष्णो दृष्टेः पथं प्रयाति न ।
यमद्वारा विनाशश्च तेषां करितवान् प्रभुः ॥१०३॥
ऋतुदानं महत्पुण्यं गृहस्थानां सुरोदितम् ।
वंशदानं चातिपुण्यं वंशकृतां प्रकीर्तितम् ॥१०४॥
निर्वंशा नोद्धरन्त्येव संसाराऽब्धिं तरन्ति न ।
सवंशाः पितरस्तृप्ताः समुद्धरन्ति सागरात् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रक्तबीजाऽऽरबीजाद्यसुरोत्पत्तिर्धुन्धुदैत्योत्पत्तिर्बीजनाशात्मकपातकमित्यादिनिरूपणनामाऽष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके चैत्रे व्यतीतेऽथ द्वितीयकम् ।
चरित्रं श्रीकृष्णनारायणस्यैव प्रमोक्षदम् ॥ १ ॥
माल्लदेश इति ख्यातो देशो वैष्णवसत्कृतः ।
भतलं नाम नगरं ख्यातं स्थानीयमुत्तमम् ॥ २ ॥
ेपणिवृत्तिस्थो गोधनाख्योऽभवद् वणिक् ।
द्धिमाँश्च कलाकौशल्यपारगः ॥ ३ ॥
स कदाचिन्निजाद् राष्ट्रात् सौराष्ट्रं गन्तुमुद्यतः ।
विशालसार्थसम्पन्नो बहुपण्यादिसंभृतः ॥ ४ ॥
गच्छतस्तस्य वै रात्रौ चौराणां संगमोऽभवत् ।
जलहीने शुष्कभागे जालिकैकतरौ स्थले ॥ ५ ॥
ततः स हृतसर्वस्वो वणिक् शोकातुरः सदा ।
भ्रमन्नितस्ततो यायाज्जालिकावृक्षसन्निधौ ॥ ६ ॥
मृगैश्च पक्षिभिः कीटैर्वर्जितां वीक्ष्य जालिकाम् ।
क्षान्तः क्षुत्तृट्शुष्ककण्ठो वृक्षपार्श्वमुपागमत् ॥ ७ ॥
उपाविवेश च सुप्तो विश्रान्तो विश्रमोऽभवत् ।
मध्याह्ने चोत्थितो यावत्तावत् प्रेतं ददर्श सः ॥ ८ ॥
शतैः प्रेतैर्वृतं प्रेतैरुह्यमानं सुखासने ।
आगच्छद्भिर्जालिकायास्तरुं प्रेतैः समन्ततः ॥ ९ ॥
यत्राऽऽसीत् स वणिक्पुत्रस्तं च वृक्षं समागतः ।
प्रेतराजो ददर्शैनं वणिक्पुत्रं स्थिरान्तरम् ॥१०॥
स्वागतं कृतवान् प्रेतो वणिक् चापि तथाऽकरोत् ।
कुशलं सर्वमाभाष्य चाभिवाद्य परस्परम् ॥११॥
वणिक्प्रेतौ चोपविष्टौ छायायां सुखतस्ततः ।
प्रेताधिपतिना पृष्टं कुत आगम्यते वणिक् ॥१२॥
क्व वासो विद्यते कुत्र गमिष्यसि स्थलादितः ।
कथं चेदं निर्जनं च स्थलं त्वया समाश्रितम् ॥१३॥
इतिपृष्टो वणिक् प्राह धनयुक्तोऽप्यहं वने ।
चौरैर्हृतधनो जातः पर्यटाम्यतिदुःखितः ॥१४॥
वणिग्दुःखेन तु प्रेतः क्षणं वै दुःखितोऽभवत् ।
स्वबन्धुमिव वणिजं प्राह शोकं तु मा कुरु ॥१५॥
भूयोऽप्यर्था भविष्यन्ति यदि भाग्यबलं तव ।
भाग्यक्षयेऽर्थाः क्षीयन्ते भवन्त्यभ्युदये पुनः ॥१६॥
क्षीणस्याऽस्य शरीरस्य चिन्तया नोदयो भवेत् ।
अभ्युदयश्च पतनं रवेर्नित्यं प्रजायते ॥१७॥
वृक्षाणां शुष्कता चापि पुनः पल्लविताऽपि च ।
पक्षे तेजस्विता चन्द्रे पक्षे तेजःक्षयस्तथा ॥१८॥
नदीनां शुष्कता ग्रीष्मे वर्षायां जलपूर्णता ।
क्षेत्राणां सस्यसम्पत्तिः क्वचित् सस्यविहीनता ॥१९॥
नेत्रं म्लानं सनिद्रं तु क्वचित्पद्मदलोत्सवम् ।
गगनं चाऽऽविलं काले काले निर्मलमुज्ज्वलम् ॥२०॥
प्रदीपो रात्रौ ज्वलति दिवा तेजः करोति न ।
क्वचिद् राजा क्वचिच्छ्रेष्ठी क्वचित् कैंकर्यवान् भवेत् ॥२१॥
क्वचिच्छास्ता क्वचिच्छास्यः क्वचित् कोटिद्वयोज्झितः ।
क्वचिल्लक्ष्मीपतिः श्रीमान् क्वचिल्लक्ष्मीविवर्जितः ॥२२॥

बाल्ये तु देहिनः सर्वे नैसर्गादपरिग्रहाः।
यौवने तृष्णया व्याप्ता वार्धक्ये शक्तिवर्जिताः ॥२३॥
कालवेगेन जायन्ते कर्मणा प्राक्तनेन च।
पूर्वं यस्माद् धनं प्राप्तमृणात्मकं यतो यतः ॥२४॥
तेभ्यो दत्तं न पश्चाद्वै तद्दणं सह गच्छति।
दातारस्ते सुताः पुत्राः पत्न्यः कुटुम्बिनस्तथा ॥२५॥
राजा भृत्याः सेवकाश्च भवन्त्येवर्णबन्धनात्।
चौररूपाश्च वा भूत्वा प्रसह्य प्रहरन्ति च ॥२६॥
नं दत्तं न च भुक्तं वै पर्याप्तं चापि चार्जितम्।
वर्धयते प्रयत्नेन तद्विलोपं समीहते ॥२७॥
द्रव्यं हसति द्रव्येशं मृषा द्रव्येशता तव।
योग्ये विनिमयः सत्ता सा कृता न त्वया यतः ॥२८॥
मरणं सन्निधौ चास्ते श्रेष्ठिन् त्यक्त्वा गमिष्यसि।
ततस्तवेशता द्रव्ये द्रव्येशता न वै त्वयि ॥२९॥
अहो लोभस्य माहात्म्यं सप्तवंशोत्तरं धनम्।
विद्यते यस्य केशेऽपि पुनः सञ्चेतुमिच्छति ॥३०॥
अर्जने तु परं दुःखं कैंकर्यादिसमुद्भवम्।
रक्षणेऽपि परं दुःखं चिन्ता व्याघ्री प्रवल्गति ॥३१॥
व्ययेऽपि क्षयदुःखं च भोगे दुःखं च रोगिता।
गर्वे दुःखं च युद्धादि मृत्युर्द्रव्ये प्रजायते ॥३२॥
तस्माद् दुःखं धनं प्रोक्तं यद् धर्मार्थे न युज्यते।
धने धर्मे नियुक्ते तु धर्मात् सुखं न दुःखिता ॥३३॥
धर्माच्छान्तिर्धर्मयोगात् तृष्णानाशो विवेकिता।
यथालब्धे च सन्तोषो देवसेवादिवर्तनम् ॥३४॥
कुटुम्बे सत्त्वभावश्च रागद्वेषादिशून्यता।
चौरादिभयविरहो निद्राऽपि सुखतो भवेत् ॥३५॥
एवंविधा गुणाः श्रेष्ठिन् निर्धनत्वे सुखावहाः।
सधनत्वे दुःखदोषाः प्रजायन्ते पुनः पुनः ॥३६॥
तत्र नास्ति महाश्चर्यं गताऽऽगताऽब्धिवारिवत्।
धनं तु चञ्चलं सर्वं लक्ष्मीः सदा हि चञ्चला ॥३७॥
जीवनं चञ्चलं चापि मा शोकं कुरु वैभवे।
भाग्यात् सर्वं पुनश्चापि यततो वै भविष्यति ॥३८॥
इत्युच्चार्य समाहूय प्रेतो भृत्यान् समब्रवीत्।
अद्याऽतिथिरयं श्रेष्ठी गृहेस्माकमुपागतः ॥३९॥
बालमित्रं मम पूज्यः सहजो देशजो मम।
अस्मिन् दृष्टे च मन्येऽहं दृष्टवान्निजबान्धवान् ॥४०॥
अस्मिन् समागते जाता प्रीतिर्ममाऽतुलाऽद्य वै।
इत्युक्त्वा च प्रसस्मार प्रेतो भोजनमुत्तमम् ॥४१॥
तावत्तस्य समायाता स्थाली नवा दृढा शुभा।
मिष्टान्नेन तु सम्पूर्णा दध्योदनयुताऽपि च ॥४२॥
शाकसूपाऽऽरनालादिसम्पूर्णा भोजनाय वै।
तथा नवा दृढा शीतजलभृता च हाण्डिका ॥४३॥
वारिधानीं तथा स्थालीं वीक्ष्य प्रेतेश्वरस्तदा।
प्राहोत्तिष्ठ वणिग्वर्य प्रक्षालय करौ मुखम् ॥४४॥
इत्युक्त्वा सलिलं दत्त्वा न्यवेशयच्छुभासने।
प्रेतराजो ददावस्मै मिष्टान्नं दधि वारि च ॥४५॥
ओदनं चाऽऽरनालं च शाकं च बुभुजे वणिक्।
प्रेतेभ्यः स ददौ सर्वविधं पात्रेषु पत्रिषु ॥४६॥
प्रेता मिष्टान्नमाद्यं च भक्षयामासुरादरात्।
जलं पपुस्ततः प्रेतेश्वरोऽपि शेषमेव तत् ॥४७॥
बुभुजे च पपौ वारि तृप्ताः सर्वेऽभवँस्ततः।
स्थाली च वारिधानी च शेषान्नमपि सर्वथा ॥४८॥
अदृश्यतां गतं तूर्णं पश्यतो वणिजस्तदा।
एतदद्भुतमाश्चर्यं दृष्ट्वा पप्रच्छ वै वणिक् ॥४९॥
एषा स्थाली चान्नपूर्णा वारिधानी च पूरिता।
अरण्येऽत्र कथं प्राप्ता वद मे प्रेतपुंगव ॥५०॥
तथापि तव भृत्यास्तु कृशाः कथं हि सर्वथा।
त्वं तु नैवाऽतिपुष्टोऽसि कथं दुर्बलता वद ॥५१॥
तावत् तत्र श्वेतवस्त्रं समायातं शुभं नवम्।
तदत्तं च वणिजेऽत्र प्रेतेन भावतस्तदा ॥५२॥
आश्चर्यं चापि तद् दृष्ट्वा कुतो वस्त्रं समागतम्।
पप्रच्छ च वणिक् प्रेतं प्रेतः प्राह यथातथम् ॥५३॥
अहमासं पुरा श्रेष्ठिन् नगरे धवलाह्वये।
विप्रो नाम्ना प्रभानाथः सूपकारोऽभवं सदा ॥५४॥
ममाऽस्ति च वणिक् श्रेष्ठी धनाढ्यो धर्मवर्धनः।
विष्णुभक्तो यजमानः स्वामी धनप्रदो मम ॥५५॥
धर्मवर्धननामाऽसौ धर्मकार्ये सदा स माम्।
आज्ञापयति धर्मार्थे व्ययार्थे च यथेप्सितम् ॥५६॥
दानार्थे चोपकारार्थमकुण्ठाऽऽज्ञां ददाति च।
सोऽहं कदर्यो लुब्धात्मा धनेऽपि सति पुष्कले ॥५७॥
न ददामि तु देवेभ्यो न विप्रेभ्यो न दानकम्।
नोपकारं कस्यचिच्च करोम्यनाथदेहिनः ॥५८॥
यतीन् साधून् धर्मनिष्ठान् गणयामि न सर्वथा।
न चाऽश्नामि तृप्तिपूर्णं लुब्धोऽन्यस्य तु का कथा ॥५९॥
अपुण्यस्य हि नाशाऽन्ता वैभवा इति निश्चितम्।
ममाऽपि न तथा पुण्यं तदासीद् भुक्तवान्नहि ॥६०॥

प्रमादाद् यदि भुञ्जेऽहं दधिक्षीरघृतादिकम् ।
मिष्टान्नं वा मिष्टजलं तदा शोकः प्रजायते ॥६१॥
अहोऽद्य तु मया व्यर्थो व्ययः कृतो हि हानिकृत् ।
निद्रा रात्रौ न चाऽऽयाति व्ययचिन्तापरस्य मे ॥६२॥
प्रातर्भवति चैवं मे यद्वा तद्वा कथंचन ।
एवमेतादृशो लोभी निवसाम्यतितृष्णकः ॥६३॥
तन्दूलतिलपिण्याकतुषशाकादिभोजनैः ।
क्षपयामि कदान्नाद्यैरात्मानं कालनिर्गमैः ॥६४॥
एवं द्रव्ययुतस्याऽपि विना दानं च पुण्यकम् ।
महान् कालो गतो मे तु सूर्यग्रहणमागतम् ॥६५॥
श्रवणद्वादशी प्राप्ता मासि भाद्रपदे तथा ।
लोकाः प्रयान्ति तीर्थार्थे साभ्रमत्यां दिने दिने ॥६६॥
अहं च श्रेष्ठिना साकं ह्येकादश्यामुपोषितः ।
गतवान् साभ्रमत्यां तु स्नातुं त्वेकादशीदिनात् ॥६७॥
यावत् सूर्यग्रहः स्याच्च तावत् तीर्थे स्थिरोऽभवम् ।
एकादशीदिनात्तेन श्रेष्ठिना कोटिशो धनम् ॥६८॥
वस्त्राणि श्रेष्ठपात्राणि गावश्चेत्यपि दानकम् ।
दत्तं यथाबलं तत्र मया दृष्ट्वाऽतिलज्जया ॥६९॥
धौत्रं चैकं नवं दत्तं विप्राय वेदवेदिने ।
नवा स्थाली चान्नपूर्णा मिष्टपूर्णा समर्पिता ॥७०॥
दध्योदनारनालाद्यैः शाकेन संयुता तथा ।
जलधानी तदा दत्ता यानं दत्तं तु काष्ठजम् ॥७१॥
छायार्थं तु तदा छत्रं दत्तं विप्राय वै तदा ।
श्रेष्ठिनो भृत्यवर्गाश्च विप्रार्थं योजिता मया ॥७२॥
एतावन्मात्रकं मया वणिग्वर्य तदार्पितम् ।
नान्यत् किञ्चित् प्रदत्तं तु मयाऽयुतसमास्वपि ॥७३॥
अथ कालान्तरे मृत्युंगतोऽहं प्रेततां गतः ।
अमी चाऽदत्तदाना वै मद्दत्ताऽन्नोपजीविनः ॥७४॥
भृत्यास्तस्य गोधनाख्यवणिजो मद्वशानुगाः ।
काष्ठयानमिदं प्राप्तं प्राप्ता भृत्याश्च ते मया ॥७५॥
प्राप्ता मिष्टान्नसंयुक्ता स्थाली जलस्य हाण्डिका ।
दत्तं तदिदमायाति मध्याह्नेऽपि दिने दिने ॥७६॥
यावन्नाऽहं तु भुञ्जेऽन्नं न तावल्लयमेति च ।
मयि भुक्ते च पीते च सर्वं लीनं प्रजायते ॥७७॥
छत्रदानादयं वृक्षो नित्यं प्राप्तोऽस्ति वै मया ।
वासार्थं निवसाम्यत्र प्रेताः कुर्वन्ति सेवनाम् ॥७८॥
इदं तवोक्तं सर्वं च दाने निरोधकृद् यथा ।
अहं पुराऽभवं तेन पापेन प्रेततां गतः ॥७९॥
लोभेन तृष्णया चाऽपि विप्रोऽहं प्रेततां गतः ।
एकवारप्रदत्तेन जलान्नेन हि भुज्यते ॥८०॥
प्रत्यहं त्वेकवारं हि दत्वा भुङ्क्ते हि नित्यदा ।
नित्यदानप्रदातुस्तु स्वर्गो वै शाश्वतं भवेत् ॥८१॥
अथ श्रेष्ठिन् तव मेऽपि हितं करोमि सर्वथा ।
कुंकुमवापिकाक्षेत्रे चाश्वपट्टसरोवरे ॥८२॥
लोमशस्याऽऽश्रमे तत्र कृष्णनारायणालये ।
याहि शीघ्रं वणिक् तत्र स्नानं च हवनं कुरु ॥८३॥
मम नाम समुद्दिश्य पिण्डनिर्वपणं कुरु ।
तत्र पिण्डप्रदानेन प्रेतभावादहं क्षणात् ॥८४॥
मुक्तः सन् दान कर्तॄणां प्रयास्यामि सलोकताम् ।
तिथिस्त्वेकादशी पुण्या शुक्ला भाद्रप्रदे शुभा ॥८५॥
बुधश्रवणसंयुक्ता साऽतिश्रेयस्करी मम ।
अथवा कार्तिककृष्णाष्टम्यां श्राद्धं कुरुष्व मे ॥८६॥
अनादिश्रीकृष्णनारायणप्राकट्यवासरे ।
अवश्यं च तदा मोक्षो मम भावी विभावय ॥८७॥
इत्युक्त्वा प्रददौ तस्मै सुवर्णं हीरकादिकम् ।
स्कन्धे कृत्वा वणिजं तं तत्याज च सुराष्ट्रकम् ॥८८॥
एकादश्यां भाद्रपदे ययावश्वसरोवरम् ।
पिण्डनिर्वपणं तत्र प्रेतानामनुपूर्वकम् ॥८९॥
चकाराऽथ स्वबन्धूनां पितॄणां तदनन्तरम् ।
आत्मनश्च तथा सम्यङ् महच्छ्राद्धं तिलैर्विना ॥९०॥
पिण्डनिर्वपणं चक्रे तथाऽन्यानपि गोत्रजान् ।
मोक्षयामास सर्वान् वै श्राद्धदानादिभिर्वणिक् ॥९१॥
कर्ममुक्तास्तु ते सर्वे आययुस्तत्र सन्निधौ ।
दिव्यरूपा दिव्यवेषाः सूर्यतेजोऽतिवर्चुलाः ॥९२॥
वणिक् तेभ्यो जलं तत्र ददौ मिष्टान्नभोजनम् ।
ततस्तान् दिव्यदेहाँश्च निनाय लोमशाश्रमम् ॥९३॥
लोमशस्ताँस्तदा मन्त्रं श्रावयामास वैष्णवम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९४॥
ददौ तेभ्यश्च तुलसीस्रजश्च चरणामृतम् ।
ततो वणिग् ययौ नीत्वा सह सर्वान् प्रमोचितान् ॥९५॥
अनादिश्रीकृष्णनारायणसौधं सुकानकम् ।
तेऽपि सर्वे नता नारायणं पुपूजुरादरात् ॥९६॥
कृष्णपादजलं पीत्वा बभूवुर्मुक्तकोटिकाः ।
दिव्ययाने समारुह्य कृष्णनारायणाऽऽज्ञया ॥९७॥
ययुर्गोलोकसंज्ञं च ततो धामाऽक्षरं परम् ।
अथाऽयं तु वणिग् राधे निजस्थानं ततो गतः ॥९८॥

धवलाख्ये पुरे तत्राऽभजत् कृष्णनरायणम् ।
भक्तिं तु नवधा कृत्वा कालधर्ममुपेयिवान् ॥९९॥
देवो भूत्वा च गन्धर्वो गुह्यकश्चापि वै ततः ।
विराड् राजा ततो भूत्वा परो भागवतो हि सः ॥१००॥
भेजेऽनादिपरब्रह्मश्रीमत्कृष्णनरायणम् ।
देहान्ते स हरेर्धाम ययौ स्तुत्वा पुनः पुनः ॥१०१॥
इत्येवं कथितो राधे ! चमत्कारो हरेर्यथा ।
दर्शनान्मुक्तिमापन्नाः प्रेता दिव्यशरीरिणः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने भाद्रैकादश्यामश्वपट्टसरोवरे श्राद्धेन प्रेतानां मुक्तिः प्रेत-वणिक्संवादश्चेतिनिरूपणनामा नवाऽधिकपञ्चाशत्तमोऽध्यायः ॥ ५९ ॥

**श्रीकृष्ण उवाच—**

अपि राधे शृणु त्वन्यं चमत्कारं हरेस्तदा ।
उदयाख्योऽभवद् राजा धार्मिको देवपूजकः ॥ १ ॥
अरवल्यद्रिभूभागे राज्यं यस्य महत्तमम् ।
उदयाख्यं पत्तनं च राजधानी ह्यभूच्छुभा ॥ २ ॥
राजा व्रतं परं चक्रे चातुर्मास्यैकभोजनम् ।
नित्यं दानं विप्रसाधुभोजनं धेनुसेवनम् ॥ ३ ॥
अनाथबालसाध्वीभ्यश्चान्नवस्त्रसमर्पणम् ।
विद्यादाने तथा द्रव्यं देवालयेषु सद्धनम् ॥ ४ ॥
हवनं सर्वदा प्रातर्ब्राह्मं सायं जलाप्लवम् ।
एवं व्रते सुकुर्वाणे श्रावणे मासि सर्वथा ॥ ५ ॥
इच्छा तस्याऽभवत् स्नातुं मासमेकं सरोवरे ।
यथावाषाढमासेऽसौ धीरवीरसरोवरम् ॥ ६ ॥
परिमेयाऽनुगो राजा आर्यायनऋषेर्वने ।
आश्रमे च निजावासं चकार सरितस्तटे ॥ ७ ॥
श्रावणे नित्यमेवाऽसौ प्रातरुत्थाय सत्वरम् ।
नारायणं नमस्कृत्य ध्यात्वा श्रीविष्णुमच्युतम् ॥ ८ ॥
स्नात्वा सम्पूज्य च लक्ष्मीनारायणं प्रभापतिम् ।
पार्वतीस्वामिनं राधेश्वरं सम्पूज्य भावतः ॥ ९ ॥
ततश्चार्यायनऋषेः पूजां करोति नित्यशः ।
अथ पश्चात् सदायाति तीर्थानि द्रष्टुमेव सः ॥१०॥
सतीतीर्थं शंभुतीर्थं चक्रतीर्थं ततः परम् ।
कृष्णतीर्थं स्वामितीर्थं मञ्जुलातीर्थमित्यपि ॥११॥
सूर्यतीर्थं चेन्द्रतीर्थं ब्रह्मतीर्थं ततः परम् ।
मुक्ततीर्थम् ऋषितीर्थं धर्मतीर्थं जलाश्रयम् ॥१२॥
एवमादीनि तीर्थानि कृत्वा सरोवरेऽभितः ।
प्रदक्षिणं सरः कृत्वा दत्वा दानानि सर्वशः ॥१३॥
स्वर्णं रूप्यं चाम्बराणि पात्राणि विविधानि च ।
भोज्यानि चान्नदानानि ततो याति निजाश्रयम् ॥१४॥
एवं कृत्वा ततो होमं वैश्वदेवं करोति च ।
विप्रानृषीन् सतीः साध्वीः साधून् बालाननाथकान् ॥१५॥
विभज्याऽन्नान्यतिथींश्च भोजयित्वाऽनुगानपि ।
ततो भुंक्ते स्वयं राजा नत्वा त्वार्यायनमृषिम् ॥१६॥
एवं पुण्यप्रतापेन राज्ञः पूर्वकृतानि च ।
यानि कान्यपि पापानि दग्धान्येव समन्ततः ॥१७॥
पुण्यपुञ्जोऽपि च महानस्य कृष्णेऽर्पितस्ततः ।
कृष्णनारायणस्यैव प्रसन्नताऽस्य शिष्यते ॥१८॥
प्रसन्नता महत् पुण्यं नान्यत् पुण्यं स मन्यते ।
हरिकृष्णः प्रसन्नोऽभूदार्यायनर्षिहृद्गतः ॥१९॥
ऋषिः प्राह च राजानं राजन्नेहि ममान्तिके ।
गृहाण परमं मन्त्रं यद्देवः पुरुषोत्तमः ॥२०॥
राजा तदा ऋषेरग्रे उपाविवेश तम् ऋषिः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥२१॥
इति मन्त्रं दिदेशापि स्रजं च तौलसीं तथा ।
ततोऽनुगानपि मन्त्रमाह चार्यायनो मुनिः ॥२२॥
मन्त्रं लब्ध्वा ऋषिं नत्वा राजा सहानुगो गृहम् ।
ययौ तत्र नदीतीरे स्वोटजायामुपाविशत् ॥२३॥
तावत् तत्रागतो बालो मुरलीकरशोभितः ।
राधया प्रभया लक्ष्म्या पारवत्या च सेवितः ॥२४॥
रूपरूपानुरूपाधिमूर्तिः श्रीभगवान् स्वयम् ।
हसन् मुहुस्तथा कान्ता हासयन् रङ्गपूरितः ॥२५॥
दिव्यो दिव्यस्वरूपाभिः पत्नीभिः परिवारितः ।
मयूरपिच्छकल्याढ्यहैममुकुटशोभितः ॥२६॥
वह्निशुद्धांशुकधरो दिव्यभूषाविराजितः ।
करे मीनध्वजस्वस्तिधनुःशूलादिलक्षितः ॥२७॥
तत्पार्श्वे च मनाक् दूरं लक्ष्मीश्रीकम्भरा सती ।
पार्श्वान्तरे मनाक् दूरं श्रीमद्गोपालकृष्णकः ॥२८॥
अन्या दास्यस्तथा दासाः पर्णकुट्यां समागताः ।
कोटिकोट्यर्कभातुल्यं तेजस्तत्र बभौ सुखम् ॥२९॥
राजा विलोक्य रुचिरं मूर्तौ तत्र स्थिरोऽभवत् ।
नेमे नेत्रे च सम्मिल्य तेजोव्याहतरश्मिणी ॥३०॥
क्षणान्तरे समुद्घाट्य यावत् पश्यति केशवम् ।
तावदेकोऽभवत् कृष्णस्तन्मूर्तौ श्रीहरिः स्वयम् ॥३१॥

दर्शयामास सौराष्ट्रं तथा कुंकुमवापिकाम् ।
अश्वपट्टसरश्चापि तथा श्रीलोमशाश्रमम् ॥३२॥
तथा श्रीकम्भरालक्ष्मीं तथा गोपालकृष्णकम् ।
कोट्यर्बुदाब्जकन्याश्च तीर्थान्यपि च सर्वशः ॥३३॥
एवं प्रदर्श्य भगवान् सर्वं लीनं चकार ह ।
ततः स्वपादयोस्तस्मै दर्शयामास वै क्षणात् ॥३४॥
पातालं च तदूर्ध्वं च रसातलं ततः परम् ।
महातलं जंघयोश्च जान्वोस्तलातलं ततः ॥३५॥
सुतलं चोर्वधोभागे सक्थ्नोश्च वितलं ततः ।
सक्थिमूले चातलं च तत्रत्यान् दैत्यदानवान् ॥३६॥
सर्पान्नागानन्यजीवान् नदीपर्वतभूस्तरान् ।
विभूतीन् दर्शयामास शेषं च कच्छपं तथा ॥३७॥
कट्यां भुवं जघने च भुवर्लोकं ततः परम् ।
नाभ्यां स्वर्गं महर्लोकं ह्युदरे हृदये जनम् ॥३८॥
तपोलोकं मुखे सत्यं ललाटेऽस्मै व्यदर्शयत् ।
चर्मणि सप्तकान्येवावरणानि व्यदर्शयत् ॥३९॥
एवं प्रदर्श्य च क्षणाल्लीनं चकार तत्तदा ।
अथैनं दर्शयामास वैष्णवं रूपमात्मनः ॥४०॥
सहस्रशिरसं रम्यं सहस्रकरपादकम् ।
तत्र वै पादयोरेनं दर्शयामास वै जलम् ॥४१॥
तेजो वायुं चाम्बरं च ब्रह्मविष्णुमहेश्वरान् ।
पादयोर्जलवैकुण्ठं वैराजं जंघयोस्तथा ॥४२॥
जान्वोश्चाथ महाविष्णुं सक्थ्नोर्भूमानमित्यपि ।
सक्थिमूले प्रधानं च पुरुषं शिश्नके तथा ॥४३॥
प्रकृतिं जघने नाभौ वासुदेवमदर्शयत् ।
कट्यां कालं च पुरुषं पार्श्वे संकर्षणं तथा ॥४४॥
पार्श्वान्तरे च प्रद्युम्नं ह्युदरे त्वनिरुद्धकम् ।
कुक्ष्योर्वैकुण्ठगोलोकौ वक्षस्यनन्तदासिकाः ॥४५॥
राधारमादिशक्तीश्च दर्शयामास केशवः ।
कण्ठे ब्रह्मस्वरूपांश्च मुक्तान् कोट्यर्बुदाब्जकान् ॥४६॥
मुखे त्वमृतलोकं च नेत्रयोरक्षरं तथा ।
ब्रह्म प्रदर्शयामास ललाटे तेजसां चयम् ॥४७॥
तत्र श्रीकम्भरालक्ष्मीं श्रीमद्गोपालकृष्णकम् ।
ब्रह्मरन्ध्रे परं धाम नैजं प्रादर्शयद्धरिः ॥४८॥
तत्र सिंहासनं दिव्यं स्थितं तस्मिन् हरिं तथा ।
सेवमानं च तं तत्र स्वं राजा संव्यलोकयत् ॥४९॥
ततः पुनश्च तत्सर्वमदृश्यं समजायत ।
कुंकुमवापिकाक्षेत्रे स्थितं तं बालरूपिणम् ॥५०॥
ददर्श राजा श्रीमन्तं सेवितं कोटिदेहिभिः ।
तत्रात्मानं नृपः पुनर्ददर्श निकटे स्थितम् ॥५१॥
अथ सर्वं क्षणात् लीनं नृपस्त्वाश्चर्यमाप्तवान् ।
ततः क्षणान्तरे नैजोटजां ददर्श शोभनाम् ॥५२॥
स्वस्थो भूत्वा दिशो नत्वा तुष्टाव ध्यानसंस्थितः ।
'ओं नमः श्रीनिवासाय मूलप्रकृतियामिने ॥५३॥
अजिताय च देवाय महात्मने नमोऽस्तु ते ।
अनाश्रिताय शान्ताय निःस्पृहाय नमोस्तु ते ॥५४॥
नम आद्याय देवाय सर्वदेवमयाय च ।
आर्षायाऽऽदिस्वरूपाय श्रीकृष्णाय च ते नमः ॥५५॥
अनन्तराय चैकाय सदा व्यक्ताय ते नमः ।
नमो गुप्ताय काशाय गुणेश्वराय ते नमः ॥५६॥
अतर्क्यायाऽप्रमेयाय चातुलाय च ते नमः ।
निश्चिन्ताय च पूर्वाय सनातनाय ते नमः ॥५७॥
पुराणाय नमस्तस्मै निर्गुणाय नमोऽस्तु ते ।
नमो जगत्प्रतिष्ठाय ब्रह्मनिष्ठाय ते नमः ॥५८॥
पद्मनाभाय योगाय गोविन्दाय नमो नमः ।
नमोऽस्तु सांख्यवेद्याय विश्वेश्वराय ते नमः ॥५९॥
हरये शिवरक्षाय नारायणाय ते नमः ।
परात्मनेऽमितदात्रेऽमितक्रमाय ते नमः ॥६०॥
शार्ङ्गचक्रगदापद्मशालिने ते नमो नमः ।
महोरगाय सिंहाय नमोऽस्तु वेदवासिने ॥६१॥
महामत्स्याय कान्ताय कच्छपाय च ते नमः ।
वामनाय च दीर्घाय चतुर्भुजाय ते नमः ॥६२॥
सिद्धचारणगन्धर्वसंस्तुताय नमो नमः ।
अच्युताय सकलाय नागेन्द्रशयनाय च ॥६३॥
दुग्धवर्णाय कृष्णाय हेमाभाय नमो नमः ।
पीताम्बराय दैत्यादिनाशनाय च ते नमः ॥६४॥
अक्षरायाऽक्षरेशाय नाभिपद्माय ते नमः ।
चतुर्मुखाय देवाय पञ्चवक्त्राय ते नमः ॥६५॥
क्षीरवासाय यशसे कान्तये वरदाय च ।
सर्वेश्वराय कान्ताय कामिनीशाय ते नमः ॥६६॥
वरेण्याय विघ्नहर्त्रे भक्तिप्रियाय ते नमः ।
पद्मायतसुनेत्राय शुकनासाय शार्ङ्गिणे ॥६७॥
योगेश्वराय वृक्षाय शाखिने ते नमो नमः ।
देवायनाय मुनये साधवे ते नमो नमः ॥६८॥
मोहिनीरूपभासाय जीववासाय ते नमः ।
वाराहाय नृसिंहाय शरभाय च ते नमः ॥६९॥

कूटस्थं सर्वहेतुं च पुरुषं च पुरातनम् ।
मायाकान्तं चेशकान्तं सर्वकान्तं नमाम्यहम् ॥७०॥
क्षेत्रज्ञं कालमायेशं व्यूहेशं मुक्तजीवकम् ।
वासुदेवं सतीकान्तं कृष्णनारायणं प्रभुम् ॥७१॥
कम्भरानन्दनं कृष्णं गोपालकृष्णबालकम् ।
परधामनिवासं तं पुमुत्तमं नमाम्यहम् ॥७२॥
ब्रह्मर्षयो ब्रह्मरूपं यं वदन्ति सनातनम् ।
अक्षरेशं च मुक्तेशं प्रपद्ये शरणं हरिम् ॥७३॥
श्रीवत्साऽङ्कं श्वेतपद्मरेखं त्रिगुणहारकम् ।
षोडशादिचिह्नशोभं प्रपद्ये शरणं पतिम् ॥७४॥
यत्र विश्वं यश्च विश्वे सर्वं यत्र प्रतिष्ठते ।
प्रभवं सर्वभूतानां दिव्यगुणं परेश्वरम् ॥७५॥
प्रपद्ये मुक्तसंगानां साधूनां परमां गतिम् ।
भगवन्तं चात्मवासं स्त्रीवासं पुष्करेक्षणम् ॥७६॥
शरण्यं शरणं भक्त्या प्रपद्ये भक्तवत्सलम् ।
अन्तकाले समागत्य प्रदर्श्यात्मानमेव यः ॥७७॥
नैजं धाम निजं भक्तं नयत्येव प्रभुः परः ।
तं नमामि परं देवं मोक्षदं पुरुषोत्तमम् ॥७८॥
पातालान्तं च सत्यादि सर्वं माति तु यत्र वै ।
महामायान्तकं सर्वं यस्मिन् माति जनार्दने ॥७९॥
धामानि मुक्तकोट्यश्च यस्मिन् मान्ति परेश्वरे ।
तं प्रपद्ये परं कृष्णं नारायणं श्रियः पतिम् ॥८०॥
न त्वां स्तोतुं तथा वेद्मि यथा त्वं वर्तसे प्रभो ! ।
स्वरूपं न यथार्थं च वेद्मि वेद्मि तटस्थकम् ॥८१॥
त्वया यत् कृष्ण कृपया कृष्णनारायणात्मकम् ।
रूपं प्रदर्शितं मह्यं तपः फलं कृपाफलम् ॥८२॥
धाम प्रदर्शितं चापि तथा कुंकुमवापिका ।
अश्वपट्टसरश्चापि दर्शितं लोमशाश्रमम् ॥८३॥
सर्वं पुनः पुनर्नाथ द्रष्टुमिच्छामि सेवया ।
प्रसन्नतां समिच्छामि तथा मे वरदो भव' ॥८४॥
इत्येवं संस्तुतोऽनादिश्रीमत्कृष्णनरायणः ।
सान्निध्यं चाजगाम द्राक् चक्रपद्मधरः प्रभुः ॥८५॥
प्रीतिमान् पुण्डरीकाक्षः शरणागतवत्सलः ।
प्रोवाच मधुरं तस्मै उदयाय महात्मने ॥८६॥
तव स्तोत्रेण च राजन् प्रसन्नोऽस्मि पुनः पुनः ।
सर्वमिष्टां च ते राजन् आर्यायनप्रसंगतः ॥८७॥
भविष्यत्यचिरात् क्षेत्रे मम वासोऽपि ते भवेत् ।
सन्नेष्ये त्वां मम क्षेत्रं वारुणेन पथा नृप ॥८८॥
ते योगान्मम योगाच्च नदीतीर्थं भविष्यति ।
इदं स्तोत्रं तु ये राजन् पठिष्यन्ति गृहे वने ॥८९॥
प्राप्स्यन्ति परमां सिद्धिं मम प्राप्तिस्वरूपिणीम् ।
अत्र तीर्थे धीरवीरसरोवरे तु ये जनाः ॥९०॥
पशवः पक्षिणः कीटा वृक्षवल्ल्यादिकास्तथा ।
जलपानं करिष्यन्ति मुक्तिं यास्यन्ति पावनीम् ॥९१॥
श्राद्धं दानं जपं होमं तर्पणं भोजनं जलम् ।
येऽत्र दास्यन्ति विधिना तेषां मुक्तिर्भविष्यति ॥९२॥
इत्युक्त्वा भगवान् भूपं चादृश्यभावमास्थितः ।
राजा जजाप बहुधा कृष्णनारायणं प्रभुम् ॥९३॥
जगौ ननर्त दध्यौ च जहास च रुरोद च ।
तस्थौ सिषेवे पुपूज ददर्श तं यथा तथा ॥९४॥
भृत्यान् वै प्रेषयामास नैजमुदयपत्तनम् ।
नागदेवं सुतं राज्यदानं समादिदेश च ॥९५॥
साधुवद्वर्तते स्माऽत्र राजा भागवतोत्तमः ।
रात्रौ सुतः श्रावणस्याऽष्टम्यां ववर्ष मेघराट् ॥९६॥
सरोवरं नदी कूपा जलाकाराः समुद्रवत् ।
अतिवृष्ट्या तदा जाता पर्णशाला जलान्तरे ॥९७॥
लयं याता जनाश्चापि जले मग्नाः शताऽधिकाः ।
अनादिश्रीकृष्णनारायणं सस्मरुरत्यति ॥९८॥
द्रागेव राधिके कृष्णनारायणो दयानिधिः ।
ययौ रक्षणकर्ता स नावमादाय शाश्वतीम् ॥९९॥
सहस्ररूपधारी च यत्र यत्र जले जनाः ।
निमग्ना बालवृद्धाद्या नरा नार्यः पशूत्तराः ॥१००॥
सर्वानुद्धारयामास नैकोऽपि मृतिमाप्तवान् ।
आययिनं महर्षिं च समाधिस्थं गतं जले ॥१०१॥
उद्धृत्य नावि भगवान् दधार करुणालयः ।
नद्यां मह्यां तु सा नौका स्थापिता परमात्मना १०२॥
शतद्वयाऽधिकान् तस्यां मग्नान् धृत्वा ररक्ष सः ।
पशून् पक्षिगणाँश्चापि ररक्ष जीवतस्तदा ॥१०३॥
राजा च मानवा सर्वे जीवन्तः श्रीनरायणम् ।
भेजिरेऽनन्यभावाश्च नौरास्ते जलमस्तके ॥१०४॥
जलोपरि वहत्येव शनैः कृष्णेन वाहिता ।
राधिके रक्षिता कृष्णस्तत्र का नाम वेदना ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उदयपुरनृपतेः चातुर्मास्ये धीरवीरसरोवरतटस्थितस्य प्रभोर्दर्शनं चातिवृष्ट्या जलमग्नत्वं प्रभुणा नावा रक्षा कृतेत्यादिनिरूपणनामा षष्टितमोऽध्यायः ॥ ६० ॥

श्रीकृष्ण उवाच—

श‍ृणु त्वं राधिके! नौश्च कृष्णनारायणान्विता।
शतद्वयमनुष्याऽधिवासिता च महीजले ॥ १ ॥
पूरवेगेन वहति भगवाँस्तां प्ररक्षति।
शनैः शनैर्महानद्यां मिलितानि जलानि च ॥ २ ॥
संगमे तु महानद्या भ्रमरेषु तु नौस्तदा।
मज्जनप्रवणा जलोपरि कृष्णेन रक्षिता ॥ ३ ॥
गुर्जरे सा नदी दीर्घा ह्यगाधा च भयंकरी।
पूरवेगेन च याता शतक्रोशं गता तदा ॥ ४ ॥
लूनापटाख्यनगरं नातिदूरे हि चागतम्।
ददृशुर्नौगताः सर्वे महाश्चर्यपरास्तदा ॥ ५ ॥
वनं चाग्रे तु ददृशुस्ततो नौः पूरवेगतः।
पञ्चाशत् क्रोशदूरं च उह्यमाना गता यदा ॥ ६ ॥

॥

सुवर्णजडितं देवैः पूजितं कृष्णरक्षितम्।
शतद्वयजनैर्युक्तं चाऽवातरत् सरोऽन्तिकम् ॥१९॥
जयशब्दाः स्वस्तिशब्दास्तनाऽभवन् मुहुर्मुहुः।
कुंकुमवापिकाक्षेत्रं सोत्साहं समदृश्यत ॥२०॥
सर्वैर्विलोकितं क्षेत्रं दृष्टं च कानकालयम्।
महाभागवतं श‍ृंगं मन्दिरस्योच्छ्रितं शुभम् ॥२१॥
दृष्टा च कम्भरालक्ष्मीर्दृष्टो गोपालकृष्णकः।
लोमशर्षिस्तथा दृष्टो नगरं च विलोकितम् ॥२२॥
विमानादवतेरुश्च कृष्णनारायणाऽन्विताः।
उदयाख्यस्तथा चान्ये भक्ता नारीनरात्मकाः ॥२३॥
तावद्विमानं च तिरोऽभवत् कृष्णविनिर्मितम्।
कृष्णनारायणश्चापि तिरोऽभवत्तु सार्थगः ॥२४॥
आश्चर्यं परमं प्राप्ता दृष्ट्वा चादृश्यरूपताम्।
यात्राकराश्च ते सर्वे जनान् पृष्ट्वा पुनः पुनः ॥२५॥
ययुर्देवालयं यत्र बालकृष्णो विराजते।
कृत्वा संदर्शनं सर्वे कृष्णेनाऽनेन रक्षिताः ॥२६॥
स्मृत्वैवं हर्षनिभृताः प्रेमाऽश्रूणि ह्यवासृजन्।
बालकृष्णो ददौ तेभ्यो निवासार्हं महालयम् ॥२७॥
सर्वोपस्करसंयुक्तं दासदासीविराजितम्।
सर्वे तीर्थानि विधिवच्चक्रुश्चाऽश्वसरोऽभितः ॥२८॥
ततो मिष्टान्नपानानि ददौ श्रीभगवान् स्वयम्।
भक्ष्यभोज्यानि लेह्यानि चोष्याणि च रसाँस्तथा ॥२९॥
मुखवासादिचूर्णानि उपमृद्यानि यानि च।
दापयामास भगवान् कृपया भक्तवत्सलः ॥३०॥
ररक्ष भगवान् सर्वान् चातुर्मास्यान्तमेव च।
लोमशोऽपि ददौ तेभ्यो मन्त्रं स्रजश्च तौलसीः ॥३१॥
प्राप्य ते वैष्णवं दिव्यं तेजः श्रीपतिसन्निधौ।
दिव्या दिव्यगुणोपेता बभूवुः कृष्णवीक्षिताः ॥३२॥
ज्ञात्वा प्रत्यक्षमेवैनं बालकृष्णं महाप्रभुम्।
परब्रह्म सुखावासं भेजुस्तं परमेश्वरम् ॥३३॥
लोमशस्तान् प्रत्यहं चोपादिदेश मुक्तये।
प्राह श‍ृण्वन्तु रुचिरं श्रेयःसाधनमुत्तमम् ॥३४॥
सर्वे यस्याऽस्ति शरीरं सर्वेषु वर्तते च यः।
तस्य स्तोत्रेण संसाराद् रक्षा भवति शाश्वती ॥३५॥
तमेनं कथयाम्यद्य स्तवं कृष्णपरायणम्।
'बालकृष्णोऽस्तु मे प्राच्यां चक्रहेतिः परेश्वरः ॥३६॥
गदाधरो बालकृष्णो दक्षिणे मेऽस्तु सर्वदा।
पश्चिमे शार्ङ्गधृक् कृष्णनारायणोऽस्तु मे सदा ॥३७॥

उत्तरे खड्गधृक् कृष्णनारायणोऽस्तु मे सदा ।
कोणेष्वस्तु हृषीकेशो मध्ये मध्ये जनार्दनः ॥३८॥
पृथ्व्यां वराहरूपोऽस्तु व्योम्नि नरहरिः प्रभुः ।
क्षुरधाराऽतितीक्ष्णं च सुदर्शनं समन्ततः ॥३९॥
प्रेतभूतान् प्रहन्त्वेव राक्षसाँश्च निशाचरान् ।
गदा सहस्रधारोर्ध्वं हन्तु वृकान् पिशाचकान् ॥४०॥
शार्ङ्गं धनुर्हरेरस्तिर्यक्कुष्माण्डादीन् प्रहन्तु च ।
यक्षान् दैत्यान् जृम्भकाँश्च खगान् क्रूरान् विनायकान् ॥४१॥
शंखो विष्णोर्निनादेन हन्तु दुष्टाँश्च पन्नगान् ।
सिंहान् व्याघ्रान् शरभाँश्च दन्दशूकान् पशूँस्तथा ॥४२॥
विष्णोः पद्मं मम शत्रून् सौम्यान् दधातु गन्धतः ।
चित्तवृत्तिहरान् स्मृत्याहरान् बलौजसां हरान् ॥४३॥
सम्पद्रोगहराँश्चापि शुभलक्षणहारकान् ।
स्त्रीपुत्रधनसदनहरान् प्रशामयत्वपि ॥४४॥
हरेः संकीर्तनाचाऽस्तु स्वास्थ्यमैन्द्रियकं मम ।
बुद्धिस्वास्थ्यं मनःस्वास्थ्यं देहस्वास्थ्यं सुखावहम् ॥४५॥
पृष्ठे चाग्रे पार्श्वयोश्च कोणेष्वस्तु हरिर्मम ।
शिखायां मे नखेष्वेषः चर्मस्वस्तु हरिर्मम' ॥४६॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इत्येवं राधिके ! रक्षास्तोत्रं श्रीलोमशो मुनिः ॥४७॥
ददौ सर्वेभ्य एवादौ ततः प्राह निदर्शनम् ।
वटासीनपुरे राजा क्रूरसिंहोऽभवत्पुरा ॥४८॥
देवद्विजसतीद्रोग्धा पिशुनः क्षत्रियाधमः ।
परपीडाकरः क्षुद्रो नैसर्गेण च निर्दयः ॥४९॥
धर्मदानविहीनश्च सतां सेवाविवर्जितः ।
आयुःक्षये स वै जज्ञे वने घोरनिशाचरः ॥५०॥
यो यो मिलति चारण्ये पशुः पक्षी च मानवः ।
भक्षणीयो मारणीय इति क्रौर्यं करोति सः ॥५१॥
यं यं पश्यति पश्वादिं तं तमादाय स द्रुतम् ।
खादत्येव दयाहीनो बाहुगोचरमागतम् ॥५२॥
एवं याते दीर्घकाले वार्धक्यं समभूत्ततः ।
अटमानस्य दुष्टस्य नर्मदायास्तटे क्वचित् ॥५३॥
तस्य दृष्ट्यां तापसो वै ऋषिर्योगपरायणः ।
नाम्ना जितश्रवा विप्रश्चाऽऽगतः संजितेन्द्रियः ॥५४॥
दृष्ट्वा तं खादितुं तूर्णं दुद्राव राक्षसेश्वरः ।
उक्तां रक्षां द्विजस्तूर्णं समुवाच पुनः पुनः ॥५५॥
श्रुत्वा स्तब्धोऽभवत्तूर्णं जडीभूतो हि राक्षसः ।
नाऽग्रे यातुं चाऽपसर्तुं शशाक स्तोत्रधर्षितः ॥५६॥
निर्धूतवेगः सहसा तस्थौ तत्रैव राक्षसः ।
यावद् द्विजस्य जपतो दिनान्तः समपद्यत ॥५७॥
ततो जप्यावसाने च तं ददर्श निशाचरम् ।
दीनं हतबलोत्साहं कान्दिशिकं हतौजसम् ॥५८॥
कृपापूर्णो द्विजो दैत्यं समाश्वास्य पुनः पुनः ।
पप्रच्छ कारणं रक्षोभावे चागमने तथा ॥५९॥
राक्षसः पूर्ववृत्तान्तं रक्षोभवनमित्यपि ।
भक्षणार्थं चागमश्चेत्येवं सर्वमुवाच ह ॥६०॥
प्रसीदेत्यब्रवीद् विप्रं निर्विण्णः सुखवर्जितः ।
बहुपापानि कृतवान् हतवाँश्च बहून् सतः ॥६१॥
बह्वीर्नारीः प्रसह्यैव भुक्तवान् विधवा अपि ।
अनागसां च सत्त्वानां प्रक्षयं कृतवान् बहुम् ॥६२॥
मद्यमांसानि बहुधा भुक्तवानपि सर्वदा ।
तस्मात् पापादहं मोक्षमिच्छामि त्वत्प्रसादतः ॥६३॥
तत्पापप्रशमायाऽलं कुरु मे धर्मसाधनम् ।
पापस्याऽस्य क्षयकरं मोक्षदं कुरु सत्वरम् ॥६४॥
निशाटस्य वचः श्रुत्वा जितश्रवा उवाच तम् ।
मम रक्षा कृता चाऽत्र मया तेऽपि पवित्रता ॥६५॥
मुमुक्षुता कृता रक्षो याहि कुंकुमवापिकाम् ।
सौराष्ट्रे श्रीकृष्णनारायणस्याऽश्वसरोवरे ॥६६॥
स्नात्वा श्रीलोमशं गत्वा प्रार्थनां कुरु सर्वथा ।
उद्धारं ते लोमशो वा विप्रश्चान्यः करिष्यति ॥६७॥
एवमुक्त्वा ययौ विप्रो राक्षसो व्योममार्गतः ।
आगतः कुंकुमवापीक्षेत्रे चाम्रवणेऽवसत् ॥६८॥
कथं मोक्षो भवेन्मेऽत्र चिन्तया दीनमानसः ।
न चखाद स सत्त्वानि क्षुधासंबाधितोऽपि सन् ॥६९॥
दशमे दशमे काले जन्तुमेकमभक्षयत् ।
व्याघ्रारण्ये ह्यटित्वा च पुनश्चाम्रवणेऽगमत् ॥७०॥
स कदाचिन्महावृष्टौ वनेऽटन् क्षुधितोऽभवत् ।
ददर्श फललाभार्थमागतं ब्रह्मचारिणम् ॥७१॥
ब्रह्मप्रकाशनामानं धर्षयामास राक्षसः ।
ब्रह्मचारी तदा त्वेनं राक्षसं प्राह सामतः ॥७२॥
वद किं कारणं त्वत्र धर्षणे मे वनेचर ! ।
राक्षसः प्राह भोज्यं मे काले भवति चाऽष्टमे ॥७३॥
स त्वं प्राप्तः क्षुधितस्य निष्ठुरस्याऽत्र मे वने ।
ब्रह्मचारी तु तं प्राह शृणु मे वचनं शुभम् ॥७४॥
फलानि गुरवे दातुं गच्छाम्यहं निशाचर ! ।
तद्दत्वाचागमिष्यामि भक्ष्यश्चेदस्मि ते न्वहम् ॥७५॥

स त्वं मुहूर्तमात्रं मामत्रैवाऽनुप्रपालय ।
निवेद्य गुरवे यावदिहाऽऽगच्छामि भक्षय ॥७६॥
निशाचरस्तदा प्राह याहि किन्तु हितं शृणु ।
गुरवे वद मे मोक्षो यथा स्यात् तत् करोतु चेत् ॥७७॥
त्वां न वै भक्षयिष्येऽहं यदर्थोऽहं समागतः ।
गुरोर्यन्न विरुद्धं स्यान्न च धर्मोपरोधकम् ॥७८॥
यन्न व्रतहरं तेऽपि तथा मन्मोक्षणं कुरु ।
मया निसर्गतो ब्रह्मन् जातिदोषाद्विशेषतः ॥७९॥
विषयाढ्येन चित्तेन पापकर्म सदाऽर्जितम् ।
आबाल्यान्मम धर्मे तु मन आसीन्न वै मनाक् ॥८०॥
अधार्मिकानि कर्माणि कृतान्येव विशेषतः ।
नर्मदायास्तटे प्राप्तविप्रेण प्रेषितोऽत्र वै ॥८१॥
पापक्षालनकामार्थे समागतोऽस्मि भावतः ।
तत्र त्वं मिलितो मेऽत्र पापान्मोक्षय मेऽनघ ॥८२॥
इत्युक्तो ब्राह्मणः प्राह गुरोर्योगादहं तव ।
प्रज्वाल्य सर्वपापानि करिष्ये मोक्षणं ध्रुवम् ॥८३॥
यदि शुश्रूषितो वह्निर्गुरोः शुश्रूषणादनु ।
व्रतानि वा सुचीर्णानि मोक्षो भवतु रक्षसः ॥८४॥
यद्यहं पितरं देवं गुरुं च मातरं हरिम् ।
गौरवेणाऽभिवन्दामि मोक्षो भवतु रक्षसः ॥८५॥
यद्यहं मनसा वाचा कर्मणा च गुरुं हरिम् ।
नाऽवमाने योजयामि मोक्षो भवतु रक्षसः ॥८६॥
जप राक्षस देवेशं श्रीकृष्णं पुरुषोत्तमम् ।
हरिकृष्णं हृषीकेशं वासुदेवं जनार्दनम् ॥८७॥
प्रणतोऽस्मि जगन्नाथं स च मोक्षं दधातु मे ।
चराचरगुरुं नाथं कृष्णनारायणं प्रभुम् ॥८८॥
शंखिनं चक्रिणं शार्ङ्गधारिणं ध्वजिनं हरिम् ।
प्रणतोऽस्मि पतिं लक्ष्म्याः स च मोक्षं दधातु मे ॥८९॥
दामोदरं पुण्डरीकनेत्रं च शेषशायिनम् ।
प्रणतोऽस्मि च गोविन्दं स च मोक्षं दधातु मे ॥९०॥
नारायणं नरं पृथ्वीधरं धामाधिवासिनम् ।
प्रणतोऽस्मि प्रभानाथं स च मोक्षं दधातु मे ॥९१॥
श्रीवत्सवक्षसं श्रीशं श्रीमत्पारवतीपतिम् ।
प्रणतोऽस्मि रमाकान्तं स च मोक्षं दधातु मे ॥९२॥
यतयो यं चिन्तयन्ति राधा रञ्जयति प्रभुम् ।
समस्तालम्बनमूर्तिं तमस्मि शरणं गतः ॥९३॥
परब्रह्माऽसंख्यगोपीपतिं श्रीकम्भरासुतम् ।
सर्वाधारं सर्वगं च तमस्मि शरणं गतः ॥९४॥
परमात्मानमात्मस्थं कर्मक्षालनशक्तिकम् ।
पुनर्भवप्रभेत्तारं तमस्मि शरणं गतः ॥९५॥
ईशान् देवानृषीन् पितॄन् मानवाँश्च सरीसृपान् ।
पादपान् जलजान् स्वेदोद्भवान् सृजति रक्षति ॥९६॥
ब्रह्मरूपधरं जगद्योनिं त्रातारमच्युतम् ।
गोपालकृष्णबालं च तमस्मि शरणं गतः ॥९७॥
यज्ञेशं चान्तकं सर्वान्तर्यामिणं परेश्वरम् ।
यस्मान्नान्यत्परं किञ्चित् तमस्मि शरणं गतः ॥९८॥
शुभाऽशुभानि कार्याणि जन्मान्तरकृतानि मे ।
अनादिश्रीकृष्णनारायणस्तानि व्यपोहतु ॥९९॥
यन्निशायां च यत्प्रातर्यन्मध्याह्नाऽपराह्णयोः ।
सन्ध्ययोश्च कृतं पापं तन्मे सर्वं प्रणश्यतु ॥१००॥
यत् तिष्ठता यद् व्रजता यच्च शय्यागतेन वै ।
कृतं दुःखकरं कर्म कायेन मनसा गिरा ॥१०१॥
अज्ञानतो ज्ञानतो वा मदात् चलितचेतसा ।
तत् क्षिप्रं विलयं यातु बालकृष्णस्य कीर्तनात् ॥१०२॥
परदारपरद्रव्यवाञ्छाद्रोहोद्भवं च यत् ।
महात्मनां प्रनिन्दां च कुर्वता परदुःखदाम् ॥१०३॥
कृतं पापं मर्मभेदिवचसा तत् प्रणश्यतु ।
यच्च भोज्ये तथा पेये भक्ष्ये चोष्ये विलेहने ॥१०४॥
यद्बाल्ये यच्च कौमार्ये यत्पापं यौवने मम ।
वयःपरिणतौ यच्च यच्च जन्मान्तरे कृतम् ॥१०५॥
तदनादिकृष्णनारायणेतिजपकीर्तनात् ।
प्रयातु विलयं सद्यो मोक्षदस्य प्रभावनात् ॥१०६॥
अनादिश्रीकृष्णनारायणाय हरये नमः ।
कम्भराश्रीनन्दनाय बालकृष्णाय ते नमः ॥१०७॥
श्रीमद्गोपालकृष्णस्य बालकाय नमो नमः ।
एतद्भद्र मयाऽऽख्यातं तव पातकनाशनम् ॥१०८॥
स्वर्गदं मोक्षदं दिव्यं स्तोत्रं यद्गुरुणोदितम् ।
अनेन बालकृष्णं त्वं समाराधय राक्षस ! ॥१०९॥
प्रत्यहं त्वं स्तवेनाऽनेनाऽपि स्मृत्वा च लोमशम् ।
गुरुं तथा परब्रह्म श्रीकृष्णपुरुषोत्तमम् ॥११०॥
स्तुत्वा भक्तिं दृढां कृत्वा ततः पापात् प्रमोक्ष्यसे ।
स्तुतो भक्त्या भक्तवशः सर्वपापहरो हरिः ॥१११॥
श्रुत्वैवं राक्षसः प्राह नय मां लोमशाश्रमम् ।
प्रदर्शय गुरुं कृष्णनारायणं प्रमोक्षदम् ॥११२॥
इत्युक्तो ब्रह्मचारी तं क्रूरसिंहाय रक्षसे ।
ददौ रक्षाकरं स्तोत्रं तेन पापविवर्जितः ॥११३॥

जातस्ततो ययौ साकं तेनैव ब्रह्मचारिणा ।
ममाश्रमं लोमशाख्यं चात्रागत्य स राक्षसः ॥११४॥
पापहीनो ह्यभूत् तूर्णं कृष्णनारायणान्तिकम् ।
गत्वा च दर्शनं लब्ध्वा प्रपीत्वा चरणामृतम् ॥११५॥
कृत्वा तीर्थानि सर्वाणि दिव्यदेहो बभूव ह ।
दिव्यं यानं समारुह्य ययावक्षरधाम सः ॥११६॥
यूयमार्यायनाद्याश्च जलप्रलयरक्षिताः ।
भजत श्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥११७॥
मरणात्तारिता येन संसारात् तारयिष्यति ।
तारकं चाश्रयतास्माच्छ्रीपतिं पुरुषोत्तमम् ॥११८॥
इत्युक्त्वा श्रीहरिं स्मृत्वा मौनं तस्थौ हि लोमशः ।
आर्यायनोदयाद्याश्च शान्तिं श्रेष्ठां सुलेभिरे ॥११९॥
स्तोत्रपाठश्रवणाद्यैर्मुक्तिः रक्षाऽऽपदां क्षयः ।
मोक्षश्च राधिके शान्तिः सर्वं स्यान्नात्र संशयः ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जलमग्नान् शतद्वयमानवान् नावि गृहीत्वा प्रभुर्महीनदी-द्वारा स्तंभाखातमुल्लंघ्य सोमनाथं स्वर्णपुरं चमत्कारपुरादि च प्रदक्षिणीकृत्य नौकात्मकविमानद्वारा कुंकुमवापीक्षेत्रं प्रापयामास, लोमशोपदिष्टरक्षास्तोत्रं, क्रूरसिंहस्य रक्षसो विप्रद्वारा श्रीकृष्णनारायणप्राप्त्या मुक्ति-श्चेतिनिरूपणनामैकषष्टितमोऽध्यायः ॥ ६१ ॥

श्रीकृष्ण उवाच—

राधिके ते नरा नार्यः द्वेशते वै श्रीलोमशम् ।
नत्वा सम्पूज्य भावेन कोट्यर्बुदाऽब्जकन्यकाः ॥ १ ॥
कृष्णकान्ताश्च सम्पूज्य ययुर्वासालये शुभे ।
भेजुः श्रीमत्कृष्णनारायणं श्रीपुरुषोत्तमम् ॥ २ ॥
कोटिकन्यापते कृष्णनारायण जगत्प्रभो ।
सर्वपते सदा पाहि निराधारान् त्वदाश्रितान् ॥ ३ ॥
इत्येवं तु मिलित्वैव भजनं ता व्यधुर्मुदा ।
कृष्णनारायण विष्णो बालकृष्ण प्रभापते ॥ ४ ॥
राधालक्ष्मीपते मञ्जुपते श्रीपार्वतीपते ।
एवं सतालधून्यं च चक्रुस्ते नौप्ररक्षिताः ॥ ५ ॥
चातुर्मास्यं तत्र चक्रुः कृष्णभक्तिसमन्विताः ।
अथोर्जकृष्णपक्षीयाऽष्टमी समागता तिथिः ॥ ६ ॥
इष्टदेवस्य प्राकट्योत्सवश्चाष्टमवर्षजः ।
देवैरीशैश्च मुनिभिः कृतः स्वर्गातिशोभितः ॥ ७ ॥
वीक्ष्य तं हर्षमापन्नाः पूजां चक्रुर्हरेस्तु ते ।
तदाश्चर्यं परं जातं राधिके शृणु वच्मि ते ॥ ८ ॥
राजाधिराजो भगवान् प्रातरेव प्रपूजितः ।
ददौ दानानि बहूनि स्वजन्माष्टमवर्षके ॥ ९ ॥
भोजयामास विप्रांश्च साधून् साध्वीश्च बालिकाः ।
बालान् कन्याश्च दीनांश्चाऽनाथान् कुमारकांस्तथा ॥१०॥
खञ्जान् काणांश्च बधिरान् वृक्णानन्धान् जडांस्तथा ।
विचित्तान् कुष्ठिनश्चापि देशेभ्यो तीर्थमागतान् ॥११॥
रोगिणो देहिनो वीक्ष्य दयालुर्भगवान् स्वयम् ।
प्राह खञ्जादिकान् व्यंगान् मध्याह्ने भोजनोत्तरम् ॥१२॥
आयान्तु व्यंगदेहाश्च रोगिणो दुःखिनस्तथा ।
आयान्तु चांगविकलाश्चेन्द्रियैर्विकला अपि ॥१३॥
अनादिश्रीकृष्णनारायणोऽहं मे जनूत्सवे ।
अपूर्वं सुखदं वोऽद्य ददामि पारितोषिकम् ॥१४॥
इत्युक्त्वा शर्कराद्रोणीं पार्श्वे कृत्वा तु कानके ।
गजासने निषसाद प्रदातुं शर्करास्ततः ॥१५॥
आययुः खञ्जलोकाश्च तेभ्यो दत्वा सुशर्कराः ।
खञ्जभागे हरिकृष्णः पस्पर्श वामपाणिना ॥१६॥
खाञ्ज्यं तेषां गतं तूर्णं बभवुः पूर्णपादिनः ।
अथ काणाः प्राययुश्च तेभ्यो दत्वा तु शर्कराः ॥१७॥
नेत्रे पस्पर्श वामेन पाणिनाऽऽन्धविमुक्तये ।
काणत्वमान्ध्यमाल्प्यं दृग्दोषा नष्टा द्रुतं तदा ॥१८॥
पूर्णरश्मिभराण्येव चक्षूंषि वर्तितानि वै ।
अथाऽऽययुर्बधिराश्च तेभ्यो दत्वा च शर्कराः ॥१९॥
कर्णे पस्पर्श हस्तेन समाजुहाव नामभिः ।
बाधिर्यं विगतं तेषां बभूवुः श्रुतिशक्तयः ॥२०॥
अथ वृक्णाः समायातास्तेभ्यो दत्वा च शर्कराम् ।
कुणिकासु प्रकोष्ठेषु चांगुलीषु नरायणः ॥२१॥
पस्पर्श पाणिना तेषां वृक्णत्वं व्यनुदत् क्षणात् ।
यथानिसर्गहस्तास्तेऽभवन् प्रसन्नमानसाः ॥२२॥
अथ जडा विचित्ताश्च समाययुश्च सन्निधौ ।
तेभ्यो दत्ता शर्करा च स्पृष्टा देहाः करेण वै ॥२३॥
मस्तकानि तथा स्पृष्ट्वा जाड्यं वैचित्यमित्यपि ।
वातरोगादिकं चापि वैनिद्र्यं नाशितं क्षणात् ॥२४॥
अथाऽऽययुश्च रुग्णाश्च कुष्ठिनश्च समाययुः ।
तेभ्यो दत्वा शर्कराश्च तथा च चरणामृतम् ॥२५॥
जलेन प्रोक्ष्य चांगानि रोगान् कुष्ठान् व्यनीनशत् ।
अथाऽऽययुश्च पक्षादिघातिनो भग्नदेहिनः ॥२६॥

तेभ्यो दत्वा शर्कराश्च पस्पर्शं च करेण तान् ।
धातरोगं कृपया च नाशयामास तत्क्षणम् ॥२७॥
भग्नभागं च तूर्णं संरोहयामास योगतः ।
गलत्कुष्ठास्ततो लोकाश्चायाताः परमेश्वरम् ॥२८॥
हरिस्तेभ्यः प्रदायैव शर्करा जलसेचनम् ।
गलत्कुष्ठप्रदेशे च स्वयं चकार तेन वै ॥२९॥
गलद्भावो गतः सर्वः श्वैत्यं श्वैत्र्यं गतं क्षणात् ।
अरोगास्ते तु सञ्जाताः प्रसन्नाः पुण्यशालिनः ॥३०॥

अथ षण्ढास्तदा प्राहुर्बहुपापेन षण्ढता ।
जाताऽस्माकं कृपासिन्धो भवान् श्रीपुरुषोत्तमः ॥३१॥
कर्तुमकर्तुं चाऽन्यथाकर्तुं शक्तः प्रवर्तते ।
भगवद्योगमात्तानां चेन्नोऽस्माकं सबीजता ॥३२॥
जायेत भगवँस्तर्हि को लाभस्तव दर्शनात् ।
श्रुत्वा तेभ्यः प्रदायैव शर्कराः श्रीहरिः स्वयम् ॥३३॥
अश्वपट्टसरस्येव स्नातुमाज्ञां ददौ ततः ।
सर्वे षण्ढा ययुस्तूर्णं सस्नुश्चाऽथ विनिर्ययुः ॥३४॥
नरप्रख्या नराः पुंस्त्वे नारीयोग्या बलान्विताः ।
नरचिह्ना नराः पूर्णाः सबीजा बभूवुस्तदा ॥३५॥
नारीप्रख्याः स्त्रियः स्त्रीत्वे नरयोग्या रजोऽन्विताः ।
नारीचिह्नाः स्त्रियः पूर्णा बभूवुश्च रजोभराः ॥३६॥
एवं वै कृपया कृष्णनारायणः स्वशक्तिभिः ।
षण्ढानि विदधे पुंसो योषितश्च सधातुकाः ॥३७॥
एवं दृष्ट्वा चमत्कारं परमाश्चर्यमागताः ।
यत्र स्नाताश्च तत् तीर्थं षण्ढोद्धारं समुच्यते ॥३८॥

अथ नार्यो नराः स्तोत्रं सर्वे चक्रुर्हरेस्तदा ।
प्रेमपूर्णहृदयाश्च स्थिरमानसवृत्तयः ॥३९॥
नमोऽस्तु ते परे धाम्नि राजते वै परात्मने ।
नमोऽसंख्यसतीसाध्वीसाधुमुक्ताभिशासिने ॥४०॥
नमोऽक्षराऽधिपतयेऽक्षरमुक्ताऽभिशासिने ।
नमो गोलोकवासाय गोपगोप्यभिशासिने ॥४१॥

गवां नाथाय कृष्णाय श्रीराधापतये नमः ।
नमो वैकुण्ठवासाय श्रीरमापतये नमः ॥४२॥
बहुवैकुण्ठनाथाय लक्ष्मीश्रीपतये नमः ।
श्रीप्रभामंजुलाहंसासगुणास्वामिने नमः ॥४३॥
वृन्दातुलसीकमलापार्वतीपतये नमः ।
नमस्तेऽस्तु जगन्नाथ वासुदेव नमोऽस्तु ते ॥४४॥
श्रीनिवास नमस्तेऽस्तु विश्वक्सेन नमोऽस्तु ते ।
गरुडध्वज गोपीश विष्णो वैकुण्ठ ते नमः ॥४५॥

पुरुषोत्तम देवेश सर्वेश्वर नमोऽस्तु ते ।
अनाद्याद्यन्तमध्यान्त नमस्ते पद्मजप्रिय ॥४६॥
सृष्टिगर्भ नमस्तुभ्यं शत्रुञ्जय नमोऽस्तु ते ।
नमो हिरण्यरूपाय कालनेत्राय ते नमः ॥४७॥
महानाभ महामूल मूलावास नमोऽस्तु ते ।
धर्मावास हृदावास शुचिश्रवः पृथुश्रवः ॥४८॥
धर्माध्यक्ष प्रजाध्यक्ष कालाध्यक्ष नमोऽस्तु ते ।
गदाधारिन् पद्मधारिन् श्रुतिप्रश्न नमोऽस्तुते ॥४९॥

श्रियोधर वनमालाधर कृष्ण नमोऽस्तुते ।
पुरुष्टुत महाकल्प सर्वात्मँस्ते नमो विभो ॥५०॥
द्वादशात्मक कालात्मन् सामात्मन् परमेश्वर ।
व्योमार्कात्मक चन्द्रात्मन् सर्वसूक्ष्म नमोऽस्तु ते ॥५१॥
नीलकेश गुडाकेश महाकेश नमोऽस्तु ते ।
मञ्जुकेश हृषीकेश सर्वकेश नमोऽस्तु ते ॥५२॥
श्वेत रक्त तथा पीत चित्र कृष्ण नमोऽस्तु ते ।
कुशेशय प्रीतिकर्तर्गोविन्द हंस ते नमः ॥५३॥

नमस्ते धर्मनेत्राय सहस्रांगाय ते नमः ।
नमस्ते विश्वरूपाय धामरूपाय ते नमः ॥५४॥
न्यग्रोधाय पिप्पलाय महाशाखाय ते नमः ।
स्कन्धपत्रांकुरलतापल्लवाय नमोऽस्तु ते ॥५५॥
त्वं वै वेदमयो विष्णुस्तीर्थदेवमती विभुः ।
भूर्भुवःस्वःस्वरूपस्त्वं यज्ञभागभुजे नमः ॥५६॥
परब्रह्म नमस्तेऽस्तु शब्दब्रह्म नमोऽस्तु ते ।
विद्या त्वं वेद्यरूपस्त्वं वन्दनीय नमोऽस्तु ते ॥५७॥

नारीवाणीस्वरूपस्त्वं नरे दयास्वरूपकः ।
पुत्रे वात्सल्यभावस्त्वं त्वां वयं शरणं गताः ॥५८॥
उद्धारं कुरु संसाराद् भगवन् परमेश्वर ।
इत्युक्त्वा मौनमासेदुस्ततश्चार्यायनो मुनिः ॥५९॥
तुष्टाव परया प्रीत्या श्रीकान्तं पुरुषोत्तमम् ।
मत्स्यं नमस्ये कूर्मं च नमस्ये हयशीर्षकम् ॥६०॥

त्रिविक्रमं नमस्ये च नमस्ये माधवं प्रभुम् ।
ईशानं च हृषीकेशं नमस्ये च कुमारिलम् ॥६१॥
नारायणं नमस्येऽहं नमस्ये गरुडध्वजम् ।
नरसिंहं नमस्ये च नमस्ये कामपालिनम् ॥६२॥
पुण्डरीकनिभनेत्रं नमस्ये श्रीनरायणम् ।
नमस्ये ध्वजचक्राऽब्जधनुर्मीनसुशूलिनम् ॥६३॥
गोपतिं कम्भरापुत्रं विभुं गोपालनन्दनम् ।
नमस्ये च गदापाणिं चाश्वपट्टसरःस्थितम् ॥६४॥

अर्धनारीश्वरं नाथं नारीवृन्दसुखप्रदम् ।
नमस्ये पद्महस्तं च पद्मसक्थिनमित्यपि ॥६५॥
नमस्ये पद्मकिरणं तथोर्ध्वरेखपत्तलम् ।
लक्ष्मीप्रतिमजघनं नमस्ये वनमालिनम् ॥६६॥
नमस्ये धरणिनाथं नमस्येऽहं श्रियः पतिम् ।
अनाथनाथ नौकास्थ विमानस्थ च ते नमः ॥६७॥
हृत्स्थ भक्तविहारस्थ दीनरक्षास्थ ते नमः ।
त्रिणाचिकेतं ब्रह्माणं नमस्ये च महौजसम् ॥६८॥
सर्वामयविनाशं च नमस्ये प्राणतर्पणम् ।
नमस्ये रुक्मकवचं नमस्ये पुरुषोत्तमम् ॥६९॥
वनस्पतिं मधुपतिं नमस्ये च सुधापतिम् ।
वासुदेवं चक्रपाणिं नमस्ये च यशोधनम् ॥७०॥
सर्वभूतगतं शान्तं धर्ममूर्तिं परेश्वरम् ।
नमस्ये मोक्षदं नाथं शरण्यं शरणं व्रजे ॥७१॥
एवं तुष्टाव देवेशं श्रीमान् आर्यायनो मुनिः ।
ततः पूजापरिहारं चक्रुः सायं सुरा नराः ॥७२॥
आर्यायनो मुनिस्तत्र समुवाच तटे सदा ।
नावा चोत्तरिता ये च नरा नार्यश्च ते हरिम् ॥७३॥
प्रार्थयामासुरत्यर्थं निजदेशान् विलोकितुम् ।
कार्तिकान्ते हरिस्तत्र सस्मार यानमुत्तमम् ॥७४॥
दिव्यं दिव्यगुणोपेतं विमानं तत्र चागतम् ।
निषाद्य तत्र सर्वास्तान् व्योम्ना क्षणेन वेगतः ॥७५॥
प्रापयामास भगवान् धीरवीरसरोवरम् ।
अरवल्लीशैलभूमौ यत्र यत्र च जन्मभूः ॥७६॥
तत्र तत्र प्रापितास्ते नरा नार्यः सुखात्तदा ।
स्वस्वगृहं गताः सर्वे कुटुम्बं जगदुर्वृत्तम् ॥७७॥
साश्चर्यास्ते हरिं भेजुरनादिश्रीनरायणम् ।
अथ श्रीभगवाँस्तूर्णं तिरोऽभवत् सयानकः ॥७८॥
समाययौ चाश्वपट्टसरो नैजालयं शुभम् ।
उदयाख्यश्च राजर्षिरश्वपट्टसरोवरे ॥७९॥
जपयज्ञं चकारैव हरेर्नामपरायणः ।
अनादिश्रीकृष्णनारायणं प्राह हृदा पुनः ॥८०॥
मोक्षं देहि कृपासिन्धो शाश्वतं पदमाप्नुयाम् ।
तथाऽस्त्विति हरिः प्राह राजा ध्यानं चकार ह ॥८१॥
लीननाडीप्राणवेगः शनैः प्राणान् जहौ तदा ।
दिव्यमुक्तो बभूवाऽथ विमानेन सुवर्चसा ॥८२॥
ययौ श्रीमत्परं धाम सच्चिदानन्दलक्षणम् ।
एवं श्रीमत्कृष्णनारायणस्तानुद्दधार ह ॥८३॥
खञ्जबधिरकाणाद्या ये ये जाताः सुदेहिनः ।
ते ते गत्वा निजं देशं गृहं सुखेन संस्थिताः ॥८४॥
तान् दृष्ट्वाऽऽश्चर्यमापन्नाः प्रजा जनाश्च दर्शकाः ।
प्रतापं परमं मत्वा भेजिरे पुरुषोत्तमम् ॥८५॥
कृष्णनारायण विष्णो परब्रह्म श्रियः पते ।
इत्येवं भजनं चक्रुः स्वामिन् रक्षय सर्वदा ॥८६॥
श्रीहरिस्तान् दूरगाँश्च स्वप्ने स्वं समदर्शयत् ।
किशोरं सुन्दरं रूपं ददृशुस्तेऽतिभासुरम् ॥८७॥
तत्र लीनाः क्षणमात्रं चाऽभवँस्ते ततः पुनः ।
प्रबुद्धाः सस्मरुर्नारायणं गोपालबालकम् ॥८८॥
आययुर्दर्शनार्थं च कुंकुमवापिकालयम् ।
सहस्रशो नरा नार्यः समाजग्मुः समन्ततः ॥८९॥
ददृशुर्यादृशं दृष्टं स्वप्ने रूपं तु तादृशम् ।
अर्चयामासुरत्यर्थं सर्वभावेन श्रीपतिम् ॥९०॥
तीर्थं विधाय बहुधा प्राप्य मन्त्रं च लोमशात् ।
ययुर्नैजान् प्रदेशाँश्च वैष्णवा भगवत्प्रियाः ॥९१॥
चातुर्मास्यव्रतिनो ये तत्राऽऽयान्ति सरोवरम् ।
स्नातुं तेभ्यो हरिः साक्षाद् दर्शनं स्वं ददाति वै ॥९२॥
वृद्धान् पूर्णायुषो दिव्यान् कृत्वा विमानसंस्थितान् ।
प्रहिणोति निजं धामाऽक्षरं च परमं पदम् ॥९३॥
एवं वै राधिके कृष्णनारायणेन रक्षिताः ।
प्रापिताश्च निजान् देशान् जलमग्नोद्धृता जनाः ॥९४॥
निरुग्णाश्च कृताः पुष्टदेहाः षण्ढाः सवीर्यकाः ।
प्रतापश्चातुलश्चैवं ख्यापितः पृथिवीतले ॥९५॥
कीर्तनात् स्मरणादस्य चमत्कारस्य शंसनात् ।
श्रवणादपि दुःखानि भवन्ति विगतानि वै ॥९६॥
रोगा नश्यन्ति शीघ्रं च नश्यन्त्यपि महापदः ।
आपत्कालाः प्रणश्यन्ति सदा कृष्णकथाश्रवात् ॥९७॥
स्तोत्राणां वाचनाद् राधे रक्षा भवति सर्वथा ।
तीर्थस्य करणाद् राधे चाभीष्टं प्राप्यते जनैः ॥९८॥
अनिष्टं लीयते सर्वं सौभाग्यं च विवर्धते ।
धनधान्यप्रजापुत्रपरीवारादिमान् भवेत् ॥९९॥
भुक्तिं प्राप्याऽत्र च स्वर्गं ततो मोक्षे महीयते ।
परब्रह्मणो भक्तस्य कर्तव्यं नाऽवशिष्यते ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जलोद्धृतजनैः कृता स्तुतिः, रुग्णव्यंगादीनामष्टमवत्सरोत्सवे स्वास्थ्यकरणम्, तत्कृतस्तवनम्, आर्यायनकृतस्तोत्रम्, जलोद्धृतानां स्वदेशप्रापणम्, उदयनृपस्य मोक्षश्चेति-निरूपणनामा द्वाषष्टितमोऽध्यायः ॥ ६२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके श्रीमद्बालकृष्णस्य चेष्टितम् ।
भक्तरक्षाकरं चान्यदष्टमेऽब्दे समुद्रजम् ॥ १ ॥
रेवातटे तु नगरं चन्द्रोदयाह्वयं शुभम् ।
सर्वभक्ताश्रितं धर्मपरायणप्रजाश्रितम् ॥ २ ॥
आसीत्तत्र महाश्रेष्ठी धनधान्यसमृद्धिमान् ।
वसुमेध इतिनाम्ना वैष्णवो मनसा शुचिः ॥ ३ ॥
सतां सेवापरो नित्यं देवपूजां करोति च ।
सूर्यं विष्णुं गणेशं च सतीं शंभुं श्रियं हरिम् ॥ ४ ॥
प्रातः स्नात्वा चोपचारैः सम्पूजयति सादरम् ।
विभज्य भुंक्ते सततं दानं ददाति नित्यशः ॥ ५ ॥
गवां सेवां सतां सेवां पितृतृप्तिं करोति च ।
व्यापारः पण्यविषयो बहुलाभोऽस्य वर्धते ॥ ६ ॥
पुत्राः पञ्च च कुशलाः पत्नी धर्मपरायणाः ।
सुशीलाख्या चैकभुक्तं व्रतं चरति सर्वदा ॥ ७ ॥
शालग्रामं समभ्यर्च्य तुलसीदलमिश्रितम् ।
पतिपादोदकस्पृष्टं भुंक्ते भोज्यं प्रसादजम् ॥ ८ ॥
पुत्राश्च वैष्णवाः सर्वे मालाध्यानजपार्थिनः ।
मोक्षभिलाषुकाः सम्यक् कृतशास्त्रकथाश्रवाः ॥ ९ ॥
अथतत्र महर्षिश्च शतानन्दाभिधोऽभवत् ।
उद्दालकस्य पुत्रः स वने कृताश्रमोऽभवत् ॥१०॥
शतानन्दो नातिदूरे चन्द्रोदयस्य सन्निधौ ।
विप्राश्रमे सदा सायं समायाति यदृच्छया ॥११॥
लक्ष्मीनारायणसंहितां च वाचयति प्रगे ।
कथां कृत्वा गृहीत्वा च भिक्षां याति निजाश्रमम् ॥१२॥
ग्रामजनाः समायान्ति कथां शृणवन्ति नित्यशः ।
तत्र श्रुतं तु सौराष्ट्रे चाश्वपट्टसरोवरे ॥१३॥
कुंकुमवापिकाक्षेत्रे कम्भराश्रीगृहे हरिः ।
अनादिश्रीकृष्णनारायणो गोपालनन्दनः ॥१४॥
वर्तते बालरूपो वै भगवान् पुरुषोत्तमः ।
शंखचक्रगदापद्ममीनध्वजत्रिशूलवान् ॥१५॥
धनुःस्वस्तिकवज्रादिचिह्नचिह्नितहस्तवान् ।
प्रत्यक्षो वर्तते सर्वेश्वरः श्रीपतिरव्ययः ॥१६॥
कोटिकोट्यब्जगोपीनां प्राणेशः परमेश्वरः ।
श्रुत्वैवं च कथां चित्रां श्रुत्वा श्रीसोमतीर्थकम् ॥१७॥
श्रुत्वा स्वर्णपुरीं पुण्यां चमत्कारपुरं तथा ।
तीर्थार्थं कृतसंकल्पः सकुटुम्बः सहानुगः ॥१८॥
अन्नवारिफलकन्दकणादिकृतसंग्रहः ।
विशालां नावमारुह्य धनधान्यसमृद्धिमान् ॥१९॥
त्रिंशद्व्यक्तिकृतसार्थो नर्मदासलिलानुगः ।
नाविकैश्चाल्यमानायां नौकायां स स्थितो ययौ ॥२०॥
यात्रार्थं त्वाययौ नावा रेवासागरसंगमम् ।
कृष्णनारायण विष्णो परब्रह्म परेश्वर ॥२१॥
कीर्तयति सततं ससार्थो जपति मालिकाम् ।
माघे विश्रम्य रेवायाः संगे सस्नौ सहाऽनुगैः ॥२२॥
ददौ दानानि वस्त्रान्नस्वर्णरूप्याणि भावतः ।
अथ नावं समारुह्याऽखातं वार्धेः समागमत् ॥२३॥
किंनदीसंगमे स्नात्वाऽखातमुल्लंघ्य चाययौ ।
शत्रुञ्जिताब्धिसंयोगे सस्नौ तु विधिनाऽत्र सः ॥२४॥
तस्माद् ययौ गोपनाथं तीर्थं हरिहराश्रितम् ।
ततो मूलां ययौ स्वर्णपुरीं कृष्णनरायणीम् ॥२५॥
सोमनाथं ययौ स्नात्वा सरस्वत्यब्धिसंगमे ।
हिरण्यासंगमे स्नात्वा कृत्वा तीर्थविधिं ततः ॥२६॥
मकरालयतीर्थं च कृत्वा भद्राब्धिसंगमम् ।
ययौ तीर्थविधिं कृत्वा कृष्णस्वर्णपुरीं ययौ ॥२७॥
द्वीपं दृष्ट्वा ततः कच्छे नारायणसरो ययौ ।
परावृत्य च नौकायां चमत्कारपुरं ययौ ॥२८॥
ततस्त्वखातमार्गेण परावृत्य च सागरे ।
स्वर्णपुरीं परित्यज्य जलमार्गेण गच्छति ॥२९॥
सोमनाथं तदा मध्ये सामुद्रं विघ्नमागमत् ।
झंझावातोऽतिवेगाच्च ववौ क्षोभकरो महान् ॥३०॥
सामुद्रजलक्षोभश्च प्रालेय इव चाभवत् ।
नौः समाकृष्यते मध्ये प्रतिकूलेन वायुना ॥३१॥
तरंगैर्वीचिकल्लोलैस्तालवृक्षोच्छ्रयैस्तदा ।
बह्वयो नौका निमग्नाश्च भग्ना नष्टाश्च मानवाः ॥३२॥
वसुमेधस्य नौकाऽपि समुत्पतति वक्रगा ।
पार्श्वयोः पतमाना च कल्लोलैर्जलपूरिता ॥३३॥
अभवत् नाविकाश्चाप्यशक्ता वै रक्षणेऽभवन् ।
वसुमेधो वणिग्वर्यस्तत्पत्नी च सुतादयः ॥३४॥
सस्मरुः श्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
शोकं चक्रुश्च बहुधा यदर्थं वयमागताः ॥३५॥
श्रुत्वा शतानन्दकथाद्वारा तं बालकृष्णकम् ।
अविलोक्य मृताः स्याम सामुद्रेऽत्र जलेऽबलाः ॥३६॥
नौकायां पूर्यते वारि निष्कासाऽधिकमत्यति ।
वायुना हन्यते चापि जलेन ताड्यते मुहुः ॥३७॥

पार्श्वभावेन चावर्तान् करोति जलताडिता ।
इमाश्चान्या जननावो व्यापारिणो लयं गताः ॥३८॥
अस्मन्नौकाऽपि सान्निध्ये तलवासं समिच्छति ।
स्मरन्तु तं प्रभुं कृष्णनारायणं परेश्वरम् ॥३९॥
यदर्थं वयमायाताः स नो रक्षतु हृच्छ्रयः ।
नौकाव्याप्तः स भगवान् नौकां स्थिरीकरोतु च ॥४०॥
झंझावातगतः कृष्णो वातं शामयतु क्षणात् ।
जलस्थः श्रीबालकृष्णो जलस्थैर्यं करोतु च ॥४१॥
यद्वा चेन्मृत्युमापन्नान् स्वात्मानं दर्शयत्विह ।
सर्वथा वै वयं नाथ ते स्मः शरणमागताः ॥४२॥
अनादिश्रीकृष्णनारायण गोपालनन्दन ।
कम्भराश्रीकुमार त्वं रक्ष गोपीपते प्रभो ॥४३॥
एवं कृष्णपराः सर्वे हतोत्साहाः सुदुःखिताः ।
निराशा जीवने जाता नौकायां वायुवेगतः ॥४४॥
जलं प्रपूरितं भूरि वायुताडनवक्रिता ।
गता जलतलं तूर्णं तावच्छ्रीभगवान् स्वयम् ॥४५॥
द्रागेव तत्र चायातस्तले कूर्मस्वरूपतः ।
पृष्ठे चकार नौकां तां जलोपरि समानयत् ॥४६॥
द्वितीयेन च रूपेण नौकावाहोऽभवत् प्रभुः ।
अन्यैर्दशस्वरूपैश्च जलनिष्कासकोऽभवत् ॥४७॥
अन्यैर्विंशतिरूपैश्च जले मग्नाँस्तु मानवान् ।
उद्धृत्योद्धृत्य च नौकामध्ये सर्वानवासृजत् ॥४८॥
नौकागतानि वस्तूनि जलान्तःपतितानि च ।
यानि तान्यपि हस्तैश्चोद्धृत्य नावि समाक्षिपत् ॥४९॥
झंझावातश्च कृपया रुद्धो जलं स्थिरं ह्यभूत् ।
नौका स्थिराऽभवच्चाऽपि भक्ता भगवताऽविताः ॥५०॥
झन्झावातेन ये चान्ये भक्ता नौकान्तरेऽपि च ।
आसन् मग्नाश्च सलिले तानुद्धार लीलया ॥५१॥
एवं रक्षां स्वभक्तानां कृत्वा भूत्वैकरूपधृक् ।
किशोरः श्रीकृष्णनारायणस्तत्र तिरोऽभवत् ॥५२॥
नाविकैः सा शनैः शनैश्चालिता त्वग्रगा ययौ ।
प्राप्ता श्रीसोमनाथं सा तत्र पक्षस्थिरीकृता ॥५३॥
नौवाहाँस्तत्र संस्थाप्य वसुमेधः ससार्थकः ।
शकटैस्त्वरितो भूत्वा प्राचीं सरस्वतीं ययौ ॥५४॥
तत्र स्नात्वा पितृदेवाँस्तर्पयित्वा ततः परम् ।
अर्कतीर्थं तथा बलिमखस्थलं ययौ शुभम् ॥५५॥
ततश्चाग्रे वामनस्य स्थलीं वस्त्रापथं तथा ।
स्वर्णरेखाकृतस्नानो ययौ राष्ट्रसरोवरम् ॥५६॥
वटस्थलीं ययौ पश्चाद् ययौ कुंकुमवापिकाम् ।
दूराद् विलोक्य तत्क्षेत्रं चकार भुवि दण्डवत् ॥५७॥
अश्वपट्टसरो गत्वा स्नात्वा तीर्थविधिं तथा ।
कृत्वा प्रदक्षिणं सर्वतीर्थानि सम्प्रणम्य च ॥५८॥
महासौधं ययौ द्रष्टुं बालकृष्णं परेश्वरम् ।
कानके मन्दिरे दिव्यसिंहासनगतं हरिम् ॥५९॥
मध्यसूर्यप्रभं चन्द्राननं शीतलकान्तिकम् ।
रूपाऽनुरूपावयवं वह्निशुद्धांशुकान्वितम् ॥६०॥
सौवर्णमुकुटं रत्नहीरमौक्तिकमालिनम् ।
देवमानवगान्धर्वैः स्तुतं संपूजितं जनैः ॥६१॥
नत्वा तुष्टाव च प्रेम्णाकुटुम्बसहितो वसुः ।
नेत्राश्रूणि प्रमुक्त्वा विह्वलो गद्गदया गिरा ॥६२॥
बहुजन्मार्जितपुण्यैः प्राप्यते पुण्यशालिभिः ।
यः परेशः स मयाऽऽप्तो रक्ष मां परमेश्वर ॥६३॥
योगिभिर्योगयत्नैश्च प्राप्यते बहुवत्सरैः ।
स मयाऽद्य प्रभुर्लब्धो रक्ष मां परमेश्वर ॥६४॥
भक्तैः सम्प्राप्यते भक्त्या सर्वस्वार्पणया तु यः ।
सोऽयं श्रीकान्तभगवान् मयाऽऽप्तो रक्ष मां हरे ॥६५॥
तपतां चिरकालेऽपि कष्टसाध्यो हरिस्तु यः ।
प्राप्तो मयाऽद्य जीवेशो रक्ष मां पुरुषोत्तम ॥६६॥
तारितोऽब्धौ प्रमज्जन् वै कुटुम्बसहितस्त्वया ।
समुत्तारय देवेश संसाराब्धेश्च मां पुनः ॥६७॥
त्वां विना जीवनं नास्ति सन्ति प्राणा न शाश्वताः ।
त्वां विना सम्पदः सर्वा विपदः सम्भवन्ति वै ॥६८॥
त्वं हृदि त्वं चक्षुषोश्च त्वमात्मनि विराजसे ।
त्वं कुटुम्बे च नौकायां जले स्थले विराजसे ॥६९॥
अद्य मे सफलं जन्म सफलं तीर्थचारणम् ।
सफलं मे कुटुम्बं च सर्वं सफलतां गतम् ॥७०॥
यदर्थं तु गृहं त्यक्त्वा निर्गतस्तीर्थवाञ्छया ।
तानि तीर्थानि सर्वाणि निर्वृत्तान्यत्र ते पदे ॥७१॥
प्राप्तं प्राप्तव्यमेवाऽत्र कर्तव्यं नाऽवशिष्यते ।
रक्ष नाथ कृपासिन्धो तवाऽस्मि शरणं गतः ॥७२॥
इत्युक्त्वा पूजयामास पपात चरणे मुहुः ।
रत्नभूषाम्बराद्यैश्च सुगन्धचन्दनादिभिः ॥७३॥

कुटुम्बं तस्य सर्वं च पूजयामास तं हरिम् ।
तिष्ठंश्च श्रीहरेरग्रे नीराजनमथाऽकरोत् ॥७४॥
श्रीहरेराज्ञया मिष्टं भोज्यं फलजलादिकम् ।
अर्पयामास च तत्र स्थाल्यां त्वग्रे हरेस्ततः ॥७५॥
भगवान् बुभुजे प्रेम्णा प्रसादं शेषममृतम् ।
ददौ च वसुमेधाय कुटुम्बिनेऽत्यनुग्रहात् ॥७६॥
वसुमेधादयः सर्वे बुभुजिरे पपुर्जलम् ।
न्यूषुर्विश्रान्तिसौधे च दत्ते भगवता ततः ॥७७॥
एवं ते दशदिवसान् यापयामासुरेव तु ।
एकादशे दिने प्रातर्वसुमेधस्तथा प्रिया ॥७८॥
सुशीला प्रातरेवैनमपश्यतां नरायणम् ।
स्वप्ने विमानमारुह्य धाम नेतुं समागतम् ॥७९॥
अथाऽसौ धर्ममेधस्तु सुशीला च द्रुतं तदा ।
पुत्रादींश्च समुद्बोध्य स्वाप्नं वृत्तान्तमुत्तमम् ॥८०॥
तेभ्योऽकथयतां सर्वं मोक्षलाभात्मसूचकम् ।
पुत्रा हर्षं परं प्राप्ताः स्नात्वा सम्पूज्य देवताः ॥८१॥
तूर्णं ययुश्च ते सर्वे बालकृष्णालयं तदा ।
हरिस्तेभ्यो ददौ नैजं दर्शनं निजगाद तान् ॥८२॥
लोमशाद्वै प्रगृह्णन्तु मन्त्रं दीक्षां स्रजं तथा ।
ततोऽद्य सायं पित्रोर्वो मोक्षगतिर्भविष्यति ॥८३॥
इत्युक्तास्ते सत्वरं च ययुः श्रीलोमशाश्रमम् ।
जगृहुश्च मनुं दीक्षां वैष्णवीं तौलसीं स्रजम् ॥८४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
गृहीत्वा च मनुं भोज्यं दानं बहुविधं ददुः ॥८५॥
आययुश्च निजावासं भेजुः श्रीबालकृष्णकम् ।
अपराह्णे ध्यानमग्नौ त्वभूतां पितरौ तदा ॥८६॥
पुत्राः क्षमामयाचन्त सेवां चक्रुर्यथोचिताम् ।
क्षणान्तरे समायातं विमानं दिव्यपार्षदम् ॥८७॥
वसुमेधं सुशीलां च दिव्यदेहौ विधाय च ।
नीतवच्च ब्रह्मधाम पुत्रा धन्यं व्यधुस्तदा ॥८८॥
और्ध्वदैहिकमेवास्य कृतवन्तः समाहिताः ।
एवं मोक्षगतिं प्राप्तौ भक्तौ नारायणाश्रितौ ॥८९॥
पुत्राश्चक्रुः श्राद्धकर्म तथाऽन्यच्च यथोचितम् ।
ययुः शकटमार्गेण यत्र नौका प्रवर्तते ॥९०॥
नावमारुह्य च सर्वे नैजं देशं ययुर्हि ते ।
प्राप्य देशं चमत्कारं प्राहुर्नारायणस्य वै ॥९१॥
श्रुत्वा जना हरिं भेजुः साक्षाच्छ्रीपुरुषोत्तमम् ।
एवं ते कथितं राधे चरित्रं पावनं हरेः ॥९२॥
भुक्तिमुक्तिप्रदं श्रोतुर्वक्तुः रक्षाकरं सदा ।
तीर्थफलप्रदं स्वर्गप्रदं सम्पत्प्रदं शुभम् ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चन्द्रोदयपत्तनवासिनो वसुमेधश्रेष्ठिनो नर्मदाद्वारा नौकया तीर्थार्थं सौराष्ट्रसमुद्रे यातस्य झंझावातेन जलमग्नस्य सकुटुम्बस्योत्तारणं श्रीकृष्णनारायणेन कृतं, मुक्तिदानं चेत्यादिनिरूपणनामा त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

श्रीराधिकोवाच—

परब्रह्म कृपासिन्धो गोपनाथाह्वयं शुभम् ।
तीर्थं सौराष्ट्रसामुद्रतीरे प्रोक्तं त्वया हरे ॥ १ ॥
कथं कदा तु तज्जातं कथं तन्नाम सार्थकम् ।
वद मह्यं यथावत्तु कृष्ण कान्त परेश्वर ॥ २ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके दिव्यां कथां तु मम गोचराम् ।
पूर्वपूर्वेषु कल्पेषु श्रीकृष्णा बहवोऽभवन् ॥ ३ ॥
पूर्वाह्णे ब्रह्मणस्तत्र प्रातरेवाऽऽद्यवत्सरे ।
आद्ये दिने तु गोलोकादहं राधे त्वया सह ॥ ४ ॥
उत्पन्नं त्वेतदण्डं वै प्रार्थनया तु वेधसः ।
द्रष्टुं समागतस्तत्र यत्र मया मणिर्मम ॥ ५ ॥
निक्षिप्तश्चात्र गोले स सौराष्ट्रविषयोऽभवत् ।
तत्रागत्य मया दिव्यविमानं स्वर्णनिर्मितम् ॥ ६ ॥
गोपगोपीगणैर्जुष्टं गोभिर्युक्तं मनोहरम् ।
विस्तृते च मणेर्देशे व्योम्नो मयाऽवतारितम् ॥ ७ ॥
गोपा गोप्यश्च राधे त्वमहं न्यूषुर्जलान्तिकम् ।
भुक्तवन्तश्चामृतानि दुग्धानि च गवां तथा ॥ ८ ॥
गावस्तत्र विहरन्ति गोपाः क्रीडन्ति तद्वने ।
गोप्यो गोपा रमन्ते च दिव्ये मन्निर्मिते स्थले ॥ ९ ॥
तत्राऽहं तु त्वया साकं राधे वृक्षेषु सर्वतः ।
गोभिर्गोपैर्गोपीभिश्च व्यचरं वासमाचरन् ॥१०॥
तदा सनत्कुमाराद्याः ऋषयस्तत्र चाययुः ।
ज्ञात्वा श्रीशंकरो भक्तो विष्णुश्चाययतुस्तदा ॥११॥
गोपैर्मया त्वया चापि गोपीभिस्तौ सुसत्कृतौ ।
पूजितौ वन्दितौ मिष्टं भोजितौ सेवितौ मुदा ॥१२॥
यत्र स्थाने कृतावासौ श्रीविष्णुशंकरौ सुरौ ।
गोपैः सम्पूजितौ तत्र सुरौ हरिहरात्मकौ ॥१३॥

तावत् तत्र समायातो ब्रह्मा विज्ञाय सत्वरम् ।
सोऽपि संपूजितो गोपैर्मया त्वया च सत्कृतः ॥१४॥
अथाऽन्ये पार्षदा ज्ञात्वा विष्णोर्हरस्य वेधसः ।
देव्यो दास्यः समायातास्तस्थुस्तत्र समे स्थले ॥१५॥
ततोऽहं पृष्टवाँस्तेभ्यो मया पृथ्व्यां शुभे स्थले ।
प्राकट्यमिष्यते शीघ्रं लोककल्याणहेतवे ॥१६॥
तावत् तत्र समायातौ धरणिमेरुपर्वतौ ।
प्रार्थयामासतुस्तौ मां पुत्रार्थं शृण्वतां सताम् ॥१७॥
मया तथाऽस्त्विति प्रोक्तं तौ तदा ब्रह्मणः शुभम् ।
मानसं युगलं जातं मानवं तु सुराष्ट्रके ॥१८॥
नाम्ना मेरुधरो गोपः क्षमादेवी च गोपिका ।
सोमनाथसमीपे तौ दिव्यं वासं प्रचक्रतुः ॥१९॥
गोपा गोप्यस्तथा गावः सम्पूज्य तु हरिं हरम् ।
ययुः सर्वे क्षमादेव्या साकं च मेरुणा सह ॥२०॥
सिंहारण्ये कृतावासास्तिष्ठन्ति स्म च मोदिताः ।
शंभुः श्रीगोपनाथश्च विष्णुर्गोपीश्वरस्तथा ॥२१॥
यत्स्थाने पूजितौ तत्र मूर्त्यात्मानौ बभूवतुः ।
तत्र गोपाश्च गोप्यश्च नित्यमायान्ति यान्ति च ॥२२॥
गोपनाथं तु तत्तीर्थं जातं हरिहरात्मकम् ।
पावनं परमं राधे ! तव मे पादपावितम् ॥२३॥
यत्र मेरुः स्वयं चास्ते क्षमा च जननी मम ।
तत्राऽहं राधिके ! जातः श्रीकृष्णो मानसः सुतः ॥२४॥
त्वं मया सह गोप्यश्च मानस्यश्चेतरा अपि ।
व्यजायन्त च तत्रैव मेरुकोटीतिपत्तने ॥२५॥
हिरण्या विद्यते यत्र यत्र प्राची सरस्वती ।
सोमेशो विद्यते यत्र सा भूमिर्मेरुकोटिका ॥२६॥
प्रदेशः स च मे लीलामयः पूर्वप्रगेऽभवत् ।
राधे ! त्वच्चरणन्यासो मोक्षद्वारमपावृतम् ॥२७॥
सनत्कुमारो भगवान् गुरुर्मे तत्र चाऽभवत् ।
गोपा गोपांगना गावस्तत्र न्यूषुः सदा मम ॥२८॥
गोपालोऽहं तदा चासं मूलमाद्यं स्थलं मम ।
मूला सा द्वारिका मेऽत्र मेरुकोटीतिविश्रुता ॥२९॥
पूर्वे शत्रुंजिता यावत् पश्चिमे तु सरस्वती ।
उत्तरे तु महाभद्रानदी क्षेत्रं पुरा मम ॥३०॥
कृतस्मरः पर्वतश्च सिंहारण्यं महद्वनम् ।
व्याघ्रारण्यं चाश्वपट्टसरश्चेति च भूर्मम ॥३१॥
विहारस्य परा भूमिश्चासीद् राधे विनोदिनी ।
यत्र गोपाश्च गोप्यश्च गावश्च व्योममार्गगाः ॥३२॥

विहरन्ति स्म नित्यं वै मेरुदेवप्रतापतः ।
तत्र मे पार्षदा देवा देव्यश्च कृतकेतनाः ॥३३॥
न्यूषुः स्थले स्थले सर्वे मम सेवेच्छया सदा ।
सौराष्ट्रं कृष्णभक्ताभिर्गोपीभिः पूरितं तदा ॥३४॥
आसीद् राधे च गोपैश्च गोलोकं धाम तत्तथा ।
गारुडी संहिता चासीन्ममैश्वर्यविवेचिनी ॥३५॥
मधुवत्यास्तटे तत्र ममासीत् कुञ्जभूमिका ।
सिंहारण्यस्य मध्ये च दिव्यालयः पुरा मम ॥३६॥
परिखावेष्टितश्चासीदखातमध्यशोभितः ।
योजनद्वयविस्तारोद्यानमध्ये व्यवस्थितः ॥३७॥
यत्र पत्न्यो मम सर्वा राज्ञ्यश्चासन् सुशोभनाः ।
वैहायसा विमानेन सर्वयात्राकराः प्रियाः ॥३८॥
पार्षदा मम वै सर्वे सौराष्ट्रे विविधे स्थले ।
देवा देव्यस्तदा न्यूषुर्ममाज्ञया च राधिके ॥३९॥
आदित्या द्वादश रुद्रा एकादशाऽश्विनावुभौ ।
वसवोऽष्टौ निधयोऽपि नवाऽष्टसिद्धयस्तथा ॥४०॥
सप्तर्षयो दशबाणा मनवस्तिथिदेवताः ।
कलास्तत्त्वानि नक्षत्रमण्डलं गुणकोटयः ॥४१॥
मरुतो योगिनीचक्रं कला नाड्यश्च दासिकाः ।
वालखिल्याः पूर्वसृष्टिभवा न्यूषुर्ममाश्रये ॥४२॥
विरजा कमला गंगा रमा लक्ष्मीः सरस्वती ।
दुर्गा राधा पद्मिनी च पार्वती मञ्जुला प्रभा ॥४३॥
सगुणा शारदा हंसा सुशीला सुभगा श्रियः ।
इत्याद्या मम गोलोकादागत्य च ममालये ॥४४॥
वासं चक्रुस्तथा नद्यस्तीर्थानि दिव्यभूमिकाः ।
कल्पवृक्षाः कल्पवल्ल्यः कल्पस्तम्बतृणादयः ॥४५॥
कल्पयानानि च कल्पमणयः कल्पमालिकाः ।
कल्पपात्राणि च कल्पोपस्करणानि यान्यपि ॥४६॥
कल्पपावटिकाः कल्पगूटिकाः कल्पकण्ठिकाः ।
कल्पोर्मिकाश्च दिव्यास्ता मूर्तिमत्यो वसन्ति हि ॥४७॥
एवं वै राधिके ! तुभ्यं स्मारितं प्रागुदन्तकम् ।
गुर्जरे च मरौ कच्छे दक्षिणे चोत्तरे तथा ॥४८॥
पूर्वेऽपि मम जन्मानि ह्यनन्तानि भवन्ति हि ।
क्वचिद् देवे क्वचित् त्वार्षे क्वचिच्च मानवे कुले ॥४९॥
द्विजे वाऽन्यकुले चास्मि संजातः कार्यकांक्षया ।
त्वं मां नैव कदाचिच्च त्यजस्येव हृदि स्थिता ॥५०॥
यत्र क्वापि स्थितश्चाऽस्मि त्वया सहैव राधिके ! ।
गोलोके गोमण्डले च गोपीजनेऽपि सर्वदा ॥५१॥

गोपेष्वपि च राधे त्वां जहाम्येव न कर्हिचित् ।
यथाऽऽत्माऽहं तथा त्वं च मम शक्तिः परा मता ॥५२॥
एवं मां भजमानास्तु सशक्तिकं परेश्वरम् ।
यान्ति धाम तु गोलोकं मम पार्श्वे वसन्ति ते ॥५३॥
इत्येवं कथितं राधे ! मम जन्मादि प्राग्भवम् ।
स्मरणाच्छ्रवणाच्चापि भुक्तिर्मुक्तिः प्रजायते ॥५४॥
जीर्णोद्धारं करिष्यन्ति कारयिष्यन्ति मत्स्थले ।
ते मल्लोके मम पार्श्वे निवत्स्यन्ति न संशयः ॥५५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने गोपनाथमाहात्म्ये सौराष्ट्रे श्रीकृष्णस्य सर्वादिक्षेत्रतीर्थक्षेत्रनिरूपणनामा चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

श्रीकृष्ण उवाच—

अथापि त्वं शृणु राधे ! सर्वपावनपावनम् ।
आर्षं विधानं कृष्णस्य लोकं चानुसृतस्य ह ॥ १ ॥
स्वयं वेदप्रणेता यो ब्रह्माणं शास्ति वै पुरा ।
सोऽयं लोकं समाश्रित्य पालयित्वा विधिं निजम् ॥ २ ॥
गृह्णाति ब्रह्मसंस्कारं प्राकृतो ब्रह्मपा यथा ।
द्विजत्वं येन सृष्ट्यादौ निर्मितं श्रेयसे सदा ॥ ३ ॥
स तु सूत्रं समगृह्य द्विजो भवति चाऽद्विजः ।
यस्य संस्पर्शनान्नार्यो नरा वृक्षाश्च वल्लयः ॥ ४ ॥
पशुप्रेतपिशाचाद्याः शुद्ध्यन्ति च्चात्मदर्शिनः ।
यस्य योगेन कामाद्या भजन्ते दिव्यतां सदा ॥ ५ ॥
यद्योगं प्राप्य यक्षा वा राक्षसा म्लेच्छयोनयः ।
दिव्या भवन्ति च क्षणात् सोऽयं ब्रह्मग्रहोऽभवत् ॥ ६ ॥
राधिके लोमशः प्राह पितरं मातरं हरेः ।
यज्ञोपवीतयोग्योऽयं वर्तते यज्ञपावनः ॥ ७ ॥
देयं चास्मै ब्रह्मसूत्रं सूत्रयित्रे परात्मने ।
श्रुत्वैतत् शोभनं वाक्यं लोमशस्य मुखात्ततः ॥ ८ ॥
प्रसन्नौ पितरौ योग्यं प्रणेमतुर्मुनिं तदा ।
भक्त्या गोपालकृष्णश्च दिव्यं गजासनं ददौ ॥ ९ ॥
मधुपर्कं ददौ हारान् मिष्टान्नं सलिलं ददौ ।
ताम्बूलं प्रददौ चापि फलं वस्त्रं शुभं ददौ ॥१०॥
उवाच लोमशं शुभोत्सवक्षणं कुरु प्रभो ।
वैशाखोऽयं समायाति भवते रोचते यदि ॥११॥
कर्तव्यश्चोत्सवस्तत्र मम भात्येव सर्वथा ।
यज्ञोपवीतयोग्यं च दिनं शस्यं प्रदर्शय ॥१२॥

लोमशस्तु ततः प्राह श्रीमद्गोपालकृष्णकम् ।
अक्षया चोत्तमा चास्ते तृतीयाऽक्षयदायिनी ॥१३॥
चन्द्रर्क्षबलशुद्ध्यादि सर्वं शुभं प्रवर्तते ।
आमन्त्रणं च त्रैलोक्ये सर्वेभ्यो देहि तत्तथा ॥१४॥
संभारान् दिव्यभोगाँश्च सच्चितुद्यतिदुर्लभान् ।
भिन्नलोकनिवासानां योग्यान् सेव्योत्तमोत्तमान् ॥१५॥
लोमशस्य वचः श्रुत्वा श्रीमद्गोपालकृष्णकः ।
प्रेषयामास सर्वत्र दिव्या मंगलपत्रिकाः ॥१६॥
अश्वपट्टसरोवासैः पार्षदैः सेवकैस्तथा ।
विमानस्थैर्दिव्ययानैः प्रेषयामास सर्वशः ॥१७॥
जन्माऽष्टमेऽब्दे वैशाखे शुक्लेऽक्षयतिथौ मम ।
पुत्रस्य श्रीहरेर्यज्ञोपवीतं वै भविष्यति ॥१८॥
अवतारैस्तथा मुक्तैर्मुक्ताभिर्धाममभिः सह ।
ब्रह्मभिः पार्षदैः पार्षदानीभिः सह सर्वथा ॥१९॥
सतीभिः सेविकाभिश्चाऽवतारिणीभिरित्यपि ।
ईशाभिरीश्वरैश्चापि ऋषिभिश्च कुटुम्बिभिः ॥२०॥
साधुभिर्यतिभिश्चापि भक्तैर्भागवतैः सह ।
भागवताभिर्भक्ताभिः समागन्तव्यमादरात् ॥२१॥
पितृभिः पत्निकायुक्तैर्देवैर्देवीसमन्वितैः ।
दिक्पालैर्लोकपालैश्च ग्रहनक्षत्रमण्डलैः ॥२२॥
ताराभिश्च तथा तत्त्वैर्भुववासिभिरित्यपि ।
मानवैर्द्रुमवल्ल्याद्यैः कल्पपादपवंशजैः ॥२३॥
तृणैः स्तम्बैः समुद्भिजैरण्डजैर्गायकैर्जनैः ।
विद्याध्रैः किन्नरैश्चापि किम्पुंभिर्नृत्यवेदिभिः ॥२४॥
नर्तकीभिश्चारणैश्च धर्माऽधर्मादिवंशजैः ।
सुराऽसुरकुटुम्बैश्च दिगीश्वरैः समन्ततः ॥२५॥
आगन्तव्यं यज्ञसूत्रोत्सवे मद्बालकस्य वै ।
तीर्थैर्नदनदीभिश्चाऽरण्यैर्वनैः सरोवरैः ॥२६॥
समुद्राऽऽखातकूपाद्यैर्नगैः खगैः समन्ततः ।
वसुन्धरास्थितैः सर्वैरागन्तव्यं च पक्षिभिः ॥२७॥
गुणैर्गुणाश्रयैश्चापि मूर्ताऽमूर्तैः समादरात् ।
कालैः ऋतुभिराद्याभिः शक्तिभिः सहवत्सरैः ॥२८॥
कामधेनुभिरेवापि वसुभिः सिद्धिभिस्तथा ।
निधिभिर्विष्णुरुद्राद्यैर्ब्रह्माद्यैर्बहुमस्तकैः ॥२९॥
इन्द्रादिराजवर्यैश्च मानवैर्मुनिभिस्तथा ।
विप्रैः क्षत्रियवर्यैश्च वैश्यैश्च सेवकैस्तथा ॥३०॥
सात्त्विकैः राजसैश्चापि तामसैर्मायिकैस्तथा ।
मायाभिः प्रकृतिभिश्चाऽऽगन्तव्यं चोपवीतके ॥३१॥

अतलादिस्थितैर्दैत्यैर्दानवैश्चासुरैरपि ।
नागैः सर्पैः सहबन्धुमित्रकुटुम्बिदेहिभिः ॥३२॥
आगन्तव्यं वाहनैश्च साधनैश्च रसैस्तथा ।
दिव्याऽऽदिव्याभिरेवाऽत्र विद्याभिश्च कलादिभिः ॥३३॥
भवतां तेजसां सारैराशीर्भिर्मम बालकः ।
वर्धितो यज्ञवत् पुण्यराशिः सम्पत्स्यते ध्रुवम् ॥३४॥
इत्येवं प्रेषयित्वा च पत्रिकाः सेवकैस्ततः ।
शुद्धसत्त्वविभूतेश्च यानि भोज्यानि धामसु ॥३५॥
परे ब्रह्मण्यक्षरे च गोलोके च विकुण्ठके ।
अमृते चेश्वरलोके सत्यलोकेऽमृतानि च ॥३६॥
ब्रह्मजलानि दिव्यानि लेह्यचोष्याणि यान्यपि ।
तेषां च सञ्चयाँस्तत्र कारयामास सत्वरम् ॥३७॥
भुवर्महर्जनलोकादिष्वपि यानि यानि च ।
खाद्यपेयोपकार्याणि तेषां च सञ्चयाँस्तथा ॥३८॥
स्वर्गे तपसि मेर्वादौ पृथ्व्यां पातालसप्तके ।
भोज्यखाद्यप्रपेयानि चोपकार्याणि यानि च ॥३९॥
मृद्यसेव्योपभोग्यानि देहियोग्यानि यानि च ।
चलस्थावरयोग्यानि मूर्ताऽमूर्ताऽर्थकानि च ॥४०॥
तेषां सर्वप्रवस्तूनां सञ्चयानव्ययाँस्तथा ।
कारयामास बहुधा श्रीमद्गोपालकृष्णकः ॥४१॥
ब्रह्महृदान् कल्पहृदान् कल्पवृक्षरसादिकान् ।
अक्षयाणि च पात्राणि आपूरकदलाँस्तथा ॥४२॥
अव्ययान् कोशपद्माँश्च सिद्धिपात्रोत्तमानि च ।
सञ्चयामास परितः सिद्धयष्टीश्च गूटिकाः ॥४३॥
सहस्रप्रदपात्राणि चिन्तामणीन् बहूँस्तथा ।
चमत्कारकृतीँश्चापि ब्रह्मपुष्पोत्तमानि च ॥४४॥
देवमायाप्रकाण्डानि देवीसूत्राणि यानि च ।
ऐन्द्रजालिकपाशाँश्च मणिकान् लक्षदाँस्तथा ॥४५॥
मन्त्रयन्त्राणि तन्त्राणि चमत्कारकणाँस्तथा ।
योगैश्वर्याऽमृतनालीः सञ्चयामास सर्वशः ॥४६॥
योगचुल्लीर्योगदर्वीर्योगकटाहवाटिकाः ।
योगस्थालीर्योगदीपान् सञ्चयामास सर्वशः ॥४७॥
योगासनानि सर्वाणि सार्वभौमाऽमृतानि च ।
कल्पतरून् कल्पकण्ठीश्च कल्पवलयकोर्मिकाः ॥४८॥
सञ्चयामास बहुधा यावदातिथ्यहेतवे ।
भौतिकानि च भोज्यानि पेयानि भौतिकानि च ॥४९॥
सूक्ष्मभूतजभोज्यानि पेयानि सूक्ष्मजान्यपि ।
व्यक्तजन्यानि भोज्यानि पेयानि व्यक्तजानि च ॥५०॥
अव्यक्तजानि भोज्यानि पेयान्यव्यक्तजानि च ।
मायाजन्यानि सर्वाणि तथा ब्राह्माणि यानि च ॥५१॥
आक्षराण्यपि दिव्यानि आत्ममयानि यानि च ।
स्नेहजान्यपि सर्वाणि पुण्यतत्त्वोद्भवानि च ॥५२॥
सर्वाण्यपि च भोग्यानि सञ्चयामास सर्वतः ।
रसकुल्या घृतकुल्या दधिकुल्या मनोहराः ॥५३॥
मधुकुल्या गुडकुल्याः शर्कराखण्डिकाह्रदान् ।
इक्षुकुल्या अमृतानां ह्रदान् मिष्टसरांसि च ॥५४॥
सञ्चयामास परितः श्रीमद्गोपालकृष्णकः ।
उपहारसहस्राणां पर्वतान् प्रचकार सः ॥५५॥
रत्नानां च मणीनां च मौक्तिकानां समुच्छ्रयान् ।
सुवर्णानां रूप्यकाणां हीरकाणां च पर्वतान् ॥५६॥
माणिक्यानां च मुक्तानां विभूषाणां च पर्वतान् ।
वस्त्रालंकारराशींश्च कारयामास वै तदा ॥५७॥
चूर्णानां गन्धसाराणां तैलानां च सुगन्धिनाम् ।
लेपानां कज्जलानां च रंगानां सञ्चयाँस्तथा ॥५८॥
चन्दनानां कुंकुमानां केसराणां च संचयान् ।
कस्तूरीणां चौषधानां राशीन् चकार चाव्ययान् ॥५९॥
दर्पणानां कंकतीनां शुद्धिद्रव्यमृदां तथा ।
शयनानां च दोलानामासनानां च चक्रिणाम् ॥६०॥
यानानां वाहनानां चाऽसंख्यसञ्चयकान् व्यधात् ।
एवं सर्वोपभोग्यादौ सम्पन्ने पूर्णतांगते ॥६१॥
अनादिश्रीकृष्णनारायणः सस्मार वै क्रमात् ।
परधामस्थमुक्ताँश्च मुक्तानीरपि सर्वशः ॥६२॥
अक्षरस्थान् मुक्तवर्गान् मुक्तानीरपि चाक्षरम् ।
अवतारानवतारिणीश्च पार्षदपुंगवान् ॥६३॥
पार्षदानीश्च वै भक्तान् भक्तानीरपि सर्वशः ।
चतुर्विंशतिविष्णूँश्च चतुर्व्यूहाँस्तथा क्रमात् ॥६४॥
परमेशानीश्वराँश्च ईश्वराणीश्च सर्वशः ।
वैराजान् ब्रह्मशंभूँश्च रुद्रान् विष्णून् ऋषीँस्तथा ॥६५॥
साधून् साध्वीः सतीः पत्नीः प्रिया देवी रमादिकाः ।
राधां लक्ष्मीं पार्वतीं च प्रभां हंसां च माणिकीम् ॥६६॥
द्वादशोत्तरशतमुख्याश्च पत्नीर्निजाः पराः ।
कोटिदासीस्तथा दासान् गोलोकस्थान् गवादिकान् ॥६७॥
चतुर्वैकुण्ठसंस्थाँश्च बदर्याश्रमवासिनः ।
सत्यस्थान् स्वर्गवासाँश्च परस्वर्गगताँस्तथा ॥६८॥
पितृन् सिद्धान् चारणाँश्च मुनीन्द्रान् सुरमानवान् ।
सस्मार च दिशां पालान् नृपतीन् सुरपालकान् ॥६९॥

भुवःस्थान् पृथिवीस्थाँश्च सप्तपातालवासिनः ।
जलस्थलस्थितान् सर्वान् स्थावरान् जंगमाँस्तथा ॥७०॥
ब्रह्मसरसस्तथा चाप्सरसः कन्यकोत्तमाः ।
भाटचारणगन्धर्वान् किंपुंकिन्नरमागधान् ॥७१॥
चारणान् वादकाँश्चापि गायकान् नर्तकाँस्तथा ।
नटान् नाटककर्तृंश्च नाट्यसंघप्रदर्शकान् ॥७२॥
मल्लान् कलाकराँश्चापि महेन्द्रजालिकाँस्तथा ।
स्वादकराँस्तथा सूदान् पाकिनः परिवेषकान् ॥७३॥
यज्ञीयान् यज्ञवेत्तृंश्च कर्मकाण्डपराँस्तथा ।
ब्राह्मणाँश्च महर्षींश्च क्षेत्रद्वारादिपालकान् ॥७४॥
सस्मार दिव्यतत्त्वानि दिव्याऽमूर्तिकमानवान् ।
जलस्थलनिवासाँश्च दैत्यदानवराक्षसान् ॥७५॥
दीनान् रंकान् सतः सांख्ययोगिनीश्च पतिव्रताः ।
कन्या देवीश्च कुलजाः कुलपूज्याश्च योगिनीः ॥७६॥
कैलासबदरीवासान् क्षीरश्वेतनिवासिनः ।
पृथ्वीस्थखण्डवासाँश्च सस्मार श्रीहरिस्तदा ॥७७॥
भक्तान् गोपान् गोपिकाश्च कोट्यर्बुदाब्जशेवधीन् ।
सस्मार वालखिल्याँश्च यतीन् ज्ञानाश्रयान् निजान् ॥७८॥
अनादिश्रीकृष्णनारायणः स्वामिनरायणः ।
सस्मार दिव्यमनसा भक्ताँश्च भक्तवत्सलः ॥७९॥
अक्षयायां तृतीयायां प्रातः सर्वे समाययुः ।
ब्रह्मवद्रतिका यानैर्वैहायसैश्च मानसैः ॥८०॥
आत्मयानैर्योगयानैः समाधिवाहनैस्तथा ।
वायुवाहैश्चाम्बरात्मवाहनैश्च समाययुः ॥८१॥
गरुडैश्च तथा हंसैः शुकैर्मयूरमूषकैः ।
विनायका गणेशाश्च विघ्नेशास्तत्र चाययुः ॥८२॥
गजैरश्वैरनलैश्च कुंजकैः सारसादिभिः ।
मेघैर्ग्रहैस्तथा विद्युल्लताभिः किरणैस्तथा ॥८३॥
सूर्यचन्द्रादयस्तूर्णं तेजोवाहाः समागताः ।
मनोवाहाः कल्पवाहा वेगवाहाः समाययुः ॥८४॥
मुक्ताश्चाप्यवताराश्च व्यूहाश्चापीश्वरास्तथा ।
ब्रह्मधामगताः सर्वे ईशधामगतास्तथा ॥८५॥
कृष्णनारायणो लक्ष्मीराधारमादिकास्तथा ।
कोटिकोट्यर्बुजाब्जादिशेवधिश्रीसखीयुताः ॥८६॥
कोटिकोट्यर्बुजाब्जादिसेवकैः सहितास्तथा ।
राममाधवगोविन्दा गोपाला गोपिकास्तथा ॥८७॥
विष्णवो वैष्णवीशक्तिप्रमुखा भूमदेवताः ।
वैराजा ब्रह्मरुद्राद्याः शतकोटिप्रमस्तकाः ॥८८॥
सत्यस्थाः साधवो देवा यतयो ब्रह्मचारिणः ।
वेदा विद्यास्तथा मन्त्रा यज्ञा हवींषि यानि च ॥८९॥
समाययुर्दिव्यरूपा वह्नयो मरुतस्तथा ।
तेजांसि चापि सर्वाणि पितरः ऋषयोऽमराः ॥९०॥
प्रमुनीन्द्राः सत्पुरुषाः सत्यः साध्व्यः पतिव्रताः ।
ब्रह्मप्रियाः कृष्णप्रिया देवप्रियाः समन्ततः ॥९१॥
चतुर्दशभुवनानां राज्ञ्यो राजान इत्यपि ।
ब्रह्मकन्याः ऋषिकन्या जलकन्याः समुद्रजाः ॥९२॥
देवकन्या नागकन्या राजकन्याश्च कोटिशः ।
कुमारिकाश्च गान्धर्व्यो विद्याधर्यश्च सर्वशः ॥९३॥
वादिका वादकाश्चापि यशोगायाः समाययुः ।
भाण्डकाश्चारणाद्याश्च भाटा नटाश्च नर्तकाः ॥९४॥
चैष्टिका ऐतिहिकाः कथका हासका अपि ।
ब्राह्मणा भिक्षुकाः सन्यासार्था मुण्डधरास्तथा ॥९५॥
अवधूता ब्रह्मचारा योगचाराः समाययुः ।
स्वस्त्रीबान्धवबालाद्यैर्युता द्वितीयविश्रमाः ॥९६॥
पत्नीव्रतस्य वंशाश्च पतिव्रताकुटुम्बिनः ।
बन्धुबान्धवयोगाश्च तद्योगास्तत्सुयोगिनः ॥९७॥
नैकक्षित्युद्भवाः सर्वे वर्ष्मभ्रा हि समाययुः ।
विष्णुगणा रुद्रगणा ब्रह्मगणा असंख्यकाः ॥९८॥
दीपावल्यो नालमेध्यः षष्ठीदेव्यस्तलाजिका ।
गोकुमार्यस्तथाऽर्जन्त्या युवत्यः शतकन्यकाः ॥९९॥
कोटिशः कन्दरा कन्यास्तथा क्रोधनिका सती ।
लक्षं च राक्षसीकन्याः कंकताल्यश्च पञ्चषः ॥१००॥
कंकतालिककन्याश्च सहस्रशो ह्युपस्थिताः ।
ब्रह्मकन्या जलकन्याऽर्यमकन्याः सहस्रशः ॥१०१॥
कुबेरकन्यकाश्चेन्द्रकन्या यमसुतास्तथा ।
वायुकन्याः ऋतुकन्या विश्वकर्मसुतास्तथा ॥१०२॥
द्रुमकन्या दानवादिकन्यापञ्चसहस्रकम् ।
वसन्तस्य तथा पत्न्यः षोडशापि ह्युपस्थिताः ॥१०३॥
वह्निकन्यास्तथा सालमालकन्यासहस्रकम् ।
श्रवणकन्यकाः शावदीनकन्यासहस्रकम् ॥१०४॥
ऐन्द्रजालिकरौद्यश्च सहस्रकन्यकास्तथा ।
विद्याकन्याः किशोर्यश्च षष्टिकन्या ह्युपस्थिताः ॥१०५॥
सम्वत्सरस्य कन्याश्च वार्क्ष्यः कन्या असंख्यकाः ।
खनिजाः कन्यकाश्चापि सोपकुंभा ह्युपस्थिताः ॥१०६॥
उपस्थिता लक्ष्मणस्य सहस्रद्वयपुत्रिकाः ।
उपस्थिता विश्वावसोस्तदा त्रिशतपुत्रिकाः ॥१०७॥

द्वासप्ततिसहस्राणि वेधःकन्या उपस्थिताः ।
जुमासेम्लानृपस्यापि तस्थुः सहस्रकन्यकाः ॥१०८॥
कार्ष्ण्यः कुमारिकाः शतोत्तरद्वादशसंख्यकाः ।
मांगल्यार्थे हरेस्तस्य कान्तस्याऽर्थमुपस्थिताः ॥१०९॥
चक्रुस्ताः श्रीकृष्णनारायणस्य कीर्तनानि वै ।
आगतेभ्यश्च सर्वेभ्यश्चावासान् प्रददौ पिता ॥११०॥
सत्कारान् मधुपर्कादि यथार्हं बहुधा ददौ ।
अथापि राधिके ! तत्र समायान्ति महर्षयः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोरष्टमे वर्षे वैशाखे यज्ञोपवीतमहोत्सवे आमन्त्रणपत्रिकाद्वारा सर्वेषामागमनादिनिदर्शननामा पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके दिव्यमहर्षयः समाययुः ।
समीरणः पवमानः सन्तारणश्च बर्बुरः ॥ १ ॥
वोढुश्च घनभेदश्च द्युविश्रामश्च पंकिलः ।
नीलकर्णस्तथाऽलर्कः पुण्डरीकः कलायनः ॥ २ ॥
वीतिहोत्रश्च चमसः पर्णकुत्सोऽश्वपाटलः ।
भाल्लवेयश्चोर्जव्रतश्चाऽऽश्वलायन इत्यपि ॥ ३ ॥
पार्ष्णिरदः सुमन्तुश्च ह्यशोकाक्षोऽभयाक्षकः ।
ब्रह्मस्तम्बः कूप्यवालश्चेतनब्रह्म इत्यपि ॥ ४ ॥
मृतदण्डश्चोपतस्थुस्तत्रत्यास्तन्महोत्सवे ।
सदारपुत्रकन्याद्याः सभृत्यदासदासिकाः ॥ ५ ॥
कौण्डिन्यः कौशिकः पौतिमाष्यो गौपवनस्तथा ।
शाण्डिल्यो गौतमश्चाग्निवेश्यश्चाम्लान इत्यपि ॥ ६ ॥
सैतवः प्राचीनयोग्यो धाराशर्यश्च मैन्दवः ।
भारद्वाजो वैजवापायनश्च कौशिकायनिः ॥ ७ ॥
घृतकौशिकयास्कौ चाऽऽसुरायणश्च त्रैवणिः ।
जातूकर्ण्य औपजघन्यासुरी माण्टिवात्स्यकौ ॥ ८ ॥
कैशोर्यः काप्य आत्रेयः कुमारहारितस्तथा ।
वैदर्भी वत्सनपातो गालवः सौभरिस्तथा ॥ ९ ॥
पन्था अयास्य आभूतिस्त्वाष्ट्रोऽश्विनौ दधीचकः ।
विश्वरूपो विप्रचितिः प्राध्वंसन आथर्वणः ॥१०॥
सनारुर्व्यष्टिरेकर्षिः सनगश्च सनातनः ।
उद्दालकायनो जाबालायनः परमेष्ठिकः ॥११॥
माध्यन्दिनायनः काषायणश्च सौकरायणः ।
औपजघनिर्यास्कश्च सांकृतिः सायकायनः ॥१२॥
एते चान्ये वालखिल्यास्तथाऽन्ये ऋषिपुंगवाः ।
आययुः श्रीकृष्णनारायणसूत्रमहोत्सवे ॥१३॥
शौङ्गी सुकृतिरालम्बी जायन्ती मण्डुकायनी ।
शाण्डिली पौतिमाषी च कात्यायनी च गौतमी ॥१४॥
धाराशरी औपस्वती भारद्वाजी च कौशिकी ।
कापी वैयाघ्रपदी चाऽऽलम्बी वात्सी च सौभगी ॥१५॥
वार्कारुणी प्रजायन्ती चात्रेयी चार्तभागिनी ।
काण्वी आलम्बायनी च माण्डुकी भालुकी तथा ॥१६॥
राथीतरी क्रौंचिकी च वैदभृत्या सुरायणी ।
साङ्किवी प्राचीनयोगी प्राश्नी च कार्शकेयिका ॥१७॥
सतीशाऽमरदुहिता धन्येश्वरी च राणिकी ।
इत्येताः ऋषिपत्न्यश्च तत्रोत्सवे समाययुः ॥१८॥
दिव्या दिव्यविभूषाश्च वह्निशुद्धांऽशुकाऽन्विताः ।
तपस्तेजोभिरापूर्णाः पुण्यपुञ्जनिभाः शुभाः ॥१९॥
अत्रिर्वशिष्ठश्च्यवनो भरद्वाजो महातपाः ।
गर्गो गार्ग्यो याज्ञवल्क्यः श्वेतव्यासश्च भीमकः ॥२०॥
धर्मो वत्सः पुलहश्च जैगीषव्यः पुलस्त्यकः ।
अगस्त्यः सौभरिश्चापि सनकश्च सनातनः ॥२१॥
सनन्दश्च सनश्चापि सुजातश्च कुमारकः ।
वोढुः पञ्चशिखश्चापि दुर्वासाश्चांगिरास्तथा ॥२२॥
शुको रामः कुशिकश्च ऋष्यशृंगो विभाण्डकः ।
वामदेवस्तथा शृंगी क्रतुर्यतिस्तथाऽऽरुणिः ॥२३॥
शुक्रो बृहस्पतिश्चापि वामनः पारिभद्रकः ।
अष्टावक्रश्च पैलश्च वाल्मीको मधुजित्तथा ॥२४॥
प्रचेताः पुरुजिच्चापि भृगुर्मरीचिरेककः ।
द्वीतश्चाप्यथ त्रीतश्च कात्यायनः सुमन्तुकः ॥२५॥
मार्कण्डेयः कश्यपश्च दक्षः सूर्यः शशी तथा ।
संवर्त्तश्चाप्युतथ्यश्च नरो नारायणस्तथा ॥२६॥
विश्वामित्रः शतानन्दो जाबालिस्तैतिलस्तथा ।
उपमन्युर्गौरमुखो मैत्रेयश्च कठः कचः ॥२७॥
अदितिश्च दितिश्चापि कृत्तिकाश्च पतिव्रताः ।
कुटुम्बशिष्यसहिताः श्रीकृष्णस्याऽऽश्रमं ययुः ॥२८॥
श्रीमद्गोपालकृष्णस्तान् ववन्दे दण्डवत् भुवि ।
अथ हंसस्थितो ब्रह्मा सावित्रीसहितो ययौ ॥२९॥
दिव्ययानस्थितः शंभुर्व्योम्ना सतीयुतो ययौ ।
नन्दी कालो वीरभद्रः सुभद्रमणिभद्रकौ ॥३०॥
पारिभद्रो गणेशश्च स्कन्दो रुद्रः समाययुः ।
कुबेरश्च वरुणश्च महेन्द्रोऽग्निस्तथाऽनिलः ॥३१॥

यमश्च ग्रहवसव आदित्याः शेषभोगिनः ।
एवं सर्वे महद्भावाः पूज्या मान्याः समाययुः ॥३२॥
गोपालकृष्णो भक्त्या तान् ववन्दे शिरसा भुवि ।
तुष्टाव परया प्रीत्या तत्तत्सृष्टीश्वरांस्तदा ॥३३॥

श्रीगोपालकृष्ण उवाच—

परब्रह्म परे धाम्नि राजमानः परेश्वरः ।
परात्परः स्वयंमुक्तैः सहितः पुरुषोत्तमः ॥३४॥
अद्य वै मद्गृहे चास्ते जगतां परमेश्वरः ।
अहो भाग्यं मम कृष्णो नारायणोऽत्र चागतः ॥३५॥
अहो भाग्यं मम वासुदेवादयः समागताः ।
अहो भाग्यं चावताराः परमेशाः समागताः ॥३६॥
ईश्वरा धाममुक्ताश्च मुक्तान्यश्च समागताः ।
भूमा विराट् स्वयं विष्णुर्विधाता विश्वसृट् प्रभुः ॥३७॥
पत्नीव्रतो महाविप्रश्चापि मद्गृहमागतः ।
सिद्धसाध्वीयतियोगिपूज्यो गुरोर्गुरुः स्वयम् ॥३८॥
ब्रह्मा मम गृहे त्वास्ते महाभाग्यं ममाऽद्य वै ।
यं प्रपूज्य जनो याति मुक्तेर्मुक्तेः सलोकताम् ॥३९॥
सर्वसंकटनाशश्च यत्प्रतापाद् भवेदपि ।
श्रीमत्कृष्णस्वरूपोऽयं गणेशो मम चालये ॥४०॥
देवानामग्रगः पूज्यो धन्योऽहं भुवि सर्वथा ।
शंकरो भगवाँश्चापि विष्णुर्लक्ष्मीसमन्वितः ॥४१॥
जगतां जननी राधा पार्वती चादिरूपिणी ।
मूलप्रकृतिराद्या च परब्रह्मस्वरूपिणी ॥४२॥
यत्पादौ सम्परिपूज्य वाञ्छितं लभते व्रती ।
सा साक्षान्मद्गृहे चाऽद्य विद्यते जननी शुभा ॥४३॥
धामकन्या धाममुक्तोत्तमाः साध्व्यो मम गृहे ।
धन्येयं कम्भरालक्ष्मीर्यस्याश्चैतद्विलोकनम् ॥४४॥
सम्पन्नं चाद्य साक्षाद्वै ब्रह्मसृष्टेस्तु योषिताम् ।
ईशसृष्टेश्च साध्वीनामीशानामपि दर्शनम् ॥४५॥
धन्यं सरश्चाश्वपट्टं धन्या कुंकुमवापिका ।
धन्यः सौराष्ट्रदेशश्च यत्र श्रीपरमेश्वराः ॥४६॥
पितरः ऋषयो देवा देव्यस्तत्त्वानि मद्गृहे ।
सर्वपातालवासाश्च मूर्ताऽमूर्ते गृहे मम ॥४७॥
अद्य मे सफलं जन्म सफलोऽयं कृतो युगः ।
सफलं सर्जनं चाद्य सफलं जीवनं मम ॥४८॥
यद्गेहे च महीमानास्त्रिसृष्टिवासिनोऽद्य वै ।
ब्रह्मसृष्टिरीशसृष्टिर्जीवसृष्टिर्गृहे मम ॥४९॥
एवं सर्वानभिवन्द्य योग्यसिंहासनेषु तान् ।
वासयामास विधिना शातभौमे महालये ॥५०॥
पूजयामास विधिवत् क्रमेण दशयोजने ।
कामरूपधरः कोट्यर्बुदरूपधरः पिता ॥५१॥
प्रत्येकं वरयामास परमेशान् सुरादिकान् ।
मुनिवर्गान् ऋषीन् साधून्मुक्तान्देवान्द्विजाँस्तथा ॥५२॥
लोमशं च मुनिं भक्त्या वव्रे नैजं पुरोहितम् ।
रत्नैः प्रवालैर्हारैश्च कल्पमुक्ताविभूषणैः ॥५३॥
वसनैर्गन्धमाल्यैश्च मणिमाणिक्यहीरकैः ।
गन्धसारैश्चन्दनैश्च रत्नसिंहासनस्थितम् ॥५४॥
सर्वमध्ये श्रीगणेशं वरयामास पूजने ।
शुभकार्ये स्थितं देवं गजाननं तु वारिभिः ॥५५॥
ब्राह्महृदाऽऽहृतैश्चापि विरजाहृतवारिभिः ।
जलावरणवार्भिश्च स्वर्गंगामेरुवारिभिः ॥५६॥
सप्तसामुद्रवार्भिश्च सर्वतीर्थजलैस्तथा ।
पुष्पचन्दनसौगन्ध्यामृतयुक्तैः प्रशीतलैः ॥५७॥
तथा दुग्धेन दध्ना च घृतेन मधुनाऽपि च ।
शर्कराभिः पञ्चगव्यैः स्नपयामास भक्तितः ॥५८॥
गणेशं श्रीकृष्णरूपं सर्वविघ्नविनाशकम् ।
सर्वमांगल्यदं देवं पूजयामास वस्तुभिः ॥५९॥
पारिजातस्य पुष्पैश्च ब्राह्मैश्च कमलैस्तथा ।
वैकुण्ठस्य तु दुर्वाभिस्तथा रत्नेन्द्रभूषणैः ॥६०॥
वह्निशुद्धांशुकैश्चापि ब्राह्मसिन्दूरकैस्तथा ।
गन्धचन्दनपुष्पैश्च सौवर्णाङ्गुलभूषणैः ॥६१॥
एवं सम्पूज्य विधिवद् गणेशं च ततः परम् ।
राधां लक्ष्मीं पार्वतीं च प्रभां श्रीं माणिकीं रमाम् ।
मञ्जुलां सगुणां हंसां जयां च ललितां दयाम् ॥६२॥
तथाऽन्याः श्रीसतीः साध्वीर्धामधामनिवासिनीः ।
कार्ष्णीश्चापि महालक्ष्मीः सावित्रीं च सरस्वतीम् ॥६३॥
गंगां दितिं चादितिं च ऋषिपत्नीः पतिव्रताः ।
देवीश्चापीश्वरिणीश्च पितृपत्नीश्च भामिनीः ॥६४॥
योगिनीः सांख्ययोगिनीर्लोपामुद्रादिकास्तथा ।
पतिव्रता महीमानीः पूजयामास कम्भरा ॥६५॥
तथाऽर्बुदाऽब्जकन्याश्च सौभाग्यशोभिता अपि ।
कम्भराऽर्बुदरूपैश्च समाश्लिष्य पुनः पुनः ॥६६॥
परस्परं च सम्भाष्य सर्वाः संश्लिष्य वै मिथः ।
ताः सर्वाः कम्भरालक्ष्मीर्वेशयामास मन्दिरे ॥६७॥
वरयामास माल्यैश्च वासोभिः रत्नभूषणैः ।
ब्रह्मवृक्षस्य पुष्पैश्च पारिजातस्य पुष्पकैः ॥६८॥

सिन्दूरबिन्दुकैश्चापि सीमन्ते शोभितैस्तथा ।
भाले सुचन्द्रपत्रैश्च बिन्दुभिश्चान्दनैस्तथा ॥६९॥
कस्तूरीकुंकुमालक्तप्रभृतिभिः सुगन्धिकैः ।
सम्पूज्य भोजयामास मिष्टान्नैस्तत्तदर्हकैः ॥७०॥
अमृतं वारि ताम्बूलं कर्पूरादिसुवासितम् ।
प्रददौ कम्भराश्रीश्च मुनिपत्नीः क्रमेण तु ॥७१॥
पूजयामास विधिवत् पतिपुत्रवतीः सतीः ।
धामकन्या ईशकन्याः पितृकन्या मनोहराः ॥७२॥
देवकन्या नागकन्या मनुकन्या वृषाश्रिताः ।
बन्धुकन्या भक्तकन्या गान्धर्वाऽसुरजास्तथा ॥७३॥
पूजयामास विधिना भोजयामास सादरम् ।
वासयामास सौधेषु महोद्यानान्वितेषु च ॥७४॥
वाद्यानि वादयामासुर्वादका मंगलानि हि ।
मंगलं कारयामास भोजयामास भूसुरान् ॥७५॥
श्रीदेवीं पूजयामास कुंकुमवापिकेश्वरीम् ।
सर्वैः स वस्तुभिः षष्ठीं तथा मंगलदेवताम् ॥७६॥
ग्रामदेवान् सरोदेवान् पूजयामास भावतः ।
महीमानान् सर्वभावैः पूजयामास वै पिता ॥७७॥
ततः पुण्यं स्वस्त्ययनं कारयामास मंगलम् ।
वेदांश्च पाठयामास गापयामास गीतिकाः ॥७८॥
सुवर्णकलशस्थैश्च गांगवारिभिरच्युतम् ।
स्नापयामास माता च श्रीमत्कृष्णनरायणम् ॥७९॥
वस्त्रचन्दनमाल्याद्यैर्वेषं रम्यं चकार सा ।
दिव्याम्बरविभूषाभिर्दिव्यलेपनचन्दनैः ॥८०॥
ततः सभाऽवताराणामीश्वराणां तपस्विनाम् ।
ऋषीणां च सुराणां च मानवानां च देहिनाम् ॥८१॥
सृष्टित्रयाऽऽगतानां च सम्पन्ना तत्र वै हरिः ।
आययौ च यदा कृष्णनरायणः सपितृकः ॥८२॥
तदाऽवतारा ईशाश्च देवा मनवो मानवाः ।
ऋषयोऽन्ये समुत्तस्थुर्ववन्दिरे परेश्वरम् ॥८३॥
त्वं परब्रह्म साक्षाद्वै बालकृष्णो विराजसे ।
अवतारधरस्त्वं वै साक्षी कृपाप्तविग्रहः ॥८४॥
निर्लेपश्चात्मशयनः सर्वसृष्ट्यादिकारणम् ।
महाविष्णुर्विराड् भूमा ब्रह्मा शेषादयस्त्वयि ॥८५॥
वर्तामः श्रीपते कृष्ण ब्रह्माण्डे मशका इव ।
त्वदंशाश्च वयं सन्तो देवाः स्म सर्वसृष्टिषु ॥८६॥
ब्रह्माण्डानि ह्यसंख्यानि शेषभोगे वसन्ति च ।
शेषस्तिष्ठति कूर्मे च कूर्मो जले प्रवर्तते ॥८७॥
जलं तेजोबलादूर्ध्वे त्वभ्रवद् वर्तते सदा ।
तेजो वायुकृताधारं वायुराकाशवर्तनः ॥८८॥
आकाशोऽयं चिदाकाशे चिदाकाशश्च चाक्षरे ।
अक्षरं ब्रह्मभावे च परमेशे विराजते ॥८९॥
अयं श्रीपरमेशस्त्वं वर्तसे कम्भरासुतः ।
गोपालबालकः साक्षादस्मदृग्गोचरो ह्यसि ॥९०॥
इत्येवं वन्दितो बालस्वरूपः कृष्ण एव ह ।
सभामध्येऽतिशुशुभे राधारमाप्रभापतिः ॥९१॥
द्विभुजः श्वेतकान्त्याढ्यः स्वर्णवर्णो मनोहरः ।
ईषद्धास्यप्रसन्नास्यो विभूषाभिर्विराजितः ॥९२॥
देहशुद्ध्यर्थमेवादौ कृतकृच्छ्रत्रयोऽच्युतः ।
अथ मंगलसमये शुभलग्ने समागते ॥९३॥
सौम्यग्रहैः परिदृष्टे जाग्रल्लग्नाधिपे स्थिते ।
असौम्यग्रहदृष्ट्याद्यविषये कर्म चारभत् ॥९४॥
कामचाराशनपानदोषशुद्ध्यर्थमेव सः ।
धेनुत्रयं ददौ दाने स्वस्तिवाचमवाचयत् ॥९५॥
लोमशस्याज्ञया स्वर्णसहस्रं मणिशेवधिम् ।
ददौ दाने ब्राह्मणेभ्यो नमश्चकार देवताः ॥९६॥
विष्णुं शिवं गणेशं पार्वतीं सूर्यं प्रपूज्य च ।
वह्निं सम्पूज्य विधिना श्रीमद्गोपालकृष्णकः ॥९७॥
पुत्राधिवासनं चक्रे वेदमन्त्रैश्च संसदि ।
देवान् ग्रहान् दिशां पालान् सम्पूज्य मातृकास्तथा ॥९८॥
नान्दीश्राद्धं महाशान्तिं विधाप्य तदनन्तरम् ।
स्थण्डिले च समुद्भवाऽनले होमं चकार सः ॥९९॥
प्रदत्वा वसुधारां च सप्तवारं घृतैस्ततः ।
वृद्धिश्राद्धं दैवश्राद्धं चक्रे पितृप्रतर्पणम् ॥१००॥
क्षौरितस्नातमुक्तायाऽलंकृतब्रह्मचारिणे ।
कटिसूत्रं च कौपीनं यज्ञसूत्रं ददौ पिता ॥१०१॥
मौञ्जीं बध्वा त्रिरशनां कट्यां कर्णे च लोमशः ।
मन्त्रं ददौ च गायत्र्यास्त्रिवारं दक्षिणश्रुतौ ॥१०२॥
आज्यहोमं कारयित्वा मुनिर्धर्मानुपादिशत् ।
ततो भिक्षां ददावस्मै श्रीरमाराधिकाप्रभाः ॥१०३॥
ईश्वराण्यश्च मुक्तान्यः साध्व्यो देव्यश्च कन्यकाः ।
महालक्ष्मीः प्रकृतिश्च हंसा लक्ष्मीश्च पार्वती ॥१०४॥
मञ्जुला सगुणा धामकन्या ईशसुतास्तथा ।
देवनागनृपकन्याः सृष्टित्रयसुतादिकाः ॥१०५॥
कार्ष्ण्यः सर्वा लोमशस्याश्रमस्था दिव्यविग्रहाः ।
कंभराश्रीश्चामृता च देवदैत्यादिमातरः ॥१०६॥

मुनिपत्न्यो ब्रह्मविष्णुमहेशानां च योषितः ।
कामिन्योदिक्प्रपालानां ददुर्भिक्षाः पृथक् पृथक् ॥१०७॥
अमूल्यरत्नसन्नद्धदिव्यस्वर्णसुपात्रके ।
भिक्षां गृहीत्वा भगवान् लोमशाय ददौ मनाक् ॥१०८॥
आमौलिब्रह्मदण्डं चाऽजिनमुत्तरवस्त्रकम् ।
पूजां सन्ध्यां ददौ कमण्डलुं शीलं च लोमशः ॥१०९॥
अन्ये सर्वे भगवन्तो ददुस्तस्मै महार्हणाम् ।
भिक्षां रत्नावलिहारान् मणीन् काञ्चनविकृतीन् ॥११०॥
अमृतानि विचित्राणि चोपभोग्यानि यानि च ।
ददुश्चास्मै निजलोकाहृतानि देवयोनयः ॥१११॥
अथैवं कर्म निर्वाप्य दक्षिणां लोमशाय च ।
स्वर्णहीरकरत्नानि ददौ गोपालकृष्णकः ॥११२॥
पुत्राय हीरहारं च ददौ रक्षाकरं पिता ।
देव्यः सौभाग्यवत्यश्च कन्याश्च मातरस्तथा ॥११३॥
शुभाशिषं प्रददुश्च शुक्लपुष्पैश्च दुर्वया ।
ये ये समाययुर्यज्ञे ते ते शुभाशिषो ददुः ॥११४॥
गीतिकाश्चाप्यगायन्ताऽवाद्यन्त तूर्यकाणि च ।
गोत्रं च प्रवरान् वेदं शाखां चाऽशिक्षयत् पिता ॥११५॥
परब्रह्मात्मकं गोत्रं प्रवरास्त्रय इत्यमी ।
अक्षरब्रह्म श्रीकृष्णः श्रीनारायण एव ते ॥११६॥
वेदः सर्वात्मकश्चैकः सामः श्रीमुखनिर्गतः ।
शाखा पत्नीव्रतीया च शाखी त्वं परमेश्वरः ॥११७॥
इत्येवं राधिके कर्म समाप्य महीमानकान् ।
संसदः परिहारं च चक्रे गोपालकृष्णकः ॥११८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीकृष्णनारायणस्य यज्ञोपवीतप्रदानविधिपूजादिनिरूपणनामा षट्षष्टितमोऽध्यायः ॥ ६६ ॥

**श्रीकृष्ण उवाच—**

श्रीमत्कृष्णस्य च राधे यज्ञोपवीतकोत्तरम् ।
महीमाना निवासेषु ययुस्तस्मात् सभास्थलात् ॥ १ ॥
ततो गोपालकृष्णो वै तथा श्रीकम्भरासती ।
गुणातीतास्तथा मुक्तास्तथा कन्या ह्यसंख्यकः ॥ २ ॥
ऋषयस्तन्निवासाश्च तीर्थानि मूर्तवल्लयः ।
तत्त्वान्यपि च दिव्यानि श्रीमुख्याः शक्तयस्तथा ॥ ३ ॥
भोजनावसरे जाते द्वारपं ब्रह्मनादकम् ।
सूचयामासुरेवाऽत्र आह्वानार्थं क्षणाच्च सः ॥ ४ ॥
ब्रह्मघण्टां मिष्टरवां सृष्टित्रयासनादिनीम् ।
नादयामास मधुरस्वरां भोजनबोधिकाम् ॥ ५ ॥
अवतारेश्वराणां च भगवतां च पंक्तयः ।
मुक्तानां धामसंस्थानां मुक्तानीनां तदाऽभवन् ॥ ६ ॥
वासुदेवप्रभृतीनां वैराजान्तकदेहिनाम् ।
दिव्यानामीश्वरीणां च पंक्तयः शतशोऽभवन् ॥ ७ ॥
दिव्याऽर्बुदाऽब्जपद्मानि कन्यानां विदधुस्तदा ।
धामानीतात्मभोज्याद्यमृतानां परिवेषणम् ॥ ८ ॥
भक्ष्यभोज्यानि दिव्यानि लेह्यचोश्यानि तत्तथा ।
मिष्टपेयानि चान्यानि पाकशाकानि तानि च ॥ ९ ॥
रसान् दिव्यान् चारनालान् द्रवान् दिव्यान् तथाविधान् ।
योग्यान् ब्रह्महृदोद्भूतान् ब्रह्मवाटीसमुद्भवान् ॥१०॥
ब्रह्मप्रियाभिः पक्वाश्च ताभिः सुसंस्कृतान् शुभान् ।
अपाराणि च ताः परिवेषयामासुरादरात् ॥११॥
स्थालेषु स्वर्णपात्रेषु चोपपात्रेषु वै शुभम् ।
घृतं दधि पयो दुग्धपाकं मधु च शर्कराम् ॥१२॥
ओदनानि द्विदलाश्च सूपं मिष्टान्नकानि च ।
पायसान्नानि सर्वाणि मेशुभान्यपि सर्वथा ॥१३॥
मोहस्थालानि मिष्टानि तथाऽपूपानि मौक्तिकान् ।
सूत्रफेनीं लड्डुकाँश्च चतुष्कान् शष्कुलींस्तथा ॥१४॥
शाटकान् घृतपूराँश्च मिष्टान्तःपोलिकास्तथा ।
फुलवटीः राजतृप्तान् क्वथिका भर्जिकास्तथा ॥१५॥
कलिकाः सेविकाश्चापि संयावं भाजिकास्तथा ।
चटनीर्विविधाश्चापि तिक्तलावण्यसंभृतान् ॥१६॥
रुक्षसंस्कृतभक्ष्याँश्च भोजयामासुरादरात् ।
जलानि मिष्टपेयानि तक्राणि नवनीतकम् ॥१७॥
फलानि फलबीजानि सौगन्धिकदलानि च ।
ददुस्ततोऽतिमग्नाश्च चक्रुर्भोजनमीश्वराः ॥१८॥
ईश्वराण्यथ ता मुक्ता मुक्तान्यः परमेश्वराः ।
ब्रह्मसख्यः प्रसह्यैव ददुर्भोज्यादिकानि तु ॥१९॥
आकण्ठं भोजयामासुस्तृप्ताश्चुलुकमादधुः ।
जलपानं प्रचक्रुश्च ताम्बूलानि च जगृहुः ॥२०॥
मुखमिष्टानि चूर्णानि जगृहुस्ते ततः परम् ।
ययुर्नैजनिवासाँश्च ब्रह्मसृष्टीशसृष्टिकाः ॥२१॥
अथ ब्रह्माणमारभ्य विष्णुशंकरतत्प्रजाः ।
देवा देव्यः पितरश्च सत्यादिभुवरान्तकाः ॥२२॥
साध्या विश्वे च दिक्पाला सुरेश्वरादयस्तथा ।
सुराण्यः कन्यका सर्वा निषेदुस्तत्र पंक्तिषु ॥२३॥

तेभ्यस्ताभ्यो ब्रह्मकन्याः कार्ष्ण्यश्चापि मुदा मुहुः ।
आसनानि ददुः परिवेषणं विदधुर्मुहुः ॥२४॥
सत्योद्भवानि मिष्टान्नपानपात्राणि वै ददुः ।
मिष्टान्नान्यमृतान्नानि भक्ष्यभोज्यानि तानि च ॥२५॥
लेह्यचोष्याणि सर्वाणि स्वाद्यपेयानि वै तथा ।
अन्नशाकरसचूर्णप्रभृतीनि ददौ मुहुः ॥२६॥
भुक्तवन्तश्च ते देवा जलं पपुस्ततः परम् ।
ताम्बूलादिमुखाऽऽवासं जगृहुश्चाऽऽलयं ययुः ॥२७॥
अथर्षयो मनुष्याश्च पार्थिवासनदेहिनः ।
चतुःखनिसमुत्पन्ना निषेदुः पंक्तिषु द्रुतम् ॥२८॥
दिव्याऽदिव्यास्तथा मूर्ताऽमूर्ताश्चराऽचरास्तथा ।
निषेदुर्भोजनपंक्तिवर्तुलेषु मुदान्विताः ॥२९॥
लोमशाश्रमकन्याश्च पात्राणि चासनानि च ।
ददुस्तेभ्योऽपि परिवेषयामासुः समुत्सुकाः ॥३०॥
अष्टकल्पस्य दैवस्य सर्गस्य कन्यकास्तदा ।
अष्टदैवप्रसर्गाश्च चक्रुर्भोजनमुत्सुकाः ॥३१॥
अमृतानि ह्यनन्तानि मिष्टान्नानि द्युमन्ति च ।
रसान् भोज्यान् भक्ष्यचोष्यान् लेह्यान् पेयान् रसान्वितान् ॥३२॥
तत्तद्देवनिकायेभ्यो योग्यान् ददुश्च तास्तदा ।
तृप्ता भुक्त्वा तु ते पानं पपुश्च मुखवासकम् ॥३३॥
ताम्बूलकादि जगृहुर्ययुश्चाऽऽवासमुत्सुकाः ।
अथाऽतलादिलोकानां वासिनां पंक्तयस्तदा ॥३४॥
दैत्यानां दानवानां चासुराणां रक्षसां तथा ।
नागानां भोगिनां जलेशयानां पंक्तयोऽभवन् ॥३५॥
तत्तल्लोकार्हभोज्यानि भक्ष्याणि विविधानि च ।
लेह्यान्यपि च चोष्याणि आस्वाद्यान्यपि सर्वथा ॥३६॥
व्यञ्जनानि च पेयानि रससाराणि कन्यकाः ।
योग्यपात्रादिषु परिवेषयामासुरुत्सुकाः ॥३७॥
मूर्तानां चाऽमूर्ततत्त्वोत्तमानां गुणशालिनाम् ।
गुणानां कर्मणां सर्वतीर्थानां पावनार्थिनाम् ॥३८॥
दीनाऽन्धकृपणानां च नरनारीनपुंसुषाम् ।
श्रेण्यश्चराऽचराणां चाऽभवन् योग्याश्च दासिकाः ॥३९॥
दासा विप्राश्च तान् परिवेषयामासुरत्यति ।
भोजयामासुरत्यर्थं पेयं ददुः सुशीतलम् ॥४०॥
वनसारान् जलसारान् वह्निसारान् क्षितेः रसान् ।
धेनुसारांस्तृणसारान् कन्दसारान् प्रमेदकान् ॥४१॥
देहसारान् पंकसारान् पुष्पसारान् रसादिकान् ।
पत्रसारान् मूलसारान् कृतिसारान् समुद्भवान् ॥४२॥
जरासारान् कोशसारान् बीजसारान् फलोत्तमान् ।
मञ्जरीसारकान् स्तम्बसारान् नालोद्भवांस्तथा ॥४३॥
खनिसरान् व्योमसारान् मेघसारान् ऋतूद्भवान् ।
वृष्टिसारान् पुण्यसारान् श्रद्धासारान् हृदुद्भवान् ॥४४॥
स्वाप्नसारान् कालसारान् द्रव्यसारान् गुणोद्भवान् ।
कर्मसारान् योगसारानैश्वर्यकृतविग्रहान् ॥४५॥
सर्वविधान् भोज्यसारान् योग्येभ्यः कन्यका ददुः ।
लक्ष्मीः श्रीः कमला हंसा रमा यत्र प्रदायिकाः ॥४६॥
तत्र का न्यूनता राधे भोज्यपानोपकारिषु ।
सत्री यत्र स्वयं कृष्णः लक्ष्मीर्यत्राभिदायिनी ॥४७॥
कल्पवल्ल्यः समाहर्त्र्यस्तत्र का नाम निम्नता ।
सर्वधामानि लोकाश्च मूर्ता राजन्त एव च ॥४८॥
यत्र तत्त्वानि तिष्ठन्ति तत्र का नाम निम्नता ।
यत्र वह्निः स्वयं पक्ता तृप्तिर्यत्परिवेषिका ॥४९॥
अमृताऽक्षरभोज्यानि तत्र का नाम निम्नता ।
नित्यानन्दमहातृप्ता यन्महे परमेश्वराः ॥५०॥
सर्वैश्वर्यचमत्कारसिद्धयः कल्पपादपाः ।
चिन्तामणयो वर्तन्ते तत्र का नाम निम्नता ॥५१॥
इत्येवं राधिके ! भोज्यपरिहारोत्तरं स्वयम् ।
लोमशो भोजनं चक्रे ततश्च बालकृष्णकः ॥५२॥
सूदाश्च परिवेषादिकर्त्र्यश्च बुभुजुस्ततः ।
कार्ष्ण्यस्ततोऽथ बुभुजुस्ततो गोपालबान्धवाः ॥५३॥
बुभोज च ततः श्रीमद्गोपालकृष्ण एव तु ।
ततश्च बुभुजे श्रीमत्कंभराश्रीः सुतान्विता ॥५४॥
दासेभ्यः प्रददौ माता भोजनान्युत्तमानि च ।
कीटमत्स्यपतंगेभ्यो भाग्यजीविभ्य इत्यपि ॥५५॥
अनिश्रिताऽदनेभ्यश्च ददौ भोज्यानि कम्भरा ।
सुवर्णरूप्यरत्नानि कोटिशो दक्षिणा ददौ ॥५६॥
क्षणं विश्रम्याऽपराह्ने सभा तु मानवर्धिनी ।
परमेश्वरदेवानां समस्तदेहिनां ह्यभूत् ॥५७॥
सुवर्णासनसंदिप्ता कोटिसत्त्वादिपूरिता ।
मध्ये श्रीशः कृष्णनारायणो विराजतेऽम्बरे ॥५८॥
उच्छ्रये गजशोभाढ्यासने पार्श्वे पिता तथा ।
माता कृष्णस्तथा राधा श्रीश्च नारायणस्तथा ॥५९॥
हेमन्तो भगवाँश्चोभौ स्थितौ धृत्वाऽस्य चामरे ।
अवतारा अवतारिण्य ईशा ईशानीगणाः ॥६०॥
देवा देव्यः पितरश्च पित्र्यो मुनय आर्षिकाः ।
असुरा असुराण्यश्च मानवा योषितस्तथा ॥६१॥

पशवः पक्षिणः स्तम्बा नागा दैत्याश्च तस्त्रियः ।
राजन्ते, सा सभा दीर्घा विशाला जडचेतनैः ।
तत्त्वैरुच्चावचैर्युक्ता दिव्याऽदिव्यैः सुदेहिभिः ॥६२॥
ततो नृत्यं नर्तकीनां प्रावर्तत सुशोभनम् ।
अप्सरसां गीतयश्च गन्धर्वाणां सुवादनम् ॥६३॥
प्रावर्तत शुभं गन्धर्वीणां नृत्यं समुत्तमम् ।
नृत्ये परिहृते मल्ला युद्धकौशल्यमावहन् ॥६४॥
दर्शयामासुरत्यर्थं समरांगणभूमिकाः ।
ततो दृश्या नटानां च नाट्ययोगेन खेलिताः ॥६५॥
प्रावर्तन्ताऽम्बररज्जुकौशल्यालम्बनादयः ।
उड्डयनं स्वर्गयुद्धं चेन्द्रजालिकदर्शनम् ॥६६॥
विद्युद्वैभवदृश्यानि निर्वर्तितानि वै ततः ।
गायनानि समभवन् कृष्णयशोभराणि च ॥६७॥
विद्याश्राणां समभवन् व्याख्यानान्युत्तमानि च ।
सिद्धानामुपदेशाश्चाऽभवँस्तत्रातिहृद्गमाः ॥६८॥
भाटचारणबन्दिशाः प्रशंसकाः कविप्रथाः ।
वर्णयामासुरेवैनमुत्सवं प्रजगुः स्त्रियः ॥६९॥
नारदः श्रीसनत्कुमाराज्ञया प्रशशंस ह ।
उत्सवं परमं दिव्यं न भूतं भावि नैव च ॥७०॥
अनादिश्रीकृष्णनारायणो यत्र परेश्वरः ।
यज्ञसूत्रस्य पात्रं चाऽवतारा महीमानकाः ॥७१॥
सृष्टित्रयं यन्महेऽस्ति सम्भूतं सत्कृतिप्रदम् ।
सर्वरसाः सर्वगन्धा यत्राऽऽनन्दाश्च सर्वशः ॥७२॥
सर्वसत्यो यत्र सन्ति श्रीभूलीलाविभूतयः ।
नैतादृशो महो भावी महोऽयं सर्वतोऽधिकः ॥७३॥
कर्तव्यं स्मरणं चाऽस्य श्रवणं मननं तथा ।
निदिध्यासनमस्यैव साक्षान्मुक्तिर्हरेः पदे ॥७४॥
तदेव लोके कर्तव्यं यत्कृते मोक्षमाविशेत् ।
कृतेन येन संसारे बन्धनं नैव जायते ॥७५॥
अनादिश्रीकृष्णनारायणस्यैते महोत्सवाः ।
कर्तव्याः सर्वदा भक्तैर्येन बन्धाद् विमुच्यते ॥७६॥
भवजलधिमग्नानां कुटुम्बिभारमज्जताम् ।
शरणं श्रीहरेरत्र तारकं नौस्वरूपकम् ॥७७॥
संश्रिता ये हरिं नारायणं गुरुं परेश्वरम् ।
कमलेशं न ते यान्ति धर्मराजप्रदेशकम् ॥७८॥
सा जिह्वा या हरिं स्तौति तच्चित्तं माधवेऽर्पितम् ।
तौ श्लाघ्यौ तु करौ बोध्यौ यौ श्रीकृष्णार्चने रतौ ॥७९॥
अन्यथा स्तम्बशाखाख्यौ शुष्कौ सेवाविवर्जितौ ।
कण्ठः स जम्बुककण्ठो यो न गायति माधवम् ॥८०॥
रोगो महान् स एवाऽस्ति यत्र नास्ति हरेः स्मृतिः ।
स एव शोच्यः सजीवो न योऽर्चयति केशवम् ॥८१॥
अनादिश्रीकृष्णनारायणोऽयं परमेश्वरः ।
सर्वाऽवतारपूज्योऽयं पूजनीयः पुमुत्तमः ॥८२॥
पूजका नहि शोच्यास्ते मृता अपि हि मुक्तिगाः ।
सर्वं चराचरं चात्र बालकृष्णे विराजते ॥८३॥
अस्य पूजा कृता येन तेनाऽर्चितं चराचरम् ।
रत्नाकरगुणा यद्वदसंख्याः श्रीहरेर्गुणाः ॥८४॥
राधाप्रभापारवतीलक्ष्मीपतिं श्रियः पतिम् ।
समाश्रिता न संसारे दुःखिता मोक्षगा यतः ॥८५॥
शूलध्वजधनुर्बाणमीनस्वस्तिकचक्रवान् ।
पूज्यते येन बालोऽयं करे ससकचिह्नितः ॥८६॥
ऊर्ध्वरेखाऽधिकैश्चिह्नैः षोडशाख्यैः पदाब्जयोः ।
सहितः पूज्यते येन बालकृष्णोऽयमीशिता ॥८७॥
सर्वायुधधरः सर्वकलाकौशल्यवारिधिः ।
पूज्यते येन बालोऽयं मोक्षभाक् स न संशयः ॥८८॥
यदन्तःकरणे कृष्णो यदात्मनि नरायणः ।
कृष्णनारायणव्याप्तो न मृत्योर्भयवान् क्वचित् ॥८९॥
परायणं प्रपन्नानां बालकृष्णजुषां क्वचित् ।
निम्नायनं न चैवाऽस्ति परधाम्नोऽधिकारिणाम् ॥९०॥
अनादिश्रीकृष्णनारायणभक्ताः परात्परम् ।
सतां मोक्षं चाप्नुवन्ति राधारमादिशंसितम् ॥९१॥
संग्रामिणां धार्मिकाणां सात्त्विकानां महात्मनाम् ।
गतेः परा गतिश्चास्ते भगवद्वेदिनां शुभा ॥९२॥
सूक्ष्मं सर्वगतं कृष्णं भक्ताः पश्यन्ति नेतरे ।
तथा पश्यन्ति तं कृष्णं महात्मानः कृपालयाः ॥९३॥
सर्वाः क्रियाः कृष्णपरा यस्य भवन्ति चार्पिताः ।
सर्वकर्ताऽप्यकर्ता स न बध्यते प्रमुच्यते ॥९४॥
हरिर्येषां प्रियो नित्यं ते प्रियाश्च हरेः सदा ।
हरिं ध्यायेच्च यस्तं ध्यायति हरिः पदाश्रितम् ॥९५॥
कल्यमुत्थाय भक्त्याऽयं स्मर्तव्यो बालकृष्णकः ।
श्रवणीयः श्रावणीयो दुर्गाणां तारको हि सः ॥९६॥
अस्य कृष्णस्य तु कथामृतपानास्तरन्ति हि ।
अत्र श्रीबालकृष्णे ये भक्तिरव्यभिचारिणीम् ॥९७॥
करिष्यन्ति गमिष्यन्ति ते यत्राऽऽस्ते हरिः स्वयम् ।
कृष्णसेवाप्रसक्तानां या गतिः परधामनि ॥९८॥

सा तु जन्मसहस्रेण तपोभिर्नाहि लभ्यते ।
किं जप्यैः किं मन्त्रवाग्भिः किमाश्रयैः प्रयत्नकैः ॥९९॥
किं यज्ञैः किं प्रदानैश्च किं धर्मैः कीर्तिभिश्च किम् ।
किं तस्य बहुभिश्चाऽन्यैर्येनाऽऽप्तः श्रीहरिर्यदि ॥१००॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
मन्त्रः सर्वार्थदाता चेज्जप्तः किं तस्य विद्यया ॥१०१॥
हरिर्येषां जयस्तेषां मोक्षस्तेषां परात्परः ।
लाभस्तेषां च मांगल्यं येषां हृत्स्थः परः प्रभुः ॥१०२॥
तीर्थकोटिसहस्राणि दानकोटिशतानि च ।
कृष्णनारायणनतेः कलां नाऽर्हन्ति षोडशीम् ॥१०३॥
कृष्णनारायणनाम्ना सर्वतीर्थफलं भवेत् ।
कृष्णनारायणध्यानाद् योगितो गतिरुत्तमा ॥१०४॥
कृष्णनारायणपूजां कुर्वन्ति जलमात्रतः ।
तेऽपि यास्यन्ति साधूनां स्थानं पुण्यकृतां परम् ॥१०५॥
त्रिसन्ध्यं श्रीकृष्णनारायणं स्मरन्ति याः पतिम् ।
तासां देहस्थितानां च मोक्ष एव न संशयः ॥१०६॥
नरा नार्यः सुरा देवा ईशा ईशान्य इत्यपि ।
सेवमाना बालकृष्णं परां गतिमवाप्स्यथ ॥१०७॥
धन्या राधारमाद्याश्च धन्याः कार्ष्ण्यः कुमारिकाः ।
धन्या कुंकुमवापी च यत्कान्तो भगवान् स्वयम् ॥१०८॥
धन्या वयं महीमाना यन्महेऽस्य समागमः ।
इत्युक्त्वा नारदः श्रीमान् प्रणनाम पुनः पुनः ॥१०९॥
भगवन्तं बालकृष्णं शुकं श्रीवल्लभं तथा ।
माला रत्नमयीः कण्ठेष्वार्प्य ननाम नारदः ॥११०॥
पुनर्विलोक्य च सभां दिर्घकण्ठेन नारदः ।
हस्तमुक्षिप्य च प्राह शृण्वतां यावतां पुनः ॥१११॥
महीमानाः प्रशृण्वन्तु सत्यं सत्यं वदाम्यहम् ।
लोके कृष्णावतारास्तु भविष्यन्ति सहस्रशः ॥११२॥
परं त्वेतादृशः कृष्णनारायणः परेश्वरः ।
अवतारी परिपूर्णतमोत्तमोत्तमः क्वचित् ॥११३॥
अद्य जातः समारम्भे पुनर्नैव भविष्यति ।
अन्ये कृष्णा अस्य लीलामाश्रयिष्यन्ति भक्तितः ॥११४॥
आनखात्तु शिखां यावत् अस्य मूर्तौ स्थले स्थले ।
सहस्रशस्तु चिह्नानि विद्यन्ते परमात्मनः ॥११५॥
शतैकं पादयोरस्य दशकं जंघयोस्तथा ।
विंशकं च तथा सक्थ्नोर्लिंगे च पञ्चकं तथा ॥११६॥
त्रिंशत्तु जघने चास्योदरे तु पञ्चविंशतिः ।
वक्षसि शतकं चास्य पृष्ठे पार्श्वे शतत्रयम् ॥११७॥
कण्ठे स्कन्दे द्विशतं च मुखे शतं गले त्रयम् ।
हस्तयोः शतचिह्नानि पञ्चाशत्तलयोस्तथा ॥११८॥
प्रकोष्ठे दशकं चापि नेत्रयोः पञ्चविंशकम् ।
गण्डयोः षोडश भाले पञ्च षट् कर्णयोस्तथा ॥११९॥
जिह्वायां चोष्ठयोश्चास्य क्रमाद् दश च विंशतिः ।
नासिकायां दशरेखा भ्रुकुटौ शतसद्गुणाः ॥१२०॥
केशेषु विंशतिश्चापि चिबुके तु चतुष्टयम् ।
रोमसु सर्वतः सन्ति हैरण्यगुणराशयः ॥१२१॥
यावद्गुणाः स्वभावाश्च रेखास्तिलाश्च सन्धयः ।
संयोगाश्चापि संस्थाना घटनाः सुव्यवस्थितिः ॥१२२॥
एकैकांगस्य च मया वर्णयितुं न शक्यते ।
सर्वं सर्वात्मकं श्रैष्ठ्यं विद्यतेऽत्र समन्ततः ॥१२३॥
एतन्मूर्तेः समादाय खण्डांशान् मूर्तयः पराः ।
भविष्यन्तीतरे देवा ईश्वराः परमेश्वराः ॥१२४॥
नाऽस्मान्मयाऽधिकं वाच्यं प्रमाणं सदसि स्थिताः ।
अवतारास्तथा मुक्ता भवन्तः परमेश्वराः ॥१२५॥
वामने विश्वरूपे तु मध्ये रोम्णोर्द्वयोर्द्वयोः ।
कोटिचिह्नानि तिष्ठन्ति नैषां स्याद् गणनार्हता ॥१२६॥
सृष्टित्रयस्वरूपं हि मूर्तौ भगवतः स्थितम् ।
सर्वसृष्टेस्तु चिह्नानि वर्तन्तेऽस्यैव वर्ष्मणि ॥१२७॥
कण्ठोपरि चोत्तमांगे सूक्ष्मसृष्टिः प्रतिष्ठिता ।
कण्ठादधः कटेरूर्ध्वं कार्यसृष्टिर्व्यवस्थिता ॥१२८॥
कटेरधो निकृष्टा च आनखान्तं व्यवस्थिता ।
कोट्यर्बुदाऽब्जचिह्नानि वर्तन्तेऽस्य तु वर्ष्मणि ॥१२९॥
इत्युक्त्वा विररामाऽसौ नारदः सनदाज्ञया ।
राधिके च ततः पारितोषिकान्यर्पयत् पिता ॥१३०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महीमानानां भोजनदानं, ततः सभायोजना, नारदोक्तपराविद्योपदेशश्चेत्यादिनिरूपणनामा सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

श्रीकृष्ण उवाच—

कुबेरो वसवः कल्पपादपा मेदिनी रमा ।
निधयश्चिन्तामणयः कृष्णनारायणाग्रतः ॥ १ ॥
तस्थुस्तु राधिके दातुं सम्पारितोषिकाणि वै ।
मुक्तेभ्यो मालिका दिव्या ददुर्दिव्यविभूतिजाः ॥ २ ॥
अवतारेभ्य एवैते ददुर्मुकुटकुण्डले ।
दिव्यहारानीश्वरेभ्यो ददुः कृष्णाज्ञया तदा ॥ ३ ॥

ब्रह्मादिभ्यो ददुः सिंहासनानि कानकानि हि ।
पितृभ्यश्चाऽक्षयाण्येव पात्राणि प्रददुस्तदा ॥ ४ ॥
ऋषिभ्यो यज्ञपात्राणि प्रददुश्चासनानि च ।
सुरेभ्यो रत्नहारांश्च ददुर्योग्यान् यथायथम् ॥ ५ ॥
दानवेभ्योऽसुरेभ्यश्च दैत्येभ्योऽपि ददुस्तदा ।
यानवाहनभूषाश्च मानवेभ्यो धनं ददुः ॥ ६ ॥
नागेभ्यो मणयश्चापि पशुभ्यो भोजनामृतम् ।
पक्षिभ्यो फलपुष्पादिरसद्रव्याणि ते ददुः ॥ ७ ॥
मूर्ताऽमूर्तचिदचिद्भ्यो यथायोग्यं धनानि च ।
विप्रेभ्यः स्वर्णरूप्यादि राजभ्यो हीरकादिकम् ॥ ८ ॥
साधुभ्यो वस्त्रकन्थादि सतीभ्यो भाग्यवर्धनम् ।
भूषाम्बरादि शृंगारं दक्षिणायां तदा ददुः ॥ ९ ॥
आतृप्ति संददुस्तत्र देहीति नोच्यते पुनः ।
ददुर्यथा च ते वोढुं शेकुर्नैव यथेष्टकम् ॥१०॥
यद् येषां वाञ्छितं तत्तत्र द्रागेव चार्पितम् ।
नशब्दो युज्यते नैव गृह्णशब्दः प्रयुज्यते ॥११॥
एवं वै दक्षिणाश्चाथ पारितोषिकमित्यपि ।
ददुस्तेभ्यश्च योग्येभ्यो विप्रादिभ्यो धनं बहु ॥१२॥
सूदेभ्यश्चान्धसिकेभ्यो ददुर्धनं विपूलकम् ।
कर्मचारेभ्य एवापि हारहीरकमित्यपि ॥१३॥
भाटेभ्यश्चारणेभ्यश्च शिल्पिभ्यश्च ददुर्धनम् ।
मल्लेभ्यो नर्तकेभ्यश्च नाटिकाभ्यो धनं ददुः ॥१४॥
गायिकाभ्यो दासिकाभ्यो हारभूषाम्बरादिकम् ।
दासेभ्योऽनाथदीनेभ्यो वस्त्रभूषादिकं ददुः ॥१५॥
सृष्टित्रयस्य कन्याभ्यो भूषाम्बरधनानि च ।
स्वर्णरूप्यकपात्राणि ददुः कृष्णाज्ञया तदा ॥१६॥
यासां येषां यथा येन परितोषोऽभिजायते ।
तत्तत् तदा प्रदत्तं च संकोचो नैव विद्यते ॥१७॥
साध्वीभ्यश्च सतीभ्यश्च पतिव्रताभ्य इत्यपि ।
अधवाभ्यश्च वृद्धाभ्यो मातृभ्यश्चापि सर्वथा ॥१८॥
स्वसृदुहितृकन्याभ्यो देवीभ्यश्च यथायथम् ।
भूषाम्बरधनान्येव ददुः कृष्णाज्ञया ततः ॥१९॥
महीमानेभ्य इत्येवं कृष्णनारायणः स्वयम् ।
दापयामास च पारितोषिकान्युत्तमानि च ॥२०॥
कुबेरवसुकल्पाऽऽदिद्वाराऽनर्घ्याणि सर्वथा ।
कंभराश्रीर्ददौ सर्वयोषिद्भ्यो भूषणानि वै ॥२१॥
कानकानि रत्नहीरमणिहारान् ददौ तथा ।
गोपालश्च ददौ सर्वजनेभ्यो हाटकात्मकम् ॥२२॥
धनं सद्रत्नहारादि यथापेक्षं तथोर्जितम् ।
एवं सर्वमहर्षिभ्यस्तदा श्रीलोमशो ददौ ॥२३॥
कल्पात्मगूटिका यस्या जायेतेष्टं क्षणे क्षणे ।
सन्तोषा भगिनी कृष्णनारायणस्य चाग्रजा ॥२४॥
ददौ सौभाग्यसूत्रादिद्रव्यरञ्जनकंकतीः ।
कानकीश्च विभूषाश्च कञ्चुकीः शाटिकास्तथा ॥२५॥
घर्घरीश्चोलिकाद्याश्च ददौ नत्थीश्च वंगिडीः ।
रशना वलयाँश्चाप्यूर्मिकाः सन्तोषदायिकाः ॥२६॥
एवं दानानि च पारितोषिकाणि प्रदाय च ।
अनुग्रहं महे समागतानां प्राह वै पिता ॥२७॥

**श्रीगोपालकृष्ण उवाच—**

मम पुत्रस्य कृष्णस्य यज्ञसूत्रमहोत्सवे ।
समागतानां भवतां शोभावृद्धिजुषां सदा ॥२८॥
ऋणयहं स्वागतं कुर्वे धन्यवादान् ददामि च ।
विनयेन वदाम्यत्र न्यूनसेवा मया कृता ॥२९॥
भवेत् क्षन्तव्यविषयं मत्वा क्षम्योऽहमीश्वरः ।
मुक्तानां चावताराणां ब्राह्मीनां ब्रह्मचारिणाम् ॥३०॥
ईशानामीश्वरीणां देवानां च देवयोषिताम् ।
मानवानां मानवीनां दैत्यानां दैत्ययोषिताम् ॥३१॥
नागानां नागपत्नीनां जडचेतनदेहिनाम् ।
दिक्पालानां नृपाणां चर्षीणाम् आर्षीप्रयोषिताम् ॥३२॥
सान्निध्येनाऽभवत्कार्यं चोत्सवीयं सुबृंहितम् ।
सर्वेषां यशसां पात्रं कृतोऽहं भवदागमैः ॥३३॥
पुत्रो मे वर्धितश्चापि तेजोभिर्निजगोचरैः ।
पुनरेवाऽवगन्तव्यं क्षन्तव्या च क्षतिर्मम ॥३४॥
इत्युक्त्वा कार्यकर्तृभ्यो धन्यवादान् ददौ मुहुः ।
आशीर्वादान् समिच्छामि सकुटुम्बः समार्थयत् ॥३५॥
तदानीं जयकारश्च सभाजनकृतोऽभवत् ।
अथ राधाकृष्ण आदौ बालकृष्णस्य वै तदा ॥३६॥
पूजार्थं त्वाययौ दिव्योपचारैः समपूजयत् ।
मुकुटं गोपवेषादि वंशीं चिन्तामणीन् ददौ ॥३७॥
कामधेनूर्ददौ चापि चन्दनाद्यैरपूजयत् ।
लक्ष्मीनारायणश्चाऽथाऽपूजयच्छ्रीहरिं तदा ॥३८॥
मुकुटं कुण्डले शंखं चक्रं गदां तथाऽब्जकम् ।
गरुडं च विमानं च दिव्यकौस्तुभमालिकाः ॥३९॥
ददौ श्रीबालकृष्णाय केसराद्यैरपूजयत् ।
वासुदेवस्तथा चान्येऽवताराः प्रकृतीश्वरः ॥४०॥

प्रधानेशस्तथा भूमा महाविष्णुर्विराट्पुमान् ।
सदाशिवस्तथा तेषां शक्तयश्चाययुर्मुदा ॥४१॥
तिलकं कज्जलं बिन्दुं दत्वा च मुकुटानि वै ।
कर्णभूषाः कण्ठहारान् मुक्तामौक्तिकनिर्मितान् ॥४२॥
उर्मिका रशना यष्टीन् ददुस्ते ता धनान्यपि ।
स्वस्वधामकृतान् दिव्यान् हंससिंहगजात्मकान् ॥४३॥
आसनोत्तममौमाँश्च ददुर्बालाय देहिने ।
अष्टावरणसंस्थाश्चेश्वराः सप्तर्षयस्तथा ॥४४॥
ब्रह्मविष्णुमहेशाद्या मुनयो ब्रह्मचारिणः ।
स्वर्णहारान् पुष्पहारान् स्वर्णपात्राणि पादुके ॥४५॥
कमण्डलून् कलशाँश्च प्रावरणान्यनेकशः ।
ददुः श्रीबालकृष्णाय धनं दिव्यं नवं नवम् ॥४६॥
पितरो मुनयो देवाश्छत्रं च चामरे तथा ।
विमानानि च यानानि हंसान् दासाँश्च दासिकाः ॥४७॥
यष्टिं सौवर्णविकृतिं दर्पणं शुकमैनकाः ।
वादित्राणि विचित्राणि चामृतानां घटाँस्तथा ॥४८॥
कामकल्पलतादींश्च सूर्यचन्द्रमणीँस्तथा ।
दिगीश्वरादिवेषाँश्च विभूषा रत्नमालिकाः ॥४९॥
ददुः श्रीबालकृष्णाय दिव्यान्यपि धनानि च ।
दैत्याश्च दानवाश्चापि असुरा वैभवान् ददुः ॥५०॥
नागाः सर्पा भोगिनश्च मणीन् माणिक्यमौक्तिकान् ।
हारान् विभूतिवैशेष्यं ददुर्द्रव्याणि वै तदा ॥५१॥
रत्नाकरास्तु रत्नानि मौक्तिकानि ददुस्तदा ।
नद्यो नदा वरुणाद्या ददुर्द्रव्यरसानपि ॥५२॥
पर्वताः खनयश्चापि ददुर्मणिविशेषकान् ।
रत्नानि वज्रमणिकान् मुक्ताश्च पद्मरागकान् ॥५३॥
मारकतानिन्द्रनीलान् वैदूर्यान् पुष्परागकान् ।
कर्केतनान् भीष्मकाँश्च पुलकान् रुधिराख्यकान् ॥५४॥
स्फटिकान् विद्रुमान् पुंखराजान् ददुर्विशेषतः ।
मानवास्तु ददुस्तस्मै स्वम्बराणि शुभानि वै ॥५५॥
द्रुमतः कम्बलाँश्चापि पात्रभूषोपवार्तिकाः ।
गजाश्ववृषभाँश्चापि धेनूश्च महिषीस्तथा ॥५६॥
द्रव्याणि स्वर्णरूप्याणि ददुर्बालाय भावतः ।
वृक्षवल्ल्यो मधुरसान् ददुर्माल्यादिपूजनम् ॥५७॥
पर्यंकान् सुवृसीश्चापि कटान् चतुष्किकादिकाः ।
खट्वा यन्त्रीस्तथा गन्त्रीर्ददुः पेषणिकास्तथा ॥५८॥
चुल्लिकाः कण्डनिकाश्च जलकुम्भीर्ददुस्तथा ।
मार्जनिका गुप्तदोरधानीश्च प्रददुर्मुदा ॥५९॥
मुशलं तन्तुचक्रं चानर्घ्यपेटिकमञ्जुषाः ।
वारिधानीश्चाथ पयोधानीस्तक्रप्रमन्थनीः ॥६०॥
द्रोणीश्च दधिधानीश्च कुसुलानि कर्णार्दिनीः ।
पिष्टिकां च शिलां घण्टीं रसयन्त्रीं ददुर्मुदा ॥६१॥
दोलां प्रेंखां घोटिकां च चतुष्पादां च खट्विकाम् ।
कौशेयान्यम्बराण्येव और्णान्यप्यम्बराणि च ॥६२॥
बुद्वाव्यवेषवर्याणि ददुश्च शर्करादिकाः ।
फलानि फलहाराँश्च शुष्कैलादिस्रजस्तथा ॥६३॥
चन्दनानि विचित्राणि शीतलानि ददुस्तदा ।
पत्राणानि वर्म्मत्राणान् शिरस्त्राणानि वै ददुः ॥६४॥
पात्राणि युगहाण्डीश्च स्थालीश्च कलशादिकान् ।
भंगारकाणि पात्राणि पुटपात्राणि यानि च ॥६५॥
जलसेचनपात्राणि स्थालानि भोज्यवाटिकाः ।
पट्टिशं पाठिकाश्चापि शस्त्राऽस्त्राण्यपि संददुः ॥६६॥
धनानि स्वर्णरूप्याणि चासंख्यानि ददुस्तदा ।
चन्दनाऽबीरकुंकुमाऽक्षतगुलालकैर्द्रवैः ॥६७॥
पुष्पैश्च केसरैर्गन्धैः कस्तूरिकाभिरित्यपि ।
कर्पूरैर्विविधैः रंगैः रञ्जनैर्हारपत्रकैः ॥६८॥
तुलस्या मञ्जरीभिश्च दलैश्च कुन्दकेतकैः ।
चम्पकैर्मृद्यतैलैश्चाऽर्चयामासुः प्रभुं पतिम् ॥६९॥
एकोत्तरशतश्रेष्ठोपचारैर्देवतादिकाः ।
अवतारा ईश्वराश्च चक्रुरारार्त्रिकं हरेः ॥७०॥
आशीर्भिर्योजयामासुः प्रदक्षिणं प्रचक्रिरे ।
तुष्टुवुश्च प्रणेमुश्च निषेदुश्चाऽऽसनेषु च ॥७१॥
ततोऽनादिकृष्णनारायणोऽनुग्रहवान् क्षणात् ।
दर्शनं नैजमूलात्मस्वरूपस्य ददौ तदा ॥७२॥
प्रथमं परमं धाम ददृशुश्च सभाजनाः ।
तन्मुक्ताँश्चापि मुक्तानीस्तत्रैव ददृशुश्च ते ॥७३॥
ब्रह्मधामाऽक्षरं तस्य मुक्तान् मुक्तानीरित्यपि ।
बालकृष्णस्य वै मूर्तौ मस्तके ददृशुश्च ते ॥७४॥
अवतारान् हरेर्भाले सहस्रशश्च ददृशुः ।
गोलोकं दक्षिणे नेत्रे वैकुण्ठं वामचक्षुषि ॥७५॥
अमृतं नित्यकैलासं कर्णयोश्चापि ददृशुः ।
महाविष्णुं नासिकायां भाले कालं च ददृशुः ॥७६॥
भालस्य प्रान्तयोः प्रधानेशं च प्रकृतीश्वरम् ।
वासुदेवादिकान् व्यूहान् नासामूले प्रददृशुः ॥७७॥
वैराजं मुखमध्ये च ददृशुस्ते सभाजनाः ।
दंष्ट्रास्वस्य ददृशुश्च शताननादिवेधसः ॥७८॥

शतनेत्रादिरुद्रांश्च दन्तेष्वस्य प्रददृशुः ।
श्मश्रुरेखास्थितान् सहस्रादिहस्तकविष्णुकान् ॥७९॥
ओष्ठे चोर्ध्वे महामायां प्रधानं चाधरे तथा ।
श्रीं लक्ष्मीं चिबुके त्वस्य ददृशुस्ते सभाजनाः ॥८०॥
हनूरोमसु ददृशुर्मायाऽष्टावरणेश्वरान् ।
कपोलयोश्चेश्वराणीर्ददृशुः कोटिशः सतीः ॥८१॥
केशमूलेषु वै सत्यं लोकं ब्रह्माद्यधिष्ठितम् ।
केशमध्येषु च स्वर्गान् केशान्ते चातलादिकान् ॥८२॥
शिरःपृष्ठे मानवांश्च ददृशुस्ते सभाजनाः ।
एवं सर्वां ब्रह्मरूपां सृष्टिं वै कारणात्मिकाम् ॥८३॥
सूक्ष्मां च शाश्वतीं नित्यां बीजरूपां हि ददृशुः ।
अथ कारणसृष्टेश्च समुद्भूतां च वैकृताम् ॥८४॥
स्थूलां सृष्टिं कण्ठभागादधः पुनश्च ददृशुः ।
कण्ठेऽस्य परमं ब्रह्म हृदये ब्रह्म चाऽक्षरम् ॥८५॥
स्तनयोश्चाऽपि गोलोकं वैकुण्ठं दक्षवामयोः ।
अमृतं नित्यकैलासं स्कन्धयोश्च प्रददृशुः ॥८६॥
महाविष्णुं च हृदये कण्ठे कालं प्रददृशुः ।
कक्षयोश्च प्रधानेशं प्रकृतीशं प्रददृशुः ॥८७॥
वासुदेवादिकान् व्यूहान् हृदयोर्ध्वे प्रददृशुः ।
वैराजं हृदयाऽधस्तात् पार्श्वास्थिषु च वेधसः ॥८८॥
अग्रसन्धिषु विष्णूंश्च रुद्रांश्च पृष्ठसन्धिषु ।
उदरे च महामायां नाभौ प्रधानमेव च ॥८९॥
श्रीं लक्ष्मीं पार्श्वयोर्नाभेर्जघनेष्टाऽऽवृतानि च ।
जघनाऽधश्चेश्वराणीर्लिंगमूले सतीस्तथा ॥९०॥
रोमसु सत्यलोकादीन् गुप्ताऽधोऽतलप्रभृतीन् ।
तत्तत्स्थानेषु चाब्धींश्च पर्वतान् ददृशुश्च ते ॥९१॥
अथापि च ततः कट्यां शेषं च कच्छपं तथा ।
ददृशुः सीवनीनाड्यां महाजलं च धातुषु ॥९२॥
लिंगाग्रे कामदेवं च सक्थ्नोर्दैत्यांश्च दानवान् ।
रोमसु च ऋषीन् पितॄन् देवान् ददृशुरेव च ॥९३॥
जान्वोश्च मानवान् जंघाद्वयेऽसुरान् प्रददृशुः ।
पादयोर्नागसर्पादीन् ददृशुः पुनरेव च ॥९४॥
सृष्टित्रयात्मिकां मूर्तिं बालकृष्णात्मिकां पुनः ।
विलोक्यैतन्महाश्चर्यं ज्ञातवन्तः स्वकारणम् ॥९५॥
सर्वेऽवतारा यस्मात् संभवन्त्येषः पुमान् परः ।
मत्वा चक्रुस्ततो ध्यानं बालकृष्णस्य ते क्षणम् ॥९६॥
अथ सभासमाप्तेश्च घण्टानादोऽभवत्तदा ।
जयशब्दैः सह सभ्या उत्तस्थुः स्वालयं ययुः ॥९७॥
मिष्टपानादिभिस्ताम्बूलकैर्मधुरभाषणैः ।
सत्कृताश्च विमानाद्यैर्महीमानास्तु सर्वशः ॥९८॥
ययुर्नैजान् गृहान् देशान् परदेशान् सुखान्विताः ।
तत्त्वानि देहिनश्चैत्या जडा गुणा रसादयः ॥९९॥
अन्येऽपि दासवर्गाद्या ययुः सम्मानिता गृहम् ।
ऋषयः पितरश्चैते स्वर्गादिकं ययुस्ततः ॥१००॥
परमेशा ब्रह्मलोकान् ईशा ईशनिवासकान् ।
दैत्याश्च दानवा नैजान् पातालादीन् ययुस्ततः ॥१०१॥
पर्वता वृक्षवल्ल्यश्च नदास्तीर्थानि चापगाः ।
सरांस्यपि च क्षेत्राणि वनान्युपवनानि च ॥१०२॥
ययुः प्रणम्य च कृष्णनारायणं पुनः पुनः ।
मण्डपस्य महाप्रासादस्य कल्पकृतस्य च ॥१०३॥
उपसंहारमकरोत् कृष्णनारायणः प्रभुः ।
सनत्कुमारो भगवान्नारदोऽपि प्रणम्य च ॥१०४॥
बदरीं ययतुश्चाथ कन्यका लोमशाश्रमम् ।
एवं च राधिके ब्रह्मसूत्रोत्सवो महत्तमः ॥१०५॥
सम्पन्नश्चाष्टमे वर्षे वैशाखे परमात्मनः ।
पठनाच्छ्रवणादस्य स्मरणान्मुक्तिभागभवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महिमानेभ्यः पारितोषिकदानं, प्रभोः पूजनम्, उपदार्पणम्, दिव्यदर्शनं, परिहारश्चेत्यादिनिरूपणनामाऽष्टषष्टितमोऽध्यायः ॥ ६८ ॥

**श्रीराधिकोवाच—**

कथं कृष्ण ! तव सेवा कर्तव्याऽऽराधना तथा ।
केनाऽर्चनेन ते कृष्ण प्रीतिः समुपजायते ॥ १ ॥
कानि दानानि देयानि प्रीणनाय हरेस्तव ।
कानि पुण्यानि शस्तानि कृष्णतुष्टिकराणि च ॥ २ ॥

**श्रीकृष्ण उवाच—**

सर्वदानानि शस्तानि श्रीकृष्णस्य प्रतुष्टये ।
भक्त्या समर्चनेनाऽयं श्रीकृष्णः परितुष्यति ॥ ३ ॥
यत्स्वेष्टं तत्प्रदेयं वै कृष्णाय प्रीणनार्थकम् ।
पुण्यं तत्राऽर्पणं सर्वं कृष्णतुष्टिकरं प्रिये ॥ ४ ॥
श्रद्दधानैर्भक्तिपरैः समुद्दिश्य श्रियः पतिम् ।
दीयन्ते यानि दानानि तानि यान्ति न वै क्षयम् ॥ ५ ॥
ता एव तिथयः श्रेष्ठा यत्र कृष्णो ह्यवाप्यते ।
यासु सतां कृता सेवा तदन्यास्तिथयोऽधमाः ॥ ६ ॥

पूजितेषु च साधुषु पूजितः परमेश्वरः ।
यस्तान् द्वेष्टि स हीनात्मा हीनां योनिं प्रयाति च ॥ ७ ॥
सतोऽर्चयन् जनो भक्त्या नारी वा कृष्णतत्परा ।
मामकी सा तनुश्चास्ति ह्यहं वैष्णवदेहवान् ॥ ८ ॥
साधवो नाऽवमन्तव्या बुधा वाऽप्यबुधा अपि ।
सन्तो दिव्यास्तनवो मे ततस्तानर्चयेत् सदा ॥ ९ ॥
कर्मणा मनसा वाचाऽर्पणेन सेवयाऽपि वा ।
भोजनेनाऽर्चनेनापि सन्तोषणीयाः साधवः ॥१०॥
प्रातरुत्थाय मां स्मृत्वा स्नात्वा च शुभवस्तुभिः ।
मन्मूर्तेः पूजनं कुर्यात् सतां सेवा हि पूजनम् ॥११॥
आराधना तु मे भक्तिर्दास्यं श्रेष्ठं सदाऽधिकम् ।
ध्यानं मे मम साधूनां कर्तव्यं मोक्षहेतवे ॥१२॥
पादसंवाहनं कार्यं साधूनां सर्वदा प्रिये ।
तदिन्द्रियेष्वहं त्वस्मि तत्तुष्टौ तोषणं मम ॥१३॥
रसगन्धयुतैः पुष्पैः पूजनीयास्त एव तु ।
चम्पकः कुन्द आम्रश्च धवलः खदिरस्तथा ॥१४॥
शतगोटस्तथाऽशोको बकुलः करवीरकः ।
तिलकश्च जपा जाती यूथिका पद्मिनी तथा ॥१५॥
कमली स्थलपद्मा च तुलसी कौमुदी तथा ।
सूर्यमुखी चम्मिलिका पारिजातः सुकेसरः ॥१६॥
केतको हारश्रृंगारः कदम्बो देवदारुकः ।
सर्जतरुः कल्पवल्ली चैतत्पुष्पाणि राधिके ॥१७॥
पूजायां मे प्रदेयानि वर्जयित्वा तु केतकीम् ।
बिल्वपत्रं शमीपत्रं भृंगपत्रं च तौलसम् ॥१८॥
तमालमालतीपत्रं प्रशस्तं मम पूजने ।
वीरुधां सुप्रवालैश्च दर्भैः समर्चयेच्च माम् ॥१९॥
प्रवालैर्बीसतन्त्वाद्यैर्दूर्वाङ्कुरैः समर्चयेत् ।
कुड्मलैश्चन्दनैः कुंकुमोशीरकेसरैस्तथा ॥२०॥
सुगन्धकाष्ठधूपैश्च प्रणोम्यहं सदा प्रिये ।
हविषा संस्कृता ये च यवगोधूमशालयः ॥२१॥
तिलमुद्गादयो माषा व्रीहयश्च प्रिया मम ।
गोदानानि पवित्राणि भूमिप्रदानकानि च ॥२२॥
वस्त्रान्नस्वर्णदानानि प्रीतये मम राधिके ।
माघे तिलाश्चेन्धनानि देयानि प्रियतां हरिः ॥२३॥
फाल्गुने व्रीहयो वस्त्रं मृगचर्मादि शस्यते ।
चैत्रे सुसूक्ष्मवस्त्राणि शयनान्यासनानि च ॥२४॥
वैशाखे गन्धयुक्तानि देयानि सुरभीणि च ।
उदकुम्भाढ्यधेनुश्च तालवृन्तः सुचन्दनः ॥२५॥
देयास्तेन भवेत्पुत्रो धनं भार्या सुता च गौः ।
शृणुयाच्च कथा नित्यं भक्त्या संपूजयेद्धरिम् ॥२६॥
तस्याऽश्वमेधयज्ञस्य दक्षिणासहितस्य च ।
सुवर्णभूमिदानस्यऽश्वगोनागरथस्य च ॥२७॥
दानस्य पुण्यमग्र्यं वै जायेत नात्र संशयः ।
नारी नरः पादमेकं कथां यः शृणुयात् हरेः ॥२८॥
स शुचिः पुण्यवान् लोके सर्वतीर्थाश्रितो हि सः ।
गंगायां नैमिषारण्ये पुष्करे मानसे तथा ॥२९॥
नारायणेऽश्वपट्टे च कोकामुखे प्रयागके ।
माघे यत्पुण्यमग्र्यं च तत् कथाश्रवणाद् भवेत् ॥३०॥
राजसूयफलं यच्च स्वर्गे यच्च महत् फलम् ।
भूमिलोके फलं यत्तत् कथायाः श्रवणाद् भवेत् ॥३१॥
सौत्रामणेः फलं यच्च मिष्टान्नदानजं च यत् ।
सूर्यचन्द्रग्रहे रत्नप्रदानस्य च यत्फलम् ॥३२॥
दुर्भिक्षे रक्षणाद् यच्च फलं ज्ञातेर्जनस्य च ।
देवाग्निसाधुविप्राणां पालने रक्षणे च यत् ॥३३॥
पित्रोः श्वशुरयोः सेवाधर्मे भ्रातुश्च यत्फलम् ।
ज्येष्ठेऽपत्यौ गवि सेवाजन्यं यच्च फलं भवेत् ॥३४॥
तत्फलं राधिके मेऽत्र कथायाः श्रवणे भवेत् ।
उपानद्युगलं छत्रं लवणामलकादिकम् ॥३५॥
ज्येष्ठे जलं प्रशीतं च सूक्ष्माम्बरं च तक्रकम् ।
दधि चोपानहौ छत्रं देयं मे प्रीतये प्रिये ॥३६॥
आषाढे व्यजनं दुग्धं शर्करा चाम्बराणि च ।
देयानि राधिके यानं वाहनानि हरेर्गृहे ॥३७॥
श्रावणे सर्वदानानि दद्यान्मत्प्रीतये प्रिये ।
अन्नवस्त्रोपकरणरसादीनि समन्ततः ॥३८॥
भाद्रे दद्यात्पायसानि लवणं सगुडौदनम् ।
नवकर्णांस्तथा मे प्रीतये च मधुसर्पिषी ॥३९॥
आश्विने नवधान्यानि वृषं चाश्वं सुवर्णकम् ।
ताम्रपात्राणि वस्त्राणि दीपादीनि समर्पयेत् ॥४०॥
कार्तिके स्वर्णरजते मणिमुक्ताफलादिकम् ।
दीपान् नवान्नमिष्टान्नं दद्याद्वै प्रीतये मम ॥४१॥
मार्गशीर्षे वाहनानि खरोष्ट्राऽश्वतरान् ददेत् ।
नागानजाविकान् गन्त्रीं शकटान् प्रीतये मम ॥४२॥
पौषे देयं प्रभक्त्या च गृहप्रावरणादिकम् ।
प्रासादनगरादीनि चान्नं षड्रससंयुतम् ॥४३॥
दासीदासमलंकारान् दद्याद्वै मम तुष्टये ।
यद्यदिष्टतमं किञ्चित् यच्छक्यं च गृहे शुचि ॥४४॥

पुरुषोत्तमतुष्ट्यर्थं देयं तत् सार्वकामिकम् ।
यः कारयेत् श्रीकृष्णस्य मन्दिरं सोऽक्षरं व्रजेत् ॥४५॥
ददेत्पुष्पफलाढ्यांश्चारामान् यः सोऽक्षरं व्रजेत् ।
पूर्वजानि पश्चिमानि कुलान्यष्टोतराणि सः ॥४६॥
तारयेदात्मना सार्धं विष्णोर्मन्दिरकारकः ।
इमाश्च पितरो देवा गाथा गायन्ति साधवः ॥४७॥
अपि नः स्वकुले कश्चित् कृष्णभक्तो भविष्यति ।
हरेर्मन्दिरकर्ता यः सुखं दास्यति नो हि सः ॥४८॥
अपि नः सन्ततौ स्याद् वै कृष्णालयविलेपकः ।
मन्दिरे मार्जनकर्ता भक्तो येनोद्धृता वयम् ॥४९॥
अपि नः सन्ततौ जातो ध्वजं श्रीकृष्णमन्दिरे ।
दास्यति च प्रदीपं सुधूपं पुष्पानुलेपनम् ॥५०॥
अपि नः स कुले भूयादेकादश्यां करिष्यति ।
उद्यापनं मम पूजामुपवासं च दानकम् ॥५१॥
महापातकयुक्तोऽपि कृष्णावसथचित्रकृत् ।
विमुक्तपापो भवति धन्यं जन्माऽस्य योऽस्ति मे ॥५२॥
धन्यो राजा मनुः पूर्वो यो लोके मानवान् वृषान् ।
प्रवर्तयामास नित्यं विष्णुभक्तिपरान् परान् ॥५३॥
कुंकुमवापिकाक्षेत्रे देवालयानकारयत् ।
विभूतिभिः श्रीकृष्णस्य नारायणस्य चालयान् ॥५४॥
चित्रयामास शुचिभिः पञ्चवर्णैः सुचित्रकैः ।
दीपपात्राणि सततं कृष्णनारायणालये ॥५५॥
सौवर्णानि च पात्राणि घृतपात्राणि वै ददौ ।
नानावर्णा वैजयन्तीर्माला हारान् ददौ मुदा ॥५६॥
स्रजश्च कण्ठिका दिव्या महारंजनरञ्जिताः ।
मञ्जिष्ठा नवरंगीयाः श्वेतपाटलिकाश्रिताः ॥५७॥
आरामान् विविधान् रम्यान् पुष्पाढ्यान् फलशालिनः ।
लतापल्लवसंख्यातान् देवदारुभिरावृतान् ॥५८॥
ह्रदान् मनोहरान् दिव्यासनकुंजविराजितान् ।
कारयामास परितो मन्दिराय ददौ च तान् ॥५९॥
मञ्चानलंकृतांस्तेषु कुशलैः समधिष्ठितान् ।
गन्धर्वविद्यारागज्ञैः रत्नजडितकासनान् ॥६०॥
कारयामास सुभगान् दिव्यान् देवालयोपमान् ।
येषु नित्यं प्रपूज्यन्ते यतयो ब्रह्मचारिणः ॥६१॥
श्रोत्रिया विप्रवर्याश्च ऋषयः साधवोऽमलाः ।
सत्यः साध्व्यः सांख्ययोगिन्यश्च ब्रह्मपराः स्त्रियः ॥६२॥
इत्थं तेनैव मनुना कृता कृष्णनरायणे ।
भक्तिश्च भार्यया सार्धं ययावन्ते हरेः पदम् ॥६३॥
एवं राजा ज्यामघोऽपि कृतवान् मनुवद् भुवि ।
परेशस्य परां भक्तिं ययौ ब्रह्मपदं परम् ॥६४॥
तस्माद्वै राधिके त्वं च कुरु देवालयं मम ।
मामर्चयस्व यत्नेन साधून् साध्वीर्मदाश्रिताः ॥६५॥
सदाचारान् कथावक्तॄन् लोककल्याणकारकान् ।
मम भक्तिप्रदान् सम्यक्संप्रपूजय राधिके ॥६६॥
वासोभिर्भूषणैः रत्नैर्गोभिर्भूकनकादिभिः ।
भोजनैर्जलपानाद्यैरंगसंवाहनादिभिः ॥६७॥
विभवे सति देवस्य प्रीणनं कुरु सर्वथा ।
इत्युक्ता राधिका चापि कृष्णदेवालयं परम् ॥६८॥
कारयामास गोलोके मन्दिरं चन्द्रशोभनम् ।
अनादिश्रीकृष्णनारायणस्य प्रतिमां शुभाम् ॥६९॥
सम्प्रतिष्ठाप्य च राधा चकार सेवनादिकम् ।
सम्मार्जनं लेपनं च शृंगारं भोजनादिकम् ॥७०॥
शर्करादिप्रदानं च दीपं धूपं प्रदक्षिणम् ।
नीराजनं चोत्सवं च चकार राधिका स्वयम् ॥७१॥
आयताक्षी पात्रसम्मार्जनं कृष्णालयेऽकरोत् ।
गीतं च कीर्तनं चापि स्वयं राधा ह्यवाकरोत् ॥७२॥
एवं राधाऽकरोद् भक्तिं पत्युर्वाक्येन सर्वदा ।
पत्युर्वाक्यं वृद्धवाक्यं सती चेत् प्रकरोति वै ॥७३॥
दुरुक्तं वा समुक्तं वा स्निग्धं तद् घृतवद् भवेत् ।
आपद्भुजंगदष्टस्य मन्त्रहीनस्य सर्वथा ॥७४॥
वृद्धवाक्यैषधान्येव कुर्वन्ति विषशून्यताम् ।
वृद्धवाक्यामृतं पीत्वा तदुक्तान्यनुमन्य च ॥७५॥
या तृप्तिर्जायते पुंसां सोमपाने न वै तथा ।
येषां वृद्धा न शास्तारस्ते जीवन्तोऽपि वै मृताः ॥७६॥
शोच्यास्त एव नष्टाश्च भविष्यन्ति पदे पदे ।
आपद्ग्राहगृहीतानां वृद्धा यत्र न मार्गदाः ॥७७॥
न वा मोचयितारश्च तेषां शान्तिर्न विद्यते ।
आपत्समुद्रमग्नानां मज्जतां व्यसनोर्मिषु ॥७८॥
वृद्धवाक्यैर्विना तेषामुद्धारो न कथंचन ।
तस्माद् यो वृद्धवाक्यानि शृणुयाद् विदधाति वा ॥७९॥
स सद्यः सिद्धिमाप्नोति वृद्धाशीर्भिः पुनः पुनः ।
राधिके येन तुष्टः स्यां तथा कार्यं त्वया सदा ॥८०॥
अहं ध्यायामि मे मूलस्वरूपं पुरुषोत्तमम् ।
मां ध्यायन्ति कपिलाद्याः कपिलं मानवाः परे ॥८१॥
वासुदेवादयो व्यूहा ध्यायन्ति पुरुषोत्तमम् ।
वासुदेवं विकुण्ठस्थो ध्यायत्यपि नरायणः ॥८२॥

नारायणं ध्यायति श्रीविष्णुर्विष्णुं प्रजाजनः ।
एवं प्रवर्तितं ध्यानं गुरोः परम्परागतम् ॥८३॥
गुरौ विष्णुर्वर्तते च विष्णौ भूमा विराजते ।
भूम्नि बृहद् बृहत्येव परब्रह्म विराजते ॥८४॥
एवं स्वात्मविचारेण ध्यायेत् कृष्णनरायणम् ।
सेवेत तं परेशानं वन्देताऽऽराधयेदपि ॥८५॥
सर्वे समर्पयेदस्मै परात्मनेऽन्तरात्मने ।
मायिकात्माऽन्तरात्मानो योगेन स्यात् परात्मवान् ॥८६॥
मायायां स्थितजीवस्य दीर्घकालेन तद्गुणाः ।
मायाकृता भवन्त्यस्य कामक्रोधादयो मलाः ॥८७॥
जन्मजन्मान्तराऽऽयातास्तैर्मलिनोऽयमुच्यते ।
स्वभावो मायया व्याप्तो बहुजन्मगतेष्वपि ॥८८॥
अन्ववर्तत आत्मानं सतां योगेन जीर्यति ।
परमेशाश्रयेणापि जीर्यत्येव ततः प्रभोः ॥८९॥
कृपया मोक्षमार्गस्य भक्त्यात्मकस्य चार्जनम् ।
तेन याति परब्रह्म ज्यामघस्तु ययौ यथा ॥९०॥
पठनाच्छ्रवणाच्चास्य स्मरणाच्छ्रावणादपि ।
स्वर्गमोक्षौ भवेतां वै राधिके नात्र संशयः ॥९१॥
यथा राधा तथा नारी कृष्णसौभाग्यमाप्नुयात् ।
यथा च गरुडस्तद्वन्नरो दास्यमवाप्नुयात् ॥९२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोः सेवाऽर्चनदानपूजादिफलमाहात्म्यादिनिरूपणनामा नवाधिकषष्टितमोऽध्यायः ॥ ६९ ॥

श्रीराधिकोवाच—

कथं राजा ज्यामघस्तु पूर्वस्वभावपूरितः ।
पश्चादाराधनलाभान्मुक्तिमवाप तद्वद ॥ १ ॥

श्रीकृष्ण उवाच—

शृणु राधे कथां पुरातनीं वैराग्यदायिनीम् ।
ज्यामघस्य कथयामि बहुजन्मसमुद्भवाम् ॥ २ ॥
धनुर्मघस्य तु ऋषेः पुत्रोऽभूत् कौशिकाभिधः ।
तस्य पुत्रोऽभवन्नाम्ना जाड्यमघो जडाकृतिः ॥ ३ ॥
न ब्रूते मूर्खवच्चासौ नासौ पश्यति चाऽन्धवत् ।
एनं माता गृहद्वारि दोटिकायां प्ररक्ष्य च ॥ ४ ॥
ययौ जलं समाहर्तुं ग्रामकूपात् तदा खलु ।
काकाक्षी राक्षसी बालं प्रेंखास्थो विजहार ह ॥ ५ ॥
सुरूपं कोमलं बालं नीत्वा स्वरक्षसे ददौ ।
राक्षसो वीक्ष्य पप्रच्छ किमानीतं त्वया प्रिये ॥ ६ ॥
साऽब्रवीत् बालकश्चाऽयं कौशिकस्याऽऽहृतो मया ।
राक्षसः प्राह च भद्रे त्वया भद्रं न वै कृतम् ॥ ७ ॥
समर्थः कौशिकश्चास्मान् तूर्णं शप्स्यति कुपितः ।
तस्मादेनं तु दोलायां तद्गृहे प्रापय द्रुतम् ॥ ८ ॥
यद्वा जलाहरणार्थं तन्माता यत्र गच्छति ।
तत्र स्थापय गत्वैव माता दृष्ट्वा ग्रहीष्यति ॥ ९ ॥
राक्षसी तूर्णमेवैनं गृहीत्वा वापिकां ययौ ।
तत्रागतां सतीं दृष्ट्वा बालं त्ववासृजत् पुरः ॥१०॥
साऽपि सती सुतं प्राप्य जलं भृत्वा गृहं ययौ ।
भाग्यं मत्वा सुतस्येयं ग्रहपूजां व्यधापयत् ॥११॥
विघ्नशान्तिं च दानानि कारयामास भावतः ।
राक्षसीकरयोगेन राक्षसीदुग्धपानतः ॥१२॥
बाले वै राक्षसभावो वर्तते स्पर्शतस्ततः ।
वर्धितो बालकश्चायं यज्ञसूत्रमवाप ह ॥१३॥
वेदाधीत्यै जाड्यमघो पित्रा गृहे नियोजितः ।
मूर्खत्वान्न पपाठाऽसौ पिता शिक्षां करोति च ॥१४॥
ताडनादिभयेनाऽसौ कूपे सीम्नि पपात ह ।
तत्राऽस्त्यामलकीवृक्षः पोषाय फलितोऽभवत् ॥१५॥
भक्षयित्वाऽऽमलकानि कूपे गत्वा जलं शुभम् ।
पिबत्येव सदा वृक्षमूलेनाऽऽयाति याति च ॥१६॥
वृक्षवल्लीसमाछन्ने कूपे मूलावरोहणे ।
सुखेनाऽयं वर्तते च बालकोऽज्ञातवर्तनः ॥१७॥
एवं पुष्टोऽभवच्चापि रात्रौ सस्यादिजान्यपि ।
कणकन्दफलादीनि बहिर्गत्वाऽत्ति नित्यशः ॥१८॥
पित्रादिभिस्ततो ज्ञातं मृतो वा नष्ट एव च ।
किन्तु माता कदाचिद्वै यज्ञकाष्ठाऽभिलाषुकी ॥१९॥
ययौ त्वामलकीकाष्ठान्यानेतुं सीम्नि तत्र वै ।
वृक्षशाखाः समागृह्य तीरे करोति सञ्चयम् ॥२०॥
तावत् कूपे मूलमध्ये क्षुतोऽकस्माद्धि बालकः ।
क्षुवनं मानुषं श्रुत्वा यावद् द्रष्टुमुपाययौ ॥२१॥
तावत् पुत्रं निजं वीक्ष्य चातिहर्षमुपागमत् ।
कूपाऽन्तःस्थं सुतं माता विह्वला त्वाजुहाव ह ॥२२॥
सुतः प्रेम्णा मातरं संदृष्ट्वा गद्गदतां गतः ।
कूपादुत्तीर्य मूलैश्च मातुः पादौ ववन्द च ॥२३॥
सा स्वपुत्रं समासाद्य नीत्वा काष्ठानि सत्वरम् ।
पुत्रयुक्ता ययौ नैजं गृहं पतिं ननाम च ॥२४॥

कथयामास तत्सर्वं चेष्टितं स्वसुतस्य तु ।
ततोऽपृच्छच्च विप्रोऽसौ प्रसन्नः प्राप्य पुत्रकम् ॥२५॥
कथं त्वं निर्गतो गेहात् कथं चाऽद्यापि जीवसि ।
कथं न वदसि पुत्र हेतुं कथय सर्वथा ॥२६॥
जाड्यमवस्ततः प्राह वृत्तान्तं पूर्वजं निजम् ।
श्रूयतां कारणं तात येन मूकत्वमाश्रितम् ॥२७॥
अन्धत्वं च जडत्वं च कथयामि यथातथम् ।
पूर्वमासमहं विप्रो ज्योतिर्विद्धस्तरेखविद् ॥२८॥
नारीणां हस्तरेखाणां परीक्षया प्रसंगतः ।
मोहमाप्तः परदाररुचिश्चाऽऽसं पुनः पुनः ॥२९॥
कदाचिच्च जनैश्चाहं कटुभाषातिरस्कृतः ।
मृतो ह्युद्बन्धनेनाऽहं यमपुरीं ततो गतः ॥३०॥
तस्माद् वर्षसहस्रान्ते भुक्तशिष्टे तदागसि ।
अरण्ये प्राप्तवान् जन्म व्याघ्रस्य नरदेहवत् ॥३१॥
राज्ञा तु बालतो धृत्वा पञ्जरे पूरितस्ततः ।
बद्धस्य पञ्जरस्थस्य व्याघ्रत्वेऽपि स्थितस्य च ॥३२॥
पूर्वज्ञानं न मे नष्टं कामनाऽपि व्यवर्धत ।
व्याघ्रोऽहं न च हिंसामि न च क्रौर्यं करोम्यपि ॥३३॥
राज्ञा राज्ञ्या समं नित्यमुद्याने विहरामि च ।
सिंहासनाऽग्रे तिष्ठामि चानुगच्छामि पृष्ठतः ॥३४॥
रमयामि बालवच्च तदुद्याने वसामि च ।
एवं याते दिने चाऽहं यौवनं प्राप्तवान् यदा ॥३५॥
शान्तो भूत्वा निषीदामि राज्ञ्याः स्नानह्रदान्तिके ।
राजा राज्ञी यदा स्नातस्तदा पश्यामि भावतः ॥३६॥
राज्ञीं स्नान्तीं विहरन्तीं विवस्त्रां च जले मुहुः ।
तेन मे कामना पूर्वसंस्कारोत्था ह्यभून्मुहुः ॥३७॥
राजा सुदर्शनः स्नात्वा राज्यकार्यार्थमेव तु ।
ययौ स्वनगरे राज्ञीमुद्याने परिहाय च ॥३८॥
सखीभिः सहिता चेयं मां व्याघ्रं रुचिरं शुभम् ।
पालितं पुत्रसदृशं रामयामास वै मुहुः ॥३९॥
उद्यानेऽहं व्यचरं च ताभिः साकं पुनः पुनः ।
आरोहन्ति स्म ताः क्वापि मम पृष्ठोपरि द्रुतम् ॥४०॥
अहं कदाचित् पार्श्वस्थो मुखेन सक्थिचुम्बनम् ।
करोम्येवं कामना मे राज्ञ्यां व्यवर्धत द्रुतम् ॥४१॥
रात्रौ सखीषु सर्वासु निद्रितासु तदालये ।
राज्ञ्याः पर्यंकपार्श्वस्थश्चिन्तयामि नृपप्रियाम् ॥४२॥
तां प्रति ववृधे चित्ते पूर्वाभ्यासान्मनोभवः ।
तस्या अपि मम स्पर्शाद् रजोभावो व्यवर्धत ॥४३॥
मयोक्ता राजपुत्रि त्वं नवयौवनशालिनी ।
चित्तं हरसि मे राज्ञि वद कामवशं गतः ॥४४॥
साऽब्रवीत्तु मनुष्यायां पशुदेहस्य ते प्रिय ।
कथमत्राऽऽवयोर्व्याघ्र रतियोग उपैष्यति ॥४५॥
ततोऽवोचमहं राज्ञि ! कौशल्येन भविष्यति ।
अथ सा मां समाश्लिष्य प्रवृत्ता रन्तुमेव च ॥४६॥
तावत् कयाचिद् सख्या चाऽवलोकितोऽहमेव च ।
द्वारपालान् शनैर्गत्वा सशस्त्रान् सा शशंस ह ॥४७॥
एवं प्रवर्तितां वार्तां श्रुतवान् नृपतिः स्वयम् ।
राज्ञा तु मारितश्चाऽहं यमलोकं गतोऽभवम् ॥४८॥
ततो वर्षशतान्तेऽहं त्वभवं श्वेतगर्दभः ।
भारवाही जनानां तु कुंभकारेण योजितः ॥४९॥
तत्रापि पूर्वविज्ञानं सर्वं मे प्रत्यभासत ।
एकदा तु महीमानाः कुंभकारस्य चागताः ॥५०॥
कन्याः स्त्रियः सुरूपाश्च दिनद्वयं स्थितास्ततः ।
तासामेका सुरूपा च युवती च गृहे पितुः ॥५१॥
गन्तुमैच्छत्पार्श्वसंस्थे ग्रामे क्रोशाविदूरके ।
तामुवाच पतिर्गच्छ आरुह्यैनं सुगर्दभम् ॥५२॥
श्व एवाऽऽगमनं कार्यं न स्थेयं परतस्ततः ।
इत्येवमुक्ता सा भर्त्रा तन्वी त्वारुह्य गर्दभम् ॥५३॥
ययौ शीघ्रं त्वर्धपथि नदी तत्र समागता ।
सजला तत्र सा स्नातुं मत्पृष्ठात् समवातरत् ॥५४॥
कुंभकारोऽपि च सार्थः शौचार्थं प्रययौ तटम् ।
सर्वैरंगैः रूपवतीं चैकलामार्द्रवस्त्रिकाम् ॥५५॥
दृष्ट्वाऽहं जलपानस्य मिषेण सन्निधौ गतः ।
स्नान्तीं तामुपरि गत्वा पतित्वाऽऽश्लिष्य कामतः ॥५६॥
पूर्वसंस्कारवशगोलिङ्गस्पर्शमकारयम् ।
दृष्टोऽभवं तदा तस्याः सार्थजनेन वै तदा ॥५७॥
ताडितश्च भृशं यष्ट्या पतितोऽहं जलान्तरे ।
क्षणादुत्थाय च भयात् प्रद्रुतो दक्षिणामुखः ॥५८॥
ततोऽभिद्रवतः कण्ठे रज्जर्दाढ्यं गता बहु ।
गलपाशेनाऽर्धरात्रादभून्मे जीवितक्षयः ॥५९॥
ततोऽस्मि नरके भूयस्तस्मान्मुक्तोऽभवं शुकः ।
महारण्ये ततो बद्धः शबरेण दुरात्मना ॥६०॥
पञ्जरे न्यस्य विक्रीतो वणिक्पुत्राय तत्र च ।
गृहे वसामि सततं युवतीनां समीपतः ॥६१॥
तास्तरुण्यः पोषयन्ति फलौदनादिभिः सदा ।
एकदा तु वणिक्पुत्री युवती चन्द्रिकाऽभिधा ॥६२॥

कराभ्यां मां प्रजग्राह रेमे वाचा पुनः पुनः ।
शयने वक्षसि कृत्वा मां वाचयति गीतिकाम् ॥६३॥
ततोऽहं स्तनयोः स्पर्शात् पूर्वसंस्कारवेगतः ।
कामभावेन तां गुह्ये पस्पर्शोड्डीय वै मुहुः ॥६४॥
पत्रखैः क्षतमापन्नं जघनं सा चुकोप ह ।
तताड मां सूक्ष्मयष्ट्या भयाच्च प्रद्रुतस्ततः ॥६५॥
दैवात्तस्या दृढं नीवीदोरकं मे गलेऽभवत् ।
ग्रन्थिर्जाता दृढा तेन क्षणान्मृतोऽभवं ततः ॥६६॥
यमलोके महाकष्टं भुक्त्वा तु वृषभोऽभवम् ।
चाण्डालस्य गृहे त्वासं काष्ठशकटवाहकः ॥६७॥
वने काष्ठानि चानेतुं दम्पती ययतुस्तदा ।
मध्याह्ने जलमानेतुं चाण्डालस्तु नदीं ययौ ॥६८॥
चाण्डाली युवती चास्ते छायायां शकटान्तिके ।
अहं तामलिहं कामात् पूर्वसंस्कारवेगतः ॥६९॥
नदीतीरे सदा त्वेवं काष्ठाऽऽदानार्थमेव तौ ।
प्रयातः प्रतियातश्च वर्षर्तुस्तत्र चागतः ॥७०॥
एकदा तु ज्वरव्याप्तोऽभवच्चण्डालको गृहे ।
चाण्डाली तद्वने याता काष्ठाऽऽनयनहेतवे ॥७१॥
पूर्वसञ्चितकाष्ठानि भृत्वा गन्त्र्यां ततस्तु सा ।
जलं पाययितुं मां च नद्यां तत्राऽनयत् ततः ॥७२॥
सा स्नाता रूपसम्पन्ना मया दृष्टा दिगम्बरा ।
पूर्वसंस्कारभावेन कामो मे हृदि संस्थितः ॥७३॥
सा वस्त्राणि परिधाय बद्ध्वं रशनया च माम् ।
धुरे शकट्या युयुजे योक्त्रेणाऽऽबध्य यावता ॥७४॥
धुरस्थाऽग्रे स्थिता चास्ते क्षणं तावदहं तदा ।
उड्डीय सधुरश्चाऽहं तस्या उपरि चापतम् ॥७५॥
सा मदग्रपदाऽऽघातात् पतिता दूरतस्तदा ।
अहं योक्त्रेण संयुक्तो गन्त्र्या निम्नेन कर्षितः ॥७६॥
चक्राभ्यां निम्नगाभ्यां च प्रक्षिप्तो गर्तके तदा ।
शकट्या सह पतितोऽगाधे गर्तेवशस्ततः ॥७७॥
योक्त्रेण बद्ध एवाऽस्मि पञ्चत्वमगमं ततः ।
साऽपि चोत्थाय तु शनैर्गृहं गता हि भामिनी ॥७८॥
ततो निमग्नो नरके धर्मराजानुशासनात् ।
जातस्तव गृहे तात जातिस्मरोऽस्मि सर्वथा ॥७९॥
तावन्त्येवाऽद्य जन्मानि स्मरामि त्वानुपूर्वशः ।
पूर्वाभ्यासाच्च दुःखानि प्राप्तान्यति मया ततः ॥८०॥
जन्मन्यत्र न वै वच्मि न शृणोमि न कामये ।
येन पापं भवेत् तत्तु नाचरिष्ये कथंचन ॥८१॥

मूकत्वे च बधिरत्वे हेतुः पूर्वस्मृतिर्मम ।
जडत्वेऽपि च विज्ञानं हेतुरेवाऽस्ति नेतरत् ॥८२॥
पापानि घोररूपाणि मनसा कर्मणा गिरा ।
शुभं वाऽप्यशुभं वापि बन्धनं वा वधोऽपि वा ॥८३॥
पूर्वाभ्यासेन जायन्ते कामनादिकमित्यपि ।
तस्माद्विज्ञानवान् जानन् तत्र मुह्यति नैव तु ॥८४॥
पौर्विकीं तु यदा जातिं स्मरत्यत्र तु मानवः ।
तदा स तेभ्यः पापेभ्यो निवृत्तिं हि गमिष्यति ॥८५॥
दानं तपोऽध्ययनं च स्तेयं पापं यशो वृषः ।
अर्थो ज्ञानं चाग्निदाहः पूर्वाभ्यासवशा हि ते ॥८६॥
अहिंसा भगवद्भक्तिः स्थैर्यं शान्तिश्च कामना ।
क्लेशस्तापो मिथुनार्तिः पूर्वाभ्यासवशा हि ते ॥८७॥
स्नेहः प्रकृतिरास्तिक्यं सेवा विद्या कला धनम् ।
कुटुम्बिता गुरुः शिष्यः पूर्वाभ्यासवशा हि ते ॥८८॥
तस्माद् यामि वनं तात शुभार्थं पापनुत्तये ।
इत्युक्त्वा च ययौ नत्वा वनं जाड्यमघस्ततः ॥८९॥
कुरुक्षेत्रं गतः पूर्वं ततो बदरिकाश्रमम् ।
तपश्चकार बहुधा राधिके पापनुत्तये ॥९०॥
कालेन निधनं प्राप्तो गंगायां तु तदा पुनः ।
तपोभिः क्षीणपापः स पुण्यवार्धिः सवासनः ॥९१॥
गौर्जरे श्रीनगरेऽयं राजपुत्रोऽभवत्ततः ।
कर्कमघस्य राज्ञः स ज्यामघो धार्मिकः शुचिः ॥९२॥
पशुजातीयसंस्कारास्तापसी प्रकृतिस्तथा ।
नारायणस्य भक्तिश्च ज्यामघेऽपि तदाऽभवन् ॥९३॥
जातिस्मरोऽभवद् राजपुत्रो वक्ति न किंचन ।
न शृणोति न हसति न चित्तं विदधाति च ॥९४॥
निर्मनस्को भोजनं च भुंक्ते पाति जलं तथा ।
वस्त्रालंकारभूषादि धत्ते निर्मानसो यथा ॥९५॥
राज्यं च राज्यभोगाश्च द्रव्यं भृत्याश्च किंकराः ।
दासा दास्यो गजाश्वाश्च सर्वं त्वस्य समं ह्यभूत् ॥९६॥
शय्या पुष्पमयी चापि पृथ्वी रूक्षाऽस्य वै समा ।
मिष्टं मृष्टं सुगन्धाढ्यं भोज्यं रूक्षं च वा समम् ॥९७॥
प्रशंसा चाऽप्रसंशा वा मानं तिरः समं तथा ।
नमस्कारोऽथवा पृष्ठकारोऽस्य समतां गतः ॥९८॥
एवं वै वर्तमानस्य यौवनं समुपागतम् ।
पित्रा सुयोजितश्चायं विवाहेन गृहाश्रमे ॥९९॥
का पत्नी कः पतिश्चेति जिज्ञासाऽस्य न विद्यते ।
कः कामः कश्च संकल्पः का रतिर्विरतिस्तथा ॥१००॥

समं चाऽस्याऽभवत् सर्वमेकदा दयिता पतिम् ।
प्रपच्छ कारणं तस्मै औदासीन्ये निशान्तरे ॥१०१॥
ततः स राधिके स्मृत्वा पत्नीं जगाद शान्तितः ।
यत्कर्तव्यं भवेदत्र मानवे दुर्लभे शुभम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पूर्वस्वभावानुवर्तनं जाड्यमवद्दृष्टान्तेन षड्भिर्जन्मभिर्विवेचितमित्यादिनिरूपणनामा सप्ततितमोऽध्यायः ॥ ७० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके यच्च ज्यामघः प्राह भामिनीम् ।
सर्वमोक्षप्रदं ज्ञानं यत्कृत्वा नावशिष्यते ॥ १ ॥
ज्यामघः स्वप्रियामाह शृणु देवि धनालसे ।
श्रीकृष्णस्य परा शक्तिर्माया मोहकरी मता ॥ २ ॥
श्रीकृष्णरूपिणी माया ययेदं धार्यते जगत् ।
अनयैव जगत् सर्वं सदेवाऽसुरमानुषम् ॥ ३ ॥
सृजति पोषयत्येव ग्रसति श्रीपतिः स्वयम् ।
अस्यास्त्वंशानधिष्ठाय शक्तिमन्तोऽभवन् सुराः ॥ ४ ॥
ब्रह्मेशानादयः सर्वेऽनया शक्त्या सुरेश्वराः ।
सैषा सर्वजगत्सूतिः प्रकृतिस्त्रिगुणात्मिका ॥ ५ ॥
नाऽलं देवा न पितरो मानवा वासवोऽपि च ।
मायामेतां समुत्तर्तुं ये चान्ये भुवि देहिनः ॥ ६ ॥
तदाशीस्तन्नमस्कारस्तन्निष्ठस्तत्परायणः ।
आराधयन् कृष्णनारायणं तरति तां जनः ॥ ७ ॥
एकदा परमो भक्त इन्द्रद्युतिस्तु भूसुरः ।
सदा विष्णुपरो भूत्वा मायां द्रष्टुं मनोऽकरोत् ॥ ८ ॥
तस्यैवं चेहमानस्य कदाचित्परमा कला ।
स्वरूपं दर्शयामास दिव्यं नारायणोद्भवम् ॥ ९ ॥
दृष्ट्वा प्रणम्य शिरसा नारायणप्रियां सतीम् ।
तुष्टाव तु ततो देवीं पप्रच्छ विनयान्वितः ॥१०॥
का त्वं मातर्विशालाक्षि विष्णुचिह्नांकिते शुभे ।
याथातथ्येन रूपं स्वं वदेदानीं कृपामयि ॥११॥
श्रुत्वाऽस्य साऽवदल्लक्ष्मीः श्रीरहं श्रीहरेः प्रिया ।
न मां पश्यन्ति मुनयो न देवा मानवाः कुतः ॥१२॥
नारायणात्मिका त्वेका मायाऽहं तन्मयी परा ।
न मे नारायणाद् भेदस्तन्मय्यहं परमेश्वरी ॥१३॥
स च सर्वेश्वरः परब्रह्म कृष्णनरायणः ।
तन्मयास्तत्कृतार्हाश्च पुरुषोत्तमसेवकाः ॥१४॥
ज्ञानेन कर्मयोगेन ये भजन्ति परेश्वरम् ।
ते तस्य परमा भक्ता न तेषां प्रभवाम्यहम् ॥१५॥
अनादिश्रीकृष्णनारायणं सर्वसमर्पणैः ।
ज्ञानेनाऽऽराधयन् भक्तोऽवश्यं मोक्षमवाप्स्यति ॥१६॥
श्रुत्वा पप्रच्छ च पुनरिन्द्रद्युतिः श्रियं तदा ।
कथं स भगवानीशो ज्ञातव्यश्चेति मे वद ॥१७॥
एवमुक्ता तु सा माया कराभ्यां तं तु भूसुरम् ।
संस्पृश्याऽऽह कृष्णनारायणो वक्ष्यति तेऽनघ ॥१८॥
इत्युक्त्वा श्रीकृष्णनारायणे चान्तरधीयत ।
विप्रः स श्रीहरिं द्रष्टुं तस्थौ तत्र समाधिना ॥१९॥
तद्भक्तस्याऽनुग्रहं कुर्वन् साक्षात् कृष्णनारायणः ।
प्रादुरासीत् पीतवासाः किशोरश्च जगन्मयः ॥२०॥
इन्द्रद्युतिर्हरिं वीक्ष्य नेमे तुष्टाव तं प्रभुम् ।
कृष्णनारायण विष्णो पुरुषोत्तम केशव ॥२१॥
अनादिश्रीहरे स्वामिन् हृषीकेश च ते नमः ।
विश्वात्मन् सृष्टिकृत्कृष्णानन्तशक्ते च ते नमः ॥२२॥
निर्गुणाऽनन्तदिव्यानां गुणानां पूर्णमूर्तिक ।
ज्ञानगम्य कृपालभ्य पुरुषोत्तम ते नमः ॥२३॥
अनन्तमूर्तये तुभ्यं नमोऽस्त्वानन्दरूपिणे ।
नमस्ते परमेशाय ब्रह्मणे परमात्मने ॥२४॥
त्वं पिता सर्वभूतानां माता बन्धुः सुहृत् सखा ।
त्वमक्षरं परं धाम चिन्मात्रं व्योम वै बृहत् ॥२५॥
सर्वस्याऽऽधारमव्यक्तमनन्तं तमसः परम् ।
त्वां पश्यन्ति परात्मानं ज्ञानदीपेन सेवकाः ॥२६॥
प्रपद्ये तं भवद्रूपं सच्चिदानन्दविग्रहम् ।
यत्रास्ते भगवाँस्तद्वै श्रीहरेः परमं पदम् ॥२७॥
त्वमेव नयसि श्रीमत्कृष्णनारायणप्रभो ।
ज्ञानं देहि पदं देहि त्वन्मायां मा प्रदेहि मे ॥२८॥
इत्युक्त्वा प्रपतन्तं तं पादयोः स्वकरेण ह ।
पस्पर्श प्रहसन् कृष्णनारायणः पुनः पुनः ॥२९॥
स्पृष्टमात्रो भगवता दिव्यचक्षुस्तदाऽभवत् ।
यथावत्परमं तत्त्वं ज्ञातवाँस्तत्प्रसादतः ॥३०॥
उवाच त्वत्प्रसादान्मे चाऽसंदिग्धं च शाश्वतम् ।
ज्ञानं ब्रह्मैकविषयं जातमानन्दसिद्धिदम् ॥३१॥
शाधि मां भगवन्नत्र कथं सेव्योऽसि सर्वथा ।
किं कार्यं च मया लोके त्वद्भक्तेन परेश्वर ॥३२॥
श्रुत्वा भक्तं हरिः प्राह भक्तानां धर्मशालिनाम् ।
ज्ञानेन भक्तियोगेन पूजनीयोऽहमेव तु ॥३३॥

विज्ञाय मां परं तत्त्वं विभूतिं कार्यकारणम् ।
प्रवृत्तिं मे परां ज्ञात्वा मोक्षार्थी मां समर्चयेत् ॥३४॥
सर्वसंगान् परित्यज्य ज्ञात्वा मन्मायिकं जगत् ।
एकं मां स्वात्मनि ध्यायेत् स पश्येन्मां परात्परम् ॥३५॥
त्रिविधां भावनां कृत्वा भज मां त्वं सदा द्विज ।
एका मद्विषया तत्र परब्रह्मसुगोचरा ॥३६॥
व्यतिरेकेण भगवान् परे धाम्नि विराजते ।
अनादिश्रीकृष्णनारायणः स्वामिपतिः प्रभुः ॥३७॥
स्वराट् सर्वावताराणां कारणं सर्वशक्तिमान् ।
द्वितीया भावना तत्र सर्वाऽचिचिच्छरीरिणी ॥३८॥
जडं च चेतनं सर्वं व्याप्यं श्रीपरमात्मनः ।
अधीनं च नियाम्यं च सर्वं श्रीपरमात्मनः ॥३९॥
तेषु सर्वेषु तत्त्वेषु चान्तरात्मा विराजते ।
सोऽयं श्रीमत्कृष्णनारायणः श्रीकृष्णवल्लभः ॥४०॥
तद्विनाऽणुरपि नास्ति तदात्मकं च तन्मयम् ।
तं व्यतिरिच्य न चास्ति जडं चेतनमित्यपि ॥४१॥
तस्मात् सर्वा तस्य मूर्तिर्मूर्तिमानत एव सः ।
दिव्यो दिव्ये यथा चास्ते तथा जडेऽपि दिव्यकः ॥४२॥
निर्बद्धो निष्कलंकश्चाऽसँगोऽन्तर्यामिसंस्थितः ।
त्वयि मयि तथाऽन्यत्र सर्वत्राऽयं विराजते ॥४३॥
इत्येवं मां सर्वतत्त्वे विलोक्य परिसेवय ।
तृतीया भावना चाथ नैजे ब्रह्मस्वरूपिणी ॥४४॥
ब्रह्मस्वरूपः स्वयं चाऽस्मीत्येवं मन्येत देहवान् ।
सा ब्राह्मी निजरूपस्य गुणातिगा प्रवर्तते ॥४५॥
अहं ब्रह्मास्मि जीवात्मा जीवत्वं कर्मयुक्तता ।
कर्माणि ब्रह्मणि नैव सन्ति ब्रह्मात्मता हि सा ॥४६॥
सर्वं कर्म प्रकर्तव्यं ब्रह्म तेन न लिप्यते ।
एवं त्रेधा भावयित्वा परं पदमवाप्नुयात् ॥४७॥
अशक्तो मूढवच्चापि हरेः शरणमाश्रयेत् ।
ततः सर्वप्रयत्नेन तन्निष्ठस्तत्परायणः ॥४८॥
आराधयेत् परब्रह्म तेन मोक्षो भवेद् ध्रुवम् ।
तस्य श्रीमत्कृष्णनारायणस्य परमात्मनः ॥४९॥
ऐश्वर्याणि समस्तानि नित्या विभूतिरुच्यते ।
प्रभ्वाराधनया भक्ते विभूतिः प्रतिपद्यते ॥५०॥
कार्ये जगति चाऽव्यक्ते व्यक्ताऽव्यक्तात्मकेऽप्यहम् ।
कारणं चाऽक्षरं ब्रह्म विशिष्टं चाऽस्मि सर्वथा ॥५१॥
अहं नारायणस्तत्राऽन्तर्यामीश्वरपूजितः ।
सर्गस्थित्यन्तकर्ताऽस्मि विज्ञायैवं भजस्व माम् ॥५२॥
ततस्त्वं ज्ञानकर्मभ्यां मामुपैष्यसि योगतः ।
अहं नारायणः स्वामी पूर्वमासं महान् विराट् ॥५३॥
चतुर्मुखस्ततो ब्रह्मा मया सृष्टः पितामहः ।
रुद्रः सृष्टस्तथा विष्णुस्ततो मया ममाङ्गतः ॥५४॥
सृष्टा श्रीर्विष्णुशक्तिश्च कमलायतलोचना ।
सुरूपा सौम्यवदना मोहिनी सर्वदेहिनाम् ॥५५॥
शुचिस्मिता सुप्रसन्ना दिव्यकान्तिः सुशोभिता ।
दिव्यमालाम्बरभूषाधारिणी महिमास्पदा ॥५६॥
नारायणी महामाया मूलप्रकृतिवैष्णवी ।
तां दृष्ट्वा तु तदा ब्रह्मा मामुवाच पुनः पुनः ॥५७॥
मोहायाऽशेषभूतानां नियोजय सुरूपिणीम् ।
येनेयं विपुला सृष्टिर्वर्धेत मम केशव ॥५८॥
तथोक्तोऽहं श्रियं देवीमवोचं प्रहसँस्तदा ।
देवीदमखिलं विश्वं सदेवाऽसुरमानुषम् ॥५९॥
मोहयित्वा ममाऽऽदेशात् संसारे विनिपातय ।
केवलां त्वां ये भजेरन् तान् त्वयि संन्निरोधय ॥६०॥
ज्ञानयोगरतान् दान्तान् ब्रह्मिष्ठान् ब्रह्मवादिनः ।
अक्रोधनान् सत्यपरान् दूरतः परिवर्जय ॥६१॥
वेदविज्ञानवेदान्तज्ञानशमितसंशयान् ।
ब्रह्मयज्ञपरान् विप्रान् दूरतः परिवर्जय ॥६२॥
ये यजन्ति जपैर्होमैर्भजनैः परमेश्वरम् ।
स्वाध्यायेनेज्यया दूरात्तान् प्रयत्नेन वर्जय ॥६३॥
भक्तियोगसमायुक्तानीश्वरार्पितमानसान् ।
मयि सर्वार्पणकर्तॄन् दूरात्परिहराऽमलान् ॥६४॥
मन्नामाऽऽसक्तमनसो मन्मूर्तिध्यापरायणान् ।
मत्साधुसेवकान् भक्तान् धर्मिष्ठान् परिवर्जय ॥६५॥
बहुनाऽत्र किमुक्तेन साधून् साध्वीर्विवर्जय ।
मदाराधनसंमग्नान् मन्नियोगान्न मोहय ॥६६॥
एवं मया मम माया प्रेरिता मम वल्लभा ।
यथादेशं करोतीयं न बध्नाति ममाऽनुगान् ॥६७॥
तां मद्भक्तः पूजयेच्च लक्ष्मीं श्रियं समर्चयेत् ।
श्रियं ददाति विपुलां पुष्टिं मेधां यशो बलम् ॥६८॥
अर्चिता भगवत्पत्नी ददाति सम्पदः शुभाः ।
कृष्णसेवां ददात्येषा तस्माल्लक्ष्मीं समर्चयेत् ॥६९॥
विना कर्म न वै देही तिष्ठते च निसर्गतः ।
प्रवृत्तं च निवृत्तं च द्विविधं कर्म जायते ॥७०॥
ज्ञानपूर्वं निवृत्तं स्यात् प्रवृत्तं यदतोऽन्यथा ।
निवृत्तं सेवमानस्तु याति तत्परमं पदम् ॥७१॥

क्षमा दमो दया दानमलोभस्त्याग इत्यपि ।
आर्जवं चानसूया च तीर्थानुसरणं तथा ॥७२॥
सत्यं सन्तोषमास्तिक्यं श्रद्धा चेन्द्रियनिग्रहः ।
देवताभ्यर्चनं पूजा साधूनां वै विशेषतः ॥७३॥
अहिंसा प्रियवादित्वमपैशुन्यं सुनम्रता ।
सर्वमनुष्यजातीनां धर्मोऽयं मोक्षदो भवेत् ॥७४॥
प्राजापत्यं तु विप्राणां स्वर्गस्थानं क्रियावताम् ।
स्थानमैन्द्रं क्षत्रियाणां तथाधर्मैः प्रवर्तताम् ॥७५॥
वैश्यानां मारुतं स्थानं तथाधर्मेषु वर्तिनाम् ।
गान्धर्वं शूद्रजातीनां तथादास्येषु वर्तिनाम् ॥७६॥
अष्टाशीतिसहस्राणां यतीनामूर्ध्वरेतसाम् ।
यत्स्थानं तत्तु वैराजं स्थानं वै गुरुसेविनाम् ॥७७॥
सप्तर्षीणां तु यत्स्थानं तत् सधर्मिवनौकसाम् ।
प्राजापत्यं गृहस्थानां तथाधर्मेषु वर्तताम् ॥७८॥
यतीनां न्यासिनामूर्ध्वरेतसां त्यागिनां सताम् ।
सतीनां ब्रह्मसाध्वीनां वैराजं स्थानमुच्यते ॥७९॥
योगीनाममृतं स्थानं भूम्नश्चाव्याकृतं तु यत् ।
भक्तानां तु तदूर्ध्वं च व्योमाख्यं परमक्षरम् ॥८०॥
आनन्दमैश्वरं धाम यस्मान्नावर्तते पुनः ।
अनादिश्रीकृष्णनारायणस्वाम्यर्पितात्मनाम् ॥८१॥
परमं धाम एवास्ति परमेश्वरराजितम् ।
सर्वैर्ब्रह्ममयैर्युक्तैः सच्चिदानन्दलक्षणैः ॥८२॥
शृणु चान्यत् प्रवक्ष्यामि मोक्षदं ज्ञानमुत्तमम् ।
सर्वेषामाश्रमाणां तु द्वैविध्यं चान्तरे मतम् ॥८३॥
ब्रह्मचार्युपकुर्वाणो नैष्ठिको ब्रह्मतत्परः ।
योऽधीत्य विधिवद् वेदान् गृहस्थाश्रममाविशेत् ॥८४॥
उपकुर्वाणको ज्ञेयो नैष्ठिको मरणान्तिकः ।
साधकश्चाऽप्युदासीनो गृहस्थो द्विविधो मतः ॥८५॥
कुटुम्बभरणायत्तः साधकोऽसौ गृही भवेत् ।
ऋणानि त्रीण्यपाकृत्य निःसंगः स्यादुदासवान् ॥८६॥
वानप्रस्थस्तापसश्च मौक्षिकश्च द्विधा मतः ।
तपोहोमयजनस्वाध्यायनिष्ठस्तु तापसः ॥८७॥
ततश्चाग्रे ध्याननिष्ठो कृष्णसेवस्तु मौक्षिकः ।
सन्न्यासो ज्ञानभाक् चाद्यो द्वितीयो भक्तिभागपि ॥८८॥
ज्ञानाय वर्तते भिक्षुर्देहात्मनोर्विवेकवान् ।
आत्मरतिश्चात्मतृप्तः सन्यासो ज्ञानभागयम् ॥८९॥
सम्यग्दर्शनसम्पन्नः कृष्णसेवापरायणः ।
कृष्णरतिः कृष्णतृप्तः सन्यासौ मौक्षिकः स हि ॥९०॥
योगी तु चाश्रमः सर्वाश्रमेषु विद्यते सदा ।
गृहेऽनासक्त एवाऽऽद्यो विवेकी स तु योगिराट् ॥९१॥
अहं ब्रह्माऽक्षररूपो निर्लेपः स तु योगिराट् ।
परब्रह्मण एवाऽहं प्रपन्नः स तु योगिराट् ॥९२॥
एवं त्रेधा भवेद् योगी मोक्षमार्गानुयोगवान् ।
एवं मया प्रजाभ्यश्चार्पितं वै मोक्षसाधनम् ॥९३॥
ब्रह्मणे शिक्षितं सर्वं ब्रह्मा ददौ ततश्च तत् ।
ऋषिभ्यो निजपुत्रेभ्यस्तैर्मार्गैर्मोक्षमाप्नुवन् ॥९४॥
गुणास्त्रयो गृहीताश्च मयैव जगतो हिताः ।
अन्योन्यमनुरक्तास्ते ह्यन्योन्यमपजीविनः ॥९५॥
अन्योन्यप्रणताश्चैव लीलया पारमेश्वराः ।
सत्त्वरजस्तमोयोगान्ममैव परमात्मनः ॥९६॥
तिस्रस्तुमूर्तयः प्रोक्ता ब्रह्मविष्णुमहेश्वराः ।
अहं ब्रह्मा, महादेवो, न भिन्नाः परमार्थतः ॥९७॥
विभज्य स्वेच्छयाऽऽत्मानमन्तर्यामी स्थितोऽप्यहम् ।
तस्मात् सर्वप्रयत्नेन वन्द्यस्त्रेधाऽपि माधवः ॥९८॥
यदीच्छेदचिरात्स्थानं यत्तन्मोक्षाख्यमव्ययम् ।
वर्णाश्रमस्य धर्मेण भक्त्या मां सेवयेत् द्विजः ॥९९॥
पूजयेद् भावयुक्तेन यावज्जीवं प्रतिज्ञया ।
आश्रमे वैष्णवे ब्राह्मे शांभवे वा स्थितोऽपि माम् ॥१००॥
तच्चिह्नधारी नियतस्तद्भक्तजनवत्सलः ।
ध्यायेन्मामर्चयेद् देवान् पराविद्यापरायणः ॥१०१॥
यस्तु नारायणं देवं प्रपन्नः शरणागतः ।
धारयेदूर्ध्वपुण्ड्रं तु ललाटे चन्दनादिभिः ॥१०२॥
अग्रे शंभुर्मध्ये विष्णुर्मूले ब्रह्मा प्रतिष्ठति ।
प्रपन्नो या जगद्वीजं ब्रह्माणं परमेष्ठिनम् ॥१०३॥
धारयेत् स महाबिन्दुं ललाटे भालमध्यगम् ।
ऊर्ध्वरेखा शांभवी च मध्ये विष्णुर्व्यवस्थितः ॥१०४॥
अधोरेखा तु सा ब्राह्मी त्रिदेवाः सन्ति तत्र च ।
शंभुं प्रपन्नो भक्तस्तु भस्मना वै त्रिपुण्ड्रकम् ॥१०५॥
ललाटे चन्द्रमस्तुल्यं चार्धभागेन धारयेत् ।
उपरि वर्तते शंभुर्मध्ये विष्णुरधो ह्यजः ॥१०६॥
संवर्तते ततश्चैतद् ब्रह्मविष्णुशिवात्मकम् ।
सूर्यतुल्यं रुद्रभालं चन्द्रतुल्यं तु वैष्णवम् ॥१०७॥
वह्नितुल्यं ब्रह्मभालं तिलकेनोज्ज्वलं सदा ।
भवत्येव सुरस्थानमैश्वरं तिलके कृते ॥१०८॥
एवं चिह्नं परं धृत्वा कृत्वा विवेकमात्मनः ।
दत्वाऽऽत्मानं प्रभोः पादे शाश्वतं पदमाप्नुहि ॥१०९॥

इत्येवं राधिके श्रीमत्कृष्णनारायणाऽऽश्रयम् ।
ज्ञानं विज्ञानसम्पन्नं स्वपत्न्यै ज्यामघो ददौ ॥११०॥
कृष्णनारायणस्वामी पुरेन्द्रद्युतये ददौ ।
मोक्षदं सर्वमेवैतद् विज्ञानं कर्मिणामपि ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने ज्यामघनृपः स्वपत्न्यै धनालसायै भगवता इन्द्रद्युति-विप्राय पूर्वमुक्तं सर्वमुक्तवानित्यादिनिरूपणना-मैकसप्ततितमोऽध्यायः ॥ ७१ ॥

**श्रीकृष्ण उवाच—**

निबोध राधिके! चैतद् विज्ञानं परमाद्भुतम् ।
ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा ॥ १ ॥
आश्रमाः क्रमसम्पन्नाः कारणादन्यथाऽपि ते ।
उत्पन्नज्ञानविज्ञानी वैराग्यं परमं गतः ॥ २ ॥
प्रव्रजेद् ब्रह्मचर्यात्तु गृहस्थाद्वा यथोचितम् ।
दारानाहृत्य विधिवद् यजेच्च विविधैर्मखैः ॥ ३ ॥
धर्मेणोत्पादयेत् पुत्रान् वैराग्ये सति सन्न्यसेत् ।
अथ वैराग्यवेगेन स्थातुं नोत्सहते गृहे ॥ ४ ॥
वानप्रस्थो भवेत् पूर्वं पश्चात् सन्यासमाश्रयेत् ।
अतिवैराग्यवेगस्तु सन्यासमेव चाश्रयेत् ॥ ५ ॥
वानप्रस्थाश्रमं गत्वा यद्वा सन्यासमित्यपि ।
पुनर्न गृहमागच्छेत् न विशेद् दारसंगमे ॥ ६ ॥
सर्वेषामेव वैराग्यं सन्यासे तु विधीयते ।
अविरक्तस्तु सन्यासात् पतत्येन न संशयः ॥ ७ ॥
एकाश्रमेऽथवा सम्यग् वर्तेताऽऽमरणान्तिकम् ।
तद्धर्मिज्ञानिभक्तस्तु सोऽमृतत्वाय कल्पते ॥ ८ ॥
धर्मार्थं दत्तसर्वस्वो ब्रह्मविद्यः प्रशान्तिमान् ।
ज्ञानविज्ञानसम्पन्नो ब्रह्मभूयाय कल्पते ॥ ९ ॥
ब्रह्मण्यर्पय्य कर्माणि कामसंगादिवर्जितः ।
प्रसन्नाऽरक्तमनसा कुर्वाणो याति तत्पदम् ॥१०॥
ब्रह्मणा दीयते देयं ब्रह्मैव दीयते हि तत् ।
दीयते ब्रह्मणे दानं ब्रह्मार्पणमिदं परम् ॥११॥
नाऽहं कर्ता सर्वमेतद् ब्रह्मैव कुरुते तथा ।
एतद् ब्रह्मार्पणं कर्म ब्रह्मणि परिधीयते ॥१२॥
पृणोतु श्रीकृष्णनारायणस्वामी स्वकर्मणा ।
एवं मत्वा क्रियते तद् ब्रह्मार्पणमिदं परम् ॥१३॥
फलानां चापि सन्यासं प्रकुर्यात्परमेश्वरे ।
एवं फलप्रदानं च ब्रह्मार्पणमनुत्तमम् ॥१४॥
कार्यमित्येव यत्कर्म नियतं संगवर्जितम् ।
क्रियते विदुषा कर्म तद्धवेदपि मोक्षदम् ॥१५॥
कर्मणां फलसन्न्यासो यदि ब्रह्मणि नेयते ।
तदा फलेन बध्येत मोक्षरोधो भवेत्ततः ॥१६॥
अर्पणात् क्षीयते पापं पुण्यं वा मोक्षबोधकम् ।
ऐहिकं पौर्विकं वापि मनःप्रसन्नता भवेत् ॥१७॥
आत्मवित्त्वं भवेच्चापि ब्रह्मविज्ञायते ततः ।
कर्मणा सहिताज् ज्ञानात् सम्यग् योगोऽभिजायते ॥१८॥
योगात् श्रीमत्कृष्णनारायणसान्निध्यमीयते ।
तस्मात् सर्वप्रयत्नेन यत्र तत्राश्रमे रतः ॥१९॥
कर्माणीश्वरतुष्ट्यर्थं कुर्यान्नैष्कर्म्यमाप्नुयात् ।
सम्प्राप्य ब्रह्मविज्ञानं नैष्कर्म्यं तत्प्रसादतः ॥२०॥
निजात्मात्मपरब्रह्मानन्दे मग्नो जितेन्द्रियः ।
एकाकी निर्ममः शान्तो जीवन्नपि समुक्तवत् ॥२१॥
वीक्षते परमात्मानं परब्रह्म परेश्वरम् ।
नित्यानन्दी निरुपाधिः श्रीहरौ लीनतां व्रजेत् ॥२२॥
तस्मात् सेवेत च राधे नैष्कर्म्यं त्वर्पणात्मकम् ।
तृप्तये परमेशस्य तेन यायात् परं पदम् ॥२३॥
एवं कृता तु या निष्ठा सिद्धिं ददाति शाश्वतीम् ।
न त्वेतां समतिक्रम्य सिद्धिं विन्दति मानवः ॥२४॥
एवं सर्वं ज्यामघोऽपि विचार्य चात्मनो हितम् ।
उक्त्वा पत्न्यै समस्तं तु विज्ञानं ज्ञानपूर्वकम् ॥२५॥
कृत्वा ज्ञानेन च निजां कान्तां तु ब्रह्मरूपिणीम् ।
दत्वा राज्यं स्वानुजाय श्रीमघाय हरिप्रियः ॥२६॥
ज्यामघः स्त्रीसहितश्च पित्रोः पादौ प्रणम्य च ।
भ्रातरं च समाश्लिष्य क्षेममावेद्य सर्वतः ॥२७॥
प्रजाशीर्वादमादाय साभ्रमतीनदीतटे ।
आश्रमे तु सतां नित्यं सत्संगं प्रचकार ह ॥२८॥
भ्रात्रा स्वनामसहितं तच्छ्रीनगरं ख्यापितम् ।
ज्यामघस्तु ततो यज्ञं वैष्णवं परमं शुभम् ॥२९॥
कारयामास स्वभ्रातृद्वारा साभ्रमतीतटे ।
तद्भक्त्या होमसमये श्रीयुतः श्रीनरायणः ॥३०॥
मूर्तिमाँस्तत्र चायातो यज्ञमण्डपमच्युतः ।
वह्निः स्वयं मूर्तिमाँश्च ब्रह्मा शंभुस्तथाऽऽगताः ॥३१॥
देवता बुभुजर्हव्यं ज्यामघेन समर्पितम् ।
श्रीः प्रसन्ना च तं प्राह तव भक्त्या जनार्दनः ॥३२॥
प्रसन्नो मां तव राज्ये स्थातुं चाज्ञां करोति हि ।
नाहमेकाकिनी वासं करिष्ये प्रत्तने तव ॥३३॥

यज्ञवृताऽस्मि सञ्जाता साकं मत्पतिना सुरैः ।
कारयाऽत्राऽऽलयं रम्यं यत्र वसामि नित्यदा ॥३४॥
श्रुत्वा च ज्यामघो भ्रात्रा सह मुमोद भक्तराट् ।
एवमुक्त्वा पुनः प्राह याहि कुंकुमवापिकाम् ॥३५॥
अश्वपट्टसरःक्षेत्रं तत्र वसामि नित्यदा ।
अनादिश्रीकृष्णनारायणसेवापरायणा ॥३६॥
दम्पत्योस्तत्र तु पुनः सेवया दास्ययुक्तया ।
दर्शनं मे स्वामिनश्च भविष्यति न संशयः ॥३७॥
इत्युक्त्वा च तिरोरास सदेवा सनरायणा ।
यज्ञः समाप्तिमगमन्नगरे श्रीर्व्यवर्धत ॥३८॥
श्रीमघं पितरौ नत्वा ज्यामघो दत्तदक्षिणः ।
साभ्रमत्यां नौकया च सपत्नीको विनिर्ययौ ॥३९॥
श्रीमघः कारयामास मन्दिरं सप्तभूमिकम् ।
मेघस्पर्शं सशिखरं नारायणाख्यघट्टके ॥४०॥
तत्र लक्ष्मीयुतो नारायणो वैदिककर्मभिः ।
प्रतिष्ठापित एवादौ राज्ञाऽस्मै वाटिकाऽर्पिता ॥४१॥
पूजानैवेद्यशृंगारोत्सवाश्चापि नियोजिताः ।
एवं भेजे श्रीमघोऽपि श्रीमत्कृष्णनरायणम् ॥४२॥
लक्षवर्षं तु तद्राज्यं भुक्त्वा धाम परं ययौ ।
ज्यामघोऽपि नदीमार्गादाययौ स्तंभवारिधिम् ॥४३॥
ततः श्रीगोपनाथं च कृत्वा तीर्थं ततः परम् ।
नावं विसृज्य यानेन ययौ कुंकुमवापिकाम् ॥४४॥
अश्वपट्टसरो दृष्ट्वा वीक्ष्य श्रीलोमशाश्रमम् ।
भूमिकां दिव्यशोभाढ्यां वीक्ष्याऽऽनन्दं परं ययौ ॥४५॥
दृष्ट्वा श्रीमत्कृष्णनारायणप्रासादमुच्छ्रितम् ।
व्योमचुम्बिशिखराणि ध्वजान् वीक्ष्य सगद्गदः ॥४६॥
दण्डवत् प्रणनामादौ प्रदक्षिणं चकार तम् ।
तावत् तत्र समायातो विप्रो बालस्वरूपवान् ॥४७॥
रमणीयः श्रीनिवासः सर्वसौन्दर्यभाजनम् ।
पद्मपत्रायतनेत्रः सूक्ष्मचक्रान्विताऽङ्गुलिः ॥४८॥
वक्षोधृतोज्ज्वलमणिस्तेजःपरिधिशोभितः ।
स्वागतं प्रचकाराऽसौ तीर्थस्थलानि दर्शयन् ॥४९॥
निनाय मन्दिरे यत्र श्रीकान्तः संविराजते ।
अनादिश्रीकृष्णनारायणं गजासनस्थितम् ॥५०॥
दर्शयामास विप्रः स तत्र चान्तरधीयत ।
ज्यामघस्तस्य राज्ञी च परमाश्चर्यमापतौ ॥५१॥
साक्षान्मानवनाट्यस्य दर्शनं प्राप्य तत्परम् ।
बालकृष्णस्य च तत्र दर्शनं प्राप्य वै पुनः ॥५२॥
द्वयोरैक्यं स्वरूपे च स्वभावे गुणवर्तने ।
मूर्तेरपीति विज्ञायाऽमन्यतां च कृतार्थकौ ॥५३॥
अहो भाग्यमहो भाग्यं ज्यामघस्य च तत्स्त्रियाः ।
साक्षाद् विप्रबटुरूपो बालकृष्णोऽभवत्तदा ॥५४॥
आनिनाय गृहं नैजं बालकृष्णे तिरोऽभवत् ।
अनेकजन्मपुण्यानां सेवया तत्प्रसन्नता ॥५५॥
जायते येन भगवान् स्वयं स्वगृहमाययौ ।
ततो गोपालकृष्णं च मातरं कम्भरासतीम् ॥५६॥
भगवन्तं च सन्तोषां ददृशतुस्ततः परम् ।
शुकं दृष्ट्वा वल्लभं च दृष्ट्वा वै सुरमण्डलम् ॥५७॥
मुमुदतुस्तावत्यर्थं पुपूजतुः परमेश्वरम् ।
चन्दनाक्षतकुंकुमोशीरगुलालवारिभिः ॥५८॥
पुष्पतुलसीकल्हारपुण्डरीकसुकेसरैः ।
हारभूषाम्बरद्रव्यैः पूजयामासतुर्हि तौ ॥५९॥
उपदाः स्वर्णपात्रादि न्यधातां पुरतस्तदा ।
मिष्टपक्वान्नपात्रादि ताम्बूलकं जलादिकम् ॥६०॥
ददतुस्तौ श्रीहरये मात्रे च जनकाय च ।
आरार्त्रिकं चक्रतुश्च दण्डवच्च नमस्कृतिम् ॥६१॥
बालकृष्णस्तु पप्रच्छागमने क्षेममित्यपि ।
कुशलं च प्रवासेऽप्यपीडां सुखागमं तथा ॥६२॥
तत आतिथ्यकार्यार्थे निनाय दम्पतीं हरिः ।
भोजनं कारयामास जलं ताम्बूलकादिकम् ॥६३॥
निवासार्थं स्वतन्त्रं च सौधं हरिः समार्पयत् ।
दम्पतीभ्यां दासदासीर्ददौ वस्तूनि सर्वशः ॥६४॥
विशश्रामाथ राजाऽसौ सायं त्वश्वसरोवरम् ।
स्नातुं प्रययौ विधिना स्नात्वा सन्ध्यां चकार ह ॥६५॥
अश्वपट्टसरसश्च तीर्थकोट्यन्वितस्य च ।
अष्टोत्तरशतवर्तियुक्तं नीराजनं न्यधात् ॥६६॥
जलं पीत्वा निजं सौधं समाययौ च सानुगः ।
रात्रिं निनाय सुखतः प्रातःस्नानोत्तरं नृपः ॥६७॥
पूजयित्वा स्वामिनं श्रीबालकृष्णं श्रियः पतिम् ।
आरार्त्रिकादिकं कृत्वा ददौ दानानि सर्वशः ॥६८॥
स्वर्णभूषाम्बरद्रव्यमुक्तामणीन् ददौ बहून् ।
भोजयामास तीर्थस्थान् विप्रान् ऋषीन् सुकन्यकाः ॥६९॥
सर्वेषां चापि देवानां तीर्थयात्रां चकार ह ।
अश्वपट्टसरःप्रदक्षिणं कृत्वा गृहं ययौ ॥७०॥
धन्यो वै गुन्द्रको वृक्षो धन्या तिन्तिडिका शुभा ।
धन्यो दाडिमवृक्षश्च धन्यौ जम्बुद्वयद्रुमौ ॥७१॥

धन्या सा बदरी यत्र भगवान् संविराजते।
धन्या सा कुंकुमवापी तीर्थोत्तमोत्तमोत्तमा ॥७२॥
धन्योऽहं ज्यामघश्चापि धन्या धनालसा प्रिया।
येषामनादिदेवश्रीकृष्णनारायणाश्रये ॥७३॥
वासो वै विद्यते ते तु ब्रह्मलोके वसन्ति हि।
एवं चिन्तयमानं तं राज्ञी प्राह त्वरान्विता ॥७४॥
मन्दिरं श्रीदर्शितं तत् कारयाऽत्र महत्तमम्।
यत्र नारायणो देवः सदा नः पूज्यतां व्रजेत् ॥७५॥
श्रुत्वा राजा मन्दिरं च कीदृग् विशालमुच्छ्रितम्।
कारयितव्यमेवेत्यचिन्तयत् क्षणमात्रकम् ॥७६॥
तावत्तेजः परं श्रेष्ठं श्वेतं ददर्श चायतम्।
तत्र ददर्श शिखरं चैकं विशालमन्तरे ॥७७॥
तत्र मध्ये शुभां मूर्तिं कृष्णनारायणात्मिकाम्।
वामे राधां श्रियं लक्ष्मीं पारवतीं प्रभां तथा ॥७८॥
माणिकीं चेति पत्नीस्ता ददर्श दिव्यदर्शनाः।
दक्षे पितरं जननीं सन्तोषां भगिनीं तथा ॥७९॥
भगवन्तं शुकं चापि वल्लभं हरिबान्धवान्।
ददर्श मण्डलं चैतत् स्वं राज्ञीं प्रददर्श च ॥८०॥
सेवायां चेति तत्सर्वं ततश्चान्तरधीयत।
राजा शिल्पिवरं तत्र चाहूयाऽकथयत्तदा ॥८१॥
शिल्पिवर्यश्चित्रपटं चकार तद्यथोदितम्।
ततो वै मन्दिरं रम्यं चाश्वपट्टस्य पश्चिमे ॥८२॥
कारयामास सम्पूर्णं प्रतिष्ठां विधिनाऽपि च।
त्रयोदशप्रतिमानां कारयामास भूसुरैः ॥८३॥
स्वसौधं कारयामास समाहूय च लोमशम्।
दीक्षां जग्राह च सांख्ययोगधर्मान्वितां शुभाम् ॥८४॥
निजसौधे मन्दिरे तं श्रीमत्कृष्णनरायणम्।
भेजे भक्त्या सपत्नीकश्चोत्तमो वैष्णवो महान् ॥८५॥
पूर्वजन्मस्वभावान् स क्षपयामास भक्तितः।
व्रतेन तपसा नित्यं ध्यानेन दास्यभावतः ॥८६॥
महाभागवतो भूत्वा सर्वं चकार भावतः।
चतुर्विंशतितत्त्वानि हर्यर्थे प्रचकार सः ॥८७॥
नृपः श्रीकृष्णदेवाय चार्पयामास चेतनम्।
सत्त्वं श्रीकृष्णदेवस्य प्रकाशने न्ययोजयत् ॥८८॥
रजस्तस्य प्रवृत्त्यर्थं यथा तुष्टो भवेद्धरिः।
तमो मूर्तौ प्रलयार्थं न्ययुङ्क्त श्रीहरेस्तदा ॥८९॥
महत्तत्त्वं बुद्धिरूपं तन्निर्णये न्ययोजयत्।
चित्तं तु चिन्तने चाहं तस्याऽभिमाननेऽकरोत् ॥९०॥
मनस्तु मनने तस्य श्रोत्रं कथाश्रवे हरेः।
त्वगस्य स्पर्शनेऽरक्षत् चक्षुस्तद्दर्शनेऽकरोत् ॥९१॥
रसना तत्प्रसादस्य स्वादे जिह्वाऽस्य कीर्तने।
नासा तत्पुष्पसौगन्ध्ये वागस्य गुणवर्णने ॥९२॥
हस्तौ दास्ये च कैंकर्ये सेवायां सर्वदाऽकरोत्।
पादौ तमभिगमने प्रादक्षिण्येऽकरोत्तथा ॥९३॥
पायूं चासनबन्धेऽस्य लिंगमानन्दनेऽस्य च।
बलं तद्धारवहने कलास्तत्सेवनेऽकरोत् ॥९४॥
दैहिकं सर्वमेवाऽयं श्रीकृष्णाय समार्पयत्।
राज्ञी चापि तथा सर्वं बालकृष्णाय चार्पयत् ॥९५॥
तन्मात्राणि विषयाँश्च शुभं चाशुभमित्यपि।
सर्वं ददौ तु हरये स्वयं प्राघूणिकाऽभवत् ॥९६॥
क्रिया सर्वा वर्ष्मणस्तु श्रीकृष्णाय तथाऽऽर्पयत्।
पूजनं स्मरणं तस्य वन्दनं स्तवनं सदा ॥९७॥
पादसम्मर्दनं विष्णोरर्चनं दास्यमित्यपि।
सख्यं केलिर्नर्मवाक्यं हसनं हास्यमित्यपि ॥९८॥
कीर्तनं चार्पणं सर्वं श्रीमत्कृष्णेऽकरोत् सदा।
राज्ञी चापि महाभागवती भक्ता बभूव ह ॥९९॥
मार्जनं लेपनं पक्वनैवेद्यकरणं तथा।
जलाहरणमेवापि वस्त्राणां क्षालनादिकम् ॥१००॥
पात्राणां मञ्जनं चापि पुष्पानयनमित्यपि।
मालिकाग्रथनं चापि तुलस्यानयनं तथा ॥१०१॥
वायोरान्दोलनं चापि दोलाऽऽन्दोलनमित्यपि।
सर्वं चकार हस्ताभ्यां शय्यास्तरणमित्यपि ॥१०२॥
पादसंवाहनं कृष्णनारायणस्य सर्वदा।
किंकरीव विदधाति सर्वाऽऽर्पणं तदाऽकरोत् ॥१०३॥
एवं संसेवमानौ तौ दिव्यपुण्याश्रितौ शुभौ।
प्रक्षीणकल्मषौ जातौ बालकृष्णाभ्यनुग्रहात् ॥१०४॥
लोमशेन प्रापितौ च मन्त्रं श्रीवैष्णवं परम्।
'ओं नमः श्रीकृष्णनारायणाय पतये नमः' ॥१०५॥
लब्ध्वा मन्त्रं पूजयित्वा हरिं चाषाढशुक्लके।
एकादश्यां रव्युदये ध्यानमग्नौ स्थिरौ क्षणम् ॥१०६॥
अभवतां तदा दिव्यं विमानं त्वक्षराच्छुभम्।
सपार्षदं समायातं कोटिसूर्यसमप्रभम् ॥१०७॥
देहौ त्यक्त्वा ज्यामघश्च धनालसा विमानके।
पार्षदानामाज्ञया चारोहतां दिव्यवर्ष्मणौ ॥१०८॥
ययौ विमानं त्वरितं चाऽक्षरं परमं पदम्।
जयशब्दाश्चाऽभवँश्च श्रीनारायणमन्दिरे ॥१०९॥

इत्येवं राधिके तौ तु भक्त्या मोक्षमवापतुः ।
पाठको वाचकः श्रोताऽप्यस्य मोक्षपदं व्रजेत् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने ज्यामघराज्ञस्तत्पत्न्या धनालसायाः कुंकुमवाप्यां त्वात्मनिवेदितभक्त्या मोक्षणमितिनिरूपणनामा द्वासप्ततितमोऽध्यायः ॥ ७२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चान्यं चमत्कारं हरेः शुभम् ।
गौर्जरे वर्तते रम्या नदी आधरसंज्ञिका ॥ १ ॥
तत्तटाद् दक्षिणे चास्ते आमोदनगरं शुभम् ।
बहुश्रेष्ठिजनावासं देवसेवापरायणम् ॥ २ ॥
व्यवसायपरैर्लोकैरधिष्ठितं धनान्वितैः ।
मानवा बहुधा यत्र आधरातीरवासिनः ॥ ३ ॥
न्यूष्टुर्भक्तास्तत्रशंभोः शंभुभक्तिपरा वराः ।
आधरायास्तटे चान्ये पूजापाठपरायणाः ॥ ४ ॥
यान्त्यायान्ति च नगरं कृत्वा शंभोश्च दर्शनम् ।
वैष्णवं मन्दिरं तत्र आधरायास्तटे शुभम् ॥ ५ ॥
श्रिया युक्तो हरिर्यत्र नारायणो विराजते ।
प्रतिमारूपधारी स पूज्यते चार्च्यते जनैः ॥ ६ ॥
वन्द्यते सेव्यते चापि वैष्णवैः सर्वदा प्रगे ।
मन्दिरस्याऽभितस्तत्र वसन्ति साधवोऽमलाः ॥ ७ ॥
तत्प्रसंगादभवच्च वैष्णवः सुधनो वणिक् ।
सुधनाख्यो नित्यमादौ स्नात्वा समर्च्य देवताः ॥ ८ ॥
नत्वा च वैष्णवान् साधून् याति शंभ्वालयं ततः ।
उद्यानवर्यसंकुलं वृक्षवल्ल्यादिराजितम् ॥ ९ ॥
फलपुष्पादिसंशोभत्तरुवर्यविराजितम् ।
जलवापीयुतं स्तम्बसस्यसमृद्धिसुशोभितम् ॥१०॥
निराबाधं च भक्तानां शान्तिदं दर्शनादपि ।
आमोदेश्वरलिंगं च तदुद्याने महालये ॥११॥
विराजते सुस्फटिकद्युति दिव्यं मनोहरम् ।
तत्सेवायां विप्रवर्यो महर्षिर्वर्चकायनिः ॥१२॥
ब्रह्मचर्यपरो यज्ञहोमकार्यपरायणः ।
फलमात्राशनो व्योमशयनो दिव्यदृष्टिमान् ॥१३॥
वैष्णवः परमः शंभौ सेवाधर्मपरायणः ।
वेदवेदाङ्गविद्याधिः कथाख्यानपरायणः ॥१४॥
व्रतेन कृतकार्श्यातिशुष्कनाडीकदेहवान् ।
लक्ष्मीनारायणसंहितायाः कथापरायणः ॥१५॥
नित्यं सायं शिवोद्याने तरुमण्डपसंश्रितः ।
कथं करोति देवास्तां शृण्वन्ति मानवादयः ॥१६॥
नरा नार्यः पक्षिणश्च देहिनस्तन्निवासिनः ।
तच्छ्रोतुं नित्यदा याति सुधनो भक्तिभावनः ॥१७॥
तत्र वै श्रुतवान् कृष्णनारायणं श्रियः पतिम् ।
सौराष्ट्रे कुंकुमवापीक्षेत्रे श्रीकम्भरासुतम् ॥१८॥
बालकृष्णं परब्रह्म गोपालकृष्णबालकम् ।
सर्वसामर्थ्ययुक्तं श्रीराधारमादिसेवितम् ॥१९॥
विराजन्तं चाश्वपट्टसरोऽन्तिकं महालये ।
लोमशस्याऽऽश्रमं चापि तीर्थानि च बहून्यपि ॥२०॥
ततोऽस्य वणिजो जाता सुधनस्य शुभाश्रया ।
साक्षादनादिदेवस्य कृष्णनारायणस्य तु ॥२१॥
धृतमानवनाट्यस्य दिदृक्षा मोक्षदायिनी ।
नित्यं चिन्तयते रम्यं बालकृष्णं दिवानिशम् ॥२२॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
मन्त्रं जग्राह च तस्माद्दषेः श्रीवर्चकायनेः ॥२३॥
जजाप तं परमं मन्त्रं दध्यौ मूर्तिं हृदन्तरे ।
सत्यां चापि दिदृक्षायां दूरदेशं विचार्य सः ॥२४॥
गृहेऽर्चायां तु सन्तोषं ह्यमन्यताऽर्चनादिभिः ।
नित्यं पूजयतेऽनादिकृष्णनारायणं हरिम् ॥२५॥
नैवेद्यं ददते प्रातर्मध्याह्ने च निशामुखे ।
आरार्त्रिकं च ददते स्तवं जापं करोत्यपि ॥२६॥
उत्सवान् कुरुते चापि न्यायागतधनैः शुभान् ।
तत्पत्नीपुत्रपौत्राद्या वैष्णवाः श्रीहरिश्रिताः ॥२७॥
देवसेवापरा ह्यासन् साधुसेवापरायणाः ।
कथाश्रवपराश्चासन् कृष्णार्पणात्मबुद्धयः ॥२८॥
सेवन्ते सततं कृष्णं साधून् साध्वीर्धनादिभिः ।
यानवाहनभोज्याद्यैः पादसंवाहनादिभिः ॥२९॥
एवं वै वर्तमानस्य सुधनस्य गृहे सदा ।
अनादिश्रीकृष्णनारायणमूर्तौ हरिः स्वयम् ॥३०॥
प्रकटीभूय साक्षात्तु गृह्णात्यन्नादि चार्पितम् ।
प्रसादं ददते चास्मै भक्ताय प्रहसंस्ततः ॥३१॥
बालकृष्णस्तिरो याति मूर्तौ नित्यं तथाऽकरोत् ।
एकदा सुधनः श्रेष्ठी पौत्रविवाहकारणात् ॥३२॥
स्ववाहिनीं परिष्कृत्य धनभूषाम्बरादिभिः ।
नरनारीवरराजयुतो गन्त्र्यादिवाहनैः ॥३३॥
आमोदात्तु ययौ कन्यानगरं जाम्बुसारसम् ।
नावानदीं समुत्तीर्य गत्वा च जाम्बुसारसम् ॥३४॥

विधिं वैवाहिकं कृत्वा प्रत्यावर्तत वै यदा ।
आधराख्यनदीतीरे तस्करा विंशतिप्रथाः ॥३५॥
आपेतुरुग्ररूपास्तु सशस्त्रा वृक्षसंकुले ।
ताडयामासुरुग्रास्ते शकटीवाहकाँस्तथा ॥३६॥
वाहिनीरक्षकाँश्चापि निजघ्नुर्यष्टिकादिभिः ।
सुवर्णं च विभूषाश्च रूप्यं तथाऽम्बरादिकम् ॥३७॥
श्रेष्ठं धनं समाजह्रुश्चाश्ववारा हि तस्कराः ।
भोज्यादिकं चापि जह्रुः सुधनो दुःखितोऽभवत् ॥३८॥
कुटुम्बं चापि तत्सार्थस्तदाऽभवद् धनोज्झितः ।
भूषाहीना योषितश्च श्रृंगाराम्बरवर्जिताः ॥३९॥
अभवन् शोकसंमग्नाः सम्बन्धिबान्धवास्तथा ।
महीमाना धनहीना निस्तेजस्का च वाहिनी ॥४०॥
शोकोद्वेगपरो जातो वधूजनः सखीजनः ।
स्नुषा चाऽमंगलग्रस्ता विवाहे सति चाऽभवत् ॥४१॥
लक्ष्मीनाशोऽभवद्भाविदारिद्र्यसूचकः खलु ।
एवं विचार्य सुधनः कृत्वा स्थैर्यं हृदि स्थितः ॥४२॥
आत्मनाऽऽत्मानमालम्ब्य सस्मार बालकृष्णकम् ।
अनादिश्रीकृष्णनारायणं स्वेष्टं परेश्वरम् ॥४३॥
तुष्टाव परया प्रीत्या स्वेष्टदेवं पुमुत्तमम् ।
कृपानाथ दयासिन्धो संसारार्णवतारक ॥४४॥
शरणागतरक्षाकृत् रक्षयात्र वनान्तरे ।
त्वया गजस्य वै पूर्वं कृता रक्षा जलान्तरे ॥४५॥
त्वया प्रल्हादरक्षा च कृता दानवमण्डले ।
त्वया च मरुतां रक्षा कृता गर्भगृहान्तरे ॥४६॥
त्वं पाता त्वं विधाता च परमात्मा सनातनः ।
रक्ष रक्ष कृपावार्धे चौराणां त्रासतः प्रभो ॥४७॥
सर्वस्वं संहृतं चौरैर्जीवनं गृहमेधिनाम् ।
स्वर्णरूप्यविभूषादि ततश्चोद्धर दुःखतः ॥४८॥
गृहस्थानां धनं द्रव्यं भूषा द्रव्यं तु योषिताम् ।
शान्तिर्द्रव्यं च साधूनां भक्तद्रव्यं हरिः स्वयम् ॥४९॥
विना द्रव्यं तु लोकेऽत्र प्रतिष्ठा नैव विद्यते ।
धान्यं वस्त्रं व्यवहारो नाथ ! द्रव्ये प्रतिष्ठति ॥५०॥
द्रव्ये दोषा बहवोऽपि गुणा जीवनसम्प्रदाः ।
द्रव्ये भवन्ति सततं ततश्चालम्बनं धनम् ॥५१॥
तत्रापि वणिजां कृष्ण सुवर्णभूषणादिकम् ।
सर्वस्वं विद्यते तच्च चौरैर्हृतं समस्तकम् ॥५२॥
तव भक्तिमतां नाथ पराभवोऽयमुत्कटः ।
अभक्तानां हास्यपात्रताया आस्पदतां गताः ॥५३॥
आपद्भ्यश्चोद्धर कृष्णनारायणपरेश्वर ।
भक्तरक्षाकरश्चेतिनामसार्थकमावह ॥५४॥
अन्यथा तु जना आशाभंगेन त्वां जनार्दन ।
त्यक्ष्यन्ति भजनं ते ते मत्वा चाऽरक्षकं प्रभुम् ॥५५॥
आर्त्ता आर्तिहरं कृष्णं यावदार्ता भजन्ति वै ।
अर्थार्थी चार्थदं कृष्णं यावदर्थं भजन्ति च ॥५६॥
जिज्ञासवश्च यावत् स्याज्जिज्ञासा तावदेव ह ।
भजन्ते श्रीहरिं ज्ञातुं ज्ञाते ते विरमन्ति हि ॥५७॥
तेषां स्वार्थपराणां तु यथोद्धारो भवेदपि ।
यथाकथंचिदाशावान् त्वां यथा चाऽवलम्बते ॥५८॥
तथा नाथ स्वभक्तानां वाञ्छां प्रपूर्य चापि वै ।
भक्तिं कारयितुं चापि मम रक्षां कुरु प्रभो ॥५९॥
इत्यभ्यर्थ्य वने तत्र मुमाचाऽश्रूणि दुःखितः ।
श्रुत्वा त्वभ्यर्थनां स्वामी कृष्णनारायणो हरिः ॥६०॥
विप्रवेषेण वै शीघ्रं यत्र चौराः समाययौ ।
चौरा नद्यास्तटे वृक्षच्छायायां सन्निषद्य च ॥६१॥
भागान् चक्रुः सुवर्णस्य रूप्यस्य च धनस्य च ।
भूषादीनां विभागे तु जायमानेऽथ भिक्षुकः ॥६२॥
विचित्तो ब्राह्मणो भूत्वा बालकृष्णश्च दीनवत् ।
अटन् धूलिसमव्याप्तदेहो दिगम्बरो यथा ॥६३॥
कौपीनमात्रवसनो भोजनं याचितुं ययौ ।
भिक्षति भोजनं मेऽत्र बुभुक्षिताय रोचते ॥६४॥
भवन्तो भाग्यवन्तो मे ददन्तां श्रेष्ठिनः शुभाः ।
न मे द्रव्यं वाञ्छनीयं भोजनं समपेक्ष्यते ॥६५॥
चौराः प्राहुर्द्रव्यमत्र वर्तते तद्गृहाण भोः ।
यदि ते रोचते तर्हि दद्मस्ते रूप्यकं वद ॥६६॥
भिक्षुकस्तु तदा प्राह न मे द्रव्यप्रयोजनम् ।
धने दोषा हि बहवो दुःखदा वैरकारकाः ॥६७॥
धनं त्याजयते धर्मं हिंसां कारयति द्रुतम् ।
आकस्मिकीं चापदं च समाह्वयति वै धनम् ॥६८॥
धनार्जने प्रयासोऽपि रक्षणे चिन्तनं महत् ।
भोगे क्षयस्य तु चिन्ता चौरहार्यादिदूषणम् ॥६९॥
तस्माद्धनं न चेष्टव्यं भिक्षुकेण सुखैषिणा ।
भवन्तो धनवन्तश्च ददन्तामत्र भोजनम् ॥७०॥
रूप्यकोऽपि यदग्रेऽस्ति सुखं निद्रां न याति सः ।
येन केन निमित्तेन वियोगस्य भयात् सदा ॥७१॥
धनहीनाः पक्षिणश्च फलमात्रस्य भिक्षुकाः ।
भुक्त्वा शाखासु तत्रैव विश्रमन्ति निरामयाः ॥७२॥

बालाश्च भोजनं भुक्त्वा सुखं स्वपन्ति भूतले ।
चिन्ता तु ग्रसते वृद्धान् यूनो धनिन इत्यमून् ॥७३॥
रत्नानि मौक्तिकादीनि हीरकाद्याः स्वभावतः ।
पाषाणा अपि मृत्योस्तु निमन्त्रणकरा हि ते ॥७४॥
सुवर्णं रजतं भूषाश्चाम्बराणि धनानि च ।
पार्थिवास्तैजसा वाऽपि चिन्तोद्वेगकराः सदा ॥७५॥
अहंममत्वबद्धाश्च रागद्वेषविधायकाः ।
जन्ममृत्युप्रदाश्चान्ते वासनालोभभावकाः ॥७६॥
तन्मया नेष्यते द्रव्यं परद्रव्यं विनाशकृत् ।
कस्माद्धनेऽत्र बहुलं द्रव्यं लब्धं महाजनाः ॥७७॥
इति पृष्टास्तथोक्ताश्च याहि याहीति रोषतः ।
प्राहुस्ते तत्र कश्चित्तु यष्टिमादाय चायसीम् ॥७८॥
ताडयितुं प्रोत्थितश्च भिक्षुकं दीनवत् स्थितम् ।
तावत्तु भिक्षुकस्तस्मात् स्थानाददृश्यतां ययौ ॥७९॥
विलोक्य चैतदैश्वर्यं विस्मयं ते परं ययुः ।
किन्तु भूतं पिशाचं वा मेनिरे मायया हताः ॥८०॥
तावत् काकः समागत्य द्रुमोपरि जगाद ह ।
शुष्कशाखास्थितश्चैतदमंगलं तदाऽभवत् ॥८१॥
अथ ते संविभज्यैव स्वर्णद्रव्याणि वै ततः ।
हारमालादिरत्नानि विभजन्ते यदा तदा ॥८२॥
श्रीहरिश्च तुरगस्थस्तथाऽन्ये राजसेवकाः ।
अश्ववाराः सशस्त्राश्च पञ्चाशत्संख्यका द्रुतम् ॥८३॥
राजदूतादिवेषास्ते परितस्तत्र चाययुः ।
कुर्वन्तो धूष्कृतीशब्दान् धर्षयन्त्विति वादिनः ॥८४॥
मारयन्तु प्रगृह्णन्तु चौरा इमे भवन्ति च ।
इत्येवं वदमानास्ते चक्रुः प्राकारवत् तदा ॥८५॥
परितो व्यूहबन्धं च तदाऽश्ववारशोभितम् ।
चौरा भयमवापुस्ते दुद्रुवुः परितस्तदा ॥८६॥
स्वर्णरूप्याम्बरहीरहारान् विहाय तत्क्षणम् ।
किन्तु मार्गमनासाद्याऽशक्ताश्च व्यूहमध्यतः ॥८७॥
निर्गन्तुं ते हस्तगता भटानामभवन् खलु ।
परवशा हस्तकटा रज्जुपाशाः कृताश्च तैः ॥८८॥
यष्टिभिस्ताडिताः केचित् केचित् कशाभिराहताः ।
केचिद् दण्डेन हस्तेन पल्लताभिश्च ताडिताः ॥८९॥
कृतदण्डा भटैस्ते च प्रार्थयामासुरीश्वरम् ।
तृणान्याधाय दन्तेषु भूस्पर्शीकृतमस्तकाः ॥९०॥
दीना गद्गदहृदया दोषक्षमां ययाचिरे ।
दयालुर्भगवाँस्तेभ्यः पुनर्दोषनिवृत्तये ॥९१॥
उपादिदेश ते सर्वे प्रतिज्ञां च तदा व्यधुः ।
वयं चौर्यं कदाचिन्न करिष्यामोऽद्य कालतः ॥९२॥
कुरु क्षमां महाराज विमोचय च बन्धनात् ।
इत्येवं याचमानान् श्रीकृष्णनारायणः प्रभुः ॥९३॥
हस्ते जलं प्रदायैव प्रतिज्ञां स्तेनकर्मणः ।
स्तैन्यं नैव हि कर्तव्यं कारयामास तादृशीम् ॥९४॥
ततस्तान् श्राधरानद्यास्तटे रम्ये मनोहरे ।
मोचयामास भगवान् जग्राह चाहृतं धनम् ॥९५॥
सुवर्णं रजतं रत्नाम्बरभूषादि यद्व्ययभूत् ।
तत्सर्वं च गृहीत्वैव सुधनो यत्र तिष्ठति ॥९६॥
ससंघस्तं समासाद्य साश्ववारश्च केशवः ।
सुधनाय ददौ सर्वं चौरहस्ताहृतं धनम् ॥९७॥
सुधनस्तस्य सार्थाश्च जहृषुर्धनलाभतः ।
राजभटा ददुः सर्वं सार्थाय स्वर्णरूप्यकम् ॥९८॥
भूषणान्यम्बरादीनि रत्नमौक्तिकहीरकान् ।
येषां यान्यभवँस्तानि तेभ्यो ददुर्हरेर्भटाः ॥९९॥
सुधनश्च ददात्येभ्यो धनं तु पारितोषिकम् ।
भटाधिपस्तदा प्राह धर्मोऽस्ति पारितोषिकम् ॥१००॥
भक्तिं कुरु सदा कृष्णनारायणस्य मोक्षदाम् ।
पारितोषिकमेवाऽत्र विद्यते न ततोऽन्यथा ॥१०१॥
सुधनः संशयं प्राप्तः श्रुत्वा कृष्णनरायणे ।
भगवानेव रक्षार्थं त्वायातो विद्यते किमु ॥१०२॥
इति सन्दिह्य चोत्थाय पपात पादयोः खलु ।
अन्येऽपि च प्रणेमुर्वै गतानुगतिका इति ॥१०३॥
अश्ववारैश्च सहितो भटाधिपस्तु वाहिनीम् ।
सह नीत्वा नदीपारं कारयामास निर्भयाम् ॥१०४॥
प्रापयामास रम्यं तमुद्यानं शंकरस्य वै ।
ततश्चाऽदृश्यतां प्राप्ता भटाधिपभटास्तदा ॥१०५॥
न अश्वा नो राजभटा नास्ति भटाधिपस्तथा ।
सुधनश्च जनास्तस्य परमाश्चर्यमागताः ॥१०६॥
सुधनस्तु तदा शीघ्रं समाजुहाव तं प्रभुम् ।
व्योमनादं महान्तं वै कृत्वा सर्वबलेन ह ॥१०७॥
हे हरे हे कृष्णनारायणस्वामिन् दयाधर ।
कृता रक्षा त्वयाऽरण्ये मद्भाग्यं त्वद्य वर्धते ॥१०८॥
ते दिदृक्षाऽस्ति मे कृष्ण दर्शनं देहि मे पुनः ।
इत्येवं व्याहरन् पृथ्व्यां धूलिक्षेत्रेऽलुठन्मुहुः ॥१०९॥
नृत्यन् तालीं वादयँश्च पुनर्धूल्यां समालुठत् ।
अनादिश्रीकृष्णनारायणो भक्तिं विलोक्य च ॥११०॥

बालकृष्णोऽभवच्छीघ्रं दिव्यमूर्तिः सुरूपवान् ।
कोटिसूर्याग्निचन्द्रादितेजोऽधिकप्रभास्वरः ॥१११॥
दिव्यस्वर्णविभूषश्च दिव्यमुकुटकुण्डलः ।
दिव्यमालाम्बरधरो दिव्यविमानवाहनः ॥११२॥
रूपानुरूपावयवः कौस्तुभादिविराजितः ।
श्रीराधामाणिकीपारवतीप्रभादिसेवितः ॥११३॥
मञ्जुलासगुणाहंसाललितासुजयार्चितः ।
एवं भूत्वाऽभवत् साक्षाद्दर्शनीयो हरिः स्वयम् ॥११४॥
सुधनाद्यैर्वीक्षितश्चोवाच यूयं विमानके ।
तिष्ठतात्रेति तान् कृत्वा विमाने क्षणमात्रतः ॥११५॥
कुंकुमवापिकाक्षेत्रं प्रासादं पितरौ ऋषिम् ।
सरस्तीर्थानि सर्वाणि प्रदर्श्य क्षणमात्रतः ॥११६॥
विमानेनाऽप्रापयच्च तमुद्यानं तिरोऽभवत् ।
सुधनाद्याः सुखं प्रापुः परमेश्वरयोगतः ॥११७॥
दिव्यदृष्टिमया जाता दिव्यभक्तिपरायणाः ।
भाद्रे शुक्ले कृताः सर्वे कृतार्था हरिणा हि ते ॥११८॥
एकादश्यां मध्यदिने भ्राधरायास्तटे शुभे ।
अथ कालान्तरे तेभ्यः परंधाम ददौ प्रभुः ॥११९॥
इत्येवं राधिके भक्तरक्षा श्रीहरिणा कृता ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेद् ध्रुवा ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आमोदनगरस्थसुधनाख्यभक्तस्य वर्चकायनिमहर्षियोगेन प्राप्तभागवतभावस्य चौरेभ्यो रक्षा भगवत्कृता, प्रभोर्दिव्यदर्शनादि चेतिनिरूपणनामा त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

**श्रीकृष्ण उवाच—**

शृणु रासेश्वरि श्रीमत्कृष्णनारायणोत्सवे ।
नवमे वत्सरेऽष्टम्यां समाजोऽभूत् त्रिलोकिनाम् ॥ १ ॥
मुक्तास्तथाऽवताराश्च मुक्तान्योऽधीश्वरास्तथा ।
ईश्वरिण्यः सुरा देव्यः पितरो मुनयस्तथा ॥ २ ॥
आर्ष्यः काश्यपवंशाश्च काश्यप्यो मानवास्तथा ।
नागा दैत्यादयो वृक्षा वल्लयः पशुपक्षिणः ॥ ३ ॥
जलजाः स्थलजाश्चापि स्थावरा जङ्गमा अपि ।
आयवुः साधवः साध्व्यः कला नद्यश्च सागराः ॥ ४ ॥
ऋतवो वसवश्चापि पर्वतास्तीर्थकोटयः ।
दिगीश्वराश्च राजानो दीनान्धकृपणादयः ॥ ५ ॥
समाययुर्बालकृष्णं पूजयामासुरादरात् ।
आशीर्वादान् ददुश्चाप्युपदा न्यधुः पुरो हरेः ॥ ६ ॥
लोमशेन कृता पूजा तथान्यैर्मुनिभिः शुभा ।
आगतानां च सत्कारं चक्रे गोपालकृष्णकः ॥ ७ ॥
ददौ मिष्टामृतभोज्यभक्ष्यलेह्यानि कम्भरा ।
पानानि मधुपर्कादि जलताम्बूलकानि च ॥ ८ ॥
सर्वैर्नीराजनं चावर्तितं शतैकवर्तिभिः ।
स्तुतः श्रीमत्कृष्णनारायणस्वामी परेश्वरः ॥ ९ ॥
ददौ प्रसादमेतेभ्यो विश्रम्याशीर्विधाय च ।
ययुर्विमानकैर्निजान् देशान् लोकान् दिगन्तकान् ॥१०॥
अथाऽऽश्चर्यमभूत् सायं शृणु नीराजनोत्तरम् ।
गुर्जरे किमनद्यास्तु तटे चोत्तरतः शुभा ॥११॥
कुशाम्बानाम नगरी चातुर्वर्ण्यजनाश्रिता ।
आसीद् यत्र महर्षिश्च कौशिकाम्बो महामुनिः ॥१२॥
देवध्यानपरो यज्ञपरो योगक्रियापरः ।
आकाशगतिमाँश्चापि कुम्भकायामनिष्ठितः ॥१३॥
अनादिश्रीकृष्णनारायणध्यानपरः स तु ।
ददाति मोक्षज्ञानं च शरणागतवत्सलः ॥१४॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्त्यजजातयः ।
ये केचित्तु समायान्ति स्वाश्रमं तानबोधयत् ॥१५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इति मन्त्रं सदा प्राप्तशिष्येभ्यः प्रददाति च ॥१६॥
एकदा त्वन्त्यजो नाम्ना त्र्यष्टकारुस्तु निर्धनः ।
स्त्रीसंयुक्तः समायातो दर्शनार्थमृषेः प्रगे ॥१७॥
अनपत्योऽभवच्चापि जलोदरप्रपीडितः ।
पत्नीतस्याऽभवत् कुष्ठरोगव्याप्ताऽतिदुःखिता ॥१८॥
कौशिकाम्बो महर्षिश्च कथां नित्यं करोति हि ।
लक्ष्मीनारायणसंहिताया यत्र सभास्थले ॥१९॥
तत्र गत्वाऽन्त्यजो वृक्षच्छायायां निषसाद ह ।
कथां शृणोति तत्रैव भार्यया सह भावतः ॥२०॥
श्रुतं तत्र तु सौराष्ट्रेऽनादिकृष्णनरायणः ।
परधामपतिः सर्वस्वामी श्रीपुरुषोत्तमः ॥२१॥
वर्तते बालरूपेण श्रीमद्गोपालनन्दनः ।
अश्वपट्टसरःक्षेत्रे परब्रह्म पुमुत्तमः ॥२२॥
यस्य वन्दनमात्रेण नाममन्त्रग्रहेण च ।
रोगा दैन्यं च दारिद्र्यं चानपत्यादिकं तथा ॥२३॥
सर्वे लयं प्रयात्येव सौभाग्यं च विवर्धते ।
इष्टप्राप्तिर्भवेच्छीघ्रं तच्छरणागतस्य वै ॥२४॥

इति श्रुत्वा कथान्ते च प्रयाते श्रोतृवर्गके ।
आमध्याह्नं चाश्रमान्ते वटोऽधःसंस्थितोऽभवत् ॥२५॥
चिन्तयत्येव तद्वाक्यं कथं पृच्छामि तं मुनिम् ।
अन्तर्वेदित्वशक्त्या वै ज्ञात्वा तन्मानसं मुनिः ॥२६॥
कौशाम्बिकस्त्वन्त्यजं तम् आह्वयामास चास्तिकम् ।
ब्रह्मभक्तं सुजिज्ञासुं ज्ञात्वा स्वाश्रममागतम् ॥२७॥
तीर्थागतं ददौ तस्मै भोज्यं जलं फलादिकम् ।
स्वागतं चापि सत्कारं कृतवान् सर्वमित्रकः ॥२८॥
विश्रान्तं तं त्वन्त्यजं च पप्रच्छ कुत एव ह ।
कथं चात्रागतो भक्त वद यन्मानसे स्थितम् ॥२९॥
भक्तः स त्र्यष्टकारुश्च प्राह विनयमावहन् ।
कृत्वाऽथ दण्डवत् गृणन् महर्षेर्विजयोऽस्तु वै ॥३०॥
क्षेमं चास्तु कुशलं च सौख्यमृषेः सदाऽस्तु वै ।
चिरं जीवतु चित्तज्ञ दयालो देवदेवते ॥३१॥
भवादृशाः साधवोऽत्र तारकाः पापिनां गुरो ।
पापक्षालनकार्यार्थं यदहं चात्र संगतः ॥३२॥
कार्यं मे सफलं जातं तीर्थं मे परमं तथा ।
साक्षाद् देवस्वरूपस्य दर्शनात् कृतकृत्यता ॥३३॥
कथालाभेन मे जन्मसाफल्यं त्वद्य वर्तते ।
अनुग्रहेण भवतो भाग्यं मेऽद्य विवर्धते ॥३४॥
अहं पापी चान्त्यजोऽस्मि तारितोऽहं त्वया गुरो ।
इत्युक्त्वा चाश्रमधूलिं मस्तके धृतवान् मुहुः ॥३५॥
पश्चादुवाच च मुनिं यद्याज्ञा भवतोऽस्ति चेत् ।
पृच्छामि मानसं यत्र रमते मे कथाश्रवात् ॥३६॥
ऋषिः प्राह सुखं पृच्छ ते जानामि मुमुक्षुताम् ।
नाऽयमात्माऽन्त्यजः क्वापि शुद्धः सत्त्वमयः सदा ॥३७॥
शरीरं चान्त्यजं पूर्वकर्मणा जायतेऽस्य वै ।
एवं श्रुत्वाऽन्त्यजः प्राह कथं चाहं तथाऽभवम् ॥३८॥
अनादिश्रीकृष्णनारायणः कथमवाप्यते ।
किं मया मोक्षसिद्ध्यर्थं कर्तव्यं चात्र दैविकम् ॥३९॥
अनपत्यत्वनाशार्थं रोगनाशार्थमित्यपि ।
किं मम स्यादनुष्ठेयं वद मे कृपया प्रभो ॥४०॥
इति पृष्टो मुनिः प्राह शृणु चान्त्यज कर्म ते ।
पुरा त्वमभवो विप्रः सप्तपुराद्रिवासकृत् ॥४१॥
नाम्ना देवप्रियश्चेयं पत्नी ते द्युमती तदा ।
तत्र विष्णोर्मन्दिरं च लक्ष्मीनारायणान्वितम् ॥४२॥
वर्तते तत्र पूजां त्वमकरोर्दासवत् सदा ।
पत्नी ते पाकशालां च नैवेद्यार्थं तदाऽकरोत् ॥४३॥
शैत्ये स्नानं विना त्वं च मलिनो मलिनाम्बरः ।
ममार्चनं स्पर्शनं चाऽकरोस्त्वं च तव प्रिया ॥४४॥
अगालितसलिलेन पाकादिकं तदाऽकरोत् ।
अस्नाता चाऽधौतवस्त्रा नैवेद्यं चार्पयत्तदा ॥४५॥
अगालितं जलं चापि मत्पानार्थं समार्पयत् ।
अशुद्धदेहा मां नित्यमस्पृशद्वामिनी तव ॥४६॥
राजस्वल्यादिकं चेयं तदा नातीव मन्यते ।
एवं त्वशुद्धिजं पापं भुक्तवन्तौ युवां चिरम् ॥४७॥
यमलोके वैतरण्यां ततो मार्जारतां गतौ ।
ततश्चान्त्यजदेहस्थौ स्थ इदानीं दैवसेवया ॥४८॥
पुण्यशेषेण च साधुसंगतिं कुरुथोऽनघौ ।
कालान्तरकृता सेवा पित्रोर्देवस्य वा गुरोः ॥४९॥
जन्मान्तरे तु सा श्रेयस्करी समुपतिष्ठति ।
हुतं दत्तं कृतं जप्तं सर्वं याति भवान्तरे ॥५०॥
हिंसा पीडा क्षतिर्निन्दा कापट्यं छलमुग्रता ।
वञ्चना घातना सर्वं प्रत्यायाति भवान्तरे ॥५१॥
पुण्यं पापं स्वभावश्च संस्कारो वासना मनः ।
इन्द्रियाणि द्वेषरागौ प्रयान्त्येव भवान्तरे ॥५२॥
अभ्यासो जपनं भक्तिः सेवा परोपकारिता ।
शीलं व्रतं प्रपत्तिश्च प्रयान्त्येव भवान्तरे ॥५३॥
ज्ञानं विज्ञानमास्तिक्यं विवेको देवपूजनम् ।
आशीर्वादस्तथा शापः प्रयान्त्येव भवान्तरे ॥५४॥
ऋणं पतिव्रता पत्नी पतिः पत्नीव्रतस्तथा ।
शत्रवश्चातिरूढाश्च प्रयान्त्येते भवान्तरे ॥५५॥
भाग्यं च सञ्चितं कर्म पश्चाद् दत्ता जलाञ्जलिः ।
श्राद्धं तपश्च सन्तोषः प्रयान्त्येव भवान्तरे ॥५६॥
युवाभ्यां तु कृता सेवा भक्तिर्मालिन्यसंभृता ।
कालान्तरे फलं तस्या लब्धं यज्जन्म मानुषम् ॥५७॥
मालिन्यदोषजं जन्म चान्त्यजं चाभवत्ततः ।
राजस्वल्यादिदोषस्य फलं कुष्ठं हि योषितः ॥५८॥
अगालिताऽम्भसः पानं यदर्पितं तु माधवे ।
जलोदरं तव जातं सदा दुःखतरं तव ॥५९॥
असंस्कृतान्ननैवेद्यं यदर्पितं त्वया हरौ ।
तत्फलं तव लोकेऽत्र दारिद्र्यं चातिवर्तते ॥६०॥
अश्रद्धायाः फलं पापं नास्तिक्यमुपजायते ।
नास्तिक्येन च ते तत्र श्राद्धादिहीनताऽभवत् ॥६१॥
तेन तेऽत्राऽनपत्यत्वं वर्तते चान्त्यजोत्तम ।
कथितस्तव वृत्तान्तः पूर्वगोऽत्रापि संशृणु ॥६२॥

अन्त्यजोऽपि सतां सेवां तीर्थयात्रां करोषि यत् ।
कथायाः श्रवणं चापि भजनं च करोषि यत् ॥६३॥
तेन पुण्यप्रतापेन गुर्वाशीर्वादतस्तथा ।
रोगोऽनपत्यता चापि दारिद्र्यं दुःखिता तथा ॥६४॥
पीडाश्चान्या द्रुतं नाशमेष्यन्ति श्रीपतेः स्मृतेः ।
आश्रयं श्रीकृष्णनारायणस्य कुरुत द्रुतम् ॥६५॥
राजते कुंकुमवापीक्षेत्रे चाश्वसरस्तटे ।
कम्भराश्रीगृहे बालः कृष्णो गोपालनन्दनः ॥६६॥
सर्वावतारधर्ता च सर्वकारणकारणम् ।
सर्वेशानां नियन्ता च सर्वान्तर्यामिसंस्थितिः ॥६७॥
सर्वकर्मफलानां स प्रदाता मोक्षदायकः ।
कर्तुमकर्तुमन्यथाकर्तुं समर्थ एव सः ॥६८॥
ज्ञानशक्तिक्रियाशक्तिकार्यकारणशक्तिमान् ।
राधालक्ष्मीप्रभापारवतीमाणिक्यशक्तिपः ॥६९॥
सगुणामञ्जुलाहंसालीलाभूधरणीश्वरः ।
वृन्दातुलसीपद्मेशः शक्त्यैश्वर्यविभूतिपः ॥७०॥
नन्दनारदशंकरसनकादिसतां प्रभुः ।
धाता निधाता संहर्ता जगतां भक्तमोक्षकृत् ॥७१॥
सर्वकामः सर्वरसः सर्वगन्धः समस्तदृक् ।
सर्वानन्दः सर्वपाता सर्वपतिः सतीप्रियः ॥७२॥
साध्वीनाथः साधुमित्रं त्यागिवर्यो गुरोर्गुरुः ।
शाश्वतं परमं तत्त्वं परब्रह्म सनातनः ॥७३॥
ब्रह्मचर्यपरा देवा न्यासिनो योगिनस्तथा ।
संयमिनो निरोधाच्च यं प्रपश्यन्ति सूरयः ॥७४॥
तं प्रभुं बालकृष्णं त्वं भज पत्न्या सहाऽन्वहम् ।
अनादिश्रीकृष्णनारायणं श्रीस्वामिनं पतिम् ॥७५॥
आद्यं वै मानवं रूपं पारमेश्वरसंज्ञितम् ।
युगे युगे जायमानं ततो बहुस्वरूपिणम् ॥७६॥
कृपारूपं चोग्ररूपं ज्ञानरूपं वृषात्मजम् ।
विद्यारूपं राजरूपं शासकं तापसं च वा ॥७७॥
व्यूहरूपं विभवं वा प्रातिमं चान्तरस्थितम् ।
स्वरूपं साधुरूपं वा भज तं पुरुषोत्तमम् ॥७८॥
अंशरूपं कलारूपमावेशात्मकमित्यपि ।
विभूतिं वा पूर्णरूपं परिपूर्णं परेश्वरम् ॥७९॥
अवतारं चैश्वरं वा विष्णुं महाप्रविष्णुकम् ।
आक्षरं वा परब्रह्म परिपूर्णोत्तमोत्तमम् ॥८०॥
एवं बहुविधं चैनमनादिश्रीनरायणम् ।
भज पत्न्या सहितस्त्वं ततो निर्वाणमेष्यसि ॥८१॥
एह्यागच्छ गृहाणेदं जलं तच्चरणामृतम् ।
पिब धारय शिरसि देहे प्रोक्षणमाचर ॥८२॥
पापानि ते विनश्येयुः सस्त्रीकस्यात्र सत्वरम् ।
एवमुक्त्वा ददौ वारि पूजाप्रसादजं शुभम् ॥८३॥
त्र्यष्टकारुः पपौ तस्य भार्या पपौ च कुष्ठिनी ।
जलपानाद्दषेरात्मबलात् कृष्णकृपालवात् ॥८४॥
जलोदरं च दारिद्र्यं कुष्ठिता चानपत्यता ।
चत्वारस्ते महारोगा निष्क्रान्ता देहतोऽभवन् ॥८५॥
पार्श्वे स्थित्वा रुरुदुस्ते नेमुस्तं कौशिकाम्बकम् ।
क्व यास्यामो वयं विप्र जीवनं देहि चाऽऽर्थयन् ॥८६॥
ऋषिर्जलोदरं पृथ्व्यै कदल्यै श्रीफलाय च ।
ददौ विभागतश्चाऽप्यपेयपानकृतेऽपि च ॥८७॥
सतृष्णकाय लुब्धाय दानस्नानवियोगिने ।
ददौ व्यसनिने चापि दारिद्र्यं लम्पटाय च ॥८८॥
वियोनिसंगलुब्धाय वर्णसांकर्यकारिणे ।
धर्मविद्वेषिणे स्तैन्यकारिणे कुष्ठितां ददौ ॥८९॥
पराऽपत्यादिहन्तृभ्यो गर्भपातादिकारिणे ।
शापितेभ्योऽनपत्यत्वं ददौ श्राद्धविलोपिने ॥९०॥
इत्युक्तास्ते चतुर्दोषा ययुस्तादृशपात्रके ।
अन्त्यजो निर्मलो जातः सस्त्रीको रोगवर्जितः ॥९१॥
ऋषिस्तस्मै ददौ मन्त्रं पावनं पारमेश्वरम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९२॥
जपं कुर्वन् ततस्तस्थावाश्रमे सेवको यथा ।
यथायोग्यं मार्जनादि चकारोद्यानसेबनम् ॥९३॥
कथां श्रुत्वा बभूवाऽसौ प्रक्षीणक्लेशवासनः ।
चान्द्रे तु कार्तिके मासे तदा कृष्णाष्टमीतिथौ ॥९४॥
ऋषिर्जन्मोत्सवं चक्रे कृष्णनारायणस्य वै ।
तत्र दिव्यं विमानं तु शतसूर्यसमप्रभम् ॥९५॥
समायातं यत्र कृष्णनारायणो विराजते ।
पार्षदास्तत्र दिव्याश्च राधाद्या योषितस्तथा ॥९६॥
विराजन्ते हरिस्तस्मात् सहसा समवातरत् ।
ऋषिकृतां महापूजां जग्राह भगवान् स्वयम् ॥९७॥
ददौ प्रासादिकं तस्मै त्र्यष्टकारुं च तत्स्त्रियम् ।
ऋषिं धृत्वा विमाने च कुंकुमवापिकां ययौ ॥९८॥
हरिश्चाऽदृश्यतां प्राप्तो विमानं व्योममण्डले ।
कुंकुमवापिकाक्षेत्रवासिभिः समलोकितम् ॥९९॥
अवाऽतरद् विमानं तच्चाश्वपट्टसरस्तटे ।
सायं स्नानं चावतीर्य त्र्यष्टकारुस्तदाऽकरोत् ॥१००॥

तत्पत्नी चापि वै स्नानं सरस्येव तदाऽकरोत् ।
तयोर्देहौ तु पतितौ, दिव्यदेहौ चतुर्भुजौ ॥१०१॥
बभूवतुस्तौ तत्कालं दिव्यालंकारभूषणौ ।
दिव्यदृष्टी दिव्यगती दिव्यविज्ञानसंभृतौ ॥१०२॥
तूर्णं तौ श्रीबालकृष्णं मातरं पितरं तथा ।
लोमशं च मुनिं दृष्ट्वा कृत्वा पूजामलौकिकीम् ॥१०३॥
ययतुस्तद्विमानेन ब्रह्मलोकं परं पदम् ।
ऋषिः कृष्णेच्छया तस्थौ कार्तिकावधिमत्र च ॥१०४॥
पश्चात् कृष्णाज्ञया यातः कुशाम्बां किमसन्निधौ ।
भक्तानुपदिशन् लक्षवर्षाणि वासमाचरत् ॥१०५॥
प्रतिसम्वत्सरं चक्रे हरेर्जन्मोत्सवम् ऋषिः ।
किमनद्यास्तटे गत्वा तत्तीर्थे श्रीनरायणः ॥१०६॥
ऋषिकृतां समर्हां च गृहीत्वा तु सरिज्जले ।
स्नात्वा चायाति दिव्येन विमानेन क्षणान्तरे ॥१०७॥
एवं तीर्थं कौशिकाम्बं किमनद्यां विराजते ।
राधिके ! श्रीकृष्णनारायणावतरणोद्भवम् ॥१०८॥
ऋषिस्ततो ययौ धाम परमं पारमेश्वरम् ।
अक्षरात्परतश्चापि परं मुक्तजनाश्रितम् ॥१०९॥
इत्येवं कथितो राधे चमत्कारो हरेस्तव ।
पठनाच्छ्रवणाच्चास्य परं मोक्षमवाप्नुयात् ॥११०॥
अपत्यधनदारादेः फलं मोक्षो महोत्तमम् ।
तल्लब्धं तेन भक्तेन किमपत्यादिभिः खलु ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने किमनद्यास्तटे कुशाम्बापत्तनस्थकौशिकाम्बर्षियोगेनाऽन्त्यजस्य रोगिणस्त्र्यष्टकारोः सस्त्रीकस्य प्रभोर्भक्त्या मुक्तिपदलाभ इत्यादिनिरूपणनामाचतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

**श्रीकृष्ण उवाच—**

एवमन्यं चमत्कारं कथयाम्यपि राधिके ।
सूर्यपुत्र्यास्तपत्यास्तु तटे कामपुरे पुरा ॥ १ ॥
आसीत् सन्तापनो नाम दैत्यो दैत्यगणेश्वरः ।
महाबलेन युक्तोऽसावटते तपतीतटे ॥ २ ॥
सप्तपद्वाद्रिवासं च कृतवान् मांसखादकः ।
प्राङ्दिशि दूरपर्यन्तं गत्वा गत्वा च बालकान् ॥ ३ ॥
तापीमूलावधिं गत्वा हरत्यल्पतरानपि ।
दैत्या मानुषमांसादा मिलित्वाऽदन्ति सोत्सवाः ॥ ४ ॥
भूशावालयपूर्वे तु तापीतीरेऽभवन् महान् ।
विद्यालयोऽभवत्तत्र मुनिर्हिरण्यकेशकः ॥ ५ ॥
कृष्णयजुर्विदांश्रेष्ठः ऋषीणां प्रवरोऽभवत् ।
तस्याऽऽश्रमे कृताऽऽवासा विद्याब्रह्मचरास्तदा ॥ ६ ॥
विप्रा हिरण्यकेशीयशाखीयास्तु सहस्रशः ।
आसँश्चान्येऽपि हिरण्यकेशाख्यगुरुसन्निधौ ॥ ७ ॥
आश्रमस्थाश्च ते ब्रह्माध्येतारस्तपतीजले ।
स्नातुं यान्ति ब्राह्मकाले तत्र सन्तापनोऽसुरः ॥ ८ ॥
सुप्रच्छन्नः समागत्य हरते विप्रबालकान् ।
नित्यं द्वौ वा पञ्च वा षट् कदाचिद् दश वा नव ॥ ९ ॥
सहस्रेषु तु बालेषु क्षयं यान्ति तु येऽर्भकाः ।
न ज्ञायन्ते चाश्रमस्थैः क्व प्रयान्तीति वै तदा ॥१०॥
यत्र वै गणना नास्ति तत्र न ज्ञायते क्षयः ।
एवं याते बहुतिथे काले पञ्चशतानि वै ॥११॥
ब्राह्मणानामपत्यानि क्षयं नीतानि राक्षसैः ।
शताऽपत्यानि चान्यानि क्षत्रविट्दासजानि च ॥१२॥
एवं कुमारबाहुल्ये क्षयं याते तदुत्तरम् ।
भोजनाऽध्ययने संख्या न्यूना विज्ञायते जनैः ॥१३॥
बाला ह्रासं नित्यमेव यान्ति तापीतटे खलु ।
जले मज्जन्ति मकरैर्ह्रियन्तेऽवश्यमेव च ॥१४॥
एवं सन्देहमापन्नाः सह स्नातुं प्रयान्ति ते ।
राक्षसा बालका भूत्वा विशन्ति बालकेषु हि ॥१५॥
शौचार्थं यान्ति यै दूरं तान् गृहीत्वा प्रयान्ति ते ।
न चायान्ति परावृत्य तदा ज्ञातं जनैः खलु ॥१६॥
हरन्ति मकरा नैव किन्तु हरन्ति राक्षसाः ।
शोकस्त्वतितरश्चासीदाश्रमे बालकेषु च ॥१७॥
हिरण्यकेशनामर्षिः शुशोच बहुधा तदा ।
अहो मे बालका नष्टा अधिकाः षट्शतादपि ॥१८॥
न ज्ञातं त्वद्यपर्यन्तं पितॄणां का गतिर्भवेत् ।
तत्सम्बन्धिजनानां च काः श्रोतव्या दुरुक्तयः ॥१९॥
अहो ध्यानं मया दत्तं नैव त्वद्यावधिं क्षये ।
कथं जीवेयुरेवैते मारिताः स्युर्हि राक्षसैः ॥२०॥
भक्षिताः स्युरहो दैवं दुर्बलानां विघातकम् ।
इति धृत्वा मस्तके द्वौ करौ रुरोद रौद्रकम् ॥२१॥
अन्ये तदाश्रमवासा रुरुदुश्चातिकण्ठतः ।
आश्रमः कश्मलो जातो मानवाः शुद्धबुद्धयः ॥२२॥
निस्तेजास्तु ऋषिर्जातः शोको दुष्वप्यजायत ।
पशुपक्षिगणाश्चाप्यरुदन्त ज्ञाततत्क्षयाः ॥२३॥

मृगाद्या नाऽग्रसन् घासं शुका नाददिरे फलम् ।
अपि पिपीलिका नैव कणान् जगृहुरुच्छुचः ॥२४॥
वल्लिका न पपुर्वारि केदारेष्वर्पितं ह्यपि ।
ववौ वायुर्न सुभगो वह्निः कुण्डे न चाऽज्वलत् ॥२५॥
मयूरा नाऽवदन् केकामृषयोऽपि शवा इव ।
अभवन्नाश्रमे नार्यो विधवा इव निष्प्रभाः ॥२६॥
हाहाकारो महानासीदाश्रमे देशमण्डले ।
दैत्याः सप्तपुटाद्रिस्था हरन्ति विप्रबालकान् ॥२७॥
मारयन्ति च खादन्ति हा कष्टं कालनोदितम् ।
अहो त्राता न चास्माकं घातयिता न रक्षसाम् ॥२८॥
कश्चिदास्ते विना कृष्णं कृष्णस्तिष्ठति कुत्र वा ।
श्रुतं पूर्वं कथायां वै चाश्वपट्टसरोऽन्तिके ॥२९॥
कुंकुमवापिकाक्षेत्रे राजते भगवान् स्वयम् ।
कौशिकाम्बर्षिमुखतश्चापि श्रुतं तथैव च ॥३०॥
तथाऽन्येभ्यो ब्राह्मणेभ्यः श्रुतं कृष्णो विराजते ।
मूर्तिमान् मानवो भूत्वा श्रीमद्गोपालनन्दनः ॥३१॥
लक्ष्मीनारायणसंहितायां श्रुतो हरिः स्वयम् ।
राजतेऽनादिदेवः स कृष्णनारायणः प्रभुः ॥३२॥
स कुर्याद् रक्षणं नस्तु महापत्कालतः खलु ।
इत्येवं शोकसम्मग्ने हिरण्यकेशकाश्रमे ॥३३॥
तत्र तावत् समायातो महर्षिः कौशिकाम्बकः ।
योगधर्मेण विज्ञाय चार्तनादान् ऋषिकृतान् ॥३४॥
पौषमासे तु पूर्णायां हिरण्यकेशकाश्रमे ।
आदृतः सत्कृतो मधुपर्काद्यैरर्चनैर्मुनिः ॥३५॥
दत्तासनो न्यषीदच्च पप्रच्छ रोदनोद्भवम् ।
हिरण्यकेशकः प्राह राक्षसैर्विप्रबालकैः ॥३६॥
ब्रह्माध्यायपरास्तापीतटे ब्राह्ममुहूर्तके ।
स्नातुं याताश्च बहवो राक्षसैः संहृता मुने ॥३७॥
षट्शतानि हताश्चैवं ज्ञायते हि विचारतः ।
दशसाहस्रविप्रेषु गुरोः कुले वसत्सु वै ॥३८॥
आसुराणां महानेवमुपद्रवो व्यजायत ।
किं कुर्मः क्व प्रयामश्च किमभूत् क्व गताश्च ते ॥३९॥
यद्येवं विप्रबालानां ह्रासतन्तुः प्रवर्तते ।
का गतिश्चाश्रमस्याऽत्र भवेदिति विपन्ननु ॥४०॥
यदि कश्चिदुपायोऽत्र विनाशरोधकोऽस्ति चेत् ।
बालानां लब्धिहेतुश्च वद योगिन् प्रकुर्महे ॥४१॥
इत्युक्त्वा विररामाऽसौ हिरण्यकेशको मुनिः ।
कौशिकाम्बश्च तं प्राह राधिके संस्मरन् हरिम् ॥४२॥
मा विषादं याहि विप्र सर्वं जानामि योगतः ।
पूर्वं ममाश्रमेऽप्येषामुपद्रवो महानभूत् ॥४३॥
मया तु राक्षसा दैत्या नाशिता वै मुहुर्मुहुः ।
पुनस्ते नूतना जातास्तां दिशां न प्रयान्ति ते ॥४४॥
तवाश्रमे प्रकुर्वन्ति तापीतटे ह्युपद्रवम् ।
मानवानपि खादन्ति सप्तपट्टाद्रिवासिनः ॥४५॥
अहं योगबलेनैव ज्ञात्वा तद्वैशसं महत् ।
स्मराम्यनादिदेवं श्रीकृष्णनारायणं प्रभुम् ॥४६॥
वसन्तं कुंकुमवापीक्षेत्रे सर्वहृदि स्थितम् ।
गच्छामः शरणं तस्य रक्षणं स करिष्यति ॥४७॥
क्षेमं च कुशलं तस्य हस्तगं वर्तते च नः ।
विनाऽनादिकृष्णनारायणं शक्तो न चाऽपरः ॥४८॥
अवितुं दुःखसंसारादापद्भ्यश्च भवाम्बुधौ ।
इत्युक्त्वा श्रीहरिं स्मृत्वा व्योममार्गेण योगिराट् ॥४९॥
नीत्वा हिरण्यकेशं च सहैवाऽश्वसरो ययौ ।
सूर्यचन्द्रसमौ ज्योत्स्नागोलकाविव भासुरौ ॥५०॥
व्योममार्गाल्लोमशस्याश्रमाग्रे चावतेरतुः ।
प्रथमं लोमशं नत्वा प्रसम्पूज्य परस्परम् ॥५१॥
अश्वपट्टसरस्येव स्नात्वा कुंकुमवापिकाम् ।
गत्वा तज्जलपानं च कृत्वा नत्वा च देवताः ॥५२॥
ययतुः श्रीकृष्णनारायणान्तिकं तु मन्दिरे ।
राजते यत्र भगवान् परमेशः परात्परः ॥५३॥
गजासने तु सौवर्णे मणिरत्नसमश्रिते ।
तीर्थैश्च मुनिभिर्देवैर्लक्ष्म्यादिभिः प्रसेवितम् ॥५४॥
दिव्यतेजोमयं दिव्यभूषामालाम्बरान्वितम् ।
पूजितं चारुसौगन्ध्यैः प्रसन्नवदनाम्बुजम् ॥५५॥
बालकृष्णं परब्रह्म दृष्ट्वा प्रणेमतुर्मुहुः ।
साश्रू स्नेहभरौ सौम्यौ प्रचक्रतुश्च दण्डवत् ॥५६॥
सत्कृतौ हरिणा तूर्णं प्रापितौ मधुपर्ककम् ।
दत्तासनौ सुखं पृष्टौ निषेदतुः समीपतः ॥५७॥
आगमे कारणं पृष्टावूचतुः परमेश्वरम् ।
विप्रगोधरणिसाधुसाध्वीधर्मप्रपालक ॥५८॥
दीनार्त्तकृपणाऽनाथनिराश्रयसमाश्रय ।
ब्राह्मणा बहवो नष्टा विद्यार्थिब्रह्मचारिणः ॥५९॥
राक्षसैर्नीयते नित्यं यद्यद्धस्तगतो भवेत् ।
तेभ्यो रक्षां बालकृष्ण परब्रह्म विधेहि नः ॥६०॥
मृतानां जीवनं कृष्ण तव संकल्पजं भवेत् ।
यथासौख्यं यथायोग्यं भवेत् तत् त्वं तथा कुरु ॥६१॥

राक्षसानां परं दण्डं विधेहि प्रतिपालक ।
त्वं धाता त्वं विधाता च त्वं दुर्धाता पुमुत्तम ॥६२॥
त्वदाश्रया वृषो यज्ञो वेदो विद्या च भूसुराः ।
आश्रमा योगयतयस्त्वदधीनप्रजीवनाः ॥६३॥
श्रुत्वैवं श्रीबालकृष्णश्चक्रं सुदर्शनं निजम् ।
सस्मार शंकरं देवीं पार्वतीं वीरभद्रकम् ॥६४॥
मृतसञ्जिवनीं विद्यां सन्धिनीं प्राणदायिनीम् ।
कल्पवल्लीं विमानं च वैहायसं सदाऽव्ययम् ॥६५॥
लक्ष्मीं सिद्धिं गणेशं च तूर्णं ते समुपस्थिताः ।
अनादिश्रीकृष्णनारायणं नेमुश्च दण्डवत् ॥६६॥
प्रभुः प्राह महादेव गणेश सिद्धि पार्वति ।
लक्ष्मि विद्ये कल्पवल्लि वीरभद्र सुदर्शन ॥६७॥
हता बालास्तु बहवः सन्तापनादिराक्षसैः ।
वर्तन्ते राक्षसाः सप्तपुट्टकाद्रौ सहस्रशः ॥६८॥
हन्तव्यास्तेऽद्य युष्माभिर्जीवनीयाश्च भूसुराः ।
तदर्थं च वयं तत्र गच्छामो हेतिभिर्युताः ॥६९॥
आरोहन्तु भवन्तोऽत्र विमाने वै मया सह ।
इत्युक्तास्ते चारुरुहुः साकं श्रीपतिना तथा ॥७०॥
कौशिकाम्बेन सहिता हिरण्यकेशिना युताः ।
विमानं ध्यातमात्रं तद् गतं तत्र विहायसा ॥७१॥
सप्तपट्टकशैलोर्ध्वे व्योम्नि भ्रमणमावहत् ।
तद् दृष्ट्वा दिव्ययानं तु राक्षसा निर्ययुर्बहिः ॥७२॥
हर्तुं विमानं दिव्यं च सशस्त्रा व्योमगामिनः ।
केचिद्वै पर्वतप्रायाः केचिद्गह्वरनासिकाः ॥७३॥
केचित्ताडसमांऽगुष्ठाः केचित्तटाककर्णकाः ।
केचिद्विद्युन्निभनेत्राः केचित्सूर्यनखास्तथा ॥७४॥
अपरे वंशवत्केशा अभ्रबाष्पाननाः परे ।
नैकरूपधरा नैकवेषा मायाप्रवेदिनः ॥७५॥
निर्जग्मुर्दशसाहस्राः शैलगह्वरवासिनः ।
तान् दृष्ट्वा श्रीहरिस्तूर्णं शंखं दध्मौ सुदारुणम् ॥७६॥
युद्धस्याऽऽवेदकं ध्वानं प्रादुश्चकार भीप्रदम् ।
तावत्ते परितो वृत्त्वा मुमुचुश्चाट्टहासनम् ॥७७॥
विमानं धर्तुमुद्युक्ता विनेदुः प्रबलोन्मदाः ।
तावच्छ्रीभगवानाह कल्पवल्लीं सतीं प्रियाम् ॥७८॥
समुत्पादय सैन्यानि युद्धार्थं शक्तिमन्ति वै ।
श्रुत्वा कल्पलता योद्धॄन् दशसाहस्रसंख्यकान् ॥७९॥
प्राविश्चकार सहसा योद्धारो युद्धमाचरन् ।
विमानान्निर्ययुः सर्वेऽभितो राक्षससन्निधौ ॥८०॥
काल्पानां रक्षसां व्योम्नि युद्धं घोरतरं ह्यभूत् ।
परस्परं विहन्यन्ते विजयार्थं रणान्धकैः ॥८१॥
गदाभिरसिभिः खड्गैस्तोमरैः परिघैस्तथा ।
स्तंभैर्वृक्षैश्च पाषाणैर्मुशलैः शूलशक्तिभिः ॥८२॥
नाराचैः पट्टिशैर्भल्लैर्निजघ्नुस्ते परस्परम् ।
अकस्माद्वै समापन्नं युद्धं तद् रक्षसां भुवि ॥८३॥
शिरांसि रक्षसां तत्र पृथ्व्यां पतन्ति वृष्टिवत् ।
भिन्नान्यंगानि दैत्यानां पतन्ति शृंगवद् भुवि ॥८४॥
केचिद्धस्तविहीनाश्चाऽपरे पादविवर्जिताः ।
कटिच्छिन्नाः परे द्वेधा स्कन्धच्छिन्नास्तथाऽपरे ॥८५॥
निपेतुर्भूतले घोरा राक्षसाः प्राणतो हताः ।
विहतेभ्यस्तु देहेभ्यो जायन्ते नूतना नवाः ॥८६॥
ते समागत्य चाकाशे योधयन्ति महाबलाः ।
एवं सैन्यं रक्षसां तु वर्धमानं हि कोटिमम् ॥८७॥
व्यदृश्यत तदा व्योम्नि भयंकरमसीमकम् ।
कल्पभटाश्च तान् धृत्वा धृत्वा केशेषु चासिभिः ॥८८॥
द्वेधा कुर्वन्ति भिन्नाँश्चास्कन्धाच्चाकटि पारगैः ।
निपतन्ति शिरोहीना युद्ध्यन्ति चोत्थिताश्च ते ॥८९॥
कोटिशो व्याहताः कल्पलतोत्थैः रणमूर्धनि ।
हस्तपादादयस्तेषामुत्थायोत्थाय रोषतः ॥९०॥
ताडयन्ति कल्पभटान् व्योम्नि चोड्डीय जीववत् ।
हन्यन्ते कालयोद्धारो दिव्याश्छिद्यन्त एव न ॥९१॥
शस्त्राणि येषु चाकाशे यथा रोधं न यन्ति हि ।
अथ दैत्यास्ततश्चक्रुर्मायां पार्वतसर्जिनीम् ॥९२॥
पर्वताश्चाऽभवन् व्योम्नि निपेतुश्चोपरिस्थिताः ।
विमानोपरि वेगाद्वै विनाशार्थं तथापि च ॥९३॥
विमानं दिव्यमेवाऽऽसीद् देवा दिव्याश्च देविकाः ।
अस्पृश्या व्योमवत् सर्वे तान् धर्षितुं न शेकिरे ॥९४॥
विमानं व्योमवद् व्योम्नि यथावस्थं स्थिरायते ।
पतन्ति पर्वतास्तस्माद् अभिव्याप्याऽपि भूतले ॥९५॥
आश्चर्यं परमं प्राप्ता दृष्ट्वा दैत्याश्च राक्षसाः ।
नैतद्धर्तुं च वा हन्तुं योग्यं विमानकं नु वै ॥९६॥
नैते देवाश्च योद्धारो हन्तुं योग्या भवन्ति हि ।
इति मत्वाऽपरेशौर्यवर्जिता दुद्रुवू रणात् ॥९७॥
ते हताश्चापि नाराचैः काल्पयोद्धृप्रमुक्तकैः ।
भिन्नदेहाश्च ते भिन्नमस्तकाः प्राणवर्जिताः ॥९८॥
निधनं हि तदा प्राप्ता उत्पन्ना अपि सर्वशः ।
अन्ये मोहाच्च युद्ध्यन्ति काल्पभटैः समन्ततः ॥९९॥

कल्पलतोत्थवह्निस्तान् भस्मीचकार सर्वशः ।
कोटिकोट्यात्मकं सैन्यं रक्षसां भस्मतां गतम् ॥१००॥
मूलास्तु पञ्चसाहस्राः क्षयं याता हि राक्षसाः ।
पञ्चसाहस्रमात्राश्च प्रशिष्टा युद्धकारिणः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हिरण्यकेशर्षिगुरुकुलस्थानां षट्शतबालानां राक्षसैर्नाशे कृते श्रीहरिणा राक्षसानां नाशार्थं कृतोद्यमयुद्धादि-निरूपणनामा पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

**श्रीकृष्ण उवाच—**

आकर्णय ततो राधे ! त्ववशिष्टानि यान्यपि ।
पञ्चसहस्ररक्षांसि महाबलानि वेगतः ॥ १ ॥
व्योमयुद्धं प्रचक्रुश्च तरुपाषाणपर्वतैः ।
प्रजघ्नुः राक्षसास्ते च विमानं परितस्तदा ॥ २ ॥
शंभुं गणपतिं सुदर्शनं च वीरभद्रकम् ।
विमाने सम्प्रविश्यैव प्रजघ्नुस्तोमरादिभिः ॥ ३ ॥
ततो वीरो गणेशश्च सुदर्शनं शिवस्तथा ।
विमानान्तर्गतान् दैत्यान् धृत्वा धृत्वा त्रिशूलकैः ॥ ४ ॥
निजघ्नुः प्राणतः सर्वान् वीरभद्रो मुखे च तान् ।
निक्षिप्य चर्वयांचक्रे जीवतो रक्षसां गणान् ॥ ५ ॥
मृतेभ्यो ये च जायन्ते मृषारूपाश्च तान् हरः ।
महामायोत्थवडवानलैर्भस्मीचकार ह ॥ ६ ॥
चतुःसहस्रदैत्यास्ते नष्टा वै भस्मतां गताः ।
अथ सहस्रसंख्यास्ते दुद्रुवुर्व्योममार्गतः ॥ ७ ॥
विविशुः सप्तपुटके पर्वते गह्वरादिषु ।
कल्पलतासमुत्पन्ना योद्धारस्तदनुक्रमाः ॥ ८ ॥
विविशुर्गह्वरादौ च जगृहुस्तान् समन्ततः ।
सुदर्शनं महाचक्रं चकर्त कण्ठदेशतः ॥ ९ ॥
अग्निस्तान् परितो वीक्ष्य भस्मीचकार सर्वथा ।
एवं हता महादैत्याः सप्तपट्टाद्रिवासिनः ॥१०॥
ततो भीता दैत्यपत्न्यः सापत्याः शरणं हरेः ।
आययुर्वै रुदन्त्यस्ताः प्राणरक्षार्थमित्यथ ॥११॥
दयालुः श्रीहरिस्तत्र चक्रं सुदर्शनं स्वकम् ।
वारयामास ताभ्यश्च ददौ जीवप्रदानकम् ॥१२॥
मृतानां विप्रबालानां खादितानां तु राक्षसैः ।
अस्थीनि दर्शयामासुर्गर्तेक्षिप्तानि तास्तदा ॥१३॥
षट्शतानां द्विजानां च तथा सहस्रयोषिताम् ।
दशसाहस्रसंख्याकपुरुषाणां च पक्षिणाम् ॥१४॥
पशूनां बालकानां च नाऽस्थिसंख्या प्रविद्यते ।
क्रोशसंस्थे महागर्ते तानि वीक्ष्य समन्ततः ॥१५॥
लक्ष्मीमाज्ञापयामास तत्रस्थां कल्पवल्लिकाम् ।
सञ्जिवन्यादिविद्याश्च जीवयितुं तदस्थितः ॥१६॥
ततो लक्ष्मीः कृष्णनारायणपादजलं शुभम् ।
जग्राह स्वघटे स्वर्णनिर्मिते त्वक्षये स्वयम् ॥१७॥
हंसस्थाऽथ विमानात् सा साऽमृतकलशा ययौ ।
गर्ते सर्वे भ्रमित्वा तु व्योम्नाऽस्थीनि पुनः पुनः ॥१८॥
चक्रे संप्रोक्षणं तस्य जलस्यामृतबिन्दुभिः ।
अस्थीन्याप्यायितान्येव सप्राणानि तदाऽभवन् ॥१९॥
कल्पवल्ली ततो याता रसान् भृत्वा घटेऽक्षये ।
चक्रे संप्रोक्षणं तस्य रसस्याऽमृतबिन्दुभिः ॥२०॥
तेन देहाः समुत्पन्ना मांसमज्जात्वगन्विताः ।
बालकाश्च नरा नार्यः पशवः पक्षिणस्तथा ॥२१॥
ये ये मृता भक्षिताश्च लक्षाधिका हि देहिनः ।
तान् सजीवान् ततः कर्तुं विद्या संजीवनी स्वयम् ॥२२॥
आज्ञप्ता वृष्टिरूपा सा पपात सर्वदेहिषु ।
वृष्टिकणा जीवरूपाश्चेतना विविशुस्ततः ॥२३॥
उत्थिता घोरनिद्रातः सर्वे गर्ताऽस्थिसंभवाः ।
यथा देहस्वभावाश्च यथावत्सरशालिनः ॥२४॥
यथायोनिस्वभावाश्च नरा नार्योऽन्ययोनयः ।
सञ्जाता जीववन्तस्ते तदाश्चर्यमभून्महत् ॥२५॥
पशवः पक्षिणः सर्वे ययुर्वनान्तरं प्रति ।
अनादिश्रीकृष्णनारायणं नत्वा मुहुर्मुहुः ॥२६॥
मानवाश्च नरा नार्यो बाला कन्याश्च ते ततः ।
गर्तान्निम्नोच्चदेशेन निर्ययुर्बहिराययुः ॥२७॥
श्रीहरिस्तत्र वै देशे विमानं चावतारयत् ।
ददौ भोज्यं ततस्तेभ्यो जलं सुतृप्तिकारकम् ॥२८॥
वस्त्राण्यपि ददौ तेभ्योऽपेक्ष्यवस्तूनि यानि तु ।
प्रददौ स्मरणं तेभ्यो यज्जन्मग्रामबान्धवाः ॥२९॥
येषां यत्र भवन्त्येव तेषां प्रस्फुरितं तु तत् ।
श्रीभगवानाह कौशाम्बिकाय योगिने ॥३०॥
एभ्यः प्रदेहि मे मन्त्रं परमं वैष्णवम् ऋषे ।
कौशाम्बिको ददौ मन्त्रं श्रीकृष्णस्य तदाज्ञया ॥३१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
हिरण्यकेशो मन्त्रं तं जग्राह ऋषितस्तदा ॥३२॥

अथ श्रीभगवान् सर्वान् समगृह्य विमानके ।
विशाले शंकरं प्राह शंभो ह्येतान् निजे स्थलम् ॥३३॥
अनेनैव विमानेन प्रापय क्षणमात्रतः ।
शंभुर्ध्यानपरो भूत्वा दृष्ट्वा तेषां तु भूमिकाः ॥३४॥
लक्षगणान् समुत्पाद्य तत्तद्व्योमविचारिणः ।
सर्वान् वै क्षणमात्रेण प्रापयामास तद्गृहान् ॥३५॥
कुटुम्बिनश्च ते जाता हृष्टाः स्वजनलाभतः ।
चमत्कारं परं श्रुत्वा जातास्ते वैष्णवास्ततः ॥३६॥
हिरण्यकेशशिष्याश्च प्रापिता वै तदाश्रमम् ।
आश्रमः सुखितो जातो वैष्णवो भगवन्मयः ॥३७॥
अथ राक्षसकन्याश्च पञ्चसाहस्रकन्यकाः ।
बालकृष्णं विलोक्य वव्रिरे तद्रूपमोहिताः ॥३८॥
तन्मातृभिः प्रदत्ताः सञ्जग्राह भगवाँस्तु ताः ।
रक्षसां बालकान् दारान् मन्त्रमश्रावयन्मुनिः ॥३९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
ततश्चासुरदाराणामाज्ञां चक्रे स्वयं प्रभुः ॥४०॥
अद्यप्रभृति कस्यापि हिंसनं कार्यमेव न ।
कृषिं कृत्वाऽत्र वै क्षेत्रे जीवन्तु निवसन्तु च ॥४१॥
दाताऽहं भवतीनां वै जलान्नाम्बरसम्पदाम् ।
इत्युक्त्वा चाऽभयं दत्वा नीत्वा कन्यास्तदर्पिताः ॥४२॥
स्नात्वा तत्र तपत्यां च कृत्वा तीर्थं तदुत्तमम् ।
ययौ तीर्थनिमित्तेन श्रीहरिर्दक्षिणां दिशम् ॥४३॥
पूर्णायां स्वकरोत् स्नानं चाम्बिकायां ततः परम् ।
सह्याद्रौ तु विमानेन भ्रमित्वा वै ततः परम् ॥४४॥
महाबलेश्वरं गत्वा भीमायां स्नानमाचरत् ।
कृष्णायां तु ततः सस्नौ तुंगभद्राजले ततः ॥४५॥
पश्चिमघट्टके वार्धौ स्नात्वा श्रीपर्वतं ययौ ।
नीलगिरिं विलोक्याऽथ एलाद्रिं वै ततो ययौ ॥४६॥
अखातेऽपि ततः स्नात्वा सिंहलं द्वीपकं ययौ ।
तत्र पुष्पनदीं स्पृष्ट्वा कावेर्यां स्नानमाचरत् ॥४७॥
कटुनद्यां ततः स्नात्वा पन्नारीस्नानमाचरत् ।
द्रोणाचलं ततो गत्वा कृष्णायां स्नानमाचरत् ॥४८॥
कोलारसरसि स्नात्वा ततो गोदावरीं ययौ ।
मञ्जिरायां ततः स्नात्वा ततश्चन्द्रावतीं ययौ ॥४९॥
इन्द्रावत्यां ततः स्नात्वा ततश्चिलसरो ययौ ।
महानद्यां ततः स्नात्वा हुहूगल्यां ततो ययौ ॥५०॥
गंगानद्यां ततः स्नात्वा ब्रह्मपुत्रां ततो ययौ ।
स्नात्वा कंचनगंगायां कुश्यां स्नात्वा ततः परम् ॥५१॥
गण्डक्यां वै ततः स्नात्वा गोगरास्नानमाचरत् ।
नन्दायां तु ततः स्नात्वा यमुनायां ततः परम् ॥५२॥
चम्बलायां ततः स्नात्वा स्नात्वा सरसि शंभरे ।
शतलाजाजले स्नात्वा राव्यां स्नात्वा ततः परम् ॥५३॥
चीनापायां ततः स्नात्वा झेलमास्नानमाचरत् ।
काबिलायां ततः स्नात्वा सिन्धुस्नानं समाचरत् ॥५४॥
लुणीस्नानं ततः कृत्वा गत्वा नारायणं सरः ।
अखातं समतीत्यैव गोमतीस्नानमाचरत् ॥५५॥
भद्रावत्यां ततः स्नात्वा चाश्वपट्टसरो ययौ ।
कुंकुमवापिकाक्षेत्रे लोमशस्याऽऽश्रमे हरिः ॥५६॥
विमानं स्थापयामास गुरुं नत्वा ततः परम् ।
गृहं गत्वा स्वपितरौ प्रणम्याऽऽभाष्य यत्कृतम् ॥५७॥
निवेदयामास कन्याः पञ्चसाहस्रसंख्यकाः ।
भोजयामास ताश्चोपकरणानि ह्यदापयत् ॥५८॥
लोमशस्याऽऽश्रमे तास्तु स्थापयामास माधवः ।
शंकरश्च गणेशश्च वीरभद्रो निजालये ॥५९॥
ययुः सुदर्शनं चापि विमानं च तिरोऽभवत् ।
लक्ष्म्याद्याः श्रीहरेः क्षेत्रे तीर्थे नैजे च मन्दिरे ॥६०॥
ययुः प्रसादमाभुक्त्वा बालकृष्णो निजालये ।
विशश्राम सुखं राधे सर्वभक्तैः प्रसेवितः ॥६१॥
चान्द्रे माघे कृष्णपक्षे चतुर्थ्यां परमेश्वरः ।
रक्षयित्वा जीवयित्वा कृत्वा तीर्थानि भूतले ॥६२॥
आजगाम निजे क्षेत्रे सर्वप्राणप्रदः प्रभुः ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेद् ध्रुवम् ॥६३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सन्तापनदैत्यमारितानां हिरण्यकेशशिष्याणां सजीवीकरणं, दैत्यानां नाशः, दक्षिणनदीनां तीर्थीकरणं चेत्यादिनिरूपणनामा षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे तथा चान्यं चमत्कारं परात्मनः ।
भक्तानां देवसाधूनां गवां त्रातुश्च सूत्रिणाम् ॥ १ ॥
पुरानङ्गपुरे राजा बृहद्वर्चा बभूव ह ।
देवसेवापरो नित्यं साधुसेवापरायणः ॥ २ ॥
धर्मकार्यपरो यज्ञसत्रहोमपरायणः ।
ज्ञानविज्ञानसम्पन्नः कथाकीर्तनतत्परः ॥ ३ ॥
अनाथदीनकृपणोपकारी दानशीलनः ।
भार्या पतिव्रता साध्वी साधुसेवापरायणा ॥ ४ ॥

भक्तिसेवापरा नित्यं सांख्यसत्यभिधानिका ।
पुत्रास्तस्यां नृपस्याऽऽसन् बुद्धिमन्तः शतत्रयम् ॥ ५ ॥
कन्याः शतद्वयं चापि सर्वाः कृष्णपरायणाः ।
राजाऽसौ तपतीतीरे गत्वा पर्वणि पर्वणि ॥ ६ ॥
तीर्थस्नानविधिं कृत्वा दानं ददाति चोत्तमम् ।
सुवर्णं रूप्यकं ताम्रं धनं द्रव्यं च मुद्रिकाः ॥ ७ ॥
रत्नानि मौक्तिकादीनि हीरकान् विद्रुमादिकान् ।
मणीन् माणिक्यवर्णांश्च गजानश्वान् गवादिकान् ॥ ८ ॥
अजावीन् वाहनयानशिबिकाशकटीस्तथा ।
विमानानि विचित्राणि बाष्पयानानि वै तथा ॥ ९ ॥
द्विचक्राणि त्रिचक्राणि बहुचक्राणि यान्यपि ।
वैहायसानि यानानि श्रेष्ठदानानि पर्वणि ॥१०॥
ददात्यपि यथायोग्यं विप्रेभ्यः पूजनोत्तरम् ।
अथ सूर्यग्रहणे च फाल्गुने तपतीतटे ॥११॥
ययौ राजाऽऽप्लवनार्थं बहुद्रव्यसमन्वितः ।
तत्रायुस्तपत्यां संस्नातुं वै लक्षशो जनाः ॥१२॥
ब्राह्मणा ग्रामवासाश्च पञ्चयोजनभूमिगाः ।
यज्ञकर्मकराश्चापि वेदाध्यापनकारिणः ॥१३॥
सत्पात्राणि तपोविद्याव्रतधर्मपरायणाः ।
सस्त्रीबाला हि ते सर्वे त्वाययुः स्नानहेतवे ॥१४॥
सूर्योपरागसंस्नाता जपं चक्रुर्नदीतटे ।
राजा दानं प्रदातुं च विप्रेभ्यश्चोपचक्रमे ॥१५॥
गजान् ददौ च सौधानि क्षेत्राणि वाटिका मणीन् ।
मौक्तिकान् हीरकान् गाश्च दोग्ध्रीश्च महिषीस्तथा ॥१६॥
अश्वान् यानानि चान्नानि माषान् ताम्रस्य पुत्तलीः ।
आयसं पुत्तलं नैजं ददौ चर्माम्बराणि च ॥१७॥
सुवर्णं रजतं मुद्रा यानानि वाहनान्यपि ।
दासीर्दासान् ददौ चाजाविकान् ग्रामान् गृहाण्यपि ॥१८॥
कृष्णवस्त्राणि च कृष्णकणान् कृष्णद्रवाँस्तथा ।
कृष्णहारान् मणिनद्धान् कृष्णसूत्रैः सुघट्टितान् ॥१९॥
कृष्णपुरुषदानं च कोटिमुद्रासमन्वितम् ।
ददौ प्रवाहमवधिं कृत्वा हस्तचतुष्टयम् ॥२०॥
लोभेन विप्रवर्यास्ते जगृहुर्दानमुत्तमम् ।
भारयुक्तं महादानं लक्षाधिकधनान्वितम् ॥२१॥
प्रत्येकं जगृहुर्विप्राः सहस्रसंख्यकास्तदा ।
एको हस्ती तथैकाश्वश्चैका गौर्वृषभद्वयम् ॥२२॥
एका च महिषी दोग्ध्री गृहं चैकं निवासदम् ।
क्षेत्रं चैकं वाटिकैका मणिः कृष्णश्च मौक्तिकम् ॥२३॥
हीरकश्चैकयानं च माषास्ताम्रस्य पुत्तली ।
आयसं पुत्तलं नैजं कृष्णं चर्म तथाऽम्बरम् ॥२४॥
कृष्णं सूत्रं कृष्णवर्णो दासो दास्यपि कृष्णिका ।
कृष्णाऽजा कृष्णहारश्च कृष्णा मद्रा सकज्जला ॥२५॥
कृष्णमाषा लक्षमूल्यं स्वर्णं रौप्यं च लक्षकम् ।
प्रत्येकाय तु विप्राय तत्सर्वं प्रददौ नृपः ॥२६॥
सहस्रब्राह्मणा लुब्धा गृहीतवन्त एव तत् ।
सूर्यशुद्धौ पुनः सस्नुस्तपत्यां ते तु भूसुराः ॥२७॥
दानलब्धेश्चातितुष्टाश्चातिप्रसन्नमानसाः ।
बहुप्रेम्णा जले सस्नुर्यावत्तु निर्ययुर्बहिः ॥२८॥
तावत्ते दानदोषेण कृष्णाः कद्रुपिणोऽभवन् ।
कृष्णवर्णस्य तु प्रतिग्रहे दोषोऽभिपद्यते ॥२९॥
राधिके तच्छृणु वच्मि येन यद्दोषता भवेत् ।
हस्तिदानेन वै राज्ञो युद्धे त्वन्यायदूषणम् ॥३०॥
पापात्मकं भवेद् यद्यत् कापथ्यं दूषणं महत् ।
स्त्रीबालानां त्वपराधवर्जितानां विघातनम् ॥३१॥
सारथीनां पशूनां च वाहानां दूतकर्मिणाम् ।
हननं यच्च तत्सर्वं हस्तिदानेन शुद्ध्यति ॥३२॥
एतत्पापं हस्तिदानग्रहिणः शिरसि व्रजेत् ।
अश्वदानस्य तु राज्ञोऽश्ववारैस्तु कृतं महत् ॥३३॥
संग्रामे दूषणं चाश्वमारणादिनिवर्तनम् ।
फलं राज्ञो भवेद् दानग्रहीता दोषभाग् भवेत् ॥३४॥
गोदानात्तु वृषादीनां युद्धादौ मारणं तु यत् ।
राज्ये मुष्कच्छेदनं च गोवृषादेस्तु यद्भवेत् ॥३५॥
तत्पापं नृपतेर्नश्येद् दानग्राहिषु गच्छति ।
वृषभद्वयदानेन प्रेता युद्धे मृतास्तु ये ॥३६॥
अशूराः पृष्ठधावाश्च प्रसह्याऽऽगतिका मृताः ।
तेषां हत्योद्भवं पापं राज्ञो नश्यति तत्पुनः ॥३७॥
वृषद्वयप्रतिग्राहिष्वेव गत्वा सुतिष्ठति ।
महिष्यास्तु प्रदानेन पाशशूलावरोपणात् ॥३८॥
यत्पापं जायते राज्ञोऽन्यायजन्यं हि दण्डतः ।
कृष्णवस्त्रधरैः पाशो दीयते पाशकारकैः ॥३९॥
तद्धत्याजं नृपतेस्तु पापं नश्यति तत्पुनः ।
महिषीदानसंग्राहकर्तर्येव प्रपद्यते ॥४०॥
गृहदानेन च राज्ञो राज्ये पृथ्व्यां प्रजाजने ।
शिल्पिनिर्मितसौधादिग्राममार्गादिजं च यत् ॥४१॥
असंख्यजीवहत्याऽघं पापं सर्वं निवर्तते ।
ग्रहग्राहिणि सर्वं तल्लग्नं भवति तत्क्षणात् ॥४२॥

क्षेत्रवाटीप्रदानेन कृषेः पापमनन्तकम् ।
प्रजानां यद् भवेद् राज्ञस्तन्निवृत्तिः प्रजायते ॥४३॥
क्षेत्रवाट्युद्यानग्राहिविप्रादौ तत्प्रवर्तते ।
कृष्णमणेः प्रदानेन खन्यादिखनने तु यत् ॥४४॥
राज्यपापं भवेद् राज्ञस्तत्सर्वं विनिवर्तते ।
मणिग्राहिणि खातानां पापं सर्वं प्रवर्तते ॥४५॥
मौक्तिकस्य प्रदाने सामुद्रजन्तुविनाशने ।
मौक्तिकोत्पादने यच्च लवणोत्पादने च यत् ॥४६॥
तथा मत्स्यादिजन्तूनां मारणे यन्त्रवाहने ।
सामुद्रादिसमुत्थं च पापं राज्ञो निवर्तते ॥४७॥
मौक्तिकग्राहिणि सर्वं प्रवर्ततेऽतिदुःसहम् ।
हीरकस्य प्रदानेन विषजन्यमघं तु यत् ॥४८॥
विषौषधादिजन्यं च ग्रीष्मतापविषोद्भवम् ।
विषवायूद्भवं पापं प्राणिनां नाशसंभवम् ॥४९॥
राज्ञो निवर्तते तच्च तद्ग्राहिणि प्रवर्तते ।
यानदानेन यानस्थचक्रैर्यत्प्राणिघातजम् ॥५०॥
पापं राज्ञो नाशमेति यानग्राहिणि गच्छति ।
माषदानेन च वर्षे ग्रहपीडा नृपस्य या ॥५१॥
दीनाऽनाथ कृपणानामरक्षाजं तु पातकम् ।
राज्ञो निवर्तते तच्च माषग्राहिणि गच्छति ॥५२॥
ताम्रपुत्तलिकादानप्रदानेन तु भूपतेः ।
गणिकासंगजं पापं तादृशं च निवर्तते ॥५३॥
पुत्तलीग्राहिणि लग्नं जायते घोरदुःखदम् ।
आयसस्य पुत्तलस्य दानेन नृपतेस्तु यत् ॥५४॥
षडीतिजन्यजं राज्ये पापं प्रजाजनोत्थितम् ।
राज्ञस्तज्जायते नष्टं पुत्तलग्राहके भवेत् ॥५५॥
अतिवृष्टिरनावृष्टिः शलभा मूषकाः शुकाः ।
भूकम्पविप्लवश्चैताः षडीतयः समीरिताः ॥५६॥
कृष्णचर्मप्रदानेन मृगयाजमघं महत् ।
राज्ञो निवर्तते चर्मग्राहके च प्रवर्तते ॥५७॥
कृष्णाम्बरप्रदानेन वस्त्रयन्त्रोद्भवं महत् ।
पापं त्वसंख्यजन्तूनां नाशोत्थं नृपतेस्तु यत् ॥५८॥
नश्यत्येवाऽम्बरग्राहिण्यघं तच्च प्रवर्तते ।
कृष्णसूत्रप्रदानेन राज्ये रज्जूद्भवं ह्यघम् ॥५९॥
ऊर्णाजन्यं तथोर्णार्थं कौशेयार्थं च यत् कृतम् ।
पातकं जीवघाताख्यं राज्ये तन्नृपतेर्भवेत् ॥६०॥
सूत्रदानेन तद् राधे राज्ञः सर्वं निवर्तते ।
सूत्रग्राहिणि विप्रादौ तत्सर्वं सम्प्रवर्तते ॥६१॥
कृष्णपूरुषदानेन बालहत्योद्भवं तु यत् ।
गर्भहत्योद्भवं चापि वृथाहत्योद्भवं तथा ॥६२॥
प्रजापापं तु यद् राज्ञस्तत्सर्वं विनिवर्तते ।
दासदानग्राहके तु तत्सर्वं सम्प्रवर्तते ॥६३॥
कृष्णादासीप्रदानेन कन्याहत्योद्भवं तथा ।
स्त्रीहत्याविधवाहत्याप्रभृत्युत्थ ह्यघं तु यत् ॥६४॥
परदारप्रसंगोत्थं पापं राज्ञो निवर्तते ।
दासीग्राहिणि विप्रादौ तत्सर्वं तु प्रवर्तते ॥६५॥
अजादानेन राज्ये यत्त्वजामांसादनोद्भवम् ।
पापं चाविकभक्षोत्थं सर्वं राज्ञो निवर्तते ॥६६॥
अजाग्राहिणि चायाति घातकिशालिकोद्भवम् ।
कृष्णमालाप्रदानेन क्रूरं प्रच्छन्नपातकम् ॥६७॥
निवर्तते च तद् राज्ञो मालाग्राहिणि गच्छति ।
कृष्णमुद्रादिदानेन धनजन्यं प्रजाजने ॥६८॥
कोशजन्यं च यत्पापं करजन्यं च यद् भवेत् ।
प्रसह्याऽऽहरणैर्जन्यं ह्यघं दण्डनिमित्तजम् ॥६९॥
राज्ञो निवर्तते तच्च द्रव्यग्राहिणि गच्छति ।
कृष्णमाषप्रदानेन राज्ञः शनिकृतं तु यत् ॥७०॥
पीडनं तन्माषग्राहिण्ये व संक्रमतेऽखिलम् ।
सुवर्णदानतः पितृप्रसन्नत्वं सुरेष्टता ॥७१॥
रजतस्य प्रदानेन लक्ष्मीः सत्त्वमयी भवेत् ।
एवं दानफलं राज्ञः पापं दुःखं तु पात्रके ॥७२॥
वस्तुभिः सह चाभ्येति राजा दोषान्निवर्तते ।
प्रतिग्राही पीड्यते तु तेजोहीनः प्रजायते ॥७३॥
यदि चेन्न स पुण्याढ्यः समर्थो ब्रह्मभावनः ।
पुण्यबलविहीनस्तु तूर्णं पापैः प्रपीड्यते ॥७४॥
न्यूनपुण्याः कृष्णवर्णा जायन्ते ग्रहमात्रतः ।
कद्रूपा ज्ञानहीना वा शापदोषाद् यथा जनाः ॥७५॥
विचित्ता वा दीर्घरोगा भग्नाङ्गा भग्नभूतयः ।
भग्नवीर्याः प्रजायन्ते भग्नकौटुम्बिकास्तथा ॥७६॥
सुखहीना दुःखपूर्णा जायन्ते दानसंग्रहात् ।
तस्माद् घोरतरं दानं न ग्राह्यं पुण्यरक्षिणा ॥७७॥
दानस्य ग्रहणार्थं यो हस्तो दक्ष प्रलम्बते ।
पुण्यं दातुं लम्बते सः पापमादातुमित्यपि ॥७८॥
तस्माद् दानं तु गृह्णीयाद् यो भवेत् पुण्यशेवधिः ।
दानदोषविनाशार्थं चरेद् देवार्पणादिकम् ॥७९॥
अन्यथा पापभुग् याति दुःखभोगस्थलं पुनः ।
याम्यं दैह्यं च गार्भं च यदुद्धारो न वै द्रुतम् ॥८०॥

इत्येवं राधिके विप्रा दानं जगृहुरुत्सुकाः ।
कृष्णवर्णाश्च कद्रूपाश्चान्त्यजा इव वै क्षणात् ॥८१॥
चाण्डाला इव ते जाता विवर्णाश्च वितेजसः ।
यथा कज्जलदेहा वा वह्निदग्धा यथा च वा ॥८२॥
तथा जाताः क्षणमात्रात् तापीस्नानोत्तरं ह्यपि ।
घोरदानफलं त्वेतद् दुर्निवार्यं ह्यभूत्तदा ॥८३॥
ग्रहणस्नानपुण्यं तु घोरप्रतिग्रहान्तिके ।
नाऽऽभूत् त्रातुं समर्थं च ब्राह्मणान् ब्रह्मवादिनः ॥८४॥
अथैवं पापसम्पन्नान् दृष्ट्वा श्रीसुरतायनः ।
महर्षिश्चन्दनवृक्षकृतावासोऽतितापसः ॥८५॥
अनादिश्रीकृष्णनारायणभक्तोऽतिवैष्णवः ।
सिद्धश्चैश्वर्यपूर्णश्च ज्ञानध्यानपरायणः ॥८६॥
पूर्वं वर्षसहस्रं यः समाधौ समतिष्ठत ।
यस्योपर्यभवन् वृक्षस्तम्बा वल्मीकमूलकाः ॥८७॥
तपस्या जलवेगेन चातिवृष्टिकृतेन च ।
मृत्तिकाक्षालने जाते निगरच्छन्महामुनिः ॥८८॥
चन्दनस्य तरोर्मूले ग्रथितो यस्य विग्रहः ।
तस्थौ तत्रैव मूले च समाधेः स बहिर्ययौ ॥८९॥
चेतनां प्राप्य तद्वृक्षे न्यवसन्भगवन्मनाः ।
समाधिनाऽऽलोकयच्च भगवान् धृतविग्रहः ॥९०॥
इदानीं वर्तते पृथ्व्यामश्वपट्टसरोऽन्तिके ।
क्षेत्रे कुंकुमवाप्यां च श्रीमद्गोपालनन्दनः ॥९१॥
अनादिश्रीकृष्णनारायणस्वामी पुमुत्तमः ।
श्रीपतिः कमलाकान्तो हंसाराधारमापतिः ॥९२॥
माणिकीपार्वतीमञ्जुलाप्रभासगुणापतिः ।
अनन्तमुक्तदेव्यश्च कोट्यर्बुदसतीप्रियः ॥९३॥
कम्भराश्रीतनयोऽसौ बालकृष्णो विराजते ।
नित्यं ज्ञात्वा प्रयात्येव प्रातर्दर्शनहेतवे ॥९४॥
क्षणमात्रेण तु समाधिना चायाति चन्दनम् ।
अनादिश्रीकृष्णनारायणं भजति नित्यशः ॥९५॥
श्रीहरिस्तं निजं मन्त्रं श्रावयामास सकृपः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९६॥
स च मन्त्रं जपन्नास्ते चन्दनाऽधो नदीतटे ।
तेन दृष्टा ब्राह्मणास्ते सहस्रसंख्यकास्तदा ॥९७॥
गृहीतदानकृष्णा ये सञ्जाताः कल्मषान्विताः ।
सशोका दोषनाशार्थं चिन्तयानाः परस्परम् ॥९८॥
ते सर्वे तं महायोगेश्वरं श्रीसुरतायनम् ।
ययुः शरणमासाद्य साश्रुनेत्रास्तदाऽभवन् ॥९९॥
दोषशान्त्यर्थमेवैनं प्रार्थयामासुरन्तिके ।
निषेदुर्दण्डवत् कृत्वा महर्षिः श्रीहरिं स्मरन् ॥१००॥
ददौ ज्ञानं पापशान्तिप्रदं चोपासनाश्रयम् ।
अनादिश्रीकृष्णनारायणप्राप्तिप्रदं तदा ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बृहद्वर्चोनृपात् तापीतीरे गृहीतघोरप्रतिग्रहेण कृष्णकद्रूपतां गतानां सहस्रविप्राणां सुरतायनर्षियोग इत्यादिनिरूपणनामा सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

श्रीकृष्ण उवाच—

यज्ज्ञानं प्रददौ श्रीमत्सुरतायनयोगिराट् ।
ब्राह्मणेभ्यस्तु तज्ज्ञानं राधे ते कथयामि च ॥ १ ॥
राधे पूर्वं मया दत्तं सुरतायनयोगिने ।
तदेव तेऽत्र संवच्मि लोकानां हितकृद् यतः ॥ २ ॥
सुरतायनविप्रर्षिः प्राह शृणुत भूसुराः ।
अनादिश्रीकृष्णनारायणस्वामीश्वरेश्वरः ॥ ३ ॥
राजते कुंकुमवापीक्षेत्रे सौराष्ट्रमण्डले ।
यो वै साक्षात्परब्रह्म परमात्मा परेश्वरः ॥ ४ ॥
सर्वशक्तिसमायुक्तः पापिनां पापनाशकः ।
तं देवं परमेशानं यात शरणमुत्तमम् ॥ ५ ॥
भक्त्या त्वनन्यया तं श्रीकृष्णमर्चयत ध्रुवम् ।
ध्यानेन कर्मयोगेन भक्त्या ज्ञानेन चैव सः ॥ ६ ॥
प्राप्यः श्रीपरमेशानो यात तं शरणं द्विजाः ।
दानधर्मात्मकं कर्म यद्यद्वर्णाश्रमात्मकम् ॥ ७ ॥
अध्यात्मज्ञानसहितं मुक्तये भवति द्विजाः ।
मया धर्मः पुरा प्रोक्तो ब्रह्मविद्यात्मकः परः ॥ ८ ॥
सर्वार्पणे मयि क्षिप्ते कर्ता क्वचिन्न लिप्यते ।
धर्मो ज्ञानं दास्यभक्तिः परं ब्रह्म प्रकाशयेत् ॥ ९ ॥
सर्वसंगान् परित्यज्य तमेव शरणं गताः ।
उपासते सदा भक्त्या योगमैश्वरमास्थिताः ॥१०॥
सर्वसंगविनिर्मुक्ताः शान्ता दान्ता विमत्सराः ।
अमानिनो हरौ सर्वसमर्पणास्तदर्थकाः ॥११॥
तच्चित्तास्तद्गतप्राणास्तज्ज्ञानकथने रताः ।
सर्वन्यासा हरौ नार्यो नरा वा बाल्यौवनाः ॥१२॥
तेषां बन्धनहर्ता वै परमेशो हरिः स्वयम् ।
ते सुनिर्धूततमसो ज्ञानेनैकेन तन्मयाः ॥१३॥

सदानन्दास्तु संसारे न जायन्ते पुनर्भवाः ।
कर्मणा मनसा वाचा यान्तु तं शरणं द्विजाः ॥१४॥
बाल्यं तु सर्वदा रक्ष्यं गर्भावस्था च योगिना ।
यथा बाल्ये च वा गर्भे वासना वाञ्छना तृषा ॥१५॥
ईहा तृष्णा रागिता च वर्तन्ते नैव शाखिवत् ।
तथैव यौवने चापि वार्धक्ये स्थैयमेव च ॥१६॥
यथा सुषुप्तो विज्ञोऽपि शत्रैः फलं न चैति हि ।
तथा विप्राः सदा स्थेयं ज्ञानेऽपि मुनिता यथा ॥१७॥
यथा त्वन्यमनस्कस्य नेन्द्रियग्राह्यवेदनम् ।
तथा कृष्णमनस्कस्य वृत्तिर्विप्रस्य मुक्तये ॥१८॥
यथा बालः पृथिव्यास्तु मृदमादाय लिम्पति ।
न शोकं वाऽपि हर्षं च बहुं तत्रैव मन्यते ॥१९॥
तथा सर्वाणि वस्तूनि क्रिया व्यापारगोचराः ।
तस्मिन् देवे विनिःक्षिप्य मृत्तिकापिण्डवद् बुधः ॥२०॥
संगृह्याऽपि न शोकं वा हर्षं निन्देत तत्रहि ।
तदा तत्फलवेदित्वं नाऽस्याऽतीव प्रवर्तते ॥२१॥
अवेदित्वे न भोक्तृत्वं कश्मलं नोपजायते ।
नित्यशुद्धस्य या निष्कल्मषता मुक्तिरेव सा ॥२२॥
विषयाश्च शरीरं च तथेन्द्रियाणि मानसम् ।
विज्ञातव्यं पृथक् चापि तत आत्मा निवर्तते ॥२३॥
कर्ता वै बन्धनं याति यदि तेषु प्रसज्जते ।
असङ्गः सज्जते नैव बन्धनं नैव याति च ॥२४॥
विषयास्तु यथा दूरं वर्तन्ते वस्तुरूपिणः ।
न ते सन्ति सहलग्ना न चेदात्माऽत्र सज्जते ॥२५॥
उद्यानस्थानि पुष्पाणि मधुवन्त्यपि षट्पदे ।
न भवन्ति प्रलग्नानि मधोः स्थानं न यान्ति ते ॥२६॥
तथा ते विषयाः सर्वे नाऽऽवृण्वन्ति प्रवेदिनम् ।
आत्मानं पुरुष, तस्माद् बन्धयितव्यमेव न ॥२७॥
शूलिकागृहमाबध्य कीटी वसति तद्गृहे ।
गृहं चाऽऽकृष्य नित्यं सा यत्र तत्र प्रयाति हि ॥२८॥
अन्ते गृहं शरीरं च सर्वं नाशं प्रयाति वै ।
इत्येषा ज्ञानहीना तद्गृहं नीत्वा तु भूतले ॥२९॥
बद्धा सर्वत्र अटति तद्वद् देहस्य बन्धनम् ।
अज्ञा बद्धा चाऽप्यटन्ति देहं नीत्वा स्थले स्थले ॥३०॥
तज्जं दुःखं सुखं चापि प्रतिक्षणं प्रवर्तते ।
योगिनस्तु प्रभावज्ञाः संयमेन शरीरकम् ॥३१॥
एकत्रापि विहायैव लोकान्तरेऽभियान्ति हि ।
न तेषां बन्धनं क्वापि दृढं देहस्य वर्तते ॥३२॥
पुनरागत्य च तत्र वासं कुर्वन्ति चेच्छया ।
पक्षिणो वृक्षशाखायां वसन्ति वासमात्रिणः ॥३३॥
न शाखा बन्धनं तेषां वियन्त्यपि विहाय ताम् ।
तथा देहे निवासोऽपि पक्षिवन्मुक्तवत् कृतः ॥३४॥
बन्धनाय न जायेत जीर्णचर्मेव भोगिनः ।
इन्द्रियाणि भवन्त्येव देहाश्रयाणि सर्वथा ॥३५॥
समनस्कानि बन्धाय निर्मनस्कानि मुक्तये ।
मानसं योजयितव्यं भवेद् यावत्प्रयोजनम् ॥३६॥
प्रत्याहर्तव्यमेवैतन्निष्प्रयोजनकं यदा ।
तदेन्द्रियाणि नैव स्युर्बद्धानि बन्धदानि च ॥३७॥
प्रत्याहृतं मनश्चापि निर्बद्धं बन्धकृन्न वै ।
बुद्धिर्या साक्षिणी साऽपि पतिं चात्मानमाश्रयेत् ॥३८॥
न तु पुत्रं मनश्चापि पुत्रतुल्येन्द्रियाण्यपि ।
नवा दासान् विषयाँश्च कदापि साध्विकाऽऽश्रयेत् ॥३९॥
बुद्धेर्नैर्मल्यमेवैतद् यदत्राऽप्रतिबिम्बनम् ।
एवं प्रवाहरोधे च स्वयमात्मा प्रकाशते ॥४०॥
अव्रणश्चाऽनघश्चाप्यकल्मषः पापवर्जितः ।
फलभावाऽप्रलुब्धश्चाऽसंगो मुक्तो न दुःखभाक् ॥४१॥
निर्द्वन्द्वं मानसं यत्र बुद्धिस्तत्र हि निर्मला ।
गृहिणी निर्मला यत्र गृहेशस्तत्र मोदते ॥४२॥
स्वसम्पत्सु सदा तृप्तो नान्यसम्पदमिच्छति ।
कस्माच्छोकश्च मोहश्च ततोऽस्य ननु जायते ॥४३॥
आत्मतृप्तस्य तु सदानन्दतृप्तस्य योगिनः ।
अत्यन्ततृप्तसंयोगः स्वभावाद्वै प्रवर्तते ॥४४॥
तेनाऽयं मोक्षवन्नित्यं याति तिष्ठति मोदते ।
आनन्दपूर्णतां ज्ञात्वा परेश्वरस्य सर्वथा ॥४५॥
तत्रैव सज्जते सम्यङ्नान्यसक्तिं समिच्छति ।
वृत्तयः कुण्ठिता यस्य बुद्धिस्तृप्त्यात्मिकाऽभवत् ॥४६॥
गृहिणी सुखदा यस्य तस्य मोक्षो गृहे स्थितः ।
गृहिणी दुःखदा यस्य तस्य वै नरकं गृहे ॥४७॥
तस्मात् सा गृहिणी बुद्धिः सर्वनैर्मल्यसाधनैः ।
सम्प्रसन्नयितव्याऽत्र यया राजा प्रसादवान् ॥४८॥
नित्यप्रसादलाभार्थं यतेत परमात्मनि ।
यत्र कर्म न चैवाऽस्ति न चाऽस्ति भोग्यभोक्तृता ॥४९॥
तद्योगेन तथा स्याच्च घोरतावर्जितो भवेत् ।
नित्यानन्दह्रदे मग्नः किं तस्य कर्दमेन वै ॥५०॥
श्वेताऽश्वतरनामा वै आसीद् ब्रह्मर्षिसत्तमः ।
तस्य शिष्यः पृथोः पौत्रः पुत्रः स तु शिखण्डिनः ॥५१॥

सुशीलनामा चाबाल्याद् वैराग्यं समुपाश्रितः ।
मतिं चक्रे भाग्ययोगात् सन्यासं प्रति धर्मवित् ॥५२॥
गुरोः सेवां करोत्येव हिमवत्पृष्ठसंस्थितः ।
धर्मवने स्थितो यत्र नरनारायणः प्रभुः ॥५३॥
यत्र मन्दाकिनी नाम सुपुण्या विमलानदी ।
पद्मोत्पलवनोपेता सिद्धसाधुनिषेविता ॥५४॥
तस्याः स सलिले स्नात्वा तर्पित्वा पितृदेवताः ।
अर्चयित्वा नरयुक्तं नारायणं सुपुष्पकैः ॥५५॥
श्वेताश्वतरसंज्ञं तु गुरुं नत्वैकदाऽऽह च ।
अहो मे सुमहद्भाग्यं तपांसि सफलानि मे ॥५६॥
यन्मे भवादृशः साक्षात् सर्वज्ञ इव सद्गुरुः ।
ज्ञानं भक्तिं च नैष्कर्म्यं सन्यासं देहि मे प्रभो ॥५७॥
इत्युक्तः स गुरुर्देवो ददौ सन्यासमुत्तमम् ।
सम्यङ्न्यासः कर्मणां योऽनादिकृष्णनरायणे ॥५८॥
सर्वसमर्पणं प्रादात् प्रपत्त्यात्मकमित्यथ ।
आचचक्षे महामन्त्रं कृष्णस्य सर्वसिद्धये ॥५९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
सर्वपापोपशमनं सर्वसारं प्रमुक्तिदम् ॥६०॥
ज्ञानं सर्वार्पणं चापि ददौ सुशीलभूभृते ।
मयि नारायणश्चाऽस्ति नारायणेऽप्यहं स्थितः ॥६१॥
अहं नारायणश्चेति नारायणोऽहमेव च ।
एवं ब्रह्मस्थितेर्ज्ञानं ददौ तु प्रथमं गुरुः ॥६२॥
ततः प्राह न देहस्त्वं देहो नेन्द्रियरूपवान् ।
इन्द्रियाणि मनो नैव मानसं न महत् तथा ॥६३॥
महत्तत्त्वं न चात्मा वै नात्मा मायात्मकः क्वचित् ।
माया नात्मस्वरूपा च त्वदात्मा पारमेश्वरः ॥६४॥
नारायणस्त्वदात्मा च त्वं वै नारायणो मतः ।
नारायणो हि निर्लेपः कर्मबन्धनवर्जितः ॥६५॥
नित्यं शुद्धस्तथा बुद्धो मुक्तो मायाविवर्जितः ।
एवं मत्वा निजं रूपं भज श्रीपरमेश्वरम् ॥६६॥
प्रातः स्नानं निजे देहे परेशानं विधापय ।
वस्त्राधानं निजे देहे परेशानं विधापय ॥६७॥
भूषाधानं चन्दनादि परेशानं विधापय ।
आरार्त्रिकादिदानं च स्वदेहे तस्य वर्तय ॥६८॥
नैवेद्यं भोजनं पानं ताम्बूलकं सुगन्धि च ।
स्वदेहे तं परेशानं सम्पादय शरीरिणम् ॥६९॥
उपानत्पादुकाछत्रप्रदानं स्वस्य वर्ष्मणि ।
तस्मै परात्मने सर्वयानाद्यर्पय भावतः ॥७०॥
दर्शनं श्रवणं चापि स्पर्शनं रसनादिकम् ।
कामनं स्नेहनं देहे प्रभवे प्रतिपादय ॥७१॥
शयनं गमनं वार्तां बोधनं मननं तथा ।
हसनं रोदनं चोद्वेजनं तस्मै समर्पय ॥७२॥
विश्रमणं संस्करणं स्खलनं मादनं तथा ।
रमणं ध्यानकरणं देहे देवाय चार्पय ॥७३॥
जृम्भणं द्रावणं दुःखं सुखं कार्यं विचारणम् ।
विवेकं श्वसनं भक्तिं देहे श्रीपतयेऽर्पय ॥७४॥
एवं क्रियाकलापं ते भौतिकं सूक्ष्ममात्रिकम् ।
करणोत्थं भावनोत्थं तस्मिन् कृष्णे समर्पय ॥७५॥
आत्मोद्भवं कलापं च परमेशे समर्पय ।
सोऽयं सन्न्यास एवाऽस्ति निर्बन्धो मुक्तिशब्दितः ॥७६॥
तत्फलं च त्वया नैव भोक्तव्यं हरयेऽर्पितम् ।
एवं वै वर्तमानस्य कर्म दिव्यं समस्तकम् ॥७७॥
कामः क्रोधश्च लोभश्च तृष्णा प्रीतिः रतिः क्षतिः ।
घृणा क्रौर्यं च मालिन्यं दिव्यं हर्यर्पणं यतः ॥७८॥
अयं सन्न्यास एवाऽस्ति वैष्णवः पारमार्थिकः ।
तत्रस्थं कल्मषं पुण्यं नैनं वा परिबाधते ॥७९॥
एवं सुशीलः कृतवान् बदर्यां तप आचरन् ।
भजन् देवमनादिश्रीकृष्णनारायणं प्रभुम् ॥८०॥
आयुःक्षये परंधामाऽवाप विगतकल्मषः ।
दिव्यनारायणरूपो बभूवाऽयं चतुर्भुजः ॥८१॥
तथैव तु द्विजा यूयं भजतैनं नरायणम् ।
तापीतटे वैष्णवेन यज्ञेन विगतज्वराः ॥८२॥
इत्ययं भगवाँस्तुष्टो हनिष्यत्यपि कल्मषम् ।
एवमुक्तास्तु ते विप्राश्चक्रुर्यज्ञं सुवैष्णवम् ॥८३॥
तपत्याः सत्तटे तत्र चन्दनद्रुमसंकुले ।
सप्तमे दिवसे होमावसाने बालरूपकः ॥८४॥
अनादिश्रीकृष्णनारायणः साक्षात् समागतः ।
प्रसन्नोऽस्मीत्युवाचैतान् वरं वृणुत भूसुराः ॥८५॥
विप्रा विलोक्य मुक्तेशं कोटिसूर्यप्रभास्वरम् ।
नेमुस्तं तुष्टुवुर्वव्रुर्दानं कल्मषनाशनम् ॥८६॥
अन्ते धाम परं देहि दर्शनं चाश्वसारसम् ।
दास्यं देहि सदा चेत्यर्थयित्वा मौनमादधुः ॥८७॥
तथाऽस्त्विति प्राह कृष्णनारायणो हसन् हरिः ।
सस्मार चाश्विनीपुत्रौ वैद्यौ रूपप्रदौ प्रभू ॥८८॥
सूर्यपुत्रावकस्माच्च तत्राऽऽगतौ सुवर्चुलौ ।
सुरूपौ यौवनोपेतौ भूषामुकुटमण्डितौ ॥८९॥

शंखचक्रगदापद्मधारिणौ कौस्तुभान्वितौ ।
श्रीरमासेवितौ कृष्णं नेमतुस्तौ नरायणम् ॥९०॥
ववन्दाते श्रीहरिं च किं कुर्वः शाधि नाविह ।
अनादिश्रीकृष्णनारायणः प्राह कृपाभरः ॥९१॥
विप्रा घोरप्रतिग्रहादिमे कल्मषतां गताः ।
यथा निष्कल्मषाः स्युस्ते कुरुतं वै तथौषधम् ॥९२॥
श्रुत्वैव चाश्विनीबालौ प्रणम्य परमेश्वरम् ।
आहतुर्भगवन् सर्वं कर्तुं चासि स्वयं प्रभुः ॥९३॥
अवतारैः प्रपूज्यस्त्वं वर्तसे परमेश्वरः ।
संकल्पे ते महासृष्टिस्थितिक्षैण्याद्यवस्थितिः ॥९४॥
तथापि कृपया सेवां कारयितुं स्मृतौ च नौ ।
नान्यदत्रौषधं श्रेष्ठं तव पादामृतं विना ॥९५॥
काद्रूप्यं कल्मषाण्येषां लयमेष्यति पज्जलात् ।
इत्युक्त्वा च ततोऽश्विन्या बालौ नैजं कमण्डलुम् ॥९६॥
तापीजलेन संभृत्वा श्रीहरेः पादपंकजे ।
प्रक्षाल्याऽन्यकलशे तद्धृत्वा तत्रौषधेः रसम् ॥९७॥
चिक्षिपतुः स्वल्पमात्रं पाययामासतुर्द्विजान् ।
प्रोक्षयामासतुश्चापि यावत्तावत्तु ते द्विजाः ॥९८॥
पानात् पापविहीनाश्च सञ्जाता भास्वरा द्रुतम् ।
कृष्णवर्णो गतो नाशं स्वर्णवर्णास्तदाऽभवन् ॥९९॥
संप्रोक्षणात्तु काद्रूप्यं नष्टं सर्वं क्षणान्तरे ।
पूर्ववद्रूपवन्तस्ते सञ्जाता ब्रह्मवर्चुलाः ॥१००॥
देववद्दिव्यवदनाः पूर्वतोऽभ्यधिकाः शुभाः ।
इत्येवं हरिणा तेषां पापं प्रज्वालितं क्षणात् ॥१०१॥
तापीतटे क्षणं स्थित्वा तीर्थं दिव्यं व्यधाद्धरिः ।
यत्रैते पाविता विप्रास्तत्तीर्थं परमं शुभम् ॥१०२॥
बभूव ख्यातमश्विनीकुमारतीर्थमुत्तमम् ।
श्रीहरिर्यत्र वै तस्थौ सस्नौ तपतीवारिषु ॥१०३॥
हरितीर्थं च तज्जातं सर्वपापप्रणाशनम् ।
अन्ये देवा दर्शनार्थं तत्रायातास्तथा जले ॥१०४॥
सस्नुस्तत्र च तीर्थानि सञ्जातानि ह्यनेकशः ।
तत्र स्नात्वा जलं पीत्वा मृताऽस्थिक्षेपणं तथा ॥१०५॥
कृत्वा मुक्तिमवाप्येत महापापोऽपि मानवः ।
अथ विप्रा हरेः पूजां कृत्वा पूजां कुमारयोः ॥१०६॥
ववन्दुश्च क्षमां तत्र ययाचिरे मुहुर्मुहुः ।
निष्कल्मषाः स्थापयित्वा त्वश्विनीबालकौ तदा ॥१०७॥
श्रीहरिं संप्रतिष्ठाप्य ययुर्गेहान् हि राधिके ।
इत्येवं फाल्गुने तत्र विप्ररक्षां चकार सः ॥१०८॥
पठनाच्छ्रवणाचास्य पापनाशो ध्रुवं भवेत् ।
तपतीस्नानजं पुण्यं लभेच्छ्रुत्वाऽपि मानवः ॥१०९॥
अश्विनीबालकौ देवा अदृश्यतां ततो गताः ।
श्रीहरिः कुंकुमवापीक्षेत्रं क्षणात् समाययौ ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सुरतायनर्षिकृतोपदेशः, प्रभोः प्राविर्भावोऽश्विनीकुमारयोरागमनं विप्राणां निष्कल्मषीकरणं सन्न्यासस्पष्टता चेत्यादिनिरूपणनामाऽष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके विप्राः स्वस्थालयं गता अपि ।
चमत्कारं दिवारात्रौ चिन्तयन्ति स्म तं प्रभुम् ॥ १ ॥
दर्शनं दुर्लभं यच्च तज्जातं सुलभं यदा ।
सुरतायनयोगेन तावदारभ्य चैव ते ॥ २ ॥
पश्यन्ति परमात्मानं बालकृष्णं दृगन्तिके ।
स्वप्ने पश्यन्ति सततं सुषुप्तौ न निवर्तते ॥ ३ ॥
एकवारं हि दृष्टस्य दिव्या मूर्तिः रमापतेः ।
सततं हृदयेऽगाधे निहिता न निवर्तते ॥ ४ ॥
बहुकालाभ्यासलब्धा दृढा यथा प्रकाशते ।
इयमेव कृपा तस्य विनाऽभ्यासं प्रदर्शनम् ॥ ५ ॥
अथाऽऽयाते पुण्यकाले चातुर्मास्ये तु भूसुराः ।
तापीनीरे तु तत्तीर्थे स्नातुं चाययुरुत्सुकाः ॥ ६ ॥
ते सर्वे मिलिताः श्रीमत्कृष्णनारायणं प्रभुम् ।
सस्मरुः स्वरक्षकं तं महाकल्मषनाशनम् ॥ ७ ॥
सम्मिलित्वा देवशयन्येकादश्यां च भूसुराः ।
प्रचक्रुर्वै नामसंकीर्तनं नारायणस्य ह ॥ ८ ॥
श्रीकृष्णनारायण चान्तरात्मन् हरे परब्रह्म श्रियः पते प्रभो ।
सर्वावतारेश्वर बालकृष्ण गोपालकृष्णात्मज कम्भराजने ॥ ९ ॥
राधेश लक्ष्मीश रमेश पद्मापते प्रभाकान्त च तूलसीपते ।
वृन्दापते पारवतीपते श्रीपते जगत्कान्त च माणिकीपते ॥१०॥
हंसापते मञ्जुलिकापते श्रीदयापते श्रीललितापते पते ।
ऊर्जापते श्रीसगुणापते कस्तुरीपते शान्तिपते जयापते ॥११॥
जय चाक्षरपर पुरुषोत्तम जय मुक्तेश्वर सर्वोत्तम ।
जय परमेश्वर आत्मोत्तम जय साक्षिन्नवतारोत्तम ॥१२॥
जय भगवन् जय आत्माराम जय निर्गुण जय वै निष्काम ।
पाहि सदा तव भक्तजनान् कल्मषनाशक श्रीभगवान् ॥१३॥

एवं ते कीर्तनं चक्रुस्तपत्या दक्षिणे तटे ।
तल्लीनाः सम्बभूवुश्च तालवादित्रनिःस्वनैः ॥१४॥
तावत्तत्र प्रकाशोऽभूत् मध्ये विमानमुत्तमम् ।
तत्र संराजते श्रीमान् बालकृष्णः प्रसेवितः ॥१५॥
षोडशपार्षदैः सर्वे ददृशुस्तं परेश्वरम् ।
सद्रत्ननद्धहारालीराजद्वक्षःस्थलोत्तमम् ॥१६॥
सौवर्णमणिरत्नादिनद्धमुकुटमण्डितम् ।
मकराकारसौवर्णकुण्डलाभ्यां विराजितम् ॥१७॥
प्रान्ते चञ्चत्सूक्ष्मपिङ्गकेशैः कृष्णैः सुशोभितम् ।
विशालभाले वह्न्याभकौंकुमतिलकान्वितम् ॥१८॥
कोटिकामकृताऽऽवासभ्रुकुटिद्वयराजितम् ।
मीनचञ्चलरक्तान्तायतनेत्रविराजितम् ॥१९॥
मन्दहासोज्ज्वलकान्तिपरिध्यक्षरशोभितम् ।
प्रफुल्लतिलसुमनोनासिकाऽभ्यतिशोभितम् ॥२०॥
कृष्णबिन्दूकृतस्थानदक्षगालातिसुन्दरम् ।
तेजःसरत्प्रभाभासिगोलगण्डविराजितम् ॥२१॥
सुवर्णसूक्ष्मसत्तन्तुनिभश्मश्रुसुरेखकम् ।
धनुःकम्मानिकाकाराकृत्यूर्ध्वौष्ठातिकर्षकम् ॥२२॥
मिष्टामृतातिसंभृतरक्ताऽधरमनोहरम् ।
सुसूक्ष्मकृष्णबिन्द्वयाढ्यचिबुकहनूसौभगम् ॥२३॥
विशालभालसंराजद्दीर्घरेखैकसौभगम् ।
शष्कुलीचक्रवद्रम्यकर्णद्वयातिभासुरम् ॥२४॥
सूर्यचन्द्रातिसंशोभिप्रेमशेवधिनेत्रकम् ।
सर्वसौन्दर्यधामश्रीसमाश्रितमुखोत्तमम् ॥२५॥
कोट्यैश्वर्यकृतस्थानभ्रमरद्वयराजितम् ।
कुन्दकलिपयःफेननिभदन्तातिमोहकम् ॥२६॥
विशालप्रान्तहास्याढ्याननकोणहृदंगमम् ।
सूक्ष्मगर्तिकया गण्डे मातृवात्सल्यदर्शकम् ॥२७॥
श्वेतचक्षुर्जन्यतेजोऽभिभूतान्यावलोकनम् ।
शंभुर्यस्य स्थितः कण्ठे शंखः कृकाटिकास्थितः ॥२८॥
कौस्तुभो हृदये यस्य वनमालासहायकृत् ।
कृष्णबिन्दुश्च वै यस्य कण्ठमध्ये प्रभासते ॥२९॥
कण्ठकूपे वायुचक्रं सम्वत्सराश्रितं स्थितम् ।
कण्ठस्य वलये यस्य त्वक्षरं ब्रह्म भासते ॥३०॥
हृदये गुणशून्यो वै हारश्चर्मणि चाम्पकः ।
भ्रमरः श्रीनिवासाख्यो दक्षावर्तोऽस्य राजते ॥३१॥
शार्दूलस्कन्धसदृशदृढस्कन्धौ हरेः शुभौ ।
भोगिभोगसमो पीनौ मृदुलौ सुभुजौ हरेः ॥३२॥
कौमुदीपटसंछन्नावुज्ज्वलौ नेत्र हारकौ ।
कुक्षौ कृष्णपिशंगाभौ स्तबकौ रोमसंकुलौ ॥३३॥
दृष्टौ दर्शकभक्तस्य जन्येते स्नेहभावनाम् ।
स्वर्णवर्णौ भुजौ रम्यौ चम्पकाभे भुजान्तरे ॥३४॥
शंखचक्रगदापद्मचिह्नानि बाहुजानि च ।
प्रकोष्ठयोस्त्रिरेखाश्च करे दक्षे शुभानि च ॥३५॥
मत्स्यत्रिशूलनाराचकेतुस्वस्तिधनूंषि च ।
रेखाचिह्नानि रम्याणि अष्टचक्राणि सन्ति तु ॥३६॥
वज्रं चापि शत्रुनाशकरं विद्यत इत्यपि ।
पंकजाभे करतले विराजेते समुज्ज्वले ॥३७॥
नखा भान्ति यथा चन्द्राः पूर्णिमायां व्यवस्थिताः ।
उदरं त्रिवलिशोभं नाभिर्विज्ञानशेवधिः ॥३८॥
जघनं श्रीप्रतिमाढ्यं लिंगं कामसमाश्रयम् ।
कटिर्नक्षत्रमालेव राजते परितः शुभा ॥३९॥
नितम्बौ प्रोज्ज्वलौ रम्यौ सखीमानसरञ्जनौ ।
सक्थिमूले शुभ्रवर्णे तेजोव्याप्तेऽतिसुन्दरे ॥४०॥
रशना कटिभागे च वर्तते स्वर्णनिर्मिता ।
ऊर्मिका अंगुलिस्थानाः शृंखला भुजबन्धने ॥४१॥
कटके कानके चापि प्रकोष्ठे बाहुभागयोः ।
सक्थ्नोर्मध्येऽक्षरब्रह्मोज्ज्वलं तेजः प्रवर्तते ॥४२॥
वामे सक्थिनि मूलाच्च ह्यधश्चिह्नं तु कैलकम् ।
सक्थ्नश्चोपरि लक्ष्म्याश्च चिह्नं पाण्डुरवर्णकम् ॥४३॥
हस्ततलायतं रम्यं यत्र मुह्यन्ति योगिनः ।
जानू रम्यौ वर्तुलौ च रमणीयौ हरेः शुभौ ॥४४॥
जङ्घे पद्मप्रभे रम्ये रोमावलिसमन्विते ।
कदलीकन्दसंशोभे सक्थिनी शीतले शुभे ॥४५॥
पादौ कम्मानिकासंस्थौ कमलोदरसन्निभौ ।
षोडशादिचिह्नयुक्तौ तथोर्ध्वरेखराजितौ ॥४६॥
शिखरं कल्पवल्ली च चक्रं च यानमित्यपि ।
सौधं वृषभं हस्तीश्च तुरगश्चन्द्रकस्तथा ॥४७॥
गरुडो हंसइत्यादिचिह्नितौ पादपंकजौ ।
स्वर्णरोमावलिराजत्पादोर्ध्वभागशोभितौ ॥४८॥
आजानुबाहुयुगलं पादाङ्गुली प्रलम्बिनी ।
सौम्यमूर्तिस्तथा तेजोव्याप्ता दिव्या ह्यभूच्छुभा ॥४९॥
एतादृशो मन्दहास्यं विमुञ्चन् भगवान् हरिः ।
अवाततार विप्राणां मध्ये विमानतो हरिः ॥५०॥
विप्रा नेमुः पादयोश्च तुष्टुवुः परमेश्वरम् ।
प्रसन्नमानसाः सर्वे बभूवुर्दर्शनादति ॥५१॥

सुरतायनसंज्ञोऽपि महर्षिः श्रीहरिं तदा ।
आगत्य चन्दनवृक्षात् पूजयामास भावतः ॥५२॥
अहो भाग्यं पुनर्नस्तु यद्धरेर्दर्शनं गृहे ।
इत्युक्त्वाऽऽलुण्ठनं चक्रे पादयोः श्रीहरेस्तदा ॥५३॥
पुपूजुर्भावपूर्णाश्च विप्राः सर्वेऽपि वै मुहुः ।
ते सर्वे कृतकार्याश्च तीर्थविधानवेदिनः ॥५४॥
प्रार्थयामासुरत्यर्थं श्रीहरिं सन्निधौ स्थिताः ।
दर्शनं कुंकुमवापीक्षेत्रस्य कारय प्रभो ॥५५॥
इति स्तुतो हरिः प्राहाऽश्विनीकुमारतीर्थके ।
पुनः स्नात्वा मया साकं विमानमधिरुह्य च ॥५६॥
समागच्छन्तु मे क्षेत्रं भवन्तो मम सेवकाः ।
ततस्ते हरिणा सार्धं स्नात्वाऽश्विनीकुमारके ॥५७॥
सुरतायनमुख्याश्च निषेदुस्तद्विमानके ।
हरिः सर्वान् सह नीत्वा पथा वैहायसेन तु ॥५८॥
पञ्चसाहस्रविप्राद्यैराययौ दिनमात्रतः ।
अखातं तु समुल्लंघ्य शत्रुञ्जितानदीमुखम् ॥५९॥
तत्र तान् स्नापयित्वा च प्रययौ गोपनाथकम् ।
तत्तीर्थं कारयित्वा च मूलस्वर्णपुरीं ययौ ॥६०॥
तत्तीर्थं तु विनिर्वर्त्य सोमनाथं ययौ ततः ।
भद्राब्धिसंगमे स्नात्वा चमत्कारपुरं ययुः ॥६१॥
देविकायां कृततीर्था वनस्थलीनिवासिनः ।
प्रार्थयाञ्चक्रुरत्यर्थं पावयितुं वनस्थलीम् ॥६२॥
अनादिश्रीकृष्णनारायणः स्वीकृत्य चार्थनाम् ।
चान्द्रे तु श्रावणे कृष्णे पञ्चम्यां रविवासरे ॥६३॥
वनस्थलीं ययौ कृष्णनारायणः प्रभुः स्वयम् ।
भक्तान् सर्वान् पावयित्वा भोजयित्वा प्रसादकम् ॥६४॥
ददौ तेभ्यश्चोपदेशं भवपारकरं परम् ।
शृण्वन्तु मम भक्ता ये सर्वार्पणं विना मयि ॥६५॥
पापपुण्यादिभोगानामन्तो नायाति वै क्वचित् ।
अहं नारायणस्तेषां सर्वार्पणविधायिनाम् ॥६६॥
स्वयं करोमि नैर्मल्यं नयामि मम धाम तान् ।
नरो नारी बालकश्च बाला वा षण्ढ इत्यपि ॥६७॥
ममाऽनुग्रहलेशेन भवन्ति मोक्षिणो द्रुतम् ।
तस्माद् भजन्तु मां प्रीत्या कुर्वन्त्वत्र सुमन्दिरम् ॥६८॥
मत्प्रतिमां स्थापयन्तु भजन्तां सततं च माम् ।
अहं चोद्धारकृच्चास्मि भवतां शरणार्थिनाम् ॥६९॥
इत्युक्त्वाऽऽदिश्य भूमिं च प्रदत्वा चरणामृतम् ।
नाशयित्वा भवरोगान् रोगांश्च रोगिणां तथा ॥७०॥
वनस्थलीं पावयित्वा नरान् नारीः शुभाशिषा ।
योजयित्वा स्वभक्तौ च दत्वा चरणवारि च ॥७१॥
दर्शनं स्पर्शनं दत्वा पादसेवां प्रगृह्य च ।
कृतां पूजां परिगृह्य समारुह्य विमानके ॥७२॥
क्षणमात्रेण च ययौ शुभं सौराष्ट्रपत्तनम् ।
यत्राऽयं वर्तते श्रीमल्लक्ष्मीनारायणः प्रभुः ॥७३॥
स्वयं स्वराट् महाशोभे प्रासादे सुविशालके ।
राजते दुग्धशुक्लाभो युवा हास्यभरो हरिः ॥७४॥
सौराष्ट्रीयप्रजानां च प्रतिमारूपवान् प्रभुः ।
भजनीयः पूजनीयो योगिनां नरयोषिताम् ॥७५॥
दिव्यसुवर्णकलशैः शोभमाने महालये ।
वर्तमानां निजां मूर्तिं संस्पृश्याऽऽभाष्य च प्रियाम् ॥७६॥
लक्ष्मीं जगतां जननीं धर्मं भक्तिं विलोक्य च ।
सूर्यं शेषप्रशायं च दत्तात्रेयं शिवं विधिम् ॥७७॥
हनुदासं गणदासं समाश्लिष्य ततो हरिः ।
ययौ वैहायसा शुभ्रविमानेन क्षणोत्तरम् ॥७८॥
कुंकुमवापिकाक्षेत्रं चाश्वपट्टसरोवरम् ।
उद्याने चान्दने तत्र विमानं स्थाप्य माधवः ॥७९॥
लोमशस्याश्रमं रम्यं विमानस्थानदर्शयत् ।
अश्वटाकसलिले स्नापयित्वा च तैर्थिकान् ॥८०॥
लोमशस्य गुरोः रम्यं कारयित्वा च दर्शनम् ।
कोट्यर्बुदाब्जकन्यानां कार्ष्णीनां चापि दर्शनम् ॥८१॥
कारयित्वा ययौ कृष्णो नैजं प्रासादमुत्तमम् ।
दर्शयामास जननीं कम्भराश्रीं महासतीम् ॥८२॥
तथा स्वपितरं देवं श्रीमद्गोपालकृष्णकम् ।
सप्तभौमे निज्यं हस्त्यासनं प्रादर्शयत् प्रभुः ॥८३॥
आतिथ्यं कृतवाँस्तेषां भोजनं वासनं तथा ।
अथाऽऽतिथ्योत्तरं सर्वे विशश्रमुश्च ते तदा ॥८४॥
विशाले तद्विमाने तु निशां निन्युः समुत्सुकाः ।
प्रातः स्नानविधिं कृत्वा ववन्दुः परमेश्वरम् ॥८५॥
कन्याशतं ददुस्ते तु श्रीकृष्णपरमात्मने ।
लोमशस्याश्रमे ताश्च रक्षयामास केशवः ॥८६॥
ततो याता मानिताश्च तैर्थिकास्ते निजं गृहम् ।
विमानेन समं श्रीमन्नारायणेन वै सह ॥८७॥
प्रापय्य तान् हरिर्देशान् षष्ठ्यां पुनः समाययौ ।
कुंकुमवापिकाक्षेत्रं दिव्यं चाक्षरभूपदम् ॥८८॥
इत्येवं दर्शनं दत्वा कारयित्वा च तीर्थकम् ।
विमानेन निजान् देशान् प्रापयित्वा कृपामयः ॥८९॥

भगवानकरोद् राधे भक्तमानसपूर्णताम् ।
कृपासाध्यः स्वयं तस्मादनादिपुरुषोत्तमः ॥९०॥
न व्रतैर्न च वा दानैर्न वा हवनकर्मभिः ।
किन्तु साध्यप्रेमभक्त्या नामभक्त्या समर्पणैः ॥९१॥
भजतां सेवकानां तु सेवायां वर्तते स्वयम् ।
राधिके च यथा वर्ते सेवायां तव सर्वदा ॥९२॥
गोलोके सेविका नान्या त्वादृशी मेऽस्ति भामिनी ।
सेविकायास्तु सेवायां कान्तो भवति दासवत् ॥९३॥
तथा श्रीभगवाँश्चापि सेवकानां कृते सदा ।
भूत्वाऽकस्मात् सेवकश्च रक्षपरः प्रजायते ॥९४॥
सर्वपूजाऽधिका पूजा सेवा तन्वा विधीयते ।
ततः सेवा मानसी च द्रव्यजा तु ततः परा ॥९५॥
सर्वात्मनाऽर्पणं सेवा ह्यतुल्या राधिके यतः ।
प्रसन्नताकरी बोध्या चानुकूल्येन वर्तनम् ॥९६॥
अनादिश्रीकृष्णनारायणस्तुष्यति दास्यतः ।
परंधाम ददात्येव चान्ते शाश्वतसौख्यदम् ॥९७॥
धनं धान्यं सुतं कान्तां पतिं कुटुम्बवर्धनम् ।
आरोग्यं सम्पदो लक्ष्मीं सुतां गां महिषीं गजान् ॥९८॥
अश्वान् दासीः प्रजा दासान् पौत्रान् स्वर्गान् ददाति च ।
इत्येतत् कथितो राधे चमत्कारो हरेस्तव ॥९९॥
पठनाच्छ्रवणाच्चास्य श्रावणात्स्मरणादपि ।
भुक्तिर्मुक्तिर्भवेदन्ते भगवच्चरणं लभेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सुरतायनादिपञ्चसाहस्रविप्राणां कुंकुमवापीतीर्थागमनं शुभोपदेशश्चेतिनिरूपणनामा नवाधिकसप्ततितमोऽध्यायः ॥ ७९ ॥

**श्रीकृष्ण उवाच—**

श्रूयतां च त्वया राधे चमत्कारो हरेः परः ।
तारिता दुःखतो भक्ता भीमासरित्तटे पुरा ॥ १ ॥
दक्षिणे पौंड्रकसंज्ञे पत्तने क्षत्रियर्षभः ।
नाम्ना बलेशवर्माऽभूद् राजा खण्डधरापतिः ॥ २ ॥
वैष्णवः परमो भक्तो योगक्रियाविशारदः ।
कपिलस्याऽभवच्छिष्यः सांख्यज्ञानविवेकवान् ॥ ३ ॥
भीमातटे नातिदूरे पर्वते कपिलाश्रमे ।
सांख्यानां योगिनां योगं समागमं करोति सः ॥ ४ ॥
यदाश्रमे पुरा देवः कपिलस्तीर्थयोगकृत् ।
दशवर्षाणि तत्रैव तस्थौ रम्ये वने शुभे ॥ ५ ॥
अद्रिभागेऽतिशुभगे शान्तिदे निर्जनेऽमले ।
तदा बलेशवर्माऽसौ संसेव्य कपिलं मुनिम् ॥ ६ ॥
प्राप्तवान् सांख्ययोगौ च परमैश्वर्यसम्पदः ।
सिद्धीश्चाऽदृश्यभावं च बहुरूपभवादिकम् ॥ ७ ॥
कपिलस्तु तथैश्वर्यं दत्वा ययौ स्थलान्तरम् ।
राजा नित्यं समायाति तदाश्रमं विलोकितुम् ॥ ८ ॥
क्षणं ध्यात्वा पदं तच्च गुरुं संस्मृत्य वै मुहुः ।
प्रपूज्य पीठमेतच्च ततो योगिजनान् परान् ॥ ९ ॥
साधून् वने स्थिताँश्चापि नत्वा याति निजं गृहम् ।
एवं करोति नित्यं स सांख्ययोगपरायणः ॥१०॥
अथैकदा व्रतं कर्तुं राजा श्रीकपिलाश्रमे ।
समाययौ सपत्नीकः कार्तिके न्यवसद् बहिः ॥११॥
वृक्षच्छायां समाश्रित्य भूशयानः फलाशनः ।
ब्रह्मचर्यपरः कृच्छ्रव्रतस्थिता च तत्प्रिया ॥१२॥
आतिथ्यधर्मनिरतश्चान्नसत्रप्रबन्धनः ।
नित्यं होमपरश्चापि सहस्रदीनभोजनः ॥१३॥
दानधर्मपरश्चातुर्मास्यान्तव्रततत्परः ।
बहवः साधवस्तत्र सिद्धाः साध्यश्च योगिनः ॥१४॥
यात्रिणो वनवासाश्च समायान्ति सदाव्रते ।
अन्नार्थिभ्यो ददात्यन्नं वस्त्रार्थिभ्यस्तथाऽम्बरम् ॥१५॥
पात्रार्थिभ्यश्च पात्राणि धनार्थिभ्यो धनानि च ।
यद्यदिष्टं भवेद् यस्याऽर्थिनस्तस्मै तदिष्टकम् ॥१६॥
ददात्येव बलेशः स दक्षिणां प्रददाति च ।
कार्तिके धृतवान् श्रेष्ठं व्रतं यो यत्प्रयाचते ॥१७॥
तत्तस्मै सम्प्रदेयं वै नकारो वाच्य एव न ।
राज्ञः पुत्रोऽभवत्तत्र द्वादशाब्दोऽतिकोमलः ॥१८॥
राज्ञी शीलवती नाम्ना पातिव्रत्यं प्ररक्षति ।
पुत्रश्च पुण्ड्रको नाम्ना ब्रह्मभक्तिं करोति हि ॥१९॥
त्रयस्ते लोकसाधूनां सेवापरा भवन्ति वै ।
तारकायननामा च महर्षिर्वैष्णवो महान् ॥२०॥
तत्रैव वसति योगी योगध्यानपरायणः ।
वैहायसगतिर्दिव्यः कामरूपधरो यतिः ॥२१॥
अष्टसिद्ध्याश्रयश्चास्ते सर्वकामान्यवर्जितः ।
स मुनिर्ध्यानयोगेन ज्ञात्वा कुंकुमवापिकाम् ॥२२॥
साक्षादनादिश्रीकृष्णनारायणसमाश्रिताम् ।
लोमशस्याश्रमं गत्वा कृत्वा श्रीकृष्णदर्शनम् ॥२३॥
गृहीत्वा च मनुं मोक्षप्रदं श्रीपतिमाधवात् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥२४॥

जजाप नित्यदा नैजाश्रमे स्थित्वान्तरे स्थले ।
नित्यं व्योम्ना प्रगे याति चाश्वपट्टसरोवरम् ॥२५॥
कृत्वा हरेर्दर्शनं च पुनः प्रयाति चाश्रमम् ।
तारकायनसंज्ञोऽयं महर्षिर्व्योमतो भुवम् ॥२६॥
अवातरत् तदा राजा दर्शनार्थे ययौ द्रुतम् ।
पप्रच्छ विनयी भूत्वा प्रणतार्तिहरं मुनिम् ॥२७॥
गम्यते क्व ऋषे ! नित्यं प्रातः कल्याणकृद् यदि ।
जिज्ञासितं तु मे वाच्यं यदि रोधो न विद्यते ॥२८॥
साधूनां संगतिः स्वर्गप्रदा मोक्षप्रदा तथा ।
दुःखनाशकारी चापद्विनाशिनी मता सदा ॥२९॥
योगिनामीश्वराणां च साधूनां च सतामपि ।
विहारो यत्र तत्राऽस्ति नारायणो हि गोचरः ॥३०॥
साधूनां चरणः पूज्यो जलं पेयं पदामृतम् ।
भोज्यं प्रासादिकं तेषां ग्राह्यं वचो मुखोद्भवम् ॥३१॥
सतां सेवा हरेः सेवा सतां संगो हरेर्हि सः ।
सतां देहो हरेर्देहः सन्तो वै हरिमूर्तयः ॥३२॥
सन्तो ध्येयाः सदा ध्याने सन्तो धार्याः सदा हृदि ।
सन्तः सेव्याः सर्वदानैः सत्सु हरिर्विराजते ॥३३॥
सतां दृष्टिर्हरेर्दृष्टिः सतां स्पर्शो हरेर्हि सः ।
सतामाश्लेषणं कृष्णाश्लेषणं पापनाशकम् ॥३४॥
सतां पादरजो धार्यं मस्तके हृदि चानने ।
सतां पादजलं धार्यं मुखे शिरसि विग्रहे ॥३५॥
सतां प्रसन्नता प्राप्या देहगेहसुतादिभिः ।
धनसम्पत्प्रदानैश्च स्वात्मार्पणेन सर्वथा ॥३६॥
अनित्यः सर्वथा देहो रक्षितोऽपि विनश्यति ।
तेन सेवा सदा कार्या ग्राह्या प्रसन्नता सताम् ॥३७॥
यत्रेन्द्रिये च विषये रुचिः स्वस्याऽतिवेगिता ।
तत्रेन्द्रिये हि कर्तव्या सेवा तूभयतुष्टये ॥३८॥
साधूनां हृदये साक्षात्परमात्मा विराजते ।
शुभास्तस्मात् क्रियाः सर्वाः सतामिन्द्रियदेहजाः ॥३९॥
सन्तो दिव्याः क्रिया दिव्या दिव्यो देहः सतां सदा ।
दिव्यश्चेन्द्रियवर्गश्च सतां दिव्या हि धातवः ॥४०॥
सतां विचारो दिव्यश्च बुद्धिर्दिव्या सतां सदा ।
सतां स्वप्नं च शयनं रमणं दिव्यमेव तत् ॥४१॥
सत्सु मायाकृतं कार्यं विद्यते नैव सर्वथा ।
सत्सु पुण्यं तथा पापं परमेश्वरमाश्रितम् ॥४२॥
लेपहीनं सदा दिव्यं शाश्वतानन्ददायकम् ।
पुण्यानां खनयः सन्तः पापलेशो न यत्र वै ॥४३॥
तादृशस्त्वं मुने दिव्यो वर्तसे तारकायन ।
यथा विष्णुस्तथा त्वं वै तारकोऽसि भवार्णवात् ॥४४॥
वद ते संगमास्तेभ्यो नश्च भाग्यं हि नो महत् ।
इत्युक्त्वा नृपतिस्तस्थौ प्रतिक्षँस्तद्वचेर्वचः ॥४५॥
तं तारकायनः प्राह शृणु राजन् बलेश्वर ।
यो लोके प्रथितश्चास्ति भगवान् पुरुषोत्तमः ॥४६॥
परब्रह्म च वेदेऽस्ति सर्वावतारधृक् प्रभुः ।
परधामस्थितो यः सः सौराष्ट्रे कम्भरागृहे ॥४७॥
अश्वपट्टसरःक्षेत्रे कुंकुमवापिकाभुवि ।
श्रीमद्गोपालबालः स लोमशाश्रमे विराजते ॥४८॥
यत्र ब्रह्मप्रियाः कोट्यर्बुदाब्जपद्मसंख्यकाः ।
सर्वाश्च शक्तयस्तीर्थकोटयः सन्ति देहिनः ॥४९॥
मानवे पादपे तार्णे तैर्यञ्चे भौतिकेऽपि च ।
सर्गे ब्रह्मप्रिया यत्र तिष्ठन्ति ब्रह्मलालसाः ॥५०॥
मुक्ता धामगताश्चापि बहुधामनिवासिनः ।
प्रच्छन्ना भिन्नवर्ष्माणो यत्र तिष्ठन्ति योगिनः ॥५१॥
तं प्रभुं परमात्मानं द्रष्टुं गच्छामि नित्यशः ।
प्रातः सम्पूज्य तं देवं पीत्वा तच्चरणाम्बुजम् ॥५२॥
ततस्तीर्थानि कृत्वैव समागच्छामि चासनम् ।
इत्युक्तो नृपतिः प्राह कदा तद्दर्शनं मम ॥५३॥
भविष्यतीति मे ब्रह्मन् वद साधो कृपां कुरु ।
मुनिः प्राह गृहाणैनं मन्त्रं जपपरो भव ॥५४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
इत्येनं राधिके मन्त्रं दत्वा च तौलसीं स्रजम् ॥५५॥
महावैष्णवसेव्यं च दत्वा हरेः पदामृतम् ।
ऋषिर्ययौ निजावासं राजा राज्ञी सुतस्ततः ॥५६॥
जेपुस्तं परमं मन्त्रं ध्याने बभूवुरास्थिताः ।
सस्मरुस्तमनादिश्रीकृष्णस्वामिनरायणम् ॥५७॥
अथ श्रीबालकृष्णस्तु परीक्षार्थं हि भूभृतः ।
आजगामाऽतिथिरूपो मध्याह्ने भोजनोत्तरम् ॥५८॥
सप्तमेऽह्नि कृष्णवर्णो लोहवलयधारकः ।
रक्ताक्षः कौपीनमात्रवसनो जंगली यथा ॥५९॥
प्राह राजा तु तं वीक्ष्य समायाहि वनेचर ।
गृहाण भोजनं वारि ततो याहि यथासुखम् ॥६०॥
जंगमी प्राह नोच्छिष्टं मया वै भुज्यते क्वचित् ।
नान्यपक्वं च भुंजेऽहं कथं ददासि भोजनम् ॥६१॥
अहं वै जंगली चास्मि भोजनं तामसं मम ।
अन्यप्राणिसमुत्थं तु नाऽहं भुंजे कदाचन ॥६२॥

यदि सत्यप्रतिज्ञोऽसि नकारो नोच्यते त्वया ।
देहि मे भोजनं राजन् प्रियं यच्छान्तिदं भवेत् ॥६३॥
नृपः प्राह यथेष्टं ते दातुं शक्तोऽस्मि भोजनम् ।
वद स्वेष्टं ददाम्यत्र नाऽदेयं मेऽत्र विद्यते ॥६४॥
सात्त्विकं राजसं वाऽपि तामसं तेऽत्र रोचते ।
अन्योऽर्थं नेष्यते चेद्वै स्वोऽर्थं वद ददामि ते ॥६५॥
यच्छक्तं तद् ददाम्येव कार्तिकेयं व्रतं मम ।
दातव्यमेव लभ्यं चेद् वद वनिन् ददामि ते ॥६६॥
वनी प्राह शृणु राजन् मांसादोऽस्मि वने वसन् ।
कार्तिकेऽपि मया त्वेतद्व्रतं पालितमेव ह ॥६७॥
राज्ञः पुत्रस्य मांसं वै मया भक्ष्यमयाचितम् ।
राजा यदि स्वयं दद्याद्धृदयस्यैव नेतरत् ॥६८॥
इत्येवं मे व्रतं त्वास्ते रक्तं पेयं च हृद्गतम् ।
नैव वारि प्रपेयं च व्रतं मे तामसं यतः ॥६९॥
नाऽहं याचे नृप त्वत्तो व्रतं मया प्रकाशितम् ।
याचना नैव कर्तव्या व्रतभंगकरी यतः ॥७०॥
इत्युक्त्वा स ततः स्थानाद् वनं प्रति विलोक्य च ।
गन्तुं पदक्रमान् चक्रे यथा याञ्चाकरो न वै ॥७१॥
राज्ञी प्राह विलोक्यैव वनिन् तिष्ठ स्थिरो भव ।
पादप्रक्षालनं कुर्वे चातिथेः परमात्मनः ॥७२॥
क्षणान्तरे ददात्येषः राजा त्वदिष्टभोजनम् ।
आसनं स्वीकुरु त्वेतत् काम्बलं तिष्ठ शान्तितः ॥७३॥
वनी प्राह व्रतं मेऽस्ति स्थेयं वै कार्तिके सदा ।
कुमारीकन्यकासक्थि विवस्त्रं चेत्तु लभ्यते ॥७४॥
तस्या ऊरौ मया चासीतव्यं न त्वन्यथा क्वचित् ।
राज्ञी पुत्रीं तदा प्राह भव पुत्रि शुभासनम् ॥७५॥
कन्याः कृष्णा तथा भीमा तुंगभद्रा च नामतः ।
तिस्र आसँश्च तद्राज्ञस्तिस्रस्तत्र ह्युपस्थिताः ॥७६॥
कृष्णा वस्त्रं परित्यज्य ददौ सक्थि यथासुखम् ।
निषसाद वनी तत्र ध्यानमग्नो बभूव ह ॥७७॥
पुत्रः प्राह पितरं तु राजन् शीघ्रं हि हृन्मम ।
भित्त्वा देहि परेशायाऽतिथये मुक्तये भवेत् ॥७८॥
क्षणाद् राजा तु खड्गेन द्वेधा स्कन्धात् कटिं प्रति ।
विभिद्य पुत्रहृदयं ददौ रक्तं हि तत्क्षणे ॥७९॥
तावत् कन्या द्वितीयाऽपि भीमा वस्त्रं विना निजम् ।
सक्थि ददौ वनिनेऽत्र वनी मांसं निधाय च ॥८०॥
बुभुजे च पपौ रक्तं तावच्च तुङ्गभद्रिका ।
विवस्त्रा वनिनो हस्तमूरौ संस्कृत्य वै मुहुः ॥८१॥
मुखं संस्कृत्य सक्थ्ना च पादसंवाहनं मुहुः ।
देहसम्मर्दनं चापि चक्रुस्तद्वनिनस्तदा ॥८२॥
अथोत्थाय प्रगन्तुं च वनी यावत् समीहते ।
तावद्राजा दक्षिणार्थं ददाति वचनं शुभम् ॥८३॥
वनी प्राह व्रतं मेऽस्ति यन्मांसं भक्षितं भवेत् ।
तन्माता दक्षिणायां वै ग्राह्या नान्यत् कदाचन ॥८४॥
वनिनीत्युक्तवत्येव राज्ञी शीघ्रमुपस्थिता ।
एषाऽहं तव दास्यास्मि दक्षिणां स्वीकुरु प्रभो ॥८५॥
वनी तां त्वम्बरशून्यां कृत्वा वृक्षतलेऽभवत् ।
रमणं कृतवान् व्योम्नि पृथ्वीं चैवाऽस्पृशन् क्षणम् ॥८६॥
आकाशे तां धृतां दृष्ट्वा राजा व्यतर्कयत् तदा ।
अहो मे परमं भाग्यं पुत्रस्य योषितस्तथा ॥८७॥
कन्यकानां महाभाग्यं हर्यर्थे योजिता वयम् ।
वनी वा स्याद् वानप्रस्थो वनेचरोऽवनेचरः ॥८८॥
अन्तरात्मा हरिस्तृप्तोऽनित्यदेहादितो मम ।
अनित्यं नाशमायाति परार्थे सफलं यदि ॥८९॥
किमस्मात्परमं भाग्यं यैर्हि तृप्यति माधवः ।
धन्योऽहं कृतकृत्योऽहं सर्वं मे सफलं कृतम् ॥९०॥
आगत्य वनिना चात्र व्रतार्थे भौतिकं मम ।
नकारस्याऽत्र वै स्थानं न जातं मम चानने ॥९१॥
मत्पत्न्या वा सुतानां वा पुत्रस्येति जयो मम ।
धन्यास्ताः पुत्रिकाश्चापि धन्यः पुत्रोऽपि मे प्रियः ॥९२॥
धन्या राज्ञी च मे त्वत्र व्रते नं नहि जगृहुः ।
तारितोऽहं कुटुम्बेन सत्यं कुटुम्बकं मम ॥९३॥
अतिथ्यर्थं चोपयोगे स्वीकारितं स्वयं शुभम् ।
धर्मार्थकाममोक्षा मे व्रतेनाऽद्य करे स्थिताः ॥९४॥
जितं जगन्मया त्वद्य चातिथेः कृपया खलु ।
एवं धन्यं मन्यमानः प्रसन्नमानसोऽभवत् ॥९५॥
तावद् राज्ञीं प्रभुक्त्वैव वनी वृक्षादयः स्थितः ।
वनित्वं प्रविहायैव श्रीलक्ष्मीराधिकायुतः ॥९६॥
द्विभुजोऽथ महालक्ष्म्या युतोऽदृश्यत वै तदा ।
महाविष्णुधृतच्छत्रो विष्णुधृतान्नपात्रकः ॥९७॥
भोजनं संग्रसन् तत्राऽदृश्यत परेश्वरः ।
कोटिकन्दर्पशोभाढ्यः कोटिसूर्यसमोज्ज्वलः ॥९८॥
अनन्तमुक्तसंस्तुत्यो देवपितृप्रवन्दितः ।
ईश्वरैरवतारैश्च पूजितो भूषणैर्भृतः ॥९९॥
कोटिब्रह्मप्रियासेव्यः परमाक्षरवन्दितः ।
दिव्यव्योमपरे धाम्नि राजमानो विलोकितः ॥१००॥

दिव्यविमानमध्यस्थगजासनविराजितः ।
दिव्यः षोडशवर्षाढ्यो हसन् प्रेम प्रदर्शयन् ॥१०१॥
वीक्षते परितो भक्तान् राजानं तत्प्रियां सतीम् ।
कन्यास्तिस्रोऽतिभावेन मोहयन् मानसं मुहुः ॥१०२॥
श्रीहरेः सन्निधौ तत्र राजपुत्रः स्थितोऽभवत् ।
दिव्यो दिव्यविभूषाढ्यो यथापूर्वाकृतिः शुभः ॥१०३॥
पुण्ड्रकः प्रहसन् पार्श्वाद्धरेः स्वपितरं प्रति ।
समाजगाम सहसा सुप्तोत्थित इवाऽमलः ॥१०४॥
देवा मुक्ता ईश्वराश्च चक्रुः कुसुमवर्षणम् ।
राजा तुष्टाव भक्त्या श्रीकृष्णनारायणं प्रभुम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बलेश्वर-राज्ञः कपिलभगवद्योगेन परमभागवतत्वं, तारकायन-महर्षियोगेन कार्तिकव्रते परीक्षार्थं श्रीकृष्णनारायणस्य वनेचररूपेणाऽऽगमनं, राज्ञः पुत्रपुत्रीस्त्रीकुटुम्बार्पणेन प्रभोर्दर्शनं चेत्यादिनिरूपणनामाऽशीतितमोऽध्यायः ॥ ८० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके राजा यथा तुष्टाव माधवम् ।
बलेश्वरोऽतिभावेन श्रीपतिं परमेश्वरम् ॥ १ ॥
त्वं देवदेवोऽसि सदा परात्म-
स्त्वं चाक्षरे धाम्नि परे स्थितोऽसि ।
त्वं वै परब्रह्म परेश्वरोऽसि
मुक्तैकवन्द्योऽक्षरवन्द्य एव ॥ २ ॥
सर्वोऽवतारै इतिपूजनीयश्चाराधनीयोऽसि यतोऽवतारी ।
सर्वैरपीशैरभिवन्दनीयो व्यूहैः समाराधनतत्परैश्च ॥ ३ ॥
विष्णुस्वरूपैरपि पूजनीयो महेशवेधःप्रभृतिप्रथैश्च ।
सुरैस्तथा पितृभिरर्चनीयो दिशां प्रपालैर्मनुजैश्च सिद्धैः ॥ ४ ॥
दैत्यैस्तथा दानवपुंगवैश्चाऽसुरैश्च रक्षोभिरभिष्टुतश्च ।
नागैश्चरैश्चाचरप्राणिभिश्च ध्येयोऽसि गुप्तोऽसि हृदि स्थितश्च ॥ ५ ॥
त्वं वामनोऽभूर्नरसिंहकोऽभूर्नारायणोऽभूर्वृषपुत्रकोऽभूः ।
त्वं विष्णुरूपोऽपि च हंसरूपस्त्वं मत्स्यरूपः कमठस्तथाऽभूः ॥ ६ ॥
त्वं क्रोडरूपः कपिलस्वरूपस्त्वं दत्तरूपः परशुध्नकोऽभूः ।
त्वं यज्ञरूपो रमणस्वरूपः कुमाररूपोऽश्वमुखस्वरूपः ॥ ७ ॥
देवर्षिरूपोऽपि नृपस्वरूपो व्यासस्वरूपोऽपि च राधिकेशः ।
ज्ञानस्वरूपश्च हरिस्वरूपः स्वामिस्वरूपोऽसि पतिस्वरूपः ॥ ८ ॥
प्रच्छन्नरूपोऽसि बटुस्वरूपो
गार्हस्थ्यरूपोऽसि वनस्थरूपः ।
साधुस्वरूपोऽसि सतीस्वरूपो
विप्रस्वरूपोऽसि च बाहुजोऽसि ॥ ९ ॥
त्वं वैश्यरूपोऽसि च सेवकोऽसि पतिव्रताधर्मसुरूपकोऽसि ।
त्वं भक्तरक्षाकरवत्सलोऽसि त्वं मोहिनीरूपधरोऽसि नाथ ॥१०॥
त्वं कोटिरूपोऽसि गुणाश्रयोऽसि
दिव्याभिराशीर्भिरभिप्रतोऽसि ।
त्वं दिव्यदेहोऽसि परीक्षकोऽसि
शुद्धारकर्ताऽसि च नः प्रपाहि ॥११॥
त्वं याचकस्त्वं सुतभक्षकश्च
त्वं रक्षको जीवद ईक्ष्यतेऽत्र ।
त्वं भोग्यभोक्ता च विहारकर्ता
त्वं लेपशून्यो भगवानिहाऽसि ॥१२॥
कथंकृतं किंकृतमत्र कृष्णनारायणेन द्युमता त्वया वै ।
मयाऽर्पितं तत्सफलं त्वयीह मयि प्रसन्नो भव विश्वमूर्ते ॥१३॥
धन्या सती शीलवती प्रिया ते
तिस्रोऽपि धन्याश्च कुमारिकास्ते ।
धन्यः कुमारस्तव पौण्ड्रकश्च
धन्यो बलेशस्तव किंकरोऽहम् ॥१४॥
धन्यं स्वरूपं वनवासिनस्ते
धन्या रतिर्व्योमगतस्य ते च ।
धन्यं सुतौरौ तव भोजनं च
धन्यः कुमारस्तव भोज्यरूपः ॥१५॥
धन्यौ गुरुस्तारकयोगिवर्यो
धन्या च भीमातटभूमिकेयम् ।
धन्या क्रिया दिव्यतमा त्वदीया
धन्यं च धैर्यं तव सेवकानाम् ॥१६॥
समर्पणं धन्यतमं सुतस्य
व्रतं च धन्यं कुमुदस्यमासः ।
अनादिलक्ष्मीपतिकृष्णनारा-
यणोऽसि धन्योऽत्र च कम्भराजः ॥१७॥
गोपालबालोऽसि च बालकृष्णः प्रभापतिः पारवतीपतिश्च ।
राधापतिर्माणिकिकापतिश्च श्रियः पतिर्भूपतिरीश्वरेशः ॥१८॥
हंसापतिर्मञ्जुपतिः सुरेशो
मायापतिर्वै सगुणापतिश्च ।
रूपं तवेदं बहुकोटिसूर्यैः
समं निरीक्ष्यं सुखतो न यद्वै ॥१९॥

कोट्यर्कभास्वद्बहुमुक्तयुक्तं तथाऽवतारैर्बहुभिः समेतम् ।
ईशेश्वरैः पितृसुरादिभिश्च दैत्यैश्च नागैः परिवारितं च ॥२०॥
लक्ष्म्या श्रिया राधिकया युतं च युतं तथा चक्रपविष्णुना च।
तथा महालक्ष्मिकया युतं च तथा महाविष्णुसुपूजितं च ॥२१॥
नेत्रे न मे वीक्षितुमीश्वरेऽत्र ततोऽपतेजः कुरु दर्शनार्हम् ।
प्रसीद जीवेश तव स्वरूपं बालस्वरूपं सुभगं विधेहि ॥२२॥
नमो नमस्ते भवतारणाय नमोऽस्तु ते ब्रह्मपरायणाय ।
श्रीबालकृष्णाय नरायणाय भूयोऽपि भूयोऽपि नमो नमस्ते ॥२३॥
अनन्तरूपाय विसंख्यवक्त्रे ह्यसंख्यनेत्राय नमो नमस्ते ।
असंख्यनाम्ने परमेश्वराय कोट्यब्जकन्यापतये नमोऽस्तु ॥२४॥
सर्वं कृतं तेऽर्पितमेव कृष्ण यथाप्रसन्नोऽसि कुरु तथा त्वम् ।
प्राप्तं मयाऽऽप्तव्यममुत्र चात्र वरार्थकं शिष्यत एवनाऽद्य ॥२५॥
इत्येवं राधिके स्तुत्वा विरराम नृपः क्षणम् ।
अनादिश्रीकृष्णनारायणः प्राह भुवः पतिम् ॥२६॥
अयं यो दृश्यते राजन् महाविष्णुः स्वयं भवान् ।
महालक्ष्मीश्च या त्वास्ते सेयं शीलवती तव ॥२७॥
श्रीरियं तव भीमाऽस्ति लक्ष्मीः कृष्णाऽस्ति ते सुता ।
राधिका तुंगभद्रा ते पुत्रीत्रयं निबोध वै ॥२८॥
अयं विष्णुस्तव पुत्रः पौंड्रकः स्वयमेव ह ।
तारकोऽयं गुरुस्तेऽस्मि राजन् मोक्षप्रदः प्रभुः ॥२९॥
दिव्यैर्नेत्रैः प्रदत्तैश्च यूयं पश्यत मामिह ।
सर्वरूपैः समायुक्तं नैजरूपाणि यान्यपि ॥३०॥
ममावताररूपाणि प्रपश्यत ततो हृदि ।
पुत्रोऽयं तव राजेन्द्र न मृतो मायया मम ॥३१॥
दर्शितं च परीक्षार्थे सर्वार्पणविधौ तव ।
व्रतेऽत्र कार्तिके नेति वक्तव्यं नाऽर्थिने क्वचित् ॥३२॥
गृहाण राजन् पुत्रं त्वं यथारूपं यथाऽसुकम् ।
भार्या भुक्ता मया नैव परीक्षार्थं प्रदर्शितम् ॥३३॥
कन्या नग्नाः कृता नैव परीक्षार्थं तु तत्कृतम् ।
प्रसन्नोऽस्मि च सञ्जातः प्रसन्नतम इत्यपि ॥३४॥
यूयं ममाऽवताराः स्थ ज्ञानं तद्वै भविष्यति ।
सर्वदा चाद्यतः सर्वे भवताऽत्र सुदेवताः ॥३५॥
उद्धारार्थं मया लोके कलांशांशादिभिस्त्विह ।
अवताराः संधृता वः कुटुम्बरूपिणो भुवि ॥३६॥
रूपद्वयं कुरुताऽत्र मत्प्रतापेन षट् प्रषट् ।
षड्रूपाण्यत्र तिष्ठन्तु प्रषड्रूपाणि मत्समम् ॥३७॥
आयान्तु कुंकुमवापीक्षेत्रे तिष्ठन्तु तत्र च ।
अश्वपट्टसरस्तीर्थे तिष्ठन्तु कन्यकाः शुभाः ॥३८॥

इत्युक्त्वा दिव्यरूपं स्वं तिरोऽभावयदीशपः ।
बालकृष्णस्वरूपोऽभूद् दर्शनीयो विशेषतः ॥३९॥
लावण्यपरिपूर्णश्च सर्वसौन्दर्यभाजनः ।
आकर्षकश्च नेत्राणां दृष्टेः स्थैर्यस्य भूमिका ॥४०॥
चम्पकाभः कानकाभो वह्निशुद्धांऽशुकाऽन्वितः ।
सद्रत्नाऽञ्चितभूषश्च कोटिकन्दर्पसुन्दरः ॥४१॥
नवीनबलपूराढ्यो धातुपूर्णाऽङ्गसुदृढः ।
सर्वांगशोभनश्चित्ताकर्षकश्च मनोहरः ॥४२॥
सौम्यहास्यलसत्कान्तिः प्रेमधाराप्रदायकः ।
स्नेहशेवधिसम्प्राप्यः करुणावरुणालयः ॥४३॥
एवं बालस्वरूपोऽभूत् पद्मकिञ्जल्ककोमलः ।
पुण्डरीकायतनेत्रद्वयेनाऽऽकर्षयन् मुहुः ॥४४॥
जगाद वरदानार्थं सर्वं कुटुम्बमेव तत् ।
राजाऽभूत् पूर्णकामश्च कुटुम्बं तुष्टमेव च ॥४५॥
साक्षात् प्राप्तिः प्रभोर्जाता कोऽन्यो वरोऽत्र शिष्यते ।
विचार्येत्थं तु ते प्राहुर्यथेष्टं नो नियोजय ॥४६॥
हरिर्हर्षस्तदा प्राह तिस्रः कन्या निजाश्रिताः ।
श्रीश्च कन्या तु या भीमानाम्नी भीमाऽऽपगाऽस्तु सा ॥४७॥
मम तीर्थस्वरूपाऽत्र भीमायां वासमेत्विह ।
लक्ष्मीर्या कन्यका कृष्णानाम्नी कृष्णाऽऽपगाऽस्तु सा ॥४८॥
मम तीर्थस्वरूपाऽत्र कृष्णायां वासमेत्विह ।
राधा तु कन्यका तुंगभद्राख्या सरिदस्तु सा ॥४९॥
मम तीर्थस्वरूपाऽत्र तुंगभद्रास्वरूपिणी ।
एवं कन्यात्रयं तत्र नदीष्वेवाऽभवत् स्थितम् ॥५०॥
लोकोद्धारविधानार्थं कृपया व्यदधत्तथा ।
प्रभुः स्वयं तीर्थकर्ता स्वयं ताभिः सहाऽवसत् ॥५१॥
भीमातटे हरिस्तत्र भीमाकृष्णो विराजते ।
कृष्णातटे हरिः कृष्णानिवासाख्यो विराजते ॥५२॥
तुंगभद्रातटे तुंगभद्रानाथो विराजते ।
एवं तीर्थत्रयं रम्यं कृतवान् भगवान् स्वयम् ॥५३॥
ततः प्राह च राजानं त्वं तु महाबलेश्वरः ।
महाविष्णुस्वरूपो वै शंकरेण समं सदा ॥५४॥
वस राजन् तीर्थरूपो मम तीर्थफलप्रदः ।
महालक्ष्म्या सहितस्त्वं शीलवत्या तु योषिता ॥५५॥
एवं तीर्थं महालक्ष्मीयुतं महाबलेश्वरम् ।
कृतं कृष्णेन वासं वै दत्वा ताभ्यां तदा शुभम् ॥५६॥
राजा राज्ञी स्थितवन्तौ महाबलेश्वरे सदा ।
अथ विष्णुं पुण्ड्रकं तु सुतं प्राह हरिः स्वयम् ॥५७॥

त्वं सदा दिव्यरूपेण पुण्ड्रकं नगरं कुरु ।
विश्वस्थलस्वरूपश्च सदा पुण्ड्रपुरे वस ॥५८॥
आश्रितानां जनानां च मुक्तिदो भव सर्वदा ।
एवं विष्णुं पुण्ड्रपुरे स्थातुमाज्ञाप्य तत्परम् ॥५९॥
तत्तत्तीर्थानि संस्थाप्य तेषु तेषु प्रविश्य च ।
विशेषतः स्वयं कृष्णनारायणोऽखिलेश्वरः ॥६०॥
प्रषड्रूपाणि दिव्यानि यानि धृतानि चाज्ञया ।
नीत्वा दिव्ये विमाने स्वे ततस्तं तारकं गुरुम् ॥६१॥
आहूय तारकं पुण्यं दिव्याश्रमं समार्पयत् ।
त्वया सतारके पुण्ये स्थातव्यं तीर्थरूपिणि ॥६२॥
मम मन्त्रः प्रदातव्यः शरणागतदेहिने ।
इत्युक्त्वा स्थापयामास तारके तारकायनम् ॥६३॥
द्वितीयं चापि तद्रूपं नीत्वा दिव्ये विमानके ।
दत्वाऽऽशिषोऽपि सर्वेभ्यः प्रसन्नो भगवान् हरिः ॥६४॥
कृत्वा तीर्थानि सप्तैव मूर्धन्यानि भुवस्तले ।
स्नात्वा तीर्थेषु तत्रापि तत्तस्थलेषु माधवः ॥६५॥
तीर्थोत्तमोत्तमान्येव व्यधात् त्रैलोक्यनायकः ।
दिव्यानि तानि रूपाणि सप्तसंख्यानि वै यदा ॥६६॥
विमाने श्रीहरिर्दिव्ये दधार च तदा सुराः ।
ब्रह्मविष्णुमहेशाद्याः ऋषयः पितरस्तथा ॥६७॥
साध्याः सिद्धा वसवश्च ईश्वरा मानवोत्तमाः ।
आययुस्तत्र सहसा जयशब्दान् व्यधुर्मुहुः ॥६८॥
हर्षनादान् प्रचक्रुश्च वर्धयामासुरक्षतैः ।
पुष्पवृष्टिं प्रचक्रुश्च सिषिचुश्चान्दनं जलम् ॥६९॥
लाजाभिर्वर्धयामासुर्हर्षयामासुरीडनैः ।
प्रणेमुर्मानयामासुः सत्कारं चक्रुरात्मभिः ॥७०॥
अर्पितैर्विविधैर्द्रव्यैर्धन्यवादान् ददुस्तथा ।
प्राहुः श्रीपरमात्मानं नाथ ! भक्तस्य ते क्वचित् ॥७१॥
नाऽदेयं विद्यते तेऽत्र निदर्शनं बलेश्वरः ।
नैतादृशी परीक्षा तु कर्तव्याऽन्यत्र कुत्रचित् ॥७२॥
अपक्वानां व्रतहन्त्री भवेत् क्वचिद्धि मायया ।
अमायिकस्य ते कृष्ण ! परीक्षणं ह्यमायिकम् ॥७३॥
मायालुब्धेन दुर्धर्षे मायाहीनेन पार्यते ।
इत्युक्त्वा पुष्पहाराद्यैः पूजयित्वा परेश्वरम् ॥७४॥
सप्त ताँस्तु महामुक्तान् समभ्यर्च्य पुनस्ततः ।
अदृश्यतां ययुर्देवाः सर्वेऽन्ये देवसार्थकाः ॥७५॥
अनादिश्रीकृष्णनारायणो विमानमम्बरे ।
प्रेरयामास तच्छीघ्रं चाययावाश्वसारसम् ॥७६॥
कुंकुमवापिकाक्षेत्रे लोमशाश्रमसन्निधौ ।
कोटिसूर्याभतेजोवत् मूर्त्यष्टकसमुज्ज्वलम् ॥७७॥
अवाततार च सायं भ्रमित्वा दशयोजनम् ।
कदम्बानां वनमध्ये उद्याने सुमनोहरे ॥७८॥
अवतेरुश्च ते पृथ्व्यां नरा नार्यस्तदाऽभितः ।
दर्शनार्थं दुद्रुवुश्च ददृशुः परमेश्वरम् ॥७९॥
सप्तदिव्यमहाभागवतभक्तसमन्वितम् ।
विमानं चाऽदृश्यभावं प्राप्तं क्षणाज्जना अपि ॥८०॥
जयशब्दाँस्तदा चक्रुः प्रणेमुश्चाष्टकं शुभम् ।
हरिर्निनाय चाऽऽवासे मातरं पितरं प्रति ॥८१॥
दर्शयित्वा ततः श्रीमल्लोमशं प्रणिनाय च ।
अश्वपट्टसरः पश्चात्तीर्थानि प्रणिनाय च ॥८२॥
कुटुम्बाय ददौ सौधं सदावासाय चोत्तमम् ।
कुंकुमवापिकाक्षेत्रे तारकायाऽऽश्रमं ददौ ॥८३॥
सत्कारं भोजनं पानमुपस्कारं च वस्तु च ।
अपेक्षितं ददौ सर्वं दिव्यं श्रीपुरुषोत्तमः ॥८४॥
हरिः प्राह च राजानं व्रतं ते कार्तिकस्य वै ।
सर्वं सम्पूर्णतां प्राप्तं मम योगेन सर्वथा ॥८५॥
यज्ञो दानं चान्नसत्रं जलं वस्त्रं धनादिकम् ।
जपो होमोऽतिथेः सेवा मासं फलाशनादिकम् ॥८६॥
सर्वं मम कृपालेशात् तव सम्पूर्णतां गतम् ।
कर्तव्यं नास्ति ते राजन्नवशिष्टं तथेतरत् ॥८७॥
अत्र सेवापरो भूत्वा मय्यर्पणं समाचर ।
कार्तिकानां च कोटीनां व्रतं ते पूर्णतां गतम् ॥८८॥
एवमुक्तवते तस्मै श्रीकृष्णाय परात्मने ।
राज्ञा कन्यात्रयं तत्राऽर्पितं कान्ताय शार्ङ्गिणे ॥८९॥
आश्रमे लोमशमुनेः प्रेषयामास कन्यकाः ।
श्रीहरिस्तारकं बलेश्वरं शीलवतीं सतीम् ॥९०॥
पुण्ड्रकं च सुतं यत्र कारयामास चाप्लवम् ।
अश्वपट्टसरस्येव तानि तीर्थानि चाऽभवन् ॥९१॥
तत्तन्नाम्ना प्रसिद्धानि दिव्यानि तारकाणि वै ।
ततः स्वयं विशश्राम निजालयेऽतिकोमले ॥९२॥
रात्रौ निद्रां चकाराऽथ प्रातश्चोर्जाष्टमीप्रगे ।
श्रीहरेर्जन्मदिवसे पूजां चकार तारकः ॥९३॥
महाबलेश्वरश्चापि कन्यात्रयं च कन्यकाः ।
ऋषयो मुनयः सिद्धा मानवा देवतादयः ॥९४॥
ईश्वरा देविकाः सर्वाः पुपूजुः परमेश्वरम् ।
दशमे वत्सरारम्भदिवसे मण्डपे हरिः ॥९५॥

निषसाद महादिव्ये गजासने परः पुमान् ।
ईशपाला लोकपाला राज्यपालाः समाययुः ॥९६॥
पुपूजुश्चातिप्रेम्णैव लोमशोऽर्चनमाचरत् ।
आरात्रिकं चकाराथोपदा ददुः सुरादयः ॥९७॥
भोजयामास च पिता माता सत्कारमाचरत् ।
देवदेवीकुटुम्बानां बहुमानधनादिभिः ॥९८॥
ततश्चक्रे परिहारं सायं चक्रे महोत्सवम् ।
नर्तनं गायनं विद्याधर्योऽन्याः कुशलस्त्रियः ॥९९॥
ताभ्यो ददौ पारितोषिकादिकं च पिता स्वयम् ।
हरिस्त्वाशीर्वादसौख्यं ददौ सुभोजनादिकम् ॥१००॥
एवमुत्सवमुत्कृष्टं निर्वर्त्य दशवार्षिकम् ।
भोजयामास विप्राद्यान् कुंकुमवापिकास्थितान् ॥१०१॥
ददौ दानानि रत्नानां गवां चार्थिप्रतुष्टये ।
एवं महोत्सवं कृत्वा ययुर्देवादयो दिवम् ॥१०२॥
अन्ये लोकान्निजान् सर्वे ययुर्गोपालकृष्णकः ।
विशश्राम सुखं कृष्णनारायणोऽपि मन्दिरे ॥१०३॥
लोमशः कन्यकायुक्तः पूजां प्राप्याऽऽश्रमं ययौ ।
महीमाना ययुर्नैजं देशं शंसन्त उत्सवम् ॥१०४॥
अथ स्वामिकृष्णनारायणसेवार्थमुत्सुकौ ।
हेमन्तभगवन्तौ द्वौ दिव्यौ श्रीहरिपार्षदौ ॥१०५॥
सेवायां दासवन्नित्यं स्थितौ सर्वात्मना प्रभोः ।
राजोपचारकैः सिषेवाते कृष्णनरायणम् ॥१०६॥
पठनाच्छ्रवणाद् राधेऽनादिकृष्णस्य चेष्टितम् ।
भुक्तिर्मुक्तिर्भवेद् ध्रौव्या प्रभाकान्तप्रतापतः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बलेश्वरराज्ञः सकुटुम्बस्य श्रीहरिस्तुतिः, द्वेधा दिव्यदेहादिप्राप्तिश्चेत्यादिनिरूपणनामैकाशीतितमोऽध्यायः ॥ ८१ ॥

श्रीकृष्ण उवाच—

शृणु राधे प्रवक्ष्यामि प्रत्यक्षपुरुषोत्तमम् ।
विश्वामित्रेण सन्दिष्टं जयध्वजाय वै क्रतौ ॥ १ ॥
चन्द्रवंशोऽभवद्राजा सहस्रार्जुनसंज्ञकः ।
सहस्रबाहुर्द्युतिमान् धनुर्वेदविदां वरः ॥ २ ॥
तस्य सुताः पञ्चशतान्यासन् सर्वे महारथाः ।
कृतास्त्रा बलिनः शूरा धर्मात्मानः सुरार्चकाः ॥ ३ ॥
केचिद् रुद्रं पूजयन्ति केचित् सूर्यं परे क्रतुम् ।
अन्ये वह्निं पूजयन्ति विष्णुमन्ये सतीं परे ॥ ४ ॥
अजं चान्ये गणेशं च परेऽर्चयन्ति चन्द्रकम् ।
जयध्वजः कनिष्ठश्च सर्वाऽवरज एव यः ॥ ५ ॥
अनादिश्रीकृष्णनारायणस्वामिपरोऽभवत् ।
नित्यं स मतिमान् देवं नारायणहरिं प्रभुम् ॥ ६ ॥
तिष्ठते शरणं विष्णुं दैवतं ब्रह्मतः परम् ।
तमूचुरितरे पुत्राः शृणु चानुज धार्मिकम् ॥ ७ ॥
पिताऽस्माकं वह्निदेवं शिवं दत्तमुनिं तथा ।
अभजत् तान् भजस्वाऽत्र मा भजस्व नरायणम् ॥ ८ ॥
जयध्वजोऽब्रवीत्तॉस्तु मम धर्मः परो मतः ।
विष्णोरंशेन संभूता राजानोऽत्र महीतले ॥ ९ ॥
राज्यपालयिता तेषां भगवान्पुरुषोत्तमः ।
पूजनीयोऽजितो विष्णुः पालको जगतां हरिः ॥१०॥
श्रीहरिर्हि भवद्भिस्तु पूजनीयोऽपि सर्वथा ।
सृजेद् ब्रह्मा रजोमूर्तिः संहरेत् तामसो हरः ॥११॥
सत्त्वात्मा भगवान् विष्णुः सम्पोषयति सर्वदा ।
तस्मान्महीपतीनान्तु राज्यं पालयतामयम् ॥१२॥
आराध्यो भगवान् विष्णुर्नारायणपरेश्वरः ।
सत्त्वेन मुच्यते जन्तुः सत्त्वात्मा भगवान् हरिः ॥१३॥
सत्त्वधर्मः सदा श्रेष्ठो योगिभिश्च विनिश्चितः ।
सर्वशुद्धौ सत्त्वशुद्धिर्वैशारद्यं विशाद्यते ॥१४॥
विष्णौ सा सात्त्विकी शुद्धिर्वैशारद्यं हि शाश्वतम् ।
शंभौ वह्नौ तथा सूर्ये तमोमात्रा विशेषिता ॥१५॥
क्रतौ सत्यां गणेशेऽजे रजोऽधिकं च चन्द्रके ।
सत्त्वं देवेश्वरे विष्णौ नारायणे विशिष्यते ॥१६॥
स पूज्यः सर्वदा युष्मद्भिश्चापि भ्रातरः ! सदा ।
विष्णुः सम्पोषकः शास्ता राजधर्मोऽपि तत्र हि ॥१७॥
स्वधर्मो मुक्तये युक्तो नान्यो राज्ञां प्रमुक्तये ।
नारायणीं महाशक्तिं नृपाणां दधतां सदा ॥१८॥
अनादिश्रीकृष्णनारायणाराधनमुत्तमम् ।
श्रुत्वैवं त्वग्रजाः प्राहुः पितुर्धर्मः परो वृषः ॥१९॥
पित्रा त्वाराधितो वह्निः शंभुर्दत्तः प्रभुस्तथा ।
त एवाऽऽराधने ग्राह्याः पितृधर्मेण मोक्षणम् ॥२०॥
जयध्वजश्च तान् प्राह युक्तमुक्तं ममाऽग्रजैः ।
पितृधर्मो रक्षणीयो यथापेक्षो च चाऽधिकः ॥२१॥
परन्त्वत्र क्रतौ कार्ये सर्वेज्यसमवायके ।
कः पूज्यश्च समाराध्य इत्यत्रोत्तरमच्युतः ॥२२॥
प्रमाणवृषयो ह्यत्र यद् ब्रूयुस्ते तथैव तत् ।
अथाऽऽहूता ऋषयश्च वशिष्ठाद्याः प्रजावृषाः ॥२३॥

पृष्ठा धर्मविवादे तु देवाराधनरूपिणि ।
क्रतौ वा चान्यदा कश्चाराध्यो देवो वदन्तु नः ॥२४॥
तानब्रुवँस्ते ऋषयो वशिष्ठाद्या यथार्थतः ।
या यस्याऽभिमता पुंसः सा हि तस्यैव देवता ॥२५॥
किन्तु कार्यविशेषेण पूज्यते चेष्टदाऽपि च ।
देवता बहुलाः सन्ति ब्रह्मणः प्रतिमा हि ताः ॥२६॥
भिन्नार्थिनश्च विद्यन्ते यथार्थो देवता तथा ।
कार्यवशात् कालवशान्नियोगाच्छासनात्तथा ॥२७॥
राज्ञा कार्यवशात् क्वापि किंकरः समुपास्यते ।
किंकरः किंकरं चाप्युपास्ते कार्यवशादपि ॥२८॥
श्रेष्ठाः कार्यवशाच्चापि कनिष्ठान् समुपासते ।
भिन्नास्तु जातयः सन्ति देहसंस्थानयोगतः ॥२९॥
यत्कार्यं जायते यस्मात् तत्तदर्थमुपास्यते ।
श्रेष्ठमिष्टफलाद्यर्थं खाद्यं सस्यान्युपासते ॥३०॥
रसप्राप्त्यर्थमेवाथ पृथ्वीं जलं ह्युपासते ।
रसानां पक्वतार्थं च सूर्यं चन्द्रं ह्युपासते ॥३१॥
नृपाणां दैवतं विष्णुस्तथैव च पुरन्दरः ।
विप्राणामग्निरादित्यो विष्णुब्रह्मशिवाः सुराः ॥३२॥
देवानां दैवतं विष्णुर्दानवानां हरः सदा ।
गन्धर्वाणां च यक्षाणां दैवतं सोम उच्यते ॥३३॥
विद्याधराणां वाग्देवी सिद्धानां भगवान् हरिः ।
रक्षसां शंकरो देवः किन्नराणां तु पार्वती ॥३४॥
ऋषीणां दैवतं ब्रह्मा शिवः पितृगणाः सुराः ।
रविरग्निश्च विश्वे च देवास्तथा जनार्दनः ॥३५॥
स्त्रीणां च दैवतं लक्ष्मीसमा रतिः पतिव्रता ।
पतिः परेश्वरः शंभुः सौभाग्यश्रीरपीति च ॥३६॥
गृहस्थानां यथापेक्षं देवा देव्यश्च दैवतम् ।
परब्रह्म स्वयं देवो यतीनां ब्रह्मचारिणाम् ॥३७॥
साधूनां तु क्षमा देवी दैवतं शीलमित्यपि ।
बालानां जनकौ दैवं पशूनां पालकः सुरः ॥३८॥
गणानां शंकरो दैवं भक्तानां परमेश्वरः ।
ईश्वराणां वासुदेवो वृक्षाणां दैवतं जलम् ॥३९॥
सर्वेषां दैवतं चान्तर्यामी श्रीपरमेश्वरः ।
रोगिणामौषधं दैवं चौराणां दण्ड इत्यपि ॥४०॥
एवं जडं चेतनं वा दैवं स्वेष्टं भवत्यपि ।
सर्वत्र वर्तमानः श्रीहरिः सर्वस्य दैवतम् ॥४१॥
अतो जयध्वजो नूनं विष्णवाराधनमर्हति ।
हरौ रुद्रस्य विष्णोश्च तादात्म्यं ब्रह्मणोऽपि च ॥४२॥
बुध्वा हरिः सदा पूज्यः सर्वेश्वरेश्वरेश्वरः ।
तत्र सर्वेऽवताराश्च वासुदेवादयस्तथा ॥४३॥
महाविष्णुप्रभृतयो वैराजा अंशरूपिणः ।
आवेशा वा कलाश्चापि विभूतयः सुरादयः ॥४४॥
समन्वयं प्रगच्छन्ति श्रीहरौ परमात्मनि ।
देवा देव्यो गुरुः सन्तो विप्रा गावः पतिव्रताः ॥४५॥
इत्युक्त्वा ऋषयः सर्वे क्रतुं तस्य हि चक्रिरे ।
वैष्णवः परमो यज्ञः सप्ताहकृतसत्क्रियः ॥४६॥
यत्रेश्वराः समस्ताश्च ऋषयो देवतास्तथा ।
समस्ताः स्वर्गनिलया ग्रहमानवभूसुराः ॥४७॥
बुभुजुर्बहुपक्वान्नपायसान्नानि सर्वथा ।
तृप्तिं प्रापुः परां सोमामृतभोजनपानकैः ॥४८॥
वह्नयो मरुतः सर्वे तत्र यज्ञेऽतिभावतः ।
बुभुजुर्दत्तहव्यादि त्रैलोक्यं तृप्तिमावहत् ॥४९॥
बुभुजे दिव्यमूर्तिश्च साक्षाद् वह्नौ समुत्थितः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥५०॥
एवं यज्ञे सुनिष्पन्ने दक्षिणादानकर्मणि ।
शेषे च हवने चापि सम्पन्नेऽवभृथाप्लवे ॥५१॥
भोजनं चक्रिरे सर्वे पंक्तिशो भूसुरादयः ।
तावत्तत्र समायातो विदेहो नाम राक्षसः ॥५२॥
दंष्ट्राकरालो दीप्ताक्षः शूलभृन्नादयन् दिशः ।
तं दृष्ट्वा दुद्रुवुर्मर्त्या भयेनाऽऽरण्यकं प्रति ॥५३॥
अथाऽर्जुनस्य सत्पुत्राः सर्वे यत्ता महाबलाः ।
युयुधुर्दानवं शक्तिगिरिकूटाऽसिमुद्गरैः ॥५४॥
प्राजापत्यं वारुणं च रौद्रं वायव्यमस्त्रकम् ।
कौबेरमैन्द्रमाग्नेयं चिक्षिपुस्तत्र भूमिपाः ॥५५॥
दानवः शूलमादाय सूर्याभं परितो भ्रमन् ।
भ्रामयन् भञ्जयामास तान्यस्त्राणि समन्ततः ॥५६॥
शूलस्थवह्निना तान्याकर्षयामास सर्वथा ।
ततो भूपा गदाभिस्तं ताडयामासुरुल्बणाः ॥५७॥
स्पृष्टमात्रा गदाः सर्वा भग्ना लोष्टाद्रिवर्ष्मणि ।
न दानवं चालयितुं शेकुर्गदाभिरीश्वराः ॥५८॥
ततस्ते भयमापन्ना दुद्रुवुर्वीक्ष्य पौरुषम् ।
भग्नोत्साहाः समभवन् दृष्ट्वा तस्याऽतिपौरुषम् ॥५९॥
अथ पञ्चशतानां तु कुमाराणां पलायनम् ।
वीक्ष्य सस्मार च जयध्वजो नारायणं हरिम् ॥६०॥
अनादिश्रीकृष्णनारायणस्वामिपुमुत्तमम् ।
ध्यात्वा क्षणं जजापैनं रक्ष रक्ष पुमुत्तम ॥६१॥

शरणागतरक्ष त्वं समायाहि परेश्वर ।
एवं वै स्मर्यमाणः स भगवान् श्रीहरिः स्वयम् ॥६२॥
तूर्णं तत्राययौ चक्रशंखपद्मगदायुधः ।
विष्णुर्जयिष्णुर्लोकादिश्चाप्रमेयो निरामयः ॥६३॥
भक्तत्राता श्रीहरिर्यः पूर्वपूरुष उत्तमः ।
ददौ जयध्वजायैव चक्रं स्वस्य सुदर्शनम् ॥६४॥
जग्राह श्रीहरिं नत्वा राजा हस्ते सुदर्शनम् ।
प्राहिणोत्तु विदेहाय राक्षसे स्कन्धयोस्तदा ॥६५॥
तूर्णं तन्मस्तकं स्कन्धात् पातयामास भूतले ।
राक्षसो विहतस्तत्र शैलतुल्यशरीरवान् ॥६६॥
इति ज्ञात्वा ऋषिर्विश्वामित्रो द्रष्टुं समाययौ ।
भ्रातरश्च प्रसन्नास्तं प्रशशंसुर्जयध्वजम् ॥६७॥
विश्वामित्राय मनये ददुश्चोत्तममासनम् ।
निषसाद मुनिस्तत्र कुशलं पृष्टवांस्ततः ॥६८॥
जयध्वजो मुनिं प्राह प्रसादाद् भवतोऽसुरः ।
निपातितोऽत्र चक्रेण विदेहो दानवो महान् ॥६९॥
त्वद्वाक्यान्नित्यदा चाऽहमभजं श्रीनरायणम् ।
न्यपतं शरणं तस्य प्रसादस्तेन मे कृतः ॥७०॥
यक्ष्यामि राक्षसहत्यापापनाशार्थमित्यतः ।
कथं केन विधानेन सम्पूज्यो हरिरीश्वरः ॥७१॥
कोऽयं नारायणः पूज्यः किम्प्रभावः क्रताविह ।
सर्वमेतत् समाचक्ष्व प्रसादयामि तं प्रभुम् ॥७२॥
जयध्वजस्य वचनं श्रुत्वा मुनिर्जगाद तम् ।
परमेशस्य भक्ताऽयं प्रपन्नं च जयध्वजम् ॥७३॥
यतः प्रवृत्तिर्भूतानां यस्मिन् सर्वं यतो जगत् ।
तमनादिं कृष्णनारायणं यज परेश्वरम् ॥७४॥
यमक्षरात्परतरात्परं प्राहुर्गुहाश्रयम् ।
आनन्दं परमं व्योम परे धाम्नि स्थितं प्रभुम् ॥७५॥
परात्परः परब्रह्म परनारायणात्परः ।
अक्षराधिपतिर्मुक्तिप्रदो मुक्तपतिर्हि सः ॥७६॥
अवतारसहस्राणां हेतुर्यः पुरुषोत्तमः ।
चतुर्व्यूहधरश्चापि चाऽव्यूहश्च निरञ्जनः ॥७७॥
परमात्मा परंधाम परंव्योम परंपदम् ।
त्रिपादमक्षरंब्रह्म यस्याऽऽहुर्ब्रह्मवादिनः ॥७८॥
वासुदेवेश्वरो योगिसिद्धः श्रीपुरुषोत्तमः ।
यस्यांऽशसंभवा ईशा ब्रह्मविष्णुमहेश्वराः ॥७९॥
वैराजश्च महाविष्णुर्भूमा कालो यदंशजाः ।
प्रधानस्य पतिर्मायापतिर्यः पुरुषोऽपि च ॥८०॥
महापूरुष इत्येषो यस्यांऽशो विद्यते तथा ।
सर्वेषां च भगवतां यः परो भगवान् स्वयम् ॥८१॥
निष्कामिन्या प्रपत्त्या स चाराध्यः पुरुषोत्तमः ।
यज्ञे तं तु पुना राजन् प्रसादय परेश्वरम् ॥८२॥
इत्युक्त्वा विररामाऽसौ विश्वामित्रो महामुनिः ।
राज्ञा क्रतुः समारब्धस्तत्र नारायणं प्रभुम् ॥८३॥
अनादिश्रीकृष्णदेवं विश्वामित्रः सभूसुरः ।
याजयामास सर्वेशं परमेशं परात्परम् ॥८४॥
यज्ञे समाप्तिमापन्ने तत्र साक्षात् स्वयं हरिः ।
आविरासीत् स भगवान् पुनः पुनर्हविर्ग्रसन् ॥८५॥
वरं वृणु क्षितेर्नाथ यत्ते मनसि वर्तते ।
इत्येवं च हरिः प्राह राजोवाच पदं तव ॥८६॥
शाश्वतं परमं धामं दिव्यं नय दयाधर ।
हरिः प्राह समीचीनं चाऽर्थितं ते तथाऽस्तु वै ॥८७॥
इत्युक्त्वाऽदृश्यतां यातस्तावत्तत्र चतुष्टयम् ।
तापसानां समायातं भिक्षां देहीति वादि च ॥८८॥
राजा भिक्षां ददौ तेभ्यो भोजनं पायसोद्भवम् ।
जगृहुस्ते च बुभुजुः राजा स दक्षिणां ददौ ॥८९॥
कृष्णवर्णास्तु ते रूक्षा भिक्षवो रोमशास्तदा ।
कामरूपधराश्चासन् वनेचराः कुरूपिणः ॥९०॥
भुक्त्वा जलं पपुश्चाथ निषेदुर्वृक्षमाश्रिताः ।
यथा मूढा हि चत्वारः शान्ताः शान्तघना इव ॥९१॥
यज्ञकार्ये सुनिर्वृत्तेऽवभृथस्नानहेतवे ।
नर्मदायां ययुः सर्वे चत्वारोऽपि ययुः सह ॥९२॥
स्नाताः सर्वेऽपि ऋषयो देवा भक्ताश्च वैष्णवाः ।
महीमाना मानवाश्च विप्राः सत्यश्च साधवः ॥९३॥
निम्नभागे तु चत्वारः स्नातास्ते कृष्णवर्णकाः ।
स्नानपुण्यप्रतापेन जातास्ते श्वेतवर्णकाः ॥९४॥
सूर्यचन्द्रसमाभाश्च महेन्द्रसमरूपिणः ।
विष्णुतुल्यसुवर्ष्माणो दिव्याः स्वर्गसुरा इव ॥९५॥
तान् दृष्ट्वाऽवभृथस्नाताः पप्रच्छुस्तान् कुलं प्रति ।
ते प्राहुः स्वस्वनामानि श्रीशैलः प्रथमो ह्ययम् ॥९६॥
नीलगिरिर्द्वितीयोऽयम् एलाद्रिश्च तृतीयकः ।
द्रोणाचलश्चतुर्थोऽयं वयं मेरुकुलोद्भवाः ॥९७॥
कामरूपधराः शैलाः स्मोऽत्र स्नातुं समिच्छवः ।
पापक्षालनकामाश्च वैष्णवाः स्मः स्थिराद्रयः ॥९८॥
अस्मासु हिंसकाः सर्वेऽरण्येषु च गुहासु च ।
कुर्वन्ति यानि पापानि तैर्थिका अपि वासिनः ॥९९॥

तेषां पापानि दत्वा नः शुद्धास्ते वै प्रयान्ति हि ।
तैः पापैः कृष्णवर्णाः स्मो जाताः स्नानेन चार्जुनाः ॥१००॥
अत्राऽनादिकृष्णनारायणः श्रीभगवान् स्वयम् ।
आययौ यज्ञभागार्थे स्नानार्थे चापि तेन तु ॥१०१॥
वैष्णवानां प्रसादेन पापं नष्टं समस्तकम् ।
अथ शैला गमिष्यामो निजावासान् नमोऽस्तु वः ॥१०२॥
यत्र श्रीभगवान् साक्षात् कृष्णनारायणः प्रभुः ।
तस्य भक्ता जले सन्तुस्तीर्थे चैतद्धि नार्मदम् ॥१०३॥
जयध्वजश्च तान् प्राह करिष्येऽतिथिसत्क्रियाम् ।
मम गृहेऽत्र वासं वै प्रकुर्वन्तु नगोत्तमाः ॥१०४॥
इत्युक्त्वा राधिके शैलान् स्वर्णवर्णसमान् नृपः ।
अवभृथान्ते निलयं निनाय बहुभावतः ॥१०५॥
अन्ये सर्वे महीमाना भुक्त्वा सम्प्राप्य पूजनम् ।
ययुर्नैजान् गृहान् लोकान् विशश्राम जयध्वजः ॥१०६॥
प्रजा भुक्त्वाऽनाथदीनाः किंकरा दासदासिकाः ।
तुतुषुश्चातिभोज्येन कीटाः पिपीलिकादयः ॥१०७॥
एनं संश्रृणुयाद्भक्त्या पाठयेच्च पठेच्च वा ।
भुक्तिर्मुक्तिर्भवेत्तस्य नारायणकृपाबलात् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जयध्वजस्य राज्ञो विश्वामित्रोपदिष्टपरब्रह्मोपासनाबलाद् यज्ञे श्रीहरिप्राप्तिः, विदेहराक्षसविनाशः, चतुःपर्वतानामवभृथस्नानादि चैत्यादिनिरूपणनामा द्वयशीतितमोऽध्यायः ॥ ८२ ॥

**श्रीकृष्ण उवाच—**

एवं राधे नृपतिः स जयध्वजः सुवैष्णवः ।
द्रोणैलानीलश्रीशैलान् चतुरोऽपि निजालये ॥ १ ॥
सुसत्कृत्यासनाद्यैः संचकार स्वागतं परम् ।
ददौ भोज्यानि रम्याणि पेयान्येभ्यो विधान्यपि ॥ २ ॥
भोग्यानि चोपकरणप्रासादिकजलानि च ।
श्रीहरेः पूजनवस्तून्यपि ददौ जयध्वजः ॥ ३ ॥
पर्वतास्ते कृतकृत्याः पप्रच्छुस्तं जयध्वजम् ।
कथं पापानि नश्यन्ति तीर्यते प्रकृतिः कथम् ॥ ४ ॥
कथं पाप्यभियोगेऽपि निर्लेपत्वं भवेत् सदा ।
केषां समागमान्मुक्तिः कस्माच्छान्तिश्च शाश्वती ॥ ५ ॥
कः स्वार्थः कः परार्थश्च का प्रवृत्तिः शुभावहा ।
जडता दिव्यता वापि प्राप्यते केन कर्मणा ॥ ६ ॥
भवानास्ते महाराज सर्वज्ञ इव भक्तराट् ।
अनादिश्रीकृष्णनारायणानुग्रहलेशतः ॥ ७ ॥
तस्मान्नो वद परमं श्रेयो येनापि लभ्यते ।
श्रुत्वा जयध्वजः प्राह ममारण्ये महर्षयः ॥ ८ ॥
वसन्ति बहवो दिव्या ये विज्ञानसमृद्धयः ।
तेषां नित्यं दर्शनार्थं प्रयामि ज्ञानलब्धये ॥ ९ ॥
तेभ्यः श्रुतं मया यद्यत् कथाप्रसंगलाभतः ।
लक्ष्मीनारायणसंहितायाः कथाश्रवेऽपि च ॥१०॥
आत्मनाऽप्यनुभूतं च कथयामि निबोधत ।
तीर्थे पापानि नश्यन्ति तीर्थं स्थिरं च जङ्गमम् ॥११॥
तारयित्वा वासनाख्यसागरात् शरणागतम् ।
प्रस्थापयति धामाऽपि परमं पारमेश्वरम् ॥१२॥
तीर्थं तत् सर्वथा बोध्यं जडं वा चेतनात्मकम् ।
जडं जलानि चैत्यानि वस्तूनि भौतिकानि च ॥१३॥
निर्गुणानि च दिव्यानि दिव्ययोगाद्भवन्ति हि ।
पापिनस्तारयन्त्येव तीर्थानि तानि सर्वथा ॥१४॥
आत्मा तीर्थं महत् प्रोक्तं कृष्णस्तीर्थोत्तमोत्तमम् ।
अनादिश्रीकृष्णनारायणस्तीर्थं परोत्तमम् ॥१५॥
तस्य तीर्थस्य योगेन भक्तास्तीर्थस्वरूपिणः ।
भवन्ति तारकाः सर्वे सन्तः साध्व्यश्च योगिनः ॥१६॥
ब्रह्मशीला गृहशीला वनशीला विरागिणः ।
न्यासशीला ध्यानशीलाः कृष्णतीर्था हि ते मताः ॥१७॥
कृष्णदास्यः कृष्णभक्तास्तथा कृष्णस्य पार्षदाः ।
कृष्णसम्बन्धमात्राश्च तीर्था जडाश्च चेतनाः ॥१८॥
कृष्णगुणाढ्यपुरुषः सती कृष्णकृपामयी ।
पशुः पक्षी वृक्षलताः कृष्णयोगा हि तारकाः ॥१९॥
वाटिका ग्रामशालाश्च धर्मशालाः सरित्तटाः ।
सरस्तटा वनस्थल्यः शैलाः अरण्यभूमयः ॥२०॥
स्थावरा जंगमाश्चापि तीर्थास्ते कृष्णयोगिनः ।
ग्रामः पुरी पत्तनं च नगरं घोष इत्यपि ॥२१॥
पल्ल्यश्चावसथाश्चापि यत्र कृष्णो विराजते ।
तत् सर्वं तीर्थमेवेति तारकं दिव्यतां गतम् ॥२२॥
यत्स्पृष्टं हरिणा साक्षात् तत् तीर्थं तारकं भवेत् ।
यथा हरिस्तथा तस्य सन्तस्तीर्थानि सन्ति हि ॥२३॥
सन्तारयन्ति सततं जनान् ज्ञानप्रदानकैः ।
अज्ञान नाशयित्वा च समर्पयन्ति दिव्यताम् ॥२४॥
कामं क्रोधं च लोभं च मदं मानं च मत्सरम् ।
तृष्णां च वासनां नाशयित्वा कुर्वन्ति शोधनम् ॥२५॥
तद्योगात्तीर्यते माया सत्सु नौषु स्थितैर्जनैः ।
सन्तो भवन्ति चक्षूंषि सन्तो दीपा भवन्ति च ॥२६॥

सन्तो नौकाश्चार्णवस्था दावस्था अमृतस्थलाः ।
विषोल्बणेषु वै सन्तो विषघ्नाः क्ष्वेडहारिणः ॥२७॥
हालाहलाब्धिसंसारे नीलकण्ठा हि साधवः ।
महारोगाब्धिसंसारे धन्वन्तरिस्वरूपिणः ॥२८॥
विषयानलदग्धानां सन्तो मानसवृष्टयः ।
वासनाजालबद्धानां कर्तनीरूपिणो हि ते ॥२९॥
सन्तस्तीर्थं परं तीर्थं परमात्मविनिर्मितम् ।
यत्र नारायणः साक्षान्मूर्तिमान् वर्तते सदा ॥३०॥
हर्यर्थं यैश्च गार्हस्थ्यं त्यक्तं त्यक्तं च सर्वशः ।
बन्धनं श्रीहरौ बद्धास्तीर्थरूपा हि साधवः ॥३१॥
हरिस्तीर्थं परं तीर्थं तीर्थं तत्साधवस्ततः ।
साध्व्यस्तीर्थं साधुवच्च तरन्ति पापिनश्च तैः ॥३२॥
एतत्त्रयं परं तीर्थं चतुर्थं विप्रमण्डलम् ।
गुरुस्तीर्थं सर्वतीर्थोत्तमं मोक्षप्रदं सदा ॥३३॥
माता तीर्थं परं तीर्थं तीर्थं पिता पतिस्तथा ।
सती तीर्थं धर्मतीर्थं तीर्थास्तु धार्मिका जनाः ॥३४॥
पुत्रस्तीर्थं धर्मवच्च कन्या तीर्थं वृषान्विता ।
स्वसा तीर्थं धर्मयुक्ता पत्नी तीर्थं सती यदि ॥३५॥
कुटुम्बं धार्मिकं तीर्थं तारयेत् तीर्थमुत्तमम् ।
देवस्तीर्थं मन्दिरं च तीर्थं तीर्थं कथामृतम् ॥३६॥
वृद्धानां वचनं तीर्थं शास्त्रं तीर्थं च शाश्वतम् ।
गोदानं परमं तीर्थं तीर्थं स्वर्णान्नदानकम् ॥३७॥
सत्यं तीर्थं क्षमा तीर्थं तीर्थं रागविहीनता ।
द्वेषराहित्यमेवाऽपि तीर्थं नैर्मल्यकारकम् ॥३८॥
कृष्णसेवा परं तीर्थं भक्तिस्तीर्थं तथोत्तमम् ।
कृष्णार्पणं तु तीर्थानामुत्तमं तीर्थमुच्यते ॥३९॥
दीक्षा भिक्षा समीक्षा च तीर्थत्रयं विवेकतः ।
एवं शैलास्तु तीर्थानि हरेर्योगाद् भवन्ति वै ॥४०॥
किं बहुनाऽत्र वचसा सन्तस्तीर्थानि सर्वथा ।
सर्वप्रदास्ते जीवानां धर्मार्थकाममोक्षिणाम् ॥४१॥
सतां शरणमापन्नस्तरत्येव न संशयः ।
काष्ठाधारं समापन्नस्तरत्येव जलार्णवम् ॥४२॥
काष्ठे लघुत्वमेवाऽस्ति सत्सु हरिर्वसत्यपि ।
यत्र हरिस्तत्र सर्वं यद्यदिष्टतमं भवेत् ॥४३॥
कल्पवल्ली सतां हस्ते चिन्तामणिः सतां मुखे ।
कल्पवृक्षः सद्धृदये कामधेनुः सतां मतौ ॥४४॥
अणिमाद्याः सिद्धयस्तु लुठन्ति पादयोः सताम् ।
ऐश्वर्याणि सतामोष्ठे वसन्ति सुखदानि वै ॥४५॥
पावित्र्यं तु सतां दृष्टौ वाक्ये धर्मो वसत्यपि ।
मुक्तिः सतां तु सेवायां वर्तते शरणं गता ॥४६॥
प्रकृतिः प्रोच्यते मायाऽभ्यासो विषयवस्तुषु ।
संस्कारः स्थितिसंस्थोऽयं कृष्णाभ्यासेन जीर्यति ॥४७॥
कृष्ण कृष्णेति कृष्णेति नारायणेति सर्वदा ।
रटणेन हि संस्कारा भावनाख्या भवन्ति वै ॥४८॥
कृष्णयोगेन दिव्यास्ते नाशयन्ति तु मायिकान् ।
प्राकृतान् नाशयित्वैव शोधयन्ति हृदन्तरम् ॥४९॥
सा माया भ्रमरूपा वाऽविद्याऽहंममतात्मिका ।
रागद्वेषात्मिका वापि संशयो वा मृषात्मिका ॥५०॥
याथार्थ्येन विधानेन लयं याति हरेर्बलात् ।
आमृत्युक्षणमासाद्य कृष्णे मतिर्न चेद् भवेत् ॥५१॥
यत्र नार्यां नरे पुत्रे द्रव्येऽन्यत्र मतिर्भवेत् ।
सा माया बन्धकर्त्र्येव कृष्णस्मृत्या विनश्यति ॥५२॥
एवं शैलाः संशृण्वन्तु कृष्णयोगो हि तारकः ।
सतां योगस्तारकोऽपि माया तेन निवर्तते ॥५३॥
यथा लौहं काष्ठयोगे तरत्येव जलोपरि ।
तथा पापी सतां योगे तरत्येव भवोपरि ॥५४॥
यथा पद्मं स्वभावाच्च जलेऽपि नहि लिप्यते ।
तथा ज्ञानी भक्तियुक्तः पापेऽपि नहि लिप्यते ॥५५॥
यथा तैलं जलमध्ये क्षिप्तं तरति मूर्धनि ।
तथा ज्ञानी पापिमध्ये स्थितस्तरति पापतः ॥५६॥
ज्ञानं दहति कर्माणि भक्तिः कर्मफलानि च ।
दहत्येवं द्वयं चान्यत् कृष्णेतरत् कृतं तु यत् ॥५७॥
आत्मा येन धृतः कृष्णे नारायणे परात्मनि ।
स चात्मा वर्तते चान्तःकरणेभ्यो वियोगवान् ॥५८॥
आन्तरं करणं तेन भिन्नं प्रयत्नमन्तरा ।
नेन्द्रियैर्युज्यते शक्तिशून्यं रूक्षं पतिं विना ॥५९॥
नेन्द्रियाणि ततो यान्ति विषयान् कृष्णवर्जितान् ।
विषयेषु गतं पापं नोपसंक्रामति ह्यतः ॥६०॥
इन्द्रियाण्यविषयाणि यदा भवन्ति योगिनः ।
मानसं चाऽविषयं च जायते सर्वदाऽस्य तु ॥६१॥
आत्मा विषयशून्यश्च कृष्णमात्रेण संभृतः ।
भवत्येव तदा पापान्निवृत्तो मोक्षगो यथा ॥६२॥
एवं भूत्वा शरीरं चेन्द्रियाण्यस्य करोति चेत् ।
क्रियां यां कां, न चैषा स्याद् बन्धनाय तु योगिनः ॥६३॥
विधिक्रियाऽथवा विधिविवर्जिताऽपि काऽपि वा ।
लोके मताऽथवा नैव मता लोकविवर्जिता ॥६४॥

विवेकेन कृता वा न कृता विवेकवर्जिता ।
पापा वा पापशून्या वा लोकदृष्ट्या तु यादृशी ॥६५॥
यादृशी तादृशी वापि क्रिया या स्यात्तु योगिनः ।
निसर्गजा न सा तस्य बन्धनाय प्रजायते ॥६६॥
यस्य नास्ति सुखे रागो न द्वेषो दुःखवस्तुषु ।
हर्षाहर्षरहितात्मा न स पापेन लिप्यते ॥६७॥
यस्य नास्ति सुखं मे स्याद् दुःखं मा स्यादिति प्रधीः ।
ईहाशून्यस्य कर्तव्यं निरीहं नहि लुम्पति ॥६८॥
इष्टं तथाप्यनिष्टं च त्यक्तं येनाऽऽत्मतः सदा ।
गुणत्रयाऽभिभवनं तस्य नैव हि जायते ॥६९॥
सर्वं कृष्णात्मकं यस्य भोग्यं भोगश्च भोक्तृता ।
क्रियाकृष्णार्पिता येन देहेन्द्रियतदीयजा ॥७०॥
तत्पापं तस्य पुण्यं वा फलं कृष्णार्पितं तथा ।
स तु सर्वेषु लिप्तोऽपि लिप्यते न मनागपि ॥७१॥
एवं वै वर्तमानस्य कृष्णार्थकृतकर्मणः ।
प्रसाधितप्रसाध्यस्य सदा साधुस्वभाविनः ॥७२॥
निर्लेपस्य प्रसंगेन मुक्तिः स्याद् बन्धनाशिनी ।
बन्धो वै वासना प्रोक्ता चाहंममत्वकारिता ॥७३॥
मिथ्याज्ञानजनिर्या च वासना जडतात्मिका ।
स संसारो बन्धनं वै कृष्णयोगेन नश्यति ॥७४॥
सतां कृष्णस्वभावानां समागमेन नश्यति ।
ततो मुक्तिर्जीवतो वै भूतबन्धनवर्जिता ॥७५॥
निर्द्वन्द्वा च निरीहा च वितृष्णा रागवर्जिता ।
स्थितिर्नित्यात्मसंस्था च नित्यानन्दपरिप्लुता ॥७६॥
सदा शान्तस्य कृष्णस्य योगेन शान्तिरच्युते ।
आत्मना चात्मनि ध्रौव्या या शाश्वत्यनुभूयते ॥७७॥
सा शान्तिः शाश्वती कृष्णात् परमेशात् प्रजायते ।
इयं मुक्तिः परा मुक्तिर्यतः शान्तिर्न वै परा ॥७८॥
असंख्यानन्दसन्दोहे मग्नता परमात्मनि ।
स स्वार्थस्वात्मनो ह्यर्थः परं प्रयोजनं हि तत् ॥७९॥
मोक्षोऽर्थो जीवलोकस्य मुमुक्षोः स्वार्थ एव ह ।
ज्ञातोऽर्थः स्वात्मनि प्रेच्छेत् स्वार्थः स चात्र मोक्षणम् ॥८०॥
क्षणिकः सुखदः स्वार्थो नापेक्ष्यो वै मुमुक्षुभिः ।
शाश्वतानन्दभृत्स्वार्थः समपेक्ष्यो मुमुक्षुभिः ॥८१॥
एवं स्वार्थं प्रलक्ष्यैव प्रवृत्तिः शुभदायिनी ।
शुभं पुण्यं स्वर्गलोकः सत्यमैश्वरधिष्ण्यकम् ॥८२॥
विनाशयोगि तत् प्रोक्तं प्रकृतेः कृतसर्जने ।
अविनाशं शुभं मोक्षः कृष्णपादाभिलंभनम् ॥८३॥
कृष्णनारायणप्राप्तिः शुभं सर्वोत्तमोत्तमम् ।
कृष्णो दिव्यः सदा चास्ते यादृशस्तादृशोऽपि वा ॥८४॥
तादात्म्यकर्मभिर्दिव्यभाव विन्दति मानवः ।
शरीरेन्द्रियकर्माणि जडान्यपि हरेर्ग्रहात् ॥८५॥
भवन्ति दिव्यभावानि जडता याति दिव्यताम् ।
एवं शैला ! भवन्तोऽपि जडा भक्तिप्रयोगतः ॥८६॥
जाड्यं भावं परित्यज्य भवन्तु दिव्यरूपिणः ।
अनादिश्रीकृष्णनारायणस्वामिपतिप्रभुः ॥८७॥
वर्तते कुंकुमवापीक्षेत्रे चाश्वसरोन्तिके ।
तद्योगं तद्भजनं च कुर्वन्तु तेन दिव्यताम् ॥८८॥
प्रयास्यथैव शीघ्रं च नारायणकृपावशात् ।
इत्येवं प्रोच्यमानेषु जयध्वजेन चाऽद्रिषु ॥८९॥
चत्वारः पुरुषाश्चान्ये शान्तास्तत्र समाययुः ।
जयध्वजादिकान् नत्वा तस्थुः पृष्ठास्ततो हि ते ॥९०॥
कुत आगम्यते कुत्र गम्यते किं प्रयोजनम् ।
ते प्रोचुस्तं विनताश्च वयं श्रुत्वा तव क्रतुम् ॥९१॥
आगता हर्षतश्चात्र गच्छामोऽश्वसरोवरम् ।
स्नातुं द्रष्टुं परेशं श्रीकृष्णनारायणं प्रभुम् ॥९२॥
यात्रिकैः सम्प्रदत्तानि पापान्यसंख्यकानि तु ।
क्षालयितुं प्रगच्छामः कुंकुमवापिकास्थलीम् ॥९३॥
कोलारसर एवायं नाम्ना ख्यातोऽस्ति तीर्थराट् ।
द्वितीयो वर्तते नाम्ना ह्ययं चिल्सरोवरः ॥९४॥
तृतीयः शंभलसरोऽभिधोऽयं तीर्थराजकः ।
चतुर्थोऽहं पुमानस्मि नारायणसरोवरः ॥९५॥
वयं त्वद्य मिलित्वा तु याता अभूम मानसम् ।
सरो दिव्यं हैमशैले दर्शनार्थं ततः पुनः ॥९६॥
श्रुत्वा चात्र समायाता यज्ञं तेऽथ ततो वयम् ।
गच्छामस्तत्र यत्रैव परमेशो विराजते ॥९७॥
एतच्छ्रुत्वा च ते शैला जयध्वजोऽपि भूपतिः ।
व्योम्ना कुटुम्बसहितः सर्वे ययुर्हरेः पुरीम् ॥९८॥
कुंकुमवापिकातीर्थं चाश्वपट्टसरोवरम् ।
व्योम्ना ते चाऽवतेरुश्च सस्नुश्चाश्वसरोवरे ॥९९॥
ततो दिव्यस्वरूपाश्च दृष्ट्वा श्रीलोमशं मुनिम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१००॥
गृहीत्वा परमं मन्त्रं बालकृष्णान्तिकं ययुः ।
सम्पूज्य विधिवत् कृष्णनारायणं च ते ततः ॥१०१॥
पीत्वाऽमृतं चरणयोर्निषेदुः सत्कृताः पुरः ।
प्रार्थयामासुरत्यर्थं देहि मोक्षं परं पदम् ॥१०२॥

श्रीहरिः कृपया तांश्च त्रिरूपान् संव्यधापयत् ।
तीर्थभक्तमुक्तरूपान् तीर्थान्यप्रेषयत्तदा ॥१०३॥
नैजं नैजं निवासं च पावनार्थं हि देहिनाम् ।
भक्तरूपांस्तत्र चाश्वसरस्येव न्यवासयत् ॥१०४॥
निजाश्रये महाभक्तान् संविधायैव सेवकान् ।
तत आरभ्य तत्तीर्थे तीर्थाष्टकं ततोऽवसत् ॥१०५॥
कोलाटतीर्थं च तथा चिल्तीर्थं तथोत्तमम् ।
तथा शंभलतीर्थं च नारायणसरस्तथा ॥१०६॥
द्रोणतीर्थं नीलतीर्थं श्रीतीर्थं चैलतीर्थकम् ।
दिव्यरूपा विराजन्ते श्रीकृष्णपादपंकजे ॥१०७॥
मुक्तरूपान् विमानेनाऽक्षरं चाऽप्रेषयत् प्रभुः ।
धाम मुक्तनिवासाख्यं राधिके करुणानिधिः ॥१०८॥
इत्येवं तच्चमत्कारं दृष्ट्वा जयध्वजोऽपि च ।
स्थित्वा मासं मार्गशीर्षे ययाचे मोक्षणं हरेः ॥१०९॥
चक्रे तस्य हरिर्मुक्तिं विमानेन ययौ स तु ।
धामाऽक्षरं पदं दिव्यं शाश्वतानन्दपूरितम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जयध्वजेन प्रदत्तं ज्ञानं, द्रोणैलनीलश्रीपर्वतानां कोलाटचिलशंभलनारायणसरसां दिव्यरूपता मोक्षणं जयध्वजस्य मुक्तिश्चेत्यादिनिरूपणनामा त्र्यशीतितमोऽध्यायः ॥८३॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चमत्कृतिं नारायणस्य च ।
ब्रह्मपुत्रपुलस्त्यस्य भार्याया भक्तिगोचराम् ॥ १ ॥
पुलस्त्यस्य प्रिया भार्या तृणबिन्दोः सुता शुभा ।
ऐलविलाऽभवन्नाम्ना तस्यां वै विश्रवाः सुतः ॥ २ ॥
अभवद् बहुशास्त्राणां ज्ञाता धर्मपरायणः ।
पुलस्त्यं त्वेकदा चैलविलाऽपृच्छद् वृषान् प्रति ॥ ३ ॥
युगधर्माः पुरा चासन् कीदृशा वद मे पते ।
पुलस्त्यस्तु ततः प्राह सर्वान् संक्षेपतो वृषान् ॥ ४ ॥
कृतं त्रेता द्वापरश्च कलिश्चेति चतुर्युगम् ।
ध्यानं तपः कृतयुगे त्रेतायां ज्ञानमध्वरः ॥ ५ ॥
द्वापरे यज्ञ एवेति दानमेकं कलौ युगे ।
ब्रह्मा कृतयुगे देवः सर्वत्र गतिमानभूत् ॥ ६ ॥
त्रेतायां गतिमान् सूर्यश्चाऽभवन्मेलनक्षमः ।
द्वापरे दैवतं विष्णुः साक्षाच्च गतिमानभूत् ॥ ७ ॥
कलौ कालस्वरूपश्च देवो रुद्रः प्रवर्तते ।
यत्र तत्र महान् क्लेशः कलौ विनाशको यतः ॥ ८ ॥
कृते तु समसंख्याकाः कन्याश्चाथ कुमारकाः ।
आसन् समानयुगला वृत्तिस्तेषामलोलुपा ॥ ९ ॥
प्रजास्तृप्ताः सदा सर्वाः सर्वानन्दाः सुखाश्रयाः ।
उत्तमाऽधमता नास्ति निर्विशेषाः पुरन्ध्रिकाः ॥१०॥
तुल्यमायुः सुखं रूपं बलं तुष्टिः स्थिरा मतिः ।
विशोका ज्ञानबहुला एकान्तबहुलास्तथा ॥११॥
ध्याननिष्ठास्तपोनिष्ठाः परब्रह्मपरायणाः ।
सदा निष्कामचारिण्यो नित्यं मुदितमानसाः ॥१२॥
पर्वतोदधिवासिन्यो ह्यनिकेताः क्षितिश्रयाः ।
संकल्पजन्यभोज्याश्च संकल्पोत्थजलादनाः ॥१३॥
संकल्पजन्यसुरसाः सदा शान्ता यथेश्वराः ।
सर्वेमासामात्मलभ्यं तदासीद् ब्रह्मसात्कृतम् ॥१४॥
रसोल्लासाः सदा ह्यासन् कृतकृत्याः कृते युगे ।
चतुःसहस्रवर्षाणां विगमे सन्धिरागतः ॥१५॥
अष्टशताब्दस्तत्रैव रसोल्लासो न वेगवान् ।
रागश्चापि विलासश्च समुद्भवति वै शनैः ॥१६॥
सत्यसिद्धौ प्रक्षीणायामन्या सिद्धिः प्रवर्तते ।
अपां सौख्ये ह्रासमाप्ते तदा मेघात्मनाऽम्बरात् ॥१७॥
मेघेभ्यः स्तनयित्नुभ्यः प्रवृत्तं वृष्टिसर्जनम् ।
सकृदेव तया वृष्ट्या संपृक्ते पृथिवीतले ॥१८॥
जलं द्वादशमासांश्च वर्तते स्म स्थलभूतम् ।
तत्र वृक्षा वल्लिकाश्च प्रादुरासन् रसभृताः ॥१९॥
सर्वे प्रत्युपभोगाश्च तदा तेभ्यो भवन्ति वै ।
वर्तयन्ति स्म कल्पाख्यवृक्षादिभ्यस्तदा प्रजाः ॥२०॥
वृक्षास्तदा प्रजानां च निवासाः केतनानि च ।
आसन् भित्तिविहीनानि सर्वाण्यपि गृहाण्यपि ॥२१॥
वृक्षाश्रिताः प्रजाः सर्वा रागलोभादिधर्षिताः ।
स्वकीयत्वे च पारक्ये विवादमाश्रयन् क्वचित् ॥२२॥
रागलोभोद्भवः क्लेशस्तदा स्थानमवाप्तवान् ।
तेन दैवास्तु ते कल्पद्रुमा नाशमथो गताः ॥२३॥
ततस्तेषु प्रणष्टेषु विभ्रान्ताः शोकिताः प्रजाः ।
कल्पद्रुमान् बलहीनान् सेवाजन्यफलप्रदान् ॥२४॥
अवापुः पृथिवीतस्ता बीजाद्युद्भवगोचरान् ।
वस्त्राणि वल्कलाख्यानि फलानि भोजनानि च ॥२५॥
पुष्पाणि त्वाभरणानि प्रसूयन्ते स्म यत्नतः ।
तेष्वेव जायते तासां गृध्नो रसोऽथ भोजनम् ॥२६॥

अमाक्षिकं महावीर्यं पुटके पुटके मधु ।
फलेभ्यः प्रस्रवन्त्येव रसा मिष्टाश्च धारया ॥२७॥
तैः प्रजा वर्तयन्ति स्म दुष्टास्तुष्टा गतज्वराः ।
अथ त्रेतोत्तरे काले प्रजा लोभावृतास्तदा ॥२८॥
विशेषतः समभवन् बलात् कृत्वा निजान् द्रुमान् ।
पर्यगृह्णन्त च मधु माक्षिकं च फलादिकम् ॥२९॥
एवं क्लेशो निर्बलानां मधुलाभं विनाऽभवत् ।
वृक्षा विलोक्य तु पक्षपातं प्रजाकृतं तदा ॥३०॥
प्रणष्टा मधुना सार्धं बीजोद्भवा अपि द्रुमाः ।
तदा शीतातपवर्षाभिः पीडा जायते नृषु ॥३१॥
द्वन्द्वैः सम्पीड्यमानास्तु चक्रुरावरणानि हि ।
गृहभित्तीः पर्णकुटीर्वार्तापायानचिन्तयन् ॥३२॥
वृष्टिजन्यजलान्येव निम्नगानि तु यत्र च ।
स्रोतःस्थानेषु तिष्ठन्ति गर्तेषु च सरःसु च ॥३३॥
तत्र वासान् प्रचक्रुश्च वृक्षसस्यादिजीविकाः ।
अपां भूमेश्च संयोगादोषधयस्तदाऽभवन् ॥३४॥
अकृष्टपच्या अपि ताश्चानुप्ताश्च क्वचित् क्वचित् ।
क्वचिदुप्ताश्च सकणाः सफलाश्च तदाऽभवन् ॥३५॥
ऋतुपुष्पफलास्तत्र वृक्षगुल्माश्च जज्ञिरे ।
त्रेतान्ते रागलोभाढ्याश्चाहंममत्वसंभृताः ॥३६॥
अवश्यंभावितार्थेन प्रजाश्चासन् सकल्मषाः ।
प्रसह्य सत्तया पर्यगृह्णन्त सस्यवाटिकाः ॥३७॥
वृक्षगुल्मौषधीश्चापि प्रसह्य तु यथाबलम् ।
नैजाँश्चक्रुः प्रजा रागान्नदीक्षेत्राणि पर्वतान् ॥३८॥
तत्रापि प्रबला जाताः क्षत्रिया रक्षकाः पुरा ।
ब्रह्मणा वै नियुक्तास्ते दीनरक्षाक्रियादिषु ॥३९॥
वर्णाश्रमव्यवस्थां च त्रेतायां कृतवानजः ।
मर्यादायाः प्रतिष्ठार्थं दण्डं तदा समसृजत् ॥४०॥
यज्ञप्रवर्तनं चापि पशुहिंसाविवर्जनम् ।
त्रेतान्ते तां व्यवस्थां च ब्राह्मणाः क्षत्रियान्विताः ॥४१॥
समरक्षन् यथायोग्यां मतेर्भेदस्ततोऽभवत् ।
रागो लोभः पक्षपातो युद्धं सम्पद्विलुण्ठनम् ॥४२॥
द्वापरे त्वागते सर्वं प्रावर्तत प्रजासु वै ।
नगराणि च राज्यानि सीमक्षेत्राणि वाटिकाः ॥४३॥
कृष्टपच्याः कणाश्चापि प्रावर्तन्त तदा प्रिये ।
अवृष्टिर्मरणं चैव तथैव व्याध्युपद्रवाः ॥४४॥
वाङ्मनःकायजाः क्लेशा अभवँश्च गृहे गृहे ।
प्रजाश्च मिथुनोत्पाद्यास्त्रेतार्धोत्तरकालतः ॥४५॥
क्वचित् क्वचित्तु संकल्पप्रजाश्चासंस्तदा प्रिये ।
द्वापरे सर्वथा कामबीजोद्भवाः प्रजाः खलु ॥४६॥
साश्रयाश्च मृषावीर्या मृषाफलास्तथाऽभवन् ।
वासनाबलसंव्याप्ताश्चात्मवीर्यविहीनकाः ॥४७॥
सिद्धिशून्याः प्रजाः सर्वा व्यवर्धन्त मदार्दिताः ।
दुःखानां द्वापरे चाकस्मिकता मरणस्य च ॥४८॥
तद्भयाज्जायते तासां दुःखमोक्षविचारणा ।
विचाराच्चापि वैराग्यं ज्ञानं भक्तिश्च मोक्षणम् ॥४९॥
एवं द्वापरधर्माश्च वर्णानामभवँस्तदा ।
आश्रमाणां तथा धर्माः पृथक् पृथक् ततोऽभवन् ॥५०॥
प्राप्ते कलौ क्लेशलाभे क्लेशव्याकुलिताः प्रजाः ।
तिष्ये मायामसूयां च वधं चापि तपस्विनाम् ॥५१॥
साधयन्ति जना नित्यं तमसा मदगर्विताः ।
कलौ प्रमारको रोगः सततं क्षुद्भयं तथा ॥५२॥
अनावृष्टिभयं घोरं देशानां च विपर्ययः ।
अधार्मिका अनाचारा महाकोपाऽल्पतेजसः ॥५३॥
अनृतं ब्रुवते लुब्धास्तिष्ये जनाः सुदुष्प्रजाः ।
दुरिष्टैर्दुरधीतैश्च दुराचारैर्दुरागमैः ॥५४॥
विप्राणां कर्मदोषैश्च प्रजानां जायते भयम् ।
न धर्मो वेदधर्मो हि किन्तु कल्पित एव सः ॥५५॥
शूद्रधर्माश्चैकवर्णाः शयनासनभोजनैः ।
भवन्त्येव प्रजाः सर्वा वर्णाश्रमविवर्जिताः ॥५६॥
राजानश्चौरकर्माणो विप्राः कापट्यभोगिनः ।
गुरवः शिष्यहाराश्च भवन्त्येव कलिप्रियाः ॥५७॥
भ्रूणहत्या वीरहत्या नारीहत्या नरेश्वरे ।
साधुहत्या सतीहत्या धर्महत्या प्रजासु च ॥५८॥
स्नानं होमो जपो दानं सुरार्चनं हरेः स्मृतिः ।
त्यज्यन्ते मानवैस्तिष्ये कामलोभपरायणैः ॥५९॥
देवान् साधून् वृषान् मोक्षं निन्दन्त्यपि श्रियः पतिम् ।
कुर्वन्त्यन्यायकर्माणि निकृष्टाचारपन्थिनः ॥६०॥
कुशीलचर्याः पाखण्डैर्वृथाचारैः समावृताः ।
बहुयाचनकाः सर्वे भवन्त्येव कलौ जनाः ॥६१॥
देशा रूक्षा अटवीवत् ग्रामा रूक्षास्तु घोषवत् ।
नरा नार्यस्तथा रूक्षाः प्रेमहीनाः पराश्रयाः ॥६२॥
सस्यचौराः कणचौरा वस्त्रचौराः प्रहारिणः ।
चौराश्चौरस्य हर्तारो हर्तुर्हन्ता तथाऽपरः ॥६३॥
दुःखबहुला रुग्णाश्चोत्साहाश्चाल्पायुषो जनाः ।
अधर्माभिनिवेशित्वात् तमोव्याप्ताः कलौ प्रजाः ॥६४॥

उच्चनीचासनभेदो योग्यता पूज्यता नयः ।
नरनारीगौरवादि नश्यत्येव कलौ युगे ॥६५॥
राजा प्रजाः कपटस्य नर्तका इव तिष्यके ।
द्विजाः शूद्रा भवन्त्येव शूद्राश्चाण्डालकास्तथा ॥६६॥
सर्वधर्मस्त्वेक एव भोज्यान्नवासलग्नके ।
पेयापेयविभागो न भोग्याभोग्यविहीनता ॥६७॥
सत्याऽसत्यविवेको न ग्राह्याग्राह्यातिलंघिता ।
कल्पनाकुलधर्माश्च कामानुकूलयोषितः ॥६८॥
मोहानुकूलकान्तश्च यतयो धूर्तधर्मिणः ।
लोकगानैर्देवतानां कीर्तनं धर्मवर्जितम् ॥६९॥
ज्ञानं कर्म विनष्टं च भवत्येव कलौ सदा ।
कीटमूषकसर्पाणां दंशा भवन्ति तिष्यके ॥७०॥
सर्वे दुष्टव्रताचाराः स्वार्थमात्रसुयोगिनः ।
मोहयन्ति जनान् सर्वान् दर्शयित्वा फलानि हि ॥७१॥
मन्त्रकर्मकराश्चाभिचारका मारकास्तथा ।
निर्दयाश्च शठा धूर्ता घातका मानवाः कलौ ॥७२॥
मांसादा मदिरापाश्च योनिसम्बन्धमात्रकाः ।
लिंगसम्बन्धमात्राश्च धनार्थकृतघातकाः ॥७३॥
वेषाचारसमाश्चापि नेत्रसत्कारवर्जिताः ।
विश्वासघ्नाश्च मित्रघ्ना आश्रितघ्नाः कलौ युगे ॥७४॥
गृहघ्नाश्च कुटुम्बघ्नाः स्वीयघ्नाश्च कलौ युगे ।
धर्मघ्नाश्चापि धर्मिघ्ना मातृघ्नाः पितृघातकाः ॥७५॥
स्नुषाघ्नाः कन्यकाघ्नाश्च स्वसृघ्ना भ्रातृघातकाः ।
षोडशादिकसंस्कारैर्हीनाः सूतकवर्जिताः ॥७६॥
शौचहीनाः स्नानहीना व्रतहीनाः कलौ युगे ।
सूत्रहीना विवाहादिविधिवर्ज्या नराः स्त्रियः ॥७७॥
अग्निहीना मण्डपादिहीना होमविवर्जिताः ।
सदाचारविहीनाश्च गृहाचारविहीनकाः ॥७८॥
अभक्ष्यभक्षणाः सर्वे सर्वभक्षाः कलौ युगे ।
राक्षसा ब्राह्मणा यक्षा गन्धर्वाः किन्नराः सुराः ॥७९॥
श्वपचाश्च पिशाचाश्च समा भवन्ति वै कलौ ।
अन्योन्यभयकर्तारोऽन्योन्यनाशविधायकाः ॥८०॥
अलज्जाश्चापि निर्लज्जाः सर्वगौरववर्जिताः ।
यथेष्टभोगवन्तश्च कुमाराः कन्यकाः स्त्रियः ॥८१॥
केशयोनिस्तनदर्शकाऽम्बराढ्यास्तु कन्यकाः ।
कर्त्र्यश्चापि च कर्तारः प्रकाशे गुप्तकर्मणाम् ॥८२॥
हस्तमात्रशरीराश्च रोमपटलवस्त्रकाः ।
पञ्चहस्तद्रुमाश्चान्ते भवन्त्येव कलौ युगे ॥८३॥

न राजा न प्रजाभावो न शास्यः शासको न च ।
न गृहाणि निवासा न न शालाः पाकसिद्धये ॥८४॥
न गृहे त्वन्नचयिता न गृहे वारिपेयिता ।
न गृहे शयनं नार्या न पत्युर्गृहवासिता ॥८५॥
पतिपत्नीकृतो योगो नहि तिष्ठति वै कलौ ।
अष्टवर्षा मध्यवेगा द्वादशान्ते मृतिः कलौ ॥८६॥
पञ्चोत्तरं सगर्भाश्च विना ग्रामं निवासिता ।
वानरीव तदा नारी सूतिका दूतिकां विना ॥८७॥
विना खट्वां सूयते च पृथिव्यां बालकं तदा ।
वर्षद्वये तदा गौरी द्विवर्षान्ते तु रोहिणी ॥८८॥
वर्षत्रये भवेत् कन्या चतुर्वर्षा रजस्वला ।
अत ऊर्ध्वं सगर्भा च मासषट्के प्रसूयते ॥८९॥
वर्षे द्वे वै प्रसूती च रजः सकृत् क्षणस्थिरम् ।
मरणं घटिकाकाले प्राणो नैव चिरायते ॥९०॥
अपत्यानि मृगशावादिवच्चरन्ति भूतले ।
सस्यरसैः प्रपुष्यन्ते पक्षदुग्धास्तु मातरः ॥९१॥
पितृनाम न चैवास्ति मातुर्नाम क्वचित् कलौ ।
दीक्षालोपो गुरोर्लोपो मन्त्रलोपो न चोत्सवाः ॥९२॥
देवानां मानवानां वा समाजो न कलौ युगे ।
इदं कुलमिति ख्यातिः कलौ नास्ति कुटुम्बकम् ॥९३॥
पितृशब्दो गुरुशब्दः कलावन्ते न तिष्ठति ।
न राजा राज्यनियमा दण्डा वा शासकस्तदा ॥९४॥
न देवो मन्दिरं सम्प्रदायः शास्त्रं पुराव्रतम् ।
ब्रह्मचर्यं न वै तत्र यतित्वं गृहसम्मतम् ॥९५॥
सन्यासो विद्यते नैव शीलं धर्मो न वै तदा ।
वैधव्यं वा विधुरत्वं धर्मो नैव कलौ युगे ॥९६॥
साध्वीत्वं च सतीत्वं च धर्मो नैव कलौ तदा ।
कामधर्मः परो धर्मः पाखण्डस्तत्र संयमः ॥९७॥
नरा नार्यः समरूपाः समवेषाः समक्रियाः ।
समप्रधानभावाश्च समदायादभागिनः ॥९८॥
न तदा वर्षगणना न चांकगणनाऽपि च ।
न विद्याभ्यास एवापि तमोवृत्तिजनाः कलौ ॥९९॥
कलावन्ते हि भगवान् प्रादुर्भवति स्वामिराट् ।
कलेर्बलं विनाश्यैव कृतस्थितिं करोति सः ॥१००॥
एवमुक्ता मया पत्नि धर्मा युगचतुष्टये ।
यथा भवन्ति ते सर्वे कालयोगेन देहिषु ॥१०१॥
दिवसान्ते वेधसस्तु घृष्यमाणो हि गोलकः ।
स्वल्पतां याति वेगाच्च भ्रमणेन च पार्थिवः ॥१०२॥

दिवसा रात्र्य एवापि ह्रस्वतां यान्ति वै तदा ।
घटिकाश्च कलाः काष्ठा मासाः काला ह्रसन्ति च ॥१०३॥
सर्वं ह्रस्वगतिकं च क्षीणायुः परिवर्तते ।
ततो ह्रासः प्रलयश्च सम्पद्यते दिनात्यये ॥१०४॥
ऐलविले ! वयं यामस्तदा सत्यं त्वजाऽऽश्रयम् ।
इत्येवं राधिके ! प्राह पुलस्त्यो निजभामिनीम् ॥१०५॥
ऐलविला तु तान् धर्मान् श्रुत्वा प्राह पतिं सती ।
यत्र सर्वे युगधर्मा विद्यन्ते पौत्रमीदृशम् ॥१०६॥
द्रष्टुमिच्छामि चात्रैव चतुर्युगाश्रयम् ऋषे ! ।
पुलस्त्यः प्राह च तथास्त्वित्येव योषितं निजाम् ॥१०७॥
पौत्रस्यापि प्रसंगेन भगवान् सम्मिलिष्यति ।
लाभमेवं विदित्वैव सुतं विश्रवसः सती ॥१०८॥
कृष्णयोगप्रदं वव्रे यं सोऽभूद् रावणस्तथा ।
ऐलविला तपस्तेपे कृष्णनारायणोपरि ॥१०९॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् स्वयम् ।
ऐलविलातपो द्रष्टुमाययौ सह्यपर्वते ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पुलस्त्योक्तचतुर्युगधर्माः, ऐलविलायै वरदानं, तपश्चर्या चेतिनिरूपणनामा चतुरशीतितमोऽध्यायः ॥ ८४ ॥

श्रीकृष्ण उवाच—

ऐलविला पुलस्त्यस्य पत्नी तपश्चचार ह ।
दुस्तरं पुत्रपुत्रार्थं चतुर्युगवृषान्वितम् ॥ १ ॥
अनादिश्रीस्वामिनारायणकृष्णनरायणः ।
सह्याद्रिशिखरे तस्या आश्रमे विप्ररूपधृक् ॥ २ ॥
जटावल्कलभस्माढ्यो मालाजपपरायणः ।
तस्थावागत्य निकटे द्रुमाऽधश्छायिते स्थले ॥ ३ ॥
कन्दमूलफलाहारो नित्यं त्रिषवणस्तथा ।
बालरूपः ऋषिपुत्रो यथा कश्चिन् मनोहरः ॥ ४ ॥
आगत्य तिष्ठति तत्र क्वचित् प्रयाति लीनताम् ।
क्वचिद् वृक्षे शुको भूत्वा भूत्वा कोकिलकस्तथा ॥ ५ ॥
मयूरश्चापि हंसश्च हरिणः क्वचिदेव वा ।
क्वचिद्रूपमगस्त्यस्य धृत्वा पश्यति तत्तपः ॥ ६ ॥
क्वचिद् भूत्वा विश्रवाश्च क्वचित् पुलस्त्ययोषिताम् ।
पुलस्त्यस्य सुतानां च धृत्वा रूपाणि वै क्वचित् ॥ ७ ॥
तपो निरीक्षते स्वामिकृष्णनारायणो मुहुः ।
राधिकोवाच हे कृष्ण किं पुण्यं योषितां तथा ॥ ८ ॥
कथं वै भगवाँस्तस्याः सन्निधौ विविधानि च ।
रूपाणि धृतवान् स्वामिकृष्णनारायणः प्रभुः ॥ ९ ॥
श्रीकृष्णः प्राह वै राधे ! ब्रह्मा पुत्रं पुलस्त्यकम् ।
'ओं नमः श्रीस्वामिकृष्णनारायणाय ते स्वाहा' ॥१०॥
इत्यार्पयन्महामन्त्रं ततः सोऽपि निजां प्रियाम् ।
ऐलविलां चार्पयत्तं मन्त्रं जजाप साऽनिशम् ॥११॥
तज्जापाऽऽकृष्टहृदयः स्वामिकृष्णनरायणः ।
भक्तिवश्यः समीपेऽस्यास्तथारूपोऽभवद्धरिः ॥१२॥
राधिके स मया दृष्टस्तदा कृष्णमृगात्मकः ।
अटमानो हरिकृष्णो वल्लभः श्रीपतिः पतिः ॥१३॥
ऐलविलातपः पश्यन् शृण्वन् जापं विराजते ।
सापि पुलस्त्यपत्नी वै जटावल्कलधारिणी ॥१४॥
परमेश्वरलब्ध्यर्थं यतते तापसी सती ।
आकाशवासिनी पृथ्व्यां कृत्वा तु वेदिकां मृदः ॥१५॥
वह्निं तत्र निधायैव प्रातः पूजां करोति सा ।
ततो रुद्रं सतीं कृष्णं लक्ष्मीं चाजं सवितृजाम् ॥१६॥
सूर्यं प्रभां गणेशं च साध्वी सद्स्तुभिः सुरान् ।
नित्यं प्रपूज्य च मालाजपं करोति वै शतम् ॥१७॥
ततः फलादि चाहृत्य मध्याह्ने हरये स्वयम् ।
नैवेद्यं सजलं चार्प्य तपः करोति तिष्ठति ॥१८॥
एकपादेन वै सूर्यं दृष्ट्वा स्थिरा प्रतिष्ठति ।
आसायं च ततश्चारार्त्रिकं स्नात्वा करोति च ॥१९॥
रात्रौ करोति भजनं कृष्णनारायणेति च ।
अर्धरात्रोत्तरं निद्रां घटिकामात्रमृच्छति ॥२०॥
समुत्थाय हरिं ध्यात्वा ब्राह्मे स्नात्वाऽर्चनं हरेः ।
नित्यवत् प्रकरोत्येव कन्दमूलफलाशना ॥२१॥
वर्षमात्रं तथा कृत्वा ततो वार्यशनाऽभवत् ।
सूर्योदयं समारभ्याऽऽसायं तिष्ठति नित्यदा ॥२२॥
अङ्गुष्ठैकस्थिरा चैवं वर्षमात्रं तपोऽकरोत् ।
ततो दिवानिशं स्थैर्यं समालम्ब्य स्थिताऽभवत् ॥२३॥
वाय्वाहारा हृदयेन पूजिका श्रीहरेस्तदा ।
शरीरं वर्षमात्रेण जडवत् काष्ठतां गतम् ॥२४॥
पक्षिणो यत्र तिष्ठन्ति कीटाः कुर्वन्ति मृद्गृहम् ।
एवं वल्मीकछन्ना सा वर्षे चतुष्टयेऽभवत् ॥२५॥
वर्षे तु पञ्चमे तस्या मस्तके स्तम्बरोहणम् ।
तृणोद्गमश्च सञ्जातो दृश्यते सा न मानवी ॥२६॥
ततो ब्रह्मा हरो विष्णुः सूर्यो गणपतिः स्त्रियः ।
आययुर्देवदेव्याद्याः सतीतपःप्रकर्षिताः ॥२७॥

देव्यः स्तम्बतृणादीनि दूरीचक्रुर्मृदां चयात् ।
गणेशश्चापि सूर्यश्च मृदो दूरीप्रचक्रतुः ॥२८॥
ब्रह्मा जलं ददौ तत्राऽञ्जलिना प्रोक्षणं शुभम् ।
रुद्रः प्राणप्रचारं चाऽकारयत् प्रोक्षणेन तु ॥२९॥
विष्णुस्तस्याश्चेतनं चाऽऽवाह्यत् सर्ववर्ष्मणि ।
ततः सा तूत्थिता बोधं प्राप्ताऽनमत् सुरान् पुरः ॥३०॥
'ओं नमः श्रीस्वामिकृष्णनारायणाय ते स्वाहा' ।
उवाच साध्वी चाऽव्यग्रा रक्षन्तं स्वां निजं प्रभुम् ॥३१॥
सस्मार देवदेवेशं श्रीमत्कृष्णनरायणम् ।
देवा ऊचुर्वद साध्वि ! किं ते मनसि वर्तते ॥३२॥
दद्मस्तेऽभीष्टमत्रैव वरं वृण्वत्र मा चिरम् ।
इत्युक्ता सा प्रजगाद वरं कृष्णनरायणात् ॥३३॥
वृणोम्येव न चान्यस्माद् देवाः स्वस्त्यस्तु वः सदा ।
भवन्तः पूजिता नित्यं मया धर्मो यतो हि सः ॥३४॥
लोकसंग्रहरक्षार्थं स्वति वोऽस्तु यदागताः ।
देव्यः स्वस्ति च युष्माकं सदाऽस्तु कुशलं तथा ॥३५॥
इत्युक्त्वा स्वागतं चक्रे हृदयेन सुतुष्यता ।
जजाप श्रीस्वामिकृष्णनारायणं श्रियः पतिम् ॥३६॥
तावच्छ्रीभगवाँस्तत्र य आसीत् स्तम्बसंस्थितः ।
वृक्षरूपः स वल्मीके प्राविरास हरिः स्वयम् ॥३७॥
द्विभुजश्चम्पकवर्णः स्वर्णभूषाविराजितः ।
कोटिकोट्यर्कतेजोभिर्व्याप्तो दिव्याकृतिः पतिः ॥३८॥
दिव्यसौवर्णभूषाढ्यो दिव्याम्बरविराजितः ।
दिव्यरत्नालिमालाभिः शोभमानः श्रीवल्लभः ॥३९॥
दिव्यकटकशोभाढ्यो दिव्यमुकुटकुण्डलः ।
दिव्यकौस्तुभरशनोर्मिकायष्टिविराजितः ॥४०॥
राधारमाप्रभापार्वतीहंसामञ्जुलाऽर्चितः ।
सगुणामाणिकीशान्ताविजयाललिताऽर्चितः ॥४१॥
हैमन्तभगवद्देवप्रकाशकेशवादिभिः ।
पार्षदैः सहितस्तत्र सुयुवा संस्थितोऽभवत् ॥४२॥
रूपानुरूपाऽवयवः करे नक्तकमादधन् ।
ताम्बूलचर्वणं कुर्वन् हसन् हरिः स्थितोऽभवत् ॥४३॥
कराभ्यां स स्पृशँस्तस्या मस्तके चाशिषं वदन् ।
वरार्थं च प्रयुञ्जँस्तां देवान् प्रति व्यलोकयत् ॥४४॥
देवैः साक्षाद्धरिर्दृष्टः स्तुतः स्तोत्रैस्तु सामगैः ।
पूजितः परया भक्त्या ततस्तस्थुः सुरेश्वराः ॥४५॥
पुपूज सा स्वामिकृष्णपरब्रह्मपरेश्वरम् ।
पत्रं पुष्पं जलं भावं ददौ श्रीपतये सती ॥४६॥
वरं समार्थयत् तस्माच्चतुर्युगगुणाश्रयाः ।
पौत्रा मे सन्तु भगवन् येन योगो भवेत्तव ॥४७॥
पौत्राणां च कुटुम्बस्य भक्त्या चानन्यलब्धया ।
युगदोषेण दोषैश्च द्वेषेणापि द्रुतं तव ॥४८॥
भवेद् भक्तिः स्मृतिर्नित्या स्नेहादप्यधिका यतः ।
तव योगं विना मोक्षो नैव भवति देहिनाम् ॥४९॥
आन्योपायैश्चिरंलभ्यो द्वेषैर्लभ्यो द्रुतं भवान् ।
तव हस्तेन मरणं मोक्षदं निश्चितं भवेत् ॥५०॥
इत्येवं मत्कुटुम्बार्थे समिच्छामि वरं प्रभो ।
देहि मे चेति श्रुत्वैव तथाऽस्त्वित्याह केशवः ॥५१॥
अथ हर्याज्ञया देवाः सत्कृता प्रययुश्च ते ।
ऐलविला तपस्त्यक्त्वा प्रसादं बुभुजे हरेः ॥५२॥
जलं फलं रसं मधु स्नात्वा शुद्धिं विधाय च ।
स्वामिकृष्णं समपृच्छत् पुलस्त्यस्य प्रिया सती ॥५३॥

ऐलविलोवाच—

भगवन् संशयान्मेऽत्र छेत्तुमर्हसि सर्ववित् ।
नार्यास्तु संशयान् कश्चिदन्यश्छेत्तुं न चार्हति ॥५४॥
केचिद् ध्यानं वृषं चान्ये विवेकं योगसाधनाम् ।
ब्रह्मचर्यं तपः पातिव्रत्यं पत्नीव्रतं परे ॥५५॥
सत्यं त्यागमहिंसां सतीत्वं सन्यासमित्यपि ।
दानं दयां चाध्ययनं प्रशंसन्ति तथेतरे ॥५६॥
तीर्थयात्रां चेन्द्रियाणां निग्रहं सत्समागमम् ।
सर्वार्पणं प्रपत्तिं वा गुर्वर्पणं विरागिताम् ॥५७॥
ज्ञानं ब्रह्ममयं चैषां किं श्रेयो ब्रूहि मे प्रभो ! ।
यदि वा विद्यते चान्यद् गुप्तं तद्वक्तुमर्हसि ॥५८॥
श्रुत्वा चैलविलावाक्यं स्वामिकृष्णनरायणः ।
प्राह दिव्यं परं तत्त्वं श्रेयःप्रदं परात्परम् ॥५९॥
हिताय सर्वजीवनां पूर्वैः पूर्वतरैः सुतम् ।
अवाच्यं सर्वगूढार्थं ज्ञानमज्ञैर्बहिष्कृतम् ॥६०॥

श्रीकृष्णनारायणस्वाम्युवाच—

परं गुह्यतमं क्षेत्रं परधामप्रदं परम् ।
ममाऽक्षराह्वयं क्षेत्रं यत्र कुंकुमवापिका ॥६१॥
सर्वेषां देहिनां वासात् संसारार्णवतारिणी ।
अश्वपट्टसरोरम्या लोमशाश्रमशोभिता ॥६२॥
तत्र भक्ता ऐलविले ! मदीयं व्रतमास्थिताः ।
निवसन्ति महात्मानः परां भक्तिं ममाश्रिताः ॥६३॥

उत्तमं सर्वतीर्थानां क्षेत्राणामुत्तमं च यत् ।
स्थानानामुत्तमं स्थानं क्षेत्रं मेऽक्षरसंज्ञतम् ॥६४॥
भूतले नैव संलग्नं चिदाकाशस्थितं हि तत् ।
अदिव्या नहि पश्यन्ति मुक्ताः पश्यन्ति तद् हृदा ॥६५॥
स्थानं प्रियतमं मे तद् गुप्तं शीघ्रं प्रमुक्तिदम् ।
मद्भक्ता यत्र वर्तन्ते मामेव च भजन्ति वै ॥६६॥
तत्र यान्ति नरा नार्यस्तेऽपि प्रयान्ति मत्पदम् ।
अन्यधामानि दृष्ट्वैव मामेव प्रविशन्ति ते ॥६७॥
दत्तं जप्तं कृतं चेष्टं तप्तं ध्यातं हुतं श्रुतम् ।
सेवितं भोजितं ज्ञातं सर्वं तत्राऽक्षयं भवेत् ॥६८॥
जन्मान्तरसहस्रेषु कृतं पापं तु सञ्चितम् ।
क्षेत्रेऽक्षरे प्रविष्टस्य सर्वं द्राग् याति संक्षयम् ॥६९॥
मानवास्तु नरा नार्यः संकराश्चातिपापिनः ।
पापयोनिगता दुष्टाः स्त्रियः संकीर्णयोगजाः ॥७०॥
म्लेच्छाश्चण्डालजाश्चापि कीटाः पिपालिका मृगाः ।
पशवः पक्षिणः सरीसृपास्तृणानि पादपाः ॥७१॥
वल्लयो जडजाताश्च यदि क्षेत्रेऽक्षरे मृताः ।
ते तु सचन्द्रतिलका महाहस्त्यादिवाहनाः ॥७२॥
रम्ये ममाऽक्षरे दिव्यास्ते प्रयान्ति प्रमोक्षणम् ।
अक्षरे तु मृतः कश्चिन्न याति नरकं ह्यघी ॥७३॥
ममाऽनुग्रहमाप्तास्ते सर्वे यान्त्यक्षरं पदम् ।
किं वक्तव्यं भवेदत्र चैलविले मम स्थले ॥७४॥
मोक्षं सुदुर्लभं ज्ञात्वा संसारं चातिभीषणम् ।
गतिं ज्ञानेन हत्वाऽपि वसेत् क्षेत्रेऽक्षरे मम ॥७५॥
यत्र तत्र विपन्नस्य गतिस्त्वत्र हि मोक्षदा ।
प्रसादाद् दह्यति पापं वासात्तु दिव्यता भवेत् ॥७६॥
दर्शनान्मम मुक्तिश्च जायते त्वक्षरे पदे ।
मम योगान्महामुक्तिर्जायते मे परे पदे ॥७७॥
अपुण्या नहि पश्यन्ति मायापटलचक्षुषः ।
तमोवृत्ता न पश्यन्ति दिव्यं क्षेत्रं ममाऽक्षरम् ॥७८॥
ते तु विण्मूत्ररेतोभृद्देहे विशन्ति वै मुहुः ।
हन्यमानोऽपि यो देही विशेद् विघ्नशतैरपि ॥७९॥
अक्षरं परमं क्षेत्रं चाऽश्वपट्टसरोऽभितः ।
स याति परमं धाम यत्र गत्वा न शोचति ॥८०॥
जन्ममृत्युजरामुक्तं परं क्षेत्रं ममास्पदम् ।
अपुनर्मरणानां तद् गदितं मोक्षकांक्षिणाम् ॥८१॥
न दानैर्न तपोभिश्च न यज्ञैर्नापि विद्यया ।
प्राप्यते गतिरुत्कृष्टा याऽक्षरे लभ्यते परा ॥८२॥
नानावर्णा विवर्णाश्च चण्डालाद्या जुगुप्सिताः ।
किल्बिषैः पूर्णदेहाश्च निकृष्टैः पातकैर्युताः ॥८३॥
तेषां तीक्ष्णं भेषजं चाक्षरं क्षेत्रं परं पदम् ।
अक्षरं तत्परं ज्ञानमक्षरं तत्परं पदम् ॥८४॥
अक्षरं तत्परं वस्त्वमक्षरं पुरुषोत्तमः ।
धृत्वा वै नैष्ठिकीं दीक्षामक्षरे ये वसन्ति ते ॥८५॥
मत्तो लब्ध्वा परं ज्ञानं यान्ति मे परमं पदम् ।
प्रभासं स्वर्णनगरी वस्त्रापथं च नर्मदा ॥८६॥
नारायणसरश्चापि पुष्करं कौरवं स्थलम् ।
गंगा बदरिका शालग्रामं श्रीशैल इत्यपि ॥८७॥
हिमालयश्च केदारो गया गोकर्णमित्यपि ।
कृष्णा गोदावरी सिन्धुर्गोमती ब्रह्मपुत्रिका ॥८८॥
नारायणीसरिच्चापि विज्ञतुरीयकं सरः ।
तूंगानीकसरो न्याससरश्चण्डसरस्तथा ॥८९॥
नष्टजरानदी रक्तवार्धिर्नीलाब्धिरित्यपि ।
नीपरा दीनयूपा च सेना महाबृहत्सरः ॥९०॥
अन्तार्किवर्तुलं चापि सूपर्युपरिकंसरः ।
पन्नाम्नी कालिमा चापि यानेशी श्वेतवारिधिः ॥९१॥
उरलाद्रिर्मानसं च सरो ब्रह्मसरोवरम् ।
बालकृष्णशरश्चापि द्विकलं च सरस्तथा ॥९२॥
अंगशिक्षांगिका चापि मरानदी तुरुनदी ।
ऐतानदी मिकांगा च इरावती नदी तथा ॥९३॥
हुतलीना च गंगाऽपि साभराख्यं महत् सरः ।
एतानि पुण्यस्थानानि पृथिव्यां विश्रुतानि तु ॥९४॥
तानि त्वायान्ति सततं चाश्वपट्टसरोवरम् ।
तन्मृताः परमं मोक्षं न यान्ति ते यथाऽक्षरे ॥९५॥
कुंकुमवापिकाक्षेत्रे साक्षादहं परेश्वरः ।
ब्रह्महृदं समादाय वर्ताम्येव निरन्तरम् ॥९६॥
ब्रह्महृदोऽनन्तजन्मकृतपापानि नाशयेत् ।
अन्यत्र सुलभा गंगा श्राद्धं दानं जपो व्रतम् ॥९७॥
कुंकुमवापिकाक्षेत्रे तत्सर्वं त्वतिदुर्लभम् ।
यदि पापो यदि शठो यदि त्वधार्मिको जनः ॥९८॥
अक्षरं तत्पदं प्राप्य पुनाति कुलसप्तकम् ।
यजेत जुहुयान्नित्यं ददात्यर्चयते तथा ॥९९॥
क्षेत्रेऽक्षरे तु मां भक्तस्तस्याऽनन्तगुणं फलम् ।
तत्र गत्वा तु ये भक्ता अर्चयन्ति स्तुवन्ति माम् ॥१००॥
सर्वपापविनिर्मुक्तास्ते ज्ञेया मम पार्षदाः ।
अन्यत्र यागाज्ज्ञानाद्वा सन्यासादथ योगतः ॥१०१॥

प्राप्यते तत्परं स्थानं सहस्रेण तु जन्मनाम् ।
अक्षरे ये वसन्त्येते विन्दन्त्येकेन जन्मना ॥१०२॥
तत्र योगस्तपो ज्ञानं व्रतं चाहं निरन्तरम् ।
मां समासाद्य भक्तानां गन्तव्यं नाऽस्ति चाऽपरम् ॥१०३॥
तदेव गुह्यं गुह्यानां परं श्रेयःप्रदं मतम् ।
ज्ञानध्याननिविष्टानां परमानन्दमिच्छताम् ॥१०४॥
तत्र ददाम्यहं मन्त्रं त्वक्षरे क्षेत्रके मम ।
यत्तत्परतरं तत्त्वं सोऽहं क्षेत्रं च तन्मम ॥१०५॥
भ्रूमध्ये नाभिमध्ये च हृदयेऽपि च मूर्द्धनि ।
यस्मात् कस्माद् याति चाऽसुस्त्वक्षरेऽत्र प्रमुच्यते ॥१०६॥
अनादिश्रीकृष्णनारायणस्वामी वसाम्यहम् ।
मामासाद्याऽतिपापाश्च प्रयान्ति परमां गतिम् ॥१०७॥
नारायणानां सर्वेषां श्रेष्ठोऽहं परमेश्वरः ।
नारायणास्तथा चान्ये शंभ्वाद्या वैष्णवा अपि ॥१०८॥
धामान्यपि च सर्वाणि धामस्था मुक्तकोटयः ।
ब्रह्माण्डेश्वरवर्याश्च देवाद्यास्तीर्थकोटयः ॥१०९॥
वसामस्तत्र मे क्षेत्रेऽक्षरे चाश्वसरोऽभितः ।
कुंकुमवापिका ब्रह्मरूपिणी मुक्तसत्पुरी ॥११०॥
पापोपहतमतयो नैव पश्यन्ति दिव्यताम् ।
न तेषां वीक्षितुं शक्यं चाऽक्षरं मम भूतलम् ॥१११॥
पुण्यवासाः स्मरन्त्येनां पुरीं दिव्येन चक्षुषा ।
पश्यन्ति योगसिद्धया च लोकान्तरेऽपि वासिनः ॥११२॥
आगच्छतामिदं स्थानं सेवितुं मोक्षकांक्षिणाम् ।
मृतानां पथि चेत्तेषां पुनर्जन्म न विद्यते ॥११३॥
योगी वाऽप्यथवाऽयोगी पापी वा पुण्यकृत्तमः ।
न लोकवचनात् पित्रोर्न चापि गुरुवादतः ॥११४॥
मतिं चोत्क्रमयेत् साक्षादक्षरक्षेत्रगां शुभाम् ।
कुंकुमवापिकावासं चाऽश्वसरोजलाप्लवम् ॥११५॥
राधिके ! भगवानेवं चैलविलं प्रबोध्य च ।
विरराम क्षणं साऽपि श्रुत्वाऽऽश्चर्यमवाप ह ॥११६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽनादिश्रीकृष्णनारायणस्वामिना ऐलविलायै कथितमक्षरमाहात्म्यमितिनामा पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! पश्चादैलविलाऽवदद्धरिम् ।
भगवन्मेऽस्ति जिज्ञासा तत् क्षेत्राऽक्षरमीक्षितुम् ॥ १ ॥
अनादिश्रीकृष्णनारायणस्तां सह्यपर्वतात् ।
आरोप्य गरुडे चैत्रे व्योम्नाऽक्षरं समाययौ ॥ २ ॥
कुंकुमवापिकाक्षेत्रं दिव्यमक्षरसंक्षितम् ।
सच्चिदानन्दधामाभं नित्यानन्दितमानवम् ॥ ३ ॥
दिव्यदेहिसमव्याप्तं देवपित्रादिसेवितम् ।
ब्रह्महृदोदसम्मिश्राऽश्वपङ्कसरोऽन्वितम् ॥ ४ ॥
सहस्रर्षिगणैश्चापि कृतावासं समुज्ज्वलम् ।
पावनं पावनानां च तीर्थानां तीर्थमुत्तमम् ॥ ५ ॥
मोक्षदानां परं मोक्षप्रदं सर्वाघनाशकम् ।
शतसाहस्रप्रासादैः शोभितं वनवल्लिभिः ॥ ६ ॥
दिव्यद्रुमैः समुद्यानैः सहस्रैः परिवारितम् ।
जलाशयैः शुभारामैः फलिपुष्पिसुगन्धितम् ॥ ७ ॥
कल्पद्रुमैः समृद्धं च चिन्तामणिप्रभासितम् ।
वर्धितं मुनिभिर्नित्यं यज्ञाऽध्ययनभक्तिभिः ॥ ८ ॥
आश्रितं चातिथिभिश्च ब्रह्मधामगमैः प्रियैः ।
प्रियाभिः श्रीहरेर्यच्च कृतकौतुकमंगलम् ॥ ९ ॥
अमृतानां हृदैर्युक्तं यावत्सृष्टिनिषेवितम् ।
गीर्वाणभाषाकुशलैर्वैदिकैर्धार्मिकैर्युतम् ॥१०॥
सौवर्णदण्डसंराजद्दीर्घध्वजसहस्रकम् ।
सासभौमाढ्यनिलयैः शृंगसौधैर्विराजितम् ॥११॥
व्योमयानैर्यत्र मुक्ता उड्डयन्ति नराः स्त्रियः ।
स्वर्गगाः पक्षिणो यत्र संस्कृतज्ञाः शुकादयः ॥१२॥
वदन्ति वैदिकीं भाषां गोहरत्याद्या अपि द्विजैः ।
अग्नयो यत्र वर्तन्ते प्रदीप्ता वेदिकास्थले ॥१३॥
दानानि यत्र दीयन्ते सृष्टिपालैर्दिवानिशम् ।
यात्रिका यत्र वर्तन्ते लक्षशो मोक्षभागिनः ॥१४॥
श्रोतॄणां कथकानां च सभास्थलसहस्रकम् ।
देवप्रतिमाप्रासादाः शतशोऽथ सहस्रशः ॥१५॥
विद्यन्ते कानकैर्व्योम्नि कलशैः शृंगशोभनैः ।
वनस्पतयो दृश्यन्ते निकुञ्जा गृहमेधिनाम् ॥१६॥
आश्रमाः ऋषिवर्याणां शोभन्ते स्वर्गिणामिव ।
तापसा यत्र विद्यन्ते कोटिशोऽश्वसरोऽभितः ॥१७॥
साधवो यत्र लोकानां कृष्णभक्तिं प्रकुर्वते ।
साध्व्यो ब्रह्मप्रिया यत्र ब्रह्मव्रतपराः सदा ॥१८॥
वसन्ति कृष्णसेवार्थं क्षेत्राऽक्षरकृताश्रयाः ।
ज्ञानयज्ञा ब्रह्मयज्ञा दानयज्ञा भवन्ति च ॥१९॥
सेवायज्ञा मोक्षयज्ञास्तृतियज्ञा भवन्ति च ।
कथायज्ञाः सततं च विप्रर्षयो वसन्ति च ॥२०॥

व्रतयज्ञाः सत्रयज्ञा उद्यापनविधिप्रथाः ।
तीर्थयज्ञा हरेर्नाम्नां कीर्तनक्रतवः सदा ॥२१॥
वर्तन्ते सततं यत्र देवाराधनरीतयः ।
दिव्यपावनहृदया वसन्ति यत्र देहिनः ॥२२॥
कृष्णनारायणस्वामिन् परब्रह्मेतिवादिनः ।
कम्भरानन्दनकृष्ण गोपालात्मज माधव ॥२३॥
श्रीपते राधिकाकान्त सर्वात्मन् भव मे प्रिय ।
इत्येवं भजमानास्तं बालकृष्णं वसन्ति ते ॥२४॥
वैरहीनास्तिरश्चोपि ददर्शैलविलाऽऽश्रमे ।
लोमशस्य रमणीये ब्रह्मप्रियाद्यधिष्ठिते ॥२५॥
मूर्तयस्तन्निवासिन्यस्तेजःप्रचुरशोभनाः ।
तया व्योम्ना वीक्षिता वै यानस्थयैलया तदा ॥२६॥
भ्रमणं तद्विमानेन कृत्वा क्षेत्रप्रदक्षिणम् ।
अवाततार प्रासादे कृष्णनारायणस्य सा ॥२७॥
सह श्रीस्वामिना सार्धं ययौ श्रीकम्भरां प्रति ।
ददर्श पूजयामास ववन्दे च ननाम च ॥२८॥
ततो गोपालकृष्णं सा ययौ ननाम पादयोः ।
ततो गजासनं गत्वा स्वामिनं सहयायिनम् ॥२९॥
अनादिश्रीकृष्णनारायणं कृतपरिश्रमम् ।
बालरूपं परब्रह्म सिषेवे देहमर्दनैः ॥३०॥
पादसंवाहनं चक्रे दासीव श्रीहरेस्ततः ।
तीर्थान्यश्वसरःस्थानि ययौ सस्नौ विधानतः ॥३१॥
जलं कुंकुमवाप्याश्च पपौ दधार मस्तके ।
ततः श्रीलोमशं नत्वा पूजयित्वा विधानतः ॥३२॥
ब्रह्मप्रियाः सर्वकन्या मिलित्वा मन्दिरं ययौ ।
बालकृष्णस्त्वैलविलां भोजयामास पायसम् ॥३३॥
पाययामास मधुरं वारि स्वचरणामृतम् ।
पावयामास भक्तां स्वां रञ्जयामास भावतः ॥३४॥
ततः साऽक्षरभूमिं तां विलोक्य स्थातुमानसा ।
प्रार्थयत्परमात्मानं सदा वासं सती यदा ॥३५॥
चैत्रे हरिर्ददौ तस्यै रूपद्वयं समं शुभम् ।
छायां संप्रेषयामास पुलस्त्यं प्रति वै तदा ॥३६॥
ऐलविलां दिव्यरूपामरक्षत् स्वान्तिके सदा ।
ब्रह्मव्रतधरां साध्वीं साधुधर्मान्वितां सतीम् ॥३७॥
अथ तस्या वरदानं सफलं समजायत ।
विश्रवसोऽभवन्पत्न्यश्चतस्रः कुलवर्धिकाः ॥३८॥
पुष्पोत्कटा च वाका च कैकसी देववर्णिनी ।
ज्येष्ठं वैश्रवणं यक्षं सुषुवे देववर्णिनी ॥३९॥
कैकस्यजनयत् पुत्रं रावणं राक्षसाधिपम् ।
कुंभकर्णं शूर्पणखां तथैव च बिभीषणम् ॥४०॥
पुष्पोत्कटाऽप्यजनयत् पुत्रान् विश्रवसः शुभान् ।
महोदरं प्रहस्तं च महापार्श्वं खरं तथा ॥४१॥
कुंभीनसीं तथा शृंगीमन्याश्च शतकन्यकाः ।
वाकाजास्त्रिशिराश्चैव विद्युज्जिह्वश्च दूषणः ॥४२॥
क्रूरं कन्याशतं चापि पौलस्त्यवंशजा दश ।
रक्षोभावयुताः सर्वयुगधर्माश्रयास्तथा ॥४३॥
तपोयुक्ता दानयुक्ता रागयुक्ताः सकल्मषाः ।
सत्याऽसत्योभययुक्ता बलदर्पसमन्विताः ॥४४॥
कलिधर्माश्रिताश्चापि यन्नाशार्थं हरिः स्वयम् ।
रामरूपं विधत्ते च प्रहन्ति राक्षसाँस्ततः ॥४५॥
पापानि क्षालयित्वा ते यान्ति वैकुण्ठवासिताम् ।
ऐलविलावरदानप्रतापेन तु वंशजान् ॥४६॥
सबलान् राक्षसान् कृष्णचक्रं हन्ति युगे युगे ।
राधिके मम चक्रं वा जलं वा तुलसीदलम् ॥४७॥
पदं वा येन सम्प्राप्तं मुक्तो भवति कोऽपि यः ।
यक्षो वा राक्षसो वाऽपि दानवो दैत्य इत्यपि ॥४८॥
विश्रवाः सिंहले द्वीपे ययौ वंशयुतस्ततः ।
ऐलविला तपः स्थाने चक्रे यत्र हरिः स्वयम् ॥४९॥
तद्रक्षां च तपसोऽपि परीक्षां प्रचकार ह ।
तत्तीर्थं चैलवैलेयं शृंगं सह्याद्रिभूभृतः ॥५०॥
सजलं जलकुण्डेन प्रस्रवणेन राजितम् ।
पावनं श्रीकृष्णनारायणपादरजोन्वितम् ॥५१॥
सञ्जातं मोक्षदं यत्र वृक्षस्तम्बात्मको हरिः ।
समभूद् वर्षमात्रं वै वर्षमात्रं शुकादयः ॥५२॥
हरिणा धृतरूपाश्च तद्वंशा वैष्णवाश्च ते ।
सह्याद्रौ सह्यपक्षिस्त्रीजन्यास्ते हरिवंशजाः ॥५३॥
दिव्या दिव्यस्वरूपाश्च वसन्ति सुसुखान्विताः ।
यत्र वृक्षाः पावनाश्च हरिवंशोद्भवास्तथा ॥५४॥
यत्राऽवग्रहलेशोऽपि सह्याद्रौ न कदाचन ।
यत्राऽनलदवो नास्ति न हिंस्रोपद्रवस्तथा ॥५५॥
श्वेतवर्णाश्च करिणश्चतुर्दन्ता महोच्छ्रयाः ।
हरिवंशोद्भवा यत्र वर्तन्ते देववाहनाः ॥५६॥
शरभाश्चोच्छ्रिता यत्र हरिवंशोद्भवाः शुभाः ।
शुभ्रवर्णा वसन्त्येव द्विशुण्डाः सिंहजातयः ॥५७॥
श्वेताः स्वस्तिकयुक्ताश्च भुजगाः पावनास्तथा ।
निःक्ष्वेडा हरिवंशोत्थाः श्वेता मयूरजातयः ॥५८॥

वर्तन्ते दिव्यरूपास्ते हरेर्वंशोद्भवा हि ते ।
सह्याद्रिः सर्वथा तीर्थोत्तमं तस्य वनानि च ॥५९॥
पञ्चवर्षाणि वै हरेर्योगात् पावित्र्यवन्ति च ।
पठनाच्छ्रवणाद् राधे भुक्तिमुक्तिप्रदानि च ॥६०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने ऐलविलायाः कुंकुमवाप्यागमनं रूपद्वयं, हरिवंशीयप्रजायाः सह्याद्रौ वासश्चेतिनिरूपणनामा षडशीतितमोऽध्यायः ॥ ८६ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके भक्ता हरेर्गृह्णन्ति सद्गुणान् ।
दुष्टा गुणेषु दोषाँश्चारोप्य गृह्णन्ति दुर्गुणान् ॥ १ ॥
विश्रवसस्तु पुत्रस्य खरस्य राक्षसस्य वै ।
खचर्यामभवत् पुत्रो ह्यधर्मजीवसंज्ञकः ॥ २ ॥
कट्यां वक्रो भग्नपृष्ठो गण्डे गोधाख्यदूषणः ।
कपर्दाक्षः सदा श्वासे दुर्गन्धाढ्यः शिशुप्रियः ॥ ३ ॥
सकल्मषोऽतिकापट्याचारो विश्वासघातकः ।
जन्मना ताडिता पद्भ्यां माता मृतेति मातृहा ॥ ४ ॥
घूकस्वरः कृष्णवर्णः पिच्छतुल्यशिरोरुहः ।
पृष्ठलिङ्गी कुण्ठकर्णो बहिर्दंष्ट्रोऽतिमत्सरः ॥ ५ ॥
उत्पन्नमात्रदुःखकृद्बालानां धर्षकोऽभवत् ।
एकदा स ययौ नद्यास्तटे रन्तुं सबालकः ॥ ६ ॥
चर्मकारस्य वासेषु चान्त्यजानां गृहेषु च ।
रिक्तेषु बालरक्षेषु ज्येष्ठास्तु कर्मणे गताः ॥ ७ ॥
तत्र बालांस्ताडयित्वा भक्षयामास तद्गृहे ।
श्वमांसं मद्यपानं च प्रचकार पपौ जलम् ॥ ८ ॥
तदा बालैर्मिलित्वा च धृत्वा बद्ध्वाऽन्त्यजैर्बलात् ।
क्षारकुण्डे विनिक्षिप्तो दुर्गन्धे स्वल्पकर्दमे ॥ ९ ॥
शिलया छादितस्तत्र कुण्ड्यां क्षारपटस्य सः ।
दिवानिशं स वै कुण्ड्यां कुण्डीगन्धं समग्रहीत् ॥१०॥
मासार्धं प्राणरक्षार्थं बुभुक्षितस्तृषाकुलः ।
चर्मक्षालनजं वारि चार्मकर्दममित्यपि ॥११॥
सूक्ष्मकीटोद्भवं कुण्ड्यां भक्षयामास पापकृत् ।
राक्षसो जातिजो यश्च चाण्डालगृहभोजनः ॥१२॥
चर्मकुण्डकृतावासश्चर्मकर्दमभक्षकः ।
मातृहाः शिशुमारश्च कोऽस्मात्पापतरो भवेत् ॥१३॥
राधिके ! तादृशोऽधर्मजीवो नाम्ना महासुरः ।
अन्त्यजैश्चर्मकारैश्च आवलीरञ्जनाम्बरः ॥१४॥
निष्कासय कुण्डितो दुष्टस्ताडितः षण्ढितस्तथा ।
सिंहले द्वीपके तस्थौ रणान्ते वनिभक्षकः ॥१५॥
पशून् पक्षिगणाँश्चापि क्वचित् कुटुम्बजाऽर्भकान् ।
धृत्वा करोति तद्घातं भक्षयत्येव तानपि ॥१६॥
एकदा भक्तराट् तत्र विभीषणो हरेः प्रियः ।
गृणन् रामेति कृष्णेति नारायणेति सञ्चरन् ॥१७॥
विहर्तुं तेन मार्गेण ययौ वनानि वीक्षितुम् ।
तत्रैनं वीक्षयामासाऽधर्मजीवं महासुरम् ॥१८॥
उवाच त्वं कथमत्र वर्तसे निर्जने सुत ।
एहि गृहं हरिं कृष्णं भज नारायणं सुखम् ॥१९॥
मा दुःखं वह शुष्केऽत्राऽरण्ये रणे तु निर्जने ।
श्रुत्वा विभीषणं प्राह पितृज्येष्ठं सगर्वकः ॥२०॥
को हरिः कश्च कृष्णोऽस्ति नारायणोऽपि कोऽस्ति वै ।
नैनं जानामि कश्चास्ते कस्माद् भजेऽविचारितम् ॥२१॥
भक्तो विभीषणः प्राह हरिर्दुःखहरोऽस्ति सः ।
परब्रह्म स्वयं दिव्यो दिव्याक्षरनिवासकृत् ॥२२॥
राक्षसोऽधर्मजीवस्तु प्राह धनापहारकः ।
द्रव्यापहारको नार्याद्यपहारक एव सः ॥२३॥
हारकस्त्वन्यसमृद्धेश्चौरः कश्चिद् भवेत् हरिः ।
कृष्णं पापं दुष्टकर्म तत्कृत् कृष्णो भवेद्धि सः ॥२४॥
नारास्वप्स्वयनः कश्चित् नदीस्थो धीवरो भवेत् ।
जलहारकभृत्यो वा किंकरः कस्यचिद्भवेत् ॥२५॥
जले वासकरो वाऽत्र सर्पो मत्स्योऽथवा भवेत् ।
परः शत्रुर्ब्रह्म महान् महाशत्रुर्भवेद्धि सः ॥२६॥
दिव्यो धूर्तो द्यूतवेत्ता व्यसनी कश्चिदेव सः ।
अक्षैः पाशैः रमते च राति गृह्णाति नाणकम् ॥२७॥
द्यूतगृहे निवासी च भवेत् कश्चिदघात्मकः ।
विभीषणस्तु तं प्राह परमात्मा परेश्वरः ॥२८॥
पुरुषोत्तम एवाऽयं भगवानीश्वरेश्वरः ।
मुक्ताऽधिपः परे धाम्नि राजमानोऽस्ति पुत्रक ॥२९॥
राक्षसोऽधर्मजीवश्च प्राह नाऽयं तथा पितः ।
पं पानं मद्यजं तत्र रमते त्वात्मना स्वयम् ॥३०॥
मद्यपानादिलुब्धः स मद्यपः परमो भवेत् ।
परस्य दीनलोकस्य दुःखकृच्चेश्वरो भवेत् ॥३१॥
पुरु सिनोति पापानि चाऽधिकं तमसाऽऽवृतः ।
तामसः पापकृच्चाऽयं भवेत् स पुरुषोत्तमः ॥३२॥
भगं गुह्यं च वा तस्य नारीचिह्नं भवेत् खलु ।
भगवान् गुप्तनारी सा भवेत् पुरुषवेषिणी ॥३३॥

ईश्वराणां मादृशानां योद्धॄणामिशुभिर्हतः ।
न रक्षितुं स्वयं शक्तः स्वं भवेदीश्वरेश्वरः ॥३४॥
मुक्ता याः पतिभिर्नार्यो गृहान्निष्कासिताश्च याः ।
तासामधिपः स भवेद् व्यभिचारिशिरोमणिः ॥३५॥
परे धाम्नि गृहे नित्यं वसति परभूस्थितः ।
गृहद्वारविहीनः स भवेद्वा भिक्षुकः पितः ! ॥३६॥
विभीषणश्च तं प्राह पुत्र ! व्यूहस्वरूपधृक् ।
सर्वावतारहेतुः स सर्वशक्तिधरः प्रभुः ॥३७॥
गोलोकेशः स वैकुण्ठधामेशो वै परः पुमान् ।
योगिगम्योऽन्तरात्मा च मोक्षदश्चेति तं भज ॥३८॥
अधर्मजीवरक्षोऽपि प्राह मन्ये स वञ्चकः ।
वञ्चनार्थं तु लोकानां व्यूह्य व्यूह्य तु वेषधृक् ॥३९॥
क्वचिन्नटः क्वचिद्गोपः क्वचिद्राजकुमारवत् ।
क्वचिद्विप्रो भवत्येव वञ्चको व्यूहवान् भवेत् ॥४०॥
सर्वेषामवताराणां लोके वै निम्नकर्मणाम् ।
हेतुः कर्ता निम्नवर्णो भवेत् कश्चिद् विवर्णजः ॥४१॥
सर्वेषु प्राणिषु शस्त्रशक्त्याख्यस्य प्रयोजकः ।
भवेत् स घातकी कश्चिदिति मन्ये पितः खलु ॥४२॥
प्रसह्य भवति कष्टप्रदः कश्चिद् भवेदघी ।
गवां स वृषभाणां वै लोके समूहके महान् ॥४३॥
महावृषभो वा कश्चिद् भवेद्वा वृषवाहकः ।
कुण्ठितं धामवासादि गृहकुड्यादिवर्जितः ॥४४॥
परः शत्रुस्वरूपो वा पुमान् भवेद्धि रक्षसाम् ।
समशीलैर्योगवद्भिर्गम्यः सातपदीनकम् ॥४५॥
तस्मादसज्जनः कश्चिदिति मन्ये पितः खलु ।
अन्तरं भिन्नता यस्य कामे मनसि चात्मनि ॥४६॥
वाचि वा भिन्नता तस्माद् विश्वासघातको भवेत् ।
मोक्षं सर्वं समाच्छिद्य दुर्बलस्य विनाशनम् ॥४७॥
मन्ये करोति कश्चित् स हिंस्रो दुर्बलघातकः ।
कस्तं भजेदसन्तं वै गुणाद्यैश्च विवर्जितम् ॥४८॥
विभीषणस्तु तं प्राह स तु विद्वान् गुणाश्रयः ।
वेदविद् वेदशास्त्रादिकर्ता शीलव्रतादिमान् ॥४९॥
सर्वधमाश्रयः साधुकर्मकः शान्तिसंभृतः ।
अधर्मजीवो रक्षोऽथ प्राह विद्वान्न चास्ति सः ॥५०॥
न रंभणं विजानाति गीतिं जानाति नैव च ।
अभिचारान्न जानाति मायां जानाति नैव च ॥५१॥
अतो नैव भवेद्वा स विद्वान् पितः कदाचन ।
गुणो रज्जुर्गवां दोहकार्यार्थे यस्य विद्यते ॥५२॥
स्कन्धे तस्माद् भवेद् गोपो गुणाश्रयः पितः खलु ।
वेदं वा वेदिकां ग्रामचतुष्के निर्मितां जनैः ॥५३॥
पाषाणानां मृदां वा तां कर्तुं जानाति कुंभकृत् ।
कुंभकारो भवेद् वाऽयं वेदिकाशिल्पवित् खलु ॥५४॥
शं शातनं हि केशानां करोत्यस्त्रेण मस्तके ।
नापितोऽयं भवेद्वा च रोमशत्रुप्रशस्त्रवान् ॥५५॥
शीलं चाऽस्खलनं धर्मो व्रतं कृच्छ्रादि यत्तपः ।
अत्ति खादति चोभं तत् तादृग्धर्मविघातकः ॥५६॥
शीलव्रतादनश्चायं भवेत् कश्चिद्धि भाण्डकः ।
सर्वे धर्माः पशुधर्मास्तद्वान् वा स पशुर्भवेत् ॥५७॥
साधोः कर्म गृहस्थानां विरुद्धं गृहभञ्जनम् ।
सन्यासादिस्वरूपं तत्कारकोऽयं यतिर्भवेत् ॥५८॥
जडो वा स्याद् विचित्तो वा शान्तिसंभृत एकलः ।
विभीषणश्च तं प्राह पुत्र विप्रोऽस्ति माधवः ॥५९॥
यज्ञोपवीतसन्धर्ता क्लेशतापप्रशामकः ।
महाविद्याश्रयः शास्त्ररचनाकारकः स्वयम् ॥६०॥
एक एवाऽद्वितीयोऽयं तीर्थयात्राकरोऽच्युतः ।
अधर्मजीवो रक्षस्तु प्राह विप्रो भवेन्न सः ॥६१॥
विं पक्षिणं तु यः प्राति गृह्णाति मृगयूर्यथा ।
तस्माद् व्याधो भवेत् कश्चित् पक्षिमारोऽथवा पशुः ॥६२॥
माधवो मातृगामी वा भवेत् कश्चित् पशुप्रजः ।
यस्य नियामको नास्ति यस्य नास्ति धवस्तथा ॥६३॥
मातृहीनः पितृहीनो भवेत् कश्चिद् वनेचरः ।
इतः प्राप्तश्च विः पक्षी तं यज्ञस्यैव सन्निधौ ॥६४॥
सन् धारयति भक्ष्यार्थं शकुनादो भवेद्धि सः ।
क्लेशैस्तापैः प्रकर्षैश्च शामको लोकनाशकः ॥६५॥
तस्माद् विप्लवकर्ता स भवेत् कश्चित्तु घातकी ।
महाविद्याः कामविद्याश्चोचाटनीं विनाशिनीम् ॥६६॥
मारिणीं मोहिनीं चेद्वा जानात्ययं तदा पितः ।
श्वपाको वाऽथ चाण्डालो मलिनो वा भवेद्धि सः ॥६७॥
शास्त्रेषु रचनां चायं प्रतारणस्य कारकः ।
प्रतारको भवेत् कश्चित् नहि शास्त्रस्य कारकः ॥६८॥
एकाकी तु वनेऽरण्ये भ्रमन् कुटुम्बहीनकः ।
अद्वितीयो विधुरोऽयं तीर्थमुण्डी च वा भवेत् ॥६९॥
न च्यवते धनं दाने दरिद्रः स भवेत् पितः ।
साधुधर्मविहीनश्च कपटी निन्दकः खलः ॥७०॥
प्रच्छन्नचौरो नारीणां चाञ्चल्यस्य प्रवर्धकः ।
असंख्यवारनारीणां भ्रामको वेषधारकः ॥७१॥

गोपीनामदृश्यकर्ता सिद्धमन्त्रकरो भवेत् ।
कामिनीनां कामनायाः पूरकोऽन्यायकारकः ॥७२॥
धर्मलोप्ता कुललोप्ता ह्यासक्तो ग्राम्यदर्शने ।
क्रोधलोभादिदोषाणामाकरोऽज्ञानशेवधिः ॥७३॥
व्यवहारविधुरश्च बुद्धिहीनोऽतितामसी ।
पशुपाशो भवेत् कश्चित् कन्याहरः शिशुप्रियः ॥७४॥
यादृशस्तादृशो वापि भवेन्मे किं प्रयोजनम् ।
तद्गुणान्न सहे दिव्यानदिव्यान् वा कथञ्चन ॥७५॥
नास्ति कश्चित् ततो ध्येयो भजनीयोऽपि मे पितः ।
अहं श्रेष्ठस्ततश्चाऽस्मि नास्ति श्रेष्ठोऽपि कश्चन ॥७६॥
विभीषणस्ततः प्राह मा पुत्र तं विमानय ।
अनादिश्रीकृष्णनारायणः श्रीकमलापतिः ॥७७॥
सर्वपतिः परमेशश्चान्तर्यामी नियामकः ।
कर्तुमकर्तुमन्यथाकर्तुं शक्तः स वै हरिः ॥७८॥
वर्तते बालरूपस्तं भज सर्वात्मना सुत ।
दिव्याः सन्ति गुणास्तस्मिन्नेकैको मोक्षदो हि यः ॥७९॥
सत्यं शौचं दया क्षान्तिस्त्यागः सन्तोष आर्जवम् ।
शमो दमस्तपः साम्यं तितिक्षोपरतिः श्रुतम् ॥८०॥
ज्ञानं विरक्तिरैश्वर्यं शौर्यं तेजो बलं स्मृतिः ।
स्वातन्त्र्यं कौशलं कान्तिर्धैर्यं च मार्दवं तथा ॥८१॥
प्रागल्भ्यं प्रश्रयः शीलं सह ओजो बलं भगः ।
गांभीर्यं स्थैर्यमास्तिक्यं कीर्तिर्मानोऽनहंकृतिः ॥८२॥
कृतोपकारश्चाद्रोहोऽनीहाऽकिञ्चनता तथा ।
मैत्री सार्वज्ञ्यमेवैते गुणाः सन्ति परात्मनि ॥८३॥
अधर्मजीवनो रक्षः प्राह मन्ये न तान् गुणान् ।
अहं नपुंसकं मन्ये कार्योत्साहविवर्जितम् ॥८४॥
धमार्थकामनाहीनं निष्क्रियं निर्बलं च तम् ।
परभाग्योपजीवित्वं परसम्पद्विकर्षणम् ॥८५॥
अमार्गवाहिता चापि मन्ये तत्रैव सन्ति हि ।
तस्मात् पितर्न मे वक्तुं गुणानर्हसि तस्य वै ॥८६॥
राधिके एवमेवायमधर्मजीवनोऽसुरः ।
शताधिकान् हरौ दोषान् जगाद पितरं प्रति ॥८७॥
विभीषणस्तु तं क्रुद्धो जघान गदया तदा ।
अमृतश्च विदुद्राव सिंहलद्वीपतस्ततः ॥८८॥
कपटी मानवो भूत्वा सौराष्ट्रे चाजगाम सः ।
शत्रुंजयानदीतीरे त्रिवटाख्ये भुवस्तले ॥८९॥
उवास कृतकेतश्च द्विषन् कृष्णनरायणम् ।
यतिवेषधरो भूत्वा सतां विद्वेषकः खलः ॥९०॥
दुष्टो धर्मध्वजो भूत्वाऽप्रतारयन् जनान् बहून् ।
अनादिश्रीकृष्णनारायणे श्रीपरमेश्वरे ॥९१॥
वैरं कुर्वन् वचोभिश्च लोके नास्तिक्यमादधन् ।
आययौ कुंकुमवापीक्षेत्रं नष्टायुरेव सः ॥९२॥
लोमशस्याऽऽश्रमे गत्वा निनिन्द परमेश्वरम् ।
तदा श्रीशंकरः श्रुत्वा भैरवं प्राह सेवकम् ॥९३॥
याहि भैरव दुष्टं तमधर्मजीवनाऽसुरम् ।
घातयैनं पिशाचैस्त्वं नारकिणं हि कर्मणा ॥९४॥
इत्युक्तो भैरवः शूलं धृत्वा गत्वा पिशाचकैः ।
जीवग्राहं गृहीत्वा तं बद्ध्वा चार्मणरज्जुभिः ॥९५॥
निचिक्षेप मलस्थाने विष्ठाव्याप्तक्षितौ तदा ।
तन्मखे मूत्रयामासुर्विष्ठां चक्रुः पिशाचकाः ॥९६॥
मूढमारं दृढं सर्वे मारयामासुरासुरम् ।
अङ्गानि छेदयामासुश्चिक्षिपुर्लवणं जलम् ॥९७॥
अनादिश्रीकृष्णनारायणद्वेषिणमेव ते ।
ततो रज्जुप्रबन्धेन गृध्रवासद्रुमान्तरे ॥९८॥
शाखायां बन्धयामासुर्लम्बते सोऽप्यधोमुखः ।
गृध्रकाकादिविष्ठा च पतत्येव तु तन्मुखे ॥९९॥
एवं मासद्वयं दण्डं चक्रे श्रीभैरवोऽसुरे ।
ततः क्षुधातृषाव्याप्तो ममार प्राणतो हि सः ॥१००॥
ययौ यमालयं सोऽयमसुरोऽधर्मजीवनः ।
कुंभीपातेऽपतत्तत्र सहस्रवत्सरं हि सः ॥१०१॥
अथाऽत्र भैरवो देवः सस्नौ चाश्वसरोवरे ।
तस्य संसर्गदोषोत्थपापप्रक्षालनाय वै ॥१०२॥
एवं विनाशमापन्नोऽसुरोऽधर्मप्रजीवनः ।
शिशुप्रियः स्वपापेन मृतोऽसद्गतिमार्गगः ॥१०३॥
राधिके मेऽपराधस्य कर्तॄणां नास्ति सद्गतिः ।
यदि स्याच्छरणापन्नस्तदा गतिं ददाम्यहम् ॥१०४॥
अथ शरणं नाऽऽयातो मृतोऽपि परमेश्वरम् ।
ततः कोट्यर्बुदवर्षैरप्यस्य सद्गतिर्न वै ॥१०५॥
आषाढे स मृतो दैत्यसमो रक्षोऽतिनिन्दकः ।
अथ विभीषणः श्रुत्वाऽधर्मजीवमृतिं ततः ॥१०६॥
नीत्वा तन्मातरं तत्र सौराष्ट्रे व्योममार्गतः ।
आययौ चार्थयामास सद्गतिं परमेश्वरात् ॥१०७॥
हरिर्जन्मान्तरे प्राह तस्य गतिर्भविष्यति ।
मम हस्तेन मृत्युं स लब्ध्वा यास्यति सद्गतिम् ॥१०८॥
तस्य मात्रे ददौ मन्त्रं लोमशर्षिस्ततः परम् ।
विभीषणाय मन्त्रं स ददौ श्रीपारमेश्वरम् ॥१०९॥

'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
मासं स्थित्वा ययतुस्तौ राधिके वै निजालयम् ॥११०॥
भेजाते श्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
विभीषणश्च खचरी त्वन्ते दिव्यौ बभूवतुः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने खरपुत्रस्याऽधर्मजीवनस्य नास्तिक्यं, हरेर्गुणेष्वगुणकल्पनाः, हरौ द्वेषोऽसद्गतिस्ततः कालान्तरे सद्गतिवरदानमित्यादिनिरूपणनामा सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

श्रीकृष्ण उवाच —

श्रूयतां राधिके दिव्यं चमत्कारं पुनर्हरेः ।
प्रयागे कुंभयोगे तु कोटिशो देहिनो ययुः ॥ १ ॥
मानवा नागदैत्याश्च सुराः ऋषिगणास्तथा ।
पितरो मुनयः सिद्धाः श्रावणे तत्र चाययुः ॥ २ ॥
दशक्रोशेषु सर्वत्र नगरं नूतनं ह्यभूत् ।
तद्बहिर्देववृक्षाश्च वल्लिका ऊषुरुत्सुकाः ॥ ३ ॥
दिव्यान्यपि च तीर्थानि दिव्यान्यपि सरांसि च ।
सरितः सर्वतो दिव्याः कूपा वाप्यश्च दीर्घिकाः ॥ ४ ॥
आययुस्तत्र वै स्नातुं कुंभयोगे तु सङ्गमे ।
गंगायमुनयोर्योगे सरस्वत्याः समागमे ॥ ५ ॥
श्रावणे च तथा भाद्रपदे सस्नुश्च तीर्थके ।
तैर्थिकैर्निजपापानि त्रिवेण्यां क्षालितानि वै ॥ ६ ॥
अथ तत्र महात्यागी साधुः सनत्कुमारकः ।
ब्रह्मपुत्रः पञ्चवर्षबालरूपः समाययौ ॥ ७ ॥
दिव्याऽणुव्योमयानस्थोऽयुतभास्करसन्निभः ।
द्योतयन् भूतलं सर्वं दिशोऽम्बरं समन्ततः ॥ ८ ॥
आश्चर्यं देहिनः प्रापुर्देवाद्यास्तोषमाययुः ।
विमानं सूक्ष्मरूपं तद्विकासमगमत् पुनः ॥ ९ ॥
यत्र दिव्यस्वरूपः स योगी बालो ह्यदृश्यत ।
शनैरवातरद् भूमावक्षयवटसन्निधौ ॥१०॥
तत्र तस्थौ महायोगी शीघ्रं चादृश्यतां गतः ।
प्रविवेश त्रिवेण्यां सः सस्नौ शीघ्रं हरिं स्मरन् ॥११॥
तिरो भूत्वा क्षणाद् यत्र विमानं तत्र चाययौ ।
वटस्पर्शं ततः कृत्वा ननाम वटशायिनम् ॥१२॥
पुपूज दिव्यकुसुमैर्ववन्दे वेदसंस्तवैः ।
तावत्तत्राऽऽययुर्ज्ञात्वा देवर्षिपितृमानवाः ॥१३॥
दर्शनार्थं समागत्य पुष्पाद्यैस्तमपूजयन् ।
स्वागतं कुशलं पृष्ट्वा परस्परं च ते ततः ॥१४॥
तस्थुश्चापि निषेदुश्च विशाले भूतले दिवि ।
तावत्तत्र तु तीर्थानि नदा नद्यः समाययुः ॥१५॥
प्रयागो मूर्तिमाँश्चापि सरांसि कूपवापिकाः ।
पूषा कट्ठी च पन्नारी चन्द्रावती च मञ्जिरा ॥१६॥
इन्द्रावती कुशी महानदी हुहूगली तथा ।
गण्डकी कञ्चनगंगा शतलाजा च गोगरा ॥१७॥
चम्बला चीनपा नन्दा झेलमा काविला नदी ।
लुगी सिन्धुस्तथा चान्या मिलित्वा ब्रह्मणः सुतम् ॥१८॥
सनत्कुमारं पप्रच्छुर्नत्वा पापविनाशकम् ।
ऋषे द्वादशवर्षेषु यानि पापानि देहिनाम् ॥१९॥
अस्मासु तु समागत्य क्षालितानि भवन्ति वै ।
तानि तिष्ठन्ति सर्वाणि द्वादशवत्सराणि च ॥२०॥
कुंभस्नानप्रसंगेन त्यक्तान्यत्र प्रयागके ।
तदा वयं सुखं शान्तिं प्राप्नुमः पापवर्जिताः ॥२१॥
किन्तु वर्षे वत्सरे च प्रतिवर्षं कथमृषे ।
पापनाशो भवेन्नस्तु येन शान्तिर्भवेत् सदा ॥२२॥
मासे मासे तथा पक्षे घोरपापदिने तथा ।
यत्र गत्वा पापशान्तिर्यथा भवेत् प्रदर्शय ॥२३॥
महापापातिपापानां ज्वलनं यत्र जायते ।
तत्स्थलं दाहकं विप्र प्रदर्शय च नः प्रभो ॥२४॥
प्रयागश्च हरिद्वारः पुष्करो नाशिकस्तथा ।
कुंभे पापहराः सर्वे पापवन्तो भवन्ति ते ॥२५॥
ततस्ते पापनाशार्थं यान्ति श्रीकृष्णगोमतीम् ।
इत्येवं नारदात् पूर्वं श्रुतं गोदावरीतटे ॥२६॥
तत्र यामोऽथवा श्रेष्ठं तीर्थोत्तमं भवेद् भुवि ।
कथयाऽत्र ऋषे सर्वं विदितं तेऽस्ति मानसे ॥२७॥
इति पृष्टो ब्रह्मपुत्रः सनातनहरिः स्वयम् ।
सनत्कुमारनामाऽसौ प्राह तिर्थानि तादृशम् ॥२८॥
श्रेष्ठाच्छ्रेष्ठतमं सद्यः प्रत्यहं पापदाहकम् ।
महापापातिपापानां यावद्ब्रह्माण्डवर्तिनाम् ॥२९॥
ईश्वराणामीश्वरो यश्चावताराधिपः प्रभुः ।
परमात्मा महाकृष्णोऽनादिकृष्णनरायणः ॥३०॥
परब्रह्माऽक्षरमुक्तपतिः परतरात्परः ।
परधामनिवासश्च स्वामी स्वामिनिकेश्वरः ॥३१॥
भगवतां यावतां यो भगवान् यस्य नो समः ।
अधिकस्तु भवेन्नैव यत्र काष्ठा परा गतिः ॥३२॥
सोऽयं राजाऽधिराजश्च स्वमूर्तेः क्षणमात्रतः ।
राधापतिं श्रपतिं च लक्ष्मीपतिं सतीपतिम् ॥३३॥

आविश्चकार वसितुं तेभ्यो धामानि संददौ ।
ददावैश्वर्यसिद्धीश्च ददौ निजगुणाँस्तथा ॥३४॥
सोऽयं श्रीकम्भरापुत्रः श्रीमद्गोपालनन्दनः ।
सृष्ट्यादौ यत्र प्रथमं प्राविर्बभूव बालवत् ॥३५॥
वर्तते कुंकुमवापीक्षेत्रे मुक्तप्रसेवितः ।
मुक्तानीभिः सेवितश्च ब्रह्मप्रियाप्रसेवितः ॥३६॥
मुनिभिर्लोमशाद्यैश्च ब्रह्मविष्णुमहेश्वरैः ।
अवतारैः सेवितश्च सहस्रभुजविष्णुभिः ॥३७॥
लक्ष्मस्तकवेधोभिर्वासुदेवादिभिस्तथा ।
सेवितो वन्दितो यत्र भूमावक्षरसंज्ञके ॥३८॥
क्षेत्रेऽश्वपट्टसरसोऽभितः क्रीडति माधवः ।
लोमशस्याश्रमस्याप्यन्तिके सर्वत्र वर्तते ॥३९॥
यत्र मुक्ता वृक्षरूपा सुरपत्न्यश्च वल्लयः ।
मुक्ताः स्तम्बस्वरूपाश्च वर्तन्ते दर्शनेच्छया ॥४०॥
यत्प्रसादेच्छुका देवा भूत्वा पिपीलिकात्मकाः ।
अपि हंसचटकाद्याश्चरन्त्यश्वसरोऽभितः ॥४१॥
दशयोजनकं क्षेत्रं चाक्षरब्रह्म तन्मतम् ।
यद्रजसा परिव्याप्ताः कीटा यान्ति परां गतिम् ॥४२॥
प्रत्यणुभूतलं तत्तु दिव्यं मोक्षप्रदं शुभम् ।
परमेश्वरयोगेन पवनोऽपि प्रमोक्षदः ॥४३॥
वल्लयश्चापि वृक्षा वै लोकान् पवित्रयन्ति हि ।
अश्वपट्टसरस्येव भगवान् नित्यमेव तु ॥४४॥
स्नाति खेलति भक्तैश्च ब्रह्महृदोऽत्र वर्तते ।
गंगाद्यानि सुतीर्थानि वर्तन्ते तज्जलादिषु ॥४५॥
अमृताख्यो ह्रदश्चापि विरजा यमुनादिकाः ।
वर्तन्ते तत्र सरसि श्रीहरेर्योगलालसाः ॥४६॥
तादृशं पावनं लोके स्वर्गे सत्ये रसातले ।
वैकुण्ठादौ च वा नद्यो वर्तन्ते नाधिकं ततः ॥४७॥
पुरुषोत्तमयोगात् तत् सरोऽक्षरस्वरूपताम् ।
प्राप्तं सर्वोत्कृष्टतां च पापतापनिवारकम् ॥४८॥
नित्यं गत्वैव तत्रैव स्नातव्यं सायमित्यपि ।
दिवाजातानि पापानि दह्यन्ति तत्प्रसंगतः ॥४९॥
प्रातर्गत्वाऽऽप्लवनं च कार्यं तेन निशोद्भवम् ।
पापं सर्वं विलीयेत स्नातुश्चाऽश्वसरोवरे ॥५०॥
प्रतिपर्व प्रगन्तव्यं स्नातव्यं तत्र देहिभिः ।
दिव्याऽदिव्यैरात्मभिश्च वासनाकल्मषापहे ॥५१॥
मासे मासे च वा वर्षे ऋतौ वा चायनेऽपि वा ।
स्नातव्यं तत्र गत्वैव सर्वपापं दहेद्धि तत् ॥५२॥
तत्राऽऽस्ते कुंकुमवापी यस्या जलं हरिः स्वयम् ।
सदा पिबति नैवेद्यैः सह वाप्या जले तथा ॥५३॥
अश्वपट्टसरश्चेदं नित्यं स्नाति प्रगे ह्यगे ।
सेयं कुंकुमवापीति श्रीहरेर्हृदयं मतम् ॥५४॥
तत्परं नास्ति तीर्थं वै धामलोकेषु कुत्रचित् ।
देवलोकेषु वा नास्ति नास्तीश्वरादिधामसु ॥५५॥
कुतः पृथ्व्यां तु लभ्येत विना कुंकुमवापिकाम् ।
कुंकुमवापिकातुल्या कुंकुमवापिका स्वयम् ॥५६॥
कृष्णनारायणतुल्यः कृष्णनारायणः स्वयम् ।
कंभराश्रीसतीतुल्या कंभराश्रीसती स्वयम् ॥५७॥
गोपालकृष्णतुल्यश्च गोपालकृष्ण एव सः ।
अक्षरं चाक्षरतुल्यं परं तुल्यं न विद्यते ॥५८॥
एतद्ब्रह्माण्डतुल्यं च एतद्ब्रह्माण्डमेव हि ।
यत्राऽनादिः परब्रह्म कृष्णनारायणोऽस्ति हि ॥५९॥
तत्र नद्यो भवत्यस्तु गत्वा कुर्वन्तु चाप्लवम् ।
अश्वपट्टसरोदिव्यवारिणि प्रातरेव च ॥६०॥
पिबन्तु कुंकुमवापीजलं हरिपदामृतम् ।
प्रत्यक्षं बालकृष्णं च प्रसेवन्तां दिवानिशम् ॥६१॥
वसन्तु देव्यस्तत्रैव मूलरूपैः सदा सुखम् ।
कार्यरूपैर्विहरन्तु देशेषु जलरूपिकाः ॥६२॥
बालकृष्णस्य योगेन यूयं प्राप्स्यथ सत्सुखम् ।
अनिर्देश्यमवर्ण्यं चाऽसीमात्यानन्दलक्षणम् ॥६३॥
यन्मूर्तिस्थः परानन्दोऽक्षरे ब्रह्मणि नास्ति च ।
अन्यत्र तु कुतः स्याद्वै तत् सुखं लप्स्यथ ध्रुवम् ॥६४॥
सर्वात्मनाऽर्पणेनैव बालकृष्णस्य सेवने ।
सर्वं सुखं हरिस्तुष्टो दास्यत्येव निजप्रियम् ॥६५॥
यत्राऽन्तरं मनाक् चास्ते तत्राऽऽनन्देऽपि चान्तरम् ।
यत्रान्तरं न तत्रास्ति तत्रानन्दे न चान्तरम् ॥६६॥
द्वयोरैक्ये प्रवाहाश्च सुखस्याऽऽविर्भवन्ति वै ।
सच्छ्रीकृष्णो नरश्रेष्ठः, चित् भवत्यस्तु सेविकाः ॥६७॥
तयोरानन्द एवायं तत्र दुःखस्य का कथा ।
पापानि कृष्णयोगेन विलीयन्ते क्षणे क्षणे ॥६८॥
पुण्यानां पर्वतास्तत्र प्रोद्भवन्ति क्षणे क्षणे ।
आनन्दानां प्रवाहाश्च सामुद्रा इव सर्वशः ॥६९॥
जायन्ते श्रीहरेर्योगात् सेवन्तां यान्तु तं हरिम् ।
इत्येवं कथ्यमानानां नदीनां रोममण्डलात् ॥७०॥
निर्ययुः सूक्ष्मकीटा वै कृष्णवर्णाः समन्ततः ।
तेभ्यः पृष्टं तदा ताभिः के भवन्तोऽत्र निर्ययुः ॥७१॥

ऊचुः कीटा वयं पापान्यघिनां पापरूपिणः ।
भवतीषु समुत्सृज्य पापिनो यान्ति वै गृहम् ॥७२॥
वयं तानि निर्गता वो देहेभ्योऽश्वसरःस्मृतेः ।
गमिष्यामो वयं नद्यस्त्वन्यत्र पर्वतादिषु ॥७३॥
अन्यथा वस्तत्र गत्वा स्नानमात्रेण नः क्षयः ।
इत्येवं भयमासाद्य निर्गतान्यत्र जीवतः ॥७४॥
ये स्मृत्वा कुंकुमवापीं बालकृष्णं परं प्रभुम् ।
अश्वपट्टसरःक्षेत्रमक्षरं यान्ति तत्प्रति ॥७५॥
तैः कृते संक्रमे शीघ्रं नश्यन्त्यघानि सर्वशः ।
तस्माद्वयं जीवनेच्छावन्तो यामः स्थलान्तरम् ॥७६॥
मरणाज्जीवनं श्रेष्ठं तपसा वा क्षुधाऽपि वा ।
क्वचिदवश्यं जायेत जीवतो भद्रदर्शनम् ॥७७॥
पुरुषार्थोऽपि जायेत लभ्येतेष्टं पुनः पुनः ।
इत्युक्त्वा निर्ययुः सर्वाघानि सरिद्गणात्तदा ॥७८॥
तीर्थानि चापुराश्चर्यं यस्य श्रवणतः खलु ।
पापानि यान्ति वै दूरं तत्तीर्थं कीदृशं भवेत् ॥७९॥
तस्माद् गत्वैव सेव्यं तत् वस्तव्यं तत्र चैवं नु ।
इतिनिश्चित्य च मुनिं प्रशशंसुः पुनः पुनः ॥८०॥
पुपूजुश्चातिभावेन समूचुश्च मुनिं मुहुः ।
सनत्कुमार भगवन् प्रापय क्षेत्रमेव नः ॥८१॥
त्वया सहैकवारं त्वमुपकारं विधेहि नः ।
ओमित्येवं जगादाऽसौ मुनिस्तीर्थानि तत्क्षणम् ॥८२॥
पृथिव्यां यानि कान्येव जहृषुश्चाति सर्वशः ।
शीघ्रं वार्ता प्रकाशं साऽभवत् कुंभाऽऽगतेषु तु ॥८३॥
सनत्कुमारो भगवान् सर्वपापविशुद्धये ।
अनादिश्रीकृष्णनारायणं प्रति प्रयाति वै ॥८४॥
सर्वतीर्थानि चादाय सह कुंकुमवापिकाम् ।
यत्र साक्षाद्धरिश्चास्ते बालकृष्णः परेश्वरः ॥८५॥
अश्वपट्टसरःक्षेत्रे यत्राऽस्ते लोमशो मुनिः ।
कुंभं कृत्वा तु गच्छामो दिव्यताप्राप्तये खलु ॥८६॥
इत्येवं निश्चयं कृत्वा धृत्वोपकरणानि च ।
तीर्थयात्राविधानार्थं तीर्थानि निर्ययुस्तदा ॥८७॥
सर्वखण्डस्थनद्यस्तु सर्वखण्डसरांसि च ।
सर्वखण्डगताः कूपा वाप्योऽखाताश्च सागराः ॥८८॥
निर्झरणानि सर्वाणि तटाका दीर्घिकास्तथा ।
संगमानि नदीनां च समुद्रसरितां तथा ॥८९॥
जलतीर्थानि चालोक्य पृथ्वीतीर्थानि यान्यपि ।
पार्वतानि स्थलानि गह्वराण्युच्छ्रयाणि च ॥९०॥
वनान्यरण्यवर्याणि घाटानि सरितस्तथा ।
द्वीपानां सरितश्चापि तीर्थयात्रार्थमागताः ॥९१॥
मिमिलुः सहयोगिन्यः सहयोगा यथायथम् ।
पर्वताः शृंगशैलाश्च तद्देवा देविकास्तथा ॥९२॥
ह्रदा ह्रदिन्यः सर्वास्तु पद्भिर्यात्रां व्यधुर्हिताम् ।
लक्षसंख्यानि तीर्थानि तथाऽन्ये लक्षशोऽपि च ॥९३॥
वाद्यैर्वादित्रकैर्वैशैस्त्रांसकैः करतालकैः ।
मृदंगैर्द्विमृदंगैश्च भेरीभिः स्वरवाद्यकैः ॥९४॥
तारतन्त्रीभिरेवापि तुम्बुराद्यैस्तथेतरैः ।
सुवाद्यैः सह गायन्तः कीर्तनानि हरेस्तु वै ॥९५॥
आश्वीनमासमासाद्य प्रयागान्निर्ययुः सुखम् ।
मार्गे ते पुष्करं कृत्वा गत्वा सिद्धाश्रमं तथा ॥९६॥
सतीं बहुचरां नत्वा चतुष्टिलकपर्वतम् ।
दृष्ट्वा तीर्थानि देवाश्च सिद्धा महर्षयस्तथा ॥९७॥
पितरः पर्वताद्याश्च दिव्यरूपधराः खलु ।
आययुः कुंकुमवापीक्षेत्रसीमान्तिकं मुदा ॥९८॥
सनत्कुमारसहिताः ऋषयश्च महर्षयः ।
तथाऽन्ये दिव्यदेहाश्च योगिनोऽपि समाययुः ॥९९॥
विशश्रमुस्तु ते क्षेत्रादुत्तरात् शांकरीं दिशम् ।
क्रमव्यूहं ततश्चक्रुः समाजोत्सवबोधकम् ॥१००॥
राधिके स्वर्गवासिन्यो देव्यो गान्धर्व्यं इत्यपि ।
सत्यः साध्व्यः समाजग्मुस्तीर्थदर्शनलालसाः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीसनत्कुमारर्षिप्रदर्शिताऽश्वपट्टसरोमाहात्म्येन सर्वतीर्थानां प्रयागतः कुंकुमवापीं प्रति यात्रानिर्देशनामाऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥

**श्रीकृष्ण उवाच—**

क्षेत्रे कुंकुमवाप्याख्ये प्राग्भागे राधिके शुभम् ।
अमराणां निवासार्हं वनं वै पारिजातकम् ॥ १ ॥
विशालं योजनायामं ततश्चैशानदिग्भवम् ।
वनं कादम्बमुत्कृष्टं योजनत्रयविस्तृतम् ॥ २ ॥
ततश्चोत्तरतो भद्रानदी दिव्या विराजते ।
यस्यां स्थले स्थले सस्नौ स्वामिकृष्णनरायणः ॥ ३ ॥
तस्यास्तीरे सुविश्रम्य स्नात्वा संभक्ष्य पायसम् ।
ततो यात्रासमाजो वै ससाराऽग्रे गृणन् हरिम् ॥ ४ ॥
भूमावर्त्तगजश्चाग्रे स्वर्णचित्रादिरञ्जितः ।
गैरिकाशैलतुल्यः स भेरीं जीमूतसदृशीम् ॥ ५ ॥

उद्वहन् याति चाग्रे वै सशब्दां गर्जनावतीम् ।
तत्पश्चाच्छरभो याति वैराजावर्त्तनामकः ॥ ६ ॥
पटहद्वयमुच्छब्दं पृष्ठे वहन् समुच्छ्रयः ।
तत्पश्चान्माणिकीपृष्ठे ध्वजं शतकरायतम् ॥ ७ ॥
कौशेयं स्वर्णतारादिपञ्चदेवविराजितम् ।
उद्वहन् याति विन्ध्याद्रिरभ्राणि कर्षयन् ध्वजे ॥ ८ ॥
तत्पश्चाच्छंखनादश्च दशदिक्षु निनादवान् ।
मरुद्देवकृतो भाति श्रूयते स्वर्गवासिभिः ॥ ९ ॥
तत्पश्चाद् रोदसी चापि निनादयत् सुधातुजम् ।
विगलं भगवान् धृत्वा वामनो याति हासयन् ॥१०॥
तत्पश्चाच्छ्रीनृसिंहश्च स्वयं वै गर्जयन् दिशः ।
दिव्यसिंहच्छटाशोभः प्रयाति पिंगनेत्रकः ॥११॥
तत्पश्चादश्विनीदेवौ सूर्यचन्द्रसमावुभौ ।
सुरूपौ तुरगारूढौ कुर्वाते जयघोषणाम् ॥१२॥
तत्पश्चाच्छ्वेतवाराहो धुन्वन् दिगन्तकान् बली ।
गर्जयन् याति तीर्थार्थे श्वेतवर्णोऽतिरूपवान् ॥१३॥
ततो यान्ति च गन्धर्वा वादका वाद्यवेदिनः ।
वादयन्ति च झंकारान् करतालान् मृदंगकान् ॥१४॥
वीणां मयूरकांश्चापि तन्त्रीं जलनिनादकान् ।
प्राणपाशान् गालशब्दान् तालिकातालपट्टकान् ॥१५॥
वृत्तभेरीः पटहाँश्च वेणुनालान् सुजिह्विकाः ।
त्राटकान् चित्रघोषाँश्च शलाकान् रागिणीस्तथा ॥१६॥
एवंविधानि वाद्यानि ह्यवाद्यन्त ततः परम् ।
ततो वै कीर्तनकाराः पुंतीर्थाः संप्रयान्ति हि ॥१७॥
दिव्याः सिद्धास्ततो यान्ति सत्यः साध्व्यश्च साधवः ।
कीर्तयन्ति हरेर्नाम सवाद्यं कृष्णमानसाः ॥१८॥
ततो यान्ति पितरश्च जयशब्दैश्च कीर्तनैः ।
ततो वै देवता यान्ति सुराः सर्वे द्युवासिनः ॥१९॥
ततो यान्ति च ऋषयः सत्यस्था भूगतास्तथा ।
कीर्तयन्तश्च वेदानां मन्त्रान् सामस्तवाँस्तथा ॥२०॥
ततोऽपि चारणा भाटा गन्धर्वा गायकास्तथा ।
प्रयान्ति वाद्यघोषैश्च नामकीर्तनकारिणः ॥२१॥
तत्पश्चाच्च सुरराजाः प्रयान्ति लोकपालकाः ।
तत्पश्चात् सरितः सर्वा नद्यः प्रस्रवणानि च ॥२२॥
सरांसि च तडागाश्च प्रयान्ति कीर्तयन्ति च ।
ततो यान्ति ऋषिपत्न्यो देव्यस्ततः सुरस्त्रियः ॥२३॥
कीर्तयन्त्यो बालकृष्णपद्यानि प्रेमपूरिताः ।
ततो यान्ति वनारण्यशैलभूतीर्थमण्डलम् ॥२४॥
ततो दासास्तथा दास्यस्ततो यान्ति च मानवाः ।
एवं यात्राप्रवाहश्च समाजो योजनावधिम् ॥२५॥
दीर्घोऽभवत्तदा दिव्यः पुष्पवृष्टिरभूत्तदा ।
महीमानानि तीर्थानि त्वागच्छन्तीति वीक्ष्य च ॥२६॥
अनादिश्रीकृष्णनारायणः स्वागतवाञ्छया ।
अग्रगोभूच्चातिहर्षात् तथा गोपालकृष्णकः ॥२७॥
कपिलाद्याः साधवश्च लोमशाद्या महर्षयः ।
राधारमाद्याः सत्यश्च शंकराद्याश्च वैष्णवाः ॥२८॥
विप्रा वेदविदश्चापि कन्याः कोट्यर्बुदार्बुदम् ।
ब्रह्मप्रियाः कम्भराश्रीस्तथा सर्वाश्च बल्लिकाः ॥२९॥
तीर्थं कुंकुमवापी च तथाऽन्या दीर्घिकाः शुभाः ।
क्षेत्रं चाश्वपट्टसरस्तथाऽऽश्रमस्य पादपाः ॥३०॥
क्षेत्रपालाश्च तीर्थानि सर्वाण्यश्वसरस्तटे ।
यानि वसन्ति ये देवा नद्यो नदाश्च पर्वताः ॥३१॥
सर्वे ते धृतमालाश्च मधुपर्कादिसंयुताः ।
गीतवादित्रयुक्ताश्च तैर्थिकानभिसंययुः ॥३२॥
ब्रह्महृदोऽश्वतटाकस्तथा कुंकुमवापिका ।
अग्रे ययुर्हरेः पार्श्वे विरजाद्यास्ततो ययुः ॥३३॥
आगतास्ते महीमाना विलोक्य हरिमन्दिरम् ।
प्रासादं सप्तभौमं च शतकौमं तथाऽपरम् ॥३४॥
नमश्चक्रुर्दण्डवच्च धूलिं न्यधुश्च मूर्द्धसु ।
जयशब्दान् जगदुश्च पूर्णोत्साहपरिप्लुताः ॥३५॥
विविशुः क्षेत्रपीठं ते दूरं तु योजनं यदा ।
मिमिलुश्चक्रुरालोकं जयध्वनीन् पुनः पुनः ॥३६॥
परस्परं सुखवादान् पप्रच्छुः स्वागतं तथा ।
चक्रुस्तीर्थात्मनां नारायणः श्री भगवान् स्वयम् ॥३७॥
अहो भाग्यमहो भाग्यं तीर्थानामागमो मम ।
इत्युक्त्वा श्रीहरिस्तेभ्यो मधुपर्कादिकं ददौ ॥३८॥
पुष्पहारान् चन्दनानि पुष्पमाला ददुः परे ।
मिलित्वा कुशलं पृष्ट्वा समाश्लिष्य यथोचितम् ॥३९॥
तैर्थिकास्तीर्थकामाश्च कृष्णकीर्तनतत्पराः ।
आययुः कुंकुमवापीसन्निधावाश्वसारसम् ॥४०॥
लुलुठुः क्षेत्रमार्गस्य धूल्यां तीर्थानि वै मुहुः ।
महद्भाग्यं मन्यमाना देवा देव्यस्तथर्षयः ॥४१॥
केचिन्नृत्यन्ति गायन्ति वादयन्त्यपरे तदा ।
धारयन्ति रजो मूर्ध्नि देहे सम्मर्दयन्ति च ॥४२॥
नमन्ति मस्तकैः केचित् केचिदञ्जलिना हरिम् ।
केचिद् वक्षःसु च रजो योजयन्ति परे मुखे ॥४३॥

स्वयंकुमारो भगवान् लुलोठ कृष्णपादयोः ।
केचिद् विज्ञाय माहात्म्यं भक्तानां पद्रजांसि च ॥४४॥
ऋषीणां सर्वतीर्थानां धारयन्ति च मूर्धसु ।
केचित् पत्राणि पुष्पाणि शलाकाश्च तृणान्यपि ॥४५॥
गृह्णन्ति तु मुखे धृत्वा मन्वते कृतकृत्यताम् ।
जलं प्रस्रवणोत्थं च मत्वा पापप्रणाशकम् ॥४६॥
घट्टकं घट्टकं पीत्वा मन्वते कृतकृत्यताम् ।
केचित् त्वश्वसरोवारिस्पृष्टं वायुं समागतम् ॥४७॥
मुखे पीत्वा मुहुर्यान्ति निर्वृत्तिं परमां तदा ।
केचित् स्मरन्ति धामानि केचित्तदवतारकान् ॥४८॥
केचिन्मुक्तान् तदैश्वर्यसिद्धीः स्मरन्ति तद्धृदः ।
आयुधाश्चक्रशंखाद्याः पार्षदाः सेविकास्तथा ॥४९॥
महीमानान् यदिष्टं तद् दापयन्ति पथि द्रुतम् ।
एवं वाद्यैः कीर्तनैश्च वाहनैः प्रेमपूरकैः ॥५०॥
जयनादैः सह सर्वे प्रापुः सरोऽश्वसंज्ञकम् ।
येषां वज्रसमान्यासन् पापानि देहिनां तदा ॥५१॥
तीर्थे त्यक्तानि सर्वाणि तान्यप्यसंख्यकानि वै ।
अश्वपट्टसरसस्तु दर्शनात् हरिदर्शनात् ॥५२॥
दग्धान्येव द्रुतं तत्र शेषमात्रं न विद्यते ।
अन्यतीर्थे कृते स्नाने यानि प्रयान्ति दूरतः ॥५३॥
तानि दग्धानि सर्वाणि चाश्वसरो विलोकनात् ।
अहो कृष्णस्य माहात्म्यं प्रत्यक्षं दृश्यते महत् ॥५४॥
यद्रजो यज्जलं यस्य क्षेत्रस्य पत्रमित्यपि ।
दाहयन्ति च पापानि किं वक्तव्यं हरौ तदा ॥५५॥
एवं प्रशंसमानास्ते महीमानाः सरस्तटे ।
उत्तरेऽतिविशाले च शांकरे सुप्रदेशके ॥५६॥
विशश्रमुस्तथा सस्नुः पपुर्जलं ववन्दिरे ।
तीर्थविधिं प्रचक्रुश्चाक्षालयन् पापमात्रकम् ॥५७॥
अथाऽनादिकृष्णनारायणं संस्नाप्य तज्जलैः ।
चक्रुः स्नानानि तीर्थाद्याः पपुर्वारि प्रसादजम् ॥५८॥
दिव्यवार्भिर्दिव्यरूपा मुक्तरूपाश्च तेऽभवन् ।
एवं चाश्वसरस्तीर्थे कृत्वा विधानतस्ततः ॥५९॥
ययुः श्रीकुंकुमवापीं विशालां धामरूपिणीम् ।
तज्जलं वै पपुः सर्वे सस्नुर्जलैर्मुहुर्मुहुः ॥६०॥
तदा सार्ष्टिं तु ते प्राप्तास्तीर्थाद्या हरिवाञ्छया ।
ततो ब्रह्महृदं गत्वा सस्नुः पपुश्च तज्जलम् ॥६१॥
ततः सारूप्यभावं च प्राप्तास्ते महीमानकाः ।
बालकृष्णसमाः सर्वे गुणरूपसमृद्धिभिः ॥६२॥
सञ्जाता मुक्तियोग्यास्ते पुनर्जन्मविवर्जिताः ।
अथोत्तरं ययुः सर्वे लोमशस्याश्रमं शुभम् ॥६३॥
लोमशः स्वागतं चक्रे मिष्टान्नफलवारिभिः ।
भोजयामास तीर्थाद्यान् सर्वान् वै महीमानकान् ॥६४॥
ब्रह्मधामानीतदुग्धसारैर्भोज्यैश्च तर्पणैः ।
तृप्तिं प्रकारयामास मुखवासान् समार्पयत् ॥६५॥
ययुस्तीर्थानि सर्वाणि देवर्षिपितृमानवाः ।
नदा नद्यः पर्वताश्च वनारण्यानि यान्यपि ॥६६॥
महीमानाश्च ते सर्वे बालकृष्णालयं शुभम् ।
दिव्यं दिव्यविभूत्याढ्यं दिव्यमुक्तनिषेवितम् ॥६७॥
अप्रतर्क्यानन्तशक्तिसेवितं चेश्वराश्रयम् ।
अवतारैः सदा जुष्टं सायुज्यमुक्तिदं शुभम् ॥६८॥
तत्रानादिकृष्णनारायणस्नातजलहृदे ।
दिव्ये ब्रह्महृदश्रेष्ठे प्रसस्नुर्महीमानकाः ॥६९॥
दिव्यदेहा दिव्यदृष्टियुक्ता दिव्ये परेऽक्षरात् ।
धाम्नि स्थितान् निजान् सर्वे ह्यपश्यन्त हि शाश्वतान् ॥७०॥
तदा पूर्णं महिमानं विविदुर्महीमानकाः ।
सालोक्यं सार्ष्टिं सारूप्यं सायुज्यं चात्र सन्ति वै ॥७१॥
पापमुक्तिश्चान्यतीर्थे त्वश्वसरोऽघदाहकम् ।
सार्ष्टिदा कुंकुमवापी ब्रह्महृदः स्वरूपदः ॥७२॥
सालोक्यदं लोमशस्याश्रमं दिव्यं हि वर्तते ।
बालकृष्णालयश्चायं सायुज्यमुक्तिदोऽस्ति हि ॥७३॥
अहो कृष्णप्रतापेन सर्वे त्वेकैकतः खलु ।
वर्धन्ते चातिसामर्थ्ये मोक्षदाः सर्वथाऽप्यहो ॥७४॥
अत्र वासः प्रकर्तव्योऽथवा गन्तव्यमक्षरे ।
परब्रह्मणि सम्प्राप्ते कोऽन्यत्र संवसेद्धी ॥७५॥
एवं वै कथयन्तस्ते व्यधुर्महोत्सवं निशि ।
चान्द्रे तु कुमुदे मासे सप्तम्याः कृष्णके दले ॥७६॥
गायनैः कीर्तनैर्नृत्यैर्भजनैः स्तवनैस्तथा ।
ध्यानैः कथाश्रवैश्चापि निन्युर्निशां सुखं तु ते ॥७७॥
प्रातः स्नात्वाऽश्वसरसि कृष्णार्चनार्थमाययुः ।
सर्वे त्वेकादशे जन्मदिनेऽष्टम्यां महोत्सवे ॥७८॥
निर्मिते मण्डपे रात्रौ विशाले विश्वकर्मणा ।
मध्ये गजासने तत्र व्यराजत हरिः स्वयम् ॥७९॥
अन्यान्यप्यासनान्यत्र सिंहासनानि सर्वशः ।
स्थापितानि च तेष्वत्रेश्वरेश्वराः परेश्वराः ॥८०॥
अवतारास्तथा मुक्ता मुक्तान्यः साध्व्य इत्यपि ।
साधवो ब्रह्मशीलाश्च देवा देव्यो महर्षयः ॥८१॥

ब्रह्माद्याः ऋषयश्चापि पितरो देवकोटयः ।
व्यराजन्त च तीर्थानि नदा नद्यः सरांसि च ॥८२॥
लोकपाला राज्यपालाः शैला वनानि भूमयः ।
अरण्याश्च द्रुमा वल्ल्यस्तृणानि दीर्घिकास्तथा ॥८३॥
जडचेतनतत्त्वानि व्यराजन्ताऽऽसनेषु च ।
देववाद्यान्यवाद्यन्त मांगल्यान्यभवँस्तदा ॥८४॥
वेदघोषाह्यजायन्ताऽभवत्कुसुमवर्षणम् ।
लोमशो मुनिराट् मायावर्जितोऽपूजयद्धरिम् ॥८५॥
तिलकं चन्द्रकं भालेऽकारयत्परमात्मनः ।
मुकुटं निदधे तस्य मस्तके मालिकां शुभाम् ॥८६॥
कानकीं तौलसीं चापि पौष्पीं राज्ञीं ददौ गले ।
पुष्पांजलिं ददौ चापि दुर्वांकुराणि कर्णयोः ॥८७॥
हस्ते श्रीफलमग्र्यं च ददौ फलानि चाग्रतः ।
चन्दनं पादयोश्चाप्यवर्धयच्चाक्षतैस्ततः ॥८८॥
आरार्त्रिकं हरेश्चक्रे आशीर्वादान् ददौ शुभान् ।
अथ श्रीकंभरादेवी पुपूज बालकृष्णकम् ॥८९॥
श्रीमद्गोपालकृष्णश्च हारं कृष्णगले न्यधात् ।
भगवान् शुकदेवश्च वल्लभाद्या ददुः स्रजः ॥९०॥
हेमन्तो भगवाश्चापि हैम्युपदाः समुत्तमाः ।
सन्तोषा चामृता दुग्धा जीवन्त्याद्या ददुः स्रजः ।
तिलकं कौंकुमं चक्रुर्भाले बिन्दुं हरेस्ततः ॥९१॥
अथेश्वरा अवतारा मुक्ता मुक्तान्य ईशिकाः ।
पूजयित्वाऽऽरार्त्रिकं च प्रचक्रुः श्रीहरेस्तदा ॥९२॥
ब्रह्मव्रताः ऋषयश्च पितरः सुरमानवाः ।
देवा देव्यो नदा नद्यः सरांस्युपजलान्यपि ॥९३॥
शैलाश्च भूमयोऽखातास्तीर्थानि च वनानि च ।
अरण्यानि च तत्त्वानि पुपूजुः परमेश्वरम् ॥९४॥
आरार्त्रिकं तथा पुष्पाञ्जलीन् तथोपदा ददुः ।
आभूषणानि वस्त्राणि तथोपकरणान्यपि ॥९५॥
ऊर्मिकाः फलपुष्पाणि रत्नानि हीरकाणि च ।
यानानि कल्पवृक्षाँश्च ददुर्दिव्यानि पूजने ॥९६॥
एवं पूजोत्तरं सभापरिहारोत्तरं हरिः ।
भोजयामास सर्वान् वै महीमानान् गृहीयकान् ॥९७॥
आगन्तुकानतिथींश्च सर्वान् देहिन इत्यपि ।
ददौ तु दक्षिणास्तेभ्यः प्रासादिकानि भावतः ॥९८॥
तदा तीर्थैः कृता तत्राऽभ्यर्थना श्रीहरेः पुरः ।
लब्ध्वा मोक्षप्रदं लाभं चान्यं लाभं क इच्छति ॥९९॥
तस्मान्मोक्षं कृपासिन्धो देहि नः शाश्वतं सुखम् ।
हरिः कृपया तेषां वै व्यधाद् रूपत्रयं तदा ॥१००॥
मूलं दिव्यं तथा छायां मूलरूपाणि धामसु ।
विमानैः सोऽप्रेषयच्च पार्षदैः सह केशवः ॥१०१॥
दिव्यान्यथ स्वरूपाणि स्वसन्निधावरक्षयत् ।
अश्वपट्टसरःक्षेत्रे यथेष्टं न्यवसँश्च ते ॥१०२॥
तीर्थात्मकाः समूर्ताश्च विश्वकर्मकृतेषु च ।
योग्यालयेषु सन्तुष्टा हरेः सेवाभिलाषुकाः ॥१०३॥
छायारूपाणि तीर्थानां यानि तत्राऽभवँस्तदा ।
तेभ्यः प्राह प्रभुर्लोकपावनार्थं शुभं वचः ॥१०४॥
मदिच्छयैव तीर्थेशा युष्मज्जन्माऽस्ति भूतले ।
लोकानां पावनार्थं वै तस्माद्गन्तव्यमीश्वराः ! ॥१०५॥
कार्यरूपेण तत्रैव स्थातव्यं यत्र संस्थितिः ।
मया कृताऽस्ति लोकेऽत्र नदीनदसरांसि च ॥१०६॥
तत्तत्रैव हि वस्तव्यं पापिपापप्रदहाय वै ।
आगन्तव्यं प्रतिवर्षं जन्माहे मम सर्वशः ॥१०७॥
पर्वण्येकादशीकाले कुंभे माघे च कार्तिके ।
संक्रान्तौ श्रावणे चापि वैशाखे पुरुषोत्तमे ॥१०८॥
इत्युक्तास्ते समूर्ताश्च तीर्थेश्वराः प्रणम्य च ।
ययुर्नैजान् प्रदेशाँश्च महीमाना ययुस्तथा ॥१०९॥
ब्रह्मप्रिया हरिं कान्तं प्रपूज्य लोमशाश्रमम् ।
ययुश्च राधिके सर्वे स्वस्वस्थानानि मानवाः ॥११०॥
रात्रावप्युत्सवः श्रेष्ठः कृतो नर्तनगायनैः ।
पठनाच्छ्रवणाचापि भुक्तिमुक्तिप्रदो भवेत् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सर्वतीर्थदेवादीनां कुंकुमवापीयात्रागमनं, श्रीहरेर्जन्मदिनोत्सवश्चेत्यादिनिरूपणनामा नवाऽधिकाऽशीतितमोऽध्यायः ॥ ८९ ॥

श्रीकृष्ण उवाच—

शृणु राधे चमत्कारं कृष्णनारायणस्य वै ।
अन्यं ते संकथयामि लोकरक्षाकरं परम् ॥ १ ॥
नरनारायणौ देवौ धर्मपुत्रौ हिमालये ।
बदर्यां श्रीकृष्णनारायणं सस्मरतुः पुरा ॥ २ ॥
ऊर्जकृष्णैकादश्यां तौ तापसौ स्वोद्भवं प्रभुम् ।
गंगातीरे दध्यतुश्च स्वाश्रमे दर्शनोत्सुकौ ॥ ३ ॥
पृथिव्यां पश्चिमे प्रान्ते सौराष्ट्रे चाजनाभजे ।
क्षेत्रे कुंकुमवाप्याख्ये कम्भराश्रीगृहे हरिः ॥ ४ ॥

यस्त्वास्ते बालरूपोऽसौ परब्रह्म परः प्रभुः ।
सर्वावतारहेतुः सः कदा दास्यति दर्शनम् ॥ ५ ॥
इत्येवं स्मरतोर्भ्रात्रोर्नरनारायणात्मनोः ।
संकल्पं सम्पूरयितुं कृष्णनारायणः स्वयम् ॥ ६ ॥
अश्वपट्टसरःक्षेत्रगतान् भक्तान् प्रभाष्य च ।
ययौ यानेन दिव्येन हैमाद्रिबदरीवनम् ॥ ७ ॥
लोमशं सह नीत्वैव शेषान् संस्थाप्य तत्र च ।
रक्षणार्थं कथयित्वा हराय क्षेत्रपाय च ॥ ८ ॥
एकादश्यां गतं कृष्णनारायणं तु बान्धवौ ।
पुपूजतुर्जलैः पुष्पैः फलैः कार्तिकपक्षके ॥ ९ ॥
सेवनं तौ चक्रतुश्च धर्मभक्ती तथर्षयः ।
तापसा अपि चक्रुश्च सेवनं प्रत्यहं प्रभोः ॥१०॥
मार्गशीर्षं श्रेष्ठमासं यज्ञीयं वीक्ष्य तापसाः ।
प्रचक्रे वैष्णवं यज्ञं बदर्यां ते महर्षयः ॥११॥
पर्णशालां ददौ नित्यं निवासार्थं यथोचिताम् ।
लोमशाय तथा बालकृष्णाय श्रीनरायणः ॥१२॥
मार्गशीर्षे बभूवाऽयं यज्ञोत्सवो महान् शुभः ।
तत्र देवो हरिः साक्षात्परमात्मा परेश्वरः ॥१३॥
यज्ञेश्वरोऽनले स्थित्वा हव्यानि बुभुजे तदा ।
साक्षाद् दिव्याक्षरमुक्तास्तथा गोलोकवासिनः ॥१४॥
वैकुण्ठवासिमुक्ताश्च तथाऽन्यधामवासिनः ।
समाययुः क्रतौ तत्र प्रसादलालसा हरेः ॥१५॥
सुरा महर्षयो देव्यस्तीर्थानि पितरस्तथा ।
सिद्धाश्चारणगन्धर्वा भूसुरा व्योमगामिनः ॥१६॥
भक्ता दैत्या दानवाश्च समाययुः क्रतौ तदा ।
एवं हि भगवाँस्तत्र राजते परमेश्वरः ॥१७॥
एतस्मिन्नेव समये कार्तिके तु सुराष्ट्रके ।
शंभोर्दूती महामारी शंभोर्निदेशतो निशि ॥१८॥
अश्वपट्टसरःक्षेत्रं सीम्नि स्थिता प्ररक्षति ।
तदा वै सिंहलद्वीपात् स्मृत्वा वै भ्रातृपुत्रकम् ॥१९॥
कुंभीनसी तथा शृंगीं राक्षस्योऽन्याः शतद्वयम् ।
व्योमगाः कामरूपिण्यो मायाजालविशारदाः ॥२०॥
ज्ञात्वा त्वधर्मजीवस्य मरणं वै सुराष्ट्रके ।
वैरं निर्यापयितुं शस्त्राऽस्त्रयुक्ताः समाययुः ॥२१॥
सिंहारण्यानि चोल्लंघ्य व्योम्ना सौराष्ट्रमाययुः ।
कृष्णायां तु चतुर्दश्यां कार्तिकस्याऽसिते दले ॥२२॥
दीपोत्सवात् पूर्वरात्र्यां चावतेरुस्तदाऽम्बरात् ।
उल्मुकान् दर्शयन्त्यश्च वह्निज्वालास्तथा मुखात् ॥२३॥
मूर्धजेभ्यस्त्रिशूलाँश्च दर्शयन्त्यो हि वह्निमान् ।
मारयैताः खादयैताः शत्रोः प्रियाः कुमारिकाः ॥२४॥
भेदयैताश्चर्वयैता नयैता राक्षसार्थकम् ।
ज्वालयैता धर्षयैताः सर्वाः कृष्णप्रिया बलात् ॥२५॥
नास्त्यासां रक्षकश्चाऽत्र समयो विजयस्य नः ।
इत्येवं भाषमाणास्ता लोमशस्याऽऽश्रमे द्रुतम् ॥२६॥
निपेतुर्धर्षणार्थं वै राक्षस्यः क्रूरयोषितः ।
सीमरक्षाकरी दूती महामारी हि भैरवी ॥२७॥
ज्ञात्वाऽऽकस्मिकसंघर्षं युद्धोपद्रवमित्यपि ।
सहस्ररूपिणी भूत्वा सशस्त्रा त्वभ्यधावत ॥२८॥
कन्यावासेषु सर्वत्र रात्रावाक्रोश उल्बणः ।
अभवत् त्रासकृत् तत्र राक्षसीनामुपद्रवात् ॥२९॥
भैरवी पाशमादाय सम्मन्त्र्य नागबन्धनैः ।
मुमोच राक्षसीसंघे राक्षस्यो बन्धनान्तरे ॥३०॥
नागैर्बद्धाश्चाऽभवँश्च निगडैश्चोरवत्तदा ।
हस्तेष्वपि तथा कट्यामुदरे च गलेष्वपि ॥३१॥
सर्वा एव तु नागानां पाशैर्नद्धा विचेष्टिताः ।
अभवन्न्यपतन् भूमौ विषदग्धास्तथाऽभवन् ॥३२॥
अथ सा भैरवी शंभुं सुप्तं चागत्य संस्तवैः ।
बोधयामास शीघ्रं चाऽऽवेदयामास धर्षणम् ॥३३॥
श्रुत्वोपद्रवमीशानो लोमशाश्रममाययौ ।
दृष्ट्वा नागास्त्रसन्नद्धा राक्षसीस्तुष्टमानसः ॥३४॥
प्राहैनां भैरवीं दूतीं कुर्वेता गतबन्धनाः ।
युद्धं कृत्वा तु ताः सर्वा विनाशाय विलोकये ॥३५॥
इत्याज्ञप्ता भैरवी सा नत्वा शंकरपादयोः ।
राक्षसीस्ता बन्धहीनाश्चकार शंकराज्ञया ॥३६॥
उवाचैता रणं कर्तुं राक्षस्यो बलगर्विताः ।
युद्धं चक्रुः शस्त्रधर्त्र्यो विविधैर्युद्धतर्कटैः ॥३७॥
शक्तिभिर्मुद्गरैश्चापि यष्टिभिः प्रस्तरैस्तथा ।
खड्गैरसिभिश्छुरिकामुष्ट्याद्यैः पादताडनैः ॥३८॥
पर्वतप्रायदेहाश्च वृष्टिभिश्चाभिचारकैः ।
युयुधुस्ता व्योमगा हि भैरवीभिर्निरन्तरम् ॥३९॥
भैरव्यो रुद्रबलतो वज्रदेहास्तदाऽभवन् ।
संकल्पजा बहुरूपा युयुधुस्तत्र हेतिभिः ॥४०॥
कृपाणैः परशुभिश्च कुठारैश्च त्रिशूलकैः ।
चक्रैर्भल्लैस्तथा स्तम्भैर्वज्रैर्दण्डैश्च जालकैः ॥४१॥
शलाकाभिः क्षेपणैश्च स्फोटगोलैश्च शाखिभिः ।
निजघ्नुश्चातिरुष्टास्ता भैरव्यो राक्षसीस्त्वति ॥४२॥

चित्कृत्योत्प्लुत्य चाकाशे निपेतुरताः परस्परम् ।
राक्षस्यो मायया नैकरूपिण्यो जम्भुरीश्वरीः ॥४३॥
ईशान्यो जम्भुरीशस्य मन्त्रयुक्शूलशक्तिभिः ।
सीताभिर्मल्लकैर्जघ्नुर्बिभिदुर्हृदयानि हि ॥४४॥
राक्षसीनां महासैन्यं कृत्रिमं समजायत ।
कृत्रिमा भैरवीयोषा विद्युत्पाशैस्तु तास्तदा ॥४५॥
बबन्धुर्ज्वालयामासुरवचित्य च मूलिनीम् ।
एवं युद्धे महाघोरे जायमाने सहस्रशः ॥४६॥
निपेतुस्तत्कबन्धाश्च शैलप्राया विहायसः ।
कुंभीनसी तथा शृंगी दुद्रुवतुर्भयाद् बहिः ॥४७॥
तदन्याः शतसंख्याश्च भैरवीभिस्तु भक्षिताः ।
शतसंख्याः परास्तत्र भिन्ना मृताश्च जीवतः ॥४८॥
भैरवीनां तदा जातो विजयः शांकराद् बलात् ।
शंभुस्ताभ्यः प्रसन्नोऽभूत् क्षेत्ररक्षा यतः कृता ॥४९॥
लोमशस्याश्रमस्यापि कन्यकानां च रक्षणम् ।
कृतं रात्रौ महायुद्धं कृत्वा वचःप्रपालनम् ॥५०॥
प्रसन्नः सन्नुवाचैता महामारीर्वरप्रदः ।
प्रसन्नोऽस्मि वरदानं याचध्वं प्रददामि वः ॥५१॥
महामार्यस्तदा प्राहुर्नत्वा श्रीशंकरं तथा ।
मूलां तां भैरवीं पूज्यां मातरं जननीं पराम् ॥५२॥
यदि शंभो प्रसन्नोऽसि यदि देयो वरोऽस्ति नः ।
तदा क्षुधासमध्माता वयं तृषाऽऽकुलास्तथा ॥५३॥
तन्निवृत्तिकरं भोज्यं परिश्रमविनाशकम् ।
पुष्टिदं बलदं पेयं तामसं देहि नः प्रभो ॥५४॥
तमोजन्या वयं सर्वास्तामस्यो युद्धदुर्मदाः ।
युद्धजं मांसरक्तादि भक्षयन्त्योऽतिपुष्टिदम् ॥५५॥
तदेव भोजनं पेयं समिच्छामो ददासि चेत् ।
इत्युक्तः शंकरः प्राह धर्मक्षेत्रे सुराष्ट्रके ॥५६॥
परब्रह्मनिवासेऽत्र तद्दानं चातिदुष्करम् ।
कथं कृपालुनाथस्य देशेऽत्र तद्धि संभवेत् ॥५७॥
तदा प्राहुस्तु ताः सर्वा हरेर्भक्तान् विहाय वै ।
तामसान् पापिनः क्रूरान्नास्तिकान् भक्तिवर्जितान् ॥५८॥
अनाचारान् दुराचारान् पूजापाठविवर्जितान् ।
अस्नातान् तीर्थयात्रादिवर्जितान् दांभिकान् शठान् ॥५९॥
हरेः प्रसादहीनांश्च तुलसीस्रग्विवर्जितान् ।
अशांभवन् सत्त्वहीनान् अवैष्णवान् परार्तिदान् ॥६०॥
परद्रव्याद्यपहारकारकान् पुण्यवर्जितान् ।
यमयात्रार्थयोग्यांश्च भक्षयिष्याम एव तान् ॥६१॥
तादृशीश्च मलिनाश्च नारीर्धर्मविवर्जिताः ।
उपासनाविहीनाश्च भक्षयिष्याम एव ताः ॥६२॥
एवं कृते भगवाँस्तु न रोषं समुपेष्यति ।
अधार्मिकाणां पापानां दण्डार्थं यमपत्तनम् ॥६३॥
कृतं तेनैव स कस्माद् दुष्टानां भक्षणे कृते ।
सन्तुष्टो न भवेन्नाथो वयं तं प्रभुमीश्वरम् ॥६४॥
प्रतोषितं विधास्यामः सेवया किंकरीस्त्रियः ।
इत्युक्त्वा ता विरेमुश्च शंभुः कृपापरस्तु ताः ॥६५॥
प्राह तथास्त्विति भोज्यं पानं दुष्टप्रजास्वदात् ।
महामार्यस्तु तं नत्वा नत्वा चापि हरिप्रियाः ॥६६॥
नत्वा च कुंकुमवापीं नत्वाऽश्वपट्टसारसम् ।
नत्वा श्रीकम्भरालक्ष्मीं नत्वा गोपालकृष्णकम् ॥६७॥
स्मृत्वा गोपालतनयं श्रीपतिं स्वामिनं प्रभुम् ।
दशयोजनतः क्षेत्राद् बहिस्ताः प्रययुर्मुदा ॥६८॥
मृतानां राक्षसीनां तु देहान् उत्थाप्य पश्चिमे ।
महागर्ते विनिःक्षिप्य मानवेषु द्रुतं च ताः ॥६९॥
विविशुश्चाऽवैष्णवेषु शैवभिन्नेषु वै द्रुतम् ।
अभक्तेषु च दुष्टेषु दंभिषु नास्तिकेषु च ॥७०॥
शठेषु धर्महीनेषु बाह्यतश्चिह्नधारिषु ।
आन्तरेषु तु मालिन्यसंभृतेषु जनेषु च ॥७१॥
भक्तनिभेषु ख्यातेषु बाह्यतोऽन्तश्च पापिषु ।
नरेषु तादृशीषु स्त्रीष्वपि प्रविविशुश्च ताः ॥७२॥
महामारीसहस्रं तत् सहस्राणां सहस्रकम् ।
सौराष्ट्रे गौर्जरे चापि महाराष्ट्रे च दक्षिणे ॥७३॥
मध्ये पूर्वे चोत्तरे च पश्चिमे सर्वभूमिषु ।
महामार्योऽभवन् व्याप्ता अदृश्या वायुविग्रहाः ॥७४॥
तूर्णं प्रविश्य देहेषु तिष्ठन्ति हृदयेषु च ।
मांसं रक्तं द्रुतं ह्युष्णं खादन्ति च पिबन्ति च ॥७५॥
नरा नार्यो भवन्त्येव क्षणान्ते प्राणवर्जिताः ।
आसमुद्रान्तमेवैता गत्वा गत्वा प्रजाजनान् ॥७६॥
पापिष्ठान्नरनार्यादीन् प्रभक्षयन्ति लक्षशः ।
ग्रामे ग्रामे नरा नार्यो म्रियन्ते प्रत्यक्षं तदा ॥७७॥
विंशत्यंशाः प्रजानां वै प्रतिसाहस्रमेव ह ।
महामार्यस्तदा क्रूरा गणयन्ति न बालकान् ॥७८॥
कन्यका न वधूश्चापि यूनो वृद्धान्न गर्भिणीः ।
अनाथान्नाप्यतिथींश्च महीमानान्न देशिकान् ॥७९॥
न राज्ञो न तथा राज्ञीर्न धनाढ्यान्न निर्धनान् ।
न कषायधृगश्चापि न वा सूतकसंस्थितान् ॥८०॥

न यज्ञहोमकर्माढ्यान् न पूजापाठकारिणः ।
पापयुक्तान् विलोक्यैव भक्षयन्ति नरान् स्त्रियः ॥८१॥
म्रियन्ते प्रत्यहं नार्यो नराश्च भुवि लक्षशः ।
एकं धृत्वा बहिर्यान्ति मृतस्तावत्परो भवेत् ॥८२॥
परं मृतं विनिष्कास्य यावदायान्ति वै गृहम् ।
तावदन्ये मृताः सन्ति पञ्च सहैव तत्क्षणे ॥८३॥
पञ्च निष्कास्य च यावदायान्ति ग्रामगोपुरम् ।
तावदन्ये दश सन्ति मृता वा च ततोऽधिकाः ॥८४॥
केषाञ्चिद् गृहवर्त्यैव कुटुम्बं निधनं गतम् ।
केषाञ्चित्त्वर्धभागेन मानवा निधनं गताः ॥८५॥
कुत्रचिच्छिष्यते बालः कुत्रचित्तु नवा वधूः ।
कुत्रचिद् वृद्धजरठः कुत्रचित्पशुमात्रकम् ॥८६॥
कुत्रचिन्नगरे लक्षे सहस्रं त्ववशेषितम् ।
कुत्रचिद् ग्रामभागे तु ग्रामार्धं सर्वशो मृतम् ॥८७॥
कुत्रचिन्मानवैः शून्या ग्रामा जाता भयंकराः ।
म्रियमाणप्रजानां च जलदाता न विद्यते ॥८८॥
कुतोऽन्नदाता लभ्येत यत्र नास्त्येव दर्शकः ।
एवं नाशो महानासीन्मर्दनं बहुशोऽप्यभूत् ॥८९॥
मासमध्ये तु लोकानामर्धं पृथ्व्यां मृतं ह्यभूत् ।
कोटिशस्तु महामार्योऽभक्षयन् पापिनो जनान् ॥९०॥
राक्षसा अपि दैत्यांश्च दानवानासुरांस्तथा ।
शठान्नैष्कृतिकांश्चापि नास्तिकान् धर्मवर्जितान् ॥९१॥
अभक्षयन् हि मासान्ते हाहाकारो दिगन्तरे ।
अभवद् वै तदा लोकास्त्यक्त्वा ग्रामान् गृहाण्यपि ॥९२॥
पत्तनानि नगराणि ययुर्भयादरण्यकम् ।
वनेषु वनिवद् वासान् चक्रुः कालभयार्दिताः ॥९३॥
अरण्यानि नगराणि नगराणि वनानि तु ।
वैपरीत्येन जातानि महामारीभयात्तदा ॥९४॥
अश्वपट्टाक्षरक्षेत्रे दशयोजनविस्तृते ।
महामारीभयं नाऽभूद् भक्तेष्वेव तदा प्रिये ॥९५॥
अभक्ता येऽपि तत्रस्थास्तच्छ्लाघ्येन देशिताः ।
ययुर्बहिर्हि ये क्षेत्रं त्यक्त्वा ते निधनं गताः ॥९६॥
त्राहि त्राहि प्रजाश्चोचुः सस्मरुः परमेश्वरम् ।
रोगस्याऽस्य विनाशार्थं प्रजाश्चक्रुर्हि मानताम् ॥९७॥
नैवेद्यानि विविधानि दास्यामो देवतागृहे ।
वस्त्रभूषाम्बरस्वर्णं दास्यामो देवसन्निधौ ॥९८॥
करिष्यामोऽन्नसत्राणि पारायणानि सन्मखान् ।
धर्मकार्याणि धर्मांश्च करिष्यामः प्रसेवनम् ॥९९॥
हरेस्तदीयसाधूनां पूजनं देवसेवनम् ।
भजनं संकरिष्यामः संत्यक्ष्यामोऽघपातकम् ॥१००॥
सूर्यं शिवं सतीं लक्ष्मीं पूजयिष्याम ईशिनीम् ।
गणेशं च महाकालं मातृकाः पितृदेवताः ॥१०१॥
तीर्थयात्रां करिष्यामश्चाश्वपट्टसरोवरे ।
यत्र नास्ति महामारी बालकृष्णप्रभावतः ॥१०२॥
प्रजाः सर्वत्र च भयान्मरणस्यातिविह्वलाः ।
प्रतिज्ञां संप्रचक्रुश्च कृष्णनारायणं प्रभुम् ॥१०३॥
भजिष्यामो यदा जीवत्प्राणाः स्थास्याम एव तु ।
भैरवि ! ते महामारि ! कृष्णनारायणस्य ते ॥१०४॥
शपथोऽस्ति यदि मां त्वं स्पृशसि तत्र मा स्पृश ।
आणं ददुः प्रजास्त्वेवं हाहाकारोऽभवद् भुवि ॥१०५॥
शंकरस्य शपथस्ते पित्रोस्ते शपथस्तथा ।
मा स्पृशाऽस्मान् महामारि ! दद्मः संयावमत्र ते ॥१०६॥
इत्येवं राधिके लोका मानताः संप्रचक्रिरे ।
सत्यः साध्व्यो द्विजाः सन्तो व्योम्ना श्रीबदरीं ययुः ॥१०७॥
सद्योजातमहादेवाय ते चास्तु नमो मुहुः ।
महाकालाय च कालभैरवाय च ते नमः ॥१०८॥
अजापालाय च वीरभद्राय ते नमो मुहुः ।
मृत्युंजयाय च महाकाल्यै चण्ड्यै नमो मुहुः ॥१०९॥
दुर्गायै नम इत्येवं दीनप्रजास्तदोचिरे ।
श्रीहरिर्ज्ञातवान् सर्वं पूर्वमेनमुपद्रवम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोर्बदर्यां गमनं, राक्षसीनां कुंकुमवाप्यामागमनम्, महामार्या राक्षसीनां नाशनम्, ततः पापिप्रजासु भक्षणार्थं व्यापकता, चेत्यादिनिरूपणनामा नवतितमोऽध्यायः ॥ ९० ॥

श्रीकृष्ण उवाच—

राधिके संश्रृणु साध्वि ! गत्वा श्रीबदरीं द्विजाः ।
सत्यः साध्व्यस्तथा सन्तो व्योम्ना सस्नुः सरिज्जले ॥ १ ॥
गंगायां च कृतस्नाना नामसंकीर्तनं हरेः ।
चक्रुः सह मिलित्वैव ययुर्यत्र नरायणः ॥ २ ॥
नरं नारायणं नत्वा नत्वा महर्षिमण्डलम् ।
तत्रत्यकृतसत्कारा लब्धस्वागतपूजनाः ॥ ३ ॥
स्वीकृतमधुपर्काश्च कृष्णनारायणस्य ते ।
पर्णकुटीं ययुः पृष्ट्वा यत्रास्ते लोमशोऽपि च ॥ ४ ॥

लोमशो वीक्ष्य भक्ताँश्चागतान् शोकितमानसान् ।
पप्रच्छ कुशलं शीघ्रं चागमेऽपि प्रयोजनम् ॥ ५ ॥
दत्तासनास्तु ते सर्वे जगदुर्लोमशं मुनिम् ।
दर्शनं श्रीहरेः कृत्वा कृत्वा प्रपूजनं तथा ॥ ६ ॥
ततो वक्ष्याम एवाऽस्मद्गमने त्वत्र कारणम् ।
इत्युक्त्वा श्रीहरिं पर्णकुट्यां स्थितं च लोमशः ॥ ७ ॥
द्रागेवाऽन्तर्गृहं गत्वा चावेद्य स्वजनागमम् ।
स्नेहभृतं हरिं नीत्वा सहैव स बहिर्ययौ ॥ ८ ॥
आगतं श्रीहरिं शालांऽगणे श्रीबदरीतले ।
दण्डवच्च नमस्कारान् चक्रुस्ते यात्रिकास्तदा ॥ ९ ॥
प्रेम्णा हरिस्तु पप्रच्छ कुशलं स्वागतं सुखम् ।
तदा चाश्रूणि मुक्त्वैव जगदुः श्रीहरिं च ते ॥१०॥
महामारी भैरवी या सीमरक्षणकारिणी ।
तया सिंहलद्वीपस्य राक्षस्योऽसंख्यका हताः ॥११॥
याऽश्वपट्टसरःक्षेत्रे युद्धार्थं समुपागताः ।
अधर्मजीवदैत्यस्य वैरनिर्यापनकृते ॥१२॥
कन्यका रक्षिताश्चापि रक्षितं चाश्रमं तथा ।
महामार्या तथा रात्रौ तस्यै शंभुः स्वयं तदा ॥१३॥
प्रसन्नो वरदानार्थं प्राह साऽपि तदाऽऽर्थयत् ।
महामार्यो मदुत्पन्ना युद्धकर्त्र्यः क्षुधार्दिताः ॥१४॥
तामस्यश्च समिच्छामो नरमांसाशनं शिव ! ।
शंभुनोक्तं न तद् योग्यं ततः प्राह तु भैरवी ॥१५॥
भक्तान्नैव ग्रहीष्यामः श्रीहरेः शरणागतान् ।
शिवभक्तान् हरेर्भक्तान् त्यक्त्वा ये पापिनश्च तान् ॥१६॥
नास्तिकान् धर्महीनाँश्च देवद्रोहिण एव तान् ।
शठान् विनिन्दकान् तीर्थद्रोहिणः कपटान्वितान् ॥१७॥
स्नानपूजाजपभक्तिहीनान्नराँश्च योषितः ।
भक्षयिष्याम एवाऽत्र बहिर्वै दशयोजनात् ॥१८॥
तथाऽस्त्विति हरः प्राह महामार्योऽयुताऽयुताः ।
भक्षयामासुरत्यर्थं बालान् वृद्धान् जनान् द्रुतम् ॥१९॥
सगर्भा जरठा नारीर्युवतीर्यून इत्यपि ।
एवं वै विप्लवो जातो ग्रामा मानववर्जिताः ॥२०॥
वियन्ते काकवासाश्च जनाः कुटुम्बवर्जिताः ।
अर्धा वसतयो जाता निर्वंशाश्चापि केचन ॥२१॥
अयं तूपद्रवो नाथ बलमासान्न वर्तते ।
महाकालस्य वेगेन म्रियन्ते मानवाः प्रभो ॥२२॥
संख्या नास्ति मृतानां वै दाहका न मिलन्त्यपि ।
अरण्यं पत्तनं जातं जाता ग्रामा वनानि च ॥२३॥

शीघ्रमागत्य रक्षां नः कुरु तत्प्रलयात्प्रभो ।
इत्युक्त्वा रुरुदुः सर्वे दयालुस्तु दयावशः ॥२४॥
भूत्वोत्थाय ततः शीघ्रं सुसस्मार नरायणम् ।
नरनारायणौ पर्णकुट्यां त्वाययतुस्तदा ॥२५॥
अग्रे निषेदतुर्नत्वा परमेशं परात्परम् ।
पप्रच्छतुस्तदाज्ञां च किमेवं व्यग्रता प्रभो ॥२६॥
हरिः प्राहाऽऽजनाभे तु खण्डे पृथ्व्यां व्यजायत ।
मनुष्याणां महामार्या विनाशो पापिनां बहुः ॥२७॥
म्रियन्ते तत्र भक्ताश्च स्वल्पदोषा अपि श्रिताः ।
संहारोऽयं समजनि चाधर्मजीवरक्षसः ॥२८॥
विनाशेन पुलस्त्यस्य वंशे खरसुतस्य वै ।
खरस्य या भगिन्यस्तु राक्षस्यस्ताभिरेव तु ॥२९॥
उपद्रवः कृतो नश्च क्षेत्रे तत्प्रतिकारिका ।
भैरवी च महामारी शंभोर्दूती च तामसी ॥३०॥
पारितोषिकरूपेण भक्षयत्येव पापिनः ।
पापिनां संगमे स्वल्पपापाः सुपुण्यशालिनः ॥३१॥
भक्ताश्चापि प्रभक्ष्यन्ते तद्रक्षार्थं मया द्रुतम् ।
गन्तव्यं तत्र भक्तैश्च साकमेभिः सुराष्ट्रके ॥३२॥
इत्युक्तः श्रीनरनारायणः प्राह कृपानिधे ।
स्वतन्त्रस्य परेशस्य यथेच्छा तद्भवेत् खलु ॥३३॥
मया नित्यं पूजनार्थं कार्तिके भगवान् स्मृतः ।
पञ्चवारं प्रत्यहं सम्पूजितः कार्तिके मया ॥३४॥
वन्दितः सेवितो नित्यं पादसंवाहनादिभिः ।
फलैः संभोजितश्चापि भक्तिधर्मादिभिस्तथा ॥३५॥
तोषितश्चापि ऋषिभिः पावितं बदरीवनम् ।
पाविताः ऋषयः सर्वे पावितश्च हिमालयः ॥३६॥
पाविता देवगंगा च पाविता पर्णशालिका ।
सदा तीर्थस्वरूपेयं स्थास्यत्येवेयमाश्रमे ॥३७॥
संकल्पाः पूरिताः सर्वे दर्शिता तापसी स्थितिः ।
रीतिश्च संयमलभ्या त्वत्तो नाथ समर्जिता ॥३८॥
सर्वं पूर्णं मम जातं स्वेष्टो मखो व्यजायत ।
क्रतुः स वैष्णवः पूर्णो विधिवत् परिवर्तते ॥३९॥
परमेशास्तथेशाश्च सुरा महर्षयस्तथा ।
पितरस्तोषिता नाथ त्वया यज्ञे प्रतिष्ठता ॥४०॥
गृह्णता च हविः साक्षाद् वह्निमुखेन भास्वता ।
किन्न्यूनं मे वर्ततेऽद्य मुक्ताः सन्तोषितास्तथा ॥४१॥
सर्वं प्रपूरितं नाथ मानसं भवता मम ।
सार्धमासोत्तरं चात्रोषित्वा बदरी पाविता ॥४२॥

इत्युक्त्वा श्रीनरनारायणौ भक्तिर्महर्षयः ।
धर्मस्तथाऽन्यदेवाश्च पुपूजुः परमेश्वरम् ॥४३॥

आरार्त्रिकं प्रचक्रुश्च प्रदक्षिणं सुमाञ्जलिम् ।
क्षमामभ्यर्थयामासुस्ततः कृष्णनरायणः ॥४४॥

आशीर्वादान् ददौ तेभ्यश्चाह नरं नरायणम् ।
भक्तिं धर्मं महर्षीश्च समागच्छन्तु मद्गृहम् ॥४५॥

कुंकुमवापिकाक्षेत्रं चाऽश्वपट्टसरोवरम् ।
लोमशस्य गुरोश्चाप्याश्रमं पश्यन्तु पावनम् ॥४६॥

अक्षरं परमं क्षेत्रं कुर्वन्तु पावनं मम ।
हैमस्थानां भवतां तु दर्शनं दुर्लभं क्षितौ ॥४७॥

इत्युक्तवान्, नरनारायणाद्या हृष्टमानसाः ।
मार्गशीर्षस्य पूर्णायां स्नात्वा यात्रां प्रचक्रिरे ॥४८॥

ऋषयो व्योममार्गस्थाः कुंभकेन ययुस्तदा ।
नरनारायणौ सन्तौ धर्मो भक्तिश्च लोमशः ॥४९॥

साध्व्यो हरिस्तथा मुक्ता विमानेनाऽऽययुर्गृहम् ।
सायं प्रापुश्च सौराष्ट्रं कालशोकितमानवम् ॥५०॥

नष्टभ्रष्टगृहाचारं नष्टार्धमानवोज्झितम् ।
सतेजस्को यथापूर्वं चासीन्नासीच्च तादृशः ॥५१॥

सौराष्ट्रश्च यथा तद्वन्मार्गे देशा विलोकिताः ।
कुरवः शूरसेनाश्च मरवो गौर्जरास्तथा ॥५२॥

नष्टप्रजाधनाः शुष्का निस्तेजस्का गृहा इव ।
महामारीभक्षिताश्च कालवेगेन नाशिताः ॥५३॥
मानवा वनवासाश्च गृहवासाः पिशाचकाः ।
शवा मृत्युनिवासाश्च तिर्यग्वासं च जीवनम् ॥५४॥

आगाराणि स्मशानानि मृत्युदूताश्च मूषकाः ।
विलोक्यन्ते नगरेषु ह्यतर्क्यः प्रलयो यथा ॥५५॥

एतत्सर्वं विदित्वैव भगवान् पुरुषोत्तमः ।
क्षणं विचार्य यानाच्च तदा सस्मार शंकरम् ॥५६॥

क्षेत्रपः शंकरस्तत्र चाश्वपट्टसरस्तटे ।
उपस्थितोऽभवत्तूर्णं ननाम परमेश्वरम् ॥५७॥

शंकरं श्रीहरिः प्राह महामारीभिरेव यत् ।
विनाश्यते जगत्सर्वं महामारीं निवारय ॥५८॥

द्रागेव शंकरो नैजं गलनादं चकार ह ।
कम्पितं सर्वमण्डं च भुवनानि चतुर्दश ॥५९॥
कम्पितान्यभवत्तूर्णं महामारीं समाह्वयत् ।
दिग्भ्यः सर्वाभ्य एवैताः कोटिरूपधराः स्त्रियः ॥६०॥

भक्षिका मद्यमांसानामाययुर्हरसन्निधौ ।
शंकरस्तास्ततः प्राह नारायणः परेश्वरः ॥६१॥

दयालुर्भगवानत्र लोकरक्षणकारकः ।
निषेधति स्वयं श्रीमान् पापिपापविनाशकः ॥६२॥

मा भक्षयन्तु पापाँश्च भक्ष्यन्ते पापिसंगतः ।
भक्ताश्चापि च भक्तानां कुटुम्बान्यपि सर्वशः ॥६३॥

तेषां रक्षा मया कार्या त्यजन्तु तद्विनाशनम् ।
इत्युक्तास्ता महामार्यो निवृत्ता भयतो हरेः ॥६४॥

ययाचिरे क्षमां चापि हरेश्चरणसेवनम् ।
हरिस्ताः प्राह वै सर्वा यान्तु सर्वत्र भूतले ॥६५॥

तिलकं चन्द्रको मे स्याद् भाले कण्ठे च मालिका ।
येषां तान् सम्प्रदायैव प्राणान् शक्तिं च चेतनाम् ॥६६॥

जीवयन्तु देवजीवान् भक्तिमार्गप्रवर्तकान् ।
ततस्ताः प्राह भगवन् न शक्ता हि वयं तथा ॥६७॥

चेतनं जीवनं दातुं किं कुर्मोऽत्र तवाऽऽज्ञया ।
हरिर्ददौ तदा ताभ्यः कल्पलताः सुजीवनीः ॥६८॥

ता गृहीत्वा ययुः सर्वा जीवयामासुरीष्टकान् ।
भक्तान् सर्वानधर्मपापान् श्रीहरेस्तु निदेशतः ॥६९॥

तदाऽऽनन्दः पुनर्जातः पृथिव्यां मानवेषु वै ।
येषां वै तिलकं कण्ठी ते भवन्ति सजीवनाः ॥७०॥

इत्युद्घोषे प्रवृत्ते च मृतानामपि तज्जनाः ।
कण्ठ्या युक्तं शवं कृत्वा विलोकयन्ति जीवनम् ॥७१॥
केचित् कुर्वन्ति तिलकं भाले शवस्य वै तदा ।
कण्ठेऽर्पयन्ति कण्ठीं च तौलसीं जीवनाय वै ॥७२॥

एवं देशेषु सर्वत्र शवास्तिलककण्ठधराः ।
सजीवा उत्थिता भूमौ साश्चर्यं चाऽवलोकयन् ॥७३॥
वैष्णवास्ते तदा जाता मानवाश्चाजनाभके ।
कृष्णनारायणस्वामिविष्णो मृत्योर्निवारक ॥७४॥

रक्ष रक्ष सदा चैवं त्वार्थयच्छ्रीहरिं प्रति ।
तदा श्रीशंकरः प्राह सर्वास्ता भैरवीः सतीः ॥७५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
मन्त्रमिमं भवत्यश्च गृह्णन्तु मत एव च ॥७६॥

जीवितान् मानवान् कर्णे श्रावयन्त्वपि सर्वशः ।
एवमुक्ताः क्षणात् सर्वा मनोवेगाः सुगृह्य तम् ॥७७॥
मन्त्रं भूत्वा च वैष्णव्यो ददुर्मन्त्रान् तु सर्वशः ।
कल्पवल्लीसमुत्थेभ्यः कारयित्वा तु वैष्णवान् ॥७८॥

जगदुज्जीवयामासुर्भक्तशोकान् प्रजह्रिरे ।
चक्रुश्चैतादृशं लोके न भूतं न भविष्यति ॥७९॥
परब्रह्म विना तादृक् कर्तुमर्हसि कोऽपरः ।
नाडीप्राणा यस्य हस्ते तेन कर्तुं हि शक्यते ॥८०॥
ब्रह्माण्डे चोत्सवा जाता ग्रामे ग्रामे गृहे गृहे ।
मृताश्चोज्जीविताः श्रीमत्कृष्णनारायणेन वै ॥८१॥
तीर्थार्थे त्वाययुः सर्वे प्राप्तनूतनजीवनाः ।
क्षेत्रं कुंकुमवापीं तु तथा कृष्णनरायणम् ॥८२॥
महामारीसमूहाँश्च दृष्ट्वाऽऽश्चर्यं प्रपेदिरे ।
पौषे माघे फाल्गुने च चैत्रेऽपि त्वाययुर्जनाः ॥८३॥
भूत्वा सर्वे कृतकृत्या यान्ति स्म निजमन्दिरम् ।
नरा नार्यः कोटिसंख्या जीविता हरिणा तदा ॥८४॥
अथ ता राधिके देव्यो महामार्योऽपि माधवात् ।
वव्रुः श्रीबालकृष्णाद्वै सेवनं निजपादयोः ॥८५॥
हरिस्ताभ्यो ददौ वासं ततः सौराष्ट्रके वने ।
भवत्यो बदरीवृक्षा भवन्तु दिव्यरूपिणः ॥८६॥
क्षेत्रेषु चाप्यरण्येषु स्वल्पा वै चिरजीविनः ।
कण्टकद्वययुक्ताश्च तामसैः कण्टकैर्युताः ॥८७॥
सौराष्ट्रे मच्चरणयोः रजोभिः संपरिप्लुताः ।
पादसेवातुल्यलाभा भवन्त्वाकल्पसंस्थिताः ॥८८॥
अहं रामस्वरूपेण भक्षयिष्ये फलानि वः ।
शबरीजातिका मेऽत्र दास्यन्त्यपि फलानि वः ॥८९॥
इत्येवं ताः कृता भक्ताः स्तम्बरूपा भुवस्तले ।
क्षुद्रिकास्ता बदर्यश्च द्राग्जाताश्चिरजीवनाः ॥९०॥
नरनारायणादीनामृषीणां भक्तिधर्मयोः ।
स्वागतं श्रीहरिश्चक्रे माता पिता च लोमशः ॥९१॥
वासं नैजे चालयेऽपि कानके प्रददौ हरिः ।
भोजनं तापसेभ्यश्च हव्यादि प्रददौ प्रभुः ॥९२॥
विशश्रमुस्ततः सर्वे प्रातस्त्वश्वसरोवरे ।
सस्नुस्ततो ययुः सर्वे द्रष्टुं श्रीलोमशाश्रमम् ॥९३॥
विस्तीर्णं दिव्यरूपं च ब्रह्मप्रियाभिरुज्ज्वलम् ।
यत्र माया न चैवास्ति दिव्याऽक्षरसमं शुभम् ॥९४॥
ततस्तीर्थविधिं कृत्वा गृहीत्वा पूजनं ततः ।
तीर्थदेवान् मिलित्वा च धृत्वा रूपद्वयं च ते ॥९५॥
तीर्थे तीर्थस्वरूपेण स्थित्वाऽपरेण ते ततः ।
आज्ञां लब्ध्वा हरेः सर्वे ययुः श्रीबदरीवनम् ॥९६॥
धर्मतीर्थं भक्तितीर्थं नरतीर्थं तथोत्तमम् ।
नारायणस्य तीर्थं च ऋषितीर्थं शुभं तथा ॥९७॥
बदरीतीर्थमित्येतज्जातं चाश्वसरोवरे ।
एवं वै राधिके तत्र चमत्कारो महानभूत् ॥९८॥
मुक्तिमुक्तिप्रदश्चापि स्मरणान्मृत्युहारकः ।
कन्यारक्षानिमित्तेन जगद्वै वैष्णवं कृतम् ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महामारीभिर्बहुमानवनाशे साध्वीसाधुविप्रर्षिगणो बदरीं गत्वा प्रभवे निवेदयित्वा हरिमानयामास, हरिर्मृतान् जगज्जीवान् जीवयामासेत्यादिनिरूपणनामैकनवतितमोऽध्यायः ॥ ९१ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके वासुदेवं संकर्षणादयः ।
त्रय ईशेश्वरा ज्ञानं पप्रच्छुर्ब्रह्मबोधकम् ॥ १ ॥
ज्ञानं जीवेश्वराणां तु मुक्तिकृद् वद चाग्रज ।
को वा त्वात्मा च का मुक्तिः संसारः किन्निमित्तकः ॥ २ ॥
कः संसारस्तथा ब्रह्म किं तत् परतरं ततः ।
त्वं वेत्सि परमं गुह्यं सर्वं वै भगवन् प्रभो ॥ ३ ॥
नारायण स्वयं साक्षात्पुराणाऽचिन्त्यपूरुष ।
न ह्यन्यो विद्यते वेत्ता त्वामृते पुरुषोत्तम ॥ ४ ॥
एवमुक्त्वाऽनिरुद्धश्च प्रद्युम्नः संप्रकर्षणः ।
दध्युः स्वस्वहृत्सु तं कंचित्परमं पुरुषं प्रभुम् ॥ ५ ॥
तावद् विलोकयामासुः श्रीहरिं पुरुषोत्तमम् ।
विहाय वासुदेवाख्यं रूपं तत्कारणं परम् ॥ ६ ॥
अनादिश्रीकृष्णनारायणं ब्रह्मपरं हरिम् ।
विभ्राजमानं मुक्तैश्च सेवितं दिव्यमद्भुतम् ॥ ७ ॥
श्रीवत्सवक्षसं कान्तं प्रभामण्डलमण्डितम् ।
सर्वायुधधरं कृष्णनारायणं धिया युतम् ॥ ८ ॥
नित्यानन्दगुणैश्वर्यभूतिशक्तिसुखाश्रयम् ।
द्विभुजं कोटिमुक्ताभिर्मुक्तैः सेवितपत्कजम् ॥ ९ ॥
हसन्तं हासयन्तं च कोटिकन्दर्पसुन्दरम् ।
किशोरं दिव्यशोभाढ्यं सर्वसृष्टिमनोहरम् ॥१०॥
उज्ज्वलं सौम्यभावेन संभृतं चायतेक्षणम् ।
परे धाम्नि दिव्यगजासनस्थं परमेश्वरम् ॥११॥
ततोऽक्षरं ब्रह्मधाम ददृशुः सीमवर्जितम् ।
कोटिमुक्तान् ददृशुश्चाक्षरसंज्ञान् मनोहरान् ॥१२॥
ततस्तं ददृशुः शीघ्रं गोलोकं गोपसंश्रितम् ।
गोपीगणैः शोभितं श्रीराधाकृष्णाऽभ्यधिष्ठितम् ॥१३॥

ततस्ते ददृशू रम्यं वैकुण्ठं ब्रह्मसद्दशम् ।
लक्ष्मीनारायणावासं कोटिपार्षदसंश्रितम् ॥१४॥
ततो दिव्यं सुकैलासं सदाशिवशिवाश्रितम् ।
ददृशुस्ते च भूम्नोऽथाऽमृताख्यं धाम शोभितम् ॥१५॥
ततस्ते ददृशुर्विष्णोर्वैकुण्ठं क्षीरसागरम् ।
श्वेतद्वीपं बदरीं च वासुदेवेऽग्रजे तदा ॥१६॥
तत्र तत्र हरेर्मूर्तिं यादृशीं तादृशीं तु ते ।
वासुदेवे ददृशुर्हि सर्वां सृष्टिं च मायिकीम् ॥१७॥
अथ तिरोऽभवत् सृष्टिः क्षणान्ते तेजसां चयम् ।
ददृशुस्तत्र च दिव्यं सौराष्ट्रं वै यथास्थितम् ॥१८॥
तत्र क्षेत्रं चाश्वपट्टसरोऽभिधं सुभास्वरम् ।
तत्र कुंकुमवापीं च तथा श्रीलोमशाश्रमम् ॥१९॥
तत्सर्वं परमं धाम दिव्यमुक्तादिराजितम् ।
ब्रह्मप्रियाभिसंव्याप्तं सांख्ययोगिन्यधिश्रितम् ॥२०॥
अनादिश्रीकृष्णनारायणभक्ताधिवासितम् ।
दिव्यश्रीकम्भरालक्ष्मीगोपालकृष्णशोभितम् ॥२१॥
प्रभापारवतीलक्ष्मीमाणिकीराधिकाश्रितम् ।
मञ्जुलासगुणाहंसाविजयाललिताश्रितम् ॥२२॥
शतेन द्वादशभिश्च प्रियाभिरधिवासितम् ।
अनन्तकोट्यब्जकानाधिष्ठितं दिव्यभूतिकम् ॥२३॥
ददृशुर्दिव्यकलशैः प्रासादानपि शोभितान् ।
महाप्रासादमेतस्याऽनादिकृष्णस्य ददृशुः ॥२४॥
स्वात्माधारं परं दिव्यं यत्र श्रीभगवान् स्वयम् ।
किशोरप्रतिभश्चास्ते बालकृष्णो नरायणः ॥२५॥
नारायणानां परमः पुमान् श्रीपरमेश्वरः ।
ईश्वराणां च परमः साक्षाच्छ्रीपुरुषोत्तमः ॥२६॥
अवतारसमूहानां कारणं चाऽवतारी यः ।
कृष्णानां चापि यः कृष्णो व्यूहानां व्यूहकृत्प्रभुः ॥२७॥
तं हरिं ददृशू राधे वासुदेवे हरौ तु ते ।
विभ्राजमानं विमले गजस्वर्णासने हरिम् ॥२८॥
यदन्तरा सर्वमेतद् यतोऽभिन्नमिदं जगत् ।
सवासुदेवं तं दृष्ट्वा महानन्दं प्रपेदिरे ॥२९॥
ततः क्षणान्तरे सर्वं लीनं ददृशिरे पुरः ।
वासुदेवं ददृशुस्ते प्रशान्तमनसोऽभवन् ।
एवं प्रत्यक्षविज्ञानं कारयित्वा तु ताँस्ततः ॥३०॥
वासुदेवः समुवाच गुह्यं ज्ञानं सनातनम् ।
यन्न देवा विजानन्ति यजमाना द्विजातयः ॥३१॥
तं ज्ञात्वा परमेशानं ब्रह्मीभूता महर्षयः ।
संसारं न प्रपद्यन्ते पूर्वेऽपि ब्रह्मधामिनः ॥३२॥
आत्माऽयं सुखवान् स्वच्छः शुद्धः सूक्ष्मः सनातनः ।
तदन्तरे तु यश्चास्ते सर्वान्तरः परात्परः ॥३३॥
सोऽन्तर्यामी स पुरुषः स प्राणः स्वामिसंज्ञकः ।
अस्मात् सञ्जायते विश्वं तस्य धाम्नि प्रलीयते ॥३४॥
स मायां छायया गृह्णन् करोति विविधास्तनूः ।
नाऽस्य बन्धो न तद्भावो नायं मायागुणाश्रयः ॥३५॥
यथा प्रकाशतमसोस्तादात्म्यं नोपपद्यते ।
तद्वदैक्यं न सम्बन्धः प्रपञ्चपरमात्मनोः ॥३६॥
छायातपौ यथा लोके परस्परविलक्षणौ ।
तद्वत् प्रपञ्चपुरुषौ विभिन्नौ परमार्थतः ॥३७॥
आत्मा शुद्धो नित्यबुद्धो मुक्तरूपः स्वभावतः ।
परमात्माऽतिशुद्धश्च सर्वज्ञश्चात्मसुस्थितः ॥३८॥
विकारहीनौ निर्द्वन्द्वौ सदानन्दपरिप्लुतौ ।
आत्मतदन्तरात्मानौ सयुजौ दिव्यसद्गुणौ ॥३९॥
नित्ययुक्तौ च सुहृदौ द्रष्टारौ च नियामकौ ।
आत्मा कर्म कृतं भुंक्तेऽन्तर्यामी भोगवर्जितः ॥४०॥
दिशत्येव यथाकालं नियाम्य श्रेष्ठिने फलम् ।
अहं कर्ता सुखी दुःखी कृशः स्थूलश्च मानवान् ॥४१॥
अहंकारेण तद्भोक्ता भवत्यज्ञानवैभवात् ।
अज्ञानादन्यथाज्ञानान्मनसा सह युज्यते ॥४२॥
प्राकृतं गुणसंसर्गं योजयित्वा मनोऽस्थिरम् ।
स्वधर्माढ्यं तदात्मानं सम्पादयति वै मुहुः ॥४३॥
अहंकाराऽविवेकेन कर्ताऽहं चेति मानयन् ।
स्वात्मानं चाऽक्षरं ब्रह्म विस्मरत्येव कल्मषी ॥४४॥
अनात्मन्यात्मविज्ञानी सर्वदुःखप्रशेवधिः ।
रागद्वेषादयश्चापि भ्रान्तिजास्तत्र यन्ति च ॥४५॥
तैर्दोषैः पुण्यपापेऽयं भुंक्ते स्वभावजे यथा ।
भ्रान्तिनाशे तु दोषाणां विगमे निष्प्रपञ्चकः ॥४६॥
एकः सन्तिष्ठते देवे कृष्णनारायणेऽर्पितः ।
सच्चिदानन्दयोगेन सच्चिदानन्दवान् सदा ॥४७॥
वर्तते परमेशस्य कृपया चेश्वरो यथा ।
यथा वै धूमसम्पर्कान्नाकाशो मलिनः क्वचित् ॥४८॥
तथा मानसदोषैश्च निर्लेपोऽक्षरसंज्ञितः ।
उपाधिवर्जितः शुद्धो विमलात्मा प्रकाशते ॥४९॥
ज्ञेयं त्यक्त्वा ततो ज्ञप्तिं ज्ञप्तिसंस्कारमित्यपि ।
त्यक्त्वा त्वात्मप्रकाशः स्याद् यथा नारायणः स्वयम् ॥५०॥

तस्मादात्माऽक्षरः शुद्धो नित्यः श्रीहरिसंश्रितः ।
उपासितव्यो मन्तव्यः श्रोतव्यश्च मुमुक्षुभिः ॥५१॥
यदात्मनि परब्रह्म भाति सर्वत्र सर्वदा ।
श्रद्दधानस्य भक्तस्य तदा सम्पद्यते स्वयम् ॥५२॥
यदा सर्वं कार्यजातं स्वस्मिन्नेवाऽभिपश्यति ।
कार्यजाते निजात्मानं तदा सम्पश्यते हरिः ॥५३॥
यदा सर्वं समाधिस्थो नातिरिक्तं प्रपश्यति ।
एकीभूतः परेणाऽऽत्मा तदा मुक्तः प्रजायते ॥५४॥
यदाऽस्य मानसा भावा विलीयन्ते परे हरौ ।
तदाऽयममृतीभूतो मोक्षं याति हरेः पदम् ॥५५॥
यदा सर्वं पृथग्भूतं तस्मिन्नेव विलोक्यते ।
ततश्चापि च विस्तारं तदाऽस्य ब्रह्मयोग्यता ॥५६॥
यदा पश्यति चात्मानं तदात्मानं च केवलम् ।
तदाऽस्य ब्रह्मसम्पत्तिर्निवृत्तिर्मायिकी तदा ॥५७॥
यदा जन्मजरादुःखव्याधीनामेकभेषजम् ।
आत्मात्मब्रह्मविज्ञानं तदाऽयं शाश्वतः शिवः ॥५८॥
यथा नदीनदा यान्ति सागरेणैकतां तथा ।
आत्माऽक्षरेण तच्चापि परे ब्रह्मणि चैकताम् ॥५९॥
व्रजेत्तदा भवेत् साक्षादपरोक्षानुदर्शनम् ।
विशेषाऽद्वैताऽद्वैतं तद् श्रुतिभिः सन्निरूपितम् ॥६०॥
तद्विज्ञानं परश्रेयःप्रदं चोपासनाभिधम् ।
यत्र तज्जायते तत्र न प्रपञ्चो न वासना ॥६१॥
अज्ञानं वर्तते यत्र तत्र मोहश्च वासना ।
तस्मान्मोहं परित्यज्य दग्ध्वा सर्वास्तु वासनाः ॥६२॥
सर्वश्रुतिसुनिस्तारं ब्रह्म भूत्वा तरेद् बुधः ।
विज्ञानं भगवद्भक्तिं योगं संसाध्य वै ध्रुवम् ॥६३॥
ब्रह्मरूपं विभाव्यैव परं हरिमवाप्नुयात् ।
एष आत्माऽहमव्यक्तो ब्रह्मेदं धाम भक्तिमत् ॥६४॥
ब्रह्मण्ययं परः स्वामी सोऽक्षरे पुरुषोत्तमः ।
विशेषाऽद्वैताऽद्वैतं तद् यो हरिः परमेश्वरः ॥६५॥
सर्वरसः सर्वरूपः सर्वगन्धोऽजरोऽमरः ।
सर्वतः पाणिपादश्च सर्वात्मा सर्वतोमुखः ॥६६॥
अनादिश्रीकृष्णनारायणोऽन्तर्यमनोऽपि सः ।
अपाणिपादो जवगो ग्रहीता सर्वसंस्थितः ॥६७॥
अचक्षुरपि चष्टेऽसो कर्णशून्यः शृणोत्ययम् ।
वेदाऽहमेनं पुरुषं पुराणं परमेश्वरम् ॥६८॥
परे धाम्नि स्थितं चापि कम्भराश्रीसुतं शुभम् ।
कृष्णनारायणं श्रीशं नरनारायणं च तम् ॥६९॥
वासुदेवं हरं विष्णुं हरिं सर्वान्तरस्थितम् ।
पश्यन्ति ऋषयस्तं तु तदनुग्रहशालिनः ॥७०॥
तापसा नैव पश्यन्ति पश्यन्त्येनं हि सेवकाः ।
निर्गुणोऽमलरूपस्य यदैश्वर्याऽक्षराभिधम् ॥७१॥
उपासकाः प्रपश्यन्ति सूक्ष्मतत्त्वादिदर्शिनः ।
यन्न देवा विजानन्ति मोहितास्तस्य मायया ॥७२॥
का कथा जीवलोकस्य शृणुध्वं भ्रातरो मम ।
अनिरुद्ध ! त्वयि त्वास्ते सर्जनैश्वर्यमुत्तमम् ॥७३॥
अक्षरस्यैव तद्बोद्धं ब्रह्मणः कोटिभागजम् ।
प्रद्युम्न ! त्वयि यच्चास्ते पोषणैश्वर्यमित्यपि ॥७४॥
अक्षरस्यैव तद् बोध्यं ब्रह्मणः कोटिभागजम् ।
संकर्षण ! त्वयि चास्ते संहारैश्वर्यमित्यपि ॥७५॥
अक्षरस्यैव तद्बोध्यं ब्रह्मणः कोटिभागजम् ।
मयि चास्ते यदैश्वर्यं वसतिर्दीव्यतिस्तथा ॥७६॥
अक्षरस्यैव बोध्यं तद् यत्प्राप्तं तेन वै हरेः ।
अहंविशेषणं तत्राऽक्षरेऽद्वैतस्वरूपिणि ॥७७॥
विशेषाद्वैतमेतद्वै चाऽक्षरं ब्रह्म विद्यते ।
तदेकं त्वक्षरं नान्यत् समं चाक्षरसंज्ञितम् ॥७८॥
विशेष्यं त्वक्षरं यत्राऽद्वैते श्रीपरमात्मनि ।
समन्वेति स विशेषाद्वैताद्वैतः परेश्वरः ॥७९॥
मायातीतं चाक्षरं च तदतीतः परः प्रभुः ।
मायां विहाय जीवाश्चाक्षरं यान्ति हि तत्पदम् ॥८०॥
प्रविष्टास्तस्य सायुज्यं लभन्ते भक्तियोगिनः ।
ये हि मायामतिक्रान्ताः सर्वा विश्वस्वरूपिणीम् ॥८१॥
लभन्ते तेऽक्षरंधाम तत्र मे परमं पदम् ।
न तेषां पुनरावृत्तिरैश्वरी चापि मायिकी ॥८२॥
प्रसादात्तस्य कृष्णस्याऽक्षरेशस्य हरेः प्रभोः ।
अनादिश्रीकृष्णनारायणस्येत्यनुशासनम् ॥८३॥
तत्पुत्रशिष्यसाधुभ्यो दातव्यं ब्रह्मयोषिते ।
प्रदातव्यं न चान्येभ्योऽपात्रेभ्योऽपथ्यमेव यत् ॥८४॥
इत्येतद् राधिके तुभ्यं मया ज्ञानं प्रकाशितम् ।
वासुदेवेन यत्पूर्वं चानुजेभ्यः प्रकीर्तितम् ॥८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वासुदेवगीतायां परब्रह्मविज्ञानेन विशेषाद्वैताऽद्वैतेन तत्पदप्राप्त्यादिनिरूपणनामा द्वानवतितमोऽध्यायः ॥ ९२ ॥

श्रीकृष्ण उवाच—

राधिके श्रीवासुदेवस्त्वाह संकर्षणादिकान् ।
अनादिश्रीकृष्णनारायणस्य परमात्मनः ॥ १ ॥
स्थितिस्थापकशक्त्याख्यः कालः पुत्रो लयंकरः ।
हरते सर्वमेवैषो मायावैषम्यमित्यपि ॥ २ ॥
क्षोभं करोति चैवैषस्तदा माया प्रमाथिनी ।
प्रसूते विषमावस्थां महापूरुषयोगतः ॥ ३ ॥
माया कालः पूरुषश्च परमेश्वरशक्तयः ।
ताभ्यः सर्वमिदं जातं तस्माच्चा ब्रह्मरूपिकाः ॥ ४ ॥
तज्जातं ब्रह्मरूपं च जगत् सर्वं तु तत्तनु ।
तत्र सर्वत्र एवाऽस्याक्षरस्य ब्रह्मणः खलु ॥ ५ ॥
पाणिपादाक्षिश्रवणाननमस्तकनाभयः ।
अतः सर्वं समावृत्य तिष्ठत्यक्षरमेव तत् ॥ ६ ॥
सर्वेन्द्रियगुणाभासं दिव्येन्द्रियसमन्वितम् ।
सर्वाधारं महानन्दं प्रमाणातीतगोचरम् ॥ ७ ॥
सर्वोपमानरहितं सर्वावासं परामृतम् ।
अभिन्नं भिन्नसंस्थानं शाश्वतं ध्रुवमक्षरम् ॥ ८ ॥
निर्गुणं परमं ज्योतिर्निर्विकल्पमसीमकम् ।
स आत्मा सर्वभूतानां स बाह्याभ्यन्तरः स्थितः ॥ ९ ॥
तत्रास्ते सर्वगः शान्तस्तदात्मा परमेश्वरः ।
तेन व्याप्तमिदं विश्वं जीवेशमुक्तवासितम् ॥१०॥
तस्येच्छयाऽप्यहं जातो वासुदेवः परेश्वरः ।
मत्तो यूयं मूर्तयश्च त्रय एव जपोषलाः ॥११॥
ततो भूमा महाविष्णुस्ततो विराट् च विश्वसृट् ।
ततो महर्षयो देवा जगत्स्थावरजंगमम् ॥१२॥
जगन्माता महामाया तस्येच्छा मूलरूपिणी ।
अमृताख्या दोषकर्त्री पारगा पूरिका तथा ॥१३॥
महदाद्यं विशेषान्तं सम्प्रसूतेऽखिलं जगत् ।
सा या प्रकृतिरिष्टैव कान्तावन्मोहिनी प्रिया ॥१४॥
मोहापन्नस्तु पुरुषः स आत्मा जीव ईश्वरः ।
अहंकारकृतमैत्र्यो महत्तत्त्वातिबान्धवः ॥१५॥
मानसे कृतविश्वासो जन्मलाभाय कल्पते ।
प्रकृतौ नास्ति यस्येष्टं मोहस्तस्य न विद्यते ॥१६॥
अहंकारे न वै मैत्री महत्तत्त्वे न बन्धुता ।
मानसे न च विश्वासो मोक्षलाभाय कल्पते ॥१७॥
तस्यैतेऽनुकूलभावे वर्तन्ते ह्युपकारिणः ।
माया कालश्च पुरुषस्त एतेऽप्युपकारिणः ॥१८॥
प्रापयन्त्यक्षरं दिव्यं यस्येष्टः परमेश्वरः ।
अनादिश्रीकृष्णनारायणः परमधामगः ॥१९॥
तद्योगात्त्वस्य जायन्ते भक्तस्य दिव्यविग्रहाः ।
ज्ञानेच्छाकृतयश्चापि सुखदुःखादिभावनाः ॥२०॥
धर्माधर्मादिकोशाश्च मनोऽहंबुद्धिवेदनाः ।
जायन्ते दिव्यरूपाश्च सत्त्वं रजश्च कल्मषम् ॥२१॥
तन्मात्राणीन्द्रियवर्गः षट्कोशा भूतपञ्चकम् ।
तद्विकारास्तथा सर्वे जायन्ते दिव्यघट्टनाः ॥२२॥
तत्क्रियास्तद्व्यवहारश्चेष्टा वर्तनमित्यपि ।
सर्वं दिव्यं मोक्षदं च जायते ब्रह्मनिर्गुणम् ॥२३॥
कालो नात्र प्रभुर्यो वै सृजते हरते प्रजाः ।
सर्वे कालस्य वशगाः कालो भक्तस्य वै वशे ॥२४॥
भक्तोऽक्षरं त्वक्षरे च सर्वज्ञः स्वामिवल्लभः ।
सर्वज्ञान्न परः कश्चित् तं भजित्वा प्रमुच्यते ॥२५॥
नित्यं नास्तीति जगति किञ्चित् स्थावरजंगमम् ।
ऋते श्रीपरमात्मानं श्रीकृष्णं पुरुषोत्तमम् ॥२६॥
नाऽयं तपोभिर्विविधैर्न दानेन न चेज्यया ।
शक्यो वै देहिभिर्ज्ञातुं विना भक्तिं पराश्रयाम् ॥२७॥
श्रीहरिः सर्वभूतानामन्तस्तिष्ठति सर्वतः ।
तं सर्वसाक्षिणं लोका न जानन्ति परेश्वराः ॥२८॥
यस्मिन्ननन्तः सर्वमिदं यश्च सर्वान्तरे स्थितः ।
सोऽयं धाता विधाता च कालोऽग्निर्विश्वतोमुखः ॥२९॥
न तं पश्यन्ति मुनयो राजसाः पितृदेवताः ।
ब्रह्मा विराट् तथा भूमा ये चान्ये तत्परेऽपि च ॥३०॥
यथाकथञ्चित् तन्नाथं जानाम्यर्थं ततोऽवरम् ।
मुक्ता नान्तं नाऽक्षरं च तदाऽन्येषां तु का कथा ॥३१॥
नित्यं तद्विग्रहे व्याप्ता नैव जानाति माणिकी ।
तदाऽन्यासां तु शक्तीनां का कथाऽस्य विजानने ॥३२॥
गृणन्ति सततं वेदा तमेकं परमेश्वरम् ।
यजन्ति विविधैर्यज्ञैर्ब्राह्मणा वेदपारगाः ॥३३॥
ध्यायन्ति योगनिष्ठाश्च यतन्ते पारमीक्षितुम् ।
विनाऽनुग्रहमेवाऽस्य नैव पश्यन्ति काष्ठया ॥३४॥
स एव सर्वहविषां भोक्ता चापि फलप्रदः ।
सर्वदेवतनुः सोऽयं सर्वात्मा श्रेयसां पदम् ॥३५॥
तं तत्कृपया पश्यन्ति विद्वांसः सन्त एव तु ।
तेषां सन्निहितः सोऽयं ये तं नित्यमुपासते ॥३६॥
तेभ्यो ददाति तत्स्थानमानन्दं परमं पदम् ।
उत्तमा मध्यमाश्चापि निकृष्टाः पापयोनयः ॥३७॥

तस्य भक्त्या प्रमुच्यन्ते तेनैव संगता यदा ।
तद्भक्ता न विनश्यन्ति निम्नं यान्ति न वै पदम् ॥३८॥
तन्मार्गस्थास्तस्य योगं कारयन्ति हि साधवः ।
यो वै निन्दति तान् मूढो बालकृष्णं स निन्दति ॥३९॥
यस्तान् पूजयते भक्त्या स तं पूजयति प्रभुम् ।
पत्रं पुष्पं फलं तोयं भोजनं चाम्बरं द्रवम् ॥४०॥
तस्मै ददाति यो भक्त्या स स्यात् तस्य प्रियः सदा ।
स पूर्वं भक्तवर्गस्य दुःखनाशार्थमेव हि ॥४१॥
शक्तिं प्रकाशयामास राधिकां निजवामतः ।
तयाऽर्थितः स वै कृष्णो बभूवाऽक्षरधामनि ॥४२॥
गोलोके न्यवसत् तस्या भक्तिग्रहणहेतवे ।
स पूर्वं भक्तवर्गस्य सम्पद्दानार्थमेव तु ॥४३॥
शक्तिं प्रकाशयामास श्रीलक्ष्मीं निजवक्षसः ।
तथाऽर्थितः स वैकुण्ठे नारायणो बभूव ह ॥४४॥
स पूर्वरचनार्थं वै सृष्टिं सस्मार पूर्ववत् ।
शक्तिं प्रकाशयामास जघनात् प्रकृतिं पराम् ॥४५॥
तयाऽर्थितः स भगवानव्याकृतेऽक्षराश्रये ।
वासुदेवोऽहमभवं प्रकृतेश्चेतनाप्रदः ॥४६॥
तेनाऽर्थिता महासृष्टिर्जनिस्थैर्यान्तधर्मिणी ।
तन्मूर्त्यात्मकमद्देहाद्भवन्तस्त्रय एव च ॥४७॥
अनिरुद्धश्च प्रद्युम्नः संकर्षणोऽतिवैभवाः ।
प्राविर्भूता गुणकार्यकराः श्रीपरमेश्वराः ॥४८॥
तेनाऽर्थितस्ततो न्यायः स भूमा तद्भ्रुदुद्भवः ।
ईश्वराणां न्यायकर्ताऽमृते धाम्नि विराजते ॥४९॥
तेनाऽर्थितस्ततो मायाविकारोऽङ्कुरकारणम् ।
मुक्तस्तस्य भ्रकुटेस्तु समुत्पन्नः स पूरुषः ॥५०॥
प्रकृतेः पुरुषः सोऽयं रमते मायया तदा ।
तस्माज्जातं च युगलं बुद्ध्या महत्समाख्यया ॥५१॥
सेवितश्च पुमान् तस्याः कान्तो रमणरञ्जनः ।
प्रधानपुरुषौ देहौ हरेः ख्यातावुभौ सदा ॥५२॥
तत्त्वं ताभ्यामहङ्कार्वाभिधानं समजायत ।
महाविष्णुः स वै जातः सृष्ट्यर्थं श्रीनिषेवितः ॥५३॥
तस्माज्जातो विराडाख्यस्ततो देवा हरादयः ।
तेभ्यः पितृप्रणाल्या वै वेदानप्रापयद्धरिः ॥५४॥
स एव परमे धाम्नि राजमानः परेश्वरः ।
तपोऽर्थं कल्पयामास नरनारायणं तनूम् ॥५५॥
जीवलोकस्य शान्त्यर्थं दुःखनाशार्थमित्यपि ।
आसुराणां प्रशान्त्यर्थं लक्ष्मीशः क्षीरसागरे ॥५६॥
श्वेधाम्नि रमाकान्तो विराजतेऽश्मात्रतः ।
योगिनां च सतां साध्वीयोषितां परमो गुरुः ॥५७॥
धार्मिकाणां स गोप्ता च निहन्ता वेदविद्विषाम् ।
मायिकानां च मायाया निहन्ता स परेश्वरः ॥५८॥
सा माया च परा शक्तिर्यदा विद्येति गीयते ।
सा माया चाऽपरा शक्तिर्यदाऽविद्या हि सा मता ॥५९॥
नाशयेत् स च तां मायां मोक्षप्रदो हि माधवः ।
श्रीकृष्णः सर्वशक्तीनां प्रवर्तको निवर्तकः ॥६०॥
आधारभूतः सर्वासां निधानममृतस्य च ।
एका शक्तिः केशवस्याऽक्षरं ब्रह्म च धाम यत् ॥६१॥
अन्या शक्तिर्विपुला या संस्थापयति वै जगत् ।
तत्रान्तर्यामिता तस्य चापरा शक्तिरेव सा ॥६२॥
ज्ञानभक्तिप्रपक्षाभ्यां समाराधयति प्रभुम् ।
स याति वै हरेर्धाम व्यतिक्रम्य तु किल्बिषम् ॥६३॥
सर्वाः शक्तीर्व्यतिक्रम्य मां प्रयाति मदिष्टकृत् ।
ममोपासनया केचिद् भवन्त्यपि नरायणाः ॥६४॥
मम भावैः संभृताश्च तारयन्ति च देहिनः ।
केचिद् भवन्ति लोकेशा विष्णवस्तत्कृपावशात् ॥६५॥
केचित् हरादयश्चापि केचिद् ब्रह्मादिकेश्वराः ।
तेषु सर्वेषु भगवान् प्रेरकश्च निवर्तकः ॥६६॥
सोऽयं ब्रह्मविदां ब्रह्मा स्वयंभूर्विश्वतोमुखः ।
मायाविनामयं देवः पुराणो हरिरव्ययः ॥६७॥
योगिनामस्त्ययं शंभुः स्त्रीणां देवी गिरीन्द्रजा ।
आदित्यानामयं विष्णुर्वसूनामस्ति पावकः ॥६८॥
रुद्राणां शंकरश्चायं गरुडः पततामयम् ।
ऐरावतो गजेन्द्राणां रामः शस्त्रभृतामयम् ॥६९॥
ऋषीणां च वशिष्ठोऽयं देवानां च शतक्रतुः ।
शिल्पिनां विश्वकर्माऽयं प्रह्लादः सुरविद्विषाम् ॥७०॥
मुनीनामप्ययं व्यासो गणानां च विनायकः ।
वीराणां वीरभद्रोऽयं सिद्धानां कपिलो मुनिः ॥७१॥
पर्वतानामयं मेरुर्नक्षत्राणां तु चन्द्रमाः ।
वज्रं प्रहरणानां च व्रतानां सत्यमेव सः ॥७२॥
अनन्तो भोगिनां सोऽयं सेनानीनां च पावकिः ।
आश्रमाणां गृहस्थः स युगानां सत्यमेव सः ॥७३॥
कुबेरः सर्वयक्षाणां निर्ऋतिः सर्वरक्षसाम् ।
प्रजापतीनां दक्षश्च मृगेन्द्राणां मृगाधिपः ॥७४॥
वेदानां सामवेदश्च जप्यानां प्रणवस्त्वयम् ।
सूक्तानां पौरुषं सूक्तं मनुर्नीतिमतां हि सः ॥७५॥

विद्यानामात्मविद्या सः तत्त्वानां चेतनो हि सः ।
गतीनां मुक्तिरेवाऽयं बन्धनानां तु वासना ॥७६॥
पत्नीव्रतो द्विजानां तु सतीनां कम्भरा सती ।
सम्पदां च महालक्ष्मीरूपः सः पुरुषोत्तमः ॥७७॥
एवं वै भावयेत्तत्र तत्र कृष्णनरायणम् ।
तेन नारायणः स्वामी तत्र फलति सर्वथा ॥७८॥
स च मूर्तिस्वरूपोऽस्ति सर्वलोकेषु चानुजाः ।
तथैवाचार्यरूपोऽस्ति गुरुः श्रीपरमेश्वरः ॥७९॥
साधुरूपः स एवाऽस्ति दिव्यदेहः स पावनः ।
पितृरूपः स एवाऽस्ति मातृरूपोऽपि माधवः ॥८०॥
सतीरूपः पतिरूपः स एवाऽस्ति नरोत्तमः ।
अष्टावेते हि गुरवस्तारका दिव्यभाविताः ॥८१॥
तेषां प्रत्युपकारो हि न कथंचन विद्यते ।
तेषां नित्यं प्रियं कुर्यात् कर्मणा मनसा गिरा ॥८२॥
त एवैतेऽनादिश्रीमत्कृष्णनारायणात्मकाः ।
मत्वैवं ये भजन्ते तान् यान्ति ते परमां गतिम् ॥८३॥
सोऽयं साक्षात्परब्रह्माऽनादिश्रीपुरुषोत्तमः ।
सर्वावतारशास्ता च कृष्णनारायणः प्रभुः ॥८४॥
भगवाँश्चाऽक्षरातीतश्चान्तर्यामीश्वरेश्वरः ।
बालरूपः कम्भराश्रीगृहे चास्तेऽवतीर्य च ॥८५॥
श्रीमद्गोपालबालः सः लोमशाश्रमसन्निधौ ।
प्रासादे कानके चास्तेऽक्षरक्षेत्रेऽश्वसारसे ॥८६॥
तीर्थे कुंकुमवाप्याख्ये भूतले दिव्यविग्रहे ।
वर्तते मानवे रूपे ब्रह्मप्रियाभिसेवितः ॥८७॥
कृपया जीवमोक्षार्थे ब्रह्माण्डरक्षणाय च ।
वर्तते मानवे रूपे मानवर्ज्योऽपि माधवः ॥८८॥
ब्रह्मविष्णुमहेशानाम् भवतामंशरूपिणाम् ।
दृग्दृश्यो वर्तते भाग्याद् यो नाऽस्मद्दृक्प्रगोचरः ॥८९॥
इत्युक्त्वा विररामाऽसौ वासुदेवः प्रभुः क्षणम् ।
दध्युश्चित्ते त्रयस्तेऽपि दिव्यमानवमच्युतम् ॥९०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वासुदेवगीतायां प्रभोः प्राप्तिसाधनविभूतीनां निरूपणनामा त्रिनवतितमोऽध्यायः ॥ ९३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके वासुदेववाक्यैः प्रबोधिताः ।
माहात्म्यज्ञानवन्तस्ते त्रयोऽप्यूचुस्तदग्रजम् ॥ १ ॥
पूर्वोत्सवेषु कृष्णस्य दर्शनार्थं वयं गताः ।
इदानीं तद्दर्शनार्थं माहात्म्यज्ञानसंयुताः ॥ २ ॥
जिगमिषामो भवता सार्धं बालस्वरूपिणः ।
लीलाकैवल्यवीक्षार्थे तद्विज्ञानेन रञ्जिताः ॥ ३ ॥
इत्येवं भ्रातृभिः प्रोक्तो वासुदेवो हरिः प्रभुः ।
भ्रातृभिः सह तल्लोकाद् ब्रह्माण्डोदरमाययौ ॥ ४ ॥
वासुदेवस्य लोकात्ते वैराजसदृशाणवः ।
भूत्वा वैराजलोकाँश्चाविविशुश्च ततोऽपि च ॥ ५ ॥
भूत्वा चाणुतराः सत्ये लोके चाविविशुस्ततः ।
ततोऽप्यणव एवैते भूत्वा दिवं समाययुः ॥ ६ ॥
ततोऽप्यणुतमा भूत्वा मानवं लोकमाययुः ।
यत्पूर्वं श्रीवासुदेवमूर्तिर्वै स्वस्य धामनि ॥ ७ ॥
तस्या रोम्णस्तु पारार्ध्यभागोऽत्र मानुषे स्थले ।
तस्यापि कोटिभागेन मानुषं देहमास्थिताः ॥ ८ ॥
तेजसा भासुरास्ते च चत्वारो व्यूहसंज्ञकाः ।
बालकाः सदृशा भूत्वा चाऽश्वपट्टसरोऽम्बरे ॥ ९ ॥
आययुर्दिव्यहंसानां विमाने चातिभासुराः ।
वासुदेवोऽभवत्तत्र चतुर्भुजोऽतिभासुरः ॥१०॥
शंखचक्रगदापद्महेतिमान् मुकुटोज्ज्वलः ।
अन्ये त्रयो द्विभुजाश्चाऽभवँश्चक्रगदायुधाः ॥११॥
किशोरा दिव्यरूपाश्च वासुदेवसमाः शुभाः ।
अनेकसूर्यसंकाशाः स्वर्णकुण्डलभूषणाः ॥१२॥
वनमालाकौस्तुभादिधरा मुकुटशोभनाः ।
दिव्यदेहा दिव्यसिद्ध्यैश्वर्यसामर्थ्यराजिताः ॥१३॥
सहस्रकोटिदेवानां तेजांसि भासुराणि च ।
येषां रोमसु विद्यन्ते तादृशास्ते विमानके ॥१४॥
व्यदृश्यन्ताऽम्बरस्थे ते सायं मध्याह्नवद्वयभूत् ।
सौराष्ट्रस्य प्रजाः सर्वा विलोक्य दिवसादपि ॥१५॥
चातिप्रमाणतेजांसि व्यतर्कयन् प्रभुः स्वयम् ।
विमानेन विहारार्थे व्योम्ना याति स्थलान्तरम् ॥१६॥
यद्वा देवाः समायान्ति पूजनार्थं हरेर्मुहुः ।
तथैवेते समायाता भवेयुश्चेत्यतर्कयन् ॥१७॥
अथ कुंकुमवाप्याश्च प्रजा भागवतास्तदा ।
निर्ययुः स्वगृहेभ्यश्च तूर्णं दर्शनहेतवे ॥१८॥
तावद् विमानं रुचिरं ह्यवाततार चाम्बरात् ।
अश्वपट्टसरस्तीरे लोमशाश्रमसन्निधौ ॥१९॥
चत्वारस्ते व्यूहकृष्णा विमानाद्बहिराययुः ।
कोटिचन्द्रोज्ज्वलकान्तिव्याप्तामृताब्धिमूर्तयः ॥२०॥

पद्भ्यां विहृत्य च शनैरश्वपट्टसरोजले ।
सस्नुर्मानुषरूपास्ते प्रययुर्लोमशाश्रमम् ॥२१॥
ऋषिश्चकार सत्कारं स्वागतं माननादिकम् ।
मधुपर्कं ददौ पूजां चकार चन्दनादिभिः ॥२२॥
दिव्यदृष्ट्या व्यूहतत्त्वं ज्ञात्वा चकार दण्डवत् ।
आरार्त्रिकं ततश्चक्रे व्यूहानां लोमशो मुनिः ॥२३॥
ब्रह्मप्रियाः ऋषयश्च चक्रुर्नमःक्रियां ततः ।
उत्थाय ते ऋषीन्नत्वा बालकृष्णालयं ययुः ॥२४॥
बालकृष्णः पितरौ च प्राह व्यूहागमं तदा ।
सोत्साहौ पितरौ तूर्णं मानार्थं चाभिजग्मतुः ॥२५॥
श्रुत्वा त्वन्ये सुराश्चापि मुनयश्चेश्वरा अपि ।
तीर्थानि तत्त्वसंघाताः सन्तः साध्व्यो महर्षयः ॥२६॥
सन्मानार्थं चाभिजग्मुर्यत्रैते व्यूहमूर्तयः ।
अक्षतैश्चन्दनैः पुष्पैर्जयशब्दैः पुनः पुनः ॥२७॥
वर्धिताः सत्कृतास्ते च बालकृष्णालयं ययुः ।
बालकृष्णस्तदा नैजं रूपं दधार धामगम् ॥२८॥
वासुदेवसमूहास्तु यन्मूर्तौ यान्ति लीनताम् ।
कोटिगोलोकवैकुण्ठाधिपाः प्रयान्ति लीनताम् ॥२९॥
तादृशं परधामस्थ दिव्यरूपं दधार सः ।
दिव्ये गजासनेऽनादिकृष्णनारायणो हरिः ॥३०॥
कोटिमुक्तगणैर्जुष्टः तत्स्थमूर्तिर्व्यराजत ।
तदा व्यूहान् विहायाऽन्यचक्षूंषि श्रीहरौ क्षणात् ॥३१॥
न प्रावर्तन्त वै पराभूतानि हरितेजसा ।
पराभूताक्षिकमलाः सुराद्या निर्ययुस्ततः ॥३२॥
स्वस्वस्थानं ययुः सर्वे ततो व्यूहान् हरिस्तथा ।
पितरौ स्वागतं प्रेम्णा चक्रतुर्भवनांगणे ॥३३॥
बालकृष्णस्य भवने विविशुस्ते सदीश्वराः ।
गजासनस्थितं स्वेष्टं ववन्दिरे च नेमिरे ॥३४॥
कृत्वा च दण्डवद् भूमौ पूजनं चक्रिरे मुदा ।
वासुदेवो ददौ दिव्यं मुकुटं मस्तके हरेः ॥३५॥
ललाटे चन्दनं तैलसारं संकर्षणो ददौ ।
तिलकं चन्द्रकं गन्धसारं प्रद्युम्न आर्पयत् ॥३६॥
नेत्रयोः कज्जलं रम्यं रञ्जनादि समार्पयत् ।
कर्णयोः कुण्डले गुच्छौ कर्णपूराऽवतंसकान् ॥३७॥
वासुदेवो ददौ कण्ठे सौवर्णमालिकाः शुभाः ।
हारान् हीरकमाणिक्यमुक्ताञ्चितान् सकौस्तुभान् ॥३८॥
ददौ संकर्षणो रम्यान् कटकान् शृंखलास्तथा ।
ऊर्मिकाङ्गुलीयकानि प्रकोष्ठशृंखलास्तथा ॥३९॥
रशनां च सुमञ्जीरे ददौ स्वर्णेऽनिरुद्धकः ।
पादुके दिव्यमृदुले चामरे चातपत्रकम् ॥४०॥
यष्टिं च कानकीं रत्नन्द्धां करे तु नक्तकम् ।
सौगन्धं पुष्पपत्रादिग्रन्थिं संकर्षणो ददौ ॥४१॥
प्रद्युम्नश्चार्पयामास सौवर्णस्थालिकां शुभाम् ।
मिष्टान्नामृतसम्पूर्णफलबीजादिसंभृताम् ॥४२॥
अनिरुद्धोऽमृतपानं ददौ ताम्बूलकं तथा ।
आरार्त्रिकं चकाराऽसौ वासुदेवः स्वयं प्रभुः ॥४३॥
प्रदक्षिणं नमस्कारं दण्डवत् चक्रुरीश्वराः ।
पुष्पाञ्जलीन् ददुः कृष्णं तुष्टुवुः परमेश्वराः ॥४४॥
त्वमनादिकृष्णनारायणः श्रीपुरुषोत्तमः ।
राजमानः परे धाम्नि द्विभुजोऽक्षरसेवितः ॥४५॥
तन्मुक्तैस्तव मुक्तैश्च सेवितः परमेश्वरः ।
परब्रह्म परमात्मा परस्त्वं भगवान्प्रभुः ॥४६॥
त्वत्तो मुक्ताः प्रकाशन्ते लीयन्ते विग्रहे तव ।
तवान्तिके च तिष्ठन्ति तवानन्दातिनन्दिताः ॥४७॥
असंख्या ब्रह्मभावाश्च ब्रह्मप्रिया भवत्समाः ।
ऐश्वर्यशक्तयस्ते च तव विग्रहजा हि ताः ॥४८॥
तव सेवां प्रकुर्वन्ति मुक्तान्यो ब्रह्मविग्रहाः ।
त्वत्तो जाता वयं व्यूहा अवतारास्तथेश्वराः ॥४९॥
ईश्वराण्यस्तथा माया पूरुषाः कालवत्सराः ।
वैराजा वैष्णवाश्चापि ब्राह्मणाः शांभवास्तथा ॥५०॥
विग्रहास्तव मूर्तेर्वै समुत्पन्ना महर्षयः ।
पितरो मुनयः सिद्धाः साधवः शीलयोगिनः ॥५१॥
सत्यः साध्व्यः सांख्ययोगव्रतिन्यः कान्तयोषितः ।
पतिव्रता तथा पत्नीव्रतो लक्ष्मीर्नरायणः ॥५२॥
पितरो दिव्यवासाश्च नरो नारायणस्तथा ।
पातालस्थाभूग्रहाश्च क्षीरे शेषो नरायणः ॥५३॥
श्रीर्लीला भूः सती पद्मा गंगा प्रभा सरस्वती ।
माणिक्या सगुणा प्रेमा पारवती च मञ्जुला ॥५४॥
विभूतिः राधिका सीताऽमृता सन्तोषिका रमा ।
हंसा च दुःखहालक्ष्मीर्दया जया च तुलसी ॥५५॥
हैमी शान्ता च सावित्री वृन्दास्त्वेतास्तु शक्तयः ।
चम्पा ललिता कस्तूरी ओजस्वत्यादिकास्तथा ॥५६॥
कपिलो दत्त ईशानो नृसिंहो वामनो हरिः ।
हंसो मत्स्यस्तथा कूर्मो वराहो जिष्णुरित्यपि ॥५७॥
हरिः पृथुश्च गोपालो हंसः ऋषभ ईशिता ।
रामः परशुरामश्च बलश्च भगवान् शुकः ॥५८॥

वल्लभश्चापि हेमन्तो देवप्रकाश इत्यमी ।
यज्ञः कुमारयोगाश्च तवैवांशविभूतयः ॥५९॥
तत्त्वानि तत्त्वचैतन्यं गुणशक्तिरसादयः ।
तवांशा भगवन् सर्वे येषु त्वमोत एव च ॥६०॥
त्वयि प्रोतं तथा सर्वं त्वमेव प्रतिरुत्तमः ।
तव दर्शनलाभार्थं बालं वीक्षितुमुत्सुकाः ॥६१॥
दर्शनं प्राप्तवन्तश्च कृतकृत्या वयं प्रभो ।
इत्युक्त्वा प्रणताः पुष्पाञ्जलिं दत्वा सुखस्थिताः ॥६२॥
बालकृष्णस्तु तं राधे तदाऽऽहाऽर्थयितुं वरम् ।
वासुदेवस्तदा प्राह वासं ते चरणे सदा ॥६३॥
देहि नाथ कृपासिन्धो व्यूहेच्छां सम्प्रपूरय ।
तथास्त्विति प्रभुः प्राह चकारैषां तनुद्वयम् ॥६४॥
कुंकुमवाप्यां वासार्हं व्यूहतीर्थेऽवसद्धि तत् ।
द्वितीयं मूलरूपं च व्यूहचतुष्टयं तु यत् ॥६५॥
श्रीहरे राज्ञया तत्तु ययौ द्वीपं सितं ततः ।
तस्माद् ययौ सत्यलोकं ततोऽव्याकृतधाम च ॥६६॥
एवं ते वासुदेवाद्या व्यूहसंज्ञा महेश्वराः ।
जीवेशसृष्टिशास्तारो राधिके श्रीहरेः पुरः ॥६७॥
सर्वदा वासमाचक्रुश्चाश्वपट्टसरोवरे ।
तीर्थतोयतटे तेषां मन्दिरं परमं शुभम् ॥६८॥
वासुदेवालयाख्यं च निर्मितं विश्वकर्मणा ।
श्रीहरेराज्ञया तत्र राजन्ते भ्रातरश्च ते ॥६९॥
अनादिश्रीकृष्णनारायणस्य पट्टशिष्यके ।
स्वयंप्रकाशे लीनाश्च वर्तन्ते व्यूहसंज्ञकः ॥७०॥
भगवन्तश्च चत्वारश्चैतन्यमूर्तिरूपिणः ।
व्यूहस्यैवाऽवतारः स स्वयंप्रकाश ईशपः ॥७१॥
वासुदेवः स्वयं चास्ते चतुर्गुणसमन्वितः ।
दिव्यं चतुर्भुजं चैनं स्वयंप्रकाशं मानवाः ॥७२॥
येऽर्चयिष्यन्ति ते पुण्यं लप्स्यन्ते व्यूहजं फलम् ।
शृणु त्वं राधिके वासुदेवं स्वयं प्रकाशकम् ॥७३॥
पूजनार्थं सदा प्रातः प्रयान्त्येव च तत्प्रियाः ।
वासुदेवस्य वै पत्नी लक्ष्मीर्मा हरिणी तु या ॥७४॥
संकर्षणस्य या पत्नी सुनन्दा सा महासती ।
प्रद्युम्नस्य प्रिया धीश्च सर्वपोषणकारिणी ॥७५॥
अनिरुद्धस्य सुशीला चतस्रस्ताः स्त्रियः खलु ।
चतुःश्रियो विमानेन नित्यं यान्ति च राधिके ॥७६॥
पश्याऽयं समयश्चास्ते ब्राह्मस्तासां प्रवासयुक् ।
तावत्तासां विमानं च निर्यातं राधिकापुरः ॥७७॥
राधिका ताः प्रवीक्ष्यैव विमानादवरोहयन् ।
राधिका तु समुत्थाय नत्वा चाश्लिष्य भावतः ॥७८॥
प्रसन्ना स्वागतं चक्रे मधुपर्कं तथासनम् ।
ददौ पूजां प्रचकाराऽऽतिथ्यं पूर्णं चकार च ॥७९॥
कुशलं परिपप्रच्छ ता अपि राधिकां तथा ।
राधाऽऽह क्व प्रयाणं वः प्रातः सञ्जायते प्रियाः ॥८०॥
ताः प्राहुर्नः पतिः श्रीशः स्वयंप्रकाशनामतः ।
व्यूहावतारो भगवान् वर्ततेऽश्वसरोवरे ॥८१॥
अनादिश्रीकृष्णनारायणशिष्यो महाप्रभुः ।
अस्मत्पतीनामंशाश्च चत्वारस्तत्र सन्ति हि ॥८२॥
वर्तते मानवे भावे बालब्रह्मव्रतान्वितः ।
कुमारस्तस्य पूजार्थं गच्छामो नित्यमेव वै ॥८३॥
त्वया स्मृतास्ततोरावे त्वागतास्त्वत्र हर्षिताः ।
इत्युक्त्वा राधिकां तास्तु पूजयामासुरुत्सुकाः ॥८४॥
सर्वशृंगारद्रव्याणि राधिकायै ददुर्हि ताः ।
आज्ञामादाय च तूर्णं ययुश्चाश्वसरोवरम् ॥८५॥
हरिणी च सुनन्दा च धीः सुशीला च ता इमाः ।
पत्यंशं सम्प्रपूज्यैव कुसुमाक्षतचन्दनैः ॥८६॥
पत्यंगुष्ठजलं पीत्वा भोजयित्वा च तं ततः ।
आरार्त्रिकादिकं कृत्वा प्रसादमाप्य तस्य च ॥८७॥
पादसंवाहनं कृत्वा ततः श्रीकंभराश्रियम् ।
नत्वा सम्मिल्य च पूजां दत्वा प्राप्य शुभां गिरम् ॥८८॥
अनादिश्रीकृष्णनारायणं प्रति ययुस्ततः ।
पूजयित्वा परेशेशं नत्वा स्तुत्वा पुनः पुनः ॥८९॥
आरार्त्रिकं हरेः कृत्वा तस्थुर्दध्युः क्षणं हरिम् ।
प्रभुः प्राह प्रसन्नोऽस्मि वरं वृणुत चेप्सितम् ॥९०॥
तदा ताः प्राहुरस्माकं वासस्त्वत्र यथा भवेत् ।
पातिव्रत्यं प्ररक्ष्येत तथोभयत्र सेवने ॥९१॥
वाञ्छापूर्तिं सदा कृष्णनारायण विधापय ।
तथास्त्विति हरिः प्राह रूपद्वयं विधाय च ॥९२॥
तीर्थरूपाणि चत्वारि व्यूहतीर्थे न्यवासयत् ।
मन्दिरे प्रतिमास्वासां वासं चाकारयत् प्रभुः ॥९३॥
यथा दिव्यस्वरूपैर्हि स्वयंप्रकाशसेवनम् ।
भवेत्तथा कृतं ताभिः कृते नारायणेन वै ॥९४॥
अन्यानि मूलरूपाणि चाज्ञामादाय वै ततः ।
ययुस्त्वव्याकृतं धाम वासुदेवादिसंश्रितम् ॥९५॥
इत्येवं राधिके दृष्टं भवत्या चाक्षिगोचरम् ।
अनादिश्रीकृष्णनारायणायस्यैश्वर्यमद्भुतम् ॥९६॥

किमहं तस्य वक्ष्यामि प्रतापं परमेशितुः ।
यद्गुणानां कीर्तनेन भुक्तिर्मुक्तिर्ध्रुवा सदा ॥९७॥
यत्रैश्वर्याणि सततं वर्तन्ते दिव्यविग्रहैः ।
यत्रेश्वरेश्वराश्चापि वर्तन्ते दिव्यविग्रहैः ॥९८॥
यत्रावतारहरयो वर्तन्ते दिव्यविग्रहैः ।
यत्र सृष्टीश्वराः सर्वे मुराश्च दिव्यविग्रहैः ॥९९॥
यत्र ब्रह्मप्रिया मुक्ता वर्तन्ते दिव्यविग्रहैः ।
अनादिश्रीकृष्णनारायणप्रसन्नतात्तये ॥१००॥
तस्य क्षेत्रस्य महिमा वर्णयितुं न शक्यते ।
ज्येष्ठस्य पूर्णिमायां तद् व्यूहतीर्थं सरस्यभूत् ॥१०१॥
आषाढद्वितीयायां च श्रीचतुष्टयतीर्थकम् ।
स्वयंप्रकाशतीर्थं च पावनं तदभूत् तदा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने व्यूहचतुष्टयश्रीचतुष्टययोः कुंकुमवापीतीर्थागमनं स्वयंप्रकाशतीर्थं व्यूहचतुष्टयतीर्थं चेत्यादि-निरूपणनामा चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

श्रीकृष्ण उवाच—

शृणु चान्यं चमत्कारं श्रीहरेः परमात्मनः ।
राधे चैकादशभक्तयोगाद् देशः सुरक्षितः ॥ १ ॥
दक्षिणे वर्तमाने वै खण्डे उष्णालयाभिधे ।
अस्त्रालये रणे तत्र सामुद्रघोरवायुभिः ॥ २ ॥
जाते तूपद्रवे देशो वालुकाभिस्तु मध्यगः ।
परितोऽब्धिजलैश्चापि धर्षितो विप्लवीकृतः ॥ ३ ॥
आच्छादितोऽभवद् भाद्रपदे वृष्ट्या विनाशितः ।
अनादिश्रीकृष्णनारायणेन स्वामिनाः ततः ॥ ४ ॥
रक्षितः स्वस्य भक्तार्थे शृणु पुण्यतमां कथाम् ।
ऊष्णालये महाखण्डे पूर्वेगऽस्त्यो महामुनिः ॥ ५ ॥
आकाशेन ययौ पूर्वं पावयितुं तु तद्भवम् ।
अगस्त्यो बहुदेशांश्च समुद्रं प्रविहाय च ॥ ६ ॥
ययौ तस्मिन् महाखण्डे हेमशालाख्यपर्वते ।
ततो बालाचलं रावासनाद्रिं त्वम्बराद् ययौ ॥ ७ ॥
दारालिंगगिरिं मषीग्रीवाद्रिं भेकदानकम् ।
अद्रिं तथा शालवीनगिरिं ग्रामाचलं ततः ॥ ८ ॥
आचालपर्वतं चापि दिवादिक्पर्वतं तथा ।
चाटाद्रिं च ततो गत्वा त्वाययौ हेमशालके ॥ ९ ॥
तस्य द्रोणीं वृक्षवल्लीतृणैः पल्लवितां शुभाम् ।
सुवृष्ट्या फलपुष्पाढ्यां वीक्ष्य वत्सरमावसत् ॥१०॥
अनादिश्रीकृष्णनारायणं स्मरत्यहर्निशम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥११॥
जपत्येव सदा मन्त्रं हेमशालाचले वसन् ।
लोपामुद्रापि तं मन्त्रं जपत्येव पतिव्रता ॥१२॥
तया सह मुनिर्नित्यं तीर्थीकर्तुं तदाऽऽपगाः ।
नित्यं विहायसा याति स्नातुं भिन्नसरित्तटम् ॥१३॥
मुरानद्यां तुरुनद्यामैतनद्यां तथा मुहुः ।
सस्नौ गोशंकुनद्यां च बालानद्यामपि क्वचित् ॥१४॥
सस्नौ मर्चाशनानद्यां माकमानसरस्यपि ।
बालासरोवरे माङ्गिसरसि श्वानिकाजले ॥१५॥
कुवने सरसि सस्नौ लाभरुचिसरस्यपि ।
झिन्कुनद्यां रिन्कुनद्यां फिन्कुनद्यां तथा पुनः ॥१६॥
सस्नावुत्तुंगसरसि आरसरोवरे तथा ।
तुरूसरोवरे सस्नौ ग्रागिराख्ये सरस्यपि ॥१७॥
मौरीनद्यां तुरानद्यां भुरानद्यां तथा मुनिः ।
सस्नौ कविन्दुमानद्यां गौरानरसरोवरे ॥१८॥
कारुलिङ्ग्यां दारुलिङ्ग्यां चारुलिंगीसरित्यपि ।
क्वील्पीनद्यां लविंगायां पावनायां तथा ततः ॥१९॥
मीचलायां फिलञ्चायां सस्नावगस्त्यको मुनिः ।
वेलीनद्यां हेलीनद्यां वितूरीयासरित्यपि ॥२०॥
फीजरायां चापगायां सस्नो निर्झरणेष्वपि ।
लोपामुद्रा सती पूजां चक्रे तद्देवतार्चनम् ॥२१॥
सरांसि सरितश्चापि चक्रुरगस्त्यमाननम् ।
अथैतेषु प्रदेशेषु सरित्तटेषु कुत्रचित् ॥२२॥
कुत्रचित्पार्वते देशे कुत्रचित् सरसस्तटे ।
विप्रास्तु तापसा रौद्रा वैष्णवाः सूर्यदेवताः ॥२३॥
वसन्तस्ते विलोक्यैनमगस्त्यं ख्यातपौरुषम् ।
प्रसन्नहृदयाः सर्वे स्वागतादि व्यधुर्मुदा ॥२४॥
हेमशालायनो बालायनो रावासनायनः ।
दारालिङ्गायनश्चापि भेकदानेयतापसः ॥२५॥
मसिग्रीवमहर्षिश्च तथा शालवनायनः ।
आचालर्षिस्तथा ग्रामायनो वाटायनस्तथा ॥२६॥
दिवादिङ्गायनाद्याश्च तापसा ब्रह्मवेदिनः ।
सहस्रशोऽन्यविप्राश्च ब्रह्मगृहवनस्थिताः ॥२७॥
यतयश्च महात्यागपरा विज्ञाश्च योषितः ।
सत्यः साध्व्यो निवसन्ति चात्मध्यानपरायणाः ॥२८॥
अगस्त्यस्तु ददौ तेभ्यो विज्ञानं पारमेश्वरम् ।
परब्रह्माऽऽक्षरातीतः परधामविराजितः ॥२९॥

अनन्तमुक्तसेव्यः श्रीपुरुषोत्तमसंज्ञकः ।
परमात्माऽन्तरात्मा च कृष्णात् कृष्णतरश्च यः ॥३०॥
वासुदेवान्महावासुदेवः श्रीपरमेश्वरः ।
दिव्यैश्वर्यविभूत्यादिसंभृतो भगवान् प्रभुः ॥३१॥
कालमायानियन्ता च व्यूहावतारशासकः ।
ईश्वराणामीश्वरेशः सुराणां सुरशक्तिदः ॥३२॥
ऋषीणां चापि पितॄणां रक्षकस्तद्धृदि स्थितः ।
देवमानुषनागानामन्तर्यामी परात्परः ॥३३॥
सर्वब्रह्मप्रियाकान्तः सर्वधामप्रभाप्रदः ।
सर्वावतारधर्ता च सर्वसाक्षी निरञ्जनः ॥३४॥
स्वप्रकाशोऽसीमशोभाऽसीमकन्दर्पसुन्दरः ।
दिव्यमूर्तिर्वेदवेद्यो योगिवेद्योऽन्तरात्मनि ॥३५॥
हृच्चक्षुर्भिस्तथा वेद्यश्चाऽवेद्यो बाह्यवृत्तिभिः ।
अगम्यो मायया छन्नैर्गम्यो भक्तिसमन्वितैः ॥३६॥
अतिदूरोऽप्यतिसामीप्यस्थः सखा सुखप्रदः ।
सर्वप्रदः सदाऽऽनन्दः सर्वानन्दप्रदो हरिः ॥३७॥
अनादिश्रीकृष्णनारायणो राधारमापतिः ।
प्रभापारवतीहंसामंजुलासगुणापतिः ॥३८॥
लक्ष्मीश्रीमाणिकीनाथः सत्पतिर्भक्तभावितः ।
ऋषीशः करुणापूर्णो ह्यबालो बालरूपधृक् ॥३९॥
वर्तते यश्चाजनाभे खण्डे देशे सुराष्ट्रके ।
अश्वपट्टसरस्तीरेऽक्षरक्षेत्रे विमुक्तिदे ॥४०॥
दिव्ये कुंकुमवाप्याख्ये नगरे च निजालये ।
कम्भराश्रीनन्दनः स श्रीमद्गोपालबालकः ॥४१॥
परब्रह्म स्वयं यः स बालब्रह्माऽद्य वर्तते ।
अन्तरात्मा च यः सोऽद्य बालात्मा बहिरस्ति वै ॥४२॥
योगिनां योगफलदो ज्ञानिनां वित्तिगोचरः ।
मुक्तानां मानसे तिष्ठन् सतीनां सत्यधारकः ॥४३॥
यज्ञानां वह्निरूपे च भोजको हवनाशनः ।
तपस्विनां तपोवृत्तेः श्रद्धारूपोऽस्ति यः प्रभुः ॥४४॥
सात्त्विकानां धर्मसत्त्वं नीतीनां न्यायविस्तरः ।
सत्क्रियाणां चातिथेयो भक्ता राधनगोचरः ॥४५॥
निराकारोऽसंख्यमूर्तिर्यः स बालो विराजते ।
कृपया करुणासिन्धुर्मोक्षदः पापिनामपि ॥४६॥
यत्प्रसंगेन तत्त्वानि जडान्यपि कृतान्यपि ।
अकृतानि चेतनानि दिव्यानि संभवन्ति च ॥४७॥
अमुक्ता मुक्तिमायान्ति पापा भवन्ति पावनाः ।
असिद्धाः सिद्धिमासाद्य यद्ध्यानाद् यान्ति मोक्षणम् ॥४८॥
अगुणा गुणवन्तश्च भवन्त्यस्य प्रतापतः ।
मायिका मायया शून्या जायन्तेऽस्य स्मृतेरपि ॥४९॥
कल्मषा नाशमायान्ति यन्मूर्तेर्दर्शनादपि ।
नाऽस्य वै दर्शने प्राप्ते कर्तव्यं चावशिष्यते ॥५०॥
प्राप्तव्यं शिष्यते नापि स वै बालोऽद्य वर्तते ।
विप्रा गृह्णन्तु तन्मन्त्रं मुक्तिदं सर्वसिद्धिदम् ॥५१॥
इत्युक्ता राधिके ! विप्रा जगृहुर्मन्त्रमुत्तमम् ।
'ॐ नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥५२॥
प्रजेपुः सततं तं च दध्युर्वै दिव्यरूपिणम् ।
तेषां वै हृदये कृष्णनारायणः समस्फुरत् ॥५३॥
किशोरो दिव्यरूपश्च कोटिमन्मथसुन्दरः ।
भेजुस्ते च ततो नित्यमगस्त्योदितपूजनैः ॥५४॥
अष्टधा श्रीहरेर्भक्तिं चक्रुर्मोक्षाभिवाञ्छया ।
एवं सहस्रलक्षाश्च भजन्ते ब्राह्मणा हरिम् ॥५५॥
अगस्त्यस्य तु योगेन अस्त्रालयक्षितौ तदा ।
उष्णालये महाखण्डेऽभवन् भक्तिपरायणाः ॥५६॥
वर्षान्तेऽगस्त्यमुनिराट् कृत्वा तीर्थानि सर्वशः ।
वैहायसा ययौ लोपामुद्रायुतोऽश्वसारसम् ॥५७॥
क्षेत्रं श्रीकुंकुमवापीसंज्ञं तत्र स्थिरोऽभवत् ।
अथ भाद्रपदे तत्र व्योम्नि रात्रौ ग्रहो महान् ॥५८॥
सहस्रयोजनदीर्घतेजःकल्गिलसच्छिराः ।
उदयं चैति नित्यं वै देशोपप्लवसूचकः ॥५९॥
धूमकेतुर्महात्रासप्रदो लोकविनाशकः ।
यं दृष्ट्वा तु प्रजाः सर्वा नाशभीतिसमाकुलाः ॥६०॥
अभवँश्चाऽप्यभजँश्च बालकृष्ण पुमुत्तमम् ।
अकुर्वँस्तस्य भक्तिं च विविधाराधनात्मिकाम् ॥६१॥
अथ भाद्रस्य विगमे पूर्णायां प्रातरेव तु ।
समुद्रस्य जलानां वै विप्लवः परितो ह्यभूत् ॥६२॥
वेला भयप्रदा सर्वदेशप्रलयकारिकाः ।
चुक्षुभुश्चातिचण्डैर्वै वातैः सह च वृष्टिभिः ॥६३॥
उष्णालयस्य खण्डस्य परितोऽब्धिजलैर्भुवः ।
योजनायतभागा वै संप्लुता प्रलयो यथा ॥६४॥
ग्रामाः खेटाः खर्वटाश्चावसथा घोषविस्तराः ।
समुद्रमवधिं कृत्वा यावद्योजनमेव ते ॥६५॥
अब्धिवेलौघवेगैश्च नष्टा जललये तदा ।
वृक्षा लता वनोद्देशा उद्यानानि च वाटिकाः ॥६६॥
नौकास्थेयानि बन्धानि सेतवः क्षेत्रभूमिकाः ।
वर्त्मानि यानरक्षार्थं गृहाणि भूशिरांसि च ॥६७॥

वेलौघवेगैर्नष्टानि व्यापारस्य स्थलानि च ।
विमानावस्थलीबन्धा नष्टाः सर्वे जलौघकैः ॥६८॥
नदीमुखास्तथा सर्वे प्रजावसतयोऽपि च ।
पशवः पक्षिणश्चान्ये खनयोऽपि लयं गताः ॥६९॥
एवं जललये जाते हाहाकारो महानभूत् ।
अथ नद्योऽपि संक्षुब्धाः क्षुब्धानि च सरांस्यपि ॥७०॥
नदीसरोवराऽऽपश्च ययुः क्षेत्रेषु चाभितः ।
उद्वेलाभिः प्रदेशास्ते सप्रजाः प्रलयं गताः ॥७१॥
स्थले जलं जले स्थलं विपरीतमपद्यत ।
अतिवर्षातिवातैश्च देहिनो विलयं गताः ॥७२॥
पार्वता वनवासाश्च दृश्यन्ते नैव देहिनः ।
जलानां तु प्रवाहेषु शवा मानवपक्षिणाम् ॥७३॥
पशूनां च सरीसृपमृगादीनामनेकशः ।
कल्लोलैरुह्यमानाश्च विलोक्यन्ते सहस्रशः ॥७४॥
वृक्षाश्च वृक्षशाखाश्च दृश्यन्ते पूरवारिषु ।
गृहाणि पर्णशालाश्च तरन्ति लयवारिषु ॥७५॥
नद्यः सरोवराण्यन्या दीर्घिकाश्चापि कूपकाः ।
सामुद्राऽखातसदृशा दृश्यन्ते जलपूरिताः ॥७६॥
एवं जाते विनाशस्य कारणे जलविप्लवे ।
झंझावातैर्वालुकाश्चाडीयन्त रणगास्तदा ॥७७॥
यथा मेघास्तथा ताश्च दृश्यन्ते चाम्बरे तदा ।
वालुकाभिः पूरितानि नेत्राणि चान्धतां ययुः ॥७८॥
वालुकाहतनेत्रास्ते देहिनस्तु परस्परम् ।
नैव पश्यन्ति वै तत्र रजोऽन्धा वातताडिताः ॥७९॥
आकाशे वायुवेगेन क्षिप्यन्ते शाखिनस्तथा ।
गृहाणि वल्लयश्चापि मण्डपाच्छादनान्यपि ॥८०॥
उल्लोचाश्च वितानानि वस्त्राणि पक्षिणस्तथा ।
क्षिप्यन्ते बहुवेगेन वातेन च जले स्थले ॥८१॥
गृहाणि चातिभग्नानि वृक्षा भग्नास्तथोटजाः ।
आश्रया आश्रमाः सौधाः प्रासादा नेशुरूटजाः ॥८२॥
वालुकावर्षणैर्ग्रामाश्छन्ना वै वालुकातले ।
एवं रणात् समुड्डीय वालुकावर्षणं ह्यभूत् ॥८३॥
वृक्षाश्च वाटिका उद्यानानि प्रजाश्च पक्षिणः ।
पशवस्तापसाश्चापि वालुकाछन्नविग्रहाः ॥८४॥
वालुकान्तर्गर्भगास्ते भूगर्भे निहिताः क्षणात् ।
अभवँस्ते विना श्वासैर्मृताः कोटिसहस्रशः ॥८५॥
ऋषयो मुनयश्चापि पर्वतस्थाः क्षितिस्थिताः ।
वीक्ष्योपप्लवमत्युग्रं समाधौ कृतसंयमाः ॥८६॥
आकृष्य नाडिकाप्रणान् निषेद्धुः कुंभकादिषु ।
सस्मरुर्भगवन्तं श्रीकृष्णनारायणं हृदि ॥८७॥
अभक्ता रुरुदुश्चापि नेशुश्चुक्रुशुरुद्बलम् ।
हाहाचक्रुर्बालकाश्च हा मातस्तात चुक्रुशुः ॥८८॥
विलपन्तो नराः पत्नीराह्वयांचक्रुरुद्बलम् ।
पत्न्योऽपत्यानि पितरं चाह्वयांचक्रुरत्यति ॥८९॥
पशूनां पक्षिणां चापि उग्राणां करिणां तथा ।
सिंहानां चानलानां चाक्रोशाश्च गर्जनान्यपि ॥९०॥
दुःखभृतान्यत्यभन् झंझावाते तदा मुहुः ।
न श्रूयन्ते न रक्ष्यन्ते स्वरक्षा यत्र दुष्करा ॥९१॥
तत्राऽन्यरक्षणं केन कुत्र वा हरिमन्तरा ।
कालानने ग्रासभावं गतानां रक्षकोऽत्र कः ॥९२॥
पर्वता रणदेशाश्च नद्यश्चापि सरांसि च ।
वनानि चोच्चभागाश्चारण्यानि क्षेत्रभूमयः ॥९३॥
सर्वं पृथ्वीतलं झंझावातैश्चापीडितं तदा ।
जातं भाद्रस्य पूर्णायां रात्रौ तु प्रतिपद्दिने ॥९४॥
आसायं तन्महोत्पातैर्विना मृतिं मृताः प्रजाः ।
हेमशालायनाद्यास्तु तदा महर्षयोऽमलाः ॥९५॥
वीक्ष्याऽशान्तं वातवेगं जलाऽनिलकृतं लयम् ।
समाधावेव शान्त्यर्थं सस्मरुर्बालकृष्णकम् ॥९६॥
करुणासागरं भक्तरक्षाकरं कृपानिधिम् ।
अविगणय्य पापानि शरणागतरक्षकम् ॥९७॥
गजरक्षाकरं कृष्णं गर्भे रक्षन्तमीश्वरम् ।
प्रलये रक्षकं नाथं मायातो रक्षकं प्रभुम् ॥९८॥
प्राणानां रक्षकं कान्तं सर्वरक्षाकरं हरिम् ।
बालानां रक्षकं देवं सृष्टिरक्षाकरं पतिम् ॥९९॥
योगे रक्षाकरं स्वामिनारायणं परेश्वरम् ।
अनादिश्रीकृष्णनारायणं देहिप्रजीवनम् ॥१००॥
सस्मरुर्हृदये त्वेकादशर्षयो लये स्थिते ।
तुष्टुवुर्मनसा सर्वे देशरक्षणहेतवे ॥१०१॥
झंझावातस्य शान्त्यर्थं वृष्टेः शान्त्यर्थमित्यपि ।
वालुकावृष्टिशान्त्यर्थं भूतानां रक्षणाय च ॥१०२॥
राधिके ते तुष्टुवुर्वै परमेशं परात्परम् ।
कृपालुं बालकृष्णं सम्प्राप्ते नाशे महर्षयः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उष्णालयखण्डेऽगस्त्यप्रवासस्तत्र्यर्षिगणेन झंझावाताऽब्धिजलक्षोभे लये जाते श्रीकृष्णनारायणः स्मृत इत्यादिनिरूपणनामा पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके बालः कृष्णनारायणः प्रभुः ।
यथा स्तुतः समागत्य ररक्ष जीवनं ददौ ॥ १ ॥
देशे सर्वत्र ये जीवा अगस्त्यं च समाश्रिताः ।
गुरुं ब्रह्मस्वरूपं तं सस्मरुर्मरणोन्मुखाः ॥ २ ॥
नारायणं परमेशं परब्रह्म च तुष्टुवुः ।
भगवन् यदि नाशार्थे वयमत्र कृतास्त्वया ॥ ३ ॥
साक्षात् स्वयं समागत्य कथं नाशं करोषि न ।
तव हस्तेन नाशो नो मोक्षार्थं स्याच्छुभार्थकः ॥ ४ ॥
येन त्वयाऽर्पितं जन्म त्वयाऽगस्त्योऽर्पितो गुरुः ।
त्वं कृपानाथ जिह्वायां मानसे वर्तसे तथा ॥ ५ ॥
एवं तव जना जीवा वयं त्वया निजीकृताः ।
तेषां नो मरणं प्राणास्तव हस्ते भवन्ति वै ॥ ६ ॥
जीवनं प्राणनं सञ्चालनं सर्वं वशे तव ।
तत् कथं वातवृष्ट्याऽत्र वालुकावृष्टिभिस्तथा ॥ ७ ॥
जलोपप्लवप्रलयैरसद्गतिप्रदा मृतिः ।
यत्राऽन्ते दर्शनं तेन नाऽप्यगस्त्यस्य योगिनः ॥ ८ ॥
आकस्मिकेऽत्र मरणे प्रेतखण्डोऽयमुल्बणः ।
भविष्यत्यन्तकभूमिः किमेवं तव रोचते ॥ ९ ॥
शरणागतपाता त्वं शरण्यो दुःखहारकः ।
मृत्योर्दुःखविनाशार्थं कथं नागच्छसि प्रभो ॥१०॥
अजातप्रज्ञा बालाश्च बालिका दौह्रदस्त्रियः ।
वृद्धाश्रयस्थिता गर्भे म्रियन्ते वालुकाहताः ॥११॥
जलेषु चापि म्रियन्ते विना ते दर्शनं प्रभो ।
हरिर्नाम न ते चास्ति किं वा नारायणो भवान् ॥१२॥
अत्र किं वा त्वया कृष्ण कृष्णत्वं कल्मषीकृतम् ।
अहो प्राणनिरोधेन निरुद्धस्त्वं जनार्दन ॥१३॥
जनार्दनः किमत्रैव ख्यायसे वातकर्मभिः ।
कृपालुस्त्वं कृपां कृष्ण कथं लुनासि चापदि ॥१४॥
अहिंस्रस्त्वं कथं हिंसां सहसे निर्गुणोऽसि किम् ।
अपत्यानां जायमानं दुःखं पश्यति चेत् पिता ॥१५॥
यतते दुःखनाशार्थं स्वयं मृत्वाऽपि मानवः ।
स त्वं चाऽमानवस्त्वास्से पितृत्वं त्वयि नास्ति किम् ॥१६॥
कथं नोद्धरसे कष्टात् कष्टहा नाऽसि किं प्रभो ।
कथं चाकस्मिकं त्वैतद् भक्तानां मरणं हरे ॥१७॥
सहसे किमभक्ताः स्मोऽपराद्धं किं तव प्रभो ।
किं भक्तेस्ते फलं चैतद् विना मृत्युं विनाशनम् ॥१८॥
कथं त्वद्भक्तिकर्तॄणां पापमेतादृशं स्थितम् ।
आकस्मिकविनाशो यत्फलं प्रेतस्थली हि भूः ॥१९॥
उद्वेलस्त्वेकतस्त्वब्धिश्चैकतो मेघवर्षणम् ।
एकतो वालुकावृष्टिझंझावातस्तथैकतः ॥२०॥
परितोऽब्धिजलैर्नाशश्चोर्ध्वतो वृष्टिभिर्हतिः ।
पार्श्वतो वालुकामिश्र सर्वतो वातघातनैः ॥२१॥
हवनं पीडनं प्राणरोधनं मर्दनं तथा ।
हींसनं कच्चरीभावस्ताडनं रोधनादिकम् ॥२२॥
सर्वं यदत्र सम्पन्नं यमलोको न चापरः ।
एवं कथं प्रभो तेऽत्र भक्तानां चापदो भुवि ॥२३॥
अकाण्डताण्डवे प्राणान् जुहोषि वद नः प्रभो ।
रक्ष रक्ष कृपासिन्धो जलसिन्धुं निवारय ॥२४॥
त्राहि त्राहि रणापद्भयस्त्राहि वृष्टिजलादितः ।
रक्षाऽगस्त्यगुरो चाऽस्मान् रक्ष मृतान् तवाश्रितान् ॥२५॥
रक्ष रक्ष गुरो कृष्ण रक्ष नारायण प्रभो ।
इत्येवं प्रार्थयामासुः प्रजास्त्राणं तथाऽऽर्थयन् ॥२६॥
त्वया रक्षा कृता कृष्णनारायण पुरा हरे ।
पृथ्व्या वाराहरूपेण पृथुरूपेण वै पुनः ॥२७॥
मत्स्यरूपेण लोकानां जले नौकां निधाय च ।
नरहरिस्वरूपेण प्रल्हादस्याऽवनं कृतम् ॥२८॥
प्रद्युम्नादिस्वरूपेण रक्ष्यन्ते भुवनानि वै ।
जिष्णुरूपेण देवानां रक्षां करोषि सर्वदा ॥२९॥
साधुरूपेण जीवेभ्यश्चाऽभयं प्रददास्यपि ।
सर्वरक्षाकरस्त्वं वै सर्वं सृष्टं त्वया हरे ॥३०॥
सर्वप्राणिनिवासस्त्वं रक्षां कुरु कृपानिधे ।
बीजे रक्षां पृथिव्यां चांकुरे रक्षां करोष्यपि ॥३१॥
पत्रे रक्षां शलाकायां ग्रन्थौ रक्षां करोषि च ।
नाले रक्षां तथा शिम्ब्यां पुष्पे कणे फलेऽपि च ॥३२॥
पुनर्बीजे तथा रक्षां करोषि जगतां प्रभो ।
जले स्थलेऽम्बरे वायौ वह्नौ रक्षाप्रदो भवान् ॥३३॥
नारकाणां तथोद्धारकरो विराजते भवान् ।
शावदीनामहाकाल्या बलिबालाः प्ररक्षिताः ॥३४॥
राक्षसीकरणः शापो निवारितस्त्वया पुरा ।
ऋषीणां रक्षकश्चास्ते भवान् श्रीभगवान् सदा ॥३५॥
देवायनो द्विजस्त्वयोद्धृतश्चाण्डालयोनितः ।
यमगृहं गतो विप्रपुत्रस्त्वया समाहृतः ॥३६॥
मांजाम्बिका त्वयाऽब्धौ च पुरा संरक्षिता प्रभो ।
बकदानर्षिरक्षा च त्वया कृष्ण कृताऽऽरवे ॥३७॥

उदयन्नृपतेः रक्षा जले मग्नस्य वै कृता ।
वसुमेधो जले मग्नः सकुटुम्बस्त्वयोद्धृतः ॥३८॥
सुधनाख्यस्य भक्तस्य चौरेभ्यो रक्षणं कृतम् ।
हिरण्यकेशशिष्याणां रक्षोनाशेऽवनं कृतम् ॥३९॥
महामारीमृता लोका जीविता भवता कृताः ।
तथैवैभ्यो महोत्पातेभ्यश्च रक्षय जीवय ॥४०॥
अक्षरेश च मुक्तेश धामेश विभवेश्वर ।
ईशेशेश्वर लोकेश मायेश परमेश्वर ॥४१॥
आत्मेश्वर महाकालेश्वर संकर्षणेश्वर ।
रुद्रेश सर्वविघ्नेश रक्ष नः शरणागतम् ॥४२॥
इमे वयं मृता वापि पतिताः स्म त्वदङ्घ्रिके ।
जीवनं मरणं वा यद् रोचते ते तथा कुरु ॥४३॥
मोक्षदं मरणं श्रेष्ठं नैसर्गिकं निमित्तजम् ।
यद्वा तद्वा भवेद्वापि येन केनाऽपि वा भवेत् ॥४४॥
राज्यासने पारमेष्ठ्ये निःकृष्टा नारकी मृतिः ।
निर्धने त्राणहीनेऽपि मोक्षदा गतिरुत्तमा ॥४५॥
तव वा तव भक्तानां सतां वा ब्रह्मयोषिताम् ।
दर्शनं प्राणयाने स्यात्तदेव मोक्षदं शुभम् ॥४६॥
प्राणयाने प्रसादस्ते जलस्यापि फलस्य वा ।
प्राप्यते येन तस्यैव भाग्यं मोक्षगतिप्रदम् ॥४७॥
पापानां चान्तकाले वै सतां वा तव दर्शनम् ।
स्मरणं वा कीर्तनं वा नैव स्याद्धि कदाचन ॥४८॥
वयं स्मो यदि ते भक्ता भवानास्ते गुरुश्च नः ।
उद्धारशक्तिमान् आस्ते तदा रक्षां विधेहि नः ॥४९॥
किं मृतानां मारणेन रक्षाशाविफलेन वा ।
यद्भवतु भवत्वेव विरमामोऽतिविस्तरात् ॥५०॥
इत्येवं राधिके कृत्वा स्तवनं बुद्धिसदृशम् ।
प्रजा मृत्योरवस्थायां सर्वथा शरणं गताः ॥५१॥
तदाऽनादिकृष्णनारायणः श्रीसहितः स्वयम् ।
तथाऽगस्त्यो महान् भक्तः सामर्थ्येनाऽजसदृशः ॥५२॥
लोपामुद्रासहितश्च शंकरः पार्वतीयुतः ।
अश्विनीबालकश्चापि सञ्जीवन्यादिसंयुतः ॥५३॥
विमानेन ययुस्तूर्णं हेमशालायनं प्रति ।
हेमशाले महाशैले यत्र द्रोण्यां स राजते ॥५४॥
वालुकाभिश्छन्नदेहो योगीन्द्रः स्मरति प्रभुम् ।
एवमेकादश भक्ता योगीन्द्रास्तं स्मरन्ति वै ॥५५॥
अन्तरीक्षे विमानं तत् कृत्वा स्थिरं हरिः स्वयम् ।
व्यलोकयत् प्रदेशं तं खण्डं पृथ्वीं प्रपीडिताम् ॥५६॥
जलैश्च वालुकाभिश्च नष्टभ्रष्टस्थलीं क्षितिम् ।
द्रागेव भगवान् कृपावशो वै चण्डमारुतम् ॥५७॥
पपौ त्वेकेन महता श्वासेन क्षणमात्रतः ।
झंझावातः क्षयं यातो रुद्रो मेघान् जहार ह ॥५८॥
मेघा नष्टा व्योम जातं निर्मलं निरुपद्रवम् ।
अगस्त्यो मुनिराट् चाब्धिं पपौ त्वञ्जलिना क्षणात् ॥५९॥
शुष्कं सर्वं जलं चापि उष्णालये समन्ततः ।
लोपामुद्रा प्रसस्मार सती श्रीपृथिवीं तदा ॥६०॥
कन्यारूपा क्षितिस्तत्र त्वाययौ विनयान्विता ।
नत्वा श्रीं बालकृष्णं चागस्तिं सतीं भवं शिवाम् ॥६१॥
आज्ञां च प्रार्थयत् तूर्णं लोपामुद्रा जगाद ताम् ।
झञ्झावातात् प्राग् यथासीद् भव पूर्वस्थली यथा ॥६२॥
यत्र ग्रामा नगराणि खेटा खर्वटकास्तथा ।
घोषा पत्तनवासाश्च प्रजा यत्र यथाऽभवन् ॥६३॥
तथा त्वं पृथिवीपीठं समीकुरु स्वभावतः ।
इत्याज्ञप्ता धरणिः सा शीघ्रं सचेतनाऽभवत् ॥६४॥
भूगर्भे छन्नखेटानां रक्षार्थं त्ववकाशदा ।
अभवत् सर्वथा देशे प्रजाऽऽस्ते यत्र यत्र वै ॥६५॥
अथ श्रीभगवान् देवान् मरुतश्चाह शासनम् ।
उद्वहन्तां द्रुतं सर्वा वालुका नवसञ्चिताः ॥६६॥
यत्र यत्र भवेत् प्राणी वालुकाया अधोगताः ।
तत्तस्थलानि सर्वाणि कुर्वन्त्वनावृतानि हि ॥६७॥
इत्युक्ता मरुतः सर्वे वात्यारूपैश्च वालुकाः ।
स्वल्पकालेन संजह्रुर्व्योम्ना सर्वभुवस्तदा ॥६८॥
तेजस्तत्त्वं च पुरुषं प्राह कृष्णनरायणः ।
शीघ्रं क्लिन्नस्थलीः सर्वा शोषयित्वा तदन्तरे ॥६९॥
छन्ना मृताश्च ये तांस्तान् बहिर्निष्कासयन्त्विति ।
अग्नयः सर्वदेवाश्च तत्कार्यं चक्रुरादरात् ॥७०॥
समुद्रे च नदे नद्यां सरोवरे च पर्वते ।
द्रोण्यां च गह्वरे गर्भे कर्दमे च वने भुवि ॥७१॥
गर्तेऽखाते दीर्घिकायामरण्ये पत्तने गृहे ।
शालायां च निकुञ्जे च वाप्यामुद्यानकेऽङ्गणे ॥७२॥
सौधान्ते सौधमध्ये वा प्रतोल्यां च मृदन्तरे ।
जलान्तरे शिलामध्ये यत्र यत्राऽतिदुर्गमे ॥७३॥
स्थले स्थल्यां जले द्रोण्यां यत्र यत्र च मानवाः ।
पशवः पक्षिणश्चान्ये देहिनो गणनार्हणाः ॥७४॥
नरा नार्यः कुमाराश्च बालाः कुमारिकास्तथा ।
वृद्धा वा जरठा वापि गोमहिष्यादिकास्तथा ॥७५॥

त्यक्तप्राणा विभाव्यन्ते तत्र तत्र च सर्वथा ।
श्रावणान् यमदूताँश्च नियोज्य क्षणमात्रतः ॥७६॥
जीवतो वा मृतान् वापि समाधिस्थाँश्च मूर्छितान् ।
मार्गयामासुरत्यर्थं सर्वान् सर्वस्थलावृतान् ॥७७॥
अथ शंभुर्निजदूतान् प्रेषयामास सर्वतः ।
कोटिसंख्यान् गणान् सञ्जीवन्या रसैर्युतान् द्रुतम् ॥७८॥
अश्विनीबालको मन्त्रान् श्रावयित्वा ददौ रसान् ।
सञ्जीवन्याश्च सन्धिन्याः सवीर्याया रसाँस्तथा ॥७९॥
प्राणाख्यश्च तदा रुद्रो ददौ प्राणान् मृतेष्वपि ।
अनादिश्रीकृष्णनारायणो ददौ हि चेतनान् ॥८०॥
घटिकाद्वयमध्ये स उष्णालयप्रदेशकः ।
सजीवः सुखभाक् सर्वो यथापूर्वं व्यजायत ॥८१॥
अथ चक्रे समृद्धिं श्रीर्यथापूर्वां क्षणान्तरे ।
लोपामुद्रा सती चापि पार्वती श्रीः सखीजनः ॥८२॥
कुटुम्बिनो वियुक्ताँश्च यत्र यत्राऽभवँश्च तान् ।
आहूयाऽऽहूय च ग्रामे वासेषु चानयँस्तदा ॥८३॥
कोट्यैश्वर्याणि सिद्धीनां गणाः सामर्थ्यकान्यपि ।
लोपामुद्राद्यधीनास्ते ता दासा दासिकास्तदा ॥८४॥
सतीनामाज्ञया चोष्णालये देशे समन्ततः ।
मनोवेगेन गत्वैव नीत्वा त्वैश्वर्यशक्तिभिः ॥८५॥
कुटुम्बानि यथापूर्वमासन् यत्र स्थितानि वै ।
तथा तान् प्रापयामासुः सुखयामासुरुत्सुकाः ॥८६॥
एवं स्वमहसा कृष्णनारायणः कृपानिधिः ।
उष्णालयं महाखण्डं निरुपद्रवमाकरोत् ॥८७॥
जीवयामास सर्वांश्च प्रापयामास चालयान् ।
मानवान् पक्षिणः पशून् जीवनार्हांस्तथाऽऽत्मनः ॥८८॥
अथ वार्धिस्तथा वायुर्मेघा भयेन पीडिताः ।
शरणं श्रीहरेस्तत्र क्षमायाच्ञार्थमाययुः ॥८९॥
हरिस्तेभ्यो ददौ तत्राऽभयदानं तथाऽऽह च ।
मा कदाचित् सार्वभौमं प्रलयं त्वाचरन्तु वै ॥९०॥
मद्भक्ता यत्र तिष्ठन्ति तत्र कार्यं न नाशनम् ।
इत्युक्त्वा श्रीहरिस्ताँश्च वार्धिं प्राह त्वया क्वचित् ॥९१॥
वेला मर्यादया हीना कर्तव्या नहि कुत्रचित् ।
वेलामुल्लंघ्य भूभागे गन्तव्यं नहि सर्वथा ॥९२॥
सर्वेषां तु समुद्राणां ख्यातानां सरसामपि ।
अखातानां च खातानां नियमोऽयं विधीयते ॥९३॥
वालुकाभिस्तथा तासां स्थानान्युल्लंघ्य वै क्वचित् ।
गन्तव्यं नैव भूदेशे वायुभिश्चापि वै क्वचित् ॥९४॥
वायुना नैव नेतव्याः सिकताः क्षितिमण्डले ।
तीरभागान् विहायैव गन्तव्यं न क्वचित् पुरः ॥९५॥
रणे रणप्रदेशेषु स्थातव्यं नियमेन वै ।
मर्यादैषा क्रियतेऽत्र नोल्लंघ्या सा कदाचन ॥९६॥
मेघाः पाकप्रदाः सन्तु नोन्मत्ताः सन्तु वै क्वचित् ।
अपेक्ष्यजलदानाश्च भवन्तु नान्यथा क्वचित् ॥९७॥
इत्येवं स्थापिता तत्र मर्यादा माधवेन वै ।
ग्रहाणां चाम्बरे योगेऽप्येवमेव नियामितम् ॥९८॥
तत आरभ्य भूभागे तत्त्वानि नियमेन वै ।
वर्तन्ते सुखदान्येवोपद्रववर्जितानि ह ॥९९॥
अथैवं देशरक्षां च कारयित्वा विधाय च ।
अम्बराच्छ्रीहरेर्यानं चावाततार भूतले ॥१००॥
राधिके ! हेमशालाख्यपर्वतस्य वनान्तरे ।
यत्रास्ते जीवितः शिष्यो हेमशालायनो मुनिः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उष्ट्रालयभूखण्डीयप्रजामहर्षीणां प्रार्थना, प्रभोर्गमनम्, उपद्रवशान्तिः, सर्वेषां जीवनदानं, चेत्यादिनिरूपणनामा षण्णवतितमोऽध्यायः ॥ ९६ ॥

श्रीकृष्ण उवाच—

अथ ते राधिकेऽनादिबालकृष्णनरायणम् ।
वैमानिका गणाः सर्वे कोट्यर्बुदा हि सेवकाः ॥ १ ॥
शंकरोऽगस्त्यमुनिराट् देव्यश्चापि निजं प्रभुम् ।
आपृच्छ्य चावतेरुश्च हेमशालायनस्थले ॥ २ ॥
हेमशालायनस्तेषां स्वागतं प्रचकार ह ।
दृष्ट्वाऽगस्त्यं गुरुं शंभुं तथा कृष्णनरायणम् ॥ ३ ॥
आनन्दं परमं प्राप स्वागतं प्रचकार ह ।
दण्डवत् पतितो भूमौ जय कृष्णेत्युवाच च ॥ ४ ॥
आसनानि मधुपर्कं पाद्यं चार्घ्यं ददौ ततः ।
ननर्त पुरतस्तेषां रक्षकाणां दयावताम् ॥ ५ ॥
श्रीहरिस्तं नर्तमानं भक्तं दृष्ट्वा जहर्ष च ।
भक्तस्योरसि चरणौ ददौ स्नेहभरः प्रभुः ॥ ६ ॥
मस्तके प्रददौ हस्तौ परिरेभे पुनः पुनः ।
दिव्यदृष्टिं ददौ शीघ्रं हेमशालायनाय वै ॥ ७ ॥
हेमशालो दिव्यदृष्ट्या उष्ट्रालयं व्यलोकयत् ।
सर्वं सुरक्षितं चास्ते भूतलं परितः खलु ॥ ८ ॥
मानवाः पक्षिणश्चापि पशवोऽपि सचेतनाः ।
जीविता वै कृताश्चेति [illegible] ॥ ९ ॥

अथाऽयं च प्रसस्मार दश मुनीन् हि वैष्णवान् ।
दर्शनार्थं हरेस्तत्र द्राक् स्मृताश्चाययुश्च ते ॥१०॥
व्योममार्गेणाऽवतेरुर्हेमशालायनोटजे ।
चन्द्रवद् भासमानाश्च योगिनो वैष्णवाः शुभाः ॥११॥
तुलसीस्रग्धराः सर्वे जपन्तः श्रीहरिं तथा ।
दृष्ट्वा गुरुमगस्त्यं चाऽनादिकृष्णनरायणम् ॥१२॥
शंकरं सुखवैद्यं च मातॄन् नेमुर्मुदान्विताः ।
सर्वांस्ते त्वर्चयामासुर्मानसैरुपचारकैः ॥१३॥
हेमशालायनो बालायनो रावासनस्तथा ।
दारालिंगायनश्चाथ भेकदानेयनामभाक् ॥१४॥
मषीग्रीवायनश्चापि शालवनायनस्तथा ।
आचालर्षिस्तथा ग्रामायनो वाटायनोऽपि च ॥१५॥
दिवादिङ्नालयश्चैते ह्येकादशमहर्षयः ।
अनादिश्रीकृष्णनारायणस्वेष्टपरायणाः ॥१६॥
जहृषुश्चातिभावज्ञा महाभागवतोत्तमाः ।
इष्टदेवं बालकृष्णं वीक्ष्याऽगस्त्यं गुरुं तथा ॥१७॥
दण्डवत्ते प्रचक्रुश्च जीवदानप्रदान् हि तान् ।
अथाऽऽसनेषूपविष्टान् महर्षीन् प्राह केशवः ॥१८॥
कुशलं सर्वथा कच्चिदास्ते वस्त्वाश्रमादिषु ।
कुशलं तपसश्चापि कुशलं देहिनां तथा ॥१९॥
कुशलं सर्वजीवानामास्ते कच्चित् प्रजादिषु ।
देशानां कुशलं चास्ते क्वचित् सौख्यं तपस्विनाम् ॥२०॥
भक्तानां नरनारीणां कच्चित् सौख्यं प्रविद्यते ।
देशेषु सर्वजातीनां कुशलं कच्चिदस्ति किम् ॥२१॥
इति पृष्ट्वा विरराम श्रीस्वामिपरमेश्वरः ।
अगस्त्यस्तु ततः प्राह विद्यते क्षेत्रमत्र किम् ॥२२॥
तापसानां प्रजानां च शिष्याणां नरयोषिताम् ।
शंकरोऽपि तथैवैषां पप्रच्छ कुशलं नु किम् ॥२३॥
सत्योऽपि तान् पप्रच्छुश्च निराबाधं ततश्च ते ।
आहुर्वै क्रमशः सर्वे महर्षयोऽतिदारुणम् ॥२४॥
प्रलयं कष्टदं तत्र यथा स्वेषां च नाशनम् ।
पुनरुत्पादनं चापि देशानां विप्लवं तथा ॥२५॥
प्रजानां नाशनं चापि रक्षणं च पुनस्तथा ।
हेमशालायनः प्राह भगवंस्तव दर्शनात् ॥२६॥
कुशलं वर्तते त्वद्य यत्खण्डे भवदागमः ।
प्रथमं चास्य खण्डस्य समुद्रेण तु विप्लवः ॥२७॥
कृतो वै परितः पश्चात् झंझावातैरुपद्रवः ।
वातवृष्ट्या जलवृष्ट्या प्रजा बह्व्यो विनाशिताः ॥२८॥
भवन्तश्च स्मृताः पृथ्व्या गर्भे गर्तैर्महर्षिभिः ।
भवद्भिस्त्वत्र चागत्य रक्षितोऽयं भूगोलकः ॥२९॥
अस्मात्परं सुकुशलं क्षेमं चान्यन्न विद्यते ।
जीवाऽभयप्रदानं यद्भगवद्भिर्विधापितम् ॥३०॥
मृतानां जीवदानं च विना श्रीपरमेश्वरम् ।
कः समर्थो भवेदत्र लये त्वाकस्मिके हरे ! ॥३१॥
योजनायतभूभागः समुद्रस्याऽन्तिके प्रभो ! ।
परितः सलिलैर्वार्धेराप्लावितो विनाशितः ॥३२॥
अगस्त्येन जलं तच्चपीतं स्वाञ्जलिना ततः ।
प्राणिनः प्राणयुक्ताश्च वैद्येनाऽत्र कृता हरे ! ॥३३॥
सर्वेषां कुशलं त्वास्ते किमन्यत् कुशलं प्रभो ! ।
सिकताभिर्भुवो भागाश्छन्ना यत्र प्रजाऽर्दिता ॥३४॥
मृतास्तास्तारिताः सर्वाः कृपया मरुतां हरे ! ।
वियुक्ता योजिताः सर्वे कुटुम्बिनश्च सेवकैः ॥३५॥
तवाऽऽज्ञया हरे कृष्ण रुद्रेणाऽऽपश्च शोषिताः ।
सम्पदश्च यथापूर्वं कृताः श्रीमातृभिस्तथा ॥३६॥
देशोऽयं रक्षितः कृष्ण मृताः सचेतनाः कृताः ।
सर्वं वै कुशलं त्वास्ते किं सौख्यं स्यादतः परम् ॥३७॥
अहो भाग्यमहो सौख्यमहो क्षेमं परेश्वरः ।
येषां रक्षणकर्ताऽस्ति दैवतं किमतः परम् ॥३८॥
अहो पुण्यमहो स्वर्गमहो ब्राह्मी स्थितिस्तथा ।
येषां वासे स्वयं कृष्णश्चायातो मुक्तिदायकः ॥३९॥
सर्वपापहरः सर्वपुण्यदः परमेश्वरः ।
सर्वानन्दप्रदः प्राप्तः प्राप्तव्यं नावशिष्यते ॥४०॥
किं वाच्यं परमेशान सर्वं सौख्यं प्रवर्तते ।
सर्वं जानासि सर्वज्ञ कुशलं ते करे हि नः ॥४१॥
समुद्रस्य रणस्यापि वातस्यापि नियामक ।
त्वया त्वेतन्निमित्तेन यमिताः सागरादयः ॥४२॥
पुनर्नैवं प्रजानां वै ब्रह्माण्डेऽत्र क्षयो भवेत् ।
कुशलं च महासौख्यं कृतं तत् किमतः परम् ॥४३॥
अथैवमृषयश्चोक्त्वा हेमशालायनो मुनिः ।
प्राह स्वस्य महाकष्टं मोक्षणं शृणु मानिनि ॥४४॥

## हेमशालायन उवाच—

अहमासं प्रभो बालानदीतीरे द्रुमालिषु ।
अतिवृष्ट्या जले मग्नः समद्रं प्रति धर्षितः ॥४५॥
तज्जले तु यदा मग्नस्तदा वैहायसा बलात् ।
मार्गेण हेमशालाद्रौ समायातस्ततः परम् ॥४६॥

वालुकावर्षणं जातं यत्र मग्नोऽभवं पुनः ।
ततः समाधिं कृतवानस्मरं त्वां गुरुं तथा ॥४७॥
मृतप्रायोऽभवं नाथ सिकतास्तरगर्भितः ।
भवता तावदागत्योद्धृतोऽहं गुरुणाऽपि च ॥४८॥

**बालायन उवाच—**

अहं समुद्रसलिले स्नातुं गतोऽभवं यदा ।
तावत् सामुद्रकल्लोलैरप्राग्भवैर्भयंकरैः ॥४९॥
आकृष्टो जलमध्ये च जलैः सह भुवं प्रति ।
समागतो हि बालाया नद्यास्तटे तु तावता ॥५०॥
वालुकावर्षणैश्छन्नो वालुकागर्भितोऽभवम् ।
कृत्वा प्राणान् ब्रह्मरन्ध्रे समाधावास्थितोऽभवम् ॥५१॥
तावद् भवता त्वागत्य तारितो जीवितोऽस्म्यहम् ।
विना तवाऽऽगमं कृष्ण पृथ्व्यां लयो मतः क्वचित् ॥५२॥

**रावासन उवाच—**

गोशंकुसरितस्तीरे समाधावभवं ह्यहम् ।
न जाने किं च मे जातं यदाऽहं जाग्रतिं गतः ॥५३॥
तदा ज्ञातं मया तत्र वालुकाऽन्तर्मृदाऽर्दितः ।
अस्म्यहं पृथिवीगर्भेऽस्मरं कृष्णमगस्तिकम् ॥५४॥
तावद्भवद्भिरागत्य रक्षितोऽहं कृपानिधे ।
सप्राणो निर्गतो भूमेर्यथा निद्रित उत्थितः ॥५५॥

**दारालिंगायन उवाच—**

दारालिंगस्य शैलस्य वने चासं जपन् हरिम् ।
तत्र वातेन वृक्षाणां शाखा विभिद्य दूरतः ॥५६॥
प्रक्षिप्ता शाखया भग्नं शरीरं मे मृतोऽभवम् ।
न जाने किं ततो जातं स्वस्थोऽहमुत्थितः प्रभो ॥५७॥
शीतलं रसपानं च मया प्राप्तं तु जाग्रता ।
ततोऽहं विप्लवं चावेदिषं त्वया हि रक्षितः ॥५८॥

**भेकदानेय उवाच—**

अहं त्वासं भेकदाने पर्वते द्रोणिकाश्रयः ।
वात्यया मे पर्णकुटी समूला गगनं गता ॥५९॥
अहं कुट्यां प्रसुप्तश्चाऽभवं काष्ठतले तदा ।
पर्णकुट्या सह क्षिप्तोऽभवं व्योम्नश्च पर्वते ॥६०॥
अगम्ये शिखरे नष्टोऽभवं गगनपाततः ।
न जाने जीवितः केन भवता हरिणा किमु ॥६१॥

स्मृत्वा त्वां चागतोऽस्म्यत्र जय कृष्णनरायण ।
त्वां विना कः रक्षकोऽस्ति मरणे समुपस्थिते ॥६२॥

**मषीग्रीव उवाच—**

अहं रणस्य च तटादगच्छं दक्षिणं वनम् ।
अरण्यं तन्मया दृष्टं क्षणाज्जलेषु मज्जितम् ॥६३॥
जलेऽहं मकरेणैव धृतश्च भक्षितोऽभवम् ।
न जाने तत्कथं पश्चाज्जीवितोऽस्मि कृपा तव ॥६४॥
वर्तते कारणं तत्र भक्षितस्याऽपि जीवनम् ।
एवं नाथ त्वयाऽवश्यं जीवितो वैद्यशार्ङ्गिणा ॥६५॥

**शालवनायन उवाच—**

शालवनेऽभवं शैले त्वां भजन् पुरुषोत्तमम् ।
वात्यया चोद्धृतः स्थानात् पञ्चयोजनदूरगः ॥६६॥
अम्बरात् पतितश्चाब्धौ मग्नो मृतोऽभवंस्ततः ।
त्वां स्मरामि कृपासिन्धो रक्ष रक्षेति वै तदा ॥६७॥
दृष्टो भवान् मया तत्र गृह्णन् मां स्वकरेण वै ।
रक्षितस्तारितश्चाऽहं त्वया चात्र निवेशितः ॥६८॥

**आचालर्षिरुवाच—**

अहं त्वासं चाग्निहोत्रे वात्यया वह्निरुल्बणः ।
समजन्यथ काष्ठानामरण्यं दावधर्षितम् ॥६९॥
दावे दग्धोऽभवं चाहं तत्रैव भस्मतां गतः ।
तदानीमस्मरं कृष्णनारायणं परेश्वरम् ॥७०॥
अगस्तिं च गुरुं देवं रक्षकं जगदीश्वरम् ।
भस्मतश्चाहमुत्पन्नस्त्वया पुनर्नवीकृतः ॥७१॥
आप्यायितश्च गणकैश्चेतनेन सुयोजितः ।
वैहायसा बलेनाऽत्र समायातोऽस्मि ते कृपा ॥७२॥

**ग्रामायन उवाच—**

ग्रामाद्रिपर्वते चाहमासं तत्र हरिं स्मरन् ।
स्नातः पूजां करोम्येव यावत्तावत्तु गर्जना ॥७३॥
भयदा भूकम्पजन्याऽभवत् सोऽहं क्षणान्तरे ।
कम्पमानात् पर्वतस्य शिखरात्पतितो यदा ॥७४॥
तावद् वात्या हृतो दूरं व्योम्नि मेघे निवेशितः ।
मृतो मेघेऽतिशैत्येन न जाने किमतः परम् ॥७५॥
कथं वा जीवनं प्राप्तस्तवैव करुणेदृशी ।
भक्तस्य रक्षणं कृष्ण करोष्येवाऽम्बरेऽपि च ॥७६॥

## वाटायन उवाच—

अहं वात्याम्बरे क्षिप्तो भ्राम्यमाणोऽतिवेगतः ।
अरण्ये कुत्रचित् क्षिप्तो दृष्टवान् मत्तहस्तिनम् ॥७७॥
तेनातिक्षुधितेनाऽहं धृतश्चापि प्रभक्षितः ।
ततः कस्माज्जीवनं मे न जाने वेत्सि केशव ॥७८॥

## दिवादिङ्गायन उवाच—

दिवादिक्पर्वतयोस्तु मध्ये कविन्दुमातटे ।
आसं तत्र च सामुद्रं जलं पूर्वत आगतम् ॥७९॥
कविन्दुमानदी तत्र सामुद्रजलसंप्लुता ।
तत्राऽहं तु निमग्नो वै जलं दूरं ह्यपासरत् ॥८०॥
ततो वालुकया जातः पर्वतो मच्छिरस्यपि ।
तत्राऽवसं समाधिस्थो भवता पर्वतो हृतः ॥८१॥
ततोऽहं निजदेहस्थो जाग्रतिं चागमं प्रभो ।
तावन्मयाऽम्बरे दृष्टं विमानं चातिभासुरम् ॥८२॥
अतिदूरं सूर्यनिभं चागतोऽहं विलोक्य तत् ।
रक्षितोऽहं त्वया कृष्ण जीवितो मृत्युदन्ततः ॥८३॥
कृपां विना न नाथाऽत्र जीवेद्वै देहवान् खलु ।
देशे मृतास्त्वया कृष्ण जीविता हि प्रजाजनाः ॥८४॥
पुनर्यथावद् विहितं कस्तथाकर्तुमीश्वरः ।
अगस्त्येन कृता रक्षा शंकरेण पुनः पुनः ॥८५॥
अश्विनीबालकेनात्र प्रजाः सचेतनीकृताः ।
श्रीभिर्देशाः स्मृद्धिपूर्णाः कृता उज्जीविताः पुनः ॥८६॥
पशवः पक्षिणः कृष्णनारायण त्वयाऽविताः ।
धन्योऽस्त्रालयदेशोऽयमुष्णालयाऽपराभिधः ॥८७॥
उष्ट्रालयसमानोऽपि ऊर्ध्वालयसमः कृतः ।
पावितो भवताऽऽगत्य रक्षितास्तारिता वयम् ॥८८॥
इत्येवं राधिके त्वेकादशर्षिभिर्निवेदिते ।
श्रीहरिः प्राह युष्माकं भक्त्या मया हि तारिताः ॥८९॥
मम भक्तार्थमेवाऽहं सर्वस्वं प्रददामि तु ।
मया हि चक्रवाक्यर्थं जलं शैलोपरि द्रुतम् ॥९०॥
पार्श्वभूमिं समाप्लाव्य प्रापितं पायितं पुरा ।
मया भक्तकृते लक्ष्मीस्त्यक्ता भक्तविरोधिनी ॥९१॥
मद्भक्तार्थं मया सर्वं दीयते रक्ष्यते च सः ।
एकस्याऽर्थेऽसंख्यदेहभृतां करोमि रक्षणम् ॥९२॥
एकस्याऽर्थेऽसंख्यदेहभृतां करोमि नाशनम् ।
सर्वं करोमि भक्तार्थं नाऽभक्तार्थं कदाचन ॥९३॥
अभक्तास्तु भक्तपार्श्वे नान्तरीयकलाभिनः ।
भवतां मम भक्तानामर्थे देशोऽयमुद्धृतः ॥९४॥
मार्जाराऽपत्यकानां संरक्षणं च पुरा मया ।
कृतं साऽनलभ्राष्ट्रौवे मार्जारिकाऽतिभक्तितः ॥९५॥
यस्य यादृक् भवेत् स्नेहस्तस्य तथाविधाऽवनम् ।
करोमि सततं लोके व्रतं मे भक्तरक्षणम् ॥९६॥
कीर्तनात्स्मरणात्स्पर्शाद्दर्शनाद्वन्दनादपि ।
अर्चनाच्च सखीभावात् श्रवणादपि चोत्तमम् ॥९७॥
आत्मसमर्पणं स्नेहपूर्वकं मम रोचते ।
मदर्थे यस्य नाऽदेयं किञ्चिदपीह विद्यते ॥९८॥
तस्याऽर्थे सर्वथा चाहं त्यजामीह परत्र च ।
भवदर्थे मया सर्वं कृतं संरक्षणं द्विजाः ॥९९॥
इत्युक्त्वा विररामाऽसौ भगवान् परमेश्वरः ।
राधिके बालकृष्णे ते बभूवुः स्थिरमानसाः ॥१००॥
क्षणं दध्युर्बहिर्मूर्तिं ततोऽन्तरे च तं हरिम् ।
आनन्दसागरे मग्नाः क्षणं विशश्रमुश्च ते ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उष्ट्रालयदेशे हेमशालायनाश्रमे श्रीहरेर्विमानस्याऽवतरणम्, स्वस्वरक्षावृत्तान्तादिकथनं चेत्यादिनिरूपणनामा सप्तनवतितमोऽध्यायः ॥ ९७ ॥

## श्रीकृष्ण उवाच—

अथ क्षणान्तरे सर्वे योगिनः परमेश्वरम् ।
पप्रच्छुः राधिके! चक्रवाकीरक्षा यथा कृता ॥ १ ॥
यथा लक्ष्मीः पुरा त्यक्ता प्रियाऽपि परमात्मना ।
यथा मार्जारिकाऽपत्यान्यरक्षयद्धरिः पुरा ॥ २ ॥
के तेऽभवन् कथं भक्ताः कथं रक्षा च कीदृशी ।
पुण्यमेषां कीदृशं च यद्रक्षां माधवोऽकरोत् ॥ ३ ॥

## श्रीहेमशालायन उवाच—

चक्रवाकी भक्ता तव कीदृशी पूर्वजातिजा ।
कथं स्नेहस्त्वदर्थे वै तिरश्चां छिन्धि संशयम् ॥ ४ ॥

## श्रीकृष्णनारायण उवाच—

शृणुतेमां कथां विप्राश्चक्रवाक्याः पुराभवाम् ।
सनत्सुजातनामाऽसौ ब्रह्मणो मानसः सुतः ॥ ५ ॥
वेदवेदांगतत्त्वज्ञो भक्तिमार्गपरायणः ।
ब्रह्मचर्यपरश्चापि ब्रह्मविद्योपदेशकः ॥ ६ ॥

चतुर्दशसु लोकेषु चाऽव्याहतगतिर्व्रती ।
किशोरभावेनोर्व्यां स व्यचरत् तीर्थकांक्षया ॥ ७ ॥
नारायणसरो यातः कच्छे स्नातुं स चैकदा ।
पूर्णचन्द्राननः सौम्यस्तेजोपरिधिशोभितः ॥ ८ ॥
रूपानुरूपावयवो वल्कलैरावृतो मुनिः ।
हृष्टपुष्टावयवश्च कामकान्तिसमुज्ज्वलः ॥ ९ ॥
स्त्रीणां मनोहरश्चातिक्षमासौजन्यशोभितः ।
प्रसन्नमानसश्चैकप्रभुध्यानपरायणः ॥१०॥
वल्कलानि समुत्सृज्य कौपीनमात्रवस्त्रकः ।
अवाततार च नारायणसरोजलान्तरे ॥११॥
अवगाह्य तटं याति प्रजप्त्वा वेदमातरम् ।
पुनर्जलान्तरे याति पुनस्तटे च तिष्ठति ॥१२॥
हरिं ध्यायन् च गायत्रीं जप्त्वा पुनर्जलान्तरे ।
गत्वा स्नाति सुखं सूर्यं नत्वाऽवगाहते जले ॥१३॥
बहिरागत्य च ध्याने स्थितो वै घटिकावधिम् ।
तावत् तत्रोर्वशी नारायणपुत्री हिमालयात् ॥१४॥
बह्वीभिः सह सखीभिः समाययौ निजेच्छया ।
ऊरोरुत्पादिता सा तु महेन्द्राय समर्पिता ॥१५॥
यद्दिनात् तद्दिनाद् बदरीं पितुर्दर्शनकारणात् ।
समायाति प्रतिपक्षं पूर्णाऽमादिवसेषु सा ॥१६॥
बदर्यां सा पितुर्नारायणस्य दर्शनं शुभम् ।
विधायैव च तीर्थार्थं नारायणसरोवरम् ॥१७॥
समाययौ महाभक्ता वैष्णवी विष्णुपुत्रिका ।
महाभागवती देवी चाप्सरोगणमूर्धजा ॥१८॥
अप्सरसां निसर्गस्तु चाञ्चल्यं सुभगे नरे ।
एवं चञ्चलभावेन भक्ताऽपि युवलालसा ॥१९॥
भासन्तं तेजसा रम्यावयवं दृष्टिगोचरम् ।
एकलं संविलोक्यैषा मनोभववशीकृता ॥२०॥
रन्तुं सनत्सुजातं तमृषिं चार्थयदग्रगा ।
ननर्त बहुभावेन भूत्वा किशोरिकाकृतिः ॥२१॥
सतालं गायनं चक्रे गीतिकां प्रजगौ मुदा ।
चक्रवत् परितस्तस्य भ्रमणं नर्तने बहु ॥२२॥
चक्राकारं चकारैषा ख्यापयन्ती स्वचापलम् ।
वाचा त्वरञ्जयच्चक्रनृत्येन सह सा मुनिम् ॥२३॥
मुनिः शुश्राव वाचं च चक्रनृत्यं व्यलोकयत् ।
सापि सम्मनुते मुग्धं मुनिं नृत्यति चाधिकम् ॥२४॥
हावभावांगचेष्टाभिः प्रेमहार्दविलोकनैः ।
मनिं सा मोहयामास मुनिर्जहास वै मुहुः ॥२५॥
सापि ज्वरयुता स्प्रष्टुं यावन्मुनिं समिच्छति ।
तावद्विवेकवान् विप्रः सनत्कुमारको मुनिः ॥२६॥
मा स्पृशेत्याह च ततः समुत्थाय सधर्मधृक् ।
ययौ दूरं हसन्नेव निषसाद स्थलान्तरे ॥२७॥
तस्य वै सरसस्तीरे तदा सापि वशंगता ।
ययौ तत्र चकारापि पुनर्नृत्यं मनोहरम् ॥२८॥
पुनः पुनश्चेक्षमाणा प्रार्थयित्री च तं मुनिम् ।
रन्तुकामाऽभिसृत्यैव पार्श्वगा सा स्थिरा ह्यभूत् ॥२९॥
ऋषिः प्राह कथं चेटि ! चेटीवद् वर्तसेऽत्र वै ।
साक्षान्नारायणपुत्री या त्वं स्पर्शे न लज्जसे ॥३०॥
अहं वै ब्रह्मणः पुत्रस्त्वं पुत्रपुत्रपुत्रिका ।
ब्रह्मव्रतोऽहमेवाऽस्मि मा वृथा चेष्टनं कुरु ॥३१॥
स्नाहि तीर्थजले रम्ये नारायणे सरोवरे ।
मा वृथा मानसीं पीडामावहाऽस्थानके सुते ! ॥३२॥
इत्युक्ता सा निराशा च सन्तापखेदसंयुता ।
उवाचैनं युवानं वै त्यक्तमर्यादचेतसा ॥३३॥
वयं त्वप्सरसो विप्र सर्वसामान्यभोगदाः ।
ब्रह्मणा विष्णुना चापि शम्भुना सम्मताः सुरैः ॥३४॥
तस्मान्नाऽहं सुता योगिन् द्रष्टव्याऽत्र त्वया क्वचित् ।
सर्वा नारायणपुत्र्यो नारायणप्रियास्तथा ॥३५॥
नारायणांगसञ्जाता लक्ष्मीर्नारायणप्रिया ।
राधा कृष्णांगसञ्जाता राधा कृष्णस्य कामिनी ॥३६॥
अजवंशे तु सञ्जाता गायत्री ब्रह्मणः प्रिया ।
अजपुत्रस्य दक्षस्य पुत्र्यो धर्मादियोषितः ॥३७॥
देवसृष्टौ न बाधोऽस्ति तस्मात् त्वां समुपस्थिता ।
त्वया हास्यं भावना च दर्शिते रतिबोधिके ॥३८॥
तस्माद् गृहाण विप्रेन्द्र न चेच्छप्स्यामि सत्वरम् ।
इत्युक्त्वा सा सनत्सुजातस्याऽङ्के निपपात ह ॥३९॥
ऋषिः सनत्सुजातस्तु शापस्य भयकारणात् ।
यद्वा ब्रह्मव्रतहानेर्न तां जगाद किञ्चन ॥४०॥
किन्तु योगं तदा कृत्वा प्राणानाकृष्य तत्क्षणम् ।
ब्रह्मरन्ध्रं समाधौ तु गत्वोवास यथासुखम् ॥४१॥
ऊर्वशी तं मुनिं कान्तं कामशून्यं विलोक्य च ।
अतृप्तिदं बिडालस्य वृत्तिं धृत्वाऽऽत्मनि स्थितम् ॥४२॥
शशाप वै तदा शीघ्रं बिडाली भव धूर्तराट् ।
यस्य नास्ति स्त्रिया मूल्यं भक्ताया अपि सर्वथा ॥४३॥
स्त्रिया दुःखं न जानाति स्त्रीकामं वर्धयत्यपि ।
अग्निमुद्भाव्य च दूरे दह्यमानां प्रपश्यति ॥४४॥

तादृशस्य तु षण्ढस्य मार्जारीजन्मयोग्यता ।
भवत्वेव दयाहीना मार्जारी दुःखवेदिनी ॥४५॥
स्त्रीदुःखं कामभेदेन कीदृशं ज्ञास्यसे यथा ।
तथा मार्जारहीना त्वं मार्जारी भव आशुगा ॥४६॥
इत्येवं शापमापन्नः ऋषिर्मार्जारिकाऽभवत् ।
जातिस्मरश्च तत्रैव नारायणसरस्तटे ॥४७॥
समाधेरुत्थितो द्राक् च स्वं देहं चावलोकयत् ।
मार्जारीभावमापन्नं क्रोधं चावाप वै तदा ॥४८॥
स्नान्तीं तदोर्वशीं प्राह चक्रवन्नर्तने रता ।
वाग्विलासेन मोहं च करोषि मादृशानपि ॥४९॥
अलब्धाशा च शपसे सदोषा दोषवर्जितम् ।
तस्मात् त्वं जलशून्ये वै प्रदेशे तृष्णया युता ॥५०॥
अतृप्ता भव चेटी च चक्रवाकी स्मरातुरा ।
चक्रवाकविहीना च सखीजनविवर्जिता ॥५१॥
इत्येवं चोर्वशी शप्ता चक्रवाकी क्षणान्तरे ।
तत्रैव जाता चित्राढ्या सपक्षा पक्षिजातिजा ॥५२॥
अथाऽन्या व्योममार्गेण सख्यस्तूर्णं विहाय ताम् ।
ययुर्दिवं महेन्द्रं च ता ऊचुस्तद् यथाऽभवत् ॥५३॥
संसारे कामना दोषो बहुदुःखप्रदो यतः ।
न गुणे गण्यते विश्वैर्यद्यप्यानन्दशेवधिः ॥५४॥
अथेन्द्रः शोकमापन्नो ययौ श्रीपरमेष्ठिनम् ।
निजगाद च वृत्तान्तं ब्रह्माऽपि शोकमाप्तवान् ॥५५॥
द्वौ तौ विष्णुं तदुद्धारकर्तारं बदरीवने ।
नरनारायणरूपं ययतुः शापमुक्तये ॥५६॥
प्रणेमतुर्ववन्दाते चार्चयामासतुर्हरिम् ।
नारायणः स्वयं नत्वा ब्रह्माणं परमेष्ठिनम् ॥५७॥
मधुपर्कं ददौ कृत्वा स्वागतं समुवाच ह ।
कुशलं सर्वथा कच्चित् प्रजानां च पितामह ॥५८॥
ब्रह्मा प्राह हरे सर्वे प्रजानां कुशलं सदा ।
यदर्थं तप्यसे चात्र तासां चाऽकुशलं कथम् ॥५९॥
किन्तु ते चोर्वशी पुत्री या चेन्द्राय समर्पिता ।
सनत्सुजातो मे पुत्रो योगीन्द्रः सांख्ययोगवित् ॥६०॥
द्वावेतौ शापयोगेन तिर्यग्भावमुपागतौ ।
द्वौ भक्तौ वैष्णवौ श्रेष्ठौ सुता सुतस्तथाऽऽवयोः ॥६१॥
चक्रवाकी च मार्जारी जाते कच्छप्रदेशके ।
नारायणसरस्तीरे कामेनाऽन्योन्यशापिते ॥६२॥
जातिस्मरे च भवतस्तन्मोक्षश्च यथा भवेत् ।
तथा विधीयतां देव दयालो भगवान् भवान् ॥६३॥

कर्तुमकर्तुमन्यथाकर्तुं शक्तोऽस्ति शासकः ।
श्रुत्वैवं भगवानाह विचिन्त्य वेधसं तदा ॥६४॥
तयोरुद्धारमेवाऽहं करिष्ये स्वल्पकालतः ।
शापेन तिर्यग्भावे च किञ्चिद् दुःखमवाप्स्यतः ॥६५॥
जातिस्मरस्वभावेन मद्भक्त्या मां स्मरिष्यतः ।
तिर्यग्योनिविमोक्षार्थमुद्भाव्य च निमित्तकम् ॥६६॥
तदाऽन्तिके तयोः शीघ्रं गत्वा दास्ये प्रमोक्षणम् ।
भक्तयोर्न चिरं दुःखं चिन्तां त्यज पितामह ॥६७॥
इत्युक्तौ च प्रसन्नौ तौ महेन्द्रश्च पितामहः ।
नारायणं प्रपूज्यैव नत्वा नारायणं सरः ॥६८॥
आययतुश्च तत्तीरे यत्र चेटीबिडालिके ।
जातिस्मरे तु ते दृष्ट्वा महेन्द्रं वेधसं तथा ॥६९॥
आययतुर्द्रुतं पार्श्वे रुरुदतुश्च दुःखतः ।
आश्वासिते च ते ताभ्यां शापमुक्तिर्निवेदिता ॥७०॥
स्वल्पकालेन भगवान् शापमुक्तिं विधास्यति ।
कुरुतं भजनं स्वाम्यनादिनारायणस्य वै ॥७१॥
ज्ञानिनां नैव शोकोऽस्ति आगमा नाशिनो यतः ।
शरीराणि समानानि मौक्तिकानि हि देहिनाम् ॥७२॥
विज्ञत्वं शिष्यते तत्र ज्ञानं दुःखविनाशकम् ।
अज्ञानिनां तु यद्दुःखं ज्ञानिनां सुखमेव तत् ॥७३॥
परिणामैश्च वस्तूनां तापैस्त्रिविधकैस्तथा ।
संस्कारैश्च विभिन्नैश्च दुःखं सर्वं विवेकिनाम् ॥७४॥
यौवनं सर्वथा दुष्टं दुःखदं कामकारणात् ।
तृष्णा सहचरी तस्य सुख्यपि दुःखमाप्नुयात् ॥७५॥
संसारे यदि दुःखं न को विशेषोऽस्य मोक्षतः ।
तस्माद् दुःखं हि संसारः सुखं मुक्तिर्निगद्यते ॥७६॥
सुखमिश्रं सदा दुःखं मायायां चाभिवर्धते ।
तृष्णाक्षये महानन्दो माया तत्र न बाधते ॥७७॥
तृष्णां परित्यजेत् प्राज्ञो यदिच्छेत् सुखमात्मनः ।
कोटीन्द्रियसुखाश्रयाणां तृष्णानाशस्य नांऽशता ॥७८॥
विषयाणामुपभोगस्तृष्णां वर्धयते नवाम् ।
तृष्णा दोषो विषयाणां फलं दुःखतरं हि तत् ॥७९॥
ज्ञानिनां तु विषयाणामुपभोगो निवृत्तये ।
इच्छानाशे फलं श्रेष्ठं सुखं मोक्षसहायकम् ॥८०॥
योगिनां ज्ञानिनां चैवं भोगा अपि न बन्धदाः ।
प्रत्युताऽदर्शनजन्यतृषानिवर्तका हि ते ॥८१॥
तृषातृप्त्यन्तविश्रान्ता ज्ञानयुक्ता यदा हि सा ।
तृषा तृष्णावर्धिनी च मौढ्यभावान्विता यदि ॥८२॥

मौढ्यं ज्ञानेन नश्येद्वै गुरुर्ज्ञानस्य कारणम् ।
गुरोः प्राप्तिः पुण्ययोगात् पुण्यं शास्त्रश्रवादिभिः ॥८३॥
शास्त्रश्रवाद्याः श्रद्धाभिः श्रद्धा मुमुक्षुतादिभिः ।
मुमुक्षुता च कृपया हरेरेव प्रवर्तते ॥८४॥
हरेः कृपा तु भजनात् सेवनात् स्मरणादितः ।
अनादिश्रीकृष्णनारायणस्वामिपरेश्वरः ॥८५॥
श्रोतव्यश्चापि मन्तव्यो निदिध्यासेऽथर्य एव सः ।
तस्य शरणमापन्ना तरन्ति दुःखसागरान् ॥८६॥
सर्वथाऽर्पणमेतस्मै कार्यं सर्वात्मना सह ।
प्रेमभक्तिः सदा कार्या तस्यैव भवपारदा ॥८७॥
यदि स्यामो वयं तस्य सोऽपि स्यात्सर्वदा तु नः ।
भक्तो भजते भक्तेशं भक्तेशो भजतेऽनुगम् ॥८८॥
सुखसागरयोगेन चापगा सुखितां व्रजेत् ।
दुग्धसागरयोगेन सरिद्वारि पयो भवेत् ॥८९॥
न माया परमेशेऽस्ति न दुःखं तृष्णिका न च ।
न दोषाः सन्ति वै कृष्णे नारायणे परेश्वरे ॥९०॥
गुणा दिव्या अनवधिकातिशयविवर्जिताः ।
सन्ति देवे महाकृष्णे भक्तास्तानाप्नुवन्ति वै ॥९१॥
स्मर्यतां च भवद्भ्यां श्रीकृष्णनारायणप्रभुः ।
स एवाऽन्चिरकालेन शापमोक्षं विधास्यति ॥९२॥
निमित्तं च समुद्भाव्य स्वयमेवागमिष्यति ।
तिर्यग्भावेऽपि चात्रैव तीर्थे स्नानं स्मृतिं हरेः ॥९३॥
नमनं मस्तकेनापि फलपत्रार्पणादिकम् ।
नामरटणमेवाऽपि न त्यक्तव्यं कदाचन ॥९४॥
एतादृशी यदि भक्तिस्तिर्यग्भावेऽपि जायते ।
मानुषादपि देहात्स लाभः श्रेष्ठतमो भवेत् ॥९५॥
विना भक्तिं पशुत्वं चात्मनां तुल्यं सुरेष्वपि ।
को विशेषः सुरत्वेऽपि यदि भक्तिर्न विद्यते ॥९६॥
राज्यस्थस्याऽपि जिह्वाया रसग्राहे समानता ।
सर्वेन्द्रियाणां सामर्थ्यं दरिद्रस्य च भूपतेः ॥९७॥
समानं वै मया क्लृप्तं विशेषो नाऽत्र विद्यते ।
शरीरं तु समानं वै समानानीन्द्रियाण्यपि ॥९८॥
रसास्तेषां समानाश्च तृप्तिः समाऽपि सर्वथा ।
दत्ताः सर्वशरीरिभ्यो विशेषो नाऽत्र विद्यते ॥९९॥
हरेर्भक्तिः केवलैका कृता साऽत्र विशिष्यते ।
तस्माद् भक्त्या भवतोश्चोद्धारः शीघ्रं भविष्यति ॥१००॥
गच्छावोऽस्मत्सुसंस्थानं शं वामस्तु च भक्तितः ।
इत्युक्त्वा पूज्यमानौ तौ महेन्द्रवेधसावुभौ ॥१०१॥
चेटीबिडालिकाभ्यां सुस्पृष्टौ भावेन पादयोः ।
नतौ सुवन्दितौ व्योम्ना ययतुश्च निजं दिवम् ॥१०२॥
ते ह्युभे पितुरादेशाद् भजेते श्रीनरायणम् ।
दिवानिशं जपतश्च स्वामिनं श्रीरमापतिम् ॥१०३॥
इत्येवमृषयस्तत्र नारायणसरोवरे ।
ते ह्युभे भवतां शापकारणात् पशुपक्षिजे ॥१०४॥
इत्युक्त्वा राधिके ! कृष्णनारायणपरेश्वरः ।
विशाश्राम क्षणं भक्तार्पितं वारि पपौ शुभम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उष्ट्रालयदेशे हेमशालायनेन पृष्टायाश्चक्रवाकीमार्जारिकापूर्वजन्मकथाया वर्णननामाऽष्टनवतितमोऽध्यायः ॥ ९८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके पश्चादनादिश्रीनरायणः ।
यथोद्धारं कृतवान् श्रीहरिः प्रोवाच तां कथाम् ॥ १ ॥

श्रीकृष्णनारायण उवाच—

हेमशालायनर्षे त्वं कथा शृणु ततः पराम् ।
याऽभून्मार्जारिका नारायणसरस्तटे तु सा ॥ २ ॥
वृकादिभयमापन्ना ययौ खेटं समीपगम् ।
यत्र वै श्रीहरेर्भक्ता वसन्ति पशुपालकाः ॥ ३ ॥
नरा नार्यो वैष्णवास्ते भजन्ते परमेश्वरम् ।
तत्र सा ह्यटति नित्यं प्रतिगृहं क्षुधान्विता ॥ ४ ॥
दुःखेनाऽऽसाद्य भोज्यं वै चौर्येण बहुयत्नतः ।
वर्तते साऽथवा चौर्यं करोत्येव न च क्वचित् ॥ ५ ॥
शुनां भयात्तु सा रात्रौ शेते पुलकसञ्चये ।
तृणानां सञ्चये चापि गृहपृष्ठस्थसञ्चये ॥ ६ ॥
यथाकथञ्चित्सम्प्राप्योच्छिष्टं वृत्तिं करोति सा ।
यत्र नास्त्येव मार्जारजातिस्तत्रैयमेकला ॥ ७ ॥
विना नरं वसत्येव युवती ऋतुधर्मिणी ।
कामदाहेन मार्जारी पीड्यतेऽहर्निशं तदा ॥ ८ ॥
शापस्य कारणेनैव मार्जारं लभते न सा ।
खेटाद् दूरतरा ग्रामास्तत्र गन्तुं न शक्यते ॥ ९ ॥
मध्ये वन्यपशूनां सा भयात्तत्रैव तिष्ठति ।
एवं सा पीडिता कामदाहेनाऽष्टसमावधिम् ॥१०॥
नवमे वत्सरे वृष्टिश्चातिवृष्टिरभूद्भुवि ।
तत्प्रवाहेण वै कश्चिन्मार्जारो दूरभूमितः ॥११॥

तरंगैरुह्यमानः सः सरोवारिषु चाययौ ।
वृक्षशाखां समालम्ब्य जीवन् सरोवरान्तिके ॥१२॥
जलेन वक्रवेगेन शाखया सहितस्तु सः ।
मार्जारो वाहितस्तीरं शाखा तीरगताऽभवत् ॥१३॥
जले लीने बिडालः सः ययौ शनैः शनैस्तदा ।
खेटं विलोक्य तत्रैव यत्र मार्जारिकाऽस्ति सा ॥१४॥
तेन योगं गता सा च सगर्भा सम्बभूव ह ।
कुंभकारगृहे सा तु घासकचरमध्यगा ॥१५॥
सगर्भा पूर्णकालेन प्रसूता पञ्चबालकान् ।
निदधे तृणपुञ्जे तान् ततो वै चापरस्थले ॥१६॥
ततः स्थलान्तरे चापि ररक्ष निजबालकान् ।
अथाऽपक्वस्थले चामपात्रपुञ्जे ररक्ष सा ॥१७॥
कुंभकारेण संक्लृप्ते पाकार्थे वह्निगर्तके ।
आमपात्रेषु बालान् सा गोपयित्वा बहिर्ययौ ॥१८॥
निजभोज्यस्य लाभार्थे पश्चात् कुंभकृताऽनलः ।
दत्तः पात्रप्रपाकार्थे सा दृष्ट्वा धूम्रमेव तम् ॥१९॥
शीघ्रं तत्र समायाता ददर्शाऽग्रेऽनलं मुखे ।
पृष्ठेऽपत्यानि तिष्ठन्ति मार्गो निर्गमनाय न ॥२०॥
वह्निर्वृद्धिं गतस्तत्र ज्वालामालासमुज्ज्वलः ।
सापि भ्रमयतस्तत्र पार्श्वे तृणेषु कचरे ॥२१॥
सुगुप्ता चाऽरुदच्चाति बाला रुदन्ति चानले ।
बालानां प्राणरक्षार्थे ह्युपायो विद्यते न वै ॥२२॥
कुंभकारो न तत्रास्ति रोदनं शृणुयात्तु कः ।
अपत्यस्नेहसम्पन्नाऽपत्यरक्षणहेतवे ॥२३॥
अनादिश्रीकृष्णनारायणस्वामिनमस्मरत् ।
तुष्टाव कल्पितैर्भावैर्नारायणं परेश्वरम् ॥२४॥
वह्निः पात्रप्रगर्ते तु परितश्चावृतोऽभवत् ।
अपत्यानि तु पात्राणां मध्ये तिष्ठन्ति तत्तले ॥२५॥
ज्वलते चाऽनलश्चोर्ध्वे तले नैवाऽभियाति च ।
मार्जारिकाऽतिभावेनाऽजपत् कृष्ण हरे प्रभो ॥२६॥
रक्ष मे बालकान् कृष्ण यत्नेन प्रापितान् शुभान् ।
निर्दोषान् ज्ञानहीनाँश्च रक्ष स्वामिन्नरायण ॥२७॥
यद्यहं त्वयि भक्ताऽस्मि रक्ष मे बालकान् विभो ।
गर्भे रक्षा कृता येन यत्पिता च जलान्तरे ॥२८॥
रक्षितो येन देवेन स मे बालान् प्ररक्षतु ।
नारायण हरे कृष्ण स्वामिन् श्रीमन् पुमुत्तम् ॥२९॥
येनाऽहं जनिता पूर्वं स मे बालान् प्ररक्षतु ।
अग्नौ जले पृथिव्यां चाम्बरे वायौ निवासकृत् ॥३०॥
हृदये चामपात्रे च गर्ते भ्राष्ट्रे च चुल्लके ।
यः सदा व्यापको देवः स मे बालान् प्ररक्षतु ॥३१॥
हरे कृष्ण हरे स्वामिन् कृष्ण रक्षय बालकान् ।
प्रियान् मे प्राणतः स्वल्पाननाथान् संप्ररक्षय ॥३२॥
लक्षजपान् करिष्येऽहं तव तुष्ट्यर्थमेव यत् ।
रक्ष मे शावकान् कृष्णनारायण जगद्गुरो ॥३३॥
शरणागतरक्षाकृत् पोतकान्मे प्ररक्षय ।
इत्येवं प्रार्थयित्री सा कुंभकारांगणे स्थिताम् ॥३४॥
तुलसीं प्रति गत्वैव नेमे च दश दण्डवत् ।
प्रदक्षिणाश्च पञ्चाशच्चक्रे मत्वा द्रुमे हरिम् ॥३५॥
कृष्णनारायणस्वामिन् श्रीपते कमलापते ।
रक्ष राधापते ब्रह्मपते मुक्तपते प्रभो ॥३६॥
पार्वतीश प्रभास्वामिन् हंसेश मञ्जुलायते ।
सगुणेशाऽऽत्मसाक्षिँस्त्वं रक्ष बालान् हरे मम ॥३७॥
आत्मात्मन् करुणासिन्धो लक्ष्मीपते जयापते ।
अमृतप्रद देवानां रक्ष शान्तापतेऽच्युत ॥३८॥
श्रीपते भूपते बद्रीपते लीलापतेऽनघ ।
भूतिपतेऽक्षरपते शक्तिपतेऽव बालकान् ॥३९॥
गोलोकाधिपते हैमीपते च ललितापते ।
गह्वरावास गर्भास्य रक्ष वह्निपते पते ॥४०॥
हृषीकेश महेशेश ब्रह्मप्रियेश भीहर ।
अक्षरक्षेत्रवासाऽस्मद्बालकान् रक्ष मेश्वर ॥४१॥
वह्निर्देवोऽवतु बालान् शान्तदाहोऽस्तु सर्वग ।
बाला मे त्वमृतदेहा भवन्तु भवदाश्रये ॥४२॥
यत्राऽन्यस्त्वाश्रयो नास्ति तत्राश्रयो भवान् गुरुः ।
तारकश्च शरण्यश्च नाथ रक्षय बालकान् ॥४३॥
इत्येवं चार्थयमाना बिडाली तुलसीं मुहुः ।
नत्वा पत्राणि चादाय वह्निस्थानं गताऽभवत् ॥४४॥
पत्राणि त्वर्पयामास वह्निदेहाय शार्ङ्गिणे ।
रक्ष मे बालकान् अग्ने वार्धक्यफलरूपिणः ॥४५॥
इत्युक्त्वा च नमस्कृत्य प्रचकार प्रदक्षिणम् ।
नाऽन्योपायोऽत्र च हरेः स्मृतिं विना तु रक्षणे ॥४६॥
इत्येवं मनसा वाचा कर्मणा परमेश्वरम् ।
अपूजयद् बिडाली सा पत्रैः श्रीपुरुषोत्तमम् ॥४७॥
जेपे नाम च सततं तस्थौ भ्राष्ट्राग्निसन्निधौ ।
जीविताशां समालम्ब्य भजमाना जगत्पतिम् ॥४८॥
अथैवं सा स्थिता पार्श्वे कश्चिन्नायाति मानवः ।
दृश्यते नैव रक्षाकृत् निराशा भजते हरिम् ॥४९॥

तावच्छुश्राव बालानां वाक्यानि भ्राष्ट्रिकान्तरात् ।
जीविताशावती सा च प्रसन्नमानसाऽभवत् ॥५०॥
वह्निश्चोपरिभागे चाऽम्बरीषोर्ध्वे प्रवर्धते ।
नीलहरितपिङ्गाभिर्ज्वालाभिश्च समन्ततः ॥५१॥
रक्तचित्राभिरुग्राभिः श्वेतमूलाभिरुल्वणः ।
अग्निर्निम्भ्राष्ट्रके व्याप्तोऽभवद्वै परितोऽभितः ॥५२॥
अन्तर्बहिस्तथा पार्श्वे मध्ये तलेऽपि सर्वशः ।
आमपात्राणि पक्वानि विगतं च दिवानिशम् ॥५३॥
क्षुधातृषायुता सापि मार्जारी बालकान्निजान् ।
शृणोति वदमानाँश्च रमतः क्षुधिताँस्तथा ॥५४॥
एकः प्राह कदा माता प्रागमिष्यति चाग्रज ।
क्षुधा मे बाधते चाति समाह्वय च मातरम् ॥५५॥
ज्येष्ठः प्राहाऽनलश्चास्ते मार्गान् रुद्ध्वा समन्ततः ।
कथं माता समागच्छेत् स्मर श्रीपरमेश्वरम् ॥५६॥
येन गर्भे कृता रक्षा सोऽत्र रक्षां करिष्यति ।
जीवयिष्यति भगवान् दत्वा भक्त्या हि भोजनम् ॥५७॥
अग्निं पश्योष्णमत्युग्रं ज्वालामालासमेधितम् ।
कथं माताऽत्र चागच्छेत् स्मर कृष्णनरायणम् ॥५८॥
कृपा भगवतश्चैषा जीवामो यद्विभावसौ ।
शीतले विवरे चात्र रक्षणं हरिणा कृतम् ॥५९॥
अग्निर्नात्र समायाति सत्यपीन्धनसञ्चये ।
पश्य ज्वाला न दहति धूम्रो मूर्छां करोति न ॥६०॥
एह्यागच्छ बहिर्यामो निर्वह्निसुषिराद् द्रुतम् ।
शीतो वह्निरयं भाति मे न दह्यति चानुज ॥६१॥
मातरं प्रति गच्छाम श्चेत्युक्त्वा निर्ययुर्द्रुतम् ।
वह्निमध्याद् विनिर्गत्याऽदग्धरोमाण एव ताम् ॥६२॥
मातरं प्रययुः सर्वे बाला भ्राष्ट्राद् विनिर्गताः ।
हर्षव्याप्ताः क्षुधाव्याप्ता अपिबन् मातृस्तपयः ॥६३॥
माता स्नेहं प्रचक्रे च लिलेहापि पुनः पुनः ।
मात्रे प्राहुस्तु ते भ्राष्ट्रं शीतलं रक्षणालयम् ॥६४॥
पय आपीय चाऽऽपृच्छ्य भ्राष्ट्रे प्रविश्य ते पुनः ।
भ्राष्ट्रिकायास्तले गत्वा विशश्रमुः सुखं मुदा ॥६५॥
योऽग्निश्चाऽऽमघटादीन्वै पक्वान् करोति दाहतः ।
योऽग्निश्चेन्धनघासादीन् दग्ध्वा भस्म करोत्यपि ॥६६॥
सोऽयमेव बिडाल्यास्तु बालकार्थे सुशीतलः ।
तदानीं दाहहीनो वै जातः कृष्णकृपावशात् ॥६७॥
मार्जारी चावलोक्यैतत् स्वयं च निर्भया सती ।
भ्राष्ट्रीतले समागन्तुं ययौ भ्राष्ट्रीमुखं प्रति ॥६८॥
तावद् वह्निस्तथा स्पृष्टोऽत्युष्णश्चात्यन्तदाहकः ।
आश्चर्यं परमं प्राप्ताऽस्मरत् कृष्णनरायणम् ॥६९॥
अहो देवस्य माहात्म्यं ह्येकमेव तु वस्तु यत् ।
सुखायैकस्य भवति दुःखायाऽन्यस्य तत् खलु ॥७०॥
सर्वेषां दाहकर्ताऽयं पक्षे दाहकरोऽभवत् ।
अवश्यं श्रीनरनारायणेन परमात्मना ॥७१॥
रक्षिता बालका मेऽत्र रक्ष्यन्ते च पुनः पुनः ।
इदं मे भक्तिमाहात्म्यं बालानां शरणागतिः ॥७२॥
यद्वा तद्वा भवेत्पुण्यं प्राग्भवीयं महत्तरम् ।
येन बाला रमन्ते मे वह्निमध्ये यथा गृहे ॥७३॥
मार्जारी कृष्णमाहात्म्यं ज्ञात्वा पूर्णतमं तदा ।
भेजे चातीव भावेन श्रीहरिं परमेश्वरम् ॥७४॥
क्षुधातृषाभिसन्तप्ता कृत्वा दृढं च निश्चयम् ।
मया नाऽन्यत्र गन्तव्यं हरिर्दास्यति भोजनम् ॥७५॥
मह्यं मम च बालेभ्यो रक्षकः रक्षयिष्यति ।
इत्येवं मन्यमाना सा जजाप ओं हरेऽच्युत ॥७६॥
कृष्णगोविन्दगोपालनारायणनरायण ।
श्वासोच्छ्वासं जजापैवं वाचा च मनसा हृदा ॥७७॥
निषसाद समीपे च भ्राष्ट्रिकाया हरिश्रिता ।
दिनद्वयं गतं तावन्नोत्तिष्ठति न याति च ॥७८॥
कृष्णो नारायणो देवो नरोत्तमो नरायणः ।
दृढं च निश्चयं ज्ञात्वा भक्तिं ज्ञात्वा परात्परम् ॥७९॥
शरणागतरक्षाकृत् कुंभकारस्वरूपधृक् ।
भाद्रश्राद्धे कृतं क्षीरपाकं च पूरिकास्तथा ॥८०॥
करे धृत्वा समायातो ददौ पितृभ्य एव सः ।
अम्बरे च ददौ काकपक्षिभ्यो धेनवे ददौ ॥८१॥
ददौ भूतेभ्य एवाऽसौ मार्जार्यै चापि सन्ददौ ।
तावत् तद्बालका वह्निभ्राष्ट्रतो बहिराययुः ॥८२॥
तेभ्यो दुग्धं श्राद्धपक्वमपाययत् सुखप्रदम् ।
पीत्वा ते विविशुस्तत्र भ्राष्ट्रीतले सुखावहे ॥८३॥
एवं कुंभकृता तेनाऽऽहुताः कुंभकृतोऽपरे ।
पश्यन्तु वह्निमध्ये वै जीवन्ति हि बिडालकाः ॥८४॥
इत्युक्त्वा दर्शयामास कुंभकृद्भ्यो हि बालकान् ।
भ्राष्ट्र्यधिपालकश्चापि ददर्शाश्चर्यमाप्तवान् ॥८५॥
आमपात्राणि पच्यन्ते नैव दह्यन्ति बालकाः ।
आश्चर्यं परमं त्वेतत् तत्र प्रकाशतां गतम् ॥८६॥
आययुर्जनसंघास्तु वीक्षितुं भ्राष्ट्रिकाऽर्भकान् ।
पुपूजुर्वह्निदेवं च बिडाल्यै भोजनं ददुः ॥८७॥

अर्भकेभ्यो ददुर्दुग्धं बालाश्चागत्य ते बहिः ।
पीत्वा प्रयान्ति आश्चर्यां ते सुषिरेण पुनः पुनः ॥८८॥
एवं विलोक्य लोकास्ते निश्चिक्युर्हरिरक्षिताः ।
जीवन्त्येते न दह्यन्ति दीनरक्षाकरो हि सः ॥८९॥
अथाऽधिपः कुंभस्रष्टा वह्निशान्त्युत्तरं स्वयम् ।
दूरीचकार भस्मादि कुंभान् पात्राणि सर्वशः ॥९०॥
तलं रिक्तं चकाराऽपि यत्र बाला व्यवस्थिताः ।
तत्र श्रीभगवत्पादचिह्ने संदृष्टवान् हि सः ॥९१॥
कुंभकारश्चकाराऽत्र भगवत्पादवेदिकाम् ।
तीर्थं मार्जाररक्षाख्यं प्रसिद्धं त्वभवद्धि तत् ॥९२॥
बालका रक्षिता येन नारायणेन योगिना ।
सोऽपि तत्रैव सर्वेषु मध्ये तदा विराजते ॥९३॥
कुंभकारस्वरूपेण नान्ये विदन्ति तं प्रभुम् ।
अथाऽयं भगवान् बद्रीनारायणः स्वयं तदा ॥९४॥
कृपया दर्शयामास रूपं निजं चतुर्भुजम् ।
कुंभकारा हरिं दृष्ट्वा पुपूजुः श्रद्धयाऽन्विताः ॥९५॥
मार्जारिका ददर्शैनं श्रीमन्नारायणं हरिम् ।
द्रागेव स्मरणं प्राप्ताः सनत्सुजातरूपिणः ॥९६॥
शोकं चकार विविधं बिडालीप्रसवादिजम् ।
क्वाऽहं सनत्सुजातोऽस्मि क्वाऽहं बिडालतां गतः ॥९७॥
अद्य नारायणः साक्षाच्छापनाशार्थमागतः ।
इत्येवं त्वाप्तवैराग्यो नेमे नारायणं हरिम् ॥९८॥
नारायणोऽपि तां तिर्यग्देहाद् विवृत्य सत्वरम् ।
सनत्कुमाररूपं च ददौ ब्रह्मसुतात्मकम् ॥९९॥
अर्भकाः कुंभकारैश्च रक्षिता वर्धितास्तथा ।
तद्वंशास्ते वनीया वै मार्जारा अभवँस्ततः ॥१००॥
अथ नारायणो देवस्तथा सनत्सुजातकः ।
ययतुश्च सरः स्नातुं कुंभकारा ययुस्ततः ॥१०१॥
तदा देवैः पुष्पवृष्टिर्मुक्ता व्योम्ना सरोवरे ।
नारायणेन वै साक्षाद् यत्र स्नातं ततः सुरैः ॥१०२॥
नारायणसरश्चेति तीर्थं प्रख्यापितं शुभम् ।
रक्षाकृन्मुक्तिकृच्चापि नारायणस्य दायकम् ॥१०३॥
सनत्सुजातसहितः स्नात्वा नारायणः प्रभुः ।
ययौ श्रीबदरीं हैमशैले विशालिकां निजाम् ॥१०४॥
ऋषिः सनत्सुजातश्च स्नात्वा त्रिपथगाजले ।
नत्वा नारायणं सत्यलोकं ययौ क्षणात्ततः ॥१०५॥
ग्रामो मार्जारपुरसंज्ञकोऽभवत् प्रजाकृतः ।
इत्येवं श्रीकृष्णनारायणो हेमायनर्षये ॥१०६॥
मार्जारपुत्ररक्षायाः कथामकथयत्तथा ।
विरराम क्षणं राधे प्रापुर्हर्षं महत्तरम् ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मार्जारिकाऽपत्यानां कुंभकारमहाभ्राष्ट्रीवह्नितो नारायणकृतरक्षणं मार्जारिकायाः शापमोक्षणं चेत्यादिनिरूपणनामा नवनवतितमोऽध्यायः ॥ ९९ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके! ऽनादिकृष्णनारायणः प्रभुः ।
प्रजगाद कथां चक्रवाक्या हेमायनर्षये ॥ १ ॥
सनत्सुजातशापेन नारायणसुतोर्वशी ।
नारायणसरस्तीरे चक्रवाकी तु याऽभवत् ॥ २ ॥
जातिस्मरा तु सा नित्यं तीर्थचिन्तां करोति हि ।
ग्रामाद्ग्रामान्तरं याति नित्यमुड्डीय दूरतः ॥ ३ ॥
मध्याह्ने तु कणान् भुंक्त्वा विश्रम्य च द्रुमान्तरे ।
उड्डीय दूरदेशं चाऽऽसायं याति विहायसा ॥ ४ ॥
एवं सा तीर्थकामा च वैराग्यवृत्तिमास्थिता ।
कच्छदेशं शनैस्त्यक्त्वाऽखातमुल्लंघ्य वेगतः ॥ ५ ॥
आनर्तदेशानायाता चमत्कारपुरं प्रति ।
स्नात्वा सरोवरे कृत्वा हाटकेश्वरदर्शनम् ॥ ६ ॥
सोमनाथं ययौ दृष्ट्वाऽक्षरक्षेत्रमुपाययौ ।
नत्वा श्रीकम्भरालक्ष्मीं बालकृष्णं प्रपूज्य च ॥ ७ ॥
सिद्धसरस्वतीं गत्वाऽर्बुदे पुष्करमाययौ ।
ब्रह्माणं सा प्रणम्यैव गंगाद्वारमुपागता ॥ ८ ॥
कुरुक्षेत्रं ततः कृत्वा प्रगण्डकीं नदीम् ।
शालग्रामान्नमस्कृत्य शालाद्रिं प्रणिपत्य च ॥ ९ ॥
दर्शनार्थं पशुपतेरुड्डीय याति चाम्बरे ।
हिमाद्रेः सन्निधौ तस्योपत्यकोर्ध्वे तदाऽम्बरे ॥१०॥
उड्डयन्त्या भुवो भागे नीपालयप्रदेशके ।
अधोदृष्ट्या तया दृष्टा कन्यैका गण्डकीतटे ॥११॥
चन्द्राननाऽतिगौरी च सूर्यवद्भासुराङ्गिनी ।
अष्टवर्षाऽपि कमलातुल्या तनुश्रियाऽभितः ॥१२॥
स्थलपद्माभकान्त्याढ्या पद्मपत्रायतेक्षणा ।
सुगन्धव्याप्तदेहा च दिव्या नारायणी यथा ॥१३॥
हृदये श्रीपतिं कान्तं जिह्वायां हरये नमः ।
कट्यां जलधरं धृत्वा पश्यतीवाऽभितः स्थिता ॥१४॥
मणिकंकणहस्ता च मणिनद्धसुकण्ठिका ।
रशनाव्याप्तकटिका शृंखलाढ्यप्रकोष्ठका ॥१५॥

नुपूराढ्यचरणा च नथिकायुक्तनासिका ।
कुण्डलाढ्यसुकर्णा च वह्नयाभवस्त्रमण्डिता ॥१६॥
कुन्दचम्पकसौवर्णकान्त्याढ्या बहुशोभना ।
कृष्णनारायणविष्णो परब्रह्म पते हरे ॥१७॥
पुरुषोत्तमभगवन् कदा दास्यसि दर्शनम् ।
इत्येवं निर्जने शब्दं व्याहरन्ती विलोकिता ॥१८॥
चक्रवाकी तु तां ज्ञात्वा विश्वासपात्ररूपिणीम् ।
अवाततार वै व्योम्नः पार्श्वस्थे श्रीद्रुमे ततः ॥१९॥
तस्या आकर्षणार्थं च जगौ गिरा सुमिष्टया ।
यथाऽप्सरसा गीतं वै समाकर्ण्य तु कन्यका ॥२०॥
व्यलोकयद् द्रुमे स्वल्पां पक्षिणीं गीतिकोविदाम् ।
गीतिकायामभूद्भावः कदा कृष्णो मिलिष्यति ॥२१॥
अहं नारायणपुत्री यदा प्राप्स्यामि माधवम् ।
तदा तेऽपि महाकृष्णो मिलिष्यतीति मा शुचः ॥२२॥
यथाऽहं वै वियुक्ताऽस्मि तथा त्वं दृश्यसे सखि ।
का त्वं कन्यास्वरूपाऽसि मानवी प्राक्स्थितिं वद ॥२३॥
इत्येवं गायने भावं श्रुत्वा कन्याऽतिहर्षिता ।
उवाच काऽसि चेटि त्वं पक्षिदेहवती वद ॥२४॥
आगच्छ देववाण्या मां विबोधयसि सुव्रते ।
कृष्णो वा कृष्णदूती वा कृष्णा वा वर्तसेऽत्र किम् ॥२५॥
एह्यत्र तिष्ठ मे पार्श्वे शंस मे मंगलं शुभम् ।
शृणोमि तव मांगल्यं हरिः कष्टं हरिष्यति ॥२६॥
इत्युक्ता सा भुवं तस्याः सन्निधौ न्यपतद् द्रुमात् ।
अपश्यत् पादयोः सौम्यं रूपं श्रीपादयोरिव ॥२७॥
अनमत् पादयोश्चापि पपौ वारि तयाऽर्पितम् ।
निषसादाऽन्तिके तस्या आसीनायाः सरित्तटे ॥२८॥
पृष्टा परिचयार्थं सा जगाद शापजं फलम् ।
उर्वशीति हरेः पुत्री सनत्सुजातशापतः ॥२९॥
अप्सरोऽपि विवृताऽस्मि चक्रवाकी भवामि ह ।
यदा नारायणस्यैव दर्शनं मे भविष्यति ॥३०॥
तदा शापविनिर्मुक्ता भविष्याम्युर्वशी पुनः ।
इत्येवं कथयित्वा सा चेटी मुहुर्हि कन्यकाम् ॥३१॥
विलोकयति भावेन श्रीसमां चिह्नशोभिताम् ।
चक्रवाक्या हृदयेऽस्याः कृष्णचिह्नं व्यलोकयत् ॥३२॥
चरणोर्ध्वतिलकाख्यपुण्ड्ररेखां व्यलोकयत् ।
जघने बाणरेखां च ललाटे मुकुटाकृतिम् ॥३३॥
गण्डे तु दक्षिणे भाले शोणबिन्दुं व्यलोकयत् ।
उरांसे विष्णुरेखां सा वामबाहौ गदां तथा ॥३४॥
वामसक्थ्नि पादुकां च वैजयन्तीं हृदि स्थिताम् ।
करे तु कमलं रम्यं हस्तिचिह्नं व्यलोकयत् ॥३५॥
दक्षे पादे शंखचिह्नं नौकाचिह्नं विमानकम् ।
गदां मत्स्यं शिखरं च झषं ताम्बूलवल्लिकाम् ॥३६॥
वामे पादे यवरेखां प्रासादं छत्रमित्यपि ।
ऊर्ध्वरेखां कमलं च ध्वजांऽकुशौ घटं तथा ॥३७॥
कुमुदं श्रीफलं चापि स्थलपद्मं विधुं तथा ।
दशचक्राणि पूर्णानि स्वर्णरेखायुताऽङ्गुलीः ॥३८॥
ललाटे पौरटं हारं स्वर्णरेखां च बिन्दुकम् ।
चिबुके बिन्दुकं हस्तरेखां दक्षस्तनोपरि ॥३९॥
चक्रं वामस्तने कण्ठे हारं वक्षसि कानकम् ।
ध्वजं मत्स्यं च वंशीं च स्वस्तिकं दक्षिणे करे ॥४०॥
धनुर्मत्स्यं कलशं च तथा व्यलोकयत् करे ।
प्राकारं तोरणं चापि दक्षहस्ते व्यलोकयत् ॥४१॥
फणायां लांगलचिह्नं ददर्श सुमनोहरम् ।
पदेऽश्वं च गजं वृक्षं यूपं बाणं च तोमरम् ॥४२॥
हस्ते सुमालिकारेखां दीपरेखां च चामरम् ।
शैलं च कुण्डलं वेदीं चक्रं व्यदर्शयत्तु सा ॥४३॥
आश्चर्यं परमं प्रापत् मत्वा श्रीं पारमेश्वरीम् ।
नान्यां त्वेतादृशीं प्राद्दश्यं विना श्रीं नरायणीयम् ॥४४॥
नैतादृशानि चिह्नानि सर्वाणि कमलां विना ।
इति निश्चित्य चापृच्छत् तस्या नाम कुलादि च ॥४५॥
श्रुत्वा जगाद कन्या तां चक्रवाकीं यथार्थतः ।
पुत्रि ! किं ते वदाम्यत्र विधिर्वै बलवान् सदा ॥४६॥
अहं नारायणपत्नी तव माता भवामि वै ।
नाम्ना लक्ष्मीरनादिश्रीकृष्णप्रियाऽस्मि शाश्वती ॥४७॥
अर्धांगना महावैकुण्ठाख्ये वसामि सर्वदा ।
नाऽहं नारायणं त्यक्त्वा कदाचिद् यामि दूरतः ॥४८॥
नारायणस्तु मां त्यक्त्वा भक्तार्थे याति दूरतः ।
यद्यहं विघ्नरूपा स्यां भक्तभक्तौ हरेः पुरः ॥४९॥
भक्तार्थे तव पित्राऽहं त्यक्ता वैकुण्ठधामतः ।
वत्से श्रीभगवान् भक्तप्रियो वैकुण्ठमुत्तमम् ॥५०॥
त्यक्त्वा भक्ताऽनुगो भूत्वा ब्रह्माण्डेऽत्र समाययौ ।
अहं गवेषयितुं तं समायाताऽस्मि भूतले ॥५१॥
अप्रकाशितसामर्थ्याऽभवं मानवरूपिणी ।
पिता मे शिवराजेति शंकरो गण्डकीतटे ॥५२॥
स्वेच्छामानवरूपोऽस्ति कैलासाऽधिपतिर्हरः ।
महाभागवतः श्रीगोपालभक्तो विरागवान् ॥५३॥

दक्षपुत्री सती तत्स्त्रीः जानकीति हरप्रिया ।
सापि स्वेच्छामानवी च शंभोर्गृहे विराजते ॥५४॥
पितरौ तौ मया क्लृप्तौ मानसौ श्रेष्ठवैष्णवौ ।
गण्डकीतीरसंस्थं वै कैलासधामनामकम् ॥५५॥
पत्तनं वर्तते चेदं शैलद्रोण्यां महत्तमम् ।
अत्र मानवरूपेण विराजेते सतीशिवौ ॥५६॥
कैलाससदृशोद्याने निजराज्यस्य पत्तने ।
क्षात्रधर्मं समाश्रित्य लोकपालनहेतवे ॥५७॥
लोकाऽविज्ञाततत्त्वौ तौ सर्वविज्ञातराजजौ ।
यद्गेहे वसति श्रीमत् कृष्णनारायणो वशे ॥५८॥
प्रातर्नित्यं हरिस्तत्र समायात्यर्चनगृहे ।
सतीशंभ्वर्पितां पूजां गृहीत्वा याति लीनताम् ॥५९॥
तदहं श्रीकृष्णनारायणार्हणार्थमेव तु ।
उद्यानात् पितृदेवार्थं जलमाहर्तुमागता ॥६०॥
दिष्टात् पुत्रि दृष्टवती त्वां वियुक्तां चिरादिह ।
आगच्छ मम गेहेऽत्र वसाऽत्र मम पञ्जरे ॥६१॥
पक्षिधर्मेण वर्तेथा यथा जानन्ति नैव ते ।
सर्वथा पालयिष्येहं प्राप्ते काले प्रिये सुते ॥६२॥
नारायणेच्छया शीघ्रं शापमोक्षो भविष्यति ।
अत्र पार्श्वे न दूराणि सन्ति वनान्यनेकशः ॥६३॥
विहरिष्याव एवात्र पश्यामश्च नरायणम् ।
नात्र भयं हरेर्योगात् शिवयोगात्तथा क्वचित् ॥६४॥
मम योगात्तथा पुत्रि! सतीयोगाच्च निर्भयम् ।
राज्यं कैलासधामाख्यं नगरं चापि निर्भयम् ॥६५॥
समञ्जसं च कुशलं वर्तते सर्वमेव तु ।
नारायणो पिता तेऽत्र मां जानाति तथापि सः ॥६६॥
अज्ञ इव सदा चास्ते न बोधयति शंभवे ।
स एव वत्सलः प्राप्ते काले चोद्धारयिष्यति ॥६७॥
यद्वा गुप्तं करिष्यामस्तपश्चोद्धारहेतवे ।
तदा निजप्रसादाख्यं तपःफलं प्रदास्यति ॥६८॥
श्रुत्वेत्थं जानकीपुत्र्या वचः शिवसुतोदितम् ।
नारायणसुता चक्रवाक्युर्वशी ह्युवाच ताम् ॥६९॥
मातस्ते दर्शनादद्य मम दुःखं गतं किल ।
यस्या कस्यामवस्थायां मातुरंको हि शान्तिदः ॥७०॥
दिष्टादद्य मया प्राप्ता दृष्टा पूज्यतमाऽत्र माँ ।
यथा वदसि मातर्मे करोमि तत्तथैव च ॥७१॥
मातुर्वचनं वेदोऽस्ति धर्मो दानं तपो व्रतम् ।
सर्वे मातुर्वचने वै कन्यायाः सफलं मतम् ॥७२॥
दुःखहा त्वं मम मातस्तथाऽहं ते च पुत्रिका ।
कृष्णवियोगनाशार्थं यतिष्ये तपआदिभिः ॥७३॥
मातुः सेवा हि कन्यायाः सर्वश्रेष्ठः परो वृषः ।
सर्वस्वं जननी पुत्र्याः पूर्वं विवाहनात्ततः ॥७४॥
आजीवनं तु जननी पुत्र्याः सौख्यं समिच्छति ।
न च पुत्रीसमो जीवो मातुरन्यो हि विद्यते ॥७५॥
शतजन्मकृतात्पुण्यान्माता पुत्रीमती भवेत् ।
पुत्री सहस्रजन्मोत्थपुण्यात् स्यान्मातृसेविका ॥७६॥
मातुरेव धनं पुत्री पितुर्धनं तु पुत्रकः ।
पितुः पुत्रः सहायः स्यान्मातुः पुत्री सहायिनी ॥७७॥
पुत्रे सत्यपि वन्ध्येव माता पुत्रीं विना मता ।
स्नाने पाके भोजने च गृहे वाटे दिवानिशम् ॥७८॥
शयने च प्रवासे चैकान्ते पुत्री सहायिनी ।
यथा वत्सायुता धेनुः प्रियतराऽतिं जायते ॥७९॥
तथा पुत्रीयुता माता मान्या लोकेऽधिका मता ।
मात्रवलम्बनं पुत्री माता पुत्र्यवलम्बनम् ॥८०॥
तस्मात्पुत्र्या सदा माता श्रेयःप्रदा प्रसेव्यते ।
मातृतीर्थं परं तीर्थं माता साक्षात् सरस्वती ॥८१॥
माता लक्ष्मीः सदा पोष्ट्री तारयित्री च पालिका ।
परार्थामपि स्वां पुत्रीं शिक्षयत्येव सत्कलाः ॥८२॥
आत्मवद् रक्षतीष्टं च सर्वं ददाति नित्यदा ।
कष्टे कष्टं सुखे सौख्यं माता विन्दति नेतरा ॥८३॥
भुक्त्वा कष्टं सुतां मत्वा चाऽबलां बलदा तु या ।
सदाऽऽश्रयं ददात्येव माता नान्या तथाऽपरा ॥८४॥
माता बोध्या तु सावित्री माता स्वाहा स्वधा यथा ।
माता ब्राह्मी महाशक्तिर्माता सर्वगरीयसी ॥८५॥
मातृवाक्यं सदा श्रेयः शकुनं चोत्तमं मतम् ।
मातृगालीघृतनालीआशिर्वादात्मिका सदा ॥८६॥
मातृभूमिर्मातृभाषा मातृदुग्धं प्रशस्यते ।
माता त्रिवेणिकाभूश्च तारिणी सा प्रशस्यते ॥८७॥
मातृदुग्धं मता गंगा मातुरंको यमी नदी ।
माता तीर्थत्रयं प्रोक्तं मातृवाक्यं सरस्वती ॥८८॥
मातुः पादजलं पुण्यं पावनं पापनाशनम् ।
मातुः स्पर्शोऽमृतस्पर्शः पोषको भोजनं विना ॥८९॥
मातुरुच्छिष्टभोज्यं च परमेशप्रसादवत् ।
मातृ रक्ताणवः कन्या तस्मान्माता प्रशस्यते ॥९०॥
नवमास्सु मातृदेहात् पुत्रीदेहः प्रजायते ।
तस्माद् ब्रह्मसमा माता सृष्टिप्रवाहकारणम् ॥९१॥

तद्दर्शनं चाधिकं वै फलदं ब्रह्मदर्शनात् ।
तत्स्मरणं चाधिकं वै सुखदं ब्रह्मणः स्मृतेः ॥९२॥
तद्दास्यं सेवनं तस्या आज्ञापालनमित्यपि ।
वेदाध्ययनतः श्रेष्ठं ब्रह्मलोकप्रदं मतम् ॥९३॥
यया पुत्र्या निजा माता तोषिता सेवनादिभिः ।
मनसा कर्मणा वाचाऽनुवृत्त्या रञ्जिता तथा ॥९४॥
तस्या नास्ति भयं मायाकालकर्मयमादिजम् ।
नाऽकस्माच्च भयं तस्या रोगादिजं भयं न च ॥९५॥
न त्रेधातापभीतिश्च न चौरादिभयं तथा ।
नापि विघ्नभयं तस्या न प्रेतादिभयं तथा ॥९६॥
किमत्र बहुनोक्तेन जन्ममृत्युभयं न च ।
पितुर्दशगुणी माता गर्भजन्मप्रपोषणैः ॥९७॥
गुरुर्माता हरिर्माता जननी ब्रह्मधाम च ।
स्वर्गं माता गृहं माता माता वै शाश्वतं पदम् ॥९८॥
पशवः पक्षिणश्चापि बाला वा वृद्धतांगताः ।
युवानश्चापि कष्टातौ माँ माँ माँ सम्वदन्ति ते ॥९९॥
मातृस्नेहो ब्रह्मस्नेहस्तस्मान्मुक्तिर्न वै परा ।
स्वप्ने पुत्रीं समालोक्य मातुर्हर्षः प्रजायते ॥१००॥
अद्य पुत्री मया दृष्टेत्युक्त्वा नित्यं स्मरत्यपि ।
मातुस्तु तारिणी पुत्री सर्वकार्यकरी यदि ॥१०१॥
मातरं चाऽसेवमाना भाग्यहीना भवेत् सदा ।
मातुर्हृदयक्लेशेन पुत्र्या भाग्यं विनश्यति ॥१०२॥
गृहकार्यं जलस्याऽप्यानयनं चान्नरन्धनम् ।
निष्कासनं कचरादेः पात्राणां शोधनं तथा ॥१०३॥
शय्यादीनामुन्नयनं वस्त्राणां क्षालनं तथा ।
अनुजानां रञ्जनं च गृहशुद्ध्यादिरक्षणम् ॥१०४॥
कणादीनां संस्करणं वेषवारादिशोधनम् ।
गृहवस्तुप्ररक्षा चोचिता सेवा कुटुम्बिनाम् ॥१०५॥
देवपूजादिकरणं दधितक्रादिमाथनम् ।
गोपश्चादिप्रसेवा च मातुर्देहस्य मर्दनम् ॥१०६॥
केशप्रसाधनं मातुः पादसंवाहनादिकम् ।
एवमादिक्रियाकाण्डं मातृब्रह्मणि पुत्रिका ॥१०७॥
कृत्वा कृत्वाऽर्पयेद् भावयुक्ता श्रद्धावती सुता ।
सा मातृव्रतपुण्येन धर्मार्थोऽनंगमुक्तिषु ॥१०८॥
विजयं लभते पुत्री चाभ्युदयं च शाश्वतम् ।
नारायणीव लोके तु जायते ब्रह्मकोटिका ॥१०९॥
किं बहुनाऽत्र वक्तव्यं यया माता निषेविता ।
सेवितं शाश्वतं ब्रह्म तया प्राप्तं दिवं भुवि ॥११०॥
इत्येवं राधिके! पुत्री चक्रवाकी स्वमातरम् ।
उवाच दुःखहालक्ष्मीर्माहात्म्यज्ञाऽतिभावुकी ॥१११॥
अनादिश्रीकृष्णनारायणो हेमायनर्षये ।
प्राह चैतां कथां तत्र हेमशालाख्यपर्वते ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चक्रवाक्यास्तीर्थयात्रायां गण्डकीतीरे स्वमातुर्लक्ष्म्या मेलनं मातृमहिमकथनं चेतिनिरूपणनामा शततमोऽध्यायः ॥ १०० ॥

**श्रीकृष्ण उवाच—**

राधिके! चक्रवाकी सा पुनः पप्रच्छ मातरम् ।
किमर्थं हरिणा त्यक्ता भवतीति वदाऽत्र मे ॥ १ ॥
इति पृष्टा जननी सा लक्ष्मीरुवाच पुत्रिकाम् ।
हेमशालायनाय श्रीकृष्णः प्राह कथामृतम् ॥ २ ॥
शृणु त्वं ते कथयामि भक्तार्थं भगवानपि ।
यथा त्यजति लक्ष्मीं च तत्राऽन्यस्य तु का कथा ॥ ३ ॥
महावैकुण्ठलोके श्रीनारायणपरेश्वरः ।
सेव्यते सततं भक्त्या महावैकुण्ठवासिभिः ॥ ४ ॥
यथा लक्ष्म्या तथा सर्वैस्ततोऽप्यधिकभावनैः ।
कृष्णानाम्नी सखी लक्ष्म्या लक्ष्म्यधिका च सेवने ॥ ५ ॥
स्वगृहे सततं नारायणं रक्षति भामिनी ।
स्नानं सुगन्धलेपैश्च सा स्वयं कुरुते प्रिया ॥ ६ ॥
अंगानां मर्दनैः सम्यक् क्षौरकर्मादिभिः सह ।
वस्त्रालंकारभूषाद्यैः शृंगारयति सा सखी ॥ ७ ॥
पूजाभोजनपानाद्यैः शय्योपस्करणादिभिः ।
हसनैर्हास्यभेदैश्च सेवाभेदैर्निरन्तरम् ॥ ८ ॥
प्रेमभेदैश्च बहुभिः सर्वार्पणैर्दिवानिशम् ।
क्षणं वियुक्ता नैवाऽऽस्ते स्वदेहमिव कृष्णिका ॥ ९ ॥
त्र्यवस्थायां सदा कृष्णकृष्ण चेति रटत्यपि ।
त्रिदेहैः सेवते नारायणं कृष्णं पतिं प्रियम् ॥१०॥
एवं तस्या भ्रातरौ द्वौ पार्षदौ जयचन्द्रकौ ।
सर्वं वै कर्मकाण्डं स्वं चार्पयामासतुर्हरौ ॥११॥
महाभागवतौ नित्यं नारायणपरायणौ ।
हरौ सर्वसुखौ कृष्णं विना क्षणविवर्जितौ ॥१२॥
तापसौ च जपमालापरायणौ हरिप्रियौ ।
इन्द्रियाऽन्तःकरणानां कृष्णे वृत्तिसमन्वितौ ॥१३॥
नवधा भक्तिसम्पन्नौ ध्यानयोगपरायणौ ।
सर्वस्वार्पणभावौ तौ भजेते परमेश्वरम् ॥१४॥

कृष्णस्तत्रापि वसति यत्र तद्भ्रातृसंस्थितिः ।
साक्षात् कृष्णो निवसति किशोरस्तद्गृहे सदा ॥१५॥
धेनुपालोऽपि गोपेशो गोपाल इव सर्वदा ।
कृष्णनारायणसेवामग्नोऽभवत् पिता तयोः ॥१६॥
आत्मसमर्पणैः कृष्णमूर्त्यात्मको यथा तथा ।
अवर्तत हरौ प्रेम्णा सर्वसेवापरायणः ॥१७॥
अथैकदा ते चत्वारो लक्ष्मीनारायणाय वै ।
उपदा विविधा दातुमाययुर्निजमन्दिरम् ॥१८॥

अदृश्यरूपतो नारायणश्चायाति तैः सह ।
तदा दिव्ये महामहाप्रासादे चान्तरगृहे ॥१९॥
शयने श्रीमहालक्ष्म्या सेवितः श्रीनरायणः ।
प्रेमसेवां महालक्ष्म्या गृह्णन्नास्तेऽतितन्मयः ॥२०॥
महालक्ष्मीः प्रेममग्ना नारायणांगयोगिनी ।
परब्रह्ममहानन्दवार्धिमग्नाऽभवत् प्रिया ॥२१॥
चिरसेवाभिलाषा सा चिरानन्देच्छया हरेः ।
वियोगेच्छारहिता श्रीहर्याश्लेषयुताऽभवत् ॥२२॥

एतस्मिन् समये ते तु चत्वारोऽपि सुसेविकाः ।
उपदाः संगृहीत्वैव द्वारमागत्य सत्वरम् ॥२३॥
कृष्णनारायण विष्णो परमेश्वरकेशव ।
हृषीकेश हृदयस्थ भक्तेभ्यो देहि दर्शनम् ॥२४॥
इत्येवं चार्थनाशब्दं चक्रुर्भक्तिसमन्वितम् ।
भगवाँस्तं भक्तशब्दं श्रुत्वा शय्यां विहाय तु ॥२५॥
उत्थाय शीघ्रं द्वारस्थं पालं त्वाज्ञापयद् द्रुतम् ।
प्रवेशार्थं, ततश्चापि स्वां त्यक्त्वाऽतिसुखप्लुताम् ॥२६॥

गतं पतिं न सोवाप किञ्चिद् दासी पतिव्रता ।
साक्षान्नारायणानन्दवियोगार्ताऽपि सा प्रिया ॥२७॥
प्रतीक्षते हरिं शीघ्रं समायात् केशवश्च माम् ।
रामयेतेति चन्ताढ्या शयने सुस्थिराऽभवत् ॥२८॥
तावद् भक्तान् समादाय कान्तो नारायणः प्रभुः ।
प्रविवेश गृहान्तःस्थं सिंहासनं युतस्तु तैः ॥२९॥
समाजुहाव लक्ष्मीं स्वां नारायणः शुभासने ।
लक्ष्मीः प्रसन्नवदना नारायणाभिशब्दिता ॥३०॥

समाययौ तदा तूर्णं सिंहासने हरिं प्रति ।
साकं श्रीहरिणा लक्ष्मीरुपविष्टाऽऽसनेऽभवत् ॥३१॥
चत्वारस्तेऽति सद्भक्त्याऽर्पयामासुस्तदाऽऽहृताः ।
विविधा उपदाः सर्वा भोज्यपानावलेहनम् ॥३२॥
शृंगारवस्तुसामग्रीर्वस्त्रभूषासुमालिकाः ।
अनेकहारहारालीः स्थालीर्मौक्तिकसंभृताः ॥३३॥

फलपुष्पसुगन्धाढ्यान् पदार्थान् सद्रसान्वितान् ।
लक्ष्मीशृंगारयोग्यांश्च ददुर्नारायणाय ते ॥३४॥
लक्ष्म्यै ददुश्च ते तत्र पुपूजुश्चातिभक्तितः ।
तस्थुः स्तुतिं प्रचक्रुश्च ध्यानमग्नास्तदाऽऽभवन् ॥३५॥
पूजां कृत्वोपदा दत्वा नोत्तस्थुश्च यदा चिरम् ।
लक्ष्मीः रोषं गता विघ्नरूपाणामुपरि द्रुतम् ॥३६॥
अप्रकाशं च रोषं सा प्रकाशयति नो बहिः ।
नैव वक्तुं समर्थाऽपि हरेरिच्छां विना तु तान् ॥३७॥

नोत्थितुं च समर्थाऽस्ति नारायणं विहाय तु ।
सरोषा चिन्तयत्येव कदा यास्यन्ति भक्तकाः ॥३८॥
पुनर्नारायणं प्राप्स्ये कदा तु शयने सुखम् ।
ध्यानमग्नास्तु ते भक्ता ध्याने बद्ध्वा हरिं पुरः ॥३९॥
निषेदुस्तु चिरं तत्र तावद्वै श्रीसतीहरौ ।
आययतुश्च कैलासाद् वीक्षितुं श्रीं नरायणम् ॥४०॥
एकं विघ्नं गतं नैव तावद् द्वितीयमागतम् ।
मत्वैवं श्रीः कृष्णपार्श्वे ह्यवशा संस्थिता स्थिरा ॥४१॥

शंकरोऽपि तथा भक्तोत्तमो भागवतो महान् ।
सती चापि महाभक्ता कस्तावुल्लंघयेत्तदा ॥४२॥
नारायणः स्वयं सिंहासनादुत्थाय सत्वरम् ।
समाश्लिष्य च शंभुं तं स्वागतं त्वाचरद्धरिः ॥४३॥
सत्याश्चापि स्वागतं तु लक्ष्मीराचरदादरात् ।
सतीशंभू पूजनादि चक्रतुः श्रीहरेस्तदा ॥४४॥
सतीदत्तासने रम्ये निषसाद श्रियाः पुरः ।
शंभुर्भागवतो भक्तो नृत्यं चकार नैकधा ॥४५॥

चिरं ननर्त प्रेम्णैव श्रीहरेः सन्निधौ हरः ।
हरिस्तत्राऽऽकृष्टचित्तोऽभवन्नाऽन्यदवेदिषत् ॥४६॥
लक्ष्मीर्नारायणस्पर्शानन्दप्रतीक्षयाऽऽकुला ।
नृत्यान्तं निर्जनभावं द्रुतं समभिवाञ्छति ॥४७॥
भक्तवश्यो हरिर्नैव लक्ष्मीं स्मरति पश्यति ।
भक्तलग्नमना भक्तान् गन्तुं बहिर्न शास्ति च ॥४८॥
तदा धैर्यं परित्यज्य वृथासमयहारकान् ।
शंकरं च सतीं धेनुपालं जयं च चन्द्रकम् ॥४९॥

कृष्णां सखीं शशापैव भवन्तु मानवा इति ।
यत्र विघ्नफलं वश्च भविष्यति न संशयः ॥५०॥
अकालताण्डवे मग्ना अकालध्यानयोगिनः ।
कालापेक्षां विहायैव यतो मे विघ्नकारिणः ॥५१॥
सविघ्ना मानवे लोके भवन्तु देहधारिणः ।
इत्युक्त्वा श्रीहरिं चापि गृहीत्वा च करे मुहुः ॥५२॥

आहाऽऽयातु गृहे कृष्ण विश्रामं कुरु वै क्षणम् ।
ईदृशा भक्तव्रातास्ते नाथ कतिपया इह ॥५३॥
वर्तन्ते तु विना कालम् आयान्ति स्नेहिला मुहुः ।
प्रेमला भक्तकास्ते वै जानन्त्येव न मानसम् ॥५४॥
समागच्छ हरे चाऽन्तःशयने शान्तिमावह ।
चिरासनस्थितस्याऽत्र श्रमस्ते विपुलो भवेत् ॥५५॥
इत्येवमाग्रहं चक्रे नेतुं नारायणं रमा ।
शंकराद्यास्तु ते भक्ताः श्रुत्वाऽऽश्चर्यं परं गताः ॥५६॥
लक्ष्म्याः शापेन नम्रास्या निस्तेजस्का इवाऽभवन् ।
नत्वा नारायणं लक्ष्मीं क्लिष्टां ज्ञात्वा तु सत्वरम् ॥५७॥
निर्ययुस्त्वालयाच्छीघ्रं श्रीहरेरन्तिकात्ततः ।
निपेतुर्मानवे लोके पश्यतां द्वाररक्षिणाम् ॥५८॥
वैकुण्ठवासिनां तत्र हाहाकारो महानभूत् ।
सर्वत्र प्रासरद्वार्ता वैकुण्ठे च प्रतिस्थलम् ॥५९॥
लक्ष्म्याः शापेन कृष्णाद्याश्चत्वारश्च सतीहरौ ।
निपेतुर्मानवे लोके ह्यकालज्ञा जडा यथा ॥६०॥
तस्मात् तेजस्विनां नेयः क्षणो वृथा न वै क्वचित् ।
अकाले नैव गन्तव्यं महतां सन्निधौ क्वचित् ॥६१॥
विघ्नं नैवाऽपि कर्तव्यं दम्पत्योश्चैकले स्थले ।
सुखहा दुःखभोक्ता स्यान्महान् वाऽपीश्वरोऽथवा ॥६२॥
विघ्नकृद् विघ्नमृच्छेद्वै दम्पतीविघ्नकृत् किल ।
हाहाकारोऽभवच्चैशलोकेषु मानवेष्वपि ॥६३॥
शंकरो शिवराजेतिनाम्ना राजाऽभवच्छुभः ।
कैलासधामनगरे हिमाद्रौ गण्डकीतटे ॥६४॥
कृष्णसिंहगृहे पुत्रो मानसो देवयोनिवत् ।
महादिव्यो महैश्वर्ययुतोऽर्जुनप्रभः प्रभुः ॥६५॥
सती च मानवी जाता षण्माण्डव्यपुरेशितुः ।
पुत्री सा जानकी देवी नाम्ना गुणैः शिवासमा ॥६६॥
जातिस्मरौ सतीशम्भू विवर्धाते तु देववत् ।
वागर्थाविव संपृक्तौ विवाहविधिना पुनः ॥६७॥
सुयोग्यसमये संयोजितौ कैलासवासिनौ ।
एवं तौ गण्डकीमूले हिमशैले नदीतटे ॥६८॥
स्वराज्ये कैलासधाम्नि नगरे राज्यमाप्नुतः ।
अथकृष्णा सखी धेनुपालश्चन्द्रो जयस्तथा ॥६९॥
निपेतुर्हिमशैले ते कैलासधामपत्तने ।
धेनुपालोऽभवद् भ्राता शिवराजस्य चाऽनुजः ॥७०॥
कृष्णाऽभवत् सुता तस्य शिवराजस्य सद्गुणा ।
चन्द्रादित्योऽनुजस्तस्याऽनुजो जयकुमारकः ॥७१॥
कुटुम्बं त्वेकमेवाऽभूत् समशापप्रसंगतः ।
सर्वे भक्ता ब्रह्मनिष्ठाः सदा कृष्णपरायणाः ॥७२॥
ध्यानयोगतपोनिष्ठा धर्मज्ञानविरागिणः ।
सततं ब्रह्मयज्ञाश्च ब्रह्मभावा अमायिनः ॥७३॥
सर्वचिह्नैः समायुक्ता मानवैरविनिश्चिताः ।
प्रजापालनधर्माश्च महाभागवताः सदा ॥७४॥
सततं कृष्णसेवायां वैकुण्ठे इव तत्पराः ।
नीपालयप्रदेशेषु हिमशैलेषु गोचराः ॥७५॥
वर्तन्ते दिव्यरूपैश्च निसर्गयोगसिद्धिभिः ।
वर्तन्ते मानवै रूपैः शापप्राप्तक्रियादिभिः ॥७६॥
शापाद् यदा निपेतुस्ते तदा तद्धृदये हरिः ।
दुःख्यभूद् भक्तदुःखेन तथापि श्रीं प्रति प्रभुः ॥७७॥
वक्तुं शशाक नैवाऽन्यत् सत्त्वसंज्ञो यतो हरिः ।
सर्वं सेहे भक्तदुःखं मौनं जग्राह वै क्षणम् ॥७८॥
शंकराद्याः समर्थाश्च शप्तुं लक्ष्मीं हरेः पुरः ।
तथापि दासभक्तास्ते न शेपुस्तां रमां तदा ॥७९॥
माता या जगतामस्ति सा हरिस्पर्शमन्तरा ।
विघ्नरूपान् शशापाऽस्मान् योग्यं तन्मेनिरेऽनुगाः ॥८०॥
एवं मत्वा हरेरिच्छामिष्टदेवेन निश्चिताम् ।
जगृहुः सुखदां मत्वा दण्डरूपामपि प्रभोः ॥८१॥
विश्वासः श्रीहरौ तेषां वरदानं हरेर्वचः ।
न्यासो हरौ च कार्पण्यं नारायणे परेश्वरे ॥८२॥
सति वैभवयोगेऽप्यैश्वर्ययोगेऽपि सर्वथा ।
कैंकर्यं तस्य वै तेषामासीद् दिवानिशं हरौ ॥८३॥
मतिः स्थिरा महापत्सु भक्तानामेव वर्तते ।
तेषां चैषा मतिः सुस्थाऽभवच्छ्रीपरमात्मनि ॥८४॥
सर्वनाशेऽपि भगवान् मा दूरं यातु मानसात् ।
आनुकूल्यं हरेर्यत्तु तदानुकूल्यमेव तु ॥८५॥
प्रातिकूल्यं हरेर्यत्तु तत्प्रातिकूल्यमेव तु ।
दासधर्मः प्रपन्नानामयं यतोऽन्यथा न वै ॥८६॥
इति मत्वा च शंभ्वाद्या असहन्त श्रिया वचः ।
सती या वैष्णवी भक्ता रुद्राणी प्रलयंकरी ॥८७॥
कथं सहेत शापं सा यदि भक्ता न वै हरेः ।
जानाति मातरं लक्ष्मीं यतो गुरोः प्रिया हि सा ॥८८॥
गुरुपत्नीं सुवन्देत न रोषयेत् कदाचन ।
गुरोः पत्नी यदाज्ञां च करोति त्वविचारिताम् ॥८९॥
सापि पाल्या यथाशक्ति नकारो वाच्य एव न ।
अत्र नारायणः कृष्णो भगवान् स्वामिवल्लभः ॥९०॥

गुरुः श्रीवेदवक्ताऽस्ति नावमान्या हि तत्प्रिया ।
सती जानाति सर्वं च रतिभंगसमुत्थितम् ॥९१॥
दुःखं सर्वे प्रतिकल्पे तस्माच्छापं ददौ न सा ।
एवं वै राधिके कृष्णनारायणोऽपि च्चार्तिहा ॥९२॥
हेमशालायननाम्ने जगाद शापकारणम् ।
प्राह लक्ष्मीश्चक्रवाक्यै वृत्तं कौटुम्बिकं निजम् ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महावैकुण्ठे लक्ष्मीशयनस्थिते भगवति सति समागतकृष्णा-धेनुपालचन्द्रादित्यजयादित्यादिसेवकानां सतीशंकरयो-श्चागमे लक्ष्म्या नारायणेन सह शयनसुखभंगे लक्ष्म्याः शापेन तेषां षण्णां मानवलोकेऽवतरण-मित्यादिनिरूपणनामैकाधिकशत-तमोऽध्यायः ॥ १०१ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके यच्च वैकुण्ठे शापनोत्तरम् ।
यदभूत् कमलाकृष्णमध्ये तु कथयामि ते ॥ १ ॥
अनादिश्रीकृष्णनारायणो हेमायनर्षये ।
यज्जगाद तथा कन्या चक्रवाक्यै जगाद यत् ॥ २ ॥
तत्सर्वं ते कथयामि निबोधैकाग्रमानसा ।
शापं श्रुत्वा हरिर्नारायणकृष्णो जनार्दनः ॥ ३ ॥
भक्तदुःखेन दुःखात्मा ह्यनुक्त्वा कमलां तदा ।
स्वयं त्वचिन्तयत् कृष्णो न्याययुक्तं शुभास्पदम् ॥ ४ ॥
अहो व्यक्तेस्तु वैचित्र्यं विलक्षणपदं गतम् ।
सर्वदा तोषयाम्येनां लक्ष्मीं हृदयवासिनीम् ॥ ५ ॥
क्षणं दूरं करोम्येव नहि क्वचित्तथापि सा ।
अतृप्ता मे महानन्दादधीरेव प्रभाषते ॥ ६ ॥
मद्भक्तानां कृते चापि सहते न क्षणं सती ।
मद्वियोगं न सहते सहते न चिरायनम् ॥ ७ ॥
सदा सौख्यं ददाम्येव यथाऽऽत्मने तथा श्रियै ।
यथा श्रिया वियोगो मे नेष्टस्तथा न सेविनाम् ॥ ८ ॥
नारीणां तु स्वभावोऽयं स्वार्थश्चेन्नहि पूर्यते ।
क्षणे परवज् जायेत फलं दुष्टं प्रयच्छति ॥ ९ ॥
यद्यपि नैव लक्ष्मीस्तु भक्ता त्याज्या कदाचन ।
भक्तोत्तमाऽतिभक्ता मे पत्नी प्रिया सखी स्वयम् ॥१०॥
शंकरोऽपि यथा भक्तो भक्ता सती च कृष्णिका ।
जयश्चन्द्रो धेनुपालस्ततो भक्तोत्तमा रमा ॥११॥
तथापि भक्तवर्येषु स्नेहदर्शनहेतवे ।
भक्ताः स्निग्धा मम लक्ष्म्यपेक्षया नितरां सदा ॥१२॥
भक्तदुःखप्रदा चेत् स्याल्लक्ष्मीर्यद्यपि मे प्रिया ।
भक्तार्थं सन्त्यजाम्येनां दृष्टान्तं कमला स्वयम् ॥१३॥
भवेदत्र विधाने तु तथा कुर्वे निदर्शनम् ।
शापफलं मे लक्ष्म्याश्च प्राप्तं भवेन्निदर्शने ॥१४॥
शिक्षाऽपि च यथार्था स्यात् पुनर्नैवं चरेत् क्वचित् ।
इत्येवं संविचार्यैव भगवान् शोकमावहन् ॥१५॥
भक्तदुःखेन दुःखात्मा न वक्ति श्रीं न पश्यति ।
निर्मनस्क इव जातो नापि हसति वै मनाक् ॥१६॥
नोर्ध्वं पश्यति मनसा महोद्विग्नो विभासते ।
यथा वै मातृमरणे यथा पत्नीविनाशने ॥१७॥
यथैकपुत्रनाशे वा शोकस्तथा विभाव्यते ।
यथा क्षणान्तरे गेहं त्यक्त्वा यास्यति वा क्वचित् ॥१८॥
यथा सर्वस्वनाशे वा भग्नमानसवान् भवेत् ।
तथा वैराग्यमापन्नो नारायणो विलोक्यते ॥१९॥
यथा जितेन्द्रियग्रामो जितान्तःकरणादिकः ।
मायापारस्थितिश्चास्ते तथा नारायणोऽभवत् ॥२०॥
लक्ष्मीर्विहस्य बहुधा हावभावैः समायुता ।
हस्तं हस्ते गृहीत्वाऽति कृत्वा प्रचुम्बनं मुहुः ॥२१॥
नारायणं समाकृष्य गृहान्तरे निनीषति ।
नारायणस्तु शववत् तथा प्रस्तरवत्तदा ॥२२॥
जडवद् भक्तशोकेन सञ्जातः परमेश्वरः ।
यद्गृहे निजभक्तानामाश्रयः सुखदोऽस्ति वै ॥२३॥
तद्गृहे यदि भक्तानां शापदुःखं प्रजायते ।
तत्र किं मे निवासेन विचार्येत्थं जगाद ताम् ॥२४॥
मा मां स्पृशाऽत्र वामोरु मा खेदं कारय वृथा ।
यद्गृहे मम भक्तानां शापस्तत्र न मे स्पृहा ॥२५॥
याहि त्वं शयने साध्वि न मे शय्या सुखावहा ।
महाभागवताः शप्ताश्चातो दुःखतरं नु किम् ॥२६॥
प्राघूणिकाः सदा मान्यास्तत्रापि निजभक्तयः ।
मदर्थैकृतसर्वस्वाः पूज्या मान्याः सदा मम ॥२७॥
मद्भक्तार्थं सदा लक्ष्मि ! मालामावर्तयाम्यहम् ।
मद्भक्तार्थं च लोकेषु सर्वदाऽवतराम्यहम् ॥२८॥
नरनारायणश्चाऽस्मि तापसो भक्तहेतवे ।
क्षीरोदे श्वेतभूमौ च्चाऽक्षरक्षेत्रे नरायणः ॥२९॥
गोलोके चापि वैकुण्ठेऽव्याकृतेऽमृतधामनि ।
यत्र वसन्ति मे भक्तास्तत्र तिष्ठामि पद्मजे ॥३०॥

अहं भक्तगृहावासो भक्तैः सह विहारवान् ।
भक्तालयो मे वैकुण्ठो नान्यद्वै रुचिरं मम ॥३१॥
मे भक्तानां दुःखप्राप्तौ निमित्तं मद्गृहं यदि ।
तदा वैकुण्ठनामाऽस्य यथार्थतां प्रहन्ति वै ॥३२॥
यद्वै शाश्वतसुखदं धाम मे ख्यातमैश्वरम् ।
तद् यदि दुःखदं जन्मप्रदं चेत् का विकुण्ठता ॥३३॥
तत्रापि देवदेवस्य शंकरस्य प्रियस्य मे ।
सत्याश्च मम भक्तायाः शापो मानवजन्मदः ॥३४॥
किमतः परमं दुःखं दुष्कीर्तिप्रदमुल्बणम् ।
कृष्णायास्तव सख्याश्च जयचन्द्रकयोरपि ॥३५॥
धेनुपालस्य च तथा पार्षदस्य निपातनम् ।
कथं ते चेदृशी बुद्धिरकाण्डताण्डवी प्रिये ॥३६॥
अप्रयोज्यं प्रोक्तवती भक्तभक्तिविरोधिनी ।
कदापि न त्वया त्वेवं कृतं कृतं तु शंकरे ॥३७॥
मया किमत्र कर्तव्यं विरोधिस्त्रीयुते गृहे ।
भोजनं मिष्टमृष्टादि भक्तं विना विषायते ॥३८॥
पेयं शीतसुगन्धाढ्यं भक्तं विनाऽनलायते ।
वस्त्रं सौम्यं च कौशेयं विना भक्तं शरायते ॥३९॥
भूषणं स्वर्णरत्नादि विना भक्तं झषायते ।
सुगन्धतैलवासादि न भक्ते कर्दमायते ॥४०॥
सर्वं ज्वालायते सौख्यं मे हृदि भक्तमन्तरा ।
लक्ष्मि शंभुं विना चाहं दह्यामि शापवैभवात् ॥४१॥
भक्तशापः स मे शापो मच्छापस्तत्तथापि च ।
अंशाऽर्धांगस्वभावत्वाद् दुःखदो नात्र संशयः ॥४२॥
त्वं न जानासि माहात्म्यं मद्भक्तानां महत्तमम् ।
सनत्कुमारो जानाति भक्तमाहात्म्यमुच्छ्रितम् ॥४३॥
यदि नेत्रे न पश्येतां मद्भक्तान् मामुपस्थितान् ।
निष्कास्य गोलकाभ्यां ते दूरीकरोमि सर्वदा ॥४४॥
यदि मे मस्तकं नैव नमते भक्तयोगिने ।
गलात् संछिद्य दूरं तन्निक्षिपामि न संशयः ॥४५॥
यदि कर्णौ शृणुयातां नैव भक्तवचांसि मे ।
तौ मूलात् संछिद्य दूरे निक्षिपामि न संशयः ॥४६॥
यदि नासा भक्तगन्धं नैव गृह्णाति मे तदा ।
सञ्छिद्य मूलतो नासां दूरं क्षिपामि पद्मजे ॥४७॥
यदि जिह्वा भक्तगाथां नैव गायति सर्वदा ।
यदि वा रसना भक्तार्पितं रसं न ऋच्छति ॥४८॥
तदा मूलाद् विनिष्कास्य जिह्वां त्यजामि नित्यदा ।
यदि चौष्ठौ भक्तदत्तं ताम्बूलादि न ऋच्छतः ॥४९॥
यदि दन्ता न भक्तैर्यच्चर्वयन्ति समर्पितम् ।
तदौष्ठदन्तकान् शस्त्रैश्छेदयित्वा त्यजामि वै ॥५०॥
यदि हस्तौ स्वभक्तानां सेवायां नोपयोगिनौ ।
छिन्द्यामामूलतस्तौ संत्यजेयं काष्ठवत्तु तौ ॥५१॥
वक्षो यदि न भक्तानामाश्लेषे चोपयोगवत् ।
तदा वक्षः समुत्पाट्य त्यजामि गर्तके सदा ॥५२॥
यदि मे हृदये भक्ता वसेयुर्न कदाचन ।
हृदयं रक्तसहितं निष्कास्य संक्षिपामि हि ॥५३॥
यद्युदरं मे पचनं भक्तार्पितस्य नेष्यते ।
विभिद्य सर्वं त्वरितं त्यजामि नात्र संशयः ॥५४॥
यदि त्वङ् मम भक्तानां स्पर्शं संरोचते न वै ।
उत्पाट्य वर्ष्मणस्तूर्णं निक्षिपामि महानले ॥५५॥
यदि वीर्यं बलं लिङ्गं भक्तानां सुखकृन्न मे ।
तदा विनाश्य तत्सर्वं षण्ढत्वं प्रकरोमि मे ॥५६॥
यदि चोरू प्रभक्तानामुपवेशार्थमेव न ।
तदा त्यक्त्वा कबन्धो वै भवामि भक्तकारणात् ॥५७॥
यदि पादौ मम भक्तान् प्रति यातो न वै तदा ।
कुठारेण विनिच्छिद्य पादहीनो भवामि वै ॥५८॥
देहो मे यदि भक्तानां सौख्यार्थं न प्रजायते ।
तथा प्रोद्भाव्य वह्निं च करोमि भस्मसान्ननु ॥५९॥
गुणा बुद्ध्यादयश्चापि यदि भक्ताऽऽश्रिता न मे ।
गुणाँस्त्यक्त्वा निर्गुणश्च वसामि गहने वने ॥६०॥
बहुनोक्तेनाऽत्र किं ते त्वं यदि भक्तरोधिनी ।
भक्तक्लेशकरी भक्तिविघ्नकरी प्रवर्तसे ॥६१॥
भक्तदुःखकरी वापि भक्तशान्तिविरोधिनी ।
त्वां त्यजामि रमे तर्हि किमन्यन्न त्यजामि वै ॥६२॥
सर्वं त्यजामि सर्वस्वं भक्तार्थे नात्र मे स्पृहा ।
भक्तनाशे विनष्टं मे सर्वमवेहि पद्मजे ॥६३॥
भक्ते तु रक्षिते सर्वं रक्षितं मम विद्धि तु ।
अहो श्रीशंकरः कुत्र मानवो वै भविष्यति ॥६४॥
अहो सती प्रिया तस्य मानवी क्व भविष्यति ।
अहो कृष्णा प्रिया दासी भक्ता वा क्व जनिष्यति ॥६५॥
अहो वै धेनुपालोऽपि जयश्चन्द्रस्तथा रमे ।
तव शापेन भूमौ ते भविष्यन्त्यसुखस्थले ॥६६॥
यावज्जानामि नैतेषां स्थितिं जन्मवतां रमे ।
तावत् सुखं न मे चास्ति गच्छामि यत्र तेऽप्यहम् ॥६७॥
इत्युक्त्वा कमलां त्यक्त्वा त्यक्त्वा श्रीकमलाकरम् ।
त्यक्त्वा सिंहासनं रम्यं प्रासादं धाम चोज्ज्वलम् ॥६८॥

वैकुण्ठं सर्वथा त्यक्त्वा त्यक्त्वा स्नेहपदं हरिः ।
निर्ययौ विमना भूत्वा त्यक्त्वा गरुडमित्यपि ॥६९॥
पश्चादनवलोक्यैव ब्रह्माण्डे भूतलं ययौ ।
रोरूयमाणां नाऽपश्यत् लक्ष्मीं प्राणातिवल्लभाम् ॥७०॥
नाथ नाथ व्याहरन्तीं श्रीहरिर्भूतलं ययौ ।
अदृश्योऽव्यक्तदेहश्च मणिजन्येऽत्र भूतले ॥७१॥
अश्वपट्टसरःक्षेत्रेऽक्षरक्षेत्रे ह्यवातरत् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥७२॥
परब्रह्माऽऽक्षराऽतीतोऽवताराणां नियामकः ।
क्षेत्रे कुंकुमवाप्याख्ये कंभराश्रीगृहे तदा ॥७३॥
श्रीमद्गोपालकृष्णस्य गृहे दिव्यर्द्धिसंयुते ।
नारायणाऽऽगमनस्य निमित्तेनाऽप्यवातरत् ॥७४॥
अनादिश्रीकृष्णनारायणे श्रीपुरुषोत्तमे ।
आगत्य लीनतां प्राप्य तस्थौ चाऽश्वसरोऽन्तिके ॥७५॥
ततोऽनादिकृष्णनारायणस्याऽऽदेशतो भुवि ।
यथावज्ञातरूपोऽसौ गवेषणार्थमुत्तरे ॥७६॥
हिमालयाश्रये देशे नीपालयप्रदेशके ।
कैलासधामराज्ये च शिवराजं कुमारकम् ॥७७॥
अन्वेष्य शंकरं भक्तं तत्र तस्थावगोचरः ।
ततः सतीं मार्गयितुं षण्माण्डव्यपुरीं ययौ ॥७८॥
तत्र कन्या जानकीति नाम्ना सती च साऽभवत् ।
तत्रापि वर्तते नारायणोऽदृश्योऽनुगप्रियः ॥७९॥
तयोर्विवाहतो जाता कृष्णा जयश्च चन्द्रकः ।
धेनुपालः शिवराजभ्राता च तत्र संस्थितः ॥८०॥
नारायणश्च तद्भक्तैः सार्धं संवसति प्रभुः ।
अप्रकाशः सह भुंक्ते रमते वर्ततेऽनिशम् ॥८१॥
क्वचिदायात्यक्षरं च क्षेत्रं त्वश्वसरोवरम् ।
क्वचित्तत्र शिवराजगृहे तिष्ठति भक्तितः ॥८२॥
इत्येवं भगवान् लक्ष्मीं त्यक्त्वा भक्तार्थमेव तु ।
समाययौ च ब्रह्माण्डे भक्तमध्ये निवासकृत् ॥८३॥
अथ वैकुण्ठगा लक्ष्मीर्ज्ञात्वा स्वां प्रविहाय तु ।
वैकुण्ठं चासनं धामालयं त्यक्त्वा नरायणः ॥८४॥
जगाम चिरयात्रार्थं भक्तार्थं मानवे भवे ।
शुशोच बहुधा तत्र रुरोद शून्यवद्गृहे ॥८५॥
तुष्टाव बहुधा वाण्या दोषान्निजान् जगाद च ।
अहं वै चञ्चला लक्ष्मीर्दुःखदोषानुकारिणी ॥८६॥
गर्वादीनां सदा हेतुर्दीनानामसहायिनी ।
पापाऽन्यापकृतां गेहे वासो मे बहुधा मतः ॥८७॥
हिंसाऽनृतादिदोषाणां गृहं चाधर्मपुष्टिदा ।
मायाकापट्यभोगादिस्थानं पूज्यावमाननम् ॥८८॥
शीलहानिः शुद्धिहानिस्तृष्णा रागोऽतिगृध्नता ।
चौर्यं प्रसह्यता चाधिक्षेपो दोषा मदाश्रयाः ॥८९॥
चञ्चला न स्थिरा क्वापि वैमनस्यविधायिनी ।
सर्वहस्तगता चाऽस्मि तथापि करुणालयः ॥९०॥
भगवान् मां स्वहृदये रक्षत्यतिकृपावशः ।
न मां निष्कास्य भुंक्तेऽपि स्वयं भोगान् दयापरः ॥९१॥
सर्वं दत्वा तु मे कृष्णः स्वयं गेहाद्विनिर्गतः ।
कीदृशं चास्य सारल्यं न मे दुःखं प्रयच्छति ॥९२॥
न मां तिरस्करोत्यल्पं सहतेऽविनयं मम ।
अशुद्धां मां सदा भक्तां भक्तयधीनः प्ररक्षति ॥९३॥
पातिव्रत्यं न मे सम्यक् तथापि भगवान् स्वयम् ।
पत्नीव्रतपरो भूत्वाऽवत्यधिकं निजादपि ॥९४॥
मां विहाय न भुंक्तेऽसौ न वै पिबति वार्यपि ।
मां विना यत्र पक्वान्नं कृतं त्वन्येन तत् खलु ॥९५॥
नैव पश्यति गृह्णाति नैव नैवाऽत्ति केशवः ।
पाचकेषु प्रवेशो मे यदा स्याच्चेत्तदा हरिः ॥९६॥
भुंक्ते नैवेद्यमात्रान्नं नान्यथा वै क्वचिद्धरिः ।
वस्त्रं रत्नं जलं पात्रं ताम्बूलमन्नमञ्जनम् ॥९७॥
भूषणं चन्दनं स्वर्णं यानं वाहनमीशता ।
आसनं शयनं वस्तु चोपदाः फलमर्पणम् ॥९८॥
सर्वं मामसमर्प्याऽयं मे नाथो भुंक्त एव न ।
अहो विचारतः कृष्णः श्रेष्ठः पत्नीव्रतस्थितः ॥९९॥
चञ्चलाऽपि स्नेहपात्रं नेदृश्यहं पतिव्रता ।
अहो मे सर्वसौभाग्यं विना कान्तं हि निष्फलम् ॥१००॥
वैकुण्ठं सम्पदः सर्वा भोग्यजातं च निष्फलम् ।
दासा दास्यो वाटिकाश्च विमानोद्यानभूमयः ॥१०१॥
सौधप्रासादकलशा गजाऽश्वरथधेनवः ।
भूषाम्बराऽमृतपानं कान्तं विना हि निष्फलम् ॥१०२॥
गृहात्कान्तो विनिर्यातो ममैव दोषकारणात् ।
अहो मृता कथं नाऽहं कथं शवो भवामि न ॥१०३॥
कान्तं विना शवश्चाऽस्मि जीवनं निष्फलं यतः ।
इत्येवं विललापेयं कृष्णनारायणप्रभो ! ॥१०४॥
नाथ श्मशानसदृशं वैकुण्ठं त्वां विना मम ।
इत्युक्त्वा निपपातेयं सिंहासनसमीपतः ॥१०५॥
मूर्छां क्षणं समासाद्य पुनरुत्थाय वेगतः ।
कान्त कान्तेति चाक्रोशं कुर्वाणा द्वारमागता ॥१०६॥

मूर्छयाऽङ्गनभागे सा पुनः पपात निर्बला ।
तावत् सख्यः समायाताः किमिदं किमिदं ब्रुवाः ॥१०७॥
तर्कयन्त्योऽत्यनिष्टं च तच्छोकेनाऽतिशोकिताः ।
दुःखिताः पवनाद्यैश्च जलसेचनकैस्तथा ॥१०८॥
पुष्पार्पणादिभिश्चापि मूर्छामपानुदंस्तु ताः ।
पप्रच्छुः किमकाले ते दुःखमेतदुपस्थितम् ॥१०९॥
प्राह लक्ष्मीर्हरिः क्वापि वैकुण्ठान्निर्ययौ चिरम् ।
मां विहाय च सर्वाश्च भक्ता भक्तान् नरायणः ॥११०॥
श्रुत्वैवं वज्रपाताभं वचो लक्ष्म्यास्तु ता अपि ।
मूर्छामवापुरत्युग्रां श्रुत्वाऽनिष्टं च राधिके ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने
श्रीलक्ष्म्याः शंम्वादौ शापोत्तरं श्रीनारायणस्य कमलां
त्यक्त्वा वैकुण्ठान्निर्गम इत्यादिनिरूपणनामा
द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

श्रीकृष्ण उवाच—

अनादिश्रीकृष्णनारायणो हेमायनर्षये ।
तथा कन्या चक्रवाक्यै वृत्तान्तमाह राधिके ॥ १ ॥
लक्ष्मीस्तथा च सख्यश्च वैकुण्ठं सर्वमेव च ।
सशोकं वै क्षणाज्जातं श्रुत्वा कृष्णविवर्जितम् ॥ २ ॥
मूर्छिताश्च तदा सर्वा वैकुण्ठवासियोषितः ।
मूर्छामपानुदँस्तासां वायुचन्दनवारिभिः ॥ ३ ॥
अथ लक्ष्मीर्विमूर्छा च संबभूव क्षणान्तरे ।
वियोगं श्रीहरेः स्मृत्वा रुरोद बहुधा पुनः ॥ ४ ॥
न भोक्ष्ये नैव पास्ये च मरिष्ये तं हरिं विना ।
नारीदेहेन भगवत्प्राप्तिस्तु दुर्लभा सदा ॥ ५ ॥
सा सम्प्राप्तिः शाश्वती वै मया लब्धा हरेः किल ।
यद्यहं न हरिं लप्स्ये करिष्ये देहनाशनम् ॥ ६ ॥
संकरिष्ये तपो घोरं गमिष्ये भूतलं प्रति ।
यत्र नाथः क्षितावास्ते तत्र मे मरणं वरम् ॥ ७ ॥
मानसं करपादादि त्यक्ष्ये कृष्णविरोधि यत् ।
नाथनाथ हरेकृष्णकान्त नारायणप्रभो ॥ ८ ॥
त्यक्त्वा मां दासिकां दुष्टां क्व यातो वद मे द्रुतम् ।
त्वां विना श्रवणं मेऽत्र कर्णशूलायते हरे ॥ ९ ॥
त्वां विना दर्शनं मेऽत्र वह्निज्वालायते हरे ।
त्वां विना कीर्तनं मेऽत्र विषदग्धायते प्रभो ॥१०॥
त्वां विना स्पर्शनं मेऽत्र बाणव्रणायते प्रभो ।
त्वां विना रसनं सर्वं मम वान्तायन्ते हरे ॥११॥
त्वां विना गन्धग्रहणं नासिका वृश्चिकायते ।
त्वां विना भोजनं पानं गलबन्धायते विभो ॥१२॥
त्वां विना चासनं रम्यं यानं भल्लायते प्रभो ।
त्वां विना पुष्पमालादि क्ष्वेडकुन्तायते हरे ॥१३॥
शृंगारस्त्वां विना विष्णो सर्वो मे राक्षसायते ।
हरिं विना मे वैकुण्ठं रिक्तगर्तायते प्रभो ॥१४॥
समयो मे क्षणरूपस्त्वां विना तु युगायते ।
शीतवातो विना कृष्णं सूर्यातपविषायते ॥१५॥
जलं स्थलं गृहं सर्वं शून्यायते विना प्रभुम् ।
वस्त्रं व्याघ्रायते रम्यं भूषा सिंहायते तथा ॥१६॥
सौभाग्यं केशकबरी सर्वं मे विधवायते ।
भुक्तं सुखं ममेदानीं विना त्वां खसुमायते ॥१७॥
देहद्रव्यादिकं सर्वं त्वां विना निधनायते ।
अस्तित्वं चापि ते पत्न्या विना त्वां नास्तिकायते ॥१८॥
किम्वत्र बहुनोक्तेन त्वां विना श्रीनरायण ।
स्थास्ये नैकाकिनी क्वापि पतिष्ये त्वामनु क्षितौ ॥१९॥
हे स्वामिकृष्णगोविन्द नारायणनरोत्तम ।
श्रीकृष्णवल्लभमूर्ते रक्ष मां स्वान्तिके पते ॥२०॥
जीवनं मे गतः क्वाऽऽस्से क्व ते भक्ता हरादयः ।
यत्र ते तत्र ते भार्या लक्ष्मीरियं गमिष्यति ॥२१॥
सर्वगस्य गमनं ते न जाने कुत्र वर्तितम् ।
एषाऽहं सम्पताम्यत्र तव पृष्ठे जनार्दन ॥२२॥
तव भक्तां पतमानां यथेच्छसि तथा कुरु ।
इत्युक्त्वा वैकुण्ठाल्लक्ष्मीः पपात शिरसा ह्यधः ॥२३॥
हाहाकारो महानासीद् वैकुण्ठे सर्वसृष्टिषु ।
लक्ष्मीर्वै सर्वलोकेभ्यः पपात प्रलये यथा ॥२४॥
ब्रह्माद्याः सत्वरं सत्ये पतमानां श्रियं सुराः ।
दध्रुः कोमलपुष्पाणामुल्लोचे न च सत्वरम् ॥२५॥
पातपीडा न वै जाता तथा जगृहुरीश्वराः ।
लक्ष्म्याश्चाऽनुनिपेतुश्च दास्यो दासाश्च लक्षशः ॥२६॥
सत्यलोके सुराद्यैस्ते विताने संधृतास्तु खे ।
सत्कृतास्ते सान्त्वयिताः पूजिताः सर्ववस्तुभिः ॥२७॥
भोजिताः पायिताश्चाप्यासनेष्वपि निषादिताः ।
मायावायुहताः सर्वेऽभवन् वै मोहमिश्रिताः ॥२८॥
विसस्मरुश्च दुःखं तन्नारायणवियोगजम् ।
सावित्र्या पूजिताः सख्यः सखायो ब्रह्मणाऽर्चिताः ॥२९॥
विश्रान्त्यनन्तरं पृष्टाः किमर्थं पतनं त्विति ।
तदा लक्ष्मीः पुनः स्मृत्वा नारायणवियोजनम् ॥३०॥

रुरुदे च क्षणं जिज्ञासयामास नरायणम् ।
क्व स्थितं वर्तमानं च कथं योगो भवेदिति ॥३१॥
ब्रह्मा प्राह स्वयं नारायणश्चाऽश्वसरोवरे ।
सौराष्ट्रे कुंकुमवापीक्षेत्रे चाऽद्य हि वर्तते ॥३२॥
अनादिश्रीकृष्णनारायणे श्रीपुरुषोत्तमे ।
अन्तर्भाव्य निजं रूपं तदभिन्नो विराजते ॥३३॥
अथ नारायणो नित्यं तव स्वामी च वल्लभः ।
देशे नीपालये याति भक्तार्थं माधवो रमे ! ॥३४॥
गण्डक्याश्चोद्भवदेशे कैलासधामनामके ।
नगरे नृपरूपो यः शंकरांशो विराजते ॥३५॥
पत्नी तस्य सती नाम्ना जानकीति सदाशिवा ।
तव शापेन सद्योजा मानवी वर्ततेऽधुना ॥३६॥
जानक्याः स पतिः शंभुः शिवराजाभिधानकः ।
तस्य पुत्री तव सखी कृष्णा कृष्णकुमारिका ॥३७॥
सद्यो जाता तव शापाद् वर्तते तस्य पुत्रिका ।
जयादित्यस्तथा चन्द्रादित्यश्चेति च पुत्रकौ ॥३८॥
धेनुपालो महावीरः शिवराजाऽनुजस्तथा ।
वर्तते कैलासधाम्नि महाभागवतः सखा ॥३९॥
शिवराजस्य पत्नी या षण्माण्डव्यपुरेशितुः ।
पुत्री सा जानकी देवी भजते श्रीनरायणम् ॥४०॥
एवमेते मानवा वै तव शापेन पद्मजे ।
सञ्जाताः सन्ति गण्डक्यास्तीरे शैलभुवस्तले ॥४१॥
यत्र तेऽस्ति मतिर्गन्तुं याहि तत्र हरिं स्मर ।
अश्वपट्टसरस्तीरे यद्वा श्रीगण्डकीतटे ॥४२॥
मिलिष्यति पतिः कान्तस्तव नारायणः स्वयम् ।
इत्येवं ब्रह्मणा प्रोक्ता मुमोद कमला तदा ॥४३॥
द्रागेवाऽस्या अस्फुरँश्च वामाङ्गानि मुहुर्मुहुः ।
दासीदाससहस्राणां शकुनानि शुभान्यपि ॥४४॥
अभवँश्चाऽच्युतप्राप्तिशंसकानि मुहुर्मुहुः ।
एवं वै ब्रह्मणा प्रोक्ता लक्ष्मीर्दासाश्च दासिकाः ॥४५॥
नमस्कृत्य तु सावित्रीं ब्रह्माणं परमेष्ठिनम् ।
प्राप्य पूजां निर्ययुश्चाययुः कुंकुमवापिकाम् ॥४६॥
अवतेरुश्चाम्बरात्ते चाऽश्वपट्टसरोऽन्तिके ।
विलोक्य 'सध्वजस्वर्णघटं प्रासादमुत्तमम् ॥४७॥
अनादिश्रीकृष्णनारायणदर्शनमाचरन् ।
परब्रह्माऽक्षरातीतानादिश्रीपुरुषोत्तमः ॥४८॥
विज्ञाय सर्ववृत्तान्तं चक्रे स्वागतमादरम् ।
न्यूषुः सम्मानिताः श्रीमद्वैकुण्ठनाथलब्धये ॥४९॥
किन्तु चतुर्भुजो नारायणः साक्षान्न दृश्यते ।
स्वयं लक्ष्मीर्महालक्ष्म्या श्रीमत्कंभरया श्रिया ॥५०॥
सेव्यते पाल्यते नित्यं प्रसन्नीक्रियते तथा ।
स्ववत् सर्वाश्च तद्दास्यः पाल्यन्ते चापि भावतः ॥५१॥
दासा वैकुण्ठवासाश्च रक्ष्यन्ते जनकेन च ।
एवं तत्र स्थिताः सर्वे किन्तु चतुर्भुजः स्वयम् ॥५२॥
नाऽऽयात्येषां दृष्टिपथं तदा श्रीपुरुषोत्तमम् ।
प्रार्थयाञ्चक्रुरत्यर्थं दर्शनार्थं मुहुर्मुहुः ॥५३॥
तपश्चर्यां चक्रुरेते सम्भूय पवनाशिनः ।
विष्णुयागं तथा चक्रुर्मासद्वयं तदुत्तरम् ॥५४॥
नारायणः प्रसन्नोऽभूदुवाच तान् रमायुतान् ।
प्रसन्नवदनश्चतुर्भुजो वैकुण्ठवासकृत् ॥५५॥
यूयं वैकुण्ठवासा मे भक्ता यात हि गण्डकीम् ।
नीपालयप्रदेशे च विहारे कोसले तथा ॥५६॥
शिवराजगृहे नित्यं यामि सेवावशंगतः ।
यत्र कृष्णा जयश्चन्द्रो विद्यन्ते बालका इति ॥५७॥
दक्षपुत्री सती यत्र जानकी शिवभामिनी ।
धेनुपालोऽनुजस्तस्य वर्तते तत्र मानवः ॥५८॥
एते लक्ष्म्यास्तव शापान्मानवा विचरन्ति वै ।
त्वं तथा मानवी तत्र शिवकन्या भव प्रिये ॥५९॥
शापदानफलं कष्टं मानवी भुंक्ष्व कन्यका ।
एते दासाः पार्षदा मे विभिन्नतीर्थवासिनः ॥६०॥
भवन्तु मानवाः सर्वे काले सेवार्थिनो मम ।
राजसु ब्राह्मणेष्वत्र भवन्तु भूतलेऽनघाः ॥६१॥
कामरूपधराः सर्वे जातिस्मरा भवन्तु च ।
शापदोषे विनिवृत्ते वो मिलिष्यामहं तदा ॥६२॥
तपसा शुद्धभावेयं लक्ष्मीर्यदा हिमालये ।
चक्रवाक्या समं पुत्र्या दर्शनं मम लप्स्यते ॥६३॥
उर्वश्याश्चक्रवाक्या मे पुत्र्या मोक्षो भविष्यति ।
हिमाद्रेः शिखरे पुत्रीं तृषितां वारि वृष्टिदम् ॥६४॥
पाययित्वा तर्पयिष्ये ततो मे दर्शनोत्तरम् ।
लक्ष्म्याः प्राप्ते योग्यकाले विवाहस्तु मया सह ॥६५॥
काश्यां राज्यमहोद्याने यदा सम्पत्स्यते तदा ।
पार्षदानां भवतां मे दासीनां चापि तत्र वै ॥६६॥
दर्शनं च विवाहे मे सर्वेषां संभविष्यति ।
ततो युष्मान्नयिष्येऽहं मम धाम च शाश्वतम् ॥६७॥
इत्युक्त्वा भगवान्नारायणश्चादृश्यतां गतः ।
अनादिश्रीकृष्णनारायणे स्वामिनि शाश्वते ॥६८॥

लक्ष्म्यादयश्च वैकुण्ठवासा आपृच्छय कंभरम् ।
मातरं पितरं श्रीमद्गोपालकृष्णमीश्वरम् ॥६९॥
अश्वपट्टसरःक्षेत्रं त्यक्त्वा श्रीगण्डकीनदीम् ।
नीपालयप्रदेशं ते ययुः श्रीशंकरालयम् ॥७०॥
कैलासधामसंज्ञं च पत्तनं वीक्ष्य चाम्बरात् ।
अवतेरुः शिवराजगृहे श्रीजानकीयुते ॥७१॥
शिवराजो योगदृष्ट्या विवेद तान् यथार्थतः ।
लक्ष्मीयुतान् पार्षदांश्च तथा दासीजनानपि ॥७२॥
मुमोद स्वागतं चक्रे जानकी प्रमुमोद च ।
कृष्णाऽपि मुमुदे तत्र जयोऽपि चन्द्रकोऽपि च ॥७३॥
धेनुपालोऽपि मुमुदे ज्ञात्वा वैकुण्ठवासिनः ।
स्वागतं चासनं वारि मधुपर्कं फलं दलम् ॥७४॥
अन्नं सत्कारमुत्कृष्टं चक्रुर्ददुः शिवादयः ।
प्रासादं राज्ययोग्यानि शयनानि गृहाणि च ॥७५॥
यानवाहनभोग्यानि सर्वोपकरणान्यपि ।
भोज्यपेयविमृग्यानि वस्तूनि राजरीतितः ॥७६॥
ददौ श्रीशंकरस्तेभ्यो महीमानेभ्य ईश्वरः ।
प्राघूणिकाश्च सञ्जातास्तृप्ताः शंकरसेवया ॥७७॥
सर्वे नित्यं प्रतीक्षन्ते प्रातरुत्थाय तत्र च ।
नारायणस्य देवस्य दर्शनं चागतस्य ह ॥७८॥
शंकराद्यैः कृतां पूजां ग्रहीतुं शंकरालये ।
हरिः प्रातः स्वयं चैत्य पूजां प्राप्य प्रयाति च ॥७९॥
एते नैनं प्रपश्यन्ति महीमानाः कदाचन ।
ततो लक्ष्मीः स्वयं तत्र शिवराजगृहे सुता ॥८०॥
भवितुं वाञ्च्छयामास प्रातर्दर्शनकांक्षया ।
संकल्पमात्रसिद्धा सा शिवराजसुताऽभवत् ॥८१॥
जातिस्मरातिविज्ञाना मानुषी दिव्यसद्गुणा ।
सर्वलक्ष्मयुता कन्या रमा वैकुण्ठवासिनी ॥८२॥
नारायणेन या विप्रकृता सा कन्यकाऽभवत् ।
सतीशंभ्वोर्गृहे शापफलभोगाय दुःखिनी ॥८३॥
ततः सा दुःखिनीलक्ष्मीरितिनाम्ना हरेण ह ।
सत्या संगदिता नित्यं स्वस्रा च कृष्णयाऽपि तु ॥८४॥
लक्ष्म्याः प्राकट्यकालेऽत्र जनैर्वैकुण्ठवासिभिः ।
कैलासवासिभिश्चापि पुष्पवृष्टिः कृताऽम्बरात् ॥८५॥
चन्दनस्य तथा वृष्टिर्वसूनां वृष्टिरित्यपि ।
जयाशीर्वाददानं च वाद्यवादनमुत्सवः ॥८६॥
अप्सरोभिर्नर्तनं च देवीभिर्मंगलानि च ।
शिवराजेन दानानि संस्काराश्च द्विजैरपि ॥८७॥
तथाऽन्योत्सवजातानि सर्वं कृतं शिवादिभिः ।
लक्ष्मीस्तु मानुषीरूपा प्रकाशयितुं नेच्छति ॥८८॥
पत्युः सेवनलाभार्थं स्थिता कपटमानुषी ।
राजकन्याऽपि सा नित्यमृषिकन्येव वर्तते ॥८९॥
तपोव्रतफलाहारा नारायणस्य सेविका ।
पुत्री शिवकुटुम्बोत्था ततः कुटुम्बवत् सदा ॥९०॥
वैकुण्ठवासिनं कान्तं नारायणं प्रसेवते ।
नारायणस्य सेवार्थं जलमाहरति प्रिया ॥९१॥
ददाति भोजनं पानं ताम्बूलकं सुगन्धि च ।
नीराजनं करोत्येषाऽमृतं पिबति पादयोः ॥९२॥
पादसंवाहनं नित्यं करोति कन्यका रमा ।
नित्यमर्थयते शापनिवृत्त्यर्थं जनार्दनात् ॥९३॥
विवाहार्थं तथा शीघ्रं वैकुण्ठगमनाय च ।
एकदा तां हरिः प्राह तपः करोतु भामिनि ॥९४॥
चक्रवाक्या समं तेन तवेष्टं संभविष्यति ।
इत्युक्ता सा कन्यका तु चक्रवाक्या समं ततः ॥९५॥
मिलिता तपसः सिद्धिं कर्तुं हिमालयं ययौ ।
अन्ये दासास्तथा दास्यो नीपालयप्रदेशके ॥९६॥
विहारे कोसले चाऽप्यविमुक्तक्षेत्रके तथा ।
इष्टपितृगृहे सर्वे स्वप्राकट्यं प्रपेदिरे ॥९७॥
जातिस्मरा अभवँश्च सर्वे भागवतोत्तमाः ।
वैष्णवाः सिद्धिमन्तश्च कामरूपधरास्तथा ॥९८॥
दिव्या दिव्यविहाराश्च दिव्याम्बरविहारिणः ।
सुखिनः सर्वसम्पन्ना यथा वैकुण्ठसंस्थिताः ॥९९॥
एतां सर्वां कथां कृष्णनारायणः परेश्वरः ।
हेमशालायनायाऽऽह कन्या प्राह तथोर्वशीम् ॥१००॥
इत्येवं राधिके सर्वं नारायणेच्छयाऽभवत् ।
न कालो न च कर्माऽपि प्रारब्धं नात्र कारणम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वैकुण्ठालक्ष्म्या दासानां दासीनां च सत्यलोकागमस्ततोऽश्वपट्टसरोवरागमस्ततो नीपालयप्रदेशे शिवराजगृहे लक्ष्म्याः प्राकट्यं दासदासीनां भिन्नप्रदेशेषु प्राकट्यमित्यादिनिरूपणनामा त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

**श्रीकृष्ण उवाच—**

राधिके ! तत्परं हेमशालायनो नरायणम् ।
पप्रच्छ तु तपः कीदृक् कृतं शंकरकन्यया ॥ १ ॥
अनादिश्रीकृष्णनारायणो जगाद तूत्तरम् ।
शिवराजसुता चक्रवाकीं श्रीगण्डकीतटे ॥ २ ॥

उवाच परया प्रीत्या पुत्रि चागच्छ मे गृहम् ।
इत्युक्ता प्रययौ पुत्री ह्युर्वशी जननीगृहम् ॥ ३ ॥
राज्यगृहेऽतिरम्ये सा पालितेव सुतिष्ठति ।
जनानां सा तु सान्निध्ये नैव वदति किञ्चन ॥ ४ ॥
निर्जने बहुधाऽऽलापान् मात्रा सह करोति सा ।
नद्यामुद्यानके वाट्यां क्षेत्रे सौधे सभागृहे ॥ ५ ॥
पाकगृहे च शयने कणगृहे महानसे ।
स्नानगृहे समाजे च मन्दिरे स्वामिनस्तथा ॥ ६ ॥
एवमन्यत्र सर्वत्र सहगा चोर्वशी सदा ।
मात्रा सह दिनक्षेपं करोति शापकारणात् ॥ ७ ॥
शिवराजस्य वै भक्त्या सत्या भक्त्या जयस्य च ।
कृष्णायाश्चापि चन्द्रस्य सुभक्त्या धेनुपस्य च ॥ ८ ॥
नारायणः स्वयं नित्यं दिव्यकिशोररूपवान् ।
प्रसन्नस्तद्गृहे याति वियाति प्राप्य पूजनम् ॥ ९ ॥
भुंक्ते दत्तं तु नैवेद्यं जलं पिबति मिष्टकम् ।
ताम्बूलं चापि गृह्णाति वस्त्रालंकारभूषणम् ॥१०॥
लक्ष्म्या च कन्यया दत्तं सर्वमश्नाति भावतः ।
उर्वश्याऽपि प्रदत्तं च प्रच्छन्नं जनकाय यत् ॥११॥
तत् सर्वं चातिभक्त्यैव गृह्णाति भगवान् प्रभुः ।
नित्यमेवं गृह्यमाणे कान्ते कान्ताऽतिभावुकी ॥१२॥
निमग्ना प्रेमवशगा त्वेकान्ते प्रार्थनां शुभाम् ।
चकार स्वविवाहार्थं शापनाशार्थमित्यपि ॥१३॥
कृष्णादीनां प्रमुक्त्यर्थं तदा प्राह नरायणः ।
मा शैघ्र्यं वह वामोरु नातिदूरं क्षणं तु तत् ॥१४॥
इत्युक्त्वाऽदृश्यभावं श्रीनारायणोऽगमत्ततः ।
उर्वशीं प्राह सा कन्या तपसा साध्यते हरिः ॥१५॥
इत्येवं भगवानाह पिता ते मां नरायणः ।
वद कीदृक् तपः कार्यं क्व गन्तव्यं हिमालये ॥१६॥
उपद्रवा न यत्र स्युस्तादृशं किं स्थलं भवेत् ।
त्वया दृष्टं भवेत् पुत्रि वद दर्शय तत्स्थलम् ॥१७॥
दैत्याश्च राक्षसाश्चापि दानवा हरिवैरिणः ।
शंभोश्च वैरिणोऽरण्ये विचरन्ति दिवानिशम् ॥१८॥
अबलानां महत्कष्टं निर्जने तु तपोऽर्जने ।
तत्र त्वं चक्रवाक्यास्से श्येनेभ्यस्ते भयं सदा ॥१९॥
अहं कन्या विवाहार्हा दैत्यादिभ्यो भयं च मे ।
तपःसिद्धिर्यथा स्याद्वै निर्विघ्ना हरितुष्टये ॥२०॥
तादृक् स्थलं वद पुत्रि यदि जानासि पर्वते ।
इत्युक्ता तूर्वशी प्राह मातर्यावान् हिमालयः ॥२१॥

मया दृष्टोऽस्ति परितो विहरन्त्या सुरैः सह ।
काश्चित् स्थल्यस्तत्र सन्ति यत्र वसन्ति मानवाः ॥२२॥
द्रोण्यस्ताः पार्श्वभागस्था अरण्यवनमिश्रिताः ।
भूतायनप्रदेशोऽस्ति यत्र वै शांकरीप्रजाः ॥२३॥
नीपालयप्रदेशोऽयं यत्र वै पार्वतीप्रजाः ।
तथा बदरीदेशश्च यत्र नारायणीप्रजाः ॥२४॥
तथा त्रिवर्तदेशोऽपि यत्र त्रिदेवजाः प्रजाः ।
तथा काश्मीरदेशोऽपि यत्रास्ते काश्यपी प्रजा ॥२५॥
तथा गान्धर्वदेशश्च चारणानां प्रदेशकः ।
किन्नराणां प्रदेशाश्च किंपुरुषभूमयः ॥२६॥
सतीशिवस्य कैलासस्तथा देवादिभूमिकाः ।
विद्यन्तेऽसंख्यका मातः पर्वते तु हिमालये ॥२७॥
तत्र विघ्ना भवेयुर्वै देवमानवदैत्यजाः ।
निर्जनं न स्थलं तत्र क्वाऽपि संभाव्यतेऽम्ब वै ॥२८॥
मया त्वेकं स्थलं दृष्टं पुरा यन्नातिदूरगम् ।
द्रोण्यां यत् कृष्णशैलस्य यत्रास्ते पूर्वसृष्टिजः ॥२९॥
हनुमान् ब्रह्मचारी च रामभक्तोऽतितापसः ।
यत्र नैवाऽस्ति विघ्नानां संभवस्तस्य सन्निधौ ॥३०॥
कदलीनां वने सोऽयं महाभागवतः प्रभुः ।
नित्यं सीतादासभक्तो राजते नातिगोचरः ॥३१॥
क्वचित् श्रीबदरीं याति क्वचिद्गौरीतपःस्थलम् ।
गौरीशिखरमेवापि क्वचित् कैलासपर्वतम् ॥३२॥
क्वचिद्वै काञ्चनीं गंगां गह्वरे शृंगवर्तिनि ।
यत्र यत्र हनुमान् स प्रयाति च वसत्यपि ॥३३॥
तत्र नैवाऽस्ति विघ्नानां मातर्वै संभवः खलु ।
गंगामूले तु शिखरे कल्पलता भवन्ति च ॥३४॥
यद् यदा चेष्यते तत्तत् तदोपस्थितमाप्यते ।
हनूमदाश्रमस्तत्र वर्तते सर्वरक्षकः ॥३५॥
गन्तव्यं तत्र शिखरे तपः कार्यं हि निर्जने ।
आवेदयित्वा कीनाशं स्थास्यावस्तपसे सदा ॥३६॥
इत्येवं निश्चयं कृत्वा दुःखिनीकमला सुता ।
मात्रे निवेदयामास जानक्यै तप ईहितम् ॥३७॥
मातर्मे वर्तते चेच्छा कर्तुं नारायणं पतिम् ।
स मां प्राह मदर्थे वै तपः कुरु सुकन्यके ॥३८॥
ततोऽहं तपसोऽर्थे वै गमिष्ये तु हिमालयम् ।
गहनं निर्जनं प्राप्य करिष्ये तप उत्तमम् ॥३९॥
तपः सिद्ध्युत्तरं मातश्चागमिष्ये तवाऽन्तिकम् ।
श्रुत्वा माता शुशोचाऽति कोमला बालिका मम ॥४०॥

कथं पारं तपसः सा गमिष्यति हरेः कृते ।
इत्येवं चिन्तयमाना सा जगाद हराय तत् ॥४१॥
शिवराजो विचार्यैव योगेनाऽऽह तु जानकीम् ।
योग्यं सा वक्ति कन्याऽत्र यतः साऽस्ति रमा स्वयम् ॥४२॥
त्वं चाऽसि दक्षपुत्री वै सती चाऽहं हरः स्वयम् ।
कृष्णाद्या वैकुण्ठवासाः सन्ति शापवशादिह ॥४३॥
सर्वेऽत्र जनिमापन्ना नारायणः सदा प्रगे ।
भक्तस्नेहादत्र नित्यं समायाति परेश्वरः ॥४४॥
तद्वाक्येन प्रिये कन्या रमा तपः करिष्यति ।
रमया सह च ततो नारायणस्य शार्ङ्गिणः ॥४५॥
प्राप्ते तु समये पत्नि विवाहः संभविष्यति ।
ततो वयं रमाशापाद् विमुक्ताः स्याम भामिनि ॥४६॥
तद्योग्यं सर्वथा चास्तु तपो निर्विघ्नमेव च ।
सफलं तत्तपश्चास्तु हरिश्चास्तु सुतापतिः ॥४७॥
एषा या चक्रवाक्यस्ति सा पुत्री चोर्वशी हरेः ।
शापमुक्ताऽपि तपसा भविष्यति न संशयः ॥४८॥
इत्येवं शंभ्वनुमता जानकी प्राह पुत्रिकाम् ।
वत्से त्वयाऽर्थितः कान्तो नारायणः स्वयं प्रभुः ॥४९॥
तपसा तत्तपस्तेऽस्तु सफलं समनोरथम् ।
प्रापयितुं स्थलीं यत्र तपस्त्वं वै करिष्यसि ॥५०॥
शिवराजस्तथा चाऽहं समागच्छाव ईश्वरि ।
अपेक्षितं गृहाणाऽत्र मुहूर्तं च शुभं तथा ॥५१॥
रक्षार्थं वद दास्यामि भ्रातरं यदि रोचते ।
तदा प्राह रमा मातर्मम किञ्चिन्न रोचते ॥५२॥
रक्षां मे तपसः कृष्णो रक्षानाथः करिष्यति ।
वस्तु किञ्चिन्न चेच्छामि वन्यं यद्देहसाधनम् ॥५३॥
शुभो मेऽस्तु हरः साक्षात् कैलासवासकृत् प्रभुः ।
रक्षा मेऽस्तु सदा माता सती दक्षसुता मम ॥५४॥
रक्षको मे वैष्णवोऽस्तु हनुमान् शंभुबालकः ।
साहचर्ये चक्रवाकी योर्वशी मम बालिका ॥५५॥
हिमालयः स्वयं रक्षां करिष्यति ममाऽम्बिके ।
स्वयं मे रक्षकश्चास्ते वरदोऽपि नरायणः ॥५६॥
नारायणं वरिष्येऽहं मरिष्ये वा हिमालये ।
साधयिष्ये मनोऽभीष्टं मोक्षयिष्ये तु शापतः ॥५७॥
इत्येवं पूर्वसंस्कारा जगाद मातरं सुता ।
ततः सा बलवच्चन्द्रे पृष्ट्वा संपूज्य मातरम् ॥५८॥
पितरं बान्धवान् बाला स्वसारं च सुहृज्जनान् ।
सखीजनान् समापृच्छ्य कृतकौतुकमंगला ॥५९॥
जटावल्कलवस्त्राढ्या शालग्रामशिलान्विता ।
अपरिग्रहसर्वस्वा त्यक्त्वा राज्यस्य वैभवान् ॥६०॥
विघ्नेशं च सतीं सूर्यं नत्वा शिवं नरायणम् ।
कार्तिकस्यैव पूर्णायां यात्रां चकार कन्यका ॥६१॥
चक्रवाक्या सह पुत्री ययौ शीघ्रं विहायसा ।
तदा वाद्यान्यवाद्यन्त जयशब्दास्तदाभवन् ॥६२॥
सुराणां पुष्पवृष्टिश्च चान्दनी वृष्टिरुत्तमा ।
पार्षदानामभवच्च सहाया मरुतोऽभवन् ॥६३॥
शकुनान्यभवँस्तत्र व्योम्नि सौभाग्यचिह्निताः ।
सुरदेव्यश्च मिलिता गच्छन्त्यो बदरीवनम् ॥६४॥
श्वेतो गजश्चतुर्दन्तो मिलितोऽवतरन् दिवः ।
हनूमान् बालसूर्याभो मार्गे दृष्टिपथं गतः ॥६५॥
यास्यन् काञ्चनगंगां सः स्वाश्रमं तु हिमालये ।
अपृच्छत् कन्यके कुत्र गम्येते वद नोऽधुना ॥६६॥
ममाश्रमे ह्यभक्तानां प्रवेशो नास्ति सर्वथा ।
रमा प्राह नमस्तेऽस्तु रामनाममहोदधे ॥६७॥
महाभागवतश्रेष्ठ रामप्रिय नमोऽस्तु ते ।
तापसीनां तपोरक्षाकर भक्त नमोऽस्तु ते ॥६८॥
अभक्ता नास्मि सीताऽस्मि नारायणप्रिया रमा ।
इयं नारायणपुत्री चक्रवाक्युर्वशी सुता ॥६९॥
सनत्सुजातशापेन चक्रवाकीतनुस्थिता ।
शापमोक्षणकामेयं तपस्तप्तुं समिच्छति ॥७०॥
अहं लक्ष्मीः स्वयं चाऽस्मि तथोऽर्थं यामि वानर ।
हनूमदाश्रमो यत्र त्वास्ते श्रृंगे सुगह्वरे ॥७१॥
यत्राऽऽस्ते कांचनगंगा कल्पवल्लीसमाश्रया ।
तत्र यामि तपोऽर्थं ते सन्निधौ हरिलब्धये ॥७२॥
श्रुत्वैवं तु रमावाक्यं हनूमान् मातरं द्रुतम् ।
ननाम पादयोः शीघ्रमहोभाग्यममन्यत ॥७३॥
शिवराजस्य जानक्या पुत्रीं श्रुत्वा ततस्तराम् ।
आनन्दं प्राप्तवाँश्चाति सेवावान् किंकरोऽभवत् ॥७४॥
शंकरस्य सुतः साक्षाद्धनूमान् वानरोत्तमः ।
शंभुपुत्रीं स्वसारं श्रीं ज्ञात्वाऽऽनन्दभरोऽभवत् ॥७५॥
स्वसृपुत्रीमुर्वशीं च ज्ञात्वा तामभ्यनन्दयत् ।
सविश्रमं नीतवाँस्तत्र कदलीवनशोभितम् ॥७६॥
स्वल्पश्रृंगाधित्यकायां गह्वरे सर्वदा सुखे ।
कल्पवल्लीसमायुक्ते सर्वसिद्धिसमन्विते ॥७७॥
नर्मये राज्यसदृशे वासं ददौ प्लवंगमः ।
धूनीं ददौ तथा वह्निकुण्डं ददौ शुभाश्रयम् ॥७८॥

कमण्डलुं वल्कलानि चासनं जपमालिकाम् ।
शीतोष्णजलकुण्डानि फलमूलजलानि च ॥७९॥
तथा नारायणमूर्तिं चतुर्भुजां ददौ तदा ।
तथोपचारसर्वस्वं ददौ स्वस्रे हनूधरः ॥८०॥
एवं तद्रक्षिते देशे लक्ष्मीश्चक्रवती तथा ।
मार्गकृष्णद्वितीयातस्तप आद्यं जपात्मकम् ॥८१॥
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
मालाभिस्तन्मन्त्रजपं चक्रतुस्तु दिवानिशम् ॥८२॥
स्नानं काञ्चनगंगायां सदा त्रिषवणं हि ते ।
चक्रतुः प्रातरेवैते नत्वा श्रीभ्रातरं कपिम् ॥८३॥
पूजयित्वा हरिं नित्यविधानतस्ततः पुनः ।
हवनं त्वनले कृत्वा तेपाते सजपं मुदा ॥८४॥
चक्राते मासमात्रं ते कन्दाहारं सकृद् दिवा ।
रात्रौ भूशयनं कृत्वा चक्राते भजनं हरेः ॥८५॥
ततो द्वितीयमासे ते फलाहारं प्रचक्रतुः ।
तृतीये मासि ते पत्राहारं चक्रतुरादरात् ॥८६॥
चतुर्थे मासि ते पुष्पाहारं चक्रतुरुत्सुके ।
पञ्चमे मासि मेघाम्बुपानं चक्रतुरम्बरे ॥८७॥
षष्ठे मासि तु बाष्पाणामशनं चक्रतुर्मुदा ।
सप्तमे चक्रतुः साध्व्यौ कृष्णार्थे पवनाशनम् ॥८८॥
अष्टमे श्वासमात्रेण तस्थतुश्चेतनान्विते ।
नवमे मासि तरुवत् त्वेकपादेन संस्थिते ॥८९॥
दशमे मासि च तयोर्देहयोः काष्ठतुल्यता ।
एकादशे ततो मासि वह्निस्तु तपसोद्भवः ॥९०॥
समुत्थितो महाज्वालश्चात्मशक्त्या भयंकरः ।
व्यानशे सर्वतो दिक्षु ब्रह्माण्डे नाशकारकः ॥९१॥
अणुरूपैश्चातिदाहैर्जीवान्तं प्राणनाशकः ।
आश्चर्यं प्राप हनुमान् रामकृष्णेति वै जपन् ॥९२॥
रक्षायां वर्तते तत्र सेवको हरिभक्तकः ।
विज्ञाय भगवान् लक्ष्म्यास्तपसश्चातिकाष्ठताम् ॥९३॥
उर्वश्याश्चापि तपसः परां काष्ठां विलोक्य च ।
नारायणः स्वयं तत्र द्रागेव च समाययौ ॥९४॥
पद्मयां समाययौ प्रेम्णा पत्न्यास्तपो विलोकितुम् ।
फलं दातुं तपसश्च तपोऽन्तार्थं समाययौ ॥९५॥
कोटिसूर्यसमं कृष्णं नारायणं विलोक्य च ।
हनुमान् दण्डवच्चक्रे तथा स्वागतमुत्तमम् ॥९६॥
आसनं मधुपर्कं च पूजनं फलपुष्पकैः ।
सुनैवेद्यं जलं शीतं ददौ नारायणाय सः ॥९७॥
नैवेद्यं च जलं नैव बुभुजे श्रीनरायणः ।
यावल्लक्ष्मीश्चोर्वशी च न भुञ्जाते फलं जलम् ॥९८॥
अथ गत्वा सन्निधौ द्रागुवाच परमेश्वरः ।
अहो लक्ष्म्यास्तथोर्वश्याः कीदृशं तप उत्तमम् ॥९९॥
यद्वर्ष्मणोरनला वै सूर्यसमाः क्षरन्ति हि ।
ब्रह्माण्डदाहशक्ता वै महाप्रलयसदृशाः ॥१००॥
शापस्य प्रतिकारोऽद्य पूर्णो जातो न शिष्यते ।
ददाम्याभ्यां बोधयित्वा यदिष्टं सुखदं तयोः ॥१०१॥
इति विचिन्त्य भगवान् हनुमन्तमुवाच ह ।
याह्येतयोश्चेतनार्थं जलं कांचनगांगकम् ॥१०२॥
शीघ्रमानय पात्रेऽस्मिन् मा चिरं कुरु भक्तराट् ।
इत्युक्त्वा भगवानास्ते क्षणं मौनं समाधिमान् ॥१०३॥
इत्येवं राधिके स्वामिकृष्णनारायणः पतिः ।
नारायणस्वरूपेण फलं दातुं समाययौ ॥१०४॥
हेमशालायनाद्यास्तच्छ्रुत्वाऽऽश्चर्यं परं गताः ।
अचिन्तयन्नहो लक्ष्म्याश्चोर्वश्यास्तप उत्तमम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने माता-पित्राज्ञां गृहीत्वा लक्ष्म्युर्वश्योस्तपोऽर्थं हिमालये हनुमदाश्रमगमनं, तपः, वर्षान्ते तपःफलं दातुं तत्र नारायणस्य साक्षाद्गमनमित्यादिनिरूपणनामा चतुरधिकशततमोऽध्यायः ॥ १०४ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके पश्चाद् यज्जातं कथयामि ते ।
कृष्णनारायणः प्राह हेमशालायनाय यत् ॥ १ ॥
कमण्डलुं गृहीत्वा श्रीहनुमान् व्योममार्गगः ।
जलं काञ्चनगंगाया आनयत्पावनं द्रुतम् ॥ २ ॥
ददौ नारायणाय द्राङ् नारायणोऽञ्जलिं ददौ ।
तापसीभ्यां तु शुष्काभ्यां यावत् तावत्तु वै द्वयोः ॥ ३ ॥
ब्रह्मरन्ध्राच्चेतनस्य सञ्चारो हृदयेऽभवत् ।
प्राणोऽप्यसञ्चरद् देहे नेत्रे चोद्घाट्य ते तदा ॥ ४ ॥
पुरो व्यलोकयतां श्रीनारायणं परेश्वरम् ।
प्रापतुस्तु परं हर्षं विलोक्य पुरुषोत्तमम् ॥ ५ ॥
सौवर्णमुकुटं रत्नमणिमौक्तिकशोभितम् ।
धारयन्तं मस्तके स्वे वक्रस्निग्धजटायुते ॥ ६ ॥
कर्णयोः कुण्डले चापि पार्श्वयोः शेखरालिकाम् ।
ललाटे तिलकं चन्द्रं नेत्रयोः कज्जलं शुभम् ॥ ७ ॥

परितः परिधिं शुक्लतैजसं त्वाननस्य वै ।
हास्ययुक्तमुखं कृष्णं हारकौस्तुभशोभितम् ॥८॥
रशनाश्रृंखलाभिश्च कटकैरुर्मिकादिभिः ।
अङ्गुलीयककन्दकैर्वैषकुसुमहारकैः ॥९॥
शोभितं परमेशानं परब्रह्म जनार्दनम् ।
सर्वशोभास्पदं रम्यं किशोरं स्वर्णरूपिणम् ॥१०॥
चम्पकाभं वह्निधौतदिव्याम्बरविराजितम् ।
शंखचक्रगदापद्मवनमालाविभूषितम् ॥११॥
वरदानं प्रदातुं वै त्वागतं कमलापतिम् ।
भक्तपतिं कृपापारावारं शान्तमनोहरम् ॥१२॥
पुनर्जलेन संप्रोक्ष्य शान्तयन्तं तपोऽनलम् ।
आह्वयन्तं कमलेति उर्वशीति पुनः पुनः ॥१३॥
वदन्तं युवयोः सिद्धिं दातुं चागतवानिति ।
वरं वृणुतं कमले प्रिये पुत्रि तथोर्वशि ॥१४॥
युवाभ्यां चातिकष्टं वै मदर्थं प्राप्तमित्यतः ।
प्रसन्नोऽस्मि ददाम्यद्य वरं भवत्यपेक्षितम् ॥१५॥
तपोयोगाग्निवर्तेथां कमले चक्रवाकि च ।
तापस्याऽन्तो भवत्वद्य ददामीष्टतमं च वाम् ॥१६॥
कमला प्राह भगवन् विवाहविधिना तु माम् ।
गृहाण निजपत्नीं वै चापराधं क्षमस्व मे ॥१७॥
यद्यप्यहं सदा पत्नी तवाऽस्मीति न गुप्तता ।
तथापि शिवराजस्य कन्यां मां विधिना वह ॥१८॥
तथाऽस्त्विति हरिः प्राह याहि पितृगृहं प्रिये ।
पूर्णे द्वादशवर्षे ते पिता माता च बान्धवौ ॥१९॥
समग्रा ह्येते प्रयास्यन्ति काशीवासार्थमेव तु ।
तत्राऽहं प्रसमागत्य ग्रहीष्ये त्वामनिन्दिताम् ॥२०॥
तत्र त्वामुद्वहिष्यामि नेष्यामि मम मन्दिरम् ।
जलं पिब फलं भुंक्ष्व मेंऽके निषीद वै रमे ॥२१॥
इत्युक्ता सा तपस्त्यक्त्वा नारायणान्तिकं ययौ ।
अंके निषद्य कान्तं तं समाश्लिषत् क्षणं रमा ॥२२॥
दत्तं फलं जलं चापि पुत्रीं विहाय पद्मजा ।
नाऽग्रहीदथ भगवानुर्वशीं प्राह पुत्रिके ॥२३॥
शीघ्रमायाहि भुंक्ष्वेदं फलं पिब जलं ततः ।
पुत्री प्राह पितर्नैवं ग्रहीष्ये तु फलं जलम् ॥२४॥
पितर्यदि प्रसन्नोऽसि तपः पूर्णं च मे यदि ।
भक्तेष्टदाताऽसि नाऽदेयं विद्यते यदि ॥२५॥
अपाम्भूतवार्यत्र शिखरे तपसः स्थले ।
प्रापयाऽन्यत् सलिलं न पिबामि देहिनाऽर्पितम् ॥२६॥
यद्येवं न ददास्यत्र वारि तर्हि पिबामि न ।
प्राणान् जह्यां शिखरेऽत्र त्वदग्रे जलमन्तरा ॥२७॥
विश्वंभरेति च पितस्तव नाम प्रसिद्ध्यति ।
भक्तवत्सलनामा च भक्तार्थे श्रीवियोगवान् ॥२८॥
मम माता रमा लक्ष्मीं त्यक्तवान् धामसंस्थिताम् ।
ततोऽहं यदि भक्ताऽस्मि पुत्री स्नेहस्य पात्रिका ॥२९॥
वात्सल्येन प्रयुक्तस्त्वं किं करोषि विलोकये ।
मया वृष्टिजलं पात्राऽभृतं चात्र समिष्यते ॥३०॥
तत् पिबामि ततः शापान्मोक्षणं चास्तु मे पितः ।
इत्युक्त्वा नाऽऽगता चाऽङ्के जलार्थं तूर्वशी सुता ॥३१॥
सर्वं त्यजति भक्तार्थं मदर्थं किं त्यजत्ययम् ।
पिता मद्भक्तिवश्यतां प्राप्तश्चेद् भगवान् स्वयम् ॥३२॥
विचार्येत्थं हठान्नैवाऽगमत् पितुः समीपतः ।
पिता नारायणः प्राह सुते तत्र जलाशये ॥३३॥
वृष्ट्या द्रोण्यां संभृतायां जलं श्रृंगगतं भवेत् ।
उच्छ्रिते वृष्टिसलिले शिखरान्निम्नभूमिकाः ॥३४॥
सर्वा मग्ना जलेषु स्युः प्राणिनां प्रलयो भवेत् ।
तत्पापं ते भवेत् पुत्रि ततोऽत्राऽऽगत्य वै पिब ॥३५॥
उर्वशी प्राह भगवन् वरदानवचस्तव ।
अभीष्टदानवाक्यं चेत् सत्यं त्वत्र जलं नय ॥३६॥
यदि सत्यं न ते वाक्यं याहि कुर्वे तपः पितः ।
अत्रैव तु मया पेयं जलं नान्यत्र कुत्रचित् ॥३७॥
अपात्रसंस्थितं पेयं स्थिरं पेयं न चञ्चलम् ।
न वा दिव्यं बिन्दुरूपं त्वम्बरात् प्रपतत् किल ॥३८॥
अहं चेत्तव भक्तास्मि भक्तावाक्यं प्रपूरय ।
अवाक्यपूरणे ते स्यात्पापं त्वसत्यवाग्भवम् ॥३९॥
मृषाऽभीष्टप्रदं वाक्यं नोचार्यं वा कदाचन ।
शंकरार्थे कृतं सर्वं मदर्थं न कथं पितः ॥४०॥
कृष्णार्थे च कृतं सर्वं मदर्थं न कथं पितः ।
कृष्णनारायणस्वामिन् जनार्दन कृपालय ॥४१॥
मां भक्तां शिखरे चात्र पानीयं न ददासि चेत् ।
संकरिष्ये तपश्चोग्रं सर्वसंसारभस्मकृत् ॥४२॥
बहूनां देहिनां नाशे तव पापं भविष्यति ।
जलमग्ने जगत्येव मम पापं यथोदितम् ॥४३॥
किमत्र चातिवक्तव्यं पापनाशकरो भवान् ।
वर्ततेऽत्र तथाप्यत्र पापभीतिं ददाति चेत् ॥४४॥
पितः पापविनाशार्थं कस्त्वां वै संभजिष्यति ।
पुष्पोद्यानानि नैवेद्यमिष्टान्नानि त्वदर्शकम् ॥४५॥

कः करिष्यति तेऽर्थे वै यदि पापं न नाश्यसे ।
पापहन्ता भवेद् भीरुः पापी कं शरणं व्रजेत् ॥४६॥
इत्युक्तो भगवानाह पिबेदं पातुमिच्छसि ।
त्वयाऽर्थितं जलं तत्र नागमिष्यति पुत्रिके ॥४७॥
लक्ष्मि त्वं च जलं त्वेतद् पिब चेत् पातुमिच्छसि ।
एषोऽन्यथा तु गच्छामि यथेष्टं चर भामिनि ! ॥४८॥
इत्युक्त्वा भगवाँस्तत्र क्षणादन्तरधीयत ।
लक्ष्मीः पुत्रीं विना नैव पपौ वारि मनागपि ॥४९॥
पुत्री जलं न जग्राह यथेष्टं नार्पितं यतः ।
इत्येवं च जलाऽपाने पुनस्तपः प्रचक्रतुः ॥५०॥
पुत्रीं विहाय वै माता गन्तुं गृहं शशाक न ।
पुनर्घोरं तपश्चोग्रं जलार्थे ते प्रचक्रतुः ॥५१॥
सर्वं ददाति भक्तार्थं जलं ददाति नौ न किम् ।
इत्येवं ते विनिश्चित्य तृषिते तपसि स्थिते ॥५२॥
नारायणेन चैकात्म्यं कृत्वा संयमसाधनैः ।
तपस्ते चेरतुश्चोग्रं शुष्ककण्ठौष्ठतालुके ॥५३॥
चक्रतुस्ते तपश्चोग्रं मासं चैकात्म्ययोगतः ।
तदा पुत्र्यास्तथा पत्न्यास्तृषायोगाद्धरेस्तृषा ॥५४॥
ववृधे प्रतिदिवसं कण्ठदाहोऽप्यजायत ।
भक्तैर्भक्ताभिरत्यर्थं पायितं जलममृतम् ॥५५॥
पुनः पुनः स पिबति नारायणो जलाञ्जलीन् ।
तथाप्यस्य तृषायास्तु निरोधो नैव जायते ॥५६॥
श्वेतद्वीपे क्षीरवार्धौ वैकुण्ठे बदरीवने ।
अक्षरे चामृते चाव्याकृते चान्यत्र यत्र च ॥५७॥
नारायणः स्वयं त्वास्ते तत्र तत्र तु सर्वथा ।
असंख्यजलपानेऽपि तृषा निवर्तते न वै ॥५८॥
जलं पीत्वा स्वयं नारायणः श्रममवाप्तवान् ।
उदरं संभृतं वार्भिः कण्ठः शुष्कायते मुहुः ॥५९॥
उर्वश्यास्तृषितायास्तु तथा लक्ष्म्यास्तपो बहु ।
वेगेन वर्धते नारायणः शान्तिं न विन्दति ॥६०॥
तृषादाहाग्निना दग्धो विक्षिप्त इव वर्तते ।
उत्थायोत्थाय पतति चोन्मत्त इव धावति ॥६१॥
मूर्छां प्राप्नोति तृषितो निद्रां सुखं न विन्दति ।
क्वचिदुत्थाय सलिले वार्धौ पतति वै मुहुः ॥६२॥
भक्ताभिः सेवकैश्चापि पवनैः सेवितो जलैः ।
सिक्तश्चापि न शैत्यं स प्राप्नोति परमेश्वरः ॥६३॥
सर्वान्तरात्मनश्चैवं जाते तृषातिशोषणे ।
अन्तःस्थितस्य देहा वै सर्वे स्थावरजङ्गमाः ॥६४॥
अवापुः शोषणं चाति तृषाजन्यं जगत्त्रये ।
ईश्वराः ऋषयो देवाः पितरो मानवाः खगाः ॥६५॥
पशवो जलगाः सर्वे दैत्याद्या अपि सर्वशः ।
तृषादोषैर्हता भ्रान्ता धावन्ति च पतन्ति च ॥६६॥
त्रैलोक्यं तृषितं सर्वं तदा नाशोन्मुखं ह्यभूत् ।
जलार्तिपानकर्तृत्वे तुन्दनाशे विनाशनम् ॥६७॥
जलाऽपाने कण्ठशोषः पानेऽपि शोषणं तथा ।
उभयथाऽपि नाशोऽत्र जगतां समुपस्थितः ॥६८॥
तदा ब्रह्मा हरो विष्णुः कृत्वा समाधिमेव ते ।
ज्ञात्वा हेतुं तृषायास्तु रमोर्वशीतृषातपः ॥६९॥
शीघ्रं ययुर्भूतले ते सौराष्ट्रेऽक्षरभूतले ।
अश्वपट्टसरःक्षेत्रे यत्राऽनादिनरायणः ॥७०॥
वर्तते कुंकुमवापीक्षेत्रे निजालये प्रभुः ।
सर्वावतारतृषया मूर्छितस्तृषितो भृशम् ॥७१॥
ब्रह्माद्यास्तृषिताश्चापि मृत्युसंयोगिनोऽपि ते ।
यथाकथंचिद्भगवत्पादयोः पतितास्तथा ॥७२॥
शुष्ककण्ठौष्ठताल्वाद्या मृत्युक्षणगता इव ।
त्रुटितया तदा वाण्या जगदुः परमेश्वरम् ॥७३॥
शीघ्रं नाथ रमायाश्चोर्वश्याः प्रापय वै जलम् ।
अवृष्टिजं चाऽपात्रस्थं चाऽन्याऽस्पृष्टमनाहुतम् ॥७४॥
अन्यथा वै जगत् सर्वं क्षणान्ते वा विनश्यति ।
सर्वनाशे समुत्पन्ने स्वल्पनाशो हितावहः ॥७५॥
यदि दृश्येत च तदा स्वल्पं त्यक्त्वा परानवेत् ।
शीघ्रं वृष्ट्या हिमशैले शिखरे वानराश्रमे ॥७६॥
रमोर्वशीतपोभूमौ जलं प्रापय चेष्टकृत् ।
इत्यर्थितः सुरैः कृष्णनारायणः परेश्वरः ॥७७॥
द्रुतं मेघान् समाहूयाऽऽज्ञापयामास वृष्टये ।
मेघा वृष्टिं प्रचक्रुश्च सम्भूय द्वादशैव ते ॥७८॥
द्रोणीश्चोपत्यकाः क्षेत्रं शैलप्राकारमध्यगम् ।
सर्वं त्वाप्लावयामासुराशृंगान्तं जलैर्लयः ॥७९॥
वर्षवर्ति महान् घोरो द्रोण्यां वै पशुपक्षिणाम् ।
अरण्यानि निमग्नानि मग्नो हनुमदाश्रमः ॥८०॥
दशयोजनविस्तारः सर्वो मग्नः प्रदेशकः ।
जलं शिखरपर्यन्तं संभृतं क्षितिपात्रके ॥८१॥
निम्नदेशा निम्नभागा निम्नानि शिखराणि च ।
द्रोण्यश्च गह्वराण्येव निमग्नानि जलैर्लये ॥८२॥
लक्ष्म्युर्वश्योः पादयोश्च जलं सामुद्रजं यथा ।
तयोः प्राप्तं च शिखरे तपःस्थल्यां पुरः स्थितम् ॥८३॥

तदा नारायणो देवा गत्वा च प्रार्थयन्मुहुः ।
जलपानार्थमेताभ्यां ते पानं चक्रतुस्तदा ॥८४॥
तृषा नारायणानां च द्रागेव निवृताऽभवत् ।
देहिनां स्थावराणां जङ्गमानामपि सर्वशः ॥८५॥
तृषा शान्ताऽभवत्तूर्णं जलानि हरिवाञ्छया ।
पृथ्व्यां समपतंस्तुश्च दिव्या मेघा ययुर्लयम् ॥८६॥
श्रीशृंगं चोर्वशीशृंगं ख्यातं तत्तपसः स्थलम् ।
लक्ष्मीवनं चक्रवाकीवनं ख्यातमभूद् वनम् ॥८७॥
लक्ष्मीगंगोर्वशीगंगा ख्याता गंगा तु कांचनी ।
हनुमद्गह्वरं चापि नारायणगुहाभिधम् ॥८८॥
जलं सरोवरं लक्ष्मीसरोवरमभूत्ततः ।
कांचनगंगातीर्थं च ब्रह्मगंगाऽधिकं ह्यभूत् ॥८९॥
कुश्यां कांचनगंगायां जलान्यासन् गतानि वै ।
निम्नदेशेषु लोकानामवैर्ये जलदर्शनात् ॥९०॥
जातं जललयः स्याद्वै गन्तव्यमितरत्र तु ।
एवं कोलाहलो जातो देशेषु सरितां जलैः ॥९१॥
तन्मिषेण ततो लोकाः काशीं श्रीपुरुषोत्तमम् ।
क्षेत्रं च कौरवं क्षेत्रं ययुर्यात्रानिमित्ततः ॥९२॥
शिवराजो जानकी च कृष्णा जयश्च चन्द्रकः ।
धेनुपालं प्रदायैव राज्यं काशीं ययुस्तदा ॥९३॥
देशान्तरेषु ये दासा दास्यो वैकुण्ठवासिनः ।
प्राकट्यं जगृहुस्तेऽपि काश्यामागत्य चोत्तरे ॥९४॥
वरणायास्तटे रम्ये न्यूषुश्चाम्रवणेषु ते ।
फलिद्रुमसमाकीर्णे पुष्पवल्ल्यादिगन्धिते ॥९५॥
काशीराजस्य सैन्यैश्चाधिश्रितोद्यानशोभिते ।
काशीराजस्य सौवर्णे प्रासादे वरणातटे ॥९६॥
सर्वोपस्कारसंयुक्ते काशीराजेन मानिताः ।
सत्कृताः स्वागतैश्चाति शतहस्तिविमानकैः ॥९७॥
बहुवाद्यादिभिश्चापि लक्षशैर्मानवैः सुरैः ।
विद्वद्भिर्ब्राह्मणैर्ब्राह्मैर्बृहस्पतिपुरोगमैः ॥९८॥
देवीभिः शक्तिभिश्चापि गणैर्वीरैरसंख्यकैः ।
सर्वतीर्थैश्च यतिभिः सतीभिश्चाप्सरोगणैः ॥९९॥
पूजितं शिवराजस्य कुटुम्बं गुप्तमानवम् ।
नित्यावासं सप्तभौमे सौधे सुवर्णनिर्मिते ॥१००॥
कल्पवल्लीसमायुक्ते चकार शंभुमानितम् ।
सतीपतिः स्वयं काशीविश्वनाथोऽन्नपूर्णिका ॥१०१॥
शंभोर्दास्यस्तथा दासाः शंभुरूपं कुटुम्बकम् ।
शिवराजं शिवं चैवाश्लिष्य स्वागतमाचरत् ॥१०२॥
मधुपर्कं चामृतादि ददौ जहर्ष चात्यति ।
एवं वासं चकारैतत् कुटुम्बं हरिवाञ्छया ॥१०३॥
सर्वं कालेन भवति यथा कृष्णः समिच्छति ।
वैष्णवाः पार्षदाश्चाऽन्ये पार्षदान्यश्च याः स्त्रियः ॥१०४॥
मानव्यश्चाऽभवँस्ताश्च काशिकानृपमानिताः ।
शंभुना मानिताश्चापि न्यूषुः राजाऽऽलयेष्वधि ॥१०५॥
अनादिश्रीकृष्णनारायणं स्मरन्त एव ते ।
नरनारायणं चापि लक्ष्मीनारायणं तथा ॥१०६॥
लक्ष्मीं च तापसीं देव्यः स्मरन्त्यो न्यूषुरेव च ।
राधिके चोर्वशीलक्ष्म्यौ सस्मरतुः कुटुम्बकम् ॥१०७॥
चक्रवाक्यभवच्छापान्मुक्ता कन्या रमासमा ।
उर्वशीतिस्वरूपाढ्या नेमे स्वपितरं हरिम् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नारायणप्रोक्षितजलेन तपसि लक्ष्मीचक्रवाक्योः प्राणसंचारे सति चक्रवाकी शिखरे जलपानं ततो मोक्षं च वव्रे, हरिर्वृष्टिभिर्देशं निमज्जयित्वा शिखरे जलं ददौ, पीत्वा शापमुक्तिः, वृष्टिभयात् शिवराजकुटुम्बस्य वैकुण्ठीयपार्षदादीनां मानवरूपाणां काश्यामागत्य वरणातटे काशीराजसौधेषु चाम्रवणे वासादिः, शंभुकृतसत्कारादि चेतिनिरूपणनामा पञ्चाऽधिकशततमोऽध्यायः ॥ १०५ ॥

श्रीकृष्ण उवाच—

इत्येवं राधिके हेमशैलायनर्षये हरिः ।
कथयामास चाख्यानं चक्रवाक्या जलार्थकम् ॥ १ ॥
उर्वशी सा शापमुक्ताऽभवद्वै सुरसुन्दरी ।
नत्वा स्वपितरं नारायणं स्वां मातरं रमाम् ॥ २ ॥
इन्द्रलोकं ययौ पूर्वमिन्द्राय चार्पिता यतः ।
अथ लक्ष्मीः स्वकान्ताय कथयामास वै तदा ॥ ३ ॥
हनूमान् रक्षयामास मां सपुत्रीं तपःस्थिताम् ।
तस्मै हनुमते देयं वरदानं त्वया प्रभो ॥ ४ ॥
इत्युक्तः श्रीहरिस्त्वाह हनुमन् वृणु चेप्सितम् ।
कपीशो वरयामास नामार्थं सार्थकं सदा ॥ ५ ॥
कं सुखं शाश्वतं नारायणमूर्तेर्निरन्तरम् ।
पिबामीत्यर्थकं मेऽस्तु कपित्वं कृपया तव ॥ ६ ॥
त्वयि नारायणे भक्तिरस्तु चाऽव्यभिचारिणी ।
यत्र नारायणकथा तत्र मे प्राणजीवनम् ॥ ७ ॥
अनादिश्रीकृष्णनारायणस्य ते कथामृतम् ।
लक्ष्मीनारायणसंहितायाश्चापि कथामृतम् ॥ ८ ॥

यत्र तत्र भवेत्तत्र ममोपस्थितिरस्तु वै ।
यत्र गायन्ति ते भक्तास्तत्र मे स्थानमस्तु च ॥ ९॥
यत्र यत्राऽऽलयस्ते स्यात्तत्र तद्द्वारि मे स्थितिः ।
सेवार्थं शाश्वती चाऽस्तु भक्तरक्षणकारिणी ॥१०॥
इत्येवं प्रार्थनां चक्रे हनूमान् भक्तराट् ततः ।
तथाऽस्त्विति हरिः प्राह ददौ मौक्तिकमालिकाम् ॥११॥
पादुके च ददौ तस्मै चाऽम्लानां पुष्पमालिकाम् ।
लक्ष्मीर्ददौ हनुमते कुलदेवत्वमित्यपि ॥१२॥
कृष्णनारायणः प्राह हनुमन् मम सन्निधौ ।
अश्वपट्टसरःक्षेत्रे वस भूमिं सुरक्षयन् ॥१३॥
हनुमान् कारयामास लक्ष्म्याः शैले सुमन्दिरम् ।
नारायणेन साकं च लक्ष्म्याः करोति पूजनम् ॥१४॥
अथ लक्ष्मीं ततो नीत्वा विमानेन तु काशिकाम् ।
हरिर्ययौ शिवराजादयो यत्र वसन्ति हि ॥१५॥
अवतार्य विमानाच्च विवाहार्थे वरं ददौ ।
आयास्यामि द्वादशाऽब्दे ते शापान्तो भविष्यति ॥१६॥
तावन्मां त्वं प्रतीक्षस्व शिवराजाय चाह तत् ।
उद्वाहयिष्ये चागत्य सर्वं शुभं भविष्यति ॥१७॥
इत्युक्त्वोग्रं तपश्चास्याः प्रश्राव्य श्रीनरायणः ।
ययावदृश्यतां तत्र वरणायास्तटे प्रभुः ॥१८॥
विमानेन ययौ चाश्वपट्टसरोवरं हरिः ।
हेमशालायनं प्राहेत्येवं कृष्णनरायणः ॥१९॥
लक्ष्मीं विवाह्य शंभ्वादीन् शापात् मुक्तान् विधास्यति ।
इत्येवं निजभक्तार्थे लक्ष्मीं जहौ हरिः पुरा ॥२०॥
हेमशालायनाद्यास्तच्छ्रुत्वा हर्षं परं ययुः ।
अथ सर्वर्षयस्तत्रोष्ट्रालयेषु स्थले स्थले ॥२१॥
अनादिश्रीहरेर्योगं पादयोः स्पर्शनं तथा ।
पावित्र्यं चापि तीर्थत्वं कारयितुं पुनः पुनः ॥२२॥
पूजयित्वाऽर्थयामासुस्तीर्थीकर्तुं भुवस्तलम् ।
उष्णालयप्रदेशं तं प्रजां पावयितुं तथा ॥२३॥
भगवन् देवदेवेश शैलसरोवराऽऽपगाः ।
नैजचरणन्यासैश्च स्नानासनप्रहीण्डनैः ॥२४॥
तीर्थीकुर्वन्तु तीर्थानि गृहारण्यानि नस्तथा ।
तथास्त्विति हरिः प्राह दिव्ये विमानके ततः ॥२५॥
आरुरुहुश्च ते सर्वे हेमशालाख्यपर्वतम् ।
प्रथमं परितो वीक्ष्य हेमशालायनगृहम् ॥२६॥
पावयित्वा चरणोत्थं स्पर्शं तत्र विधाय च ।
पूजां हैमकृतां प्राप्य ततो बालानदीं ययुः ॥२७॥

तत्र स्नात्वा पावयित्वा वीक्ष्य बालादिमित्यपि ।
गोशंकुसलिले स्नात्वा रावासनाद्रिमाययुः ॥२८॥
पर्वतं चरणैः सर्वे पावयित्वा ततश्च ते ।
मर्चाशनानदीं चापि मुरानदीं तुरूनदीम् ॥२९॥
ऐतनदीं पावयित्वा तीर्थीकृत्वाऽऽप्लवेन च ।
माकमानसरःसंज्ञे स्नात्वा बालासरस्यपि ॥३०॥
श्वाननद्यां ततः स्नात्वा दारालिंगं च पर्वतम् ।
कृत्वा सुपावनं पद्भ्यां स्नात्वा कुवन्सरोवरे ॥३१॥
लाभरुचिसरश्चापि दृष्ट्वाऽरण्यं च दक्षिणम् ।
गौरानरसरोमध्ये स्नात्वा तुरुसरोवरे ॥३२॥
स्नात्वा ग्रागिरि सरसि स्नात्वा आरसरोवरे ।
पावयित्वा मषीग्रीवं पर्वतं चरणैस्तथा ॥३३॥
उत्तुंगसरसि स्नात्वा रणं विलोक्य चाम्बरात् ।
मेकदानेयशैलं च कृत्वा पद्भ्यां तु पावनम् ॥३४॥
उत्तरे च ततो गत्वा वितूरीयजलाप्लवम् ।
कृत्वा देल्यां च चेल्यां च स्नात्वा निपीय तज्जलम् ॥३५॥
गत्वा शालवीनशैलं पावयित्वा च तं ततः ।
रिन्कुनद्यां झिन्कुनद्यां फिन्कुनन्द्यां च ते ततः ॥३६॥
स्नात्वा च ग्रामशैलं च पावयित्वाऽवतीर्य च ।
कारुलिंगसरित्येव दारुलिंगाजले ततः ॥३७॥
चारुलिंगाजले स्नात्वा स्नात्वा मुरानदीजले ।
तुरानद्यां मुरानद्यां स्नात्वाऽऽचालाद्रिमाययुः ॥३८॥
पद्भ्यां तं पावयित्वैव दिवादिङ्पर्वतं ययुः ।
किण्डीचायां ततः स्नात्वा कुविन्दूमानदीजले ॥३९॥
क्वीलपीनद्यां लविंगायां सस्नुश्च पावनीजले ।
मिचलायां ततः स्नात्वा दृष्ट्वा च चाटपर्वतम् ॥४०॥
पावयित्वा चोत्तरं चोल्लंघ्य ते पश्चिमं ययुः ।
फिजरायां ततः स्नात्वा पावयित्वा प्रजाश्च ताः ॥४१॥
प्रजाभिश्च कृतां पूजां जगृहुर्हरिसेवकाः ।
भोजिताः पूजिताश्चापि वन्दिताश्च मुहुर्मुहुः ॥४२॥
अगस्त्यश्च तथा शंभुर्लोपामुद्रा रमा तथा ।
पार्वती चाश्विनीपुत्रस्तथा तेषां च सेवकाः ॥४३॥
उष्णालयप्रजानां तु ये याः रक्षाकरास्तदा ।
आशीर्वादान् ददुस्ताभ्यः प्रजाभ्यश्चातिनिर्भरान् ॥४४॥
ददुस्ताभ्यो महामन्त्रं वैष्णवं मोक्षदं शुभम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥४५॥
तुलसीकण्ठिकाश्चापि तथा च जपमालिकाः ।
ददुश्च शरणं पश्चाज्जयकारोऽभवत् महान् ॥४६॥

ततो गत्वा राजधान्यां चक्रुस्ते वैष्णवं मखम् ।
तत्रत्याः ऋषयस्तत्र याजकाश्च तदाऽभवन् ॥४७॥
अगस्त्यश्चाऽभवद्ब्रह्मा रुद्रो रुद्रस्थले स्थितः ।
कृष्णनारायणोऽतिष्ठन्मुख्यदेवस्थले प्रभुः ॥४८॥
होता होमायनश्चैव तथोद्गाता बलायनः ।
आहर्ता च मर्षीग्रीवः प्रतिहर्ता रवासनः ॥४९॥
अन्ये होतार एवाऽऽसन् यजमानोऽभवन्महान् ।
राजोष्णालयदेशस्य सम्राट् दक्षजवंगरः ॥५०॥
दक्षस्य मानसः पुत्रो देवदैत्याभिवन्दितः ।
देशविप्लवविघ्नैश्च यानि पापानि कान्यपि ॥५१॥
निवृत्तानि भवेयुश्च विघ्ना भवन्तु नो पुनः ।
इत्यभिप्रेत्य ते सर्वे राजाज्ञया तु भूसुराः ॥५२॥
चक्रुर्यज्ञं वैष्णवं च तुष्टा देवाश्च देहिनः ।
ब्राह्मणास्तत्र वै चक्रुः पुरश्चरणमित्यपि ॥५३॥
केचित्पुरुषसूक्तस्य विष्णुसूक्तस्य चापरे ।
तथा नारायणसूक्तस्याऽन्ये श्रीसूक्तकस्य च ॥५४॥
परे लक्ष्मीप्रसूक्तस्य देवीसूक्तस्य चेतरे ।
रुद्राध्यायस्य च परे सावित्र्याः सवितुः परे ॥५५॥
गणेशाध्यायिनश्चान्ये सामवेदप्रपाठकः ।
एवमन्ये च वेदानां पाठानि चक्रिरे तदा ॥५६॥
दक्षजवंगरो राजा यज्ञारम्भात् सदा प्रगे ।
ददात्येव च दानानि भुंजते च प्रजाः सदा ॥५७॥
मिष्टान्नानि प्रत्यहं च बालका बालिकादिकाः ।
दीनाऽनाथाऽधनाश्चापि पङ्ग्वन्धकृपणादयः ॥५८॥
पश्चाहं यज्ञमेवैते समाप्यावभृथं ततः ।
दक्षजवंगरराज्ञो राजधान्याः समीपगे ॥५९॥
उष्णादत्तांगराख्याया नगर्या दक्षिणे शुभे ।
आरसरोवरे चक्रुः फिंकूनदीसमागमे ॥६०॥
शुक्लषष्ठ्यां परिहारं चक्रुर्विमानकैस्ततः ।
ययुर्नैजान् प्रदेशांश्च तत्रत्या ब्राह्मणादयः ॥६१॥
राजा तुष्टोऽभवच्चापि नारायणपरायणः ।
प्रार्थयच्छ्रीकृष्णनारायणं कर्तुं सुमन्दिरम् ॥६२॥
तथाऽस्त्विति हरिः प्राह राजाऽकारयदुत्तमम् ।
मन्दिरं तत्र नृपतेः राजधान्यां समुच्छ्रयम् ॥६३॥
इषपूर्णातिथौ श्रीयुकृष्णनारायणं हरिम् ।
स्थापितवान् महाविज्ञोऽगस्त्यो वेदविधानतः ॥६४॥
राजा भक्तिं चकाराऽस्य कंभरानन्दनस्य वै ।
अथेयेष प्रजायुक्तः सकुटुम्बः सभूसुरः ॥६५॥
अश्वपट्टसरःक्षेत्रं द्रष्टुं श्रीहरिपत्तनम् ।
कुंकुमवापिकाक्षेत्रं वैष्णवो धार्मिकः शुचिः ॥६६॥
हरिः प्राह तथाऽस्त्वेव विमानशतकेन सः ।
दशसाहस्रसंख्याकनरनारीप्रजाजनान् ॥६७॥
गृहीत्वा व्योममार्गेण चाययौ लोमशाश्रमम् ।
अनादिश्रीकृष्णनारायणश्चापि सहाऽऽययौ ॥६८॥
नैजेनैव विमानेन निजवैमानिकैः सह ।
उष्ट्रालयीयभक्तानां संघाश्चापि समाययुः ॥६९॥
ऊर्जकृष्णतृतीयायां तेऽक्षरक्षेत्रमाययुः ।
स्वागताद्यैर्मानितास्ते न्यूषुर्वै दिनपञ्चकम् ॥७०॥
सर्वतीर्थानि चक्रुश्च शुश्रुवुश्च कथामृतम् ।
लक्ष्मीनारायणसंहिताया नित्यं प्रमुक्तिदम् ॥७१॥
ऊर्जकृष्णाष्टमीब्राह्मे मुहूर्तेऽश्वसरोवरे ।
स्नात्वा चक्रुश्च तेऽनादिकृष्णनारायणोत्सवम् ॥७२॥
द्वादशाब्दीयजन्माहनिमित्तं चार्चनादिकम् ।
श्रीकान्तो भगवाँस्तत्र निर्मिते स्वर्णमण्डपे ॥७३॥
देवदेवीसतीसाध्वीमहर्षिराजशोभिते ।
ईश्वरैरीश्वराणीभिरधिष्ठितेऽतिविस्तृते ॥७४॥
पितृगान्धर्वविद्याध्रैः शोभिते चाप्सरोगणैः ।
दिव्ये गजासनेऽराजत् पुपूजुस्तं मुनीश्वराः ॥७५॥
आशीर्वादान् ददुश्चाप्यारार्त्रिकं चक्रुरीश्वराः ।
साऽक्षतचन्द्रकं चक्रुरुपदाः प्रददुर्जनाः ॥७६॥
सङ्गीतकं तथा नृत्यं सवाद्यं समजायत ।
स्तुतयो देवबन्दीभिर्दिव्यलाभाऽभिबोधिकाः ॥७७॥
कृतास्तत्र च कन्याभिर्ब्रह्मप्रियाभिरर्चितः ।
भगवान् शुशुभे दिव्यो वर्धितो वृद्धवाञ्छयैः ॥७८॥
दानानि प्रददौ तत्र श्रीमद्गोपालकृष्णकः ।
रात्रावुष्ट्रालयभक्ता दशसाहस्रसंख्यकाः ॥७९॥
लोमशं च तथाऽगस्त्यं हेमशालायनं तथा ।
पुरस्कृत्य प्रभोर्जन्मनिमित्तमुत्सवं व्यधुः ॥८०॥
प्रभुं गजासने रम्ये निषाद्य सर्व एव ते ।
मातरं पितरं नत्वा पूजयित्वा यथाक्रमम् ॥८१॥
पुपूजुर्बालकृष्णं ते यावद्विधोपचारकैः ।
न्यधुस्ते मुकुटं दिव्यं बालकृष्णस्य मस्तके ॥८२॥
सद्रत्नसारसौवर्णमणिनिर्बद्धाँश्च शेखरान् ।
आलम्बयामासुरिष्टान् मुकुटे कर्णपार्श्वयोः ॥८३॥
केशेषु न्यक्षिपँस्तैलं सुगन्धं चात्तरादिकम् ।
ललाटे पुण्ड्रकं कृत्वा मध्ये काश्मीरबिन्दुकम् ॥८४॥

नेत्रयोः कज्जलं दत्वा कर्णयोः कुण्डले ददुः ।
कर्णपूरे च सौवर्णे पौष्पे रञ्जनमोष्ठयोः ॥८५॥
स्कन्धयोः राजकवचं सौवर्णं मणिभिर्युतम् ।
कञ्चुकं नाटजातीयं कौशेयं स्वर्णतारितम् ॥८६॥
सौवर्णमणिरत्नाढ्यौ पट्टकौ दीपचन्द्रकौ ।
सूर्यचन्द्रोज्ज्वलौ प्रभाप्रसवौ चायतौ शुभौ ॥८७॥
स्कन्धयोर्लम्बमानौ तौ स्तनयोर्वक्षसि स्थितौ ।
कटिसौवर्णरशनायोजितौ किरणान्वितौ ॥८८॥
लक्षलक्षाधिकमूल्यौ न्यधुः कृष्णस्य वक्षसि ।
मुकुटोर्ध्वे न्यधुः कलिंग मूले मौक्तिकयोजिताम् ॥८९॥
मध्ये तेजःपरिध्युप्तसूक्ष्महीरकशोभिताम् ।
प्रान्ते सौवर्णतारालिस्रवत्तेजःसमन्विताम् ॥९०॥
कण्ठे च गण्डयोर्भाले चिबुके च प्रकोष्ठयोः ।
स्वर्णशृंखलिकानद्धान् मणीन् ददुः सुलग्नितान् ॥९१॥
स्वर्णहारान् पुष्पहारान् तौलसीस्रज उत्तमाः ।
गले न्यधुस्तथा बाह्वोर्न्यधुः कटकशृंखलाः ॥९२॥
ऊर्मिकाः कटकाँश्चाप्यङ्गुलीयकानि वै ददुः ।
स्वर्णयष्टिं स्वर्णगच्छान् धारयामास माधवः ॥९३॥
कट्यधः स्वर्णवस्त्राणां सूरवालं दधार च ।
स्वर्णबुट्टाढ्यमुरुधा मणिमौक्तिकतारकम् ॥९४॥
सप्तपातालचित्राढ्यं बहुरंगविचित्रितम् ।
पादप्रकोष्ठयोः स्वर्णमणिनद्धे च नूपुरे ॥९५॥
ददुस्ते भक्तवर्या वै पादयोः स्वर्णपादुके ।
सिंहाग्राङ्गुष्ठकीलाढ्ये मध्यहस्तिविराजिते ॥९६॥
पार्श्वयोर्हंसशोभे च पश्चाद् गरुडराजिते ।
अग्रे शेषसमाकारे मध्ये कमठशोभिते ॥९७॥
परितो मणिहारालिराजिते च ददुर्हि ते ।
नखेषु रञ्जनं द्रव्यं करपादतलेष्वपि ॥९८॥
ताम्बूलकं सुगन्धाढ्यं ददुस्ते चूर्णमिश्रितम् ।
उत्तरीयं महावस्त्रं सप्तस्वर्गविराजितम् ॥९९॥
कानकं दिव्यदृश्याढ्यं ददुस्तेऽक्षरसन्निभम् ।
छत्रं द्वात्रिंशच्छलाकं सर्वधामविराजितम् ॥१००॥
चामरे सूर्यचन्द्राग्निविद्युत्तेजोविराजते ।
रत्नदण्डे ददुस्तत्र वितानं सत्यसदृशम् ॥१०१॥
विमानं सर्वलोकानां प्रतिमाढ्यं श्रिया युतम् ।
कल्पवल्लीयुतं दिव्यं ददुश्चैकं महायतम् ॥१०२॥

राजा सौवर्णपात्राणि रत्नस्थालान् ददौ तदा ।
सहस्रैकसुवर्त्याद्यैर्युक्तमारार्त्रिकं ददौ ॥१०३॥
कोटिकन्याकृते भूषा ब्रह्मप्रियाकृते ददौ ।
अनन्तमणिरत्नादि तथोऽपकरणानि च ॥१०४॥
पूजोत्तरं ददौ पश्चान्नीराजनं व्यधान्मुदा ।
तदा वाद्यान्यवाद्यन्ताऽजायन्त नर्तनानि च ॥१०५॥
स्तुतयश्च महर्षीणां गीतिकाः स्वर्गयोषिताम् ।
सुस्वराः कन्यकानां च श्रूयन्ते मंगलप्रदाः ॥१०६॥
एवं द्वादशवर्षीयजन्माहोत्सवमद्भुतम् ।
चक्रुस्तेऽस्त्रालयभक्ताः सराजाः सप्रजा निशि ॥१०७॥
ततश्चक्रुः परिहारं सुषुपुश्च तदुत्तरम् ।
प्रातर्नवमीदिवसे स्नातान् कृतसुमंगलान् ॥१०८॥
भोजयामासुरत्यर्थं दुग्धसारान्नसारकान् ।
रससारान् पेयसारान् भक्ष्यभोज्यादिसारकान् ॥१०९॥
मुखशुद्ध्यभिसारॉंश्च ददौ गोपालनन्दनः ।
लोमशं च तथाऽगस्त्यं तथाऽन्यानृषिपुंगवान् ॥११०॥
शंभुं चाश्विनिकापुत्रौ तथा गणगणाऽयुतान् ।
पुपूजुस्तेऽस्त्रदेशीया ददुस्तेभ्यो धनानि वै ॥१११॥
यथेष्टद्रव्यजातानि फलपुष्पाम्बराणि च ।
परिहारं ततश्चक्रुराज्ञां जगृहुरादरात् ॥११२॥
गमनार्थं निजं देशं मोक्षं तदाऽऽर्थयँश्च ते ।
हरिः प्राह करिष्यामि मोक्षं वः प्राणनिर्गमे ॥११३॥
हेमशालायनाद्याश्चैकादशर्षय एव ते ।
अश्वपट्टसरस्तीरे नित्यं वासं व्यधुस्ततः ॥११४॥
अथ राज्ञः शतकन्याः प्रजाकन्यासहस्रकम् ।
वव्रुस्तं परमात्मानं मुग्धास्तदा हि राधिके ॥११५॥
राजा प्रजा ददुस्ताश्च कृष्णनारायणाय ताः ।
लोमशस्याश्रमे सर्वा रक्षिताः परमात्मना ॥११६॥
अथाऽऽज्ञां श्रीहरेः प्राप्य ययुरुष्ट्रालयं च ते ।
विमानैः श्रीकृष्णनारायणं भजन्त एव ह ॥११७॥
स्मरन्तश्चाऽक्षरं क्षेत्रं प्रशंसन्तोऽश्वतीर्थकम् ।
प्रतापं संरटन्तश्च प्रापुर्देशं निजं तु ते ॥११८॥
राधिके चैतदाख्यानं मार्जारीबालरक्षणम् ।
चक्रवाकीजलपानं लक्ष्मीतपोऽतिवाहनम् ॥११९॥
उष्ट्रालयमहादेशप्रजापीडानिवारकम् ।
शृणुयाद्वा पठेद्वा यः श्रावयेद्वा स्मरेच्च वा ॥१२०॥

तस्य मुक्तिस्तथा मुक्तिर्यथेष्टं स्याद्धरेः खलु ।
सिद्ध्यैश्वर्यादिसम्प्राप्तिर्धराधान्यसुतादिकम् ॥१२१॥
सम्पद्वंशप्रविस्तारश्चारोग्यं गृहमेधिता ।
सर्वं भवेत् कृपया श्रीकृष्णनारायणस्य वै ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हनुमते वरदानं, उष्ट्रालयखण्डे प्रभुकृतानि सर्वत्र तीर्थानि, तत्रत्यभूपेन दक्षजवंगरेण कृतविष्णुयागः, शतविमानैः सप्रजनृपस्याऽश्वपट्टसरःक्षेत्रागमनम्, प्रभोर्द्वादश-जन्मदिनोत्सवे पूजोपदादि, राज्ञः शतकन्याः प्रजानां सहस्रकन्याश्च बालकृष्णायाऽर्पिताः नृपादीनां स्वदेशगमनमित्यादिनिरूपणनामा षडधिकशततमोऽध्यायः ॥ १०६ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चान्यं चमत्कारं हरेस्ततः ।
भक्तसाहाय्यकृत्कृष्णनारायणोऽभवद् यथा ॥ १ ॥
एकदा भूतलं द्रष्टुं पितॄणां जनवासिनाम् ।
मानस्यः कन्यका बह्व्यो विमानेन समागताः ॥ २ ॥
ब्रह्मपुत्री लवहीता चन्द्रावती इरावती ।
शालावती मीनकङ्कू लाटिशा कानिशा तथा ॥ ३ ॥
मापींगा चापि शीक्यांगा अंगस्वांगा हरांगहा ।
मौक्तिका तारिमा चापि पन्नामा त्वांगहा तथा ॥ ४ ॥
मीनामी तानसरिमा सीना गान्धर्ववेदिका ।
नृत्यगायनकुशलारागरागिण्यभिज्ञिकाः ॥ ५ ॥
सुरूपा यौवनभराश्चन्द्रास्याः सूर्यभासुराः ।
वह्निशुद्धांशुकवस्त्रा दिव्यभूषाः प्रभान्विताः ॥ ६ ॥
विंशतिसंख्यकाः कन्यास्तासां दास्यः सहस्रशः ।
कामरूपधाराः सिद्धैश्वर्यसामर्थ्यराजिताः ॥ ७ ॥
अस्त्रशस्त्रधारिकाश्च देव्योऽप्रधृष्यसद्बलाः ।
निजलोकात्तु दिव्येन विमानेन शुभांगनाः ॥ ८ ॥
ययुः सत्यं नमस्कृत्य विष्णुं शंभुमजं तथा ।
ब्रह्मसभास्थितान् देवान् नत्वा कृतसुमंगलाः ॥ ९ ॥
मेरोः शिखरात् प्रथमं मेरुद्रोणीमुपाययुः ।
मेरुं प्रदक्षिणां कृत्वा दृष्ट्वा देवालयान् बहून् ॥१०॥
ब्रह्मलोकालयसमान् सौधोद्यानमहालयान् ।
स्वर्गातिस्वर्गशोभाढ्यान् दिक्पालानां तथालयान् ॥११॥
प्रासादान् ग्रहनक्षत्रतारकाणां महोज्ज्वलान् ।
योगिनां च ऋषीणां च गान्धर्वाणां तथाऽऽलयान् ॥१२॥
दैत्यदानवसौधानि किन्नराणां गृहाणि च ।
स्थानानि किंपुरुषाणां तापसानां तथाऽऽश्रमान् ॥१३॥
विलोक्यैलावृतं पश्चात् वियुक्तां जाम्बवीं भुवम् ।
पृथ्व्यां समाययुर्व्योम्ना ताः किंपुरुषखण्डकम् ॥१४॥
आपतायीपर्वतं च गोपीरणं तथाऽक्षिगम् ।
पर्वतं कुनलीनाद्रिं कारुकोरं त्रियानशम् ॥१५॥
चिर्पिगं प्राचीनभागं दृष्ट्वा पीतसमुद्रकम् ।
अंगशिक्षांगसरितं शिक्षांगिकां नदीं तथा ॥१६॥
जलपानप्रदेशांश्च फुह्लिपानप्रदेशकान् ।
वारणीयद्वीपगणान् दृष्ट्वा सुमातृकां ययुः ॥१७॥
ततः परावृत्य ययुर्मीनकङ्कूनदीं प्रति ।
इरावतीं चन्द्रवीनां पतत्कायाद्रिमाययुः ॥१८॥
तावत् कन्याविमानं च वीक्ष्य सामुद्रराक्षसाः ।
जलपानप्रदेशस्था व्योमयानविहारिणः ॥१९॥
पिशंगवर्णा दीर्घाश्च पर्वतशृंगसदृशाः ।
सशस्त्रा स्त्वाययुर्हर्तुं कन्यारत्नानि चाम्बरे ॥२०॥
एवं फुह्लिपानदेशप्रजाता दानवा अपि ।
व्योममार्गेण यानेन कन्या हर्तुं समाययुः ॥२१॥
मायाविनो विकराला यथेष्टरूपधारिणः ।
अस्त्रशस्त्रधरा व्योम्नि विहाराश्चाब्धिवर्तिनः ॥२२॥
पर्वतप्रायदेहाश्च विद्युच्छस्त्रा भयंकराः ।
निर्दयाः पिङ्गवर्णाश्च रूक्षदेहाः प्रदाहकाः ॥२३॥
एवमन्ये वारणीयद्वीपदैत्या भयंकराः ।
निर्घृणा मानुषादाश्च वह्निपाषाणशस्त्रिणः ॥२४॥
व्रजक्षेपणबाणाद्यैर्युक्ता व्योमविहारिणः ।
कन्यकानां विमानं तद् रम्यं क्रोशायतं शुभम् ॥२५॥
सूर्यप्रभं विलोक्यैते हर्तुं कन्याः समाययुः ।
आदमनद्वीपतश्च कृष्णनागाश्च कश्मलाः ॥२६॥
आययुस्तं प्रविज्ञाय कन्यागणं सुरूपिणाम् ।
एवं ते राक्षसाः पञ्चशतानि च सहस्रशः ॥२७॥
दैत्याश्च दानवाः कृष्णनागाश्चापि सहस्रशः ।
सर्वे ते पञ्चसाहस्राः परितश्चाययुस्तदा ॥२८॥
पतत्काये महाशैले विमानं रुरुधुश्च ते ।
सर्वाः शरणमायान्त्वन्यथा नङ्क्ष्यथ वै द्रुतम् ॥२९॥
इत्युक्त्वा चासुराः सर्वे विमानं प्रविविक्षवः ।
प्रविष्टुं त्वरमाणाश्च दुद्रुवुः परितो यदा ॥३०॥
विमानं पुण्यतत्त्वस्य पापिनां स्पर्शवर्जितम् ।
रक्षोदानवदैत्यानामप्रधृष्यं तदाऽम्बरे ॥३१॥

निरोधं नाऽऽप च यदा तदा ते चासुराः पुनः ।
मायां वै निजपापानां कृत्वा धृत्वा च तत्क्षणम् ॥३२॥
पापतत्त्वस्य रूपाणि पापातत्त्वायुधानि च ।
पापास्त्राणि च पापानां शस्त्राणि पापपाशकान् ॥३३॥
पापमन्त्रितनाराचान् धनुःखड्गादिकाँस्तथा ।
वह्निपाषाणबाणाँश्च गदातोमरमुद्गलान् ॥३४॥
गोलकान् वह्निचूर्णाढ्यान् विस्फोटकाँस्तथाविधान् ।
विमानं चाऽवरुरुधुस्तासां जिघृक्षवो हि ते ॥३५॥
पापतत्त्वेन मेघेन गतिं रुरुधुरेव ते ।
द्वाराण्युपरुरुधुश्च विविशुश्च विमानकम् ॥३६॥
हाहाकारो महानासीद्विमाने कन्यकागणे ।
न कश्चिद् विद्यते त्राता विमाने सन्निधावपि ॥३७॥
भूतले चाऽम्बरे वाऽपि पर्वते वारिधावपि ।
कन्यका दुःखमापेदुरर्यमाणं च सस्मरुः ॥३८॥
पितरं रक्षकं नैजं जनकं दुःखवारकम् ।
तावच्छीघ्रं समायातस्त्वर्यमा स्वगणैः सह ॥३९॥
स्मृतमात्रो विमानेऽसावदृश्यत शतप्रभः ।
सहस्रशरवर्षाभिर्वारयामास राक्षसान् ॥४०॥
राक्षसा दानवा दैत्याः कृष्णनागाश्च वै तदा ।
परितो बाणवर्षाभिरर्दयामासुरार्यकम् ॥४१॥
अर्यमा वह्निमुत्पाद्य प्रेषयामास सर्वतः ।
राक्षसादीन् प्रदग्धुं स ददाह सर्वतो दिशः ॥४२॥
जलपानीयरक्षांसि जलान्युत्पाद्य मायया ।
शान्तयामासुरनलं ततोऽयमर्यमा पिता ॥४३॥
अरुणानयुतान् सृष्ट्वा प्रेषयामास सर्वतः ।
तीक्ष्णज्वालाऽणुशस्त्रास्ते दाहयामासुरीश्वराः ॥४४॥
राक्षसान् दानवान् दैत्यान् कृष्णनागाँश्च सर्वशः ।
तदाऽसुरा मृषारूपधराः स्वमाययाऽभवन् ॥४५॥
मूलरूपाणि चाच्छाद्य युयुधुश्चारुणैः समम् ।
आरुणा अर्यमदूतास्तीक्ष्णोष्णरश्मिहेतिभिः ॥४६॥
अन्विष्याऽन्विष्य दैत्यादीन् दाहयामासुरासुरान् ।
दग्धास्तु बहवस्तत्र नवोत्पन्नाश्च भस्मतः ॥४७॥
अयुताऽयुतलक्षाणि राक्षसा अभवँस्तदा ।
युद्धं तच्चाम्बरे सर्वं सर्वस्वध्वंसकारकम् ॥४८॥
आरुणानां रक्षसां चाऽभवत्तर्कपरं महत् ।
अर्यम्णा सूर्यमन्त्रैश्चोत्पाद्यन्तेऽरुणकोटयः ॥४९॥
रक्षोभिः राक्षसैर्मन्त्रैरुत्पाद्यन्ते च राक्षसाः ।
नान्तस्त्वायाति सैन्यानां वर्धन्ते सैन्यकोटयः ॥५०॥
आयुधान्यपि वर्धन्ते वर्धन्ते शस्त्रराशयः ।
विभिद्यन्ते विछिद्यन्ते म्रियन्ते च पतन्ति च ॥५१॥
रक्तं रक्तमयं जातं चाम्बरं भूतलं तथा ।
कायव्यूहाः पतन्त्यत्र लक्षशो वै समन्ततः ॥५२॥
आरुणानां राक्षसानामद्रिशृंगसमा हताः ।
देहाः कायाः पतन्तश्च सञ्चया उच्छ्रयास्तथा ॥५३॥
मेघानुल्लंघ्य गगने सञ्जाताः पर्वता यथा ।
शतयोजनविस्तारे भूतले पर्वतोच्छ्रयाः ॥५४॥
नग्नानां वै शवानां ते पर्वता वै तदाऽभवन् ।
पतत्कायाः पर्वतास्ते नग्नशैला हि तेऽभवन् ॥५५॥
पिंगोच्चयाः समभवन् ये नष्टा युद्धकोविदाः ।
आसप्ताहं महायुद्धं दिवानिशं त्ववर्तत ।
न विरामोऽभवत्तत्र तदाऽर्यमा स्वयं रविः ॥५६॥
पितृकक्षः प्रसस्मार विष्णुं शिवमजं त्रयम् ।
रक्षार्थं देवदेवेशान् पितृरूपान् पितामहान् ॥५७॥
रक्षार्थं देवदेवेशाः समायान्तु द्रुतं क्षणात् ।
रक्षन्तु कन्यकाः सर्वा नाशयन्त्वसुरानिति ॥५८॥
तावत्तत्र समायाता ब्रह्मविष्णुमहेश्वराः ।
विमानत्रयमारूढा दिव्यसैन्यसमन्विताः ॥५९॥
एतस्मिन्नेव काले तु दैत्यदानवराक्षसाः ।
सस्मरुश्च महादैत्यं महामायाविशारदम् ॥६०॥
कालप्रालेयनामानं कोटिसैन्यसमन्वितम् ।
महाकालसमं महामायोत्थं मेरुसदृशम् ॥६१॥
सहस्रमस्तकं प्रत्याननं शताऽजचर्वणम् ।
द्रागेव स समायातः कम्पयन् भुवनानि वै ॥६२॥
यस्याट्टहास्यमात्रेण निपेतुर्ग्रहसञ्चयाः ।
चुक्षुभुः सागराः सर्वे मेदिनी चाऽप्यकम्पत ॥६३॥
शिखराणि निपेतुश्च भूतानि तत्यजुर्ध्रुवम् ।
महावज्रनिपातेन समा जाताश्च गर्जनाः ॥६४॥
मन्दरस्य शिखरं वै हस्तेनैकेन संधृतम् ।
कालप्रालेयकेनाऽन्यकरेण केतवो धृताः ॥६५॥
एतादृशो महाकायोऽसुरो यस्याऽऽननं तदा ।
व्यात्तं समभवद् विकासितं तु दशयोजनम् ॥६६॥
एवं सहस्रवदनो दृष्ट्वाऽजविष्णुशंकरान् ।
सक्थिस्फोटैराजुहावाऽम्बरे कोटिसुरान्वितान् ॥६७॥
अथ देवास्तु तं वीक्ष्य वैराजप्रतिरूपकम् ।
संकर्षणं महाकायं सस्मरुः कालनाशकम् ॥६८॥

तूर्णं संकर्षणो देवस्तत्राम्बरे समाययौ ।
तुष्टुवुस्ते त्रयो देवा रक्षार्थं सगदं प्रभुम् ॥६९॥
संकर्षणो गदां तस्य मूर्ध्नि बलान्न्यपातयत् ।
कालप्रालेयकः शीघ्रं वञ्चयित्वा तु तां गदाम् ॥७०॥
संकर्षणं स गदया तताड मस्तकोपरि ।
संकर्षणः स्वगदया चूर्णयामास तद्गदाम् ॥७१॥
कालप्रालेयकं मूर्ध्नि तताड वेगतस्ततः ।
गदा भग्नाऽभवद् दण्डाद् दैत्यमूर्धा बभंज न ॥७२॥
दैत्यस्त्रिशूलमादाय हन्तुं दुद्राव तत्क्षणम् ।
संकर्षणः स्वशूलेनाऽभिनद् वक्षसि कालकम् ॥७३॥
निपपात तदा पूर्वसमुद्रे पर्वतोच्छ्रयः ।
शक्त्या हतस्ततः कण्ठे वज्रेण च तथोदरे ॥७४॥
मर्दितः पर्वतैश्चापि कूर्चितः पत्तलैस्तथा ।
व्यसुर्यथा तथा जातः क्षणान्मूर्छामवाप्य सः ॥७५॥
उत्थाय जीवरक्षार्थं चकार स पलायनम् ।
मेरुं प्रदक्षिणं कृत्वा दुद्राव च बहिर्यदा ॥७६॥
संकर्षणस्तु तं लोकाऽलोकाचलाऽवधि ययौ ।
पृष्ठदेशे ययौ येनाऽसुरः स कालकालयः ॥७७॥
लोकालोकं विहायैवाऽलोकं व्योम ययौ बहिः ।
संकर्षणभयात् सोऽप्यनन्ताऽसंख्याम्बरे ययौ ॥७८॥
संकर्षणोऽपि देवस्तु शंभ्वादीन् सूक्ष्मरूपतः ।
निर्भयं संप्रदत्त्वैव ययावीश्वरधाम च ॥७९॥
अथ दैत्यैर्दानवैश्च युयुधुः शंकरादयः ।
निजघ्नुः सर्वतो दैत्यान् कालप्रालेयपक्षकान् ॥८०॥
त्रिशूलैश्चक्रकैर्विद्युत्पाशैः पाशैश्च तोमरैः ।
खड्गैः प्रक्षेपणैः शैलैरसिभिः शक्तिभिस्तथा ॥८१॥
वायव्यास्त्रैः पर्वतास्त्रैश्च मेघास्त्रैरनलास्त्रकैः ।
नागास्त्रैर्गरुडास्त्रैश्च सिंहास्त्रैः शरभास्त्रकैः ॥८२॥
वाराहास्त्रैः कृकलास्त्रैः कर्कस्त्रैर्वृश्चिकास्त्रकैः ।
यमास्त्रै राक्षसास्त्रैश्च मकरास्त्रैर्जलास्त्रकैः ॥८३॥
व्याघ्रास्त्रैर्दीपकास्त्रैश्चोन्मादास्त्रैर्मूर्च्छनास्त्रकैः ।
क्षुधास्त्रैश्च तृषास्त्रैश्चोन्मत्तास्त्रैर्जघ्नुरामिथः ॥८४॥
ब्रह्मादीनां च सैन्यानि दैत्यदानवराक्षसान् ।
अर्दयामासुरत्यर्थं नाशयामासुरन्ततः ॥८५॥
कोटिसंख्या आसुरास्ते हता युद्धे समन्ततः ।
कृत्रिमाश्चाऽकृत्रिमाश्च मायिकाश्चाप्यमायिकाः ॥८६॥
आरुणानां च सैन्यानि ब्राह्मानां पृतनास्तथा ।
शांकराणां गणाश्चापि वैष्णवानां च पार्षदाः ॥८७॥
हता युद्धे कोटिशश्च तान् सर्वांस्तेऽसुरास्त्रयः ।
जीवयामासुराम्नायमन्त्रैः संकल्पसिद्धिभिः ॥८८॥
ब्रह्माद्याश्चाहुरेतेभ्यो वरदानार्थमिष्टदाः ।
वव्रुस्ते परमं मोक्षं ये सर्वे जीविताश्च ते ॥८९॥
ब्रह्माद्यास्तु तदा प्राहुर्वृणुताऽन्यद्धि मोक्षणात् ।
जीविताश्चारुणाद्यास्ते मोक्षान्यं नैव वव्रिरे ॥९०॥
विष्णुः प्राह ततस्तांश्च मोक्षाः सन्ति ह्यनेकशः ।
नरनारायणलोकं बद्रिकाश्रममित्युत ॥९१॥
पयोनिधिं वा युष्मभ्यः श्वेतद्वीपं ददामि वा ।
ते प्राहुर्नैव तद्धाम शाश्वतं न ततो वयम् ॥९२॥
समिच्छामः किन्तु चेच्छामः श्रेष्ठं शाश्वतं परम् ।
विष्णुः प्राह तु वैकुण्ठं जलस्यावरणोपरि ॥९३॥
वर्तते तद् ददाम्येव वैराजं धाम वोत्तमम् ।
ते प्राहुर्नहि वैकुण्ठं वैराजं वाऽपि शाश्वतम् ॥९४॥
तस्मादिच्छाम एवान्यद्धाम मोक्षाभिधं परम् ।
विष्णुः प्राहाऽमृतं धाम भूम्नो ददामि चैव वः ॥९५॥
यद्वाऽव्याकृतसंज्ञं च वैकुण्ठं वा ददामि वः ।
ते प्राहुर्नैव चेच्छामस्तद्धाम किन्तु तत्परम् ॥९६॥
विष्णुः प्राह ददाम्येव गोलोकं परमं पदम् ।
ते प्राहुर्नैव वाञ्छामो वाञ्छामस्तु ततः परम् ॥९७॥
शाश्वतं चाऽक्षरब्रह्मपदं वेदान्तबोधितम् ।
सर्वधाम्नां परं धामोपनिषद्वर्णितं शुभम् ॥९८॥
यत्समं यत्परं नास्ति तद्धाम परमं हरेः ।
इच्छामो देहि तद्धाम परब्रह्मसमाश्रितम् ॥९९॥
विष्णुः प्राह न मे शक्तिर्विद्यतेऽर्पयितुं तु तत् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥१००॥
परमात्मा परब्रह्म सर्वावतारधारकः ।
दातुं शक्तोऽस्ति तद्धाम स वै दास्यति तत्पदम् ॥१०१॥
इत्युक्ताः सस्मरुस्तूर्णं तं वै श्रीपुरुषोत्तमम् ।
अनादिश्रीकृष्णनारायणस्वामिपुमुत्तमम् ॥१०२॥
ध्यानमग्नाश्च सहसा ह्यभवंस्तत्क्षणे तु ते ।
आत्मात्मन्यवगाह्यैवाऽस्मरन् सर्वावतारिणम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पितृकन्यकानां किम्पुरुषखण्डे राक्षसादिकृतस्य निरोधस्य निवृत्तये-ब्रह्मादिदेवकृतयुद्धे मृतानां प्राणदानं, जीवितैर्मोक्षो याचितः परममोक्षदस्तु अनादिश्रीकृष्णनारायण एवेत्यादिनिरूपण-नामा सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥

श्रीकृष्ण उवाच—

श्रृणु त्वं राधिके देवैर्ध्याते स्मृते नरायणे।
कुंकुमवापिकाक्षेत्रे बालकृष्णः परः पुमान्॥ १॥
प्राह स्वान्परमान् भक्तानृषिं मंकणकं यतिम्।
मंकिरयं महर्षिं च कूर्मिणम् ऋषिपूजितम्॥ २॥
प्राचीनबर्हं त्रीतं च प्रभूतानर्षिमुत्तमम्।
रुशायिनं च खासीनं चांगश्यामलकं मुनिम्॥ ३॥
आरकर्णं ब्रह्मदास्यमनामयर्षिमित्यपि।
श्यामलर्षिं मलयर्षिं चतुर्दशर्षिमण्डलम्॥ ४॥
समाहूय हरिः प्राह चाऽश्वपद्मसरःस्थितान्।
श्रृण्वन्तु ऋषयः सौम्या महाभागवता यतः॥ ५॥
तापसा वैष्णवाश्चाश्च मम ध्यानपरायणाः।
हिमालयात् पूर्वदेशे दक्षिणे च प्रदेशके॥ ६॥
पतत्काये च वर्तन्ते विमाने पितृकन्यकाः।
प्रधर्षितास्तु ता दैत्यैस्ततः पिता तदाऽर्यमा॥ ७॥
ब्रह्मविष्णुमहेशाश्च संकर्षणो महान् प्रभुः।
एते दैत्याश्च युयुधुर्जघ्नुर्दैत्यासुराँस्ततः॥ ८॥
मृतानुज्जीवयामासुरारुणान् सूर्यपार्षदान्।
वैष्णवान् शांकराँश्चापि वैश्वसृजाँश्च कोटिशः॥ ९॥
तेभ्यो वरप्रदानार्थं देवैर्वचनमर्पितम्।
पार्षदैरर्थितो मोक्षः परमोऽक्षरतः परः॥१०॥
सुरा दातुमशक्तास्तं ततस्ते चाऽरुणादयः।
बोधिता देववर्गैश्च तादृङ्मोक्षप्रदं च माम्॥११॥
ततस्ते ध्यानमग्नाश्च मामिदानीं स्मरन्ति वै।
अनादिश्रीकृष्णनारायणोऽहं पुरुषोत्तमः॥१२॥
भवद्भ्यश्च महर्षिभ्यो गतेभ्यो मम दासताम्।
महाभागवतेभ्यो वश्चाज्ञापयामि सर्वथा॥१३॥
यूयं यात क्षणात्तत्र पतत्कायाद्रितः परम्।
वर्षे किंपुरुषे गत्वा प्राग्ज्योतिषु तथाऽऽदरात्॥१४॥
प्राचीनाऽद्रिप्रदेशेषु विचरताऽपि सर्वतः।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा'॥१५॥
मन्त्रमिमं प्रदद्ध्वं च सर्वेभ्यो वै सुराज्ञया।
कन्यारक्षकरांभ्वाद्याः प्रतीक्षन्ते च मामपि॥१६॥
भवद्भिः सः प्रदेशश्च कार्यो भागवतात्मकः।
मिलित्वा चारुणाद्यैश्च कारणीया ह्युपासना॥१७॥
प्रवर्तनीया मे भक्तिर्दास्ये तेषामभीष्टकम्।
विमानैर्यात वै सर्वे मा चिरं प्रोच्य चेति वै॥१८॥

ददौ दिव्यं विमानं च भगवान् पुरुषोत्तमः।
ययुस्ते ऋषयश्चतुर्दश क्षणेन चाम्बरात्॥१९॥
पतत्काये पर्वतोर्ध्वे विमानं तत् स्थिरं ह्यधुः।
अपश्यन् व्योमसंस्थं च पितृकन्याविमानकम्॥२०॥
भास्वरं कोटिसूर्याभं विमानं वीक्ष्य कन्यकाः।
ब्रह्मविष्णुमहेशाद्यास्तथा चारुणपार्षदाः॥२१॥
जयशब्दान् हर्षनादान् चक्रुरुत्साहसंभृताः।
ऋषयोऽपि तदा कृष्णनारायणो जयत्विति॥२२॥
इत्येवं जयशब्दाँश्च प्रचक्रुर्व्योमसंस्तरे।
जय कृष्ण जय नारायण श्रीपुरुषोत्तम॥२३॥
जयोऽस्त्वनादिदेवस्य कृष्णनारायणस्य वै।
अक्षरातीतकृष्णस्य परब्रह्मण श्चा जयः॥२४॥
एवं तु भजनं चक्रुस्तच्छ्रुत्वा व्योममार्गतः।
ऋषीणां वै विमाने ते दशयोजनविस्तरे॥२५॥
ययुः सर्वे तु ते नेमुः परमर्षीन् ततो मुहुः।
कन्यकाभिः पितृजाभिः कुमारिकाभिरेव च॥२६॥
प्रथमं पादुकासम्मार्जनं ततश्च पादयोः।
ऋषीणां सेवनं पादप्रक्षालनं फलार्पणम्॥२७॥
जलार्पणं स्वागतादि चन्दनाद्यर्घ्यमित्यपि।
स्वासनादि प्रदत्तं च मधुपर्कादिकं कृतम्॥२८॥
ततस्तेषु च देशेषु तत्पद्धत्या निरन्तरम्।
प्राघूर्णिकानां सन्मानं कुमारीभिर्विधीयते॥२९॥
किंपुरुषप्रदेशानां मंगलं कार्यमेव च।
कुमारिकाभिः सर्वत्र प्रथमं सम्प्रवर्त्यते॥३०॥
राधिके कन्यकाद्यास्ते विधायर्षिसमर्चनम्।
निन्युस्तान् स्वं विमानं च ततस्ते ऋषयोऽमलाः॥३१॥
परब्रह्मप्रतापेन परभावमुपागताः।
विष्णोः शंभोर्ब्रह्मणश्चार्यम्णः पूजां प्रचक्रिरे॥३२॥
अनादिश्रीकृष्णनारायणाशिषः समूचिरे।
श्रीमतां स्मरणादत्र प्रेषितास्तेन चोचिरे॥३३॥
मन्त्रदानार्थमेवाऽत्र प्रेषिताश्चेति चोचिरे।
किंपुरुषः समन्ताच्च कर्तव्यो वैष्णवः खलु॥३४॥
इत्याज्ञा श्रीकृष्णनारायणस्याऽस्तीति चोचिरे।
ततोऽनादिकृष्णनारायणः श्रीभगवान् स्वयम्॥३५॥
आगमिष्यति सर्वात्मेत्येवं तेभ्यः समूचिरे।
श्रुत्वा सर्वे जहृषुश्च विमानद्वयमेव तु॥३६॥
चन्द्रावतीनदीतीरे शोभनेऽरण्यसन्निधौ।
ऋषीणामाज्ञया चावतारयामासुरुत्सुकाः॥३७॥

मीनस्थानं वनं रम्यं विलोक्य तत्र ते जनाः ।
हवनं चक्रिरे दैवम् ऋषयस्ते च वैष्णवाः ॥३८॥
ततोऽर्यम्णः सेवकेभ्यश्चारुणेभ्यो महर्षयः ।
'ओंनमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥३९॥
इतिमन्त्रं ददुस्तत्र स्रजं च तौलसीं गले ।
पितृपुत्रा वैष्णवास्ते ततोऽभवन् सहस्रशः ॥४०॥
अयुताऽयुतसंख्यास्ते कृष्णनारायणं हरिम् ।
भेजिरे च ततस्तत्र ऋषयस्ते तपोधनाः ॥४१॥
विष्णुजेभ्यः पार्षदेभ्यो ददुर्मन्त्रं तमेव च ।
रुद्रस्य च गणेभ्यश्च ब्रह्मशिष्येभ्य इत्यपि ॥४२॥
कोटिकोटिसहस्रेभ्यो ददुर्मन्त्रं तमेव च ।
ते सर्वे वैष्णवास्तत्र भेजिरे पुरुषोत्तमम् ॥४३॥
अथर्षयस्ततः पितृकन्याभ्यश्चापि तं मनुम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥४४॥
प्रददुश्चेति कन्यास्ता भेजिरे पुरुषोत्तमम् ।
अथैवं दीक्षणात् पश्चात् कामवल्लीद्रुमोद्भवम् ॥४५॥
ऋषीणां दानतो मिष्टं सिद्धान्नं भोजनादिकम् ।
ददुर्वै वैष्णवेभ्यश्च कन्याभ्यश्चापि ते द्विजाः ॥४६॥
भुक्त्वा चन्द्रावतीनद्यां सस्नुस्ते वैष्णवादयः ।
अथाऽत्र मन्त्रयामासुः ऋषयो वैष्णवास्तथा ॥४७॥
ब्रह्मविष्णुमहेशाश्चार्यमा च कन्यकास्तथा ।
मीनकङ्कनदीतीरे कर्तव्यो वैष्णवो मखः ॥४८॥
तत्र प्राग्ज्योतिषां सर्वाः प्रजाः समन्ततः किल ।
आहूता आगमिष्यन्ति आसमुद्राद्धि सर्वतः ॥४९॥
किंपुरुषस्य खण्डस्याऽऽगमिष्यन्ति प्रजास्तथा ।
यज्ञे ताभ्यः प्रदेयो वै मन्त्रस्तु वैष्णवो यतः ॥५०॥
इत्येवं श्रीहरेराज्ञा पूर्णा चात्र भविष्यति ।
ब्रह्मा प्राह मखे तत्र युद्धं चापि भविष्यति ॥५१॥
तामस्यो वै प्रजास्त्वत्र वर्तन्ते पार्वता नृपाः ।
जलपानफिलीपानवारणीयप्रदेशजाः ॥५२॥
वर्तन्ते तामसाश्चाति मानवा राक्षसोपमाः ।
एतेष्वपि प्रदेशेषु तैस्तु युद्धं भविष्यति ॥५३॥
ततः स्याद् वैष्णवी भूमिः पावनी तीर्थरूपिणी ।
अस्त्वेवम् ऋषयः प्राहुर्विष्णुः प्राह तथाऽस्त्विति ॥५४॥
रुद्रः प्राह तथाऽस्त्वेवं चार्यमा प्राह ओमिति ।
मीनकङ्कनदीमूले मेलकांगाभुवस्तले ॥५५॥
मखः प्रजायतां सर्वदेशानां मध्यभूतले ।
इतिनिश्चित्य ते सर्वे प्रययुर्वै हिमालयात् ॥५६॥
प्रागुत्तरे प्रदेशे वै ईशानदिग्भवे शुभे ।
पिंगदेशे किंपुरुषे यज्ञार्थं विष्णुसंहिताः ॥५७॥
मेनकांगावने तत्र मीनकङ्कनदीतटे ।
पिंगारण्ये प्रचक्रुस्ते यज्ञार्थं भूमिशोधनम् ॥५८॥
अंगस्वांगापश्चिमे च शालावत्यास्तु पूर्वतः ।
पञ्चाशद्योजनमाने वर्तुलेऽरण्यशोभिते ॥५९॥
मीनकंग्वाः पश्चिमे च यज्ञमण्डपमाचरन् ।
मीनकंग्वाः पूर्वतश्चाऽवसथान् चक्रुरुत्तमान् ॥६०॥
मीनकंगूभयतीरे ऋष्याश्रमान् व्यधुस्तदा ।
देवाश्रमान् पितृवासान् सिद्धाश्रमान् व्यधुस्तथा ॥६१॥
ईश्वराणामाश्रमाँश्च शालावतीनदीतटे ।
चक्रुर्ब्रह्ममहेशाद्याः पूर्वभागेऽतिशोभने ॥६२॥
मुक्तानां वैष्णवानां चाश्रमान् रम्यान्मनोहरान् ।
शालावत्याः पश्चिमे च प्रचक्रुर्व्योमगामिनाम् ॥६३॥
इत्येवं त्रिणदं देशं पिंगारण्यं महायतम् ।
यज्ञार्थं कल्पयित्वैव दूतैः सर्वान् समाह्वयन् ॥६४॥
मुक्ताँस्तथेश्वरान् सर्वानवताराँस्तथेश्वरीः ।
ब्रह्मप्रियास्तथा पितॄनृषीन्देवान् दिगीश्वरान् ॥६५॥
मानवान् देवजातीश्च पातालस्थान् सतीः सतः ।
गान्धर्वान् किंपुरुषाँश्च विद्याध्रानप्सरोगणान् ॥६६॥
देवीश्च योगिनीश्चापि कैलासीयान् समग्रतः ।
वैकुण्ठीयान् समस्ताँश्च सत्यीयाँश्च समस्ततः ॥६७॥
पितृगणान् समस्ताँश्च सुरेश्वरान् सुराँस्तथा ।
दिक्पालान् पृथिवीपालान् प्रजापालान् समग्रतः ॥६८॥
पशून् पक्षिगणाँश्चापि काश्यपीर्बहुलाः प्रजाः ।
वल्लीर्वृक्षान् तृणस्तम्बान् कन्दौषधिकदम्बकान् ॥६९॥
नदान् नदीस्तटाकाँश्च सरांसि सागराँस्तथा ।
पर्वतान् खातभागाँश्चाऽखातानरण्यभूमिकाः ॥७०॥
वनान्युपवनादीनि वापीश्च दीर्घिकाः प्रहीन् ।
तीर्थानि सागराँश्चापि नरान्नारीः समन्ततः ॥७१॥
गणेशान् कार्तिकेयाँश्च हनूमतश्च पार्षदान् ।
हेतीन् सर्वान् समूर्ताँश्च सुदर्शनादिकाऽऽयुधान् ॥७२॥
मन्त्रान् वेदान् सर्वविद्याः कलाः सर्वा रसाँस्तथा ।
तत्त्वानि चापि सर्वाणि चैत्यानि विविधान्यपि ॥७३॥
ऋतून् मासान् वत्सरादीन् युगान् दिनानि च क्षणान् ।
मायां गुणान् प्रकर्माणि याम्यान् प्रेताँश्च दानवान् ॥७४॥
दैत्यानासुरभावाँश्च राक्षसान् ब्रह्मवंशजान् ।
सर्वान् मखे महेशाद्या आह्वयाञ्चक्रिरे तदा ॥७५॥

आजग्मुस्ते महीमानाः सर्वलोकेभ्य उत्सुकाः ।
देवत्रयाऽनुगास्तेषामातिथ्यं चक्रुरुत्सवे ॥७६॥
ब्रह्मस्थाने स्वयं ब्रह्मा रुद्रस्थाने हरः स्वयम् ।
विष्णुस्थाने स्वयं विष्णुः पितृस्थानेऽर्यमा स्वयम् ॥७७॥
मातृकाश्चासने तासां ग्रहाणां चासने ग्रहाः ।
दिक्पालानामृषीणां च स्थानेषु चेतनास्तु ते ॥७८॥
निषेदुश्चान्यदेवानां स्थानेषु देवयोषिताम् ।
समूर्तास्ते निषेदुश्च देवा देव्यो यथोचितम् ॥७९॥
मुख्यदेवः स्वयं तत्राऽनादिकृष्णनरायणः ।
संस्मृतस्तैस्तदा साक्षान्मातापितृसमन्वितः ॥८०॥
लोमशादिसमेतश्च ब्रह्मप्रियासमन्वितः ।
विमानेनाऽऽययौ शीघ्रं भगवान् पुरुषोत्तमः ॥८१॥
कल्पवल्लीकल्पवृक्षकल्पधेन्वादिसंयुतः ।
याज्ञिकाः स्वागतं चक्रुर्बहुमानपुरःसरम् ॥८२॥
समाजो हर्षमापन्नः परमेश्वरदर्शनात् ।
वासं कृत्वाऽऽप्लवनं च यज्ञभुवं हरिर्ययौ ॥८३॥
कल्पवल्ल्यादिभिस्तत्र घृतकुल्यास्तदाऽऽयताः ।
दधिकुल्या मधुकुल्या दुग्धकुल्यास्तथाविधाः ॥८४॥
रसकुल्या रसशालाभृता मिष्टान्नकामृतैः ।
हव्यसामग्र्यसंख्याश्च भक्ष्यसामग्र्यनन्तता ॥८५॥
विनिर्मितास्तदा तत्र परमेशप्रतापतः ।
अनादिश्रीकृष्णनारायणश्रीपुरुषोत्तमः ॥८६॥
प्रधानदेवसदने स्वर्णासने व्यराजत ।
यजमानः स्वपत्नीश्रीकम्भरासहितः पिता ॥८७॥
श्रीमद्गोपालकृष्णो वै नैजासने व्यराजत ।
पार्षदौ भगवन्हेमन्तकौ देवप्रकाशकः ॥८८॥
स्वयंप्रकाशो भगवान् व्यराजन्त सुमण्डपे ।
वरणं देहशुद्धिश्च पुण्याहवाचनादिकम् ॥८९॥
अंगदेवस्थापनादि कृत्वा श्रीलोमशो मुनिः ।
वह्निं कुण्डे समन्त्रं च प्रातिष्ठिपत् ततः परम् ॥९०॥
हवनं वेदमन्त्रैश्च प्रावर्तत सुखोचितम् ।
गणेशभूतयक्षाद्याः सुराद्याश्च निजादनम् ॥९१॥
स्वस्वभागान् वह्निमुखाज्जगृहुर्हरिणाऽर्पिताः ।
पितृदेवा अतृप्यन्त चेश्वरा मुक्तकोटयः ॥९२॥
आमन्त्रिताश्च परितः प्राग्ज्योतिषां च मानवाः ।
जीवसुमातृकजना मलयस्य जनास्तथा ॥९३॥
इरावतीतटस्थाश्च मीनकङ्कूतटस्थिताः ।
शालावतीतटस्थाश्च शिक्षांगातटसंस्थिताः ॥९४॥
अंगशिक्षांगतीरस्था हरांगातटवासिनः ।
तारिमातटवासश्च महतीतटवासिनः ॥९५॥
आमूरतटवासाश्च सरित्प्रदेशवासिनः ।
तन्मध्यदेशवासाश्चाऽऽहूता यज्ञे तु मानवाः ॥९६॥
देशकल्याणहेतुर्वै मखोऽयं वैष्णवोत्तमः ।
अनादिश्रीकृष्णनारायणश्रीपतिदैवतः ॥९७॥
सम्पद्यतेऽत्र गन्तव्यं सर्वैः कल्याणहेतवे ।
इत्यामन्त्रणमाश्रुत्य सात्त्विका मानवास्तथा ॥९८॥
राजसाश्चापि विप्राद्याः क्षत्रिया वैश्यजीविनः ।
वैश्योत्तमास्तथा शूद्रा नार्यो नरा ययुर्मखम् ॥९९॥
विमानैर्व्योमयानैश्च गरुडैश्च जटायुकैः ।
आत्मानं कृतकृत्यं ते मेनिरे वीक्ष्य वै क्रतुम् ॥१००॥
प्राप्य प्रासादिकं चाऽप्यवाप्य कृष्णमनुं तथा ।
'ओम् अनादिकृष्णनारायणाय स्वामिने स्वाहा' ॥१०१॥
जपं मन्त्रं ततः कृत्वा साक्षाच्छ्रीपुरुषोत्तमम् ।
दृष्ट्वा भुक्त्वाऽमृतं पीत्वा दिव्यभावं ययुश्च ते ॥१०२॥
कण्ठीं च तौलसीं धृत्वाऽभवन् परमवैष्णवाः ।
कोटिशो मानवा भक्ता मुमुक्षवो हरिप्रियाः ॥१०३॥
अवभृथं ततश्चक्रुः परिहारं मखस्य च ।
तावत्तामसभावा ये यज्ञद्वेषिण एव ये ॥१०४॥
सुरारयो लक्षशस्ते सशस्त्रा यज्ञघातिनः ।
सत्कार्यनाशकाः क्रूरा जलपानीयजातयः ॥१०५॥
फिलीपानीयवासानां सम्बन्धिनोऽतिघातकाः ।
वारणीयप्रजानां च जातीया आदमानिनः ॥१०६॥
परस्परं तु मिलिताः कालप्रालेयजातिकाः ।
अन्ये तत्सुहृदश्चापि तत्सहाया गुणैरपि ॥१०७॥
राजानो बोधपाठीयाश्चैत्यपाठकजातिकाः ।
चांकशेकाः सिंगलिङ्गा हांगचाउदकास्तथा ॥१०८॥
तूनकीना हनोयाश्च रायगा बंगकाकिनः ।
लाशहा मांगजातीया मञ्चरायास्तथाऽपरे ॥१०९॥
एते च क्षत्रियाः सर्वे तामसा राक्षसा इव ।
लक्षायुतानि सैन्यानि गृहीत्वा चाययुस्तदा ॥११०॥
रणतूर्याण्यवाद्यन्त प्राजायन्त च गर्जनाः ।
शूराणां रणशस्त्राणि प्राऽस्फुरन्नम्बरे तदा ॥१११॥

इत्येवं राधिके तत्र मखान्ते युद्धसंभवः ।
समभवद्धि दैत्यानां ब्रह्माण्डसर्जकैः सह ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कुंकुमवापीतः ऋषीणां प्रेषणं ततः पित्रादिभ्यां च सह हरेः प्राग्ज्योतिषादिदेशेषु विमानेन गमनं, यज्ञान्ते युद्धसंभवश्चेत्यादिनिरूपणनामाऽष्टाधिकशततमोऽध्यायः ॥ १०८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके तेषामासुराणां तु गर्जनैः ।
व्यनदंस्तु दिगन्ता चाऽम्बरं चुक्षोभ सग्रहम् ॥ १ ॥
जलपानेयदेशानां राजा मकरकेतुमान् ।
फिलीपानां नृपश्चापि फलजंगमनामकः ॥ २ ॥
वारणीयद्वीपराजो नाम्ना वार्धूषकेतनः ।
आर्द्रमानद्वीपराजो नाम्ना कल्माषकेसरिः ॥ ३ ॥
कालप्रालेयकानां च राजा रणमर्दाकनः ।
प्राचीनानां च देशानां नृपो बोधविहंगमः ॥ ४ ॥
चिपिंगानां च देशानां राजा पिंगलकस्तथा ।
मंगूजानां महाराजो नाम्ना समरमंगलः ॥ ५ ॥
मञ्चूराणां तथा राजा हारकिरिटनामकः ।
लाशहानां महाराजः क्षणात्मवादनाभिधः ॥ ६ ॥
कर्वरीप्रान्तजो राजा कारुवर्माऽभिधस्तथा ।
इलादेशनृपो नाम्ना माण्डलाक्षिर्महाबलः ॥ ७ ॥
पन्नामदेशराजश्च नाम्ना पादसहाऽभिधः ।
प्राकृच्यनप्रदेशानां राजा प्राचीनशायनः ॥ ८ ॥
अंगशिक्षांगदेशानां शृंगशोकाभिधो नृपः ।
एते चान्ये च वै मुख्या राजानो युद्धदुर्मदाः ॥ ९ ॥
लक्षायुतैर्निजैः सैन्यैर्व्योमप्रसारिभिः सह ।
विद्युद्गोलैर्वह्नियन्त्रैस्तूर्णस्फोटैश्च पुत्तलैः ॥१०॥
शस्त्रक्षेपैश्चाऽऽणुक्ष्वेडैः सुरंगशक्तिभिस्तथा ।
व्योमजालैः शतघ्नीभिर्मायाजालैर्विषाश्रुभिः ॥११॥
विषानिलैः कृत्रिमार्यैर्युयुधुः सुरमानवैः ।
युद्धं समभवच्चेदं शतयोजनवर्तुले ॥१२॥
पितृकन्याविमानं च ब्रह्मप्रियाविमानकम् ।
ररक्षशंकरो देवो बालकृष्णस्तथा स्वयम् ॥१३॥
अन्ये च शांकरा ब्राह्माः सौर्याश्च वैष्णवा गणाः ।
कोटिशो युयुधुस्तत्राऽऽज्ञयाऽऽसुरैः समं तदा ॥१४॥
राधिके ! पर्वतप्राया योजनोर्ध्वेम्बरे तु ते ।
उत्प्लुत्य ग्रहवत् सर्वे युद्धयन्ति स्म तदाऽम्बरे ॥१५॥
अन्ये पञ्चयोजनोर्ध्वे पञ्चाशद्योजनोर्ध्वगाः ।
सूर्यवत् सहसा गत्वा पतन्ति सैन्यशक्तिषु ॥१६॥
नक्षत्रमण्डलानीव शोभन्ते योधिनोऽम्बरे ।
मकरकेतुमान् राजा शतसाहस्रसंख्यकैः ॥१७॥
योद्धृभिः सहितो व्योम्नि युयुधे चारुणैः सह ।
अर्यमा तं तु राजानं ससैन्यं सागरोपरि ॥१८॥
विष्णुप्रदत्तचक्रेण तथा चक्रैः स्वकैर्द्रुतम् ।
घातयित्वाऽम्बरे तानप्रेषयत् स यमालयम् ॥१९॥
सूर्यकेतुश्च तत्पुत्रो हरेः शरणमागतः ।
रक्षितो हरिणा तत्र वैष्णवः स कृतस्ततः ॥२०॥
फिलीपानां महाराजो युयुधे शांकरैर्गणैः ।
अयुतयोद्धृसहितो वह्निगोलैश्च होतिभिः ॥२१॥
गणास्तु शतसाहस्रा निजघ्नुर्विद्युदस्त्रकैः ।
फिलीपराजसहितान् योद्धृनयुतसंख्यकान् ॥२२॥
तत्सुतः शरणं प्राप्तः श्रीहरेर्बीजजंगमः ।
अन्येऽपि शतशः पुत्राः श्रीहरेः शरणं गताः ॥२३॥
ते सर्वे बीजजंगाद्या वैष्णवा हरिणा कृताः ।
वारणीयभुवो राजा द्वैपो वार्धूषकेतनः ॥२४॥
पञ्चलक्षभटोपेतो युयुधे विष्णुपार्षदैः ।
वह्नियन्त्रैस्तूर्णशस्त्रैरम्बरे चक्रैस्तथा ॥२५॥
पार्षदा निजचक्रैस्तान् निजघ्नुश्चाब्धिसंगमे ।
चतुर्लक्षभटा नष्टा राजा हतः सुदर्शनात् ॥२६॥
तत्पुत्रः सारकेतुश्च लक्षयोद्धृसमन्वितः ।
श्रीहरेः शरणं प्राप्तो वैष्णवो हरिणा कृतः ॥२७॥
तद्भटा वैष्णवाः सर्वे जाताः प्राणरिरक्षवः ।
आर्द्रमानद्वीपराजो दैत्यः कल्माषकेसरी ॥२८॥
कृष्णक्रूरायुतसंख्यभटैः सह विमानगः ।
युयुधे व्योमजालाद्यैरस्त्रशस्त्रैर्विषाश्रुभिः ॥२९॥
कल्पवल्लीजन्यभटैर्लक्षसंख्यकवैष्णवैः ।
वैष्णवा व्योमजालानि चिच्छिदुः कर्तरीगणैः ॥३०॥
कल्पवल्ल्युत्थितैस्तूर्णं चाम्बरे बहुयत्नतः ।
निजघ्नुः प्राणतः सर्वान् सुदर्शनैश्च तद्भटान् ॥३१॥
कल्माषकेशरं मूर्ध्नो द्वेधा चक्रं तदाऽकरोत् ।
हते कल्माषकेशे च तत्पुत्राः पञ्च कल्मषाः ॥३२॥
रक्तकेशः कृष्णकेशश्चित्रकेशोऽग्निकेशकः ।
धूम्रकेशस्तथा चान्ये श्रीहरेः शरणं ययुः ॥३३॥

तेऽपि मन्त्रप्रदानेन वैष्णवा हरिणा कृताः ।
अथ काललयजन्या आसुरा ये भयंकराः ॥३४॥
त्रिंशल्लक्षाः सशस्त्रास्ते नैकरूपधराः खगाः ।
युयुधुर्वैष्णवैः सार्धं पार्षदैर्दशलक्षकैः ॥३५॥
पुत्तलैः कृत्रिमैर्व्योम्नि तूर्णस्फोटैश्च गोलकैः ।
शराणां वृष्टिभिर्विद्युत्पाशैः कासारवृष्टिभिः ॥३६॥
नागपाशैः शिलाभिश्च घनैर्लोहोद्भवैस्तथा ।
निजघ्नुर्वैष्णवान् क्रूरा मृषामायामदोद्धताः ॥३७॥
पार्षदा भगवद्धर्मं धारयित्वा तु तैः सह ।
अन्तरीक्षे विमानस्थास्तदा युयुधिरेऽस्त्रकैः ॥३८॥
कालकालेयजो ज्येष्ठः पुत्रो रणमदांकनः ।
गदां धृत्वा मूढमारं ममार वैष्णवान् बहून् ॥३९॥
मूर्छितास्त्वापतन्नुर्व्यामन्ये भग्नाश्च दुद्रुवुः ।
कृष्णनारायणवर्म रक्षार्थं जेपुरुद्विजः ॥४०॥
'अस्य श्रीकृष्णनारायणवर्मणः सती रमा ।
छन्दोऽनुष्टुप् तथा कृष्णनारायणस्तदिष्टदः ॥४१॥
सर्वजिष्णुं परब्रह्म दैत्यदानवनाशनम् ।
नमामि श्रीहरिं कृष्णं लक्ष्मीशं वल्लभं प्रभुम् ॥४२॥
बीजं गोपालबालश्च भक्तपालो महाप्रभुः ।
शक्तिश्च वैष्णवीदीक्षा महाभागवती शुभा ॥४३॥
कीलकः श्रीकम्भराश्रीनन्दनो भक्तिवर्धनः ।
विनियुक्तो जपे स्मृत्वा राधापारवतीपतिः ॥४४॥
ध्यानं सर्वावताराणां सामर्थ्यानां प्रभावताम् ।
प्रभवस्य सगुणस्य मञ्जुहंसहरेर्हृदि ॥४५॥
न्यासो मे मस्तके चास्तु मस्तकं श्रीहरेरिह ।
नेत्रयोर्भगवन्नेत्रे हरेः कर्णौ च कर्णयोः ॥४६॥
नासायां कृष्णनासाऽस्तु मुखे नारायणाननम् ।
कृष्णनारायणकण्ठो मे कण्ठेऽस्त्वसुरक्षकः ॥४७॥
हृदये मे चक्रधर्तुर्हृदयं चाऽस्तु शार्ङ्गिणः ।
पृष्ठे कुंकुमवापीस्थहरेः पृष्ठं सदाऽस्तु मे ॥४८॥
अश्वपट्टसरःस्थस्योदरं ममोदरेऽस्तु च ।
नाभ्यां मे बालकृष्णस्य नाभिरस्तु जगद्धरा ॥४९॥
जघने मे हरेश्चाऽस्तु जघनं बलसंभृतम् ।
गुह्ये कट्यां च मे स्तां च हरेर्धातुः कटीन्द्रिये ॥५०॥
सक्थ्नोर्मे सक्थिनी च स्तां दैत्यदानवनाशितुः ।
जान्वोर्मे च हरेर्जानू स्तां शक्तिसेवितुः प्रभोः ॥५१॥
जंघयोः स्तां परनारायणजंघे जगच्छ्रये ।
पादयोर्मे सर्वधातुः पादौ स्तां बलिरक्षकौ ॥५२॥
मय्यनादिकृष्णनारायणोऽस्तु मूर्तिमानिह ।
ब्रह्मप्रियापतिश्चास्तु मच्छरीरेन्द्रियादिषु ॥५३॥
ऊर्ध्वे मां रक्षतु स्वामी परमाक्षरधामगः ।
पुरो मां रक्षतु कृष्णनारायणः परेश्वरः ॥५४॥
पार्श्वयोः रक्षतां कृष्णो हरिर्भ्रातृवरावुभौ ।
पृष्ठेऽधस्ताद् रक्षतां मे नरो नारायणस्तथा ॥५५॥
पृथ्व्यां माऽवतु लक्ष्मीशो जले रक्षतु सत्पतिः ।
तेजस्यवतु श्रीकान्तोऽन्तरीक्षे तु प्रभापतिः ॥५६॥
ब्रह्मप्रियापतिर्व्योम्नि माणिकीशोऽनिलेऽवतु ।
राधापतिररण्ये मे रक्षां करोतु चक्रधृक् ॥५७॥
गदाधरो हरिर्मां संरक्षत्वसुरकोटितः ।
शक्तिधृग् बालकृष्णो मां दिक्षु विदिक्षु रक्षतात् ॥५८॥
गोलोकाधिपतिः कृष्णोऽवतु वह्निगणाच्च माम् ।
वैकुण्ठाधिपतिर्नारायणो रक्षतु चासुरात् ॥५९॥
अस्त्रशस्त्रविघातेभ्यो वीर्यवान् मां प्ररक्षतात् ।
आकस्मिकभयान्मां श्रीहृदयस्थः प्ररक्षतात् ॥६०॥
कालमायापापकर्मशत्रुयाम्यकुहद्भयात् ।
शूलमीनध्वजधनुःस्वस्तिकधृक् प्ररक्षतात्' ॥६१॥
इत्येवं कवचं कृष्णनारायणस्य वैष्णवाः ।
धृतवन्तोऽथ दिव्यास्ते मायापारशरीरिणः ॥६२॥
सर्वकृष्णबला जाताः सर्वशक्तिसमन्विताः ।
अनादिश्रीकृष्णनारायणस्यैव हि मूर्तयः ॥६३॥
सुदर्शनैर्महाचक्रैः प्रयुक्तैः सर्वतोदिशि ।
चिच्छिदुःकाललयजान् त्रिंशल्लक्षाऽसुरान् द्रुतम् ॥६४॥
जीवतस्ते मृताः सर्वे रणे पेतुर्महाजले ।
कालप्रालेयपुत्रोऽपि मृतो रणमदांकनः ॥६५॥
तत्सुतानां शतं नष्टं विष्णुचक्रेण चाम्बरे ।
प्राचीनानां नृपो बोधविहंगमोऽपि चाम्बरे ॥६६॥
कोटिपिशङ्गयोद्भृत् पृथ्व्यां युद्धं चकार ह ।
आरुणैर्वैष्णवैः रौद्रैर्गणैः कल्पलतोद्भवैः ॥६७॥
कोटिसंख्यैः रणे देशे शस्त्रास्त्रैरवितर्कितैः ।
अम्बरे सलिले पृथ्व्यां पर्वतेऽरण्यभूमिषु ॥६८॥
सर्वतो युयुधुस्तस्य सैन्यान्यनलशस्त्रकैः ।
विद्युद्गोलैर्वह्नियन्त्रैस्तूर्णस्फोटैश्च पुत्तलैः ॥६९॥
अणुक्ष्वेडैः क्षेपणैश्च शरैः सुरंगशक्तिभिः ।
विद्युत्तारैर्वह्निपाशैर्व्योमजालैर्विषानलैः ॥७०॥
शतघ्नीभिः सैन्यहाभिः शकटीभिर्विमानकैः ।
जलवातैः क्षितिघातैर्घातयामासुरुल्बणाः ॥७१॥'

आरुणाद्या गणा वर्म धारयामासुरैश्वरम् ।
निजभुर्बोधसैन्यानि कोटिप्रस्फोटकानि वै ॥७२॥
कल्पवल्ल्युत्थरम्या वै पुत्तला देवसदृशाः ।
वह्नियन्त्रप्रपूराश्चाऽम्बरे जघ्नुर्हि दानवान् ॥७३॥
अर्धं नष्टं महासैन्यं पुत्तलैः पुत्तलात्मकम् ।
सचेतनं ततः सैन्यमशीतिलक्षसंख्यकम् ॥७४॥
आसुराणां हि तन्नष्टं दशलक्षाणि दुद्रुवुः ।
दशलक्षाणि शरणं श्रीहरेस्तत्र चाययुः ॥७५॥
नाशं प्राप्तस्तथा राजा पिंगो बोधविहंगमः ।
तत्पुत्राः शतसंख्याश्च विज्ञविहंगमादयः ॥७६॥
शरणं श्रीहरेः प्राप्ता रक्षिता वैष्णवाः कृताः ।
दशलक्षभटाश्चापि वैष्णवा हरिणा कृताः ॥७७॥
चिपिंगास्त्रिलक्षसंख्या योद्धारो व्योमयानगाः ।
पिंगलकेन चाऽऽदिष्टा युयुधुस्ते विनायकैः ॥७८॥
कल्पवल्लीजनैः सर्वैः रौद्रैस्तदा वनेऽम्बरे ।
कल्पलतोद्भवैर्विनाशकैस्ते लक्षशो भटाः ॥७९॥
हताः सर्वे परशुभिर्गोलकैः क्षेपणैर्नगैः ।
सर्पैः पाशैर्वज्रदंशैस्त्रिशूलैस्ते जलेऽम्बरे ॥८०॥
भूमौ चैव विमानेषु यत्र प्राप्ता हता हि ते ।
पिंगलको हतश्चापि तत्पुत्रः पिंगशोककः ॥८१॥
शरणं श्रीहरेः प्राप्तो हरिणा वैष्णवः कृतः ।
मंगूजनप्रदेशानां राजा समरमंगलः ॥८२॥
मंचूरणप्रदेशानां हारकिरीटभूपतिः ।
लाशहानां प्रदेशानां क्षणात्मवदनो नृपः ॥८३॥
कारुवर्मा तथा राजा कर्वरीदेशजोऽपि च ।
त एते निजसैन्यैश्च पञ्चाशल्लक्षसंख्यकैः ॥८४॥
सहिता युयुधुः सर्वे ब्रह्मणा परमेष्ठिना ।
ब्रह्मात्वथर्वमन्त्रैश्च जनयामास जाटिकान् ॥८५॥
देवान् दैत्यपृतनासु प्रेरयामास सत्वरम् ।
विद्युत्पाशैः समेतास्ते व्योममार्गेण वै क्षणात् ॥८६॥
उड्डयाञ्चक्रिरे तूर्णं पञ्चाशल्लक्षजाटिकाः ।
विद्युच्छस्त्रैश्च तत्पाशैस्त्रिंशल्लक्षाँस्तु दानवान् ॥८७॥
नाशयाञ्चक्रिरे विद्युद्वज्रैः शेषाश्च दुद्रुवुः ।
आथर्वणोत्थशलभैर्मेघवचामरद्रवैः ॥८८॥
विषाक्तैर्दंशिता दैत्याः शेषा ये दशलक्षकाः ।
मृताः सर्वे ततः शेषा दशलक्षाणि तद्भटाः ॥८९॥
जीवनार्थं च शरणं श्रीहरेस्तत्र चागताः ।
ते सर्वे वैष्णवास्तत्र बालकृष्णेन वै कृताः ॥९०॥
मृतो हारकिरीटश्च तथा समरमंगलः ।
हारकिरीटपुत्राश्च दश सर्वे महाबलाः ॥९१॥
जीवनाशा ययुः सर्वे शरणं श्रीहरेस्तदा ।
प्रमासकिरीटश्रेष्ठा हरिणा वैष्णवाः कृताः ॥९२॥
सहस्रपुत्राः समरमंगलस्यापि वै हरेः ।
शरणं त्वागताः सर्वे हरिणा वैष्णवाः कृताः ॥९३॥
क्षणात्मवदनो राजा युयुधे शंभुना पुनः ।
लक्षसैन्यसमायुक्तो निहतः शंकरेण सः ॥९४॥
कारुवर्मा लक्षसैन्ययुतः पुनश्च शार्ङ्गिणा ।
युयुधे हरिणा सोऽपि सुदर्शनेन घातितः ॥९५॥
तयोः पुत्राः प्रपौत्राश्च तत्सहायप्रदास्तथा ।
समरे निहताः सर्वे सुदर्शनैर्हि विष्णुना ॥९६॥
इलादेशस्य वै राजा मण्डलाक्षिर्महाबलः ।
तथा पादसहो राजा पन्नामदेशरक्षकः ॥९७॥
प्राक्चयनभूपालो नाम्ना प्राचीनशायनः ।
शतलक्षसैन्ययुता युयुधुः शंभुना सह ॥९८॥
अंगशिक्षांगदेशानां श्रृंगशोकाभिधो नृपः ।
शतलक्षभटैः सार्धं युयुधे शंभुना सह ॥९९॥
हतास्ते द्विशतलक्षैर्योद्धृभिः सहिता रणे ।
हरेण स्वगणैः सर्वे नाशिता मारिता मृधे ॥१००॥
एकोऽपि नाऽवशिष्टोऽभूद्धरसंग्राममयायिनाम् ।
एवमेते विनष्टास्ते चतुष्कोटिरणंगमाः ॥१०१॥
शेषा प्रजास्तथा सैन्यभटास्तु वैष्णवाः कृताः ।
अनादिश्रीकृष्णनारायणेन राधिके ! तदा ॥१०२॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
मन्त्रं ददौ हरिस्तेभ्यः ऋषयश्चाऽऽज्ञया हरेः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मकरकेतुमदादिपञ्चदशभूभृतां सपादचतुष्कोटिसैन्यसहितानां शंभ्वादिभिः सह युद्धे मरणाच्छिष्टानां पञ्चविंशतिलक्षाणां शरणागतिरित्यादिनिरूपणनामा नवाऽधिकशततमोऽध्यायः ॥१०९॥

**श्रीकृष्ण उवाच—**

इत्येवं राधिके पूर्वपृथिव्यां सागरान्तिके ।
प्राग्ज्योतिषादिदेशेषु रणोऽभूद्दानवान्तकृत् ॥ १ ॥
ततस्तेषां विशुद्ध्यर्थं यज्ञं पुनस्तु वैष्णवम् ।
शालावतीनदीमूले लाशहासरसस्तटे ॥ २ ॥

ब्रह्मपुत्रोत्तरे पार्श्वे शतयोजनविस्तरे ।
सरोवराऽभितश्चक्रेऽनादिकृष्णनरायणः ॥ ३ ॥
समाहूताः प्रजाः सर्वा युद्धदेशीयमानवाः ।
विमानैः सर्वतोभद्रैर्घस्या क्रोशसहस्रगैः ॥ ४ ॥
सर्वे सुराः समायाताः ऋषयः पितरस्तथा ।
सप्ताहश्चाऽभवद् यज्ञोऽत्युत्कृष्टहवनादिभिः ॥ ५ ॥

हव्यानां नहि संख्याऽस्ति रसानां गणनाऽपि न ।
भोज्यानामपि नाऽन्तोऽस्ति पेयानां तत्र काकथा ॥ ६ ॥
अब्जाधिका महीमानाः संहतास्तत्र सात्त्विकाः ।
पार्थिवाश्च नरा नार्यो युद्धशुद्धिमभीप्सवः ॥ ७ ॥
देवानां च महर्षीणां पितॄणां गणना तु न ।
आहूतानि च तीर्थानि नदा नद्यश्च सागराः ॥ ८ ॥
लाशहासरसश्चाप्सु ब्रह्मपुत्राजलेषु च ।
शालावत्यास्तथा नद्या मूले तीर्थानि चाययुः ॥ ९ ॥

शतयोजनविस्तारो भूदेशो देवताश्रयः ।
गोलोक इव समभूद् वैकुण्ठ इव चाऽभवत् ॥१०॥
ब्रह्मलोक इव वापि ह्यक्षरं चेव वाऽभवत् ।
यत्राऽनादिकृष्णनारायणः श्रीपरमेश्वरः ॥११॥
स्वयं विराजते यत्र ब्रह्म ब्रह्मर्षयस्तथा ।
ऋषयश्च सुराश्चापि जगतां पितरस्तथा ॥१२॥

तत्र किं नाम वै न्यूनं राधिके ! ऋद्धिवर्जितम् ।
यत्र ब्रह्मप्रियाः सन्ति सन्ति वै कल्पवल्लयः ॥१३॥
स्वयं ब्रह्मा हरो विष्णुश्चार्यमा तत्र का क्षतिः ।
यत्र वह्निः सप्तजिह्वश्चतुर्वेदधरो ह्यजः ॥१४॥
पञ्चाननः स्वयं रुद्रस्तत्र का न्यूनता भवेत् ।
लोककल्याणदा देवा ईश्वरा यत्र सात्त्विकाः ॥१५॥
यत्र मोक्षप्रदाः शुद्धा महर्षयश्च वैष्णवाः ।
पावना लोकशुद्ध्यर्थे मिलितास्तीर्थरूपिणः ॥१६॥
यत्र प्रवर्तते यज्ञो वैष्णवो वैष्णवैः सुरैः ।
तत्र का नाम कल्याणे न्यूनभूमिः प्रजायते ॥१७॥
कल्पवल्ल्यस्तथा मुक्ता नदा नद्यो द्रुमास्तथा ।
सुरास्तत्त्वानि चाऽजहुर्यज्ञसामग्रिकाः पराः ॥१८॥
पञ्चगव्यानि सर्वान् वै पाययामासुरीश्वराः ।
ऋषयो ये विमानस्था नारायणसहस्थिताः ॥१९॥
प्रजानां युद्धगानां च देहशुद्धिं यथाविधि ।
कारयामासुरुत्साहात् ततो मन्त्रं च वैष्णवम् ॥२०॥
"शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वथा" ।
"ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा" ॥२१॥

"कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव" ॥२२॥
"ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे" ॥२३॥
प्रथमं शरणं मन्त्रं द्वितीयं तु समर्पणम् ।
षोडशाक्षरयुक्तं च प्रथमं च द्वितीयकम् ॥२४॥

तृतीयं रक्षणं मन्त्रं द्वित्रिंशदक्षरं तथा ।
चतुर्थं ब्रह्मभावं च हर्यर्धांगप्रदं मनुम् ॥२५॥
द्वात्रिंशदक्षरं ददुः ऋषयस्ते चतुर्दश ।
मंकणको मंकिरयः कूर्मी प्राचीनबर्हणः ॥२६॥
त्रीतः प्रभूतानकश्च रुशायी खासनस्तथा ।
अंगश्यामः आरकर्णो ब्रह्मदासो ह्यनामयः ॥२७॥
श्यामलर्षिमलयर्षिश्चैते मनून् ददुस्तदा ।
हवनोत्तरमेते वै प्रजाभ्यस्तौलसीः स्रजः ॥२८॥
ददुश्चाऽब्जप्रमाणाभ्यः प्रजाभ्यः शासनाद्धरेः ।
"कृष्णनारायणस्वामी श्रीहरिः शरणं मम" ॥२९॥
यज्ञे मन्त्रं ददुस्ताभ्यः पावन्यश्चाऽकरोत्प्रजाः ।
लाशहासलिले सर्वाः स्नापयामास केशवः ॥३०॥

शालावत्याश्च सलिले ब्रह्मपुत्रीजले तथा ।
एवं सर्वाः प्रजा नारीर्नरान् बालाँश्च बालिकाः ॥३१॥

पावयामास भगवान् सर्वज्ञातीयमानवान् ।
वह्निं देवान् हव्यरसैः सन्तृप्य पितृदेवताः ॥३२॥
पार्षदान् कन्यकाश्चापि सन्तृप्य युद्धरक्षितान् ।
भोजयामास भगवान् मिष्टान्नैरब्जमानवान् ॥३३॥
यज्ञप्रसादमासाद्य कृतकृत्याश्च तेऽभवन् ।
अवभृथं विधायैव सभायां बालकृष्णकः ॥३४॥

अजमाज्ञापयामास पारितोषिकहेतवे ।
ब्रह्मा नत्वा बालकृष्णं प्रभुं श्रीकृष्णवल्लभम् ॥३५॥

प्रकाशं प्राह सर्वाभ्यः प्रजाभ्योऽभयदानकम् ।
परब्रह्माऽक्षरातीतः सर्वावतारकारणम् ॥३६॥
वासुदेवादिकव्यूहा उत्पद्यन्ते यतः खलु ।
कालो महापूरुषश्च माया यस्य तु शक्तयः ॥३७॥
अवताराश्च धामानि जायन्ते यस्य मूर्तितः ।
सोऽयं श्रीबालकृष्णोऽस्ति स्वामिश्रीकृष्णवल्लभः ॥३८॥
कंभराश्रीसुतः श्रीमद्गोपालबालको हरिः ।
अश्वपट्टसरःक्षेत्रेऽक्षरक्षेत्रे निवासकृत् ॥३९॥
कुंकुमवापिकासंस्थः प्रभापारवतीपतिः ।
कृष्णाब्रह्मप्रियाराधारमालक्ष्मीपतिः प्रभुः ॥४०॥

माणिकीललिताहंसामञ्जुलासगुणापतिः ।
जयाशान्तादयामुक्तादेवीहैमीकलापतिः ॥४१॥
सतां स्वामी मुक्तिकान्तः सृष्टिस्वामी परेश्वरः ।
सर्वधामेशोऽन्तरात्मा देहिनां फलदः स्वयम् ॥४२॥
यदाश्रयेण ज्ञातव्यं प्राप्तव्यं नावशिष्यते ।
यत्परो न समो येन कश्चिदन्यो न विद्यते ॥४३॥
आरुणैः प्रार्थनीया या मुक्तिः शाश्वतिका परा ।
तस्या दाता त्वयं स्वामी पतिः कान्तः परो हरिः ॥४४॥
परामुक्तिः समेष्टव्या ह्येतस्माच्छ्रीहरेर्जनाः ।
अस्माकं विजयस्त्वस्य प्रतापेन सदाऽस्ति वै ॥४५॥
नारायणाद्याः सततं यं भजामः स एव सः ।
अस्य मूर्तिं पूजयध्वं भजध्वं त्वेनमेव च ॥४६॥
सेवामस्य प्रकुरुध्वं तिष्ठध्वं वचनेऽस्य च ।
अस्य वाणी महावेदा अस्य क्रिया वृषो महान् ॥४७॥
अस्य मूर्तिः सदा सेव्या ह्ययं ध्येयः सदा जनैः ।
अस्य स्पर्शाद् पवित्रा वै जायन्ते जडचेतनाः ॥४८॥
युद्धे हतास्तु ये देवा देवपक्षास्तथा च ये ।
सजीवाः सन्तु ते सर्वे कृपयाऽस्य क्षणादिह ॥४९॥
पृथ्व्यां जलेऽम्बरे ये वा मृता देवानुसारिणः ।
शीघ्रं भवन्तु दिव्यास्ते समायान्तु हरिं प्रति ॥५०॥
इत्युक्त्वा जलमादाय कमण्डलौ हरेः पदात् ।
चिक्षेप चाम्बरे ब्रह्मा जलं तन्मेघसदृशम् ॥५१॥
वर्धमानं द्रुतं च प्राऽसरद् भूव्योमवारिषु ।
अमृतं तत्तदा भूत्वा जीवयामास वै मृतान् ॥५२॥
सुरपक्षान् सर्वजीवान् कृत्रिमानपराँस्तथा ।
तदेव जलमेवाऽभूत् स्पृष्टं दानवसुप्तिषु ॥५३॥
तथापि दानवा नैव सजीवा अभवँस्तदा ।
श्रीशस्वामिकृष्णनारायणस्येच्छा हि तादृशी ॥५४॥
स्पृष्टं समं सुरपक्षा जीविता न तु दानवाः ।
अथ ब्रह्म तदा तेभ्यो ददौ मन्त्रचतुष्टयम् ॥५५॥
जीवितेभ्यो हरिस्तत्र प्रददौ पारितोषिकम् ।
विजेतृभ्यस्तथा तत्र ददौ सुपारितोषिकम् ॥५६॥
देहद्वयं मुक्तियोग्यं चैकं परं तु भूस्थितम् ।
प्रेषयामास तान् सर्वान् मुक्तियोग्यान् पदेऽक्षरे ॥५७॥
भूयोग्यान् भगवानाह स्वयं प्रसन्नमानसः ।
यज्ञहव्यं प्रसादं च पानं मिष्टं सुभोजनम् ॥५८॥
गृह्णन्तु चेति ते सर्वे भुक्तवन्तस्तदाज्ञया ।
अथ राजकुमाराँश्च ऋषीन् सैन्यानि चापि च ॥५९॥
समाहूय हरिः प्राह प्रजाश्च सकलास्तथा ।
पाविता वै मया देशा भवतां तीर्थरूपिणः ॥६०॥
कृता मोक्षप्रदा नद्यो नदाः सरांसि पर्वताः ।
दैत्यदानवनाशोऽति कृतश्चात्र भुवस्तले ॥६१॥
एते राजकुमाराश्च वैष्णवास्ते ममाश्रिताः ।
मया नृपासनेष्वेव स्थाप्यन्ते मम बालकाः ॥६२॥
प्रजाश्चापि भवत्यो मे बालिकाः सन्ति सर्वथा ।
नृपाऽऽज्ञायां प्रवर्तन्तु ममाऽऽज्ञैषा हि शाश्वती ॥६३॥
मम भक्तिं प्रकुर्वन्तु मान्या मे ऋषयस्तथा ।
शृण्वन्त्वपि विभागेन यथा राज्यं ददामि तत् ॥६४॥
अयं ब्रह्मा प्रजानां च पितामहः स्वयं प्रभुः ।
यस्य नाम वदाम्यस्मै किरीटं प्रददातु सः ॥६५॥
जलपानद्वीपभूमिर्दीयते सूर्यकेतवे ।
फिलीपद्वीपसंघाता दीयन्ते बीजजंगिने ॥६६॥
वारणीयद्वीपभूमिः सारकेताय दीयते ।
आर्द्रमानद्वीपभूमिः रक्तकेशाय दीयते ॥६७॥
दीयते प्राचीनराज्यं विश्वविहंगमाय च ।
पिंगचिपिंगराज्यं तु पिंगकेशाय दीयते ॥६८॥
मंगूभूमिर्दीयते च आहवमंगलाय तु ।
मञ्जुरणोऽर्प्यते प्रभाकिरीटाय प्रदेशकः ॥६९॥
लाशहाख्यप्रदेशश्च त्रीतर्षये प्रदीयते ।
त्रीतवित्तेतिनाम्ना च प्रसिद्धं राज्यमस्तु तत् ॥७०॥
ऋषिराज्यं भवत्वेतद् वसन्तु तत्र चारुणाः ।
छायाशरीररूपाश्च ब्रह्मात्मज्ञानवेदिनः ॥७१॥
कारुराज्यं दीयते च कूर्मिणे तु महर्षये ।
ऋषिराज्यं तदप्यस्तु वैष्णवं पावनं सदा ॥७२॥
इलादेशस्य वै राज्यं स्वयं ब्रह्मा करोतु च ।
ब्रह्मदेशः सदा चाऽस्तु तीर्थं चैरावती नदी ॥७३॥
पन्नामनदिकाभूमिं विष्णुः प्रशास्तु सर्वदा ।
श्यामदेशो ब्रह्मपूर्वे पन्नाम्नीतीर्थमस्तु च ॥७४॥
प्राक्चयनाख्यभूमेश्च रक्षकोऽस्तु शिवः सदा ।
विनायकाश्च प्राचीनरक्षकाः सन्तु तत्पराः ॥७५॥
अंगाशिक्षांगदेशानां राजाऽपि शंकरः स्वयम् ।
स्वगणैः सहराज्यं तच्छास्तु प्राचीनदक्षिणम् ॥७६॥
सुमातृके प्रदेशे च तिष्ठन्तु मातरः सदा ।
शिवसत्यो रक्षणार्थं सामुद्रदैत्यनाशिकाः ॥७७॥
एवमेतानि राज्यानि भवन्तु वैष्णवानि वै ।
इत्येवं राधिके कृष्णनारायणेन भाषितम् ॥७८॥

ब्रह्मा च प्रददौ तस्मै तस्मै राज्यकिरीटकम् ।
हरिर्ददौ स्वयं चापि विष्णवेऽजाय शंभवे ॥७९॥
तिलकं कैसरं कृत्वा कण्ठीं मालां च तौलसीम् ।
नूतनेभ्यश्च प्रददौ बालकृष्णः स्वयं तदा ॥८०॥
अथाऽऽह च हरिस्तेभ्यो राजभ्यो हितकृद्वचः ।
गुरवोऽपि मया वोऽत्र दीयन्ते भक्तिहेतवे ॥८१॥
कर्वेरीजलपानानां गुरुः कूर्मीति वै ऋषिः ।
प्राचीनानां फिलीपानानां गुरुः शंभुर्महेश्वरः ॥८२॥
प्राचीनोत्तरभागानां गुरुः प्राचीनबर्हणः ।
श्यामलानां चिपिंगानां गुरुः श्यामलको मुनिः ॥८३॥
मलयानां मलयर्षिरिलाया ब्रह्मदासकः ।
लाशहानां गुरुस्त्रीतो लूशानां लूशयस्तथा ॥८४॥
वारणानां मातरश्च गुर्व्यो बोध्याः ऋषिप्रियाः ।
आर्द्रमानगुरुर्ब्रह्मा ब्राह्मणामपि विश्वसृट् ॥८५॥
मंगूजानां मंकणको गुरुस्तद्देशवासिनाम् ।
मंचूराणां प्रजादीनां मंकिरयो गुरुर्मतः ॥८६॥
भूतानां तु प्रभूतानः पन्नामानामनामयः ।
प्राक्चयनप्रदेशानां चयनर्षिर्गुरुर्मतः ॥८७॥
अंगशिक्षांगदेशानामंगश्यामलको गुरुः ।
आराकाणामारकर्णः खसीनानां तु खासनः ॥८८॥
एते तद्देशराजानां प्रजानां गुरवः सदा ।
महर्षयो मया दत्ता महाभागवतोत्तमाः ॥८९॥
रवीचक्रुस्तेऽपि राजानो वैष्णवा वैष्णवान् गुरून् ।
हर्षं प्रापुश्च ते सर्वे ऋषयो भूभृतः प्रजाः ॥९०॥
अथ श्रीभगवान् भक्तहृदयज्ञः प्रजाऽऽर्त्तिहा ।
अब्जरूपधरो भूत्वा मिमिले सर्वदेहिनः ॥९१॥
चरणौ प्रददौ सर्ववक्षस्सु चिह्नशोभितौ ।
अष्टकोणश्चोर्ध्वरेखा स्वस्तिको यववज्रकौ ॥९२॥
जाम्बूफलं ध्वजोऽङ्कुशः पद्मं दक्षपदेऽभवन् ।
त्रिकोणः कलशश्चापि गोष्पदं च धनुष्यकम् ॥९३॥
मीनाऽर्धचन्द्रकौ व्योम वामे तु चरणेऽभवन् ।
कच्छपश्च गरुडश्च शिखरं करिहंसकौ ॥९४॥
विमानं सूर्यमेवैते पादग्रन्थेरधोऽभवन् ।
दक्षे पदे हरेस्तत्र त्रुटिकाऽङ्गुष्ठदिग्भवा ॥९५॥
वामे तु त्रुटिकानिम्ने लक्ष्मीः सौधं द्रुमश्च गौः ।
सिंहासनं च पञ्चैते पदे समभवन् हरेः ॥९६॥
अथ मीनध्वजधनुश्चक्रस्वस्तिकशूलिनम् ।
पद्मबाणदण्डयुतं दक्षं करं तु सिद्धिदम् ॥९७॥
निर्भयचक्रसहितं श्रीरेखं समयूरकम् ।
वंशीचिह्नं कल्पवल्लीयुतं चाऽश्ववृषान्वितम् ॥९८॥
वामं करं तु शुभदं कृत्वा द्वयोस्तदाऽञ्जलिम् ।
प्रजानां च नृपादीनां प्रददौ मूर्द्धसु प्रभुः ॥९९॥
मुद्रिकाः कल्पफलदाः प्रददौ प्रतिमानवम् ।
कल्पमूर्तिं निजां पूजाकर्मणे प्रददौ प्रभुः ॥१००॥
अन्नवस्त्रर्द्धिबाहुल्यं प्रददावाशिषस्तथा ।
ददौ दिव्यं दर्शनं च परधामविराजितम् ॥१०१॥
राधिके ! कृपया यत्र प्रसन्नः परमेश्वरः ।
तत्र त्रिगुणजीवानां समो लाभो हरेर्भवेत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्राग्ज्योतिषादिदेशानां वैष्णवनृपव्यवस्था, ऋषिव्यवस्था, कृपावर्षणं, दिव्यदर्शनं चेत्यादिनिरूपणनामा दशाधिकशततमोऽध्यायः ॥ ११० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! दिव्यकिशोरं दर्शनं परम् ।
परधामगतं रूपं दर्शयामास माधवः ॥ १ ॥
रूपानुरूपावयवं कोटिकामाश्रयं शुभम् ।
सर्वतेजोमयं सर्वानन्दशान्तिदयाभृतम् ॥ २ ॥
अपारकरुणायुक्तं तथा वात्सल्यशेवधिम् ।
अनन्तानन्तसौहार्दरनेहप्रेमप्रपूरितम् ॥ ३ ॥
सर्वगन्धरसायुक्तं सर्वपुष्टिबलान्वितम् ।
सर्वाभृतप्रसवं च सर्वस्पर्शसुखप्रदम् ॥ ४ ॥
मुकुटादिविभूषाभिः शोभितं च मनोहरम् ।
दिव्याम्बरसुशोभं च सर्वचिह्नविराजितम् ॥ ५ ॥
राधालक्ष्मीयुतं पार्श्वे प्रभापारवतीयुतम् ।
माणिकीसहितं दिव्यं ब्रह्मप्रियाभिवन्दितम् ॥ ६ ॥
असंख्यमुक्तधामादिप्रस्तुतं चावतारकैः ।
पार्षदैरीश्वरैः सर्वैरीश्वरीभिर्नतं तथा ॥ ७ ॥
सगुणैर्निर्गुणैस्तत्त्वैः सृष्टिपालैः प्रवन्दितम् ।
ऋषिभिः पितृभिर्देवैर्मानवैर्जडचेतनैः ॥ ८ ॥
पातालवासिभिश्चापि शक्तिभिश्च स्तुतं प्रभुम् ।
सर्वं यत्र ममौ सूक्ष्मं यस्माच्च निर्ययाविदम् ॥ ९ ॥
सर्वात्मकं ततः सूक्ष्मं चमत्कारप्रपूरितम् ।
सर्वाश्चर्याश्रितं बालकृष्णं श्रीकम्भरासुतम् ॥१०॥
कुंकुमवापिकाक्षेत्रं चाश्वपट्टसरोवरम् ।
दिव्याक्षरं परं क्षेत्रं दर्शयामास वै प्रभुः ॥११॥

पितृकन्या विंशतिश्च दशसाहस्रसेविकाः ।
सर्वास्ताः पितृपुत्र्यो वै मुमुहुः श्रीहरौ तदा ॥१२॥
वव्रिरे कान्तमात्मानं सर्वात्मवल्लभं प्रभुम् ।
प्रजाकन्याः कोटिसंख्या वव्रिरे कान्तमेव तम् ॥१३॥
अर्यम्णा च प्रजाभिश्च बालकृष्णाय चार्पिताः ।
अनादिश्रीकृष्णनारायणेन स्वीकृताश्च ताः ॥१४॥
कृतकृत्या अभवँश्च प्राप्तव्यः प्राप्त एव यत् ।
भगवान् स्वविमानेषु ताभ्यो वासं तदा ददौ ॥१५॥
अथाऽर्यमाणं भगवानाह कारुकपर्वते ।
सिन्धुमूले सदा मूर्त्या स्थेयं त्वयाऽत्र भूतये ॥१६॥
त्रीतराज्ये चारुणानां रक्षार्थं पश्चिमे स्थले ।
अर्यमँस्तव राज्यं तद् भविष्यति सुखावहम् ॥१७॥
इत्येवं भगवान् कृष्णनारायणस्तु भास्वते ।
अर्यम्णे प्रददौ कारुकराद्रिं सिन्धुपार्श्वगम् ॥१८॥
आरुणा दिव्यवसना दिव्यरूपाश्च तत्स्त्रियः ।
प्राप्य तत् सुन्दरं स्थानं मुमुदुर्देवता इव ॥१९॥
कं सुखं तत्प्रदा या अश्मनाम् इरा क्षितिः शुभा ।
कश्मेरा पर्वतभूमिः कारुपर्वतशोभना ॥२०॥
तत्राऽर्यमा स्वयं वासं चक्रे श्रीसहितः सदा ।
श्रीभूमिः पावनी सा चाऽभवच्छ्रीनगरी सदा ॥२१॥
एवं सर्वं व्यवस्थाप्य हरिस्तीर्थविधित्सया ।
विधापयितुं तीर्थानि नदीर्नदान् सरांसि च ॥२२॥
प्रजाः स्वस्वप्रदेशाँश्च गन्तुमाज्ञाप्य वै ततः ।
विमानैर्निर्ययौ कृष्णो यातुमादिश्य वै नृपान् ॥२३॥
ब्रह्मप्रियाकुमारीभिर्देवपित्रर्षिभिः सह ।
सस्नौ स ब्रह्मपुत्र्यां वै लाशहाख्यसरोजले ॥२४॥
ततः सस्नौ सिन्धुमूले ततश्च तेरिमाजले ।
आमूराया जले सस्नौ होमांगाया जले ततः ॥२५॥
महत्याश्च जले अंगशिक्षांगाया जले ततः ।
शिक्षांगाया जले सस्नौ मीनकङ्क्वा जले ततः ॥२६॥
पन्नाम्न्याश्च जले चापि शालावत्या जलेऽपि च ।
इरावत्या जले स्नात्वा सुन्दरारण्यमाययौ ॥२७॥
पितृकन्या हरिः प्राह भवत्योऽत्र मम प्रियाः ।
द्विरूपिण्यो भवन्त्वेव मूलच्छायात्मिकाः शुभाः ॥२८॥
मूलात्मिका मम क्षेत्रे वसन्तु तु मया सह ।
छायात्मिका नदीरूपा वसन्तु तीर्थभूमिगाः ॥२९॥
ब्रह्मपुत्री लवहीता चन्द्रावती इरावती ।
शालावती मीनकङ्क्षू लाटिशा कानिशा तथा ॥३०॥
मापींगा चापि सीक्यांगा अंगस्वांगा हरांगिका ।
मौक्तिका तारिमा चापि पन्नामा त्वांगहा तथा ॥३१॥
मन्नाम्नी मणिवर्णा च रंगवर्णा च सुन्दरी ।
एताः सर्वाः स्वनाम्नैव ख्यातिं यास्यथ मे प्रियाः ॥३२॥
भवतिभ्यो मया दत्तं सामर्थ्यं पापनाशकम् ।
मोक्षदं पुण्यदं स्मृद्धिप्रदं पुत्रादिसम्प्रदम् ॥३३॥
भवतीनां महिमानं कथयामि मम प्रियाः ! ।
यासां साक्षाद्धरेर्योगो दिव्यतापादकः शुभः ॥३४॥
मुक्ततादायको योगो यासां नारायणेन वै ।
तासां वै दिव्यता नित्यमुक्तता कमलासमा ॥३५॥
राधिकया समा लक्ष्म्या समाः श्रिया समास्तथा ।
यूयं प्रभासमा दिव्या यूयं पारवतीसमाः ॥३६॥
यूयं वै माणिकीतुल्या मम प्राणसमाः प्रियाः ।
युष्मत्संसर्गमाप्तानां मम धाम्नि निवासनम् ॥३७॥
भवतीनां जले स्नाता ये पक्षिपशवो जनाः ।
कीटाः पतंगजन्त्वाद्यास्ते यास्यन्ति परं पदम् ॥३८॥
यथा गंगा च यमुना यथा सरस्वती सती ।
तथा यूयं सर्वमोक्षप्रदा दिव्याः स्थ तारिकाः ॥३९॥
यथा च गण्डकी श्रेष्ठा गोमती स्वर्णलेखिका ।
तथा यूयं सदा मे वै निवासार्हाः स्थ योषितः ॥४०॥
मम मूर्तेर्जलं यद्वत् तत्तथैव च वो जलम् ।
ब्रह्मकमण्डलुवारिसदृशं वो जलं शुभम् ॥४१॥
विराजाया यथा वारि ब्रह्महृदजलं यथा ।
पावनं वो जलं यद्वदामूलं वार्धिसंगमात् ॥४२॥
महापापातिपापानां घातहत्यादिभाविनाम् ।
अकृत्यजायमानानां क्षालनं वो जले सदा ॥४३॥
पीतं स्पृष्टं तथा दृष्टं घ्रातं चाचमनीकृतम् ।
कणमात्रजलं वोऽस्तु पावकं मम योगतः ॥४४॥
आसुरा राक्षसा दैत्या म्लेच्छाः पापाश्च दानवाः ।
शुद्धिमेष्यन्ति सलिलाद्भवतीनां युगे युगे ॥४५॥
प्रेता भूता राक्षसाद्या असद्गतिगतास्तथा ।
यदाकदाचित् स्नानेन मुक्तिमेष्यन्ति वै क्षणात् ॥४६॥
शालावत्या चांगशिक्षाया मध्ये तु मया क्रतुः ।
मेनकांगातटे यत्र प्रथमस्तु कृतः शुभः ॥४७॥
तथात्र लाशहानाम्नस्तडागस्य समीपतः ।
द्वितीयोऽयं महायज्ञः कृतो वै वैष्णवः शुभः ॥४८॥
आद्या वैकुण्ठसदृशी गोलोकेन समा परा ।
भूमिर्दिव्या भवतीनां योगाच्च मोक्षसदृशी ॥४९॥

तत्रत्याश्च प्रजाः सर्वा मम पार्षदरूपिणी ।
मम ब्रह्मप्रियातुल्याः सत्यः साध्व्यः स्त्रियोऽपि च ॥५०॥
बाला मद्बालतुल्याश्च वृद्धा मे वृद्धसदृशाः ।
समाना मे समभावाः पावना मम योगतः ॥५१॥
भवतीनां तटे वासं कुर्वाणा देहिनः खलु ।
जराऽण्डस्वेदभेदोत्थाश्चत्वारोऽपि प्रजीविनः ॥५२॥
पावना मे भक्तियुक्ता विष्णुतुल्या मता मम ।
भवतीनां जले वासं कुर्वाणा जन्तवस्तु ये ॥५३॥
सदा वैकुण्ठवासास्ते भविष्यन्ति न संशयः ।
भवतीनां कणव्याप्ताः पवना यान्ति यद्दिशम् ॥५४॥
ते देशाः पावना विष्णुलोकतुल्या हि देहिनाम् ।
भवतीनां जले येषामस्थिखण्डः पतेदपि ॥५५॥
यद्वा भस्म शवस्यापि पतेत्स्वल्पं यदा तदा ।
ते जीवाः पावना भूत्वा यास्यन्ति मम धाम वै ॥५६॥
भवतीनां स्मरणेन प्रातर्नाम्नां तु याः प्रजाः ।
यत्र क्वापि करिष्यन्ति स्नानं वापीजलादिषु ॥५७॥
गृहे वा पर्वतेऽरण्ये समुद्रे यानवाहने ।
ब्रह्मपुत्र्यादिनाम्नैव ते प्राप्स्यन्ति क्रतोः फलम् ॥५८॥
अथ गंगा चाजनाभे अब्रिक्के च नरायणी ।
इरावती ब्रह्मदेशे त्रिविते ब्रह्मपुत्रिका ॥५९॥
श्यामदेशे मेनकांगा प्राचीनेंऽगशिवांगिका ।
सर्वास्ता गोमतीतुल्या गोलोकाऽऽवासदायिकाः ॥६०॥
सर्वतीर्थफलं यायात् स्नात्वा स्मृत्वाऽपि मानवः ।
भवतीनां तटे कश्चिद् दास्यत्यपि च ढब्बुकम् ॥६१॥
कोटिमुद्राप्रदानस्य फलमाप्स्यति मानवः ।
रूप्यकं वा स्वर्णमुद्रां रत्नं च हीरकं च वा ॥६२॥
मौक्तिकं चापि माणिक्यं मणिं ताम्रं वराटिकाम् ।
दाने दास्यन्ति ये तीरे तेषां कोटिगुणं फलम् ॥६३॥
वस्त्रं भूषाः कज्जलादि शृंगारं चन्दनादिकम् ।
पादुके वाहनं वापि तथोपकरणादिकम् ॥६४॥
गृहं गृहस्य सामग्रीश्चान्नं रसं च भोजनम् ।
यो वा दास्यति भावेन तस्य पुण्यमनन्तकम् ॥६५॥
गजं चाश्वमजां धेनुं दोग्ध्रीं कन्यां च वाटिकाम् ।
दाने दास्यति तीरे वस्तस्य पुण्यमनन्तकम् ॥६६॥
विद्यां विद्यार्थिनां चापि साहाय्यं पाठशालिकाम् ।
दास्यति वस्तटे तेषां स्वर्गे स्यात् समनन्तकम् ॥६७॥
अहं नारायणः स्वामी जलाद्वस्तच्चतुष्टये ।
तीरे दानप्रदातारो यास्यन्ति मम धाम ते ॥६८॥
नारीणां चापि बालानामनाथानां च योगिनाम् ।
साध्वीनां च सतां सेवां कर्तव्याऽनन्तपुण्यदा ॥६९॥
अनंगानामधनानामगृहाणामनायुषाम् ।
सेवनं वस्तटे कार्यं तस्य पुण्यमनन्तकम् ॥७०॥
माघे पूर्वदले यज्ञः प्रथमः पञ्चमीतिथौ ।
समारब्धो मेनकांगातटे तत्र दिने तु यः ॥७१॥
करिष्यति क्रतुं तत्र वैष्णवं रौद्रमेव वा ।
स्वर्गराज्यं ब्रह्मराज्यं प्राप्स्यन्ति मोक्षणं तथा ॥७२॥
एकादश्यां समाप्तिश्च कृता तस्येति तद्दिने ।
भोजनादीनि दास्यन्ति प्राप्स्यन्ति परमां गतिम् ॥७३॥
लक्ष्मीनारायणसंहितायाः पारायणं ततः ।
आरभ्य कारयिष्यन्ति प्राप्स्यन्ति मम धाम ते ॥७४॥
मन्दिरे मम तत्रैवोत्सवं च मम सन्निधौ ।
कारयिष्यन्ति ये भक्तास्तेषां मोक्षस्तु शाश्वतः ॥७५॥
दृढं च मन्दिरं नूनं कारयित्वा तु तत्तटे ।
लक्ष्मीराधाप्रभापारवतीश्रीमाणिकीयुतम् ॥७६॥
सप्तमूर्तिस्वरूपं मा स्थापयिष्यन्ति ये जनाः ।
तेभ्यो धाम परं स्थानं दास्यामि मम शोभनम् ॥७७॥
पूजाप्रवाहं वृत्तिं च जीवनं दानभोजनम् ।
दास्यन्ति ये भवतीनां तटे मन्मन्दिरे जनाः ॥७८॥
तेभ्यः स्वर्गाणि रम्याणि धामानि द्युतिमन्ति च ।
दास्याम्यजस्रं दिव्यानि शाश्वतानि न संशयः ॥७९॥
मन्दिरे दीपदानं च भवतीनां जले तथा ।
दीपदानं करिष्यन्ति तेषां चक्षुर्हि शाश्वतम् ॥८०॥
सर्वं ज्ञानमयं दिव्यं विधास्ये मुक्तिदं शुभम् ।
तुलसीं चम्पकं पद्मं तदुद्यानं फलान्वितम् ॥८१॥
कारयिष्यन्ति ये भक्तास्तान्नयिष्येऽक्षरालयम् ।
मम वैष्णवभक्तानां पूजां भोजनदक्षिणाम् ॥८२॥
सेवां पादस्य दास्यं वा करिष्यन्ति तु ये जनाः ।
साध्वीनां वा पार्षदानां करिष्यन्ति प्रसेवनम् ॥८३॥
अन्नधनाऽम्बरेष्टाद्यैस्तान्नयिष्येऽक्षरं पदम् ।
भवतीनां तटे रम्ये ग्रामे चावसथादिषु ॥८४॥
साधुरूपेण सततं विचरिष्यामि वल्लभः ।
साध्वीरूपेण मे पत्न्यो विचरिष्यन्ति सर्वदा ॥८५॥
तासां पूजाऽन्नदानाद्यैः कार्या स्वश्रेयसे जनैः ।
भवतीनां जले ताश्च स्नास्यन्ति तीर्थहेतवे ॥८६॥
मम भक्तावताराश्च मेऽवतारा युगे युगे ।
स्नास्यन्ति भवतीनां वै सलिलेषु पुनः पुनः ॥८७॥

माघे सरित्सु चैतासु ये तु स्नास्यन्ति देहिनः ।
तेषां पापानि विलयं यास्यन्ति कोटिजन्मनाम् ॥८८॥
नदीनां संगमादौ च कुंभलग्ने तु ये जनाः ।
स्नास्यन्ति दूरतो गत्वा यास्यन्ति परमं पदम् ॥८९॥
मया कृपया पितृकन्यास्तीर्थीकृताः सदा ।
मत्प्रिया भवथाऽतो वै मत्तुल्या नाऽत्र संशयः ॥९०॥
माघमासे भवतीनां जलेषु स्वर्गवासिनः ।
देवाश्च पितरश्चापि समायास्यन्ति नित्यशः ॥९१॥
सर्वतीर्थानि लोकेभ्यश्चागमिष्यन्ति सर्वतः ।
कोटितीर्थात्मकं वारि भवतीनां भविष्यति ॥९२॥
सत्यं स्वर्गादिकं सर्वं भवतीनां जले तदा ।
भविष्यति न सन्देहो यूयं श्रेष्ठतमास्ततः ॥९३॥
तत्तद्देशोद्भवाः सन्तो निवत्स्यन्ति हि वस्तटे ।
भवतीनां सुपावित्र्यं वर्धयिष्यन्ति साधवः ॥९४॥
पुत्रपौत्रकलत्रादिधनधान्याऽम्बरादिकम् ।
भूषाक्षेत्रोद्यानराज्यसम्पत्समृद्धिप्रदं तथा ॥९५॥
सर्वेष्टसुखदं स्वर्गमोक्षदं वंशदं शुभम् ।
भवतीनां जले स्नानं कृतं सर्वं विधास्यति ॥९६॥
भवतीनां तटे वासकृतां मोक्षो भविष्यति ।
मुण्डनं कारयिष्यन्ति ये तत्पापानि सर्वथा ॥९७॥
नाशमेष्यन्ति च शुद्धिं यास्यन्ति चात्मनां ततः ।
भवतीनां तटे दीक्षां ग्रहीष्यन्ति नराः स्त्रियः ॥९८॥
ते मुक्ता मम धामस्थतुल्या देहयुता अपि ।
स्नानं दान तपो होमं स्वाध्यायं पितृतर्पणम् ॥९९॥
अनाथपालनं गोपालनं दीनसहायनम् ।
करिष्यन्ति जना येऽत्र तटे ते मोक्षभागिनः ॥१००॥
कुमारदानकर्तारः कन्यादानविधायिनः ।
ब्रह्मधामगतिं चान्ते यास्यन्ति शाश्वतं पदम् ॥१०१॥
भवतीनां जले त्वेकवारं स्नास्यन्ति ये जनाः ।
स्मृत्वा शतकुलान्येव तानि यास्यन्ति मोक्षणम् ॥१०२॥
भवतीनां तटे श्राद्धं मृतानां पुण्यसत्क्रियाः ।
देवानां स्थापनं वृक्षे जलपानं तथाऽऽलयम् ॥१०३॥
आश्रयं धर्मशालां च साहाय्यं विपदात्मनाम् ।
करिष्यन्ति जना येऽत्र ते प्राप्स्यन्ति परां गतिम् ॥१०४॥
भवतीनां मन्दिराणि कारिष्यन्ति ये जनाः ।
कुलदेवीं कूलवासा मानयिष्यन्ति वश्च ये ॥१०५॥
पूजयिष्यन्ति विविधैर्नूतनैर्मिष्टभोजनैः ।
जलपुष्पफलाद्यैश्च तेषां स्वर्गं हि शाश्वतम् ॥१०६॥
अवग्रहाऽतिवृष्ट्यादिपीडा तेषां न वै भवेत् ।
ऋषीणां मम शिष्याणां मन्दिरे प्रतिमार्चनम् ॥१०७॥
करिष्यन्ति जनास्तेषां दारिद्र्यं नैव दृश्यते ।
इत्येवं राधिके ! ताभ्यो ददावाशीर्वचांसि सः ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने ब्रह्मपुत्र्यादिभ्यो हरिणा दत्तदिव्यदर्शनम्, दशसहस्राणि विंशतिश्चेति कन्यकाऽर्पणम्, अर्यम्णे कश्मेराप्रदेशराज्यदानम्, ब्रह्मपुत्र्यादीनां नदीरूपेणापि भवनम्, तासु हरिकृतस्नानम्, वरदानानि, तीर्थफलानि, दानफलानि चेतिनिरूपणनामैकादशाधिकशततमोऽध्यायः ॥ १११ ॥

श्रीकृष्ण उवाच—

श्रृणु त्वं राधिके ! ताभिर्नदीभिर्यत्तदाऽर्थितम् ।
त्वया कृष्ण ! वयं सर्वास्तीर्थीकृताः कृपावशात् ॥ १ ॥
सर्वदेवनिवासाँश्च प्रदेह्यस्मत्तटेष्विह ।
इत्यस्माकं सुसंकल्पं प्रपूरय प्रभापते ॥ २ ॥
श्रुत्वा प्राह महाराजः कृष्णनारायणः प्रभुः ।
ब्रह्माणं शंकरं विष्णुं सर्वदेवाऽऽह्वनाय वै ॥ ३ ॥
त्रिदेवाः सस्मरुर्देवान् त्रयस्त्रिंशत्प्रकोटिकान् ।
सर्वे तूर्णं समाजग्मुर्यत्र कृष्णनरायणः ॥ ४ ॥
वने वै सुन्दराख्ये ते समागत्य नरायणम् ।
नमश्चक्रुः समीहाना आज्ञां नारायणस्य ते ॥ ५ ॥
हरिः प्राह वसूनष्टौ रुद्रानेकादशैव च ।
द्वादशादित्यवर्यांश्चाऽश्विनौ द्वौ लोकहेतवे ॥ ६ ॥
भवन्तो भिन्नरूपैश्च तिष्ठन्तु तीर्थकाम्यया ।
ब्रह्मपुत्र्यादिसलिले लोकपावनहेतवे ॥ ७ ॥
तत आरभ्य तन्मूले वसवो वासमाचरन् ।
संगमेष्वादित्यवर्या रुद्राः. समुद्रसंगमे ॥ ८ ॥
अश्विनौ वक्रगत्यादौ वासान् समाचरँस्ततः ।
इन्द्राद्याश्च दिशां पाला अष्टौ तेषां ह्रदेषु च ॥ ९ ॥
सप्तर्षयस्तीरवनेष्ववसन् यत्र पर्वताः ।
नवग्रहा निवासं चाऽकुर्वन् नगरसन्निधौ ॥१०॥
मरुद्देवाश्च तीरेषु स्वल्पसरित्समागमे ।
चतुःषष्टिमहायोगिन्यश्चाऽवसन् समुच्छ्रये ॥११॥
अवतारेषु सर्वत्राऽष्टषष्टितीर्थमण्डलम् ।
वालखिल्याः पितरश्चर्षयो विश्वेसुरास्तथा ॥१२॥

सिद्धाश्चासां प्रमार्गेषु न्यवसँस्तीर्थरूपिणः ।
इत्येवं श्रीहरिस्ताभ्यस्तीर्थानि प्रददौ स्वयम् ॥१३॥
एतेषां तु निवासेषु यज्ञदानतपःक्रियाः ।
क्रियमाणा यजमाने शाश्वतपुण्यकारिकाः ॥१४॥
माघकृष्णैकादशिकोत्तरं पुनर्मृधोऽभवत् ।
सप्ताहस्तत्र वै सर्वान् दैत्यान् विनाश्य माधवः ॥१५॥
चक्रे द्वितीययज्ञं स माघे सिते तु पञ्चमे ।
दिने सप्ताहयज्ञः स पूर्णोऽभवद् व्रते दिने ॥१६॥
एकादश्यां कृतं तस्याऽवभृथं च ततः परम् ।
चतुर्दिनानि सर्वासां जलेषु स्नानमाचरत् ॥१७॥

अनादिश्रीकृष्णनारायणः श्रीपूर्णिमातिथौ ।
आययौ च विमानेन वनं सुन्दरसंज्ञकम् ॥१८॥
तस्मात्तीर्थानि सर्वाणि लाशहाख्ये सरोवरे ।
शालावत्या ब्रह्मपुत्र्या जले सप्ताहकेऽत्र वै ॥१९॥
वसन्ति च समायान्ति माघशुक्ले विशेषतः ।
सरित्स्वन्यासु च चतुर्दिनेषु संवसन्ति च ॥२०॥
तत्र दानं गवां देयं गजानां वाजिनां तथा ।
अजानां च तथोष्ट्राणां वृषाणां देयमित्यपि ॥२१॥
कम्बलानां च वस्त्राणां यानानां दानमुत्तमम् ।
विमानानां गृहाणां च क्षेत्राणां देयमित्यपि ॥२२॥

अन्नानां विविधानां च द्विदलानां प्रदानकम् ।
शाकानां चापि पात्राणां कन्दानां देयमित्यपि ॥२३॥
कणानां सुरसानां च शर्कराणां पतत्त्रिणाम् ।
पत्राणामिक्षुदण्डानां फलानां देयमित्यपि ॥२४॥
पेटिकानां मञ्जुषाणां पात्राणां दानमुत्तमम् ।
मञ्चोपकरणानां च स्वर्णस्य रजतस्य च ॥२५॥
मुद्रादेश्च धनस्यापि कर्तव्यं दानमित्यपि ।
विद्यादानं प्रदातव्यं दासदानं तथोत्तमम् ॥२६॥
दासीदानं प्रदातव्यं मोक्षदानं महोत्तमम् ।
ज्ञानदानं कथादानं पुत्रदानं स्वदानकम् ॥२७॥

कन्यादानं प्रदातव्यं योग्याय तु वराय च ।
सौधदानं तथा शय्यादानं पर्यंकदानकम् ॥२८॥
कर्तव्यं दैवपुरुषे दैवीसत्यां फलप्रदम् ।
देवमूर्तिप्रदानं च स्वर्गदं मोक्षदं तथा ॥२९॥
देहदानं प्रकर्तव्यं कटिदानं परात्मने ।
सर्वदानं प्रदातव्यं श्रीशाय परमात्मने ॥३०॥
आत्मदानं सदा देयं गुरवे मोक्षदाय वै ।
पुस्तकानां पाठदानं कर्तव्यं पाठिने सदा ॥३१॥

माघे सर्वाणि दानानि सर्वमासेष्वपि ध्रुवम् ।
कर्तव्यानि सकामैस्तु लभ्यते फलमक्षरम् ॥३२॥
रक्तदानं बाष्पदानं गर्भदानं तथा स्त्रियाः ।
रतिदानं प्रदातव्यं औषधादिप्रदानकम् ॥३३॥
नारायणबलिः श्राद्धं कर्तव्यं मृतमुक्तिदम् ।
आश्रया आलया धर्मशाला मखाश्च तत्तटे ॥३४॥
अन्नसत्राणि कार्याणि वृद्धानामाश्रयास्तथा ।
विद्यानामाश्रयाः कार्याः कन्याऽनाथाश्रयास्तथा ॥३५॥
विधवानां विधुराणामाश्रयाः कर्मयोजकाः ।
कर्तव्या धनिभिस्तासां नदीनां तीरभूमिषु ॥३६॥

लोकसेवाप्रवाहाश्च कारणीयाः समन्ततः ।
परोपकाराः कर्तव्या मानवैर्नरयोषिताम् ॥३७॥
तीर्थेकृतानि तान्येव कोटिगुणफलानि वै ।
कालमानप्रदानं च विद्युन्मानप्रदानकम् ॥३८॥
अंगदानप्रदानं च कर्तव्यं तीर्थभूमिषु ।
यन्त्रदानं प्रकर्तव्यं प्रतिबिम्बप्रदानकम् ॥३९॥
दूरश्रवणदृष्ट्यादियन्त्रदानं तथोत्तमम् ।
देयं कृषिहलाद्यं च साधनं महदुत्तमम् ॥४०॥
अथ देयं सुगन्ध्यादि पुष्पसारं सदुत्तरम् ।
गन्धसारं रससारं सारसारं परात्परम् ॥४१॥

ब्रह्मपुत्री स्थापनीया चतुर्हस्ताऽतिसुन्दरी ।
लवहीता स्थापनीया द्विहस्ता रमणी सती ॥४२॥
चन्द्रावती स्थापनीया षोडशकरशालिनी ।
इरावती स्थापनीया अष्टहस्ता सुकन्यका ॥४३॥
शालावती स्थापनीया चतुर्हस्ता मनोहरा ।
मेनकांगा मीनकञ्जू स्थापनीये चतुर्भुजे ॥४४॥
लाटिंशा कानिशा स्थाप्ये द्विभुजे कन्यके शुभे ।
मापींगा चापि सीक्यांगा स्थाप्येऽष्टकरशालिनी ॥४५॥
अष्टादशभुजे स्थाप्ये अंगस्वांगा हरांगिका ।
मौक्तिका तारिमा स्थाप्ये द्विभुजे चित्तकर्षिके ॥४६॥

पन्नाम्नी त्वंगहा स्थाप्ये द्विभुजे च सुरूपिणी ।
मन्नाम्नी मणिवर्णा च स्थाप्ये दशभुजे शुभे ॥४७॥
रंगवर्णा तथा स्थाप्या चतुर्भुजा नदी सती ।
इत्येवं कृष्णपत्नीनां रूपाणि सरितां प्रिये ॥४८॥
कृत्वोद्भिन्नयुवतीत्वभावापन्नानि सर्वथा ।
सुहास्यसौम्यवात्सल्ययुक्ताननानि राधिके ॥४९॥
श्वेतचम्पकवर्णानि स्वर्णकान्तियुतानि च ।
कारयित्वा प्रतिमाश्च मन्दिराणि शुभानि च ॥५०॥

स्थापनीयान्यनादिश्रीकृष्णनारायणेन वै ।
सहितानि किशोरेण रम्याणि मानवैर्भुवि ॥५१॥
तत्तन्नदीप्रदेशानां प्रजानां ता हि मातरः ।
पूजिता वन्दिता नित्यं करिष्यन्ति प्रजाऽवनम् ॥५२॥
ताभ्यो भूषाः प्रदातव्या नारीभिः पतिकाम्यया ।
सौभाग्यदाश्च ताः सन्ति नारीणां पूजिताः सदा ॥५३॥
अवैधव्यप्रदाश्चापि तथाऽऽयुष्यविवर्धिकाः ।
पुत्रपौत्रप्रदाश्चाप्यारोग्यदा धनधान्यदाः ॥५४॥
ताभ्यः शाट्यः प्रदातव्याः कंचुक्यश्चोलिकास्तथा ।
केशतैलं प्रदातव्यं केशशृंगारकादिकम् ॥५५॥
पुष्पहाराः कज्जलं च तैलं सुगन्धसारकम् ।
घर्घर्यः कवचं वस्त्रं तथा मत्सरवारिणी ॥५६॥
शय्या गेन्दुकमुत्कृष्टं मृदुलं गुप्तदोरकम् ।
उत्तरीयं केशकाञ्ची प्रदेया सरिते जनैः ॥५७॥
सिंहासनं कारणीयं छत्रं च हाटकादिजम् ।
मुकुटं तन्तिका काञ्ची रशना कटकादिकम् ॥५८॥
ऊर्मिकाऽङ्गुलीयकानि शृंखलाश्च नुपूरकम् ।
हाराः सुवर्णजन्याश्च स्वस्तिकश्चन्द्रकस्तथा ॥५९॥
बिन्दुश्चन्द्रकपट्टी च नखरञ्जनकानि च ।
भोज्यपानानि देयानि मन्दिरे सरितां जनैः ॥६०॥
कंकतिर्दोरकश्चापि चिपीटकश्च राजतः ।
सुकिंकिणीजालयुक्तचड्डिका पादयोस्तथा ॥६१॥
धूपो दीपश्च नैवेद्यं तथा नीराजनादिकम् ।
कलशश्चान्यवस्तूनि देयानि सरितां गृहे ॥६२॥
कन्यकाभिः कुंकुमं चाक्षता देयाश्च शर्कराः ।
सुवासनीभिः शृंगाराम्बरभूषादि सौभगम् ॥६३॥
दातव्यं वै नदीभ्यश्च हरिप्रियाभ्य उत्तमम् ।
प्रेङ्खा देया घोटकादि दोला पालनमित्यपि ॥६४॥
वातयानं बाष्पयानं वह्नियानं तथा शुभम् ।
उष्णयानं प्रभायानं चाणुयानं समुत्तमम् ॥६५॥
प्रदातव्यं विहारार्थं व्योम्नि जले तथाऽम्बरे ।
जलयानं चाश्वयानं दातव्यं भूविहारि च ॥६६॥
जलरूपां मूर्तिरूपां पितृकन्यां सुतोषयेत् ।
तासु भगवत्पत्नीषु तुष्टासु तुष्यति प्रभुः ॥६७॥
तासां महोत्सवाः कार्या माघे कृष्णे सिते तथा ।
तासामग्रे प्रकर्तव्यं नृत्यं वादित्रवादनम् ॥६८॥
कीर्तनं भगवद्गानं स्तवनं सामवैदिकम् ।
कोटिहीरकरत्नाद्यैः शोभनीयाश्च तास्तदा ॥६९॥
पुष्पसुगन्धशोभाद्यैरर्चनीया हरिप्रियाः ।
ऊर्जकृष्णाष्टमीप्रातःकाले ब्रह्मप्रियायुतः ॥७०॥
पितृकन्यायुतोऽनादिकृष्णनारायणः प्रभुः ।
पूजनीयोऽतिभावेन शोभनीयोऽतिवस्तुभिः ॥७१॥
शृंगारणीयो भगवान् तदा राजाधिराजवत् ।
स्वर्णहारादिभिः स्वर्णतन्त्वम्बरादिभिस्तथा ॥७२॥
अष्टोत्तरशतैश्चापि भक्ष्यभोज्यादिभिस्तथा ।
परिचर्यादिभिः कृष्णस्तोषणीयोऽतिगीतिभिः ॥७३॥
राशैर्मनोहरैश्चापि नरनारीसुमिश्रितैः ।
नगरे नगरे ग्रामे वने चावसथेष्वपि ॥७४॥
घोषे च पत्तने पूरे राजधान्यां विशेषतः ।
ताभिस्ताभिः सुपत्नीभिः सह नारायणो हरिः ॥७५॥
गजयानैरश्वयानैः स्वर्णशकटीभिस्तथा ।
राजतीभिः शकटीभिः कलशध्वजपार्श्वदैः ॥७६॥
सहिताभिः शुभाभिश्च भ्रामयितव्य एव सः ।
रथश्च सेवकैः स्थिरीकर्तव्यः प्रतिचत्वरम् ॥७७॥
प्रतिहट्टं प्रतिरथ्यं प्रत्यापणं च गोपुरे ।
पूजनीयः श्रीफलाद्यैः प्रतिराजगृहं तथा ॥७८॥
पुष्पवृष्टिः प्रकर्तव्याऽक्षतलाजादिमिश्रिता ।
चन्दनं गन्धसलिलं प्रोक्षणे देयमेव तु ॥७९॥
मिष्टान्नं मिष्टपानीयं पातव्यं चार्थिने रथात् ।
प्रसादश्च प्रदातव्यो भक्तेभ्यः पथि सर्वथा ॥८०॥
तूर्याणि राजतूर्याणि वादनीयानि चाग्रतः ।
धूपदीपसहितोऽयं भ्रामणोत्सव उत्तमः ॥८१॥
कर्तव्यः कार्तिके कृष्णे कृष्णजन्ममहोत्सवः ।
एवं वै भ्रामयित्वैव भगवन्तं प्रियायुतम् ॥८२॥
विशाले मण्डपे रात्रौ स्थापनीयो गजासने ।
नीराजनं प्रकर्तव्यं शताष्टवर्तिभिस्ततः ॥८३॥
रासस्तत्र प्रकर्तव्यस्तालिकादण्डिकादिभिः ।
वादित्रैर्विविधैश्चापि कथा कार्या तदा हरेः ॥८४॥
पूजनं संविधायैव परिहारं समाचरेत् ।
रात्रौ तन्मन्दिरे नेयो भगवान् सह पत्नीभिः ॥८५॥
ततो भक्तैः प्रकर्तव्यं जागरणं तथाऽथवा ।
सुप्तव्यं स्वगृहे गत्वा ब्रह्मचर्यपरायणैः ॥८६॥
प्रातः स्नात्वा हरिं नत्वा कृत्वा दर्शनपूजनम् ।
ततो दानादि कर्तव्यं नवम्यां प्रातरित्यपि ॥८७॥
तस्य पुण्यस्य नान्तोऽस्ति परमोक्षप्रदं हि तत् ।
एवं महोत्सवे कृष्णनारायणः प्रसीदति ॥८८॥

सरितश्च प्रसीदन्ति ददत्यतीव सम्पदः ।
धनधान्यादिसमृद्धीर्ददत्यपि नवा नवाः ॥८९॥
आरोग्यं पुत्रपौत्रादि गोमहिषी धनान्यपि ।
अश्वहस्त्युष्ट्रयानानि विमानं राजसम्पदः ॥९०॥
कीर्तिं स्वर्णं पूज्यतां च लोके ख्यातिं परां स्थितिम् ।
ददत्येव सरिच्छ्रेष्ठास्तुष्टाः श्रीपतिना सह ॥९१॥
इत्येवं श्रीकृष्णनारायणः प्राह स्वयं प्रभुः ।
गृहे गृहे प्ररक्ष्या मे प्रतिमा सरिता सह ॥९२॥
पूजनीया सदा प्रातर्मध्याह्ने सायमित्यपि ।
करिष्ये तन्मनः पूर्णं स्वष्टं दास्ये पुनः पुनः ॥९३॥
इत्याह भगवाँस्ताभ्यः सतीभ्यस्तत्र सुन्दरे ।
वने पश्चाद् ब्रह्मपुत्रीसागरे सस्नुरेव च ॥९४॥
गंगासागरयोगे च सस्नुः सर्वविमानगाः ।
साकं भगवता स्वामिकृष्णनारायणेन वै ॥९५॥
क्षणं ध्यात्वा पुपूजुश्च कृष्णनारायणं प्रभुम् ।
दध्युर्नारायणमूर्तिं हृदयेषु स्थिरीकृताम् ॥९६॥
इत्येतद् राधिके ! तुभ्यं मयोक्तं हरिचेष्टितम् ।
श्रवणात्पठनाच्चापि भुक्तिमुक्तिप्रदं शुभम् ॥९७॥
स्वर्गमोक्षप्रदं चापि पापतापप्रणाशनम् ।
सर्वदा कीर्तनीयं वै भक्तैरपि मुमुक्षुभिः ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने द्वितीययज्ञभूमिरूपलाशहासरोवरसरितां मूर्त्यादि-पूजनप्रतिष्ठामाहात्म्यवर्णननामा द्वादशाधिक-शततमोऽध्यायः ॥ ११२ ॥

**श्रीकृष्ण उवाच—**

अथ श्रीराधिके ! कृष्णप्रियास्ताः पितृकन्यकाः ।
अनादिश्रीकृष्णनारायणं पप्रच्छुरादरात् ॥ १ ॥
अस्माकं महिमा कान्त कृपया वर्धितस्त्वया ।
श्रीमतश्च महिमानं ज्ञास्यामश्च यथा वयम् ॥ २ ॥
तव नो वद सर्वात्मन् मोक्षोऽन्ते नो यथा भवेत् ।
इत्युक्तो भवनाशादिविहीनो भगवान् प्रभुः ॥ ३ ॥
आह ताभ्यः स्वरूपस्य ज्ञानं भक्तिसहायकृत् ।
जीवलोकात्परे सन्ति ईश्वराणां हि भूमयः ॥ ४ ॥
वासुदेवादयस्तत्र वसन्ति व्यूहकोटयः ।
गोलोकेऽहं राधया सेवितः कृष्णो वसामि च ॥ ५ ॥
वैकुण्ठेऽहं श्रिया युक्तो नारायणो वसामि वै ।
तत्परे चाक्षरे धाम्नि वर्तामि पुरुषोत्तमः ॥ ६ ॥
अक्षरातीतसंज्ञोऽहं द्विभुजः परमेश्वरः ।
परतश्चाक्षराच्चापि परोऽस्मि परधामनि ॥ ७ ॥
असंख्यमुक्तसेव्योऽहं ब्रह्मप्रियाप्रसेवितः ।
मम रोमैकाणुदेशादुत्पन्नं तेज ऐश्वरम् ॥ ८ ॥
सर्वेश्वरेषु तद् व्याप्तं पूर्णमिव प्रजायते ।
मदेकगुणलेशेन भवन्तीशा गुणोच्छ्रयाः ॥ ९ ॥
मम संकल्पमात्रेण चावतारा भवन्ति हि ।
सृष्टयश्चाऽप्यसंख्याता मत्पुरुषेच्छया खलु ॥१०॥
जायन्तेऽनन्तसंख्याकास्तत्राऽन्तर्याम्यहं स्थितः ।
अन्तर्बहिश्च भूतानां यथास्थानं वसाम्यहम् ॥११॥
यथाकार्यं यथापेक्षं यथाभक्तानुसेवनम् ।
तथा भूत्वा निवसामि भक्तवृन्देषु मत्प्रियाः ॥१२॥
क्वचिद् भवामि चेशेषु क्वचिद् देवेषु वा दिवि ।
ऋषिवर्येषु भक्तेषु क्वचिन्मानवजातिषु ॥१३॥
क्वचिज्जले स्थलेऽरण्ये शैले पृथ्व्यां च गह्वरे ।
पशौ पक्षिणि यादस्सु वृक्षे वल्ल्यां तृणादिषु ॥१४॥
यथाकार्यं भवाम्येव नरो नारी च वेतरः ।
राजा प्रजाऽथवा दीनः साधुः साध्वी च कामिनी ॥१५॥
गोपालो वापि गोबालो गोजालो गोपिकापतिः ।
कल्पे युगे दिने लभेऽवतारो मे ध्रुवं प्रियाः ॥१६॥
इदानीं बालकृष्णोऽस्मि श्रीकंभरासतीसुतः ।
कोट्यब्जकन्यकाकान्तः कन्येच्छापूरणार्थकः ॥१७॥
श्रीमद्गोपालकृष्णस्याऽनादिकृष्णनरायणः ।
पुरुषोत्तमसंज्ञोऽहं परमात्मा हि मानवः ॥१८॥
भवतीनां प्राप्यरूपः करुणाकृतकैतवः ।
सौराष्ट्रे कुंकुमवापीक्षेत्रेऽश्वपट्टशोभिते ॥१९॥
लोमशाश्रमसामीप्येऽक्षरक्षेत्रे वसाम्यहम् ।
नरनाट्यं प्रकुर्वाणोऽमेयोऽपि मानतां गतः ॥२०॥
पूर्वकल्पीयकन्यानां तपःफलप्रदेहया ।
कोटिकन्दर्पसौन्दर्योऽनवधिवीर्यवानहम् ॥२१॥
षड्भगैरष्टसामर्थ्यैरष्टसिद्धिभिरन्वितः ।
कोट्यब्जरूपसामर्थ्योऽसंख्यबलगुणाश्रयः ॥२२॥
कन्यानां भावपूर्त्यर्थं साक्षाज्जातोऽस्मि कान्तकः ।
भवतीनां पतिश्चाऽहं वर्तेऽद्य तपसो बलात् ॥२३॥
मम सेवा प्रकर्तव्या भवतीभिः सुखाप्तये ।
स्नेहेन मम सेवैव भक्तिरेव मता मया ॥२४॥
तया चाहं प्रसन्नः स्यां नान्योपायेन केनचित् ।
सती पतिव्रता यद्वत् सेवते स्वपतिं सदा ॥२५॥

तादृगनन्यभावेन मुमुक्षुर्मां सदा भजेत् ।
परानुरागरूपा सा कर्तव्या मयि सर्वथा ॥२६॥
श्रवणं च कथाया मे कर्तव्यं जन्मकर्मणाम् ।
मम भक्तस्य भक्ताया मुखाद्वा मोक्षदं हि तत् । ॥२७॥
मेऽवतारचरित्राणां श्रवणं च मुमुक्षुणा ।
तथैव मम भक्तानां चमत्कारश्रवः शुभः ॥२८॥
श्रोतव्यानि चरित्राणामाख्यानानि मुमुक्षुभिः ।
एवं प्रिया ! मम कार्यं कीर्तनं मत्सतामपि ॥२९॥
जन्मकर्मचरित्राणां कथावार्ताः सतां मुखात् ।
कारणीयास्तथा योग्ये समये श्रद्धया मुहुः ॥३०॥
मद्भक्तानां मम चापि ग्रन्थानां पठनं तथा ।
पाठनं मम पत्नीनां चरित्राणां हि मोक्षदम् ॥३१॥
छन्दसां बद्धपद्यानां गद्यानां मम सर्वदा ।
संस्कृतानां प्राकृतानां ग्रन्थानां गायनं मुदा ॥३२॥
वीणादिवाद्यसम्मिश्रं तालिकासहितं च वा ।
गालध्वानैश्चिपीटाभिः कर्तव्यं कीर्तनं मम ॥३३॥
पादयोर्नुपूरनद्धकिंकिणीध्वानमिश्रितम् ।
कट्यां निबद्धपट्टस्य घुर्घुरादिनिनादनैः ॥३४॥
सहितं वा प्रकर्तव्यं नृत्ययुक्तं सुकीर्तनम् ।
मे स्तुतिः सम्प्रार्थना च नाम्नां मे कीर्तनं तथा ॥३५॥
कार्यं पद्यैर्मम प्रीत्या तथा वाक्यैर्मनोरमैः ।
अथ मे स्मरणं कार्यं चिन्तनं हृदयाम्बुजे ॥३६॥
सांगोपांगा मम मूर्तिश्चिन्त्या स्वहृदये प्रियाः ! ।
एकैकमंगं संचिन्त्यं केशात् पादनखावधिम् ॥३७॥
मूर्तिध्याने मम हास्यं चिन्तनीयं विशेषतः ।
मम नामानि कर्माणि स्मरणीयानि सर्वदा ॥३८॥
चमत्काराः स्मरणीया मद्भक्तानां ममाऽपि च ।
गुणानां स्मरणं कार्यं जप्तव्यो मे मनुस्तथा ॥३९॥
परधामाऽक्षरधाम्नोर्गोलोकस्याऽमृतस्य च ।
वैकुण्ठस्याऽव्याकृतस्य श्वेतद्वीपस्य वै तथा ॥४०॥
विशालाख्यस्य मे धाम्नः साकेतनामकस्य मे ।
नित्यकैलासनाम्नश्च क्षीरोदस्य च मे तथा ॥४१॥
श्रीपुरं च श्रियां मे पार्षदानां ब्रह्मयोषिताम् ।
ऐश्वर्याणां च सिद्धीनां विभूतीनां च मे प्रियाः ! ॥४२॥
स्मरणं मम दिव्यानां साधूनां कार्यमुत्सवात् ।
मम देवालयानां च मम पित्रोः कुटुम्बिनाम् ॥४३॥
गवां मे वाहनादीनां मम वेषस्य वै तथा ।
ममाऽऽयुधानां मत्सम्बद्धवस्तूनां स्मृतिः सदा ॥४४॥
कर्तव्या वै तया मुक्तिः स्याद् दिव्या मुक्तिदा हि मे ।
अथ कार्यं चरणयोः संवाहनं मम प्रियाः ! ॥४५॥
प्रत्यक्षस्य हरेर्मेऽत्राऽनादिकृष्णस्य सत्पतेः ।
मम मूर्तेः पादसंवाहनं कार्यं तथा मुहुः ॥४६॥
तत्र स्थितोऽहं गृह्णामि सेवां संवाहनादिकाम् ।
मम मूर्तिः कारणीया सर्वांगा चिह्नशोभना ॥४७॥
धातवी दारवी वापि पार्थिवी च किशोरिका ।
तस्याः सेवा नरैश्चापि नारीभिः सर्वथा सदा ॥४८॥
कारणीया स्नेहपूर्णा कर्तव्या मनसेप्सिता ।
मानसीं वा मम मूर्तिं प्रकल्प्य ध्याननिर्मिताम् ॥४९॥
तस्याश्चरणयोः स्पर्शस्तदंगानां समन्ततः ।
स्पर्शो भावेन कर्तव्यो रन्तव्यं च तया सह ॥५०॥
मानसं सर्वथा कार्यं सेवनं मम भावितम् ।
भोजनीयः पूजनीयो रञ्जनीयो विशेषतः ॥५१॥
हृदयस्थोऽप्यहं कृष्णो ग्रहीष्ये सेवनं तु वः ।
धृत्वा मां शयने नित्यं सुतव्यं हि मया सह ॥५२॥
व्यवहारेऽपि मां चाऽग्रे कृत्वा कर्तव्य एव सः ।
भोक्तव्यं मां प्रधार्यैव नान्यथा तु कदाचन ॥५३॥
शरीरेऽहं सदा चास्मि तथेन्द्रियेषु सर्वथा ।
भोक्तव्यैवं प्रभोग्येषु मां निधायाऽऽचरेत् क्रियाः ॥५४॥
तत्सर्वं निर्गुणं मोक्षप्रदं पुण्यप्रदं भवेत् ।
गन्तव्यं मां पुरस्कृत्य स्थातव्यं मयि सर्वथा ॥५५॥
एवं मे सेवनं कार्यं देहसंवाहनं मम ।
सेवया मे वासुदेवाऽनुजा व्यूहस्वरूपिणः ॥५६॥
यावत्सृष्ट्यद्भुतिपुष्टिसंहृतिशक्तिमाप्नुवन् ।
मम पादांगुष्ठपूता गंगा पुनाति गोलकम् ॥५७॥
कालमायापापकर्मशत्रुकुद्धद्वयादिकम् ।
मम पादाश्रयवतां तूर्णं नश्यति सेवया ॥५८॥
राधारमाप्रभापारवतीश्रीमाणिकीप्रियाः ।
द्वादशाधिकशतसंख्याश्चान्या ब्रह्मयोषितः ॥५९॥
पादौ परिचरन्त्यन्याः कोट्यर्बुदस्त्रियश्च मे ।
मुक्तकोट्योऽपि यौ पादौ सदा परिचरन्ति हि ॥६०॥
देवप्रिया ह्यसंख्याश्च मम पादप्रसेवया ।
गोप्यश्चाऽसंख्यकाश्चापि कीर्तिं प्रापुर्ममाऽधिकाम् ॥६१॥
यौ पादौ मे स्तुवन्त्येव व्यासाः शतसहस्रशः ।
तौ पादौ संवाहनीयौ सेव्यौ मे मुक्तिकामुकैः ॥६२॥
चरणौ च यया सेव्यौ सेव्यौ भुजौ तथा मम ।
मस्तकं मे सदा सेव्यं पृष्ठं संवाहनेन च ॥६३॥

सेव्यं मेंऽगं तथोपांगं प्रत्यंगं भावतः प्रियाः ! ।
यस्य कस्याऽपि मेंऽगस्य सेवनं मोक्षदं मम ॥६४॥
अथाऽर्चनं मम कार्यं सात्वतीभिश्च सात्त्वतैः ।
बाह्यार्चनं षोडशभिस्तथा चाष्टशतैरपि ॥६५॥
उपचारैः प्रकर्तव्यं हृद्यैः श्रेष्ठैर्मनोरमैः ।
चलायां मे प्रतिमायां मामावाह्य प्रपूजयेत् ॥६६॥
स्नापयेद् घृतदुग्धाद्यैरभिषिञ्चेज्जलैस्तथा ।
कारयेच्च ततः श्रेष्ठवासांसि सुसमर्पयेत् ॥६७॥
अलंकारान् विविधाँश्च यथास्थानं प्रधारयेत् ।
काश्मीरकेसरोपेतचन्दनाद्यंगलेपनम् ॥६८॥
यथर्तु कुर्यात् स्नेहेन तिलकं बिन्दुगर्भकम् ।
हारान् सुगन्धिनश्चापि शेखरानवतंसकान् ॥६९॥
मम दद्यात्प्रदीपं सुधूपं नैवेद्यमुत्तमम् ।
महानीराजनं कुर्याद्गीतवादित्रवादनैः ॥७०॥
प्रदक्षिणां स्तवनं च प्रार्थनां नमनादिकम् ।
पुष्पांजलिं प्रदद्याच्च पञ्चकालं तु पूजनम् ॥७१॥
त्रिकालं वा द्विकालं वा प्रातरेव तु वाऽऽचरेत् ।
मम जन्मदिनेष्वत्र कर्तव्यं पूजनं महत् ॥७२॥
व्रतेष्वेकादशीनां च गीतवादित्रपूर्वकम् ।
भोजनीयाः साधवश्च सत्यश्च पारणादिने ॥७३॥
धनवन्तः कारयेयुर्मन्दिराणि दृढानि मे ।
प्रतिष्ठां कारयेत्तत्र धनी मे सुमहोत्सवैः ॥७४॥
ग्रामं क्षेत्रं धनं दद्याद् गृहं पूजाधनार्थिकाम् ।
वृत्तिं प्रबन्धयेद् रम्यां पूजाप्रवाहसिद्धये ॥७५॥
कूपं च वापिकां पुष्पवाटिकां सुसरांस्यपि ।
कुण्डान् कूपान् कारयेच्च मदर्थं च सतां कृते ॥७६॥
वैष्णवान् कारयेच्छ्रेष्ठान् मखान् वै भूरिदक्षिणान् ।
मन्त्रजपान् प्रकुर्याच्च स्तोत्राणां पाठनादिकम् ॥७७॥
पुरश्चर्यां तथा कुर्यान्मम नाम्नां पुनः पुनः ।
मन्त्राणां च पुरश्चर्यां ग्रन्थानामपि भावतः ॥७८॥
पितरो देवताः पूज्याः ऋषयो वृद्धदेहिनः ।
एवं बाह्यार्चनं प्रोक्तं मानसं चान्तरं तु तत् ॥७९॥
अष्टाधिकशतश्रेष्ठोपचारैर्मानसैर्हृदि ।
पूजनं मे प्रकर्तव्यं प्रेमसागरसंभृता ॥८०॥
अथ मे वन्दनं कार्यं साष्टांगं वांऽगषष्टकम् ।
पद्भ्यां कराभ्यां जानुभ्यामुरसा शिरसा दृशा ॥८१॥
वचसा मनसा चेति दण्डवत् पुरुषैः सदा ।
पद्भ्यां कराभ्यां मनसा वचसा शिरसा दृशाः ॥८२॥

नारीभिः सन्निपत्यैव प्रणामः कार्य एव मे ।
मत्पादस्पृष्टसद्धूल्यां कर्तव्यं परिलुण्ठनम् ॥८३॥
रजांसि वर्ष्मणि शीर्षे निधातव्यानि तानि वै ।
मद्गात्रस्पृष्टवार्यादि मद्गात्रस्पृष्टचन्दनम् ॥८४॥
रंगसलिलसौगन्ध्यचूर्णादि धार्यमित्यपि ।
अहो भाग्यं मम श्रेष्ठं प्राप्तं चूर्णं रजो मया ॥८५॥
भगवत्पादपद्मैर्यत् स्पृष्टं चाहो सुभाग्यवान् ।
इत्येवं वै वदन् नित्यानन्दे मग्नो भवेज्जनः ॥८६॥
अथ दास्यं सदा कार्यं यथा मे लोमशो मुनिः ।
दासभावे सदा लक्ष्मीरिव संवर्तते तथा ॥८७॥
न मानं तत्र वै कार्यं सेवने क्षतिधायकम् ।
सर्वकाले यथापेक्षसेवायां दासवद् भवेत् ॥८८॥
परिचर्या सर्वविधा योग्याऽयोग्याऽपि सर्वथा ।
कर्तव्या मम दास्येव भृत्येव योषिताऽपि च ॥८९॥
नरेण वा सदा भक्त्या सेव्योऽहं परमेश्वरः ।
मम स्नानोपयोगार्थं जलं स्वयं समाहरेत् ॥९०॥
कुसुमान्याहरेच्चापि मालां प्रागुम्फयेत् स्वयम् ।
तुलसीं चन्दनं चापि घर्षयेद् द्रवमेव च ॥९१॥
पाकं कुर्यात् स्वयं भक्तो भोजयेत् कवलैश्च माम् ।
जलपानादिकं दद्याच्चुलुकं कारयेदपि ॥९२॥
ताम्बूलकं मुखवासं दद्यान्मे स्वयमेव तु ।
तालवृन्तादिभिर्भक्तो वेजयेन्मां यथोचितम् ॥९३॥
सम्मार्जनं मन्दिरस्य मम कुर्याद् विलेपनम् ।
जीर्णोद्धारं प्रकुर्वीत नूतनं मन्दिरादिकम् ॥९४॥
भक्तानामन्नतोयाद्यैः फलाद्यैः सेवनं शुभम् ।
मानं हित्वा प्रकुर्वीत प्रणमेत्तान् हि भावतः ॥९५॥
देहस्त्रीपुत्रवित्तादेर्दास्येऽर्पणं विधापयेत् ।
इत्येवं वर्तमानस्य मम साम्यं ददाम्यहम् ॥९६॥
अथ सख्यं विधातव्यं सर्वं प्रकाशवन्मयि ।
आचरितव्यमेवाऽत्र परत्र स समो मम ॥९७॥
देहस्त्रीपतिपुत्रादेः स्नेहः कार्योऽधिको मयि ।
मानुष्यनाट्यं दधतो मे क्रियासु न दोषधीः ॥९८॥
कर्तुरकर्तुरन्यथाकर्तुर्मे कर्मसु क्वचित् ।
संशयोः नहि कर्तव्यो भक्ताधीनस्य मे प्रियाः ॥९९॥
कामान् क्रोधात्तथा लोभान्मोहात् स्वार्थात् सुखेच्छया ।
ये यथा मां प्रपद्यन्ते ताँस्तथैव भजाम्यहम् ॥१००॥
न तत्र संशयः कार्यः सख्यं मैत्र्यमिदं मयि ।
यत्करोमि तु भक्तार्थं भक्तकल्याणहेतवे ॥१०१॥

लोका नैतद् विजानन्ति गहनां तां गतिं मम।
तस्मात् कार्यो हि विश्वासो मम क्रियासु सर्वथा ॥१०२॥
अथ कार्यं समस्तं वै मयि त्वात्मनिवेदनम्।
नरेण योषिता वापि देहोऽर्प्यो मयि सर्वथा ॥१०३॥
तथेन्द्रियाणि चार्प्याणि तथाऽन्तःकरणान्यपि।
स्वभावाश्च मयि चार्प्याः कुटुम्बं चापि वै मयि ॥१०४॥
समर्पणीयं भक्तेन तदधीनो भवेन्न वै।
अनादिश्रीकृष्णनारायणः स्वामी भवाम्यहम् ॥१०५॥
ममाऽधीनो भवेन्नित्यं मदर्थं सकलक्रियः।
मदर्थसर्वव्यापारो भवेद् भक्तो मम प्रियः ॥१०६॥
एवं प्रियाभिर्युष्माभिर्वर्तितव्यं सदा मयि।
कान्तोऽहं भवतीनां च दास्ये वै शाश्वतं सुखम् ॥१०७॥
एवमाह स्वयं कृष्णनारायणः परेश्वरः।
राधिके! बहुधा भक्तिस्वरूपाणि विशेषतः ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोः सर्वथा प्रसन्नताऽऽपादकविविधभक्तिस्वरूपविवेचननामा त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

श्रीकृष्ण उवाच—

एवं विशेषतः प्राह श्रीपतिः श्रीनरायणः।
अधिकं चापि यत्प्राह शृणु त्वं राधिके हि तत् ॥ १ ॥
मम भक्तौ विघ्नकृतान् स्वजनानपि संत्यजेत्।
नेत्राभ्यां दर्शनं कुर्यान्मेऽङ्गोपाङ्गात्मवर्ष्मणः ॥ २ ॥
श्रुतिभ्यां मत्कथां नित्यं शृणुयान्मम कर्मणाम्।
त्वचा स्पर्शं मम कुर्यात् सर्वांगानां समस्ततः ॥ ३ ॥
मे गुणोच्चारणं कुर्याज्जिह्वया मन्त्रजापनम्।
मुखेन मे प्रसादस्याऽशनं कुर्याज्जलं पिबेत् ॥ ४ ॥
नासया मे प्रसादं च पत्रं तुलसीसंभवम्।
पुष्पं गन्धं च गृह्णीयाच्चन्दनं मे समर्पितम् ॥ ५ ॥
कराभ्यां मम देहस्य कुर्यात् संवाहनं शुभम्।
शीर्ष्णा कुर्याद् वन्दनं मे पद्भ्यां प्रदक्षिणां तथा ॥ ६ ॥
मनसा मम संकल्पं धिया मे निश्चयं परम्।
चेतसा चिन्तनं मे च कान्तस्यैव विधापयेत् ॥ ७ ॥
मम दासत्वाभिमानं स्वस्मिन् कुर्यात्सदाऽहमा।
मदर्थमेव कुर्याद्वै कृषिव्यापारसत्क्रियाः ॥ ८ ॥
उद्यमं च मदर्थं वै प्रकुर्यात् पितृकन्यकाः!।
यद्यत् स्वेष्टं भवेद् वस्तु तत्तन्मे त्वर्पयेत् सदा ॥ ९ ॥
गन्धं पुष्पं भूषणं चाम्बरं श्रांगारिकं तथा।
मत्प्रसादं शुभं कृत्वा धारयेत्तु ततः परम् ॥१०॥
पत्रं पुष्पं जलं वापि मह्यं यत्स्यान्न चार्पितम्।
तन्न भक्ष्यं न वा पेयं न धार्यं हीरकाद्यपि ॥११॥
तपः कुर्यात् क्रतुं कुर्याद् दानं कुर्याज्जपं तथा।
मम प्रसन्नतार्थं वै सर्वं कुर्यात् परार्थकम् ॥१२॥
सात्वतां सेवनं चापि साध्वीनां सेवनं तथा।
कर्तव्यं मम भक्तैर्वै प्रसन्नतायै मेऽनघाः ॥१३॥
भक्ते साधौ तथा साध्व्यां स्थितो वै सर्वदाऽस्म्यहम्।
तदंगेषु ममाऽङ्गानि सर्वेन्द्रियाणि मे सदा ॥१४॥
वसन्त्येव न सन्देहस्तस्मात् सेव्यास्तु तेऽन्वहम्।
सकामैः साधवः सेव्याः कल्पवृक्षा हि मे मताः ॥१५॥
कामनापूरकाः सन्ति साधवः स्वर्गमोक्षदाः।
साध्व्यो मे कल्पवल्ल्यश्च सेव्याः सकामया स्त्रिया ॥१६॥
ताभ्यो मनोरथाः सर्वे सिद्ध्यन्त्येव न संशयः।
तेषां तासां सदाशीर्भिः फलन्त्येव मनोरथाः ॥१७॥
धर्मार्थकाममोक्षाख्याः पुरुषार्थाः फलन्ति च।
तेषु तासु वसाम्येव स्वयं नारायणोत्तमः ॥१८॥
यथायथं च भक्तानां पूरयामि मनोरथान्।
देहान्ते शाश्वतं स्थानं महानन्दं ददामि च ॥१९॥
लभन्ते चेष्टसौख्यानि तत्र ते चाऽक्षयाणि हि।
सालोक्यं सार्ष्टिं सामीप्यं सारूप्यं च तदात्मताम् ॥२०॥
ददाम्येतेभ्य एवाऽहं यथा तुष्टो हि सेवनैः।
अन्ये श्रेष्ठा महाभागवता भक्ताश्च मे पराः ॥२१॥
मम सेवां विना नान्यदिच्छन्ति सिद्धिवैभवान्।
न च मुक्तिं चतुर्धां वा ते समिच्छन्ति कर्हिचित् ॥२२॥
मया दत्तं दीयमानं त्वैश्वर्यं चोर्जितं परम्।
नैव वाञ्छन्ति ते भक्ता यथा लक्ष्मीर्न ते तथा ॥२३॥
अन्तरायकरत्वाद्वै सन्ति विघ्नानि सिद्धयः।
ऐश्वर्याण्यपि विघ्नानि गृह्णन्ति न हृदाऽपि ते ॥२४॥
ममाऽऽनन्देनसम्पूर्णं हृद् आत्मकुटिका शुभा।
मन्मूर्त्यानन्दसंव्याप्ता भवत्यस्य प्रियाः! खलु ॥२५॥
एवं निष्कामभावेन मां भजेरँश्च ये जनाः।
भक्तोत्तमास्ते प्रोक्ता मे मत्पूर्णहृदया यतः ॥२६॥
एवं मां भजमानस्य सेवमानस्य नित्यदा।
स्नेहो विवर्धते भूयान् यत्र विघ्नो न जायते ॥२७॥
ब्रह्मपुत्र्या यथा ह्यापो भित्त्वा हिमगिरीन् बहून्।
आयान्त्यासामदेशाँश्च विशन्ति सुन्दराब्धिकम् ॥२८॥

तथा प्रेमा हि भक्तानां विज्ञान् विभिद्य देशजान् ।
कालजान् संगजाँश्चान्यान् विशत्यनन्तके मयि ॥२९॥
आन्तराणां च बाह्यानां तत्त्वानां वृत्तयोऽखिलाः ।
स्वभावाश्चापि संस्कारा मय्येषां विश्रमन्ति वै ॥३०॥
प्रत्यक्षे मयि सम्प्राप्ते सन्निधावप्युपस्थिते ।
स्वसमाने मानवाख्ये सजातीयादिवर्तने ॥३१॥
प्राप्तस्नेहभरा भक्ता मत्सुखाब्धौ सुखं गताः ।
अन्यत्र नाऽनुरक्ताः स्युर्मां विहाय क्वचिद्धि ते ॥३२॥
वस्तुद्वयं जनैः प्राप्तं विविक्तं च द्विधा हि तत् ।
रमणीयं स्वानुकूलं सुखदं प्रथमं मतम् ॥३३॥
द्वितीयं नाऽनुकूलं चाऽरमणीयं च दुःखदम् ।
तत्तु त्याज्यं स्वभावाद्धि सर्वेषां तत्र का कथा ॥३४॥
प्रथमं तु सदा चेष्टं सर्वेषां देहिनां खलु ।
तदप्येषां महःदुखप्रदं भाति विवेकिनाम् ॥३५॥
देहनिर्वाहमात्रं वै ग्राह्यं प्रसह्य योगिनाम् ।
विशेषं तु तदप्येषां दुःखदं भाति बुद्धितः ॥३६॥
रम्यत्वं रमणीयेषु नैषां भवति कर्हिचित् ।
रम्यत्वं चास्ति यत्राऽहं तत्रैवैषां महात्मनाम् ॥३७॥
मद्विना चन्दनं रम्यं शीतलं गन्धसंभृतम् ।
स्पृष्टं विषायते शीघ्रं मद्युक्तं चामृतायते ॥३८॥
मद्विना पुष्पमालाश्च स्वर्णहारादयस्तथा ।
पाशायन्ते गले क्षिप्ता मद्युक्तास्तु वधूकराः ॥३९॥
भूषणं मद्विहीनं च स्वर्णमौक्तिकहीरकम् ।
धृतं गोधासमं स्याद्वै मद्युक्तं चन्द्रवत्सुखम् ॥४०॥
सुन्दरी पुष्पशय्या मद्विहीना रमणीयुता ।
वह्निधौताम्बरकृता श्रेष्ठाऽपि रौरवायते ॥४१॥
चान्द्रकान्तिः शारदी च मद्विहीना सुधास्रवा ।
विषाऽऽतपायते दुग्धायते सा तु मया युता ॥४२॥
प्रासादश्चेन्द्रवासार्हो मद्विहीनो गुहायते ।
जनाऽऽवासो मद्विहीनो भूतारण्यायते तथा ॥४३॥
सुगन्धिशीतलो वायुर्मद्विहीनोऽनलायते ।
श्रेष्ठवस्त्रं मद्विहीनं शूलयुक्खर्जनायते ॥४४॥
सम्बन्धिनो मद्विहीना वृकायन्तेऽस्य सर्वथा ।
रूपं कुष्ठायते सौम्यं मद्विहीनं मनोहरम् ॥४५॥
स्वादु भोज्यं तु मच्छून्यं भक्तस्य तु विषायते ।
स्वादु पानं मया हीनं वान्तायतेऽमृतं त्वपि ॥४६॥
गतिर्माधुर्यपूर्णाऽपि मया हीना शरायते ।
मया हीना सती नारी देव्यपि प्रदवायते ॥४७॥
सुखं दुःखायते सर्वं शान्तं क्रूरायते तथा ।
मिष्टं सर्वं मया हीनं भक्तस्य कटुकायते ॥४८॥
उत्सवो मद्विहीनस्तु भग्नोत्साहायते सदा ।
आनन्दोऽपि मया हीनो तिक्तमर्चायते तथा ॥४९॥
प्रसंगोऽपि शुभः सर्वो मां विना मरणायते ।
शुभं सर्वं विना मां तु भक्तस्यैवाऽशुभायते ॥५०॥
एवं भक्तस्य विज्ञेयः स्नेहो मय्यत्यसीमकः ।
अहमेव स्फुराम्येको भक्तस्याऽन्तश्च वै बहिः ॥५१॥
दृष्टोऽहमेव भक्तेन सहसा त्वान्तरे यदा ।
तदा विलोक्य मां भक्तः प्रेम्णा वै हसति क्वचित् ॥५२॥
क्वचिन्मां दूरमालोक्य गच्छन्तमिव रोदिति ।
क्वचिच्चानन्दलाभेन नृत्यं करोति गायति ॥५३॥
क्वचित् संभाषते दिव्यमूर्तिना स मया सह ।
क्वचित् करोति साष्टांगं क्वचिदालिङ्गतीति माम् ॥५४॥
क्वचित् प्रचुम्बति मां च क्वचित् स्वपिति चादरात् ।
क्वचिदुत्थाय सहसा जलं ददाति मे तदा ॥५५॥
स्नानभोजनभूषादि क्वचित् क्वचिद् ददाति मे ।
क्वचिद्ध्यानपरो भूत्वा रमते चान्तरे मयि ॥५६॥
क्वचिन्मौनं समालम्ब्य समाह्वयति मां हृदि ।
क्वचित् स्नेहात् समाकृष्य मां नयत्येव निर्जने ॥५७॥
क्वचिद् दासी स्वयं भूत्वा दास्यं करोति मे तदा ।
क्वचित् मैत्र्यं क्वचिच्छ्रैष्ठ्यं क्वचित् करोति साम्यकम् ॥५८॥
क्वचिन्मत्वाऽपराधं स्वं क्षमस्वेति वदत्यपि ।
क्वचित् प्रार्थयते वस्तु क्वचित् परवशो भवेत् ॥५९॥
अनर्गलः क्वचिद्भूत्वा नामान्येव गृणाति च ।
अनादिश्रीकृष्णनारायणस्वामिपतिप्रभो ॥६०॥
परब्रह्म परात्मन्मे नाथ कान्त हरे विभो ।
नारायण महाविष्णो कृष्ण श्रीमन्नरायण ॥६१॥
परमेश दयासिन्धो क्वासे वदाऽत्र मां प्रति ।
एवमाहूय च मां स सेवतेऽपि यथेष्टकम् ॥६२॥
नाऽत्र लोके भवेत्तस्य त्रपा सेवनविघ्निका ।
तादृशो मम भक्तो यो भक्ता दासी च वा मम ॥६३॥
पुनाति भुवनं सर्वं ब्रह्माण्डं पारवारिभिः ।
तस्य वै पादरजसा प्रज्वलन्ति दुरीतिकाः ॥६४॥
तस्य सन्दर्शनाल्लोकाः पूता भवन्ति वै द्रुतम् ।
एतद्दृशस्य भक्तस्याश्रयेण मुक्तिरुत्तमा ॥६५॥
सेवनेन भवेत् सेवा ममैवात्र न संशयः ।
तस्य मे नहि भेदोऽस्ति तनुः सोऽस्ति ममैव सः ॥६६॥

तदिन्द्रियाणि मे सन्तीन्द्रियाणि नात्र संशयः ।
पश्यामि तस्य नेत्राभ्यां स्पृशामि तस्य वै त्वचा ॥६७॥
शृणोमि तस्य कर्णाभ्यां रसयामि च जिह्वया ।
वदामि तस्य वै वाचा जिघ्रामि घ्राणयोगिना ॥६८॥
मम घ्राणेन तत्रैव विविधान् गन्धगौरवान् ।
भुवा चिचेष्टे तस्यैव गृह्णामि तत्करेण च ॥६९॥
गच्छामि तत्पदाभ्यां च देवक्षेत्रेषु सर्वदा ।
आनन्दयामि तस्यैवेन्द्रियेण कामवृत्तिना ॥७०॥
कच्चरं चोत्सृजाम्येव तदिन्द्रियेण पायुना ।
चिन्तयामि तु तस्यैव चेतसा मम चेतसा ॥७१॥
मननं च तथा कुर्वे मनसा तस्य वै सदा ।
अहंभावं च सर्वत्र करोम्यहं हि तद्धृदा ॥७२॥
निर्णयं तस्य बुद्ध्यैव करोम्यहं सदा प्रियाः ! ।
शब्दं स्पर्शं रसं रूपं गन्धं चानन्दमित्यपि ॥७३॥
गृह्णाम्यहं स्थितस्तस्मिन् कृष्णनारायणः पतिः ।
एवं तस्य क्रियाः सर्वा दिव्या मम क्रियाहि ताः ॥७४॥
मोक्षरूपा भक्तिभावा मायिका नहि वै हिताः ।
तस्य सेवा प्रकर्तव्या तया विन्दामि तर्पणम् ॥७५॥
तस्यार्पणेन मे स्याद्वै सर्वार्पणं हि देहिनाम् ।
प्रत्यक्षोऽहं तथा चाऽस्मि मम साधुस्वरूपवान् ॥७६॥
परोक्षोऽहं तथा चास्मि मम साधुवियोगवान् ।
प्रत्यक्षाः साधवो मे वै सन्ति दिव्यास्तु मूर्तयः ॥७७॥
तेषां भगवतां कार्या सेवा सर्वक्रियादिभिः ।
न तत्र संशयः कार्यो मम मूर्त्यात्मका हि ते ॥७८॥
न तथा ब्राह्मणाः श्रेष्ठा मुनयो न महर्षयः ।
न चाचार्या न गुरवो यथा मे साधवो वराः ॥७९॥
वर्णेषु ब्राह्मणः श्रेष्ठो ब्राह्मणेषु च सात्त्वताः ।
सात्त्वतेषु मम भक्ताश्चात्मनिवेदिनः पराः ॥८०॥
आत्मनिवेदिषु श्रेष्ठा दीक्षावन्तो हि साधवः ।
साधुभ्यः श्रेष्ठ एवाऽहं नान्यो मत्तः परः समः ॥८१॥
साधवो मे समाः श्रेष्ठा जपाम्येतान् सदा ह्यहम् ।
करोमि दर्शनं नित्यं साधूनां मयि वासिनाम् ॥८२॥
मय्यर्पितसमस्तानां मोक्षदानां मदात्मनाम् ।
करोमि स्मरणं तेषां दास्यं सख्यं महात्मनाम् ॥८३॥
कीर्तनं वन्दनं तेषां साधूनां च करोम्यहम् ।
पादसंवाहनं कुर्वे साधूनामहमात्मनाम् ॥८४॥
अर्चनं त्वात्मनो मे च करोम्यपि निवेदनम् ।
साधुतो न प्रियं मेऽस्ति मम तत्त्वस्य चिन्तनात् ॥८५॥
परमेश्वरसंज्ञास्ते मम नाम्ना हि मोक्षदाः ।
नारायणाश्च ते प्रोक्ताः साधवो मम वै प्रियाः ॥८६॥
तन्मुखैर्भोजनं कुर्वे तृप्तो भवामि तेषु च ।
न देवा न च गन्धर्वाश्चारणा गुह्यकादयः ॥८७॥
पितरो मुनयो विप्रा नाधिकाः साधुतो हि मे ।
ईश्वरा लोकपालाद्याः साधुतो नाधिका हि मे ॥८८॥
मुक्ता मुक्तिं गताश्चापि साधुतो नाऽधिका हि मे ।
का कथा वा स्वयं लक्ष्मीः राधिका कमलादिकाः ॥८९॥
श्रीर्लीला भूर्विभूतिश्च पार्वती चापि माणिकी ।
प्रभाद्या मे साधुतो नाऽधिका अन्यस्य का कथा ॥९०॥
एवंविधया भक्त्या मां भजध्वं पितृकन्यकाः ! ।
उद्धरिष्यामि सर्वा वः पावयध्वं च देहिनः ॥९१॥
इत्युक्त्वा च ततस्ताभ्यो राधिके ! श्रीनरायणः ।
ददौ तासां हृदयेषु चरणौ मूर्तिमित्यपि ॥९२॥
स्नात्वा भुक्त्वा भोजयित्वा ददावाज्ञां स्वयं हरिः ।
स्वस्वस्थानेषु गन्तुं वै तीर्थेषु पावनेषु च ॥९३॥
मयोक्तया सदा रीत्या भजध्वं मां पतिं प्रभुम् ।
अनायासेन भक्तानां भक्तिं कारयताऽपि च ॥९४॥
अन्ते विना प्रयत्नेन निरोधं प्राप्य वै मयि ।
यास्यन्ति तादृशा भक्ता भवत्यश्चापि मत्पदम् ॥९५॥
दिव्यां ब्रह्मतनुं प्राप्य मदिच्छया ममाऽऽलये ।
मया सह प्रयास्यन्ति भवत्यो भक्तियुग्जनाः ॥९६॥
मया दत्तानि सर्वाणि शाश्वतानि पराणि च ।
अनन्तान्यक्षराण्येव दिव्यसौख्यानि सर्वदा ॥९७॥
प्राप्स्यन्ति मम सेवां च भवत्यो भक्तिसंभृताः ।
ये जनाश्च तथा भक्तिं करिष्यन्ति स्त्रियोऽपि याः ॥९८॥
ते च ताश्च प्रयास्यन्ति मम मुक्तिपदं परम् ।
यान्त्वेवं मां विदन्त्वेवं सेवन्तां मां तथा प्रियम् ॥९९॥
मम मन्त्रं प्रदायैव मोक्षयन्तु हि देहिनः ।
गच्छाम्यहं मम क्षेत्रं शाश्वतीं कुंकुमस्थलीम् ॥१००॥
इत्युक्त्वा पितृतनयाभ्यश्च नदीभ्य इत्यपि ।
ऋषीन् देवान् ब्रह्मप्रियास्ततो मौनं स्थितः क्षणम् ॥१०१॥
आत्मन्यचिन्तयत् किञ्चिद् वक्तुं श्रीशंकराय सः ।
आज्ञां पालयितुं सज्जा नरा नार्योऽव्रतस्थिरे ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पितृकन्यात्मकनदीभ्यो भगवता स्वात्मात्मकसाधुजनादिभक्तिस्वरूपप्रदर्शनमित्यादिनिरूपणनामा चतुर्दशाधिकशततमोऽध्यायः ॥ ११४॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके! चैवमाज्ञाप्य सरितात्मिकाः।
स्वस्वप्रदेशान् गन्तुं च ततः श्रीशंकरं हरिः॥ १॥
प्राह योगिन् तव भक्ता इमे योद्धार एव ये।
तेभ्यो राज्यं प्रदातव्यं तद्योग्यं पार्वतं शुभम्॥ २॥
कैलाससन्निधौ चात्र पर्वते तु हिमालये।
भूतानां पर्वताः सन्तु त्वासामस्योर्ध्वभूमिषु॥ ३॥
पार्वतीयं महाराज्यं भूतासनं तदस्तु वै।
इत्युक्त्वा शंभवे कृष्णनारायणो ददौ शुभम्॥ ४॥
मुकुटं भूतनाथेति नाम्ना राज्यं ददौ तदा।
भूतनाथस्वरूपेण भगवान् भैरवात्मकः॥ ५॥
स्वस्वरूपाय भूतानामधिपाय महात्मने।
भैरवाय ददौ तत्र मुकुटं शंकरोऽपि च॥ ६॥
भैरवो राज्यमासाद्य नत्वा नारायणं प्रभुम्।
हरं स्वपितरं नत्वा गृहीत्वा भूतमण्डलम्॥ ७॥
षष्टिलक्षाधिकं शैलं हिमालयं ययौ द्रुतम्।
भूतानामालयास्तेन पर्वता वै कृतास्तदा॥ ८॥
एवं तस्मै प्रदत्त्वैव राज्यं श्रीभगवान् प्रभुः।
ब्रह्माणं प्राह तत्रैव भवान् चेरावतीभुवम्॥ ९॥
ब्रह्मदेशमितिख्यातां शास्तु रक्षतु सर्वदा।
शंकरो यातु पिंगायां भूमौ प्राचीनराज्यके॥१०॥
विष्णुर्यातु श्यामराज्यं भवन्नाम्ना प्रसिद्धिमत्।
एवमाज्ञाप्य तान्देवान् विसर्जयित्वा चापगाः॥११॥
ऋषीन् तत्तत्प्रदेशीयान् आज्ञाप्य गन्तुमित्यथ।
स्वस्वस्थानानि नित्यानि चोपदेष्टुं प्रजा अपि॥१२॥
सर्वविधान् देवसंधान् जातान् योद्धृन् हरिस्ततः।
प्राह मे सामवेदाख्ये देशे वसन्तु तेऽनुगाः॥१३॥
येऽवशिष्टा भवन्त्यत्र ब्रह्मपुत्र्यास्तु पूर्वगाः।
कामरूपप्रदेशेषु पतत्कायावधिं द्रुतम्॥१४॥
दक्षिणे तु प्रदेशेऽत्र यावद्वै लुकशायिनम्।
नम्रा ये पर्वताश्चापि लुकहीतानदीं प्रति॥१५॥
तन्मध्ये सामदेशम् आ अभिव्याप्य वसन्त्विति।
सर्वयोद्धृगणानेवं वासयित्वा हरिः स्वयम्॥१६॥
आसामानां नृपं तत्र शिवलिंगं चकार ह।
शिवलिंगाख्यकगणो नीत्वा सर्वान् भटाँस्ततः॥१७॥
आसामीयप्रदेशे संवासं चक्रे समन्ततः।
शिवलिंगोद्भवां देवीं शिवां कामस्वरूपिणीम्॥१८॥
कामरूपीयकामाक्षीं सह नीत्वा ययौ गणः।
पर्वते तन्मन्दिरं च शुभमुच्छ्रितमालयम्॥१९॥
कृत्वा संस्थापयामास कामरूपां सतीं गणः।
मातरं तां सदा मत्वा पूजयामास सादरम्॥२०॥
स्वनाम्ना नगरं श्रेष्ठं स्थापयामास चोच्छ्रये।
एवं नारायणो दत्वा शिवलिंगाय राज्यकम्॥२१॥
भटान् सर्वान् व्यवस्थाप्य देवान् विसृज्य वै मुनीन्।
ततो विमाने संगृह्य कोटिकन्याः प्रजापिताः॥२२॥
दशसाहस्रकन्याश्च सेविका विंशतिश्रिताः।
विंशतिपितृकन्याश्च तथा ब्रह्मप्रियाः पराः॥२३॥
संगृह्य श्रीकृष्णनारायणस्वामी सलोमशः।
मातापितृयुत आयाद् व्योम्ना काशीं श्रियाः स्थलीम्॥२४॥
शिवराजगृहे यत्र निजलक्ष्मीर्हि कन्यका।
राजते सप्रतीक्षा वै प्रति श्रीपुरुषोत्तमम्॥२५॥
तत्रोद्याने वरणायास्तटे निजं विमानकम्।
अवतार्य भुवि कृष्णनारायणो ययौ गृहम्॥२६॥
शिवराजं हरं नत्वा श्वशुरं पार्वतीं तथा।
भक्तं जयं च चन्द्रं च कृष्णं धेनुपमित्यपि॥२७॥
एकान्ते स्वसतीं लक्ष्मीं मिलित्वा स्वप्रियां ततः।
तां विमाने सर्वकन्याऽऽश्लेषं तासां च दर्शनम्॥२८॥
कारयित्वा तथा पित्रोर्लोमशस्यापि दर्शनम्।
आश्वास्य च पुनस्तस्याः पितृगेहे निवेश्यताम्॥२९॥
आशीर्दत्वा विमानेन भगवान् पुरुषोत्तमः।
आययौ कुंकुमवापीक्षेत्रं चाऽक्षरसंज्ञकम्॥३०॥
फाल्गुनस्याऽसिते पक्षे द्वितीयायां हरिः स्वयम्।
आययौ कुंकुमवापीक्षेत्रं सायं परः प्रभुः॥३१॥
मासान्ते त्वागतं वीक्ष्य भ्रातृसम्बन्धिसज्जनाः।
रुद्रो देवाश्च तीर्थानि अश्वपट्टसरः स्वयम्॥३२॥
ऋषयोंऽशाऽवताराश्च तथा भक्ताश्च कोटिशः।
आययुः सन्निधौ दृष्ट्वा तेजो विलक्षणं तु खे॥३३॥
दृष्ट्वा दिव्यं विमानं वै श्रीनारायणशोभितम्।
कोटिसूर्यप्रभं रम्यं चन्द्रकान्तिसुशीतलम्॥३४॥
कोटिकन्याऽयुतकन्याविंशतिकन्यकान्वितम्।
जयशब्दान् प्रचक्रुस्तेऽक्षरक्षेत्रनिवासिनः॥३५॥
लाजाभिश्चाऽक्षतैश्चैव काश्मीरैः कुंकुमैस्तथा।
वर्धयामासुरत्यर्थे विमानं पारमेश्वरम्॥३६॥
अवाततार च तदा पश्चिमेऽश्वसरोवरात्।
उद्यानेऽनादिकृष्णस्य प्रासादसन्निधौ ततः॥३७॥

अवतेरुर्विमानाच्छ्रीस्वामी नारायणो हरिः ।
ब्रह्मप्रियाः पितृकन्याः प्रजाकन्याश्च सेविकाः ॥३८॥
लोमशश्च तथा चान्ये महर्षयस्तथा पिता ।
माता रमादिकाः सत्यो विविशुश्च निजालयम् ॥३९॥
विशश्राम हरिर्माता पिता क्षणं च लोमशः ।
कन्यकास्ता हरेः सौधं परात्परमलोकयन् ॥४०॥
अक्षरस्थाऽतिसौन्दर्यसम्पद्व्याप्तं महालयम् ।
दिव्यसमृद्धियुतं कोटिसामर्थ्यैश्वर्यराजितम् ॥४१॥
सातभौमं पुत्तलैश्चेश्वराणां मण्डितं शुभम् ।
ब्रह्महृदेन च ब्रह्मसरसा चाभिशोभितम् ॥४२॥
दिव्यं दिव्यगुणोपेतं दिव्ययन्त्रादिराजितम् ।
दृष्ट्वाऽऽश्चर्यं परं प्राप्तास्ताः सर्वाः कन्यकास्ततः ॥४३॥
अनादिश्रीकृष्णनारायणः स्वां भगिनीं तदा ।
सन्तोषां प्राह चैताभ्यो भोजनं दीयतां स्वसः ॥४४॥
भ्रातृजायां तथा देवीं त्वमृतां प्राह माधवः ।
एताभ्यो दीयतां पेयं मुखवासादिकं शुभम् ॥४५॥
इत्युक्ते सहसा ते द्वे कल्पचिन्तामणिप्रजम् ।
भोजनं शतरूपं च पेयं बहुविधं तथा ॥४६॥
ददतुर्बहुसत्कारं चक्रतुः कृष्णयोषिताम् ।
समाश्लिश्ञ्श्च ताः सर्वाः स्वसारं भ्रातृयोषितम् ॥४७॥
तथाऽन्याः कन्यकाश्चापि ऋषिपत्नीश्च योषितः ।
अथ कृष्णार्पितया सुदिव्यया दृष्टिधारया ॥४८॥
ताः सर्वा लोकयामासुर्दिव्यास्ताः कन्यकास्तदा ।
वल्ल्यात्मिकास्तथा पक्षिमृग्यादिरूपधारिकाः ॥४९॥
कृष्णकान्ता बहुरूपा विलोक्याऽऽश्चर्यमावहन् ।
पश्चाच्छ्रीलोमशं प्राह भगवान् पुरुषोत्तमः ॥५०॥
एता नेया भवतैव गुरो शुभनिजाश्रमे ।
ब्रह्मप्रियादिभिः सार्धं रक्षणीयाः प्रयत्नतः ॥५१॥
लोमशश्च पूजितो भोजितोऽभिवन्दितस्तथा ।
कन्या नीत्वाऽऽज्ञया नैजाश्रमं वै स तदा ययौ ॥५२॥
भगवाँश्च विशश्राम पितरौ ययतुः सुखम् ।
अथ वै राधिके ! कृष्णनारायणः स्वयं प्रभुः ॥५३॥
फाल्गुने प्रचकारैव पुष्पदोलमहोत्सवम् ।
कारयित्वा दिव्यरंगान् विचित्रान् वारिमिश्रितान् ॥५४॥
हेमन्तभगवद्भ्यां पार्षदाभ्यां चान्यपार्षदैः ।
सामग्रीः कृतयित्वाऽथ समारभत खेलनम् ॥५५॥
क्षेपकैर्यन्त्रवर्यैश्च सौवर्णैः श्रीवसन्तकम् ।
पूजयित्वा निजमूर्तिं तथा कृष्णनरायणम् ॥५६॥
अक्षरं च तथा मुक्तान् तथा च सांख्ययोगिनीः ।
स्वयं धृत्वा करे यन्त्रं सौवर्णं रंगसंभृतम् ॥५७॥
चिक्षेप रंगं मर्यादास्थितासु जनतासु वै ।
निजाऽसंख्यासु कान्तासु भक्तभक्तासु वै मुहुः ॥५८॥
भक्तेषु सात्त्वतेष्वेवं महर्षिषु जनेषु च ।
गोपीषु गोपभक्तेषु चिक्षेप रंगमुत्तमम् ॥५९॥
प्रचिक्षेप गुलालं च रक्तवर्णानकारयत् ।
सर्वान्निजाश्रिताँश्चापि स्वयं रक्तोऽभवत्तथा ॥६०॥
रक्तं व्योमाऽभवच्चापि पिशंगं कैसरं तथा ।
अश्वपट्टसरसश्च जलं रंगविमिश्रितम् ॥६१॥
चित्रभावं गतं यद्वद् व्योम्नीन्द्रधनुषा समम् ।
भूतलं चाऽक्षरं क्षेत्रं चित्ररंगमयं ह्यभूत् ॥६२॥
मृत्तिका कुंकुमवापीक्षेत्रीया चन्दनाकृतिम् ।
प्राप्ता पिशंगरूपं सा रंगवारिसुमिश्रिता ॥६३॥
अथैवं पुष्पदोलस्य खेलनं संविधाय सः ।
सस्नौ हरिस्तु सर्वाभिः प्रजाभिः सह चाऽश्वके ॥६४॥
ततो वनेषु वृक्षेषु नूत्नाम्बरधरा जनाः ।
ययुः सुगन्धवाय्वाभिव्याप्तोद्यानेषु चाभितः ॥६५॥
तत्र पुष्पमयीं दोलां प्रेंखां शाखासु शाखिनाम् ।
भिन्नां भिन्नां विचित्रां च बन्धयित्वा समन्ततः ॥६६॥
फलपुष्पादिभिस्तत्र कृत्वा शोभामनुत्तमाम् ।
नूत्नवेषधराः सर्वाः कन्यका भगवाँस्तथा ॥६७॥
प्रजाजनाश्च वै सर्वे पुष्पदोलमहोत्सवे ।
आन्दोलनं शुभं चक्रुर्जहृषुश्चापि निर्भरम् ॥६८॥
सख्यः परस्परं सर्वाश्चान्दोलयन्ति कन्यकाः ।
ब्रह्मप्रिया निजं कान्तं चान्दोलयन्ति भावतः ॥६९॥
कीर्तयन्ति विविधानि चमत्काराणि कीर्तनैः ।
नृत्यन्ति च तदा काश्चिद्धरेरान्दोलनान्तिके ॥७०॥
वादयन्ति सुवाद्यानि चापराः कृष्णसन्निधौ ।
तथाऽन्या हासयन्त्येव कृष्णं नर्मवचोयुताः ॥७१॥
अपराश्च ददुस्तस्मै कान्ताय शीतलं जलम् ।
इतराश्च ददुस्तस्मै पक्वफलानि योषितः ॥७२॥
बह्व्यः कृष्णं निजं कान्तं कृत्वा स्वान्दोलने ततः ।
पद्भ्यां सहैव दोलां स्वामान्दोलयति वै मुहुः ॥७३॥
अनादिश्रीकृष्णनारायणस्वामी पतीश्वरः ।
ज्ञात्वा सर्वमनांस्यत्राऽसंख्यरूपोऽभवत्तदा ॥७४॥
प्रतिकन्यं प्रतिनारिप्रतिभक्तं प्रतिद्रुमम् ।
किशोरश्चाऽभवद् रम्यः कोटिकाममदापहः ॥७५॥

सर्वासां च सतीनां च भक्तानां ब्रह्मयोषिताम् ।
सेवां संगृह्य भगवान् पुनश्चैकविधोऽभवत् ॥७६॥
एवं चैत्रे कृष्णपक्षे दिने तु प्रथमे हरिः ।
पुष्पदोलोत्सवं श्रेष्ठं चकाराऽक्षरक्षेत्रके ॥७७॥
ततो गेहं जगामाथ भोजयामास वै पुनः ।
सायं समुत्सवं चक्रे गीतनर्तनवादनैः ॥७८॥
ततः सुप्तिं ययुः सर्वे विश्रान्तिं प्रापुरञ्जसा ।
अथैवं वर्तमानस्य श्रावणस्तु समागतः ॥७९॥
भक्तैः संक्लृप्य दोलाश्च विविधाः स्वर्णराजतैः ।
अनेकभूषाशोभाढ्याः पुष्पहारालिराजिताः ॥८०॥
दिव्यहीरकमण्याद्यैः खचिताश्च सुगन्धिताः ।
दिव्यकोमलशय्याभिर्विराजिताः शुभासनैः ॥८१॥
तत्र नारायणस्वामिकृष्णकान्तं निषाद्य तु ।
ब्रह्मप्रियाश्चता आन्दोलयामासुः स्वमीश्वरम् ॥८२॥
अथाऽऽश्चर्यमभूत्तत्र मेघा वै मानुषास्तदा ।
भूत्वा व्योम्नो हरिं त्वान्दोलनार्थं तत्र चाययुः ॥८३॥
प्रेंखां च नूतनां विद्युत्प्रभां दिव्यां निराश्रयाम् ।
व्योमाश्रयां ददुस्तस्मै श्रीकृष्णाय परात्मने ॥८४॥
यत्रैकैकांगके तत्र मुक्ता गोप्यश्च पार्षदाः ।
अवताराश्च धामानि दृश्यन्ते ईश्वरास्तथा ॥८५॥
ऋषयो मुनयो देवाः पितरो मानुषा अपि ।
समुद्राः पर्वताश्चापि ग्रहा नक्षत्रमण्डलम् ॥८६॥
दिक्पाला लोकपालाश्च तथा पातालवासिनः ।
क्षीरोदः श्वेतधामाऽपि विशालाऽक्षरवासिनः ॥८७॥
अव्याकृतं तथा तत्रामृतं धामापि दृश्यते ।
गोलोकं चापि वैकुण्ठं साकेतं च किलासकम् ॥८८॥
तथा चतुर्मुखो ब्रह्मा ब्रह्मा चाष्टमुखस्तथा ।
तथाऽजः षोडशमुखो द्वात्रिंशदाननस्तथा ॥८९॥
पञ्चाशदाननश्चापि शताननोऽपि दृश्यते ।
सहस्रानन एवापि लक्षाननोऽपि दृश्यते ॥९०॥
कोट्याननस्तथा ब्रह्मा दृश्यते मणिमण्डले ।
तादृशी दिव्यदोला वै मेघैर्दत्ता तु शार्ङ्गिणे ॥९१॥
अनादिश्रीकृष्णनारायणो जग्राह तां तदा ।
आरुह्याऽऽन्दोलनं चक्रे मेघान् पप्रच्छ वै तदा ॥९२॥
कस्मादियं समानीता सर्वब्रह्माण्डदर्शिका ।
दिव्या प्रेंखा शुभा योग्या मम सर्वेशितुः कृते ॥९३॥
मेघाः प्राहुर्महाराज वयं काश्यां समागताः ।
आषाढे तीर्थयात्रार्थं वरणायास्तटे तदा ॥९४॥
दृष्टा महालये रम्ये शिवराजस्य कन्यका ।
वयं तत्र मिथो वार्तामकरवाम शोभनाम् ॥९५॥
स्नानं च दर्शनं चात्र कृत्वा गन्तव्यमेव तु ।
अश्वपट्टसरस्तीर्थं लोमशस्याश्रमं शुभम् ॥९६॥
अक्षराख्यं शुभं क्षेत्रं मोक्षदं शाश्वतं परम् ।
यत्राऽनादिकृष्णनारायणस्वामी परः पुमान् ॥९७॥
सर्वावतारधर्ता यः सर्वकारणकारणम् ।
विराजते महाराजोऽनादिश्रीपुरुषोत्तमः ॥९८॥
बालकृष्णः स्वयं साक्षात्परमात्मा परात्परः ।
कम्भराश्रीसुतः श्रीमद्गोपालकृष्णबालकः ॥९९॥
तस्यैव दर्शनार्थं वै गच्छामश्चेत एव नु ।
तच्छ्रुत्वा कन्यका प्राह दोला मम गृहेऽस्ति वै ॥१००॥
तस्यार्थं सा प्रदेया वै यदि गन्तव्यमस्ति हि ।
तया वै दुःखहालक्ष्म्या दत्तेयं चाहृता प्रभो ॥१०१॥
तद् गृहाण कृपासिन्धो कन्याभावभरः प्रभुः ।
इत्युक्तो भगवाँश्चाति जहर्ष चाददे तु ताम् ॥१०२॥
आशीर्वादान् ददौ तस्यै तेभ्यश्चापि पुनः पुनः ।
मेघा नत्वा ययुर्व्योम कृष्णनारायणः स्वयम् ॥१०३॥
आन्दोलनं स्वयं चक्रे दोलायां श्रावणे स्मरन् ।
लक्ष्मीं नारायणीं देवीं मन्यते तु महोत्सवम् ॥१०४॥
इत्येवं कथितं कृष्णनारायणस्य शोभनम् ।
चरितं मोक्षदं राधे सर्वसम्पत्प्रदं शुभम् ॥१०५॥
पठनाच्छ्रवणाच्चापि श्रावणात्पाठनादपि ।
मननान्मोक्षदं दिव्यां ब्राह्मीं तनुं ददाति च ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभुर्भूतासनराज्यं भैरवाय, नग्नपर्वतराज्यं सामराज्यं च विशिष्टयोद्धृभ्यः प्रदत्तवान्, सुन्दरवने नदीः स्वस्वप्रदेशान् गन्तुमाज्ञाप्य कुंकुमवापीक्षेत्रं प्रत्यागमने सति फुलदोलोत्सवं श्रावणोत्सवं च कृतवानित्यादिनिरूपणनामा पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणस्य वै ।
जन्ममासः कार्तिको वै कृष्णपक्षात्मकः शुभः ॥ १ ॥
अष्टमीदिव्यदिवसस्त्रयोदशः समागतः ।
तदुत्सवं विधातुं प्राग्ज्योतिषां वैष्णवा जनाः ॥ २ ॥
प्राचीनदेशभक्ताश्च श्यामब्रह्मप्रदेशजाः ।
त्रिविस्तदेशजाश्चापि काश्मेराऽऽसामवासिनः ॥ ३ ॥

तथाऽन्ये हिमदेशस्थाः शंभुदेशसमुद्भवाः ।
नरा नार्यो बालकाश्च बालिका वृद्धसेविनः ॥ ४ ॥
विमानैराययुस्त्वश्वपट्टतीर्थे महर्षयः ।
साधवश्च तथा सत्यः प्रगृह्य विविधोपदाः ॥ ५ ॥
आययुर्बालकृष्णस्य पूजार्थं वै समुत्सुकाः ।
उष्ट्रालयप्रदेशाच्च तथाऽब्धिक्तप्रदेशजाः ॥ ६ ॥
आरबीजप्रदेशाच्च कुमारीक्षेत्रजास्तथा ।
अन्ये वै चाजनाभीयाः कच्छदेशोद्भवास्तथा ॥ ७ ॥
आययुः कृष्णपूजार्थं चोत्सुकाः सोपदादयः ।
प्रातर्वै मण्डपं रम्यं चक्रे गोपालकृष्णकः ॥ ८ ॥
गजासने बालकृष्णः स्नात्वा धृत्वाऽम्बराणि च ।
शृंगाराभूषणादीनि धृत्वा सदसि चाययौ ॥ ९ ॥
तत्र देवाः पितरश्च मुनयोऽक्षरमुक्तिगाः ।
अन्यधामनिवासाश्चेश्वरा देवाश्च मानवाः ॥१०॥
आययुः श्रीहरेस्तस्य पूजार्थे तस्य संसदि ।
अवाद्यन्त सुवाद्यानि जयशब्दास्तथाऽभवन् ॥११॥
विरेजे श्रीबालकृष्णो वर्धितश्च निजासने ।
समाजे लोमशो विप्रः पूजयामास चाच्युतम् ॥१२॥
मुकुटं धारयामास प्रददौ कुण्डले ततः ।
तिलकं साक्षतचन्द्रं चक्रे भाले हरेस्ततः ॥१३॥
आरार्त्रिकं चकाराऽस्य पुष्पहारान् ददौ गले ।
आशीर्वादान् ददौ पश्चात् पूजयामासुरीश्वराः ॥१४॥
राधिके ! च ततो लक्ष्म्यो ब्रह्मप्रियास्ततोऽपि च ।
देव्यो गान्धर्व्य आर्याश्च ऋषिपत्न्यस्ततः परम् ॥१५॥
देवा देव्यस्तथा वै प्राग्ज्योतिषां वैष्णवीप्रजा ।
देशान्तरागताश्चापि महीमानाश्च तं प्रभुम् ॥१६॥
पूजयामासुरत्यर्थं दिव्यैः सर्वोपचारकैः ।
आरार्त्रिकं च ते चक्रुर्ददुश्चाग्रे महोपदाः ॥१७॥
विविधान्यम्बराण्याभूषणानि मौक्तिकानि च ।
हारान् सुवर्णरूप्योत्थान् हीरकान् रशनायुतान् ॥१८॥
यानानि वारणाँश्चाश्वान् अलंकाराँस्तथोत्तमान् ।
ददुर्भोज्यानि पानानि फलानि चामृतानि च ॥१९॥
एवं सम्पूज्य ते सर्वे बालकृष्णं सुमण्डपे ।
मातरं श्रीं च गोपालं पितरं श्रीहरिस्तदा ॥२०॥
नत्वा श्रीलोमशं चर्षीन् जनरीत्या गजासनात् ।
उत्थाय च सभासंस्थान् वृद्धान् प्रणम्य वै ततः ॥२१॥
ययौ निजालयं पितृसम्मतः पुरुषोत्तमः ।
महीमानान् भोजयित्वा श्रीमद्गोपालकृष्णकः ॥२२॥
विसर्जयामास लोकान् स्वस्वान् सतीश्च वै ततः ।
पूजयामास लक्ष्मीश्रीकम्भरा भावतस्तदा ॥२३॥
भोजयित्वा च ता विसर्जयामास निजालयान् ।
एवं त्रयोदशसंख्यः श्रीहरेर्जननोत्सवः ॥२४॥
सुसम्पन्नो महीमाना ययुर्निजान् प्रदेशकान् ।
द्वितीयेऽह्न्यभवत्तत्राश्चर्यं संशृणु राधिके ॥२५॥
दत्तात्रेयेण गुरुणा भगवता परात्मना ।
प्रेषितः शरभः कश्चित् कृष्णनारायणान्तिकम् ॥२६॥
आययौ तत्र मोक्षार्थं तुष्टाव श्रीहरिं ततः ।
दिव्यदेहश्च वै भूत्वा ययौ धामाऽक्षराभिधम् ॥२७॥

**श्रीराधिकोवाच—**

क आसीच्छरभः कृष्ण दत्तात्रेयेण नोदितः ।
वद मे तत्कथां सर्वां श्रोतुमिच्छामि सर्वशः ॥२८॥

**श्रीकृष्ण उवाच—**

शृणु राधे कथयामि शरभस्य कथां शुभाम् ।
समीरणोऽभवद् राजा सूर्यवंशसमुद्भवः ॥२९॥
आजनाभस्य खण्डस्य पश्चिमाया भुवः शुभः ।
गौर्जराणां च कच्छानां सौराष्ट्राणां नृपाधिपः ॥३०॥
प्रजापालनकरुणो भक्तो नारायणस्य च ।
धर्मकर्मपरो नित्यं दानहोमपरायणः ॥३१॥
अखण्डकीर्तिमानासीद् दीनरक्षापरस्तथा ।
गोभूब्राह्मणसाधूनां रक्षाकरः प्ररक्षकः ॥३२॥
यस्य राज्ये कदाचिद्वै दुर्भिक्षं नाऽभवत्पुरा ।
शरणागतरक्षाकृत् देशरक्षाकरस्तथा ॥३३॥
धनुर्धरः स्वयं नित्यं देवसेवां करोति च ।
राजधान्यभवत्तस्य शत्रुंजीतानदीतटे ॥३४॥
कुण्डलाख्या महादिव्या नगरी विप्रशोभिता ।
क्षत्रीयवैश्यशूद्रादिसौम्यप्रजानिवासिता ॥३५॥
यज्ञयागपरा यत्र विप्राश्च वेदघोषिणः ।
साधवो यतयो यत्र कृष्णध्यानपरास्तथा ॥३६॥
वनिनोऽपि न यद्राज्ये कष्टं विन्दन्ति कुत्रचित् ।
नार्यो नराश्च सुखिनो यदाश्रयेऽभवन् सदा ॥३७॥
समीरणस्य राज्ये वै विशेषोऽयमभूत् सदा ।
प्रातर्निनाद्यते नित्यं पटहो राजपूरुषैः ॥३८॥
दीनोऽन्धः कृपणः कश्चिन्निराधारो निराश्रयः ।
निरन्नोऽनाथबालो वा वृद्धो वा भिक्षुकोऽपि वा ॥३९॥

नारी निराश्रया वृद्धा विधवा चाऽकुटुम्बिनी ।
साधुः साध्वी योगिनी वा तापसी धनवर्जिता ॥४०॥
दरिद्रो वाऽधनो वा च षण्ढो वा षण्ढिका तथा ।
प्रातरागत्य मद्द्वारे गृह्णातु चान्नभोजनम् ॥४१॥
मम ग्रामे च नगरे पत्तने च प्रजासु च ।
यत्र यत्र ममाऽन्नानामागाराणि भवन्ति वै ॥४२॥

तत्र तत्र समागत्य गृह्णातु चान्नभोजनम् ।
वस्त्रं पात्रं प्रगृह्णातु भजतां पुरुषोत्तमम् ॥४३॥
इत्येवं पटहस्तस्य प्रातर्नदति बोधयन् ।
मानवा निर्धनास्तस्य भुञ्जतेऽन्नं स्थले स्थले ॥४४॥
भुक्त्वा तृप्यन्ति सततं ददत्याशीर्वचांसि च ।
एवं पुण्ययुतो राजा त्वेकदा भृत्यमण्डलम् ॥४५॥
गृहीत्वा प्रययौ व्याघ्रारण्यं विहर्तुमुत्सुकः ।
भृत्याश्च गजघोटाश्च दासा अपि ययुः सह ॥४६॥

मध्यारण्ये दीर्घिकायास्तटे वृक्षेषु वै तदा ।
निवासं गजघोटादेः कारयित्वा स भूपतिः ॥४७॥
राजधर्मेण मृगयां कर्तुं वनं विवेश ह ।
भृत्या अपि ययुः केचित् सार्धं राज्ञा सवाहनाः ॥४८॥
गवयं संविलोक्यैत्र राजा पृष्ठमनुव्रजन् ।
अरण्ये गवयेनाऽयं विवेश गहने मुधा ॥४९॥
धनुर्धरोऽश्वमारूढो वेगाद् राजा पशुप्रियः ।
नदीं रम्यां प्राप तत्र जलपूरवतीं शुभाम् ॥५०॥

तस्यास्तीरेऽभवत् तत्राश्रमो रम्योऽतिसुन्दरः ।
फलपुष्पादियुक्तानां वृक्षाणां सुघटासु वै ॥५१॥
मुनीनां चातिविश्वासुमृगपक्ष्यादिशोभनः ।
हिंस्राणां हिंस्रवृत्त्यादिशान्तिकृच्चातिनिर्मलः ॥५२॥
मुनिशिष्यैः प्रशिष्यैश्च सेवितो ब्रह्मधामवत् ।
कामक्रोधातिलोभानां दोषाणां यत्र नोद्भवः ॥५३॥
मायाऽनृतादिदोषाश्च पशुष्वपि न यत्र वै ।
पक्षिणो मधुरान् रावान् गायन्ति स्म द्रुमादिषु ॥५४॥

वेदवाक्यानि च शुका मयूरा मिलितास्तदा ।
कोकिला राजहंसाश्च प्रगायन्ति स्वभाषया ॥५५॥
देवा देव्योऽपि नाकाच्च यत्राऽऽगत्य वसन्ति हि ।
ऋषिं नत्वा प्रयान्त्येव मन्वानाः कृतकृत्यताम् ॥५६॥
एतादृशे चाश्रमे तु पार्ष्णिगृह्णो महामुनिः ।
तपः करोति विपुलं लोककल्याणहेतवे ॥५७॥
ग्रीष्मे पञ्चाग्निमध्ये च निषीदति निरन्तरम् ।
वर्षायां भूतले वर्षाधारास्वेव निषीदति ॥५८॥

शैत्ये जले कृताऽऽवासो दिवा तिष्ठति सर्वथा ।
रात्रौ वृक्षतले तत्र वर्तते वै निरावृतौ ॥५९॥
क्वचित्फलं क्वचित्पुष्पं क्वचिन्मुन्यन्नमित्यपि ।
क्वचिज्जलं क्वचित्पानीयकं गृह्णाति वार्दलम् ॥६०॥
निराहारः क्वचित्वास्ते भजते श्रीनरायणम् ।
सुस्वामिश्रीकृष्णनारायणं संभजते हृदि ॥६१॥
तादृशोऽयं मुनिर्यत्र वृक्षेऽधो वर्तते तदा ।
तस्य पुरः स गवयः समागत्याऽतिभीतितः ॥६२॥
अभवत् सुस्थिरस्तत्र ऋषेः शरणमाश्रितः ।
राजा दूरादनावीक्ष्याऽऽश्रमं तं च मुनिं तथा ॥६३॥
मृगयालग्नचित्तोऽसौ जघान गवयं बलात् ।
शरेण तीक्ष्णधारेण ह्युदरान्तःप्रवेशिना ॥६४॥
सशरो गवयस्तत्राऽऽक्रोशं कृत्वा ऋषेः पुरः ।
निपपात यथा पुत्रस्तथा रक्षार्थमेव तु ॥६५॥

दीनवत्तं मुनिं पश्यन् तदा दीनेन चक्षुषा ।
पतितं शरसहितं वीक्ष्य पार्ष्णिगृह्णो मुनिः ॥६६॥
दयालुः शीघ्रमेवैनं पशुं परस्पर्श पाणिना ।
जलं ददौ मुखे तस्याऽपश्यल्लग्नं शरं तदा ॥६७॥
तथा त्रासेन हरिणान् पलायनपरान् पशून् ।
परितो धावमानाँश्च विलोक्य कष्टमाप्तवान् ॥६८॥
अहो ममाश्रमे कोऽयं घातकश्चाद्य संगतः ।
पशूनां ग्रासकृद् दुष्टो निर्मर्यादोऽतिदारुणः ॥६९॥

निर्दोषं गवयं योऽत्र जघान प्राणतः शरैः ।
एवं यावन्मुनिश्रेष्ठो विचारं प्रकरोति हि ॥७०॥
तावद्राजा तुरंगस्थस्तत्र सृत्या समागतः ।
ददर्श ब्राह्मणं मालाजटाश्मश्रुधरं शुभम् ॥७१॥
पतितं पादविक्षेपान् कुर्वन्तं गवयं तथा ।
मनसा मृदुभावेन तदाश्रमप्रसंगतः ॥७२॥
दूयमानः स वै राजा पार्ष्णिगृह्णं प्रवीक्ष्य च ।
आयातश्चाश्रमाबद्ध्य वृक्षमूले पदक्रमैः ॥७३॥
भीतः पपात स ऋषेः पादयोः शीघ्रमेव तु ।
तावद् ऋषिस्तमुवाच कथं दुष्ट ! हतः पशुः ॥७४॥
त्वया व्याधेन निर्दोषो ममाऽरण्यनिवासकृत् ।
दुष्टस्त्वं दृश्यसे राजा कृत्यं करोषि हिंसकम् ॥७५॥
व्याधवत् क्रूरकर्मा त्वं मुनीनामाश्रमेष्वपि ।
दुष्टकार्यं प्रकर्तुं किं लज्जसे न नराधिप ॥७६॥
शरेण भग्ना हरिणा ममाश्रमनिवासिनः ।
गवयोऽयं मृतश्चात्र भवत्येव क्षणान्तरे ॥७७॥

शरे विकर्षणं प्राप्ते नाऽस्य प्राणोऽवतिष्ठति ।
पश्य पाप निजं पुत्रं कथं घातयसे न वै ॥७८॥
मृगया ते न वै योग्या ऋषिविश्वस्तजन्तुषु ।
मृगाः पुत्रा मम तुल्या ममाऽऽश्रमसमीपतः ॥७९॥
तव भीत्या दुद्रुवुर्वै प्राणरक्षणवाञ्छया ।
शरेण भग्ना हरिणा ममाश्रमसमीपतः ॥८०॥
शरभो भव राजेन्द्र ! वनाऽऽवासोऽतिकष्टवान् ।
पुनर्नैवं दण्डशिक्षः करिष्यसि वधं क्वचित् ॥८१॥
इत्युक्तः ऋषिणा राजा तत्रैव शरभोऽभवत् ।
विहाय मानवं रूपं पाशवं रूपमाप्तवान् ॥८२॥
इत्येवं स ऋषिणा वै शप्तो राजा समीरणः ।
शरभः स पशुर्भूत्वा तदाश्रमाद् विनिर्ययौ ॥८३॥
शापमोक्षणमत्रैव प्रार्थयितुं न चाऽवदत् ।
भीतश्चातीव दोषेण कोपेनाऽपि ऋषेस्तदा ॥८४॥
शीघ्रं तदाश्रमं त्यक्त्वा सिंहारण्यं विवेश ह ।
दुःखातिदुःखसंमग्नः सुखं नाऽवाप कुत्रचित् ॥८५॥
जातिस्मरः सदा स्वस्य दुःखान्तं कर्तुमेव तु ।
चिन्तयत्येव सततं चरन् वने मुहुर्मुहुः ॥८६॥
राजभृत्यास्तु वै ज्ञात्वा वृत्तान्तं तं ततः किल ।
भीता निजप्राणारक्षां ज्ञात्वा गृहान् द्रुतं ययुः ॥८७॥
गवये च ऋषिणैव मन्त्रपुष्पाञ्जलिस्तदा ।
सन्धिन्या सहितः क्षिप्तस्तेनोज्जीवनमाहितम् ॥८८॥
राजा शापनिवृत्त्यर्थं भ्रमित्वा तद्वनं ततः ।
पार्ष्णिग्रहं समागत्य प्रार्थयामास मोक्षणम् ॥८९॥
ऋषिः प्राह महारण्ये पातालीये सरोवरे ।
रैवताद्रिः समागत्य निजाऽऽवासं करिष्यति ॥९०॥
तत्र वै भगवान् साक्षाद् दत्तात्रेयो महाप्रभुः ।
शिखरे तु जनैर्हीने स्वगम्ये व्योमगामिनि ॥९१॥
स्वयं तपो महच्चोग्रं करिष्यति यदा तदा ।
शैलद्रोण्यां त्वया तत्र स्थितेन भगवान् हि सः ॥९२॥
दृष्टश्चाराधितश्चापि कृपया त्वां सुनेष्यति ।
क्षेत्रं कुंकुमवाप्याख्यं तत्र स्थास्यति चाऽत्रिजः ॥९३॥
अश्वपट्टसरस्तीरे पश्चिमे तपसा हरिम् ।
अनादिश्रीकृष्णनारायणमाराधयँस्तदा ॥९४॥
दत्तात्रेयस्य कृपयाऽनादिकृष्णनरायणम् ।
वीक्ष्य त्वं तत्पादयोश्च पीत्वा जलं प्रसादजम् ॥९५॥
शीघ्रं शापान्मम मुक्तो भविष्यसि न संशयः ।
इत्युक्तः स तु राजर्षिः शरभस्य तु देहवान् ॥९६॥
अरण्यं प्रययौ तस्मान्महासरोवरान्तिके ।
ततः कालान्तरे तत्र रैवताद्रिः समाययौ ॥९७॥
तत्रैव भगवानत्रिपुत्रस्तपश्चचार ह ।
शिखरे तं ददर्शाऽसौ शरभो जपमाचरत् ॥९८॥
दत्तात्रेयो दयालुः स चैनमादाय तद्गृहम् ।
समायातोऽस्ति भगवानश्वपट्टसरोवरे ॥९९॥
अदृश्यस्तिष्ठति चास्य शापमोक्षार्थमेव तु ।
दत्तात्रेयाभिधं तीर्थं तदत्राऽश्वसरोवरे ॥१००॥
शापपापविनाशार्थं वर्तते पावनं हि तत् ।
तत्र वै शरभो गत्वाऽनादिकृष्णनरायणम् ॥१०१॥
वीक्ष्य पादजलं पीत्वा शापान्मोक्षमवाप्तवान् ।
राजरूपं शुभं प्राप्तस्ततोऽपि तीर्थवीर्यतः ॥१०२॥
दिव्यरूपोऽत्र भूत्वैवाऽक्षरं लोकं ययौ शुभम् ।
इत्येवं राधिके चाश्वसरोवरं वरं सदा ॥१०३॥
सायं स शरभः पीत्वा जलं पादजलं हरेः ।
मुक्तिं जगाम परमां ब्राह्मीं दिव्यां तु शाश्वतीम् ॥१०४॥
पठनाच्छ्रवणाचास्य भुक्तिर्मुक्तिर्भवेदपि ।
सकामानां वंशवृद्धिर्दुःखमुक्तिर्भवेदपि ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रभोस्त्रयोदशजन्मदिनोत्सवः, समीरणराज्ञो मृगयार्थं गतस्य वने पार्ष्णिग्रहर्षिशापेन शरभत्वं, ततो रैवताद्रौ दत्तात्रेयद्वारा कुंकुमवापीक्षेत्रे मोक्षणम् , अश्वपट्टसरसि दत्तात्रेयतीर्थं चेत्यादिनिरूपणनामा षड्दशाधिकशततमोऽध्यायः ॥ ११६ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! चान्यद् वाराहं तीर्थमित्यपि ।
कुंकुमाया अश्वपट्टसरस्येव पुराऽभवत् ॥ १ ॥
अक्षराधिपतिः श्रीमान् सर्वेशः पुरुषोत्तमः ।
परब्रह्म स्वयं सृष्टिं यदाऽऽरेभे स्वमूर्तितः ॥ २ ॥
तत्त्वानि चिन्तयतोऽस्य मुखादग्निरजायत ।
दिव्यो दिव्याक्षरमुक्तो दिव्यमुक्तस्वरूपधृक् ॥ ३ ॥
द्विभुजः श्वेतवर्णश्च शीतलस्पर्शवाँस्तदा ।
मूर्तितेजोमयः सोऽयमभवद् रूपवान् शुभः ॥ ४ ॥
भगवानैक्षत वह्निं कर्तुं तत्त्वात्मकं तदा ।
वह्निश्चेङ्गितमाज्ञाय तस्थौ पुरोहरेस्तदा ॥ ५ ॥
हरिश्चाज्ञां चकाराऽस्य याहि त्वं चेश्वरादिषु ।
मया वै सृज्यमानेषु तेजस्तत्त्वं सदा भव ॥ ६ ॥

इत्याज्ञां स समादाय महामायां विवेश ह ।
गर्भरूपस्तदा माया क्षोभं त्ववाप वह्निवत् ॥ ७ ॥
यथा यथा तु सा माया गुणत्रयात्मिका तदा ।
सूक्ष्मा साम्यस्वरूपाऽपि क्षोभं त्ववाप वै मुहुः ॥ ८ ॥
तथा तथा च मायाया मौष्ण्यं कार्यं व्यवर्तत ।
तामसो वै स भागस्तु व्यवर्धत हरीच्छया ॥ ९ ॥
मायया तत्त्वसंघातो वैराजः समपद्यत ।
तत्रोष्णभावमासाद्योष्मात्मको वै महानलः ॥१०॥
मुखतो बहिरायातश्चेश्वरो वह्निनामकः ।
वं वैराजं समाश्रित्य हं हनुं मुखमार्गतः ॥११॥
अभितो निर्गतो देवो वह्निरित्येव सोऽभवत् ।
दिव्योऽयं शुभ्रवदनः शुभ्रवर्णः समुज्ज्वलः ॥१२॥
ब्रह्मभावं तु विसृज्येश्वरभावमुपागतः ।
वैराजो निजपुत्रं तं वह्निं पुरुषरूपिणम् ॥१३॥
प्राह पुत्रान् सृष्टियोग्यान् सृज पुत्र समान् त्वया ।
ओमित्याज्ञां शिरस्येव धृत्वा वह्निर्व्यतर्कयत् ॥१४॥
पुत्रा मे सृष्टियोग्या वै भवन्तु मत्स्वरूपिणः ।
संकल्पमात्रजाता वै पावकः पवमानकः ॥१५॥
पविः त्रयः समुत्पन्ना पविर्वज्रं तु वैद्युतम् ।
इन्द्राय चार्पितः पुत्रो ब्रह्मणा परमेष्ठिना ॥१६॥
पावकाख्यस्तु लोकेभ्यश्चार्पितः पाककर्मणे ।
पवमानो महाज्वालायुतश्चातीव चञ्चलः ॥१७॥
वेगवान् हानिदश्चेति दाहकोऽपि महोल्बणः ।
इति ज्ञात्वा जनास्तं तु नाऽगृह्णन्त यदा तदा ॥१८॥
क्रुद्धोऽरण्यं जगामाऽयं भोजनार्थे महावने ।
बभ्राम स महारण्यप्रभृतिषु महाबलः ॥१९॥
एवं सौराष्ट्रविषये पवमानः स्वयं भ्रमन् ।
अन्वेषयन् भोजनं चाऽलभमानोऽतिदुःखितः ॥२०॥
व्याघ्रारण्यं ददाहाऽसौ क्षुधयाऽतीव बाधितः ।
ज्वालामालासमाव्याप्तं वनं जातं भयंकरम् ॥२१॥
दह्यमानं दुष्प्रवेश्यं दुर्निर्गम्यं समन्ततः ।
हरिणाः पशवः पक्ष्यादयो मृगाः सरीसृपाः ॥२२॥
दह्यन्ते वह्निना तत्र निबिडे वृक्षसंकुले ।
तृणवल्लीघटाव्याप्तेऽदृश्यभूतलभूमिके ॥२३॥
धावन्ति हरिणाः सर्वे धूमान्धाः पक्षिणस्तथा ।
अशक्ताऽपत्यबालाद्या वन्यानां तिर्यगात्मनाम् ॥२४॥
सहस्रशः प्राणधारा अशक्ता वह्निसंकुलाः ।
दग्धास्तत्र वह्निपुत्रपवमानेन वै मृताः ॥२५॥

वृक्षा दग्धाः सजीवाश्च वल्लिका भस्मतां गताः ।
तृणानां च लतानां च स्तम्बानां गणना तु का ॥२६॥
शिखराणि विलोक्यन्ते वृक्षाणां वह्निशैलवत् ।
उच्छ्रया भूप्रदेशाश्च वने वह्निमयास्तदा ॥२७॥
अल्पशृंगास्तथा शैला वृक्षारण्याम्बरास्तदा ।
दह्यन्ति वह्निना ज्वालामुखाः शैला यथाऽभवन् ॥२८॥
एवं क्रौर्ये संप्रवृत्ते वनवासिविनाशने ।
व्यापके चानले जाते पवमानेऽनिलान्विते ॥२९॥
नदीतीरेऽपि वृक्षाणां दग्धभावे ह्युपस्थिते ।
आश्रमः पिच्छलर्षेश्च दाहवेगेन धर्षितः ॥३०॥
पिच्छलर्षिर्बहुवर्षपुराणस्तपसि स्थितः ।
ध्यायन्नारायणं देवं श्वेतवाराहरूपिणम् ॥३१॥
तेपे तपो महाघोरं चारण्ये वनवासिषु ।
यत्र कामदुघा गावो प्रवसन्ति तदाश्रमे ॥३२॥
गोपालास्तत्र तिष्ठन्ति पार्श्वे वृक्षाश्रयेऽपि च ।
ते ता वह्निप्रवेगेन दुद्रुवुश्च नदीजले ॥३३॥
निपेतुर्जीवरक्षार्थे गोपालाः पेतुरप्सु च ।
अथायं तु महर्षिर्वै पिच्छलाख्यो द्विजेश्वरः ॥३४॥
विलोक्य पवमानस्य चेष्टितं क्रूरतामयम् ।
दयापरः स्वयं भूत्वा पवमानमुवाच ह ॥३५॥
रे रे वह्ने महाक्रूर महाहिंसकतोऽधिक ।
क्षुधया पीडितश्चैतद्वनं ममाश्रमं तथा ॥३६॥
गाः पशून् प्राणिनः पक्षिगणान् सरीसृपाँस्तथा ।
विनाऽपराधं दहसि दीनं चापि न मुञ्चसि ॥३७॥
बुभुक्षितः पापबुद्धिर्भवत्येवेति तत्तथा ।
कथं विहाय मर्यादां सर्वं नाशयसे बलात् ॥३८॥
पश्याऽपत्यानि पक्ष्यादिजन्तूनामपि निष्पदाः ।
अपक्षाश्चापि दह्यन्ति पश्यतस्ते घृणाऽपि न ॥३९॥
कथं त्वं क्रूरतां प्राप्तः शान्तिं नैवाऽधिगच्छसि ।
पर्वतो भूच्छ्रयाश्चापि दग्धास्तव प्रभावतः ॥४०॥
भोज्यं त्वं वै लब्धवता दग्धं सर्वाऽन्यभोजनम् ।
क्षयं नीतं ममारण्यं क्षीणाः सर्वे हि जीविनः ॥४१॥
तस्मात्त्वां क्षयकर्तारं शपाम्यत्र न संशयः ।
इत्येवं वह्निना क्लिष्टः पिच्छलर्षिस्तु राधिके ! ॥४२॥
शशाप पवमान ! त्वं क्षयमाप्नुहि वै द्रुतम् ।
इत्युक्त्वा स्वकरस्थं च जलं मुमोच भूतले ॥४३॥
यावत्तावच्चानलस्य ज्वाला मान्द्यमुपागताः ।
दाहशक्तिर्विनष्टा च पाकशक्तिर्लयं गता ॥४४॥

रसादनस्य सामर्थ्ये लीनं क्षणान्तरे तथा ।
श्वैत्यं वह्नेर्विनष्टं च तथौष्ण्यं विलयं गतम् ॥४५॥
नैसर्गवर्धनं चापि ह्रासं यातं तदा स्वयम् ।
धूम्रभावः प्रवृद्धश्चाऽङ्गारा निस्तेजसाऽसिताः ॥४६॥
अप्रकाशाः कृष्णवर्णाः काष्ठकूर्चास्तदाऽभवन् ।
विना प्रयत्नं वह्निर्वै शमितः शापकारणात् ॥४७॥
भक्षितास्तु रसाः सर्वे बीजानि पशुपक्षिणः ।
पवमानस्य जठरादपक्वा निर्ययुर्बहिः ॥४८॥
मन्दोदरो मन्दतेजा मन्दश्वासो बभूव सः ।
मरणोन्मुखतां प्राप्तः पादशक्तिविहीनकः ॥४९॥
ज्वालाशून्यश्चेन्द्रियाणां वृत्तिशून्यो बभूव च ।
शुशोच बहुधा कर्मफलं प्राप्तो रुरोद च ॥५०॥
किं कर्तव्यं क्व गन्तव्यं कथं शापो महर्षिकृत् ।
निवर्तेत कथं सोऽपि प्रसन्नः स्याद् व्यचिन्तयत् ॥५१॥
अथायं पवमानश्च निर्मानस्तमृषिं प्रति ।
ययौ द्रुतं दण्डवच्च पतित्वा मनसा गिरा ॥५२॥
तुष्टाव ब्रह्मरूपं तं दुःखमोक्षस्य कांक्षया ।
हे साधो त्वं दयालुर्वै निर्दयोऽहं तु हिंसकः ॥५३॥
सत्यव्रतो भवान् साधो न सत्यं विद्यते मयि ।
निष्पापस्त्वं सदा त्वास्से पापिष्ठोऽहं तु दुःखदः ॥५४॥
असन्तुष्टोऽस्मि वै लुब्धस्त्वं सन्तोषी न लुब्धकः ।
परिग्रहपरश्चाऽहं त्वं विरागोऽपरिग्रहः ॥५५॥
तापनोऽहं तु जीवानां त्वं तपस्वी न तापनः ।
ब्रह्मभूतः सदा त्वं तु भ्रमात्माऽहं तु मायिकः ॥५६॥
क्षमाशून्यो भवाम्येव त्वयि क्षमा सदाऽस्ति च ।
सिद्धीनां मयि लेशो न सिद्ध्याश्रयो भवानिह ॥५७॥
पापिनां पापनाशार्थे नाऽहं शक्तो भवानिव ।
तीर्थरूपो भवानास्ते नाऽहं तीर्थं तरामि न ॥५८॥
अहमाविद्यको जीवो भवान् विद्याश्रयः सदा ।
ब्रह्मतनुर्भवानस्ति मायातनुर्भवाम्यहम् ॥५९॥
दिव्यमोक्षप्रदस्त्वं च जन्मदोऽहं विनाशकः ।
शान्तिप्रदो भवानास्तेऽहमुद्वेगप्रदोऽस्मि तु ॥६०॥
नित्यं ब्रह्म परं सौम्यं चिन्तयानो भवानिह ।
कर्तुमुद्धारमेवाऽऽस्ते समर्थो दीनदेहिनाम् ॥६१॥
अज्ञानामपराधानां क्षमां कुरु महामते ।
मया प्रज्वालितं यत्तजीवयितुं प्रभुर्भवान् ॥६२॥
तपसा द्योतमानस्त्वं समुज्जीवय जङ्गलम् ।
पशून् प्राणिगणांश्चापि पक्षिणश्च वनस्पतीन् ॥६३॥
जीवान् सरीसृपादींश्च मामुद्धर तपोधन ।
शापपात्रं पुनः स्याच्च साधूनां तोषपात्रकम् ॥६४॥
शिक्षा प्राप्ता मया साधो मरणं मा विधेहि मे ।
मृत्योः सान्निध्यमाप्तोऽस्मि मामुज्जीवय चार्तिहन् ॥६५॥
साधूनां कृष्णभक्तानां साधुत्वं त्वेतदेव यत् ।
क्षान्त्वाऽऽपराधान् जीवस्य तस्मै गुणान् ददाति च ॥६६॥
वृश्चिकः कण्टकं युंक्ते साधुस्तं न विमुञ्चति ।
मूषकः कृन्तति पक्षं हंसस्तं न विमुञ्चति ॥६७॥
रक्षकाः कुर्वन्ति रक्षां दुष्टानामपि देहिनाम् ।
मामुज्जीवय विप्रेन्द्र क्षमासारा हि साधवः ॥६८॥
नैवं पुनः करिष्येऽहं चापराद्धं कदाचन ।
सत्यं सत्यं पुनः सत्यं पतितस्तव पादयोः ॥६९॥
इत्येवं स द्रुतं राधे ! पवमानो मुहुर्मुहुः ।
ऋषिं तं पिच्छलं तत्र तुष्टाव पतितो वने ॥७०॥
ध्यानवृत्त्या महर्षिस्तज्ज्ञात्वा तत्स्तवनं ततः ।
प्रसन्नः करुणावार्धिर्द्रागेवोत्थाय चासनात् ॥७१॥
पवमानं स्तुवन्तं स्वं ययौ शीघ्रं शुभाश्रयः ।
पवमान ! शुभं तेऽस्तु मा शोकं कुरु वह्निज ! ॥७२॥
भवान् देवो वह्निपुत्रो यदि नैवं करोति चेत् ।
जीवयामि भवन्तं वै मा प्रदह्यतु देहिनः ॥७३॥
इत्युक्त्वा जलमादाय करे सम्मन्त्र्य पात्रतः ।
गृहीत्वा पवमानस्योपरि चिक्षेप यावता ॥७४॥
पवमानः सशक्तोऽभूदुत्तस्थौ च ननाम च ।
तेजोयुक्तो दण्डवच्च चकार तम् ऋषिं तदा ॥७५॥
पवमानश्च तं प्राह शापमोक्षं कुरु प्रभो ।
ऋषिः प्राह मया शक्तिर्दत्ता गन्तुं विहायसा ॥७६॥
याहि श्रीशैलसंज्ञं च पर्वतं यत्र सूकरः ।
आस्ते मोक्षप्रदः श्रीमान् धरणिप्राणरक्षकः ॥७७॥
सर्वरक्षाकरः क्रोडः स ते रक्षां करिष्यति ।
इत्युक्तः पवमानः स ययौ श्रीशैलमादरात् ॥७८॥
वल्मीकसन्निधौ तिष्ठन् स्मरत्येव च तं तदा ।
राधिके भगवाँस्तस्माद् वल्मीकादुत्थितोऽभवत् ॥७९॥
श्वेतवर्णः सुन्दरश्च पवमानस्तमानमत् ।
सुखी भवेति भगवानाह वह्निसुतं तदा ॥८०॥
पप्रच्छ कारणं तत्रागमनस्य ततोऽनलः ।
अखिलं कथयामास कारणं शापमित्यपि ॥८१॥
समुद्धारं मम विष्णो कुर्वित्याह विभावसुः ।
तेजः शक्तिं बलं रूपं दिव्यतां व्यापितां तथा ॥८२॥

गुणान् पुरा भवान् मेऽत्र ददातु परमेश्वर ।
इत्युक्तः श्रीवराहश्च प्राह तं पवमानकम् ॥८३॥
आयाहि पवमान त्वं मया सह सुराष्ट्रकम् ।
कुंकुमवापिकाक्षेत्रं चाऽश्वपट्टसरोवरम् ॥८४॥
सर्वावतारधर्ता यः साक्षात् स्वामी पुमुत्तमः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥८५॥
विराजतेऽक्षरक्षेत्रे स ते सर्वं प्रदास्यति ।
मोक्षं चैश्वरभावं च सर्वं स ते प्रदास्यति ॥८६॥
इत्युक्त्वा श्रीवराहस्तं निनायाऽक्षरभूमिकाम् ।
सहसा व्योममार्गेण तथा चाऽश्वसरोवरे ॥८७॥
स्नपयामास तं शीघ्रं दर्शनार्थं हरेः पुरः ।
तं नीत्वा प्रययौ श्रीमान् वाराहो भगवान्प्रभुः ॥८८॥
चकार दण्डवद् भूमौ पवमानस्तमादरात् ।
अनादिश्रीकृष्णनारायणश्चोत्थाप्य वह्निजम् ॥८९॥
निषाद्य त्वासने क्रोडं समाश्लिक्षत्तु वक्षसि ।
सिंहासनं ददावस्मै वराहाय निजात्मने ॥९०॥
तस्माच्च कारणं ज्ञात्वा मानुष्यं नाटयन् हरिः ।
ऋषेः शापनिवृत्त्यर्थं प्रसादं प्रददौ प्रभुः ॥९१॥
पवमानः प्रसादं तं बुभुजे चाऽमृतं फलम् ।
जलं पपौ च यावद्वै तावत् सर्वगुणान्वितः ॥९२॥
समपद्यत विश्वात्मा यथापूर्वगुणाश्रयः ।
सर्वशापविनिर्मुक्तोऽभवत् सुख्यतिहर्षितः ॥९३॥
वराहं पूजयामास तथा कृष्णनरायणाम् ।
पवमानो हरेर्योगात्तीर्थरूपोऽभवत्ततः ॥९४॥
तीर्थे वासं चकाराऽसौ वराहोऽपि सरोवरे ।
अनादिश्रीकृष्णनारायणस्यैवाऽऽज्ञया प्रभोः ॥९५॥
एवं वाराहतीर्थं तत् समभूत् तत्र नित्यदा ।
वराहो भगवानास्ते पवमानयुतः प्रभुः ॥९६॥
तत्र स्नानं करिष्यन्ति ये जनास्ते विरोगिणः ।
भविष्यन्ति हरेर्योगात् सेचनात् तीर्थवारिणाम् ॥९७॥
मुक्तिं मुक्तिं गमिष्यन्ति यास्यन्ति दिव्यतां तथा ।
पठनाद् वाचनादस्याऽऽरोग्यं स्यात्सर्वदा प्रियम् ॥९८॥
राधिके भगवानेवं त्वाह वाराहरूपिणम् ।
फाल्गुने पूर्णिमायां वै प्रातर्वै पवमानकम् ॥९९॥
ददौ वासं यज्ञभूमौ तथाऽरण्ये महाजले ।
वृष्ट्याश्चापि जले वासं पवमानाय वै ददौ ॥१००॥
भूगर्भे च तथाऽऽवासं ददौ कृष्णनरायणः ।
प्रददौ निर्भयत्वं च वैष्णवत्वं ददौ तथा ॥१०१॥
कण्ठीं च तौलसीं चापि तिलकं चन्द्रकं तथा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥१०२॥
एवं मन्त्रं ददौ चाथ प्रणम्य पवमानकः ।
प्रपूज्य च हरिं तीर्थे वासार्थं प्रययौ सरः ॥१०३॥
वराहोऽपि प्रदत्तं सत्कारं जग्राह सर्वथा ।
वाराहे तन्महत्तीर्थे वासं चकार राधिके ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पिच्छलर्षिदत्तशापनिवृत्तये वराहं प्रभुं गृहीत्वाऽश्वपट्टसरोवरं प्रति पवमानस्य गमनं, हरेर्योगाच्छापमुक्तिः, वराहतीर्थं पवमानतीर्थं चेत्यादिनिरूपणनामा सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चाऽन्यं चमत्कारं हरेः शुभम् ।
भक्तरक्षाकरं श्रेष्ठं पापतापप्रणाशनम् ॥ १ ॥
सौराष्ट्रे जयनगरेऽभवत् सन्तारणो द्विजः ।
वेदधर्मरतः सम्यक् पूजाविधानतत्परः ॥ २ ॥
षट्कर्मनिरतः कथावाचने गुणकीर्तने ।
कथायाः श्रवणे विष्णोः स्मरणे पादसेवने ॥ ३ ॥
अर्चने वन्दने दास्ये सख्ये चात्मनिवेदने ।
महाभागवतश्चासीत् कृष्णपूजापरायणः ॥ ४ ॥
स्वयं द्विजः समुत्थाय प्रातर्नित्यं नदीतटम् ।
गत्वा स्नात्येव भद्रायां कृत्वा सन्ध्यां च वन्दनम् ॥ ५ ॥
जलस्य कलशं मूर्ध्नि स्वयं नीत्वैव भावतः ।
शालग्रामस्य वै पूजां स्वाऽऽहृतकुसुमादिभिः ॥ ६ ॥
स्वघृष्टचन्दनाद्यैश्च करोत्येव सदा द्विजः ।
पूजायां जायमानायां तस्य पत्नी पतिव्रता ॥ ७ ॥
तरण्याख्या तु सामग्रीर्ददात्येव हि भावतः ।
जलं पुष्पं फलं चापि वस्त्रं भूषां घृतादिकम् ॥ ८ ॥
पुत्री तस्य तरलिका कन्या कुमारिका सती ।
शीघ्रं पूजासमयाद्वै पूर्वमुत्थाय नित्यदा ॥ ९ ॥
स्नात्वा नत्वा स्वपितरौ देवं नत्वाऽतिभावतः ।
चुल्हिकां वह्नियुक्तां च विधाय त्वरिता सती ॥१०॥
दुग्धपाकं पूरिकाश्च पक्त्वा नैवेद्यमुत्तमम् ।
समर्पयति कृष्णाय विष्णवे चातिभक्तितः ॥११॥
द्वितीया कन्यका नाम्ना कुमुदा सर्वदा प्रगे ।
गां निजां दोहयित्वैव क्षीरं ददाति चार्चने ॥१२॥

दुग्धसारादिकं कृत्वा नित्यं ददाति चार्चने ।
पुत्रस्तस्य विनोदश्च देवपुष्पद्रुमाश्रये ॥१३॥
जलसेचनकार्यादि करोत्येव तु सेवनम् ।
पात्राणां मञ्जनं धूपं दीपं जलार्पणादिकम् ॥१४॥
करोति सर्वदा पार्श्वे पितुः स्थित्वा यथास्थलम् ।
द्वितीयस्तस्य पुत्रोऽपि वसन्तर्षिश्च वैष्णवः ॥१५॥
वायुदानं व्यजनेन करोति पूजनादिषु ।
मक्षिकाद्रावणं चापि शर्करातुलसीदलम् ॥१६॥
फलान्यपि ददात्येव यथापेक्षं च सेवनम् ।
अथ पूजोत्तरं सर्वे कुर्वन्ति स्तवनं प्रभोः ॥१७॥
प्रदक्षिणं दण्डवच्च पुष्पाञ्जलिं ददत्यपि ।
क्षमायाच्ञां प्रकुर्वन्ति ततो नृत्यन्ति वै मुदा ॥१८॥
वादयन्ति सुवाद्यानि कीर्तयन्ति प्रगीतिकाः ।
गायन्ति तालमानाद्यैर्विविधैर्नर्तनैः सदा ॥१९॥
एवं संपूजयित्वा च रमाकान्तं सदा पतिम् ।
ततः प्रसादं भक्तेभ्यः संविभज्य प्रदाय च ॥२०॥
गृहिणस्ते समश्नन्ति शर्करान्नजलादिकम् ।
मध्याह्ने च तथा सायं पूजयन्ति विधानतः ॥२१॥
जीविकार्थे तु दिवसे यतन्तेऽपेक्षितं मनाक् ।
एवं प्रयाते समये भगवान् पुरुषोत्तमः ॥२२॥
सुप्रसन्नोऽतिभक्त्यैव साक्षाद् बभूव चैकदा ।
आषाढे कृष्णपक्षे वै रात्रावेकादशीव्रते ॥२३॥
मुकुटं धारयन् रम्यं वक्रं सौवर्णमुत्तमम् ।
मयूरवर्यपिच्छाग्रं मणिरत्नादिशोभितम् ॥२४॥
कुण्डले मकराकारे दधन् रम्ये तु कर्णयोः ।
तिलकं कौंकुमं मध्ये भाले बिभ्रत् सुचन्द्रकम् ॥२५॥
मन्दहास्याननो दिव्यस्मेराकर्षितमानसः ।
कण्ठे सुकौस्तुभहारान् तुलसीपत्रमालिकाः ॥२६॥
सौवर्णहारमालालीन् दधन् कट्यां तु मेखलाम् ।
सौवर्णौ कटके चापि भुजयोश्च प्रकोष्ठयोः ॥२७॥
शृंखले स्वर्णजे रम्येऽङ्गुलीयकोर्मिकाः करे ।
यष्टिं च पौरटीं मुक्तामाणिक्यहीरकान्विताम् ॥२८॥
पादुके रम्यसौवर्णजनिते धारयन् हरिः ।
पीताम्बरश्च रुचिरो व्यदृश्यत यदृच्छया ॥२९॥
तेजोमण्डलमध्यस्थो दासदासीगणार्चितः ।
युवा राजाधिराजश्च राधारमादिसेवितः ॥३०॥
ततो भक्तान् तिरोभाव्य किशोरोऽभूत् स्वयंप्रभुः ।
बालकृष्णस्वरूपः श्रीमहाराजाधिराजकः ॥३१॥

किशोरो भगवान् कृष्णो ददौ मन्त्रं स्वयं प्रभुः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥३२॥
ददौ च मस्तके हस्तं प्रभुस्तत्र तिरोऽभवत् ।
एवं ततो दिनान्नित्यं प्रारभ्योषःसमर्चने ॥३३॥
पूजायां श्रीमहाराजो नित्यमायाति केशवः ।
किशोरः श्रीकृष्णनारायणः श्रीभूप्रसेवितः ॥३४॥
सर्वोपचारान् गृह्णाति पूजायामर्पितानि वै ।
श्रावणे भाद्रके मासे तथाऽऽश्विनेऽपि वै प्रभुः ॥३५॥
पूजां तेषाममायां वै गृहीत्वा प्राह तान् हरिः ।
ऊर्जकृष्णदलाष्टम्यां मम जन्ममहोत्सवः ॥३६॥
चतुर्दशोऽश्वसरस्तटेऽक्षराख्यभूतले ।
भविष्यतीति युष्माभिश्चागन्तव्यं मम गृहम् ॥३७॥
पितृभ्यां चापि कन्याभिः पुत्रैः सह ममालये ।
आगमिष्यन्ति त्रैलोक्येश्वरा ममार्चनाय यत् ॥३८॥
इत्युक्त्वा भगवाँस्तेभ्यो भक्तेभ्योऽथ तिरोऽभवत् ।
भक्तास्ते तीर्थयात्रार्थं समुत्सुकास्ततोऽभवन् ॥३९॥
षष्ठ्यां प्रसाध्य पाथेयं गृहं पिधाय तालकैः ।
उपदाः सुभगा गृह्य पद्भ्यां प्रस्थानमाचरत् ॥४०॥
सप्तम्यां सायमेवैते प्रापुस्त्वश्वसरोवरम् ।
दृष्ट्वा कुंकुमवापीं च तथा श्रीलोमशाश्रमम् ॥४१॥
ऋषीन् सतीः साधुजनान् देवान् देवालयान् बहून् ।
क्षेत्रपान् क्षेत्ररक्षाँश्च नगरं वाटिकादिकाः ॥४२॥
उद्यानानि विचित्राणि दैववृक्षवनानि च ।
यज्ञशालाः कथाशाला धर्मशाला महालयान् ॥४३॥
दृष्ट्वा श्रीकम्भरालक्ष्मीं श्रीगोपालं हरिं तथा ।
दैवीं भूमिं विलोक्यैव ब्रह्मप्रियाश्च कन्यकाः ॥४४॥
विमानानि सुदिव्यानि मुक्तान् सौधान् समन्ततः ।
अवापुः परमाश्चर्यं परमेश्वरमद्भुतम् ॥४५॥
अनादिश्रीकृष्णनारायणं नत्वाऽऽर्च्य वै ततः ।
सत्कृता भोजितास्तेन नारायणेन ते जनाः ॥४६॥
न्यूषुः रात्रिं महीमानगृहे सौधेऽतिसुन्दरे ।
चक्रुर्जागरणं रात्रौ सप्तम्यां प्रेमविह्वलाः ॥४७॥
ददृशुर्व्योममार्गेण विमानान्यागतानि ते ।
येषु मुक्तास्त्वक्षरस्य तथा गोलोकवासिनः ॥४८॥
वैकुण्ठस्य तथा मुक्ता वैराजाऽमृतवासिनः ।
ब्रह्मविष्णुमहेशाद्या ईश्वराः पितरस्तथा ॥४९॥
ऋषयः स्वर्गिणो देवा मेर्वाश्रयाः सुरादयः ।
दिक्पाला लोकपालाश्च मानवाः साधवोऽमलाः ॥५०॥

सिद्धाः साध्व्यः सतीनार्यः सांख्ययोगिन्य इत्यपि ।
नदा नद्यश्च तीर्थानि समुद्राः ऋतवस्तथा ॥५१॥
मासा गुणा अरण्यानि पातालवासिनोऽसुराः ।
दिव्या भक्तास्तथा दैत्या दानवाश्चारणादयः ॥५२॥
राजानो दिव्यभक्ताश्च संस्थिताः सन्ति येषु वै ।
तादृशानि विमानानि सूर्यचन्द्रनिभानि वै ॥५३॥
कुमारीगणगीतैश्चोद्घोषितानि शुभानि च ।
वाद्यनादातिशब्दानि व्योम्नोऽवतेरुरक्षरे ॥५४॥
क्षेत्रे कुंकुमवाप्यास्तु सन्निधौ वै सहस्रशः ।
तेषां प्रभाः प्रकाशाश्च कोटिचन्द्रसमास्तदा ॥५५॥
अभवन् गगने भूमौ नगरे सर्वतो दिशि ।
रजोमात्रं नान्धकारस्तत्राऽभूद्धामसदृशे ॥५६॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् प्रभुः ।
तथा गोपालकृष्णाख्यः पिता माता तु कम्भरा ॥५७॥
सन्तोषा च स्वसा भ्राता भगवाँश्च शुकस्तथा ।
वल्लभश्चाऽथ वै हेमन्तकोऽपि भगवाँस्तथा ॥५८॥
दासौ द्वौ मञ्जुला हंसा सगुणा च सखीगणः ।
स्वागतं वासमर्घ्यं च मधुपर्कं ददुः सुखम् ॥५९॥
अथ वै ब्राह्मसमये वेदानूचुर्महर्षयः ।
तदा मंगलतूर्याणि त्ववाद्यन्त समन्ततः ॥६०॥
मुनयो भजनं चक्रुः साधवो ध्यानमाचरन् ।
जनाश्चापि महीमाना ययुः स्नातुं सरोवरम् ॥६१॥
सन्तारणो द्विजश्चापि तरणिस्तस्य भामिनी ।
तरला च कुमुदा च विनोदश्च वसन्तकः ॥६२॥
सर्वे ते वै कुटुम्बं च स्मृत्वा कृष्णनरायणम् ।
ययुः स्नातुं चाश्वपट्टसरोवरजले तदा ॥६३॥
नौकामादाय शबरं तीरस्थं ते व्यलोकयन् ।
विहर्तुमानसा वार्धौ नावमारुरुहुश्च ते ॥६४॥
शुल्कं दत्वा निषेदुश्च नाविको नावमैरयत् ।
जलमध्ये गता नौका क्रोशादप्यधिकं यदा ॥६५॥
तदा नौका अपराश्च मानवैरधिरोहिताः ।
शतशश्चापि सरसो मध्ये तटे समन्ततः ॥६६॥
विहरन्ति स्म जलधौ सुखान्ननु सरोवरे ।
यदृच्छया महत्या सा नौकया सह वै तदा ॥६७॥
आघातं सहसा प्राप्य वक्रा चाधोमुखी क्षणात् ।
अभवत् तद्वयेनैते नौकास्थाः सहसा तदा ॥६८॥
एकपार्श्वेऽपसस्रुश्च पतिताः सलिलान्तरे ।
नौकाऽपि जलमध्ये सा मग्ना जलप्रपूरिता ॥६९॥
अत्रोपायो न चैवाऽस्ति समुद्धर्तुं तदा हि तान् ।
महत्या नौकया चापि तथा नौकाभिरेव च ॥७०॥
सहसा तत्र ते सर्वे धीवरैः परिमार्गिताः ।
अगाधे तु जले तत्र मग्नाः षडेव तत्क्षणात् ॥७१॥
तरणस्य कलां नैते जानन्ति तेन हेतुना ।
सरस्येव तले मग्ना धीवराणां न हस्तगाः ॥७२॥
अभवँस्ते तले मग्नाः पपुर्जलं विशेषतः ।
सस्मरुः श्रीकृष्णनारायणं श्रीपरमेश्वरम् ॥७३॥
आर्तिहं त्राणकर्तारं निराधारजलान्तरे ।
तुष्टुवुर्मनसा मृत्युपाशाधीनाश्च वै हरिम् ॥७४॥
जलमग्नां महीं यश्च समुद्दधार सूकरः ।
जलस्थां च महानौकां जग्राह मकरश्च यः ॥७५॥
जलमग्नं महाशैलं पृष्ठे कूर्मो दधार यः ।
जलमग्नं गजं भक्तं यो ररक्ष प्रभुर्हरिः ॥७६॥
जलमग्नं च वणिजं ररक्ष भगवाँस्तु यः ।
जलमग्नं महादेशं चोष्ट्रालयं ररक्ष यः ॥७७॥
जलमग्नं नृपं यश्च ररक्षोदयनं पुरा ।
मांझांत्रिकां जलमग्नां समुद्रे संररक्ष यः ॥७८॥
एवं चान्यान् जलमग्नान् ररक्ष बहुधा प्रभुः ।
निजभक्तान् यदि सत्यान् मन्यसे त्वं नरायण ॥७९॥
तदाऽस्मान् दयया कृष्ण सन्तारय जलान्तरात् ।
मृत्युस्ते सर्वदाऽधीनः कालस्ते कवलस्तथा ॥८०॥
जलं प्राणनिरोधश्च तव शक्तिवशौ सदा ।
अन्तरात्मा भवानास्ते त्वकालमृत्युहारकः ॥८१॥
हर दुःखानि देवेश यदि त्रातुं हि मन्यसे ।
त्वं नौकास्त्वं महाप्राणस्त्वं जीवस्त्वं च जीवनम् ॥८२॥
त्वमेव जलमध्ये वै प्रह्लादं प्राणदोऽभवः ।
नास्ति स्तुतेस्तु समयः प्राणा जलनिरोधिताः ॥८३॥
स्थैर्यं यान्ति हृदात्मा च मूर्धानं प्रतिगच्छति ।
क्षणं मृत्योर्मध्यवर्ति विद्यते नाऽधिकं ततः ॥८४॥
इत्येवं ते जलमध्ये राधिकेऽतीव मूर्छिताः ।
स्तुत्वाऽर्पणं च शरणं जग्मुः श्रीकम्भरासुतम् ॥८५॥
सर्वज्ञो भगवान् श्रीशो बालकृष्णस्त्वरायुतः ।
धृत्वा वै कामठं रूपं महाकच्छपमुत्तमम् ॥८६॥

षड्भक्तान् सहसा पृष्ठे धृत्वा तांश्च जलोपरि ।
आनयामास भगवान् निर्नौकाजलमस्तके ॥८७॥
मूर्छां जलं च सहसा बालरूपधरः प्रभुः ।
हस्ताभ्यां च मुहुः स्पृष्ट्वा वारयामास तत्क्षणम् ॥८८॥
पीतं जलं विलीनं च करस्पर्शनमात्रः ।
मूर्छा दूरं गता चापि मानवन्तोऽभवँश्च ते ॥८९॥
स्वाँस्तदा महति कूर्मे स्थितान् ददृशुरन्तिके ।
बालं गोपालकृष्णस्य रक्षकं ददृशुस्तथा ॥९०॥
दिव्यरूपधरं कृष्णं दृष्ट्वा शान्तिं परां ययुः ।
मार्गयद्भिर्जनैः षट् ते दृष्टा वै कमठोपरि ॥९१॥
अनादिश्रीकृष्णनारायणेन रक्षिता इति ।
सहसा ते तदा याता नौकायां कूर्मपृष्ठतः ॥९२॥
जगृहुस्तान् नाविका वै कूर्मश्चाऽदृश्यतां गतः ।
शंखचक्रगदापद्मधरोऽभूद् भगवान् हि सः ॥९३॥
सर्वैरेवं क्षणं दृष्टः कूर्मो जलान्तरे नरः ।
बालकृष्णे लयं यातश्चैवं दृष्टो जनैस्ततः ॥९४॥
नौकया तान् समगृह्य तीरमानीय तत्यजुः ।
आश्चर्यं श्रीबालकृष्णचमत्कारात्मकं प्रजाः ॥९५॥
आविदन् रक्षकं कृष्णं भेजुर्वै भावतस्ततः ।
अथ जन्मोत्सवपूजां कर्तुं ततश्च मण्डपे ॥९६॥
आययुरीश्वरा मुक्ता देवा देव्यश्च देहिनः ।
पूजनं सर्ववस्त्वाद्यैर्व्यधुश्चारार्त्रिकं व्यधुः ॥९७॥
उपदाश्चार्पयामासुस्तथा प्रददुराशिषः ।
श्रीगोपालो महीमानान् भोजयामास सर्वशः ॥९८॥
दत्वा दानानि बहूनि मत्वोपकृतिमुत्तमाम् ।
सर्वान् विसर्जयामास महीमानान् ययुश्च ते ॥९९॥
सन्तारणो द्विजस्तत्र बालकृष्णाय वै तदा ।
कन्याद्वयमतं ज्ञात्वा कन्याद्वयं ददौ मुदा ॥१००॥
जग्राह भगवान् कन्यारत्नद्वयं श्रियः पतिः ।
कन्यके कृतकृत्ये च सञ्जाते पतिलाभतः ॥१०१॥
लोमशस्याऽऽश्रमे चोभे लोमशाय हरिर्ददौ ।
रक्षितुं कन्यके ब्रह्मप्रियाभिः सह माधवः ॥१०२॥
सन्तारणः सपत्नीकः सपुत्रः श्रीहरेस्तदा ।
पूजां जन्मोत्सवं कृत्वा दृष्ट्वा कृतेष्टकोऽभवत् ॥१०३॥
आज्ञामादाय स विप्रो ययौ जयन्तपत्तनम् ।
राधिके तन्महातीर्थं शुभं सन्तारणाभिधम् ॥१०४॥
अभवद् यत्र वै कूर्मो राजते भगवान् स्वयम् ।
तीरे मन्दिरमध्ये च स्नानात् संसारतारकः ॥१०५॥
पठनाच्छ्रवणाच्चापि पापतापात्स तारयेत् ।
स्मरणादस्य मोक्षः स्यात् किं पुनः सेवनात्प्रभोः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽश्वपट्टसरोवरे चतुर्दशवर्षीयबालकृष्णाष्टमीप्रातःकाले जलमग्नानां सन्तारणादिविप्राणां कूर्मरूपेणोद्धरणमित्यादिनिरूपणनामाऽष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

**श्रीकृष्ण उवाच—**

शृणु चान्यं चमत्कारं राधे ! भक्तस्य वै हरेः ।
नाम्ना देवायतनस्य सौराष्ट्रवासिनः प्रिये ॥ १ ॥
ग्रामे समाधियानाख्ये भक्तोऽभवच्छुभाश्रयः ।
आभीरजातिमूर्धन्यो देवायतनसंज्ञकः ॥ २ ॥
नित्यस्नानपरोऽनादिकृष्णनारायणाश्रितः ।
हरे कृष्ण हरे स्वामिन् हरे नारायण प्रभो ॥ ३ ॥
श्रीगोपाल हरे कृष्ण कम्भराश्रि रमे सति ! ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥ ४ ॥
अक्षरेश प्रभाराधामाणिकीपार्वतीपते ।
सत्पते मुक्तधामेश बालकृष्ण हरे हरे ॥ ५ ॥
एवं नित्यं कीर्तनं स करोति सरितस्तटे ।
वालुकासु जले चापि वृक्षाश्रये च भूतले ॥ ६ ॥
गृहे क्षेत्रे वाटिकासूद्यानेऽरण्ये वनेऽपि च ।
सर्वकर्मसु कृष्णं तं परमेशं स्मरत्यथ ॥ ७ ॥
भोजने शयने याने गमने चासने सदा ।
क्रीडे क्षुतौ चाप्लवने शौचे चालस्यमन्दिरे ॥ ८ ॥
चत्वरे च सभायां च जातिकुटुम्बकोत्सवे ।
सूतके शोकविषये हर्षस्थानेऽपि सर्वदा ॥ ९ ॥
हरे कृष्ण हरे स्वामिन् तालीवादनपूर्वकम् ।
नामसंकीर्तनं कृष्णनारायणस्य सर्वदा ॥१०॥
श्रद्धया स करोत्येव स्नानोत्तरं च पूजनम् ।
अनादिश्रीकृष्णनारायणमूर्तेः करोति च ॥११॥
आरार्त्रिकं च नैवेद्यं फलान्नजलशोभितम् ।
ददात्येव भगवते भावप्रेमप्रपूरितः ॥१२॥
ग्रामे देशे जनास्तं तु देवायतर्षिसंज्ञया ।
प्राहुर्देवायतर्षिश्चैकदा वृक्षतले स्थितः ॥१३॥
टिम्बुरुफलमादाय पक्वं मिष्टं सुखप्रदम् ।
सस्मार श्रीकृष्णनारायणं निवेदनाय वै ॥१४॥
अनादिश्रीकृष्णनारायणो भक्त्या वशंगतः ।
आययौ तुम्बुरुवृक्षस्थले यत्र स भक्तराट् ॥१५॥

बालगोपालवेषो वै समागत्य हसँस्तदा ।
देवायतनहस्ताभ्यां तुम्बुरुद्रुफलानि तु ॥१६॥
पक्वमिष्टानि संगृह्य बुभुजे मिष्टतद्रसम् ।
भक्तो देवायतनर्षिश्चारुफलानि संददौ ॥१७॥
प्रसादं कृष्णदत्तं च भुंक्ते नृत्यति शंसति ।
तल्लीनो मूर्तिसंमग्नो दिव्यदृग् दिव्यदेहवान् ॥१८॥
अभवद् बन्धनशून्यो व्योमाक्रमणशक्तिमान् ।
बालकृष्णः फलान्यत्त्वा नदीं यातो जलाय तु ॥१९॥
देवायनोऽपि तत्पृष्ठे नदीं यातो जलाय वै ।
कृष्णाकृष्टेन्द्रियप्राणवर्ष्मा वाटं ययावनु ॥२०॥
पर्वतान् वनवृक्षादीन् समुल्लंघ्य हरिं त्वनु ।
जगाम व्योममार्गेण निरावरणदेहवान् ॥२१॥
आययौ कुंकुमवापीक्षेत्रं प्वाश्वसरोवरम् ।
श्रीहरिं ध्यानवृत्त्या वै लक्ष्यीकृत्य सरोवरे ॥२२॥
सस्नौ श्रीकृष्णयोगेन सोपानैश्च जलान्तरे ।
देहं विस्मृत्य सलिले मग्नोऽभूल्लीलया क्षणात् ॥२३॥
देहो वै जलमध्ये सन्तिष्ठन्नेव जलाविलः ।
जलं पीत्वाऽऽत्मना दिव्यो भूत्वा वै स जलोपरि ॥२४॥
हरे कृष्ण हरे स्वामिन्नेवं रटन् बहिस्तटे ।
निर्गत्य दिव्यदेहेन क्षणं तस्थौ च यावता ॥२५॥
तावत् तस्य समायातो विचारो जीवतारकः ।
यद्यहं दिव्यदेहेन कारयामि प्रजासु तु ॥२६॥
भजनं कीर्तनं विष्णोर्जीवा यास्यन्ति मोक्षणम् ।
इत्येवं संविचार्यैव भजनं श्रीहरे हरे ॥२७॥
कुर्वन् त्वारण्यकं व्याघ्रं सिंहारण्यं ततः परम् ।
ततः संयमनीं याम्यां पुरीं गत्वाऽप्यकीर्तयत् ॥२८॥
हरे कृष्ण हरे स्वामिन् हरे नारायण प्रभो ।
श्रीगोपाल हरे कृष्ण कंभराश्रि हरे विभो ॥२९॥
बालकृष्ण रमाराधालक्ष्मीपारवतीपते ।
कमलेश प्रभामाणिकीश नारायण प्रभो ॥३०॥
इत्येवं भजनं चक्रे नामकीर्तनघोषणाम् ।
श्रुत्वा याम्यनिगडस्था विपाशा बन्धनच्युताः ॥३१॥
बभूवुः सहसा शुद्धाः पापतापविवर्जिताः ।
मुक्तियोग्या दिव्यदेहा वैकुण्ठयोग्यदेहिनः ॥३२॥
पुण्यदेहाश्च ते भूत्वा श्रुत्वा नाम हरेर्मुहुः ।
धर्मराजं नमस्कृत्य ययुर्ब्रह्म सनातनम् ॥३३॥
देवायनोऽपि याम्याना भ्रमित्वा सर्वभूमिषु ।
बालकृष्णस्य च हरेः श्रावयित्वाऽभिधां मुहुः ॥३४॥
प्रज्वाल्य पापिपापानि प्रेषयामास धाम च ।
यमदूता विलोक्यैतन्महाश्चर्यं यमं प्रति ॥३५॥
त्वरिताः प्रययुर्विज्ञापयामासुरनिष्टकम् ।
यमराज महाबाहो कारागाराणि पापिनाम् ॥३६॥
केनचित्तु समागत्य संश्राव्य नाम वै हरेः ।
विधाप्यन्ते तु रिक्तानि प्रयान्ति ब्रह्म पापिनः ॥३७॥
पुण्यदेहाः पुण्यरूपाः पुण्यात्मानो विहायसा ।
दिव्ययानेन वै गन्तुं समर्थास्ते प्रयान्ति हि ॥३८॥
नाऽस्माँस्ते गणयन्त्यत्र योजितान् दण्डदायिनः ।
तिरस्कृत्य च नः सर्वान् प्रदर्श्याङ्गुष्ठदन्तकान् ॥३९॥
विहस्याऽस्मान् प्रयान्त्येते पश्य रिक्तं पुरं तव ।
इत्युक्तो यमराजोऽसौ यावत् पश्यति पत्तनम् ॥४०॥
याम्यं सर्वं दण्डलोकं रिक्तं संदृष्टवाँस्ततः ।
तं ददर्श दिव्यदेहं भक्तं देवायनं हरेः ॥४१॥
नाम गृणन्तं तानेन श्रावयन्तं च नारकान् ।
प्रक्षालयन्तं पापानि कुर्वन्तं दिव्यमुक्तताम् ॥४२॥
प्रेषयन्तं हरेर्धाम बलिष्ठं सात्त्वतं स्थितम् ।
यमराजो विलोक्यैनं भक्तं ननाम भावतः ॥४३॥
प्राह स्वागतमर्घ्यं च मधुपर्कं ददौ तथा ।
आसनं प्रददौ तस्मै उपाविवेश भक्तराट् ॥४४॥
पप्रच्छ कुशलं सर्वं निरामयं च नाम च ।
आगमं चेति भक्तस्य भक्तो जगाद वै शुभम् ॥४५॥
यमः प्राह हरेर्नाम पापिनां पापनाशकम् ।
भवान् गृह्णाति भक्ताग्र्य तद्योग्यं वै विधीयते ॥४६॥
संसारोऽयं तु पापिष्ठो दुःखदः कर्मभिर्वृतः ।
कर्मणा जायते जन्तुः कर्मणैव विलीयते ॥४७॥
कर्मणा भुज्यते दुःखं कर्मणा सुखमाप्यते ।
साधुकर्मप्रकर्ता वै स्वर्गं प्राप्नोति चैश्वरम् ॥४८॥
असाधुकर्मकर्ता वै नारकं दुःखमृच्छति ।
अधर्मकृतकार्याणां पापिनां दण्डहेतवे ॥४९॥
विष्णुना दण्डशालाऽत्र निर्मिता विद्यते सदा ।
तत्राऽहं सूर्यपुत्रोऽस्मि नियुक्तो धर्मदेहवान् ॥५०॥
धर्मरूपस्य मे पुत्रो हरिर्नारायणः स्वयम् ।
कृष्णो नरश्च ते पुत्राश्चत्वारो मम वै पुरा ॥५१॥
विशालायां बदर्यां वै मानसा ह्यभवँश्च मे ।
तन्नाम्ना सर्वदा पापिपापानि प्रज्वलन्ति हि ॥५२॥
मुक्तिं प्रयान्ति जीवाश्च कर्मभूमेर्बलात् खलु ।
यमस्य नगरं त्वेतद् दण्डशाला हि केवला ॥५३॥

नैषा कर्मक्षितिश्चास्ते नाऽत्र भक्तप्रवेशनम् ।
अन्तरेण फलभुक्तिं नाऽस्मात् स्थानान्निवर्तनम् ।।५४।।
इत्येवं श्रीहरेराज्ञा मनोराज्ञा विधेस्तथा ।
तामनुसृत्य चैवाऽत्र फलं ददामि देहिने ।।५५।।
तन्मध्ये न क्षतिः कार्या येन केनापि वै क्वचित् ।
इत्येवं नियमस्त्वद्य भक्त त्वया प्रधर्षितः ।।५६।।
अविगणय्य कृष्णस्य नियमं यद् भवानिह ।
समागतोऽस्ति पापानां विनाशको विमुक्तिदः ।।५७।।
तद् योग्यं न कृतं भक्त मा हरेः कीर्तनं कुरु ।
इत्येवं चानुनीतोऽपि न मेने श्रीहरेर्बलात् ।।५८।।
प्राह भक्तो यमं तत्र मुञ्चेदं व्याधपत्तनम् ।
हरेर्नाम्ना तु ते धर्मं मुक्तिं करोमि तेऽपि च ।।५९।।
हरे कृष्ण हरे स्वामिन् वद नारायणेति च ।
भजैनं श्रीबालकृष्णं वाचमन्यां विमुञ्च वै ।।६०।।
तं विदित्वा चातिमृत्युमुपैति नेतरा सृतिः ।
मोक्षार्थं खलु जीवानां मुक्तिदानं परं मतम् ।।६१।।
दीनाऽनाथदरिद्राणामशक्तानां प्रमोक्षणम् ।
अज्ञानां चाऽप्यसुराणां रक्षसां मोक्षणं सदा ।।६२।।
कार्यं विजानता नित्यं संसारे पापसंकुले ।
मया त्वत्र समागत्य पापिनां पापवार्धयः ।।६३।।
प्रदह्यन्ते हरेर्नाम्ना तद् योग्यं क्रियते यम ।
एकोऽपि मानवस्त्वत्र नाम्ना चेदुद्धरेदितः ।।६४।।
तस्य पुण्यस्य वै पारं नैव पश्यामि सूर्यज ।
यमदूताः कथं न्वेते रक्षिता राक्षसा इव ।।६५।।
दीयतां वै त्वया तेभ्यश्चाद्यदिनादभ्रत्यताम् ।
श्रवणाद्याश्चित्रगुप्ताः प्रगच्छन्तु च मोक्षणम् ।।६६।।
श्रावयामि हरेर्नाम कुर्वन्तु निर्जनां पुरीम् ।
वसन्तु भगवद्भक्ताः सर्वे दुःखविवर्जिताः ।।६७।।
प्रक्षालयन्तु यन्त्राणि पापिनां मोक्षणं कुरु ।
वैष्णवाश्च भवन्त्वेव सर्वे दयालुसात्त्वताः ।।६८।।
हरेर्नामबलात् सर्वान् मोक्षयिष्ये न संशयः ।
याम्यापुरी भवत्वेषा स्वर्गपुरी सुखान्विता ।।६९।।
पापिरिक्तां करोम्येषो भजनेन हरेरिह ।
यथेष्टं कुरु याम्येश भज नारायणं हरिम् ।।७०।।
इत्युक्त्वा च यमं नत्वा भजन्नारायणं हरिम् ।
बालकृष्णं हृदि धृत्वा ययौ कुण्डेषु पापिनाम् ।।७१।।
हरेकृष्ण हरेस्वामिन् हरेनारायण प्रभो ।
बालकृष्ण हरेकृष्ण श्रीपते पार्वतीपते ।।७२।।
परब्रह्माऽक्षरातीत माणिकीश रमापते ।
राधालक्ष्मीपते कृष्ण प्रभापतेऽव पापिनः ।।७३।।
इत्येवं करतालाभ्यां शब्दयन् कण्ठतस्तथा ।
पुरीं याम्यां सुखयंश्च पापिनः परितो ययौ ।।७४।।
असंख्यान् पापिनस्त्वेवं संश्राव्य कीर्तनं मनुम् ।
पापानि संप्रदाह्यैव प्रेषयामास चाक्षरम् ।।७५।।
यमराजो विह्वलः सन् ययौ कुंकुमवापिकाम् ।
अक्षरं परमं क्षेत्रं दिव्यं चाश्वसरोवरम् ।।७६।।
अकस्माच्छ्रीहरेश्चाग्रे त्वागत्य दण्डवत् भुवि ।
पतितः साश्रुनेत्रश्च मौनमास्थाय संस्थितः ।।७७।।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
जानन्नपि नूनाख्येन पप्रच्छैनं हि कारणम् ।।७८।।
जगाद यमराजोऽपि भक्तं याम्ये समागतम् ।
अर्पयन्तं प्रमुक्तिं च पापिभ्यो नामकीर्तनात् ।।७९।।
हरिः प्राह तु तच्छ्रुत्वा भक्ताऽधीनोऽस्म्यहं यम ।
भक्तेच्छापूरकश्चाऽस्मि भक्तवश्यः करोमि किम् ।।८०।।
न निरोद्धुमहं शक्तस्त्वेनं ब्रह्मादयोऽपि च ।
तस्माच्छृणु ममाज्ञां त्वं मा शुचश्चात्र संभवे ।।८१।।
एकवारं याम्यलोकं रिक्तं कारयितुं हि ते ।
मद्भक्ताय तु समयं देहि पश्चात् गमिष्यति ।।८२।।
रिक्तायां यमपुर्यां स नाऽवलोक्य तु पापिनः ।
कृतकार्यं तु मत्वा स्वं स्वयं गतो भविष्यति ।।८३।।
अद्य मे जनिदिवसश्चतुर्दशसमाकृतः ।
पापिनां निगडानां वै मोक्षणं भवताद् यम ।।८४।।
इत्युक्तो यमराजोऽपि कृष्णाज्ञां प्राप्य पूजनम् ।
हरेश्चकार विधिना मुमुदे सुखतः स्थितः ।।८५।।
भोजयामास भगवान् यमराजं ततः परम् ।
ददौ च मुकुटं तस्मै सौवर्णं मस्तके हरिः ।।८६।।
कण्ठे हारं च सौवर्णं रत्नहीरकशोभितम् ।
'ओंनमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।।८७।।
मन्त्रं ददौ च तुलसीमालां यमेश्वराय वै ।
पारितोष्यं ददौ मूर्तिं प्रतिमां स्वां सुवर्णजाम् ।।८८।।
ततश्च भगवान् बालकृष्णो जगाद सूर्यजम् ।
भक्तं देवायनं ब्रूहि जय कृष्णनरायण ।।८९।।
विमानं सर्वगाम्येतद् देहि तस्मै सुखास्पदम् ।
यात्रार्थं सर्वलोकानां कल्पवल्ल्यादि संश्रितम् ।।९०।।
अधिरुह्य प्रयाहि त्वं यमराज विमानकम् ।
प्रसादं तु मम नीत्वा देहि सर्वेभ्य एव च ।।९१।।

त्वत्पुरं पावनं चास्तु चाद्याऽपराधिवर्जितम् ।
देवायने प्रयाते तु पुनः पूर्णं भविष्यति ॥९२॥
इत्युक्तो यमराजः स राधिके श्रीहरिं तदा ।
नत्वा कृत्वा दण्डवच्च भूत्वा वै वैष्णवो महान् ॥९३॥
ययौ विमानवर्येण याम्यं नैजं पुरं पुनः ।
श्रावयामास सर्वेभ्यो यद्वृत्तं हरिसन्निधौ ॥९४॥
देवायनोऽपि यच्छ्रुत्वा मुमुदेऽति ननर्त च ।
नामसंकीर्तनं चक्रे भ्रमित्वा परितः पुरम् ॥९५॥
रिक्तं यमपुरं चक्रे संश्राव्य नाम वै हरेः ।
यमराजो ददौ तस्मै प्रसादं च विमानकम् ॥९६॥
यमदूताः पापिनां च पीडनं प्रजहुस्ततः ।
मोचिता निगडेभ्यश्च बन्धनेभ्यस्तथा तदा ॥९७॥
गताः सर्वे हरेर्नाम्ना स्वर्गं सत्यं सुखाश्रयम् ।
वैकुण्ठं चापि गोलोकं चाव्याकृतं तथाऽमृतम् ॥९८॥
अक्षरं धाम परमं निवर्तन्ते न यद्गताः ।
इत्येवं सुचमत्कारो दृष्टो जातो जनैस्तदा ॥९९॥
चतुर्दशस्थलोकैर्वै तथा धामनिवासिभिः ।
भुक्तिमुक्तिप्रदः कृष्णः समर्थो न करोति किम् ॥१००॥
यस्य सर्वं यत्र सर्वं यद्वशे सर्वमेव च ।
यस्मात् सर्वं स वै शास्ता किं न करोति राधिके ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने देवायतनर्षिभक्तो यमपुर्यां श्रीहरेर्नामसंकीर्तनं कृत्वा याम्यान् सर्वान् मोचयामासेत्यादिनिरूपणनामा नवदशाधिकशततमोऽध्यायः ॥ ११९ ॥

**श्रीकृष्ण उवाच—**

श्रृणु त्वं राधिके ! पश्चाद् याम्यलोकैः प्रपूजितः ।
देवायतनभक्तस्तु पूजां प्राप्य यमार्पिताम् ॥ १ ॥
विमानेन ययौ तस्मान्नैर्ऋतां दिशमेकलः ।
ददर्श नगरीं रम्यां स्वर्गतुल्यां सुवर्णजाम् ॥ २ ॥
निर्ऋतानां राक्षसानां प्रासादैरभिशोभिताम् ।
लक्षयोजनविस्तीर्णप्राकारपरिवेष्टिताम् ॥ ३ ॥
मृषामायेन्द्रजालानां शालाभिः ऋद्धिसंभृताम् ।
अर्बुदार्बुदपद्मानां राक्षसानां कुटुम्बकैः ॥ ४ ॥
निषेवितां महास्वर्गोपमां चाऽम्बरसंस्थिताम् ।
सूर्यवद् भ्राजमानां तां विलोक्य भक्तराट् तदा ॥ ५ ॥
दीर्घस्वरेण तालाद्यैः सहितं कीर्तनं हरेः ।
हरेकृष्ण हरेस्वामिन् हरेनारायण प्रभो ॥ ६ ॥
बालकृष्ण हरेकृष्ण परब्रह्म रमापते ।
लक्ष्मीपते माणिकीश पारवतीप्रभापते ॥ ७ ॥
श्रीगोपाल सतांपाल राधेश कंभरात्मज ।
अक्षरेश च गोपेश मुक्तेश कुंकुमाधिप ॥ ८ ॥
कृष्णनारायण विष्णो परमेश जनार्दन ।
मुक्तिनाथ महाविष्णो श्रीपते पुरुषोत्तम ॥ ९ ॥
एवं नैर्ऋतपुर्यां स विचरन्नम्बरे गृणन् ।
नामानि श्रावयामास नैर्ऋतेभ्यो मनुं तथा ॥१०॥
नैर्ऋताश्च प्रजालोकाः श्रुत्वा श्रुत्वा शुभां गिरम् ।
निष्पापा अभवन् रक्षोगणाश्च दिव्यविग्रहाः ॥११॥
रक्षोभावविहीनाश्च दिव्यपार्षददेहिनः ।
सम्भूय मुक्तरूपाश्च विहाय नगरीं निजाम् ॥१२॥
ययुर्भक्तबलेनैव कल्पलतोत्थवाहनैः ।
गजयानैर्विमानैश्च देवायनार्पितैस्तदा ॥१३॥
अक्षरं ब्रह्मलोकं ते तथा वैकुण्ठमित्यपि ।
तथा गोलोकमेवाऽन्येऽमृतं वाऽव्याकृतं परे ॥१४॥
यथेष्टं पार्षदा भूत्वा तत्तद्धामसु ते गताः ।
अनादिश्रीकृष्णनारायणनामश्रवेण ते ॥१५॥
महापुण्याब्धयो भूत्वा ययुर्वै ब्रह्म शाश्वतम् ।
अथ तस्मात्प्रदेशात् स व्योम्ना वै वारुणीं पुरीम् ॥१६॥
पश्चिमायां ययौ कुर्वन् नामसंकीर्तनं हरेः ।
लक्षयोजनविस्तीर्णप्राकारान्तःकृताश्रयाम् ॥१७॥
ददर्श तां भ्रमन् व्योम्ना विमानेन समन्ततः ।
श्रावयामास जनताः प्राचेतसीर्मुहुर्मुहुः ॥१८॥
ताः सर्वाश्च प्रजा दिव्या भूत्वा श्रुत्वाऽभिधां मनुम् ।
कल्पवल्लीकृतैर्यानैर्ययुस्ते धाम चैश्वरम् ॥१९॥
नरा नार्यो दिव्यदेहाः सर्वथा दिव्यरूपिणः ।
भिन्नधामानि च ययुर्देवायनसमागमात् ॥२०॥
अथ तस्मात्प्रदेशाच्च व्योम्ना वै वायवीं पुरीम् ।
ययौ देवायनो भक्तो गृणन्नाम हरेर्मुहुः ॥२१॥
वायूनां देवताः सर्वा मरुतां सृष्टयस्तथा ।
वायवीयशरीरास्ते श्रुत्वाऽभिधां मनुं हरेः ॥२२॥
लक्षयोजनमध्यस्थास्तदा पुरीप्रजाजनाः ।
दिव्यदेहधरा भूत्वा ययुर्धाम हरेः खलु ॥२३॥
विमानं तु भ्रमद् व्योम्ना सर्वां प्राचेतसीं पुरीम् ।
प्रजास्तत्र स्थिताः संश्रावयामास हरे हरे ॥२४॥
देवायनोऽपि ताः संप्रेषयामास हरेर्गृहम् ।
तथाऽन्यान्यपि धामानि कल्पवल्लीविमानकैः ॥२५॥

अथोत्तरां दिशं देवायनर्षिः प्रययौ ततः ।
कौबेरीं सुपुरीं लक्षयोजनायतदुर्गिकाम् ॥२६॥
ददर्शाऽम्बरमार्गेण गृणन् नाम मनुं हरेः ।
तां भ्रमन् सविमानेन तद्गतां यक्षकप्रजाम् ॥२७॥
श्रावयामास नामानि कृष्णनारायणप्रभो ।
हरेब्रह्म परब्रह्म यक्षान् मुक्तान् चकार सः ॥२८॥
क्षयं यातानि पापानि यक्षाणां पुण्यशालिनाम् ।
पुण्यान्येषां वर्धितानि नारायणश्रुतेर्बलात् ॥२९॥
दिव्यदेहास्ततो भूत्वा मुक्तदेहाः समन्ततः ।
कल्पवल्लीसमुत्पन्नविमानैरक्षरामिगैः ॥३०॥
ययुस्ते तां पुरीं त्यक्त्वा वैकुण्ठं च गवां स्थलीम् ।
अक्षरं ब्रह्म परमं प्रापुस्ते श्रीहरेर्बलात् ॥३१॥
अथ देवायनो भक्तो ययौ चेशानपालिताम् ।
दिशं विलोकयामास पुरीं तत्रेशपालिताम् ॥३२॥
लक्षयोजनदुर्गान्तर्वर्तिनीं रुद्रशोभिताम् ।
शतरुद्राः कोटिरुद्राः शंकरा ईशमूर्तयः ॥३३॥
ईशान्यो रुद्रपत्न्यश्च यत्राऽर्बुदाऽब्जकोटयः ।
भूताः प्रेताः पिशाचाश्च कूष्माण्डाश्च विनायकाः ॥३४॥
वेतालाश्च कुमाराश्च भैरवा गणकोटयः ।
वीराश्च भद्रदेवाश्च डाकिन्यः शाकिनीगणाः ॥३५॥
योगिन्यो योगिनश्चापि यतयश्च विरागिणः ।
वेताल्न्यश्च कूष्माण्ड्यः कृत्याश्च पूतनागणाः ॥३६॥
दुर्गाश्च नन्दिनश्चापि चण्डाश्चण्ड्यः सतीगणाः ।
एते यत्राऽसंख्यदासदासीगणावसन्ति हि ॥३७॥
ईशानस्य हरस्यैव दृष्टा देवायनेन हि ।
ततो विमानं व्योम्नि तद् भ्रामयामास भक्तराट् ॥३८॥
जगादोचैर्हरेर्नामाऽनादिकृष्णनरायण ।
कम्भरानन्दन विष्णो गोपालबाल माधव ॥३९॥
बालकृष्ण हरेकृष्ण पुरुषोत्तम केशव ।
अन्तरात्मन् प्रभाकान्त श्रीकान्त परमेश्वर ॥४०॥
हरेकृष्ण हरेस्वामिन् हरेनारायण प्रभो ।
स्वामिन्नारायण नारायणेश्वर रमेश्वर ॥४१॥
माणिक्येश्वर मायेश पार्वतीश्वर भूपते ।
लीलापते विभूतीश राधापते सतांपते ॥४२॥
श्रीवल्लभ श्रीपद्मेश श्रीकृष्ण श्रीनरायण ।
श्रीराम श्रीकमलेश मंगलायतन प्रभो ॥४३॥
इत्येवं स गृणन् कृष्णनामानि च मनुं हरेः ।
श्रावयामास सर्वांश्च मोक्षयामास कर्मतः ॥४४॥
दिव्यदेहमयान् कृत्वा धामयोग्यान् गणान् शुभान् ।
विष्णुतुल्यान् शंभुदासान् दासीः रमासमास्तथा ॥४५॥
प्रेषयामास वैकुण्ठं गोलोकं चाक्षरं तथा ।
अमृताख्यं दिव्यधामाऽव्याकृतं च किलासकम् ॥४६॥
साकेतं चापि ये यस्य योग्यास्तॉंस्तत्र चैरयत् ।
मुक्तिं कृत्वा तु वै तेषां नामकीर्तनतो हरेः ॥४७॥
विमानैः प्रेषयित्वैव ततः पूर्वां दिशं ययौ ।
उज्ज्वलां कोटिसूर्याभां ददर्शेन्द्रपुरीं शुभाम् ॥४८॥
लक्षयोजनप्राकारवर्तिनीं स्मृद्धिसंभृताम् ।
राजधानीं दिवो रम्यां लोकपालालयां पराम् ॥४९॥
सर्वसुवर्णप्रासादां दिक्पालाद्यधिवासिताम् ।
ग्रहनक्षत्रताराणां प्रासादैरभिशोभिताम् ॥५०॥
केतूनां सुरवर्गाणामालयैरभितः कृताम् ।
मन्दिरैः सर्वसिद्धीनां वसूनां च सुमन्दिरैः ॥५१॥
निधीनां मन्दिरैश्चापि सप्तर्षीणां निवासनैः ।
कृत्तिकानां महासौधैर्दिशां प्रासादकैर्युताम् ॥५२॥
रुद्राणां चापि सूर्याणां कामानां चालयैर्युताम् ।
मनूनां च कलानां च तिथीनां मन्दिरैर्युताम् ॥५३॥
मरुतां वालखिल्यानां चारुणानां निवासनैः ।
देवीनामप्सरसां ब्रह्मसरसां तथालयैः ॥५४॥
तत्त्वानां सुसमुद्यानैः कल्पद्रुमैः समन्ततः ।
अमृतानां च कुल्याभिर्ब्रह्मवाप्यभिशोभिताम् ॥५५॥
सूतैर्मागधलोकैश्च बन्दीजनैः प्रसेविताम् ।
भाटचारणगन्धर्वैः किम्पुरुषैश्च किन्नरैः ॥५६॥
साध्यदेवैर्विश्वदेवैः सिद्धैश्च राजभिर्युताम् ।
सर्वश्रेष्ठां राजधानीं विलोक्य चातिसंभृताम् ॥५७॥
विविधैर्देहिभिः रम्यां भिन्नजातीयवासिभिः ।
हर्षं प्राप्याऽतिवेगेन देवायनर्षिरुत्सुकः ॥५८॥
कीर्तयामास नामानि बालकृष्णस्य वै मनुम् ।
हरेकृष्ण हरेस्वामिन् हरेनारायण प्रभो ॥५९॥
बालकृष्ण हरेकृष्ण रामकृष्ण जनार्दन ।
श्रीगोपाल सतांपाल कंभरानन्दन प्रभो ॥६०॥
ब्रह्मप्रियापते राधापते रमापते विभो ।
आत्मपते प्राणपते परब्रह्म परेश्वर ॥६१॥
सर्वलोकपते कृष्णनारायण प्रभापते ।
माणिक्येश्वर मायेश सुरेश्वरेश्वरेश्वर ॥६२॥
श्रीभूपारवतीकान्त स्वामिन्नारायण प्रभो ।
अक्षरेश्वर मुक्तेश मोक्षप्रद महाप्रभो ॥६३॥

बालकृष्ण हरेकृष्ण लक्ष्मीकान्त दिवस्पते ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥६४॥
नारायणेश कृष्णेश कृष्णवल्लभसत्पते ।
विद्याव्यासाऽवतारेश नरनारायण प्रभो ॥६५॥
एवं नामानि बहुधा गृणन् तालीं प्रवादयन् ।
भ्रामयन् स्वं विमानं चाभितश्चैन्द्रीं पुरीं तदा ॥६६॥
राधिके ! भक्तराट् देवायतनः सात्त्वताग्रणीः ।
मोक्षयामास देवाँश्च महेन्द्रपुरवासिनः ॥६७॥
दिव्यदेहान् मुक्तदेहान् धामयोग्यान् विधाय सः ।
प्रेषयामास कल्पद्रुलतोत्थैश्च विमानकैः ॥६८॥
वैकुण्ठं चामृतं चाव्याकृतं गोलोकमक्षरम् ।
परमं धाम मुक्तानां वासार्हं कार्ष्णवाल्लभम् ॥६९॥
धर्मभक्तियुतं सर्वस्वामिना परमात्मना ।
अधिष्ठितं परंधाम परमेशनिषेवितम् ॥७०॥
देवा नैकविधा देव्यो दिव्यदेहाश्चतुर्भुजाः ।
द्विभुजाश्चाऽष्टहस्ताश्च तथा षोडशबाहवः ॥७१॥
भूत्वा भूत्वा च नामानि श्रुत्वा धाम ययुर्हरेः ।
एवं स्वर्गस्थितान् कृत्वा मुक्तान् नाम्नां प्रकीर्तनैः ॥७२॥
देवायतनभक्तश्च ययावग्निपुरीं ततः ।
यत्राऽग्नयो विभिन्नाश्च वसन्ति कोट्यसंख्यकाः ॥७३॥
गर्भाग्नयश्च पाकानामग्नयो जाठराग्नयः ।
ऊष्माग्नयस्तथा होमाग्नयः क्ष्वेडाग्नयस्तथा ॥७४॥
चिन्ताग्नयस्तथा देवाग्नयश्चिताग्नयस्तथा ।
दावाग्नयः शीतवह्निगणाश्चामाग्नयस्तथा ॥७५॥
प्रेताग्नयश्च देवानां मुखरूपाग्नयस्तथा ।
पावकः पवमानश्च पविः श्मशानजास्तथा ॥७६॥
घटाग्नयः सर्वभक्षा हव्यभक्षाग्नयस्तथा ।
वडवानलरूपाश्च तथा मेघानलादयः ॥७७॥
आर्तवा अग्नयश्चापि क्रूराः सौम्या गणास्तथा ।
खन्यग्नयश्च भूतानामग्नयो भिन्नजातयः ॥७८॥
श्वेता रक्तास्तथा कृष्णा नीला पीता हरिद्गुणाः ।
कपीशाः सप्तजिह्वाश्च बहुजिह्वाः प्रदाहकाः ॥७९॥
तान् सर्वान् वीक्ष्य भक्तेशोऽम्बरे विमानसंस्थितः ।
कीर्तयामास बहुधोच्चकैर्नामानि वै हरेः ॥८०॥
मनुं संश्रावयामास हरे कृष्ण हरे हरे ।
बालकृष्ण परब्रह्म माणिकीराधिकापते ॥८१॥
यज्ञनारायण कृष्णवल्लभ श्रीसतीपते ।
परमेश्वर देवेश मुक्तधामपते हरे ॥८२॥

प्रभाकान्त रमाकान्त कमलाकान्त माधव ।
श्रीभूलीलापते कृष्णनारायण सतीपते ॥८३॥
लक्ष्मीनाथ च दीनानां पते ब्रह्मप्रियापते ।
पार्वतीललितास्वामिन् वृन्दाविभूतिपालक ॥८४॥
सर्ववह्निपते विष्णो महाविष्णो नरायण ।
सर्वावतारहेतो श्रीपते गोपालनन्दन ॥८५॥
इत्येवं भक्तराट् देवायतनो नाम वै हरेः ।
गृणन् संश्रावयामास तालवादनकैः सह ॥८६॥
भ्रमित्वा परितो वह्नेः पुरीं लक्षायतां शुभाम् ।
वह्नीन् वह्निप्रजाः सर्वा दिव्या भक्तश्चकार ह ॥८७॥
द्विभुजान् सुचतुर्बाहून् बहुबाहून् परान् शुभान् ।
नामकीर्तनसामर्थ्यात् कृत्वा दत्वा मनुं हरेः ॥८८॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥८९॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥९०॥
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥९१॥
'कृष्णवल्लभभक्तोहं श्रीहरिः शरणं मम' ।
इत्येवं तु मनून् तेभ्यो दत्वा मुक्तान् विधाप्य च ॥९२॥
वैष्णवान् धामयोग्याँश्च विमानेषु निषाद्य च ।
प्रेषयामास तान् धाम वैकुण्ठं चामृतं तथा ॥९३॥
अव्याकृतं च गोलोकं परमाऽक्षरधाम च ।
जयशब्दान् प्रकुर्वन्तो ययुस्ते धाम वै हरेः ॥९४॥
इत्येवं राधिके ! भक्तो देवायतनसंज्ञकः ।
श्रीहरेश्चात्मवेदी वै मोक्षकर्ताऽभवत्पुरा ॥९५॥
अष्टानां दिक्प्रपालानां धामभ्यस्ताः प्रजाः स हि ।
मोक्षयामास सर्वाश्च प्रेषयामास मोक्षणम् ॥९६॥
नामकीर्तनभक्त्यैव बलेन श्रीहरेस्तथा ।
मनून् दत्वा स सर्वेभ्यो विधाय वैष्णवान् शुभान् ॥९७॥
रिक्तान् वै तत्प्रदेशाँश्च कारयामास नामतः ।
न भूतो वा न च भावी देवायनसमो मुनिः ॥९८॥
आद्यसृष्टौ हि भक्तोऽयं सञ्जातः कृष्णविग्रहः ।
अथ तस्या दिशश्चायं भक्तो विमानमास्थितः ॥९९॥
आययौ कुंकुमवापीक्षेत्रे हर्षसमन्वितः ।
अनादिश्रीकृष्णनारायणं नत्वा पुरः स्थितः ॥१००॥
बालकृष्णः समुत्थाय तं भक्तं परिषस्वजे ।
ददौ हृदये चरणौ हस्तौ च मस्तके तथा ॥१०१॥

प्रसादं भोजयामास गले हारं ददौ हरिः ।
ऊर्जे धवलप्रतिपद्दिने तस्मै हरिः प्रभुः ॥१०२॥
ददौ पारितोषिकं च तथाऽऽवासं निजालये ।
स विश्रान्ति ततश्चक्रे कार्तिके पूर्णिमाऽवधिम् ॥१०३॥
राधिके ! पठनादस्या मद्भक्तस्य चमत्कृतेः ।
पाठनाच्छ्रावणाद्वापि श्रवणान्मुक्तिभाग्भवेत् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने देवायतनर्षेर्भक्त्या प्रसन्नो बालकृष्णस्तद्वशीभूतो जलात्तं ररक्ष, अष्टदिक्पालप्रजाभ्यः श्रीहरेर्नाम श्रावयित्वा तद्द्वारा तासां मुक्तिं चकारेत्यादिनिरूपणनामा विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥

**श्रीकृष्ण उवाच—**

रासेश्वरि महादेवि राधे गोलोककौमुदि ।
आकर्णय कथां देवायतनस्य ततः पराम् ॥ १ ॥
परब्रह्मबलेनाऽसौ मुक्ततां तु समर्जयन् ।
परब्रह्मसमं कार्यं करोत्येव निदेशतः ॥ २ ॥
मार्गाऽसितस्य प्रतिपद्दिने कृष्णनरायणः ।
प्राह भक्तं पूजयन्तं बहुवस्तुभिरादरात् ॥ ३ ॥
बालकृष्णोऽहमेवाऽस्मि परब्रह्मपरात्परः ।
परमेशः सर्वनारायणानामीशिता प्रभुः ॥ ४ ॥
सर्वे नारायणा मत्तः प्राविर्भवन्ति सर्वदा ।
सर्वसृष्टिषु भक्तेन्द्र मेऽवतारा असंख्यकाः ॥ ५ ॥
मम रूपाण्यसंख्यानि गुणैश्वर्यमयान्यपि ।
तेषां योगेन जीवानां करोमि श्रेय उत्तमम् ॥ ६ ॥
मम भक्ताः पार्षदाश्च सत्यो ब्राह्मयोऽपि मे प्रियाः ।
आविर्भवन्ति लोकेषु तारयन्ति च देहिनः ॥ ७ ॥
त्वं सदा मम मुक्तोऽसि ममाऽऽलयोऽसि वै हृदि ।
मन्निवासोऽसि भक्तेन्द्र मत्कार्ये क्रियते त्वया ॥ ८ ॥
जीवा याम्या ऐश्वराश्च देवा उद्धारितास्त्वया ।
अथाऽपि क्षितिलोकेऽत्र याहि किंपुरुषोत्तरान् ॥ ९ ॥
हिमालयात् परे पारे प्रजाकल्याणहेतवे ।
सिन्धुमुल्लंघ्य शैलं च परमिन्दुकुशं ततः ॥१०॥
कश्यपायनवार्धिं च तथा च उरुलां नदीम् ।
उरुलं पर्वतं चापि कारुसमुद्रमित्यपि ॥११॥
त्रिमुरं द्वीपकल्पं च तन्द्राप्रदेशमित्यपि ।
शान्तलारिं प्रदेशं च कामचाटकदेशकान् ॥१२॥
स्तेनावासं पर्वतं च तथा शैलं प्रभानुलम् ।
द्विकलं च सरश्चापि समानं पर्वतं तथा ॥१३॥
कीरगर्जनभूभागं शिब्रिराजप्रदेशकान् ।
ओबीनदीप्रदेशांश्च यानेशीसरितो भुवम् ॥१४॥
बीनां नदीं पिंगदेशान् यातु त्वं रशनाभुवम् ।
उत्तरान् रशनासंज्ञान् भागान् किंपुरुषस्य वै ॥१५॥
तत्रत्यमानवान् सर्वान् वैष्णवान् कुरु भक्तराट् ।
भजनं च मनुं नाम्नां कीर्तनं श्रावयाऽनिशम् ॥१६॥
विमानं सचमत्कारं महाश्चर्यमयं महत् ।
कल्पवल्लीकल्पवृक्षचिन्तामणिसमन्वितम् ॥१७॥
गृहीत्वा च प्रयाह्येवं जीवानुद्धर्तुमादरात् ।
प्रद्युम्नं मम रूपं च साहाय्यं ते ददाम्यपि ॥१८॥
इत्युक्त्वा सुविमानं च दत्वा प्रद्युम्नमित्यपि ।
प्रेषयामास भगवान् मार्गशीर्षेऽसित दले ॥१९॥
यथोक्तेन तु मार्गेण देवायतनभक्तराट् ।
इन्दुकुशं चाभिवीक्ष्य मुमुदे मनसा मुहुः ॥२०॥
भजनं चोच्चकैश्चक्रे बालकृष्ण हरेहरे ।
कृष्णनारायणस्वामिन् श्रीमद्गोपालनन्दन ॥२१॥
परब्रह्म हरेकृष्णनारायण श्रियःपते ।
राधाकृष्ण प्रभाकृष्ण माणिकीकृष्ण माधव ॥२२॥
लक्ष्मीनारायण स्वामिन्नारायण नरायण ।
जय मुक्तपते सतांपते श्रीपार्वतीपत ॥२३॥
सर्वावतारधर्तस्त्वं जयश्रीकृष्णवल्लभ ।
अनादिश्रीकृष्णनारायण श्रीपुरुषोत्तम ॥२४॥
हरेकृष्ण हरेकृष्ण कृष्ण कृष्ण हरे हरे ।
हरेस्वामिन् रामकृष्ण सीतापते सतीपते ॥२५॥
रामकृष्ण हरेकृष्ण कृष्णरामजनार्दन ! ।
कंभरानन्दन श्रीमद्गोपालबाल केशव ॥२६॥
अश्वपट्टसरःसूर्य अक्षरक्षेत्रचन्द्रमः ।
श्रीमत्कुंकुमवापीस्थ जयकृष्णनरायण ॥२७॥
हरेकृष्ण हरेकृष्ण कृष्णकृष्ण हरेहरे ।
अनादिश्रीकृष्णनारायण श्रीपरमेश्वर ॥२८॥
ब्रह्मप्रियापते कृष्णकृष्ण कृष्णहरेहरे ।
पद्मापते च कमलापते श्रीतुलसीपते ॥२९॥
वृन्दापते तथा चात्मपते कृष्णहरेहरे ।
भार्गवीकान्त ललिताकान्त गोपीपतेहरे ॥३०॥
इत्येवं कीर्तनं नाम्नां कुर्वन् संगर्जयन् मुहुः ।
निनादयन् दिशः सर्वाः प्रजाभ्यः श्रावयन् मुहुः ॥३१॥
विमानेन ययौ त्वग्रे कश्यपायनवार्निधिम् ।
तस्य पूर्वप्रदेशेषु प्रजाः संश्रावयन् ततः ॥३२॥

ऊरुलासरितः पूर्वप्रदेशेषु पुनः पुनः ।
संश्रावयन् हरेर्नामकीर्तनं व्योममार्गतः ॥३३॥
उरुलात् पर्वतात् पूर्वदेशान् कारुसमुद्रतः ।
पूर्वदक्षिणदेशाँश्च श्रावयन्नभिधा हरेः ॥३४॥
त्रिमुरं द्वीपकल्पं च ययौ तन्द्राप्रजासु च ।
श्रावयामास तन्नाम हिमशैत्यसहाः प्रजाः ॥३५॥
शान्तलारिप्रदेशाँश्च ततो वै कामचाटकान् ।
स्तेनावासं गिरिं चापि द्विकलं च सरोवरम् ॥३६॥

प्रभाल्गुनगिरिं चापि समानं पर्वतं ययौ ।
बालकृष्णसरश्चापि कीरगर्जनभूतलम् ॥३७॥
शिबिराजप्रदेशाँश्च ओबीं यानेशाकीं नदीम् ।
बीनां पिंगप्रदेशाँश्च सर्वां च रशनाभुवम् ॥३८॥
राशियानप्रदेशाँश्च भ्रमित्वा तु पुनः पुनः ।
श्रावयामास वै सर्वान् जनान् नामानि वै हरेः ॥३९॥
सप्तकृत्वो ददौ चक्रं राशियानेषु राशिवत् ।
उत्तरस्थलीयलोकेषु भूशैलरणवारिषु ॥४०॥

वनारण्यहिमद्वीपोपद्वीपान्तरभूमिषु ।
विमानेन ददौ चक्रं श्रावयामास कीर्तनम् ॥४१॥
बालकृष्णं हरिकृष्णं परब्रह्म भजन्त्विह ।
अनादिश्रीकृष्णनारायणं कुर्वन्तु वै हृदि ॥४२॥
कर्णाभ्यां तत्कथां रम्यां पापतापप्रणाशिनीम् ।
शृण्वन्तु चक्षुषा त्वस्य कुर्वन्तु दर्शनं सदा ॥४३॥
कण्ठे तस्यैव तुलसीमालां गृह्णन्तु मानवाः ! ।
भक्षयन्तु प्रसादं च पिबन्तु तज्जलं शुभम् ॥४४॥

कीर्तयन्तु च नामानि बालकृष्णस्य सर्वदा ।
स्पृशन्तु तस्य चरणौ जिघ्रन्तु गन्धमस्य च ॥४५॥
पूजयन्तु हरिं नित्यं श्रीमद्गोपालबालकम् ।
स्मरन्तु श्रीबालकृष्णं कुर्वन्तु तस्य वै स्तुतिम् ॥४६॥
शरणं तस्य कृष्णस्य गृह्णन्तु मोक्षहेतवे ।
भुक्तिमुक्तिप्रदश्चास्य चरणः स प्रसेव्यताम् ॥४७॥

धार्यतां हृदये मूर्तिः कृष्णनारायणस्य वै ।
परब्रह्मस्वरूपः स वर्तते पुरुषोत्तमः ॥४८॥
सौराष्ट्रे कम्भरागेहे श्रीपतिः पुरुषोत्तमः ।
अहो लोका देहनाशे सह नायान्ति किञ्चन ॥४९॥
सर्वे चात्रैव तिष्ठत्याविनाशं च मृषा ततः ।
तद्बन्धनं विहायैव भजन्तु परमेश्वरम् ॥५०॥
अहं तस्यैव भक्तोऽस्मि साक्षान्नारायणस्य ह ।
तन्नामानि रटन्त्वत्र स्मरन्त्वर्थे हरिं प्रभुम् ॥५१॥

ब्रह्मधामेश्वरं साधुपतिं श्रीमाणिकीपतिम् ।
मुक्तनाथं चात्मनाथं स्मरन्तु नरयोषितः ॥५२॥
मानुषस्य तु देहोऽयं दुर्लभो दुर्लभा गतिः ।
मोक्षस्याऽनेन देहेन प्राप्यते साधनैः शुभैः ॥५३॥
हरेस्वामिन् हरेकृष्ण बालकृष्ण जनार्दन ।
धर्मपुत्र हरे ब्रह्मपर श्रीपरमेश्वर ॥५४॥
राधारमासतीस्वामिन् प्रभापारवतीपते ।
लक्ष्मीश्रीमंगलाकान्त श्रीजयाललितापते ॥५५॥

भगवन् सर्वलोकेश सर्वनारायणेश्वर ।
अवतारेश धामेश तत्त्वेश्वर प्रभो हरे ॥५६॥
एवं संकीर्तयन्त्वेव भुक्तिर्मुक्तिर्भवेद्धि वः ।
इत्येवं सप्तवारं स भक्तराड् राधिके ! मुहुः ॥५७॥
राशियानेषु देशेषु श्रावयामास कीर्तनम् ।
जनाः श्रुत्वा विमानं च दृष्ट्वा दिव्यं सुखप्रदम् ॥५८॥
आश्चर्यं परमं प्राप्ता आबालवृद्धमानवाः ।
द्रष्टुं सम्भूय च बहिः समायान्ति स्म चाम्बरे ॥५९॥

विलोकयन्ति बहुधा कीर्तयन्ति हरिं तथा ।
बालकृष्ण हरेकृष्णस्वामिन् कृष्ण हरे हरे ॥६०॥
प्रशंसन्ति गुरुं भक्तं देवायतनमीशवत् ।
अहो माता पिता बन्धुर्भगवन्नामदायकः ॥६१॥
पतिः पत्नी प्रियो मित्रं हरेर्नाम्नां प्रदायकः ।
सुतः पुत्री सखा संश्रावको नाम्नां हरेर्हि सः ॥६२॥
सुतादयस्तु ये भक्तिं नैवाऽत्र बोधयन्ति वै ।
ते तु स्वार्थपरा लोके नाममात्रस्य धारकाः ॥६३॥

दुर्लभो मानुषो देहो देहिनां क्षीणधर्मकः ।
अक्षीणं त्वक्षरं धाम प्राप्तव्यं तेन धीमता ॥६४॥
परमेश्वरभक्तौ ये निरोधयन्ति मानवाः ।
न ते सम्बन्धिनो मान्याः सम्बन्धिनो हि भक्तिदाः ॥६५॥
विमाने यः स्थितो देवः कृष्णभक्तिप्रदर्शकः ।
सोऽत्र देशे गृहे नोऽत्र समायातु प्रतापवान् ॥६६॥

वयं भक्तिं करिष्यामो बालकृष्णस्य देवते ! ।
आरुह्याऽस्मद्गृहान् देव पावयाऽस्मद्गृहाणि च ॥६७॥
इत्येवं ते जनाः सर्वे राशियानप्रदेशकाः ।
श्रुत्वा श्रुत्वा हरेर्नाम प्रार्थयामासुरादरात् ॥६८॥
अथ तत्राऽभवन्मुख्याः ऋषयो द्वादशोत्तमाः ।
भिन्नस्थानेषु तिष्ठन्तस्त्रिकालज्ञा विरागिणः ॥६९॥
राधिके ! ते हरेर्भक्तं विमानं भक्तिशोभितम् ।
विज्ञाय व्योममार्गेण विमानं प्रति चाययुः ॥७०॥

मेषायनो महर्षिश्च वृषभायन योगिराट् ।
मिथुनायननामर्षिः कर्कायनश्च तापसः ॥७१॥
सिंहायनस्तथा कन्यायनस्तुलायनस्तथा ।
वृश्चिकायननामर्षिर्धनायनश्च वै ऋषिः ॥७२॥
मकरायनसंज्ञर्षिः कुंभायनस्तथाऋषिः ।
मीनायनऋषिश्चापि सर्वे योगपरायणाः ॥७३॥
राशियानप्रदेशेषु लब्धस्थाना महर्षयः ।
ब्रह्मध्यानपराश्चासन् सर्वे भिन्ननिवासिनः ॥७४॥
ब्रह्मज्ञानपराश्चापि समाधिस्थितिवर्तिनः ।
ज्ञात्वा योगेन च देवायतनं हरिदेशितम् ॥७५॥
बोधयन्तं जनान् लोके कीर्तनं श्रीहरेः शुभम् ।
द्रष्टुं व्योम्नि विमाने ते त्वाययुर्हर्षविह्वलाः ॥७६॥
प्रथमं तं तु ऋषयः प्रजारूपेण भक्तकम् ।
नेमुर्लौकिकरीत्यैव सत्कृता भक्तकेन च ॥७७॥
वन्दिताः पूजिताः प्रशंसिता धन्यवचायिताः ।
निषादिताश्च भक्तेन जिज्ञासिताः प्रतीष्टकम् ॥७८॥
पृष्टाः परिचयार्थं च जगदुस्ते निजोद्भवम् ।
वयं सर्वे भ्रातरः स्म रुद्रपुत्रा हि रुद्रजाः ॥७९॥
ब्रह्मणा प्रथमं सृष्टिर्ललाटाद् या कृता तदा ।
रुद्रो जातः क्रूरपुत्रो वृद्धये विनियोजितः ॥८०॥
तेनाऽसंख्याः समा स्वेन रुद्रा वै प्रकटीकृताः ।
क्रूरास्ते ब्रह्मणा दृष्टाः संहारिणोऽवमानिनः ॥८१॥
तेषां संहरणार्थं वै ब्रह्मा रुद्रं जगाद ह ।
रुद्रस्तेषां च सर्वेषां यदा संहारमाचरत् ॥८२॥
तदा वयं भयं प्राप्ता द्वादश रुद्रपुत्रकाः ।
रुद्रा एव स्वकं रूपं प्रविवृत्य जलान्तरे ॥८३॥
गह्वरे च गुहायां च खन्यां द्रोण्यां यथायथम् ।
गुप्ता जीवनवाञ्च्छाढ्या लीनभावमुपागताः ॥८४॥
बहुवर्षसहस्रान्ते ब्रह्मा तपस्ततोऽकरोत् ।
रुद्रसृष्टेर्विनाशान्ते दुन्दुभ्यादीन् ससर्ज सः ॥८५॥
मन्दिरस्थान् पार्षदान् वै ततश्च सनकादिकान् ।
ततो योगेश्वरांश्चापि ततो महर्षिमण्डलम् ॥८६॥
राजर्षींश्च ततो ब्रह्मा ससर्ज पितृदेवताः ।
कश्यपाच्च ततः सूर्यचन्द्राद्या सुभर्वस्तदा ॥८७॥
अस्माभिः स्वप्रकाशत्वं कृतं देवसभासु तु ।
ब्रह्मणा च तथा देवैः सम्मानिता महर्षयः ॥८८॥
योगिनो मानवे लोके सृष्ट्यर्थमुपकारिणः ।
नियुक्ता ब्रह्मणा देवैः सह कृत्वा विनिर्णयम् ॥८९॥
रां लक्ष्मीं सम्पदं शोभाम् अश्नुमो वयमादरात् ।
दद्मश्चापि प्रसन्नाश्च राशयस्तेन वै वयम् ॥९०॥
नियुक्ताः फलदानार्थे कर्मिणां कृतकर्मणाम् ।
ततो वयं स्थिता यत्र तत्र ते नः प्रदेशकाः ॥९१॥
राशियाना इमे सन्ति वयं वै राशिसंज्ञकाः ।
आज्ञां संपालयन्तश्च ब्रह्मणः परमेष्ठिनः ॥९२॥
ध्रुवदेशं विचरन्तो वसामस्त्वत्र सर्वदा ।
सूर्यचन्द्रादिभिः सर्वैर्नवग्रहैः सहायताम् ॥९३॥
अस्माकं तु समगृह्य पच्यते सृष्टिमण्डलम् ।
ते वयम् ऋषयस्त्वत्र वसामो रुद्रपुत्रकाः ॥९४॥
रुद्रसृष्ट्यवशेषा वै यथाकर्मफलप्रदाः ।
ततो ब्रह्मा ददौ वर्णान् नस्तु सारस्वतान् पृथक् ॥९५॥
मेषायनाय प्रददौ अलइवर्णकान् अजः ।
वृषभाय ददौ ब्रह्मा बवउवर्णकान् तदा ॥९६॥
मिथुनाय ददौ ब्रह्मा कछघवर्णकांस्तदा ।
कर्कायनाय प्रददौ डहाक्षरौ पितामहः ॥९७॥
सिंहायनाय प्रददौ मटवर्णौ पितामहः ।
कन्यायनाय प्रददौ पठणवर्णकान् अजः ॥९८॥
तुलायनाय प्रददौ रतवर्णौ पितामहः ।
वृश्चिकाय ददौ ब्रह्मा नयवर्णौ तदा ततः ॥९९॥
धनायनाय भमफढवर्णान् प्रददावजः ।
मकराय ददौ ब्रह्मा खजवर्णौ तदा ततः ॥१००॥
कुंभायनाय प्रददौ गशवर्णौ पितामहः ।
मीनायनाय दचझथवर्णान् प्रददावजः ॥१०१॥
तत्तद्वर्णान् जीवकर्मबोधकान् विदधे ह्यजः ।
अस्मद्योगे तु चन्द्रादौ यस्य जन्म तु देहिनः ॥१०२॥
तत्तद्वर्णकृतनाम्ना तत्कर्मायुर्भवेदिति ।
लोकतन्त्रप्रवाहार्थे ब्रह्मणा परमेष्ठिना ॥१०३॥
नियुक्ताः स्मो वयं रौद्राः सृष्ट्युपकृतये सदा ।
अद्य वै कृतकृत्याः स्मो नारायणपरायणः ॥१०४॥
भवानत्र समायातो लोककल्याणहेतवे ।
वयं गुप्तस्वरूपेण मेषादिना पुरा तदा ॥१०५॥
जीवनार्थं स्वभर्वैश्च तानि नामानि सन्ति नः ।
वस्तुतो वै वयं दिव्या रौद्राः स्मो ब्रह्मपौत्रकाः ॥१०६॥

आयाह्यस्मद्गृहान् भक्त ! विश्रान्तिं लभ सर्वथा ।
कीर्तनं संकरिष्यामः संभूय श्रीहरेर्मुहुः ॥१०७॥
इत्युक्तो भक्तराट् देवायतनर्षिर्जहर्ष ह ।
ओमित्याह तदा राधे ! विमानं चावतारयत् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने किंपुरुषखण्डे राशियानप्रदेशेषु हरिनामकीर्तनबोधार्थं प्रेषितेन देवायतनर्षिणा द्वादशमेषायनादिमहर्षिसमागमनामैकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥

**श्रीकृष्ण उवाच—**

राधिके ! भगवद्भक्तो देवायतनमुक्तराट् ।
मेषादीनां महर्षीणामनुमत्या विमानकम् ॥ १ ॥
द्विकलाख्यसरस्तीरे दक्षभागेऽवतारयत् ।
कृकलासस्वरूपेण कर्कायनर्षिरप्सु वै ॥ २ ॥
वासं करोति सरसि तत्तटे चाऽवरोहयत् ।
जयशब्दास्तदा लोकैः कृता जय विमानकम् ॥ ३ ॥
जय देवो विमानस्थो जय प्रद्युम्न ईश्वरः ।
इत्येवं तु नरा नार्यो जयशब्दसमन्विताः ॥ ४ ॥
लाजाभिः कुसुमैर्गन्धैरक्षतैस्तमवर्धयन् ।
आशीर्भिः समयुञ्जँश्च दद्दशुर्देवतायनम् ॥ ५ ॥
प्रद्युम्नं च तथा कर्कं देवायतनमार्चयन् ।
पादयोः पतिताः सर्वे पादवारि पपुस्तथा ॥ ६ ॥
मेनिरे धन्यभाग्यानि घोषयन्तो हरे हरे ।
हरेकृष्ण हरेस्वामिन् बालकृष्ण हरेहरे ॥ ७ ॥
कर्कर्षिस्तत्र राजानं थर्कूटस्थाभिधं प्रति ।
हरेर्नामग्रहणस्योपदेशं प्रचकार ह ॥ ८ ॥
राजा जग्राह मन्त्रं तन्मालिकां तौलसीं तथा ।
थर्कूटस्थालये सौम्ये प्रासादे तमवासयत् ॥ ९ ॥
देवतायतनर्षेश्च महापूजनमाचरत् ।
देवतायतनस्तत्र प्रासादे राजकीयके ॥१०॥
मेषादीन् द्वादशर्षीश्च राजसम्बन्धिनस्तथा ।
राज्ञीं चारुमकावां च तथा बाकुकलासिकाम् ॥११॥
त्रिलूनां मंगलां चापि नाम मन्त्रं तदाऽऽर्पयत् ।
'हरेकृष्ण हरेस्वामिन् हरेनारायण प्रभो ॥१२॥
बालकृष्ण कम्भराश्रीपुत्र गोपालनन्दन' ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥१३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'कालमायापापकर्मशत्रुयाम्यकुद्दद्भयात् ॥१४॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ॥१५॥
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ।
'कृष्णवल्लभभक्तोऽहं श्रीहरिः शरणं मम' ॥१६॥
इत्येवं प्रददौ मन्त्रान् देवतायतनस्तदा ।
ततः प्रजाभ्यः सर्वाभ्यो ददौ समन्त्रकीर्तनम् ॥१७॥
इत्येवं वैष्णवान् कृत्वा तत्रत्यैः प्रतिपूजितः ।
विमानं च समारुह्यर्षिभिः राजकुटुम्बिभिः ॥१८॥
राज्ञा च राजपत्निभिः समं पश्चिमभूमिकाम् ।
तानुतुवाप्रदेशस्थान् श्रावयन् नामकीर्तनम् ॥१९॥
अवाऽतारयद् वायानं दत्वा मन्त्रान् प्रजातये ।
तत्कृतां प्राप्य संपूजाम् अल्पमात्रासरोवरम् ।
गत्वाऽवतीर्य यानाच्च इरात्रीशानदीमनु ॥२०॥
मकरर्षिनिवासे च सस्नुः सर्वेऽवतीर्य च ।
तटाके च तथा नद्यां स्नापयित्वा प्रजाजनान् ॥२१॥
नाममन्त्रं ददौ तेभ्यो देवतायतनः ऋषिः ।
तत्कृतां परमां पूजां प्राप्य ततोऽपि पश्चिमे ॥२२॥
बालकृष्णसरो गत्वाऽवतेरुस्ते सरस्तटे ।
दक्षिणे वालिकानद्याः संगमे स्नानमाचरन् ॥२३॥
मीनर्षिः स्वगृहं नीत्वा पुपूज भक्तमण्डलम् ।
विमानं च समारुह्य प्रद्युम्नं समपूजयत् ॥२४॥
श्रावयन् कृष्णनामानि प्रजाभ्यः श्रीहरेर्मनून् ।
ददौ देवायतनकश्चकार वैष्णवीः प्रजाः ॥२५॥
तत्प्रदत्तां प्राप्य पूजां ययुः सर्वे तु पश्चिमे ।
कीरगर्जनदेशेषु विमानात्ते ह्यवातरन् ॥२६॥
वृश्चिकर्षिनिवासेषु गत्वा दत्वा स्वदर्शनम् ।
तद्देशीयजनेभ्यश्च मनून् देवायनो ददौ ॥२७॥
कीरगर्जनराजानं सकुटुम्बं मनुं शुभम् ।
श्रावयित्वा वैष्णवं च कृत्वा नीत्वा विमानके ॥२८॥
प्रजाकृतां महापूजां गृहीत्वा देवतायनः ।
सर्षिराजकुटुम्बादिः सीरानदीसमागमे ॥२९॥
उरुले सरसि नैजं विमानं भ्वामतारयत् ।
नाम संश्रावयन् सर्वाः प्रजास्तत्र सरोवरे ॥३०॥
अस्नापयत् ततो मन्त्रान् ददौ तेभ्यः सकीर्तनान् ।
मिथुनायनसंज्ञश्च ऋषिर्युगलरूपधृक् ॥३१॥
स्वावासे श्रीविमानस्थान् प्रद्युम्नादीनुपानयत् ।
पुपूज परया भक्त्या विमानं चारुरोह च ॥३२॥

ततश्च प्रययुः सर्वे आमुनदीसमागमे ।
तदूर्ध्वदेशवासाश्च प्रजाः संश्रावयन् मुनिः ॥३३॥
हरेकृष्ण बालकृष्ण मन्त्रानश्रावयच्च ताः ।
वैष्णवीस्ताः प्रजाः कृत्वा विमानमधिरुह्य च ॥३४॥
केशापायनवार्धिं च गत्वा पूर्वतटे शुभे ।
विमानादवतीर्याऽथ स्नात्वा वार्धौ च ते ततः ॥३५॥
स्नपयित्वा प्रजास्तत्र श्रावयन्नामकीर्तनम् ।
मन्त्रान् ददौ देवतायतनस्ताभ्यस्ततः खलु ॥३६॥
विमानं च समारुह्य उरुलासंगमं ययौ ।
तत्र कुंभर्षिणा सर्वे पूजिताः परमेश्वराः ॥३७॥
स्वावासे भ्रामणं तेषां कारितं चापि पावनम् ।
देवायनः श्रावयित्वा नाममन्त्रान् प्रजाजनान् ॥३८॥
तेभ्यो दत्वा मनून् पश्चाद् विमानेनाऽऽप पर्वतम् ।
उरुलं त्रिवलासंज्ञां नदीं चापि ययौ मुनिः ॥३९॥
इरात्रीशात्रिबालासंगमे सस्नुश्च ते तदा ।
तत्प्रदेशीयलोकाँश्च देवतायतनो मुनिः ॥४०॥
श्रावयामास वै नाम हरेश्चाथ मनून् ददौ ।
सिंहर्षिणा समादिष्टप्रजाभ्यो मुनिराट् खलु ॥४१॥
तैः प्रद्युम्नः पूजितश्च देवायनोऽपि पूजितः ।
अन्येऽपि पूजिताः सर्वे विमानेन तदोत्तरे ॥४२॥
श्रावयन्तो हरेर्नाम ओबीत्रिवलासंगमम् ।
अवतेरुर्विमानाच्च सस्नुस्तत्र महाजले ॥४३॥
धनायनो महर्षिश्च तथा प्रजाजना अपि ।
पुपूजुः परया भक्त्या विमानस्थान् जनाँस्तदा ॥४४॥
देवतायतनो नाम हरेः संश्रावयन् मुहुः ।
प्रजाभ्यो नाम मन्त्राँश्च दत्वा तत्रत्यभूपतिम् ॥४५॥
वीरजारं श्रावयित्वा नाममन्त्रं मनूँस्तथा ।
पुत्रान् पुत्रीश्च तत्पत्नीं श्रावयित्वा च तान् मनून् ॥४६॥
विमाने सह नीत्वा च ययौ ओब्यब्धिसंगमम् ।
अवतेरुर्विमानाच्च सस्नुरोब्यब्धिसंगमे ॥४७॥
श्रावयन्तो हरेर्नाम आमद्राक्षप्रजाजनान् ।
तेभ्यो मन्त्रं ददौ देवायनर्षिश्च ततः परम् ॥४८॥
कन्यायनर्षिस्तत्रैव पर्वते चोरुलाभिधे ।
निजाऽऽवासे विमानेन नीत्वा सर्वानपूजयत् ॥४९॥
गृहीत्वा तस्य वै पूजां पूर्वां दिशं ययौ ततः ।
त्राससागरसंयोगे चावतेरुर्विमानतः ॥५०॥
श्रावयामासुरत्यर्थं हरेकृष्ण प्रजाजनान् ।
स्नात्वा च स्नपयित्वा च मनून् दत्वा च वै ततः ॥५१॥
यानेशीसागरसंगं ययुः सर्वे विमानगाः ।
सस्नुश्च स्नपयामासुः श्रावयित्वा प्रजाजनान् ॥५२॥
नाम मन्त्रं ददौ देवायतनर्षिश्च भक्तराट् ।
ऐकागारिकदेशीयप्रजाभ्यश्च मनून् ददौ ॥५३॥
शिबिराजप्रदेशानामुत्तरेषु स्तरेषु च ।
तुंगाऽसिकानदीप्रान्ते प्रजाभ्यः प्रददौ मनून् ॥५४॥
तन्द्रादेशं ययौ देवायनर्षिः सर्वसेवितः ।
हिमभूमिप्रजास्तत्र श्रावयित्वाऽभिधां हरेः ॥५५॥
ताभ्यो मनून् ददौ देवायनर्षिस्त्रिमुरप्रजाः ।
श्रावयित्वा ततस्ताभ्यो नाम मन्त्रं ददौ ततः ॥५६॥
रेन्डी मेषायनर्षिश्च पुपूज तान् विमानगान् ।
स्वस्थानं पावनं चक्रे तेषां पादरजोऽन्वितम् ॥५७॥
मेषायनेन ऋषिणा प्रद्युम्नाद्याः प्रपूजिताः ।
गृणन्तस्ते हरेर्नाम अनावारानदीं ययुः ॥५८॥
श्रावयित्वा च नामानि स्नापयित्वा प्रजाजनाम् ।
स्नात्वा सर्वे संगमे च तत्प्रजाभ्यो मनून् ददुः ॥५९॥
विमानेन ययुः पूर्वे आलनौकानदीं प्रति ।
तदब्धिसंगमे सस्नुः सर्वे प्रजाजना अपि ॥६०॥
शक्त्यक्षिनृपतिः सस्नौ सकुटुम्बोऽब्धिसंगमे ।
श्रुत्वा नाम हरेकृष्ण बालकृष्ण नरायण ॥६१॥
जगृहुस्ते नाममन्त्रान् देवायनमहर्षितः ।
राजप्रजार्पितां पूजां प्राप्य प्रद्युम्नकादयः ॥६२॥
ययुः पूर्वस्थितान् तन्द्रादेशान् बीनानदीमनु ।
लीनासागरसंगे च सस्नुः सर्वे विमानिनः ॥६३॥
नामसंकीर्तनं चक्रुः प्रजास्तत्र समाययुः ।
जगृहुर्नाममन्त्राँश्च देवतायतनात् ततः ॥६४॥
तत्रत्यो वृषभर्षिश्च पूजयामास ताँस्ततः ।
पूजां प्राप्य विमानेन चाययुः सर्व एव ते ॥६५॥
उड्डीयास्कानदीं तत्र सस्नुः प्रजाजनैः सह ।
प्रजाभ्यः प्रददौ देवायतनश्च मनून् ततः ॥६६॥
नाम विष्णोः श्रावयँश्च यानां नदीं ययुस्ततः ।
यानाऽब्धिसंगमे स्नात्वा स्नपयित्वा प्रजाजनान् ॥६७॥
श्रावयित्वा हरेर्नाम तेभ्यो मनून् ददुश्च ते ।
ततो ययुर्विमानेन कालिमां सरितं च ते ॥६८॥
कालिमाऽब्धिजले स्नात्वा स्नपयित्वा प्रजाजनान् ।
श्रावयित्वा हरेर्नाम तेभ्यो मनून् ददुस्तदा ॥६९॥
तुलायनो महर्षिश्च स्वस्थानं तान् विमानगान् ।
निनाय पूजयामास प्रद्युम्नदेवतादिकान् ॥७०॥

कालिमाशश्च राजाऽपि सुवैष्णवस्तदाऽभवत् ।
पुपूज परया प्रीत्या विमानस्थान् सुरेश्वरान् ॥७१॥
विमाने सकुटुम्बो वै समारुरोह वैष्णवः ।
ततो ययुरलांशुकाप्रदेशान् वै ततः परम् ॥७२॥
द्विरंगाख्यप्रदेशाँश्च अनादीरनदीतटान् ।
श्रावयित्वा तद्भूमिस्थजनेभ्यो नामकीर्तनम् ॥७३॥
मनून् तेभ्यो ददुश्चाऽथ ययुर्वै कामचाटकान् ।
तत्प्रजाः पावयित्वैव हरेर्नाम्ना ततः परम् ॥७४॥
ताभ्यो मन्त्रान् प्रदायैव अक्षौढाभुवमागताः ।
स्तेनावासिजनान् सर्वान् श्रावयित्वा हरेर्मनुम् ॥७५॥
तेभ्यो मन्त्रान् प्रदायैव प्रभालुनाद्रिमाययुः ।
श्रावयित्वा तद्भूमिस्थजनेभ्यो नाम वै हरेः ॥७६॥
ताभ्यो मन्त्रं ददुर्देवायतनाद्यास्ततश्च ते ।
पश्चिमं प्रययुः सर्वे विलीनायुप्रदेशकान् ॥७७॥
तत्रत्याश्च प्रजाः सर्वाः श्रावयामासुरुत्सुकाः ।
हरेकृष्ण हरेस्वामिन् बालकृष्ण हरेहरे ॥७८॥
मन्त्रान् ताभ्यो ददुश्चापि ताभिः कृतां तथोपदाम् ।
संगृहीत्वा ययुः सर्वे योनिषोढाप्रदेशकान् ॥७९॥
तत्रत्याश्च प्रजाः सर्वाः श्रावयित्वाऽभिधां हरेः ।
ताभ्यो मन्त्रान् प्रददुश्च तत्कृतं पूजनं ततः ॥८०॥
समादाय ययुः सर्वे ओम्प्रदेशान् विमानगाः ।
अवतीर्य प्रजाः सर्वाः श्रावयित्वाऽभिधां हरेः ॥८१॥
ताभ्यो ददुर्हरेर्मन्त्रान् चक्रुस्तान् वैष्णवान् शुभान् ।
अथैवं राधिके सर्वान् देशान् देवायनो मुनिः ॥८२॥
प्रद्युम्नेन तथा श्रेष्ठद्वादशर्षिभिरन्वितः ।
राशियानप्रदेशानां राजभिः सहितस्तथा ॥८३॥
भ्रमित्वाऽष्टभ्रमान् दैवान् जीवान् चकार वैष्णवान् ।
स्थले स्थले हरेर्नाम जपपारायणा जनाः ॥८४॥
अभवन् वै नरा नार्यो बाला वृद्धाश्च मध्यमाः ।
स्नानं च पूजनं नित्यं बालकृष्णस्य सर्वदा ॥८५॥
गृहे गृहेऽभवद् वासो देवदेवस्य वै तदा ।
अथ देवायतनाय प्रार्थयामासुरेव ते ॥८६॥
मेषायनाद्याः ऋषयो थर्कूटस्थनृपादयः ।
वयं वै भवतो योगान्नारायणपरायणाः ॥८७॥
जाताः स्मोऽद्य प्रजाः सर्वाः पापमार्गान्निवारिताः ।
कृष्णभक्तिपरा जाताश्चोपकारो महान् कृतः ॥८८॥
नृदेहस्य तु साफल्यं कारितं भवताऽधुना ।
गुरुरेव परब्रह्म तारकोऽस्ति भवान् हि नः ॥८९॥
गुरुद्वारा हरिः साक्षात् मिलत्येव न संशयः ।
यथा साक्षाद्धरेर्योगो भवेत् तथा विधेहि नः ॥९०॥
बालकृष्णस्य कृष्णस्य स्वेष्टदेवस्य दर्शनम् ।
प्रत्यक्षं नो भवेत्तद्वद् भवान् करोतु योजनाम् ॥९१॥
यन्मन्त्रो नाममात्रं च पापप्रज्वालनक्षमम् ।
तस्य साक्षाद्दर्शनं तु किं न धत्ते हि देहिनाम् ॥९२॥
श्रवणं मंगलं यस्य स्मरणं मंगलं मुहुः ।
कीर्तनं मंगलं यस्य किं न धत्ते तु दर्शनम् ॥९३॥
यथा कृपाऽत्र चागत्य भवताऽनुष्ठिता तथा ।
इष्टदेवः समागच्छेत् तथा कृपां विधेहि नः ॥९४॥
बालानां बालिकानां च नराणां योषितां तथा ।
अशक्तानां दर्शनं श्रीहरेः स्यादागमेन वै ॥९५॥
यद्भक्तस्य प्रसंगेन दैवा मुमुक्षुतां गताः ।
वैष्णवास्तं भजन्त्यत्र कृतिनस्तु तदागमे ॥९६॥
देशोऽपि दिव्यतां यायान्नद्यो नदाः सरोऽब्धयः ।
दिव्यतां तीर्थतां पृथ्व्यो यास्यन्ति चागमाद्धरेः ॥९७॥
वनानि पर्वता ग्रामा नगराणि जलानि च ।
खातानि चाऽप्यखातानि यास्यन्ति दिव्यतां ततः ॥९८॥
रणानां भूमयश्चापि द्वीपानां भूमिकास्तथा ।
दुर्गाऽदुर्गप्रदेशाश्च यास्यन्ति दिव्यतां ततः ॥९९॥
मानवानां हृदयानि कालुष्यसंभृतानि वै ।
हरेर्योगाद्धवलानि भविष्यन्ति सुपुण्यतः ॥१००॥
इत्येवं प्रार्थयामोऽत्र प्रद्युम्नाय महात्मने ।
देवतायतनायाऽपि दद्मश्चाशीर्वचः शुभम् ॥१०१॥
इत्येवं चाऽर्थितौ राधे ! प्रद्युम्नदेवतायनौ ।
आश्वासनं ददतुश्च तेभ्यो वै ओमिति ध्रुवम् ॥१०२॥
ततो विमानं सर्वैश्च बालकृष्णसरोवरे ।
उत्तरे तत्तीरभागेऽवतारितं निवृत्तये ॥१०३॥
विशश्रमुस्तु ते सर्वे कृत्वा वै भोजनादिकम् ।
निशायां श्रीबालकृष्णं भेजिरे सस्मरुश्च ते ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने राशियानप्रदेशेषु महर्षिभिः राजभिश्च सह विमानेन भ्रमित्वा प्रजासु हरेर्नामश्रावणं मन्त्रदानं च देवायतनर्षिश्चकारेत्यादिनिरूपणनामा द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥

श्रीकृष्ण उवाच—
अथ रासेश्वरि राधे ! प्रातः स्नात्वा हरेर्जनाः ।
पूजयित्वा बालकृष्णमूर्तिं प्रद्युम्नमित्यपि ॥ १ ॥
देवतायतनं चापि हितां चक्रुर्विचारणाम् ।
मेषायनाद्याः ऋषयः थर्कूटरथनृपादयः ॥ २ ॥
राशियानप्रदेशानां भक्ताग्र्याः सात्त्वतोत्तमाः ।
श्रुत्वा पुरा क्रतुं चक्रे भगवान् लाशहातटे ॥ ३ ॥
शालावत्यास्तटे चापि पिंगदेशेषु तत्प्रजाः ।
कृपया पावयामास बालकृष्णः परेश्वरः ॥ ४ ॥
स्वयमागत्य देवैश्च ब्रह्मप्रियादिभिः सह ।
पितृभ्यां सहितश्चापि तीर्थीचकार तद्भुवम् ॥ ५ ॥
तथा चात्र समागच्छेद् भवेयुस्तीर्थभूमयः ।
पवित्राः सुखदाः सर्वपापप्रणाशशक्तयः ॥ ६ ॥
सर्वदेवनिवासार्हाः सर्वपूज्याः प्रमोक्षदाः ।
सर्वनद्यो भवेयुश्च भगवत्पादपाविताः ॥ ७ ॥
तस्माद् यज्ञान् करिष्यामः पञ्च श्रीवैष्णवान् शुभान् ।
आद्यं मखं शिबिराज्ये बालकृष्णसरस्तटे ॥ ८ ॥
थर्कूटरथभूपराज्ये द्वितीयं च क्रतुं शुभम् ।
वीरजारमहाराजराज्ये क्रतुं तृतीयकम् ॥ ९ ॥
शक्त्यक्षिनृपराज्ये च मखं चतुर्थकं शुभम् ।
कालिमाशनृपराज्ये मखं श्रेष्ठं च पञ्चमम् ॥१०॥
करिष्यामो धनाद्यैश्चार्पणैः सर्वप्रसाधनैः ।
मुक्तान् तथाऽतारौंश्च ईश्वरान् पार्षदाँस्तथा ॥११॥
ईश्वरीर्देवदेवीश्च पितॄन् सिद्धर्षिपुंगवान् ।
मानवान् जडचैतन्याश्रयान् सर्वान् हि देहिनः ॥१२॥
तीर्थानि लोकपालाद्यानाह्वयिष्याम एव च ।
कारयिष्याम उत्कृष्टान्मखान् कृष्णस्य तुष्टये ॥१३॥
तस्मान्नारायणस्वामी बालकृष्णो जनार्दनः ।
समागच्छेच्च नो देशेष्वेवं भक्तविधीयताम् ॥१४॥
इत्युक्तो देवसदृशो देवतायतनो मुनिः ।
बाढं बाढमुवाचैतान् मुमुक्षून् वैष्णवाँस्तदा ॥१५॥
क्षणं विश्रमितुं त्वाज्ञां प्रचकार च भक्तराट् ।
गत्वा श्रीबालकृष्णाख्यसरस्तटे नृपादिकान् ॥१६॥
ऋषयश्च नृपाद्याश्च देवायतनको मुनिः ।
ययुर्विमानमार्गेण बालकृष्णसरोवरम् ॥१७॥
अवतेरुश्च ते भूमौ विमानेनोत्तरे तटे ।
चत्वारोऽपि च राजानो द्वादशाऽपि महर्षयः ॥१८॥
तथा प्रजाग्रमान्याश्च सहस्रशो धनान्विताः ।
वैष्णवास्तेऽवतेरुश्च यज्ञार्थं कृतनिश्चयाः ॥१९॥
प्रद्युम्नश्च ऋषीन् प्राह कुर्वन्तु घोषणां भुवि ।
यज्ञो वै वैष्णवः कार्यो बालकृष्णसरस्तटे ॥२०॥
उत्तरे प्रथमः पश्चाद् द्वितीयस्तु क्रतूत्तमः ।
द्विकलाख्यसरस्तीरे थर्कूटभूभृता पुनः ॥२१॥
तृतीयश्च क्रतुः कार्यो वीरजारेण भूभृता ।
ओबीराञीशनद्योश्च संगमे क्षितिविस्तरे ॥२२॥
चतुर्थस्तु क्रतुः कार्यः शक्त्यक्षिभूभृता शुभः ।
आलनौकाब्धिसंयोगे विशाले भूतले तथा ॥२३॥
पञ्चमस्तु क्रतुः कार्यः कालिमाशेन भूभृता ।
कालिमासागरयोगे तेष्वायान्तु हि वैष्णवाः ॥२४॥
तत्राऽनादिकृष्णनारायणः श्रीपुरुषोत्तमः ।
अक्षराधिपतिः श्रीमान् परमात्मा परेश्वरः ॥२५॥
बालकृष्णो हि भगवानस्माकमिष्टदेवता ।
कुंकुमवापिकाक्षेत्रात् स्वयं चैवागमिष्यति ॥२६॥
दर्शनार्थं च सेवार्थं समागन्तव्यमेव ह ।
पूर्णिमावधिपर्यन्तं दत्ता दीक्षा स्थले स्थले ॥२७॥
अथेदानीं मार्गशीर्षे कृष्णैकादशिकादिने ।
प्रथमस्य मखस्यैवारम्भः सम्यग् भविष्यति ॥२८॥
सासदैनस्य यज्ञस्य कार्यं कृष्णः करिष्यति ।
द्वितीयस्य तु यज्ञस्य मार्गे वै पञ्चमीदिने ॥२९॥
समारम्भः समाप्तिश्च ह्येकादश्यां सिते दले ।
तृतीयस्य क्रतोश्चाप्यारंभो वै तृतीयातिथौ ॥३०॥
पौषकृष्णे समाप्तिश्च नवम्यां संभविष्यति ।
चतुर्थयज्ञारम्भस्तु एकादश्यां भविष्यति ॥३१॥
शुक्लायां तु द्वितीयायां समाप्तिश्च भविष्यति ।
पञ्चमस्य तु यज्ञस्याऽऽरम्भो वै पञ्चमीदिने ॥३२॥
एकादश्यां समाप्तिश्च भविष्यतीति निश्चितम् ।
इत्येवं घोषयन्त्वेव राशियानेषु सर्वथा ॥३३॥
इत्युक्ता राजवर्गाश्च तथा तत्तन्महर्षयः ।
उद्घोषणां तथा चक्रुः स्वस्वदेशेषु सत्वरम् ॥३४॥
वैहायसा तु यानेन ततो राजादयश्च ते ।
शोधयामासुरत्यर्थं सामग्रीर्विविधाः शुभाः ॥३५॥
कारयामासुरेवात्र सज्जिताः सर्वतो दिशः ।
मण्डपादींस्तथा शाला निवासान् शिबिराणि च ॥३६॥
दशयोजनभूमौ च कारयामासुरुत्सुकाः ।
प्रद्युम्नः कारयामास यथायोग्यं निरीक्षकः ॥३७॥
देवतायतनश्चापि द्वादशर्षय एव ते ।
विमानेन ययुः श्रीमत्कृष्णनारायणं प्रति ॥३८॥

प्रार्थयामासुरीशेशेश्वरं कृष्णनरायणम् ।
तथाऽस्त्वेवं हरिः प्राह प्रसन्नः पितृदेशितः ॥३९॥
लोमशेन तथाऽऽज्ञप्तो देवतायतनो मुनिः ।
ऋषीन् सहस्रशो नीत्वा विमाने प्रययौ क्रतुम् ॥४०॥
ते सर्वे कारयामासुर्बालकृष्णसरस्तटे ।
कुण्डान् विविधान् वेदीश्च स्थापनार्थे च वेदिकाः ॥४१॥
शालाः क्रतोर्वासशाला महीमानाश्रयाँस्तथा ।
मुक्तानां चालयान् रम्यानवतारालयाँस्तथा ॥४२॥
ईश्वराणामालयाँश्चेश्वरीणामालयाँस्तथा ।
पितृणां च तथर्षीणां ब्रह्मप्रियालयाँस्तथा ॥४३॥
ब्रह्मसरसामालयाँश्चाप्सरसामालयाँस्तथा ।
देवानां बहुजातीनामालयान् विविधाँस्तथा ॥४४॥
दासानामालयाँश्चापि भुवर्लोकनिवासिनाम् ।
मानवानां च तीर्थानां स्थावराणां तथालयान् ॥४५॥
अतलादिनिवासानामालयान् बहुभूमिकान् ।
विशाले भूतले चापि व्योम्नि चापि व्यधुस्तदा ॥४६॥
मण्डपं सप्तभौमं च विशालं दशयोजनम् ।
व्यधुस्तु विश्वकर्माणः प्रद्युम्नस्य निदेशतः ॥४७॥
पञ्चाशद्योजने भागे महीमानाश्रयान् व्यधुः ।
प्रत्याश्रयं प्रदीपाश्च मणीनां तु स्वभावजाः ॥४८॥
शीतोष्णादिजलानां च कुल्याः स्वभावजास्तथा ।
पयोदधिघृतानां च कुल्याश्चापि स्वभावजाः ॥४९॥
मधूनां शर्कराणां च रसकुल्याः स्वभावजाः ।
पेयानां शीततोयानां ह्रदाश्चामृतसंज्ञकाः ॥५०॥
ब्रह्मह्रदास्तथा गोपह्रदा नारायणह्रदाः ।
सत्यह्रदास्तथा देवह्रदाश्च निहिता ध्रुवाः ॥५१॥
यथापेक्षमनलानां कुण्डाश्च कुण्डिकाः कृताः ।
नैसर्गा दुग्धपाकाश्च दुग्धसारा निसर्गजाः ॥५२॥
कामधेनुसमूहाश्च रसवल्लीद्रुमालयाः ।
रसशालाः सर्वसृष्टिभोज्यपानप्रदाः शुभाः ॥५३॥
वस्त्राभूषणशृंगारभोग्यद्रव्यादिपेटिकाः ।
गन्धसारप्रचूर्णादिकजलालक्तवापिकाः ॥५४॥
वाद्यगायननृत्यादिप्रदर्शनप्रदर्शिकाः ।
मनोरञ्जनजालाढ्याः प्रस्फोटकानलानिलाः ॥५५॥
यानवाहनशिबिकागारुडहंसगोवृषाः ।
शय्यापर्यंकवितानोल्लोचपटादिभित्तिकाः ॥५६॥
उद्यानानि विचित्राणि सर्वौषधिप्रवाटिकाः ।
भोज्यपेयादिवस्तूनां पर्वता इव सञ्चयाः ॥५७॥
हव्यानां च कणानां च फलानां सञ्चयास्तथा ।
पत्राणां च रसानां च समिधां संचयास्तथा ॥५८॥
व्रीहीणां च यवानां च मुन्यन्नानां विशेषतः ।
तिलानां घृतभागानां पक्वान्नानां समुच्छ्रयाः ॥५९॥
दूरश्रवणयन्त्राणां दूरदर्शनकारिणाम् ।
चन्द्राणां दूरवेधानां स्पर्शबोधनकारिणाम् ॥६०॥
ऋतुबोधकराणां च गोलकान्तरबोधिनाम् ।
वार्तातारगृहाणां च क्लृप्तनं वै स्थले स्थले ॥६१॥
दासीनां सेवकानां च निसर्गलेखकारिणाम् ।
क्लृप्तना कारिता तत्र मखभूमौ स्थले स्थले ॥६२॥
राजमार्गा देवमार्गा हस्त्यश्वहंसगारुडाः ।
येषु प्रयान्ति सुखतस्तथा वै निर्मितास्तदा ॥६३॥
दक्षिणार्थे द्रव्यशाला यज्ञार्थे पात्रमन्दिरम् ।
दानार्थे वस्त्रशालाश्च देवपूजार्हशालिकाः ॥६४॥
सर्वोपचारशालाश्च निर्मिता विश्वकर्मभिः ।
स्थाने स्थाने कल्पलताः कोणे कोणे मणिप्रभाः ॥६५॥
चिन्तामणिप्रधानाश्च वासाः सर्वसुखप्रदाः ।
मुक्तानां धवले व्योम्नि चान्तरीक्षे तु नाकिनाम् ॥६६॥
भौमानां भूमिभागेषु भूस्तरे त्वन्यदेहिनाम् ।
निर्मिताः सुखदा वासा बालकृष्णमखोत्सवे ॥६७॥
इत्येवं सर्वथा भूमिः शृंगारिता महालयैः ।
मण्डपस्य शिरोभागे ध्वजोऽष्टशतहस्तकः ॥६८॥
सहस्रं कलशानां तु सौवर्णानां च रोपितम् ।
वेदमन्त्रा झल्लरीषु तोरणेषु प्रलेखिताः ॥६९॥
रंगरंगोलिकाशोभाः स्वर्गोद्यानसमाः कृताः ।
एवं वै भ्राजमानेषु निवासेषु मखाभितः ॥७०॥
आययुश्च महीमानाः पत्रैश्चामन्त्रितास्तदा ।
यज्ञोऽयं श्रीकृष्णनारायणः कारयति स्वयम् ॥७१॥
शिबिदेवनृपद्वारा सर्वैर्गन्तव्यमादरात् ।
इदानीं मार्गशीर्षे वै कृष्णैकादशिकादिने ॥७२॥
बालकृष्णसरस्तीरे यज्ञारंभो विलोक्यताम् ।
अनादिश्रीकृष्णनारायणस्य पटहो महान् ॥७३॥
व्यनदत् सर्वलोकेषु हरिणाऽऽज्ञापितः शुभः ।
दशम्यां सर्वलोकस्थाः श्रुत्वा क्रतुं समाययुः ॥७४॥
अक्षरब्रह्मलोकाद्वै मुक्ताः सर्वे समाययुः ।
धामानि चापि सर्वाणि भगवन्तस्तदाश्रिताः ॥७५॥
भगवत्यः समाजग्मुर्मुक्तान्यश्चाप्यसंख्यिकाः ।
ईश्वरा ईश्वराण्यश्च पितरो मुनयस्तथा ॥७६॥

सिद्धा ब्रह्मप्रशीलाश्च सुराः सुराण्य एव तु ।
ब्रह्मसरसोऽप्सरसो देव्यो दिक्पालपुंगवाः ॥७७॥
सांख्ययोगिन्य एवापि भुवर्लोकसुरास्तथा ।
मानवाः ऋषयो विप्राः कुंकुमवापिकाजनाः ॥७८॥
अब्रिक्तजाश्चाजनाभा उष्ट्रालयादिवासिनः ।
आययुस्तलवासाश्च भूविवरनिवासिनः ॥७९॥
नदा नद्यः समुद्राश्च वृक्षा वल्लय इत्यपि ।
तीर्थानि पशवः पक्षवन्तस्तिर्यक्प्रजातयः ॥८०॥
पार्थिवाश्च जलीयाश्च वाह्नेया वायवीयकाः ।
देहिनश्चाययुस्तत्र यज्ञार्थे कृतनिश्चयाः ॥८१॥
देवदानवदैत्याश्च रुद्राश्च वसवस्तथा ।
विश्वेदेवास्तथा साध्या मनवो ब्रह्मपुत्रकाः ॥८२॥
सनकाद्याः साधवश्च नारदाद्या महर्षयः ।
ब्रह्मपुत्रप्रपौत्राद्याश्चाययुस्त्वध्वरे हरेः ॥८३॥
विनेदुश्च दिशः सर्वा विमानानां समागमैः ।
राजानो राशिवर्गाश्च ददुर्वासानि चादरात् ॥८४॥
तावद्देवायनर्षिश्च विमाने कामगे शुभे ।
सर्वस्मृद्धिप्रपूर्णे तु शातभौमे महायते ॥८५॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
ब्रह्मप्रियास्तथा सर्वाः सर्वे कुटुम्बमित्यपि ॥८६॥
लोमशादीन् सप्तर्षींश्च विप्रान् नरांश्च योषितः ।
मातापितरौ देवादीन् तीर्थानि शंकरादिकान् ॥८७॥
क्षेत्रपान् सेविका देवीर्देवताश्चेश्वरादिकान् ।
तत्रत्यदिव्यदेहाँश्च नीत्वा व्योम्ना समाययौ ॥८८॥
अवाद्यन्त सुवाद्यानि जयशब्दास्तदाऽभवन् ।
लाजापुष्पाक्षतैः सर्वे वर्धयामासुरेव तत् ॥८९॥
नेमुश्च परितः सर्वे कोटिसूर्योज्ज्वलं शुभम् ।
विमानं परमेशस्याऽक्षरतुल्यं महोज्ज्वलम् ॥९०॥
दिव्यहस्तिसुशोभाढ्यं दिव्यहंसविराजितम् ।
दिव्यध्वजसुकलशैः राजितं कामगं सुखम् ॥९१॥
यत्पार्श्वे सुविमानानि सुप्रयान्ति सहस्रशः ।
अशब्दं चाऽऽगतं मेघादूर्ध्वं द्विपञ्चयोजनम् ॥९२॥
आकाशे स्थैर्यमापन्नं तस्माद्वै भगवान् स्वयम् ।
अवाततार सहसा कोट्यब्जसार्थशोभितः ॥९३॥
विद्युद्यन्त्रादिनिर्घोषा अवाद्यन्त च सूचकाः ।
आकाशो मूर्तिमान् भूत्वा कृष्णगीतिमगायत ॥९४॥
रागाश्चापि च रागिण्यः सरस्वत्यश्च शारदाः ।
विद्याः सर्वास्तदा कृष्णकृतेऽगायन्त चोत्सुकाः ॥९५॥
राधारमाश्रीश्चमेनापराविद्याःप्रगीतयः ।
लक्ष्मीगंगाविरजासुललिताविजयाजयाः ॥९६॥
सुशीलाद्याश्च वै गीतिं तदा चक्रुर्मनोहराम् ।
गन्धर्वा गायनं चक्रुस्तदा कृष्णस्य तुष्टये ॥९७॥
ऋषयो वेदनिर्घोषाँश्चक्रुर्घनरवादिभिः ।
वह्न्याद्या देवताश्चापि जयशब्दान् प्रचक्रिरे ॥९८॥
शिष्याद्याश्च ऋषयश्च सन्मानं दण्डवत्पुरः ।
चक्रुः सर्वे जय कृष्णनारायणेति संजगुः ॥९९॥
तावद्धरिः पृथिव्यां वै सभामण्डपमागमत् ।
पुष्पहारान् ददुस्तस्मै शेखरान् गुच्छकान् ददुः ॥१००॥
पुष्पाणां सञ्चयैः सर्वे वर्धयामासुरच्युतम् ।
मातरं पितरं चापि भगवन्तं शुकं तथा ॥१०१॥
सन्तुष्टां चामृतां चापि देवायतनकं मुनिम् ।
हेमन्तं च भगवन्तं लोमशं शंभुविष्णवजान् ॥१०२॥
ब्रह्मप्रियादिका राधे ! कुंकुमवापिकाप्रजाः ।
वर्धयामासुरत्यर्थं राशियानप्रजा मुहुः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णसरोवरतटे यज्ञमण्डपादिकरणं महीमानागमो बालकृष्णाद्यागमश्चेत्यादिनिरूपणनामा त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥

**श्रीकृष्ण उवाच—**

इत्येवं राधिके ! कृष्णो बालकृष्णो महाप्रभुः ।
अवतीर्य विमानाच्च यज्ञमण्डपमाययौ ॥ १ ॥
विलोक्य च ततः शीघ्रं कृत्वा स्नानं तडागके ।
यजमानः स्वयं भूत्वा पत्नीव्रतद्विजेन च ॥ २ ॥
लोमशेन तथा देवायतनेन युतः प्रभुः ।
मातापित्रादिसहितो निषसाद शुभासने ॥ ३ ॥
विप्राश्च जगदुस्तावत् स्वस्तिवाचनमुत्सुकाः ।
आचमनं ग्राहयित्वा ततो वै लोमशो मुनिः ॥ ४ ॥
शुद्धिमन्त्रान् समुच्चार्य पञ्चगव्यं प्रदाय च ।
जलेन प्रोक्षणं कृत्वा गृहीत्वा सूत्रकं करे ॥ ५ ॥
बालकृष्णं प्रकोष्ठे चाऽबन्धयद् यजमानकम् ।
तथा भूपं यजमानं गौणं सस्त्रीकमेव च ॥ ६ ॥
शिबिदेवाभिधानं चाऽबन्धयन् लोमशो मुनिः ।
बालकृष्णोऽपि भगवान् लोमशं यज्ञवेदिनम् ॥ ७ ॥
मुख्यं चाऽबन्धयत्तत्र गौणं पत्नीव्रतं तथा ।
आचार्ययुगलं कृत्वा ततो द्वादशभूसुरान् ॥ ८ ॥

रौद्रान् रुद्रस्वरूपाँश्चाऽबन्धयद् रुद्रसन्निधौ ।
ब्रह्मणो निकटे चान्यान् दशसाहस्रसंख्यकान् ॥ ९ ॥
ऋषीँश्चाऽबन्धयत् तत्र जपहोमकराँस्तथा ।
ब्रह्मा स्वयं ब्रह्मवेद्यां स्थितः कृष्णाज्ञयाऽभवत् ॥१०॥
वेदास्तथोपवेदाश्च गातारश्चाऽभवँस्तदा ।
उद्गातारस्तदा चासन् शाखामूर्तय इत्यपि ॥११॥
होतारश्चोपहोतारस्तदाऽऽसन् सनकादिकाः ।
योगेश्वरास्तथा सिद्धाः कपिलाद्या नरायणाः ॥१२॥
आहर्तारस्तथा प्रतिहर्तारश्चेश्वराः शुभाः ।
भूमादयोऽप्यभवँश्च वैराजादियुतास्तथा ॥१३॥
ऋत्विजश्चाऽभवँस्तत्र वसिष्ठाद्या महर्षयः ।
वालखिल्या अभवँश्च वेदपाठकरास्तदा ॥१४॥
व्यासाद्या वेदवेत्तारो बृहस्पत्यादयस्तथा ।
लक्ष्मीनारायणसंहितायाः प्रपाठिनोऽभवन् ॥१५॥
नारायणास्तदा सर्वे हव्यवाहा हि वह्निषु ।
अभवन् अवताराश्च वन्ह्याननास्तदा मखे ॥१६॥
वह्नयो दिव्यरूपाश्च राजन्ते तत्र संसदि ।
कल्पवल्लीयुताः कल्पद्रुमा हव्यप्रदायिनः ॥१७॥
समाहरन्ति द्रव्याणि संकल्पितानि वै तदा ।
इत्येवं यज्ञसाहाय्याः क्लृप्तास्तत्र मखे ततः ॥१८॥
पृथ्व्याः सम्पूजनं चापि वाराहस्य प्रपूजनम् ।
कुण्डस्य पूजनं चापि वेदिकानां प्रपूजनम् ॥१९॥
चक्रुः श्रीलोमशाद्याश्च ततो गणेशपूजनम् ।
प्रत्यक्षस्य गणेशस्याऽर्चनं चक्रुस्तदा द्विजाः ॥२०॥
शंखस्य पूजनं चापि तथा चक्रस्य पूजनम् ।
कलशस्याऽर्चनं चापि तथा लक्ष्म्याः सुपूजनम् ॥२१॥
रुद्रस्य पूजनं चापि दुर्गायाः पूजनं तथा ।
कलशस्थापनं चापि मातृकापूजनं तथा ॥२२॥
दिक्पालानां पूजनं च ग्रहाणां चार्चनं तथा ।
ईश्वराणां पूजनं च शक्तीनां पूजनं तथा ॥२३॥
पार्षदानां पूजनं च वसूनां पूजनं तथा ।
आदित्यानां पूजनं च सुराणां पूजनं तथा ॥२४॥
लोकपालार्चनं चापि सतीनां पूजनं तथा ।
देवानां पूजनं पितृपूजनम् ऋषिपूजनम् ॥२५॥
भूतानां पूजनं चापि इष्टाऽनिष्टप्रवेदिनाम् ।
दिशां प्रपूजनं चापि विश्वेदेवप्रपूजनम् ॥२६॥
अश्विनीसुतयोश्चापि पूजनं रक्षसां तथा ।
क्षेत्राणां क्षेत्रपालानां पूजनं योगिनां तथा ॥२७॥
योगिनीनां पूजनं च कलानां पूजनं तथा ।
मनूनां पूजनं चापि तत्त्वानां पूजनं तथा ॥२८॥
मरुतां पूजनं चापि तीर्थानां पूजनं तथा ।
राजसानां तामसानां देवानां पूजनं तथा ॥२९॥
विघ्नानां विघ्नराजानां ब्राह्मीनां पूजनं तथा ।
विद्यानां ब्रह्मपत्नीनां पूजनं धामयोषिताम् ॥३०॥
मूर्तिमतां तु सर्वेषां सर्वासां तत्र पूजनम् ।
चकार श्रीकृष्णनारायणस्तेषां प्रतुष्टये ॥३१॥
ततः स्वयं हरिकृष्णस्वामी श्रीपुरुषोत्तमः ।
बालकृष्णः परब्रह्म मुख्यदेवस्थले स्थितः ॥३२॥
तस्य पूजां महापूजां शिविदेवश्चकार ह ।
मुख्यदेवे पूजिते चाऽवाद्यन्त तूर्यकोटयः ॥३३॥
ततो वह्निं मूर्तिमन्तं प्राह नारायणः स्वयम् ।
तिष्ठ कुण्डे मम मूर्ते देवानां तृप्तये मखे ॥३४॥
इत्युक्त्वा पूजितो वह्निः प्रसन्नः कुण्डमास्थितः ।
ज्वालारूपोऽभवत्तत्र समित्सु हव्यवाहनः ॥३५॥
यज्ञपात्रादिपूजां च कृत्वा वै ऋषयस्ततः ।
कुण्डदेवान् समिद्देवान् सम्पूज्य चान्यदेवताः ॥३६॥
तेभ्यो दत्वा यथापूजां होमकार्यं व्यवर्तत ।
स्वाहाद्यास्तत्र देव्यश्च सख्यो वै दिव्यविग्रहाः ॥३७॥
करे कृत्वा च हव्यानि ददुर्वह्निमुखादिषु ।
देवता ईश्वराश्चापि मुक्ता नारायणा अपि ॥३८॥
ब्रह्मप्रियाश्च मुक्तान्य ईश्वराण्यश्च देविकाः ।
सुराण्यश्चापि मानव्यः ऋषयः ऋषिसंप्रियाः ॥३९॥
सात्त्विका राजसाश्चापि तामसाश्चापि वै सुराः ।
सात्त्विक्यश्चापि राजस्यस्तामस्यस्तनवो हरेः ॥४०॥
प्रत्यक्षा मूर्तिमत्यस्ता भागान् जगृहुरध्वरे ।
जीवसृष्टावीशसृष्टौ ब्रह्मसृष्टौ तु ये च ये ॥४१॥
देहिनो वेदपर्णस्थास्ते सर्वे भुञ्जतेऽनले ।
अध्वरेऽर्पितहव्यानि जायते तृप्तिमान् हरिः ॥४२॥
एवं सप्तदिनान्येवाऽभवद् यज्ञो विधानतः ।
वैष्णवः परमो होमः सर्वतृप्तिप्रदो मखः ॥४३॥

**श्रीराधिकोवाच—**

यान् देवान् वै तदा स्मृत्वा यथा होमः प्रजायते ।
तत्सर्वं श्रोतुमिच्छामि तस्मिन् वै वैष्णवे मखे ॥४४॥

**श्रीकृष्ण उवाच—**

शृणु राधे तत्र होमो यथा वै सम्प्रजायते ।
अनादिश्रीकृष्णनारायणाय स्वामिने स्वाहा ॥४५॥

अक्षरब्रह्मणे स्वाहा स्वाहा मुक्तेभ्य इत्यपि ।
स्वाहा ब्रह्मप्रियाभ्यश्च स्वाहा मुक्ताभ्य इत्यपि ॥४६॥
स्वाहा कृष्णाय कान्ताय स्वाहा गोपीगणाय च ।
राधायै कृष्णकान्तायै स्वाहा गोपगणाय च ॥४७॥
स्वाहा गोलोकधाम्ने च स्वाहा धेनुभ्य इत्यपि ।
स्वाहा नारायणायेति लक्ष्म्यै स्वाहा श्रियै तथा ॥४८॥
श्रीसखीभ्यस्तथा स्वाहा स्वाहा वैकुण्ठकाय च ।
स्वाहा पार्षदवर्गाय स्वाहा दासीगणाय च ॥४९॥
वासुदेवाय वै स्वाहा स्वाहा संकर्षणाय च ।
प्रद्युम्नाय तथा स्वाहा स्वाहाऽनिरुद्धसंज्ञिने ॥५०॥
महाकालाय वै स्वाहा महापुरुषसंज्ञिने ।
मायायै च तथा स्वाहा स्वाहा तत्पुरुषाय च ॥५१॥
प्रधानपुरुषायेति स्वाहाऽव्याकृतधामिने ।
अमृतवासिने स्वाहा भूम्ने स्वाहा सुबुद्धये ॥५२॥
अहंकाराय च महाविष्णवे मनसे तथा ।
स्वाहा वैराजरूपाय विष्णवे शंभवे तथा ॥५३॥
ब्रह्मणे च तथा स्वाहा स्वाहा सदाशिवाय च ।
ईश्वरेभ्यस्तथा स्वाहा ईश्वराणीभ्य इत्यपि ॥५४॥
तन्मात्राभ्यस्तथा स्वाहा स्वाहेन्द्रियेभ्य इत्यपि ।
प्राणेभ्यश्च तथा स्वाहा स्वाहा भूतेभ्य इत्यपि ॥५५॥
अष्टावरणवासिभ्यः स्वाहा ईशेश्वराय च ।
मत्स्याय कूर्मरूपाय स्वाहा वाराहरूपिणे ॥५६॥
कपिलाय च हरये स्वाहा श्रीपृथवे तथा ।
दत्तात्रेयाय हंसाय स्वाहा नृसिंहरूपिणे ॥५७॥
ऋषभाय वामनाय स्वाहा परशुधारिणे ।
यज्ञाय च कुमाराय स्वाहा रामाय धन्विने ॥५८॥
हयशीर्षाय वै स्वाहा स्वाहा नारदनामिने ।
राजराजाय वै स्वाहा स्वाहा व्यासाय कल्किने ॥५९॥
स्वाहा मोहिनिकायै च स्वाहाऽन्तर्यामिणे तथा ।
स्वाहा सत्यनिवासिभ्यः स्वाहा श्रीपरमेष्ठिने ॥६०॥
सरस्वत्यै च गायत्र्यै सावित्र्यै ब्रह्मयोषिते ।
असिक्न्यै च पलिक्न्यै च स्वधा वीरिणियोषिते ॥६१॥
सृष्ट्यै चाऽप्यथ सन्ध्यायै मोहिन्यै स्वाह्निकेति च ।
दक्षादिभ्यो वषट् चापि प्रजापतिभ्य इत्यपि ॥६२॥
मनुभ्यो वालखिल्येभ्यो वषट् ऋषिभ्य इत्यपि ।
पितृभ्यश्च स्वधा चापि स्वाहा मेघेभ्य इत्यपि ॥६३॥
स्वाहा धर्माधर्मवंशगणाय काममूर्तये ।
ऋतुभ्यो वत्सरादिभ्यः स्वधा युगेभ्य इत्यपि ॥६४॥
दिग्भ्यः स्वाहा गुणेभ्यश्च स्वाहा द्रव्येभ्य इत्यपि ।
कर्मभ्यश्चापि जातिभ्यः स्वाहा योगेभ्य इत्यपि ॥६५॥
इन्द्रादिभ्यो दिगीशेभ्यः स्वाहा लोकेभ्य इत्यपि ।
सत्याय तपसे स्वाहा जनाय महरेऽपि च ॥६६॥
स्वर्गाय स्वर्गवासिभ्यः स्वाहा देवेभ्य इत्यपि ।
स्वाहाऽप्सरोगणेभ्यश्च स्वाहा देवीभ्य इत्यपि ॥६७॥
सिद्धिभ्यश्च वसुभ्यश्च स्वाहा निधिभ्य इत्यपि ।
स्वाहा ग्रहेभ्यः सर्वेभ्यः सूर्येभ्यस्तिथिनामिने ॥६८॥
कलाभ्यश्च तथा स्वाहा नक्षत्रेभ्यश्च इत्यपि ।
तारकाभ्यस्तथा स्वाहा स्वाहा मरुद्भ्य इत्यपि ॥६९॥
रुद्रेभ्यो रुद्रपत्नीभ्यः स्वाहा श्रीशंकराय च ।
कलाभ्यो योगिनीभ्यश्च स्वाहा खनिभ्य इत्यपि ॥७०॥
नरनारायणायेति स्वाहा वै शेषशायिने ।
अवतारस्वरूपाय स्वाहा मूर्त्यात्मने तथा ॥७१॥
गंगाद्यायै तथा स्वाहा स्वाहा तीर्थेभ्य इत्यपि ।
कैलासगणकेशाय गणेशाय शिवाय च ॥७२॥
मात्रे योगिनिकाचक्राय च स्वाहा हनूमते ।
कार्तिकाय च हंसाय गरुडायाऽरुणाय च ॥७३॥
स्वाहाऽग्निमण्डलायेति स्वधा याम्याय चेत्यपि ।
श्रावणेभ्यः स्वधा चापि प्रेतेभ्यश्च स्वधा ह्यपि ॥७४॥
भूतप्रेतपिशाचेभ्यः कूष्माण्डेभ्यः स्वधा तथा ।
विनायकेभ्यो वेतालेभ्यश्च स्वाहा स्वधा तथा ॥७५॥
डाकिनीशाकिनीभ्यश्च स्वधा वै पितृयोषिते ।
सूतमागधबन्दीभ्यो वषट् तीर्थेभ्य इत्यपि ॥७६॥
मानवेभ्यस्तथा वषड् वृक्षद्रुभ्यो वषट् तथा ।
वल्लीभ्यश्च वषट् तृणलताभ्यश्च वषट् तथा ॥७७॥
तिर्यग्भ्यश्च पशुभ्यश्च पक्षिभ्यश्च वषट् तथा ।
सरीसृपेभ्यः कीटेभ्यः क्षुद्रेभ्यश्च वषट् तथा ॥७८॥
गृहग्रामक्षेत्रदेवताभ्यः स्वाहा च भूमये ।
वनारण्यनदेभ्यश्च वौषट् चाब्धिभ्य इत्यपि ॥७९॥
आश्रमेभ्यश्च वर्णेभ्यो वौषट् शैलेभ्य इत्यपि ।
स्वधा पित्रे पितामहाय प्रपितामहाय च ॥८०॥
मात्राद्यायै स्वधा चापि श्रौषट् विश्वाधिवासिने ।
गन्धर्वेभ्यः किन्नरेभ्यः श्रौषट् किंपुरुषाय च ॥८१॥
साध्येभ्यश्चापि विश्वेभ्यः स्वाहा मरुद्भ्य इत्यपि ।
चारणेभ्यो वषट् वौषट् नारीभ्यो गणिकाभ्य आ ॥८२॥
साध्वीभ्यश्च तथा श्रौषट् त्यागिनीभ्यश्च सर्वथा ।
यादोभ्यश्च वषट् नागसर्पेभ्यश्च वषट् तथा ॥८३॥

दैत्येभ्यो दानवेभ्यश्च राक्षसेभ्यो वषट् तथा ।
यक्षेभ्यश्च वषट् चापि काश्यपेभ्यो यथायथम् ॥८४॥
सर्वसृष्टिप्रदेवेभ्यः स्वाहाऽन्तर्यामिणे तथा ।
स्वाहा श्रीहरिकृष्णाय घनश्यामाय वै तथा ॥८५॥
बालकृष्णाय च स्वाहा श्रीकृष्णवल्लभाय च ।
गोपालबालकायेति कंभराश्रीसुताय च ॥८६॥

स्वाहा श्रीहरये श्रीमन्माणिकीपतये तथा ।
लक्ष्मीनारायणायेति स्वाहा प्रीतिमयाय च ॥८७॥
पार्वतीपतये स्वाहा स्वाहा रासेश्वरीशिने ।
स्वाहा श्रीदुःखहालक्ष्मीस्वामिने परमात्मने ॥८८॥
स्वाहा जयाललिताधिपतये हंसयोगिने ।
अन्तर्यामिस्वरूपाय स्वाहा सर्वेश्वराय च ॥८९॥

यज्ञनारायणायेति स्वाहा श्रीवह्नये तथा ।
ओं परब्रह्मणे स्वाहा होमं भगवते ददुः ॥९०॥
सर्वे जीवास्तदा तृप्ता हव्यैः कव्यैर्मनोहरैः ।
इत्येवं हवनं कृत्वा भोजयामासुरादरात् ॥९१॥
महीमानान् तथा देशनिवासान् कोटिकार्बुदान् ।
मानवाँश्च चेतनाँश्च जडाँश्च भोज्यवस्तुभिः ॥९२॥

आगता वै तत्र यज्ञे कोटिशो मानवास्तदा ।
जगृहुश्चावशिष्टाश्च मन्त्रान् श्रीवैष्णवाँस्तथा ॥९३॥

इत्येवं नित्यमेवाऽपि जायन्ते हवनादयः ।
वैष्णवाश्चापि जायन्ते मानवाः कोटिशोऽपि च ॥९४॥
सप्ताहेन सुसम्पाद्यो न्यवर्तत क्रतुः शुभः ।
अवभृथं ततश्चक्रुर्बालकृष्णसरोवरे ॥९५॥

सर्वे वै देहिनो दिव्याऽदिव्या येऽत्र समागताः ।
पावनास्ते च सञ्जाता बालकृष्णस्य योगतः ॥९६॥
दक्षिणाः प्रददौ कृष्णनारायणोऽतिभूयसीः ।
शिबिदेवोऽपि सर्वस्वं राजा यज्ञे ददौ तदा ॥९७॥
कन्यकानां शतं नैजं बालकृष्णाय वै ददौ ।
हस्त्यश्वरथसौवर्णयानविमानकानि च ॥९८॥

स्वर्णरूप्यकहीरादिगृहवाटीर्ददौ तथा ।
दासीदासाननेकाँश्च ददौ राजा क्रतौ तदा ॥९९॥
अन्नवस्त्रगवां दानं कोटिसंख्यं ददौ नृपः ।
सर्वस्वं हरये नैजं ददौ वै राधिके तदा ॥१००॥
परिहारं ततश्चक्रे रात्रौ सर्वे विशश्रमुः ।
शिबिस्तु कारयामास मन्दिरं तत्र शोभनम् ॥१०१॥
बालकृष्णश्च षट्पत्नीसहितो यत्र राजते ।
राधा लक्ष्मीर्माणिकी च कमला श्रीः रमा तथा ॥१०२॥
सेवयन्ति सदा कान्तं मन्दिरे व्योमगामिनि ।
पठनाच्छ्रवणाच्चास्य यज्ञस्य फलभाग् भवेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने शिबिदेवराज्ये बालकृष्णसरोवरतटे महायज्ञे याज्ञिक-व्यवस्था, यज्ञकार्यनिर्वृत्तिः, श्रीहरये नृपकृत-शतकन्यादानं, चेत्यादिनिरूपणनामा चतु-र्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

**श्रीकृष्ण उवाच—**

एवं बालकृष्णसरस्तटे कृत्वा क्रतुं हरिः ।
बालकृष्णः स्वनाम्नैव बालकृष्णसरोऽकरोत् ॥ १ ॥
असंख्यदेहधारिभ्यो दत्वा मनुं च दर्शनम् ।
कृत्वा तान्पावनान्पश्चाद्भोजयित्वा जनानपि ॥ २ ॥

तृतीयायां जनान् सार्धं चाजिज्ञपत्प्रभुः स्वयम् ।
शिबिदेवो महाराजो मुक्तवद् वर्तते भुवि ॥ ३ ॥
शिबिराज्यं वैष्णवं च मत्कृपावशतोऽभवत् ।
श्रीसम्पद्द्रव्यभोग्यादिसंभृताश्च शिबेः प्रजाः ॥ ४ ॥

भवन्तु सुखपात्राणि मा तासां स्याद्धि निम्नता ।
मा स्याद् दुःखं क्वचिच्चापि स्यात् सदाऽभ्युदयः किल ॥ ५ ॥
भवतीनां प्रजानां च राज्ञोऽपि भवतात् सदा ।
राजवंशे प्रजानां च मम भक्तिः सदाऽस्तु च ॥ ६ ॥
अथ कर्तुं द्वितीयं तु मखं यान्तु प्रजाजनाः ।
सेवकाः ऋषयश्चापि थर्कूटस्थनृपादयः ॥ ७ ॥

थर्कूटस्थभूपराज्ये साहाय्यार्थं प्रयान्तु च ।
नैजो धर्मः पालनीयो भवद्भिर्भक्तिसंयुतैः ॥ ८ ॥
सतां गुणाश्चार्जनीयाः सुखदा दिव्यशान्तिदाः ।
स्वस्वरूपे ब्रह्मरूपे स्थितिः कार्या हि सर्वदा ॥ ९ ॥

सत्यं यथार्थवक्तृत्वं पालनीयं हितप्रदम् ।
शौचं सदात्मनः शुद्धिश्चान्तराणां प्रशुद्धितः ॥१०॥
पालनीया सदा भक्तैरकालुष्यं तु पापकैः ।
दया कार्या तु जीवेषु तेषां दुःखनिवारिका ॥११॥
क्षान्तिः रक्ष्या सापराधजनेष्वपि सहिष्णुता ।
चित्तसंयमरूपा च सदाऽनुद्वेगशालिनी ॥१२॥

त्यागो रक्ष्यः सदा दानं पूर्णकामत्वयोगतः ।
मायिकेषु तु भोग्येषु त्वनादरः प्रशान्तिदः ॥१३॥
अर्थिषु मुक्तकरता प्राप्तेष्वपि न लुब्धता ।
सन्तोषश्च निजानन्दपरिपूर्णत्वमित्यपि ॥१४॥

यथालब्धेष्वलंभावस्तृष्णाराहित्यमित्यपि ।
क्लेशराहित्यमेवाऽपि रक्षणीयं सदा जनैः ॥१५॥
आर्जवं चापि सारल्यं त्रयाणामेकरूपता ।
मनोवाणीशरीराणां भावानां चैकरूपता ॥१६॥
रक्षणीया प्रयत्नेन भक्तैर्भागवतैः सदा ।
शमः शाश्वतिकी शान्तिर्विषयेभ्यो निवर्तनम् ॥१७॥
अतिप्राकृतसंज्ञेभ्यो दुःखदेभ्यो निरन्तरम् ।
दमश्चेन्द्रियनियमः कर्तव्यः श्रेयसे सदा ॥१८॥
तपो विज्ञानलब्ध्यर्थं यत्नः कार्यः सदा जनैः ।
व्रतोपवासरूपं च कर्तव्यं वृद्धसेवनम् ॥१९॥
साम्यं रक्ष्यं शुभे दुष्टेऽनादरो मायिके सदा ।
तितिक्षा सहनं रक्ष्यं द्वन्द्वाख्यैर्दुःखसंस्थितौ ॥२०॥
आत्मरूपेण वै स्थैर्यं चाऽप्रतिक्षतिभावतः ।
उपरमः सदा रक्ष्यो व्यर्थव्यापारवर्जनम् ॥२१॥
श्रुतं ज्ञानं प्रापणीयं शास्त्रसद्गुरुदेवतः ।
स्वयं चापि परश्चापि वेदनीयो विशेषतः ॥२२॥
वैराग्यं सर्वविषये निस्पृहत्वं तथा सदा ।
अनाकृष्टमनस्त्वं च रक्षणीयं विशेषतः ॥२३॥
ऐश्वर्यं भगवद्योगात् सार्ष्टिं प्राप्यं हरेः पुरः ।
शौर्यं स्वभावविजयः कर्तव्यः सर्वथा जनैः ॥२४॥
तेजो रक्ष्यं भक्तजनैरन्यैः प्रधृष्यशून्यता ।
बलं चात्मबलं सर्वनियन्तृयोगतः सदा ॥२५॥
रक्षणीयं हि सामर्थ्यं बालकृष्णस्य मे कृपा ।
स्मृतिः कर्तव्यविषयेऽनुसन्धानं शुभाश्रये ॥२६॥
रक्षणीयं प्रयत्नेन परमेशप्रसंगतः ।
स्वातन्त्र्यं च पराऽनपेक्षता रक्ष्या तु सात्त्वतैः ॥२७॥
कौशलं सर्वकार्येषु नैपुण्यं रक्ष्यमुत्तमम् ।
कान्तिः रक्ष्या ब्रह्मचर्यबलजा शोभनात्मिका ॥२८॥
धैर्यं विषमभावेऽपि व्याकुलत्वविवर्जनम् ।
मार्दवं सर्वदा रक्ष्यं रौक्ष्यकाठिन्यवर्जनम् ॥२९॥
प्रागल्भ्यं प्रतिभा रक्ष्या मोक्षविचारदायिनी ।
प्रश्रयो विनयो रक्ष्यः सद्वृत्तिः शीलकारिणी ॥३०॥
सहनं मनसा कार्यं सर्वघातेऽप्यघातिता ।
ओजः रक्ष्यं चक्षुरादौ ज्ञानेन्द्रियेषु सर्वथा ॥३१॥
प्रभावश्च बलं रक्ष्यं कर्मेन्द्रियेषु वै तथा ।
भगो रक्ष्यो महैश्वर्यं सर्वोत्कर्षादिसंस्थितिः ॥३२॥
गाम्भीर्यं रक्षणीयं च दुर्गाह्याऽऽन्तरमन्त्रणम् ।
स्थैर्यं रक्ष्यं सदा भक्तैश्चाञ्चल्येन विहीनता ॥३३॥
आस्तिक्यं धर्ममोक्षादौ हरौ मयि स्थिरा मतिः ।
शास्त्रोक्तेऽर्थे च विश्वासः श्रद्धा च परमात्मनि ॥३४॥
कीर्तिः प्राप्या शुभा भक्तिः ख्यातिर्धामप्रदा जनैः ।
मौनं रक्ष्यं वृथालापवर्जनं सात्त्वतैः सदा ॥३५॥
गर्वाभावः सदा रक्ष्यो गुणाद्यहन्त्वहीनता ।
मानाभावस्तथा रक्ष्योऽवृथास्वरूपहानिता ॥३६॥
दंभाभावस्तथा रक्ष्यो वञ्चकत्वविहीनता ।
योग्याहारस्तथा कार्यो यो मोक्षे फलदो भवेत् ॥३७॥
दाक्ष्यं रक्ष्यं हितवाक्योपदेष्टृत्वं न चेतरत् ।
मैत्री रक्ष्या च विश्वासाधारता सर्वदेहिनाम् ॥३८॥
उपकारश्च सर्वेषां कर्तव्योऽतिवाञ्छया ।
अक्षोभश्च सदा रक्ष्यो वेगेन तृष्णयाऽपि वा ॥३९॥
क्षुब्धव्यं नैव विषये सात्त्विकैर्भक्तियोगिभिः ।
पीडनं प्राणिनां नैव कर्तव्यं वैष्णवैः क्वचित् ॥४०॥
सर्वसत्कारकारित्वं ग्रहणीयं समन्ततः ।
अनिष्टाप्तपराभूतिराहित्यं कार्यमेव च ॥४१॥
ब्रह्मज्ञानां सहवासः कर्तव्यश्च सतामपि ।
साधुता रक्षणीया च शरणागतपालिता ॥४२॥
फलेच्छाशून्यता रक्ष्या परिग्रहविवर्जिता ।
अनादिश्रीकृष्णनारायणे मयि परात्मनि ॥४३॥
सर्वस्वार्पणभक्तिश्च कर्तव्या मम सात्त्वतैः ।
यथा भक्तिर्मम कार्या तथा कार्या सतां मम ॥४४॥
निर्दंभप्रेमभावेन गुरोः शुश्रूषणं तथा ।
गुरोः सेवा मम सेवा भुक्तिमुक्तिप्रदा सदा ॥४५॥
मम पूजा प्रकर्तव्या सतां ममाऽर्चनं तथा ।
भुक्तिमुक्तिप्रदं चैतत् सर्वपापप्रणाशकम् ॥४६॥
पत्नी रक्ष्या सदा सौख्ये पीडनीया न वै क्वचित् ।
पतिः पूज्यः सदा पत्न्या पीडनीयो न वै क्वचित् ॥४७॥
वृद्धाः सेव्याः सदा मध्यावस्थैः पुत्रादिभिः खलु ।
गावः सन्तः सदा रक्ष्या भक्तिबोधकरा अपि ॥४८॥
देवा रक्ष्या गृहे मूर्तिस्वरूपा दृष्टिपावनाः ।
गुरवश्च सदा रक्ष्या गेहे संसारतारकाः ॥४९॥
भजनं च सदा कार्यं मम नारायणस्य वै ।
शरणं च मम ग्राह्यं पुरुषोत्तमशार्ङ्गिणः ॥५०॥
गुरोराज्ञा सदा पाल्या शुभा वा मोक्षदायिनी ।
स्वेषां शान्तिकरी मान्या वाचो गुरोः सदाऽनुजैः ॥५१॥
पूजनं सर्वदा कार्यं कृष्णनारायणस्य मे ।
परब्रह्मण एवाऽत्र मूर्तौ मे भक्तपुंगवैः ॥५२॥

स्नानं सरोवरे चात्र कर्तव्यं बालकृष्णके ।
मार्गैकादशिकायां चाऽमायां द्वितीयके दिने ॥५३॥
सप्ताहेषु प्रकर्तव्यं सर्वपापप्रणाशनम् ।
अत्र दानं प्रकर्तव्यं गवां मोक्षप्रदायकम् ॥५४॥
मम मूर्तेः प्रदानं च भवेत् सर्वार्थसाधकम् ।
हस्तिदानं चाश्वदानं वृषभस्य प्रदानकम् ॥५५॥
महिषीदानमार्ष्यं च रेण्डीवृषभदानकम् ।
शकटस्य च यानस्य विमानस्य प्रदानकम् ॥५६॥
शिबिकायाः प्रदानं च वाहनानां प्रदानकम् ।
वस्त्राणां कम्बलानां च शाटीनां च प्रदानकम् ॥५७॥
कर्तव्यं कञ्चुकीनां च दानं कोटिगुणार्थकम् ।
स्वर्णदानं रूप्यदानं ताम्रदानं श्रियःप्रदम् ॥५८॥
पात्रदानं प्रकर्तव्यं चान्नदानं महत्तमम् ।
जलदानं मिष्टदानं चेष्टदानं शुभावहम् ॥५९॥
शाकदानं प्रकर्तव्यं कन्यादानं दिवस्पदम् ।
ज्ञानदानं तथा यज्ञोपवीतस्य प्रदानकम् ॥६०॥
गृहदानं तथा दानं गृहोपकरणादिजम् ।
प्रकर्तव्यं वाटिकाया दानं क्षेत्रप्रदानकम् ॥६१॥
यद्यत् स्वेष्टं भवेत्तस्य दानं कर्तव्यमत्र वै ।
साधुभ्यो भोजनं देयं महर्षिभ्यश्च पूजनम् ॥६२॥
भोजनं वल्कलाद्यं च दातव्यं श्रेय इच्छता ।
पितॄणां पिण्डदानादि कर्तव्यं पितृतृप्तये ॥६३॥
बालकृष्णसरस्येव शाश्वतीतृप्तिदं भवेत् ।
देवानां पूजनं कार्यं बालकृष्णसरस्तटे ॥६४॥
मन्दिराणि सुराणां च कारणीयानि तत्तटे ।
मुक्तानामवताराणामीश्वराणां तथाऽऽलयाः ॥६५॥
ऋषीणां चापि पितॄणां प्रासादा मोक्षदाः शुभाः ।
कारणीया धर्मशाला भक्तिशालाः शुभावहाः ॥६६॥
उद्यानानि वाटिकाद्याः कारणीया हरेः कृते ।
मन्दिरं कारयित्वाऽत्र मम मूर्त्या समं सुरान् ॥६७॥
स्थापयिष्यन्ति ये भक्तास्तेभ्यो धाम ददाम्यहम् ।
जीविकां वृत्तिकां चापि पूजायाश्च प्रवाहिकाम् ॥६८॥
कारयिष्यन्ति ये भक्तास्तेषां पुण्यमनन्तकम् ।
सर्वे दास्येऽहमेवाऽस्मै धाम्नि मे पुरुषोत्तमः ॥६९॥
सर्वे देवास्तथा मुक्ता ईश्वराश्च नरायणाः ।
अवतारा ईश्वराण्यो मुक्तान्यो देवपुंगवाः ॥७०॥
देव्यो देवाः ऋषयश्च तीर्थानि च वसन्तिह ।
बालकृष्णः परब्रह्म स्वयं वसामि चात्र हि ॥७१॥

मार्गशीर्षकृष्णपक्षैकादशिकादिनेऽनिशम् ।
प्रतिसम्वत्सरं सर्वतीर्थैर्देवैश्च साधुभिः ॥७२॥
मुक्तैस्तथेश्वरैश्चात्राऽऽगन्तव्यं लोकहेतवे ।
सर्वपाविव्र्यलाभार्थं सप्ताहं तीर्थभावतः ॥७३॥
कोटिशश्च जनास्त्वत्र स्नास्यन्ति हि सरोवरे ।
तेषां पापविनाशश्च पुण्यं स्यादप्यनन्तकम् ॥७४॥
एतत्तीर्थवरं श्रेष्ठं सर्वतीर्थोत्तमोत्तमम् ।
मया सम्पाद्यते चात्र वासं कृत्वा तु शाश्वतम् ॥७५॥
अत्र तीर्थप्रकर्तॄणां रोगा यास्यन्ति वै क्षयम् ।
दारिद्र्यं नाशमायाच्च दुर्भाग्यं नाशमाप्नुयात् ॥७६॥
लक्ष्मीस्तेषां गृहे स्याच्च सौभाग्यं वर्धयेत्तथा ।
पुत्रपौत्रादिवंशश्च तैर्थिकानां भवेदिह ॥७७॥
यथेष्टः स्यात्तस्य लाभः पुरुषार्थचतुष्टये ।
मार्गशीर्षातिरिक्तेऽपि मासे तीर्थविधायिनाम् ॥७८॥
प्रणश्यन्ति च पापानि पुण्यं स्वर्गप्रदं भवेत् ।
अत्र वार्धौ मृतानां वै भस्माऽस्थिक्षेपणेऽपि च ॥७९॥
सर्वपापविनाशोऽपि मुक्तिश्च शाश्वती भवेत् ।
एतत्सरोजलस्यापि कणं पास्यति यो जनः ॥८०॥
मृत्यवस्थागतस्यापि मुक्तिस्तस्य तु शाश्वती ।
सरसश्चास्य संभूतः स्वाम्यहं परमेश्वरः ॥८१॥
अनादिश्रीकृष्णनारायणः श्रीबालकृष्णकः ।
सरोजलस्य योगेन मम योगो ध्रुवो भवेत् ॥८२॥
स्नानात् पानाद् दर्शनाच्चाऽऽचमनात् स्पर्शनादपि ।
स्मरणादस्य यज्ञस्य सरसश्च प्रमोक्षणम् ॥८३॥
भवत्येव न सन्देहो दास्येऽहं पुरुषोत्तमः ।
तपस्तीर्थं व्रतं होमः कार्याश्चात्र मुमुक्षुभिः ॥८४॥
समर्पणं क्रियाणां च कर्तव्यं मयि शार्ङ्गिणि ।
शाश्वतं पुण्यमेव स्यादर्पितस्य मयि ध्रुवम् ॥८५॥
मुक्ततीर्थं ब्रह्मतीर्थं ब्रह्मप्रियादितीर्थकम् ।
अवतारादितीर्थानि भूमतीर्थं तथाऽत्र च ॥८६॥
वासुदेवाऽभिधं तीर्थं प्राद्युम्नं तीर्थमित्यपि ।
देवायतनकं तीर्थं वैराजतीर्थमित्यपि ॥८७॥
कृष्णतीर्थं तथा राधातीर्थं श्रीतीर्थमित्यपि ।
नारायणं परं तीर्थं लक्ष्मीतीर्थं शुभं परम् ॥८८॥
ब्रह्मतीर्थं विष्णुतीर्थं शिवतीर्थं सतीयुतम् ।
रुद्रतीर्थं राशितीर्थम् ऋषितीर्थं तथोत्तमम् ॥८९॥
पितृतीर्थं देवतीर्थं दिक्पालानां च तीर्थकम् ।
इन्द्रतीर्थं वह्नितीर्थं धर्मतीर्थं शुभोत्तमम् ॥९०॥

वायुतीर्थं यमतीर्थं कुबेरतीर्थमुत्तमम् ।
ईशानतीर्थमुत्कृष्टं बृहस्पतिप्रतीर्थकम् ॥९१॥
लोमशाख्यं शुभं तीर्थं यज्ञतीर्थं शुभोत्तमम् ।
कम्भरातीर्थमेवाऽपि सन्तोषातीर्थमित्यपि ॥९२॥
श्रीमद्गोपालतीर्थं च माणिकीतीर्थमित्यपि ।
सभातीर्थं तथा पारवशंतीर्थं शुभं प्रियम् ॥९३॥
वेदतीर्थं च गायत्रीतीर्थं सावित्रिकाह्वयम् ।
कुंकुमवापिकातीर्थं बालकृष्णप्रतीर्थकम् ॥९४॥
कल्पवल्लीमहातीर्थं शुभं सर्वेष्टदायकम् ।
ग्रहतीर्थं सूर्यतीर्थं देवायतनतीर्थकम् ॥९५॥
वसुतीर्थं साध्यतीर्थं विश्वेतीर्थं शुभास्पदम् ।
सामुद्रतीर्थमेवापि कैलासतीर्थमित्यपि ॥९६॥
वैकुण्ठतीर्थमेवापि गणेशतीर्थमित्यपि ।
गणतीर्थं सतीतीर्थं साध्वीतीर्थोत्तमोत्तमम् ॥९७॥
व्रततीर्थं विमानाख्यतीर्थं च शिबितीर्थकम् ।
अवभृथं महत्तीर्थं सर्वतीर्थाऽधिवासितम् ॥९८॥
एतान्यन्यानि सर्वाणि मूर्तान्यत्र वसन्ति हि ।
ममाऽऽज्ञयाऽद्याऽस्यैव पावनानि तु देहिनाम् ॥९९॥
धर्मकार्यं सदा चात्र कर्तव्यं मानवैस्ततः ।
अथ सर्वे प्रयान्त्वेव थर्कूटस्थस्य राज्यके ॥१००॥
यत्र यज्ञः प्रकर्तव्यस्तत्र कुर्वन्तु तत्स्थितिम् ।
अहं तत्रागमिष्यामि श्वो वा परश्व एव तु ॥१०१॥
इत्युक्तास्तीर्थदेवाश्च कृत्वा रूपं द्वितीयकम् ।
तत्र तीर्थस्वरूपेण स्थिताः सदा हि राधिके ! ॥१०२॥
अथ सर्वे ययुस्तत्र द्विकलाख्यसरोवरे ।
थर्कूटस्थमहाराजराज्ये यज्ञार्थमेव ह ॥१०३॥
व्योमयानेन वै सर्वे ईशा देवाश्च मानवाः ।
कोट्यर्बुदाब्जसंख्या हि सतीसाध्वीहरिप्रियाः ॥१०४॥
बालकृष्णः समुवास शिबिराजगृहे दिनम् ।
विश्रान्त्यर्थं तथा राज्ञः सेवास्वीकरणाय वै ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णमूर्तिना श्रीहरिणा प्रदत्तोपदेशाशिषो, द्वितीययज्ञार्थमाज्ञा, बालकृष्णसरस्तीर्थानि चेति-निरूपणनामा पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

श्रीकृष्ण उवाच—
शृणु त्वं राधिके तत्र चमत्कारोऽभवन्महान् ।
सभायाः सन्निधौ तत्र कृशांगाश्च सहस्रशः ॥ १ ॥
रूक्षवर्णा नरा नार्यः कृष्णास्तेजोविहीनकाः ।
दुःखिनश्चाश्रयहीना दीना इव समाययुः ॥ २ ॥
प्रार्थयन्तः स्वमोक्षं वै दुःखसागरबन्धनात् ।
दृष्ट्वा ताँस्तु प्रजानां च तदाऽऽश्चर्यमभून्महत् ॥ ३ ॥
क इमे कुत आयाता जिज्ञासां चक्रिरे प्रजाः ।
ज्ञात्वा च हरिणा हार्दं पृष्टास्ते यूयमत्र के ॥ ४ ॥
ते रुदन्तस्तदा प्राहुः शृण्वतां नरयोषिताम् ।
वयं प्रेता मृताः पूर्वे पूर्वजाः प्रेतयोनयः ॥ ५ ॥
असद्गतिं गताः सर्वे सहस्रशः सरस्तटे ।
वसामोऽत्र महारण्ये क्षुधिता दुःखितास्तथा ॥ ६ ॥
प्रजानां पितरः स्मोऽत्र मन्यन्ते न इमे तु नः ।
उद्धारं त्वं भगवन्नः कुर्वत्र जलदानतः ॥ ७ ॥
इत्युक्तवद्भ्यस्तेभ्यः श्रीकृष्णनारायणो जलम् ।
प्रासादिकं निजं कृत्वा ददौ पानार्थमेव च ॥ ८ ॥
मिष्टं प्रसादं दत्वा च तृप्तान् कृत्वा पुनः पुनः ।
ददौ मुक्तिं ब्रह्मलोकगामिनीं परमोत्तमाम् ॥ ९ ॥
सर्वे ते दिव्यदेहा वै मुक्तास्तत्राऽभवन् शुभाः ।
मुक्ततुल्या विमानैश्च ययुस्ते ब्रह्म शाश्वतम् ॥१०॥
इत्येवं सरस्सतीरे मुक्तिं तेभ्यो ददौ हरिः ।
आश्चर्यं परमं दृष्ट्वा प्रजाः श्राद्धानि चाचरन् ॥११॥
पितॄणां तेन मुक्तिश्च तृप्तिश्चापि व्यजायत ।
इत्येवं राधिके ! पितृतीर्थं तत् समवर्तत ॥१२॥
शिबिदेवेन चोद्याने भूपवेषे प्रपूजितः ।
अनादिश्रीबालकृष्णः सैन्यादिपरिवारितः ॥१३॥
भूपवेषसुशोभाढ्यश्चाम्बालिकासमन्विते ।
चतुर्दन्तगजे शुक्ले निषादितः परेश्वरः ॥१४॥
स्वामिपालाशनाम्न्यां वै गत्वा विमानकेन तु ।
राजधान्यां निजायां च चतुर्दन्तगजोपरि ॥१५॥
पुनश्च भ्रामितः कृष्णो राजमार्गादिभिस्ततः ।
प्रजाभिर्वर्धितः पुष्पाक्षतलाजाभिरच्युतः ॥१६॥
पूजितो वन्दितः कृष्णो बहुभावेन चार्थितः ।
राज्ञ्या भूप्रभया साकं राज्ञा भूपालये चिरम् ॥१७॥
ततस्ताम्रकशायां च गत्वा विमानमार्गतः ।
दत्वा स्वदर्शनं राज्ञ्याः पितृभ्यां पूजितः प्रभुः ॥१८॥
विमानेन ययौ राज्ञा शिबिना सह माधवः ।
थर्कूटस्थनृपराज्ये द्विकलाख्यसरस्तटे ॥१९॥
पश्चिमे भूतले बीनानदीपर्यन्तमेव ह ।
कृतांश्च मण्डपान् दृष्ट्वा शिबिराणि नवानि च ॥२०॥

सरोवरं भ्रामयित्वाऽवाऽतारयद् विमानकम् ।
पश्चिमे सरस्वतीरे मण्डपस्य समीपतः ॥२१॥
अवाद्यन्त सुवाद्यानि तदा मांगलिकानि हि ।
जयघोषा ह्यभवँश्च साधुवादास्तथाऽभवन् ॥२२॥
पुष्पचन्दनलाजाभिश्चाऽक्षतैः कुंकुमादिभिः ।
वर्धयन्ति स्म जनताः श्रीकृष्णस्वामिनं हरिम् ॥२३॥
कोटिशो मानवास्तत्र द्विकलस्य तटेऽभवन् ।
अनादिश्रीकृष्णनारायणस्य दर्शनोत्सुकाः ॥२४॥
पावित्र्याऽऽकांक्षया यज्ञं द्रष्टुं चापि समागताः ।
नरा नार्यः कोटिशस्ते आबालवृद्धमानवाः ॥२५॥
सूर्यवत् काशमानं तं बालकृष्णं प्रभुं तथा ।
मातरं पितरं चापि भ्रातरौ भगिनीं स्नुषाम् ॥२६॥
शिबिदेवं च भक्ताऽयं दृष्ट्वा जहृषुरुत्सुकाः ।
देवतायतनश्चापि लोमशः पत्निकाव्रतः ॥२७॥
वशिष्ठाद्याः ऋषयश्च हारान् श्रीहरये ददुः ।
थर्कूटस्थो नृपतिश्च राज्ञ्यश्चतस्र इत्यपि ॥२८॥
ददुर्हारान् गले विष्णोर्मेषाद्याः ऋषयोऽपि च ।
पञ्चाशद्योजने तत्र मण्डपो विद्यते महान् ॥२९॥
तन्मध्ये श्रीबालकृष्णो ययौ स्नात्वा सरोवरे ।
मध्यपीठे तु सौवर्णे न्यषीदच्च व्यराजत ॥३०॥
पञ्चम्यां मार्गशुक्लस्य प्रातरेव हरिः स्वयम् ।
न्ययुंक्त यज्ञकार्यार्थे यथायोग्यर्षिमण्डलम् ॥३१॥
देवान् देवेश्वरान् मुक्तानवतारान् द्विजादिकान् ।
सतीः साध्वीर्दासदासीर्यथा वै प्रथमे मखे ॥३२॥
थर्कूटस्थो महाराजो यजमानः प्रियायुतः ।
वव्रे प्रकोष्ठबन्धेन ब्रह्मादीन् याज्ञिकाँस्ततः ॥३३॥
लोमशश्च नृपं बालकृष्णं च यजमानकम् ।
प्रकोष्ठेऽबन्धयत् कृष्णो लोमशं चाऽप्यबन्धयत् ॥३४॥
आचार्यं गौणमेवाऽपि पत्नीव्रतं हरिद्विजम् ।
अन्यान् पारेसहस्रं च पारेलक्षं ह्यबन्धयत् ॥३५॥
शुद्धिश्च स्वस्तिवाचश्च देवानां स्थापनादिकम् ।
पूजनं हवनं दानं पूर्वक्रतौ यथाऽभवत् ॥३६॥
अर्चनं भोजनं दानं दक्षिणाः स्वागतादिकम् ।
यथा पूर्वक्रतौ तद्वत् सर्वं पूर्णं त्वपद्यत ॥३७॥
सप्ताहो यज्ञ एवाऽयं वैष्णवः पूर्णतां गतः ।
दक्षिणाश्चान्नवस्त्रादिस्वर्णरूप्यकदानकम् ॥३८॥
सर्वं पूर्ववदेवात्र कृतं थर्कूटकेन वै ।
अवभृथं च मार्गस्य सितैकादशिकादिने ॥३९॥

द्विकले सरसि तत्र पश्चिमे चक्रुरुत्सुकाः ।
मुक्ता ईशा अवतारा देवाश्च पितृमानवाः ॥४०॥
पातालस्थास्तथा चान्ये जडचेतनदेहिनः ।
बीनामूले तथा सस्नुः कृष्णयुक्ता जनाः पुनः ॥४१॥
एवं च द्विकले कृष्णो बीनानद्या जलेऽपि च ।
स्नात्वा तीर्थानि वै कृत्वा महीमानानभोजयत् ॥४२॥
दीनाऽनाथदरिद्रादीनभोजयच्च तत्परः ।
प्रजाः सर्वास्ततश्चाभोजयन्मिष्टान्नजातिभिः ॥४३॥
अभोजयद्धरिः पश्चात् परिवेषणकारकान् ।
जडचेतनवर्गांश्चातर्पयाच्चान्नवारिभिः ॥४४॥
मन्त्रान् तत्रागतसर्वमुमुक्षेभ्यो ददौ ऋषिः ।
लोमशः श्रीहरिश्चापि निजान् मनून् स्वयं ददौ ॥४५॥
एवं निर्वर्तितो यज्ञः थर्कूटस्थेन भूभृता ।
तस्मै राज्ञे हरिर्नैजे पादाब्जे प्रददौ हृदि ॥४६॥
राज्यं चाऽविचलं त्वस्तु प्रजा ते चास्तु मोदिनी ।
सर्वसम्पद्धरा चास्तु भवान् वंशधरोऽस्तु च ॥४७॥
बालकृष्णसरस्तोये यथा तीर्थानि सन्ति च ।
तथा तीर्थानि सर्वाणि सरस्यत्र वसन्त्वपि ॥४८॥
मुक्ता ईशा अवतारा राधालक्ष्मीरमादिकाः ।
ब्रह्मविष्णुमहेशाद्याः पितरो मुनयस्तथा ॥४९॥
देवा देव्यो मानवाश्च यत्र सस्नुस्तदन्तरे ।
ते सर्वे दिव्यरूपेण वसन्तु दिव्यरूपिणः ॥५०॥
इत्येवं हरिणाऽऽज्ञप्ता ऊषुस्तत्र निरन्तरम् ।
तानि तीर्थानि सर्वाणि कृतानि परमात्मना ॥५१॥
स्नानदानजपयज्ञहोमोपकारकाणि च ।
कोट्यनन्तफलदानि भविष्यन्तीत्युवाच सः ॥५२॥
श्राद्धं कार्यं त्वत्र तीर्थे यज्ञसप्ताहके शुभे ।
सर्वतीर्थनिवासेऽत्र मोक्षदं चेष्टदं भवेत् ॥५३॥
मार्गशीर्षे सिते पक्षे पञ्चम्येकादशीक्षणे ।
समाजस्तत्र कर्तव्यः सरसो वै तटे शुभे ॥५४॥
मन्दिरं चात्र कर्तव्यं मूर्तिर्मे कानकी शुभा ।
अभयदानदात्री च मालिकासहिता तथा ॥५५॥
स्थापनीया मन्दिरेऽत्र षड्दासीसहिता वरा ।
राधालक्ष्मीब्रह्मविद्यारमाश्रीमाणिकीयुता ॥५६॥
यज्ञास्त्वत्रैव कर्तव्याः सर्वमेधादिवैष्णवाः ।
यथाऽयं वैष्णवो यज्ञः कृतः सर्वसुरार्चनः ॥५७॥
तथा भक्तैः प्रकर्तव्या यज्ञा यथाधनं शुभाः ।
असद्गतीनां मोक्षोऽत्र भविता तर्पणात् खलु ॥५८॥

श्राद्धदानादि कर्तव्यं तीर्थेऽत्र पितृनामतः ।
पापानां प्रविनाशार्थं स्नातव्यं त्वत्र सर्वथा ॥५९॥
अत्राऽऽसन्नमृत्युभिस्तु वासः कार्यः सरस्तटे ।
अहं नारायणस्वामी मन्त्रं दास्यामि मोक्षणम् ॥६०॥
कथा दिव्या वाचनीया मम सामर्थ्यबोधिकाः ।
लक्ष्मीनारायणसंहिताकथा तत्त्ववेदिभिः ॥६१॥
मोक्षदा वाचनीयाऽत्र सर्वादिबोधदायिनी ।
मम शास्त्रं वेद एव लक्ष्म्या श्रुतं च राधया ॥६२॥
माणिक्यया च रमया विद्यया च श्रुतं तथा ।
मंजुलया हंसया च श्रुतं सद्गुणया तथा ॥६३॥
जयाललिताभूलीलाद्याभिर्मुक्तैस्तथा श्रुतम् ।
ऋषिपितृसुरनारायणभूवासिभिः श्रुतम् ॥६४॥
अतलादिस्थितैरन्यैः श्रुतं यस्माद् बहिर्न वै ।
चरित्राणि पूर्वपूर्वकृतानि तनुभिर्मया ॥६५॥
तच्छ्रव्यं श्रावणीयं च श्रोतव्यं च पुनः पुनः ।
बालकृष्णः परब्रह्माऽहमस्मि पुरुषोत्तमः ॥६६॥
भजनीयः स एवाहं चान्तरात्मा परात्परः ।
एवं मे निश्चयः कार्यो विकल्पवर्जितो ध्रुवः ॥६७॥
मम भक्तिः सदा कार्या सर्वस्वार्पणपूर्विका ।
मम भक्ताः सदा दिव्यतया मान्या यथा त्वहम् ॥६८॥
भक्तद्रोहो न कर्तव्यो द्रोहः स्वरूपखण्डनम् ।
कर्तव्यस्तु तथा नित्यो मम भक्तसमागमः ॥६९॥
दर्शनं मे सदा कार्यं प्रातः स्नात्वा च मन्दिरे ।
दासभक्तिर्भृत्यभक्तिस्तथा कार्या सतां मम ॥७०॥
मम वासे प्रवस्तव्यं दुःखदोषनिवृत्तये ।
हिंसा कार्या न कस्यापि भोक्तव्या न परस्त्रियः ॥७१॥
मांसादनं न कर्तव्यं पातव्यं मदिरादि न ।
शीलभंगो न कर्तव्यो ह्ययोग्ये देहिनि क्वचित् ॥७२॥
आत्मघातोऽपि कार्यो न चौर्यं कार्यं न वै क्वचित् ।
मिथ्यारोपकलंकादि देयं नैव पराय च ॥७३॥
निन्दनीया न वै देवा देव्यो वा देहिनोऽपि वा ।
पापस्योत्पादिका निन्दा ततः पुण्यविनाशिनी ॥७४॥
अभक्ष्यं नैव भक्ष्यं चाऽपेयं पातव्यमेव न ।
देवप्रसादहीनं चाऽभक्ष्याऽपेयं यतो मतम् ॥७५॥
नास्तिकानां प्रसंगो न कर्तव्यो मोक्षरोधकः ।
सतां सेवा सदा कार्या सन्तो वै मम मूर्तयः ॥७६॥
नरो वा यदि वा नारी सेवया मुच्यते ह्यघात् ।
मम ये साधवः सन्ति ते सन्ति मोक्षदायकाः ॥७७॥
तद्देहः सर्वथा पुण्यः पुण्यदः पावनः परः ।
भागत्यागो न तत्राऽस्ति यथा मयि तथा सति ॥७८॥
मातापितृसेवनं तु कर्तव्यं सर्वथा भुवि ।
ममाऽऽज्ञां पालयिष्यन्ति ध्रुवास्तेषां हि सिद्धयः ॥७९॥
कल्पविद्युत्प्रवाहाश्च कल्पतत्त्वाणवस्तथा ।
कल्पवल्लीरसास्तेषां भविष्यन्ति गृहे सदा ॥८०॥
कामावसायिताशालाः संकल्पवंशविस्तराः ।
सर्वे कामदुघास्तत्त्वसमूहाः सार्वभौमिकाः ॥८१॥
भविष्यन्ति गृहे तेषां ये मदाज्ञाप्रवर्तिनः ।
तेषामहं सदा दाता यथेष्टस्याक्षरे यथा ॥८२॥
भोगाः कार्या न चाऽत्यर्थं भक्तिः कार्याऽतिशायिनी ।
निद्रा कार्या न चात्यर्थं सेवा कार्याऽतिशायिनी ॥८३॥
मनः कार्यं नाऽपकृष्टं कार्या माया विमूलिनी ।
तृष्णा कार्या न चात्यर्थं वाञ्छा कार्या ममाऽतिगा ॥८४॥
आग्रहो नेह कर्तव्यः कर्तव्योऽमुत्र मोक्षदः ।
उद्वेगः सर्वथा त्याज्यः शान्तिः प्राप्या तु शाश्वती ॥८५॥
नाऽऽयासो बहुधा कार्यो विज्ञाने कार्य उत्तमः ।
पराधीनेन नो भाव्यं भाव्यं तु सत्तयाऽऽत्मनः ॥८६॥
देहात्मना न वै वृत्त्यं वर्तितव्यं निजात्मना ।
ममता न गृहे कार्या कार्या सुस्वामिनि ध्रुवा ॥८७॥
स्वामी चाहं हि भक्तानां सर्वेषामपि सर्वथा ।
भवाम्येव परः स्वामी परमेश्वरसंज्ञकः ॥८८॥
जलं तीर्थं स्थलं तीर्थं चात्मतीर्थं सदोत्तमम् ।
साधुजनः सदा तीर्थं स्वामी तीर्थमहं हरिः ॥८९॥
यत्राऽहं मम मूर्तिश्च तत्तीर्थं दिव्यमोक्षदम् ।
इत्येवं सर्वथा यूयं थर्कूटस्थप्रजाजनाः ॥९०॥
वित्त कुरुत भक्तिं मे भजताऽन्वहमादरात् ।
आदत्त मम मन्त्रांश्च मत्त एव सुमुक्तिदान् ॥९१॥
इत्युपदिष्टा भक्तास्ते कोटिशो मनुलब्धये ।
आययुः श्रीहरेः पार्श्वं ददौ तेभ्यो मनून् हरिः ॥९२॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥९३॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥९४॥
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥९५॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ॥९६॥

'श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ।
इत्येवं प्रददौ कृष्णस्तेभ्यो मनून् हि राधिके ॥९७॥
परिहारं ततश्चक्रे विश्रान्त्यर्थं ययौ गृहम् ।
थर्कूटस्थमहाराजस्तथा राज्ञ्यः सुताः सुताः ॥९८॥
पादसंवाहनं चक्रुर्बालकृष्णस्य वै तदा ।
राज्ञा सर्वे पूजिताश्च भोजिताश्च विशश्रमुः ॥९९॥
राजधान्यां द्वितीये च दिने त्वभ्रामयन्मुदा ।
हस्तिस्थं बालकृष्णं वै प्रजा ददृशुरुत्सुकाः ॥१००॥
वर्धयामासुरत्यर्थं पुपूजुरुत्सुकास्तथा ।
आगत्य राजभवने सभायामाह केशवः ॥१०१॥
श्वः प्रयान्तु प्रभुक्त्वैव ओत्रीरात्रीशसंगमम् ।
वीरजारमहाराजराज्ये यज्ञस्तृतीयकः ॥१०२॥
पौषकृष्णतृतीयातो यज्ञारंभो भविष्यति ।
सप्ताहः कारणीयोऽस्ति यावन्नवमिकातिथिम् ॥१०३॥
अहं तत्राऽऽगमिष्यामि द्वितीयाप्रातरेव ह ।
इत्युक्ता व्योमयानैर्वै सर्वे देवेश्वरर्षयः ॥१०४॥
सर्वसृष्टिमहीमाना ययुश्चौबीनदीतटम् ।
श्रीहरिः स्वास्थ्यमापन्नश्चोवास थर्कुटस्थकम् ॥१०५॥
सुखयन् तद्गृहे तावद् राधिके ! मोक्षकृद्धरिः ।
सर्वकामनिधिः स्वामी सर्वसंकल्पपूरकः ॥१०६॥
पठनाच्छ्रवणाचास्य श्रावणान्मननादपि ।
द्विकलस्नानपुण्यं च यज्ञपुण्यं लभेज्जनः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने थर्कूटस्थमहाराजराज्ये द्विकलसरोवरे द्वितीयविष्णुयागकरणं प्रजाभ्यो मन्त्रोपदेशदानादि चेत्यादिनिरूपणनामा षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! तत्राऽप्याश्चर्यं समभूद्धि यत् ।
पूर्वं भूकम्पयोगेन मृताश्चापगतिं गताः ॥ १ ॥
लक्षाधिकास्तु ये प्रेताः समानपर्वतस्थिताः ।
आययुर्द्विकलं तीर्थं मोक्षार्थं कृष्णसन्निधौ ॥ २ ॥
केचिद्वै वक्रवदनाः केचिच्छुष्ककलेवराः ।
अन्ये तु कटिभग्नाश्च पृष्ठलग्नोदराः परे ॥ ३ ॥
सकेशा मक्षिकाव्याप्ताश्चान्ये मशकजालिनः ।
क्षुत्तृषादुःखिनश्चान्येऽन्धाः पङ्गुव्रणकाः परे ॥ ४ ॥
कुष्ठिनोऽङ्गादिविकलाः श्वासकासादिरोगिणः ।
लम्बजलोदराश्चान्ये निर्नेत्राः कर्णवर्जिताः ॥ ५ ॥
पृष्ठपादाः पृष्ठमुखा विकराला दरिद्रकाः ।
सहस्रशो दुःखिनस्ते समाययुर्हरेः पुरः ॥ ६ ॥
दुःखनाशार्थमेवैते प्रार्थयामासुरच्युतम् ।
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥ ७ ॥
भूकम्पे हि वयं नष्टा गृहपातार्दनैः पुरा ।
वृक्षपाताऽर्दनैश्चापि भूस्फाटे पतिता अपि ॥ ८ ॥
विवरेषु सजलेषु मग्ना नष्टा मृतास्तदा ।
आकस्मिकैश्च मरणैः प्रेता वयं हि दुःखिनः ॥ ९ ॥
योग्या उद्धर्तुमेवाऽत्र भवतैव न चेतरैः ।
तस्मादुद्धर पापिष्ठयोनेरस्मान् कृपां कुरु ॥१०॥
इत्यर्थितः श्रीभगवान् जलं चिक्षेप तेषु ह ।
अञ्जलिना कृतं प्रासादिकं प्राप्तं च तैस्तदा ॥११॥
दग्धपापा अभवँश्च जलं ययाचिरे पुनः ।
पानार्थं प्रददौ तेभ्यः कृष्णो जलं तु सारसम् ॥१२॥
आनीतं निजकार्यार्थं पाययामास तान्प्रभुः ।
पीत्वा पीत्वाऽतितृप्तास्ते ययाचिरेऽथ भोजनम् ॥१३॥
भगवान् प्रददौ तेभ्यो मिष्टान्नं शार्करं शुभम् ।
सघृतं पायसान्नं च कल्पधेनुसमुद्भवम् ॥१४॥
भुक्त्वा तृप्ताः पुनर्जाता ययाचिरे विरोगिताम् ।
हरिस्तेभ्यो ददौ रम्यमारोग्यं सौम्यवर्ष्म च ॥१५॥
ययाचिरे ततो मोक्षं दिव्यदेहैः प्रसेवनम् ।
हरिस्तेभ्यो ददौ मोक्षं दिव्यदेहैर्ययुश्च ते ॥१६॥
वैकुण्ठं परमं लोकं विमानैः सूर्यसन्निभैः ।
नराश्च पार्षदा जाताश्चतुर्भुजाः सुभासुराः ॥१७॥
नार्यश्च पार्षदान्यश्च चतुर्भुजाः सुभाग्यिकाः ।
मुक्तरूपा हि जाता वै मोक्षस्थाननिवासिनः ॥१८॥
इत्येवं कृपया तेभ्यो बालकृष्णः श्रियः पतिः ।
ददौ वैकुण्ठमेवाऽर्घ्यं स्वयोगेन क्षणान्ननु ॥१९॥
कृपैव कारणं चात्र न पुण्यं भक्तिरित्यपि ।
शरणागतपालत्वं कारणं कृपयाऽन्वितम् ॥२०॥
राधिके च ततः कृष्णो महाराजो रमापतिः ।
माणिक्याकान्त ईशेशः थर्कूटस्थं जगाद ह ॥२१॥
थर्कूटस्थमहाराज ! शृणु ज्ञातव्यमत्र यत् ।
धर्मो ज्ञानं विरागश्च भक्तिश्चेति चतुष्टयम् ॥२२॥
त्वया पाल्या हि चत्वारः कर्तव्यार्थाः सदा भुवि ।
लोकेऽस्मिन् सुखदास्ते च परत्राऽऽनन्ददायकाः ॥२३॥
प्रजानां पालनं कार्यं दया कार्या प्रजादिषु ।
दीनाऽनाथेषु योषित्सु सत्सु वृद्धजनादिषु ॥२४॥

परोपकारः कर्तव्यः परात्मसुखकारकः ।
परपीडा न कर्तव्या युद्धधर्मं विना क्वचित् ॥२५॥
शरणापन्नजीवानां रक्षा कार्या त्वया सदा ।
यन्मुखे भगवन्नाम स पूज्योऽदण्ड्य एव च ॥२६॥
वैष्णवाः सर्वथा पूज्या दानमानाऽर्हवस्तुभिः ।
विनयेन च वाक्येन सेवया दासधर्मया ॥२७॥
सात्त्वतानां संगमश्च कर्तव्यो हृदयेन वै ।
राजसानां संगमस्तु कर्तव्यो वर्ष्मणा मनाक् ॥२८॥
तामसानां संगमस्तु कर्तव्यो वै मृषानिभः ।
यथा राज्यं विनश्येन्न बन्धनं स्वस्य नो भवेत् ॥२९॥
विप्रा नेयुर्यथा चापि कर्तव्यं तत्तथा सदा ।
विश्वासः सर्वथा कार्यः सत्सु भागवतेषु वै ॥३०॥
राज्ञ्यां पुत्रे प्रधाने वा विश्वसेत् सावधानकः ।
निजान् निजान्न मन्वीत यावन्न स्यात्परिक्षणम् ॥३१॥
स्वार्थमात्रपरान् गृध्नायुतान् राज्ये न विश्वसेत् ।
निस्पृहान् विश्वसेत् भक्त्या साधुमार्गे स्थितान् जनान् ॥३२॥
एकाकी न मिलेत् कंचिद् भयस्थानं हि निर्जनम् ।
भोजनं नापि गृह्णीयात् विनाऽन्यग्रहपूर्वकम् ॥३३॥
पेयं स्पृश्यं ददेत् कश्चिन्न गृह्णीयादचिन्तयन् ।
भोग्यानां जडवस्तूनां विनाऽन्यस्मिन् समर्पणम् ॥३४॥
स्वार्थार्थे नोपयुञ्जीत कणमात्रमपि क्वचित् ।
अपि भ्राता सुतश्चापि द्रष्टव्यस्त्ववधानिना ॥३५॥
प्रजा नोद्वेजनीयाश्च हिंसितव्या न देहिनः ।
नमन्तं विश्वसेन्नैव इषन्मिलत्प्रनेत्रकम् ॥३६॥
शून्यगृहे वसेन्नैव विना शस्त्रं न वै वसेत् ।
चेटीं विना वसेन्नैव राज्ञ्या सहाऽपि निर्जने ॥३७॥
बहुपत्नीर्न वै कुर्यान्न दास्यां सुरतं श्रयेत् ।
विना धर्मे न गच्छेच्च पदं कृत्यार्थमेव वा ॥३८॥
न स्वपेन्निर्भयो भूत्वा पार्श्वे साधून्प्ररक्षयेत् ।
धर्मस्थाने न वै कामं प्रयुञ्जीत कदाचन ॥३९॥
कामस्थाने न वै ज्ञानं प्रयुञ्जीत विरागिताम् ।
वैराग्यस्य तपसश्च स्थाने युञ्ज्यान्न लालसाम् ॥४०॥
चारान् युञ्ज्यात् परस्थाने स्वराज्येऽपि गृहे स्थले ।
देहेन्द्रियादिराज्येऽपि चारान् युञ्जीत धर्मजान् ॥४१॥
विवेकं च प्रधानं वै कृत्वा कार्याणि वर्तयेत् ।
प्रधानो विमनाः स्याच्चेत् कार्यरोधं समर्थयेत् ॥४२॥
वृद्धादनुभवं प्राप्य शान्तिदं शाश्वतं चरेत् ।
सद्योजातं बालकं च महत्यर्थे न संश्रयेत् ॥४३॥

मोक्षार्थे हितदं स्वल्पं महान्तं वा समाश्रयेत् ।
वृथाऽऽयासप्रदां बुद्धिं विवासयेद् वृकीमिव ॥४४॥
शान्तिप्रदां मतिं ह्रस्वां सुवासयेत् सतीमिव ।
जडं चापि जनं रक्षेद् स्तम्भमिव विपत्स्थले ॥४५॥
विद्वांसमपि रक्षेन्न चाततायिक्रियापरम् ।
अरण्ये वा मृगयायां नैकाकी विचरेन्नृपः ॥४६॥
जलाशये च कूपादौ विश्वसेन्न निजं जनम् ।
पुरोहितं पुरस्कृत्य ससैन्यश्चाऽटवीं चरेत् ॥४७॥
तत्रापि चाटवीशं हि कुर्यादग्रगतः सदा ।
वर्षायां नाऽटवीं गच्छेदुत्सवे विप्लवे तथा ॥४८॥
रात्रौ वेषान्तरेणाऽपि परीक्षेत प्रजासुखम् ।
नापितात् तन्तुवायाच्च भाराच्चाटाच्च तस्करात् ॥४९॥
स्वयं तद्रूपमासाद्य महीमानो भवेत् क्वचित् ।
सर्वं विज्ञाय वृत्तान्तं प्रजासुखं समाचरेत् ॥५०॥
नापितादौ निजान् भृत्यान् तद्रूपैः प्रेरयेत् पुरा ।
ततः स्वयं च तद्रूपो भूत्वा गच्छेन्न चान्यथा ॥५१॥
नारी भूत्वा ब्राह्मकाले जलार्थे जलहारिणी ।
स्वदासीभिर्जलहारिणीभिर्गच्छेज्जलस्थलीम् ॥५२॥
विजानीयाच्च ताभ्यश्च वार्तया च प्रजाहितम् ।
स्वभृत्यानां स्वाश्रितानां स्वस्त्रीणां वर्तनादिकम् ॥५३॥
दीनाऽनाथदरिद्राणां ज्ञात्वा दुःखानि नाशयेत् ।
नास्तिक्यं च प्रतारित्वं कौटिल्यं नाशयेत्तथा ॥५४॥
कथाद्वारा दण्डद्वारा दुष्टाः प्रजाः प्रशिक्षयेत् ।
विधवाभ्यश्चान्नवस्त्राश्रयान् दद्याद् दयापरः ॥५५॥
विद्यादानं दापयेच्च शिक्षाज्ञानं प्रदापयेत् ।
कलाज्ञानं शिल्पविद्यां विकासयेत् सदा नृपः ॥५६॥
नराणां मानवानां तु चाऽण्डकोशान्न छेदयेत् ।
नारीणां बालरक्षादि परद्वारा न कारयेत् ॥५७॥
मातृद्वारा बालरक्षापुष्टिशिक्षादि कारयेत् ।
ऋतुधर्मान्न वै रुन्ध्याच्छासनेन कदापि वै ॥५८॥
आर्तवं फलपुष्पादि विकारयेन्न चौषधैः ।
मानवं तु पराधीनं पशुवन्न प्रवाहयेत् ॥५९॥
मारयेन्न च निष्कामं निष्प्रयोजनमक्रियम् ।
विघ्नरूपं च वाऽयोग्यं मानवं वै कदाचन ॥६०॥
मोक्षधर्मे तादृशाय समर्पयेद्धिताय वै ।
लोकानां च हितार्थाय देवकार्याणि चार्पयेत् ॥६१॥
मानवं दुर्लभं कुर्यात् तुषवन्न कदाचन ।
विकासं साधयेन्नूनं विकासं न विलोपयेत् ॥६२॥

कृषिं विकासयेत् सर्वविकासोत्तमरूपिणीम् ।
शैल्प्यं विकासयेच्चापि विज्ञानं तात्त्विकं तथा ॥६३॥
रासायनं तान्त्रिकं यान्त्रिकं च मान्त्रिकं तथा ।
दैविकं व्योममार्गीयं विकासयेद् यथाबलम् ॥६४॥
श्रेष्ठे संकरतां नैव कुर्यान्निम्नत्वदायिनीम् ।
निम्ने श्रैष्ठ्यप्रदां कुर्यात् कलां विभूतिदायिनीम् ॥६५॥
दूरश्रवणदृश्यादि विकासयेद्धि तात्त्विकम् ।
पृथ्वीप्रवेशमार्गादि विकासयेत्तु योगिवत् ॥६६॥

जलतेजोऽन्तरीक्षादिगमनं च विकासयेत् ।
पराण्डगमनं चापि लोपयेन्न कदाचन ॥६७॥
ऋषिपितृसुरादीनां दैत्यमानवरक्षसाम् ।
समाजं कारयेच्छ्रेष्ठं मिथः परिचयार्थकम् ॥६८॥
यज्ञान्निर्वर्तयेत्तस्मात् सर्वमेधान्नृपः स्वयम् ।
स्याच्च परिचयस्तेन सर्वलोकनिवासिनाम् ॥६९॥
पूज्यपूजादिसत्कारक्रमोत्क्रमं न चाचरेत् ।
गुरूणां पूज्यताभावं वर्धयेत् सर्वथा नृपः ॥७०॥

स्वर्गवत् सर्ववस्तूनां कल्पनिधीन् प्ररक्षयेत् ।
प्रजाः सर्वाः सुखच्च मोदन्ते यत्तथाऽऽचरेत् ॥७१॥
राजा प्रजानां सुखदो यथाऽहं परमेश्वरः ।
मया वासः सदा राज्ञि क्रियते राजधर्मिणा ॥७२॥
मत्स्वरूपस्ततो राजा पुत्रवत्पालयेत्प्रजाः ।
धर्ममर्थं च कामं च मोक्षं प्रदापयेत्ततः ॥७३॥
परमेशाऽऽराधनातः पातयेन्न प्रजाः क्वचित् ।
पतनं मोक्षहानिश्चोन्नतिर्मोक्षाऽविसर्जनम् ॥७४॥

मुख्यं वै मानवे भावे ध्येयं मत्वा चरेद् वृषम् ।
भक्तिच्युतिर्यथा न स्यात्तथा ध्येयं सुभावयेत् ॥७५॥
तद्विना राजसंज्ञा तु जारसंज्ञा भवेद् भुवि ।
नाम्ना थर्कूटराजा त्वं थुरानन्दमयो भव ॥७६॥
मदुक्तधर्मलोपे तु दुःखं वै स्यात् क्वचित् त्वयि ।
तस्माद्वै सावधानस्त्वं प्ररक्ष मम देशनाः ॥७७॥

सारद्वयं हरौ भक्तिः सतां समागमः शुभः ।
सर्वथा कारयेत्तौ च राजा राजार्थसार्थकः ॥७८॥
प्रजानां पालनं चात्र परत्र मोक्षदायकम् ।
स्वमोक्षदायकं चापि कर्तव्यं राजधर्मिणा ॥७९॥
पाल्यधर्मविरुद्धार्थं कुर्वाणानां प्रशासनम् ।
दैवधर्मप्रवृत्तानामुत्तेजनं परार्थिनाम् ॥८०॥
मुक्तिध्येयाऽनुसन्धानं कर्तव्यं राजधर्मिणा ।
राज्यप्रशासने नियोक्तव्यास्तद्बुद्धिशालिनः ॥८१॥

राज्ञा मानुषदेहस्य फलं साध्यं तु मोक्षणम् ।
अध्रुवस्य तु संस्कारे फलं नाऽऽप्येत वै ध्रुवम् ॥८२॥
राज्यं प्रशास्त्वा विधिना मोक्षशासनमाचरेत् ।
तदा राज्यं प्रदद्याच्च पुत्रादिभ्योऽथ संव्रजेत् ॥८३॥
यदि प्रव्राजनं नेष्टं तदापि राजकर्मसु ।
आराधनात्मकं कर्म विशेषयेत् प्रधानतः ॥८४॥
परराष्ट्रस्य विजयो विजयो न ध्रुवो मतः ।
ब्रह्मराष्ट्रस्य विजयो विजयः स ध्रुवो मतः ॥८५॥

देहेन्द्रियादिशयनं शयनं न ध्रुवं सुखम् ।
वासनाशयनं प्रोक्तं शयनं वै ध्रुवं सुखम् ॥८६॥
भुक्तानां स्मरणे लीने संस्कारे लयितां गते ।
तृष्णाक्षयं सुखं चात्मानन्दतुल्यं प्रजायते ॥८७॥
ब्रह्मराज्यं महाराज्यं प्राप्तव्यं तत्तु भूभृता ।
यन्न सान्तं न वै हार्यं न चोद्वेगप्रदं क्वचित् ॥८८॥
व्यापारस्तादृशः कार्यः श्रेष्ठिना फलवर्धकः ।
हानिप्रदस्तु सन्त्याज्यो व्यापारः पुरुषार्थिना ॥८९॥

राज्याद् राज्योत्तमं राज्यं यथा प्राप्येत तच्चरेत् ।
न कुर्याद् राज्यनाशे तु नारकित्वप्रदं तु यत् ॥९०॥
पुण्यं साधुपदं श्रेष्ठं स्वर्गं मच्चरणाब्जकम् ।
भोगो मन्मूर्तिसंयोगो लब्धव्यास्ते तु वैष्णवैः ॥९१॥
दुःखं साम्राज्यबन्धश्च नरकं वासनागणः ।
प्रमादालस्यकं मृत्युस्त्यक्तव्यास्ते तु वैष्णवैः ॥९२॥
साम्राज्यं मेऽक्षरप्राप्तिः कुटुम्बं मुक्तमण्डलम् ।
प्रासादः स्वयमेव स्यान्मुक्तो मेऽक्षरधामनि ॥९३॥

यद्राज्यं मम साम्राज्यं तद्राज्यं तस्य मे भवेत् ।
तस्मै ददामि मे राज्यं भक्तायाऽऽत्मनिवेदिने ॥९४॥
राजन् मां भज भक्त्यैव दासीव सर्वदा प्रभुम् ।
मोक्षं दास्ये यथाकाले भक्तिं कारय मे भुवि ॥९५॥
कुरु मे मंदिरं रम्यं प्रतिष्ठापय मां प्रभुम् ।
राधालक्ष्मीरमाब्रह्मविद्याश्रीमाणिकीयुतम् ॥९६॥

प्रवाहं मम पूजायाश्चाऽखण्डितं प्रवर्तय ।
करिष्ये तव सेवायाः स्वीकारं प्रतिमास्थितः ॥९७॥
इत्येवं श्रीबालकृष्णस्वामीश्रीपुरुषोत्तमः ।
राधिके ! थर्कूटनाम्ने ह्युपादिशत् कुटुम्बिने ॥९८॥
राजा तु कारयामास मन्दिरं सुमहत्तमम् ।
तत्र संस्थाप्य मूर्तिस्ता असेवयत्तु दासवत् ॥९९॥
अनादिश्रीकृष्णनारायणश्रीभगवत्प्रभुः ।
प्रतिपद्रात्रिविगमे प्रातः थर्कूटसंज्ञकम् ॥१००॥

प्राह तृतीययज्ञार्थे वीरजारस्य राष्ट्रके ।
गन्तव्यं प्रातरेवाऽत्र गमिष्यामि त्वया सह ॥१०१॥
इत्युक्त्वा तु द्वितीयायां प्रातरेव हरिः स्वयम् ।
राज्ञा राज्ञ्या तदा नैजाः पञ्चाशत्कन्यकाः शुभाः ॥१०२॥
विधिना चार्पितास्ताश्च गृहीत्वा यौतकं तथा ।
पूजां संगृह्य च दत्वाऽऽशीर्वादान् शोभनान् शुभान् ॥१०३॥
प्रजादिभ्यो विमानेन ओबीरात्रीशसंगमम् ।
ययौ शीघ्रं ददर्शाऽपि प्रदेशान्मण्डपान्वितान् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रेतोद्धारः, थर्कूटस्थनृपतये राजनीतिसद्धर्मोपदेशादि चेति-निरूपणनामा सप्तविंशत्यधिकशततमोऽध्यायः ॥१२७॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! कृष्णनारायणपरेश्वरः ।
विमानेनाऽम्बरे यावत्समायातोऽतिभास्वरः ॥ १ ॥
प्रकाशः समभूत्कोटिचन्द्रप्रकाशवत् सितः ।
पृथ्व्यां दिक्षु विदिक्ष्वत्र नदीद्वयसमागमे ॥ २ ॥
कोटिशो मानवा देवाः ऋषयो जय माधव ।
जय कृष्ण जय स्वामिन् बालकृष्ण जय प्रभो ॥ ३ ॥
अनादिश्रीकृष्णनारायणो विजयतेतमाम् ।
इत्येवं जयशब्दांश्च मुक्तकण्ठा महोत्सवाः ॥ ४ ॥
जगदुः प्राञ्जलयश्च ददृशुर्निर्निमेषकाः ।
तावद्विमानं कृष्णस्य भ्रमित्वा पञ्चवारकम् ॥ ५ ॥
व्योम्न्येव जनताभ्यस्तु दत्वा शुभं स्वदर्शनम् ।
अवाततार भूभागे कामगं शुभदर्शनम् ॥ ६ ॥
इरात्रिशौषिकायोगे मध्यदेशेऽतिशोभने ।
पञ्चाशद्योजने रम्यमण्डपस्य समीपतः ॥ ७ ॥
इरात्रीशातटे कृष्णो विमानाद् बहिराययौ ।
श्रीगोपालः कंभराश्रीस्तथा राजान इत्यपि ॥ ८ ॥
विमानाल्लोमशश्चापि कन्याश्च बहिराययुः ।
लाजाभिश्चाऽक्षतैः पुष्पैर्वर्धितास्ते प्रजाजनैः ॥ ९ ॥
अथ श्रीभगवान् स्नात्वा इरात्रीशानदीजले ।
मण्डपं कुण्डवेद्यादींर्दृष्ट्वाऽऽवासं ययौ निजम् ॥१०॥
राज्ञा राजकुटुम्बेन वीरजारादिभिस्तदा ।
पूजितः सेवितः कृष्णो विशश्राम च मन्दिरे ॥११॥
बालकृष्णस्ततः प्रातः स्नात्वा यज्ञस्थलीं ययौ ।
पौषकृष्णतृतीयायां देवर्षिपितृशोभितान् ॥१२॥
ददर्श वेदीं कुण्डांश्च पट्टिकाः काञ्चनीस्तथा ।
सामग्रीर्यज्ञकार्यार्था असंख्या मानवर्जिताः ॥१३॥
यज्ञभूमौ ददर्शाऽथ कोटिविप्रर्षिदेवताः ।
वरणार्थं हरिस्तत्र मण्डपे तु निजासने ॥१४॥
निषसाद तथा राजा वीरजारः प्रियान्वितः ।
आजगाम च यज्ञार्थं लोमशश्चाजगाम ह ॥१५॥
पत्नीव्रतस्तथा ब्रह्मा वशिष्ठो वैष्णवो महान् ।
निषेदुः स्वासनेष्वेव मंगला गीतयस्तदा ॥१६॥
सामवेदस्य वै विप्रा अगायन् हर्षनिर्भराः ।
देव्यश्च गीतिकास्तत्र जगुर्मंगलबोधिकाः ॥१७॥
वादित्राणि ह्यवाद्यन्त तूर्याणि विविधानि च ।
प्रकोष्ठबन्धनं स्वस्तिवाचनादि व्यवर्तत ॥१८॥
अंगदेवस्थापनं च पूजनं विघ्नहानये ।
अभवद्वै मुख्यपात्रपूजनं द्रव्यपूजनम् ॥१९॥
देवदेवीपूजनादि प्रावर्तत तदाऽम्बरे ।
चन्दनादिप्रवृष्ट्यर्थं सुराद्यास्त्वाययुः क्षणम् ॥२०॥
वह्निदेवः कुण्डपात्रे प्रतिष्ठपित एव च ।
ब्रह्माद्या मूर्तिमन्तस्ते देवाश्चक्रुर्हवं तदा ॥२१॥
लोमशश्च वशिष्ठश्चाऽऽरभेते स्म ऋतुक्रियाः ।
मन्त्रास्तत्र तु पठ्यन्ते प्रहूयन्ते हवींषि च ॥२२॥
वह्न्याननाः परब्रह्मब्रह्ममुक्तावतारकाः ।
ईश्वरेशर्षिदेवर्षिपितृमानवभूद्विजाः ॥२३॥
तृप्तिं गच्छन्ति हव्यैर्वै भुञ्जते चानलाननाः ।
जीवसृष्टिर्ब्रह्मसृष्टिश्चेश्वरसृष्टिरित्यपि ॥२४॥
तृप्ताः सर्वाः सृष्टयश्चाऽसंख्यहव्यप्रभोजनैः ।
अभवन् राधिके ! तत्र पूर्वयज्ञे यथाऽभवन् ॥२५॥
जडाश्च स्थावराश्चापि चेतनाः कामरूपिणः ।
तीर्थानि पर्वता नद्यः कीटपतंगपक्षिणः ॥२६॥
सर्वे वै भगवद्देहास्तृप्तास्तत्र महाध्वरे ।
वैष्णवेऽनादिलक्ष्मीश्रीकान्तनारायणप्रभुः ॥२७॥
सर्वाऽन्तरात्मा भगवानतृप्यताऽग्रणीर्हरिः ।
एवं वै सप्तदिवसास्तृप्त्युत्सवव्रतात्मकाः ॥२८॥
व्यतीयुर्देवयजनैर्नवम्यां तु विसर्जनम् ।
ऋतोस्तस्य परिहारो दक्षिणाश्चांकवर्जिताः ॥२९॥
भोजनानि च सर्वेषां नित्यवन्नूतनानि च ।
यथायोग्यानि पच्यानि पथ्यानि देहिनां यथा ॥३०॥
व्यजायन्त ततो बालः श्रीपतिः पुरुषोत्तमः ।
ओब्या इरात्रिशायाश्च संगमेऽवभृथं परम् ॥३१॥
चकार याज्ञिकैः सर्वैः समं कोटिजनैः सह ।
तत्र तीर्थानि सर्वाणि मूर्तिमन्ति तदाऽभवन् ॥३२॥

मुक्ततीर्थानि सर्वाणि ब्रह्मतीर्थानि वै तथा ।
अवतारप्रतीर्थानि मुक्तातीर्थानि यानि च ॥३३॥
कृष्णतीर्थानि सर्वाणि नारायणस्य यानि च ।
ब्रह्मविष्णु महेशानां पितॄणां योगिनां तथा ॥३४॥
ऋषीणां च सुराणां च द्विजानां च सतामपि ।
सतीनां देवदेवीनां दिक्पालानां तपस्विनाम् ॥३५॥
साध्वीनां चापि साधूनां तीर्थानि मूर्तिमन्ति च ।
ओब्या नद्या इरात्रिशासंगमे न्यवसँस्तदा ॥३६॥
तत्र स्नानं प्रकर्तव्यं पौषकृष्णतृतीयकात् ।
दिनादानवमीं यावत् सप्ताहे क्रतुपुण्यदम् ॥३७॥
एवमाह महाराजो राधिकेऽवभृथे तदा ।
अहं स्नातो हरेस्तस्य पार्श्वे तिष्ठँस्तदा मुहुः ॥३८॥
नारायणोऽपि तत्राऽऽसीत् पार्श्वे लक्ष्मीपतिः स्वयम् ।
श्रुतवान् हरिणोक्तं तत् तथोक्तं च पुनः पुनः ॥३९॥
नारायणैश्च सर्वैर्वै कृष्णैः सर्वैस्तथाऽत्र वै ।
वासुदेवैरवतारैः सर्वैरीश्वरकोटिभिः ॥४०॥
तीर्थरूपेण चात्राऽपि वस्तव्यं श्रेयसे नृणाम् ।
राधालक्ष्म्यादिभिश्चापि देवीभिः सर्वथाऽत्र च ॥४१॥
स्वस्वकान्तैः समं स्थेयं तीर्थरूपेण वै सदा ।
इत्येवं तत्र यज्ञस्य तीर्थे तु संगमे सुराः ॥४२॥
ओब्यामिरात्रिशायां च त्रिवलायां जलादिषु ।
वापीषु कूपभागेषु दीर्घिकास्वपि सर्वथा ॥४३॥
पल्वलेषु तत्र यज्ञभूमिष्वपि स्थले स्थले ।
निवसामो वयं सर्वे श्रीहरेराज्ञया प्रिये ॥४४॥
हरिः प्राह पुनस्तत्र पापातिपापकारिणाम् ।
अत्र स्नानेन वै नाशं यास्यन्ति पापपर्वताः ॥४५॥
पुण्यभाजो भविष्यन्ति पुत्रपौत्रकुटुम्बिनः ।
श्रेष्ठिनो भोगभाजश्च नीरोगा बहुजीविनः ॥४६॥
यदा क्वापि समागत्य स्नास्यन्ति चात्र ये जनाः ।
जलपानं करिष्यन्ति स्प्रक्ष्यन्त्येतजलानि च ॥४७॥
स्मरिष्यन्ति क्रतोस्तीर्थं देशान्तरेऽपि वर्तिनः ।
तेभ्यो भुक्तिं तथा मुक्तिं प्रदास्यामि न संशयः ॥४८॥
स्नानं दानं तपो होमं परोपकरणादिकम् ।
देवस्थानं धर्मशालां वृक्षारोपणमित्यपि ॥४९॥
विद्यादानं च कन्याया दानं चौषधशालिकाम् ।
कारयिष्यन्ति ये लोकास्तेषां पुण्यमनन्तकम् ॥५०॥
रसशालां ग्रहशालां वेधशालां क्रतुग्रहम् ।
सतां शालां कथाशालां यन्त्रशालां वृषगृहम् ॥५१॥
अन्नशालां च सत्राणि जलशालां पयोगृहम् ।
प्रसूतिगृहमेवापि ज्ञानशालां प्रसेविनाम् ॥५२॥
सेवाशालां तथाऽतिथिभोजनादिगृहाणि च ।
कारयिष्यन्ति ये लोका भूतशालां क्रतुस्थले ॥५३॥
तेभ्यो भुक्तिं तथा मुक्तिं प्रदास्यामि न संशयः ।
इत्येवं श्रीहरिः प्राह राधिकेऽवभृथस्थले ॥५४॥
सस्नौ स्वयं निमज्ज्यैव पुनःपुनर्जलेष्वपि ।
अञ्जलिभिः स्नापितः सः सर्वैः सर्वेऽपि तेन च ॥५५॥
स्नापिता अञ्जलिधाराभिश्चावभृथके मुहुः ।
मया प्रासादिकं वारि धृतं चैतत्तवार्थकम् ॥५६॥
कलशे पिब चालभ्यं पावनं पारमेश्वरम् ।
पिबामीति पपौ राधा श्रीहरेश्चरणामृतम् ॥५७॥
नारायणः प्रददौ च लक्ष्म्यै साप्यपिबज्जलम् ।
एवं राधे विनिर्वर्त्याऽवभृथं परमेश्वरः ॥५८॥
बहिर्निर्गत्य च वस्त्राण्याधाय भूषणादिकम् ।
मण्डपाऽन्तःस्थितं नैजं चासनं प्रययौ हरिः ॥५९॥
लेभे क्षणं च विश्रान्तिं ततः सायं सभां शुभाम् ।
कारयामास भगवान् सर्वलोकनिवासिनाम् ॥६०॥
वीरजारमहाराजः पूजां चकार भावतः ।
श्रीहरेराज्ञया कृष्णं नारायणं समर्चयत् ॥६१॥
वासुदेवं च भूमानं वैराजं परमेष्ठिनम् ।
विष्णुं शिवं चार्यमाणं सनत्कुमारकादिकम् ॥६२॥
ब्रह्मप्रियास्तथा सर्वाः इन्द्रं सूर्यं प्रजापतीन् ।
वशिष्ठं गालवं पत्नीव्रतं देवायतं मुनिम् ॥६३॥
श्रीगोपालं कम्भराश्रीराधालक्ष्मीसरस्वतीः ।
अन्या देवीस्तथा पूज्याः पूज्यानपूजयन्नृपः ॥६४॥
उपदा विविधास्तत्र पूजायामार्पयत्तदा ।
क्षमां चाऽयाचत न्यूनाक्षम्या सेवा ममेति च ॥६५॥
पावितोऽहं कृपयैव पावितं भूमिमण्डलम् ।
ईश्वरैरत्र चागत्य ख्यापितोऽहं दिगन्तरे ॥६६॥
धन्यो राजा जारसंज्ञो वीरतां समुपागतः ।
यदहं सर्वथा जारो जारता नाशिता मम ॥६७॥
अतः परं च किं भाग्यं मम श्रेष्ठं भवेत् किल ।
यदहं स्वगृहे कृष्णचरणौ प्राप्तवानिह ॥६८॥
राज्यं मे सार्थकं चापि भोगा मे सार्थका अपि ।
कुटुम्बं सार्थकं त्वत्र श्रीकृष्णचरणामृतात् ॥६९॥
प्रजा मे सार्थकास्त्वद्य नरा नार्योऽपि सार्थकाः ।
आयुष्यं सार्थकं चापि यदत्र पुरुषोत्तमः ॥७०॥

धनं मे सार्थकं सर्वं गजवाजिविमानकम् ।
सर्वं मे सार्थकं चाद्य यदत्र पुरुषोत्तमः ॥७१॥
धन्योऽहं जननी धन्या धन्यं शतकुटुम्बकम् ।
यद्वंशे यद्गृहे कृष्णः सर्वावतारशोभनः ॥७२॥
कोटिजन्मकृतात्पुण्याल्लब्धिः स्याच्छ्रीहरेरिह ।
सा कृपावशतो जाता किं वदामि सुभाग्यताम् ॥७३॥
ओबी धन्या तथा धन्या इरात्रिशा नदी शुभा ।
त्रिवलाऽपि तथा धन्या यज्जले पुरुषोत्तमः ॥७४॥
धन्या वै राशिऋषयो यद्गृहे पुरुषोत्तमः ।
धन्या वृक्षाश्च विरुधः स्तम्बास्तृणगणादयः ॥७५॥
पशवः पक्षिणो धन्या यद्वासे पुरुषोत्तमः ।
नारायणास्तथा कृष्णा यद्गृहेऽद्य समागताः ॥७६॥
मोक्षस्तेषां जयस्तेषां तेषां सौभाग्यसम्पदः ।
सर्वाऽपि श्रीः सदा तेषां यद्गृहे पुरुषोत्तमः ॥७७॥
धन्यो नृपः शिविश्चापि धन्यः थर्कूटको नृपः ।
धन्यो राजा वीरराजो यद्गृहे पुरुषोत्तमः ॥७८॥
धन्याः पातालवासाश्च धन्याः पर्वतवासिनः ।
धन्याः कन्याः कुमाराश्च येषां कृष्णस्य दर्शनम् ॥७९॥
गृह्णन्तु मानवाश्चास्मान्नारायणात्परेश्वरात् ।
मन्त्रं मोक्षप्रदं सर्वे येऽवशिष्टा मुमुक्षवः ॥८०॥
इत्युक्त्वा दण्डवच्चक्रे राजा श्रीपुरुषोत्तमम् ।
सभां च दण्डवच्चक्रेऽलोटीद् रजस्सु चोत्सुकः ॥८१॥
हरिस्तस्मै चरणौ द्वौ ददौ तन्मस्तकोपरि ।
हृदयेऽपि ददौ पादौ समालेपं ततो ददौ ॥८२॥
पुष्पहारप्रसादं च ददौ राज्ञे हरिः स्वयम् ।
राज्ञ्यस्तस्य चतस्रश्च पुपूज परमेश्वरम् ॥८३॥
पुत्राः पुत्र्यस्तथा कृष्णं पुपूज बहुभावतः ।
प्रजाजनाः पुपूजुश्च श्रीकृष्णं पुरुषोत्तमम् ॥८४॥
नरा नार्यः पुपूजुश्च देशीया महीमानकाः ।
प्राघूणिकाः पुपूजुश्च श्रीस्वामिपरमेश्वरम् ॥८५॥
श्रीहरिः प्रददौ राज्ञे मुकुटं निजमस्तकात् ।
अथ मन्त्रार्थमाजग्मुः कोटिशस्तु प्रजाजनाः ॥८६॥
हरिस्तेभ्यो ददौ मन्त्रान् नामस्मरणपूर्वकान् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥८७॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ॥८८॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ॥८९॥
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥९०॥
पिता वन्द्यः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ।
'अहं तस्य शरीरं वै स मे शारीरकोऽस्तु वै' ॥९१॥
'श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ।
इतिमन्त्रान् ददौ श्रीमद्बालकृष्णो नरायणः ॥९२॥
प्रासादिकं जलपानं ह्यकारयज्जनान्निजान् ।
दर्शनं दिव्यधामस्थमहामुक्तादिभिः सह ॥९३॥
ददौ स्वस्य जनताभ्यो बालकृष्णः स्वयं प्रभुः ।
शिश्रियुर्जनताः कृष्णं नारायणं परं प्रभुम् ॥९४॥
सभासमाप्तौ भगवान् भोजयित्वाऽऽगतान् जनान् ।
विशश्राम क्षणं विशश्रमुः सर्वे निशि प्रगे ॥९५॥
स्नात्वा हरिर्जनानाह ऋषीन् देवादिकाँस्तथा ।
चतुर्थयज्ञकार्यार्थं यान्तु सर्वेऽपि वै द्रुतम् ॥९६॥
आलनौकाब्धिसंयोगे शत्त्यक्षिभूपराज्यके ।
कारयन्तु योग्यतां च प्रारम्भस्य क्रतोर्द्रुतम् ॥९७॥
एकादश्यां वयं प्रातश्चागमिष्याम एव तु ।
इत्याज्ञप्ताश्च हरिणा देवर्षिपितृमानवाः ॥९८॥
ययुः सर्वे याज्ञिकाश्च आलनौकाऽब्धिसंगमम् ।
बालकृष्णो वीरजारालये तस्थौ तदर्थितः ॥९९॥
राज्ञीभिश्च तथा राज्ञा कुमाराद्यैः प्रसेवितः ।
हरिः कुटुम्बसहितः सुखं तस्थौ मनो विदन् ॥१००॥
राजा तु निजकन्यानां शतं कृष्णे विमोहितम् ।
ज्ञात्वा राज्ञ्यभिमत्या च ददौ कृष्णाय भक्तितः ॥१०१॥
कन्याशतं पतिं प्राप्य तदा श्रीपुरुषोत्तमम् ।
कृतकृत्यं सदा जातं राजाद्याः सुखिनोऽभवन् ॥१०२॥
राज्ञ्यः सर्वाश्च वै कृष्णं जामातारं तदाऽऽप्य च ।
कृतकृत्याः सदा मेने पुण्यपात्राणि राधिके ! ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वीरजारनृपराज्ये ओबीरात्रीशासंगमे तृतीयविष्णुयागकरणं, मन्त्रादिदानं, तीर्थमाहात्म्यं, चेतिनिरूपणनामाऽष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके तत्राश्चर्यं नृपगृहेऽभवत् ।
कश्चिद् राजा व्योममार्गान्मुकुटेन विराजितः ॥ १ ॥
शंखचक्रगदापद्मसंशोभितचतुर्भुजः ।
सुदिव्यभालतिलकश्चन्दनार्जितबिन्दुकः ॥ २ ॥

वह्निशुद्धाम्बरो मालां तौलसीं स्वकरे दधन् ।
स्वर्णवर्णः प्रसन्नास्यः कट्यां कृपाणराजितः ॥ ३ ॥
राजवेषधरश्चान्यैर्बहुभिर्निजसदृशैः ।
छत्रचामरयुक्तश्च जयशब्दैर्विवर्धितः ॥ ४ ॥
बालकृष्णो जयत्वत्र तद्भक्तोऽयं जयत्वपि ।
तस्याश्रितानां चास्माकं विजयोऽद्य पदे पदे ॥ ५ ॥
अहो पात्रं परब्रह्म दाता वीरजरः स्वयम् ।
यत्प्रतापोत्थपुण्येन चतुर्भुजत्वमुत्तमम् ॥ ६ ॥
प्राप्तोऽयं नृपतिश्चात्र वयं भृत्याः समुद्धृताः ।
शुभं राजन् वीरजार ! कृतवान् जीव शाश्वतः ॥ ७ ॥
इत्युक्त्वा नृपवेषः स प्रणनाम हरिं मुहुः ।
अन्ये प्रणेमुः सर्वे वै भृत्यास्ते च चतुर्भुजाः ॥ ८ ॥
श्रीहरेश्चरणौ स्पृष्ट्वा निदधुर्निजमूर्धसु ।
जलं प्रासादिकं कृत्वा पादप्रक्षालनोत्तरम् ॥ ९ ॥
पपुस्ते राधिके सर्वे जय कृष्णेतिकीर्तनाः ।
पुपूजुर्दिव्यहाराद्यैः श्रीस्वामिश्रीरमेश्वरम् ॥१०॥
तावत् तत्र स्थिता राधे वीरजारादयः खलु ।
बालकृष्णनिवासे ते कन्याद्या अपि सर्वशः ॥११॥
राज्यश्च राजभृत्याश्च परमानन्दसंभृताः ।
आश्चर्यमतुलं प्राप्ता जिज्ञासां चक्रिरे तदा ॥१२॥
कोऽयं कस्मात् समायातो राजा चापि चतुर्भुजः ।
कुर्मोऽत्र स्वागतं तस्येत्युक्त्वा सिंहासनं ददुः ॥१३॥
अर्घ्यं च मधुपर्कं च मिष्टान्नं मिष्टवारि च ।
ताम्बूलकं च सन्मानं चक्रिरे तु यथोचितम् ॥१४॥
जगृहुस्तेऽतिभावेन प्रसन्नाऽऽशिः परायणाः ।
श्रीहरिर्मौनभावं च विहाय कुशलादिकम् ॥१५॥
अपृच्छत्तं दिव्यभक्तं मुमोद च मुहुर्मुहुः ।
तदा राजा वीरजारः समपृच्छद्धरिं तदा ॥१६॥
महाभागवताश्चेमे महाराजानुगा अपि ।
कुत आयान्ति भगवन् वयं जिज्ञासवो यतः ॥१७॥
क्व राज्यं क्व च भूरेषां कथं ख्याताः किमर्थकाः ।
अस्मभ्यस्तव सेवायां रक्तेभ्यो देहि वेदनम् ॥१८॥
इत्युक्तो भगवान् कृष्णस्त्वाह तं भूभृतं तदा ।
वद राजन् स्ववृत्तान्तं जिज्ञासुभ्यो यथार्थकम् ॥१९॥
इत्याज्ञां तत्र संप्राप्य प्रसन्नः सन्नराधिपः ।
तत्सर्वेभ्योऽकथयच्च वृत्तान्तं शृणु राधिके ॥२०॥
अहं राजा शूरजाराभिधोऽत्राऽऽसं नराधिपः ।
वीरजारपिता चैते मन्त्रिणो मेऽभवँस्तदा ॥२१॥
राज्यं धर्मेण कृतवान् प्रजारक्षाकरः सदा ।
प्रजानां सेवको भूत्वाऽकरवं राष्ट्रपालनम् ॥२२॥
दानपुण्येऽकरवं च स्वर्गदे सुखपूरिते ।
अनाथादीनरक्षं च सत्रेऽभोजयमन्वहम् ॥२३॥
साधूनपूजयं पितॄन् अतिथीनार्चयं सदा ।
असेवयं गवादींश्च प्रजाश्चाऽतोषयं मुहुः ॥२४॥
वृक्षानवापयं श्रेष्ठान् प्रजानामुपकारिणः ।
वर्षे वर्षे गतवत्सरस्याऽन्नं शिष्यते यदि ॥२५॥
पाकोत्तरं च तत्सर्वमर्थिभ्यश्चार्पितं मया ।
विप्राः संभोजिता नित्यं सत्यश्चातीव पूजिताः ॥२६॥
सत्कृता ग्रामदेवाद्याः सत्कृताः शरणागताः ।
आर्तानामार्त्तिनाशं चाऽकरवं वस्तुदानकैः ॥२७॥
रोगिणामोषधदानात् स्वास्थ्यं चाऽकरवं सुखम् ।
गृहदानं हस्तिदानं क्षेत्रदानादिकं तथा ॥२८॥
सर्वं चाऽकरवं चाऽरोचयं यद्यच्छुभार्थनम् ।
तेन पुण्येन राज्यं च कृत्वा निधाय पुत्रके ॥२९॥
निधनं प्राप्य राज्ञीं स्वां विहायाऽहं दिवं गतः ।
तत्र सूर्यस्य लोकेऽहं निवसामि समुज्ज्वलः ॥३०॥
हिरण्यदेवजातीयः सर्वसौख्यसमन्वितः ।
इमे पुण्यक्रियास्वेव भृत्या आसन्पुरा मम ॥३१॥
धर्मकार्यसहायास्ते मृत्वा स्वर्गं ममाऽऽगताः ।
हिरण्यजातिजा देवा वर्तन्ते ते मया सह ॥३२॥
तत्रापि मम राज्यं वै वर्तते बहुयोजनम् ।
इमे प्रधाना मे सन्ति मन्त्रिणस्तत्र केचन ॥३३॥
भृत्याः केचन दूताश्च सन्ति सर्वे प्रभाकरे ।
सुखिनः सुखरूपाश्च महानन्दपरिप्लुताः ॥३४॥
अस्माभिस्तत्र देवादिद्वारा यशः श्रुतोऽत्र वै ।
पुत्रेण वैष्णवः श्रेष्ठो निर्वर्तितः सुरादिभिः ॥३५॥
अनादिश्रीकृष्णनारायणश्रीपुरुषोत्तमः ।
समायातोऽस्ति भगवान् लोककल्याणहेतवे ॥३६॥
तस्मै देवाधिदेवाय सर्वाऽधिपतयेऽद्य वै ।
मम पुत्रेण वै दत्ताः पूजायां शतकन्यकाः ॥३७॥
तद्दानेन कुटुम्बं मे पावनं दिव्यतां गतम् ।
वयं स्वर्गस्थिताः सर्वे कन्यादानस्य पुण्यतः ॥३८॥
विलीय द्विभुजाः सर्वे चतुर्भुजाः स्म एव तु ।
वैष्णवाः पार्षदाश्चाऽद्य सञ्जाता धामयोगिनः ॥३९॥
विष्णुतुल्यस्वरूपाश्च विष्णोर्धामगमाः शुभाः ।
सर्वैश्वर्यसमापन्नाः कोटिसूर्याधितेजसः ॥४०॥

मोक्षोस्माकं सुपुत्रेण कृतोऽस्ति कन्यकाऽर्पणात् ।
कन्यादानं शुभे पात्रे तीर्थे शतकुलाधिकम् ॥४१॥
तारयत्येव पितृणां प्रत्यक्षं दृष्टमेव यत् ।
तस्माच्चतुर्भुजा भूत्वा कृत्वा च हरिदर्शनम् ॥४२॥
प्रयास्यामो हरेर्धाम दिव्यं त्वक्षरसंज्ञकम् ।
एतत्कथयितुं त्वत्राऽऽगताः सूर्यगृहा वयम् ॥४३॥
श्रीहरेर्दर्शनं कर्तुं भोक्तुं प्रसादमित्यपि ।
आज्ञां प्राप्तुं च तद्धाम याचितुं प्रसमागताः ॥४४॥
इत्युक्त्वा च विरेमुस्ते हरिः प्रासादिकं ददौ ।
कन्याया दिव्यरूपं तं दृष्ट्वा नैजं पितामहम् ॥४५॥
सुसंहृष्टाः प्रणेमुश्च प्रसादं प्रददौ हरिः ।
बुभुजुस्ते हृष्टहृदः पपुश्च चरणामृतम् ॥४६॥
श्रीहरिर्वै ततः प्राह शूरजारादिकाँस्तदा ।
मम भक्ताः सात्त्वता वै प्रयान्ति धाम मे शुभम् ॥४७॥
मन्त्रं गृहीत्वा योग्यास्ते गन्तुं भवन्ति तत्र वै ।
नान्यथा संप्रवेशोऽस्ति मम धाम्नि कथंचन ॥४८॥
इत्युक्ता जगृहुर्मन्त्रान् बालकृष्णाननात्तदा ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥४९॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ॥५०॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
'परब्रह्माऽक्षरातीतो बालकृष्णः पतिर्मम' ॥५१॥
ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥५२॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ॥५३॥
"श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ।
एतान् मन्त्रान् ददौ तेभ्यः श्रीस्वामी श्रीरमेश्वरः ॥५४॥
ततस्तेऽक्षरमुक्ताश्च गन्तुं योग्यास्ततोऽभवन् ।
अथ राजा वीरजारस्तत्कुटुम्बं पितेति च ॥५५॥
विज्ञाय पूजनं चक्रे तस्य क्षमाम् परार्थयत् ।
अथ राज्ञी राजमाता नाम्ना देववरूथिनी ॥५६॥
वृद्धा ज्ञात्वा पतिं मुक्तं दिव्यं यातुं तथाऽक्षरम् ।
ववन्दे चरणौ तत्र पत्युः पतिव्रता सती ॥५७॥
मुमोचाऽश्रूणि विधवा गन्तुं सह मनोमती ।
उवाच प्रश्रया भूत्वा किं मे पापं यदत्र च ॥५८॥
तिष्ठामि विधवा देहे नय मां सह भूपते ।
यद्गृहे भगवान् साक्षाज्जामाता ननु वर्तते ।
तस्य पुण्यस्य पारं न तन्माताऽहं तव प्रिया ॥५९॥
कथं वृद्धा दिव्यमुक्ता न भवामि यथा पतिः ।
तस्माद् राजन् मदर्थं त्वं याचनां कुरु शाश्वतीम् ॥६०॥
यथा मुक्तिं सह यामि तथा त्वं कुरु सत्वरम् ।
श्रुत्वा शूरपतिः राजा ययाचे श्रीहरिं तदा ॥६१॥
पतित्वा दण्डवत्तत्र राज्यर्थं मोक्षकांक्षया ।
भगवान् श्रीहरिः प्राह राजन् मनोरथस्तव ॥६२॥
तथा राज्याश्च संकल्पः सिद्ध एव न संशयः ।
मासेऽस्मिन् पौषसंज्ञे वै यज्ञकार्याणि सन्ति तु ॥६३॥
तानि दृष्ट्वा ततो यायाद् राज्ञी ते धाम मेऽक्षरम् ।
तावद्दर्शनलाभार्थं तिष्ठत्वत्र प्रिया तव ॥६४॥
पौषशुक्लस्य पूर्णायां राज्ञी धामाक्षरं मम ।
यातु विमानमारूढा मम पार्षदसेविता ॥६५॥
भवाँश्चतुर्भुजस्त्वत्र मुक्तैः सह स्थिरोऽस्तु च ।
पूर्णिमायां त्वया राज्ञीं सह नीत्वा चतुर्भुजाम् ॥६६॥
गन्तव्यं त्वक्षरं धाम मम मन्त्रैः परिप्लुताम् ।
इत्युक्त्वा राधिके स्वामी बालकृष्णः स्वयं तदा ॥६७॥
कृपया प्रददौ राज्ञ्यै मन्त्रान् दिव्यत्वलब्धये ।
राज्ञी भौतिकदेहाऽपि तदा दिव्या व्यजायत ॥६८॥
यथा चतुर्भुजो राजा तथा साऽपि चतुर्भुजा ।
वैकुण्ठवासयोग्या सा यथा राजा तथाऽभवत् ॥६९॥
राधिके ! मन्त्रदानेऽपि चतुर्भुजास्तु पूर्णिमाम् ।
अवधीकृत्य लोकेऽत्र स्थास्यन्त्येव हरीच्छया ॥७०॥
पूर्णिमायां यदा ते तु गमिष्यन्त्यक्षरं पदम् ।
तदा ते द्विकरा भूत्वाऽक्षरमुक्तसमाः शुभाः ॥७१॥
यास्यन्ति परमं धामाऽक्षरं श्रीस्वामिनः सुखात् ।
एवं शूरं शूरदेवीं शूरभृत्यान् हरिः स्वयम् ॥७२॥
स्थातुमाज्ञाप्य यज्ञार्थं भोजयामास चामृतम् ।
पाययामास च पादजलं पुण्यं हरिर्निजम् ॥७३॥
वासयामास च निजे प्रासादे शूरजारकम् ।
बोधयामास विविधैर्वचनैर्मोक्षदायकैः ॥७४॥
राजन् यत्र नरो नारी तत्र संसारवासना ।
राजन् यत्र हरिश्चाऽहं तत्राऽक्षरस्य भावना ॥७५॥
राजन् यत्र साधवो मे तत्राऽहं पुरुषोत्तमः ।
यत्र ब्रह्मप्रिया मे च तत्राऽक्षरं पदं मम ॥७६॥
मायाऽपि दिव्यतां याति मम योगेन सर्वथा ।
मुक्ता चाऽक्षररूपा स्यात्तदन्यस्य तु का कथा ॥७७॥
इमाः पौत्र्यश्च ते सर्वा दृश्यन्ते यद्यपि स्त्रियः ।
भूतदेहविकारिण्यस्तथापि मम योगतः ॥७८॥

मुक्ताः सर्वा भविष्यन्ति मत्स्वरूपा विमायिकाः ।
मां भजित्वा पुरा राजन् बह्व्यो वै दिव्यतां गताः ॥७९॥
नार्यो यथा तथा मुक्ता व्यजायन्त नरा अपि ।
मम योगेन बहवोऽभवन्नरा नरायणाः ॥८०॥
नारायणाश्च बहवोऽभवन्नारायणा अपि ।
नारायणाश्च बहवोऽभवन् पुमुत्तमास्तथा ॥८१॥
पुमुत्तमाश्च बहवोऽभवन् वै पुरुषोत्तमाः ।
पुरुषोत्तमसंज्ञास्ते पुरुषोत्तमशासने ॥८२॥
वर्तन्ते धाम्नि पुरुषोत्तमभक्तास्तदन्विताः ।
पुरुषोत्तमसदृशा गुणैर्धर्मैश्च शक्तिभिः ॥८३॥
ऐश्वर्यैः रूपविभवैस्ततस्ते पुरुषोत्तमाः ।
अहमेषां च पुरुषोत्तमानां पुरुषोत्तमः ॥८४॥
नियामको हि सर्वेषां तत् पुरुषोत्तमोत्तमः ।
नास्ति मे सदृशः कश्चित्परस्यैव तु का कथा ॥८५॥
तादृशोऽहं तव राज्ये प्राप्तोऽस्मि ते सुतस्य वै ।
सत्यं राज्यं मम राज्यं न पृथिव्या मृषा हि तत् ॥८६॥
सत्यानन्दो महानन्दो न मायाया मृषा हि सः ।
सत्यं सुखं सुखं मेऽत्र न भौतिकं मृषा यतः ॥८७॥
कुटुम्बं सत्यमेवाऽहं दैहिकं न मृषा यतः ।
कार्यं नाम्ना विकृतं च मद्योगे विकृतं न तत् ॥८८॥
मृषा नाम्ना चाऽनृतं च मद्योगे नाऽनृतं हि तत् ।
अस्थिरं च विना मां यत् सुस्थितं मद्युतं तु तत् ॥८९॥
मद्रिक्तं परिहार्यं च मद्युक्तं ग्राह्यमेव तत् ।
मां विना शून्यमन्यद् यत् मद्युक्तं भरपूरकम् ॥९०॥
मां विना प्रलयः सर्वो मद्युक्तः समृद्धायते ।
मद्विना कल्मषं यच्च तन्मद्युक्तं तु मादृशम् ॥९१॥
मद्भक्ता मादृशाः सर्वे तस्मात्ते पुरुषोत्तमाः ।
इत्येवं मां विदित्वैव भज मां भव तादृशः ॥९२॥
इत्युक्त्वा श्रीहरिः शूरजाराय निजदर्शनम् ।
ददौ तत्रैव पुरुषोत्तमानां पुरुषोत्तमम् ॥९३॥
दिव्यदृष्ट्या शूरजारो विलोक्य परमेश्वरम् ।
अनन्तपरमेशाद्यैः सेवितं पुरुषोत्तमम् ॥९४॥
मुमुदे महिमानं च विवेद श्रीहरेस्तदा ।
ततो हरिर्दिव्यभावं तिरोभाव्य मनुष्यवत् ॥९५॥
अभवत् क्षणमात्रेण प्रसन्नः प्राह वीरकम् ।
विश्रान्तिं लभ राजेन्द्र गन्तव्यं वै प्रगे द्रुतम् ॥९६॥
एकादश्यां चतुर्थस्य यज्ञस्याऽर्थेऽब्धिसंगमम् ।
पौषे कृष्णे दले चैकादश्यां प्रारभ्य तं क्रतुम् ॥९७॥
पौषे शुक्ले द्वितीयायां करिष्ये पूर्णमेव च ।
इत्युक्तो वीरजारश्च शूरजारस्तथाऽपरे ॥९८॥
विशश्रमुः सुखेनैव विशश्राम हरिस्तथा ।
रात्रौ सुष्वाप भगवान् कन्याभिः सेवितो हरिः ॥९९॥
एकादश्यां प्रगे शीघ्रं समुत्थाय कृतार्चनः ।
स्वस्थो भूत्वा विमानेन राजकुटुम्बसेवितः ॥१००॥
मातापितृयुतश्चापि प्रजाभिश्चाभिवर्धितः ।
ययौ शक्त्यक्षिनृपतेः राज्ये यज्ञक्षितौ क्षणात् ॥१०१॥
आलनौकाऽब्धिसंयोगे विशालं भूतलं तदा ।
भ्रामयित्वा विमानं चाम्बरे व्यलोकयत् मुहुः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वीरजारनृपतेः पित्रे शूरजारमहाराजाय द्विव्यदेवरूपाय सकुटुम्बाय हिरण्यपुरुषात्मिकायाऽक्षरयोग्यदिव्यदेहाद्यर्पणादिना मुक्तिरित्यादिनिरूपणनामा नवविंशत्यधिकशततमोऽध्यायः ॥ १२९ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! व्योम्नि शक्त्यक्षिनृपतेः क्षितेः ।
विशालं भूतलं यज्ञकृते वीक्ष्य सुसंस्कृतम् ॥ १ ॥
अनादिश्रीकृष्णनारायणस्वामी पुमुत्तमः ।
आलनौकानदीपार्श्वे पश्चिमेऽनावरावधिम् ॥ २ ॥
उत्तरेऽब्धितटं यावत् पञ्चाशत् क्रोशभूतले ।
विलोक्य मण्डपं रम्यं विमानं समतारयत् ॥ ३ ॥
प्रकाशः कोटिसूर्याणां तदा व्योम्न्यभवत् सितः ।
जयशब्दाः कीर्तनानि हर्षनादास्तदाऽभवन् ॥ ४ ॥
वेत्रबन्दीस्तवनानि जयकारैः सहाऽभवन् ।
वादित्राणि विविधान्यावाद्यन्त परितस्तदा ॥ ५ ॥
समुत्साहभराः सर्वे दुद्रुवुस्तद्विमानकम् ।
बालकृष्णं प्रभुं द्रष्टुं वर्धयितुं सुमादिभिः ॥ ६ ॥
सत्कर्तुं पुष्पहाराद्यैः राजा च जनता ययुः ।
नरा नार्योऽतिसम्मर्देऽवतरन्तं विमानतः ॥ ७ ॥
बालकृष्णं प्रसन्नास्यं वर्धयामासुरुत्सुकाः ।
लाजाभिश्चाऽक्षतैः पुष्पैः स्वागतं विदधुर्मुदा ॥ ८ ॥
अथ श्रीभगवान् कृष्णनारायणपुमुत्तमः ।
ययौ स्नातुं संगमे च समुद्रे च ततः परम् ॥ ९ ॥
शीघ्रमागत्य च यज्ञे मध्ये प्रतीक्षतां सताम् ।
स्वर्णासने नृपेणाऽभ्यर्पिते व्यराजत प्रभुः ॥१०॥

ऋषयो लोमशाद्याश्च ब्रह्मेन्द्राद्याः सुरेश्वराः ।
पत्नीव्रताद्या विप्राश्च मुक्ता नारायणास्तथा ॥११॥
गणेशाद्या यज्ञदेवा देव्यश्च मातरस्तथा ।
सर्वसृष्टिसुराद्याश्च व्यराजन्त सुमण्डपे ॥१२॥
स्वस्तिवाचो देहशुद्धिः प्रकोष्ठबन्धनादिकम् ।
अंगदेवप्रतिष्ठानं मुख्यदेवाधिवासनम् ॥१३॥
वह्न्याधानं हवनादि यथापूर्वक्रतौ तथा ।
वेदघोषा गीतयश्च व्यजायन्त विधिक्रमात् ॥१४॥
अनादिश्रीकृष्णनारायणश्रीपुरुषोत्तमः ।
हव्यं राज्ञाऽर्पितं द्रव्यैश्चाग्न्याननो भुनक्ति सः ॥१५॥
सप्ताहः स ऋतुर्जातो वैष्णवो यत्र देहिनः ।
सृष्टित्रयनिवासा वै तृप्ताः प्रत्यक्षभोजिनः ॥१६॥
मुक्ता ईशा अवतारा ईश्वराण्यः सुरादयः ।
सुराण्यो देवदेव्यश्च दिक्पाललोकपालिनः ॥१७॥
यज्ञदेवा लोकदेवाः क्षेत्रादिदेवतास्तथा ।
मानवा वायुलोकस्था जलस्थास्तलगा अपि ॥१८॥
पादपा वायुपाश्चापि शैत्यपाः प्राणिनस्तथा ।
तीर्थानि सन्तः ऋषयः पितरो दैत्यदानवाः ॥१९॥
रक्षांसि तामसाश्चापि जीवाः स्थावरजंगमाः ।
तृप्ता जाता हव्यमिष्टैस्तथा मिष्टान्नभोजनैः ॥२०॥
न्यूनं तत्र च नैवाऽस्ति कल्पद्रुमणिवल्लिभिः ।
समुत्थभक्ष्यभोज्यादि कामधेनुपयांसि च ॥२१॥
दक्षिणाः समवर्तन्त भूयस्यः स्वर्णरत्नजाः ।
अन्नवस्त्रविभूषाणां दानानि नाऽन्तवन्ति वै ॥२२॥
दत्तानि तत्र शक्त्यक्षितृपेण हरिसन्निधौ ।
परिहारश्च सप्ताहे द्वितीयायां कृतस्ततः ॥२३॥
अवभृथं च मध्यान्हे कृतं चाऽब्धौ समागमे ।
आलनौकाजलमिश्रेऽनावराब्धिजलेऽपि च ॥२४॥
अनावरायां नद्यां च आलनौकासरित्यपि ।
तदा दानानि हस्तीनामश्वानामुष्ट्रगोगवाम् ॥२५॥
यानानां वाहनानां च क्षेत्रवाटिभुवां तथा ।
राज्ञा दत्तानि विप्रेभ्यो गृहाणामृद्धिसंयुजाम् ॥२६॥
कन्यादानानि दीनेभ्यो भोज्यदानानि वै तदा ।
स्वर्णरूप्यकभूषाणां दत्तानि दानकानि च ॥२७॥
देवायतनको भक्तो महिमानं जगाद च ।
अवभृथस्य सर्वेभ्यः शृणु त्वं राधिके ! शुभम् ॥२८॥
अवतीर्य क्रतुं सर्वं निर्विघ्नं येन पूर्णता ।
कर्मणा चान्तिमेनाऽस्ति संभृतिः सा भृथात्मिका ॥२९॥
यज्ञे न्यूनं क्रमत्यागो जन्तूनां पीडनादिकम् ।
दुरीतं यत्र वै स्नाने सर्वं नश्यति तद् भृथम् ॥३०॥
अशुद्धिजं च वाग्जातं देहजं मानसं च वा ।
पापं तु यत्र वै स्नाने सर्वं नश्यति तद्भृथम् ॥३१॥
मन्त्राणां वै समुच्चारे हव्यदानेऽपि वै क्रतौ ।
लोभादिजं च यत्पापं सर्वं नश्यति तद् भृथम् ॥३२॥
आशावतां जलान्नाद्यैर्दक्षिणाभिरतोषणम् ।
मनाग् वा चाऽणुमात्रं वा पापं नश्यति तद् भृथम् ॥३३॥
समित्प्रज्वालने जन्तुर्वह्नावाकस्मिकः पतेत् ।
सूक्ष्मोऽपि काष्ठसंवासः पापं नश्यति तद् भृथम् ॥३४॥
पात्राणां चापि हव्यानां संस्कृतौ यदि शुद्धता ।
पूर्णा न स्याच्च तत्पापं नश्यत्येव च तद् भृथम् ॥३५॥
देवानां यद्धवेदिष्टतमं तन्मिलितं न चेत् ।
हवने सा क्षतिः पापं नश्यत्येव च तद् भृथम् ॥३६॥
बीजानामङ्कुराहाणां वह्नौ या दग्धता तु सा ।
बीजघातात्मकं पापं नश्यत्येवेति तद् भृथम् ॥३७॥
गृध्रादिपक्षिणां चञ्च्वाः पतितं व्योमतोऽपि च ।
अशुद्धं वाऽन्यदेवाऽपि पापं नश्यति तद् भृथम् ॥३८॥
असंख्यानां तु देवानामावाहने क्वचित् क्रतौ ।
अनुपस्थितनिःश्वासः पापं नश्यति तद् भृथम् ॥३९॥
मन्त्रोच्चारणकालेऽपि स्वरैः साकं मुखान्ननु ।
थूककणा उत्पतन्ति पापं नश्यति तद् भृथम् ॥४०॥
कामक्रोधादियुक्तानां विप्राणां वरणे क्रतौ ।
संसर्गजं वा पापं तन्नश्यत्येव च तद् भृथम् ॥४१॥
यजमानस्य चिन्तायां दुःस्वप्नं वा समापतेत् ।
रोगो वा सूतकं पापं नश्यत्येव च तद् भृथम् ॥४२॥
अभीष्टव्ययतश्चोग्रे व्ययेऽकस्मादुपस्थिते ।
संकोचव्ययजं पापं नश्यत्येव च तद् भृथम् ॥४३॥
यज्ञे विघ्नस्य कर्तॄणां विनाशनं भवेत् क्वचित् ।
हिंसनं तत्तदा पापं नश्यत्येव च तद् भृथम् ॥४४॥
प्रायश्चित्तादिगौणत्वं ब्रह्मचर्यादिगौणता ।
कर्मकाण्डादिगौणत्वं पापं नश्यति तद् भृथम् ॥४५॥
यज्ञे नित्यं प्रतियज्ञं तदंगादिषु वै पृथक् ।
पुण्यमुत्पद्यते यत्तत् मिलित्वा पुण्यपर्वतः ॥४६॥
जायते यजमाने वै चेत् क्षतिर्नाशनं भृथम् ।
क्वचित् कालप्रभावेण नानुकूल्यं क्रतौ तु यत् ॥४७॥
तज्जं पापं क्रतौ जाते नश्यत्येव तु तद् भृथम् ।
देवानामवमानादि ह्यजानता भवेद् यदि ॥४८॥

पूज्यानामवमानादि जानताऽपि भवेद् यदि ।
अपूज्यपूज्यतापापं नश्यत्येव तु तद् भृथम् ॥४९॥
वरुणः सर्वदा साक्षी जलाधिदेवरूपकः ।
स्वर्गे सम्पत्प्रदः स्यात् स नारायणात्मको भृथम् ॥५०॥
यजमाने सर्वदेवा यजमान्यां च देविकाः ।
स्नानकाले वसन्त्येव तीर्थे सर्वात्मकं भृथम् ॥५१॥
आचार्ये श्रीहरिस्त्वास्ते याज्ञिकेष्ववतारकाः ।
ऋत्विक्षु चेश्वराः सन्ति तीर्थे सर्वात्मकं भृथम् ॥५२॥
जापकेषु च तीर्थानि तत्त्वानि कर्मचारिषु ।
साहाय्येषु च ऋषयस्तीर्थे सर्वात्मकं भृथम् ॥५३॥
यवांकुराः प्रदातव्या वरुणाय महात्मने ।
घृताद्यंगपंचकं च दातव्यं सलिले तदा ॥५४॥
पञ्चामृतानि दत्तानि लभ्यन्ते दिवि वै पुनः ।
षोडशोपसुवस्त्राद्यैः पूजनीयो जलेश्वरः ॥५५॥
तत्र नारायणश्चास्तेऽक्षरेशः पुरुषोत्तमः ।
जले स्नानं हरौ स्नानं चावभृथं प्रपुण्यदम् ॥५६॥
यत्र यज्ञश्चान्नसत्रं पारायणं कथामृतम् ।
अवभृथं चाप्लवनं तत्तीर्थं शाश्वतं मतम् ॥५७॥
नदा नद्यस्तटाकानि सरांसि दीर्घिकास्तथा ।
अखातानि च खातानि तीर्थान्यवभृथेन वै ॥५८॥
अवभृथक्षणे वारि ग्राह्यं पात्रेषु पावनम् ।
अन्तकालेर्पितं मर्त्यमुखे मोक्षप्रदं हि तत् ॥५९॥
पापिनां पापनाशार्थं यज्ञदेवादयः सदा ।
अवभृथस्थले स्नात्वा तततिष्ठन्ति तत्र वै ॥६०॥
मृतस्यापि तु जान्तोर्वै यस्य कस्यापि देहिनः ।
अस्थिपत्रांगभागोऽल्पः पतितश्चेदवभृथे ॥६१॥
स याति परलोकस्थः प्रेतो वा याम्यलोकगः ।
असद्गतिं ततो वापि श्रीहरेर्धाम शाश्वतम् ॥६२॥
असत्कर्माणि नश्यन्ति जायन्ते पुण्यपर्वताः ।
अवभृथस्थले स्नातुः परलोकाः सुखप्रदाः ॥६३॥
अवभृथस्थलीलोके मासः श्रीपुरुषोत्तमः ।
बालकृष्णप्रतिमाश्च त्रयो मोक्षप्रदोत्तमाः ॥६४॥
साधवो वैष्णवा लोके सांख्ययोगिन्य इत्यपि ।
लक्ष्मीनारायणसंहितास्तिस्रो मूर्तयो हरेः ॥६५॥
ब्रह्मप्रिया ब्रह्ममुक्ता ब्रह्मकुंकुमवापिका ।
त्रयस्ते ब्रह्मतीर्थानि सर्वयज्ञभृथानि वै ॥६६॥
हृदये सर्वदा कृष्णनारायणस्य संस्मृतिः ।
करे तु तौलसी माला कण्ठे स्रगपि तौलसी ॥६७॥
प्रसादमात्रग्रहणं त्रयस्तेऽक्षरधामदाः ।
ललाटे तिलकं चन्द्रः, बाह्वोश्चक्रादिलेखनम् ॥६८॥
जिह्वायां श्रीहरेर्नाम त्रयस्ते याम्यनाशकाः ।
गृहे तु वैष्णवा यस्य वाटिकायां तु तुलसी ॥६९॥
पशुष्वपि च गौर्यस्य त्रिनावो भवपारगाः ।
भार्या पतिव्रता यस्य कृपा यस्य च सद्गुरोः ॥७०॥
शास्त्रज्ञानं भक्तियुक्तं पारगः स भवाम्बुधेः ।
येन सर्वं हरौ कृष्णेऽर्पितं वर्ष्म च दैहिकम् ॥७१॥
शान्तवृत्तिनिरीहश्च त्रयं निर्लेपताप्रदम् ।
रात्रिर्यस्य हरावास्ते प्रातर्यस्य प्रपूजने ॥७२॥
मध्याह्नो ज्ञानभागे च स वै मुक्तोऽत्र साकृतिः ।
सतां योगाद् यज्ञयोगाद् योगात् प्रत्यक्षशार्ङ्गिणः ॥७३॥
नरो नारी नान्यतरो जायतेऽवभृथाधिकः ।
क्रतुस्नानं तिलस्नानं स्नानमामलकीफलैः ॥७४॥
स्मृत्वा तीर्थानि कुर्वीत जायतेऽवभृथाऽधिकम् ।
अन्तकाले यज्ञभूमिस्तथा नारायणो हरिः ॥७५॥
स्मर्यन्ते साधवः साध्व्यस्तत्फलं तु भृथाधिकम् ।
कोटिकन्याप्रदानेन सहस्रक्रतुभिश्च यत् ॥७६॥
अन्नक्षेत्रसहस्रेण यत्फलं तदवभृथात् ।
चातुर्मास्यव्रतैश्चापि वेदाध्ययनकैस्तथा ॥७७॥
सहस्रवर्षतपसा गोसहस्रप्रदानकैः ।
यत्फलं लभ्यते भूमौ तत्फलं स्यादवभृथात् ॥७८॥
यात्राभिः सर्वतीर्थानां पितुर्मातुश्च सेवया ।
पत्युश्च सेवया गवां सेवया देवसेवया ॥७९॥
दैविक्षेत्रनिवासेन तुलसीसेवया तथा ।
यत्फलं लभ्यते तत्स्यात् साधोश्चरणसेवया ॥८०॥
बुद्ध्या हीनो नरो नारी कथां श्रुत्वा हरिं भजेत् ।
साधुं सेवेत सततं मोक्षोऽपि तद्बलाद् भवेत् ॥८१॥
यस्याऽग्रे नास्ति वै द्रव्यं क्षेत्रं वा वाटिकाऽपि वा ।
जीवनं श्रममात्रेण भृत्यदास्यादिभिस्तथा ॥८२॥
तेन वै मन्दिरं सेव्यं कृष्णनारायणस्य वै ।
मार्जनेन च लेपेन जलप्रक्षालनेन च ॥८३॥
कचराद्यपहारेण पुष्पमालाकलादिभिः ।
शिल्पनेन च वस्त्रादिक्षालनेन निरन्तरम् ॥८४॥
पात्राणां मञ्जनेनापि भित्तिकाघर्षणेन च ।
लुताजालाऽपहारेण रजोनिष्कासनेन च ॥८५॥
व्यवस्थया च वस्तूनां चत्वरे दीपकर्मणा ।
द्वारोद्घाटनकार्येण वादित्रनादनेन च ॥८६॥

कीर्तनेन च तालाद्यैर्गुणानां कथनेन च ।
जयशब्दैर्हरे शब्दैर्भजनैर्मालिकादिभिः ॥८७॥
पात्राणामानयनैश्च धान्यानां शुद्धिभिस्तथा ।
जलानां चाऽऽहरणैश्च स्तवनैश्च प्रदक्षिणैः ॥८८॥
दण्डवद्भिर्नमस्कारैर्गुणानां ग्रहणैस्तथा ।
भावैः प्रेमभरैर्दिव्यैर्मनोरञ्जनकार्यकैः ॥८९॥
मृत्तिकाऽऽनयनैश्चापि सेव्यं श्रीकृष्णमन्दिरम् ।
नार्या नरेण वा नान्यतरेणापि यथामति ॥९०॥
यथाबलं यथासाध्यं यथायोग्यं भवेत्तु यत् ।
तत्तथा सेवनं कार्यं मन्दिरस्य सतामपि ॥९१॥
इत्येवं सेवको यस्तु दासो भागवतो महान् ।
सर्वावभृथतः श्रेष्ठः पावनो वर्तते हि सः ॥९२॥
अवभृथे तदेत्येवं देवायतनको मुनिः ।
उपदिश्य विरराम ततः श्रीपुरुषोत्तमः ॥९३॥
प्राह चास्मि प्रसन्नोऽत्र क्रतौ राज्ञाऽर्पितं बहु ।
सेवया च प्रसन्नोऽस्मि जयत्वत्र सदा नृपः ॥९४॥
ततो राजा परमेशं श्रीहरिं चरणेऽपतत् ।
हरिणाऽर्पित एवाऽस्य कण्ठे हारः सुवर्णजः ॥९५॥
राज्ञा प्राघूर्णिकाः सर्वे पूजिता उपदादिभिः ।
आशीर्वादान् समगृह्य परिहारं ततोऽकरोत् ॥९६॥
आययुर्निजवासेषु विशश्रमुः क्षणं जनाः ।
राजा संभोजयामास सृष्टित्रयस्य देहिनः ॥९७॥
दक्षिणाश्च ददौ तत्र तुतुषुः सर्वदेहिनः ।
रात्रौ महोत्सवं लोका देवर्षयश्च चक्रिरे ॥९८॥
रासकीर्तननृत्यैश्च भगवत्तोषणाय वै ।
ततो निद्रां गताः प्रातः समुत्थाय च नैत्यकम् ॥९९॥
कृत्वा तत्र सभायां चागताः श्रीहरिणा तदा ।
पूजिता देवताद्याश्चाऽमूल्योपदासमर्पणैः ॥१००॥
ततः संभोजिताः सर्वे आज्ञप्ता हरिणा ततः ।
कर्तुं तु पञ्चमं यज्ञं गन्तव्यं सायमेव ह ॥१०१॥
कालिमाऽब्धितटे देशे कालिमानृपतेः क्षितौ ।
पञ्चम्यां पौषशुक्लस्य यज्ञारंभो भविष्यति ॥१०२॥
आगमिष्याम्यहं तत्र चतुर्थ्यां सायमेव च ।
इत्युक्त्वा भगवान् लोकान् मुमुक्षून् प्रददौ मनून् ॥१०३॥
नरान् नारीर्नान्यतरान् मुमुक्षून् शक्तिराज्यगान् ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥१०४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ॥१०५॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ॥१०६॥
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥१०७॥
पिता बन्धुः सुहृन्मित्रं रक्षकः पोषकोऽस्तु सः' ।
'श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ॥१०८॥
इत्येतेभ्यो ददौ मन्त्रान् मुमुक्षुभ्यः स्वयं हरिः ।
अथ सर्वे ययुस्तत्राज्ञप्ता वै पञ्चमक्रतोः ॥१०९॥
यज्ञार्थं कालिमाशस्य राज्ये कालीसरित्तटे ।
श्रीहरिः राधिके ! तत्र शक्त्यक्षिभूपसेवितः ॥११०॥
दिनद्वयं समुवासा नन्दयन् नृपमुत्सुकम् ।
ज्ञानं ददौ नृपादिभ्यः कृपया वल्लभः प्रभुः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने शक्त्यक्षिनृपतेः राज्ये चतुर्थविष्णुयागकरणमवभृथार्थस्फुटतामहिमादि चेतिनिरूपणनामा त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके कृष्णनारायणो भुवःपतिम् ।
शक्त्यक्षिनामकं प्राह तृतीयायां प्रगे हितम् ॥ १ ॥
यज्ञस्त्वया कृतः सम्यक् तोषिताः सर्वदेहिनः ।
तुष्टोऽहं श्रीहरिः साक्षात् तोषणीयं न शिष्यते ॥ २ ॥
सन्तुष्टे श्रीहरौ कृष्णे तुष्टा भवन्ति देहिनः ।
सर्वान्तरात्मा भगवान् सन्तुष्यामि हृदि स्थितः ॥ ३ ॥
वद ते वाञ्छितं चात्र ददामि चोत्तमोत्तमम् ।
भक्त्या तेऽस्मि प्रसन्नोऽहं ददामि मनसेप्सितम् ॥ ४ ॥
इत्युक्तो भूपतिः प्राह सदाऽत्र मन्दिरे वस ।
कारयेऽहं सुवर्णानां मन्दिरं कानकं शुभम् ॥ ५ ॥
तत्र त्वं प्रतिमाप्रख्यो वस मे श्रेयसे सदा ।
हरिः प्राह तथाऽस्त्वेवं निवत्स्ये मन्दिरे तव ॥ ६ ॥
मूर्तिं मे रमणीयां वै तत्र स्थापय कानकीम् ।
राधालक्ष्मीरमाब्रह्मविद्याश्रीमाणिकीयुताम् ॥ ७ ॥
वासं कुर्वन् सदा मूर्तौ ग्रहिष्ये सेवनादिकम् ।
साक्षाद् यथा तथा तत्र तव स्नेहपरायणः ॥ ८ ॥
यथा वर्ते सदा हृत्सु जनानामन्तरात्मकः ।
तथा मूर्तौ चान्तरात्मा निवत्स्ये गोचरो यथा ॥ ९ ॥
यथाऽक्षरे महाक्षेत्रे धाम्नि चाऽक्षरसंज्ञके ।
यथा कुंकुमवाप्यां च भविष्याम्यत्र गोचरः ॥१०॥
मूर्तिर्मेऽन्तर्यामिणो या सा दिव्या सेवनार्थिका ।
भक्तेच्छाधीनसामर्थ्या श्रेयसे जगतां मता ॥११॥

युगेऽत्र प्रथमे मूर्तिं सप्ततालसमोच्छ्रयाम् ।
यथा वै मानवा दीर्घास्तथा मे त्वं प्रकारय ॥१२॥
युगान्तरेषु कालेषु यथा ह्रासो हि देहिनाम् ।
तथा तन्मानसारेण मूर्तिर्मे तेषु सम्मता ॥१३॥
यथा वै पूजने याने विहारे रथवाहने ।
सुसख्या स्यात्तथा कार्या नरमानान्न चाऽधिका ॥१४॥
नैकं मानं मनुष्याणां कालभेदेन संभवेत् ।
सप्तवितस्तिकायः स्वः स्वस्यैवेति विनिर्णयः ॥१५॥
यथा दीर्घो भवेद् देहस्तथा दीर्घो भवेद् भुजः ।
भुजवत्तस्य वै दीर्घा भवन्त्यङ्गुलिकास्तदा ॥१६॥
अङ्गुलोऽपि तथा दीर्घस्तत्तद्देहानुसारतः ।
बाल्ये बाल्याङ्गुलो ह्रस्वो यौवने यौवनादिवत् ॥१७॥
अस्म्यहं चाऽद्य ते गेहे ममाङ्गुलैः प्रमापितः ।
सार्धपञ्चषष्टिभिर्वै ऊर्ध्वमानः सुरूपवान् ॥१८॥
स्वर्णचम्पकशुक्लाभस्तथाऽऽजानुकराऽन्वितः ।
आकर्णान्ताऽऽयतनेत्रकोणवक्रभ्रुवान्वितः ॥१९॥
सुकुन्दकलिकातुल्यदन्तपंक्तिविराजितः ।
विशालभालतिलकः पुष्टिसंभृतविग्रहः ॥२०॥
विशालोन्नतवक्षाश्च पुष्टसक्थ्यादशोभितः ।
तथा मूर्तिर्मम राजन् कारणीया त्वया शुभा ॥२१॥
मम पार्श्वे तु वै दक्षे लक्ष्मीः ब्रह्मविद्या रमा ।
लक्ष्मीः षष्ट्यंगुला सप्तपञ्चाशत् ब्रह्मविद्यिका ॥२२॥
रमाततस्तृतीया वै चतुष्पञ्चाशदंगुला ।
प्रेज्ज्वलाः स्वर्णवर्णाभाः सर्वाः षोडशहायनाः ॥२३॥
अथ वामे मम पार्श्वे राधा माणिकी श्रीस्तथा ।
राधा षष्ट्यंगुला सप्तपञ्चाशन्माणिकी मता ॥२४॥
श्रीस्तृतीया सुशोभाढ्या चतुर्ष्पंचाशदंगुला ।
ममांगुलैस्ता मापनीयाः कर्तव्याश्चन्द्रशोभिताः ॥२५॥
सुरूपाः कृशकट्यश्च पूजापात्रादिहस्तकाः ।
प्रोज्ज्वलाः स्वर्णवर्णाभाः सर्वाः षोडशहायनाः ॥२६॥
सर्वसौभाग्यशोभाढ्याः सर्वांगपरिपूर्णिकाः ।
पुष्टाः प्रसन्नवदना द्रवभूषाविभूषिताः ॥२७॥
चतुर्भुजोऽहं मध्ये च स्थापनीयस्त्वया हरिः ।
शंखचक्रगदापद्मश्रीवत्सकौस्तुभान्वितः ॥२८॥
राजचिह्नधरो रम्यो युवाऽष्टादशहायनः ।
सर्वचिह्नांगसम्पूर्णः कारणीयो न चाऽन्यथा ॥२९॥
इत्येवं मां प्रतिष्ठाप्य कुरु मे मध्यमन्दिरे ।
पूजनं नित्यदा राजन्नथ दक्षे तु मन्दिरे ॥३०॥
बालकृष्णं घनश्यामं द्वादशवर्षशोभनम् ।
प्रतिष्ठापय मे पित्रा मात्रा च सहितं तु माम् ॥३१॥
श्रीमद्गोपालकृष्णोऽयं पिता मेऽत्र विराजते ।
माता मे कंभरालक्ष्मीर्विराजतेऽत्र लोकय ॥३२॥
तथा शिल्पकलाद्वारा मूर्तित्रयं प्रकारय ।
अथ वामे मन्दिरे मे शय्यां कारय शोभनाम् ॥३३॥
स्वर्णगेन्दुकशोभाढ्यां सर्वोपकरणान्विताम् ।
हस्तिगरुडौ कारय मध्यमन्दिरसन्निधौ ॥३४॥
अग्रगोलसुसौधे वै मध्ये स्थापय तौ तथा ।
चत्वरे छत्रिकामध्ये मम वै चरणौ शुभौ ॥३५॥
प्रतिष्ठापय राजेन्द्र गोपुरे मम पार्श्वदम् ।
देवायतनभक्तं च भक्तं रणंगमाभिधम् ॥३६॥
सर्वशस्त्रयुतौ तौ च प्रकारय शुभोत्तमौ ।
हेमन्तं च वसन्तं च द्वारपालौ विधापय ॥३७॥
स्वप्रकाशं द्युप्रकाशं सेवकौ च प्रकारय ।
मन्दिराग्रसुखण्डेषु विजयध्वनिकारकान् ॥३८॥
सन्तोषां भगवन्तं च शुकं च वल्लभं तथा ।
पार्श्वखण्डे समस्थापयार्घपात्रयुतान् शुभान् ॥३९॥
राशयो द्वादशैवाऽपि मन्दिरोपरि कारय ।
ऋषिमूर्तिप्रतिमास्ते तापसा वैष्णवाः शुभाः ॥४०॥
ब्रह्मप्रियाणां मुख्यानां चत्वारिंशत्तथा शतम् ।
सर्वासां मम पत्नीनां नराणां च पृथक् पृथक् ॥४१॥
रासरूपेण मध्योर्ध्वे गोलसौधे प्रकारय ।
वादित्राणि समादाय मण्डलं मध्यगं कुरु ॥४२॥
शिल्पिनां विद्यया वापि चैत्राणां विद्ययाऽपि वा ।
मध्येऽहं पार्श्वतः पत्नीचतुर्विंशतिद्विशतम् ॥४३॥
एवं राजन् सदा सौम्यं प्रकारय प्रसेवनम् ।
तत्राऽहं गोचरस्तेऽत्र निवत्स्यामि न संशयः ॥४४॥
अथ राजाऽह कृष्णं तं दिव्यदर्शनकांक्षया ।
दिव्यं ते दर्शनं देहि प्रासादे स्थापितस्य वै ॥४५॥
षट्पत्नीसहितं रम्यं तथा दृष्ट्वा करोमि हि ।
पितृमूर्तीस्तथा रासं दृष्ट्वा शय्यां करोम्यपि ॥४६॥
इत्युक्तो भगवान् कृष्णनारायणो हि राधिके ।
द्रागेव दर्शयामास प्रतिमा मन्दिराणि च ॥४७॥
अनेककोटिसूर्याभस्तेजो व्याप्तसुमूर्तिकः ।
भगवान् षोडशवर्षपत्नीभिः सहितः शुभः ॥४८॥
दर्शयित्वा स्वरूपाणि दिव्यधामगतानि वै ।
राजानं तोषयामास कुटुम्बं नृपतेस्तथा ॥४९॥

नृपकन्याः षष्टिसंख्यास्तथा शतकुमारकाः ।
राज्ञी च मुमुहुर्दृष्ट्वा प्रत्यक्षं पुरुषोत्तमम् ॥५०॥
राजा विज्ञाय कन्यानां मानसानि हरौ तदा ।
आकृष्टानि पतिप्राप्त्यै राज्ञी विज्ञाय तत्तथा ॥५१॥
ददौ श्रीहरये कन्याः षष्टिरेव कुमारिकाः ।
ताः सर्वाः कृतकृत्या वै जाताः प्राप्य हरिं पतिम् ॥५२॥
जामातारं हरिं प्राप्य राजा राज्ञी मुदं गतौ ।
मेनाते कृतकृत्यौ च विशेषेण तदा पुनः ॥५३॥
पूजनं श्रीहरेश्चक्रुः कन्यकाः प्रेमविह्वलाः ।
वरमाला हरेः कण्ठे त्वर्पयामासुरुत्सुकाः ॥५४॥
भोजनाद्यैर्हरिं तत्र सेवयामासुरादरात् ।
राजाऽपि यौतकं दिव्यं ददावतर्कितं बहु ॥५५॥
दिव्यरत्नादिहारांश्च कोट्यर्बुदादिसंख्यकान् ।
दिव्यदासीर्ददौ चापि षष्टिसंख्यास्तथोत्तमाः ॥५६॥
चतुर्दन्ता गजाः श्वेता राज्ञा समर्पितास्तदा ।
विमानं बहुवेगं च दिव्यं सहस्रमानवैः ॥५७॥
अधिष्ठेयं ददौ दाने कन्याविहारहेतवे ।
श्रीहरिश्चैवमासाद्य दानं सुखं न्युवास ह ॥५८॥
चतुर्थीं तत्र कृत्वैव सायं प्राह नराधिपम् ।
सायं पञ्चमयज्ञार्थं गन्तव्यं कालिमाक्षितौ ॥५९॥
आगच्छ सकुटुम्बस्त्वं यज्ञे सार्कं मया नृप ।
इत्युक्तो भूपतिः सज्जो बभूव मेयभृत्यकः ॥६०॥
जलपानं हरिश्चक्रे तावत्तत्र समाययौ ।
पिशाच्येका शतभृत्यासहिता दुर्दशां गता ॥६१॥
रुरोद बहुधा तत्र सन्निधौ श्रीहरेस्तदा ।
भगवान् श्रीहरिः प्राह का त्वं कस्माच्च रोदिषि ॥६२॥
किं ते दुःखं च काः सख्यो वद सौख्यं करोमि ते ।
तदा सा लज्जया युक्ता नोवाचापि तु किंचन ॥६३॥
तावत्तत्र समायातः शक्त्यक्षिः पुरतो हरेः ।
तं दृष्ट्वा पुनरेवैषा रुरोदाक्रन्दनं मुहुः ॥६४॥
राजा दृष्ट्वा च पप्रच्छ का त्वं कथं नु रोदिषि ।
सा तदा पूर्वजन्मीयं रूपं क्षणं दधार ह ॥६५॥
राज्ञो या भगिनी ज्येष्ठा कन्यका युवती मृता ।
वासनाविषदोषेण पिशाचीत्वमुपागता ॥६६॥
समुवाच नृपं चाऽहं विना यज्ञोपवीतकम् ।
विवाहमन्तरा रुग्णा मृता यौवनदर्शिनी ॥६७॥
वासनायुक्तहृदया पुरुषं प्रति तृष्णया ।
प्रेतभावं गता शीघ्रं त्वरण्येऽत्र वसामि हि ॥६८॥
अन्याश्च कन्यका या या वासनाहृदयान्विताः ।
प्राप्नुवन्ति तु मरणं ता इमाः सन्ति योषितः ॥६९॥
पिशाचिन्यो हि मे सख्यः पिशाचपत्निकाः किल ।
पिशाचाः पतयोऽस्माकं भुक्त्वा यज्ञप्रसादकम् ॥७०॥
धूतपापा गताः मुक्तिं स्वर्गं वा तत्परं पदम् ।
वयं प्रसादहीनाश्च गृहे एव स्थिता यतः ॥७१॥
पिशाचानां निरोधेन यज्ञे नाऽत्र समागताः ।
न प्राप्तं दर्शनं चापि क्रतोः प्रासादिकं ह्यपि ॥७२॥
पिशाचीत्वं तदस्माकं न नष्टं चेदृशे मखे ।
पिशाचास्ते गता मुक्तिं शिष्यामहेऽशुभाऽबलाः ॥७३॥
अबलानां बलं नास्ति विना त्रातारमच्युतम् ।
अपत्यपतिशून्याश्च जातास्ततोऽत्र चागताः ॥७४॥
मोक्षेच्छया हरेकृष्ण राजन् भ्रातः शुभं कुरु ।
साऽहं ते भगिनी चेमाः प्रजाकन्या मृतास्तु याः ॥७५॥
ता वयं देवदेवस्य मोक्षार्थं शरणागताः ।
कुर्वस्माकं महामोक्षं यथा दुःखं भवेन्न वै ॥७६॥
राजा प्राह पिशाचिन्यश्चेमा वै केन कर्मणा ।
संभूता वद मे चात्र स्वसस्तेऽस्तु शुभं ततः ॥७७॥
स्वसा प्राह च राजानं शृणु पिशाचिकोद्भवम् ।
या कन्या निर्दया चास्ते पितृगृहेऽतिक्रोधिनी ॥७८॥
कलहस्याऽतिकर्त्री च मृता स्यात् सा पिशाचिनी ।
अवमन्य स्वजननीं स्वतन्त्रा शीलनाशिनी ॥७९॥
पापकर्मनिमग्ना च मृता स्यात् सा पिशाचिनी ।
प्रवृत्ता गुप्तपापेषु पुण्यधर्मविवर्जिता ॥८०॥
मातुः सेवापरा नास्ति नास्ति गृहस्य शोधिनी ।
कृष्णभक्तिपरा या न सा मृता स्यात् पिशाचिनी ॥८१॥
यया चोद्वेजिता माता भगिनी भ्रातृभामिनी ।
कलंकिनं कुटुम्बं च सा मृता स्यात् पिशाचिनी ॥८२॥
स्नानपूजाविहीना च राजस्वल्यान्विता तथा ।
अशुद्धा पशुगम्या च मृता स्यात् सा पिशाचिनी ॥८३॥
आत्मघातकरी या च या च कुटुम्बघातिनी ।
पित्रादिघातिनी या च सा मृता स्यात् पिशाचिनी ॥८४॥
अर्भकान् या क्रोधवशा ताडयत्येव वै मुहुः ।
गृहे चौर्यकरी कन्या मृता स्यात् सा पिशाचिनी ॥८५॥
जन्तूनां मारयित्री या केशेषु चाम्बरेषु च ।
जानत्यपि च चुल्ल्यां या मृता सा स्यात् पिशाचिनी ॥८६॥
मूषकाणां विडालानां घातिनी प्राणिनां तु या ।
गोवत्सानां घातयित्री मृता सा स्यात् पिशाचिनी ॥८७॥

महिषीबालकेभ्यो या दुग्धं पाययतीव न ।
तन्मातुश्चापि तक्रं वा मृता सा स्यात् पिशाचिनी ॥८८॥
पक्षिणां च पशूनां च हिंसिका जीवघातिनी ।
स्वैरिणी पुंश्चली या च कामिनी गणिका तथा ॥८९॥
मद्यमांसादना गर्भहन्त्री स्याद्वै पिशाचिनी ।
जले मृता तथा वह्नौ क्षुत्पिपासान्विता यदि ॥९०॥
पृथ्व्यां मग्ना विवरादौ मृता सा स्यात् पिशाचिनी ।
असंस्कृता मृता या स्यादक्षता वा क्षताऽपि वा ॥९१॥
भक्तिहीना रागयुक्ता मृता सा स्यात् पिशाचिनी ।
इत्येवं दोषयुक्ता वै इमा जाताः पिशाचिकाः ॥९२॥
उद्धारं कुरु राजेन्द्र हरेः प्रसाददानतः ।
यज्ञस्त्वया कृतश्चात्र कन्यादानं कृतं तथा ॥९३॥
तेन पुण्येन नः पापं नष्टं भागेन भौतिकम् ।
मानसं तु प्रसादेन नाशमेष्यति देहि नः ॥९४॥
ततो मुक्तिं हरिर्दद्यात् सर्वप्राणपतिः प्रभुः ।
इत्येवं राधिके ! ताभिश्चार्थितो भूपतिः स्वयम् ॥९५॥
ददौ हरेः प्रसादं स जलं च पादसंस्पृशम् ।
पपुस्ता भक्षयामासुः प्रेमतस्तत्क्षणात्खलु ॥९६॥
दिव्यरूपास्तदा जाता यथा देव्यः सुरेशितुः ।
ताः पवित्राः कन्यकाश्च निपेतुः पादयोर्हरेः ॥९७॥
श्रीहरिश्च दयामग्नो ददौ मन्त्रान् निजाननात् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९८॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
'कालमायापापकर्मशत्रुयाम्यकुद्वन्द्वयात् ॥९९॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ॥१००॥
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥१०१॥
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ।
श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ॥१०२॥
इत्येतान् प्रददौ मन्त्रान् ददौ यज्ञोपवीतकम् ।
सर्वान् प्रदर्श्य पित्राहीन् कुटुम्बं च तदीयकम् ॥१०३॥
ताः सर्वाः श्रीहरिर्यावत् सम्प्रेषयति चाक्षरम् ।
तावत् सर्वा हरौ मुग्धा गन्तुं नैच्छँस्तदाक्षरम् ॥१०४॥
विहाय सुन्दरं कान्तं पतिं श्रीपुरुषोत्तमम् ।
वव्रिरे ता हरिकृष्णबालकृष्णनरायणम् ॥१०५॥
कन्यकाः शतसंख्यास्तास्तथा च राजन्यकाः ।
मालाः करेषु संगृह्य कोटिचन्द्रनिभाननाः ॥१०६॥
सुरूपाः सूज्ज्वलाः सर्वास्तदा षोडशवत्सराः ।
प्रेम्णा कृष्णगले रम्ये न्यधुः पत्नीत्वकाम्यया ॥१०७॥
हरिणा स्वीकृताः सर्वास्तासां प्रियचिकीर्षया ।
इत्येवं राधिके ताश्च गृहीत्वा स्वविमानके ॥१०८॥
राजकन्या गृहीत्वा च सायं त्वम्बरवर्त्मना ।
परिहारोत्तरं शीघ्रं ययौ कालिमभूतलम् ॥१०९॥
अनादिश्रीकृष्णनारायणो मंगलसूत्रदः ।
इत्येवं राधिके ! कृष्णस्वाम्यनादिपुमुत्तमः ॥११०॥
पावयन्निजभक्तानां हृदयानि तदाम्बरात् ।
कालिमाशनृपराज्ये गत्वा ददर्श भूतलम् ॥१११॥
पठनाच्छ्रवणादस्य मोक्षस्य फलभाग्भवेत् ।
पाठयेच्छ्रावयेद्यं च सोऽपि मोक्षफलं लभेत् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने शत्यक्षिनृपराज्ये यज्ञोत्तरं देवर्षीणां पञ्चमयज्ञार्थं प्रेषणं, राज्ञा षष्टिकन्या हरयेऽर्पिताः, पिशाचीत्वे कारणानि, एकाधिकशतपिशाचिनीमोक्षकरणं चेत्यादिनिरूपणनामैकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! नारायणनारायणप्रभुः ।
विमानेनाऽम्बरेऽपश्यत् कालिमाशनृपक्षितिम् ॥ १ ॥
कालिमासागरयोगेऽपश्यद् विशालमण्डपम् ।
पञ्चाशद्योजनायामं यावद्यानानदीं शुभम् ॥ २ ॥
विमानेन भुवो भागे तथा दिक्षु विदिक्षु च ।
सर्वत्राऽभूत् प्रकाशो वै सूर्यकोटिसमप्रभः ॥ ३ ॥
तदा तूर्याण्यवाद्यन्त जयशब्दास्तथाऽभवन् ।
मनुष्याणां च देवानामीश्वराणां च देहिनाम् ॥ ४ ॥
दर्शकाश्चाप्यथ शीघ्रं दद्रुवुस्तां स्थलीं शुभाम् ।
विमानस्याऽवरोहार्हो सलाजाऽक्षतपुष्पिणः ॥ ५ ॥
समुद्रस्य तटे कृष्णोऽवातारयद्विमानकम् ।
अवाततार स तस्मात्स्वयं ततो नृपादयः ॥ ६ ॥
ब्रह्मप्रियास्ततः सर्वा अवतेरुर्विमानतः ।
पूजिता हारदानाद्यैर्लाजाक्षतैर्विवर्धिताः ॥ ७ ॥
जयशब्दैः सत्कृताश्च नमनैः स्वागतीकृताः ।
दृष्टाः प्रजाजनैः सर्वे श्रीकृष्णसहजास्तदा ॥ ८ ॥
निषादिताश्चासनेषु मधुपर्कैश्च भाविताः ।
तोषिता जलपानाद्यैर्मिष्टान्नैर्भोजितास्तथा ॥ ९ ॥

विश्रामितास्तथा रात्रौ संवाहिताः सुखं यथा।
निद्रापिताश्च प्रासादेष्वमूल्यशयनादिषु ॥१०॥
कालिमाशेन च राज्ञा सकुटुम्बेन वै तदा।
सेवितो वन्दितः कृष्णः सकुटुम्बो यथोचितम् ॥११॥
प्रातर्जातं प्रबुबोध हरिर्वाद्यादिगीतिभिः।
बन्दीकृतां स्तुतिं शृण्वन् दन्तधावनमाचरत् ॥१२॥
सुगन्धसलिलाद्यैश्च सस्नौ नारायणेश्वरः।
भूषाः सन्धारयामासाऽम्बरयोगमुपागतः ॥१३॥
राजाद्याः श्रीहरेः पूजां चक्रुर्वैराजवैभवैः।
ब्रह्मप्रियास्तथा पूजां चक्रुर्वै पारमेश्वरीम् ॥१४॥
पञ्चम्यां तु शुभे काले ययौ स यज्ञमण्डपम्।
ददर्श योग्यं सर्वं चाऽकारयल्लोमशेन सः ॥१५॥
तथा पत्नीव्रतेनाऽपि प्रारंभं च क्रतोस्तदा।
संकल्पं कारयामास कालिमाशं नृपं क्रतौ ॥१६॥
प्रकोष्ठे बन्धयामास स्वस्तिवाचनपूर्वकम्।
जपहोमप्रगीत्यादिमन्त्रार्थं ब्राह्मणानृषीन् ॥१७॥
वरयामास देवाँश्चेश्वरानीशान् दिविग्रहान्।
मुनीन् साधून् सतीः साध्वीर्देवीर्दिव्याश्च कन्यकाः ॥१८॥
तीर्थतत्त्वानि दितिजान् काश्यपीर्वै प्रजास्तथा।
वरयामास योग्याँश्च प्रत्यक्षदेहिदेवताः ॥१९॥
मुख्यदेवस्थले श्रीमत्कृष्णनारायणोऽभवत्।
सब्रह्मविष्णुरुद्राद्याः प्रत्यक्षाः स्थानधर्मिणः ॥२०॥
स्वस्वस्थानेऽभवँस्तत्र दिक्पाला मातरस्तथा।
गृहपालाः क्षेत्रपाला ग्रहाश्चाऽन्ये च तामसाः ॥२१॥
तेऽपि तत्राऽभवन् योग्यस्थले स्थिता हि गोचराः।
वसवश्च तथाऽऽदित्या अश्विनौ साध्यसिद्धिजाः ॥२२॥
विप्राश्च वैदिका आर्षाः सुराश्च पितरस्तथा।
ऋषयश्चेश्वराश्चापि ईश्वराण्यस्तथा गणाः ॥२३॥
गणेशाः पार्षदाश्चापि सिद्धयो मुक्तकोटयः।
अवतारास्तथा सर्वेऽवताराणां च योषितः ॥२४॥
यज्ञे प्रत्यक्षरूपास्ते स्वस्वस्थाने विरेजिरे।
वेदाश्चत्वार एवापि मूर्तिमन्तोऽभवँस्तदा ॥२५॥
ऋचश्च गोचरीभूता मन्त्रा मूर्तिमयास्तथा।
वह्नयश्च तथा मूर्ता हव्यकव्यादिमूर्तयः ॥२६॥
सर्वेऽपि गोचरास्तत्र यज्ञे वै वैष्णवे परे।
उपस्थिताः समभवन् क्रियाः क्रमाः समूर्तयः ॥२७॥
विधयो विनियोगाश्च पात्रोत्तमाः समूर्तयः।
स्रुक्स्रुवाद्या मूर्तिमन्तो दर्भाद्या व्रीहयो यवाः ॥२८॥
गोधूमाश्च निवाराश्च रसाः शार्करमाक्षिकाः।
समूर्ताः सर्व एवैतेऽभवन्नुपस्थितास्तदा ॥२९॥
समिधो मण्डलान्यत्र स्थापनानि च वेदिकाः।
कुण्डाः पाल्यश्च काण्डाद्याः समूर्ता ह्यभवँस्तदा ॥३०॥
यत्र साक्षाद्धरिश्चास्ते सर्वशरीरसंयुतः।
तत्र का न्यूनता राधे भोज्यभोग्यक्रियादिषु ॥३१॥
अथाऽर्चने गणेशस्य जाते रुद्रादिपूजने।
मातृकापूजनादौ च निवृत्ते श्रीहरिः स्वयम् ॥३२॥
राजहस्तेन कुण्डे वै वह्न्याधानं विधानतः।
कारयामास च तदा वेदा नादान् प्रचक्रिरे ॥३३॥
साक्षादग्निस्ततः कुण्डे ज्वालामध्ये व्यराजत।
हव्यदानं समन्त्रं च वह्नौ प्रावर्तताऽर्थितम् ॥३४॥
देवर्षिपितृकार्यादौ निर्वृत्ते भोजनादिकम्।
मिष्टान्नजलताम्बूलप्रभृत्यपि व्यवर्तत ॥३५॥
रात्रौ कथादिकं यत्र जायते सात्त्वतैः कृतम्।
पुनर्नित्यविधिश्चाऽथ हवनादि प्रवर्तते ॥३६॥
एवं सप्ताहको यज्ञो व्यवर्तत महोत्सवः।
पौषशुक्लैकादशिकादिने पूर्णोऽभवद्धि सः ॥३७॥
मध्याह्ने दक्षिणा दत्वाऽन्तिमो होमोऽभवत्तथा।
श्रीफलानामसंख्यैश्च वह्निश्चान्तेऽप्यतृप्यत ॥३८॥
ततो वै श्रीहरिर्मुक्तान् भोजयामास सर्वशः।
ब्रह्मप्रियाश्चावतारानवतारप्रियास्तथा ॥३९॥
धामधामनिवासाँश्च पार्षदान् दासदासिकाः।
ईश्वरानीश्वराणीश्च नारायणान् नरायणीः ॥४०॥
तत्त्वानि मूलमायां च ब्रह्मादीन् व्यूहमूर्तिकाः।
पितॄन् देवान् सिद्धसाध्यान् मुनीन् यतीन् प्रयोगिनः ॥४१॥
साधून् साध्वीः सांख्ययोगाऽऽश्रिताश्च दिव्यदेविकाः।
मानवान् दिक्प्रपालाँश्च ग्रहनक्षत्रतारकाः ॥४२॥
विप्रान् देहस्थितान् वर्णान् तथाऽऽश्रमनिवासिनः।
वृक्षवल्ली स्तृणस्तम्बान् नदीर्नदान् सरांसि च ॥४३॥
अखातखातसामुद्रान् द्वीपान् गह्वरपर्वतान्।
तलादिलोकवासाँश्च जलस्थलाऽनिलस्थितान् ॥४४॥
विवरस्थान् भूगर्भस्थान् महीमानान् समागतान्।
अपि कीटपतंगाद्यान् भोजयामास केशवः ॥४५॥
नास्ति कश्चिदनशनो जडा वा स्थावरा अपि।
चेतना जडतुल्या वा बुधा वा बलिनोऽपि वा ॥४६॥
सात्त्विका राजसा वापि तामसा अपि देहिनः।
स्वस्य पुत्रास्त एवेति भोजिता हरिणा तदा ॥४७॥

पायिता जलपानाद्यैर्दक्षिणाभिश्च तोषिताः ।
ततो विश्रान्तिमाचक्रुः सर्वे श्रीहरिसंयुताः ॥४८॥
अवभृथं ततः कर्तुं ययौ श्रीभगवान् हरिः ।
कालिमाऽब्धिजलयोगे वाद्यघोषपुरःसरः ॥४९॥
गीतिकाभिः सर्वदेव्यो ययुश्चावभृथाय वै ।
कालिमाजलमाविश्य तथाऽन्ये यानिकाजले ॥५०॥
समुद्रस्य जले चान्ये कूपवापीसरस्सु च ।
सस्नुः प्राघूणिकास्तत्र यज्ञान्तावभृथे तदा ॥५१॥
अनादिश्रीकृष्णनारायणं स्मृत्वा परेश्वरम् ।
कान्तं शान्तिप्रदं भान्तं हृदयेषु निरन्तरम् ॥५२॥
मोक्षदं मुक्तिदं नाथं नारायणेश्वरेश्वरम् ।
ब्रह्मधामेश्वरं श्रीमद्बालकृष्णं हरिं प्रभुम् ॥५३॥
राजा तत्र च दानानि ददौ कोशोष्ट्रवाजिनाम् ।
गजहंसगरुडानां विमानयानयानिनाम् ॥५४॥
स्वर्णरूप्यकमाणिक्यहीरकमौक्तिकानि च ।
गृहाण्युपस्कराण्युद्यानान्यरण्यानि वाटिकाः ॥५५॥
क्षेत्राणि चापि पात्राणि ददावन्नानि सर्वशः ।
महादानानि सर्वाणि ददौ कालिमकेश्वरः ॥५६॥
एवं चाऽवभृथं कृत्वा त्वाययुर्निजमन्दिरे ।
सायं प्रददौ भोज्यानि पानानि विविधान्यपि ॥५७॥
बालकृष्णोदितो राजा कालिमेशः सुखान्वितः ।
रात्रौ लक्ष्मीर्महालक्ष्मीः कन्यारूपा हरेः कथाम् ॥५८॥
लक्ष्मीनारायणसंहिताया व्यासासनस्थिता ।
बालकृष्णाज्ञया रम्यां वाचयामास संसदि ॥५९॥
तत्राऽऽगताः समुद्रस्य पत्न्यो नद्यश्च देविकाः ।
पुपूजुस्तां महालक्ष्मीं ततः श्रीकम्भरासतीम् ॥६०॥
रत्नाद्यैर्विविधैर्वस्तुभिश्च हारैर्मनोहरैः ।
वस्त्रभूषाभिरेवापि शुभं दिव्याभिरर्चनम् ॥६१॥
चक्रुरारार्त्रिकं चापि वनदेव्योऽपि वै तदा ।
यज्ञपत्न्यः समग्राश्च देवपत्न्यस्तथा तदा ॥६२॥
पितृपत्न्यः सिद्धपत्न्य ईशपत्न्यस्तथा श्रियः ।
पूजां चक्रुर्ब्रह्मपत्न्यो धामपत्न्यस्तथा तदा ॥६३॥
हरेर्मातुः कम्भराया लक्ष्म्याः पूजां व्यधुर्मुदा ।
सर्वसृष्टिनिवासिन्यो देव्यः पूजां व्यधुः शुभाम् ॥६४॥
परिहारं कथायाश्च पूजायाश्चापि नामभिः ।
श्रीपतिं श्रीगोपपुत्रं सर्वावतारकारणम् ॥६५॥
कंभराबालकं कृष्णं नारायणं रमापतिम् ।
सर्वकामपतिं राधापतिं श्रीमाणिकीपतिम् ॥६६॥
ब्रह्मविद्यारमानाथं लक्ष्मीपतिं सतां पतिम् ।
बालकृष्णं ब्रह्मप्रियापतिं कान्तं भजामहे ॥६७॥
इत्येवं कीर्तनं रम्यं चक्रुः सर्वेसभासदः ।
अथ विश्रान्तिलाभार्थे प्रसादग्रहणोत्तरम् ॥६८॥
आरार्त्रिकं कथायाश्च चक्रुर्निजालयान् ययुः ।
निद्रां वै जगृहुः सर्वे यथा जागरणश्रिताम् ॥६९॥
द्वादश्यां नैत्यकं कृत्वा राजा पूजार्थमाययौ ।
बालकृष्णं निजात्मानं पूजयामास भावतः ॥७०॥
अष्टोत्तरशतद्रव्यैः राज्ञ्यश्चापि समर्चयन् ।
विंशतिसंख्यकराज्ञ्यश्चारार्त्रिकं महद् व्यधुः ॥७१॥
तदा च कन्यकास्तासां शते द्वे मुमुहुर्हरौ ।
दिव्यरूपे कोटिकोटिकन्दर्पसुन्दरे प्रभौ ॥७२॥
वरयामासुरेवैता वरमाला ददुर्गले ।
राज्ञ्यः सर्वाश्च तास्तत्रार्पयामासुश्च कन्यकाः ॥७३॥
अनादिश्रीकृष्णनारायणाय परमात्मने ।
जग्राह श्रीहरिस्ताश्च राजाऽपि यौतकं ददौ ॥७४॥
विमानं योजनायामं चतुर्दन्तांश्च हस्तिनः ।
गरुडान् प्रददौ वाहान् सपक्षान् व्योमचारिणः ॥७५॥
नैसर्गदीपमणिकान् दासान् दासीस्तदा ददौ ।
द्वे शते द्वे शते चापि जग्राह कंभरासुतः ॥७६॥
कन्यकाः परमेशं तं पतिं प्राप्य मनोहरम् ।
सर्वा मुमुदिरेऽत्यर्थं प्राप्तव्यं नावशिष्यते ॥७७॥
एवं यज्ञोत्तरं कृष्णो द्वादश्यां पूजनोत्तरम् ।
ददौ राज्ञे स्वचरणौ हृदये मस्तके करौ ॥७८॥
राज्ञ्यै चापि ददौ हारं पौष्पं प्रासादिकं हरिः ।
राज्ञीभ्यश्चापि सर्वाभ्यो ददौ हारान् सहीरकान् ॥७९॥
इयेष दर्शनं दातुं नैजं परेशबोधकम् ।
द्रागेव सहसा तेजोमण्डलं प्राविरास ह ॥८०॥
श्रीहरेरभितस्तेजः प्रवाहाः निस्सरन्ति हि ।
व्याप्नुवन्ति तदाऽऽकाशे कोट्यर्बुदरविप्रभाः ॥८१॥
तदा चक्षूंषि सर्वेषां सर्वासां मिलितानि वै ।
ददौ दिव्यां हरिर्दृष्टिं तेजःसहां सुदर्शनाम् ॥८२॥
अथ राजकुटुम्बं तत् तथा प्रजाजना अपि ।
ददृशुः श्रीपरमेशं पराक्षरपरं विभुम् ॥८३॥
धामधामाधिमुक्तैश्च सेवितं ब्राह्मिकादिभिः ।
अवतारैरीश्वरैश्च सुरैः सिद्धैश्च मानवैः ॥८४॥
रूपरूपानुवयवं किशोरं श्यामसुन्दरम् ।
कामगर्वहरं कान्तं राधालक्ष्मीप्रसेवितम् ॥८५॥

द्विभुजं सुन्दरं कृष्णं बालकृष्णं मनोहरम् ।
प्रपूरं योवनभरं सर्वशक्तिसमन्वितम् ॥८६॥
मयूरपिच्छमुकुटं स्वर्णकुण्डलराजितम् ।
सकौस्तुभहारराजत्प्रोन्नतवक्षसं विभुम् ॥८७॥
स्वर्णभूषान्वितं वंशीधरं वक्रस्थिरं मनाक् ।
ततश्चतुर्भुजं शंखचक्रगदाब्जशोभितम् ॥८८॥
दृष्ट्वा ततो द्विभुजं च निजकन्यादिसेवितम् ।
स्वराज्यस्थं सौधभाजं सान्निध्ये संविराजितम् ॥८९॥
एवं दृष्ट्वा द्रुतं सर्वे समाधिं प्रविहाय ताः ।
ददृशुः श्रीहरिं चाग्रे तदाश्चर्यपरामुहुः ॥९०॥
आत्मनां मेनिरे राज्यो राजा प्रजाः कृतात्मताम् ।
अथाऽन्ये दर्शनार्थं वै समागच्छन्ति भूभृतः ॥९१॥
पञ्चराज्यानि शासन्तो राज्ञीयुता हरिं प्रभुम् ।
अर्चयामासुरत्यर्थं ततो महर्षयोऽपि च ॥९२॥
साधवश्च सुरा मर्त्या दैत्या भक्तेश्वरा अपि ।
सर्वलोकनिवासाश्चागत्य पुपूजुरच्युतम् ॥९३॥
राशियानप्रदेशानां शिबिराज्यस्य चापि याः ।
अन्यद्वीपप्रजाश्चापि पुपूजुरीश्वरेश्वरम् ॥९४॥
कामचाटकदेशीया आलायुतायनाः प्रजाः ।
पूर्वभूदेशीयलोकाः पुपूजुः परमेश्वरम् ॥९५॥
रिङ्गजलप्रजाश्चापि पक्षवातप्रजाजनाः ।
मालोष्ठद्वीपवासाश्च स्फुटाक्षद्वीपवासिनः ॥९६॥
थुरायसद्वीपवासाः कूटलाननिवासिनः ।
स्वैरनारीद्वीपवासा झेमीयाननिवासिनः ॥९७॥
एवमन्याः प्रजाश्चापि पुपूजुः परमेश्वरम् ।
साधुर्ललासनः कश्चिद् राधे पूर्वाब्धिमध्यगः ॥९८॥
द्वीपस्थो व्योममार्गेण कृष्णं द्रष्टुं समाययौ ।
पादयोः पतितश्चापि ययाचे भोजनं हरेः ॥९९॥
हरिस्तस्मै ददौ श्रेष्ठं पायसं पूरिकादिकम् ।
बुभुजे साधुवर्योऽसौ तावद् दुन्दुभयो दिवि ॥१००॥
विनेदुः शंखनिनदाश्चाऽभवन् वै निसर्गतः ।
जलं पीत्वा समुद्गारं मुमोच तृप्तिसूचकम् ॥१०१॥
तावत् तूर्याणि सर्वाणि त्ववाद्यन्त निसर्गतः ।
अप्रेर्यमाणान्यनिशं चमत्कारोऽयमद्भुतः ॥१०२॥
दृष्टो लोकैस्तदा राजा कालिमेश उवाच ह ।
बालकृष्ण हरेस्वामिन् कृष्णनारायणप्रभो ॥१०३॥
किमिदं जायते शीघ्रं वादित्राणि निवारय ।
भयं मे जायते कृष्ण ! श्रुत्वाऽऽकस्मिकगर्जनाः ॥१०४॥
हरिः प्राह भयं नास्ति साधुर्मे भक्तराड्यम् ।
कल्पान्तरात् तपः कुर्वन् ललासनेऽब्धिमध्यके ॥१०५॥
योगासने सदा चास्ते ज्ञात्वा मामत्र चागतः ।
तद्भुक्ते पूर्णतां याता यज्ञः पञ्च मया कृताः ॥१०६॥
एकस्मिन् सात्त्वते तृप्ते त्रैलोक्यं तृप्तमेव हि ।
यज्ञान्तसूचकः सोऽयं सच्चिदानन्दमूर्तिकः ॥१०७॥
मुक्तो मे वर्तते हर्षायन्ते तूर्याणि तेन वै ।
इत्युक्त्वा स हरिश्चक्रे वादित्रनादरोधनम् ॥१०८॥
साधुर्भुक्त्वा च दिग्वासा ययौ द्वीपं ललासनम् ।
पठनाच्छ्रवणाच्चास्य भुक्तिर्मुक्तिर्भवेद् ध्रुवम् ॥१०९॥
कृष्णैकान्तमनस्कानां सन्मानन्तु जडा अपि ।
कुर्वन्ति सर्वतत्त्वानि यथा वाद्यानि सञ्जगुः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कालिमेशनृपराज्ये कालिमाब्धिसंगमे पञ्चमविष्णुयागः, अवभृथं भोजनं कथानकं पूजनं, शतद्वयकन्यादानं दिव्यदर्शनं, नैकद्वीपीयप्रजाकृतपूजनं, साधुलालासनभोजनं, निसर्गशंखादिनिनादाश्चेत्यादिवर्णननामा द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके कृष्णनारायणः स्वयं प्रभुः ।
द्वादश्यां वैश्वदेवान्ते भोजयित्वा मखीयकान् ॥ १ ॥
सर्वांश्च देहिनः पश्चाद् भुक्त्वा विश्रान्तिमाप ह ।
सायं सभां च महतीं चक्रे वै यज्ञमण्डपे ॥ २ ॥
ललासनश्चाऽदृश्यत सभायां क्षणमात्रतः ।
सर्वकाषायवसनो दधानस्तौलसीं स्रजम् ॥ ३ ॥
रूपानुरूपावयवो यथा चाक्षरवासकृत् ।
महामुक्तस्वरूपो वै ब्रह्मव्रताभिकाशितः ॥ ४ ॥
जपन् संकीर्तयन् कृष्णो बालकृष्णो जयत्विह ।
अनादिश्रीकृष्णनारायणो जयतु सत्पतिः ॥ ५ ॥
जय स्वामिन्बालकृष्ण परमात्मन्नमोऽस्तु ते ।
जय श्रीकम्भरापुत्र जय गोपालनन्दन ॥ ६ ॥
देशोऽयं मखयोगेन पावितो वैष्णवः कृतः ।
धन्यास्ते मानवा लोके येषां साक्षाद् भवानिह ॥ ७ ॥
धन्या नार्यो नराः सर्वे यद्गृहे पुरुषोत्तमः ।
धन्योऽहं सच्चिदानन्दो ललासनोऽपि योगिराट् ॥ ८ ॥
यदहं प्राप्तवान् कृष्णनारायणं परप्रभुम् ।
मन्त्रं देहि शरण्य त्वं दीक्षां भागवतीं तथा ॥ ९ ॥

प्रदेहि चाऽक्षरं धाम मरणान्ते पदं तव ।
इत्युक्तो भगवाँस्तस्मै ददौ दीक्षां तु वैष्णवीम् ॥१०॥
राधिके द्वीपवासाय योगिने तु मुमुक्षवे ।
मण्डपं कारयामास भगवाँस्तत्र कादलम् ॥११॥
पत्रतोरणशोभाढ्यं वेदीकलशशोभितम् ।
कुण्डयुक्तं सवितानं गव्यहव्यादिशोभितम् ॥१२॥
पञ्चगव्येन च शुद्धिं हरिस्तस्याऽप्यकारयत् ।
लासासनस्य भक्तस्य देहशुद्धिमकारयत् ॥१३॥
ततः पूर्वमुखं तं च हरिश्चोत्तरकाऽऽननः ।
ददौ वै प्रथमं वारि करे संकल्पसिद्धये ॥१४॥
देशकालादि संकीर्त्य मोचयित्वा जलं क्षितौ ।
मस्तके प्रोक्षणं तस्य कारयित्वा ततो हरिः ॥१५॥
ददौ तं शरणं मन्त्रं दक्षे कर्णे कृपानिधिः ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥१६॥
मन्त्रमिति प्रदायैव रक्षणमन्त्रकं ददौ ।
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ॥१७॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
मन्त्रमिति प्रदायैवाऽर्पणमन्त्रं ततो ददौ ॥१८॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥१९॥
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ।
इतिमन्त्रान् प्रदायैव कारयित्वोर्ध्वपुण्ड्रकम् ॥२०॥
मालां च तौलसीं कण्ठे ददौ द्विगुणितां हरिः ।
मद्यं मांसं पारदार्यं चौर्यं कार्यं न वै क्वचित् ॥२१॥
इत्येवं च यमान् तस्मै श्रावयामास माधवः ।
उपकारं विरागं च ज्ञानं भक्तिं ददौ तदा ॥२२॥
नियमान् मोक्षदान् कृष्णः श्रीपतिः पुरुषोत्तमः ।
साधुसंगः सदा कार्यो मोक्षदश्चेति चाह तम् ॥२३॥
गुरोः सेवा हरेः सेवा पित्रोः सेवा कुटुम्बिनाम् ।
सेवा कार्येति तं प्राह भगवान् पुरुषोत्तमः ॥२४॥
न कश्चिदुद्वेजनीयस्तोषणीयः सदा क्षितौ ।
सत्यः साध्व्यो नमस्कार्यास्ता हि परेशशक्तयः ॥२५॥
इत्येवं तमुपादिश्य ततः श्रीपुरुषोत्तमः ।
महादीक्षाप्रदानार्थमुपवासं तमादिशत् ॥२६॥
उपवासस्थले तत्र गोदानं समकारयत् ।
देहशुद्ध्यर्थमेवं स दत्वोपोषणसद्विधिम् ॥२७॥
नान्दीश्राद्धं स्वस्त्ययनं त्वकारयत् स्वयं हरिः ।
मण्डपे सर्वतोभद्रं मण्डलं धान्यशोभितम् ॥२८॥

अकारयच्च तन्मध्ये हैमं कुंभं न्यधापयत् ।
अष्टदिक्ष्वष्टकुंभाँश्च तोयरत्नफलान्विताम् ॥२९॥
पल्लवाम्बरयुक्ताँश्चाऽस्थापयच्च घटोपरि ।
तिलपूर्णां शुभस्थालीं निधाय प्रतिमां हरेः ॥३०॥
सनैवेद्यां स्थापयित्वा सौवर्णीं चाऽप्यपूजयत् ।
राधालक्ष्मीब्रह्मविद्यारमाश्रीमाणिकीयुताम् ॥३१॥
ततोऽष्टदिक्षु कलशे पूर्वे सतीं च शंकरम् ।
दक्षिणे भास्करं संज्ञां, प्रतीच्यां तु गणेश्वरम् ॥३२॥
सिद्धिबुद्धिसहितं च, कौबेर्यां श्रीनरायणम् ।
आग्नेय्यां तु चतुर्व्यूहं, नैर्ऋत्यां गरुडं गजम् ॥३३॥
वायव्यां हनुमन्तं चैशान्यां ब्रह्मप्रियागणम् ।
अस्थापयत् स्वयं कृष्णनारायणः परेश्वरः ॥३४॥
स्वस्तिवाचो वृद्धिश्राद्धं भूतशुद्धिं ततः परम् ।
कारयित्वांऽगदेवानामावाहनादिकं तथा ॥३५॥
मातृकान्यासनं कारयित्वाऽपूजयदच्युतम् ।
उपचारैः शोडशभिर्मन्त्रैस्तथा च वैदिकैः ॥३६॥
अथ कुण्डे वह्निदेवमस्थापयत्तु दक्षिणे ।
वैष्णवं च चरुं चाऽश्रापयच्चाऽपूजयद्धरिम् ॥३७॥
समिदाज्यचरूणां च होमं त्वकारयत्तदा ।
अष्टोत्तरशतसमर्पणमन्त्रैरकारयत् ॥३८॥
अङ्गाऽङ्गदेवताभ्यश्चैकैकामाहुतिमार्पयत् ।
पूर्णाहुतिं ततो हुत्वा महानीराजनं व्यधात् ॥३९॥
पुष्पाञ्जलिं तदा कृष्णोऽप्यदापयद्धरौ शुभाम् ।
पूर्वमुखं निषाद्यैव शिष्यमुदङ्मुखो हरिः ॥४०॥
काषायाम्बरकं दिव्यं चोत्तरीयं तथा ददौ ।
यज्ञोपवीतकं चक्रादिकचिह्नचतुष्टयम् ॥४१॥
ततो मन्त्रं ददौ तस्मै लालायनाय कर्णके ।
दक्षे त्रिवारमेवाऽर्थसहितं ब्रह्मभावदम् ॥४२॥
'ब्रह्माहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥४३॥
श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ।
इति मन्त्रं ददौ पश्चात् स्वमूर्तिं पूजनाय वै ।
ददौ स्वर्णां षट्प्रियाभिः सहितां मोक्षहेतवे ॥४४॥
ज्ञानं ददौ तारकं च सच्चिदानन्दबोधकम् ।
आत्मा वै ब्रह्मरूपोऽयं सच्चिदानन्दभासुरः ॥४५॥
तत्र कृष्णं परब्रह्म मां हृदि चिन्तयेः मुने ।
आत्मनिवेदी त्वं चाद्यदिनात् मम समो ह्यसि ॥४६॥

इत्युक्तः स मुनिः समुत्थाय श्रीकृष्णपादयोः ।
पतितो दण्डवत् भूमौ दीक्षाविधेस्तु दक्षिणाम् ॥४७॥
पत्रं पुष्पं फलं तोयं हृदयं चाऽसमर्पयत् ।
हरिस्तस्मै ददावाशीर्वादान् मोक्षप्रदान् शुभान् ॥४८॥
ममाऽत्र कृपया भक्त फलितस्ते मनोरथः ।
मां प्रसेव्य चोभयत्र परं सुखमवाप्स्यसि ॥४९॥
यस्य कृष्णे परा भक्तिर्गुरौ श्रीकृष्णवल्लभे ।
तस्य पुमर्थसिद्धिश्च सा तेऽस्त्वनुग्रहान्मम ॥५०॥
अथ विसर्जनं चक्रे देवानां श्रीहरिः स्वयम् ।
ततः प्राह हरिस्तं च भज नारायणं तु माम् ॥५१॥
उपदेशं मम देहि ममोपासनसंभृतम् ।
अनेन विधिना दीक्षां देहि मुमुक्षवे मुने ॥५२॥
सच्चिदानन्दनामा त्वं काषायाम्बरधारकः ।
आचार्योऽसि ममाऽऽज्ञां त्वं गृहाण दीक्षणे, जनान् ॥५३॥
नारीर्नरान् पशून् पक्षिजातिस्मरान् तृणादिकान् ।
कामरूपधरान् सर्वान् कुरु दीक्षाऽभिपावितान् ॥५४॥
अहं नारायणकृष्णः स्वामी वै सर्वदेहिनाम् ।
सर्वे भजन्तु मां नित्यं पतिं ब्रह्मपरं हरिम् ॥५५॥
त्वं प्रकारय साधो मे भक्तिं पृथ्व्यां जने जने ।
आबालयुववृद्धेषु नरनारीनपुंक्षु च ॥५६॥
इत्युक्तः सच्चिदानन्दो योगिराट् तत्र संसदि ।
नत्वा स्वामिबालकृष्णं जनानुपादिदेश ह ॥५७॥
ददाति ज्ञानमैशं च पापानि क्षालयत्यपि ।
एतादृशी हरेरिच्छा दीक्षानाम्नी महासती ॥५८॥
ब्रह्मपुत्री ब्रह्मधामप्रदा मुक्तिप्रदा यतः ।
सामान्या च विशेषा वा ग्रहीतव्या जनैः शुभा ॥५९॥
अदीक्षितस्य नाऽश्नाति दत्तमन्नजलं हरिः ।
दीक्षितस्य पत्रमपि न वै त्यजति श्रीहरिः ॥६०॥
दीक्षितो भक्तराट् तीर्थं तीर्थोत्तमं हरिः स्वयम् ।
तत्र तीर्थानि सर्वाणि निवसन्ति पदाऽङ्गुले ॥६१॥
दीक्षिते देवताः सर्वा ईश्वरा अपि सर्वशः ।
निवसन्ति सदा देहे तस्माद्वै दीक्षितो भवेत् ॥६२॥
दीक्षितस्य तु सेवायाः फलं मोक्षो भवेदिति ।
दीक्षितस्पर्शजं पुण्यं महापापादिनाशकम् ॥६३॥
दीक्षितस्य प्रसादान्नं पावनं चापि तज्जलम् ।
दीक्षितस्य सहवासो मोक्षदो धामदायकः ॥६४॥
दीक्षितस्य तु सत्संगो भगवत्संगसदृशः ।
दीक्षितस्य क्रियाः सर्वा दिव्या हर्यर्पणात्मिकाः ॥६५॥
दीक्षिते सर्वयज्ञानां पुण्यानि निवसन्ति वै ।
दीक्षितस्य स्नानवारि पीत्वा तृप्यन्ति पूर्वजाः ॥६६॥
ऋषयो मुनयः सिद्धा योगिनो यतयस्तथा ।
साधवो ब्रह्मशीलाश्च दीक्षितं प्रणमन्ति वै ॥६७॥
दीक्षितो यद्गृहे याति तद्गृहं धामसदृशम् ।
सेवते या दीक्षितं सा बोध्या वै पुण्यशालिनी ॥६८॥
सेवते यो दीक्षितं स जायते पार्षदो हरेः ।
पृथ्वी नित्यं हरेरग्रे प्रार्थयति प्रदीक्षितम् ॥६९॥
साधुदीक्षाप्रपन्नानां चरणैः पावनी ह्यहम् ।
दीक्षितस्नानमात्रेण जलं तीर्थं प्रजायते ॥७०॥
साधुलालासनश्चाहं सत्यं वदामि वै मुहुः ।
सच्चिदानन्दसंज्ञोऽहं जातो वै दीक्षया हरेः ॥७१॥
आबाल्यादपि संग्राह्यः शरणागतमन्त्रकः ।
तस्याश्रयप्रदाता श्रीकृष्णो यत्र भयं न वै ॥७२॥
ततो ग्राह्यो रक्षणस्य मन्त्रोऽप्याबाल्यतोऽपि वै ।
कालान्मायाबन्धनाच्च पापाच्च कर्मबन्धनात् ॥७३॥
शत्रुभ्यो याम्यदुःखाच्च कुमित्राद् यद्भयादिकम् ।
तस्मात् त्रिशूलमत्स्यादिचिह्नोऽवत्येव माधवः ॥७४॥
यद्धस्ते त्रिशूलचिह्नं मीनचिह्नं ध्वजाऽङ्ककम् ।
धनुरंकं चक्रचिह्नं स्वस्तिकाऽङ्कं च वज्रकम् ॥७५॥
तत्र त्रिशूलकं दिव्यं कालभीतिं प्रहन्ति वै ।
दीव्यमीनस्तथा हन्ति मायाभीतिं च बन्धनम् ॥७६॥
ध्वजचिह्नं तथा दिव्यं हन्ति पापभयं सदा ।
धनुरंकं तथा दिव्यं कर्मभीतिं प्रहन्ति च ॥७७॥
चक्रचिह्नं महादिव्यं शत्रून् प्रहन्ति तद्भयम् ।
स्वस्तिचिह्नं तथा दिव्यं यमभीतिं प्रहन्ति च ॥७८॥
कं वज्रं दिव्यमेवैतत् कुहृद्भयं निहन्ति च ।
सप्तचिह्नधरो हस्तो यस्य देहं स्पृशत्यपि ॥७९॥
तद्देहे तूक्तभीतीनां संभवोऽपि न जायते ।
ततः समर्पणो मन्त्रो ग्राह्यो वै ज्ञानपूर्वकः ॥८०॥
ओंनाग्रे हरये चाऽहं नमस्करोमि सर्वदा ।
स्वामिने श्रीकृष्णनारायणायाऽर्पणतां गतः ॥८१॥
नाऽन्यस्याऽहं भवाम्यद्यदिनात् तस्यैव वै वशे ।
दासो भृत्यो दीनदासी भवाम्यद्यदिनाद्धरे ॥८२॥
इत्येवं त्वात्मदानाख्यं सर्वस्वं तत्र चार्प्यते ।
हुतं घृतं यथा वह्नौ हुतश्चाऽहं तथा हरौ ॥८३॥
पृथग्भावो न मेऽस्त्यद्यदिनाच्छ्रीकृष्णवल्लभात् ।
मत्वैवं निजभावे श्रीहरौ देहे यथात्मनि ॥८४॥

तथा श्रीबालकृष्णोऽत्र परे ब्रह्मणि सर्वदा ।
पतित्वं शाश्वतं ज्ञेयं पितृत्वं बन्धुताऽपि च ॥८५॥
सुहृता मित्रता चापि रक्षयितृत्वमित्यपि ।
पालकत्वं तथा कृष्णे शाश्वतं ज्ञेयमेव च ॥८६॥
इत्येवं चार्पणे ज्ञाने परिपक्वे दृढे सति ।
ततो ग्राह्या साधुदीक्षा ब्रह्मभावप्रदा शुभा ॥८७॥
ब्रह्मरूपो यतश्चाहं देहेन्द्रियाद्यहं न वै ।
प्रेमसेवाकरो भक्तः शाश्वतोऽस्मि हरेर्यतः ॥८८॥
अनादिश्रीकृष्णनारायणः सर्वस्वमेव मे ।
पतिः पाता तथा भोक्ता स्वामी नियामको मम ॥८९॥
अन्तरात्मा परात्मा च बाह्यात्माऽपि ममैव सः ।
इन्द्रियात्मा शरीरात्मा दैहिकात्मा ममैव सः ॥९०॥
इत्येवं श्रीकृष्णनारायणाद् रिक्तोऽस्मि न क्वचित् ।
सदा तन्मूर्तिमग्नोऽस्मि तद्गुणश्च तदंशकः ॥९१॥
एवं वै ब्रह्मभावं स्वं विदित्वा साधुता फलेत् ।
पराऽक्षरे तु विन्देत श्रीहरेः शाश्वतं सुखम् ॥९२॥
एवं दीक्षाग्रहे शीघ्रं दिव्या भवन्ति देहिनः ।
तस्माद् दीक्षा हरेर्ग्राह्या ज्ञानिभिः साधवी परा ॥९३॥
तदन्यैः रक्षिणी दीक्षा शरणी वा समर्पणी ।
ग्रहीतव्या विना दीक्षां न स्थैर्यं मानवैरिह ॥९४॥
देशः कालः शुभः संगो न हातव्यः कदाचन ।
परमेशे गृहे प्राप्ते प्रसन्ने मोक्षदायिनि ॥९५॥
यो न मायां त्यजेन्मूढस्तस्य हानिः पदे पदे ।
दुर्लभं मानुषं वर्ष्म मोक्षसाधनमुत्तमम् ॥९६॥
प्राप्य तन्न यतेतापि मोक्षेऽत्र त्वात्महा हि सः ।
तस्मादात्मा न हन्तव्यो मोक्षयोग्योऽपि मानवैः ॥९७॥
गृह्णन्तु साधवीं दीक्षां तदन्यां पात्रता यथा ।
अयं श्रीभगवान् साक्षाद् ददात्येव यथा हि मे ॥९८॥
इत्युक्त्वा विररामाऽसौ सच्चिदानन्दयोगिराट् ।
लक्षशो मानवाः श्रुत्वा दीक्षार्थं समुपागताः ॥९९॥
बालकृष्णो ददौ तेभ्यः शरणं रक्षणं तथा ।
समर्पणं मनुं चापि ज्ञानिभ्यो ब्रह्ममन्त्रकम् ॥१००॥
पञ्चसाहस्रभक्तास्ते तदा वै साधवोऽभवन् ।
गुरवो लोकजीवानां मोक्षकारिण एव च ॥१०१॥
राशियानादिदेशेषूपदेशार्थं निदेशिताः ।
प्रययुर्भिन्नदेशेषु हर्याज्ञया हरेः प्रियाः ॥१०२॥
राधे ! हरिर्विशश्राम सभान्तं प्रचकार ह ।
निवासेषु प्रगत्यैव विशश्रमुश्च देहिनः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीहरिः साधुलालासनयोगिने साधवीं वैष्णवीं दीक्षां दत्वा ततः पञ्चसहस्रेभ्यः साधवीं दीक्षां ददावित्यादिनिरूपणनामा त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिकेऽनादिकृष्णनारायणः प्रभुः ।
त्रयोदश्यां प्रगे स्नात्वा समाजुहाव भूभृतम् ॥ १ ॥
कालिमेशं महाराजं स तु राजा द्रुतं ययौ ।
हरिं नत्वा सुपूज्यैव निषसाद पुरो हरेः ॥ २ ॥
भगवानाह सर्वेभ्यो भोजनान्तेऽद्य दक्षिणाम् ।
विदायाख्यां देहि राजन्नुत्सवस्य विसर्जने ॥ ३ ॥
इत्युक्तः स महाराजो रन्धयामास सत्वरम् ।
भोजनानि विविधान्याहारयामास सद्धनम् ॥ ४ ॥
हीरामाणिक्यरत्नानि स्वर्णरूप्यकमुद्रिकाः ।
भूषालंकारवस्त्राणि गा विमानानि वाहनम् ॥ ५ ॥
मध्याह्ने श्रीहरिः सर्वमहीमानेभ्य इत्यपि ।
दक्षिणा दापयामास भोजयामास तान् मुदा ॥ ६ ॥
भोजिता मुक्तमुक्तान्यो ब्रह्माक्षरविभूतयः ।
शक्तयः पार्षदा दासा दास्यो भृत्याश्च भूभृता ॥ ७ ॥
सेवकाश्चावताराश्चाऽवतारिण्यः सुभोजिताः ।
राधालक्ष्म्यादयः सर्वा वासुदेवादयस्तथा ॥ ८ ॥
भूमविष्णुमहाविष्णुवैराजशंभुतद्गणाः ।
मायास्तत्पुरुषाश्चापि धामानि तन्निवासिनः ॥ ९ ॥
वैराजाः सत्यलोकीयाः ऋषयो मुनयस्तथा ।
सिद्धाश्च साधवश्चापि पितरः सुरदेवताः ॥१०॥
दिक्पाला लोकपालाश्च मेरुपर्वतवासिनः ।
भुवर्लोकस्थिताश्चापि मरुतो विश्वदेवताः ॥११॥
वसवश्चारणाः साध्या निधयो मानवा गणाः ।
गणेशा गणिकाश्चापि भूताः प्रेताश्च मातरः ॥१२॥
दैत्यदानवरक्षांसि ह्यसुरा भक्तसृष्टयः ।
सूर्या रुद्रा ग्रहास्तारा नक्षत्राणि च काश्यपाः ॥१३॥
वृक्षा वल्ल्यस्तृणस्तम्बा वंशाः कन्दाः फलद्रुमाः ।
नदा नद्यः समुद्राश्च सरांसि निर्झरादयः ॥१४॥
वापीकूपतटाकानि खाताऽखातानि चाब्धयः ।
तीर्थानि पर्वताश्चापि वनान्युपवनानि च ॥१५॥

कीटाः पतंगाश्च सरीसृपाः पातालवासिनः ।
अन्येऽपि देशदेशीयास्तत्त्वान्यपि जडानि च ॥१६॥
यज्ञाश्चवह्नयश्चापि पात्राणि हव्यसद्द्रवाः ।
सर्वे मूर्ता हरेर्योगात् पूजिता भूभृता तदा ॥१७॥
तथा सर्वैः राजभिश्च पूजिता भोजितास्तथा ।
तोषिता दक्षिणाभिश्च क्षत्यादौ प्रक्षमापिताः ॥१८॥
दासवर्गाः कर्मचारा येऽभवन् यज्ञकर्मसु ।
भाट्टाश्च बन्दिनः सूता भाटाश्चारणगुह्यकाः ॥१९॥
गान्धर्वा नर्तका नाट्यकला नटाश्च गायकाः ।
नर्तक्यो गायिकाश्चापि देव्योऽप्सरोगणादयः ॥२०॥
पादसंवाहकाश्चापि भृत्याः सेवाकरास्तथा ।
सेवकाः क्षालकाश्चापि मार्जका हारका अपि ॥२१॥
क्षणका मालिनश्चापि त्वष्टारस्तन्तुवायकाः ।
रजका राजकाश्चापि शिल्पिनः सुकलाविदः ॥२२॥
एवमन्ये दीपहारा वेत्रहारादयस्तथा ।
जयकारा वाहरक्षाः सौधोद्यानादिरक्षिणः ॥२३॥
गोपाला गृहपालाश्च वनारण्यप्रपालकाः ।
यानवाहनपालाश्च कोटिशोऽपि च मानवाः ॥२४॥
वारप्रियास्तथा वारा नपुंसकानि भण्डकाः ।
बहुरूपा रङ्गगामा हासकाः कथकास्तथा ॥२५॥
सभ्याः सभाकलाज्ञाश्च शृंगारहावभाविनः ।
प्रदर्शनकराश्चापि वह्निस्फोटकरास्तथा ॥२६॥
विद्युद्विज्ञा यन्त्रवाहा जलवाहादयस्तथा ।
दृश्यशिल्पास्तथा चान्ये ये के कर्मचरादयः ॥२७॥
नरा नार्यश्च सर्वे ते सर्वा राजभिरर्चिताः ।
तोषिता दक्षिणाभिश्च पारितोषिकवस्तुभिः ॥२८॥
वस्त्राम्बरधनाद्यैश्चालंकारोपकरादिभिः ।
द्रव्यैः सुवर्णकूप्यैश्च रत्नहारादिभिस्तथा ॥२९॥
भोजितास्तोषिताश्चाति प्रसादिताः पुनः पुनः ।
भिक्षुका दीनवर्गाश्चाऽनाथा दारिद्र्ययोगिनः ॥३०॥
नरा नार्यः सतीसाध्व्यः साधवो रागवर्जिताः ।
अनिकेतास्तापसाश्चातिथयो वनवासिनः ॥३१॥
बहुजातीयजीवाश्च जातिस्मरा वियोनिजाः ।
एवमन्येऽप्यलसाश्च राजसास्तामसा अपि ॥३२॥
सर्वे सन्तोषिताः सर्वप्रदानैरच्युताज्ञया ।
राजभिः सर्वदानैस्ते तोषितास्तत्र चोत्सवे ॥३३॥
अथ राधे ! हरेः पूजां चक्रुस्तेऽप्यपराह्णके ।
विदायं चार्थयामासुर्हरिर्विदायकं ददौ ॥३४॥
नीराजयित्वा श्रीपतिं बालकृष्णं पुमुत्तमम् ।
कृतकृत्यान् मन्यमानाः प्राप्याऽऽज्ञां पारमेश्वरीम् ॥३५॥
प्रार्थयते क्षमां सेवाक्षतौ राज्ञे प्रदाय च ।
आशीर्वादान् विमानैः स्वैर्यानैः रथैश्च वाहनैः ॥३६॥
यथैश्वर्यं यथास्मृद्धिं यथागति ययुर्गृहान् ।
स्वस्वलोकान् क्षितेर्भागैर्वायुमार्गैर्विमानकैः ॥३७॥
गरुडैश्च गजैरश्वैर्हंसैः सिंहादिभिस्तथा ।
अनलैः किरणैश्चापि संकल्पैः सिद्धिभिस्तथा ॥३८॥
समाधिना ययुश्चाप्यैश्वर्यकैः रूपलक्षकैः ।
अदृश्यभावनाभिश्च लीनैश्वर्यादिभिस्तथा ॥३९॥
सृज्यैश्वर्यैस्तथा चात्मतत्त्वभावैर्ययुर्गृहम् ।
एवं तत्र त्रयोदश्यां महीमानाः समस्ततः ॥४०॥
ययुर्लोकान्निजान्देशान् सौराष्ट्रमण्डलं विना ।
कोट्यर्बुदब्रह्मप्रियाकन्यकासहितो हरिः ॥४१॥
लोमशादिमुनिभिश्च तथाऽश्वपट्टतीर्थकैः ।
क्षेत्रपैरवताराद्यैः पितृभ्यां सहितस्तथा ॥४२॥
भक्तैर्दासैः कुटुम्बेन वैष्णवैः ऋषिभिः सह ।
साध्वीभिः साधुभिः साकं सर्वकन्याभिरित्यपि ॥४३॥
अक्षरक्षेत्रवासाभिः प्रजाभिः सात्त्वतैः सह ।
देवायनादिभिः साकं श्रीहरिः पूर्णिमावधिम् ॥४४॥
कालिमेशनृपसौधे समुवास कृपाकरः ।
कालिमेशकुटुम्बस्य श्रेयसे तोषणाय च ॥४५॥
सर्वराजकुटुम्बानि न्यूषुश्चाऽऽपूर्णिमावधिम् ।
अहं कृष्णस्तथा नारायणस्तस्येच्छया प्रभोः ॥४६॥
त्वया लक्ष्म्या युतो चावां न्यूषिम पूर्णिमावधिम् ।
एवं वै राधिके कृत्वा प्राघूर्णिकविदायकम् ॥४७॥
रात्रौ विश्रान्तिमापन्नः साक्षाच्छ्रीपुरुषोत्तमः ।
चतुर्दश्यां प्रगे स्नात्वा समाहूय नृपान् हरिः ॥४८॥
उपादिदेश हार्दं स्वं सभ्येभ्यो नृपसंसदि ।
शृण्वन्तु वैष्णवाः सर्वे राजानस्तत्कुटुम्बिनः ॥४९॥
राजा धर्माश्रयश्चास्ति राजन्यहं वसामि च ।
दिक्पालानां शक्तयश्च निहिता वै नृपे मया ॥५०॥
राजाधीनप्रजाः सर्वाः पालयन्ति वृषान् शुभान् ।
अचौर्यं चाऽप्यहिंसां च ब्रह्मचर्यं नयं तथा ॥५१॥
सत्यं प्रपालनं चापि मातापितृप्रसेवनम् ।
पत्यधीना तथा पत्नी पत्न्यधीनः पतिस्तथा ॥५२॥
स्वाम्यधीनास्तथा भृत्या भृत्याधीनश्च रक्षकः ।
राजभीत्या यथाचारे वर्तन्ते दण्डभीतितः ॥५३॥

तस्माद् राजा मम रूपो मम शासनवर्तनः ।
राज्ञा वै पाल्यते धर्मस्तथाऽर्थोऽपि प्रपाल्यते ॥५४॥
राजा प्रजानामर्थैश्च करोति क्रतुमुत्सवम् ।
अन्नसत्राणि देवानां मन्दिराण्यर्थराशिभिः ॥५५॥
भक्तिं करोति राजा च कारयत्यपि राष्ट्रके ।
तारयति प्रजाश्चापि यस्तु भागवतो भवेत् ॥५६॥
तस्माद् भवद्भिः क्षितिपैः पृथ्व्यां दूतैस्तु सर्वतः ।
कारणीया हरेर्भक्तेर्घोषणा पटहैरपि ॥५७॥
प्रजा भवन्तु च हरेर्भक्तिमत्यः सुदीक्षिताः ।
वैष्णव्यः सर्वथा कृष्णनारायणसमाश्रिताः ॥५८॥
यज्ञोपवीतं गृह्णन्तु वैष्णवं पावनं शुभम् ।
दीक्षां मन्त्रं हरेर्नाम गृह्णन्त्वपि प्रमोक्षदम् ॥५९॥
व्रतं कुर्वन्तु च हरेर्जन्माष्टम्यां शुभोर्जके ।
कृष्णे दलेऽतिभावेन चैकादश्या व्रतं तथा ॥६०॥
अत्र यज्ञदिनानां च कुर्वन्तु तीर्थयात्रिकाम् ।
नामसंकीर्तनं चापि प्रकुर्वन्तु दिवानिशम् ॥६१॥
उत्सवान् विविधांश्चापि वैष्णवैर्मिलितैः सह ।
कारयन्तु प्रजाश्चापि कथापारायणादिकम् ॥६२॥
चातुर्मास्ये प्रपूजादि कुर्वन्तु श्रीहरेस्तथा ।
इत्येवं घोषणां राज्ये कारयन्तु निजे निजे ॥६३॥
इत्यादिष्टास्तु राजानः पञ्चमुख्यास्तथाऽपरे ।
शिबिदेवनृपश्चापि थर्कूटस्थनृपस्तथा ॥६४॥
वीरजारमहाराजः शत्त्यक्षिनृपतिस्तथा ।
कालिमाशनृपश्चापि तथाऽन्ये खण्डभूभृतः ॥६५॥
आज्ञां शिरसि चाधाय नेमुः श्रीपुरुषोत्तमम् ।
करिष्यामस्तथेत्युक्त्वोद्घोषणां दूतसत्तमैः ॥६६॥
कारयामासुरत्यर्थं स्वस्वराज्ये समन्ततः ।
भोजयामास च सर्वान् श्रीहरिर्निजमन्दिरे ॥६७॥
कालिमाशनृपोक्त्या वै प्रासादिकं तु नैकधा ।
सार्यं विमानमारुह्य लालायनमुनेर्गृहम् ॥६८॥
ययौ श्रीभगवान् पूर्वसमुद्रे द्वीपसंस्थितम् ।
प्रासादिकं च तत् कृत्वा त्वाययौ व्योममार्गतः ॥६९॥
कालिमाशनृपसौधं विश्रान्तिं प्राप वै निशि ।
लालायनमृषिं साधुं सच्चिदानन्दसंज्ञितम् ॥७०॥
दीक्षितं श्रीहरिस्त्वाह व्रज त्वं चोत्तरान् कुरून् ।
तव द्वीपात्पूर्वदेशान् केनाटद्वीपसंयुतान् ॥७१॥
अमरीणां प्रदेशांश्च मम भक्तिं प्रकारय ।
इत्याज्ञप्तो यतिः सोऽपि ययौ केनाटकान् कुरून् ॥७२॥
व्योममार्गेण योगेन बहुशक्तिसमन्वितः ।
अथ रात्रौ हरिः प्राप विश्रान्तिं च ततः पुनः ॥७३॥
पूर्णायां प्रातरुत्थाय स्नात्वा ध्यानपरोऽभवत् ।
तावत् तत्राऽभवद् राधे महाश्चर्यं हरेः पुरः ॥७४॥
विमानं त्वक्षराद्धाम्नो मुक्तयुक्तं समुज्ज्वलम् ।
आयातं द्राक् स्थिरं तस्थौ श्रीहरेः सन्निधौ ततः ॥७५॥
पार्षदास्तद्विमानाच्चाऽवतीर्य पुरुषोत्तमम् ।
राधिके ! पूजयामासुः प्राहुर्भक्तिपरायणाः ॥७६॥
शूरजारस्य मुक्त्यर्थं तथा तस्य तु योषितः ।
देववरूथिनीनाम्न्या मोक्षार्थं भवदाज्ञया ॥७७॥
यथा प्रतिश्रुतं तद्वत् स्मृत्वा समागता वयम् ।
आज्ञापय यथा कृष्ण तथा स्मः सेवने रताः ॥७८॥
श्रीहरिः श्रावयामास तत्सर्वं भूभृते तदा ।
संप्रयुज्याऽऽशिषो राज्ञे कालिमेशाय शक्तये ॥७९॥
वीरजारेण सहितः शूरजारादिसंयुतः ।
श्रीहरिवीरजारस्य राज्यं चोबीनदीतटे ॥८०॥
आययौ सुविमानेन निजमण्डलसेवितः ।
शूरजारं तथा देववरूथिनीं तदा हरिः ॥८१॥
प्रापयन्मोक्षकं दिव्यं त्वक्षरं धाम शाश्वतम् ।
अथ श्रीभगवाँस्तूर्णं बालकृष्णसरोवरम् ॥८२॥
आययौ तद्विमानेन शिबिराजालये पुनः ।
थर्कूटस्थो हरेराज्ञां प्राप्य राज्यं निजं ययौ ॥८३॥
अथाश्चर्यमभूत्तत्र कन्याः षोडश चाययुः ।
दिव्यरूपधराः सर्वास्त्रिशूलिन्यस्त्रिनेत्रिकाः ॥८४॥
तथा कुमाराश्चत्वारस्तेऽपि त्रिशूलनेत्रिकाः ।
दिव्या योगकलायुक्ता महैश्वर्यादिशालिनः ॥८५॥
अथाऽन्ये पुरुषा दिव्याः श्वेतास्त्रिशूलनेत्रकाः ।
चत्वारश्चंचला दीर्घाः स्थूलास्तत्र समाययुः ॥८६॥
पञ्चाऽपरे च पुरुषाः कृष्णवर्णास्त्रिशूलिनः ।
त्रिनेत्रा दिव्यरूपाश्च दीर्घाः कृशाः समाययुः ॥८७॥
एकः कश्चिद् दुर्बलश्च निःशस्त्रोऽपि समाययौ ।
रूक्षवर्णोऽपि सुखवान् निश्चिन्तश्चञ्चलोऽपि सन् ॥८८॥
एवमेते समागत्य त्रिंशत्ते हरिसन्निधौ ।
निपेतुर्दण्डवत् कृष्णपादयोर्भक्तिसंयुताः ॥८९॥
धन्या वयं वयं धन्या उद्धृताः परमात्मना ।
इत्युक्त्वा बहुरत्नाद्यैः पुपूजुः परमेश्वरम् ॥९०॥
आरार्त्रिकादिकं चक्रुः सत्कृताः शिबिना तु ते ।
निषेदुश्चाथ संपृष्टाः के यूयं देवरूपिणः ॥९१॥

जगदुस्ते वयं रुद्रसृष्टाः पुरा तदात्मजाः ।
रुद्रसृष्टेर्विनाशेऽत्र प्रच्छन्ना वासकारिणः ॥९२॥
सदा वर्तामहे त्वया पाविताः परमात्मना ।
देहि मन्त्रान् वैष्णवाँश्च कुरु श्रीपरमेश्वर ॥९३॥
इत्येवं स्वर्थितः कृष्णनारायणो ददौ मनून् ।
तत्र याः कन्यकास्त्वासन् रौद्रयः पुत्र्यस्तु ता यथा ॥९४॥
उरला वालिका इरात्रिशा ओत्री च मानिशी ।
वीना त्रिवला त्रासा च तुंगासिका अनावरा ॥९५॥
आलनौका उष्ट्रीयास्का याना अनादिरा तथा ।
अनांशुका कालिमा च वैष्णव्यस्तास्तदाऽभवन् ॥९६॥
कुमाराश्चापि चत्वारो नाम्ना तान् शृणु राधिके ! ।
वालकृशो द्विकलश्च अल्पमात्रो युरालकः ॥९७॥
तेऽपि मन्त्राँस्तदा प्राप्य वैष्णवाश्चाऽभवन् शुभाः ।
अन्ये दीर्घाश्च पुरुषा नाम्ना तान् शृणु राधिके ॥९८॥
अक्षोटा कारकश्चापि कश्यपायो द्विरिंगकः ।
तेऽपि मन्त्रान् जगृहुश्च वैष्णवाश्चाऽभवँस्तदा ॥९९॥
अन्ये च पञ्च पुरुषा नाम्ना तान् शृणु राधिके ! ।
ऊरुलश्च समानश्च स्तेनावासः प्रमालुनः ॥१००॥
आपतायी त ऐवापि जगृहुर्वैष्णवान् मनून् ।
वैष्णवाश्चाऽभवँश्चाऽथ यश्चैको दुर्बलो जनः ॥१०१॥
नाम्ना शिवरणश्चाऽयं जग्राह च मनूँस्तदा ।
वैष्णवाः समजायन्त सर्वे श्रीहरिसेवकाः ॥१०२॥
आशां गृहीत्वा कन्यास्ता नदीरूपा ययुः स्थलम् ।
चत्वारस्तु कुमारा वै सरोरूपा ययुश्च ते ॥१०३॥
चत्वारश्चापि पुरुषाश्चाब्धिरूपा ययुश्च ते ।
पञ्चापि पुरुषाश्चैते शैलरूपा ययुश्च ते ॥१०४॥
एको रुक्षो दुर्बलश्च रणरूपो ययौ ततः ।
तीर्थरूपा न्यवसँश्च तारका देहिनां सदा ॥१०५॥
शिविदेवकुटुम्बं तद् दृष्ट्वाऽऽश्चर्यपरं ह्यभूत् ।
पठनाच्छ्रवणाच्चास्य तत्तत्तीर्थफलं भवेत् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीसंहितायां द्वितीये त्रेतासन्ताने सर्वेषां महीमानानां विदायसत्कारः, वैष्णवीघोषणा, सच्चिदानन्दलालायनस्योत्तरकुरून् प्रति प्रेषणं, शूरजारदम्पतीमोक्षः, त्रिंशद्रौद्रीरौद्रात्मजानां वैष्णवीभवनम्, तानि तीर्थानि चेत्यादिनिरूपणनामा चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! कृष्णो नारायणः परः प्रभुः ।
शिवेः सौधे ह्युषित्वा तत्कृतां सेवां प्रगृह्य च ॥ १ ॥
विनिर्गमय्य च निशां माघाद्यदिवसे प्रगे ।
नैत्यकं दैविकं कृत्वाऽऽदिश्य धर्मान् सुसात्त्वतान् ॥ २ ॥
प्राप्य दत्तां महापूजां भोजनं च्योपदादिकम् ।
सर्वान् शुभाशीर्वचनैः संप्रयुज्य प्रसाद्य च ॥ ३ ॥
देवायतनकं भक्तं तथा श्रीलोमशादिकान् ।
ब्रह्मप्रियास्तथा सर्वा अक्षरक्षेत्रवासिनः ॥ ४ ॥
क्षेत्रपान् देवतीर्थानि कुटुम्बं पार्षदादिकान् ।
मातरं पितरं चापि भ्रातॄन् भ्रातृवधूस्तथा ॥ ५ ॥
भगिनीं तत्सखीं चापि राजाऽर्पिताश्च कन्यकाः ।
सौराष्ट्रीयजनान् नैजान् विमानेषु नवेषु च ॥ ६ ॥
निषाद्य स्वविमानेन व्योममार्गेण सञ्चरन् ।
इन्दुकुशं समतीत्य सिन्धुव्योम विलंघ्य च ॥ ७ ॥
बदरिकाश्रमं गत्वा दृष्ट्वा नरं नरायणम् ।
ऋषीन् दृष्ट्वा तापसाँश्च ततः श्रीकाशिकां ययौ ॥ ८ ॥
वरणायास्तटे नैजां लक्ष्मीं शिवसुतां सतीम् ।
शिवराजं तथा कृष्णां चन्द्रं जयं च जानकीम् ॥ ९ ॥
दृष्ट्वा सर्वान् सम्मिलित्वा स्नात्वा गंगाजले ततः ।
विश्वेशं सर्वदेवाँश्च दृष्ट्वा सम्पूज्य सर्वथा ॥१०॥
विमानैः सहितैः सर्वैः श्रीहरिः पुरुषोत्तमः ।
राधिके ! चाययावश्वपट्टक्षेत्रं निजं शुभम् ॥११॥
प्रजाभिर्जयकारैश्च वर्धितास्त्तीर्थकारिणः ।
विमानानि त्वक्षरं तत् क्षेत्रं तु वारसप्तकम् ॥१२॥
भ्रमित्वा कुंकुमवापीं विलोक्योद्यानवाटिकाः ।
सर्वान् विज्ञाप्य च निजागमं वै पश्चिमे ततः ॥१३॥
अवतेरुर्महोद्याने स्थैर्यमातानि वै ततः ।
पुष्पाक्षतैश्च लाजाभिः सत्कृतानि प्रजाजनैः ॥१४॥
विमानेभ्यो बहिः सर्वे निर्गत्याऽऽपृच्छ्य वै मुहुः ।
क्षेमं च कुशलं चानाऽमयं दत्वा स्रगादिकम् ॥१५॥
सत्कृत्य च समाश्लिष्य स्वस्वस्थानं ययुर्जनाः ।
निवासार्हेषु सौधेषु निजान् हरिर्न्यवासयत् ॥१६॥
भोजयामास शीघ्रं च विश्रमुश्च ते तथा ।
प्राहिणोत् कन्यकाः सर्वास्तदा ब्रह्मप्रियायुताः ॥१७॥
लोमशस्याऽऽश्रमे रम्ये सदा मायाविवर्जिते ।
ररक्ष लोमशः सर्वा दिव्यमुक्तोत्तमो मुनिः ॥१८॥

ऋषयो देवताद्याश्च क्षेत्रपास्तत्रवासिनः ।
भुक्त्वा नैजान्निवासाँश्च ययुर्विश्रान्तिमागमन् ॥१९॥
हरिः कुटुम्बसहितो भुक्त्वा विश्रान्तिमाप च ।
द्वितीयाया दिने प्रातः कृत्वा स्वं नैत्यकं विधिम् ॥२०॥
महीमानान् सुराष्ट्रीयान् भोजयामास भावतः ।
कन्थाधराद्याश्च तथा रणंगमादयोऽपि च ॥२१॥
विप्राः शीलव्रताद्याश्च महर्षयोऽपि साधवः ।
आज्ञां प्राप्य हरेर्नैजान् ग्रामान् ययुः समन्ततः ॥२२॥
देवायतनकं प्राह हरिः प्रसन्नमानसः ।
त्वया भक्त कृतं सर्वं वैष्णवं राशिराज्यकम् ॥२३॥
नैतादृशं महत् कार्यं विना भक्तेन जायते ।
पाविताः किंपुरुषा वै नरा नार्यो नपुंसकाः ॥२४॥
प्रसन्नोऽस्मि वदाऽदेयं तव मे नैव विद्यते ।
वृणु सर्वं ददाम्येव यत्ते मनसि वर्तते ॥२५॥
इत्युक्त्वा च समाकृष्य मिमिले वक्षसा स्वयम् ।
मस्तके श्रीहरिस्तस्य. हस्तौ तत्र न्यधात् क्षणम् ॥२६॥
हृदये चरणौ दिव्यौ ददौ श्रीपुरुषोत्तमः ।
देवायनोऽपि भक्तोऽसौ पूर्णकामोऽस्ति राधिके ॥२७॥
ततो वव्रे भक्तराट् स गृहं ते वै भवाम्यहम् ।
यत्र यत्र भवानास्ते पररूपः स्वयं हरिः ॥२८॥
अवतारस्वरूपश्चेश्वरे दैवे च मानुषे ।
विभवाख्योऽथवा व्यूहस्वरूपोऽप्यथवांऽशकः ॥२९॥
अर्चारूपोऽथवाऽऽवेशकलाविभूतिरूपवान् ।
शक्तिरूपो देवरूपो यत्रास्ते भगवान् भवान् ॥३०॥
तत्र तत्र गृहं मेऽस्तु मद्गृहे वस सर्वदा ।
हरिः प्राह च धन्योऽसि त्वदात्मकगृहेऽन्वहम् ॥३१॥
यथा वसामि सौख्येन तथा त्वं भव मद्गृहम् ।
चेतनो मुक्तरूपोऽसि सच्चिदानन्दविग्रहः ॥३२॥
तथा कार्यस्वरूपोऽपि मम देवालयो भव ।
देवालये सदा चाऽहं निवत्स्ये सृष्टिमण्डले ॥३३॥
प्रासादो मे भवत्वेव गतः प्रासादपात्रताम् ।
यत्राऽहं तत्र सर्वत्र देवायतनको भव ॥३४॥
अनेकशक्तिसम्पन्नश्चानेकरूपधृग्भव ।
जडवद् दृश्यरूपस्त्वं तदधिष्ठातृदेवता ॥३५॥
देवालनां सर्वेषां भव त्वष्ट्रप्रवर्धितः ।
अधिदेवोऽतिरूपश्च दर्शनीयो हि देहिनाम् ॥३६॥
दर्शयिष्ये च रूपाणि देवालयात्मकानि ते ।
इत्युक्त्वा भगवानस्मै देवायतनकाय च ॥३७॥

दर्शयामास शिखरान्वितं देवालयं शुभम् ।
निजमूर्तौ ततो मूर्तिंदेवालयेऽपि तिष्ठति ॥३८॥
तादृशं दर्शयामास सर्वांगं देवतालयम् ।
वेदिकां जगतीं भीटं पीठं मण्डोवरं तथा ॥३९॥
शृंगं पद्मशिलां चापि कलशं ध्वजमित्यपि ।
अग्रगं मण्डपं चापि गजासनं प्रदक्षिणम् ॥४०॥
सर्वं मूर्तौ हरिर्नैजस्वरूपायां तदा मुहुः ।
देवतायतनायैव देवतायतनात्मकम् ॥४१॥
दर्शयामास विशदं ज्ञानं दिव्यं ददौ तथा ।
देवायतनकः प्राप्य ज्ञानं च भवनात्मताम् ॥४२॥
कृतकृत्योऽभवन्नम्रो बभूव द्विस्वरूपवान् ।
मुक्तरूपस्तथा देवालयरूपोऽतिशोभनः ॥४३॥
कुंकुमवापिकाक्षेत्रे दिव्यो देवालयोऽभवत् ।
सहस्रः हस्तमानः स प्रासादोऽभवदम्बरे ॥४४॥
यद्घटाश्चाभ्रसलिलैः स्नान्ति नित्यं ध्वजान्विताः ।
तादृशं खलु भगवान् चकार स्वं शुभालयम् ॥४५॥
विज्ञायैतदृषयश्च सिद्धाः देव्यश्च देवताः ।
जलजाः स्थलजाश्चापि चतुःखनिसुसम्भवाः ॥४६॥
ईशा ईश्वरमुख्याश्च तत्त्वानि चेतनान्यपि ।
वृक्षा वल्ल्यश्चाकृतयो गरुडा गजवाजिनः ॥४७॥
योगिन्यः पुष्पवल्ल्यश्च स्तम्भा मुमुक्षवस्तथा ।
अरण्यस्था अम्बरस्था. अन्येऽपि सौधयोगिनः ॥४८॥
ज्ञात्वा देवायतनस्य देवालयस्वरूपताम् ।
तत्र वासं चेहमानाश्चाययुर्हरिसन्निधौ ॥४९॥
सदेहाः श्रीहरेः सेवामिच्छन्तो भक्तिभावुकाः ।
प्रार्थयामासुरत्यर्थं पूजयित्वा हरिं हि ते ॥५०॥
कृपानाथ दयासिन्धो सर्वात्मन् सर्वरक्षक ।
सर्वाश्रयप्रदातस्त्वं देहि वासं निजालये ॥५१॥
भक्तवत्सलसंज्ञोऽसि तव सर्वं शरीरकम् ।
त्वां विना नैव लोकानां वासः सुखाय कल्प्यते ॥५२॥
देवतायतनो भक्तो भक्त्या त्वदालयोऽभवत् ।
वयं ते कृपया दासास्त्वदालयनिवासिनः ॥५३॥
भवेम इति विश्वात्मन् धारयामः प्रदेहि तत् ।
तानाह भगवान् कृष्णः सर्वश्रेयःपरायणः ॥५४॥
दुर्लभं सुलभं मत्वा भवद्भिस्त्वर्थितं त्विह ।
ममाऽऽलयो भवत्येव त्रेधा यत्र वसाम्यहम् ॥५५॥
अक्षरं ब्रह्म परमं मुक्तिस्थानं ममाऽऽलयः ।
यत्राऽक्षरं भवेद् ब्रह्म तत्राऽहं निवसामि वै ॥५६॥

यत्र वासो हि मुक्तानां नाऽन्येषां भवति क्वचित् ।
मायापारं गतानां च ब्रह्मविदां च योगिनाम् ॥५७॥
यत्र पूर्वे सन्ति साध्या देवा नित्यनिवासिनः ।
जीवभावं परित्यज्य चेशभावं विहाय च ॥५८॥
मायाकर्माशयं दग्ध्वा ममाऽऽराधनतत्पराः ।
मे ध्यानपरमा भूत्वा क्षालिताऽशेषकारणाः ॥५९॥
शुद्धाः सच्चिन्मयानन्दा मत्प्रपन्ना मदर्थकाः ।
मन्मूर्तौ संयमपरास्ते यान्ति ब्रह्म चाऽक्षरम् ॥६०॥
मत्कृपालेशतो दिव्या ये संभूता मदात्मकाः ।
मदन्यलयभावास्ते मे यान्ति ब्रह्म चाक्षरम् ॥६१॥
मायाविकृतिलुब्धानां मायामिष्टरसात्मनाम् ।
मायाऽहंभावयुक्तानां मायास्वभावशालिनाम् ॥६२॥
स्वार्थसाधनयत्नानां रागार्थे यततां सदा ।
मद्भावनाविहीनानां न स्थानं ब्रह्मणि क्वचित् ॥६३॥
मम भक्तिविहीनानां मम मार्गोऽविदां तथा ।
मम मन्त्रादिशून्यानां न स्थानं ब्रह्मणि क्वचित् ॥६४॥
इत्येवं परमं स्थानं मयोक्तं तन्ममाऽक्षरम् ।
तदन्यद् वै द्वितीयं तु स्थानं मे हृदयं सताम् ॥६५॥
यत्राऽहं सर्वदा वासं प्रकुर्वे चेतनालये ।
मम मुक्ता महामुक्ताश्चाऽक्षरं ब्रह्म चेत्यपि ॥६६॥
मुक्तानां हृदये नित्यं सतां वै जीवतामिह ।
वसामो मिलिताः सर्वे हृदयेषु सतां वयम् ॥६७॥
तत्र वै वासना नास्ति नास्ति मायाविकारिता ।
तत्र मत्तोऽतिरिक्तं वै नास्ति ततो वसाम्यहम् ॥६८॥
मम मूर्तिः सदा दिव्याऽक्षरधामनिवासिनी ।
भक्तिधर्मयुता तत्र राजते हृदये सताम् ॥६९॥
धर्मवंशो मम मूर्तौ योऽस्ति दिव्यगुणात्मकः ।
ते गुणास्तत्र राजन्ते हृदये वै सतां सदा ॥७०॥
श्रद्धा शान्तिर्दया मेधा तुष्टिः पुष्टिर्गतिस्तथा ।
लज्जा मैत्री तितिक्षा च बुद्धिर्मूर्तिः क्रियोन्नतिः ॥७१॥
धर्मप्रिया वसन्त्येव साधूनां हृदये सदा ।
ज्ञानं वैराग्यमैश्वर्यं चाऽभयं तप आर्जवम् ॥७२॥
सत्यं क्षेमः सुखं शौचं स्थैर्यं धैर्यं च मार्दवम् ।
निग्रहस्त्याग आस्तिक्यं सन्तोषश्च क्षमा स्मृतिः ॥७३॥
दमो यज्ञः शमो योगश्चोपरतिरुपासना ।
प्रसादश्च शुभं तेजः स्वाध्यायः प्रश्रयश्च मुद् ॥७४॥
ध्यानं साम्यं ब्रह्मविद्या लाभः सामार्थ उद्यमः ।
श्रवणाद्या भक्तिरूपा वसन्ति हृदये सताम् ॥७५॥
तत्राऽहं सर्वदा शान्तो निवसामि प्रसन्नहृत् ।
सदालयो मम यूयं तत्र वासोऽन्यदुर्लभः ॥७६॥
अमुक्तानां मम मन्त्रविहीनानां कदाचन ।
ममाऽभक्तिमतां वासो मम सत्सु न विद्यते ॥७७॥
येषां वै त्वक्षरे वासो येषां च हृदये सताम् ।
तेषां वासः सदा योग्यो मम देवालये शुभः ॥७८॥
अथाऽयं भक्तवर्योऽत्र देवायतनकोऽभवत् ।
देवालयस्वरूपोऽपि जडप्रख्योऽपि चेतनः ॥७९॥
तत्र वासं जडचैत्ये प्रासादे यदि चेच्छथ ।
मम मन्त्रान् प्रगृह्णन्तु मम भक्ता भवन्तु च ॥८०॥
विना मे सात्त्वतान् भक्तान् स्थातुमर्हन्ति नेतरे ।
लोमशोऽयमृषिश्रेष्ठो मन्त्रान् वः सम्प्रदास्यति ॥८१॥
वैष्णवाः संभवन्त्वत्र ततो वसन्तु मद्गृहे ।
इत्युक्ता देवताद्याश्च देहिनः श्रीहरिं तदा ॥८२॥
नत्वा समर्च्य सम्पूज्याऽऽज्ञया- श्रीलोमशं ययुः ।
लोमशोऽपि ददौ तेभ्यो मन्त्रान् चकार वैष्णवान् ॥८३॥
ततस्ते देवसदनं देवायतनमाययुः ।
नेमुर्देवायतनकं निपेतुर्हरिपादयोः ॥८४॥
हर्याज्ञया वैष्णवास्ते देवालयनिवासिनः ।
भवितुं दीक्षिता जातास्तदा देवालयोऽब्रवीत् ॥८५॥
भगवन् चंचला देवांश्चञ्चला देहिनस्तथा ।
भीतियुक्ताः सदा त्वेते ह्यापत्काले समागते ॥८६॥
आसुरोपद्रवं ज्ञात्वा विद्रवेयुर्न चेद् यदि ।
मध्ये मध्ये विहायैव गच्छेयुर्न स्थलान्तरम् ॥८७॥
नित्यवासप्रतिज्ञां चेत् कुर्युस्ते तव सन्निधौ ।
तदा वासः प्रदेयः स्यादेभ्यश्चेति विधिं कुरु ॥८८॥
बालकृष्णस्तु तच्छ्रुत्वा देवालयवचः शुभम् ।
हितं पथ्यं तथा सत्यं प्राह प्रार्थयतस्तदा ॥८९॥
यथा देवालयो वक्ति तथा चेन्मन्यते यदि ।
शपथान् कुरुताऽत्रैव तदा वासं ददाम्यहम् ॥९०॥
यावद् देवालयस्तिष्ठेज्जीर्णो वा भित्तिमात्रकः ।
यावद्देवोऽपि तिष्ठेच्च तावत्स्थेयं तदालये ॥९१॥
देवतायतनो देवो यदा स्थानं विहाय च ।
सर्वकालार्थमुद्गच्छेत् तदा गम्यं न चान्यथा ॥९२॥
इत्येवं वै प्रतिज्ञां च कुरुताऽत्र तदाऽप्यहम् ।
वासं ददामि देवायतने देवालये सदा ॥९३॥
इत्युक्तास्ते प्रतिज्ञां वै तथा चक्रुर्निरन्तराम् ।
यावद् देवालयस्तिष्ठेद् यावत्तिष्ठेच्च देवता ॥९४॥

तावद्वस्तव्यमेवाऽत्र महापत्कालकेऽपि च ।
इत्युक्त्वा च जलं पीत्वा प्रासादिकं क्षितावपि ॥९५॥
जलं प्रमुच्य चरणे हरेः सुरादयोऽस्पृशन् ।
इत्येवं शपथं प्राप्ताः प्राप्ता वासं महालये ॥९६॥
देवालये हरेर्वासे वासार्हा वैष्णवा हि ते ।
यावद्देवालयस्तस्मात् तद्देवोऽपि च तिष्ठति ॥९७॥
तावद्वै राधिके देवालयांऽगानि च सर्वदा ।
तिष्ठन्त्येवेति भग्नाश्च खण्डिता अपि राधिके ! ॥९८॥
जीर्णोद्धारस्ततो देवालयस्य हितदो नृणाम् ।
प्रसन्ना देवतांशास्ते सुखयन्ति सहायिनः ॥९९॥
एवं प्रसन्नतां प्राप्य देवायतनको मुनिः ।
देवालयात्मतां प्राप्तस्तथा देवा निवासनम् ॥१००॥
कृपया श्रीहरेः प्राप्तास्तान् नमेद् दूरोऽपि वै ।
शालग्रामे खण्डितेऽपि यथा वसामि सर्वदा ॥१०१॥
देवालये प्रभग्नेऽपि जीर्णेऽपि मूर्तिसंयुते ।
वसाम्येव त्वहं यावद् देवायतनकोऽपि च ॥१०२॥
वसत्येव तु तावद्वै ममाऽऽज्ञां मूर्ध्नि धारयन् ।
पठनाच्छ्रवणाच्चास्य देवालयफलं भवेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीहरेरश्वपट्टसरःक्षेत्रं प्रत्यागमनं, अक्षरधाम्नि सतां हृत्सु देवालयमूर्तौ चेति हरेस्त्रेधा वासः, देवायतनर्षेर्देवालयस्वरूपता, देवालयांगदेवानामपि स्थैर्यादि चेतिनिरूपणनामा पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! देवायतनको भक्तराट् पुनः ।
पप्रच्छ श्रीहरिं ज्ञातुं प्रासादनिर्मितिं तदा ॥ १ ॥
लोकानामुपकारार्थे ज्ञातुमंगप्रमाणकम् ।
अन्तर्मानानि सर्वाणि विज्ञातुं मन्दिरस्य वै ॥ २ ॥
भगवन् देवदेवेश देवालये यथा यथा ।
अंगानि मूलतो यानि भवन्ति चाऽऽध्वजं वद ॥ ३ ॥
येनाऽहं च ममांऽगानि जानीयां यत्र देवताः ।
आध्यात्मिक्य इमाश्चापि निवत्स्यन्ति तनौ मम ॥ ४ ॥
इत्यस्य वै स्वरूपं च ज्ञात्वा प्रासादकस्य च ।
अन्ये प्रासादवर्याश्च भविष्यन्ति सजातयः ॥ ५ ॥
शिल्पिनो विश्वकर्माणो यदाधारान् स्वबुद्धिभिः ।
प्रासादान् कल्पयिष्यन्ति नैकरूपाँस्तदुत्तरम् ॥ ६ ॥
तस्माद् वद हरेकृष्ण प्रासादांगविवेचनाम् ।
हितकृद् देववासानां यन्मूलः शिल्पिविस्तरः ॥ ७ ॥
इतिपृष्टो हरिकृष्णस्तमुवाच समासतः ।
रेखालक्ष्यात्मरूपं वै देवायतनकं मुनिम् ॥ ८ ॥
सप्तयवोदरैर्मीतश्चाऽङ्गुलो मध्यमः स्मृतः ।
चतुर्विंशत्यंगुलैश्च हस्तो वै परिकीर्तितः ॥ ९ ॥
हस्तोऽयं गजसंज्ञोऽस्ति देवप्रासादके तथा ।
प्रतिमायां च लिङ्गे च पीठे च मण्डपे तथा ॥१०॥
राजप्रासादिके चापि महादीर्घनिवासके ।
दीर्घहर्म्ये पृथिव्यां च हस्तेनाऽनेन मापयेत् ॥११॥
देवप्रासादके चापि मण्डपे भित्तिबाह्यतः ।
मानं ग्राह्यं च शिखरे मन्दिरे देवतालये ॥१२॥
पृथिव्या दीर्घतायां वै हस्तसंख्या तु यावती ।
गुणिता सा प्रकर्तव्या व्यासता हस्तसंख्यया ॥१३॥
उत्पन्ना या हस्तसंख्या भञ्जनीयाऽष्टसंख्यया ।
शेषसंख्या भवदेव आयनाम्नीति विश्रुता ॥१४॥
एकाऽङ्कस्तु ध्वजायः स्यात् पञ्चाऽङ्कस्तु वृषायकः ।
सप्तसंख्या गजायः स्याद् देवालये त उत्तमाः ॥१५॥
ध्वजाये त्वर्थलाभः स्याद् वृषायो धनधान्यदः ।
कल्याणदो गजायश्च मन्दिरादौ मता इमे ॥१६॥
प्रासादे च प्रतिमायां लिङ्गे पृथ्व्यां च मण्डपे ।
पीठे सिंहासने वेद्यां कुण्डे ध्वजे च चामरे ॥१७॥
छत्रे वाप्यां तटाके च कूपे देवासनेऽम्बरे ।
भूषायां पीठिकायां च हारे मुकुटके तथा ॥१८॥
ध्वजायः सर्वथा श्रेष्ठो ग्राह्यः शिल्पिकलाविदा ।
शेषे त्रित्वे तु सिंहायः सिंहासने शुभो मतः ॥१९॥
देवालये ध्वजायः स्याच्छ्रेष्ठ एव न संशयः ।
वृषायो वा गजायो वा न ग्राह्यो देवतालये ॥२०॥
ध्वजायो न भवेच्चेद्वै गजायस्तत्र गृह्यते ।
पूर्वायास्तु ध्वजः स्वामी पश्चिमाया वृषायकः ॥२१॥
उत्तराया गजायोऽस्ति सिंहायो दक्षिणादिशः ।
क्षेत्रायामं गुणयेच्च विस्तारेण ततश्च ताम् ॥२२॥
संख्यां विभज्ययाच्च सप्तविंशत्या शेषकं च यत् ।
भवेत्तदंकसंख्याकं नक्षत्रं वेश्मनो भवेत् ॥२३॥
नक्षत्रं भञ्जयित्वा वै अष्टाख्यसंख्यया ततः ।
शेषसंख्या व्ययसंज्ञा न्यूना सा चाऽऽयतो यदि ॥२४॥
श्रेष्ठा सा नरसंज्ञाऽस्ति धनधान्यादिदायिनी ।
व्ययोऽधिको राक्षसः स्यात् समानस्तु पिशाचकः ॥२५॥

अशुभौ तौ सदा बोध्यौ नरव्ययो हि लाभदः ।
अष्टौ व्ययाश्च ते बोध्याः शेषैके शान्तनामकः ॥२६॥
ध्वजायेन समं शान्तो व्ययो देयः फलप्रदः ।
सिंहायेन समं पौरो व्ययो देयो द्वितीयकः ॥२७॥
वृषायेन समं देयः श्रियानन्दस्तु पञ्चमः ।
गजायेन समं देयः श्रीवत्सो व्यय एव च ॥२८॥
क्षेत्रपास्ते प्रकीर्त्यन्ते पूजिता विघ्ननाशकाः ।
मणिरत्नसुवर्णाद्यैः प्रासादा देवताप्रियाः ॥२९॥
नद्यास्तटे पुरे तीर्थे सिद्धाश्रमे च गह्वरे ।
उद्याने च तटाके च कार्या देवालयाः शुभाः ॥३०॥
नगराभिमुखाः श्रेष्ठाः प्रासादाः सुखदाः सदा ।
तेषु मध्ये च बाह्ये च देवताः सुखदा सदा ॥३१॥
श्रीः कुबेरो गणेशश्च गोपुरे सुखदाः सदा ।
मध्ये वा स्वस्य निलये सुखदाः सन्ति वैष्णवाः ॥३२॥
रात्रौ पृथ्व्यां प्रदीपं च संस्थाप्य ध्रुवतारके ।
अवलम्बनसूत्रेण रेखैक्यं लेखयेद् बुधः ॥३३॥
उत्तरा सा दिशा शुद्धा कीलकैर्निश्चितां तु ताम् ।
कुर्यादावारि निखनेदाशिलाभागभूतलम् ॥३४॥
पाषाणान्ते जलान्ते वा कूर्मशिलां निवेशयेत् ।
यद्दिशि स्यात्सर्पमुखं तस्यां खातं न चाचरेत् ॥३५॥
चतुष्षष्टिचतुष्कीनां कार्यमेकं हि कोष्ठकम् ।
समकोणं चतुष्कोणं कृत्वा चोभयतोदिशि ॥३६॥
रव्यादिवासरांस्तत्र लिखेदष्टौ क्रमादपि ।
चुतुष्कोणे रविर्यथा पतेल्लिखेत्तथाविधम् ॥३७॥
तत्र कोष्ठे मंगलस्य पंक्तौ नागमुखं महत् ।
शनेः पंक्तौ मंगलस्य पंक्तौ देहो मतोऽस्य वै ॥३८॥
शनैः पंक्तौ तथा पुच्छं भवेन्नागास्यकोष्ठके ।
देहस्थले न वै खातं कर्तव्यं क्वचिदेव च ॥३९॥
कन्यातुलावृश्चिके च रवौ पूर्वं मुखं भवेत् ।
भाद्रेषोर्जेष्वपि नागमुखं पूर्वे भवेत् सदा ॥४०॥
ततस्त्रिके च दक्षे स्यात् ततस्त्रिके तु पश्चिमे ।
ततस्त्रिके उत्तरे स्यात् तत्र खातं न कारयेत् ॥४१॥
कुक्षिद्वयस्य वै पार्श्वे खातं शस्तं मतं यथा ।
यदि नागमुखं पूर्वे वायव्ये खातमाचरेत् ॥४२॥
दक्षिणे चेत् सर्पमुखं त्वैशान्यां खातमाचरेत् ।
पश्चिमे चेन्नागमुखं खातं वह्नौ तदाचरेत् ॥४३॥
उत्तरे चेन्नागमुखं नैर्ऋत्ये खातमाचरेत् ।
देवालयेषु सर्वत्र निखनेद् वामकुक्षिके ॥४४॥
गजैकमानप्रासादे चतुरंगुलकूर्मकः ।
ततो दशगजं यावद् द्व्यंगुलं प्रतिहस्तकम् ॥४५॥
कूर्मं संवर्धयेत् कूर्मशिला योग्या तु सा मता ।
दशतो विंशतिं यावदेकांगुलं विवर्धयेत् ॥४६॥
विंशतितश्च पञ्चाशद्गजं चार्धांगुलं धरेत् ।
इष्टकानां तु प्रासादे इष्टकाकूर्मकः स्मृतः ॥४७॥
पाषाणानां मन्दिरादौ पाषाणस्य हि कूर्मकः ।
कूर्मशिलाऽधोभागेऽष्टांऽशकं पद्मं समाचरेत् ॥४८॥
एकगजायता चाऽष्टांऽगुलोर्ध्वा चतुरस्रिका ।
पाषाणसौधे दातव्या स्वस्थाख्या सा सहायदा ॥४९॥
इष्टिकानां तु सौधेषु कूर्मार्धांगुलमानतः ।
कृत्वा कूर्मशिला देया स्थौल्ये सा स्याद् ध्रुवप्रदा ॥५०॥
कूर्मशिलोपरि कार्या नव वै कोष्ठकास्ततः ।
अग्निस्थे कोष्ठके वारिदृश्यं मत्स्यं तु दक्षिणे ॥५१॥
नैर्ऋते मण्डुकदृश्यं पश्चिमे मकरदृशिः ।
वायव्ये तु ग्रासमुखमुत्तरे शंखदर्शनम् ॥५२॥
चैशाने सर्पदृश्यं च पूर्वे कुंभस्य दर्शनम् ।
नवमे मध्यभागे वै कूर्मः कार्य इतिस्थितिः ॥५३॥
नन्दा भद्रा जया रिक्ता तथाऽजिताऽपराजिता ।
शुक्लौ सौभागिनी चाथ धरणी नवमी मता ॥५४॥
कूर्मः कार्यश्चैकहस्ते देवालयेऽङ्गुलाऽर्धकः ।
सुवर्णस्याऽथवा रौप्यकस्य श्रेष्ठः स सम्मतः ॥५५॥
पश्चात् प्रत्येकहस्तेन आपंचदशहस्तकम् ।
अर्धाऽगुलेन कूर्मोऽयं वर्धनीयो भवेदिति ॥५६॥
पञ्चदशादेकत्रिंशद्गजपर्यन्तमेव तु ।
चतुर्थांशांऽगुलवृद्धिः कूर्मस्यैवेष्यते सदा ॥५७॥
एकत्रिंशादापञ्चाशद्गजपर्यन्तमेव तु ।
एकैकदोरकस्यैव वृद्धिः कूर्मे प्रदीयते ॥५८॥
दुग्धदधिघृतमधुशर्कराभिः सकूर्मकः ।
स्नपनीयस्ततः स्थाप्यो धरणीनामको हि सः ॥५९॥
पत्राऽऽयो नैव कर्तव्यः कर्तव्यश्छिद्रवर्जितः ।
मध्ये च व्योमशून्यश्च कर्तव्यो भागवर्जितः ॥६०॥
मणिभिः पूजनीयश्चाच्छादनीयः प्रवालकैः ।
या नन्दाद्याश्चाष्टदिक्षु शिलास्ताश्च शुभा यथा ॥६१॥
प्रासादे त्वेकहस्ते तु मता सप्तांगुला शिला ।
ततः पञ्चगजं यावत् द्व्यंगुलास्ताः शिलाः मताः ॥६२॥
ततो वै दशहस्ते तु त्र्यंगुलास्ताः शिला मताः ।
ततो विंशतिहस्ते तु पादोनचतुरंगुला ॥६३॥

पञ्चाशद्गजपर्यन्तं सपादचतुरंगुलाः ।
समकोणाश्चतुर्थांऽशस्थूलाः कार्याः शिला नव ॥६४॥
शिलानामुपरि चाग्निकोणे शक्तिं प्रदापयेत् ।
दक्षिणायां च दण्डं तु नैर्ऋत्यायां तु खड्गकम् ॥६५॥
पश्चिमायां तु पाशं वै वायव्यायां तथांऽकुशम् ।
उत्तरायां गदां दद्याद् ऐशान्यां तु त्रिशूलकम् ॥६६॥
पूर्वस्यां वज्रकं, दद्यान्मखं तासां बहिर्यथा ।
रक्तं श्यामं चाभ्रवर्णं पाण्डुरं श्वेतमम्बरम् ॥६७॥
हरितं श्वेतं पीतं च वस्त्रमाच्छादयेत् क्रमात् ।
खाते शिलाऽधः संपुटाः स्थापनीया निधेर्नव ॥६८॥
शंखः पद्मो महापद्मो मकरः कुन्दनालकौ ।
कच्छपश्च मुकुन्दश्च खर्वश्च निधयो नव ॥६९॥
ईशानादग्निकोणाद्वा दक्षे शिलाऽष्टकाऽर्पणम् ।
मध्ये कूर्मशिला पश्चाद् वेदमांगल्यगीतिकैः ॥७०॥
पूर्वे नन्दा स्थापनीया ततोऽन्या धरणी ततः ।
शिलाष्टकोदरं सावकाशं रक्ष्यं पुटादिवत् ॥७१॥
अभितः पालिकाः कृत्वोपरि स्थाप्याः पुटादिवत् ।
धरणीनाभिनालं तु सावकाशं तदूर्ध्वके ॥७२॥
आसिंहासनपर्यन्तं चानयेत् सुखदो हि सः ।
कूर्मस्य स्थापने शिलास्थापने घृतपक्वकम् ॥७३॥
मिष्टान्नं देवताभ्यश्च दिक्पालेभ्योऽपि मिष्टकम् ।
बलिं दद्याद् दिव्यवस्त्रं शिल्पिने श्रीफलान्वितम् ॥७४॥
ब्राह्मणायाऽर्पयेद् भोज्यं दक्षिणां वैदिकाय च ।
प्रासादानामधिष्ठानं जगती वेदिका मता ॥७५॥
यावत्कोणो भवेत् देवप्रासादो जगती तथा ।
चतुरस्रा तथाऽष्टास्रा वर्तुला चाऽयताऽथवा ॥७६॥
प्रासादरूपरूपा तु वेदिका वै प्रशस्यते ।
वेदिका जगती प्रदक्षिणा चेति समर्थकाः ॥७७॥
प्रासादाज्जगती कार्या षड्गुणा शोभना मता ।
ब्रह्मविष्णुमहेशानां सप्तगुणा तु मन्दिरे ॥७८॥
द्विगुणा वा चतुर्गुणा पञ्चगुणा क्वचिन्मता ।
त्रिभ्रमा जगती श्रेष्ठा द्विभ्रमा तु च मध्यमा ॥७९॥
एकभ्रमा कनिष्ठा च त्रिभ्रमा विष्णुमन्दिरे ।
उच्छ्रायस्य त्रिभागेन न्यूना द्वितीयभ्रामिणी ॥८०॥
तदुच्छ्रायविभागेन न्यूना तृतीयभ्रामिणी ।
एवं समुच्छ्रयः कार्यो भ्रमणीनां त्रिभागतः ॥८१॥
चतुष्कोणा द्वादशकोणा वा विंशतिकोणकाः ।
अष्टाविंशतिकोणाः षट्त्रिंशत्कोणास्तु चोत्तमाः ॥८२॥
प्रासादश्चेद् द्वादशहस्ताऽऽयतो जगती तदा ।
आयताऽर्धप्रमाणेन समुच्छ्रयवती मता ॥८३॥
द्वाविंशतिगजाऽऽयत्ये तत्तृतीयांऽशकोच्छ्रया ।
द्वात्रिंशदायतभावे चतुर्थांऽशोच्छ्रयो मतः ॥८४॥
पञ्चाशदायतभावे तुर्येऽपि चतुरंशिका ।
उच्छ्रये समता चापि सदा निर्विघ्नताकरी ॥८५॥
जगत्युच्छ्रायमानस्य भागाः कार्याः समाः पुरा ।
अष्टाविंशतिरेवाऽथ जाड्यकुंभस्त्रिभागकः ॥८६॥
द्विभागा कर्णिका कार्या त्रिभागे सरपट्टिका ।
पद्मपत्रयुता कार्या द्विभागः खुरको मतः ॥८७॥
सप्तभागो भवेत् कुंभस्त्रिभागः कलशो भवेत् ।
एकभागाऽऽन्तरपत्री कपोतालिस्त्रिभागजा ॥८८॥
चतुर्भागः पुष्पकण्ठः कर्तव्यः सुखदा इमे ।
निर्गमे पुष्पकण्ठो वै चतुर्भागो हि गृह्यते ॥८९॥
जाड्यकुंभोऽपि च तथा चतुर्भागो हि गृह्यते ।
कर्णिकासु पूर्वतो वै समारभ्य प्रदक्षिणम् ॥९०॥
अष्टानां दिक्प्रपालानां स्थाप्याः सुप्रतिमाः शुभाः ।
शिलाः प्रासादधर्त्र्यस्तु दीर्घाः पुष्टा नीरन्ध्रकाः ॥९१॥
स्थाप्या दृढाः सुचूर्णाद्यैरवकाशविवर्जिताः ।
जगतीदाशिकायाश्चोपरि भीटं ततो भवेत् ॥९२॥
गजप्रासादकभीटं चतुरंगुलमुच्छ्रितम् ।
कृत्वा ततश्च पञ्चाशद्गजपर्यन्तमेव तु ॥९३॥
अर्धांगुलं प्रतिगजं भीटमुच्छ्रितमेव च ।
एकद्वित्रीणि भीटानि चोपर्युपरि मानतः ॥९४॥
चतुर्थांशन्यूनमानैः कारणीयानि सर्वथा ।
निकासोऽपि चतुर्थांऽशः स्वस्वोच्छ्रयप्रमाणतः ॥९५॥
भीटस्यांऽशत्रयं कृत्वोपरिभागे परार्धके ।
पुष्पकचिप्पिकाः कार्याः पीठं भीटोपरि न्यसेत् ॥९६॥
प्रासादे त्वेकहस्ते तु पीठं वै द्वादशांगुलम् ।
पञ्चहस्तावधिं पञ्चांगुलं प्रतिगजं ततः ॥९७॥
दशावधिं ततो वृद्धिश्चतुरंगुलमानतः ।
विंशावधिं ततो वृद्धिस्त्र्यंगुला वै मता शुभा ॥९८॥
षट्त्रिंशदवधिं वृद्धिः सार्धैकांगुलमानतः ।
पञ्चाशद्गजपर्यन्तमूनपादः समुच्छ्रयः ॥९९॥
पञ्चमांशाऽधिका श्रेष्ठा पीठवृद्धिः शुभा मता ।
एकविंशतिसंभागाः प्रासादस्योच्छ्रये च ये ॥१००॥
पञ्चादिनवभागान्तः पीठोत्सेधो यथेष्टकः ।
शुभदं सर्वतोभद्रं पद्मं वसुन्धरं तथा ॥१०१॥

सिंहं व्योम गरुडं च हंसं वृषं च पीठकम् ।
नवधा पीठमेव स्यात् पीठं प्रासादधारकम् ॥१०२॥
पीठोच्छ्राये त्रिपंचाशद् भागाः कार्यास्ततः परम् ।
द्वाविंशतिभागास्तु निर्गमेऽर्प्या विधानतः ॥१०३॥
नवभागा जाड्यकुंभे सप्तभागास्तु कर्णके ।
अन्धारीसहिते बोध्याश्चाथापि सप्तभागकाः ॥१०४॥
छज्जिकासहितग्रासपट्टिकाया मतास्तथा ।
हस्तिस्तरो द्वादशांशे वाजिस्तरो दशांशके ॥१०५॥
अष्टभागे नरस्तरः कर्तव्यः शुभदर्शनः ।
अश्वस्तरे मुख्यदेववाहनस्य स्तरोऽपि वा ॥१०६॥
कर्णकाग्रप्रभावाद्वै पञ्चभागात्मनिर्गमः ।
जाड्यकुंभो हि कर्तव्यः सार्धत्रिभागकर्णकः ॥१०७॥
आन्तरालश्चार्धभागश्चतुर्भागा ततः परम् ।
छज्जिकायुग्ग्रासपट्टी कर्तव्या शोभना परा ॥१०८॥
हस्तिस्तरश्चतुर्भागे निर्गमो वाजिनिर्गमात् ।
प्रभागको हि कर्तव्योनरस्तरो द्विभागकः ॥१०९॥
स्तराणामन्तराले च तथोर्ध्वे कर्णिका तथा ।
छज्जिका च प्रकर्तव्या शोभाकरी तु राधिके ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रासादरूपे मन्दिरनिर्माणे खाताद्यारभ्य पीठकर्णीपर्यन्तं मन्दिरांगानां निर्देशप्रमापणादिनामा षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥

श्रीकृष्ण उवाच—

ततो नारायणः प्राह देवायतनकं मुनिम् ।
शृणु त्वं राधिके ! मण्डोवरादिकं यथायथम् ॥ १ ॥
प्रासादस्य कर्णरेखोपरि मण्डोवरः स्मृतः ।
मण्डोवर उदयिनी उभिणीति समार्थकाः ॥ २ ॥
हस्तादिपञ्चहस्तस्य प्रासादस्योदयः खलु ।
प्रासादाऽऽयतता साम्या कर्तव्या शुभदा हि सा ॥ ३ ॥
दशहस्तप्रपर्यन्तं चतुर्दशांऽगुलोच्छ्रयः ।
प्रतिहस्तं प्रकर्तव्यस्ततस्त्रिंशद्गजावधिम् ॥ ४ ॥
द्वादशांगुलको मण्डोवरः कार्यस्ततः परम् ।
पञ्चाशद्गजपर्यन्तं नवांगुलोभिणीं मता ॥ ५ ॥
मण्डोवरस्य भागास्तु कर्तव्याः शिल्पिना यथा ।
चतुश्चत्वारिंशदधिकशतं मण्डवारकः ॥ ६ ॥
पीठस्य मस्तकाच्छज्जामस्तकान्तं च ते मताः ।
खुरकः पञ्चभागेषु विंशतिः कुंभकस्तथा ॥ ७ ॥
अष्टभागेषु कलशोऽन्तरालं सार्धकद्वयम् ।
कपोतिकाऽष्टभागेषु मञ्चिका नवभागिका ॥ ८ ॥
पञ्चत्रिंशद्भागजंघा पञ्चदशसु तूद्गमः ।
अष्टभागा च भरणी शिरावट्टी दशांशिका ॥ ९ ॥
कपोतालिश्चाष्टभागा सार्धद्वयाऽन्तरालकम् ।
छाद्यं त्रयोदशभागं दशभागश्च निर्गमः ॥१०॥
खुरकः पञ्चभागोर्ध्वो द्विभागस्तस्य निर्गमः ।
भागार्धं चान्तरपत्रं कर्णकस्तु द्विभागकः ॥११॥
वापीस्कन्धः सार्धभागो भागैकः कणकोत्तमः ।
कणकाग्रं पट्टिकाभ्यां शोभनीयं सुदर्शनम् ॥१२॥
पट्टिके निर्गमे भागैके च बोध्ये नचाऽधिके ।
कणको निर्गमे सपादैकभागो भवेदिति ॥१३॥
कुंभकस्य महापंक्तावपस्कन्धस्य निर्गमः ।
कर्णकावधिं कर्तव्यस्त्वथ वै कुंभकं शृणु ॥१४॥
विंशतिभागकोत्सेधः कुंभकस्तत्र खण्डशः ।
भागार्धः स्कन्धपट्टो वै चिप्पिका त्वेकभागतः ॥१५॥
स्कन्धपट्टः सुललितो वर्तुलश्चित्रपल्लवः ।
कर्तव्यः शोभनो यत्र दृश्यं वै सुन्दरं भवेत् ॥१६॥
चिप्पिकां कमलैः पत्रैः शोभनीयां विधापयेत् ।
प्राच्यमध्यावसानेषु कुंभे ब्रह्मा हरिर्हरः ॥१७॥
प्रतिमाः रूपतः स्थाप्या दर्शनार्हाः सहेतयः ।
त्रिसन्ध्याभद्रशोभां च चित्राणि विविधानि च ॥१८॥
स्कन्धपट्टे प्रकुर्याद्वै यथादृश्यं मनोहरम् ।
नासिकाः कर्णनाम्न्यस्तु प्रतिरथिकाया दले ॥१९॥
कोणेष्वेव मध्यगर्भे कार्याः सप्रतिमाः शुभाः ।
स्तंभिकासु प्रकर्तव्यं तोरणं पद्मपत्रवत् ॥२०॥
तथा कमलदण्डाद्यैः शोभितं सुस्वरूपवत् ।
विचित्राकाररूपोऽयं कुंभकः श्रेष्ठको मतः ॥२१॥
कुंभोर्ध्वे कलशः कार्यश्चाष्टभागः सुशोभनः ।
षड्भागो मध्यभागोऽस्य कर्तव्यो वै सुशोभितः ॥२२॥
वृत्तरूपः प्रकर्तव्यस्तस्योर्ध्वे चिप्पिका शुभा ।
एकभागे प्रकर्तव्या पट्टबन्धऽपि शोभनः ॥२३॥
रत्नयुक्तः प्रकर्तव्यस्तथा सार्धद्वयांऽशके ।
अन्तरालं प्रकर्तव्यं दिव्यपुष्पादिशोभितम् ॥२४॥
अथाऽष्टभागिका कार्या कपोताली शुभावहा ।
भागार्धो स्कन्धपट्टी च स्कन्धः सपादकद्वयः ॥२५॥
मुखपट्टी पादभागे द्विभागे कर्णपट्टिका ।
स्कन्धस्यनिर्गमः सार्धभागद्वयात्मकः शुभः ॥२६॥

भागार्धः स्कन्धपट्टश्च कर्तव्यो गलतायुतः ।
मुखपट्टी च कर्तव्या तदधोऽग्रे गगारकाः ॥२७॥
सन्मुखौ चतुरंगुलाः सदृशाः शोभना मताः ।
ऊर्ध्वस्कन्धस्तु कर्तव्यो दलगर्भनिकासवान् ॥२८॥
कपोताल्यंगगर्भोर्ध्वे कर्तव्या तु ठगारिका ।
कपोताल्युपरि कार्या मञ्चिका नवभागिका ॥२९॥
सपादभागं चान्तरपत्रकं च ततः परम् ।
कामरूपं च पादोनं पट्टिका पादभागिका ॥३०॥
स्कन्धो द्विभागः पादे च मुखपट्टी ततः परम् ।
सपादः कर्णकस्तद्वत् स्कन्धोऽपि च सपादकः ॥३१॥
सपादान्तरपत्री च सार्धभागः कणस्तथा ।
निर्वाणट्टिका पादे कर्तव्या शोभना शुभा ॥३२॥
कपोताल्याः सूत्रदारे कर्तव्याश्च गगारकाः ।
जंघास्तंभा निर्गमाढ्यास्तदधोवृत्तलुम्बिकाः ॥३३॥
तदूर्ध्वे जंघिकाः कार्याः पञ्चत्रिंशत्सुभागगाः ।
गोलस्तंभीयुता नासाफलनासहिताः शुभाः ॥३४॥
सर्वासु मूलनासासु कार्याः स्तंभीचतुष्किकाः ।
गजैः सिंहैर्गरुडैश्च मकरैर्हंसकैर्युताः ॥३५॥
कर्णेषु त्वष्टदिक्पालाः पूर्वाक्रमात् प्रदक्षिणे ।
नृत्यन् रुद्रः पश्चभागेऽन्धकहन्ता स दक्षिणे ॥३६॥
चण्डनाशकरी दंष्ट्रानना देवी तथोत्तरे ।
प्रतिरथे सूत्रदेवास्तथा दिशाधिपा अपि ॥३७॥
मुनीन्द्रा वारिमार्गेषु कर्तव्यास्तपसि स्थिताः ।
गवाक्षकाश्च भद्रेषु कर्तव्या निर्गमान्विताः ॥३८॥
पञ्चारभणकैः स्तंभैश्छाद्यैश्च तिलकैर्युताः ।
ब्रह्मविष्णुमहादेवैः सुशोभिताः सुदर्शनाः ॥३९॥
गवाक्षस्तम्भिकोर्ध्वेऽर्धगोलतोरणशोभिताः ।
जंघासु दम्पती वापि पत्रयूथानि वा तथा ॥४०॥
मञ्जर्यो वा तथा पर्य्यः कर्तव्याः शोभना यथा ।
भरणी चाष्टभागोच्छ्राऽधरछन्दो गोलरूपवान् ॥४१॥
निर्गमा ग्रासपट्टी च भरणिस्कन्धिकावटी ।
वर्तुला सा न कर्तव्या निर्गमे समसद्दला ॥४२॥
पादोनं कामरूपं च पादा स्यात् स्कन्धपट्टिका ।
चिप्पिका चार्धभागा च सपादं कणकं तथा ॥४३॥
पट्टिका चान्तरालं च पादं पादं स्मृतं सदा ।
द्विभागः स्कन्ध आकार्यो भागार्धं कर्णकोत्पलम् ॥४४॥
पट्टिका चान्तरालं च पादं पादं तथा मतम् ।
भागार्धश्च तथा स्कन्धो वर्त्मे पादोनभागकम् ॥४५॥

अन्तःपत्रं चार्धभागं कर्तव्यं कामनाप्रदम् ।
नासोपांगेषु सर्वेषु कर्तव्याः पल्लवाः शुभाः ॥४६॥
अशोकपल्लवाश्चापि सर्वकामप्रदा हि ते ।
कणकेषु स्कन्धबन्धास्तमालपत्ररूपिणः ॥४७॥
कर्तव्याश्च भरण्यूर्ध्वे गोलभागे प्रलीनिनः ।
शिरावट्टिर्दशभागे कर्तव्या चोच्छ्रया शुभा ॥४८॥
तत्र त्रिभागे कर्तव्या भारपुत्तलिकाः शुभाः ।
पादोनस्तु भवेत् स्कन्धः पादोनः कर्णकस्तथा ॥४९॥
अन्तरा चार्धभागं तदन्तरे पट्टकस्तथा ।
वृत्ता शिरावटी पञ्चभागे कार्या सतन्त्रका ॥५०॥
मौक्तिकाऽलंकृतियुक्ता कर्तव्या हीरकान्विता ।
तदूर्ध्वे च कपोताली पादभागसुकल्पिता ॥५१॥
सार्धद्विभागकं चान्तरालं कर्तव्यमेव तु ।
छाद्यं त्रयोदशभागे कर्तव्यं तत्र वै यथा ॥५२॥
अर्धभागा स्कन्धपट्टी त्रिभागः स्कन्ध एव च ।
अर्धभागा मुखपट्टी चतुर्भागः छज्जोदयः ॥५३॥
एकभागा दण्डिका चान्तरालं चतुरंशकम् ।
सपादभागः कणको द्विभागः स्कन्ध इत्यपि ॥५४॥
पादभागा स्कन्धपट्टी सर्वकामप्रपूरिका ।
कपोतालयाश्छाद्यनिर्गमस्तु दशांशको मतः ॥५५॥
चतुर्भागो ह्यधः स्कन्धः सार्धैको मणिबन्धकः ।
अग्रेचिप्पी त्वर्धभागा सर्वकामप्रदा भवेत् ॥५६॥
कामरूपं त्वेकभागं पादैकास्कन्धपट्टिका ।
चिप्पिका चापि भागार्धा पादैका मुखपट्टिका ॥५७॥
द्विभागः कणकश्चापि भागार्धो दण्डकस्तथा ।
मणिबन्धस्य वै स्थाने त्रिभागे सारिलम्बनम् ॥५८॥
निकारो दशभागश्च प्रवेशस्तु षडंशकः ।
वारिमार्गेन्तु षड्भागः प्रवेशोऽपि षडंशकः ॥५९॥
भागस्य षोडशोंऽशस्तु पाणितारायतात्मकः ।
एवं स्थिते दृढः स्याद्वै प्रासादो दीर्घजीवनः ॥६०॥
कुंभादयः स्थराः सर्वे निर्गमे समसूत्रिणः ।
पीठस्य निर्गमो बाह्ये तथैवाच्छादकस्य च ॥६१॥
कुम्भस्तरप्रमाणं च प्रासादाऽऽयतता तथा ।
बोद्धव्या मूलनासाभिर्यथायोग्या तु शिल्पिना ॥६२॥
त्रिपञ्चसप्तनवक उपांगफालनोद्गमः ।
बहिरेव हि बोद्धव्यः शिल्पिना चारुकर्मणा ॥६३॥
कर्णं प्रतिरथं चैव कर्णिका चैव नन्दिका ।
उपरथं च भद्रं च सुभद्रं चेति निर्गमे ॥६४॥

यथा बहिर्मूलसीम्नो भवेत्तथा भवेदिति ।
सप्तनासाः प्रकर्तव्या भद्रार्धे वै षडंशके ॥६५॥
प्रथमा त्वष्टभागैश्च द्वितीयैका दशांशिका ।
तृतीयाऽप्यष्टभागा च प्रान्ते सार्धचतुष्टया ॥६६॥
भद्रार्धे स्याद्धि षड्भागं पूर्णं तु द्वादशांशकम् ।
वास्तुक्षेत्रं चाष्टकोणं कर्तव्यं देवतालये ॥६७॥
इष्टिकानां स्तरे भित्तिः पादस्थूला मता सदा ।
पाषाणभित्तिका बोध्या षडंशाऽवधिकेति च ॥६८॥
काष्ठप्रासादभित्तिश्च सप्तमांऽशात्मिका मता ।
स्वर्णरूप्यादिभित्तिश्च माणिक्याद्या दशांशिका ॥६९॥
भ्रमणी चापि कर्तव्या प्रासादस्य दशांशतः ।
भ्रमणीमध्यकोणाद्या नेयाश्चोपरि तत्क्रमात् ॥७०॥
पञ्चाशद्गजसौधे च भद्रवद् भ्रमणोर्ध्वना ।
मण्डपोऽपि भ्रमयुक्तः कर्तव्यः स्तंभसंधृतः ॥७१॥
दीपालयं प्रकर्तव्यं प्रासादे दक्षिणेंऽशके ।
प्रासादव्यासभागार्धा कर्तव्या कोलिका तथा ॥७२॥
तदूर्ध्वे शुकनासश्च कर्तव्यो वै सुशोभनः ।
द्वारं पूर्वे पश्चिमे चोत्तरे कार्यं न दक्षिणे ॥७३॥
गजप्रासादके द्वारं षोडशांगुलमुच्छ्रितम् ।
चतुर्गजप्रपर्यन्तं प्रतिहस्तं तु षोडशम् ॥७४॥
अगुलानां वर्धनीयं त्र्यंगुलं चाष्टहस्तके ।
पञ्चाशद्गजपर्यन्ते द्व्यंगुलं प्रतिहस्तकम् ॥७५॥
दैर्घ्याऽर्धेन पृथुत्वं च द्वारस्य शोभनं सदा ।
ऊर्ध्वतायाः षोडशांऽशोऽधिकोऽर्धे निहितो यदि ॥७६॥
श्रेष्ठं द्वारं भवेत् तद्धि सर्वसम्पत्सुखप्रदम् ।
विमानपुष्पजातीनां प्रासादे नागरं शुभम् ॥७७॥
नवशाखं प्रकर्तव्यं द्वारं वै वैष्णवं हि तत् ।
ध्वजायस्तु प्रदातव्यो द्वारं प्रासादसूत्रतः ॥७८॥
तलच्छन्दानुसारेण द्वारशाखा विभाजयेत् ।
नवांगे नवशाखा वै कर्तव्यास्त्र्यंशके शुभाः ॥७९॥
आयदोषविशुद्ध्यर्थं ह्रस्ववृद्ध्यावपि मते ।
मध्यपेटे द्वारपालाः कर्तव्याः सुमनोहराः ॥८०॥
पार्श्वशाखास्वपि सूक्ष्मा वल्लयः शोभिता मताः ।
शाखोच्छ्रयचतुर्थांऽशे द्वारपालौ मतौ शुभौ ॥८१॥
वामे च यमुना दक्षे गंगा तथैव चोभये ।
गान्धर्व्यश्चाथ गन्धर्वाः कर्तव्या वाद्यसंयुताः ॥८२॥
गजाश्च गरुडाश्चापिहंसा अश्वाश्च पार्षदाः ।
देवा वा यत्र योग्याः स्युः कर्तव्या नवशाखके ॥८३॥
शाखायास्तत्र कर्तव्या भागा एकादशाऽऽयताः ।
रूपस्तम्भौ च द्वौ कार्यौ द्विभागौ कोणिकायुतौ ॥८४॥
पादोनद्वयभागेन निर्गमस्तत्र शोभनः ।
प्रथमा पत्रशाखा च गन्धर्वा च द्वितीयका ॥८५॥
रूपस्तंभा तृतीया च खल्वशाखा चतुर्थिका ।
गन्धर्वा पञ्चमी चापि रूपस्तंभश्च षष्ठकः ॥८६॥
सप्तमी रूपशाखा च खल्वशाखा तथाऽष्टमी ।
नवमी सिंहशाखा च यथेष्टशोभनाऽथवा ॥८७॥
शाखापेटकविस्तारः प्रवेशायतपञ्चमः ।
स्थाप्यदेवस्य मूर्तिश्चोत्तरंगे शाखिदेवयुक् ॥८८॥
यद्वा गणेशको देवो देवाः सपरिवारकाः ।
देव्यो ब्रह्मप्रियाश्चापि कर्तव्या उत्तरंगके ॥८९॥
मूलकर्णस्य सूत्रेण कुंभेनोदुम्बरं समम् ।
कर्तव्यं पञ्चरत्नानि निहितव्यान्यधस्तरे ॥९०॥
द्वाराऽऽयत्यतृतीयांऽशे मध्ये मन्दारिको मतः ।
अर्धचन्द्रसमाकारो मृणालपत्रसंयुतः ॥९१॥
मृणालाऽधो जाड्यकुंभः कणाली कणपीठकः ।
मृणालस्य द्वयपार्श्वे कोणिका ग्रासयोर्मुखे ॥९२॥
उदुम्बरस्य पार्श्वे च शाखारूपतिलानि च ।
उदुम्बरोच्छ्रयः कार्यः कुंभात् पादोनकः शुभः ॥९३॥
खुरकेण समो बोध्योऽर्धचन्द्रस्योच्छ्रयः सदा ।
यथा द्वाराऽऽयतलम्बो निर्गमे तु तदर्धकः ॥९४॥
भागद्वयाऽर्धचन्द्रे चाऽर्धार्धभागे गगारकौ ।
पार्श्वद्वये प्रकर्तव्यौ शोभनौ च सुरूपिणौ ॥९५॥
चन्द्रगगारयोर्मध्ये शंखः चम्पकवल्लियुक् ।
चन्द्रेऽपि कमलं कार्यं शोभितं स्मृद्धिदं हि तत् ॥९६॥
इत्येवं राधिके ! सर्वमान्तरागं तवोदितम् ।
देवायतनकं प्राह यच्छ्रीकृष्णनरायणः ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रासादरूपे मण्डोवरकुंभीछज्जुनासामण्डपद्वारोदुम्बरादिनिरूपणनामा सप्तत्रिंशदधिकशततमोऽध्यायः ॥ १३७ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके !ऽनादिश्रीहरिः पुरुषोत्तमः ।
देवायतनकं भक्त्तं ततो यदाह वच्मि ते ॥ १ ॥
प्रासादस्य प्रमाणेन कर्तव्यो मण्डपः शुभः ।
प्रासादमूलकर्णास्यसूत्रेण कोलिकी यथा ॥ २ ॥

चतुष्की मण्डपश्चाऽपि कर्तव्याः शिखरं तथा ।
गूढो वाऽनावृत्तश्चैकद्वारो वाऽथ त्रिद्वारकः ॥ ३ ॥
प्रासादाग्रे सुकर्तव्यो मण्डपो देवतागृहे ।
मण्डपस्योत्तरे दक्षे पूर्वे रूपचतुष्किकाः ॥ ४ ॥
नृत्यमण्डपः कर्तव्यः कर्तव्यश्च बलाणकाः ।
सार्धैकायतभागो वै प्रासादाच्छोभनो मतः ॥ ५ ॥
चतुष्किकायुतः कार्यो द्विगुणः सुमहानिति ।
मण्डपोपरि घूम्मटश्चायतदीर्घप्रमाणवान् ॥ ६ ॥
उच्छ्रायाढ्यश्चार्धगोलाकारः कर्तव्य एव तु ।
अष्टांशो मण्डपः श्रेष्ठो भित्तिभिश्चापि वर्तितः ॥ ७ ॥
सोपानतोरणाढ्यश्च मकरास्यजलस्रवाः ।
गवाक्षा जालकयुक्ता यद्वा निर्जालका मताः ॥ ८ ॥
मूलप्रासादके जंघामेखलापीठकादयः ।
यथा स्युर्वै तथा कार्या मण्डपे चैकसूत्रगाः ॥ ९ ॥
दलेनार्धेन पादेन दलानां निर्गमा मताः ।
मण्डपे नवभागं च कृत्वा भागचतुष्टयम् ॥१०॥
मध्यशालात्मकं ग्राह्यं पदं कर्तव्यमेव च ।
रंगभूमिर्विचित्रा च सशोभा वै पदात्मिका ॥११॥
चतुष्षष्टिस्तंभयुक्तो मण्डपो मे प्रियः सदा ।
एकविंशतिसोपानाः कर्तव्या मण्डपाग्रतः ॥१२॥
हस्त्यश्वगारुडरूपैः शोभाढ्या मणिभिस्तथा ।
पार्श्वे चतुष्किकाः कार्याः शोभना योग्यविस्तराः ॥१३॥
नव चतुष्किकाः कार्याः शोभना अपि सर्वतः ।
बहुवितानशोभाढ्याश्चित्रशोभान्विताः शुभाः ॥१४॥
आक्षरब्रह्मनामा वै मण्डपो मम सुप्रियः ।
युग्मस्तंभः प्रकर्तव्यो न त्वेकीसंख्यया क्वचित् ॥१५॥
कादम्बः कमलाकारः सूर्यमुखाकृतोऽपि च ।
चान्द्रो वा मण्डपो बोध्यश्चेन्द्रधनुःसमोऽपि च ॥१६॥
जगतीमण्डपौ भद्रमानेन निर्गमे मतौ ।
प्रतोल्या जगती चापि भद्रवन्निर्गमे मता ॥१७॥
अग्रे कार्याः प्रतिहारा मुख्यमूर्तेस्तु पार्श्वयोः ।
नरपीठस्य चोर्ध्वात्तु यावद्भरणीमस्तकम् ॥१८॥
पदानि दशसार्धानि कर्तव्यानि ततः परम् ।
एकभागं राजसेनं द्विभागा वेदिका मता ॥१९॥
अर्धभागाऽऽसन्नपटः स्तंभो भागचतुष्टयः ।
अर्धभागं भरणं च चरुस्त्वेकांशकस्तथा ॥२०॥
सार्धैकभागः पाटश्च छाद्यकं तु ततः परम् ।
कम्मानिकास्तथा कार्यास्तोरणादिसुरूपिकाः ॥२१॥

रंगमण्डपपूर्वे च कार्या नृत्यस्य मण्डपाः ।
कथाया मण्डपाः कार्या होमस्य मण्डपास्तथा ॥२२॥
उद्यापनस्य च कार्या मण्डपा रासमण्डपाः ।
वास्तुवेधो न वै कार्यः स्तंभवेधोऽपि नैव च ॥२३॥
स्तंभस्थौल्यं दशांशाद्वै चतुर्दशांऽशकाऽवधिम् ।
प्रासादस्थौल्यसापेक्षं पाषाणदृढतानुगम् ॥२४॥
प्रासादे त्वेकहस्ते तु स्तम्भः स्याच्चतुरंगुलः ।
द्विहस्ते चांगुलाः सप्त त्रिहस्ते नव चांगुलाः ॥२५॥
ततो द्वादशहस्ते च प्रतिहस्तं द्वयाऽङ्गुलौ ।
सपादाऽङ्गुलवृद्धिश्च यावत्षोडशहस्तके ॥२६॥
अंगुलिकाभिवृद्धिश्च चत्वारिंशत्करावधिम् ।
पञ्चाशत्करपर्यन्तं पादोनांगुलिकाऽधिका ॥२७॥
स्वस्तिका मस्तके भद्रयुताऽष्टास्राश्च स्तम्भकाः ।
मूर्तिपत्रसुवल्ल्याढ्या भद्रयुक्कंभिकास्तथा ॥२८॥
भरणे वल्लिकायुक्ताश्चरवः किन्नरान्विताः ।
मम वै मन्दिरं सप्तशिखरं कार्यमुत्तमम् ॥२९॥
तदग्रे कोलिका बोध्या तदग्रे गूढमण्डपः ।
ततो नृत्यमण्डपश्च ततः सभाख्यमण्डपः ॥३०॥
ततो वै रूपचोकी च ततः सोपानकानि च ।
षट्पञ्चाशद्दक्षभागे षट्पंचाशच्च वामके ॥३१॥
मन्दिराणि च कार्याणि पत्नीनां मम सर्वतः ।
मध्यमन्दिरके चाऽहं पार्श्वेषु षट् प्रपत्निकाः ॥३२॥
मण्डपेषु घूम्मटेषु भूमिकाः सप्त सप्त च ।
रासतोरणवेद्यादियुताः कार्याः सुशोभनाः ॥३३॥
पश्चिमे रथशाला च दक्षिणे मठशालिकाः ।
उत्तरे सूदशाला च पूर्वे चायुधशालिका ॥३४॥
वायौ कोष्ठागारकं चाग्निकोणे तु महानसः ।
ईशाने पुष्पशाला च नैर्ऋत्ये पात्रशालिका ॥३५॥
पश्चिमे जलशाला च ह्युपरि वाचनालयः ।
कर्तव्या अपि सापेक्षा आलया मन्दिराऽभितः ॥३६॥
द्वारोच्छ्रायस्य त्रिभागे भागद्वयं तु जालकम् ।
गवाक्षाश्च तथा कार्या ह्रस्वा वा समस्तकाः ॥३७॥
मण्डपोपरि चाष्टास्रं तदूर्ध्वे षोडशास्रकम् ।
तदूर्ध्वे घूम्मटो गोलश्चायताऽऽर्धोर्ध्वमानतः ॥३८॥
उच्छ्रये षष्ठिभागान् वै कृत्वा तत्रादिमेषु वै ।
कर्णदर्दरिकाः सप्तभागे समोच्छ्रनिर्गमाः ॥३९॥
चतुर्भागे रूपकण्ठो द्व्यंशे निर्गमवान्मतः ।
विद्याध्राः षोडश कार्याश्चतुर्विंशतिहस्तिनः ॥४०॥

विद्याधरपृथुत्वेन सप्तांशे निर्गमो मतः ।
तदूर्ध्वे चित्ररूपाश्च नर्तिका रासनर्तनाः ॥४१॥
आद्यास्ते सार्धपड्भागा द्वितीयाः षड्विभागिकाः ।
पञ्चभागास्ततः कोलाः सार्धचतुर्गवालकम् ॥४२॥
मध्यगोलवितानं तु कथाचमत्कृतिप्रभैः ।
संगीतगीतनृत्यादिपुत्तलैरेव शोभितम् ॥४३॥
जीवलोकेश्वरलोकब्रह्मलोकादिचित्रकैः ।
शोभिता रत्नगर्भाश्च सूर्यवर्णा वितानकाः ॥४४॥
सांभरणं प्रकर्तव्यं प्रथमं भागषट्कके ।
द्वितीयाद्यानि तान्येव चतुर्भागविवृद्धितः ॥४५॥
कर्तव्यानि पञ्चविंशतिसाभरणानि क्रमात् ।
प्रथमे पञ्चघण्टाश्च कर्तव्यास्त्वतिशोभनाः ॥४६॥
द्वितीयादौ चतुर्वृद्ध्या कारणीयास्तदुत्तरे ।
वामे दक्षे तु भद्रार्धे रक्षार्थे नवघण्टकम् ॥४७॥
रथिकाऽऽयतताऽर्धे च भागे तु रथिकोपरि ।
घण्टाः कूटाः प्रकर्तव्यास्ततो वै कलशो भवेत् ॥४८॥
प्रथमा घण्टिका कार्या पञ्चकलशशोभना ।
एवं त्वेकीसंख्ययाऽपि चाग्रे कार्याः सुघण्टिकाः ॥४९॥
एकद्वित्रिचतुःपञ्चषट्कसप्तपदान्तरे ।
प्रासाददेवतायाश्च वाहनस्य चतुष्किका ॥५०॥
कर्तव्या वाहनस्थानरूपा सुशोभना शुभा ।
देवमूर्तेर्नवभागा आपादशिखमेव तु ॥५१॥
कर्तव्याः पञ्चषट्सप्तभागान्तो वाहनोच्छ्रयः ।
यद्वा वाहननेत्रे च गुह्यनाभिस्तनोच्छ्रये ॥५२॥
समरेखे भवेतां च तथोच्छ्रयं तु वाहनम् ।
यद्वा पादकटिजानुसमरेखं तु वाहनम् ॥५३॥
शिवलिंगस्य वाहस्तु जलाधारीसमुच्छ्रयः ।
सूर्यवाहः स्कन्धरेखासमो देवस्य वै मतः ॥५४॥
मुख्यप्रासादपरितः प्रासादा गर्भसंख्यया ।
गर्भे धृत्वा ततः कार्या नाभिवेधं न कारयेत् ॥५५॥
ब्रह्मविष्णुशिवसौधः पूर्वपश्चिमकाऽऽननः ।
नगराभिमुखा देवाः शुभाः क्षेमकराः सदा ॥५६॥
पराङ्मुखाः पुरं घ्नन्ति सर्वास्यास्त्रिसुराः शुभाः ।
गणेशो भैरवश्चण्डी नकुलीशो नवग्रहाः ॥५७॥
मातरश्च कुबेरश्च दक्षिणाभिमुखाः शुभाः ।
नैर्ऋत्यदक्षिणमुखो हनुमान् नान्यदेवता ॥५८॥
प्रासादगर्भतृतीयभागेन प्रतिमोत्तमा ।
दशभागेन हीना या मध्यमा सा प्रकीर्तिता ॥५९॥
पञ्चभागेन हीना या कनिष्ठा स्वस्तिकासना ।
द्वारोच्छ्रायनवभागे भागोर्ध्वैकं विहाय च ॥६०॥
शिष्टाष्टभागके चतुर्भागोच्छ्राया शुभा मता ।
चतुर्भागावषं तु सिंहासनं मतं तथा ॥६१॥
यद्वा द्वारोच्छ्रयस्यैव द्वात्रिंशद्भागकेषु तु ।
ऊर्ध्वं चतुष्टयं त्यक्त्वाऽष्टाविंशतिप्रभागके ॥६२॥
सिंहासनं च प्रतिमा चतुर्दशे चतुर्दशे ।
सिंहासनं त्रयोदशे मूर्तिः पञ्चदशे स्मृता ॥६३॥
सिंहासनं पञ्चदशे मूर्तिस्त्रयोदशे स्मृता ।
सिंहासनं द्वादशे चेत् प्रतिमा षोडशांऽशके ॥६४॥
प्रासादे एकहस्ते तु मूर्तिरेकादशांगुला ।
दशांगुला वर्धनीय यावद्धस्तचतुष्टयम् ॥६५॥
द्व्यंगुला वर्धनीया च यावद्वै दशहस्तकम् ।
अर्धांगुलं वर्धनीया पञ्चाशदंगुलावधिम् ॥६६॥
मध्या दशांशहीना स्यात् कनिष्ठा तद्दशांशहा ।
सुप्ता मूर्तिर्गर्भगेहे सप्तभागेषु पञ्चगा ॥६७॥
द्वौ भागौ वर्जनीयौ च शयनस्था सुखप्रदा ।
प्रासादगर्भखण्डौ द्वौ द्वारखण्डं विहाय च ॥६८॥
शेषखण्डे पचभागाः कर्तव्या आसनार्थकाः ।
भित्तिलग्ने प्रथमे तु भागे यक्षादिकासनम् ॥६९॥
द्वितीये तु विभागे स्युः सर्वदेवासनानि वै ।
तृतीये तु विभागे वै ब्रह्मविष्णुहरासनम् ॥७०॥
पञ्चमांशे यवमात्रमीशान्यां तु शिवासनम् ।
प्रासादानां तु सर्वेषां विभागो गर्भतो मतः ॥७१॥
गर्भस्य मध्यभागाद्धि क्रमाद् देवासनानि वै ।
चतुरस्राण्यायतान्यायतवृत्तानि वै तथा ॥७२॥
यथायोग्यानि कुर्याच्च वृत्तान्यष्टास्रकाण्यपि ।
भित्तिगानि मण्डलानि त्वष्टाविंशतिरेव वा ॥७३॥
मध्ये शिवो द्वितीये तु मण्डले विश्वसृड् भवेत् ।
नकुलीशस्तृतीये सावित्री चतुर्थके मता ॥७४॥
रुद्रमूर्तिः पञ्चमे च षष्ठे स्वामी तु कार्तिकः ।
ब्रह्मा तु सप्तमे वासुदेवोऽष्टमे तु मण्डले ॥७५॥
जनार्दनस्तु नवमे दशमे विश्वदेवताः ।
अग्निरेकादशे चापि द्वादशे भास्करस्तथा ॥७६॥
दुर्गा त्रयोदशे चतुर्दशे विघ्नेश आदृतः ।
नवग्रहाः पञ्चदशे षोडशे मातृदेवताः ॥७७॥
सप्तदशे गणाश्चापि भैरवोऽष्टादशे मतः ।
क्षेत्रपाला नवदशे यक्षराजस्तु विंशके ॥७८॥

हनुमानेकविंशे च भृगो द्वाविंशके तथा ।
त्रयोविंशेऽपरदेवाश्चतुर्विंशे तु दैत्यकः ॥७९॥
पञ्चविंशे राक्षसश्च षड्विंशे तु पिशाचकः ।
सप्तविंशे भूतवर्गोऽष्टाविंशे रिक्तमेव च ॥८०॥
तत्तत्पत्नीभृत्यदासीकुटुम्बभक्तसेविताः ।
यथायोग्यं स्थापनीया देवा स्वस्वालये सदा ॥८१॥
गजासनं च वा सिंहासनं हंसासनं तथा ।
विमानं मुक्तधार्यं वा सछत्रं चोत्तमोत्तमाम् ॥८२॥
शैवलिंगं यादृशं तु तादृशं योनिकासनम् ।
योनिस्त्वष्टादशभागा कर्तव्योच्छ्रयमानतः ॥८३॥
कणः स्यात् सार्धभागेन पट्टिका चार्धभागिका ।
द्वितीया पट्टिका तुल्या स्कन्धस्त्रिभागकः स्मृतः ॥८४॥
अर्धभागा पट्टिकान्या चान्तरपत्रं तु सार्धके ।
अर्धभागा पट्टिकान्या द्विभागः कर्णकस्तथा ॥८५॥
अर्धभागा पट्टिकान्या सार्धभागं तु पत्रकम् ।
अर्धभागा पट्टिकान्या त्रिभागः स्कन्ध एव च ॥८६॥
पट्टिकाद्वयमेवापि त्वर्धद्वयप्रभागके ।
सार्धभागः कर्णकश्च ततो लिंगस्य दर्शनम् ॥८७॥
यद्द्रव्यं तु भवेल्लिंगं तद्द्रव्या योनिका मता ।
चतुरस्रा वर्तुला समेखला बहुकोणिका ॥८८॥
लिंगस्थौल्यं मापनीयं सूत्रेण परिधिर्हि सः ।
सूत्रायतायतं कार्यं पीठं वै विस्तृतं तु तत् ॥८९॥
सूत्रं भागत्रयं कार्यं द्विभागे योनिका मता ।
भागैके शिवलिंगं चोच्छ्रये बोध्यं सदा बुधैः ॥९०॥
लिंगात् प्रणालं सूत्रेण प्रमीतं निर्गमे मतम् ।
सूत्रदीर्घं द्वयमेव योनिलिंगं तु नाधिकम् ॥९१॥
अपूर्णअपूर्णशिरसोर्ध्वार्द्धे लिंगप्रवेश इष्यते ।
कोष्ठलाद्वा प्रपूर्णार्द्धे लिंगप्रवेश ऊर्ध्वतः ॥९२॥
प्रणालं चोत्तरे वामे गुप्तं चण्डमुखे पतेत् ।
बहुदेवेषु प्रणालं जगत्यां वै चतुर्दिशि ॥९३॥
षड्भागा द्वारशाखायाः कार्या वै पञ्चमे शुभे ।
लक्ष्मीनारायणादीनां दृष्टिः कार्या शुभा सदा ॥९४॥
तृतीयांशे शिवमूर्तेः श्रीशेषशायिनोऽपि च ।
अष्टभागां द्वारशाखां विभज्यैकं तथाऽष्टकैः ॥९५॥
चतुःषष्टिर्भवत्येवं भागानां तत्र सर्वथा ।
एकीभागे देवदृष्टिर्न तु युग्मे विनिर्णयः ॥९६॥
एकी द्वात्रिंशदंशेषु देवदृष्टिर्विधीयते ।
युग्मांशा देवदृष्ट्यर्थे निषिद्धा एव हानिदाः ॥९७॥
दृष्टिदोषविपाकेन स्थाननाशो धनक्षयः ।
दृष्टिदोषहृतं यद्यन्न पुनश्च प्ररोहति ॥९८॥
ऊर्ध्वदृष्ट्या द्रव्यनाशो भोगहानिरधःस्थया ।
समदृष्टिः सुखदाऽस्ति सर्वकाले यथायथम् ॥९९॥
चतुःषष्टिप्रभागेषु प्रथमे त्वादितत्त्वकम् ।
सृष्टिस्तृतीये तत्त्वं च पञ्चमेष्टिस्तु सप्तमे ॥१००॥
आयुस्तु नवमे चैकादशे लक्ष्मं मतं तथा ।
विज्ञं त्रयोदशे पञ्चदशे प्राज्ञं मतं तथा ॥१०१॥
शान्तितत्त्वं सप्तदशेऽव्यक्तं नवदशे तथा ।
व्यक्ताऽव्यक्तं त्वेकविंशे त्रयोविंशे तु व्यक्तकम् ॥१०२॥
पञ्चविंशे शेषनागः सप्तविंशे शयी हरिः ।
नवविंशे तु गरुडस्त्वेकत्रिंशे तु मातरः ॥१०३॥
त्रयस्त्रिंशे कुबेरश्च पञ्चत्रिंशे वराहकः ।
सप्तत्रिंशे ह्युमारुद्रौ नवत्रिंशे तु बुद्धकः ॥१०४॥
एकचत्वारिंशकेऽजस्त्रिचत्वारिंशके ततः ।
दुर्वासा नारदोऽगस्त्यस्त्रयस्तेऽन्ये महर्षयः ॥१०५॥
पञ्चचत्वारिंशके श्रीलक्ष्मीनारायणादयः ।
सप्तचत्वारिंशके च धाता ततोऽथ देवता ॥१०६॥
नवचत्वारिंशके च शारदा च गणेशकः ।
एकपञ्चाशदंके च ब्रह्मा पद्मासने स्थितः ॥१०७॥
त्रिपंचाशत्तमे सिद्धिर्हरसिद्धिस्तथाऽपराः ।
पञ्चपञ्चाशत्तमेऽजो विष्णुः सूर्यो विरागिणः ॥१०८॥
सप्तपञ्चाशत्तमे तु शुक्राचार्यः परे यथा ।
नवपञ्चाशत्तमे चण्डिका चान्याश्च देविकाः ॥१०९॥
एकषष्टितमे देवा भैरवाद्याः प्रकीर्तिताः ।
त्रिषष्ट्यां वेतालकाद्यास्तत्परं शून्यमेव तु ॥११०॥
अर्चायाः पादयोः कट्यां वा दृष्टिर्वाहनस्य तु ।
एवं स्थानप्रतिष्ठानात् पुरुषार्थचतुष्टयम् ॥१११॥
वैपरीत्ये विपरीतं फलं वै राधिके ! भवेत् ।
क्षयकृत् श्रीहरिः प्राह देवायतनकं मुनिम् ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रासाद-रूपेमण्डपघूम्मटसिंहासनतद्देवादितत्तदंशप्रमापणादिनिरू-पणनामाऽष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥

श्रीकृष्ण उवाच—

श्रूयतां च त्वया राधे ! हरिणा दैवताय तु ।
कथितं शिखराद्यं तत् कथयामि समासतः ॥ १ ॥

अथ प्रासादशिखरां सभेदं चित्रबन्धनम् ।
कथयामि समासेन बहुजातीयकं शुभम् ॥ २ ॥
बहुश्रृंगं बहुघूम्मटकं बहुप्रफालणम् ।
बहुभद्रगवाक्षं च बहुरूपं हि नैष्ठिकम् ॥ ३ ॥
बहुवेदीबहुपीठं बहुवल्लीप्रपत्रकम् ।
बहुरेखं बहुचित्रं बह्वंगं गृहधर्मि तत् ॥ ४ ॥
सातभौमं शतभौमं शिखरं बहुपुत्रलम् ।
चन्द्रशालान्तकं बहुकलशं वानप्रस्थकम् ॥ ५ ॥
एकश्रृंगं तु सन्न्यस्तमश्रृंगं साधुजातिकम् ।
लम्बगोलं तथा गोलं श्रृंगं यथेष्टकं भवेत् ॥ ६ ॥
आयतत्वे चतुर्भागं दैर्घ्ये तु पञ्चभागकम् ।
ऊर्ध्वे त्रिकलशं सिंहयुक्तं तु लम्बगोलकम् ॥ ७ ॥
लम्बगोले दक्षवामभागौ सार्धैकविस्तरौ ।
फालनानिर्गमश्चाष्टभद्रकं लम्बगोलकम् ॥ ८ ॥
एकाण्डं गोलशिखरं कर्णे श्रेण्यण्डकानि च ।
चतुर्भागं समारभ्य द्वादशोत्तरकं शतम् ॥ ९ ॥
तलानां दर्शनं कृत्वा भवन्ति शिखराणि वै ।
एकस्यापि तलस्योर्ध्वे बहूनि शिखराणि हि ॥१०॥
छाद्यस्योर्ध्वे प्रहारः स्याच्छृङ्गे श्रृंगं तदुत्तरम् ।
एकद्वित्रिशिखराणि रेखयैव भवन्ति वै ॥११॥
गर्भान्तरे श्रृंगभित्तिरेखा नैव तु शस्यते ।
विपुला विस्तृता बाह्ये सर्वसौख्यप्रदा तु सा ॥१२॥
श्रृंगरेखोर्ध्वता रेखाऽऽयततापेक्षया किल ।
सपादा सार्धका वा च ग्राह्या न न्यूनिका क्वचित् ॥१३॥
श्रृंगस्कन्धोर्ध्वके घण्टा कर्तव्या फलदा शुभा ।
पहारांशं पुनर्दद्यात् पुनः श्रृंगाणि तत्र च ॥१४॥
श्रृंगाऽधो वाद्ययुक्ता वै प्रतिमाः शोभना मताः ।
श्रृंगपार्श्वे च श्रृंगोर्ध्वे श्रृंगिकाः शोभनास्तथा ॥१५॥
उरुश्रृंगाणि कार्याणि नव वा समरेखया ।
आद्योरुश्रृंगतलतः परोरुस्कन्धकावधिम् ॥१६॥
भागास्त्रयोदश कार्याः सप्तभागाद्यश्रृंगकम् ।
कृत्वा द्वितीयकमुरुश्रृंगं प्रमर्दयेत् ततः ॥१७॥
एवं वै नव कार्याणि मुख्यमूलानि चोर्ध्वतः ।
रेखामूले दशभागान् कृत्वोर्ध्वे तु षडंशकः ॥१८॥
स्कन्धो रम्यः प्रकर्तव्यो नाऽधिकांशः सदोषकः ।
पञ्चभागान्न वा न्यूनः सुदृश्यो यो न जायते ॥१९॥
मूलस्कन्धे ध्वजदण्डश्चाविशेत् स्वामिनाशकृत् ।
प्रतिगर्जं चांगुलेन ध्वजदण्डासनं बहिः ॥२०॥
आद्यश्रृंगे गवाक्षं च द्वितीये माढमेव च ।
तृतीयमस्तकं यावत् सिंहस्थानं मतं शुभम् ॥२१॥
चतुर्थमस्तकं यावत् शुकसिंहः समुच्यते ।
यद्वा वै नवपर्यन्तं तथाऽन्यादिव्यमूर्तयः ॥२२॥
गवाक्षेषु देवताश्च ह्यग्रे शुको हरिस्त्रये ।
भद्रे स्थाप्यस्तेन सर्वे सौख्यं स्यात् शिखरोद्भवम् ॥२३॥
छाद्याद्वै स्कन्धपर्यन्तं भागा वै चैकविंशतिः ।
नवत्रयोदशमध्ये सिंहा वै शुकनासकाः ॥२४॥
पञ्चधा तत्र कर्तव्याः शुकनासाः शुभा मताः ।
कोल्यामेकान्नव यावत् सिंहा दैर्घ्यस्य सूत्रतः ॥२५॥
मण्डपे स्तम्भकान् कुर्यान्मध्यगर्भानुसारतः ।
शुकनाससमा घण्टा कर्तव्या निम्निकाऽथवा ॥२६॥
श्रृंगोरुश्रृंगप्रत्यंगैरण्डान् दद्याद्धि तावतः ।
कर्णेषु नवकोणेषु तिलकं सौधभूषणम् ॥२७॥
अंगानां संख्यया वार्यन्तराः कार्याः शुभावहाः ।
यद्वा मूलशिलाऽऽरम्भात् कलशान्तं समुच्छ्रये ॥२८॥
भागास्तु विंशतिः कार्या अष्टभागे हि चोत्तमम् ।
मण्डोवरं द्विसार्धाऽष्टे मध्यं नवे कनिष्ठकम् ॥२९॥
मण्डोवरादुपर्येव शिखरोदय उच्यते ।
प्रासादे दशभागेषु द्वित्रचतुर्थके तथा ॥३०॥
पादे चार्धे त्रिभागे वा श्रृंगोदयो मतः सदा ।
दशांशान् शिखरे मूले कृत्वा दशांशकाँस्ततः ॥३१॥
द्वौ द्वौ भागौ द्विकर्णौ च सार्धौ सार्धौ पढारकौ ।
त्रिभागं भद्रकं कार्यं बन्धनामस्तके त्वपि ॥३२॥
नवांशाश्च प्रकर्तव्या द्वौ द्वौ भागौ द्विकर्णकौ ।
सार्धौ सार्धौ तु पढरौ द्विभागं भद्रकं ततः ॥३३॥
कर्णात् सपादं शिखरं सार्धैकं शिखरं च वा ।
सपादकर्णयोर्मध्ये रेखाः स्युः पञ्चविंशतिः ॥३४॥
उदये कर्णयोर्मध्ये रेखाश्च पञ्चविंशतिः ।
अष्टादितोऽष्टषष्ट्यन्तं रेखा भवन्ति षोडश ॥३५॥
ऊर्ध्वे पञ्चाऽऽयतत्वे च पञ्चेति पञ्चविंशतिः ।
अंशवृद्धिः कला कार्या तेन भेदास्तथाविधाः ॥३६॥
अष्टादितोऽष्टषष्ट्यन्तं चतुर्वृद्ध्या तु षोडश ।
अष्टद्वादशषोडशविंशा ऊर्ध्वे तथाऽऽयते ॥३७॥
यद्वाऽष्टादश चार्ध्वे चायते षोडश एव च ।
एवं रेखाः षट्पञ्चाशद् द्वे शते च भवन्ति वै ॥३८॥
त्रिखण्डेभ्यः खण्डवृद्धिर्यावदष्टादशैव तु ।
एकैकस्य कला अष्टौ समाचार्यास्तेन षोडश ॥३९॥

चतुर्विंशतिः प्रथमा द्वितीया सप्तविंशतिः ।
त्रिंशद्भागा तृतीया च तत्र तत्रापि षोडश ॥४०॥
सूत्रं चतुर्गुणं धृत्वा रेखातः पद्मकोशवत् ।
शिखराऽऽयतता गोला कार्योच्छ्रयः सपादकः ॥४१॥
पञ्च भागाश्च षट् सप्ताष्टौ द्वादशाऽथ षोडश ।
अथ ध्वजपुरुषं वै कथयामि तु राधिके ! ॥४२॥
शृंगरेखां समारभ्य यावद्वन्धनिकोच्छ्रये ।
षड्भागान् संविधायैव षष्ठे भागचतुष्टयम् ॥४३॥
ऊर्ध्वभागं विहायैव शेषभागत्रयांशकः ।
ध्वजाधारः प्रकर्तव्यः प्रतिरथे तु दक्षिणे ॥४४॥
यद्वा रेखां समारभ्य शृंगस्कन्धान्तकेंऽशकौ ।
द्वौ कृत्वोर्ध्वेंऽशके भागत्रयं कृत्वा तदर्धकः ॥४५॥
वंशाधारः प्रकर्तव्यस्तद्वामे तु करे ध्वजः ।
प्रदातव्यो ध्वजस्तंभः प्रदातव्यस्तु दक्षिणे ॥४६॥
प्रासादपृष्ठदेशे तु दक्षिणे वै पढारके ।
ध्वजाधारः प्रकर्तव्यः पूर्वाननस्य नैर्ऋते ॥४७॥
ईशाने पश्चिममुखप्रासादस्य ध्वजाधरः ।
प्रासादस्य स्कन्धदेशे मध्ये पढरयोर्द्वयोः ॥४८॥
पढरावत् प्रकार्यो वर्तुलश्चामलसारकः ।
उत्सेधो विस्तराऽर्धेन कर्तव्यस्तस्य शोभनः ॥४९॥
तदुच्छ्रयस्य वै भागाश्चत्वारस्तत्र चोपरि ।
ग्रीवा पादोनिका तस्याऽमलसारः सपादकः ॥५०॥
एकभागा चन्द्रिका च झांझरी चैकभागिका ।
कलशस्य ततो मानं कथयामि समासतः ॥५१॥
पद्मकोशे सप्तभागाः ग्रीवास्तस्यैकभागिका ।
सार्धैकोच्छ्रायवान् आमलसारः संप्रकीर्तितः ॥५२॥
पादोनं पद्मपत्रं च पादोना झांझरी ततः ।
त्रिभागोच्छ्रयकलशो द्विभागायतवान् शुभः ॥५३॥
प्रासादकर्णाऽऽयत्यायाः कलशश्चाऽष्टमांशकः ।
षोडशांऽशो वर्धितः स श्रेष्ठो व्यासे घटो मतः ॥५४॥
द्वात्रिंशद्भागतो वर्धितः स वै मध्यमो मतः ।
यद्वा मूलस्य रेखाया व्यासस्य पञ्चमांशिका ॥५५॥
आयतता कलशस्य कर्तव्या शोभना मता ।
यद्वा चाऽमलसारस्याऽऽयततायाश्चतुर्थके ॥५६॥
अंशे चायतता या सा कलशस्य प्रकीर्तिता ।
चतुर्थांशो वर्धनीयः सार्धश्चोच्छ्रयवाँस्ततः ॥५७॥
उच्छ्रयो नवभागश्च स्थौल्ये षडंशकस्तथा ।
प्रमाणसूत्रमानेन कलशः सर्वकामदः ॥५८॥

ग्रीवापीठौ त्वेकभागे त्रिभागे त्वण्डकं तथा ।
कर्णिके चैकैकभागे डोडलश्च त्रिभागकः ॥५९॥
डोडलाग्रं चैकभागं मूलस्थौल्यं द्विभागकम् ।
कर्णिका च त्रिभागाऽथ छज्जी भागचतुष्टयम् ॥६०॥
ग्रीवा द्विभागिकाऽर्धपीठकं द्विभागकं तथा ।
पूर्णे पीठं चतुर्भागं चाण्डं षड्भागकायतम् ॥६१॥
श्रेष्ठस्तु सर्वश्रेष्ठानां सौवर्णकलशो ध्वजः ।
प्रासादस्याऽमलसारो जीवस्थानं प्रकीर्तितम् ॥६२॥
प्रासादपुरुषस्तत्र देवायतनको मतः ।
स्थापनीयः स पुरुषश्चाध्यात्मा चेतनान्वितः ॥६३॥
प्रासादे चैकहस्ते तु पुरुषोऽर्धांगुलात्मकः ।
पञ्चाशद्गजपर्यन्ते प्रत्येकमर्धं वर्धयेत् ॥६४॥
तस्य वै शयनं रौप्यं कमलं दक्षिणे करे ।
वामे ध्वजस्त्रिपताको वक्षसि धारितो यथा ॥६५॥
ध्वजापताकाभागस्तु यथा स्कन्धोपरि स्थितः ।
आमलसारके ताम्रं स्वर्णं वा घृतपात्रकम् ॥६६॥
स्थापनीयं तथा स्वर्णप्रासादपुरुषोऽपि च ।
रौप्यपर्यंकशायी च स्थापनीयः शुभो मतः ॥६७॥
पर्यंकस्य चतुष्पादे कुंभाश्चत्वार एव तु ।
सहेमरत्नसंयुक्तास्तन्निधिचिह्नशोभिताः ॥६८॥
शंखः पद्मो महापद्मो मकरश्चेति नामिनः ।
ध्वजदण्डप्रमाणं च कथयामि निशामय ॥६९॥
प्रासादः कर्णके यावदायतस्तावदेव सः ।
लम्ब एव ध्वजादण्डः कर्तव्यो ज्येष्ठमानतः ॥७०॥
मध्यो दशांशहीनश्च पञ्चमांशः कनिष्ठकः ।
यद्वा जगतीशिरसो घटोर्ध्वे यावदेव च ॥७१॥
उच्छ्रयस्य त्रयो भागास्तत्रैकदीर्घदण्डकः ।
ज्येष्ठो भवेन्मध्यमस्तु चाष्टांशहीनको मतः ॥७२॥
षष्ठांशहीनकः प्रोक्तः कनिष्ठ एव सर्वथा ।
यद्वा रेखाप्रमाणस्तु कनिष्ठकः स उच्यते ॥७३॥
द्वादशभागवृद्ध्या च मध्यमः स भवेदथ ।
षष्ठांशवृद्धितः श्रेष्ठो भवत्येव स दण्डकः ॥७४॥
प्रासादकोणमर्यादा सप्तहस्तान्तिका मता ।
गर्भमानस्य मर्यादा हस्ताः स्युः पञ्चविंशतिः ॥७५॥
रेखामानस्य मर्यादा पञ्चाशद्धस्तिका मता ।
तत्तन्मर्यादया ध्वजादण्डस्य दैर्घ्यमित्यपि ॥७६॥
प्रासादे चैकहस्ते तु दण्डः पादोकांगुलः ।
पृथुस्ततः प्रतिगजं चार्धांगुलं पृथुं धरेत् ॥७७॥

पञ्चाशद्गजपर्यन्तं मानं स्थौल्ये मतं शुभम् ।
वंशामयश्चांजनो वा माधुकः शैंशपेयकः ॥७८॥
खादिरो वा प्रकर्तव्यो वृत्तः सोपानपंक्तियुक् ।
एकीपर्वयुतो द्विलग्रन्थिसंख्यासमन्वितः ॥७९॥
दण्डदैर्घ्यषडंशेन लम्बा मर्कटी पाटली ।
दैर्घ्यार्धांशैश्चायता च स्थूला चाऽऽयत्यत्र्यंशकैः ॥८०॥

किंकिणीघण्टिकायुक्ता कांगरीभिः सुशोभिता ।
मर्कट्यायततायाश्च पञ्चांशैः कलशोच्छ्रयः ॥८१॥
मर्कट्यधोऽर्धचन्द्राभः पक्षयोः सगगारकः ।
दण्डोपर्येव कलशः स्थापनीयः कुशाग्रकः ॥८२॥
पताका दण्डवल्लम्बा तदष्टांशैस्तथाऽऽयता ।
त्रिभिर्वा पञ्चकैः पट्टैर्भिन्नरूपैः सुशोभिता ॥८३॥

दक्षस्कन्धे पंढरायां ध्वजदण्डः स्थितो भवेत् ।
प्रासादस्य पृष्ठभागे दक्षे तु पंढरे शुभः ॥८४॥

ध्वजदण्डाधाररूपः कलाबः शोभनो मतः ।
कलाबाऽऽयतता कार्या भित्तिषष्ठांशमानतः ॥८५॥
घण्टोदयसमोच्छ्रायः कलाबो मन्यते शुभः ।
प्रासादस्य पृथुत्वे च यावद्धस्ता भवन्ति च ॥८६॥
तावदङ्गुलमानेन दण्डगर्तविशालता ।
चतुर्मुखे तु प्रासादे ईशान्यां दण्डरोपणम् ॥८७॥
ईशान्यां तु मनाक् पाटलिका दण्डे परक्षयेत् ।
राज्यवृद्धिः स्थानवृद्धिः प्रजासौख्यं ततो भवेत् ॥८८॥

ध्वजहीने महासौधे वासमिच्छन्ति राक्षसाः ।
ध्वजदानेन तुष्यन्ति देवताः पितरस्तथा ॥८९॥
दशाश्वमेधिकं पुण्यं शतैकं तारयेत् कुलम् ।
जीर्णोद्धारे पूर्वसूत्रं प्रासादे न समुत्सृजेत् ॥९०॥
पूर्वद्रव्यापेक्षया चोत्तमद्रव्येण वास्तुकम् ।
सुमुहूर्तादिसद्योगे शुभं जीर्णप्रपातनम् ॥९१॥
स्वर्णरूप्यमयहस्तिवृषदन्तैः प्रपातनम् ।
अन्यदेवस्य जीर्णादिर्नान्यदेवगृहेऽर्पयेत् ॥९२॥

प्रतिष्ठितस्य देवस्य चालनं पुण्यनाशकम् ।
गृहस्थानां न तु सतां यतीनां ब्रह्मचारिणाम् ॥९३॥
प्रतिमोत्थापनं लग्ने चरे लब्धेन वै मतम् ।
लंचनं च गजाश्वस्य रूप्यकं वाऽथ वज्रकम् ॥९४॥
कपाटाः समसूत्रे च श्रेणीभंगं न कारयेत् ।
पाषाणादिथराः सर्वे समसूत्रेण सम्मताः ॥९५॥
प्रतोलिकाः शुभाः कार्याः गोपुराणि महान्ति च ।
कीर्तिस्तंभस्तथा कार्यो वेधयन्त्रादिकं तथा ॥९६॥

इत्येवं राधिके नारायणः प्राह निजाश्रितम् ।
देवायतनभक्तायलक्ष्म्यै प्राह च तत् तथा ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रासादरूपे शिखरपद्मकोशकलशध्वजादिविशेषनिरूपण-नामा नवत्रिंशाऽधिकशततमोऽध्यायः ॥ १३९ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! देवायतनायाऽऽह यद्धरिः ।
मेरुजातीयसुभगप्रासादं तद्विभागकान् ॥ १ ॥
प्रासादेषु शतैकानि चाण्डानि कानकानि वै ।
सहस्रैकान्यपि देवे प्रासादे संभवन्ति हि ॥ २ ॥

प्रासादराजो मेरुर्वै सर्वदेवाश्रयो मतः ।
प्रासादस्त्वक्षराख्यश्च गोलोकाख्यश्च कीर्तितः ॥ ३ ॥
वैकुण्ठाख्योऽव्याकृताख्योऽमृताऽऽख्यश्च हिरण्मयः ।
वाह्नेयश्चापि वैराजो भूमा च वैष्णवोऽपि च ॥ ४ ॥
कैलासश्चापि वैशालः श्वेतद्वीपोऽपि मन्दरः ।
सर्वतोभद्रनामा च श्रीवत्सः स्वस्तिकस्तथा ॥ ५ ॥

हैमो हंसो गारुडश्च गजो वृषभ इत्यपि ।
मन्दिरो ब्राह्मसंज्ञश्च पंचविंशतिजातिकाः ॥ ६ ॥
वर्तुलोऽनन्तशिखरो मेरुराजः प्रकीर्तितः ।
सहास्रास्रश्चाक्षरश्चाऽनन्तभवनसंकुलः ॥ ७ ॥
नवशतनवतिस्तंभाढ्यो गोलोक इष्यते ।
सर्वथा शिखराढ्यश्च वैकुण्ठाख्यः प्रकीर्तितः ॥ ८ ॥

सर्वथा घूम्मटाढ्यश्चाऽव्याकृताख्यः प्रकीर्त्यते ।
सर्वथा गृहमात्राढ्यश्चामृतः परिकीर्त्यते ॥ ९ ॥
सर्वथा कम्मानिकाढ्यो हिरण्मयः प्रकीर्त्यते ।
सर्वथा पाटकाधारो वाह्नेयः परिकीर्त्यते ॥१०॥
सर्वथा गजशोभाढ्यो वैराजः संप्रकीर्त्यते ।
सर्वथाऽश्वादिशोभाढ्यो भूमासौधः प्रकीर्त्यते ॥११॥

दासीभिर्वैष्णवदूतैर्व्याप्तो वैष्णव उच्यते ।
सर्वथा तु गणैर्व्याप्तः कैलासः स प्रकीर्त्यते ॥१२॥
सर्वथा ऋषिभिर्व्याप्तो वैशालः सप्रकीर्त्यते ।
तापसैः सर्वथा व्याप्तः श्वेतद्वीपाख्य उच्यते ॥१३॥

चतुष्कोणः सर्वभद्रः श्रीयन्त्रवच्छ्रीवत्सकः ।
स्वस्तिकेन समः स्वस्तिर्बहुखण्डस्तु हैमकः ॥१४॥
बहुहंसो हांसकश्च गारुडाढ्यश्च गारुडः ।
पञ्चपादो गजाख्यश्च चतुष्पादो वृषाभिधः ॥१५॥

शतपादो मन्दिरं च दशपादस्तु ब्राह्मकः ।
इति मुख्या भवन्त्येव त्वंगभेदैर्विभिन्नकाः ॥१६॥
शिल्पभेदैः रूपभेदैर्द्दश्यभेदैर्विभिन्नकाः ।
यथाबुद्धि यथाशक्ति यथालोकं यथासुखम् ॥१७॥
शिल्पबुद्धिसमुत्पन्ना मानवेधविवर्जिताः ।
वैमानिकास्तु प्रासादा बहुधा संभवन्ति हि ॥१८॥
यावन्तो देहिनः सन्ति तावन्तस्तादृशालयाः ।
भविष्यन्त्यपरे चापि प्रासादा बहुरूपिणः ॥१९॥
तलभागाष्टकश्चाण्डपंचकस्तु स केसरी ।
नवाण्डः सर्वतोभद्रस्तलतिलाष्टको हि सः ॥२०॥
प्रासादो नन्दनाख्यस्तु त्रयोदशाण्डसंयुतः ।
नन्दिशालिकसौधस्तु सप्तदशाण्डकः स्मृतः ॥२१॥
तलभागा दश तत्र तिलकानां चतुष्टयम् ।
तलभागा दश चैकविंशत्यण्डस्तु नन्दिशः ॥२२॥
द्वादश तलभागाश्च पञ्चविंशतिकाण्डकः ।
अष्टतिलकसंशोभो मन्दिराख्यः स उच्यते ॥२३॥
चतुर्दशतलभागो नवविंशतिकाण्डकः ।
चतुर्विंशतितिलकः श्रीवत्साख्यः स उच्यते ॥२४॥
चतुर्दशतलभागस्त्रयस्त्रिंशच्छुभाण्डकः ।
षोडशोत्तमतिलकश्चाऽमृतोद्भव उच्यते ॥२५॥
चतुर्दशतलभागः सप्तत्रिंशच्छुभाण्डकः ।
द्वादशतिलकाढ्यश्च हिमवान् स तु कीर्तितः ॥२६॥
चतुर्दशतलभागश्चाष्टतिलकवाँस्तथा ।
एकचत्वारिंशदण्डो हेमकूटः स उच्यते ॥२७॥
षोडशतलभागाश्च तिलकानां चतुष्टयम् ।
पञ्चचत्वारिंशदण्डः कैलासः स तु कीर्तितः ॥२८॥
नवचत्वारिंशदण्डस्तलभागाश्च षोडश ।
पृथ्वीविजयसंज्ञः स प्रासादः परिकीर्तितः ॥२९॥
षोडशतलभागाश्च तिलकानां तथाऽष्टकम् ।
त्रिपंचाशदण्डकश्च प्रासादश्चेन्द्रनीलकः ॥३०॥
षोडशतलभागाश्च तिलकानां तथाऽष्टकम् ।
सप्तपंचशदण्डश्च महानीलः स उच्यते ॥३१॥
षोडशतलभागाश्चैकषष्ट्यण्डः स भूधरः ।
अष्टादशतलभागाः पंचषष्ट्यण्डकस्तथा ॥३२॥
चतुश्चत्वारिंशत्तिलः रत्नकूटः स उच्यते ।
अष्टादश तलभागाश्चत्वारिंशत्तिलस्तथा ॥३३॥
नवषष्ट्यण्डकः प्रोक्तो वैदूर्याख्यः शुभो महान् ।
अष्टादशतलभागाः षट्त्रिंशत्तिलकान्वितः ॥३४॥

त्रिसप्तत्यण्डकः प्रोक्तः पद्मरागः शुभो महान् ।
अष्टादश तलभागा द्वात्रिंशत्तिलकस्तथा ॥३५॥
सप्तसप्तत्यण्डकश्च प्रासादो वज्रको हि सः ।
अष्टादशतलभागा अष्टाविंशतिसत्तिलः ॥३६॥
एकाशीत्यण्डकश्चेति मुकुटोज्ज्वल उच्यते ।
अष्टादश तिलभागाश्चतुर्विंशतिसत्तिलः ॥३७॥
पञ्चाशीत्यण्डकश्चायमैरावताख्य उच्यते ।
द्वाविंशतितलभागाश्चत्वारस्तिलकास्तथा ॥३८॥
नवाशीत्यण्डकः प्रोक्तो राजहंसेतिनामवान् ।
द्वाविंशतितलभागास्तिलकाष्टकवाँस्तथा ॥३९॥
त्रिनवत्यण्डकः प्रोक्तो गरुडाख्यः शुभो हि सः ।
द्वाविंशतितलभागास्तिलकानां चतुष्टयम् ॥४०॥
सप्तनवत्यण्डकश्च वृषभोऽयं समुच्यते ।
द्वाविंशततिलभागाः शतैकाण्डकवाँस्तथा ॥४१॥
मेरुप्रासाद उक्तोऽयं सर्वशोभास्पदो हि सः ।
चतुरस्रतलं चैकाण्डकस्तिलकनामकः ॥४२॥
गौरीतिलक एकाण्डाष्टतिलश्चतुरस्रकः ।
तलभागाष्टकस्तिलचतुष्टयाण्डकैकवान् ॥४३॥
रुद्रतिलकप्रासादः श्रेष्ठो बोध्यः सुखावहः ।
तलभागाष्टकश्चतुस्तिलकोऽण्डकपञ्चकः ॥४४॥
श्रीतिलकसंज्ञः स प्रासादोऽपि शुभावहः ।
तलभागाष्टकं तिलकानां तथा चतुष्टयम् ॥४५॥
नवाण्डं हरितिलकाभिधं वै शिखरं मतम् ।
तदेव तु त्रयोदशाण्डकं लक्ष्मीतिलाख्यकम् ॥४६॥
दशभागतलं तथा द्वादशतिलकाश्रितम् ।
नवविंशत्यण्डकं च भूतिलकं तदुच्यते ॥४७॥
तदेव च त्रयस्त्रिंशदण्डं रंभातिलाख्यकम् ।
चतुर्विंशतितिलकं तलं द्वादशभागकम् ॥४८॥
सप्तत्रिंशदण्डकं च मन्दिरतिलकं मतम् ।
द्वादशतलभागाश्च विंशतिस्तिलकानि च ॥४९॥
पञ्चचत्वारिंशदण्डं हेमवत्तिलकं मतम् ।
चतुर्विंशतितिलकं तलद्वादशभागकम् ॥५०॥
नवचत्वारिंशदण्डं कैलासतिलकं मतम् ।
द्वादश तलभागाश्च विंशतितिलकान्वितम् ॥५१॥
सप्तपञ्चाशदण्डं च पृथिवीतिलकं मतम् ।
षट्त्रिंशत्तिलकं चाष्टाविंशतितलभागकम् ॥५२॥
पञ्चषष्ट्यण्डकं प्रोक्तं त्रिभुवनाख्यमेव तत् ।
तदेव नवषष्ट्यण्डं चेन्द्रनीलतिलात्मकम् ॥५३॥

अष्टाविंशतितिलकं द्वात्रिंशत्तलभागकम् ।
त्रिसप्तत्यण्डकं प्रोक्तं सर्वांगतिलकं मतम् ॥५४॥
चतुर्विंशतितिलकं द्वात्रिंशत्तलभागकम् ।
सप्तसप्तत्यण्डकं च सुरवल्लभकाभिधम् ॥५५॥
पञ्चविंशत्यण्डमष्टभागतलं चतुस्तिलम् ।
सिंहतिलकमेवैतत् कल्पितं शिल्पिभिः शुभम् ॥५६॥
द्वादशतिलकं सप्तसप्तत्यण्डं तला दश ।
मकरध्वजसंज्ञं तत् तिलकं शोभनं मतम् ॥५७॥
पञ्चचत्वारिंशदधिकशताण्डसुशोभितम् ।
दशभागतलं चाष्टतिलं मंगलनामकम् ॥५८॥
सप्तदशाधिकशताण्डकं चतुस्तिलात्मकम् ।
तलभागदशकं च तिलकाख्याभिधं हि तत् ॥५९॥
तदेवैकोनपञ्चाशदण्डं पद्मतिलाभिधम् ।
पञ्चषष्ट्यधिकशताण्डकं तलांशद्वादशम् ॥६०॥
चतुर्विंशतितिलकं सोमतिलकमुच्यते ।
नवाशीत्यधिकशताण्डकं द्वादश वै तलम् ॥६१॥
विंशतितिलकं नाम विजयाख्यं मतं शुभम् ।
पञ्चविंशत्यधिकचतुःशताण्डकं शुभम् ॥६२॥
तले द्वादशतिलके चतुर्विंशे त्रलोकनम् ।
द्वात्रिंशत्तलभागाश्च चतुस्तिलक एव च ॥६३॥
त्रयस्त्रिंशत्सप्तशताण्डकः ऋषभसंज्ञकः ।
द्वे शते नवषष्टिश्चाण्डकानि यस्य सन्ति च ॥६४॥
द्वादशतलभागाश्चाजितप्रासाद उच्यते ।
त्रयोदशाधिकशताण्डकोऽष्टादशसत्तलः ॥६५॥
स्वयंभूनामकः प्रोक्तः प्रासादः सुखदायकः ।
सप्तसप्तत्यधिकाढ्यशताण्डकः शुभाकृतिः ॥६६॥
अष्टादशतलभागश्चाभिनन्दननामकः ।
चतुर्दशतलभागः सप्तपञ्चाशदण्डकः ॥६७॥
सुमत्याख्यः स वै बोध्यः सर्वशान्तिप्रदायकः ।
विंशतिस्तलभागाश्च 'अण्डानि द्वे शते नव ॥६८॥
पद्मवल्लभसंज्ञः स प्रासादो नामतो मतः ।
दशभागतलश्चापि सप्तपंचाशदण्डकः ॥६९॥
सुपार्श्ववल्लभः सोऽयं प्रासादः परिकीर्तितः ।
अण्डकानि भवेयुश्च द्वे शते नवविंशति ॥७०॥
द्वात्रिंशत्तलभागश्च प्रासादः शीतलाभिधः ।
चतुर्विंशतितलभाग् द्वादशतिलकान्वितः ॥७१॥
नवचत्वारिंशदण्डः श्रियोंऽशकः स उच्यते ।
चतुर्विंशतितिलभाक् चतुर्विंशतिसत्तिलः ॥७२॥
त्रयस्त्रिंशदण्डकश्च शीतलाख्यः स उच्यते ।
अष्टादशतलभागो द्वादशतिलकान्वितः ॥७३॥
सप्तदशाण्डकः सोऽयं स्वकुलाभिध उच्यते ।
द्वाविंशतितलभागः षोडशतिलकान्वितः ॥७४॥
द्वे शते सप्तपंचाशदण्डानि वसुपूज्यकः ।
चतुर्विंशतितलभाक् सप्तसप्ततिकाण्डकः ॥७५॥
विमलाख्यो भवेत् सोऽयं प्रासादः शुभलक्षणः ।
विंशतितलभागश्च त्रिपंचाशच्चतुःशतम् ॥७६॥
अण्डानां यस्य सोऽनन्तमाया प्रासाद उच्यते ।
अष्टाविंशतितलभाग् द्वादशतिलकान्वितः ॥७७॥
पञ्चविंशतिर्द्वे शतेऽण्डान्ययं धर्म उच्यते ।
द्वादशतलभागश्च नवाशीतिः शतं तथा ॥७८॥
अण्डान्ययं शान्तनामा प्रासादः शोभनो मतः ।
तलभागाष्टकश्चापि विंशतितिलकान्वितः ॥७९॥
नवषष्ट्यण्डकः सोऽयं कन्थाधरः समुच्यते ।
अष्टभागतलवाँश्चैकविंशत्यण्डकश्च यः ॥८०॥
कमलकन्दनामा स प्रासादः शोभनो भवेत् ।
द्वादशतलभागश्च तथाऽष्टतिलकश्च यः ॥८१॥
एकाशीतिः शतं चाण्डान्ययं महेन्द्रसंज्ञकः ।
चतुर्दशतलभागास्तिलकान्यष्ट यत्र च ॥८२॥
पञ्चाशीत्यण्डकश्चायं मानसतुष्टिनामकः ।
षड्विंशत्तलभागाश्च षोडशतिलकान्वितः ॥८३॥
त्रिसप्ततिश्चतुःशतान्यण्डानि सुमतिर्हि सः ।
द्वाविंशतिस्तलभागाश्चत्वारिंशत्तिलात्मकः ॥८४॥
शतं त्रिनवतिश्चाण्डकान्ययं नेमिनामकः ।
षड्विंशतिस्तलभागास्तथा च तिलकाष्टकम् ॥८५॥
त्रयोदशाधिकशताण्डकः पार्श्वाभिधो हि सः ।
चतुर्विंशतितलभाग् द्वे शते चैकविंशतिः ॥८६॥
अण्डानि यस्य स बोध्यो वीरनामा शुभावहः ।
एकांगश्चैकप्रासादश्चतुरस्रोऽण्डकैकवान् ॥८७॥
त्रयांगास्त्रिप्रासादकाः पंचांगाः पञ्च इत्यपि ।
सप्तांगाः सप्तप्रसादा नवांगा नव इत्यपि ॥८८॥
विचित्रशिखराकाराः शिल्पिबुद्ध्युदयान्विताः ।
एकाण्डकश्चतुरस्रो वैराजाख्यो हि कथ्यते ॥८९॥
चतुर्भागतलस्त्रयोदशाण्डो नन्दनाभिधः ।
एकोनत्रिंशदण्डश्च श्रीनन्दनः स उच्यते ॥९०॥
षट्तलांशः पञ्चविंशत्यण्डो मन्दिरनामकः ।
एकोनत्रिंशदण्डश्च मलयाख्यः स उच्यते ॥९१॥

त्रयस्त्रिंशदण्डकश्च विमानाख्यः स उच्यते ।
सप्तत्रिंशदण्डश्चाष्टतिलकस्तु विशालकः ॥९२॥
एकचत्वारिंशदण्डस्त्रैलोक्यभूषणो मतः ।
तलाष्टांशः पञ्चचत्वारिंशदण्डक एव च ॥९३॥
चतुस्तिलकसंयुक्तो महेन्द्रनामको मतः ।
अण्डानां वर्धनात् सप्तभेदाश्चास्य भवन्ति हि ॥९४॥
तलभागदशकश्चैकचत्वारिंशदण्डकः ।
षोडशतिलकैर्युक्तो महीधरः स उच्यते ॥९५॥
तिलकाण्डप्रभेदेन बहुधाऽयं भवत्यपि ।
इत्येवं राधिके भेदान् शिखराणां तदाह तम् ॥९६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रासादरूपे मेर्वादिजातीयाऽक्षरादिजातीयतदन्यजातीयप्रासादानां स्वरूपनिरूपणनामा चत्वारिंशदधिकशततमोऽध्यायः ॥ १४० ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! कृष्णनारायणो यथाऽऽह च ।
भक्तं देवायतनकं ते वदामि यथायथम् ॥ १ ॥
एकाऽधिकसहस्राण्डो द्वासप्ततितलान्वितः ।
ज्येष्ठमेर्वाख्य एवाऽसौ मतः सर्वोत्तमोत्तमः ॥ २ ॥
चतुरस्रीकृते क्षेत्रे द्वासप्ततिविभाजिते ।
सार्धचतुर्भागभित्तिः सार्धतर्याभ्रमन्तिका ॥ ३ ॥
अथ क्षेत्रं चतुरस्रं दशधा भाजयेत्ततः ।
भागैका भ्रमणी कार्या भित्तिर्भागैकसम्मता ॥ ४ ॥
कोणो भागद्वयात्मा सार्धैकं प्रतिरथं तथा ।
भद्रं भागत्रयं चैतत् सर्वदिक्षु समानकम् ॥ ५ ॥
अथ क्षेत्रं चतुरस्रं त्वष्टधा भाजयेत्पुनः ।
द्विभागस्तत्र कोणश्च भद्रं भागद्वयात्मकम् ॥ ६ ॥
एवं त्रिधा भवन्त्येव मेरुप्रासादका भुवि ।
द्वासप्ततितलभागाः कणादिभद्रकान्तकाः ॥ ७ ॥
बोध्यास्तत्र षड्द्वयं षड्द्वयं षड्द्वयम् षड्द्वयम् ।
आकर्णभद्रमावृत्य चांगभागादियोजना ॥ ८ ॥
भागाष्टकं च भद्रार्धे निर्गमे भागषट्ककम् ।
भद्रोपरि गवाक्षाश्च तवंगरथिकास्तथा ॥ ९ ॥
तथा पंचोरुश्रृंगाणि रोपणीयानि सर्वथा ।
कोणे तु सर्वतोभद्रो नन्दीशः पृथिवीजयः ॥१०॥
क्रमेणोपर्युपर्येव संस्थाप्यास्ते दृढात्मकाः ।
नवाण्डो भद्रको नन्दीशश्चैकविंशत्यण्डकः ॥११॥
नवचत्वारिंशदण्डः पृथिवीजय आदृतः ।
कर्णसमभागपढरे केशरीभद्रकस्तथा ॥१२॥
नन्दीशालः प्रदातव्यास्तत्र पञ्चाण्डकेशरी ।
नन्दीशालः सप्तदशाण्डको भद्रो नवाण्डकः ॥१३॥
भद्रस्य वामदक्षस्थनन्दिकानामुपर्यथ ।
केशरी केशरी श्रीवत्सः श्रीवत्साण्डकास्तथा ॥१४॥
देयास्तत्रैकाण्डकस्तु श्रीवत्सोऽन्ये तु पूर्ववत् ।
कोणस्य वामदक्षस्थनन्दिकानामुपर्यथ ॥१५॥
केशरी केशरी श्रीवत्सश्रीवत्साण्डकास्तथा ।
नन्दिकास्तत्र षड्बोध्याः स्वल्पा महत्य एव वा ॥१६॥
प्रतिकर्णवामदक्षस्थनन्दिकोपरि ध्रुवः ।
केशरी एव दातव्यो नाऽन्यथा तु कदाचन ॥१७॥
भद्रे तु नासिकां कृत्वा तत्र श्रीवत्सकाऽण्डकः ।
कर्णे च प्रतिकर्णे च भद्रस्य वामदक्षिणे ॥१८॥
चतुःष्वेवं प्रदेयानि प्रत्यंगान्यष्टसंख्यया ।
एवं चतुर्षु दिक्षु द्वात्रिंशत्प्रत्यंगकानि वै ॥१९॥
द्वासप्ततिपदसौधे चतुष्पंचाशदंशकैः ।
शिखरस्य नमणस्य रेखाः कार्यास्ततः परम् ॥२०॥
एवं भवति चैकाढ्यसहस्राण्डसमन्वितः ।
ज्येष्ठमेरुसमाख्यो वै परब्रह्मनिवासवान् ॥२१॥
मध्यमेरुं कथयामि क्षेत्रं तु चतुरस्रकम् ।
चतुष्षष्टिविभागं च गर्भादिकोणकावधिम् ॥२२॥
सप्तद्वयत्रिचतुष्षट्चतुष्षड्भिर्विभाजयेत् ।
त्रिभागो भद्रनिस्तारो भद्रोऽयं भागसप्तकः ॥२३॥
प्रथमा नन्दिका भागद्वया भागत्रयाऽपरा ।
प्रतिकर्णचतुर्भागः षड्भागः प्रातिराथकः ॥२४॥
प्रतिकर्णश्चतुर्भागः कोणः षड्भागजस्तथा ।
एवं कार्ये चतुर्दिक्षु षड्भागा भ्रमणी मता ॥२५॥
षट्षड्भागा भित्तिकाश्च रेखा विंशतिभागिका ।
केशरी सर्वतोभद्रो नन्दनो नन्दशालिकः ॥२६॥
स्थाप्याः क्रमेण कोणेषु त्रयोदशाण्डनन्दनः ।
श्रीवत्सौ द्वौ केशरी स्युः प्रतिकर्णे स्थिताः क्रमात् ॥२७॥
श्रीवत्सः केशरी चैव सर्वतोभद्रकस्तथा ।
पढरोपरि दातव्यः प्रासादत्रयभूषणाः ॥२८॥
श्रीवत्सः केशरी चैव नन्दिकायां नियोजयेत् ।
द्वितीयां नन्दिका कार्या श्रीवत्सद्वयशोभिता ॥२९॥
पढरे प्रतिरथके कर्णे च नन्दिके तथा ।
तदर्धे वामदक्षे तु देयं प्रत्यंगमेव च ॥३०॥

अण्डकाः पूर्ववद् बोध्याः श्रृंगमानं च पूर्ववत् ।
पञ्चाधिकपञ्चशताण्डकोऽयं मेरुमध्यमः ॥३१॥
मुनिविद्याधरसिंहगजघण्टककूटकैः ।
वरालिकासंवरणैर्युक्तः शिवाधिवासनः ॥३२॥
चतुष्षष्टितलः पञ्चाधिकपञ्चशताण्डकः ।
मध्यमेरुः कीर्तितोऽथ कनिष्ठं प्रवदामि च ॥३३॥
चतुरस्रीकृते क्षेत्रे पञ्चपञ्चाशदंशके ।
षट्त्रिषट्त्रिषड्भिश्च कर्तव्या योजना क्रमात् ॥३४॥
भद्रमारभ्य कर्णान्ता भद्रार्धे चांशषट्ककम् ।
भागद्वयं निर्गमे च त्रिभागा नन्दिका तथा ॥३५॥
द्वितीयापि त्रिभागा च पढरो भागषट्कवान् ।
तृतीया नन्दिका भागत्रयाढ्या कोणकास्तु षट् ॥३६॥
निर्गमे समभावास्ते ततः कार्योऽग्रयोजना ।
भित्तिः सार्धचतुरंशा भ्रमण्यपि तथाऽऽयता ॥३७॥
नमणस्य तु रेखाश्च मध्यमेराविव ध्रुवाः ।
प्रतिरथे च कोणे च श्रृंगाणि त्रीणि त्रीणि च ॥३८॥
केशरीसंज्ञकान्येव देयान्युपरितस्ततः ।
नन्दिकायां प्रतिकर्णे श्रीवत्साश्च त्रयस्त्रयः ॥३९॥
भद्रे तु नासिकां कृत्वा द्वौ प्रकार्यौ श्रीवत्सकौ ।
चत्वारि चोरुश्रृंगाणि प्रत्यंगं वामदक्षके ॥४०॥
त्रिनवत्याढ्यद्विशताण्डको मेरुः कनिष्ठकः ।
गणविद्याश्चादिशोभो देवानां प्रिय एव च ॥४१॥
अथ मन्दिरनामापि मेरुमन्दिरमुच्यते ।
चतुरस्रीकृते क्षेत्रेह्यष्टात्रिंशद्विभाजिते ॥४२॥
चतुर्भागं भवेद् भद्रं द्विभागश्चास्य निर्गमः ।
नन्दिका चैकभागा च द्वितीया द्व्यंशिका तथा ॥४३॥
पञ्चभागः पढरश्च तथा भागद्वयाऽपरा ।
नन्दिका चाऽथ कोणस्तु पञ्चभागात्मकस्तथा ॥४४॥
समदलाः सर्वं एते भित्तिः सार्धत्रया मता ।
भ्रमण्यपि सार्धत्रया चतुर्दिक्षु समा मता ॥४५॥
मध्यप्रासादकतलं मतं द्वादशभागकम् ।
चतुर्दिक्ष्वेव कर्तव्यं कोणे केशरिणस्त्रयः ॥४६॥
एकं श्रीवत्सकं चापि ततोऽथ पढरोपरि ।
श्रीवत्साश्च त्रयश्चैकं तिलकं कार्यमेव च ॥४७॥
सर्वनन्दिकोर्ध्वके च श्रीवत्सानां तथाऽण्डकाः ।
त्रयस्त्रयः करणीयाश्चतुःश्रृंगाणि भद्रके ॥४८॥
प्रत्यंगानि दक्षिणे वामके चापि यथायथम् ।
रेखोर्ध्वे द्वादशभागेष्वपि रूपाणि सन्न्यसेत् ॥४९॥
अष्टात्रिंशत्तलभागस्तथा च तिलकाष्टकः ।
एवं पञ्चाशीत्यधिकाऽण्डको मेरुरयं मतः ॥५०॥
अष्टात्रिंशत्तलभागाश्चतुष्षष्टितिलानि च ।
नवचत्वारिंशदधिकं शतं चाण्डमण्डलम् ॥५१॥
लक्ष्मीकोटरसंज्ञोऽयं प्रासादो मेरुरुच्यते ।
चतुर्विंशतितिलकः षट्त्रिंशत्तलभागवान् ॥५२॥
नवविंशत्येकशताण्डकः कैलासमेरुकः ।
द्वासप्ततितिलकाढ्यश्चाष्टादशतलांशवान् ॥५३॥
एकषष्ट्यधिकशताण्डः स पंचाननाभिधः ।
चतुर्विंशतितिलकः सप्तसप्ततिकाण्डवान् ॥५४॥
षड्विंशत्तलभागः स विमानमेरुरुच्यते ।
चतुष्षष्ट्याधिकशततिलकश्च तले तु यः ॥५५॥
षट्त्रिंशद्भागवान् नवाधिकद्विशतकाण्डकः ।
गन्धमादननामाऽसौ मेरुः प्रासादको मतः ॥५६॥
षड्विंशतितलभागा विंशतिस्तिलकानि च ।
पञ्चविंशत्यधिकैकशताण्डो मुक्तकोणकः ॥५७॥
षट्त्रिंशश्च शतं चापि तिलकानि तथा तले ।
द्वात्रिंशद्भागका यस्य तथा शतं च पंच च ॥५८॥
चत्वारिंशच्चाण्डकानि गिरिप्रासादकाऽभिधः ।
चतुरशीतितिलकश्चाष्टादशतलांशवान् ॥५९॥
एकविंशत्यण्डकश्च तिलकाभिधमेरुकः ।
द्वानवतितिलकश्च नवाधिकशताण्डकः ॥६०॥
चतुस्त्रिंशत्तलभागश्चन्द्रशेखरमेरुकः ।
षट्पंचाशत्तिलकश्चैवत्रिसप्ततिकाण्डकः ॥६१॥
अष्टाविंशतितलभाङ्मन्दिरतिलकाभिधः ।
त्रयस्त्रिंशदण्डकश्च षोडशतिलकान्वितः ॥६२॥
द्वादशतलभागश्च सौभाग्यमेरुरेव सः ।
अण्डानि च नवाधिकचत्वारिंशत्तु यत्र वै ॥६३॥
तिलकानि चाष्टयुक्तचत्वारिंशत्तु यत्र च ।
द्वाविंशतितलभागाः सुन्दरो मेरुरेव सः ॥६४॥
विंशतिस्तलभागाश्च षट्त्रिंशत्तिलकानि च ।
अण्डानि नवचत्वारिंशद्युक्तशतमेव तु ॥६५॥
श्रीतिलकाऽभिधानोऽसौ प्रासादः सम्मतः शुभः ।
सप्तपंचाशदाढ्यैकशताण्डकस्तु यो भवेत् ॥६६॥
चत्वारिंशत्तिलकश्चाष्टाविंशतिसत्तलः ।
विशालाख्यः स वै बोध्यः प्रासादः शुभदो मतः ॥६७॥
एकाण्डश्च चतुश्चत्वारिंशत्तिलकवाँस्तथा ।
द्वादशतलभागश्च पर्वतकूटको हि सः ॥६८॥

चत्वारिंशत्तिलकश्च सप्तपंचाशदण्डकः ।
द्वाविंशतितलभाक् स नन्दिवर्धन उच्यते ॥६९॥
इत्येवं कथिताः सर्वे प्रासादाश्च ममाऽऽलयाः ।
प्रतिमाश्चाथ वक्ष्यामि यथा यथा तु मे मता ॥७०॥
निबिडा निर्वणा मृद्वी सुगन्धा मधुरा शिला ।
कान्तियुक्ता दर्शनीया प्रतिमार्था शिला भवेत् ॥७१॥
निर्मलं हेमकांस्यादि चिन्हं लोहमयं च यत् ।
तथा विचित्रविकृतिः प्रतिमायां भयावहम् ॥७२॥
भृंगकपोतकुमुदमाषमुद्गसितोपमा ।
पाण्डुरा घृतपद्माभा सर्वार्चासु शिला शुभा ॥७३॥
द्वादशांगुलतो न्यूना पूज्या मूर्तिर्गृहे मता ।
द्वादशांगुलतो नवगजान्ताऽर्च्या सुरालये ॥७४॥
दशगजोर्ध्वा प्रतिमा पूज्या प्रासादकं विना ।
चतुष्क्यामेव सा पंचचत्वारिंशद्गजान्तिका ॥७५॥
अष्टलौहमयी शैली रत्नजा श्रेष्ठदारुजा ।
प्रवालादिमयी चापि प्रतिमा शुभदायिनी ॥७६॥
शतवत्सरपूर्वा या दैविपुरुषवेशिता ।
खण्डिता स्फुटिताऽप्यर्च्या तदन्या दोषदायिनी ॥७७॥
तीर्थभूमिष्वरण्ये च देवताः खण्डिता अपि ।
पूजनीया हि फलदा नान्यत्र तु कदाचन ॥७८॥
रात्नी च धातवी लेपलिप्ता च दुर्घटा तु या ।
पुनः संस्कारयोग्या सा पूजनीया ततो भवेत् ॥७९॥
काष्ठपाषाणजा भग्ना संस्कारार्हा न सा मता ।
नाधिकांगा न हीनांगा कर्तव्या सा कदाचन ॥८०॥
काष्ठलेपाश्मदन्तोत्था चित्राऽऽयसादिजापि च ।
मानाधिका देवपरिवारा गृहे न पूज्यते ॥८१॥
गर्जनां रोदनं हास्यमुन्मीलननिमीलने ।
क्रूरतां यत्र कुर्वन्ति देवास्तत्र महद्भयम् ॥८२॥
पृथ्व्यां शिला तु या सुप्ता निखन्यते बहिस्तदा ।
दक्षिणं पश्चिमं पार्श्वं स्मृत्वा शिरो विधापयेत् ॥८३॥
एकभागं ग्राहमुखं पक्षी द्विभागवाँस्तथा ।
त्रिभागाः कुंजराद्याश्च चतुर्भागाश्च [illegible]किन्नराः ॥८४॥
वृषाः सुराः पञ्चभागाः कर्तव्याः शिल्पिना शुभाः ।
गणेशो वामनः क्रोडश्चैते षडंशका मताः ॥८५॥
सप्तभागास्तु कर्तव्या वृषभक्रोडमानवाः ।
अष्टांशा पार्वती शक्तिस्तथाऽन्या देविका अपि ॥८६॥
नवांऽशाऽन्यसुराः शिवसंकर्षणा दशांशकाः ।
चण्डीभूतहनुमान् कार्तिकाश्चैकादशांशकाः ॥८७॥

वैतालो द्वादशांशश्च त्रयोदशांशराक्षसाः ।
दैत्याश्चतुर्दशांशाश्च पञ्चदशांशको भृगुः ॥८८॥
क्रूरा देवा देविकाद्याः षोडशांशा मताः सदा ।
गणेशो मूषकारूढो धत्ते दन्तपरश्वधौ ॥८९॥
पंकजं मोदकं चापि हस्त्यास्यः सर्पभूषणः ।
मुखं भागद्वयं तस्य भागद्वयं तथोदरम् ॥९०॥
चतुरंगुलं जघनम् आजान्वंगुलसप्तकम् ।
जानू त्र्यंगुलमेवाऽपि जंघा सप्तांगुला तथा ॥९१॥
पादस्त्र्यंगुल एवापि मानं षड्भागमूर्तिकम् ।
सप्तभागे प्रमाणं तु कथयामि निबोध मे ॥९२॥
केशान्तास्तु त्रयो भागा मुखमेकांशकं तथा ।
त्र्यंगुलः कण्ठ एवापि पक्षः सार्धदशांगुलः ॥९३॥
नवांगुलोदरं प्रोक्तं सार्धं सप्तांगुलं तु वै ।
नाभिलिंगान्तरालं च सक्थ्यष्टादशकांगुलम् ॥९४॥
जानुस्त्र्यंगुलकश्चापि जंघाऽष्टादशकांगुला ।
पादस्त्र्यंगुलको बोध्यः सप्तवितस्तिकायकः ॥९५॥
अष्टताले मुखं तालं केशान्तं त्र्यंगुलं तथा ।
ग्रीवा च त्र्यंगुला बोध्या हृदयं च नवांगुलम् ॥९६॥
द्वादशांगुलमानाभिम् आमेढ्रं च नवांगुलम् ।
एकविंशत्यंगुलोरुर्जानुस्त्र्यंगुलको मतः ॥९७॥
एकविंशत्यंगुला जंघा पादस्त्र्यंगुलस्तथा ।
एषा चाष्टवितस्त्याख्या मूर्तिः प्रोक्ता सुशिल्पके ॥९८॥
नवतालं तथा वच्मि केशान्तं त्र्यंगुलं तथा ।
द्वादशांगुलकं बोध्यं मुखं कण्ठोऽङ्गुलत्रयः ॥९९॥
दशांगुलं च हृदयं नाभिर्द्वादशकांऽगुला ।
चतुरंगुलमुदरं गुह्यं चाष्टांगुलान्तरम् ॥१००॥
सक्थि चतुर्विंशतिकांगुलं जानुश्चतुर्मितः ।
चतुर्विंशत्यंगुला च जंघा पादश्चतुर्मितः ॥१०१॥
विस्तारे स्तनगर्भे तु द्वादशांगुलमीरितम् ।
स्तनात् कुक्षिश्चतुरंगुलायता शोभना तथा ॥१०२॥
कुक्षिबाह्वोरवकाशश्चैकांगुलो मतः शुभः ।
हस्तः सप्तांगुलः पुष्टः स्कन्धात् कफोणिकां प्रति ॥१०३॥
शोडशांगुलदैर्घ्ये च ततः प्रकोष्ठकं दश ।
प्रकोष्ठायतता त्र्यंगुलाऽथ हस्ततलं तु वै ॥१०४॥
द्वादशांगुललम्बं च पंचागुलं तथाऽऽयतम् ।
मध्यं चतुर्दशांगुलायतं कटिस्तु वै तथा ॥१०५॥
चतुर्विंशत्यंगुला च सक्थिमूलं दशैककम् ।
जंघाप्रकोष्ठश्चतुरंगुलायतस्तथा पुनः ॥१०६॥

चतुर्दशांगुलपादायततांऽगुलिकान्तिका ।
बाहुतःस्तनभागश्च चतुरंगुलोर्ध्वगः ॥१०७॥
कुक्षेः स्कन्धोपरिभागश्चाष्टांगुलो मतस्तथा ।
कण्ठोऽष्टांशः पादः षष्ठांशायतश्चेति मानता ॥१०८॥
इत्येवं राधिके मानं बहुधाऽपि भवत्यपि ।
युगानुरूपमेवाऽपि यथाह देवतं हरिः ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे उत्तममध्यमकनिष्ठमेरुमन्दिराणां गणेशादिमूर्तीनां च मानानुमापादिनिरूपणनामैकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! चान्यसुरमूर्तीर्वदामि ते ।
अनादिश्रीकृष्णनारायणो यदाह भक्तकम् ॥ १ ॥
अंगप्रत्यंगभग्नां तु मूर्तिं विसर्जयेज्जले ।
नखाऽऽभरणमालाऽस्त्रभग्नां तां न विसर्जयेत् ॥ २ ॥
ऋग्वेदादिचतुर्भेदात् सत्ययुगादिभेदतः ।
ब्राह्मादिवर्णभेदाच्च चतुर्मुखो हि विश्वसृट् ॥ ३ ॥
दक्षिणार्धः करादूर्ध्वे जपमालां तथा स्रुचम् ।
ग्रन्थं कमण्डलुं धत्ते सश्मश्रुः कमलासनः ॥ ४ ॥
अक्षसूत्रं पुस्तकं च धत्ते पद्मकमण्डलू ।
चतुर्वक्त्रा हि सावित्री श्रोत्रियाऽऽनन्दकारिणी ॥ ५ ॥
ऋग्वेदः श्वेतवर्णश्च द्विभुजो रासभाननः ।
अक्षमालाम्बुपात्रं च बिभ्रन् स्वाध्ययने रतः ॥ ६ ॥
अजाऽऽस्यः पीतवर्णश्च यजुर्वेदोऽक्षसूत्रवान् ।
वामे चांकुशपाणिस्तु भूतिदो मंगलावहः ॥ ७ ॥
नीलोत्पलदलाभासः सामवेदो हयाननः ।
अक्षमालाधरः सव्ये वामे कम्बुधरः स वै ॥ ८ ॥
अथर्वणाभिधो वेदो धवलो मर्कटाननः ।
अक्षसूत्रं च खट्वांगं बिभ्रन् वै विजयप्रदः ॥ ९ ॥
विश्वकर्मा चतुर्बाहुरक्षमालां च सूत्रकम् ।
गजं कमण्डलुं धत्ते त्रिनेत्रो हंसवाहनः ॥१०॥
सुदर्शनकरा सव्ये पद्महस्ता तु वामतः ।
एतद् विष्णुनामकस्य रूपं सूर्यस्य कीर्तितम् ॥११॥
सर्वलक्षणसंयुक्तं सर्वाभरणभूषितम् ।
द्विभुजं चैकवस्त्रं च श्वेतपंकजधृक्करम् ॥१२॥
वर्तुलं तेजसां बिम्बं मध्यस्थं रक्तवाससम् ।
सप्ताननहयैर्युक्तं रथेऽरुणेन संयुतम् ॥१३॥
विष्णुर्गणेशः सूर्यश्च शक्तिः रुद्रश्च देवताः ।
पञ्चायतनरूपाश्च बोध्याः सर्वत्र शोभनाः ॥१४॥
नवांशा तत्र कर्तव्या मूर्तिर्नारायणस्य वै ।
शंखपद्मगदाचक्रधारिणी मुकुटान्विता ॥१५॥
हरिर्धारयते कम्बुं चक्रं पद्मं गदां तथा ।
कृष्णो धत्ते पाञ्चजन्यं गदां पद्मं सुदर्शनम् ॥१६॥
गरुडो हरितो रूपे कौशिकाकारनासिकः ।
चतुर्भुजो वृत्तनेत्रमुखः पक्षद्वयाऽन्वितः ॥१७॥
गृध्रोरुजानुचरणः स्वर्णवर्णः कलायुतः ।
छत्रं कुम्भं धारयँश्चांऽजलिं कुर्वन् नमोयुतः ॥१८॥
वामाग्रे कुञ्चितः पश्चादन्यपादस्तु जानुना ।
पृथिवीं संश्रितः पत्रो गरुडासनसंस्थितः ॥१९॥
उमामहेश्वरो दक्षे करे त्रिशूलकं तथा ।
मातुलिंगं समाधत्ते आलिंगितं तु वामके ॥२०॥
अंके स्वे पार्वतीं देवीं समासीनां शुभाननाम् ।
नागेन्द्रोऽन्यकरे स्कन्धे उमाहस्तोऽतिशोभनः ॥२१॥
करान्ये दर्पणं चापि वृषभोऽधःस्थितस्तथा ।
कुमारेण गणेशेन भृंगीरटादिभिर्युतः ॥२२॥
उमां च द्विभुजां कुर्याल्लक्ष्मीं नारायणाश्रिताम् ।
हरिः शस्त्रैः स्वकीयैश्च गरुडोपरि संस्थितः ॥२३॥
दक्षिणः कण्ठलग्नः स्याद् वामहस्तः सरोजधृक् ।
हरेर्वामकरो लक्ष्म्याः कुक्षिभागे स्थितः शुभः ॥२४॥
वरं त्रिशूलखेटे च पानपात्रं सुबिभ्रती ।
मयूरं च हस्तिं च महालक्ष्मीः प्रकीर्तिता ॥२५॥
अष्टपत्राम्बुजस्योर्ध्वे लक्ष्मीः सिंहासनस्थिता ।
विनायकवदासीना भूषिताऽऽभरणैः शुभैः ॥२६॥
ऊर्ध्वहस्तौ प्रकर्तव्यौ देव्याः पंकजधारिणौ ।
वामेऽमृतघटं धत्ते दक्षिणे मातुलिंगकम् ॥२७॥
एकवक्त्रा चतुर्हस्ता मुकुटेन विराजिता ।
प्रभामण्डलसंयुक्ता कुण्डलान्वितशेखरा ॥२८॥
अक्षाऽब्जवीणाग्रन्थाढ्या महाविद्या प्रकीर्तिता ।
वराक्षाऽब्जग्रन्थयुक्ता सरस्वतीशुभावहा ॥२९॥
भित्तिसंलग्नबिम्बश्च पुरुषः सर्वथाऽशुभः ।
न कदापि ध्वजादण्डः स्थाप्यो वै गृहमन्दिरे ॥३०॥
रवावुत्तरगे श्रेष्ठं देवानां स्थापनादिकम् ।
अभिषेकः प्रतिष्ठा च प्रवेशः पूजनादिकम् ॥३१॥
प्रासादाऽग्रे तथैशाने चोत्तरे मण्डपोगजैः ।
त्रिपंचसप्तनवैकादशभिश्चान्तरालके ॥३२॥

पृथ्वीं पूर्वं शोधयित्वा दाहखातजलार्पणैः ।
पुण्याहं वाचयित्वा च पूजयित्वा च कूर्मकम् ॥३३॥
शेषनागं क्षितिं चापि पूजयित्वा ततः परम् ।
शुद्धपूर्वां दिशं मण्डपार्थे प्रसाधयेद् यथा ॥३४॥
सूत्रेण वर्तुलं कृत्वा मध्ये शंकुं प्ररोपयेत् ।
उदयाऽस्तसमयस्य रेखाभ्यां साधयेद् दिशम् ॥३५॥
अष्टदशद्वादशषोडशाऽष्टादशहस्तकः ।
षोडशादिस्तंभयुक्तो विंशतिहस्तकोऽपि वा ॥३६॥
वितस्त्युच्छ्रायतलवान् गजोच्छ्रायतलोऽपि वा ।
द्वितीये मण्डपे कार्ये चाद्यमण्डपमानतः ॥३७॥
तावद्धस्तप्रमाणं च त्यक्त्वा कार्योऽन्यमण्डपः ।
मण्डपे नवभागे च मध्यभागा तु वेदिका ॥३८॥
मण्डपस्य तृतीयांशा वेदिका मध्यगा मता ।
अष्टांगुलाधिकद्विहस्तप्रमाणमितानि वै ॥३९॥
चतुर्द्वाराणि रम्याणि तोरणाद्यैर्युमन्ति च ।
कर्तव्यान्यथ च ध्वजान् कथयामि निबोध मे ॥४०॥
अष्टध्वजा रोपणीयाः पूर्वादिक्रमतो यथा ।
द्विद्विगजायताः पंचपंचगजप्रलम्बनाः ॥४१॥
पूर्वे पीतो हस्तिचित्र इन्द्रध्वजः स उच्यते ।
अग्नौ रक्तश्चोरणाऽऽस्यचित्रवानग्निदैवतः ॥४२॥
दक्षे कृष्णो महिषाढ्यो यमध्वज सः उच्यते ।
नैर्ऋत्ये नीलवर्णश्च सचित्रो राक्षसो ध्वजः ॥४३॥
पश्चिमे श्वेतवर्णश्च मकरास्यश्च वारुणः ।
वायौ हरितो मृगवान् वायुध्वजः स उच्यते ॥४४॥
उत्तरे श्वेतवर्णश्च हस्तिचिह्नः कुबेरकः ।
ईशाने श्वेतवर्णश्च वृषचित्रयुतो ध्वजः ॥४५॥
दशहस्तदीर्घवंशशीर्षे धृत्वाऽर्पयेद्धि तान् ।
वंशा भूमौ रोपणीया दार्ढ्यस्य हेतवे खलु ॥४६॥
मण्डपस्य मध्यभागे सप्तहस्तसुदीर्घकः ।
त्रिहस्तायत एवापि किंकिणीजालकान्तकः ॥४७॥
मिश्ररंगश्चामराढ्यः प्रदातव्यः शुभो मतः ।
दशहस्तवंशशीर्षे सुदृढः शोभनो भवेत् ॥४८॥
सप्तसप्तहस्तदीर्घा एकैकहस्तकाऽऽयता-।
त्रिकोणाकृतिका तत्तदायुधाढ्या च वंशगा ॥४९॥
वज्रशक्तिदण्डखड्गपाशांकुशगदास्तथा ।
त्रिशूलं चेति क्रमशो बोध्यान्यायुधकानि च ॥५०॥
पूर्वोक्तरंगयुक्ताश्च पताकास्तु समन्ततः ।
पताका नवमी श्वेता मध्ये चेशानपूर्वयोः ॥५१॥
पुष्पाद्यैः पूजयित्वा तां रोपयेद् दण्डशीर्षसु ।
अपि कुण्डविधिं वच्मि मण्डपान्तरभूमिषु ॥५२॥
दशहस्तेभ्य आरभ्य षोडशगजसम्मिते ।
वेदीं मण्डपमध्ये च कुण्डं कुण्डाँस्तथा शुभान् ॥५३॥
पञ्चाऽष्टौ नव वा कुर्यात् पूर्वादिक्रमशः खलु ।
पूर्वे चतुष्कोणकं च योन्याकारं तथाग्निके ॥५४॥
अर्धचन्द्रं दक्षिणे तु नैर्ऋत्ये तु त्रिकोणकम् ।
पश्चिमे वर्तुलं कुर्याद् वायौ षट्कोणमेव च ॥५५॥
उत्तरेऽष्टदलपद्माभमष्टास्रकमीशिनि ।
वृत्तो वा चतुरस्रो वा पूर्वेशानसुमध्यके ॥५६॥
आचार्यं कुण्डनामाऽसौ सदिक्पालादिकुण्डवान् ।
यद्वा कुर्यात् पञ्चकुण्डीः पूर्वे सा चतुरस्तिका ॥५७॥
अर्धचन्द्रसमा दक्षे वृत्ता तु पश्चिमे च सा ।
उत्तरे पद्मरूपा च ईशाने वर्तुलाऽथवा ॥५८॥
चतुरस्रा च कर्तव्या रूपान्तरप्रभेदतः ।
एक एव यदीष्टः सः चतुरस्रो मतो हिः सः ॥५९॥
पश्चिमे चोत्तरे वा चैशाने वा कार्य एव सः ।
सपादगजदूरे वै वेद्याः सर्वे च कुण्डकाः ॥६०॥
यद्वा वेदीचतुर्भागाऽन्तरालाऽन्ते मता हि ते ।
चतुरस्रो ब्रह्मणानां क्षत्रियाणां तु वर्तुलः ॥६१॥
अर्धचन्द्रः स वैश्यानां शूद्राणां स त्रिकोणकः ।
यद्वा चतुष्कोण एव सर्वेषां वर्तुलोऽथवा ॥६२॥
नारीणां योनिकुण्डो वै सम्मतः सर्वथा शुभः ।
मेखलायोनियुक्तश्च हस्तमात्रो हि कुण्डकः ॥६३॥
होमायुतं हस्तमात्रे लक्षार्धे तु द्विहस्तके ।
लक्षहोमं त्रिहस्ते च दशलक्षं चतुष्किके ॥६४॥
त्रिंशल्लक्षं पञ्चहस्ते कोट्यर्धे तु षडस्रके ।
सप्तकेऽशीतिलक्षं च कोटिहोमं गजाष्टके ॥६५॥
पञ्चाशद्धवने कुर्यादेकविंशतिकांगुलम् ।
शतहोमे सार्धद्वाविंशतिकांगुलकं तथा ॥६६॥
सहस्रहवनार्थे तु हस्तैकमानवान्मतः ।
होमाऽयुताय द्विगजो लक्षे चतुर्गजात्मकः ॥६७॥
षड्हस्तो दशलक्षार्थे कोटिहोमार्थमेव तु ।
अष्टहस्तो दशहस्तोऽथवा षोडशहस्तकः ॥६८॥
सूक्ष्मं हविस्तिलघृतं मध्यं द्राक्षायवादिकम् ।
स्थूलं बिल्वं नारिकेलं समिधादि प्रकीर्तितम् ॥६९॥
यादृशं तु भवेद् द्रव्यं तथा कुण्डोऽप्यपेक्षितः ।
यद्वा कुण्डं प्रतिलक्षं गजमानं विवर्धयेत् ॥७०॥

दशलक्षप्रपर्यन्तं दशहस्तं विधापयेत् ।
यद्वा सप्तगजः पञ्चाशल्लक्षहवनार्थकः ॥७१॥
दशलक्षहवनाय पञ्चहस्तमितोऽपि वा ।
विंशतिलक्षहोमार्थं षड्गजः कुण्डको मतः ॥७२॥
लक्षार्धहवनार्थं त्रिहस्तकः कुण्ड इत्यपि ।
कुण्डस्य गाधता क्षेत्रसमा समेखला मता ॥७३॥
विनापि मेखलां समा गाधताऽपि प्रकीर्तिता ।
चतुर्विंशत्यंशके द्वादशांशः कुण्डकण्ठकः ॥७४॥
एका द्वे तिस्र एता वा द्वे तिस्रः पञ्च मेखला ।
क्षेत्रभागाष्टके पञ्चभागां गाधां खनेत् ततः ॥७५॥
त्रिभागे मेखलाश्चोर्ध्वे तिस्रः कार्या विधानतः ।
ऊर्ध्वा चतुरंगुला च मध्या त्र्यंगुलका मता ॥७६॥
निम्ना भागद्वयाढ्या च मेखला शुभदा मता ।
चतुरस्रं गजमात्रं चतुरंगुलकोच्छ्रयम् ॥७७॥
एकांगुलोच्छ्रयं वापि स्थण्डिलं होमवेदिका ।
विशालायां वेदिकायाम् एकद्वित्रिगजायतम् ॥७८॥
सर्वतोभद्रकं नाम मण्डलं कार्यमेव च ।
अष्टौ द्वात्रिंशदेवाऽपि चतुष्षष्टिश्च वा द्विजाः ॥७९॥
ऋत्विजो वैदिकाश्चाभिमन्त्रणीयाः क्रियाविदः ।
मण्डपस्य त्रिभागेन चोत्तरे स्नानमण्डपः ॥८०॥
तत्र वै स्थण्डिले शैले वालुके छाययान्विते ।
प्रतिमाः स्नपयितव्याः पञ्चगव्यैः कषायकैः ॥८१॥
स्नापयेच्छतकलशवारिभिर्वल्कलान्विताः ।
वेदमन्त्रैश्च वादित्रैर्गीतिमंगलकीर्तनैः ॥८२॥
वेदीपार्श्वे मण्डपाधो वस्त्रेणाच्छादयेत् सुरान् ।
तुलामारोपयेद् वेद्यामुत्तरादौ च तां न्यसेत् ॥८३॥
कलशं तु शिरोदेशे पादस्थाने कमण्डलुम् ।
व्यजनं पृष्ठदेशे च दर्पणं वामभागके ॥८४॥
वज्रवैदूर्यमुक्ताश्च त्विन्द्रनीलं सुनीलकम् ।
पुष्परागं च गोमेदं प्रवालं पूर्वदिक्क्रमैः ॥८५॥
सुवर्णं रजतं ताम्रं कांस्यं रीतिं च सीसकम् ।
वंगं लोहं च पूर्वादौ क्रमाद् धातूनिहाऽर्पयेत् ॥८६॥
वज्रं वह्निशिखां सहदेवीं तुलसीपत्रकम् ।
इन्द्रवारुणिकां शंखावलीमुद्यावलीं तथा ॥८७॥
स्वरितां पूर्वक्रमतश्चौषधीःस्थापयेत्तथा ।
यवं व्रीहिं च कङ्गुं च जवरीं च तिलानि च ॥८८॥
अक्षकान् मुद्गकान् गोधूमकान् पूर्वादितः क्रमात् ।
महोत्सवं नृत्यगीतनैवेद्यारात्रिकादिभिः ॥८९॥
अंगन्यासादिभिश्चापि प्रतिष्ठाविधिमाचरेत् ।
देवार्पितं वस्त्रभूषादिकं ददेत्तु शिल्पिने ॥९०॥
यज्ञार्पितं समग्रं तु दद्यादाचार्यरूपिणे ।
प्रासादे देवतान्यासान् प्रत्येकांगेषु कारयेत् ॥९१॥
वाराहं खरशिलायां नागं तु वारिमार्गगे ।
कुंभीषु जलदेवं च पुष्पकण्ठेऽसुराँस्तथा ॥९२॥
जाड्यकुंभे नन्दिनीं च विष्णुं कर्णिकयोस्तथा ।
गजपीठे गणेशं च ह्यश्वपीठे तथाऽश्विनौ ॥९३॥
नरपीठे नगाँश्चैव क्षुरके मेदिनीं तथा ।
सन्ध्यात्रयं भद्रकुंभे कलशे पार्वतीं तथा ॥९४॥
कपोताल्यां च गन्धर्वान् मञ्चिकायां सरस्वतीम् ।
जंघायां तु दिशांपालान् उद्गमे चेन्द्रदेवताम् ॥९५॥
सावित्रीं तु भरण्यां च शिरावट्यां तु देविकाः ।
विद्याधरीं पुष्पकण्ठे सुराँश्चायन्तरालके ॥९६॥
पर्जन्यं कूटच्छाद्ये च शाखयोः सूर्यचन्द्रकौ ।
उत्तरंगे त्रिदेवाँश्चोदुम्बरे यक्षकं तथा ॥९७॥
शंखावटेऽश्विनीपुत्रो कोल्यां शेषं क्ष्मां पट्टके ।
स्तंभे पर्वतदेवाँश्च घूम्मटे व्योमदेवताः ॥९८॥
मध्ये मुख्यं च देवं च परनाले तु जाह्नवीम् ।
शिखरस्योरुशृंगेषु ब्रह्मविष्णुहरेश्वरान् ॥९९॥
इन्द्रं चेति पञ्चदेवान् प्रासादे त्रीन् सुरेश्वरान् ।
शिखरे चेश्वरं देवं कलशे त्विन्द्रमेव च ॥१००॥
ग्रीवायाममरं चामलसारे तु निशाचरम् ।
पद्मपत्रे तु पद्माक्षं कलशो तु सदाशिवम् ॥१०१॥
छाद्यवामेवऽघोरदेवं दक्षे तत्पुरुषं तथा ।
भैरवं स्थापयेच्चापि प्रासादे पञ्चभागके ॥१०२॥
देवं प्रतिष्ठितं पूर्वं ब्रह्मकन्या विलोकयेत् ।
ततोऽन्ये दर्शनं कुर्युः साधुसाध्व्यो विरागिणः ॥१०३॥
ततो वै गृहधर्माणस्तेन देवप्रतोषणम् ।
प्रार्थयेद् यजमानस्तु पुण्यं वै सूत्रधारतः ॥१०४॥
सूत्रधारो वदेच्छ्रेष्ठिन्नक्षयं भवतात्तव ।
सूत्रधाराय शिल्पिभ्यौ दद्यात् पूजोपदादिकम् ॥१०५॥
महोत्सवं भोजनाद्यैः कुर्यात् कथादिभिस्तथा ।
इत्येवं राधिके कर्म ते मयोक्तं हरेर्मतम् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे ब्रह्मवेददेवदेवीप्रभृतिमूर्तिमानोपमण्डप कुण्ड-संक्षिप्तप्रतिष्ठादिप्रदर्शननामा द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! कृष्णनारायणः परेश्वरः ।
देवायतनकायाऽऽह वास्तुं तं ते वदामि च ॥ १ ॥
कूर्मशिलास्थापनं च द्वारशाखादिरोपणम् ।
पद्मशिलास्थापनं च ध्वजापुरुषवेशनम् ॥ २ ॥
घण्टायाः स्थापनं चापि ध्वजस्य स्थापनं तथा ।
देवप्रतिष्ठानमिति पुण्याहसप्तकं मतम् ॥ ३ ॥
वास्तुपूजा हि कर्तव्या तत्र तत्र पुनः पुनः ।
शान्तिकर्माणि तान्येव चतुर्दश वदामि ते ॥ ४ ॥
भूमिखाते कूर्मदाने शिलादाने च सूत्रके ।
द्वारदाने खुरदाने कुंभीदाने च पाटके ॥ ५ ॥
पाद्मशैले शुकनासे ध्वजपुंसि च घण्टके ।
कलशे ध्वजदाने च प्रतिष्ठायां मतानि वै ॥ ६ ॥
एकदा तु परब्रह्म स्वं रूपं दृश्यमाचरत् ।
तस्मात्तेजोऽनन्तकोटिसूर्याभं समजायत ॥ ७ ॥
तत्र योगीश्वरो देवः संहारधर्मवाँस्तदा ।
समभवत् तल्ललाटात् स्वेदबिन्दुरभूत्तदा ॥ ८ ॥
मूर्तपूरुषरूपं तद् यदा चाऽभूद् भयंकरम् ।
तदा देवैर्ब्रह्मभावैर्न्यस्तं भूमावधोमुखम् ॥ ९ ॥
तस्य वास्तोः पूरुषस्य नैर्ऋतायां तदाऽभवन् ।
पादौ जंघे च जानू च तथेशान्यां शिरोऽभवत् ॥१०॥
दक्षकफोणिका चाग्नौ वामा वायौ तदाऽभवत् ।
अस्य देहे पञ्चचत्वारिंशद्देवास्तदाऽभवन् ॥११॥
सर्वदेवयुतः पूजां प्राप्तः स सुखदो भवेत् ।
चतुष्षष्टिविभागोऽपि चतुरस्रोऽपि पूज्यते ॥१२॥
एकाशीतिविभागोऽपि चतुरस्रः स पूज्यते ।
शतभागयुतश्चापि चतुरस्रः स पूज्यते ॥१३॥
अष्टावष्टौ सुराश्चास्य प्रतिकाष्ठं वसन्ति च ।
गजादेकात्तु पञ्चाशद्गजात्मको विधीयते ॥१४॥
द्वात्रिंशन्मण्डलान्येव कृत्वाऽभितः प्रपूजयेत् ।
मणिभिः स्वर्णरूप्याभ्यां विद्रुमैश्च फलैरपि ॥१५॥
चतुष्षष्टिपदं शतपदं वास्तुं च वा लिखेत् ।
पिष्टेन वाऽक्षतैश्चापि कृत्वा च बलिमर्पयेत् ॥१६॥
चतुष्षष्टिपदं वास्तुं दर्शयामि निबोध मे ।
चतुरस्रीकृते क्षेत्रे ह्यष्टभागविभाजिते ॥१७॥
मध्ये ब्रह्मा चतुर्भागे तत्पूर्वे चाऽर्यमा तथा ।
दक्षे वैवस्वतो मैत्रगणश्च पश्चिमे तथा ॥१८॥
पृथ्वीधरश्चोत्तरे च तथेशान्यां द्विधाकृते ।
आपश्च आपवत्सश्च तथाग्नौ च द्विधा कृते ॥१९॥
सावित्रश्च सविता च तथा द्वेधा तु नैर्ऋते ।
इन्द्रो जयश्च च तथा वायावपि द्विधा कृते ॥२०॥
रुद्रश्च राजयक्ष्मा च स्थापनीयास्ततः परम् ।
अभितः सर्वभागेषु प्रदक्षिणक्रमाच्छृणु ॥२१॥
इशान्यामीशदिती द्वे पर्जन्यो दक्षकर्णके ।
स्कन्धे जयस्तथा चेन्द्रः सूर्यः सत्यो भृशस्ततः ॥२२॥
आकाशाग्नी द्वावग्नौ च पूषा वितथ इत्यतः ।
गृहक्षतो यमश्चापि गन्धर्वश्च भृंगस्ततः ॥२३॥
मृगपितरावैके च नैर्ऋते नन्दिकस्ततः ।
सुग्रीवः पुष्पदन्तोऽपि वरुणश्चासुरस्तथा ॥२४॥
शेषश्चेति ततो वायौ पापरोगौ व्यवस्थितौ ।
ततो नागश्च मुख्यश्च भल्लाटश्च कुबेरकः ॥२५॥
शैलश्चाऽदितिरित्येवं वामस्कन्धे स्थिताऽन्तिमा ।
त एते पूजनीया वै चतुष्षष्टिविभागके ॥२६॥
एकाशीतिविभागे तु कोणे द्वौ द्वौ सुरौ तु न ।
एकैक एव देवः स्यात् तद्यथा प्रवदामि ते ॥२७॥
ईशः पर्जन्यकश्चापि जयश्चेन्द्रश्च सूर्यकः ।
सत्यो भृशस्तथाऽऽकाशोऽग्निः पूषा वितथस्तथा ॥२८॥
गृहक्षतो यमश्चापि गन्धर्वश्च भंगो मृगः ।
पितृ नन्दी सुग्रीवकः पूष्यश्च वरुणोऽसुरः ॥२९॥
शेषः पापश्च रोगश्च नागो मुख्यो भल्लाटकः ।
कुबेरश्च तथा शैलोऽदितिर्दितिस्तथेति च ॥३०॥
चरकी बहिरीशानेऽग्नौ वहिस्तु विदारिका ।
पूतना बहिर्नैर्ऋत्ये वायौ पापा बहिर्मता ॥३१॥
चतुरस्रीकृते क्षेत्रे नवभागविभाजिते ।
मध्ये नवपदो ब्रह्मा षट्पदाश्चार्यमादयः ॥३२॥
कोणे तु पदमध्यस्था द्विपदाः परिकीर्तिताः ।
अभितः पदिका ज्ञेया एकाशीतिपदे सुराः ॥३३॥
अथ वास्तुं शतपदं वच्मि निबोध राधिके ।
चतुरस्रीकृते क्षेत्रे दशभागविभाजिते ॥३४॥
कोणाः सर्वे बहिष्ठास्तु रिक्ता देवास्तु दक्षगाः ।
मध्ये ब्रह्मा षोडशांशः षडंशाश्चार्यमादयः ॥३५॥
आपाद्याश्च द्विद्विभागाः स्थाप्याः पूज्याः सदा शुभाः ।
ईशो मूर्ध्नि च पर्जन्यो दक्षकर्णे स्थितः सदा ॥३६॥
जयः स्कन्धे इन्द्रसूर्यसत्यभृशाऽम्बरा भुजे ।
सावित्रः सविता हस्तेऽग्न्यादिपित्रन्तकाः पदे ॥३७॥

नन्द्यादिरोगकान्ताश्च वामे पदे भवन्ति च।
वामे सक्थिनि मैत्रश्च विवस्वान् दक्षसक्थिनि ॥३८॥
गुह्ये चेन्द्रो गुदाभागे जयन्तश्चेति कीर्तितौ।
रुद्रश्च राजयक्ष्मा द्वौ वामहस्ते मतौ तथा ॥३९॥
नागो मुख्यश्च भल्लाटः कुबेरः शैलकोऽदितिः।
त एते वामभुजगा दितिः कर्णे तु वामके ॥४०॥
आपः कण्ठे आपवत्सो हृदि पार्श्वेऽर्यमा मतः।
दक्षेऽथ वामके पार्श्वे पृथ्वीधरो मतस्तथा ॥४१॥
ईशाने चरकी बाह्ये चिपिच्छा पूर्वतो मता।
विदारिकाऽग्निकोणे च दिक्पाला दक्षिणे तथा ॥४२॥
नैर्ऋत्ये पूतना प्रोक्ता पश्चिमे स्कन्ध एव च।
वायौ पापा राक्षसी चोत्तरे तथा कुबेरकः ॥४३॥
एवं पूज्या वास्तुदेहे देवताः शुभदा मताः।
प्रासादस्योत्तरे वेशाने वा वेदीं द्विहस्तकाम् ॥४४॥
कृत्वा तत्र च कौशेयं श्वेतवस्त्रं समास्तरेत्।
तत्राऽक्षतस्वस्तिकं च कृत्वा पीताम्बरं ततः ॥४५॥
आस्तीर्याऽष्टदलं पद्मं तत्रैवाऽक्षतजं चरेत्।
पीतोपरि ततो रक्तं वस्त्रमास्तीर्य तत्र च ॥४६॥
वास्तुरेखाः स्वर्णशलाकया वा यवपिष्टजाः।
कृत्वा ब्रह्मस्थले मध्ये वारिकलशमान्यसेत् ॥४७॥
गंगे यमुने विरजे गोदावरि सरस्वति।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं वह ॥४८॥
विष्णुश्चाग्रे शिवो मध्ये तले ब्रह्मा विराजते।
मातरः परितः कुक्षौ समुद्रास्तीर्थकोटयः ॥४९॥
सर्वे वेदाः पत्ररूपा रत्नरूपा वसुन्धरा।
फलानि श्रीफले सन्ति स्थापयामि स्थिरो भव ॥५०॥
'ओं श्रीसिद्ध्यै नमः ओं श्रीब्रह्मणेऽपि नमो नमः।
ओं श्रीब्रह्मासने रम्ये तिष्ठ श्रीगुरवे नमः ॥५१॥
ओं नमस्ते वासुदेव विश्वकर्मन्नमोऽस्तु ते।
शुद्धान्यर्चनद्रव्याणि जलेन प्रोक्षितानि वै ॥५२॥
सर्वं शुद्धं जायते श्रीकृष्णनारायणस्मृतेः।
ओं क्लीं सिद्ध्यै नमश्चात्राऽऽगच्छ स्थाने स्थिरा भव ॥५३॥
ओमर्यम्णे नमश्चात्राऽऽगच्छ स्थाने स्थिरो भव।
विवस्वते नम ओमागच्छ चात्र स्थिरो भव ॥५४॥
ओं मित्राय नम ओं पृथ्वीधराय स्थिरो भव।
ओम् ऋद्ध्यै नम आगच्छ स्थानेऽत्र त्वं स्थिरा भव ॥५५॥
नम आपाऽऽपवत्साभ्यामागछतं स्थिरौ तथा।
सावित्रीसवितृभ्यामों नम आगच्छतं स्थिरौ ॥५६॥

इन्द्रजयाभ्यां नम ओमागच्छतं स्थिरौ तथा।
नम ओं रुद्रयक्ष्मभ्यामागच्छतं स्थिरौ तथा ॥५७॥
ओं ह्रीं श्रीं ईशाय नम आगच्छात्र स्थिरो भव।
पर्जन्याय जयायाऽपीन्द्राय सूर्याय ओं नमः ॥५८॥
सत्याय च नमो भृशाथाऽऽकाशाय च ओं नमः।
आगच्छाऽस्मिन् समागच्छ नैजे स्थाने स्थिरो भव ॥५९॥
ओं क्लीं अग्नये नम आगच्छ स्थाने स्थिरो भव।
पूष्णे विरोचनाय ओं गृहक्षताय ओं नमः ॥६०॥
ओं यमाय नमो गन्धर्वाय भृंगाय ओं नमः।
ओं मृगाय नम आगच्छाऽस्मिन् स्थाने स्थिरो भव ॥६१॥
ओं क्लीं श्रीं पितृभ्यो नम आगच्छत स्थिरास्तथा।
दौवारिकाय च सुग्रीवाय नमः स्थिरो भव ॥६२॥
पुष्पदन्ताय च वरुणाय नमः स्थिरो भव।
ओम् असुराय शेषाय पापाय च स्थिरो भव ॥६३॥
ओं क्लीं श्रीं रोगाय नम आगच्छात्र स्थिरो भव।
ओं नागाय च मुख्याय भल्लाटाय स्थिरो भव ॥६४॥
नमः सोमाय शैलायाऽदित्यै दित्यै नमः स्थिरा।
ओं चिपिच्छायै नम आगच्छात्र त्वं स्थिरा भव ॥६५॥
ओं विदार्यै च जंभायै पूतनायै च ओं नमः।
स्कन्दायै पापराक्षस्यै यमाय ओं नमोऽत्र च ॥६६॥
ओं चरक्यै नम आगच्छात्र स्थाने स्थिरा भव।
ओं श्रीमन्महागणाधिपतये ते नमो नमः ॥६७॥
इष्टदेवेभ्यश्च कुलदेवताभ्यो नमो नमः।
स्थानवास्तुदेवताभ्यः सर्वेभ्यश्च नमो नमः ॥६८॥
एतत्कर्मप्रधानाद्यदेवताभ्यो नमो नमः।
कल्पेऽत्र वत्सरे मासे दिने मदिष्टसिद्धये ॥६९॥
देवाद्यवास्तुदेवस्य करिष्ये पूजनं नमः।
पंचामृतैर्जलैर्देवं संस्नाप्य ब्रह्मसूत्रकम् ॥७०॥
वस्त्रं भूषा पुष्पमालां धूपं दीपं निवेदनम्।
अष्टभ्यश्च बलिं चाचमनं ताम्बूलकं तथा ॥७१॥
नीराजनं प्रदक्षिणं दण्डवन्नमनादिकम्।
तत ओं ह्रीं श्रीं कुरु कुरु स्वाहेति जपेन्मनुम् ॥७२॥
नम ओं वास्तुदेवाय चैकविंशतिकं जपेत्।
ओं पूर्वे हेतकभैरवाय नमोऽथ दक्षिणे ॥७३॥
आदिवैतालभैरवाय नमोऽथ च पश्चिमे।
कालभैरवाय नम उत्तरेऽथ नमोऽस्तु च ॥७४॥
एकपादभैरवाय नम ओम् ऊर्ध्वकेऽथ च।
स्वच्छन्दभैरवायाऽस्तु नम आग्नेयकोऽथ च ॥७५॥

त्रिपुरान्तकभैरवाय नमोऽथ निर्ऋत्यके ।
अग्निजिह्वकभैरवाय नमोऽथ च वायुके ॥७६॥
वायुदेवाय नमोऽथेशाने ईशानकाय च ।
नमोऽथ ओं च पाताले विष्णवे च नमो नमः ॥७७॥
अर्घ्यं दत्वा क्षमां प्रार्थयित्वा वास्तुं नमेत् ततः ।
दिक्पालान् क्षेत्रपालाँश्च गणेशं चण्डिकां तथा ॥७८॥
समर्चयेत् ततः प्रतिष्ठादि सर्वं समाचरेत् ।
ओं आं ईं क्लीं महेन्द्राय नमः स्थाने स्थिरो भव ॥७९॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्णेन्द्राय स्वाहा ।
ओं ह्रीं ह्रों ह्रौं वह्नये च नमः स्थाने स्थिरो भव ॥८०॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्णाऽग्नये स्वाहा ।
ओं क्रीं क्रौं क्रू कालमूर्तये नमोऽत्र स्थिरो भव ॥८१॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं ऐं क्षों क्षीं मृत्यवे च नमः स्थाने स्थिरो भव ॥८२॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं श्रां श्रीं श्रूं वं विं वरुणाय नमः स्थिरो भव ॥८३॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं ऐं विश्वाधिनाथाय नमः स्थाने स्थिरो भव ॥८४॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं ह्रीं श्रीं कुबेराय च नमः स्थाने स्थिरो भव ॥८५॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं क्लीं क्लीं क्लूं विश्वंभराय च नमः स्थिरो भव ॥८६॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं ब्रां ब्रीं ब्रूं ब्रह्मणे च नमः स्थाने स्थिरो भव ॥८७॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
ओं श्रां श्रीं श्रीपतये नमोऽत्र स्थाने स्थिरो भव ॥८८॥
क्षेत्रपालैः सह बलिं गृह्ण गृह्ण नमः स्वाहा ।
एवं प्रपूजयेत् पश्चात् प्रतिष्ठाकार्यमावहेत् ॥८९॥
माघे च फाल्गुने धनायुष्यारोग्यप्रदा हि सा ।
ज्येष्ठे वैशाखके चापि प्रतिष्ठा द्रव्यपुत्रहा ॥९०॥
दक्षिणायनगे सूर्ये वाराहं मातृकास्तथा ।
भैरवं वामनं देवीं नृसिंहं स्थापयेत्तथा ॥९१॥
श्रावणे शांकरं लिंगमाश्विने जगदम्बिकाम् ।
मार्गशीर्षे हरिं नारायणं पौषे तु सर्वकान् ॥९२॥
शनौ रवौ शशांके च बुधे गुरौ च शुक्रके ।
द्वारोच्छ्रायोऽष्टधा कार्यश्चाष्टमं परिहाय च ॥९३॥
सप्तभागात्मशाखाया भागत्रयं पुनश्चरेत् ।
भागद्वयं प्रतिमा स्यात् लम्बेति सर्वनिर्णयः ॥९४॥
द्वारं विभज्य नवधा भागैकं च परित्यजेत् ।
अष्टभागं त्रिधा कृत्वा द्विभागा प्रतिमा मता ॥९५॥
गजाच्चतुर्गजान्तं तु षडंगुला गजे गजे ।
ततो दशगजान्तं तु गजे त्र्यंगुलवर्धनम् ॥९६॥
पञ्चाशद्गजपर्यन्तमेकांगुलप्रवर्धनम् ।
अत्र विंशत्यंशशाऽऽधिकत्वे श्रेष्ठा प्रासादमानतः ॥९७॥
प्रासादार्थप्रमाणेन कोली ज्येष्ठाऽपि कथ्यते ।
इत्येवं देवतायन ! भवानास्ते तथाविधः ॥९८॥
मन्दिरं मम रूपं वै शृणु ते रूपमर्थवत् ।
प्रासादो देवरूपोऽस्ति पादौ पादशिलाः स्मृताः ॥९९॥
जंघा तु जगती बोध्या स्तंभा वै जानवः स्मृताः ।
सक्थि कम्मानिका बोध्या मेढ्रं कुंभादधस्तलम् ॥१००॥
प्रणालं तु गुदाभागो घूम्मटश्चोदरं मतम् ।
देवस्थानं नाभितुल्यं पीठिका हृदयं मतम् ॥१०१॥
प्रतिमा जीव एवाऽसौ शिखरं वक्ष एव च ।
अमलसारः कण्ठश्च शुकनासस्तु नासिका ॥१०२॥
दीपश्चक्षुः गवाक्षः कर्णः स्कन्धः कायपालिका ।
कलशो मस्तकं ध्वजा केशा भूतानि धातवः ॥१०३॥
प्रलेपो मांसमेवाऽत्र मेदश्च वसुधाद्रवाः ।
अस्थीनि च शिलाः सर्वा वस्त्रं चूर्णपटात्मकम् ॥१०४॥
एवं विद्धि स्वकं देहं देवायतन ! भक्तराट् ।
इत्येवं राधिके ! कृष्णनारायणो जगाद तम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे वास्तुपुरुषतद्देवादिस्थापनाप्रभृति-निरूपणनामा त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके चाऽग्रे प्रतिष्ठादिविधानकम् ।
अनादिश्रीकृष्णनारायणो यदाह दैवतम् ॥ १ ॥
यजमानः प्रगे स्नात्वाऽऽचार्यहस्ते प्रदाय च ।
पूजासंभारकान् स्त्रीभिः सुवासिनीभिरन्वितः ॥ २ ॥
प्रासादोऽग्रे मण्डपस्य भूमिमागत्य प्रागदिशि ।
पादप्रक्षालनं कृत्वाऽऽसने समुपविश्य च ॥ ३ ॥
आचमनं तथा प्राणायामं कृत्वा ततः परम् ।
बद्धशिखः सपत्नीको ध्यायन् गणपतिं ततः ॥ ४ ॥
प्राङ्मुखो वोदङ्मुखो वा संकीर्त्य देशकालकौ ।
परमेश्वरप्रीत्यर्थं प्रतिष्ठाकार्यसिद्धये ॥ ५ ॥

गणेशपूजनं कुर्यादाचार्यवरणादिकम् ।
पादप्रक्षालनं पादपूजनं तस्य चाचरेत् ॥ ६ ॥
चन्द्रकाऽऽक्षतपुष्पाद्यैः समर्च्य प्रणमेद्धि तम् ।
अस्य देवस्य वै रम्ये प्रासादे कर्मसिद्धये ॥ ७ ॥
प्रतिष्ठासिद्धये मण्डपादिकार्यादिसिद्धये ।
भवन्तं श्रीहरेर्भक्तमाचार्यत्वेन संवृणे ॥ ८ ॥
ओं वृतोऽस्मीत्यावदेच्चाचार्यः सर्वार्थपण्डितः ।
यजमानश्च बध्नीयादाचार्यकरकंकणम् ॥ ९ ॥
आचार्यपूजनं कृत्वा भूमिमावाहयेत्ततः ।
आगच्छ सर्वकल्याणि वसुधेऽत्र स्थिरा भव ॥१०॥
आयाहि वरदे धात्रि यज्ञेऽस्मिन् शुभदायिनि ।
ओं महीद्यौः पृथिवी नः इमं यज्ञं मिमिक्षताम् ॥११॥
पिपृतान्नो भरिमभिः सर्वरसाऽन्वितेक्षिते ।
एवमावाह्य पृथिवीं स्मृत्वा च सर्वदेवताः ॥१२॥
ओं विश्वे देवास इह मादयन्ताम् ओं प्रतिष्ठ ।
इति क्षितिं प्रतिष्ठाप्य बद्धाऽञ्जलिं च प्रार्थयेत् ॥१३॥
यज्ञभागं प्रतीच्छस्व प्रणमामि क्षमां कुरु ।
तवोपरि मण्डपादि भविष्यति मखे हिता ॥१४॥
भवेति तां नमस्कृत्य प्रोक्षयेत् पञ्चगव्यकैः ।
कुशैश्च हरितैः कृत्वा प्रोक्षयेच्च वदेत्तथा ॥१५॥
ओमिदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे स्वाहा त्वां च हवामहे ॥१६॥
ओं शन्नो मित्रः शं वरुणः शन्नो भवत्वर्यमा ।
शं न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः ॥१७॥
ओं देवस्य त्वां सवितुः प्रसवेन तथाऽश्विनोः ।
बाहुभ्यां च कराभ्यां च पूष्णो वाचा सरोजुषः ॥१८॥
अग्नेः साम्राज्यकेनाऽभिषिञ्चामि प्रोक्षिताऽसि भूः ।
इत्युक्त्वा च गृहीत्वा च श्वेतसर्षपकान् करे ॥१९॥
ईशानाभिमुखो विकिरेत् ततः सर्वतोमुखम् ।
ओं भूतानि राक्षसा वा यत्र तिष्ठन्ति केचन ॥२०॥
ते सर्वेऽप्यपसर्पन्तु विष्णुयागस्य भूमितः ।
भूतप्रेतपिशाचाद्याश्चापक्रामन्तु दूरतः ॥२१॥
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।
ये भूता विघ्नकर्तारस्तेऽपयान्तु हराज्ञया ॥२२॥
इत्यभिधाय सर्वत्र विकीर्य श्वेतसर्षपान् ।
संप्रोक्ष्य पञ्चगव्येन दद्यादर्घ्यं भुवे यथा ॥२३॥
गन्धदूर्वाफलपुष्पयवान्वितं जलं शुभम् ।
ताम्रपात्रे गृहीत्वैव धृतशुक्लाम्बरद्वयः ॥२४॥
उदङ्मुखश्चार्घ्यहस्तोऽर्घ्यं दद्यात् सुकृताञ्जलिः ।
गृहाणाऽर्घ्यं जगन्मातः प्रसन्ना भव सर्वदा ॥२५॥
एवं सम्पूज्य पृथिवीं भूतशुद्धिं विधाय च ।
भद्रपीठे चाऽऽचर्य वास्तुं प्राचीं संसाधयेद् दिशम् ॥२६॥
समानायां पृथिव्यां वै गणेशं श्रीगुरुं तथा ।
यजन् मानसोपचारैर्ध्यायेच्च कुलदेवताम् ॥२७॥
विप्राय दक्षिणां दत्वा तोषयित्वा तु शिल्पिनम् ।
कुर्याद्वै मण्डपं षोडशहस्तं द्वादशात्मकम् ॥२८॥
दशहस्तं चाऽष्टहस्तं यथावकाशकं च वा ।
तत्र कुण्डं पूर्ववच्च यथोक्तं प्रविधाय च ॥२९॥
तत उत्तरवेद्याश्च चतुष्कोणेषु सर्वथा ।
ईशकोणे ग्रहपीठं चतुस्त्रिंशांगुलात्मकम् ॥३०॥
अग्नौ हस्तं मातृपीठं द्वादशांगुलकोच्छ्रयम् ।
नैर्ऋते वास्तुपीठं च हस्तं द्वादशकोच्छ्रयम् ॥३१॥
वायौ च योगिनीक्षेत्रपालपीठं तु हस्तकम् ।
द्वादशांगुलकोर्ध्वं च प्रकुर्याद्वा यथोचितम् ॥३२॥
अष्टहस्तमितायास्तु धाराया वै घृतस्य च ।
कृते पूर्वस्थले रम्यशिलारोपणमित्यपि ॥३३॥
इष्टिकानां च वा भित्तिर्विधेया शोभना तदा ।
तोरणैश्च पताकाभिश्चतुरस्रं तु मण्डपम् ॥३४॥
प्रागुक्तरूपं कृत्वैव तदुत्तरेऽपि मण्डपम् ।
स्नपनार्थं च कृत्वैव कुर्याच्च वेदिकात्रयम् ॥३५॥
यथायोग्यान् मण्डपाँश्चाद्यदिने संविधाय च ।
हविष्यभोजनः स्याद्वै यजमानः सुपुण्यवान् ॥३६॥
रात्रौ भूशयनो भूत्वा ब्रह्मचारी सुसात्त्विकः ।
प्रातश्चाधिवासनेऽह्नि स्नात्वा तीर्थोदकैस्ततः ॥३७॥
प्रायश्चित्तस्य मुक्त्यर्थं पापधेनुं समर्पयेत् ।
अद्यास्मिन् दिवसे देवप्रासादकर्मयोग्यता ॥३८॥
मयि स्यादिति लाभार्थं पापानां नुत्तये तथा ।
पापधेनुं ब्राह्मणाय ददामीति समर्पयेत् ॥३९॥
स्नात्वा पुनस्तीर्थजलैः सर्वौषधिसमन्वितैः ।
पञ्चगव्ययुतैश्चापि वारुणमन्त्रयोजितैः ॥४०॥
ओं त्वं वारुणी मूर्तिर्वरुणोत्था हि देवता ।
वारुणं सदनं चाऽसि वहाऽऽयुर्मम शोभनम् ॥४१॥
तव पाशाः प्रयान्त्वेव दूरं यज्ञे पतन्तु न ।
अपाशोऽहं देवताभ्यो दास्ये हव्यं विधेहि तत् ॥४२॥
इति स्नात्वा शुक्लपटे धृत्वा गन्धानुलेपनः ।
शुक्लमाल्याम्बरधरः पत्नीयुतोऽतिसात्त्विकः ॥४३॥

यजमानः सर्वसंभारान् धृत्वा शिल्पिभूमितः ।
प्रादक्षिण्येन दैवं वै समानीय सुगीतिभिः ॥४४॥
वादित्रनिनदैश्चापि स्त्रीणां मंगलगीतिभिः ।
शान्तिपाठैः सह चैवागत्य मण्डपसन्निधौ ॥४५॥
प्रविश्य पश्चिमद्वारेणाऽऽसने सन्निधाय च ।
देवं ततो यजमानो दक्षिणद्वारसन्निधौ ॥४६॥
पश्चिमे भद्रपीठे प्रागग्रदर्भेषु प्राङ्मुखः ।
उदङ्मुखः सपत्नीकश्चोपाविशेत् ततः परम् ॥४७॥
संभारान् यज्ञीयकाँश्च दक्षपार्श्वे निधापयेत् ।
कथयामि समासेन संभारान् विविधान् यथा ॥४८॥
प्रत्येकसमिधामष्टोत्तरशतं समर्जयेत् ।
अर्कमुदुम्बरं पिप्पलकं वटं च तूलसीम् ॥४९॥
अपामार्गं पलाशं चामलकीं यज्ञभूरुहान् ।
चन्दनं शिंशपां बिल्वं पिप्पलीं यज्ञभूरुहान् ॥५०॥
तिलानेवंविधान् यथाप्राप्यान् समर्जयेद् द्रुमान् ।
भद्रपीठत्रयं रक्षेत् पुष्पमालाः फुलानि च ॥५१॥
कुंकुमं चन्दनद्रवं कस्तूरीं घनसारकम् ।
अगुरुं गुग्गुलं धूपं धूपपात्रं च दर्पणम् ॥५२॥
घण्टां च पादुकामारार्त्रिकं बलिकणान् बलिम् ।
पायसं भक्ष्यभोज्ये च नैवेद्यं च फलानि च ॥५३॥
पूगीफलानि ताम्बूलं चाज्यं तिला यवाऽक्षताः ।
शर्करा च फलश्रेष्ठान्यपि श्रीफलकानि च ॥५४॥
द्राक्षाश्च कदलान्येव नवरंगादिकान्यपि ।
चत्वारो विष्टराः प्रतिकुण्डं स्रुक्स्रुवकौ तथा ॥५५॥
आसनानि कुंकुमाक्तत्रिसूत्री शोभना तथा ।
श्वेतोर्णासूत्रकं चाऽथ सर्वतोभद्रलब्धये ॥५६॥
श्वेतरक्तनीलपीतकृष्णरंगानि यानि च ।
तथा स्नपनकलशाः पल्लवाः पञ्चजातिकाः ॥५७॥
कदलीस्तम्भवर्याश्च पताका दशसंख्यकाः ।
ध्वजास्तेषां वेणुदण्डा एको मध्यध्वजस्तथा ॥५८॥
वज्रमौक्तिकवैडूर्यशंखस्फटिकपुष्पकाः ।
इन्द्रनीलमहानीलाश्चाष्टरत्नानि यानि च ॥५९॥
मनश्शिलाहरितालाभ्रकक्कृष्णांजनानि च ।
माक्षिककासीसस्वर्णमाक्षिकगैरिकास्तथा ॥६०॥
धात्वष्टकं च तत् सर्वं रक्षयेद् यज्ञकर्मणे ।
यवगोधूमनीवारमुद्गश्यामाकसर्षपाः ॥६१॥
तिलव्रीहय एवैतद् बीजाष्टकं च सन्न्यसेत् ।
सुवर्णं रजतं ताम्रं सीसकं त्रपु चायसम् ॥६२॥
रंगं रीतिर्धात्वष्टकं रक्षयेद् यज्ञकर्मणे ।
मधुपर्कस्य पात्रं च सौवर्णं ताम्रमेव वा ॥६३॥
अर्घपात्रं सुवर्णस्य शलाकां रक्षयेत् तथा ।
कनकं कुलिशं नीलं पद्मरागं च मौक्तिकम् ॥६४॥
तानि कलशरत्नानि स्थापयेन्निजपार्श्वके ।
षोडशद्वारकलशान् अष्टौ तु लोकपाघटान् ॥६५॥
चतुरो वेदिकलशान् वास्तुघटं प्ररक्षयेत् ।
कुण्डसंख्यककलशान् निद्रायाः कलशं तथा ॥६६॥
स्नपनैकाशीतिघटान् शरावाँश्चापि तावतः ।
धारासहस्रकलशौ राजस्थानस्य मृत्तिकाम् ॥६७॥
अश्वस्थानमृदं चापि वल्मीकमृत्तिकां तथा ।
संगममृत्तिकां कूलद्वयमृदं वराहजाम् ॥६८॥
मृदं राजद्वारमृदं रक्षयेदष्टमृत्तिकाः ।
मुरामांसीवचाकुष्टशैलेयहरिद्रास्तथा ॥६९॥
दारुहरिद्राशुण्ठीचम्पकमुस्ताः सर्वौषधीः ।
रक्षयेचापि पञ्चगव्यकं पृथक् पृथक् तथा ॥७०॥
व्रीहियवतिलगोधूमश्यामाकनिवारकान् ।
मुद्गानिति च सप्तापि धान्यानि रक्षयेत्तथा ॥७१॥
शय्यां सोपस्करां श्वेतच्छत्रं च चामरद्वयम् ।
विचित्रं तु वितानं च त्रीन् वै दुकूलपट्टकान् ॥७२॥
ऋत्विग्वरणसामग्रीरुद्वर्तनार्थद्रव्यकम् ।
गोघृतं च गोशृंगोदकं तीर्थोदकं च कम्बुकम् ॥७३॥
शिल्पिदेयानि वस्त्राणि सुगन्धितैलमित्यपि ।
नेत्राञ्जनार्थकं पात्रं सिन्दूरं रक्षयेत् तथा ॥७४॥
आम्रसत्पत्रमालाश्च देवमूर्तीश्च कानकीः ।
नारिकेलफलादीनि रक्षयेद् यज्ञमण्डपे ॥७५॥
एतान् सर्वान् सुसंभारान् निजे तु दक्षिणे स्थले ।
स्थापयित्वाऽऽचमनं च प्राणायामं विधाय च ॥७६॥
गृहीत्वा दक्षिणे हस्ते जलं दर्भादिकं तथा ।
ओम् प्रपुनातु पद्माक्षो नारायणो हरिः प्रभुः ॥७७॥
इत्युक्त्वा सर्वसंभारान् प्रोक्ष्य चात्मानमित्यपि ।
गणेशादीन् सुरान् स्मृत्वा कुर्यात् संकल्पमित्यमुम् ॥७८॥
ब्रह्माण्डेऽत्र स्थले विप्रसन्निधौ वत्सरेऽमुके ।
मासपक्षतिथौ वारे सर्वपापक्षयाय वै ॥७९॥
उद्धर्तुं पूर्वजाँश्चाऽहं सम्पदायुष्यलब्धये ।
भुक्तिमुक्तिसुलाभार्थे मूर्तौ देवाऽऽगमाय च ॥८०॥
यथाशक्ति प्रतिष्ठां श्रीहरेर्वाऽन्यसुरस्य च ।
संकरिष्ये तदंगाख्यं श्रीगणेशादिपूजनम् ॥८१॥

स्वस्तिपुण्याहवाचश्च मातृकापूजनं तथा ।
नान्दीश्राद्धं तथाऽऽचार्यवरणं विप्रपूजनम् ॥८२॥
करिष्ये इति संकल्प्य जलं भूमौ समुत्सृजेत् ।
सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ॥८३॥
लम्बोदरश्च विकटो विघ्ननाशो विनायकः ।
धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥८४॥
द्वादशैतानि नामानि मम रूपस्य वै पठेत् ।
गजशुण्डं च त्रिशूलाढ्यं पत्नीपुत्रयुतं गणम् ॥८५॥
प्रसन्नं सायुधं ध्यायेद् विघ्नानां वारणाय च ।
एवं ध्यात्वा गणेशं च पूजयेद् बहुवस्तुभिः ॥८६॥
हे हेरम्ब त्वमेह्येहि लक्षलाभयुतस्त्विह ।
सिद्धिबुद्धिपते त्वेहि सर्वायुधसमन्वितः ॥८७॥
आवाहयामि पूजार्थं रक्षार्थं च मखस्य मे ।
आगच्छ च भव स्वार्णासने स्थिरः प्ररक्ष नः ॥८८॥
गणानां च पतिं प्रियपतिं निधिपतिं तथा ।
हवामहे वसाऽत्रैव श्रीकृष्णः शांकरोऽसि च ॥८९॥
आहमजानि गर्भधमात्वमजासिगर्भधम् ।
सिद्धिबुद्धियुतं चावाहयामि गणनायकम् ॥९०॥
सम्प्रतिष्ठापयाम्याऽऽस्ये सौवर्णे गृह्ण चासनम् ।
पाद्यं जलं गृहाणाऽपि सुगन्धि निर्मलं शुभम् ॥९१॥
ताम्रपात्रगतं तोयमर्घ्यं गृहाण सिद्धिकृत् ।
आचमनं तीर्थजलं गृहाण गणनायक ॥९२॥
पयःस्नानं गृहाणैतद् दधिस्नानं गृहाण च ।
घृतस्नानं गृहाणाऽपि मधुस्नानं गृहाण च ॥९३॥
गृहाण शर्करास्नानं गृहाणोद्वर्तनं तथा ।
तीर्थजलैः शुद्धवारिस्नानं कुरु गणेश्वर ॥९४॥
वासांसि धारय यज्ञोपवीतं स्वीकुरु प्रभो ।
चन्दनं चाक्षतान् रम्यपुष्पाणि प्रतिगृह्यताम् ॥९५॥
दूर्वाकुराणि रम्याणि धूपं च प्रतिगृह्यताम् ।
दीपं घृताक्तमेवाऽपि नैवेद्यं लड्डुकादिकम् ॥९६॥
फलान्याचमनं चापि जलं ताम्बूलकं तथा ।
दक्षिणा गृह्यतां देवाऽऽरार्त्रिकं प्रतिगृह्यताम् ॥९७॥
पुष्पांजलिर्गृह्यतां च प्रदक्षिणां करोमि ते ।
विशेषार्घ्यं फलयुक्तं प्राप्यात्र वरदो भव ॥९८॥
नमस्ते गजशुण्डाय कृष्णरूपाय ते नमः ।
निर्विघ्नं कुरु मे देव सर्वकार्ये मखादिकम् ॥९९॥
अनया पूजया सांगः प्रीयतां मे गणाधिपः ।
इति सम्पूज्य च ततश्चरेत् पुण्याहवाचनम् ॥१००॥
इत्येवं राधिकेऽनादिकृष्णनारायणो हरिः ।
देवायतनकं भक्तं चाह ते कथितं तु तत् ॥१०१॥
पठनाच्छ्रवणादस्य पूजनस्य फलं लभेत् ।
निर्विघ्नं जायते श्रोतुर्वक्तुः कार्यं फलान्वितम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मूर्तिप्रतिष्ठोत्सवे आचार्यवरणयज्ञसामग्रीसमर्जनगणेश-पूजनादिनिरूपणनामा चतुश्चत्वारिंशदधिकशत-तमोऽध्यायः ॥ १४४ ॥

**श्रीकृष्ण उवाच—**

अथापि राधिके चाग्रे कलशस्थापनादिकम् ।
कथयामि यदाह श्रीहरिर्देवायतं मुनिम् ॥ १ ॥
कलशं जलसम्पन्नं फलरत्नादिराजितम् ।
निजयोः करयोर्धृत्वा शिरसोऽग्रे ततो भुवि ॥ २ ॥
वक्रेण जानुना चार्धं निषद्य दक्षिणेन तु ।
करेण धारयित्वा संस्थापयेद् विधिना स्थले ॥ ३ ॥
ततो विप्रैश्च पुण्याहं वाचयेद् यजमानकः ।
यजमानवचःप्रतिवचो दद्युश्च भूसुराः ॥ ४ ॥
मे पुण्याहं दीर्घमायुरस्तु ते ब्रूम एव तत् ।
शिवा आपः सन्तु चेति सौमनस्यं तथाऽस्तु च ॥ ५ ॥
अक्षताऽरिष्टमस्त्वेव सौमांगल्यं तथाऽस्तु च ।
पान्तु गन्धास्तथा पान्तु चाक्षता आयुरस्तु च ॥ ६ ॥
पान्तु पुष्पाणि चास्त्वेव सौश्रियं सिद्धिरस्तु च ।
पान्तु ताम्बूलानि चास्त्वैश्वर्यं पान्तु च दक्षिणाः ॥ ७ ॥
अस्तु धनं बहुविधं श्रीरस्तु चास्तु सद्यशः ।
विद्याविनयवित्तादि चास्तु चायुष्यमित्यपि ॥ ८ ॥
बहुपुत्रादिमत्त्वं च दीर्घमायुः समस्तु ते !
शान्तिः पुष्टिश्चास्तु तुष्टिर्यजमानस्य सर्वदा ॥ ९ ॥
इत्युचार्याऽभिसिञ्चेयुर्यजमानस्य मूर्धनि ।
भद्रं कर्णे शृणुयाम भद्रं पश्येम चक्षुषा ॥१०॥
स्तुतियोग्यं तनु प्राप्नुयाम देवहितं सदा ।
देवा भद्रं श्रावयन्तु चारातिश्च निवर्तताम् ॥११॥
देवसख्यं सदा चाऽस्तु तथाऽऽयुः कालवर्जितम् ।
द्रविणं पुष्कलं चास्तु सविताऽवतु सर्वतः ॥१२॥
चन्द्रश्चायुश्चामृतं च ददात्वस्मै सुदैवतम् ।
हिरण्यदा वसवोऽस्य यजमानस्य सन्तु वै ॥१३॥
इत्याशीर्वादपात्रं त्वं यजमानो विवर्धताम् ।
समाहिताऽन्तः करणाः प्रसन्नाः स्मोऽस्तु शान्तिका ॥१४॥

पुष्टिस्तुष्टिर्वृद्धिरस्तु चाऽविघ्नायुष्यमस्तु च।
आरोग्यं शिवकर्माऽस्तु समृद्धिरस्तु कर्मणाम् ॥१५॥
वेदशास्त्रसंहितानां ज्ञानस्मृद्धिः सदाऽस्तु ते।
धनधान्यपुत्रपौत्रस्मृद्धिरस्त्विष्टसम्पदाम् ॥१६॥
अरिष्टनाशनं चास्तु दूरेऽस्तु रोगपापकम्।
अकल्याणं हतं तेऽस्तु श्रेयोऽस्तु सर्वभावितम् ॥१७॥
उत्तरे कर्मणि निर्विघ्नत्वं चास्तु सदा तव।
शुभाश्च सफलाः सन्तु क्रियास्ते चोत्तरोद्भवाः ॥१८॥
तिथ्यादयः शुभाः सन्तु जलसेकेन ते सदा।
तिथ्याद्यधिसुराः सर्वे प्रीयन्तां जलसेकतः ॥१९॥
प्रीयेतां तिथिकरणे दुर्गापाञ्चालिके तथा।
प्रीयन्तां विश्वदेवाश्च प्रीयन्तां च मरुद्गणाः ॥२०॥
उमामातरः प्रीयन्तां प्रीयन्तामेकपत्निकाः।
प्रीयन्तां सर्वदेवाश्च प्रीयन्तां वेदमूर्तयः ॥२१॥
प्रीयन्तां ब्राह्मणा ब्रह्म प्रीयेतां शारदाश्रियौ।
श्रद्धामेधे सुप्रीयेतां कात्यायनी च प्रीयताम् ॥२२॥
माहेश्वरी प्रीयतां च ऋद्धिकरी च प्रीयताम्।
सिद्धिकरी प्रीयतां च पुष्टिकरी च प्रीयताम् ॥२३॥
तुष्टिकरी प्रीयतां च प्रीयन्तां कुलदेवताः।
प्रीयेतां भगवन्तौ च तथा विघ्नविनायकौ ॥२४॥
प्रीयन्तां ग्रामदेवाश्च हतास्ते परिपन्थिनः।
ब्रह्मद्विषो हताश्चापि विघ्नदाश्च हतास्तथा ॥२५॥
शत्रवश्च हताः सर्वे शाम्यन्तु घोरमूर्तयः।
शाम्यन्तु पापपुञ्जाश्च शाम्यन्तु तव चेतयः ॥२६॥
वर्धन्तां शुभकार्याणि सन्तु चापः शिवास्तु ते।
शिवा आहुतयः सन्तु स्यातां शिवे निशादिने ॥२७॥
कामं वर्षतु पर्जन्यो ह्योषधयः फलान्विताः।
योगक्षेमौ भवेतां ते प्रीयन्तां गृहदेवताः ॥२८॥
अनादिश्रीकृष्णनारायणश्च प्रीयतां तथा।
पर्जन्यः प्रीयतां स्वामी प्रीयतां कार्तिकस्तथा ॥२९॥
ब्राह्मः कालश्च पुण्याहः सदा तेऽस्तु शुभक्रियः।
अस्तु देवप्रतिष्ठाकर्मणः पुण्याहमेव ते ॥३०॥
पुनन्तु मां देवदेवाः पुनन्तु मानसं धियम्।
पुनन्तु विश्वाभूतानि जातवेदः पुनीहि माम् ॥३१॥
पृथिव्यामुद्धृतायां च कल्याणं तु ब्रुवन्तु मे।
ओं कल्याणं महर्द्धिं च ब्रुवन्तु ब्राह्मणा मम ॥३२॥
सत्रर्द्धिं मम च ज्योतिरमृतं स्वः ब्रुवन्तु मे।
स्वस्तिं वृद्धिं ब्रुवन्त्वेव सन्तु ब्रमश्च भसुराः ॥३३॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥३४॥
हरिप्रिया स्वस्तिमती स्वस्तिं करोतु सर्वदा।
ओमस्तु श्रीश्च ते लक्ष्मीः पत्न्यौ नारायणस्य वै ॥३५॥
एवं पुण्याहवाचश्च सन्तु पूर्णा भूसूरिणाम्।
ततश्चाऽभिषेककर्म पात्रे तु कलशोदकम् ॥३६॥
धृत्वा विप्राश्च चत्वारो दूर्वाऽऽम्रपल्लवादिभिः।
यजमानमभिषिञ्चेयुश्च त्वां प्रपुनन्त्विति ॥३७॥
पुनन्तु मां देवजनाः पुनन्तु तीर्थसागराः।
पञ्चनद्यो जातवेदो पुनन्त्वेते यजिस्थितम् ॥३८॥
साम्राज्येनाऽभिषिञ्चामि वाचां त्वां तु यजिस्थितम्।
भैषज्येनाऽभिषिञ्चामि तेजसा ब्रह्मवर्चसा ॥३९॥
ऐन्द्रियेणाभिषिञ्चामीन्द्रस्य त्वां तु यजिस्थितम्।
विश्वानि देवसवितर्दुरीतानि परासुव ॥४०॥
मखसत्रे तु सर्वेषां यद् भद्रं तन्न आसुव।
ओं द्यौः शान्तिरन्तरिक्षं शान्तिश्चाध्यात्मिकी तव ॥४१॥
अनेन वाचनेनाऽत्र प्रीयतां वै प्रजापतिः।
एवं वै राधिके पुण्याहवागुत्तरमे च ॥४२॥
मातृकापूजनं कुर्यात्त्वग्निकोणे सुपीठके।
अक्षतानां प्रपुञ्जेषु यद्वा पूगीफलेषु च ॥४३॥
गौरी पद्मा शची मेधा सावित्री विजया जया।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ॥४४॥
हृष्टिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवता।
गणेशश्चेति सम्पूज्या वृद्धावेता हि षोडश ॥४५॥
राधा लक्ष्मीर्माणिकी च ब्रह्मविद्यारमारतिः।
सुगुणा मंजुला हंसा ललिता कम्भरा सती ॥४६॥
सन्तोषा कमला दुर्गा शारदार्च्याश्च षोडश।
गणेशाय नम ओमावाहयामि गणाधिपम् ॥४७॥
ओं गौर्यै च नमो गौरीमावाहयामि ते नमः।
ओं पद्मायै नमः पद्मामावाहयामि ते नमः ॥४८॥
ओं शच्यै च नमः शचीमावाहयामि ते नमः।
ओं मेधायै नमो मेधामावाहयामि ते नमः ॥४९॥
ओं सावित्र्यै नमः सावित्रिकामावाहयामि च।
विजयायै नमश्चावाहयामि विजयां नमः ॥५०॥
ओं जयायै नमो जयामावाहयामि ते नमः।
नमः श्रीदेवसेनायै सेनामावाहयामि च ॥५१॥
ओं स्वधायै नमः स्वधामावाहयामि ते नमः।
ओं स्वाहायै नमः स्वाहामावाहयामि ते नमः ॥५२॥

ओं मातृभ्यो नमो मातृरावाहयामि वै नमः ।
नमो वै लोकमातृभ्यो नम आवाहयामि ताः ॥५३॥
हृष्ट्यै नमश्चावाहयाम्यों पुष्ट्यै च नमस्तथा ।
आवाहयामि तां तुष्ट्यै नम आवाहयामि च ॥५४॥
नमः श्रीकुलदेव्यै चावाहयामि नमोऽस्तु ते ।
ओं राधायै नमश्चावाहयामि प्रतिनौमि ताम् ॥५५॥
ओं श्रीलक्ष्म्यै नम आवाहयामि प्रणमामि ताम् ।
ओं माणिक्यै नम आवाहयामि प्रणमामि ताम् ॥५६॥
ओं ब्रह्मविद्यायै नमश्चावाहयामि प्रणमामि ताम् ।
रमारत्यै नमश्चावाहयाम्यस्यै नमो नमः ॥५७॥
ओं श्रियं चावाहयामि श्रीदेव्यै नमो नमः ।
ओं सुगुणां नम आवाहयाम्यस्यै नमो नमः ॥५८॥
मञ्जुलायै नम आवाहयाम्यस्यै नमो नमः ।
हंसायै च नम आवाहयाम्यस्या नमोऽस्तु च ॥५९॥
ललितायै नम आवाहयाम्यस्यै नमो नमः ।
कंभरायै नम आवाहयाम्यस्या नमोऽस्तु च ॥६०॥
ओं सत्यै नम आवाहयाम्यस्यै च नमो नमः ।
सन्तोषायै नम आवाहयाम्यस्यै नमो नमः ॥६१॥
कमलायै नम आवाहयाम्यस्यै नमो नमः ।
ओं दुर्गायै नम आवाहयाम्यस्यै नमो नमः ॥६२॥
शारदायै नमश्चावाहयाम्यस्यै नमोऽस्तु च ।
इत्यावाह्य प्रतिष्ठाप्य पूजयेदुपचारकैः ॥६३॥
प्रीयन्तां पूजया देवा देव्यस्तुष्यन्तु मातरः ।
कुण्डस्थमातृकामूर्ध्नि घृतधारां ददामि च ॥६४॥
ब्राह्मी माहेश्वरी चापि कौमारी वैष्णवी तथा ।
वाराही च तथैन्द्राणी चामुण्डा घृतधारया ॥६५॥
सहधारया तुष्टा भवन्तु वरदास्तथा ।
पाद्यादिभिः पूजयेच्च धारा दिव्या बलप्रदाः ॥६६॥
तथाऽन्याः षोडशदेवीः पूजयेद् घृतधारया ।
नान्दीश्राद्धं प्रकुर्याच्च क्रमेणाऽऽचमनादिना ॥६७॥
प्राणानायम्य च कालं देशं संकल्प्य वै ततः ।
अस्य देवस्य च प्रतिष्ठानकर्मसु वस्तुभिः ॥६८॥
नान्दीश्राद्धं करिष्येऽहं विघ्नादिविनिवृत्तये ।
नान्दीमुखाः सत्यवसुसंज्ञका विश्वदेवताः ॥६९॥
ओं भूर्भुवः स्व इदं वः पाद्यं पादावनेजनम् ।
पादप्रक्षालनं वृद्धिश्चाऽस्तु माता पितामही ॥७०॥
प्रपितामहिका चैता नान्दीमुख्यो भवन्ति याः ।
ओं भूर्भुवः स्व इदं वः पाद्यं पादावनेजनम् ॥७१॥
पादप्रक्षालनं वृद्धिश्चाऽस्तु पिता पितामहः ।
प्रपितामह एवैते नान्दीमुखा भवन्ति ये ॥७२॥
ओं भूर्भुवः स्व इदं वः पाद्यं पादावनेजनम् ।
पादप्रक्षालनं वृद्धिश्चाऽस्तु सर्वा ततः परम् ॥७३॥
मातामहः प्रमातामहो वृद्धप्रमातामहः ।
सपत्नीका नान्दीमुखा ये च ये च भवन्ति ते ॥७४॥
ओं भूर्भुव स्व इदं वः पाद्यं पादावनेजनम् ।
पादप्रक्षालनं वृद्धिश्चास्तु ददामि चासनम् ॥७५॥
सत्यवसुसंज्ञकेभ्यो विश्वेदेवेभ्य इत्यपि ।
नान्दीमुखेभ्य ओं भूर्भुवः स्व इदं सुखासनम् ॥७६॥
स्वधा वोऽस्तु नान्दीश्राद्धेक्षणौ क्रियेतामों तथा ।
स्वीकुरुतां भवन्तौ च प्राप्नुवश्च सुखान्वितौ ॥७७॥
मातृपितामहीप्रपितामहीनां सुखासनम् ।
आसादयतां वः स्वाहाऽऽसादयावः सुखावहम् ॥७८॥
पितृपितामहप्रपितामहानां सुखासनम् ।
आसादयतां वः स्वाहाऽऽसादयामः सुखावहम् ॥७९॥
मातामहप्रमातामहवृद्धप्रमातामहाः ।
व आसनं स्वधा वो भूर्भुवः स्वः सुखावहम् ॥८०॥
गन्धं पुष्पं दीयते च सत्यवसुभ्य एव च ।
विश्वेभ्यो नान्दीमुख्येभ्य इदं गन्धादिकार्चनम् ॥८१॥
सम्पद्यन्तामिह वृद्धिः स्वधा भवन्त एव च ।
मातृपितामहीप्रपितामहीभ्य एव च ॥८२॥
इदं गन्धाद्यर्चनं च स्वाहा वृद्धिः समस्तु च ।
पितृपितामहप्रपितामहेभ्य एव च ॥८३॥
इदं गन्धाद्यर्चनं च स्वधा वृद्धिः समस्तु च ।
मातामहप्रमातामहवृद्धप्रमातामहाः ॥८४॥
सस्त्रीभ्यो व इदं गन्धार्चनं स्वधाऽस्तु वृद्धिका ।
इत्येवमर्चनं दत्वा भोजनस्य तु निष्क्रयः ॥८५॥
द्रव्यं दद्यात् सत्यवसु विश्वेदेवेभ्य एव च ।
युग्मभोजनपर्याप्तमन्नममृतमर्पितम् ॥८६॥
स्वधा सम्पद्यतां वृद्धिरायुस्तेजःप्रदा शुभा ।
मातृपितामहीप्रपितामहीभ्य एव च ॥८७॥
युग्मभोजनपर्याप्तमन्नममृतमर्पितम् ।
स्वधा सम्पद्यतां वृद्धिः हिरण्यदक्षिणायुतम् ॥८८॥
पितृपितामहप्रपितामहेभ्योऽपि चैव ह ।
युग्मभोजनपर्याप्तमन्नममृतमर्पितम् ॥८९॥
स्वधा सम्पद्यतां वृद्धिर्हिरण्यदक्षिणायुतम् ।
मातामहप्रमातामहवृद्धप्रमातामहाः ॥९०॥

सस्त्रीभ्यो व इदं भोज्यं पर्याप्ताऽमृतमर्पितम् ।
स्वधा सम्पद्यतां वृद्धिर्हिरण्यदक्षिणायुतम् ॥९१॥
ददामि दक्षिणां द्राक्षाऽऽमलकयवनिष्क्रयाम् ।
नान्दीश्राद्धफलपूर्त्यै सत्यवसुभ्य एव च ॥९२॥
मातृपितामहीप्रपितामहीभ्योऽपि चैव ह ।
नान्दीश्राद्धफलपूर्त्यै ददामि दक्षिणां तथा ॥९३॥
पितृपितामहप्रपितामहेभ्योऽपि चैव ह ।
नान्दीश्राद्धफलपूर्त्यै ददामि दक्षिणां तथा ॥९४॥
मातामहप्रमातामहवृद्धप्रमातामहाः ।
सस्त्रीभ्यो वो ददाम्यत्र दक्षिणां निष्क्रयात्मिकाम् ॥९५॥
नान्दीश्राद्धफलपूर्त्यै द्राक्षाऽऽमलकमार्द्रकम् ।
फलप्रतिष्ठासिद्ध्यर्थं गृह्णन्तु चोत्सृजामि च ॥९६॥
नान्दीश्राद्धं सुसम्पन्नं पठित्वाऽऽर्प्य च दक्षिणाम् ।
विश्वेदेवाः प्रीयन्तामोमिति देवविसर्जनम् ॥९७॥
नान्दीमुखा मातरश्च प्रीयन्तां तद्विसर्जनम् ।
नान्दीमुखाः पितरश्च प्रीयन्तां तद्विसर्जनम् ॥९८॥
नान्दीमुखा मातामहाः प्रीयन्तां तद्विसर्जनम् ।
अनुव्रज्य च विप्राणां वचनात् परिपूर्णकः ॥९९॥
श्राद्धविधिर्नान्दीमुखप्रासादात् परिपूर्णकः ।
अस्तु वै परिपूर्णोऽयं ब्राह्मणानां वचोऽनुगः ॥१००॥
इत्येवं राधिके कृष्णनारायणः परः प्रभुः ।
देवायतनकायाऽऽह विधिं मयोदितस्तु ते ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे कलशस्थापनपुण्याहवाचनमातृकाद्यावाहननान्दीश्राद्धासनपूजनभोजनदक्षिणादानविसर्जनादिनिरूपणनामा पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥१४५॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चैवं नान्दीश्राद्धोत्तरं तु यत् ।
भक्ताय भगवानाहाऽऽचार्यादिवरणं यथा ॥ १ ॥
ओमेतस्यां प्रतिष्ठायां कर्तव्यायां तु कर्मसु ।
आचार्यत्वेन विप्रं त्वां वृणे गन्धाऽक्षतादिभिः ॥ २ ॥
पुष्पताम्बूलमुद्राभिर्वासोभिश्चास्मि ओं वृतः ।
तं प्रपूज्य ततो ब्रह्मवरणं संविधापयेत् ॥ ३ ॥
ओमेतस्यां प्रतिष्ठायां कर्तव्यायां तु कर्मसु ।
कृताऽकृतेक्षात्मसु ब्रह्मस्थाने त्वामहमावृणे ॥ ४ ॥
गन्धपुष्पाक्षतताम्बूलकमुद्राऽम्बरादिभिः ।
ब्रह्मत्वेन वृतोऽस्मीति ब्रह्माऽस्मि वै क्रतौ तव ॥ ५ ॥
तं प्रपूज्य ऋत्विजोऽष्टौ चतुरो वृणुयाच्च वा ।
अस्य देवस्य च प्रतिष्ठायां वेदविदोऽत्र च ॥ ६ ॥
अमुकान् वो वृणे ऋत्विक्त्वेन गन्धादिभिस्त्विह ।
ओं वृत्ताः स्म इति तान् संपूज्य गन्धाक्षतादिभिः ॥ ७ ॥
अष्टौ वा चतुरो द्वारपालान् संवृणुयान्मखी ।
एकैकवेदिनौ द्वौ द्वौ जापकौ वृणुयान्मखी ॥ ८ ॥
भवन्ति ऋत्विजश्चैवं पञ्चविंशतिसंख्यकाः ।
यद्वाऽशक्तौ वृणुयाद्वै तथा होत्रष्टकं पुनः ॥ ९ ॥
जापकान् चतुरो द्वारपालचतुष्टयं गुरुम् ।
एवं वै ऋत्विजः सप्तदशाप्यपि भवन्ति हि ॥१०॥
यद्वा होतॄंश्च चतुरो जापकाँश्चतुरस्तथा ।
चतुरो द्वारपालाँश्च गुरुं चेति त्रयोदश ॥११॥
यद्वाऽऽचार्यं तथा ब्रह्माणमेव वृणुयान्मखी ।
द्वाभ्यां सर्वं यज्ञकर्म निवर्तते न संशयः ॥१२॥
राजा तु शतसाहस्रान् वृणुयाच्च यथाबलम् ।
ततोऽर्चयेच्च विधिना गुर्वादीन् वरणक्रमात् ॥१३॥
मधुपर्केणाऽर्चयेद्वै मिष्टेन पायसादिना ।
मधुपर्को बहुविधो मिष्टाम्ब्लपायसादिजः ॥१४॥
अथ विप्रान् प्रार्थयेच्च मखी प्राञ्जलिरुत्थितः ।
ब्राह्मणाः सन्तु मे शान्ताः सर्वपापनिवारकाः ॥१५॥
दानयज्ञजपहोमैर्याजकास्तृप्तिदायकाः ।
पितॄणां च सुराणां च वेदमूर्तय एव ते ॥१६॥
रक्षन्तु जापका मां च ऋद्धिं वृद्धिं ददत्वपि ।
यागनिष्पत्तये विप्रा वृताः कुर्वन्तु शान्तिकम् ॥१७॥
पौष्टिकं च प्रकुर्वन्तु नियमे संस्थिताः द्विजाः ।
एवं विप्रान् सुसम्प्रार्थ्याऽऽचार्यं संप्रार्थयेन्मखी ॥१८॥
मन्त्रमूर्तिर्भवानास्ते कुरु धर्मोन्नतिं मम ।
त्वत्प्रसादेन यज्ञोऽयं निर्विघ्नो वै समाप्यताम् ॥१९॥
एवं सम्प्रार्थ्य च ततः समुत्थाय मखी स्वयम् ।
गृहीत्वा योग्यसम्भारान् कृत्वाऽग्रतः सुवासिनीः ॥२०॥
विप्रांस्तथाऽग्रतः कृत्वा तूर्यघोषे प्रवर्तिते ।
पूर्णकुंभसमायुक्तो यज मानो हि मण्डपम् ॥२१॥
कृत्वा प्रदक्षिणं प्राप्य पश्चिमद्वारमेव तु ।
पाणिभ्यां चार्घपात्रं वै समादाय स्थितो भवेत् ॥२२॥
सार्घो द्वारे पृथिवीं च ध्यात्वा कूर्मोपरिस्थिताम् ।
शुक्लां पद्मशंखचक्रशूलयुक्तचतुर्भुजाम् ॥२३॥
सवत्सां गोरूपधरां चागच्छ वसुधे त्विह ।
गृहाण फलपुष्पाणि पूजां गृहाण मत्कृताम् ॥२४॥

यज्ञार्थे भगवत्पत्नीं त्वां वृणोमीह वैष्णवीम् ।
सौभाग्यं देहि पुत्रांश्च धनंरूपं प्रदेहि च ॥२५॥
गृहाणार्घ्यं च मे देवि सुसौभाग्यं प्रयच्छ मे ।
इत्यष्टांगं महार्घ्यं च दत्वा नत्वा ततो मखी ॥२६॥
पश्चिमद्वारमार्गेण प्रविशेद् यजमानकः ।
होमद्रव्यप्रवेशस्तु पूर्वद्वारेण वै मतः॥२७॥
दानद्रव्यप्रवेशस्तु दक्षद्वारेण वै मतः ।
दानार्थान् दक्षिणार्थांश्च प्रतिष्ठार्थान् सुपावनान् ॥२८॥
संभारानुत्तरद्वारेणैव प्रवेशयेन्मखी ।
आचार्यस्तु ततो वामे हस्ते वै गौरसर्षपान् ॥२९॥
लाजायुक्तान् गृहीत्वा च कुर्याद्वै दिक्प्ररक्षणम् ।
ओं रक्षोहणं वलगं चोत्किरामि समन्ततः ॥३०॥
अनिष्टानुत्खन सर्वान् वलग त्वां किरामि च ।
रक्षोहणो वलगाः प्रोक्षयामि वैष्णवान् बलान् ॥३१॥
तृणाम्युपदधाम्यत्रोपर्यूहामि समन्ततः ।
रक्षोभागो निरस्तोऽस्ति रक्षोबाधो न वै भवेत् ॥३२॥
रक्षोहा विश्वचर्षणिरभियोनिमयोहते ।
द्रोणेसधः स्थलं पुष्टं समासदत् विनिर्भयम् ॥३३॥
भूमिभूता विघ्नरूपा असर्पन्त्वितः स्थलात् ।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशः ॥३४॥
यज्ञकर्मविरोध्यत्र भूतं स्थितं स्थलेऽत्र वै ।
स्थानं विहाय चान्यत्र प्रयान्त्वस्तु च शान्तिदम् ॥३५॥
प्रेताद्याश्चापगच्छन्तु स्वीकरोमि भुवं त्विमाम् ।
करोमि शान्तिकं चात्र किरामीशानतः क्रमात् ॥३६॥
आयान्त्वत्र सुरा यातुधानाद्या अपयान्तु च ।
देवयजनं क्षेत्रं त्वं रक्ष विष्णोऽन्तरे स्थित ॥३७॥
इति रक्षां विधायैव पञ्चगव्येन सत्कुशैः ।
प्रोक्षयेन्मण्डपभूमिं यज्ञसंभारकांस्तथा ॥३८॥
हिरण्यवर्णाः शुचयः पाविका लोकपाविकाः ।
अग्निं या दधिरे गर्भे ता आपः पावयन्तु नः ॥३९॥
वारुण्यो मधुस्राविण्यः शंस्य अपो भवन्ति याः ।
यत्स्पृष्टं भक्ष्यमेव स्याद् देवानां ताः पुनन्तु नः ॥४०॥
अन्तरीक्षे पृथिव्यां च शुक्रं यदुद्भवं रसम् ।
पुष्टिदं सर्वदेवानां ता आपो नः पुनन्त्विह ॥४१॥
शिवेन चक्षुषा पश्यतापो मां स्पृशताऽपि च ।
शिवया तनुवा मां च बलंतेजोन्वितं तथा ॥४२॥
पुनातु यज्ञसंभारान् पवमानो जलान्वितः ।
पुनन्तु मनवो देवाः पुनन्तु विश्वआयवः ॥४३॥
अग्ने सलिल शक्त्या ते इदं ब्रह्म पुनीमहे ।
वैश्वानरो रश्मिभिर्मा वातः प्राणेन वर्चसा ॥४४॥
द्यावापृथिवी पयसा सविता किरणैरिहा ।
पुनन्तु मां च संभारानिदं ब्रह्म पुनीमहे ॥४५॥
पावमान्या पवित्रं यत् तदश्नन्त्येव देवताः ।
पावमान्या तु संभाराः संभृताः सद्रसैः सदा ॥४६॥
तस्मै रसवती दुहे सर्वमश्नन्ति देवताः ।
ऋषिभिः संभृतरसं क्षीरं सर्पिर्मधूत्तमम् ॥४७॥
ब्राह्मणेष्वमृतं हितं निहितं तच्च वस्तुषु ।
पवमान्या पवित्रेण देवाश्चाश्नन्ति भावतः ॥४८॥
इन्द्रः सोमो वरुणश्च यमो राजा पुनन्त्विदम् ।
ब्रह्मजातं वस्तुजातं पूतं ब्रह्म पुनीमहे ॥४९॥
इत्येवं चाभिषिच्यैव आपोहिष्ठामयो भुवः ।
ता न ऊर्जे दधातन महेरणाय चक्षसे ॥५०॥
यो वः श्रेष्ठतमो मिष्टो रसस्तद्भाजनं वयम् ।
आपस्तद्भाजनं सर्वम् आपो जनयथा रसम् ॥५१॥
इत्येवं सर्वसंभारान् प्रोक्ष्य कृताञ्जलिर्मखी ।
तिष्ठेद् विप्रो वदेत् स्वस्तिमश्विनौ कुरुतं तव ॥५२॥
अदितिस्ते स्वस्तिमेव पूषा स्वस्तिं दधातु ते ।
द्यौः क्षितिस्ते स्वस्तिमेव चिनुतः स्वस्तिमर्यमा ॥५३॥
वायुः स्वस्तिं गुरुः स्वस्तिं वह्निः स्वस्तिं करोतु ते ।
देव्यः स्वस्तिं तथा देवाः स्वस्तिं कुर्वन्तु ते सदा ॥५४॥
स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्ताक्ष्यौऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥५५॥
इत्येवं स्वस्तिमाधत्य मण्डपस्याऽर्चनं तथा ।
कुर्याद्वै वास्तुपूजां चोपविश्य वास्तुसन्निधौ ॥५६॥
मण्डपनैर्ऋत्यकोणे प्राङ्मुखो यजमानकः ।
उपविश्याऽऽचम्य प्राणानायम्य च समाहितः ॥५७॥
देशकालौ प्रसंकीर्त्य वास्तुपूजां चरेन्मखी ।
वास्तोश्चतुर्षु कोणेषु चतुःशंकून् प्ररोपयेत् ॥५८॥
ओं विशन्तु भूभागे नागाश्च लोकप्रपालकाः ।
मण्डपेऽत्राऽवतिष्ठन्तु वलायुष्यप्रदाः सदा ॥५९॥
बलिदानं माषभक्तदध्योदनेन चार्पये ।
शंकवः प्रतिगृह्णन्तु भवत्पार्श्वे समर्पितम् ॥६०॥
रुद्रेभ्यश्चापि सर्पेभ्यो बलिं ददामि शोभनम् ।
गृह्णन्त्वीशानभागस्था ये चान्ये तत्समाश्रिताः ॥६१॥
ओम् अग्निभ्योऽथ सर्पेभ्यो ये चान्ये तत्समाश्रिताः ।
आग्नेय्यां वो बलिं गृह्णन्त्वोदनं प्रददामि यत् ॥६२॥

नैर्ऋत्याधिपतिश्चैव नैर्ऋत्यां राक्षसाश्च ये ।
बलिं तेभ्यः प्रयच्छामि गृह्णन्तु मन्त्रितं बलिम् ॥६३॥
वायव्याधिपतिश्चैव वायव्यां ये च राक्षसाः ।
बलिं ददामि गृह्णन्त्वोदनं पुण्यं समर्पितम् ॥६४॥
वास्तुपीठे कुंकुमाद्यैः स्वर्णशलाकया तथा ।
रत्नेन रजतेनापि फलेन कुसुमेन वा ॥६५॥
नवरेखाः प्रकर्तव्यास्तत्र लक्ष्म्यै नमश्च ओम् ।
यशोवत्यै नमश्चेति ओं कान्तायै नमस्तथा ॥६६॥
सुप्रियायै नमश्चेति विमलायै नमश्च ओम् ।
ओं श्रियै नम ओं सुभगायै नमश्च ओमिति ॥६७॥
ओं सुमत्यै नम ओम् इडायै नमश्च ओमिति ।
एवं वै स्थापयित्वैव कृत्वा रेखाः पुनर्नव ॥६८॥
ओं धान्यायै नमस्तत्र ओं प्राणायै नमस्तथा ।
विशालायै नमश्चापि ओं स्थिरायै नमस्तथा ॥६९॥
ओं भद्रायै नमश्चेति ओं जयायै नमस्तथा ।
ओं निशायै नमश्चेति विरजायै नमश्च ओम् ॥७०॥
विभवायै नमश्चेति स्थापयित्वा प्रपूजयेत् ।
ऐशाने च पदे देवमीशानं शिखिनं हरम् ॥७१॥
ध्यात्वा चाऽऽवाहयाम्यत्र शंभवाय नमो नमः ।
भवाय शंभवे शिवतराय च नमो नमः ॥७२॥
ओं भूर्भुवः स्वः शिखिन्निहाऽऽगच्छ तिष्ठ च ते नमः ।
तद्दक्षिणे च पर्जन्यं ध्यात्वा चावाहयाम्यहम् ॥७३॥
अभिवर्षतु पर्जन्यः पर्जन्याय नमो नमः ।
ओं भूर्भुवः स्वः पर्जन्य इहागच्छ च तिष्ठ च ॥७४॥
ततो दक्षे जयन्तं च ध्यात्वा चावाहयाम्यहम् ।
जयन्त वर्मणा छन्न चामृतेन समप्लुता ॥७५॥
उरसा बलमापन्न त्वां मन्दन्तु सुरा इह ।
ओं भूर्भुवः स्वः जयन्त इहागच्छ च तिष्ठ च ॥७६॥
जयन्ताय नमस्तेऽस्तु जयं तनोतु सर्वथा ।
ततो दक्षे महेन्द्रं च ध्यात्वा चावाहयाम्यहम् ॥७७॥
ओम् आयात्विन्द्रो वसत्वत्र स्तुतः शूरश्च वर्धनः ।
ओं भूर्भुवः स्वः महेन्द्र इहागच्छ च तिष्ठ च ॥७८॥
महेन्द्राय नमो वज्रधराय द्युप्रभाविणे ।
ततो दक्षे सूर्यदेवं ध्यात्वा चावाहयाम्यहम् ॥७९॥
सवित्रे ब्रह्मरूपाय तेजःकोशाय ते नमः ।
ओं भूर्भुवः स्वः सूर्य त्वमिहागच्छ च तिष्ठ च ॥८०॥
ततश्च दक्षिणे सत्यं ध्यात्वा चावाहयाम्यहम् ।
सत्येन दीक्षा फलति सश्रद्धा दक्षिणात्मिका ॥८१॥
तत्सर्वे सत्यकाधारं सत्याय ते नमो नमः ।
ओं भूर्भुवः स्वश्च सत्य इहागच्छ तिष्ठ च ॥८२॥
ततो दक्षे भृशं ध्यात्वा चावाहयामि भावतः ।
आत्वा हार्षमन्तरभूर्ध्रुवस्तिष्ठाऽविचाचलिः ॥८३॥
विशस्त्वां सर्वे वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत् ।
ओं भूर्भुवः स्वः भृश इहागच्छ तिष्ठ च ते नमः ॥८४॥
ततो दक्षे महाकाशं ध्यात्वा चावाहयामि च ।
स्वरा नादा ध्वनयश्च सुनृताः माध्व्य एव च ॥८५॥
त्वयि सन्ति महाकाश तुभ्यं दिव्याय वै नमः ।
ओं भूर्भुवः स्वः आकाश इहागच्छ च तिष्ठ च ॥८६॥
ततो दक्षे कोणभागेऽनलमावाहयामि च ।
वायुसखं तथा वायुं ध्यात्वा चावाहयामि च ॥८७॥
अग्ने सप्तसहस्रात्यजिव्ह तुभ्यं नमो नमः ।
वायो सहस्ररथवन् वह्निमित्र च ते नमः ॥८८॥
ओं भूर्भुवः स्वश्च वह्ने वायो चागच्छ तिष्ठ च ।
ततः पश्चे पूषणं च ध्यात्वा चावाहयामि च ॥८९॥
पूषन् तव व्रते वयं न रिष्येम कदाचन ।
ओं भूर्भुवः स्वश्च पूषन्निहागच्छ च तिष्ठ च ॥९०॥
पूष्णे नमस्तव स्तोतारो वयं स्मः सुखं कुरु ।
ततः पश्चे त वितथं ध्यात्वा चावाहयामि च ॥९१॥
वितथ त्वं सूर्यमहस्तुभ्यं नमः पुनः पुनः ।
ओं भूर्भुवः स्वः वितथ इहागच्छ च तिष्ठ च ॥९२॥
ततः पश्चे गृहक्षतं ध्यात्वा चावाहयामि च ।
ओम् अक्षन्नमीमदंतह्यवप्रिया अधूषत ॥९३॥
ओं भूर्भुवः स्वः गृहक्षत नमश्चागच्छ तिष्ठ च ।
ततः पश्चे यमं ध्यात्वा चावाहयामि ते नमः ॥९४॥
ते यमाय पितृमते स्वधा धर्माय ते नमः ।
ओं भूर्भुवः स्वः यमश्चेहागच्छ च तिष्ठ च ॥९५॥
ततः पश्चिमे गन्धर्वं ध्यात्वा चावाहयामि च ।
गन्धर्व त्वां विश्वावसुः परिदधातु भूतये ॥९६॥
ओं, भूर्भुवः स्वः गन्धर्व नमश्चागच्छ तिष्ठ च ।
तत्पश्चे भृंगराजं च ध्यात्वा चावाहयामि च ॥९७॥
भृंगराजाय च नमः सूरिणे च सरोमते ।
ओं भूर्भुवः स्वः भृंगराज इहागच्छ च तिष्ठ च ॥९८॥
ततः पश्चे मृगं ध्यात्वा चावाहयामि ते नमः ।
विशत्रुं कुरु मृगराट् दुर्गेऽपि सहृदो भव ॥९९॥
ओं भूर्भुवः स्वः मृगाऽत्र समागच्छ च तिष्ठ च ।
तत्पश्चे नैर्ऋतकोणे पितॄनावाहयामि च ॥१००॥

पितृभ्यश्च नमः सर्वपितॄन् समभिधीमहि ।
ओं भूर्भुवः स्वः पितर इहागच्छत तिष्ठत ॥१०१॥
तदुत्तरे द्वारपं नन्दिनं चावाहयामि च ।
बहुरक्षाधर नन्दिन् नमस्तेऽस्तु प्ररक्षय ॥१०२॥
ओं भूर्भुवः स्वः नन्दिँस्त्वमिहागच्छ च तिष्ठ च ।
तदुत्तरे सुग्रीवकं ध्यात्वा चावाहयामि च ॥१०३॥
सुग्रीवाय नमो रुद्रोपाश्रिताय गणाय ते ।
ओं भूर्भुवः स्वः सुग्रीव इहागच्छ च तिष्ठ च ॥१०४॥
तदुत्तरे पुष्पदन्तं ध्यात्वा चावाहयामि च ।
शंभुसामविधात्रे ते पुष्पदन्ताय वै नमः ॥१०५॥
ओं भूर्भुवः स्वः पुष्पदन्त इहागच्छ च तिष्ठ च ।
तदुत्तरे च वरुणं ध्यात्वा चावाहयामि च ॥१०६॥
रसेशाय नमो मिष्टहव्यवासाय द्युमते ।
ओं भूर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च ॥१०७॥
तदुत्तरेऽसुरं ध्यात्वा चावाहयामि ते नमः ।
ओं भूर्भुवः स्वश्च असुर इहागच्छ च तिष्ठ च ॥१०८॥
तदुत्तरे शेषमावाहयामि ते नमो नमः ।
ओं भूर्भुवः स्वः शेषाख्य इहागच्छ च तिष्ठ च ॥१०९॥
तदुत्तरे च वै पापं ध्यायाम्यावाहयामि च ।
ओं भूर्भुवः स्वः पाप ते नमश्चागच्छ तिष्ठ च ॥११०॥
तदुत्तरे वायुकोणे रोगमावाहयामि च ।
ओं भूर्भुवः स्वः रोग ते नमश्चागच्छ तिष्ठ च ॥१११॥
पापरोगौ प्रजानां मा स्यातां नमाम्युभावपि ।
तत्पूर्वे नागनामानं चाहिर्बुध्न्यं नमामि च ॥११२॥
आवाहयामि चागच्छ तिष्ठाऽत्र भूर्भुवः स्वश्च ।
तत्पूर्वे मुख्यनामानं ध्यात्वा चावाहयामि च ॥११३॥
ओं भूर्भुवः स्वः मुख्याऽत्राऽऽगच्छ तिष्ठ च ते नमः ।
तत्पूर्वे च नमो भल्लाटाय चावाहयामि तम् ॥११४॥
ओं भूर्भुवः स्वः भल्लाट इहागच्छ च तिष्ठ च ।
तत्पूर्वे तु कुबेराय नम आवाहयामि तम् ॥११५॥
सोमाय ओं भूर्भुवः स्व आगच्छ तिष्ठ ते नमः ।
तत्पूर्वे तु च शैलाय नम आवाहयामि तम् ॥११६॥
सर्पाय ओं भूर्भुवः स्व आगच्छ तिष्ठ ते नमः ।
तत्पूर्वेऽदितये नम आगच्छेह च तिष्ठ च ॥११७॥
ओं भूर्भुवः स्व अदिते मयि कल्पप्रदा भव ।
तत्पूर्वे च दितिं ध्यात्वा चावाहयामि ते नमः ॥११८॥
ओं भूर्भुवः स्वः दितेऽत्र समागच्छ च तिष्ठ च ।
वास्तोः कण्ठे अपो ध्यात्वा चावाहयामि वै नमः ॥११९॥
आपो हिष्ठामयो भुवस्तानऽऊर्जेदधातन ।
ओं भूर्भुवः स्वः आपो वै इहागच्छत तिष्ठत ॥१२०॥
स्कन्धे ध्यात्वा चाऽऽपवत्सं चावाहयामि ते नमः ।
ओं भूर्भुवः स्वः आपवत्स इहागच्छ च तिष्ठ च ॥१२१॥
दक्षे पार्श्वे चार्यमाणं नमाम्यावाहयामि च ।
ओं भूर्भुवः स्वः अर्यमन् इहागच्छ च तिष्ठ च ॥१२२॥
ततो दक्षे करे सावित्रकमावाहयामि च ।
ओं भूर्भुवः स्वः सावित्रागच्छ तिष्ठ च ते नमः ॥१२३॥
सावित्रपार्श्वके सवितारमावाहयामि च ।
कफोणिकायाः सान्निध्ये नमामि संस्मरामि च ॥१२४॥
ओं विश्वानि देवसवितर्दुरितानि परासुव ।
ओं भूर्भुवः स्वः सवितोश्चेहागच्छ च तिष्ठ च ॥१२५॥
तत्पश्चे दक्षसक्थिन विवस्वन्तं संस्मरामि च ।
आवाहयामि च नमस्ते विवस्वन् सुधां कुरु ॥१२६॥
दम्पती चाश्रुतश्चात्रागच्छ तिष्ठ च ते नमः ।
ओं भूर्भुवः स्वः विवस्वन्तं देवं संप्रधीमहि ॥१२७॥
तत्पश्चे मेढ्रदेशे च इन्द्रमावाहयामि च ।
वसुदो भव चागच्छ नमस्ते तिष्ठ स्वःपते ॥१२८॥
ओं भूर्भुवः स्व इन्द्राय विबुधेशाय ते नमः ।
तदधो गुदभागे च जयन्तं प्रस्मरामि च ॥१२९॥
आवाहयामि ओं भूर्भुवः स्व एहि च तिष्ठ च ।
जयन्ताय नम अषाढाय नमो जयाय ते ॥१३०॥
तदुत्तरे वामसक्थिन मित्रमावाहयामि च ।
ओं भूर्भुवः स्वः मित्र त्वमागच्छ तिष्ठ ते नमः ॥१३१॥
तदुत्तरे वामकरे राजयक्ष्माणमेव च ।
आवाहयामि ते नमो यक्ष्मणां विप्रकर्षकृत् ॥१३२॥
ओं भूर्भुवः स्वः राजयक्ष्मन्निहागच्छ च तिष्ठ च ।
कफोणीसन्निधौ हस्ते वामे रुद्रं स्मरामि च ॥१३३॥
आवाहयामि च रुद्र नमामि श्रेयसे भव ।
ओं भूर्भुवः स्वः रुद्रात्र समागच्छ च तिष्ठ च ॥१३४॥
ततः पूर्वे वामपार्श्वे पृथ्वीधरं स्मरामि च ।
आवाहयामि पृथिवीधृक् श्रेयसे नमामि च ॥१३५॥
ओं भूर्भुवः स्वः पृथिवीधरागच्छ च तिष्ठ च ।
वास्तूदरे च ब्रह्माणं स्मराम्यावाहयामि च ॥१३६॥
ब्रह्मरूप नमस्तेऽस्तु सतो योनिं प्रदेहि नः ।
ओं भूर्भुवः स्वः ब्रह्मँस्त्वमागच्छात्र च तिष्ठ च ॥१३७॥
ईशाने कोणके बाह्ये चरकीं च स्मरामि च ।
आवाहयामि चरकीं नमामि पाशनाशिनीम् ॥१३८॥

ओं भूर्भुवः स्वः चरकि चेहागच्छ च तिष्ठ च ।
अग्नौ कोणे बहिर्विदारिकामावाहयामि च ॥१३९॥
मृत्युनाशकरि विदारिके नमामि योगिनि ।
ओं भूर्भुवः स्वः विदारिके चागच्छ तिष्ठ च ॥१४०॥
रक्षःकोणे पूतनां चावाहयामि नमामि च ।
बन्धहन्त्रि पूतने त्वं निर्ऋतिदुरितापहे ॥१४१॥
ओं भूर्भुवः स्वः पूतने चागच्छ तिष्ठ चात्र च ।
वायुकोणे पापिनीं चावाहयामि नमामि च ॥१४२॥
ओं भूर्भुवः स्वः पापे त्वं चेहागच्छात्र तिष्ठ च ।
पूर्वे स्कन्दं नमाम्यावाहयामि संस्मरामि च ॥१४३॥
बाणेभ्यो रक्ष सेनानि शर्म यच्छतु दुष्टहन् ।
ओं भूर्भुवः स्वः स्कन्दाऽत्र समागच्छ च तिष्ठ च ॥१४४॥
दक्षेऽर्यमाणं च नौम्यावाहयामि स्मरामि च ।
ओं भूर्भुवः स्वः अर्यमन् समागच्छ च तिष्ठ च ॥१४५॥
पश्चिमे जृंभकं नौम्यावाहयामि स्मरामि च ।
हिंकृते प्रोथते शयानाय स्वाहा च वल्गते ॥१४६॥
स्वपते जाग्रते स्वाहा जृंभमाणाय कूजते ।
ओं भूर्भुवः स्वः जृम्भक समागच्छ च तिष्ठ च ॥१४७॥
उत्तरे पिलिपिच्छं नौम्यावाहयामि चिन्तये ।
पिलिप्पिलाक्यै पिशांगिन्यै स्वाहा ते नमोऽस्त्विह ॥१४८॥
ओं भूर्भुवः स्वः पिलिपिच्छ समागच्छ च तिष्ठ च ।
पूर्वे चेन्द्रं स्मराम्यावाहयामि च नमामि च ॥१४९॥
ओं भूर्भुवः स्वः इन्द्र चागच्छ चेह च तिष्ठ च ।
अग्नावग्निं स्मराम्यावाहयामि च नमामि च ॥१५०॥
ओं भूर्भुवः स्वः अग्ने चागच्छ चेह तिष्ठ च ।
याम्ये यमं स्मराम्यावाहयामि च नमामि च ॥१५१॥
ओं भूर्भुवः स्वः यम चागच्छ चेह च तिष्ठ च ।
नैर्ऋते निर्ऋतिं स्मराम्यावाहयामि नौमि च ॥१५२॥
ओं भूर्भुवः स्वः निर्ऋत चागच्छात्र च तिष्ठ च ।
पश्चिमे वरुणं स्मराम्यावाहयामि नौमि च ॥१५३॥
ओं भूर्भुवः स्वः वरुण चागच्छात्र च तिष्ठ च ।
स्मरामि वायुं वायव्ये नौमि चावाहयामि च ॥१५४॥
ओं भूर्भुवः स्वः वायो चागच्छात्र च त्रिष्ठ च ।
कुबेरमुत्तरे स्मराम्यावाहयामि नौमि च ॥१५५॥
ओं भूर्भुवः स्वः कुबेर इहागच्छ च तिष्ठ च ।
ईशान्यामीशानदेवमावाहयामि नौमि च ॥१५६॥
ओं भूर्भुवः स्वः ईशान इहागच्छ च तिष्ठ च ।
ईशानपूर्वमध्ये वै ब्रह्माणं प्रस्मरामि च ॥१५७॥
आवाहयामि नौम्येनं देवा अवन्तु सर्वतः ।
ओं भूर्भुवः स्वः ब्रह्माऽत्र समागच्छात्र तिष्ठ च ॥१५८॥
वरुणनिर्ऋतिमध्येऽनन्तं स्मरामि नौमि च ।
आवाहयाम्यनन्तं च विषरक्षाकरं हरिम् ॥१५९॥
ओं भूर्भुवः स्व अनन्त इहागच्छ च तिष्ठ च ।
इत्यावाह्य वास्तुपीठदेवान् प्रणम्य राधिके ॥१६०॥
कुर्याद् देवप्रतिष्ठां वै सांगोपांगां क्रतौ ततः ।
बृहस्पतिस्तनोत्वेनं विश्वेदेवाः प्रतिष्ठत ॥१६१॥
इत्येवं श्रीकृष्णनारायणश्चाह तु दैवतम् ।
तदेव तु मया तेऽत्र वास्तुध्यानं प्रकीर्तितम् ॥१६२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे आचार्यऋत्विगादिवरणं संभारप्रोक्षणं स्वस्तिवाचो मण्डपपूजा वास्तुपीठदेवावाहननमनादि चेतिनिरूपणनामा षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणो विभुः ।
आह देवायतनकं यत्तद् वच्मि च ते ततः ॥ १ ॥
वास्तुदेवार्चनं कार्यं प्रतिष्ठाऽनन्तरं यतः ।
तदङ्गात्मा स्थापनीयस्ताम्रस्य कलशो नवः ॥ २ ॥
ओम् आजिघ्र कलशं मह्या त्वा विशन्तु चेन्दवः ।
सहस्रधाराः पयस्वत्यस्त्वां विशन्तु तिष्ठ च ॥ ३ ॥
इति कलशं स्थापयित्वा जलं तत्र प्रपूरयेत् ।
वरुणस्य सुखं स्थानं चोत्तंभनं जलं त्वयि ॥ ४ ॥
ऋतं च सदनं त्वं वै जलमाधत्स्व पावनम् ।
इति वारि पूरयित्वा कण्ठे वस्त्रं प्रवेष्टयेत् ॥ ५ ॥
वसोः पवित्रमसि शतधारं सहस्रधारवत् ।
इतिवस्त्रं वेष्टयित्वा पूगीफलं घटेऽर्पयेत् ॥ ६ ॥
ओं फलिनी पुष्पिणी स्यादफलाऽपुष्पापि ते युजेः ।
पूगि त्वं च घटे तिष्ठ फलदा भव देहिनः ॥ ७ ॥
इति पूगीफलं दत्वा पञ्चरत्नानि चार्पयेत् ।
स्वर्णं रौप्यं हीरकं च माणिक्यं मौक्तिकं तथा ॥ ८ ॥
परिवाजपतिः कविरग्निर्हव्यानि चाक्रमीत् ।
इति रत्नानि दत्त्वैव हिरण्यं प्रक्षिपेद् घटे ॥ ९ ॥
अग्नेरपत्यं देवेन विधृतं शिरसा पुरा ।
हिरण्यं हरिणा नीतं कलशे प्रददामि तत् ॥१०॥
इति हिरण्यं दत्त्वैव गन्धं कलशे प्रक्षिपेत् ।
कौंकुमं कैसरं गन्धं चान्दनं प्रददामि ते ॥११॥

इतिगन्धं प्रदायैवाऽर्पयेदोषधिकास्ततः ।
रसप्लुता मधुस्रावाः पुरा जाता हरेस्तनौ ॥१२॥
तास्त्वपि प्रक्षिपाम्येव शतं सप्त च रुघ्नाः ।
इति सर्वौषधीर्दत्वा सप्तमृदः समर्पयेत् ॥१३॥
गजाश्वगोस्थलीजातां वल्मीकचत्वरोद्भवाम् ।
राजचत्वरलब्धां चार्पयेत् तुलसीमूलजाम् ॥१४॥
पृथिवी सर्वरूपा त्वं शर्मदा भव वासदे ।
इति सप्तमृदो दत्वा दूर्वा घटे समर्पयेत् ॥१५॥
काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि ।
एवं नो दूर्वे प्रतनोः सहस्रेण शतेन च ॥१६॥
इति दूर्वां घटे दत्वाऽर्पयेद्वै पञ्चपल्लवान् ।
अश्वत्थेवो निषदनं पर्णे वो वसतिः कृता ॥१७॥
गोभाज इत्किलाऽथ यत् स नवथ पूरुषम् ।
ओं नमः कलशे मुखेऽश्वत्थस्य च वटस्य च ॥१८॥
चूतस्योदुम्बरस्याऽपि प्लक्षस्यापि नवानि वै ।
पत्राणि स्थापयाम्यत्र सस्यवद् राष्ट्रकं तव ॥१९॥
ओं पवित्रं पवित्राख्यं पुनातु सूर्यरश्मिवत् ।
पवित्रपते कलशेऽर्पयाम्यत्र पवित्रकम् ॥२०॥
ओं नमस्ते पवित्राय कुशजन्याय वेधसे ।
घटे त्वां च निक्षिपामि पवित्रं कुरु वारि तत् ॥२१॥
इति दत्वा पवित्रं च घटोपर्यक्षतभृताम् ।
स्थालीं न्यसेन्नवां शर्करादियुक्तां सुकांचनीम् ॥२२॥
पूर्णा दर्वी परापत सुपूर्णा पुनरापत ।
वस्नेव विक्रीणावहा इषमूर्जः शतक्रतो ॥२३॥
इति तण्डुलपात्रं च नत्वा श्रीफलमर्पयेत् ।
श्रीश्च लक्ष्मीः रमा राधा ब्रह्मविद्यासतीरतिः ॥२४॥
सुगुणा मञ्जुला हंसा ललिता कम्भरा सती ।
सन्तोषा माणिकी दुर्गाऽमृताऽम्बा शारदा इमाः ॥२५॥
श्रीफले संवसन्त्वत्र सम्पज्जुष्यो भवन्तु नः ।
इति श्रीफलमास्थाप्य श्रीदं तं प्रणमेन्मखी ॥२६॥
ओं मनोजुतिर्जुषतामाज्यस्य बृहस्पतिः क्रतुम् ।
इमं तनोत्वरिष्टं यज्ञं समिमं दधातु च ।
विश्वेदेवा इह घटे मादयन्तामों प्रतिष्ठ ॥२७॥
इति घटं प्रतिष्ठाप्याऽऽवाहयेद् वरुणं ततः ।
जलं सर्वरसाढ्यं वै पावनं च क्रतोर्हितम् ॥२८॥
तत्त्वायामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः ।
अहेडमानो वरुणेह बोद्ध्युरुशंसमान आयुः प्रमोषी ॥२९॥
ओं भुर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च ।
इत्यावाह्य वरुणं चार्चयेत् षोडशवस्तुभिः ॥३०॥
सर्वे समुद्राः सरितस्तीर्थानि च सरांसि च ।
आयान्तु च मखीयानां दुरितक्षयहेतवे ॥३१॥
कलशस्य मुखं कृष्णः कण्ठः सदाशिवः स्मृतः ।
मूलं ब्रह्मा स्वयं बोध्य उदरं मातरः स्मृताः ॥३२॥
कुक्षयः सागराः सन्ति पृथ्वी कलशरूपिणी ।
वेदाः सांगाश्च कलशावयवात्मान एव च ॥३३॥
आवाहयामि तीर्थानि चागच्छत च तिष्ठत ।
अमृतोन्मथने जातः कलशो विष्णुहस्तगः ॥३४॥
तीर्थप्राणसुरभूतवासोऽसि फलदोऽसि च ।
आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥३५॥
अश्विनौ त्वयि तिष्ठन्तु यज्ञार्थं सन्निधिं कुरु ।
इत्येवं कलशं प्राार्थ्य तस्योपरि तु कानकीम् ॥३६॥
वास्तुमूर्तिं कृकलासरूपां तत्र निधापयेत् ।
अग्न्युत्तारणकं कुर्याद् वस्त्रैराच्छादयेत् पटैः ॥३७॥
तत उत्तानकं वास्तुमीशानशिरसं नरम् ।
ध्यायेदग्न्युत्तारणे च देशकालौ प्रकीर्त्य च ॥३८॥
अवघातादिदोषाणां परिहारार्थमेव च ।
अग्न्युत्तारणकं प्राणप्रतिष्ठां च समाचरेत् ॥३९॥
मूर्तिं पात्रे निधायैव दुग्धधारां प्रपातयेत् ।
जलधारां ततः कुर्यात् सूक्तं पठेत् पुनः पुनः ॥४०॥
ओं समुद्रस्य त्वावकयाग्ने परिव्ययामसि ।
सर्वदेवोत्तारणः पावकोऽस्मभ्यः शिवो भव ॥४१॥
ओं हिमस्य त्वा जरायुणाऽग्ने परिव्ययामसि ।
सर्वदेवोत्तारणः पावकोऽस्मभ्यः शिवो भव ॥४२॥
ओमपामिदं न्ययनं समुद्रस्य निवेशनम् ।
विघ्नरूपाँस्तथाऽन्याँस्ते ह्यस्मत्तपन्तु हेतयः ॥४३॥
सर्वदेवोत्तारणः पावकोऽस्मभ्यः शिवो भव ।
नमस्ते हरसे शोचिषे नमस्ते अस्त्वर्चिषे ॥४४॥
विघ्नरूपाँस्तथाऽन्याँस्ते ह्यस्मत्तपन्तु हेतयः ।
सर्वदेवोत्तारणः पावकोऽस्मभ्यः शिवो भव ॥४५॥
प्राणदाऽपानदा व्यानदा वर्चोदा वरिष्ठदाः ।
विघ्नरूपाँस्तथाऽन्याँस्ते ह्यस्मत्तपन्तु हेतयः ॥४६॥
सर्वदेवोत्तारणः पावकोऽस्मभ्यः शिवो भव ।
एवमग्न्युत्तारणं च कृत्वा पञ्चभिरमृतैः ॥४७॥
संस्नाप्य वास्तुपुरुषं कलशोपरि विन्यसेत् ।
ध्यायेद् वास्तुस्वरूपं च परब्रह्मोद्भवं पुरा ॥४८॥

ततः शंभोः शरीराच्चाऽभवत् पुत्रो बली महान् ।
यज्ञापकारकः सोऽयं देवैः पराजितो मृधे ॥४९॥
निपात्याऽधोमुखो बद्धः समन्ताद् देवतागणैः ।
ईशाने मस्तकं न्यस्तं नैर्ऋत्ये पादसंपुटम् ॥५०॥
जानुनी कूर्परीकृत्य बाहुयुग्मं तथाविधम् ।
वायव्याग्न्योस्ततो जानुं हृदये चांजलिस्तथा ॥५१॥
पदीकृत्य च तस्योर्ध्वे सर्वे सुराश्च रोहिताः ।
तं सर्वसुखासं चावाहयामि च वास्तुकम् ॥५२॥
ओं भूर्भुवः सः वास्तुनरं चावाहयामि नौमि च ।
सम्मानयामि चागच्छ महाबलपराक्रम ॥५३॥
सर्वदेवाश्रितवपुर्ब्रह्मपुत्र नमोऽस्तु ते ।
सर्वब्रह्माण्डधृगसि त्वागच्छ भगवन्निह ॥५४॥
आगच्छ भगवन् वास्तो सर्वदेवान्वितस्त्विह ।
तिष्ठात्र कुरु कल्याणं यज्ञेऽस्मिन् सन्निधो भव ॥५५॥
ओं वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः ।
यत्त्वेमहे प्रति तन्नो जुषस्व शन्नो भव द्विपदेशं चतुष्पदे ॥५६॥
इत्यावाह्याऽक्षतपुष्पैश्चन्दनाम्बरभूषणैः ।
सम्पूज्य प्रार्थयेद् रक्षां रक्ष संकटविप्लवात् ॥५७॥
नैवेद्यं धूपदीपौ च नीराजनादि चार्पयेत् ।
स्वाहेत्युच्चार्य च ततोंऽगदवान् विधिनाऽर्चयेत् ॥५८॥
ओं नमः शिखिने चेशानाय पाद्यं तथाऽर्घकम् ।
आचमनं स्नपनं चाम्बरं गन्धं तथाऽक्षतान् ॥५९॥
पुष्पाणि धूपदीपौ च नैवेद्यं च जलं फलम् ।
ताम्बूलं शयनं दक्षिणां ददामि गृहाण शम् ॥६०॥
पर्जन्याय नमः पाद्यादिकं गृहाण शं कुरु ।
जयन्ताय नमः पाद्यादिकं गृहाण शं कुरु ॥६१॥
ओमिन्द्राय नमः पाद्यादिकं गृहाण शं कुरु ।
ओं सूर्याय नमः पाद्यादिकं गृहाण शं कुरु ॥६२॥
ओं सत्याय नमः पाद्यादिकं गृहाण शं कुरु ।
ओं भृशाय नमः पाद्यादिकं गृहाण शं कुरु ॥६३॥
ओं आकाशाय नमश्च ओं वायवे च नमो नमः ।
ओं पूष्णे च नमः ओं वितथायापि नमो नमः ॥६४॥
गृहक्षताय नम ओं ओं यमाय नमो नमः ।
ओं गन्धर्वाय च नमो भृंगराजाय ओं नमः ॥६५॥
ओं मृगाय नम ओं च पितृभ्योऽपि नमो नमः ।
पाद्यादीनि च गृह्णन्तु कुर्वन्तु शं नमो नमः ॥६६॥
ओं नन्दिने नम ओं च सुग्रीवाय नमो नमः ।
ओं पुष्पदन्ताय नमो वरुणाय च ओं नमः ॥६७॥
ओमसुराय च नमः शेषाय च नमो नमः ।
नमः पापाय रोगाय ओं नामश्चाहये नमः ॥६८॥
ओं मुख्याय नमो भल्लाटाय ओं च नमो नमः ।
ओं सोमाय च नागायाऽदितये दितये नमः ॥६९॥
ओमदम्यश्च नमश्चापवत्साय नमो नमः ।
पाद्यादीनि च गृह्णन्तु कुर्वन्तु शं नमो नमः ॥७०॥
ओमर्यम्णे नम ओं सावित्राय च नमश्च ओम् ।
ओं सवित्रे नमो विवस्वते चेन्द्राय ओं नमः ॥७१॥
ओं जयन्ताय नम ओं मित्राय नम ओं नमः ।
राजयक्ष्मणे नम ओं ओं रुद्राय नमो नमः ॥७२॥
ओं पृथिवीधराय च नम ओं ब्रह्मणे नमः ।
पाद्यादीनि च गृह्णन्तु कुर्वन्तु शं नमो नमः ॥७३॥
ओं चरक्यै नम ओं च विदार्यै च नमश्च ओम् ।
पूतनायै नम ओं च पापायै च नमश्च ओम् ॥७४॥
ओं स्कन्दाय नमश्चार्यम्णे नमो जृंभकाय ओम् ।
नम ओं पिलिपिच्छाय ओमिन्द्राय नमश्च ओम् ॥७५॥
अग्नये ओं नमो यमाय ओं निर्ऋतये नमः ।
नम ओं च वरुणाय ओं वायवे नमो नमः ॥७६॥
ओं कुबेराय नम ओमीशानाय ओं नमः ।
ओं ब्रह्मणे नमश्च ओमनन्ताय नमो नमः ॥७७॥
पाद्यादीनि च गृह्णन्तु कुर्वन्तु शं नमो नमः ।
भवन्तश्चांगदेवाद्या गृह्णन्तु गन्धमक्षतान् ॥७८॥
पुष्पधूपौ दीपवस्त्रे प्रतिपात्रस्थभोजनम् ।
जलं फलं दलं ताम्बूलकं च दक्षिणादिकम् ॥७९॥
आरार्त्रिकं चार्पयामि गृह्णन्तु वितरन्तु शम् ।
अथ वास्तुपुरुषं च पूजयेत्तु पुनस्तथा ॥८०॥
कुर्यात्प्राणप्रतिष्ठां वै बीजप्रणवबृंहिताम् ।
एकाग्रं हृदयं कृत्वा ध्यात्वा देवं समुच्चरेत् ॥८१॥
ओं आं ह्री क्रौ यं रं लं वं शं षं सं हं क्षं हं सः सोऽहम् ।
अस्य देवस्य वै प्राणा इह प्राणा वसन्तु च ॥८२॥
ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं क्षं हं सः सोऽहम् ।
अस्य देवस्य वै जीव इह जीवः स्थितश्च ओम् ॥८३॥
ओं आं ह्रीं क्रौं यं रं लं वं शं षं सं हं क्षं हं सः सोऽहम् ।
अस्य देवस्य वाङ्मनस्त्वक्चक्षुःश्रोत्रमित्यपि ॥८४॥
जिह्वा घ्राणं पाणिपादाः पायूपस्थानि चान्तरम् ।
अस्मिन्नागत्य च चिरं सुखं तिष्ठन्तु वै स्वाहा ॥८५॥
ओं मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञम् ।
इमं तनोत्वरिष्टं च यज्ञं समिमं दधातु ॥८६॥

विश्वेदेवास इह मादयन्तामों प्रतिष्ठत ।
एवं प्रतिष्ठायज्ञेन यजन्ते वै प्रतिष्ठितान् ॥८७॥
तव वास्तो महापूजां करोम्यनुग्रहं कुरु ।
ओं वास्तुपुरुषाय च नमोऽर्पयामि पाद्यकम् ॥८८॥
अर्घ्यं चाचमनं पञ्चामृतस्नानं ददामि च ।
शुद्धोदकं यज्ञसूत्रं चार्पयामि च ते नमः ॥८९॥
वस्त्रं गन्धं कुसुमं च धूपं दीपं तथाऽत्तरम् ।
नैवेद्यं फलताम्बूले चार्पयामि च ते नमः ॥९०॥
दक्षिणां प्राञ्जलिं चार्घ्यं समर्पयामि ते नमः ।
ओं पूज्योऽसि त्रिलोकेषु यज्ञरक्षार्थहेतवे ॥९१॥
त्वदर्चनं विना नैव सिद्ध्यन्ति क्रतुसत्क्रियाः ।
अयोने भगवन् शंभुललाटस्वेदसंभव ॥९२॥
गृहाणाऽर्घ्यं मया दत्तं वास्तो स्वामिन्नमोऽस्तु ते ।
एवमर्घ्यं प्रदत्त्वैव बलिदानं समर्पयेत् ॥९३॥
ओं ब्रह्मणे नम एष पायसबलिर्नमम ।
ओं पर्जन्याय नम एष पायसबलिर्नमम ॥९४॥
ओं जयन्ताय नम एष पायसबलिर्नमम ।
ओमिन्द्राय नम एष पायसबलिर्नमम ॥९५॥
ओं सूर्याय नम एष पायसबलिर्नमम ।
ओं सत्याय नम एष पायसबलिर्नमम ॥९६॥
एवं वै वास्तुदेवेभ्यः प्रत्येकाय पुनः पुनः ।
ओममुकाय नम एष पायसबलिर्नमम ॥९७॥
इति दद्याद् बलिं ततश्चरक्यादिभ्य इत्यपि ।
दिक्पालेभ्यो माषभक्तबलीन् दद्याच्च तद्यथा ॥९८॥
ओं चरक्यै नम एष माषभक्तबलिर्नमम ।
ओं विदार्यै नम एष माषभक्तबलिर्नमम ॥९९॥
पूतनायै नम एष माषभक्तबलिर्नमम ।
ओं पापायै नम एष माषभक्तबलिर्नमम ॥१००॥
ओं स्कन्दाय नम एष माषभक्तबलिर्नमम ।
अर्यम्णे जृम्भकायापि पिलिपिच्छाय चार्पयेत् ॥१०१॥
इन्द्राग्नियमनिर्ऋतवरुणवायवे नमः ।
कुबेरेशाजानन्तेभ्यो माषभक्तबलिर्नमम ॥१०२॥
ततो वास्तुपुरुषाय बलिं दद्याद्धि मन्त्रतः ।
नानासुगन्धिपक्वान्नं पायसाद्यं विभिन्नकम् ॥१०३॥
बलिं गृहाण वास्तो त्वं क्षुधादोषं प्रणाशय ।
ओं नम एष वास्तुपुरुषाय बलिर्नमम ॥१०४॥
ये देवाः पायसभुजो गृह्णन्तु पायसं हि ते ।
ये देवाश्चान्नभोक्तारो गृह्णन्त्वन्नं शुभं मधु ॥१०५॥
ये देवा रसभोक्तारो गृह्णन्त्वेते रसान् बहून् ।
ये देवाः कृशरादास्ते गृह्णन्तु कृशरान्नकम् ॥१०६॥
ये देवा माषभोक्तारो गृह्णन्तु माषजं बलिम् ।
ये देवाश्चामृतभुजो गृह्णन्त्वमृतमेव ते ॥१०७॥
ये देवाः पिष्टचूर्णादा गृह्णन्तु पिष्टचूर्णकम् ।
ये देवाः फलभोक्तारो गृह्णन्त्वेते फलानि च ॥१०८॥
ये देवाः कणभोक्तारः सर्षपादाश्च ये सुराः ।
शाकादा हव्यभोक्तारो येषां योग्यं तु यद्भवेत् ॥१०९॥
तत्तन्मयार्पितं देवा गृह्णन्त्विष्टबलिं नमम ।
मन्त्रहीनं क्रियाहीनं भक्तिश्रद्धाविहीनकम् ॥११०॥
यदर्पितं मया देव परिपूर्णं विधीयताम् ।
नमस्ते वास्तुदेवेश सर्वविघ्नहरो भव ॥१११॥
शान्तिं कुरु सुखं देहि सर्वान् कामान् प्रयच्छ मे ।
ओं श्रीवास्तुपुरुषायाऽर्पयामि नारिकेलकम् ॥११२॥
सुवर्णं चार्पयाम्यत्र प्रणमामि सुखं कुरु ।
श्रीं लक्ष्मीं च रमां राधां ब्रह्मविद्यां च पद्मजाम् ॥११३॥
सुगुणां मंजुलां पद्मां ललितां कंभरां सतीम् ।
सन्तोषां माणिकीं दुर्गाऽमृताऽम्बाः शारदामिमाः ॥११४॥
अर्चयेत् सात्त्विकैर्द्रव्यैः पायसाद्यैश्च तोषयेत् ।
ततो वै मण्डपं वेष्टयेत् त्रिसूत्र्या समन्ततः ।
सूक्तेन पवमानेन रक्षोघ्नेन निनादयन् ॥११५॥
ओं पवमानः सुवर्जनः पवित्रेण विचर्षणिः ।
यः पोता स पुनातु मां पुनन्तु मां देवजनाः ॥११६॥
पुनन्तु मनवो धिया पुनन्तु विश्व आयवः ।
जातवेदः पवित्रवत् पवित्रेण पुनीहि माम् ॥११७॥
शुक्रेण देवदीद्यत् अग्ने क्रत्वा क्रतूरनु ।
यत्ते पवित्रमर्चिषि अग्ने विततमन्तरा ॥११८॥
ब्रह्म तेन पुनीमहे उभाभ्यां देवसवितः ।
पवित्रेण सवेन च इदं ब्रह्म पुनीमहे ॥११९॥
वैश्वदेवी पुनती देव्यागाद् यस्यैस्तनुवो वीतपृष्ठाः ।
तया मदन्तः सधमाद्येषु वयस्यामपतयोरयीणाम् ॥१२०॥
वैश्वानरो रश्मिभिर्या पुनात्तु वातः प्राणेनेषिरोमयो भूः ।
द्यावापृथिवी पयसा पयोभिः ऋतावरीयज्ञियेमापुनीताम् ॥१२१॥
बृहद्भिः सवितस्तृभिः वर्शिष्ठैर्देव-
मन्मभिः अग्ने दक्षै पुनीहिमा ।
येन देवा अपुनत येनापो दिव्यं कशः
तेन दिव्येन ब्रह्मणा इदं ब्रह्म पुनीमहे ॥१२२॥

ओं रक्षोहणं वलगहनं वैष्णवी-
मिदमहन्तं वलगमुत्किरामि ।
यं मेऽनिष्ट्यो यममात्यो
निचखानेदमहन्तं वलगमुत्किरामि ॥१२३॥
यं मे समानो यमसमानो
निचखानेदमहन्तं बलगमुत्किरामि ।
यं मे सबन्धुर्यमसबन्धु-
र्निचखानेदमहन्तं वलगमुत्किरामि ॥१२४॥
यं मे सजातो यमसजातो
निचखानोत्कृत्यां किरामि ।
ओं कुणुष्वपाजः प्रसितिं न
पृथिवीं याहि राजेवाम-वां इभेन ॥१२५॥
तृष्वीमनुप्रसितिं द्रुणानोस्ता-
सिविद्ध्यरक्षसस्तपिष्ठैः ।
पुनन्तु मां देवजना मनसा धियो
विश्वाभूतानि जातवेदोऽपि माम् ॥१२६॥
इत्येवं राधिके! मण्डपं त्रिसूत्र्या प्रवेष्टयेत् ।
मण्डपे च ततश्चागत्यासने तत आविशेत् ॥१२७॥
एवं नारायणः कृष्णो जगाद देवतायनम् ।
तत्तथैव मयोक्तं ते यद्यपि नाति विस्तरम् ॥१२८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रतिष्ठोत्सवे कलशस्थापनं वास्तोः प्रतिष्ठानं पूजनं वास्तु-देवानां पूजनं नैवेद्यं बलिस्त्रिसूत्र्या मण्डपवेष्टनं मन्त्राश्चेत्यादिकथननामा सप्तचत्वारिंशदधिक-शततमोऽध्यायः ॥ १४७ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणस्ततः ।
देवायतनकायाऽऽह पञ्च तत्ते वदामि च ॥ १ ॥
ततो वायवीयपीठे योगिनीक्षेत्रपालकान् ।
पूजयेद् विधिना समावाह्य शोडशवस्तुभिः ॥ २ ॥
ओं दिव्ययोगिनीमावाहयामि स्थापयामि च ।
ओं दिव्ययोगिनीं नौमि क्षेत्ररक्षणकारिणीम् ॥ ३ ॥
ओं महायोगिनीमावाहयामि स्थापयामि च ।
पूजयामि च गन्धाद्यैस्तां तस्यै ते नमो नमः ॥ ४ ॥
ओं सिद्धयोगिनीमावाहयामि स्थापयामि च ।
पूजयामि च गन्धाद्यैस्तां तस्यै ते नमो नमः ॥ ५ ॥
ओं श्रीगणेश्वरीमावाहयामि स्थापयामि च ।
पूजयामि च गन्धाद्यैस्तां तस्यै ते नमो नमः ॥ ६ ॥
ओं प्रेताक्षीं डाकिनीं च कालीं च कालरात्रिकाम् ।
आवाहयामि स्थापयामि पूजयामि च वो नमः ॥ ७ ॥
निशाचरीमों हूँकारी सिद्धिवेतालिनीं तथा ।
आवाहयामि स्थापयामि पूजयामि च वो नमः ॥ ८ ॥
ओं ह्रींकारीं भूतडामरीमूर्ध्वकेशीं च ओं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥ ९ ॥
विरूपाक्षीं च शुष्कांगीं नरभोजनां च ओं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१०॥
ओं कंकारीं वीरभद्रां धूम्राक्षीं ओं कलिप्रियाम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥११॥
राक्षसीं घोरराक्षसीं विरूपाक्षीं भयंकरीम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१२॥
विशालाक्षीं कामरीं च चण्डीं वाराहिनीं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१३॥
मुण्डधर्त्रीं भैरवीं चक्रिणीं क्रोधां च दुर्मुखीम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१४॥
प्रेतवाहनां कुरंगीं प्रलम्बौष्ठीं मालिनीं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१५॥
मन्त्रयोगिनीं कालाग्नी मोहिनीं वक्रिकां तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१६॥
कुण्डलिनीं बालकीं च कौमारीं यमदूतिकाम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१७॥
ओं करालीं कौशिकीं च यक्षिणीं भक्षिणीं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१८॥
कुमारिकां यन्त्रवाहां विशालाक्षीं च कामुकीम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥१९॥
ओं वाभ्रीं राक्षसीं प्रेतभक्षिणीं धूर्जटीं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२०॥
ओं विकटां च घोरां च कपालीं विमलां तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२१॥
ओं मालां सर्वसिद्धां चाऽऽवाहयामि च वां नमः ।
स्थापयामि पूजयामि सर्वाः सन्तु च सिद्धिदाः ॥२२॥
अनया पूजया षोडशोपचारादिभिरिह ।
प्रीयन्तां पायसबलिं ददामि योगिनीगणाः ॥२३॥
अथ क्षेत्रपालपीठदेवताः संप्रपूजयेत् ।
ओमजरमावाहयामि स्थापयामि च ते नमः ॥२४॥

पूजयामि बलिं चार्पयामि नमोऽजराय ते ।
इन्द्रचोरम् आह्वयामि स्थापयामि च ते नमः ॥२५॥
व्यापकं चेन्द्रमूर्तिं चोक्ष्णं कूष्माण्डं वरुणकम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२६॥
वामुकं च विमुक्तं च लीलालोपं च शसकम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२७॥
ऐरावतं चैकदंष्ट्रम् ओषधिघ्नं च बन्धनम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२८॥
दिव्यकरं कम्बलं च गवयवं च क्षोभणम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥२९॥
कालं बलधरं चाऽण्डं चन्द्रवारणकं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३०॥
फटाटोपं च जटिलम् ऋतुं घण्टेश्वरं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३१॥
विकटं चाणिमं गुणबन्धं च डामरं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३२॥
टंठफणं स्थविलं च दन्तुरं धनदं तथा ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३३॥
नागकर्णं फोत्करं च महादलं च चीरकम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३४॥
ओं सिंहं च मृगं यक्षं मेघवाहनमित्यपि ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३५॥
ओं तीक्ष्णौष्ठमनलं सुक्रतुं युधापं 'वक्रकम् ।
आह्वयामि स्थापयामि पूजयामि च वो नमः ॥३६॥
ओं वातं यापनं चावाहयामि, स्थापयामि च ।
पूजयामि बलिं चार्पयामि वां प्रणमामि च ॥३७॥
पञ्चाशत्क्षेत्रपालाश्चेहागच्छतात्र तिष्ठत ।
आसनं च तथा पाद्यमर्घ्यमाचमनीयकम् ॥३८॥
पञ्चामृताप्लवनं चाभिषेकं चाम्बराणि च ।
भूषाश्चन्दनगन्धादि चाक्षतान् कुंकुमादिकम् ॥३९॥
पुष्पहारान् कज्जलं च धूपं दीपं निवेदनम् ।
भोजनं जलपानं च फलं ताम्बूलकादिकम् ॥४०॥
नीराजनादिकं समर्पयामि सन्तु रक्षकाः ।
ओं ह्रां ह्रीं ह्रूं स्वाहा बटुकाय प्रभूतबलिमर्पयेत् ॥४१॥
योगिन्यः क्षेत्रपालाश्च सर्वे यत्र वसन्ति हि ।
ततश्चात्र समागत्य बलिं गृह्णन्तु मेऽमृतम् ॥४२॥
बलिदानेन सन्तुष्टाः प्रयच्छन्तु ममेप्सितम् ।
यज्ञे कार्याणि कुर्वन्तु दोषाँश्च घ्नन्तु मे मखे ॥४३॥

इति दत्वाऽर्थयित्वा च प्रणमेत् सर्वदेवताः ।
ततः श्रीमण्डपपूजां कुर्यात् षोडशवस्तुभिः ॥४४॥
ऋत्विभिर्गुरुणा चापि स्नापितो यजमानकः ।
सर्वौषधिसलिलेन शुक्लमाल्याम्बरस्तथा ॥४५॥
शुक्लगन्धानुलेपश्च सपत्नीपुत्रपौत्रकः ।
साऽऽचार्यर्त्विक् करे पूर्णकलशस्तूर्यनादने ॥४६॥
मुख्यदेवं ध्यायमानो मण्डपध्यानतत्परः ।
वेदघोषान् प्रश्रृण्वानो मण्डपं पूजयेत् सुधीः ॥४७॥
ओं भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाऽक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवाँसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥४८॥
आचम्य प्राणानायम्य देशकालौ प्रकीर्त्य च ।
मुख्यदेवप्रतिष्ठाने यज्ञांगं पूजनं शुभम् ॥४९॥
गणेशस्य देवतानां मण्डपस्य करोम्यहम् ।
आवाहनं स्थापनं च नमनं प्रकरोमि च ॥५०॥
ओं श्रीगणेश्वरमावाहयामि स्थापयामि च ।
षोडशवस्तुभिः सम्पूजयामि प्रणमामि च ॥५१॥
एवं गणेशं सम्पूज्य दत्वा नैवेद्यकं तथा ।
स्तम्भपूजां ततः कुर्यादीशानादिक्रमान्मखी ॥५२॥
ओमीशान्यां ब्रह्ममूर्तिमावाहयामि वेधसम् ।
स्थापयामि पुस्तकाऽक्षसूत्रशूलकमण्डलून् ॥५३॥
दधानं देवतायुक्तं हंसस्थं तं पितामहम् ।
आगच्छ सृष्टिकृद् ब्रह्मन् प्रथमस्तंभवासकृत् ॥५४॥

ओं ब्रह्म यज्ञानं प्रथमं पुरस्ताद्
विसीमतः सुरुचोवेन आवः ।
सबुध्न्याः उपमा अस्य विष्ठाः
सतश्च योनिमसतश्च विवः ॥५५॥

ओं ओं भूर्भुवः स्वर्ब्रह्मन्निहागच्छ च तिष्ठ च ।
नम ओं ब्रह्मणे षोडशोपचारान् ददामि ते ॥५६॥
अथाऽऽग्नेये शुभे स्तंभे विष्णुमावाहयामि च ।
शंखचक्रगदापद्मचतुर्बाहुं रमापतिम् ॥५७॥
गरुडस्थं कमलाश्रीलक्ष्मीगणप्रसेवितम् ।
आगच्छ भगवन् विष्णो द्वितीयस्तंभवासकृत् ॥५८॥
स्थापयामि प्रभुं त्वां च पूजयामि नमामि च ।
ओं ओं भूर्भुवः स्वः विष्णो इहागच्छ च तिष्ठ च ॥५९॥
नम ओं विष्णवे षोडशोपचारान् ददामि ते ।
ओम् इदं विष्णुर्विचक्रमे त्रेधा च निदधे पदम् ॥६०॥
समूढमस्य पांसुरे ओं विष्णवे ते नमो नमः ।
अथ नैर्ऋत्यकस्तंभे शिवमावाहयामि च ॥६१॥

वृषभस्थं चन्द्रभालं शूलिनं मुण्डमालिनम् ।
उमागणसमाजुष्टं नागयज्ञोपवीतकम् ॥६२॥
आगच्छ भगवन् शंभो तृतीयस्तंभवासकृत् ।
स्थापयामि हरं त्वां च पूजयामि नमामि च ॥६३॥
ओं भूर्भुवः स्वः शंभो इहागच्छ च तिष्ठ च ।
नम ओं शंभवे षोडशोपचारान् ददामि ते ॥६४॥
ओं नमस्ते रुद्रमन्यव उतोत इषवे नमः ।
बाहुभ्यामुत ते नमः ओं शंभवे ते नमो नमः ॥६५॥
अथ वायुकोणस्तंभे इन्द्रमावाहयामि च ।
सहस्राक्षं गजारूढं वज्रिणं च शचीपतिम् ॥६६॥
आगच्छ भगवन्निन्द्र चतुर्थस्तम्भवासकृत् ।
स्थापयामि महेन्द्रं त्वां पूजयामि नमामि च ॥६७॥
ओं भूर्भुवः स्वः इन्द्र इहागच्छ च तिष्ठ च ।
नम इन्द्राय ओं षोडशोपचारान् ददामि ते ॥६८॥
ओं त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥६९॥
ओं इन्द्राय नमस्ततो द्वादशस्तंभपूजनम् ।
बाह्यभागे मण्डपस्य करोमीशानतः क्रमात् ॥७०॥
अथेशाने सूर्यमावाहयामि स्थापयामि च ।
सप्ताश्वरथसंरूढं रक्तांगं तिग्मतेजसम् ॥७१॥
सपद्मं पूजयाम्यत्र पञ्चमस्तंभसंस्थितम् ।
त्रैलोक्यनेत्ररूपं च कुण्डलादिविराजितम् ॥७२॥
ओं आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्मयेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥७३॥
ओं भूर्भुवः स्वः सूर्य इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥७४॥
अथेशानपूर्वयोस्तु मध्ये स्तंभे गणेशकम् ।
आह्वयामि स्थापयामि विघ्नहरं गजाननम् ॥७५॥
सिद्धिबुद्धिप्रदातारं प्रणमामि विनायकम् ।
आगच्छ गणनाथ त्वं षष्ठस्तंभे च तिष्ठ च ॥७६॥
ओं गणानां त्वा गणपतिं हवामहे ।
ओं प्रियाणां त्वा प्रियपतिं हवामहे ।
ओं निधीनां त्वा निधिपतिं हवामहे ।
वसो मम आहमजानिगर्भधमात्वामजासिगर्भधम् ॥७७॥
ओं भूर्भुवः स्वः गणपते इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥७८॥
अथ पूर्वाऽग्न्यन्तरालस्तम्भे यमं यमाधिपम् ।
आह्वयामि स्थापयामि सर्वजन्तुभयंकरम् ॥७९॥
रौद्रमूर्तिं कृष्णवर्णं प्रणमामि सदण्डकम् ।
माहिषवाहनं कर्मसाक्षिणं धर्ममूर्तिकम् ॥८०॥
आगच्छ धर्मराज त्वं सप्तमस्तंभके विश ।
ओं यमाय त्वा मखाय त्वा सूर्यस्य त्वा तपसे ॥८१॥
देवस्त्वा सवितामद्ध्वानक्तुपृथिव्याः संस्पृशस्पाहि ।
अर्चिरसि शोचिरसि तपोऽसि ब्रह्ममूर्तिकः ॥८२॥
ओं भूर्भुवः स्वः यम इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥८३॥
अथाऽग्निकोणके स्तंभे शेषं पातालवासिनम् ।
आह्वयामि स्थापयामि सहस्रशिरसं शुभम् ॥८४॥
स्वस्तिकरेखया युक्तफणामणिविभूषितम् ।
नारायणासनं देवं प्रणमामि विषान्वितम् ॥८५॥
आगच्छ शेषराज त्वं चाष्टमस्तंभके विश ।
ओं नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु ॥८६॥
येऽन्तरिक्षे ये च दिवि तत्सर्पेभ्यो नमो नमः ।
ओं भूर्भुवः स्वः शेष इहागच्छ च तिष्ठ च ॥८७॥
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ।
अथाऽग्निदक्षमध्यस्थे स्तम्भे स्कन्दं तु षण्मुखम् ॥८८॥
आह्वयामि स्थापयामि कार्तिकेयं हि शांकरम् ।
सर्वतत्त्वब्रह्मविदं मयूरस्थं नमामि च ॥८९॥
आगच्छ शरजन्म त्वं नवमे स्तम्भके विश ।
देवसेनापते गांगेयक वाह्नेयक प्रभो ॥९०॥
ओं यदक्रन्दः प्रथमं जायमान उद्यन्समुद्रादुत वा पुरीषात् ।
श्येनस्य पक्षा हरिणस्य बाहु उपस्तुत्यं महि जातं तेऽर्वन् ॥९१॥
ओं भूर्भुवः स्वः स्कन्द इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥९२॥
दक्षनैर्ऋत्यान्तरालस्तंभे वायुं प्राणं देहिनाम् ।
कृष्णमृगसमारूढं सर्वाधारं ध्वजायुधम् ॥९३॥
आह्वयामि स्थापयामि प्रणमामि सदागतिम् ।
आगच्छात्र वायुदेव दशमे स्तंभके विश ॥९४॥
ओं वायो ये ते सहस्रिणो रथासस्तेभिरागहि ।
नियुत्वान्सोमपीतये प्राणीत्यदभ्रमात्मसु ॥९५॥
ओं भूर्भुवः स्वः वायो इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥९६॥
नैर्ऋत्यकोणके स्तंभे सोमं वै रात्रिनायकम् ।
शशिनं रुद्रशीर्षस्थं श्वेतं क्षीरोदपुत्रकम् ॥९७॥
आह्वयामि स्थापयामि प्रणमामि सुशीतलम् ।
आगच्छात्र सोमदेवैकादशस्तंभके विश ॥९८॥

ओं आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् ।
भवाव्वाजस्य संगथेऽमृतवर्षी प्रपोषिता ॥९९॥
ओं भूर्भुवः स्वः सोमदेव इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥१००॥
निर्ऋतिपश्चमध्यस्थे स्तंभे तु वरुणं सुरम् ।
कुंभीरथसमारूढं पाशहस्तं समुज्ज्वलम् ॥१०१॥
आह्वयामि स्थापयामि प्रणमामि जलेश्वरम् ।
आगच्छात्र वरुणेश द्वादशस्तंभके विश ॥१०२॥
ओम् इमम्मे वरुणश्रुधीहवमद्याचमृडय ।
त्वामवस्युराचके तृट्प्रभाहन् विपाशकृत् ॥१०३॥
ओं भूर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥१०४॥
पश्चवाय्वोरन्तराले स्तंभेऽष्टवसुसत्तमान् ।
अश्वस्थान् पुष्पमालाद्यैर्धनस्मृद्धया समन्वितान् ॥१०५॥
आह्वयामि स्थापयामि प्रणमामि वसुभृतान् ।
अत्रागच्छत वसवो विशन्तु च त्रयोदशे ॥१०६॥
ओं वसोः पवित्रमसि शतधारं
वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः
पवित्रेण शतधारेण सुप्वाकामधुक्षः ॥१०७॥
ओं भूर्भुवः स्वः वसवोः इहागच्छत तिष्ठत ।
षोडशवस्तुसंभूतां पूजां गृह्णन्तु वो नमः ॥१०८॥
वायुस्तंभे धनदं सयक्षं नरयानं गदाधरम् ।
आह्वयामि स्थापयामि प्रणमामि कुबेरकम् ॥१०९॥
अत्रागच्छ च धनद विश स्तंभे चतुर्दशे ।
ओं वयं सोमव्रते तव मनस्तनूषु बिभ्रतः ॥११०॥
प्रजावन्तः सचेमहि स्वर्णवन्तोः भवेमहि ।
ओं भूर्भुवः स्वः धनद इहागच्छ च तिष्ठ च ॥१११॥
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ।
वायूत्तरान्तरालस्थस्तंभं बृहस्पतिं गुरुम् ॥११२॥
आह्वयामि स्थापयामि प्रणमामि गिरां निधिम् ।
अत्रागच्छ बृहस्पते स्तंभे पञ्चदशे विश ॥११३॥
ओं बृहस्पते अतियदर्यो अर्हाद्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवस ऋतप्प्रजाततदस्मासु द्रविणं धेहि चित्रम् ॥११४॥
ओं भूर्भुवः स्वः बृहस्पते इहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥११५॥
उत्तरेशानयोर्मध्येस्तंभे तु विश्वकर्मकम् ।
आह्वयामि स्थापयामि प्रणमामि सुतेजसम् ॥११६॥
श्वेतं शिल्पकलाढ्यं च सर्वज्ञं च सनातनम् ।
अत्रागच्छ विश्वकर्मन् स्तंभे षोडशके विश ॥११७॥
ओं विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् ।
तस्मै विशः समनमन्तपूर्वीरयमुग्रोविहव्यो यथासत् ॥११८॥
ओं भूर्भुवः स्वः विश्वकर्मन्निहागच्छ च तिष्ठ च ।
षोडशवस्तुसंभूतां पूजां गृह्ण च ते नमः ॥११९॥
इत्येवं षोडशस्तंभान् पूजयेद् राधिके धरान् ।
यदाह भगवान् कृष्णस्तत्ते प्रोक्तं मयात्र च ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने देवप्रतिष्ठाने चतुष्षष्टियोगिनीपञ्चाशत्क्षेत्रपालमण्डपीय-षोडशस्तंभदेवावाहनपूजनादिनिरूपणनामाऽष्टचत्वारिं-शदधिकशततमोऽध्यायः ॥ १४८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! पश्चाद् भगवान् पुरुषोत्तमः ।
देवायतनभक्ताय यजगाद वदामि ते ॥ १ ॥
ओं नागमात्रे नम इति बलिकाष्ठानि पूजयेत् ।
चन्दनं कुसुमं धूपं दीपं नैवेद्यमर्पयेत् ॥ २ ॥
ओं सर्वेभ्यो नम इति शाखोद्वन्धनमर्चयेत् !
चन्दनं कुसुमं धूपं दीपं नैवेद्यमर्पयेत् ॥ ३ ॥
निर्गत्य पश्चिमद्वारात् पूर्वद्वारस्य तोरणम् ।
पूजयेन्मण्डपात्पूर्वे हस्तमात्रे बहिःशुभम् ॥ ४ ॥
अश्वत्थं सुदृढाख्यं सिन्दूरवर्णं हि तोरणम् ।
महेन्द्रपर्वतयुतं शंखांकितं हि पूजयेत् ॥ ५ ॥
ओं अश्वत्थतोरण चैनं यज्ञं रक्ष प्ररक्ष च ।
सर्वान् विघ्नान् वारयाऽत्र स्थितं स्थिरं नमामि ते ॥ ६ ॥
ओं अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ।
होतारं रत्नधातमं रक्ष मण्डपसार्थकम् ॥ ७ ॥
ओं ऋग्वेदाधिष्ठिताय सुदृढतोरणाय च ।
नमः सुदृढतोरण चावाहयामि ते नमः ॥ ८ ॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण दृणतोरण ते नमः ॥ ९ ॥
ओमत्र तिष्ठते कृतयुगाय च नमो नमः ।
कृतं युगं तोरणे चावाहयामि च ते नमः ॥१०॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण सत्ययुग च ते नमः ॥११॥
तत्रैव राहवे नम आवाहयामि राहुकम् ।
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ॥१२॥

ताम्बूलं दक्षिणां गृह्ण राहो देव च ते नमः ।
बृहस्पतये नम आवाहयामि बृहस्पतिम् ॥१३॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण बृहस्पते च ते नमः ॥१४॥
तत्रैकं कलशं धृत्वा महीं स्पृष्ट्वा मनुं वदेत् ।
ओं मही द्यौः पृथिवी च नः इमं यज्ञं मिमिक्षताम् ॥१५॥
पिपृतान्नो भरीमभिः समृद्धान्नो रसादिभिः ।
तत्र चौषधयः क्षेप्या यवाः क्षेप्या मनुप्लुताः ॥१६॥
ओं ओषधयः समवदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥१७॥
कलशं भूतले चाथ निधाय च मनुं वदेत् ।
ओं आजिघ्रकलशं मह्या त्वा विशन्त्विन्दवः ॥१८॥
पुनरूर्जा निवर्तस्व शानःसहस्रं धुक्ष्व ।
उरुधारा पयस्वती पुनर्मा विशताद्रयिः ॥१९॥
जलेनाऽऽपूर्य कलशं तीर्थे स्मृत्वा मनु वदेत् ।
ओं वरुणस्योत्तम्भनसि वरुणस्य स्कंभसर्जनीस्थः ॥२०॥
वरुणस्य ऋतसदन्यसि वरुणस्य ऋतसदनमसि ।
वरुणस्य ऋतसदनमासीद सर्वतीर्थमृतो भव ॥२१॥
अथ गन्धं प्रक्षिपेच्च कलशे तीर्थवारिषु ।
ओं गन्धद्वारां दुराधर्षां नित्यपुष्टां करिषिणीम् ॥२२॥
ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ।
सर्वौषधीस्तत्र ततःक्षिपेत्तासां मनून् गृणन् ॥२३॥
ओं या ओषधीः पूर्वा याता देवेभ्यस्त्रियुगं पुरा ।
मनैनुबभ्रूणामहःशतं धामानि सप्त च ॥२४॥
अथ दूर्वाः क्षिपेत् तत्र दूर्वायाश्च मनुं गृणन् ।
ओं काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥२५॥
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ।
अथ तत्र क्षिपेत् पञ्चपल्लवान् तन्मनुं गृणन् ॥२६॥
ओं अश्वत्थे वो निषदनं पर्णे वो वसतिः कृता ।
गोभाज इत् किलासथ यत्सनवथ पूरुषम् ॥२७॥
अथ सप्तमृत्तिकाश्चार्पयेत् तासां मनुं गृणन् ।
ओं स्योना पृथिवी नो भवानृक्षरानिवेशिनी ॥२८॥
यच्छानः शर्मसप्रथाः पुष्टिदा भवथेह च ।
अथ पूगीफलं दद्यात् तस्यापि च मनुं गृणन् ॥२९॥
ओं याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वं हसः ॥३०॥
अथ पञ्चैव रत्नानि न्यसेत्तेषां मनुं गृणन् ।
ओं परिवाजपतिः कविरग्निर्हव्यान्यक्रमीत् ॥३१॥
दधद् रत्नानि दाशुषे सर्वरत्नानि चावह ।
अथ क्षिपेद्धिरण्यं च हिरण्यगर्भकं गृणन् ॥३२॥
ओं हिरण्यगर्भःसमवर्तताग्रेभूतस्य जातः पतिरेकआसीत् ।
सदाधारपृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम ॥३३॥
अथ वस्त्रं वेष्टयेच्च युवासुमन्त्रमुच्चरन् ।
तेजोवासांसि रम्याणि दत्त्व स्वर्णानि धारय ॥३४॥
ओं युवासुवासाः परिवीत आगात्स
उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति
स्वाध्यो मनसा देवयन्तः ॥३५॥
अथ धान्यादिना पूर्णं पात्रं निधाय तच्छिरः ।
ओं पूर्णादर्वि परापत सुपूर्णा पुनरापत ॥३६॥
वस्नेव विक्रीणावहा इषमूर्ज्जं शतक्रतो ।
इतिमन्त्रेण संस्कृत्य कलशे ध्रुवमाह्वयेत् ॥३७॥
ओं ध्रुवं चावाहयामि स्थापयामि नमश्च ते ।
गन्धं पुष्पं धूपदीपौ नैवेद्यं चार्पयामि ते ॥३८॥
पूजयामि मखे चात्र ध्रुवो ध्रुवतरो भव ।
ततश्च दक्षिणे गत्वा औदुम्बरं च तोरणम् ॥३९॥
विकटाख्यं चक्रचिह्नं विन्ध्यनामाऽद्रिसंयुतम् ।
धूम्रवर्णं तोरणं चावाहयाम्यर्चयामि च ॥४०॥
एहि विकटतोरण त्वं यज्ञं रक्ष प्ररक्ष च ।
विघ्नान्निवारयेतस्तात् रसान् स्मृद्धिं प्रदापय ॥४१॥
ओं इषे त्वोर्जे त्वा वायवस्थदेवो वः ।
सविता प्रार्पयतु श्रेष्ठतमाय कर्मणः ।
आप्यायद्धमघ्न्या इन्द्रायभागंप्रजावतीरनमीवा अयक्ष्मा॥४२॥
मावस्तेन ईशतमाऽघशंसो ध्रुवा अस्मिन् ।
गोपतौस्यातबह्वीःयजमानस्य पशून् पाहि ।
गोमहिषीः गजाश्वान् गवयान् पाहि गोवृषांश्च ॥४३॥
ओं यजुर्वेदाधिष्ठिताय विकटतोरणाय ते ।
नमस्त्वामावाहयामि स्थापयामि च ते नमः ॥४४॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण विकटतोरण ते नमः ॥४५॥
ओमत्र तिष्ठते त्रेतायुगाय च नमो नमः ।
त्रेतायुगं तोरणे चावाहयामि च ते नमः ॥४६॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण त्रेतायुग च ते नमः ॥४७॥
तत्रैव सूर्याय नम आवाहयामि सूर्यकम् ।
अंगारकाय च नम आह्वयामि चांगारकम् ॥४८॥

गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्णतं युवाभ्यां नमो नमः ॥४९॥
तत्रैकः कलशः स्थाप्यः पूर्वोक्तविधिभिश्च सः ।
पूजनीयस्तत्र धरामाह्वयामि च ते नमः ॥५०॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण धरे सम्पद्धरा भव ॥५१॥
तत आचम्य च पश्चे गत्वा प्लाक्षं हि तोरणम् ।
सुभीमाख्यं स्वर्णरूपं गन्धमादनशोभितम् ॥५२॥
गदांकितं च विन्यस्य पूजयेत्तन्मनुं गृणन् ।
एह्येहि सुभीमतोरण यज्ञं रक्ष प्ररक्ष च ॥५३॥
सर्वविघ्नान्निवारय रसान् सर्वान् समाह्वय ।
ओं अग्न आयाहि वीतये गृणानो हव्यदातये ॥५४॥
निहोता सत्सिबर्हिषि सामसौख्यं विधेहि नः ।
ओं सामवेदाधिष्ठिताय सुभीमतोरणाय ते ॥५५॥
नमः आवाहयामि त्वां तस्मै ते च नमो नमः ।
तदत्र द्वापरयुगमाह्वयामि नमोऽस्तु च ॥५६॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण द्वापराय च ते नमः ॥५७॥
तत्र शुक्राय च नमः शुक्रमावाहयामि च ।
तत्र बुधाय च नमो बुधमावाहयामि च ॥५८॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण तं युवाभ्यां नमो नमः ॥५९॥
तत्रैकः कलशः स्थाप्यः पूर्वोक्तविधिभिश्च सः ।
पूज्यस्तत्र वाक्पतिं चावाहयामि च ते नमः ॥६०॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण वाक्पते वाक्प्रदो भव ॥६१॥
तत आचम्योत्तरे च गत्वा वटात्मतोरणम् ।
सुप्रभाख्यं श्वेतवर्णं हिमाद्रिशोभितं शुभम् ॥६२॥
पद्मांकितं च विन्यस्य पूजयेत् तन्मनुं गृणन् ।
एह्येहि सुप्रभतोरण यज्ञं रक्ष प्ररक्ष च ॥६३॥
सर्वविघ्नान् निवारय प्रभाः सर्वाः समानय ।
ओं शन्नो देवीरभिष्टय आपो भवन्तु प्रीतये ॥६४॥
शंय्योरभिस्रवन्तु नः तेजांसि वर्धयन्तु नः ।
ओं अथर्ववेदाऽधिष्ठिताय सुप्रभातोरणाय ते ॥६५॥
नम आवाहयामि त्वां तस्मै ते च नमो नमः ।
तदत्र च कलियुगमाह्वयामि नमोऽस्तु च ॥६६॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ।
ताम्बूलं दक्षिणां गृह्ण कलियुगाय ते नमः ॥६७॥
तत्र सोमाय च नमः सोममावाहयामि च ।
केतवे तत्र च नमः केतुमावाहयामि च ॥६८॥
शनैश्चराय नमः शनिमावाहयामि च ।
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ॥६९॥
ताम्बूलं दक्षिणां गृह्णतैतेभ्यश्च नमो नमः ।
तत्रैकः कलशः स्थाप्यः पूर्वोक्तविधिभिश्च सः ॥७०॥
पूज्यस्तत्र च विघ्नेशमाह्वयामि च ते नमः ।
गन्धं पुष्पं धूपदीपौ नैवेद्यं च फलं जलम् ॥७१॥
ताम्बूलं दक्षिणां गृह्ण विघ्नेश सिद्धिदो भव ।
ततः पूर्वे च गत्वैव महीद्यौरिति संगृणन् ॥७२॥
स्थापयेच्च प्रतिद्वारशाखं तु कलशद्वयम् ।
आवर्तनीया मन्त्रास्ते तत्तद्दिक्कलशप्रथाः ॥७३॥
पूर्वद्वारे कलशोभयके चैरावताभिधम् ।
दिग्गजं चावाहयामि ऐरावताय ते नमः ॥७४॥
गन्धाद्यं ताम्बूलकान्तं चार्पयामि च पूजनम् ।
कलशोपरि सन्देयो घृतदीपः सुशोभनः ॥७५॥
तत्र ऋग्विधिना प्राथ्यौं ऋत्विजौ ब्रह्मदैवतौ ।
ऋग्वेदः पद्मपत्राक्षो गायत्रः सोमदैवतः ॥७६॥
अत्रिगोत्रस्तु विप्रेन्द्र ऋत्विक् त्वं मे भव ।
ओं अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम् ॥७७॥
होतारं रत्नधातमं गन्धाद्यैः पूजयामि च ।
श्रीसूक्तं पावमानं च सोमसूक्तं सुमंगलम् ॥७८॥
पौरुषं रुद्रसूक्तं च वामदेव्यं च वै वदेत् ।
सहस्राक्षं गजस्थं सपीतकिरीटकुण्डलम् ॥७९॥
दक्षवामकरवज्रोत्पलं ध्यायेन्महेन्द्रकम् ।
आगच्छामरसंस्तुत्य रक्ष यज्ञं च ते नमः ॥८०॥
ओं भूर्भुवः स्वः इन्द्र इहागच्छ च तिष्ठ च ।
सांगं सपरिवारं सायुधं तथा सशक्तिकम् ॥८१॥
इन्द्रं च द्वारकलशे ह्वयामि पूजयामि च ।
समुच्छ्रयेत्पीतवर्णौ पताकाध्वजकौ तथा ॥८२॥
ओं त्रातारमिन्द्रमवितारमिन्द्रं हवे हवे सुहवं शूरमिन्द्रम् ।
ह्वयामि शक्रं पुरुहूतमिन्द्रं स्वस्ति नो मघवा धात्विन्द्रः ॥८३॥
शाखायां दक्षिणे धात्रे विधात्रे चोत्तरे नमः ।
द्वारश्रियै नमश्चोर्ध्वे गणाधिपतये नमः ॥८४॥
तदूर्ध्वे च नमो वास्तुपुरुषाय सुतेजसे ।
नमश्चाधो नु देहल्यै क्षमाशक्त्यै नमो नमः ॥८५॥
वामे स्तंभे गणेशाय दक्षे स्कन्दाय वै नमः ।
कलशयोश्च गंगायै यमुनायै नमो नमः ॥८६॥

इन्द्रादिभ्यः सुरेभ्यश्च गन्धं पुष्पं जलं फलम् ।
धूपं दीपं च नैवेद्यं दक्षिणामर्पयामि च ॥८७॥
सांगायेन्द्राय सपरिवाराय सायुधाय च ।
सशक्तिकाय च माषबलिं ददामि ते नमः ॥८८॥
इति दत्वा बलिं चाचामेच्चाग्नेयीं दिशं ततः ।
गत्वा च पूर्ववत् न्यस्य कलशं सर्वदैवतम् ॥८९॥
तत्र च पुण्डरीकाय नम आवाहयामि तम् ।
अमृताय नम अमृतं चाह्वयामि वै ततः ॥९०॥
गन्धाद्यैः परिसम्पूज्य प्रदातव्यश्च दीपकः ।
ततश्चाग्निं छागपृष्ठस्थितं रक्तं सजिह्वकम् ॥९१॥
दक्षे शक्तिं करे वामे कमण्डलुं शिरःशिखाम् ।
यज्ञसूत्रंदधानं च ध्यायेदावाहयेन्मखी ॥९२॥
ओं एह्येहि सर्वामरहव्यवाह मुनिप्रवर्यैरभितोऽभिजुष्ट ।
तेजोवता लोकगणेन सार्धं ममाध्वरं पाहि कवे नमस्ते ॥९३॥
ओं भूर्भुवः स्वः अग्ने इहागच्छ च तिष्ठ च ।
कलशेऽत्र समागच्छ तिष्ठ चावाहयामि वै ॥९४॥
ओं त्वन्नो अग्ने तव देवपायुभिर्मघोनो रक्षतन्वश्च वंद्य ।
त्राता तोकस्य तनये गवामस्य निमेषं रक्षमाणस्तव व्रते ॥९५॥
एवमभ्यर्च्य च गन्धादिभिर्नैवेद्यकान्तकैः ।
ओं अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे ॥९६॥
देवान् आसादयादिहेत्युक्त्वा रक्तां ध्वजां तथा ।
रक्तां पताकां समुच्छ्रयेत् प्रशंप्रार्थयेत् ततः ॥९७॥
आग्नेयः पुरुषो रक्तः सर्वदेवमयोऽव्ययः ।
धूम्रकेतुरजोऽध्यक्षस्तस्मात् क्षमां समर्थये ॥९८॥
सांगाय अग्नये परिवाराऽऽयुधयुताय च ।
माषभक्तबलिं चार्पयामि सशक्तिकाय च ॥९९॥
इति दत्वा बलिं चाचामेच्च यायाच्च दक्षिणाम् ।
तत्र प्रतिद्वारशाखं संस्थाप्य कलशद्वयम् ॥१००॥
तत्रैव वामनाख्यं दिग्गजं चावाहयेत्ततः ।
पूजयेत् सुप्रदीपं च ददेत् संप्रणमेत्तथा ॥१०१॥
यजुर्वेदिद्वारपालौ वृणुयाद् वै मनुं गृणन् ।
कातराक्षो यजुर्वेदस्त्रैष्टुभो विष्णुदैवतः ॥१०२॥
काश्यपेयस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।
इति वृत्वा तु प्रत्येकं गन्धादिभिः प्रपूजयेत् ॥१०३॥
आनो भद्रानुवाकश्च आशुः शिशानकस्तथा ।
यद्देवा त्रीणि च पठेत् ततोऽष्टौ च पुनन्तु माम् ॥१०४॥
महिषस्थं यमं दक्षवामयोः दण्डपाशिनम् ।
कृष्णं वह्निसमनेत्रं ध्यात्वा नमो मनुं वदेत् ॥१०५॥
एह्येहि वैवस्वत धर्मराज सर्वामरैरर्चितधर्ममूर्ते ।
शुभाशुभानन्दशुचामधीश शिवाय नः पाहि मखं नमस्ते॥१०६॥
ओं भूर्भुवः स्वः यम इहागच्छ च तिष्ठ च ।
यमं सांगं सकुटुम्बं चावाह्य कलशे ततः ॥१०७॥
ओं यमाय त्वां गिरस्वते पितृमते च स्वाहा ।
स्वहा घर्माय स्वाहा घर्मः पित्रे यमाय नमः ॥१०८॥
गन्धादिभिस्तं संपूज्य कृष्णपताकिकाध्वजौ ।
उच्छ्रयेच्च मखी गृणन् मन्त्रं यमाय वै नमः ॥१०९॥
ओम् आयङ्गौः प्रश्नीरक्रमीदसदन्मातरम्पुरः ।
पितरं च प्रयन्त्स्वः ततः संप्रार्थयेन्मखी ॥११०॥
वैवस्वत महादेव नमस्ते धर्मसाक्षिक ।
शिवाज्ञापिहितो देव दिशं रक्ष भवानिह ॥१११॥
बलाय सबलाय च नमो वै द्वारशाखयोः ।
श्रियै चोर्ध्वे नमो गणपतये च नमो नमः ॥११२॥
नमोऽधस्ताच्च देहल्यै वास्तुपुंसे नमो नमः ।
स्तंभयोः पुष्पदन्ताय कपर्दिने नमो नमः ॥११३॥
गोदावर्यै च कृष्णायैः नमोऽस्तु कलशद्वये ।
यमाय सकुटुम्बाय माषभक्तबलिं ददे ॥११४॥
आचम्य च ततो गच्छेन्नैर्ऋत्यां कलशं ददेत् ।
कुमुदं दुर्जयं चावाहयामि वो नमो नमः ॥११५॥
दीपं दत्वा नरस्थं नैर्ऋतिं नीलं सखड्गकम् ।
रक्षोयुतं पीतभूषं ध्यात्वा चावाहयेच्च तम् ॥११६॥
रक्षःपिशाचवेतालैर्युतश्चेहि क्रतुं ह्यव ।
ओं भूर्भुवः स्वः निर्ऋते इहागच्छ च तिष्ठ च ॥११७॥
ओं असुन्वंतमयजमानमिच्छस्तेनस्येत्यामन्विहिस्तस्करस्य ।
अन्यमस्मदिच्छसातइत्यानमो देविनिर्ऋते तुभ्यमस्तु ॥११८॥
इति नत्वा च संपूज्य घटे नैर्ऋतमेव च ।
ओं मोषुणः परापरानिर्ऋतिर्दुर्हणावधीत् ॥११९॥
पदीष्टतृष्णया सह नीलपताकाध्वजावुच्छ्रयेत् ।
शवस्थस्त्वं यज्ञरक्षां कुरु रक्षोभ्य एव च ॥१२०॥
निर्ऋतये सांगपरिवाराय प्रददामि च ।
माषभक्तबलिं नत्वा गत्वा च पश्चिमे ततः ॥१२१॥
स्थापयेच्च प्रतिशाखं पूर्ववत् कलशद्वयम् ।
तत्रांजनाभिधं चावाहयामि दिग्गजं ततः ॥१२२॥
पूजयामि ततः सामवेदिनौ द्वारपालकौ ।
सामवेदस्तु पिंगाक्षो जाग्रतः शक्रदैवतः ॥१२३॥
भारद्वाजस्तु विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ।
वृत्वेति ओमग्ने आयाहि वीतये गृणानो हव्यदातये ॥१२४॥

ोता सस्मिन्बर्हिषि इति गन्धादिभिस्तदा ।
ज्येन्द्राय च साम गायतो द्वौ सुगीतिकम् ॥१२५॥
मस्मि प्रथमजा सेतूं स्तरा स्वदिष्टया ।
न्ति त्वां गायत्रिणः द्वारपालजपो भवेत् ॥१२६॥
स्थं पाशहस्तं ध्यात्वा च वरुणं सितम् ।
यादोऽप्सरोमेघविद्याग्रैः पाहि ते नमः ॥१२७॥
भूर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च ।
शयोः सांगमावाहयामि त्वां नमामि च ॥१२८॥
ा यामि ब्रह्मणा वन्दमानस्तदाशास्तेयजमानोहविर्भिः।
डमानो वरुणेह बोद्ध्युरुशः समान आयुःप्रमोषीः ॥१२९॥
ाय नमः संपूजयामि गन्धवस्तुभिः ।
मे वरुणश्रुधीहवमद्या च मृडय ॥१३०॥
वस्सुराचके श्वेतपताकाध्वजावुच्छ्रयेत् ।
ा च वरुणं जयं विजयं द्वारशाखयोः ॥१३१॥
श्रियं गणपतिम्अधश्च देहलीं तथा ।
तुपुंसं स्तंभयोर्नन्दिनं चन्द्रं नमामि च ॥१३२॥
यै नर्मदायै च कलशयोर्नमामि च ।
यामि वरुणं सकुडुम्बं माषयुग्बलिम् ॥१३३॥
यामि ततो गत्वा वायव्यां कलशं ददे ।
दन्तं च सिद्धार्थं चाह्वयामि नमामि च ॥१३४॥
यामि प्रदीपं च ददामि चिन्तयेऽनिलम् ।
स्थं धूम्रवर्णं च चित्राम्बरं च चञ्चलम् ॥१३५॥
वजधरं दक्षवामयोः करयोस्ततः ।
यज्ञे रक्षणाय पूजां गृह्ण च ते नमः ॥१३६॥
भूर्भुवः स्वः वायो इहागच्छ च तिष्ठ च ।
ामि बह्निसखं पूजयामि मनुं गृणन् ॥१३७॥
आनो नियुद्भिः शतिनीभिरध्वरं
सहस्रिणीभिरुपयाहि यज्ञम् ।
ो अस्मिन् सवने मादयस्व
यूयं पातस्वस्तिभिः सदा नः ॥१३८॥
वायो ये ते सहस्रिणो रथासस्तेभिरागहि ।
त्वान्सोमपीतये धूम्रपताकाध्वजावुच्छ्रयेत् ॥१३९॥
नमामि सांगाय ददामि माषयुग्बलिम् ।
ोत्तरे प्रतिशाखं निधाय कलशद्वयम् ॥१४०॥
सार्वभौमदिग्गजमाह्वयामि ते नमः ।
ददामि चाथर्ववेदिनौ द्वारपालकौ ॥१४१॥
न्नेत्रोऽथर्ववेदो ह्यनुष्टुप् रुद्रदैवतः ।
पायन विप्रेन्द्र ऋत्विक् त्वं मे मखे भव ॥१४२॥

वृत्वेति शन्नो देवीरभिष्टय आपो भवन्तु प्रीतये ।
शंय्योरभिस्रवन्तु नः गन्धाद्यैरेर्चयामि च ॥१४३॥
अथर्वांगिरसं चैव अथर्वशिरसं तथा ।
शान्त्याध्यायमित्यादिद्वारपालजयो भवेत् ॥१४४॥
नरयानस्थमाभूषं वस्त्रगदाकरद्वयम् ।
हरिताभं कुबेरं च ध्यायामि पूजयामि च ॥१४५॥
एहि विधत्स्व रक्षां नो नक्षत्रौषधिपितृभिः ।
ओं भूर्भुवः स्वः कुबेर इहागच्छ च तिष्ठ च ॥१४६॥
ओं वयठं सोमव्रते तव मनस्तनूषु बिभ्रतः ।
प्रजावन्तः सचेमहि नमामि पूजयामि च ॥१४७॥
ओं आप्यायस्व समेतु ते विश्वतः सोमवृष्ण्यम् ।
भवा वाजस्य संगथे हरितौ पताकाध्वजावुच्छ्रयेत् ॥१४८॥
कुबेराय तु सोमाय नमामि द्वारशाखयोः ।
प्रचण्डाय च चण्डाय नमों द्वारश्रियै नमः ॥१४९॥
गणेशाय नमश्चाधो देहल्यै च नमो नमः ।
वास्तुपुंसे स्तम्भयोस्तु महाकालाय भृंगिणे ॥१५०॥
नमः कलशयोर्वारुण्यै वेण्यै च नमो नमः ।
नमः श्रीकलशायाऽस्तु तत्स्थसुरेभ्य ओं नमः ॥१५१॥
कुबेरसोमरूपाय सांगाय माषयुग्बलिम् ।
ददामि यामि चैशान्यां कलशं स्थापयामि च ॥१५२॥
सुप्रतीकाय च तत्र मंगलाय नमोऽर्चये ।
ददामि दीपकं वृषारूढं वस्त्रिशूलकम् ॥१५३॥
दक्षवामकरयोश्च दधतं त्र्यक्षमुज्ज्वलम् ।
ध्यायामीशानदेवं चावाहयामि नमामि च ॥१५४॥
एहि यज्ञस्य सिद्ध्यर्थं पूजां गृह्ण नमोऽस्तु ते ।
ओं भूर्भुवः स्वः ईशान इहागच्छ च तिष्ठ च ॥१५५॥
ओं तमीशानं जगतस्तस्थुषस्पतिं
धियं जिन्वमवसेहूमहे वयम् ।
पूषा नो यथा वेदसामसद्वृद्धे-
रक्षितापायुरदब्धः स्वस्तये ॥१५६॥
इति संपूज्य च नत्वा शूलपाणिं त्रिनेत्रकम् ।
तमीशानेतिमन्त्रेण पञ्चवर्णपताकाध्वजावुच्छ्रयेत् ॥१५७॥
सांगायेशानकायेमं माषयुग्बलिमर्पये ।
ईशानपूर्वयोर्मध्ये ऊर्ध्वमुद्दिश्य वै घटम् ॥१५८॥
निधाय तत्र ब्रह्माणं पूजयेद् गन्धवस्तुभिः ।
अक्षसूत्रकुशमुष्टिधरदक्षिणहस्तकम् ॥१५९॥
स्रुवकमण्डलुधरवामकरं चतुर्मुखम् ।
श्मश्रुलं जटिलं चाजं ध्यायामि पूजयामि च ॥१६०॥

एहि सर्वपितर्यज्ञे शिवं विधेहि नो मखे ।
ओं भूर्भुवः स्वः ब्रह्मन्निहागच्छ च तिष्ठ च ॥१६१॥
ओं ब्रह्मयज्ञानं प्रथमं पुरस्ताद्
विसीमतः सुरुचो वेन आवः ।
सबुध्न्या उपमा अस्य विष्ठाः
सन्तश्च योनिरसतश्च विवः ॥१६२॥
पूजयामि च गन्धाद्यैः रक्तपताकाध्वजावुच्छ्रयेत् ।
नत्वा तं ब्रह्मणे माषभक्तबलिं ददामि च ॥१६३॥
ततो निर्ऋतिवरुणान्तराले न्यस्य वै घटम् ।
तत्राऽधोऽनन्तशयनासीनं फणाभिमण्डितम् ॥१६४॥
पद्मशंखधरोर्ध्वाधोदक्षिणहस्तकद्वयम् ।
नीलं चानन्तकं ध्यात्वा एहीत्यावाहयेत् ततः ॥१६५॥
रक्ष नागाभिपूज्यांऽत्रेऽध्वरं नस्तलधृक् प्रभो ।
ओं भूर्भुवः स्वः अनन्त इहागच्छ च तिष्ठ च ॥१६६॥
आवाहयामि सांगं सपरिवारं सशक्तिकम् ।
ओं आयंगौः प्रश्निरक्रमीदसदन्मातरं पुरः ॥१६७॥
पितरं च प्रियंस्स्वः अनन्ताय नमो नमः ।
आयंगौरिति धूम्रौ पताकाध्वजौ समुच्छ्रयेत् ॥१६८॥
अनन्ताय च सांगाय माषयुग्बलिमर्पयेत् ।
ततो मण्डपमध्ये चामरकिंकिणिकायुतः ॥१६९॥
षोडशहस्तको दण्डो दशहस्तमितोऽपि वा ।
त्रिहस्तलम्बहस्तायपञ्चवर्णध्वजान्वितः ॥१७०॥
ओमिन्द्रस्य वृष्णो इति मन्त्रेणोर्ध्वे धृतो भवेत् ।
ब्रह्मयज्ञानमिति च ब्रह्माणं पूजयेत् ततः ॥१७१॥
नमेत् षोडशस्तम्भस्थदेवान् ध्यात्वा पुनः पुनः ।
वंशेषु किन्नरेभ्यः पन्नगेभ्यः पृष्ठके नमः ॥१७२॥
पूजयित्वा च तान् पूर्वदिशि भूमिं विलिप्य च ।
मण्डपाद् बहिरेतस्यामुपविश्य वदेन्मखी ॥१७३॥
चतुर्दशस्तरवासा जाडाश्चेतनवर्गकाः ।
ब्रह्मविष्णुहरव्यासा रक्षन्तु च मखं हि नः ॥१७४॥
सिद्धाः ऋषयः पितरो देवा आसुरराक्षसाः ।
दानवा यक्षगन्धर्वा भूताः पिशाचकादयः ॥१७५॥
मानवाः पशवः पक्षिणश्च पादपजातयः ।
सूक्ष्मदेहाः सर्पगणा मखं रक्षन्तु नस्तथा ॥१७६॥
सर्वे देवा ईश्वराश्च ईश्वराण्यश्च भूमिपाः ।
क्षेत्रपा लोकपाः सर्वे मखं रक्षन्तु मण्डपम् ॥१७७॥
घ्नन्तु विघ्नान् दुरितांश्च विरोधिनश्च वै मखे ।
स्थावराणि चराण्यावाहयामि पूजयामि च ॥१७८॥



नमामि संस्मराम्येव ब्रह्मणे विष्णवे नमः ।
देवेभ्यो दानवेभ्यश्च गन्धर्वेभ्यो नमो नमः ॥१७९॥
सिद्धर्षिभ्यश्च पितृभ्य आसुरेभ्यो नमो नमः ।
राक्षसेभ्यश्च यक्षेभ्यो भूतेभ्यश्च नमो नमः ॥१८०॥
पिशाचेभ्यो मानवेभ्यः पशुपक्षिभ्य इत्यपि ।
शाखिभ्यः सूक्ष्मदेहेभ्यः सर्पेभ्यश्च नमो नमः ॥१८१॥
ईशेभ्यश्चेश्वराणीभ्यो भूमिपेभ्यो नमो नमः ।
क्षेत्रपेभ्यो लोकपेभ्यो नमः स्थिरचरादये ॥१८२॥
मातृभ्यो ब्रह्मसतीभ्यो नमश्चावाहयामि तान् ।
पूजयामि स्मराम्येतान् ददामि योग्यभाजनम् ॥१८३॥
माषबलिं पायसादीन् फलाऽमृतादिकं तथा ।
इतिपूजां विधायैव सर्वेभ्यो वै नमो नमः ॥१८४॥
यजमानस्तथाऽऽचार्यः ऋत्विक् धौतांघ्रिहस्तकाः ।
आचान्ताः पूर्वद्वारेण प्रविशेयुर्हि मण्डपम् ॥१८५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने तोरणकलशद्वारशाखादेहलीतद्देवादीनां षोडशोपचार-पूजनादिनिरूपणनामा नवचत्वारिंशदधिक-शततमोऽध्यायः ॥ १४९ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके पश्चाद् यत् कर्तव्यं तदाह च ।
अनादिश्रीहरिर्भक्ताय त्वां सर्वं वदामि तत् ॥ १ ॥
शुद्धिमान् यजमानश्च दक्षिणद्वारसन्निधौ ।
पश्चिमांशे उदङ्मुखश्चोपविश्य द्विजाँस्ततः ॥ २ ॥
कुरुध्वं तु क्रतोः कर्म यथाविहितमादरात् ।
इत्यर्थयेत् ततः पूर्वकुण्डे ऋग्वेदिनौ द्विजौ ॥ ३ ॥
होताराबुपविशेतां ब्रह्मा तु पश्चिमाननः ।
होमकर्ताऽपरश्चोदङ्मुखस्ततश्च दक्षिणे ॥ ४ ॥
कुण्डे यजुर्वेदिनौ च ब्रह्मा तत्र ह्युदङ्मुखः ।
पूर्वमुखो होमकर्ता ततः पश्चिमकुण्डके ॥ ५ ॥
सामवेदिद्विजावुत्तरकुण्डेऽथर्ववेदिनौ ।
तथाऽपरौ जापकौ द्वौ द्वावप्यधिकभूसुरौ ॥ ६ ॥
तत्तद्वेदविदौ चोपविशेतां वै यथासनम् ।
तत आचार्य इन्द्रेशानयोर्मध्ये स्वकुण्डके ॥ ७ ॥
उपाविशेत् प्राङ्मुखोऽथ ब्रह्मा तूदङ्मुखस्तथा ।
गुरुः स्वकुण्डे आगत्य स्वगृह्योक्तविधानतः ॥ ८ ॥
अग्निं संस्थापयेत् पञ्चकुण्डकेऽन्येऽपि तत्तथा ।
कुर्युश्चाग्निस्थापनं चैककुण्डे तु यथायथम् ॥ ९ ॥

आचार्यः प्राङ्मुखो ब्रह्मोदङ्मुखः समुपाविशेत् ।
प्रथमं कुण्डपूजां च कुर्याद्वै यजमानकः ॥१०॥
स्वयमग्नेश्चायतनादुपविश्य च दक्षिणे ।
आचार्यश्चोपविश्यैव कुण्डपश्चिमतस्तदा ॥११॥
आचम्य च तथा प्राणानायम्य च ततो वदेत् ।
अपसर्पन्तु ये भूता ये भूता भूमिसंस्थिताः ॥१२॥
ये भूता विघ्नकर्तारो दूरं यान्तु मखक्षितेः ।
विकीर्य सर्षपान् पञ्चगव्येन प्रोक्ष्य मण्डपम् ॥१३॥
कुण्डं च यज्ञसंभारान् गुरुभ्यो नम आवदेत् ।
गणेशं सम्प्रणम्यापि करे धृत्वाऽक्षतादिकम् ॥१४॥
गन्धपुष्पजलाद्यं च देशकालौ प्रकीर्त्य च ।
तदेतद्देवप्रासादोत्सर्गकर्मणि भावतः ॥१५॥
करिष्येऽग्निप्रतिष्ठां च तदंगमार्जनादिकम् ।
मेखलायोनिदेवानां स्थापनं पूजनं तथा ॥१६॥
ततश्चाग्नेरायतनं संमृज्य कुशवारिणा ।
कुण्डं प्रोक्ष्याऽञ्जलौ पुष्पाण्यादाय कुण्डमास्पृशेत् ॥१७॥
आवाहयामि तत्कुण्डं विश्वकर्मविनिर्मितम् ।
शारीरं यच्च ते दिव्यमग्न्यधिष्ठानमद्भुतम् ॥१८॥
ये च कुण्डे स्थिता देवाः कुण्डाग्रे याश्च देवताः ।
ऋद्धिं यच्छन्तु ताः सर्वा यज्ञसिद्धिं समाहिताः ॥१९॥
हे कुण्ड वाञ्छितां यज्ञ सिद्धिं ददातु नो हिताम् ।
इति प्रार्थ्य कुण्डमध्ये विश्वकर्माणमर्चयेत् ॥२०॥
ओं विश्वकर्मन् हविषा वर्धनेन त्रातारमिन्द्रमकृणोरवद्ध्यम् ।
तस्मै विशः समनमंत पूर्वीरयमुग्रो विहव्यो यथा सत् ॥२१॥
उपयाम गृहीतोऽसीन्द्राय त्वा विश्वकर्मणः ।
एष ते योनिरिन्द्राय त्वा विश्वकर्मणे ओं नमः ॥२२॥
सम्पूज्य चन्दनाद्यैश्च प्रार्थयेत् खातशुद्धये ।
ज्ञाताऽज्ञातखातदोषान् विनाशय नमोऽस्तु ते ॥२३॥
श्वेतायां मेखलायां श्रीविष्णुमावाहयेत्ततः ।
ओं विष्णो यज्ञरक्षार्थं कुण्डे सन्निहितो भव ॥२४॥
ओं इदं विष्णुर्विचक्रमे त्रेधा वै निदधे पदम् ।
समूढमस्य पाण्डुरे स्वाहाऽर्चयामि चक्रिणम् ॥२५॥
सम्पूज्य श्रीहरिं विष्णुमेखलायै नमो नमः ।
श्वेताद्यमेखलामाऽऽर्च्य ततो रक्तां तु मध्यमाम् ॥२६॥
मेखलां तत्र ब्रह्माणं चावाहयेत् मनुं गृणन् ।
हंसस्थो यज्ञरक्षार्थं कुण्डेऽस्मिन् सन्निधो भव ॥२७॥
ओं ब्रह्मयज्ञानं प्रथमं पुरस्ताद्
विसीमतः सुरुचो वेन आवः ।
सबुध्न्या उपमा अस्य विष्ठाः
सतश्च योनिरसतश्च विवः ॥२८॥
ब्रह्माणमितिसम्पूज्य मेखलायै नमो नमः ।
रक्तां ब्रह्माधिष्ठितां च मेखलां पूजयेन्मखी ॥२९॥
ततोऽधो मेखलायां तु कृष्णायां रुद्रमेव च ।
आवाहयामि वृषगं गंगाधरं पिनाकिनम् ॥३०॥
आगच्छ भगवन् रुद्र कुण्डेऽस्मिन् सन्निधो भव ।
ओं नमस्ते रुद्र मन्यव उतोऽत इषवे नमः ॥३१॥
बाहुभ्यामुत ते नमो मेखलायै नमो नमः ।
रुद्रदेवां कृष्णवर्णां मेखलां पूजयेन्मखी ॥३२॥
कुण्डे त्रिकोणे वृत्ते षट्कोणे पद्मेऽष्टकोणके ।
योनिर्योज्या पश्चिमेऽग्र्यं भवेत्पूर्वमुखं तथा ॥३३॥
कोणे कुण्डे योनिकुण्डे योनिः कार्या न सर्वथा ।
क्षेत्रार्धमानलम्बा च क्षेत्र्यंशायता तथा ॥३४॥
चतुर्विंशत्यंशोर्ध्वा च समेखलाऽग्रनिम्नगा ।
प्रविष्टा कुण्डमग्रेर्धगोलद्वययुता तथा ॥३५॥
विशालमूला समध्यनालाऽश्वत्थदलाकृतिः ।
ब्रह्माऽऽधानस्वरूपा सा पूजनीया हि कुण्डके ॥३६॥
नमो जगद्धेतुकायै ब्रह्मधात्र्यै च ते नमः ।
ओं सर्वस्य योनिरसि सर्वस्य नाभिरप्यसि ॥३७॥
गन्धादिभिः पूजयामि प्रार्थयामीष्टसिद्धये ।
देहिनस्त्वां प्रसेवन्ते पुरुषार्थान् युनक्ति या ॥३८॥
योनिर्ब्राह्मी सुखदायै ब्रह्मगर्भे च ते नमः ।
इति योनिं समर्च्याथ कण्ठपूजनमाचरेत् ॥३९॥
स्रग्धरं चोत्तमांगस्याधारमावाहयामि च ।
नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः ॥४०॥
तेषां सहस्रयोजनेवधन्वानितन्मसि च ।
इति सम्पूज्य गन्धाद्यैः प्रार्थयेत् कण्ठमुज्ज्वलम् ॥४१॥
कण्ठ कुण्डे स्थितोऽभितो मेखलाऽऽस्तेऽसि मंगलः ।
तत नाभिं पूजयेच्च कुण्डाभां पद्मभां च वा ॥४२॥
आधारां सर्वकुण्डानां नाभिमावाहयामि च ।
नाभिर्मे चित्तविज्ञानं पायुर्मेऽपचितिर्भसत् ॥४३॥
आनन्दवन्दावाण्डौ मे भगः सौभाग्यंपसः ।
जंघाभ्यां पद्भ्यां धर्मोऽसि विशि राजा प्रतिष्ठितः ॥४४॥

इतिसम्पूज्य नाभे त्वं सदेवा कुण्डके स्थिता ।
भव शुभर्द्धिदेत्यभ्यर्थ्य च नत्वा पुनस्ततः ॥४५॥
कुण्डे नैर्ऋतकोणे वास्तुपुरुषं प्रपूजयेत् ।
पुष्पाण्यादायाह्वयामि वास्तुं प्रपूजयामि च ॥४६॥
ओं वास्तोष्पते प्रतिजानीह्यस्मान्
स्वावेशो अनमीवो भवानः ।
यत्त्वेमहे प्रतितन्नो जुषस्व
शन्नोऽभवद्विपदेशं चतुष्पदे ॥४७॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं चार्पयामि च ।
वास्तुपुरुषरूपाय वलिं समर्पयामि च ॥४८॥
ब्रह्मपुत्रं रुद्रपुत्रं सर्वदेवाश्रयं नरम् ।
वास्तुं नत्वा ततोऽग्निं स्थापयेत् क्रमान्मखी यथा ॥४९॥
तुषकेशर्ककरादिहीने कुण्डे च वा तथा ।
स्थण्डिले तु चतुरस्रां भूमिं समूह्य सत्कुशैः ॥५०॥
ईशान्यां च कुशान् त्यक्त्वोपलिप्यया गोमयोदकैः ।
स्फ्येन वा स्रुवमूलेन प्रागग्रदेशमात्रकम् ॥५१॥
उत्तरोत्तरक्रमतस्त्रिरुल्लिख्य ततस्तथा ।
उल्लेखनक्रमेणैवाऽनामिकांगुष्ठचिष्यया ॥५२॥
मृदमुद्धृत्य च जलेनाभ्युक्ष्य कांस्यपात्रगम् ।
वह्निं कांस्याऽन्यपात्रेणाऽपिहितं प्रत्यङ्काननम् ॥५३॥
उपसमाधाय गायत्रीमन्त्रेणाभिपूज्य च ।
ओं भूर्भुवस्स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि ॥५४॥
धियो यो नः प्रचोदयाद् वह्निं चापूजयामि च ।
ओं नारायणाय विद्महे वासुदेवाय धीमहि ॥५५॥
तन्नो विष्णुः प्रचोदयाद् वह्निं नमामि चिन्तये ।
ततश्च योनिमार्गेण स्थापयेत् कुण्डकेऽनलम् ॥५६॥
ओं अग्निर्मूर्द्धा दिवः ककुत्पतिः पृथिव्या अयम् ।
अपां रेतांसि जिन्वति इति गृणन् निधापयेत् ॥५७॥
अग्नेश्च जीवनार्थं च किञ्चित् समिध् नियुज्य च ।
वह्निपात्रे जलादि क्षेपयेत् ततश्च वै शुभम् ॥५८॥
आचार्यकुण्डकायुद्धरणं कुण्डान्तरेषु च ।
अग्निस्थापनमादध्यात् ततो नवग्रहार्चनम् ॥५९॥
ईशान्यां ग्रहपीठे तु नवग्रहाह्वनं चरेत् ।
रक्तपुष्पाक्षतैर्मध्ये वर्तुलाकारके रविम् ॥६०॥
प्राङ्मुखमावाहयेच्च स्थापयेच्च मनुं गृणन् ।
ओं भूर्भुवः स्वः सूर्य इहागच्छ च तिष्ठ च ॥६१॥
ओं आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्मयेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥६२॥

सूर्याय च नमो गन्धपुष्पाद्यैः पूजयामि च ।
आग्नेय्यामर्ध चन्द्राभे चक्रे श्वेतसुमाक्षतैः ॥६३॥
चन्द्रमावाहयेद्ध्यायेत्पूजयेच्चन्दनादिभिः ।
ओं भूर्भुवः स्वः चन्द्र इहागच्छ च तिष्ठ च ॥६४॥
ओं इमं देवा असपत्नं सुवध्वं महते क्षत्राय च ।
महते ज्येष्ठाय महतेजानराज्यायेन्द्रियस्येन्द्रियाय ॥६५॥
इममुष्य पुत्रममुष्यै पुत्रमस्यै विश एष वः ।
अमी राजा सोमोऽस्माकं ब्राह्मणानां राजा च ओं नमः ॥६६॥
दक्षिणस्यां त्रिकोणे तु रक्तपुष्पाक्षतादिभिः ।
दक्षिणाभिमुखं भौममावाहयेच्च पूजयेत् ॥६७॥
ओं भूर्भुवः स्वः भौम इहागच्छ च तिष्ठ च ।
ओं अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम् ॥६८॥
अपां रेतांसि जिन्वति ओं भौमाय नमो नमः ।
ईशान्यां बाणसदृशे मण्डले च उदङ्मुखम् ॥६९॥
पीतपुष्पाक्षतैः रम्यैर्बुधमावाह्य पूजयेत् ।
ओं भूर्भुवः स्वः बुध इहागच्छ च तिष्ठ च ॥७०॥
ओं उद्बुध्य स्वाग्नेप्रतिजागृहि
त्वमिष्टा पूर्ते सस्रजेऽथामयं च ।
अस्मिन्त्सधस्थे अद्ध्युत्तरस्मिन् विश्वे
देवा यजमानश्च सीदत ॥७१॥
उत्तरे चतुरस्रे च मण्डले उदङ्काननम् ।
बृहस्पतिं पीतपुष्पाक्षतैरावाहयेन्नमेत ॥७२॥
ओं भूर्भुवः स्वः बृहस्पते इहागच्छ च तिष्ठ च ।
गन्धपुष्पादिभिर्गुरुं पूजयामि मनुं गृणन् ॥७३॥
ओं बृहस्पते अतियदर्यो अर्हाद्द्युमद्विभाति क्रतुमज्जनेषु ।
यद्दीदयच्छवसऋतप्रजाततदस्मासु द्रविणं धेहि चित्रम् ॥७४॥
पूर्वे पञ्चकोणके च मण्डले प्राङ्मुखं कविम् ।
शुक्लपुष्पाक्षतैः शुक्रमावाहयेत्प्रपूजयेत् ॥७५॥
ओं भूर्भुवः स्वः शुक्र इहागच्छ च तिष्ठ च ।
गन्धं पुष्पं च धूपादि संगृहाण नमामि ते ॥७६॥
ओं अन्नात् परिस्रुतो रसं ब्रह्मणा
व्यपिबत् क्षत्रं पयः सोमं प्रजापतिः ।
ऋतेन सत्यमिन्द्रियं विपानं शुक्रमन्धस
इन्द्रस्येन्द्रियमिदं पयोमृतम्मधु ॥७७॥
पश्चिमे तु धनुस्तुल्ये मण्डले प्रत्यङ्काननम् ।
कृष्णपुष्पाक्षतैः शनिमावाहयेच्च पूजयेत् ॥७८॥
ओं भूर्भुवः स्वः शने चात्र समागच्छ च तिष्ठ च ।
ओं शन्नो देविरभिष्टय आपो भवन्तु पीतये ॥७९॥

शंय्योरभिस्रवन्तु नः पूजयामि नमामि च।
नैर्ऋत्ये शूर्पसदृशे मण्डले दक्षिणाननम् ॥८०॥
कृष्णपुष्पाक्षतैः राहुमावाहयेच्च पूजयेत्।
ओं भूर्भुवः स्वः राहो चात्रागच्छ च तिष्ठ च ॥८१॥
ओं कयानश्चित्र आभुवदूतीसदावृधः सखा।
कया शचिष्ठयावृता पूजयामि नमामि च ॥८२॥
वायव्यां च ध्वजाकारे मण्डले दक्षिणाननम्।
धूम्रपुष्पाक्षतैः केतुमावाहयेच्च पूजयेत् ॥८३॥
ओं भूर्भुवः स्वः केतो इहागच्छ च तिष्ठ च।
ओं केतुं कृण्वन्न केतवे पेशोमर्या अपेशसे ॥८४॥
समुषद्भिरजायथाः पूजयामि नमामि च।
अथाधिदेवता आवाहयामि स्थापयामि च ॥८५॥
आदित्याभिमुखाः स्थाप्या देवता मध्यके रविः।
दक्षपार्श्वे श्वेतपुष्पाक्षतैः रुद्रं समाह्वयेत् ॥८६॥
ओं भूर्भुवः स्वः रुद्र समागच्छेह तिष्ठ च।
ओं त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ॥८७॥
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीयमामृतात्।
आग्नेय्यां चन्द्रदक्षे च रक्तपुष्पाक्षतैरुमाम् ॥८८॥
आवाहयेत् स्थापयेच्च पूजयेच्चन्दनादिभिः।
ओं भुर्भुवः स्वः उमे इहागच्छ च तिष्ठ च ॥८९॥
ओं श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे
पार्श्वे नक्षत्राणि रूपमश्विनौ व्यात्तम्।
इष्णन्निषाणामुम्मईषाण
सर्वलोकम्मइषाण उमायै नमः ॥९०॥
याम्यां भौमस्य दक्षे तु पीतपुष्पाऽक्षतादिभिः।
स्कन्दमावाहयेत्संपूजयेन्नमेच्च संस्मरेत् ॥९१॥
ओं भूर्भुवः स्वः स्कन्द इहागच्छ च तिष्ठ च।
गन्धं पुष्पं धूपदीपौ नैवेद्यादि गृहाण च ॥९२॥
ओं यदक्रन्दः प्रथमं जायमानः
उद्यन्त्समुद्रादुत वा पुरीषात्।
श्येनस्य पक्षा हरिणस्य बाहू
उपस्तुत्यं महिजातन्ते अर्व्वन् ॥९३॥
ईशान्यां बुधदक्षे तु विष्णुं पीतसुमाऽक्षतैः।
आवाहयेद् भूर्भुवः स्वः विष्णोरागच्छ तिष्ठ च ॥९४॥
ओं इदं विष्णुर्विचक्रमे त्रेधा वै निदधे पदम्।
समूढमस्य पांसुरे स्वाहा च विष्णवे नमः ॥९५॥
उत्तरे तु गुरोर्दक्षे श्वेतपुष्पाक्षतैरजम्।
आवाहयेद् भूर्भुवः स्वः ब्रह्मन्नागच्छ तिष्ठ च ॥९६॥
ओं ब्रह्मयज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचोव्वेन आवः।
सबुध्न्या उपमा अस्यविष्ठाः सतश्च योनिरसतश्च व्विवः ॥९७॥
पूर्वस्यां शुक्रदक्षे तु पीतपुष्पाक्षतैर्हरिम्।
आवाहयेद् भूर्भुवः स्वः इन्द्र आगच्छ तिष्ठ च ॥९८॥
ओं त्रातारमिन्द्रमवितारमिन्द्रं
हवेहवे सुहवं शूरमिन्द्रम्।
व्हयामि शक्रम्पुरुहूतमिन्द्रं
स्वस्ति नो मघवा धात्विन्द्रः ॥९९॥
पश्चिमे शनिदक्षे च कृष्णपुष्पाक्षतैर्यमम्।
आवाहयेद् भूर्भुवः स्वः यम आगच्छ तिष्ठ च ॥१००॥
ओं यमाय त्वा मखाय त्वा सूर्य्यस्य त्वा तपसे।
देवस्त्वा सवितामद्धानक्तुपृथिव्याः संस्पृशस्पाहि ॥१०१॥
अर्चिरसि शोचिरसि तपोऽसि यम ते नमः।
राहोर्दक्षे च नैर्ऋत्यां कालं धूम्रसुमाक्षतैः ॥१०२॥
आवाहयेद् भूर्भुवः स्वः काल आगच्छ तिष्ठ च।
ओं कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि ॥१०३॥
समापो अद्भिरग्मतसमोषधीभिरोषधीः काल ते नमः।
वायव्यां केतुदक्षे तु रक्तपुष्पाक्षतादिभिः ॥१०४॥
आवाहयेच्चित्रगुप्तमिहागच्छ च तिष्ठ च।
ओं भूर्भुवः स्वः चित्रावसो स्वस्ति ते पारमशीय ॥१०५॥
पूजयामीति वै राधेऽधिदेवतासमर्चनम्।
श्रीहरिः प्राह भक्ताय यत्तन्मया त ईरितम् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अग्निस्थापनकुण्डदेवमेखलादेवयोनिवह्निपूजनं नवग्रहपूजनमधिदेवतापूजनं चेतिनिरूपणनामा पञ्चाशदधिकशततमोऽध्यायः॥ १५० ॥

श्रीकृष्ण उवाच

शृणु त्वं राधिके देवायताय प्राह यद्धरिः।
प्रत्यधिदेवताद्यावाहनाद्यं कथयामि ते ॥ १ ॥
मध्ये सूर्यस्य वै वामे रक्तपुष्पाक्षतादिभिः।
ओं भूर्भुवः स्वश्च अग्निमावाहयाम्येतिष्ठ च ॥ २ ॥
ओं अग्निं दूतं पुरोदधे हव्यवाहमुपब्रुवे।
देवानासादयादिह अग्नेऽर्चयामि ते नमः ॥ ३ ॥
आग्नेय्यां चन्द्रवामे च श्वेतपुष्पाक्षतैर्जलम्।
ओं भूर्भुवः स्वश्च जलमाह्वयाम्येहि तिष्ठ च ॥ ४ ॥
ओं अप्स्वग्नेऽसधिष्टवसौषधीरनुरुद्धयसे।
गर्भे सञ्जायसे पुनः जलाऽर्चयामि ते नमः ॥ ५ ॥

दक्षिणे भौमपार्श्वे तु भूमिं रक्तसुमाऽक्षतैः।
ओं भूर्भुवः स्वः क्षिते चाह्वयाम्येहि तिष्ठ च॥६॥
ओं स्योना पृथिवी नो भवानृक्षरानिवेशिनी।
यच्छानः शर्मसप्रथाः भूमेऽर्च्चयामि ते नमः॥७॥
ईशान्यां बुधवामे च विष्णुं पीतसुमाऽक्षतैः।
ओं भूर्भुवः स्वः विष्णो आह्वयाम्येहि तिष्ठ च॥८॥
ओं इदं विष्णुर्विचक्रमे त्रेधा वै निदधे पदम्।
समूढमस्य पांसुरे विष्णोऽर्च्चयामि ते नमः॥९॥
उत्तरे गुरुवामे च इन्द्रं पीतसुमाक्षतैः।
ओं भूर्भुवः स्वः इन्द्र आह्वयाम्येहि तिष्ठ च॥१०॥
ओं सजोषा इन्द्र सगणो मरुद्भिः
सोमं पिब वृत्रहा शूरविद्वान्।
जहि शत्रूँरपमृधोनुदस्वाथाभयं
कृणुहि विश्वतो नः॥११॥
पूर्वे शुक्रस्य च वामे पीतसुमाक्षतैः शचीम्।
ओं भूर्भुवः स्वः इन्द्राण्याह्वयाम्येहि प्रतिष्ठ च॥१२॥
ओं अदित्यैरास्नासीन्द्राण्या उष्णीषः।
पूषासिघर्म्मायदीष्वेन्द्राण्यर्चयामि ते नमः॥१३॥
पश्चे वामे शनेः श्वेतपुष्पाक्षतैः प्रजापतिम्।
ओं भूर्भुवः स्वः प्रजापते ह्वयाम्ये हि तिष्ठ च॥१४॥
ओं प्रजापतेनत्त्वदेतान्न्यन्न्यो विश्वारूपाणि परिता बभूव।
यत्कामास्ते जुहुमस्तन्नो अस्तु वयं स्याम पतयो रयीणाम्॥१५॥
राहोर्वामे च नैर्ऋत्यां नागं कृष्णसुमाक्षतैः।
ओं भूर्भुवः स्वः नागाऽऽवाह्याम्येहि तिष्ठ च॥१६॥
ओं नमोऽस्तु सर्पेभ्यो ये के च पृथिवीमनु।
येऽन्तरीक्षे ये दिवि तेभ्योऽर्च्चयामि वो नमः॥१७॥
केतोर्वामे च वायव्यामजं श्वेतसुमाक्षतैः।
ओं भूर्भुवः स्वः ब्रह्मन्नाह्वयाम्येहि तिष्ठ च॥१८॥
ओं ब्रह्मयज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचोवेन आवः।
सबुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः॥१९॥
अथ चावाहयेत् पञ्चलोकपालान् सुरक्षकान्।
नैर्ऋत्यामुत्तरे राहोः पीतपुष्पाक्षतादिभिः॥२०॥
ओं भूर्भुवः स्वः गणेशं ह्वयाम्येहि च तिष्ठ च।
गन्धपुष्पाक्षतैर्नैवेद्यैरभ्यर्च्य नमामि ते॥२१॥
ओं गणानां त्वा गणपतिं हवामहे
प्रियाणां त्वां प्रियपतिं हवामहे।
निधीनां त्वा निधिपतिं हवामहे
वसो मम गणेशं प्रणमामि च॥२२॥

आहमजानि गर्भधमात्त्वमजासि गर्भधम्।
शन्युत्तरे पश्चिमे च दुर्गां रक्तसुमाऽक्षतैः॥२३॥
ओं भूर्भुवः स्वः दुर्गे ह्वयाम्येहि च तिष्ठ च।
पूजयामि प्रणमामि सुखं कुरु जने नमः॥२४॥
ओं जातवेदसे सुनवाम
सोममरातीयतो निजहाति वेदः।
स नः पर्षदति दुर्गाणि विश्वा
नावेव सिन्धुं दुरितात्यग्निः॥२५॥
मध्ये सूर्योत्तरे वायुं पीतपुष्पाक्षतादिभिः।
ओं भूर्भुवः स्वः वायो इहागच्छ च तिष्ठ च॥२६॥
ओं आनो नियुद्भिः शतिनी-
भिरुद्धरं सहस्रिणीभिरुपयाहि यज्ञम्।
वायो अस्मिन् सवने मादयस्व
यूयं पातस्वस्तिभिः सदा नः॥२७॥
पूर्वे शुक्रपूर्वभागे ह्याकाशं नीमपुष्पकैः।
ओं भूर्भुवः स्वः आकाश आगच्छात्र च तिष्ठ च॥२८॥
ओं घृतं घृतपावानः पिबत वसां वस
पावानः पिबतान्तरिक्षस्य हविरसि स्वाहा।
दिशः प्रदिशः आदिशो विदिश उद्दिशो
दिग्भ्यः स्वाहा पूजयामि नमामि च॥२९॥
राहोर्दक्षे च नैर्ऋत्यां श्वेतपुष्पाक्षतादिभिः।
ओं भूर्भुवः स्वोऽश्विनाविहागच्छतं तिष्ठतम्॥३०॥
ओं यावांकशामधुमत्यश्विनासूनृतावती।
तया यज्ञं मिमिक्षतामश्विनौ पूजयामि च॥३१॥
धूपं दीपं च नैवेद्यं देवान् प्राप्यं नमामि च।
अथ पूर्वादिकाष्ठासु चेन्द्रादीनाह्वयेन्मखी॥३२॥
पूर्वे ओं भूर्भुवः स्वश्चेन्द्र इहागच्छ च तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च॥३३॥
आग्नेय्यां ओं भूर्भुवः स्वरग्ने आगच्छ तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च॥३४॥
दक्षिणे ओं भूर्भुवः स्वः यम चागच्छ तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च॥३५॥
नैर्ऋत्यामों भूर्भुवः स्वः निर्ऋते चैहि तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च॥३६॥
पश्चिमे ओं भूर्भुवः स्वः वरुणागच्छ तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च॥३७॥
वायव्यामों भूर्भुवः स्वः वायो आगच्छ तिष्ठ च।
पूजामि च गन्धाद्यैः संस्मरामि नमामि च॥३८॥

उत्तरे ओं भूर्भुवः स्वः कुबेरागच्छ तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च ॥३९॥
ईशान्यामोंभूर्भुवः स्वः ईशानागच्छ तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च ॥४०॥
ईशानपूर्वयोमध्ये ब्रह्माणमाह्वयामि च।
ओं भूर्भुवः स्वः ब्रह्मन्नत्रागच्छ च तिष्ठ च ॥४१॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
निर्ऋतिवारुणमध्येऽनन्तं ह्वायमि नौमि च ॥४२॥
ओं भूर्भुवः स्वश्चानन्त इहागच्छ च तिष्ठ च।
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च ॥४३॥
अथ मण्डलमध्यस्थपितामहादि चाह्वयेत्।
ओं भूर्भुवः स्वः ब्रह्मन्निहागच्छ च तिष्ठ च ॥४४॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः शिव इहागच्छ च तिष्ठ च ॥४५॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः विष्णो इहागच्छ च तिष्ठ च ॥४६॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः गणपते इहागच्छ च तिष्ठ च ॥४७॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः लक्ष्मि इहागच्छ च तिष्ठ च ॥४८॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं पञ्चनद्यः सरस्वतीमपियन्ति सस्रोतसः ॥४९॥
सरस्वती तु पञ्चधा सा वै देशेऽभवत् सरित्।
ओं भूर्भुवः स्वः सरस्वति इहागच्छ च तिष्ठ च ॥५०॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं अम्बेऽम्बिकेऽम्बालिके न मानयति कश्चन ॥५१॥
ससस्त्यश्वकः शुभद्रिकां कांपीलवासिनीम्।
ओं भूर्भुवः स्वः दुर्गे इहागच्छ च तिष्ठ च ॥५२॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः क्षेत्रपाल इहागच्छ च तिष्ठ च ॥५३॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः भूतानि इहागच्छत तिष्ठत ॥५४॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
ओं भूर्भुवः स्वः विश्वकर्मन्निहागच्छ च तिष्ठ च ॥५५॥
पूजयामि च गन्धाद्यैः संस्मरामि नमामि च।
देशकालौ प्रसंकीर्त्य यज्ञसिद्ध्यर्थमुत्तमम् ॥५६॥
करोमि पूजनं सर्वदेवानां चन्दनादिभिः।
ओं सूर्यादिनवग्रहेभ्यो नमः शान्तिदा हि नः ॥५७॥
ओं रुद्रादिदेवताभ्यो नमः रक्षाप्रदा हि नः।
ओमग्न्यादिदेवताभ्यो नमस्तेजःप्रदा हि नः ॥५८॥
ओं गणेशादिलोकप्रपालेभ्यो नम इष्टदाः।
ओमिन्द्रादिदिक्प्रपालेभ्यो नमः पुष्टिदा हि नः ॥५९॥
ब्रह्मादिविश्वकर्मान्तेभ्यो नमः सम्पदांप्रदाः।
इति सम्पूज्य च मखी ग्रहवेदीसमीपतः ॥६०॥
भूमौ तत्तन्नाममन्त्रैर्बलिं दद्याच्च तद्यथा।
गुडौदनं तु सूर्याय सोमाय घृतपायसम् ॥६१॥
मसूरान्नं मंगलाय बुधाय क्षीरमोदनम्।
दध्योदनं तु गुरवे शुक्राय च घृतौदनम् ॥६२॥
शनये तिलपिष्टं च पायसं राहवे तथा।
चित्रौदनं केतवे च ह्यन्येभ्यः पायसं बलिम् ॥६३॥
दत्वा ततश्चैशकोणे कलशं स्थापयेन्मखी।
ओं भूरसीतिमन्त्रेण भूमिस्पर्शनमाचरेत् ॥६४॥
ओं धान्यमसीतिमनुना भूमौ धान्यं क्षिप्येमखी।
ओमाजिघ्रेतिमन्त्रेण धान्योपरि न्यसेद् घटम् ॥६५॥
ओं वरुणस्येत्युदकं च कलशे परिपूरयेत्।
ओं वसोः पवित्रेतिमनुना वस्त्रं कण्ठे च वेष्टयेत् ॥६६॥
ओं याः फलिनीतिमनुना पूगीफलं समर्पयेत्।
ओं परिवाजेतिमनुना पञ्चरत्नानि निक्षिपेत् ॥६७॥
ओं हिरण्यगर्भेति मनुना हिरण्यं च समर्पयेत्।
ओं गन्धद्वारेतिमनुना गन्धादिकं समर्पयेत् ॥६८॥
ओं या ओषधीरिति च सर्वौषधीः समक्षिपेत्।
अश्वस्थानाद् गजस्थानाद् वल्मीकात् संगमाद् ह्रदात् ॥६९॥
राजद्वाराद् गोकुलाच्च मृदमानीय निक्षिपेत्।
ओं काण्डात्काण्डमिति दुर्वां कलशे तु समक्षिपेत् ॥७०॥
ओमश्वत्थेतिमन्त्रेण पञ्चपल्लवकान् क्षिपेत्।
ओं पवित्रेणस्थमन्त्रेण पवित्राणि विनिक्षिपेत् ॥७१॥
ओं पूर्णादर्वीति तन्दुलपात्रं च कलशे क्षिपेत्।
ओं श्रीश्चते इतिमन्त्रेण श्रीफलं कलशे क्षिपेत् ॥७२॥
एवं घटं प्रतिष्ठाप्य वरुणं सलिले ह्वयेत्।
ओं तत्त्वायामीति मन्त्रेण वरुणं प्रसमाह्वयेत् ॥७३॥
ओं भूर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च।
पूजयामि नमस्ते च षोडशोपसुवस्तुभिः ॥७४॥
सर्वे समुद्राः सरितस्तीर्थान्यपि सरांसि च।
जलदाश्च समायान्तु सर्वदुरीतनाशकाः ॥७५॥
सर्वे देवाः कलशे तु प्रतितिष्ठन्ति पावकाः।
कलशस्य मुखे चेति कलशं चाभिमन्त्रयेत् ॥७६॥

देवदानवमन्त्रेण कलशं प्रार्थयेत् ततः ।
अथ वै सर्वतोभद्रमण्डलस्य च पूजनम् ॥७७॥
प्रागुदीच्यां गता रेखाः कुर्यादेकोनविंशतिम् ।
खण्डेन्दुस्त्रिपदः कोणे, शृंखला पञ्चभिः पदैः ॥७८॥
एकादशपदा वल्ली भद्रं तु नवभिः पदैः ।
चतुर्विंशत्पदा वापी विंशत्या परिधिः पदैः ॥७९॥
मध्ये षोडशभिः कोष्ठैः पद्ममष्टदलं स्मृतम् ।
श्वेतेन्दुः शृंखला कृष्णा वल्लीर्नीलेन पूरयेत् ॥८०॥
भद्राऽरुणा सिता वापी परिधिः पीतवर्णकः ।
बाह्यान्तरदलश्वेता कर्णिका पीतवर्णका ॥८१॥
परिध्यावेष्टितं पद्मं बाह्ये सत्त्वं रजस्तमः ।
तन्मध्ये स्थापयेद्देवान् ब्रह्माद्यांश्च सुरेश्वरान् ॥८२॥
देशकालौ च संकीर्त्य देवस्थापनकर्मसु ।
सर्वतोभद्रके षट्पञ्चाशद्देवान् समाह्वयेत् ॥८३॥
गृहीत्वा चाक्षतान्मध्ये ब्रह्माणं तु समाह्वयेत् ।
ओं भूर्भुवः स्वः ब्रह्मन्निहागच्छ च तिष्ठ च ॥८४॥
पूजयामि संस्मरामि नमामि गृह्ण पूजनम् ।
उत्तरे ओं भूर्भुवः स्वः सोममावाहयामि च ॥८५॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
ईशान्याम् ओं भूर्भुवः स्वः ईशानमाह्वयामि च ॥८६॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
पूर्वस्यां ओं भूर्भुवः स्वः इन्द्रमावाहयामि च ॥८७॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
आग्नेय्यां ओं भूर्भुवः स्वः अग्निमावाहयामि च ॥८८॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
दक्षिणे ओं भूर्भुवः स्वः यममावाहयामि च ॥८९॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
नैर्ऋत्याम् ओं भूर्भुवः स्वः निर्ऋतिमाह्वयामि च ॥९०॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
पश्चिमे ओं भूर्भुवः स्वः वरुणमाह्वयामि च ॥९१॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
वायव्याम् ओं भूर्भुवः स्वः वायुमावाहयामि च ॥९२॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
उत्तरे ओं भूर्भुवः स्वः कुबेरमाह्वयामि च ॥९३॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
ईशाने ओं भूर्भुवः स्वः ईशानमाह्वयामि च ॥९४॥
पूजयामि संस्मरामि नमाम्यागच्छ तिष्ठ च ।
ईशानपूर्वयोर्मध्ये ब्रह्माणमाह्वयामि च ॥९५॥
ओं भूर्भुवः स्वः ब्रह्मन्निहागच्छ च तिष्ठ च ।
पूजयामि संस्मरामि नमामि सुखदो भव ॥९६॥
वायुसोमान्तरालेऽष्टवसूनावाहयामि च ।
ओं भूर्भुवः स्वः वसव इहागच्छत तिष्ठत ॥९७॥
पूजयामि संस्मरामि नमामि सुखदा हि नः ।
सोमेशानान्तराले च रुद्रानावाहयामि च ॥९८॥
ओं भूर्भुवः स्वः रुद्रा इहागच्छत तिष्ठत ।
पूजयामि संस्मरामि नमामि सुखदा हि नः ॥९९॥
ईशानपूर्वयोर्मध्ये आदित्यानाह्वयामि च ।
ओं भूर्भुवः स्व आदित्या इहागच्छत तिष्ठत ॥१००॥
इन्द्राग्न्यान्तरभागेऽश्विकुमारावाह्वयामि च ।
ओं भूर्भुवः स्वः अश्विनाविहागच्छतं तिष्ठतम् ॥१०१॥
पूजयामि संस्मरामि नमामि सुखदौ हि नः ।
ओमग्नियमयोर्मध्ये विश्वेदेवान् सपितृकान् ॥१०२॥
आह्वयामि भूर्भुवः स्वः पितरस्तिष्ठताऽत्र च ।
पूजयामि संस्मरामि नमामि सुखदा हि नः ॥१०३॥
यमनैर्ऋतयोर्मध्ये यक्षानावाहयामि च ।
ओं भूर्भुवः स्वः यक्षाः समागच्छत तिष्ठत ॥१०४॥
पूजयामि संस्मरामि नमामि सुखदा हि नः ।
नैर्ऋतिवरुणान्तर्म्वा भूतनागान् ह्वयामि च ॥१०५॥
ओं भूर्भुवः स्वः भूता इहागच्छत तिष्ठत ।
पूजयामि संस्मरामि नमामि सुखदा हि नः ॥१०६॥
तत्रैव भूर्भुवः स्वः सर्पानाह्वयामि तिष्ठत ।
पूजयामि संस्मरामि नमामि सुखदा हि नः ॥१०७॥
वरुणवाय्वन्तरे च गन्धर्वाप्सरसस्तथा ।
भूर्भुवः स्वश्चार्चयामि स्मरामि च नमामि च ॥१०८॥
तत्रैव भूर्भुवः स्वश्चाप्सरसश्चापि तिष्ठत ।
पूजयामि संस्मरामि नमामि सुखदा हि नः ॥१०९॥
ओं पुञ्जिकस्थली क्रतुस्थली चाप्सरसौ दंक्षणवः ।
पशवो हेतिः पौरुषेयो वधः प्रहेतिस्तेभ्यो नमो अस्तु ॥११०॥
ब्रह्मसोमयोर्मध्ये स्कन्दं शूलं च नन्दिनम् ।
भूर्भुवः स्व आह्वयामि स्मरामि च नमामि च ॥१११॥
पूजयामि इह स्थाने समागच्छत तिष्ठत ।
नन्दीश्वराय शूलाय महाकालाय वो नमः ॥११२॥
ब्रह्मेशानान्तराले च सप्तप्रजापतीन् शुभान् ।
भूर्भुवः स्वः प्रजेशाना इहागच्छत तिष्ठत ॥११३॥
पूजयामि संस्मरामि नमामि सुखदा हि नः ।
ब्रह्मेन्द्रयोर्मध्यभागे दुर्गे चागच्छ तिष्ठ च ॥११४॥

भूर्भुवः स्वः दुर्गामाह्वयामि नौम्यर्चयामि च।
दुर्गापूर्वे भूर्भुवः स्वः विष्णुमावाहयामि च॥११५॥
पूजयामि संस्मरामि नौम्यागच्छ च तिष्ठ च।
ब्रह्माग्न्योर्मध्यके पितॄनाह्वयामि च तिष्ठत॥११६॥
भूर्भुवः स्वः पितरश्चागच्छतार्चयामि च।
ब्रह्मयमयोर्मध्ये च मृत्युरोगान् ह्वयामि च॥११७॥

ओं परं मृत्यो अनुपरे हि पन्था यस्ते
अन्य इतरो देवयानात्।
चक्षुष्मते शृण्वते ब्रवीमिमानः
प्रजां रीरिषो मोतवीरान्॥११८॥

पूजयामि संस्मरामि नौम्यागच्छत तिष्ठत।
ब्रह्मनिर्ऋत्यन्तराले गणेशं चाह्वयामि च॥११९॥
भूर्भुवः स्वः गणेश इहागच्छ च तिष्ठ च।
पूजयामि संस्मरामि नमामि सुखदो भव॥१२०॥
ब्रह्मवरुणयोर्मध्ये अपश्चाव्हयामि च।
भूर्भुवः स्वः आप इहागच्छत तिष्ठत॥१२१॥
पूजयामि संस्मरामि नमामि सुखदा हि नः।
ब्रह्मवायव्यन्तराले च मरुत आव्हयामि च॥१२२॥
ब्रह्मपादे पृथिवीमावाहयामि नमामि च।
भूर्भुवः स्वः पृथिवी इहागच्छ च तिष्ठ च॥१२३॥
पूजयामि संस्मरामि नमामि सुखदा भव।
तत्रैव सप्तनद्यश्च इहागच्छत तिष्ठत॥१२४॥
भूर्भुवः स्वश्च गंगाद्याः पूजयामि नमामि च।
गंगे च यमुने सरस्वति शतद्रुतापिके॥१२५॥
उष्णाऽसिक्नी सप्तनदीः स्मरामि च नमो नमः।
तत्रैव सप्तवार्धीश्च आह्वयामि नमामि च॥१२६॥
भूर्भुवः स्वः सागराश्च समागच्छत तिष्ठत।
पूजयामि संस्मरामि तृप्तिदाः सुखदा हि नः॥१२७॥
तदूर्ध्वे मेरुमाह्वयाम्यागच्छ चात्र तिष्ठ च।
भूर्भुवः स्वश्च मेरो त्वां नौमि मे सुखदो भव॥१२८॥
अथ वै मण्डलाद् बाह्ये सोमादिसन्निधौ क्रमात्।
उत्तरे तु गदामावाहयामि स्थापयामि च॥१२९॥
भूर्भुवः स्वश्च गदे इहागच्छ च तिष्ठ च।
ईशान्यां तु शूलमावाहयामि स्थापयामि च॥१३०॥
भूर्भुवः स्वश्च शूलक इहागच्छ च तिष्ठ च।
पूर्वे वज्रमाह्वयामि स्थापयामि नमामि च॥१३१॥
भूर्भुवः स्वश्च वज्र त्वमिहागच्छ च तिष्ठ च।
आग्नेय्यां शक्तिमावाहयामि संस्थापयासि च॥१३२॥
भूर्भुवः स्वश्चैहि चात्रागच्छ तिष्ठ नमामि ते।
दक्षिणस्यां दण्डमावाहयामि स्थापयामि च॥१३३॥
नैर्ऋत्यां खण्डहेतिं चावाहयामि नमामि च।
पश्चिमे पाशमावाहयामि संस्थापयामि च॥१३४॥
वायव्यामंकुशमावाहयामि स्थापयामि च।
भूर्भुवः स्वश्च दण्डाद्या इहागच्छत तिष्ठत॥१३५॥
पूजयामि संस्मरामि नमामि सुखदा हि नः।
तद्बाह्ये चोत्तरे गौतममाह्वयामि नौमि च॥१३६॥
ईशान्यां भारद्वाजं चाह्वयामि प्रणमामि च।
विश्वामित्रं च पूर्वस्यामाह्वयामि नमामि च॥१३७॥
आग्नेय्यां कश्यपमावाहयामि प्रणमामि च।
दक्षिणे जमदग्निं चावाहयामि नमामि च॥१३८॥
नैर्ऋत्यां च वशिष्ठं चावाहयामि नमामि च।
पश्चिमेऽत्रिमाह्वयामि पूजयामि नमामि च॥१३९॥
वायव्यां चारुन्धतीमाह्वयामि प्रणमामि च।
पूर्वे चैन्द्र्यै नमश्चाग्नौ कुमार्यै तु नमो नमः॥१४०॥
दक्षे ब्राह्मयै नमो वाराह्यै नैर्ऋत्यां नमो नमः।
पश्चिमायां चामुण्डायै वैष्णव्यै वायुके नमः॥१४१॥
माहेश्वर्यै चोत्तरे चेशाने वैनायकीश्रियै।
नमः प्रपूजयामि संस्मरामि सुखदा हि नः॥१४२॥
षड्पंचाशद्देवगणानावाह्य परिपूजयेत्।
इत्याह श्रीहरिर्भक्तदेवायतनकाय तत्॥१४३॥
मया तेऽभिहितं राधे ऊह्या मन्त्रास्तदर्थगाः।
धूपदीपसुनैवेद्यैस्तर्पयेद् देवतागणान्॥१४४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रत्यधिदेवतावाहनलोकपालत्रिदेवदेवीग्रहावाहनादिघटस्थापनसर्वतोभद्रपूजनषट्पञ्चाशद्देवपूजनादिप्रदर्शननामैकपञ्चाशदधिकशततमोऽध्यायः॥ १५१॥

श्रीकृष्ण उवाच—

ततो यदाह भगवान् भक्तं राधे वदामि ते।
वेदिमध्ये तु कमले ताम्रघटं निधापयेत्॥ १॥
ओं भूरसीति वै भूमिं स्पृष्ट्वा प्रक्षिप्य तन्दुलान्।
यवान् वा समिति तत्र ओषधीः सन्नियुज्य च॥ २॥
ओमाजिघ्रेति कलशं स्थापयेत् तत्र वै स्थले।
ओं वरुणस्येत्युदकं क्षिप्त्वा वस्त्रेण वेष्टयेत्॥ ३॥
ओं याः फलिनीति पूगीफलं च पञ्चरत्नकम्।
हिरण्यं च क्षिपेद्गन्धं क्षिपेत् सर्वौषधीस्तथा॥ ४॥

क्षिपेत् सप्तमृदश्चापि दूर्वां च पञ्चपल्लवान् ।
पवित्राणि क्षिपेत्तन्दुलस्थालीं च निधापयेत् ॥ ५ ॥
श्रीफलं सन्निधायै व प्रतिष्ठाप्य च देवताम् ।
ओं भूर्भुवः स्वः वरुण इहागच्छ च तिष्ठ च ॥ ६ ॥
नमामि षोडशद्रव्यैः पूजयामि च ते नमः ।
सम्प्रार्थ्य तन्मुखे स्वर्णमूर्तिं नारायणीं न्यसेत् ॥ ७ ॥
अग्न्युत्तारणपूर्वां चाच्छाद्य पट्टाम्बरादिभिः ।
एह्येहि भगवन् विष्णो लोकानुग्रहकारक ॥ ८ ॥
यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते ।
ओं विष्णवे नमो मधुसूदनाय नमो नमः ॥ ९ ॥
ओं नमस्त्रिविक्रमाय वामनाय च ओं नमः ।
श्रीधराय नम ओं श्रीहृषीकेशाय ओं नमः ॥१०॥
पद्मनाभाय च नमो दामोदराय ओं नमः ।
अनादिश्रीकृष्णनारायणाय ओं नमो नमः ॥११॥
श्रीकृष्णाय नम ओं च नारायणाय ओं नमः ।
नरनारायणाय ओं नमो वै हरये च ओम् ॥१२॥
एतैश्च नामभिः कृष्णं सम्पूज्य प्रणमेत्पुनः ।
गुरुराचम्य च द्वारपालान् गन्धैः समर्चयेत् ॥१३॥
पठध्वं च यजध्वं च विप्रान् वै प्रेरयेत्तथा ।
आचार्य ऋत्विजः कुण्डेऽग्निं स्मृत्वा कुर्युराविधिम् ॥१४॥
प्रतिकुण्डं कुण्डदक्षे यजमानो निषद्य च ।
धृत्वा कुशयवजलान्यद्य कालादिके शुभे ॥१५॥
एतद्देवप्रतिष्ठार्थयज्ञकर्मस्विदं हविः ।
द्रव्यं सर्वग्रहेभ्योऽधिदेवताभ्यश्च वै तथा ॥१६॥
प्रत्यधिदेवताभ्यश्च लोकपालेभ्य इत्यपि ।
दिक्पालेभ्यस्त्रिदेवेभ्यो गणेशाय तथा ह्यपि ॥१७॥
अम्बिकाभूतयूथेभ्यस्तथा च विश्वकर्मणे ।
वरुणाग्निवायुसूर्यप्रजापतिभ्य इत्यपि ॥१८॥
स्विष्टकृदादिदेवेभ्यः सर्वेभ्यश्च नमम ओम् ।
इत्युच्चार्य प्रतिकुण्डं द्रव्यत्यागं समाचरेत् ॥१९॥
जापकानां जपे जायमाने होमं समाचरेत् ।
क्रमेण वरणं कुर्याद् देशकालौ प्रकीर्त्य वै ॥२०॥
अमुकं ब्राह्मणं ब्रह्मत्वेन त्वामहमावृणे ।
वृतोऽस्मीति प्रतिवाक्यं विहितं कर्म चाचर ॥२१॥
यथाज्ञानं करवाणि वह्नेर्दक्षिणतस्ततः ।
त्यक्त्वा परिस्तरणार्थभुवं दत्वा तु वेधसे ॥२२॥
वारणादिदारुरूपासनं प्रागग्रगान् कुशान् ।
आसने तु समास्तीर्थ वह्निप्रदक्षिणक्रमात् ॥२३॥

ब्रह्माणं तु समानीय प्रतिष्ठाकर्मणि स्वयम् ।
ब्रह्मा भवेत्यभिधायाऽऽसने समुपवेशयेत् ॥२४॥
तदभावे तु पञ्चाशत्कुशात्मकं प्रकल्पयेत् ।
अग्नेरुत्तरतः प्रागग्रकुशैरासनद्वयम् ॥२५॥
कल्पयित्वा वारणं द्वादशांगुलसुदीर्घकम् ।
चतुरंगुलविस्तारं चतुरंगुलखातकम् ॥२६॥
चमसं पुरतः कृत्वा दक्षहस्तस्थपात्रगम् ।
जलं प्रपूर्य च कुशैराच्छाद्य ब्रह्मणो मुखम् ॥२७॥
वीक्ष्याऽग्नेरुत्तरतः पश्चिमासने कुशोपरि ।
निदध्याद्वै ततः परिस्तरणं स्याद् यथा तु तत् ॥२८॥
बर्हिषो वै चतुर्थांशं धृत्वा प्रागग्रकैः कुशैः ।
चतुर्भिश्च चतुर्भिश्चाऽऽग्नेयादीशानकावधिम् ॥२९॥
ब्रह्मतश्चाग्निपर्यन्तं नैर्ऋत्याद् वायकावधिम् ।
अग्नितः प्रणीतकान्तं परिस्तरणमिष्यते ॥३०॥
कृत्वा तच्च ततोऽग्नेरुत्तरतः पश्चिमे खलु ।
पवित्रच्छेदनार्थं तु कुशत्रयं समाददेत् ॥३१॥
पवित्रकरणार्थं च द्वौ कुशास्तबकौ नयेत् ।
वारणं प्रोक्षणीपात्रं द्वादशांगुलदीर्घकम् ॥३२॥
आज्यस्थाली तैजसी द्वादशांगुलविशालिका ।
प्रादेशोच्चाऽथ चरुस्थाली सम्मार्गत्रिदर्भिकाः ॥३३॥
उपयमकुशास्त्रिप्रभृतयश्च समित् त्रयम् ।
पालाश्यः प्रादेशमात्र्यः स्रवो हस्तश्च खादिरः ॥३४॥
आज्यं गव्यं व्रीहितन्दुलका द्रव्यं हिरण्यकम् ।
षट्पंचाशत्तथा शतद्वयं तण्डुलमुष्टिकाः ॥३५॥
तन्दुलपूर्णपात्रं च रक्षणीयानि मण्डपे ।
आसादनं पवित्रच्छित्तिदर्भानां तु पूर्वतः ॥३६॥
ततः कुशैस्त्रिभिश्चाग्रे हित्वा प्रादेशमात्रकम् ।
द्वे कुशतरुणे प्रच्छिद्य पवित्रविधापनम् ॥३७॥
सपवित्रकरेणैव प्रोक्षणीपात्रके तदा ।
प्रणीतोदकमाक्षिप्याऽनामिकांऽगुष्ठचिप्प्यया ॥३८॥
उत्तराग्रे पवित्रे गृहीत्वा त्रिरुत्पवं तथा ।
प्रोक्षणीपात्रस्य वामे हस्ते विधापनं तथा ॥३९॥
अनामिकांगुष्ठचिप्प्या पवित्रे प्राप्य वै ततः ।
त्रिरुदिंगनमाधेयं ततः प्रणीतवारिणा ॥४०॥
प्रोक्षणीप्रोक्षणं चाथ प्रोक्षणीवारिणा ततः ।
आज्यस्थाल्यादीनि पूर्णपात्रपर्यन्तकानि वै ॥४१॥
क्रमेणैकैकशः प्रोक्ष्य प्रोक्षणीपात्रकं ततः ।
असञ्चरे प्रणीताग्न्योरन्तराले निधाय च ॥४२॥

आज्यमासादितं चाज्यस्थाल्यामग्नेस्तु पश्चके ।
निहितायां समाक्षिप्य चरुस्थाल्यां ततः परम् ॥४३॥
प्रणीतोदकमासिच्याऽऽसादितान् न्यस्य तन्दुलान् ।
ब्रह्माऽधिश्रयति चाज्यं तदुत्तरतश्च स्वयम् ॥४४॥
चरुमेवं च युगपदग्नावारोप्य वै ततः ।
ईषच्छृते चरौ ज्वलदुल्मुकं तु प्रदक्षिणम् ॥४५॥
आज्यचर्वोः समन्ताद्वै भ्रामयेच्च ततः पुनः ।
दक्षिणपाणिना स्रुवमादाय प्राङ्मेव च ॥४६॥
अधोमुखं तथाऽग्नौ तापयित्वा सव्यहस्तके ।
कृत्वा च दक्षिणेनैव सम्मार्गाग्रैश्च मूलतः ॥४७॥
अग्रपर्यन्तकं मूलैरग्रमारभ्य चाप्यधः ।
संमृज्य मूलपर्यन्तं प्रणीतवारिणा ततः ॥४८॥
अभिषिच्य पुनः पूर्ववत्प्रताप्य च दक्षतः ।
निदध्याद्वै तत आज्यमुत्थाप्य पूर्वतश्चरोः ॥४९॥
नीत्वाऽग्नेरुत्तरतश्च स्थापयित्वा चरुं ततः ।
उत्थाप्याज्यस्य पश्चाद्वै नीत्वाऽऽज्यस्योत्तरात्ततः ॥५०॥
स्थापयित्वा चाऽऽज्यमग्नेः पश्चादानीय वै चरुम् ।
आनीयाऽऽज्यस्योत्तरतो निधाय पूर्ववत् ततः ॥५१॥
पवित्राभ्यामाज्यमुत्पूयाऽवलोक्य च वै ततः ।
अपद्रव्यनिरासश्च पुनः प्रोक्षिणिकोत्पवः ॥५२॥
ततश्चोपयमकुशात् दक्षहस्तेन वामके ।
हस्ते कृत्वा समुत्तिष्ठन् ध्यात्वा प्रजापतिं हृदि ॥५३॥
तूष्णीमग्नौ घृताक्तास्त्रिसमिधः प्रक्षिपेन्मखी ।
उपविश्य प्रोक्षणीवारिणा पवित्रयोजिना ॥५४॥
दक्षिणेन चुलुकेन गृहीतेनाग्निमेव च ।
ईशानाद्युदगपवर्गं परिषिच्य वै ततः ॥५५॥
दक्षिणजान्ववाच्यकुशाग्रेण ब्रह्मणाऽपि च ।
अन्वारब्धो यजमानेनाऽन्वारब्धश्च वै ततः ॥५६॥
समिद्धेऽग्नौ स्रुवेणाऽऽज्याहुतीश्च जुहुयान्मखी ।
आधारात्तु समारभ्य द्वादशाहुतिकासु च ॥५७॥
तत्तदाहुतिशेषस्य स्रुवलग्नघृतस्य तु ।
प्रोक्षणीपात्रके क्षेपः कर्तव्यो विधिरीदृशः ॥५८॥
होमस्तत्र यथायोग्यः कर्तव्यः स्याद् यदिष्टकः ।
ओं प्रजापतये स्वाहेदं प्रजापतये नमम ॥५९॥
ओमिन्द्राय स्वाहेदमिन्द्रायाधारकौ नमम ।
ओमग्नये स्वाहेदमग्नये ओम् ओं नमम ॥६०॥
ओं सोमाय स्वाहेदं सोमायाज्यभागकौ नमम ।
ओं भूः स्वाहेदं भूः नमम भुवः स्वाहा इदं भुवः ॥६१॥
ओं स्वः स्वाहा इदं स्वश्च महाव्याहृतयस्त्विमाः ।
ओं त्वन्नोऽग्नेइत्यग्निवरुणाभ्यां च नमम ओम् ॥६२॥
ओं सत्वनोऽग्न इदमग्निवरुणाभ्यां नमश्च ओम् ।
ओमयाश्चाग्ने इति च इदमग्नये नमश्च ओम् ॥६३॥
ओं ये ते शतमिति स्वाहा सवित्रे विष्णवे इदम् ।
इदं च विश्वदेवेभ्यो मरुद्भ्योऽर्केभ्य ओमिदम् ॥६४॥
ओं उदुत्तमेति च स्वाहेदं वरुणाय नमम ।
वर्मवद् देवविघ्नानां वारणं शान्तिरुच्यते ॥६५॥
ओं आपः शिवाः शिवतमाः शान्ताः
शान्ततमास्तास्ते कृण्वन्तु भेषजम् ।
एवं कुर्यात् प्रोक्षणं सर्वकुण्डेष्व-
ग्निप्रोक्षणान्तकं कर्म भूसुरैः ॥६६॥
अथाऽऽचार्योऽग्निं संपूज्य ग्रहहोमं समाचरेत् ।
अर्कः पलाशः खदिरश्चापामार्गोऽथ पिप्पलः ॥६७॥
औदुम्बरः शमी दूर्वा कुशाश्च समिधः क्रमात् ।
नवग्रहाणां बोद्धव्या दधिक्षीरघृताऽऽक्तकाः ॥६८॥
समिधः शाकल्ययुता जुहुयाद्वै गृणन् मनून् ।
अष्टोत्तरशतं वाऽष्टाविंशतिर्वाऽष्टवारकम् ॥६९॥
ओं आकृष्णेनेति वै स्वाहा इदं सूर्याय वै नमम ।
ओं इमं देवेति वै स्वाहा इदं चन्द्रमसे नमम ॥७०॥
ओं अग्निरितिवै स्वाहा इदं भौमाय वै नमम ।
ओं उद्बुद्धयस्वेति स्वाहा इदं बुधाय वै नमम ॥७१॥
ओं बृहस्पते इति स्वाहा इदं बृहस्पतये नमम ।
ओं अन्नादिति वै स्वाहा इदं शुक्राय वै नमम ॥७२॥
ओं शन्न इति वै स्वाहा इदं शनिश्चराय नमम ।
ओं कयान इति वै स्वाहा इदं वै राहवे नमम ॥७३॥
ओं केतुमिति वै स्वाहा इदं वै केतवे नमम ।
अथ हस्ते जलं धृत्वा होमेन ग्रहदेवताः ॥७४॥
प्रीयन्तां च नममेति जलं भूमाववासृजेत् ।
ततो नवग्रहाधिदेवानां होमं समाचरेत् ॥७५॥
पालाश्य ईश्वरादिभ्यः प्रादेशमात्रिकाः शुभाः ।
साज्याः समिधः प्रत्येकं चाष्टौ चतस्र एव वा ॥७६॥
सघृताः सयवास्तिला होतव्याश्च विधानतः ।
ओं त्र्यम्बकं यजामहे स्वाहेदमीश्वराय नमम ॥७७॥
ओं श्रीश्च ते लक्ष्मीश्च स्वाहेदं ह्युमायैः नमम ।
ओं यदक्रन्दः प्रथमं स्वाहेदं स्कन्दाय नमम ॥७८॥
ओं विष्णोरराटमसि स्वाहेदं विष्णवे नमम ।
ओं ब्रह्मयज्ञानं प्रथमं स्वाहेदं ब्रह्मणे नमम ॥७९॥

ओं त्रातारमिन्द्रं स्वाहेदं चेन्द्राय नमम ।
ओं यमाय त्वा मखाय स्वाहेदं यमाय नमम ॥८०॥
ओं कार्षिरसि स्वाहेदं कालाय ओं नमम ।
ओं चित्रावसो स्वाहेदं चित्रगुप्ताय नमम ॥८१॥
अनेन द्रव्यहोमेन प्रीयन्तां चाधिदेवताः ।
नममेति समुच्चार्य जलं समुत्सृजेन्मखी ॥८२॥
अथ प्रत्यधिदेवानां होमः क्रमात् ततः परम् ।
ओं अग्निं दूतमिति स्वाहा इदं तु चाग्नये नमम ॥८३॥
ओं अप्स्वग्ने इति स्वाहा इदमद्भ्यश्च ओं नमम् ।
ओं स्योनापृथिवीति स्वाहेदं धरण्यै ओं नमम ॥८४॥
ओं विष्णोरराटमिति स्वाहेदं विष्णवे ओं नमम ।
ओं सजोषा इति स्वाहेदं चेन्द्राय ओं नमम ॥८५॥
ओं आदित्यैरेति स्वाहेदमिन्द्राण्यै ओं नमम ।
ओं ब्रह्मयज्ञानमिति स्वाहेदं ब्रह्मणे ओं नमम ॥८६॥
ओं नमोऽस्तु इति स्वाहेदं सर्पेभ्य ओं नमम ।
ओं प्रजापते इति स्वाहेदं प्रजापतये नमम ॥८७॥
अनेन द्रव्यहोमेन प्रीयन्तां प्रत्यधीश्वराः ।
नममेति समुच्चार्य जलं समुत्सृजेन् मखी ॥८८॥
अथ होमः पञ्चलोकपालानां विधिना ततः ।
ओं गणानामितिस्वाहेदं गणेशाय ओं नमम ॥८९॥
ओं अम्बेऽम्बालिके स्वाहेदं चाम्बिकायै नमम ।
ओं वातो वामन स्वाहेदं वायवे ओं नमम ॥९०॥
ओं घृतंघृतेति स्वाहेदं आकाशाय च ओं नमम ।
ओं यावांकशेतिस्वाहेदं अश्विभ्यां च ओं नमम ॥९१॥
अनेन द्रव्यहोमेन प्रीयन्तां लोकपालकाः ।
नममेति समुच्चार्य जलं समुत्सृजेन्मखी ॥९२॥
अथ होमो दशदिक्प्रपालानां विधिना ततः ।
ओं त्रातारमिन्द्रं स्वाहेदं चेन्द्राय नमम ओम् ॥९३॥
ओमग्निदूतमिति स्वाहेदं चाग्नये नमम ओम् ।
ओं यमाय त्वेति स्वाहा इदं यमाय वै नमम ॥९४॥
ओं असुन्वन्तेति स्वाहा इदं निर्ऋतये नमम ।
ओं वरुणस्येति स्वाहा इदं वरुणाय नमम ॥९५॥
ओं वायो ये ते इति स्वाहा इदं च वायवे नमम ।
ओं कुविदं चेति स्वाहा इदं कुबेराय नमम ॥९६॥
ओं तमीशानमितिस्वाहा इदमीशानाय नमम ।
ओं अस्मेरुद्रा इति स्वाहा इदं वै ब्रह्मणे नमम ॥९७॥
ओं स्योना पृथिवीति स्वाहा इदं चानन्ताय नमम ।
अनेन द्रव्यहोमेन प्रीयन्तां दिक्प्रपालकाः ॥९८॥
नममेति समुच्चार्य जलं समुत्सृजेन्मखी ।
गन्धं पुष्पं जलं नैवेद्यकं दीपं च धूपकम् ॥९९॥
अर्पयामि च ताम्बूलं प्रीयन्तां परमेश्वराः ।
इत्येवं विधिना कुर्यात्पूजनं राधिके तथा ॥१००॥
अनादिश्रीकृष्णनारायणः प्राह विधानतः ।
देवायतनभक्ताय तदुक्तं च मयापि ते ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कलशतद्देवद्वारपालपूजनं, वरणं, प्रोक्षणीपात्रादि, चरुः, आज्याहुतिः, वारणं, ग्रहहोमम्, अधिदेवप्रत्यधिदेवानां होमः, लोकपालदिक्पालानां होम, इत्यादिनिरूपणनामा द्वापञ्चाशदधिकशततमोऽध्यायः ॥१५२॥

**श्रीकृष्ण उवाच—**

राधे वास्तुस्थदेवानां होमं च विधिना ततः ।
हरिर्भक्ताय यं त्वाह तथाऽन्यत् कर्म वच्मि ते ॥ १ ॥
शिख्यादिभ्यश्च तत्रादौ स्वाहान्ताः प्रणवादिकाः ।
नामभिर्वेदमन्त्रैश्च प्रत्येकं शतमष्टवत् ॥ २ ॥
अष्टाविंशतिर्वाष्टौ वाऽऽहुतिस्तिलाज्यपायसैः ।
समिद्भिश्च प्रदातव्या औदुम्बरीभिरेव च ॥ ३ ॥
तदभावेऽश्वत्थसमिदन्या. मध्वाज्यदुग्धयुक् ।
होतव्या च तिलाः कृष्णा विधिना मन्त्रपूर्वकम् ॥ ४ ॥
ओं शिखिने च वै स्वाहा इदं च शिखिने नमम ।
ओं पर्जन्याय च स्वाहा इदं पर्जन्यकाय च ॥ ५ ॥
ओं जयन्ताय च स्वाहा इदं जयन्तकाय च ।
ओमिन्द्राय च वै स्वाहा इदमिन्द्राय नमम ॥ ६ ॥
ओं सूर्याय च वै स्वाहा इदं सूर्याय नमम ।
ओं सत्याय च वै स्वाहा इदं सत्याय नमम ॥ ७ ॥
ओं भृशाय च वै स्वाहा इदं भृशाय नमम ।
ओमाकाशाय च स्वाहा इदमाकाशकाय च ॥ ८ ॥
ओं वायवे च वै स्वाहा इदं वायवे नमम ।
ओं पूष्णे च नमः स्वाहा इदं पूष्णे च नमम ॥ ९ ॥
ओं वितथाय च स्वाहा इदं वितथाय नमम ।
ओं गृहक्षताय स्वाहा इदं गृहक्षताय च ॥१०॥
ओं यमाय च वै स्वाहा इदं यमाय नमम ।
ओं गन्धर्वाय च स्वाहा इदं गन्धर्वाय नमम ॥११॥
ओं भृंगराजाय स्वाहा इदं भृंगाय नमम ।
ओं मृगाय च वै स्वाहा इदं मृगाय नमम ॥१२॥

ओं पितृभ्यश्च वै स्वधा इदं पितृभ्यो नमम ।
ओं दौवारिकाय स्वाहा इदं दौवारिकाय च ॥१३॥
ओं सुग्रीवाय च स्वाहा इदं सुग्रीवकाय च ।
ओं पुष्पदन्ताय स्वाहा इदं पुष्पाय नमम ॥१४॥
ओं वरुणाय च स्वाहा इदं वरुणाय नमम ।
ओमसुराय च स्वाहा इदमसुराय नमम ॥१५॥
ओं शेषाय च वै स्वाहा इदं शेषाय नमम ।
ओं पापयक्ष्मणे स्वाहेदं पापयक्ष्मणे नमम ॥१६॥
ओं रोगाय च वै स्वाहा इदं रोगाय नमम ।
ओं सर्पाय च वै स्वाहा इदं सर्पाय नमम ॥१७॥
ओं मुख्याय च वै स्वाहा इदं मुख्याय नमम ।
ओं भल्लाटाय च स्वाहा इदं भल्लाटकाय च ॥१८॥
ओं सोमाय च वै स्वाहा इदं सोमाय नमम ।
ओं सर्पाय च वै स्वाहा इदं सर्पाय नमम ॥१९॥
ओमदितये च स्वाहा इदमदितये नमम ।
ओं दितये च वै स्वाहा इदं दितये नमम ॥२०॥
ओमद्भ्यश्च तथा स्वाहा इदमद्भ्यश्च नमम ।
ओं सावित्राय च स्वाहा इदं सावित्राय नमम ॥२१॥
ओं जयाय च वै स्वाहा इदं जयाय नमम ।
ओं रुद्राय च वै स्वाहा इदं रुद्राय नमम ॥२२॥
ओमर्यम्णे च वै स्वधा इदमर्यम्णे नमम ।
ओं सवित्रे च वै स्वाहा इदं सवित्रे नमम ॥२३॥
ओं विवस्वते च स्वाहा इदं विवस्वते नमम ।
ओं विबुधेशाय स्वाहेदं विबुधेशाय नमम ॥२४॥
ओं मित्राय च वै स्वाहेदं मित्राय च नमम ।
ओं राजयक्ष्मणे स्वाहेदं राजयक्ष्मणे नमम ॥२५॥
ओं पृथ्वीधृगे स्वाहा इदं पृथ्वीधृगे नमम ।
ओमापवत्साय स्वाहेदमापवत्साय नमम ॥२६॥
ओं ब्रह्मणे च वै स्वाहा इदं च ब्रह्मणे नमम ।
ओं चरक्यै च वै स्वाहा इदं चरक्यै नमम ॥२७॥
ओं विदार्यै च वै स्वाहा इदं विदार्यै नमम ।
ओं पूतनायै च स्वाहा इदं पूतनायै नमम ॥२८॥
ओ पापराक्षस्यै स्वाहेदं पापराक्षस्यै नमम ।
ओं स्कन्दाय च स्वाहा इदं स्कन्दाय नमम ॥२९॥
ओमर्यम्णे च वै स्वधा इदमर्यम्णे नमम ।
ओं जृंभकाय च स्वाहा इदं जृंभाय नमम ॥३०॥
ओं पिलिपिच्छाय स्वाहेदं पिलिपिच्छाय नमम ।
ओमिन्द्राय च वै स्वाहा इदमिन्द्राय नमम ॥३१॥
ओमग्नये च वै स्वाहा इदमग्नये नमम ।
ओं यमाय च वै स्वाहा इदं यमाय नमम ॥३२॥
ओं निर्ऋतये च स्वाहा इदं निर्ऋतये नमम ।
ओं वरुणाय च स्वाहा इदं वरुणाय नमम ॥३३॥
ओं वायवे च वै स्वाहा इदं वायवे नमम ।
ओं कुबेराय च स्वाहेदं कुबेराय वै नमम ॥३४॥
ओमीशानाय च स्वाहेदमीशानाय वै नमम ।
ओं ब्रह्मणे च वै स्वाहा इदं वै ब्रह्मणे नमम ॥३५॥
ओमनन्ताय च स्वाहा इदमनन्ताय नमम ।
ओमुग्रसेनाय स्वाहेदमुग्रसेनाय नमम ॥३६॥
ओं डामराय च स्वाहा इदं डामराय नमम ।
ओं महाकालाय वषट् महाकालायेदं नमम ॥३७॥
ओमश्विभ्यां च वै स्वाहा इदमश्विभ्यां नमम ।
ओं दुर्गायै च वै स्वाहा इदं दुर्गायै नमम ॥३८॥
एतद्धोमेन शिख्याद्याः प्रीयन्तां जलमुत्सृजेत् ।
अथ वास्तोष्पतये च शतं चाष्टौ तथाऽऽहुतीः ॥३९॥
समित्तिलपायसाज्यैर्जुहुयान्मन्त्रयोजिताः ।
एकैकेन तु मन्त्रेण सप्तविंशतिका हि ताः ॥४०॥
ओं वास्तोष्पते प्रतिजानीह्यस्मान् स्वावेशो अनमीवो भवानः ।
यत्वेमहेप्रतितन्नो जुषस्व शन्नो भवद्विपदेशंचतुष्पदे स्वाहा॥४१॥
इदं वास्तोष्पतये स्वाहा वास्तोष्पतये नमम ।
धूपं दीपं च नैवेद्यं जलं समर्पयामि च ॥४२॥
ओं वास्तोष्पते प्रतरणोन
एधिगयस्फानोगोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्यामपितेव पुत्रान्प्रति
तन्नो जुषस्व सन्नोभवद्विपदेशं चतुष्पदे स्वाहा ॥४३॥
इदं वास्तोष्पतये स्वाहा वास्तोष्पतये नमम ।
धूपं दीपं च नैवेद्यं जलं समर्पयामि च ॥४४॥
ओं वास्तोष्पते शग्मयासं
सदा ते सक्षीमहि हिरण्ययागातुमत्या ।
पाहि क्षेम उत योगेवरन्नो
यूयं पात स्वस्तिभिः सदा नः स्वाहा ॥४५॥
इदं वास्तोष्पतये स्वाहा वास्तोष्पतये नमम ।
धूपं दीपं च नैवेद्यं जलं समर्पयामि च ॥४६॥
ओं अमीवहावास्तोष्पते विश्वारूपाण्याविशन् ।
सखा सुशेव एधिनः स्वाहा वर्धय सम्पदा ॥४७॥
इदं वास्तोष्पतये स्वाहा वास्तोष्पतये नमम ।
धूपं दीपं च नैवेद्यं जलं समर्पयामि च ॥४८॥

ततो वै स्थालीपाकेनाऽऽहुतयः षट् च तद्यथा ।
ओमग्निमिन्द्रं बृहस्पतिं विश्वान् देवानुपह्वये ॥४९॥
सरस्वतीं चवाजिनं च वास्तु मे दत्त वाजिनः स्वाहा ।
इदमग्नये इन्द्राय बृहस्पतये विश्वदेवेभ्यःसरस्वत्यै वाजिने ॥५०॥
ओं सर्प्यदेवजनान्सर्वान् हिमवन्तं सुदर्शनम् ।
वसूँश्च रुद्रानादित्यानीशानं जगदैः सह ॥५१॥
एतान् सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ।
इदं सर्पदेवजनेभ्यो हिमवते सुदर्शनाय वसुभ्यो रुद्रेभ्य
आदित्येभ्य ईशानाय जगदेभ्यश्च स्वाहा नमम ॥५२॥
ओं पूर्वाह्णमपराह्णं चोभौ मध्यन्दिना सह ।
प्रदोषमर्धरात्रं च व्युष्टां देवीं महापथम् ॥५३॥
एतान् सर्वान् प्रपद्येऽहं वास्तु
मे दत्त वाजिनः स्वाहा ।
इदं पूर्वाह्णायाऽपराह्णाय प्रदोषायाऽर्धरात्रा-
व्युष्टयैदेव्यै महापथाय नमम ॥५४॥
ओं कर्तारं चविकर्तारं विश्वकर्माणमोषधीश्च वनस्पतीन् ।
एतान्सर्वान्प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ॥५५॥
इदं कर्त्रे विकर्त्रे विश्वकर्मणे ओषधीभ्यो वनस्पतिभ्यो नमम ।
ओं धातारं विधातारं निधीनां च पतिं सह ॥५६॥
एतान्सर्वान् प्रपद्येऽहं वास्तु मे दत्त वाजिनः स्वाहा ।
इदं धात्रे विधात्रे च निधीनां पतये नमम ॥५७॥
ओं स्योनः शिवमिदं वास्तुदत्तब्रह्म
प्रजापतीन सर्वांश्च देवताः स्वाहा ।
इदं ब्रह्मणे प्रजापतये सर्वाभ्यो देवताभ्यो नमम ॥५८॥
पुनः वास्तोष्पते चेति मन्त्रैरेकेन वा सह ।
जुहुयाद् वक्ष्यमाणेन बिल्वं साज्यं सबीजकम् ॥५९॥
पञ्चमं चाज्ययुक्तं च बिल्वं धृत्वा मनुं वदन् ।
जुहुयाद्वै शतं चाष्टौ प्रत्येकं च विधानतः ॥६०॥
ओं वास्तोष्पते ध्रुवस्थूणां सत्रं सो
अभ्यानाद्रप्सो भेत्ता पुरां शश्वतीनाम् ।
इन्द्रो मुनीनां सखा शन्नो भवद्विपदेशं
चतुष्पदे स्वाहा इदं वास्तोष्पतये ॥६१॥
अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यश्च ।
सर्वेभ्यः सर्वशर्वेभ्यो नमस्तेऽस्तु रुद्ररूपेभ्यः ॥६२॥
वास्तुमर्मसुसन्धानार्थे जुहुयात् शतात्परम् ।
शिख्यादिभ्यः पुनर्हुत्वाऽऽपूज्य पंचोपचारकैः ॥६३॥
पीठस्थां प्रतिमां वास्तोर्दधिदूर्वादिभिस्तथा ।
शैवलसप्तधान्यैश्च गन्धाक्षतसुमादिभिः ॥६४॥

युक्तेऽपक्वमृदो भाण्डे संस्थाप्य च पिधाय च ।
प्रासादाग्नेयकोणे वा कोणपदात्तथोत्तरे ॥६५॥
आकाशपदे जानुगर्ते जलेनापूर्य तत्र च ।
प्रक्षिप्य गन्धपुष्पाणि मृद्भाण्डं च निधापयेत् ॥६६॥
गृणन् नमो वरुणाय मृदा मृदं प्रपूरयेत् ।
हुत्वैवं वास्तुदेवेभ्यो योगिनीभ्योऽर्पयेत्ततः ॥६७॥
ओं दिव्ययोगिन्यै स्वाहा इदं दिव्ययोगिन्यै नमम ।
योजनीयं तथा सर्वे योगिन्यै नममेति च ॥६८॥
ओं महाशब्दायै सिद्धयै गणेश्वर्यै स्वाहा नमम ।
प्रेताक्ष्यै डाकिन्यै काल्यै कालरात्र्यै स्वाहा नमम ॥६९॥
निशाचर्य्यै च हुँकार्य्यै सिद्धिवेताल्यै स्वाहा नमम ।
ह्रींकार्य्यै भूतडामर्यै ऊर्ध्वकेश्यै स्वाहा नमम ॥७०॥
विरूपाक्ष्यै च शुष्कांग्यै नरभोजिन्यै स्वाहा नमम ।
फुतकार्यै वीरभद्रायै धूम्राक्ष्यै च स्वाहा नमम ॥७१॥
कालप्रियायै राक्षस्यै घोरराक्षस्यै स्वाहा नमम ।
विरूपाक्ष्यै भयंकर्यै विशालाक्ष्यै स्वाहा नमम ॥७२॥
कौमार्य्यै चण्डिकायै वाराह्यै मुण्डमत्यै स्वाहा नमम ।
भैरव्यै चक्रिण्यै क्रोधायै दुर्मुख्यै स्वाहा नमम ॥७३॥
प्रेतवाहायै कुरंग्यै प्रलम्बौष्ठ्यै स्वाहा नमम ।
मालिन्यै मन्त्रयोगिन्यै कालाग्न्यै स्वाहा नमम ॥७४॥
मोहिन्यै वक्रायै कुण्डलिन्यै बालक्यै स्वाहा नमम ।
कौमार्य्यै यमदूत्यै कराल्यै कौशिक्यै स्वाहा नमम ॥७५॥
यक्षिण्यै भक्षिण्यै कुमारिकायै स्वाहा नमम ।
यन्त्रवादिन्यै विशालाक्ष्यै कामुक्यै स्वाहा नमम ॥७६॥
व्याघ्र्यै राक्षस्यै प्रेतभक्षिण्यै स्वाहा नमम ।
धूर्जट्यै विकटायै घोरायै कपाल्यै स्वाहा नमम ॥७७॥
विकलायै च मालायै सर्वसिद्धयै स्वाहा नमम ।
चतुष्षष्टिश्च योगिन्यः प्रीयन्तां होमतः खलु ॥७८॥
क्षेत्रपालहवनं च कुर्याद्वै विधिना मखी ।
ओं अजराय च स्वाहेदम् अजराय वै नमम ॥७९॥
पावकाय च चौराय दक्षाय चेन्द्रमूर्तये ।
कुष्माण्डाय वरुणाय बाहुकाय स्वाहा नमम ॥८०॥
निमुक्ताय लिप्तकाय तिललोपाय स्वाहा नमम ।
एकदंष्ट्रायैरावतायौषधिघ्नाय स्वाहा नमम ॥८१॥
बन्धनायाऽऽदिव्याप्ताय कम्बलाय स्वाहा नमम ।
क्षोभणाय भगवते धरायाऽऽलाय स्वाहा नमम ॥८२॥
अणवे चन्द्रवारणाय कराटोपाय स्वाहा नमम ।
उरोटोपाय जटिलाय ऋतवे स्वाहा नमम ॥८३॥

महेश्वराय विकाराय मणिमाय स्वाहा नमम ।
गुणबन्धाय डामराय दृढकिरणाय स्वाहा नमम ॥८४॥
स्थविलाय दन्तुराय धनदाय स्वाहा नमम ।
नागकरणाय च फेनकारिणे स्वाहा नमम ॥८५॥
महादलाय चिरकाय सिंहाय स्वाहा नमम ।
मृगाय पक्षिणे सिंहवाहनाय स्वाहा नमम ॥८६॥
तीक्ष्णौष्ठाय अलाभाय सुक्तुण्डाय स्वाहा नमम ।
युधामन्यवे अलीलाय वक्रकाय स्वाहा नमम ॥८७॥
पावनाय स्वाहा नमम प्रीयन्तां क्षेत्रपालकाः ।
ततश्च मातृकाहोमः गौर्यै स्वाहा च ओं नमम ॥८८॥
पद्मायै शच्यै मेधायै सावित्र्यै स्वाहा नमम ।
विजयायै जयायै देवसेनायै स्वाहा नमम ॥८९॥
स्वधायै स्वाहायै मातृभ्यः स्वाहा ओं नमम ओम् ।
लोकमातृभ्यो हृष्टयै पुष्टयै तुष्टयै स्वाहा नमम ॥९०॥
कुलदेव्यै नमः स्वाहा वसुहोमस्ततः परम् ।
ध्रुवाय च धराय च सोमायाऽद्भ्योऽनिलाय च ॥९१॥
नलाय प्रत्यूषाय प्रभासाय स्वाहा नमम ।
आदित्यहवनं चाथ धात्रेऽर्यम्णे स्वाहा नमम ॥९२॥
मित्राय वरुणायाऽपि चांशाय च स्वाहा नमम ।
गभस्तिमते इन्द्राय विवस्वते स्वाहा नमम ॥९३॥
पूष्णे पर्जन्यकायाऽपि विष्णवे जघनाय च ।
स्वाहा नमम च ततो रुद्राणां हवनं यथा ॥९४॥
ओं वीरभद्राय च स्वाहा नमम शंभवे तथा ।
गिरीशायाजैकपादेऽहिर्बुध्न्याय पिनाकिने ॥९५॥
अपराजिताय भुवनाधीश्वराय स्वाहा नमम ।
कपालिने स्थाणवे भगाय स्वाहा नमम ॥९६॥
सप्तमातृहवनं च यथा ब्राह्मयै स्वाहा नमम ।
वैष्णव्यै च माहेश्वर्यै कुमार्यै स्वाहा नमम ॥९७॥
कुबेरायै च वाराह्यै इन्द्राण्यै स्वाहा नमम ।
षड्विनायकहोमोऽथ मोदाय स्वाहा नमम ॥९८॥
प्रमोदाय सन्मुखाय दुर्मुखाय स्वाहा नमम ।
अविघ्नाय विघ्नहर्त्रे स्वाहा नमम ओं नमः ॥९९॥
पितामहादिहोमश्च ब्रह्मणे स्वाहेदं नमम ।
विष्णवे स्वाहेदं नमम रुद्राय स्वाहेदं नमम ॥१००॥
गणेशाय स्वाहेदं नमम लक्ष्म्यै स्वाहेदं नमम ।
जातवेदसे विश्वकर्मणे स्वाहेदं नमम ॥१०१॥
भूतग्रामाय च स्वाहेदं नमम च ओं नमः ।
दशांशोऽथ जपानां चायुतो गायत्रीहोमकः ॥१०२॥
समिदाज्यचरुयवतिलैः सदुग्धशर्करैः ।
श्रीसूक्ताद्यैर्लक्ष्मीहोमः प्रधानदेवहोमकः ॥१०३॥
कर्तव्यश्चेति भक्ताय देवायतनकाय सः ।
हरिः प्राह मया तेऽपि चोक्तं राधे यथायथम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वास्तुदेवहवनं योगिनीहवनं क्षेत्रपालहवनं मातृकाहवनं वस्वादित्यरुद्रमातृगणपतिपितामहविष्णुलक्ष्मीसूर्यादि-हवनमित्यादिनिरूपणनामा त्रिपंचाशदधिक-शततमोऽध्यायः ॥ १५३ ॥

**श्रीकृष्ण उवाच—**

ततश्च श्रीहरिः प्राह देवायतनकाय यम् ।
ब्रह्मप्रियादिहोमं च राधे तं ते वदाम्यपि ॥ १ ॥
अनादिश्रीकृष्णनारायणस्य ब्राह्मरूपिणीः ।
ब्रह्मप्रियाश्चत्वारिंशत् शतं चावाह्य पूजयेत् ॥ २ ॥
स्वर्णसिंहासनं ध्यात्वा विशालं ताः समाह्वयेत् ।
तण्डुलेष्वथ वा पूगीफलेषु चार्चयेद् द्रवैः ॥ ३ ॥
ओं श्रीश्च ते लक्ष्मीश्च पत्न्यावहोरात्रे पार्श्वे-
नक्षत्राणि रूपमश्विनौ व्यात्तंन् इष्णं ।
निषाणमुम्मईषाण सर्वलोकम्मइषाणः ॥ ४ ॥
प्रथमं षण्महाब्राह्मीप्रियाश्चावाहयेन्मखी ।
ओं श्रीराधिकायै स्वाहा इदं राधिकायै नमम ॥ ५ ॥
आह्वयामि स्थापयामि पूजयामि नमामि ताम् ।
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ॥ ६ ॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
ओं श्रीलक्ष्म्यै तथा स्वाहा इदं लक्ष्म्यै नमम ओम् ॥ ७ ॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ॥ ८ ॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
ओं श्रीमाणिक्यायै स्वाहेदं माणिक्यायै नमम ॥ ९ ॥
ओं श्रीब्रह्मविद्यायै स्वाहा इदं ब्रह्मविद्यायै नमम ।
ओं श्रीरमायै च स्वाहा इदं रमायै च नमम ॥१०॥
ओं श्रियै च तथा स्वाहा इदं श्रियै च वै नमम ।
आह्वयामि स्थापयामि पूजयामि नमामि च ॥११॥
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ।
ताम्बूलकं तथा नीराजनं समर्पयामि च ॥१२॥
परविद्यां चाह्वयामि पूजयामि नमामि च ।
धूपं दीपं सुनैवेद्यं समर्पयामि ओं नमम ॥१३॥

ब्रह्मप्रियास्तथा गीता उपनिषद् इत्यपि ।
जयन्तीश्चैकादशीश्चाऽऽराधनां चाह्वयामि च ॥१४॥
महालक्ष्मीं तथा भक्तिं राधां रमां पतिव्रताम् ।
गंगां च रोहिणीं कामदुघां च पृथिवीं तथा ॥१५॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ॥१६॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
संज्ञा विभूतिं दुःखहालक्ष्मीं च कमलां तथा ॥१७॥
सिद्धिं मोहिनीमुर्वशीं मुक्तां बुद्धिं च पार्वतीम् ।
दीक्षां लीलां विरजां च वृन्दां नारायणीं तथा ॥१८॥
सरस्वतीं स्वर्णरेखां सितां च देविकां तथा ।
विभावरीं च तुलसीं मूर्तिं जयां च गोमतीम् ॥१९॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ॥२०॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
प्रेमसखीं रुक्मिणीं गोदावरीं मञ्जुलां तथा ॥२१॥
हंसां सुगुणां ललितां धात्रीं रंभां कुमुद्वतीम् ।
चम्पां च शीतलां स्वर्णगौरीं नन्दां दयां कलाम् ॥२२॥
दुर्गां च नन्दिनीं साध्यां विजयां वञ्जुलीं तथा ।
धन्यां दोलां च सावित्रीं पुष्पां च कोकिलां मनुम् ॥२३॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं च नैवेद्यं चन्दनादि जलं तथा ॥२४॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
चित्रलेखां पूर्णिमां शारदां मां मञ्जरीं तथा ॥२५॥
देविकां प्रेयसीं श्रेयसीं विकुण्ठां तथाऽरुणाम् ।
ज्योष्ट्रीं शबरीं पम्पां च गालवीं सुदुघां तथा ॥२६॥
याज्ञसेनीं वसुमतीं पद्मावतीं च भार्गवीम् ।
पद्मिनीं श्रीमतीं जरत्कार्वीं लीलावतीं तथा ॥२७॥
कलावतीं च कदलीं रेवां कान्तिमतीं तथा ।
कालिन्दीं वर्धिनीं पुण्यनैधेयिकां सुमित्रिकाम् ॥२८॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं चन्दनादि नैवेद्यं च जलं तथा ॥२९॥
ताम्बूलकं तथा नीराजनं समर्पयामि च ।
बन्दुलां च सुशीलां च मानसां माधवीं तथा ॥३०॥
शर्मवतीं दीर्घिकां कर्णोत्पलामक्षमालिकाम् ।
उदुम्बरीं बदरीं कुब्जिकां हैमीमृतम्भराम् ॥३१॥
मंगलां चाऽमृतां महावेदीं कृष्णां हरिप्रियाः ।
आह्वयामि स्थापयामि पूजयामि नमामि च ॥३२॥

धूपं दीपं चन्दनादि नैवेद्यं च जलं तथा ।
ताम्बूलकं तथा नीराजनं समर्पयामि च ॥३३॥
सन्तोषां कंभरालक्ष्मीमाह्वयामि नमामि च ।
स्थापयामि पूजयामि धूपदीपजलादिभिः ॥३४॥
नैवेद्यं चन्दनं ताम्बूलकं समर्पयामि च ।
ओं राधाष्टकाय च स्वाहेदं राधाष्टकाय नमम ॥३५॥
पायसं पोलिका मिष्टान्नादि सद्व्यंजनानि च ।
भक्ष्यभोज्यानि लेह्यानि चोश्यानि चार्पयामि च ॥३६॥
ओं पराविद्यादिकानां चत्वारिंशद्युजे शताय च ।
स्वाहा इदं पराविद्यादिभ्य ओं ताभ्यो नमम ॥३७॥
पायसं पोलिका मिष्टान्नादि सद्व्यंजनानि च ।
भक्ष्यभोज्यानि लेह्यानि चोश्यानि चार्पयामि च ॥३८॥
ओं सन्तोषायैः कंभरालक्ष्म्यै स्वाहा ताभ्यां नमम ।
पायसं पोलिका मिष्टान्नानि सद्व्यंजनानि च ॥३९॥
भक्ष्यभोज्यानि लेह्यानि चोश्यानि चार्पयामि च ।
इति ब्राह्मीः पूजयित्वा ह्यवतारान् प्रपूजयेत् ॥४०॥
मत्स्यं कूर्मं च वाराहं कपिलं च हरिं तथा ।
वासुदेवं पृथुं दत्तात्रेयं हंसं नृसिंहकम् ॥४१॥
ऋषभं वामनं पर्शुरामं यज्ञं कुमारकान् ।
रामं हयग्रीवदेवं नारदं राजराजकम् ॥४२॥
व्यासं कृष्णं च गोपालं बुद्धं कल्किं च मोहिनीम् ।
धन्वन्तरिं बालकृष्णं नारायणं नरं तथा ॥४३॥
सहस्रहस्तं व्यूहं च स्थापयेत् स्वर्णमूर्तिषु ।
तन्दुलेषु पूगिकासु मणिष्वपि निधापयेत् ॥४४॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
धूपं दीपं चन्दनादि नैवेद्यं जलमित्यपि ॥४५॥
ताम्बूलकं नीराजनं समर्पयामि ओं नमः ।
ओं मत्स्यादिभ्यश्च स्वाहा इदं मत्स्यादिभ्यो नमम ॥४६॥
पायसं पोलिका मिष्टान्नानि सद्व्यंजनानि च ।
भक्ष्यभोज्यानि लेह्यानि चोश्यानि चार्पयामि च ॥४७॥
सशक्तिकाः सायुधाश्च सभूषाश्च ससेवकाः ।
प्रगृह्णन्त्वष्टयुक्छतं भोज्यानां तु मखेऽर्पितम् ॥४८॥
ओं यज्ञेन यज्ञमयजन्त देवास्तानि
धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥४९॥
इत्येवं त्ववताराणां होममष्टोत्तरं शतम् ।
यद्वा प्रत्येकमेवाऽपि कुर्यान्मखी यथाबलम् ॥५०॥

अथ सिंहासने स्वर्णे सगुणं तु चतुष्टयम् ।
वासुदेवं चानिरुद्धं प्रद्युम्नं च संकर्षणम् ॥५१॥
आह्वयामि स्थापयामि पूजयामि नमामि च ।
अष्टोत्तरशतद्रव्यैरर्चयामि सशक्तिकम् ॥५२॥
वासुदेवादिभ्यः स्वाहा इदं चतुष्टयाय नमम ।
पायसं पोलिकाः शाकान्यपि रसांश्च मिष्टकान् ॥५३॥
अथ सिंहासने स्वर्णे निर्गुणं तु चतुष्टयम् ।
अनादिश्रीकृष्णनारायणं कृष्णनरायणम् ॥५४॥
लक्ष्मीनारायणं नरनारायणं समाह्वयेत् ।
आह्वयामि स्थापयामि पूजयामि नमामि च ॥५५॥
अष्टोत्तरशतद्रव्यैरर्चयामि सशक्तिकम् ।
अनादिश्रीकृष्णनारायणादिभ्यश्च वै स्वाहा ॥५६॥
इदं तेभ्यश्च नमम नीराजयामि वै नमः ।
पायसं पोलिकाः शाकान्यपि रसांश्च मिष्टकान् ॥५७॥
इति सम्पूज्य परमेश्वरान् हवनमाचरेत् ।
तत्तन्नाम्नाऽष्टाहुतीश्चार्पयेत्पायसाज्यकैः ॥५८॥
विष्णोर्मासूरमयश्चरुः क्षीरमयश्चरुः शुभः ।
इदं विष्णुरिति गृणान् द्वादशाऽक्षरविद्यया ॥५९॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
षोडशाक्षरमनुना सहस्रं साष्टकं शतम् ॥६०॥
चरुं जुहुयात् ओं नमो भगवते वासुदेवाय स्वाहा ।
समिद्भिश्चाज्ययवतिलैः फलैर्जुहुयात्तथा ॥६१॥
ओं इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् ।
समूढमस्य पांसुरे स्वाहा इदं तु विष्णवे ॥६२॥
अनेन चापि सहस्रं साष्टकं शतमर्पयेत् ।
ओमग्नये स्विष्टकृते स्वाहेदमग्नये नमम ॥६३॥
तत ओं भूः स्वाहेदमग्नये नमम शं मखे कुरु ।
ओं भुवः स्वाहेदं वायवे नमम शं मखे कुरु ॥६४॥
ओं स्वः स्वाहेदं सूर्याय नमम शं मखे कुरु ।
इतिव्याहृतिहोमं च कृत्वा तु मण्डपस्थितान् ॥६५॥
सम्पूज्य च बलिं दद्यात् सर्वदेवेभ्य एव च ।
ततश्च बहिरागत्य लोकपालेभ्य आर्पयेत् ॥६६॥
पूर्वे इन्द्र समागच्छ रक्षाऽध्वरं नमोऽस्तु ते ।
दिशं रक्ष बलिं भक्ष यजमानोदयं कुरु ॥६७॥
इन्द्रस्याऽनुचराः सर्वे भक्षयन्तु बलिं सुखाः ।
आग्नेय्यामग्ने आगच्छ रक्षाऽध्वरं नमोऽस्तु ते ॥६८॥
दिशं रक्ष बलिं भक्ष यजमानोदयं कुरु ।
अग्नेश्चानुसराः सर्वे भक्षयन्तु बलिं सुखाः ॥६९॥
दक्षिणे यम आगच्छ नैर्ऋत्यामेहि नैर्ऋते ।
पश्चिमे वरुणाऽऽगच्छ वायव्यामेहि वायुराट् ॥७०॥
उत्तरस्यां कुबेरैहि ऐशान्यामेहि ईश्वर ।
दिशं रक्ष बलिं भक्ष यजमानोदयं कुरु ॥७१॥
तत्तदनुचराः सर्वे भक्षयन्तु बलिं सुखाः ।
ईपूमध्ये एहि ब्रह्मन् निपमध्ये ह्यनन्तराट् ॥७२॥
दिशं च रक्षतं बलिं भक्षतं सानुसेवकौ ।
कुरुतं यजमानस्याऽभ्युदयं च मखोदयम् ॥७३॥
अथ क्षेत्रपाल बलिं गृह्ण रक्ष मखं सदा ।
सानुचरो यजमानोदयं कुरु सुखं कुरु ॥७४॥
दधिमाषादिकं भक्षेत्युक्त्वा तु तण्डुलान् क्षिपेत् ।
अथ चतुष्पथे भूता बलिं गृह्णन्तु शूर्पगम् ॥७५॥
पिष्टं माषान्नदध्योदनहरिद्रादिकज्जलम् ।
सिन्दूरकं गन्धरक्तपुष्पादि चत्वरे मखी ॥७६॥
गन्धपुष्पार्चितं शूर्पं स्थापयेद्वै गृणन् मनून् ।
बलिं गृह्णन्तु ते देवा आदित्या वसवस्तथा ॥७७॥
मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः ।
जृम्भकाः सिद्धगन्धर्वा माला विद्याधरा नगाः ॥७८॥
असुरा यातुधानाश्च पिशाचा डाकिनीगणाः ।
शक्तयो यक्षवेताला ये च विघ्नविनायकाः ॥७९॥
भूताः प्रेताश्च कूष्माण्डाः शाकिन्यो मातरस्तथा ।
तृप्ता भवन्तु बलिना यज्ञप्रसादरूपिणा ॥८०॥
मा विघ्नं यजमानस्य रोगं दुःखमनिष्टकम् ।
कुर्वन्तु तत्कुटुम्बस्य मा सन्तु परिपन्थिनः ॥८१॥
सर्वे भवन्तु तृप्ताश्च रक्षां कुर्वन्तु मेऽध्वरे ।
देवताभ्यश्च पितृभ्यो भूतेभ्यः सहजन्तुभिः ॥८२॥
एतत्स्थानाधिवासिभ्यः प्रयच्छामि बलिं नमम ।
त्रैलोक्ये यानि भूतानि स्थावराणि चराणि च ॥८३॥
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ।
किंपुरुषाः किन्नराश्च साध्या सन्तश्च सात्त्विकाः ॥८४॥
ऋषयो मुनयो गावो देवमातर इत्यपि ।
काश्यप्यस्तस्य वंशीया राजसास्तामसाः सिताः ॥८५॥
एते ममाऽध्वरे रक्षां कुर्वन्तु देहधारिणः ।
मूर्ताऽमूर्तस्वरूपाश्च यमा याम्याश्चरन्तु शम् ॥८६॥

एतेभ्यश्चापि सर्वेभ्यः स्वाहा बलिं च ओं नमम ।
कृत्वाऽथाचमनं शुद्धिं यायान्मण्डपसन्निधौ ॥८७॥
विश्रम्य यूपकार्यं च तत आचार्य आचरेत् ।
इति राधे प्रभूक्तं ते मयोक्तं ब्राह्मकर्म तत् ॥८८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने राधिका-
दिषट्कपराविद्याचत्वारिंशद्धिकशतसन्तुष्टाकम्भराद्वयपर-
मेशावतारविष्णुलोकपालभूतादिपूजाबलिसमर्पणादिनामा
चतुष्पञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥

**श्रीकृष्ण उवाच—**

अथ श्रीभगवानाह देवायतनकायवत् ।
यूपारोपणकर्मादि राधिके तद्वदामि ते ॥ १ ॥
आचार्यः पूर्वकुण्डाद्वै पूर्वतो मण्डपाच्च वा ।
पादत्रयमितां भूमिं विहाय च ततः परम् ॥ २ ॥
यूपस्थानं प्रकुर्वीत प्रासादे शानके च वा ।
षोडश वा दश हस्तान् भूभागान् प्रविहाय वै ॥ ३ ॥
यूपस्थानं प्रकुर्वीत पूजनं तस्य वै ततः ।
काष्ठेनाऽरत्निमात्रं तु खातं कृत्वा ततः परम् ॥ ४ ॥
यूपस्तुतिं प्रकुर्याद्वै यूप त्वं निर्मितः पुरा ।
यज्ञभागात्मको देवः प्रासादरक्षकः शुभः ॥ ५ ॥
पूजां पुष्पबलिं धृत्वा स्थिरो नश्चोदयं कुरु ।
इत्यभ्यर्च्य हरिद्रातैलाक्तं यूपं ततः परम् ॥ ६ ॥
शान्तिकुंभोदकैः स्नापयित्वाऽभ्युज्य घृतेन च ।
पुष्पमालादिनाऽभ्यर्च्य बध्नीयात् पोटलीं ततः ॥ ७ ॥
दूर्वागुग्गुलसर्षपनिम्बपत्रगोरोचनैः ।
सहितां यूपमाबध्नन् मन्त्रं वदेन्मखी तदा ॥ ८ ॥
ओं यदा बध्नं दाक्षायणाहिरण्यं शतानीकायसुमनस्यमानाः।
तन्म आबध्नामि शतशारदायुष्माँ जरदष्टिर्यथासम् ॥ ९ ॥
ओं युवा सुवासाः परिवीत उ श्रेयान् भवति जायमानः ।
तं धीरासः कवय उन्नयन्ति स्वाध्यायो मनसा देवयन्तः ।
इति वस्त्रेण चावेष्ट्य ततश्चालम्बयेन्मखी ॥१०॥
ओं यूपव्रस्का उत ये यूपवाहाश्चषालंये अश्वयूपायतक्षति ।
ये चार्वते पचनं संभरन्त्युतस्तेषामाभिगूर्तिर्न्न इन्वतु ॥११॥
ओं उच्छ्रयस्व वनस्पत इत्युच्छ्रित्य च गर्तके ।
अक्षतपुष्पदर्भांश्च प्रक्षिप्य प्रोक्ष्य वारिणा ॥१२॥
ओं ध्रुवासीतिमन्त्रेण रोपयेद् यूपदैवतम् ।
सुप्रतिष्ठश्चिरं स्थिरश्चायुदः सौख्यदो भव ॥१३॥

ओं ध्रुवासि ध्रुवोऽयं यजमानोऽस्मिन्नायत
प्रजया पशुभिर्भूयात् ।
घृतेन द्यावापृथिवीपूर्य्येथामिन्द्रस्य-
च्छदिरसि विश्वजनस्यच्छाया ॥१४॥
इतिगर्ते मृदाऽऽपूर्य दृढीकुर्वन्न वै चलेत् ।
यज्ञायज्ञावो अग्नये गिरागिरा च दक्षसे ॥१५॥
प्रप्रवयममृजं जातवेदसं प्रियं मित्रं न शंसिषम् ।
इति मूले जलं दत्वा यूपं कुंकुमरञ्जितम् ॥१६॥
कृत्वा धूपदीपपुष्पगन्धनैवेद्यसत्फलैः ।
दक्षिणाभिश्च संपूज्य तद्दक्षे मण्डलं शुभम् ॥१७॥
कुर्याद् यूपदेवतार्थं हस्तमात्रे हि स्थण्डिले ।
शुभ्रवस्त्रं समास्तीर्थ पञ्चविंशतिकोष्ठवत् ॥१८॥
पूर्वोत्तराभिः रेखाभिः षड्भिः षड्भिः सुकोष्ठकम् ।
कृत्वा च व्रीहिभिः रम्यं मण्डपं पूजयेत् सुरान् ॥१९॥
ब्रह्माणं मध्यकोष्ठे तु सोमं तथोत्तरेऽर्च्चयेत् ।
ऐशे शिवं च प्रागिन्द्रमाग्नेय्यामग्निमर्चयेत् ॥२०॥
दक्षे यमं च नैर्ऋत्यां नैर्ऋतिं च समर्चयेत् ।
पश्चिमे वरुणं वायौ वायुं तथा समर्चयेत् ॥२१॥
वायुसोमान्तरालेऽष्टवसून् संपूजयेन्मखी ।
सोमेशानान्तराले चैकादशरुद्रदेवताः ॥२२॥
ईशानपूर्वयोर्मध्ये द्वादशादित्यदेवताः ।
इन्द्राग्नयोश्चान्तरालेऽश्विनौ देवौ समर्चयेत् ॥२३॥
आग्नेयदक्षिणमध्ये सप्तमातृः समर्चयेत् ।
याम्यनैर्ऋत्ययोर्मध्ये गणेशं च समर्चयेत् ॥२४॥
वरुणनिर्ऋतिमध्ये नागान् भूतानि चार्चयेत् ।
वरुणवाय्वन्तराले यक्षरक्षांसि चार्चयेत् ॥२५॥
ब्रह्मतस्तु उदीच्याः प्रादक्षिण्येन मध्यगान् ।
वृषभध्वजकं साध्यान्नारायणं च पितृकान् ॥२६॥
यमं च मृत्युरोगांश्च मरुतश्चित्रगुप्तकम् ।
अष्टौ संस्थाप्य च देवान् पूजयेत्तु ततः परम् ॥२७॥
ब्रह्मणः पादमूले तु पृथिवीं वै समर्चयेत् ।
अभिषेकं प्रकुर्वीत तत्तन्नामानि वै गृणन् ॥२८॥
ओं असंख्याताः सहस्राणि ये रुद्रा अधिभूम्यां वै ।
तेषां सहस्रयोजने वधन्वानितन्मसीतिं ॥२९॥
ओं इमं मे गंगे यमुने सरस्वति
शतद्रुस्तोमं स च तापरुष्ण्या ।
असिन्न्यामहद्विधेवितस्तयार्जीकीये
श्रृणु ह्याशिषो मया ॥३०॥

ओं इमं मे ब्रह्मपुत्रे इरावति साले
चन्द्रे मेनकागेंऽगशिक्षांगे चोरले ।
वल्गो दीनाप् कञ्जो नीपे नायिजे
नरायणि मेके चार्थे कलिंगिनि चेमे ॥३१॥

ओं एका च मे, तिस्रश्च मे तिस्रश्च मे,
पञ्च च मे पञ्च च मे, सप्त च मे सप्त च मे,
नव च मे नव च मे, एकादश च मे एकादश च मे,
त्रयोदश च मे त्रयोदश च मे,
पञ्चदश च मे पञ्चदश च मे,
सप्तदश च मे सप्तदश च मे,
नवदश च मे नवदश च मे,
एकविंशतिश्च मे एकविंशतिश्च मे,
त्रयोविंशतिश्च मे त्रयोविंशतिश्च मे,
पञ्चविंशतिश्च मे पञ्चविंशतिश्च मे,
सप्तविंशतिश्च मे सप्तविंशतिश्च मे,
नवविंशतिश्च मे नवविंशतिश्च मे,
एकत्रिंशश्च मे एकत्रिंशश्च मे
त्रयस्त्रिंशाच मे त्रयस्त्रिंचमे, यज्ञेन कल्पन्ताम् ॥३२॥

चतस्रश्च मेऽष्टौ च मेऽष्टौ च मे,
द्वादश च मे द्वादश च मे,
षोडश च मे षोडश च मे,
विंशतिश्च मे विंशतिश्च मे,
चतुर्विंशतिश्च मे चतुर्विंशतिश्च मे,
ऽष्टाविंशतिश्च मेऽष्टाविंशतिश्च मे,
द्वात्रिंशाच मे द्वात्रिंशाच मे,
षट्त्रिंशाच मे षट्त्रिंशाच मे,
चत्वारिंशाच मे चत्वारिंशाच मे,
चतुश्चत्वारिंशाच मे चतुश्चत्वारिंशाच मे,
ऽष्टाचत्वारिंशाच मेऽष्टाचत्वारिंशाच मे,
यज्ञेन कल्पन्ताम् ॥३३॥

ओं ये तीर्थानि प्रचरन्ति सृकाहस्ता निषङ्गिणः ।
तेषां सहस्रयोजने वधन्न्वानितन्मसि ॥३४॥

इतियूपमभिषिच्य यूपन्यासान् समाचरेत् ।
यूपस्य शिरसि नमो ब्रह्मणे चक्षुषोस्त्वथ ॥३५॥

सूर्यशशिभ्यां च नमः केशवाय नमो हृदि ।
नमो नाभावग्नये च कटिगुह्योरुषु न्विमान् ॥३६॥
नमाम्येकादशरुद्रान् जंघयोर्मेरवे नमः ।
पादयोर्नागदेवाँश्च नमामि चाथ वै पुनः ॥३७॥

ओं अथेतस्स्थ राष्ट्रदाराष्ट्रं मे दत्त
स्वाहाऽर्थेतस्स्थ राष्ट्रदाराष्ट्रममुष्मै दत्त ।
ओजस्वतीस्स्थ राष्ट्रदाराष्ट्रं मे दत्त
स्वाहौजस्वतीस्स्थ राष्ट्रदाराष्ट्रममुष्मै दत्त ।

आपः परिवाहिणीस्स्थ राष्ट्रदाराष्ट्रं मे दत्त
स्वाहापः परिवारिणीस्स्थ राष्ट्रदाराष्ट्रं मे दत्त ।
अपां पतिरासि राष्ट्रदाराष्ट्रम्मे देहि
स्वाहापाम्पतिरसि राष्ट्रदाराष्ट्रममुष्मै देहि ।
अपां गर्भोऽसि राष्ट्रदाराष्ट्रम्मे देहि
स्वाहापांगर्भोसि राष्ट्रदाराष्ट्रममुष्मै देहि ।
सूर्यत्वचसस्स्थ इति शिखायाम् ॥३८॥

ओं विश्वतश्चक्षुरुत विश्वतोमुखो
विश्वतोबाहुरुतविश्वतस्पात् ।
सम्बाहुभ्यां धमति पतत्रैर्द्यावाभूमी
जनयन् देव एक इति चक्षुषोः ॥३९॥

ओं वाराहाय नम इति नासिकाभ्यां नमो नमः ।
ओमग्निं दूतं पुरोदधे हव्यावाहमुपब्रुवे ।
देवानासादयादिह चेति मुखे नमो नमः ॥४०॥

ओं नीलग्रीवाः शितिकण्ठा दिवं रुद्रा उपश्रिताः ।
तेषां सहस्रयोजने वधन्न्वानि तन्मसीति ग्रीवायाम् ॥४१॥

ओं बाह्वोर्मे बलमस्तु चेति बाह्वोश्चापि नमो नमः ।
ओं हृदे त्वा मनसे त्वा दिवे त्वा सूर्याय त्वा ।
ऊर्ध्वमिममध्वरं दिवि देवेषु होत्रा यच्छेति हृदये ॥४२॥

ओं समुद्रादूर्मिर्मधुं मां उदारदुपांशुनासममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिरित्युदरे ॥४३॥

ओं वामत्र सवितुरिति कटिद्वयोः नमो नमः ।
ओं नाभिर्मे चित्तं विज्ञानं पायुर्मेऽपचितिर्भसत् ॥४४॥
आनन्दनन्दावाँण्डौ मे भगः सौभाग्यंपसः ।
जंघाभ्यां पद्भ्यां धर्मोऽस्मिविशिराजाप्रतिष्ठितः इति जंघयोः ॥४५॥

ओं आयंगौः पृश्निरक्रमीदसदन्मातरम्पुरः ।
पितरंचप्रयंत्स्वः इति पादयोस्ते नमो नमः ॥४६॥
एवं यूपे न्यासमाप्त्वाऽऽपूज्य पंचोपचारकैः ।
पूजां बलिं प्रदद्याच यूपायैष बलिं नमम ॥४७॥

एह्येहि धर्मध्वज यज्ञनाथ त्रयीमयो वेदशरीरयूप ।
दधातु देवाध्वरयज्ञरक्षां बलिं गृहाणापि नमोनमस्ते ॥४८॥
ओं सोमपर्वतेति कुंकुमाक्तसूत्रेण वेष्टयेत् ।
ओं पर्वतस्येति पर्वतान् वरुणं दिक्प्रपालकान् ॥४९॥

यूपे गन्धाद्यैः सम्पूज्य ध्यात्वा चोदङ्मुखः पठेत् ।
मूलच्छेदेन च भूमिघातेन पातकादिकम् ॥५०॥
यूप व्यापोह्य सर्वं यूपस्पृष्टः शुचिः सदा ।
ओं या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ॥५१॥
मनैनुबभ्रूणामहं शतं धामानि सप्त च ।
बध्वैवं पुष्पमालां च यूपं कृत्वा प्रदक्षिणम् ॥५२॥
गाढमालिङ्ग्य च सर्वे नमस्कुर्यात् कुटुम्बकम् ।
पालाशो ब्राह्मणस्योक्तो नैय्यग्रोधस्तु भूभुजः ॥५३॥
बैल्वो वैश्यस्य यूपः स्याच्छूद्रस्यौदुम्बरः स्मृतः ।
शिरःप्रमाणो विप्रस्य आकण्ठं क्षत्रियस्य च ॥५४॥
उरःप्रमाणो वैश्यस्य शूद्रस्य नाभिमात्रकः ।
प्राच्यां तु पदमात्रान्ते इतिनारायणं नमेत् ॥५५॥
अथाऽधिवासनं कार्यं सायं मुख्यसुरस्य वै ।
आचार्यो यजमानश्च ऋत्विक् सुवासिनी तथा ॥५६॥
गच्छेयुः शिल्पिशालां च देवाग्रे स्थापयेद् घटम् ।
तीर्थान्यावाहयेत् तत्र गंगां यमीं सरस्वतीम् ॥५७॥
चेरावतीं ब्रह्मपुत्रां नारायणीं च गण्डकीम् ।
समुद्रान् प्रतटाकांश्च क्षेत्राण्यश्वसरोवरम् ॥५८॥
पुष्करं बालकृष्णं च मानसं बदरीवनम् ।
आवाहयेद् घटे तानि विशन्तु ब्रह्मशासनात् ॥५९॥
कुंभस्य तु चतुर्दिक्षु नम इन्द्राय ओमिति ।
नमो यमाय च वरुणाय कुबेराय च ॥६०॥
पूजयामि च गन्धाद्यैस्तथा होमं करोमि च ।
प्रतिमायाः शिलायास्तु दोषवारणहेतवे ॥६१॥
घटनादौ जन्तुनाशोत्थादिपापनिवृत्तये ।
स्थण्डिलं प्रतिमायोग्यं कृत्वा च भूतसंस्कृतिम् ॥६२॥
अग्निं न्यस्य प्रकुर्याच्च होमं तिलैर्घृतादिना ।
हुत्वा चाऽऽघाराज्यभागौ देवमन्त्रेण वै तथा ॥६३॥
आज्याहुतीः शतद्वयं हुत्वा पूर्णाहुतिं तथा ।
प्रार्थयेन्मूर्तिरूपस्त्वं स्मृद्धियुक्तः सदा भव ॥६४॥
कुशैः सम्मृज्य मध्वाज्याभ्यंगेन व्रणनाशनम् ।
कर्तव्यं कारणीयं च मृदा स्नानं विशुद्धया ॥६५॥
गोमयेन गोमूत्रेण भस्मना पयसा पृथक् ।
मध्ये मध्ये जलेनाऽपि ततोऽभिषेचनं चरेत् ॥६६॥
गन्धाद्यैः सितपुष्पैश्चाऽऽपूज्य कुंभादेकेन च ।
संस्नाप्य यजमानः सः शिल्पिने चाम्बरादिकम् ॥६७॥
दद्याच्चापि तदाचार्यो मूर्तिं विलोक्य सर्वतः ।
देवस्य दक्षिणे हस्ते सितोर्णादिविनिर्मितम् ॥६८॥
सर्वौषधिमनःफलयुतं वितस्तिमात्रकम् ।
दोरकं मूलमन्त्रेण बध्नीयात् प्रतिमां ततः ॥६९॥
रथे चारोपयेद् गीतवाद्यैः शृंगारशोभिताम् ।
आरोपयेद् रथे ब्रह्मा वेदमन्त्रान् समुच्चरन् ॥७०॥

ओं रथे तिष्ठन्नयति वाजिनः पुरो
यत्र यत्र कामयते सुखारथिः ।
अभीशूनां महिमानं पनायतमनः
पश्चादनुयच्छन्ति रश्मयः ॥७१॥

नद्यां वा सरसि कुण्डे नीत्वा तामधिवासयेत् ।
पुण्याहवाचनं कुर्यात् स्वस्तिवाचस्ततोऽपि च ॥७२॥

ओं आनो भद्राः क्रतवो यन्तु
विश्वतोदब्धासो अपरीतास उद्भिदः ।
देवा नो यथा सदमिद्वृधे असन्न-
प्रायुवो रक्षितारो दिवे दिवे ॥७३॥
ओं देवानां भद्रा सुमतिर्ऋजूयतां
देवानां रातिरभिनो निवर्तताम् ।
देवानां सख्यमुपसेदिमावयं देवा न
आयुः प्रतिरन्तुजीवसे ॥७४॥
ओं तमीशानं जगतस्तस्थुषः
पतिंधियं जिन्वमवसे हूमहे वयम् ।
पूषा नो यथा वेदसामसद्
वृधे रक्षितापायुरदब्धः स्वस्तये ॥७५॥

इत्यादिशान्तिपाठादि प्रोच्चार्य सरितस्तटम् ।
पञ्चगव्येन सम्प्रोक्ष्य न्यस्य पूजाद्रवादिकान् ॥७६॥
वस्त्राच्छादितमूर्तिं च मनुनाऽप्स्वधिवासयेत् ।
उदङ्मुखो यजमानो देशकालौ प्रकीर्त्य च ॥७७॥
वरुणस्य गणेशस्य मातृक्षेत्रपप्रभृतेः ।
पूजनं च करिष्येऽत्र गणानां त्वा वदन् ततः ॥७८॥
भूर्भुवः स्वः गणेश त्वमिहागच्छ च तिष्ठ च ।
सिद्धिबुद्धिसहितं त्वां पूजयामि नमामि च ॥७९॥
इदं दीपमाषभक्तबलिं समर्पयामि ते ।
जलमातृर्जले तद्वदर्चयेच्चार्पयेद्बलिम् ॥८०॥
नमो मत्स्यै च कच्छप्यै कूर्म्यै वाराह्यै नमम ।
दर्दुर्यै शिशुमार्यै चेश्वर्यै नमः प्रपूजनम् ॥८१॥
अक्षतेषु च रेखासु जीवमातृः प्रपूजयेत् ।
मत्स्यै हृद्यै च गोधायै मकर्यै डुंडुभ्यै नमः ॥८२॥
दर्दुर्यै च नमो जल्यै गन्धाद्यैः पूजनं तथा ।
चतुष्षष्टियोगिनीनां कुंकुमाद्यैर्जलेऽर्चनम् ॥८३॥

वायव्यां क्षेत्रपालं कुंकुमाद्यैरर्चयेन्नरम् ।
भूर्भुवः स्वः क्षेत्रपाल इहागच्छ च तिष्ठ च ॥८४॥
कुंकुमं दीपकं माषदधिभक्तबलिं गृह्ण ।
अथ कुर्याज्जलपूजां नम ओं अद्भ्य एव च ॥८५॥
सागरेभ्यः सरोभ्यश्च तीर्थेभ्यो नदीभ्यो नमः ।
गन्धाक्षतान् जले क्षिप्त्वा वरुणं चापि पूजयेत् ॥८६॥
भूर्भुवः स्वः वरुण त्वमिहागच्छ च तिष्ठ च ।
माषभक्तबलिं गृह्ण वरुणाय नमो नमः ॥८७॥
पञ्चामृतं करे धृत्वा तन्मन्त्रैश्च जले क्षिपेत् ।
जलदेवं प्रार्थयेच्च मूर्तिं जले प्रक्षयेत् ॥८८॥
सप्त पञ्च त्रिरात्रं वै करात्रं याममेव वा ।
आचार्याय हिरण्यं चाऽन्येभ्यश्च भूरिदक्षिणाम् ॥८९॥
दद्यान्मूर्तिं ब्राह्मकाले घटिकाद्वययापिते ।
जलान्निष्कास्य तीरे संस्नाप्य सम्पूज्य सद्द्रवैः ॥९०॥
उत्तिष्ठ श्रीकृष्णनारायण राधारमापते ।
उत्तिष्ठ ब्रह्मणस्पते देवयन्तस्त्वेमहे ॥९१॥
उपप्रयन्तु मरुतः सुदानव इन्द्रप्राशुर्भवासचा ।
इतिमन्त्रैः समुत्थाप्य सर्वाभरणभूषिताम् ॥९२॥
वाद्यगीतैः रथे न्यस्य मार्गे च वसतौ नयेत् ।
शिल्पिशालाजले नीत्वा देवमण्डप दक्षिणात् ॥९३॥
भ्रामयित्वाऽऽनयेत् स्नानमण्डपं च ततः परम् ।
वेदिकायां भद्रके चासने प्राङाननं प्रभुम् ॥९४॥
स्थापयेद् भद्रमन्त्रैश्च ततः स्नानं प्रकारयेत् ।
राधे तुभ्यं मयोक्तं तद् दैवतायाऽऽह यद्धरिः ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने यूपारोपणं तद्देवादिपूजनं प्रतिमाया जलाधिवासनं नगरभ्रामणं मण्डपानयनं चेत्यादिनिरूपणनामा पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

श्रीकृष्ण उवाच—

ततः श्रीभगवानाह देवायतनकाय यत् ।
स्नानविध्यादिकं सर्वं तद् राधे कथयामि ते ॥ १ ॥
गुरुः स्नानस्य शालायां कृत्वा तु वेदिकात्रयम् ।
कृत्वोत्तरोत्तरं चाथ स्नपनद्रव्यसंभृतिम् ॥ २ ॥
कृत्वा च पञ्चगव्येन भूमिं संप्रोक्ष्य वेदिकाः ।
वालुकायुक्तवेद्यां वै दक्षिणायां तदाऽक्षतैः ॥ ३ ॥
स्वस्तिकं तु समुल्लिख्य भद्रपीठं विधाय च ।
पश्चाच्च वेदिकायास्तु कलशान् षड् निधापयेत् ॥ ४ ॥
वारिपूर्णान् पल्लवाढ्यान् तथा पञ्चाऽपरानपि ।
मृत्पल्लववृक्षीयकषायगोमूत्रगोमयैः ॥ ५ ॥
भस्मगन्धोदकैर्भृत्वा पञ्चदेवप्रसंज्ञकान् ।
उदक्संस्थपंक्तिरीत्या घटान् निधापयेत् ततः ॥ ६ ॥
अन्त्यस्थपतिकलशम् वेद्याः पश्चे ह्येकादश ।
स्थाप्यैतान् भद्रपीठस्योत्तरवेद्यां घटाष्टके ॥ ७ ॥
परितः पूर्वक्रमशः क्षीरं दधि घृतं सुराम् ।
इक्षुरसं दूर्वोदकं दर्भोदकं निधाय च ॥ ८ ॥
हिरण्यगर्भादिमन्त्रैर्विन्यस्येत् तद्घटाष्टकम् ।
ततोऽन्ये पश्चिमे वेद्या दश मृत्तिकया क्रमात् ॥ ९ ॥
गोमूत्रेण गोमयेन भस्मना पञ्चगव्यकैः ।
क्षीरेण दध्ना घृतेन मधुना खण्डया युताः ॥१०॥
घटाः स्थाप्यास्तथा तत्र चतुर्दशघटाः पुनः ।
शुद्धजलैर्भृताश्चान्येऽप्यथ पञ्चत्रिंशद्घटाः ॥११॥
स्थापनीयास्तेषु मध्ये पञ्च पञ्चामृतैर्युताः ।
पञ्चजलयुताश्चाथ पञ्च पत्रकषायिणः ॥१२॥
पुनर्दश क्रमात् पुष्पैः फलै सौवर्णवारिभिः ।
गवां शृंगोदकैश्चापि धान्यैः सहस्रछिद्रकैः ॥१३॥
सर्वौषधिभिश्च पञ्चपल्लवैदूर्वया तथा ।
नवरत्नैर्युता कार्या अविशिष्टा दशाऽथ तु ॥१४॥
पूरणीया स्वच्छवारिभिः कदम्बादिपल्लवैः ।
तत्राऽऽवाह्य लोकपालान् आजिघ्रकलशं धरेत् ॥१५॥
कादम्बं शाल्मलीपत्रं जाम्बवं चाऽप्यशोकजम् ।
प्लक्षपत्रमुदुम्बरदलं वटदलं तथा ॥१६॥
विल्वपत्रं नागवल्लीपत्रं पलाशपत्रकम् ।
तथाऽन्यान्यपि वस्तूनि सूक्ष्मवस्त्रं सुगन्धि च ॥१७॥
सुतैलं यवचूर्णं चोद्वर्तनार्थं तथाऽपरम् ।
सुगन्धामलकीचूर्णं जटामांस्यादिकं शुभम् ॥१८॥
सर्वमासादयेत्तत्र वेदीमध्ये घटेषु च ।
अन्त्यस्थपतिसंज्ञं च घटं तीर्थोदकान्वितम् ॥१९॥
कृत्वा देवसमीपे च तीर्थान्यावाहयेज्जले ।
गंगे च यमुने सरस्वति चेरावति तथा ॥२०॥
मेनकांगे ब्रह्मपुत्रि नारायणि तथोरले ।
कंगो नाये च वाल्गे चैमे कारुलिंगिके मकि ॥२१॥
दीनाप् नीपे तथार्थे च नर्मदे गण्डकि हरे ।
स्वर्णरेखे पुष्करं च मानसं चाश्वपट्टकम् ॥२२॥
बालकृष्णं तथा नारायणं चापि सरोवरम् ।
सागराश्चापि तीर्थानि विशन्त्वत्र घटे शुभाः ॥२३॥

ततो जलेन देवं वै स्नापयेद् वेदमन्त्रकैः ।
यजमानः प्रदद्याच्च शिल्पिभ्यः पारितोषिकम् ॥२४॥
अथाचार्यो बलिं दद्यात् सिद्धार्थघृतपायसैः ।
दिक्पालेभ्यः सर्वदिक्षु पूर्वादिक्रमतो बहिः ॥२५॥
आचमनं प्रकुर्याच्च पूर्वे इन्द्राय वै बलिम् ।
अर्पयामि दिशं रक्ष यजमानोदयं कुरु ॥२६॥

आग्नेय्यामग्नये सांगायाऽर्पयामि बलिं नमः ।
दक्षिणे यमदेवाय चार्पयामि बलिं नमः ॥२७॥
नैऋत्ये निर्ऋतये चार्पयामि बलिं नमः ।
पश्चिमे वरुणायैवाऽर्पयामि च बलिं नमः ॥२८॥
वायव्यां वायवे चार्पयामि बलिं च ते नमः ।
उत्तरे च कुबेराय अर्पयामि बलिं नमः ॥२९॥
ईशाने चेशदेवाय चार्पयामि बलिं नमः ।
बलिं दत्वाऽऽचम्य देवं प्रस्नापयेद् विधानतः ॥३०॥
अग्निर्मूर्द्धेति च मृदा यज्ञायेति कषायकैः ।
गोमूत्रेण च गायत्र्या गन्धेति गोमयेन च ॥३१॥
भस्मना मानस्तोकेति गायत्र्या गन्धवारिणा ।
पञ्चदैवत्यकलशैः स्नापयेच्च ततः परम् ॥३२॥
नमःशिवेतिचाद्येन हंसेतिद्वितीयेन च ।
यातेति तृतीयेनापि विष्णोश्चतुर्थकेन च ॥३३॥
ब्रह्मेति पञ्चमेनापि शुद्धोदकेन वै ततः ।
पुष्पाक्षताद्यैः संपूज्याऽऽच्छाद्य पिताम्बरेण च ॥३४॥
द्वितीयायां च वै वेद्यां भद्रासनं निधाय च ।
प्रागग्रगान् कुशानास्तीर्य च देवं निधाय च ॥३५॥
उदङ्मुखो महाचार्यः कुंकुमसूत्रकेण ह ।
मूर्तिमावेष्टय च ततो हिरण्यगर्भमन्त्रतः ॥३६॥
पात्रे मधुघृतं मिश्रि मधुवातेतिमन्त्रयेत् ।
ततो मधुघृताक्तां च शलाकां कानकीं धरेत् ॥३७॥

ओं चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुस्य अग्नेः ।
ओं अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा
सूर्य्यो ज्योतिर्ज्योतिःसूर्यः स्वाहा ॥३८॥

ओं अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा
सूर्यो वर्चोज्योतिर्वर्चः स्वाहा ।
ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति
कल्पयेत् प्रतिमायास्तु नेत्रके ॥३९॥
ओं आकृष्णेन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यं च ।
हिरण्मयेन सविता रथेनादेवो याति भुवनानि पश्यन् ॥४०॥

इत्यनेन पञ्चपुटद्वये कुर्यात् कनीनिकाम् ।
नेत्रोन्मीलनकाले न द्रष्टव्यं देवसन्मुखे ॥४१॥
आदर्शस्वर्णभक्ष्यपायसफलानि दर्शयेत् ।
सौम्या शुभा भवेद् दृष्टिर्देवस्य तु तथाकृते ॥४२॥
शिल्पी शस्त्रेण च रेखामुल्लेखयेद् विधानतः ।
गुरुरभ्युज्य मधुना घृतेनाभ्युक्ष्य मन्त्रतः ॥४३॥

स्नापयेन्मृद्गोमयेन शस्त्रदोषनिवृत्तये ।
स्वर्णपात्रशलाकादि वस्त्रादि शिल्पिनेऽर्पयेत् ॥४४॥
गोदानं गुरवे चापि दत्वा कुण्डे हवं चरेत् ।
दिक्पालेभ्यो बलिं दत्वा ब्राह्मणान् चतुरः शुभान् ॥४५॥
भोजयित्वा दक्षिणादि प्रदत्वा तान् विसर्जयेत् ।
इतिनेत्राञ्जनं कृत्वा संकीर्त्य देशकालकौ ॥४६॥
महास्नानं कारयेच्च देवस्य परमात्मनः ।
भद्रासनात् प्रतिमामुत्थापयेन्मन्त्रकं गृणन् ॥४७॥

ओं उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वे महे ।
उपप्रयन्तु मरुतः सुदानव इन्द्र प्रासूर्भवासचा ॥४८॥
इत्युत्थाप्य भद्रं कर्णेभीति वेद्याम् उदङ्दिशि ।
भद्रासने स्थापयित्वा पादपीठं प्रकल्पयेत् ॥४९॥
ओं समुद्रेतिमन्त्रैश्च स्नापयेच्चतुर्भिर्घटैः ।
दधिदूर्वाऽक्षताद्यैः सम्पूज्याऽऽरात्रिकमाचरेत् ॥५०॥

नमस्तेऽर्चे सुरेशानि प्रकृते विश्वकर्मणः ।
प्रभाविताऽशेषजगद्धात्रि तुभ्यं नमो नमः ॥५१॥
त्वयि सम्पूजयामीशं नारायणं परात्परम् ।
हरिताशेषदोषे त्वम् ऋद्धियुक्ता सदा भव ॥५२॥
ततो दक्षे करे चौर्णसूत्रं वितस्तिमात्रकम् ।
यदा बध्नन्नितिमन्त्रैर्बध्नीयात्प्रणमेत्तथा ॥५३॥
इदमापेतिमन्त्रैश्च प्रस्नापयेच्चतुर्घटैः ।
अग्निर्मूर्द्धेति च मृदा ततः शुद्धोदकेन च ॥५४॥

गोमयेन गोमूत्रेण भस्मना शुद्धवारिणा ।
पञ्चगव्येन शुद्धाद्भिः क्षीरेण शुद्धवारिणा ॥५५॥
दध्ना शुद्धजलेनापि मधुना च जलेन च ।
शर्करया जलेनापि स्नापयेन्मार्जयेत्ततः ॥५६॥
पञ्चामृतानां मन्त्राँश्चोच्चारयेत् स्नानकारकः ।
यज्ञायेति सुगन्धेन तैलेन चाभियोजयेत् ॥५७॥
ओं द्रुपदादिवमुमुचानः स्विन्नः स्नातो मलादिव ।
पूतं पवित्रेणेवाऽऽज्यमापः शुन्धन्तु मैनसः ॥५८॥
यवशालिगोधूमादिमसूरबिल्वचूर्णकैः ।
उद्वर्त्य ओं यातेति च लिम्पयेद् यक्षकर्दमैः ॥५९॥

कस्तूर्यंशद्वयं कुंकुमांशत्रयं शश्येककम् ।
चन्दनांशत्रयं यक्षकर्दमः सोऽयमुच्यते ॥६०॥
जटामांस्याऽनुसंलिप्य घटद्वयेन स्नापयेत् ।
मानस्तोकप्रतद्विष्णुमन्त्रद्वयं समुच्चरेत् ॥६१॥
पञ्चनद्य इतिपञ्चामृतेन च पृथक्पृथक् ।
तत्तन्मन्त्रेण संस्नाप्य शुद्धोदकेन वै ततः ॥६२॥
गन्धोदकेन च पञ्चपत्रकषायवारिणा ।
ओषधीकलशेनापि सितपुष्पोदकेन च ॥६३॥
शान्तिघटोदकेनापि फलघटोदकेन च ।
स्वर्णोदकघटेनापि हिरण्येतिमनुं गृणन् ॥६४॥
ततः श्रृंगोदकेनापि ततो धन्योदकेन च ।
सहस्रधाराकलशैः सर्वौषधीजलेन च ॥६५॥
पत्रोदकेन च दूर्वोदकेन च रत्नवारिभिः ।
तीर्थोदकेन च वार्धिघटैः संस्नापयेत्ततः ॥६६॥
क्षारोदकेन च क्षीरकुंभोदकेन वै ततः ।
दधिकुंभेन च घृतेनेक्षुरसेन वै ततः ॥६७॥
सुरोदकेन च ततः स्वादूदकेन वै ततः ।
नारिकेलजलेनापि लोकपालघटैस्ततः ॥६८॥
कदम्बपत्रकुंभेन शाल्मलीकुंभकोदकैः ।
जम्बूपत्रघटेनापि चाशोकपत्रवारिणा ॥६९॥
प्लक्षपल्लवसलिलैश्चूतपत्रघटेन च ।
वटपत्रोदकेनापि बिल्वपत्रोदकेन च ॥७०॥
नागवल्लीदलेनापि पालाशपल्लवेन च ।
रुद्राक्षवारिणा चापि संस्नाप्य चावमार्जयेत् ॥७१॥
देवमावाहयेन्मन्त्रैरेहि चात्र स्थिरो भव ।
यज्ञभागं गृहाणेमं परमेश नमोस्तु ते ॥७२॥
हिरण्यपात्रपाद्यं च दद्यादर्घ्यं तथा शुभम् ।
आचमनं चन्दनादि दद्यात्तथोपवीतकम् ॥७३॥
वेदाहमेतमिति सूत्रं युवास्विति तथाऽम्बरम् ।
वेदाहेत्युत्तरीयं च इदं विष्णुः सुपुष्पकम् ॥७४॥
धूरसीति ततो धूपं चन्द्रमा इति दीपकम् ।
अन्नपते च नैवेद्यं करोद्वर्तनमाचमम् ॥७५॥
ताम्बूलकं फलं यज्ञेनेति पुष्पाञ्जलिं तथा ।
दत्वा च शिल्पिने पात्रवस्त्रादि सर्वमर्पयेत् ॥७६॥
अन्नाधिवासनं कुर्यात् कोणे तु मण्डपस्य वै ।
सप्तसु धान्यश्रृंगेषु देवानामुपवेशनम् ॥७७॥
कृत्वा देवेश्वरं शय्यायां तु समधिवासयेत् ।
ब्राह्मणादीन् भोजयेच्च द्वादश प्रीयतामिति ॥७८॥
गोदानं च ततः कृत्वा प्रासादमुखदक्षगाम् ।
कोणगां शयनीं कृत्वा स्तुत्वा देवमुत्थापयेत् ॥७९॥
रथे त्वारोपयेच्चापि प्रादक्षिण्येन मन्दिरात् ।
आनीय यागमण्डक्ष्मां निवेश्य द्वारि पश्चिमे ॥८०॥
मध्यवेद्याः पश्चपीठे प्राङ्मुखं तं निधाय च ।
दद्यान्मन्त्रैर्मधुपर्कं पुरुष एवेदमितिना ॥८१॥
पाद्यं चार्घ्यं मधुपर्कं मन्त्रैर्दद्यात्ततः परम् ।
मध्यवेद्यां धान्यपुञ्जे काष्ठशय्यां तु प्राक्शिराम् ॥८२॥
आस्तीर्य शुक्लवसनेऽक्षतस्वस्तिकमालिखेत् ।
प्रागग्रगान् कुशानास्तीर्य पूर्वादिषु पूजयेत् ॥८३॥
पूर्वे नमो विष्णवे दक्षे मधुसूदनाय च ।
पश्चिमे त्रिविक्रमायोत्तरे वामनकाय च ॥८४॥
आग्नेय्यां श्रीधरायेति ऋषिकेशाय निर्ऋतौ ।
वायव्ये पद्मनाभायेशान्यां दामोदराय च ॥८५॥
नमः सम्पूजयामीति ततस्तान् त्रिःपरिक्रमेत् ।
देवं च शयने कृत्वा त्रिभिः पट्टदुकूलकैः ॥८६॥
आच्छाद्य च शिरोदेशे निद्राकलशमान्यसेत् ।
सहिरण्याम्बरम् आपोदेवीमन्त्रेण सन्न्यसेत् ॥८७॥
आपो अस्मान्मातरश्चेतिमन्त्रैः प्रतिष्ठापयेत् ।
आप्यायस्वेति मधुना घृतेनाऽभ्यंजयेत्ततः ॥८८॥
या ते रुद्रेतिमनुनोपलिपेत्तैलसर्षपैः ।
गन्धाद्यैरभ्यर्च्य सितं परिधानं समर्पयेत् ॥८९॥
बृहस्पतेति मनुना करे दद्यात्तु कंकणम् ।
विश्वतेति पादनाभिवक्षःशिरस्स्वालम्भनम् ॥९०॥
पुरतः पादुके पार्श्वयोः शान्तिकुंभकौ तथा ।
दक्षे छत्रं व्यजनं च पुरतश्चासनं तथा ॥९१॥
घण्टां भक्ष्यं जलं दर्पणादिकं स्थापयेत्ततः ।
समन्ताद् भस्मना दर्भतिलैः प्राकारकत्रयम् ॥९२॥
कृत्वा च मण्डपाद् बाह्येलोकपेभ्योऽर्पयेद् बलिम् ।
दिक्षु दत्वा बलिं कुण्डमागत्य होममाचरेत् ॥९३॥
ओं पराय विष्णवात्मने नमः स्वाहेदं विष्णवे ।
अष्टोत्तरशतंहोमं कुर्यात् तिलयवादिभिः ॥९४॥
न्यासान् कुर्याद् यथा यं पादयोः ऊं हृदये तथा ।
मं ललाटे इति रीत्या मूर्तौ प्रणवमर्पयेत् ॥९५॥
भूः पादयोर्भुवौ हृदि स्वर्भाले व्याहृतीर्न्यसेत् ।
अं तालौ आं मुखे इं दक्षे ईं वामे च नेत्रके ॥९६॥
उं दक्षे ऊं वामकर्णे ऋं दक्षिणगण्डके ।
ॠं वामगण्डके ऌं दक्षिणनासापुटे तथा ॥९७॥

ॡं वामे नासिकापत्रे एं ऊर्ध्वे ओष्ठके तथा ।
ऐं अधरोष्ठे ओं दन्तेषु औं दन्तेषु अधःसु च ॥९८॥
अं ललाटे अः जिह्वायां यं त्वचि रं तु चक्षुषोः ।
लं नासायां वं दशनेषु शं श्रोत्रयोः षं चोदरे ॥९९॥
सं करौ हं हृदि क्षं नाभ्यां लं लिंगे न्यसेत्तथा ।
पंफंबंभंमं दक्षिणे बाहौ तंथंदंधंनं वामके ॥१००॥
टंठंडंढंणं दक्षायां जंघायां चंछंजंझंञं वामायाम् ।
कंखंगंघंङं चांगुलिषु मातृकान्यासमाचरेत् ॥१०१॥
ओं रविचन्द्राभ्यां नेत्रयोर्भौमाय हृदये तथा ।
स्कन्धे बुधाय जिह्वायां बृहस्पतये वै तथा ॥१०२॥
लिंगे शुक्राय च शनैश्चराय तु ललाटके ।
राहवे पादयोश्चापि केशेषु केतवे तथा ॥१०३॥
रोहिणीभ्योऽपि हृदये मृगशिरसे मस्तके ।
आर्द्रायै चापि केशेषु पुनर्वसवे भालके ॥१०४॥
पुष्याय तु मुखे आश्लेषाभ्यो नासापुटे तथा ।
मघाभ्यो दन्तवर्गेषु न्यासान् समाचरेत्तथा ॥१०५॥
दक्षकर्णे तु पूर्वाफाल्गुनीभ्यो वामकर्णके ।
उत्तराफाल्गुनीभ्यश्च हस्ताय हस्तयोस्तथा ॥१०६॥
चित्रायै दक्षिणभुजे स्वात्यै च वामबाहुके ।
विशाखानुराधाभ्यां स्तनयो दक्षिणे त्वथ ॥१०७॥
कुक्षौ ज्येष्ठाभ्यो मूलाय वामकुक्षौ ततस्तथा ।
कट्यां च पार्श्वयोः पूर्वाषाढाभ्यो लिंगके तथा ॥१०८॥
उत्तराषाढाभ्य एव वृषणे श्रवणाय तु ।
धनिष्ठायै तथा नेत्रे शतभिषाभ्य एव च ॥१०९॥
ऊर्वोः पूर्वाभाद्रपदोत्तराभाद्रपदाभ्यां तथा ।
रेवतीभ्योऽश्विनीभ्यश्च नाभ्यां ध्रुवाय वै नमः ।
सप्तर्षिभ्यः कण्ठदेशे मातृकाभ्यः कट्यां नमः ॥११०॥
विष्णुपदेभ्यः पादयोस्ताराभ्यो रोमकूपिषु ।
नागवीथ्यै चांगवीथ्यै वनमालायां नमः ॥१११॥
कौस्तुभेऽगस्तिमुनये नमो ग्रहेभ्य इत्यपि ।
हरिः राधे न्यासभेदानाह प्रोक्ता मयाऽपि ते ॥११२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने स्नान-
कलशस्थापनदिक्पालबलिस्वर्णशलाकानेत्रांजनबहुघटस्नान-
पत्रस्नान पूजनाऽऽभरणनैवेद्यहोमप्रणवन्यासमातृकान्या-
सनक्षत्रन्यासादिनिरूपणनामा षट्पंचाशदधिकशत-
तमोऽध्यायः ॥ १५६ ॥

श्रीकृष्ण उवाच—

शृणु राधे तथा न्यासान् यानाह भगवान् स्वयम् ।
देवायताय मूर्तौ वै प्रवदामि क्रिया अपि ॥ १ ॥
चैत्राय च नमो मूर्ध्नि वैशाखाय मुखे तथा ।
हृदि ज्येष्ठायाऽऽषाढाश्रावणाभ्यां स्तनयोर्नमः ॥ २ ॥
भाद्रपदाय उदरे कट्यामाश्विनकाय च ।
ऊर्वोः कार्तिकमार्गाभ्यां पौषमाघाय जंघयोः ॥ ३ ॥
फाल्गुनाय पादयोश्च वत्सरेभ्यो दक्षोर्ध्वके ।
संवत्परीडावत्सरेभ्यो नमश्चतुर्षु बाहुषु ॥ ४ ॥
सन्धिषु पर्वतेभ्यश्च लिङ्गे ऋतुभ्य इत्यपि ।
अस्थिषु चाहोरात्रेभ्यः क्षणादिभ्यश्च रोमसु ॥ ५ ॥
मुखे कृताय त्रेतायै हृदि नितम्बयोस्तु च ।
द्वापराय कलये पादयोर्बाह्वोर्मनुभ्य उ ॥ ६ ॥
पराय च परार्धाय जंघयोश्च नमो नमः ।
महाकल्पाय देहे चाऽयनाभ्यां पादयोर्नमः ॥ ७ ॥
विषुवतेऽङ्गुलीष्वेव कालायैवं नमो नमः ।
मुखे विप्राय बाह्वोः क्षत्रायोर्वोर्वैश्यकाय च ॥ ८ ॥
शूद्राय पादयोः संकराय पादाग्रयोर्नमः ।
सन्धिषु लोमजेभ्यश्च गोभ्यो नमो मुखे तथा ॥ ९ ॥
अजाविकाभ्यो हस्तयोश्च सर्वत्र पशुभ्यो नमः ।
नमः केशेषु मेघेभ्योऽभ्रेभ्यो नमोऽस्य रोमसु ॥१०॥
नमो नदीभ्यो गात्रेषु नमोऽब्धिभ्यश्च कुक्षिके ।
ऋग्वेदाय नमो मूर्ध्नि यजुषे दक्षिणे भुजे ॥११॥
वामभुजे तु सामायोपनिषद्भ्यो नमो हृदि ।
आख्यानेभ्यो जंघयोश्च नाभावथर्वणे नमः ॥१२॥
पादयोः कल्पसूत्रेभ्यो वक्त्रे व्याकृतये नमः ।
ऊहेभ्यः कण्ठदेशे च निरुक्ताय नमो हृदि ॥१३॥
नेत्रयोश्छन्दसे ज्योतिषे भौतिकाय कर्णयोः ।
आयुर्वेदाय च दक्षे भुजे वामे धनुर्विदे ॥१४॥
योगाय हृदि नीत्यै पादयोस्तन्त्राय चौष्ठयोः ।
दिवे मूर्ध्नि नमः सूर्यचन्द्राभ्यां नेत्रयोर्नमः ॥१५॥
अनिलाय नमो घ्राणे व्योम्ने नाभ्यां नमो नमः ।
समुद्रेभ्यो नमो बस्तौ पृथ्व्यै नमश्च पादयोः ॥१६॥
हिरण्मयाय शिरसि कृष्णाय केशमण्डले ।
भाले रुद्राय भ्रूकुटौ यमाय च नमो नमः ॥१७॥
अश्विभ्यां कर्णयोर्वैश्वानरस्य च नमो मुखे ।
मरुद्भ्यश्च नमो घ्राणे वसुभ्यः कण्ठके नमः ॥१८॥

रुद्रेभ्यश्च नमो दन्ते सरस्वत्यै च वाङ्मये ।
इन्द्राय तु भुजे दक्षे वामे तु बलये नमः ॥१९॥
प्रल्हादाय दक्षस्तने वामे तु विश्वकर्मणे ।
नारदाय दक्षकुक्षौ वामेऽनन्तादिकाय च ॥२०॥
वरुणाय करयोश्च मित्राय पादयोर्नमः ।
ऊरुमध्ये तु विश्वेभ्यः पितृभ्यो जानुमध्यके ॥२१॥
यज्ञेभ्यो जंघयोश्चापि राक्षसेभ्यस्तु गुल्फयोः ।
पिशाचेभ्यो दक्षपादेऽसुरेभ्यो वामपादके ॥२२॥
विद्याध्रेभ्यः पादयोश्च ग्रहेभ्यः पत्तले तथा ।
गुह्यकेभ्यो गुदे पूतनादिभ्यश्च नखेषु च ॥२३॥
गन्धर्वेभ्यश्चौष्ठयोश्च स्कन्दाय कटिपार्श्वके ।
गणेशं कटिपार्श्वे च मत्स्याय मस्तके नमः ॥२४॥
कूर्माय पादयोर्नृसिंहाय नमो ललाटके ।
वाराहाय जंघयोश्च वामनाय मुखे नमः ॥२५॥
पर्शुरामाय तु हृदि नमो रामाय बाहुषु ।
नाभ्यां कृष्णाय बुद्धाय बुद्धौ जान्वोश्च कल्किने ॥२६॥
केशवाय च शिरसि नारायणाय वै मुखे ।
ग्रीवायां माधवायाऽपि बाह्वोर्गोविन्दकाय च ॥२७॥
विष्णवे हृदये मधुसूदनाय तु पृष्ठके ।
त्रिविक्रमाय च कट्यां वामनायोदरे नमः ॥२८॥
जंघयोः श्रीधरहृषीकेशाभ्यां तु नमो नमः ।
गुल्फयोः पद्मनाभाय दामोदराय पादयोः ॥२९॥
मूर्ध्नि नमोऽश्वमेधाय नरमेधाय भालके ।
राजसूयाय च मुखे गोमेधाय तु कण्ठके ॥३०॥
नमोहृदि द्वादशायाऽधीनेभ्यो नाभिमण्डले ।
सर्वजिते दक्षकट्यां वामायां सर्वमेधिने ॥३१॥
लिंगे नमोऽग्निष्टोमायाऽतिरात्राय तु गोलयोः ।
आप्तोर्यामाय चोर्वोश्च जान्वोः षोडशिने नमः ॥३२॥
उतथ्याय दक्षजंघायां वामायां नमोऽपि तु ।
वाजपेयायात्यग्निष्टोमाय बाहौ तु दक्षिणे ॥३३॥
चातुर्मास्याय च वामे सौत्रामणये हस्तयोः ।
पश्विष्टीभ्योऽङ्गुलीष्वेव दर्शपौर्णाय नेत्रयोः ॥३४॥
सर्वेष्टिभ्यो रोमकूपे वषट् स्वाहाय च स्तने ।
पादाङ्गुलीषु च पञ्चमहायज्ञेभ्य एव च ॥३५॥
आहवनीयाय मुखे हृदि दक्षिणवह्नये ।
गार्हपत्याय च नाभौ वेद्यै तदुत्तरे नमः ॥३६॥
प्रवर्ग्याय भूषणेषु सवनेभ्यश्च पादयोः ।
एधेभ्यो बाहुषु दर्भेभ्यः केशेषु नमो हरेः ॥३७॥
मूर्ध्नि धर्माय च हृदि ज्ञानाय च नमो नमः ।
वैराग्याय च गुह्ये वै ऐश्वर्याय तु पादयोः ॥३८॥
खड्गाय नमः शिरसि शार्ङ्गाय मस्तके नमः ।
दक्षभुजे मूशलाय वामभुजे हलाय च ॥३९॥
नाभ्यां च जठरे पृष्ठे चक्राय च नमो नमः ।
शंखाय लिंगे वृषणे गदायै जानुजंघयोः ॥४०॥
पादगुल्फयोः पद्माय लक्ष्म्यै नमो ललाटके ।
नमो मुखे सरस्वत्यै रत्यै गुह्ये नमो नमः ॥४१॥
प्रीत्यै कण्ठे नमः कीर्त्यै दिक्षु शान्त्यै नमो हृदि ।
तुष्ट्यै नमश्च जठरे पुष्ट्यै सर्वत्र वै नमः ॥४२॥
दक्षवामस्तनयोः श्रीवत्साय च नमो नमः ।
कौस्तुभायोरसि वनमालायैः कण्ठके नमः ॥४३॥
ओं पादयोर्नं तु जान्वोर्मों गुह्ये भं नाभिके ।
गं हृदि वं कण्ठके तें मुखे वा नेत्रयोर्नमः ॥४४॥
सुं भाले दें मस्तके वां दक्षपार्श्वे यमुत्तरे ।
अं रन्ध्रे नां शिखायां दिं भाले श्रीं भ्रूमध्यके ॥४५॥
कं मुखे ष्णं कण्टमध्ये नां बाह्वोः रां हृदन्तरे ।
यं स्तने णां जठरे च यं नाभौ जघने तु पम् ॥४६॥
तं गुह्ये यें वृषणे नं सक्थ्नोर्मं जानुकद्वये ।
विसर्गः पादयोश्चेति नमः श्रीहरये मुहुः ॥४७॥
श्रीं हृदि राधिकां वामे लक्ष्मीं बाहौ तु वामके ।
रमां दक्षे ब्रह्मविद्यां बाहौ हृदि तु माणिकीम् ॥४८॥
पराविद्यादिका मूर्तौ कृष्णान्ता नौमि वै हरेः ।
सन्तोषायैः कंभरायै नमो हरेस्तु नेत्रयोः ॥४९॥
इति कृत्वा सर्वन्यासान् जीवन्यासं ततश्चरेत् ।
मूर्तौ तेजो भावयित्वा बुद्धीन्द्रियमनांसि च ॥५०॥
प्राणाहंकारतन्मात्राः संयुज्य तनुभावनाम् ।
पुंभावं तत्र वै कृत्वा भावयित्वा तु साक्षिणम् ॥५१॥
न्यसेत् तत्त्वत्रयं वा च पञ्चतत्त्वानि सन्न्यसेत् ।
आत्मतत्त्वाय देवाय ब्रह्मणे पादयोर्नमः ॥५२॥
विद्यातत्त्वाय देवाय विष्णवे हृदये नमः ।
शिवतत्त्वाय देवाय शिवाय मस्तके नमः ॥५३॥
ब्रह्मतत्त्वाय शिरसि मायातत्त्वाय कण्ठके ।
ईशतत्त्वाय हृदये जीवतत्त्वाय पादयोः ॥५४॥
अन्तर्यामिप्रतत्त्वाय नमः सर्वशरीरके ।
तत्पादांगुष्ठयोः संगुल्फयोर्विं जंघयोस्तथा ॥५५॥
तुं जान्वोर्वं तथोर्वोः रें गुदें णिं वृषणे तथा ।
यं कट्यां भं नाभिकायां गं जठरे स्तने च देम् ॥५६॥

वं हृदि स्यं कण्ठके च धीं वक्त्रे तालुके च मम् ।
हिं नासायां चक्षुषोर्धि यों भ्र्वां ललाटके तु योम् ॥५७॥
पूर्वे नः पं दक्षिणे च पश्चे चों उत्तरे तु दम् ।
यां मूर्ध्नि त् च सर्वत्र तत्सवितुर्हृदि हरेः ॥५८॥
वरेण्यं मस्तके भर्गो देवस्य धीमहि कचे ।
धियो यो नः नेत्रयोश्च प्रचोदयात् तदस्त्रके ॥५९॥
ओं नां पादांगुष्ठयोश्च रां गुल्फयोर्यं जंघयोः ।
णां जान्वोर्ये तथोर्वो विं गुदे वृषणे ष्मकम् ॥६०॥
हें कट्यां वां नाभिकायां सुं जठरे स्तने च देम् ।
वां हृदि यं कण्ठके च धीं वक्त्रे तालुके च मम् ॥६१॥
हिं नासायां चक्षुषोस्तत् नो भ्र्वां धिं तु ललाटके ।
ष्णुं रन्ध्रे प्रं शिखायां चों मानसे दं शरीरके ॥६२॥
यां चात्मनि त् सर्वमूर्तौ चिन्तयामि हरेरिह ।
नारायणाय हृदये विद्महे मस्तके तथा ॥६३॥
वासुदेवाय कवचे धीमहीति च नेत्रयोः ।
तन्नो विष्णुश्चान्तरे च प्रचोदयात् तदस्त्रके ॥६४॥
अग्निमीळे पादयोश्च इषे त्वो गुल्फयोर्नमः ।
शन्नो देवीति जान्वोः सुपर्णोसील्यूरुद्वये च ॥६५॥
स्वस्ति न इति जठरे दीर्घायु त्वेति वै हृदि ।
श्रीश्च ते इति कण्ठे च त्रातारमिति वक्त्रके ॥६६॥
त्र्यम्बकमिति स्तनयोर्नेत्रयोश्च नमो नमः ।
मूर्धानमिति वै मूर्ध्नि नारायणाय ते नमः ॥६७॥
ओं केशवाय नमो मूर्ध्नि मुखे नारायणाय नम् ।
ग्रीवायां मों माधवाय भं गोविन्दाय कण्ठके ॥६८॥
पृष्ठे गं विष्णवे वें कुक्षौ मधुसूदनाय च ।
तें कट्यां त्रिविक्रमाय जंघयोर्वामनाय वाम् ॥६९॥
सुं गुह्ये श्रीधरायेति दें गुल्फे हृषीकेशिने ।
वां पादे पद्मनाभाय दक्षे दामोदराय यम् ॥७०॥
हुं हृदयाय नमो हृदि विष्णवे मस्तके नमः ।
शिखायां ब्रह्मणे चापि ध्रुवाय कवचे नमः ॥७१॥
चक्रिणे नेत्रयोर्नमोऽस्त्राय फट् चक्रिणे नमः ।
सहस्रशीर्षपादयोः पूरुष एव जंघयोः ॥७२॥
एतावानिति जान्वोश्च ऊर्वोस्त्रिपादूर्ध्वकम् ।
तस्माद्विराट् च वृषणे तस्माद् यज्ञाद् कटिस्थले ॥७३॥
तस्माद्यज्ञात् सर्वनाभ्यां तस्मादश्वा हृदिस्थले ।
तं यज्ञं च स्तनयोश्च बाह्वोर्यत्पुरुषं तथा ॥७४॥
ब्राह्मणोऽस्येति च मुखे चन्द्रमा इति चक्षुषोः ।
नाभ्या आसीत्कर्णयोश्च भ्रुवोर्यत्पुरुषेति च ॥७५॥

सप्तास्येतिभालके च यज्ञेनेति च मस्तके ।
अद्भ्यश्च हृदये वेदाहमित्येतच्च मस्तके ॥७६॥
प्रजापतिः शिखायां च योदेवकवचे तथा ।
ऋचं ब्राह्मं नेत्रयोश्च श्रीश्चास्त्रं न्यासमाचरेत् ॥७७॥
निद्रामावाहयेच्चापि मोहिन्यागच्छ तिष्ठ च ।
भोगिशय्याप्रसुप्तस्य नारायणस्य शासने ॥७८॥
त्वं प्रतिष्ठाऽसि वै देवि गृहाण पूजनं बलिम् ।
एहि सावित्रिकामूर्ते चक्षुर्भ्यां स्थानगोचरे ॥७९॥
विश नासापुटे देवि कण्ठे चोत्कण्ठिता विश ।
इदमर्घ्यं मया दत्तं पूजेयं प्रतिगृह्यताम् ॥८०॥
एवं निद्राकलशे च निद्रां प्रपूज्य वै ततः ।
बलिं दत्वा लोकपालादिभ्यः शय्यां प्रपूजयेत् ॥८१॥
सर्वतोभद्रके विष्णुं द्वादशारे सुचक्रके ।
पद्मेऽष्टदलके कृष्णं मूलमन्त्रेण वेशयेत् ॥८२॥
कर्णिकायां हृदयं प्रपूजयेच्च हृदे नमः ।
पूर्वपत्रे शिरः पूजयेच्च वै विष्णवे नमः ॥८३॥
दक्षपत्रे शिखां पूजयेच्च वै ब्रह्मणे नमः ।
पश्चिमे कवचं पूजयेच्च ध्रुवाय वै नमः ॥८४॥
उत्तरेऽस्त्रंफट्पूजयेच्च वै चक्रिणे नमः ।
आग्नेये शंभवे नमो गायत्रीं पूजयेत्तथा ॥८५॥
विजयामितिसावित्रीमीशानदलकेऽर्चयेत् ।
ज्योतिरूपाय च नमो नैर्ऋते वै नमो नमः ॥८६॥
चक्रिरूपाय च नमः पिङ्गलास्त्रं तु वायुके ।
इतिगर्भावरणं च कृत्वाऽरासु पुराक्रमात् ॥८७॥
केशवं नारायणं माधवं गोविन्दमित्यपि ।
विष्णुं च मधुसूदनं त्रिविक्रमं वामनं तथा ॥८८॥
श्रीधरं च हृषीकेशं पद्मनाभं दमोदरम् ।
पूजयेद् द्वादशमूर्तीर्द्वितीयावरणं हि तत् ॥८९॥
पूर्वतश्च पुनः खड्गं चक्रं सुशंखकम् ।
पद्मं हलं शार्ङ्गमग्निमूर्त्यधिपतिकं तथा ॥९०॥
यजमानमूर्त्यधिपतिकं चोग्रं तथाऽर्ककम् ।
तृतीयावरणं संपूजयेत् तदधिपाँस्ततः ॥९१॥
पृथ्व्यै तदधिपतये वासुदेवाय वै नमः ।
दक्षे जलाय पतये संकर्षणाय वै नमः ॥९२॥
पश्चेऽग्नयेऽधिपतये प्रद्युम्नाय नमो नमः ।
उत्तरे वायवे चानिरुद्धाय वै नमो नमः ॥९३॥
स्वमूर्तये नमो नारायणाय च नमो नमः ।
इन्द्रादिकान् पूजयित्वा वस्त्रैर्देवमाच्छादयेत् ॥९४॥

स्तुत्वा पुष्पांजलिं दत्वाऽवकीर्य मण्डपादिकान्।
पुष्पाद्यैर्मण्डले स्वस्ति लिखित्वा देवतात्रयम् ॥९५॥
लोकपालान् वसून् रुद्रानादित्यान् विश्वदेवताः।
साध्यान् मरुद्गणान् गन्धर्वाप्सरस इत्यमून् ॥९६॥
पितृगणान् सुतीर्थानि स्कन्ददुर्गादिकाँस्तथा।
क्षेत्रपालान् पार्षदांश्च नमः कृत्वा प्रपूजयेत् ॥९७॥
आचार्यः कुण्डमागत्य पलाशोदुम्बरोद्भवाः।
अश्वत्थाऽपामार्गजाश्च समिधोऽष्टशतानि वै ॥९८॥
त्रिसहस्राणि वा षट्सहस्राण्यष्टसहस्रकम्।
द्वादशाऽपि सहस्राणि रक्षेत् कुण्डसमीपतः ॥९९॥
शान्तिकपौष्टिकैर्मन्त्रैर्जुहुयाच्च यथांशकम्।
ओं शन्नो वातः पवतां शं नस्तपतु सूर्यः ॥१००॥
शन्नः कनिष्क्रदद्देवः पर्जन्यो ह्यभिवर्षतु।
शन्नो देविरभिष्टय आपो भवन्तु पीतये ॥१०१॥
ओं पुष्टिनरण्वान् क्षितिर्न पृथिवी गिरिर्न भुज्मः क्षोदोनशम्भुः।
अथोना मज्जन् सर्गः प्रणक्तः सिन्धुर्न तक्षोदः कदम्बरातो।
जयस्फानो अमीव ह्यवसुवित पुष्टिवर्धनः ॥१०२॥
अथ पूर्वकुण्डकेऽग्निमीलेति जुहुयात् तिलैः।
यवैश्चाष्टोत्तरशतं पलाशसमिधाऽथवा ॥१०३॥
इषे त्वेति मनुना च जुहुयाद् दक्षकुण्डके।
ओमग्नेति जुहुयाच्च पश्चिमे कुण्डके तथा ॥१०४॥
शन्नो देवीत्युत्तरे कुण्डके च जुहुयात्तथा।
वौषटिति च मनुना जुहुयादग्निदिग्भवे ॥१०५॥
गायत्र्या च जुहुयाच्च नैर्ऋते कुण्डके तथा।
जातवेदसवायव्ये नमो ब्रह्मेतीशानके ॥१०६॥
मूर्धानं दिवमन्त्रेण पूर्णाहुतिं ततः परम्।
जुहुयुश्चाहुतिपाता शान्तिघटे मतास्तदा ॥१०७॥
एवं राधे हरिः प्राह देवायतनकाय यत्।
मया तेऽभिहितं सर्वं विधानं फलदं श्रवात् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मूर्तौ मासर्तुयुगवर्णवेदवसुदिक्पाललोकपालक्षेत्रपालभगवद्-वतारयज्ञाग्निहेतिभूषणप्रियातत्त्वमूलमन्त्रगायत्रीद्वयार्पण-मन्त्रपुरुषसूक्तन्यासपूजाबलिप्रदानहवनादि-निरूपणनामा सप्तपञ्चाशदधिकशत-तमोऽध्यायः ॥ १५७ ॥

**श्रीकृष्ण उवाच—**

श्रूयतां च ततो राधे पूर्णाहुतिं महाहुतीन्।
यानाह श्रीहरिस्तत्र कर्म चात्र वदामि ते ॥ १ ॥
स्योनापृथ्वीति पृथिव्यै अघोरेभ्यश्च शंभवे।
इन्द्रायेन्द्रो महेन्द्रायाग्नयेऽग्निं दूतमित्यपि ॥ २ ॥
पशूनां पशुपतयेऽग्नये अग्न आयाहि च।
असिही यजमानाय तमिन्द्रं रुद्रमूर्तये ॥ ३ ॥
यामायेति यमायैव उदुत्यं सूर्यमूर्तये।
आवो रुद्राय चासुन्वन्तं निर्ऋतयेऽर्पयेत् ॥ ४ ॥
आपोहि जलदेवाय विभूषं तु भवाय च।
इमं मे वरुणायेति वातआ वायुमूर्तये ॥ ५ ॥
ईशानाय तमीशानं आनोनीति च वायवे।
वयं सोमाय सूर्याय इन्द्रं महादेवाय तु ॥ ६ ॥
आदिप्रत्नेति हरये भीमाय तु मृगोनमी।
ईशानाय अभित्यं तु जुहुयान्मन्त्रसाधितम् ॥ ७ ॥
एककुण्डे महाचार्यो जुहुयात् सर्वनामतः।
अष्टसाहस्रकं यद्वा चाष्टशतं हवान् चरेत् ॥ ८ ॥
पूर्णाहुतिं ततो हुत्वा देवकर्णे तु दक्षके।
निवेद्ययोः स्पर्शे घृताहुत्यष्टकोत्तरम् ॥ ९ ॥
कुर्याच्च मूलमन्त्रेण शतादिसंख्यया हवम्।
यामकुण्डे दधि हुत्वा देवनाभिं स्पृशेत्ततः ॥१०॥
वारुणे कुण्डके क्षीरं हुत्वा हृदि हरेः स्पृशेत्।
सौम्यकुण्डे मधु हुत्वा मूर्धानं तु स्पृशेद्धरेः ॥११॥
वारुणे कुण्डके मिश्रं घृताद्येव चतुष्टयम्।
हुत्वा पूर्णाहुतिं हुत्वा सर्वांगानि स्पृशेद्धरेः ॥१२॥
मूर्तौ कृत्वा न्यासविधिं कूर्मशिलां प्रपूज्य च।
ब्रह्मशिलां पिण्डिकां च वाहनानि च पार्षदान् ॥१३॥
परिचारकदेवाँश्च परिवारान् प्रपूजयेत्।
वामेऽधिवासयेत्ताँश्च विष्णोर्वै चण्डप्रभृतीन् ॥१४॥
मधुघृतैः समभ्युज्य जलैः प्रक्षाल्य पूजयेत्।
वस्त्रेणाच्छाद्य च मूर्तेर्मन्त्रन्यासाँस्ततश्चरेत् ॥१५॥
विष्णुः स्थाप्यो भवेद्यत्र प्रतिमापिण्डिकाविधौ।
ओं घं ङं पं भं फं लक्ष्म्यै नमो हृदि च मस्तके ॥१६॥
शिखायां कवचे नेत्रे हुंफट् स्वाहेति वै नमम।
न्यस्यैवं पिण्डिकायां तु पञ्चांगानि च तत्र च ॥१७॥
विन्यसेन्मूर्तिमान् मन्त्रैर्मूर्तौ वै मूर्तिमान् यजेत्।
ओं ह्रीं श्रीं ह्रां क्षः नमः श्रीपरब्रह्मणेऽखिलधृगे ॥१८॥

ओं ह्रां श्रीं ह्रीं दिव्यतेजोधर्यै सुभगायै नमः ।
इत्यधिवासनं कृत्वा प्रासादस्याऽधिवासनम् ॥१९॥
नूतनस्य समीपे चैकाशीतिपदमण्डलम् ।
कृत्वाऽक्षतैः पदेष्वेव सप्तधान्यजपुञ्जकान् ॥२०॥
कृत्वा जलाढ्यकलशानेकाशीतिं शुभान्नवान् ।
आहृत्य तत्र च नवनवकेषु तु मध्यमम् ॥२१॥
ज्ञात्वा कोष्ठं तेषु कुंभान् मध्यपूर्वक्रमादिना ।
न्यस्य मध्ये तु कलशे द्वादशपल्लवानि वै ॥२२॥
शम्युदुम्बरकाश्वत्थपलाशाऽशोकचम्पकाः ।
कदम्बप्लक्षन्यग्रोधाऽऽम्रकबिल्वार्जुना द्रुमाः ॥२३॥
तेषां पत्राणि ग्राह्याणि नमः सोमाय निक्षिपेत् ।
ततः पूर्वघटे पद्मकरोचनादूर्वांकुरान् ॥२४॥
दर्भपिञ्जूलधवलपीतसर्षपकाँस्तथा ।
रक्तचन्दनजातीपुष्पनन्दावर्तमादश ॥२५॥
तत आग्नेयकलशे सप्तकं निक्षिपेद् यथा ।
यवव्रीहितिलस्वर्णरौप्यनदीतटमृदः ॥२६॥
भूम्यस्पृष्टं गोमयं च नम उक्त्वा विनिक्षिपेत् ।
ततो याम्यघटेऽष्टौ च निक्षिपेत् तद् यथायथम् ॥२७॥
सहदेवीं विष्णुक्रान्तां भृंगराजं महौषधिम् ।
शमीं शतावरीं गुडूचीं श्यामाकं विनिक्षिपेत् ॥२८॥
ततो नैर्ऋत्यकलशे कदलीं पूगिकाफलम् ।
नारिकेलं च बिल्वं च नारिंगं मातुलिंगकम् ॥२९॥
बदरं चामलकं च नम उक्त्वा विनिक्षिपेत् ।
वारुणे तु घटे पञ्चगव्यं मन्त्रितमाददेत् ॥३०॥
वायव्ये कलशे शम्युदुम्बराश्वत्थकोद्भवम् ।
न्यग्रोधकपलाशोत्थं कषायपञ्चकं न्यसेत् ॥३१॥
सौम्ये घटे शंखपुष्पीं सहदेवीं बलां तथा ।
शतावरीं कुमारीं च गुडूचीं च वचां तथा ॥३२॥
व्याघ्रीं च मूलरूपास्ता अष्टमूलानि संन्यसेत् ।
ईशकुंभे वल्मीकप्रभृतिसप्तमृदो न्यसेत् ॥३३॥
हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥३४॥
इति मन्त्रेण च मध्यकुंभकानभिमन्त्रयेत् ।
शेषान् गन्धोदकैः पूरयित्वाऽभिमन्त्र्य वै ततः ॥३५॥
मूलमन्त्रेण सूत्रैश्चाभिवेष्ट्यान्तर्बहिर्ह्यधः ।
ऊर्ध्वं च शिखरं प्रासादं प्रोक्ष्य पञ्चगव्यकैः ॥३६॥
मूर्धानं दिवमन्त्रेण वल्मीकमृत्स्नया ततः ।
लिम्पयेद्वै ततः समुद्रादूर्मीति च मन्त्रतः ॥३७॥
ईशानमृत्तिकाकुंभकेन संस्नपयेत्ततः ।
यज्ञायज्ञेतिमन्त्रेण कषायकुंभकेन च ॥३८॥
वायव्येन स्नपयेच्च पयःपृथिव्येतिमन्त्रतः ।
वारुणेन पञ्चगव्यकुंभेन स्नपयेत्ततः ॥३९॥
याः फलिनीति नैर्ऋतफलकुंभेन वै ततः ।
हंसः शुचीति सौम्यस्थमूलाष्टकुंभकेन च ॥४०॥
विष्णोरराटमसीति पूर्वेण कुंभकेन च ।
सोमः राजेति मन्त्रेणाग्नेयस्थकुंभकेन च ॥४१॥
विश्वतश्चेतिमन्त्रेण याम्यस्थकुंभकेन च ।
नमोऽस्तु सर्पमन्त्रेण मध्यस्थकुंभकेन च ॥४२॥
अष्टाभिः पूर्वक्रमतः शिखरं स्नापयेत्ततः ।
ओं इदमापः प्रवहतावद्यञ्चमलं च यत् ॥४३॥
यच्चाभिदुद्रोहान्नृतं यच्च शेपे अभीरुणम् ।
आपो मातस्मादेनसः पवमानश्च मुञ्चतु ॥४४॥

ओं दैव्याय कर्मणे शुन्धध्वन्देवयज्यायै यद्द्रवो
शुद्धाः पराजघ्नुरिदं वस्तच्छुन्धामि ।
इति संप्रोक्ष्य सूत्रेणावेष्ट्य स्नापयित्वा देवरूपं
प्रासादं चिन्तयित्वाऽधिवासयेत् ॥४५॥

ओं ह्रीं सर्वदेवमयाचिन्त्य सर्वरत्नोज्ज्वलाकृते ।
यावच्चन्द्रश्च सूर्यश्च तावदत्र स्थिरो भव ॥४६॥
अथ शृंगकलशं च पताकाः स्थापयेत्तथा ।
पिण्डिकावाहदेवानां होमं कृत्वा तिलादिभिः ॥४७॥
चतुर्धेनूर्दक्षद्वारे सम्पूज्योदङ्मुखीस्ततः ।
ओं नारायणाय विद्महे वासुदेवाय धीमहि ॥४८॥
तन्नो विष्णुः प्रचोदयादिति दुग्ध्वा च पायसम् ।
श्रपयित्वा चरुं निवेद्य च नारायणाय तु ॥४९॥
दशविप्रान् भोजयित्वा प्रीयतां विष्णुरुच्चरेत् ।
धेनूर्दद्यान्महाचार्यायर्त्विग्भ्यः स्वर्णजोर्मिकाः ॥५०॥
दत्वा च दक्षिणा रात्रौ महोत्सवं प्रकारयेत् ।
सप्तपञ्चत्र्येकरात्रं बल्यन्तं वाधिवासनम् ॥५१॥
ततो गुरुर्बहिर्गत्वा ध्यायेत् प्रासाददेवताम् ।
पादौ पादशिला प्रोक्ता जंघा पादोर्ध्वमुच्यते ॥५२॥
गर्भश्चैवोदरं ज्ञेयं कटिश्च कटिमेखला ।
स्तंभाश्च बाहवो बोध्या घण्टा जिह्वा प्रकीर्तिता ॥५३॥
दीपः प्राणोऽस्य विज्ञेयो ह्यपानो जलनिर्गमः ।
ब्रह्मस्थानं नाभिरस्य हृत्पद्मं पिण्डिका मता ॥५४॥
प्रतिमा पुरुषः सोऽयं पादस्त्वहंकरस्तथा ।
ज्योतिश्चक्षुस्तदूर्ध्वं च प्रकृतिस्तस्य कीर्तिता ॥५५॥

प्रतिमाऽऽत्मा नलकुंभादधोद्वारं तु शिश्नकम् ।
शुकनासा नासिकाऽस्य गवाक्षः कर्ण उच्यते ॥५६॥
कपोतपालिः स्कन्धोऽस्य ग्रीवा चामलसारकः ।
कलशस्तु शिरो ज्ञेयं मज्जाक्षिप्तरसं हितम् ॥५७॥
मेदं तु वसुधां विद्यात् प्रलेपो मांसम् उच्यते ।
अस्थीनि च शिलास्तस्य स्नायुः कीलादयः स्मृताः ॥५८॥
चक्षुषी शिखरास्तस्य ध्वजाः केशाः प्रकीर्तिताः ।
एवं नरस्वरूपं संध्यायेत्प्रासादकं मखी ॥५९॥
पूजयेद् गन्धपुष्पाद्यैः सूत्रेण वेष्टयेत्तथा ।
वस्त्रं च कल्पयेत् सूत्रं नमस्कारं चरेत्ततः ॥६०॥
इत्यधिवासनं कृत्वा प्रातः स्नात्वा च मण्डपे ।
आचार्यस्तु समागत्य मूर्तिपान् द्वारपान् सुरान् ॥६१॥
वास्तुदेवान् समभ्यर्च्य कुण्डे हुत्वाऽष्टकं शतम् ।
वास्तोष्पतेतिमन्त्रेण पूर्णाहुतिं तु मूलतः ॥६२॥
दिक्पालेभ्यो बलिं दत्वा देवं च प्रणमेत्ततः ।
मण्डपोत्तरकलशैर्यजमानं तु सेचयेत् ॥६३॥
गुरुं विप्रान् स्थपत्यादीन् तोषयेद् दक्षिणादिभिः ।
प्रासादोत्सर्गकं कुर्याद् देशकालौ भिधाय च ॥६४॥
इमं प्रासादकं देवालयं देवस्य प्रीतये ।
उत्सृजामीति संप्रोच्य क्षिप्त्वा कुशाऽब्यवान् ततः ॥६५॥
नत्वा देवं ब्राह्मणादीन् साधून् साध्वीः प्रभोजयेत् ।
अचलायाः प्रतिमायाः कर्मार्थं मूर्तिपैः सह ॥६६॥
समधिवासितां देवाधारां कूर्मशिलां तथा ।
ब्रह्मशिलां पिण्डिकां संगृह्याऽऽचार्यः प्रदक्षिणम् ॥६७॥
प्रासादं तु समानीय त्रातारमिन्द्रकं गृणन् ।
अस्त्राय फट् प्रमन्त्रेण विघ्नानां नाशनाय वै ॥६८॥
पुष्पोदकानां धाराभिरभ्युक्ष्य भवनं शुभम् ।
ओंचमहाँ इन्द्रेणेति दर्भेणोल्लिख्य वै ततः ॥६९॥
प्रोक्ष्याऽस्त्रवारिणा सम्यक् प्रासादद्वारमध्यतः ।
यवार्धेन च वैशानीमुत्तरां चाऽऽप्य वा दिशम् ॥७०॥
स्नानादिसंस्कृतां कूर्मशिलां तु पञ्चरत्नके ।
प्रणवेन निधायैव शुभ्रे सौवर्णकच्छपम् ॥७१॥
द्वाराभिमुखमान्यस्य न्यस्य रत्नानि तत्र च ।
षट्त्रिंशत्पञ्चचत्वारिंशद्वर्त्तसहितां च वा ॥७२॥
ब्रह्मशिलामधिवासितां निदध्यात् समर्चयेत् ।
ओं नमो व्यापिनि स्थिरेऽचले ध्रुवे च शं कुरु ॥७३॥
ओं श्रीं लं स्वाहेतिमन्त्रेणाभ्यर्चयेद् यथेष्टकम् ।
त्वमेवासनशक्तिश्च तिष्ठात्र सर्वदा शिले ॥७४॥
वर्णाध्वने नमः पदाध्वने मन्त्राध्वने नमः ।
भुवनाध्वने नमस्तत्त्वाध्वने सकलाध्वने ॥७५॥
ध्यात्वाऽऽरूढं समध्वानं पुण्याहं वाचयेत् ततः ।
अष्टोत्तरशतं हुत्वा ब्रह्मशिलाप्रगर्तके ॥७६॥
प्रादक्षिण्येन सहेम्ना हस्तेन रत्नन्यासकान् ।
कुर्यात् श्वभ्ररहिते तु शिलाभागे सश्वभ्रिकाम् ॥७७॥
पिण्डिकां प्राक्पश्चमुखे सौधे सौम्यप्रणालिकाम् ।
दक्षोत्तरे पूर्वप्रणालीं गृणन् ध्रुवसूक्तकम् ॥७८॥
देवपत्नीमन्त्रकेण पिण्डिकामभिमन्त्रयेत् ।
श्रीश्च ते च पठेत् सूक्तं रमां संस्थापयेत् ततः ॥७९॥
तत्त्वन्यासान् प्रकुर्याच्च आत्मतत्त्वाय वै नमः ।
आत्मतत्त्वक्रियाशक्त्यै चाधिपत्यै नमो नमः ॥८०॥
विद्यातत्त्वाय च नमो ज्ञानशक्त्यै नमो नमः ।
शिवतत्त्वाय च नम इच्छाशक्त्यै नमो नमः ॥८१॥
प्रतितत्त्वे मूर्तिमूर्तिपलोकपालकान् न्यसेत् ।
नमश्चाधारशक्त्यै चानन्तासनं सवह्निकम् ॥८२॥
विधायाऽभ्यर्च्य ओं नमः प्रार्थयेत्तां सुशक्तिकाम् ।
सर्वलोकाधिकरणे त्वामत्र स्थापयामि च ॥८३॥
यावद्वसुन्धरा तावन्मन्दिरेऽत्र स्थिरा भव ।
इतिप्रार्थ्य च तद्बाह्ये प्रणवषोडशस्वरान् ॥८४॥
कृत्वाऽभितो व्यंजनानि न्यस्य श्वभ्रान्तरे ततः ।
रत्नादीन् स्थापयेत् बाह्यपरिधौ च यवान् व्रीहीन् ॥८५॥
निष्पावान् तिलामाषांश्च प्रियङ्गुं च नीवारकान् ।
शालिसिद्धार्थकाँश्चापि वज्रमौक्तिकशंखकान् ॥८६॥
वैडूर्यस्फटिकपुष्परागेन्द्रनीलपद्मकान् ।
चन्द्रकान्तं मनःशिलां हरितालां जनश्यमाम् ॥८७॥
जनकां सीसकां सौराष्ट्रीं रोचनां च गैरिकाम् ।
पारदं कनकं रूप्यं ताम्रमायसकं त्रपुम् ॥८८॥
सीसं कांस्यं चारकूटं तीक्ष्णलौहानि वाप्यथ ।
श्वेतं रक्तं चन्दनं चाऽगुरुमर्जुनकं तथा ॥८९॥
उशीरं वैष्णवीं सहदेवीं च लक्ष्मणां न्यसेत् ।
बीजाभावे यवान् रत्नाऽभावे वज्रं समर्पयेत् ॥९०॥
धात्वभावे हरितालं ताम्राभावे सुवर्णकम् ।
ओषध्यभावे सहदेवीं दधाल्लंभनं ततः ॥९१॥
पूर्वे त्रातारमिन्द्रेति आग्नेय्यामग्निमित्यपि ।
यमाय त्वामिति याम्यां असुन्वन्तेति निर्ऋतौ ॥९२॥
वारुण्यां पञ्चनद्येति वायव्यां वायो येतति ।
उत्तरे ओं वयं चेति ईशान्यां तमीशानेति ॥९३॥

रत्नन्यासान् विधायैवं पृथ्वीसुमेरुकच्छपान् ।
वाहनं चेति सौवर्णान् द्वाराभिमुखकान् तथा ॥९४॥
मध्यश्वभ्रे पारदं च निधाय गुग्गुलैः रसैः ।
रत्नादिकं स्थिरीकृत्य श्वभ्रं प्रलिप्य पायसैः ॥९५॥
मधुना चोपलिप्याऽपि वस्त्रेणाच्छाद्य हुँ इति ।
कवचेनाऽवगुण्ठ्यैवाऽस्त्रायफट्संवदेत्ततः ॥९६॥
मनोजूतिर्जुषतां च प्रासादमभिषिच्य च ।
इन्द्रादिभ्यो बलिं दत्वा प्रासादाच्च बहिस्ततः ॥९७॥
प्रादक्षिण्येन च भुवं प्रोक्ष्य वै पञ्चगव्यकैः ।
संमृज्य दर्भपिञ्जूल्यैरष्टदिक्षु ततश्चरेत् ॥९८॥
वालुकास्थण्डिलान्यष्ट चतुरस्त्राणि वै ततः ।
त्रिवितस्तिप्रमाणानि तेषामीशानप्रभृतौ ॥९९॥
कलशान् वारिपूर्णान् सत्पुष्पपल्लवसत्फलान् ।
सूत्रवेष्टितकान् न्यस्य स्थण्डिले भूमिसंस्कृतिम् ॥१००॥
सम्पाद्याऽग्निं प्रणीयाऽपि पलाशसमिधा ततः ।
अष्टोत्तरशतं हुत्वा गायत्र्याऽऽज्येन वै ततः ॥१०१॥
अष्टकलशतोयैश्च मूलमन्त्राभिमन्त्रितैः ।
देवमूर्ध्न्यभिसिञ्चेच्च हुँफट् दिग्बन्धनं चरेत् ॥१०२॥
प्रार्थयेत्तं प्रबुध्यस्व देवदेव जगत्पते ।
प्रबुद्ध्यस्व धरानन्तवासुदेव नमोऽस्तु ते ॥१०३॥
शंखस्थान् तण्डुलतिलकुशक्षीरजलादिकान् ।
राधे दत्वाऽर्घ्यकं देवं मन्त्रेणोत्थापयेदिति ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पूर्णाहुतिर्न्यासा अधिवासनं कुंभजलानि शिखरस्नानं चरुश्रपणं प्रासादपुरुषाकारताध्यानं पूजनं कूर्मशिला ब्रह्मशिला पिण्डिका रत्नानि देवार्घ्यं चेत्यादिनिरूपणनामाऽष्टपञ्चाश-दधिकशततमोऽध्यायः ॥ १५८ ॥

श्रीकृष्ण उवाच—

ततो राधे हरेरुत्थापनं मन्त्रेण कीर्तितम् ।
तत्सर्वं कर्मकाण्डं चाऽविचलां प्रतिमां तथा ॥ १ ॥
कथयामि हरिः प्राह देवायतनकाय यत् ।
ओं उत्तिष्ठ ब्रह्मणस्पते देवयंतस्त्वेमहे ॥ २ ॥
उपप्रयन्तु मरुतः सुदानव इन्द्र प्राशुर्भवासचा ।
इतिमन्त्रेण चोत्थाप्य रथे समुपवेशयेत् ॥ ३ ॥
ओं रथे तिष्ठन्नयति वाजिनः पुरो यत्र यत्र कामयते सुषारथिः ।
अभीशूनां महिमानं पनायतमनः पश्चादनुयच्छन्ति रश्मयः ॥ ४ ॥

इति रथे तु देवस्य पुरोभागे गुरुः स्वयम् ।
पृष्ठभागे यजमानो निषीदेत् सकुटुम्बकः ॥ ५ ॥
पार्श्वयोर्मूर्तिपाः रक्षार्थं च मंगलनिःस्वनैः ।
तूर्यघोषैश्च सौधस्य ग्रामस्य नगरस्य च ॥ ६ ॥
प्रदक्षिणं विधायैवाऽऽनीय प्रासादकं रथात् ।
अवतार्य मन्दिरद्वाराभिमुखं विधाय च ॥ ७ ॥
अर्घ्यं दत्वा ततः प्रासादके देवं निवेशयेत् ।
यजमानो गुरुर्देवं पिण्डिकायां निधापयेत् ॥ ८ ॥
सुमुहूर्ते सुलग्ने च शुभग्रहैः समीक्षिते ।
ईश्वरेशं भावयँश्च पद्मं श्वभ्रे निधाय च ॥ ९ ॥
यावद्धरणीवासश्च तावत्त्वं सुस्थिरो भव ।
इत्युक्त्वा शक्तिसहितं देवं दृढं सुलग्नयेत् ॥१०॥
विष्णोर्वामे महालक्ष्मीं स्थापयेन्न चलेद्यथा ।
विश्वतश्चेतिमन्त्रेण हस्तं देवस्य मूर्धनि ॥११॥
कृत्वा ध्यात्वा ततः प्राणप्रतिष्ठां सुचरेन्मखी ।
प्राणप्रतिष्ठामन्त्रस्य ब्रह्मविष्णुशिवर्षयः ॥१२॥
ऋग्यजुःसामछन्दांसि क्रियाप्राणस्तु देवता ।
आं बीजं क्रौं तथा शक्तिः प्रतिष्ठायां नियोजनम् ॥१३॥
ब्रह्मादिभ्यो नमो मूर्ध्नि ऋगादिभ्यो नमो मुखे ।
प्राणाय च नमो हृत्सु आं बीजाय गुह्ये नमः ॥१४॥
क्रौं शक्त्यै तु नमः पादयोश्च देहे नमो नमः ।
ततः सबीजान् न्यासाँश्च प्राणागमार्थमाचरेत् ॥१५॥
ओं कंखंगंघंङं आं पृथिव्यप्तेजोवाय्वा-
काशात्मने ओं हृदयाय नमः ।
ओं चंछंजंझंञं इं शब्दस्पर्शरूपरसगन्धात्मने
ईं शिरसि स्वाहा ॥१६॥
ओं टंठंडंढंणं ओं श्रोत्रत्वक्चक्षूरसनाघ्राणात्मने
अं शिखायै वषट् ।
ओं तंथंदंधंनं एं वाक्पाणिपादपायूप-
स्थात्मने ऐं कवचाय हुम् ॥१७॥
ओं पंफंबंभंमं ओं वचनादानविहरणो-
त्सर्गानन्दात्मने ओं नेत्रत्रयाय वौषट् ।
ओं यंरंलंवंशंषंसंहंळंक्षं अं मनोबुद्ध्य-
हंकारचित्तात्मने अः अस्त्राय फट् ॥१८॥

अथ देवं स्पृष्ट्वा—

ओंआंह्रींक्रौंयंरंलंवंशंषंसंहंसः देवस्य प्राण इह प्राणाः ।
ओंआंह्रींक्रौंयंरंलंवंशंषंसंहंसः देवस्य जीव इह स्थितः ॥१९॥

ओंआंह्रींक्रौंयंरंलंवंशंषंसंहंसः देवस्य सर्वेन्द्रियाणीह ।
ओंआंह्रींक्रौंयंरंलंवंशंषंसंहंसः देवस्य वाङ्मनश्चक्षुः-
श्रोत्रघ्राणप्राणाः इह तिष्ठन्तु स्वाहा ॥२०॥

अथाऽर्चाहृदि अंगुष्ठं दत्वा जपेत्—

अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाश्चरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥२१॥
प्रणवेन सन्निरुद्धय ध्यात्वा सजीवमेव च ।
ध्रुवाद्यौश्च गृणन् कर्णे जप्त्वा गायत्रिकां मनुम् ॥२२॥
पुरुषसूक्तेनोपस्थाय च नत्वा ततः परम् ।
पादौ नाभिं शिरः स्पृष्ट्वा इहैवैधीतित्रिर्जपेत् ॥२३॥
स्वागतं ते हरेकृष्ण स्थिरो भव शिवाय नः ।
यावद्वै मेदिनीचास्ते तावत्स्थेयं कृपालुना ॥२४॥
सर्वतेजोऽन्वितं शंखचक्रगदासमन्वितम् ।
चक्रिणं स्थापयाम्यत्र देवो भूत्वा परेश्वरम् ॥२५॥
पौरुषं सूक्तकं नाम मन्त्रान् जपेद् यथायथम् ।
येन रूपेण भगवन् व्याप्तं सर्वं चराचरम् ॥२६॥
तेन विशिष्टरूपेण अर्चायां निहितो भव ।
इत्युक्त्वा तत्परिवारदेवताः स्थापयेत् ततः ॥२७॥
पूर्वकुण्डे हृन्मन्त्रेण शिरोमन्त्रेण दक्षिणे ।
शिखामन्त्रेण पश्चे तु वर्ममन्त्रेण चोत्तरे ॥२८॥
नेत्रमन्त्रैर्गुरोः कुण्डे जुहुयादेकविंशतिम् ।
पूर्वकुण्डेऽस्त्रमन्त्रेण हुत्वा चायुधमन्त्रकैः ॥२९॥
हुत्वा च प्रार्थयेल्लोकरक्षार्थं सर्वदा वस ।
माभूत् प्रजाविरामोऽस्मिन् यजमानः समृध्ययतु ॥३०॥
राष्ट्रं सतां समृद्धं स्तात् अश्नातु सुखमक्षय्यम् ।
इति प्रार्थ्यांगदेवांश्च स्थापयेत्तत्तदालये ॥३१॥
अर्घ्यं पाद्यं चाचमनं दद्यादासनकं नमः ।
स्वाहा सम्पूज्य च पंञ्चामृतेन वारिणा ततः ॥३२॥
संस्नाप्य प्रजपेत् सूक्तं पौरुषं प्रार्थयेत् तथा ।
पादौ नाभिं शिरो वक्षः स्पृशेच्च मोक्षदो भव ॥३३॥
ज्ञानतोऽज्ञानतो न्यूनविधिः पूर्णोऽस्तु ते प्रभो ।
प्रसादेन हरेकृष्णाऽनादिकृष्णनरायण ॥३४॥
दद्याद् देवनाम नीराजयेद् वाद्यैः स्तुतिं चरेत् ।
नैमत्तिकाऽघनाशार्थं प्रायश्चित्तहवं चरेत् ॥३५॥
शमीपलाशतिलाद्यैरष्टोत्तरशतात्मकम् ।
आचार्याय दक्षिणां च धनगोरत्नभूगृहान् ॥३६॥
पुनर्होमं प्रकुर्याच्च निषिद्धागमशान्तये ।
ओं स्थैर्याय स्थिरो भव स्वाहा क्लसो भवात्र च ॥३७॥
अप्रमेयो विबोधश्च नित्यः सर्वगतो भव ।
सर्वशान्त्यर्थमेवात्र होमं चाष्टोत्तरं शतम् ॥३८॥
ओं प्रजापतये स्वाहा इदं प्रजापतये नमम ।
ओं अग्नये स्विष्टकृते स्वाहेदमग्नये स्विष्टकृते नमम ॥३९॥
हुत्वा संस्रवप्राशनमाचामं पात्रदानकम् ।
पूर्णं प्रजापतिदैवं विप्राय ते ददामि वै ॥४०॥
ब्रह्मग्रन्थिविमोकं च कुर्यात् सुमित्रिमन्त्रतः ।
ओं सुमित्रियान आप ओषधयः सन्त्विति ॥४१॥
पवित्राभ्यां प्रणीतेन जलेन यजमानकम् ।
शिरः संमृज्य चाग्नौ प्रक्षिप्य पवित्रके ततः ॥४२॥
दुर्मित्रीति गृणन् न्युब्जीकुर्यात् प्रणीतिकां खलु ।
ईशान्याम् बहिरुत्थाप्याज्येनाऽऽघार्यं च वै ततः ॥४३॥
हस्तेनैव च जुहुयान्मन्त्रं गृणन् पुनः पुनः ।
ओं देवागातु विदो गातुं वित्वागातुमित ॥४४॥
मनसस्पत इमं देवयक्षं स्वाहा वातेधाः स्वाहा ।
ततो देशं समयं चोच्चार्य ऋत्विज एव च ॥४५॥
स्वस्वकुण्डे प्रकुर्युश्च होमं पूर्णाहुतिप्रखम् ।
यजमानः सपत्नीको दक्षस्कन्धं स्पृशन् गुरौः ॥४६॥
ताम्बूलफलपूगीफलाक्षतघृतकानि च ।
श्रीफलं च स्रुवे कृत्वा जुहुयान्मन्त्रकैः सह ॥४७॥
ओं समुद्रादूर्मिर्मधुमाँ२उदारदुपांशुनासममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥४८॥
वयन्नाम प्रब्रवामा घृतस्यास्मिन् यज्ञे धारया मानमोभिः ।
उपब्रह्माश्शृणवच्छस्यमानं चतुःश्रृंगो वमीद् गौर एतत् ॥४९॥
त्रिधा हितं पणिभिर्गुह्यमानं गवि देवासो घृतमन्वविदन् ।
इन्द्रः एकः सूर्यं एकं जजान वेनादेकं स्वधया निष्टतक्षुः ॥५०॥
एता अर्षन्ति हृद्यात् समुद्राच्छतवज्रारिपुणा नावचक्षे ।
घृतस्य धारा अभि चाकशीमि
हिरण्ययोवेतसोमध्य आसाम् ॥५१॥
सम्यक् स्रवन्ति सरितोनधेना
अन्तर्हृदा मनसा पूयमानाः ।
एते अर्षन्त्यूर्मयो घृतस्य मृगा इव क्षिपणो रीषमाणाः ॥५२॥
सिन्धोरिव प्राध्वनेशूघनासो वातप्रमियः पतयन्ति यह्वाः ।
घृतस्य धारा अरुषोनवाजी
काष्ठाभिन्दन्नूर्मिभिःपिन्वमानाः ॥५३॥

अभिप्रवंतसमनेवयोषाः कल्याण्यः
स्मयमाना सो अग्निम् ।
घृतस्य धाराः समिधोनसंततजुषाणो
हर्य्यति जातवेदाः ॥५४॥
कन्या इव वहतु मे तवा उ अंज्यं जाना अभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो घृतस्य धारा अभितत्पवन्ते ॥५५॥
अभ्यर्षत सुष्टुतिंगव्यमाजिमस्मासुभद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो घृतस्य धारा मधुमत्पवन्ते ॥५६॥
ओं चितिं जुहोमि मनसा घृतेन यथा
देवा इहागमन्वीनहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि
विश्वकर्मणे विश्वाहादाभ्यः हविः ॥५७॥
सप्त ते अग्ने समिधः सप्तजिह्वाः
सप्तऋषयः सप्तधामप्रियाणि ।
सप्तहोत्राः सप्तधात्वा यजन्ति
सप्तयोनीरापृणस्वाघृतेन स्वाहा ॥५८॥
पुनस्त्वादित्या रुद्रा वसवःसमिन्धतां पुनर्ब्रह्माणो वसुनीथयज्ञैः ।
घृतेन त्वं तन्वन्वर्धयस्व सत्याः सन्तु यजमानस्य कामाः ॥५९॥
वसोः पवित्रमसि शतधारं
वसोः पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोःपवित्रेण
शतधारेण सुप्वाकामधुक्षः ॥६०॥
पूर्णादर्वि परापत सुपूर्णा पुनरापत ।
वस्नेवविक्रीणावहा इषमूर्ज्जं शतक्रतो स्वाहा ॥६१॥
इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः
शतक्रतवे अद्भ्यश्च नमम ।
इदं त्रिदेवेभ्य ईशेभ्योऽवतारेभ्यः
शक्तिभ्यः परब्रह्मणे स्वाहा नमम ॥६२॥
इति पूर्णाहुतिं कुर्यात् स्रुवस्थं च समर्पयेत् ।
ततस्त्र्यायुषकरणं न्यासेन विदधीत च ॥६३॥
त्र्यायुषं जमदग्नेस्तु ललाटे ओं नमो नमः ।
कश्यपस्य त्र्यायुषं च ग्रीवायां ओं नमो नमः ॥६४॥
यद्देवेषु त्र्यायुषं च बाहुमूले नमो नमः ।
तन्नोऽस्तु त्र्यायुषमिति हृदि कृष्णाय ते नमः ॥६५॥
एवं पूर्णाहुतिं हुत्वेशाने बलिं समर्पयेत् ।
शान्तिघटोदकं चाभिसिञ्चेत्तु यजमानके ॥६६॥
सकुटुम्बे वेदमन्त्रैः कुशदूर्वाऽऽम्रपल्लवैः ।
ओं आपो हिष्ठामयो भुवस्तान ऊर्ज्जे दधातन ॥६७॥
महेरणाय चक्षसे यजमानस्य शान्तये ।
यो वः शिवतमो रसः तस्य भाजयतेह नः ॥६८॥
उशतीरिव मातरः यजमानस्य ऋद्धये ।
तस्मा अरंगमामवो यस्य क्षयाय जिन्वथ ॥६९॥
आपो जनयथा च नः यजमानस्य तृप्तये ।
आरोग्याय रसधनाय महायुष्याय सन्तु नः ॥७०॥
भगप्रणेतर्भगसत्यराधो भगेमान्धियमुदवाददन्नः ।
भगप्रनो जनय गोभिरश्वैर्भगप्रनुभिर्नृवन्तः स्यामः ॥७१॥
इदमापः प्रवहतावद्यञ्चमलं च यत् ।
यच्चाभिद्रुद्रोहाऽनृतं यच्च शेपे अभीरुणम् ॥७२॥
आपो मा तस्मादेनसः पवमानश्च मुञ्चतु ।
ओं पुनन्तु मां देवजनाः पुनन्तु मनसा धियः ॥७३॥
पुनन्तु विश्वाभूतानि जातवेदः पुनीहिमाम् ।
आप्यायस्व समेतु मे विश्वतः सोमवृष्ण्यम् ॥७४॥
भवावाजस्य सङ्गथे यजमानाय वै भव ।
महर्द्धये प्रपौत्रादिवृद्धयेऽनुग्रहं वह ॥७५॥
ओं पयःपृथिव्यां पय ओषधीषु पयोदिव्यन्तरीक्षे पयोधाः ।
पयस्वतीः प्रदिशः सन्तु मह्यम् पायसन्नो गृहेष्वस्त्वरण्यम् ॥७६॥
ओं देवस्य त्वा सवितुः प्रसवेऽश्विनो
र्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यं तुर्य्यैत्रियेदधामि
बृहस्पतेष्ट्वा साम्राज्येनाभिषिंचामि ॥७७॥
ओं देवस्य त्वासवितुःप्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
सरस्वत्यै वाचो यं तुर्य्यैत्रेणाऽग्ने साम्राज्येनाभिञ्चामि ॥७८॥
ओं देवस्य त्वा सवितुः प्रसवेऽश्वि नोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अश्विनोर्भैषज्येन तेजसे ब्रह्मवर्चसायाभिषिञ्चामि ॥७९॥
सरस्वत्यै भैषज्येन वीर्यायान्नाद्यायाभिषिञ्चामि ।
इन्द्रस्येन्द्रियेण बलाय श्रियै यशसेऽभिषिञ्चामि ॥८०॥
पालाशं भवति तेन ब्रह्मणोऽभ्यभिषिञ्चति ।
ब्रह्मवै पालाशो ब्रह्मणैवेनमेतदभिषिञ्चति ॥८१॥
सर्वेषां वा एष वेनां रसो यत्साम
सर्वेषामेवैनमेतद्वेदानां रसेनाऽभिषिञ्चति ।
यं देवकल्पाञ्जुहोति प्राणा वै कल्पा
अमृतमुपवै प्राणा अमृतेनैवैनमेतदभिषिञ्चति ॥८२॥
दीर्घायुत्वाय बलाय वर्चसे सुप्रजास्त्वा
सहसा अथो जीव शरदः शतम् ।
द्यौः शान्तिरन्तरीक्षं शान्तिः पृथिवी
शान्तिरापः शान्तिरोषधयः शान्तिः ॥८३॥

वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः ।
सर्वं शान्तिः शान्तिरेव शान्तिः
सा मा शान्तिरेधि परब्रह्म शान्तिः प्रतिमाः
शान्तिर्ब्रह्मप्रियाः शान्तिरेव शान्तिः ॥८४॥
परब्रह्माऽक्षरंब्रह्म गोलोकः कृष्णराधिके ।
लक्ष्मीर्नारायणश्चैषशसृष्टिर्देवादयस्तथा ॥८५॥
जीवसृष्टिः शक्तयश्च देव्यः सत्यश्च साधवः ।
एते त्वामभिषिञ्चन्तु स्वस्तिं शान्तिं ददत्वपि ॥८६॥
यजमानस्तत आचार्याय दद्याद्धि दक्षिणाम् ।
ग्रामं गोमण्डलं भूमिं गजाश्वादिकवाहनम् ॥८७॥
दासान् दासीर्वितानादि यानाम्बरविभूषणम् ।
स्वर्णरूप्यादिकं ददामि ते यज्ञान्तदक्षिणाः ॥८८॥
गोपुच्छे यवतुलसीतिलकुशयुग्जलेन वै ।
प्रार्थयेच्च क्रतो विप्र शाश्वतस्वर्गदो भवान् ॥८९॥
अद्य मे सफलं द्रव्यं जन्माद्यं सम्पदादिकम् ।
यथाशक्ति प्रदत्तं च प्रसन्नो भव पुण्यद ॥९०॥
ज्ञानतोऽज्ञानतो वापि यद्यन्न्यूनं कृतं मया ।
तत्सर्वं पूर्णमेवाऽस्तु त्वत्प्रसादात् क्षमस्व मे ॥९१॥
आचार्यश्च वदेद्वक्तं पुरुषोत्तमवाञ्छया ।
न्यूनं सम्पूर्णतां यातं सर्वं पूर्णफलप्रदम् ॥९२॥
द्रव्यहीनं क्रियाहीनं विधिहीनं प्रमादजम् ।
तत्सर्वं पूर्णमेवाऽस्तु प्रसादाच्छ्रीहरेस्तु ते ॥९३॥
ओं स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ।
स्वस्ति नस्तार्क्ष्योऽरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥९४॥
ओं श्रीः वर्चस्वमायुष्यमारोग्यमा-
विधात् शोभमानं महीयते ।
धान्यं धनं पशुं बहुपुत्रलाभं
शतसम्बत्सरं दीर्घमायुः ॥९५॥
पुनस्त्वादित्या रुद्रा वसवः समिन्धतां
पुनर्ब्रह्माणो वसुनीथ यज्ञैः ।
घृतेन त्वं तन्वं वर्धयस्व सत्याः
सन्तु यजमानस्य कामाः ॥९६॥
मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः ।
शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयस्तव ॥९७॥
देवान् क्षमापयेच्चापि प्रसन्नाः सन्तु सर्वदा ।
अग्निं सम्पूज्य च विसर्जयेत्क्षमावचोऽर्पितम् ॥९८॥
गच्छध्वं भगवन्नग्ने स्वस्थाने कुण्डमध्यतः ।
हुतमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे ॥९९॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर ।
यत्र ब्रह्मादयो देवास्तत्र याहि हुताशन ॥१००॥
यान्तु देवगणाः सर्वे पूजामादाय मामकीम् ।
इष्टकामसमृद्ध्यर्थं पुनरागमनाय च ॥१०१॥
अक्षतान् प्रक्षिपेत्सर्वस्थापनेषु सुमाञ्जलिम् ।
प्रतिष्ठोत्सव एवाऽयं श्रद्धाद्रव्याद्यपूर्णकः ॥१०२॥
विप्रविष्णुप्रसादाच्च विधिः पूर्णतमोऽस्तु मे ।
ब्राह्मणास्ते सर्वयज्ञो विधिपूर्णोऽस्तु सर्वथा ॥१०३॥
अच्छिद्रश्च वदेयुश्च गृह्णीयुर्भूयसीं ततः ।
भोजनं चापि गृह्णीयुर्वदेयुश्च पुनस्ततः ॥१०४॥
यस्य स्मृत्या च नामोक्त्या तपःपूजाक्रियादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे हरिं प्रभुम् ॥१०५॥
प्रमादात्कुर्वतां कर्म प्रच्यवेताऽध्वरेषु यत् ।
श्रीहरेः स्मरणात्तद्वै सम्पूर्णं स्यात्तथाऽस्तु च ॥१०६॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च ।
हूयते च पुनर्द्वाभ्यां तस्मै यज्ञात्मने नमः ॥१०७॥
महाभोज्यं कारयित्वा महादानानि चाऽऽर्प्य च ।
महोत्सवं परं कृत्वा यजमानस्तु भोजनम् ॥१०८॥
कुर्यात् सर्वान् भोजयित्वा उपदाश्चार्पयेत् ततः ।
अवभृथं प्रकुर्याच्च सरित्यब्धौ सरोवरे ॥१०९॥
सर्वे देवाः समायान्ति तीर्थान्यवभृथे तदा ।
सर्वदुरीतनाशार्थं कार्यं यथा चावभृथं ततः ॥११०॥
इत्येवं राधिके प्रोक्तः प्रतिष्ठाविधिरेष ते ।
उक्तो यथा भगवता दैवायतनकाय यः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने देवस्य पिण्डिकायां सिंहासने स्थापनं, प्राणप्रतिष्ठान्यासाः, जीवावाहनम्, आरार्त्रिकम्, होमः, पूर्णाहुतिहवनम्, आशीर्वादशान्तिस्वस्तिवाचः देवानां विदायः, पूर्णतावाचोऽवभृथं चेतिनिरूपणनामा नवपञ्चाशदधिकशततमोऽध्यायः ॥ १५९ ॥

श्रीकृष्ण उवाच—

अथ वै राधिके वच्मि यदुक्तं परमात्मना ।
स्वर्णकलशारोहस्य ध्वजस्य विधानकम् ॥ १ ॥
आचार्यो मण्डपस्यैवोत्तरभागे विरच्य च ।
स्वस्तिकमण्डलं ऋत्विग्यजमानादिभिर्युतः ॥ २ ॥
यत्र कुड्यां कलशानां कृतं घटनं शिल्पिभिः ।
तत्र गत्वा पञ्चघटैः संस्नाप्य कलशोत्तमम् ॥ ३ ॥

मनोजूतिरितिमन्त्रैः प्रतिष्ठाप्य बलिं तथा ।
दत्वा तु लोकपालेभ्य आचम्याऽभ्युक्ष्य तैलकैः ॥ ४॥
चन्दनादिभिरभ्यर्च्य त्रिसूत्र्याऽऽवेष्ट्य वै रथे ।
आरोप्य शान्तिपाठाद्यैः स्नानमण्डपमानयेत् ॥ ५॥
स्वस्तिके भद्रसंज्ञे चासने संस्थाप्य तत्पुरः ।
पुण्याहं वाचयेत् घृतं घृतेत्यभ्युज्य वै घृतैः ॥ ६॥
उद्वर्त्य यवमसूरहरिद्रापिष्टकेन च ।
उष्णोदकेन प्रक्षाल्योपलिप्य वाल्मीकीमृदा ॥ ७॥
गन्धोदकेन संस्नाप्य चतुर्भिश्च घटैस्तथा ।
शुद्धोदकेन संस्नाप्याऽर्चयित्वा गन्धपुष्पकैः ॥ ८॥
वस्त्रैराच्छाद्य च शान्तिपाठमन्त्रान् समुच्चरेत् ।
स्वस्तिमन्त्रेण चोत्थाय प्रादक्षिण्येन मण्डपम् ॥ ९॥
आनीय पश्चिमद्वारे प्रविश्य देवसन्निधौ ।
भद्रासने विनिवेश्याऽभ्यर्च्य गन्धादिभिस्ततः ॥१०॥
भक्ष्यभोज्याद्यैरापूर्य पठित्वा विश्वतः श्रुतिम् ।
संकलीकृत्य चाचार्यः स्वकुण्डे तु पृथक् पृथक् ॥११॥
मधुक्षीराज्यदधिभिरष्टोत्तरशतं हवम् ।
कृत्वा च शान्तिकलशे निक्षिप्य संस्रवं ततः ॥१२॥
तेनोदकेन क्रमशः पादनाभिहृदक्षिकम् ।
स्पृशेत् पुरुषसूक्तं च विन्यस्य कलशे ततः ॥१३॥
सम्पूज्य कलशं दत्वा बलिं प्रासादमेव च ।
आरुह्य गन्धसलिलैः प्रक्षाल्यांऽगेषु वै ततः ॥१४॥
कृत्वा न्यासान् तूर्यघोषैः प्रासादमस्तके च तम् ।
कलशं तु समानीय क्षणं विश्रम्य वै ततः ॥१५॥
द्वादशाऽक्षरमन्त्रेण सुमुहूर्ते स्थलेऽर्पयेत् ।
ओं आजिघ्रकलशं मह्या त्वा विशन्त्विन्दवः ॥१६॥
ओं पुनरूर्जानिवर्तस्वशानः सहस्रं धुक्ष्वोरु-
धारापयस्वतीनपुनर्मा विशताद्रयिः ।
इतिमन्त्रेण प्रतिष्ठाप्य वस्त्रेणावेष्ट्याऽ-
स्त्रेण हुंफट् स्वाहेति समुच्चार्य नमेत्ततः ॥१७॥
चक्रं हिरण्मयं पद्मं शूलं शस्त्रं च विन्यसेत् ।
सुस्थिरीकृत्य वै शिल्पी संस्नाप्य वारिणा तथा ॥१८॥
गन्धपुष्पैः पूजयित्वाऽवतीर्याऽधः प्रणम्य च ।
वस्त्रालंकाररौप्यादिदानं दद्याद् यथाबलम् ॥१९॥
भोजनादि कारयेच्च दीनानाथसतां तथा ।
विप्राचार्यकुटुम्बानां साध्वीनां ब्रह्मचारिणाम् ॥२०॥
अथ कलशसान्निध्ये मानस्तंभोऽतिदार्ढ्यवान् ।
तत्र च ध्वजस्तंभोऽपि प्रतिष्ठेयो विधानतः ॥२१॥
वृक्षसारमयश्चाश्मसारजो लोहजोऽपि वा ।
शींशपास्ताम्रपत्राढ्यो मानस्तंभो मतः खलु ॥२२॥
वर्तुलः शृंगवद्धीऽर्घोऽधिको वा च यथोचितः ।
शिल्पमानेन वै कार्यो दण्डश्च कलशो ध्वजः ॥२३॥
नवत्रिंशच्छताध्याये मानमेषां निरूपितम् ।
अत्र तु पूजनमात्रं फलोद्देशश्च सम्मतः ॥२४॥
मण्डपस्य ध्वजमन्त्रा, बोद्धव्याश्चात्र पूजने ।
पूजनं हवनं चापि तत्रत्यविधिना मतम् ॥२५॥
ध्वजो वै परमेशस्य चिह्नं तु सार्वदैवतम् ।
यद् दृष्ट्वा दुष्टसत्त्वानां भवेच्छासनवर्तिता ॥२६॥
सतां भवेद् भक्तिवृत्तिरासुराणां भयन्तथा ।
ध्वजहीनं मन्दिरं न कर्तव्यं तु क्वचिद् भुवि ॥२७॥
तन्तुवर्षसहस्राणि स्वर्गे दाता महीयते ।
ध्वजधूननशस्त्रेण दातुः पापं विनश्यति ॥२८॥
यत्र ग्रामे नगरे च राष्ट्रे राज्ये ध्वजोऽस्ति च ।
नाऽकालमृत्युस्तत्राऽस्ति नाऽलक्ष्मीः पापकृत्स्वपि ॥२९॥
नोपसर्गभयं तत्र न रोगा न ह्युपद्रवाः ।
विपरीतानि नो तत्र सुभिक्षं सस्यसम्पदः ॥३०॥
स्वकालवर्षी पर्जन्यः पयस्विन्यः पयोभृतः ।
ध्वजवन्दनकर्तारः पुण्यवन्तो भवन्ति च ॥३१॥
ध्वजस्य दर्शनं सर्वमंगलं कलशस्य च ।
शिखरस्यापि च तथा मंगलं पुण्यदायकम् ॥३२॥
पापिनां पापशान्तिश्च ध्वजादिदर्शनाद् भवेत् ।
प्रासादप्रतिमावेदीकुण्डध्वजघटेषु वै ॥३३॥
यावन्तः सन्ति अणवस्तावद्वर्षसहस्रकम् ।
स्वर्गे च शाश्वते स्वर्गे मोक्षे मोदन्त एव च ॥३४॥
यजमानादयः सर्वे देवस्यानुग्रहादिति ।
चलमूर्तेः प्रतिष्ठां च वच्मि संक्षेपतो यथा ॥३५॥
शुचौ देशे मण्डपं च कृत्वा कुण्डं च वेदिकाम् ।
प्रतिष्ठादिवसे मूर्तिं चानीय मण्डपे ततः ॥३६॥
निधाय चासने प्राणानायम्योल्लिख्य वै दिनम् ।
संकल्प्य च प्रतिष्ठार्थं गणेशं पूजयेत्ततः ॥३७॥
पुण्याहवाचनं मातृकार्चनं कारयेत्तथा ।
नान्दीश्राद्धं विधायाऽथ गुरुं वृत्वा च ऋत्विजः ॥३८॥
चतुरो वा पूजयेच्च मण्डपस्थापनं गुरुः ।
अग्निस्थापनकं वास्तुपूजनं ग्रहयज्ञकम् ॥३९॥
सर्वतोभद्रके ब्रह्मादिकानावाहयेत्ततः ।
पूजयेत् स्थापयेद् दैवत्य नैवारं चरुं तदा ॥४०॥

श्रपयित्वाऽऽज्यभागान्ते ग्रहहोमं विधाय च ।
पालाशादिसमिद्भिश्च प्रत्येकं शतमष्टकम् ॥४१॥
प्रतिदैवतमेवापि लोकपालादिमन्त्रकैः ।
व्याहृतिभिर्जुहुयाद्वा चाऽऽज्यहोमं तथा चरेत् ॥४२॥
स्थापितानां तु देवानां समित्तिलाज्यकाहुतीः ।
दश दश तथा स्विष्टकृतं हुत्वाऽष्टकं शतम् ॥४३॥
प्रधानदेवतामन्त्रैर्जुहुयाच्च नमेत् प्रभुम् ।
स्वागतं सर्वदेवेश कुर्मस्तेऽत्रेति वै वदेत् ॥४४॥
उत्तिष्ठेतिसुमन्त्रैश्चोत्थाप्य वेद्यां निधाय च ।
पञ्चगव्यैश्चामृतैः पंचभिः संस्नाप्य मन्त्रकैः ॥४५॥
घृताभ्यंगोद्वर्तनादि कलशैः स्नपनादि च ।
कृत्वाऽभिषिच्य तं पीठे ह्युपावेश्य समन्ततः ॥४६॥
जलकुंभानवस्थाप्य क्षिप्त्वा गन्धसुमाऽक्षतान् ।
प्रथमे कुंभके सप्तमृदोऽन्ये पल्लवान् शुभान् ॥४७॥
तृतीये सप्तधान्यानि कुशांश्चाथ चतुर्थके ।
शान्त्युदकं पञ्चरत्नं पञ्चमे तु फलानि च ॥४८॥
प्रवणोदकं पुष्पाणि क्षिपेत् षष्ठे यवान् तथा ।
सप्तमे तु क्षिपेत् सम्पातोदकं चाष्टमे तु वै ॥४९॥
सर्वौषधीः सुनिक्षिप्य आपोहिष्ठेतिमन्त्रकैः ।
हिरण्यवर्णामन्त्रैश्च पवमानेन चापि च ॥५०॥
संस्नाप्य वाससी चोपवीतं दत्वा प्रपूजयेत् ।
गन्धपुष्पैर्धूपदीपैर्नीराज्य पिष्टदीपकैः ॥५१॥
स्वर्णपात्रे तु मध्वाज्यं धृत्वा स्वर्णशलाकया ।
मन्त्रानुच्चार्याऽथ नेत्रे लिखेद् दक्षिणसव्यके ॥५२॥
ओं चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याऽग्नेः ।
ओं तेजोऽसि शुक्रमस्यमृतमसि धामनामासि
प्रियं देवानामनाधृष्टं देवयजनमसि ॥५३॥
अञ्जन्ति त्वामध्वरमितिमन्त्रेण मूर्तिमञ्जयेत् ।
पुनर्मधुघृतेनापि शर्करयाऽपि चाञ्जयेत् ॥५४॥
देवस्य त्वा सवितुश्चमन्त्रेणाञ्जनमञ्जयेत् ।
भक्ष्यभोज्यादर्शकांश्च दर्शयेत् न विलोकयेत् ॥५५॥
दक्षिणां च प्रदायैव द्विजादिभ्यः स्तुवीत च ।
वंशपात्रे पञ्चवर्णान्वितान्नं न्यस्य वह्निना ॥५६॥
देवं नीराजयेदन्नं रुद्राय तु चतुष्पथे ।
दद्याद् ओं नमो रुद्राय स्वाहा कर्माऽस्तु वै शिवम् ॥५७॥
भूतेभ्यश्च नमोऽश्वत्थपर्णे समर्प्य वै बलिम् ।
आचम्य मण्डलदेवान् प्रपूज्य मध्यमण्डले ॥५८॥
प्रतिष्ठितो भवेत्युक्त्वा देवं निवेश्य पूजयेत् ।
देवानां नामभिः कुण्डे तिलाज्यैर्जुहुयाद् दश ॥५९॥
पुष्पाञ्जलिं प्रदायैव नत्वा मण्डलकोत्तरात् ।
स्वस्तिके मञ्चके शय्यां कृत्वोत्तिष्ठेतिमन्त्रकैः ॥६०॥
उपावेश्य तु शय्यायां सहस्रसूक्तमागृणन् ।
न्यासान् कुर्यात् नमो ब्रह्मरन्ध्रे तु पुरुषात्मने ॥६१॥
प्राणात्मने नमो मुखे कण्ठे प्रकृतिरूपिणे ।
बुद्धितत्त्वाय हृदयेऽहंकारायोदरे नमः ॥६२॥
मनस्तत्त्वाय गुप्तादौ चित्ताय पादयोर्नमः ।
रसतत्त्वाय बस्तौ च गन्धतत्त्वाय वै नसि ॥६३॥
शब्दतत्त्वाय वै कर्णे स्पर्शतत्त्वाय वर्ष्मणि ।
रूपतत्त्वाय नेत्रे च रसतत्त्वाय रासने ॥६४॥
वाक्तत्त्वाय नमो वाचि पाणितत्त्वाय हस्तयोः ।
पादतत्त्वाय चरणे पायुतत्त्वाय पायुके ॥६५॥
उपस्थाय नमश्चोपस्थके पृथ्व्यै तु पादयोः ।
अप्तत्त्वाय नमो बस्तौ तेजस्तत्त्वाय वै हृदि ॥६६॥
वायुतत्त्वाय वै घ्राणे व्योमतत्त्वाय चाम्बरे ।
गुणतत्त्वाय वै मूर्तौ करणेभ्यो नमोनमः ॥६७॥
पौरुषेण च सूक्तेन कृत्वा न्यासाँस्ततो वदेत् ।
सुखशायी भवेत्येव शय्यायां स्वापयेत् प्रभुम् ॥६८॥
संपूज्याऽधिवासयेच्च देवोपहारमर्पयेत् ।
ब्रह्मणे तत्र सर्वान्नं घृतान्नं वज्रिणे जलम् ॥६९॥
आज्यान्नमग्नये माषान्नं च यमाय चार्पयेत् ।
निर्ऋतये कृष्णव्रीह्यन्नं सघृतं समर्पयेत् ॥७०॥
वरुणाय नवनीतौदनं वायवे यवौदनम् ।
प्रैयंगवं कुबेराय ईशानाय तु पायसम् ॥७१॥
सर्वेभ्यः पायसं दद्यात् नैवारं चरुमित्यपि ।
स्थापयित्वा मण्डलस्य देवताभ्योऽर्पयेद् बलिम् ॥७२॥
रात्रिं नयेत्ततः प्रातश्चोत्थाय मूलमन्त्रकैः ।
श्रपयित्वा चरुं घृतेनाभिघार्योद्ध्युक्शतम् ॥७३॥
मूलमन्त्रेण वै हुत्वा देवनामभिरित्यपि ।
स्वाहाऽग्नये च सोमाय धन्वन्तरिस्वरूपिणे ॥७४॥
कुह्वै स्वाहाऽनुमत्यै च प्रजानां पतये स्वाहा ।
परमेष्ठिस्वरूपाय ब्रह्मणे स्वाहाऽग्नये ॥७५॥
सोमाय अग्नये स्वाहा स्वाहा अन्नाय अग्नये ।
अग्नयेऽन्नपतये स्वाहा प्रजापतये च स्वाहा ॥७६॥
विश्वदेवताभ्यः स्वाहा सर्वभूतेभ्यश्च स्वाहा ।
भूर्भुवः स्वश्चाग्नये स्विष्टकृते स्वाहा नमम ॥७७॥

सूर्योदये गुरुर्वेद्यां देवं चाभिमुखं तदा ।
विधाय रत्नपुष्पादिमूलफलौषधीस्तथा ॥७८॥
दर्शयित्वा ताम्रपात्रे शान्तिजलं प्रगृह्य च ।
प्रधानदेवमन्त्रेण दशवारं प्रमन्त्रयेत् ॥७९॥
अभिषिच्य देवमूर्ध्नि ओं उत्तिष्ठेत्युत्थापयेत् ।
विश्वतश्चक्षुरित्यादि जपेन्नमेत् पुनः पुनः ॥८०॥
ब्रह्मविष्णुमहेशेभ्यो दिक्पालेभ्यो नमोनमः ।
वसुभ्यश्च नमो रुद्रादित्येभ्यश्च नमोनमः ॥८१॥
अश्विभ्यां च मरुद्भ्यश्च कुबेराय नमोनमः ।
महानदीभ्योऽग्नीषोमाभ्यां द्यावापृथ्वीभ्यां नमः ॥८२॥
इन्द्राग्निभ्यां धन्वन्तरये सर्वेशाय च नमः ।
ब्रह्मणे विश्वदेवेभ्यो नमश्च परब्रह्मणे ॥८३॥
जप्त्वैवं यजमानं चाभिषिच्य देवतां स्मरेत् ।
प्रतिष्ठिताय देवाय दत्त्वा पुष्पाञ्जलिं ततः ॥८४॥
पुरुषसूक्तगायत्र्या व्याहृतिभिश्च मन्त्रकैः ।
देवं तु प्रतिमायां वै प्रतिष्ठाप्य ततःपरम् ॥८५॥
प्राणप्रतिष्ठां कुर्याच्च तद्यथा राधिके शृणु ।
अस्य प्राणप्रतिष्ठाख्यमन्त्रस्य ऋषयस्त्रयः ॥८६॥
देवा वेदास्त्रयश्छन्दांसि क्रियात्मवपुस्तथा ।
प्राणाख्या देवता आं बीजं क्रौं शक्तिर्नियोजनम् ॥८७॥
प्राणप्रतिष्ठायां तथाहि ऋषिभ्यो मस्तके नमः ।
छन्दोभ्यश्चानने देवतायै तु हृदये नमः ॥८८॥
आं बीजाय नमो गुह्ये क्रौं शक्त्यै पादयोर्नमः ।
ओं कंखंगंघंङं आं पञ्चभ्यो भूतेभ्य आं हृदे नमः ॥८९॥
ओं चंछंजंझंञं ईं तन्मात्रेभ्यो नमो ईं च के स्वाहा ।
ओं टंठंडंढंणं ओं ज्ञानकृद्भ्यो नमो ओं शिखायै वौषट् ॥९०॥
ओं तंथंदंधंनं एं कर्मकृद्भ्यो नमो एं कवचाय हुम् ।
ओं पंफंबंभंमं औं कर्मभ्यो नमो औं नेत्रत्रयाय वौषट् ॥९१॥
ओं यंरंलंवंशंषंसंहंलंक्षं ओं आन्तरेभ्यो
नमो अः अस्त्राय फट् ।
एवमात्मनि देवे च न्यासान् कृत्वा
स्पृष्ट्वा देवं ततो जपेत् ॥९२॥
ओं आं ह्रीं क्रौं यंरंलंवंशंषंसंहंसः
देवस्य प्राणा इह प्राणाः ।
ओं आं ह्रीं क्रौं यंरंलंवंशंषंहंसः
देवस्य जीव इह स्थितः ॥९३॥
ओं आं ह्रीं क्रौं यंरंलंवंशंषंसंहंसः
देवस्य सर्वेन्द्रियाणि ।
ओं आं ह्रीं क्रौं यंरंलंवंशंषंसंहंसः देवस्यान्तः-
करणानि प्राणा इह स्थिताः ॥९४॥
इहागत्य स्वस्तये च चिरं तिष्ठतु वै स्वाहा ।
हृद्यंगुष्ठेन वै स्पृष्ट्वा प्रतिमाया जपेद् यथा ॥९५॥
अस्यै प्राणाः प्रतिष्ठन्तु अस्यै प्राणाश्चरन्तु च ।
अस्यै देवत्वमर्चायै मामहेति च कश्चन ॥९६॥
सन्निरुद्ध्य प्रणवेन ध्यात्वा सजीवमेव च ।
ओं ध्रुवा द्यौः ऋचं जप्त्वा गायत्रीं कर्णके मनुम् ॥९७॥
पादनाभिशिरांस्येव स्पृष्ट्वा पौरुषसूक्तकैः ।
स्वागतं परमेशाऽत्र कूर्मश्चिरं स्थिरो भव ॥९८॥
यावच्चन्द्रावनिसूर्यास्तिष्ठन्त्यप्रतिघातिनः ।
तावत् त्वयाऽत्र देवेश स्थेयं भक्तानुकम्पया ॥९९॥
पौरुषेण तु सूक्तेन षोडशोपसुवस्तुभिः ।
आर्च्य कंकणं विसृज्य मूर्तौ भूषायुधानि च ॥१००॥
वाहनं परिवारं च ध्यात्वा मुद्रां प्रदर्श्य च ।
संपूज्य मूलमन्त्रेण जपित्वाष्टोत्तरं शतम् ॥१०१॥
स्तुत्वा नत्वाऽऽचम्य स्विष्टकृत्पूर्णाहुतिकान्तकम् ।
कर्मसमाप्य गोदानं दक्षिणां सम्प्रदाय च ॥१०२॥
आरार्त्रिकोत्सवं कृत्वा नैवेद्यान्ते च भोजनम् ।
कारयित्वा जनान् कृत्वा स्वयं परिहरेत् क्रियाम् ॥१०३॥
एवं चलप्रतिष्ठां वै कारयेद् चलमाधवे ।
इत्येवं भगवानाह देवायतनकाय वै ॥१०४॥
जीर्णरंगादिनोद्धारे विधिः संक्षेपतो मतः ।
दक्षिणस्यां तु वेशान्यां पश्चिमद्वारकं शुभम् ॥१०५॥
एकतोरणकं कृत्वा मण्डपं मध्यके ततः ।
वर्तुलं वा चतुरस्त्रां वेदीं कृत्वा तु पश्चिमे ॥१०६॥
वास्तु पीठं चोत्तरे तु वालुकास्थण्डिलं तथा ।
देशकालौ प्रसंकीर्त्य जीर्णदोषविशुद्धये ॥१०७॥
उद्धारनिमित्तकर्म करोमीति विचिन्तयेत् ।
गणेशस्यार्चनं स्वस्तिवाचनं मातृकार्चनम् ॥१०८॥
नान्दीश्राद्धं गुरुं वृत्वाऽर्चयित्वा ताँस्ततः परम् ।
मण्डपस्य प्रतिष्ठां च वास्तुपूजां तथा ततः ॥१०९॥
सर्वतोभद्रके देवान् न्यस्य पीठे तदासनम् ।
सम्पूज्यैहि देवदेव व्यापकेश्वर ते नमः ॥११०॥

हृदयाय नमः स्वाहा शिरसे शिखायै वषट् ।
कवचाय हुँ अस्त्राय फट् व्यापकशार्ङ्गिणे ॥१११॥
मूलमन्त्रेणाऽर्चयेच्च जपेदष्टोत्तरं शतम् ।
अग्निं संस्थाप्याज्यभागान्तकं हुत्वाऽर्पयेद् बलिम् ॥११२॥
जीर्णं देवं प्रणवेन सम्पूज्य प्रार्थयेत्ततः ।
जीर्णं भग्न देवदेव जीर्णत्वक् जीर्णमूर्तिक ॥११३॥
जीर्णांगं प्रोद्धराम्यत्र क्षमां कुरु कृपां कुरु ।
यायास्त्वं सम्मतं स्थानं पार्श्वेमूर्तौ च वाऽक्षरे ॥११४॥
जीर्णोद्धारोत्तरं पुनश्चागमनाय प्रयाहि वै ।
आरात्रिकं भोजनं च पूजनं जलपानकम् ॥११५॥
सर्वं नीत्वा प्रवाह्यन्यत्र स्थले चानुकम्पया ।
स्वेष्टस्थानं याहि विष्णो सर्वदेवान्वितोऽथवा ॥११६॥
इत्युक्त्वा चार्पयेद् विधायाञ्जलिं कुसुमाक्षतैः ।
पुनः प्राणप्रतिष्ठादि कृत्वा संपूजयेत्ततः ॥११७॥
भोजयेद् ब्राह्मणादींश्च जीर्णसंस्कारकर्मसु ।
भुक्तिं मुक्तिमवाप्नोति देवालयाभिवृद्धिकृत् ॥११८॥
इत्येवं राधिकेऽनादिकृष्णनारायणो हरिः ।
देवायतनकायाह मयोदितं च ते तथा ॥११९॥
एतस्य श्रवणात्पाठात्प्रासादनिर्मितेः फलम् ।
उद्धारस्य कृतोश्चापि प्रतिष्ठायाः फलं लभेत् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कलशारोहणमानस्तंभध्वजारोपणं चलमूर्तिप्रतिष्ठाविधिः जीर्णोद्धारश्चेत्यादिनिरूपणनामा षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

श्रीकृष्ण उवाच—

राधिके दिव्यभक्तः स देवायतनको मुनिः ।
श्रुत्वाऽऽश्चर्यभृतः कृष्णं नारायणं पुपूज ह ॥ १ ॥
आरात्रिकं परं कृत्वा प्रेममग्नोऽतिसिद्धिमान् ।
अनादिश्रीकृष्णनारायणेच्छया तदा स्वयम् ॥ २ ॥
दिव्यप्रासादरूपोऽभूत् सहस्रकलशान्वितः ।
सर्वलक्षणसम्पन्नः सर्वांगपरिपूरितः ॥ ३ ॥
सर्वोपस्थापनयुक्तः सेवायां मूर्तिमानपि ।
व्यतिरिकेणापि चास्ते मुक्तरूपधरोऽपि सन् ॥ ४ ॥
प्रासादः सोऽभवत् ख्यातो देवाद्यैश्च प्रपूजितः ।
इन्द्रो विलोक्य तत्तुल्यं कारयितुं मनोऽकरोत् ॥ ५ ॥
विश्वकर्माणमाहूय दर्शयामास तत्कृतिम् ।
आज्ञां ददौ ततोऽमरावत्यां कर्तुं सुमन्दिरम् ॥ ६ ॥
विश्वकर्मा समभ्यस्य कुंकुमाऽक्षरभूस्थले ।
ततः स्वर्गं ययौ श्रृंगं सहस्रकलशं व्यधात् ॥ ७ ॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
पत्नीषट्कसहितं स्थापयामास महोत्सवैः ॥ ८ ॥
अथ प्रवृत्ताः प्रासादाः सर्वलोकेषु वै ततः ।
सर्वत्राऽऽध्यात्मिको देवायनो देवोऽस्ति तेषु वै ॥ ९ ॥
एवंदिव्यं मन्दिरं तु द्रष्टुमायान्ति मानवाः ।
सुराः पातालसंस्थाश्च सत्यलोकनिवासिनः ॥१०॥
कुंकुमवापिकाक्षेत्रं दृष्ट्वा मन्दिरशोभितम् ।
प्रमोदन्ते नरा नार्यो विश्राम्यन्ति बृहत्सुखे ॥११॥
दर्शनीयं मन्दिरं तु श्रुत्वा कपर्दिसंघतः ।
आसमुद्रात् समायान्ति जना द्रष्टुं समुत्सुकाः ॥१२॥
धनमेदो धीवरोऽपि प्रतीचिवार्धितीरगः ।
श्रुत्वा कुटुम्बसहितो द्रष्टुं गृहाद् विनिर्ययौ ॥१३॥
वत्रापथं शुभं दृष्ट्वा तुरीदेवीं ययौ पथि ।
वृक्षच्छायाघटामध्ये स्थितां मूर्तिमयीं शुभाम् ॥१४॥
जीवन्तिकानदीतीरे प्रासादे संस्थितां सतीम् ।
आम्राणां वनमध्यस्थां काष्ठहारादिसेविताम् ॥१५॥
आश्रयदां वनिनां तां शान्तिदां वनवासिनीम् ।
विलोक्य गजपृष्ठस्थां चतुर्भुजां हरिप्रियाम् ॥१६॥
लक्ष्म्यंशरूपां सत्त्वाढ्यां फलपुष्पादिपूजिताम् ।
नेमे गत्वाऽन्तिके तस्थौ धनमेदोऽतिभावतः ॥१७॥
सस्नौ नद्या हृदे चाम्रवृक्षस्याऽधो भुवस्तले ।
सामग्रीर्यात्रिकीः सर्वा निधाय च ततः परम् ॥१८॥
समादाय जलं शीतं पुष्पाणि चाम्पकानि च ।
अमृतस्य फलान्युत्तमानि पक्वानि तौलसीम् ॥१९॥
ययौ लक्ष्मीं तुरीनाम्नीमर्चयितुं हि मन्दिरे ।
कुटुम्बेन तु तद्देव्याः सन्निधौ प्रणनाम सः ॥२०॥
स्तुतिं चकार विधिना वन्यरक्षणकारिणीम् ।
पुपूज परया प्रीत्या फलपुष्पजलादिभिः ॥२१॥
अहो मातश्च हे मातर्महालक्ष्मि महासति ।
वने दत्तं मया नीतं गृहाणाऽऽर्घ्यं नमोस्तु ते ॥२२॥
प्रसन्ना भव यात्रार्थे प्रज्वालय च कल्मषम् ।
धीवराणां पावनी त्वं समुद्धर हरिप्रिये ॥२३॥
न जानाम्यर्चनं जात्या निकृष्टोऽशुद्ध एव यत् ।
हृदयं तेऽर्पितं शुद्धं मत्वा गृहाण चामृतम् ॥२४॥
बुद्धिं देहि तथा भक्तिं मुक्तिं देहि मदर्हिकाम् ।
परिवारसहितस्य मह्यं श्रेयः प्रदेहि च ॥२५॥

इत्युक्त्वा च मुहुर्नत्वा मार्जयामास मन्दिरम् ।
शुष्कपत्राणि निष्कास्य धूल्यादि चापहृत्य च ॥२६॥
जलेन क्षालयामास मन्दिरं तुरिकां तथा ।
स्नपयामास सलिलैः प्रदक्षिणां चकार सः ॥२७॥
पत्रपुष्पाणि चादाय नूतनानि बहून्यपि ।
तोरणं मालिकां चापि क्लृप्त्वा ददौ समर्हणे ॥२८॥
रात्रिमुवास तत्रैवाश्रयं प्रवीक्ष्य शान्तिदम् ।
फलादिवन्यभोज्यं च दृष्ट्वोवास दिनान्तरे ॥२९॥
तृतीयेऽपि दिने तस्थौ विश्रान्तिमाप भूयसीम् ।
नित्यं स्वगृहवत् सर्वे देवीकार्ये सुपूजनम् ॥३०॥
संशोधनं सेवनादि करोति भावतो वने ।
रात्रौ कुर्वन्ति भजनं कुटुम्बिनो हि कण्ठतः ॥३१॥
वह्निं प्रकाशयित्वैव तापं शैत्यनिवृत्तये ।
गृह्णन्त्यपि च तद्देव्या आगारे मिलिताश्च ते ॥३२॥
इत्येवं राधिके रात्रिं विनिर्याप्य दिनान्तरे ।
पुष्पाणि विविधान्येव समादायाऽम्बराणि च ॥३३॥
पुष्पाणामेव संसाध्य लक्ष्म्यै समर्पयन्ति ते ।
मुकुटं कर्णफुल्लानि चावतंसान् सुकञ्चुकीम् ॥३४॥
शाटीं च घर्घरीं मालां गुच्छं च रशनां तथा ।
पादुके झुल्लरीं चेति कृत्वा समर्पयन्ति ते ॥३५॥
सुगन्धि मधु मिष्टं चानीय वृक्षसुसंस्थितम् ।
समर्पयन्ति देव्यै च भोजनं सुरसान् बहून् ॥३६॥
चन्दनस्य शुभं काष्ठं समाहृत्य वनान्तरात् ।
धूपं कुर्वन्ति गन्धाढ्यं सेवन्ते स्मेति भावतः ॥३७॥
भजनं श्रीहरे कृष्ण लक्ष्मि मातर्नमोऽस्तु ते ।
एवं कुर्वन्ति सततं वनमध्ये तुरीगृहे ॥३८॥
तुर्यावस्थात्मिका लक्ष्मीरदृश्याऽपि तदर्हणाम् ।
समग्रहीत् प्रसन्नाऽभूत् स्वभावसेवया सती ॥३९॥
मूर्तौ स्थिताऽपि जग्राहाऽमृतं मधु फलानि च ।
पपौ तु सलिलं शीतं दधार मालिकाश्च ताः ॥४०॥
पौष्पाम्बराणि जगृहे धूपं जग्राह भावतः ।
वने सेवां भक्तकृतां सर्वां जग्राह मूर्तिगा ॥४१॥
एवं कुटुम्बसहितो धनमेदोऽपि धीवरः ।
योगक्षेमौ वने लेभे तीर्थयात्राप्रसंगतः ॥४२॥
निर्मलान्तःकरणः स पञ्चदशदिनानि वै ।
उवास मन्दिरे तत्र वने तुर्यान्तिके मुदा ॥४३॥
नित्यपूजादिसम्पत्त्या पुण्यं चावाप भूरि च ।
पावित्र्यं प्राप बहुधा लक्ष्मीदेवीप्रसादतः ॥४४॥
पौषशुक्लस्य पूर्णायां रात्रौ चन्द्रे शिरोगते ।
कीर्तनं प्रचकाराऽसौ मृदंगेन कुटुम्बिभिः ॥४५॥
शीतकान्तिसुधावल्ये वनवृक्षादिशोभिते ।
निर्मले रजनीभागे शान्ते राजसभावने ॥४६॥
गीतिं चकार पत्न्या च पुत्रीभिः पुत्रकैः सह ।
प्रत्यक्षं मधुरं श्रुत्वा साक्षात् तुरी बभूव ह ॥४७॥
रूपरूपानुशोभाढ्यावयवांऽगातिसुन्दरी ।
प्रसन्नवदना हस्ते कमलं बिभ्रती सती ॥४८॥
मणिस्वर्णविभूषाढ्या दिव्याम्बरादिधारिणी ।
कोटिशारदपूर्णेन्दुकान्त्यतिकान्तिभासुरा ॥४९॥
श्वेतगजस्य पृष्ठे सा निषण्णा च मनोहरा ।
वरदानं गृहाणाऽत्र प्रसन्नाऽस्मीत्युवाच तम् ॥५०॥
भक्त त्वया वने मेऽत्र मन्दिरे वसतिः कृता ।
सेवा बहुप्रकारेण कृता नैजगृहादिवत् ॥५१॥
वरं वरय भद्रं ते यथेष्टं वद चार्पये ।
एकवारं गृहस्यापि मार्जनेन ममात्र च ॥५२॥
दारिद्र्यं नाशमायाति स्वर्गे दिव्यमवाप्नुयात् ।
एकवारं प्रदीपेन ममालये तु वै चिरम् ॥५३॥
फलं सूर्यस्य लोकाप्तिः सहस्रयुगजा भवेत् ।
एकवारं तुलस्याश्चार्पणेन मम मस्तके ॥५४॥
चक्रवर्तित्वमेवाऽस्मै ददामि सम्पदश्चिरम् ।
पुष्पहाराद्यर्पणेन ददामि स्वर्णभूषणम् ॥५५॥
एकवारं फलानामर्पणेन प्रददामि वै ।
शाश्वतं चामृतं स्वर्गमैन्द्रं पदं समुज्ज्वलम् ॥५६॥
एकवारं जलदानाद् ददामि वारुणं पदम् ।
आत्मार्पणेन सर्वस्वं ददामि धाम शाश्वतम् ॥५७॥
पतिर्मे भगवान् साक्षादनादिः श्रीनरायणः ।
तत्समृद्धिं प्रददाम्यस्मै मद्भक्ताय महात्मने ॥५८॥
मय्यर्पितं प्रगृह्णामि समर्प्य पतये ततः ।
तत्प्रसादं सदा चाऽद्मि तस्य सेवापरायणा ॥५९॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
स्मृद्धः प्रसन्नो भगवान् जायते मम सेवया ॥६०॥
अहं प्रिया यथा तस्य यथा च माणिकी प्रिया ।
तथा प्रियोऽपि मे भक्तस्तस्मै ददात्यलं पतिः ॥६१॥
धनमेद पवित्रोऽसि प्रसन्नाऽहं यतस्त्वयि ।
वृणु यत्ते मानसेऽस्ति ददामि पतिवाञ्छया ॥६२॥
इत्युक्तो धनमेदः स राधिके क्षणमान्तरे ।
आश्चर्यं परमं प्राप्य सुखं प्राप्य मुदं पराम् ॥६३॥

दास्यं कुटुम्बयुक्तस्य वरयामास मातरि ।
न सम्पदं न च राज्यं नैश्वर्यं समियेष सः ॥६४॥
धन्योऽसि धनमेद ! त्वं दास्ये सर्वं प्रवर्तते ।
दास्यं तु दुर्लभं लोके निश्छद्मं स्वामिनः कृते ॥६५॥
अभिलषन्ति दास्यं वै भृत्याः संसारकोटिषु ।
स्वार्थदासा ह्यसंख्याता वर्तन्ते भुवनत्रये ॥६६॥
हार्ददासा दुर्लभा वै हार्ददासोऽत्र मे भव ।
हार्ददास्ये वसन्त्येव सिद्धयैश्वर्याणि सर्वदा ॥६७॥
छद्मदास्ये क्लेशभूता वर्तन्ते रक्तहारिणः ।
तस्मात् कर्तव्यमेवात्र दास्यं हृदयरंजितम् ॥६८॥
यथा दासी भवाम्यत्र नारायणस्य पद्मजा ।
यथा दासी भवत्यत्र शिवस्य पार्वती सती ॥६९॥
सूर्यदासी प्रभा चास्ते दासी पद्मावती हरेः ।
यथा च माणिकी दासी राधा दासी हरेर्जया ॥७०॥
यथा च मंजुला हंसा दासी च सुगुणा हरेः ।
ललिता चाऽक्षरब्रह्म गरुडो दास इत्यपि ॥७१॥
तथा दास्यं कुरु देवे यथा च हनुमान् कपिः ।
यथा हेमन्तको दासो वसन्तो दास इत्यपि ॥७२॥
कल्पे कल्पे भवन्त्येव दासा ह्येते हरेस्तथा ।
लभ दास्यं मयि मे च पत्यौ श्रीपुरुषोत्तमे ॥७३॥
अनादिश्रीकृष्णनारायणः श्रीकंभरासुतः ।
मानवेन तु रूपेण वर्तते यत्र गच्छसि ॥७४॥
कुंकुमवापिकाक्षेत्रे लोमशाश्रमसन्निधौ ।
देवायतनसौधे श्रीकान्तस्तत्र विराजते ॥७५॥
मादृश्यः कमलास्तत्र राजन्ते कोटिशोऽपि च ।
सर्ववीर्यधरस्याऽस्य सेवयाऽऽनन्दसंभृताः ॥७६॥
याहि भक्त शुभं क्षेत्रं कुंकुमवापिकाभिधम् ।
कान्तं सेवय सर्वं ते दास्यं फलर्द्धिमद्भवेत् ॥७७॥
गृहाण वनपुष्पाणि फलानि विविधानि च ।
अर्पय पतये तत्र नमस्कारांश्च मे वद ॥७८॥
अहं पश्चिमभागेऽत्र क्षेत्रसीम्नि तदाज्ञया ।
तुरीरूपेण तिष्ठामि क्षेत्रपा कमला स्वयम् ॥७९॥
अदृश्येन स्वरूपेण कृष्णं सेवे हि नित्यदा ।
याहि शीघ्रं मानसेष्टं तव तत्र भविष्यति ॥८०॥
इत्युक्त्वा सा तुरीलक्ष्मीर्मूर्तौ विलीनतां गता ।
धनमेदो हर्षमत्तो माघमासे तु कृष्णके ॥८१॥
पक्षे कुंकुमवाप्यां सकुटुम्बश्च मुदा ययौ ।
वीक्ष्य वीक्ष्य मुदं प्राप ह्युद्यानानि वनानि च ॥८२॥
लोमशस्याश्रमं वीक्ष्य वीक्ष्याकाशगतालयम् ।
ब्रह्मप्रियाः समालोक्य विलोक्याऽश्वसरोवरम् ॥८३॥
सौधानि बहुलक्षानि विलोक्य देवतालयान् ।
वीक्ष्य तीर्थानि दिव्यानि धनमेदो जहर्ष ह ॥८४॥
स्थले स्थले चकाराऽसौ दण्डवत् सकुटुम्बकः ।
लक्ष्मीदर्शितकान्तं च द्रष्टुं महालयं ययौ ॥८५॥
यत्राऽनादिः कृष्णनारायणो विराजते प्रभुः ।
कोटिसूर्याभमुकुटाभूषणादिप्रतेजितः ॥८६॥
रूपानुरूपावयवो भगवान् कमलादिभिः ।
सेवितः श्रीहरिः साक्षाद् देवमुक्तादिसेवितः ॥८७॥
नेमे च दण्डवत् कृष्णं ददौ तुरीप्रदोपदाः ।
पुपूज च स्वयं पुष्पैः फलैर्भावैर्हृदंगमैः ॥८८॥
पादोदकं पपौ मूर्तिं हृदये स दधार च ।
प्राप्य प्रासादिकं चापि सत्कारं स्वागतादिकम् ॥८९॥
भोजनं चापि संप्राप्य विश्रान्तिं स चकार ह ।
सायं तीर्थानि कर्तुं च ययावश्वसरस्तटे ॥९०॥
निशायां च तटे न्यग्रोधस्य तले ह्युवास सः ।
जातिस्वभावभावेन तीरे वासमरोचयत् ॥९१॥
रात्रौ स भजनं चक्रे नामसंकीर्तनं हरेः ।
प्रातर्जातिस्वभावेन वीक्ष्य मत्स्यांस्तु रोहितान् ॥९२॥
चक्रचिह्नसुशोभाढ्यान् धर्तुं मनोऽकरोत्तदा ।
तीरं गत्वा सूत्ररश्मिं मुमोचाऽप्सु सकण्डकाम् ॥९३॥
मत्स्यरूपधरः कृष्णनारायणः स्वयं हरिः ।
भूत्वाऽऽनने च बडिशं गृहीत्वा तद्वशं ययौ ॥९४॥
धनमेदेन सम्प्राप्तो मत्स्यो विशालतां ययौ ।
शंखचक्रगदाधारी बभूव पद्मवान् क्षणात् ॥९५॥
महद्रूपं विलोक्याऽसौ लज्जां भक्तो ययौ तदा ।
हरिः प्राह स्वभावं त्वं त्यज मां भज धीवर ॥९६॥
लक्ष्म्यास्त्वाशीर्वचनैश्च प्राप्तोऽहं ते कृपालवात् ।
दास्यं गृहाण मे याहि लोमशं मनुमावह ॥९७॥
वैष्णवो भव तिष्ठाऽत्र कुरु मे सेवनं तथा ।
यथा त्वं दृष्टवानत्र मत्स्यरूपं चतुर्भुजम् ॥९८॥
मत्स्यतीर्थमिदं मेऽस्ति मत्स्यावताररूपवान् ।
त्वदर्थं ते दृष्टिपथं समागतोऽस्मि तं भज ॥९९॥
धीवरा मत्स्यदायादा मत्स्यस्नेहा भवन्ति वै ।
तवाऽहं मत्स्यरूपेण दास्ये मोक्षं भजस्व माम् ॥१००॥
मत्स्यमूर्तिं विधायाऽत्र वटाधस्ताद् भजस्व माम् ।
तीर्थे मत्स्यावतारस्य ममैतत्पापनाशनम् ॥१०१॥

अश्वपट्टसरस्तीरे स्वर्गमोक्षप्रदं शुभम् ।
धीवराणां विशेषेण भविष्यति प्रभुक्तिदम् ॥१०२॥
इत्युक्त्वा राधिके कृष्णनारायणस्तिरोऽभवत् ।
धनमेदो ययौ शीघ्रं लोमशस्याश्रमं ततः ॥१०३॥
प्राप्तो मन्त्रं तौलसीं च स्रजं वैष्णवदासताम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥१०४॥
इतिप्राप्य सरस्तीरे समाययौ कुटुम्बयुक् ।
वटाधस्तात् पर्णकुटीं कृत्वोवास निरन्तरम् ॥१०५॥
मत्स्यमूर्तिं ततः कृत्वा भेजे कृष्णनरायणम् ।
स्वल्पकालेन वै राधे मुक्तिं चाप तु शाश्वतीम् ॥१०६॥
दिव्यपार्षदवर्यैश्च नीयमानः कुटुम्बयुक् ।
ययावक्षरलोकं स तीर्थे मात्स्येऽश्वसारसे ॥१०७॥
एवं ये तत्र वै गत्वा करिष्यन्त्याप्लवादिकम् ।
धीवरा अपि तत्तुल्या मोक्षं यास्यन्ति राधिके ॥१०८॥
माघाऽमायां मया तत्र मत्स्यरूपं प्रकाशितम् ।
पठनाच्छ्रवणाच्चास्य मत्स्यतीर्थफलं भवेत् ॥१०९॥
भुक्तिं मुक्तिं लभेन्मर्त्यः स्वर्गं पुत्रं धनादिकम् ।
यद्यदिष्टतमं सर्वं लभेत् कृष्णकृपालवात् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने तुरीदेव्या आशीर्वादेन धनमेदधीवरस्य यात्रालोः कुंकुमवाप्यां मत्स्यावतारदर्शनोत्तरं मुक्तिर्मत्स्यतीर्थे चेति-निरूपणनामैकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥

श्रीकृष्ण उवाच—

माघपूर्णातिथौ राधे चमत्कारोऽपरोऽभवत् ।
कथयामि समासेन शृणु तं ज्ञानदायकम् ॥ १ ॥
पाञ्चाले पश्चिमे देशे विष्टिजातिसमग्रणीः ।
आसीद्भक्तः शतोढुश्च नाम्ना परमवैष्णवः ॥ २ ॥
दासवर्गोऽस्य वशगः शिबिकावाहकोऽभवत् ।
राज्ञां च श्रेष्ठिनां यानवाहकत्वं चरन्ति ते ॥३ ॥
विष्टयो दूरदेशं च यात्रालुभिः सहैव तु ।
गच्छन्ति विष्टिकर्माणः सोमक्षेत्रं तथाऽपरम् ॥ ४ ॥
गोपक्षेत्रं चमत्कारपुरं सिद्धपुरं तथा ।
माथुरं क्षेत्रमेवापि क्षेत्रं च पुष्पकरं तथा ॥ ५ ॥
वाराणसीं नर्मदां च गोदावरीं च गोमतीम् ।
स्वर्णरेखां तथा चाश्वपट्टतीर्थं प्रयान्ति च ॥ ६ ॥
एकदा स शतोढुश्च कथां शुश्राव वैष्णवीम् ।
संहितां पुत्रहीनस्य गतिर्नास्तीति सर्वथा ॥ ७ ॥
अपुत्रस्य शतोढोश्च हृदये सा कथा स्थिता ।
पुत्रार्थं प्रैरयत् सोऽपि मौनमादाय नित्यशः ॥ ८ ॥
मालां जप्त्वा नदीतीरे शमीस्थां भुवनेश्वरीम् ।
पुपूजाऽऽराधयामास रात्रौ रात्रौ तदैकलः ॥ ९ ॥
स्वग्रामनिकटे नित्यं शमीवृक्षतले स्थितः ।
धूपं दीपं शमीपत्रं नैवेद्यं चणकादिकम् ॥१०॥
समर्प्यैवं बलिं मालावृत्तिं करोति वै शतम् ।
भुवनेशि भुवनेशि भुवनेशीति संजपन् ॥११॥
अन्ते देहि च पुत्रं मे प्रार्थ्य गृहं प्रयाति सः ।
एवं वै वर्षपर्यन्तं प्रचकार तपः शुभम् ॥१२॥
वर्षायां शिशिरे तापे शैत्याधिक्येऽपि सर्वथा ।
व्रतभंगं न चाऽवाप श्रद्धया तीव्रया तथा ॥१३॥
तितिक्षया गुणेनापि व्रतं पूर्णं चकार सः ।
वर्षान्ते भुवनेशी सा नवरात्रान्तिमे दिने ॥१४॥
साक्षाद्बभूव भक्तस्य प्रसन्नाऽस्मीत्युवाच तम् ।
भक्तोऽपि वीक्ष्य तेजोऽन्तमूर्तिं दिव्यां सुरूपिणीम् ॥१५॥
त्र्यक्षां शूलधरां श्वेतां प्रसन्नवदनां सतीम् ।
सिंहस्थां वरदानार्थं कृतोर्ध्वहस्तकां शुभाम् ॥१६॥
प्रणनाम जयशब्दं जगाद च ननर्त च ।
मातर्मनोरथश्चाद्य फलितो मे सुपुष्पितः ॥१७॥
या साक्षाज्जगतां धात्री मम दृष्टिमुपागता ।
स्वल्पेनैव हि तपसा फलं लब्धं मया बहु ॥१८॥
किं करोमि च पूजादि चात्मनाऽर्पितवाहनम् ।
पादयोस्ते पतितोऽस्मि मानसं निहितं त्वयि ॥१९॥
यासां प्रजानां जननी रक्षयित्री च पोषिका ।
वर्तते सर्वथा तासां दुःखं सर्वं विनश्यति ॥२०॥
मम दुःखं गतं सर्वं विष्टिजातीयकस्य वै ।
इत्युक्त्वा प्रददौ श्रेष्ठं बलिं पूजां तथोपदाः ॥२१॥
प्रसन्ना भुवनेशी सा जगाद प्रणतं जनम् ।
वरं वृणु द्रुतं भक्त किं ते मनसि वर्तते ॥२२॥
शीघ्रं ददामि वरदा नाऽदेयं विद्यते तव ।
इत्युक्तः सः शतोढुश्च देवीप्रभावधर्षितः ॥२३॥
मौनं धृत्वा कराभ्यां च चेष्टया बालकं शुभम् ।
वक्त्रे कुक्षौ करौ कृत्वा मौनिचिह्नेन पुत्रकम् ॥२४॥
देवी तथाऽस्त्विति प्राह मूकः पुत्रो भविष्यति ।
इत्युक्त्वा तु तिरोभावं प्राप्ता शतोढुरित्यपि ॥२५॥
शमीं प्रणम्य देवीं च कृत्वा प्रदक्षिणं मुहुः ।
क्षमां प्रार्थ्याऽन्तिमां पूजां कृत्वा गृहं ययौ ततः ॥२६॥

पत्न्यै प्राह कथां सर्वां मूकपुत्राभिदायिनीम् ।
सापि श्रुत्वा पुत्रमोदं मूकाऽमोदं जगाम ह ॥२७॥
अथ वर्षान्तरे जातो बालो देवीप्रतापतः ।
ववृधे चन्द्रसदृशो मूको वाणीविवर्जितः ॥२८॥
संस्कृतो बहुधा चेष्टाविज्ञानैः प्रतिबोधितः ।
जनयामास हर्षं स पित्रोर्वंशसुतन्तुकः ॥२९॥
वाणीशून्यत्वमेवात्र शोकस्थलं हि वर्तते ।
पिता विष्टिस्वरूपेणैकदा श्रेष्ठिप्रवाहणः ॥३०॥
अश्वपट्टसरस्तीर्थयात्रार्थं गतवाँस्तदा ।
कथां शुश्राव च रात्रौ लोमशस्याश्रमे शुभाम् ॥३१॥
लक्ष्मीनारायणसंहितायाः सर्वार्थसाधिकाम् ।
चक्षुर्ददाति देवेशश्चान्धाय सुप्रसादितः ॥३२॥
कर्णौ ददाति भगवान् बधिराय प्रराधितः ।
पङ्गुं पादौ समर्प्यैव दधाति सुखिनं हरिः ॥३३॥
वृकणं करौ प्रदायैव करोति सुखिनं श्रितम् ।
कुष्ठिनं कुष्ठरहितं करोत्येव जनार्दनः ॥३४॥
दरिद्रं सम्पदा युक्तं करोत्येव श्रियाः पतिः ।
सर्वकामान् हरिः सोऽयं स्वामिकृष्णनरायणः ॥३५॥
पूरयत्येव भक्तस्य गोपालकम्भरासुतः ।
तीर्थे वासः सदा कृत्वा यश्चैनं पूजयेद्धरिम् ॥३६॥
तस्य सर्वं भवेत् सिद्धं प्रयत्नो निष्फलो नहि ।
इत्येवं स शतोढुश्च श्रुत्वा कथां सरस्तटे ॥३७॥
सुष्वाप च तदा रात्रौ निद्रायां बालकृष्णकः ।
भगवान् दिव्यरूपः स शतोढोः सन्निधौ तदा ॥३८॥
आगत्याह च ते भक्त चिन्ता दूरे भविष्यति ।
वोढुर्नाम्ना तव पुत्रश्चात्रागत्य च तप्स्यति ॥३९॥
तस्य वाणी स्वयं चात्र सांकुरा संभविष्यति ।
याहि गृहं ततः पुत्रं नीत्वा चाश्वसरोवरम् ॥४०॥
समायाहि ततस्तेऽत्र मानसं फलवद् यतः ।
इत्युक्त्वा भगवान् कृष्णनारायणस्तिरोऽभवत् ॥४१॥
प्रबुद्धश्च शतोढुस्तन्महाश्चर्यं ह्यचिन्तयत् ।
सत्यं क्षेत्रफलं जातं तीर्थागमनमात्रतः ॥४२॥
यथा दृष्टं मया स्वप्ने तथा करोमि वै शुभम् ।
इत्येवं च विनिर्णीय कृत्वा तीर्थं तु सार्थकैः ॥४३॥
श्रेष्ठिनः शिबिकास्थाँश्च प्रापय्य तद्गृहाणि च ।
गृहं गत्वा निजां भार्यां प्राह सर्वं यथायथम् ॥४४॥
पुत्रस्य शारदासिद्ध्यै चाश्वपट्टसरोवरे ।
वासो योग्यो मतो मे श्रीकृष्णनारायणाग्रहात् ॥४५॥
इत्युक्त्वा सम्मतिं प्राप्य पत्न्याः पुत्रं निनाय सः ।
शतोढुश्च सह पत्न्या त्वश्वपट्टसरोवरम् ॥४६॥
वोढुस्तत्र महामूको जन्ममूको निशामुखे ।
सुप्तः स्वप्नं ददर्शाऽथ तपसा वाक्प्रकाशताम् ॥४७॥
चेष्टया पितरौ प्रातर्विज्ञाय स्वाप्नवैभवम् ।
वोढुः स्वयं चकारैव तपस्तापसिनः क्रमात् ॥४८॥
प्रथमं स ययौ तत्र लोमशस्य महाश्रमम् ।
मन्त्रं जग्राह विधिना पञ्चगव्यस्य चादनम् ॥४९॥
चकार देहशुद्धिं च दधार तौलसीं स्रजम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥५०॥
सम्प्राप्तं तं मनुं शश्वज्जपन् श्रीकृष्णवल्लभम् ।
द्रष्टुं देवालयं गत्वा नत्वा श्रीपुरुषोत्तमम् ॥५१॥
पीत्वा पादोदकं तस्य सरस्तटमुपाययौ ।
प्रणम्य चरणौ पित्रोश्चामलकीद्रुमाश्रये ॥५२॥
भूतले स निषद्यैव कुशासने तु मालया ।
जपं कुर्वन् हरिं ध्यायन् श्रीमत्कृष्णनरायणम् ॥५३॥
वृत्तीः सर्वाश्चान्तरे च कृत्वा तपसि संस्थितः ।
वागर्थं स तपस्तेपे चाश्वपट्टसरस्तटे ॥५४॥
मूर्तिं विधाय वै स्वल्पां बालकृष्णस्य सैकतीम् ।
सर्वोपचारकैस्तस्याः पूजां चक्रे त्रिकालिकीम् ॥५५॥
मालाजपं चकारापि वाणीं देहीति मानसम् ।
तुलसीवनतो नित्यं समाहृत्य दलायुतम् ॥५६॥
अर्पयति स्म नित्यं वै बालकृष्णाय पूजने ।
स्वयं तुलसीपत्राणि भुंक्ते मासं निनाय सः ॥५७॥
मासे द्वितीयके वन्यफलाहारो बभूव सः ।
तृतीये मासि भाजानां पत्रादः स बभूव च ॥५८॥
चतुर्थे कन्दमूलानामाहारेण स वर्तते ।
पञ्चमे जलमात्रेण षष्ठे वायुप्रजीवनः ॥५९॥
सप्तमे फेनपश्चापि बभूव जलशायनः ।
जले कृत्वा विचारं स नश्यामि वा वदामि वा ॥६०॥
अर्पयामि हरयेऽत्र चात्मानं मोक्षणाय तु ।
इत्येवं स विनिर्धार्य जलवासोऽभवत्ततः ॥६१॥
नामरटणमात्रं वै जानात्येव न चेतरत् ।
मानसं रटणं सर्वं प्राणान्तं च तपः परम् ॥६२॥
विदित्वा बालकृष्णोऽयं तुतोष बालकाय सः ।
वोढुश्चाऽयं शारदार्थं तपस्तपति दारुणम् ॥६३॥
मदर्थं त्यक्तसर्वस्वो मरणाय कृतादरः ।
तोषणीयो मया भक्तो वाणीदानेन वै भुवि ॥६४॥

शरणागतरक्षोऽहं भक्तत्राता भवामि च ।
कृपया साध्य एवाऽहं कृपया तोषयामि तम् ॥६५॥
इति विचार्य भगवान् भक्तानुग्रहसंभृतः ।
अनादिश्रीकृष्णनारायणः कपिलरूपधृक् ॥६६॥
साधुवेषः पिङ्गजटः स्कन्धे धृतोपवीतकः ।
करे कमण्डलुं बिभ्रन् कुक्षौ चाधारपावटीम् ॥६७॥
मृगचर्म दधन् मालां स्फाटिकीं जोलिकां दधन् ।
युवा तेजःप्रवाहैश्च संशोभद्विग्रहः शुभः ॥६८॥
भस्मच्छन्नशरीरश्च कौपीनाम्बरभूषितः ।
सुरूपः शान्तमूर्तिश्च हृदये स्वर्णरेखकः ॥६९॥
मत्स्यशूलधनुःस्वस्तिध्वजचिह्नितहस्तकः ।
वामसक्थिन शुभ्रलक्ष्मीचन्द्रचिह्नविराजितः ॥७०॥
साधुवेषोऽपि भगवान् दिव्यसिद्धिविराजितः ।
अकस्माद् व्योममार्गेण तेजोमण्डलमध्यतः ॥७१॥
अवाततार सलिले भक्ताग्रे सुस्थिरोऽभवत् ।
अनाधारो जलाधारो भगवान् वोढुमेव तम् ॥७२॥
दक्षहस्तेन चोन्नीत्वा सरस्तटे निधाय च ।
नेत्रे प्रमृज्य चोद्घाट्य दर्शनं प्रददौ निजम् ॥७३॥
प्राह कस्माज्जले त्वं वै वर्तसेऽत्र किमिच्छसि ।
वद दास्ये समग्रं ते तपसाऽस्मि प्रतोषितः ॥७४॥
अनन्यस्य भवाम्येव चात्मसमर्पकोऽप्यहम् ।
अनन्यो मे भवाञ्जातस्तवाऽनन्यो भवाम्यहम् ॥७५॥
वद शीघ्रं वरं याचस्वात्र ददामि चेप्सितम् ।
इत्युक्त्वा विररामाऽसौ भगवान् करुणानिधिः ॥७६॥
वोढुः स्वास्थ्यं समापन्नो भानयुक् श्रीहरिं तदा ।
साधुवेषं वरदं च रम्यरूपं विलोक्य वै ॥७७॥
अतिहर्षातिमग्नश्चोत्थाय पपात पादयोः ।
हरेश्चरणतलयोश्चावलेहं चकार सः ॥७८॥
हृदये भगवत्पादौ न्यधात् क्षणं सुखं ययौ ।
मस्तके करकमले न्यधात् चकार दण्डवत् ॥७९॥
नेत्राश्रूणि मुमोचापि स्नेहोद्भरातिविह्वलः ।
रोमाञ्चितां तदा प्राप्तोऽचेष्टयत् परमेश्वरम् ॥८०॥
मानसेनैव भावेन जिह्वां प्रदर्श्य चेष्टया ।
नास्ति वाणी कृपासिन्धो वाणीं देहि कृपां कुरु ॥८१॥
इति सर्वे चेष्टयैव ज्ञापयामास माधवम् ।
पिङ्गलं कपिलं कृष्णं दर्शयामास जिह्विकाम् ॥८२॥
भगवानपि दीनस्योद्धारकर्ता करेण ताम् ।
प्रहसन् दर्शितां जिह्वां पस्पर्शाऽङ्गुलिभिर्मुदा ॥८३॥

समाकृष्य मनाक् तत्र कमण्डलोर्जलं ददौ ।
श्वेतवर्णं सर्वविद्याश्रितं लीनं च तत्र तत् ॥८४॥
बभूव यत्र सलिले साक्षात् सरस्वती ह्यभूत् ।
ब्रह्मज्ञानं ह्यभूद्यत्र सांख्यविज्ञानमित्यपि ॥८५॥
वेदानां सर्वविज्ञानं तत्त्वदृष्टिरभूत्तथा ।
एवं जलमिषेणैव तत्त्वप्रदर्शितां ददौ ॥८६॥
तावद्वाणी देववाणी गीर्वाणवाक् सुसंस्कृता ।
प्रादुरभूत् तदा वोढुजिह्वायां कृपया हरेः ॥८७॥
स्तुतिं चकार विविधां वोढुर्वेदमयीं हरेः ।
"बृहद्ब्रह्मण्ययनवान् दिव्यविप्रासनश्च यः ॥८८॥
ईशानीभिर्जुष्टपदः श्रीशोऽवत्वखिलास्पदः ।
प्राविर्भावांऽशदिव्यात्माऽसंख्यधर्माभिरर्चितः ॥८९॥
ईशकोटिरथो जुष्टो भगी मे भरणं कुरु ।
वेदहृद् वाङ्प्रविस्तारः शारदाधिपतिः पुमान् ॥९०॥
सरस्वतीपतिः पाताऽरणं मे कुरु पिंगलः ।
इन्द्रेन्द्रोऽगोचरो वाचां देहभेदात्मदर्शकः ॥९१॥
प्राकृतांऽशपृथग्रूपः कपिलो मां सदाऽवतु ।
यः क्रतुर्जातवेदाश्च सिद्धर्षिब्रह्मपादपः ॥९२॥
सतीर्थ्यश्चात्मनां स्तम्भः साम्भः कृष्णः प्ररक्षतु ।
पृथुभूतानि सूक्ष्माणि रश्मयश्च प्रवाहणम् ॥९३॥
स्फुर्तयश्चापूरकाणि यच्छ्रयाणि स माऽवतु ।
यज्जीवं चांकुरात् सर्वं यदात्मकं विशिष्यते ॥९४॥
यत्प्रत्नं सक्रियं चैतज्जायते बुभ्रकं पुनः ।
तस्मै देवाय दिव्याय विधेम हविषा हृदा ॥९५॥
राधयेयं च तं कृष्णनारायणं तु कंभृतम् ।
काम्भरेयं कापिलाख्यं गुरुं शमस्तु तत्पदे" ॥९६॥
इतिस्तुत्वा राधिके स पपात कृष्णपादयोः ।
कपिलाख्यहरिस्तत्र शीघ्रमन्तरधीयत ॥९७॥
वोढुर्विज्ञानमापन्नो दिव्यर्षिश्चाभवत्ततः ।
सांख्ययोगादितत्त्वानां व्याख्याता पण्डितः शुभिः ॥९८॥
अनादिश्रीकृष्णनारायणं कपिलरूपिणम् ।
यत्र तीर्थे ददर्शाऽसौ कपिलं तीर्थमेव तत् ॥९९॥
अश्वपट्टसरस्येव जातं विद्याप्रदं शुभम् ।
तत्र वोढुर्ददौ लोकेभ्यो विज्ञानं तु तात्त्विकम् ॥१००॥
वोढ्वाश्रमे हरेर्मूर्तिं कापिलीं सुन्दरांगिनीम् ।
सरस्तीरे प्रतिष्ठाप्य वोढुः पुपूज नित्यशः ॥१०१॥
मन्दिरं रमणीयं वै कापिलेयं ततोऽभवत् ।
माघपूर्णादिने वोढुर्शनं वाणीं च दर्शनम् ॥१०२॥

अवाप श्रीहरेस्तत्र चिरं वासं चकार सः ।
ततो मोक्षं गतो वोढुः राधिके युगपर्यये ॥१०३॥
तत्र स्नात्वा कथां श्रुत्वा ब्रह्मज्ञानमवाप्नुयात् ।
ऐहिकीं तु परां सिद्धिं चाप्नुयान्नहि संशयः ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने शिबिकावाहशतोद्धुतपस्यया लब्धस्य मूकपुत्रस्य वोढोश्चाश्वपट्टसरसि तपसा कपिलरूपेण श्रीहरेर्दर्शनं सांख्यज्ञानवाणीसिद्धिप्राप्तिश्चेति-निरूपणनामा द्वाषष्ट्यधिकशततमोऽध्यायः ॥ १६२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चान्यं चमत्कारं हरेः शुभम् ।
अनादिश्रीकृष्णनारायणस्य प्रवदामि ते ॥ १ ॥
कुंकुमवापिकाक्षेत्रे पावने काम्यके पुरे ।
कर्षुको भगवद्भक्तो द्युविश्रामाऽभिधोऽभवत् ॥ २ ॥
धर्मं कर्म न जानाति नैव जानाति पूजनम् ।
नैव जानाति शास्त्रोक्तं विधानं दैवकर्म च ॥ ३ ॥
गवां संरक्षणं चैव गोवृषाणां प्रपालनम् ।
जानात्येव परं कर्म कृषिं जानाति चोत्तमाम् ॥ ४ ॥
स्नानं गोपादरजसा सन्ध्या गोकवलार्पणम् ।
गायत्री गोनामजपः पूजनं गोप्ररक्षणम् ॥ ५ ॥
वैश्वदेवो निजभुक्तिः स्वाध्यायः कृषिरेव तु ।
होमो रोटकनिर्माणं तर्पणं सस्यपोषणम् ॥ ६ ॥
एवं तस्य कर्मकाण्डः कृषिकार्ये प्रवर्तते ।
नान्यत् किञ्चित् स जानाति तथापि शुद्धमानसः ॥ ७ ॥
न चौर्यं नाऽनृतवृत्तिर्न द्रोहो जन्तुहिंसनम् ।
न प्रतारणकार्यं च विद्यतेऽस्य हृदि क्वचित् ॥ ८ ॥
अकल्मषो वृद्धसेवी गोसेवापुण्यभाग् व्रती ।
क्षेत्रे वाट्यां समागच्छेदतिथिश्चेत् स पूज्यते ॥ ९ ॥
दीयतेऽतिथये चेक्षुदण्डः शाकदलादिकम् ।
फलं मूलं दलं कन्दः वासोऽपि पूलकगृहे ॥१०॥
साधुर्वा भगवद्भक्तः कश्चिदायात्तु वाटिकाम् ।
सस्त्रीपुत्रः सेवते तं पादसंवाहनादिभिः ॥११॥
रात्रौ क्षेत्रे द्रुमाऽधो भूतले वह्निखले शुभे ।
वह्निं प्रज्वाल्य विश्रान्तिं तत्प्रकाशे प्रविन्दति ॥१२॥
मानस्यै तु प्रतिमायै समर्पयति भोजनम् ।
जलं फलं मूलकन्दं कणान् दलादिकं च यत् ॥१३॥
रात्रौ नारायणं देवं स्मृत्वा निद्रां प्रगच्छति ।
प्रातरुत्थाय शारीरं कृत्वा शुद्धिमयं ततः ॥१४॥
गृहीत्वा भोजनं क्षेत्रे कृषिकार्ये प्रवर्तते ।
एवं वै वर्तमानस्य निष्पापस्य गृहे क्वचित् ॥१५॥
अश्वपट्टसरस्तीर्थं कर्तुं वै भक्तमण्डलम् ।
समायातं निशारंभे ज्ञात्वाऽऽश्रयपदं तु तम् ॥१६॥
सोऽप्याश्रयं ददौ काण्डशालायां भावभक्तिमान् ।
भक्तेभ्यः स ददौ वारि दुग्धं च रोटकादिकम् ॥१७॥
तार्णासनानि प्रददौ विश्रान्तिं चापुरेव ते ।
निशायां भजनं चक्रुः कीर्तनं चक्रुरुत्सुकाः ॥१८॥
कीर्तनेऽनादिकृष्णश्रीपतिनारायणो हरिः ।
कीर्तितः कंभरापुत्रः प्रभुर्गोपालनन्दनः ॥१९॥
स्वरूपाऽद्वैतरूपः स योऽक्षरे धाम्नि वै परे ।
वर्तते दिव्यरूपः श्रीपतिः श्रीकृष्णवल्लभः ॥२०॥
सर्वावतारधर्ता च सर्वान्तर्यामी माधवः ।
जडचेतनजातात्मा बालकृष्णः पुमुत्तमः ॥२१॥
ईश्वराणामीश्वरो यो देवानामपि दैवतम् ।
प्राणिनां प्राणरूपो यो बालकृष्णः स एव सः ॥२२॥
इन्द्रियाणां तु यश्चेन्द्रो वस्तूनां वास्तवं बलम् ।
कर्मणां फलदो यश्च बालकृष्णः स एव सः ॥२३॥
विप्राणां पावनो धर्मः क्षत्रियाणामधृष्यता ।
वैश्यानां सस्यसम्पत्तिर्बालकृष्णः स एव सः ॥२४॥
वृक्षाणां रससम्पत्तिर्वल्लीनां फलपुष्पिता ।
दासानां सेविकावृत्तिर्बालकृष्णः स एव सः ॥२५॥
वर्णिनां ब्रह्मचर्यं यद् गृहस्थानां सपुत्रता ।
यतीनां च सतां ब्रह्म बालकृष्णः स एव सः ॥२६॥
राज्ञां नीतिः प्रजानां च दास्यं परोपकारिता ।
अनुग्रहश्च देवानां बालकृष्णः स एव सः ॥२७॥
ग्रहनक्षत्रताराणां वह्नेश्च विद्युतामपि ।
मणीनां चक्षुषां तेजो बालकृष्णः स एव सः ॥२८॥
या तृप्तिर्देहिनां भोज्ये भोग्ये तृप्तिश्च या मता ।
या शान्तिः प्राप्यलाभेऽस्ति बालकृष्णः स एव सः ॥२९॥
विश्वासे फलवत्ता या दाने श्रद्धा च या मता ।
कथायां चान्तरो बोधो बालकृष्णः स एव सः ॥३०॥
यज्ञे यद्धवनं प्रोक्तं विप्रेषु सत्त्वभावना ।
यजमाने ददद्वृत्तिर्बालकृष्णः स एव सः ॥३१॥
गर्भतन्तुर्यस्य हस्ते दौर्हृदत्वं च यत्कृतम् ।
नालपुष्टेर्विधाता च बालकृष्णः स एव सः ॥३२॥

चिदाकाशाज्जडाकाशं कृतवान् यो निरञ्जनः ।
रचयामास चाण्डानि बालकृष्णः स एव सः ॥३३॥
कुलालान् ब्रह्मसंज्ञाँश्च कर्षुकान् विष्णुसंज्ञितान् ।
छुनकान् रुद्रकाँश्चक्रे बालकृष्णः स एव यः ॥३४॥
दुग्धयन्त्रात्मकपशून् रसयन्त्रात्मपादपान् ।
ज्ञानयन्त्रनराँश्चक्रे बालकृष्णः स एव यः ॥३५॥
आर्तवं च जगच्चक्रं चालयन्नियमेन यः ।
विश्वकर्मत्वमापन्नो बालकृष्णः स एव सः ॥३६॥
एकस्माद् भूस्तरात् खाद्यं भक्षयित्वाऽपि पादपाः ।
बीजभेदाद् भिन्नभावाः बालकृष्णः स बीजकः ॥३७॥
भोज्यं चैकविधं न्यस्तं जठरे भिन्नरूपि यत् ।
भिन्नगुणं येन देहे बालकृष्णः स जाठरः ॥३८॥
अदृश्याद् दृश्यभावास्तु सजातीयात् सजातिकाः ।
भवन्त्येव यदावेशाद् बालकृष्णः स एव सः ॥३९॥
मन्त्राधीनास्तथा देवा वागधीनाऽर्थशेमुषी ।
आत्माधीनं जडं येन बालकृष्णः स एव सः ॥४०॥
इष्टाधीनश्चेच्छुकश्च कर्माधीनं तथा जगत् ।
यदधीना परामुक्तिर्बालकृष्णः स एव सः ॥४१॥
अतिथीन् सेवते यश्च तस्मै सेवाफलप्रदः ।
बीजवच्छतधा दाता बालकृष्णः स एव सः ॥४२॥
सर्वसौख्यप्रदाता यः सर्वरक्षाकरश्च यः ।
सर्वमानसपूरश्च बालकृष्णः स एव सः ॥४३॥
रात्रिर्विश्रान्तिदा येन दिनं प्रवृत्तिदं कृतम् ।
निद्रा श्रमहरा क्लृप्ता बालकृष्णः स एव सः ॥४४॥
साधुरूपं धृतं येन वैराजं च तथा धृतम् ।
परमाणुः कृतो येन बालकृष्णः स एव सः ॥४५॥
मार्दवं दिव्यवस्त्रादौ काठिन्यं चोपलादिषु ।
देहे द्वयं कृतं येन बालकृष्णः स एव सः ॥४६॥
महाकालः कृतो येन महामाया यमाश्रिता ।
पुरुषो योजितो येन बालकृष्णः स एव सः ॥४७॥
प्रलयश्च कृतो येन सर्गो येन कृतो मुहुः ।
निर्लेपस्तत्र यश्चास्ते बालकृष्णः स एव सः ॥४८॥
कामं क्रोधं महालोभं मोहं मदं च मत्सरम् ।
आकुर्वन्नपि चाऽसक्तो बालकृष्णः स एव सः ॥४९॥
सदृशेष्वपि बीजेषु विभिन्नशक्तिधायकः ।
भिन्नपाकप्रदाता यो बालकृष्णः स एव सः ॥५०॥
कृष्णो नारायणो विष्णुर्वासुदेवोऽक्षराधिपः ।
अन्तरात्मेश्वरो यश्च बालकृष्णः स एव सः ॥५१॥
भगवान् परमात्मा च हरिः श्रीपुरुषोत्तमः ।
राधालक्ष्मीपतिर्यश्च बालकृष्णः स एव सः ॥५२॥
कुंकुमवापिकाक्षेत्रे सहस्रकलशालये ।
ब्रह्मप्रियाऽसंख्यसेव्यो बालकृष्णः स एव सः ॥५३॥
भजनीयः पूजनीयश्चिन्तनीयश्च यो हृदि ।
सेवया प्रापणीयश्च बालकृष्णः स एव सः ॥५४॥
एवं वै कीर्तनं चक्रुः सर्वे भक्ता निशोत्सवे ।
युविश्रामः कर्षुकश्च श्रुत्वाऽऽनन्दं ललाभ ह ॥५५॥
जिज्ञासां कृतवान् मन्त्रग्रहणेऽतिथिमण्डलात् ।
अतिथिस्तत्र विप्रश्च षड्गुणाख्य उवाच तम् ॥५६॥
गृहाण मन्त्रं देवस्य कृष्णनारायणस्य मत् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥५७॥
इतिमन्त्रं ददौ तस्मै कर्षुकाय तु षड्गुणः ।
सुकण्ठीं तौलसीं चापि ददौ नाम नरायणम् ॥५८॥
मालिकां प्रददौ तस्मै जपार्थं प्रतिमां तथा ।
ददौ दर्शनकार्यार्थं कृष्णनारायणस्य च ॥५९॥
मालायां जपनार्थं च कृष्णनारायणेति च ।
ददौ नाम तदा सर्वे प्रातस्तस्मात्प्रतस्थिरे ॥६०॥
आययुः कुंकुमवापीक्षेत्रं श्रीलोमशाश्रमम् ।
अश्वपट्टसरश्चापि सहस्रघटमन्दिरम् ॥६१॥
उद्यानं सर्वतीर्थानि व्यधुस्ततो नरायणम् ।
बालकृष्णं ययुः सर्वे राजमानं गृहान्तरे ॥६२॥
सम्पूज्य विधिवत्तीर्थं कृत्वा देशं निजं ययुः ।
युविश्रामः कृषीवलः सकुटुम्बो मुदान्वितः ॥६३॥
विचार्य तीर्थयात्रार्थं निर्ययौ काम्यकात्पुरात् ।
गोभिर्गोवृषभैः साकं चाश्वपट्टसरोवरम् ॥६४॥
आययौ श्रीकृष्णनारायणं गृणन् समुत्सुकः ।
चारयन् वै वने गाश्च वृषभान् सायमाप तत् ॥६५॥
सरस्तीरे पूर्वदक्षे विश्रान्तिं निशि चाकरोत् ।
पाययित्वा जलं गाश्च वृषभान् पादपाश्रये ॥६६॥
व्यसर्जयन्निपेदुस्ते पशवः सुखतोऽन्तिके ।
रात्रौ निद्रावशं याताः पशवो मानवाश्च ते ॥६७॥
परिश्रमं चाध्वजं ते व्यपानुदन् सुनिद्रया ।
अविशंकास्तीर्थभूमौ स्वपन्ति सरसस्तटे ॥६८॥
अर्धरात्रौ व्यतीतायां शान्ते मानवसञ्चरे ।
ग्रामशब्दे प्रशान्ते च निद्रात्तपशुपक्षिषु ॥६९॥
सिंहानां मण्डलं चायात् सप्तानां व्याघ्रजंगलात् ।
अकस्माद् गोवृषान् तद्वै जग्राहाऽतिभयंकरम् ॥७०॥

गावश्च वृषभाश्चाप्याक्रोशांश्चक्रुः प्ररंभणान् ।
आक्रन्दनानि विश्रुत्य जना बुबुधिरे द्रुतम् ॥७१॥
भगवन्तं सस्मरुश्च रक्षार्थं परमेश्वरम् ।
भक्तोऽनादिकृष्णनारायणं सस्मार वै हृदा ॥७२॥
आयाहि भगवन् कृष्णनारायण परात्पर ।
सर्वजीवाऽधिवास त्वं रक्ष त्राहि च पाहि च ॥७३॥
गोधनं मे दुर्बलस्य बलं कृषीवलस्य यत् ।
सिंहैर्विनाश्यते चेत्ते दासो दुःखी भविष्यति ॥७४॥
शीघ्रं कुरु महाराज यावन्नैवाभिधर्षितम् ।
धर्षणे नैव जीवेयुर्गावो वा वृषभास्तव ॥७५॥
त्वच्छरणेऽर्पिताश्चेमे पशवो मे न सन्ति वै ।
त्वमेव रक्ष भगवन् दुग्धं पिब यथोचितम् ॥७६॥
गा दास्ये ते महाराज शीघ्रं पाहि च रक्षय ।
इत्युच्चार्य महाकाष्ठं वह्निदग्धं सवह्निकम् ॥७७॥
समुत्तोल्य स्थितो भक्तः सिंहानां सन्निधौ हठात् ।
सिंहास्तु गर्जनाश्चक्रुर्मुहुर्नादैर्भयंकरैः ॥७८॥
सरःक्षेत्रं समस्तं तन्नादितं गर्जनामयम् ।
त्रेसुश्च देहिनः सर्वे विनिद्रा गर्जनादिभिः ॥७९॥
विदुद्रुवुरितस्ततो बहिरन्तो भयार्दिताः ।
साग्निकं तन्महाकाष्ठं दृष्ट्वा सिंहा भयान्विताः ॥८०॥
नोपाजग्मुः सन्निधौ वै किन्तु गावो भयान्विताः ।
सरःसेतुं परित्यज्य दुद्रुवुर्दूरमेव यत् ॥८१॥
तत्पृष्ठे दुद्रुवुः सिंहा दध्नुर्दूरं गताश्च ताः ।
रुरोद भक्तवर्यश्च पशवो ज्ञानवर्जिताः ॥८२॥
सिंहवज्रपराभूताः किं करोम्यत्र सोऽरुदत् ।
भक्तरक्षाकरस्तावद् बालकृष्णः कृपानिधिः ॥८३॥
गोपालबालको देवश्चक्रधार्यभवत् क्षणात् ।
हर्षनादं नदन् कृष्णो मुमोच चक्रमुल्बणम् ॥८४॥
वेगाद्रतं भ्रमच्चक्रं जघानसिंहमण्डलम् ।
यत्र यत्र पशूनां तु नखस्पर्शोऽभवत्तदा ॥८५॥
विदारणं त्वचां चाऽभूत् सिंहकृतं च भञ्जनम् ।
तत्र तत्र पशुदेहे पस्पर्श स्वकरेण सः ॥८६॥
दयालुर्भगवान् शीघ्रं रुजं न्यवारयत् क्षणात् ।
सन्धानं च त्वचां स्पर्शमात्रेण पूर्ववद्धरिः ॥८७॥
प्रचकार यथा स्पर्शो नखानां नैव विद्यते ।
नवा रक्तस्य संस्रावस्तत्र तत्राऽभवद्यपि ॥८८॥
श्रीहरेः करसंस्पर्शाद् रक्तस्रावोऽपि नाऽभवत् ।
यथा देवशरीरं वै नीरुजं तादृशानि वै ॥८९॥
गवां च वृषभाणां च शरीराणि कृतानि वै ।
गोधनं रक्षितं चैवं ततो वंशीं व्यनादयत् ॥९०॥
भक्तस्य सन्निधौ गत्वा भक्तं च समभावयत् ।
गोधनं सहसा श्रुत्वा वंशीं बालहरेस्तदा ॥९१॥
तूर्णं चायात् सरस्तीरे द्युविश्रामस्य सन्निधौ ।
भगवान् चक्रधार्येव निषसादाऽऽसनेऽर्पिते ॥९२॥
गोवृषाश्च समागत्य लिलिहुर्हरिपत्कजम् ।
दुग्धधाराः प्रमुञ्चन्त्यो गावश्चक्रुर्हि रंभणम् ॥९३॥
भक्तो दुग्धानि तत्कालं दोहयित्वा हरिं प्रभुम् ।
पाययामास रुचिरं मिष्टं श्रेष्ठं पयो मुहुः ॥९४॥
प्रशंसन् भगवान् दुग्धं पपौ भक्तसमर्पितम् ।
शंखचक्रगदापद्मधरं हस्तचतुष्टयम् ॥९५॥
दर्शयामास रूपं स्वं हर्यवताररूपिणम् ।
सिंहेभ्यश्च ददौ मुक्तिं वैकुण्ठं प्राहिणोद्धि तान् ॥९६॥
द्युविश्रामं च तत्पत्नीं पुत्रान् पुत्रीः कुटुम्बकम् ।
दिव्यं रूपं दर्शयित्वा हरिस्तूर्णं तिरोऽभवत् ॥९७॥
फाल्गुने कृष्णपक्षस्यैकादश्यां रात्रिमध्यके ।
सिंहेभ्यस्तु गवां रक्षां चकार बालकृष्णकः ॥९८॥
द्वादश्यां च ददौ भक्तो दानानि विविधान्यपि ।
पूजयामास भावैश्च श्रीपतिं पुरुषोत्तमम् ॥९९॥
द्युविश्रामो ददौ बालकृष्णाय गोधनं तदा ।
हरिः प्रत्यर्पयामास भक्तोऽपि मुमुदे ह्यति ॥१००॥
हर्याज्ञया च गाः प्राप्य ययौ स्वं काम्यकं पुरम् ।
तत्तीर्थे हरितीर्थाख्यं गोतीर्थं ख्यातमप्यभूत् ॥१०१॥
एवं तत्र कृषीवलैः कारितं हरिमन्दिरम् ।
हरिं च स्थापयामासुश्चतुर्भुजं परेश्वरम् ॥१०२॥
बालकृष्णं च गास्तत्र स्थापयामासुरुत्सुकाः ।
श्रवणात्पठनाच्चास्य भुक्तिर्मुक्तिस्तथा भवेत् ॥१०३॥
गोदानं तत्र दातव्यं कोणेऽग्नावाश्वसारसे ।
अनादिश्रीकृष्णनारायणः प्रसन्नतां व्रजेत् ॥१०४॥
राधिके यमदूतेभ्यो रक्षां कुर्याद्धि तीर्थिनः ।
गोदातुर्वृषदातुश्च बालकृष्णो दयानिधिः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने द्युविश्रामाख्यकृषिकारस्य सिंहप्रधर्षितगोधनस्याऽवनं हरिरूपेण भगवता कृतं हरितीर्थे गोतीर्थे चेतिनिरूपणनामा त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चान्यं चमत्कारं हरेस्ततः ।
बकखावाख्यनगरे व्याघ्रारण्याभिसंस्थिते ॥ १ ॥
बहुवृक्षसमाकीर्णे यतिसाधुनिवासिते ।
चातुर्वर्ण्यजनव्याप्ते वृकशावीनदीतटे ॥ २ ॥
नीलकर्णाख्यचात्वालो वसति स्म कुटुम्बयुक् ।
ज्येष्ठेऽरण्ये चातिवृष्ट्या नदीपूरे तु पत्तनम् ॥ ३ ॥
मग्नं समन्ततो जातं मानवाः पशवस्तथा ।
मृताश्चान्नानि नष्टानि भक्ष्यं क्वापि न लभ्यते ॥४॥
सप्ताहवृष्ट्या भूभागः समुद्र इव दृश्यते ।
मार्गा रुद्धा गमनस्य ग्रामान्तरं न गम्यते ॥ ५ ॥
चात्वालः सकुटुम्बोऽसौ द्रुशाखास्ववलम्बते ।
बद्ध्वा काष्ठानि वल्ल्या च शाखादोलासु जीवति ॥ ६ ॥
कुटुम्बं चापि शाखासु प्रेंखासु चाभिजीवति ।
क्षुधितं तदभूच्चापि मृतिनैकट्यमास च ॥ ७ ॥
वृकायनो महर्षिश्च समाधिस्थितिमास्थितः ।
उह्यमानश्च कल्लोलैरायाद् वृक्षस्य सन्निधौ ॥ ८ ॥
चात्वालेन तदा दीर्घरज्ज्वा चावृत्य शाखया ।
निरुद्धस्तत्र वृक्षाधो वृक्षस्तम्बनिरोधितः ॥ ९ ॥
चात्वालेन शनैर्वृक्षादवतीर्य वृकायनः ।
जटया संगृहीतश्च शाखायामधिरोपितः ॥१०॥
अतिदुर्बलदेहोऽयं समाधौ मग्न एव तु ।
विवेद नैव वृष्ट्यादि वहनं द्रुमरोधनम् ॥११॥
चात्वालेन मुहुः स्पृष्टः कम्पितो मस्तके च सः ।
बहुध्वानैर्बोधितश्च जाग्रतिं चाप वै ऋषिः ॥१२॥
तदा स ज्ञातवान् सर्वं चातिवृष्टिमयं जलम् ।
शीघ्रं स भजनं चक्रे कृष्णनारायण प्रभो ॥१३॥
अनादिश्रीकृष्णनारायण श्रीकृष्णवल्लभ ।
गोपालनन्दन लक्ष्मीपते श्रीकंभरात्मज ॥१४॥
कुंकुमवापिकाक्षेत्रकृतप्राकट्य केशव ।
ब्रह्मप्रियापते रमामाणिकीपद्मजापते ॥१५॥
सतां पते विभो धामाक्षराधिप परेश्वर ।
रक्ष रक्ष जनान् कृष्ण चातिवृष्ट्याऽतिदुःखितान् ॥१६॥
ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा ।
इत्येवं भजनं चक्रे प्रार्थनां च वृकायनः ॥१७॥
तावत्तस्यातिभावेन बालकृष्णः परः प्रभुः ।
श्वेतगजसमारूढो व्योममार्गेण चाययौ ॥१८॥
शंखचक्रगदापद्मकरः मुकुटमस्तकः ।
वैजयन्तीकण्ठकश्च सुदर्शनाङ्गुलीयकः ॥१९॥
मन्दहासाननः प्रेमवर्षामुञ्चत्सुनेत्रकः ।
भोज्यसंभृतपेटायुक् और्णवस्त्रादिमञ्जुषः ॥२०॥
छत्रचामरसंशोभत्पार्षदद्वयसेवितः ।
आकाशमार्गतः कृष्णः समागत्य द्रुमान्तरे ॥२१॥
शाखायां च स्वयं बालो निषद्य पेटिकाद्वयात् ।
भक्ष्यं प्रदत्तवान् तस्मै वृकायनाय तत्क्षणम् ॥२२॥
नीलकर्णकुटुम्बाय नीलकर्णाय वै ददौ ।
भक्ष्यं पूर्णं च वस्त्राणि ददौ श्रीभगवान् स्वयम् ॥२३॥
नीलकर्णो हरिं दृष्ट्वा तत्कुटुम्बं निराश्रयम् ।
दृष्ट्वा नारायणं साक्षात् साधुयोगेन वै तदा ॥२४॥
बभूव कृतकृत्यो वै बुभुजे च प्रसादजम् ।
अन्नं दधार वस्त्राणि शैत्यं दूरं गतं तदा ॥२५॥
प्रणनाम मुहुः कृष्णं बालकृष्णं परेश्वरम् ।
वृकायनो महर्षिश्च स्तोत्रं चकार वै हरेः ॥२६॥
पूजनं प्रचकाराऽसौ शालवृक्षदलैस्तदा ।
वृष्टिजलैर्मनोभावैः पुपूज परमेश्वरम् ॥२७॥
येन रक्षा कृताऽऽरम्भे ब्रह्मणः परमेष्ठिनः ।
तेन त्वयाऽत्र मे रक्षा कृता तुभ्यं नमोनमः ॥२८॥
येन रक्षा कृता पूर्वं सत्यव्रतस्य सागरे ।
तेन त्वयात्र मे रक्षा कृता तुभ्यं नमोनमः ॥२९॥
येनाऽब्धिमन्थने रक्षा बहूनां वै कृता पुरा ।
येन देवा रक्षिताश्च दैत्यास्तु विनिपातिताः ॥३०॥
येन दुग्धा मेदिनी च रक्षिताः प्राणिनः पुरा ।
येन सागरतलगा रक्षिता वै क्षितिः पुरा ॥३१॥
येनाऽङ्गुष्ठजलेनैतद् ब्रह्माण्डं पावनं कृतम् ।
तेन त्वयाऽत्र मे रक्षा विहिता ते नमोऽस्तु च ॥३२॥
येन ध्रुवश्च प्रल्हादो रक्षितौ बालकौ पुरा ।
येन साणासुरश्चात्र घातितः परमात्मना ॥३३॥
तलाजा रक्षिता येन मोक्षिता शरणागता ।
दैत्यो दमनको येन मोक्षितः परमात्मना ॥३४॥
कंकताला मोक्षिताश्च नारका मोक्षितास्तथा ।
सालमालो नाशितश्च येन तेनाऽवितोऽस्मि च ॥३५॥
बालाः प्रमोक्षिता येन राज्यमाता प्रमोक्षिता ।
वह्नीदीनो नाशितश्च वराटको विनाशितः ॥३६॥
वनस्पत्यादयो येन रक्षोभावाद् विमोचिताः ।
देवायनसमुद्धारश्चाण्डालयोनितः कृतः ॥३७॥

कंथाधरः कृतो येन चिरंजीवोऽपि वै ततः ।
रणंगमेन पुत्रेण तारितो येन शार्ङ्गिणा ॥३८॥
माँजांम्बिका रक्षिता च म्लेच्छा विनाशितास्तथा ।
रक्तबीजो नाशितश्च येन तेनाऽवितोऽस्म्यहम् ॥३९॥
जलमग्नो नृपतिश्च रक्षितो क्षुदयाभिधः ।
वसुमेधो रक्षितश्च जले येन नमोऽस्तु ते ॥४०॥
श्यामवस्तारितो येन चौरेभ्यः सुधनोऽवितः ।
न्यष्टकारुर्मोक्षितश्च येन तुभ्यं नमोऽस्तु मे ॥४१॥
हिरण्यकेशशिष्याश्च सजीवा येन वै कृताः ।
बृहद्वर्चास्तारितश्च बलेश्वरोऽपि मोक्षितः ॥४२॥
जयध्वजो मोक्षितश्च येन तुभ्यं नमोऽस्तु मे ।
ऐलविला तारिता चाऽधर्मजीवो विनाशितः ॥४३॥
महामारी नाशिता च मृता येन तु जीविताः ।
उष्णालयप्रजा वारिमृता येन प्रजीविताः ॥४४॥
चक्रवाक्यै जलं येन गिरिशृंगे समर्पितम् ।
मार्जारीबालका येन वह्निभ्राष्ट्र्यां प्ररक्षिताः ॥४५॥
किंपुरुषप्रदेशाश्च प्राग्ज्योतिर्भूप्रदेशकाः ।
यज्ञाद्यैः पाविता येन तस्मै तुभ्यं नमोनमः ॥४६॥
समीरणोऽवितो येन पवमानोऽपि रक्षितः ।
सन्तारणोऽवितो येन तस्मै तुभ्यं नमोनमः ॥४७॥
देवायतनको येन रक्षितः परमात्मना ।
प्रेतोद्धारः कृतो येन राशियानेषु शार्ङ्गिणा ॥४८॥
शूरजारो मोक्षितश्च पिशाच्यो मोक्षितास्तथा ।
धनमेदो मोक्षितश्च येन तुभ्यं नमोनमः ॥४९॥
वोढुर्विज्ञानवान् येन कृतो गा रक्षितास्तथा ।
बालकृष्णाय ते लक्षवारं मेऽस्तु नमोनमः ॥५०॥
मम योगेन भगवन् चात्वालोऽयं समुद्धृतः ।
तस्मै दयालुदेवाय कोटिवारं नमोनमः ॥५१॥
निवारयाऽतिवृष्टिं च मेघान् प्रवारय प्रभो ।
समावेशय पूराऽपो रक्ष मग्नान् हि देहिनः ॥५२॥
इत्युक्त्वा सर्जपत्राणि न्यक्षिपन्मस्तके हरेः ।
हरिं शंखं तदा दध्मौ मेघाः शीघ्रं तु घोषतः ॥५३॥
व्यदीर्यन्त जलानां च वर्षणं विलयं गतम् ।
जलानि जलपूराश्च व्यलीयन्त निनादतः ॥५४॥
प्राणिनः सुखिनो जाता वृकायनप्रसंगतः ।
वृकायनो महर्षिश्च ययौ कृतस्मरं गिरिम् ॥५५॥
बालकृष्णस्तिरोभूय ययावश्वसरोवरम् ।
नीलकर्णः सचात्वालस्तद्दिनात्परमेश्वरम् ॥५६॥
आराधयामास कृष्णनारायणं च तं हरिम् ।
तस्यैव भजनं चक्रे प्रत्यक्षस्य हरेः सदा ॥५७॥
वृक्षवासी फलाहारी मालाजापी विरागवान् ।
ज्ञानी श्रीबालकृष्णे स्वहृदयार्पी सुभक्तिमान् ॥५८॥
भजते स्म हरिं नित्यं करतालादिभिर्गृणन् ।
बालकृष्णहरेकृष्णनारायणाऽव मां विभो ॥५९॥
बालकृष्ण हरेकृष्ण जयकृष्ण हरेहरे ।
हरेकृष्ण हरेकृष्णवल्लभ श्रीहरे जय ॥६०॥
एवं स भजनं चक्रे सह पत्न्या सुतादिभिः ।
यथालब्धान्नसन्तोषी स्वल्पवस्त्रादितृप्तिमान् ॥६१॥
भजते श्रीभगवन्तं कांभरेयं महाप्रभुम् ।
स्वज्ञातीनां तु भक्तानां मण्डलं कृतवान् हि सः ॥६२॥
नित्यं रात्रौ मिलित्वैव मण्डलस्था भजन्ति च ।
कीर्तयन्ति हरिकृष्णं स्तुवन्ति प्रणमन्ति च ॥६३॥
पूजयन्ति तुलस्याद्यैर्भोजयन्ति फलादिकम् ।
आरार्त्रिकं च कुर्वन्ति प्रसादं भक्षयन्ति च ॥६४॥
ततो यान्ति गृहं नैजं स्वपन्ति हरिमानसाः ।
उत्थाय च हरिं ध्यात्वा ततो व्यापारयन्ति च ॥६५॥
एवं वै वर्तमानास्ते चात्वाला भक्तिवेदिनः ।
निर्णयं त्वेकदा चक्रुर्यात्रार्थं कुंकुमस्थलीम् ॥६६॥
लोमशस्याश्रमं द्रष्टुं बालकृष्णं विलोकितुम् ।
अश्वपट्टसरो द्रष्टुं कर्तुं तीर्थानि तत्र च ॥६७॥
पाथेयानि गृहीत्वा ते सकुटुम्बाः शताऽधिकाः ।
मानवा वै नरा नार्यो बालवृद्धान्विता ययुः ॥६८॥
मार्गे गायन्ति वाद्याढ्यां गीतिं नारायणस्य ते ।
शनैः शनैः समायान्ति कुंकुमवापिकां ततः ॥६९॥
केचिन्नमन्ति वृक्षाँश्च केचिद्धूलीं वहन्ति च ।
केचिन्नारायणं स्मृत्वा विलुठन्ति भुवस्तले ॥७०॥
केचिच्चापि प्रकुर्वन्ति साष्टांगं दण्डवत् तदा ।
अन्ये नृत्यन्ति भावेन वाद्यमण्डलिकायुताः ॥७१॥
परे गायन्ति च गुणान् हरेः कृष्णस्य भावुकाः ।
अपरे प्रतिगायन्ति गुणान् पुनश्च तानपि ॥७२॥
स्मृत्वा श्रीबालकृष्णं ते पिबन्त्यदन्ति वै पथि ।
सतां सेवां प्रकुर्वन्ति मार्गे प्रगच्छतां तदा ॥७३॥
एवं सर्वे समायाता भक्ताः श्रीकृष्णमानसाः ।
लोमशस्याश्रमं वाद्यकीर्तनगर्जनादिभिः ॥७४॥
तान् द्रष्टुमृषयः सर्वे तथा ब्रह्मप्रियादयः ।
ययुर्बहिर्मार्गतीरे तदा भक्ता विलोक्य तान् ॥७५॥

चक्रुश्च दण्डवत् सर्वे रजो न्यधुश्च मस्तके ।
ऋषीणां च प्रियाणां च प्रक्षाल्य चरणान् जलैः ॥७६॥
पपुः प्रसादसलिलं न्यधुर्देहे च मस्तके ।
लोमशं वीक्ष्य विधितः पूजयित्वा हरिप्रियाः ॥७७॥
प्रज्वाल्य निजपापानि गृहीत्वा लोमशान्मनुम् ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥७८॥
जपन्तस्तौलसीर्मालां दधाना निजवक्षसि ।
रटन्तो बालकृष्णं च परब्रह्म सनातनम् ॥७९॥
सहस्रकलशं दिव्यं दृष्ट्वा च हरिमन्दिरम् ।
नेमुस्तत्कलशान् दिव्यान् ध्वजं चाग्रोपरिस्थितम् ॥८०॥
अश्वपट्टसरस्तीरे ययुः स्नातुं द्रुतं पुरा ।
स्नात्वा पीत्वा तीर्थजलं विश्रम्य चाम्रद्रुतले ॥८१॥
अनादिश्रीकृष्णनारायणस्य दर्शनाय तु ।
ययुस्ते सोपदाः सर्वे प्रदिव्यमन्दिरान्तरम् ॥८२॥
भगवान् श्रीहरिः शीघ्रं निजशिष्यं सुयोगिनम् ।
स्वयंप्रकाशं चाहूय ददौ स्वचरणामृतम् ॥८३॥
तेभ्यो ददौ च ते सर्वे पीतवन्तः क्षणात्ततः ।
प्रसादं प्रददौ कृष्णो भुक्तवन्तश्च ते ततः ॥८४॥
दृष्टिमात्रेण हरिणा वीक्षिताः सर्व एव ते ।
तावद्दिव्यस्वरूपास्ते भूतदेहविवर्जिताः ॥८५॥
सूर्यदेहसमा जाता देवा वै दिव्यविग्रहाः ।
कुण्ठभावविहीनाश्च व्योममार्गाभिगामिनः ॥८६॥
भित्त्यावरणहीनाश्च निरावरणदृष्टयः ।
दिव्यज्ञानभृताः सर्वे श्वेतवर्णाः सुमूर्तयः ॥८७॥
रूपानुरूपावयवा यथा मुक्ता इहाऽऽगताः ।
अक्षरब्रह्मलोकस्य वैकुण्ठस्याऽथवाऽऽगताः ॥८८॥
यद्वा गोलोकधाम्नश्च श्वेतधाम्नश्च वाऽऽगताः ।
तादृशाः श्वेतवर्णाश्च चन्द्रबिम्बाभकान्तयः ॥८९॥
हरेः प्रसादमापन्ना दिव्यतां भक्तितो ययुः ।
चाट्वालत्वं विलीनं च जडता विगता तथा ॥९०॥
अपावित्र्यं विनष्टं च मानुषत्वं लयं गतम् ।
देवत्वं च समुद्भूतं शास्त्रज्ञत्वं समर्जितम् ॥९१॥
दिव्यदृष्टिजुषो जाता नीलकर्णादयोऽखिलाः ।
अथ श्रीबालकृष्णं ते पुपूजुः परमादरात् ॥९२॥
तावत्तत्र विमानं वै दिव्यं व्योम्नः समागतम् ।
मुक्त्यर्थं हरिभक्तानां तदा ते चक्रुरर्थनाम् ॥९३॥
तवाऽऽज्ञां च वहामोऽत्र सैव मुक्तिर्हि नो मता ।
नेष्यतेऽत्र विमानं वा नेष्यते पारलौकिकम् ॥९४॥
रक्षाऽत्रैव महाराज कुर्मो दास्यं तवाऽत्र ह ।
इत्येवं याचमानेभ्यो हरिश्चाज्ञां ददौ तदा ॥९५॥
यूयं भक्ता दिव्ययाने स्थित्वा यान्तूत्तरां दिशम् ।
केतुमालं महादेशं माल्यवतस्तु पश्चिमम् ॥९६॥
माल्योऽयमुरलाख्योऽस्ति केतुमालस्य पूर्वगः ।
तद्देशेषु प्रजाभ्यो मे मन्त्रदानं ददत्वपि ॥९७॥
इत्युक्ताः श्रीहरिं नत्वा विमानं चाऽध्यरोहयन् ।
तावत् कृष्णेन तु स्मृतो वृकायनर्षिसत्तमः ॥९८॥
व्योममार्गेण चायातस्तस्मै श्रीहरिरेव सः ।
आज्ञां ददौ केतुमालं गन्तुं भक्तिप्रवृत्तये ॥९९॥
सोऽपि विमानमारुह्य शताधिकैर्महर्षिभिः ।
श्रावणे देवरूपैश्च सह जगाम चाम्बरे ॥१००॥
केतुमालं प्रति शीघ्रं विमानं प्रैरयद्धि सः ।
कच्छं सिन्धुमिन्दुकुशं कश्यपाब्धिं विलोक्य तत् ॥१०१॥
कुकेशासनमुल्लंध्य केतुमालं ययौ द्रुतम् ।
यत्र शैत्येन शुभ्रांगाः प्रजा वसन्ति कश्यपाः ॥१०२॥
काश्यप्यः सर्वजनता धर्मकर्मसु वै समाः ।
नीपरायाः सरितश्च तीरे विमानकं निजम् ॥१०३॥
नीलकर्णो भक्तराजो वृकायनाज्ञया तदा ।
क्षणं विश्रान्तिमाप्तुं वै चाम्बरादवतारयत् ॥१०४॥
राधिके नीलकर्णाद्याश्चाश्वपट्टसरोवरे ।
यत्र स्नाताश्च तत् तीर्थं नीलकर्णाभिधं ह्यभूत् ॥१०५॥
दिव्यतापादकं तद्धि स्नानमात्रेण देहिनाम् ।
पठनाच्छ्रवणाच्चापि दिव्यता लभ्यते जनैः ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नीलकर्णचाट्वालकुडुम्बस्याऽतिवृष्टौ वृकायनर्षिद्वारा भगवता कृतं रक्षणं, कुंकुमवापीमागत्य नीलकर्णस्य शतपरिजनस्य दिव्यता, केतुमालखण्डं प्रति तस्य भगवता कृतं प्रेषणं चेत्यादिनिरूपणनामा चतुष्षष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥

श्रीराधिकोवाच—

प्रिय प्राणपते कृष्ण कान्त सर्वमनोहर ।
नीलकर्णो वृकर्षिश्च तथाऽन्ये भक्तपुंगवाः ॥ १ ॥
किं चक्रुः केतुमालाख्ये नीपरायास्तटे ततः ।
तदज्ञाते प्रदेशे तत्सर्वं मे वक्तुमर्हसि ॥ २ ॥
अनादिश्रीकृष्णनारायणसम्बन्धवत्कथाम् ।
श्रुत्वा तृप्तिं न चाप्नोमि प्रियप्राणमुखात् पुनः ॥ ३ ॥

श्रीकृष्ण उवाच—

नीपरायास्तटे राधे ! बहुवृक्षसमाकुले ।
बहुपक्षिसमावासे शीतवायुमनोहरे ॥ ४ ॥
विमानात्ते क्षितौ सर्वे चावतेरुर्जलान्तिकम् ।
गत्वा सस्नुस्ततः पूजां कृत्वाऽनादिहरेश्च ते ॥ ५ ॥
नैवेद्यं फलमूलादेः पक्वान्नस्य तथाऽऽर्प्य च ।
पाथेयादि प्रभुक्त्वैव पीत्वा वारि प्रसादजम् ॥ ६ ॥
घटिकामात्रमाश्रम्य चक्रुस्ते नामकीर्तनम् ।
हरेकृष्ण बालकृष्ण परब्रह्म हरेहरे ॥ ७॥
महेशान परेशान सर्वेशान हरेहरे ।
एवं संकीर्तनं वाद्यैः सह चक्रुः प्रमोदिनः ॥ ८ ॥
ततः खण्डं वीक्षितुं ते विमानमध्यरोहयन् ।
व्योममार्गेण दक्षेण क्रमेण गतिमाचरन् ॥ ९ ॥
यवक्रीतप्रदेशाँस्ते लोकयामासरम्बरात् ।
निस्तारां च नदीं पृथानदीं रोमायनक्षितिम् ॥१०॥
कृपास्थलाद्रिं दिनपां नदीं वीक्ष्य च सेविकाम् ।
युगशावप्रदेशाँश्च वल्गुरायप्रदेशकान् ॥११॥
वीक्ष्य गिरीशदेशाँश्च इष्टलवप्रदेशकान् ।
आप्यायनाद्रिं च तथाऽल्पाद्रिं वीक्ष्य ततः परम् ॥१२॥
स्वेष्टजरप्रदेशाँश्च फेरुनसप्रदेशकान् ।
राहूनां च नदीं दृष्ट्वा वीक्ष्य परीजपर्वतम् ॥१३॥
इन्दिरां च नदीं दृष्ट्वा गवादकवितांनदीम् ।
नदीं गवादयानां च पूर्तगण्डप्रदेशकान् ॥१४॥
त्रिग्रासां च नदीं दूरां नदीं मित्रां नदीं तथा ।
सुपानदेशान् संवीक्ष्य गुरूनां सरितं ततः ॥१५॥
फलाशनप्रदेशाँश्च लववारां नदीं तथा ।
सेनानदीं विलोक्याऽथ स्थायिनीं; वीक्ष्य चापगाम् ॥१६॥
वल्लीजीवनदेशाँश्च जरामौनप्रदेशकान् ।
आल्पापां च नदीं वीक्ष्य औदरीं सरितं तथा ॥१७॥
पालनादप्रदेशाँश्च नदीं विषतुलां तथा ।
प्रपीठां च नियमानां नदीं वीक्ष्य ततः परम् ॥१८॥
लातवायप्रदेशाँश्च वीक्ष्य दूनानदीं ततः ।
पायुपश्यसरो दृष्ट्वा लेण्डुगं वीक्ष्य वै सरः ॥१९॥
योनिगं च सरो दृष्ट्वा फालनादप्रदेशकान् ।
स्वाद्वदनप्रदेशाँश्च नाररवप्रदेशकान् ॥२०॥
त्रिनयां च नदीं वीक्ष्य लेपनादप्रदेशकान् ।
कोलद्वीपं प्रसमीक्ष्य श्वेतवार्धिं विलोक्य च ॥२१॥
हीनां नदीं विलोक्याथ पाचौरां सरितं तथा ।
कामाया वल्गुनायाश्च संगमं वीक्ष्य सुन्दरम् ॥२२॥
दोनानदीं विलोक्याऽथ आजवाब्धिसमागमे ।
भक्तास्ते शनकैर्निजं विमानं ह्यवतारयन् ॥२३॥
न्यूषुस्ते तत्र वृक्षाद्यैः रमणीये प्रदेशके ।
भजनं श्रीहरेश्चक्रुर्वाद्यगायननर्तनैः ॥२४॥
रात्रौ विश्रान्तिमासाद्य द्वितीये दिवसे पुनः ।
षट्कर्माणि विनिर्वर्त्य कीर्तयन्तः सवाद्यकाः ॥२५॥
तेनैव च क्रमेणैते बभ्रमुर्वै विमानगाः ।
श्रुत्वा प्रजाश्च राजानो रटणं परमेशितुः ॥२६॥
परमानन्दमापन्ना जयवाचोऽभिसञ्जगुः ।
स्वागतं स्वागतं चेति सत्कारवाचमैरयन् ॥२७॥
पुष्पाद्यैर्वर्धयामासुः प्रतिदेशं प्रतिस्थलम् ।
एवं देशान् भ्रमित्वा च दोनानदीं समाययुः ॥२८॥
विशश्रमुर्भोज्यपानैस्तृप्ता निशां तु कीर्तनैः ।
यापयामासुरेवैते तृतीयेऽपि दिने तथा ॥२९॥
प्रातः कृत्यं विधायैव निषद्य च विमानके ।
तेनैव च क्रमेणैते बभ्रमुर्वै विमानगाः ॥३०॥
अनादिश्रीकृष्णनारायणमूर्तेर्गले च यः ।
चिन्तामणिर्धृतो मालामध्ये स्पृष्ट्वा तु तं तदा ॥३१॥
वृकायनो महर्षिश्च चिन्तयित्वा तु शर्कराम् ।
मिष्टाममृतकल्पां च समुत्पाद्य नवां नवाम् ॥३२॥
यत्र यत्र जना देशे विलोक्यन्ते च तत्र च ।
वर्षयामास बहुधा हरेः प्रसादलब्धये ॥३३॥
प्रजास्तु हर्षनादैश्च जगृहुः शर्कराश्च ताः ।
चखदुश्चातिमुदिता जयनादान् प्रचक्रिरे ॥३४॥
स्वागतं स्वागतं चेति प्रार्थयामासुरुत्सुकाः ।
प्रसादं च समर्पय्य विमानं सायमेव तत् ॥३५॥
दोनाजवाऽब्धिसंगं च समायातं निशामुखे ।
रात्रौ ते भजनं चक्रुः कृष्णनारायणेति वै ॥३६॥
तावत्तत्र समायाता अष्टाविंशतिकन्यकाः ।
दिव्यरूपधराः सर्वाः कुमार्यः श्वेतभासुराः ॥३७॥
दिव्यमालाम्बरभूषाधारिण्यश्चन्द्रकान्तयः ।
रमणीयाऽतिसुन्दर्यो वैष्णव्यस्तौलसीस्रजः ॥३८॥
नारायणहरेकृष्ण बालकृष्णेति वै हरिम् ।
रटन्त्यः सौम्यभावेन भगवल्लग्नमानसाः ॥३९॥
पुष्परत्नाऽक्षतहस्ताः कस्तुरीचन्दनान्विताः ।
पूजासामग्रिकायुक्ताः प्रणेमुस्ता विमानकम् ॥४०॥

कुमार्यः पञ्च दिव्याश्च दिव्याभरणशोभिताः।
दिव्यवैष्णववेषाश्च पूजोपकरणान्विताः ॥४१॥
एकः श्वेतश्चापरश्च कृष्णस्तृतीयको जवी।
चतुर्थस्त्रिनयनश्च पञ्चमो नीलवर्णकः ॥४२॥
तेऽपि नत्वा विमानं च तस्थुः क्षणं कुमारकाः।
तावत् त्रयं समायातं नान्यतरं सुशोभितम् ॥४३॥
स्त्रीपुंभावरहितं च श्वेतवर्णं मनोहरम्।
नत्वा विमानं त्वरितं तस्थौ त्रिकं क्षणं तदा ॥४४॥
तावत्तत्र समायातं विंशतियतिमण्डलम्।
सजटं वैष्णवं दिव्यं तापसं ब्रह्मभासुरम् ॥४५॥
नारायणहरेकृष्ण बालकृष्ण नमोऽस्तु ते।
एकस्वरेण प्रवदत् नेमे विमानकं तु तत् ॥४६॥
अथ स्मृद्धपुरुषाश्च चत्वारस्तत्र चाययुः।
दिव्या दिव्याभरणाश्च दिव्यर्द्धिसंभृताः शुभाः ॥४७॥
तापसाः सिद्धिमन्तश्च यथा वै ब्रह्मचारिणः।
नत्वा दिव्यं विमानं ते तस्थुः क्षणं विशश्रमुः ॥४८॥
अथ षष्टिर्दिव्यरूपा मिलित्वा ते नराः स्त्रियः।
वृकायनं तथा चाट्वालर्षीन् सर्वान् प्रणम्य च ॥४९॥
स्तुतिं चक्रुर्विमानाभिमुखं विलोक्य भावतः।
एकस्वरेण मुदिता नेत्रे प्रमिल्य वै तदा ॥५०॥
व्यापको यः परब्रह्माऽनादिश्रीपुरुषोत्तमः।
मुक्तमुक्तानिकासेव्यस्तस्मै कृष्णाय ते नमः ॥५१॥
अक्षरं ब्रह्म यत्रास्ते धाम दिव्यं परात्परम्।
सेवते यं सदा तत्र तस्मै कृष्णाय ते नमः ॥५२॥
यन्मूर्तेस्तु समुत्पन्ना राधा शक्तिः सुरूपिणी।
राधार्थं कृष्णरूपोऽभूत् तस्मै कृष्णाय ते नमः ॥५३॥
यं कृष्णं नित्यगोलोके गावो गोप्यश्च गोपकाः।
सेवन्ते सुखदं रासे तस्मै कृष्णाय ते नमः ॥५४॥
यन्मूर्तेस्तु समुत्पन्ना लक्ष्मीर्मूर्तिः सुरूपिणी।
नारायणोऽभूल्लक्ष्म्यर्थं तस्मै कृष्णाय ते नमः ॥५५॥
यं वैकुण्ठे पार्षदाः पार्षदान्यश्च भगानि च।
प्रसेवन्ते सखीकोट्यस्तस्मै कृष्णाय ते नमः ॥५६॥
यो नाथोऽनादिसृष्टेश्च प्रवाहार्थे चतुष्टयम्।
वासुदेवादिकं व्यूहं धत्ते कृष्णाय ते नमः ॥५७॥
यो देवो वै महाभूमा वैराजश्च पुराऽभवत्।
त्रिदेवतां समापन्नस्तस्मै कृष्णाय ते नमः ॥५८॥
यः स्वमूर्तौ माणिकीं च रमां पद्मावतीं सतीम्।
लक्ष्मीं नारायणीं धत्ते तस्मै कृष्णाय ते नमः ॥५९॥
यो हंसां सुगुणां मञ्जुलिकां धत्ते स्वविग्रहे।
दयां जयां च ललितां तस्मै कृष्णाय ते नमः ॥६०॥
यो राधां यमुनां गंगां विरजां च सरस्वतीम्।
शारदां कमलां धत्ते तस्मै कृष्णाय ते नमः ॥६१॥
यः स्वमूर्तेर्विवरेषु धत्ते ब्रह्माण्डकोटिकाः।
ब्रह्माण्डेष्वन्वितश्चास्ते तस्मै कृष्णाय ते नमः ॥६२॥
अव्याकृतेऽमृते धाम्नि श्वेतद्वीपे नरायणः।
यस्त्वास्ते श्रीरमासेव्यस्तस्मै कृष्णाय ते नमः ॥६३॥
आदित्यमण्डले हिरण्मयो यश्च विराजते।
अग्नौ यज्ञस्वरूपश्च तस्मै कृष्णाय ते नमः ॥६४॥
ब्रह्माण्डे विष्णुरूपो यः स्वर्गे वामनरूपधृक्।
बदर्यां च हरिश्चास्ते तस्मै कृष्णाय ते नमः ॥६५॥
शेषे नारायणरूपश्चात्मस्वन्तर्नियामकः।
साक्षी यः सर्वभूतानां तस्मै कृष्णाय ते नमः ॥६६॥
यश्चास्ते बालकृष्णोऽयं श्रीमद्गोपालनन्दनः।
कुंकुमवापिकाक्षेत्रे तस्मै कृष्णाय ते नमः ॥६७॥
येन गंगा कृता दिव्याऽस्मन्माता षष्टिबालका।
पादाङ्गुष्ठेन सत्ये वै तस्मै कृष्णाय ते नमः ॥६८॥
मूर्तिरूपो विमानेऽत्र यश्चास्ते भगवान् हरिः।
गंगाऽपत्यकृपावर्षी तस्मै कृष्णाय ते नमः ॥६९॥
कर्मकाण्डाय योगाय ज्ञानाय च विविक्तये।
नीतये च विचाराय तस्मै कृष्णाय ते नमः ॥७०॥
जीवाय जीवकायापि प्राणाय कोशिने च ते।
खाय काय च सत्याय तस्मै कृष्णात्मने नमः ॥७१॥
तीर्थाय साधुरूपाय सर्वज्ञाय विहारिणे।
मुक्तये मुक्तिदात्रे च तस्मै कृष्णात्मने नमः ॥७२॥
चिदचित्सर्वरूपाय विमानस्थाय मूर्तये।
बालाय बालकृष्णाय कान्तकृष्णाय ते नमः ॥७३॥
ब्रह्मप्रियाधिपतये कोटिशक्तीश्वराय च।
शतचत्वारिंशदूर्ध्वकन्याकान्ताय ते नमोनमः ॥७४॥
मायाकालपुरुषाणां पतये धामधामिनाम्।
ईशजीवाधिपतये तस्मै कृष्णाय ते नमः ॥७५॥
गोचरायाऽगोचराय षष्टिवन्द्याय मूर्तये।
शरणं स्मः समापन्नाः शरण्याय च ते नमः ॥७६॥
एवं स्तुत्वा राधिके! ते वृकायनाभिकांक्षया।
पुष्पाञ्जलीन्निबद्ध्यैव विमानभूमिकां ययुः ॥७७॥
गांगेयाः षष्टिबालास्ते विविशुश्च विमानकम्।
यत्राऽऽस्ते बालकृष्णः स मूर्तिरूपो हरिः स्वयम् ॥७८॥

दृष्ट्वा पुष्पाञ्जलिं चक्रुर्दण्डवच्चादरादति ।
तावन्मूर्तेः प्राविरास बालकृष्णस्तु गोचरः ॥७९॥
चतुर्दशसमामूर्तिर्दिव्यावयवशोभनः ।
कोटिकामाधिसौन्दर्यो हास्यसौम्याननः प्रभुः ॥८०॥
ब्रह्मप्रियाभिसहितः षट्पत्नीसहितः स्वयम् ।
गंगादितीर्थसहितो विमाने गोचरोऽभवत् ॥८१॥
गंगां च मातरं दृष्ट्वा तथा कृष्णनरायणम् ।
षष्टिबाला मुमुदिरे गंगास्तन्यं तदाऽस्रवत् ॥८२॥
निपेतुः श्रीहरेश्चापि मातुश्च पादयोर्द्रुतम् ।
पद्मलानि पपुः सर्वे प्रक्षाल्य मग्नमानसाः ॥८३॥
पूजयामासुरत्यर्थं पुष्पमौक्तिकहीरकैः ।
दिव्यरत्नैः स्वर्णवस्त्राभूषणैश्च फलादिभिः ॥८४॥
दिव्यैश्च मधुमिश्चापि सुगन्धिचन्दनादिभिः ।
गन्धसारैः सर्वरसैर्भावनाभिश्च वै हृदा ॥८५॥
नीराजनं तदा चक्रुर्हरेश्च मातुरित्यपि ।
प्रदक्षिणं प्रचक्रुश्च प्रार्थनां चक्रुरेव च ॥८६॥
कोटिजन्मापराधानां क्षन्ता नारायणप्रभो ।
अस्मद्देशेषु चागत्य कुरु देशान् हि पावनान् ॥८७॥
प्रतीक्षामस्त्वागमं ते प्रजानां पावनाय वै ।
समागत्य हरेरस्मान् पावयात्र चिरंस्थितान् ॥८८॥
मात्रा सह यदा सत्याल्लोकादागमनं तु नः ।
भगीरथस्य यत्नेन चाभूत्तदा हरेण वै ॥८९॥
ग्रहीता स्वजटायां नो जननी तु तदा वयम् ।
वियुक्ता हिमवद्व्योम्नस्त्यक्त्वा किंपुरुषं तलम् ॥९०॥
केतुमालं निर्जनं च दृष्ट्वाऽत्र निरुपद्रवम् ।
नारायणेच्छयाऽऽगत्य निवसामोऽतिशान्तितः ॥९१॥
अस्मन्मध्ये भवन्तीया अष्टाविंशतिकन्यकाः ।
गंगापुत्र्यो वयं सर्वाः पञ्च पुत्रा इमे तथा ॥९२॥
त्रीण्यपत्यानि चैतानि कुमारा विंशतिस्तथा ।
चत्वारश्चापि बालाश्च सर्वे गंगोद्भवा वयम् ॥९३॥
कृत्वा यज्ञोत्सवानत्र चाहूय दैवमण्डलम् ।
केतुमालं पावनं च कुरु कृष्णं समन्ततः ॥९४॥
श्रुत्वाऽनादिकृष्णनारायणः श्रीकृष्णवल्लभः ।
जहासे मुमुदे चापि स्वीचकार तदर्थितम् ॥९५॥
दत्वा तेभ्यः प्रसादं च प्रतिमायां तिरोभवत् ।
परिवारोऽपि सर्वो हि क्षणादन्तरधीयत ॥९६॥
वृकायनो महर्षिश्च नीलकर्णादयस्तथा ।
श्रुत्वा वृत्तान्तकं दृष्ट्वा समाश्लिक्षन् हृदा मुदा ॥९७॥
स्वागतं ते ततश्चक्रुः पूजाभोजनवारिभिः ।
गांगेयानां तु सर्वेषां बालकृष्णकृपाजुषाम् ॥९८॥
मिलित्वा च विमाने ते चक्रुः श्रीहरिकीर्तनम् ।
प्रददुश्च ततो नैजं परिचयं परस्परम् ॥९९॥
आमन्त्रणं प्रचक्रुश्च गांगेयास्तु विमानगान् ।
नैजान् देशान् पावयितुं विहर्तुं च पुनः पुनः ॥१००॥
वृकायनाद्याः स्वीचक्रुरामन्त्रणं पुनस्ततः ।
जगदुः स्वविमाने च सह स्थातुं तु षष्टिकम् ॥१०१॥
अङ्गीचक्रुश्च ते षष्टिर्दिव्यबाला यथोदितम् ।
इत्येवं राधिके कृष्णेच्छया सम्मेलनं ह्यभूत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वृकायननीलकर्णादिमहर्षीणां केतुमालं प्रति विमानेन गमनं देशनिरीक्षणं गांगेयाऽपत्यषष्टिसम्मेलन-मित्यादिनिरूपणनामा पञ्चषष्ट्यधिक-शततमोऽध्यायः ॥ १६५ ॥

श्रीराधिकोवाच—

कथं कदा समुत्पन्ना गंगायां बालबालिकाः ।
तत्सर्वं मे वद कृष्ण श्रोतुमिच्छामि तत्त्वतः ॥ १ ॥

श्रीकृष्ण उवाच—

वृकायनादिभिः पृष्टास्ते सर्वेऽपि तथैव तु ।
वृत्तान्तं जगदुः सर्वे यथाभूतं वदामि ते ॥ २ ॥
एकदा खलु गोलोके राधया चार्थितस्त्वया ।
श्रीकृष्णोऽहमपत्यार्थं मया संकल्पितस्तदा ॥ ३ ॥
विकुण्ठाख्या तदा पुत्री पुत्राश्च सप्तसागराः ।
उत्पाद्यैव प्रदत्तास्ते त्वमभूस्तुष्टमानसा ॥ ४ ॥
त्वामपत्यवतीं दृष्ट्वा गंगा त्वपत्यवर्जिता ।
अपत्येच्छावती जाताऽपत्यानि चार्थयच्च मत् ॥ ५ ॥
मया पुत्र्यः शुभा दत्ता यावत्यस्त्वभिवाञ्छिताः ।
अष्टाविंशतिसंख्याकास्तदा तोषमुपागता ॥ ६ ॥
अथैच्छत् सा कुमारांश्च मया पश्चाऽर्पितास्तदा ।
तथापि नैव सन्तुष्टा चत्वारश्च ततोऽर्पिताः ॥ ७ ॥
अथापि तोषं नैवाऽऽप्ता पुनर्विंशतिबालकाः ।
मया दत्ता तदा तोषं ह्यवापैच्छत्तथापि सा ॥ ८ ॥
अपत्यानि तदा त्रीणि मयाऽर्पितानि तत्क्षणात् ।
एवं मया तु गंगायै गोलोके षष्टिबालकाः ॥ ९ ॥

संकल्पयोगजा दत्तास्तदा सा तोषमाप ह ।
यदा साऽवातरल्लोके तदाऽपत्ययुता तु सा ॥१०॥
समागता स्नेहयुक्ताऽपत्यान्याधाय वै सह ।
गोलोकात् सा प्रथमे तु वैकुण्ठे समवातरत् ॥११॥
ततो जलस्याऽऽवरणे वैकुण्ठे तु द्वितीयके ।
ततो विष्णुपादभूता सत्यलोके ह्यवातरत् ॥१२॥
ब्रह्मणा रक्षिता सत्ये लोकेऽभिषेकवाञ्छया ।
कमण्डलौ धृता नित्यं समूर्ता स्वगृहेऽपि च ॥१३॥
कार्यकारणरूपैव ब्रह्मवासे विराजते ।
भगीरथप्रयत्नेन कार्यकारणरूपिणी ॥१४॥
अर्पिता सागरमुक्त्यै भगीरथाय वेधसा ।
सम्पुनाना महर्षींश्च पितॄन् देवाँश्च वायुजान् ॥१५॥
मेरुमार्गेण सा देवी न्यपतद् रुद्रमस्तके ।
शंभुना स्वजटायां सा धृता तत्र लयं गता ॥१६॥
तदा मात्रा चोपदिष्टा षष्टिबाला हिमालयम् ।
शंभुस्थानं परित्यज्य दूरं भयाद् ययुर्द्रुतम् ॥१७॥
इन्दुकुशं कश्यपाब्धिं त्यक्त्वा किंपुरुषं तथा ।
ययुः खण्डान्तरे यत्र निर्भयास्तस्थुरेव ते ॥१८॥
केतुमाले कृतस्थाना न्यवसंस्ते यथामतम् ।
गांगेयास्ते कुमाराश्च कुमार्यः षष्टिसंख्यकाः ॥१९॥
प्रतीक्षन्ते स्म भगवत्पादपद्मं सुखस्थिताः ।
आराधयन्ति स्म हरिं स्मरन्ति मातरं सदा ॥२०॥
तेषां मनोऽभिलषितं पूरयितुं परेश्वरः ।
प्रेषयामास शतकं भक्तानां मिषमात्रकम् ॥२१॥
तन्मिषेण स्वयं कृष्णनारायणः परेश्वरः ।
राधिके मूर्तिरूपेण विमाने गोचरोऽभवत् ॥२२॥
तेषां संकल्पसिद्ध्यर्थं यज्ञं कर्तुमियेष सः ।
अतो दत्वा वचस्तत्र पुनश्चान्तरधीयत ॥२३॥
शृणु कन्यकानामानि कुमारनामकानि च ।
तिष्ठन्ति मूर्तिमन्तश्च तिष्ठन्ति कृतकानि च ॥२४॥
ज्येष्ठा कन्या वल्गुनाम्नी निष्ठापरा द्वितीयका ।
निस्तारा च पृथा चापि दिनपा सेविका तथा ॥२५॥
सप्तमी चेन्दिरा गवादकविताऽष्टमी मता ।
राहूना नवमी गवादयाना दशमी तथा ॥२६॥
त्रिग्रासा दूरिका मित्रा गुरूना लववारिका ।
सेना स्थायिनी चाल्पापा ह्यष्टादशी मता हि सा ॥२७॥
औदरी विषतुल्या च प्रपीठा नियमानिका ।
दूना त्रिनया च हीना पाचौरा कामिका तथा ॥२८॥
दोनाऽष्टाविंशतितमा कन्याःप्रोक्ताः कुमारिकाः ।
बालत्रिकस्तथा श्वेतः कृष्णश्च कश्यपाभिधः ॥२९॥
आजवः पञ्चमश्चेति ज्येष्ठा वै भ्रातरस्त्विमे ।
ततश्चत्वार एवाऽऽसन् भ्रातरस्तान् वदामि ते ॥३०॥
परीजोऽल्पश्चाप्यायनः कृपास्थलश्चतुर्थकः ।
ततो विंशतिः सञ्जाताः शृणु नाम्ना वदामि ते ॥३१॥
यवक्रीतस्तथा रोमायनश्च युगशावकः ।
वल्गुरायो गिरीशश्च षष्ठश्चेष्टलवो मतः ॥३२॥
स्वेष्टजरः फेरुनसः पूर्तगण्डः सुपानकः ।
फलाशनो वह्निजीवो जरामौनस्त्रयोदशः ॥३३॥
पालनादो लातवायः फालनादस्तु षोडशः ।
स्वाद्वदनो नाररवो लेपनादश्च कोलकः ॥३४॥
एते विंशतिसंख्या वै कृष्णतुल्याः पराक्रमे ।
ततस्त्रीणि च जातानि ह्यपत्यानि तु नामतः ॥३५॥
पायुपश्यं लेण्डुगं च योनिगं चेति षण्ढकम् ।
एवं षष्टिः सहजानां राधिके दिव्यवैभवा ॥३६॥
वर्तते वैष्णवी कृष्णनारायणार्पणक्रिया ।
यत्र यत्र तु यश्चास्ते तत्तन्नाम्ना स्थलादिकम् ॥३७॥
तत्तत्तः प्रसिद्धिं चाऽगमत् तदधिदैवतम् ।
त एते षष्टिबाला वै गांगेयाश्च वृकायनम् ॥३८॥
प्रार्थयामासुरत्यर्थं भ्रमितुं निजदेशकान् ।
पुनर्विमानमारुह्य सर्वे ते शतमेव तु ॥३९॥
षष्ट्या सह विमानेन निर्ययुर्भ्रमितुं तदा ।
प्रादक्षिण्यक्रमेणैव व्योम्ना पूर्वक्रमेण च ॥४०॥
तत्तद्देशानवतीर्य गांगेयानां प्रवाञ्छया ।
पावनान् वै प्रकुर्वन्तः कुर्वन्तो भजनं हरेः ॥४१॥
षष्टिस्थलानि संवीक्ष्य कृत्वोत्सवाँश्च तत्र च ।
श्रावयित्वा हरेर्नाम नृपान् नॄँश्च मुहुर्मुहुः ॥४२॥
पुनस्तत्राऽऽययुः सर्वे दोनाऽऽजवाब्धिसंगमम् ।
न्यूषुः सुखेन ते सर्वे कीर्तयन्तो हरेः कथाम् ॥४३॥
गांगेयाः प्राहुरेवैतान् वृकायनादिकान् पुनः ।
कदाऽनादिकृष्णनारायणः साक्षाद्धरिः स्वयम् ॥४४॥
आगमिष्यति यज्ञार्थे कदा दृष्ट्यामवाप्स्यते ।
देशेष्वत्र प्रजाः सर्वाः प्रतीक्षन्ते समुत्सवम् ॥४५॥
वृकायन महर्षे त्वं प्रयाहि श्रीहरिं प्रति ।
शीघ्रं यथा भवेद्यज्ञस्तथाऽर्थयितुमर्हसि ॥४६॥
इत्युक्तः सिद्धिमान् दिव्यो वृकायनः समाधिना ।
द्रुतं प्राणान् सन्निरुद्ध्य ब्रह्मरन्ध्रमुपागतः ॥४७॥

निर्ययौ योगरीत्यैव चाययावाश्वसारसम् ।
नत्वा देवं बालकृष्णं चार्थयामास हृद्गतम् ॥४८॥
श्रुत्वा श्रीभगवानाह श्रावणे शुक्लपक्षके ।
पञ्चम्यां तु मखः कार्यश्चैकादश्यां समाप्तिमान् ॥४९॥
ततो देशेषु सर्वत्र स्थाने स्थाने तु राजसु ।
गन्तव्यं भाद्रमासे वै आश्विने कृष्णपक्षके ॥५०॥
याहि त्वं च प्रदेशेषु तथा प्रकाशनं कुरु ।
यथा यज्ञस्य समयं जानीयुर्जनताः प्रजाः ॥५१॥
सामग्रीश्चापि गांगेयैर्मिलित्वा सञ्चिताः कुरु ।
इदं सुदर्शनं चक्रं सह नीत्वा प्रयाहि मे ॥५२॥
प्रेषय व्योममार्गेण तद्देशेषु समन्ततः ।
भ्रमित्वा च मुहुर्यत्र भूमौ विश्रान्तिमाचरेत् ॥५३॥
तत्र यज्ञः प्रकर्तव्यस्तत्स्थलं संस्कृतं कुरु ।
प्रकाशितं स्थलं तच्च विमानेन पुनर्दिनम् ॥५४॥
भ्रमित्वाऽम्बरमार्गेण प्रसूचितं विधापय ।
अहं विमानमार्गेण श्रावणेऽह्नि तृतीयके ॥५५॥
शुक्ले देवैः कुटुम्बाद्यैर्महर्षिभिश्च शक्तिभिः ।
सह नीत्वा समायास्ये मध्याह्नोत्तरमेव ह ॥५६॥
इत्याज्ञप्तो महर्षिश्च सुदर्शनेन शोभितः ।
योगैश्वर्येण सहसा दोनाऽऽजवाब्धिसंगमम् ॥५७॥
ययौ प्रातश्च वृत्तान्तं सर्वेभ्योऽकथयच्छुभम् ।
षष्टिबालाः प्रसन्नास्तेऽभवद् श्रुत्वाऽच्युतागमम् ॥५८॥
प्रातःकृत्यानि निर्वर्त्य सर्ववाद्यैश्च कीर्तनैः ।
सर्वे विमानमारुह्य मांगल्यसूचनाय ते ॥५९॥
व्योम्ना प्रागुक्तक्रमशः सुदर्शनेन संयुताः ।
यज्ञभूमेर्निर्णयार्थं कीर्तयन्तो विनिर्ययुः ॥६०॥
एकवारं महच्चक्रं भ्रमित्वाऽऽलोक्य भूमिकाः ।
प्रदर्शयत् स्वकं तेजोमण्डलं सूर्यसदृशम् ॥६१॥
सहस्रारं सुदुर्लक्ष्यं किञ्चिल्लक्ष्यं प्रभाविनाम् ।
हृदयेषु प्रजानामाश्चर्यं चाजनयन्महत् ॥६२॥
कौतूहलं व्यदधाच्च दिव्यभावं न्यधापयत् ।
एवं तु भ्रामणे जाते प्रजाश्चासन् सुविह्वलाः ॥६३॥
द्रष्टुं पुनश्च तच्चक्रं विमानं सूर्यवर्चसम् ।
अथ चक्रं पुनस्तेन विमानेन समं भुवम् ॥६४॥
निर्णेतुं प्रासरत् शीघ्रं प्रसन्नं जनयत् सुखम् ।
निष्ठापराप्रपीठासंगमे शान्तमवातरत् ॥६५॥
उत्तरस्यां क्षितौ रासायनारण्यसुशोभिते ।
परितः सर्वदेशानां सममध्ये सुभूतले ॥६६॥
विलोक्य श्रीहरेः सुदर्शनावतरणं क्षितौ ।
विमानं संगमे तत्राऽवाऽतारयन् महर्षयः ॥६७॥
वृकायनो नीलकर्णो यवक्रीतस्तथाऽपरे ।
विश्रम्य भूमिकां दिव्यां वीक्ष्य रम्यां मखार्हिकाम् ॥६८॥
प्रशशंसुः प्रसन्नाश्चाऽभवन् गांगेयकादयः ।
अथोद्घोषयितुं स्थानं दिनं यज्ञं च ते ततः ॥६९॥
सवाद्यकीर्तनगीताः विमाने चाऽम्बरेऽभवन् ।
प्रादक्षिण्यक्रमेणैव शंखवादनपूर्वकाः ॥७०॥
पटहान् नादयन्तश्च गायन्तः कीर्तनानि च ।
हरेकृष्ण बालकृष्ण रमाकृष्ण हरेहरे ॥७१॥
पद्मजाश्रीकृष्णनारायण लक्ष्मीपतेहरे ।
इत्येवं संरटन्तस्ते मध्ये मध्ये स्थले स्थले ॥७२॥
उद्घोषयन्ति • यज्ञं सुस्थानं च दिनमित्यपि ।
सप्ताहो वैष्णवो यज्ञो वैदिकः सार्वदैवतः ॥७३॥
निष्ठापराप्रपीठासंगमे विशालभूतले ।
यतक्रीतर्षिसंस्थाने नदीद्वयान्तरालके ॥७४॥
सम्पत्स्यतेऽत्र भगवान् श्रीपतिः पुरुषोत्तमः ।
अनादिश्रीकृष्णनारायणश्चायास्यति स्वयम् ॥७५॥
श्रावणस्य तृतीयायां शुक्लायां श्रीहरिः प्रभुः ।
मध्याह्नोत्तरवेलायामाजनाभप्रदेशतः ॥७६॥
क्षेत्रात्कुकुमवाप्याख्याद् विमानेनागमिष्यति ।
देवर्षिपितृसहितो ब्रह्मप्रियासमन्वितः ॥७७॥
श्रावणस्य तु शुक्लायां पञ्चम्यां प्रातरेव सः ।
विधास्यति मखारम्भं पावनं सर्वदेहिनाम् ॥७८॥
एकादश्यां समाप्तिश्च क्रतोस्तत्र भविष्यति ।
आमन्त्र्यन्ते प्रजाः सर्वा राजानोऽपि कुटुम्बिनः ॥७९॥
सर्ववर्णा नरा नार्यो समायान्तु महाध्वरे ।
पश्यन्तु देवदेवेशं कृतार्थयन्तु जन्म च ॥८०॥
गृह्णन्तु चाध्वरप्रासादिकं भजन्तु चेश्वरम् ।
शृण्वन्तु सुकथा दिव्याः पावयन्तु कुलानि च ॥८१॥
भजन्तु भगवन्तं तं प्रत्यक्षं कृष्णनामकम् ।
सर्वैस्तु भोजनं कार्यं सप्ताहे याज्ञशालिकम् ॥८२॥
प्राप्तं दिव्यं तु समयं सफलयन्तु सर्वथा ।
गृह्णन्तु वैष्णवान् मन्त्रान् नारायणमुखान्नतु ॥८३॥
धारयन्तु पावनीश्च स्रजस्तुलसिकोद्भवाः ।
रटन्तु श्रीहरेर्नाम भवन्तु दिव्यविग्रहाः ॥८४॥
आगच्छन्तु महाभागा यज्ञे नारायणीयके ।
न भूतो न पुनर्भावी क्रतुश्चैतादृशः खलु ॥८५॥

अध्वरे चागमिष्यन्ति धामधामनिवासिनः ।
मुक्तकोट्यश्चेशकोट्यो देवकोट्यश्च मानवाः ॥८६॥
ऋषयः पितरो यक्षा गान्धर्वा राक्षसास्तथा ।
द्रुमास्तीर्थानि तत्त्वानि पर्वता भूमयस्तथा ॥८७॥
मूर्ताऽमूर्तगणाः सर्वे समायास्यन्ति चाऽध्वरे ।
कल्पलताः कामगावः सिद्धयो यतयस्तथा ॥८८॥
योगिनः सिद्धपुरुषाः शक्तयो योषितस्तथा ।
सर्वे चात्राऽऽगमिष्यन्ति पश्यन्तु तन्महाऽध्वरम् ॥८९॥
हरेकृष्ण स्वामिकृष्ण बालकृष्ण हरेहरे ।
अनादिश्रीकृष्णनारायणस्वामिन् हरेहरे ॥९०॥
राधालक्ष्मीपते हंसारमापद्मावतीपते ।
माणिकीश्रीमंजुलासद्गुणापते श्रियाःपते ॥९१॥
ब्रह्मप्रियापते कृष्णपरमेश हरेहरे ।
हरेकृष्ण स्वामिकृष्ण बालकृष्ण हरेहरे ॥९२॥
विजयोऽस्तु हरेश्चात्र प्रजानां विजयोऽस्तु च ।
सुखाभिवृद्धिरेवाऽस्तु स्मृद्धिश्चास्तु सदाऽव्यया ॥९३॥
आरोग्यं चाऽस्तु देशानां भक्तिश्चास्तु परेश्वरे ।
परमेशं चिन्तयन्तु प्रापयन्तु परां गतिम् ॥९४॥
भुक्तिं मुक्तिं चार्जयन्तु नारायणप्रसादतः ।
अवश्यं तु मखे समागत्य तृप्ता भवन्तु हि ॥९५॥
भवन्तु पावना भक्ता मोक्षयोग्याः शुभाश्रयाः ।
दानहोमपरास्तत्र भवन्तु मखभागिनः ॥९६॥
राजानो राजवर्गाश्च श्रेष्ठिवर्गाः प्रजाजनाः ।
बाला बाल्यः स्त्रियो वृद्धा गृह्णन्तु लाभमाध्वरम् ॥९७॥
इत्येवं राधिके व्योम्नि विमानं घोषणां मुहुः ।
अकरोत् सप्तवारं वै भ्रमित्वा केतुमालके ॥९८॥
उरलात् पश्चिमे देशे समुद्रतीरकावधिम् ।
सर्वदेशेषु कृष्णस्य घोषणा वै प्रवर्तिता ॥९९॥
ततो विमानं शान्तं च यतक्रीतप्रदेशके ।
अवातरत् प्रपीठायाः पूर्वे नीपरपश्चिमे ॥१००॥
अनादिश्रीकृष्णनारायणो जयतु सर्वदा ।
उच्चरन्तश्चावतेरुः सुदर्शनेन संहिताः ॥१०१॥
विशश्रमुर्महारण्येऽमारात्रौ ते महर्षयः ।
गांगेया बालबालाद्यः शान्तिमापुः परां तदा ॥१०२॥
इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने गांगेयानामुद्भववृत्तान्तस्तन्नामानि, वृकायनस्य कुंकुमवापिकाक्षेत्रागमनं, हरेरामन्त्रणं, सुदर्शनेन सह केतुमाले वृकायनागमः, सुदर्शनस्थैर्यदर्शितक्रतुस्थलीनिर्णयः, यज्ञोद्घोषणा चेत्यादिनिरूपणनामा षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके पश्चाद् यदजायत वच्मि ते ।
अनादिश्रीकृष्णनारायणस्वामिपतीश्वरः ॥ १ ॥
प्रैषयल्लोमशं चान्यान् महर्षीन् यज्ञकोविदान् ।
पत्नीव्रतं महर्षिं च श्वेतव्यासं सनातनम् ॥ २ ॥
सनत्कुमारं च तथा गणेशं जातवेदसम् ।
सत्रायणं गालवं च स्वीयप्रकाशमित्यपि ॥ ३ ॥
शतानन्दं नारदं च देवगुरुं बृहस्पतिम् ।
ईशानं च महादेवं कपिलं भगवन्मुनिम् ॥ ४ ॥
शुकं च वल्लभमुनिं वामनं सुरतायनम् ।
हेमन्तं देवप्रकाशं यज्ञोपकरणान्यपि ॥ ५ ॥
समग्राणि विमाने प्रेषयामास स तान्मुनीन् ।
प्रतिपद्दिवसे सर्वे मध्याह्नोत्तरमेव तु ॥ ६ ॥
प्राप्ता निष्ठापरातीरे यत्र वृकायनादयः ।
स्वागतं कृतवन्तस्ते यवक्रीतादयस्तदा ॥ ७ ॥
आगतानां लोमशादिमहर्षीणां जयादिभिः ।
मधुपर्कादिभिश्चापि पुपूजुर्लोमशादिकान् ॥ ८ ॥
विमानं तु विमानेन सह भूमावरक्षयन् ।
गांगेयाश्च यवक्रीतादयः पुपूजुरादरात् ॥ ९ ॥
विश्वकर्मा तथा देवायतनो द्वौ समागतौ ।
हर्याज्ञया शिल्पिवर्यौ तत्रैव प्रतिपद्दिने ॥१०॥
विश्रम्य भोजनं कृत्वा ततो भूमिविशोधनम् ।
मण्डपं धर्मशालाश्च पाकशालाः प्रचक्रतुः ॥११॥
यज्ञशाला वासशाला होमशालाः प्रचक्रतुः ।
घट्टशाला वस्तुशाला महीमानालयान् शुभान् ॥१२॥
मुक्तशाला अवतारनिवासान् देवतालयान् ।
ऋषिशालाः पितृशाला यक्षराक्षससद्गृहान् ॥१३॥
जडचेतनवासाँश्च चक्रतुस्ते समन्ततः ।
शतक्रोशमिते देशे नदीद्वयान्तरालके ॥१४॥
चक्रतुर्मण्डपान् रम्यान् यथावासिसमर्हणान् ।
यवक्रीतादयश्चापि स्वस्वदेशान् ययुर्द्रुतम् ॥१५॥
तत्तद्देशीयनृपतीनानिन्युश्च प्रजास्तथा ।
श्रेष्ठिनो भक्तवर्यांश्च नरान् नारीः कुटुम्बिनः ॥१६॥
विमानैस्त्वरितं सर्वे चानिन्युश्चाध्वरस्थलीम् ।
शृणु त्वं राधिके मुख्याभिधानानि मखार्थिनाम् ॥१७॥
सम्राट् पूर्वप्रदेशानामुरलकेतुसंज्ञकः ।
यवक्रीतर्षिणा सार्धं षष्टिलक्षप्रजायुतः ॥१८॥

कुटुम्बसहितश्चाब्जलक्ष्मीद्रव्यादिभिः सह ।
यानवाहनसंस्मृद्ध्या यज्ञार्थे समुपाययौ ॥१९॥
रोमायनर्षिणा साकं रुमाणां क्रथको नृपः ।
लक्षप्रजाभिः सहितः सकुटुम्बः समाययौ ॥२०॥
कृपास्थलर्षिणा सार्धं पृथुराजः कुटुम्बवान् ।
दशसाहस्रमनुजैः सह यज्ञार्थमाययौ ॥२१॥
युगशावर्षिणा सार्धमुष्ट्राल्नृपतिस्तथा ।
हंकाराख्यनृपश्चापि जयकोष्ठलभूपतिः ॥२२॥
त्रयस्ते भ्रातरो भूपाः कुटुम्बसहितास्तथा ।
लक्षप्रजायुतास्तत्र मखार्थे समुपाययुः ॥२३॥
वल्गुरायर्षिणा सार्धं तीराणभूपतिस्तदा ।
दशसाहस्रमनुजैः कुटुम्बी क्रतुमाययौ ॥२४॥
गिरीशेन समं राजा अल्वीनरः कुटुम्बवान् ।
दशसाहस्रमनुजैः सार्धं यज्ञार्थमाययौ ॥२५॥
इष्टलवर्षिणा सार्धं जिनवर्द्धिनृपस्तदा ।
कुटुम्बी पञ्चसाहस्रप्रजाभिर्यज्ञमाययौ ॥२६॥
आप्यायनर्षिणा सार्धमल्पकेतुर्नृपस्तदा ।
दशसाहस्रमनुजैः कुटुम्बेन सहाययौ ॥२७॥
स्वेष्टजरर्षिणा सार्धं जयकृष्णवभूपतिः ।
दशसाहस्रमनुजैः कुटुम्बेन सहाययौ ॥२८॥
फेरुनरर्षिणा सार्धं परीशाननृपो मखे ।
दशलक्षप्रजायुक्तः सकुटुम्बः समाययौ ॥२९॥
परीजमुनिना सार्धमिन्दुरायनृपो मखे ।
त्रिसाहस्रप्रजायुक्तः सकुटुम्बः समाययौ ॥३०॥
पूर्तगण्डर्षिणा सार्धं गण्डको नृप आययौ ।
सकुटुम्बः पञ्चशतप्रजाभिश्चाध्वरे तदा ॥३१॥
सुपानमुनिना सार्धं मुद्राण्डनृपतिस्तदा ।
पञ्चलक्षप्रजायुक्तः कुटुम्बी समुपाययौ ॥३२॥
फलाशनर्षिणा सार्धं लीनोर्णनृपतिर्मखे ।
लक्षद्वयप्रजायुक्तः कुटुम्बी समुपाययौ ॥३३॥
वल्लीजीवनमुनिना साकं बृहच्छरो नृपः ।
सहस्रमनुजैर्युक्तः कुटुम्बी मखमाययौ ॥३४॥
जरामौनर्षिणा सार्धं बललीनो नृपो मखे ।
दशलक्षप्रजायुक्तः कुटुम्बवान् समाययौ ॥३५॥
पालनादर्षिणा सार्धं वरसिंहो नृपोऽध्वरे ।
लक्षप्रजान्वितः कुटुम्बेन युतः समाययौ ॥३६॥
लातवायर्षिणा सार्धं रायगामलभूपतिः ।
सहस्रमनुजैः सार्धं कुटुम्बी यज्ञमाययौ ॥३७॥
फाल्गनादर्षिणा साकं फेनतन्तुनृपो मखे ।
सहस्रमनुजैर्युक्तः कुटुम्बी समुपाययौ ॥३८॥
स्वाद्वदनर्षिणा सार्धं स्तोकहोमनृपो मखे ।
सहस्रमनुजैर्युक्तः कुटुम्बी समुपाययौ ॥३९॥
नाररवर्षिणा सार्धं काष्ठयाननृपो मखे ।
पञ्चशतप्रजायुक्तः कुटुम्बी समुपाययौ ॥४०॥
लेपनादर्षिणा सार्धं कोलको नृपतिः क्रतौ ।
शतमानवयुक्तश्च कुटुम्बी समुपाययौ ॥४१॥
लयदानप्रदेशेभ्यश्चांगराजः समाययौ ।
विषपर्षियुतो लक्षप्रजायुक्तः कुटुम्बवान् ॥४२॥
शकुन्तदेशतश्चापि शाकुन्तको नृपोऽध्वरे ।
लक्षप्रजान्वितः कुटुम्बवान् तत्र समाययौ ॥४३॥
आयसात्तु प्रदेशाद्वै प्रजा यज्ञे समाययुः ।
उत्तरद्वीपभागेभ्यस्तथा प्रजाः समाययुः ॥४४॥
विमानैर्हस्तिभिश्चाश्वैरनोभिः राण्डियैस्तथा ।
उष्ट्रैश्च वृषभैश्चापि स्वर्णरत्नधनान्विताः ॥४५॥
बहुभोज्यप्रदेयैश्च वस्तुभिः सह चाययुः ।
दासदासीसमायुक्ताः पुत्रपुत्र्यादिवल्गिताः ॥४६॥
दम्पतीसमुदायाश्च सवे तत्र समाययुः ।
यज्ञार्हाभिश्चोपदाभिः सामग्रीभिः समाययुः ॥४७॥
षड्विंशतिक्षितिपास्तेऽसंख्यद्रव्यसमन्विताः ।
यज्ञार्थे वस्तुसामग्रीर्नीत्वोत्साहभरा मखे ॥४८॥
आगत्य प्रददुः सर्वाः सामग्रीर्विविधास्तदा ।
गालवायर्षये सर्वाध्यक्षेशानाय वै तथा ॥४९॥
ईशानः श्रीमहादेवो वैष्णवः परमेश्वरः ।
सर्वयज्ञक्रियाध्यक्षो वस्त्वध्यक्षोऽभवत्तदा ॥५०॥
मण्डपादिव्यवस्थाया नियामकोऽपि सो ह्यभूत् ।
राजभिस्तत्र चागत्येशानाय विनिवेदितम् ॥५१॥
राजवर्गो हि प्रत्येकं यज्ञार्थे यजमानकः ।
व्ययं दातुं प्रभवति तस्मान्मखा नृपाऽर्थिताः ॥५२॥
षड्विंशतिसंख्याकाश्च भवन्तु कुण्डशोभिताः ।
श्रुत्वैवं राजवर्गस्य वाक्यं वृकायनस्तथा ॥५३॥
लोमशश्च तथेशानो नीलकर्णादयस्तथा ।
स्वयंप्रकाशः कपिलो देवप्रकाशकोऽपरे ॥५४॥
अग्रगा जगृहुर्वाचो विश्वकर्माऽत्र दैवतः ।
आज्ञां प्राप्यर्षीणां तत्र तथा कुण्डानि चक्रतुः ॥५५॥
सप्तविंशो महान् कुण्डमूर्धन्यो भगवत्कृते ।
विहितो होममूर्धन्यः कृष्णनारायणार्थकः ॥५६॥

कुण्डा नवविधास्तत्र कृता वै विश्वकर्मणा ।
वेदर्षिविधितः सर्वे दिशां नियमतस्तथा ॥५७॥
सर्वतोभद्रवेद्याख्यः कमलाकारकुण्डकः ।
सर्वतोभद्रिका वेदी चतुरस्रा तथा कृता ॥५८॥
योनिकुण्डः कृतश्चापि कुण्डोऽर्धचन्द्रकः कृतः ।
कुण्डस्त्रिकोणकश्चापि कुण्डो वर्तुलकस्तथा ॥५९॥
षट्कोणकुण्डकश्चापि षट्पत्रकुण्डकस्तथा ।
कुण्डोऽष्टकोणकश्चापि कुण्डोऽष्टपत्रकस्तथा ॥६०॥
कृतश्चाचार्यकुण्डश्च ऋग्वेदिकुण्डकः कृतः ।
यजुर्वेदिकुण्डकश्चाऽथर्ववेदिप्रकुण्डकः ॥६१॥
सामवेदिकुण्डकश्च वेदिकाश्चापराः कृताः ।
मध्यवेद्यः पार्श्ववेद्यस्तथा च विधिना कृताः ॥६२॥
एवं यथायथं पृथ्वीं संस्कृत्य मण्डपान्तरे ।
यथायोग्यान् शुभकुण्डान् वेदिकाश्चातिशोभिताः ॥६३॥
देवायतनकश्चापि विश्वकर्मा प्रचक्रतुः ।
मण्डपान् रुचिरान् रम्यस्तंभध्वजसुशोभितान् ॥६४॥
दिक्चिह्नादिसमाढ्यसत्तोरणादिभिरञ्चितान् ।
शतक्रोशे कारयामासतुस्तौ दिव्यवैभवान् ॥६५॥
नैसर्गिकानि तेजांसि निसर्गसलिलान्यपि ।
शीतसुगन्धिवायुश्च निसर्गोद्यानभूमयः ॥६६॥
स्वल्पविमानवाहाश्च विद्युद्विमानकोटयः ।
दोलाश्च विविधास्तत्र निसर्गगीतयस्तथा ॥६७॥
शीतोष्णह्रदकुण्डाश्च निसर्गगन्धसारकाः ।
शय्यावाहनभोग्यानि मालापुष्पाणि वै तथा ॥६८॥
निसर्गतैलसाराश्च सर्वं नैसर्गिकं कृतम् ।
स्वर्गं वा सत्यलोको वा किं वा वैकुण्ठमेव तत् ॥६९॥
सूर्या निसर्गजा यत्र चन्द्रा निसर्गभासुराः ।
सरांसि सरितो यत्र वहन्ति च निसर्गजाः ॥७०॥
एवं वै दैहिकं सर्वं क्लृप्तं दिव्यं निसर्गजम् ।
राज्ञां चापि प्रजानां च श्रेष्ठिनां च तपस्विनाम् ॥७१॥
दरिद्राणां नराणां च योषितां षण्ढकस्य च ।
भोगा भोग्यास्तथा वासा भक्ष्याः पेयास्तथालयाः ॥७२॥
समानं दिव्यलोकीयं नित्यविभूतिजं तदा ।
क्लृप्तं वै सच्चिदानन्दं ह्रासनाशविवर्जितम् ॥७३॥
दुग्धार्थं चागतास्तत्र गोलोकात् कामधेनवः ।
दुग्धकुल्या दधिकुल्या घृतकुल्याश्च पायसम् ॥७४॥
क्षीरं च दुग्धसाराणि नवनीतानि वै तदा ।
अक्षय्यान्यभवन् दिव्यान्यपि हव्यान्यनन्ततः ॥७५॥

वृक्षाश्च वल्लिकाः कल्पलता निन्युर्मधून्यपि ।
इक्षुसारान् गुडान् खण्डाः शर्कराश्चाप्यसंख्यकाः ॥७६॥
गुन्द्रांश्च गुन्द्रपाकांश्च फलानि च दलानि च ।
अरण्यानि वनान्युद्यानानि निन्युरनन्ततः ॥७७॥
ओषधयस्तदा दिव्याः कणान् व्रीहीन् रसाँस्तथा ।
तिलान् यवान् सुधान्यानि समिधो निन्युरुत्सुकाः ॥७८॥
मेघाश्च वार्धयो मिष्टा नदा नद्यः सरांसि च ।
नैसर्गशीतमिष्टानि निन्युः पेयानि चान्ततः ॥७९॥
श्रीलक्ष्म्यौ श्रीहरेः पत्न्यौ भूलीलाब्जाविभूतयः ।
रमाऽन्नपूर्णा कमला निन्युर्मिष्टान्नपर्वतान् ॥८०॥
स्तम्बाः स्तबकागुच्छाश्च गुल्मा नालाश्च काण्डिकाः ।
वल्लयस्तृणपत्राश्च निन्युः पुष्पाणि चान्ततः ॥८१॥
गह्वराणि खनयश्च पर्वता विवराणि च ।
गैरिकाश्चित्रचूर्णानि निन्युः कुंकुमरंगकान् ॥८२॥
मेरुः पात्राणि सर्वाणि चेन्द्रश्चाऽऽस्तरणानि च ।
देवताश्च विमानानि निन्युर्यज्ञमहोत्सवे ॥८३॥
वसवश्च कुबेरश्च द्रव्याणि तु ददुर्मखे ।
हिमालयोरलाद्याश्च मणिरत्नानि वै ददुः ॥८४॥
समुद्रा द्वीपभागाश्च मौक्तिकानि ददुर्मखे ।
घनाश्चक्रुस्तदा छायामृतवश्चानुकूलताम् ॥८५॥
गन्धर्वा वादकाः सर्वे ददुर्वाद्यानि शारदाः ।
राजानश्च ददुर्दासदासीर्भृत्यान् सुकर्मिणः ॥८६॥
छत्रचामरयानानि वाहनानि क्रतौ तदा ।
गृहे गृहे च निचिताश्चिन्तामणिगणास्ततः ॥८७॥
चिन्तयन्ति यदेवाऽर्थ्यं तत् तत् सर्वं ददत्यपि ।
पटहः श्रीहरेर्दिव्यो नृत्यँश्च निनदन् मुहुः ॥८८॥
कल्पपटहरूपोऽयं चाऽक्षरब्रह्मरूपवान् ।
सर्वापेक्ष्यनिधिप्रख्यो ददात्यप्यभिवाञ्छितम् ॥८९॥
वस्त्राभूषाद्रवद्द्रव्यशृंगारं देवशिल्पिनः ।
यदपेक्ष्यं द्रुतं प्रत्युपस्थापयन्ति वै मखे ॥९०॥
एवं वै सर्ववस्तूनामानन्त्यं तत्र विद्यते ।
जलदेवी स्वयं यत्र रसरूपा व्यजायत ॥९१॥
भूदेवी भोज्यरूपा च किं न्यूनं तत्र राधिके ।
अनादिश्रीकृष्णनारायणस्य वाञ्छया त्विदम् ॥९२॥
संहितं समभूत् तत्राऽन्तःस्थितस्याऽऽज्ञया द्रुतम् ।
सूर्यं चन्द्रं निशां सन्ध्यां दिनं वायुं तथाऽम्बरम् ॥९३॥
अनलं श्रवणान् देवान् पृथ्वीं जलं च पर्वतान् ।
मेघान् कालं वृषं मायामाज्ञां चकार माधवः ॥९४॥

अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
सर्वे द्रागेव सर्वत्र चतुर्दशस्तरेषु वै ॥९५॥
आवेदयन्तु जनता अध्वरो वै प्रजायते ।
हव्यमादाय च केतुमाले यन्तु मखोत्सुकाः ॥९६॥
इत्याज्ञप्तैर्वेदिताश्च स्थानिनः स्तरवासिनः ।
आनिन्युस्तत्र हव्यानि चोपदाः सीमवर्जिताः ॥९७॥
इत्येवं राधिके यज्ञेऽसंख्यसामग्रिकाद्रयः ।
पूर्वमेवाऽभवन् क्लृप्ता अचिन्त्या वै महर्षिभिः ॥९८॥
षड्विंशतिक्षितिपाला महाश्चर्यं प्रपेदिरे ।
अहो देवस्य माहात्म्यं चानुमातुं न शक्यते ॥९९॥
अभवन् गर्वहीनाश्च सामग्र्यल्पं निजं विदुः ।
पठनाच्छ्रवणाचास्य राधे यज्ञफलं लभेत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशादीनामृषीणां देवायतनविश्वकर्मणोः केतुमालीयभूभृतां प्रजानां च यज्ञभूमावागमनम्, मण्डपकुण्डहव्योपकरणादिसमुपस्थितिरिति-निरूपणनामा सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणः स्वयम् ।
अक्षराख्यं पार्षदं स्वं सस्मार तूर्णमेव ह ॥ १ ॥
आगतश्चाक्षरस्तत्र कुंकुमवापिकास्थले ।
नत्वा तस्थौ हरिस्तस्मै ददावाज्ञां शुभश्रुतिम् ॥ २ ॥
केतुमाले महान् यज्ञो भविष्यतीति पत्रिकाम् ।
कुंकुमाढ्यां सर्वसृष्टावामन्त्रणार्थमर्थदाम् ॥ ३ ॥
शीघ्रं दिव्यैः पार्षदैस्त्वं सम्प्रेषय च मा चिरम् ।
इत्युक्त्वा भगवान् तस्मै ददौ तां पत्रिकां यथा ॥ ४ ॥
अनादिश्रीकृष्णनारायणो विजयतेतमाम् ।
केतुमाले साप्रपीठानिष्ठापरासमागमे ॥ ५ ॥
श्रावणे शुक्लपञ्चम्यां सर्वेष्टिं वैष्णवं मखम् ।
करिष्यति त्रिलोकस्थैस्तत्रागन्तव्यमादरात् ॥ ६ ॥
गृहीमश्चातिथिलाभं मखलाभं विदन्तु च ।
एकादश्यां पूर्णहवो भविष्यति सुखोत्सवैः ॥ ७ ॥
अवतारा ईश्वराश्च पितरः ऋषिदेवताः ।
मानवाः काश्यपाः सर्वे पातालादिनिवासिनः ॥ ८ ॥
स्थावरा जंगमाश्चापि समायान्तु मखे सुखाः ।
लोमशश्च यवक्रीतः कपिलश्च बृहस्पतिः ॥ ९ ॥
सनत्कुमारो भगवान् उरलकेतुभूपतिः ।
ईशानश्च वयमेते निवेदयाम आदरात् ॥१०॥
जीवलोके ईशलोके ब्रह्मलोके वसन्ति ये ।
आगन्तव्यं समस्तैस्तैर्नारायणोऽपि वच्म्यहम् ॥११॥
अनादिश्रीकृष्णनारायणस्त्रिवारकं दले ।
प्रतिज्ञाय पुनर्वच्मि सर्वे चायान्तु वै मखे ॥१२॥
कुंकुमवापिकाक्षेत्रात् तृतीयायामहं मखे ।
गमिष्यामि भवद्भिश्चोपस्थातव्यं तदा मखे ॥१३॥
पार्षदाः सर्वधामस्थाः पार्षदान्यश्च शक्तयः ।
समायान्तु महीमानसेवार्थं पूर्वके दिने ॥१४॥
इत्येवं पत्रिकाः कोटिरूपिणीः समप्रैषयत् ।
सर्वलोकेषु भगवान् कृष्णनारायणः स्वयम् ॥१५॥
चिदाकाशेन च भूताकाशेन मायया तथा ।
महाकालेन धर्मेण द्वारा वै सर्वसृष्टिषु ॥१६॥
सृष्ट्यादौ राधिके सर्वतत्त्वानां लोकलोकिनाम् ।
आसीत् कुटुम्बवद् योगः संसर्गो मेलनं गतिः ॥१७॥
तत्र नैवास्ति चाश्चर्यं यत्रैते द्वाररूपिणः ।
अहं गोलोकगश्चापि त्वया साकं तदाऽगमम् ॥१८॥
सर्वे नारायणास्तत्राऽगच्छन् विलोक्य पत्रिकाः ।
सर्वसृष्टिजनास्तत्र चाययुः स्नेहसंभृताः ॥१९॥
वार्धयस्तु जनानां वै विमानानां तदाम्बरे ।
प्रदृश्यन्ते सर्वदिक्षु त्वायान्तो मखभूमिकाम् ॥२०॥
कोट्यर्बुदाब्जपद्मानि त्वाययुः प्रतिदिक्स्तरात् ।
यावन्तो मुक्तकोट्यश्च तावन्तः पार्षदादयः ॥२१॥
तावत्यः शक्तयश्चापि मुक्तान्यः सिद्धयस्तथा ।
तावन्तश्चेश्वराः सर्वे स्वस्वशक्त्यादिशोभिताः ॥२२॥
तावन्तश्च महेशाद्यास्तावन्तश्चाण्डवासिनः ।
सुराऽसुराश्चिदचिदो द्रव्यगुणक्रियादिकाः ॥२३॥
वेदा विद्याश्च तीर्थानि तत्त्वानि धर्मविस्तराः ।
तावन्त एव खनिजाः सर्वस्वर्गनिवासिजः ॥२४॥
विवरस्थाश्च मिश्रस्था व्यतिरिक्तास्तथाऽन्विताः ।
परब्रह्ममयाः सर्वे त्रिगुणास्तत्र चाययुः ॥२५॥
सर्वसृष्टिनिवासानां दर्शनं दुर्लभं तु यत् ।
मखेऽत्र सुलभं तद्वै नारायणकृपावशात् ॥२६॥
किं वक्तव्यं तदा राधेऽन्यथाकर्ता हरिस्तदा ।
कर्ताऽकर्ताऽपि सिद्धः स नान्यशक्तिस्तु तादृशी ॥२७॥
चुम्ब्यन्ते सर्वसामग्र्यो यादृशं चुम्बकं भवेत् ।
चुम्बकोऽत्र परब्रह्म सर्वाऽऽकृष्टिः कथं न वै ॥२८॥

वर्णयितुं न शक्नोमि यथाऽऽकृष्टाः प्रजा मखे ।
अतः पूर्वं मयाऽऽकृष्टा न दृष्टा वै मखान्तरे ॥२९॥
उत्सवात्ते समायान्ति कीर्तनैर्वाद्यनर्तनैः ।
वदन्तश्च परब्रह्माऽऽमन्त्रयत्येव नोऽप्यहो ॥३०॥
एवं वै गम्यमानेषु सर्वेषु च समन्ततः ।
अनादिश्रीकृष्णनारायणः प्रस्थानमाचरत् ॥३१॥
ऋषिभिर्मुनिभिः साकं क्षेत्रपालादिभिस्तथा ।
तीर्थैः सौराष्ट्रदेशीयैः प्रजाजनैः कुटुम्बिभिः ॥३२॥
ब्रह्मप्रियाभिः सर्वाभिः कोट्यर्बुदाब्जसंख्यकैः ।
भक्तैस्तथा कुटुम्बेन सहाऽऽरोहद् विमानकम् ॥३३॥
विमानेषु सहस्रेषु तथाऽन्या भक्तकोटयः ।
आरोहन् व्योममार्गेण जयनादान् प्रचक्रिरे ॥३४॥
साधवश्च तथा सिद्धाः सत्योऽन्वीयुस्तदा हरिम् ।
आकाशं व्यनदत् सर्वं विमानवाद्यगर्जनैः ॥३५॥
अग्रे वेदा मूर्तिमन्तः प्रयान्ति मन्त्रिघोषिणः ।
वेत्रधर्यः शारदाद्या गायन्ति गुणकीर्तनम् ॥३६॥
देववाद्यविमानानि कवयो यान्ति वै ततः ।
निशानध्वजडंकाद्यास्ततो यान्ति जयध्वनाः ॥३७॥
ततो मुक्तास्ततः पत्न्यो ब्रह्मप्रिया असंख्यकाः ।
ततो विमानं कृष्णस्य ततश्च रक्षिणो जनाः ॥३८॥
पार्षदाश्च ततः सर्वे प्रजास्ततः सुराष्ट्रजाः ।
क्षेत्रपालाः सर्वपश्चाः समायान्ति मखे तदा ॥३९॥
हिमालयः स्वयं यद्वद् गगने किं प्रगच्छति ।
स्वर्गे वा स्वयमागत्य क्षित्युत्तरे प्रगच्छति ॥४०॥
सागरा रत्नशोभाढ्या यान्ति वा नाकमेव किम् ।
इत्येवं दर्शनं व्योम्नि कृष्णनारायणस्य वै ॥४१॥
प्रस्थानसार्थयानस्याऽभवत्तदा विलक्षणम् ।
तृतीयाया दिने मध्याह्नोत्तरं भगवान् स्वयम् ॥४२॥
घटिकासु दशस्वेव व्यतीतासु मखाम्बरम् ।
प्राप तदा जयध्वानाऽन्तरीक्षे खे स्थलेऽभवन् ॥४३॥
अर्बुदाऽर्बुदकोट्यश्च दर्शकानां विनिर्ययुः ।
आकाशं तेजसा व्याप्तं विलक्षणेन चाऽभवत् ॥४४॥
सूर्यवह्न्यादयो यत्र विलीना नैव गोचराः ।
लोकानां दर्शनयोग्यान्यासन् नेत्राणि वै तदा ॥४५॥
अनादिश्रीकृष्णनारायणस्य कृपयैव ह ।
श्रीहरेस्तेजसा सर्वं तेजोमयं ह्यभूत्तदा ॥४६॥
अपि कृष्णाः शिलाः सर्वा भासन्ते मणयो यथा ।
अपि कृष्णं भूतलं तु चन्द्रोज्ज्वलमभूत्तदा ॥४७॥
अपि रोमाणि केशाश्च स्वर्णवर्णास्तदाऽभवन् ।
अपि काका भ्रमराश्च हंसा इव च कोकिलाः ॥४८॥
अपि नीलं तदा व्योमाऽभवच्चान्द्रं तलं यथा ।
अभ्यान्तराणि लोकानामभवन् ब्रह्मभानि तु ॥४९॥
भौतिकं तु तदा दिव्यं यावत्त्वक्षरवद्ध्यभूत् ।
स्वर्गभूव्योमतत्त्वानां भेदोऽपि विलयं गतः ॥५०॥
सप्तरूपाणि सर्वाणि श्वेतवर्णानि चाऽभवन् ।
मायायास्तामसो रक्तो भावोऽपि सत्त्वतां ययौ ॥५१॥
अपि सर्वाश्च सामग्र्यो ब्रह्ममय्यस्तदाऽभवन् ।
ब्रह्मभवनतुल्याश्च तदा ग्रामा गृहाणि च ॥५२॥
सर्वं ब्रह्ममयं चाभूद् बालकृष्णस्य तेजसा ।
दिव्योपहारपूजाद्यैः प्रजा नृपा महर्षयः ॥५३॥
राधिके स्वागतार्थं चोपतस्थिरे समुत्सुकाः ।
जयनादान् प्रकुर्वन्तश्चित्रयन्तः प्रतिकृतीः ॥५४॥
साञ्जलयः साईणाश्च सभावाः स्नेहिलाननाः ।
प्रफुल्लनेत्रपद्माश्च प्रेमभराऽऽन्तरास्तथा ॥५५॥
नार्यः कुक्षौ धृतबाला नराश्चुतशिरोधृताः ।
ऊर्ध्वलग्नवृत्तयश्चोत्तानाननास्तदाऽभवन् ॥५६॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् प्रभुः ।
तिरोभावयदुग्रं तत्तेजोऽम्बरादवातरन् ॥५७॥
सर्वदृश्योऽभवच्चापि स्थूलदृश्योऽभवत् प्रभुः ।
अम्बरात् सुरमुक्तानां पुष्पवृष्टिस्तदाऽभवत् ॥५८॥
चन्दनानां शुभा वृष्टिश्चाऽक्षतानां तथाऽभवत् ।
स्वर्णरूप्यकहीराणां वृष्टिस्तदाऽम्बरादभूत् ॥५९॥
कलशगोपुरसोपानैः शनैः कृष्णो ह्यवातरत् ।
चतुर्दन्तार्जुनहस्तियाने कृष्णं न्यषादयत् ॥६०॥
नृपाः सर्वे स्वर्णरत्नहारान् गुच्छान् समार्पयन् ।
नेमुश्च दण्डवत् देव्यो राज्ञ्यः कन्या व्यवर्धयन् ॥६१॥
भगवन्तं त्वक्षताद्यैश्चांकुरैश्चन्दनैः सुमैः ।
नेत्रपुटाख्यकमलैर्दुःखहाञ्जलिभिर्मुहुः ॥६२॥
शाटीप्रान्तैस्तथा चोपस्थानैः स्वस्तिकहस्तकैः ।
हृदयैः प्रेमभावैश्च नमनैस्तमवर्धयन् ॥६३॥
जयशब्दैश्च लाजाभिः कुसुमैस्तीर्थवारिभिः ।
अवर्धयन् हरिं बालकृष्णं नारायणं प्रजाः ॥६४॥
व्यजनैश्चामरैश्छत्रैः सुगन्धिशीतलैर्जलैः ।
गन्धसारान्वितैः कृष्णं श्रेष्ठिनो सुखयन् मुदा ॥६५॥
नारिकेलैः शर्कराभिः कुंकुमाबीरलालकैः ।
मांगलिककफलाद्यैश्च बालकृष्णं व्यवर्धयन् ॥६६॥

स्वर्णरथे शतचक्रे दिव्यसिंहासने प्रभुः ।
राजमानश्च गृह्णाति जनार्पितोपदास्तदा ॥६७॥
कांश्चिद् दृष्ट्या नेत्रकोणैः स्मितैर्हस्तैश्च केन च ।
भावैस्तु विविधैः कृष्णो मानयामास वै प्रजाः ॥६८॥
सर्वेभ्यो हासवदनैर्बहुरूपैस्तदा हरिः ।
समन्ततो ददौ नैजं दर्शनं कृपया चिरम् ॥६९॥
यथा चाग्रे तथा पश्चे यथा पार्श्वे तथोर्ध्वके ।
तथैव सर्वनेत्रेषु हृदयेष्वप्यदृश्यत ॥७०॥
केभ्यश्चिद्धारपुष्पाणि ददात्येव प्रसादतः ।
केभ्यश्चिद्धीरकान् मौक्तिकादीन् रत्नानि गुच्छकान् ॥७१॥
ददात्येव महाराजः प्रासादिकान् परेश्वरः ।
फलानि ताम्बूलकानि पूग्यादीनि ददाति च ॥७२॥
नारिकेलानि वस्त्राणि पूजायामागतानि च ।
स्वागतार्थोपदात्मानि प्रासादीनि ददाति वै ॥७३॥
शतक्रोशेषु सर्वत्र दत्वा स्वदर्शनं हरिः ।
गजयानेन वै रात्रौ निवासालयमाययौ ॥७४॥
जलपानादिकं चक्रुः सर्वे सार्थाश्च भोजनम् ।
दत्तालयेषु योग्येषु विश्रमुश्च वै ततः ॥७५॥
सकुटुम्बो हरिश्चापि ब्रह्मप्रियासमन्वितः ।
षड्युक्चत्वारिंशदूर्ध्वे शतयुक् बुभुजे स्वयम् ॥७६॥
पपौ शान्ति जगामाऽथ निद्रां योगमयीमपि ।
आप्रातश्चापि जग्राह दासदासीप्रसेवितः ॥७७॥
रात्रौ स्थले स्थले तत्र बभूवुः कीर्तनानि तु ।
कथाः प्राग्वृत्तमिश्राश्च संप्रचक्रुर्महर्षयः ॥७८॥
चारणा वंशविस्तारान् इतिवृत्तजुषस्तदा ।
इतिहासान् जगदुश्च समाजे भूभृतां तदा ॥७९॥
साधवो ज्ञानवार्ताश्च चक्रुर्मोक्षविधिप्रदाः ।
नार्यो गायन्ति रागाद्यैर्गीतिकाः कृष्णमानसाः ॥८०॥
कन्यका रासमाबध्य भ्रमन्ति वर्तुलानि च ।
गायन्ति तालिकाध्वानैर्नूपुरघुर्घुरीगतैः ॥८१॥
नर्तक्यो नर्तनं रंगे कुर्वन्ति धनिसंकुले ।
वाद्यका वाद्यकुशला वादयन्ति रमन्ति च ॥८२॥
नटा नाट्यं प्रकुर्वन्ति दर्शयन्ति च पाटवम् ।
कवयो रचनाव्याप्ता दृश्यन्ते शंसिनस्तदा ॥८३॥
मल्लाः कुर्वन्ति युद्धानि लोकरञ्जनकानि च ।
प्रदर्शनानि दृश्यन्ते सृष्टिसृष्ट्यन्तराणि च ॥८४॥
इन्द्रजालानि लोक्यन्ते रचितानि सुवेदिभिः ।
हास्यशालासु हास्यानि नर्माणि च भवन्त्यपि ॥८५॥
प्रकाश्यन्ते वह्निचूर्णैर्विद्युदग्निसुशिल्पिभिः ।
वह्लावाकाररूपाणि चाम्बरे गर्जनानि च ॥८६॥
खेलनानि वह्नियोगैः क्षिप्यन्ते त्वम्बरेऽपि च ।
भवन्ति गर्जना व्योम्नि प्रस्फोटद्रव्यचित्रता ॥८७॥
बहुरूपधराश्चापि रूप्यन्ते कौशलैर्निजैः ।
भण्डका वेषकाश्चापि रञ्जयन्ति प्रजास्तदा ॥८८॥
वृषभाणां महिषाणां राण्डियानां प्रगर्विणाम् ।
करिणां भल्लुकानां वानराणां योधनानि च ॥८९॥
रात्रावुत्सवरूपेणाऽभवँस्तदा तु राधिके ।
द्वन्द्ववाद्यान्यवाद्यन्त तूर्यशब्दाः पुनः पुनः ॥९०॥
अजायन्त मुरादीनां विपञ्चीनां स्वरास्तदा ।
अप्सरसां कन्यकानां गीतयः सर्वतोऽभवन् ॥९१॥
वैदिका ध्वनयस्तत्राऽऽर्षाणामप्यभवन् क्षितौ ।
नपुंसकानां नर्माणि पुत्तलीखेलनानि च ॥९२॥
गारुडीनां च विद्यानां प्रयोगाश्च तदाऽभवन् ।
कल्पजालस्य रचना विविधाश्च क्वचित्स्थले ॥९३॥
रासे कृष्णकृता लीला गोपीजनविभूषिताः ।
कुत्रचिच्चाऽभवँस्तत्र भक्तिभेदैर्मनोगमाः ॥९४॥
रामादित्यनरादित्यलीलाश्चापि क्वचित्स्थले ।
बालकृष्णचमत्काराः क्वचित्कुर्वन्ति तद्विदः ॥९५॥
एवं रात्रौ तदा राधे! जनानां भूमिवासिनाम् ।
तथाऽन्येषां यथेष्टान्यासन्नानन्दोत्सवानि वै ॥९६॥
श्रीमद्गोपालकृष्णस्य तथा श्रीकम्भराश्रियः ।
यशोगानानि योषित्सु सर्वस्थले तदाऽभवन् ॥९७॥
कुंकुमवापिकाक्षेत्रं सुराष्ट्रं चाजनाभिगम् ।
तदा गीतिषु सर्वासां धन्यवादेन शस्यते ॥९८॥
गांगेयास्तु तदा बाला बालिका भूभृतस्तथा ।
ऋषयो ब्रह्मभक्ताश्च प्रशस्यन्ते च गीतिषु ॥९९॥
द्विनदीसंगमश्चापि तीर्थं सुदर्शनं तथा ।
यज्ञतीर्थे शतक्रोशं शस्यन्ते राधिकेऽभितः ॥१००॥
एवं तृतीयरात्रिः सा व्यतीयाय सुखोच्छ्रया ।
प्रातर्जातं चतुर्थ्यास्तु कृष्णो निद्रां जहाति च ॥१०१॥
मंगलानि च तुर्याणि ह्यवाद्यन्त समन्ततः ।
अगायन्त यशोवार्ताः सूतमागधबन्दयः ॥१०२॥

राधिके श्रीहरिर्निद्रां तत्याज मंगलश्रवाः ।
उन्निद्रं सर्वतः क्षेत्रं ह्याभूत् क्रोशशतान्तरम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने यज्ञमंगलपत्रिकाप्रकाशनं सर्वसृष्टिवासिनामागमनं श्रीहरेः सकुटुम्बसौराष्ट्रीयप्रजासहितस्य विमानैर्यज्ञभूमिगमनं स्वागतं भ्रमणं विश्रान्तिर्मनोरञ्जनादीनि चेतिनिरूपणनामा-ऽष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

**श्रीकृष्ण उवाच—**

राधिके प्रातरुत्थाय भगवान् स्नानमाचरत् ।
ध्यानं जपं तथा होमं स्वाध्यायं तर्पणं तथा ॥ १ ॥
पूजनं निजरूपस्य पितृदर्शनवन्दनम् ।
साधूनां च सतीनां च दर्शनं चाकरोत्ततः ॥ २ ॥
दुग्धामृतं मनाक् पीत्वा यज्ञभूम्यवलोकनम् ।
कर्तुं करिणमारुह्य निर्ययौ स निजालयात् ॥ ३ ॥
सपक्षहस्ती व्योम्नैवाऽसञ्चरत् सर्वभूमिषु ।
व्यलोकयच्छुभां भूमिं सुदर्शनं प्रगृह्य च ॥ ४ ॥
लीनं प्रकाशितं जातं यत्र तत्रैव वेदिकाम् ।
विश्वकर्मकृतां वीक्ष्य प्रसन्नः स्थानमाययौ ॥ ५ ॥
प्रशशंस हरिश्चेशानं देवं सर्वदृष्टिकम् ।
भक्तं देवायनं विश्वकर्माणं कपिलादिकान् ॥ ६ ॥
देवगुरुं गणेशादीन् प्रशशंस तदा हरिः ।
सामग्रीदायकान् सर्वान् दासान् दासीश्च कोटिशः ॥ ७ ॥
सर्वभूपालकांश्चापि प्रशशंस हरिस्तदा ।
सर्वतत्त्वानि भगवान् प्रशशंस मुहुर्मुहुः ॥ ८ ॥
राजानः ऋषयः सत्यः साधवः पार्षदादयः ।
ब्रह्मप्रियाद्याश्च ततश्चक्रुः पूजां हरेस्तदा ॥ ९ ॥
लोमशादीन् हरिर्नत्वा विश्रान्तिं मन्दिरेऽलभत् ।
प्रातः पेयानि भोज्यानि सर्वेभ्योऽदापयत् प्रभुः ॥१०॥
रसशालाः प्रवर्तन्ते दीयन्ते भोजनानि च ।
यथायोग्यानि चेष्टानि सर्वेभ्यः पूर्णतृप्तये ॥११॥
प्रातरारभ्य वै भक्ष्यं पेयं चान्यदपेक्षितम् ।
सातत्येन प्रवाहेण दीयते चाऽऽनिशामुखम् ॥१२॥
यथा यानि तु तत्त्वानि वर्ष्माणि यादृशानि च ।
यादृशं पथ्यमेतेषां तादृग् ददति वल्लिकाः ॥१३॥
मणयो धेनवश्चापि वृक्षाश्च कल्पचिन्तनाः ।
मुक्ता मुक्तान्य एवापि सिद्धयः श्रीरमादयः ॥१४॥
ब्राह्मयः सुशक्तयोऽनन्ता ऐश्वर्याणि गुणास्तथा ।
अर्पयन्ति समस्तेभ्योऽपेक्ष्यभोज्यानि वै तदा ॥१५॥
प्रतिमन्दिरमेतेभ्यः प्रापयन्तीष्टभोज्यकम् ।
यद्यदपेक्षितं सर्वं त्वधिकं प्रापयन्ति हि ॥१६॥
त्वं राधेऽमर्षमापन्ना दृष्ट्वा गांगेयगौरवम् ।
किन्न स्मरसि शान्ता च मया त्वं सुनयैः कृता ॥१७॥
भोजिता वन्दिता त्वं तु गंगया पादवाहिता ।
श्रृंगारिता कबर्यां च प्रसन्ना त्वं तदा ह्यभूः ॥१८॥
चतुर्थ्यां राधिके तत्र प्राघूणिका विशेषतः ।
समाययुर्विमानैश्च कोटिशो मानवा दिने ॥१९॥
राशियानप्रदेशेभ्यो षोडशलक्षमानवाः ।
प्राग्ज्योतिर्देशतो लक्षमानवाश्चाययुस्तदा ॥२०॥
प्राचीनदेशतश्चापि दशलक्षाणि चाययुः ।
ब्रह्मदेशाल्लक्षजना उष्ट्रालयाच्च लक्षकम् ॥२१॥
आजनाभात् कोटिजना अब्रिक्तात् कोटिशो जनाः ।
आरक्ताल्लक्षजनताश्चोत्तरादपि चाययुः ॥२२॥
मानवानां कोटिचतुष्टयं तत्राऽभवत्तदा ।
तदन्यानां तु लोकानां सृष्टित्रयनिवासिनाम् ॥२३॥
आगतानां देहिनां तु संख्यासंख्या न विद्यते ।
महीमानालया भूमौ जलेऽनिलेऽन्तरीक्षके ॥२४॥
मेघे गिरौ च विवरेऽम्बरे तत्त्वेषु सर्वशः ।
रचिताश्चाभवन् विश्वकर्मणा सूक्ष्मदर्शिना ॥२५॥
सिद्धिमन्तस्तदा चाणूभूय मिश्रीप्रभूय च ।
लीनीभूयाऽपि यज्ञेऽत्र तिष्ठन्ति हरिमानसः ॥२६॥
परे ब्रह्मणि सर्वेषां त्वक्षरे चापि धामनि ।
आन्तरभाववासेन समावेशोऽभवत्तदा ॥२७॥
ममुः सर्वे परे धाम्न्यक्षरे साक्षाद्विराजिते ।
आश्चर्यं नास्ति राधेऽत्र सर्वाश्रयो यतो हरिः ॥२८॥
अणुदेशे सर्वसृष्टीः समावेशयितुं क्षमः ।
स्वल्पे स्थले विशालत्वं प्रदर्शयितुमर्हति ॥२९॥
तत्कृत्यन्तं न विन्देऽहं कोऽन्यो ज्ञातुं तदाऽर्हति ।
अणौ सृष्टीः क्षणे कल्पान् दर्शयितुं स चार्हति ॥३०॥
जलगण्डूषमात्रेण तर्पयितुं त्रिलोकजान् ।
कणभक्षणमात्रेण तृप्तिं दातुं स चार्हति ॥३१॥
असंभाव्यं तथाऽतर्क्यं तथाऽशक्यं न माधवे ।
यन्मूर्तेः सर्वमेवेदं समभूत् चेक्षणात्पुरा ॥३२॥
यत्संकल्पात्पुनर्ह्रासं चान्ते तत्रैव यास्यति ।
कोऽहं का त्वं तथा चान्ये नारायणाश्चतुर्भुजाः ॥३३॥

तदग्रे शक्तिमन्तो वै यन्मूर्तेरभवाम ह ।
अलं चातिवचोभिश्च सर्वाधारो हरिर्हि सः ॥३४॥
सर्वानकरोत् सुखिनो मखे संभावनादिभिः ।
अथ श्रीबालकृष्णोऽसौ चतुर्थ्यां मध्यगे रवौ ॥३५॥
मन्त्रान् ददौ नृपेभ्यश्च जनताभ्यश्च मण्डपे ।
कोटिरूपधरो बालकृष्णः सर्वत्र सोऽभवत् ॥३६॥
प्रत्याश्रयं तदा बृष्यां कुशजायां निषद्य च ।
सजलं भक्तकर्णेषु मन्त्रानश्रावयत् प्रभुः ॥३७॥
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥३८॥
'कालमायापापकर्मशत्रुयाम्यकुहृद्भयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥३९॥
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः' ।
'अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥४०॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ॥४१॥
'श्रीकृष्णवल्लभः कृष्णः स्वामी मेऽयं पतिर्हि मे' ।
एवं शरणमन्त्रं चार्पणमन्त्रं च रक्षकम् ॥४२॥
मनुं च ब्रह्मभावं च मन्त्रं स्वाम्यनिवेदकम् ।
सर्वस्वं च मनुं कृष्णनारायणः परेश्वरः ॥४३॥
यथाधिकारं संवीक्ष्याऽऽबालवृद्धनरीनरान् ।
कृतार्थान् श्रावयामास चकार मानवान् बहून् ॥४४॥
ततो वै भोजनं चक्रुर्दीक्षिताश्च हरिर्जनाः ।
लक्ष्मीनारायणसंहिताख्यानं सायमेव वै ।
लोमशः प्रचकाराऽथ चक्रे नीराजनं हरेः ॥४५॥
जायन्ते चोत्सवास्तत्र रात्रौ तु भोजनोत्तरम् ।
सर्वेषां सुखदा राधेऽपररात्रे विशश्रमुः ॥४६॥
पञ्चम्यां च प्रगे ब्राह्मे मुहूर्ते श्रीहरिः स्वयम् ।
सस्नौ तु संगमे नद्योः सर्वे सस्नुस्ततः परम् ॥४७॥
नित्यविधीन् विधायाऽथ कृत्वा देवार्हणादिकम् ।
कृष्णनारायणो यज्ञमण्डपं शीघ्रमाययौ ॥४८॥
राजानश्च प्रजाः सर्वे ऋषयो मुनयस्तथा ।
कर्मचाराः ऋत्विजश्च जापकाद्याः समाययुः ॥४९॥
वादित्राणां निनादाश्च तदाऽभवन् सुसूचकाः ।
अध्वरस्य क्रियाकाण्डं कुर्वन्तु भूसुरा इति ॥५०॥
अनादिश्रीकृष्णनारायणश्चाजिज्ञपद् द्विजान् ।
विप्राद्या मंगलं चक्रुर्वेदमन्त्रैः प्रसुस्वरम् ॥५१॥
आचार्यो लोमशस्तत्र देशकालावकीर्तयत् ।
गणेशस्मरणं कृत्वा कृष्णनारायणः प्रभुः ॥५२॥
आचार्यवरणं चक्रे नत्वा श्रीलोमशं गुरुम् ।
प्रकोष्ठे बन्धनं चक्रे चक्रे चावाहनं क्षितेः ॥५३॥
पञ्चगव्यकुशैर्भूमेः प्रोक्षणं प्रचकार ह ।
भूताद्यपक्रमार्थं च प्राक्षिपत् श्वेतसर्षपान् ॥५४॥
एवं भूमिं पूजयित्वा प्रायश्चित्तं चकार ह ।
आचमनं प्राणायामं कृत्वा चक्रे प्रपूजनम् ॥५५॥
स्वात्मकस्य गणेशस्य षोडशोपसुवस्तुभिः ।
पुण्याहवाचनं चक्रे कलशस्थापनं तथा ॥५६॥
आशीर्वादान् ददुस्तत्र ब्राह्मणा वेदवेदिनः ।
शान्तिपाठाञ्जगुर्वारिसेकं चक्रुस्तदा द्विजाः ॥५७॥
स्वस्तिवाचो जगुश्चापि चक्रुः कृष्णाभिसेचनम् ।
मातृकापूजनं चक्रुर्नान्दीश्राद्धं प्रचक्रिरे ॥५८॥
तदंगदक्षिणादानं चकार परमेश्वरः ।
प्रत्येकाचार्यवरणं ब्रह्मवरणमित्यपि ॥५९॥
ऋत्विजां वरणं द्वारपालवरणमित्यपि ।
जापकानां वरणं च चक्रे पुपूज तांस्ततः ॥६०॥
ततः पृथिवीं सम्पूज्य चक्रे दिग्रक्षणं ततः ।
सम्प्रोक्ष्य यज्ञसामग्रीः स्वस्तिमन्त्रान् जगाद ह ॥६१॥
मण्डपपूजनं वास्तुपूजनं प्रचकार ह ।
वास्तुदेवार्हणं सर्वं विधिना प्रचकार ह ॥६२॥
कलशस्थापनं चक्रे फलौषधिमृदार्पणम् ।
दर्भपवित्रदानं च तीर्थावाहनमित्यपि ॥६३॥
अथाऽग्न्युत्तारणं चक्रे सर्वदेवान् पुपूज च ।
प्राणप्रतिष्ठामन्त्रांश्च जगाद परमेश्वरः ॥६४॥
योगिनीक्षेत्रपालाँश्च पुपूज विधिना हरिः ।
पीठदेवार्हणं चक्रे बलिं ददौ ननाम च ॥६५॥
मण्डपस्याऽर्हणं चक्रे ब्रह्मपूजां चकार ह ।
तथा मण्डपदेवानामर्हणं प्रचकार च ॥६६॥
षोडशादिस्तम्भपूजां बहिर्देवादिपूजनम् ।
शाखादेवप्रपूजां च ध्वजानां पूजनं तथा ॥६७॥
सर्वकलशपूजां च वेदपूजां चकार ह ।
वेदीकुण्डेषु सर्वेषु कुण्डपूजां चकार च ॥६८॥
कुण्डमध्ये विश्वकर्मपूजनं प्रचकार सः ।
मेखलापूजनं तत्र देवानां पूजनं तथा ॥६९॥
योनिपूजां कण्ठपूजां नाभिपूजां चकार सः ।
वास्तुपुरुषपूजां च वह्निस्थापनमाचरत् ॥७०॥

नवग्रहार्हणं चाधिदेवतार्हणमाचरत् ।
प्रत्यधिदेवतापूजां नागपूजां समाचरत् ॥७१॥
लोकपालार्हणं चक्रे गणेशभूतपूजनम् ।
दिक्पालपूजनं चक्रे श्रीदेवीपूजनं तथा ॥७२॥
मण्डलस्थापितदेवार्हणं चक्रे हरिस्तथा ।
कलशार्हणमेवापि षट्पञ्चाशत्सुरार्हणम् ॥७३॥
ऋषीणां पूजनं पितृपूजनं सिद्धपूजनम् ।
मृत्युकालार्हणं चक्रे सरित्सागरपूजनम् ॥७४॥
शैलाऽऽयुधाऽर्हणं चक्रे आर्षीदेवीप्रपूजनम् ।
कलशस्थापनं कृत्वा वरुणार्हणमाचरत् ॥७५॥
चतुर्विंशत्यवतारान् वासुदेवादिकानपि ।
ईश्वरान् तत्सतीः साध्वीः सर्वाश्च हरिरार्चयत् ॥७६॥
त्रिदेवपार्षदान् सर्वान् सर्वधामनिवासिनः ।
ब्रह्मसृष्टिमयान् सर्वान् ईशसृष्टिमयानपि ॥७७॥
जीवसृष्टिमयान् सर्वान् श्रीकृष्णः समपूजयत् ।
चतुर्दशसु लोकेषु ये वसन्ति तु देहिनः ॥७८॥
जडान् दिव्यान् चेतनाँश्च गुरून् दासीश्च दासकान् ।
चतुःखनिषु चोत्पन्नान् सर्वान् कृष्णो ह्यपूजयत् ॥७९॥
प्रतिकुण्डं च राजानस्तथा चक्रुः प्रपूजनम् ।
तत्तन्महर्षिगुरुणा यथोद्दिष्टं तथा व्यधुः ॥८०॥
द्रव्यत्यागं कुण्डवह्नौ चकार परमेश्वरः ।
प्रोक्षणीप्रोक्षणं चक्रे तथाऽऽज्यहवनं व्यधात् ॥८१॥
चरुं त्वग्नौ समारोप्य तथाऽवस्थाप्य तत्स्थले ।
समिधो हवनं चक्रे स्रुवेणाऽऽज्याहुतीर्ददौ ॥८२॥
स्वाहा देवायाऽमुकायेत्येवं होमं चकार सः ।
ब्रह्मसृष्टीश्वरसृष्टिजीवसृष्टिभ्य एव च ॥८३॥
यज्ञदेवेभ्य एवाऽपि बह्वाहुतीर्ददौ प्रभुः ।
कुण्डमण्डपवास्तूनां देवताभ्यो हवं ददौ ।
सतीसाध्वीसेविकाशक्तिभ्यः कृष्णो हवं ददौ ॥८४॥
योगिनीभ्यश्च मुक्ताभ्यो ब्रह्मप्रियाभ्य इत्यपि ।
सर्वांगव्यापिनीभ्यः सिद्धिभ्यः कृष्णो हवं ददौ ॥८५॥
आदित्यवसुरुद्राश्विकुमारेभ्यो हवं ददौ ।
अवतारसहिताय निजाय चाहुतीर्ददौ ॥८६॥
चर्वाहुतीर्ददौ चामृतात्मिकास्तृप्तये हरिः ।
यूपारोपं ततश्चक्रे यूपदेवानपूजयत् ॥८७॥
यूपमसिञ्चयच्चापि बलिं यूपाय वै ददौ ।
निद्राकलशपूजां च प्राकारयद्धरिस्ततः ॥८८॥

आमन्त्रितान् जीवजातान् यज्ञे भागं हरिर्ददौ ।
पायसान्नं घृतं दुग्धं फलानि च रसान् ददौ ॥८९॥
यथा यथा मखे वह्नौ सहस्रायुतधारिकाः ।
पतन्त्याहुतयो हव्यात्मिकास्तथा तथाऽमितः ॥९०॥
सर्वे जीवास्तृप्तिमन्तो जायन्ते हर्यनुग्रहात् ।
व्रीहयश्च यवा निवाराद्या मुन्यन्नकानि च ॥९१॥
खर्जुरा रसवन्तश्च कणा मिष्टरसान्विताः ।
ओषधयश्च समिधः फलानि रसवन्ति च ॥९२॥
शर्कराद्यास्तथा मिष्टान्नानि चाहुतयोऽभवन् ।
वह्नयः सर्वजातीयाश्चागत्य तृप्तिमावहन् ॥९३॥
अग्निमुखा देहिनश्च येऽन्ये ब्रह्ममुखास्तथा ।
कृष्णमुखास्तथा सर्वे साधुमुखास्तथाऽपरे ॥९४॥
सतीमुख्यो देविकामुख्यश्च याः शक्तयस्तथा ।
स्वाहामुख्यश्च या लक्ष्मीश्रीमुख्यश्च तथाऽपराः ॥९५॥
अन्नपूर्णानना याश्च सर्वास्तास्तृप्तिमावहन् ।
जडचेतनतत्त्वानि तृप्तानि विविधैर्हवैः ॥९६॥
पूर्णाहुतिं ददौ पश्चादारार्त्रिकं ततोऽकरोत् ।
सर्वदेवादिसत्त्वानां विश्रान्तिं प्रददौ ततः ॥९७॥
एवं वै सप्तविंशत्यात्मकेषु कुण्डकेषु च ।
सर्वत्र ऋषिभिः पूजाबलिदानहवाः कृताः ॥९८॥
राजभिर्युगलैश्चापि हवनेच्छायुतैस्तथा ।
गृहीतो हवलाभश्च बालकृष्णाज्ञया मखे ॥९९॥
दक्षिणाः प्रतिपूजायां भूयस्योऽर्प्यन्त एव च ।
फलाहारा रसाहारा अन्नाहारा ह्यतिप्रियाः ॥१००॥
दीयन्ते सर्वजन्तुभ्यः स्वस्वाहारास्तु शार्ङ्गिणा ।
कल्पचिन्तामणिजन्या दीयन्ते भक्ष्यसद्रसाः ॥१०१॥
एवं निर्वर्तितं रम्यं पञ्चमीहवनं शुभम् ।
ततः सर्वानब्जकोट्यर्बुदपद्मादिसंख्यकान् ॥१०२॥
मुक्तान् धामानि मुक्तानीश्चावतारांश्च तत्प्रियाः ।
पार्षदान् पार्षदानीश्च भोजयामास चामृतान् ॥१०३॥
मिष्टान्नानि च दिव्यानि पेयान्यनन्तकानि च ।
भक्ष्यभोज्यानि सर्वाणि लेह्यान्यपि शुभानि च ॥१०४॥
ब्रह्मप्रियास्तथा भक्ताः सतीः साध्वीर्हरिप्रियाः ।
भोजयामास भगवान् कन्यका बहुसंख्यकाः ॥१०५॥
ईश्वरानीश्वराणीश्च मायां मायाकुटुम्बकम् ।
चतुर्विंशतितत्त्वानि भोजयामास माधवः ॥१०६॥
अष्टावरणलोकस्थान् ब्रह्मेशविष्णुसेवकान् ।
त्रिदेवदासदासीश्च भोजयामास माधवः ॥१०७॥

त्रिदेवदेविकाः सर्वा ब्रह्मचर्याऽधिकन्यकाः ।
देवीः कुमारिका योगिनीः सांख्ययोगिनीः सतीः ॥१०८॥
सर्वाः संभोजयामास व्रतैकादशिकादिकाः ।
तिथिरूपान् देविकानां गणानप्सरसस्तथा ॥१०९॥
सर्वाः संभोजयामास भगवान् कृष्णवल्लभः ।
मेरुस्थान् सत्यलोकस्थान् महर्जनतपःस्थितान् ॥११०॥
ऋषीन् पितॄन् तथाऽऽर्षीश्च पितृका मातृकास्तथा ।
स्वःस्थान् देवान् देविकाश्च भुवर्लोकस्थितांस्तथा ॥१११॥
भूस्थान्नरान् नारीवर्गान् जरायुजाऽण्डजाँस्तथा ।
स्वेदजानुद्भिज्जजातान् भोजयामास माधवः ॥११२॥
तीर्थान्यरण्यसरितः पर्वतान् सागरादिकान् ।
अपि कीटपतंगाद्यान् भोजयामास माधवः ॥११३॥
ब्रह्मपुत्रान् राजसांश्च तामसान् सर्वजातिकान् ।
धर्माधर्मप्रजाताँश्च काश्यपान् सूर्यचन्द्रजान् ॥११४॥
पातालस्थान् राक्षसाँश्च यक्षान् गन्धर्वकिन्नरान् ।
सप्ततलिनो भूताँश्च प्रेतान् यमालयस्थितान् ॥११५॥
किंपुंसो मागधान् सूतान् बन्दिजनानभोजयत् ।
चारणान् शूद्रजातीयान् विद्याध्रान् वनवासिनः ॥११६॥
क्रूरान् सत्त्वान् डाकिनीश्च शाकिनीश्च तथाऽपराः ।
चाण्डालान् श्वपचान् पशून् भोजयामास माधवः ॥११७॥
सर्पान्नागान् पक्षिगणान् कुष्माण्डान् प्रविनायकान् ।
दैत्यान् देवानासुराँश्च भोजयामास माधवः ॥११८॥
जडं च चेतनं सर्वम् आधाराधेयमिश्रितम् ।
बुभुजे यज्ञभागं वै क्रतोः प्रासादिकं शुभम् ॥११९॥
सर्वं त्रिसृष्टिजं नित्यमनित्यं स्थिरजंगमम् ।
भुक्त्वा यज्ञप्रसादं सुतृप्तिमाप हि शाश्वतीम् ॥१२०॥
राधाद्या मे प्रियाः सर्वास्तृप्तिमाप्ता प्रसादजाम् ।
इत्येवं राधिके ! यज्ञकार्ये चाद्यदिनेऽभवत् ॥१२१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने यज्ञे भूमिपूजनं वास्तुकुण्डमण्डपादिदेवानां पूजनं ब्रह्मसृष्टीश्वरसृष्टिजीवसृष्टिदेहिनां पूजनं हवनं महापूर्णाहुतिदानं भोजनदानं चेत्यादिनिरूपणनामा नवषष्ट्यधिकशततमोऽध्यायः ॥१६९॥

**श्रीकृष्ण उवाच—**

राधिकेऽथ तथा षष्ठ्यां सप्तम्यामष्टमी तिथौ ।
नवम्यां च दशम्यां च तर्पिता हरिणा मखे ॥ १ ॥
एकादश्यां तर्पिताश्च यावद्भिर्विविधैस्तथा ।
सर्वे वै देहिनोऽदेहाः स्थूलसूक्ष्मा हि नामिनः ॥ २ ॥
जडाश्चेतनजाताश्च द्रव्याख्याश्च गुणाभिधाः ।
कर्माभिधाश्च तद्देवास्तत्तत्तत्त्वेश्वरादयः ॥ ३ ॥
सर्वलोकनिवासाश्च सर्वे कुटुम्बिनस्तथा ।
स्थावरा जंगमा नार्यो नराः षण्ढाश्च तर्पिताः ॥ ४ ॥
अभिधेयं न वै किञ्चिद् भोजने ह्यवशिष्यते ।
एवं सर्वेष्टियज्ञोऽयं वैष्णवो हरिणा कृतः ॥ ५ ॥
सप्ताहे नित्यमायान्ति लोकलोकनिवासिनः ।
कृत्वा च दर्शनं यान्ति कोट्यर्बुदा नराः स्त्रियः ॥ ६ ॥
गगने तु विमानानां सांकुल्यं न निवर्तते ।
यावन्तो गगने सन्ति सुराः स्वर्गादिवासिनः ॥ ७ ॥
तावन्तो मानवा भूमौ तावन्तः पर्वतादिषु ।
तावन्त एव वृक्षेषु तावन्तश्च नदीषु च ॥ ८ ॥
नौकासु तटभूम्यादौ तावन्तः सन्ति मानवाः ।
मण्डपेषु च शालासु सौधेषु गह्वरेष्वपि ॥ ९ ॥
कुंजेषु च शकट्यादौ तावन्तो वाहनेष्वपि ।
मानवा मानवा यत्र तत्र लोकयन्त एव तु ॥१०॥
धामधामनिवासाश्च लोक्यन्ते तत्र तत्र च ।
लोकालोकनिवासाश्च दृश्यन्ते तत्र तत्र च ॥११॥
तलस्तरनिवासाश्च लोक्यन्ते सर्वतस्तदा ।
सप्ताहे चाध्वरे नित्याऽऽगमवृद्धिर्विलोक्यते ॥१२॥
स्वर्णरूप्यकहीराणां रत्नानां भूषणात्मनाम् ।
मणीनां सर्वकान्तानां कल्पानां शृंगिणोऽभवन् ॥१३॥
उपदापर्वता जाता यानवाहनकोटयः ।
वस्त्रवैभवभक्ष्याणां भोगानां शैलपंक्तयः ॥१४॥
मौक्तिकानां शिखराणि मिष्टान्नानां तु पर्वताः ।
भोग्योपकरणानां तु शैलगंजास्तदाऽभवन् ॥१५॥
पेयानां सरितश्चासन् गव्यानां वार्धयोऽभवन् ।
शेवधयश्च द्रव्याणां चासन् मखे समर्पिताः ॥१६॥
कुबेरो वसवश्चेन्द्रो मेरुर्बृहस्पतिस्तथा ।
विष्णुर्वीक्ष्याऽध्वरर्द्धीश्च बभूवुर्लज्जया नताः ॥१७॥
अन्नपूर्णा महिमानं विलोक्य पारमेश्वरम् ।
लक्ष्मीः श्रीश्चात्र नम्रा बभूवतुर्लज्जयाऽध्वरे ॥१८॥
अप्रमेयमतर्क्यं चाऽनुपस्थितमचिन्त्यकम् ।
यद्यदिच्छति तत्त्वज्ञस्तत्तदैवोपतिष्ठति ॥१९॥
प्रतापोऽयं हरेस्तत्र बालकृष्णस्य राधिके ! ।
अन्धकुष्ठिदरिद्राणां व्यंगानां दुःखिनामपि ॥२०॥
आन्ध्यं कुष्ठश्च दारिद्र्यं व्यंगता विलयं गता ।
अनिष्टं नाशमापन्नं तदेष्टं प्राप्तमेव तु ॥२१॥

स्वर्गवत् सर्वमेवाऽभूत् मखेऽत्र पारमेश्वरे ।
सिद्धयोऽपि विलोक्यैतदाश्चर्यं परमं गताः ॥२२॥
ऐश्वर्याणि समस्तानि लज्जानम्राणि चाऽभवन् ।
मायाऽपि मोहमापन्ना चमत्कारे हरेस्तदा ॥२३॥
बालकृष्णं वीक्षितुं वै कोट्यर्बुदाब्जमानवाः ।
समायान्ति चानुवेलं सम्मर्दो जायते बहुः ॥२४॥
निराशतां तदा यान्ति जना दर्शनलालसाः ।
तेषां भावं परं ज्ञात्वा विज्ञायाऽऽगमनश्रमम् ॥२५॥

हताशतां परिज्ञाय भक्तवात्सल्यवान् प्रभुः ।
अन्तरात्मा च तत्रैव भक्ताग्रे गोचरोऽभितः ॥२६॥
नेत्राग्रे कोटिरूपैश्च स्थले स्थले विलोक्यते ।
यादृशो मण्डपे चास्ते होमासने च यादृशः ॥२७॥
तादृशश्चान्यकुण्डाग्रे हवनासनकेषु च ।
तादृशोऽसंख्यसौधेषु मण्डपेषु च तादृशः ॥२८॥
नदीकूलेषु नौकासु यानेष्वपि च तादृशः ।
विमानेषु च वृक्षेषु वनेऽरण्येषु तादृशः ॥२९॥
भक्तेषु भक्तवृन्देषु मार्गेषु वीथिकादिषु ।
शालासु चन्द्रशालासु पाकशालासु तादृशः ॥३०॥
महीमाननिवासेषु चातिथिस्थानकेष्वपि ।
भोज्यशालासु शैलेषु वाटिकास्वपि तादृशः ॥३१॥
रथेषु शकटीभागेष्वपि चाश्वगजादिषु ।
दृश्येषु रंगनाट्येषु गह्वरेष्वपि तादृशः ॥३२॥
जले स्थलेऽम्बरे वार्धौ सरस्सु च नदीष्वपि ।
विगमेषु च दुर्गेषु हरिः सर्वत्र दृश्यते ॥३३॥
मन्दहास्याननः शुभ्रः सर्वभूषाविभूषितः ।
पीतवस्त्रधरः सौम्यो बालकृष्णो विलोक्यते ॥३४॥
दिव्यचिह्नधरः स्वामी धनुर्ध्वजत्रिशूलवान् ।
मीनस्वस्तिकचक्राद्यैः शोभितः स विलोक्यते ॥३५॥

नीलचञ्चद्वक्रकेशः पद्मपत्रायतेक्षणः ।
कौस्तुभश्रीशोभितोरःस्थलो लक्ष्मीप्रसेवितः ॥३६॥
कोट्यर्कभाधरः कृष्णनारायणो विलोक्यते ।
एवं श्रीबालकृष्णस्य दर्शनं सर्वतोदिशम् ॥३७॥
भावुकानां पुरतोऽभूत् सप्ताहे चाध्वरे तदा ।
राधिके ! बालवृद्धाद्यैः कृतं गृह्णाति पूजनम् ॥३८॥
भोजनं च प्रमोदं च गृह्णाति प्रददाति च ।
रमते रासभावेषु रमते च सतीजने ॥३९॥
रमते सर्वलोकेषु सर्वरूपधरोऽभवत् ।
एवं दृष्ट्वा चमत्कारं राधेऽहं विस्मयं गतः ॥४०॥

नारायणोऽपि वैकुण्ठेश्वरश्चाह तदा नु माम् ।
पश्य कृष्ण महाश्चर्यं पराकाष्ठागतं त्विदम् ॥४१॥
रूपं रूपं प्रतिरूपो बालकृष्णो हि राजते ।
नास्ति वै तादृशी भूमिर्बालकृष्णो न यत्र वै ॥४२॥
अज्ञातमार्गा लोका ये समायान्ति मखं प्रति ।
अग्रे तेषां जनो भूत्वा जायते मार्गदर्शकः ॥४३॥
अस्वस्थमनसां त्वग्रे भूत्वा स कथको द्विजः ।
कथां पुरातनीं रम्यां कथयत्येव रञ्जनाम् ॥४४॥

अस्वस्थवर्ष्मणां पार्श्वे गत्वा वैद्यस्वरूपवान् ।
स्वास्थ्यप्रसञ्जकं तेभ्यो ददाति चौषधं शुभम् ॥४५॥
चमत्कारोऽद्भुतस्तत्र दृष्टो मया तु राधिके ।
कोट्यर्बुदाब्जलोकेषु देहत्यागो न कस्यचित् ॥४६॥
नाऽकस्मात्तु क्षयः क्वापि कश्चिद् दुःखी न तत्र च ।
न कुटुम्बी जनः कश्चिद् वियुक्तः स्वकुटुम्बतः ॥४७॥
सम्मर्दे न च भूषादि विगतं कस्यचित्तदा ।
नांगमर्दोऽभवत्तत्र कस्यचित् पादकच्चरः ॥४८॥
न यानं चापि भग्नं वा न वस्तु विगमोऽभवत् ।
अदृष्टबालकृष्णश्च न कोऽपि मानवोऽभवत् ॥४९॥
अप्राप्ताध्वरशेषश्च न कश्चिद् देहवानभूत् ।
अप्राप्तस्वागतः कश्चिन्महीमानो न वाऽभवत् ॥५०॥
अजातपूर्णकामश्च तदा कोपि न चाऽभवत् ।
अलब्धब्रह्ममन्त्रश्च तदा कोपि न चाऽभवत् ॥५१॥
अहो देवस्य ऐश्वर्यम् ईशानोऽपि मुमोह तु ।
वासुदेवादयो व्यूहा दृष्ट्वाऽऽश्चर्यं प्रपेदिरे ॥५२॥
लज्जानम्रा बभूवुस्ते विमदाः स्वबलेऽभवन् ।
अहो विभवो देवस्य बालकृष्णस्य चाध्वरे ॥५३॥
महाविष्णुस्तु भूमानं प्राहैवं धूनयन् शिरः ।
पार्वती माणिकीं प्राह पत्युस्तेऽहो चमत्कृतिः ॥५४॥
कंभरा कमलां प्राह पश्य मे पुत्रवैभवम् ।
कमला पतिमोदाढ्या स्वात्मानं बहुमन्यत ॥५५॥
कृष्णस्थाने तथा नारायणस्थाने सुकर्मणि ।
स्वयमास्ते हरिः कर्ता महाश्चर्यं त्विदं मम ॥५६॥
अहो वै राधिके कृष्णप्राप्त्या गांगेयकैस्त्विह ।
पुत्रास्ते सागरा निम्नीकृतास्तीर्थविधाविह ॥५७॥
केतुमालो निजार्थेऽद्य सार्थको हरिलब्धितः ।
केतुवन्ननु सञ्जातः सर्वलोकेषु चाद्यतः ।
मालासु केतुवच्चास्ते ब्रह्माण्डानां त्वयं सदा ॥५८॥

बालकृष्णप्रसंगेन सदाऽध्वरेण पावितः ।
श्वेतद्वीपसमो भावी तैश्वर्येऽयं महत्तमे ।
पावनोऽयं महान् देशो मोक्षदाता भविष्यति ॥५९॥
अत्र मृतिं गता जीवाः सूक्ष्माः कीटादयो ह्यपि ।
मुक्तिं यास्यन्ति परमां पापिनोऽपि च देहिनः ॥६०॥
यज्ञं सर्वेष्टिरूपं तु स्मरिष्यन्त्यपि ये जनाः ।
तेषां पापप्रणाशश्च मुक्तिः करगता भवेत् ॥६१॥
नमिष्यति भुवं स्मृत्वा दूरदेशगता अपि ।
तेषां पुण्यं मखजन्यं भविष्यति न संशयः ॥६२॥
अपि नाम रटिष्यन्ति नीपरां च प्रपीठिकाम् ।
तेषां पापविनाशः स्यात् स्नानजं च फलं भवेत् ॥६३॥
सप्तविंशतिकुण्डान् यः शंसिष्यति तु मानवः ।
भुक्तिं मुक्तिं महातृप्तिं समृद्ध्यादिभिः प्रयास्यति ॥६४॥
अपि धूलीं संगमस्य मध्यभूमेर्ग्रहीष्यति ।
मस्तके वा शरीरे वा शुद्धात्मा स भविष्यति ॥६५॥
अपि पद्भ्यां श्रद्धया तां भूमिं तीर्थविधित्सया ।
गमिष्यति तु यः कश्चित् पदेऽध्वरफलं लभेत् ॥६६॥
अपि साप्ताहवासं वा दिनवासं तु संगमे ।
करिष्यति जनः कश्चित् स्वर्गे तस्य तु शाश्वतम् ॥६७॥
अपि व्रतं तु साप्ताहं दिनमात्रं फलादिना ।
विधास्यति नरो नारी साम्राज्यफलमाप्नुयात् ॥६८॥
अपि दीपं पत्रपृष्ठे प्रज्वाल्य सलिले तु यः ।
दास्यति तीर्थदेवाय स सूर्यस्थानमाप्नुयात् ॥६९॥
अपि पायसभोज्यं यो दीनाऽनाथाय दास्यति ।
चन्द्रलोकं स वै प्राप्याऽमृतभोजी भविष्यति ॥७०॥
अपि वस्त्रं च वा भूषां पादुके कंकणौ च वा ।
छत्रं वा चामरं वापि व्यजनं नक्तकं च वा ॥७१॥
पात्रं जोलीं कोष्ठलीं वा चांगरक्षकमेव वा ।
कौपीनं यतये योऽत्र दद्याच्चैन्द्रपदं लभेत् ॥७२॥
माणिक्यां पार्वतीं लक्ष्मीं प्रभां श्रियं च राधिकाम् ।
बालकृष्णेन सहितां पूजयेदत्र मोक्षभाक् ॥७३॥
गोभ्यो ग्रासानत्र दद्यात् पक्षिभ्यश्च कणान् शुभान् ।
जनेभ्यो भोजनं दद्यादत्र सोऽपि च मोक्षभाग् ॥७४॥
जलं दद्यात् फलं दद्यात् पत्रं पुष्पं पयोऽर्पयेत् ।
मखभूमौ संगमेऽत्र स्वर्गभाक् स तु मानवः ॥७५॥
शय्यां च गेन्दुकं खट्वां येऽत्र दास्यन्ति भावतः ।
ते यास्यन्ति महत् स्वर्गं महत्पुण्यप्रतापतः ॥७६॥
आसनानि बृसीश्चापि दास्यन्त्यत्र चतुष्किकाः ।
ते ब्रह्मासनयोग्याश्च भविष्यन्ति न संशयः ॥७७॥
मखभूमौ मखं येऽत्र करिष्यन्ति तु मानवाः ।
चिदाकाशं परंधाम प्रयास्यन्ति तु ते जनाः ॥७८॥
हस्तिदानं चाश्वदानं रेण्डियादानमित्यपि ।
हंसकोकिलमेनानां दानं शुकस्य चापि ये ॥७९॥
वृषभाणां विमानानां यानानामनसां तथा ।
दानं येऽत्र करिष्यन्ति यास्यन्ति ब्रह्मधाम ते ॥८०॥
कन्यादानं भूमिदानं पुत्रदानं महत्तमम् ।
गृहदानं क्षेत्रदानं वाटिकादानमित्यपि ॥८१॥
वृक्षवल्लीस्तम्बदानं करिष्यन्त्यत्र ये जनाः ।
प्रयास्यन्त्यमृतं स्वर्गं सर्वरसामृतान्वितम् ॥८२॥
काष्ठदानं चोपलादिप्रदानं लोष्ठदानकम् ।
धातुदानं विधास्यन्त्याप्स्यन्ति ते वह्निमण्डलम् ॥८३॥
दधिदुग्धादिदातारो यास्यन्ति चन्द्रमण्डलम् ।
गृहोपकरणानां तु दातारो ब्रह्मणः पदम् ॥८४॥
राज्यदातार एवात्राऽऽप्स्यन्ति वैराजमण्डलम् ।
स्वर्णरूप्यकदातॄणां गोलोकगमनं भवेत् ॥८५॥
विद्यादानप्रदातारो भविष्यन्ति सुरार्हणाः ।
कृषेः साधनदातारो भविष्यन्ति कुबेरकाः ॥८६॥
कलाकौशल्यशिक्षाद्या भविष्यन्ति तु विद्वराः ।
एतज्जलघटं नीत्वा देशान्तरेऽपि बिन्दुकम् ॥८७॥
अन्यस्मै ये प्रदास्यन्ति चोभयोर्मोक्षदं भवेत् ।
अत्र जले पशूनां पक्षिणां पिच्छस्थिकं पतेत् ॥८८॥
सर्वपापविनिर्मुक्तास्ते यास्यन्ति परं पदम् ।
अपि मृत्युसमयेऽपि मुखे यस्य जलं पतेत् ॥८९॥
शरीरे मोक्षणं वापि चास्थि यस्य पतेज्जले ।
ते सर्वे मुक्तिमेष्यन्ति राधिके नात्र संशयः ॥९०॥
एतादृशी स्थली त्वेषा शतयोजनवर्तुला ।
नदीद्वयान्तरालस्था पावनी वर्णनोत्तरा ॥९१॥
मखस्थल्यां यदि कश्चिद् दीक्षां गृह्णाति वैष्णवीम् ।
चतुर्भुजो भवेद् दिव्यः पार्षदः स विकुण्ठके ॥९२॥
नारी दीक्षावती दिव्या चतुर्भुजा हरिप्रिया ।
जायते नित्यमुक्तानी पुनर्जन्म न विद्यते ॥९३॥
लक्ष्मीनारायणसंहितायाः कथां तु ये जनाः ।
श्रावयन्ति च शृण्वन्ति तेऽत्र मोक्षगमा जनाः ॥९४॥
सतीभ्यो भोजनं दद्यात् साध्वीभ्यश्चात्र सर्वथा ।
साधुभ्यो भोजनं दद्याद् दाता मोक्षमवाप्नुयात् ॥९५॥

अत्रोपवासनियमैश्चरिष्यन्ति तपस्तु ये ।
ते शुद्धा ब्रह्मगा बोध्या मुक्ता दिव्याक्षरार्थिनः ॥९६॥
किमु ते राधिके वच्मि यत्र कृष्णनरायणः ।
नारायणास्तथा चान्येऽवतारा ईश्वराः सुराः ॥९७॥
पितरः ऋषयः सिद्धाः सत्यः साध्व्यो यतीश्वराः ।
योगिन्योऽर्हणवर्गाश्च तीर्थानि तारकाणि च ॥९८॥
आगत्योषितवन्तश्च पीतवन्तः सरिज्जलम् ।
भुक्तवन्तश्च वन्यानि स्पृष्टवन्तः प्रतिस्थलम् ॥९९॥
तल्लीलास्मरणादेव भवन्ति मोक्षभागिनः ।
पठनाच्छ्रवणाच्चास्य भुक्तिं मुक्तिं लभेद् ध्रुवाम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सप्ताहयज्ञे समर्पितोपदाः, बालकृष्णस्य कोटयब्जरूपधारित्वं, यज्ञभूमिदानादिमाहात्म्यं चेतिनिरूपणनामा सप्तत्यधिकशततमोऽध्यायः ॥ १७० ॥

श्रीकृष्ण उवाच—

राधिके तत्र नित्यं वै रात्रौ जनसमाजके ।
लक्ष्मीनारायणसंहिताकथा जायते शुभा ॥ १ ॥
सनत्कुमारो भगवान् स्वयं वाचयति प्रभुः ।
श्वेतकृष्णायनव्यासः कथां विवेचयत्यपि ॥ २ ॥
श्वेतव्यासस्य नाम्ना च श्वेतासनं तदुच्यते ।
स्थलं तीर्थस्वरूपं तज्ज्ञानविज्ञानदं सदा ॥ ३ ॥
यवक्रीतो महर्षिश्च गांगेयो यत्र वै स्थले ।
क्षारस्य कवलं भुक्त्वा तपस्तेपे सुदारुणम् ॥ ४ ॥
क्षारकवलसंज्ञं तत्पावनं तीर्थमुत्तमम् ।
तत्र स्थल्यां समभवत् प्रसिद्धं मोक्षदं सदा ॥ ५ ॥
तन्नाम्ना स प्रदेशोऽपि शतयोजनविस्तृतः ।
कृष्णवार्धिप्रपर्यन्तं निस्तारां यावदेव ह ॥ ६ ॥
यवक्रीतः प्रसिद्धोऽभूत् निष्ठापरातटाश्रयः ।
यवक्रीतो महर्षिः स वेदकर्मपरायणः ॥ ७ ॥
एकादश्यां तु मध्याह्ने बालकृष्णं जगाद ह ।
हरेऽभिजिन्मुहूर्तेऽत्र पूर्णाहुतीः प्रदेहि वै ॥ ८ ॥
लोमशस्तत्तथा श्रुत्वाऽनुमत्या श्रीहरेस्तथा ।
ददौ पूर्णाहुतीस्तत्र परब्रह्मात्मवह्नये ॥ ९ ॥
ताम्बूलफलपूगीफलाऽक्षतघृतकानि च ।
श्रीफलं च स्रुवे कृत्वा ददौ पूर्णाहुतीर्हरिः ॥१०॥
ओं समुद्रादितिमन्त्रान् पूर्णादर्वीतिबोधितान् ।
ऋषिभिर्वाच्यमानाँश्च श्रुत्वा पूर्णाहुतीर्ददौ ॥११॥

इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः
शतक्रतवे अद्रयश्च नमम ।
इदं त्रिदिवेभ्य ईशेभ्योऽवतारेभ्यः शक्तिभ्यः
परब्रह्मणे स्वाहा नमम ॥१२॥
इदं सप्ततलस्थेभ्यो भूस्थेभ्यश्चतुर्भ्यो
जडचेतनेभ्यः स्वाहा नमम ।
इदं सप्तस्वर्ग्यश्चाष्टावृतिस्थेभ्य
ईशानान्तेभ्यो धामिभ्यः स्वाहा नमम ॥१३॥
इदं च ब्रह्मणे स्वाहा स्वाहा च परब्रह्मणे ।
एकस्मै चाऽद्वितीयाय मह्यं स्वाहा च ओं नमम ॥१४॥
इत्युक्त्वा श्रीबालकृष्णो महापूर्णाहुतीर्ददौ ।
श्रीफलानि ह्यसंख्यानि सहस्रघृतधारिकाः ॥१५॥
चन्दनानि समिधश्च मिष्टमहाहुतीर्ददौ ।
साक्षादनादिभगवान् प्रत्यक्षो वह्निमण्डले ॥१६॥
प्रत्यहात् सविशेषेण हसन् जग्राह चाहुतीः ।
सर्वकुण्डेषु च तद्वज्जग्राह युगलार्पिताः ॥१७॥
दक्षिणाश्च तदाऽसंख्याः स्वर्णमयीर्ददौ प्रभुः ।
मणिमौक्तिकहीरादीन् रत्नानि विविधान्यपि ॥१८॥
एवं पूर्णाहुतीर्हुत्वा विप्रास्तु वेदपारगाः ।
आशीर्वादान् ददुस्तत्र यजमानाय मन्त्रकैः ॥१९॥
शान्तिघटोदकैर्विप्राः कुशदूर्वाऽऽम्रपल्लवैः ।
पुनन्त्वित्यादिभिश्चाभिषिञ्चाम इति वादिनः ॥२०॥
ततः शान्तिप्रवाचश्चोचिरे विप्राः समन्ततः ।
दक्षिणाश्च पुनः प्राप्ताः स्वस्तिवाचो जगुस्तदा ॥२१॥
हुताशनादिदेवाँश्च निजस्थानविदायकम् ।
ददुर्विप्राः पूर्णताया वाचस्ततोऽवदन् मुखाः ॥२२॥
यज्ञप्रसादं सर्वेभ्यश्चरुजं पद्मरेखया ।
वृद्धिं यान्तं चाऽव्ययं च ददौ कृष्णनरायणः ॥२३॥
कोट्यब्जरूपधारी च ददौ सर्वत्र माधवः ।
विना चरुप्रसादं वै कश्चित्तदा न शिष्यते ॥२४॥
अन्तरीक्षेऽम्बरे व्योम्नि जले स्थले वने क्षितौ ।
गह्वरे प्रान्तके भागेऽरण्ये वृक्षे च पर्वते ॥२५॥
विमाने वाहने याने नौकायां शिखरेऽपि च ।
असंख्यरूपधृक्कृष्णो ददौ चरुप्रसादकम् ॥२६॥
ततो वै भोजयामास सर्वान् वै महीमानकान् ।
प्राघूणिकान् महामुक्तान् मुक्तान् धामानि धामिनः ॥२७॥
ब्रह्मप्रियाश्च मुक्तानी राधारमादिकास्तथा ।
अवतारान् सर्वनारायणान् श्रीपरमेश्वरान् ॥२८॥

व्यूहान् प्रकृतिपालाँश्च कालपुरुषकेश्वरान् ।
वैराजान् भूमसंज्ञाँश्च महाविष्णुगणाँस्तथा ॥२९॥
त्रिदेवानावरणेशान् तत्पत्नीदासिकास्तथा ।
भृत्याँश्च पार्षदाँश्चापि पार्षदानीः समन्ततः ॥३०॥
भोजयामास भगवान् ब्रह्मसृष्टीशसृष्टिजान् ।
ततः सिद्धानृषीन् साधून् पितॄन् सतीश्च योषितः ॥३१॥
पञ्चस्वर्गस्थितान् सर्वान् देवान् देवीः कुटुम्बिनः ।
ब्रह्मचारिगणाँश्चापि दिक्पालान् लोकपालकान् ॥३२॥
त्रयँस्त्रिंशद्देवताश्च भुवर्लोकनिवासिनः ।
भूलोकस्थान् चतुःखनिजीवान् जडाँश्च चेतनान् ॥३३॥
सप्तपातालसंस्थाँश्च भोजयामास माधवः ।
सुराऽसुरगणान् सर्वान् काश्यपेयाँश्च मानवान् ॥३४॥
ब्रह्मसृष्टान् स्थिरचरान् गुणकर्मतदाश्रितान् ।
तदाश्रयाँश्च भगवान् भोजयामास वै क्रतौ ॥३५॥
अद्याऽहं भगवानस्मि भोजयामि च निर्गुणम् ।
एकादशीदिने चापि फलवत् सर्वमेव मे ॥३६॥
मत्स्पृष्टं निर्गुणं सर्वं भुञ्जन्तु भावतोऽखिलाः ।
भोजनं वै व्रतं त्वद्य मदिच्छयैव जायताम् ॥३७॥
इत्येवं भगवानाह बालकृष्णस्तु राधिके ।
सर्वान् संभोज्य च ततः स्वयं पित्रा युतस्तथा ॥३८॥
भ्रातृभिश्च कुटुम्बेन सह भोजनमाददे ।
माता च मातरश्चान्या स्वसा सन्तोषिणी तथा ॥३९॥
ब्रह्मप्रियाश्च वै सर्वाः कुटुम्बं बुभुजे तदा ।
ताम्बूलं प्राप्य च सर्वे विश्रामं चक्रुरीश्वराः ॥४०॥
ततो वाद्यान्यवाद्यन्त ह्यगायन्त च गीतिकाः ।
अवभृथाप्लवनार्थं सर्वे वै यत्निनोऽभवन् ॥४१॥
निष्ठापराप्रपीठायाः संगमेऽनन्तमानवाः ।
देवा मुक्ता ईश्वराश्चावताराः शक्तयोऽखिलाः ॥४२॥
सृष्टित्रयनिवासाश्चर्षयः सत्यश्च साधवः ।
प्रययुर्भगवान् सर्वेश्वरेश्वरेश्वरेश्वरः ॥४३॥
पद्भ्यां जगाम सहितो महर्षिभिश्च कीर्तितः ।
वेदमन्त्रैः स्तूयमानोऽवभृथार्थं नदीतटम् ॥४४॥
तस्थौ च संगमे बालकृष्णनारायणः प्रभुः ।
संकल्पं कारयामास लोमशस्तु पुरातनः ॥४५॥
चतुर्मुखाऽजब्रह्माण्डे सृष्ट्यारंभे कृतान्तगे ।
प्रथमे पर्यये श्रीमत्कांभरेये नरायणे ॥४६॥
वर्तमाने वत्सरे च चतुर्दशेऽत्र भूतले ।
सर्वाद्यनररूपेऽस्मिन्नवतारिणि वर्तति ॥४७॥
श्रावणे शुक्लपक्षीयैकादश्यां सूर्यवासरे ।
निष्ठापराप्रपीठासंगमे यज्ञान्तकं त्विदम् ॥४८॥
अवभृथात्मकं स्नानं सर्वपापविशोधकम् ।
अध्वरे नान्तरीयकाघानां क्षालनशक्तिकम् ॥४९॥
सर्वपुण्यप्रदं सर्वाऽज्ञातकल्मषवारकम् ।
सूक्ष्मजन्तुबीजकाष्ठकणपुष्पकलार्पणे ॥५०॥
वह्नौ समर्पणे भूमेः शोधने मण्डपकृतौ ।
रसशालास्थले चूल्ल्यां कण्डन्यां जलकुंभके ॥५१॥
पेषण्यां मार्जने चापि पत्रदलावभेदने ।
दुरीतं प्रत्यवायादि यत्किंचिज्जातमित्यपि ॥५२॥
तस्य नाशकरं स्नानं कृष्णनारायणः प्रभुः ।
यज्ञकर्मप्रपूर्त्यर्थं सुरप्रसन्नतार्थकम् ॥५३॥
परमाऽपूर्वपुष्ट्यर्थं त्ववभृथाप्लवात्मकम् ।
स्नानं सृष्टित्रयोपेतः करोम्यद्य च ओं नमः ॥५४॥
इति कृत्वा सुसंकल्पं भगवान् पुरुषोत्तमः ।
राधिके स जले मग्नोऽभवन्निर्गवै पुनः ॥५५॥
स्नानांगं तर्पणं चक्रे स्मृत्वा सृष्टित्रयं तदा ।
शरीरे मर्दनं चक्रे तिलपिष्टेन वै तदा ॥५६॥
आमलकीफलचूर्णैस्तीर्थमृदा च भस्मना ।
यज्ञकुण्डीयकेनैव हरिद्राचूर्णकेन च ।
चन्दनेन च कस्तूर्या यवपिष्टादिना तथा ॥५७॥
पञ्चरंगैस्तथा चूर्णैः सर्वौषधीभिरित्यपि ।
पञ्चगव्येन च तथा सुवर्णतीर्थवारिणा ॥५८॥
ब्रह्मकमण्डलुद्वाराऽभिषेधविधिना तदा ।
संमृद्य सर्वचूर्णानि चक्रे स्नानमवभृथम् ॥५९॥
यदा स्नातो महाराजस्तदा तत्र तु सागराः ।
ब्रह्महृदः सुधासिन्धुर्विरजा च महाजलम् ॥६०॥
नारा आपस्तथा नद्यो नदाः सरांसि दीर्घिकाः ।
व्योमवारि तथा मेघा जलं दिव्यं च पाण्डुरम् ॥६१॥
वारुणं च महातीर्थं महाभूतजलं तथा ।
साधिदैवानि सर्वाणि तीर्थानि तत्र चाययुः ॥६२॥
स्नपयामासुरत्यर्थं भगवन्तं हि धारया ।
मुक्ता धामान्यवतारा अवतारिण्य इत्यपि ॥६३॥
शक्तय ईश्वरा ईश्वराण्यो ब्रह्मप्रियास्तथा ।
पितरो देवदेवेशाः ऋषयः सिद्धसाधवः ॥६४॥
आश्रमाः सर्ववर्णाश्च नरा नार्यो नपुंसकाः ।
जरायूजाश्चाण्डजाश्चोद्भिज्जाः स्वेदजजातयः ॥६५॥

दैत्याश्च दानवा यक्षा राक्षसा वह्नयस्तथा।
पार्थिवाश्च जलीयाश्च तैजसा वायुदेहिनः ॥६६॥
गगनीयास्तलवासाश्चेतनाश्च जडास्तथा।
सर्वे सस्नुस्तत्र तीर्थेऽवभृथे पुण्यवारिधौ ॥६७॥
दिव्ययोगे दिव्यगुणे निर्गुणे दिव्यकारिणि।
पुष्पचन्दनवृष्टिश्च तदा तत्राऽभवच्छुभा ॥६८॥
आकाशाद् देवगुरवः पावनान्यवदँस्तदा।
पावयन्तु परब्रह्म ब्रह्माऽक्षरनिवासिनः ॥६९॥
धामधामस्थिता भक्ता भक्तेश्वराऽवतारिणः।
अवताराः पार्षदाश्च पावयन्तु तथेश्वराः ॥७०॥
ईश्वराण्यो महासत्यः पावयन्तु सुरेश्वराः।
यजमानं यजमानान् पावयन्तु महर्षयः ॥७१॥
स्वभावपावनं देवं महानारायणं सुराः।
पावयन्तु च तीर्थानि चावभृथाऽऽगतानि वै ॥७२॥
गंगा चेरावती मेनकांगी च ब्रह्मपुत्रिका।
अंगशिक्षांगिका हरांगहा आयूरिका तथा ॥७३॥
बीना यानेश्वरी चौबी सिन्धुश्चोरलिका तथा।
वल्गुर्निष्ठापरा दीना दिनपाद्याः सरिद्वराः ॥७४॥
नारायणी नष्टजरा कर्मांगी जाम्बुजा नदी।
मुरा च कारुलिंगा च परीना आमजानिका ॥७५॥
मिश्रसुरी महाकाञ्ची यूकासना सरिद्वरा।
एताश्चान्या महानद्यः पावयन्तु मखेष्टिनः ॥७६॥
अश्वपट्टं पुष्करं मानसं नारायणंसरः।
पम्पासरश्चेन्द्रद्युम्नसरो ब्रह्मसरोवरम् ॥७७॥
शंभुलं च सरश्चिलंसरः कोलारकंसरः।
माकमानसरो बालासरश्च माञ्जिरासरः ॥७८॥
लाभरुचिसरः सरः कुवनं ग्रागिरं सरः।
आरसरस्तुरुसरो गैरानरसरस्तथा ॥७९॥
सुशीलं च सरो मीनकङ्कूसरस्तथा शुभम्।
बालकृष्णसरश्चापि द्विकलं च सरोवरम् ॥८०॥
युरालं च सरस्त्र्यंगिनरसरोवरं तथा।
फुलमण्डसरश्चापि लुरासं च सरस्तथा ॥८१॥
मशकेलसरश्चापि जयेशानसरस्तथा।
उद्दशं च सरश्चापि योनिगं च सरस्तथा ॥८२॥
लेण्डुगं च सरश्चापि पायूशं च सरोवरम्।
तूनायं च रुक्मवासम् आवालं च रुदन्फलम् ॥८३॥
विस्तुरीयसरश्चापि आलवार्तं सरस्तथा।
इतिवर्त्तं सरः किम्वासरश्च तुंगयानिकम् ॥८४॥
मावुरं वाग्वियालं च सरो न्यासजयात्मकम्।
शिरोवं चण्डसंज्ञं च ग्रातवीरं सरस्तथा ॥८५॥
ग्रातश्लवसरश्चापि अर्थवासं सरस्तथा।
विनिपारं सरश्चापि सुपरीयारकं तथा ॥८६॥
क्लिन्नवारिसरश्चापि इतोर्शं सरोवरम्।
शोणभद्रनदश्चापि घर्घरानद इत्यपि ॥८७॥
सागराश्चापि सर्वेऽत्र पावयन्तु च देहिनः।
पुनन्तु देवसरितः पुनन्तु तीर्थकोटयः ॥८८॥
मेरुर्मन्दरशैलश्च हिमाद्रिर्युरलस्तथा।
कारुकर्मा पतत्कायो रैवताद्रिः पुनन्तु वः ॥८९॥
इत्येवं च शतक्रोशे सरित्सागरवारिषु।
सस्नुः सर्वे च राजानो मखेषु यजमानकाः ॥९०॥
तत्र तत्रैकपुरुषो दिव्यस्तु सूर्यभास्वरः।
नद्योस्तु संगमात्तत्र समुत्पन्नो हरिर्यथा ॥९१॥
हस्ते सौवर्णपात्रे च दधन् चन्दनकाक्षतान्।
पुष्पमालां च मुकुटं बालकृष्णं समाययौ ॥९२॥
पूजयामास विधिना चन्द्रकं प्रचकार सः।
हरेर्भालेऽक्षताद्यैः कुंकुमचन्दनकर्दमैः ॥९३॥
ददौ तु मुकुटं कृष्णमस्तके मालिकां गले।
चकार दण्डवत्तत्र बालकृष्णं जगाद ह ॥९४॥
सर्वेषां शृण्वतां मेघनादगम्भीरया गिरा।
अवभृथोऽहं पुरुषो यमपुत्रोऽस्मि शाश्वतः ॥९५॥
सर्वेष्टिवैष्णवो यज्ञः पूर्णोऽयं पूर्णपुण्यदः।
अहं पुष्टिं गतोऽस्म्यद्य सर्वतीर्थागमादिह ॥९६॥
अत्र स्नानं प्रतिवर्षं कुर्वाणानां तु शाश्वतम्।
मोक्षपदं निश्चितं स्यान्नारायणकृपालवात् ॥९७॥
सर्वे भवन्तु सुखिनः श्रिया द्रव्यैश्च सम्पदा।
आरोग्येण कुटुम्बाद्यै रसैर्भोग्यैः प्रपूरिताः ॥९८॥
योगिनः क्षेमिणश्चापि भवन्तु सिद्धिधारिणः।
नराः नार्यः समस्ताश्च येऽत्र मखे समागताः ॥९९॥
भुक्तिमुक्तिकृताह्लादा भवन्तु, हरिसदृशाः।
इत्युक्त्वा च जलं त्ववभृथौ पपौ हि राधिके ॥१००॥
तावज्जलात्समुत्पन्ना कुमारी चन्द्रभास्वरा।
सुरूपा सर्वशोभाढ्या पुष्टा चम्पकशोभना ॥१०१॥
योग्या प्रसन्ना सुमुखी लक्ष्मीतुल्या सभूषणा।
हस्ते पात्रं पूजनार्हद्रव्ययुक्तं च बिभ्रती ॥१०२॥
अक्षताद्यैः परमेशं बालकृष्णं पुपूज सा।
तां दृष्ट्वा मुमुहुः सर्वे कोटिशो मानवा अपि ॥१०३॥

देवा दैत्याः ऋषयश्च पितरो देहधारिणः ।
बालकृष्णं हरिं नत्वा पूजयित्वा जगाद सा ॥१०४॥
अहं तृप्तिः शाश्वती च हव्यपुत्री भवामि च ।
यज्ञेऽत्र सर्वहव्येभ्यो मम जन्माऽस्ति पुण्यवत् ॥१०५॥
कुमार्यहं सुसन्तुष्टा जाताऽस्मि च शुभाशिषा ।
युनज्मि वो भवन्तोऽत्र भवन्तु सुखिनः सदा ॥१०६॥
मम सौभाग्यदातारो भविष्यन्ति सुभागिनः ।
श्रीहरिस्तां तदा प्राह वरं याचस्व कन्यके ॥१०७॥
कन्या प्राह वरं देहि वरश्चावभृथो हि मे ।
श्रीहरिर्द्राक् विचार्यैव दानकाले ह्यवभृथम् ॥१०८॥
कुमारं तं समाहूय करे धृत्वा कुमारकम् ।
कन्यायै चार्थितवत्यै चार्थयन्तं कुमारिकाम् ॥१०९॥
ददौ कुमार्यै दानं च विधिना दानवित् प्रभुः ।
कुमारदानं प्रददौ कुमार्यै भगवान् प्रभुः ॥११०॥
कुमारो रत्नहारं च कुमार्यै च समार्पयत् ।
एवं विवाहविधिना कुमारदानमाप्य सा ॥१११॥
कुमारी सौभाग्यवती कुमारः सुभगोऽभवत् ।
केतुमाले तदारभ्य कुमारदानमुत्तमम् ॥११२॥
नारी प्रधानभूता च कुमारो नार्यधीनकः ।
नारीवर्चस्वमेवाऽपि नरस्य पारवश्यता ॥११३॥
अवभृथकृतं जातं नार्यै समर्पणं सदा ।
नारीराज्यं हि तत्सर्वं तन्माहात्म्येन विद्यते ॥११४॥
इत्येवं नरदानाख्यं संगमे स्नानसंगमे ।
उत्सवे तत्र कृत्वैव निर्ययुश्च जलाद् बहिः ॥११५॥
सर्वे वै स्नानकर्तारस्तावत्तु दम्पतीद्वयम् ।
नृत्यं कुर्वत् प्रसन्नं च जलान्तरे व्यलीयत ॥११६॥
इत्येवं लोकयामासुर्महाश्चर्यं मखार्थिनः ।
ददौ दानानि च तदा कोटिशो मानवादयः ॥११७॥
कन्याभ्यः कोटिसंख्याभ्यः कुमाराणां यथाकृतम् ।
कन्यकास्तु तदा प्राप्य कुमारान् वररूपिणः ॥११८॥
कोटिशस्तत्र सञ्जाताः सौभाग्यभाग्यशोभिताः ।
एवं कुमारदानं वै विवाहे तत्र चाद्यजम् ॥११९॥
अभवत् तत् सदा तत्र विद्यते शाश्वतो विधिः ।
कुमारैश्च समं पृथ्वीगृहगोस्वर्णदानकम् ॥१२०॥
ददुर्वै पितरस्तेषां वधूटीभ्यो मुदान्विताः ।
एवं चावभृथं कृत्वा दत्वा दानानि कोटिशः ॥१२१॥
स्वं स्वं स्थानं ययुः सर्वे विशश्रमुश्च मन्दिरे ।
वादित्राणां निनादाश्च तदा शान्तिमुपागमन् ॥१२२॥
इत्येवं राधिके महाश्चर्यं यत्ते निवेदितम् ।
श्रवणात्पठनादस्य स्मरणाच्छ्रावणादपि ॥१२३॥
अवभृथफलं प्राप्य कुमारदानजं फलम् ।
लभेत् भुक्तिं तथा मुक्तिं सौभाग्यं शाश्वतं लभेत् ॥१२४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रत्यक्षहरिर्महापूर्णाहुतीर्जग्राह, सर्वेषां भोजनानि, अवभृथ-स्नानं, अवभृथात्मककुमारप्राकट्यम्, तृप्तिरूपकुमारी-प्राकट्यम्, कुमार्यै वरं याचमानायै अवभृथाख्यस्य कुमारस्य दानम्, विवाहविधौ कुमारदानानि, महादानानि, स्वस्वस्थानेषु विश्रान्तिश्चेत्यादि-निरूपणनामैकसप्तत्यधिकशत-तमोऽध्यायः ॥१७१॥

**श्रीकृष्ण उवाच—**

राधिके केतुमालाख्ये कुमारिकाभ्य एव तु ।
कुमाराणां प्रदाने वै फलं श्रेष्ठं प्रजायते ॥ १ ॥
नारी तत्र स्वतन्त्राऽस्ति कुमारे स्वत्वयामिनी ।
पत्नीवचो महत्तत्र पत्न्याज्ञा पारमेश्वरी ॥ २ ॥
पत्नी वर्चस्वधर्त्री हि पतिर्दाससमस्ततः ।
पतिस्तु बीजदो मात्रं क्षेत्रं प्रधानमुत्तमम् ॥ ३ ॥
क्षेत्रं वै रक्षकं पातृ जनयितृ नियामकम् ।
स्थायि सर्वाधिकारात्तं पारम्पर्यस्य सूचकम् ॥ ४ ॥
अवभृथप्रदानेन धर्मो कुमारदानकम् ।
प्रवृत्तस्तत्र तत्कालाद् बालकृष्णेच्छया परः ॥ ५ ॥
गांगेयादींस्तदा श्रीमद्बालकृष्णः परेश्वरः ।
अशिक्षयत् कुमाराणां दानविधिं स्वयं प्रभुः ॥ ६ ॥
मखभूमौ च वा देवमन्दिरे वा गुरोर्गृहे ।
शृंगारिते च वाद्याद्यैर्ध्वानिते च समाजिते ॥ ७ ॥
शुभे निरुद्यमे वारे आराधनादिने प्रगे ।
यायात् कन्याकुटुम्बं तु नीत्वा कन्यां सुशोभिताम् ॥ ८ ॥
सुवेषां योग्यशृंगारभासितां पूर्णयौवनाम् ।
सर्वहस्याननां चित्रवस्त्रां छत्रान्वितां ततः ॥ ९ ॥
महासिंहासने धर्मगुरुं नत्वा निषादिताम् ।
मात्रा दत्तपुष्पमालां गुरुणाऽऽशीःप्रयोजिताम् ॥१०॥
अन्यैश्चदर्शकैर्मित्रैः सुहृदादिभिरर्चिताम् ।
आचार्यः श्रावयेद्धर्मान् नीतीश्वरादिभिश्रितान् ॥११॥
तावत्तत्र समागच्छेत् कुमारेणान्वितं तदा ।
कुटुम्बं तु कुमारस्य मित्रसुहृत्समन्वितम् ॥१२॥

सुशोभितं कुमारं च कन्यापार्श्वे निषाद्य च।
पुष्पहारादिकं दद्याच्चाशीर्वादान् गुरुस्तदा ॥१३॥
परमेशानमन्त्रौँस्तौ श्रावयेद् धर्मभक्तिवित्।
ततस्तौ द्वौ गुरुः पुष्पादिभिः संपूज्य मन्दिरे ॥१४॥
पुष्पहारौ स्वहस्तेन दद्यात् तत्कण्ठयोः पृथक्।
गुच्छौ दद्यात् सुगन्धादि दद्यान्मालाद्वयं करे ॥१५॥
परस्परं निदध्याच्च मालां कण्ठे वधूर्वरः।
गुरुः कुमारहस्तं च दद्यात्कुमारिकाकरे ॥१६॥
कुमारिका च गृह्णीयात् करं पत्युस्तदा ततः।
कुमारस्य करे दद्यात् करं नैजं कुमारिका ॥१७॥
कुमारस्तं च गृह्णीयात् प्रेमभावेन लोकयन्।
ततः परस्परं कुर्यात् मिथो हस्तादिचूम्बनम् ॥१८॥
परस्परं परस्परकरौ धृत्वा च नर्तनम्।
ततस्तौ प्रणमेतां च परेश्वरं गुरुं तथा ॥१९॥
अथ द्वयोः पक्षिणश्च दद्युर्हारद्वयं तदा।
प्रत्येकस्य गले सर्वे सुगन्धादि शुभास्पदम् ॥२०॥
सुखिनौ भवतां चापि भवतां चिरजीविनौ।
भवतां पुत्रपुत्र्यादिफलिनौ प्रेमकोशिनौ ॥२१॥
इत्याशीर्वादसम्प्राप्तौ नमेतां धर्मपुस्तकम्।
गुरुं ततो भवेन्नृत्यं पश्येतां द्वन्द्वयोजितम् ॥२२॥
भोजनं च समाजेन गृह्णीयातां सहस्थितौ।
ताम्बूलकादिकं प्राप्य गुरुणाऽऽशीःप्रयोजितौ ॥२३॥
गच्छेतां च समुत्थाय यथेष्टं कन्यकागृहम्।
कन्याज्ञया च वा गच्छेतां तदानीं वरगृहम् ॥२४॥
स्वतन्त्रं वा गृहं कीर्तिलभ्यं वासाय योजितम्।
कुमारः कन्यकाज्ञां च लोपयित्वा न सञ्चरेत् ॥२५॥
वधूः सा स्वामिनी नित्यं स्वामिनो वै नियामिका।
वर्तेत सर्वथाऽधीनो वरस्तस्या मतौ मते ॥२६॥
एवं कुमारदानं वै कुमार्यै देवमन्दिरे।
उत्सवेन च भोज्येन हारतोरादिभिर्मतम् ॥२७॥
गायनेन च नृत्येन वाद्यादिभिः सुशोभितम्।
नात्र यज्ञविधिर्वह्नौ देवसाक्ष्ये ह्यपेक्ष्यते ॥२८॥
अबन्धनो विधिश्चायं यथेष्टगृहयापनः।
यदि प्रेम्णः क्षतिश्चास्ते न चेत् स्वभावमेलनम् ॥२९॥
पुरुषो वै भवत्येव त्यक्तव्यो योषिता तदा।
द्वितीयश्चापि कर्तव्यः स्वतन्त्रया तु योषिता ॥३०॥
इत्येवं राधिके कन्यायै कुमारप्रदानके।
विधिस्तेऽत्र सतीवश्यः प्रोक्तो वै केतुमालके ॥३१॥
ततः श्रीमद्बालकृष्णो रात्रौ विश्रान्तिमाप ह।
विवाहाः कोटिशस्तत्र जाता वै द्वादशीदिने ॥३२॥
आध्वरे मण्डपे दानं विवाहविधिनाऽभवत्।
मध्याह्ने भोजयित्वा च महीमानान् समस्तकान् ॥३३॥
विदाये बहुदानानि तेभ्यो ददौ हरिः स्वयम्।
याः सर्वा उपदास्तत्रागतास्तास्तु प्रसादजाः ॥३४॥
कृत्वा मत्वा ददौ कृष्णो जगृहुः सर्वदेहिनः।
मुक्तास्तथाऽवताराश्च भगवन्तो नरायणाः ॥३५॥
ईश्वरा ईश्वराण्यश्च मुक्तान्यः शक्तयस्तथा।
तत्त्वानि तत्त्वविज्ञाश्च सत्यश्च ब्रह्मचारिणः ॥३६॥
साधवः पितरो देवाः ऋषयो देवतोपमाः।
राजानो मानवा दैवगन्धर्वाद्याः सुरप्रजाः ॥३७॥
लोकपाला दिशांपाला वनानि तीर्थभूमयः।
पातालस्था जलवासा व्योमवासाश्च भूस्थिताः ॥३८॥
जडाश्च चेतनाश्चापि महीमानास्तु ये तदा।
यज्ञे समागताश्चासन् विदायं जगृहुश्च ते ॥३९॥
श्रीहरेस्त्वाज्ञया सर्वे पूजयित्वा परेश्वरम्।
ययुर्विमानयानैश्च वाहनैः स्वालयाँस्ततः ॥४०॥
सौराष्ट्रीयाः प्रजाश्चापि ययुर्विमानमार्गगाः।
ब्रह्मप्रियाः सर्वकन्याः कुटुम्बं श्रीहरेस्तदा ॥४१॥
ऋषयो लोमशाद्याश्च नीलकर्णवृकादयः।
राजभिश्चार्थिताः सर्वे न्यूषुस्तत्र मखस्थले ॥४२॥
अश्वपट्टसरोदेवाः क्षेत्रपा देवतादिकाः।
ईशानो राजगुरवो मखाचार्याश्च तद्भवाः ॥४३॥
गांगेयाश्चामुकप्रजा न्यूषुस्तत्र तु संगमे।
हरेर्दर्शनलाभार्थं नेतुं हरिं निजाऽऽलयान् ॥४४॥
भुक्त्वा रात्रौ तदा चक्रुर्विश्रान्तिं च प्रगे पुनः।
हरिरुत्थाय विधिवत् स्नानपूजां चकार ह ॥४५॥
त्रयोदश्यां तु मध्याह्ने भोजयामास मानवान्।
राजा सम्राट् करौ बध्वा प्रार्थयामास माधवम् ॥४६॥
मे गृहं पावनं कृष्ण पादन्यासैर्विधेहि च।
तथाऽस्त्विति हरिः प्राह ततश्चोरलकेतुकः ॥४७॥
राजा त्वाज्ञापयामास प्रधानान् स्वागताय वै।
विमानानि सुसज्जानि त्वानयामासुरुत्सुकाः ॥४८॥
प्रधानाद्यास्ततो यज्ञपरिहारं प्रचक्रिरे।
सामग्रीणां तु शिष्टानां रक्षणं दधिरे तथा ॥४९॥
यानाब्धेर्भूपवर्गास्तु प्रजाश्च श्रेष्ठिनस्तथा।
निन्युः स्वस्वालयान् स्तंभपटमण्डपपात्रिकाः ॥५०॥

राजभिस्त्वर्थितस्तत्र श्रेष्ठिभिश्चार्थितः प्रभुः ।
स्वस्वदेशगृहाण्येव पवित्रयितुमादरात् ॥५१॥
हरिस्तथाऽस्त्विति प्राह स्वस्वर्षिमतमावहन् ।
सर्वालयानहं समागमिष्यामि सुखाय वः ॥५२॥
राजानः सर्व एवाऽतो यान्तु निजालयानितः ।
गुरवस्तु मया साकं गांगेयाः सन्तु संस्थिताः ॥५३॥
प्रतीक्षन्तु क्रमेणैव ममागमं दिनोत्तरे ।
प्रादक्षिण्यक्रमेणैवागमिष्यामि च वो गृहान् ॥५४॥
इत्युक्ताः प्रययुः सर्वे राजानो निजराज्यकम् ।
विमानेषु समारुह्योरलभूपेन वन्दिताः ॥५५॥
श्रीहर्याद्या ययुर्व्योम्ना राजधानीं तु मोक्षदाम् ।
मोक्षकपत्तनाख्यां च बहुशोभार्हशोभिताम् ॥५६॥
गोपुराणि स्वर्णरूप्यमयानि तोरणान्यपि ।
सूर्यचन्द्रप्रभातुल्योज्ज्वलानि शोभितान्यपि ॥५७॥
राजमार्गाः शोभिताश्च कृत्रिमोद्यानपुष्पकैः ।
रंगवल्ल्यादिभिः स्तंभैः कादलैः पद्मपत्रकैः ॥५८॥
जलकुंभैः स्वागताद्यैर्ध्वजैश्चित्रैर्मखात्मकैः ।
यशोश्लोकान्वितै रम्यै रंगपटादिराजितैः ॥५९॥
पताकाभिः शोभितानि फटाकाभिश्च शालिकाः ।
गन्धजलैः प्रसक्तानि वर्त्मानि वीथयस्तथा ॥६०॥
राजमार्गाः सुगन्धाद्यैः पुष्पैरंगैः शुभाः कृताः ।
जयस्वागतमानादिसूचिकामुद्रिकान्विताः ॥६१॥
सर्वयन्त्रान्वितां रम्यां विशालां बहुमानवाम् ।
दशयोजनवृत्तां च स्मृद्ध्यादिभिः प्रपूरिताम् ॥६२॥
श्वेतचम्पकतुल्याभैर्मानवैः परिशोभिताम् ।
वृक्षवल्लीगृहोद्यानै रम्यां मनोहरां पुरीम् ॥६३॥
बहुवादित्रनिनदैस्तूपस्फोटनगर्जनैः ।
राजसैन्यैः कृतमानो बालकृष्णो विवेश ताम् ॥६४॥
विमानादवरुह्यैव चतुर्दन्तकरिस्थितः ।
शुशोभ भगवाँस्तत्र वर्धितो जनकोटिभिः ॥६५॥
छत्रचामरशोभाढ्यो राज्ञा राज्ञ्या गजान्तरे ।
जयकारेण मानेन प्रेम्णा निभालितो मुहुः ॥६६॥
राजमार्गे पूजितश्च वन्दितो नमितो मुहुः ।
प्रसन्नतां दर्शयन् तान् हरिर्नृपालयं ययौ ॥६७॥
अवातरत् शनैर्देवो मातृपितृसमन्वितः ।
कुटुम्बिभिर्युतो महर्षिभिर्युक्तोऽङ्गणे शुभे ॥६८॥
महोद्यानमये राजसौधाग्रे भूतले तदा ।
ब्रह्मप्रियास्तथेशानादयो ह्यवातरँस्तदा ॥६९॥
विमानेभ्यो व्योममार्गात् महोद्याने शुभाश्रये ।
राजसौधे महादिव्ये निनाय पुरुषोत्तमम् ॥७०॥
ऊरुकीर्तिर्नृपपुत्रश्चोरलकेतुभूपतिः ।
पुपूज बहुधा भक्त्या जलान्नमधुपर्ककैः ॥७१॥
चन्दनाक्षतगन्धाद्यैः कस्तूरीगन्धसारकैः ।
बहुस्वर्णमयैः पात्रै रत्नाढ्याभरणादिभिः ॥७२॥
दिव्यवस्तूपसामग्रीबाहुल्यैरार्चयद्धरिम् ।
नीराजनं ततश्चक्रे स्वर्णमुद्रास्तु कोटिशः ॥७३॥
ददौ दाने तु हर्यग्रे मणिहारान् ददौ गले ।
पादौ प्रक्षाल्य च तदा सकुटुम्बो जलं पपौ ॥७४॥
शतं पुत्रा दश पुत्र्यस्तथाऽन्या बालबालिकाः ।
द्वे पत्न्यौ दासिकाश्चापि पपुर्वारि प्रसादजम् ॥७५॥
कृतकृत्यं तदात्मानं मेनिरे राजयोगिनः ।
सर्वे कुटुम्बिनो राज्ञस्त्रिंशत्कन्या विशेषतः ॥७६॥
जहृषुः श्रीहरिं प्राप्य मनसैच्छन् सदा प्रभुम् ।
यवक्रीतो महर्षिश्च पुपूज परमेश्वरम् ॥७७॥
राज्ञाऽर्पितं धनं चान्यद् ददौ महर्षये हरिः ।
कन्याभिश्चार्थितः कृष्णः कुमारदानधर्मतः ॥७८॥
नृपालयेऽभवत् कृष्णेच्छया कुमारदानकम् ।
कन्यास्तत्र हरिं प्राप्य जाताः पूर्णमनोरथाः ॥७९॥
पितॄन् वृद्धान् मातृवर्गान् प्रणम्याऽऽज्ञां समर्ज्य च ।
साकं श्रीहरिणा स्थातुं सर्वदैव मनो व्यधुः ॥८०॥
प्राप्य मन्त्रान् वैष्णवाँश्च पावन्यः कन्यकास्तु ताः ।
पवित्रहृदयैर्ब्रह्मप्रियामध्ये स्थिताः सदा ॥८१॥
राज्ञा तत्र कृता सेवा राज्ञ्यादिभिश्च सेवकैः ।
प्रधानैः श्रेष्ठिभिश्चापि दासदासीभिरित्यपि ॥८२॥
भोजनैः पानदानैश्च मर्दनैः रंजनादिभिः ।
नगरेऽपि हरिं नीत्वा श्रेष्ठिनश्चाऽऽर्चयन् प्रभुम् ॥८३॥
आप्रातः श्रीहरिं रम्यं बालकृष्णं परेश्वरम् ।
श्रेष्ठिनः स्वालयान्नीत्वा पुपूजुर्बहुभावनाः ॥८४॥
ब्रह्मर्पणानि प्रददुश्चात्मार्पणं व्यधुर्मुदा ।
एकान्तिनश्च ते भक्ता जाता नराः स्त्रियोऽखिलाः ॥८५॥
परमा वैष्णवाः सर्वे बालकृष्णस्य सेवकाः ।
बालकृष्णाश्रयं मुक्त्यै चक्रिरे तु समुत्सुकाः ॥८६॥
विद्युत्प्रकाशके तत्र नगरे भ्राजितेऽभितः ।
परिबभ्राम भगवान् कुटुम्बेन सहाऽच्युतः ॥८७॥
महर्षिभिस्तथेशानमण्डलेन पुरीं ततः ।
प्रातः स्वस्थानमासाद्य विश्रान्तिं चाप वै मनाक् ॥८८॥

गृहीत्वा योगनिद्रां च सूर्योदये विहाय ताम् ।
समुत्तस्थौ निजं ध्यानं कृत्वा चकार चाप्लवम् ॥८९॥
उष्णोदकैश्चन्दनाद्यैरर्चितो मर्दितस्तथा ।
राज्ञ्यादिभिस्तथा भक्ताभिश्च सखौ जगद्विधिः ॥९०॥
पूजां संध्यां ततः कृत्वा सद्योजातं च भोजनम् ।
प्रचकार महाराजः सभायां तत आययौ ॥९१॥
पूजितः सप्रजाभिश्च शोभते जयते हरिः ।
राजते राजसन्मानैः श्रीहरिः कृष्णवल्लभः ॥९२॥
तावत् तत्र सभायां वै कृष्णदेहास्तु मानवाः ।
समाययुर्विरूपाश्च कृशा दुःखान्वितास्तदा ॥९३॥
प्रणिपत्य हरिं प्राहुः कुरु नो मोक्षणं प्रभो ।
वयं त्वत्रोरलदेशे वसामोऽगतिका जनाः ॥९४॥
वासनायुक्तचित्ताश्च पूर्वजा राजमानिनाम् ।
श्रुत्वैवं भगवाँस्तान् जलपानमकारयत् ॥९५॥
राज्ञां तु पूर्वजास्ते संत्यक्त्वा काळुष्यमुल्बणम् ।
दिव्यदेहाः समभवन् चतुर्भुजा विमानगाः ॥९६॥
पार्षदैर्नीयमानास्ते विष्णोर्धाम ययुः परम् ।
एतद् विलोक्य नृपतिस्त्वाश्चर्यं परमं महत् ॥९७॥
नत्वाऽऽत्मानं कृतकृत्यं मेने मोक्षं स्वकं ह्यपि ।
मोक्षार्थं त्वर्थयामास श्रीमत्कृष्णनरायणम् ॥९८॥
तथाऽस्त्विति प्रभुः प्राह प्राप्ते काले भविष्यति ।
मोक्षणं सकुटुम्बस्येत्येवं वरं ददौ तदा ॥९९॥
अथैवं राधिके त्रयोदश्यां विदायमाप्य च ।
राज्ञा सन्मानितश्चापि प्रस्थापितो हरिस्ततः ॥१००॥
हारादिभिः शोभितः श्रीभगवान् गन्तुमुत्सुकः ।
प्रजाभिः पूजितः सायं सर्वानुपादिदेश ह ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने,कुमार-दानविवाहविधिः, महीमानानां विदायः, उरलकेतुराजधान्यां मोक्षिकायां प्रभोर्गमनं, नगरे भ्रामणं पूजनं, राजपूर्वजानां मोक्षणं चेत्यादिनिरूपणनामा द्वासप्तत्यधिकशततमोऽध्यायः ॥ १७२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके तत्र यवक्रीताय चर्षये ।
भगवान् प्रददौ ज्ञानं गांगेयाय महात्मने ॥ १ ॥
राज्ञे राजकुटुम्बाय प्रजाभ्यश्चापि शोभनम् ।
पारम्पर्यप्ररक्षार्थं शिष्यत्वावेदकं निजम् ॥ २ ॥
यवक्रीतोरलकेतोः राज्ञ्यस्तथा प्रजास्त्विमाः ।
शृण्वन्तु मम वाक्यानि कृष्णमूलपराणि वै ॥ ३ ॥
अहं श्रीभगवानस्मि परब्रह्म परात्परः ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥ ४ ॥
अक्षरात्तु परे धाम्नि दिव्ये विराजमानकः ।
दिव्यमूर्तिर्निवसामि दिव्यमुक्तप्रसेवितः ॥ ५ ॥
अहं मम स्वरूपस्य ज्ञानं ददामि वै मुहुः ।
भक्तेभ्यो मुक्तसंज्ञेभ्यो मुक्तानीभ्यस्तथा क्वचित् ॥ ६ ॥
क्वचिद् ब्रह्मप्रियाभ्यश्च राधायै च श्रियै क्वचित् ।
क्वचिल्लक्ष्म्यै रमायै च माणिक्यायै क्वचित्तथा ॥ ७ ॥
रमायै च जयायै च ललितायै तथा क्वचित् ।
पद्मावत्यै महालक्ष्म्यै पार्षदेभ्यस्तथा क्वचित् ॥ ८ ॥
आयुधेभ्यो विभूषाभ्यो गुणेभ्यश्च तथा क्वचित् ।
ऐश्वर्येभ्यश्च शक्तिभ्यः क्वचिद्भक्तेभ्य इत्यपि ॥ ९ ॥
ज्ञानं सम्यक् स्वरूपस्य प्रददामि तु सेविने ।
सम्प्रदायः स वै प्रोक्तो ज्ञानात्मकः प्रमुक्तिदः ॥१०॥
ज्ञानं चाहं परब्रह्मास्मीति जानन्तु सर्वथा ।
दीयतेऽद्य मया त्वत्र भवद्भ्यः सर्वथोत्तमम् ॥११॥
मया साक्षात्तु तद् दत्तं ग्राह्यं धार्यं सदा हृदि ।
मत्तोऽवतारा जायन्ते कृष्णाद्याः कोटिशः सदा ॥१२॥
चतुर्विंशत्यवतारास्तथाऽन्येऽपि सहस्रशः ।
मत्तः सर्वे प्रजायन्ते मदैश्वर्यान्वितास्तु ते ॥१३॥
नारायणास्तथा सर्वे जायन्ते मत्स्वरूपतः ।
वासुदेवादयो व्यूहा जायन्ते मम मूर्तितः ॥१४॥
भूमादयस्त्वीश्वराश्च ममांशाः सर्व एव ते ।
ब्रह्मविष्णुमहेशाद्या ममांशांऽशा भवन्ति ते ॥१५॥
राधारमादिकाः सर्वा मम सन्ति प्रशक्तयः ।
गोलोकं चापि वैकुण्ठं चामृतं च किलासनम् ।
ममाक्षरप्रदेशास्ते प्रान्तधामानि सन्ति मे ॥१६॥
अक्षरं धाम सर्वेशं सर्वेभ्यो मानवर्जितम् ।
अन्यधामानि सर्वाणि मानवन्ति भवन्ति मे ॥१७॥
महन्नगरमभितो यथा शाखापुराणि हि ।
बृहद्धामाभितस्तद्वच्छाखाधामानि तानि वै ॥१८॥
सम्राडस्म्यवताराणां सर्वे ममांशयोगिनः ।
एवं वै वर्तमानस्य नियामकस्य मे परम् ॥१९॥
अक्षराच्च बृहतोऽपि धामाऽस्ति परमोत्तमम् ।
मन्मूर्तेरभितश्चास्ते मम धाम परोत्तमम् ॥२०॥

तस्माच्च परधामाद्वै तेजो यन्निर्गतं पुरः ।
तदक्षरं बृहद्धाम भण्यते सर्वबुद्धिषु ॥२१॥
तस्माद् बोध्यं मम धाम त्वक्षराद् परमं बृहत् ।
अक्षरं तु बृहत्प्रोक्तं धामान्यन्यानि सीम्नि च ॥२२॥
अक्षरस्यैव तिष्ठन्ति ततश्चेश्वरकोटयः ।
ततोऽष्टावरणान्येव मलिनानि भवन्ति हि ॥२३॥
ततो ब्रह्माण्डलोकाश्चोद्भुयन्ति त्वणुवत् सदा ।
सर्वेष्वहं सदा चान्तर्यामितया वसामि च ॥२४॥
अत्र योऽस्मि स तत्राऽस्मि बालकृष्णः परः प्रभुः ।
अत्र मे योगमापन्नास्ते सर्वे परधामगाः ॥२५॥
अहं सदैकरूपोऽस्मि सर्वैश्वर्यादिसंभृतः ।
जनास्तु भिन्ननेत्रा मां स्वीयदृष्ट्या स्ववत् सदा ॥२६॥
पश्यन्ति देववद् देवाः पश्यन्ति मर्त्यवन्नराः ।
पश्यन्ति सिद्धवत् सिद्धाः ऋषयः ऋषिवत्तथा ॥२७॥
पितरः पितृवच्चापीश्वरा ईश्वरवत्तथा ।
अवताराः स्ववच्चापि मुक्ता मुक्तसमं तथा ॥२८॥
ब्रह्मा तु ब्रह्मवच्चापि मायिका मायिकं यथा ।
महामुक्ताः स्ववच्चापि मां पश्यन्ति सदा स्ववत् ॥२९॥
अनन्ताऽपाररूपोऽहं चाऽप्रमेयोऽस्मि सर्वथा ।
स्वरूपेण स्वभावेन गुणैर्भावैश्च सर्वदा ॥३०॥
नान्तोऽस्ति मम दिव्यानां स्वरूपाणां कुतस्तु मे ।
विभूतीनां न मे त्वन्तः कुतो मे मानता तदा ॥३१॥
अहमानन्दवानस्मि तेन जीवन्ति जीविनः ।
यत्रानन्दश्च तत्राऽहं विदित्वैवं च मां भजेत् ॥३२॥
नरो वा यदि वा नारी ततो मोक्षमवाप्नुयात् ।
मोक्षिकेयं हि नगरी मया त्वागत्य सत्कृता ॥३३॥
मम ज्ञानेन लोकानां वसतां मोक्षदा न्वियम् ।
शरीरेणेन्द्रियैर्भावैरन्तःकरणकैश्च माम् ॥३४॥
प्रभजन्ति जना ये मामान्तरस्थं तरन्ति ते ।
सर्वदा कर्मकाण्डे वै दैहिके मानसेऽथवा ॥३५॥
ऐन्द्रियकेऽपि मद्ध्यानं तदेव मोक्षदं मतम् ।
निर्गुणं मत्कृते सर्वं दिव्यं वैषयिकं च वा ॥३६॥
इत्येवं च जडं चापि चेतनं वर्ष्म मे मतम् ।
तत्राऽहं सर्वदा चास्मि विशिष्टोऽहं भवामि च ॥३७॥
चुल्लिकायां तथा काष्ठे वह्नौ भ्राष्ट्रे कपालके ।
पिष्टे च रोटके चाहं कर्त्र्यां भोक्तरि चाप्यहम् ॥३८॥
जाठरे चोदरे सर्वविकृतौ च बलेऽपि च ।
धातुष्वहं च गर्भादौ बालेऽहं यौवनेऽप्यहम् ॥३९॥
वार्धके, च शवे, भूतीभावे चाहं वसामि हि ।
पुनः खाद्ये खादके च बीजे वृक्षे कुठारके ॥४०॥
छेदने छेत्तरि द्वैधीभावे समित्सु चाप्यहम् ।
एवं सर्वत्र निधने पुष्टौ च जननेऽस्म्यहम् ॥४१॥
मद्विना नाऽप्यणुरस्त्वस्ति मया सर्वं त्वधिष्ठितम् ।
एवं ज्ञात्वा सर्वविधां मम मूर्तिं भजेत् सदा ॥४२॥
तदा नैर्गुण्यमासाद्य मम भावाय कल्पते ।
एतज्ज्ञानं मया धाम्नि परे पुरा तु सर्जने ॥४३॥
माणिक्यायै मम देव्यै वाह्यायै चार्पितं ध्रुवम् ।
तया तु दुःखहालक्ष्म्यै दत्तं तया तु शंभवे ॥४४॥
शिवराजस्वरूपाय शिवेन निजयोषिते ।
सत्यै दत्तं तया पुत्रगणेशाय पुराऽर्पितम् ॥४५॥
तेन बुद्ध्यै तथा सिद्ध्यै ताभ्यां तज्ज्ञानमुत्तमम् ।
पद्मावत्यै रमायै च ताभ्यां हिरण्यगर्भिणे ॥४६॥
तेन चानेकशिष्येभ्यो बहुशाखागतं ततः ।
बहुधा वर्धितं सम्प्रदायशाखासु वर्तते ॥४७॥
विघ्ना वै सम्प्रदायस्य नाशकास्तु भवन्त्यपि ।
तैर्ज्ञानं न पराभाव्यं यद्यहं संस्मृतोऽन्तरे ॥४८॥
सम्प्रदायो रक्षणीयः शिष्यैः प्रशिष्यकैस्ततः ।
तन्वा च मनसा बुद्ध्या धनैर्ज्ञानैः सुमन्दिरैः ॥४९॥
ज्ञानाऽवनार्थमेवात्र शास्त्रं त्वपेक्ष्यते सदा ।
वेदाश्च संहिता चापि सर्ववेदार्थबोधिनी ॥५०॥
लक्ष्मीनारायणसंहितेयं रक्ष्या सदा हृदि ।
तद्व्याख्याता गुरुर्धार्यः पूजार्थं मम रूपवान् ॥५१॥
गुरुर्वै दीक्षितः संहिताज्ञो मदात्मको हि सः ।
संहितार्थं ज्ञापयेत् स कथा द्वारा सदा जनान् ॥५२॥
मम पूजाप्रकारादि प्रकुर्यात् लिखितं यथा ।
पूजार्थं मम मूर्तिश्च स्थिरा स्थाप्या सुमन्दिरे ॥५३॥
राधया रमया लक्ष्म्या श्रिया माणिक्यया सह ।
पद्मावत्या रमया गंगया विरजया सह ॥५४॥
सरस्वत्या दुर्गया भ्वा ब्रह्मप्रियादिभिः सह ।
जयया पद्मया वृन्दया तुलस्या च हंसया ॥५५॥
मंजुलया सद्गुणया स्थाप्या ललितया सह ।
देव्या च मुक्तया हैम्या शान्त्या वा चम्पया सह ॥५६॥
तत्पूजायाः प्रवाहार्थं भूग्रामादिसमर्पणम् ।
कर्तव्यं विधिना राज्ञा धनाढ्यैस्तु धनार्पणम् ॥५७॥
विद्यायास्तु पराया मे दानार्थं पाठशालिकाः ।
विद्यालया विशालाश्च कारणीया हि बोधदाः ।
शिक्षका योजनीयाश्च पूजका मन्दिरेऽपि मे ॥५८॥

पुस्तकानां प्रचारश्च कर्तव्यो मानवेष्वपि ।
देवेषु चान्यलोकेषु पातालेष्वपि सर्वथा ॥५९॥
तत्र तत्रत्यसंहिताभागप्रसारमाचरेत् ।
एवं षडंगरूपेण सम्प्रदायः प्रवर्तते ॥६०॥
विद्या शास्त्रं गुरुर्मूर्तिर्मन्दिरं शिष्यवर्गकः ।
विद्या प्रोक्ता परा मन्त्रो नाम चाराधनादिकाः ॥६१॥
अपरा बहुधा ज्ञानं व्यवहारेण मिश्रितम् ।
शास्त्रं वेदाः संहिताश्च गुरोर्वाणी हरेर्वचः ॥६२॥
गुरुस्तु वैष्णवो ज्ञानमन्त्रशास्त्रादियोजकः ।
मूर्तिश्चाहं स्वयं पत्नीसहितः परमेश्वरः ॥६३॥
मुक्तैर्भक्तैः प्रियाभिश्च सहाऽऽर्यः कृष्णवल्लभः ।
अवताराश्च मे सर्वे व्यूहा मे कार्यकारिणः ॥६४॥
अंशाः कलास्तथाऽऽवेशा विभूतयः स्वरूपिणः ।
पूर्णाश्चोपासका भक्ता नारायणास्तथाऽपरे ॥६५॥
मन्दिरं शतकलशं सहस्रकलशं तथा ।
सौवर्णं च तथा दिव्यं मणिजं कारयेद् दृढम् ॥६६॥
शिष्यवर्गो भवेयुर्वै मन्त्रग्रहणसेवनैः ।
साधवो गृहवर्गाश्च नरा नार्यो हि सेवकाः ॥६७॥
बाला युवानो वृद्धाश्च सधवा अधवा अपि ।
बालिकाश्च कुमाराश्च विज्ञा विज्ञानवर्जिताः ॥६८॥
राजा प्रजाः प्रधानाश्च ब्रह्मिष्ठा वीतरागकाः ।
सन्न्यासाः साधवो योगाभ्यासाश्च यतयस्तथा ॥६९॥
मानवा अपि षण्ढा ये ये केऽपि सम्प्रदायिनः ।
भजेरन् मां सदा भावभराः कपटवर्जिताः ॥७०॥
तृष्णारागद्वेषमन्युद्रोहेर्ष्यावर्जितास्तथा ।
भजेयुर्मां तदा सम्प्रदायो शाश्वतो भवेत् ॥७१॥
निर्दोषैस्त्वाश्रितैः सम्प्रदायः प्रकाशतां व्रजेत् ।
सदोषैस्त्वाश्रितैः सम्प्रदायश्चान्ध्यमुपाव्रजेत् ॥७२॥
यत्र नास्ति गुरुर्बोद्धा नित्यतृप्तो निरीहकः ।
यमैश्च नियमैर्युक्तः सम्प्रदायः स नश्यति ॥७३॥
यत्र नास्ति गुरुस्त्यागी वैराग्यवान् जितेन्द्रियः ।
शास्त्रज्ञो धर्मशीलश्च सम्प्रदायः स नश्यति ॥७४॥
यत्र नास्ति गुरुर्ज्ञाता ज्ञानदोऽज्ञाननाशकः ।
सर्वशास्त्रव्यापकश्च सम्प्रदायः स नश्यति॥ ७५॥
यत्र गुरुर्द्रव्यहर्ता व्यसनी चानृती तथा ।
स्वार्थमात्रपरस्तृष्णी सम्प्रदायः स नश्यति ॥७६॥
यत्र गुरुर्दयाहीनः पारक्यान् मनुते श्रितान् ।
दुःखे प्रक्षिपति शिष्यान् सम्प्रदायः स नश्यति ॥७७॥

यत्र गुरुर्धर्महन्ता नास्तिकः शठधूर्तकः ।
दोषालयश्च विषयी सम्प्रदायः स नश्यति ॥७८॥
यत्र गुरुः सर्वभक्षी तृष्णालोभादिशेवधिः ।
पूर्यते नोदरं यस्य सम्प्रदायः स नश्यति ॥७९॥
रक्षका भक्षका यत्र त्रातारश्च विडम्बकाः ।
विश्वासघातिनः श्रेष्ठाः सम्प्रदायः स नश्यति ॥८०॥
पाषण्डिचौरहाराणां लुण्टकानां क्रियापराः ।
मूर्धन्या यत्र विद्यन्ते सम्प्रदायः स नश्यति ॥८१॥
सभासदो व्यवहारनिर्णतारश्च योजकाः ।
लुञ्चाखादकिनो यत्र सम्प्रदायः स नश्यति ॥८२॥
प्रसह्याऽन्याययुक्ताश्च विगन्तारो विरोधिनः ।
क्लेशिनो मानवा यत्र सम्प्रदायः स नश्यति ॥८३॥
गुरुद्रोहिजना यत्र निम्नदोषावलोकिनः ।
भावहीना निन्दकाश्च सम्प्रदायः स नश्यति ॥८४॥
अविवेका अदीर्घदृष्टयः प्रेमविहीनकाः ।
पूज्यपूजोल्लंघकाश्च सम्प्रदायः स नश्यति ॥८५॥
हत्याकाण्डाभिरुचयो देवान्नद्रव्यभोजकाः ।
गुरोर्मानहनो यत्र सम्प्रदायः स नश्यति ॥८६॥
कुदृष्टयः कुसंकल्पाः कुसंगव्याप्तमानसाः ।
परगृहप्रभंक्तारः सम्प्रदायः स नश्यति ॥८७॥
गुणेषु दोषद्रष्टारः परोत्कर्षाऽसहिष्णवः ।
मानवा यत्र वै याम्याः सम्प्रदायः स नश्यति ॥८८॥
असत्कार्यमसद्वाणी अन्यायश्च पदे पदे ।
महतामवमानं च सम्प्रदायः स नश्यति ॥८९॥
यत्र मे प्रतिमा नास्ति नास्ति मे मन्दिरं च वा ।
नास्ति मे संहिताशास्त्रं सम्प्रदायः स नश्यति ॥९०॥
कथा मे सततं नास्ति सन्ति हृन्न्यमलानि न ।
सेवका निर्मला नैव सम्प्रदायः स नश्यति ॥९१॥
गृहस्था गुरवो यत्र त्यागिनः शिष्यकोटयः ।
गुरवः स्त्रीजुषो यत्र सम्प्रदायः स नश्यति ॥९२॥
सर्वभोगविलासाश्च गुरुष्वेव वसन्ति चेत् ।
त्यागांशो यत्र नास्त्येव सम्प्रदायः स नश्यति ॥९३॥
गुरोः पृष्ठे महच्छिद्रं हृदये राक्षसी स्थितिः ।
अग्रे तु ग्रहणान्ध्यं च सम्प्रदायः स नश्यति ॥९४॥
नरा नार्यो निःश्वसन्ति यं यान् वै साम्प्रदायिकान् ।
तेषामाधारभूतश्चेत् सम्प्रदायः स नश्यति ॥९५॥
विद्या विद्यालयो नास्ति चमत्कारो न यत्र च ।
सिद्धा यत्र न सन्त्येव सम्प्रदायः स नश्यति ॥९६॥

उदरंभरिणो यत्र शिष्या धार्म्यशभक्षकाः ।
देवभीतिविहीनाश्च सम्प्रदायः स नश्यति ॥९७॥
वाक्यवन्यद् दर्शने चान्यत् हृदयेऽन्यत्तु मानवे ।
तादृशो यत्र कार्याग्र्यः सम्प्रदायः स नश्यति ॥९८॥
ज्ञाने कर्मणि नास्तिक्यं चाऽनृतैश्वर्यदर्शनम् ।
यत्राऽऽदानं वमयित्वा सम्प्रदायः स नश्यति ॥९९॥
विद्या शास्त्रं गुरुर्देवा आलया यत्र सन्ति न ।
सम्प्रदायस्य नाशस्तु द्रुतं तत्र प्रजापते ॥१००॥
तस्मामन्त्रा मया दत्ता दीयन्तां शिष्यवर्गिणे ।
विद्यां शास्त्रं गुरुं देवान् स्थापयन्त्वर्चयन्तु च ॥१०१॥
एवमुक्त्वाऽऽशिषो दत्वा विमानं त्वध्यरोहयत् ।
जयनादैर्वाद्यनादैर्यन्त्रनादैश्च हर्षणैः ॥१०२॥
सह व्योम्ना सार्थयुक्तो ययौ क्रथकराष्ट्रकम् ।
रोमायनेनर्षिणा प्रार्थितः क्रथकभूभृता ॥१०३॥
राधिके तु तदा व्योम्नि यान्तं दृष्ट्वा हरिं प्रजाः ।
आगन्तव्यं रक्षणीया देयं च दर्शनं जगुः ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उरलकेतुराजर्षि-यवक्रीतमहर्षि-प्रजाभ्यश्च हरिणा स्वस्वरूप-ज्ञानं सम्प्रदायशाश्वतिकज्ञानं च दत्तमिति निरूपण-नामा त्रिसप्तत्यधिकशततमोऽध्यायः ॥ १७३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके कृष्णनारायणः परः प्रभुः ।
क्रथकस्य राजधान्याम् ओंकारेष्टाभिधाजुषि ॥ १ ॥
नगरे शोभिते कृष्णनामधुन्यनिनादिते ।
रोमायनेनर्षिणा च क्रथकेन च भूभृता ॥ २ ॥
दर्शिते बहुविधिभिः शृंगारितहरित्स्थले ।
अवातारयदुद्याने विमानं जनसंकुले ॥ ३ ॥
नृपालये विमानाच्चावतीर्य भगवान् यदा ।
प्रविवेश तदा पुष्पाक्षतवृष्टिर्बभूव ह ॥ ४ ॥
तूर्याणि राजरीत्यैवाऽवाद्यन्त मिष्टसुस्वरैः ।
अगीयन्त सुगीतानि जयशब्दास्तथाऽभवन् ॥ ५ ॥
कुटुम्बं श्रीहरेः सर्वे ब्रह्मप्रिया महर्षयः ।
अवतेरुर्विमानात्तु स्वर्णाढ्ये भूभृदालये ॥ ६ ॥
विद्युत्प्रकाशकैः समुज्ज्वले सुगन्धशालिनि ।
सर्वसामग्रिकारम्ये दासदासीसभाजिते ॥ ७ ॥
भृत्यैः प्रधानकै राजकुटुम्बकैः प्रजाजनैः ।
संकुलितेऽतिसम्मर्दे कृष्णः सौधे विवेश ह ॥ ८ ॥
प्रवेशनस्य समये वर्धितः स्वागतेन तु ।
नमनैर्वन्दनैः प्रेम्णा दर्शनेन सुमाऽक्षतैः ॥ ९ ॥
राज्ञा राज्ञ्या कुमारैश्च पुत्रीभिर्भ्रातृबान्धवैः ।
श्रीहरिः सलिलेनापि शीतलैरनिलैरपि ॥१०॥
फलै रसैः सुपेयैश्च सत्कृतः क्षणमात्रतः ।
कुटुम्बादिसार्थजनः सत्कृताः सर्व एव ते ॥११॥
पुष्पहारैस्तथा गुच्छैः सुगन्धिद्रवसेचनैः ।
रञ्जितो भगवान् कृष्णनारायणः परः प्रभुः ॥१२॥
एवं क्षणं प्रविश्रम्य रोमायनेन बोधितः ।
अनादिश्रीकृष्णनारायणो राजसभां ययौ ॥१३॥
रात्रावपि तु दिनवद् भ्राजमानां प्रदीपकैः ।
मणीनां किरणैश्चापि कृतचन्द्रकरैस्तथा ॥१४॥
विशालां परितो भित्तिपटलेषु सुरैः स्थिताम् ।
उद्यानदृश्यशोभाढ्यां स्वर्गवत्सुकलेवराम् ॥१५॥
सभामासाद्य तु हरिर्निषसाद गजासने ।
स्वर्णहीरकशोभाढ्ये छत्रचामरभूषिते ॥१६॥
अन्ये पित्रादयश्चापि निषेदुर्योग्यकासने ।
भगवान् सर्वलोकानां कुशलं सुखसम्पदम् ॥१७॥
समपृच्छत्तथाऽऽरोग्यं जनाश्च सुखिनोऽभवन् ।
राजा राजकुटुम्बं च पादौ प्रक्षाल्य वै हरेः ॥१८॥
प्रासादिकं पयः सर्वे पपुस्ततः सुगन्धिभिः ।
चन्दनैः पुष्पहाराद्यैः सौवर्णैर्हारकैस्तथा ॥१९॥
हीरकैर्मौक्तिकैश्चापि पुपूजुः परमेश्वरम् ।
प्रजाजनाः पुपूजुश्च प्रधानाः श्रेष्ठिनस्तथा ॥२०॥
कृतकृत्याः कृता नाथ वयमागमदर्शनैः ।
भगवता श्रीहरिणा पावनी नगरी कृता ॥२१॥
अद्य विश्रान्तिमासाद्य प्रातर्देहि स्वदर्शनम् ।
इत्युक्त्वा त्वभिवन्द्यैव ययुः सर्वप्रजाजनाः ॥२२॥
महिमानास्ततः सर्वे निवासानाययुर्द्रुतम् ।
श्रीहरिः सकुटुम्बश्च नृपसौधे सुशोभने ॥२३॥
विश्रान्त्यर्थं ययौ राज्ञा क्रथकेन तथर्षिणा ।
दर्शिते शयने कृष्णः सुष्वाप निद्रितोऽभवत् ॥२४॥
महीमाना दुग्धपानादिकं कृत्वा विशश्रमुः ।
राजा ययौ निजं सौधं विश्रान्त्यर्थं तु राधिके ॥२५॥
चतुर्दश्यां प्रगे समुत्थाय श्रीभगवान् प्रभुः ।
बोधितो मंगलशब्दैः शुश्राव स्वयशोऽमलम् ॥२६॥

ध्यात्वा स्वं च ततो नित्यविधिं चकार सर्वशः ।
दर्शनार्थं समाजग्मुर्लोमशाद्याः प्रजास्तथा ॥२७॥
स राजा क्रथको राज्ञी पुत्र्यः पुत्राः समाययुः ।
पूजनार्थं हरेः सर्वसामग्रीभिः समुत्सुकाः ॥२८॥
पादप्रक्षालनं चक्रुः पयसा तज्जलं पपुः ।
वस्त्रालंकारभूषाद्यैर्हारकैर्मौक्तिकैस्तथा ॥२९॥
चन्दनाऽक्षतपुष्पाद्यैर्मणिभिश्चार्चयन् हरिम् ।
मातरं पितरं चापि सन्तुष्टां शुकवल्लभौ ॥३०॥
ब्रह्मप्रियाश्च कन्याश्च लोमशादीन् समार्चयन् ।
तत आरार्त्रिकं चक्रुर्दण्डवच्च प्रदक्षिणम् ॥३१॥
उपदाः सन्न्यधुस्त्वग्रे विविधा भावतस्तदा ।
राजा प्राह हरिकृष्णनारायणं जगद्गुरुम् ॥३२॥
पावितं मम राष्ट्रं संपावितोपि मदालयः ।
कुटुम्बं पावितं मेऽत्र वसाऽत्र भगवन् सदा ॥३३॥
भवतोऽस्मि कुटुम्बेन सहितोऽहं कृपानिधे ।
भगवाँश्च नृपं प्राह मूर्तिरूपेण सर्वदा ॥३४॥
राजँस्तव गृहे निवत्स्यामि प्रत्यक्षवत् सदा ।
कारय त्वं मन्दिरं मे स्थापयाऽत्र च मां प्रभुम् ॥३५॥
नृपः पप्रच्छ च हरिं कदा कार्यं नु मन्दिरम् ।
कः कालो हि मुहूर्तादिः दिननक्षत्रराशयः ॥३६॥
उत्तमा हि शुभे कार्ये मन्दिरादौ सुकर्मणि ।
भवत्स्थापनकालश्च तद् वदात्र तु मे प्रभो ॥३७॥
हरिः प्राह यदा राजन् भगवान् भुवि वर्तते ।
धृतमानुषरूपो वै तदाज्ञा तु यदा भवेत् ॥३८॥
रात्रौ वा दिवसे वापि सन्ध्यायां सूतकेऽपि वा ।
अकाले वा तथाऽनिष्टे शोके क्लेशमयेऽपि वा ॥३९॥
यादृशस्तादृशः कालस्तन्मतः शुभ एव सः ।
हर्यधीनाः सर्वकालास्तदिच्छया शुभा हि ते ॥४०॥
देशः सर्वविधश्चापि हर्याश्रितः शुभो हि सः ।
कृष्णतुल्याः समर्था ये सन्तस्तेषां वचांसि च ॥४१॥
यस्मिन् काले तु लब्धानि कालः सर्वः शुभो हि सः ।
नैसर्गेण तु ते वच्मि शृणु श्रैष्ठ्यं तु कालिकम् ॥४२॥
वर्षे मासास्तथा पक्षाः सप्ताहानि दिनानि च ।
नक्षत्राणि ग्रहा वाराश्चतुर्घट्यो मुहूर्तकम् ॥४३॥
योगाश्च तिथयः क्लृप्ता व्यवहारस्य सिद्धये ।
वर्ज्यान् वच्म्यपि प्रथमं शृणु राजन् यथायथम् ॥४४॥
तिथिनक्षत्रवारेश्चोत्पन्नान् योगान् हि दूषितान् ।
वर्जयेच्छुभकार्ये वै व्यतीपातादिकांस्तथा ॥४५॥
दुर्योगानथ भद्रां चामावास्यां सूर्यसंक्रमम् ।
जन्मर्क्षं जन्मतिथिकां जन्ममासं विवर्जयेत् ॥४६॥
तिथेर्वृद्धिं क्षयं चापि विवर्जयेत् सुकर्मणि ।
पापग्रहैः प्रभुक्तानि भुज्यमानानि चापि च ॥४७॥
भोग्यान्यपि च ऋक्षाणि वर्जयेच्छुभकर्मसु ।
उत्पातर्क्षं पापग्रहविद्धर्क्षं च विवर्जयेत् ॥४८॥
ऋतं च भेदितं पापग्रहेण तद्विवर्जयेत् ।
खग्रासग्रहणर्क्षं तु षण्मासावधि वर्जयेत् ॥४९॥
अर्धग्रासस्य नक्षत्रं त्रिमासावधि वर्जयेत् ।
पादग्रासस्य नक्षत्रं मासावधि विवर्जयेत् ॥५०॥
ग्रासात् प्राक् त्रिदिनं त्याज्यं पश्चात् सप्ताहकं त्यजेत् ।
ग्रस्तास्ते प्राक् त्रिदिनं ग्रस्तोदये त्र्यहमुत्तरम् ॥५१॥
पूर्णग्रासे प्राक् च पश्चाद् दिनत्रिकं विवर्जयेत् ।
मासान्तैकदिनं चापि नक्षत्रान्तघटीद्वयम् ॥५२॥
तिथ्यन्तघटिकैकं च लग्नान्तार्धघटीं तथा ।
नक्षत्राणां विषां नाडीं वर्जयेच्छुभकर्मसु ॥५३॥
पातदोषं तथा चैकार्गलं दग्धदिनात्मकम् ।
संक्रान्तिसमयं चापि वर्जयेच्छुभकर्मसु ॥५४॥
लग्नस्वामी भवेत् स्थाने शत्रोर्मृत्योश्च वा यदा ।
मध्याह्नं मध्यरात्रिं च सन्ध्यासन्धिं विवर्जयेत् ॥५५॥
अधिमासं च शुक्रस्य गुरोश्चास्तं विवर्जयेत् ।
शुक्रस्य च गुरोर्बाल्यं वार्धक्यं च विवर्जयेत् ॥५६॥
जन्मेशास्तं मनोभंगं सूतकं मातुरार्तवम् ।
रोगोत्पाताद्यरिष्टानि शुभकार्येषु वर्जयेत् ॥५७॥
सिंहस्थे तु गुरौ त्याज्या विवाहो वपनं व्रतम् ।
यात्रा दीक्षा प्रतिष्ठा च यतस्तत्र सविघ्नकाः ॥५८॥
क्रूरग्रहेण यद्भुक्तं भोक्तव्यं भोज्यमेव वा ।
नक्षत्रं सर्वकार्येषु सिद्धिकृद्ग्राह्यमेव तत् ॥५९॥
किन्तु राहुयुतमृक्षं त्याज्यं वै शुभकर्मसु ।
ग्रहदुष्टं तु नक्षत्रं सूर्यभुक्तं यदा भवेत् ॥६०॥
चन्द्रभुक्तं च वा स्याच्च ततः शुभप्रदं भवेत् ।
ग्रहणेन हतमृक्षं षण्मासान्ते शुभं भवेत् ॥६१॥
एकमासे चोपरागद्वये प्राथमिकं तु भम् ।
द्वितीयग्रासपूर्वं स्याच्छुद्धं षाण्मासिकेऽपरम् ॥६२॥
खातं चैत्रेशोकदं स्याद् वैशाखे धनदं स्मृतम् ।
ज्येष्ठे ग्रहप्रपीडादम् आषाढे पशुनाशनम् ॥६३॥
श्रावणे धनवृद्धिकृत् भाद्रपदे तु शून्यकृत् ।
आश्विने क्लेशदं स्याच्च कार्तिके भृत्यनाशकम् ॥६४॥

मार्गशीर्षे धनदं स्यात् पौषे कामर्द्धिसम्प्रदम् ।
माघे त्वग्निभयदं स्यात् फाल्गुने श्रीप्रदं मतम् ॥६५॥
गृहारंभस्तु मेषस्थे सूर्ये सर्वशुभप्रदः ।
वृषस्थे धनवृद्धिकृत् मिथुनस्थे मृतिप्रदः ॥६६॥
कर्कस्थे शुभदः स्याच्च सिंहस्थे भृत्यवर्धकः ।
कन्यास्थे रोगदः स्याच्च तुलास्थे सुखदो भवेत् ॥६७॥
वृश्चिकस्थे धनवृद्धिर्धनुःस्थे महती क्षतिः ।
मकरस्थे धनाऽऽयः स्यात् कुंभस्थे रत्नदो मतः ॥६८॥
मीनस्थे भयदः स्याच्च विचार्याऽऽरंभमाचरेत् ।
देवप्रतिष्ठा माघे च फाल्गुने धनदा तथा ॥६९॥
आयुष्यारोग्यदा भर्तुः कीर्तिकरी भवेद्धि सा ।
चैत्रे सा भयदा रोगप्रदा बोध्या तु सर्वथा ॥७०॥
वैशाखे सा तथा ज्येष्ठे धनपुत्रादिदायिनी ।
दक्षिणायनगे सूर्ये वाराहं मातृकास्तथा ॥७१॥
भैरवं वामनं दुर्गां नृसिंहं स्थापयेत् सुखम् ।
श्रावणे शिवलिंगं चाश्विने तु जगदम्बिकाम् ॥७२॥
मार्गशीर्षे हरिं विष्णुं नारायणं च मां प्रभुम् ।
स्थापयेत् पौषमासे तु स्थापयेत् सर्वदेवताः ॥७३॥
नीत्यं गीतं कृषिं चित्रमुत्सवं च गृहादिकम् ।
वस्त्रालंकारभूषादि शिल्पिता च कलादिकम् ॥७४॥
एकादश्यां प्रतिपदि षष्ठ्यां नन्दाख्यतत्तिथौ ।
विधापयेत् शिक्षयेत् स्वोऽधीयीत शुभदं भवेत् ॥७५॥
विवाहश्चोपनयनं यात्रा भूषादिधारणम् ।
शिल्पकार्यं कलाशिक्षा हस्तिरथाश्वचालनम् ॥७६॥
आवाहने समारोहो सिद्धिदास्तु यथा शृणु ।
द्वितीयायां च सप्तम्यां द्वादश्यां भद्रिकातिथौ ॥७७॥
सैन्यसंग्रामशस्त्रादिधृत्यभ्यासप्रयोधनम् ।
यात्रोत्सवगृहारंभौषधिव्यापारकर्म च ॥७८॥
जयाख्यायां तृतीयायामष्टम्यां च तथा शृणु ।
त्रयोदश्यां प्रकर्तव्यं सर्वसिद्धिप्रदायकम् ॥७९॥
शत्रूणां मारणं बन्धनं तथा विषयोजनम् ।
शस्त्राग्नियोजनं कार्यं रिक्ताख्यायां तिथौ शृणु ॥८०॥
चतुर्थ्यां च नवम्यां च चतुर्दश्यां च सिद्ध्यति ।
रिक्तायां मंगलं कार्यं न कर्तव्यं कदाचन ॥८१॥
राज्याभिषेको यात्रा च विवाहश्चोपवीतकम् ।
शान्तिकर्म पुष्टिकर्म पूर्णाख्यायां तिथौ शृणु ॥८२॥
पञ्चम्यां च दशम्यां च पूर्णिमायां हि सिद्धिदम् ।
इत्येवं करणे कार्यसिद्धिर्भवति निश्चिता ॥८३॥
द्वितीया पंचमी चापि तृतीया सप्तमी तथा ।
दशम्येकादशो कृष्णप्रतिपच्च त्रयोदशी ॥८४॥
पूर्णिमा तिथयो ह्येताः सर्वकार्ये शुभावहाः ।
अन्यास्तु तिथयो नैव शुभदा वै मताः क्वचित् ॥८५॥
कृष्णा चतुर्दशी शुक्ला प्रतिपत् दर्शसंज्ञका ।
वर्जनीयाः शुभे कार्ये तिथयस्ता भयावहाः ॥८६॥
आदित्यश्चन्द्रमा भौमो बुद्धश्चापि बृहस्पतिः ।
शुक्रः शनैश्चरश्चेति वासराः सप्त योजिताः ॥८७॥
गुरुश्चन्द्रो बुधः शुक्रः शुभाः शुभे तु कर्मणि ।
रविः शनिर्मंगलश्च क्रूराः क्रूरे तु कर्मणि ॥८८॥
स्थिरः सूर्यश्चरश्चन्द्रो भौमश्चोग्रो बुधः समः ।
लघुर्गुरुर्मृदुः शुक्रः शनिस्तीक्ष्णः स्वभावतः ॥८९॥
रवौ देवप्रतिष्ठा तु तेजःप्रभावदायिनी ।
चन्द्रे क्षेमकरी भौमे वह्निदाहप्रदायिनी ॥९०॥
बुधे चेष्टफलदा स्याद् गुरौ स्थिरत्वदायिनी ।
शुक्रे चानन्ददा स्याच्च शनौ कल्पनिवासिनी ॥९१॥
राज्याभिषेको मांगल्यं यानवाहननिर्मितिः ।
सैन्यस्वारी मन्त्रसिद्धिरस्त्रशस्त्रावमोचनम् ॥९२॥
भेषजस्य प्रयोगश्च युद्धं चापणपण्यकम् ।
-अग्निदानं सेवनं च सौवर्णकार्यमित्यपि ॥९३॥
आभूषाधारणं चापि रवौ वारे शुभानि हि ।
अथ चन्द्रे वासरे तु शंखमौक्तिकरूप्यकैः ॥९४॥
आभूषणविधानं च भूषाधारणमित्यपि ।
संगीतविद्याध्ययनं यज्ञकार्यं कृषिक्रिया ॥९५॥
भोज्यं स्त्रीसेवनं चेक्षुरसपाकविधापनम् ।
जलप्रवाहकूपादिकोषवहनमुत्तमम् ॥९६॥
अथ भौमे वासरे तु भेदभावस्तथाऽनृतम् ।
चौर्यं शाठ्यं विषशस्त्रवह्निघातनमित्यपि ॥९७॥
करदण्डाऽऽदानदानं स्वर्णप्रवालधारणम् ।
एवमेतानि कार्याणि शुभान्युक्तानि मंगले ॥९८॥
अथ वारे बुधे शिक्ष्यं वाणिज्यं च कलादिकम् ।
सम्बन्धश्च भृत्यता च व्यायामो वेदघोषणम् ॥९९॥
शास्त्रस्य लेखनारम्भश्चैताः क्रियाः शुभा मताः ।
गुरौ वारे यज्ञकार्यं धर्मः सत्कार इत्यपि ॥१००॥
मांगल्यं पौष्टिकं विद्या यात्रा गृहविधापनम् ।
भैषज्यं चाऽलंकरणं कर्तव्यानि शुभानि वै ॥१०१॥
शुक्रे गीतं स्त्रीसंगश्च रत्नधारणमित्यपि ।
शय्यापर्यंककरणं वस्त्रभूषादिधारणम् ॥१०२॥

उत्सवो भूक्रयविक्रयौ कृषिश्चापणक्रिया ।
कोशसंरक्षणं चेति शुभानि तानि शुक्रके ॥१०३॥
शनौ गृहप्रवेशश्च मन्त्रदीक्षा तथोत्तमा ।
हस्तिप्रभृतिग्रहणं भृत्यतानिर्णयस्तथा ॥१०४॥
शस्त्रोपयोगश्चाऽसत्यवदनं चौर्यमित्यपि ।
कर्तव्यानि स्थिरकर्माण्यपि शुभानि वै शनौ ॥१०५॥
रोहिण्यश्विमृगाः पुष्यो हस्तश्चित्रोत्तरात्रयम् ।
रेवती श्रवणं चैव धनिष्ठा च पुनर्वसुः ॥१०६॥
अनुराधा तथा स्वाती शुभान्येतानि भानि वै ।
शुभकार्याणि सर्वाणि सिद्ध्यन्त्येतेषु भेषु च ॥१०७॥
पूर्वात्रयं विशाखा च ज्येष्ठाऽऽर्द्रामूलमित्यपि ।
शतताराभमेतेषु कृत्यं साधारणं भवेत् ॥१०८॥
भरणी कृत्तिका चापि मघाऽऽश्लेषा तथैव च ।
अत्युग्रं दुष्टकार्यं तत् कर्तव्यमेषु भेषु तु ॥१०९॥
इत्येवं राधिकेऽनादिकृष्णनारायणः प्रभुः ।
क्रथकाय तदा प्राह रोमायनर्षिसन्निधौ ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने क्रथकराजधान्याम् ओंकारेष्टायां गत्वा पूजां प्रगृह्य विश्रम्य चतुर्दश्यां प्रगे नृपपृष्टो हरिर्मन्दिरादि-निर्माणे शुभकालादीन् प्राहेत्यादिनिरूपणनामा चतुःसप्तत्यधिकशततमोऽध्यायः ॥ १७४ ॥

**श्रीकृष्ण उवाच—**

श्रृणु त्वं राधिके पश्चाद् यदाह भगवान् स्वयम् ।
नक्षत्रेषु विशेषेण शुभाशुभादि कर्म च ॥ १ ॥
रोहिणी चोत्तरास्तिस्रो ध्रुवासंज्ञा मता यतः ।
तासु देवालयं ग्रामखातं नृपाभिषेचनम् ॥ २ ॥
स्थिरकार्याणि सर्वाणि कारयेत्तु स्थिराण्यतः ।
मृगश्चित्राऽनुराधा च रेवती मृदुसंज्ञिकाः ॥ ३ ॥
मित्रभावास्ततस्तासु कुर्याद् गीतं रतिं तथा ।
भूषां मांगल्यकं वस्त्रं धारयेत् सुखदं सदा ॥ ४ ॥
पुष्याश्विन्यभिजिद्धस्तं लघु क्षिप्रमुदाहृतम् ।
तत्र भूषौषधज्ञानं गमनं शिल्पिता रतिः ॥ ५ ॥
ज्येष्ठार्द्रा मूलमाश्लेषा तीक्ष्णं दारुणमुच्यते ।
तत्र भेदो वधो बन्धो मन्त्रभूतादिसाधनम् ॥ ६ ॥
श्रवणादित्रिभं स्वातिः पुनर्वसुचरं चलम् ।
तत्र वाजिगजारोहो वाटिकारचनादिकम् ॥ ७ ॥
भरणी च मघा पूर्वा क्रूरमुग्रमुदाहृतम् ।
विषशस्त्राभिघातादि तत्रेच्छेदविनाशनम् ॥ ८ ॥
विशाखा कृत्तिका चापि मिश्रं साधारणं मतम् ।
वृषोत्सर्गोऽग्निकार्यं च मिश्रकार्यं च सिद्ध्यति ॥ ९ ॥
गुरौ पुष्यं चोत्तराश्च तिस्रो वा रोहिणी मृगः ।
श्रवणं चाश्लेषिका वा पूर्वाषाढा भवेद् यदि ॥१०॥
गुरुर्वा तत्परः स्याच्चेद् गृहारंभ सुतप्रदः ।
राज्यप्रदश्च वा स्याच्च सर्वसौख्यप्रदस्तथा ॥११॥
अश्विनी चित्रिका शतभिषाऽऽर्द्राः शुक्रके यदि ।
शुक्रो वा तत्परः स्याच्चेद् गृहारम्भोधनाऽन्नदः ॥१२॥
रेवतीपुष्यहस्ताश्च पूर्वाषाढा मघा तथा ।
मूलं भौमे च वा भौमस्तत्परः स्यात्तदा गृहम् ॥१३॥
आरब्धं वह्निदग्धं स्याद् यद्वा पुत्रप्रपीडकम् ।
रोहिण्यश्विन्युत्तराफाल्गुनीचित्रकहस्तिकाः ॥१४॥
बुधे वा तत्परः स स्याद् गृहारंभः सुतप्रदः ।
भाद्रद्वयानुराधास्वातिज्येष्ठाभरणीभिधाः ॥१५॥
शनौ वा तत्परः शनिर्गृहारम्भोऽत्र चेद् यदि ।
भूतराक्षसवासः स्याद् गृहे तत्र न संशयः ॥१६॥
कृत्तिकोपरि सूर्यो वा चन्द्रो वा च भवेत्तदा ।
आरब्धं तु गृहं सद्यो वह्निभस्म प्रजायते ॥१७॥
पापग्रहैर्युते यद्वा विद्धे चन्द्रे च तारके ।
चन्द्रताराबले हीनेऽपि पुष्ये भे क्रियाः खलु ॥१८॥
सिद्ध्यन्त्येव न सन्देहो समस्तमंगलानि वै ।
एवं विचार्य खातादि कर्तव्यं क्रथकेति वै ॥१९॥
योगनामानि च सप्तविंशतिं प्रवदामि ते ।
विष्कुंभः प्रीतिरायुष्मान् सौभाग्यः शोभनस्तथा ॥२०॥
अतिगण्डः सुकर्मा च धृतिः शूलश्च गण्डकः ।
वृद्धिर्ध्रुवश्च व्याघातो हर्षणो वज्रकस्तथा ॥२१॥
सिद्धिश्च व्यतीपातश्च वरीयान् परिघः शिवः ।
सिद्धिः साध्यः शुभः शुक्लो ब्रह्मा ऐन्द्रश्च वैधृतिः ॥२२॥
यथा नाम तथा ते वै फलदाः सार्थका मताः ।
वैधृतिं च व्यतीपातं वर्जयेत् सर्वथा शुभे ॥२३॥
वज्रविकुम्भयोस्त्याज्यं घटिकात्रयमादिमम् ।
परिघार्धं परित्याज्यं घटिकाः पञ्च शूलके ॥२४॥
गण्डातिगण्डयोः षट् च व्याघाते घटिका नव ।
त्याज्या वै शुभकार्ये च विरुद्धयोगपादकम् ॥२५॥
करणान्यथ ते वच्मि किंस्तुघ्नं बवमित्यपि ।
बालवं कौलवं चापि तैत्तिलं च गरं तथा ॥२६॥

वणिजं विष्टिं शकुनिं चतुष्पादं च नागकम् ।
बवे पौष्टिककर्माणि द्विजकर्माणि बालवे ॥२७॥
कौलवे स्त्रीसुहृत्कर्म तैतिले पत्निकाप्रियम् ।
गरे बीजप्ररोपश्च वाणिज्यं वणिजे चरेत् ॥२८॥
दाहपातादिकं विष्ट्यां न शुभं तत्र सञ्चरेत् ।
शकुनावौषधं मन्त्रसाधनं पौष्टिकं चरेत् ॥२९॥
राज्यं गोविप्रयोः कार्यं पितृकार्यं चतुष्पदे ।
सौभाग्यं दारुणं नागे किंस्तुघ्ने मंगलं चरेत् ॥३०॥
एकादश्यां चतुर्थ्यां च शुक्ले भद्रा पराह्णके ।
अष्टम्यां पूर्णिमायां च भद्रा पूर्वाह्णिके मता ॥३१॥
तृतीयायां दशम्यां च कृष्णे भद्रा पराह्णके ।
सप्तम्यां च चतुर्दश्यां भद्रा पूर्वाह्णिके तथा ॥३२॥
मुखे पञ्चघटिका सा कण्ठे चैकघटीर्हि सा ।
हृदि दशघटीर्भद्रा नाभौ पञ्चघटीर्हि सा ॥३३॥
कट्यां षड्घटिका भद्रा पुच्छे सा घटिकात्रयम् ।
एवं त्रिंशद्विभागैश्च भद्रांगानि तु षट् तथा ॥३४॥
क्रमात् फलानि चांगानां कार्येष्वेतानि तद्यथा ।
कार्यनाशो मृतिर्लक्ष्मीनाशो बुद्धिलयः कलिः ॥३५॥
तस्माद् विष्टिः परित्याज्याऽऽवश्यके चाननं त्यजेत् ।
देवर्क्षयोगे सोमे च बुधे शुक्रे गुरौ यदि ॥३६॥
भद्रा भवेत् सुकल्याणी सा सर्वकार्यसाधिका ।
तिथेः पूर्वार्धजा रात्रौ दिने भद्रा परार्धजा ॥३७॥
न वै दोषप्रदा बोध्या कार्ये त्वावश्यके सदा ।
मेषे वृषे च मिथुने वृश्चिके चन्द्रके स्थिते ॥३८॥
भद्रा तिष्ठति वै स्वर्गे शुभा सा सर्वदा मता ।
धने तुलायां कन्यायां मकरे चन्द्रिके सति ॥३९॥
भद्रा पातालवासाऽऽस्ति सापि शुभा सदा मता ।
कुंभमीनकर्कसिंहेष्ववस्थिते तु चन्द्रके ॥४०॥
भद्राऽस्ति मानवे लोके सा त्याज्या शुभकर्मसु ।
व्यतीपातो वैधृतिश्च भद्रा भौमः पराह्णके ॥४१॥
शुभाः सर्वे तथा दुष्टताराश्चापि शुभा मताः ।
जन्मराशिस्थिते चन्द्रे पुष्टिः फलं प्रजायते ॥४२॥
द्वितीयस्थानगे नैव सुखं स्याद्वै कदाचन ।
तृतीये धनलाभश्च चतुर्थे रोगसंभवः ॥४३॥
पञ्चमे कार्यनाशश्च षष्ठे द्रव्यागमो महान् ।
सप्तमे भूपसन्मानं चाष्टमे मरणं ध्रुवम् ॥४४॥
नवमे तु भयं ज्ञेयं दशमे कार्यसम्पदः ।
एकादशेऽर्थलाभश्च द्वादशे विविधाऽऽपदः ॥४५॥
द्वितीयः पञ्चमश्चन्द्रो नवमो धवले शुभः ।
कृष्णे तारा बलवत्यो ग्राह्याः शुभप्रदास्तु ताः ॥४६॥
चतुष्कोणं कोष्टकं च दीर्घं तु नवखण्डकम् ।
विशालं तु त्रिखण्डं च कृत्वा सप्त च विंशतिम् ॥४७॥
खण्डाँस्तेष्वाद्यनवके देया अंकाः क्रमान्नव ।
द्वितीये नवके दशाऽष्टादशांकाः क्रमात्तथा ॥४८॥
तृतीये नवके चैकोनविंशसप्तविंशतिः ।
एवं दत्वा नवके च जन्मसंपत् विपत्तथा ॥४९॥
क्षेमं चर्म सधनं च निधनं मैत्री मित्रता ।
नाम्नी तारा तु सा बोध्या जन्मतारा नवात्मिका ॥५०॥
प्रथमे नवके सा च द्वितीये तु कर्मात्मिका ।
तृतीये नवके सा च आधाना प्रोच्यते सदा ॥५१॥
त्रिष्वपि नवकेष्वेव प्रथमा च द्वितीयका ।
अष्टमी तारका मध्यफलदा सम्प्रकीर्तिता ॥५२॥
द्वितीया पञ्चमी सप्तमी तारा ह्यधमा मता ।
चतुर्थी षष्ठी नवमी तारा श्रेष्ठा फलप्रदा ॥५३॥
अशुभं चन्द्रमशुभां तिथिं भं चाशुभं तथा ।
विमृद्य फलदा तारा षट्चतुर्थनवस्थिता ॥५४॥
यात्रायुद्धविवाहेषु जन्मतारा न शोभना ।
अन्येषु शुभकार्येषु शुभा प्रवेशनेऽपि च ॥५५॥
मेषे सिंहे धने चन्द्रः पूर्वे भवति सर्वथा ।
वृषे मकरे कन्यायां दक्षिणे चन्द्रमा मतः ॥५६॥
कुंभे तुलायां मिथुने पश्चिमे चन्द्रमा मतः ।
कर्के मीने वृश्चिके चोत्तरे वै वर्तते शशी ॥५७॥
सन्मुखे चार्थलाभं तु दक्षिणे सुखसम्पदः ।
पश्चिमे कुरुते मृत्युं वामे चन्द्रो धनक्षयम् ॥५८॥
करणर्क्षवारसंक्रान्तिकुतिथिकुलिककम् ।
प्रहरचतुष्घटीमंगलशनिरविग्रहम् ॥५९॥
राहुं केतुं चान्यदोषान् हरतीन्दुस्तु सन्मुखः ।
राश्येकस्थोऽपि च चन्द्रो वर्तते सर्वदिक्ष्वपि ॥६०॥
पूर्वे सप्तदशघट्यः पञ्चदश तु दक्षिणे ।
एकविंशतिः पश्चे चोत्तरे घट्यस्तु षोडश ॥६१॥
पुनः सप्तदश पूर्वे चतुर्दश तु दक्षिणे ।
विंशतिः पश्चिमे पञ्चदशघट्यस्तथोत्तरे ॥६२॥
तत्तद्दिशाफलं ददात्येकराशिस्थितोऽपि सः ।
उत्सवे च विवाहे च गुरुर्वै बलवान् मतः ॥६३॥
राजसम्मीलने सूर्यबलं सर्वत्र चेष्यते ।
भौमबलं तु संग्रामे विद्याभ्यासे बुधो बली ॥६४॥

शुक्रबलं तु यात्रायां दीक्षायां च शनेर्बलम् ।
सर्वकार्येषु चन्द्रस्य बलं पूर्णफलप्रदम् ॥६५॥
एकादश्यां गुरुः षष्ठ्यां भौमः शुक्रः त्रयोदशे ।
नवम्यामष्टम्यां प्रतिपदि वारो रविर्भवेत् ॥६६॥
द्वितीयायां नवम्यां च दशम्यां सोमवारकः ।
तत्र बोध्यः सिद्धियोगः सर्वारंभप्रसिद्धिकृत् ॥६७॥
नन्दा शुक्रे बुधे भद्रा शनौ रिक्ता कुजे जया ।
गुरौ पूर्णा भवेत् सिद्धियोगकृत्कार्यसिद्धिदा ॥६८॥
रवौ हस्तो मृगश्चन्द्रे गुरौ पुष्यं कुजेऽश्विनी ।
अनुराधा बुधे शुक्रे रेवती रोहिणी शनौ ॥६९॥
अमृतसिद्धियोगः स्यात् सर्वकार्यार्थसिद्धिकृत् ।
पञ्चम्यां चेद् भवेद्धस्तो रवियुक्तो न शोभनः ॥७०॥
षष्ठ्यां मृगशिरा चन्द्रयुक्तोऽपि स न शोभनः ।
सप्तम्यामश्विनी भौमयुक्तापि न च शोभना ॥७१॥
अष्टम्यामनुराधा बुधयुक्ताऽपि न शोभना ।
नवम्यां तु गुरुयुक्तं पुष्यं नैव शुभावहम् ॥७२॥
यद्यप्यमृतसिद्धिः सा त्यक्तव्यां शुभकर्मसु ।
अन्येऽमृतसिद्धियोगाः सर्वकार्यप्रसाधकाः ॥७३॥
उद्वाहे गुरुपुष्यं च प्रवेशे तु कुजाश्विनीम् ।
त्यजेदेतत् प्रयत्नेन प्रयाणे शनिरोहिणीम् ॥७४॥
सोमभौमबुधगुर्वन्यतमे वारके दिने ।
एकपञ्चषट्दशैकादशान्यतमायां तिथौ ॥७५॥
अनुराधारोहिणीपुनर्वसुमघान्यतमे ।
हस्तविशाखमूलश्रवणप्राग्भाद्रान्यतमे ॥७६॥
नक्षत्रे स्यात् श्रेष्ठः कुमारयोगः सर्वसिद्धिकृत् ।
रविभौमबुधशुक्रान्यतमे वारके दिने ॥७७॥
द्वात्रसप्तद्वादशपञ्चदशान्यतमातिथौ ।
भरणीमृगपुष्यप्राक्फाल्गुनीचित्रान्यतमे ॥७८॥
अनुराधाप्राक्षाढाधनिष्ठोत्तराभाद्रान्यतमे ।
राजयोगो भवत्येव श्रेष्ठः कार्यार्थसाधकः ॥७९॥
गुरुशन्यन्यन्तरे चतुरष्टनवान्यतमे ।
त्रयोदशचतुर्दशान्यतरे तिथिविशेषके ॥८०॥
कार्तिकार्द्राश्रवणोत्तराफाल्गुनीस्वात्यन्यतमे ।
ज्येष्ठोत्तराषाढाशततारकारेवत्यन्यतमे ॥८१॥
ऋक्षे स्थविरयोगश्च श्रेष्ठः कार्यार्थसाधकः ।
भौमगुरुशन्यन्यतमे द्वासप्तद्वादशान्यतमे ॥८२॥
मूलचित्राधनिष्ठान्यतमे द्विपुष्करयोगः ।
श्रेष्ठः कार्यार्थदः प्रोक्तः कार्यारम्भः सुखप्रदः ॥८३॥
भौमगुरुशन्यन्यतमे द्वासप्तद्वादशान्यतमे ।
कृत्तिकापुनर्वसूत्तराफाल्गुनिकाऽन्यतमे ॥८४॥
विशाखाप्राग्भाद्रपदोत्तराषाढाऽन्यतमर्क्षे ।
त्रिपुष्करयोगश्च सर्वकार्यार्थसाधकः ॥८५॥
रवौ हस्ते च पञ्चम्यामशुभो मृत्युयोगकः ।
सोमे मृगे षष्ठिकायामशुभो मृत्युयोगकः ॥८६॥
भौमेऽश्विन्यां च सप्तम्यामशुभो मृत्युयोगकः ।
बुधेऽनुराधायामष्टम्यामशुभो मृत्युयोगकः ॥८७॥
गुरौ पुष्ये नवम्यां चाशुभो वै मृत्युयोगकः ।
रवावार्द्रायां द्वादश्यामबलायोगकोऽशुभः ॥८८॥
एकादश्यां मृगे सामेऽबलायोगोऽप्यशुद्धकः ।
बुधे द्वये च रोहिण्यामबलायोगकोऽशुभः ॥८९॥
कृत्तिकायां शनौ पञ्चेऽबलायोगोऽप्यशुद्धकः ।
कृत्तिकायां रवौ द्वादश्यां भवेद् विषयोगकः ॥९०॥
शतभिषायां सप्तम्यां भौमे विषयोगोऽशुभः ।
द्वितीयायामाश्लेषायां शनौ विषयोगोऽशुभः ॥९१॥
भरण्यां च रवौ दग्धयोगोऽशुभः सदा मतः ।
सोमे चित्रायां च दग्धो योगोऽशुभः सदा मतः ॥९२॥
मंगले चोत्तराषाढायां च दग्धोऽशुभः सदा ।
धनिष्ठायां बुधे दग्धो योगोऽशुभः सदा मतः ॥९३॥
गुरावुत्तराफाल्गुन्यां दग्धो योगोऽशुभः सदा ।
ज्येष्ठायां शुक्रके दग्धो रेवतीयुक्शनावपि ॥९४॥
दग्धोऽशुभः सदा बोध्यः कार्यहानिकरो हि सः ।
मघायां च रवौ यमघण्टयोगोऽशुभस्तथा ॥९५॥
विशाखायां चन्द्रके स आर्द्रायां मंगलेऽपि सः ।
मूले बुधे यमघण्टः कृत्तिकायां गुरौ च सः ॥९६॥
रोहिण्यां शुक्रके सोऽपि हस्ते शनौ स चापि वै ।
यमघण्टः सदा वर्ज्यः शुभं नैव ददाति सः ॥९७॥
सूर्यभात् चन्द्रनक्षत्रे तुर्ये षष्ठे त्रयोदशे ।
विंशे च नवमे रवियोगः सर्वशुभप्रदः ॥९८॥
अनेकदोषसंघानां ध्वंसकः शुभदः सदा ।
इत्येवं राधिकेऽनादिकृष्णनारायणः प्रभुः ॥९९॥
क्रथकं प्राह यत् सर्वं मयोदितं तु ते तथा ।
ज्ञानदं शुभकालानां कार्याणां फलकृत्तथा ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नक्षत्रेषु शुभाऽशुभकार्यतत्फल-योग-करण-भद्राचक्र-शुभाशुभ-चन्द्र-फलताराबलचन्द्रबलभ्रमणसिद्धियोगचक्रशुभाशुभयोग-रवियोगबलानीत्यादिनिरूपणनामा पञ्चसप्तत्यधिक-शततमोऽध्यायः ॥ १७५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चानन्दाद्यष्टाविंशतिं तथा ।
योगान् यानाह भगवान् क्रथकाय वदामि ते ॥ १ ॥
रवाश्विवनिकायुक्ते सोमे मृगयुते तथा ।
भौमे चाश्लेषान्विते च बुधे हस्तयुते तथा ॥ २ ॥
गुरावनुराधास्थिते शुक्रे चोत्तरषाढिगे ।
शततारान्वयशनावानन्दयोगः सिद्धिदः ॥ ३ ॥
रवौ भरणिकायुक्ते आर्द्रान्विते च सोमके ।
मघायुक्ते मंगले च बुधे चित्रायुते तथा ॥ ४ ॥
ज्येष्ठायुते गुरौ चापि शुक्रेऽभिजित्समन्विते ।
शनौ प्राग्भाद्रपदगे योगः स कालदण्डकः ॥ ५ ॥
फलं मृत्युस्ततस्त्याज्यः सर्वथैव तु कर्मसु ।
रवौ तु कृत्तिकायुक्ते सोमे पुनर्वसुस्थिते ॥ ६ ॥
मंगले प्राक्फाल्गुनीस्थे बुधे स्वातियुते तथा ।
गुरौ मूलयुते शुक्रे श्रवणस्थे शनौ त्वथ ॥ ७ ॥
उत्तराभाद्रगे धूम्राक्षयोगश्चाऽसुखं फलम् ।
एकघटिका त्याज्यास्याऽरम्भे ततः सुखप्रदः ॥ ८ ॥
रवौ तु रोहिणी सोमे पुष्यं च मंगले त्वथ ।
उत्तराफाल्गुनी चापि बुधे विशाखिका तथा ॥ ९ ॥
गुरौ पूर्वाषाढिका च शुक्रे धनिष्ठिका तथा ।
शनौ च रेवती प्रजापतियोगः सुभाग्यदः ॥१०॥
रवौ मृगशिरा सोमे चाश्लेषा हस्तकः कुजे ।
बुधेऽनुराधा च गुरावुत्तराषाढिका तथा ॥११॥
शुक्रे शततारका चाश्विनी शनौ यदा भवेत् ।
सुभाग्यदः सौम्ययोगः त्याज्यः पञ्चघटीकिकः ॥१२॥
रवावार्द्रा मघा सोमे चित्रा तु मंगले तथा ।
ज्येष्ठा बुधेऽभिजिद् गुरौ पूर्वाभाद्रपदा कवौ ॥१३॥
शनौ तु भरणी ध्वांक्षयोगः स धननाशकृत् ।
रवौ पुनर्वसुः पूर्वाफाल्गुनी सोमके तथा ॥१४॥
स्वातिः कुजे बुधे मूलं श्रवणं तु गुरौ तथा ।
शुक्रे चोत्तरभाद्रा च कृत्तिका च शनौ यदा ॥१५॥
ध्वजयोगः सुखदो वै सर्वकार्ये जयप्रदः ।
रवौ पुष्यं चोत्तराफाल्गुनी सोमेऽथ मंगले ॥१६॥
विशाखा च बुधे पूर्वाषाढा गुरौ धनिष्ठिका ।
शुक्रे रेवा शनौ रोहा सुखः श्रीवत्सयोगकः ॥१७॥
रवावाश्लेषिका सोमे हस्तोऽनुराधिका कुजे ।
बुधे चोत्तरषाढा च गुरौ तु शततारका ॥१८॥
शुक्रेऽश्विनी शनौ मृगो वज्रयोगः क्षयप्रदः ।
त्याज्यः स पञ्चघटिकः ततो वै शुभदः क्वचित् ॥१९॥
रवौ मघा सोमके तु चित्रा ज्येष्ठा तु मंगले ।
बुधेऽभिजिद् गुरौ पूर्वाभाद्रा भरणी शुक्रके ॥२०॥
शनावार्द्रा मुद्गराख्ययोगो वै धननाशकृत् ।
त्याज्यः पञ्चघटिकः स ततो वै शुभदः क्वचित् ॥२१॥
रवौ पूर्वाफाल्गुनी च सोमे स्वातिः कुजे त्वथ ।
मूलं बुधे श्रवणं चोत्तराभाद्रा गुरौ यदा ॥२२॥
शुक्रे तु कृत्तिकाः शनौ पुनर्वसुर्यदा स च ।
छत्रयोगः स वै प्रोक्तः राजसन्मानदः सदा ॥२३॥
उत्तराफाल्गुनी सूर्ये विशाखा सोमके यदा ।
पूर्वाषाढा मंगले च धनिष्ठा बुधवासरे ॥२४॥
रेवती च गुरौ शुक्रे रोहिणी पुष्यकं शनौ ।
मित्रयोगः स वै प्रोक्तः पुष्टिदः सर्वकर्मसु ॥२५॥
रवौ हस्तोऽनुराधाः तु सोमे च मंगले त्वथ ।
उत्तराषाढिका चाथ बुधे तु शततारका ॥२६॥
अश्विनी च गुरौ शुक्रे मृग आश्लेषिका शनौ ।
मानसाख्यः स योगो वै सुखदः सर्वकर्मसु ॥२७॥
रवौ चित्रेन्दुके ज्येष्ठाऽभिजिद् भौमे बुधे तु च ।
पूर्वाभाद्रा भरणी स्याद् गुरावार्द्रा तु शुक्रके ॥२८॥
मघा शनौ पद्मयोगो धनप्राप्तिकरः स च ।
चतुर्घटिको वर्ज्यश्च ततः सुखप्रदो मतः ॥२९॥
रवौ स्वातिर्मूलमिन्द्रौ श्रवणं मंगले यदा ।
उत्तराभद्रिका बुधे गुरौ च कृत्तिका तथा ॥३०॥
शुक्रे वसुः शनौ प्राक्फाल्गुनी लम्बुकयोगकः ।
धनहानिकरो वर्ज्यश्चतुर्घटिक एव सः ॥३१॥
विशाखा च रवौ पूर्वाषाढा तु चन्द्रके यदा ।
धनिष्ठा मंगले रेवा बुधे गुरौ तु रोहिणी ॥३२॥
पुष्यं शुक्रे शनावुत्तराफाल्गुनी यदा तदा ।
उत्पातयोगो वर्ज्यः स प्राणनाशफलो यतः ॥३३॥
अनुराधा रवावुत्तराषाढा चन्द्रके तथा ।
शततारा मंगले चाश्लेषा बुधे गुरौ मृगः ॥३४॥
आश्लेषा शुक्रके हस्तः शनौ स मृत्युयोगकः ।
वर्जनीयः सदा पूर्णो मृत्युफलो यतो हि सः ॥३५॥
ज्येष्ठा रवावभिजित्सोमके प्राग्भद्रिका कुजे ।
बुधे भरणी गुरावार्द्रा मघा शुक्रे शनौ तु वै ॥३६॥
चित्रा स काणयोगः क्लेशदो वर्ज्यो घटीद्वयम् ।
रवौ मूलं श्रवः सोमे उत्तराभद्रिका कुजे ॥३७॥

कृत्तिका बुधके वसुर्गुरौ शुक्रे प्राक्फाल्गुनी ।
स्वातिः शनौ सिद्धयोगः कार्यसिद्धिः फलं भवेत् ॥३८॥
पूर्वाषाढा रवौ सोमे धनिष्ठा रेवती कुजे ।
बुधे रोहा गुरौ पुष्यमुत्तराफाल्गुनी कवौ ॥३९॥
शनौ विशाखा शुभयोगः स कल्याणकारकः ।
रवौ तु चोत्तराषाढा शततारा तु चन्द्रके ॥४०॥
अश्विनी मंगले मृगशिरा बुधे गुरौ तु वै ।
आश्लेषा शुक्रके हस्तः शनौ तथाऽनुराधिका ॥४१॥
अमृतसिद्धियोगः स राजमानादिसम्पदः ।
रवावभिजित् पूर्वाभाद्रपदा चन्द्रके तथा ॥४२॥
भरणी मंगले चार्द्रा बुधे मघा गुरौ भवेत् ।
चित्रा शुक्रे शनौ ज्येष्ठा मूशलयोग उच्यते ॥४३॥
धनक्षयकरः चतुष्घटिको वर्ज्य एव सः ।
रवौ श्रवश्चन्द्रके चोत्तराभाद्रपदा तथा ॥४४॥
कृत्तिका मंगले पुनर्वसुर्बुधे गुरौ तु वै ।
पूर्वाफाल्गुनिका शुक्रे स्वातिः मूलं शनौ तथा ॥४५॥
गदयोगः क्षयदः स वर्ज्यः सप्तघटीककः ।
धनिष्ठा तु रवौ सोमे रेवती रोहिणी कुजे ॥४६॥
पुष्यं बुधे गुरावुत्तराफाल्गुनी कवौ तु वै ।
विशाखा च शनौ पूर्वाषाढा मातंगयोगकः ॥४७॥
कुलवृद्धिप्रदः सोऽस्ति शुभकृत् सर्वदा मतः ।
शततारा रवौ सोमेऽश्विनी मृगशिरा कुजे ॥४८॥
आश्लेषा बुधके हस्तो गुरौ शुक्रेऽनुराधिका ।
शनावुत्तराषाढा च राक्षसो योगकः स तु ॥४९॥
महाकष्टप्रदो वर्ज्यः सर्वदा शुभकर्मणि ।
पूर्वाभाद्रपदा सूर्ये सोमे च भरणी तथा ॥५०॥
आर्द्रा भौमे मघा बुधे चित्रा गुरौ कवौ तु च ।
ज्येष्ठाऽभिजिच्छनौ चरयोगः कार्यस्य हानिकृत् ॥५१॥
वर्ज्यः स वै त्रिघटिकः, ततो लाभकरः क्वचित् ।
उत्तराभद्रिका सूर्ये चन्द्रे तु कृत्तिका तथा ॥५२॥
पुनर्वसुर्मंगले च पूर्वाफाल्गुनिका बुधे ।
स्वातिर्गुरौ कवौ मूलं श्रवणं तु शनौ तथा ॥५३॥
स्थिरयोगो महारंभकरः सर्वविवर्धनः ।
रवौ तु रेवती चन्द्रे रोहिणी पुष्यकं कुजे ॥५४॥
उत्तराफाल्गुनी बुधे विशाखा च गुरौ तथा ।
शुक्रे पूर्वाषाढिका च धनिष्ठा तु शनौ यदा ॥५५॥
वर्धमानाख्ययोगः स लभकरः शुभः सदा ।
रवौ शुक्रे च प्रतिपत् चन्द्रे बुधे द्वितीयका ॥५६॥

मंगले तृतीया शनौ चतुर्थी पञ्चमी गुरौ ।
मंगले शुक्रके षष्ठी बुधे च सप्तमी तथा ॥५७॥
रवौ शनौ मंगले वाऽष्टमी नवमी मंगले ।
रवौ शनौ चाथ दशमी तु गुरौ च चन्द्रके ॥५८॥
एकादशी गुरौ शुक्रे द्वादशी बुधवासरे ।
मंगले शुक्रके त्रयोदशी शनौ चतुर्दशी ॥५९॥
गुरौ पञ्चदशी चेत् स्यात् सिद्धियोगः शुभावहः ।
अथाऽन्यानशुभान् योगान् द्वादश प्रवदामि ते ॥६०॥
हुताशनश्च दग्धश्च विषश्च क्रकचस्तथा ।
संवर्तश्चतुर्थीग्रहं मृत्युश्च वज्रपातकः ॥६१॥
कालमुखस्तथा ज्वालामुखो वर्ज्योऽशुभास्त्विमे ।
षष्ठ्यां चन्द्रश्च सप्तम्यां मंगलश्च बुधेऽष्टमी ॥६२॥
नवम्यां च गुरुः शुक्रे दशम्येकादशी शनौ ।
द्वादश्यां तु रविर्हुताशनयोगोऽशुभः सदा ॥६३॥
तृतीयायां बुधः पञ्चम्यां भौमः षष्ठके गुरुः ।
शुक्रोऽष्टम्यां नवम्यां च शनिश्चन्द्रे ह्येकादशी ॥६४॥
रवौ च द्वादशी दग्धयोगोऽशुभः सदा मतः ।
द्वितीयायां बुधः सूर्यश्चतुर्थ्यां षष्ठके शशी ॥६५॥
शनिर्भौमश्च सप्तम्यामष्टम्यां च गुरुस्तथा ।
नवम्यां शुक्रको यत्र विषयोगो भयावहः ॥६६॥
षष्ठ्यां शनिश्च सप्तम्यां शुक्रोऽष्टम्यां गुरुस्तथा ।
नवम्यां बुध एवापि दशम्यां मंगलस्तथा ॥६७॥
एकादश्यां चन्द्रकश्च द्वादश्यां च रविस्तथा ।
क्रकचाख्यः स योगो वै अशुभः सर्वथा मतः ॥६८॥
आद्ये बुधः सप्तमेऽर्कः संवर्तयोगकोऽशुभः ।
आद्ये शनिर्द्वितीये शुक्रस्तृतीये गुरुस्तथा ॥६९॥
चतुर्थ्यां बुधकः पञ्चम्यां भौमः षष्ठके शशी ।
सप्तम्यां च रविः चतुर्थीग्रहयोगकोऽशुभः ॥७०॥
आद्ये गुरुर्मंगलश्च द्वितीये शुक्रको गुरुः ।
तृतीये च बुधः शुक्रश्चतुर्थे शुक्रको गुरुः ॥७१॥
पञ्चम्यां शनिरर्के च गुरौ च षष्ठिका तथा ।
रवौ चन्द्रे गुरौ शुक्रे सप्तमी बुधकेऽष्टमी ॥७२॥
नवमी शुक्रके शनौ दशमी च ततः परम् ।
एकादश्यां रविर्भौमो द्वादश्यां चन्द्रको गुरुः ॥७३॥
त्रयोदश्यां बुधचन्द्रौ पञ्चदश्यां शनिस्तथा ।
चतुर्दश्यां बुधशुक्ररवयो मृत्युयोगकः ॥७४॥
अशुभो मृत्युकरणः त्याज्य एषः सदा तु सः ।
अनुराधा द्वितीयायां तृतीये चोत्तरात्रयम् ॥७५॥

पञ्चम्यां तु मघा षष्ठ्यां रोहिणी च ततः परम् ।
हस्तं मूलं च सप्तम्यां पूर्वाभाद्रपदाऽष्टमे ॥७६॥
नवम्यां कृत्तिका चैकादश्यां तु रोहिणी यदि ।
चित्रा स्वातिस्त्रयोदश्यां योगः स वज्रपातकः ॥७७॥
वज्रपातसमं दुःखं करोति कर्मसु ध्रुवम् ।
अनुराधा तृतीयायां चतुर्थ्यामुत्तरात्रयम् ॥७८॥
पञ्चम्यां च मघाऽष्टम्यां रोहा नवमे कृत्तिका ।
कालमुखाख्ययोगः स सदा चाशुभपाकदः ॥७९॥
मूलं प्रतिपदि चापि भरणी पञ्चमीदिने ।
अष्टम्यां कृत्तिका रोहा नवम्यां दशमेऽश्लिषा ॥८०॥
ज्वालामुखश्च योगः स सदोद्वेगकरोऽशुभः ।
सप्तम्यां भरणी पुष्यं नवम्यां दशमेऽश्लिषा ॥८१॥
त्रयोदश्यां चित्रिका च वर्ज्ययोगोऽशुभो हि सः ।
आद्ये सूर्यो मंगलश्च द्वितीये शुक्रकः शशी ॥८२॥
तृतीयायां बुधो गुरुश्चतुर्थ्यां पंचमे शनिः ।
षष्ठ्यां सूर्यो मंगलश्च सप्तम्यां शुक्रकः शशी ॥८३॥
बुधोऽष्टम्यां नवम्यां च गुरुर्दशमके शनिः ।
एकादश्यां रविर्भौमश्चन्द्रशुक्रौ तु द्वादशे ॥८४॥
बुधस्त्रयोदशे गुरुश्चतुर्दशे पूर्णे शनिः ।
अशुभयोगाः प्रोक्तास्ते सर्वकार्यविघातकाः ॥८५॥
ज्येष्ठामूलर्क्षयोः सन्धौ रेवत्यश्विभयोस्तथा ।
आश्लेषामघयोरन्तराले घटीचतुष्टयम् ॥८६॥
द्वे पूर्वाया द्वे पश्चाया घट्यौ गण्डान्तयोगकः ।
त्याज्यः सोऽपि शुभकार्ये फलानिष्टो हि गण्डकः ॥८७॥
अन्तरे पञ्चमीषष्ठयोः सन्धौ पूर्णाप्रतिपदोः ।
दशम्येकादशीसन्धौ गण्डान्तो घटिकाद्वयम् ॥८८॥
नवम्यन्ते द्वे घटिके पञ्चम्यन्ते घटी तथा ।
चतुर्थ्यन्तेऽर्धघटिका गण्डान्तं त्याज्यमित्यपि ॥८९॥
कर्कसिंहान्तरालं च मीनमेषान्तरालकम् ।
वृश्चिकधनुष्यमध्यं घटी गण्डान्तकं स्मृतम् ॥९०॥
रवितः शनिपर्यन्तं मुहूर्ताः क्रमशस्त्विमे ।
चतुर्दशद्वादशदशाष्टषट्चतुर्द्विप्रखाः ॥९१॥
कुलिकयोगरूपास्ते त्याज्याः शुभे तु कर्मणि ।
बुधतो भौमपर्यन्तं मुहूर्ताऽकास्त एव तु ॥९२॥
क्रमशः कण्टकयोगरूपास्त्याज्यास्त इत्यपि ।
गुरुतो बुधपर्यन्तं मूहूर्ताऽकास्त एव तु ॥९३॥
क्रमशः कालवेलाख्ययोगस्त्याज्यः स एव च ।
शुक्रतो गुरुपर्यन्तं मुहूर्ताऽकास्त एव तु ॥९४॥
यमघण्टः क्रमशो वै त्याज्यः स श्रेष्ठकर्मसु ।
दिवसे ते कुलिकाद्याश्चोक्ता रात्रौ त्वथ शृणु ॥९५॥
रवितः शनिपर्यन्तं मुहूर्ताः क्रमशस्त्विमे ।
त्रयोदशैकादशनवसप्तपञ्चत्र्येककाः ॥९६॥
कुलिकयोगरूपास्ते त्याज्याः शुभे तु कर्मणि ।
बुधतो भौमपर्यन्तं त एवांऽकास्तु कण्टकः ॥९७॥
गुरुतो बुधपर्यन्तं तेंऽकाश्च कालवेलिकाः ।
शुक्रतो गुरुपर्यन्तं तेंऽकास्तु यमघंटकाः ॥९८॥
त्यक्तव्यास्ते निशाभागे सर्वथा शुभकर्मसु ।
रवौ चतुर्दशं मुहूर्तकं त्याज्यं हि दुष्टकम् ॥९९॥
तथा चन्द्रे नवमं द्वादशं त्याज्यं हि दुष्टकम् ।
भौमे रात्रौ सप्तकं च दिने त्याज्यं चतुर्थकम् ॥१००॥
बुधेऽष्टमं गुरौ षष्ठं द्वादशं त्याज्यमित्यपि ।
शुक्रे तुर्यं नवमं च शनावाद्यं द्वितीयकम् ॥१०१॥
दुष्टक्षणास्त एते वै त्याज्याः शुभे तु कर्मणि ।
चन्द्रे शुभे तु ते सर्वे निर्बलाः शुभशंसकाः ॥१०२॥
सिद्धियोगे कुयोगास्ते निर्बलाः सिद्धिशंसकाः ।
रवौ गगनमध्यस्थे मुहूर्तेऽभिजिदाह्वये ॥१०३॥
घटीद्वयं सर्वदोषान् हन्ति जयमुहूर्तकम् ।
तत्रारब्धं सर्वकार्यं जयदं नात्र संशयः ॥१०४॥
सप्तांगुला यष्टिका च स्थापनीयां क्षितौ ततः ।
छाया तस्याः प्रद्रष्टव्या सिद्धच्छायाऽभिधा यथा ॥१०५॥
रवौ चैकादशांऽगुला सोमे सार्धाऽष्टकांगुला ।
भौमे नवांऽगुला दीर्घा बुधेऽष्टांगुलदीर्घिका ॥१०६॥
गुरौ सप्तांगुला शुक्रे सार्धाऽष्टांगुलदीर्घिका ।
शनौ सार्धाऽष्टांगुला च यदा सूर्यकृता भवेत् ॥१०७॥
सिद्धिच्छायामुहूर्ते तत् दुष्टान् करोति शोभनान् ।
ऋक्षं तिथिं दिनं तारां चन्द्रं ग्रहं तदादिकान् ॥१०८॥
उक्तानेतान् विचार्यैव कार्यं खातादिकं शुभम् ।
इत्याह श्रीहरिः राधे ! कथकं भूपतिं तदा ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आनन्दाद्यष्टाविंशतियोगतिथिवारनक्षत्रोत्पन्नदुष्टयोग-त्रिविधगण्डान्तयोगकुलिकादिमुहूर्तदुष्टमुहूर्ताऽभि-जिच्छायामुहूर्तादिनिरूपणनामा षट्सप्तत्यधिक-शततमोऽध्यायः ॥ १७६ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके चोच्चग्रहादिकं यथा हरिः ।
कथकायाऽऽह तद्वक्ति तथाऽन्यदोषयोगिकम् ॥ १ ॥

मेषस्याऽर्कों वृषस्येन्दुर्नक्रस्य मंगलस्तथा।
कन्यायाश्च बुधः कर्कराशेर्गुरुस्तथा खलु ॥ २ ॥
मीनस्य शुक्रस्तुलायाः शनिश्चोच्चस्थिता हि ते।
तुलायाश्च रविर्वृश्चिकस्य चन्द्रस्तथा खलु ॥ ३ ॥
कर्कस्य मंगलो मीनस्य च बुधस्तथा खलु।
मकरस्य गुरुः कन्यायाः शुक्रो मेषगो शनिः ॥ ४ ॥
नीचस्थानगता एते बोध्या नैव सुखप्रदाः।
राहोर्गृहं तु कन्याऽस्ति मिथुनं चोच्चकालयम् ॥ ५ ॥
धनुर्नीचं स्थानमेव बोध्यं तथा फलं ह्यपि।
द्विः स्वभावे स्थिरे लग्ने त्यक्त्वाऽष्टमं च द्वादशम् ॥ ६ ॥
स्थानमन्येषु स्थानेषु भवन्ति चेत् शुभग्रहाः।
एकादशे च षष्ठे तु पापग्रहा भवन्ति चेत् ॥ ७ ॥
गृहसौधमन्दिराणामारम्भस्तत्र शोभनः।
लग्ने गुरौ रवौ षष्ठे सप्तमे च बुधो यदि ॥ ८ ॥
चतुर्थे शुक्रकः शनिस्तृतीये चेत् तदा यदि।
गृहाद्यारंभणं कुर्यात् शतवर्षायुरेव तत् ॥ ९ ॥
लग्ने शुक्रे तृतीयेऽर्के षष्ठे भौमे गुरुस्त्वपि।
पञ्चमे चेत् गृहं कुर्यात् शतद्वयायुरेव तत् ॥१०॥
सूर्ये चैकादशे लग्ने शुक्रे दशमगे बुधे।
तत्र कुर्याद् गृहाद्यं चेत् शतवर्षा युरेव तत् ॥११॥
गुरौ तुर्ये शनौ भौमे चैकादशेऽथ चन्द्रके।
दशमे चेद् गृहं कुर्यादशीत्यायुर्भवेद्धि तत् ॥१२॥
शुक्रे उच्चे च वा लग्ने गुरौ लग्ने वा तुर्यके।
उच्चे चैकादशे वा च शनौ सम्पत्प्रदं गृहम् ॥१३॥
लग्ने स्याचेत् कर्कचन्द्रो गुरुः स्यात् केन्द्रके यदि।
अन्यग्रहा उच्चराशौ मित्रराशौ च वा यदि ॥१४॥
तद्योगे मन्दिरं जातं लक्ष्मीदं शाश्वतं भवेत्।
मीनराशेर्लग्नके च शुक्रश्च वर्तते यदि ॥१५॥
कर्कगुरुश्चतुर्थे च भवने वर्तते यदि।
तुलाशनिश्च वैकादशके भवनके भवेत् ॥१६॥
प्रारब्धं तु गृहं लक्ष्मीप्रदं चिरायुरेव तत्।
सर्वे ग्रहा द्वादशे चाष्टमे स्थाने न शोभनाः ॥१७॥
केन्द्रत्रिकोणधनुर्गाः पापग्रहा न शोभनाः।
लग्नचन्द्रो बुधयुक्तश्चापि नैव स शोभनः ॥१८॥
अष्टमस्थः चन्द्रमाः स शोभनो नैव नैव च।
सर्वे ग्रहा भवेयुश्च नीचांशे तत्र निर्मितम् ॥१९॥
गृहं वै निर्धनं स्याच्च तत्र कार्यं न सर्वथा।
कोऽप्येकश्च ग्रहः शत्रुग्रहस्य नवमांशके ॥२०॥
स्थितोऽपि दशमे वा सप्तमे स्याच्चेत् तथा पुनः।
लग्नेशो यदि वै निर्बलो भवेत् तत्र मन्दिरम् ॥२१॥
कृतं वर्षान्तरे स्यात् तत्परहस्तगतं ध्रुवम्।
लग्नस्वामी जन्मस्वामी राशिस्वामी च यो ग्रहः ॥२२॥
तथा चन्द्रो गुरुः शुक्रश्चैतेऽनस्तगता यदि।
तथा स्वोच्चस्थले स्वक्षेत्रके स्वांशे भवन्ति चेत् ॥२३॥
तदाऽऽरब्धं गृहं सौख्यश्रीप्रदं जायते सदा।
अथ प्रतिष्ठासमये सूर्यश्चेल्लग्नकुण्डले ॥२४॥
त्रिषड्दशैकादशेषूपचयस्थानकेषु चेत्।
भवेच्छ्रेष्ठस्तथैव स्याच्चन्द्रोऽप्युक्तस्थलेषु चेत् ॥२५॥
धनुर्धर्मस्थानयुक्षु भवेच्छ्रेष्ठस्तथाविधः।
भौमः शनिस्तृतीये चैकादशे षष्ठके शुभाः ॥२६॥
बुधो गुरुर्द्वादशाष्टभिन्नस्थानेषु वै शुभौ।
एकद्वात्रचतुःपञ्चनवस्थानेषु चेत् कविः ॥२७॥
दशैकादशयोश्चापि वर्तते श्रेष्ठ एव सः।
पापग्रहाः रविर्भौमः शनिश्च राहुकेतुकौ ॥२८॥
आद्येऽष्टमे पञ्चमे सप्तमे चेत् स्युस्तदा च ते।
तथा शुभग्रहाः स्युरष्टमे शशी तथाऽऽद्यके ॥२९॥
षष्ठेऽष्टमे भवेत् कुण्डलीग्रहास्त्याज्यका इमे।
सिंहलग्ने सूर्यदेवप्रतिष्ठा तु शुभा मता ॥३०॥
हरस्य मिथुने कन्यालग्ने विष्णोर्ममापि च।
कुंभे तु ब्रह्मणश्चरलग्ने क्षुद्रसुरस्य च ॥३१॥
योगिनीनां तथा लग्ने चरे वै स्थापनं मतम्।
लग्ने तु द्विस्वभावे देवीनां सुस्थापनं वरम् ॥३२॥
स्थिरे लग्ने सर्वदेवप्रतिष्ठा चोत्तमा मता।
प्रतिष्ठाकुण्डले चाद्यभवने मृत्युदः शशी ॥३३॥
द्वितीये तु धनुःस्थाने धान्यवृद्धिप्रदः शशी।
पराक्रमे तृतीये तु क्लेशदो वै भवेच्छशी ॥३४॥
पञ्चमस्थः शशी गोत्रसन्तानक्षयकारकः।
शत्रुतो भयदः षष्ठे सप्तमे दुःखदः शशी ॥३५॥
अष्टमे मृत्युदो विघ्नप्रदश्च नवमे शशी।
दशमे बलदश्चैकादशस्थो धनदः शशी ॥३६॥
द्वादशस्थो व्ययकारी बोध्यश्चन्द्रो हि कुण्डले।
शुभोऽपि चन्द्रमाः पापग्रहात् चेत् सप्तमे स्थले ॥३७॥
अशुभः स्यात्तथा पापग्रहयुक्तोऽप्यशुद्धकः।
तथा पापग्रहमध्येऽशुभः क्षीणोऽप्यशुद्धकः ॥३८॥
नीचगश्च शत्रुवर्गगश्चाप्यशोभनो भवेत्।
यदि चन्द्रो गुरुदृष्ट्या युक्तश्चेत् शुभको भवेत् ॥३९॥

स्वकर्कराशिगः स्याद्वा उच्चगो वा शुभो भवेत् ।
शुभग्रहनवांशस्थः स्वाधिमित्रनवांशगः ॥४०॥
भवेद्वापि तदाऽशुभः शशी स्याच्छुभ एव सः ।
चन्द्राच्चाग्रे चतुर्थे सप्तमे च दशमे स्थले ॥४१॥
यदि क्रूरो ग्रहः स्यात् तत्क्रमात् योगास्त्विमेऽशुभाः ।
आपीडा चापि संपीडा भृग्वाद्या वर्तिता तथा ॥४२॥
तत्र कार्ये कृते स्वस्य बन्धोर्नार्याश्च कर्मणः ।
चतुर्णां वै विनाशः स्यात् तत्र कार्यं न चारभेत् ॥४३॥
यत्र राशौ भवेच्चन्द्रस्तत्र क्रूरग्रहोऽपि चेत् ।
तदा युतिर्भवेद्दोषस्त्याज्यः शुभे तु कर्मणि ॥४४॥
बुधेन गुरुणा युक्ते चन्द्रे दोषो युतिर्न वै ।
अब्दाऽयनर्तुमासर्क्षपक्षदग्धाहसंभवाः ॥४५॥
अन्धकाणादिलग्नोत्थाः सपापेन्दुनवांऽशजाः ।
दोषा नश्यन्ति गुरुज्ञशुक्रैः केन्द्रत्रिकोणगैः ॥४६॥
कुनवांऽशग्रहोद्भूताः षड्वर्गक्षणलग्नजाः ।
शशिन्येकादशे दोषाः सर्वे नश्यन्ति तद्बलात् ॥४७॥
लग्ने वर्गोत्तमे वेन्दौ रवौ चैकादशेऽथवा ।
केन्द्रे कोणे गुरुः स्याच्चेत् दोषा नश्यन्ति तद्बलात् ॥४८॥
त्यक्त्वा वै सप्तमं स्थानं केन्द्रे त्रिकोणके बुधः ।
शतदोषानपि हन्ति तेषु शुक्रः शतद्वयम् ॥४९॥
तेषु गुरुर्लक्षदोषान् हन्ति कार्यं शुभं भवेत् ।
लग्नेशो लग्नके स्याद्वा नवांशे वा भवेद् यदि ॥५०॥
एकादशे वा केन्द्रे वा सर्वदोषविनाशकृत् ।
लग्नबले चोत्तमे कुयोगा न दोषदाः क्वचित् ॥५१॥
शुक्लाद्यदिवसाद् गणयित्वा वै तिथिसंख्यकाम् ।
रवेर्वाराद् वारसंख्यामश्विन्या ऋक्षसंख्यकाम् ॥५२॥
तदंकसंख्याः सम्मिश्र्य भंक्तव्यास्तुर्यसंख्यया ।
एकशेषे स्थिता पृथ्वी गृहारंभे कलिप्रदा ॥५३॥
द्विःशेषे क्षितिरासीना शुभा त्रिःशेषकेऽपि च ।
शून्ये शेषे जाग्रती सा गृहारम्भे त्वनिष्टदा ॥५४॥
एवं विलोक्य सर्वं वै क्रथकाऽत्र सुमन्दिरम् ।
प्रकारय ममार्थं त्वं पूजासेवादिलब्धये ॥५५॥
इत्युक्त्वा विररामेशः परेशः कृष्णवल्लभः ।
क्रथकस्तद् वचो धृत्वा पुपूज परमेश्वरम् ॥५६॥
रोमायनस्तथा चान्ये पुपूजुश्च प्रजाजनाः ।
हरिं च नगरे तत्र भ्रामयामासुरुत्सुकाः ॥५७॥
यानवाहनवाद्यैर्मंगलैः स्वागतादिभिः ।
उपदाभिरनन्ताभिरर्चयामासुरच्युतम् ॥५८॥
हरिः सर्वं ददौ तत्र रोमायनमहात्मने ।
प्रजाभ्यश्च ददौ प्रासादिकं राज्ञे कुटुम्बिने ॥५९॥
नगरीं पावनीं कृत्वा हर्म्याणि श्रेष्ठिनां तथा ।
आगत्य राजसौधं च भोजनं स उपाददे ॥६०॥
सर्वे ते भोजनं चक्रुस्ततो नृपस्य कन्यकाः ।
पञ्च दिव्यात्मवेत्त्र्यश्च हरेस्तु जगृहुः करम् ॥६१॥
कुमारदानं मध्याह्ने ह्यभूत् ताश्च ततः परम् ।
कुमारेण समं राज्यान्निर्ययुर्हरिणा सह ॥६२॥
विमानेनर्षयः सर्वे लोमशाद्या हरिप्रियाः ।
ब्रह्मप्रियास्तथा सर्वे विदायं प्राप्य निर्ययुः ॥६३॥
प्रस्थापिताश्च राज्ञा ते राजमानपुरःसराः ।
कृपास्थलाद्विनृपतिपृथुना प्रार्थितास्ततः ॥६४॥
पृथुना भूभृता सार्कं कृपास्थलर्षिणा तथा ।
प्रजाजनैर्युतः कृष्णनारायणो विहायसा ॥६५॥
मार्गेण दिव्ययानेन राजधानीं जरस्थलीम् ।
व्योम्ना विलोकयामास राधिकेऽरण्यशोभिताम् ॥६६॥
कृतस्वागतशोभाढ्यां पृथापगातटस्थिताम् ।
वीक्ष्य प्रजा विमानं च चक्रुर्जयेतिघोषणाम् ॥६७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उच्चनीचग्रहफलं, प्रतिष्ठाने लग्नकुण्डलीस्थग्रहाणां फलं, चन्द्रफलम्, आपीडादियोगाः, युतिदोषः, लग्नबलं, पृथिवी सुप्तेत्यादिपरीक्षा, ततो नगरीभ्रामणं पूजनं विदायं, पृथुराजधानीं जरस्थलीमागमनं चेत्यादिनिरूपणनामा सप्तसप्तत्यधिकशततमोऽध्यायः ॥ १७७ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके देवि प्राणप्रिये सुरूपिणि ।
जरस्थलीं ययौ कृष्णनारायणो विमानतः ॥ १ ॥
पृथुराजकुटुम्बं च सहाऽभूत् हरिणा तदा ।
विमानस्थं स्वागतार्थं चाऽवारोहयदच्युतम् ॥ २ ॥
वाद्यघोषैर्जयनादैर्यन्त्रस्फोटनघोषणैः ।
भेरीडंककविगलैः कृतध्वानैर्निनादयम् ॥ ३ ॥
राजा गृह्णन् हारपूजां समीपस्थोऽभवद् भुवि ।
पृथातीरे महोद्याने राजसौधविराजिते ॥ ४ ॥
विशाले भूतले व्योम्नो ह्यवारोहयदीश्वरः ।
ददौ हारान् स्वयं राजा श्रीशाय परमात्मने ॥ ५ ॥
राज्ञो कृपी ददौ हारान् कंभराय श्रियै तदा ।
तस्याः कुमारिका हारान् ददुर्ब्रह्मप्रियागले ॥ ६ ॥

विंशतिसंख्यकाः सर्वाः पुपूजुश्चापरा अपि ।
कुमाराः शतसंख्याश्च पुपूजुश्च ऋषींस्तथा ॥ ७ ॥
स्वागतं कुशलं पृष्ट्वा राजा न्यषादयद्धरिम् ।
दिव्ये सिंहासने राजसभास्थे जनतान्वितः ॥ ८ ॥
हरिश्च जनताः सर्वाः पप्रच्छ कुशलं शुभम् ।
चतुर्दश्यां तदा सायं नगरेऽभ्रामयद्धरिम् ॥ ९ ॥
ततो नदीतटे गत्वा सन्ध्यां रात्रौ समाचरत् ।
श्रीहरिः ऋषिभिः सार्धं ततो भोजनमाचरत् ॥१०॥
रात्रौ विश्रान्तिमासाद्य प्रातर्बुबोध सत्वरम् ।
नित्यपूजादिकं कृत्वा सभायां राजपूजितः ॥११॥
उपदेशं ददौ कृष्णनारायणः स्वयं प्रभुः ।
राजन् वर्षासु चाभ्राणि जायन्ते यान्ति लीनताम् ॥१२॥
तथा सर्वाणि भूतानि जायन्ते च विशन्ति च ।
अद्य वा श्वः परश्वो वा ततोऽग्रे वा वियोजनम् ॥१३॥
संघातानां मिलितानां भविष्यति न संशयः ।
गर्भे देहा विपच्यन्ते बहिः पुष्टिं प्रयान्ति च ॥१४॥
जरायां खलु जातायां ह्रसन्त्येव विछित्तये ।
अस्थिरं मानसं यद्वचञ्चलं च प्रतारकम् ॥१५॥
तथा वर्ष्माऽपि बोद्धव्यं विशेषो नात्र विद्यते ।
कदा क्वैतद् वियुक्तं च भविष्यतीति मानवः ॥१६॥
निर्णेतुं नैव शक्नोति रक्षितं चापि यास्यति ।
राज्यं कुलं कुटुम्बं च ज्ञातिः प्रजाश्च सेवकाः ॥१७॥
पूर्वकर्मानुसारेण स्त्रियोऽपत्यानि सन्ति च ।
भगवत्प्राप्तिरेतेषां बहुपुण्यैः प्रजायते ॥१८॥
तव पुण्यस्य नान्तोऽस्ति कुटुम्बस्यापि ते नृप ।
येनाऽद्य त्वद्गृहे वासो महर्षीणां मया सह ॥१९॥
प्रजानां ते महद्भाग्यं यासां वै दर्शनं मम ।
राष्ट्रं पुण्यं तव चाद्य जातं तीर्थस्वरूपकम् ॥२०॥
इत्येवं श्रीहरिं तत्रोपदिशन्तं नृपः स्वयम् ।
पप्रच्छ श्रीहरिं नत्वा निजपूर्वभवादिकम् ॥२१॥
कोऽहमासं पुरा कृष्ण क इमे मम बान्धवाः ।
कुटुम्बं च मम सर्वं प्रजा मे वद माधव ॥२२॥
इतिपृष्टो हरिः प्राह शृणु राजन् कथां तव ।
पुरा कल्पे भवानासीन्मुनिश्चारण्यकाऽभिधः ॥२३॥
वन्यफलादनो वृक्षस्तम्बे वासकरः सदा ।
महामार्गाष्टकं यत्र युज्यते स्वाश्रमान्तिके ॥२४॥
मानवा मार्गकैर्यान्ति चायान्ति च तवाश्रमे ।
विश्रम्य च क्षणं भुक्त्वा त्वद्दत्तानि फलानि तु ॥२५॥
पीत्वा जलं च नत्वा त्वां प्रयान्ति च यथेष्टकम् ।
तेषां सेवा त्वया तत्र फलैर्जलैर्विधीयते ॥२६॥
बृस्यादिभिश्चाश्रयस्य प्रदानेन चिरं मुहुः ।
निजसेवां भवाँस्तैश्चाऽकारयन्नैव सर्वथा ॥२७॥
यतस्त्वं ज्ञानवानासीः ऋणं कार्यं न सर्वथा ।
दातव्यमेव सर्वेभ्यो ग्राह्यं नैव रजोऽपि तु ॥२८॥
प्रतिग्रहे तथाऽऽदाने तेषामृणं प्रजायते ।
मानुष्येण तु देहेन ऋणं कार्यं न वै क्वचित् ॥२९॥
ऋणकर्ता पुनर्जन्म समेति नात्र संशयः ।
सेवया जायते मोक्षः सेवया स्वर्गमाप्यते ॥३०॥
सेवाभिश्चाशिषः प्राप्य भवन्ति चिरजीविनः ।
दत्तं सर्वं पुरा पश्चादाप्यते नियमाद् ध्रुवम् ॥३१॥
तस्माद् देयं यथाशक्ति दातव्यं श्रद्धया मुहुः ।
पुंसे नार्यै प्राणिने वा यस्मै कस्मैचिदात्मने ॥३२॥
एवं मत्वा त्वया दत्तं ब्रह्मात्मानः प्रसादिताः ।
तवाश्रमे तदा पञ्चविंशतिः ऋषयोऽभवन् ॥३३॥
त्वया तुल्याः सेवकास्ते सर्वसेवापरायणाः ।
एवं भवद्भिः सर्वैश्चाऽनाथा नार्यो नरादयः ॥३४॥
सेविता आश्रयं दत्वा बालाश्च वनवासिनः ।
युष्माकमाश्रमे सौख्यं दृष्ट्वा सेवां विलोक्य च ॥३५॥
दरिद्राश्च तथाऽनाथास्तत्र न्यूषुर्निरन्तरम् ।
षड्विंशतिभूसुराणामाज्ञायां तु स्थिताः सदा ॥३६॥
सेवन्तेऽभ्यागतान् सर्वान् पुण्यं चाप्यर्जयन्ति हि ।
सकामाः सर्व एवै ते सेवकाः सेवयन्ति वै ॥३७॥
ऋषीणामाश्रिताश्चाश्रमस्था जाताः कुटुम्बवत् ।
मण्डलं तन्मनुष्याणां सहस्रोत्तरतां गतम् ॥३८॥
षड्विंशत्याश्रितं तद्वै वर्तते सेवकादिवत् ।
तैश्च विज्ञानवार्तायां परलोकगतौ किल ॥३९॥
प्रार्थिताश्च भवन्तोऽग्रेसरा विप्रा दयालवः ।
अस्मान् विहाय गन्तव्यं नैव युष्माभिरव्ययम् ॥४०॥
स्वर्गं मोक्षं च वा विप्रा नीत्वा गन्तव्यमेव नः ।
आश्रितेषु तथास्त्विति दयया चार्पितं वचः ॥४१॥
दयैषा बन्धनरूपा वरिवर्ति भवत्कृते ।
साधुभिस्तु दया कार्या जीवदुःखहरा शुभा ॥४२॥
न तु कार्या तथा यत्र स्वस्यापि बन्धनं भवेत् ।
भवद्भिस्तु कृता स्वेषां बन्धदा यत्र ते खलु ॥४३॥
तत्र स्थातव्यरूपा वै पुण्यशेवधिभिः पुरा ।
परोपकारपुण्येन भवन्तो विंशतिश्च षट् ॥४४॥

तथा पारे सहस्रं चाश्रितं यन्मण्डलं च तत् ।
नैत्यके तु लये चाकस्मिके सायं समागते ॥४५॥
सर्वे देहान् विहायैव स्वर्गलोकमितो गताः ।
ततो महर्लोकमेव गत्वा निशां तु वैधसीम् ॥४६॥
क्षपयित्वा पुनः सृष्टौ स्वर्गमाश्रित्य देवताः ।
चतुर्दश तु मनवस्तथा द्वादश सूर्यकाः ॥४७॥
जाताः कल्पे गते तत्र स्वर्गवासाः सुखाश्रयाः ।
आश्रिताः सर्व एवैते ये यस्य सेवकाः पुरा ॥४८॥
अभवँस्ते तथा तेषां कुटुम्बं समजायत ।
गतः कल्पः सुसम्पूर्णः सेवापुण्यैः पुरार्जितैः ॥४९॥
स्वर्गे भुक्तो देवसृष्टौ तदाऽहं भगवान् स्वयम् ।
अनादिश्रीकृष्णनारायणः श्रीकृष्णवल्लभः ॥५०॥
राजराजस्वरूपेण भवतां सर्वसन्धिषु ।
पट्टाभिषेकदाताऽहं चाभुवं तत्र तत्र च ॥५१॥
सूर्याणां च मनूनां च शासकोऽहं तदा खलु ।
अर्थितश्च भवद्भिर्वै मोक्षार्थं सेवया तदा ॥५२॥
मया विचार्य पुण्यं वै ह्येकजन्मोत्तरं ततः ।
मोक्षोऽस्तु भवतां चेति तथास्त्विति वचोऽर्पितम् ॥५३॥
नाऽभुक्तं क्षीयते कर्म कोटिकल्पे गतेऽपि तु ।
स्वर्गभोगावशिष्टं च भोक्तव्यं भूतले भवेत् ॥५४॥
कर्मभोगात्मभूमौ तद् भोगार्थं चागतं हि वः ।
कल्पे क्षीणे पुनः सृष्टौ शुभभोगार्थमेव ह ॥५५॥
भवन्तोऽत्र कुटुम्बैर्वै सह जाता भवन्ति च ।
भवानारण्यकश्चासीत् तृतीयश्च मनुस्ततः ॥५६॥
आद्यश्चोरलकेतुश्च द्वितीयः क्रथको मनुः ।
उष्ट्रालराजा चतुर्थोऽभून्मनुस्तत्र कल्पके ॥५७॥
हंकारोऽयं पञ्चमोऽभूत् षष्ठस्तु जयकाष्ठलः ।
तीराणः सप्तमश्चासीत् अल्वीनरस्तथाऽष्टमः ॥५८॥
जिनवर्द्धिर्नवमोऽभूद् दशमस्त्वल्पकेतुकः ।
एकादशो जयकृष्णो द्वादशो यज्ञशानकः ॥५९॥
त्रयोदशश्चेन्दुरायो गणकस्तु चतुर्दशः ।
एते वै मनवश्चासन् भवन्तोऽत्रक्षितीश्वराः ॥६०॥
अथाऽऽसन् द्वादश सूर्या मुद्राण्डः प्रथमोऽभवत् ।
लीनोर्णोऽर्को द्वितीयोऽभूद् बृहच्छरस्तृतीयकः ॥६१॥
बललीनश्चतुर्थश्च पञ्चमो वरसिंहकः ।
रायगामलकः षष्ठः सप्तमः फेनतन्तुकः ॥६२॥
स्तोकहोमश्चाष्टमार्को नवमः काष्ठयानकः ।
दशमः कोलको राजा एकादशोऽगराजकः ॥६३॥
शाकुन्तराजाऽप्यभवत् द्वादशोऽर्कस्तदा पुरा ।
एवं सूर्या राजराजेश्वरस्य मम मूर्तयः ॥६४॥
ममावेशेन चासन् वै भवन्तो विंशतिश्च षट् ।
राजानोऽत्र समुद्भूता मनवोऽर्काः शुभाश्रयाः ॥६५॥
राजराजेश्वरयोगस्तदासीद् भवतां ततः ।
स्वर्गे वामनयोगश्च पुनरासीत् परे दिने ॥६६॥
अनादिश्रीकृष्णनारायणस्याऽत्र क्षितौ मम ।
महापुण्यप्रतापेन योगो जातोऽस्ति वः पुनः ॥६७॥
अनाथा ये तु ते सर्वे नार्यो नराश्च बालकाः ।
बालिकाः सेवकाः स्वर्गे तदासन् वः कुटुम्बिनः ॥६८॥
अत्र भूमौ तु ते जाताः कुटुम्बिनोऽपि वः पुनः ।
यज्ञे मया समस्तेभ्यो लाभो दत्तो हि गोचरः ॥६९॥
पृष्टं यद् भवता तस्मात् कथितं प्राग्भवं हि वः ।
जानाम्यहं च तत्सर्वं भवद्भिर्विस्मृतं हि तत् ॥७०॥
भवद्भिस्तु वने वन्यैर्या सेवा देहिनां कृता ।
तत्पुण्यैर्मनुराज्यानि भुक्त्वा राज्यानि वै रवेः ॥७१॥
अद्यात्र शेषभोगार्थं जाता राजान एव ह ।
मम योगेन पुण्येन पुरातनेन चापि वै ॥७२॥
संस्काराणां बलैश्चापि गांगेयाश्च महर्षयः ।
कृपास्थलाद्या देशेऽत्र स्थिता युष्माभिरर्जिताः ॥७३॥
सेविताः सर्वथा प्रेम्णाऽऽशीर्वादाश्चार्जितास्तथा ।
तेनाऽहं पुनरेवाऽत्र सर्वं स्मृत्वा पुरातनम् ॥७४॥
वृकायनं नीलकर्णं यज्ञार्थं समप्रेषयम् ।
प्रबोधार्थं च मोक्षार्थं लोमशादीन्मुनींस्तथा ॥७५॥
अहं स्वयं चागतोऽस्मि स्मृत्वा भक्ताँश्च वस्तथा ।
इमाः प्रजाश्च याः सर्वाः पुराऽऽसन् भवतां पुरः ॥७६॥
ग्राम्यजना अतिथयो यैर्जग्धानि फलानि च ।
ताः प्रजा वः प्रदेशेषु पुण्या भक्ता भवन्ति हि ॥७७॥
तेषां भाग्यं परं मन्ये भगवद्योजनं यतः ।
नाल्पपुण्येन लभ्येत भगवान् भूतभावनः ॥७८॥
नाल्पपुण्येन लभ्यन्ते साधवो ब्रह्मवेदिनः ।
नाल्पपुण्येन लभ्यन्ते बान्धवा भक्तितत्पराः ॥७९॥
नाल्पपुण्येन लभ्येत कुटुम्बं सेवकं हरेः ।
सती नारी सेविका च पुत्रा भक्ता निदेशगाः ॥८०॥
पुत्र्यो भक्तियुताः कृष्णनारायणपरात्मनि ।
भृत्या धर्मयुताः सत्यव्रताः सन्तोषकारिणः ॥८१॥
कर्मचाराः पुष्टिदाश्च धर्मकार्ये सहायदाः ।
दुःखे भागग्रहाश्चापि न मिलन्त्यल्पपुण्यतः ॥८२॥

सांसारिकं सुखं पुण्यैर्लभ्यतेऽनन्तकालिकम् ।
परब्रह्मसुखं सेवाधर्मेण लभ्यते हरेः ॥८३॥
असंख्यं चाप्यनन्तं च न च ग्रस्तं कदाचन ।
न ह्रस्तं न परिणतं तत्सुखं दुःखवर्जितम् ॥८४॥
मानुषस्य तु साफल्यं राजन् ब्रह्मसमर्पणम् ।
युष्माभी राजभिस्तत्तु कृतं यज्ञमहोत्सवे ॥८५॥
कृतकृत्या भवन्तोऽत्र जाता ममाश्रयादिह ।
प्रसन्नोऽस्मि पूजितोऽस्मि सर्वभावैर्महामखे ॥८६॥
गृहे निवेशितोऽस्म्यद्य गृहं ते पावनं सदा ।
भज मां प्रेमभावेन प्रकारय सुमन्दिरम् ॥८७॥
प्रतिष्ठापय मां तत्र द्विभुजं परमेश्वरम् ।
यथादृष्टं यथालब्धं सुरूपं माणिकीयुतम् ॥८८॥
लक्ष्मीयुतं दिव्यभावं प्रसेवय च सर्वदा ।
सहाऽर्धपञ्चषष्ठ्यंगुलोच्छ्रयं च गजासने ॥८९॥
तथा श्रीपद्माभ्यांयुक्तं रमायुक्तं महासने ।
प्रतिष्ठापय मां नित्यं प्रपूजय सुखं लभ ॥९०॥
इत्यादिश्याऽर्हणां प्राप्य भोजयित्वा जनानथ ।
स्वयं भुक्त्वा बहून् कृत्वा निजमन्त्राधिसंश्रितान् ॥९१॥
प्राप्य विश्रान्तिमल्पां च मध्याह्ने राजमण्डलैः ।
प्रधानाद्यैः प्रहरान्ते पूजितः श्रीहरिस्ततः ॥९२॥
इयेष बहुधा राज्ञाऽर्थितश्चोष्ट्रालकेन ह ।
युगशावेन मुनिना चार्थितः परमेश्वरः ॥९३॥
उष्ट्रालं तन्महद्राज्यं गन्तुं मध्याह्नकोत्तरम् ।
तावद्वै पृथुराजस्य कन्यकाः विंशतिस्तदा ॥९४॥
मातृभिः सह संगत्य पूजनार्थमुपाययुः ।
वरमालाऽक्षतपुष्पसुगन्धिपात्रहस्तकाः ॥९५॥
स्वयंवरस्वरूपेण हरेः कण्ठे तु राधिके ।
विंशत्या चार्पिता माला वैवाहिका हि तत्क्षणे ॥९६॥
कुमारदानविधिना जगृहुश्च हरेः करम् ।
प्रेम्णा सर्वा हरिं निभालयामासुः समुत्सुकाः ॥९७॥
पितरं ताः प्रणम्यैव मातॄश्च वृद्धमण्डलम् ।
आशिषः सर्वथाऽऽसाद्य ब्रह्मप्रियास्तदाऽभवन् ॥९८॥
उत्सवः सत्वरं सर्वैः कृतो मालादिकार्पणैः ।
विमानानि तदाऽऽसँश्च प्रस्थानसम्पराणि तु ॥९९॥
कन्यकाविंशतिः कृष्णनारायणेन वै सह ।
गन्तुकामा विमाने श्रीहरेः प्रियासु सर्वथा ॥१००॥
सम्मील्य प्रस्थिताश्चान्ये सर्वे विमानमास्थिताः ।
कुटुम्बं च हरेः सर्वे महर्षयस्तथाऽपरे ॥१०१॥
तदा वाद्यान्यवाद्यन्त मंगलश्रवणानि वै ।
गीतिकाश्चाप्यगायन्त कीर्तनं च व्यजायत ॥१०२॥
आरात्रिकेन विधिना पुष्पाञ्जल्यादिभिस्तथा ।
वर्धितः श्रीहरिस्तूर्णं तत्स्थलाच्चाम्बरेऽभवत् ॥१०३॥
जयशब्दैर्यन्त्रघोषैर्हर्षनादैः सह प्रभोः ।
विमानं चाऽन्ययानानि व्योम्न्यग्रेऽसंचरन् सुखात् ॥१०४॥
प्रजाश्चाऽऽगम्यमेवात्र पुनर्वै कृपया प्रभो ।
इत्याहुर्बहुधा वाक्यैरतोषयन् परेश्वरम् ॥१०५॥
क्षणमात्राद् राधिके वै विमानान्यम्बरात्तदा ।
युगशावेन निर्दिष्टमार्गेणोष्ट्रालराष्ट्रकम् ॥१०६॥
आययुर्दिनपानद्यास्तटे वियानिकां पुरीम् ।
ददर्श राधिके व्योम्ना राष्ट्रं सुशोभितं हरिः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पृथुराजधानीं जरस्थलीं गत्वा स्वागतमासाद्य हरिरूपादिदेश, षड्विंशतिनृपाणां प्राक्कल्पे ऋषित्वं मनुत्वं सूर्यत्वं चेत्याह, ततो विश्रम्य पूर्णिमायाम् उष्ट्रालराष्ट्रमुपागमदित्यादिनिरूपणनामाऽष्टसप्तत्यधिकशततमोऽध्यायः ॥ १७८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके राजा वियानानगरीपतिः ।
उष्ट्रालश्च तथा तस्य भ्राताऽनुजोऽपि भक्तराट् ॥ १ ॥
नाम्ना हंकारकः सौम्यो गुडाकेशीपुरीपतिः ।
तथा भ्राता तृतीयश्च नाम्ना तु जयकाष्ठलः ॥ २ ॥
प्रयागनगरीराजो धार्मिकः शुभभावनः ।
त्रयाणां भूभृतां कुलगुरुश्च युगशावकः ॥ ३ ॥
राज्ञां सर्वे कुटुम्बं च बन्धवोऽन्ये सुहृज्जनाः ।
श्रेष्ठिनश्च प्रजाः सर्वाः स्वागतार्थं हरेस्तदा ॥ ४ ॥
दीनपासरितस्तीरे महोद्यानसुशोभिते ।
वियानाख्यनगर्यास्तु नातिदूरे कृतस्थले ॥ ५ ॥
स्वागतार्थं कृष्णनारायणस्य परमात्मनः ।
ध्वजपताकिकाडंकानिशानवाद्यकान्विताः ॥ ६ ॥
यानवाहनशकटीविमानरथसंहिताः ।
पुष्पमालाऽक्षतद्रव्यचन्दनगन्धधारिणः ॥ ७ ॥
राजसैन्यैः प्रजाक्लृप्तस्वसेवामण्डलैर्युताः ।
आसन् वै तत्परा व्योम्नि प्रतीक्षन्तः शुभागमम् ॥ ८ ॥
विमानं च विमानानि सूर्यतुल्यानि तावता ।
दुलोकिरेऽतितेजोभिश्चक्रुस्ते तु जयध्वनीन् ॥ ९ ॥

स्वागतध्वजदानानि दर्शयामासुरम्बरे ।
तदा वाद्यान्यवाद्यन्ताऽजायन्त यन्त्रगर्जनाः ॥१०॥
विमानावतरणार्थं सूचकाः सूचनां ददुः ।
प्रजाः सर्वा जयकारान् जगुः कीर्तनमिश्रितान् ॥११॥
हरेकृष्ण बालकृष्ण कृष्णनारायणप्रभो ।
परब्रह्म रमाकान्त राधाकान्त हरेविभो ॥१२॥
इत्येवं कीर्तनं ह्याभूल्लक्षाधिमानवैः कृतम् ।
नदीतीरश्च गगनं कीर्तनोद्घोषितं ह्यभूत् ॥१३॥
प्रजा द्रष्टुं तदाऽऽसँश्च उद्वेला इव वार्धयः ।
पूर्णिमेन्दुं प्रतीशेशेश्वरेश्वरं प्रति प्रभुम् ॥१४॥
महोद्याने विशाले तु हरेर्यानमवाऽतरत् ।
ततो यानानि सर्वाणि व्योम्नस्तत्र ह्यवातरन् ॥१५॥
नृपत्रयं तदमात्याः स्वागतं चक्रुरादरात् ।
प्रजाः सर्वाः स्वागतं च चक्रुस्तदा हरेः शुभम् ॥१६॥
अग्रजेन हरेः कण्ठे मणिहारः समर्पितः ।
द्वितीयेन हीरमाला हरेर्गलेऽर्पिता तदा ॥१७॥
तृतीयेन तु सामुद्रमौक्तिकस्रक् समर्पिता ।
राज्ञीभिश्च तदा स्वर्णमाला हरये चार्पिता ॥१८॥
पुत्रपुत्र्यादिभिः पुष्पमालाः कण्ठे समर्पिताः ।
पुष्पाक्षतैश्चन्दनाद्यैः सत्कृतः पूजितो हरिः ॥१९॥
प्रजाभिश्च धनाढ्यैश्चामात्यवर्गैः प्रपूजितः ।
श्रीहरिस्तत्पितरौ च भ्रातॄन् स्वसारमित्यपि ॥२०॥
ऋषीन् महर्षीन् भक्तांश्च ब्रह्मप्रियाश्च सेविकाः ।
सर्वान् सर्वास्तदा राजकुटुम्बाद्या ह्यपूजयन् ॥२१॥
गजासने समासीनं नत्वा राजकुटुम्बकम् ।
कृत्वा च दण्डवत् पादौ प्रक्षाल्य चरणामृतम् ॥२२॥
पपौ क्रमेण राजाद्याः प्रधानाश्च प्रजास्ततः ।
एवं सुस्वागतं कृत्वा कारयित्वा च पायसम् ॥२३॥
पानं फलादनं सर्वान् नगर्यां चाप्यभ्रामयन् ।
राज्यशोभितसैन्यैश्च वाद्यैर्विविधकैस्तथा ॥२४॥
कीर्तनैर्नामगानैश्च भ्रामयामासुरुत्सुकाः ।
हस्तियानं सुशोभं च विशालं प्रासरत् पुरः ॥२५॥
गोपुरे कन्यकाभिश्च वर्धितः कुसुमाऽक्षतैः ।
लाजाभिर्जलकलशैर्दुःखहाञ्जलिभिस्तथा ॥२६॥
घण्टापथे चापणस्थैर्धनिकैः पूजितो हरिः ।
मौक्तिकैः प्रोक्षितश्चाग्रे चतुष्के वनितागणैः ॥२७॥
प्रजाभिः सर्वथा सर्वाभिश्च चन्दनवारिभिः ।
पुष्पाक्षतादिभिर्नारिकेलैः फलैश्च कुंकुमैः ॥२८॥
शर्कराभिः पुष्पहारैः पूजितो वर्धितो हरिः ।
सर्वेषु राजमार्गेषु पौरस्त्रीभिः प्रपूजितः ॥२९॥
निरीक्षितश्च बहुधास्वरूपस्तृप्तिदः प्रभुः ।
कुमारीणां कमनीयः कुमारो विदितस्तदा ॥३०॥
युवतीनां मुग्धमूर्तिर्युवा सुविदितः प्रभुः ।
वृद्धानां बालरूपः सः पुत्रवद्विदितस्तदा ॥३१॥
विधवानां प्रभुः साक्षात् प्राप्यः स विदितस्तदा ।
सतीनां सत्स्वरूपश्चाऽनाथानां विदितोऽविता ॥३२॥
कुमाराणां शिक्षकश्च यूनां प्रशासकस्तथा ।
जरठानां प्राप्यरूपो विदितः परमेश्वरः ॥३३॥
भक्तानां प्रेमपात्राणां स्वामी स विदितो हरिः ।
दर्शकानां सुरूपश्च योगिनां ब्रह्ममूर्तिमान् ॥३४॥
ऋषीणां शंखचक्रादिधृगच्युतः प्रबोधितः ।
साधूनां च तदाऽनादिकृष्णनारायणः प्रभुः ॥३५॥
ज्ञातोऽभूत् सर्वलोकानां द्विभुजः परमेश्वरः ।
इत्येवं नगरे दत्वा दर्शनं भ्रामणेन वै ॥३६॥
आकृष्य जनताचित्तान्याययौ स्वे नृपालये ।
विशश्राम क्षणं तत्रोपदेशं लोमशो ददौ ॥३७॥
अयं नारायणः साक्षाद् राजन् श्रीपुरुषोत्तमः ।
प्राग्भवीयमनूनां च रवीणां भवतां कृते ॥३८॥
भक्तवश्यः प्रभुः साक्षाद् भक्तान् स्मृत्वाऽत्र चागतः ।
यज्ञो होमो जपो मालावर्तनं भजनं तपः ॥३९॥
ज्ञानं दानं सेवनं च साक्षात् कृष्णे विराजते ।
सर्वधर्माश्रयः कृष्णः सर्वपुण्यनिधिः स्वयम् ॥४०॥
येषां स मिलितः साक्षान्मानवर्षिस्वरूपवान् ।
तेषां तासां भवेत् सेवा कृष्णरञ्जनकारिणी ॥४१॥
यथा पत्यौ यथा पत्न्यां यथा वृद्धे च मातरि ।
गुरौ ज्येष्ठे पूज्यवर्गे यथा सेवा तथा हरौ ॥४२॥
साक्षात्कृता दिव्यरूपा पुरुषार्थचतुःप्रदा ।
गृहधर्मो यतिधर्मो यत्र भक्तिः सुविद्यते ॥४३॥
नित्यं तत्रैव वसतस्तावुभौ परमेश्वरे ।
सर्वात्मनाऽर्पणं कार्यं परमेशे परात्परे ॥४४॥
सत्पात्रे भगवान् साक्षात्प्राप्यते पुण्यकोटिभिः ।
क्षणं वित्तं क्षणं चित्तं क्षणो देहो धनं क्षणम् ॥४५॥
क्षणेन साधनीयः स भगवान् पुरुषोत्तमः ।
किं राज्येन धनेनापि कुटुम्बेन जनेन वा ॥४६॥
किं लक्ष्म्या चापि सम्पत्त्या किं मानेन च विद्यया ।
किं क्षेत्रेण स्त्रिया स्त्रीभिः पुत्रैः पुत्र्यादिभिश्च किम् ॥४७॥

किं यानेन विमानैश्च किं कीर्त्या यशसापि किम् ।
किं पुष्टेन सुरूपेण शरीरेण बलेन किम् ॥४८॥
यद्यनादिकृष्णनारायणो भावेन सेवया ।
अर्पणेन च भक्त्यापि तोषितो नहि जन्मनि ॥४९॥
आत्मा देयस्त्वात्मनो यत् सर्वं तत्राऽऽर्प्यमेव ह ।
भुक्तिर्मुक्तिश्चार्जनीये सर्वार्पणेन चाच्युतात् ॥५०॥
भवद्भिः राजभिश्चात्र कृतो यज्ञः शुभो महान् ।
अयं श्रीकम्भराबालो बालकृष्णः प्रतोषितः ॥५१॥
कृतकृत्या भवन्तो वै सर्वे प्राप्तं शुभास्पदम् ।
कर्तव्यं शिष्यते नैव यतोऽयं सुप्रसादितः ॥५२॥
इत्युक्त्वा विररामाऽसौ लोमशश्च ततः परम् ।
श्रीहरेश्चरणौ धृत्वा राजा स्वमस्तके न्यधात् ॥५३॥
राज्ञी राजकुमाराश्च राजपुत्र्यो हृदि न्यधुः ।
आज्ञां प्राप्य ययुः सर्वे हरिर्विश्रान्तिमाप ह ॥५४॥
भोजनादि संविधाय सर्वे निद्रां प्रजगृहुः ।
प्रातरुत्थाय च नित्यं विधिं कृत्वा हरिस्ततः ॥५५॥
निषसादासने रम्ये महर्षिकुलपूजितः ।
तावद् राजा तथा राज्ञी पुत्र्यः पुत्राः समाययुः ॥५६॥
उष्ट्रालश्चापि हंकारो जयकाष्ठल इत्यपि ।
प्रार्थयामासुरत्यर्थं चिरवासार्थमीश्वरम् ॥५७॥
हरिः प्राहाऽद्य भवतां जन्मसाफल्यमेव तु ।
दर्शनात्पूजनाज्जातं प्रसन्नताऽर्जिता मम ॥५८॥
येनाऽहं सम्प्रसन्नः स्यां तद्विधेयं सदाऽनघाः ।
चिरवासाय समयो विद्यते नहि सर्वथा ॥५९॥
हंकारस्याऽऽलये राष्ट्रे गन्तव्यमपि विद्यते ।
जयकाष्ठलराज्ये च गन्तव्यमपि विद्यते ॥६०॥
अत्र लाभो गृहीतश्च सन्तुष्टोऽस्म्यत्र पूजया ।
चरणस्पर्शनं भूमौ राज्यालये भवेदिति ॥६१॥
भवतां कामनापूर्तिं करोम्यद्यैव धार्यताम् ।
अद्य प्रातर्दुग्धपानं कृत्वा विमानयानकैः ॥६२॥
सर्वैर्गन्तव्यमेवाऽऽद्ये हंकारालयराष्ट्रके ।
मध्याह्ने भोजनं तत्र नगरभ्रमणं तथा ॥६३॥
पादन्यासादिकं कृत्वा मध्याह्नोत्तरमेव तु ।
जयकाष्ठलराज्ये वै गन्तव्यं तु तदालये ॥६४॥
तत्र पुर्यां भ्रमित्वा च पावयित्वा तदालयम् ।
रात्रौ च भोजनं कृत्वा विश्रम्य च निशां ततः ॥६५॥
अरुणोदयवेलायाम् आल्वीनरस्य राष्ट्रकम् ।
गन्तव्यं चेति तद्रीत्या कुर्वन्तु चानुकूलताम् ॥६६॥
ममाऽऽज्ञा सर्वथा पाल्या सुखं तत्रैव विद्यते ।
स्वल्पेऽपि समये दास्ये सौख्यं संख्याविवर्जितम् ॥६७॥
इत्याश्रुत्य हरेश्चाज्ञां भ्रातरस्त्रय एव ते ।
प्रसन्ना भगवद्वाक्ये तथैव चक्रुरादरात् ॥६८॥
उष्ट्रालस्याऽर्हणां प्राप्य प्रस्थानाय समुद्यतम् ।
भगवन्तं कृष्णनारायणं वै राधिके तदा ॥६९॥
उष्ट्रालस्य सुताः पञ्च पूजनं चक्रुरादरात् ।
पुत्र्यो दश हरेः पाणिं जगृहुः पतिकाम्यया ॥७०॥
पितृभ्यां मोदितास्तत्र विवाहविधिना हरिम् ।
प्रापुर्ब्रह्मप्रियाणां मण्डलेऽमिलन्समुत्सुकाः ॥७१॥
आशीर्वादाँस्तदा नीत्वा प्रस्थानमास्थितास्तदा ।
प्रस्थितेन च हरिणा सार्धं कन्याश्च भूभृतः ॥७२॥
विमानान्यधिरुह्याऽथ व्योम्ना शीघ्रं प्रतस्थिरे ।
गुडाकेशीं राजधानीं हंकारराजपालिताम् ॥७३॥
क्षणमात्रेण संप्रापुः शृण्वन्तो जयघोषणाम् ।
त्यक्तैः पुरोगतैश्चापि श्रावितां मंगलान्विताम् ॥७४॥
दीनपायाः सरितश्च तटे स्थितां सुशोभिताम् ।
गुडाकेशीं तु नगरीं महोद्यानसमन्विताम् ॥७५॥
शृंगारितां गोपुराद्यैस्तोरणैः कलशादिभिः ।
रंगवल्लीस्वस्तिकाद्यैर्ध्वजचिह्नैरलंकृताम् ॥७६॥
सम्मार्जितां गन्धजलैः संसिक्तां वाद्यनादिताम् ।
स्वागतार्थं प्रजाभिश्च पुर आगत्य गर्जिताम् ॥७७॥
हंकारः सकुटुम्बश्चाऽनुजेन सह पूर्वगः ।
स्वागतं सैन्यसहितश्चक्रे जयध्वजादिभिः ॥७८॥
विमानं तत्सूचनानुसारेण युगशावकः ।
ऋषिः सौधस्य निकटे व्योम्नोऽवाऽतारयत्तदा ॥७९॥
विमानानि चावतेरुस्तथान्यानि तदाम्बरात् ।
तूपशब्दास्तदा जाता जयनादाः सकीर्तनाः ॥८०॥
हरिर्विमानतस्तूर्णं चावतीर्णो महीतले ।
राजा हंकारकेणापि कुटुम्बेन हरिस्तदा ॥८१॥
वर्धितो वै जयध्वानैः पूजितश्चन्दनादिभिः ।
हरेश्चरणौ प्रक्षाल्य राजाद्याश्च पपुर्जलम् ॥८२॥
ततोऽश्वयाने श्रीकृष्णं समारोप्य पुरीं प्रति ।
उत्सवेन सह निन्ये राजा तद्राजमार्गकम् ॥८३॥
स्थले स्थले हरिं नत्वा प्रजाः पुपूजुरादरात् ।
उपदाः प्रददुश्चक्रुर्दर्शनं वन्दनादिकम् ॥८४॥
अमात्याः स्वगृहान् नीत्वा चक्रुश्चारार्त्रिकं प्रभोः ।
प्रजाः स्वस्वगृहान् नीत्वा पुपूजुः परमेश्वरम् ॥८५॥

एवं कृत्वा पावनीं च गुडाकेशीं पुरीं ततः ।
राजालयं ययुः सर्वे हरिः स्वर्णरथात्तदा ॥८६॥
अवतीर्य द्रुतं स्नात्वा मध्याह्नविधिमाचरत् ।
देवाय भोजनं चार्प्य स्वयं सर्वान् निजाश्रितान् ॥८७॥
भोजयित्वा च बुभुजे विशश्राम क्षणं ततः ।
राजानं सुप्रसन्नं च कृत्वा दत्वा शुभाशिषः ॥८८॥
मध्याह्नोत्तरवेलायां विमानेन ससार्थकः ।
जिगमिषुर्हरिः राज्ञ्या प्रार्थितः कन्यकादिभिः ॥८९॥
पूजितश्च ततः पञ्च कन्यका नृपतेस्तदा ।
पाणिं जग्राह कृष्णस्य मात्रा चाज्ञापितास्तदा ॥९०॥
कृतकृत्या अभवँश्च कुटुम्बं हर्षितं त्वभूत् ।
ब्रह्मप्रियासु ताः पञ्च मिमीलुर्दिव्यविग्रहाः ॥९१॥
अथ राजानमापृष्ट्वा राज्ञीं च तत्प्रजाजनान् ।
हरिर्विमानमारुह्य ससार्थश्चाम्बरं ययौ ॥९२॥
तदा वाद्यान्यवाद्यन्त जयशब्दास्तदाऽभवन् ।
दत्वा स दर्शनं शीघ्रं ययौ प्रयागपत्तनम् ॥९३॥
जयकाष्ठलनृपतेः राजधानीं शुभाश्रयाम् ।
महोद्यानान्वितां रम्यां सायं प्राप प्रभुस्ततः ॥९४॥
जयो राजा पुरो गत्वा स्वागतं प्रजया सह ।
आचरद् वाद्यघोषाद्यैर्ध्वजैः सैन्यैः सुशोभितैः ॥९५॥
सायं दृष्ट्वा पुरीं रम्यां प्रयागाख्यां विमानकम् ।
युगशावोक्तमार्गेण व्योम्नस्तदा भुवं प्रति ॥९६॥
अवातारयदीशेशः श्रीहरिः कृष्णवल्लभः ।
विमानानि चावतेरुः सौधस्य सन्निधौ तदा ॥९७॥
जलेन राजा चरणौ हरेः प्रक्षाल्य वै पपौ ।
हारमालादिभिः कृत्वा स्वागतं सुजलं ददौ ॥९८॥
सर्वान् जलानि मिष्टानि पाययित्वा ससैन्यकः ।
राजा स्वनगरीं कृष्णं भ्रामयामास सोत्सवः ॥९९॥
प्रजाभिर्मुख्यवर्गैश्च पूजितः परमेश्वरः ।
चरणैर्दर्शनदानैः पावयित्वा पुरीभुवम् ॥१००॥
राजसौधं समायाच्च भोजनादि ततोऽकरोत् ।
सर्वान् वै भोजयित्वैव विशश्राम निशामुखे ॥१०१॥
तद्राज्यगायकैर्गानैस्तोषितः परमेश्वरः ।
तेभ्यो ददौ चोपहारान् पारितोषिकहीरकान् ॥१०२॥
रात्रौ सुप्त्वा प्रगे तूर्यैः प्रबुबोध हरिस्ततः ।
नित्यं विधिं ब्राह्मकाले शीघ्रं चकार माधवः ॥१०३॥
राजा प्रजाः समागत्योपदा न्यधुर्हरेः पुरः ।
भ्रातृत्रयस्य तत्सर्वं युगशावाय सन्ददौ ॥१०४॥
अथ राज्ञी वैष्णवी च पञ्चपुत्रीसमायुता ।
आययौ पूजनार्थं च पञ्चकन्याः प्रपूज्य तम् ॥१०५॥
हरिं जगृहुः कान्तं स्वं मत्वा मोहवशंगताः ।
कुमारदानविधिना विवाह्य परमेश्वरम् ॥१०६॥
कृतकृत्याश्च ता जातास्ततो दुग्धानि वै पपुः ।
पाययामासुरत्यर्थं भगवन्तं कुटुम्बिनम् ॥१०७॥
राजानं च प्रजाः सर्वाः पाययामास माधवः ।
ऋषीन् देवादिकान् सर्वान् ब्रह्मप्रियादिकास्तथा ॥१०८॥
दुग्धादि पाययामास परमात्मा सनातनः ।
अथ गन्तुमनाः कृष्णश्चाशीर्वादान् ददौ तदा ॥१०९॥
सज्जोऽभूच्छीघ्रमेवाथ प्रस्थापितः प्रजादिभिः ।
विमानं शीघ्रमेवादौ दिव्यं समारुरोह सः ॥११०॥
अन्येऽप्यारुरुहुर्नैजविमानानि तदा द्रुतम् ।
जयमंगलशब्दैश्च प्रस्थानं चक्रिरे ततः ॥१११॥
वल्गुरायप्रदेशानां राजा तीराणनामकः ।
सकुटुम्बस्तथा ऋषिर्वल्गुरायः कुटुम्बवान् ॥११२॥
विमानेन हरिं श्रित्वा सह पूर्वं ययौ तदा ।
वल्गुरायप्रदेशाँश्च हरिर्ददर्श चाम्बरात् ॥११३॥
रमणीयान् सेविकाया नद्यास्तटे सुशोभनाम् ।
तीराणां राजधानीं च ततो ददर्श चाम्बरात् ॥११४॥
राधिके च विमानस्था अशृण्वन् मंगलस्वनान् ।
जयध्वानान् तूर्यशब्दान् जयशब्दान् प्रजोदितान् ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने उष्ट्रालयस्य हंकारस्य जयकाष्ठलस्य च नृपस्य राजधानीषु विमानैर्गमनं नगरेषु भ्रामणं पूजनं प्रतिपदि प्रातस्तीराणराजधानीं प्रति गमनमित्यादिनिरूपणनामा नवसप्तत्यधिकशततमोऽध्यायः ॥ १७९ ॥

श्रीकृष्ण उवाच—

ततः श्रीमद्धरिः स्वामी राधिके स्वविमानकम् ।
वल्गुरायर्षिणा सार्धं तीराणेन च भूभृता ॥ १ ॥
प्रदर्शितेन मार्गेण समवातारयत् क्षितौ ।
ततश्चान्यविमानानि त्ववतेरुस्तु पृष्ठतः ॥ २ ॥
जयशब्दास्तु तूर्याणां निनादाश्च तदाऽभवन् ।
हर्षशब्दाश्च नारीणां बालानां कलघोषणाः ॥ ३ ॥
प्रजानां स्वागतशब्दाश्चाभवम् परितस्तदा ।
पुष्पवर्षाऽक्षतवर्षा चान्दनी वृष्टिरित्यपि ॥ ४ ॥
अभूत्तदा विमानाद्वै यदा हरिर्बहिर्ययौ ।
अन्ये चापि महीमानाश्चावतेरुर्विमानतः ॥ ५ ॥

तीराणाख्यनृपस्तत्र नेमे चरणयोर्हरेः ।
कुटुम्बं राजकीयं च नेमे चरणयोर्हरेः ॥६॥
प्रक्षाल्य चरणौ पानं व्यधुः सर्वे कुटुम्बिनः ।
हेमहारान् रत्नहारान् मौक्तिकमणिसञ्चितान् ॥७॥
हरेः कण्ठे न्यधुः सर्वे परब्रह्मपरात्मनः ।
स्वागतं पुष्पमालाभिर्जयशब्दैः प्रचक्रिरे ॥८॥
रेण्डियारसप्तवाह्ये रथे राजा हरिं तदा ।
श्वेते निषादयामास तथाऽन्यान् वाजिवाहने ॥९॥
राजसैन्यैः कृतमानः प्रधानैर्हरिपूजितः ।
छत्रचामरशोभाढ्यो रेजे श्रीकृष्णवल्लभः ॥१०॥
तीराणाख्यनगर्यां वै बहुमानपुरःसरम् ।
श्रीहरिं सार्थसहितं भ्रामयामास भूपतिः ॥११॥
पूजयामासुरत्यर्थं प्रजाः सर्वाः स्थले स्थले ।
आमध्याह्नं प्रदायैवं दर्शनं च नृपालयम् ॥१२॥
देवसभासमं चेन्द्रसौधामं प्राप वै प्रभुः ।
विश्रान्तिं च क्षणं कृत्वा स्नानादिकमथाचरत् ॥१३॥
दुग्धपानादिकं सर्वानकारयदति नृपः ।
कृतपूजो हरिश्चापि भोजयित्वा कुटुम्बिनः ॥१४॥
महीमानान् ऋषीन् सर्वान् ब्रह्मप्रियाश्च सेवकान् ।
स्वयं च बुभुजे स्वामिकृष्णनारायणः प्रभुः ॥१५॥
राजाद्याश्च प्रसादं श्रीहरेरापुस्तदाशुभम् ।
आरामं कृतवन्तश्च सर्वे मध्याह्नकोत्तरम् ॥१६॥
राजा कुटुम्बसहितः कृष्णपादावमर्दयत् ।
देहसंवाहनं चक्रे सेवालाभमवापह ॥१७॥
अथ सायं सभास्थाने विशालाऽभूत् सभा तदा ।
लक्षशो मानवा यत्र निषेदुः सन्निधौ हरेः ॥१८॥
नार्यो नराश्च परितो निषेदुस्तस्थुरित्यपि ।
अथ राजा पुपूजैनं चोपदाभिः परेश्वरम् ॥१९॥
निषसादाऽऽसने राजा पप्रच्छ विनयान्वितः ।
कथं कृष्ण कृते राज्ये बन्धनं नोपसर्पति ॥२०॥
भवत्प्राप्त्या बन्धनानि छिन्नानीति च वेद्म्यहम् ।
तथापि बद्धभावत्वाद् यथा न बन्धनं भवेत् ॥२१॥
तथा शाधि महाराज कुटुम्बं वद शान्तिदम् ।
श्रुत्वैवं भगवानाह सभायां सर्वशृण्वताम् ॥२२॥
भवसागरतीरस्य प्रापकं प्रवदामि ते ।
यथा न बन्धनं मध्ये कुत्रचित् स्यात् कदाचन ॥२३॥
प्राणस्याऽन्नमिदं सर्वं नात्मनस्तु कदाचन ।
स्थावरं जंगमं सर्वं प्राणस्यैवास्ति भोजनम् ॥२४॥
स्थिते प्राणे तु तत्त्वानामपेक्षा वर्ष्मणि स्थिता ।
प्राणो वै प्रकृतेः कार्यं गते प्राणे न तृष्णिका ॥२५॥
मत्वैवं तु बुधो भक्ष्ये भोग्ये वर्तेत निस्पृहः ।
लुब्धवन्नैव वर्तेत विरागस्य न बन्धनम् ॥२६॥
यथाऽऽरुह्य महावृक्षमपहृत्य ततो मधु ।
वृक्षं त्यजति तत्रैव भुक्त्वा मधु ततः परम् ॥२७॥
मलं त्यजति तत्पश्चाद् देहस्त्याज्यो भविष्यति ।
इत्येवं चानुसन्धाय वर्तते न स बध्यते ॥२८॥
यथा मार्गे महान्तं वै जनस्त्वाशाशताकुलः ।
पतन् फलं न विन्देत निराशः सम्प्रजायते ॥२९॥
स्मृत्वा सर्वं तथा विश्वश्वलं मत्वा न बध्यते ।
आपत्काले यथा शक्तजनोऽपि याति मार्दवम् ॥३०॥
तथा वर्तेत मायायां मार्दवेन न बध्यते ।
यथा च जरया व्याप्तः शत्रुहस्तगतोऽपि वा ॥३१॥
भोग्याशां प्रजहात्येव तथावृत्तिर्न बध्यते ।
पर्वताश्च द्रुमाश्चापि नित्यसंन्यासयोगिनः ॥३२॥
ममकारं परित्यज्य वर्तन्ते निष्परिग्रहाः ।
तथावृत्तिः राज्यकर्ता निर्लेपो नहि बध्यते ॥३३॥
औदकाः सृष्टयः सर्वा आत्मभरणतत्पराः ।
परिग्रहं न कुर्वन्ति तथावृत्तिर्न बध्यते ॥३४॥
शृणु चात्रेतिहासं त्वं तापसानां हितावहम् ।
पुरा गृहान् परित्यज्य द्विजाः केचन वैष्णवाः ॥३५॥
वनमभ्यागमन् धीरा ब्रह्मचर्यपरायणाः ।
यतितुल्या रूपवन्तो ह्यजातश्मश्रवोऽपि ह ॥३६॥
इन्द्रो दयापरो भूत्वाऽऽबभाषे पक्षिरूपधृक् ।
अहो भवन्तो बाल्याद्वै त्यागमार्गमुपाश्रिताः ॥३७॥
कथं गता न गार्हस्थ्ये को हेतुस्त्यजनेऽनघाः ।
श्रुत्वा तदृषयः प्राहुर्निःस्पृहस्य तृणं जगत् ॥३८॥
गार्हस्थ्ये वा वने वापि तस्य बन्धो न विद्यते ।
वयं वै निस्पृहास्तस्माद्वनमार्गमुपाश्रिताः ॥३९॥
प्रक्षालनाद्धि पंकेन पंकाऽस्पर्शो हि चोत्तमः ।
पंकस्पर्शो यस्य जातस्तस्याऽपेक्षा जलस्य वै ॥४०॥
जलात्मकेन ज्ञानेन प्रक्षालनं वरं मतम् ।
यद्वा चातपयोगेन शुष्कभावो वरो मतः ॥४१॥
कर्दमः कृकचीभूत्वा स्वयं वियोगमाश्रयेत् ।
आराधनं हरेश्चास्त्यातपरूपं विशोधकम् ॥४२॥
यद्वा च वायुना शुष्कभावोऽपि चोत्तमो मतः ।
गुरुं वायुं समाश्रित्याऽविद्याकर्दमनाशनम् ॥४३॥

तस्माद् गुरुं महान्तं वै सन्तं वा परमेश्वरम् ।
तद्विज्ञानं समाश्लिष्य मायां विनाशयेत् सुधीः ॥४४॥
कर्माऽपि सर्वमेवैतल्लौकिकं वैदिकं च वा ।
कुर्वन्नैष्कर्म्यभावेन सिद्धिं विन्दति मानवः ॥४५॥
सिद्धिक्षेत्रमिदं पुण्यं पक्षिन् कर्मफलप्रदम् ।
देववंशान् पितृवंशान् ब्रह्मवंशान् सतो जनान् ॥४६॥
अनुसृत्यैव यत्कर्म तत्कर्म फलदं नृणाम् ।
वयं वर्तामहे ब्रह्मवंशमाश्रित्य वैदिकम् ॥४७॥
गार्हस्थ्यं चेत् तपोयुक्तं युज्यते मोक्षदायकम् ।
किन्तु विघ्नगृहं तद्वै वयं शान्ता यतस्ततः ॥४८॥
नैर्बल्ये सति सारल्यं चात्ममार्गस्य संश्रयेत् ।
सबलानां महामार्गो गार्हस्थ्यं बहुतापिनाम् ॥४९॥
न वयं प्रभवो वोढुं गृहधर्मानतो यमान् ।
साधुधर्मान् संश्रिताः स्मो यत्र श्रेयो ध्रुवं भवेत् ॥५०॥
संशये निर्णये चाद्यं त्यक्त्वा निर्णयमाश्रयेत् ।
श्रुत्वैवं वचनं तेषामृषीणां पक्षिराट् स्वयम् ॥५१॥
जगाद तान् गृहधर्मान् कठिनान् परमोत्तमान् ।
जले निमज्जितश्चापि जलस्पर्शातिरेकवान् ॥५२॥
वह्नौ तु पतितश्चापि दाहभावातिरेकवान् ।
कामधर्मे स्थितश्चापि कामनांशविवर्जितः ॥५३॥
कश्चिदेव भवेल्लोके समर्थः पुण्यावानपि ।
तादृशः स्याद् गृहस्थश्चेल्लभते श्रेय उत्तमम् ॥५४॥
त्यागेन त्वात्ममात्रस्य कल्याणं लभते जनः ।
गृहधर्मैरसंख्यानां कल्याणकृद्भवेज्जनः ॥५५॥
यथा सर्वास्तु सरितो विश्रान्तिं यान्ति वारिधौ ।
तथा सर्वाणि भूतानि विश्रमन्ते गृहिगृहे ॥५६॥
त्यागवन्तो महात्मानो निस्पृहा अपि योगिनः ।
गृहधर्मस्थितान् वृक्षान् सफलानाश्रयन्ति वै ॥५७॥
परोपकरणं तत्र गृहधर्मे प्रजायते ।
अतिथीनामाश्रयो वै पक्षिणां गृहधर्मवान् ॥५८॥
अर्जितं गृहधर्मैश्च नीत्या सत्येन युक्तया ।
विभज्यैव गृही भुंक्ते कुटुम्बाश्रितभिक्षुकान् ॥५९॥
नृपं चागन्तुकं चाप्यनाथं पिपीलिकादिकान् ।
स्मृत्वा तेभ्यो यथायोग्यं दत्वा भुंक्ते गृही सदा ॥६०॥
प्रातर्देवा हि तृप्यन्ति मध्याह्नेऽतिथिभिक्षुकाः ।
ततः परं च पितरश्चान्ते वै क्षुद्रजन्तवः ॥६१॥
गृहिणा रन्धितं चान्नं भुञ्जते सर्वदेहिनः ।
विघसाशी गृही तस्माद् दत्वा गृह्णाति नान्यथा ॥६२॥
घसं पापं स्वात्ममात्रोदरंभरत्वमुच्यते ।
विगतं तु घसं पापं यत्राऽन्ये यान्ति तर्पणम् ॥६३॥
यज्ञो दानं तपो होमः स्वाध्यायश्चेश्वरार्पणम् ।
षडेतानि यत्र सन्ति विघसाशित्वमेव तत् ॥६४॥
श्रेष्ठं वै सर्वधर्मेभ्यो विघसाशित्वमुत्तमम् ।
पालयित्वा च तद्धर्मं श्रेयः परममर्जयेत् ॥६५॥
लोकोऽयं भोगदस्तेषां स्वर्गोऽपि चातिसौख्यकृत् ।
ततोऽपि च फलाधिक्ये परं श्रेयो भवेदपि ॥६६॥
सर्वार्पणविधानेन प्राप्तव्यं परमं पदम् ।
नेदृशं कर्मभूमौ वै श्रेष्ठं त्वन्यद् गृहाश्रमात् ॥६७॥
अहमिन्द्रोऽस्मि यतयः कर्मणाऽऽप्तः सुरेशताम् ।
सूर्यचन्द्रादयः सर्वेऽभवन् प्राग् विघसाशिनः ॥६८॥
वर्तन्ते त्वधुना स्वर्गे विघसाशिन एव ते ।
वैकुण्ठस्थो हरिः साक्षाद् विघसाशी विराजते ॥६९॥
गोलोकेऽपि तथा कृष्णो विघसाशी विराजते ।
चतुर्भुजो वासुदेवो विष्णुश्च विघसाशनः ॥७०॥
हरो ब्रह्मा वसिष्ठाद्या विघसाशिन एव ते ।
वर्तन्ते भोगमार्गस्था अपि द्वन्द्वविवर्जिताः ॥७१॥
ईश्वरार्पणधर्माणो गमिष्यन्ति परं पदम् ।
एवं वै यतयो ब्रह्म गच्छन्ति विघसाशिनः ॥७२॥
सायं प्रातर्विभज्याऽन्नं कुटुम्बेऽतिथिभिक्षुके ।
परेशे च सुरे भूते पितरि स्वजनेऽपि च ॥७३॥
अनाथे चाश्रिते भृत्ये श्वादौ चानाथके तथा ।
नार्यां गवि च सम्प्राप्ते याचके च गुरावपि ॥७४॥
दासे दास्यां कर्मचारे प्रजायां भौतिकात्मसु ।
विभज्यान्नादिकं सर्वं यथायोग्यं तु धर्मतः ॥७५॥
अवशिष्टं समश्नन्ति ये ते स्युर्विघसाशिनः ।
ते लोकगुरवो भूत्वा जायन्ते शाश्वताशिनः ॥७६॥
त्रिदिवं च महद्राज्यं प्राप्य शाश्वतवार्षिकम् ।
ईश्वरार्पणपुण्येन प्रयान्त्यपुनरागमम् ॥७७॥
तस्माद् विघसभोक्तारो भवन्ति बन्धनोज्झिताः ।
गृहधर्मान् समाश्रित्य बहवस्तत्पदं ययुः ॥७८॥
तस्माद् भवन्तो बालाश्च भवन्तु विघसाशिनः ।
एतद् विदुस्तपो विप्राः सप्तर्षयस्तथा परे ॥७९॥
इत्युक्तास्ते धर्मयुक्तं वचः श्रुत्वा यतीश्वराः ।
त्यागाश्रमं विहायैव गार्हस्थ्यं समुपाश्रिताः ॥८०॥
चक्रुः सर्वार्पणं कृष्णे विघसाशा महर्षयः ।
आत्मनिवेदनधर्माश्रयाः सर्वे ततोऽभवन् ॥८१॥

सस्त्रीपुत्रकुटुम्बाढ्याश्रान्ते ब्रह्म ययुः पुरा ।
तस्माद् राजन् गृहधर्मः कठिनोऽपि सुखावहः ॥८२॥
परोपकारपुण्याढ्यः सत्सेवाप्रापकः सदा ।
परमेश्वरसेवादेर्लम्भदः श्रेष्ठको यतः ॥८३॥
विघसाशी भवान् नित्यं वर्तयतु सहाश्रितैः ।
सर्वेन्द्रियक्रियास्वेव कृष्णं ध्यायतु मां मुहुः ॥८४॥
बन्धनं ते न वै भावि मम योगात् कदाचन ।
मम योगात् सदा शान्तिस्तव राजन् भविष्यति ॥८५॥
रक्षाऽत्र प्रतिमां मे च कुरु सर्वार्पणं मयि ।
अनन्यभक्तं त्वां भूभृत् नयिष्ये ब्रह्मधाम ते ॥८६॥
ये ये ममार्पणधर्मपरायणा जना इह ।
तेषामहं समुद्धर्ता कर्मबन्धनसागरात् ॥८७॥
इत्युक्त्वा भगवाँस्तत्र विरराम प्रजास्तु ताः ।
पुपूजुः परमात्मानं मन्त्रान् जगृहुरादरात् ॥८८॥
विघसाशिव्रतवत्यो जाताः सर्वाश्च तद्दिनात् ।
इत्येवं राधिके सभां समाप्य भगवाँस्ततः ॥८९॥
स्नानसन्ध्यादिकं चक्रे ततश्च भोजनादिकम् ।
सर्वे ते महीमानाश्च भुक्तवन्तो विशश्रमुः ॥९०॥
राजा कुटुम्बसहितं सिषेवे निद्रितं हरिम् ।
प्रातर्बुबोध निनदैर्वाद्यानां श्रीहरिस्ततः ॥९१॥
कृत्वा नित्यविधिं सिंहासने चागत्य संस्थितः ।
तावद् राजादयः सर्वे त्वायन् पूजयितुं हरिम् ॥९२॥
बहूपदा अर्पिताश्च राज्ञा तीराणकेन वै ।
तस्य राज्ञ्यस्तथा कन्याः समाजग्मुः करेषु तु ॥९३॥
धृत्वा पूजनपात्राणि पुपूजुः परमेश्वरम् ।
राधिके ! कन्यकाः षट् च जगृहुः श्रीहरेः करम् ॥९४॥
कुमारदानमासाद्य कृतकृत्यास्तदाऽभवन् ।
अथ विश्रान्तिमासाद्य कृत्वा वै भोजनादिकम् ॥९५॥
अल्वीनरनरेशेन प्रार्थितो गन्तुमुत्सुकः ।
गिरीशर्षिवन्दितश्च सज्जोऽभवद्धरिस्तदा ॥९६॥
तदा वाद्यान्यवाद्यन्ताऽगायन्त गीतिकास्तथा ।
जयशब्दान् प्रशृण्वानः प्राप्य सत्करणादिकम् ॥९७॥
हरिर्निजं विमानं चाध्यारुरोह तथा परे ।
आरुरुहुर्व्योममार्गे विमानान्यभवँस्तदा ॥९८॥
मांगलिकनिनादैश्च यन्त्रशब्दादिभिस्तथा ।
वर्धितश्चाशिषा कृष्णनारायणस्तथा परे ॥९९॥
प्रतस्थिरेऽतिवेगेन विमानैः क्षणमात्रतः ।
गिरीशाख्यां भुवं प्राप्याऽब्धियुतं राष्ट्रमुत्तमम् ॥१००॥
प्रसन्नोऽभूद्धरिः शृण्वन् जयशब्दान् विलोकयन् ।
अल्वीनरः पुरो गत्वा स्वागतार्थमुपस्थितः ॥१०१॥
एति हरिर्महाराज इति प्रजाः समुत्सुकाः ।
द्रष्टुं स्वागतमाधातुं सज्जाश्चासन् भुवस्तले ॥१०२॥
विलोकयन्त्यश्चाकाशं कीर्तनं चक्रुरुत्सुकाः ।
राधिकेऽक्षतपुष्पादिधृतहस्ताः स्त्रियो नराः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने तीराणनृपराज्यं गत्वा तीराणनगर्यां ससैन्यस्वागतरूपेण भ्रमित्वा भोजनादि कृत्वा सायं सभायां विघसाशित्वधर्मोपदेशेन निर्बन्धनतामुक्त्वा रात्रौ विश्रम्य प्रातः पूजां प्रगृह्य भुक्त्वा सज्जो भूत्वा हरिर्द्वितीयायाम् अल्वीनरराज्यमाजगामेत्यादिनिरूपणनामाऽशीत्यधिकशततमोऽध्यायः ॥ १८० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके गोपि ! सश्रीकृष्णनरायणः ।
भाद्रकृष्णद्वितीयायामल्वीनरभुवं प्रभुः ॥ १ ॥
गिरीशमुनिनाऽऽदिष्टस्थले निजविमानकम् ।
पश्यन् प्रजाः प्रतीक्षन्तीर्व्योम्नोऽवातारयन्मुदा ॥ २ ॥
विमानानि तदाऽन्यानि चावतेरुस्ततोऽम्बरात् ।
अथश्रीराजधन्याः सन्निधावुद्यानभूस्तरे ॥ ३ ॥
गिरीशर्षिस्तथा राजाऽल्वीनरः सकुटुम्बकः ।
चकार स्वागतं वाद्यैः पूजनैर्हारचन्दनैः ॥ ४ ॥
विमानात् कृप्तसोपाननिःश्रेण्या बहिरंगणे ।
निःसरन्तं हरिं स्वर्णहारान् कण्ठेन्यधुर्जनाः ॥ ५ ॥
जयशब्दा वेत्रधारयशःशब्दास्तदाऽभवन् ।
सूतमागधबन्दीनां चारणानां यशोश्रितम् ॥ ६ ॥
श्लोकश्रवणमुत्कृष्टं वाणीजन्यं तदाऽभवत् ।
पुष्पाक्षतैश्च लाजाभिः स्वर्णमुद्रादिभिस्तथा ॥ ७ ॥
गोधूमैः पूजनं कृष्णस्याऽकुर्वन् जनतास्तदा ।
राजसौधे हरिं नीत्वा राजा सहकुटुम्बकम् ॥ ८ ॥
जलपानादि ताम्बूलं ददौ नेमे च पादयोः ।
पादप्रक्षालनं चक्रे राजा सुतसुतादियुक् ॥ ९ ॥
चरणामृतपानं च प्रचक्रे सकुटुम्बकः ।
दुग्धपानं ददौ तत्र सर्वेभ्यश्च ततः परम् ॥१०॥
शीघ्रं सैन्येन सहितो नगर्यां भ्रमणार्थकम् ।
यानं साश्वं सुवर्णोरथमानिनाय हरेः कृते ॥११॥

व्यराजद् भगवाँस्तत्र पितृभ्यां सहितो मुदा ।
भ्रातरश्चान्यमुनयो ब्रह्मप्रियादयस्तदा ॥१२॥
यानेषु शिबिकायां च रथेषु हस्तियन्त्रके ।
निषेदुश्च तदा वाद्यान्यवाद्यन्त जयैः सह ॥१३॥
वाहिनी सर्वशोभाढ्या प्रययौ नगरं प्रति ।
अर्थश्याख्यनगर्यां सा राजमार्गगताऽभवत् ॥१४॥
अमात्यै राजपुरुषैः श्रेष्ठिभिः प्रजया तथा ।
वर्धितः पूजितः साक्षाद् दृष्टः स्पृष्टः प्रभुर्मुहुः ॥१५॥
वन्दितश्चोपदाभिश्च सुप्रसादित इत्यथ ।
सर्वां नगरीं परितो भ्रमित्वा भगवान् पुनः ॥१६॥
उद्याने राजसौधे च समागत्य निजासने ।
विश्रान्तिमाप च सस्नावन्येऽपि श्रान्तिमागताः ॥१७॥
विशश्रमुः स्वभवने ततश्च बुभुजुः सुखम् ।
पक्वान्नानि ह्यनेकानि बुभुजुः परमादरात् ॥१८॥
तदाऽऽश्चर्यमभूद् राधे ! शृणु तत्कथयामि ते ।
क्रीतद्विपस्य वास्तव्यो ह्यर्थेष्टो राक्षसो महान् ॥१९॥
आगतो वै परीक्षार्थं लोकितुं तु हरेर्बलम् ।
प्रथमं तेन मिष्टान्ने मिष्टान्नसदृशीः शिलाः ॥२०॥
घृताक्ता भोजने दत्ता परिवेषकरूपिणा ।
ज्ञातवाँस्तद्धरिः शीघ्रं शिलाः सर्वा हरीच्छया ॥२१॥
मिष्टान्नतामवापुर्वै हित्वा ताः शैलतां तदा ।
स त्वाश्चर्यं गतस्तत्र ततश्चक्रे परीक्षणम् ॥२२॥
अपरं तच्छृणु राधे शय्यारूपो बभूव ह ।
उपरि मञ्चके रम्यं गेन्दुकं स प्रदर्श्य वै ॥२३॥
गुप्तं चाधः शूलशय्यामकरोत् श्रीहरेः कृते ।
हरिस्तां शूलशय्यां चाऽध्यारुरोह कृतादरः ॥२४॥
शूलाः सुवर्णपुष्पाणि कैसराण्यभवँस्तदा ।
तत्राऽप्याश्चर्यमाप्यैव निर्गतो राक्षसस्ततः ॥२५॥
उपानहौ विषेणापि योजिते कृतवाँस्तदा ।
परीक्षणं तृतीयं स चक्रेऽथ भगवानपि ॥२६॥
उपानहौ परिधायाऽमृतरूपे विधाय वै ।
अचलत् सुखतस्तत्र सौधे च परितः प्रभुः ॥२७॥
अथापि च चतुर्थीं स परीक्षां राक्षसोऽकरोत् ।
सभायामासनं दिव्यं सौवर्णं चाग्निमाव्यधात् ॥२८॥
हरिस्तत्र सभायां च गत्वाऽऽसनं तदाग्निकम् ।
स्पृष्ट्वा च शीतलं चक्रे सौवर्णं पुनरेव तत् ॥२९॥
तदाश्चर्यं परं प्राप्तो राक्षसो मानवर्जितः ।
मोक्षं स्वस्य निजं गेहमायातुं कृष्णमार्थयत् ॥३०॥
हरिस्तथास्त्वितिप्राह राक्षसं मूर्ध्नि वै तदा ।
ददौ स्वचरणौ यावत् तावद् देवो बभूव ह ॥३१॥
तुषितो नाम दिव्यः सः स्वर्गवासकरः सदा ।
पृष्टो जनैस्तदा सोऽपि वृत्तान्तमाह चात्मनः ॥३२॥
तुषितो नाम देवोऽहं पृथ्व्यामत्र यदृच्छया ।
भ्रमितुं त्वागतस्त्वत्र मया दृष्टाऽत्र सुन्दरी ॥३३॥
अर्थेष्टा नामतश्चात्र पुरा समुद्रसन्निधौ ।
प्रधर्षिता मया सा चाऽकस्माच्छापं ददौ च मे ॥३४॥
राक्षसो भव दुश्चेष्ट कन्याधर्षणतत्पर ।
अहं द्रागेव तु जातो राक्षसः क्रीतभूमिगः ॥३५॥
तव स्पर्शेन भगवन्नद्याऽहं शापवर्जितः ।
जातो देवः पुनः कृष्णनारायण जगत्प्रभो ॥३६॥
आज्ञा चेदहमेतस्यात् स्थलाद् यास्ये निजं गृहम् ।
हरिः प्राह प्रयाहि त्वं कुरूनुत्तरदिक्स्थितान् ॥३७॥
लालयनो मया पूर्वं सच्चिदानन्दभावनः ।
प्रेषितोऽस्ति मार्गयित्वा सूचनां मे प्रदेहि तम् ॥३८॥
गृहाण मन्त्रा देव त्वं ममाज्ञया प्रयाहि च ।
इत्युक्त्वा सम्प्रदायाऽस्मै मन्त्रान् अप्रेषयत् सुरम् ॥३९॥
व्योम्ना चोत्तरकेनाटान् देशान् सूचयितुं मुनिम् ।
हरिः स्वयं समायातः केतुमाले तु पश्चिमे ॥४०॥
मासान्तेऽत्राऽपि भगवानागमिष्यति निश्चयः ।
उवाच तं मुनिं गत्वा पालिपारसरस्तटे ॥४१॥
स्थितं पूर्वतटे शेषकाष्ठवनानदीयुते ।
जहर्षाऽतीव चाकर्ण्य निजनाथागमं मुनिः ॥४२॥
स्वागतं स मुनिश्चक्रे तुषितस्य तदा बहु ।
तुषितेन समं देशेष्वेवोत्तरे मुनिर्द्रुतम् ॥४३॥
जनेभ्यश्चाह कृष्णस्यागमनं चोत्सुकस्तदा ।
द्वौ तु बभ्रमतुः केनाटकेषु सर्वतोदिशि ॥४४॥
नाममन्त्रान् ददतुर्वै प्रजाभ्यश्चादरात् प्रभू ।
अथ श्रीभगवान् राधे !ऽल्वीनरस्याऽऽलये ततः ॥४५॥
रात्रौ सभां सुमहतीं प्रचक्रे तत्र माधवः ।
सम्मानितः पूजितश्चोपादिदेश प्रजाजनान् ॥४६॥
प्रजा वा राजवर्गो वा यतयो वा गृहस्थिताः ।
कुर्वन्तो योग्यकर्माणि समर्पयन्ति चेन्मयि ॥४७॥
बन्धनं न भवेत् तेषां कर्मणां च फलस्य च ।
अहं फलप्रदस्तेषां नैष्कर्म्यं तत्करोमि वै ॥४८॥
वित्तानि धर्मलब्धानि ये क्रतुषूत्सृजन्ति च ।
कृतात्मानः कर्मिणस्ते त्यागाश्रमिण एव ते ॥४९॥

न त्यागं त्यागमित्याहुरबन्धस्त्याग उच्यते।
औदासीन्यं परिगृह्य वृक्षवासस्तु यो जनः ॥५०॥
न करोति च वा किञ्चित् तामसो हि स उच्यते।
यदीश्वरे भवेद्दासः स तु नैर्गुण्यमाप्नुयात् ॥५१॥
कुर्वन् कर्माणि सर्वाणि सुखेच्छया मुहुर्मुहुः।
न देवं संस्मरेत् तत्र राजसानि तु तानि वै ॥५२॥
सुखार्थं कर्मणां त्यागो राजसः स मतो भवेत्।
कुर्वन् कर्माणि सर्वाणि मयि कृष्णे परात्परे ॥५३॥
यश्चार्पयति सर्वस्वं सुखेच्छया फलेच्छया।
सात्त्विकं तद् भवेत् कर्म त्यागोऽपि सात्त्विकः स तु ॥५४॥
फलेच्छावर्जितं कृत्वा मयि न्यस्यति यो जनः।
तद्भवेन्निर्गुणं सर्वं मत्सम्बद्धं मदर्थकम् ॥५५॥
यथागुणं च यत्कर्म तथा गृही निबध्यते।
अगुणं चेद् भवेत् कर्म मुच्यते न तु बध्यते ॥५६॥
एकतश्चाश्रमाश्चान्ये गृहस्थाश्रम एकतः।
गृहधर्मी कृष्णधर्मी भवेत् स निर्गुणाश्रमी ॥५७॥
मयि त्यक्तं सर्वकर्म मदात्मकफलं ददेत्।
शमो दमस्तथा धैर्यं सत्यं शौचं तथाऽऽर्जवम् ॥५८॥
यज्ञो धृतिश्च धर्मश्च नाऽस्य पार्थक्यमाप्नुयुः।
अभिमानकृतं कर्म मम स्मृतिविवर्जितम् ॥५९॥
यमद्वारा मृत्युपाशं कण्ठे कारयति द्रुतम्।
तस्मान्मानं विहायैव कुर्वन्तु कर्म मत्परम् ॥६०॥
गार्हस्थ्येऽपि तु मोक्षार्थं करिष्यामि मयि धृतम्।
असृजद्धि प्रजाः सर्वाः ब्रह्मा ममाऽऽज्ञया पुरा ॥६१॥
कर्मप्रवाहरक्षार्थं मम पूजार्थमित्यपि।
विरुधश्चापि वृक्षाँश्च यज्ञार्थे च तथौषधीः ॥६२॥
रसान् फलानि पत्राणि यज्ञार्थानि हवींषि च।
गार्हस्थ्यं पत्निकायुक्तं यज्ञं कर्तुं सदा मतम् ॥६३॥
युगलं देवदेवीनां पूजार्थं वै प्रशस्यते।
तत्संप्राप्य गृहस्था ये धनधान्यरसान्विताः ॥६४॥
न यजन्ते यदि देवान् किल्बिषं भुञ्जते तु ते।
ज्ञानयज्ञा विदुषां च सतामाराधना मखाः ॥६५॥
ऋषीणां स्वाध्याययज्ञा द्रव्ययज्ञास्तु भूभृताम्।
अन्नयज्ञाः कृषीशानां ध्यानयज्ञास्तु योगिनाम् ॥६६॥
सेवायज्ञाः सेवकानां स्त्रीणां शुश्रूषणं क्रतुः।
पुत्राणां पितृवाक्यानि ब्रह्म वै ब्रह्मचारिणाम् ॥६७॥
गृहस्थानां दानयज्ञास्तापसानां तपोमयाः।
एवं यज्ञाश्च विविधा भवन्ति योग्यतावशाः ॥६८॥
सर्वेषान्तु हरेर्भक्तियज्ञाः सन्ति विबन्धनाः।
तस्मात् कार्या यथायोग्यं यज्ञा मां वीक्ष्य तद्वतम् ॥६९॥
दास्ये मुक्तिं न सन्देहस्तुष्टो भूत्वा समर्पणैः।
राजभिः खलु दातव्या अश्वा गजा गवादयः ॥७०॥
दासा दास्योऽलंकृताश्च ग्रामा जनपदास्तथा।
वाटिकाश्च गृहक्षेत्रोद्यानानि विविधानि च ॥७१॥
तत्फलं शाश्वतं प्रोक्तं राज्ञां तत्तु विशेषतः।
अदातारोऽशरण्याश्च नृपाः किल्बिषभागिनः ॥७२॥
दोषाणामेव भोक्तारो न सुखानां कदाचन।
अनिष्ट्वा तु महायज्ञैरकृत्वा तर्पणादिकम् ॥७३॥
तीर्थेष्वनभिसंप्लुत्याऽनाराध्य परमेश्वरम्।
यदि प्रयाति पन्थानं पुनरावर्तते स वै ॥७४॥
छिन्नाभ्रमिव वा गन्ता लयं याति विनश्यति।
द्व्यक्षरं तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म चाऽमृतम् ॥७५॥
ममेति मृत्युरेवास्ति नममेति सदाऽमृतम्।
तद्द्वयं सर्वदा चास्ते निजे मूर्ध्नि च वा हृदि ॥७६॥
तत्र चाद्यं परित्यज्य परं प्राप्यं तु देहिभिः।
मार्गोऽयं सेवितः सद्भिर्भवद्भिः सेव्यतां सदा ॥७७॥
लब्ध्वा राज्यं सुकुटुम्बं धनानि सम्पदस्तथा।
यजते न प्रभुं यज्ञे निष्फलं तस्य तत् खलु ॥७८॥
अनाराधितदेवस्य स्वार्थमात्रं प्रजीवतः।
द्रव्यादौ ममभावस्य मृत्युः शिखां न मुञ्चति ॥७९॥
बाह्याभ्यन्तरवर्ती यो भूतानां नित्यसाक्षिकः।
यैरिहाराधितो द्रव्यैस्तान् मृत्युः प्रविमुञ्चति ॥८०॥
अपि समृद्धं भोगपूर्णं मानसं तृष्णया स्थितम्।
क्लीबं तन्मानसं प्रोक्तं ब्रह्मराज्यं न विन्दति ॥८१॥
न क्लीबो ब्रह्मवसुधां भुंक्ते भक्तिधनं न च।
न तु क्लीबालये देवार्चनमांगल्यमस्ति हि ॥८२॥
तस्मान्न क्लीबता कार्या परेशाराधने क्वचित्।
वृद्धैः सदा हरिः सेव्यस्तानन्येऽनसरन्ति हि ॥८३॥
वृद्धोन्मादादाश्रिताश्च स्युः सदोन्मादिनो यतः।
तस्मादुन्मत्तता त्याज्या मायारागादिसंभवा ॥८४॥
भजनीयः सदा कृष्णोऽनादिनारायणप्रभुः।
यज्ञः कृतो यथा तद्वत् कर्तव्यः सर्वदा गृहे ॥८५॥
ब्रह्मयज्ञः सदा कार्यो मोक्षं दास्ये न संशयः।
इत्युक्त्वा प्रददौ मन्त्रान् प्रजाभ्यश्च तदा प्रभुः ॥८६॥
राधिकेऽथ सभायास्तु परिहारोऽभवत्ततः।
रात्रौ विश्रम्य भगवान् प्रातः कृतविधिस्ततः ॥८७॥

गन्तुमियेष वै शीघ्रं जिनवर्द्धिनृपार्थितः ।
इष्टलवर्षिणा चाप्यर्थित इष्टालिराष्ट्रकम् ॥८८॥
राजा पूजां भोजनादि चानयत् सकुटुम्बकः ।
अल्वीनरस्ततः कृष्णो जग्राह तस्य चेष्टकृत् ॥८९॥
अन्येऽपि जगृहुः सर्वे हरेः सार्थास्ततः परम् ।
राज्ञी तस्य पञ्चकन्यासहिताश्चार्चयद्धरिम् ॥९०॥
पञ्चापि कन्यकास्तत्र जगृहुः श्रीहरेः करम् ।
विवाहविधिना कृष्णो ददौ ताभ्यः करं निजम् ॥९१॥
पूजां चाशीर्वचः प्राप्य गन्तुं सज्जोऽभवद्धरिः ।
पञ्चकन्या ब्रह्मप्रियादिभिः सह सुतत्पराः ॥९२॥
ययुः श्रीहरिणा सार्धं विमाने समुपाविशन् ।
विदायं प्राप्य भगवान् यानमध्यारुरोह च ॥९३॥
अन्येऽपि च तदा सर्वेऽरोहन् विमानकानि वै ।
तदा वाद्यान्यवाद्यन्त जयशब्दास्तथाऽभवन् ॥९४॥
प्रजाः सर्वा हरेकृष्ण हरेनारायणप्रभो ।
नामसंकीर्तनं चक्रुर्विमानानि तदाम्बरे ॥९५॥
इष्टलवप्रोक्तदिशां गतिं चक्रुर्जलोपरि ।
वार्धिखाडीं व्यत्यक्रामन् प्रापुः रामपुरीं ततः ॥९६॥
पश्चिमे खाडिकातीरे जिनवर्द्धिनृपः पुरा ।
अवाऽतरद् विमानाद् स्वात् स्वागतार्थं कुटुम्बवान् ॥९७॥
इष्टलवो महर्षिश्च प्रजाः सर्वास्तदा तटे ।
उद्यानसन्निधौ चासन् स्वागतार्थं प्रभोर्हरेः ॥९८॥
अश्रूयन्त विलोक्यैव विमानानि जयान्विताः ।
प्रजानादास्तूपनादाः संकीर्तनरवास्तथा ॥९९॥
इत्येवं राधिके सर्वं राष्ट्रं स्वागततत्परम् ।
तत्राऽभूत् संहितं पृथ्वी जनवार्धिसमाऽभवत् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरिर्भाद्रपदकृष्णद्वितीयायाम् अल्वीनरराज्यं गत्वाऽर्थश्रीनगरीं भ्रमित्वा भुक्त्वा राक्षसमुक्तिं कृत्वा तं तुषितदेवम् उत्तरान् कुरून् सम्प्रेषयित्वा सभायामुपदिश्य पूजां संगृह्य विश्रम्य प्रातर्भोजनोत्तरं जिनवर्द्धिनृपराजधानीं प्रति प्रतस्थे चेत्यादिनिरूपणनामैकाशीत्यधिकशततमोऽध्यायः ॥ १८१ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽनादिकृष्णनारायणो हरिः ।
इष्टलवर्ष्युपादिष्टस्थले निजविमानकम् ॥ १ ॥
अवातारयदुद्याने विशाले भूतले शुभे ।
त्रिवरायाश्चापगायास्तटस्थे सुद्रुमाकुले ॥ २ ॥
रामपुर्या नगर्यास्तु निकटे वाद्यनादिते ।
जिनवर्द्धिनृपोऽमात्यैः कुमारैर्बान्धवैः सह ॥ ३ ॥
प्रजाभिश्च हरेस्तत्र सुस्वागतं चकार ह ।
पुष्पहारान् हीरकाढ्यस्वर्णहारान् गले ददौ ॥ ४ ॥
बहिश्चावतरन्तं श्रीहरिं विमानकात् प्रजाः ।
सर्वाश्चन्दनलाजाभिश्चाक्षतैः कुसुमादिभिः ॥ ५ ॥
जयशब्दैर्हर्षनादैर्नमनैरर्हणां व्यधुः ।
पितरौ बान्धवान् सर्वान् भगिनीं च गुरूनृषीन् ॥ ६ ॥
ब्रह्मप्रियाश्च सर्वे ते पुपूजुर्हारचन्दनैः ।
अथ सैन्यसहाये च गजयाने सुवर्णजे ॥ ७ ॥
हरिमारोहयामास राजा तु जिनवर्धकः ।
महीमानान् समस्तांश्चारोहयामास भूरिषु ॥ ८ ॥
वाहनेषु विमानेषु गन्त्रीषु शकटीष्वपि ।
वाद्यकीर्तनसंह्लादोत्सवैः कृष्णनरायणम् ॥ ९ ॥
रामपुर्यां नगर्यां सम्भ्रामयामास सर्वशः ।
राजमार्गेषु सर्वत्र प्रजाभिः पूजितो हरिः ॥१०॥
फलपुष्पाक्षतरौप्यस्वर्णमुद्राम्बरादिभिः ।
एवं वै दर्शनं दत्वा राजसौधं समाययौ ॥११॥
वर्धितो जनताभिश्च शुशुभे परमेश्वरः ।
आनन्दपूर्णहृदयः सायं सभामकारयत् ॥१२॥
लक्षावधिमनुष्याणां प्रियकार्यार्थहेतवे ।
जलपानं हरिः कृत्वोपादिदेश प्रजास्तदा ॥१३॥
दिव्ये सिंहासने तत्रासीनः प्रसन्नभावनः ।
भगवत्कार्यकर्तारो भगवच्चरणाश्रयाः ॥१४॥
भगवद्ध्यानसम्पन्नाः प्रयान्ति परमां गतिम् ।
सतां सेवाप्रकर्तारः सतां वा चरणाश्रयाः ॥१५॥
सतां मार्गे प्रगन्तारः प्रयान्ति परमां गतिम् ।
स्मृद्धयो भूमिकाजन्याश्चान्ते भूमौ विशन्ति हि ॥१६॥
ता यदि स्युः सतामर्थं हर्यर्थे मोक्षदाश्च ताः ।
पृथ्वी ददाति चान्नानि मेघा अपो ददत्यपि ॥१७॥
वह्निः पाकं करोत्येव वायुः करोति रूक्षताम् ।
संविधायैव ते सर्वे शय्याभोग्यधनानि च ॥१८॥
मानवार्थे ददत्येव मानवैरर्प्यमीश्वरे ।
विनाऽर्पणं परेशे तु सम्पदो विपदो ननु ॥१९॥
नारकिण्यो भवन्त्येवान्तेऽपि निरयसम्प्रदाः ।
तस्माद् भूतैस्तु या दत्ता विभूतयोऽतिगौरवात् ॥२०॥

अर्पणीया हरौ सर्वास्तास्तदा मोक्षदाः खलु ।
समुद्रोऽपि कृतस्तेन पृथिवी तेन निर्मिता ॥२१॥
सस्यानि तेन देवेन कृतानि कणदानि तु ।
देहस्तेन कृतश्चापि बीजं तेन विनिर्मितम् ॥२२॥
सजातीयं कृतं तेन भोग्यं दत्तं समानकम् ।
येन दत्तमिदं सर्वं तस्मै देयं परात्मने ॥२३॥
स एव भगवानत्र भूतले लोकहेतवे ।
देहिनां श्रेयसे चास्ते दृग्गोचरः सुखप्रदः ॥२४॥
सेवनीयस्तोषणीयः प्रयत्नेनाऽवगत्य च ।
एवं ज्ञात्वा मम सेवां करिष्यन्ति तु ये जनाः ॥२५॥
तानहं तूद्धरिष्ये वै जन्मसंसारवारिधेः ।
अहं दण्डप्रदाताऽस्मि दण्डो मया विनिर्मितः ॥२६॥
यदाश्रयं विना दण्डपात्राणि देहिनः खलु ।
दण्डदातारमेवात्र मामाश्रयन्तु सर्वथा ॥२७॥
राजसु यो मया क्षिप्तो दण्डो वश्यः स मे सदा ।
यमे चापि मया न्यस्तो दण्डो विकर्मिशासकः ॥२८॥
दण्डः शास्ति प्रजाः सर्वा धर्मदण्डः प्ररक्षति ।
दण्डो जागर्ति सुप्तेषु धर्मार्थकाममोक्षकृत् ॥२९॥
धान्यं धनं स्त्रियः पुत्रा भृत्याः पुत्र्यश्च वाटिकाः ।
धर्मो न्यायश्च मर्यादा रक्ष्यन्ते दण्डभीतितः ॥३०॥
मातृदण्डभयाद्बाला कलहं न प्रकुर्वते ।
राजदण्डभयादेके पापाः पापं न कुर्वते ॥३१॥
देवदण्डभयाद् दुष्टा अन्यायं नाश्रयन्ति हि ।
यमदण्डभयाश्चापि परलोकभयादपि ॥३२॥
परस्परभयाश्चापि नियम्यन्ते प्रजा इह ।
एवं सांसिद्धिको लोको भयाद्धर्मे व्यवस्थितः ॥३३॥
दण्डस्यैव भयात्सर्वे न खादन्ति परस्परम् ।
राजदण्डो धर्मदण्डो यमदण्डस्तथाऽपरः ॥३४॥
देवदण्डः प्रधानास्ते रक्षन्ति विविधाः प्रजाः ।
अदण्डिकाः प्रजाश्चेत्स्युर्निमज्जेयुर्महान्धसि ॥३५॥
अदान्तानप्यशिष्टांश्च दमयत्येव दण्डकः ।
आज्ञादण्डो ममाऽस्त्येव ममाज्ञा वैदिकी हि सा ॥३६॥
तामनुत्सृज्य गन्तारो यान्ति दण्डस्य पारताम् ।
नेताऽहं सर्वसृष्टीनां शासको रक्षकस्तथा ॥३७॥
राजस्वाविश्य तिष्ठामि वर्तयामि च शासने ।
प्रजाः सर्वास्तथा सर्वान् नृपान् नियमरूपवान् ॥३८॥
यत्र दण्डो मम याति चरते सूद्यतः सदा ।
प्रजास्तत्र न मुह्यन्ति नेयुः सन्मार्गभ्रंशताम् ॥३९॥

मनुष्याः पशवः पक्षवन्तोऽपि कीटमक्षिकाः ।
दण्डस्यैव भयादेते यथार्थे वर्त्मनि स्थिताः ॥४०॥
नाऽभीतो यजते कश्चिन्नाऽभीतो दातुमिच्छति ।
नाऽभीतश्च जनः कश्चित् समये स्थातुमिच्छति ॥४१॥
रुद्रः स्कन्दो महेन्द्रश्च वह्निश्च वरुणो यमः ।
कालो वायुः कुबेरश्च रविर्मृत्युः शनिस्तथा ॥४२॥
वसवो मरुतः साध्या विश्वेदेवाश्च राक्षसाः ।
एतेऽपि भयमापन्ना दण्डस्य नियमे स्थिताः ॥४३॥
एतान् प्रजास्तथा भीताः प्रणमन्ति मुहुर्मुहुः ।
भयं न चेद् भवेल्लोके विनश्येयुः परस्परम् ॥४४॥
दण्डस्यैव भयाद्भीतो धर्मे सर्वैः प्रवर्तते ।
चातुर्वर्ण्यप्रमोदाय सुनीतिरक्षणाय च ॥४५॥
दण्डभीतिस्तु विहिता धर्मार्थौ रक्षितुं सदा ।
ताभ्यां मोक्षो भवेत् पश्चाद् योऽस्ति मन्मूर्तिमाश्रितः ॥४६॥
यदि धर्मान्न बिभियुः श्वापदाद्या विजातयः ।
अद्युर्ज्ञातिं निजां सिंहादयः क्रूरा वनश्रिताः ॥४७॥
मनुष्याश्चापि संभूय चाद्युः प्रसह्य वै मिथः ।
विश्वक् लोपः प्रवर्तेत भिद्येरन्नीतिसेतवः ॥४८॥
चरेयुर्नाश्रमं कर्म कन्या नोद्वहनं लषेत् ।
युवती नाश्रयेत् कान्तं प्रेष्या त्वाज्ञां न चोद्वहेत् ॥४९॥
नरस्तिष्ठेन्न नियमे शीले धर्मभयं विना ।
धर्मे स्वर्गो मनुष्याणां लोकश्चायं प्रतिष्ठितः ॥५०॥
धर्मो भक्त्याश्च सहितो निर्गुणत्वाय कल्पते ।
नात्यन्तं गुणवत् किञ्चिन्न चाऽप्यत्यन्तनिर्गुणम् ॥५१॥
उभयं सर्वलोकेषु दृश्यते साध्वसाधु वा ।
साधु विचार्य कर्तव्यं त्यक्तव्यं यन्न साधु तत् ॥५२॥
सतां समागमः साधुः श्रीहरेर्मे सदाश्रयः ।
सर्वार्पणविधानेन कर्तव्यो मे समागमः ॥५३॥
अवध्ये शासके कृष्णे मयि न्यस्ता हि ये जनाः ।
न ते वै कालमायादेर्भयेन स्युः प्रपीडिताः ॥५४॥
तस्माद् भागवतं धर्मं पालयन्तु प्रजाजनाः ।
ममाऽऽज्ञा दण्डरूपाऽस्ति सुखदा भयवर्जिता ॥५५॥
निर्भयाः सन्तु सर्वेऽत्र मानवा इष्टलीस्थिताः ।
स्वस्ति वोऽस्तु जिनवर्द्धे इष्टलवाश्रयस्थिते ॥५६॥
इत्युक्त्वा विररामाऽसौ भगवान् पुरुषोत्तमः ।
ततो नीराजनं चक्रुः पूजनं श्रीहरेस्तदा ॥५७॥
पित्रोश्च बान्धवानां च राजाद्याः सुसमुत्सुकाः ।
राज्ञ्याद्याः पूजनं चक्रुर्ब्रह्मप्रियादियोषिताम् ॥५८॥

उपदाश्च न्यधुः सर्वाः स्वर्णरूप्यकहीरकान् ।
आभूषणानि वस्त्राणि मणीन् पात्राणि मौक्तिकान् ॥५९॥
रत्नानि चोपकरणान्यधुर्विविधकानि च ।
मन्त्राँश्च जगृहुः सर्वे नरा नार्योऽवशेषिताः ॥६०॥
ततश्चक्रुः परिहारं सभायाः श्रीहरिस्ततः ।
बुभुजे दुग्धपुरिकादिकं चान्येपि सर्वशः ॥६१॥
महीमाना बुभुजुश्च प्रसादं जगृहुः प्रजाः ।
राजाद्याश्च ततो नैजं स्थानं ययुस्ततो हरिः ॥६२॥
निद्रां जग्राह रात्रौ च प्रातरुत्थाय वै हृदि ।
ध्यात्वा रूपं परं नैजं शुश्राव मंगलस्वनान् ॥६३॥
नित्यविधिं विधायैव यावत्स्वस्थोऽभवत्तदा ।
राजा पक्वान्नपात्राणि दुग्धादीन्यानिनाय ह ॥६४॥
आर्पयद्धरये प्राघूणिकेभ्यस्तेऽदनं व्यधुः ।
अथ मध्याह्नकाले च भुक्त्वा विश्रान्तिमाययुः ॥६५॥
हरिं तु भुक्तवन्तं वै राज्ञी कन्याश्च सप्त वै ।
सेवितुं त्वागताः पुष्पहाराद्यर्पणमाचरन् ॥६६॥
भूषणानि विचित्राणि धारयामासुरीश्वरम् ।
आभूषयित्वा श्रीकृष्णं नारायणं सुरूपिणम् ॥६७॥
करे च जगृहुः कन्याः सप्त विवाहकर्मणा ।
कृतकृत्या बभूवुश्च प्राप्य श्रीकृष्णवल्लभम् ॥६८॥
ब्रह्मप्रियासु मिलिता वैष्णव्यः सुखपूरिताः ।
अथ राधे तदा सर्वे पुपूजुर्युगलानि वै ॥६९॥
ततश्चैकं महाश्चर्यमभूच्छृणु वदामि ते ।
कश्चिद् दीनजनोऽनाथ इवाऽऽयातो हरेः पुरः ॥७०॥
आक्रोशन्नाह भगवन् मम बालं कुमारकम् ।
पुत्रीं चैकां जहारात्र राक्षसः कश्चिदेव ह ॥७१॥
प्रजापुत्रान् प्रजापुत्रीर्हरन्ति राक्षसाः परे ।
मारयन्ति जनाँश्चापि पृष्ठे गच्छन्ति तानपि ॥७२॥
भूत्वा हरन्ति चाद्रौ तान् वृद्धान् यूनोऽपि राक्षसाः ।
तस्माद् रक्ष महाराज नारायण परेश्वर ॥७३॥
पर्वतीयप्रजाः सर्वाः कृपानाथ कृपां कुरु ।
इत्युक्तः श्रीहरिस्तूर्णं राधे सज्जो बभूव ह ॥७४॥
धृत्वा सुदर्शनं सूक्ष्मं चांगुल्यां चोर्मिकासमम् ।
गूढतेजोऽन्वितं शीघ्रं गन्तुं चेयेष तत्स्थलम् ॥७५॥
तावद् राजा जिनवर्द्धिश्चापि शस्त्रसमन्वितः ।
सज्जोऽभवच्च हरिणा सार्धं दीनाऽवनोद्यतः ॥७६॥
तावत्तत्र समायातो राजा नाम्नाऽल्पकेतुकः ।
आल्पपर्वतराज्येशः प्राह नत्वा हरिं तदा ॥७७॥
मम राज्यं पावनं त्वं कुरु श्रीपरमेश्वर ।
आप्यायनो महर्षिश्च तथैवाऽऽर्थयदीश्वरम् ॥७८॥
तथाऽस्त्विति हरिः प्राह जगादोदन्तकं तथा ।
राक्षसस्य क्रूरकर्माऽनाथस्य परिरक्षणम् ॥७९॥
अल्पकेतुश्च तच्छ्रुत्वा शस्त्रसज्जो विमानके ।
निषसाद विमानेऽपि हन्तुं राक्षसपुंगवम् ॥८०॥
विमानैश्च तदा सर्वसैन्यान्यपि च सत्वरम् ।
शस्त्रास्त्रयन्त्रयुक्तानि युद्धार्थं चाम्बरेऽभवन् ॥८१॥
राज्ञा राज्ञ्यादिभिश्चापि प्रजाभिः पूजितः प्रभुः ।
अल्पकेतोर्गृहं यास्यन् हनिष्यतीति राक्षसम् ॥८२॥
विज्ञाय च श्रीहरये दत्तान्युपायनान्यपि ।
गृहीत्वा सुविदायं सर्वेभ्यो दत्वा शुभाशिषः ॥८३॥
विदायतूर्यनिनदान् युद्धभेरीप्रगर्जनाः ।
श्रुत्वा धृत्वा पुष्पहारान् यानमध्यारुरोह च ॥८४॥
अन्ये प्राघूणिकवर्गाः सार्थाः सर्वे हरेस्तदा ।
विमानानि समारुह्य जयशब्दान् प्रचक्रिरे ॥८५॥
अनाथोऽपि जनः कृष्णविमाने दर्शकोऽभवत् ।
तन्निदर्शितमार्गेण यानानि गतिमाचरन् ॥८६॥
क्षणमात्रेण शैलं तम् अपिनार्यं प्रपेदिरे ।
पूर्ववार्धिखाडिकायाः पश्चिमे चायताद्रिकम् ॥८७॥
दुर्गमं कण्टकारण्यैः पाषाणैर्गण्डशैलकैः ।
हिंस्रप्राणिनिवासैश्च राक्षसैश्च विशेषतः ॥८८॥
ज्वालमालावृतशैलरसविघ्नैर्विशेषतः ।
आकाशात्पर्वतेऽधित्यकायां तु गह्वरं महत् ॥८९॥
यन्मुखे राक्षसा आसन् वृक्षोऽधःकृतकेतनाः ।
भयंकरा विवस्त्राश्च पशुमांसाशना अपि ॥९०॥
नरमांसादनाश्चापि दिगम्बरा भयंकराः ।
अस्थिशस्त्रान्विता मन्त्रजालशस्त्रविदस्तथा ॥९१॥
विमानस्थोऽनाथभक्तो दर्शयामास तां दिशाम् ।
हरिर्विलोक्य बुबुधे राक्षसानां तदालयम् ॥९२॥
नरनाट्यधरः कृष्णो वेत्ति सर्वं तथापि वै ।
तदा प्राह महायुद्धं दारुणं संभविष्यति ॥९३॥
इमे तु राक्षसा घोरा विना रुद्रं तु शंकरम् ।
अशक्या हन्तुमेवात्रेत्युक्त्वेशानमुवाच ह ॥९४॥
रुद्र रुद्र महाबाहो मम बाहो सुरेश्वर ।
योधनार्थं प्ररक्षार्थं मया त्वमत्र वै सदा ॥९५॥
मम पार्श्वे रक्षितोऽसि कार्यं ते समुपस्थितम् ।
धारयोग्रं महद्रूपं संहरैतान् महासुरान् ॥९६॥

मारयैतानीशसंज्ञेशानदेवोऽर्थवान् भव ।
इत्येवं स्वविमानस्थं क्षेत्रपालेश्वरं हरम् ॥९७॥
महारुद्रं महाराजः प्रोक्त्वा युद्धार्थमैरयत् ।
तावद् रुद्रो महेशानस्त्यक्त्वा शान्तं तु भावनम् ॥९८॥
विकरालं स्वरूपं सन्दधार शैलसदृशम् ।
आकाशे तु विमानानि हरिणा चक्रसदृशम् ॥९९॥
व्यूहं प्रकारयित्वैव स्थिरीकृतानि सर्वथा ।
जिनवर्द्धिमहाराजस्तथाऽल्पकेतुभूपतिः ॥१००॥
आज्ञां चक्रतुर्वाद्यानां युद्धावेदनमर्दने ।
युद्धवाद्यान्यवाद्यन्त शूरा रक्तदृशोऽभवन् ॥१०१॥
शंखा भेर्यो बिगुलानि तदाऽवाद्यन्त सर्वशः ।
जयशब्दाश्च वीराणां युद्धार्थमभवँस्तदा ॥१०२॥
राक्षसा दशसाहस्रा मारीशायां तदाऽभवन् ।
ते च शर्वे विदित्वैवाकस्माद् युद्धनिनादकान् ॥१०३॥
सज्जा भूत्वा निर्ययुश्च मारीशानगरीमुखात् ।
आकाशमार्गगा सर्वे गह्वरं प्राप्य विस्मिताः ॥१०४॥
नष्टमाना इव चासन् महायुद्धजयार्थिनः ।
राधिके तु तदा रुद्रगोमुखं व्यनदद् बहु ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जिनवर्धिनृपराज्ये रामपुरीं पावनीकृत्योपदिश्य भुक्त्वा विश्रम्य पूजां प्राप्य जनहारिराक्षसविनाशार्थं सविदायम् अपिनायाऽद्रिं हरिर्जगामेत्यादिनिरूपणनामा द्व्यशीत्यधिकशततमोऽध्यायः ॥ १८२ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके श्रुत्वा रणभेरीस्तु राक्षसाः ।
कृत्वा किलकिलाशब्दान् सक्थिस्फोटान् भयंकरान् ॥ १ ॥
कम्पयन्तश्च पृथिवीं नादयन्तो दिशस्तथा ।
अट्टहासान् प्रकुर्वन्तो युद्धार्थे कृतनिश्चयाः ॥ २ ॥
भल्लान् शूलानसीन् खड्गान् मुद्गरान् मुशलानि च ।
प्रस्तरान् सर्जवृक्षाँश्चोपलाः संगृह्य चाम्बरे ॥ ३ ॥
योधनार्थं समुत्पेतुर्धृतपर्वतविग्रहाः ।
अस्त्रशस्त्रान्विताः सर्वे दशसाहस्रसंख्यकाः ॥ ४ ॥
मारयन्तु खादयन्तु चर्वयन्तु विमानगान् ।
बन्धयन्तु मर्दयन्तु मोचयन्त्यसुभिश्च तान् ॥ ५ ॥
छिन्दन्तु करपादादि शिरांसि पातयन्तु च ।
भक्षयन्तु नरदेहान् हरन्तु कन्यकास्त्विमाः ॥ ६ ॥
प्रज्वालयन्तु यानानि यन्त्राणि भञ्जयन्तु च ।
चूर्णयन्तु मस्तकानि विमानानि हरन्तु च ॥ ७ ॥
इत्येवं बहुजल्पास्ते राक्षसाः सैन्यसदृशाः ।
आकाशे परितो भूत्वा गत्वोर्ध्वं क्षेपणैस्तदा ॥ ८ ॥
पाषाणमारं चक्रुश्च बाणवृष्टिं भयंकरीम् ।
नाराचवृष्टिं गोलानां वृष्टिं चक्रुः प्रदाहिकाम् ॥ ९ ॥
तदा हरिः समुद्रं च तथा चन्द्रमसं द्रुतम् ।
सस्मार तावुभौ मूर्तिमन्तावागत्य नेमतुः ॥१०॥
हरिः प्राह जलैश्चाप्यमृतैः शमयतं त्विमम् ।
वह्निं शीघ्रं गोलकानां तौ तथा चक्रतुर्मुदा ॥११॥
समुद्रो वर्षणं चक्रे बाष्पाणां जलसंभृताम् ।
चन्द्रोऽमृतं द्रुतं तत्र वर्षयामास वह्निहृत् ॥१२॥
अथ राजा जिनवर्द्धिश्चाल्पकेतुर्महाबलौ ।
नाराचैः शतसाहस्रैर्निजघ्नुः राक्षसाँस्तदा ॥१३॥
अर्धचन्द्रैस्तथा भल्लैर्द्वेधा छिन्नाः पतन्ति ते ।
राक्षसा भूतले पादकरान् क्षिप्त्वा जलं जलम् ॥१४॥
प्रलपन्तस्त्यजन्त्येव प्राणान् पार्वतदुर्गमे ।
राजसैन्यानि भूस्थानि तूपगोलैस्तदाऽम्बरे ॥१५॥
राक्षसान् मारयन्त्येव पातयन्ति च जीवतः ।
दृष्ट्वैवं घोरकदनं मन्त्रमालिन्यकारिकाः ॥१६॥
राक्षस्यो गह्वरात्तत्र बहिरागत्य सत्वरम् ।
शतसाहस्रसंख्यास्ता उत्पेतुश्चाम्बरे तदा ॥१७॥
मन्त्रकृतैर्मृषोद्भूतैः राक्षसैः खड्गधारिभिः ।
पातयामासुरेवैतौ राजानौ चाम्बराद् भुवि ॥१८॥
सैन्यानि मारयामासुः कृत्रिमैः राक्षसैस्तु ताः ।
मानवानां तु सैन्यानां मर्दनं समजायत ॥१९॥
हाहाकारो विमानेषु तदाऽभवत् समन्ततः ।
म्रियमाणौ नृपौ दृष्ट्वा द्रुतं कृष्णनरायणः ॥२०॥
विमानादवतीर्यैव वायुवेगेन भूभृतौ ।
धृत्वा भुजाभ्यां च पुनर्विमानं स्वं समाययौ ॥२१॥
करस्पर्शेन राजानौ जीवयामास माधवः ।
चन्द्रमाज्ञापयामासाऽर्पयाऽमृतं समन्ततः ॥२२॥
मानवानां तु सैन्येषु मृतान् जीवय सत्वरम् ।
चन्द्रश्चक्रे तथा शीघ्रं सैन्यानि जीवनं ह्यगुः ॥२३॥
अथ कृत्रिमसैन्यानां रक्षसां नाशनाय वै ।
जटातः सुसमुत्पाद्य मायां मृषादिनीं तदा ॥२४॥
ईशानदेवो व्यसृजत् मृषासैन्यं जगाम सा ।
प्रतिरक्षोऽभवद् राक्षसीस्वरूपाऽत्यसंख्यका ॥२५॥

भक्षयामास सर्वांश्च राक्षसानथ शंकरः ।
प्रेरयामास दुर्गां स्वां समुत्पाद्य तु वामतः ॥२६॥
राक्षसीनां नाशनार्थं नत्वा दुर्गा तु शंकरम् ।
कोटिरूपधरा भूत्वाऽष्टादशहस्तशोभना ॥२७॥
सिंहारूढा बहुशस्त्रा महाबलपराक्रमा ।
सर्वरूपैः सहकाले निपपाताऽम्बरेऽभितः॥२८॥
प्रत्येकां राक्षसीं धृत्वा गलेऽनयद् यमालयम् ।
हाहाकारो महानासीत्तदा राक्षसमण्डले ॥२९॥
हर्षनादा विमानेषु सैन्येषु मानवेषु च ।
दृष्ट्वा दुर्गाकृतं कार्यं जहर्ष परमेश्वरः ॥३०॥
जहृषुः कन्यका ब्रह्मप्रियाद्या लब्धलालसाः ।
तावद् दृष्ट्वा राक्षसाश्च पत्नीनां यमगामिता ॥३१॥
क्रुद्धाश्चातीव विधुरा दुर्गासैन्यं प्रति द्रुतम् ।
स्त्रीनाशार्थं चाम्बराद्वै दुर्गाः प्रति प्रदुद्रुवुः ॥३२॥
शंकरः स्वगणान् क्षेत्रपालानाह धरन्तु वै ।
राक्षसान् व्योममार्गेण एकैकशो गले द्रुतम् ॥३३॥
क्षेत्रपालास्तदा व्योम्ना दध्रुः पृष्ठं तु रक्षसाम् ।
प्राप्य प्राप्य गले दध्रुर्मारयामासुरेव तान् ॥३४॥
पद्भ्यां च गदया मुद्गरेण भल्लादिभिस्तथा ।
मुष्टिभ्यां जानुमारेण कफोणिकाभिघातकैः ॥३५॥
अस्थिभग्नं महामारं मारयामासुरीश्वराः ।
कांश्चिच्छस्त्रैस्तथा खड्गैः शूलैः शक्त्या च भल्लकैः ॥३६॥
प्राणैर्वियोजयामासुः रक्षांसीशानपार्षदाः ।
मृताः पञ्चसहस्राणि राक्षसा नरयोधिनः ॥३७॥
हताश्च शतसाहस्त्र्यो राक्षस्यो व्यसवस्तदा ।
अवशिष्टा विचार्यैव जीवने कोऽर्थ एव नः ॥३८॥
हतेषु कुलवर्गेषु मर्तव्यं सर्वथा ह्यनु ।
इत्येवं संविचार्यैव सन्नद्धाः सर्वथाऽम्बरे ॥३९॥
मायाजालानि रचयामासुस्ता विविधानि वै ।
मोहनान्यप्यसंख्यान्यरचयन् मायिकानि च ॥४०॥
यथा विमानसैन्यानि वैमानिकानि चाप्यपि ।
विनाशं प्रापुरेवाऽत्राऽम्बरे तथा व्यधुर्मृषा ॥४१॥
राक्षसानां महान् राजा मायाजालपरायणः ।
नाम्ना मारीचशार्दूलो रोषताम्रेक्षणो दशन् ॥४२॥
दन्तान् जिह्वामोष्ठकौ च मायामन्त्रानवासृजत् ।
अविज्ञाय महारुद्रं नारायणं सतीं तदा ॥४३॥
विज्ञाय मानवं सैन्यं बलवद् वा तथाविधम् ।
रक्षसां त्वन्यभूजानां मायामन्त्रानवासृजत् ॥४४॥

प्रथमं पञ्चसाहस्रान् संरक्ष्य छायया स्वया ।
ततो मन्त्रान् मुमोचाऽयं शालभेयान् भयंकरान् ॥४५॥
शलभानां समुद्रो वै तदाऽऽकाशेऽभवन्नवः ।
यद्द्वारेण विमानानि निम्नानि तु तदाऽभवन् ॥४६॥
योद्धारश्चावृताः सर्वे शलभैर्वृष्टिसदृशैः ।
अन्यैः शालभरूपैर्न व्यदृश्यन्त तदा मिथः ॥४७॥
तद्विनाशाय रुद्रश्च किलहाऽस्त्रमवासृजत् ।
असंख्याः पक्षिणो जाताः किलहाख्यास्तदाऽम्बरे ॥४८॥
शलभाद्राः सर्वतस्तान् भक्षयामासुरम्बरे ।
कर्बूरीणां समूहाश्च वीक्ष्य राक्षसपुंगवाः ॥४९॥
तासां कलहजातीनां विनाशार्थं मनो दधे ।
मायया श्येनजालानि रचयामास मार्गणैः ॥५०॥
श्येनाश्चाब्जाब्जसंख्यास्ते भक्षयामासुरम्बरे ।
किलहाँश्च ततो भूत्वा यानतुल्याः शरीरतः ॥५१॥
विमानानि पक्षबलैस्ताडयामासुरुल्बणाः ।
केचिद्विमानतुल्याश्च केचित्पर्वतदेहिनः ॥५२॥
अन्यान्यस्थौल्यवन्तस्ते बभञ्जुर्वै समन्ततः ।
विमानानि तु भिन्नानि क्षिप्तानि पेतुरम्बरात् ॥५३॥
एवं विचित्रे घाते च जायमाने हरिः स्वयम् ।
वायुदेवं तदा चाज्ञापयामास धृतेः कृते ॥५४॥
भग्नान्यपि विमानानि धारयामास वायुराट् ।
अम्बरे एव तु विश्वकर्मा स्मृतो ह्युपाययौ ॥५५॥
शिल्पेन कर्मणा शीघ्रं भग्नभागानयोजयत् ।
यथासंस्थानयानानि विधाय परमेश्वरम् ॥५६॥
चकार सुप्रसन्नं च तस्थौ तत्रैव योधने ।
अथ रुद्रोऽनलमन्त्रैः पक्षिणोऽनलसंज्ञितान् ॥५७॥
कोट्यब्जसंख्यकान् शीघ्रं जनयामास मार्गणैः ।
अनलाः पक्षिणः श्येनान् भक्षयामासुरुल्बणाः ॥५८॥
राक्षसानपि चात्तुं ते दुद्रुवुः रुद्रनोदिताः ।
राक्षसा मायया तत्र तिरोधानं गताः क्षणम् ॥५९॥
सर्जयामासुरुग्रांश्च नागान् विषोल्बणांस्तदा ।
सपक्षाँस्ते विमानस्थान् गत्वाऽऽविश्य दशन्ति हि ॥६०॥
रुद्रो गारुडमन्त्रेणोत्पादयामास भक्षकान् ।
गरुडान् नागसंहारकर्तॄन् कोटिसहस्रशः ॥६१॥
गरुडास्ताननुद्रुत्य भक्षयामासुरेव च ।
गरुडानां विनाशार्थं राक्षसो वह्निमासृजत् ॥६२॥
अग्निरग्निर्महाग्निश्चाम्बरे ज्वालामयोऽभवत् ।
रुद्रो नेत्रं तृतीयं चोद्घाटयामास तत्क्षणे ॥६३॥

तत्रोत्पन्नः प्रलयाग्निर्मृषाग्निं राक्षसोत्थितम् ।
आकृष्य चाऽऽजहारैव नैजे रूपेऽतिदारुणम् ॥६४॥
शशामाऽग्निस्तदा शीघ्रं राक्षसा भयमावहन् ।
गह्वरस्य द्रुमाधस्ताद् गुप्ता बाणान् शरांस्तथा ॥६५॥
मुमुचुर्भल्लकांश्चापि योद्धव्यमिति निश्चिताः ।
रुद्रगणा व्योममार्गात् क्षेत्रपालाः समन्ततः ॥६६॥
चक्रुस्तदा बाणवृष्टिं हन्तुं राक्षसपुंगवान् ।
अथ ते राक्षसाः प्राप्ताः प्राणसन्देहतां यदा ॥६७॥
तदा पाषाणमन्त्रैस्ते मुमुचुर्मार्गणान् बहून् ।
शिला व्योम्नि समुत्पन्ना गण्डशैलसमास्तदा ॥६८॥
उत्पत्योत्पत्याऽनरीक्षे जघ्नुर्विमानकानि वै ।
ज्ञात्वा रुद्रश्चेष्टितं तद् वज्रास्त्रं प्रमुमोच ह ॥६९॥
शिलाश्चूर्णीभूय सर्वा वायुनोड्डिज्यिरे दिशः ।
व्यलीयन्त ततो दैत्या मेघानुग्रानवासृजन् ॥७०॥
वाय्वस्त्रेण तदा रुद्रो मेघान् लीनानकारयत् ।
अथ ते राक्षसा भीता मृतशेषास्तु वारिधिम् ॥७१॥
प्रवेष्टुं दुद्रुवुस्तावच्छंकरो लोकशंकरः ।
गणान् विमोचयामास तत्पृष्ठे धर्तुमेव तान् ॥७२॥
परावृत्य तदा दैत्या गणैर्युद्धं व्यधुः पुनः ।
तदा रुद्रो मुमोचाथ शूलं लोकभयंकरम् ॥७३॥
भ्रमद् वेगेन वह्नींश्च मुञ्चत् समन्ततश्च तत् ।
मारयामास दैत्यांस्तान् मारीशेशो तिरोऽभवत् ॥७४॥
धृत्वा तु मायिकं रूपं वाह्नेयं शूलमेव तत् ।
मुखे समाग्रसत्तत्र सर्वेषां पश्यतां तदा ॥७५॥
वीक्ष्याऽऽश्चर्यं परं प्राप्ताः शंकराद्या गणास्तथा ।
तद्विलोक्य परं कर्म राक्षसस्य नरायणः ॥७६॥
प्रशशंसाऽसुरस्यैतत्कर्म लोकभयंकरम् ।
शंभुं वीक्ष्य हरिस्तूर्णं चक्रं करान्मुमोच ह ॥७७॥
उर्मिकासदृशं चक्रं निर्गतं चांगुलेर्यदा ।
शीघ्रं वह्निं विमुञ्चचाऽवर्धताऽतिभयंकरम् ॥७८॥
सहस्रारं सूर्यतुल्यं रक्तवर्णं च वेगवत् ।
निनादयद्दिशः सर्वाः प्रज्वालयद् वनानि च ॥७९॥
पर्वतं भस्मसात् कुर्वत् चाग्रसद् राक्षसान् द्रुतम् ।
पृथिवी कम्पिता तस्य वेगेन वायुमण्डलम् ॥८०॥
कम्पितं च समुद्रा वै स्तब्धाश्चोद्वेलतां गताः ।
विमानान्यम्बरे स्थैर्यं समतां तत्यजुः क्षणम् ॥८१॥
सर्वदेहिहृदयानि त्रेसुर्धैर्यं प्रतत्यजुः ।
हाहाकारस्तदा जातो मुमुहुर्निर्बलाः क्षणम् ॥८२॥

सत्त्वानि मूर्छितान्येव क्षणं चक्रेऽतिवेगिते ।
राक्षसाः स्तब्धतां याता ज्ञातवन्तः सुदर्शनम् ॥८३॥
तावच्चक्रं प्राप्तमेव व्यदारयच्छिरांसि हि ।
हताः शेषा राक्षसा ये मारिशेशोऽपि नाशितः ॥८४॥
गण्डशैला इव तेषां देहाः पेतुः क्षितौ तदा ।
अथ चक्रं गणरक्षाकरं शूलं प्रगृह्य तु ॥८५॥
न्यवर्तत महाघोरं वह्निमण्डलसदृशम् ।
अतिवेगं समापन्नं शान्तिं नाऽवाप सत्वरम् ॥८६॥
पर्वतारण्यभोगेषु शनैः शनैरपाऽसरत् ।
पर्वतस्य भूमिका याः प्रदेशा बहवस्तदा ॥८७॥
चक्राग्निनां प्रदग्धाश्च रसभावं गतास्तदा ।
श्वेतस्फटिकभस्माढ्याः कृष्णमणिसमा अपि ॥८८॥
पीताः स्वर्णसमाश्चापि प्रदेशास्त्वभवन् प्रियाः ।
पाषाणपर्वतरसा दग्धाश्चक्रस्य वह्निना ॥८९॥
पुनः पाषाणतां प्राप्ता मणयो वै यथा शुभाः ।
आसमन्ताद् रसोत्पन्नः पाषाणा आरसात्मकाः ॥९०॥
चक्रसंगेन संजाता मर्मराः संगमर्मराः ।
शिल्पकार्याऽर्हदेहास्ते प्रदेशा विकृतिं गताः ॥९१॥
चक्रं शान्तं ह्यभूच्चापि मूर्तिं दधार पार्षदीम् ।
शूलं तु गणमूर्तिं च दधारापि त्रिलोचनाम् ॥९२॥
गणानाहूय च सेनां मानवानां वनस्थिताम् ।
धैर्यं च ददतुश्चोभौ विजयं च शशंसतुः ॥९३॥
तावद् विजयतूर्याणि त्ववाद्यन्त समन्ततः ।
पुष्पवृष्टिश्चाभवच्चम्बराद् देवादिभिः कृता ॥९४॥
भेर्यो निनादान् चक्रुश्च शंखाश्च बिगुलानि च ।
सैन्ये तु मानवे हर्षो मूर्तिमान् प्रविवेश ह ॥९५॥
गणेष्वपि तु सर्वेषु वैमानिकेषु वै तथा ।
उभयोर्नृपयोश्चापि हृत्स्वानन्दो न वै ममौ ॥९६॥
जयशब्दा विमानेषु प्राभवन् बहुहर्षतः ।
अथ चक्रं तथा शूलं पार्षदौ द्वौ च पर्वते ॥९७॥
ययतुर्गह्वरद्वारं रक्षोनिवासभूमिकाम् ।
विलोकयामासतुश्चान्तरे गत्वाऽन्धकारिते ॥९८॥
प्रकाशं स्वं प्रसार्यैव तावत्तत्र च गह्वरे ।
भक्षितानां नराणां नारीणां शेषास्थिसंचयान् ॥९९॥
विलोक्य दुःखमापन्नौ दयापरौ हि पार्षदौ ।
अग्रे गत्वा पुनस्तत्रालोकयामासतुस्तदा ॥१००॥
कन्यकाश्च स्त्रियश्चापि राक्षसैर्या अपहृताः ।
शते द्वे च सहस्रं च युवत्यो रुरुदुस्तदा ॥१०१॥

तावुभौ वेदयामासुर्वृत्तान्तानि हि रक्षसाम् ।
पार्श्वे च विद्यते वृक्षसमूहे नगरी वने ॥१०२॥
द्रोण्यामदृश्यरूपा तु यत्र सन्ति ह्यनेकशः ।
अपहृता नरा नार्यो बाला बाल्यश्च बन्धने ॥१०३॥
ताः सर्वास्तौ गह्वराच्च बहिर्निष्कास्य सत्वरम् ।
ययतुर्नगरी राक्षसैः प्राक् कृता यथा ॥१०४॥
तत्र दृष्टा निगडस्था बहवो युवमूर्तयः ।
अन्ये विमुक्तभावाश्च प्राकारान्तर्निवेशिताः ॥१०५॥
नरा नार्यश्च बहवो भक्ष्याः क्रमात्तु रक्षसाम् ।
पारेसहस्रमावीक्ष्य मोचयामासतुश्च तान् ॥१०६॥
अथ चक्रं स्थितं तत्र शूलं ययौ हरिं हरम् ।
जगाद सर्वं वृत्तान्तं तदा नारायणो हरः ॥१०७॥
विमानं सत्वरं त्यक्त्वा नगरीं ययतुर्द्रुतम् ।
रुदन्तोऽपि गता हर्षं दृष्ट्वा हरिं हरं प्रभुम् ॥१०८॥
प्रजास्ताश्च प्रणेमुर्बन्धनमुक्ताः पुनः पुनः ।
हरिः सर्वाः प्रजास्तत्राऽऽश्वासयामास पितृवत् ॥१०९॥
अनाथस्य सुतश्चापि सुताऽपि च प्रणेमतुः ।
परमेशं हरं चापि रुरुदतुः पुनः पुनः ॥११०॥
हरिस्तेभ्यो राधिके वै धैर्यं निर्भयतां ददौ ।
शंकराय हरिः प्राह निस्तारार्थं सुखावहम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने राक्षसानां राजभ्यां तत्सैन्यैः सह योधनं राक्षसीनां दुर्गया सह योधनं रुद्रेण राक्षसानां नाशनं निगडस्थप्रजानां रक्षणं पर्वतस्य सुदर्शनतेजसा रसशिलामयत्वं चेत्यादिनिरूपणनामा त्र्यशीत्यधिकशततमोऽध्यायः ॥ १८३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! कृष्णनारायणः परेश्वरः ।
रुद्रं राक्षसहन्तारं प्राह चोद्धरणक्षमम् ॥ १ ॥
शंभोऽनाथस्य बालां च बालं प्रदेहि मन्त्रकम् ।
अनाथाय ततो देहि वैष्णवौ तस्य बालकौ ॥ २ ॥
शंभुर्मन्त्रं ददौ शीघ्रं बालायै बालकाय च ।
अनाथोऽपि मनुं शंभोर्जग्राह वैष्णवोऽभवत् ॥ ३ ॥
बाला सा रक्षकं कृष्णं मत्वा योग्यं वरं तदा ।
पित्राज्ञां प्राप्य तत्रैव कृष्णहस्तमुपाददे ॥ ४ ॥
एतद्विलोक्य च तदा शते द्वे च सहस्रकम् ।
या युवत्यो गह्वरात्तु मोचिता रक्षिताश्च ताः ॥ ५ ॥
सर्वा विज्ञाय कान्तं स्वं नारायणं परेश्वरम् ।
शुक्लवर्णा यथा देव्यस्तादृश्यो योग्यमीश्वरम् ॥ ६ ॥
रक्षितारं हरेर्हस्तं विवाहहृद्यैः शुभैः ।
जगृहुस्तत्र च वने स्वतन्त्राः पुण्यनोदिताः ॥ ७ ॥
शंभुः सर्वाभ्य एवादौ मनुं ददौ तु वैष्णवम् ।
ब्रह्मप्रियासु ताः सर्वाः स्थापयामास चाम्बरे ॥ ८ ॥
कारागारे स्थितान् सर्वान् नरान्नारीश्च माधवः ।
ददौ स्वचरणौ मूर्ध्नि स्वतन्त्रानप्यचीकरत् ॥ ९ ॥
दुःखान्यपाहरत् कृष्णोऽदापयच्छंभुना मनुम् ।
वैष्णवास्ते तदा जाता भेजिरे श्रीनरायणम् ॥१०॥
मारीशानामपुर्यां च रुद्धा या राक्षसैः प्रजाः ।
ताभ्यो दत्वा मन्त्रकाँस्तु वैष्णवीस्ता हरोऽकरोत् ॥११॥
तां सुशुभां नगरीं च परिभ्रम्य स्थले स्थले ।
कृष्णनारायणः सर्वा देवोऽपवित्रयत्तदा ॥१२॥
तैः सर्वैरर्थितः कृष्णः पूजितो हृद्यैस्तथा ।
स्थातुं निशां तु तत्रैव पुनः पुनः समर्थितः ॥१३॥
दृष्ट्वा तद्भावनां विमानान्यवातारयद् द्रुतम् ।
विशालेऽरण्यके मारीशापुर्याः सन्निधौ तदा ॥१४॥
निशामुखे निवासाँश्चाकारयद् वृक्षवद्भुवि ।
रात्रौ वै भोजनं सर्वान् कारयित्वा हरिः स्वयम् ॥१५॥
विजयस्योत्सवं तत्र कारयामास चोत्तमम् ।
गायनैर्नर्तनैर्वाद्यैः संकीर्तनैश्च हर्षणैः ॥१६॥
नाटकैश्च कथाख्यानैर्निशामगमयत्तदा ।
युद्धे मृतास्तु ये सर्वे निजपक्षीययोधिनः ॥१७॥
तान् सर्वान् श्रीहरिस्तूर्णं सस्मार योगविद्यया ।
सर्वे ते जीवभावं च प्राप्य प्राणान् शरीरकम् ॥१८॥
स्वस्था भूत्वा च तद्रात्रौ हरेर्वासे समाययुः ।
गह्वरेऽस्थीनि येषां वै मृतानां च वनेऽपि च ॥१९॥
नगर्याः सन्निधौ चापि पतितान्यभवँस्तदा ।
योगैश्वर्येण भगवान् सस्मार तत्र देहिनः ॥२०॥
मृताः सर्वे सत्यसंकल्पस्य कृष्णस्य वाञ्छया ।
सजीवाश्चाऽभवन् स्वस्था रात्रौ तत्र समाययुः ॥२१॥
अनेके वै नरा नार्यो बाला बाल्यश्च मानवाः ।
प्रातर्नवीनरूपाः समदृश्यन्त निवासने ॥२२॥
पारेलक्षं मानवान् श्रीहरिश्चैवं निशान्तरे ।
जीवयामास कृपया तेभ्यः शंभुर्मनुं ददौ ॥२३॥
वैष्णवास्ते तदा जाता हरेः पादजलं पपुः ।
भिन्नदेशीयलोकास्ते सस्मरुर्निजभूस्थलीम् ॥२४॥

ययुः शक्ता निजान् देशानन्ये न्यूषुश्च तत्र वै ।
अथ श्रीभगवानाह लोमशाय महात्मने ॥२५॥
जिनवर्द्धिनृपायेदं राज्यं समर्प्यमेव तु ।
अभिषेकविधिनैनं प्रदेहि मुकुटं गुरो ॥२६॥
विधेहि तिलकं तस्य भाले राजा भवेदिह ।
जिनवर्द्धिस्तदा प्राह विजेत्रे देयमेव तत् ॥२७॥
ईशानाय प्रदेयं तद्राज्यं श्रीपरमेश्वर ।
अल्पकेतुस्तथा चान्ये महर्षयोऽपि तत्तथा ॥२८॥
ऊचुस्ततो हरिः शंभुं प्रसह्य कानकासने ।
प्रतिष्ठाप्याऽक्षतैः कुंकुमैश्च चन्द्रं ललाटके ॥२९॥
स्वयं दक्षकरेणैव चकार मुकुटं ददौ ।
ईशानः श्रीमहादेवो मारीशाया नृपोऽभवत् ॥३०॥
नगरीं पार्वतीभूमेरुपत्यकास्थले पुनः ।
अवासयच्छनैः राधे वाटिकोद्यानमण्डिताम् ॥३१॥
ईशानः शंकरः सोऽयं द्वितीयरूपधृक् प्रभुः ।
दुर्गया सहितश्चापि गणैश्च सहितस्तथा ॥३२॥
हर्याज्ञया निवासं स्वं प्रचकार प्रजार्थितः ।
इष्टदेवोऽभवत् सोऽयमीशानः परमेश्वरः ॥३३॥
श्वेतगौरप्रजानां वै रक्षसां नाशकारकः ।
दोषाणां नाशको देवो मोक्षदः सुखदः सदा ॥३४॥
आप्यायनं च गांगेयं शंकरः प्राह तद्दिने ।
राज्यस्थितिं प्रसाध्यैव दास्ये तुभ्यं पुरीमिमाम् ॥३५॥
मालां गृहाण च हरेः सन्निधौ सजलाञ्जलिम् ।
इत्येवं तत्र सः प्रातः प्रोक्तो मालामुपाददे ॥३६॥
प्रातर्हरिर्गणान् शंभोः रक्षकान् न्यस्य तत्र च ।
शंभुं दुर्गां ब्रह्मसतीर्महर्षीन् स्वकुटुम्बकम् ॥३७॥
कारयिता दुग्धपानं पञ्चम्यां भाद्रकृष्णके ।
उपादिदेश भगवान् सभां कृत्वा प्रजाजनान् ॥३८॥
काले वै राक्षसश्चाऽस्ति यथाऽत्र राक्षसो ह्यभूत् ।
मारितः शंकरेणाऽसौ मम भक्तेन साऽन्वयः ॥३९॥
तथा ममाश्रयेणैव भक्ताः कालोऽपि राक्षसः ।
मुक्तभावसमापन्नैर्नाश्यते नात्र संशयः ॥४०॥
मम भक्तिं प्रकुर्वन्तु तथेशानं भजन्त्वपि ।
इष्टदेवं महारक्षाकरं शंभुं भवन्तु वै ॥४१॥
महादेवीं सतीं दुर्गां वैष्णवीं च भजन्त्वपि ।
गतश्चः सूर्यवारो वै ह्यभवत् सूर्यदेवता ॥४२॥
सर्वदोषविनाशार्थं समाराध्या प्रकाशदा ।
सूर्यवारे मया त्वत्र शंकरादिसहायिना ॥४३॥
प्रहता राक्षसा घोरा भक्षका दुःखदायिनः ।
भवद्भिश्चापि हन्तव्या दोषाः पापप्रदा रवौ ॥४४॥
कामक्रोधादयः सर्वे पालनीयो वृषो रवौ ।
द्विविधो जायते व्याधिः शारीरो मानसोऽथवा ॥४५॥
शारीरान्मानसो व्याधिर्मानसाद् देहजोऽपि च ।
परस्परं तयोर्जन्म कामक्रोधादयो हि ते ॥४६॥
दोषा वै व्याधयः प्रोक्तास्त्यक्तव्यास्ते रवौ दिने ।
सत्त्वं रजस्तम इति मानसा वै त्रयो गुणाः ॥४७॥
रवौ वारे नातियोज्यास्त्रयस्ते विघ्नरूपिणः ।
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ॥४८॥
तामसेन तु धर्मेण हर्षशोकौ प्रबाध्यतः ।
विज्ञायैव गुणचक्रं बाधनीयं रवौ प्रभौ ॥४९॥
असन्तोषः प्रमादश्च मदो रागोऽतिलालसा ।
लोभो मोहोऽभिमानश्चोद्वेगश्चैते हि राक्षसाः ॥५०॥
एभिः पाप्मभिराविष्टो भवेन्नैव रवौ क्वचित् ।
उदराख्यां खनिं नाऽह्ना पूरयितुमलं जनैः ॥५१॥
रवौ तां पूरयेन्नैवाऽपूर्यां मत्वा विचक्षणः ।
यथेद्धः प्रज्वलत्यग्निरसमिद्धः प्रशाम्यति ॥५२॥
रवावाहारशून्यः स स्वयं शाम्यति वै प्रभौ ।
आत्मोदरकृते लोकः करोति विघसं बहु ॥५३॥
रवावुदरजेता स्याद् विजेता सर्वपाप्मनाम् ।
मानुषाः कामभोगाश्च जेतव्याः सूर्यवासरे ॥५४॥
अभोगिनो जनाः सूर्ये यान्ति स्थानमनुत्तमम् ।
योगः क्षेमस्तथा त्यागः सूर्ये कार्या हरौ सदा ॥५५॥
एकोदरकृते व्याघ्रः करोति विघसं बहु ।
तमन्येऽप्युपजीवन्ति मन्दा लुब्धा मृगादयः ॥५६॥
विचार्यैवं रवौ त्याज्या वृथा विघसराशयः ।
पत्राहारैः फलाहारैश्चैकाहारैर्जनैः रवौ ॥५७॥
यस्त्विमां वसुधां कृत्स्नां प्रशिष्यादखिलां नृपः ।
रवौ त्यागपरो भक्तो विशिष्यते न वै नृपः ॥५८॥
संकल्पास्तु निरारंभा रवौ कार्या हरे शुभाः ।
निरामिषा न शोचन्ति त्याज्यं वै चामिषं रवौ ॥५९॥
पितृयानं देवयानं रवौ लभ्येत शंकरात् ।
तपसा ब्रह्मचर्येण भजनेन महर्षयः ॥६०॥
विमुच्य देहान् यान्त्यन्ते ब्रह्मलोकमनामयम् ।
आमिषं बन्धकृत्कर्म तत् त्यक्तव्यं रवौ सदा ॥६१॥
तस्मान्मुक्तो हरे लग्नः पदमाप्नोति तत्परम् ।
प्रज्ञाप्रसादमारुह्य त्याज्यं त्यक्तव्यमेव यत् ॥६२॥

ग्राह्यं चेशानभजनं चक्षुष्मता सुबुद्धिना ।
षाट्कौशिकेऽत्र देहे वै रविस्तु सप्तमः पृथक् ॥६३॥
तद्देवं च तदात्मानं यः पश्यति स पश्यति ।
तत एव तु शानकैर्ब्रह्म सम्पद्यते परम् ॥६४॥
सूर्ये सूरिगतिं यान्ति दान्ताः शान्तास्तितिक्षवः ।
सूर्ये चेशानहवनं दुर्गायाः पूजनं तथा ॥६५॥
गुरोः पूजा हरेः पूजा कर्तव्या भक्तमानवैः ।
असक्तस्तद्दिने तिष्ठेन्निःसंगो मुक्तबन्धनः ॥६६॥
समः शत्रौ च मित्रे च स वै मुक्तो भवेद् ध्रुवम् ।
एवं धर्ममनुक्रान्ताः सदा दानतपःपराः ॥६७॥
आनृशंस्यगुणोपेताः कामक्रोधादिवर्जिताः ।
प्रजापालनयुक्ताश्च सूर्येशानव्रतस्थिताः ॥६८॥
गुरुवृद्धार्हणपरा इष्टलोकानवाप्स्यथ ।
स्वस्ति चास्तु भवतां च सदा सूर्यजुषां सुखम् ॥६९॥
इत्युक्त्वा श्रीहरिर्मौनं समास्थाय विचार्य च ।
अल्पकेतुं प्राह गन्तुं तदीयां जीवनीपुरीम् ॥७०॥
सज्जा भवन्तु चान्येऽपि मोक्ष्यामस्तत्र चैव ह ।
जिनवर्द्धिमहाराजः प्राह नत्वा हरिं तदा ॥७१॥
ईशानश्च तथा दुर्गा आप्यायनो मुनिस्तथा ।
भुक्त्वाऽत्र भगवन् पुर्यां भ्रमित्वा च ततः परम् ॥७२॥
पावयित्वा भूतलं च गन्तव्यं तु ततः परम् ।
दयालुर्भगवानाह राधिके वै तथास्त्विति ॥७३॥
पक्वान्नानि कृतान्येव शीघ्रं तत्रत्यमानवैः ।
मध्याह्ने भोजनं चक्रुः सर्वे चेशानवाञ्छया ॥७४॥
दुर्गा सती ब्रह्मपत्नीर्भोजयामास वै तदा ।
विश्रम्य च क्षणं यानैर्वाहनैश्च विमानकैः ॥७५॥
सज्जीभूयाऽम्बरे प्राप्य पूजास्तन्मानवैः कृताः ।
कृष्णनारायणाद्या वै विमाने विविशुर्द्रुतम् ॥७६॥
विदायस्य सुवाद्यानि तदाऽवाद्यन्त भूरिशः ।
जयशब्दास्तूर्यशब्दाश्चाभवन् वै समन्ततः ॥७७॥
राजसैन्यं प्रस्थैव तत्र राजा जिनर्द्धिकः ।
विदायं प्रददौ शंभुदुर्गानारायणादये ॥७८॥
अल्पकेतुनृपेणैव साकं यानान्यपासरन् ।
विमानानि चाल्पकेतुदर्शितेन पथाऽगमन् ॥७९॥
आप्यायनो महर्षिश्च विमाने सह चागमत् ।
अपियानं पर्वतं चातिक्रम्य चोत्तरे गिरिम् ॥८०॥
अल्पाख्यं समपश्यँश्च विमानस्थाः सुसुन्दरम् ।
अल्पकेतुर्विमानेन प्रथमं चाग्रगोऽभवत् ॥८१॥
साऽऽप्यायनः स्वागतार्थं निजां वै जीवनीपुरीम् ।
सवाद्यसैन्ययुक्तश्च शीघ्रं हारार्हणादिभिः ॥८२॥
राज्ञीपुत्रसुताद्यैश्च सहितः पुरतोऽभवत् ।
तदाज्ञया द्रुतं वाद्यघोषाः कृताश्च वादकैः ॥८३॥
जयशब्दाः प्रजाभिश्च वेत्रहारैर्यशोगिरः ।
यान्त्रिकैर्यन्त्रशब्दाश्च कृताः स्वागतसूचकाः ॥८४॥
नरा नेमुश्चाम्बरे च दृष्ट्वा स्वर्णविमानकम् ।
नार्यः पर्वतवासिन्यस्तथा भूभवना जनाः ॥८५॥
हरेर्विमानमालोक्य सध्वजं तेजसा ज्वलत् ।
विलक्षणं सुसम्पन्नं दिव्यताधिक्यराजितम् ॥८६॥
बहुमालातोरणाद्यैर्मुक्ताहीरकजातिकैः ।
समृद्धं मूर्तिसत्तेजःकिरणैः सूर्यसन्निभम् ॥८७॥
अग्रे हंसैश्च गरुडैर्गजैर्माणिक्यवाजिभिः ।
सिंहैश्च शरभैश्चापि मूर्तिमद्भिः प्रयापितम् ॥८८॥
बहुभिश्चान्ययानैश्च विमानैः पार्श्वमण्डितम् ।
पश्चाच्च देवदेवीभिः परीभिर्जयघोषितम् ॥८९॥
पुष्पाक्षताद्यैर्मालाभिः शृंगारितं सुवर्धितम् ।
अधस्ताच्चन्द्रसदृशैर्मणिभिः शीतभान्वितम् ॥९०॥
कल्पद्रुमालिपुष्पाद्यैः कृतोद्यानसुमध्यमम् ।
चिन्तामणिप्रणद्धाढ्यभित्तिपट्टविराजितम् ॥९१॥
स्वर्णकलशशोभाढ्यशिखरैरतिशोभितम् ।
कमलाकारकल्याणीकृतस्वस्तिकचित्रकम् ॥९२॥
दिव्यव्यजनच्छत्राद्यैश्चामरैरुज्ज्वलैर्युतम् ।
वेत्रहारैर्जयशब्दैर्गर्जितं पूर्वकांगनम् ॥९३॥
अनादिश्रीकृष्णनारायणो विजयतेतमाम् ।
इत्येवं स्वर्णवर्णैश्च सूचयन्माधवाश्रितम् ॥९४॥
एवंभूतं शुभं वीक्ष्य विमानं नेमुरम्बरे ।
राज्ञा दर्शितमार्गेण भूतले चायते शुभे ॥९५॥
हरिर्निजं विमानं तच्चावातारयदच्युतः ।
अन्यान्यपि विमानानि चावतेरुर्भुवस्तले ॥९६॥
जयशब्दैः स्वागतं च चक्रुः प्रजाः सुदण्डवत् ।
लाजादि चिक्षिपुस्तत्र विमाने दूरतः स्थिताः ॥९७॥
पुष्पाणि चिक्षिपुश्चान्येऽक्षतान् केचिच्च चिक्षिपुः ।
गन्धमाल्यादीनि चान्ये चिक्षिपुश्च विमानके ॥९८॥
इत्येवं राधिके कृष्णे भाद्रे तु पञ्चमीदिने ।
जीवनीं नगरीं नारायणः प्राप्तो वनान्विताम् ॥९९॥
राजाऽल्पकेतुको राज्ञी तथा पुत्र्यः सुतादयः ।
विमानाग्रे प्रतीक्षन्ते बहिश्चागमनं हरेः ॥१००॥

सर्वे पश्यन्ति तत्रैव द्वारे कदा हि माधवः ।
बहिश्चेयात् स्थिरनेत्राश्चातिहर्षाऽभिसंभृताः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अनाथबालोद्धरणाय राक्षसानां विनाशोत्तरं द्व्यधिकशतयुक्सहस्रकन्याभिः हरिकरग्रहणं, राक्षसमारिताऽस्थिभ्यो मृतानामुज्जीवनम्, ईशानराज्यस्थापनं, रविवारमाहात्म्यं, पूजाशीर्वादा निशाविश्रान्तिः, प्रातर्भोजनोत्तरम् अल्पकेतुनृपस्य जीवनीं नगरीं प्रति भाद्रकृष्णपञ्चम्यां गमनमित्यादिनिरूपणनामा चतुरशीत्यधिकशततमोऽध्यायः ॥ १८४ ॥

श्रीकृष्ण उवाच—

अथाऽयं भगवान् राधे जीवनीनगरीं प्रति ।
दृष्टिं कृत्वा विमानात् स्वाद् बहिस्तूर्णं समाययौ ॥ १ ॥
तावद् राजाऽल्पकेतुश्चाप्यायनर्षिस्तथा परे ।
कुमारा बालकृष्णस्य कण्ठे हारान् न्यधुः शुभान् ॥ २ ॥
सौवर्णान् कौसुमाँश्चापि हैरकान् राज्निकानपि ।
करे गुच्छान् सुगन्धाँश्च ददुः पुष्पाणि मस्तके ॥ ३ ॥
अक्षतैर्वर्धयामासुः प्रणेमुः पादयोरपि ।
अन्येऽपि पूजिताः सर्वैरीशानाद्यास्तथर्षयः ॥ ४ ॥
पितरः सकुटुम्बाश्च स्वागतैश्चातिमानिताः ।
पादौ प्रक्षाल्य च वारि पपुर्भक्ता हरेस्तदा ॥ ५ ॥
हरिं सुवर्णशोभायां गजगन्त्र्यां न्यषादयन् ।
अन्यान् शुभेषु यानेषु वाहनेषु ह्यनस्सु च ॥ ६ ॥
शिविकासु विमानेषु निषाद्य मंगलस्वनैः ।
नगरीं भ्रामयामासुः राजाद्याः प्रेमविह्वलाः ॥ ७ ॥
प्रधानैश्च नृपाद्यैश्च श्रेष्ठिभिश्चाधिकारिभिः ।
प्रजाभिः सर्वजातीयनारीभिश्च नरैस्तथा ॥ ८ ॥
वर्धितः पूजितश्चापि घण्टापथे च चत्वरे ।
अंगने मार्गिकायोगे चाऽऽपणानां च वर्तुले ॥ ९ ॥
स्वागतेन हरिः सर्वैः प्रासादितः पुनः पुनः ।
उपदाभिरमूल्याभिः सर्वोपकरणादिभिः ॥१०॥
फलपुष्पैर्मंगलैश्च समर्चितो नरायणः ।
एवं तां नगरीं वीक्ष्य दत्वा च दर्शनं ततः ॥११॥
निवासालयमागत्य जलपानं समाचरत् ।
हरिरतूर्णं सभायां च निषसादाऽऽदिदेश च ॥१२॥
यत्राऽऽस्ते भगवान् साक्षात् यत्र सन्तो हरिं श्रिताः ।
यत्र वसन्ति भक्ताश्च देशः स दिव्य उच्यते ॥१३॥
निर्गुणः स प्रदेशो वै भुक्तिमुक्तिफलप्रदः ।
धन्योऽयं केतुमालश्च धन्या नृपा नदीतटाः ॥१४॥
धन्यान्येषां नगराणि यत्र मच्चरणागमः ।
धन्या यूयं प्रजाश्चात्र वैष्णवत्वमुपागताः ॥१५॥
वैष्णवत्वं च सत्संगः परमेशप्रसन्नता ।
सदेष्टदेवभक्तिश्च सेवा सतां हि दुर्लभाः ॥१६॥
ते येषां मिलितास्तेषां प्राप्तव्यं नाऽवशिष्यते ।
स्थानिनो दिव्यलोकस्था वाञ्छन्त्येतत्तु पञ्चकम् ॥१७॥
तपःस्वाध्यायशीलानां सन्ति लोकाः सनातनः ।
अजातशत्रवो धीरा भक्त्या मोक्षं परं गताः ॥१८॥
विषयेभ्यः परावृत्ता यान्ति भक्त्या परं पदम् ।
अनिर्देश्यां गतिं यान्ति मोक्षिणो भक्तिसंयुताः ॥१९॥
उक्तं तु पञ्चकं येषां नास्ति तेषां तु लौकिकम् ।
विपाख्य कदलीस्तम्भं सारलाभो न विद्यते ॥२०॥
तस्मात्तत्पञ्चकं लब्ध्वा श्रेयो लक्ष्यं विधाय च ।
निगृह्य च मनस्तृष्णामुत्सृज्य कर्मसन्ततिम् ॥२१॥
परेश्वरे तु संलग्नः सतां मार्गमनुस्मरन् ।
ध्यायेद्देवं चान्तरस्थं स वै श्रेयः प्रयास्यति ॥२२॥
क्रियारताः क्रतौ मग्ना दाने सेवाविधावपि ।
मां प्रलक्ष्योत्सृजन्तो ये ते मता मम लोकगाः ॥२३॥
त्यागः सन्तोष इष्टेज्याऽभिलालसाक्षयस्तथा ।
मानादिविलयो येषां तेषां वै शाश्वतं सुखम् ॥२४॥
चतुष्पदो भवेदत्र निःश्रेणी ब्रह्मलोकदा ।
कथायज्ञः ऋषिश्रेणी ज्ञानं श्रेणी तु तत्त्विनाम् ॥२५॥
कर्मश्रेणी गृहस्थानां तपःश्रेणी सतां मता ।
ईहा चेद् विषयाढ्याऽस्ति ततोऽनीहा गरीयसी ॥२६॥
ईहायां बहवो दोषाः संहारजननप्रदाः ।
ईहया दूष्यते चात्मा श्रेयस्तेन विलीयते ॥२७॥
अनर्हं योऽर्जयत्यत्राऽर्हं च त्यजति सर्वथा ।
स चान्ते संपरित्यक्तो भवेद् द्वाभ्यां ततोऽन्धगः ॥२८॥
एवं विचार्य मनुजैर्गृहस्थैस्तु विशेषतः ।
कर्मयज्ञोऽपि विधिना धनयज्ञोऽपि सद्धनैः ॥२९॥
कर्तव्यश्च समेष्टव्यो नारायणोऽहमेव च ।
इन्द्रो यज्ञैश्च विविधैः सुरराजोऽभवत् पुरा ॥३०॥
महादेवो महायज्ञे हुत्वाऽऽत्मानं बभूव सः ।
देवदेवो व्याप्य विश्वान् विष्टभ्येशानतां गतः ॥३१॥
आविक्षितो मरुत्तश्च यज्ञे श्रीं परिवेषिणीम् ।
प्राप सर्वप्रदां भक्त्या ययौ धाम ममापि च ॥३२॥

एवमन्ये पूर्वकल्पे कल्पान्तरेषु कर्मिणः ।
कर्मयज्ञेषु संयुज्य धनं चापि दिवं गताः ॥३३॥
कर्मयज्ञे वैष्णवत्वं सत्संगो हरितोषणम् ।
सतां सेवा भवन्त्येव तादृग्यज्ञं समाचरेत् ॥३४॥
अनीहश्चेत् सुसन्तोषी विन्दते ब्रह्म शाश्वतम् ।
सन्तोषो वै परं स्वर्गं परानन्दो हि तोषणम् ॥३५॥
तुष्टेः परं न वै किञ्चित् सुखं क्वापि प्रशस्यते ।
देही कामान् समाहृत्य स्वात्मन्येव प्रसीदति ॥३६॥
भयं नाऽस्य कुतस्ताद्वै नास्मात्तु कस्यचिद् भयम् ।
स्वयं हीनः कामरुड्भ्यां यदा तत्राऽऽत्मदृग् भवेत् ॥३७॥
अद्रोहः सर्वभूतानां सर्वाकांक्षाविवर्जितः ।
सर्वार्पणं हरौ प्राप्तो ब्रह्म सम्पद्यते स च ॥३८॥
यथा प्रवृत्तिर्येषां तु भूतानां रागवाहिनी ।
तत्र तेषां गतिश्चास्ति हर्यर्पणे तु शाश्वती ॥३९॥
केचित् साम प्रशंसन्ति प्रयत्नं चापरे जनाः ।
अन्ये ध्यानं प्रशंसन्ति चेतरे चाश्रयं शुभम् ॥४०॥
केऽपि यज्ञं प्रशंसन्ति सन्न्यासमपरेऽपि च ।
दानं चैके प्रशंसन्ति परे त्वान्ति प्रतिग्रहम् ॥४१॥
शान्तास्तूष्णीं स्थितिं प्राप्य परमेशं भजन्ति च ।
अशान्ता राज्यमिच्छन्ति यत्रोभयतुला समा ॥४२॥
एतद् विचार्य विज्ञानैः श्रयणीयं सुखप्रदम् ।
नैसर्गानुगमं श्रेयःप्रदं वै साधनं शुभम् ॥४३॥
अद्रोहेण तु भूतानां वर्तनं साधुसाधनम् ।
सतां मार्गः स वै प्रोक्तो यत्रात्मा नैव बध्यते ॥४४॥
राजा चेत् स सदा राज्ये वर्तेताऽद्रोहवर्त्मना ।
सत्येन संविभागेन दमेन दयया तथा ॥४५॥
ह्रिया दानेन देवेऽतिभक्त्या प्रजासु रक्षया ।
वशिभावेन च प्रियाऽप्रियतुल्यमनीषया ॥४६॥
यज्ञशिष्टादनेनाऽपि साध्वनुग्रहणेन च ।
तस्याऽयं च परो लोको भवेच्छ्रेष्ठफलोदयः ॥४७॥
एवं धर्मपराणां वै साधुसेवाजुषां सदा ।
प्रजारक्षार्थमेवाऽत्र युध्यतां धर्महेतवे ॥४८॥
भवेत् स्वर्गात्परे स्वर्गे सर्वोत्तमा गतिः शुभा ।
पूर्वे रुद्राश्च वसवश्चादित्या लोकपालिनः ॥४९॥
साध्या मरुतो विश्वेशा देवा धर्मं तथाविधम् ।
कृत्वा पुण्यैः परं स्वर्गं प्राप्तास्ततोऽत्र मानवाः ॥५०॥
तद्विधं धर्ममाश्रित्य यान्तु वै परमां गतिम् ।
गृहस्थं हि सदा देवाः पितरोऽतिथयस्तथा ॥५१॥
भृत्याः सन्तश्च सततं चोपजीवन्ति मानवाः ।
वयांसि पशवश्चापि भूतान्युपाश्रितानि च ॥५२॥
तपो यज्ञस्तथा विद्या भैक्ष्यमिन्द्रियसंयमः ।
ध्यानमेकान्तशीलत्वं तुष्टिर्ज्ञानं च सेवनम् ॥५३॥
विप्रधर्मा गृहस्थे ये ते कृष्णेऽर्प्याः सदा मयि ।
यज्ञो विद्या समुत्थानं श्यर्जनं दण्डधारणम् ॥५४॥
उग्रत्वं चरितं ज्ञानं प्रजावनं प्रदानकम् ।
राजधर्मा गृहस्थे ये ते कृष्णेऽर्प्याः सदा मयि ॥५५॥
धनार्जनं व्यवसायो दानं च पालनादिकम् ।
सस्योत्पत्त्यादिकं वैश्यधर्मा अर्प्या मयि प्रभौ ॥५६॥
सेवनं सहनं चाज्ञावर्तनं शेषभोजनम् ।
भृत्यत्वं शूद्रधर्मा येतेऽप्यर्प्या मयि माधवे ॥५७॥
पातिव्रत्यं गुरोः सेवा गृहसंस्करणादिकम् ।
अपत्यरक्षणं नारीधर्मा अर्प्याः प्रभौ मयि ॥५८॥
अध्ययनं खेलनं च विकासनं च रञ्जनम् ।
नर्म साहसकं बालधर्मा अर्प्याः प्रभौ मयि ॥५९॥
कामो बलं स्वार्थदृष्टिर्विजयोऽतिविचारिता ।
अर्जनं योजनं युवधर्मा अर्प्याः प्रभौ मयि ॥६०॥
जल्पनं कम्पनं पारवश्यं चाशक्तिरुग्रता ।
आलस्यं चाऽवमानादि मय्यर्प्या वृद्धधर्मकाः ॥६१॥
ताडनं सहनं दुःखं दारिद्र्यं पशुतुल्यता ।
दण्डः पारुष्यमर्प्याश्च दीनधर्माः प्रभौ मयि ॥६२॥
हास्यं रतिर्विलासश्च प्रीतिर्दासीत्वमुग्रता ।
बन्धो निराश्रितेत्यर्प्या स्त्रीधर्मा वै प्रभौ मयि ॥६३॥
इत्येवं वर्तमानानां मय्येवार्पितचेतसाम् ।
समुद्धारं करोम्येव मृत्युवार्धिनिमज्जताम् ॥६४॥
पुरा शंखश्च लिखितो भूदेवसंभवौ मुनी ।
अभूतां भ्रातरावावसथावास्तां तयोः पृथक् ॥६५॥
नित्यं पुष्पफलैर्वृक्षैरुपेतौ बाहुदामनु ।
कदाचिल्लिखितश्चायादाश्रमे शंखपालिते ॥६६॥
शंखो नाऽभूदाश्रमे तु तदा वनान्तरं गतः ।
लिखितः पातयामास पक्वानि तु फलानि वै ॥६७॥
भक्षयामास तत्रैव तावच्छंख उपागतः ।
भ्रातरं प्राह चाऽपृष्ट्वा सस्वामिकानि वै त्वया ॥६८॥
पातितानि फलान्यत्र तव धर्मोऽत्र दूष्यति ।
त्वया स्तेयं कृतं चेदं फलान्यादद्ता स्वयम् ॥६९॥
गच्छ राजानमासाद्य चौर्यं कर्म निवेदय ।
सोऽपि तूर्णं गतो भूपं न्यवेदयच्च कर्म तत् ॥७०॥

मया चौर्यं कृतं प्रायश्चित्तं तस्य प्रदेहि मे।
सुद्युम्नो नाम राजाऽऽह यदि राजा मतस्तव ॥७१॥
तदाऽनुज्ञां मम विप्र गृह्णाऽन्यद् दण्डतो वृणु।
एवमुक्तोऽपि ऋषिराट् वरयामास नेतरत् ॥७२॥
ततो राजा करौ प्रच्छेदयामास ऋषेस्ततः।
धृतदण्डो ययौ विप्रो भ्रातरं प्रजगाम ह ॥७३॥
शंखस्तं प्राह धर्मिष्ठ भ्रातर्याहि च बाहुदाम्।
ऋषीन् पितॄन् सुराँश्चैव तर्पयस्व यथाविधि ॥७४॥
ततः पुनः कदाचिद्वै नैवाऽधर्मे मनः कृथाः।
शंखस्याऽऽज्ञां गृहीत्वैव लिखितो बाहुदां ययौ ॥७५॥
अवगाह्याऽऽपगां पुण्यां प्रायश्चित्तफलं मयि।
समर्प्योदकदानार्थं यावद्विप्रः प्रचक्रमे ॥७६॥
प्रादुरास्तां करौ तावत्तस्य मय्यर्पणात्तदा।
ततः कृत्वोदकदानं सर्वार्पणं सदा मयि ॥७७॥
समाचरत् स विप्रोऽत्र कर्मभूमौ निरन्तरम्।
विज्ञायाऽर्पणमाहात्म्यं सर्वपापप्रणाशनम् ॥७८॥
राजा यो दत्तवान् दण्डः सोऽपि तेनाऽर्पितो मयि।
उदकादिप्रदानं च लिखितेनाऽर्पितं मयि ॥७९॥
शंखेनाऽऽज्ञावचनं च तथैवाऽभ्यर्पितं मयि।
एवं सर्वार्पणेनैते पूता मम प्रभावतः ॥८०॥
न बाह्वोषोऽस्ति शंखस्य दण्डदोषो न भूभृतः।
हस्तदोषो नापि तथा लिखितस्य मदर्पणात् ॥८१॥
इत्येवं मानवा ये मां स्मृत्वा मयि समर्प्य च।
भुञ्जते चापि वर्तन्ते निर्बाधास्ते ममाश्रिताः ॥८२॥
मामेवान्ते प्रयान्त्येव कर्मपाशविवर्जिताः।
तथा यूयं राजवर्गाः प्रजावर्गाश्च सर्वशः ॥८३॥
मयि सर्वार्पणं कृत्वा भजित्वा यात धाम मे।
अहमन्तेऽसुविगमे तूपस्थास्यामि गोचरः ॥८४॥
नयिष्येऽहं विमानेन मद्भक्तान् धाम मे परम्।
भजनं मे प्रकुरुत प्रपूजयत मां सदा ॥८५॥
दृढाश्रयं मे कुरुत नयिष्ये धाम मे परम्।
इत्युक्त्वा भगवानाह लोमशाय महात्मने ॥८६॥
देहि मन्त्रान् प्रजाभ्यश्च गृह्णन्तु भोजनं जनाः।
इत्युक्तः स ददौ मन्त्रान् शरणागततारकान् ॥८७॥
अथ सर्वप्रजाः स्वस्वगृहान् ययुस्ततो हरिः।
भोजनं राधिके चक्रे सर्वेऽपि भोजनं व्यधुः ॥८८॥
रात्रौ विश्रान्तिमासाद्य प्रातरुत्थाय सत्वरम्।
कृतनित्यविधिः कृष्णो निषसाद निजासने ॥८९॥
तावद् राजा दुग्धपानादिकं कारयितुं प्रभुम्।
प्रार्थयामास च हरिश्चकार दुग्धभोजनम् ॥९०॥
ताम्बूलकं चाददेऽपि प्रस्थानार्थमियेष च।
अन्येऽपि कृतदुग्धादिभोजनाः प्रातरेव ह ॥९१॥
गन्तुं सज्जा बभूवुश्च तावद् राज्ञी सकन्यका।
पूजनार्थं चाययौ च पुपूज परमेश्वरम् ॥९२॥
सप्तकन्याः कुमार्यश्च जगृहुश्च करं हरेः।
करदानं तथा कृत्वा प्राप्य कान्तं परेश्वरम् ॥९३॥
वरमालादिकं प्राप्य कृतकृत्यास्तदाऽभवन्।
ब्रह्मप्रियासु ताः सप्त मिलित्वा तद्विमानकम् ॥९४॥
आरुरुहुस्तदा राजा हरिं पुपूज चादरात्।
प्रजा विदायदानं च ददुः राजोपदा ददौ ॥९५॥
तदा वाद्यान्यवाद्यन्त प्रस्थानसूचकानि वै।
महीमाना विमानानि चारुरुहुस्ततः प्रभुः ॥९६॥
आरुरोह विमानं स्वं कुटुम्बेन च शंभुना।
सह स्वेष्टजरेणापि मुनिना भक्तिशालिना ॥९७॥
राज्ञा च जयकृष्णवनाम्ना तदाऽर्थितो हरिः।
अल्पकेत्वादिकान् वर्धयित्वाऽऽशीर्भिस्तदाऽम्बरे ॥९८॥
विमानेन गतिं चक्रे जयकृष्णवराष्ट्रकम्।
अल्पाद्रिं च व्यतिक्रम्य स्वेष्टजराश्रयां भुवम् ॥९९॥
प्रापाऽम्बरे हरिकृष्णस्तथाऽन्ये व्योमवाहनाः।
राहूनाया आपगाया मूलदेशेषु चाययुः ॥१००॥
राजा ऋषिर्ययतुश्च पूर्वं स्वागतसिद्धये।
भूतलं चक्रतुस्तत्र वाद्याद्यैः स्वागतं हरेः ॥१०१॥
वरणां नगरीं दृष्ट्वा जहर्ष हरिरीश्वरः।
विशालां शोभितां शृंगारितां च राधिके तदा ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने-ऽल्पकेतोर्जीवन्यां नगर्यां श्रीहरेर्भ्रमणं पूजनं सभायां शंखलिखितदृष्टान्तेनोपदेशनं भोजनं रात्रौ विश्रमणं प्रातर्भोजनोत्तरं स्वेष्टजरर्षिदेशेषु जयकृष्णवनृपतेः षष्ठ्यां वरणानगर्यामागमनमित्यादिनिरूपणनामा पञ्चाशीत्यधिकशततमोऽध्यायः ॥ १८५ ॥

श्रीकृष्ण उवाच—

आकाशाद् भगवान् राधेऽपश्यत् प्रावरणां पुरीम्।
राज्ञाऽऽदिष्टेन मार्गेणाऽवातारयद् विमानकम् ॥ १ ॥
अन्यान्यपि विमानानि चावतेरुस्तदुत्तरम्।
भूरिवाद्यान्यवाद्यन्ताऽजायन्त जयघोषणाः ॥ २ ॥

जयनादाश्वाऽभवँश्च प्रजाहर्षा ममुर्न च ।
श्रीहरिं तु स्वयं राजाऽभिगत्वा स्वर्णहारकैः ॥ ३ ॥
पुष्पहारैर्गुच्छपुष्पाऽक्षताद्यैः समपूजयत् ।
राजभृत्याः श्रेष्ठिनश्च प्रजाः स्वागतमाचरन् ॥ ४ ॥
नमस्कारैर्जयध्वानैस्तथा संकीर्तनैः शुभैः ।
उत्साहं दर्शयन्त्यश्च प्रजाः मानमदर्शयन् ॥ ५ ॥
श्रीहरेश्चरणौ वार्भिः प्रक्षाल्याऽमृतमापपौ ।
राजा कुटुम्बसहितः प्रजास्तदमृतं पपुः ॥ ६ ॥
ईशानस्याऽर्हणं चक्रुस्तथाऽन्येषां यथायथम् ।
राज्ञी ब्रह्मप्रियादीनामर्हणां संव्यधात्तथा ॥ ७ ॥
शृंगारितेषु सैन्येषु हस्तियानेषु सर्वशः ।
आरोहयित्वा भगवान् गजयानं समारुहत् ॥ ८ ॥
नगर्यां वाद्यगीतैश्च राजा कृष्णं महापथे ।
रथ्यायोगेषु सर्वेषु हरिं त्वभ्रामयन्मुदा ॥ ९ ॥
राजसौधे भृत्यसौधे प्रधानस्य गृहेऽपि च ।
प्रजालयेषु चान्येषु प्रजाः नीत्वाऽर्हणां व्यधुः ॥१०॥
पावनीं नगरीं कृत्वा मध्याह्ने भगवान् निजम् ।
आवासं त्वाययौ स्नानं चक्रे विश्रान्तिमाप च ॥११॥
सर्वे श्रान्तास्ततो राजा भोजनानि शुभानि वै ।
कारयामास युक्तानि प्रमिष्टान्नानि भूरिशः ॥१२॥
भगवान् बुभुजे चान्ये प्रचक्रुर्भोजनं ततः ।
विश्रम्य तु क्षणं सायं सभां चक्रे प्रभुर्हरिः ॥१३॥
तत्रोपदेशं प्रददौ बालकृष्णः स्वयं यथा ।
पुण्यपापे तु पन्थानौ युज्येते देहिना सदा ॥१४॥
काले पापं च वा पुण्यं दुःखं सुखं ददात्यपि ।
भवतां फलितं पुण्यं यदत्र तु ममाऽऽगमः ॥१५॥
मम योगो मम सेवा बहुपुण्यफलं त्विदम् ।
मन्त्रः फलति कालेन काले फलति चौषधम् ॥१६॥
काले वृष्टिश्च भवति वृक्षाः फलन्ति कालतः ।
चन्द्रः काले पूर्यते च पूर्यन्ते सरितोऽपि च ॥१७॥
प्राप्ते तु समये समृद्धिः स्वयमेवाभिगच्छति ।
बीजमुप्तं च समये कालागमे प्ररोहति ॥१८॥
काले जरा तथा काले रसहानिर्द्रुमेष्वपि ।
कालकृतो हि पर्यायः सर्वान् स्पृशति देहिनः ॥१९॥
विचार्यैवं स्वस्थकाले परमेशं श्रयेत् सुधीः ।
कालोऽयं मंगलतमो भवतां विद्यतेऽधुना ॥२०॥
योगोऽत्र भवतां जातो मम नारायणस्य वै ।
एतादृशं तु साक्षान्मां लब्ध्वा येऽन्यत्र संस्थिताः ॥२१॥
मुग्धा वाऽज्ञानसम्पन्नास्तेषां हानिः पदे पदे ।
परमेशं विहायैव तृष्णालोभसमुद्भवैः ॥२२॥
वेगैश्चान्यत्र विषये स्थितास्ते दुःखभागिनः ।
तृष्णार्तिप्रभवं दुःखं फलं तेषां न चेतरत् ॥२३॥
यद्वा लभ्येत चेद् दुःखोत्तरं सुखं क्षणस्थिरम् ।
सुखस्याऽनन्तरं दुःखं दुःखस्याऽनन्तरं सुखम् ॥२४॥
सुखमेव हि दुःखान्तं सुखान्तं दुःखमेव च ।
तस्मादेतत् द्वयं जह्याद् य इच्छेच्छाश्वतं सुखम् ॥२५॥
यन्निमित्तो भवेच्छोकस्तापो वा मूर्छनादिकम् ।
तत् त्यजेद् बुद्धिमानत्र शाश्वतं सुखमर्जयेत् ॥२६॥
सर्वं सुखं दुःखनान्तरीयकं मायिकं त्विह ।
दुःखानां तु क्षयो नास्ति जायते ह्युत्तरोत्तरम् ॥२७॥
तस्मात् पर्यायभावेन चान्तर्भावेन सर्वदा ।
सुखमिश्रं समायाति दुःखं संसारिणः खलु ॥२८॥
विचार्यैवं क्षणं नष्टं बह्वायासं च तापकृत् ।
सुखसंज्ञं ध्रुवसंज्ञं शाश्वतं सुखमर्जयेत् ॥२९॥
सेवया तपसा भक्त्या धर्मेणैकान्तिकेन च ।
दानेन निग्रहेणाऽपि यान्ति सुखं हि शाश्वतम् ॥३०॥
सन्तोषो वै स्वर्गतमः सन्तोषः परमं सुखम् ।
तुष्टिः सुधाऽमृतं तुष्टिस्तुष्ट्या वै सिद्धिरुत्तमा ॥३१॥
नारायणाश्रितो जीवो नारायणबलात् सदा ।
बिभेति न परात् क्वापि नाऽस्माद् बिभ्यति केचन ॥३२॥
सर्वत्र मत्कृताह्लादो ब्रह्म सम्पद्यते तदा ।
यदा न भावं कुरुते कस्मिंश्चिदपि पापकम् ॥३३॥
मनसा कर्मणा वाचा ब्रह्म सम्पद्यते तदा ।
मानमोहौ हतौ येन हताः संगा मृषा तथा ॥३४॥
ममाश्रयमुपेतश्च निर्वाणमुपयाति सः ।
मत्वा क्षयान्तनिचयान् पतनान्तसमुच्छ्रयान् ॥३५॥
वियोगान्तकसंयोगान् मरणान्तकजीवनम् ।
दुःखान्तकसुखं चापि विज्ञो मां समुपाश्रयेत् ॥३६॥
सुखं वा यदि वा दुःखं क्रमेणैवोपपद्यते ।
तदस्य चेतनामाशु हरत्येव च देहिनः ॥३७॥
सत्येवं चाभिजातोऽस्मि सिद्धोऽस्मि चास्मि वै महान् ।
इत्येवं सिच्यते चित्तं नष्टस्मृतिर्भवत्यपि ॥३८॥
नष्टस्मृतिः परस्वानामादानं साधु मन्यते ।
तमतिक्रान्तमर्यादं राजा शास्ति यमस्ततः ॥३९॥
तस्माद् विचार्य वीक्ष्यापि विज्ञो भैषज्यमाचरेत् ।
साधूनां शरणं यद्वा श्रीमन्नारायणस्य च ॥४०॥

अन्यथा दुःखसम्पत्तिर्विभ्रमोऽनिष्टवेदनम् ।
त्रिकं समुपपद्येत चतुर्थं नाऽस्य विद्यते ॥४१॥
जरामृत्यू हि भूतानां खादितारौ यथा वृकौ ।
न कश्चित्तावतिक्रामेदपि ब्रह्माण्डभूपतिः ॥४२॥
उपस्थितस्य दुःखस्य परिहारो न विद्यते ।
सुखस्यापि तथा बोध्यं नैकान्तं तच्च विद्यते ॥४३॥

अर्था नाऽऽयान्ति संसारे वाञ्छिताः किन्तु चान्यथा ।
उपतिष्ठन्ति वर्तन्तेऽवर्जनीयाः सदाऽन्यथा ॥४४॥
अप्रियैः सह संयोगो वियोगः सुप्रियैः सह ।
अर्थाऽनर्थकरावेतौ सुखदुःखप्रदौ मतौ ॥४५॥
उत्पत्तिः पुष्टिरन्तश्च सर्वेष्वेते प्रतिष्ठिताः ।
गन्धरूपरसस्पर्शाः काले सन्ति प्रयान्ति च ॥४६॥
आसनं शयनं यानं विमानं पानमञ्जनम् ।
भोजनं च समुत्थानं जायते च विनश्यति ॥४७॥

वैद्या अपि तु रुग्णास्ते बलिनः स्त्रीषु निर्बलाः ।
श्रीमन्तोऽपि तु षण्ढास्ते विचित्रः कर्मपर्ययः ॥४८॥
कुले जन्म महावीर्यमारोग्यं रूपमार्जवम् ।
सौभाग्यमुपभोगाद्या लभ्यन्ते बहुपुण्यतः ॥४९॥
तेषु सत्स्वपि भक्तिश्चेत् कृष्णे नास्तीति निष्फलाः ।
सन्ति पुत्रा दरिद्राणां बहवश्चाप्यनिच्छताम् ॥५०॥
नास्ति पुत्रः समृद्धानां विचित्रं कर्मचेष्टितम् ।
व्याधिस्तापश्च विदुषो बुभुक्षा निर्धने तथा ॥५१॥

आपदस्तु धनाढ्यस्य ज्वरश्च नृपतेः सदा ।
निर्माणं यस्य यत्तस्माद् विचित्रं कर्म चेष्टितम् ॥५२॥
युवा धनी मतो याति निर्धनः शतवर्षभाक् ।
अकिञ्चनाश्चिरंजीवाः समृद्धाश्चाल्पायुषस्तथा ॥५३॥
श्रीमत्सु भोगशक्तिर्न दरिद्रे जाठरोऽतिगः ।
सधने कार्यबुद्धिर्न विचित्रं कर्मचेष्टितम् ॥५४॥

एतद्विचार्य मतिमान् स्वात्मश्रेयः समाचरेत् ।
नौषधानि न वै मन्त्रा न होमा न पुनर्जपाः ॥५५॥
मानता मानवस्मृद्धिः प्राप्तमृत्युं न रक्षति ।
यथा पूरे तरुः काष्ठं समेयातां यदृच्छया ॥५६॥
समेत्य च व्यपेयातां तथा भूतसमागमः ।
स्त्रीराज्यसुतवन्तो ये येऽनाथाश्च परान्निनः ॥५७॥
ईश्वरा वा दरिद्रा वा कालस्तेषु समक्रियः ।
कृतविद्याश्च येऽन्धा वा बलवन्तो न यत्निनः ॥५८॥
भजमानाश्चाऽभजन्तः कालस्तेषु समक्रियः ।
अभुक्तं वा प्रभुक्तं वा रक्षितं नाऽऽहृतं च वा ॥५९॥

विप्रकृतं स्वीकृतं वा कालस्तेषु समक्रियः ।
मातापितृसहस्राणि पुत्रदारायुतानि च ॥६०॥
असंख्यधनराज्यानि भुक्त्वा त्यक्तानि जन्मसु ।
पुनः प्राप्तानि संसारे कस्य ते कस्य वा वयम् ॥६१॥
न चाऽस्य कश्चिद् भविता नाऽयं भवति कस्यचित् ।
मार्गे संगतमेवेदं दारबन्धुसुहृन्मयम् ॥६२॥

क्वाऽऽसे क्व च गमिष्यामि कोऽहं किमत्र चास्थितः ।
कियान् कालो ध्रुवो मेऽस्ति विचारयेत् पुनः पुनः ॥६३॥
अनित्ये दुःखसंवासे बहिः सुखसमेऽशुभे ।
मार्गे संगतमेवेदं माता भ्राता सुतः प्रिया ॥६४॥
जगन्मज्जति नित्यं च गंभीरे कालसागरे ।
जरामृत्युमहाग्राहे न कश्चिदवबुध्यते ॥६५॥
आयुर्वेदमधीयाना अपि व्याधिपराभवाः ।
पिबन्तोऽपि कषायाँश्च न मृत्युमतियान्ति ते ॥६६॥

रसायनपिबाश्चापि भवन्ति जरयाऽऽप्लुताः ।
तपस्विनोऽपि दातारो यज्विनोऽपि चिरंस्थिताः ॥६७॥
दिव्यदेहाश्चाम्बरस्था अपि जीर्यन्ति कालतः ।
न ह्यहानि निवर्तन्ते भूतानां यानि यान्ति वै ॥६८॥
कालाध्वानमनन्तं वै सर्वलोकनिषेवितम् ।
कृतस्थैर्योऽपि संयाति जनोऽवशोऽतिलालसः ॥६९॥
देहो जीवं च वा जीवो देहं चाभ्येति पान्थवत् ।
पान्थेन पान्था अभ्येत्य वियन्ति बान्धवादयः ॥७०॥

नाऽत्राऽत्यन्तं सुसंवासो लभ्यते जातु केनचित् ।
अपि स्वेन शरीरेण तदाऽन्येन तु का कथा ॥७१॥
क्व गताः कर्मिणः पूर्वे पितामहादयस्त्वतः ।
न पश्यामो वयं ताँस्तु ते न पश्यन्ति नोऽपि च ॥७२॥
मायया तु पिशाचिन्या भक्षिताः पाचनं गताः ।
अगाधगर्ते संसुप्ता न निस्सरन्ति ते पुनः ॥७३॥

तस्माद् विचार्य कालं च कर्म मायां विडम्बिनीम् ।
देहं विश्वासहं चापि संगतानां वियोजनम् ॥७४॥
स्वस्याऽस्थैर्यं कालभक्ष्यं चाकस्मिकं जगत्तथा ।
भजन्तु भगवन्तं मां रक्षकं कालपाशतः ॥७५॥

मद्योगे न पुनर्मृत्युर्न ग्रासः कालभोगिनः ।
न नाशः सुखसम्पत्तेर्धाम्नि मे भवतां भवेत् ॥७६॥
मच्छ्रयाश्च मन्मनसो मदर्पितेन्द्रियार्थकाः ।
मत्स्वरूपे स्थितप्रज्ञा यान्ति मे शाश्वतं सुखम् ॥७७॥
ज्ञानं चामृतमेवोक्तं यदि बोधफलं भवेत् ।
सेवा मे भोजनं तस्य यदि श्रद्धान्विता भवेत् ॥७८॥

प्राप्तिर्मे तृप्तिरेवाऽस्ति यदि माहात्म्यसंयुता ।
सर्वार्पणं मयि तस्य शाश्वतानन्ददायकम् ॥७९॥
एवं विचिन्त्य वै भक्ता नरा नार्योऽपि सर्वथा ।
कर्म सर्वविधं कृष्णे मय्यर्पयन्त्वहर्निशम् ॥८०॥
अहं नैर्गुण्यमेतस्मिन् प्रापय्य फलवर्जनाम् ।
मदात्मकफलावाप्तिं दास्ये चोद्धारसंज्ञिताम् ॥८१॥
इत्युक्त्वा भगवान् राधे विरराम ततो जनाः ।
पुपूजुः परया भक्त्या बालकृष्णं क्रमेण वै ॥८२॥
चन्दनेन कुसुमैश्चाऽक्षतैर्हारैः सुगन्धिभिः ।
पुष्पसारै रससारैरम्बरैर्बहुमूल्यकैः ॥८३॥
विभूषाभिः फलैर्बीजैर्मौक्तिकै रत्नहीरकैः ।
उपदाभिर्विविधाभिरर्चयित्वा ततो जनाः ॥८४॥
आरार्त्रिकं व्यदधुश्च नमः स्तुतिं व्यधुस्तथा ।
अथ राजा तथा राज्ञी तथा राजकुटुम्बकम् ॥८५॥
सभायास्तु समाप्तिं वै कृत्वा निजालये हरिम् ।
सन्निन्युर्भोजयामासुर्हरिं हरेः कुटुम्बिनः ॥८६॥
महर्षींश्च महीमानान् ब्रह्मप्रियास्तथाऽपरान् ।
भोजयामासुरत्यर्थं राजसेवापरायणाः ॥८७॥
ततो राज्ञी स्वयं कन्यामाह नैजां सुशोभनाम् ।
एकामेवाऽद्वितीयां तां कृष्णहस्तं गृहाण वै ॥८८॥
सापि चेच्छावती शीघ्रं कृष्णहस्तं समग्रहीत् ।
मालां सौवर्णजां रत्नखचितां श्रीहरेर्गले ॥८९॥
न्यधात् पुष्पमयीं चापि हरिस्तस्या गले ह्यपि ।
एवं विवाहविधिना राजकन्याऽऽप माधवम् ॥९०॥
तदुत्सवं तदा राजा चक्रेऽथ च ततः परम् ।
रात्रौ विश्रम्य भगवान् प्रातः प्रजाजनान् स्वयम् ॥९१॥
श्रावयामास च मन्त्रं नैजं वैष्णवताप्रदम् ।
कृताह्निकस्ततो गन्तुं मनो दधेऽथ भूपतिः ॥९२॥
दुग्धभोज्यैर्हरिं सर्वान् महीमानान् समन्ततः ।
भोजयामास विधिना विदायं च ददौ ततः ॥९३॥
यानवाहनसैन्यैश्च वाद्यघोषैर्जयस्वनैः ।
पुष्पाक्षतैर्हर्षणैश्च विदायं प्रददौ तदा ॥९४॥
विमानान्यभवन् व्योम्नि निषेदुः सर्वशो जनाः ।
हरिर्विमानमारुह्य गत्यर्थं च समैरयत् ॥९५॥
राहूनां चापगां क्रान्त्वा व्योम्नि विमानकानि वै ।
फेरुनसर्षिवासात्मप्रदेशान् प्रययुर्द्रुतम् ॥९६॥
परीशानो नृपश्चात्र फेरुनसो मुनिस्तथा ।
विमानं चाग्रतः कृत्वाऽवतेरतुर्भुवं द्रुतम् ॥९७॥
स्वागतार्थं हरेः राजा सैन्यं समैरयच्छुभम् ।
वाद्यघोषान् जयशब्दान् यन्त्रस्फोटानकारयत् ॥९८॥
प्रजा व्योम्नि विमानानि प्रतीक्षन्ते स्म सादरम् ।
लाजाक्षतकुसुमाद्यैर्युक्ता हर्षभरास्तदा ॥९९॥
अथ श्रीबालकृष्णो वै ददर्श शोभनाः स्थलीः ।
सेनानदीतटे रम्ये परीशां नगरीं शुभाम् ॥१००॥
शोभया नाकमधरं कुर्वाणां स्मृद्धिशालिनीम् ।
उद्यानैर्मिश्रितां सौधैः स्वर्णवर्णैर्विराजिताम् ॥१०१॥
विशालां देवतुल्यैश्च मानवैरधिवासिताम् ।
राधिके त्वत्समाभिश्च सुन्दरीभिर्विराजिताम् ॥१०२॥
राजदर्शितमार्गेण महोद्याने नृपालये ।
विमानं श्रीबालकृष्णः समवातारयच्छनैः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने जयकृष्णवराजर्षिराज्ये विमानादवतीर्य वरणानगरीं परिभ्रम्य पूजां प्रगृह्योपदेशं दत्वा रात्रौ भोजनं विश्रान्तिं लब्ध्वा प्रातश्चाह्निकं कृत्वा दुग्धपानाद्युत्तरम् षष्ठ्यां फेरुनसर्षिदेशान् परीशानराजराज्यं हरिर्जगामेत्यादिनिरूपणनामा षडशीत्यधिकशततमोऽध्यायः ॥ १८६ ॥

श्रीकृष्ण उवाच—

गोलोकराशेश्वरि बालकृष्णो
विमानमध्याद् बहिराजगाम ।
ददर्श लक्षाधिकमानुषाणां
सम्मर्दमाश्चर्यकरं तदानीम् ॥ १ ॥
चकोरजातीयसमस्तकानां
यथेन्दुतेजोवलयेऽक्षिवृत्तिः ।
तथाऽखिलस्वागतकारकाणां
परेश्वरेऽभूद् वरदेऽक्षिवृत्तिः॥ २ ॥
यथा मयूरा घनदर्शनेन
भवन्ति केकानिनदेऽतिमग्नाः ।
तथा प्रजाः श्रीहरिदर्शनेन
तदाऽभवन् वै जयनादमग्नाः ॥ ३ ॥
यथा घने स्वातिजलेऽतिहृष्टा
नन्दन्ति वै चातकपक्षिसार्थाः ।
तथा घनश्यामफलेऽतिहृष्टा
आनन्दिताः स्वागतपक्षिसार्थाः ॥ ४ ॥

यथा तु बाला मधुरां सुशर्करा-
मासाद्य मोदातिभृता भवन्त्यपि ।
तथा प्रजाः स्वेष्टसुधाननं प्रभुं
सम्प्राप्य मोदातिभृतास्तदाऽभवन् ॥ ५ ॥

यथा सती कान्तमतीव सुन्दरं
चिरं वियुक्तं ह्यधिगम्य मोदते ।
तथा प्रजास्तं परकान्तमच्युतं
सदावियुक्तं प्रतिलभ्य हर्षिताः ॥ ६ ॥

यथा पतंगा ह्यतितेजसानलं
विलोक्य कृष्टा अभियन्ति मोहिताः ।
तथा प्रजांगानि समुज्ज्वलं प्रभुं
विलोक्य कृष्टानि पतन्ति मोहिनि ॥ ७ ॥

यथा निशेशं प्रसमीक्ष्य पूर्णिनं
जगत्सु वारांनिधयो द्रवन्त्यभि ।
तथाऽक्षरेशं प्रसमीक्ष्य पूर्णकं
प्रजाब्जकोट्योऽभिमुखं द्रवन्त्यपि ॥ ८ ॥

यथाऽऽप्य लौहानि तु लौहकान्तं
निसर्गतस्तत्परितोऽभियन्ति ।
तथाऽऽप्यलोका बहुलोककान्तं
निसर्गतो बालहरिं प्रयान्ति ॥ ९ ॥

यथा तु नद्यो जलधिं प्रयान्ति
यथेष्टलभ्ये हृदयानि यान्ति ।
तथा प्रजानां हृदयानि कृष्णे
समस्तदिग्भ्यो ह्यभवन् गतानि ॥१०॥

श्रीबालकृष्णोऽमिततेजसाऽन्वितो
बभूव मध्याह्नगभास्करोपमः ।
सुश्वेतरूपातिमनोहरप्रजा
बभूवुरुन्निद्रसरोजसन्निभाः ॥११॥

तदा विमानं हरिणा त्वधिष्ठितं
पुष्पाञ्जलक्षैः कुसुमायनं ह्यभूत् ।
विचित्रजातीयसुमाधिवाटिका-
भ्रमोद्वहं मन्दरशृंगमीक्षितम् ॥१२॥

हरिस्तदाऽभूत् खलु पुष्पवृक्षः
सर्वौषधिमिश्रणगुच्छशोभः ।
निजाक्षरस्याननगह्वराद्वा
विनिष्क्रमन्नक्षरमुक्तशोभः ॥१३॥

धृतोऽच्युतेनाऽच्युतहीरकान्वितः
सुवर्णमाणिक्यसुरत्नमुक्तवान् ।
किरीटवर्यो निजमूर्ध्नि कल्गियुग्
यथास्थितः संशुशुभे दिवस्पतिः ॥१४॥

निसर्गजाऽसंख्यकरश्मिजालवान्
मुखाभितेजः परिधिः समन्ततः ।
सहस्रभावृत्तनिशांपतिः स्थितो
ह्यभिन्नतायाः स्मृतिमातनोत्यपि ॥१५॥

विशालभालं सितकेसरद्वयो-
र्ध्वरेखयुक्तसत्तिलकेन भायुजा ।
जनेभ्य आवेदयति द्विमार्गको
सुरेश्वरस्याऽक्षरधामकस्य च ॥१६॥

नेत्रे विशाले च मनोहरे प्रिये
सुचञ्चले प्रेमभरेऽतिमञ्जुले ।
अनन्तवात्सल्यविवर्षिणी हरे-
स्तदा विभिन्नाङ्कितबोधिनी मते ॥१७॥

प्रवालरक्तायनकाधरौ हरेः
सानन्दमन्दस्मितसंभृतौ तदा ।
आकर्षणं चाऽऽदधतश्च योषितां
समस्तभावैर्मनसां तथाऽऽत्मनाम् ॥१८॥

सुवर्तुलौ कुंकुमरंगसंस्पृशौ
समुन्नतौ कान्तिविलासिनौ हरेः ।
आनन्दपूर्णौ मणितुल्यभास्वरौ
मृदू समास्तां हृदयंगमौ शुभौ ॥१९॥

अदक्षहस्तो धृतपुष्पगुच्छको
वरप्रदोऽभूच्च तदा समुन्नतः ।
धनुर्ध्वजस्वस्तिकशूलमत्स्यका-
ऽऽबाणाढ्यदक्षोऽभयदः करोऽभवत् ॥२०॥

विशालवक्षःस्थलशोभिचञ्च-
न्नवीनवैचित्र्यसुपुष्पमालाः ।
सम्मिश्रणं प्राप्य च कौस्तुभेन
श्रियो मुखं वक्षसि दर्शयन्ति ॥२१॥

स्कन्धौ दृढौ पुष्पसुमालिकाभि-
र्व्याप्तौ तथा कर्णसुकुण्डलाक्तौ ।
रत्नत्विषा पारवतीप्रभे च
राधारमेऽदर्शयतां भुजस्थले ॥२२॥

तदोदरं दिव्यसुपुष्पहारै-
श्छन्नं हरेर्व्यजयति प्रजाभ्यः ।
हारात्मनिःश्रेणिकया विशन्तु
वक्षःस्थले भक्तियुजो मदूर्ध्वम् ॥२३॥

असंख्यदासीपरिसेवितांऽघ्रि-
द्वयं व्यराजत् स्थलपद्मकाभम् ।
जनप्रवाहैः सततं नतं चाऽऽ-
नन्यप्रदं स्वल्पसमर्पितस्य ॥२४॥

हरिस्तदा भूपतिभिस्तु सम्राड्
राजा प्रजाभिश्च गुरुः प्रशिष्यैः ।
सद्भिश्च साधुः प्रमदाभिरिष्टो
दीनैश्च दाता कविभिः पुराणः ॥२५॥

प्राप्यश्च भक्तैरणुरेव योगिभिः
रूपप्रियाभिर्नटवर्यवेशकः ।
कान्तः सतीभिः ऋषिभिश्च वैदिको
मनोहरः सर्वजनैरपेक्षितः ॥२६॥

सोपानमार्गेण हरिर्हसन् शनै-
रवाततारेश्वरपुष्पवार्षितः ।
पुरांगनाद्यक्षतवर्धितो जनै-
र्जयध्वनिश्रावित आप्तकामनः ॥२७॥

प्रदर्शयन् नैजजनूंषि वै मुहुः
सोपानकेभ्यः समवाततार ह ।
राजा स्तृतौ कौशिककोमलाम्बरं
समास्तरत्पादनिधानकक्रमात् ॥२८॥

यत्राऽभवच्छोभनकानको रथः
शतैकसौवर्णघटाधिशृंगवान् ।
अष्टैकचक्रातिसुवेगवानपि
चतूरदैर्वारणसप्तकैर्युतः ॥२९॥

मध्ये परीभिः परितः परीभिः
सुराङ्गनाद्यर्पितमालिकाभिः ।
भ्रूसन्मुखाभिः प्रियसुन्दरीभिः
शृंगारितः पुष्पविमानतुल्यः ॥३०॥

राजा परीशानक एव तं हरिं
निनाय तूर्णं सकुटुम्बकं प्रभुम् ।
रथे समारोहयदीश्वरेश्वरं
न्यषादयत् कानकवारणासने ॥३१॥

पुपूज हारैर्विविधैर्विचित्रैः
सुगन्धिसारैः सुमचन्दनैश्च ।
लाजाऽक्षतैः शीतसुगन्धिवार्भिः
सौवर्णभूषाभिरमूल्यवस्त्रैः ॥३२॥

ददौ च राजा सुरवालमुत्तमं
कौशेयमत्युत्तमरुक्मबुट्टकम् ।
तथा ददौ कञ्चुकमुज्ज्वलं तथा-
विधं महाभूपतिधार्यमुत्तमम् ॥३३॥

ददौ च हीराञ्चितरत्नराजिभिः
समन्वितं सन्मुकुटं सकलिंगकम् ।
ददौ विभूषाश्च सुवर्णवैकृता
दधार सर्वान् भगवान् परेश्वरः ॥३४॥

पपौ जलं श्रीहरिपादधौतं
दधार मूर्ध्नि स्वकुटुम्बयुक् च ।
हरिर्ददौ कण्ठगलां सुमालां
गुच्छं च राज्ञे स्वकृपाभिशंसम् ॥३५॥

जनास्तु लक्षाधिकगौरमूर्तयः
सुरालयात् किं सुगतास्तदाऽभवन् ।
चन्द्राभशोभाः खलु शुक्लवर्णकाः
सुपिंगनेत्रास्तनुदीर्घयष्टयः ॥३६॥

गौर्यश्च कन्याः प्रमदा युवत्यो
वृद्धा अपि स्वल्पनिगूढदेहाः ।
समानरङ्ग्यो धृतचित्रछत्र्यो
विवृत्तकेश्यश्च पिशंगनेत्र्यः ॥३७॥

संलग्नवेषा मृदुशोणकान्तिकाः
सुसूक्ष्मपार्ष्णिभ्रमिपादरक्षिकाः ।
सुकुण्ठितान्ताम्बरदृश्यवर्ष्मिका
गौर्यः प्रगौर्योऽप्यभवन् सुहर्षिताः ॥३८॥

नेदुर्महादुन्दुभयस्तदानीं
व्यंगूलवाद्यानि मयूरकाणि ।
विपञ्चिका वंशनिनादकानि
वीणास्तथा बन्दिकतूर्यकाणि ॥३९॥

जयप्रणादा ह्यभवँस्तदाऽभितो
यशोगुणानां बहुकीर्तनान्यपि ।
सहस्रकण्ठस्वरमिश्रितान्यपि
तदाऽभवन् गीतिककीर्तनान्यपि ॥४०॥

सहस्रशो यान्त्रिकबन्धुकीकृता-
स्तूपीकृता गोलकभेदनैः कृताः ।
शब्दाः सुकर्ण्याश्च तदाऽभवन् शुभाः
ओंनादमाताः परमेशबोधकाः ॥४१॥

महामहासैन्यकृता निनादाः
प्रहर्षशब्दा व्यगमन् ककुत्सु ।
गजाभिनादास्तुरगाभिनादा
व्यानेशिरे ब्रह्मगमा विदिक्षु ॥४२॥

दन्तिप्रगन्त्रीमनु गन्त्र्य आशु
विमानतुल्याः शतशः सहस्रम् ।
श्रीबालकृष्णानुगरोहिताश्चा-
ऽगच्छन् शनैस्तुल्यसुशोभिताश्च ॥४३॥

ध्वजापताकोत्तमवावटाद्यैः
सौवर्णशृंगैः कलशैरनेकैः ।
दिव्यातिदिव्यैरभितोरणैश्च
रथा अशोभन्त महर्षियुक्ताः ॥४४॥

परीप्रभाभाससमूर्ध्ववर्णा
ब्रह्मप्रियाः काञ्चनचारुभास्यः ।
सौवर्णयानेषु विराजयन्त्यो
गोलोकवैकुण्ठमतिं नयन्ति ॥४५॥

तदा जना दर्शनकारिणस्ते
नराश्च नार्यो मुमुहुर्हरौ वै ।
रूपानुरूपावयवेतिरम्ये
गोपालबाले ह्यति कामभरेये ॥४६॥

तदाऽश्ववारी खलु योजनायता-
ऽभवज्जनानामतिमर्दसंकुला ।
अनेकहस्त्यश्वकरेणुकर्षभै-
र्हंसैः प्रगेण्डैर्गरुडैर्गवेयकैः ॥४७॥

यानैर्विमानैरनसोभिरुत्तमै-
र्बाष्पोपयानैश्चरणाभियायिभिः ।
सद्भिर्नृपै राजकुमारकैः प्रजा-
जनैः समस्तैर्नगरीनिवासिभिः ॥४८॥

आर्षैर्जनैः सद्गुरुसांख्ययोगिभिः
पतिव्रताभिः परमाश्रमादिभिः ।
गांगेयकै रौद्रगणादिभिस्तथा-
ऽश्ववारिका सैन्ययुता हि शोभते ॥४९॥

निशम्य विज्ञाय पुरान्तरस्था
नरा विलासिन्य अपीश्वरेशम् ।
ससंभ्रमं त्यक्तसमस्तकार्या
द्रष्टुं हरिं यान्ति बहिर्गृहेभ्यः ॥५०॥

तद्दर्शनात्युत्सुकमानसास्ते
घण्टापथान्ते कृतपंक्तिदुर्गाः ।
अन्योन्यसम्मर्दितदेहभागा
विलोकयामासुरुदग्रनेत्राः ॥५१॥

स्थितास्तु मार्गे ह्यपि विप्रकृष्टे
निशम्य वादित्रनिनादमुच्चैः ।
हर्यागमाशैकनिबद्धनेत्राः
समुच्छ्रिताः प्राञ्जलयः प्रणेमुः ॥५२॥

सौवर्णछत्रेण सुचामराद्यैः
साम्राज्यचिह्नैः सुविराजमानः ।
पुरीं ददर्शाऽद्भुतभूरिशोभां
सुसंस्कृतां सर्वरसैः प्रपूर्णाम् ॥५३॥

सुगन्धिवार्भिश्च मदैर्गजानां
संसिक्तघण्टापथचत्वरां च ।
सुस्वस्तिकैः स्वर्णघटैश्च रंभा-
स्तम्भै रसालादिदलैः सुशोभाम् ॥५४॥

पुष्पाक्षतैः कृत्रिमगोपुरैश्च
महोच्चदुर्गाढ्यसुगोपुरैश्च ।
तथोच्चसौधैर्बहुभूमिकैश्च
सोद्यानभागैरतिशोभमानाम् ॥५५॥

गृहे गृहे पुष्पितवल्लिकाभिः
सुगन्धितैः पल्लवितैर्द्रुमैश्च ।
कुण्डस्थमूलैः स्तबकैः सुमाढ्यै-
र्युतां च सस्याढ्यसुवाटिकाभिः ॥५६॥

सरोवरैर्मध्यसुपट्टभूमि-
श्चारामभूमिश्च विहारभूमिः ।
व्याख्यानभूमिर्नटिकादिभूमिः
प्रदर्शनै रंजनकैर्युतां च ॥५७॥

कलाप्रशालाभिरनन्तिकाभि-
र्भिषक्प्रशालाभिरभीष्टिकाभिः ।
रसप्रशालाभिरवन्तिकाभिः
सद्धर्मशालाभिरतीव युक्ताम् ॥५८॥

विद्याश्रशालाभिरनुग्रिकाभिः
सङ्गीतशालाभिरमीतशोभाम् ।
सत्संगशालाभिरभीष्टमोदां
यन्त्रादिशालाभिरजस्रघोषाम् ॥५९॥

नक्षत्रवेधैर्घनवेधकैश्च
सामुद्रवेधैर्ग्रहवेधकैश्च ।
विदेशवेधैः समयप्रवेधै-
र्वायुप्रवेधैः समतत्त्ववेधैः ॥६०॥

उष्णप्रवेधैः सहितां प्रशीत-
वेधैर्घटीवेधकयन्त्रयुक्ताम् ।
विद्युत्प्रवेधै रसवेधकैश्च
स्वरादिवेधैश्च प्रदर्श्यवेधैः ॥६१॥

गन्त्रीप्रवेधैः शकटीप्रवेधै-
र्देहप्रवेधैः पृथिवीप्रवेधैः ।
जलान्तवेधैः सहितां सुशोभां
विज्ञानधां तां नगरीं ददर्श ॥६२॥

विमानसंघैः सततं स्वाढ्यां
परीसमाभिः प्रमदाभिरासाम् ।
व्योमान्तचुम्ब्यूर्ध्वसुभौमशालां
द्यां चापरां तां नगरीं ददर्श ॥६३॥

श्रृंगारितां चागुरुधूपदीपै-
र्ध्वजैः पताकाभिरभीष्टभाग्याम् ।
जलस्रवाभिर्नलनालिकाभि-
स्तारैः स्वनाकर्षणकारिभिश्च ॥६४॥

दूरश्रवैस्तारकदीपकैश्च
स्थले स्थले मानससंहरां च ।
परीशनाम्नीं भगवान् ददर्श
सुरांगनामंदिरशोभितां च ॥६५॥

तां सम्प्रविष्टं सुमनोहरांगं
पूर्णेन्दुतुल्यं नवयौवनाढ्यम् ।
स्वर्णातपत्रेण च चामराभ्यां
सम्मानितं तं ददृशुः प्रजाश्च ॥६६॥

आरुह्य हर्म्याणि परीस्त्रियस्तदा
ससंभ्रमास्त्यक्तसमस्तवृत्तिकाः ।
व्यत्यस्तवस्त्राभरणा गवाक्षकैः
स्थिरेक्षणास्तं ददृशुः परं प्रियम् ॥६७॥

स्थले स्थले सौधकवल्लभीगत-
स्त्रीमण्डलैरक्षतपुष्पचन्दनैः ।
संवर्धितः श्रीपतिरीश्वरेश्वरो
जग्राह तासां हृदयार्पितार्पितम् ॥६८॥

तथैव हट्टाग्रकृतेक्षणास्तदा
वणिक्जना माननमस्य वै व्यधुः ।
नारीफलैः शुष्कफलैश्च बीजकै-
र्मुद्राभिरिष्टाभिरथाम्बरादिभिः ॥६९॥

विप्रास्तदा साक्षतचन्दनाद्यैः
पुष्पीयहारैरभिवादनाद्यैः ।
वेदस्थमन्त्रैः सुभगं प्रचक्रु-
रुच्चैश्च सामानि जगुः सहर्षाः ॥७०॥

धनाढ्यवर्गा धनदानकैश्च
दीना जना मानसदानकैश्च ।
भक्ता जना भक्तिसमर्पणैश्च
हरेस्तदा स्वागतकं व्यधुश्च ॥७१॥

राजा नगर्यां परितः ससैन्यकः
प्रभुं समभ्रामयदन्तसीम्निकाम् ।
पुरीं विलोक्यैव हरिः प्रशासनं
व्यधात् परीशानपुरीप्रशंसनम् ॥७२॥

नृपस्य सौधे च महर्षिकुट्यां
श्रेष्ठिप्रधानादिकमन्दिरेषु ।
विधाय पद्भ्यां बहुपावनीं क्ष्मां
पुरीं सुतीर्थं प्रचकार कृष्णः ॥७३॥

एवं परिभ्रम्य निवर्तनं व्यधाद्
राजाधिराजो नृपमन्दिरं प्रति ।
आगत्य यानाद् बहिरेत्य मन्दिरं
प्रति प्रपन्नोऽभवदिष्टशान्तये ॥७४॥

जलं पपौ शान्तिमवाप वै क्षणं
ततः सभायां समुपाजगाम च ।
उच्चासने राजकृते विधापिते
विराजमानोऽभवदच्युतस्तदा ॥७५॥

उपादिदेशाऽथ जनान् नृपादिकान्
परावरेशो जगदुद्धृतिस्थितिः ।
तूष्णीं न्यषीदन् सकलाः प्रजाजना
राधे चकोरा इव चन्द्रमानसाः ॥७६॥

दधुर्मनांसीन्द्रियवृत्तिका हरौ
समस्तकान्ते निजभक्तकान्तिदे ।
सदा सुधावर्षिणि साधुवृत्तिके
निजात्मकान्ते प्रियकृष्णवल्लभे ॥७७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रजानां सम्मर्दो हरेः शोभा गजयानारोहणं प्रजानामाकर्षणं परीशानानगर्यां भ्रमणं राजसौधागमनं चेत्यादिनिरूपण-नामा सप्ताशीत्यधिकशततमोऽध्यायः ॥ १८७ ॥

श्रीकृष्ण उवाच—

राधिके श्रीबालकृष्ण उपादिदेश संसदम् ।
परीशाननगर्यां यत् तत्ते संश्रावयाम्यहम् ॥ १ ॥
हरिः प्राह हि संसारे मरणं ध्रुवमेव हि ।
शरीरं गत्वरं प्राणा गत्वरा गत्वराः श्रियः ॥ २ ॥
संयोगा गत्वराः सर्वे ब्रह्माण्डं चापि गत्वरम् ।
गत्वराणि हि भूतानि चात्माऽन्यत्र गमिष्यति ॥ ३ ॥
पुनर्नैतादृशं प्राप्यं गत्वरं कृतबुद्धिना ।
आत्मना स्थास्नुना लभ्यः स्थास्नुर्मोक्षो हि शाश्वतः ॥ ४ ॥
अग्रिमाणां क्षितिभुजां मान्यो देवमहर्षिभिः ।
वर्धितः स्वस्तिवचनैराशीर्भिर्योजितो नृपः ॥ ५ ॥
आविक्षितो मरुत्तश्च महाभागवतो ह्यभूत् ।
यस्य सेन्द्राः सवरुणा बृहस्पतिपुरोगमाः ॥ ६ ॥
देवा विश्वसृजो राज्ञो यज्ञमीयुर्महात्मनः ।
यस्मिन् शासति पृथिवी चाऽकृष्टपाकदाऽभवत् ॥ ७ ॥
यस्य यज्ञे तदाऽऽसँश्च विश्वेदेवाः सभासदः ।
मरुतः परिवेष्टारः साध्याश्च साधवस्तथा ॥ ८ ॥
अहमासं क्रतौ भोक्ता मूर्तिमाननले तदा ।
स राज्यं मत्परं कृत्वा कृत्वा स्वं मत्परायणम् ॥ ९ ॥
ययौ धामाऽक्षरं मे च तथा कार्यं नृपैरिह ।
सुहोत्रो नाम नृपतिस्तथा भागवतोऽभवत् ॥१०॥
यस्मिन् हिरण्यं ववृषे मघवा परिवत्सरम् ।
सत्यनामा वसुमती स्वर्णं नद्योऽवहँस्तदा ॥११॥
इन्द्रो ववर्ष मकरान् कूर्मान् यादांसि यानि च ।
हिरण्यमयानि सम्राट् स ब्राह्मणेभ्यः समार्पयत् ॥१२॥
अहं श्रीबालकृष्णोऽस्मि सर्वपात्रेषु मां स तु ।
सुयष्ट्वा सोऽतिथिर्भूत्वा ययौ मे परमं पदम् ॥१३॥
अंगो बृहद्रथो राजा महाभागवतो ह्यभूत् ।
यः सहस्रं सहस्राणां श्वेतानश्वान् प्रदत्तवान् ॥१४॥
सहस्रं च सहस्राणां कन्या हेमपरिष्कृताः ।
सहस्रं च सहस्राणां गजानामतिपद्मिनाम् ॥१५॥
शतं शतसहस्राणि वृषाणां हेममालिनाम् ।
सहस्राणि सुवर्णानां निष्काणां प्रतिमानवम् ॥१६॥
ईजानो वितते यज्ञे सोमसंस्थासु सप्तसु ।
भिक्षुकेभ्योऽपि विप्रेभ्यो दक्षिणा अत्यकालयत् ॥१७॥
कृत्वा मां सुप्रसन्नं च भजित्वा मां क्रतौ नृपः ।
महाभागवतो भूत्वा ययावन्ते तु मत्पदम् ॥१८॥
शिबिश्चौशीनरो राजा महाभागवतोऽभवत् ।
य इमां पृथिवीं सर्वां सुवर्णैरभ्यवेष्टयत् ॥१९॥
यावदस्यां गवाश्वं च हस्तिगवयकं तथा ।
अभूत् सर्वं प्रददौ स दानेऽसंख्यगुणं ततः ॥२०॥
प्राप्य प्रसन्नतां मेऽत्र भूत्वा भागवतो महान् ।
मां भजित्वा ययौ धामाऽक्षरं मे शाश्वतं शिबिः ॥२१॥
भगीरथोऽनयद् गंगां पितृद्धारणहेतवे ।
महाभगवतो भूत्वा ययौ धामाऽक्षरं मम ॥२२॥
दिलीपः कृतवान् यज्ञं वैष्णवं मम तुष्टये ।
सहस्रं वारणान् हैमान् दक्षिणामत्यकालयत् ॥२३॥
चषाले यस्य सौवर्णे तस्मिन् यूपे हिरण्मये ।
ननृतुर्देवगन्धर्वाः षट्सहस्राणि सप्तधा ॥२४॥
स प्रसाद्य परंब्रह्म मां भक्त्या सेवया सताम् ।
ययौ धामाऽक्षरं मे तु शाश्वतं चाऽपुनर्भवम् ॥२५॥
मान्धाता यौवनाश्वोऽभूद् राजा भागवतो महान् ।
इन्द्रो पोष्टाऽभवद् यस्य सर्वक्ष्माशासकोऽभवत् ॥२६॥
अश्वमेधशतं चक्रे राजसूयशतं तथा ।
हैरण्यान् रोहितान् मत्स्यान् ब्राह्मणेभ्योऽददत् स च ॥२७॥
यज्ञेषु मां प्रतर्प्यैव कृत्वा भक्तिं ममाऽधिकाम् ।
प्राप धामाऽक्षरं मे स कृतकृत्योऽभवत् सदा ॥२८॥
ययातिश्चाऽभवद् राजा नाहुषो भक्तिमान् मम ।
तीरक्षेपेण कुण्डं स कारयित्वाऽयजद्धि माम् ॥२९॥
चक्रे यज्ञसहस्रं स वाजपेयशतं तथा ।
ददौ दाने त्रीन् सुयोग्यान् स्वर्णशैलान् मदर्थकान् ॥३०॥
वने गत्वा स मां कृष्णं प्रसाद्याऽक्षरमाप्तवान् ।
अम्बरीषश्च नाभागो महाभागवतोऽभवत् ॥३१॥
यः सहस्रं सहस्राणां राज्ञामयुतयाजिनाम् ।
ईजानो वितते यज्ञे मयि सर्वार्पणं न्यधात् ॥३२॥
सुदर्शनं मया चक्रं तद्रक्षार्थं समर्पितम् ।
सोऽन्ते धामाऽक्षरं प्राप प्रसाद्य मां परेश्वरम् ॥३३॥

शशबिन्दुरभवच्च भूपो भागवतो महान् ।
यज्ञे राज्यं च सर्वस्वं दत्त्वा वनं जगाम ह ॥३४॥
मामाराध्य ययौ धामाऽक्षरं मे शाश्वतं स्थिरम् ।
गयो राजाऽभवच्छ्रेष्ठो महाभागवतः शुचिः ॥३५॥
स च वर्षशतं राजा हुतशिष्टाशनोऽभवत् ।
अग्निस्तुष्टो वरदानं भक्तिरूपं ददौ हरौ ॥३६॥
अयजद् वाजिमेधेन सहस्रं परिवत्सरम् ।
सौवर्णी पृथिवीं कृत्वा ददौ दानं द्विजातये ॥३७॥
यावत्यो गांगसिकतास्तावतीः प्रददौ स गाः ।
माम् आराध्य चायुषोऽन्ते ममाऽक्षरपदं ययौ ॥३८॥
रन्तिदेवोऽभवद् राजा महाभागवतश्च सः ।
अतिथौ मां विलोक्यैव पुष्कसाय जलं ददौ ॥३९॥
शतकोटिसहस्राणि भुञ्जते तद्गृहे द्विजाः ।
स मां प्रसाद्य सम्प्राप धामाऽक्षरपदं मम ॥४०॥
सगरो नाम राजा च वाजिमेधसहस्रकम् ।
कृत्वा दत्वा च सर्वस्वं मामाराध्य गतोऽक्षरम् ॥४१॥
पृथुः साक्षादहमासं सोऽपि चाराधनां मम ।
कृत्वा विवेश मद्रूपे तथा कुर्वन्तु भूमिपाः ॥४२॥
रुक्मांगदश्च राजर्षिर्धर्मांगदश्च तत्सुतः ।
आराध्य मां ययतुश्च मम धामाऽक्षरं परम् ॥४३॥
रुक्मांगदगृहे कन्या वेधसो मोहिनी प्रिया ।
पत्नीरूपाऽभवद् या तु वेधा तिथिः समुच्यते ॥४४॥
सुद्युम्नश्चाऽभवद् राजा ध्यात्वा नारायणं तु माम् ।
प्रापद् धामाऽक्षरं भक्त्या शाश्वतं मम वै प्रजाः ॥४५॥
इन्द्रद्युम्नोऽभवद् राजा पुरुषोत्तमभक्तराट् ।
मामाराध्य ययौ धामाऽक्षरं वै शाश्वतं मम ॥४६॥
पुण्डरीकोऽभवद् राजा महाभागवतो मम ।
भक्त्या धामाऽक्षरं प्राप शाश्वतं परमं पदम् ॥४७॥
प्रह्लादश्च बलिर्बाणो भूपाः पातालवासिनः ।
राजस्था अपि भक्त्या मां तोषयन्ति दिवानिशम् ॥४८॥
उदयनो महाराजस्तथा रणंगमोऽपि च ।
चित्रकेतुस्तथा नन्दस्त्वेते भागवता मम ॥४९॥
कन्थाधरश्च भद्राश्वो लक्ष्मणो मुचुकुन्दकः ।
विशालश्च प्रजापालो दुर्जयोऽश्वशिरास्तथा ॥५०॥
चमत्कारः सत्यसन्धोऽमित्रजित् कलशो नृपः ।
पुण्यनिधिः सुयज्ञश्च पंचालनृपतिस्तथा ॥५१॥
अलर्कस्तोण्डमौश्चापि नाभिः ऋतध्वजस्तथा ।
रन्तिर्वेदश्रवाश्चापि नन्दसावर्णिरित्यपि ॥५२॥
निमिश्रुवस्तथा धर्मध्वजः कुशध्वजस्तथा ।
दृढधन्वा दिवोदासश्चानर्त्तो रैवतादयः ॥५३॥
एते त्वन्ये च बहवो राजानो वैष्णवा मम ।
मत्प्राप्तिं दुर्लभां प्राप्य संसिद्धाश्चाऽभवन् खलु ॥५४॥
सप्रजा बहवस्तत्र वैकुण्ठं प्रययुः परम् ।
प्रजानां पालनं धर्मो राज्ञां भक्तियुतो हरौ ॥५५॥
राजाज्ञापालनं धर्मः प्रजानां भक्तियुक् हरौ ।
एवं परस्परं कृत्वा साहाय्यं धर्मकांक्षिणः ॥५६॥
मम स्मृत्याऽन्वयेनैव ते बोध्या मोक्षभागिनः ।
मया नियुक्तः पुरुषः साध्वसाधु करोति हि ॥५७॥
स्वयं साधुप्रवाहः स्यान्न त्वसाधुप्रवाहणः ।
ज्ञानदृष्ट्या विचार्यैव साधु कुर्यान्न चेतरत् ॥५८॥
सर्वकर्मसु साधुत्वं मय्यर्पणं मया मतम् ।
मय्यर्पितं भवेत् साधु तद्भिन्नं नैव साधु तत् ॥५९॥
नान्यद्रोहकरं कुर्यान्नोद्वेजनपरं क्वचित् ।
नात्महानिकरं कुर्यान्न कुर्याल्लोकगर्हितम् ॥६०॥
एवं वर्तेत मेधावी सर्वं प्रक्षिप्य वै मयि ।
तदा शान्तिं परां लब्ध्वा तिष्ठेदन्तेऽक्षरे परे ॥६१॥
नरा नार्यः कर्मनद्धा नाऽकर्माणो भवन्ति वै ।
नैसर्गिकी क्रिया या च साऽपि क्षिपेन्मयीश्वरे ॥६२॥
वह्नौ क्षिप्तं यथा काष्ठं शुष्कमार्द्रं च वेतरत् ।
द्रुतं चिरेण वा भस्मीभवेन्नैवात्र संशयः ॥६३॥
तथा कर्म शुभं वाऽन्यत् क्षिपेन्मयि परेश्वरे ।
भस्मीकुर्यां समर्थोऽस्मि मोक्षयाम्यपि कर्मदम् ॥६४॥
अथवा तदुपादानात् प्राप्नुयात् कर्मणः फलम् ।
प्राप्नुयादिति हेतोश्च मयीश्वरे निवेदयेत् ॥६५॥
तथापि पुरुषः कर्ता कर्मणोः शुभपापयोः ।
साभिमानोऽज्ञानवृत्त्या भोक्ता स्यात् तत्फलेऽपि च ॥६६॥
कर्मसूत्रात्मकं सर्वं सन्नद्धं क्रमशः खलु ।
सुखदुःखगुणोदर्कं मयि न्यस्तं विशीर्यते ॥६७॥
यो हि कर्मसमारम्भे भवेत् तद्भावभावितः ।
तदा तेनाभिभूयेत मयीते नाभिभूयते ॥६८॥
मय्येव कलुषं सर्वं समाप्तं जायते ततः ।
प्रायश्चित्तं न तस्यास्ति भोगो वा विद्यतेऽस्य न ॥६९॥
अकुर्वन् विहितं कर्म प्रतिषिद्धं तथाऽऽचरन् ।
प्रायश्चित्तीयते देही मय्यर्पणविवर्जितः ॥७०॥
अकार्याणि न मनुजो जातु कुर्यात् तथाहि वै ।
स्वधर्मस्य परित्यागं परधर्मानुवर्तनम् ॥७१॥

शरणागतसन्त्यागं भृत्यस्याऽऽभरणादिकम् ।
परस्वापाभिहरणं पित्रा वादं न वै चरेत् ॥७२॥
स्त्रीत्यागं च युवा कान्तो न वै कुर्यात् कदाचन ।
पत्नी च युवती कान्तं न त्यजेद्वै कदाचन ॥७३॥
आश्रितानां सुभरणं कर्तव्यं सर्वदा मतम् ।
वृद्धानां सेवनं कार्यं दीनानां तु सहायता ॥७४॥
असत्यं न वदेत् क्वापि पारुष्यं छलसंभृतम् ।
जीवानां हिंसनं नैव कुर्याद् दयापरो भवेत् ॥७५॥
आश्रितानां पशूनां च कुर्यात् क्षुत्तृट्निवारणम् ।
परोपकारं कुर्याच्च सतश्च भोजयेत् सदा ॥७६॥
सतां सेवां प्रकुर्याच्च मम सेवां च सर्वदा ।
आत्मानं सुखिनं कुर्यान्नोद्वेगे स्वं नयेत् क्वचित् ॥७७॥
नाऽन्यानुद्वेजयेत् क्वापि वृथामृषाऽनृतादिभिः ।
हरेः संकीर्तनं कुर्यात् सततं वचसा हृदा ॥७८॥
ध्यानं हरेः सदा कुर्यान्मुक्तिदं पापनाशकम् ।
कुर्याच्छुभानि कर्माणि निवर्तेत शुभेतरात् ॥७९॥
दद्याद् वित्तादि नित्यं च तेन मुच्येत किल्बिषात् ।
शिष्टाचारः परो धर्मो देशकालादियोजितः ॥८०॥
सेवितव्यः स एवात्र प्रेत्येह च सुखेप्सुना ।
दैवदेशे जपं कुर्यात् होमं चोपोषणादिकम् ॥८१॥
दैवसन्दर्शनं ज्ञानं कुर्यादात्मप्रशोधनम् ।
न गर्वेण भवेत् प्राज्ञः कदाचिन्मृत्युधर्मवान् ॥८२॥
देवानृषीन्मनुष्यांश्च पितॄन् गृह्याश्च देवताः ।
पूजयित्वा हरिं चापि गृहस्थो भोक्तुमर्हति ॥८३॥
एवं कृत्वा न लिप्येत राजा प्रजाऽथ साधवः ।
स्त्रियो दीना वृन्दलाश्च तथा कुर्वन्तु सर्वथा ॥८४॥
मम नाम गृणन्नित्यं स्मरन्मां सर्वतः क्षणम् ।
कुर्वन् सर्वाणि कर्माणि मयि न्यस्य न लिप्यते ॥८५॥
तथा कुर्वन्तु सततं मां स्मृत्वा मयि चार्पणम् ।
अहं मोक्ष्यामि सर्वान् मे वैष्णवान् मत्परायणान् ॥८६॥
अस्तु स्वस्ति तु भवतां राज्ञां राजकुटुम्बिनाम् ।
प्रजानां च प्रजेशानां दीनानां तु विशेषतः ॥८७॥
अस्तु स्वस्त्यबलानां च मदर्थंकृतकर्मणाम् ।
सर्वदा स्वस्ति चास्त्वेव हरिः शं विदधातु वः ॥८८॥
इत्युक्त्वा राधिके बालकृष्णः श्रीकृष्णवल्लभः ।
परीशानसभायां तु क्षणं तूष्णीमभूत्तदा ॥८९॥
राजा पूजां च विदधेऽसंख्यमौक्तिकहीरकैः ।
हाराद्यैरम्बराद्यैश्च चन्दनाद्यैः सुगन्धिभिः ॥९०॥
आरार्त्रिकं महच्चक्रे राज्ञी राजकुमारिकाः ।
कुमाराश्च प्रधानाश्च प्रजाश्चापि प्रचक्रिरे ॥९१॥
वन्दनं स्तवनं कृत्वा चखदुश्च प्रसादकम् ।
हरिणा करदत्तं च ततश्च राजकन्यकाः ॥९२॥
एकविंशतिसंख्याका युवत्यो मुग्धमानसाः ।
हरेः करं जगृहुश्च विवाहविधिना तदा ॥९३॥
करग्रहोत्तरं शीघ्रं राजा महोत्सवं निशि ।
भोजयित्वा महीमानान् हरिं प्राघूणिकादिकान् ॥९४॥
कारयामास ललितं नृत्यगीतिकलादिभिः ।
रात्रौ प्राघूणिकाः सर्वे विश्रान्तिं चापुरुत्तमाम् ॥९५॥
कन्यकास्तु नवं कान्तं सिषेविरेऽतिभावतः ।
प्रातरुत्थाय भगवान् नैजं ध्यानं चकार ह ॥९६॥
राजाऽपि त्वाययौ कृष्णपूजार्थं च पुपूज तम् ।
एवं महोत्सवो रावे वृत्तो वै पारमेश्वरः ॥९७॥
परीशानानगर्यां चोपदाः प्रजास्ततो ददुः ।
विदार्यं जगृहे कृष्णनारायणस्तदा नृपः ॥९८॥
दुग्धपानादिकं सर्वान् कारयामास भावतः ।
लोमशस्तु प्रजाभ्यो वै मनुं ददौ च तारकम् ॥९९॥
हरिः सज्जो बभूवाऽथ गन्तुं परीजपर्वतम् ।
इन्दुरायो नृपस्तस्याऽऽग्रहं चाति चकार ह ॥१००॥
तदा वाद्यान्यवाद्यन्त हरिर्विमानमास्थितः ।
अन्ये विमानगास्तत्राऽभवँस्ततो नृपाज्ञया ॥१०१॥
व्योममार्गेण च ययुश्चेन्दुरायस्य राष्ट्रकम् ।
हरिर्विलोकयामास भूतलं पर्वतान्वितम् ॥१०२॥
स्वागतार्थं चेन्दुरायस्त्वग्रे ययौ कुटुम्बवान् ।
सन्मानतूर्यनिनदास्तदाऽभवन् समन्ततः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने परीशानाप्रजादिभ्य उपदेशदानं पूजनं विमानैः सप्तम्यां प्रातः परीजराष्ट्रागमनं चेत्यादिनिरूपण-नामाऽष्टाशीत्यधिकशततमोऽध्यायः ॥ १८८ ॥

श्रीकृष्ण उवाच—

राधिके श्रीहरिः शोभां परीनिजाद्रिसंभवाम् ।
अम्बरादेव परितो लोकयामास वृक्षजाम् ॥ १ ॥
तत्पश्चिमे तु नगरीं वायूनाख्यां शुभां स्थिताम् ।
विलोक्य तत्र जनता दर्शनार्थमुपस्थिताः ॥ २ ॥
स्वागतार्थं तु राजानं समुपस्थितमग्रतः ।
भूपदर्शितमार्गेणाऽवातारयद्विमानकम् ॥ ३ ॥

उद्याने राजसौधाग्रे वनतुल्येऽतिसुन्दरे ।
अवतेरुश्च सर्वाणि विमानान्यम्बरात्ततः ॥ ४ ॥
बालकृष्णो विमानात्स्वाङ्गनं प्रति चाययौ ।
राजा हारान् ददौ कृष्णकण्ठे सुमसुवर्णजान् ॥ ५ ॥
अन्येषां स्वागतं चापि यथार्हं त्वकरोत्तदा ।
निनादश्रवणेनाऽथ हरिः प्रसन्नतां गतः ॥ ६ ॥
समुत्तीर्य तदा राजसौधे विश्रान्तिमाप ह ।
पादौ प्रक्षाल्य राजाद्याश्चरणामृतमापपुः ॥ ७ ॥
मिष्टान्नाद्यैश्च विविधैर्भोजयामास भूपतिः ।
महाराजं कुटुम्बादीन् महर्षीन् ब्रह्मयोषितः ॥ ८ ॥
सर्वानन्यान् महीमानान् भोजयामास भावतः ।
मध्याह्ने च हरिः प्राप विश्रान्तिं च ततः परम् ॥ ९ ॥
राजा सैन्यं महत् स्वस्य सुशृंगार्यावदद्धरिम् ।
वायूनायां नगर्यां मे दर्शनदानहेतवे ॥१०॥
ससैन्योऽहं समिच्छामि भ्रमणं भवतः प्रभो ।
तथाऽस्त्विति हरिः प्राह गजपीठेऽतिशोभिते ॥११॥
अम्बालिकायां कानक्यां निषसाद तदेतरे ।
यथायोग्येषु वाहेषु निषेदुश्च ततः परम् ॥१२॥
प्रावाद्यन्त सुवाद्यानि तूर्याणि विविधानि च ।
यन्त्राणां स्फोटनशब्दा मानदाश्च तदाऽभवन् ॥१३॥
प्रजाः पर्यो हरिकृष्णं गौर्यो निजाङ्गणादिषु ।
वर्धयामासुरीशेशं लाजापुष्पाक्षतादिभिः ॥१४॥
फलादीन्यर्पयामासुः पुपूजुर्ददृशुश्चिरम् ।
आत्मानं कृतकृत्यं च मेनिरे ताः प्रजास्तदा ॥१५॥
एवं भ्रमित्वा नगरीं राजसौधं ययौ हरिः ।
राजा राज्ञी महापूजां चक्रतुर्बहुवस्तुभिः ॥१६॥
स्वर्णपात्राणि रौप्याणि मुद्राश्च हीरकादिकान् ।
ददौ श्रीहरये राजोपदा अम्बरभूषणम् ॥१७॥
राज्ञ्याज्ञया तदा कन्याद्वयं कान्तं हरिं तदा ।
प्रवीक्ष्य बालकृष्णस्य करं जगृहतुर्मुदा ॥१८॥
विवाहविधिना तत्रोत्सवः सम्यग् व्यजायत ।
राजा ददर्श कृपया जामातारं चतुर्भुजम् ॥१९॥
शंखचक्रगदापद्मधारिणं करुणामुखम् ।
तुष्टाव परया प्रीत्या पर्वतस्थोऽप्यपर्वकम् ॥२०॥
अविद्यापर्वशून्यस्त्वं मायागुणविवर्जितः ।
पाहि संघातधर्मेभ्यो नय धामाऽक्षरं तव ॥२१॥
अनाद्यन्तः परब्रह्म बालकृष्णो नरायणः ।
हरिकृष्णो भवानास्ते नरो नारायणो भवान् ॥२२॥
ऋषयः पितरः सिद्धा देवा गन्धर्वदानवाः ।
पन्नगा राक्षसा यक्षा यं न जानन्ति तत्त्वतः ॥२३॥
योगिनः साधवः सत्यो ज्ञानिनस्तापसेश्वराः ।
यं न जानन्ति देवेशं कुतोऽयं भगवानिति ॥२४॥
तस्मै मे नम इत्यस्तु पाहि संसारसागरात् ।
यस्मिन् जनिः पुषा नष्टिर्भूतानां ते नमोनमः ॥२५॥
विश्वात्मन् विश्वकर्मात्मन् विश्वकर्मेक्षणादिमन् ।
कर्मणामपि नैष्कर्म्यं दधँस्त्वं पाहि सागरात् ॥२६॥
सहस्रकिरणं विष्णुं सर्वतश्चक्षुषं प्रभुम् ।
अनन्तकरपाद्यं नमामि परमेश्वरम् ॥२७॥
अणुष्वणुं महान्तं च महत्स्वपि ध्रुवं हरिम् ।
गरिष्ठं श्रेष्ठमत्यूर्ध्वं त्वां नमामि परेश्वरम् ॥२८॥
अतिभूतादिकर्माणं बुद्धीन्द्रियाद्यगोचरम् ।
पुराणपुरुषं ब्रह्म त्वां नमामि परेश्वरम् ॥२९॥
जगत्कोशं चात्मयोनिं सनातनं जगत्पतिम् ।
सर्वपतिं हिरण्वर्णं त्वां नमामि परेश्वरम् ॥३०॥
तपते शीतलायाऽपि प्रकाशाय च ते नमः ।
स्वराय सार्थतत्त्वाय गीतिरूपाय ते नमः ॥३१॥
त्वमोंकारोऽवतारस्त्वं व्यूहस्त्वं त्वं चतुर्भुजः ।
भूमा त्वं च महाविष्णुर्विराट् त्वं कमलाशयः ॥३२॥
त्वं क्रिया करणं कर्ता कर्म त्वं कारकस्तथा ।
द्रष्टा साक्षी महाकालः कवलस्त्वं च ते नमः ॥३३॥
सर्वरूपाय शान्ताय कांभरेयाय ते नमः ।
बालकृष्णाय कृष्णाय गोपालजाय ते नमः ॥३४॥
सर्वपापप्रशान्ताय सर्वदुःखहराय च ।
आत्मपाथेयरूपाय सर्वान्तर्यामिणे नमः ॥३५॥
गृहं मे पावनं कृष्णवल्लभस्वामिना कृतम् ।
निमग्नं च कुटुम्बं मे त्वयोद्धृतं प्रगृह्य माम् ॥३६॥
नमस्ते सर्वलोकेषु सर्वात्मसु च ते नमः ।
बालकृष्ण महाकृष्ण कृष्णेश्वर नमोऽस्तु ते ॥३७॥
इत्युक्त्वा राधिके राजा चेन्दुरायो नमोऽकरोत् ।
अनादिश्रीबालकृष्णस्तु तं प्राह शुभां गिरम् ॥३८॥
राजन् भक्तिं प्रविलोक्य परां तव मयि ध्रुवाम् ।
मनाग् दिव्यं स्वरूपं मे दर्शितं च मयाऽत्र ते ॥३९॥
कन्याद्वयं ममेदं यत् हस्तग्रहं चकार ह ।
तदा ते मानसे जातं कथमेवं च को न्वयम् ॥४०॥
संशयं तं निरसितुं कृपया दर्शितं मम ।
चतुर्भुजं स्वरूपं ते ध्यायस्वैतत् सदा हृदि ॥४१॥

इत्युक्त्वाऽसंहरद् रूपं मानवोऽथ व्यजायत ।
पपात पादयोः राजा दधार चरणौ हृदि ॥४२॥
साश्रुनेत्रोऽभवच्चापि प्रययाचे क्षमां कुरु ।
सर्वं जगत् तवैवास्ति तत्र किं कन्यकाद्वयम् ॥४३॥
इत्युक्त्वा विधिना चक्रे महोत्सवं तदा नृपः ।
भोजयामास सर्वांश्च पूजयामास भावतः ॥४४॥
हरिश्चोपादिदेशापि यथा निर्बन्धनं भवेत् ।
राजन् कर्मकृतं सर्वं सम्पद्यते विपद्यते ॥४५॥
मदाश्रयं तु तत्कर्म व्यत्येति स्वेष्टकृद्धि तत् ।
ममाश्रयबलं तादृक् कर्म स्यादन्यथाफलम् ॥४६॥
देवतानां द्विजानां च गुरूणां पूजनं सताम् ।
आनृण्यं तत्करोत्येव पित्रोश्च पूजनं तथा ॥४७॥
राज्ञां धर्मः समुत्थानं तेन दैवं प्रजायते ।
उभयं तत् प्रसम्भूय श्रीप्रदं मुक्तिदं तथा ॥४८॥
पौरुषं प्रथमं कार्यं ततो दैवं समाश्रयेत् ।
विनाऽऽरम्भं प्रयत्नं वा फलभाङ् न भवेत् क्वचित् ॥४९॥
पौरुषं चापि दैवं च सत्येनासादितं यदि ।
ध्रुवसिद्धिप्रदं स्यात्तत् प्रेत्य चेह सुखावहम् ॥५०॥
शीलदान्तिमार्दवाढ्यो जनः श्रीसेवितो भवेत् ।
कारणं स्वस्य सौख्यस्य परब्रह्म विचिन्तयेत् ॥५१॥
कारणं नैव हन्याद्वै तत्कृते स्वो विहन्यते ।
जलादग्निर्ब्राह्मणात्क्षत्रियोऽश्मनश्च लोष्ठकम् ॥५२॥
उत्पन्नं यदि हेतुं स्वं हन्तुं याति विनश्यति ।
आत्मा ज्ञानं क्रिया कर्म समुत्पन्ना हरेः पुरः ॥५३॥
हरिं चेन्न भजतेऽसावात्महा हरिहा भवेत् ।
कृष्णघातपरस्याऽस्य विनाशो वह्निवद् भवेत् ॥५४॥
तस्मादहं सदा रक्ष्यो धार्यो मन्तव्य आदरात् ।
स्मर्तव्यश्च पूजनीयो दास्ये मुक्तिं हि बन्धनात् ॥५५॥
वृथा संपरिहेयानि व्यसनानि मुमुक्षुभिः ।
व्यसनं भोजनं पानं शयनं नर्मकारिता ॥५६॥
रञ्जनं नित्यसंलग्नं यथापेक्षातिरेकि तत् ।
मयि चेन्न्यस्तमेवैतद् व्यसनं न निगद्यते ॥५७॥
निर्वाहमात्राऽपेक्षं तद् व्यसनं न निगद्यते ।
अयोग्यनुपयोगी च द्युतादिस्तु विपन्मता ॥५८॥
विपदां तु पदं नित्यं दुःखशोकानुयायि वै ।
यत्र तत् स्यात् कथं सौख्यं विन्देत मानवो निजम् ॥५९॥
तस्माद् विचार्य नैरर्थ्यं त्यजेन्निसर्गदूषकम् ।
एवं वै वर्तमाना चेत् प्रजा स्याद् वरपद्धतिः ॥६०॥
तदा धर्मो भवेत् तत्र भक्त्या च श्रद्धया युतः ।
यत्र धर्मश्च तत्राऽहं निवसामि निरन्तरम् ॥६१॥
प्रत्यक्षो वा च हृदये रक्षयामि निजाश्रितम् ।
बालान् रक्षति मातेव तं रक्षामि वृषान्वितम् ॥६२॥
तस्माद् धर्मयुताः सर्वे मां भजन्तु प्रजादयः ।
उद्धरिष्यामि कामोदात् सागरान्नात्र संशयः ॥६३॥
मूर्तिं मे स्थापयन्त्वत्र नित्यदर्शनहेतवे ।
गमिष्ये त्वद्य संस्नातुमिन्दिराया जले शुभे ॥६४॥
स्वस्ति वोऽस्तु सुखं चास्तु सदाऽऽरोग्यं निरामयम् ।
इत्युक्त्वा चासनात् कृष्णः समुत्तस्थौ ततः परम् ॥६५॥
नृपो यानानि सर्वाणि व्योमयानानि यानि च ।
सज्जयामास शीघ्रं च विदायं नृपतिर्ददौ ॥६६॥
इन्दिरायां महानद्यां स्नात्वा सुपानराष्ट्रकम् ।
गन्तव्यमेव सायं वै चेति निश्चयतो हरिः ॥६७॥
सज्जो भूत्वा समारोहद् विमानं चापरेपि च ।
यानान्यारुह्य च विमानान्यारुह्याऽम्बरेऽभवन् ॥६८॥
राजा राज्ञी कुटुम्बं च प्रजाः क्षमां ययाचिरे ।
प्रस्थानस्य च तूर्याणां निनादा गीतयस्तथा ॥६९॥
जयशब्दा हर्षनादा जीवशब्दास्तदाऽभवन् ।
सुपानमुनिना सार्धं मुद्राण्डेन नृपेण च ॥७०॥
सहस्थेनार्थितः कृष्णनारायणो ययौ पुरः ।
वर्धितश्चाञ्जलिव्रातैरिन्दिरातटमाययौ ॥७१॥
अवतीर्य विशाले च प्रदेशे यानतस्तदा ।
सस्नौ हरिस्तथा सर्वे सस्नुस्तीर्थे ह्यभूद्धि तत् ॥७२॥
दानं श्रीभगवाँस्तत्र सुपानमुनये ददौ ।
हरेः स्नानामृतवारि पपुर्भक्तजनास्तदा ॥७३॥
यत्र स्नातो हरिस्तत्र वेताला बहवोऽभवन् ।
पूर्वकर्मकृताः सर्वे विगतिं तत्र वै गताः ॥७४॥
ते सर्वे त्वाययुर्गौरा अपि तेजोविहीनकाः ।
दुःखिनो मानवे रूपे न्यवेदयन्नसद्गतिम् ॥७५॥
प्रसह्य लुण्टकाः पूर्वे वयमारावणाः खलाः ।
प्रजापीडाकराश्चौरा निजपापैर्मृता इह ॥७६॥
शीतर्झंझाप्रवातेन पीडिताः क्षुत्पिपासिताः ।
जाता वेतालकाश्चात्र निवसामो नदीतटे ॥७७॥
उद्धारं कुरु देवेश वयं ते शरणागताः ।
इत्युक्तो भगवान् कृष्णनारायणोऽमृतं जलम् ॥७८॥
ददौ तेभ्योऽभिपानार्थं पपुस्ते पापवर्जिताः ।
तत्क्षणं जातपुण्याश्च दिव्यदेहाः सुरा यथा ॥७९॥

देवा देव्योऽभवँस्ते च स्वर्गार्हाः शुभगात्रिणः ।
कृपालुर्भगवानाह लोमशाय महात्मने ॥८०॥
मनुमेभ्यः प्रापयाऽत्र वैष्णवाः स्युरततुत्तरम् ।
लोमशस्तान् हरेर्मन्त्रं श्रावयामास सत्वरम् ॥८१॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
श्रुत्वा मन्त्रं वैष्णवास्ते दिव्यरूपा ववन्दिरे ॥८२॥
हरिश्चेशानदेवं सम्प्राह चैतान् निजाश्रितान् ।
कैलासे प्रेषय शंभो गणास्ते सन्तु तत्र च ॥८३॥
इत्युक्तः शंकरस्तान् संप्रेषयामास वै द्रुतम् ।
व्योम्ना कैलासलोकं च हरिः सर्वे जनास्ततः ॥८४॥
विमानानि समारुह्याऽऽययुः सुपानराष्ट्रकम् ।
दूराख्यसरितस्तीरे मद्रिटापत्तने शुभे ॥८५॥
विशाले लक्षशाले च बहूद्याने समन्ततः ।
स्वर्गनिभे सुसमृद्धे व्योम्नः शोभां व्यलोकयन् ॥८६॥
शृंगारितं हि बहुधा संसिक्तं गन्धवारिभिः ।
तोरणैर्गोपूरवर्यैर्नगरं बहुशोभत ॥८७॥
सैन्यं राजाऽऽज्ञया सार्धं नारायणस्य तुष्टये ।
स्वागतार्थं नदीतीरे महोद्याने तदाऽरमत् ॥८८॥
विमानं नृपतिः स्वस्य समवातारयत् ततः ।
ऋषिः राजा प्रजाश्चापि स्वागतार्थं पुरोऽभवन् ॥८९॥
तदावाद्यान्यवाद्यन्त जयनादास्ततोऽभवन् ।
यन्त्रशब्दा जनघोषास्तूपशब्दास्ततोऽभवन् ॥९०॥
राजदर्शितमार्गेण विमानं श्रीहरिर्निजम् ।
महोद्यानेऽवातारयद् राजसौधसमीपतः ॥९१॥
अन्यान्यपि विमानानि चावतेरुस्तदाऽम्बरात् ।
राधिके हर्षनादैश्च लाजाऽक्षतसुमादिभिः ॥९२॥
वर्धयामासुरत्यर्थं प्रजा राजादयस्तदा ।
जयत्वसंख्यतत्त्वाधिदेवश्चेतिरवान् व्यधुः ॥९३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने इन्दुरायराष्ट्रे तत्सौधे हरेः पूजनं भोजनं वायूनानगरीभ्रमणम् उपदेशनं विदायं सप्तम्यां सायम् इन्दिरानदीस्नानं वेतालोद्धारो मुद्राण्डराजराष्ट्रागमनं चेत्यादिनिरूपणनामा नवाशीत्यधिकशततमोऽध्यायः ॥१८९॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके राजा मुद्राण्डो माधवे तदा ।
पुष्पहारान् स्वर्णहारान् आर्पयत् समपूजयत् ॥ १ ॥
राजवेषं बहुशोभमधारयत्तदा हरिम् ।
मद्रिटानगरीं सार्धं भ्रामयितुं समार्थयत् ॥ २ ॥
सर्वांस्तत्र महीमानान् पुपूज राजकेशरी ।
सुपानर्षिश्च तिलकं चन्द्रकं हरयेऽकरोत् ॥ ३ ॥
जलपानं ददौ पश्चाद् वाहनेषु नृपोऽखिलान् ।
न्यषादयद् सतूर्याणि व्यनादयच्छुभानि वै ॥ ४ ॥
हरिर्नवं रथं शुभ्रं कम्बलाजिनसंवृतम् ।
युक्तं षोडशभिर्गोभिः पाण्डुरैर्देवलक्षणैः ॥ ५ ॥
तथाऽग्र्यैकेन महता पाण्डुरेण वृषेण च ।
बन्दिभिः स्तूयमानश्चाऽभ्यर्च्यमानो महर्षिभिः ॥ ६ ॥
आरुरोह रथं स्वर्णमणिमौक्तिकराजितम् ।
जग्राह रश्मीन् मौद्राण्डः कुमारस्त्रिग्रसाण्डकः ॥ ७ ॥
गवादकवितर्षिश्च धारयामास छत्रकम् ।
ध्रियमाणं महच्छत्रं पाण्डुरं रथमध्यगम् ॥ ८ ॥
शुशुभे तारकायुक्तचन्द्रमिव सुहीरकैः ।
चामरव्यजने स्वस्य मुनी जगृहतुर्मुदा ॥ ९ ॥
सुपानर्षिस्तथा मित्रमहर्षिश्च महाव्रतौ ।
चन्द्ररश्मिसमकान्तियुते दीर्घातिमञ्जुले ॥१०॥
कृष्णस्य पितरौ राधे भ्रातरश्च स्वसा तथा ।
रथे स्थिता अदृश्यन्त सर्वेदेवसमास्तदा ॥११॥
रथं शुभ्रं समास्थाय युक्तं तुरगसत्तमैः ।
अन्वयात् पृष्ठतो रुद्रश्चेशानो गणसेवितः ॥१२॥
रथं हेममयं श्रेष्ठं महादीर्घाश्वयोजितम् ।
लोमशश्च समास्थायाऽन्वयाद् रुद्रं गुरुः स्वयम् ॥१३॥
वृकायनो नीलकर्णश्चोभौ पीतरथेन च ।
ययतुस्तु ततो नीलवर्णाश्वयोजितेन वै ॥१४॥
ब्रह्मप्रियास्ततः सर्वाः स्वलंकृताः सहस्रशः ।
नरयानैस्तथा यानैरुच्चावचैर्ययुस्ततः ॥१५॥
गांगेयाः ऋषयः सर्वे कन्यकाश्च तथाऽपरे ।
राजकन्याश्च राज्यश्चान्वयुर्मर्त्यैः रथादिभिः ॥१६॥
ततो रथाश्च बहुला नागाश्चोष्ट्रवृषान्विताः ।
पदातयो हयरूढाः पृष्ठतः समनुव्रजन् ॥१७॥
ततो वैतालिकाः सूता मागधाश्चारणास्तथा ।
सुभाषितानि गायन्तो ययुः प्रजाजनान्विताः ॥१८॥
तदा तु दर्शनं विष्णोर्बभूवाऽप्रतिमं सुखम् ।
अनादिश्रीकृष्णनारायणस्याऽनुपमं भुवि ॥१९॥
मद्रिटायां हरेः प्रवेशने नगरवासिभिः ।
नगरी राजमार्गाद्या बहुधा समलंकृताः ॥२०॥

पाण्डुरैर्माल्यवर्गैश्च पताकाभिश्च मेदिनी ।
संस्कृता राजमार्गाऽभूद् धूपनैश्च प्रधूपिता ॥२१॥
तथा चूर्णैः सुगन्धानां नानापुष्पप्रियंगुभिः ।
माल्यदामभिः संसक्तैर्नगरी शोभिता कृता ॥२२॥
कुंभा द्वारि कृताश्चासन् जलपूर्णा नवाः शुभाः ।
सिताः सुमनसो गौरा निक्षिप्तास्तत्र तत्र च ॥२३॥
यथास्वलंकृतान्येव द्वाराणि रंगवल्लिभिः ।
एवं श्रृंगारितायां च नगर्यां स विवेश ह ॥२४॥
प्रवेशने हरेस्तत्र जनानां पुरवासिनाम् ।
दिदृक्षूणां सहस्राणि समाजग्मुः सहस्रशः ॥२५॥
राजमार्गोऽतिशुशुभे समलंकृतचत्वरः ।
चन्द्रोदयेऽब्धिवृद्धिश्च पूरागतागतैर्यथा ॥२६॥
प्रजानां राजमार्गेषु वृद्धिश्चाऽचिन्तिताऽभवत् ।
गृहाणि राजमार्गेषु रत्नबद्धानि सर्वथा ॥२७॥
प्राकम्पन्तीव भारेण गौरीणां पूर्णितानि वै ।
ताः स्त्रियश्च प्रशशंसुः कांभरेयं श्रियः पतिम् ॥२८॥
ब्रह्मप्रिया इमा धन्या याः प्राप्ताः पुरुषोत्तमम् ।
गौरीणां व्रतचर्याणि प्रशशंसुस्तथा स्त्रियः ॥२९॥
प्रशंसावचनैस्तासां प्रीतिशब्दैश्च राधिके ।
जयशब्दैः कीर्तनैश्च पुरमासीन्निनादितम् ॥३०॥
प्रतिरथ्यं प्रतिमार्गसंगमं प्रतिचत्वरम् ।
प्रतिहट्टं प्रतिहर्म्यं प्रजा आनर्चुरीश्वरम् ॥३१॥
भ्रमित्वा नगरीं राजमार्गेण च ततो हरिः ।
अलंकृतं शोभमानमुपायाद् राजवेश्म ह ॥३२॥
तत्र प्रकृतयः सर्वाः पौरा जानपदा अपि ।
ऊचुः कर्णसुखा वाचो दिष्ट्या प्राप्तोऽसि माधव ॥३३॥
भवत्कृपा भवतश्च दर्शनेऽत्र मता शुभा ।
अन्यथा दर्शनं कृष्ण कथं ते भाग्यमन्तरा ॥३४॥
एवं राजकुलद्वारि मंगलैरभितोषितः ।
प्रविवेश हरिर्यानादुत्तीर्य राजमन्दिरम् ॥३५॥
राजा महर्षयश्चापि राजपत्नी कुमारिकाः ।
गन्धमाल्यै रत्नहारैरार्चयन् कृष्णवल्लभम् ॥३६॥
सुमनोमोदकै रत्नैर्हिरण्येन च भूरिणा ।
उपदाभिर्विविधाभिर्विविधैश्च किमिच्छकैः ॥३७॥
तत्रैवाऽवसरं ज्ञात्वा मोहपाशवशंगताः ।
राजकन्या हरेर्हस्तं जगृहुर्दश पञ्च च ॥३८॥
ततः पुण्याहघोषोऽभून्नामसंकीर्तनं तथा ।
सुहृदां प्रीतिजनकं पुण्यं श्रतिसुखावहम् ॥३९॥

तथा दुन्दुभिनिर्घोषः शंखानां च मनोरमः ।
जयं प्रवदतां चापि प्रादुरभूत्स्वनः शुभः ॥४०॥
श्रुत्वा श्रीबालकृष्णश्च प्रसन्नहृदयस्तदा ।
काञ्चने राजसौधस्थे न्यषीदत् परमासने ॥४१॥
उपादिदेश बहुधा सभायां भूपतेर्वृषान् ।
व्यसनी चेद् भवेद् राजा लोकैः सपरिभूयते ॥४२॥
उद्वेजयति लोकं यो द्वेष्टि सुखं न विन्दति ।
स्वप्रियं तु परित्यज्य लोकहितं समाचरेत् ॥४३॥
धीरतां न त्यजेत् क्वापि राजा लोकहितावहः ।
नात्यर्थः परिहासश्च भृत्यैः कार्यो नृपेण वै ॥४४॥
अवमन्यन्ति राजानं संघर्षादुपजीविनः ।
स्वे स्थाने न तु तिष्ठन्ति लंघयन्ति तु तद्वचः ॥४५॥
प्रेष्यमाणा न गच्छन्ति गुह्यं प्रकाशयन्ति च ।
अयाच्यमपि याचन्ते भोज्यानि भक्षयन्ति च ॥४६॥
क्रुश्यन्ति परिदीप्यन्ति कार्याणि घातयन्ति च ।
वञ्चनां चापि कुर्वन्ति लुञ्चां गृह्णन्ति वै क्वचित् ॥४७॥
हस्ताक्षरैः कृत्रिमैश्च साधयन्ति निजां कृतिम् ।
स्त्रीरक्षिभिश्च सज्जन्ते तुल्यवेषा भवन्ति च ॥४८॥
वान्तं निष्ठीवनं चापि कुर्वते राजसन्निधौ ।
निर्लज्जा नृपनिकटे भूत्वा घ्नन्ति यशोऽप्यनु ॥४९॥
राजवाहं हयं हस्तिरथाद्यारोहयन्ति च ।
सभायामपि राजानं चाऽज्ञानिनं वदन्ति च ॥५०॥
क्रुद्धे नृपे हसन्त्येव मन्त्रं विस्रंसयन्ति च ।
गुप्तं प्रकाशं कुर्वन्ति शासनं लंघयन्ति च ॥५१॥
हेलनं चापि कुर्वन्ति निन्दन्ति सन्निधावपि ।
अस्मन्मुष्टयां नृपोऽस्त्येव लोकाँश्चैवं वदन्त्यपि ॥५२॥
तस्माद् भृत्यादिभिः सार्धं हर्षुलो न मृदुर्भवेत् ।
उद्यमं संप्रकुर्याच्च भुक्तिमुक्तिप्रदं सदा ॥५३॥
लोकानां रञ्जनाद् राजा नृपधर्मो हि रञ्जनम् ।
सत्यस्य रक्षणं चापि व्यवहारस्य रक्षणम् ॥५४॥
क्षान्तेश्च रक्षणं कार्यं राजमार्गाच्चलेन्न च ।
आत्मवान् पुरुषार्थेषु जाग्रन् राजत्वमर्हति ॥५५॥
मानवाः सर्वधर्माश्च रक्षितव्या नृपेण वै ।
वृद्धाः प्रसेवनीयाश्च सेवनीयाश्च साधवः ॥५६॥
सन्दयो दद्यादसद्भयस्तु समादद्यान्नृपो वृषात् ।
शिष्टान् शिष्टक्रियाश्चापि मानयेत् सर्वथा नृपः ॥५७॥
विदुषो रक्षयेद् राजा नीतिज्ञान् शास्त्रकोविदान् ।
कथाकारान् धर्मधर्तॄन् परमेशोपदेशकान् ॥५८॥

गुरूँश्च मानयेद् राजा पूजयेद् बहुदानकैः ।
साधून् सम्पूजयेन्नित्यं भोजयेद् शृणुयात् कथाः ॥५९॥
देवालयान् कारयेच्च पूजाप्रबन्धमाचरेत् ।
नित्यं भक्त्या स्वयं राजा यजेत देवताः प्रियान् ॥६०॥
दशांशं वा च विंशांशं शतांशं पञ्चमांशकम् ।
राज्यर्द्धिद्रव्यधान्येभ्योऽर्पयेद्धर्मार्थमेव सः ॥६१॥
तीर्थानि रक्षयेद् राजा क्रतूँश्च कारयेत्तथा ।
गोविप्रस्त्रीदीनबालान् यतीन् संरक्षयेच्छ्रितान् ॥६२॥
नित्यं दद्यात्तु दानानि पूजयित्वा गुरून् जनान् ।
वृद्धान् वन्देत सततं गृह्णीयादाशिषस्ततः ॥६३॥
भगवन्तं स्मरेन्नित्यं प्रातः सायं च कर्मसु ।
न त्रासं जनयेत् किंचिदायुर्नाशकरं न च ॥६४॥
पुण्यनाशकरं चापि नैव कुर्यात् कदाचन ।
विघसाशी भवेन्नित्यं ब्रह्मयज्ञपरो भवेत् ॥६५॥
प्रजायां संप्रपश्येत्तु पुत्रवात्सल्यमुत्तमम् ।
मां हरिं संस्थितं सर्वास्वपि मत्वाऽर्चयेद् यथा ॥६६॥
हिंसनं न वृथा राजा कुर्यात् स्वार्थार्थमित्यपि ।
सत्कार्याणि सदा लोके समारभेत भावतः ॥६७॥
पुण्यकार्येषु साहाय्यं दद्यात् कुर्यात् स्वयं ह्यपि ।
साधून् संवासयेद् राज्ये सेवेत परमादरात् ॥६८॥
भगवन्तं च भक्ताँश्च भ्रामयेन्नगरादिषु ।
मालावर्तनमादध्याद् राजा नित्यासनस्थितः ॥६९॥
वर्तयेत् स्वकुटुम्बादि धर्मे कर्मणि भक्तिषु ।
स्नानं ध्यानं जपं होमं तर्पणं च निवेदनम् ॥७०॥
दानं धर्मं भजनं च सेवां कुर्वन्नृपः स्वयम् ।
एवं वर्तेत चेद् राजा मुच्यते न तु बध्यते ॥७१॥
यस्य कूटं न कपटं न माया सत्सु वै क्वचित् ।
यस्य गेहे कथा ज्ञानं भजनं देवपूजनम् ॥७२॥
सतां वर्त्मानुगश्चापि त्यागीव वर्तते च यः ।
स भवेद्वै क्वचिन्मोक्षभागीश्वरेशसेवया ॥७३॥
यथा राजा तथा धर्मो यथा धर्मस्तथा प्रजाः ।
कृष्णधर्मोऽतियत्नेन राज्ञा रक्ष्यो मुमुक्षुणा ॥७४॥
स्वस्मिन् भागवते धर्मे तिष्ठत्येव कुटुम्बकम् ।
बान्धवाः सुहृदश्चान्ये प्रजाद्या अपि सर्वथा ॥७५॥
वर्तेरन् सात्वते धर्मे यथा राजा तथा प्रजाः ।
तस्माद् राजन् प्रजाश्चापि सर्वे कुर्वन्तु सात्त्वतीम् ॥७६॥
भक्तिं मे मोक्षदां श्रेष्ठामुद्धरिष्ये मदाश्रितान् ।
इत्युक्त्वा विररामाऽसौ बालकृष्णो हि राधिके ॥७७॥
राजा प्रजादयः सर्वे जगृहुस्तद्वचांसि वै ।
मन्त्रं मन्त्रविहीना ये ते सञ्जगृहुरैश्वरम् ॥७८॥
कण्ठीं च भजनं नामरटणं जगृहुश्च ते ।
ततः सभां विसर्जयामास मुद्राण्डको नृपः ॥७९॥
भोजनानि हरिश्चापि कुटुम्बं च महर्षयः ।
ईशानाद्या महीमानाश्चक्रुर्ब्रह्मप्रियादिकाः ॥८०॥
रात्रौ विश्रान्तिमासाद्य कृत्वोत्थायाऽऽप्लवादिकम् ।
नित्यपूजां विधायाथ दुग्धपानादिकं तथा ॥८१॥
हरिः सज्जोऽभवद् गन्तुं पूर्तगण्डप्रदेशकान् ।
तदा राजा प्रार्थयच्छ्रीहरिं शैवालपत्तनम् ॥८२॥
गन्तुं गवादकवितानदीतटस्थमुत्तमम् ।
हरिस्तथाऽस्त्विति प्राह जयशब्दैश्च कीर्तनैः ॥८३॥
सह पूजां समागृह्य स्वं विमानमरूरुहत् ।
अन्ये निषेदुः शीघ्रं च मुद्राण्डकोऽपि तत्क्षणम् ॥८४॥
विमानमधिरुह्याग्रे ययौ स्वागतसिद्धये ।
विमानानि विचेरुश्च शैवालपत्तनं प्रति ॥८५॥
क्षणात् प्रापुश्च तं देशं गवादकवितान्तिकम् ।
अवतेरुर्विमानानि गवादकवितातटे ॥८६॥
राजा निजालये कृष्णं सर्वानानर्च भावतः ।
उद्यानफलपुष्पाद्यैरपूजयद्धरिं नृपः ॥८७॥
आरार्त्रिकं चकाराऽथ नगरेऽभ्रामयत्प्रभुम् ।
कृत्वैवं पावनं कृष्णनारायणो हि पत्तनम् ॥८८॥
दुग्धं फलादिकं जग्ध्वा प्राप्य पूजां नृपादिभिः ।
प्रजाभिश्च कृतां सर्वामाशिषः सम्प्रदाय च ॥८९॥
सन्मानेन समं शीघ्रमियेष गन्तुमच्युतः ।
गण्डो नाम नृपस्तत्र नेतुं कृष्णं समागतः ॥९०॥
पूर्तगण्डर्षिणा साकं हरिः सज्जोऽभवत्ततः ।
शीघ्रं विमानमारुह्य दत्वाऽऽशीर्वचनानि च ॥९१॥
ययौ शृण्वन् जयनादान् नदीं गवादयानिकाम् ।
समुल्लंघ्य नदीदेशानाकाशे व्यचरद्धरिः ॥९२॥
त्रिगिरां च नदीं प्राप्य राजा वै गण्डकः पुरः ।
पूर्तगण्डर्षिणा साकं स्वागतार्थमवातरत् ॥९३॥
लीशवनं पत्तनं च शृंगारितं हि राधिके ।
सैन्ययुक्तं शुभं गत्वोद्याने स्वागतमाचरत् ॥९४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मद्रिटानगर्यां भ्रमणं राजवेश्मागमनं पूजनम् उपदेशो भोजनं निशोत्तरम् अष्टम्यां प्रातःकृत्योत्तरं प्रयाणं शैवालनगरीं भ्रमित्वा पूर्तगण्डर्षिप्रदेशेषु गण्डकनृपस्य लीशवनपत्तनं प्रति गमनमित्यादिनिरूपणनामा नवत्यधिकशततमोऽध्यायः ॥ १९० ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके पूर्तगण्डर्षिर्गण्डको नृपः।
राज्ञी कुमारिकाश्चापि कुमाराश्च तथाऽपरे ॥ १ ॥
बान्धवाश्चामात्यवर्गाः स्वागतार्थे पुरोऽभवन्।
विमानमम्बराद् राजोद्याने ह्यवातरद्धरेः ॥ २ ॥
अन्यान्यपि विमानानि चावतेरुः समन्ततः।
तदा वाद्यान्यवाद्यन्त तूर्यनादास्तदाऽभवन् ॥ ३ ॥
अगायन्त च गीतानि जयशब्दा बभूविरे।
पटहानां विपुलानां दुन्दुभीनां रवोत्तमाः ॥ ४ ॥
प्रजाहर्षभरैः शब्दैर्दिशो ह्यनादयन् दश।
हरिर्विमानादुत्थाय श्रेण्या बहिः समागमत् ॥ ५ ॥
राजा ऋषिः कुटुम्बाद्याः पुष्पाद्यैः समवर्धयन्।
हारैरक्षतवर्यैश्च लाजाभिः स्वागतं व्यधुः ॥ ६ ॥
गजयन्त्र्यां हरिकृष्णं राजा न्यषादयत्तथा।
अन्यान् यथोचितवाहेष्वपि सद्वाहनेषु च ॥ ७ ॥
गन्त्र्यादिषु पटोल्लेचशकटीषु न्यषादयत्।
वाद्यशब्दैः सह देवेश्वरं लीशवनां पुरीम् ॥ ८ ॥
भ्रामयामास सोत्साहः प्रजाश्चक्रुः समर्हणम्।
दर्शनं पादपूजां च बहूपदाभिरादरात् ॥ ९ ॥
समुद्रतीरशोभां च विलोक्य भगवाँस्ततः।
राजप्रासादके श्रेष्ठे समायात् सकुटुम्बकः ॥१०॥
राजा राज्ञ्या च कन्याभिः पूजितः कृष्णवल्लभः।
चन्दनैर्गन्धसारैश्च कुसुमैरम्बरैः शुभैः ॥११॥
शीतहारैश्चौर्णवैषै रत्नैराभूषणादिभिः।
द्रव्यैः फलैः प्रपूजां श्रीहरेश्चक्रुः प्रधानकाः ॥१२॥
अथ गण्डस्य वै कन्या नव तत्र कुमारिका।
करग्रहं हरेश्चक्रुर्विवाहविधिना द्रुतम् ॥१३॥
राजा बभूव च भाग्यात् कृतकृत्यो नृपी ह्यपि।
तदुत्सवं महान्तं च चक्रे पूजनमाननैः ॥१४॥
भोजनं कारयामास राजा पक्वान्नपूरितम्।
नर्तनं गायनं तत्र कारयामास भूपतिः ॥१५॥
राजा कृष्णाय बहुधाऽर्पयामास विभूतिकाः।
भगवान् पूर्णगण्डाय ऋषये ता ददौ तदा ॥१६॥
भुक्त्वा विश्रान्तिमापुश्च पानताम्बूलचर्वणैः।
दुग्धपानैः स्वयं राजा महीमानानरञ्जयत् ॥१७॥
अथ सायं सभास्थाने बालकृष्णः प्रजाजनान्।
उपादिदेश बहुधा शान्तिवाक्यानि चाञ्जसा ॥१८॥
राज्ये वा वाटिकायां वा गृहे वापि वनेऽपि वा।
अन्तर्वृत्तिपरो देही विवेकी शान्तिमृच्छति ॥१९॥
तृष्णातन्तुं सुविच्छिद्य भोग्यवृत्तिं विहाय च।
आत्मस्थित्या सुतिष्ठेद् यः स शान्तिमधिगच्छति ॥२०॥
ईहा चोपरता यस्य लिङ्गं निर्लिङ्गतां गतम्।
रसना नीरसा यस्य स शान्तिमधिगच्छति ॥२१॥
शब्दास्त्वाकाशभागाश्च स्पर्शा दावानलोपमाः।
रूपाणि कुष्ठतुल्यानि यस्य शान्तिं स ऋच्छति ॥२२॥
नार्यः प्राणहरा यस्य यस्या नरश्च राक्षसः।
दृश्यते मनसा त्यागात् स शान्तिं साऽभियाति वै ॥२३॥
धातवो मलरूपाश्च कुटुम्बं वानरायितम्।
भृत्याः क्षयसमा यस्य स शान्तिमभियाति वै ॥२४॥
शिष्याः शत्रुसमा यस्य पुत्रा भक्षणतत्पराः।
देहो यस्य सदा रुग्णः स शान्तिमभियाति वै ॥२५॥
वैराग्यं वर्तते यस्य रागस्थलं तु दुःखदम्।
स्नेहस्थलं नाऽनुकूलं स शान्तिमभियाति वै ॥२६॥
बहुभोगे बहुदुःखे शान्तिं याति विवेकवान्।
नाऽहं देहो न मे भोग्यं नाऽहं भोक्ता हि दीनवत् ॥२७॥
नाऽहं जडाधीन एवं विवेकी शान्तिमृच्छति।
नदीनां रम्यभागेषु वनोद्यानेषु मन्दिरे ॥२८॥
देवालयेषु तीर्थेषु निर्जने शान्तिभाग् भवेत्।
यदा यत्र न वै सन्ति शत्रवो बहिरान्तराः ॥२९॥
आगन्तुकाश्च वा नित्यास्तदा शान्तिं प्रगच्छति।
क्षतदुःखो यथा निद्रावशो दुःखं न वेत्ति हि ॥३०॥
जगद्धतोऽपि जीवात्मा तूर्यागतो न खिद्यति।
वासनाप्रहतः प्राणी साधुसंगतिमृच्छति ॥३१॥
साधुसेवारतः स्याचेत् साध्वीं शान्तिं स गच्छति।
सतां गुणान् प्रगृह्णीयात् सतां शीलं समाचरेत् ॥३२॥
अग्राह्यं वर्जयेन्नित्यं ग्राह्यं शुभं समार्थयेत्।
तरंगान् मानसान् देही शमयेत् शान्तिमान् भवेत् ॥३३॥
विकल्पान् संशयान् मोहान् त्यजेत् गुरोरनुग्रहात्।
तर्कान् हेतून् विवादाँश्च त्यजेन्निजमनीषया ॥३४॥
उद्वेगान् दावहेतूँश्च ज्ञात्वा दूराद् विवर्जयेत्।
आयतिं सुविचार्यैव वर्तयेत् निरभिप्लवः ॥३५॥
हरिं शरणमासाद्य फलं तत्र समर्पयेत्।
आरभेत हरिं ध्यात्वा मां कर्तारं विभाव्य यः ॥३६॥
मदनुस्यूतभावेन कुर्याद्धितं हितार्थदम्।
स्वस्य वाऽन्यस्य सुतरां श्रेयस्कृतं समाचरेत् ॥३७॥

ज्ञानविज्ञानकोशेन धनाढ्यत्वं विचारयेत् ।
अपरिग्रहसम्पन्नस्तृप्तोऽतिशान्तिमावहेत् ॥३८॥
एवं विचार्य सततं राज्ञा राज्ञ्या प्रजादिभिः ।
अन्योन्यहितमाश्रित्य वर्तितव्यं सुशान्तये ॥३९॥
सेवां प्रजानां रक्षां च राजरक्षां परस्परम् ।
आत्मबुद्ध्या सुतबुद्ध्या समाचरेत् सुशान्तिदाम् ॥४०॥
बृहस्पतिर्विशालाक्षः काव्यः प्राचेतसस्तथा ।
भरद्वाजो महेन्द्रश्च गौरशिरा मनुस्तथा ॥४१॥
ब्रह्मवादास्त एवैते रक्षां धर्मं परस्परम् ।
प्रशंसन्ति सदा कल्पे कल्पे राजप्रताहितम् ॥४२॥
दानं सतां सदा सेवा सतां संग्रहणं तथा ।
दाक्ष्यं सत्यं चार्जवं चाऽवेक्षा समन्ततस्तथा ॥४३॥
सीदतां च समुद्धारः कुलीनानां प्रसञ्जनम् ।
साधूनामपरित्यागः सेवा बुद्धिमतामपि ॥४४॥
शत्रुमित्रौदास्यकानां निरीक्षणं परे स्वके ।
नीतिधर्मानुसरणं चानार्यवर्जनं सदा ॥४५॥
उत्थानं सर्वथा योग्यं लोके कार्ये हरौ मतौ ।
मोक्षे त्यागे च वैराग्ये धर्मो रक्षापरा न्विमे ॥४६॥
रक्षणीयाः सदा राज्ञा प्रजया चामृतेहया ।
उत्थानेनाऽमृतं प्राप्ताः सुरा महेन्द्रसंहिताः ॥४७॥
उत्थानेन विहीनस्य रक्षा दूरं प्रयाति हि ।
धर्मोत्थानं सदा कार्यं धर्मिष्ठां चाचरेत् क्रियाम् ॥४८॥
यद्यप्यस्य विपत्तिः स्याद् रक्षाधर्मस्य देहिनः ।
सोऽप्यस्य विपुलो धर्मो यतो रक्षाऽहमेव वै ॥४९॥
रक्षा च रक्षकश्चाहं रक्ष्यश्चाप्यहमेव च ।
सदा रक्षाकरं चाहं रक्षयामि न संशयः ॥५०॥
अरक्षकान् क्रूरभावान् न रक्षामि कदाचन ।
रक्षको राजवर्गश्च मत्स्वरूपोऽस्ति भूतले ॥५१॥
तस्माद् रक्षा मम धर्मो मत्कृता पाल्यतां जनैः ।
इत्युच्यमाने श्रीकृष्णे नारायणे परात्मनि ॥५२॥
राधिके गण्डको राजा पप्रच्छ श्रीनरायणम् ।
राजशब्दः कथं कस्मात् कदा वै भवता कृतः ॥५३॥
तुल्यशारीरभावेऽपि तुल्येन्द्रियात्मकेऽपि च ।
तुल्यदुःखसुखे तुल्यविकारे तुल्यविग्रहे ॥५४॥
तुल्यशुक्रास्थिमज्जे च तुल्यमांसादिसंभृते ।
तुल्यप्राणशरीरे च तुल्यमृत्युभवान्विते ॥५५॥
एवंविधेऽपि चैकस्मिन् राजता कथमूर्ध्वगा ।
कथमेको विशिष्टाँश्च शूराँश्च पण्डितानपि ॥५६॥
अधितिष्ठति सत्तावान् पृथ्वीं रक्षति चैकलः ।
प्रसादेन तथैकस्य लोकः सर्वः प्रसीदति ॥५७॥
एकस्मिन्नेव राष्ट्रं च देववद् याति सन्नतिम् ।
भगवँस्तत्कथं साम्येऽप्येषा वै राजताऽतिगा ॥५८॥
वर्तते सर्वमूर्धन्या वदात्र कारणं तु किम् ।
श्रुत्वा प्राह हरिः राधे राजनियमजां कथाम् ॥५९॥
आदौ कृतयुगे चात्र नासीद् राज्यं न राज्यपः ।
न राजा न च दण्डोऽभूद् दण्ड्यो नासीच्च दण्डकृत् ॥६०॥
सत्यधर्मैः प्रजा ब्राह्म्यो रक्षन्ति स्म परस्परम् ।
कल्पवृक्षाः कल्पवल्ल्यश्चिन्तामणिश्च कामगौः ॥६१॥
आसँस्तेन प्रजाः सर्वाः स्वात्माधीनाः सुखास्तदा ।
अथ काले कृतान्ते च कल्पनायां बलानि तु ॥६२॥
क्षीणतां संगतान्येव तदा स्वत्वं प्रवर्तितम् ।
ममेदं कल्पवृक्षं च न तवेदं विवादितम् ॥६३॥
एवं ममतामोहौ च प्रजास्वाविशतां तदा ।
चिन्ताः संकल्परूपाश्च निष्फलाश्च तदाऽभवन् ॥६४॥
तृष्णादोषाऽभिवेशेन धर्मः सत्यो व्यनीनशत् ।
लोभस्य वशमापन्ना अप्राप्तस्याऽभिमर्शिनः ॥६५॥
कामोऽपरो महान् दोषः प्रजासु प्रत्यपद्यत ।
कामपरान् जनान् रागोऽनिष्टकृद् वै समस्पृशत् ॥६६॥
तेन कार्यं तथा कार्यं नाभ्यजानन्त मोहिताः ।
अगम्यागमनं चापि वाच्यावाच्यं व्यजायत ॥६७॥
भक्ष्याभक्ष्यं तथा दूष्यादूष्यं च प्रत्यपद्यत ।
विप्लुते मानवे लोके ब्रह्मभावो ननाश ह ॥६८॥
ब्रह्मनाशे धर्मनाशो देवास्त्रासं ततोऽगमन् ।
ययुश्च पितरं चाऽजं प्रसाद्योचुः सुदुःखिनः ॥६९॥
ब्रह्मन् मानवलोके वै सत्यं ब्रह्म लयं गतम् ।
धर्मो नाशं गतस्तेन वयं स्वाहाविवर्जिताः ॥७०॥
क्षीणतां च गताः स्मोऽद्य मानवैः समतां गताः ।
अतो निःश्रेयसं यत्तद् ध्यायस्वेह पितामह ॥७१॥
ब्रह्माऽऽह भवतां श्रेयश्चिन्तयामि भयापहम् ।
ततस्त्रेतामुखे ब्रह्मा धर्मं चार्थं च कामनाम् ॥७२॥
मोक्षं चेति चतुर्वर्गं धर्मे चक्रे पृथग्गुणम् ।
धर्मरूपान् नियमाँश्च दण्डरक्षादिकल्पितान् ॥७३॥
चक्रे यज्ञादिरूपाँश्च कर्मफलादिमिश्रितान् ।
अर्थरूपान् पदार्थाँश्च क्षेत्रवाटीगृहादिकान् ॥७४॥
धनसम्पत्स्वरूपाँश्च चक्रे स्वत्वादिबोधकान् ।
कामरूपान् नियमाँश्च ऋतून् परस्परान्वितान् ॥७५॥

मोहादिनियमाँश्चक्रे स्वस्वभोग्यव्यवस्थितान् ।
मोक्षधर्मं सामरूपं चार्पणं मयि माधवे ॥७६॥
त्रिवर्गार्पणमेवापि मोक्षदं चेत्यनिर्णयत् ।
अन्यानि बहुधान्येव प्रकाराणि ह्यनिर्णयत् ॥७७॥
तां नीतिं शंकरः पूर्वं जग्राहेशानको ह्ययम् ।
शंकरोक्तं च तच्छास्त्रं वैशालाक्षं तदाऽभवत् ॥७८॥
इन्द्रस्तस्मात्प्रजग्राह बाहुदन्तकमेव तत् ।
बृहस्पतिर्लिलेखेदं बार्हस्पत्यं ततोऽभवत् ॥७९॥
औशनसं ततो जातं ततो नीतिः प्रवर्तिता ।
देवैर्विष्णुश्चार्थितश्च नीतिशास्त्रविदं प्रति ॥८०॥
ततो नारायणश्चाहं ददौ वै मानसं सुतम् ।
विरजसं तत्पुत्रोऽभूत् कीर्तिमान् तस्य पुत्रकः ॥८१॥
कर्दमोऽभूत् तस्य पुत्रोऽनंगनामा सुबुद्धिमान् ।
प्रजारक्षयिता साधुर्दण्डनीतिविशारदः ॥८२॥
तत्सुतोऽभूदंगराजो मृत्युपुत्रीं सुनीथिकाम् ।
विवाह्य वेनं क्रूरं वै पुत्रमेकमजीजनत् ॥८३॥
तं वेनं द्वेषिणं मन्त्रकुशैर्जघ्नुर्महर्षयः ।
ममन्थुर्दक्षिणं चोरुमृषयो वेनदेहजम् ॥८४॥
निषादं जनयामासुर्निषादाश्च ततोऽभवन् ।
भूयोऽस्य दक्षिणं पाणिं ममन्थुस्ते महर्षयः ॥८५॥
ततोऽहं पृथुरूपश्चाऽभवं शस्त्री च वर्मवान् ।
नीतिशास्त्रज्ञ एवाऽहं राजशब्दमवासवान् ॥८६॥
मया देवैः सह भूमिः समपाटा विधापिता ।
संकल्पेन मया सर्वा राज्यस्मृद्धिर्नवीकृता ॥८७॥
आद्ये तु युगपर्याये राज्यं वै स्थापितं मया ।
पृथ्वी दुग्धा प्रजार्थं च प्रजा दण्डेन रक्षिता ॥८८॥
रञ्जनाद्वै प्रजाः प्राहुः राजा पृथुरिति क्षितौ ।
क्षतत्राणात् क्षत्रियोऽहं ततोऽभवं द्विजोऽपि सन् ॥८९॥
पृथिवीस्थापनं राज्यस्थापनं चाहमेव तु ।
विष्णुः सनातनस्तत्राऽकरवं नीतियोजिम् ॥९०॥
मल्ललाटात्तदा जातं कमलं कानकं शुभम् ।
श्रीःसंभूता ततो देवी कमला धर्मपत्निका ॥९१॥
श्रीरर्थरूपाऽभूद् राज्ये कामदा मोक्षदा अपि ।
वैष्णवी श्रीर्यदा राज्ये वर्तते मोक्षदा तु सा ॥९२॥
एवं ततः समारभ्य देवाश्च नरदेवताः ।
बुधैस्तुल्याः शब्दिताश्च मदंशा भूभृतो यतः ॥९३॥
श्रैष्ठ्यमेवं मया न्यस्तं राज्ञि राजत्वसंज्ञकम् ।
तेन राज्ञा प्रजाभिश्च द्रष्टव्योऽहं निजात्मसु ॥९४॥
पूजनीयो वन्दनीयश्चार्पणीयोऽतिभावतः ।
मय्यर्पितास्तु मामेव प्राप्स्यन्ति नात्र संशयः ॥९५॥
मां विहायाऽभिमन्तारो नैजं पदं तु ये नृपाः ।
क्षयं यास्यन्ति ते न्यूनं राजवंशा दरिद्रकाः ॥९६॥
इत्येवं निर्णयं ज्ञात्वा भजन्तु मां जनार्दनम् ।
राजराजेश्वरं नित्यं चतुर्वर्गं निधाय च ॥९७॥
मय्येवेति हरिः प्राह राधिके च सभाजनाः ।
जगृहुस्तद्वचांस्येव नेमुः सर्वे ततो ययुः ॥९८॥
हरिः प्राप निजावासं राजसौधे च भोजनम् ।
चकाराऽन्ये महीमानाश्चक्रुर्भोजनमादरात् ॥९९॥
विश्रान्तिं च ततः प्रापुः रात्रौ सर्वेऽपि निद्रिताः ।
राधिके राजकन्यास्तं कृष्णकान्तं सिषेविरे ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने गण्डकराजधानीं प्रति गमनं लीशवनानगर्यां भ्रमणं पूजनं भोजनमुपदेशनं रात्रौ विश्रमणं चेत्यादिनिरूपणनामैकनवत्यधिकशततमोऽध्यायः ॥ १९१ ॥

**श्रीकृष्ण उवाच—**

राधिके नवमीप्रातर्मंगलैस्तूर्यनिःस्वनैः ।
बन्दिमागधसूतानां वाग्भिर्जागरितः प्रभुः ॥ १ ॥
जजागरुस्तथा सर्वे नित्यविधिं प्रचक्रिरे ।
राजा दुग्धादि भोज्यादि त्वानीय हरये ददौ ॥ २ ॥
सर्वे चक्रुर्दुग्धपानं भोजनं च यथोचितम् ।
आशीर्वाबान् ददौ तत्र भूभृते श्रीहरिः प्रभुः ॥ ३ ॥
जनताभ्यस्तथाऽऽशीर्वाग्गौरवादि ददौ हरिः ।
ततो गन्तुमभवच्च सज्जो लीनोर्णराष्ट्रकम् ॥ ४ ॥
लीनोर्णनृपतिस्तत्रागत्य चार्थयदच्युतम् ।
फलाशनेन ऋषिणा सार्धं प्रभुस्तदाऽवदत् ॥ ५ ॥
गण्डको नृपतिस्तत्र विदायं प्रददौ बहु ।
हरिर्विमानवर्ये च समारुरोह पूजितः ॥ ६ ॥
आरुरुहुस्तथाऽन्येऽपि प्रजाजयध्वनींस्तदा ।
श्रृण्वन्तः सर्व एवैते प्रैरयन् व्योमपत्त्रिणः ॥ ७ ॥
खाडिकां च समुल्लंध्य वारुणीं नगरीं ययुः ।
लीनोर्णभूपतिः पूर्वमवतीर्य पुरं निजम् ॥ ८ ॥
फलाशनर्षिणा साकं हरेः स्वागतमाचरत् ।
भूपदर्शितमार्गेणाऽवातारयद् विमानकम् ॥ ९ ॥
हरिस्तथाऽन्ये यानान्यवातारयत्तदाऽम्बरात् ।
वाद्यानां गीतिकानां च निनादो व्यानशेऽभितः ॥१०॥

हरिर्यानात् समुत्तीर्य नरयाने सुशोभिते ।
राज्ञा प्रदर्शिते स्वर्णे व्यराजत जयध्वनैः ॥११॥
राज्ञा मालादिभिः सम्यक् पूजितः परमेश्वरः ।
कुटुम्बाद्यैः सह सर्वान् वारुण्यामविहारयत् ॥१२॥
राजसैन्येन सहितो भगवान् नागरैर्जनैः ।
अर्चितश्चाययौ सौधं राजालयं विशालकम् ॥१३॥
विशश्राम ततः सस्नौ भोजनं जगृहे तदा ।
अन्येऽपि भोजनं चक्रुस्ततो राज्ञी हरेः पुरः ॥१४॥
पूजनार्थं समायाता चतुःकन्यासमन्विता ।
कन्या हरिं प्रियं प्राप्य करग्रहं व्यधुर्मुदा ॥१५॥
राज्ञी पूजां यौतकं च प्रददौ विधिना ततः ।
विश्रम्य च ततः सज्जो बभूव भगवान् द्रुतम् ॥१६॥
राज्ञश्चाभिप्रायमाप्य सर्वान् सज्जान् व्यधात् प्रभुः ।
बृहच्छरनृपस्याऽग्रे राष्ट्रं वै खाडिगान्तिगम् ॥१७॥
वल्लीजीवनमुनिनाऽर्थितो हरिर्जगाम ह ।
बृहच्छरो नृपश्चाग्रे ह्यवातरन्निजां पुरीम् ॥१८॥
धीवराख्यां शोभितां च श्रीहरिं तु सहाऽऽनयत् ।
नगर्यां भवने रम्ये पुपूज परमेश्वरम् ॥१९॥
राजा राज्ञी कन्यके च प्रजाः स्वागतमाचरन् ।
कन्याद्वयं हरेः पाणिं जगृहतुः सुभावतः ॥२०॥
राजाऽभवत् कृतकृत्यो हरिर्निशां निनाय ह ।
प्रातर्नगर्यां परितो व्यभ्रमत् सैन्यशोभितः ॥२१॥
प्रजाभ्यो दर्शनं दत्वा कृत्वा तां पावनीं पुरीम् ।
दुग्धपानादिकं कृत्वा गन्तुं सज्जोऽभवत्प्रभुः ॥२२॥
तावत्पश्चिमसामुद्रो राजा श्रुत्वा प्रभुं द्रुतम् ।
विमानैः सह वै शीघ्रं नेतुं तत्र समाययौ ॥२३॥
अंगराजो हरिं नत्वाऽप्रार्थयत्परमेश्वरम् ।
हरिस्तथाऽस्त्विति प्राह सज्जस्तूर्णं तदाऽभवत् ॥२४॥
अन्यान्यपि विमानानि सुसज्जानि तदाऽभवन् ।
खाडीमुत्तीर्य भगवान् मिलिन्दां नगरीं ययौ ॥२५॥
राज्ञा सम्मानितः शक्त्या वाद्यैः सैन्येन कीर्तनैः ।
पूजनैरुपदादानैस्तोषितो भ्रामितः पुरे ॥२६॥
भोजनं कारयामास मध्याह्ने सर्वमानवान् ।
सायं सर्वान् विमानेषु कृत्वा द्वीपानदर्शयत् ॥२७॥
पुनः सर्वे विलोक्यैव मिलिन्दामाययौ हरिः ।
ददौ तत्रोपदेशं च राजनीत्युपबृंहितम् ॥२८॥
द्विलीनायाः प्रजाश्चापि सुकौतुकीप्रजास्तथा ।
श्रश्रुवुस्तत्र चागत्योपदेशं सह चांगकैः ॥२९॥

दशमीरजनीभागे लक्षाधिजनसंसदि ।
हितं मोक्षकरं चाप्युपादिदेश च राधिके ॥३०॥
ईशानोऽयं परब्रह्म माननीयः सदा जनैः ।
ईशाने तु पराभक्तिः कर्तव्या वै मदात्मके ॥३१॥
अनृतं न हि वक्तव्यं शपथं तत्र नापि वै ।
सूर्यवारः पालनीयो हरस्याराधनाय वै ॥३२॥
पितरौ सर्वदा सेव्यौ घातः कार्यो न सर्वदा ।
स्तैन्यं वर्ज्यं मृषा साक्ष्यं वर्ज्यं न्यायालयेऽपि च ॥३३॥
परेषां धनवस्त्रादि कामनीयानि नैव तु ।
परसत्त्वं न हन्तव्यं पारक्यं ग्राह्यमेव न ॥३४॥
विश्वासघातनं नैव कर्तव्यं कस्यचित् क्वचित् ।
प्रजायां धर्मघातश्च कर्तव्यो नैव सर्वथा ॥३५॥
एवं धर्मान् पालयित्वा राजा नाकं समाप्नुयात् ।
सत्यवाक्यं क्रोधशून्यं क्षमापनं विभाजनम् ॥३६॥
स्वदारेस्वेव रमणं शौचं द्रोहविवर्जनम् ।
आर्जवं भृत्यभरणं कार्यं सर्वजनैः सदा ॥३७॥
दमं पुरातनं धर्मं जगृहुर्विप्रजातयः ।
स्वाध्यायं योगकरणं तपः सन्तानपालनम् ॥३८॥
मैत्र्यं हितकरं वाक्यं धर्तव्यं रक्षणं सदा ।
एवं वै वर्तयन् विप्रः स्वर्गं नित्यमवाप्नुयात् ॥३९॥
क्षत्रियस्तु समदद्यात् चाधीयीत यजेत च ।
प्रजाः प्रपालयेत् पराक्रमेदन्यायवर्तिनि ॥४०॥
क्षत्रकृत्यं दस्युजातेर्वारणं मुख्यमस्ति यत् ।
दानं चाध्ययनं यज्ञश्चेति राज्ञां सुखावहाः ॥४१॥
तैश्च तिष्ठन्निजे धर्मे राजा सर्वान् हि वर्तयेत् ।
एवं धर्मे स्थितो राजा राजन्येन्द्रः समुच्यते ॥४२॥
अथेतरः कृषिकर्मा व्यापारवान् च वा जनाः ।
दानमध्ययनं यज्ञं प्रकारयेद् धनार्जनम् ॥४३॥
पशून् वै पालयेत् सर्वान् पुत्रवात्सल्यभावतः ।
पशूनां रक्षया वैश्यः परमं सुखमाप्नुयात् ॥४४॥
प्रजापतिः पुरा सृष्ट्वा पशून् वैश्याय सन्ददौ ।
राज्ञे ददौ प्रजाः सर्वा विप्रेभ्यः शारदां ददौ ॥४५॥
सप्तमं भागमादाय जीवनं सर्वथा चरेत् ।
क्षत्रियश्चेत्तदा मह्यं समर्प्य मोक्षमाप्नुयात् ॥४६॥
सेवां च भृत्यतां दास्यं परिचर्यां च दूतताम् ।
कुर्वाणा दासवर्गास्तु महत्सुखमवाप्नुयुः ॥४७॥
शुश्रूषा कल्पवल्लयस्ति शुश्रूषा कल्पपादपः ।
शुश्रूषा कामधेनुश्च चिन्तामणिश्च सा मता ॥४८॥

सेवया वशमायाति सिंहो राजा गुरुर्ग्रहाः ।
दास्येन वशतां यान्ति स्वामीपतिः सती प्रजाः ॥४९॥
शुश्रूषया वशं यान्ति शत्रुर्द्वेष्टा तमः खलाः ।
परिचर्यापरो लोको रञ्जयति नियामकान् ॥५०॥
रञ्जनाद् राजराज्यादि रञ्जकस्य न वै पृथक् ।
तस्मात् सर्वं प्रपद्येत सेवया रत्नसंभृतम् ॥५१॥
छत्रं वेष्टनमाभूषा चोपानद् व्यजनादिकम् ।
अम्बराणि सुभोज्यानि दीयन्ते परिचारिणे ॥५२॥
अनपत्यो हि भर्तव्यो भर्तव्यौ वृद्धदुर्बलौ ।
दासो दासी भृत्यवर्गो भर्तव्या धर्मतस्तु ते ॥५३॥
यज्ञः पूजा ब्राह्मणानां यज्ञो धनेन भूभृताम् ।
वैश्यानां भरणं यज्ञः श्रद्धा यज्ञस्तु सेविनाम् ॥५४॥
अग्रे सर्वेषु यज्ञेषु श्रद्धा यज्ञोऽतिदुष्करः ।
दैवतं परमं श्रद्धा यया तुष्यामि माधवः ॥५५॥
श्रद्धामयाः कर्मकाराः सर्वफलैः समृद्धिनः ।
तस्मात् सर्वेषु लोकेषु श्रद्धायज्ञो विधीयते ॥५६॥
दैवतं परमं यत्र श्रद्धाख्यं तत्र देवता ।
कार्यसिद्धिश्चेशसिद्धिर्मयि न्यस्य समर्ज्यते ॥५७॥
स्तेनो वा यदि वा पापो यदि वः पापकृत्तमः ।
यष्टुमिच्छति यज्ञं यः साधुरेव यतो हि सः ॥५८॥
यष्टव्यं सर्वदा तस्माद् देवे वा चेतनेऽपि वा ।
दरिद्रेऽनाथवर्गे वा पाल्ये वा श्रद्धयोद्धृते ॥५९॥
सर्वथा सर्वदा सर्वैर्यष्टव्यमिति निश्चयः ।
नहि यज्ञसमं किञ्चित् फलदं सुखदं परम् ॥६०॥
ब्रह्मचर्यपरो वा स्याद् गृहधर्ममनाचरन् ।
ब्रह्मण्येव तु जुह्वानः परब्रह्माऽधिगच्छति ॥६१॥
यद्वा सदारकर्मापि मत्परायणधर्मवान् ।
ममाश्रये चरन् धर्मं बन्धनान्मुच्यतेऽपि सः ॥६२॥
कृतकृत्योऽथवा ज्ञानदृष्ट्या वने वसेदपि ।
मत्परः स सदा कर्मी व्रजत्यक्षरसाम्यताम् ॥६३॥
मम धर्मान् साधुभावानाश्रित्य द्वन्द्ववर्जितः ।
यतिश्चेत् प्राप्नुयान्मां स मद्भावायोपकल्प्यते ॥६४॥
भैक्षवृत्तिश्च यस्तिष्ठेन्निष्परिग्रह आत्मवान् ।
कर्मी वा कर्मशून्योऽपि मद्भावायोपकल्पते ॥६५॥
मितशायी मिताशी च निराशी चाप्यकेतनः ।
यथोपलब्धजीवी च मुनिर्मां समवाप्नुयात् ॥६६॥
निराशी ब्रह्मवत्प्रोक्तस्तृप्तः पूर्णसुखाश्रयः ।
निर्भोगो वृत्तिवर्ज्यश्च व्रजत्यक्षरसाम्यताम् ॥६७॥

गृहाश्रमी तरेन्मायां मायायां माययोषितः ।
अपि सर्वां मयि क्षिप्त्वा ततो बन्धाद् विमुच्यते ॥६८॥
स्वदारतुष्टः सन्तोषी शाठ्यजैह्म्यविवर्जितः ।
देवपूजापरः सत्यो दान्तो विभागकृत्तथा ॥६९॥
क्षमादयापरो दाता सर्वेभ्यश्च यथोचितम् ।
आर्जवं चातिथिपूजां भरणं श्रितदेहिनाम् ॥७०॥
यः कुर्याद् वर्तयेच्चापि वर्ततापि स मोक्षभाक् ।
स्वर्गे शुद्धं फलं प्राप्य मोदित्वा शाश्वतीसमाः ॥७१॥
देहान्ते चाक्षयान् कामाननन्तान् सर्वतः स्थितान् ।
अवाप्नुयान्न सन्देहो मय्यर्पणे तु मद्गतान् ॥७२॥
यो यथा कुरुते चात्र तादृशं स समाप्नुयात् ।
पारक्यं प्रथमं कृत्वोपकाररूपमुत्सवात् ॥७३॥
ततो दैह्यं चान्तरं च ततो नैजं समाचरेत् ।
पारमेशं ततः कुर्यात् सर्वदोषनिवारकम् ॥७४॥
य एवं वर्तते राजा लोके प्रजाजनोऽपि वा ।
सर्वतन्तुप्रोतमणिर्मेरुकृष्णं स विन्दति ॥७५॥
तस्मात् प्रजाभिः सततं परमेशे समर्प्य च ।
निर्द्वन्द्वाभिर्निष्कर्माभिर्भाव्यं ब्राह्म्यधिलब्धये ॥७६॥
मत्कर्माणं मद्विश्रान्तं मद्धोमं मत्परायणम् ।
तारयामि न सन्देहो मृत्युसागरपूरतः ॥७७॥
अर्चयित्वा सर्वपितॄन् देवानृषीन् समाश्रितान् ।
आन्तरस्थं हरिं चापि यायादन्ते हरेः पदम् ॥७८॥
अकुर्वन् वा विकुर्वन् वा कुर्वन् वा मत्कृताश्रयः ।
मद्योगात्पारमाप्नोति कर्माऽसंख्याऽधिवारिधेः ॥७९॥
मां यजन्तु सदा प्रातर्मां स्मरन्तु क्रियादिषु ।
मामन्ते हृदये कृत्वा प्रयान्तु मेऽक्षरं पदम् ॥८०॥
इत्युक्त्वा विररामैव राधिके भगवान् स्वयम् ।
मिलिन्दाराजधान्याश्च राजा प्रजास्तथेतरे ॥८१॥
धर्ममासाद्य विज्ञानैर्मिश्रितं बन्धनाशकम् ।
प्रसन्ना जगृहुः सर्वान् धर्मास्तदोपदेशितान् ॥८२॥
लोमशश्च ददौ तत्र ताभ्यो मन्त्रं हरेरपि ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८३॥
ततः प्रजाश्च राजा च पूजयामासुरीश्वरम् ।
स्वर्णरूप्यकमुद्राभिश्चोपदाभिस्तथाऽम्बरैः ॥८४॥
विभूषाभिश्चन्दनाद्यैरक्षतैः पुष्पहारकैः ।
विविधैर्दानयोग्यैश्च वस्तुभिः परमेश्वरम् ॥८५॥
हरिस्ताभ्यः प्रजाभ्यश्च राजभ्यश्च प्रसन्नहृत् ।
आशीर्वादान् ददौ यूयं भवत श्रेष्ठकीर्तयः ॥८६॥

श्रेष्ठराज्याः श्रेष्ठधर्माः श्रेष्ठन्यायपरायणाः ।
श्रेष्ठस्य मे महेशानस्यैव भक्तौ कृतादराः ॥८७॥
एवमुक्त्वा विशश्राम हरिर्निजनिवासने ।
जना नैजान् निवासाँश्च ययुः कृतात्मवेदिनः ॥८८॥
अंगराजो भोजनानि ददौ श्रीपरमात्मने ।
सर्वानभोजयच्चापि महीमानान् हरेःश्रितान् ॥८९॥
ईशानं पूजयामास लोमशं च पुपूज ह ।
हरेः कुटुम्बकं प्राच्य राजा जग्राह भोजनम् ॥९०॥
राज्ञी रंगरजानाम्नी चांगराजस्य पत्निका ।
गौरी प्रसन्नहृदयैकादशपुत्रिकायुता ॥९१॥
पौष्पकानकहाराँश्च चन्दनाक्षतगन्धिनः ।
आदायाऽर्चयितुं चायाद् बालकृष्णस्य सन्निधौ ॥९२॥
पुपूज प्रीत्या चरणौ पयसाऽक्षालयद्धरेः ।
पपौ पपुश्च गौर्यस्ताः कन्यास्त्वेकादशापि वै ॥९३॥
अनादिश्रीबालकृष्णं विलोक्य कान्तमीश्वरम् ।
करे जगृहुरत्यर्थं विवाहविधिना तु ताः ॥९४॥
कण्ठे हारान् ददुस्ताश्च हरिस्ताभ्योऽपि सन्ददौ ।
उत्सवः स महान् जातः कृतकृत्योऽभवन्नृपः ॥९५॥
अथ निद्रां जगृहुश्च विशश्रमुः सुखं निशाम् ।
गतां विलोक्य भगवान् श्रुत्वा मंगलनिःस्वनान् ॥९६॥
कृताह्निको हरिस्तूर्णं स्वस्थोऽभवद् यदा द्रुतम् ।
तावद् राजा सती राज्ञीश्चाजह्रतुः पयः शुभम् ॥९७॥
फलात्मभोजनार्थं च जग्राह भगवाँश्च तत् ।
ब्रह्मप्रियाः कुटुम्बं चर्षयो जगृहुरुत्सुकाः ॥९८॥
फलानि जगृहुश्चापि ताम्बूलानि ततः परम् ।
विदायं जगृहुश्चापि सन्मानं प्राप्य तत्क्षणम् ॥९९॥
हरिश्चान्ये नृपं पृष्ट्वाऽऽरुरुहुः सज्जिता द्रुतम् ।
विमानानि तूर्यनादान् शृण्वन्तो व्योममार्गतः ॥१००॥
आकारणादिवचसो विचेरुश्चाग्रतस्तदा ।
इत्येवं राधिके कृष्णनारायणो ययौ पुरः ॥१०१॥
बललीननृपराष्ट्रं जरामौनर्षिभूतलम् ।
अम्बराद् भूतलं कृष्णो ददर्श बहुशोभनम् ॥१०२॥
राजा पुरो ययौ भूमौ बललीनो महर्षिणा ।
जरामौनेन सार्कं वै स्वागतार्थं हरेस्तदा ॥१०३॥
राधिके श्रावणे कृष्णैकादश्यां प्रहरद्वये ।
तदा वाद्यान्यवाद्यन्त जयध्वानास्तदाऽभवन् ॥१०४॥
यन्त्रशब्दा नाममाला भजनान्यभवन् भुवि ।
राजदर्शितमार्गेण विमानानि क्रमात्तदा ॥१०५॥
अवतेरुर्महोद्याने वालीनायास्तु सन्निधौ ।
विशालया राजधान्या लक्षाधिजनसंकुले ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेर्लीनोर्णराष्ट्रागमनं वारुण्यां नगर्यां भ्रमणं पूजनं भोजनं विदायं, ततो बृहच्छरनृपराष्ट्रागमनं धीवरायां नगर्यां भ्रमणं, ततोऽङ्गराजस्य मिलिन्दानगरीं प्रति गमनं भ्रामणमुपदेशनं भोजनं रात्रौ विश्रान्तिर्भाद्र-कृष्णैकादश्यां प्रहरद्वये बललीननृपराष्ट्र-गमनमित्यादिनिरूपणनामा द्वानवत्यधिक-शततमोऽध्यायः ॥ १९२ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे ततो राजाऽवतरन्तं विमानतः ।
भगवन्तं बालकृष्णं पुष्पहारं गले ददौ ॥ १ ॥
रत्नहारं ददौ कण्ठे करे गुच्छं तु पुष्पजम् ।
राज्ञी साक्षतचन्द्रं च कौंकुमं प्रचकार ह ॥ २ ॥
कुमारिकाः कृष्णपादौ प्रक्षाल्याऽमृतमापपुः ।
राज्ञः कुटुम्बं चामात्याः प्रधानाद्याः प्रजास्तथा ॥ ३ ॥
श्रीहरेः स्वागतं चक्रुः पूजाभिस्तत्र सादरम् ।
जलपानं च हरये राजा ददौ सुगन्धिमत् ॥ ४ ॥
अन्यानपि जनान् सर्वान् जलपानमकारयत् ।
हरिं राजा गजयाने सौवर्णे सन्न्यषादयत् ॥ ५ ॥
कुटुम्बं गजयानेषु महर्षीन् वृषवाजिभिः ।
वाहितेषु रम्यपट्टीगन्त्रीषु स न्यषादयत् ॥ ६ ॥
ब्रह्मप्रियास्तु दिव्यासु पट्टगन्त्रीषु भूपतिः ।
न्यषादयत्ततो राजा हस्तियाने त्वरूरुहत् ॥ ७ ॥
वालीनायां नगर्यां ससैन्यो राजा हरिं प्रभुम् ।
अभ्रामयद् राजमार्गेणान्यरथ्यादिचत्वरे ॥ ८ ॥
अग्रे डंककनादो वै याति चोष्ट्रस्य पृष्ठके ।
ततो वाजिवरो याति सध्वजो वाहकान्वितः ॥ ९ ॥
ततो हस्ती महान् याति दुन्दुभिध्वानबोधनः ।
शृंगारितास्तु ते वाहाः शोभन्ते देवता यथा ॥१०॥
ततो याति रथो दिव्यः पुत्तलीचक्रशोभितः ।
पुष्पहारादिदानार्थं प्रजायै कृष्णपूजने ॥११॥
ततः स्वर्णमयी गन्त्री विशाला यन्त्रवाहिता ।
यत्र झांझपखाजादिमण्डली कीर्तनार्थिनी ॥१२॥
यत्र ध्वानकराश्चाश्ववाराः सकुन्तसद्ध्वजाः ।
ततो याति महान् हस्ती यत्र राजकुमारकाः ॥१३॥

ततो यान्ति चोष्ट्रगन्त्र्यो यत्र प्रधानजाः प्रजाः ।
ततो यान्ति सिंहवेषा वादित्रनादिनो जनाः ॥१४॥
ततो व्याघ्रप्रवेशाश्च विगुलादिनिनादिनः ।
अथ सप्तगजा यान्ति ब्रह्मर्षिवाहनास्तदा ॥१५॥
ततोऽश्ववारयुगलाः स्वर्णवेषाश्च शस्त्रिणः ।
वाद्ययुक्तगणा यान्ति दुन्दुभ्यानकधारिणः ॥१६॥
पटहश्चास्ततो यान्ति पट्टघाश्च ततः परम् ।
ततो गणा यथा शंभोः शतशो भृत्यपार्षदाः ॥१७॥
ततो भृत्या राजगन्त्रीवर्यासु वै सहस्रशः ।
ततो वाद्यानि चान्यानि मिष्टमधुरसद्रवैः ॥१८॥
बोधयन्ति जनान् पश्चाद् यान्ति ब्रह्मप्रिया इमाः ।
ततो गन्त्रीषु सर्वासु गौर्यः शृंगारिता ययुः ॥१९॥
ततः कुटुम्बं कृष्णस्य गजेषु याति शोभितम् ।
तत ईशानदेवश्च गजपृष्ठे विराजते ॥२०॥
ततो राज्ञी राजमाता स्वर्णगन्त्र्यां विराजते ।
ततः कुमारकाः सर्वे कुमारिकास्ततः परम् ॥२१॥
गजयन्त्रीषु राजन्ते ततो राजा सुशोभितः ।
बललीनो महाराजः श्रीकृष्णेन तु सत्कृतः ॥२२॥
हस्तियाने बालकृष्णसन्निधौ राजते पुरः ।
धृतछत्रः पार्श्वभागे चामरश्रौ प्रतिष्ठतः ॥२३॥
पृष्ठे महाश्ववाराश्च गजवाराः प्रयान्ति च ।
ततो गौर्यः स्वर्णवेषाः प्रयान्ति मंगलस्वराः ॥२४॥
मस्तके कृतकलशाः फलपत्रजलान्विताः ।
यान्ति गीतिपराः सर्वा रक्षकाश्च ततः परम् ॥२५॥
यन्त्रध्वानकराश्चापि चान्ते प्रयान्ति वै तदा ।
गौर्यः प्रजाप्रियाश्चापि प्रयान्ति संघशस्तदा ॥२६॥
राजमार्गाः संकुलितास्तदाऽऽसन् मानवैरति ।
चत्वराश्चन्द्रशालाश्चालयाः सौधाः प्रतर्दिकाः ॥२७॥
वितर्द्यः संगमा रथ्यायोगाः पार्श्वपदस्तृतिः ।
वल्लभ्यश्चांगणान्यगाराणि गोपुरभूमिकाः ॥२८॥
वृक्षशाखा दुर्गभागा भित्तिका गृहवेषकाः ।
कोणाः कफोणाश्चोत्ताना मध्यभारा नलाजलाः ॥२९॥
उच्छ्रया जीर्णभागाश्च गण्डोर्ध्वा गृहभूमयः ।
उद्याना मार्गभागाश्च पार्श्वप्राकारवृत्तिकाः ॥३०॥
सर्वे संकुलितं चासीन्मानवैर्दर्शनार्थिभिः ।
नगरी कोटिमानुष्यैर्मर्दिता दर्शनार्थकैः ॥३१॥
स्वर्गस्येन्द्रावतीनाम्नी यथाऽशोभत सा पुरी ।
चत्वराः पुष्पस्तबकैः कृत्रिमोद्यानकीकृताः ॥३२॥
रथ्याद्वाराणि च शृंगारितानि गोपुरादिभिः ।
हट्टांगणानि सर्वाणि शोभितानि च तोरणैः ॥३३॥
मार्गपार्श्वप्रभागाश्च शोभिताः कदलीवनैः ।
अगाराणि रङ्गवल्लीस्वस्तिकाद्यैः कृतानि च ॥३४॥
मार्गोपर्यन्तरीक्षं शोभितं पताकिकाध्वजैः ।
वावटाभिस्तोरणैश्च संशोभिताः सुभूमिकाः ॥३५॥
कलशैः श्रीफलैश्चापि द्वारशाखाः सुशोभिताः ।
कन्याभिर्गौरवर्णाभिः शोभिता वल्लभीभुवः ॥३६॥
शोभितानि गवाक्षाणि मृगाक्षीणां मुखाब्जकैः ।
सौधा धवलवर्णाश्च वावटाभिः सुशोभिताः ॥३७॥
शिखराणि घूम्मटानि स्तूपानि वेधकानि च ।
घटीशृंगाणि सर्वाणि शोभितानि शुभध्वजैः ॥३८॥
जयशब्दैर्वाद्यशब्दैर्यन्त्रीध्वानैः सुगीतिभिः ।
गर्जिता दशदिक्ष्वेषा पुरी वाल्गनिकाऽभवत् ॥३९॥
गोपुरे रक्षिभिः कृष्णः पूजितश्च प्रधानकैः ।
अग्रे सैन्यैः पूजितश्च राजकीयैर्जनैस्ततः ॥४०॥
श्रेष्ठिभिः सत्कुलैश्चाप्यापणिभिः स्थानिभिस्तथा ।
पूजितः सर्ववर्गैश्च योषिद्भिश्च नरैस्तथा ॥४१॥
उपदाभिः फलाद्यैश्च कणाद्यैर्भूषणादिभिः ।
अम्बरैः कम्बलाद्यैश्च हारैः स्रग्भिः सुवर्णजैः ॥४२॥
अक्षतैः कुंकुमैश्चापि रत्नहीरकहारकैः ।
पुष्पैश्च वर्धितः कृष्णनारायणोऽतिभावतः ॥४३॥
एवं भ्रमित्वा नगरीं राजसौधं समाययौ ।
राजा संपूजयामास कोटिरत्नार्पणैर्हरिम् ॥४४॥
रात्रौ पूजां व्रतस्यैवैकादश्यां प्रचकार ह ।
जागरणं सभायां च धर्मादेशयुतं हरिः ॥४५॥
प्रचकारोत्सवयुक्तं कृष्णकीर्तनसंयुतम् ।
राधिके च महीमानाश्चक्रुर्विश्रान्तिमादरात् ॥४६॥
हरिश्चोपादिदेशैव सर्वान् जागरणस्थितान् ।
जाग्रत्येव नरे व्रतस्थिते निद्रोत्थदूषणम् ॥४७॥
व्रतघ्नं नोपसंयाति चैतज्जागरणे फलम् ।
व्रतं पूर्णं भवेच्चापि तमोभावो निरुद्ध्यते ॥४८॥
प्रसह्यापि भवेद् भक्तिर्हरौ सन्तोषकारिणी ।
श्रीहरौ तोषिते सर्वं सफलं मानवं जनु ॥४९॥
तदर्थं वै व्रतं लोके कर्तव्यं सावधानिना ।
उदये या तिथिस्त्वास्ते सैकादशी व्रतर्थिनी ॥५०॥
सूर्यस्योदयनं मत्वा कार्या त्वेकादशी सदा ।
मम जन्माष्टमी प्रातर्जन्मन्यष्टमिकोदये ॥५१॥

ऊर्जे कृष्णे सदा ग्राह्या शरत्पूर्णोत्तराऽऽगता ।
एवं चान्याश्च तिथयो ग्राह्या सूर्योदये स्थिताः ॥५२॥
नक्षत्रं वासरं वाप्यालम्ब्य सेत्स्यन्ति मानवाः ।
तत्र मुख्यं मतं मे वै तिथिर्मे ह्युदये मतम् ॥५३॥
व्रतं तत्रैव कर्तव्यं यद्व्रते यत्र या तिथिः ।
तिथेः क्वापि क्षयो नास्ति क्षीणा चन्द्रोदये मता ॥५४॥
चन्द्रोदये च वा सूर्योदयेऽस्तित्वं तिथेर्ध्रुवम् ।
रात्रावुत्सवकार्ये तु तिथिश्चन्द्रोदया मता ॥५५॥
दिने तूत्सवकार्ये तु सूर्योदया मता तिथिः ।
एवं व्रतानि कार्याणि मद्बलात्तानि सर्वथा ॥५६॥
पुण्यदानि पूर्णकानि भवन्ति नात्र संशयः ।
मोहिनी ब्रह्मजा वेधा मत्सम्बन्धे न हानिदा ॥५७॥
इति ममाज्ञां ज्ञात्वैव व्रतानि चोत्तमानि वै ।
कर्तव्यानि सदा भक्तैर्मदाज्ञा फलदायिनी ॥५८॥
यत्काले यस्य देवादेरुत्सवो जन्म वा लयः ।
तत्क्षणे या तिथिश्चास्ते सा व्रते शोभना सदा ॥५९॥
सूर्योदयस्तथा चन्द्रोदयो वा तारकोदयः ।
गौणस्तत्रैव मन्तव्यः क्षणं मुख्यं दिवानिशम् ॥६०॥
एतद् विहाय मनुजाः करिष्यन्ति व्रतानि चेत् ।
भिन्नमतानि तत्रैव भविष्यन्ति न संशयः ॥६१॥
व्रतच्छेदकराण्येव भविष्यन्ति तु तानि वै ।
तस्मात् क्षणः सदा ग्राह्यो व्रते सर्वविधोत्सवे ॥६२॥
तेन धर्मो वर्धते वै नान्यथा तु कदाचन ।
श्रद्धया वर्धते पुण्यं कालयुक्तं विशेषतः ॥६३॥
पात्रयुक्तं ततोऽप्यति वर्धते पात्रसद्बलात् ।
पात्रं चाहं परब्रह्म सेवनीयो व्रतं महत् ॥६४॥
मातापित्रोर्गुरोश्चापि शुश्रूषा व्रतमुत्तमम् ।
आचार्यसाधुशुश्रूषा व्रतं पुण्यप्रदं महत् ॥६५॥
जनसेवाः प्रपाः कूपाः शयनानि शुभानि च ।
दानानि कारयेद् भक्त्या व्रतं पुण्यप्रदं हि तत् ॥६६॥
अहिंसा सत्यमक्रोधो वृत्तिदानं प्रपालनम् ।
वृद्धानां सेवनं पुत्रदाराणां भरणं व्रतम् ॥६७॥
दक्षिणा यज्ञकार्येषु दातव्या भूतिमिच्छता ।
पाकयज्ञाः प्रकर्तव्याः कणयज्ञाश्च भूतिदाः ॥६८॥
अर्हान् पूजयतो नित्यं संविभागेन सर्वथा ।
व्रतं तस्य भवेत्तद्वै स्वर्गदं नात्र संशयः ॥६९॥
ज्ञातिसम्बन्धिमित्राणामापदुद्धर्तुरत्र तु ।
पुण्यं स्वर्गप्रदं स्याद्वै व्रतमेतत्परं सदा ॥७०॥
सर्वसत्कारकर्तुस्तु स्वर्गो ध्रुवं न संशयः ।
पितृयज्ञं भूतयज्ञं चातिथेः पूजनादिकम् ॥७१॥
देवयज्ञं कुर्वतस्तु स्वर्गो ध्रुवं न संशयः ।
दीक्षाया ग्रहणं चापि शिष्टानां पूजनं सदा ॥७२॥
देवानां स्मरणं चापि शरणागतरक्षणम् ।
अकौटिल्येन वृत्तिश्च व्रतं ब्रह्म दिवः प्रदम् ॥७३॥
सर्वभूतेषु दयया प्रवृत्तस्य तु देहिनः ।
परित्राणपरस्याऽत्र व्रतं स्वर्गप्रदं भवेत् ॥७४॥
आगतानां स्वागतादिकर्तुर्योग्यक्रियावताम् ।
पूजयितुर्विनम्रस्य व्रतं स्वर्गप्रदं भवेत् ॥७५॥
कुटुम्बस्य वशे स्थातुः साधूनां वचनेऽपि च ।
शास्त्राणां वचने स्थातुर्व्रतं मोक्षप्रदं भवेत् ॥७६॥
आश्रमे यत्र कुत्रापि तद्वृषेऽवस्थितस्य तु ।
व्रतं धर्ममयं स्वर्ग्यं भवत्येव न संशयः ॥७७॥
स्थानमानं कुलमानं वयोमानं गुणार्हणम् ।
कुर्वन् वर्तेत लोके यस्तस्य नाकं सुनिश्चितम् ॥७८॥
देशधर्मान् ज्ञातिधर्मान् प्रजाधर्मान् विलोक्य च ।
तत्तथा वर्तते यश्च व्रतं तस्येदमुत्तमम् ॥७९॥
गृहस्थोऽपि न वै लुब्धः स्पृद्धौ च विषये धने ।
देहे वा दैहिके वाऽपि व्रतं साधुसमं भवेत् ॥८०॥
धर्मारामा धर्मपरा धर्मसाहाय्यदा जनाः ।
धर्मावासा भवन्त्येव गार्हस्थ्येऽपि हि साधवः ॥८१॥
आत्मोपमश्च यो लोके भूतेषु वर्तते सदा ।
परदुःखहरो देही प्रत्येह लभते सुखम् ॥८२॥
धर्मोदया धर्मवीर्या धर्मपालाध्वरक्षकाः ।
त्यागधर्माश्रिताः शीघ्रं तरन्त्येव भवाम्बुधिम् ॥८३॥
यदा दुस्थोऽस्य संकल्पो निवृत्तो मूलतो भवेत् ।
देही सत्त्वगतिं प्राप्तस्ततो ब्रह्म समश्नुते ॥८४॥
तस्मात् सर्वेऽपि संकल्पा न्यसनीया मयि प्रभौ ।
आत्मा निवेदनीयश्च दास्ये मोक्षं तु धाम मे ॥८५॥
इत्युक्त्वा विररामाऽसौ बालकृष्णः परेश्वरः ।
राजा पुपूज देवं च लक्ष्मीनारायणं तथा ॥८६॥
सतीशानं महेशं संपुपूज परमादरात् ।
प्रातः स्नानादिकं कृत्वा पूजनादि विधाय च ॥८७॥
राजा प्रकारयामास मिष्टान्नाद्यैश्च पारणाम् ।
श्रीहरिः पारणां कृत्वा विश्रान्तिं चाप यावता ॥८८॥
तावद् राज्ञी श्रीरतीशा पूजोपकरणान्विता ।
चत्वारिंशत्कन्यकाभिर्गौरीभिः सह चाययौ ॥८९॥

पुपूज परमात्मानं पादामृतं पपौ ततः ।
चत्वारिंशत्कन्यकाश्च हरेः पाणिं प्रजगृहुः ॥९०॥
तदा वाद्यान्यवाद्यन्त राजाज्ञया च गीतयः ।
अगायन्त च गौरीभिरुत्सवो नृत्यसंयुतः ॥९१॥
अजायत नृपश्च स्वं कृतकृत्यममन्यत ।
उपदा यौतकं चापि राजा ददौ तु शार्ङ्गिणे ॥९२॥
रत्नहारान् स्वर्णभूषाः कम्बलाम्बरभूतिकाः ।
हरिः प्राप्य च तत्सर्वं नृपाज्ञया द्रुतं तदा ॥९३॥
गन्तुं सज्जोऽभवच्छीघ्रं राजाऽभोजयदच्युतम् ।
महीमानान् समग्राँश्चाऽभोजयत्पायसादिकम् ॥९४॥
सैन्यं ततोऽभवत्सज्जं प्रस्थाने मानदं तदा ।
अवादयच्च तूर्याणि चक्रे जयनिनादनम् ॥९५॥
विमानानि तदा सर्वाण्येवाऽभवन् विहायसि ।
आरुरोह महाराजः पूजितः प्रजयाऽभितः ॥९६॥
आरुरुहुस्तथा सर्वे पालनादर्षिबोधिताः ।
वरसिंहनृपेणापि निमन्त्रिताश्च ते तदा ॥९७॥
गतिमन्तोऽभवन् व्योम्नि शृण्वन्तो वै जयध्वनीन् ।
हरेर्विमानमगमद् वरसिंहस्य राष्ट्रकम् ॥९८॥
राजा पूर्वं वरसिंहोऽवाततारर्षिसंयुतः ।
स्वागतार्थं हरेः सैन्यं सज्जं चास्थापयत्पुरः ॥९९॥
विष्णुतुल्यानदीतीरे वाशीलानगरीतटे ।
हरेर्विमानमालोक्य सैन्यं स्वागतमाचरत् ॥१००॥
विचित्रवाद्यध्वनिभिर्यन्त्रगर्जनया तथा ।
गीतिकाभिश्च गौरीणां व्योम नादमयं ह्यभूत् ॥१०१॥
राजदर्शितमार्गेण विमानं भुवमागतम् ।
हरेश्चान्यानि च विमानानि चाप्यागतानि वै ॥१०२॥
विमानोपरि पुष्पाणां वृष्टिः प्रजाकृताऽभवत् ।
राधिके जनता चाभूद् विह्वला दर्शनाय च ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वालीनानगर्यां श्रीहरेर्भ्रमणं पूजनं जागरणं व्रतोपदेशनं द्वादश्यां पारणं ततो वाशीलानगरीं प्रति गमनमित्यादिनिरूपणनामा त्रिनवत्यधिकशततमोऽध्यायः ॥ १९३ ॥

**श्रीकृष्ण उवाच—**

राधिके विष्णुतुल्यायास्तटे विशालवर्तुले ।
उद्याने श्रीबालकृष्णो विमानाद् बहिराययौ ॥ १ ॥
राजा पुष्पस्रजः कण्ठे ददौ नारायणस्य ह ।
ऋषिर्हारान् ददौ राज्ञी प्रधानाद्या ददुः स्रजः ॥ २ ॥
सुपुष्पैः प्रजया कृष्णो वर्धितस्त्वक्षतादिभिः ।
गुच्छे करे न्यधाद् राजा श्रीकृष्णवल्लभप्रभोः ॥ ३ ॥
गन्धसारादिकं गन्धिजलं वेषेऽप्यदात्तदा ।
पादौ प्रक्षाल्य राजाद्या अमृतं च पपुस्ततः ॥ ४ ॥
वरसिंहो नृपः कृष्णं यन्त्रगन्त्र्यां न्यषादयत् ।
कुटुम्बं दीर्घगन्त्र्यां च महर्षीन् वातगासु च ॥ ५ ॥
ब्रह्मप्रिया गजयानेष्वेव राजा न्यषादयत् ।
महीमानयुतं शंभुं शारमेयरथे शुभे ॥ ६ ॥
न्यषादयत्ततो वाद्यैः सैन्यसत्कारबोधनैः ।
वाशीलायां नगर्यां वै हरिं चाऽभ्रामयन्नृपः ॥ ७ ॥
गोपुरेऽपूजयत् कृष्णं ततो राजकुटुम्बकम् ।
प्रधानाश्चत्वरे कृष्णं पुपूजुश्च कुटुम्बिनः ॥ ८ ॥
श्रेष्ठिनस्त्वापणाग्रेषु स्थानिनो मार्गसंगमे ।
प्रजाः सर्वा महामार्गे पुपूजुः कृष्णवल्लभम् ॥ ९ ॥
तदानीं योषितो गौर्यः समारूक्षन् निजालयान् ।
हरिं विलोकयन्त्यश्चाऽवाकिरन् पुष्पकैर्हरिम् ॥१०॥
प्रोचुः परस्परं गौर्यो हृष्टाः शान्तिं गतास्तदा ।
नेत्रायतफलं प्राप्य तद्वीक्षाकृष्टमानसाः ॥११॥

करुणातिनोदितसुदत्तदर्शनं
ललना शरीरिभिरगम्यदर्शनम् ।
प्रसमीक्ष्यसुन्दरतरं हरिं त्वमुं
सफलं स्वकं कुरुत जन्म मा चिरम् ॥१२॥
विषयातिलुब्धमवशं प्रवासनं
नहि मानसं समुपगच्छति स्थितिम् ।
इति चाति लुब्धमवशं प्रदर्शना-
त्तनु योषितो भवति माधवः स्वयम् ॥१३॥
प्रणमत्सुराधिपतिभूपतीशधृक्-
मुकुटाग्रकल्गिकृतयोगितासनम् ।
चरणारविन्दयुगलं सतीनुतं
कमलाधृतं कुरुत मानसे त्विदम् ॥१४॥
परधाम्नि यश्च शुभदिव्यविग्रहः
परिवर्णितोऽस्ति निगमैर्गुणाश्रयः ।
विभवर्द्धिरूपगुणकैः प्रपूरितः
प्रभयावृतं कुरुत मानसे त्विमम् ॥१५॥

बहुकान्तिसंभृतमिमं हि सुन्दरं
बहुपुष्टविग्रहमिमं ग्रहाश्रयम् ।
अबलाः पुनर्न तु गतं त्ववाप्स्यथ
तदयं सदा स्वहृदये निगृह्यताम् ॥१६॥

वदनाम्बुजं विविधतापनाशनं
मितमन्दमिष्टहसनातिलोभनम् ।
भुवि मुक्तिदं च परलोकमुक्तिदं
न्विषपूर्णचन्द्रसुखदं निपीयताम् ॥१७॥

पुरुषोत्तमोऽयमतिकर्षति द्रुतं
हृदयं तथेन्द्रियगणं च चेतनम् ।
तमवेत्य कान्तमिह शाश्वतं प्रभुं
हृदये मिलन्तु मिलितः प्रभुज्यताम् ॥१८॥

हृदयस्थितो बहिरुपागतो ह्ययं
कुसुमैश्च मानसभरैः प्रपूज्यताम् ।
रतिरत्नहीरकसमर्पणैरयं
परिरभ्य आलि ! मिलितः प्रसेव्यताम् ॥१९॥

इत्थं गीतयशाः कृष्णो भ्रमित्वा नगरीं ततः ।
राजहर्म्ये समायातो वन्दितो नागरैर्जनैः ॥२०॥
राजा तूर्णं हरेः पादौ पूजयामास चन्दनैः ।
अक्षतैः कुसुमैश्चापि हरिः सिंहासनेऽभवत् ॥२१॥
निषीदन्तं पुष्पहारैः कुसुमैस्तं ववर्ष ह ।
लोकः प्रेमभरैर्हृद्भिः स्थिरनेत्रो ददर्श च ॥२२॥
सभाऽतिमहती तत्र कृता श्रीपरमात्मना ।
उपादिदेश च तदा जनताहितहेतवे ॥२३॥
भगवान् परमेशो यो राजते परमेऽक्षरे ।
कृपया स समायाति निजप्रजावनाय वै ॥२४॥
प्रजाः पुत्र्यो भगवतः पालनीयाश्च मातृवत् ।
पोषणीयाः सुखनीया नेतव्याश्चाक्षरं पदम् ॥२५॥
सर्वावतारधर्ताऽहं श्रीस्वामिकृष्णवल्लभः ।
मायां प्रगृह्य लोकेऽत्र वर्ते भवत्प्रगोचरः ॥२६॥
कांभरेयो राधिकेशो लक्ष्मीपद्मावतीपतिः ।
माणिकीशः रमानाथः स्वयं गोपालनन्दनः ॥२७॥
ब्रह्मप्रियाणां कान्तश्च सर्वसृष्टिपतिः प्रभुः ।
सद्गुणामंजुलाहंसाललिताविजयापतिः ॥२८॥
यत्र वासोऽत्र लोकेऽपि मे तद् धाममयं भवेत् ।
नारायणनिवासेन भूमिर्वैकुण्ठसदृशी ॥२९॥
जातेयं भगवान् हेतुर्दिव्यत्वे दिव्यभाविनि ।
तथा भक्तोऽपि मे हेतुः सद्देशादिसमर्जने ॥३०॥
राजा भक्तो भवेच्चेद्वै तत्र कृतयुगो भवेत् ।
नीतिधर्मयुतो राजा कृतं प्रवर्तयेत् खलु ॥३१॥
तत्र वै सर्ववर्णानां नाऽधर्मे जायते मतिः ।
क्षेमं प्रजानां सुभगं सर्वदा हि प्रवर्तते ॥३२॥
सत्कर्माणि समस्तानि क्रियन्ते तु द्विजातिभिः ।
सुसुखाः ऋतवः सर्वे भवन्त्यपि निरामयाः ॥३३॥
प्रसीदन्ति मानवाश्च हृदा च मनसा गिरा ।
न जायन्ते व्याधयश्च नाल्पायुर्जायते जनः ॥३४॥
कृपणा न जनास्तत्राऽपतिका न च योषितः ।
पृथ्वी चापि विना कृष्टिं जनयत्येव सस्यकम् ॥३५॥
ओषधयः फलन्त्येव क्ष्मारसेन सुखप्रदाः ।
त्वक्पत्रफलमूलानि वीर्यवन्ति भवन्त्यपि ॥३६॥
धर्म एव सुखं चैव तृप्तिश्चैव गृहे गृहे ।
जने जने च विश्वासः सुखं नोद्वेजनं क्वचित् ॥३७॥
एवं राजा धर्मयुक्तः सत्यकालस्य कारणम् ।
यदांऽशं त्यजते राजा धर्मस्यैव तदा भवेत् ॥३८॥
त्रेतानामयुगश्चात्र मानवेषु स्थले स्थले ।
अशुभांशश्चतुर्थांशस्तावन्मानं च कष्टकृत् ॥३९॥
कृष्टपच्या भूर्भवेच्च त्रिभागफलदा तदा ।
सर्वं त्रिभागफलदं फल्गु भागे चतुर्थके ॥४०॥
सुखे तत्साधने चापि लब्धव्ये विषयेऽपि च ।
सर्वं पूर्णं न फलति त्रेताहेतुर्नृपो यदा ॥४१॥
अर्धं राजा यदा धर्मं नीतिं त्यजति वै तदा ।
द्वापरं नृपतौ प्राप्तं प्रजास्वेवं प्रवर्तते ॥४२॥
मेघेऽरण्ये ऋतौ वृक्षे रसे गोषु प्रवर्तते ।
अशुभांशौ भवेतां द्वौ शुभांशौ द्वौ मतौ तदा ॥४३॥
सर्वं चार्धं फलत्येव बाह्यं वाऽन्तरमित्यपि ।
स्वकीयं वा च पारक्यं दैवं वाऽदैवमित्यपि ॥४४॥
स्वार्थे वाऽथ परार्थे वा चार्धं फलति सर्वथा ।
अर्धा पृथिवी फलति सस्येष्वर्धकणर्द्धिता ॥४५॥
यदा राजा त्यजत्येव त्र्यंशं धर्मं तदा भुवि ।
ऋतौ रसे जने वृक्षे कार्ये फले च पादता ॥४६॥
त्र्यंशे निष्फलता बोध्या चांऽशेऽपि निश्चयो नहि ।
एवं वै वर्तते राजा तदा तिष्यः प्रवर्तते ॥४७॥
प्रजा क्लिश्नात्ययोगेन तदाऽधर्मपरा जनाः ।
सर्वेषां मानवानां वै स्वधर्माच्च्यवते मनः ॥४८॥
कलावधर्मो बलवान् गृहे गृहे जने जने ।
भिक्षवो वर्णसर्वस्वा भृत्याश्च सार्ववर्णिकाः ॥४९॥

वर्णसांकर्यभूयिष्ठं योगक्षेमौ न वै क्वचित् ।
सत्कर्माणि न विद्यन्ते कुतो वैदिकवार्तिका ॥५०॥

ऋतवश्चाऽसुखाः सर्वे भवन्त्यामयिनो जनाः ।
असत्ये विजयं मन्यमानास्तिष्ठन्ति सर्वदा ॥५१॥

ह्रसन्ति मानवानां तु रूपस्वरमनांस्यपि ।
व्याधयो नूतनास्तत्र म्रियन्ते चाल्पकालिनः ॥५२॥

विधवा विधुराः प्रायो भवन्ति बहवो जनाः ।
निन्द्या एव प्रजाः प्रायः सुखशान्तिविवर्जिताः ॥५३॥

पार्श्वे वर्षति पर्जन्यः पक्षेऽवग्रहकारकः ।
क्वचित्सस्यकणोत्थाणं क्वचिच्चांकुरदग्धता ॥५४॥

रसाः क्षयं गताः स्युश्च यदा राज्ञि कलिर्भवेत् ।
प्रजारक्षाहनो भूपाः कलिकोशा भवन्ति वै ॥५५॥

राजा कृतस्य स्रष्टा वै त्रेताया द्वापरस्य च ।
कलेश्च स्रष्टा राजैव कारणं युगपर्यये ॥५६॥

कृतस्य करणाद् राजा स्वर्गमुत्तममश्नुते ।
त्रेतायाः करणाद् राजा त्र्यंशं स्वर्गं समश्नुते ॥५७॥

द्वापरस्याऽर्जनाद् राजाऽर्धं सुखं समविन्दति ।
कलेः प्रवर्तनात् क्लेशं राज्यनाशं च विन्दति ॥५८॥

एवं कलौ पापमेव भुंक्ते राजा हि राक्षसः ।
ततो यात्येव नरके वसत्येव चिरं समाः ॥५९॥

प्रजानां कल्मषं भुंक्ते दुःखं भुंक्तेऽप्यसीमकम् ।
पापं चाप्यपकीर्तिंच भुंक्ते दुःखपरम्पराम् ॥६०॥

तस्मान्नीत्या सदा राज्ञा वर्तितव्यं कृतादिवत् ।
चरेद्धर्मानसंमोहान् कुर्यात् स्नेहं विबन्धनात् ॥६१॥

लभेदर्थं च निर्लोभाचरेत् कामं सदार्तवात् ।
ब्रूयात् प्रियं न कार्पण्यात् परक्रमेन्न कत्थनात् ॥६२॥

दद्यात् कुपात्रदो न स्यात् स्याद् गंभीरो न निम्नगः ।
मिलेत् सर्वैरनार्यैश्च गृह्णीयान्नाप्यनीतितः ॥६३॥

अचारो न भवेत् क्वापि कार्यं कुर्यान्न पीडयेत् ।
अर्थं वदेन्न दुष्टेषु गुणान् वदेन्न चात्मनः ॥६४॥

आदद्यान्न दरिद्रेभ्यो नाश्रयं दुःसतश्चरेत् ।
अविमृश्य दण्डयेन्न रहस्यं न प्रकाशयेत् ॥६५॥

विसृजेन्न तु दुष्टेभ्यो विश्वसेन्नापकारिषु ।
इर्ष्याशून्यो भवेच्चापि दारेष्वपि प्रजास्वपि ॥६६॥

स्त्रीः संसेवेत नात्यर्थं मृष्टं भुञ्जीत नाऽहितम् ।
मानयेत् पूज्यवर्गांश्च गुरून् सेवेत् भावतः ॥६७॥

देवान् प्रपूजयेद् भक्त्या श्रियं चेच्छेदनिन्दिताम् ।
दाक्ष्यं कुर्याद् यथापेक्षं मार्दवं कालविच्चरेत् ॥६८॥

सान्त्वयेत् हार्दलाभायाऽनुगृह्णीयात् समृद्धये ।
प्रहरेत् तत्त्वमाज्ञाय कृत्वा पश्चान्न शोचयेत् ॥६९॥

क्रोधं कुर्यान्नान्यथा वै मार्दवं गृह्णीयान्न च ।
सतः सेवेत सततं शान्तये मोक्षणाय च ॥७०॥

समाध्यर्थे पण्डितांश्च सेवेत सततं नृपः ।
एवं बुद्धिं प्रसेवेत प्रातरुत्थाय निर्जने ॥७१॥

सेवेत चान्तरात्मानं मां यथार्थप्रदर्शिने ।
चत्वारिंशद्गुणैः राजा देवत्वमिव राजताम् ॥७२॥

विकासयितुमर्हः स्यात् तस्मान्नीतियुतो भवेत् ।
मां सदा सर्वथा साक्ष्ये चान्तरे संस्मरेन्नृपः ॥७३॥

ततः सर्वं प्रकुर्वीत सत्ययुगप्रदोऽस्म्यहम् ।
असन्मार्गप्रवृत्तस्योद्धारकोऽहं भवामि च ॥७४॥

संशयपंकमग्नस्योन्नेताऽस्म्यहं जनार्दनः ।
अकार्यजालग्रथनागतस्याऽहं विमोचकः ॥७५॥

अपारङ्गमगन्तुश्च पारङ्गमक इत्यहम् ।
भवाम्येव सदा तस्मात् सेवनीयोऽहमाश्रयः ॥७६॥

राजाऽथवा प्रजा पुत्रः पुत्री वा कार्ययोगिनः ।
विस्तरेण तु धर्माणां न जात्वन्तमवाप्नुयुः ॥७७॥

तैः सदाऽनुष्ठेयकेऽर्थे सन्दिग्धे नान्तवर्तिनि ।
प्रष्टव्या धर्मनिष्ठाश्च श्रुतवन्तः सुरोत्तमाः ॥७८॥

प्रत्युत्थायोपसंगृह्य चरणावभिवाद्य च ।
निवेदनीयाः कार्यार्थे नारायणस्मृतेस्तथा ॥७९॥

गोपायितारं दातारं धर्मनित्यमतन्द्रितम् ।
अकामद्वेषसंयुक्तमनुरज्यन्ति मानवाः ॥८०॥

मत्परं साधुसेवं च मदर्थकृतयत्नकम् ।
मयि न्यस्तसमस्तं च भूतान्यनुसरन्ति हि ॥८१॥

तस्मान्निरुक्तसूत्या च भाव्यं राज्ञा प्रजाजनैः ।
तथा सौख्यं भवेदत्र परत्रापि गतिर्भवेत् ॥८२॥

राजा प्रजा भवेद् यो वा को वाऽप्यत्र तु देहवान् ।
देहदं मां भजेन्नित्यं स स्यात् सुखी न चेतरः ॥८३॥

धर्मा अर्थाश्च कामाश्च मोक्षे येन नियोजिताः ।
योजितः स भवत्येव नैसर्गान्मयि माधवे ॥८४॥

एवं सर्वे प्रकुर्वन्तु कार्याणि मन्मयानि ह ।
भुक्तिर्मुक्तिर्भवत्येव नात्र कार्या विचारणा ॥८५॥

इत्युक्त्वा भगवान् कृष्णो मन्त्रं ददौ तदा निजम् ।
विरराम ततः स्वामी सर्वमानसतृप्तिदः ॥८६॥

राज्ञी च राजकन्याश्च पुपूजुः परमेश्वरम् ।
पञ्चकन्यास्तदैवाऽस्य हस्तं जगृहुरादरात् ॥८७॥

कान्तं प्राप्य परानन्दं लेभिरे पञ्चगौरिकाः ।
राजा मुमुदेऽत्यर्थं च राज्ञी मेने कृतार्थताम् ॥८८॥
हरेः पूजा कृता लोकैः सभाविसर्जनं ह्यभूत् ।
हरिर्भोजनमासाद्य विश्रान्तिमाप चालये ॥८९॥
महीमानाः समस्ताश्च विश्रान्तिं लेभिरे भृशम् ।
रात्रिं निनाय भगवान् पालनादाय चर्षये ॥९०॥
दत्वोपदादिसामग्रीर्गन्तुं सज्जोऽभवत्तदा ।
राजा सैन्येन वाद्याद्यैर्विदायं प्रददौ महत् ॥९१॥
हरिं राजा पुष्पहारैः प्रातः कृताह्निकं तदा ।
दुग्धपानादिकं व्यधापयत्ततोऽतिपूजनम् ॥९२॥
चकाराऽऽरार्त्रिकं चापि पपौ पादामृतं ततः ।
हारालिराजितवक्षा हरिर्विमानगोऽभवत् ॥९३॥
महीमानाः समस्ताश्चारुरुहुर्व्योमगामिषु ।
विमानेषु ततो वाद्यान्यवाद्यन्त च भूरिशः ॥९४॥
जयनादैर्ययुस्तस्माद् रायगामलराष्ट्रकम् ।
रायगामलराजा च लातवायमुनिस्तथा ॥९५॥
कुटुम्बं राजकीयं च पुरो गत्वाऽतिशोभनम् ।
स्वागतं श्रीहरेश्चापि सैन्यशोभातिकारितम् ॥९६॥
चक्रुः सर्वे निनादैः कीर्तनैर्वाद्यैः सुमादिभिः ।
आकाशे चागतं कृष्णविमानं वीक्ष्य ते तदा ॥९७॥
जयनादान् प्रचक्रुश्च यन्त्रीध्वानानकारयन् ।
गौर्यः सर्वा गीतिनादान् मधुरानप्यगापयत् ॥९८॥
एवं सन्मानसौभाग्ये स्थले ह्युद्यानशोभिते ।
द्वयूनासरित्तटे पुर्या रिगायाः सन्निधौ हरिः ॥९९॥
राजदर्शितमार्गेणाऽवातारयद् विमानकम् ।
अन्यान्यपि विमानानि चावतेरुस्तदाम्बरात् ॥१००॥
राधिके जनताः कृष्णं व्यलोकयन् स्थिरदृशः ।
पुष्पैरवर्धयन् गीतिजयध्वानैरवर्धयन् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वरसिंहनृपस्य वाशीलानगर्यां हरेर्भ्रमणं पूजनं युगोपदेशनं भोजनं विश्रमणं निद्रोत्तरं त्रयोदश्यां मध्याह्नपूर्वे रायगामलराष्ट्रगमनमित्यादिनिरूपणनामा चतुर्नवत्यधिकशततमोऽध्यायः ॥ १९४ ॥

श्रीकृष्ण उवाच—

राधिके श्रीबालकृष्णो विमानात् समवातरत् ।
रायगामलनृपतिः पुष्पहारान् ददौ गले ॥ १ ॥
राज्ञी प्रक्षालयामास चरणौ परमात्मनः ।
कन्यकाश्च कुटुम्बं च राज्ञः पुपूजुरच्युतम् ॥ २ ॥
गन्धाक्षतैः पुष्पस्रग्भिश्चन्दनेन सुगन्धिना ।
हारान् गुच्छान् ददौ चापि ततो राजा हरिं च तम् ॥ ३ ॥
न्यषादयद् रम्यगजेऽम्बालिकावरशोभिते ।
शृंगारितेऽतिसुभगे चतुर्दन्तेऽर्जुने वरे ॥ ४ ॥
उच्चके संस्थितं कृष्णं जनता समलोकयत् ।
छत्रं दधुश्च शिरसि कुमाराश्चामरेऽपि च ॥ ५ ॥
अन्यान् सर्वान् महीमानान् शकटीषु न्यषादयत् ।
राजाऽभ्रामयदीशेशं नगर्यां राजमार्गके ॥ ६ ॥
रिगाप्रजा हरिं नत्वा पुपूजुरुत्तमोत्तमैः ।
फलै रत्नैरम्बराद्यैः स्वर्णरूप्यककम्बलैः ॥ ७ ॥
पुष्पहारैर्हीरकाद्यैरमूल्यवस्तुभिस्तथा ।
गोपुरे चत्वरे संगे हट्टके मार्गसन्निधौ ॥ ८ ॥
अंगणे सर्वथा लोका अपूजयन् सुवस्तुभिः ।
अवर्धयन् शुभा गौर्योऽक्षतलाजाब्जकेसरैः ॥ ९ ॥
हार्दिकैर्भावनैश्चापि निरीक्षणैः सुमानसैः ।
स्वागतं सर्वतो बुद्ध्या चक्रुः कीर्तनगीतिभिः ॥१०॥
राजप्रासादवर्यं च ययौ कृष्णोऽतिभास्वरः ।
राजकन्याः पञ्च कृष्णहस्तं जगृहुरादरात् ॥११॥
राज्ञी पुपूज देवेशं जामातारं तदा मुदा ।
ददौ दानानि सुभगा विविधानि पुपूज च ॥१२॥
ददौ कन्याः पञ्च कृष्णनारायणाय तत्र ह ।
उत्सवं च शुभं चक्रे राजा कृतार्थतां वहन् ॥१३॥
ततः प्रधानसौधानि प्रजागृहाणि सर्वशः ।
श्रेष्ठिनां मन्दिरोद्यानगृहादीनि ययौ हरिः ॥१४॥
भगवान् श्रीहरिस्तत्र सर्वत्र पूजितः प्रभुः ।
ईशानो ब्रह्मपत्न्यश्च गौर्यो महर्षयस्तथा ॥१५॥
सर्वेऽपि पूजितास्तस्यां नगर्यां नागरैर्मुदा ।
गौरीभिः पूजितं कृष्णकुटुम्बं भाववस्तुभिः ॥१६॥
ततो हरिर्निजावासं चाययौ सैन्यशोभितः ।
जलपानं चकाराऽथ सभां चकार तत्र च ॥१७॥
उपादिदेश च जनान् राधिके कृष्णवल्लभः ।
धर्मः पाल्यः सदा भक्तैरर्थस्तेन प्रजायते ॥१८॥
केवलार्थपरो जन्तुरचिरेण विनश्यति ।
वित्तं दत्तं च वा न्यस्तमस्थाने चेद् विनश्यति ॥१९॥
हिंसार्थं योजितं चापि पापायैव प्रकल्पते ।
यद्वाऽऽत्मनोऽपि हिंसां वा कुरुते हिंसकं भवत् ॥२०॥

धर्मे ऊधो भवत्येव मा छिन्द्यात्तं कदाचन ।
ऊधश्छेदे पयोलाभो क्षीरार्थिनो न जायते ॥२१॥
ऊधसोऽर्थमयं दुग्धं प्रगृह्णीयाद् विवेकवान् ।
दुग्धं दोग्ध्र्याः सेवनेन प्राप्यते नित्यमुत्तमम् ॥२२॥
एवं पृथ्वीमुपायेन भुञ्जानो लभते फलम् ।
सतीं गां च तनुं धर्मं भुञ्जानो लभते फलम् ॥२३॥

दोग्ध्रीं धान्यं सुवर्णं च रक्षयेत् पृथिवीं च ताम् ।
धर्मं नित्यं रक्षयेच्च दोग्ध्रीं मत्वा विवेकवान् ॥२४॥
भूतानां रक्षणं धर्मो दया सा परमा मता ।
दयाधर्मेण कर्ता वै तरत्यसारसागरम् ॥२५॥
भीतानां रक्षणं कार्यं रक्षाफलं सुलभ्यते ।
दशवर्षसहस्राणि स्वर्गे वासात्मकं हि तत् ॥२६॥
स्विष्टिः स्वधीतिः सुतपा यान् लोकान् जयते ततः ।
तानेव दयया प्राज्ञो जयते धर्ममाचरन् ॥२७॥

देवताः पितरः सन्तो जीवन्ति दानधर्मणा ।
अन्यभूतानि जीवन्ति दयागार्हस्थ्यधर्मणा ॥२८॥
छायायामप्सु वायौ च सुखमुष्णे प्रमेलने ।
अग्नौ वाससि सूर्ये च सुखं शीते प्रमेलने ॥२९॥
शब्दे स्पर्शे रसे रूपे गन्धे च रमते मनः ।
उष्णे शीतं साधुरूपं प्राप्तव्यं सुखदं हृदि ॥३०॥
शीते चोष्णं कृष्णरूपं प्राप्तव्यं सुखदं सदा ।
तेषु भोगेषु नाऽसक्तो लभते सुखमुत्तमम् ॥३१॥
अन्ये धर्माः शीतजानामन्ये चोष्णनिवासिनाम् ।
उष्णस्थानां स्नानजं च फलं यत् स्याच्छुभप्रदम् ॥३२॥

शीतस्थानां यज्ञदानैस्ततोऽधिकं फलं भवेत् ।
अर्थदानं मतं पुष्टिप्रदं देहस्य तुष्टये ॥३३॥
अर्थो द्वेधा धनरूपः सुखदोऽत्र भवेत् खलु ।
परार्थो मोक्षरूपस्तु शाश्वतिकसुखप्रदः ॥३४॥
अभयस्य प्रदातुस्तु फलं सर्वोत्तमोत्तमम् ।
नहि प्राणसमं दानं मोक्षदानं ततोऽधिकम् ॥३५॥
अहं श्रीबालकृष्णो वै स्वामिश्रीकृष्णवल्लभः ।
ददामि मोक्षदानं च प्राणदानं धनादि च ॥३६॥

श्रेष्ठं मध्यं कनिष्ठं च त्रयमेतद्विभज्यते ।
मोक्षदानं परं दानं दातव्यं सर्वथा भुवि ॥३७॥
ग्रहीतव्यं तु तद्दानं नित्यानन्दप्रदं तु यत् ।
अन्याऽऽदाने भवेद् व्याधिर्मोक्षदाने विनश्यति ॥३८॥
मोक्षदाने ब्रह्मदानं ब्रह्मभूतं करोति हि ।
ब्रह्मवृक्षो रक्ष्यमाणो मधुहेम ददाति वै ॥३९॥

ब्रह्मदानपरं दानं नाधिकं सृष्टिमण्डले ।
मोक्षदानं ब्रह्मदानं ब्रह्माहं मां ददामि च ॥४०॥
धर्मोऽहं चार्थरूपोऽहं मोक्षोऽहं मोक्षदोऽप्यहम् ।
मोक्षात्मानं ददाम्येव मुमुक्षवे प्रसादितः ॥४१॥
स्त्रियं वा ब्रह्म वा हन्यात् साधुं हन्यात्तु यो घृणी ।
तत्पापैः क्रियमाणैश्च युज्यते स दरिद्रकः ॥४२॥

ईशानो रुद्रदेवश्च हिनस्त्यसाधुपापिनः ।
साधून् रक्षति सर्वात्मा मद्रूपो रुद्र ईश्वरः ॥४३॥
आत्मा रुद्रो निजः प्रोक्तः पापं हन्याद् यदा स्वतः ।
पापं द्वेषो वञ्चनादि चात्मघातादि नाशयेत् ॥४४॥
आत्मघातो मोक्षघातस्तं न कुर्यात् कदाचन ।
आत्मा स्वार्थी भवेन्नित्यं मोक्षार्थी मत्समागमात् ॥४५॥
देहभावं न चोहेत मिश्रभावं परित्यजेत् ।
शुष्कैरार्द्रं दह्यतेऽपि मिश्रितं चेद् भवेद् यदि ॥४६॥

आत्मा दुःखी जायतेऽपि देहमिश्रो भवेद् यदि ।
पापकृद्भिः कथंचिच्च न स्यान्मिश्रो विवेकवान् ॥४७॥
रागद्वेषौ पापरूपौ त्यक्तव्यौ मुक्तिमिच्छता ।
प्रमादमोहौ पापौ च त्यक्तव्यौ भूतिमिच्छता ॥४८॥
पुण्यलोकः स्वयं स्वर्गः सुखी चात्मा दिवं मतम् ।
पापलोकोऽत्र निरयो दुःखी चात्मा ह्यधो मतः ॥४९॥
पृथ्वी साधूँस्तथाऽसाधून् सन्धारयति सदृशी ।
सूर्यः साधूँस्तथाऽसाधून् करोति तापनं समः ॥५०॥
जलं तृप्तान् करोत्येव साधूनसाधुकानपि ।
वातः प्राणं स्पर्शनं च समं करोति देहिषु ॥५१॥

आपः पुनन्ति सर्वांश्च साध्वसाधून् समानतः ।
अत्र लोके तथा चास्ति फललोके तु भिन्नता ॥५२॥
पुण्यशालिकृते वारि शीतं तत्रोपसर्पति ।
अपुण्यस्य कृते वारि दृष्टिमार्गं न गच्छति ॥५३॥
पुण्यशालिकृते पृथ्वी कोमलास्तरणान्विता ।
अपुण्यस्य कृते पृथ्वी कण्टककर्करान्विता ॥५४॥
पुण्यशालिकृते वायुः शीतलो गन्धिसंस्पृशः ।
अपुण्यस्य कृते वायुर्विषोल्बणोऽतिदारुणः ॥५५॥

पुण्यशालिकृते सूर्यो यथापेक्षोष्णताप्रदः ।
अपुण्यस्य कृते सूर्यो दाहको भस्मसात्करः ॥५६॥
इत्येवं चान्तरं लोके फलाढ्ये वर्तते सदा ।
पुण्यलोको मधुमांश्च घृतादः स्वर्णभूषणः ॥५७॥
अमृतादो मोदयुक्तो जरामृत्युविवर्जितः ।
पापस्य लोको निरयस्तमोदुःखसुतापनः ॥५८॥

क्षुत्तृड्व्याप्तः शोककोशः क्षणमृत्युवशंगतः ।
तं लोकं गन्तुमिच्छेद् यो विवेकभ्रष्ट एव सः ॥५९॥
पुण्यलोकं प्रयातुं यो वाञ्छेद् विवेकवान् हि सः ।
शाश्वतं च परं लोकं मम धामाऽक्षराभिधम् ॥६०॥
गन्तुमिच्छेत्तु यः प्राज्ञो मुमुक्षूत्तम एव सः ।
नित्यपूजो ब्राह्मणस्तल्लोकं समभिगच्छति ॥६१॥
नित्यं दानी मखी रक्षी पूजी क्षत्रोऽपि गच्छति ।
उद्यमी चोपकारी च धर्मी वैश्योऽपि गच्छति ॥६२॥
हिती सेवी च सन्तोषी याति शूद्रोऽपि शेषभुक् ।
तत्र तत्राऽनुसन्धानं मम भक्त्यात्मकं स्मृतम् ॥६३॥
आज्ञां वहते नियतो गुरोर्योऽस्खलितो जनः ।
तस्य सिद्धिर्भवत्येव गुरोर्बलान्न संशयः ॥६४॥
अल्पं च सारभूतं च करणीयं विशेषतः ।
येन सिद्धिर्द्रुतं श्रेयःप्रदा भवति देहिनः ॥६५॥
येषां श्रीभगवान् रक्ष्यो येषां रक्ष्यं च कीर्तनम् ।
मम भक्तास्तथा रक्ष्यास्ते रक्ष्या मम सर्वदा ॥६६॥
येषां पुरोगमा भक्ताः सन्तो ब्रह्मपरं त्वहम् ।
यद्गृहे भक्तकन्याश्च ते रक्ष्या मम सर्वदा ॥६७॥
न कालात् कर्मतस्तेषां मायातो यमतो भयम् ।
येषां चास्मि गृहे चाहं हृदये पूजितः सदा ॥६८॥
साधून् रक्षेत् सदा राजा ते हि रक्षन्ति रक्षिताः ।
आशीरेषां भवेद् धामप्रदात्री बन्धनाशिनी ॥६९॥
दानेन तपसा यज्ञैर्भक्त्या दमेन सेवया ।
साधवो वा गृहस्था वा क्षेममिच्छेयुरात्मनः ॥७०॥
अपारे पारकर्ता यश्चाऽप्लवे प्लवदोऽपि यः ।
यमाश्रित्याऽतिघोरेऽत्र संसारे सुखिनो जनाः ॥७१॥
त्यागी वापि गृही वापि नरो नारी च वा भवेत् ।
तारकं बान्धवं मत्वा साधुं तं परिपूजयेत् ॥७२॥
परमेशं तथा सन्तं ज्ञानदं च गुरुं प्रभुम् ।
सतीं साध्वीं पूजयेच्च मोक्षदो हि यतो गुरुः ॥७३॥
किं तैर्ये वृषभा नोह्याः किं धेन्वा वाऽप्यदुग्धया ।
किं पत्न्या वन्ध्यया लाभः कोऽर्थो राज्ञाऽप्यरक्षता ॥७४॥
किं तद्धनेन देहेन सेवा साधोर्न मे भवेत् ।
किं राज्येन च शुष्केण किं दस्युग्रस्तसम्पदा ॥७५॥
किं निःस्नेहेन भोग्येन किं जनु यन्न मुक्तिदम् ।
यथा काष्ठकृतो हस्ती शार्दूलश्चर्मकृद् यथा ॥७६॥
यथा षण्ठो यथा क्षारं क्षेत्रं निर्विघ्नको यथा ।
यथा मेघाऽऽडम्बरश्च क्षत्रं बलविवर्जितम् ॥७७॥
यथा व्रतं दानहीनं भक्तः स्नेहविहीनकः ।
गुरुर्ज्ञानादिशून्यश्च सर्वेऽप्येते निरर्थकाः ॥७८॥
सफलं मोक्षदं सर्वं निष्फलं तद्विवर्जितम् ।
आत्मलाभो न वै यत्र स लाभो ह्यानिरुच्यते ॥७९॥
आत्मलाभः परो लाभः परमात्मसमर्पणम् ।
मोक्षलाभो भवेत्तेन सत्यलाभो मतो हि सः ॥८०॥
सेवयन्तु सतो नित्यं भजन्तु मां सदा जनाः ।
रक्षयन्तु स्वकं धर्मं मम धाम प्रयान्त्वपि ॥८१॥
भवतामस्तु वै स्वस्ति लोके चात्र परत्र च ।
इत्युक्त्वा विररामाऽथ राजा पुपूज तं प्रभुम् ॥८२॥
प्रजाश्चानर्चयामासुर्बहुवस्तुभिरादरात् ।
राज्ञी पूजां चकाराथ श्रीहरेः कन्यकायुता ॥८३॥
तिस्रः कन्या हरेर्हस्तं जगृहुः पतिभाविताः ।
सार्थकं च जनुश्चक्रुः प्राप्य श्रीपुरुषोत्तमम् ॥८४॥
भोजनं प्रददौ राजा हरये च कुटुम्बिने ।
महीमानेभ्य एवापि ततः स्वो बुभुजे नृपः ॥८५॥
चकार सुमहान्तं चोत्सवं रात्रौ प्रजायुतः ।
नृत्यानि कारयामास वाद्यभक्त्यादिभिः सह ॥८६॥
रात्रौ सुभोजनं लब्ध्वा हर्याद्यास्ते विशश्रमुः ।
प्रातः समुत्थिता वाद्यरवैर्मंगलनिःस्वनैः ॥८७॥
कृताह्निकास्तु हर्याद्या गन्तुं सज्जास्तदाऽभवन् ।
मन्त्रं हरिर्ददौ तत्र प्रजाभ्यस्तूर्णमर्थितम् ॥८८॥
राजा श्रीहरये स्वर्णं यौतकं बहुधा ददौ ।
उपदाः प्रददौ चापि हरिश्चापि धनं तदा ॥८९॥
लातवायर्षिणे प्रादाद् यथायोग्यं प्रपूजनम् ।
राजा ददौ विदायं च दुग्धपानोत्तरं ततः ॥९०॥
हरिर्विमानमारुह्य तूर्णं शृण्वन् जयध्वनिम् ।
अम्बरे चाऽभवत् सर्वकुटुम्बेन समन्वितः ॥९१॥
अन्ययानानि सर्वाणि चाम्बरे त्वभवँस्तदा ।
राजा सैन्येन सन्मानं कृतवान् समयोचितम् ॥९२॥
फेनतन्तुनृपश्चापि फालनादो मुनिस्तदा ।
आजग्मतुः समानेतुं निजराज्यं सतां पतिम् ॥९३॥
हरिस्तेनार्थितस्तूर्णं बहुमानपुरःसरः ।
व्योम्ना सर्वान् प्रयुज्यैवाऽऽशीर्वादैः प्रययौ तदा ॥९४॥
अन्यान्यपि विमानानि ययुस्तूर्णं तदाम्बरे ।
फेनतन्तुमहाराजराष्ट्रमुल्लंघ्य खाडिकाम् ॥९५॥
तूर्णनयानदीतीरे संगमस्थे मनोहरे ।
नगरे त्रिनयाख्ये तत्समीपोद्यानमण्डले ॥९६॥

राजा पुरः प्रगत्वैव सैन्यसन्मानमाचरत् ।
राजदर्शितमार्गेण हरिर्नैजं विमानकम् ॥९७॥
अवातारयदुद्याने राजसौधस्य सन्निधौ ।
विमानानि तथाऽन्यानि चावतेरुस्तदाऽम्बरात् ॥९८॥

तदा वाद्यान्यवाद्यन्त जयशब्दास्तथाऽभवन् ।
पुष्पवृष्टिः प्रजानां चाऽभवद्विमानसन्निधौ ॥९९॥
राधिके कीर्तनान्येव गौर्यो जगुः प्रजाजनाः ।
स्वागतं परमं राजा चक्रे यान्त्रिकसद्रवैः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रायगामलराष्ट्रे रिगानगर्यां भ्रमणं पूजनमुपदेशनं भोजनं विश्रमणं रात्रियापनं चतुर्दशीप्रातर्दुग्धादिपानोत्तरं फेनतन्तुनृपराष्ट्राभिगमनमित्यादिनिरूपणनामा पञ्चनवत्यधिकशततमोऽध्यायः ॥१९५॥

श्रीकृष्ण उवाच—

शृणु राधे ततः श्रीमान् बालकृष्णः परेश्वरः ।
विमानादवतीर्याऽऽग्रे रम्येऽश्ववाहने शुभे ॥ १ ॥
व्यराजत् स्वर्णशोभाढ्ये छत्रचामरयोजिते ।
और्णचित्रादलिकास्तरणगद्दिसमन्विते ॥ २ ॥
फेनतन्तुनृपः कृष्णं पुपूज पुष्पहारकैः ।
स्वर्गहारैश्चन्दनाद्यैरमूल्यवरवस्तुभिः ॥ ३ ॥

राज्ञी राजकुटुम्बं च फालनादमुनिस्तथा ।
प्रजाश्चापि तदाऽऽनर्चुः श्रीपतिं गौरिकापतिम् ॥ ४ ॥

राजा सैन्येन सहितः स्वागतेन विवर्धयन् ।
हरिं वै भ्रामयामास त्रिनयायां समन्ततः ॥ ५ ॥
राजधान्या गोपुरे तं प्रधानाः समपूजयन् ।
राजमार्गे राजभृत्याः श्रेष्ठिनश्चत्वरादिके ॥ ६ ॥

प्रतिहट्टं क्रयिणश्च विक्रयिणः प्रजाजनाः ।
चन्दनैः कुंकुमैः पुष्पैर्दिव्यैः श्रीफलभूषणैः ॥ ७ ॥
वर्धयामासुरत्यर्थं गौर्यः स्थले स्थले तदा ।
नेमुश्चाक्षतलाजाभिर्वर्धयामासुरच्युतम् ॥ ८ ॥
प्रजाजन्मफलं लेभुर्दर्शनेन हरेस्तदा ।
गौर्यो नेत्राऽऽयतलाभं प्रापुः कृष्णं विलोक्य च ॥ ९ ॥

त्रिनयानगरी सर्वा जनसंकुलिता तदा ।
हरेर्दर्शनकार्यार्थे त्यक्ताऽन्यकार्थिकाऽभवत् ॥१०॥
एवं सर्वत्र संस्थानेष्वखिलेष्वपि माधवः ।
दत्वा स्वदर्शनं राजसौधं सन्मानितोऽगमत् ॥११॥

तत्रोपदेशं प्रददौ प्रजाभ्यो भगवान् स्वयम् ।
विराजमानः सौवर्णे सिंहासनेऽतिभास्वरः ॥१२॥
जेतव्यं च मनो नित्यं संसारवासनाश्रितम् ।
इन्द्रियाणि तथाऽर्थेभ्यो जेतव्यानि विशेषतः ॥१३॥

निवर्तितव्यं सततं विषयेभ्यश्च देहिभिः ।
वृथा चिन्ता न कर्तव्या विहाय परमेश्वरम् ॥१४॥
दिनं व्यर्थं न नेतव्यं भक्तिं भगवतो विना ।
आयुर्व्यर्थं न नेतव्यं साधूनां सेवया विना ॥१५॥
आयासो न वृथा कार्यः सत्संगमन्तरा जनैः ।
वाणी व्यर्था न नेतव्या विना मे कीर्तनं क्वचित् ॥१६॥
दैहिकं न वृथा क्षेप्यं विना समर्पणं मयि ।
रात्रिर्व्यर्था न वै क्षेप्या विना ध्यानं हरेर्मम ॥१७॥
धनं व्यर्थं न कर्तव्यं विना मन्मन्दिरादिकम् ।
आत्मा व्यर्थो न योक्तव्यो विना मां परमेश्वरम् ॥१८॥
माया व्यर्था भवेत् सर्वा यत्रहं नास्मि तत्र च ।
तथा व्यर्थं भवेत् सर्वं यत्राऽहं नास्मि पूजितः ॥१९॥
पूजिते तु मयि कृष्णे सर्वं भवति पूजितम् ।
मय्यर्पिते मनाक् चार्थे सर्वार्थो निर्गुणो यतः ॥२०॥
नैर्गुण्येन सदा भाव्यं भक्तैर्मानुषविग्रहैः ।
अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा दमः शमः ॥२१॥
सत्यं धृतिः स्मृतिर्दान्तिश्चोपरतिर्विलुब्धता ।
गुणा ह्येतेऽर्पिताः कृष्णे मयि नैर्गुण्यमाप्नुयुः ॥२२॥
तेन मुक्तिर्भवेदेव मोक्षदोऽहं च निर्गुणः ।
सर्वैश्वर्यचमत्कारदिव्यगुणादिसंभृतः ॥२३॥
भक्ते नैर्गुण्यमासज्ज्य तारयामि न संशयः ।
अहिंसा सत्यवचनमानृशंस्यं दमो घृणा ॥२४॥
एतत्तपो महत्प्रोक्तं तेन तुष्याम्यहं सदा ।
देहस्य शोषणाच्छ्रेष्ठं मनःशोषणमेव ह ॥२५॥

मनसः शोषणात् सेवा दास्यं श्रेष्ठं मतं मम ।
आज्ञानुसारसंस्थानं सर्वेभ्योऽप्यधिकं मम ॥२६॥
आज्ञांकितो जनो नित्यं दूरोऽपि निकटेऽस्ति वै ।
अनाज्ञाकृन्निकटेऽपि विदूरोऽस्तीति मे मतम् ॥२७॥
तस्मादाज्ञा पालनीयाः गुरोः पित्रोर्हरेः स्त्रियाः ।
पत्युश्च पूज्यवर्गस्य विशेषज्ञस्य सर्वदा ॥२८॥

मया वेदा हि रचिता आज्ञा वै विधयश्च ताः ।
ऋषिभिस्ताः श्रेयसे च स्मर्यन्ते देहिनां मुहुः ॥२९॥
प्रजाभ्यस्तूपदिश्यन्ते वर्तन्ते तदनुसृताः ।
ये ते मुक्तिं प्रयान्त्येव भुक्त्वा स्वर्गानि भूरिशः ॥३०॥

सम्मानयेत्पूजयेच्च ऋषीन् वाचा च कर्मणा ।
कुर्याच्च प्रियमेतेभ्यो नाऽप्रियं किञ्चिदाचरेत् ॥३१॥
ऋषयः साधवो दिव्या मम मूर्तय एव ते ।
सर्वथा गुणकोशास्ते मत्स्वरूपा विमुक्तिदाः ॥३२॥
नहि दोषो गुणो वेति निरूप्यस्तेषु दृश्यते ।
य एवं वर्तते नित्यं साधुसत्संगमण्डले ॥३३॥
यत्र क्वापि स्थितः तेऽत्र कल्प्यते यशसे चिरम् ।
परे स्वर्गे मम धाम्नि गत एव स कल्प्यते ॥३४॥
लोकोऽयं त्वापदां स्थानं क्षणे क्षणे विपत्प्रदः ।
सतां योगाऽज्ञानलब्ध्या विलीयन्ते तदापदः ॥३५॥
आपदो द्विविधाः सन्ति बाह्याश्चाभ्यन्तरास्तथा ।
स्वेन वान्येन वा सर्वाः प्राविर्भवन्ति नित्यशः ॥३६॥
आभ्यन्तरा भवन्त्येव स्वेन कृतेन कर्मणा ।
बाह्यास्त्वन्यसमुत्पन्ना विना कृत्यं भवन्त्यपि ॥३७॥
आभ्यन्तराः सहनेन ज्ञानेन निर्वहेण च ।
बाह्या अनुनयेनाऽनुसृत्या दानेन यान्ति च ॥३८॥
शक्त्याऽन्नदानं सततं द्रव्यदानं ह्यपेक्षितम् ।
आर्जवं मार्दवं चाति तितिक्षा पूजनादिकम् ॥३९॥
प्रसन्नीकरणं चापि बाह्यापदां निवारकम् ।
सर्वापदां नाशकन्तु सतामाशीर्वचो मतम् ॥४०॥
श्रीहरेर्मे श्रयणं तु सर्वसौख्यप्रदं मतम् ।
सुखानां शेवधिश्चाऽहं यत्र भक्तैः सुपूजितः ॥४१॥
रक्षितश्च भृतश्चापि तत्राऽऽनन्दस्य वारिधिः ।
न तत्राऽऽपत्प्रलेशोऽपि यत्राऽहं सुखसागरः ॥४२॥
यत्र नाऽहं तत्र चौरा दुष्टा घ्नन्ति पुरीपतिम् ।
प्रजा घ्नन्ति सत्प्रामाण्यं घ्नन्ति विना प्ररक्षकम् ॥४३॥
पुरा काकलतो नाम्ना मुनिरासीद् द्रुमाश्रयः ।
काकं स शिक्षयामास मानुषैः सहवासनम् ॥४४॥
काकास्तु बहवस्तस्य वृक्षे तिष्ठन्ति पञ्जरे ।
काकविद्यां चिरेणासावधीतवान् समागमात् ॥४५॥
वाणीं सर्वां ज्ञातवाँश्च शनैः शनैः प्रसंगतः ।
शकुनानि विजानाति जानात्यशकुनानि च ॥४६॥
काकान् स पंजरे कृत्वा पर्यचरति पत्तने ।
कोसलायां नगर्यां स ययौ वसतिसन्निधौ ॥४७॥
वदन् जनान् भाग्यदर्शी प्रवृत्त्यर्थी पुनः पुनः ।
अधीध्वं वायसीं विद्यां शंसन्ति मम वायसाः ॥४८॥
अनागतमतीतं च वर्तमानं च वेद्म्यहम् ।
एवं भ्रमन् चतुर्मास्सु नगर्यां च गृहे गृहे ॥४९॥
सर्वेषां राज्यभृत्यानां दुष्कर्म परिदृष्टवान् ।
सर्वेऽन्यायेन गृह्णन्ति धनानि राजसेवकाः ॥५०॥
मद्यं मांसं च खादन्ति चौर्यं कुर्वन्त्यशीलिनः ।
निर्दयाश्च प्रजाः सर्वाः पीडयन्त्यप्रकाशितम् ॥५१॥
राजानं हन्तुमिच्छन्ति राज्याप्तयेऽपि तेऽनुगाः ।
एतत्सर्वं काकवाचा परिज्ञाय ययौ नृपम् ॥५२॥
सर्वज्ञोऽस्मीति नृपतिं प्राह भृत्यादिवर्तनम् ।
अमात्यं प्राह नृपतेर्वचनादपि काकपः ॥५३॥
इदं द्रव्यं चोरितं चामुत्रेदं च त्वया कृतम् ।
असावत्र राजकोशस्त्वया हृतो विनाशितः ॥५४॥
अन्ये कोशहराश्चापि भवन्तीमेऽनुगास्तव ।
एवमाख्याति काकोऽयं सत्यमेतन्मयोदितम् ॥५५॥
राजा प्रगृह्य तान् सर्वान् कोशद्रव्यममार्गयत् ।
सर्वं सत्यं प्रजातं तत् नाऽनृतं कथितं तु यत् ॥५६॥
तेन राज्ञा दण्डितास्ते प्रधानाद्यास्ततः परम् ।
अन्ये भृत्या भीतिमाप्ता दण्डस्य काकवाग्विनः ॥५७॥
रात्रौ सुप्तस्य विप्रस्य बाणैः काकमवेधयन् ।
अन्ये काका भिन्नजालात्पञ्जरान्निर्ययुस्ततः ॥५८॥
मृतं काकं प्रसमीक्ष्य विप्रो गत्वा नृपं प्रति ।
प्राह राजँस्तव क्षेमं याचे त्वां निर्भयं तथा ॥५९॥
वचनात्ते मया सत्यं प्रोक्तं काकोदितं तु यत् ।
दण्डिताश्च त्वया भृत्या अन्ये भीतास्ततो न्विमम् ॥६०॥
काकं मे हतवन्तस्ते दुष्टा भृत्यास्तवाऽहिताः ।
राजा यत्र बली नास्ति तत्रेयं मे दशाऽऽगता ॥६१॥
काकद्रव्यं हतं मेऽत्र काकाश्चान्ये गतास्तथा ।
त्वत्तः प्राप्तं न वै किञ्चित् प्राणभीतिं विनाऽपरम् ॥६२॥
बहुमित्रा हि राजानो बहुमित्राश्च ते तथा ।
राजसंगप्रसक्तस्य नाशः पूर्वं प्रवर्तते ॥६३॥
नैकान्तेनाऽप्रमादो हि कर्तव्यः स्यान्महीपतौ ।
प्रमादिते महीपतौ विश्वस्तो यः स नश्यति ॥६४॥
प्रमादाद्धि स्खलेद् राजा स्खलिते नास्ति जीवनम् ।
राजानं सेवयेत् प्राज्ञो मृतोऽस्मीत्यभिमत्य वै ॥६५॥
दुर्व्याहृतादनादेशाद् दुःस्थिताद् दुरधिष्ठितात् ।
दुरासिताद् दुर्व्रजिताद् इंगितादंगचेष्टितात् ॥६६॥
शंकमानः प्रवर्तेत प्राज्ञो नृपस्य सन्निधौ ।
वैश्वानर इव क्रुद्धश्चेद् यावत् प्रदहेन्नृपः ॥६७॥
तस्मान्नाऽहं निवत्स्येऽत्र मम क्षेमाय केवलम् ।
परं निबोध मे राजन् यत्र राजा न विद्यते ॥६८॥

तत्रापदः प्रजास्वेव जायन्ते दुष्टनोदिताः ।
यत्र राजा निर्बलश्चाऽद्रष्टाऽज्ञाताऽविवेकवान् ॥६९॥
तत्रापि चापदो गुर्व्यो भवन्त्येव प्रजास्वपि ।
भवद्राज्ये वसन्त्येव भृत्या आदानतत्पराः ॥७०॥
अभूतिकामा भूतानां विनाशचौर्यहारिणः ।
ये वा भवद्विनाशेन राज्यमिच्छन्त्यनन्तकम् ॥७१॥
तेषामहं भयाद् राजन् गमिष्याम्यन्यमाश्रयम् ।
यथा काको मृतस्तैश्चाभिसन्धितशरेण मे ॥७२॥
तथाऽहं वा तथा त्वं वा मा बाणस्य गतिं गतः ।
स्यां स्या वेति विनिश्चित्य तीर्णोऽस्मि काकदानतः ॥७३॥
बहुनक्रझषग्राहां तिमिंगिलगणैर्युताम् ।
तव राज्यात्मिकां दुष्टां नदीं मरणदायिनीम् ॥७४॥
गहनं तव राज्यं वै ह्यन्धकारमयं ननु ।
नेह विश्वसितुं शक्यं भवताऽपि कुतो मया ॥७५॥
अतो नात्र शुभो वासो वधो यत्राऽग्रगोऽस्ति वै ।
सुकृतं बध्यते यत्र रक्ष्यन्ते दुष्प्रकर्मिणः ॥७६॥
नेह युक्तं चिरं स्थातुं चात्मनः क्षेममिच्छता ।
मधुप्रपातं राज्यं ते भोजनं विषसंयुतम् ॥७७॥
आशीविषैः परिवृतं चासद्भिः खादितं पृथक् ।
श्वगृध्रगोमायुयुतं राजँस्तत्परिशोधय ॥७८॥
त्वया पुष्टास्त्वया राज्येऽधिकृताः परिपालिताः ।
त्वामेव चाभिसन्धाय जिघांसन्ति तवाऽनुगाः ॥७९॥
भवतोऽर्थे मम काको हतस्तैर्दुष्टमानसैः ।
तस्माद् यामि महाराज कारणं नान्यदस्ति यत् ॥८०॥
अरेर्हि दुर्हृदात् सर्वैर्भेतव्यं क्षेमयाचिभिः ।
इत्युक्तश्च नृपः प्राह काकिनं सत्यवादिनम् ॥८१॥
अहं रक्षां करिष्ये ते सत्कारेणाऽपि भूयसा ।
तोषयिष्ये काकपालिन् भूयो वस गृहे मम ॥८२॥
एवं तं कथयन्तं च राजानं प्राह काकपः ।
मा कुरु त्वं साहसं वा वेगं राजन् विधाविह ॥८३॥
किन्त्वेकैकं प्रदण्डेन प्रगृह्य दुर्बलीकुरु ।
ततो दोषानुसारेण प्रत्येकं पुरुषं जहि ॥८४॥
एवं कृते विजयस्ते नाऽन्यथा सहसा कृते ।
कण्टका बहवो युक्ता हिंसन्ति हस्तिनं दृढाः ॥८५॥
मृदवो बहवो युक्ता हिंसन्ति बलिनं नृपम् ।
अदृश्या बहवो दोषा निघ्नन्ति वर्ष्मणः पतिम् ॥८६॥
तस्मादेकैकशो दोषा इव क्षय्या हि शात्रवः ।
एवमुक्ते चकारैवं राजा जघान वै क्रमात् ॥८७॥
शत्रून् निष्कण्टकं राज्यं कृत्वा श्रीकोसलाधिपः ।
शशास पृथिवीं पश्चात् कृत्वा सत्कर्मशोभनम् ॥८८॥
व्रतं तपस्तीर्थविधिं कृत्वा सेवां गुरोः सताम् ।
कृत्वा च भजनं दिव्यं ययौ धाम सुखास्पदम् ॥८९॥
तथा देहनगर्यां वै राजा कौशलनामकः ।
आत्माऽयं वर्तते दस्युवर्यक्रोधादिपीडितः ॥९०॥
गुरुः काकी शास्त्रकाकान् सह नीत्वा पुरीपतिम् ।
क्रोधादीनां तु दुष्टत्वं वदत्येव पुनः पुनः ॥९१॥
दोषाः शास्त्रविहन्तारोऽतिदृढा बलिनस्तथा ।
मायायां स्थितमात्मानं जिघांसन्ति च संहताः ॥९२॥
तद्विज्ञाय नृपेणैवाऽऽत्मानं भाव्यं ससत्तकम् ।
दोषाः क्रमाच्छनैरेव हन्तव्या निजसत्तया ॥९३॥
ततो निष्कण्टके राज्ये कुर्याच्छ्रीकृष्णसेवनम् ।
तेनाऽऽनन्दो महाँश्चापि मुक्तिराज्यं भवेदिह ॥९४॥
इत्येवं राधिकेऽनादिकृष्णनारायणो हरिः ।
उपादिश्य विरराम ददौ मन्त्रं च वैष्णवम् ॥९५॥
तावत् कन्याद्वयं राज्ञो राज्ञ्या सार्कं सभास्थले ।
प्रपूज्य परमं कान्तं जग्राह श्रीहरेः करम् ॥९६॥
विवाहविधिना प्राप्य प्रभुं जाते कृतार्थिके ।
हरिं राजा प्रजाः सर्वे पूजयामासुरेव तु ॥९७॥
भूपतिः कारयामास भोजनं विविधं ततः ।
सर्वे विशश्रमुः सायं रात्रौ चक्रुर्महोत्सवम् ॥९८॥
प्रातरुत्थाय भगवान् फालनादाय सर्वथा ।
उपदावस्तुसर्वस्वं प्रददौ परमेश्वरः ॥९९॥
कृताह्निको दुग्धपानं कृत्वा गन्तुं मनोऽकरोत् ।
तावद्राजा स्तोकहोमो नेतुं कृष्णमुपाययौ ॥१००॥
फेनतन्तुं समापृच्छय हरिः सज्जोऽभवद् द्रुतम् ।
राजदत्तां परिगृह्य पूजां विमानगोऽभवत् ॥१०१॥
अन्ये सर्वे महीमाना विमानगास्तदाऽभवन् ।
विदायतूर्यनिनदास्तदा जयरवैः सह ॥१०२॥
अम्बरे दिक्षु सर्वत्राऽव्याप्नुवन् प्रजया कृताः ।
हर्षनादाः समभवन् शृण्वन् तान् श्रीहरिर्ययौ ॥१०३॥
स्तोकहोमनृपराज्यं स्वादुवदनराष्ट्रकम् ।
समुद्रखाडिकां मुक्त्वा देशं ददर्श सौभगम् ॥१०४॥

राजा ययौ पुरस्तत्र स्वागतार्थं हरेः खलु ।
ऋषिः स्वादननामापि ययौ पुरस्तदाऽम्बरात् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने फेनतन्तुनृपस्य त्रिनयानगर्यां श्रीहरेरवतरणं भ्रामणं पूजनम् उपदेशनं भोजनं विश्रमणं रात्र्यनन्तरं भाद्रकृष्णाऽमायां प्रातर्दुग्धपानोत्तरं स्तोकहोमनृपराष्ट्रागमनमित्यादिनिरूपणनामा षण्णवत्यधिकशततमोऽध्यायः ॥ १९६ ॥

श्रीकृष्ण उवाच—

राधिके स्वादनर्षिश्च स्तोकहोमो नृपोऽपि च ।
अम्बरादवतीर्यैव महोद्याने विशालके ॥ १ ॥
उमापुर्याः सन्निधौ स्वागतार्थं ययतुर्द्रुतम् ।
सैन्यमादाय तूद्याने तिष्ठतः संप्रतीक्षतः ॥ २ ॥
राजदर्शितमार्गेणाऽवातारयद् विमानकम् ।
हरिश्चान्ये विमानानि तदुद्यानेऽवतारयन् ॥ ३ ॥
तदा वाद्यान्यवाद्यन्त जयनादास्तथाऽभवन् ।
प्रजानां हर्षनादाश्च कीर्तनानि तदाऽभवन् ।
विमानं फलपुष्पाद्यैः प्रजाभिः संप्रवर्धितम् ॥ ४ ॥
हरिर्लाजाऽक्षताद्यैश्च वर्धितः स्वागतीकृतः ।
श्रीहरिर्मध्यभागाच्च विमानाद् बहिराययौ ॥ ५ ॥
राजा पुपूज वै भक्त्या स्वर्णकौसुमशेखरैः ।
हारै रत्नमयैः पौष्पैर्गुच्छैश्चन्दनवारिभिः ॥ ६ ॥
सुगन्धसारैर्विविधैः पादप्रक्षालनेन च ।
पपौ पादजलं चापि कुटुम्बेन समन्वितः ॥ ७ ॥
प्रधानाद्यैश्च सहितः प्रजाभिः सहितस्तथा ।
अथ राजा तु पितरौ हरेः पुपूज वै ततः ॥ ८ ॥
राज्ञी ब्रह्मप्रियाः सर्वाः पुपूज परमेश्वरीः ।
राजाऽऽनर्चेशानदेवं कन्या गौरीं पुपूज च ॥ ९ ॥
ऋषिर्महर्षीनानर्च भूभृत्तदा हरिं प्रभुम् ।
न्यषादयन्नरयाने शेषवस्त्रस्वर्णमण्डिते ॥१०॥
फणासहस्रशोभाढ्ये षष्टिमानववाहिते ।
अन्यान् न्यषादयद् राजा शकटीषु नवासु च ॥११॥
ततस्तूर्यनिनादैर्हि यशोगानैः सुगीतिभिः ।
निनादितासु त्वाशासु हरिः स्वागतशोभितः ॥१२॥
उमापुर्यां विचचार पावयितुं प्रतिस्थलम् ।
गोपुरे राजपुरुषैर्वर्धितो रत्नमण्डनैः ॥१३॥
पुरीमध्ये भृत्यवर्यैः श्रेष्ठिभिश्च महापथे ।
गृहिभिश्चांगणेष्वेव सर्वत्र प्रजया तदा ॥१४॥
वर्धितः पूजितः कृष्णो ययौ ददन् स्वदर्शनम् ।
पूजां प्राप्य ततः सैन्यसहितः स्वनिवासनम् ॥१५॥
आययौ जलपानादि चकार नृपनोदितः ।
कुटुम्बं जलपानादि चक्रे तथाऽपरेऽपि च ॥१६॥
जलपानादिकं चक्रुरथ कृष्णः सभास्थले ।
राजसिंहासने स्थित्वा निषद्योपादिदेश ह ॥१७॥
प्रजाभिः सर्वथा भाव्यं परमेश्वरहेतवे ।
राजभिः सर्वथा भाव्यं प्रजान्तर्यामिहेतवे ॥१८॥
उभाभ्यां सर्वथा भाव्यं मिथोऽन्तर्यामिहेतवे ।
उभयत्र विराजेऽहं मां यजन्तु समाहिताः ॥१९॥
तेन युष्मद्विजयश्च मुक्तौ मुक्तौ भविष्यति ।
साधून् संपूजयेन्नित्यं स्पर्धां तत्र परित्यजेत् ॥२०॥
न च कामाद् भयाल्लोभात्क्रोधाद्वा धर्ममुत्सृजेत् ।
अमानिना सत्यवाचा भाव्यं जितात्मना तथा ॥२१॥
तस्यैवं वर्तमानस्य भूतिर्भवति शाश्वती ।
तेजो धैर्यं क्षमा शौचमनुरागः स्थितिर्धृतिः ॥२२॥
एतान् गुणान् समाश्रित्य वर्तितव्यं हि मुक्तये ।
कृतप्रज्ञश्च मेधावी बुधः सर्वात्मदर्शकः ॥२३॥
सर्वसत्कर्मशुद्धश्च विज्ञश्चात्मपरात्मनोः ।
सुहृदात्मा विरागश्च मल्लोके गन्तुमर्हति ॥२४॥
सत्यवाक् शीलसम्पन्नः सत्तपो ब्रह्मसंस्मरः ।
सन्तुष्टः सत्यव्रतवान् मल्लोके गन्तुमर्हति ॥२५॥
सान्त्वनं वचनं चैकपदं गुणैर्विभूषितम् ।
आचरन् पुरुषः सौख्यं लभेत् सर्वत्र सृष्टिषु ॥२६॥
साम मे स्तवनं प्रोक्तं सान्त्वनं च तदेव तत् ।
जनानां सान्त्वनं चापि हृदिस्थस्य ममैव तत् ॥२७॥
तेन तुष्यामि सततं सान्त्वकीर्तनसेवनैः ।
सान्त्वं चैकपदं सर्वभूतानां सुखदं सदा ॥२८॥
सुकृतस्य हि सान्त्वस्य श्लक्ष्णस्य मधुरस्य च ।
सम्यगासेव्यमानस्य जिह्वायां संवसाम्यहम् ॥२९॥
व्यवहारेण शुद्धेन हृदये संवसाम्यहम् ।
उभाभ्यां सन्निधौ तस्य चागत्य गोचरो यथा ॥३०॥
भवाम्येव तथा नित्यं करोम्यस्य शुभं न्वहम् ।
एवं तिष्ठामि सततं धार्मिकेषु जनेष्वहम् ॥३१॥
धार्मिकैश्च जनैर्यत्र स्वकीया वसतिः कृता ।
तत्र गूढो वसाम्येव तेषां रक्षणहेतवे ॥३२॥

यष्टव्यं क्रतुभिस्तैश्च दातव्यं दानयोगिने ।
अनाथरक्षणं कार्यं न कार्यं धर्मबाधकम् ॥३३॥
कृपणाऽनाथवृद्धानां योषितां सेविनां तथा ।
योगः क्षेमस्तथा वृत्तिः कल्पनीया हि धार्मिकैः ॥३४॥
आश्रमेषु यथाकालं चैलभाजनभोजनम् ।
दातव्यं तैः प्रजाजनैर्नृपेण श्रेष्ठिनाऽपि च ॥३५॥
सर्वार्थत्यागिनं सन्तं मोक्षदं शास्त्रसंवृतम् ।
पूजयेच्छ्रेय इच्छन् वै शयनासनभोजनैः ॥३६॥
दस्यवोऽपि घातकाश्च विश्वसन्ति तथाविधे ।
पापनाशकरे शुद्धे साधौ मोक्षप्रदे गुरौ ॥३७॥
सर्वश्रेयस्करे साधौ विश्वसन्ति वनस्थिताः ।
आरण्यकाश्च पशवः सिंहाः क्रूरादयोऽपि च ॥३८॥
शान्तिं लभन्ते तत्रैव यत्र साधुनिवासनम् ।
ऋतवोऽपि सत्त्ववृत्ता भवन्ति साधुसंगमे ॥३९॥
भूतानि सत्त्वयुक्तानि जायन्ते साधुसन्निधौ ।
अहं यस्माद् वसाम्येव साधूनां हृदयेऽन्वहम् ॥४०॥
तेषां सेवनतः सेवा मम संजायते शुभा ।
फलं यत्सेवनस्यैव जायते साधुसेवनात् ॥४१॥
यथादेशं यथाकालं यथाबुद्धि यथाबलम् ।
साधून् सेवेत सततं धर्मार्थी मोक्षलालसः ॥४२॥
यथा श्रेयो भवेन्नैजं तथा सेवेत क्षेमवत् ।
तथा कर्माणि कुर्वीत साधुस्तुष्टो भवेद् यथा ॥४३॥
ये भूतान्यनुगृह्णन्ति शिक्षयन्ति वृषादिकम् ।
ते साधवः सदा रक्ष्या राष्ट्रे राज्ञा विपश्चिता ॥४४॥
धनी संपूजयेन्नित्यं पानाच्छादनभोजनैः ।
साधुं प्रजानियन्तारं धर्मस्य शासकं शुभम् ॥४५॥
प्रायो धनी धार्मिकश्च तपोयुक्तान् प्रपूजयेत् ।
बुद्धिमान् साधुपुरुषं रक्षेत् स्वनगरे सदा ॥४६॥
सत्यमार्जवमक्रोधं भक्तिं धर्मं विरागिताम् ।
पालयन्तः साधवस्ते राष्ट्रक्षेमकरा मताः ॥४७॥
किं छिद्रं कस्य संगो मे किं वा करोमि साधनम् ।
कुतो मां नाश्रयेद् दोषः इति विद्वान् विचिन्तयेत् ॥४८॥
राजा साधून् रक्षयेद्वै सर्वदोषहरा हि ते ।
धर्माय राजा भवति लोकरक्षणहेतवे ॥४९॥
राजा चरति चेद्धर्मं देवत्वायैव कल्पते ।
राजा चरत्यधर्मं चेन्नरकायैव कल्पते ॥५०॥
धर्मे तिष्ठन्ति भूतानि धर्मो राजसु तिष्ठति ।
तं राजा साधु यः शास्ति स राजा रक्षको मतः ॥५१॥
राजा परमधर्मात्मा साधुर्धर्मः स उच्यते ।
स्वधर्मे वर्तमानानामर्थसिद्धिः प्रदृश्यते ॥५२॥
तमेव मंगलं धर्मं लोकः समनुवर्तते ।
ममेदमिति नैवाऽस्ति साधूनां धर्मशालिनाम् ॥५३॥
ऋषयः साधवो वीक्ष्य लोकक्षेमं समन्ततः ।
असृजन्त महद्भूतं ह्ययं धर्मो भविष्यति ॥५४॥
यस्मिन् धर्मो विराजेत स राजा रक्षको मतः ।
धर्मे वर्धति वर्धन्ते सर्वभूतानि सौख्यतः ॥५५॥
तस्मिन् ह्रसति हीयन्ते तस्माद्धर्मं प्ररक्षयेत् ।
प्रभवार्थं हि भूतानां धर्मः सृष्टः स्वयंभुवा ॥५६॥
साधौ धर्मः प्रभवति रक्ष्यास्तस्माद्धि साधवः ।
धर्मस्य साधवो योनिस्तस्मात्तान् पूजयेत् सदा ॥५७॥
मत्तात्प्रमत्तात् पौगण्डादुन्मत्ताद्व्यसनाश्रयात् ।
मायिकाच्च शठाद्धूर्ताल्लम्पटात्कितवात्मकात् ॥५८॥
दूरे भवन्ति सततं साधवो निर्मला यतः ।
तारयन्ति निमग्नांश्च प्रापयन्ति च मामपि ॥५९॥
तस्माद् रक्ष्याः पूजनीयाः सेवनीयाः हि साधवः ।
अत्यागं चाभिमानं च दंभं क्रोधं च वर्जयेत् ॥६०॥
कृतं त्रेता द्वापरं च कलिश्च युगतुर्यता ।
राजाधिनानि सर्वाणि राजैव युगमुच्यते ॥६१॥
सुधर्मात्मा नृपः श्रेष्ठः कृतं युगं स तूच्यते ।
अधर्मात्मा भवेद् राजा साधवस्त्वपयान्ति वै ॥६२॥
विपदोऽपि भवेयुर्वै राष्ट्रे तत्र समन्ततः ।
अधर्मभूते नृपतौ सर्वे सीदन्ति जन्तवः ॥६३॥
यस्य नास्ति गुरुर्धर्मे न च साधून् सुपृच्छति ।
स्वयं चापारदर्शी च न चिरं सुखमश्नुते ॥६४॥
गुरुप्रधानो धर्मेषु साधुधर्मे स्वयं स्थितः ।
धर्मप्रधानो नृपतिः सुखमक्षयमश्नुते ॥६५॥
तस्माद् प्रजाभिः सततं राज्ञा च धर्मवर्मणि ।
वर्तितव्यं साधुसंगे येन भुक्तिश्च मोक्षणम् ॥६६॥
इत्युक्त्वा श्रीहरिः कृष्णो विररामाऽथ वै ततः ।
भूपतिः पूजयामास प्रजाः पुपूजुरादरात् ॥६७॥
अथ श्रीबालकृष्णं तं स्तोकहोमस्य कन्यका ।
मातृवाक्यं परिपाल्य कृष्णहस्तमुपाददे ॥६८॥
कृतकृत्याऽभवद् गौरी राजोत्सवं चकार ह ।
हरिं संभोजयामास कुटुम्बं महीमानकान् ॥६९॥
विशश्रमुस्ततः सर्वे प्रजाः स्वस्वालयान् ययुः ।
रात्रौ नृत्यादि च राजाऽकारयन्महदुत्सवे ॥७०॥

भोजनं चाथ विश्रान्तिं जगृहुश्च ततः परम् ।
प्रातरुत्थाय भगवान् कृताह्निकः सुपूजितः ॥७१॥
कृतदुग्धादिपानश्च सज्जोऽभूद् गन्तुमच्युतः ।
राजा ददावुपदाश्च सैन्येन सह शोभनः ॥७२॥
विदायं प्रददौ चापि तूर्यनादास्तदाऽभवन् ।
हरिर्विमानमारुह्य शृण्वन् जयध्वनीन् शुभान् ॥७३॥
गौरीणां गीतिकाश्चापि सर्वैर्विमानवासिभिः ।
प्रययौ चाम्बरात्तूर्णं काष्ठयाननृपस्य वै ॥७४॥
राष्ट्रं नाररवर्षिश्रं सागरान्तं महायतम् ।
तुन्नयामानगर्याः सन्निधौ वृक्षाधिवासिते ॥७५॥
उद्याने काष्ठयानश्च राजा पुरो ययौ तथा ।
नाररवमुनिश्चापि स्वागतार्थं हरेर्ययौ ॥७६॥
इत्येवं राधिके राजा सैन्ययुक्तोऽभवत्पुरः ।
सर्वाः प्रजास्तथा कृष्णसन्मानार्थे समाययुः ॥७७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने स्तोकहोमस्य उमापुर्यां हरेरवतरणं भ्रमणं पूजनम् उपदेशनं भोजनं रात्रौ विश्रमणं भाद्रशुक्लप्रतिपदि प्रातस्ततः काष्ठयाननृपतिराष्ट्रागमनमित्यादिनिरूपण-नामा सप्तनवत्यधिकशततमोऽध्यायः ॥ १९७ ॥

श्रीकृष्ण उवाच—

अथ राधे बालकृष्णं काष्ठयानो नृपस्तदा ।
आदिदेशाऽवतरितुं विमानेन युतं हरिम् ॥ १ ॥
हरिर्विमानमाकाशादुद्याने समतारयत् ।
अन्यान्यपि विमानानि चावतेरुस्तदाऽम्बरात् ॥ २ ॥
सैन्यवाद्यान्यवाद्यन्त जयनादास्ततोऽभवन् ।
प्रजाभिर्वर्धितः कृष्णनारायणो जहर्ष च ॥ ३ ॥
चन्दनाक्षतकुसुमैर्हारकाद्यैश्च पूजितः ।
राज्ञा च प्रजया चापि मुनिनाऽर्चित ईश्वरः ॥ ४ ॥
आययौ स विमानाद्वै बहिः प्रसन्नतान्वितः ।
अभयं प्रददन् प्रेम्णा करेण कृष्णवल्लभः ॥ ५ ॥
काष्ठयानो महाराजो हरेर्हारं गले ददौ ।
कोटिहीरकमूल्याढ्यं पादौ पुपूज चन्दनैः ॥ ६ ॥
पपौ जलं प्रसादोत्थं कुटुम्बं चाप्यपूजयत् ।
श्यामाश्वस्यन्दने कृष्णं न्यषादयन्मुदान्वितः ॥ ७ ॥
रात्रा छत्रं दधाराऽथ कुमारौ चामरे शुभे ।
तदा जयस्य निनदाः प्रभाभिरभिघोषिताः ॥ ८ ॥
गौरीभिः पुष्पमालाभिश्चाक्षतैर्वर्धितः प्रभुः ।
अथाऽन्यान् वै महीमानान् वाहनेषु शुभेषु च ॥ ९ ॥
राजा न्यषादयत् सम्यगुच्चावचेषु वै तदा ।
तुन्नवायानगर्यां श्रीहरिं त्वभ्रामयन्नृपः ॥१०॥
राज्ञा गोपुरमध्ये च समर्चितः परेश्वरः ।
प्रधानैः पञ्चवर्तिभिर्नीराजितश्च पूजितः ॥११॥
श्रेष्ठिभिः पूजितो मध्ये नगर्या हृदयांगणे ।
आपणेषु प्रजाभिश्च पूजितः फलनाणकैः ॥१२॥
गृहे गृहे च गौरीभिरर्चितः प्राणधारकः ।
एवं वै नगरीं सर्वां भ्रमित्वा भगवान् स्वयम् ॥१३॥
आजगाम निवासं स्वं राजोद्याने च मन्दिरम् ।
तत्राऽभवत्सभा रम्या लोकानां भगवान् स्वयम् ॥१४॥
पूजां प्राप्य प्रजाभ्यश्चोपादिदेश हितावहम् ।
संसारसागरश्चास्ति शीतोष्णादिप्रदः सदा ॥१५॥
निमज्जमानं स्पृशति दोषनक्रनखादिकम् ।
तरितुं नौस्वरूपा वै भवन्ति खलु साधवः ॥१६॥
तारयन्ति करे धृत्वा भवसागरमज्जितान् ।
भगवान् हृदये येषां नित्यं वसामि मोक्षदः ॥१७॥
ते पूज्याः साधवो धीरा हृदयं मे यतो मताः ।
साधुपक्षे विजयः स्यादैहिकः पारमार्थिकः ॥१८॥
असाधुयुक्तो विजयो ह्यध्रुवोऽस्वर्ग्य एव च ।
सादयत्येव जयिनं संसारे घोरकर्दमे ॥१९॥
यस्तु धर्मविलोपेन मर्यादालोपनेन च ।
साधुवाक्योल्लंघनेन कुर्यात्तन्न सुखावहम् ॥२०॥
यस्य लोकाः प्रसन्नाश्चातिथयः पूजयाऽर्हिताः ।
सन्तुष्टं च कुटुम्बं च नारायणो गृहेऽस्य वै ॥२१॥
साधवो गुरवश्चाचार्याश्चान्ये पूज्यमानवाः ।
सत्यश्च पूजिता यस्य तस्य गृहे वसाम्यहम् ॥२२॥
निग्रहेण तु पापानां साधूनां संग्रहेण च ।
भक्त्या यज्ञेन दानेन सेवयाऽहं वशी सदा ॥२३॥
साध्वर्थे चापि मोक्षार्थे हर्यर्थे यश्च युध्यति ।
आत्मानं यूपमुत्सृज्य स यज्ञोऽनन्तदक्षिणः ॥२४॥
मदर्थे त्यक्तमानादिर्मदर्थे दीक्षितश्च यः ।
सोऽश्नुते सर्वकामान् वै सर्वार्थप्रदुहोऽक्षयान् ॥२५॥
दुष्टाँस्त्यक्त्वा ततः साधोः संगतिं सर्वदाऽऽचरेत् ।
दुष्टान् भावैर्विजानीयाल्लिंगैः परोक्षगोचरैः ॥२६॥
परोक्षमगुणानाह सद्गुणानभ्यसूयते ।
परैर्वा कीर्त्यमानेषु तूष्णीमास्ते पराङ्मुखः ॥२७॥

निःश्वासं चौष्ठसंदंशं शिरसश्च प्रकम्पनम् ।
करोत्यभीक्ष्णं विमना भाषते विपरीतकम् ॥२८॥
परोक्षे तु विकुरुते प्रत्यक्षे नाभिभाषते ।
पृथगुक्त्वा च मृद्नाति नेदृगिदं पुनः पुनः ॥२९॥
आसने शयने याने विरुद्धं परिवर्तते ।
यस्मिँस्तत्र प्रविज्ञेयं दुष्टत्वं सहवासतः ॥३०॥
आर्तिरार्ते प्रिये प्रीतिरेतावन्मित्रलक्षणम् ।
विपरीतं तु बोद्धव्यं सदा दुष्टारिलक्षणम् ॥३१॥

साधवः सुहृदो मित्रवर्या आत्महितैषिणः ।
पापहा मोक्षदाः सन्ति सेवनीया विशेषतः ॥३२॥
स्वयं चापि विवेकेन वर्तितव्यं तदग्रतः ।
हृदयेऽपि विवेकं वै कुर्यादनित्यवस्तुनः ॥३३॥
अनित्यं सर्वमेवैतन्ममाऽहंकारसंभृतम् ।
नामरूपं यदस्त्येव सर्वं तन्नास्ति चोत्तरे ॥३४॥
एवं विवेकवान् नष्टे व्यथते न कदाचन ।
प्राप्ते न हर्षवानास्ते गत्वरे का नु देवना ॥३५॥
आपदं प्रगतश्चापि व्यथते न विवेकवान् ।
भूतं गतं भविष्यं तु नागतं वर्तते तु यत् ॥३६॥

ह्रसमानं प्रयात्येव सर्वं तन्न भविष्यति ।
एवं विदितवेद्यस्तु नहि शोकाय कल्पते ॥३७॥
आगतं तद्विनश्येत ज्ञात्वैवं को नु संज्वरेत् ।
शोकमूलं ततः सर्वं ज्ञात्वा शोकं परित्यजेत् ॥३८॥
क्व नु वृद्धा गता ये तु पिता पितामहादयः ।
सर्वे ध्रुवा न विद्यन्ते ज्ञात्वैवं को नु संज्वरेत् ॥३९॥
बाला मध्यवयसश्च ततो वृद्धाश्चिरायुषः ।
लक्षाधिलक्षकोट्यब्दा मरिष्यन्ति न संशयः ॥४०॥
तथापि महतीं तृष्णां विमुञ्चन्ति न देहिनः ।
विचार्यैवं च तां त्यक्त्वा कुर्वीत प्रियमात्मनः ॥४१॥

अनागतं न मे चास्ति क्रान्तं मे नहि वर्तते ।
अस्ति मे न ललाटेऽस्ति तस्मात् साधुर्भवेत् सदा ॥४२॥
अनाढ्याश्चापि जीवन्ति राजानोऽपि तथैव च ।
राजसु व्याधिबाहुल्यं नाऽनाढ्येऽतोऽधनः सुखी ॥४३॥
एवं मत्वा न शोचेत कालः सर्वत्र वै समः ।
भोक्तारोऽन्येऽर्जयितारोऽपरे चिन्तापराः परे ॥४४॥
सर्वभोग्येषु लोकेऽत्र दृष्ट्वैवं न शुचश्चरेत् ।
पूर्वदत्तं परस्मिँश्च प्राप्येतेति स्थितिर्ध्रुवा ॥४५॥
अदत्तं चापि वाञ्छन्ति विना यत्नं लषन्ति च ।
हीनभोग्यो जनः सोऽज्ञं गर्हते न निजं क्वचित् ॥४६॥

ईर्ष्याभिमानसम्पन्नस्तूद्वेगं लभते ततः ।
एतस्मात् कारणाद् व्यक्तौ दुःखं भूयोऽनुवर्तते ॥४७॥
सहनीया परा लक्ष्मीर्या नास्ति स्वललाटके ।
यतितव्यं तदर्थं वा यत्नफला रमा यतः ॥४८॥
अन्यत्रापि सतीं लक्ष्मीं कुशला भुञ्जते सदा ।
अभिनिस्पन्दते श्रीर्हि यत्नवन्तं प्रभाविनम् ॥४९॥
श्रियं च पुत्रपौत्राँश्च कन्यां च पृथिवीमपि ।
उत्पाद्य परभोग्यानि स्वयमेव त्यजन्ति हि ॥५०॥

अकाम्यान् कामयानोऽर्थान् पराधीनानुपद्रवान् ।
त्यक्त्वा भवेत्तु संकल्पान् सुखी साधुर्यथाऽग्रही ॥५१॥
अनर्थास्त्वर्थरूपा वै अर्थाश्चानर्थरूपिणः ।
भवन्त्येव यथाभाग्यं तत्र प्राज्ञो न विश्वसेत् ॥५२॥
अर्थायैव तु केषाञ्चित् सर्वनाशो भवत्यपि ।
अनर्थायैव केषाञ्चिद् बहुलाभो भवत्यपि ॥५३॥
अज्ञश्चानन्तलुब्धश्च सुखं मत्वा प्रसज्जते ।
रममाणः श्रिया पश्चान्नान्यच्छ्रेयोऽभिमन्यते ॥५४॥
अकस्मात्तु श्रियो नाशे समारंभो विनश्यति ।
तदा निर्विद्यते सोऽर्थात् परिभग्नमनोरथः ॥५५॥

धर्ममेके चरन्त्येव कल्याणाभिजना भुवि ।
परत्र सुखमिच्छन्तो निर्विद्यन्ते तु लौकिकात् ॥५६॥
धनमेकेऽर्जयन्त्येव महालोभाभिमर्दिताः ।
जीवितार्थे हि मन्यन्ते पुरुषार्थं धनं च ते ॥५७॥
ज्ञात्वा तेषां कृपणतां ज्ञात्वा तेषामबुद्धिताम् ।
अध्रुवे जीविते मोहादर्थदृष्टिमुपाश्रितान् ॥५८॥
निष्फलान् तप्यमानाँश्च ज्ञानवर्जितमानवान् ।
विलोक्याऽन्धतमःक्षिप्तान् को नु दद्यान्मृषा मनः ॥५९॥
नियच्छतेन्द्रियाण्येभ्यो यच्छतापि मनो निजम् ।
संयच्छत गिरोऽप्येभ्यो विषयेभ्यो विचारतः ॥६०॥

भवत प्रतिषेद्धारस्तदा जयो भविष्यति ।
भावेषु क्षणमात्रेषु प्रज्ञातृप्तो न शोचति ॥६१॥
अल्पे तृप्तो मृदुर्दान्तो ब्रह्मशीलो न शोचति ।
नृशंसवृत्तिं पापिष्ठां प्राप्तः शोकान्न मुच्यते ॥६२॥
अपि मूलफलाऽऽजीवो रमते निर्जने वने ।
वाग्यतो मत्परो भक्तः सर्वार्पणः सुखी जनः ॥६३॥
मनीषया विनिगृह्येषणाः सुखी गृही भवेत् ।
यथैको रमतेऽरण्येष्वारण्येनैव तुष्यति ॥६४॥
महापुरुषतृप्तश्च स्वात्मनैव प्रसीदति ।
साधुवद्वर्तमानस्य सर्वं दुःखं परात्मनि ॥६५॥

हित्वा दंभं च कामं च क्रोधं हर्षं भयं तथा ।
साधून् प्रसेव्य देहाद्यैः शाश्वतं सुखमर्जयेत् ॥६६॥
साधुसेवा परं पुण्यं सर्वपुण्याधिकं मतम् ।
असंशयं पुण्यशीलः प्राप्नोति परमां गतिम् ॥६७॥
मातापित्रोर्गुरूणां च पूजा बहुमता मम ।
इह युक्तो नरो लोकान् यशस्तु महदश्नुते ॥६८॥
यच्च तेऽभ्यनुजानीयुः कर्तव्यं पूजिताः खलु ।
धर्म्यं धर्मविरुद्धं वा तत्कर्तव्यं सुतादिभिः ॥६९॥
न च तैरभ्यनुज्ञातो धर्ममन्यं समाचरेत् ।
यं च तेऽभ्यनुजानीयुः स धर्म इति निश्चयः ॥७०॥
एते एव त्रयो लोकास्त्रयोऽग्नयश्च ते मताः ।
त्रयो वेदास्त्रयाश्रमाश्च तन्मतस्था जयन्ति वै ॥७१॥
पिता वै गार्हपत्योऽग्निर्माता वै दक्षिणोऽनलः ।
गुरुश्चाहवनीयाग्निः साग्नित्रेता गरीयसी ॥७२॥
त्रिष्वप्रमाद्यन्नेतेषु त्रीन् लोकान् विजयेत वै ।
पितृवृत्त्या त्विमं लोकं मातृवृत्त्या दिवं तथा ॥७३॥
ब्रह्मलोकं गुरुवृत्त्या जयेत नात्र संशयः ।
नित्यं परिचरेत्त्वेतान् तद्वैसुकृतमुत्तमम् ॥७४॥
सर्वे तस्याऽऽदृता लोका यस्यैते त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याऽफलाः क्रियाः ॥७५॥
अमानिता नित्यमेव यस्यैते गुरवस्त्रयः ।
न चायं न परोलोकस्तस्य क्षेमाय जायते ॥७६॥
न चात्र वा परे लोके यशस्तस्य प्रवर्तते ।
न चान्यदपि कल्याणं चोभयत्राऽस्य जायते ॥७७॥
दशश्रोत्रियतः श्रेष्ठः सदाचार्यो हि विद्यते ।
दशाचार्येभ्य एवात्रोपाध्यायः श्रेष्ठ उच्यते ॥७८॥
दशोपाध्यायतः श्रेष्ठः पिता सर्वत्र वर्तते ।
दशपितॄत्तमा माता सर्वपृथ्वीसमा हि सा ॥७९॥
गुरुर्माता यथा प्रोक्ता नास्ति मातृसमो गुरुः ।
गुरुर्गरीयान् पितृतो मातृतश्चापि सर्वदा ॥८०॥
उभौ हि मातापितरौ जन्मदौ शरीरसृजौ ।
गुरुर्ज्ञानप्रदो दिव्यो दिव्यज्ञातिकरस्तथा ॥८१॥
गुरुयुक्ता तु या जातिः सा दिव्या साऽजराऽमरा ।
अवध्या हि सदा माता पिता गुरुः सुतादिभिः ॥८२॥
ऋषयश्चापि देवाश्च प्रीयन्ते पितृभिः सह ।
पूज्यमानेषु गुरुषु तस्मात् पूज्यतमो गुरुः ॥८३॥
केनचिन्न च वृत्तेन ह्यवज्ञेयो गुरुर्भवेत् ।
न तेऽवमानमर्हन्ति माता पिता गुरुस्तथा ॥८४॥
न तेषां दूषयेत् कार्यं सत्कारं त्वाचरेत् सदा ।
अवमानप्रकर्तुश्च भ्रूणहत्याघमस्ति यत् ॥८५॥
मित्रद्रुहः कृतघ्नस्य स्त्रीघ्नस्य गुरुघातिनः ।
चतुर्णां निष्कृतिर्नास्ति महामहातिपापिनाम् ॥८६॥
साधवः श्रीहरेर्भक्तास्त्यागिनो गुरवः शुभाः ।
पूजनीया वन्दनीया भोजनीयाः समन्ततः ॥८७॥
तेषु वै धर्मसर्वस्वं सेवितेषु भवेदिह ।
सन्तुष्टेषु सर्वयज्ञा भवन्तीह न संशयः ॥८८॥
एवं गुरून् पूजयित्वाऽऽराधयित्वा च मां सदा ।
भुक्तिं मुक्तिं लभध्वं वै मत्प्रसादाज्जना इह ॥८९॥
इत्युक्त्वा भगवान् राधे विरराम ततो नृपः ।
पुपूज श्रीहरिं नीराजनाद्यैस्तु कृतादरः ॥९०॥
पुपूजुश्च प्रजा सर्वा बहुभिर्वस्तुभिस्तदा ।
राज्ञी पूजां चकारापि राजकन्या कुमुद्वती ॥९१॥
हरेर्हस्तग्रहं चक्रे विवाहविधिना तदा ।
महोत्सवं नृपश्चक्रे परिहारं चकार ह ॥९२॥
भोजयामास नृपतिर्हरिं प्राघूणिकाँस्ततः ।
विश्रम्य च निशां यापयित्वा प्रातः कृताह्निकः ॥९३॥
हरिः सज्जोऽभवद् गन्तुं कोलकक्ष्मेशराष्ट्रकम् ।
कृतदुग्धादिपानश्च कृतार्चनो विमानकम् ॥९४॥
समारुरोह सर्वेऽपि चारुरुहुस्ततोऽम्बरे ।
जयनादैः सह कृष्णो लेपनादर्षिसंयुतः ॥९५॥
लेपदेशान् ययुः शीघ्रं मानितो मानवैस्तदा ।
राजा स्वागतसिद्ध्यर्थं ययौ पुरोतिभावतः ॥९६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने काष्ठयान-नृपस्य तुन्नवायापुर्यां श्रीहरेर्भ्रमणं पूजनमुपदेशनं भोजनं निशोत्तरं प्रातः कोलकनृपराष्ट्राभिगमनमित्यादिनिरू-पणनामाऽष्टनवत्यधिकशततमोऽध्यायः ॥ १९८ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके श्रीमद्बालकृष्णो हरिः स्वयम् ।
लेपराष्ट्रनृपं सैन्यसहितं भुव्यलोकयत् ॥ १ ॥
स्वागतार्थं स्थितं नैजे महोद्यानेऽतिविस्तृते ।
राजदर्शितमार्गेण भगवान् कृष्णवल्लभः ॥ २ ॥
विमानमम्बरात् पृथ्व्यां मुरमाषापुरीतटे ।
विशाले रम्यभागे चावातारयत् सुशोभिते ॥ ३ ॥
अन्यान्यपि विमानानि चावतेरुः समीपतः ।
तदा वाद्यान्यवाद्यन्त जयनादास्तथाऽभवन् ॥ ४ ॥

गौरीणां गीतिकाश्चासन् प्रजानां हर्षघोषणाः ।
विमानाच्च हरिः शीघ्रं बहिस्तत्र समाययौ ॥ ५ ॥
राज्ञा च प्रजया राज्या महर्षिणाऽर्चितः प्रभुः ।
हारैः सुशेखरैः पुष्पैश्चन्दनैरक्षतादिभिः ॥ ६ ॥
अन्येऽपि पूजितास्तत्र महीमानाः प्रजाजनैः ।
नरयाने हरिं राजा निषाद्याऽन्यान् गजादिषु ॥ ७ ॥
सुरमाषानगर्यां चाऽभ्रामयद् बहुमानतः ।
राजवंशः प्रधानाश्च श्रेष्ठिनः पण्डिता अपि ॥ ८ ॥
नरा नार्यो गोपुरादौ राजमार्गे सुसंगमे ।
चत्वरादौ च शालासु पूजयामासुरादरात् ॥ ९ ॥
बह्वीभिस्तूपदाभिश्च स्वर्णरत्नविभूषणैः ।
अनेकदिव्यभूषाभिः कम्बलैश्च धनैस्तथा ॥१०॥
स्थले स्थले प्रचक्रुस्ते नीराजनं समर्हणम् ।
गौर्यः पुष्पादिभिः कृष्णं वर्धयामासुरीश्वरम् ॥११॥
एवं भ्रमित्वा नगरीं राजसौधं स आययौ ।
सभां कृत्वा जनानाह भगवान् हितकारकः ॥१२॥
सच्चिदानन्दरूपो वै परमेशः सनातनः ।
पूजनीयो भजनीयो मानवैर्मोक्षकांक्षिभिः ॥१३॥
सत्यं व्रतं परं साधु न सत्याद् विद्यते परम् ।
हानिदं सत्यमेवापि वक्तव्यं न कदाचन ॥१४॥
अहिंसार्थाय भूतानां धर्मप्रवचनं कृतम् ।
धारणाद् धर्म इत्याहुर्धर्मेण विधृताः प्रजाः ॥१५॥
यः स्याद्धारणसंयुक्तः स धर्म इतिनिश्चयः ।
यः स्यादहिंसासंयुक्तः स धर्म इतिनिश्चयः ॥१६॥
हिंसायां सत्यवचनेऽनृतं धर्म इतिस्थितिः ।
अनृतेऽपि च हिंसायां धर्म इतिस्थितिः ॥१७॥
सत्येऽनृते वा हिंसायां मौनं धर्म इतिस्थितिः ।
जीवरक्षा सत्यशिष्टा सत्यं ब्रह्म यतो मतम् ॥१८॥
चौरेभ्यो न धनं वाच्यं सत्यं तत्र न भूषणम् ।
तेभ्यः सत्यं न चाख्येयं स धर्म इतिनिश्चयः ॥१९॥
अकूजनेन चेन्मोक्षो नाऽवकूजेत् कथंचन ।
अवश्यं कूजितव्ये वा स्वल्पं चानृतमिश्रितम् ॥२०॥
धर्म एव भवेत्तत्र श्रेयस्करं तदाऽनृतम् ।
शपथोऽपि प्रवक्तव्यो यदि चौरैः प्रमुच्यते ॥२१॥
प्राणात्यये विवाहे चानृतं सत्यं तदुच्यते ।
अर्थस्य रक्षणार्थाय परस्य प्राणधारणे ॥२२॥
अनृतं सत्यमेवाऽस्ति धर्मतत्त्वं निगूढकम् ।
साधुभ्यो नाऽनृतं वाच्यं तारकास्ते हि देहिनाम् ॥२३॥
तेष्वनृतं सदा पापं सत्यपूतं ततो वदेत् ।
सत्यं ब्रह्मस्वरूपं वै व्रतं श्रेष्ठतमं मतम् ॥२४॥
कर्मणा मनसा वाचा सत्यं धर्मं समाचरेत् ।
सत्यव्रतस्य दुःखानि नोपयान्ति कदाचन ॥२५॥
संयतात्मा वितृष्णश्च दुःखदुर्गं तरत्यपि ।
दंभाचारविहीनश्च विषयाणां विनिग्रही ॥२६॥
अहिंसको नातिवादी दुःखदुर्गं तरत्यपि ।
दाता याचकताहीनोऽतिथिसंपूजकस्तथा ॥२७॥
अनसूयोऽतिसेवाकृत् मातापित्रोर्गुरोः सताम् ।
पापहीनो न्यायवृत्तिर्दुःखदुर्गं तरत्यपि ॥२८॥
सत्यव्रतोऽन्यकष्टस्य निवारकः शुचिः स्थिरः ।
कुहकेन विहीनश्च दुःखदुर्गं तरत्यपि ॥२९॥
तापसो ब्रह्मवर्चस्कः शान्तः सत्त्वातिवर्तनः ।
त्रासशून्योऽभयदश्च दुःखदुर्गं तरत्यपि ॥३०॥
समदृष्टिश्च सर्वत्र परश्रीवर्धकस्तथा ।
ग्राम्यार्थविनिवृत्तश्च दुःखदुर्गं तरत्यपि ॥३१॥
सर्वदेवनमोयुक्तः सदा कृष्णकथाश्रवः ।
श्रद्धधानः शान्तचित्तो दुःखदुर्गं तरत्यपि ॥३२॥
अमानी मानदो मान्यो देवर्षिपितृपूजकः ।
अक्रोधः क्रोधशमनो दुःखदुर्गं तरत्यपि ॥३३॥
जितजिह्वो जितशिश्नो जितनारायणोऽपि च ।
जिततृष्णो जितवृत्तिर्दुःखदुर्गं तरत्यपि ॥३४॥
यत्राऽहं पद्मरक्ताक्षः पीतवासा जनार्दनः ।
सुहृद् भ्राता च मित्रं च सम्बन्धी च सुखप्रदः ॥३५॥
काम्भरेयो बालकृष्णो गोपालबालकोऽच्युतः ।
स्थितोऽस्मि हितकृद् यत्र भक्तस्य हृदि सन्निधौ ॥३६॥
ब्रह्मप्रियाप्रियः कान्तः श्रीपतिर्यत्र चास्मि तम् ।
मां हरिर्यश्चाश्रयति दुःखदुर्गं तरत्यसौ ॥३७॥
सत्योऽहं सत्यधर्मोऽहं दुःखानां नाशकोऽप्यहम् ।
मां विदित्वाऽऽश्रयन्तश्च दुःखदुर्गं तरन्त्यपि ॥३८॥
तस्माद् भजत मां नित्यं मामेवाप्स्यथ धाम्नि मे ।
इत्युक्त्वा प्रददौ मन्त्रं भगवान् शरणार्थिने ॥३९॥
राज्ञे चापि प्रजाभ्यश्च ततो राजाऽर्चयद्धरिम् ।
राज्ञी कन्यायुता कृष्णं राधे प्रापूजयत्तदा ॥४०॥
कन्यैका कृष्णकान्तं तं करे जग्राह भावतः ।
विवाहविधिना प्राप्य कृतकृत्या बभूव ह ॥४१॥
सभां विसर्जयित्वैव स राजा महीमानकान् ।
भोजयामास विविधान्नानि रस्य फलानि च ॥४२॥

उत्सवं सुभगं चक्रे राजा भाद्रस्य चार्जुने ।
तृतीयाया निशायां च विशश्रमुस्ततः परम् ॥४३॥
सर्वे प्रातः कृतस्नानाश्चक्रुः पायसभोजनम् ।
तावद् गांगेयपुत्र्यश्चाययुस्त्वर्थयितुं हरेः ॥४४॥
नारायणं नमस्कृत्य कन्यास्ता वरदानकम् ।
वव्रिरे बालकृष्णाद्वै तीर्थीकर्तुं सरिद्वराः ॥४५॥
स्नाहि नारायण कृष्णवल्लभश्रीपते जले ।
सर्वा वयं भविष्यामस्तीर्थात्मिकास्तवाप्लवात् ॥४६॥
हरिस्तथास्त्विति प्राह धृत्वा रूपाण्यनेकशः ।
कृपया प्रययौ शीघ्रं स्नातुं नदीषु वै तथा ॥४७॥
सरस्सु च समुद्रेषु ययावनेकरूपधृक् ।
तथैकरूपतः कृष्णो राजते राजसन्निधौ ॥४८॥
कोलकाख्यो महाराजो दिव्यदृष्ट्या प्रदत्तया ।
सर्वं पश्यति तत्रैव मुरमाषास्थितोऽपि सन् ॥४९॥
हरिः सस्नौ नीपरायां निस्तारायां तथा तदा ।
पृथायां दिनपायां सेविकायां स्नानमाचरत् ॥५०॥
त्रिवरायां राहुणायां सेनायां स्नानमाचरत् ।
इन्दिरायां गवादकवितायां स्नानमाचरत् ॥५१॥
गवादयानानद्यां त्रिगिरायां स्नानमाचरत् ।
दूरानद्यां गुरूणायां मित्रायां स्नानमाचरत् ॥५२॥
सेनायां लववारायां द्विलीनायां तथाऽऽप्लवम् ।
सुकौतुक्यां स्थायिनद्यां चाल्पापायां तथाऽकरोत् ॥५३॥
औदर्यां विष्णुतुल्यायां प्रपीठायां समाप्लवम् ।
नियमानाजले दूनानद्यां च पायुपश्यके ॥५४॥
सरस्यपि लेण्डुगे योनिगे स्नानं समाचरत् ।
त्रिनयायां च हीनायां पंचोरायां समाप्लवम् ॥५५॥
कामायां चापि वोल्गायां दोनायां स्नानमाचरत् ।
आजवाब्धौ श्वेतवार्धौ कृष्णाब्धौ काश्यपेयके ॥५६॥
बालत्रिकेऽब्धौ भगवान् सस्नौ वै युगपत्तदा ।
चत्वारिंशद्रूपधर्ता भगवान् भूतभावनः ॥५७॥
विधाय तीर्थरूपास्ताः कन्यकाश्च सरांसि च ।
उपकन्याश्च वै तत्राद्यात्मिकाः संविधाय च ॥५८॥
शीघ्रं तिरोऽभवत् कृष्णः कोलकालयमाययौ ।
कोलकस्तु तदा कृष्णमाहात्म्यं संबुबोध ह ॥५९॥
अवतारावतार्येव परमात्मा परात्परः ।
सोऽयं नारायणः साक्षाज्जामाता मेऽभवत् प्रभुः ॥६०॥
कृतकृत्योऽहमेवाऽस्मि वसाऽत्र भगवन् सदा ।
ममाऽऽवासे तव योग्ये कृपां कुरु जनार्दन ॥६१॥
इत्येवं चार्थयत्तावन्मध्याह्नः समजायत ।
यवक्रीतादयः सर्वे गांगेयाश्च महर्षयः ॥६२॥
आययुर्दर्शनार्थं वै हरिणा संस्मृतास्तदा ।
निषेदुस्ते प्रणम्यैव बालकृष्णस्य सन्निधौ ॥६३॥
लोमशाद्यास्तथा वृकायनाश्च नीलकर्णकः ।
ईशानोऽन्ये गणाश्चापि पार्षदाः संस्मृतास्तदा ॥६४॥
आययुः सन्निधौ सर्वे कोलराजस्य मन्दिरे ।
हरिः प्राह कृतं कार्यं केतुमालस्य सर्वतः ॥६५॥
देशाः सम्पाविताः सर्वे राजानो भक्तिमाश्रिताः ।
प्रजा भक्ताः प्रजाताश्च तीर्थान्यपि कृतानि च ॥६६॥
ऋषयश्चापि सन्तुष्टा जाता दानादिभिस्तथा ।
ब्रह्मप्रियास्तथा गौर्यः सुखमय्यो मया कृताः ॥६७॥
पर्वताः पाविताश्चात्र सर्वं पूर्णं ततोऽभवत् ।
अधुना तत्र गन्तव्यं यत्रर्षिमण्डलं वदेत् ॥६८॥
भवन्तो मे प्रमाणं वै साधवश्च महर्षयः ।
इत्युक्त्वा बालकृष्णश्च ऋषिवाक्यं प्रतीक्षते ॥६९॥
तावद् व्योम्नः सकाशाद्वै पुष्पवृष्टिर्ववर्ष वै ।
जयशब्दैः सह साधुः सच्चिदानन्दसंज्ञकः ॥७०॥
लालायनो महर्षिर्यः पूर्वं चोत्तरतो ह्यगात् ।
पोषपूर्णातिथौ पश्चात् तुषितोऽपि सुरो ह्यगात् ॥७१॥
तावुभौ सुविमानस्थौ त्वागतौ कोलकालये ।
बालकृष्णं भजमानौ जयशब्दान् प्रचक्रतुः ॥७२॥
तीर्थीकुर्वन् केतुमालं जयत्वक्षरधामपः ।
हरेकृष्ण बालकृष्णस्वामिश्रीकृष्णवल्लभ ॥७३॥
काम्भरेय ब्रह्मशक्तिस्वामिन्गोपालनन्दन ।
वर्धयाऽत्र चिरं तिष्ठ देशान् संकुरु पावनान् ॥७४॥
इत्येवं व्याहरन्तौ तौ विमानं भास्करोपमम् ।
अवतारयतां राजालयोद्याने शनैः शनैः ॥७५॥
निर्गतौ तौ विमानाच्च मुनी सात्वतपुंगवौ ।
पुष्पमालान्वितौ भक्तिभरौ कृष्णेऽतिमानसौ ॥७६॥
नेमतुः श्रीबालकृष्णं समागत्य समीपतः ।
दण्डवत् पुष्पहाराद्यैरानर्चतुः परेश्वरम् ॥७७॥
साश्रुनेत्रौ गलत्कर्णौ जातपुलकिताङ्गकौ ।
हर्याज्ञयाऽऽसनयोश्च निषेदतुः समीपतः ॥७८॥
हरिरुत्थाय चरणौ ददौ वक्षसि वै तयोः ।
न्यधाद्धस्तौ मस्तके च बाहुभ्यां परिषस्वजे ॥७९॥
पप्रच्छ कुशलं ताभ्यां भक्तिकार्यप्रसारणम् ।
ऊचतुस्तौ कृपया ते योगक्षेमौ प्रवर्ततः ॥८०॥

केनाटाश्चामरीदेशा भवतः कृपया प्रभो ।
मुमुक्षुवासिताः सन्ति प्रतीक्षन्ते तवागमम् ॥८१॥
आगत्य तत्र कर्तव्यो विष्णुक्रतुर्हि पावनः ।
ताः प्रजाः पावयितव्या अमरीकप्रदेशजाः ॥८२॥
राजानश्च प्रजाश्चापि महर्षयश्च तद्गताः ।
आगमं ते प्रतीक्षन्ते कृतार्थीकुरु तत्प्रजाः ॥८३॥
इत्यर्थितो हरिः श्रीमल्लोमशं शंकरं तथा ।
महर्षीन् परिपप्रच्छ किं कर्तव्यं वदन्तु माम् ॥८४॥
सर्वे प्राहुर्यथा लालायनः प्रार्थयते प्रभो ।
तथा कर्तव्यमेवाऽत्र तारको हि भवान् यतः ॥८५॥
यवक्रीतो नीलकर्णो वृकायनश्च लोमशः ।
गांगेयाश्च वयं सर्वे शंकराद्या यथादिशः ॥८६॥
तथा कुर्मो न सन्देहो लोकतारणहेतवे ।
एवं प्रत्युत्तरे प्राप्ते भगवान् नरनाट्यधृक् ॥८७॥
तथास्त्विति प्राह लालायनं तुषितदैवतम् ।
हारितर्षिर्नामतश्च प्राह तत्र तदा हरिम् ॥८८॥
गच्छाम्यहं हरे पूर्वं मम शिष्यप्रदेशकान् ।
गरिमाख्यान् हारितांश्च माध्यस्थान् कुरु पावनान् ॥८९॥
इत्युक्त्वाऽऽज्ञां शिरो धृत्वा ययौ विमानतः पुरः ।
गरिमाख्यप्रदेशांश्च स्वागतार्थमसज्जयत् ॥९०॥
अपरानाविकापुर्यां दिनमानार्कभूपतिः ।
हारितर्षिप्रशिष्यश्च स्वागतार्थं हरेः शुभैः ॥९१॥
मंगलैर्विविधैः कल्पैः शृंगारं समसज्जयत् ।
अथात्र कोलको राजा परमेशं मुनीन् सतीः ॥९२॥
महीमानान् परमान्नैस्तृप्तयामास भोजनैः ।
पूजयामास बहुधा समर्पणैश्च सर्वथा ॥९३॥
अर्थयामास रात्र्यैक्यं स्थातुं निजालये प्रभुम् ।
हरिस्तथाऽस्त्विति प्राह राजा रात्रौ महोत्सवम् ॥९४॥
कारयामास सुभगं नृत्यमल्लप्रदर्शनैः ।
निशानिद्रोत्तरं प्रातर्हरिः कृताह्निको द्रुतम् ॥९५॥
गन्तुं सज्जोऽभवत्तूर्णं राजा मानाऽर्हणां व्यधात् ।
सैन्येन मानितश्चापि प्रजाभिर्मानितश्च सः ॥९६॥
विमानं चारुरोहाऽन्ये चारुरुहुर्निजान्यपि ।
यशःकीर्त्यादि शृण्वन् श्रीकृष्णनारायणः प्रभुः ॥९७॥
गांगैयैर्नैजिकैश्चापि व्योममार्गेण सत्वरम् ।
समुद्रं तु समुल्लंघ्य गरिमापृथिवीं ययौ ॥९८॥
हारितांस्तान्प्रदेशांश्च व्यलोकयत्तदाम्बरात् ।
स्वागतार्थं हारितर्षिदिनमानार्कभूपती ॥९९॥
यत्रास्तां तावपरानाविकापुर्यां पुरःस्थितौ ।
तौ विलोक्य ध्वजचिह्नैरम्बरे स्थैर्यमाप्तवान् ॥१००॥
सैन्यकृतं स्वागतं संविलोक्य भगवान् हरिः ।
राधिके बालकृष्णः स मुमुदे त्वन्तरीक्षगः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कोलकनृपस्य मुरमाषानगर्यां श्रीहरेस्तृतीयायां भ्रमणं पूजनमुपदेशनं भोजनं गांगेयकन्यादिकृतप्रार्थनया तज्जलेषु बहुरूपाणि धृत्वा युगपत् स्नानेन तीर्थीकरणता रात्रौ विश्रान्तिर्भाद्रशुक्लचतुर्थ्यां दिनमानार्कनृपखण्डं प्रति गमनमित्यादिनिरूपणनामा नवनवत्यधिकशततमोऽध्यायः ॥ १९९ ॥

**श्रीकृष्ण उवाच—**

राधे हारितदेशेषु बह्वरण्याऽतिशीतिषु ।
स्वल्पप्रजाश्रितेष्वेषः कृष्णनारायणः प्रभुः ॥ १ ॥
अपरानाविकापुर्यां समुद्रसन्निधौ निजम् ।
विमानमम्बरात्तूर्णं दिनमानार्कभूभृता ॥ २ ॥
प्रदर्शितेन मार्गेण गरिमापृथिवीतले ।
हारितर्षिं स्थितं दृष्ट्वा समवातारयच्छनैः ॥ ३ ॥
अन्यान्यपि विमानानि चावतेरुस्तदाऽम्बरात् ।
राजा सैन्येन सहितः स्वागतं परमात्मनः ॥ ४ ॥
समाचरत्तथा राज्ञी हारितश्च प्रजाजनः ।
राजा श्रुतं हरिं श्रीमद्बालकृष्णं विमानगम् ॥ ५ ॥
अन्तिकं चाभिगत्वैव ददर्शाऽऽश्चर्यमाप्तवान् ।
अदृष्टपूर्वं श्रीकान्तं रमणीयसुविग्रहम् ॥ ६ ॥
प्रथमं दिव्यमालोक्य क्षणं तु स्थिरतां गतः ।
विमाने श्रीहरेर्मूर्तौ लीनः समाधिमानिव ॥ ७ ॥
जात एव तथा राज्ञी कुमाराश्च कुमारिकाः ।
सर्वे दृष्ट्वा बालकृष्णं समाधिं चाभिपेदिरे ॥ ८ ॥
कोटिविद्युत्समं तेजो ददृशुः सर्वतोमुखम् ।
तत्रेश्वरान् विराडाद्यान् ददृशुश्च ततः परान् ॥ ९ ॥
भूमाद्यानथ तत्पश्चाद् धाम गोलोकमुत्तमम् ।
लोकयामासुरुत्कृष्टं कोटिगोपगणाश्रितम् ॥१०॥
तत्र कृष्णं बालकृष्णं विलोक्य पुनरेव ते ।
अक्षराख्ये परे धाम्नि स्थितं श्रीपुरुषोत्तमम् ॥११॥
व्यलोकयन्मुक्तमध्ये ब्रह्मप्रियासमन्वितम् ।
सर्वेश्वरेश्वरं नारायणं मुक्तादिसेवितम् ॥१२॥

ततः समाधिर्नष्टश्च व्युत्थितास्ते विमानके ।
बालकृष्णं निजे राष्ट्रे ददृशुस्तेऽतिभावुकाः ॥१३॥
आश्चर्यं परमं प्राप्ता राजा राजकुटुम्बिनः ।
हारचन्दनगन्धाद्यैरपूजयन् विमानके ।
तावद्धरिर्बहिर्यातो विमानाद् भास्वराम्बरः ॥१४॥
सर्वलावण्यसौन्दर्यौज्ज्वल्यहास्यमनोहरः ।
प्रजा गौर्यश्च हारित्यो वर्धयामासुरच्युतम् ॥१५॥
लाजाक्षतादिभिः पुष्पैर्गीतैश्च नमनादिभिः ।
प्रजाजनाः प्रणेमुश्च श्रीपतिं कृष्णवल्लभम् ॥१६॥
राजा हरिं करेणैव करमादाय कानके ।
यन्त्रवाह्ये रथे न्यषादयत् स्रगादिशोभिते ॥१७॥
कुटुम्बं च नृपस्याऽपि रथेऽत्र निषसाद ह ।
राजा छत्रं दधारापि राज्ञी दध्रे च वायुदम् ॥१८॥
कुमार्यश्चामरे दध्रुः कुमारा वेत्रमावहन् ।
रथेष्वन्येषु पितरौ हरेः कुटुम्बमेव च ॥१९॥
निषाद्याऽन्यरथे शंभुं परेषु मुनिमण्डलम् ।
गुप्तिगन्त्रीषु च कृष्णकान्ता न्यषादयन्नृपः ॥२०॥
महता स्वागतेनैवं वाद्यध्वनिपुरःसरम् ।
तूर्यशब्दैर्नादितां च पुरीं प्रावेशयत् प्रभुम् ॥२१॥
महोत्साहः प्रजायां वै तदाऽभून्नूतनेक्षणात् ।
हृन्दि हरिः प्रजानां संप्रचकर्ष मुहुर्मुहुः ॥२२॥
यत्राऽङ्गे यस्य चक्षुर्वै तदा लग्नं त्वभूद्धरेः ।
तत्राऽऽसक्तं ध्रुवं चाऽभून्निर्निमेषं स्थिरं सुखात् ॥२३॥
केचिदस्य मुखपंकजमीक्ष्याऽऽपुर्हि साधनमपास्य समाधिम् ।
तत्र चातिहृदयंगममीशं वीक्ष्य शान्तिमतिगां समवापुः ॥२४॥
काश्चिदस्य मदनाश्रितनेत्रं त्वायतान्तमतिकृष्टिभरं च ।
वीक्ष्य मोहितधियः स्थिरतां वै प्राप्य चक्रुरमृतोत्तमपानम् ॥२५॥
यास्तदोष्ठमुरुरक्तकबिम्बाभं विलोक्य समकर्षितचित्ताः ।
योषितः समभवन् समलब्धौ ताः सतृष्णहृदया अभवँश्च ॥२६॥
काश्चिदस्य पुरुसुन्दरगात्रेलुब्धवृत्तय इतीश्वरबोधाः ।
अर्पणं च परिचक्रुरमुष्मै मानसं तनुगतं च समस्तम् ॥२७॥
संविलोक्य पुरुभक्तिसेविकाः काश्चिदेष परमेश्वरोत्तमः ।
नो नयत्विति पराक्षरं निजं हारिताः समवकल्पयँस्तदा ॥२८॥
राधिकाकमलगारमासतीमाणिकीप्रभृतयो दिवानिशम् ।
यं भजन्ति बहुधा तु पद्मजाब्राह्मशक्तय इमा हि गौरिकाः ॥२९॥
तं भजाम इदमाधिसंयुतं संविहाय तु चलं कलेवरम् ।
शाश्वतं भवति चात्र वै सुखं त्वालयोऽस्य कुरुत प्रपूजनम् ॥३०॥

अत्र शीतभवने समुद्रगेऽनुग्रहेण भगवान् समागतः ।
कर्मणा च मनसा च कीर्तनैः सेवया कुरुत नैजमीश्वरम् ॥३१॥
कीदृशो नु परिधिः समन्ततश्चाननस्य भवतीह तैजसः ।
कोटिचन्द्रपरिकान्तिसंस्रवद्विग्रहोऽस्य हृदयंगमोऽस्ति यत् ॥३२॥
नैकमुक्तजनसेवितपादः कोटिदासपरिमर्दितगात्रः ।
प्राप्यते नु बहुपुण्यधनाढ्यैर्नोऽयमाप्त इति विस्मरणीयः ॥३३॥
मानवाश्च जनता इत आद्ये नेदृशं हृदि च कामितवन्तः ।
तादृशोऽयमिह चाप्त उमेशस्तं श्रयन्वतिसुखं परमेशम् ॥३४॥
मा त्यजन्तु मिलितं सुलभं च कान्तकान्तमुरुसद्गुणभाजम् ।
वर्धयन्तु हृदयैः कुसुमैश्च पूजयन्तु निजसर्वसुदानैः ॥३५॥
इत्येवं राधिके ! स्वामिन्बालकृष्णं विलोक्य ताः ।
हारिताः प्रमदाः सर्वा ऊचुः पपुः प्रभुं सुखैः ॥३६॥
राजा गोपुरके घण्टापथे प्राधानिकास्तथा ।
हट्टेषु हट्टपाश्चापि रथ्यामुखेषु योषितः ॥३७॥
वल्लभीषु कन्यकाश्च जनताः पार्श्वभूस्तटे ।
चत्वरेषु प्रजाः सर्वाः पुपूजुः परमेश्वरम् ॥३८॥
लाजाभिः सत्फलैः पुष्पैः कुंकुमैरक्षतैरपि ।
वस्त्रैश्चन्दनपंकाद्यैर्गन्धैरानर्चुरच्युतम् ॥३९॥
सामुद्ररत्नहारांश्च ददौ ते परमेष्ठिने ।
अपरानाविकापुर्यां भ्रामयित्वा प्रजाजनाः ॥४०॥
पूजयित्वा गृहे नीत्वा स्वे स्वे कृतार्थतामगुः ।
हरिस्ततो निजावासे दिनमानार्कमन्दिरे ॥४१॥
आययौ हारितर्षिश्च नत्वाऽऽह परमेश्वरम् ।
भोजनानि सुमृष्टानि विद्यन्ते भुंक्ष्व तानि वै ॥४२॥
भोजयाऽन्यान् हरेकृष्ण पायसादीन् प्रतर्पय ।
ततो विमानमारुह्य गरिमाक्ष्मां विलोकितुम् ॥४३॥
गन्तव्यं दृष्टिमात्रेण पावयितुं समन्ततः ।
इत्युक्तो भगवान् शीघ्रं जग्रास पायसादिकम् ॥४४॥
महीमानान् समस्तांश्च भोजयामास वै द्रुतम् ।
सर्वान् राजालये त्यक्त्वा शंकरेण नृपेण च ॥४५॥
ऋषिणा च समं कृष्णः परिमेयपुरःसरः ।
विमानं स्वं समारुह्याम्बरे जगाम चोत्तरे ॥४६॥
वार्श्रृंगतनुभूभागं विलोक्यापि परीस्थलम् ।
फुद्रिक्तं विलयं देशं काञ्चनं चार्षुकं स्थलम् ॥४७॥
हायनं च स्थलं वीक्ष्य ह्यपरानाविकां ययौ ।
एवं विलोक्य भगवानवाततार चाम्बरात् ॥४८॥
राजसौधे विशश्राम राज्ञी पूजार्थमाययौ ।
पूजयित्वा हरिं तस्याः कन्याद्वयं हरिं तदा ॥४९॥

अपूजयत् सुखासक्ते कन्यके स्थिरनेत्रिके ।
हरिं दृष्ट्वा चकमाते वत्राते$\mathsf{S}$र्पितमालया ॥५०॥
पाणी जग्राह भगवान् प्रत्यर्पितसुमालया ।
तदुत्सवं नृपश्चक्रे रात्रौ भोजनतः परम् ॥५१॥
गणेशं पूजयामास दूर्वालड्डूककुंकुमैः ।
नृत्यं त्वकारयद् राजा वाद्यान्यवादयत्तथा ॥५२॥
सिन्दूरैश्चार्चयामास गणेशविग्रहे शुभे ।
अगापयच्च पद्यानि कीर्तनानि तदुत्सवे ॥५३॥
हारिते कन्यके कृष्णं सिषेवाते सवोत्तरम् ।
निशा गता प्रभातेऽथ कृतस्नानसुपूजनः ॥५४॥
बालकृष्णोऽभवत् सज्जो दुग्धपानोत्तरं तदा ।
गन्तुं केनाटकदेशानमरीणां प्रदेशकान् ॥५५॥
पञ्चम्यां संगवे काले भाद्रे शुक्लेऽतिशोभने ।
राजा विदायं प्रददौ बहुरत्नादिकं तदा ॥५६॥
हरिर्हारितमुनयेऽर्पयामास धनादि तत् ।
राजा सैन्येन सहितो मानं तत्र ददौ बहु ॥५७॥
जयशब्दा यशःशब्दा गीतयश्चाभवँस्तदा ।
गौरीभिर्हारिताभिश्च कृता माधुर्यसंभृताः ॥५८॥
हरिर्हारं ददौ राज्ञे राज्ञ्यै पुत्रेभ्य इत्यपि ।
प्रजानतिं समागृह्य समारुरोह शोभनम् ॥५९॥
आसनं चान्यवर्गाश्चारुरुहुश्चासनानि हि ।
उपादिदेश राजानं प्रजाजनाँश्च सद्धितम् ॥६०॥
उष्ट्रः पुरा तपश्चक्रे प्रजापतिः समाययौ ।
वरदानं तदा वव्रे ग्रीवाऽस्तु योजनाऽऽयता ॥६१॥
ब्रह्मा तथाऽस्त्वितिप्राहाऽरण्ये तूष्ट्रः सदा स्थितः ।
महालसो निषण्णैकस्थले चखाद पादपान् ॥६२॥
परितो योजनावर्ते रात्रौ स्वपिति सौख्यभाक् ।
मध्ये शृगालः सम्प्राप्तो ववल्गे तद्गले दृढम् ॥६३॥
ममारोष्ट्रो मध्यकण्ठे भेदनाल्लम्बकण्ठवान् ।
तथा लोके लम्बतृष्णो म्रियेत मायया हतः ॥६४॥
तस्मात् तृष्णां न कुर्वीत कुर्वीत भजनं हरेः ।
ममाश्रयं प्रकुर्वीत तारयेऽहं न संशयः ॥६५॥
सिंहस्याऽऽसीत्प्रधानो वै हंसः कश्चिद् वनान्तरे ।
दरिद्रो ब्राह्मणो नाम्ना सत्त्ववृत्तिर्ययौ वनम् ॥६६॥
हंसस्तं मिलितो मार्गे पप्रच्छ कुत्र गम्यते ।
स प्राह धनलाभार्थं यामि देशान्तरं न्वितः ॥६७॥
हंसः प्राह भवान् विप्रो मम पूज्योऽस्ति चानघ ।
दास्ये रत्नानि ते त्वत्र सिंहार्जितानि हस्तितः ॥६८॥
मारयित्वा गजान् कुंभस्थलमौक्तिकजातिकान् ।
इत्युक्त्वा सह नीत्वैनं विप्रं हंसो ह्यरण्यके ॥६९॥
ययौ यत्रास्ति सिंहः सः सिंहं प्राह स हंसकः ।
अतिथिर्ब्राह्मणश्चायं पूजनीयः समागतः ॥७०॥
हिंसाजन्यं महत्पापं नश्येदस्मै प्रदानतः ।
इत्युक्तः शार्दूलवर्यः प्रक्षाल्य चरणौ ततः ॥७१॥
विप्रपादामृतं पीत्वा पुपूज रत्नदानकैः ।
विप्रो गृहं प्रयात्येव हंसस्तदाह तं द्विजम् ॥७२॥
आयाहि मा पुनस्त्वत्र माम् ऋते दुःखमुद्भवेत् ।
इत्युक्त्वा प्रययौ हंसस्ततः कालान्तरे द्विजः ॥७३॥
पुनर्लोभेन संप्राप्तस्तद्वनं संस्मरन् हरिम् ।
हंसो मन्त्री तदा नाऽभूत् काको मन्त्री तदा ह्यभूत् ॥७४॥
द्विजं प्रवीक्ष्य काकस्तु सिंहं प्राह प्रखादय ।
सिंहः प्राह न चैवं स्याद् विप्रोऽयं पावनः सदा ॥७५॥
पादवारि पपौ धूलीं मस्तके स न्यधात्तदा ।
काकः प्राह पवित्रं वै पादवारि तु यस्य हि ॥७६॥
स तु पूर्णः पवित्रोऽस्ति भक्षितव्यः स सर्वशः ।
तेन पूता वयं स्यामः पापं नश्येत्तथाऽऽन्तरम् ॥७७॥
इत्युक्तः सिंहराजस्तु भक्षयामास तं द्विजम् ।
तस्माल्लोभं न कुर्वीत मृत्युर्लोभगृहे स्थितः ॥७८॥
लोभं त्यक्त्वा हरिं स्मृत्वा सन्तोषेण हि वर्तयेत् ।
सुखी स स्यादत्र लोके धाम्नि परत्र मे सुखी ॥७९॥
सन्तुष्टस्य परं धाम निश्चितं भक्तिसञ्जुषः ।
एकदा सागरः प्राह सरितः किमु शाखिनः ॥८०॥
आयान्त्येव जलौघा वै नायान्ति वैतसानि तु ।
नद्यः प्राहुर्द्रुमाश्चैते कूलस्था अपि सर्वदा ॥८१॥
अस्मदभ्युदये चापि न नमन्ति कदाचन ।
तान् वयं मूलतो हृत्वा नयामः सागरोदरे ॥८२॥
वैतसीनालिकाः पूरे पतितास्तु नमन्त्यपि ।
विगते पूरवेगे तु शनैर्यान्ति समुत्थितिम् ॥८३॥
न तान् वयं नयामो वै नमतो नालपत्रकान् ।
ये नमन्ति जनाः काले महान्तं वेगिनं तु ते ॥८४॥
नाप्नुवन्ति मूलनाशं स्थितिमन्तो भवन्ति ते ।
एवं कालं तथा मायां वेगकाले नमन्ति ये ॥८५॥
शनैरुत्थानमासाद्य जीवन्ति देहिनस्त्विह ।
ते न दुःखं प्रपश्यन्ति तद्वद् वृत्यं जनैरिह ॥८६॥
मामाश्रित्य शनैर्मायां त्यक्त्वा गन्तव्यमेव मे ।
धाम दिव्यं सुखावासं सुस्थिराश्रयमेव ह ॥८७॥

देशकालौ विचार्यैव वर्तितव्यं सुखार्थिना ।
अहं नारायणः स्वामी भजनीयः सदा प्रभुः ॥८८॥
तारयामि न सन्देहो भजन्तं मां पदागतम् ।
मूर्खः क्रोडोऽभवत्पृष्ठे शृगालं धर्तुमेव ह ॥८९॥
अधावद् बहुवेगेन शृगालोऽवसरे तदा ।
कूपमुल्लुत्य चाक्रामत् परतीरं गतोऽभवत् ॥९०॥
क्रोडः स्थूलवपुर्धावन् वेगतः कूपगोऽभवत् ।
अपतज्जलमध्ये च ममाराऽज्ञानसंहतः ॥९१॥
तस्मान्नैव क्वचिद्धाव्यं वेगेन कर्मणा जनैः ।
शनैस्तरेद्धि संसारं मदाश्रयेण मानवः ॥९२॥
शृगालाभं लोभवेगं नाश्रयेन्मानवस्त्विह ।
दोषात्मकं महाधूर्तं पातयन्तं तु गर्तके ॥९३॥
कामं क्रोधं मदं लोभं मानं त्यक्त्वा सुखी भवेत् ।
मामीशं साधुपुरुषं साध्वीं श्रित्वा सुखी भवेत् ॥९४॥
एवमुक्त्वा ददौ मन्त्रं हरिः राज्ञे कुटुम्बिने ।
प्रजाभ्यश्च ददौ मन्त्रं लोमशस्तु निदेशितः ॥९५॥
हारिताभ्यः प्रजाभ्यश्च मन्त्रं ददौ महेश्वरः ।
ततो जलं प्रपीत्वैव भगवान् चाम्बरेऽभवत् ॥९६॥
राजादिभिः पुष्पहारैः पूजितः परमेश्वरः ।
आशीर्वादान् मुहुर्दत्वा निजं विमानमास्थितः ॥९७॥
अन्ये सर्वेऽभवन् व्योम्नि विमानेषु स्थितास्तदा ।
वाद्यान्यतीव वेगेनाऽवाद्यन्त माननाय वै ॥९८॥
जयशब्दा यशःशब्दा यन्त्राणां ध्वनयस्तथा ।
अभवँस्तत्र देशे वै हरिः शीघ्रं विमानकम् ॥९९॥
प्रैरयद् व्योममार्गेण केनाटकभुवं प्रति ।
समुल्लंघ्य समुद्रं वै केनाटकप्रदेशकान् ॥१००॥
आययुश्च विमानानि मध्याह्ने वेगवन्ति वै ।
देशान् जले विकीर्णांश्च दृष्ट्वाऽविचारयद्धरिम् ॥१०१॥
यज्ञस्थानं प्रथमं वै गन्तव्यं यत्र वर्तते ।
लालायनो महर्षिश्च ततोऽन्यत्कार्यमेव ह ॥१०२॥
अथ लालायनश्चापि स्मृत्वा विमानमण्डलम् ।
तूर्णं स्वागतनादाँश्च राजसैन्यैरकारयत् ॥१०३॥
हरिश्चापि द्विफेनाब्धिं द्विफेनद्वीपमेव च ।
हड्डिकासनमुल्लंघ्य विनिपारसरो ययौ ॥१०४॥
यत्र वाद्यानि वाद्यन्ते स्वागतार्थं हरेस्तदा ।
असंख्यमानवा यत्र प्रतीक्षन्ते परेश्वरम् ॥१०५॥
राधिके हर्षनादाश्चाभवन् दिगन्तगामिनः ।
दूरदर्शादिभिर्लोका व्यपश्यन्नम्बरे तदा ॥१०६॥
तूपशब्दाः कर्कशाश्च वायुकम्पनकारिणः ।
तूर्यसंगीतघोषाश्चाऽभवन् सम्मानने हरेः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने दिनमानार्कनृपस्य गरिमाखण्डे हरेरपरानाविकापुर्यामवतरणं भ्रामणं पूजनं भोजनं विश्रमणं समन्ततो देशे विमानेन गमनं रात्रौ विश्रान्त्युत्तरं प्रातर्भोजनं प्रस्थानं केनाटकप्रदेशेषु विनिपारसरोवरं प्रत्यागमनं चेति-निरूपणनामा द्विशततमोऽध्यायः ॥ २०० ॥

### श्रीराधिकोवाच—

कान्त कान्त कृपासिन्धो राधापते रमापते ।
अमरीणां प्रदेशेषु किं किं चकार माधवः ॥ १ ॥
क्व क्व कुत्र ययौ तस्थौ कैः कैः संसेवितो हरेः ।
चमत्काराश्च के तत्र दर्शिताः परमात्मना ॥ २ ॥
प्रजाभिः किं कृतं तत्र प्राप्ते परेश्वरे प्रभौ ।
काँस्कान् देशान् जगामाऽयं भगवान् भूतभावनः ॥ ३ ॥
वदाऽमरीप्रदेशानां भगवच्चरितानि मे ।
यानि यान्यभवँस्तत्र ब्रह्मप्रियानिषेवितुः ॥ ४ ॥
बहुतृप्ता भवाम्यस्य श्रुत्वा नाथस्य सत्कथाः ।
पुनस्तृषा भवत्येव श्रोतुं तच्चरितानि मे ॥ ५ ॥

### श्रीकृष्ण उवाच—

शृणु त्वं राधिके यावच्चरित्राणि वदामि ते ।
यज्ञः पूजा स्वागतादि समर्पणं निदेशनम् ॥ ६ ॥
भ्रमणं मन्त्रदानं च दिव्यदर्शनकानि च ।
मोक्षणं देहिनां तीर्थीकरणं सरितां तथा ॥ ७ ॥
सरसां सागराणां च पावनीकरणं शुभम् ।
कथयामि समासेन चमत्कारमयानि ते ॥ ८ ॥
यज्ञं चकार भगवान् विनिपारसरस्तटे ।
शेषकाष्ठवनासंगे विशाले भूतले शुभे ॥ ९ ॥
वैष्णवं सर्वदेवानां तृप्तिदं प्राणिनामिह ।
सृष्टित्रयस्थदेहाद्या जडाश्च चेतनास्तथा ॥१०॥
बालकृष्णस्य हस्ताभ्यां तृप्तिं ते शाश्वतीं ययुः ।
केनाटकप्रदेशानां खण्डानां सार्वभौमकः ॥११॥
राजा पंचसरसां वै रायकिन्नरनामकः ।
दिविमानायनर्षिश्च साहाय्यं चक्रतुः क्रतौ ॥१२॥
वैष्णवौ परमौ तौ द्वौ लालायनस्य संगमात् ।
तुषितस्य प्रतापेन भक्तोत्तमौ बभूवतुः ॥१३॥

लालायनस्य शिष्यो वै राजा ऋषेर्निदेशतः ।
मंगलपत्रिकाः सम्प्रेषयामास मखार्थिनीः ॥१४॥
लालायनस्य योगेन चामरीणां प्रदेशकाः ।
वैष्णवीभिः प्रजाभिश्च वासिताः सन्ति धर्मिणः ॥१५॥
खण्डे खण्डे च राजानो भवन्तश्च प्रजाजनाः ।
वैष्णवत्वं चोपगता अहोभाग्यानि तानि नः ॥१६॥
यो वै नारायणानां श्रीनारायणः परेश्वरः ।
यद्भक्ताश्च वयं स्मोऽत्र स श्रीकृष्णनरायणः ॥१७॥
मम राज्ये समागत्य यज्ञं वै वैष्णवं शुभम् ।
करिष्यतीति सर्वैरागन्तव्यं तन्मखोत्सवे ॥१८॥
भाद्रशुक्लस्य सप्तम्यां कृत्वारंभो भविष्यति ।
पञ्चम्यां परमात्मा स विमानादागमिष्यति ॥१९॥
खण्डगैः राजभिश्चात्र संहितव्यं पुरा दिने ।
स्वागतार्थं हरेः सर्वैः प्रजाजनैश्च सात्त्वतैः ॥२०॥
सैन्यशोभासुसहितैः कर्तव्यं हरिमाननम् ।
एकादश्यां समाप्तिश्च क्रतोरस्य भविष्यति ॥२१॥
लालायनाऽऽज्ञया रायकिन्नरोऽहं लिखामि च ।
उक्तैरनुक्तैः सर्वैरागन्तव्यं स्त्रीनरैरिह ॥२२॥
इत्येवं चामरीणां वै प्रदेशेषु सुपत्रिकाः ।
प्रेषयामास दूतैः स रायकिन्नरभूपतिः ॥२३॥
प्राप्याऽऽमन्त्रणपत्राणि त्वाययुस्त्वरितं जनाः ।
उत्सुका नरनार्याद्या दर्शनार्थं कुटुम्बिनः ॥२४॥
विमानैर्वाहनैर्यानैराजग्मुश्चोपदायुताः ।
स्वर्णरूप्यकधान्याद्यै रत्नहीरकसद्रसैः ॥२५॥
यज्ञीयवस्तुभिर्योग्यैर्दैवैः सह समाययुः ।
कोटिशो मानवाः शेषकाष्ठावनानदीतटे ॥२६॥
विनिपारसरोयोगे राजानोऽपि तदाऽभवन् ।
सैन्यानि बहुरंगानि समायातानि भूभृताम् ॥२७॥
स्वागतार्थं हरेश्चासन्नुपस्थिताः सुवेषिणः ।
वाद्ययुक्ता ध्वजापताकिकावावटशोभिताः ॥२८॥
हेतिहस्ता गजवाहा अश्ववाहोष्ट्रवाहिनः ।
दशयोजनविस्तारे वत्सनूतनपत्तने ॥२९॥
सम्मर्दोऽभूत्तदा शेषकाष्ठवनानदीतटे ।
सरस्तीरेऽनुशयिनां कोट्यब्जनरयोषिताम् ॥३०॥
स्वर्गवद्भ्राजते यज्ञपत्तनं नूतनं तदा ।
पत्तनं तद्धरिकृष्णोऽलोकयत्त्वम्बरान्मुहुः ॥३१॥
मण्डपार्थं समालोक्य भूमिं सरसोरान्तरे ।
दिविमानायनर्ग्युक्तदिशा वीक्ष्य समस्थलीम् ॥३२॥
चक्रं विधाय सर्वोर्ध्वेऽवातारयद्विमानकम् ।
वादित्रनिनदाश्चासन्नमरीणां च गीतिकाः ॥३३॥
जयध्वानाः प्रजानां च तदाऽऽसन् व्योमयोगिनः ।
तूर्यशब्दा यन्त्ररवा मानने त्वभवन् हरेः ॥३४॥
श्रेष्ठा दश नृपस्तत्र सार्वभौमा ह्युपस्थिताः ।
गृहीत्वा चोपदाः स्वर्णपात्रेषु सप्रधानकाः ॥३५॥
रायकिन्नरनृपतिः रायरोकीश्वरो नृपः ।
रायरणजिद्भूपश्च रायवाकक्षको नृपः ॥३६॥
रायमारीशभूपश्च रायबालेश्वरो नृपः ।
रायलम्बारभूपश्च रायनवार्कभूपतिः ॥३७॥
रायहण्डेशभूपश्च रायकूपेशभूपतिः ।
एते सैन्यैः सुयुक्ताश्च स्वागतार्थं हरेस्तदा ॥३८॥
विमानैस्तत्र चागत्य प्रागेव समुपस्थिताः ।
हस्त्यश्वरथवाहाद्यैः श्रृंगारितसुविग्रहैः ।
सैन्यं स्वागतकार्यार्थं तदाऽभूत्तु व्यवस्थितम् ॥३९॥
वादका नीतिकर्तारश्चाग्निरञ्जनवेषिणः ।
जलवाद्यविधर्तारो नृत्यवाद्यप्रशब्दिनः ॥४०॥
गलवाद्यप्रभावज्ञा मयूरवंशिवाद्यकाः ।
तारवाद्यातिकुशलाः पटहध्वानकारिणः ॥४१॥
सहशारीरचेष्टाकाः सशस्त्रा नमनार्थिनः ।
वेत्रधरा गणवेषा व्याघ्रवेषाश्च भाल्लुकाः ॥४२॥
पिंगवेषाः परीवेषा अवधूतस्वरूपिणः ।
शूलचक्रधराश्चापि चर्मखड्गधरास्तथा ॥४३॥
तांसकैः करतालैश्च विगुलैर्लक्षिता अपि ।
शंखिनो वज्रिणश्चापि सुकन्यावेषिणस्तथा ॥४४॥
जटावेषधराश्चापि योद्धृवेषातिशोभनाः ।
अर्जुनाम्बरयुक्ताश्च रक्ताम्बराः प्रचित्रिणः ॥४५॥
सुछत्रैर्व्यजनैश्चापि चामरैर्गुच्छकैस्तथा ।
वर्धयित्वा दर्पणैश्च स्वागतार्थं ह्युपस्थिताः ॥४६॥
अमर्यो योषितस्तत्र पाण्डुराभाः सुयौवनाः ।
कन्यका रक्तकाधराः पूरवेगातिसंभृताः ॥४७॥
नीलपीतहरिद्वर्णवेषाः स्वर्णविभूषणाः ।
किंकिणीजालमालाद्यैरम्बैररतिशोभिताः ॥४८॥
धृतस्थाला हरेरर्चनार्थं लाजाक्षतान्विताः ।
कल्हारपद्मकुमुदैः कादम्बपारिजातकैः ॥४९॥
कुन्दसाहस्रपत्रैश्च स्थलपद्मैः सुकेसरैः ।
चाम्पकैः कामलैर्हारैः शेखरैः स्रग्भिरन्विताः ॥५०॥

कुंकुमवाटिकायुक्ताः पूजार्हचन्दनान्विताः ।
अमर्यस्तत्र चायाता लक्षशो दिव्ययोषितः ॥५१॥
सहस्रशो राजयोषा असंख्याताः प्रजास्त्रियः ।
केनाटकाः सर्वदेशा मंगलामन्त्रणैस्तदा ॥५२॥
सम्राजो मन्दिरे रायकिन्नरस्य मखोत्तमे ।
आयास्यतो बालकृष्णहरेर्दर्शनलब्धये ॥५३॥
आबालवृद्धा मनुजाः कोट्यर्बुदाब्जसंख्यकाः ।
आययुस्ते स्वागतार्थं हरेः समुपतस्थिरे ॥५४॥
शेषकाष्ठवनानद्या विनिपारसरोवरे ।
संगमस्याऽतिदीर्घे भूतले समुपतस्थिरे ॥५५॥
आगन्तुकानां वासार्हं नगरं बहुयोजनम् ।
मखसेवाभिधं व्यद्योतत स्वर्गमिवाऽपरम् ॥५६॥
मणिसेवानगर्याः सन्निधौ पूर्वे सरोवरात् ।
राजदर्शितमार्गेण भगवान् कृष्णवल्लभः ॥५७॥
विमानं सूर्यसदृशं चावातारयदम्बरात् ।
द्योतयत्तु दिशः सर्वाः स्वर्णवर्णमशोभत ॥५८॥
भूमौ स्थैर्यं समवाप्य चन्द्रतुल्यं व्यदृश्यत ।
अन्यान्यपि विमानानि चावतेरुस्ततोऽम्बरात् ॥५९॥
आकृतिग्राहकयन्त्रैः कुशला जगृहुः कृतिम् ।
राजानस्तं त्वेकसूत्रे तिष्ठन्तश्चक्रुरानतिम् ॥६०॥
सैन्यानि नेमिरे देहैर्वाद्यैर्नृत्यकलादिभिः ।
सम्राजा सहिताः सर्वे नृपास्तन्निकटं ययुः ॥६१॥
ईशानो लोमशश्चोभौ विमानाग्रं प्रजग्मतुः ।
वृकायनो नीलकर्णश्चोभौ पश्चात् समागतौ ॥६२॥
द्वारपालाः पार्षदाश्चांऽगणे तस्थुः सवेत्रकाः ।
निःश्रेणीं समधिप्राप्य राजानस्तस्थुरीक्षकाः ॥६३॥
तावद्धरिर्बालकृष्णः पितृभ्यां सहितो बहिः ।
विमाने त्वाययौ चाग्रे सुभास्वरे तु गोपुरे ॥६४॥
कोटिकोट्यर्कचन्द्राग्निविद्युद्भास्वरविग्रहः ।
तोरणाऽधःस्थितं चञ्चद्विद्युदाभां तु वल्लभीम् ॥६५॥
करेण च मनाक् स्पृष्ट्वा मन्दहास्यं मनोहरम् ।
श्रीकृष्णं तं बालकृष्णं रायकिन्नरभूपतिः ॥६६॥
प्रणम्य गन्धविपुलां मालतीपुष्पमालिकाम् ।
चित्ररंगां ददौ कण्ठे रत्नहारं ददौ ततः ॥६७॥
गुच्छं पौष्पं ददौ हस्ते चन्दनार्कं तु भालके ।
ददौ सुगन्धसाराणि पात्रेण सन्धृताम्बरे ॥६८॥
पादयोश्चाक्षतान् स्वर्णमयान् मूर्ध्नि सुतन्दुलान् ।
पुष्पाणि विग्रहे राजा चिक्षेपार्हणकर्मणा ॥६९॥
जलं दुग्धं ददौ ताम्बूलकं फलं च सन्निधौ ।
कृताञ्जलिः प्रार्थयच्च मखार्थक्ष्मां विलोकितुम् ॥७०॥
हरिः शनैः स्वर्णसोपानकैरवाततार ह ।
ततो दत्तासने सैंहे क्षणं वा निषसाद ह ॥७१॥
रायरोकीश्वरः पुष्पहारै रत्नैरपूजयत् ।
रायरणजिद्भूपश्च मण्याद्यैस्तमपूजयत् ॥७२॥
रायवाकक्षको राजा स्वर्णाद्यैस्तमपूजयत् ।
रायमारीशभूपोऽपि रत्नाद्यैस्तमपूजयत् ॥७३॥
रायबालेश्वरो राजा हीरकैस्तमपूजयत् ।
रायलम्बारभूपश्च धनाद्यैस्तमपूजयत् ॥७४॥
रायनवार्कभूपश्च माणिक्यैस्तमपूजयत् ।
रायहण्डेशभूपश्च मुक्ताभिस्तमपूजयत् ॥७५॥
रायकूपेशभूपश्च राजतैस्तमपूजयत् ।
अथ प्रधानाः सर्वेऽपि पुपूजुर्भूषणादिभिः ॥७६॥
श्रेष्ठिनोऽपि प्रभुमानर्चुश्च धनान्नसद्रसैः ।
हव्यकव्यादिभिश्चापि समिद्धिर्बहुवस्तुभिः ॥७७॥
पुपूजुश्च प्रजावर्गाः श्रीपतिं पुरुषोत्तमम् ।
पूजास्वागतमात्तः श्रीहरिः पप्रच्छ ताँस्तदा ॥७८॥
अनामयं सुकुशलं क्षेमं योगं सुखादिकम् ।
राजाद्याः सम्प्रणम्यैव प्राहुस्ते कृपया सुखम् ॥७९॥
सर्वविधं विद्यतेऽत्र दिनेऽद्य तु महत्सुखम् ।
स्वर्णसूर्योदयस्त्वद्य जातो नस्ते कृपा यतः ॥८०॥
प्राप्तोऽद्य शाश्वतो लाभो यद्भवद्दर्शनं त्विह ।
सिद्धाश्चाद्य चतुर्वर्गाश्चत्वारश्च पुमर्थकाः ॥८१॥
राज्यभारफलं त्वद्य लब्धं लब्धव्यलाभतः ।
श्रीः सर्वा चेन्द्रपदवीप्रदात्री नो गृहेऽद्य वै ॥८२॥
पुण्यं त्वक्षयमद्यैवाऽऽसादितं तव दर्शनात् ।
पावना नोऽद्य देशा वै भवदागमनात् प्रभो ॥८३॥
सम्पदः सार्थकास्त्वद्य भवता विनियोजिताः ।
सत्कार्ये सफलाः सर्वा लक्ष्म्योऽपि विविधा ध्रुवाः ॥८४॥
मानवाः कृतकृत्याश्च वयं माधवदर्शनात् ।
नरा नार्यो बालबाला वृद्धाः पुण्यतमा ननु ॥८५॥
पशवो वृक्षवल्ल्याद्या बहुपुण्या दिनेऽद्य वै ।
पक्षिणो जलगाश्चापि भूमिगा वनिनोऽपि च ॥८६॥
यदत्र भवतां पादौ स्पृशतो भूतलादिकम् ।
भूरियं बहुभाग्या च धामतुल्या हि मोदते ॥८७॥
जाताऽद्य पुलकाढ्या सा गन्धदानैर्विशेषतः ।
वृक्षा द्रुमास्तृणस्तम्बा धन्यभाग्या दिनेऽद्य वै ॥८८॥

यदत्र भवतां पादरजःपूता भवन्ति ते ।
धन्याः पिपीलिकाद्याश्च भवत्प्रसादभागिनः ॥८९॥
धन्या जनपदास्त्वेते यत्र नारायणागमः ।
प्राकट्यं मोक्षदं त्वद्य प्रावर्तत हरेस्तव ॥९०॥
धनं धान्यं राज्यमृद्धिः पुत्राः पुत्र्यो गजादयः ।
यानवाहनसमृद्धिः सर्वं सफलमेव यत् ॥९१॥
तवागमेन भगवन् किं किं न्यूनं भवेन्ननु ।
सर्वं नः पूर्णमेवाऽस्ति हरेर्लाभो हि दुर्लभः ॥९२॥
यज्ञं कृत्वा पावयाऽस्मान् कल्याणं कुरु शाश्वतम् ।
सदा देशेऽत्र वसतिं तवेच्छामोऽनुगास्तव ॥९३॥
इत्युक्त्वा तु नमस्कारं चक्रे राजा तु किन्नरः ।
अन्ये नृपाः प्रणेमुश्च ततो वै भगवान् स्वयम् ॥९४॥
समुत्थाय क्षितिं योग्यां द्रष्टुं चचार चाभितः ।
शेषकाष्ठवनानद्याः संगमाद् दक्षिणे स्थले ॥९५॥
बहुयोजनविस्तारे मण्डपार्हां क्षितिं शुभाम् ।
वीक्ष्य चाज्ञापयामास राजानं मण्डपाय वै ॥९६॥
राजदूता विष्णुदूताः शिवदूतास्तथाऽपरे ।
स्मृतास्तत्राऽऽययुः शीघ्रं विश्वकर्मा समाययौ ॥९७॥
तानाज्ञाप्य नवकुण्डान् कर्तुं श्रेष्ठं च मण्डपम् ।
आप्रातः सर्वमेवैतद् यथा स्यात् समुपस्थितम् ॥९८॥
हरिर्निवाससौधं च ययौ मध्याह्नके ततः ।
भोजनादि चकाराऽथ विशश्राम ससार्थकः ॥९९॥
सर्वे ते मण्डपं चक्रुः रात्रावेव सुशोभनम् ।
कुण्डवेदीमहावेदीशोभितं कलशाग्रहैः ॥१००॥
वस्तुगृहैर्वह्निशालाभिश्च युक्तं मनोहरम् ।
मणिसेवानगर्यन्तं मण्डपं संविधाय च ॥१०१॥
पार्षदा यज्ञसमिधश्चाहर्तुं परितो गताः ।
ऋषयः सर्वगांगेयास्तथा लोमशशिष्यकाः ॥१०२॥
यज्ञसंभारकान् चक्रुर्देवा देव्यश्च तन्मयाः ।
षष्ठ्यां कृताह्निकः कृष्णो महीमानपुरीं नवाम् ॥१०३॥
वीक्षितुं प्रययौ हस्तिपृष्ठासनो नृपैर्युतः ।
पाकशाला रसशालाः स्नानशाला महायताः ॥१०४॥
स्वापशालाः शान्तिशाला हव्यशाला व्यलोकयत् ।
राजभिः पूरिताः पात्रशाला महानसानि च १०५॥
व्यलोकयत्सुसामग्रीसंभृताः सर्वसंविधाः ।
हरिः सस्मार वै प्रातर्देवेन्द्रं चाऽमृतान्वितम् ॥१०६॥
शीघ्रं समाययौ तत्र महेन्द्रोऽमृतसंयुतः ।
अमृतस्य ह्रदस्तत्र परितोऽक्षयतृप्तिकृत् ॥१०७॥
स्मृताः कल्पलतास्तत्र त्वाययुः फलसंयुताः ।
फलानां पर्वतास्ताभिः कृता यज्ञार्थमेव ह ॥१०८॥
स्मृताः पुष्पकणदाश्च वृक्षसस्यद्रुमादयः ।
कल्पवृक्षाः कणपुष्पादीनां वै पर्वतान् व्यधुः ॥१०९॥
आगताः कामदुग्धश्राः स्मृता वै निजधामतः ।
घृतकुल्या दधिकुल्याः पयःकुल्याश्च धेनुभिः ॥११०॥
संभृता हव्यशालासु त्वक्षया द्रव्यपूरिताः ।
अन्नपूर्णा सती देवी शिवा लक्ष्मीस्तदा स्मृता ॥१११॥
आगतास्ताः पर्वतांश्च चक्रुः पक्वान्नकल्पितान् ।
पृथ्वी मूर्ता समागत्य मिष्टं शर्करपर्वतम् ॥११२॥
व्यधाद्धरेर्वचनात् सा जलदेवो रसान् व्यधात् ।
ओषधयः समस्ताश्च वेषवारादिकान् व्यधुः ॥११३॥
ब्रह्मा स्वयं स्मृतस्तत्र समायातश्चतुर्मुखः ।
निर्ममे योग्यसंवासाँस्तथोपकरणानि च ॥११४॥
कुबेरो दक्षिणार्थं च स्वर्णरूप्यादिकं न्यधात् ।
एवमन्ये राष्ट्रपाला लोकपालाः प्रजेश्वराः ॥११५॥
संस्मृतास्त्वाययुः शीघ्रं पूर्तये हव्यकव्ययोः ।
षष्ठ्यां मध्याह्नके जाते सर्वं सम्पूर्णमूर्जितम् ॥११६॥
सुसम्पन्नं समभूच्च न्यूनं किञ्चिन्न विद्यते ।
कोटिशो मानवान् राजा किन्नरो मिष्टभोजनैः ॥११७॥
तर्पयामास बहुधा समस्ताँस्तान्प्रजाजनान् ।
हरिः कुटुम्बसहितो महर्षिमण्डलान्वितः ॥११८॥
निजसार्थयुतस्तत्र जग्राह भोजनानि वै ।
ततो राजाऽऽर्थयत् कृष्णं रायकिन्नरभूपतिः ॥११९॥
राधिके स्वालये कृष्णं त्वागन्तुं सैन्यसत्कृतम् ।
नगरे भ्रमितुं चापि कृष्ण ओमाह तत्क्षणम् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने केनाटकेषु क्रतोर्मंगलपत्रिकाप्रेषणम् । समागतहरेर्देश-भूपादिकृतं स्वागतम्, कुशलप्रश्नादिकम्, मण्डपादिनिर्माणाज्ञा, भोजनादिकं क्रतुपकरण-संचयादीत्यादिनिरूपणनामैकाधिकद्विशत-तमोऽध्यायः ॥ २०१ ॥

श्रीकृष्ण उवाच—

राधिके रायकिन्नारः शीघ्रं सैन्यमसज्जयत् ।
हस्त्यश्वरथसंशोभद्वाद्यमानववाहनम् ॥ १ ॥
श्वेतहस्ती चतुर्दन्तः पर्वतशृंगकोच्छ्रयः ।
साऽम्बालिकोऽतिचित्राढ्यः स्वर्णकूथसुशोभितः ॥ २ ॥

राजाऽऽज्ञया हरेरर्थे हस्तिपकेन नोदितः ।
आययौ शीघ्रमेवाऽग्रे चारुरोह गजं हरिः ॥ ३ ॥
अन्ये गजास्तथोर्ध्वा वै षट् तत्रैवोपतस्थिरे ।
पितरौ भ्रातरश्चापि स्वसा भ्रातृप्रिया ह्यपि ॥ ४ ॥
आरुरुहुर्गजान् तांश्च लोमशस्तुषितस्तथा ।
लालायनस्तथा चेशानः स्वयं गजमुत्तमम् ॥ ५ ॥
आरुरुहुर्नरयानेष्वपि ब्रह्मप्रियाः स्त्रियः ।
सावरणेषु यानेषु रंगिन्यो नवयौवनाः ॥ ६ ॥
कन्यका गौरिकाश्चापि पिशंग्यो हारितास्तथा ।
रथेष्वपि च गांगेया महर्षयस्तथाऽपरे ॥ ७ ॥
निषेदुः सुखसम्पन्ना भ्रमितुं मणिपत्तनम् ।
महीमानेषु सर्वेषु तूपविष्टेषु तत्तथा ॥ ८ ॥
वाहनेषु ततो लोकजनानां सैन्यकानि हि ।
अग्रे वाद्यसुयुक्तानि ध्वजापताकिकादिभिः ॥ ९ ॥
चेलुर्गायन्त एवाऽऽद्यनारायणमहद्यशः ।
ततो हस्ती महान् यातीशानदेवस्य शोभनः ॥१०॥
कुटुम्बिनां गजाः पश्चात्ततो महर्षिवारणाः ।
ब्रह्मप्रियादीनां नरयानानि यान्ति हि ॥११॥
रथाः प्रयान्ति शोभाढ्याः सौवर्णकलशान्विताः ।
चित्रपट्टावृताश्चापि शुभाः श्वेताश्ववाहिताः ॥१२॥
ततो हस्ती महान् याति श्रीपतिकृष्णशोभितः ।
राजा किन्नारको यत्र छत्रं दधार पृष्ठके ॥१३॥
पार्श्वे कुमारकौ धृत्वा चामरौ समतिष्ठतः ।
ततो राज्ञां वाहनानि निर्ययुः शोभनानि वै ॥१४॥
अमर्यः कन्यकाः पश्चाद्गीतनारायणाभिधाः ।
कृतकौतुकवेषाश्च श्रृंगारभावमंगलाः ॥१५॥
मौक्तिकासनकलशाः सफलाः शुभपल्लवाः ।
सर्वशोभाम्बरभूषा यान्ति गायन्त्य ऐश्वरम् ॥१६॥
कीर्तनं कांभरेयस्य श्रीपतेः कमलापतेः ।
नरयानेषु तन्मध्ये राधा लक्ष्मीः प्रभा सती ॥१७॥
पार्वती माणिकी हंसा मंजुला सगुणाऽम्बिका ।
सन्तोषा चाऽमृता मुक्तिर्देवी च ललिता जया ॥१८॥
एता अन्याश्च राजन्ते भूषिताश्चापराः स्त्रियः ।
प्रयान्ति राजमार्गेऽन्या अश्ववाराश्च रक्षकाः ॥१९॥
राजाज्ञाकृज्जनादिष्टमहामार्गेण संचरन् ।
श्रीहरिः शोभतेऽर्कद्युतिस्तदा जनतार्चितः ॥२०॥
एवं सैन्यं चचालैतन् मणिपुर्यां हरेस्तदा ।
प्रथमं राजशोभाढ्यं ययौ तद्राजमन्दिरम् ॥२१॥
राज्याऽऽसनेऽतिसौवर्णे मणिरत्नसमुज्ज्वले ।
राजा वाहादवतीर्य हरिं न्यषादयन्नरः ॥२२॥
जयशब्दाश्चाभवँश्च पुष्पवृष्टिरभूत्तथा ।
प्रधानाद्यैः कुमाराद्यै राज्ञीभिश्च कृतोत्तमा ॥२३॥
राज्ञी मुख्या सती देवी पुपूज परमेश्वरम् ।
तिलकं कुंकुमेनाऽपि चन्दनेनाऽक्षतैस्तथा ॥२४॥
अकरोच्छ्रीहरेर्भाले दुःखहाञ्जलिमाचरत् ।
पुष्पैर्विकीर्य कृष्णस्य मस्तके नमनं व्यधात् ॥२५॥
पादौ प्रक्षाल्य दुग्धेन स्थाल्यां दुग्धं समानयत् ।
पपौ प्रासादिकं शीघ्रं राजकुटुम्बमेव तत् ॥२६॥
वारिणा चरणौ पश्चात्प्रक्षाल्य परमात्मनः ।
सन्निधौ हारभूषादिर्द्रव्यं कोटिमितं न्यधात् ॥२७॥
यन्नेऽर्पितं मया कृष्ण नृपाज्ञया तवाऽस्ति तत् ।
इत्युक्त्वा पार्श्वमागत्य स्थिरेक्षणा ददर्श तम् ॥२८॥
राधिके च तदा राजा ननाम हरिपादयोः ।
कुटुम्बं मणिरत्नादि प्रददौ पूजने तदा ॥२९॥
बालकृष्णो ददौ तेभ्यस्तदा नेत्रे सुदिव्यके ।
पररूपग्राहिणी च ततो नैजं त्वलौकिकम् ॥३०॥
दर्शनं प्रददौ कृष्णः सुदिव्यं सुमनोहरम् ।
रूपानुरूपावयवं कोटिमन्मथसुन्दरम् ॥३१॥
कोटिमुक्तैः कोटिशक्तिभिश्च संसेवितं परम् ।
अनन्तानन्तमुक्तैश्चेश्वराद्यैर्जुष्टमुत्तमम् ॥३२॥
ब्रह्माद्यैर्वन्दितं दिव्याम्बरभूषाविराजितम् ।
राधारमादिसंजुष्टं कान्तकान्तातिकान्तिकम् ॥३३॥
अवतारैस्तथा व्यूहैर्देवेश्वरैः प्रसेवितम् ।
विलोक्य राजकुलिनो मुमुहुस्तत्र माधवे ॥३४॥
आश्चर्यं परमं वीक्ष्य क्षणं स्तब्धा इवाऽभवन् ।
ततो राजा स्तुतिं चक्रे दिव्यभावेन नोदितः ॥३५॥

महातेजःपुञ्जात्मकपरमधामस्थरुचिरो
महामुक्तैः सेवापरिचरणतुष्टो विजयते ।
अनादिश्रीकृष्णोऽनवधिगुणधारी परतरो-
ऽक्षरेशः शक्त्याद्यैरधिगतपदः संविजयते ॥३६॥

त्वमेवाऽऽस्से दिव्येऽक्षरपरमधाम्नि स्वनिलये
स एवास्से कृष्ण द्विभुजवररूपोऽतिसुखकृत् ।
गवां लोके गोपीगणसुरचिताघ्यैः स्वभवने
स एवास्से लक्ष्मीपरिचरितवैकुण्ठभवने ॥३७॥

त्वमेवास्से भूमन्नमृतपरिपूर्तेश्वरपदे
स एवास्से व्यूहात्मकतनुमयोऽव्याकृतभुवि ।
विराज त्वं चास्से भवसि च हिरण्यगर्भ पुरुष-
स्त्रिदेव त्वं विष्णो भवसि मनुजानां हितकरः ॥३८॥
सुरा दैत्याश्चान्ये पितर इह विप्राः ऋषिगणा
नृपाः पातालस्था जडचिदभिधं सा तव तनूः ।
नरो नाराद्या ये मुनय इह बद्रीशतनुगं
भजन्त्येवात्मज्ञा युगलतनुगं मुक्तिलषिणः ॥३९॥
तथा श्वेते लोके धवलरुचिदेहास्तव जनाः
प्रसेवन्ते लक्ष्मीकृतचरणसेवं फणिशयम् ।
त्वमेव त्वं चन्द्रे रविपरिधिग त्वं हृदयगो-
ऽनले त्वं श्रीकृष्णो भवसि तमसां लोपकृतिमान् ॥४०॥
इदं दिव्यं रूपं तव जडचितिस्थं निजदृशा
प्रपद्येऽहं विष्णो भवदतिकृपालेशबलतः ।
त्वमेवादौ चाभूः सपरिकरतत्त्वादिसृजिकृत्
प्रविष्टस्त्वं पोष्टा भवसि परिहारेऽपि लयकृत् ॥४१॥
त्वमेवास्सेऽसंख्याऽवतरणसुमूर्तिप्रगपि यः
परंश्रेयःकर्ता भवजलधिमग्नस्य कृपया ।
स एवात्र प्राप्तो भवसि भगवन् यज्ञतनुमान्
प्रभोक्ता त्वं यज्ञे कुरु निजजनानां सुखमयम् ॥४२॥
मया दत्तं द्रव्यं तव भवति भोग्यं ननु पुरा
समस्तं राज्या द्यंतव चरणयोराहितमिदम् ।
अहं वर्ते राज्ये ननु सततमागन्तुक इति
महाराज त्वं वै गृहपतिरसि स्वीयविषयः ॥४३॥
इत्यभीष्टूय राजा स बालकृष्णं तु राधिके ।
मौनं जग्राह च ततो भगवान् दिव्यदर्शनम् ॥४४॥
तिरोभावयदथ ते ददृशुः स्वर्णकासने ।
नेमुः प्रणेमुः सहसा साश्रुनेत्राः सद्दद्गदाः ॥४५॥
राज्ञ्यः सर्वाश्च चरणौ धृत्वा तदा तु शार्ङ्गिणः ।
अलिहन् द्वे तले प्रेम्णा ज्ञात्वा श्रीपरमेश्वरम् ॥४६॥
कन्यकास्तत्र च राज्ञस्त्वेकपञ्चाशदुत्तमाः ।
आसन् दर्शनकर्त्र्यस्ता मुमुहुः पुरुषोत्तमे ॥४७॥
वरमालां करयोश्च धृत्वा कण्ठे हरेर्न्यधुः ।
बालकृष्णो नृपादिष्टः करान् जग्राह वै तदा ॥४८॥
प्राप्य कृष्णं कान्तमीशं ता आसन् कृतकार्यिकाः ।
राजानं श्रीहरिस्तत्राशीर्वचांसि प्रदाय तु ॥४९॥
यज्ञद्रव्यं दिनमानर्षयेऽधीनं विधाय ह ।
उत्तस्थौ त्वासनाद् राजा कृतकृत्यो बभूव ह ॥५०॥

मन्दिरे त्वालये राज्ञः सर्वत्र भगवाँस्तदा ।
विचचार बहुभौमे शतभूम्यादिसंयुते ॥५१॥
राजोद्यानं विचचार पादपूतं विधाय च ।
राजमन्दिरमेवादौ ततः प्रधानमन्दिरम् ॥५२॥
श्रेष्ठिणामालयाँश्चापि ततो नगरवासिनाम् ।
गृहेषु चरणौ न्यस्याऽऽदाय पूजां क्रतोः कृते ॥५३॥
राजमार्गे चापणेषु चत्वरेषु स्थले स्थले ।
पूजां प्राप्य हरिः सर्वं यज्ञार्थं तत् समार्पयत् ॥५४॥
एवं नगर्यामभितो बहुमानपुरःसरम् ।
विचचार जनानां तु मनांसि स्वे जहार च ॥५५॥
राजमार्गे भ्रमन्तं तं महाहस्तिस्थितं प्रभुम् ।
विलोक्य प्रमदाः सर्वा अमर्त्याः सज्जगुर्यशः ॥५६॥
धन्यास्ता राजकन्या या वव्रुः श्रीपतिमीश्वरम् ।
कृतपूर्वतपःपूजाफलमापुः कुतोऽन्यथा ॥५७॥
नारायणः पतिः कान्तो गृहे मिलेत् स्त्रियस्त्विह ।
यं राधा कमला पद्मा लक्ष्मीः प्रभा च पार्वती ॥५८॥
माणिक्याद्याः प्रसेवन्ते तं प्राप्ता भाग्यगौरवात् ।
यं सेवन्ते ब्रह्मप्रिया यं सेवन्तेऽन्यकन्यकाः ॥५९॥
यं सेवन्ते गौरिकाश्च तं प्राप्ता भाग्यगौरवात् ।
यं सेवन्ते हारिताश्च देव्योऽसंख्यगुणाश्रयम् ॥६०॥
प्रपश्यन्तु मुखं त्वस्य चन्द्रबिम्बोज्ज्वलं परम् ।
भ्रूकुट्यां वर्तते बाणः कामदेवस्य संस्थितः ॥६१॥
धनुर्भ्रुवोर्वर्ततेऽस्य देहेऽस्य रामणीयकम् ।
हास्ये महाँश्चमत्कारः समाकर्षणमोहनः ॥६२॥
नेत्रकोणेऽस्य रुचिरा चमत्कान्तिर्विराजते ।
ओष्ठमध्येऽतिसौन्दर्यं समाकर्षणकारकम् ॥६३॥
पश्यन्तु चालयस्त्वस्य विशालं समुरःस्थलम् ।
कौस्तुभश्रीसमाधारं सबलं मोहकं वपुः ॥६४॥
अलक्तातिगशोभाढ्ये पश्यन्तु करपत्तले ।
कदलीस्तंभशोभाढ्यौ पश्यन्तूरू हरेः स्त्रियः ॥६५॥
मूर्तिस्त्वस्याऽतितेजोऽभिव्याप्ता पारदर्शिश्रया ।
नाऽयं मानुषदेहोऽस्ति दिव्योऽस्ति परमेश्वरः ॥६६॥
नास्य मूर्तावयवा दृश्यन्ते सन्धियोजिताः ।
सख्यः पश्यन्तु सौन्दर्यं बहिश्चान्तः समन्ततः ॥६७॥
अमलं चास्थिनाड्यादिक्लिसिघटनावर्जितम् ।
एकतत्त्वं विभात्येषोऽवश्यं श्रीपुरुषोत्तमः ॥६८॥
सच्चिदानन्दरूपोऽस्ति परात्परः परेश्वरः ।
श्रुतो यः शास्त्रकथने स एवायं वितर्क्यते ॥६९॥

अस्य दर्शनमात्राद्वै सुखानन्त्यं समर्ज्यते ।
आनन्दघन एवाऽयं सर्वगन्धरसाश्रयः ॥७०॥
आत्मज्योतिःप्रदश्चायं हरत्यन्तर्मनो हि नः ।
प्राप्तव्यः सर्वथा चायं मरणान्ते परेऽक्षरे ॥७१॥
मन्त्रं तस्य ग्रहीष्यामो यज्ञेऽवश्यं हि योषितः ।
प्राप्स्यामस्तं परं कान्तं बालकृष्णं जनार्दनम् ॥७२॥
तेजःपुञ्जोऽस्य तनुतो निर्याति कीदृशोऽतिगः ।
सुखो निमेषहृत्सौम्यः शीलशान्तिप्रदोऽव्ययः ॥७३॥
एवं परस्परं राधे मणिपुर्यां तु योषितः ।
अमरीजातीयनार्यो वदन्ति स्मातिमोहिताः ॥७४॥
मार्गे मार्गे गृहाग्रे च चत्वरे सौधसन्निधौ ।
लाजाऽक्षतैः सुमैर्वर्धयन्ति स्म परमेश्वरम् ॥७५॥
जयशब्दान् समुच्चार्य रञ्जयन्ति सतां पतिम् ।
नमन्ति तु गवाक्षेभ्यः पश्यन्त्यः कान्तमीश्वरम् ॥७६॥
भुक्तिदं मुक्तिदं देवेश्वरेश्वरं गुहाश्रयम् ।
एवं भ्रमित्वा नगरीं मणिपूर्यभिधां हरिः ॥७७॥
यज्ञपत्तनमुत्कृष्टं वीक्षितुं संययौ ततः ।
महीमाना नरा नार्यो दृष्ट्वा देवेश्वरेश्वरम् ॥७८॥
वर्धयामासुरिष्टाभिर्दत्ताभिश्चोपदादिभिः ।
पूजयामासुरत्यर्थं चक्रुः स्वागतमुत्तमम् ॥७९॥
धनैर्द्रव्यै रसैः क्षारैर्वेषवारैः कणादिभिः ।
गव्यैर्हव्यैः शालिभिश्चाऽक्षताद्यैरार्चयन् प्रभुम् ॥८०॥
वस्त्रैः शुभासनैः पात्रैः कम्बलैश्चोलकञ्चुकैः ।
वर्मभिश्च विभूषाभिर्मुकुटाद्यैश्च कुण्डलैः ॥८१॥
चन्दनैरतिमिष्टान्नैः फलैः शुष्कफलादिभिः ।
मुखसौगन्ध्यवासैश्च रत्नहारालिभिस्तथा ॥८२॥
दक्षिणाभिर्विविधाभिः सुवर्णकूप्यताम्रकैः ।
बालकृष्णं प्रजाः सर्वाः पूजयामासुरेव ह ॥८३॥
सैन्येनोत्साहितः कृष्णो दत्त्वैवं दर्शनं परम् ।
आशीर्वादैर्योजयित्वा जनान् प्राप्य तथोपदाः ॥८४॥
आययौ राजवर्गाद्यैः सहितो निजसंश्रयम् ।
राजसौधं रुमावासयोग्यं स्वर्गसमं हरिः ॥८५॥
ददौ सर्वं चागतं वै धनं धान्यादिकं मखे ।
सायं विनोदकायेव राजा प्राकारयन् मुदा ॥८६॥
निशायां नर्तनोत्साहं महोत्सवमकारयत् ।
कन्यार्पणनिमित्तं च धनार्पणमथाऽकरोत् ॥८७॥
हरिर्भुक्त्वा भोजयित्वा कुटुम्बिनः समाश्रितान् ।
महीमानान् मुनीन् सर्वान् ब्रह्मप्रियाश्च योषितः ॥८८॥
प्रजाजनान् सुखं पश्चात् सुष्वापाऽमरिकाशये ।
अमर्यस्तं नवं कान्तं सिषेविरेऽतिसेवया ॥८९॥
प्रातस्तूर्याण्यवाद्यन्त प्रबोधयितुमीश्वरम् ।
मंगलानि कीर्तनानि गीतिकाश्च स्त्रियो व्यधुः ॥९०॥
वादित्रनिनदा मिष्टाः श्रवणेऽप्यभवँस्तदा ।
जजागार हरिकृष्णः कृताह्निकः सभां ययौ ॥९१॥
दुग्धपानादिकं कृत्वा वीक्षितुं मण्डपं ययौ ।
विश्वकर्मादिभिः रात्रौ रचितं शोभनं परम् ॥९२॥
विशालं तु दशक्रोशं चायुतासनशोभितम् ।
कोटिदेवसमावेशं चित्रध्वजसमन्वितम् ॥९३॥
कुण्डानि नव तत्रैव तथैकं परमं परम् ।
वीक्ष्य वेदीश्च पात्राणि शालाश्च हव्यशालिकाः ॥९४॥
होमसमिधः संवीक्ष्य कव्यानि वीक्ष्य चापि वै ।
तुतोष भगवान् चाभूत्प्रसन्नश्चातिहर्षितः ॥९५॥
सुदिव्यादिव्यसिद्धीनां योगिनीनां गणास्तथा ।
देवीनां मातृकानां च सतीनां मण्डलानि च ॥९६॥
मण्डलानि सांख्ययोगिनीनामैश्वर्यजुंषि च ।
महानसानां रक्षार्थं वर्तन्ते पाकसिद्धये ॥९७॥
तद्विलोक्याऽतितुष्टोऽभूद् भगवान् कृष्णवल्लभः ।
देवीं धरणिं चाहूयाऽधिकारिणीं तदाऽकरोत् ॥९८॥
अन्नपूर्णां तथा लक्ष्मीं ददौ सहाय्यदां हरिः ।
धरण्यै सर्वलोकानां भोजनादिप्रपूर्तये ॥९९॥
वरुणाय जलार्थं दक्षिणार्थं तु कुबेरकम् ।
न्ययोजयद्धरिस्तत्राऽऽरोग्यार्थं चाश्विनौ सुतौ ॥१००॥
रक्षार्थं धर्मराजं च विघ्नेशं विघ्नशान्तये ।
अक्षयार्थं सूर्यदेवं शासनार्थं तु शूलिनम् ॥१०१॥
दानार्थं गोचरं विष्णुं व्यवस्थार्थं तु वेधसम् ।
सन्मानार्थं त्वागतानां महेन्द्रं समयोजयत् ॥१०२॥
पाचनार्थं वह्निदेवं प्रकाशार्थं तु पार्वणम् ।
ध्वन्यादिपरिवृद्ध्यर्थं विद्युतः समयोजयत् ॥१०३॥
इत्येवं रात्रिके श्रीमद्बालकृष्णः प्रभातके ।
न्ययोजयत् कर्मचारान् षष्ठ्यां भाद्रे सिते दले ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मणिसेवापुर्यां यज्ञपत्तने च हरेर्विहरणं पूजनं भोजनं रात्रौ विश्रमणं भाद्रशुक्लषष्ठ्यां प्रातः कर्मचारयोजनेत्यादिनिरूपणनामा द्व्यधिकद्विशततमोऽध्यायः ॥ २०२ ॥

श्रीकृष्ण उवाच—

राधिके वै ततः प्रातः कृताह्निकः कृतादनः ।
कृताभिवृद्धसेवश्च बालकृष्णः सभां ययौ ॥ १ ॥
राजा तत्राऽऽययौ तूर्णं पूजादर्शनलालसः ।
कृत्वा पूजां चन्दनाद्यैर्हरिं तदाऽऽह सन्नतिः ॥ २ ॥
अद्य कर्तव्यविषयं त्वाज्ञापय दयानिधे ।
सर्वं शक्त्या साधयिष्ये क्रत्वर्थं सेवनं प्रभो ॥ ३ ॥
हरिस्तमाह सौवर्णीं प्रतिमां शोभनां शुभाम् ।
लक्ष्मीनारायणस्याऽद्य प्रकारय सरत्नकाम् ॥ ४ ॥
नवांगुलां चतुर्बाहुं नारायणस्य मूर्तिकाम् ।
लक्ष्म्याश्चाष्टांगुलां चापि प्रकारय नु कानकीम् ॥ ५ ॥
मम प्रतिमां रम्यां च प्रकारय दशांगुलाम् ।
माणिकीं स्वर्णमूर्तिं च मत्कर्णोर्ध्वां प्रकारय ॥ ६ ॥
लक्ष्मीं मत्स्कन्धपर्यन्तां मत्कर्णोर्ध्वां च पद्मजाम् ।
मत्स्कन्धोर्ध्वां रमां चापि राधां मत्कण्ठकोच्छ्रयाम् ॥ ७ ॥
अमरीशां तव कन्यां ज्येष्ठां मन्मुखकोर्ध्वकाम् ।
राजन् कारय सौवर्णीं यज्ञार्थे बहुशोभनाम् ॥ ८ ॥
मूर्त्यष्टकं कारयित्वा सतीशिवौ प्रकारय ।
सौवर्णौ च गणनाथं सौवर्णं सम्प्रकारय ॥ ९ ॥
नन्दिनं कार्तिकेयं च तथा सम्यक् प्रकारय ।
पद्ममूर्तीस्तथा राजन् कारयित्वा च भास्करम् ॥१०॥
विष्णुं च कानकं ब्रह्माणं प्रकारय कानकम् ।
कंभरां मातरं चापि गोपालं पितरं मम ॥११॥
प्रकारय च सौवर्णं पद्मकं शोभनं ततः ।
वास्तुदेवं कानकं च प्रकारय विशालकम् ॥१२॥
यूथं च कानकं सर्वदेवावासं प्रकारय ।
इत्याज्ञां प्रददौ कृष्णो देवगृहं विधापय ॥१३॥
आज्ञां लब्ध्वा नृपस्तूर्णं कारयामास मूर्तिकाः ।
बालकृष्णोऽथ सस्मार नारदं लोकवेदिनम् ॥१४॥
सनत्कुमारं साधुं च गरुडं वाहनं निजम् ।
चक्रं सुदर्शनं चापि सच्चिदानन्दयोगिनम् ॥१५॥
पञ्चैते दिव्यबोधाश्च तूर्णं तत्राययुः पुरः ।
कृत्वाऽर्हां दण्डवच्चक्रुराज्ञां योग्यां समार्थयन् ॥१६॥
बालकृष्णस्तदा तेभ्यो ददौ प्रसादभोजनम् ।
पानं हारान् करौ मूर्ध्नि ततः कार्यं समादिशत् ॥१७॥
आमन्त्रणदलं तेभ्यो ददौ यज्ञार्थबोधकम् ।
सप्तम्यां वैष्णवो यज्ञः प्रारप्स्यतेऽत्र भूतले ॥१८॥
अमरीणां प्रदेशेषु केनाटकाभिधे स्थले ।
मणिसेवानगर्याः सन्निधौ विशालभूतले ॥१९॥
शेषकाष्ठावनानद्याः संगमे विनिपारगे ।
सरस्तीरेऽत्र धामस्थैर्मुक्तैर्मुक्ताभिरुत्सवे ॥२०॥
अवतारैः समस्तैश्च तथा तद्धामपार्षदैः ।
सर्वावतारिणीभिश्च पार्षदानीभिरादरात् ॥२१॥
व्यूहैर्व्यूहानिकाभिश्च नारायणैः समस्तकैः ।
नारायणीभिः सर्वाभिरागन्तव्यं मखोत्सवे ॥२२॥
विष्णुभिर्वैष्णवीभिश्चेश्वरैरीश्वरशक्तिभिः ।
वैराजेन च वैराज्या सत्या गणैः शिवेन च ॥२३॥
मायया मायिकैस्तत्वैः पुरुषेणापि सर्वथा ।
आगन्तव्यं महोत्साहैर्ब्रह्मणा ब्रह्मशक्तिभिः ॥२४॥
ब्रह्मचारियतिभिश्च ऋषिभिः साधवैस्तथा ।
पितृभिर्मातृभिश्चापि देवैर्देवीभिरित्यपि ॥२५॥
दिक्पालैर्लोकपालैश्चागन्तव्यं स्वप्रियायुतैः ।
सुरैः सुराभिः स्वर्गस्थैर्भुवर्लोकनिवासिभिः ॥२६॥
ग्रहनक्षत्रताराभिर्ग्रहैः प्रेतपिशाचकैः ।
भूतकुष्माण्डकैर्विनायकैर्गणैः समन्ततः ॥२७॥
यक्षै रक्षोभिश्चैवागन्तव्यं दैत्यैश्च दानवैः ।
काश्यपीभिः प्रजाभिश्च वेतालकैश्च शक्तिभिः ॥२८॥
राजसैस्तामसैश्चापि मानवैः सकुटुम्बकैः ।
यतिभिर्योगिभिश्चापि वृक्षैस्तृणैश्च वल्लिभिः ॥२९॥
स्तम्बैर्वासैर्जन्तुभिश्च जराजैरण्डजैरपि ।
स्वेदजैः कणजैश्चापि कन्दजैर्जलजैस्तथा ॥३०॥
आगन्तव्यं पर्वतैश्च नदीभिश्च सरोवरैः ।
तीर्थैर्वनैररण्यैश्च खाताऽखातैः समुद्रकैः ॥३१॥
आगन्तव्यं क्षेत्रपालैर्गृहदेवैः समन्ततः ।
कुलदेवैरायतनैर्गन्धर्वैश्चारणादिभिः ॥३२॥
सूतैर्मागधकैर्बन्दीजनैर्नर्तकनाम्त्रिभिः ।
बहुरूपधरैर्मल्लैर्विद्याध्रैः किन्नरादिभिः ॥३३॥
गणैर्गणिकवर्गैश्चाऽनाथैश्च भिक्षुकैरपि ।
वनिभिश्चातलावासैः पातालान्तनिवासिभिः ॥३४॥
फणिभिर्बलिभिश्चापि समागन्तव्यमादरात् ।
शास्त्रैर्वेदैश्च विद्याभिर्व्यवहारैः समन्ततः ॥३५॥
जडैश्च चेतनैः सर्वैरागन्तव्यं महामखे ।
अहं ब्रह्मपतिर्ब्रह्मप्रियास्वामी परेश्वरः ॥३६॥
अवतारी बालकृष्णो निमन्त्रयामि चाध्वरे ।
देवदैत्यगुरुभिश्चाचार्यैरैश्वर्यशालिभिः ॥३७॥

विप्रैर्मुनिभिर्ब्राह्मीभिश्चागन्तव्यं मखे मम ।
सप्तम्यां प्रातरारभ्यैकादश्यां भाद्रशुक्लके ॥३८॥
मखकार्यं मतं श्रेष्ठं चागन्तव्यं कुटुम्बिभिः ।
अनागतानां शपथं ददाम्यहं नरायणः ॥३९॥
अवश्यं चामरीदेशं पवित्रयन्तु पावनाः ।
नरनारायणाद्याश्च शेषनारायणादयः ॥४०॥
स्वस्वमुक्तादिसहिताः समायान्तु सुखप्रदाः ।
श्रीरमाराधिकागंगाशारदातुलसीप्रभाः ॥४१॥
तत्तद्धामनिवासिन्यः समायान्तु महाध्वरे ।
योगिन्यो मातरः सर्वाः कुलदेव्यश्च चण्डिकाः ॥४२॥
सर्वा वै ब्रह्मचारिण्यः समायान्तु ममाऽध्वरे ।
सपतिकाः सपुत्राश्च सवंशाः सानुगाः समाः ॥४३॥
आयान्तु चाध्वरेऽनादिकृष्णनारायणाऽर्थिताः ।
समाजोऽत्र महान् भावी ब्रह्माण्डेश्वरशोभितः ॥४४॥
शतसहस्रवदना ब्रह्माद्या विष्णवोऽपि च ।
तथोत्तमाः समायान्तु सर्वे श्रीवैष्णवेऽध्वरे ॥४५॥
आह्वयाम्यामन्त्रयाम्याकारयाम्यहमच्युतः ।
परब्रह्माऽक्षरातीतः स्वामिश्रीकृष्णवल्लभः ॥४६॥
इत्येवं राधिके यज्ञाऽऽमन्त्रणार्थां सुपत्रिकाम् ।
ददौ श्रीबालकृष्णो वै नारदादिभ्य एव तु ॥४७॥
ददावनन्तरूपाणां धर्तृत्वं परमाद्भुतम् ।
ऐश्वर्यं चापि गतिकां सर्वज्ञत्वं च सत्वरम् ॥४८॥
सर्वे ययुर्हरेराज्ञां प्रगृह्यामन्त्रणार्थिकाः ।
मध्याह्ने यमराजं च सस्मार परमेश्वरः ॥४९॥
यमलोकं बन्धशून्यं कारयामास चाज्ञया ।
सर्वान् विमोचयामास जीवान् यमवशंगतान् ॥५०॥
यमदूतांस्तदा यज्ञे कर्मचारान् चकार ह ।
एवं निर्वर्त्य भगवान् मध्याह्ने भोजनादिकम् ॥५१॥
कारयामास सर्वेभ्यो मखार्थिभ्यस्ततः स्वयम् ।
बुभुजेऽथ च विश्रान्तिं लेभे क्षणं ततः परम् ॥५२॥
आदिदेश हरिस्तत्र ब्रह्मणे विष्णवे तथा ।
शंकराय च सर्वेषामागम्यमानदेहिनाम् ॥५३॥
मखार्थिनां नराणां च नारीणां स्वागताय वै ।
सत्यै लक्ष्म्यै सरस्वत्यै चादिदेश तथैव च ॥५४॥
नरनारायणाभ्यां चादिदेश स्वागताय वै ।
धर्मदेवाय च वासुदेवायाऽप्यादिदेश च ॥५५॥
स्वागतार्थं हि सर्वेषामागन्तुकमखार्थिनाम् ।
अथ श्रीलोमशं प्राह भारद्वाजं तथा मुनिम् ॥५६॥
दिविमानायनं चापि गांगेयान् यवक्रीतिनः ।
भवन्तः स्वागतं सर्वे कुर्वन्तु सर्वदेहिनाम् ॥५७॥
आगतानां जलैश्चान्नैः फलैः पुष्पैश्च मन्दिरैः ।
आवासनप्रदानैश्चाऽपेक्ष्यवस्तुभिरादरात् ॥५८॥
कल्पवृक्षान् कल्पलताः कल्पमणींश्च कल्पगाः ।
प्राह सर्वनिवासेषु यज्ञपत्तनकेऽभितः ॥५९॥
उपतिष्ठन्तु सर्वत्र स्वागतार्थं समन्विताः ।
यथापेक्षं यथेष्टं च विधायापि नवं नवम् ॥६०॥
अर्पयन्तु महीमानेभ्यस्तदा सार्ववाञ्छिकम् ।
ब्रह्महृदं च विरजां रसकूपं तथाऽमृतम् ॥६१॥
ब्रह्मसरो हरिः प्राह तिष्ठन्तु च स्थले स्थले ।
सर्वाभिवाञ्छितं सर्वं पेयं समर्पयन्तु वै ॥६२॥
पवनं वह्निदेवं च प्राह व्यजनदो भव ।
उष्णदो भव चाप्यत्र बहुरूपधरो भवान् ॥६३॥
व्योम प्राह भवानत्र दूरश्रुतिं करोतु वै ।
सिद्धीः प्राह भवत्योऽत्र कुर्वन्तु प्रापणादिकम् ॥६४॥
एवं मन्त्रांस्तदा प्राह घोषयन्तु मखस्थले ।
मंगलानि विचित्राणि चागतानां हि मानने ॥६५॥
शारदाश्च तदा प्राह कुर्वन्तु गीतिकाः शुभाः ।
आगतानां स्वागतार्थं वाद्यानि वादयन्तु वै ॥६६॥
राजभ्यश्च हरिः प्राह सैन्यैश्चरन्तु माननम् ।
स्वागतं सर्वलोकानामागतानां मखार्थिनाम् ॥६७॥
वाद्यैर्यन्त्रध्वानकैश्च कुर्वन्तु बहुमाननम् ।
विश्वकर्माणमाहूय बालकृष्णो जगाद ह ॥६८॥
मुक्तानां तु निवासान् वै व्योम्नि क्षणात्प्रकल्पय ।
अवतारेश्वराणां च तथा व्योम्नि प्रकल्पय ॥६९॥
देवानामृषिवर्याणां व्योम्नि पितृणां कल्पय ।
ब्रह्माण्डान्तरवासानां भूतले यज्ञपत्तने ॥७०॥
उत्तरोत्तरभूभागान् प्रकल्पय क्षणान्ननु ।
दिव्यां ददामि शक्तिं ते संकल्पोत्थफलात्मिकाम् ॥७१॥
कल्पक्लृप्त्यभिधां श्रेष्ठां तया साधय सत्वरम् ।
इत्युक्त्वा विररामाऽसौ भगवान् स्वासनेऽभवत् ॥७२॥
तावद् राजा रायरोकीश्वरः संप्रार्थयद्धरिम् ।
अद्य चेद् भवतो वाञ्छा मम राज्यं पवित्रय ॥७३॥
स्फूर्तिनारीवनां दिव्यां महाकञ्जीनदीतटे ।
नगरीं मे समागत्य द्विमानायनराष्ट्रकम् ॥७४॥
पवित्रय हरेकृष्ण तवाऽऽगम्यं न किञ्चन ।
तथास्त्विति हरिः प्राह पीत्वा जलं सुशीतलम् ॥७५॥

विमानं चारुरोहापि मात्रा पित्रा समन्वितः ।
लालयनेन सहितो माणक्या सहितस्तथा ॥७६॥
पार्षदैर्दिव्यदेहैश्च भृत्यैर्दासीशतैरपि ।
द्वादशभिश्च मुख्याभिः सतीभिः सहितो ययौ ॥७७॥
स्फूर्तिनारीवनापुर्यामम्बरात् क्षणमात्रतः ।
राजा ऋषिश्चक्रतुश्च सन्मानं सहगौ तदा ॥७८॥
उद्याने त्ववतीर्यैव राजसौधसमीपतः ।
सैन्येन स्वागतं विष्णोः कुरुतः स्म विधानतः ॥७९॥
पादौ प्रक्षाल्य विधिना पपतुर्जलममृतम् ।
चन्दनैः पुष्पहारैश्च पुपूजतुस्तमादरात् ॥८०॥
अन्यान् सहगतांश्चापि पुपूजतुर्नृपो मुनिः ।
अथ सौधे निन्यतुश्च श्रीपतिं नृपमन्दिरे ॥८१॥
आरार्त्रिकं चकाराऽस्य राज्ञीदशकमेव तु ।
कुमाराश्च कुमार्यश्च चक्रुर्निराजनं ततः ॥८२॥
हरिर्दिव्यं दर्शनं स्वं चतुर्भुजं ददौ च तान् ।
आश्चर्यचकिताश्चासन् कुमार्यश्चैकविंशतिः ॥८३॥
राजकन्या मातृवश्या मात्राज्ञया च मोहिताः ।
वरमालां बालकृष्णकण्ठे समार्पयँस्तदा ॥८४॥
कृतकृत्यास्ता अभवन् प्राप्य कान्तं जनार्दनम् ।
राजा तदुत्सवं चक्रे राजसौधे हि शोभनम् ॥८५॥
हरेश्च पादयोर्द्रव्यं कोटिसंख्यं न्यधान्नृपः ।
यौतकं प्रददौ चापि स्वर्णहारादिकाँस्तथा ॥८६॥
भूषाम्बराणि प्रददौ नीराजनमकारयत् ।
नत्वा हरिं ततः शीघ्रं क्षमामयाचत प्रभोः ॥८७॥
पावितोऽहं धृतो हस्ते कन्या स्वीकृत्य मे त्वया ।
नैजीकृतोऽस्मि भगवन् सदा रक्षय मायिकात् ॥८८॥
राज्यस्ततो हरिं नत्वा चन्द्रकं भालके व्यधुः ।
क्षमां हरेरयाचन्न समुद्धरेति चार्थयन् ॥८९॥
हरिः प्राहोद्धरिष्येऽहं नयिष्येऽन्ते परं पदम् ।
ततो दिव्यस्वरूपं स्वं चतुर्भुजं व्यलोपयत् ॥९०॥
सर्वतो राजसौधेषु विहृत्य च ततः परम् ।
प्रधानानां गृहाण्येव गत्वाऽपावयदच्युतः ॥९१॥
कृतां पूजां परिगृह्य सैन्येन शोभितः प्रभुः ।
स्फूर्तिनारीवनापुर्यां राजमार्गे गतोऽभवत् ॥९२॥
दर्शकैः पूजकैश्चापि प्रजाजनैः सुपूजितः ।
वन्दितोऽर्चितपादश्च द्रव्यादिभिः समर्पितः ॥९३॥
अमरीभिर्यशोगानैः श्रावितो रञ्जितोऽर्चनैः ।
वर्धितश्चाशिषा पुष्पैर्विकीरितोऽतिमानितः ॥९४॥
जयशब्दैर्वाद्यशब्दैः कीर्तितः परमेश्वरः ।
नेत्रपद्मैस्तथा पीतो भावैश्चाकर्षितो ययौ ॥९५॥
प्रधानाः श्रेष्ठिनः सर्वे प्रजाजनाश्च योषितः ।
ददुः पूजां परिगृह्य भ्रमित्वा नगरीं ततः ॥९६॥
राजसौधं समागम्य महाकाञ्चीजलं पपौ ।
महाकांचननामानमृषिं सम्मानयन् प्रभुः ॥९७॥
द्रव्यं तस्मै ददौ तत्र राजा मुनिर्धनं तु तत् ।
यज्ञार्थं तु विमाने वै कृत्वाऽप्रापयदध्वरम् ॥९८॥
हरिर्विमानमारुह्य कुटुम्बसहितस्तदा ।
राज्ञा राज्या कन्यकाभिः सह द्विमानराष्ट्रकम् ॥९९॥
भ्रमित्वा व्योममार्गेण दृष्ट्वा देशप्रदेशकान् ।
विनिपारसरस्तीरं सायंपूर्वं समाययौ ॥१००॥
राजसौधे त्ववतीर्य विश्रान्तिं प्रययौ हरिः ।
कन्यकास्ता ब्रह्मसत्यः कान्तासु वासमाचरन् ॥१०१॥
रायरोकीश्वरो महाकाञ्चनर्षिर्धनानि वै ।
ददतुर्यज्ञकार्यार्थं कुबेराय तदा ह्युभौ ॥१०२॥
अथाकाशे महीमानविमानानि महाम्बरात् ।
अक्षराच्चापि गोलोकाद् वैकुण्ठादमृतादपि ॥१०३॥
अव्याकृतादीशलोकाद्वैराजाच्च हिरण्मयात् ।
सत्यात् स्वर्गाज्जनादेश्च मेरोर्दिग्भ्यः समन्ततः ॥१०४॥
पुर्यष्टकाद् भुवनानामन्तरालेभ्य आययुः ।
पातालेभ्यस्त्रिसृष्टिभ्यो विमानानि समाययुः ॥१०५॥
आमन्त्रितानां यानानि कोट्यर्बुदानि चाययुः ।
अम्बरं छन्नभावं वै प्राप्तं विमानकोटिभिः ॥१०६॥
स्वर्गं स्वर्गं महास्वर्गं ब्रह्मस्वर्गं तदाऽभवत् ।
सूर्यवत्काशमानं वै दिवं द्वितीयकं ह्यभूत् ॥१०७॥
राधिके जीवसृष्टिश्चेश्वरसृष्टिस्तथा परा ।
ब्रह्मसृष्टिः सर्वविधा त्वाययौ वै निमन्त्रणात् ॥१०८॥
निशा लयं गता तत्र श्रीहरेश्चैकरोमके ।
स्वागतं स्म प्रकुर्वन्ति ब्रह्मविष्णुमहेश्वराः ।
महीमानाश्चाम्बराच्चावतरन्त्युचितस्थलीः ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने रायकिन्नरनृपाय सौवर्णमूर्तिविधापनादेशः, नारदादीनां कुंकुमामन्त्रणपत्रिकायुक्तानां सृष्टिषु प्रेषणं, हरेः रायरोकीश्वरनृपराष्ट्रगमनं पूजनं स्फूर्तिनारीनगर्यां देशे च भ्रमणं पुनर्यज्ञस्थलागमनं, महीमानानामागमश्चेत्यादिनिरूपणनामा त्र्यधिकद्विशततमोऽध्यायः ॥ २०३ ॥

श्रीकृष्ण उवाच—

आययू राधिके मुक्ताः परमाक्षरधामिनः ।
मुक्तान्यश्चाययुस्तत्र दिव्यविमानसंस्थिताः ॥ १ ॥
कृतं श्रीहरिणा तेषां स्वागतं बहुशोभनम् ।
धामेश्वरा अवताराश्चाययुः शक्तिशोभिताः ॥ २ ॥
अहं राधे त्वया साकं गोपगोपीगणान्वितः ।
अगमं दिव्यपत्नीभिः साकं विमानमाश्रितः ॥ ३ ॥
वैकुण्ठाच्छ्रीपतिर्नारायणोऽपि तत्र चाययौ ।
सर्वपार्षदयुक्तश्च रमाभिः सहितस्तदा ॥ ४ ॥
वासुदेवादयो व्यूहाश्चाययुस्तत्र चाध्वरे ।
अवतारास्तथा सर्वेऽप्यायुः शक्तिसेविताः ॥ ५ ॥
सम्मानं स्वागतं श्रीमद्बालकृष्णः स्वयं व्यधात् ।
महाविष्णुस्तथा भूमा विराडपि हिरण्मयः ॥ ६ ॥
अष्टावरणसंस्थाश्चेश्वरा मायागता अपि ।
शिवलोकगताश्चापि तत्राययुस्तदंशकाः ॥ ७ ॥
श्रीहरिः स्वयमेवैषां स्वागतं मानमाचरत् ।
ईशसृष्टिसमस्तानां ब्रह्मसृष्टिनिवासिनाम् ॥ ८ ॥
चिदानन्दाम्बरे क्लृप्ते नगरे च निवासनम् ।
प्रददौ श्रीबालकृष्णोऽवतारी पुरुषोत्तमः ॥ ९ ॥
ब्रह्मणः सत्यलोकस्थास्तथान्यलोकवासिनः ।
ऋषयः पितरः सिद्धाश्चाययुस्तत्र वै मखे ॥१०॥
देवा देवेश्वराश्चाशापाला लोकप्रपालिनः ।
आययुश्च विमानैरध्वरे भुवर्निवासिनः ॥११॥
मेरोः समाययुश्चाप्यन्तरीक्षाद् ग्रहतारकाः ।
नक्षत्राणि सुराद्याश्च वसवो रुद्रकोटयः ॥१२॥
आदित्या अश्विनौ धर्मराजस्तथाऽपरे सुराः ।
आययुश्चाध्वरे नैजकुटुम्बपरिशोभिताः ॥१३॥
कैलासस्य गणा गण्यो योगिन्यश्चण्डिकास्तथा ।
भैरवा भूतदेहाश्च शांकरास्ते समाययुः ॥१४॥
एतेभ्यो देवकोटिभ्यो योग्याऽऽवासान् ददौ हरिः ।
सुस्वागतं सुसम्मानं चक्रुर्ब्रह्माऽजविष्णवः ॥१५॥
लोमशाद्याः ऋषयश्च चक्रुः सम्माननं बहु ।
वालखिल्यमहर्षीणां मुनीनां चोर्ध्वरेतसाम् ॥१६॥
साध्वीनां च सतां सांख्ययोगिनीनां सुमाननम् ।
लक्ष्म्याद्याश्चक्रुरत्यर्थं निवासान् प्रददुः सुखान् ॥१७॥
सूतमागधबन्द्याद्या विद्याद्याः किन्नरादयः ।
किम्पुंसश्चापि गन्धर्वाश्चारणा भाटजातयः ॥१८॥
आययुः कथकाश्चापि रञ्जका मल्लयोधिनः ।
रूपकाश्चाययुश्चापि नरा नृत्यकरास्तथा ॥१९॥
सर्ववर्णाः सर्वदेशनिवासास्तत्र चाययुः ।
सौराष्ट्रीया मानवाश्च दक्षिणापथवर्तिनः ॥२०॥
उष्ट्रालयजनाश्चापि ब्रह्मभूमिजना अपि ।
शिवराज्यस्थिताश्चापि प्राचीनराज्यवासिनः ॥२१॥
राशियाननिवासाश्च केतुमालनिवासिनः ।
अब्रिक्तस्थास्तथा लोका आरक्तदेशवासिनः ॥२२॥
आरात्रिकगुहावासाश्चामरीदेशवासिनः ।
हारिताश्च तथाऽऽरण्यवासाः पर्वतवासिनः ॥२३॥
जलस्थाश्च स्थलस्थाश्च व्योमस्थाः प्रसमाययुः ।
तेभ्यो ददुर्निवासाँश्चाऽकुर्वन् मानं हरादयः ॥२४॥
वृक्षा वल्ल्यस्तृणस्तम्बाः कन्दमूलादयस्तथा ।
आययुः कणजाताश्चोद्भिजा दिव्यशरीरिणः ॥२५॥
पशवः पक्षिणश्चापि हंसगरुडजातिकाः ।
अन्येऽपि जन्तवस्तत्राययुर्दिव्यशरीरिणः ॥२६॥
तेषां निवासान् प्रददुश्चक्रुर्मानं हरादयः ।
काश्यप्यश्च प्रजाः सर्वाः सर्वाऽतलादिवासिनः ॥२७॥
सर्पाश्च नागा नागेन्द्रा वाहनानि समाययुः ।
दैत्याश्च दानवा रौद्रा राक्षसाश्च समाययुः ॥२८॥
तेषां ददुर्निवासाँश्च दक्षिणे सरसस्तथा ।
सम्मानं शंकरश्चक्रे यथायोग्यं सती तथा ॥२९॥
नरनारायणाद्याश्च शेषनारायणादयः ।
अवतारास्तथा चान्ये तत्राययुर्महाध्वरे ॥३०॥
अनादिश्रीकृष्णनारायणस्तेषां समुत्सुकः ।
सम्मानं स्वागतं चक्रे निवासान् प्रददौ शुभान् ॥३१॥
नद्यो नदाः समुद्राश्च तत्त्वानि त्वाययुस्तदा ।
तीर्थानि विप्रवर्याश्च दिव्यदेहाः महर्षयः ॥३२॥
मेघा विद्युद्विलसिताश्चाययुस्तत्र चाध्वरे ।
यथायोग्यं स्वागतं च तेषां ब्रह्मा तदाऽकरोत् ॥३३॥
कालः क्षणा मुहूर्तानि दिवसाः पक्षवत्सराः ।
युगा मासाश्चाययुश्च स्वागतं शंकरो व्यधात् ॥३४॥
शिल्पिनः कोटिलोकस्थाश्चाययुस्तत्र चाध्वरे ।
विश्वकर्मा सुसम्मानं व्यधाद् वासान् ददौ तदा ॥३५॥
सर्वेषां बहुधामानं वासुदेवो नरायणः ।
यथायोग्यं प्रचक्रे वै सर्वदानादिभिस्तदा ॥३६॥
राधिके तत्र वासेषु सर्वं सम्पूर्णमस्ति वै ।
प्रदीपाः पानपात्राणि भक्ष्यभोज्यानि यानि च ॥३७॥

मिष्टान्नानि च पेयानि लेह्यानि सन्ति तत्र च ।
चोष्याणि चासनादीनि शय्या योग्याः सुकोमलाः ॥३८॥

दासा दास्यो दुग्धकुण्डा अमृतानां सरिद्वराः ।
उद्यानानां सुदृश्यानि भृत्या दास्यश्च सेवकाः ॥३९॥

कर्मचारा निदेशस्थाः सर्वावासेषु निर्मिताः ।
बालकृष्णेन संकल्पात् कोटिशोऽनन्तसेवकाः ॥४०॥

दूरश्रवणयन्त्राणि दूरदर्शनकानि च ।
वैहायसानि यानानि सर्वस्पर्शादिसिद्धिकाः ॥४१॥

घृतकुल्याः पयःकुल्याः शर्करापर्वतास्तथा ।
तत्राऽऽसन् सर्वतः क्लृप्ता महीमानादितुष्टये ॥४२॥

राधिके किं वर्णयेऽहं स्वर्णभूषादिपर्वताः ।
अम्बराणां तथा शैलाः कृताः श्रीपरमात्मना ॥४३॥

अलक्तानां सुगन्धानां द्रोण्यस्तत्र तदा कृताः ।
सर्वशृंगारवस्तूनां तत्राऽऽसन् पर्वताः पराः ॥४४॥

दीर्घिकाश्च तथाऽऽसँश्च रसानां च सरांसि वै ।
द्रवाणां तु नदाश्चासन् भुक्तये तु मखार्थिनाम् ॥४५॥

यादृश्यश्चाऽक्षरे सन्ति गोलोके च विकुण्ठके ।
कैलासके श्वेतभूमौ तादृश्यः स्मृद्धयोऽभवन् ॥४६॥

विसस्मरुर्महीमानाः सर्वसृष्टिनिवासिनः ।
निजां निजां समृद्धिं चाधिकां प्राप्य हरेर्मखे ॥४७॥

आप्रातश्चैवमेवैवं स्वागतं समभूत् खलु ।
भोजनं सेवनं पानं शय्यादानं निवासनम् ॥४८॥

दासदासीप्रदानं च सर्वं पूर्णमभूत् तदा ।
महीमानाः प्रसन्नाश्च जहुः परिश्रमं तदा ॥४९॥

सुखावासान् परान् प्राप्याऽऽधिक्येन सुखिनोऽभवन् ।
रात्रौ स्थले स्थले तत्र मनोरञ्जनशालिकाः ॥५०॥

अभवन्नर्तनादीनां कथानां योधिनां तथा ।
रूपप्रदर्शनानां च हास्यानां गीतिकारिणाम् ॥५१॥

आख्यानानां च नाट्यानां रञ्जनान्यभवन्निशि ।
प्रातर्जातं त्वेवमेव सप्तम्याः शोभनं प्रियम् ॥५२॥

राधिके श्रीबालकृष्णः स्नानं चक्रे प्रबोधितः ।
कृतपूजावन्दनश्चाऽऽजुहाव लोमशं मुनिम् ॥५३॥

ऋषिं चाज्ञापयामास कृताभिवन्दनं गुरुम् ।
यज्ञकार्ये समाधेहि सर्वद्रष्टारमुत्तमम् ॥५४॥

लोमशश्चाह कृष्णं तं तव शिष्यं महामुनिम् ।
वेदशास्त्रनिधानं च कर्मकाण्डातिगोचरम् ॥५५॥

त्रिकालज्ञं च मन्त्रज्ञं समाधिसिद्धिशालिनम् ।
सर्वैश्वर्ययुतं कृष्णांशं परेश्वरयोगिनम् ॥५६॥

समर्थं नैष्ठिकवर्यं नैकभवनशक्तिकम् ।
स्वयंप्रकाशनामानं सर्वद्रष्टारमुत्तमम् ॥५७॥

विधेहि त्वध्वरे चात्र सर्वत्रगतिशालिनम् ।
शान्तं गुणनिधिं योग्यं द्रष्टारं तं सुयोजय ॥५८॥

विष्णुर्ब्रह्मा हरश्चापि बृहस्पतिः कुमारकः ।
गणेशश्चापि योग्यं तं चान्वमोदन्त वै तदा ॥५९॥

भारद्वाजो वशिष्ठश्च भृगुर्वैश्वानरस्तथा ।
विश्वेदेवा मरुतश्चाऽप्यन्वमोदन्त तं तथा ॥६०॥

स्वयंप्रकाशो भगवान् सार्वज्ञ्यस्य महानिधिः ।
गुरोर्वाक्यं हरेर्वाक्यं सर्वद्रष्टृत्वधायकम् ॥६१॥

स्वीचकार विनीतः सँस्ततः श्रीकृष्णवल्लभः ।
कण्ठहारं ददौ तस्मै शिरस्त्राणं तदर्थकम् ॥६२॥

कञ्चुकं स्वर्णताराढ्यं वस्त्रं कौशेयकं ददौ ।
धौत्रं तथाविधं चापि सर्वद्रष्टृत्वबोधकम् ॥६३॥

आसनं चोत्तमं तत्र मण्डपे तत्कृते महत् ।
न्यधापयत्ततस्तं चाप्रेषयद् यज्ञमण्डपम् ॥६४॥

गुर्वासनं लोमशाय दत्तवान् भगवान् स्वयम् ।
सच्चिदानन्दरूपाय लालायनाय माधवः ॥६५॥

बालकृष्णो ददौ प्रतिनिधित्वं स्वस्य वै तदा ।
यजमानस्तदा राजा रायकिन्नरको मतः ॥६६॥

सतीदेवीमहाराज्ञीयुतो मण्डपमाययौ ।
अवाद्यन्त समस्तानि तूर्याणि मंगलक्षणे ॥६७॥

आययुः सर्वतो यज्ञभूमौ तदधिकारिणः ।
भूदेवाः स्वर्गदेवाश्च सत्यदेवाः समाययुः ॥६८॥

ईशदेवा देवदेवा देवाः सर्वे समाययुः ।
मुक्तास्तथाऽवताराश्चेश्वराः पत्नीसमायुताः ॥६९॥

ऋषयः पितरो देवा मानवाः स्त्रीसमायुताः ।
गुरवः सर्वलोकानां व्यासा व्यासतरास्तथा ॥७०॥

वेदाः ऋचश्च सामानि पूज्यात्मानः समाययुः ।
वयोवृद्धा ज्ञानवृद्धाः कर्मठाश्च समाययुः ॥७१॥

स्वरवृद्धा भूतिवृद्धा गुणवृद्धाः समाययुः ।
धनवृद्धा धर्मवृद्धा लोकवृद्धाः समाययुः ॥७२॥

योगवृद्धास्तपोवृद्धाः स्थानवृद्धाः समाययुः ।
गीतिवृद्धा वेदवृद्धा वृद्धवृद्धाः समाययुः ॥७३॥

सत्तावृद्धाश्चाययुश्च राजानोऽपि समाययुः ।
जापकाः कर्मचाराश्च होमका दानकास्तथा ॥७४॥

द्वारपा मण्डपरक्षा मुख्या गौणाः समाययुः ।
द्रव्यहारा हव्यहारा समिद्धाराः समाययुः ॥७५॥

निशानिर्मितकुण्डाश्च रङ्गवल्लीप्रपूरकाः ।
ध्वजापताकाधर्तारस्तत्र सर्वे समाययुः ॥७६॥
जलादानप्रकर्तारः पात्रसंचयकारिणः ।
वस्तुहाराः फलपुष्पहारास्तत्र समाययुः ॥७७॥
रसहारा गन्धहारा मिष्टहाराः समाययुः ।
वादित्रेष्वतिगर्जत्सु निनादिते दिगम्बरे ॥७८॥
सर्वे मण्डपभूमिं वै द्रष्टुं चाययुरुत्सुकाः ।
व्योम्नि व्योमविहर्तारोऽन्तरीक्षेऽन्तरयोगिनः ॥७९॥
वायुस्तरे भुवर्वासः समागत्य स्थितास्तदा ।
द्युवासाश्च प्रकाशेषु वैमानिका विमानके ॥८०॥
आगत्य तु स्थिताः सर्वे मण्डपाभिमुखास्तदा ।
सत्यः साध्व्यश्च गौर्यश्च ब्रह्मप्रियाश्च हारिताः ॥८१॥
अमर्यः कन्यकाश्चापि देव्यः सर्वाः समागताः ।
देवपत्न्यः कृतवेषाश्चित्रशृंगारशोभिताः ॥८२॥
पूर्णानन्दभराः सर्वा यज्ञमण्डपमाययुः ।
ईश्वराण्यश्च मुक्तान्यः सांख्ययोगिन्य इत्यपि ॥८३॥
मानव्यो मातरश्चापि योगिन्यश्च समाययुः ।
यतिन्यश्च ब्रह्मपत्न्यो ब्राह्मण्यश्च समाययुः ॥८४॥
वास्तुदेवाः कुण्डदेवाः शाखादेवाः समाययुः ।
द्वारदेवास्तोरणादिसुरा मण्डपदेवताः ॥८५॥
स्तंभदेवा ध्वजदेवा यूपदेवाः समाययुः ।
त्रयस्त्रिंशत्प्रदेवाश्च पञ्चायतनदेवताः ॥८६॥
श्रुत्वा वादित्रनिनदान् यज्ञमण्डपमाययुः ।
नृपा दश सयोषाश्च बहुरत्नसमन्विताः ॥८७॥
यजमानस्वरूपास्ते यज्ञमण्डपमाययुः ।
पृथ्व्यादिभूततत्त्वानि शब्दाद्या विषयास्तथा ॥८८॥
वह्नयो मूर्तिमन्तश्च यज्ञमण्डपमाययुः ।
कुण्डा बहुविधाश्चापि वेदिका मुख्यवेदिकाः ॥८९॥
स्थण्डिलाः पालिकाश्चापि मूर्तिमन्तः समाययुः ।
स्रुक्स्रुवाद्यानि पात्राणि पत्राणि कुशदेवताः ॥९०॥
समिधः कणजातानि हव्यान्यपि समाययुः ।
चरवश्च पवित्राणि मूर्तानि तत्र चाययुः ॥९१॥
शुद्धयश्चापि गव्यानि सप्तमृदः समाययुः ।
आसनान्युपकरणान्यपि मूर्तानि चाययुः ॥९२॥
अथ ज्योतिःपूरुषश्च मूर्तिमान् दिव्यरूपधृक् ।
पटहेन दिशः सर्वा नादयन् समुपाययौ ॥९३॥
स्वर्णयूपपूरुषश्च मूर्तिमाँस्तत्र चाययौ ।
तीर्थानि सर्वरूपाणि मूर्तिमन्ति समाययुः ॥९४॥
स्वस्तयः श्राद्धपुरुषास्तृप्तयस्तत्र चाययुः ।
अपूर्वाणि समस्तानि परमापूर्वलब्धये ॥९५॥
मध्यापूर्वत्रिकापूर्वायुतानि तत्र चाययुः ।
काण्डिका विधयः सर्वे क्रमास्तत्र समाययुः ॥९६॥
होतव्यानि समस्तानि मूर्तिमन्ति समाययुः ।
प्रजाः प्रजेश्वराश्चाप्याबालवृद्धयुवादिकाः ॥९७॥
नरा नार्यश्चाययुर्वै वाद्यघोषैः क्रतुस्थलीम् ।
संस्कृतां शोभया युक्तां द्युभासां त्वक्षरीकृताम् ॥९८॥
युगलैश्चायुगलैश्च संभृतां नवजीवनीम् ।
मण्डपै राजितां यज्ञपत्तनैरतिगर्विताम् ॥९९॥
सर्वसृष्ट्याधिवासैश्चाश्रितां श्रेष्ठतमां महीम् ।
सार्वभौमीं धामतुल्यां धामिनीं पारमेश्वरीम् ॥१००॥
राधिके कर्मणां प्रारंभस्योत्तमं मुहूर्तकम् ।
उपस्थितं तदा नादाः शंखानामभवन् शुभाः ॥१०१॥
तूपशब्दा अभवँश्च विद्युद्वंशनिनादकाः ।
सूचकाः कर्मकाण्डस्यारम्भस्यैव तदाऽभवन् ॥१०२॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
आययौ मण्डपं शीघ्रं जयनादप्रवर्धितः ॥१०३॥
निषसादाऽऽसने दिव्ये मण्डपे कुण्डसन्निधौ ।
नृपाश्चागत्य कुण्डानां न्यषीदन् सन्निधौ तदा ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सर्वेषामागन्तुकानां स्वागतमावासनं चोपकरणसंक्लृप्तिः स्वयंप्रकाशस्य हयवतारस्य मखे सर्वद्रष्टृत्वविधानं, मंगलवाद्यघोषाः, सर्वेषां देवीदेवादीनां यज्ञमण्डपागमनं, चेत्यादिनिरूपणनामा चतुरधिकद्विशततमोऽध्यायः ॥ २०४ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके प्रातर्मण्डपे कुण्डसन्निधौ ।
रायकिन्नरनृपतिर्दिविमानायनर्षिणा ॥ १ ॥
समं समाययौ पत्न्या सहितो यजमानकः ।
रायरोकीश्वरो राजा महाकाञ्चनकर्षिणा ॥ २ ॥
तथा स्वपत्न्या सहितः कुण्डसन्निधिमाययौ ।
रायरणजिद्भूपश्च आलायसर्षिणा समम् ॥ ३ ॥
पत्न्या युतस्तथा कुण्डसन्निधौ मण्डपे ययौ ।
रायवाकक्षको राजा चारुलाषर्षिणा समम् ॥ ४ ॥
पत्न्या युतस्तथा कुण्डसन्निधौ मण्डपे ययौ ।
रायमारीशभूपश्च दानवर्षियुतो मखे ॥ ५ ॥

पत्न्या साकं तथा कुंण्डसन्निधौ मण्डपे ययौ ।
रायबालेश्वरो राजा मालावनर्षिसंयुतः ॥ ६ ॥
राज्ञ्या साकं ययौ कुण्डसन्निधौ मण्डपे तदा ।
रायलम्बारभूपश्च रूपर्तुऋषिणा सह ॥ ७ ॥
पत्न्या युतो ययौ यज्ञे कुण्डस्य सन्निधौ तदा ।
रायनवार्कभूपश्च वार्श्यंगतनुकर्षिणा ॥ ८ ॥
पत्न्या साकं ययौ यज्ञमण्डपे कुण्डसन्निधौ ।
रायहुण्डेशनृपतिर्वीराकजनकर्षिणा ॥ ९ ॥
समं पत्न्या त्वाययौ च मण्डपे कुण्डसन्निधौ ।
रायकूपेशभूपश्च हेयतानर्षिणा सह ॥१०॥
पत्न्या साकं ययौ यज्ञमण्डपे कुण्डसन्निधौ ।
इत्येवं दश राजानौ दशकुण्डान् निजीकृतान् ॥११॥
प्रत्येकस्यैव कुण्डस्य निषेदुः सन्निधौ तदा ।
आचार्यस्य तदा कुण्डे श्रीहरिर्बालनैष्ठिकः ॥१२॥
लोमशेन तु सहितो रायकिन्नरभूभृता ।
सपत्नीकेन साकं वै न्यषीदत्परमासने ॥१३॥
अन्यकुण्डर्षिसहिता वेदप्राधानिका नृपाः ।
यथायोग्यं लोमशोक्ता निषेदुर्युगलात्मकाः ॥१४॥
राधिके देवविप्राश्च भूविप्राः सत्यभूसुराः ।
प्रारभन्त ततस्तत्र मंगलानि शुभस्वरैः ॥१५॥
अनादिश्रीकृष्णनारायणः श्रेष्ठासने स्थितः ।
लक्ष्मीनारायणं देवं सर्वतोभद्रमण्डले ॥१६॥
अस्थापयद्धरिश्चैवं सर्वा मूर्तीर्न्यधापयत् ।
स्वर्णमयं च गरुडं द्वारपालाँश्च पार्षदान् ॥१७॥
अस्थापयच्छक्तियुक्तान् हरिर्विष्णोस्तु सन्निधौ ।
गणेशस्थापनं चैशान्यां तु रुद्रस्य पीठकम् ॥१८॥
पूर्वे क्षेत्रपीठं चाग्नेय्यां शक्तिप्रपीठकम् ।
दक्षे गणेशपीठं नैर्ऋत्यां च वास्तुपीठकम् ॥१९॥
वायव्यां योगिनीपीठं स्नानपीठं तथोत्तरे ।
ग्रहपीठानि सर्वाणि कोणमध्यगगर्भके ॥२०॥
न्यस्य तत्र च देवाँस्तानस्थापयत् परेश्वरः ।
कुण्डमण्डपवेदीश्च प्रोक्ष्यद्रव्याणि मण्डपे ॥२१॥
अस्थापयच्च मुख्यानि कर्णांश्च समिधस्तथा ।
यवव्रीहिकुशान् दूर्वादधिचन्दनसर्षपान् ॥२२॥
सिद्धार्थरोचनाश्चापि फलानि शर्करास्तथा ।
गन्धकुसुमपूगानि धूपदीपादिकाँस्तथा ॥२३॥
आचार्यो लोमशस्तत्र चकार स्वस्तिकं शुभम् ।
वस्त्रोर्णामुद्रिकापात्रमधुपर्कादिकाँस्तथा ॥२४॥
हिरण्याऽऽरार्त्रिकास्नानपात्रशंखधरादिकान् ।
चन्दनागुरुकस्तूरीकर्पूरकुंकुमानि च ॥२५॥
आज्यस्थालीं चरुस्थालीं तन्दूलान् भाजनानि च ।
उपवीतं चासनानि मुद्राभूषासुमानि च ॥२६॥
ताम्बूलकं तथा तत्राऽपेक्षितानि न्यधाद्धरिः ।
यजमानः सपत्नीकः स्नानशालां ययौ ततः ॥२७॥
स्नानं कृत्वा मण्डपे त्वाययौ गणपतिं ततः ।
पुपूज प्रचकारापि मातृश्राद्धं ततो नृपः ॥२८॥
मातृपूजां विधायाऽथ दीक्षां जग्राह वैष्णवीम् ।
प्रायश्चित्तं चकाराऽथ वृद्धिश्राद्धं ततोऽकरोत् ॥२९॥
ग्रहरक्षां ध्वजानिवेशनं शिबिरबन्धनम् ।
प्रचकार ततश्चाचार्यादीनां वरणं नृपः ॥३०॥
देशकालौ समुच्चार्य मधुपर्कं ततोऽकरोत् ।
ऋत्विजां वरणं चक्रे ब्रह्मणो वरणं तथा ॥३१॥
आचार्यवरणं चापि तथाऽऽसनानि सन्ददौ ।
संवरणोपहाराँश्च निष्क्रयं द्रव्यमित्यपि ॥३२॥
वरणं जापकानां च पाठकानां तथाविधम् ।
सहस्रायुतकोटीनां विप्राणां वरणं व्यधात् ॥३३॥
चातुर्वेदा ब्राह्मणाश्च मन्त्रान् जेपुर्निजोचितान् ।
पुण्याहवाचनं चक्रुर्विप्राश्चागमवेदिनः ॥३४॥
स्वस्तिवाचोऽवदँश्चाप्याशीर्वादाँश्च ददुस्ततः ।
सप्तर्षयस्तथा लक्षमिताः सर्वे महर्षयः ॥३५॥
वर्धिनीकलशं तीर्थवारिभृतं नृपोऽमुचत् ।
स्वर्णं तत्र पल्लवाँश्च रत्नान्यपि न्यधात्ततः ॥३६॥
अथ श्रीलोमशस्तत्रानादिकृष्णनरायणम् ।
राधालक्ष्मीप्रभाश्रीमाणिकीभूपार्वतीयुतम् ॥३७॥
सौवर्णं स्थापयामासाऽपूजयच्च विधानतः ।
स्वयं श्रीमद्बालकृष्णः साक्षात्तत्र व्यराजत ॥३८॥
श्रीकृष्णं राधिकायुक्तं नारायणं श्रियायुतम् ।
सौवर्णं स्थापयामास साक्षात् सोऽपि ह्युपस्थितः ॥३९॥
अवतारान् शक्तियुक्तान् स्थापयामास वै तदा ।
सर्वे साक्षादतिष्ठन्ताऽध्वरे तत्र निजासने ॥४०॥
वासुदेवादिकव्यूहान् स्थापयामास वै तदा ।
चत्वारस्ते गोचरा वै ह्युपातिष्ठन्त चाध्वरे ॥४१॥
भूमानं च हिरण्गर्भं वैराजं चावृतीश्वरान् ।
स्थापयामास ते सर्वे साक्षात्तत्राप्युपस्थिताः ॥४२॥
स्वस्वशक्तियुताः स्वस्वपार्षदादिसमन्विताः ।
ईशानो विश्वसृड् विष्णुः स्वस्वशक्तिसमन्विताः ॥४३॥

आवाहिताः समागत्याऽराजन्त गोचराश्च ते ।
महामाया पुरुषश्च तत्त्वान्यपि च तात्त्विकाः ॥४४॥
शक्तयश्चापि साक्षादावाहिताश्चोपतस्थिरे ।
ब्रह्मप्रियाः समस्ताश्चावाहिता आययुर्मखे ॥४५॥
साक्षात्सर्वा व्यराजन्त मण्डपे तु निजासने ।
ब्रह्मा ब्रह्मपदेऽतिष्ठत् साक्षाल्लोकपितामहः ॥४६॥
रुद्रो रुद्रपदेऽतिष्ठच्चैकादशस्वरूपवान् ।
रुद्राणीभिर्युतो गणैर्गणेशकार्तिकादिभिः ॥४७॥
साक्षान्निषेदुः सौवर्णा अपि दिव्या निजासने ।
आवाहिताश्च पितरस्तथा महर्षयोऽपि च ॥४८॥
साक्षादुपस्थितास्तत्र निजासनेषु चाध्वरे ।
मरुतो वसवः साध्या विश्वेदेवाः सुरेश्वराः ॥४९॥
दिगीश्वरा लोकपाला आवाहिताश्च गोचराः ।
पत्नीयुताः समागत्य निषेदुश्चासनेषु ते ॥५०॥
सिद्धयो निधयश्चापि ग्रहाश्चोपग्रहादयः ।
तारकाश्चावाहिताश्च सन्निर्यो गोचरास्तदा ॥५१॥
साक्षान्निषेदुः सर्वे ते स्वासनेषु समाहिताः ।
सप्तर्षयो वालखिल्याः कृत्तिकाश्च दिशस्तथा ॥५२॥
आदित्याः कामदेवश्च मनवस्तिथयस्तथा ।
आवाहितास्तु साक्षात्ते ह्युपातिष्ठन्त चाध्वरे ॥५३॥
नक्षत्राणि कलाश्चापि त्रयस्त्रिंशत्सुरानुगाः ।
गुणा योगिनिकाचक्रं तीर्थानि सरितस्तथा ॥५४॥
सागरा दीर्घिकाः कूपाः सरांसि पर्वतादयः ।
आवाहिताश्चाययुस्ते साक्षात्सर्वे सुमूर्तयः ॥५५॥
यक्षाश्च राक्षसाश्चापि भूताः प्रेताः पिशाचकाः ।
विनायकाश्च कूष्माण्डा वेतालाद्या महाध्वरे ॥५६॥
स्वस्वकुटुम्बसहिताः साक्षात् तत्राययुर्मखे ।
आवाहिता निषेदुश्च निर्भया मण्डपे तदा ॥५७॥
सूतमागधबन्द्याद्या भाटचारणकिन्नराः ।
विद्याधराः किंपुरुषा गन्धर्वाः सिद्धकोटयः ॥५८॥
साक्षात्समावाहितास्ते चागता मण्डपे स्थिताः ।
चातुर्वर्ण्या यतयश्च साधवः सनकादयः ॥५९॥
आवाहिता नैष्ठिकाश्च सर्वे ते मण्डपे स्थिताः ।
गरुडश्च तथा हंसो हस्ती चाश्वश्च केसरी ॥६०॥
वृषभश्चोन्दुरुश्चैते आवाहिताः समाययुः ।
दत्तासनेषु साक्षात्ते व्यराजन्त सुमण्डपे ॥६१॥
हनुमानादयश्चिरंजीवाः साक्षात्तु मण्डपे ।
आवाहिता आययुश्च सर्वे वै ब्रह्मवर्चसः ॥६२॥
वर्णास्तथाऽऽश्रमा धर्मा धर्मराजोऽनुगाऽनुगः ।
चित्रगुप्तादिसहितः श्रावणाद्यैः समायुतः ॥६३॥
कालः सम्वत्सराद्याश्च युगा मूर्तियुताश्च ते ।
आवाहिता अतिष्ठन्त मण्डपे सर्वगोचराः ॥६४॥
जलस्थाश्च स्थलस्थाश्च जन्तवोऽपि तृणादयः ।
वल्लिकाश्च द्रुमाद्याश्च कल्पकन्दाश्च मूलिकाः ॥६५॥
स्तम्बाद्याश्चाययुश्चावाहिताः साक्षाद्धि मण्डपे ।
गृहदेवा ग्रामदेवा वनदेवाश्च सीमगाः ॥६६॥
आरण्यकास्तथा देवाः शाखातोरणदेवताः ।
स्तंभदेवा द्वारदेवाः कुण्डदेवाश्च वै तदा ॥६७॥
देहलीदेवताश्चापि पालिकादेवतास्तथा ।
प्राकारदेवताः सर्वे सर्वा गोपुरदेवताः ॥६८॥
प्रांगणदेवताः कोणदेवता भारदेवताः ।
पाटदेवा ध्वजदेवा घटदेवास्तदा मखे ॥६९॥
दण्डदेवाः पीठदेवाः स्वस्वदेवीसमन्विताः ।
आवाहितास्तु ते साक्षान्मूर्तिमन्तोऽभवन् स्थिताः ॥७०॥
धर्मदेवोऽथ तत्पत्न्यः पुत्रीपुत्रसमन्विताः ।
मूर्तिमत्यः समागत्याऽऽवाहितास्तत्र चाययुः ॥७१॥
दानवा दैत्यवर्गाश्च कश्यपजाः प्रजादयः ।
पक्षिणः पशवश्चापि जन्तवश्च सरीसृपाः ॥७२॥
सर्पा नागादयः सर्वे आवाहिताः समाययुः ।
मूर्तिमन्तो मण्डपे ते न्यषीदन् विहितासने ॥७३॥
सर्वधामनिवासाश्च सर्वलोकनिवासिनः ।
सर्वसृष्टिनिवासाश्चावाहितास्तत्र मण्डपे ॥७४॥
मूर्तिमन्तो ह्यतिष्ठन्त दत्तासनेषु चेतनाः ।
जडाश्च जडवर्गाश्च दीनानाथाश्च देहिनः ॥७५॥
दृभ्रयोगा मण्डपे ते चाययुर्धन्यवादिनः ।
काशाश्च कुशाश्च पत्राणि शलाकाः समिधस्तथा ॥७६॥
हव्यान्यपि च कव्यानि फलपुष्पकणादयः ।
रसा द्रव्याणि मिष्टानि मिष्टान्नानि त्वचस्तथा ॥७७॥
गन्धसाराणि सर्वाणि समूर्तानि तदाऽध्वरे ।
मण्डपे चाययुश्चावाहिताः साक्षात् स्थिताश्च ते ॥७८॥
कामधेनुगणाश्चापि कल्पवल्ल्यश्च मूर्तयः ।
कल्पद्रुमाश्चाययुर्वै चिन्तामणय इत्यपि ॥७९॥
मूर्तिमन्तः कल्पकोशा अक्षयपात्रकोटयः ।
हेतयः शंखचक्राद्या मखानां हेतयस्तथा ॥८०॥
साधनानि समस्तानि पूजांगपात्रकोटयः ।
आवाहिता मूर्तिमन्तः सर्वेऽतिष्ठन्त मण्डपे ॥८१॥

मन्त्रा वेदाश्च विधयः कर्मकाण्डप्रकारकाः ।
शुद्धयोऽपूर्वदेवाश्च मूर्तिमन्तस्तु मण्डपे ॥८२॥
आवाहिताश्चाययुस्तेऽतिष्ठन्त विहितासने ।
स्वरा विद्याः शारदाद्या ब्रह्मविद्यादिकास्तथा ॥८३॥
गीतयः सामसूक्तानि स्वाहास्वधावषट्कुलम् ।
अग्नयः सर्वजातीया आकारिताश्च मण्डपे ॥८४॥
मूर्तिमन्तो न्यषीदन् वै दत्तासनेषु ते तदा ।
देवदैत्यगुरवश्च व्यासा व्याख्यानमूर्तयः ॥८५॥
तपांसि योगविधयो ज्ञानं वैराग्यमित्यपि ।
भक्तिर्विभूतयः सर्वा आकारिताः समाययुः ॥८६॥
प्रत्यक्षा योषितां वर्गा अतिष्ठन्त समूर्तयः ।
विघ्ना अविघ्नरूपास्ते रोगा अरोगरूपिणः ॥८७॥
दुःखान्यदुःखरूपाणि आकारितानि चाययुः ।
धर्मवंशास्तथाऽधर्मस्तत्पत्न्यश्चापि वै तदा ॥८८॥
तद्वंश्याश्च मखे तेऽपि सौम्या भूत्वा समाययुः ।
अधर्मो धर्मरूपोऽभूत्तदा रूपं विवर्तयन् ॥८९॥
आनन्दश्च सुखं शान्तिस्तृप्तिः सन्तोषकादयः ।
आवाहिताश्चाययुश्च मूर्तयो मण्डपे तदा ॥९०॥
शब्दाद्या विषयाश्चापि षट्कोशाद्याश्च देहगाः ।
समूर्ताश्चाययुः सर्वे आकारितास्तु मण्डपे ॥९१॥
राधिके मण्डपश्चैवं सर्वसृष्टिसमन्वितः ।
शोभनेऽनादिकृष्णस्योपस्थितौ दिव्यधामवत् ॥९२॥
अनादिश्रीकृष्णनारायणे श्रीकृष्णवल्लभे ।
सर्वस्वामिनि यत्रस्थे तत्र किं पक्षपातनम् ॥९३॥
जडाश्च चेतनाश्चापि जडच्चेतनमिश्रकाः ।
सर्वे वंशा हरेः सन्ति सर्वेषु समवर्तिनः ॥९४॥
राजसास्तामसाश्चापि सात्त्विका देहिनोऽपि च ।
सन्तश्चिदश्च सर्वे वै आनन्दा मूर्तियोगिनः ॥९५॥
आवाहिताश्चाययुस्ते न्यषीदन् वै सुमण्डपे ।
दाता होता स्वयं कृष्णः परमेशः सनातनः ॥९६॥
तत्र न्यूनं न वै चास्ति संकोचोऽपि विकासितः ।
दारिद्र्यं प्रातमेवोदारतां विवर्तितं तदा ॥९७॥
नकारोऽपि गतस्तत्र हाकारतां विवर्तितः ।
संशयोऽपि गतस्तत्र निश्चयतां विवर्तितः ॥९८॥
भयं विवृत्तं सहसाऽप्रापन्निर्भयतां तदा ।
न्यूनत्वं विवृतं चाप्यधिकतां तु समासदत् ॥९९॥
इत्येवं राधिके तत्र मण्डपे देवतादिकाः ।
मूर्तिमन्तः समागत्य निषेदुः स्थापने निजे ॥१००॥
य एवाऽदृश्यरूपैश्च ग्रहीतारस्त एव ह ।
साक्षादुपस्थितास्तत्र बालकृष्णेच्छयाऽखिलाः ॥१०१॥
इत्येवं सर्वदेवानां दशकुण्डेषु मण्डपे ।
यथापेक्षमभूद् राधे ! स्थापना वेदिकादिषु ॥१०२॥
सर्वे नृपास्तथाऽकुर्वन् कर्म यज्ञीयमेव तत् ।
ततः पूजा प्रवृत्ता च तत्तदृषिप्रणोदिता ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने राज्ञामृषीणां मण्डपे समागमनं देवपीठानां स्थापना, ऋत्विगाचार्यादिवरणं, प्रत्यक्षदेवानां विराजमानता चेत्यादिनिरूपणनामा पञ्चाधिकद्विशततमोऽध्यायः ॥ २०५ ॥

श्रीकृष्ण उवाच—

राधिके मण्डपे कृष्णः सौवर्णौ पितरौ तथा ।
सूर्यं चन्द्रं शंकरं च सतीं गंगां व्यलिष्ठिपत् ॥ १ ॥
अनादिश्रीबालकृष्णं लोमशोक्तविधानतः ।
रायकिन्नरराजः संपूजयत् परमेश्वरम् ॥ २ ॥
मातरं पितरं चापि हरेस्तत्राऽप्यपूजयत् ।
आवाहनं चासनं च पाद्यमर्घ्यं ददौ तदा ॥ ३ ॥
ददावाचमनं वारि शौचार्थं वारि चेत्यपि ।
शुद्ध्यर्थं च ततो दुग्धं दधि घृतं च शर्कराम् ॥ ४ ॥
मधु ददौ ततश्चाभिषेकार्थं तीर्थवारि च ।
वस्त्राऽऽमार्जनमेवापि सुगन्धितैलमर्दनम् ॥ ५ ॥
वस्त्राभूषाप्रदानं चन्दनाक्षतगुलालकम् ।
पुष्पहारान् कज्जलादि धूपं दीपं च कुंकुमम् ॥ ६ ॥
तुलसीं पद्महारांश्च नैवेद्यं चोपवीतकम् ।
छत्रं चामरव्यजने नैवेद्यं फलमुत्तमम् ॥ ७ ॥
जलं ताम्बूलकं चारात्रिकं च दक्षिणां ददौ ।
स्तुतिं क्षमां नमस्कारं दण्डवत् कुसुमाञ्जलिम् ॥ ८ ॥
ददौ पूजाप्रकारैश्च समर्च्य श्रीनरायणम् ।
ततोऽवतारान् मुक्तांश्चेश्वरान् देवान् मुनीन् सुरान् ॥ ९ ॥
पितॄन् देवीर्देवताश्च पूजयामास पार्थिवः ।
चकार च ततः प्रायश्चित्तांगं व्याहृतेर्हवम् ॥१०॥
विष्णुश्राद्धं चकाराऽथ चक्रे मुखावलोकनम् ।
आज्यपात्रस्य दानं चाचार्याय प्रददौ नृपः ॥११॥
शुश्राव शान्तिपाठांश्च विप्रकृतान् सुखावहान् ।
स्वस्तिपाठान् मांगलिकान् श्रुत्वा ववन्द वै गुरुम् ॥१२॥
लोमशर्षिस्ततश्चक्रे प्रधानं मखकर्मणः ।
संकल्पं चांगसंकल्पं कारयामास तं नृपम् ॥१३॥

भूमिकूर्माऽनन्तपूजां दीपस्थानं नृपो व्यधात् ।
चक्रे दिग्रक्षणं वामे करे त्वादाय सर्षपान् ॥१४॥
विकीर्य सर्वतोभागेऽघातयद्वामपाणिना ।
भूमिं चाथ ततश्चक्रे कलशाराधनं नृपः ॥१५॥
जले तीर्थानि चावाह्य देहे स्वे प्रोक्षणं व्यधात् ।
पञ्चगव्येन यज्ञस्य संभारप्रोक्षणं व्यधात् ॥१६॥
गणेशपूजनं चक्रे साक्षाद् दूर्वादिभिस्तथा ।
षोडशभिस्तूपचारैरथाऽऽवरणपूजनम् ॥१७॥
चक्रे ततश्च गौर्यादिमातृकापूजनं व्यधात् ।
ब्राह्म्यादिमातृकापूजां कृत्वा राजा ततोऽकरोत् ॥१८॥
नान्दीश्राद्धं तर्पणं च पितॄणां तृप्तिकारकम् ।
अथाऽर्घवन्दनं चक्रे कलशे सूत्रवेष्टनम् ॥१९॥
ओषधिपुष्पनिःक्षेपं पञ्चपल्लवरत्नकम् ।
चिक्षेप च फलं स्वर्णं मृत्तिकां धान्यदूर्विकाम् ॥२०॥
ततश्चाचार्यवरणं ब्रह्मादिवरणं पुनः ।
गणेशवरणं द्वारपालवरणमाचरत् ॥२१॥
ऋत्विजां वरणं चक्रे मधुपर्कार्हणं व्यधात् ।
मधुपर्कप्राशनं च व्यधादाचमनं ततः ॥२२॥
गोनिष्क्रयं धनं राजा ददौ विप्राय वै तदा ।
प्रार्थयच्च गुरुं श्रीमद्बालकृष्णं च लोमशम् ॥२३॥
भूभृतस्तिलकं चक्रे लोमशर्षिस्तदा ततः ।
राज्ञ्या बबन्ध च वामे करे रक्षार्थसूत्रकम् ॥२४॥
कंकणं वा ततश्चापि पुण्याहवाचनं व्यधात् ।
सजलं कलशं पूर्णपात्रयुक्तं तु धान्यके ॥२५॥
न्यधात् पुपूज कलशं तज्जलैस्तर्पणं व्यधात् ।
यजमानाऽभिषेकं च लोमशः समवर्तयत् ॥२६॥
वर्धनीकलशस्यापि स्थापनं प्रचकार ह ।
राजा प्रदक्षिणीकृत्य मण्डपे तं न्यवेशयत् ॥२७॥
जलयात्रां लोमशश्चाऽकारयत् कलशान्विताम् ।
सौभाग्याभिश्च नारीभिर्वाद्ययानसुकीर्तनैः ॥२८॥
तीर्थे सम्पूज्य वरुणं गणेशं जलमातरम् ।
जलं पुपूज च जीवमातरं स्थलमातरम् ॥२९॥
मत्स्यी कूर्मी च वाराही दर्दुरी मकरी तथा ।
जलूकी चापि तन्तूकी तृप्यन्तां जलमातरः ॥३०॥
कुमारी धनदा नन्दा विमला मंगला चला ।
पद्मा चेति प्रतृप्यन्तां सप्तैता जीवमातृकाः ॥३१॥
उर्मीर्लक्ष्मीर्महामाया पानदेवी च वारुणी ।
निर्मला च तथा गोधा तृप्यन्तां स्थलमातरः ॥३२॥

ततोऽर्चयच्चतुःषष्टियोगिनीचक्रमित्यपि ।
क्षेत्रपालं तीर्थगणं वरुणं समपूजयत् ॥३३॥
कलशस्थापनं चक्रे क्षेत्रपालप्रपूजनम् ।
ततो मण्डपमागत्य कलशेन समन्वितः ॥३४॥
राजा च द्वारशाखाधिष्ठातृदेवानपूजयत् ।
देहलीं मण्डलशोभां कृत्वा वास्तुं प्रणम्य च ॥३५॥
वास्तुस्थापनमेवापि लोमशर्षिस्तदाऽकरोत् ।
वास्तुपीठं विधायाऽपि गणेशं समपूजयत् ॥३६॥
वास्तुदेवान् चतुःषष्टिसंख्याकान् लोमशो मुनिः ।
आवाह्य च समभ्यर्च्य कलशं समपूजयत् ॥३७॥
कलशे वास्तुमूर्तिं चाऽपूजयत् षोडशादिभिः ।
बहिर्होमं विधायाऽथ बलिं तस्मै ददावृषिः ॥३८॥
मण्डपस्य ततः पूजां स्तम्भपूजां समाचरत् ।
सर्वकोणस्तम्भदेवान् मध्यदेवानपूजयत् ॥३९॥
द्वारतोरणदेवाँश्चाऽपूजयन्नृपतिस्ततः ।
वेदपूजां चिह्नपूजां शाखापूजामथाऽकरोत् ॥४०॥
कलशे शाखिनो देवानपूजयद्विधानतः ।
भूतादिभ्यो माषबलिमार्पयत् सन्न्यवर्तयत् ॥४१॥
सर्वतोभद्रकं रम्यं मण्डलं देवतायुतम् ।
अपूजयत् त्रयस्त्रिंशद्देवतास्तत्र मण्डले ॥४२॥
मध्येऽनादिकृष्णनारायणं तमवतारिणम् ।
सर्वपत्नीयुतं राधाकृष्णं श्रीमन्नरायणम् ॥४३॥
अवतारान् शक्तियुक्तानीश्वरानप्यपूजयत् ।
ईश्वराणीस्तथा सर्वा अन्यशक्तीरपूजयत् ॥४४॥
मुक्तान् मुक्तानिकाश्चापि धामाऽक्षरं ह्यपूजयत् ।
श्रीकृष्णं राधिकायुक्तं गोपगोपीगणान्वितम् ॥४५॥
अपूजयत्तदा दासीपत्नीप्रियासमन्वितम् ।
लक्ष्मीनारायणं देवं पार्षदैर्गरुडेन च ॥४६॥
रमाभिश्च पार्षदानीभिश्च पुपूज भूपतिः ।
गणेशपूजनं चक्रे वास्तुदेवप्रपूजनम् ॥४७॥
ईश्वराणां पूजनं च चकार भूपतिस्ततः ।
ब्रह्माणं च तथा सोममीशानमिन्द्रमित्यपि ॥४८॥
अग्निं वैवस्वतं रक्षो वरुणं समपूजयत् ।
वायुं कुबेरं च वसून् रुद्रानेकादशापि च ॥४९॥
आदित्यान् द्वादश चैवाऽऽश्विनौ तत्राऽप्यपूजयत् ।
पितॄँश्च विश्वदेवाँश्च सप्तयज्ञानपूजयत् ॥५०॥
सर्पान् गन्धर्वकानप्सरसः स्कन्दमपूजयत् ।
नन्दीश्वरं महाकालं शूलं दक्षादिसप्तकम् ॥५१॥

अपूजयत्तथा दुर्गां विष्णुं च वैष्णवीं तथा।
स्वधां स्वाहां मृत्युरोगौ गणेशं समपूजयत् ॥५२॥
वरुणं च मखेशं च मरुतः समपूजयत्।
पृथिवीं च नदीं गंगां सरितश्चाऽप्यपूजयत् ॥५३॥
सागरान् सप्त मेरुं च पार्थिवः समपूजयत्।
आयुधानि समस्तानि तीर्थानि समपूजयत् ॥५४॥
विभूषणानि दिव्यानि मूर्तिमन्ति ह्यपूजयत्।
भारद्वाजादिकान् महर्षिवर्यानप्यपूजयत् ॥५५॥
अरुन्धतीं तथा चान्या देवीस्तत्राऽप्यपूजयत्।
सर्वदिक्पालपत्नीश्च राजा सम्यगपूजयत् ॥५६॥
ईश्वरान् सर्वपितॄंश्च मुनीन् देवानृषींस्तथा।
साधून् साध्वीः सांख्ययोगिनीश्च सर्वा ह्यपूजयत् ॥५७॥
भुवर्लोकनिवासाँश्च कुष्माण्डकान् विनायकान्।
वेतालान् राक्षसाँश्चापि प्रेतान् सर्वानपूजयत् ॥५८॥
यमदूतान् धर्मवंश्यान् अधर्मवंशजानपि।
नारीर्नरान् नृपतिः सः सर्वांस्तत्र ह्यपूजयत् ॥५९॥
पर्वतान् वनवृक्षाँश्च वल्लीश्च तृणजातिकान्।
स्तबकान् वंशजातीयान् रसदानप्यपूजयत् ॥६०॥
मूलकन्दान् फलिवृक्षान् जरायूजांस्तथाऽण्डजान्।
जन्तून् सूक्ष्मान् विशालाँश्च यादोवासानपूजयत् ॥६१॥
स्वेदजान् काश्यपीः सर्वाः प्रजाश्चाप्यत्यपूजयत्।
स्थलजान् वायुजाँश्चापि वह्निजान् खातजानपि ॥६२॥
पार्थिवान् देहिनो वारिजातान् सर्वानपूजयत्।
सात्त्विकान् मलिनान् राजसाँश्च तामसदेहिनः ॥६३॥
अपूजयत्तदा दीनानाथान् भिक्षुकानपि।
अनाश्रितान् पराधीनान् परभाग्योपजीविनः ॥६४॥
भृत्यवर्गान् दूरवर्गान् दासवर्गानपूजयत्।
कलाज्ञान् शिल्पवेतॄंश्च नाट्यनर्तनकारकान् ॥६५॥
सूतमागधवन्द्यादीन् कथाकारानपूजयत्।
जडान् तत्त्वविशेषांश्च गुणान् स्वरानपूर्वकान् ॥६६॥
मन्त्रान् सर्वान् विषयाँश्च भूपतिः समपूजयत्।
गीतिका वेदमूर्तीश्च यज्ञपात्राणि सत्कणान् ॥६७॥
सस्यानि समिधः सर्वान् हव्यान्यपि त्वपूजयत्।
यानि यानि तदा यज्ञमण्डपे हरिणा स्वयम् ॥६८॥
आमन्त्रितानि भूतानि चागतानि समुत्सवे।
अपि निकृष्टनामानि निकृष्टदेहवन्त्यपि ॥६९॥
परेश्वरो निजां सृष्टिं निजापत्यस्वरूपिणीम्।
सर्वां श्रीवैष्णवे नैजे यज्ञे ह्यपूजयत्तदा ॥७०॥

पातालस्थान् दैत्यगणान् दानवान् नागविग्रहान्।
धामलोकनिवासाँश्च मण्डपे वै समागतान् ॥७१॥
सर्वानपूजयत् कृष्णनारायणः सुखप्रदः।
अपि कीटपतंगाद्यान् पूजयित्वा हरिः स्वयम् ॥७२॥
सर्वेभ्योऽर्घ्यं बलिं चातर्पयद्वै निजकेऽध्वरे।
संकर्षणादिकाँश्चापि सनकाद्याँश्च योगिनः ॥७३॥
विश्वक्सेनादिकान् सर्वान् पार्षदान् यन्त्रदेवताः।
शुकादीन् ज्ञानयोगाँश्च मत्स्यादीन् केशवानपि ॥७४॥
प्रणवादीन् शारदाँश्चऽवतारान् ऋषभादिकान्।
विश्वामित्रादिकान् सर्वानपूजयत्तदा नृपः ॥७५॥
ब्राह्म्यादिकाः शक्तिरूपा अणिमासिद्धिकास्तथा।
दिक्पालान् चायुधान्येव वेदान् गंगादिकास्तथा ॥७६॥
मन्त्रदेवान् कुटुम्बाढ्यान् पूजयत्तदा नृपः।
ततोऽग्न्युत्तारणं चक्रे मूर्तानां घृतलेपनम् ॥७७॥
जलधाराभिषेकं च कृत्वा प्राणान् स बीजकान्।
इह प्राणाश्च आं ह्रीं क्रौं यंरंलंवंशंषंसंहम् ॥७८॥
सःसोऽहमिति मन्त्राद्यैर्न्यासैर्बीजैरयोजयत्।
एवं सौवर्णमूर्तीनां सर्वासां तत्र मण्डपे ॥७९॥
स्थापितानां हरिश्चापि पूजां चकार वै पुनः।
निजां निजपितुश्चापि निजमातुस्तथा स्वसुः ॥८०॥
भ्रातॄणां च गणेशस्य राधाकृष्णस्य वै तथा।
लक्ष्मीनारायणस्यापि पद्मायाश्च तथा शुभाम् ॥८१॥
रमायाश्च तथा माणिक्यायास्तथा च कानकीम्।
सूर्यस्यापि च चन्द्रस्येशानस्यापि च कानकीम् ॥८२॥
सत्याश्च कानकीं मूर्तिं प्रतिष्ठार्थमपूजयत्।
षोडशप्राणवासार्थं मूर्तीः सर्वा अपूजयत् ॥८३॥
ब्रह्मसृष्टिमीशसृष्टिं जीवसृष्टिमथोऽस्मरत्।
तत्रावतारमूर्तीनां तदा कृष्णः स्मृतिं व्यधात् ॥८४॥
सर्वावताराश्चागत्य मण्डपे प्रतिमादिषु।
अतिष्ठन्त हि दिव्यास्ते सर्वतत्त्वमयाः सुराः ॥८५॥
एवं वै विधिना मूर्तीः प्रतिष्ठाप्य सजीविकाः।
चेतनास्ता विधायैव प्राविशद् बालकृष्णकः ॥८६॥
ततश्चक्रे पीठपूजां राजा कृष्णानुमोदितः।
परदेवतापूजां च गुरोः पूजां चकार सः ॥८७॥
वेदव्यासं च गरुडं दुर्गां सरस्वतीं तथा।
यमं वायुं शिवं चेन्द्रं निर्ऋतिं रुद्रमार्चयत् ॥८८॥
शक्तिं कूर्ममनन्तं च पृथ्वीमद्रिमपूजयत्।
क्षीराब्धिं श्वेतद्वीपं च मण्डपं पद्ममार्चयत् ॥८९॥

सूर्यमण्डलमेवाऽपि हिरण्मयं नरायणम् ।
सोममण्डलमेवापि विष्णुं दिव्यं नरायणम् ॥९०॥
हुताशनेऽग्निदेवं च नृसिंहं च नरायणम् ।
सत्त्वश्रियं रजोभूमिं तमोदुर्गामपूजयत् ॥९१॥
आत्मानं चान्तरात्मानं परात्मानमपूजयत् ।
ज्ञानात्मानं विमलाद्याः पीठशक्तीरपूजयत् ॥९२॥
प्रधानपुरुषं प्रकृतिपुरुषमपूजयत् ।
कुण्डस्य पूजनं चापि विश्वकर्मप्रपूजनम् ॥९३॥
मेखलादेवता विष्णुब्रह्मरुद्रानपूजयत् ।
योनिपूजां कण्ठपूजां नाभिपूजामथाऽकरोत् ॥९४॥
वास्तुदेवाँस्तथा ब्रह्मादीन् वेदान् कच्छपादिकान् ।
अपूजयत्तदा राजा रायकिन्नरसंज्ञकः ॥९५॥
धर्मादिकान् पूजयित्वा चक्रेऽग्निस्थापनं ततः ।
सम्पुटेऽग्निं समाहृत्य भ्रामयित्वा त्रिरेव तम् ॥९६॥
अग्निमस्थापयत् कुण्डे दक्षे स्वाहां स्वधां परे ।
समार्चयच्च विधिना प्रणीतानयनं ततः ॥९७॥
परिस्तरणमेवाऽपि पात्रासादनमित्यपि ।
पवित्रीकरणं चापि तथा वार्यभिषेचनम् ॥९८॥
उत्तानं चोद्दिगनं च प्रोक्षणं क्षालनं तथा ।
सेकश्चर्वधिश्रयणं पर्यग्निकरणं तथा ॥९९॥
चकार लोमशो देवो ग्रहस्थापनमाचरत् ।
नवग्रहानार्चयच्चाऽधिदेवानार्चयत्तथा ॥१००॥
प्रत्यधिदेवतार्हां च लोकपालार्हणां ततः ।
क्षेत्रपालस्थापनं च दिक्पालस्थापनं तथा ॥१०१॥
महारुद्रस्थापनं च तेषां पूजनमाचरत् ।
चतुःषष्टियोगिनीनां पूजनं चाकरोत्ततः ॥१०२॥
पञ्चाशत्क्षेत्रपालानां पूजनं च ततोऽकरोत् ।
परमेशं चावतारानीश्वरान् देवतास्तथा ॥१०३॥
दध्यौ राजा तु तिलकं ह्यकारयद्धरेस्तदा ।
तुलसीमालिकां चापि ददौ मालां ददौ ततः ॥१०४॥
शंखं चक्रादिकं दत्वाऽपूजयन्नृपतिश्च वै ।
मत्स्यचिह्नं त्रिशूलं च धनुषं बाणमित्यपि ॥१०५॥
स्वस्तिकं च ध्वजं चक्रं वज्रं चापूजयत्ततः ।
घण्टापूजामाचरच्च कलशार्हां समाचरत् ॥१०६॥
भूशुद्धिं लोमशस्तं चाकारयद् वै नमस्तथा ।
आसनं च शिखाया बन्धनं दिग्बन्धनं तथा ॥१०७॥
तालत्रयं तथा भूमिताडनं त्रिः समाचरत् ।
भूतशुद्धिं प्राचरच्च कुण्डलिनीमपूजयत् ॥१०८॥
षट्चक्राणि पूजयित्वा जीवं ब्रह्माऽप्यपूजयत् ।
पापपुरुषदाहं च ध्यात्वा राजाऽकरोत्तदा ॥१०९॥
शरीराऽऽप्लवनं चक्रे तथाऽऽत्मशोधनं नृपः ।
प्राणप्रतिष्ठां सन्यासां बीजाक्षरयुतां तथा ॥११०॥
पाठशक्तिसहितां च कृत्वा पूजनमाचरत् ।
पञ्चावरणदेवार्हां प्राणस्थापनमित्यपि ॥१११॥
अथाऽन्तर्मातृकान्यासान् बहिर्मातृकन्यासनम् ।
एकादश तथा न्यासान् श्रीहरेश्च समाचरत् ॥११२॥
पात्रासादनमेवापि दीपदानमथाचरत् ।
कलार्हणां तथाऽर्घं च कृत्वा दत्वा विशेषतः ॥११३॥
पाद्याऽर्घ्याचमनप्रोक्षणीमधुपर्कपात्रकम् ।
विधिनाऽपूजयद् राजा राधिके मण्डपे मखे ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सौवर्णीमूर्तिपूजा गणेशपूजा कलशस्थापनं मण्डलं वास्तुस्थापनं सर्वेश्वरेश्वरदेवादिपूजा कुण्डमण्डपशाखादिदेवदेवीयोगिनी-क्षेत्रपालात्मादिपूजा देहशुद्ध्यादिब्रह्मपूजाऽग्निस्थापनं चेत्यादिनिरूपणनामा षडधिकद्विशततमोऽध्यायः ॥ २०६ ॥

**श्रीकृष्ण उवाच—**

श्रीपतिं राधिके राजाऽनादिकृष्णनरायणम् ।
अपूजयन्महामहोपचारैः सकुटुम्बकम् ॥ १ ॥
ध्यानमावाहनं सम्यगासनं पाद्यमर्घ्यकम् ।
आचमनं मधुपर्कं पयो दधि घृतं मधु ॥ २ ॥
शर्करां प्रददौ तस्मै चाभ्यंगं निर्मलोदकम् ।
अभिषेकं सुगन्धाढ्यं वस्त्रामार्जनमाददौ ॥ ३ ॥
वस्त्रं यज्ञोपवीतं चाऽलंकारान् मालिकां ददौ ।
गन्धसारं कुंकुमं च कज्जलं चाक्षतान् ददौ ॥ ४ ॥
पुष्पमञ्जरिकाश्चापि तुलसीपत्रमाददौ ।
अंगपूजां कृतवाँश्चाऽवरणानां प्रपूजनम् ॥ ५ ॥
श्रीहरेस्तत्सेविकानां व्यूहानां च प्रपूजनम् ।
पार्षदानामवतारमूर्तीनां च प्रपूजनम् ॥ ६ ॥
तथाऽवतारिणीनां पूजनं पार्षदपूजनम् ।
हेतीनां च तदैश्वर्यविभूतीनां प्रपूजनम् ॥ ७ ॥
वाहनानां तथा भृत्यदासानां च प्रपूजनम् ।
दासीनां पुत्रपौत्राणां कुटुम्बानां प्रपूजनम् ॥ ८ ॥
गृहपालार्हणं द्वारपालार्हणं चकार ह ।
श्वेतचूर्णं रक्तचूर्णं सिन्दूरकं हरिद्रिकाम् ॥ ९ ॥

धूपं दीपमलक्तं च नैवेद्यं च जलं फलम् ।
अपोशनं करोद्वर्त्तं ताम्बूलं दक्षिणां ददौ ॥१०॥
छत्रं चामरकं चापि व्यजनं दर्पणं ददौ ।
पादुके सर्वश्रृंगारं ददौ नीराजनं ततः ॥११॥
वस्त्रनीराजनं वारिनीराजनं नमःक्रियाम् ।
प्रदक्षिणां दण्डवच्च स्तुतिं पुष्पाञ्जलिं ददौ ॥१२॥
अथ होमं ततो वह्नौ चकार नृपतिः स्वयम् ।
आदावधिश्रिते चरोः स्रुवस्य तपनं व्यधात् ॥१३॥
मार्जनं चाऽभ्युक्षणं च तपनं च निधानकम् ।
आज्योद्वासनमेवाऽपि चरोरुद्वासनं तथा ॥१४॥
पवित्राभ्यां तत आज्योत्पवनं चाप्यवेक्षणम् ।
अपद्रव्यनिरासं च प्रोक्षिण्युत्पवनं तथा ॥१५॥
पर्युक्षणं निधानं च कृत्वा होमं ददौ नृपः ।
आघारावाज्यभागौ च ब्रह्मा होमे ददौ तदा ॥१६॥
समिच्चरुतिलाज्यादिहविर्द्रव्याणि सन्ददौ ।
परेशाय महेशाय प्रजानां पतये तथा ॥१७॥
दिक्पालेभ्यस्तथेशेभ्यो लोकपालेभ्य इत्यपि ।
नवग्रहेभ्यो देवेभ्यः प्रत्यधिदेवकोटये ॥१८॥
अधिदेवेभ्य एवापि होमं ददौ नृपस्तदा ।
वास्तुमण्डलदेवेभ्यो होमं ददौ ततः परम् ॥१९॥
समित्तिलान् पायसादीनुदुम्बरसमिद्वराः ।
अश्वत्थादीन् घृतमधुक्षीराणि प्रददौ तदा ॥२०॥
तथामण्डलदेवानां होमं ददौ यथोचितम् ।
फलैर्भिन्नैर्विभिन्नैश्च द्रव्यैर्होमं ददौ नृपः ॥२१॥
ब्रह्मादिदेवताभ्यश्च होमं ददौ घृतादिभिः ।
पीठदेवताभ्यश्चापि होमं ददौ घृतादिभिः ॥२२॥
ततः समित्तिलाज्यैश्च चरुणा पायसेन वै ।
होमं प्रधानं प्रददौ सहस्राऽयुतमेव च ॥२३॥
आवरणसुरेभ्यश्च होमं ददौ ततो नृपः ।
द्राक्षेक्षुपूगनारिंगैस्तिलाज्यैर्व्याहृतेर्हवम् ॥२४॥
ददौ च जम्बिरं बीजपूरकं खारिकां तथा ।
नारिकेलं दाडिमं च गुग्गुलं सर्षपादिकान् ॥२५॥
लक्ष्म्यै ददौ ततो दुग्धं शर्कराकदलीघृतम् ।
फलदूर्वाऽक्षतांश्चापि होमं चक्रे नृपः स्वयम् ॥२६॥
गन्धं पुष्पं धूपदीपौ नैवेद्यं च ददौ ततः ।
ब्रह्मा ददौ ततः स्विष्टकृद्धोमं च नवाहुतीन् ॥२७॥
सर्वेभ्यश्च सुरेभ्यश्च बलिदानं यथोचितम् ।
दिक्पालेभ्यो दीपयुक्तं पायसान्नं बलिं ददौ ॥२८॥
गणेशाय च मातृभ्यो वास्तुदेवेभ्य एव च ।
वास्तुपुंसे तथाऽऽदित्यादिभ्यो बलिं ददौ नृपः ॥२९॥
योगिनीभ्यः क्षेत्रपालेभ्यश्च बलिं ददौ नृपः ।
मण्डलस्य प्रधानस्य देवेभ्योऽपि बलिं ददौ ॥३०॥
षट्पंचाशद्देवताभ्यो बलिं ददौ सपूजनम् ।
लक्ष्मीनारायणराधाकृष्णाभ्यां च बलिं ददौ ॥३१॥
नरनारायणवासुदेवनारायणाय च ।
अनादिश्रीकृष्णनारायणाय स्वबलिं ददौ ॥३२॥
सर्वाभ्यश्च हरेः शक्तिभ्यश्च बलिं ददौ नृपः ।
ब्रह्मप्रियाभ्यः सर्वाभ्यो बलिं राजा ददौ ततः ॥३३॥
धामपालबलिं चापि द्वारपालबलिं तथा ।
सृष्टिपालबलिं चापि क्षेत्रपालबलिं ददौ ॥३४॥
नगरग्रामक्षेत्रादिस्थितेभ्योऽपि बलिं ददौ ।
गृहारण्यवनस्थेभ्यो बलिं राजा ददौ ततः ॥३५॥
पातालादिस्थितेभ्यश्च भूमिस्वर्वासिने तथा ।
भुवर्लोकस्थितेभ्य सत्यान्तेभ्यो बलिं ददौ ॥३६॥
आवरणस्थितेभ्यश्च वैराजलोकवासिने ।
हिरण्मयाऽव्याकृतगोलोकवासेभ्य आददौ ॥३७॥
वैकुण्ठाऽक्षरधामस्थमायास्थेभ्यो बलिं ददौ ।
चेतनेभ्यो जडेभ्यश्च देहदेहिभ्य इत्यपि ॥३८॥
बलिं ददौ तदा राजा तत्त्वेभ्यश्च यथोचितम् ।
श्रेष्ठेभ्यश्च कनिष्ठेभ्यो ददौ बलिं यथोचितम् ॥३९॥
आमन्त्रितेभ्यः सर्वेभ्यः स्थितेभ्यो मण्डपे तदा ।
नरनारीसमेतेभ्यो बलिं राजा ददौ शुभम् ॥४०॥
आमन्त्रिता ये चागता अनागतास्तथाऽध्वरे ।
सकुटुम्बाः सभृत्याश्च सदासाः सानुगास्तथा ॥४१॥
सपत्नीकाः सवंशाश्च सत्त्वरजस्तमोन्विताः ।
त्रिगुणेभ्यश्च ये जाताः साध्याः साधनरूपिणः ॥४२॥
यज्ञात्मका यज्ञदेहा यज्ञांगानि मखाश्रिताः ।
सर्वेभ्यस्तत्र राजाऽसौ बलिं यथोचितं ददौ ॥४३॥
सर्वकुण्डेषु राजानस्तत्तद्वर्षिनोदिताः ।
ददुर्बलिं तथैवैते सर्वे कर्म व्यधुस्तथा ॥४४॥
ग्राहका भोजकाश्चापि ये चाऽऽहुत्यदनाः सुराः ।
असुरा वा मूर्तिमन्तो जगृहुः स्वबलिं करे ॥४५॥
प्रत्यक्षं ते भुक्तवन्तः प्रत्यक्षाः स्वक्षणेऽनले ।
सर्वे वै देहिनस्तत्र भुञ्जानास्तृप्तिमाययुः ॥४६॥
येषां येषां यदन्नं तत् तत्र तत्र यथोचितम् ।
अनादिश्रीकृष्णनारायणः संकल्प्य वै ददौ ॥४७॥

आकण्ठतृप्ताः सर्वे ते सृष्टित्रयनिवासिनः ।
माया तत्त्वानि मायोत्था मायिका देहिनस्तथा ॥४८॥
आत्मा तत्त्वानि चात्मोत्था आत्मीया देहिनस्तथा ।
ईशस्तत्त्वानि चेशोत्था ईशीया देहिनस्तथा ॥४९॥
मुक्तास्तत्त्वानि मुक्तोत्था मुक्तीया देहिनस्तथा ।
ब्रह्मतत्त्वानि ब्रह्मोत्था ब्रह्मीया देहिनस्तथा ॥५०॥
शक्तिस्तत्त्वानि शक्त्युत्थाः शक्तीया देहिनस्तथा ।
गुणैश्वर्यायुधभूषादिका ये केचनापि च ॥५१॥
सर्वेभ्यः श्रीहरिस्तत्र बलिं दत्त्वा ह्यतर्पयत् ।
तृप्तिं वै शाश्वतीं नैजां ददौ सर्वेश्वरः प्रभुः ॥५२॥
सर्वे चोद्गारमापन्ना आकण्ठभक्षणास्तथा ।
बहुतृप्तिं गतास्तत्र परमेशमखे जनाः ॥५३॥
जरायूजाश्चाण्डजाश्चोद्भिज्जाः स्वेदजनास्तथा ।
भौतिकाः कोशजाश्चापि कर्दमोत्था रसोत्थिताः ॥५४॥
सर्वे तृप्तिं गतास्तत्र बालकृष्णमखेऽनले ।
अथाऽन्तिमाहुतिं प्रादाद्धोमशस्तत्र कुण्डके ॥५५॥
वसोर्धारायुतं बह्वाहुतिहोमं चकार सः ।
परिहारं ततश्चक्रे देवानां शयनं व्यधात् ॥५६॥
एवं नित्यं भवत्येव राधिकेऽर्हा ह्वादिकम् ।
आमध्यान्तं ततः श्रीमद्बालकृष्णादयश्च ते ॥५७॥
चक्रिरे भोजनान्येव महीमानादयस्तथा ।
सर्वप्रजा भोजनानि चक्रिरे नित्यमेव ह ॥५८॥
सप्तम्यां चापि चाष्टम्यां नवम्यां दशमीदिने ।
एकादश्यां मखकार्यं नित्यं प्रवर्तते तथा ॥५९॥
भोजनानि विचित्राणि नित्यं भवन्ति तत्र च ।
असंख्यदेहिनस्तत्र भुंजते स्म दिवानिशम् ॥६०॥
दीयतां दीयतामिति भुज्यतां भुज्यतामिति ।
घोषणा त्वन्नदानस्य सततं वै प्रवर्तते ॥६१॥
अन्नपूर्णा तथा लक्ष्मीस्तद्दास्योऽनेकशक्तयः ।
सेवन्ते त्वन्नदानाद्यैर्यथालोकमपेक्षितैः ॥६२॥
कल्पलताः कल्पद्रुमाः कल्पगावो निरन्तरम् ।
कल्पकन्यास्तथा चिन्तामणयः कल्पचुल्लिकाः ॥६३॥
कल्पह्रदाः कल्पपात्राण्यपि कल्पनदादयः ।
कल्पपेटाः पूरयन्ति चेष्टभोज्यानि चार्थिषु ॥६४॥
भोजनान्ते जनाः सर्वे विश्राम्यन्ति विशेषतः ।
अनादिश्रीकृष्णनारायणस्तु भूभृदर्थितः ॥६५॥
आमन्त्रणानुसारेण प्रयाति राजमन्दिरम् ।
पुनः सायं मण्डपेऽत्र समायाति विमानतः ॥६६॥

एवं पञ्चदिनं राष्ट्रे भ्रमणं हरिणा कृतम् ।
पावितानि समस्तानि राष्ट्राणि गमनक्रमात् ॥६७॥
मखे ददाति भगवान् दक्षिणाः कोटिशस्तथा ।
मखाद् बहिश्चार्पयति यथेष्टं त्वर्थिनेऽपि सः ॥६८॥
देयं देयं च दातव्यं शब्दस्त्वेवं हि सार्थकः ।
हरेरग्रे जायते वै सर्वयज्ञफलप्रदः ॥६९॥
यथेष्टं दीयते नित्यं राजानोऽपि ददत्यपि ।
प्रजाश्चावसरं प्राप्य ददत्यपि धनान्यपि ॥७०॥
गृहदानानि च कन्यादानानि बहुधा व्यधुः ।
विद्याभूषाम्बरदानान्यपि व्यधुः प्रजाजनाः ॥७१॥
यत्र स्वामी परब्रह्म श्रीपतिः कृष्णवल्लभः ।
कर्ता दाता च भोक्ता च तत्राऽशुभं न वै क्वचित् ॥७२॥
विघ्नं नास्ति निषेधश्च नास्ति यत्र प्रभापतिः ।
कालो नास्ति यमो नास्ति बन्धो नास्ति परेश्वरे ॥७३॥
सूतकं न च शोको न न वाऽपशकुनान्यपि ।
कुमुहूर्तं च नैवास्ति यत्र श्रीपार्वतीश्वरः ॥७४॥
सर्वं शुभं भवत्येव यत्र लक्ष्मीपतिः प्रभुः ।
सर्वं पुष्टं भवत्येव यत्र श्रीमाणिकीपतिः ॥७५॥
सर्वं दैवं भवत्येवाऽनुकूलं प्रियमित्यपि ।
सर्वं सम्पत्प्रदं चास्ते यत्र देवः परेश्वरः ॥७६॥
सर्वं तु मंगलं तत्र जायते यत्र माधवः ।
विरुद्धा यद्वशे सन्ति को विरोधोऽस्य सन्निधौ ॥७७॥
राधिके श्रीहरिश्चैवं मखोत्सवं व्यधाच्छुभम् ।
सप्तम्यामथ मध्याह्नोत्तरं भुक्त्युत्तरं नृपः ॥७८॥
रायरणजिन्नृपश्च प्रार्थयत्परमेश्वरम् ।
निजं राष्ट्रं पावयितुं समायाहीति वै ततः ॥७९॥
हरिः प्राह तथाऽस्त्वेव सज्जस्तूर्णं तदाऽभवत् ।
आलायसर्षिमुनिराट् रणजिन्नृपतिस्तथा ॥८०॥
शीघ्रमाज्ञां हरेः प्राप्य विमानेन निजालयम् ।
आलाक्षाकप्रदेशस्थं मीनार्ककृष्णपत्तनम् ॥८१॥
यूकासनानदीतीरगतं गत्वाऽग्रतस्तदा ।
शीघ्रं सैन्यादिसहितं वाद्यमण्डलतत्परम् ॥८२॥
जनतापूरराजचाऽश्रृंगारयद् यथोचितम् ।
स्वागतार्थं सोपदाश्च जनता राजसेविकाः ॥८३॥
शीघ्रं शीघ्रं चोपतस्थुर्नृपोद्याने महायते ।
तदा वाद्यान्यवाद्यन्त ध्वजा धृतास्तथाऽम्बरे ॥८४॥
तूर्यशब्दाः प्राभवँश्च श्रीहरेः स्वागताय वै ।
घटिकायां कृते सर्वे श्रृंगारितं नृपेण ह ॥८५॥

तावच्छ्रीकान्तभगवान् पितृभ्यां शंकरेण च ।
लोमशेन तथैशैश्चावतारैश्च सुरेश्वरैः ॥८६॥
यथापेक्षैः सह शीघ्रं राधालक्ष्म्यादिभिस्तथा ।
नैजं विमानमारुह्य प्रकाशयन् दिशो दश ॥८७॥
ययौ यूकासनातीरे मीनार्ककृष्णपत्तनम् ।
दृष्ट्वा श्रीमत्सूर्यतुल्यं विमानं पारमेश्वरम् ॥८८॥
रायरणजिद्भूपश्च आलायसर्षिसत्तमः ।
विमानावतरणार्थं ददतुः स्थलसूचनाम् ॥८९॥
भ्रमित्वाऽम्बरमेवैतद् विमानं तदवातरत् ।
तदा वाद्यानि तूर्याणि चावाद्यन्त मुहुर्मुहुः ॥९०॥
जयशब्दा हर्षनादाः प्रजानाममवन् शुभाः ।
दुद्रुवुश्चातिवेगेन दर्शनार्थं समीपगाः ॥९१॥
प्रजाजना वर्धयन्ति लाजाक्षतसुगन्धकैः ।
कुसुमैश्चाऽञ्जलिभिश्च नेत्रवृत्त्यर्पणैस्तथा ॥९२॥
भावदानैः स्वागताद्यैर्वर्धयामासुरच्युतम् ।
राधिके भूभृता कृष्णनारायणो विमानतः ॥९३॥
हस्ते हस्तं गृहीत्वैवानीतोऽतिभावतो बहिः ।
राजा पुष्पस्रजं कण्ठे बालकृष्णस्य वै ददौ ॥९४॥
ऋषिश्चन्दनदानेनाऽपूजयत् परमेश्वरम् ।
राजपुत्रादयोऽप्येनं समानर्चुः सुमादिभिः ॥९५॥
विमानाग्रे क्षणं स्थित्वा दत्वा नैजं च दर्शनम् ।
अवतीर्य हरिः पूजां जग्राह जनताकृताम् ॥९६॥
सर्वाः प्रजाः सुखं प्राप्ताः पूजया दर्शनेन च ।
ततो नृपालयान्तर्वै प्रविवेश शुभासने ॥९७॥
निषसाद हरिश्चान्ये निषेदुर्योग्यकासने ।
राजा राज्ञी राजपुत्र्यः कुमाराश्च कुटुम्बिनः ॥९८॥
पुपूजुः परया प्रीत्या श्रीपतिं कृष्णवल्लभम् ।
दशलक्षं सुवर्णं च ददौ राजाऽतिभावतः ॥९९॥
कोटिमूल्यान् हीरकाँश्च ददौ कृष्णाय भूपतिः ।
कन्यका विंशतिः कृष्णगले न्यधुर्हि मालिकाः ॥१००॥
राज्ञी ददौ तदा श्रीमद्बालकृष्णाय ताः सुताः ।
विंशतिः कन्यकाः प्राप्य बालकृष्णं पतिं प्रभुम् ॥१०१॥
कृतकृत्या अभवँश्च हरिर्दुग्धं पपौ तदा ।
ततो मीनार्ककृष्णाख्ये पत्तने श्वेतहस्तिना ॥१०२॥
विजहार महासैन्यसम्मानितो गृहे गृहे ।
प्रधानाः श्रेष्ठिनः सर्वे समानर्चुः स्थले स्थले ॥१०३॥
भ्रमित्वा नगरीं रम्यां नृपसौधं समाययौ ।
राधिके श्रीहरिः शान्तिं चालम्भ्योपादिदेश ह ॥१०४॥
प्रजाजनाँस्तथा भूपं पारमार्थिकमुत्तमम् ।
उभयत्र महानन्दप्रदं पुमर्थसाधकम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीहरेः षोडशोपचारैः पूजनं वह्वावाहुतिप्रदानं सृष्टित्रयदेहिभ्य आहुतिप्रदानं सर्वेभ्य आहुतिप्रदानं, परिहारः, भोजनं, ततो रायरणजिद्राष्ट्रं प्रतिगमनम्, नगर्यां भ्रमणं पूजनं कन्यकार्पणं चेत्यादिनिरूपणनामा सप्ताधिकद्विशततमोऽध्यायः ॥ २०७ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके श्रीमद्बालकृष्णोऽतिहेतुभिः ।
उपदेशं ददौ तेभ्यः कथयामि निबोध मे ॥ १ ॥
मया सृष्टं हरिः प्राह जगत् सर्वं हि गत्वरम् ।
न स्थिरं जायते तत्त्वं दीर्घकालेऽपि नश्यति ॥ २ ॥
अविनाशी महानात्मा सच्चिदानन्दलक्षणः ।
निजानन्दमयो देहे कर्मानुगफलादनः ॥ ३ ॥
यावत्कर्म स्थिरस्तावत् ततो यान्ति गृहान्तरम् ।
अत्र कृतं परे लोके भुंक्ते फलात्मकं हि तत् ॥ ४ ॥
विहाय सर्वं गन्तव्यं सर्वैर्लोकान्तरे ध्रुवम् ।
यत्र गत्वा भवेत् सौख्यं कर्तव्यं साधनं हि तत् ॥ ५ ॥
लोकान्तराणि सर्वाणि स्वरादीनि सुखानि वै ।
बहुपुण्येन दानेन परोपकृतिकर्मभिः ॥ ६ ॥
लभ्यते सेवया चापि वृद्धानां च सतां तथा ।
आशीर्वादात्मपुण्येन जायते स्वर्गमुत्तमम् ॥ ७ ॥
ततोऽपि चोत्तमं स्वर्गं वैकुण्ठं वा ततः परम् ।
गोलोकं वाऽक्षरं धाम परंधाम ममापि च ॥ ८ ॥
वैकुण्ठे मे भवन्त्येव कुटुम्बानि शुभानि वै ।
पार्षदानां तथा पार्षदानीनां मण्डलानि च ॥ ९ ॥
युगलानि भवन्त्येव दिव्यानि युगलोऽप्यहम् ।
लक्ष्म्यादिकोटिदासीभिः सेव्यमानोऽस्मि तत्र ह ॥१०॥
गोलोकेऽपि तथा चाहं श्रीकृष्णो राधया युतः ।
कोट्यब्जगोपगोपीभिर्युगलैः सम्प्रसेवितः ॥११॥
राजाधिराजो वर्तेऽहं सदानन्दमहाम्बुधिः ।
युगलानां महत् सौख्यं शाश्वतं तत्र वर्तते ॥१२॥
सर्वं दिव्यं मम योगान्मोक्षस्थानमगत्वरम् ।
नित्यं विवर्धमानं तत् ह्रासशून्यं परं सुखम् ॥१३॥
तद्वत् सुखं सदा चास्ते कैलासे नित्ययोगिभिः ।
आश्रिते शांकरे लोके गोलोकादध एव ह ॥१४॥

गणैश्च गणीभिर्दिव्ययोगिनीभिः प्रसेव्यते ।
शंकरोऽहं वसाम्येव तत्र कैलासके शुभे ॥१५॥
मया रूपं धृतं तद्वै गार्हस्थ्ययोगिदर्शकम् ।
योगी तिष्ठामि गार्हस्थ्ये सत्यपि शंकरात्मकः ॥१६॥
तत्सुखं शाश्वतं चापि युगलानां सतां ध्रुवम् ।
सतीसेवां च गृह्णामि योगिनीनां पतिः प्रभुः ॥१७॥
ततः श्रेष्ठं सुखं चास्ते त्रिभ्यो लोकेभ्य उत्तमम् ।
अक्षरे मे नित्यधाम्नि यथेष्टं पारमेश्वरम् ॥१८॥
सर्वैश्वर्यमयं सर्वयोगात्मकं सुखोत्तमम् ।
कामरूपधरं नैकरूपभोग्यं सुखात्सुखम् ॥१९॥
सर्वरूपधरत्वं वै वर्तते तत्र चोत्तमम् ।
स्वातन्त्र्यं दिव्यमुक्तानां सर्वशक्तिजुषां सदा ॥२०॥
सुखस्याऽन्तः क्वचिन्नास्ति कदाचित् ह्रास एव न ।
वर्धन्ते सुखसन्देहाः सदा आनन्दवार्धयः ॥२१॥
अनेकेन्द्रियविषया दिव्या अक्षरसंज्ञिताः ।
शब्दाः स्पर्शा रसा गन्धा दृश्या दिव्या भवन्ति वै ॥२२॥
आनन्दाख्याः सुखशैला आत्मानो भुञ्जते सदा ।
अक्षरे तत्र कोट्यब्जगोलोकानां सुखाधिकम् ॥२३॥
तथा कोट्यब्जवैकुण्ठकैलासानां सुखाधिकम् ।
सुखं सर्वविधं चास्ते मुक्तानां मानसेप्सितम् ॥२४॥
ततोऽप्यधिकं चैवास्ते परेधाम्नि सुखं मम ।
मम योगेन भक्तानां सुखं सर्वोत्तमोत्तमम् ॥२५॥
अनन्तं मन्मूर्तिलभ्यं सर्वेन्द्रियसुगोचरम् ।
निरवध्यधिकं चैव निरतिशायि शाश्वतम् ॥२६॥
यथेष्टं चैकमूर्त्या वा लभ्यं च युगलेन वा ।
ऐक्यभावेन लभ्यं वा सर्वभावार्जितं च वा ॥२७॥
यथेष्टेष्टेष्टेष्टतमं राधे निरूपणात्परम् ।
एवं हरिर्निजं सौख्यं वर्णयामास मूर्तिजम् ॥२८॥
अथाहेह सुखार्थं च राधिके वर्तनं शुभम् ।
मारुतोदकवेगेन ये नमन्त्युन्नमन्ति च ॥२९॥
ओषधयो द्रुमा गुल्मा न ते यान्ति पराभवम् ।
तथा सचेता भूत्वैव प्रसहेता गतं परात् ॥३०॥
प्रातिकूल्यं निगिलता प्राप्यते विजयः सदा ।
सुकृतं लभ्यते तेन सहमानेन सर्वथा ॥३१॥
दुष्कृतं नाश्यते तेन नम्यमानेन सर्वदा ।
देहेन्द्रियादिभिः क्वापि दीयमाने निजात्मने ॥३२॥
क्लेशो वाऽऽतुरता चापि सहनीया सुबुद्धिभिः ।
लोकैर्वा निजलोकैर्वा भूतैर्वा तत्त्वसत्तमैः ॥३३॥
दीयमानं महाकष्टं सहते यश्च देहवान् ।
स एव विजयं याति परे स्वर्गेऽपि मोदते ॥३४॥
प्रत्यक्षं वा परोक्षं वा योऽपरानिह निन्दति ।
निन्दावृत्तिः श्ववल्लोके मृततुल्यः शवादिवत् ॥३५॥
निन्दकं वै नर्तमानं मयूरं नग्नपुच्छकम् ।
वर्जयेन्मृततुल्यं वै तादृशं पापचेतसम् ॥३६॥
शालावृकं च मातंगं चारित्रं विमार्गिणम् ।
वर्जयेत् सर्वथा क्रुद्धं स स्यात् सुखी जनेष्वपि ॥३७॥
यस्य भृत्यजनः सर्वो ज्ञानविज्ञानकोविदः ।
हितैषी वचने सक्तः स्निग्धः स जायते सुखी ॥३८॥
मन्त्रिणो यस्य हितदा मतिदाश्चोन्नतिप्रदाः ।
अनागतविवेकारः स सदा जायते सुखी ॥३९॥
समदुःखसुखा यस्य सहायाः प्रियकारिणः ।
हितचिन्तापराः सत्याः स सदा जायते सुखी ॥४०॥
यस्य नार्तः श्रितवर्गो भावतो निकटागमः ।
सेवाधर्मपरो दक्षः स सदा जायते सुखी ॥४१॥
भाव्यं राज्ञा हितकर्त्रा सेवकेनापि सर्वथा ।
ऐश्वर्यभागिना चापि विन्दतः सुखमेव तौ ॥४२॥
यस्मात्प्राप्तं महैश्वर्यं प्रजया चाश्रितेन च ।
तेन वा च तया वातद् विस्मर्तव्यं न वै क्वचिद् ॥४३॥
कृतघ्नत्वे पुनर्नाशो भवेदेव न संशयः ।
दुःखमासाद्यते तेन विपरीतार्थगामिना ॥४४॥
आसीद् वने महारण्ये मुनिर्मोक्षपरायणः ।
कृपायनो द्विजश्रेष्ठो महाभागवतः शुचिः ॥४५॥
भजमानो हरिं नित्यं नियतो तप आस्थितः ।
ऐश्वर्याधार एवाऽसौ फलमूलादनः सुखी ॥४६॥
सत्त्वभावेन निवसन् बह्वाश्रयप्रदोऽभवत् ।
तमेनं सत्त्वसम्पन्नं चाहिंसकं समदृशम् ॥४७॥
विज्ञाय वनिनः सत्त्वाः समीपे निवसन्त्यपि ।
मूषका नकुलाश्चापि मार्जाराः सारमेयकाः ॥४८॥
द्वीपिनो भल्लुकाश्चापि व्याघ्रा गजा महागजाः ।
सिंहाश्चान्ये खड्गमृगा गण्डका हरिणास्तथा ॥४९॥
वैरं त्यक्त्वैव तिष्ठन्ति यान्ति चारण्यकं दिने ।
रात्रौ वाऽऽहारलाभार्थं पुनश्चायान्ति तत्र च ॥५०॥
मूषकस्त्वेकदा यातो निजाहारार्थमेकलः ।
दूरं तदाश्रमात्तत्र मार्जारो मिलितस्तदा ॥५१॥
क्षुधया च पतन् धर्तुं पृष्ठेऽभवद्बलाद् यदा ।
मूषकः सोऽतिवेगेन ऋष्यंके न्यपतद् भयात् ॥५२॥

प्रार्थयन्मे भयं चास्मान्मार्जाराज्जायते ऋषे ।
निर्भयं कुरु विप्रेन्द्र यथा सुखं वसाम्यहम् ॥५३॥
ऋषिः प्राह भवैवात्र मार्जारस्त्वं सुखी भव ।
जातः सोऽपि च मार्जारस्तं धर्तुं श्वा समागतः ॥५४॥
पुनश्चैवं प्रार्थयच्च ऋषिः प्राह कृपायनः ।
श्वा भवेति द्रुतं सोऽभूत् श्वा तदा निर्भयोऽनिशम् ॥५५॥
अथैकदा समायातो वृकस्तं धर्तुमापतत् ।
श्वा प्राह च ऋषिं गत्वा निर्भयं मां विधेहि च ॥५६॥
ऋषिः प्राह वृकोऽत्र त्वं भवैवं निर्भयो भव ।
वृके जातेऽथ च ततो व्याघ्रः क्षुधाकुलो वने ॥५७॥
समायातो वृकं हन्तुं वृको भयान्वितो मुनिम् ।
प्रार्थयन्निर्भयं भावं मुनिस्तं व्याघ्रतां ददौ ॥५८॥
व्याघ्रो भूत्वा निर्भयोऽभूत् मुन्याश्रमे सुखस्थितः ।
कदाचिन्मत्तभावेन महादन्तेन हस्तिना ॥५९॥
दृष्टश्च ताडितुं शीघ्रं समायातेन वेगतः ।
उवाचैवं मुनिं गत्वा दन्त्ययं मां हनिष्यति ॥६०॥
ऋषिः प्राह भवात्रैव दन्ती बली महावपुः ।
व्याघ्रः शीघ्रं हस्तिभावं गतोऽतिबलपुष्टिमान् ॥६१॥
तावत् कश्चित् कदाचिद्वै केसरी दृष्टवान् गजम् ।
धर्तुं यावत् समायाति गजस्तावन्मुनिं प्रति ॥६२॥
समागत्य भयं प्राह निर्भयत्वमयाचत ।
ऋषिस्तस्मै ददौ शीघ्रं केसरित्वं कृपायनः ॥६३॥
अथायातः कदाचिद्वै शरभस्तत्र दैवतः ।
धर्तुं केसरिणं तावद् भयेन केसरी मुनिम् ॥६४॥
प्रार्थयन्निर्भयं भावं मुनिः प्राह कृपायनः ।
भव त्वं शरभः पुत्र माऽस्तु भयं कदाचन ॥६५॥
शरभः स तदा जातः केसरिप्राणनाशनः ।
निर्भयोऽस्ति वने तावत् कदाचिद् दिनसप्तके ॥६६॥
अतिवर्षा अभवँश्च न प्रापच्छरभोऽदनम् ।
तदा व्यचिन्तयच्चैनमृषिं संभक्षयामि वै ॥६७॥
ध्यानयोगबलेनापि महर्षिस्तं तथामतिम् ।
ज्ञात्वाऽऽह मूषकं त्वां तु मदैश्वर्यबलेन ह ॥६८॥
शरभत्वं दत्तवाँश्च सर्वश्रेष्ठं च निर्भयम् ।
तथैश्वर्यप्रदातारं कृपया रक्षकं प्रभुम् ॥६९॥
अपापं प्राणदातारं यतो हिंसितुमिच्छसि ।
तस्मात्पुनर्मूषकत्वं प्रयाहि पापयोनिज ॥७०॥
एवं शप्तो मूषिकत्वं प्राप्तः शरभता गता ।
दीनतां वै गतः पश्चादृषिणा स बहिष्कृतः ॥७१॥

एवं विज्ञाय पात्रादि सात्त्विकं सत्त्ववर्जितम् ।
वा तथा तत्र वै देयं चैश्वर्यं नाधिकं क्वचित् ॥७२॥
एतादृशानां लोकानां विश्वासो न हितावहः ।
स्वामिना श्रेष्ठिना राज्ञा ज्ञातव्यं वै सुखार्थिना ॥७३॥
नाऽपरीक्ष्य कदाचिद्वै देयं सर्वं कुपात्रके ।
कुपात्रपाशमापन्नो न कदाचिद् सुखं व्रजेत् ॥७४॥
कुलीनः प्राकृतोऽप्यत्र दुःखमाप्तोऽपि वै क्वचित् ।
न पापे कुरुते बुद्धिं भिद्यमानोऽपि सात्त्विकः ॥७५॥
कुलीनभिन्नपुरुषो बुद्ध्या हीनोऽतिमूर्खराट् ।
दुर्लभैश्वरतां चापि प्रापितः शत्रुतां व्रजेत् ॥७६॥
कुलीनं शिक्षितं प्राज्ञं ज्ञानविज्ञानपारगम् ।
कृतज्ञं च सहिष्णुं च सन्तुष्टं च जितेन्द्रियम् ॥७७॥
हितैषिणं सतां सेवां कुर्वन्तं पितृसेविनम् ।
ब्रह्मसेवापरं चेष्टदेवार्पणवृषान्वितम् ॥७८॥
युक्ताचारं शुभचिन्तापरं विनयवेदिनम् ।
इंगितज्ञं नीतियुक्तं कुशलं गुणसंभृतम् ॥७९॥
सेवाज्ञं लाभहान्यादिवेदिनं सत्त्वमाश्रितम् ।
दुर्लभैश्वर्यवन्तं यः कुरुते ज्ञानवान् पतिः ॥८०॥
स्वामी राजाऽथवाऽन्यश्च स सुखी जायते सदा ।
एवं शिष्यं प्रविज्ञाय राजँस्तेऽत्र ददाम्यहम् ॥८१॥
योगैश्वर्यं समाधिस्थं भावं मम स्वरूपके ।
पश्य नित्यं दिव्यभावं मम त्वं रणजित् ! सदा ॥८२॥
येन ते परमा सिद्धिर्मोक्षदा हस्तगा भवेत् ।
इत्युक्त्वा प्रददौ दिव्यं भावं रणजिते हरिः ॥८३॥
विंशतिकन्यकापित्रे श्वशुराय महात्मने ।
स चापि भावमापन्नो दिव्यं दिव्यसुनेत्रकः ॥८४॥
दृष्टवान् कुंकुमवापीं दिव्यां स्मृद्धां महापुरीम् ।
दृष्टवान् दिव्यवैकुण्ठं गोलोकं चाक्षरं तथा ॥८५॥
अक्षरेशं कांभरेयं बालकृष्णं सुतापतिम् ।
ततो हरिः प्रजाभ्यश्च स्वं दिव्यं दर्शनं ददौ ॥८६॥
क्षणान्ते मानवं भावं प्राप्य मन्त्रं निजं ददौ ।
वैष्णवास्ते तदा जाताः प्रजालोकाः सहस्रशः ॥८७॥
अथ युकासनानद्यां स्नातुं गोपालनन्दनः ।
ययौ स्नात्वा ध्यानपूजां कृत्वा शीघ्रं नृपार्पिताम् ॥८८॥
पूजां प्रगृह्य दुग्धादिपानं कृत्वा विहायसा ।
विमानेन कृतं प्राप्य सम्मानं प्रययौ ततः ॥८९॥
आलायसर्षिसहितो भूभृता सहितस्तथा ।
विंशतिकन्यकायुक्तो हरिः पितृसमन्वितः ॥९०॥

यज्ञभूमिं चाययौ वै लक्षकोटिकमुद्रिकाः ।
यज्ञे समर्पयामास दानार्थं कोशरक्षिणे ॥९१॥
रात्रौ च भोजनं चक्रे महोत्सवं तथोत्तमम् ।
भोजयित्वा जनान् सर्वान् सुष्वाप परमेश्वरः ॥९२॥
सप्तम्यां देशजाश्चान्यदेशीया मानवास्तदा ।
ऋषयो मुनयश्चान्ये धर्माख्यानपरा जनाः ॥९३॥
लक्ष्मीनारायणसंहितायाः कथानकानि वै ।
जगुस्तत्र महोत्साहयुता मखेऽतिशोभने ॥९४॥
कीर्तनानि भवन्त्येव लीलाश्चर्यमयानि च ।
शेषकाष्ठवनानद्यास्तीरे सतां निवासने ॥९५॥
रासभावेन सर्वाश्चामर्यो रमन्त इत्यपि ।
नाट्यभावेन नरका नाट्यं कुर्वन्ति वै निशि ॥९६॥
अथ राधे प्रसेवन्ते विंशतिकन्यका हरिम् ।
निशि श्रीपतिमीशेशं कान्तं कान्तिमनोहरम् ॥९७॥
शाश्वतं सुखमापुस्ताः सेवयित्वा नवं प्रभुम् ।
कृतकृत्या अभवँश्च योगैश्वर्यप्रतापिनम् ॥९८॥
प्रातर्जातं हरिर्निद्रां तत्याज मंगलश्रवैः ।
ध्यानैर्मंगलतूर्योत्थैः सूतमागधजैः रवैः ॥९९॥
गीतिकाभिश्च वै ब्रह्मप्रियाणां योषितां सताम् ।
कीर्तनैर्भजनैश्चापि प्रबुबोध जनार्दनः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मीनार्क-कृष्णपत्तने रायरणजित्प्रभृतिजनान् हरिः समुपादिदेश, यज्ञ-भूमिमाजगाम, रात्रौ सुष्वाप, प्रातः प्रबुबोधेत्यादिनिरूपण-नामाऽष्टाऽधिकद्विशततमोऽध्यायः ॥ २०८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके प्रातः कृतस्नानविधिः प्रभुः ।
पूजां कर्तुं निषसादाऽऽसने सौवर्णशोभने ॥ १ ॥
यज्ञनारायणं तत्र पूजयामास वस्तुभिः ।
षोडशादिभिरुत्कृष्टैस्तावत्तत्र समाययौ ॥ २ ॥
लोमशर्षिः पूजनार्थं पुपूज परमेश्वरम् ।
ब्रह्मप्रियाश्च राजानः समाययुस्तथाऽऽर्चयन् ॥ ३ ॥
तावद् वाद्यान्यवाद्यन्त यज्ञकार्यमहोत्सवे ।
गमनार्थं च राजानः प्रजा महर्षयस्तथा ॥ ४ ॥
ब्रह्माद्या ईश्वराः सर्वे यज्ञभूमिं द्रुतं ययुः ।
संभारान् भूभृतोऽपीष्टान् चक्रुरेकत्रितान् मखे ॥ ५ ॥
दुग्धं समिधः काष्ठादि कणाः फलानि शालयः ।
सर्वं चोपस्थितं तत्र कृतं देवादिभिः क्षणात् ॥ ६ ॥
आचार्यों देवताः सर्वे ऋत्विजो जापकास्तथा ।
कर्मठा यजमानाश्च सहायाश्चोपतस्थिरे ॥ ७ ॥
स्वस्तिवाचोऽभवँस्तत्र ब्राह्मणानां शुभप्रदाः ।
पुण्याहवाचनं चापि वेदघोषास्तदाऽभवन् ॥ ८ ॥
यथास्थानस्थितेष्वेव सर्वेषु याज्ञिकेषु च ।
देहशुद्धिर्दशस्नानं गुरुपादाभिवन्दनम् ॥ ९ ॥
संकल्पो दिग्रक्षणं च कलशाराधनं तथा ।
गणेशपूजनं चापि मातृकापूजनं तथा ॥१०॥
नान्दीश्राद्धं तथार्घं च मधुपर्कं ततोऽभवत् ।
अभिषेको वर्धिनीपूजनं वास्तुप्रपूजनम् ॥११॥
मण्डपार्चनमेवाऽथ सर्वतोभद्रपूजनम् ।
देवतापूजनं यन्त्रदेवानामर्हणं तथा ॥१२॥
अग्नेरुत्तारणं पीठदेवानां पूजनं ततः ।
कुण्डपूजा देवपूजा ततोऽग्निपूजनं शुभम् ॥१३॥
ग्रहाणां योगिनीनां च पूजनं क्षेत्रपाऽर्चनम् ।
मुक्तानामवताराणामीश्वराणां प्रपूजनम् ॥१४॥
ईश्वरीणां ब्रह्मयोषित्पूजनं ब्रह्मचारिणाम् ।
सांख्ययोगिन्यर्हणं च सतीनां पूजनं सताम् ॥१५॥
पितॄणां च ऋषीणां च दिक्पालानां प्रपूजनम् ।
लोकपालार्हणं चापि स्वर्गस्थानां प्रपूजनम् ॥१६॥
त्रयस्त्रिंशत्सुराणां च पञ्चदेवार्हणं तथा ।
भुवर्लोकनिवासानां पूजनं रक्षसां तथा ॥१७॥
भूतप्रेतपिशाचानां मानवानां समर्हणम् ।
चतुःखनिस्थजीवानां पूजनं दासवर्गिणाम् ॥१८॥
जडानां चेतनानां च तीर्थानां पूजनादिकम् ।
रसप्रदानां सर्वेषां स्थावराणां प्रपूजनम् ॥१९॥
जन्तूनां चापि तत्त्वानामतलादिनिवासिनाम् ।
पूजनं श्रीमहाविष्णोर्विष्णोश्च पूजनं तथा ॥२०॥
शंखघण्टार्हणं प्राणपूजनं च निवेदनम् ।
हवनं बहुमिष्टान्नैराज्यैर्घृतादिभिस्तथा ॥२१॥
नीराजनं च वै बलिदानं पुष्पाञ्जलिस्तथा ।
दक्षिणा च नमस्कारः स्तुतिश्चाशीःप्रदानकम् ॥२२॥
परिहारो भोजनानि क्रमात् सर्वं मखे ह्यभूत् ।
कोटिशो लक्षशो देवा तृप्तिं प्राप्ता महामखे ॥२३॥
अष्टम्यामेव मध्याह्ने तथा सर्वं विधानकम् ।
कृत्वा श्रीमद्बालकृष्णो बुभुजे सकुटुम्बकः ॥२४॥
जग्राह ताम्बूलकं च क्षणं विश्रान्तिमाप ह ।
तावत्तत्र नृपश्चायात् प्रार्थनार्थं समुत्सुकः ॥२५॥

चारुलाषर्षिसहितो रायवाकक्षको नृपः ।
निजराष्ट्रं जलस्थं वै द्वीपं विषतुरीयकम् ॥२६॥
तूर्यपदां पुरीं चापि पावयितुं तदाऽऽर्थयत् ।
हरिः प्राह तथाऽस्त्वेवं शीघ्रं सज्जोभवत्तदा ॥२७॥
अनादिश्रीकृष्णनारायणः श्रीकम्भरासुतः ।
पितरौ भ्रातरश्चापि सन्तुष्टा भगिनी तथा ॥२८॥
अमृता भ्रातृजाया च ब्रह्मप्रियाश्च वै सती ।
शंकरो लोमशश्चापि चारुलाषऋषिस्तथा ॥२९॥
रायवाकक्षको राजा विमानयोस्तदा द्रुतम् ।
आरुरुहुर्ययुः सर्वे परिमेयपदानुगाः ॥३०॥
समुद्रखाडिकां समुल्लंघ्य द्वीपमुपाययुः ।
विषतुरीयसंज्ञं ते राजा चाग्रे गतोऽभवत् ॥३१॥
तुर्यपदानगर्यां स हर्यर्थं स्वागतं व्यधात् ।
राज्ञ्या सैन्येन सहितो राजा सम्मानमाचरत् ॥३१॥
विमानं निकटे राजसौधस्योद्यानमण्डले ।
उत्तार्य श्रीहरिस्तस्माद् विमानाद्बहिराययौ ॥३३॥
राजा पुष्पादिभिः पूजां चक्रे श्रीमाधवस्य ह ।
कुंकुमाद्यैस्तथाऽमर्त्यैः पुपूजुः परमेश्वरम् ॥३४॥
जयशब्दा वाद्यशब्दास्तदाऽभवन् समन्ततः ।
वर्धयामासुरीशेशं पुष्पलाजाऽक्षतादिभिः ॥३५॥
प्रजाश्च वर्धयामासुर्हर्षनादैः परेश्वरम् ।
ततो राजा हरिं स्वल्पे विमाने चाध्यरोहयत् ॥३६॥
कुटुम्बं च विमानेषु तथैव चाध्यरोहयत् ।
नगर्यां प्रतिभवनं विमानैरभिगम्य च ॥३७॥
पावनानि जनानां वै गृहाणि प्रचकार ह ।
पूजां महोपचारांश्च धनं द्रव्यं सुरत्नकम् ॥३८॥
प्राप्य कृत्वा पावनानि गृहाणि पुनरेव ह ।
भ्रमित्वा नगरीं दिव्यां दत्वा नैजं च दर्शनम् ॥३९॥
आजगाम नृपावासं दिव्यं सौधं हरिस्ततः ।
विशश्राम क्षणं दुग्धं पपौ सर्वे ततः पपुः ॥४०॥
राजा राज्ञी कुमाराश्च कन्यकात्रयमित्यपि ।
पुपूजुः श्रीकृष्णनारायणश्रीकृष्णवल्लभम् ॥४१॥
उपदाभिर्विविधाभिश्चन्दनाक्षतकुंकुमैः ।
अन्यहारैर्महारत्नैस्ततो नीराजनं व्यधुः ॥४२॥
कन्यात्रयं हरौ मुग्धं वरमाला ददुर्गले ।
हरिर्जग्राह हस्तांश्च तासां राज्ञीमतेन वै ॥४३॥
कन्या जाताः कृतकृत्याः प्राप्य कान्तं सुरूपिणम् ।
राजा मुमोद बहुधा राज्ञी चाति मुमोद ह ॥४४॥

हरिस्तेभ्यो ददौ सम्यगुपदेशं सुखप्रदम् ।
राजसौधे महासिंहासने निषद्य चोत्सवे ॥४५॥
सदा भक्तिर्हरेः कार्याऽक्षरेशस्य ममाश्रिता ।
सतां सेवा सदा कार्या पुण्यदा मोक्षदा शुभा ॥४६॥
रक्षणं सर्वभूतानां कर्तव्यं दययाऽन्वहम् ।
यस्मिन्नर्थे हितं यत् स्यात्तद् ग्राह्यं नेतरत् क्वचित् ॥४७॥
आत्मसंयमनं बुद्ध्या ग्राह्यबुद्ध्या तु वर्तनम् ।
परामर्शेन मोक्षश्च प्राप्तव्यो देहिना त्विह ॥४८॥
अनुयुञ्जीत कृत्यानि धर्मज्ञानमयानि च ।
आगमैरुपदिष्टानि गुरूदितानि यानि च ॥४९॥
धर्माणामविरोधेन सर्वेषां प्रियमाचरेत् ।
धर्ममेवाभिरक्षेद्वै निजार्थं साधयेत् कृती ॥५०॥
शास्त्रं धर्मो ब्राह्मणस्य दण्डः क्षत्रस्य वै वृषः ।
कृषिर्वैश्यस्य धर्मोऽस्ति सेवकस्य च सेवनम् ॥५१॥
सत्यं धर्मो हि सर्वस्य धर्माढ्या देवताः स्मृताः ।
मानवा देवतुल्यास्ते सर्वेषां प्राणरूपिणः ॥५२॥
शास्त्रं शासनकर्तृ स्याद् भर्तृप्रत्ययलक्षणम् ।
ब्रह्मणा लोकरक्षार्थं मन्निदेशात् पुरा कृतम् ॥५३॥
व्यवहारसुखार्थं च भर्तृप्रत्ययलक्षणः ।
दण्डो विनिर्मितश्चापि क्षात्रधर्मात्मकः शुभः ॥५४॥
व्यवहारोऽपरश्चाप्युद्यमरूपो विनिर्मितः ।
बिभर्ति जनताः सर्वा नीतिलब्धान्ननाणकैः ॥५५॥
आयोत्पादनरूपः स भर्तृप्रत्ययलक्षणः ।
तृतीयः पुरुषश्चापि निर्मितः सुखसाधनः ॥५६॥
आज्ञाऽऽदेशात्मकश्चान्यः पुरुषोऽपि विनिर्मितः ।
सर्वेषां दीनवर्णानां भर्तृप्रत्ययलक्षणः ॥५७॥
आदेशे संस्थिताश्चाप्नुवन्ति भरणसाधनम् ।
लोकानामेव सर्वेषां ससुराऽसुररक्षसाम् ॥५८॥
समनुष्योरगवतां स्थावराणां तथैव च ।
चतुर्थोऽयं व्यवहारो भर्तृप्रत्ययलक्षणः ॥५९॥
सुखसम्पत्प्रवाहार्थं कृतोऽस्ति पूर्वतो मया ।
धर्मयुक्तो मम भक्त्या युतो यो मत्परायणः ॥६०॥
भूत्वा वर्तेत सततं तद्भर्ताऽहं भवामि वै ।
कर्मणां च स्वभावानां पुण्यानां व्यवसायिनाम् ॥६१॥
प्रयत्नानामहं भर्ता भर्तॄणां चापि भर्तृकः ।
शास्ता नियामकश्चाहं लोकयात्राकरोऽप्यहम् ॥६२॥
एवं ज्ञात्वा च मां लोका भजेरन् वै तरन्ति ते ।
धर्ममूलः सदैवार्थस्तथाऽर्थफलनं रतिः ॥६३॥

धर्मार्थकामनाः सर्वा मनोमूलोत्थितास्त्विह ।
प्रवृत्तिरूपिणः सर्वे धर्माद्या भवयोगिनः ॥६४॥
समूलेभ्यश्च वै तेभ्यो निवृत्तिर्मोक्ष उच्यते ।
धर्माच्छरीरयोगश्च शारीरोऽर्थः सहायकृत् ॥६५॥
कामः फलं महाबन्धः सर्वे त्वेते रजस्वलाः ।
तान् विहाय विशेषाँश्चाऽरजस्को भक्तिमान् मयि ॥६६॥
वर्तते योगयुक्तात्मा ब्रह्मभूयाय कल्पते ।
धर्मो न चेन्मम प्राप्तिप्रदोऽर्थोऽपि न चेत्तथा ॥६७॥
कामो न चेन्मम प्राप्तिप्रदस्तेऽनर्थका मताः ।
अर्थाननर्थरूपाँस्तान् युञ्जीत मयि वा त्यजेत् ॥६८॥
अन्यथा विषये बुद्धिर्यास्यत्येव विहारिणः ।
मोक्षार्थे संहृता बुद्धिर्विनाशं वै व्रजेत्ततः ॥६९॥
बुद्धिनाशो महान्मोहस्तामसोऽपि विवर्धते ।
तस्मान्नास्तिकता स्याच्च दुराचारस्ततो भवेत् ॥७०॥
दुराचारात्प्रजा नष्टा भवत्येव हि सांकरी ।
साधवो न गृहं यान्ति दुराचारगतस्य वै ॥७१॥
पापान्यस्य तु वर्धन्ते दुःखं जीवितमृच्छति ।
जीवतोऽपि निरयोऽयं चासुखं जीवनं यतः ॥७२॥
तस्मात्तद्दोषनाशार्थे सुखार्थं सत्त्वभावतः ।
ब्रह्मनिष्ठान् प्रसेवेत भक्तियुक्तान् हरेर्जनान् ॥७३॥
जपेन्नाम सदा मेऽत्राऽर्पयेत् सर्वं तथा मयि ।
धर्मं चार्थं च कामं च मोक्षाय कल्पते हि सः ॥७४॥
साधून् प्रसादयेन्नित्यं कर्मणा मनसा गिरा ।
तवाऽस्मीति वदेन्नित्यं प्रणमेत् सेवनं चरेत् ॥७५॥
सतामाशीर्वचोभिश्च प्रसादेन च सेवया ।
समागमेन योगेन पावनो जायते जनः ॥७६॥
अपापोऽयं सतां संगः सर्वदोषनिकृन्तनः ।
पापान्यपि च कृच्छ्राणि शमयेन्नात्र संशयः ॥७७॥
गुरवः साधवो लोके श्रेष्ठा मोक्षप्रदा मम ।
सुवर्णं सर्वथा श्रेष्ठं सर्वांशे साधवस्तथा ॥७८॥
आपादकेशपर्यन्ताः पावनाः कृष्णमूर्तयः ।
यथाकथञ्चित्प्राप्तास्ते दास्यन्ति मम योजनम् ॥७९॥
कारयिष्यन्ति मे भक्तिं यापयिष्यन्ति धाम मे ।
तस्मात् सेव्या मम भक्तिमन्त्रयुक्ता हि साधवः ॥८०॥
गुरवस्ते परं धर्मं महाभागवतं मम ।
ब्रूयुस्तं ये त्वाचरयेयुस्ते यास्यन्ति पराऽक्षरम् ॥८१॥
गुरूणां तु प्रसादाद्वै परं श्रेय अवाप्नुयुः ।
सर्वधर्मोत्तमं शीलं शीलधर्मा हि साधवः ॥८२॥
शीलेन हि त्रयो लोकाः शक्या जेतुं न संशयः ।
नहि किञ्चिदसाध्यं वै लोके शीलवतां भवेत् ॥८३॥
एतत्पृथिव्याममृतं शीलं सर्वोत्तमोत्तमम् ।
एतावच्छ्रेय एवास्ति शीलं यत्र प्रतिष्ठितम् ॥८४॥
साधूनां चावताराणां सतीनां परिशीलनम् ।
सेवा शीलं परं प्रोक्तं ब्रह्मशीलं व्रतं परम् ॥८५॥
यथावद् गुरुवृत्त्या वै समं नान्यद्धि विद्यते ।
पूर्वकल्पेऽभवद्राजा प्रह्लादः शीलवान् सदा ॥८६॥
साधुशीलनमेवाऽस्य व्रतं श्रेष्ठं तदाऽभवत् ।
तमेनं तु समागत्य बृहस्पतिः पुरा शुभम् ॥८७॥
प्रह्लादाय ददौ ज्ञानं भक्तिरूपं सनातनम् ।
प्रस्थिते तु गुरौ राजा दक्षिणार्थे तदाऽवदत् ॥८८॥
बृहस्पतिर्ययाचे वै दक्षिणां शीलरूपिणीम् ।
प्रह्लादश्च ददौ शीलं यावत् तावच्च देहतः ॥८९॥
शीलं दिव्यं विनिर्यातं श्रीश्चापि निर्ययौ सह ।
प्रह्लादश्चाभवत्तत्र निस्तेजो धर्मवर्जितः ॥९०॥
शीलहीनः श्रियाहीनः पप्रच्छ पुरुषं च तम् ।
कस्त्वं कस्मात् प्रयास्येवं वद मे तु यथायथम् ॥९१॥
शीलं प्राह व्रतं चास्मि दाने दत्तः प्रयाम्यहम् ।
मयि याते च धर्मोऽयं पुरुषोऽपि प्रयाति च ॥९२॥
धर्मवंश्या इमे चान्ये प्रयान्ति पश्य पार्थिव ।
मयि याते धर्मपत्नी भक्तिर्याति तथा रमा ॥९३॥
लक्ष्मीः श्रीर्भूः समग्राश्च प्रयान्त्येव हरिप्रियाः ।
तच्छ्रुत्वा भयमापन्नः प्रह्लादः शीलवर्जनात् ॥९४॥
यत्र नास्ति सतां सेवा शीलं चेन्द्रियनिग्रहः ।
अद्रोहः सर्वभूतानां तत्र नारायणो न च ॥९५॥
यत्र नारायणो नाऽस्मि यत्र नास्ति रमा मम ।
तत्र मोक्षो न वै चास्ते तस्माद् भवन्तु शीलिनः ॥९६॥
सतां मे च समर्हां वै सेवां कुर्वन्तु नित्यदा ।
सर्वभूतानुग्रहं च शीलं समासतो हि तत् ॥९७॥
सम्पदं भुञ्जते शीलाः शाश्वतीं मदनुग्रहात् ।
अशीलाश्चेदाप्नुवन्ति भुञ्जते न चिरं हि ते ॥९८॥
यज्ञदानादिकार्यार्थं दत्ता समस्तु निर्गुणा ।
एतद्देशीयलोका वै भवन्तु यज्ञवृत्तयः ॥९९॥
सुखिनो दानशीलाश्च तथा शीलवृषान्विताः ।
इत्युक्त्वा विररामैव भगवान् राधिके ततः ॥१००॥
प्रजाभिः पूजितः कृष्णो राज्ञा राज्ञ्या समर्हितः ।
मन्त्रान् ददौ प्रजाभ्यश्च दुग्धपानं चकार ह ॥१०१॥

राजसौधे चरणौ स्वौ दत्वा कृत्वा च पावनम् ।
सायं स्वागतमानेन वाद्यघोषादिभिर्हरिः ॥१०२॥
विमानं स्वं समारुह्य सर्वसार्थसमन्वितः ।
द्विनस्कं पार्श्वराज्यं च मिहिवलं द्वीपमित्यपि ॥१०३॥
विलासद्वीपमेवापि बुलन्दद्वीपमित्यपि ।
विमानेन तदा गत्वा विहृत्य गगने तदा ॥१०४॥
विलोक्य श्रीहरिस्तूर्णं रात्रौ वैहायसा द्रुतम् ।
अष्टम्यामाययौ यज्ञभूमिं निजालयं शुभम् ॥१०५॥
स्नानं सन्ध्यां चकाराऽपि भोजनं जगृहे हरिः ।
तथाऽन्ये भोजनं चक्रुर्द्रव्यं यज्ञे हरिर्ददौ ॥१०६॥
विशश्राम सुखं रात्रौ कन्यात्रयेण सेवितः ।
योगनिद्रावशः कृष्णः प्रातर्बुबोध मंगलैः ॥१०७॥
गीतिभिर्वेदघोषैश्च तूर्यस्वनैश्च कीर्तनैः ।
सूतमागधबन्द्याद्यैर्बोधितः परमेश्वरः ॥१०८॥
राधिके स्वस्वरूपं स दध्यौ क्षणं परात्परम् ।
अक्षरातीतरूपं यत् पूर्णब्रह्मपरात्मकम् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने भाद्रशुक्लाऽष्टम्यां यज्ञे सर्वकर्मणामन्तिमाहुतिपर्यन्तानां करणं भोजनं ततो रायवाकक्षकनृपार्थितो हरिस्तद्राज्यं विषतुरीयद्वीपं द्विनस्कं मिविलां च गत्वा पावयित्वोपदिश्य रात्रौ पुनर्मखभूमिमाजगाम विशश्रामेत्यादिनिरूपणनामा नवाधिकद्विशततमोऽध्यायः ॥ २०९ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके प्रातः स्नात्वा कृष्णनरायणः ।
कृत्वा तु नैत्यिकी पूजां यज्ञभूमिं जगाम ह ॥ १ ॥
लोमशाद्याः ऋषयश्च राजानो यजमानकाः ।
प्रजा देवाः सुरेशाश्च कर्मठाश्चोपतस्थिरे ॥ २ ॥
यज्ञद्रव्यानि नव्यानि तत्राहृतानि सर्वतः ।
कामद्रुमादिभिस्तत्र रसाः सम्प्रतिपादिताः ॥ ३ ॥
स्वस्तिवाचोऽभवँश्चापि पुण्याहवचनान्यपि ।
वाद्यघोषा अभवँश्च वेदध्वनय इत्यपि ॥ ४ ॥
यजमानाश्च राजानो नवम्यां प्रातरेव ते ।
यथास्थानं समागत्य कर्मकाण्डे कृतादराः ॥ ५ ॥
सावधाना अभवँश्च जायन्ते क्रमशः क्रियाः ।
प्रोक्षणानि पूजनानि नैवेद्यबलयोऽर्पिताः ॥ ६ ॥
वह्नौ हव्यप्रदानानि जातान्याहुतयोऽभवन् ।
देवतातर्पणं जातं सुराद्यास्तृतिमागताः ॥ ७ ॥
ब्रह्मसृष्टीश्वरसृष्टिजीवसृष्टिस्थदेहिनः ।
यज्ञाहुतिभिः प्रत्यक्षं तृप्तिं गतास्तदाऽध्वरे ॥ ८ ॥
अन्त्याहुतिं तथा पुष्पाञ्जलिं ददौ हरिर्मखे ।
परिहारं चकाराऽथ भोजनान्यददात् प्रभुः ॥ ९ ॥
मेशुभान्नं मोहनस्थालान्नं मुद्गजलड्डुकान् ।
सुखदां चूर्णलड्डूँश्च मौक्तिकान् शष्कुलीस्तथा ॥१०॥
शाटकान् घृतपूराँश्चापूपाँश्च शतछिद्रकान् ।
पिण्डकान् बर्फिकां मिष्टपूर्णपोलीश्च पूरिकाः ॥११॥
खाजकान् पायसान् क्षीरं संयावं च बिरञ्जकम् ।
कंसारं बुन्दिकालड्डून् शर्कराघृतलड्डुकान् ॥१२॥
श्रीखण्डं राजिकाराद्धं क्वथिकां सूपमित्यपि ।
ओदनं बहुशाकानि पत्रभाजाश्च भोजनाः ॥१३॥
चणका माषकाश्चापि श्रपिता भर्जितास्तथा ।
वटिकाः फुल्लवटका पोलिकाश्चामृतानि च ॥१४॥
दिव्यभोज्यानि मुक्तानां सत्त्वभोज्यानि चेशिनाम् ।
सुधाभोज्यानि देवानां चाममोज्यानि पितॄणाम् ॥१५॥
रसभोज्यानि तत्त्वानां मदभोज्यानि रक्षसाम् ।
यथायोग्यानि भोज्यानि सर्वेषां देहिनां तथा ॥१६॥
यज्ञप्रसादरूपाणि तृप्तिदान्यभवँस्तदा ।
तक्रं बहुविधं शुभ्रं चाम्ब्लमिष्टं सुगन्धि च ॥१७॥
पाचकं शान्तिदं तत्रामीक्षाद्यं चामवत्तथा ।
मधूनि नैकरूपाणि मधुपर्काणि यान्यपि ॥१८॥
तिक्ताम्ब्लकटुचूर्णानि चटन्यश्चाभवँस्तदा ।
आरनालानि रम्याणि फलानि विविधानि च ॥१९॥
ताम्बूलकानि दिव्यानि देहिभ्योऽदापयद्धरिः ।
एवं सर्वान् भोजयित्वा ततः संबुभुजे प्रभुः ॥२०॥
कुटुम्बसहितः श्रीशो विशश्राम क्षणं तथा ।
मध्याह्ने रायमारीशो नृपः प्रार्थयदच्युतम् ॥२१॥
निजद्वीपं समागन्तुं हरिः सज्जो बभूव ह ।
अन्यान् यथापेक्षिताँश्च नित्ययोगस्थितान् प्रभुः ॥२२॥
पित्रादीनीश्वरं शंभुं सतीं कुटुम्बकं निजम् ।
ऋषीन् लोमशमुख्याँश्च नीत्वा विमानमास्थितः ॥२३॥
तदा राजा च राज्ञी च दानवर्षिस्तथा पुरः ।
विमानेन ययुश्चाग्रे द्वीपमालीस्मराभिधम् ॥२४॥
ऋद्धीशा नगरी संशोभाभिश्चलंकृता तदा ।
सैन्येन स्वागतार्थं चोपस्थितिः रचिता द्रुतम् ॥२५॥

तावद् विमानं कृष्णस्य वर्धिमुल्लंघ्य खाडिकाम् ।
द्वीपानुच्चावचाँश्चाप्युल्लंघ्य राष्ट्रं सुशोभनम् ॥२६॥
आलीस्मरं हरिः प्राप विमानं भूतलेऽनयन् ।
ऋद्धीशाया महोद्याने नृपालयस्य सन्निधौ ॥२७॥
तदा वाद्यान्यवाद्यन्त जयध्वानास्तथाऽभवन् ।
गीतिकाः स्मरनारीणां प्रजानां जयगर्जनाः ॥२८॥
सुस्वागतैः पताकाद्यैर्ध्वजैर्लाजाऽक्षतादिभिः ।
तोरणैः पुष्पहाराद्यैरञ्जल्यादिभिरेव च ॥२९॥
नमनैः पुष्पदानैश्च सम्मानं श्रीहरेरभूत् ।
विमानाच्छ्रीहरिस्तूर्णं बहिर्यदाऽऽययौ ततः ॥३०॥
रायमारीशभूपत्नी राज्ञी कुशलकुण्डला ।
पादौ तीर्थजलैः संप्रक्षालयामास सत्वरम् ॥३१॥
हरेस्तच्चरणोत्थं च जलं पपुर्नृपादयः ।
कुंकुमैश्चरणौ रञ्जयित्वा मुद्राश्च जगृहुः ॥३२॥
पुष्पहारान् गन्धवारि गन्धसारान् ददौ तथा ।
दुःखहाञ्जलिभिर्नार्यः स्मारिकाः कृष्णमेव ताः ॥३३॥
पुपूजुर्बहुभावेन कन्यका भावगर्भिताः ।
अथ कृष्णं महासौधे राजा न्यषादयत् क्षणम् ॥३४॥
सिंहासने स्वके नीत्वा ददौ धनं तु कोटिकम् ।
सौवर्णं चाम्बराद्यं चौर्णं सर्वं कूप्यमित्यपि ॥३५॥
रत्नलक्षं प्रददौ च तदा कन्यात्रयं शुभम् ।
मुग्धं कृष्णगले मालात्रयं समार्पयत् पतिम् ॥३६॥
मत्वा मातृवचोऽवाप्य कृष्णवल्लभमुत्तमम् ।
पतिं कन्यात्रयं प्राप राजा सन्तोषितोऽभवत् ॥३७॥
राज्ञी जाता कृतकृत्या ततो दुग्धं पपौ प्रभुः ।
अन्ये दुग्धं पपुश्चापि द्रुतं कृष्णो विमानके ॥३८॥
स्थित्वा स्वल्पे ऋद्धीशायां नगर्यां सैन्यवर्धितः ।
प्रजाभिश्चार्थितः संविहृत्य गृहाणि सर्वतः ॥३९॥
पावनानि तदा कृत्वा दत्वा स्वं दर्शनं शुभम् ।
प्रजाभिश्च कृतं नैकविधोपदाभिरर्चनम् ॥४०॥
गृहीत्वा राजसौधं चाऽऽययौ स्वामी हरिः प्रभुः ।
राज्यसिंहासने स्थित्वोपादिदेश प्रजादिकान् ॥४१॥
मम योगो महत्पुण्यैर्जातोऽस्त्यत्र महार्णवे ।
भवतां भावनाकृष्टः समायातोऽस्मि दूरतः ॥४२॥
मदर्थे दीयते सर्वं शाश्वतं जायते हि तत् ।
निर्गुणं मम योगेन मोक्षदं जायते हि तत् ॥४३॥
आशां विहाय चान्यस्मिन् मायिकेऽखिलवस्तुनि ।
रमते चात्मयोगेषु मोक्षमार्गं स विन्दति ॥४४॥
आशा दुःखगृहं शश्वत् हिमवत्समनिश्चलम् ।
महोदधिसमं चाप्यगाधं दोषसमन्वितम् ॥४५॥
नभःसममपारं च रौरवं जीवतः स्थितम् ।
अपि राज्यस्थितो राजा चाशया मृगयाकृते ॥४६॥
वने दुःखं तथाऽऽप्नोति यथा क्षुद्रो हि लुब्धकः ।
अपि सर्वेन्द्रियवृतः कामनाशाधृतो भवेत् ॥४७॥
अन्यायकामभोगेन महद्दुःखमवाप्नुयात् ।
अन्तरीक्षं तथा कामो द्वयोर्ज्यायान् नु को भवेत् ॥४८॥
इति प्रश्नेऽन्तरीक्षं वै ज्यायः कामो न हि क्वचित् ।
अन्तरीक्षस्य पारं वै यान्ति योगिजनाः क्वचित् ॥४९॥
आशाया नैव पारं संलभन्ते तदनुसृताः ।
ऋषभो नाम भक्तो मे पुरा श्रीबदरीवनम् ॥५०॥
उपाययौ मम दिव्यं नरनारायणाश्रमम् ।
यत्र मे बदरी रम्या हृदो वैहायसोऽमलः ॥५१॥
अश्वशिरा ऋषिर्यत्र यत्र गंगाऽतिपावनी ।
तत्रागत्याश्रमे रम्ये मण्डपे मम सन्निधौ ॥५२॥
नत्वा वासार्थमेवाऽसौ दृष्ट्वाऽऽश्रमर्षिसत्कुटीम् ।
पर्णकुटीं ययौ कर्तुं दीर्घवासेच्छया पुनः ॥५३॥
तेन मार्गे ऋषिर्नाम्ना तनुर्दृष्टस्तपोधनः ।
ऊर्ध्वे त्वष्टगुणो देहे कृशतायां तृणेशवत् ॥५४॥
कनिष्ठिकासमस्त्वस्य दर्शनं चाद्भुतं ह्यभूत् ।
तं नत्वा ऋषभस्तस्थौ दत्तासने विवेश ह ॥५५॥
पृष्टः कुशलमेवापि कथयामास सान्त्वनम् ।
तथाऽऽह पर्णशालां च कर्तुमिच्छामि चात्र वै ॥५६॥
तपः कर्तुं तथेच्छामि शान्तिं विन्दामि येन च ।
तत्सर्वं कर्तुमिच्छामि शाधि मे त्वं तनो मुने ॥५७॥
तनुः प्राह मया नैव कृताऽत्र पर्णसत्कुटी ।
यतः सर्वं नश्वरं वै कस्यार्थे पर्णजा कुटी ॥५८॥
यावदिच्छा च ते त्वास्ते पर्णशालाविधापने ।
तावच्छान्तिर्न ते स्याद्वै तृष्णाशालावृतस्य वै ॥५९॥
निस्तृष्णस्य निरीहस्य निरिच्छस्य महत्सुखम् ।
तपसाऽपि सुखं नैव यदीच्छा तत्र जाग्रति ॥६०॥
पर्णकुट्यां निविष्टस्य न स्याद् ब्रह्मप्रवेशनम् ।
आशाकुटीविहीनस्य भवेद् ब्रह्मप्रवेशनम् ॥६१॥
ब्रह्मावेशितलोकस्य शान्तिः शाश्वतयोगिनी ।
तस्मादाशां परित्यज्याऽन्तरीक्षादपि दीर्घिकाम् ॥६२॥
चिदाकाशे पर्णकुट्यां लभ विश्रान्तिमच्युते ।
तनुनैवं समुक्तः स ऋषभो ज्ञानचक्षुषा ॥६३॥

पर्णकुटीं परित्यज्याऽभजन्मां परमेश्वरम् ।
ममांऽशो मत्स्वरूपः सोऽभवन्मोक्षगतिस्ततः ॥६४॥
तस्मादाशां परित्यज्य मनो मयि समर्पयेत् ।
सर्वं मयि समर्प्यैव शाश्वतं सुखमाप्नुयात् ॥६५॥
आशा कृता कृशा येन पुष्टात्मा स मतो मम ।
आशा पुष्टा भवेद् यस्य कृशः स्यात् स न संशयः ॥६६॥
या सक्ता सर्वभूतेषु कृतघ्नेष्वलसेषु च ।
नृशंसेषु हिंसकेषु याऽपकारिषु विद्यते ॥६७॥

पुत्रस्त्रीधनसौधेषु देहेन्द्रियेषु भुक्तिषु ।
वार्धक्ये पुत्रहीनानां पुत्रे राज्ञां च राष्ट्रके ॥६८॥
प्रदानकांक्षिणीनां च कन्यानां सुविलासने ।
लुब्धानां प्रियविषये डिम्भानां मातरि ध्रुवा ॥६९॥

याऽऽशा कृता कृशा येन स शान्तिमधिगच्छति ।
षष्टिवर्षसहस्राणि गौतमस्तप आचरत् ॥७०॥
उपायातो धर्मराजस्तमुग्रतपसं मुनिम् ।
गौतमो धर्मराजाय नमस्कृत्याऽऽसनं ददौ ॥७१॥
प्रपच्छ कुशलं चापि स्वागतं चाकरोत्ततः ।
धर्मराजो गौतमं संपप्रच्छ तपसा मुने ॥७२॥
किं ते प्रयोजनं चास्ते कथं करोषि दुस्तपः ।
गौतमः प्राह शान्त्यर्थं तपश्चरामि दुश्चरम् ॥७३॥
येन यास्ये पुण्यकृताँल्लोकान् सुखादिसंभृतान् ।
यमः प्राह विचारस्ते विमार्गं प्रतिगच्छति ॥७४॥
पुण्यकृतां तथाऽपुण्यकृतां लोकेषु सदृशम् ।
तृष्णाजन्यं महादुःखं बाधते पुण्यशालिनः ॥७५॥
धामाक्षरं विनाऽन्यत्र तार्ष्णं दुःखं प्रविद्यते ।
तस्मादाशां विहायैव तिष्ठ ब्रह्मणि निश्चलः ॥७६॥
सर्वां शान्तिं ब्रह्मयोगादविनाशामवाप्स्यसि ।
आशावतः सुखं नास्ति यथा ते तपतोऽपि वै ॥७७॥

यावदाशा च तृष्णा च तथेहा स्वार्थगृध्निका ।
इच्छाऽभिलाषा कामश्च तावद् व्यक्तेः कथं सुखम् ॥७८॥
सर्वं चेष्टं निवृत्तं च यस्य भवति सर्वथा ।
तस्याऽब्धिः शाश्वतश्चोपतिष्ठेदानन्दसंभृतः ॥७९॥
तस्मान्नारायणः साक्षाद् येषामिच्छास्ववस्थितः ।
सन्तोऽपि ब्रह्मवेत्तारस्त एव शान्तिसंभुजः ॥८०॥

श्रुत्वैवं गौतमस्त्यक्त्वा तपो भक्तौ व्यवस्थितः ।
निराशः शान्तहृदयः परां शान्तिं गतस्तदा ॥८१॥
तस्मान्नृपैः प्रजाभिश्च नरैर्नारीभिरेव च ।
यष्टव्योऽहं महायज्ञैः सन्तोषणीयः सेवया ॥८२॥
इच्छार्पणेन साक्षाच्च भजनीयोऽहमेव च ।
एवं मां प्राप्य सेवाभिर्मोक्षं नैजं प्रसाधयेत् ॥८३॥
भवन्तश्च जनाः सर्वे प्रजा राजादयोऽपि च ।
मयि नारायणे कृष्णे कर्मणा मनसा गिरा ॥८४॥
सर्वं समर्प्य मां कृष्णं भजन्तु गतलालसाः ।
महाशान्तिं परमां मे दास्येऽक्षरे परे स्थिताम् ॥८५॥
इत्युक्त्वा श्रीहरिः राधे चाह मन्त्रं प्रजादिषु ।
भक्तिं ददौ निजां पश्चाद् विरराम महाप्रभुः ॥८६॥

राजा राज्ञी प्रजाश्चापि भोजयामासुरच्युतम् ।
सार्थान् संभोजयामासुः राजाद्याश्चकुरादनम् ॥८७॥
ततः पूजां परिगृह्य विमानमध्यरोहयत् ।
सर्वान् स्वयं चारुरोह गन्तुं च मखभूमिकाम् ॥८८॥
सम्मानं बहुधा चक्रुः प्रजाः सैन्यानि योषितः ।
ससार च ततः कृष्णो राज्ञा च ऋषिणा सह ॥८९॥
द्वीपे द्वीपान्तरे चापि सायं वै काशिमं ययौ ।
द्विवामं च ययौ पश्चान्मीलवीलं समाययौ ॥९०॥
ततोऽध्वरप्रदेशं स आययौ च निशांशके ।
स्नात्वा सन्ध्यां तत्र चक्रे निजावासे च भोजनम् ॥९१॥

विशश्राम च निद्रायां रायमारीशकन्यकाः ।
तिस्रः सिषेविरे कान्तं भगवन्तं नवं पतिम् ॥९२॥

प्रातःकाले वेदघोषैर्मंगलावहतूर्यकैः ।
गीतिभिर्वाद्यघोषैश्च जजागार हरिः स्तवैः ॥९३॥
राजाधिराजो भगवान् कृतस्नानविधिस्ततः ।
पितरौ पूजयामास भक्तेभ्यो दर्शनं ददौ ॥९४॥
कृताह्निकः सुवेषश्च मखभूमिं समागतः ।
दानवर्षिं तथा रायमारीशभूपतिं तदा ॥९५॥
प्राहेदं कोटिद्रव्यं यत् पूजायां मम चागतम् ।
भवतोश्च प्रजानां च सर्वं मखेऽस्तु चार्पितम् ॥९६॥

इत्युक्त्वाऽऽहूय कोशेशं कुबेरं प्रददौ च तत् ।
मखे व्ययार्थं धनराडयुंक्त सर्वमेव तत् ॥९७॥
इत्येवं राधिकेऽनादिकृष्णनारायणः स्वयम् ।
पावयित्वा जनान् देशान् नराँश्च योषितस्तथा ॥९८॥
संगृह्य शरणे मुक्तियोग्यान् करोत्यनुग्रहात् ।
बालान् वृद्धान् मध्यरूपान् यूनः सर्वांश्च देहिनः ॥९९॥

पावयित्वा मोक्षयोग्यान् करोति परमेश्वरः ।
अपि कन्या भूभृतां च मुग्धाः समर्पिताः स्वयम् ॥१००॥
परिगृह्यापि विधिना निजयोगं ददाति सः ।
कृपापारावाररूपो दिव्योऽपि जनताश्रयः ॥१०१॥

अदिव्यान् मानवान् देहान् स्वीकृत्यापि प्रमोक्षणम् ।
ददातीति कृपा तस्याऽऽनन्दवार्धेर्हरेः प्रिये ॥१०२॥
अलेप्यस्य न लेपोऽस्ति कालमायेशितुः क्वचित् ।
सर्वं चास्य शरीरं वै भोग्यं चाधीनकं तथा ॥१०३॥
विशेषेण परिगृह्य पावयत्येव भक्तिगम् ।
नित्यतृप्तस्य नास्त्येव पराधीना हि तृप्तिका ॥१०४॥
सर्वानन्दप्रदः सोऽयं सर्वत्र जयतेतमाम् ।
राधे भक्त्यैव भगवान् भक्ताधीनो भवत्यपि ॥१०५॥
यो यथा तं प्रपद्येत तं तथा भजते प्रभुः ।
या यथा सेवते कृष्णं कृष्णस्तां सेवते तथा ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नवम्यां यज्ञकार्योत्तरं रायमारीशभूपराष्ट्रे आलीस्मरद्वीपे ऋद्धीशापुरीं प्रतिगमनं भ्रमणं पूजनमुपदेशनं काशिमद्विवाममीलवील-द्वीपान् पावयित्वा मखभूमावागमनं रात्रौ विश्रान्ति-श्चेत्यादिनिरूपणनामा दशाधिकद्विशत-तमोऽध्यायः ॥ २१० ॥

श्रीकृष्ण उवाच—

राधिके बालकृष्णोऽयं दशम्यामध्वरं प्रगे ।
ययौ निजासने स्वर्णे संस्थितश्च तदाऽभवन् ॥ १ ॥
तूर्याणां निनदाश्चापि गीतयो वरयोषिताम् ।
वेदघोषा महर्षीणां गान्धर्वगायनानि च ॥ २ ॥
ध्वनयश्चापि मन्त्राणां हर्षाश्च मखिनां तथा ।
सज्जाः कृताह्निका देवाः कर्मठा हव्यवाहकाः ॥ ३ ॥
हव्यप्रदा यजमाना मण्डपे चोपतस्थिरे ।
स्वस्तिवाचः प्रोक्षणानि वस्तूनां चाहुतिस्तथा ॥ ४ ॥
पुण्याहवाचो विप्राणां देवानां स्तवनानि च ।
उन्निद्रत्वं तथा साक्षादुपस्थितिश्च पूजनम् ॥ ५ ॥
क्रमशोऽक्षरधामस्थेश्वरसृष्टिनिवासिनाम् ।
जीवलोकीयजीवानां पूजनं क्रमशोऽभवत् ॥ ६ ॥
षोडशोपसुवस्तूनामर्पणैर्भोजनादिभिः ।
बलिदानैर्हव्यदानै रसदानैः समर्हणम् ॥ ७ ॥
सुधाघृतफलान्नादिपायसादिप्रदानकैः ।
चरुदानैर्यथायोग्ययवमाषादिदानकैः ॥ ८ ॥
भक्ष्यभोज्यप्रदानैश्च लेह्यचोष्यप्रदानकैः ।
स्वाद्यपेयप्रदानैश्च तृप्यद्दृश्यप्रदानकैः ॥ ९ ॥
भाव्यगम्यप्रदानैश्च कल्प्यक्लृप्त्यप्रदानकैः ।
स्थूलसूक्ष्मप्रदानैश्च सत्त्वाऽसत्त्वप्रदानकैः ॥१०॥
तृप्ता भवन्ति देवाद्याः सर्वसृष्टिनिवासिनः ।
वह्नयो भुञ्जते स्निग्धं बह्वन्नं बहुजातिकम् ॥११॥
हवनानि च हव्यानाममभवँस्तत्र वह्निषु ।
असंख्यान्युत्तमान्येव बहुहस्तैश्च भावतः ॥१२॥
अन्तिमं हवनं कृत्वा दत्वा च भूयसीस्तथा ।
दक्षिणाः स्वर्णमुख्याश्च परिहारं व्यधाद्धरिः ॥१३॥
राजानो यजमानाश्च ददुर्दानानि कोटिशः ।
एवं यज्ञे वर्तितेऽथ मध्याह्ने भोजनानि ह ॥१४॥
चक्रुर्मखस्य वै सर्वे प्रासादिकान्नजानि वै ।
मुक्तास्तथाऽवताराश्चाऽवतारिण्यो हरिप्रियाः ॥१५॥
पार्षदाः पार्षदान्यश्च सांख्ययोगिन्य इत्यपि ।
सत्यः साध्व्यश्चेश्वराण्य ईश्वरा देवतास्तथा ॥१६॥
ऋषयः पितरो देवा दिक्पाला लोकपालकाः ।
मानवा दैत्ययक्षाश्च दानवाः पशुपक्षिणः ॥१७॥
अपि कीटपतंगाद्या वृक्षाः स्तम्बाश्च वल्लयः ।
तत्वान्यपि जडान्येव चेतनानि च सर्वशः ॥१८॥
नामरूपमयं सर्वं यत्किञ्चिद्धरिनिर्मितम् ।
सर्वं प्रसादमासाद्य तृप्तिं जगाम चाध्वरे ॥१९॥
हरिः कुटुम्बसहितोऽनुगैर्युक्तश्च सेविभिः ।
ब्रह्मप्रियाभिः सहितो बुभुजे चरुभोजनम् ॥२०॥
मिष्टान्नानि च शाकानि रसस्निग्धानि यानि च ।
दिव्यानि चापि सर्वाणि बुभुजे बालकृष्णकः ॥२१॥
भोजनोत्तरमेवात्र सन्निधौ श्रीहरेस्तदा ।
राजा द्वैपायनद्वीपपतिः राज्ञीसमन्वितः ॥२२॥
रायबालेश्वरो नाम्ना प्रार्थयत्परमेश्वरम् ।
मालावनर्षिसहितो वायुफेनापुरीं प्रति ॥२३॥
नेतुं स्वराष्ट्रे श्रीकृष्णं हारितास्मारितापतिम् ।
तथास्त्विति हरिः प्राह तूर्णं सज्जोऽभवत्तदा ॥२४॥
लोमशेन कुटुम्बेन शंकरेण सह प्रभुः ।
विमानं दिव्यमास्थायाऽम्बरेऽभवत् क्षणान्तरे ॥२५॥
ऋषिः राजा विमाने स्वे कुटुम्बसहितोऽभवत् ।
पूर्वं स्वागतदानार्थं ययौ तूर्णं निजां पुरीम् ॥२६॥
सैन्यं सज्जं चकाराऽसौ तूर्णं सम्माननाय वै ।
प्रजाः पुष्पादिसामग्रीर्धृत्वा सज्जास्तथाऽभवन् ॥२७॥
वायुफेनानगर्याः सन्निधावुद्यानसंस्थिते ।
राजसौधे महाविशालांगणे च ययुस्तदा ॥२८॥
तावद्दूरेर्विमानं चाम्बरेऽत्यन्तसुभासुरम् ।
समदृश्यत सुर्याभं वाद्यानि विविधानि वै ॥२९॥

अवाद्यन्त तथा घोषा जययुक्तास्तदाऽभवन् ।
प्रजास्त्वेकाग्रदृष्ट्यैव वीक्षितुं त्वरितास्तदा ॥३०॥
तावच्च सन्निधौ तूर्णं विमानं त्वागतं हि खे ।
राज्ञा दर्शितमार्गेणाऽवातरत् सौधसन्निधौ ॥३१॥
मालावनर्षिर्मालाभिर्विमानं प्रागवर्धयत् ।
प्रजा लाजाक्षताद्यैश्चाऽवर्धयत् परितस्ततः ॥३२॥
राजा मालां स्वर्णहारं हरेः कण्ठे समार्पयत् ।
पादौ प्रक्षाल्य च पपौ हरिर्बर्हिः समाययौ ॥३३॥
प्रजाः स्रगादिभिस्तूर्णं पुपूजुः स्वागतादिभिः ।
राजा सौधे हरिं नीत्वा पुपूज बहुभिर्धनैः ॥३४॥
ततो याने तु सौवर्णे चोपावेश्य परेश्वरम् ।
कुटुम्बं लोमशं शंभुं नगर्यां नीतवान्नृपः ॥३५॥
ससैन्यः श्रीहरिर्मार्गे सम्मानितः प्रजाजनैः ।
पूजितो वन्दितश्चापि वीक्षितो भावनेत्रकैः ॥३६॥
आर्पितो बहुरत्नाद्यैर्धनैः सौवर्णरूप्यकैः ।
प्रधानैः पूजितश्चापि भ्रमित्वा नगरीं ततः ॥३७॥
आययौ राजसौधं तं निषसाद नृपासने ।
उपादिदेश च तदा प्रजाभ्यो हितकृद्वचः ॥३८॥
ईप्स्यते बहुभिः कृष्णो विना पुण्यं न लभ्यते ।
लभ्यते बहुभिः पुण्यैर्विनाभावं न सेव्यते ॥३९॥
सेव्यते बहुभिर्भावैर्विना श्रद्धां न रज्यते ।
रज्यते चार्पणैः सर्वैस्तत्राऽनुग्रहकारणम् ॥४०॥
अनुग्रहेण विवशो भवाम्येव स्वयं प्रभुः ।
मयाऽनुग्रहयुक्तेन भवद्देशो विलोकितः ॥४१॥
सेवा चांगीकृता प्रेम्णा निर्गुणा मुक्तिदा हि सा ।
मद्योगो मुक्तिदश्चास्ते सदा सर्वस्य देहिनः ॥४२॥
यथाज्ञानं च सेवन्ते प्राप्य मां देहिनस्त्विह ।
तेषां तथैव दाताऽहं तथाऽनुग्रहकारकः ॥४३॥
प्रसन्नोऽहं ददाम्येव सुखं रक्षामि विघ्नतः ।
योगक्षेमौ करोम्यस्य भक्तस्य सेवकस्य मे ॥४४॥
सेवाबलाढ्यभक्तस्य सर्वं सन्निहितं शुभम् ।
सेवाबलं बुभूषेद्वै सर्वे बलवतो वशे ॥४५॥
सेवाबलं स्थितं स्वस्मिँस्त्रायते महतो भयात् ।
सर्वधर्माद्बलं धर्मः सर्वसौख्यप्रवर्तकः ॥४६॥
सेवाबले स्थितो धर्मो धर्मे तिष्ठाम्यहं सदा ।
मयि तिष्ठति यावच्छ्रीः सर्वसौख्यस्य साधनम् ॥४७॥
धूमो वायोरिव वशे सेवां धर्मोऽनुवर्तते ।
सेवा बलवतां धर्मः सर्वापत्यः प्रवर्तते ॥४८॥
नास्त्यसाध्यं सेवकानां प्रसन्नत्वजुषामिह ।
मदनुग्रहपात्रं वै क्षिप्रं बहुमतं भवेत् ॥४९॥
लोके वै लभते पूजा परत्रेह महत्फलम् ।
सुखं सुचित्रं भुञ्जीत शाश्वतं च ततः परम् ॥५०॥
सेवा सत्येन कर्तव्या देवपितृतपस्विनाम् ।
अतिथीनां सतां चाप्यनाथानां योषितः तथा ॥५१॥
असेवा नैव कर्तव्या असेवा द्रोह एव तु ।
उद्वेजनं भवेद् द्रोहात् तेन रुष्टा भवन्ति ते ॥५२॥
येषां रुष्टाश्च गुर्वाद्यास्तेषां भाग्यं विलीयते ।
न तेषां त्रिषु लोकेषु त्राता भवति कश्चन ॥५३॥
यस्तान् परिवदेच्चापि तन्नाशं चापि रोचयेत् ।
स्वयं नाशे गतः स्यात् स तमः सूर्योदये यथा ॥५४॥
अनागतस्य सन्द्रष्टा प्रत्युत्पन्नमतिस्तथा ।
सेवया सुखमेधेते तद्विहीनौ विनश्यतः ॥५५॥
प्राप्ते काले भवेत् सेवा सा सेवा मोक्षदा मता ।
गते काले गते देवे गते श्रीसंभवे ततः ॥५६॥
स लाभो न भवत्येव यो लाभोऽनुग्रहेऽर्थितः ।
ब्रह्मवेत्तॄन् प्रसेवेत ज्ञानवृद्धाँस्तपस्विनः ॥५७॥
श्रुतचारित्र्यवृत्ताढ्यान् सतः सेवेत भूतये ।
प्रीत्या यशो भवेद्दिव्यमप्रीत्या श्रेयसां क्षयः ॥५८॥
प्रीतिं सम्पादयेत् सेवां कृत्वा सतां स बुद्धिमान् ।
प्रीताः सन्तो हरिर्वापि शरणार्थं प्ररक्षति ॥५९॥
कपोतेन शरणार्यः पूजितो मांसदानकैः ।
लुब्धोऽरण्ये शबरो वै क्रूरकर्मा च निष्ठुरः ॥६०॥
जनः पापसमाचारस्त्यक्तः स्वैर्बान्धवैः पुरा ।
ययौ वनं तदा वृष्टिरभूत् सर्वातिशायिनी ॥६१॥
जलं जलं ह्यभूत् सर्वं महाजलमयं यथा ।
लभ्यन्ते प्राणिनो नैव पक्षिणः पशवोऽपि न ॥६२॥
लुब्धकः स तदा सायं त्वेकां कपोतिकां वने ।
प्राप्तवान् पञ्जरे तां च कृत्वा वृक्षं समाश्रितः ॥६३॥
लुब्धकः स तदा रात्रौ वृक्षं मत्वा तु दैवतम् ।
साञ्जलिः प्रणतिं कृत्वा वाक्यमाह वनस्पतिम् ॥६४॥
शरणं यामि यान्यस्मिन् दैवतानि वनस्पतौ ।
रक्षन्तु मां निराधारं शरणागतमत्र वः ॥६५॥
क्षुधितः स तु सुष्वाप मूले निधाय मस्तकम् ।
शाखायां विहगश्चास्ते नाम्ना चित्रकपोतकः ॥६६॥
भार्या तस्य गता भक्ष्यं चरितुं नागता तु सा ।
शुशोच बहुधा रात्रौ कपोतो वृष्टिपीडितः ॥६७॥

मन्ये भार्या मृता मे वै वातवृष्टिभिरद्य वै ।
अपि स्वस्ति भवेत्तस्याः प्रियाया मम कानने ॥६८॥
भार्याहीनं गृहं त्वद्य शून्यं मे दृश्यते किल ।
पुत्रपौत्रवधूभृत्यदासाद्यैः पूरितं ह्यपि ॥६९॥
न गृहं गृहमित्याहुर्गृहिणी गृहमेव यत् ।
पत्नीं विना गृहं चास्तेऽरण्यं शून्यमिवाऽपरम् ॥७०॥
तया विना जीवनं मे व्यपार्थकं हि लोक्यते ।
न भुंक्ते मय्यभुक्ते या नाऽस्नाते स्नाति सुव्रता ॥७१॥
नाऽतिष्ठत्युपतिष्ठेत्सा शेते तु शयिते मयि ।
हृष्टे भवति सा हृष्टा दुःखिते मयि दुःखिता ॥७२॥
प्रोषिते दीनवदना क्रुद्धे तु प्रियवादिनी ।
पतिव्रता पतिगतिः पतिप्रियहिते रता ॥७३॥
यस्य स्यात् तादृशी भार्या धन्यः स पुरुषः सदा ।
सा च शान्तं क्षुधार्तं च जानीते मां तपस्विनी ॥७४॥
अनुरक्ता स्थिरा चैव भक्ता स्निग्धा यशस्विनी ।
वृक्षोऽपि सद्गृहं भाति तया युक्तं सुखावहम् ॥७५॥
तद्विहीनो महासौधः कान्तार इव भाति वै ।
धर्मार्थकामकार्येषु भार्या पुंसः सहायिनी ॥७६॥
विदेशगमने चापि विश्वासपात्रिका हि सा ।
भार्या वै परमश्चार्थः पुरुषस्य सदाऽस्ति हि ॥७७॥
असहायस्य लोकेऽत्र भार्या चास्ते सहायिनी ।
रोगकृच्छ्राभिभूतस्य भेषजं परमं हि सा ॥७८॥
नास्ति पत्नीसमो बन्धुः सहायो धर्मसंग्रहे ।
विनोदे परलोके च गतौ सुहृत् तु सा सदा ॥७९॥
यस्य साध्वी सती भार्या रम्या च प्रियवादिनी ।
नास्ति गृहे च तेनात्राऽरण्ये गन्तव्यमेव तु ॥८०॥
मर्तव्यं वेति रात्रौ स विलापं कृतवान् बहुम् ।
तं विलापं प्रसुप्तेनाऽरण्ये धृता कपोतिका ॥८१॥
पञ्जरस्था प्रशुश्राव सस्नेहा वाक्यमब्रवीत् ।
अहोऽतीव सुभाग्याऽहं यस्या मे दयितः पतिः ॥८२॥
अनाज्ञापालिकाया मे गुणानेवं प्रभाषते ।
न सा स्त्री ह्यभिमन्तव्या यस्यां भर्ता न तुष्यति ॥८३॥
तुष्टे भर्तरि नारीणां तुष्टाः स्युः सर्वदेवताः ।
भस्मीभवति सा नारी यस्या भर्ता न तुष्यति ।
इति सञ्चिन्त्य भर्तारं कपोती वाक्यमब्रवीत् ॥८४॥
नाथ वक्ष्यामि सुखकृत् तत्तथा कर्तुमर्हसि ।
शरणागतसेवायां तत्परो भव सर्वथा ॥८५॥
अयं शाकुनिको लुब्धस्तव वासं समागतः ।
क्षुधार्तस्याऽन्नदानेन सेवनं पुण्यदं भवेत् ॥८६॥
शरणागतसेवायाः पुण्यं स्वर्गप्रदं मतम् ।
स त्वं सेवय कैरातिं देहदानेन वा प्रिय ॥८७॥
पूजामस्मै प्रयुंक्ष्व त्वं शरीरे मा स्पृहां वह ।
इतिश्रुत्वा प्रियावाक्यं कपोतोऽधो जगाम ह ॥८८॥
तमुत्थाप्याऽऽह भद्रं ते स्वागतं करवाणि ते ।
स्वगृहे वर्तसे चात्र किमिच्छसि करोमि ते ॥८९॥
त्वमत्र वनमध्ये मे शरणागत आगतः ।
शत्रावप्युचितं कार्यमातिथ्यं गृहमागते ॥९०॥
यज्ञतुल्यं फलं तस्यातिथ्यकर्तुर्गृहस्थितेः ।
श्रुत्वा किरातश्चोवाच शीतं क्षुधा च मेऽद्य वै ॥९१॥
बाधेते तन्निवृत्त्यर्थं यत्नः स्याच्चेद् विधीयताम् ।
कपोतः शीघ्रमुड्डीय कर्मारगृहमागतः ॥९२॥
ज्वलत्काण्डं गृहीत्वैव चञ्च्वा वृक्षमुपाययौ ।
शुष्कपर्णेषु वह्निं चाऽदीपयल्लुब्धकोऽतपत् ॥९३॥
शीतं गतं ततः प्राह भोजनं देहि मे प्रिय ।
कपोतः प्राह मे नास्ति सञ्चयो वनवासिनः ॥९४॥
नित्योञ्छवृत्त्या जीवामि नाशयेयं कथं क्षुधाम् ।
किन्तु स्वात्मप्रदानेन तर्पये त्वां नु मन्यसे ॥९५॥
ऋषीणां देवतानां च पितॄणां च महात्मनाम् ।
सतीनां च सतां पूजां कुर्यादात्मार्पणैरपि ॥९६॥
इत्युक्त्वा त्रिःपरिक्रम्याऽग्निं विवेश विहंगमः ।
भक्षयेति गृणन् वाक्यं नत्वाऽतिथिं पुनः पुनः ॥९७॥
लुब्धकोऽपि कपोतं संवीक्ष्याग्निभर्जितं तदा ।
उत्पन्नकरुणः प्राह पातकं मित्रघातजम् ॥९८॥
ममोत्पन्नं नृशंसस्य प्रायश्चित्तं नु किं भवेत् ।
अहो देहप्रदानेनातिथ्यसेवा प्रदर्शिता ॥९९॥
सोऽहं चापि वने स्थित्वा चरिष्ये पारलौकिकम् ।
धर्मं कर्म चरिष्यामि धर्मसेवा परा गतिः ॥१००॥
इत्यभिधाय शीघ्रं तत्पञ्जरं च कपोतिकाम् ।
प्रमुच्य कृष्णकृष्णेति जजाप भक्तिमान् यथा ॥१०१॥
सा कपोती पतिं वीक्ष्य वह्निदग्धं ततोऽप्यनु ।
सतीधर्मं तदालम्ब्य वह्निं विवेश दुःखिता ॥१०२॥
ततश्चित्रांगदधरं भर्तारं साऽन्वपश्यत ।
विमानस्थं हि देवीभिः पूजितश्च महात्मभिः ॥१०३॥
सापि दिव्या सुराणी च भूत्वा विमानगाऽभवत् ।
लुब्धकस्तौ विमानस्थौ देवौ खे सन्ददर्श ह ॥१०४॥

सेवाधर्मफलं दृष्ट्वा किरातोऽपि तपोऽकरोत् ।
अतिथीनां सेवनं चाकरोद् वननिवासिनाम् ॥१०५॥
पालनं पशुपक्ष्यादेः शरणागतरक्षणम् ।
दावाग्निना वने दग्धे भस्मीभूतोऽभवत्ततः ॥१०६॥
नष्टकल्मष एवाऽसौ जपन् कृष्णनरायणम् ।
दिव्यां गतिं जगामैव सेवया ब्रह्मसेविनाम् ॥१०७॥
एवं सेवां प्रकुर्वन्तु यान्तु मोक्षपदं परम् ।
इत्युक्त्वा राधिके कृष्णो विरराम क्षणं तदा ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने-ऽध्वरदेवतापूजनहोमाद्युत्तरं भोजनं, ततो रायबालेश्वरराष्ट्रं द्वैपायनद्वीपं च प्रतिगमनम् । वायुफेनापुर्यां भ्रमणं पूजनं चोपदेशनं चेत्यादिनिरूपणनामैकादशा-धिकद्विशततमोऽध्यायः ॥ २११ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽथ ततः श्रीमद्बालकृष्णः प्रभुः स्वयम् ।
दुग्धं पपौ भोजनं च चकार सकुटुम्बकः ॥ १ ॥
तावत् पूजां महाराज्ञी कर्तुं कन्यायुताऽऽययौ ।
तिस्रः कन्या वरमालां ददुः कण्ठे हरेस्तदा ॥ २ ॥
कृतकृत्या अभवँस्ता राज्ञी मेने सुभाग्यकम् ।
राजा कोटिसुवर्णानि प्रददौ हरये तदा ॥ ३ ॥
प्रजा महोत्सवं चक्रे पूजनं च हरेस्ततः ।
पूजां लब्ध्वा द्रुतं कृष्णो विमानं चाध्यरोहयत् ॥ ४ ॥
सर्वान् स्वयं चारुरोह राजा सैन्येन वै तदा ।
विदायमानं सम्मानं व्याकरोद् वादकैस्तथा ॥ ५ ॥
स्वयं विमानमारुह्य सर्षिस्तदाऽम्बरेऽभवत् ।
देशान् राज्ये सुयुक्तांश्च वीक्ष्य हरिर्नृपान्वितः ॥ ६ ॥
साधुद्वीपं ततो वीक्ष्य हट्टासनाब्धिमाप्य च ।
उल्लंघ्य शीघ्रमेवाऽऽपाऽध्वरभूमिं निशामुखे ॥ ७ ॥
भोजनं मधुरं चक्रे विशश्राम सुखोषितः ।
तिस्रः कन्या हरेः सेवां चक्रिरे शयने तदा ॥ ८ ॥
प्रातस्तूर्यनिनादैश्च मांगलिकस्तवैस्तथा ।
गीतिभिर्ब्रह्मपत्नीनां प्रबुबोध महाप्रभुः ॥ ९ ॥
कृतस्नानादिकस्तूर्णं प्रपूज्य पितरौ गुरून् ।
यज्ञभूमौ हरिस्तूर्णं तत्राजगाम सान्वयः ॥१०॥
एकादश्यां प्रगे विप्रा मुनयोऽपि महर्षयः ।
साधवः कर्मठाश्चान्ये यज्ञमण्डपमाययुः ॥११॥
देवाद्याः स्थानभोक्तारः सर्वे स्वस्थानमाययुः ।
निषेदुर्वह्नयः कुण्डमध्ये मूर्ता यथोचितम् ॥१२॥
स्वस्तिवाचोऽभवँस्तत्र पुण्याहवचनानि च ।
प्रोक्षणान्युद्बोधनानि पूजनान्यभवन् क्रमात् ॥१३॥
हवनानि तर्पणानि यथानित्यं तथाऽभवन् ।
अन्तिमं होमकार्यं च परिहारोऽभवत्तथा ॥१४॥
हव्यानां भोजनान्येवाऽभवँस्तद्व्रतपुष्टये ।
अनन्ताऽऽहारमापुस्ते श्रीहरेः करतः सुराः ॥१५॥
तृप्तास्तत्र महातृप्तिं गता हरिप्रसादजाम् ।
अथ तत्र महाद्रव्यदक्षिणाः स्वर्णरत्नजाः ॥१६॥
कोट्यब्जार्बुदपद्मानां परार्धानां परात्पराः ।
विप्रेभ्योऽदापयत् कृष्णनारायणश्च राजभिः ॥१७॥
ततः सर्वेऽपि राजानो राज्ञीयुक्ता निजे निजे ।
कुण्डे चक्रुर्हवनानि पूर्णाहुत्यात्मकानि वै ॥१८॥
अनादिश्रीकृष्णनारायणोऽपि मुख्यकुण्डके ।
पूर्णाहुतीर्ददौ वह्नौ देवताभ्योऽमृतात्मिकाः ॥१९॥
ततश्चचार भगवान् महापूर्णाहुतिं पराम् ।
तदा मुक्ता अवतारा ईश्वरा मुनयस्तथा ॥२०॥
ऋषयो देवताः सर्वा देव्यश्च मानवादयः ।
काश्यप्यश्च प्रजाः सर्वा मूर्तिमन्तो नराः स्त्रियः ॥२१॥
चरुप्रसादलाभार्थं महापूर्णहवाप्तये ।
स्थावरा जंगमाः सर्वे चोपतस्थुर्हि मण्डपे ॥२२॥
घृतधारासहस्राद्यैस्तृप्यन्ते देवतादयः ।
वसुधारायुताद्यैश्च तृप्यन्तेऽनन्तसृष्टयः ॥२३॥
महापूर्णाहुतिहोमसंकल्पोत्तरमेव तु ।
मृडं वह्निं नमस्कृत्याऽऽज्यं चाधिश्रित्य स्रुक्स्रुवौ ॥२४॥
प्रताप्य दर्भैः सम्मृज्योद्वास्याज्यमभिवीक्ष्य च ।
संस्कृत्याऽऽज्यं गृहीत्वा श्रीफलं स्रुचि निधाय च ॥२५॥
ताम्बूलं च फलान्यत्र पूगाऽक्षतादिकानि च ।
धृत्वोपरि च समिधोऽलंकृत्य पुष्पचन्दनैः ॥२६॥
पूर्णाहुत्यै नम इति संपूज्य हव्यमेव च ।
धृत्वा कराभ्यां भगवान् राजाद्या यजमानकाः ॥२७॥
स्थिताः प्रणालिकाद्वारा घृतधाराः सहस्रशः ।
कुण्डमध्ये प्रवहन्त्यविच्छिन्नाश्च तदा मुहुः ॥२८॥
वेदमन्त्रा अभवँश्चोचरिता वह्निदेवताः ।
वह्नेर्ध्यानं तदा चक्रुः साक्षात् स्थितस्य होमिनः ॥२९॥
चतुःशृंगं त्रिधा बद्धं द्विमूर्धानं समुज्ज्वलम् ।
नासाद्वयं च षण्णेत्रं चतुःश्रोत्रं त्रिपादकम् ॥३०॥

सप्तहस्तं दक्षे चतुःकरं वामे त्रिहस्तकम् ।
स्रुवं स्रुचं तथा शक्तिमक्षमालां च दक्षिणे ॥३१॥
तोमरं व्यजनं चैव घृतपात्रं तु वामके ।
दधानं सप्तजिह्वं च त्रिर्जिह्वोत्तरकाननम् ॥३२॥
चतुर्जिह्वं दक्षभागे द्विपञ्चाशत्कलायुतम् ।
कोटिद्वादशमूर्त्याख्यं रक्तपद्मासनस्थितम् ॥३३॥
स्वाहास्वधावषट्कारैरंकितं रक्तहारिणम् ।
पिंगाक्षं लोहितग्रीवं कृष्णमार्गं हुताशनम् ॥३४॥
ज्वालामयं तथा सप्तार्चिषं तं हव्यवाहनम् ।
अग्निं वैश्वानरं त्वां वै नमामो गोचरं सुरम् ॥३५॥
इति ध्यात्वा तथा नत्वा वेदमन्त्रान् जगर्द्विजाः ।
घृतधाराः पतन्त्येव तत्र सहस्रशोऽनले ॥३६॥
ओं समुद्रादूर्मिर्मधु माँ उदारदुपाँशुना सममृतत्वमानट् ।
घृतस्य नाम गुह्यं यदस्ति जिह्वा देवानाममृतस्य नाभिः ॥३७॥
वयन्नामप्प्रब्रवामाघृतस्याऽस्मिन् यज्ञे धारयामानमोभिः ।
उपब्रह्माश्रृणवच्छस्यमानं चतुःश्रृंगोवमीद्गौर एतत् ॥३८॥

चत्वारि श्रृंगास्त्रयो अस्य पादा
द्वे शीर्षे सप्तहस्तासो अस्य ।
त्रिधा बद्धो वृषभो रोरवीति
महोदेवो मर्त्यानाविवेश ॥३९॥
त्रिधा हितं पणिभिर्गुह्यमानं
गवि देवासो घृतमन्वविदन् ।
इन्द्र एकं सूर्य एकं जजान
वेनादेकं स्वधया निष्टतक्षुः ॥४०॥
एता अर्षन्ति हृद्यात्
समुद्राच्छतव्रजारिपुणानावचक्षे ।
घृतस्य धारा अभिचाकशीमि
हिरण्ययो वेतसो मध्य आसाम् ॥४१॥
सम्यक् स्रवन्ति सरितोऽनधेना-
ऽअन्तर्हृदा मनसा पूयमानाः ।
एतेऽअर्षन्त्यूर्मयो घृतस्य मृगा
इवक्षिपणो रीषमाणाः ॥४२॥
सिन्धोरिव प्राध्वनेशूघनासोव्वात-
प्प्रमियः पतयन्ति यह्वाः ।
घृतस्य धाराऽअरुषोनव्वाजीकाष्ठा-
भिन्दन्नूर्मिभिः पिन्वमानाः ॥४३॥

अभिप्रवंतसमनेवयोषाः कल्याण्यः
स्मयमानासोऽअग्निम् ।
घृतस्य धाराः समिधोनसन्तता
जुषाणो हर्य्यतिजातवेदाः ॥४४॥
कन्या इवव्वहतुमेतवाऽउऽअंज्यं-
जानाऽअभिचाकशीमि ।
यत्र सोमः सूयते यत्र यज्ञो
घृतस्य धाराऽअतितत्पवन्ते ॥४५॥
अभ्यर्षत सुष्टुतिं गव्यमाजि-
मस्मासु भद्रा द्रविणानि धत्त ।
इमं यज्ञं नयत देवता नो
घृतस्य धारा मधुमत्पवन्ते ॥४६॥
धामं ते विश्वं भुवनमधिश्रित-
मन्तःसमुद्रे हृद्यन्तरायुषि ।
अपामनीके समिथेयऽआभृत-
स्तमश्यामममधुमन्तं त ऊर्मिम् ॥४७॥
ओं मूर्धानं दिवो अरतिं पृथिव्या
वैश्वानरमृत आजातमग्निम् ।
कविं सम्राजमतिथिं जनाना-
मासन्नापात्रं जनयन्त देवाः ॥४८॥
ओं चिति जुहोमि मनसा घृतेन यथा
देवा इहाऽगमन् वीतहोत्रा ऋतावृधः ।
पत्ये विश्वस्य भूमनो जुहोमि
विश्वकर्मणे विश्वाहादाभ्यं हविः ॥४९॥
सप्त ते अग्ने समिधः सप्तजिह्वाः
सप्त ऋषयः सप्तधामप्रियाणि ।
सप्तहोत्राः सप्तधात्वा यजन्ति
सप्तयोनीरापृणस्वाघृतेन स्वाहा ॥५०॥
शुक्रं ज्योतिश्च चित्रज्योतिश्च सत्यज्योतिश्च ।
ज्योतिष्माँश्च शुक्रश्च ऋतपाश्चात्यंहाः ॥५१॥
ईदृङ्त्वान्न्यादृङ्च सदृङ्च प्रतिसदृङ्च ।
मितश्च संमितश्च सभराः ॥५२॥
ऋतश्च सत्यश्च ध्रुवश्च धरुणश्च
धर्ता च विधर्ता च विधाधयः ।
ऋतजिच्च सत्यजिच्च सेनजिच्च सुषेणश्च
अन्तिमित्रश्च दूरेऽअमित्रश्च गुणः ॥५३॥

ईदृक्षास एतादृक्षास ऊषुणः
सदृक्षासः प्रतिसदृक्षास एतन ।
मितासश्च सम्मितासो नोऽअद्य-
सभरसो मरुतो यज्ञेऽस्मिन् ॥५४॥

स्वतवाँश्च प्रघासी च सान्तपनश्च
गृहमेधी च क्रीडी च शाकी चोजेषि ।
उग्रश्च भीमश्च ध्वान्तश्च धुनिश्च
सासह्वांश्चाभियुग्वा च विक्षिपः स्वाहा ॥५५॥

पुनस्त्वादित्या रुद्रा वसवः समिन्धतां
पुनर्ब्रह्माणोव्वसुनीथ यज्ञैः ।
घृतेन त्वं तन्न्वन्वर्धयस्व सत्याः
सन्तु यजमानस्य कामाः ॥५६॥

वसोः पवित्रमसि शतधारं वसोः
पवित्रमसि सहस्रधारम् ।
देवस्त्वा सविता पुनातु वसोः
पवित्रेण शतधारेण सुप्वाकामधुक्षः ॥५७॥

पूर्णादर्व्वि परापत सुपूर्णा पुनरापत
वस्नेवव्विक्रीणावहा इषमूर्ज्जं शतक्रतो स्वाहा ।
इदमग्नये वैश्वानराय वसुरुद्रादित्येभ्यः
शतक्रतवे अद्भ्यश्च नमम ॥५८॥

इदं दिविषद्भ्यो भुवः सद्भ्यो महःषद्भ्यो
जनसद्भ्यस्तपःसद्भ्यश्च नमम ।
इदं सत्यसद्भ्यश्चाऽऽवृतिषद्भ्यश्चेश्वरेभ्यो
विराजाय महाविराजाय नमम ॥५९॥

इदं विष्णुभ्यो महाविष्णुभ्यो
हिरण्यगर्भेभ्यो नमम ।
इदं भूमभ्यो महापुरुषेभ्यो -
महाकालेभ्यश्चतुर्व्यूहेभ्यो नमम ॥६०॥

इदं चाक्षराय चाक्षरषद्भ्यो-
ऽवतारेभ्योऽवतारिणे नमम ।
इदं ब्रह्मप्रियाभ्य ईशानीभ्यो
धामिनीभ्यः सतीभ्यो नमम ॥६१॥

इदं पार्षदेभ्यः पार्षदानीभ्यो
गणेभ्यो गणनीभ्यो नमम ।
इदं योगिभ्यो योगिनीभ्यः
सर्वपालेभ्यः क्षेत्रपेभ्यो नमम ॥६२॥

इदं महर्षिभ्यश्च पितृभ्यो
वायवीयेभ्यो जलीयेभ्यो नमम ।
इदं यमीयेभ्यः काश्यपीयेभ्यो
यक्षेभ्यो राक्षसेभ्यश्च नमम ॥६३॥

इदं मानवेभ्यो मानवीभ्यः
पाशवीभ्यः पशुभ्यश्च नमम ।
इदं पाक्षिणीभ्यश्च पक्षिभ्यः
सृपेभ्यश्च सृपीभ्यश्च नमम ॥६४॥

इदं दासेभ्यश्च दासीभ्यश्च
पादपेभ्यो वल्लीभ्यश्च नमम ।
इदं तृणेभ्यश्च स्तम्बेभ्यश्च
विरुद्भ्यश्च मूलेभ्यो नमम ॥६५॥

इदं तीर्थेभ्यश्च नदीभ्यश्चा-
ऽब्धिभ्यश्च तडागेभ्यो नमम ।
इदं चैत्येभ्यश्च जडेभ्यश्च
तत्त्वेभ्यश्च चेतनेभ्यो नमम ॥६६॥

इदं दैत्येभ्यश्च भूतेभ्यश्च
पिशाचेभ्यश्च भूतिन्यादिभ्यश्च नमम ।
इदं अधोभ्यश्चोपरिभ्यश्चा-
न्तरेभ्यश्च पार्श्वगेभ्यो नमम ॥६७॥

इदं साध्येभ्यश्च तापसेभ्यश्च
सांख्ययोगिनीभ्यश्च नमम ।
इदमंशेभ्यश्च कलाभ्यश्चा-
ऽऽवेशेभ्यश्च विभूतिभ्यो नमम ॥६८॥

इदं अर्चाभ्यश्चान्तर्यामिणे च
स्वरूपेभ्यो रूपेभ्यो नमम ।
इदं विभवेभ्यश्च प्रतिबिम्बेभ्य-
श्चावतीर्णेभ्यश्च नमम ॥६९॥

इदं त्यागिभ्यश्च यतिभ्यश्च
शीलिभ्यश्च ब्रह्मिष्ठेभ्यो नमम ।
इदं गुणेभ्यश्च क्रियाभ्यश्च
रसेभ्यश्च प्रियाभ्यश्च नमम ॥७०॥

इदं गर्भेभ्यश्च बालेभ्यश्च
युवभ्यश्च स्थवीरेभ्यश्च नमम ।
इदं प्रेतेभ्यश्च वृषवन्धेभ्यश्च
कालेभ्यश्च नमम ॥७१॥

इदं कोशेभ्यश्चेन्द्रियेभ्यश्च
शक्तिभ्यश्च देवताभ्यो नमम ।
इदं मायाभ्यश्चेशानेभ्यश्चेशानीभ्यश्च
वैष्णवीभ्यश्च नमम ॥७२॥

इदं ब्राह्मीभ्यश्च ब्रह्माणीभ्यश्च
वैराजीभ्यश्च भूम्नीभ्यश्च नमम ।
इदं धामभ्यश्च विकुण्ठाभ्यो
हारिताभ्यः श्वेताभ्यश्च नमम ॥७३॥

इदं पिशंगीभ्यश्च रक्ताभ्यश्च
गौरीभ्यः स्मारिताभ्यश्च नमम ।
इदं लक्ष्म्यै राधिकायै सरस्वत्यै
दुर्गायै गंगायै नमम ॥७४॥

इदं विरजायै पद्मावत्यै रमायै
माणिक्यै मंजुलायै नमम ।
इदं कमलायै हंसायै चामृतायै
सद्गुणायै सुदेव्यै च नमम ॥७५॥

इदं दुःखहालक्ष्म्यै सन्तुष्टायै चामरीभ्यः
कम्भरायै श्रियै नमम ।
इदं धर्माय च वृषाय च गोपालाय च
भगवते वल्लभाय च नमम ॥७६॥

इदं शुकाय च स्वतःप्रकाशाय च
महाव्यासाय च दैवाधिकाशाय च नमम ।
इदं ब्रह्मसृष्ट्यै चेशसृष्ट्यै जीवसृष्ट्यै
सर्वसृष्ट्यै असृष्ट्यै च नमम ॥७७॥

इदं विशिष्टाय परेशायाऽनादिकृष्ण-
नारायणाय स्वामिने नमम ।
इदं यज्ञाय च हव्याय च पात्रेभ्यश्चो-
पकरणेभ्यश्च श्रीकृष्णवल्लभाय च नमम ॥७८॥

इदं कुण्डाय च वेदेभ्यश्च
मण्डपाय च स्वरेभ्यश्च नमम ।
इदं महीमानेभ्यश्च दीनेभ्यश्चा-
ऽनाथेभ्यश्च कीटेभ्यश्च नमम ॥७९॥

इदं भिक्षुकेभ्यश्च न्यासिभ्यश्च भृत्येभ्यश्च
साशेभ्यश्चान्तेवासिभ्यश्च नमम ।
इदं प्रतीक्षद्भ्यश्चाऽप्रतीक्षद्भ्यश्च
मूर्तेभ्यश्चाऽमूर्तेभ्यश्च तत्त्वेभ्यश्च नमम ॥८०॥

इदं लीनेभ्यश्चाऽलीनेभ्यश्चागतेभ्यश्चा-
नागतेभ्यश्च नमम ।
इदं लौकिभ्यश्चाऽलौकिभ्यश्च देहिभ्यश्चा-
ऽदेहिभ्यश्च परिच्छिन्नेभ्यश्च नमम ॥८१॥

इदं स्मृतेभ्यश्चाऽस्मृतेभ्यश्चोग्रकेभ्यश्चा-
ऽनुग्रकेभ्यश्चाऽपरिच्छिन्नेभ्यश्च नमम ।
इदं सात्त्विकेभ्यश्च राजसेभ्यश्च
तामसेभ्यश्च त्रिकास्पृष्टेभ्यश्च नमम ॥८२॥

इदमिन्द्रियवद्भ्यश्चानिन्द्रियेभ्यश्च
कललेभ्यश्च बीजेभ्यश्च सूक्ष्मेभ्यो नमम ।
इदं यावद्भ्यश्च प्रयावद्भ्यश्च पराणुभ्यश्चा-
ऽनणुभ्यश्चांऽकुरेभ्यश्च नमम ॥८३॥

इदं कामेभ्यश्च रतिभ्यश्चैश्वर्येभ्यश्चा-
ऽवृषेभ्यश्च योनिभ्यश्च नमम ।
इदं भक्तिभ्यश्चापराभ्यश्च शारदाभ्यश्च
भूम्यश्च लिंगेभ्यश्च नमम ॥८४॥

इदं लीलाभ्यश्च तुलसीभ्यश्च दैवसमिद्भ्यश्च नमम ।
इदं पूजाभ्यश्चार्हणाभ्यश्च स्वागताभ्यश्च नमम ॥८५॥
इदं राजभ्यश्च प्रजाभ्यश्च श्रद्धानेभ्यश्च नमम ।
इदं वंशेभ्यश्च प्रवंशेभ्यश्चानुवंशेभ्यश्च नमम ॥८६॥
इदं सतीभ्यश्च गर्भिणीभ्यश्च प्रसूताभ्यश्च नमम ।
इदं विषिभ्यश्च दंष्ट्रिभ्यश्च शृंगिभ्यश्च नमम ॥८७॥
इदं मन्त्रिभ्यश्च मलिभ्यश्चाऽमलिभ्यश्च नमम ।
इदं हेतिभ्यश्च वेषेभ्यश्च यन्त्रेभ्यश्च नमम ॥८८॥
इदं गन्त्रीभ्यश्च विमानेभ्यश्च यानेभ्यश्च नमम ।
इदं कल्पेभ्यश्च कल्पद्रुभ्यश्च कल्पवल्लीभ्यश्च नमम ॥८९॥
इदं धेनुभ्यश्च कामदुघाभ्यश्च चिन्तामणिभ्यश्च नमम ।
इदं ब्रह्मसरसे ब्रह्मह्रदायामृतधारायाऽक्षयपात्राय नमम ॥९०॥
इदं चैतस्मै चेतद्वृत्तये महाकृष्णाय बालकृष्णाय नमम ।
इदं ब्रह्मणे च परब्रह्मणे च नारायणाय परमात्मने नमम ॥९१॥

इत्येवं राधिके हव्याहुतयोऽनन्तनामभिः ।
दीयन्ते कुण्डके वह्नौ साक्षाद् देवप्रदाय वै ॥९२॥
आगत्यागत्य सर्वे ते गृह्णन्ति वह्निकाननात् ।
तृप्ताः प्रयान्ति सुखिनः सोद्गाराः साशिषस्तदा ॥९३॥
एवं कृतं हि हवनं नारिकेलादिभिस्तदा ।
महापूर्णाहुतिप्रख्यं बालकृष्णोऽनले शुभे ॥९४॥
दिव्यरूपोऽभवद् दृश्यः सर्वेषामेव देहिनाम् ।
विश्वंभरः स्वयं भुंक्ते हव्यानि विविधानि वै ॥९५॥

अन्तर्भोज्य तु तांस्तांश्च तृप्तस्तृप्तिं ददाति वै।
शर्करा मधुपर्कांश्च चरवश्च फलानि च ॥९६॥
घृतानि व्रीहयो दिव्या रसा मिष्टान्नकानि च।
अमृतानि सुधाश्चापि पेयानि विविधान्यपि ॥९७॥
कणभूजानि सस्यानि बीजानि समिधस्तथा।
दुग्धसाराणि चान्यानि हूयन्ते चानले हरौ ॥९८॥
यद्यल्लोके तु यान्येव येषां खाद्यानि सन्ति च।
सत्त्वभावानि तान्येव हूयन्ते चानले हरौ ॥९९॥
येषां यत् तृप्तिकृच्चापि सर्वज्ञो बालकृष्णकः।
तत्प्रदायैव तं तां वा तर्पयत्येव चानले ॥१००॥
एवं पूर्णाहुतिर्जाता महापूर्णाहुतिस्तथा।
तृप्तं जातं जगत् सर्वं तृप्तं वै सृष्टिमण्डलम् ॥१०१॥
तृप्तं सृष्टेः परं चापि सर्वं वै ब्रह्ममण्डलम्।
ततो देवादयः प्राहुः पच्यन्ते नोदरेऽधुना ॥१०२॥
हव्यानीति परिहारं करोतु परमेश्वरः।
इत्येवं देवकोटीनां घोषणायां हरिः स्वयम् ॥१०३॥
तृप्तः प्रसन्नश्चोद्गारं प्राप्य होमान्तकं व्यधात्।
महापूर्णाहुतौ होमे जाते नारायणास्तदा।
अमृताख्यफलान्यग्नौ जुहुवुर्धामजानि वै ॥१०४॥
मुक्ताः कल्पमयान्येव फलानि जुहुवुस्तदा।
ईश्वरा ऐश्वरसुधाफलानि जुहुवुस्तदा ॥१०५॥
ऋषयो देवताश्चापि पीयूषफलकानि च।
जुहुवुर्मानवा नारिकेलानि शर्करास्तथा ॥१०६॥
पर्वताश्चन्दनादीनि धेनवः पायसान्यपि।
द्रुमा रसान् श्रेष्ठगुन्द्रान् जुहुवुः सर्वशस्तदा ॥१०७॥
सस्यानि जुहुवुस्तत्र शालिकणादिकान् शुभान्।
वल्लयो मिष्टपुष्पाणि देव्यो मिष्टान्नकानि च ॥१०८॥
यथा येषामभूत् स्मृद्धिस्तथा फलादिकानि वै।
जुहुवुस्तत्र कुण्डाग्नौ परमेशे परात्परे ॥१०९॥
पत्रवन्तस्तु पत्राणि गन्धवन्तः सुगन्धकान्।
त्वग्वन्तश्च त्वचः श्रेष्ठा जुहुवुस्तत्र चानले ॥११०॥
त्रैलोक्यां व्यानशे धूम्रः सुगन्धिमिष्टतृप्तिदः।
सृष्टित्रयं तदा तृप्तं हरौ तृप्ते हि राधिके ॥१११॥
एवं यज्ञो महान् जातो मध्याह्नेऽभूत् समाप्तिमान्।
देवानां दक्षिणादानं पूजनं च विसर्जनम् ॥११२॥
चकार भगवान् साक्षाद् दक्षिणादानमित्यपि।
भिक्षुकाणां हि सर्वेषां भोजनादीन्यकारयत् ॥११३॥
आचार्याद्या यथायोग्याः सामग्रीर्जगृहुश्च ताः।
यज्ञीया दक्षिणाद्याश्च परिहारस्ततोऽभवत् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चैकादश्यां महापूर्णाहुतिप्रदानं सर्वेषां तृप्तिर्यज्ञपरिहारश्चेत्यादिनिरूपणनामा द्वादशाधिकद्विशततमोऽध्यायः ॥ २१२ ॥

श्रीकृष्ण उवाच—

राधिके यज्ञभूमौ वै कुण्डे त्वग्निर्महानलः।
अचुम्बत व्योम हृष्टश्चाशीर्वादान् ददौ तदा ॥ १ ॥
भूमिश्चेयं शान्तिवृत्तिः श्रेष्ठस्मृद्धिमयी सदा।
नीतिसौख्यप्रपूराश्च प्रजाः सन्तु सदा त्विह ॥ २ ॥
अमर्त्यः सुखभाग्याश्च स्मृद्धाः सन्तु सदा त्विह।
राजानो न्यायमार्गस्था महास्मृद्धा भवन्तु वै ॥ ३ ॥
कन्यकाः सुखवत्यश्च कुमाराः स्मृद्धिसंयुताः।
प्रजा दीर्घजीववत्यो भवन्तु रोगवर्जिताः ॥ ४ ॥
सस्यस्मृद्धिः सदा चास्तु स्वर्णरूप्यादिभूरिला।
बुद्धिमन्तो जनाः सन्तु स्त्रियः सौभाग्यसंभृताः ॥ ५ ॥
पशवो बहुदुग्धाश्च पादपा रससंभृताः।
रसाला पृथिवी चास्तु देवतुल्याः कुटुम्बिनः ॥ ६ ॥
साम्राज्यं श्रेष्ठसत्ताकं चास्तु स्मृद्धं धनादिभिः।
दिव्यो भवतु देशोऽयं खण्डाः सन्तु समृद्धयः ॥ ७ ॥
पात्राणि सन्तु मनुजा देवर्षिगुरुपूजकाः।
यज्ञा भवन्तु लोकेऽत्र स्वर्णं चास्तु समुन्नतम् ॥ ८ ॥
इत्येवं वह्निना दत्ता आशीर्वादा हि चाध्वरे।
अश्रूयन्त जनैः सर्वैः प्रसन्नहृदयैस्तदा ॥ ९ ॥
एवमाशीर्वचनानि दत्वा वह्निस्तिरोऽभवत्।
यज्ञभस्मप्रसादं च जगृहुर्देहिनस्तदा ॥१०॥
यज्ञे परिहृते चाज्ञा भोजनानां तदाऽभवत्।
दीयन्ते मिष्टभोज्यानि तदा सर्वविधानि हि ॥११॥
भुंजते देहिनः पंक्तिबद्धा ईशासुरादिकाः।
मानवाश्चान्यजातीयास्तदा मिष्टान्नमध्वरे ॥१२॥
दीयतां दीयतां चेति भुज्यतां भुज्यतामिति।
गृह्यतां गृह्यतां चेति वदन्ति परिवेषकाः ॥१३॥
असंख्यान्नं तथा द्रव्यमसंख्यं दीयते तदा।
अम्बराणि ह्यसंख्यानि पात्राणि विविधानि च ॥१४॥
अन्नान्यपि विविधानि दीयन्ते तत्र चाध्वरे।
एकादश्यां महादानान्यादीयन्ते समन्ततः ॥१५॥

राजभिश्च प्रजाभिश्च स्वर्णप्रधानकानि वै ।
राधिके ये महीमानास्तेऽपि ददति सर्वशः ॥१६॥
ग्राहकाश्च गृहीत्वैव ददत्यपरयाचिने ।
कोटिशो देहिनस्तत्र भुञ्जते हव्यमुत्तमम् ॥१७॥
एवं समुत्सवे जातेऽवभृथार्थं प्रभुर्जनान् ।
मुनीन् प्रजाजनानाह नदीसरःसमागमे ॥१८॥
स्नातुं गन्तव्यमेवाऽद्य सज्जा भवन्तु वै द्रुतम् ।
पटहो वै महाँस्तत्र ताडितो घोषणाकृते ॥१९॥
अवभृथार्थं चायान्तु भगवाँस्तत्र याति वै ।
यानि कानि च पापानि जन्तुद्रोहोद्भवानि च ॥२०॥
कर्मकाण्डस्य वैगुण्ये समुत्थानि च यान्यपि ।
कणशालिसमिद्धोमे यानि वा दुरितानि च ॥२१॥
तेषां विनाशनार्थं वाऽवभृथं शस्यते सदा ।
अवभृथेऽवतारैश्चेश्वरैर्देवैश्च मानवैः ॥२२॥
स्नातव्यं वरुणं सम्पूज्यैवाऽऽपूज्य च वारि च ।
आमलकीफलैश्चापि भस्मना च घृतेन च ॥२३॥
तीर्थमृदा तिलैश्चापि स्नातव्यं वारिभिस्तदा ।
इत्येवं पटहेनापि बोधिता मानवादयः ॥२४॥
ईश्वरा देवताश्चापि नारायणा नरेश्वराः ।
देव्यः सत्यो भगवत्यः सांख्ययोगिन्य इत्यपि ॥२५॥
वाद्यघोषैर्गीतिभिश्चाययुस्त्ववभृथाय वै ।
शेषकाष्ठवनानद्या विनिपारसरोवरे ॥२६॥
संगमे पावने सस्नुर्विधिना मखिनस्तदा ।
यत्र यत्र तटे ये ये त्वभवँस्तत्र तत्र ते ॥२७॥
सस्नुः सम्पूज्य वरुणं तीर्थानि च जलानि च ।
भगवान् श्रीबालकृष्णो ब्रह्मप्रियाश्च योषितः ॥२८॥
सस्नुर्देवास्तथा देव्यस्तीर्थोत्तमं ह्यभूज्जलम् ।
नारायणाऽवताराश्च तथा राधारमादयः ॥२९॥
सस्नुस्तत्र तु तीर्थानि पावनान्यपि शुद्धये ।
एवं चाऽवभृथे जाते त्वाययुर्वै गृहान्निजान् ॥३०॥
ततः सभा महत्यासीत् पारितोषिकलब्धये ।
सर्वेभ्यः कर्मचारिभ्यस्तूपदाः स्वर्णनिर्मिताः ॥३१॥
भूषा द्रव्याणि रत्नानि दीयन्ते माधवेन वै ।
हाराः स्वर्णमयाश्चापि श्रेष्ठाम्बराणि चापि तु ॥३२॥
सुवर्णचन्द्रका रत्नवद्धाः कार्यप्रसूचकाः ।
गुणावेदनरेखाश्च मखचिह्नसमन्विताः ॥३३॥
रूप्यचन्द्रास्तथा चौर्णकम्बलाऽम्बरशाटिकाः ।
तन्तिकाः कुण्डले चापि रशनाऽङ्गुलिमुद्रिकाः ॥३४॥
ऊर्मिकाः कटकाश्चापि मौक्तिकानां स्रजः शुभाः ।
स्वर्णपात्राणि रम्याणि स्थालिकाः कलशास्तथा ॥३५॥
छत्राणि चामरे चापि व्यजनानि विमानकम् ।
सिंहासनानि रम्याणि पट्टिका च चतुष्पदी ॥३६॥
स्वर्णमणिमहाहारा मालाश्च हीरकैः कृताः ।
पारितोषिकरूपेण ददौ श्रीकृष्णवल्लभः ॥३७॥
क्षत्रियेभ्यश्चायुधानि विप्रेभ्यो याजनानि च ।
अन्येभ्यस्तु यथापेक्षं ददौ वै पारितोषिकम् ॥३८॥
मूर्तयः स्वर्णमय्यो याः प्राणैः सुप्रतियोजिताः ।
पूजनार्थं ददौ स्वामिकृष्णनारायणार्यकः ॥३९॥
आचार्यादेशमालम्ब्य भूभृद्वयस्तत्र चाध्वरे ।
एवं समाप्य सर्वं वै क्षणं विश्रान्तिमाप ह ॥४०॥
तावत्तत्र समागत्य रायलम्बारभूपतिः ।
रूपर्तुमहर्षिश्चापि प्रार्थयामासतुर्द्रुतम् ॥४१॥
किमुवक्रान् प्रदेशान् नौ किमुवक्रां पुरीं तथा ।
प्रपुनीहि महाराजैकादश्यामद्य शोभनाम् ॥४२॥
हरिस्त्वथाऽस्त्विति प्राहाऽऽसहत् सज्जो विमानकम् ।
कुटुम्बेन हरेणापि लोमशेन समन्वितः ॥४३॥
राजा तूर्णं ययौ पूर्वं स्वागतार्थं विमानगः ।
हरिः सायं ययौ शीघ्रं किमुवक्रां पुरीं शुभाम् ॥४४॥
राजदर्शितमार्गेणाऽवातारयद् विमानकम् ।
उद्याने निजसौधस्य स्वागतं चाचरन् नृपः ॥४५॥
वाद्यानि बहुरम्याणि तदाऽवाद्यन्त सर्वतः ।
प्रजा द्रष्टुं समायाता वर्धयामासुरच्युतम् ॥४६॥
विमानाच्छ्रीहरिस्तत्रोद्याने बहिरुपाययौ ।
लाजाक्षतादिभिः पुष्पैश्चन्दनैः परमेश्वरम् ॥४७॥
वर्धयामासुरत्यर्थं प्रजाद्या नरयोषितः ।
राजा सौधे हरिं नत्वा पुपूज बहुरत्नकैः ॥४८॥
राज्ञी पूजां चकाराऽथ कन्यका भूभृतस्तु षट् ।
वव्रिरे भगवन्तं तं वरमालाप्रदानकैः ॥४९॥
कृतकृत्यास्तु ता जाता राजा मुमोद चाप्यति ।
राज्ञी मुमोद बहुधा ददावुपायनानि च ॥५०॥
यौतकं प्रददौ राज्ञी नीराजनं ततोऽकरोत् ।
भोजयामास दुग्धादि पायसं शार्ङ्गिणे तदा ॥५१॥
अथ सैन्येन सहितं त्वाचार्यं कृष्णवल्लभम् ।
नगर्यां भ्रामयामास राजमार्गेण भूपतिः ॥५२॥
प्रधानाः श्रेष्ठिनश्चान्ये वर्धयामासुरीश्वरम् ।
पुपूजुश्च प्रजाः सर्वा वक्रिण्यः कन्यकास्तथा ॥५३॥

हारैः फलैर्धनैश्चापि कम्बलैरम्बरादिभिः ।
विभूषाभिः समानर्चुः सर्वे धनं हरिस्तदा ॥५४॥
रूपर्तुऋषये प्रादाद् यौतकं नीतवान् सह ।
राजसौधं समागत्य निशि विश्रान्तिमाप च ॥५५॥
कन्याषट्कप्रसेवां च गृह्णन् बुबोध वै प्रगे ।
कृताह्निकः पयः पीत्वा गन्तुं सज्जोऽभवद्धरिः ॥५६॥
सूर्योदये समायाच्च सैन्यसम्मानितो द्रुतम् ।
प्राप्य पूजां यज्ञपृथ्व्यां नैजालये ह्यवातरत् ॥५७॥
एवं वै राधिके कृत्वा किमुवक्रां पुरीं शुभाम् ।
पावनीं द्वादशीप्रातर्यज्ञस्थलीं व्यलोकयत् ॥५८॥
महीमानान्सार्वभौमानाकारयत् सभास्थले ।
मुक्ता धामान्यवतारा नारायणास्तथेश्वराः ॥५९॥
ऋषयः पितरो देवा दैत्याश्च मानवास्तथा ।
खगा जलगाः पातालावासाः सर्वे समाययुः ॥६०॥
स्थावरा जंगमाश्चापि जडाश्च चेतनास्तथा ।
दासा भृत्याः स्वामिनश्च स्वामिन्यश्च सभां ययुः ॥६१॥
ईश्वराण्यस्तथा नारायण्यः सत्यः सुरप्रियाः ।
सर्वप्रियाश्चाययुश्चाप्सरसो मातृकास्तथा ॥६२॥
यतिन्यो ब्रह्मसरसो ब्रह्मचारिण्य इत्यपि ।
सांख्ययोगिन्य एवापि सृष्टयश्चागताः सभाम् ॥६३॥
हरिः प्रसन्नो भगवान् कल्पद्रुधेनुवल्लिकाः ।
कल्पमणीन् सेवकाँश्च पार्षदान् सेविकास्तथा ॥६४॥
पर्षद्याकारयामासाऽऽययुस्ते ताः सभां तदा ।
सिंहासनेषु दिव्येषु भ्राजमानेषु सूर्यवत् ॥६५॥
आसीनेषु समस्तेषु कृष्णनारायणोऽब्रवीत् ।
आगतेभ्योऽवतारेभ्यः सर्वेभ्यश्चाह माधवः ॥६६॥
सम्माननं धन्यभावं कुर्वेऽहं भवतामिह ।
धामान्यपि विहायैव यज्ञार्थे यदुपागताः ॥६७॥
ईश्वराणामीश्वरीणां सम्मानं धन्यभावनाम् ।
कुर्वेऽहं दूरतश्चापि यज्ञार्थे यदुपागताः ॥६८॥
ऋषीणां च मुनीनां च पितृणां योषितां तथा ।
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ॥६९॥
देवानां काश्यपीनां च प्रजानां मनुजन्मनाम् ।
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ॥७०॥
वृक्षादीनां तृणादीनां वल्लीनां विरुधां तथा ।
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ॥७१॥
तीर्थानां दैवतत्वानां जडानां च चितामपि ।
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ॥७२॥
पातालतलवासानां जलस्थलनिवासिनाम् ।
वह्निवायुनिवासानां तीर्थानां भूभृतां तथा ॥७३॥
लोकानां च दिशां पालकानां च कर्मचारिणाम् ।
पार्षदानां गणानां च गणेशानां च योगिनाम् ॥७४॥
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ।
यज्ञार्थे कृतयत्नानां सेवकानां समन्ततः ॥७५॥
सेविकानां समस्तानां क्षेत्रपानां समन्ततः ।
दासीनां दासवर्गाणां रक्षकाणां समन्ततः ॥७६॥
सर्वाधिकारमाप्तानां रसशालाकृतां तथा ।
द्रव्यशालारक्षकाणां संकल्पवस्तुसंजुषाम् ॥७७॥
दातॄणां च नृपाणां च नृपीणां ब्रह्मयोषिताम् ।
विप्राणां वेदमन्त्राणां हव्यानां मखपात्रिणाम् ॥७८॥
तत्त्वानां जडग्रन्थीनां चैत्यानां विश्वकर्मणाम् ।
सम्मानं धन्यवादं च कुर्वे यन्मखमागताः ॥७९॥
विदार्य प्राञ्जलिं चात्मप्रसादत्वं शुभाशिषः ।
मन्मूर्तिं स्वर्णरूप्यादि सुधामृतानि सन्ददे ॥८०॥
मुकुटानि कटकानि सुचन्द्रकाणि सन्ददे ।
भूषाम्बराणि पात्राणि चाम्बराण्यपि सन्ददे ॥८१॥
छत्राणि दिव्ययानानि शाट्यादीनि च सन्ददे ।
शिरस्त्राणानि रम्याणि कौशेयानि च सन्ददे ॥८२॥
हस्त्यश्वरथरत्नानि हीरकानपि सन्ददे ।
शृंगाराणि विचित्राणि कञ्चुकादीनि सन्ददे ॥८३॥
अक्षयान्यपि पात्राणि कल्पवृक्षादिकान् ददे ।
कल्पवल्लीः कल्पधेनूः कल्पमणीन् ददे च वः ॥८४॥
दिव्यज्ञानं महैश्वर्यं दिव्यतेजो ददे च वः ।
दिव्यर्द्धिं शाश्वतीं शान्तिं भक्तिं सेवां ददे च वः ॥८५॥
दिव्यसिद्धीर्महालाभं ममाऽमृतं ददे च वः ।
इत्युक्त्वा भगवान् कृष्णवल्लभाचार्य इष्टकृत् ॥८६॥
ददौ दिव्याक्षरस्वर्णकृतकिरीटकुण्डले ।
अवतारेभ्य एवाद्ये ईश्वरेभ्यस्ततः परम् ॥८७॥
लोकपालेभ्य एवापि राजभ्यश्च ततः परम् ।
एवं सर्वेभ्य एवापि यथायोग्यं त्वपेक्षितम् ॥८८॥
नरनारीसमेतेभ्यो ददौ वै पारितोषिकम् ।
प्रातश्चैवं दानकर्म समाचरद्धरिस्ततः ॥८९॥
दासभृत्यादिदेहिभ्यो धनानि व्यतरत्प्रभुः ।
स्वर्णहारान् रत्नहारान् ददौ योग्यान् पुनः पुनः ॥९०॥
नारीभ्यो नारिकायोग्या ददौ भूषाः सुवर्णजाः ।
अन्नपात्रेभ्य एवापि ददावन्नानि सर्वशः ॥९१॥

वस्त्रपात्रेभ्य एवापि ददौ वस्त्राणि सर्वशः ।
बहुभ्यो गृहदानानि ददौ नारायणः प्रभुः ॥९२॥
राजद्वाराऽदापयच्च भवनानि द्विजातये ।
एवं सर्वं दानकर्म त्वपारयत्प्रभुः स्वयम् ॥९३॥
भोजनं तु ततश्चैवाऽकारयत् सार्वभौमिकम् ।
पारणात्म शुभं मिष्टं पायसान्नमभोजयत् ॥९४॥
रसान्नं मधुपर्कान्नं मिष्टान्नं चाप्यभोजयत् ।
सुधान्नं चामृतान्नं च पीयूषान्नमभोजयत् ॥९५॥
पुण्यान्नं भावनान्नं च फलान्नं चाप्यभोजयत् ।
कणान्नं चापि मुन्यन्नं पत्रान्नं चाप्यभोजयत् ॥९६॥
भाजान्नं चांकुरान्नं च सस्यान्नं चाप्यभोजयत् ।
जलीयान्नं पावनान्नं चानलान्नमभोजयत् ॥९७॥
तैजसान्नं च धामान्नं सात्त्विकान्नमभोजयत् ।
शुद्धसत्त्वान्नकं लीलाविभूत्यन्नमबोधयत् ॥९८॥
ऋत्वन्नं चाप्यऋत्वन्नं देहजान्नमभोजयत् ।
कल्पान्नं चापि सिद्धयन्नं सिद्धान्नं चाप्यभोजयत् ॥९९॥
भावनान्नं च तृप्त्यन्नं सन्तोषान्नमभोजयत् ।
आनन्दान्नं महासौख्यान्नकं सर्वानभोजयत् ॥१००॥
तक्रं च शर्करां दुग्धं सूपं तथौदनादिकम् ।
पूरिकां पोलिकां चापि व्यंजनान्नान्यभोजयत् ॥१०१॥
मिष्टान्नानि क्वथिकाश्च चटनीः पर्पटादिकान् ।
सेविकाश्च तथाऽपूपान् संयावं चाप्यभोजयत् ॥१०२॥
चणकाँश्च फुल्लवटीर्भर्जितांश्चाप्यभोजयत् ।
मेशुभाँश्च सुखदाँश्च मोहरथालानभोजयत् ॥१०३॥
चक्रपारान् स्थिरकाँश्च ग्रन्थकानप्यभोजयत् ।
राजिकाराद्धमेवाऽपि त्वारनालान्यभोजयत् ॥१०४॥
दधिघृतं नवनीतं गूडं मधु ह्यभोजयत् ।
अम्बलवानं शरत्पिबं चाम्ररसानभोजयत् ॥१०५॥
फलानि त्वार्द्रशुष्काणि बीजान्यपि ह्यभोजयत् ।
मुखवासान् गन्धिकणान् ताम्बूलकान्यभोजयत् ॥१०६॥
ब्रह्महृदस्य सलिलं सर्वेभ्योऽपाययत् प्रभुः ।
एवं प्रभोजयित्वैव स्वयं तु बुभुजे हरिः ॥१०७॥
कुटुम्बेन तु सहितो ब्रह्मप्रियासमन्वितः ।
राधारमासतीलक्ष्मीप्रभापारवतीयुतः ॥१०८॥
माणिकीदुःखहालक्ष्मीमंजुलाऽमृतिकायुतः ।
सगुणाशारदाहंसादुर्गासरस्वतीयुतः ॥१०९॥
पितरौ बुभुजाते च लोमशाद्या गुरूत्तमाः ।
बुभुजिरे च सर्वे वै देहिनो महीमानकाः ॥११०॥
गांगेयाश्चामरेयाश्च महर्षयश्च कन्यकाः ।
नदा नद्यश्च तीर्थानि बुभुजिरेऽतिकण्ठतः ॥१११॥
मध्याह्ने श्रीहरिस्तत्र राजभ्योऽभोजयत्त्वति ।
मध्याह्नोत्तरवेलायां मखस्य महीमानकान् ॥११२॥
गन्तुमाज्ञापयामास स्वस्वलोकान्निजालयान् ।
ऋते ब्रह्मप्रियाः सर्वाः ऋते लोमशकादिकान् ॥११३॥
ऋते नैजं कुटुम्बं चेशानं सतीं गणेश्वरम् ।
ऋते चामरिकर्षीश्च ऋते च तुषितं तथा ॥११४॥
ऋते च सच्चिदानन्दं श्रीकृष्णं त्वां च राधिकाम् ।
ऋते नारायणं लक्ष्मीम् ऋतेऽश्वसरसो जनान् ॥११५॥
इत्येवं सर्वथा चाज्ञां लब्ध्वा लब्ध्वा च राधिके ।
प्रतस्थिरे विमानैः स्वैः सायं शून्यमिवाऽभवत् ॥११६॥
रचनानां मण्डपानां संहारं विश्वकर्मिणः ।
सदासा वै निशायां ते चक्रुः स्थली प्रगेऽभवत् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वह्नेराशीर्वादो भोजनानि, अवभृथं पारितोषिकाणि, सायं हरेः रायलम्बारनृपराष्ट्रगमनं, किमुवक्रापुर्यां भ्रमणं पूजनं भोजनं रात्रौ विश्रमणं प्रातर्यज्ञभूमिमागमनं, महीमानसभाकरणं सम्मानधन्यवादोपदा-पारितोषिकादिदानं, भोजनानि विदायं चेत्यादिनिरूपणनामा त्रयोदशाधिक-द्विशततमोऽध्यायः ॥ २१३ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके त्रयोदश्यां प्रातः कृताह्निकः ।
हरिस्त्वासनमासाद्य पूजायां संस्थितोऽभवत् ॥ १ ॥
तावत्तत्र समायातो रायनवार्कभूपतिः ।
निजराष्ट्रं समानेतुं भगवन्तं समार्थयत् ॥ २ ॥
हरिस्तथाऽस्त्विति प्राह सर्वान् सज्जान् समाकरोत् ।
रायकिन्नरसम्राजं त्वाहूय प्राह तद्विधिम् ॥ ३ ॥
राजा सम्पूज्य कृष्णं तं विदायं प्रददौ ततः ।
हरिस्तूर्णं विमानं स्वं चाऽवरुह्याऽम्बरेऽभवत् ॥ ४ ॥
तदा वाद्यान्यवाद्यन्त विदाये पारमेश्वरे ।
रोकीश्वरो रणजिच्च मारीशो वायुकक्षकः ॥ ५ ॥
बालेश्वरश्च लम्बारस्त एते भूभृतस्तदा ।
विदायं यौतकं चापि सुताभ्यो हरये ददुः ॥ ६ ॥
सैन्यैः सम्मानितो वाद्यैर्गीतिकाभिः सभाजितः ।
विमानेन ययौ तूर्णं सर्वसार्थसमन्वितः ॥ ७ ॥

रायनवार्कभूपस्य राष्ट्रे मिश्रसुराभिधम् ।
मिश्रसुरासरिद्योगे सुपारीयसरोऽन्तिके ॥ ८ ॥
चिञ्चागोपुरिकापुर्या उद्याने चोपकण्ठगे ।
वायुश्रृंगतनुर्नामा ऋषिः कृष्णेन वै सह ॥ ९ ॥
विमाने चागमत् तत्र राजा पूर्वं ययौ तथा ।
स्वागतार्थं हरेः सम्यक् सैन्यमसज्जयद् द्रुतम् ॥१०॥
तदा वाद्यान्यवाद्यन्त प्रजानादाश्च हर्षजाः ।
वादित्राणां निनादाश्चाऽभवन् दिगन्तचारिणः ॥११॥
कन्यकाः प्रमदाश्चाप्यगायन् सुगीतिकाः शुभाः ।
मांगल्यद्रवयुक्ताश्चाययुः कृष्णसमीपगाः ॥१२॥
विमानं नृपबोध्येन मार्गेणाऽवातरद् भुवि ।
तदाऽक्षतानां लाजानां पुष्पाणां वर्षणं ह्यभूत् ॥१३॥
जयशब्दा जीवशब्दाः सर्वाननेभ्य आभवन् ।
स्थिराद्विमानकात् कृष्णो बहिश्चाग्रे ह्युपस्थितः ॥१४॥
तदा लोकै राजभिश्च वर्धितः कन्यकादिभिः ।
प्रक्षाल्य चरणौ राजा पपौ वारि च के न्यधात् ॥१५॥
ततो दुग्धं ददौ पानार्थं च सर्वेभ्य एव च ।
सैन्येन सहितं कृष्णं पुर्यामभ्रामयन्मुदा ॥१६॥
प्रजाः पुपूजुः प्रेम्णैव प्रधानाः श्रेष्ठिनस्तथा ।
नरा नार्यो ह्यमर्यश्च मिश्रसुर्यश्च योषितः ॥१७॥
द्रव्यैः पुष्पैरम्बरैश्च फलै रत्नैश्च हीरकैः ।
विविधैर्मुकुटैश्चापि भूषाभिः समपूजयन् ॥१८॥
अवर्धयन्नञ्जलिभिर्हृदयार्पणभावनैः ।
नमनैश्च यथाशक्तिदानैश्चापि समर्हणैः ॥१९॥
भ्रमित्वैवं नगर्यां स्वं दत्वा दर्शनमुत्तमम् ।
आययौ राजसौधं श्रीबालकृष्णोऽनुगान्वितः ॥२०॥
राजा पुपूज रत्नाद्यैः सौवर्णैर्हारकैस्तथा ।
दिव्याम्बरैर्धनैः श्रेष्ठैर्दिव्योपदाभिरादरात् ॥२१॥
आरार्त्रिकं चकारापि चन्दनाद्यैरपूजयत् ।
पपात पादयोश्चापि कृतार्थोऽस्मीति संवदन् ॥२२॥
राज्ञ्यस्तस्य चतस्रश्च पुपूजुः परमेश्वरम् ।
कन्यकाः सप्त भूपस्य तदा चन्द्रनिभाननाः ॥२३॥
मुमुहुः श्रीपतौ कान्ते जगृहुर्मनसा पतिम् ।
वरमाला ददुस्ताश्च कृष्णकण्ठे सुहर्षिताः ॥२४॥
कृतकृत्याश्च ता जाता राजा राज्ञ्योऽपि वै तथा ।
कृतकृत्या अभवँश्च भाग्यं श्रेष्ठं हि मेनिरे ।
राजोत्सवं चकारापि मध्याह्ने हर्षसंभृतम् ॥२५॥
ततः सर्वान् सुमिष्टान्नं भोजयामास भूपतिः ।
ताम्बूलकादिकं दत्वा यौतकं चोपदा ददौ ॥२६॥
हरिर्जग्राह सर्वं तत् तन्वर्तुऋषये ददौ ।
यथायोग्यं निजयोग्यं विमानेऽस्थापयत् त्वपि ॥२७॥
विशश्राम क्षणं पश्चाद् राजा स्वर्लतिकापुरीम् ।
निजां गन्तुं हरिं प्राह हरिः सज्जोऽभवत् क्षणात् ॥२८॥
राजा पूर्वं ययौ तत्र पुर्यां सम्मानमाचरत् ।
वाद्यघोषैः प्रजाहर्षनादैः पुष्पादिपूजनैः ॥२९॥
महोद्याने चावतीर्य विमानाद् भगवाँस्ततः ।
राजोक्तरीत्या नगरे चाभ्रमद् दर्शनप्रदः ॥३०॥
पूजितो वन्दितो लोकैः वस्तुभिश्च समार्पितः ।
दृष्टश्चावधृतो नैजे हृदये परमेश्वरः ॥३१॥
वर्धितो बहुधा लोकैः प्रसन्नोऽभूत्परेश्वरः ।
पूजायामागतं वायुश्रृंगतन्वर्षये ददौ ॥३२॥
विशश्राम महासौधे राज्ञो दिव्ये सुवर्णजे ।
तत्रायातो रायहाण्डेश्वरो माक्षिकराष्ट्रपः ॥३३॥
प्रार्थयितुं हरिं नैजं राज्यं तथाऽऽर्थयत्तदा ।
हरिः सज्जोऽभवच्छीघ्रं सायं सार्थसमन्वितः ॥३४॥
रायनवार्कभूपश्च विदायं यौतकं ददौ ।
विमानेन हरिस्तूर्णं व्योम्ना माक्षिकराष्ट्रकम् ॥३५॥
निशामुखे समायाच्च माक्षिकानगरीं प्रति ।
विद्युत्प्रकाशैः परितः शोभमानां महापुरीम् ॥३६॥
रायहण्डेशभूपश्च प्राग्गत्वा स्वागतं व्यधात् ।
सैन्येन वाद्यघोषैश्च ध्वजापताकिकादिभिः ॥३७॥
पुष्पहारैर्जयशब्दैर्गीतिकाभिश्च मंगलैः ।
चन्दनाद्यैः स्वागतं श्रीहरेः राजाऽकरोत्तदा ॥३८॥
विमानं चागतं पृथ्व्यां हरिर्बहिः समाययौ ।
अनन्तशाखविद्युद्भिः काशिते च दिवानिभे ॥३९॥
विमानाग्रे हि भगवान् शुशुभे दिवि चन्द्रवत् ।
तं विलोक्य परंब्रह्म योषितश्च प्रजाजनाः ॥४०॥
वर्धयामासुरत्यर्थं हरिं चन्दनपुष्पकैः ।
अक्षतैश्चापि लाजाभिर्गन्धसारैर्मनोहरैः ॥४१॥
रात्रौ राजा नगर्यां वै भ्रामयामास माधवम् ।
सैन्येन सहितं कृष्णं प्रजाः पुपूजुरुत्सुकाः ॥४२॥
गोपुरे चांगणे मध्ये चत्वरे राजमार्गके ।
हट्टाग्रेषु च सौधेषु वर्धयामासुरुत्सुकाः ॥४३॥
द्रव्यैः सुवर्णमुद्राभिः फलैः कुंकुमचन्दनैः ।
अम्बरैर्नारिकेलाद्यैर्गन्धसारैः सुगन्धिभिः ॥४४॥

पुष्पहारै रत्नहारैरमूल्योपसुवस्तुभिः ।
एवं नगर्यां भगवान् परिभ्रम्य नृपालयम् ॥४५॥
आययौ च सभां चक्रे रात्रावुपादिदेश ह ।
सर्वेषां स्ववृत्तितयेष्यमाणं वै प्रयोजनम् ॥४६॥
सुखं च दुःखाभावश्चेत्युभयं वै प्रयोजनम् ।
सुखार्थं चेष्यते धर्मो धर्मात् सुखं हि जायते ॥४७॥
अनागतस्य दुःखस्याऽनागमाय यतेत वै ।
अधर्मो दुःखदः प्रोक्तोऽधर्मो ह्यपुण्यनामधृक् ॥४८॥
हिंसनं परपीडादि द्रोहः पापं ह्यधर्मकः ।
स्तेयं चानृतकरणं च प्रतारणं हि पापकम् ॥४९॥
अन्यायवर्तनं चापि परनाशकरी क्रिया ।
परवृत्तिविनाशश्च परवस्तुविनाशनम् ॥५०॥
स्वस्य मोक्षस्य हान्यादिदर्शनेन वर्जनं तथा ।
मौर्ख्यं च निजपित्रोश्चाऽसेवनं पातकानि वै ॥५१॥
अन्यद्रव्याद्याहरणं चाश्रिताऽरक्षणं तथा ।
विस्मृतिर्देवदेवस्य पूज्यानां चावमाननम् ॥५२॥
नारीणां पीडनं चापि बालानां पीडनं वृथा ।
वृक्षवल्ल्यादिनाशश्च वह्निदानं महावने ॥५३॥
यत्र जीवाः प्रदह्येयुस्तत्सर्वं पातकं महत् ।
मनुष्येण न कर्तव्यं स्वात्मनः पीडनं तथा ॥५४॥
सुखं देहसमुत्थं वेन्द्रियजं चात्मजं च वा ।
सर्वं प्रयोजनं स्वस्य साधयत्येव मानवः ॥५५॥
अनित्यं तु सुखं नाशं प्राप्स्यत्येव न संशयः ।
विचार्येत्थं च तन्नाऽर्ज्यं चाऽर्ज्यं वै शाश्वतं सुखम् ॥५६॥
यज्ञो दानं दया देवाः सत्यं च सेवनं तपः ।
सुचारित्र्यं सुखदानि योगिधर्मा इमे मताः ॥५७॥
अष्टैतानि पवित्राणि श्रेयः प्रसाददानि वै ।
पुण्यतीर्थाभिगमनं सुखदं शाश्वते हितम् ॥५८॥
पुण्यदेशाभिगमनं पवित्रं श्रेयसांप्रदम् ।
मर्त्योऽन्नधनवस्त्राद्यैश्चेत् समृद्धश्च जीवति ॥५९॥
तदा यज्ञादिकं कृत्वा शाश्वतं सुखमर्जयेत् ।
पुण्यतीर्थानि सन्त्येव साधवो जगतां हिताः ॥६०॥
पुण्यदेशाश्च सन्त्येव मन्दिरे प्रतिमा हरेः ।
तत्र गतिर्मोक्षगतिस्तया सुखं हि शाश्वतम् ॥६१॥
प्रायश्चित्तोद्वेजनेन जायते पापनाशनम् ।
पुनर्नैव प्रकुर्याच्चेद् भाविपापात् प्रमुच्यते ॥६२॥
सतां संगं प्रकुर्याच्चेत् कुसंगात् परिमुच्यते ।
साधुतीर्थे परिस्नातो यमक्लेशात्प्रमुच्यते ॥६३॥
साधुतीर्थी भवेत् साधुर्हरितीर्थी हरो भवेत् ।
सुगन्धसेवी सुगन्धी स्यात् कृष्णगन्धी भवेत्ततः ॥६४॥
कर्मकृत्वाऽभिमन्येत नाहमस्मीति चेतनः ।
कर्मणा लिप्यते नैव पद्मपत्रमिवाऽम्भसा ॥६५॥
छिद्राणि विवृतान्येव साधूनां चावृणोति यः ।
पापातिपापकृच्चापि स कल्याणं प्रपद्यते ॥६६॥
यथा सूर्यस्तमोनाशी तथा कल्याणकृज्जनः ।
सर्वपापाभिहर्ताऽपि सर्वपापविनाशकः ॥६७॥
सेवापरो जनो नित्यमाशीर्वादान् प्रविन्दति ।
आयुरन्नं धनं सौख्यं विन्दति सेवया ततः ॥६८॥
साधूनां सेवया सौख्यं शाश्वतं कृष्णयोगतः ।
साधुतीर्थी भवेत्तस्मान्मानवो दीर्घदृष्टियुक् ॥६९॥
शाश्वते सुखकोशे ते नित्यं तिष्ठन्ति केशवे ।
तदाश्रयिणां कोशः स शाश्वतः स्यादुपस्थितः ॥७०॥
अहं कोशः शाश्वतोऽस्मि महानन्दपरिप्लुतः ।
सन्तो मदानन्दयुक्ताः कुर्वन्त्यान्दिनोऽपरान् ॥७१॥
मुख्यं प्रयोजनं मुक्तिः शाश्वतं सुखमेषु वै ।
साधुष्वेवोपलभ्येत सेव्याः सन्तस्ततोऽनिशम् ॥७२॥
इत्युक्त्वा विररामाऽसौ भगवान् राधिके ततः ।
सभान्ते नृपतिः पूजां चकार द्रव्यकोटिभिः ॥७३॥
सुवर्णरूप्यकपात्रैरम्बरैश्च विभूषणैः ।
मुकुटं धारयामास बालकृष्णस्य मस्तके ॥७४॥
कण्ठे हारान् रत्नयुक्तान् सौवर्णान् श्रीहरेर्ददौ ।
और्णान् कोमलवेषाँश्चार्पयामास सुवर्णिनः ॥७५॥
सुछत्रं चामरे श्रेष्ठे स्वर्णदण्डं च वेत्रकम् ।
हीरकैर्मौक्तिकैर्युक्ता माला ददौ च शोभनाः ॥७६॥
ऊर्मिकाः करकान्याच्छादनानि विविधानि च ।
ददौ सुगन्धसारैश्च पुष्पाऽक्षतैरपूजयत् ॥७७॥
राज्ञी हीरवती कृष्णपूजामारार्त्रिकं व्यधात् ।
तिलकं कौंकुमं भाले साक्षतं चन्द्रकं व्यधात् ॥७८॥
मस्तकेऽक्षतपुष्पाद्यैरर्हणां चोत्तमां व्यधात् ।
ददौ मिष्टान्नकवलं मुखे कृष्णस्य सा ततः ॥७९॥
स्वस्याः पार्श्वे स्थिताः कन्या नव प्राह जनेश्वरी ।
कन्याकाः ! श्रीपतिश्चायं राधास्वामी हि राजते ॥८०॥
बहुजन्मकृतैः पुण्यैर्लभ्यते द्रष्टुमित्यपि ।
एष साक्षान्मिलितोऽस्ति कृपया स्वगृहेऽधुना ॥८१॥
हृदये तं वासयन्तु मा त्यजन्तु कदाचन ।
पूजयन्तु हरिं प्रेम्णा सेवयन्तु जनार्दनम् ॥८२॥

सदा भक्तिं प्रकुर्वन्तु श्रीरमाकमला इव ।
श्रुत्वैवं कन्यकाः कृष्णे बालकृष्णेऽतिमोहिताः ॥८३॥
मातृवाक्येन पुष्टिं च प्राप्तास्तं कान्तमच्युतम् ।
वव्रिरे फुल्लवदना हृष्टा मालाप्रदानकैः ॥८४॥
वरमालाः कृष्णकण्ठे न्यधुर्नव ताः कन्यकाः ।
तासां करग्रहं चक्रे भगवान् विधिना ततः ॥८५॥
उत्सवं कृतकृत्यश्च राजा चकार वै निशि ।
भोजनानि ततः सर्वसार्थेभ्य प्रददौ नृपः ॥८६॥
प्रजा अपि हरेः पूजां चक्रुस्तत्रातिभावतः ।
राधाद्या भोजनं चक्रुस्ततः कृष्णो निशान्तरे ॥८७॥
कन्यकासेवितो निद्रां जग्राह क्षणमेव तु ।
मंगलैर्वाद्यघोषैश्च प्रबुबोध प्रगे द्रुतम् ॥८८॥
त्रयोदश्यां कृतस्नानपूजनश्च पयः पपौ ।
पपुश्चान्येऽपि दुग्धादि हुण्डेशनृपतेर्गृहे ॥८९॥
प्रातः ऋषिश्च वीराकजनर्षि श्रीहरिं प्रभुम् ।
पूजयामास विविधैर्वस्तुभिर्वेदमन्त्रकैः ॥९०॥
महापूजां प्रकृत्वैव मोक्षं वव्रे च शाश्वतम् ।
हरिः प्राह समाधौ त्वं तिष्ठर्षे मोक्षमाव्रज ॥९१॥
इत्युक्तः स ऋषिस्तूर्णं ध्याने स्थिरोऽभवत् क्षणात् ।
तावन्मूर्तिं हरेर्दिव्यामपश्यत् हृदये शुभाम् ॥९२॥
दिव्यतेजोमयीं दिव्यमुक्ताद्यैः सेवितां ततः ।
विमानं त्वक्षरसंज्ञमपश्यत्तेजसावृतम् ॥९३॥
भगवाँस्तं राधिके वै हस्ते धृत्वा विमानके ।
नीत्वा धामाऽक्षरं नैजं प्रापयामास तत्क्षणम् ॥९४॥
राजाद्यास्तु ऋषेर्देहं चिक्षिपुर्गर्तमध्यके ।
देहे जातश्चमत्कारस्तं राधे कथयामि ते ॥९५॥
देहात् तत्र समुत्पन्ना वीरा हेतिसमन्विताः ।
महादेहा बलिष्ठाश्च हरिं नत्वाऽग्रतः स्थिताः ॥९६॥
वीराकजनपुत्रास्ते निवासं चार्थयन् प्रभोः ।
हरिस्तेभ्यो ददौ वासं शंभोर्गणेषु सर्वदा ॥९७॥
वीरास्ते च जनास्ते च न त्वेशानं सतीं ततः ।
लब्धाज्ञाः प्रययुः सर्वे कैलासं शाश्वतं स्थलम् ॥९८॥
शंभोर्लब्धमनवस्ते तामसा वैष्णवाः सदा ।
वीरजनख्यातिमन्तोऽभवन् भक्ता हरस्य वै ॥९९॥
अथ श्रीमद्बालकृष्णं काम्भरेयं महाप्रभुम् ।
राजा चक्रे दण्डवच्च चक्रे वै पादवाहनम् ॥१००॥
सेवां कृत्वा ततो नीराजनं व्यधात् स भूपतिः ।
पादधौतजलं दिव्यं पपौ तस्थौ समीपतः ॥१०१॥
तावत् तत्र समायातो रायकूपेशभूपतिः ।
हरिं नेतुं स्वनगरीं हवानाख्यां सुशालिनीम् ॥१०२॥
हरिः प्राह तथास्त्वेवं शीघ्रं सज्जो बभूव च ।
हुण्डेशो यौतकं प्रादाद् ययाचे च क्षमां हरेः ॥१०३॥
हरिश्चाभयदानं च दत्वा विमानमारुहत् ।
सार्थाश्चापि विमानस्था अभवन् केशवाज्ञया ॥१०४॥
रायकूपेशभूपश्च सम्मानार्थं जगाम ह ।
पूर्वं गत्वा निजं सैन्यं नील्वोद्याने स्थिरोऽभवत् ॥१०५॥
रायहुण्डेशभूपश्च विदार्यं माननं तथा ।
जयशब्दैर्वाद्यशब्दैर्गीतिभिश्च ददौ तदा ॥१०६॥
हरेर्यानं समायाच्च हवानापुरिकान्तिकम् ।
तदा वाद्यान्यवाद्यन्त जयनादाः प्रजाकृताः ॥१०७॥
मन्त्रवादास्तवभवँश्च महोद्याने तु राधिके ।
प्रजाद्या हर्षहृदया द्रष्टुं कृष्णं तदाऽभवन् ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने त्रयोदश्यां प्रातः रायनवार्कनृपराष्ट्रगमनं चिञ्चागोपुरिकापुर्यां भ्रमणं पूजनं ततः स्वर्लतिकापुरीं प्रतिगमनं भ्रमणं पूजनं ततः सायं रायहुण्डेश्वरनृपराष्ट्रगमनं माक्षिकानगर्यां भ्रमणं पूजनं हृयुपदेशनं रात्रौ विश्रमणं भाद्रशुक्लचतुर्दश्यां वीराकजनर्षिप्रमोक्षणं रायकूपेशनृपराष्ट्रगमनं चेत्यादिनिरूपणनामा चतुर्दशाधिकद्विशततमोऽध्यायः ॥ २१४ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽब्धिस्थे द्वीपे कूपेशभूपतिः ।
सम्मानं श्रीहरेश्चक्रे क्यूबाख्ये बहुशोभिते ॥ १ ॥
जलयन्त्रैर्वाहनैश्च नौकाभिश्च प्रजास्तदा ।
हवानाया नगर्याः सन्निधौ तूद्यानकेऽगमन् ॥ २ ॥
विमानं त्वब्धितीरस्य सन्निधौ भूतले शुभे ।
अवातरत् ततो राजा श्रीकृष्णसन्निधिं ययौ ॥ ३ ॥
ननाम पादयोश्चापि पुष्पहारान् ददौ गले ।
राज्ञी पुपूज देवेशं पुष्पलाजाऽक्षतादिभिः ॥ ४ ॥
हैयतायनराजर्षिः पुपूज परमेश्वरम् ।
नगर्यां श्रीहरिं राजा भ्रामयामास वाहनैः ॥ ५ ॥
सुवर्णशकटीमध्ये निषाद्य छत्रचामरैः ।
शोभितं श्रीहरिं लोकाः पूजयामासुरादरात् ॥ ६ ॥
द्रव्यैः फलैश्चाम्रराद्यै रत्नैश्चन्दनकेसरैः ।
पूगीफलादिभिर्नारिकेलैश्च शर्करादिभिः ॥ ७ ॥

ततः कृष्णं तु नौकायां निषाद्य भूपतिः स्वयम् ।
अब्धौ विहारयामास द्वीपस्य सन्निधौ तदा ॥ ८ ॥
अथ भोजनवेलायां मध्याह्ने भोजनं व्यधात् ।
भगवान् सार्थयुक्तो वै तदा राज्ञी समागता ॥ ९ ॥
पूजनार्थं हरिं तत्र तत्पुत्रीं हरये ददौ ।
ताम्बूलं कान्तमालां च कण्ठे न्यधाद्धरेर्हि सा ॥१०॥
कन्या प्राप्य पतिं कृष्णं कृतकृत्या बभूव सा ।
माता चातिप्रसन्नाऽभूद् राजोत्सवं चकार ह ॥११॥
ततो विश्रान्तिमापाऽयं भगवान् भवनोत्तमे ।
अथाऽऽयाद् दर्शनार्थं हि कन्याया मातुलो नृपः ॥१२॥
कुलम्बायनराष्ट्रेशो विगोष्ठानगरीपतिः ।
नाम्ना कालीमण्डलीनः पुपूजापि स माधवम् ॥१३॥
श्रीहरिं प्रार्थयामास स्वराष्ट्रगमनाय हि ।
हरिस्तथास्त्विति प्राह तदा सज्जोऽभवद् द्रुतम् ॥१४॥
कूपेशश्च विदार्य श्रीहरये यौतकं ददौ ।
ययौ कालीमण्डलीनः पूर्णासनर्षियुक् पुरः ॥१५॥
भगवान् स्वविमानस्थो व्योम्ना ययौ विगोष्ठिकाम् ।
समुद्रं समतीत्यैव सायं त्ववाप तां पुरीम् ॥१६॥
राजा सैन्येन सहितः सम्मानं बहुधा व्यधात् ।
अवाततार भगवान् विगोष्ठिकान्तिकक्षितौ ॥१७॥
प्रजास्तं वर्धयामासुरत्यर्थं चाक्षतादिभिः ।
भगवान् स्वविमानाच्चाऽवतीर्यार्पितकाञ्चने ॥१८॥
निषसादासने दिव्ये राजा ननाम पादयोः ।
पुष्पस्रजो ददौ कण्ठे गन्धसारं ददौ तथा ॥१९॥
ताम्बूलकं जलं चापि ददौ सार्थेभ्य इत्यपि ।
सैन्येन सहितो राजा भ्रामयामास वाहनैः ॥२०॥
गजाश्वशकटीभिश्च तथा मानववाहनैः ।
विगोष्ठाख्यनगर्यां वै प्रजाः पुपूजुरच्युतम् ॥२१॥
गजयाने स्थितं कृष्णं पितरौ च कुटुम्बकम् ।
ईशानं लोमशं चापि सतीं लक्ष्म्यादिकास्तथा ॥२२॥
अश्वयानस्थितांश्चान्यान् सेवकानृषिसत्तमान् ।
ब्रह्मप्रियादिकाः सर्वाः शिबिकास्थाश्च योषितः ॥२३॥
प्रजाः प्रधाना विप्राद्याः श्रेष्ठिनो धनिनस्तथा ।
दीना नराः स्त्रियः सर्वाः पुपूजुश्च यथाधनम् ॥२४॥
नमनैः स्तवनैश्चापि हृदयैर्नेत्रकैः करैः ।
भावनैः पुष्पहाराद्यैः फलैश्च शर्करादिभिः ॥२५॥
पुपूजुः परमेशानं प्राप्तं दिव्यगुणोदधिम् ।
एवं नगरीं सर्वां तां भ्रमित्वा भगवान् प्रभुः ॥२६॥
आययौ चार्पितावासं सभां चकार शोभनाम् ।
उपदेशं ददौ तत्र योग्यं योग्यतरं हरिः ॥२७॥
येषां देवेऽस्ति विश्वासस्तेषां फलति विश्वसृट् ।
येषां नास्ति तु विश्वासस्तेषां फलं न जायते ॥२८॥
भवतां चातिविश्वासात् प्राप्तिर्मेऽत्र सुखावहा ।
जाता कालीमण्डलीनभूभृता द्वाररूपिणा ॥२९॥
अहं चास्मि परेशो वै सर्वावतारधृक् प्रभुः ।
परब्रह्म हृदयस्थश्चान्तर्यामी फलप्रदः ॥३०॥
पूजने सेवने चापि दर्शने वन्दनेऽर्पणे ।
पादसंवाहने दाने फलदोऽस्मि न संशयः ॥३१॥
मम भक्तो महादेवः पुरा बालमजीवयत् ।
विश्वस्तानां जम्बुकस्य वाक्यादपीति तत्तथा ॥३२॥
देवा विश्वासपूज्याश्च नृपा विश्वासवर्तिनः ।
शरणागतिमाप्तानां विश्वासः प्रथमा स्थितिः ॥३३॥
वरणं च ततः प्रोक्तं चार्पणं च ततः परम् ।
दीनवत् सेवनं चापि स्थैर्यभावस्ततः परम् ॥३४॥
यथा यथा हरिस्तुष्येत्तथा तथाऽनुवर्तनम् ।
न तुष्येत्तु यया रीत्या तस्या तस्या विवर्जनम् ॥३५॥
एवमादीनि कर्माणि साधनानि विमुक्तये ।
सन्तीह मानवे भावे सर्वत्रापि तथा स्थितिः ॥३६॥
तस्मात् सेव्योऽहमेवात्र मुक्तये समृद्धये सुखः ।
शाश्वतानन्दलाभाय सेव्योऽहं परमेश्वरः ॥३७॥
श्रद्धया सेवितश्चाहं विश्वासेन विनोदितः ।
ददामि श्रेयःसर्वस्वं स्वं लक्ष्मीं प्रददाम्यहम् ॥३८॥
जीवनं धनसम्पत्तिं चारोग्यं वंशविस्तरम् ।
भोगान् भोग्यान् भोगशक्तीर्ददामि नात्र संशयः ॥३९॥
पुरा पापकृतश्चापि पश्चात् पुण्यनिषेविणः ।
मृता अपि पुरा ते वै जीविता इति निश्चयः ॥४०॥
पुरा पुण्यकृतश्चापि पश्चात् पापनिषेविणः ।
जीवितास्ते पुरा पश्चान्मृता एव हि ते मताः ॥४१॥
तस्मान्मृतानां जीवाशा जीवनं दीयते तु यः ।
जीवनस्य प्रदाता स गुरुर्बोध्यः परमेश्वरः ॥४२॥
जीवन्नपि हरिं नैव जानाति गोचरं प्रभुम् ।
मृत एव श्वसन् भस्त्रासदृशो मत एव ह ॥४३॥
तादृशोऽपि सतां योगाद् भगवन्तमुपागतः ।
भजन् स्थितश्चालसोऽपि जीवत्येवाऽमृतो हि सः ॥४४॥
जीवनं जीवनीयं वै मिष्टं श्रीहरिसेवनात् ।
रूक्षं तु जीवनं त्याज्यं विषयादिप्रसेवितम् ॥४५॥

मरणेऽपि निकटेऽपि स्मर्ता मे याति मद्गृहम् ।
तथा बुद्ध्या स्मरेन्मां वै विश्वासेन मिलाम्यहम् ॥४६॥
अश्वपट्टसरस्तीर्थेऽक्षरक्षेत्रे पुराऽभवत् ।
विप्रस्य वृद्धदेवस्य वार्धक्ये त्वेकपुत्रकः ॥४७॥
ययौ जले सुतः स्नातुं जलमध्ये पपात ह ।
मृतः सोऽयं मृतकल्पो जलपानेन सोऽभवत् ॥४८॥
प्राणस्तस्याऽभवन् मूर्ध्नि न चायाति च नेत्रयोः ।
नाड्यो नैव प्रसरन्ति चोष्मा नापि च विद्यते ॥४९॥
मृतो वा मृतकल्पो वा दृश्यते स्थापितो भुवि ।
गोमयेन प्रलिप्तायां जना ज्ञात्वा मृतं च तम् ॥५०॥
पित्रा साकं खातभागं निन्युर्यत्र श्मशानकम् ।
तत्राऽऽसीद् वृद्धगृध्रोऽपि ददर्श मृतबालकम् ॥५१॥
धृतं चांके जनकेन रुदताऽत्यजता तदा ।
पिता बालं परित्यज्य गन्तुं शक्नोति नैव तु ॥५२॥
अन्येऽपि बालकं त्यक्त्वा प्रतिगन्तुं न शेकिरे ।
तदा गृध्रः समागत्याऽब्रवीद् गच्छत वै गृहम् ॥५३॥
इह नार्यो नरा नित्यं सहस्राधिकतः खलु ।
आयान्ति तु मृताँस्त्यक्त्वा प्रयान्ति स्वगृहं सदा ॥५४॥
नहि कश्चित् समायाति मृतः पुनः शरीरके ।
जगत् सर्वं तथाभूतं संक्लृप्तं वर्तते यतः ॥५५॥
सुखदुःखादिसंव्याप्तं तत्र का परिदेवना ।
मृता याता मृतवाहाः मरिष्यन्ति क्षणान्तरे ॥५६॥
इति ज्ञात्वा ये भजेरन् हरिं ते चिरजीविनः ।
न पुनः प्राणवान् कश्चिन्महाकालमुखं गतः ॥५७॥
प्रियेऽप्रियेऽपि समता कालस्य गतिरीदृशी ।
सर्वेण खलु गन्तव्यं जन्मवतेह देहिना ॥५८॥
कर्मान्तजीवने याते पुनर्जीवो न लभ्यते ।
यान्तु गृहाणि सन्त्यज्य मृतं शवं प्रयान्तु शम् ॥५९॥
एवं ज्ञानं समासाद्य समुत्सृज्य क्षितौ नराः ।
प्राक्रोशन्तो ययुः स्नानहृदं ज्ञात्वा मृतं हि तम् ॥६०॥
तत्राऽभूज्जम्बुकवृद्धश्चागत्योवाच ताञ्जनान् ।
निर्घृणा मानवाः सर्वे निर्दयाः स्नेहवर्जिताः ॥६१॥
कथं त्यक्त्वा गमने वै हृदयं वः प्रजायते ।
दिवसोऽस्ति मुहूर्तश्च बहुरूपो विवर्तते ॥६२॥
कदाचिन्मृत एवापि जीवन याति श्मशानतः ।
यूयं वै निर्घृणास्त्यक्त्वा कथं याथ हि निर्दयाः ॥६३॥
तस्य चक्षुः श्रुतिर्नासा देहः सर्वोऽपि विद्यते ।
न वोऽस्त्यस्मिन् किमु स्नेहः पशुपक्षिसमोऽपि न ॥६४॥

अस्वार्थवर्धितानां तु बालानां सदृशोऽपि न ।
चतुष्पात्पक्षिकीटानां पोषितानामपि क्वचित् ॥६५॥
फलागमो न चैवाऽस्ति न गुणोऽपि कथंचन ।
तथापि मृतबालाँस्ते यावत्पश्यन्ति भूतले ॥६६॥
तावन्नैव त्यजन्त्येते तावान् स्नेहोऽपि नास्ति वः ।
ततो मा यान्तु विसृज्य कुलदं पुत्रमुत्तमम् ॥६७॥
चिरं पश्यत पुत्रं तं यावद्देहोऽस्ति चाक्षतः ।
यत्र नाऽन्ये हि तिष्ठन्ति तत्र तिष्ठन्ति बान्धवाः ॥६८॥
जम्बुकस्य वचः श्रुत्वा स्नाता अपि नराश्च ते ।
पुत्रस्नेहपराभूताः समायाताः श्मशानकम् ॥६९॥
गृध्रस्तावद् विलोक्यैवोवाच जनान् शुचान्वितान् ।
अहो वै मानुषा भूत्वा किमायाता विमोहिताः ॥७०॥
प्राणेन्द्रियैः परित्यक्तं भूतात्मकं शवं त्विदम् ।
शुष्कं काष्ठत्वमापन्नं कथं शोचथ वेदिनः ॥७१॥
किन्न शोचथ चात्मानं गत्वरं किन्तु शोचथ ।
तपसा नाश्यते पापं भक्त्या भवान्तरादि च ॥७२॥
विलापेन भवेत् किं वै गतस्य बालकस्य नु ।
ऋणं दत्वा च वा नीत्वा यान्ति देहधरा भुवि ॥७३॥
बालोऽयं गतवान् तद्वद् दत्वा शोकमनन्तकम् ।
गृहं स्वर्णं धेनवश्चापत्यं रत्नानि भूतयः ॥७४॥
सर्वं तपोऽर्ज्यमेवाऽस्ति भक्त्या लभ्यं तथा मतम् ।
पुण्यलभ्यं च वै सर्वं पुण्यं शोचथ यद्धितम् ॥७५॥
स्वकृतेन तु धर्मेण पापेन सुखिदुःखिता ।
पिता पुत्रोऽथवा बन्धुः सुखी दुःखी स्वकर्मभिः ॥७६॥
तस्माद् यात निजान् गेहान् धर्मं कुरुत सत्तमाः ।
वर्तध्वं च हरेर्भक्तौ सत्सु सुरेषु पितृषु ॥७७॥
शोकं त्यजत मोहं च निवर्तध्वं विहाय तत् ।
विद्वान् वा यदि वा चाऽज्ञो राजा धनी च निर्धनः ॥७८॥
सर्वः कालवशं प्राप्तः पुनरायाति नैव ह ।
यूनो बालान् स्थवीराँश्च गर्भान् नारीर्नरानपि ॥७९॥
सर्वानाविशते मृत्युर्नयत्येवाऽपुनर्गमान् ।
इत्युक्ता मानवास्ते तु हित्वा शवं प्रयान्त्यथ ॥८०॥
तावद्वै जम्बुक आह केन स्नेहो हतो हि वः ।
स्नेहहीनस्य वाक्येन स्नेहहीनाः कृताः कथम् ॥८१॥
दैवं पुरुषकारश्च श्रद्धा विश्वास इत्यमी ।
कृतान्तं चापि दूरं वै द्रावयन्ति कदाचन ॥८२॥
अनिर्वेदेन भाव्यं वै निर्वेदे वै कुतः फलम् ।
प्रयत्नात्प्राप्यते सर्वं मा यान्तु निर्दयाः कथम् ॥८३॥

आत्ममांससमुत्थं तु पितृवंशस्य साधनम् ।
शवं त्यक्त्वा स्थिते सूर्ये निर्दयाः क्व प्रयास्यथ ॥८४॥
अस्तंगते हि गन्तव्यं स्थातव्यं चात्र वा पुनः ।
आराधिताः सुराश्चापि दद्त्यसून् दयालवः ॥८५॥
इत्युक्तास्ते ऋतं मत्वा समायाताः शवं प्रति ।
अथ गृध्रो जगादेनान् बालिशाः स्थेति भाति मे ॥८६॥
अत्र बहूनि वर्षाणि मे जातस्य गतानि हि ।
न दृष्टं जीवितं मृत्वा पुनः स्त्रीपुंनपुंसकम् ॥८७॥
गर्भा बालाः किशोराश्च युवानो जरठा अपि ।
मृताः पुनर्न जीवन्ति सम्बन्धिस्नेहिता अपि ॥८८॥
शोकितास्तु गृहं यान्ति सम्बन्धिबान्धवादयः ।
त्यज्यतामेष देहोऽपि शून्यः काष्ठसमः सुतः ॥८९॥
अन्यत्र वै गतं त्यक्त्वा कथं गृहं न यास्यथ ।
नात्रेन्द्रियाणि प्राणाश्च त्यक्त्वा कथं न गच्छथ ॥९०॥
परलोके सुखार्थं वै यत्नं कुरुत सत्तमाः ।
श्रुत्वैवं विनिवृत्तास्ते जम्बुकस्तावदाह तान् ॥९१॥
अहो स्वर्णसमं पुत्रं त्यक्त्वा यान्ति हि निर्घृणाः ।
राक्षसा अपि पुत्रं स्वं त्यक्त्वा नैव प्रयान्ति हि ॥९२॥
येषां नास्ति स्वयं प्रज्ञा तेषां किमुपदेशनैः ।
श्वेतराजस्य वै पुत्रो मृतः संजीवितः पुनः ॥९३॥
सत्यवान् जीवितः पत्न्या सावित्र्याऽपि पतिः पुनः ।
हरिश्चन्द्रसुतश्चापि मृतः सञ्जीवितः पुनः ॥९४॥
रुक्मांगदस्य पुत्रोऽपि मृतः सञ्जीवितः पुनः ।
नचिकेतस्य पुत्रोऽपि मृतः सञ्जीवितः पुनः ॥९५॥
मरुतो नाम देवाश्च गर्भे हताश्च जीविताः ।
तथा भाग्याल्लभेत् कश्चिन्मृतं तु जीवितं पुनः ॥९६॥
देवः कुर्यात् कृपणानामनुक्रोशं ददात्यसून् ।
इत्युक्तास्ते न्यवर्तन्त लब्धाशाः स्नेहिलाः पुनः ॥९७॥
गृध्रः पुनः समागत्योवाच तानाशया हतान् ।
तपसाऽपि भृताश्चैवैश्वर्यवन्तो महाधियः ॥९८॥
मृत्युं गता न चायान्ति प्रेतपत्तनतः पुनः ।
अलमाशाबन्धनेन मृतस्य जीवने त्विह ॥९९॥
नैव शृगालशतकं जीवयिष्यति प्रेतकम् ।
अथेशानो हरिर्ब्रह्मा यमराजोऽथवेश्वराः ॥१००॥
यदि त्वेनं जीवयेयुस्तदा जीवेन्न चान्यथा ।
नैव वस्त्वत्र वासेन रोदनेनापि जीवनम् ॥१०१॥
बाष्पस्रावेण वा श्वासैः कुट्टनैरपि जीवनम् ।
देवस्याऽऽराधनं कुर्मो मिलित्वा धर्मसंयुताः ॥१०२॥
यदि स्याज्जीवनं यावदाप्रातः कुर्म एव ताम् ।
श्रुत्वैवं ते निराशाश्च त्यक्त्वा शवं प्रयान्ति तु ॥१०३॥
जम्बुकस्तावदागत्योवाच शान्तिमयं पुनः ।
मा प्रयान्तु निराशा वै धिग् गृध्रं स्नेहवर्जितम् ॥१०४॥
सुखस्याऽनन्तरं दुःखं दुःखस्याऽनन्तरं सुखम् ।
अवश्यं जायते तस्मान्मा विसृज्य प्रयान्त्विह ॥१०५॥
जीवन्तमेव पश्यामि क्षणान्तरे न संशयः ।
इत्याशायोजिताः सर्वे स्थिताः प्रतीक्षया पुनः ॥१०६॥
गृध्रः प्राह श्मशानाख्यः प्रदेशोऽयं हि दारुणः ।
आशां त्यक्त्वा शवं त्यक्त्वा कुर्वन्तु प्रेतकार्यकम् ॥१०७॥
सूर्ये त्वस्तं गते प्रेता यक्षा भूताश्च राक्षसाः ।
युष्मान् प्रधर्षयिष्यन्ति रौद्राः पललखादकाः ॥१०८॥
जम्बुकोक्तौ श्रद्दधाना द्रुतं सर्वे विनंक्ष्यथ ।
इत्युक्तास्ते प्रयान्त्येव तावच्छृगालकोऽवदत् ॥१०९॥
मा भयं यात मा यात क्रव्यादवाक्यमोहिताः ।
वो विद्राव्य स्वार्थिगृध्रः शवं वै भक्षयिष्यति ॥११०॥
गृध्रः प्राह न चाहं वै स्वार्थी स्वार्थी तु जम्बुकः ।
अन्धकारे निजं भक्ष्यं शवं चेच्छति वञ्चनात् ॥१११॥
इत्युक्ता ज्ञातवन्तस्ते तौ स्वार्थसाधकाविति ।
स्वार्थार्थबद्धकक्षौ च क्षुधान्वितौ च जल्पिनौ ॥११२॥
वञ्चकाभ्यां शवं नैव दातव्यं चेति निश्चिताः ।
सायं शंभुं सस्मरुस्ते पुत्रस्नेहसमाकुलाः ॥११३॥
तावद् देव्या नोदितः श्रीशंभुस्तत्र समागतः ।
नेमुः शंभुं तु ते दुःखं न्यवेदयँस्ततो हरः ॥११४॥
जीवितं प्रददौ तस्मै दशवर्षसहस्रकम् ।
स्वार्थपरौ वञ्चितौ च पुत्रो जीवनमाप्तवान् ॥११५॥
हरमाराध्य ते पुत्रं प्राप्ताश्च सुखिनोऽभवन् ।
गृहं याता हि विश्वस्ताः फलमाप्ता हि जीवनम् ॥११६॥
प्राप्तं च वञ्चकाभ्यां तु कर्मणा परियापितम् ।
तस्माद् विश्वासमासाद्य मां हरिं पुरुषोत्तमम् ॥११७॥
भजन्त्वनन्यभावेन रक्षयिष्ये न संशयः ।
दास्ये च जीवनं धाम्नि शाश्वतानन्दसंभृतम् ॥११८॥
इत्युक्त्वा प्रददौ मन्त्रान् प्रजाभ्यो भगवान् स्वयम् ।
वैष्णवान् कृतवान् कृष्णनारायणो निजाश्रितान् ॥११९॥
राधिके श्रीहरेर्वाणीं श्रुत्वाऽऽश्चर्यं व्यधुस्ततः ।
पूजयित्वा हरिं नैजान् गृहान् ययुः प्रजाजनाः ॥१२०॥
राज्ञः कन्याश्चतस्रश्च कृष्णं कान्तं महाप्रभुम् ।
वरमालां ददौ कण्ठे व्यधुर्नैजं पतिं प्रभुम् ॥१२१॥

राजोत्सवं व्यधाद्रात्रौ भोजनादीन्यकारयत् ।
सेवनं कन्यकाश्चक्रुर्निद्रां कृष्णो ह्यवाप च ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः रायकूपेशभूपराष्ट्रगमनं हवानानगर्यां भ्रमणं पूजनं ततः कालीमण्डलीनभूपराष्ट्रगमनं विगोष्ठिकानगर्यां भ्रमणं पूजनं चोपदेशनं भोजनं रात्रौ विश्रमणं चेत्यादिनिरूपणनामा पञ्चदशाधिकद्विशततमोऽध्यायः ॥ २१५ ॥

श्रीकृष्ण उवाच—

राधिके पञ्चदश्यां वै प्रभाते बालकृष्णकः ।
मंगलैर्गीतिकाभिश्च वाद्यैर्बुबोध संस्तवैः ॥ १ ॥
कृतस्नानः कृतपूजः कृतदुग्धादिपानकः ।
सिंहासने निषसाद पितरावभिवन्द्य च ॥ २ ॥
तावद्राजा समायातः पूजनार्थं हरेः पुरः ।
ददौ वै मुकुटं मूर्ध्नि कुण्डले कटके तथा ॥ ३ ॥
सुवर्णस्योर्मिकाश्चापि शृंखलां मौक्तिकस्रजम् ।
रत्नहीरकहारांश्च द्रव्यं लक्षाधिकं ददौ ॥ ४ ॥
आत्मार्पणं ददौ चापि पुष्पहारान् ददौ तथा ।
पादौ प्रक्षाल्य च पपौ राजा सम्बन्धिसंयुतः ॥ ५ ॥
नीराजनं चकाराऽथ ननाम पाहि मां जगौ ।
राज्ञी पूजां यौतकं च ददौ वव्रेऽवनं सदा ॥ ६ ॥
एवंस्थिते तु तद्भ्राता कालीमण्डलिनाग्रजः ।
पूर्वराज्यप्रशास्ता वै वनजेलेशभूपतिः ॥ ७ ॥
वनज्वालाप्रदेशेशः सानुज्योष्ट्रीपुरीपतिः ।
आययौ स्वविमानेन समानेतुं हरिं तदा ॥ ८ ॥
आगत्य दण्डवच्चक्रे पुष्पमालां गले न्यधात् ।
आर्पयत् स्वर्णपात्रे च सौवर्णमुद्रिकाशतम् ॥ ९ ॥
प्रार्थयच्च प्रदेशान् स्वान् पावयितुं परेश्वरम् ।
हरिस्तथास्त्विति प्राह सज्जोऽभवत् क्षणान्तरे ॥१०॥
चक्रे कालीमण्डलीनो नृपो विदायमाननम् ।
अर्हणां महतीं चक्रे चन्दनाऽक्षतकुंकुमैः ॥११॥
द्रव्यैर्नानाविधै रत्नैर्हारैः शेखरकुण्डलैः ।
यौतकैश्चोपदाभिश्च नीराजनं ततोऽकरोत् ॥१२॥
हरेः सार्थस्य पूजां च कृत्वा सैन्येन तूर्यकैः ।
जयनादैस्तथा मानं विदायं श्रीहरेर्व्यधात् ॥१३॥
श्रीहरिः स्वविमानस्थोऽभवत्तत्र तदाम्बरे ।
प्रजास्तु दर्शनं चक्रुर्नेमुस्तुष्टुवुरुत्सुकाः ॥१४॥
आगन्तव्यं रक्षितव्या वयमाहुः पुनः पुनः ।
हरिर्दर्शितमार्गेण व्योम्ना विमानमैरयत् ॥१५॥
राकासनो महर्षिश्च राजगुरुविमानके ।
सार्धं कृष्णेन चायाति राजा पूर्वं ययौ पुरीम् ॥१६॥
सम्मानार्थं हरेस्तत्र सैन्यं सज्जं ह्यभूत् तथा ।
प्रजाः सर्वाः साक्षताश्च पुष्पमालासमन्विताः ॥१७॥
स्वागतार्थं महोद्याने सानुज्योष्ट्रीसमीपतः ।
पुरःस्थिता अभवँश्च प्रतीक्षन्त्यो हरेर्दिशम् ॥१८॥
गुरुः कालीमण्डलीनस्य पूर्णासनको मुनिः ।
आययौ हरिणा सार्धं तथा राकासनो मुनिः ॥१९॥
व्योम्नि प्रजा विमानं वै समालोक्याऽतिहर्षिताः ।
राजा सैन्येन सहितः स्वागतं वाद्यनादनैः ॥२०॥
चकार जयशब्दैश्च ध्वजैः पताकिकादिभिः ।
नमनैः पुष्पदानैश्च गीतिकाभिश्च मंगलैः ॥२१॥
विमानं भूतले स्थैर्यमाप्तं हरिर्बहिर्ययौ ।
राजा ददौ बालकृष्णकण्ठे पौष्पीः स्रजः शुभाः ॥२२॥
पादयोश्च जलैश्चक्रेऽभिषेचनं तदमृतम् ।
पपौ कुटुम्बसहितो दण्डवत् प्रचकार ह ॥२३॥
राज्ञी नेमे कंभरायै महालक्ष्म्यै पुपूज ताम् ।
गोपालकृष्णं पितरं पुपूज नृपतिस्ततः ॥२४॥
कुटुम्बं ब्रह्मकान्ताश्च पुपूजुश्च कुटुम्बिनः ।
हस्तियाने हरिं राजा न्यषादयत् सुवर्णजे ॥२५॥
तथाऽन्यानश्वगन्त्र्यादौ शिबिकादौ न्यषादयत् ।
हारशेखरगुच्छाद्यैः सम्पूज्य सैन्यसंयुतः ॥२६॥
वाद्यघोषैः कीर्तनैश्च निन्ये पुर्यां हरिं नृपः ।
गोपुरे पूजयामासुः राजकुमारकाः पृथक् ॥२७॥
चत्वरे श्रेष्ठिनश्चापि प्रधाना महति स्थले ।
प्रातिरथ्यं पूजनं च हरेस्तत्र प्रजा व्यधुः ॥२८॥
प्रमदा हारपुष्पाद्यैश्चन्दनाऽक्षतसत्फलैः ।
कुंकुमैः पूजयामासुर्हृदयैर्भावनादिभिः ॥२९॥
अम्बरैश्च तथा भूषाभिश्च द्रव्यैः सुवर्णकैः ।
पादस्पर्शैर्मस्तके च दुःखहावर्धनैरपि ॥३०॥
अञ्जलिभिश्चक्षुषां च भावनाभिरपूजयन् ।
दृष्ट्वा कान्तं बालकृष्णं रूपरूपातिशोभितम् ॥३१॥
दध्युर्वै हृदये कान्ता अविस्मरणशाश्वतम् ।
अपरा दूरतः स्थित्वा लोकयामासुरच्युतम् ॥३२॥
दिव्यतेजोमयं शान्तं कोटिकन्दर्पसुन्दरम् ।
कृष्णं राधादिसहितं गोपगोपीगणार्चितम् ॥३३॥

तथाऽन्यास्तं चतुर्हस्तं नारायणं रमार्चितम् ।
लोकयामासुरेवेशं चेतरा बदरीपतिम् ॥३४॥
तापसं श्रीहरिं कृष्णं परास्तु शेषशायिनम् ।
काश्चिदन्याः सूर्यसंस्थं हिरण्मयं प्रभुं हरिम् ॥३५॥
तथाऽन्या वह्निमध्यस्थं दिव्यं सत्पुरुषं प्रभुम् ।
युवत्यो ददृशुः कान्तं पूर्णकामसुखप्रदम् ॥३६॥
भक्ता ददृशुस्तं देवं महाऽक्षरनिवासिनम् ।
प्रजा नरास्तथा नार्यो ददृशुर्विष्णुरूपिणम् ॥३७॥
राधारमासतीवृन्दातुलसीश्रीप्रसेवितम् ।
रमापद्मावतीहासामंजुलासद्गुणार्चितम् ॥३८॥
माणिकीदुःखहालक्ष्मीदुर्गिकाकमलार्चितम् ।
ददृशुर्बहुधा तत्र हस्तियानगतं हरिम् ॥३९॥
ब्रह्मप्रियादिभिश्चापि पिशङ्गिनीप्रपूजितम् ।
गौरीभिश्चामरीभिश्च कन्याभिरर्चितं प्रभुम् ॥४०॥
ददृशुर्वै योषितश्च दिव्यं श्रीहरिमेव ताः ।
एवं हरिर्ददौ नैजं दर्शनं बहुधा तदा ॥४१॥
सानुज्योष्ट्रीनगर्यां वै प्रजाभ्यो विहरन् मुहुः ।
एवं भ्रमित्वा नगरीं राजसौधं समाययौ ॥४२॥
सिंहासने न्यराजच्च राज्ञी पूजां चकार ह ।
जलपानं ददौ चापि तस्यास्तु पञ्चकन्यकाः ॥४३॥
पुपूजुः श्रीपतिं कान्तं सुन्दरं मनसेप्सितम् ।
वरमालां न्यधुः कण्ठे कृष्णस्य पारिजातिकीम् ॥४४॥
वव्रिरे तमलभ्यं वै सुलभं स्वगृहागतम् ।
कृतकृत्या अभवँश्च प्राप्य कान्तं हरिं च ताः ॥४५॥
नृपो राज्ञी कुमाराश्च सद्भाग्यं मेनिरे निजम् ।
राजोत्सवं चकारापि मध्याह्ने भोजनं ददौ ॥४६॥
भुक्त्वा सार्थाः सुविश्रान्तिमापुस्त्रिवादनोत्तरम् ।
यौतकं च विदायं च ददौ राजा तु शार्ङ्गिणे ॥४७॥
दर्शनार्थं नरा नार्यश्चाययुश्च तदाऽऽलयम् ।
तेभ्यो हरिर्ददौ बोधं मन्त्रं च वैष्णवं शुभम् ॥४८॥
बलं सदा हरेः रक्ष्यं सर्वसौख्यप्रदं नृणाम् ।
आपत्काले मृत्युकाले यमकाले ह्यसद्रतौ ॥४९॥
गतिरेव बलं मेऽस्ति चापदादिनिवारकम् ।
शाल्मलिर्बलहीनोऽपि पुरा ब्रह्माश्रयाज्जयी ॥५०॥
अभवद् वायुदेवस्य कृत्वा पराभवं खलु ।
हिमाचले महानासीद् वृक्षः शाल्मलिसंज्ञकः ॥५१॥
शाखी स्कन्धी च पत्री च पशुपक्ष्याश्रयप्रदः ।
पुष्पफलादिभिः क्षुद्वारकश्चाश्रयिणामपि ॥५२॥

विशालां प्रति गच्छन् वै नारदस्तं विशालिनम् ।
पप्रच्छ त्वं कथं वृक्ष निर्भयो वर्तसे सुखी ॥५३॥
वायुना तव शाखां च भग्नां पश्यामि नैव यत् ।
किन्नु ते पवनश्चास्ते मित्रं यस्त्वां प्ररक्षति ॥५४॥
महाबलो हि पवनः पर्वतानपि नाशयेत् ।
स त्वां त्यक्त्वा वर्ततेऽत्र ततो हेतुर्भविष्यति ॥५५॥
हस्तिनो गवयाश्चान्ये मृगास्तिष्ठन्ति ते ह्यधः ।
शोभसे त्वं परसेव्यश्चोपकारी हि सर्वथा ॥५६॥
तर्कये पवनस्तेऽस्ति बन्धुः सखाऽथवा सुहृत् ।
यद्वा त्वं पवनस्य स्याच्छरणागत एव ह ॥५७॥
श्रुत्वा तु शाल्मलिः प्राह न मे वायुः सखा सुहृत् ।
न बन्धुर्न शरण्यश्च येनाऽहं रक्षितोऽभवम् ॥५८॥
मम तेजो बलं श्रेष्ठं वायोश्चाष्टादशाधिकम् ।
तेन विष्टम्भितो वायुर्मयैवं स पराकृतः ॥५९॥
तस्माद् बिभेमि वायोर्न क्रुद्धाद्वा वेगवत्तमात् ।
नारदस्तु तदा प्राह महाश्चर्यमिदं श्रुतम् ॥६०॥
वरुणो यमराजश्च कुबेरो न मरुत्समाः ।
सर्वचेष्टाकरो वायुस्तं त्वं वै जीतवान् यतः ॥६१॥
यद्वा मिथ्या भाषसे त्वं द्रुपते बुद्धिलाघवात् ।
कथयिष्येऽनिलं गत्वा तव दुर्भाषितं खलु ॥६२॥
पर्वतैः सागरैश्चापि ग्रहैर्वा देवपादपैः ।
नैव क्षिप्तः कदाचिद्वै वायुर्यथा त्वयोदितः ॥६३॥
ते तं सर्वे नमस्यन्ति त्वं मोहात् कत्थसेऽफलम् ।
इत्युक्त्वा नारदश्चायाद् यत्र वायुः स्थितोऽभवत् ॥६४॥
शाल्मलिवचनान्याह व्याक्षेपसंभृतानि तम् ।
श्रुत्वा तु पवनस्तत्राऽऽययौ यत्र हि शाल्मलिः ॥६५॥
क्रुद्धः प्राह त्वया वृक्ष नारदाय विगर्हणम् ।
मम प्रोक्तं यतस्त्वां दर्शये बलं स्थिरो भव ॥६६॥
पितामहः प्रजासर्गे त्वयि विश्रान्तवान् यतः ।
त्वां त्यजामि सदा वेगेन स्पृशामि हरामि च ॥६७॥
तद्गुणं त्वं परित्यज्य बलं त्वग्रे करोषि मे ।
समूलं त्वां नयिष्येऽद्य वंशविस्तारवर्जितम् ॥६८॥
एवमुक्तः शाल्मलिश्च प्राह मे भयमेव न ।
यथाबलं समायाहि त्यज्यतां क्रोधनं मयि ॥६९॥
न मे भयं तव वायो बलं मेऽस्ति त्वदूर्जितम् ।
ये तु बुद्ध्या हि बलिनस्ते सत्यं बलिनः सदा ॥७०॥
देहमात्रबला नैव बलिनो वै यथार्थतः ।
इत्युक्तः पवनः क्रुद्धो झंझावातमयोऽभवत् ॥७१॥

शाल्मलिस्तं विलोक्यैव शातयामास वै निजान् ।
दलान् शाखाः कुसुमानि फलानि स्वल्पशाखिकाः ॥७२॥
तस्थौ दण्डसमो भूत्वा पवनः किंकरिष्यति ।
तावद्वायुश्चातिवेगी ददर्श हीनशाखकम् ॥७३॥
शीर्णपर्णदलाद्यं प्रोवाच वनस्पतिं हसन् ।
पश्य मे बलमैश्वर्यं यद्भयात् त्वं विशीर्णितः ॥७४॥
ब्रह्माश्रयात्तथा मेऽत्र कृपालेशादभूः सुखी ।
महतामाश्रयं त्यक्त्वा महान्तमवमन्यसे ॥७५॥
ततस्त्वं दुःखितो जातो वंशविस्तारवर्जितः ।
त्वां भक्तुं प्रसमर्थोऽस्मि मा गर्वं वह वै क्वचित् ॥७६॥
उत्खातुं च समर्थोऽस्मि मा गर्वं वह निष्फलम् ।
एवमुक्त्वातिवेगात्मप्रवाहेण ववौ बलात् ॥७७॥
वक्रीभूतोऽभवत् स्तम्बो भंक्तुं च तत्परोऽभवत् ।
उत्खातुं च भुवः कम्पोऽभवद् वायुप्रवेगतः ॥७८॥
शाल्मलिस्तु तदा नम्रो ब्रह्माणं स्मृतवान् हृदि ।
ननाम वायवे चापि ब्रह्मा शीघ्रमुपाययौ ॥७९॥
अभयं प्रददौ वायुर्निर्वेगो ह्यभवत्तदा ।
पूजितौ देववर्यौ तौ ययतुश्च निजस्थलीम् ॥८०॥
इत्येवं बलहीनोऽपि देही वृक्षजडोऽपि च ।
यदि मां ब्रह्मधामानं समाश्रयति कानने ॥८१॥
मायामयेऽपि तमहं रक्षामि मायिकानिलात् ।
कालाच्च कर्मणश्चापि यमदूतादवामि च ॥८२॥
मद्बलं मम साधूनां बलं त्यजति चेत् पुमान् ।
वायुरूपाः कालकर्ममायास्तं नाशयन्ति वै ॥८३॥
पत्रं पुष्पं फलं शाखाः पौत्रान् धनं सुखं सुतान् ।
त्यक्त्वापि संश्रयेत् साधून् भयं तस्य न विद्यते ॥८४॥
सर्वत्यागेऽपि चेन्नास्ति ममाश्रयस्तदा भयम् ।
कालानिलाद् भवत्येव तस्मान्ममाश्रयं लभेत् ॥८५॥
इत्यादिष्टाश्च राजाद्याः प्रजाजना नराः स्त्रियः ।
चक्रुः श्रीमद्बालकृष्णाश्रयं मनुं च जगृहुः ॥८६॥
जगृहुस्तौलसीं कण्ठीं मूर्तिं हरेश्च जगृहुः ।
पुपूजुः श्रीहरिं प्रेम्णा तथेशानादिकानपि ॥८७॥
जलपानं व्यधाचापि विश्रान्तिमाप यावता ।
तावद् राजा विमानेन पारावारपिबाभिधः ॥८८॥
अम्बिकर्षियुतश्चायान्नेतुं कृष्णं स्वराष्ट्रके ।
प्रार्थयद्बहुधा त्वीशं कृष्णस्तथेत्यमानयत् ॥८९॥
सज्जोऽभवत्तदा शीघ्रं ततो विदायकं नृपः ।
यौतकं च ददौ मानं वनज्वालेशभूपतिः ॥९०॥
प्रजाभिर्भूभृता सम्मानितः श्रीभगवाँस्ततः ।
विमानगोऽभवच्छीघ्रं व्योममार्गे विमानकम् ॥९१॥
सम्मानेन ययौ राष्ट्रं गतैनसं पवित्रकम् ।
गतैनाराष्ट्रके राजा सम्मानार्थं ययौ पुरा ॥९२॥
कायन्याख्यनगर्याः सन्निधौ चाब्धेस्तटे तदा ।
महाविशाले भूदेशे महोद्याने महालये ॥९३॥
सैन्येन सहितो राजा सम्मानं स्वागतं व्यधात् ।
विमानं चागतं शीघ्रं चावातरत् सुभूतले ॥९४॥
प्रजा राजा तथा चान्ये जयशब्दान् जगुस्तथा ।
सैन्यानि नेमिरे कृष्णं प्रजाश्चक्रुश्च वर्धनम् ॥९५॥
मांगलिकसुतूर्याणां निनादास्त्वभवन् मुहुः ।
कृष्णं द्रष्टुं प्रजाः सर्वा नरा नार्यः समन्ततः ॥९६॥
आजग्मुस्तत्र सुखदे महोद्याने मुदान्विताः ।
पुष्पहारादिभिर्युक्ता लाजाऽऽक्षतादिशोभिताः ॥९७॥
प्रेम्णा हलहलाशब्दैर्गोगोशब्दातिहर्षिताः ।
सवेगाः कक्षबालाश्च नार्योऽपि द्रुतमाययुः ॥९८॥
मेदिनी द्यौरिवाऽऽसीद्वै तदोज्ज्वलप्रजायुता ।
हरिर्विमानतस्तूर्णं त्वग्रे बहिः समाययौ ॥९९॥
राजा ननाम चरणे पुष्पहारं गले ददौ ।
राज्ञी पुपूज पुष्पाद्यैर्जलं चामृतवद् ददौ ॥१००॥
प्रधाना नेमिरे चापि पुष्पहारैः समार्चयन् ।
हरिर्जग्राह सर्वेषां नमस्कारादिमाननम् ॥१०१॥
स्वागतं स्वीचकारापि मधुपर्कादिकं शुभम् ।
फलं जलं पयश्चापि यददाद्वै प्रजाजनः ॥१०२॥
राधिके वीक्ष्य कमलाकान्तं मनोहरं प्रभुम् ।
वृत्तयो निश्चलभावं प्रापुस्तत्र हि योषिताम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः पंचदश्यां प्रभाते प्रबोधनं कृताह्निकत्वं पूजनं ततो वनज्वालाराष्ट्रगमनं सानुज्योष्ट्रीनगर्यां भ्रमणं पूजनं दिव्यदर्शनमुपदेशनं भोजनं ततो गतैनसराष्ट्रगमनं स्वागतं चेत्यादिनिरूपणनामा षोडशाधिकद्विशततमोऽध्यायः ॥ २१६ ॥

श्रीकृष्ण उवाच—

राधिके कायनीपुर्यां नेतुं चेयेष भूपतिः ।
श्रीहरिं प्रार्थयामास तूपविष्टं गजोपरि ॥ १ ॥
हरिर्गजे चतुर्दन्ते स्वर्णाम्बालिकया युते ।
न्यषीदच्च ततश्चान्यान् न्यषादयद् गजादिषु ॥ २ ॥

शिबिकासु हरिप्रिया न्यषादयत्तु राधिके ।
गौरीर्ब्रह्मप्रियाद्याश्च हारिताश्चामरीस्तथा ॥ ३ ॥
सैन्यवाद्यैः सह श्रीमत्कृष्णो वै शुशुभे तदा ।
अम्बिकर्षिश्चामरं च धृत्वा पृष्ठे ह्युपाविशत् ॥ ४ ॥
एवमभ्रामयत् कृष्णं कायन्यां नृपतिः स्वयम् ।
नगर्यां चत्वरादौ च सौधेष्वपि च हट्टके ॥ ५ ॥
स्थले स्थले प्रजास्तं सम्पुपूजुर्बालकृष्णकम् ।
अनादिश्रीकृष्णनारायणं चन्दनकाञ्चनैः ॥ ६ ॥
फलैश्च मौक्तिकैर्हारै रत्नाद्यैरक्षतादिभिः ।
वस्त्रैर्भूषादिभिश्चापि शर्करामिष्टवस्तुभिः ॥ ७ ॥
एवं श्रीभगवान् पुर्यां भ्रमित्वाऽऽवासमाययौ ।
जलं पपौ राजसभागृहे रात्रौ ह्युपादिशत् ॥ ८ ॥
पूर्णारात्रौ देशजनानाह श्रीभगवान् प्रभुः ।
उपार्जनीयं पुण्यं वै येन केनापि कर्मणा ॥ ९ ॥
पापं वै परिहर्तव्यं यद्वै श्रेयोविघातकम् ।
पापस्य विद्यते सृष्टावधिष्ठानं प्रलोभनम् ॥१०॥
एको लोभो महादुष्टो लोभात्पापं प्रवर्तते ।
नाशमूलं महान् लोभो येन ध्वंसगता जनाः ॥११॥
लोभात् संजायते क्वापि क्रोधः कामश्च तृष्णिका ।
मानं माया च मोहश्च स्तंभः पराऽसुताऽपि च ॥१२॥
अक्षमा ह्रीविनाशश्च सम्पच्छ्रीधर्मसंक्षयः ।
अकीर्तिर्दीनता वश्यभावो लोभात् प्रवर्तते ॥१३॥
अदानं चात्यजनं च तृषा विकर्मवर्तनम् ।
मदो द्रोहोऽवमानं चाऽविश्वासोऽनार्जवं तथा ॥१४॥
परद्रव्यादिहरणं निन्दा वेगो विभोगकः ।
ईर्ष्या कुत्सा विकत्था च मात्सर्यं दुष्टकारिता ॥१५॥
साहसं वञ्चनं चौर्यं लोभात् सर्वं प्रवर्तते ।
यो न पूरयितुं शक्योऽयुतजन्मगतैरपि ॥१६॥
जीर्यतो जीर्यति ध्रौव्यं लोभो ध्रौव्यं न मुञ्चति ।
नित्यं गभीरतां याति प्रयुक्तोऽर्थेषु चाऽक्षतः ॥१७॥
रागं जनयति द्रव्ये भोग्ये प्रयोजितः सदा ।
आसक्तिं च परां तृष्णां लोभात् प्राप्नोति मानवः ॥१८॥
स लोभः सह मोहेन जेतव्यः श्रेय इच्छता ।
लोभाश्रयौ द्वेषरुषौ शिष्टाचारविघातकौ ॥१९॥
अन्तःक्रूरौ छन्नकूपौ जगतां नाशकारकौ ।
लोभाश्रया जनाश्चान्यान् वञ्चयन्तीह हेतुभिः ॥२०॥
सतां मार्गान् विलुम्पन्ति नाशयन्ति निजान् वृषान् ।
पतन्ति दारुणे क्लेशे पातयन्त्यपरानपि ॥२१॥
धर्षयन्त्युत्तमान् स्वार्थसिद्ध्यर्थं पितृबान्धवान् ।
शिष्टानशिष्टान् कुर्वन्ति लुब्धा लोभादयस्तथा ॥२२॥
तेन पुण्यस्य लोपः स्यात्तथा भूतो विनश्यति ।
तस्माच्छुचिव्रतान् साधून् समाश्रयेद् वितृष्णकान् ॥२३॥
लोभमोहरहितान् वै श्रेयः स्यात्परमं ततः ।
सत्ये स्थितान् धर्मवृषान् शिष्टाचारसमन्वितान् ॥२४॥
कृष्णप्रसंगसंप्राप्तान् सेवेतापि दयापरान् ।
पितृदेवाऽऽतिथेयाँश्च तथा सर्वोपकारिणः ॥२५॥
सर्वधर्माऽऽस्तिकभावान् सर्वभूतहिते रतान् ।
सर्वदेवान् पूजयेच्चाश्रयेच्छ्रेयः परं भवेत् ॥२६॥
न येषां भिद्यते वृत्तं यत्पुरा साधुभिः कृतम् ।
न त्रासिनो न चपला न क्रूराः सत्पथे स्थिताः ॥२७॥
तान् साधून् सम्प्रसेवेताऽहिंसकान् मत्परायणान् ।
सर्वदोषव्यपेताँश्च निर्ममान् निरहंकृतान् ॥२८॥
सुव्रतान् स्थिरमर्यादान् समुपासीत भूतये ।
न धनार्थं यशोऽर्थं वा धर्मौ येषां विलुप्यते ॥२९॥
अवश्यं कार्यं इत्येवं शरीरस्य क्रियापराः ।
न भयं रुट् न चापल्यं न शोको येषु लौकिकः ॥३०॥
सत्यार्जवपरा ये च मम मूर्तिपरास्तथा ।
न भ्रश्यन्ते रतिं प्राप्य न च लाभेषु हर्षिताः ॥३१॥
न व्यथन्ति विलाभेषु सत्त्वमार्गमुपाश्रिताः ।
समभावा दयाभावाः परोपकारभाविनः ॥३२॥
लाभालाभौ सुखदुःखे प्रियाप्रिये जनिमृती ।
समानि येषां चेतांसि तानुपासीत भक्तिमान् ॥३३॥
महानुभावान् दैवाँश्च गुणिनः समुपाश्रयेत् ।
अज्ञानहारकान् दिव्यान् गुरून् श्रयेच्च भूतये ॥३४॥
अज्ञानं लोभमूलं च पापोत्पादकमित्यपि ।
अज्ञानान्न नरो वेत्ति त्वात्मनः क्षयमित्यपि ॥३५॥
उभावेतौ समफलौ समदोषौ महत्तमौ ।
अज्ञानं चातिलोभश्च स्थितेर्विनाशकौ मतौ ॥३६॥
लोभप्रभवमज्ञानं लोभवृद्ध्या प्रवर्धते ।
लोभे क्षीणे क्षयं यात्यन्यथा यात्यब्जघागतीः ॥३७॥
इन्द्रियाणां दमनेन लोभः क्षीणो भवेन्ननु ।
वासनाया विलोपेन लोभमूलं विनश्यति ॥३८॥
दमः कल्याणदो बोध्यो दमो धर्मोऽतिशोभनः ।
दमात् सिद्धिर्भवत्येव दमो दानाद् विशिष्यते ॥३९॥
दमात्तेजो वर्धते च तेजस्वी पुरुषो भवेत् ।
दमी चात्र परत्राऽपि परं सुखं प्रविन्दति ॥४०॥

सुखं दान्तः प्रस्वपिति सुखं च प्रतिबुध्यते ।
सुखं पर्येति लोकाँश्च मनश्चास्य प्रसीदति ॥४१॥
अदान्तो हि जनः क्लेशमभीक्ष्णं प्रतिपद्यते ।
अनर्थांश्च बहूनन्यान् प्रसृजत्यदमो जनः ॥४२॥
गुरुपूजाफलं प्रोक्तं दमिनः शीलिनः सतः ।
कामः क्रोधो दर्पलोभौ रोष ईर्ष्याऽवमानने ॥४३॥
असूयाद्या दुर्गुणाश्च दान्ते तिष्ठन्ति नैव ह ।
समुद्रकल्पो दान्तोऽस्ति येनेन्द्रियझषा हताः ॥४४॥
येन ग्राम्यास्तथाऽऽरण्याः प्रवृत्तयोऽपि वै हताः ।
सुवृत्तः शीलसम्पन्नः प्रसन्नात्माऽऽत्मविद् बुधः ॥४५॥
दान्तं प्राप्येह सत्कारं सुगतिं लभते परे ।
सतां समाचरितं यत् कर्म दान्तस्य वर्तते ॥४६॥
शुभं कल्याणदं वर्त्म सतां दान्तस्य वर्धते ।
दान्तो धूत्वाऽऽत्मनिष्ठश्च साधुसेवापरायणः ॥४७॥
मद्ध्याननिरतो भक्तो ब्रह्मभूयाय कल्पते ।
यस्मादभयं भूतानां भूतेभ्यो यस्य चाऽभयम् ॥४८॥
देहे वा च विदेहे वा भयं त्वस्य कुतोऽपि न ।
आचिनोति तु मे सेवां सर्वेषु मित्रतां गतः ॥४९॥
सतां मार्गं प्रपन्नस्य गतिर्मे सदृशी सदा ।
लोभं चाऽज्ञानकं त्यक्त्वा दान्तो भूत्वा तु मां भजेत् ॥५०॥
मोक्षस्तेजोमया यद्वा लोकास्तस्य तु शाश्वताः ।
समर्प्य मयि कर्माणि समर्प्य मयि वै तपः ॥५१॥
समर्प्य मयि विज्ञानं प्रसन्नात्मा मदाश्रयः ।
प्राप्य भोगान् दिविस्थाँश्च मत्स्वर्गं विन्दति ध्रुवम् ॥५२॥
यद्वा पैतामहं स्थानं वैराजं वा ततः परम् ।
ब्रह्मराशिमयं चाव्याकृतं धामाऽमृतं च वा ॥५३॥
गोलोकं चापि वैकुण्ठं भक्त्या दमेन विन्दति ।
ज्ञानारामस्य भक्तस्य सर्वदेह्यविरोधिनः ॥५४॥
नात्र भयं पुनश्चास्ति परलोकभयं न च ।
दमिनो यादृशी शान्तिस्तादृशी यज्विनो नहि ॥५५॥
दमे लोकोक्तिरेका स्यात् सोढव्या साहि साधुना ।
या चैनं क्षमया युक्तमशक्तं मन्यते जनः ॥५६॥
अशक्त्या क्षमया श्रेष्ठो गुणोऽस्य जायते ध्रुवः ।
क्षमया विपुला लोकाः सुलभा येनु दुर्लभाः ॥५७॥
सहिष्णुता साधुधर्मो दुर्लभोऽन्यदुरात्मनाम् ।
दान्तस्य किमरण्येनाऽरण्यं यत्र संवसेत् ॥५८॥
दान्तिस्तपः परं प्रोक्तं यदिच्छामारणं महत् ।
वेगवतामिन्द्रियाणां निरोधो योधनं महत् ॥५९॥
तद्वै तपः सञ्चितं च सर्वान् कामान् ददाति हि ।
त्रीन् लोकाँस्तपसा सिद्धाः प्रपश्यन्ति दमान्विताः ॥६०॥
यद् दुरापं भवेत् किञ्चित् तत्सर्वं तपसा लभेत् ।
ऐश्वर्याणि समस्तानि तपोमूलानि तानि वै ॥६१॥
सर्वपापानि तपसा दह्यन्ते तापितानि हि ।
निवृत्तेन्द्रियवर्गस्य तपोऽनशननामकम् ॥६२॥
सबलं वर्धते दिव्यतेजोवर्धनकं परम् ।
न दुष्करतरं दानात् तपो नानशनात्परम् ॥६३॥
न दाक्ष्यं चात्ममुक्त्यार्तेर्न सन्तोषात्परं सुखम् ।
तपसा शक्यते प्राप्तुं देवेशमुक्तितादिकम् ॥६४॥
वाङ्तपः सत्यमेवाऽस्ति सत्सु सत्यं प्रतिष्ठितम् ।
सत्यं धर्मस्तपो योगो यज्ञो ब्रह्म सनातनम् ॥६५॥
तत्सर्वं सत्यरूपं वै तपः कृष्णे समर्पितम् ।
हरेर्योगाद् भवेत् सत्यव्रतं सतां तु सेवनात् ॥६६॥
सर्ववस्तुषु मां पश्येत् समताव्रतमुच्यते ।
इच्छाक्षयेन च दमव्रतं तृष्णाक्षयेन च ॥६७॥
आत्मनिष्ठादृढत्वेनाऽभयव्रतं ह्यवाप्यते ।
ज्ञानेन चाप्यते स्थैर्यं गांभीर्यं धैर्यमित्यपि ॥६८॥
अमात्सर्यं लभ्यते च निर्ममत्वेव सर्वथा ।
साधुत्वं क्षमया शीलं चाऽसंकल्पेन लभ्यते ॥६९॥
धिया श्रेयो लभ्यते च कल्याणं पुण्यकर्मभिः ।
ह्रीर्धर्मात्प्राप्यते क्षान्तिर्धैर्येण लभ्यते तथा ॥७०॥
त्यागः स्नेहस्य यत्त्यागो विषयाणां तथैव च ।
रागद्वेषवियोगेन वैराग्येण च लभ्यते ॥७१॥
धैर्यं विकारशून्यत्वं सुखदुःखप्रदेऽपि च ।
विषये चाऽप्यधृष्यत्वं प्राप्यते चात्मसत्तया ॥७२॥
सर्वथा क्षमिणा भाव्यं भाव्यं सत्यपरेण च ।
वीतहर्षभयरुड्भिर्भाव्यं कल्याणलब्धये ॥७३॥
अद्रोहेण सदा भाव्यं सानुग्रहेण वै तथा ।
सत्यधर्मेण शीलेन भाव्यं कल्याणमिच्छता ॥७४॥
सतां सेवाकृता भाव्यं भाव्यं मद्भक्तिसंयुजा ।
आत्मार्पणेन वै भाव्यं परश्रेयोऽभिकांक्षिणा ॥७५॥
मन्त्रो ग्राह्यो वैष्णवश्च शरणं मे हरेस्तथा ।
तेन श्रेयस्तथा प्रेयः परमं वो भविष्यति ॥७६॥
इत्युक्त्वा विररामाऽसौ भगवान् पुरुषोत्तमः ।
प्रजाः प्रेम्णा पुपूजुश्च मन्त्रं हरेश्च जगृहुः ॥७७॥
ततो राजा च राज्ञी च कुमाराश्चक्रुरर्हणाम् ।
तिस्रो राज्ञ्यस्तथा तिस्रः कन्यकाश्चक्रुरर्हणाम् ॥७८॥

महानीराजनं चक्रुः कर्पूरवर्तिकायुतम् ।
राजवेषं धारयामासुश्च गोपालनन्दनम् ॥७९॥
योग्याः कन्याश्च वै तिस्रो रम्या युवत्य एव ताः ।
मात्राज्ञया स्वहृदयैः सुवर्णवरमालिकाः ॥८०॥
हरेः कण्ठे न्यधुः सर्वाश्चरणाम्बु पपुस्तथा ।
मधुपर्कं ददुश्चाप्याददुः कान्ते समर्पिताः ॥८१॥
कृतकृत्या अभवँस्ताः स्थलपद्मदलप्रभाः ।
पारावारपित्रो राजा चक्रे विवाहकोत्सवम् ॥८२॥
परिहारोत्तरं चक्रुर्भोजनं तत्र संगताः ।
अस्वपँश्च ततः सर्वे कन्याः कृष्णं सिषेविरे ॥८३॥
प्रातर्वाद्यैर्गीतिभिश्च प्रबुबोध महाप्रभुः ।
कृताह्निकः कृतपूजोऽभवत् स्वस्थो यदा हरिः ॥८४॥
राजा त्वायात् तत्र कृष्णं पूजयितुं पुपूज च ।
तदा समायान्नृपतिः शुचिः कोटीश्वराभिधः ॥८५॥
एकद्वारप्रदेशानामधिशास्ता सुधर्मवान् ।
तथा चायान्नृपतिश्च श्रीसतीशाभिधः शुचिः ॥८६॥
पारूपराष्ट्रनृपतिर्धर्मवान्भक्तिभाववान् ।
मृत्युहर्षिकोष्ठकर्षिभ्यां युतौ तौ नृपौ शुभौ ॥८७॥
प्रार्थयामासतुः श्रीशं स्वराष्ट्रगमनाय ह ।
हरिस्तथाऽस्त्विति प्राह सत्कारं चाकरोत् तयोः ॥८८॥
तावदायात् प्रधानो वै ह्यमात्यो याजनेश्वरः ।
ईशानपानशिष्टाख्यसम्राजो ब्राह्मिलेशितुः ॥८९॥
पत्रेण साकं नत्वैवाऽप्रार्थयत्परमेश्वरम् ।
ब्राह्मीलराज्ये चागत्य गोयाजनीपुरीं च नः ॥९०॥
यज्ञैर्महोत्सवैः कृष्ण पावयेति नृपेषणाम् ।
पूर्णां करोतु भगवान् प्रजाश्रेयो भविष्यति ॥९१॥
अमरीणां च भाग्यानि भविष्यन्ति शुभानि च ।
भवतो दर्शनेनाऽपि पूजनेन च सेवया ॥९२॥
इत्युक्तो भगवानाह स्वागतं ते नृपस्य च ।
वचनं मानयेऽमात्यवर्य योग्यं समीहितम् ॥९३॥
पञ्चम्यां तु प्रगे तत्र समागत्य क्रतूत्सवम् ।
करिष्ये लोमशं नीत्वा तथा महर्षिसत्तमान् ॥९४॥
ईशानं च सतीं नीत्वा याहि राज्ञे निवेदय ।
सामग्रीसञ्चयं चापि प्रकारय च घोषणाम् ॥९५॥
नदीतीरे शुभं स्थानं योग्यं यज्ञार्थमाचर ।
पञ्चम्यां तु प्रगे यज्ञारंभश्चैकादशीदिने ॥९६॥
पूर्णाहुतिः क्रतोः स्याच्च प्रघोषयेति सर्वथा ।
अमात्यः प्रययौ शीघ्रं त्वाज्ञां प्राप्य निजालयम् ॥९७॥
ब्राह्मीलेशं तथोक्तं चावेदयामास सर्वथा ।
लोमशेशानदेवौ च लालायनो वृकायनः ॥९८॥
नीलकर्णो यवक्रीतस्तथाऽन्ये ऋषयो ययुः ।
स्वयंप्रकाशो भगवान् ययौ यज्ञार्थसिद्धये ॥९९॥
आम्रजनिसरित्तीरे शान्तारामर्षिसेविते ।
गोयाजनीभूमिमध्ये यज्ञस्थलीं ह्यकल्पयन् ॥१००॥
अथ कृष्णोऽभवत् सज्जो दुग्धं पीत्वा कुटुम्बयुक् ।
गन्तुमेकद्वारराष्ट्रं तथा पारूपराष्ट्रकम् ॥१०१॥
पारावारपित्रो राजा विदायं यौतकं ददौ ।
पूजालब्धं धनं सर्वं ददौ स चाम्बिकर्षये ॥१०२॥
स्वागतं मानन्नं प्राप्य हरिर्विमानगोऽभवत् ।
कोटीश्वरो ययौ पूर्वं सम्मानार्थं हरेस्तदा ॥१०३॥
श्रीसतीशो ययौ चापि निजराष्ट्रं हरिस्ततः ।
मृत्युहर्षिसुयुक्तश्च कोष्ठकर्षियुतस्तथा ॥१०४॥
व्योम्ना शीघ्रं समायाच्च पेयिस्थानगरीं प्रति ।
राधिके च तदा वाद्यान्यवाद्यन्त विलोक्य तम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः कायनीनगर्यां भ्रमणं पूजनं राजालये समुपदेशनं भोजनं स्वपनं प्रातर्विदायं आश्विनकृष्णप्रतिपदि कोटीश्वर-नृपस्य एकद्वारराष्ट्रगमनं चेत्यादिनिरूपणनामा सप्तदशाधिकद्विशततमोऽध्यायः ॥ २१७ ॥

**श्रीकृष्ण उवाच—**

राधिके प्रतिपत्प्रातश्चाश्वीनकृष्णपक्षके ।
पेयिस्थायाः सन्निधौ वै महोद्याने हि कोटिशः ॥ १ ॥
नृपः सैन्येन कृष्णस्य स्वागतं स्वं व्यधापयत् ।
विमानं बालकृष्णस्य दिव्यसूर्यनिभप्रभम् ॥ २ ॥
जना दृष्ट्वा जयशब्दान् चक्रुर्हर्षसमन्विताः ।
राजदर्शितमार्गेणाऽवातारयद् विमानकम् ॥ ३ ॥
पेयिस्थाया नगर्या उद्याने ध्वजादिशोभिते ।
विमानं चाऽवर्धयँश्च प्रजा अक्षतचन्दनैः ॥ ४ ॥
पुष्पाञ्जलिभिश्चात्यर्थं गीतिभिः स्वागतं व्यधुः ।
अनादिश्रीकृष्णनारायणो विमानतो बहिः ॥ ५ ॥
आययौ च तदा सूर्याननं विलोक्य मानवाः ।
क्षणं तेजोधर्षिताश्चाऽभवँस्ततः कृपानिधिः ॥ ६ ॥
चन्द्राननोऽभवच्छीघ्रं शान्तसुधाप्रवर्षणः ।
ददृशुश्च जनाः सर्वे तदा श्रीकृष्णवल्लभम् ॥ ७ ॥

कोटीश्वरो नृपः कृष्णकण्ठे हारं ददौ शुभम्।
पपौ पादामृतं चापि ततोऽन्येऽपूजयन् प्रभुम् ॥ ८ ॥
गजे निषाद्य सर्वेशं पेयिस्थायां महापथे।
महासैन्येन राजा सोऽभ्रामयन्मानपूर्वकम् ॥ ९ ॥
प्रधानैश्च तथाऽमात्यैः श्रेष्ठिभिश्च प्रजाजनैः।
धनाम्बरैर्हीरकैश्च मौक्तिकै रत्नहारकैः ॥१०॥
फलैः पुष्पैर्दलैर्मिष्टैः सुवर्णाद्यैश्च पूजितः।
नीराजितो वन्दितश्च योषिद्भिः सन्निरीक्षितः ॥११॥
मनोहरस्वरूपः श्रीकाम्भरेयो नरायणः।
दत्वैवं दर्शनं चायान्नृपावासं मनोहरम् ॥१२॥
राजा स्वमन्दिरे दिव्ये सिंहासने जनार्दनम्।
निषाद्य चरणौ नत्वा पुरः स्वर्णायुतं न्यधात् ॥१३॥
राज्ञी पुपूज भक्त्याढ्या चन्दनाक्षतपुष्पकैः।
कन्ये द्वे च तदा कृष्णकण्ठे मात्राज्ञया शुभे ॥१४॥
वरमाले न्यधातां ते जाते पूर्णमनोरथे।
परेश्वरं पतिं प्राप्यानन्दमग्ने बभूवतुः ॥१५॥
राजा भाग्यं निजं मेने सर्वश्रेष्ठं नृपांगना।
नीराजनं चकाराऽथ हरिश्चोपादिदेश ह ॥१६॥
क्रोधो लोभो रसास्वादो मानः स्तैन्यं च पैशुनम्।
एते प्रमत्ताः सततं तुदन्ति पुरुषं स्त्रियम् ॥१७॥
एभ्यः प्रवर्तते दुःखमेभ्यः पापं प्रवर्तते।
लोभात् क्रोधः प्रभवति मानाच्च जायते भृशम् ॥१८॥
परदोषैस्तथा क्रोधो भवेदिच्छाविघातकः।
अवमानाद् भवेत् क्रोधो वाक्काठिन्यश्रवात्तथा ॥१९॥
क्षमया क्रोधनं साधौ द्रागेव विनिवर्तते।
क्रोधमूलं क्वचित् कामो भवत्येव वियोजितः ॥२०॥
काममूलं तु संकल्पो हेतुवृद्धौ विवर्धते।
सेव्यमानस्तु सुतरां त्यज्यमानस्तु नश्यति ॥२१॥
असूया जायते मानाद् यशःखण्डनतस्तथा।
दारिद्र्यात् स्वापकर्षाच्चाऽवनतेर्निम्नसंस्थितेः ॥२२॥
अज्ञानप्रभवो मोहः पापाभ्यासात् प्रवर्तते।
ज्ञानमार्गेण विहतो मोहो मूलान्निवर्तते ॥२३॥
विधित्सा कर्मफलिका मय्यर्पणान्न बन्धदा।
प्रीत्या शोकः प्रभवति चेष्टावियोजनात्तथा ॥२४॥
यदा नैरर्थ्यमानं स्याच्छोकः सर्वो निवर्तते।
पारवश्यं तृष्णया वा लोभात् कामात् सुखेहया ॥२५॥
जायते तत्तु वैराग्यान्निवर्तते समूलकम्।
असत्याश्रयिणो नित्यं मात्सर्यं प्रविवर्धते ॥२६॥
साधूनां सेवनात् सत्योद्बोधात्तत्तु निवर्तते।
अवस्थागुणसम्पत्तिकुलख्यातिकलादिभिः ॥२७॥
ऐश्वर्याद् विद्यया चापि जायते तु मदोद्भवः।
तेषामंशं सुखदं च प्राप्याऽन्यांऽशं विवर्जयेत् ॥२८॥
एवं वै वर्तमानस्य मदद्दुःखं न जायते।
ईर्ष्या परोन्नतिश्रैष्ठ्याऽसहिष्णुना वितन्यते ॥२९॥
उपेक्षया नाशयेद् वै संहर्षाद् वा विचारतः।
कुत्सा सञ्जायते श्रैष्ठ्यगर्वेणाऽन्यत्र वस्तुनि ॥३०॥
अवस्थाभेदसाम्यज्ञः कुत्सां जयति नान्यथा।
इति कर्तुं न शक्ता ये बलस्थाय महात्मने ॥३१॥
असूया जायते तेषां भाग्यतुष्ट्या निवर्तते।
कृपा संजायते लोके ह्युपकारविवेकतः ॥३२॥
कृपणेषु तथाऽन्येषु दौर्गुण्येन निवर्तते।
अज्ञानप्रभवो लोभो यत्र यत्र प्रजायते ॥३३॥
तत्र तत्र भावयेच्चाऽस्थिरत्वं दुःखदायिताम्।
अनपेक्षस्वभावेन लोभोऽप्यत्र निवर्तते ॥३४॥
नृशंसं वर्जयेन्नित्यं विज्ञाय च यथातथम्।
सस्पृहो गर्वितश्चाप्याक्रोष्टा च वञ्चकस्तथा ॥३५॥
शठः क्षुद्रो नैकृतिको विषमश्च विकत्थनः।
संगी मान्यसंविभागी सर्वशंकी च निर्दयः ॥३६॥
कृपणो द्वेषवान् हिंसाविहारो बहुलीककः।
लुब्धः पाषण्डवान् निन्दाकर्ता त्वेते नृशंसकाः ॥३७॥
धर्मशीलं गुणोपेतं पापमित्यवगच्छति।
श्रेष्ठान् पूज्यान् सतः साध्वीः स्वार्थार्थमुपहन्ति यः ॥३८॥
स्वपैशुन्यप्रमाणेन न विश्वसिति कस्यचित्।
गुणिनां स्वल्पदोषं वा बहुत्वेन च वक्ति यः ॥३९॥
यश्चोपकारिणं मित्रं मन्यते वञ्चकं परम्।
हितकृतेऽपि च मुहुस्तपत्येव निरर्थकम् ॥४०॥
भोजनं साधु नीत्वैव भुंक्ते प्रेक्षकपंक्तिषु।
नारीं प्रतापयेद् यश्च पितरौ तापयेच्च यः ॥४१॥
एते नृशंसा ज्ञातव्यास्तेषां संगं न चाचरेत्।
सद्भ्यो दत्वा भुंजते ये सुहृद्भिर्बान्धवैः सह ॥४२॥
प्रेत्य लभन्ते स्वर्गं ते स्वर्गात् स्वर्गं तथोत्तरम्।
नृशंसान् वर्जयेज् ज्ञात्वाऽऽश्रयेत् साधून् हरिं तथा ॥४३॥
निःस्वेभ्यो देयमेवेति विद्याऽन्नाऽम्बरमुत्तमम्।
यक्ष्यमाणो दानपात्रं सर्वविद्याधरस्तथा ॥४४॥
आचार्यपितृकार्यश्च धर्मार्थदत्तजीवनः।
एते वै साधवः प्रोक्ताः परमेशपरायणाः ॥४५॥

तेषामाश्रयणान्मोक्षो महास्वर्गादिकार्जनम् ।
सर्वैश्वर्यप्रलाभश्चेश्वरभावस्तदाश्रयात् ॥४६॥
मद्रूपाः साधवस्ते वै येषु मे सद्गुणाः शुभाः ।
मद्गुणो वै मदंशोऽस्ति नरो नारायणाह्वयः ॥४७॥
त्यक्तव्याँश्च जनान् वच्मि येषां संगो भयावहः ।
लुब्धं क्रूरं धर्महीनं मम भक्तिविवर्जितम् ॥४८॥
निकृतिं च शठं क्षुद्रं पापाचारं विवर्जयेत् ।
अलसं सर्वशंकं च दीर्घसूत्रं विवर्जयेत् ॥४९॥
अनृजुं च सदा क्रुष्टं गुरुदारप्रधर्षकम् ।
व्यसनेयं दुरात्मानं पितृहं निरपत्रपम् ॥५०॥
सर्वतः पापचक्षुष्कं नास्तिकं निन्दकं खलम् ।
असंयमेन्द्रियं कामासक्तं प्रमत्तमुत्सृजेत् ॥५१॥
असद्वृत्तं च विद्विष्टं समये चाऽनवस्थितम् ।
पिशुनं चाऽकृतप्रज्ञं मत्सरिणं च पापिनम् ॥५२॥
दुःशीलं चाऽकृतात्मानं कितवं च नृशंसकम् ।
मित्राऽपकृतिकं चान्यद्रव्यार्थलालसान्वितम् ॥५३॥
दानद्वेषिणमेवापि चासन्तुष्टं परित्यजेत् ।
अधीरं बलखण्डं चाऽस्थानक्रोधपरायणम् ॥५४॥
अयुक्तं चाऽविवेकं चाऽकस्माद् विरोधिनं त्यजेत् ।
अकल्याणकरं दुष्टं व्यसनाढ्यं विवर्जयेत् ॥५५॥
अपकारपरं मूढं पुण्यप्रध्वंसकारकम् ।
शत्रुर्मित्रमुखो यश्च मित्रद्वेषी सुहृत् त्वपि ॥५६॥
जिह्मप्रेक्षी स्वार्थमात्रमेलनो यशसां क्षयी ।
प्रत्यक्षे शंसको यश्च परोक्षे निन्दको नरः ॥५७॥
स्वार्थे मृदुः कृते स्वार्थे स्तब्धो यस्तान् परित्यजेत् ।
पानपं द्वेषिणं ऋद्धं निर्घृणं परुषं त्यजेत् ॥५८॥
परतापकरं प्राणिवधे रक्तं कृतघ्नकम् ।
अधमं छिद्रपश्यं च दूरतो वर्जयेत् सुधीः ॥५९॥
तेन हानिर्न वै लोके नात्मविक्षेपणं क्वचित् ।
बुद्धिनाशो न चैवापि नाभ्युदयेऽस्य विघ्नता ॥६०॥
एवं परीक्ष्य मतिमान् साधून् हितान् समाश्रयेत् ।
कुलीनान् ज्ञानसम्पन्नान् कोविदान् सुबहुश्रुतान् ॥६१॥
गुणोपेतानलुब्धाँश्चाऽजितान् जितश्रमाँस्तथा ।
सन्मित्राणि कृतज्ञाँश्च सर्वज्ञान् लोभवर्जितान् ॥६२॥
माधुर्यगुणसम्पन्नान् सत्यसन्धान् जितेन्द्रियान् ।
व्यायामशीलान्निर्दोषान् सदाचारान् समाश्रयेत् ॥६३॥
नाऽस्थाने क्रोधिनश्चाप्यकस्मान्नैव विरागिणः ।
विरक्ताँश्चार्थवेतॄँश्च सुहृत्कार्यपरायणान् ॥६४॥

विश्वस्तान् घातहीनाँश्च रक्षकान् धर्मवत्सलान् ।
लोष्टकाञ्चनतुल्यार्थान् सुहृदो दृढबुद्धिकान् ॥६५॥
स्वाम्यर्थे कृतसर्वस्वान् श्रयेद् विचार्य सज्जनान् ।
ईदृशैर्भगवद्भक्तैर्यः सन्धिं कुरुते जनः ॥६६॥
तस्य नित्यं भवेच्छ्रेयः कल्याणं मोक्षणं तथा ।
शास्त्रनित्या जितदोषाः सन्तोषिणो हरिस्थिताः ॥६७॥
शीलशान्तिगुणोपेताः सन्धेयाः पुरुषोत्तमाः ।
नृशंसाश्च तथा दुष्टा ये चोक्ताश्च ततोऽधमाः ॥६८॥
कृतघ्ना मित्रघाताश्च त्यक्तव्या धर्मवर्जिताः ।
कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम् ॥६९॥
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः ।
मित्रद्रोहो न कर्तव्यः पुरुषेण विशेषतः ॥७०॥
मित्रध्रुङ् नरकं घोरं दुःखं याति विपत्तिदम् ।
कृतज्ञेन सदा भाव्यं मित्रकामेन चैव ह ॥७१॥
मित्राच्च लभते सर्वं मित्रात् पूजां प्रपद्यते ।
मित्राद्भोगानवाप्नोति मित्रादापद् विनश्यति ॥७२॥
मित्राणि साधवो लोके जीवानां पापनाशकाः ।
वासनाक्षालकाश्चापि स्वर्गमोक्षप्रदास्तथा ॥७३॥
भवमृत्युहरास्ते च शरणागतरक्षकाः ।
सर्वथा दुःखहर्तारो दयालवोऽतिसात्त्विकाः ॥७४॥
नरैश्चाबालवृद्धैश्च नारीभिः शीलशोभनाः ।
सेवनीयाः सदा सन्तः सर्वदोषविवर्जिताः ॥७५॥
दिव्या दिव्यगुणोपेता आश्रितदिव्यताप्रदाः ।
अनादिश्रीकृष्णनारायणस्य मेऽनुसेवकाः ॥७६॥
यत्प्रसादोऽपि दिव्योऽस्ति दर्शनं दिव्यमेव च ।
स्पर्शनं दिव्यमेवाऽपि सेवनं दिव्यमित्यपि ॥७७॥
वन्दनं वर्तनं चाज्ञापालनं चरणामृतम् ।
सर्वं दिव्यं दिव्ययोगात्ते सेव्याः सततं जनैः ॥७८॥
नैतादृशं परं पुण्यं परो धर्मोऽपि नेदृशः ।
पराभक्तिश्च मे साधौ साधवो भवतारकाः ॥७९॥
इत्युपादिश्य भगवान् ददौ मन्त्रान् सुवैष्णवान् ।
भोजनं कारयामास राजा कोटीश्वरो हरिम् ॥८०॥
महीमानाँस्तथा सर्वान् ताम्बूलानि ततो ददौ ।
दक्षिणाः स्वर्णमुद्राद्या ददौ चौर्णाम्बराण्यपि ॥८१॥
मध्याह्नोत्तरवेलायां कुष्ठकर्षिस्तदा हरिम् ।
आर्थयन्निजराष्ट्रं त्वागन्तुं पारूपनामकम् ॥८२॥
श्रीसतीशो नृपः पूर्वं गतोऽभूत् स्वागताय च ।
हरिस्तथाऽस्त्विति प्राह सज्जोऽभवद् द्रुतं तदा ॥८३॥

कोटीश्वरो नृपः प्रादाद् यौतकं च धनं बहु ।
विदायं स्वर्णरत्नादि, हरिः प्राप्य निजान्वितः ॥८४॥
आरुरोह विमानं च प्रससार पुरोदिशम् ।
तदा विदायवाद्यानि ह्यवाद्यन्त नृपाज्ञया ॥८५॥
जयशब्दाः प्रजाभिश्च कृताः कृष्णो नतो जनैः ।
वर्धितो भावनाभिश्च ययावम्बरमार्गतः ॥८६॥
पारूपराष्ट्रमायाच सञ्चालानगरीं प्रति ।
महोद्याने राजसौधे राजा सैन्यसमन्वितः ॥८७॥
स्वस्थोऽभूत् स्वागतार्थं वै विमानं स्वागतं द्रुतम् ।
सूर्यतुल्यं विलोक्यैव प्रजाः सैन्यानि चाभितः ॥८८॥
जयशब्दान् प्रचक्रुश्च दर्शयामासुरानतिम् ।
ध्वजान् पताकिकाँश्चापि दर्शयामासुरुत्सुकाः ॥८९॥
चन्द्रतुल्या गृहचित्रा वावटिकाश्च वावटान् ।
दर्शयामासुराकाशे यशोश्लोकसमन्वितान् ॥९०॥
राजदर्शितमार्गेण विमानं श्रीहरिस्तदा ।
उद्याने मन्दिराग्रेऽवातारयच्छनकैः स्थले ॥९१॥
प्रजाभिस्तु विमानं तत् पुष्पपत्रादिभिः शुभम् ।
वर्धितं पूजितं चापि नतं प्राञ्जलिभिस्तदा ॥९२॥
श्रीहरिस्त्वाययौ चाग्रे विमाने कृपया द्रुतम् ।
दातुं स्वदर्शनं सर्वलोकेभ्यः परमेश्वरः ॥९३॥
सूर्यनिभोऽतितेजस्वी चन्द्रशीतलमानसः ।
पद्माक्षः प्रेमभृन्नेत्रो मन्दहास्याननो हरिः ॥९४॥
तेजःपरिधिसंव्याप्तविग्रहः कानकीप्रभः ।
कोटिकन्दर्पसौन्दर्यो वात्सल्यवारिधिः प्रभुः ॥९५॥
जनेभ्यो दर्शनं प्रादाज्जग्राह नमनादिकम् ।
भावनां हृदयैर्दत्तां स्वीचकार हृदा तदा ॥९६॥
अथ राजा पुष्पहारान् स्वर्णहारान् गले ददौ ।
शीतसुगन्धसारांश्च सिषेच मस्तकादिषु ॥९७॥
करे ददौ पुष्पगुच्छान् तिलकं कैसरं व्यधात् ।
पादप्रक्षालनं चक्रे प्रसादामृतमापपौ ॥९८॥
राज्ञी तस्याऽपूजयच्च श्रीपतिं पार्वतीपतिम् ।
आरात्रिकं व्यधात् तत्र विमाने बहुवर्तिकम् ॥९९॥
पूजाश्चक्रुः पूजनं च हारावल्यादिभिस्तदा ।
अथ कृष्णः पपौ वारि शीतलं मधुरं तदा ॥१००॥
राधिकेऽथ तदा सैन्यं सञ्चालानगरीं प्रति ।
सज्जं ह्यभूत् हरिं भ्रामयितुं राजा समुत्सुकः ॥१०१॥
भगवान् श्रीबालकृष्णो विमानादवरुह्य च ।
शृंगारिते गजे श्वेते स्वर्णासने ह्युपाविशत् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पेयिस्थानगर्यां भ्रमणं पूजनं चोपदेशनं भोजनं विदायं ततः सायं पारूपराष्ट्रागमनं पूजनं चेत्यादिनिरूपणनामाऽष्टादशाधिकद्विशततमोऽध्यायः ॥ २१८ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽनादिकृष्णस्य गजपृष्ठे गजान्तरे ।
पितरौ च ततो गजान्तरे स्वभ्रातरस्त्रयः ॥ १ ॥
ततो ब्रह्मप्रियादीनां शिबिकाद्यास्तथाऽभवन् ।
अमर्यश्चाऽभवन् पश्चाद् गीतिकारसिकास्तथा ॥ २ ॥
अग्रे डंकानिशानादि पटहाद्यास्तथाऽभवन् ।
सैन्यवाद्यान्यवाद्यन्त जयनादास्तथाऽभवन् ॥ ३ ॥
यन्त्रशब्दा विप्रघोषा जायन्ते स्माऽतिगर्जनाः ।
सञ्चालायां गोपुरादौ चन्द्रशालासु शाखिषु ॥ ४ ॥
रथ्यासु राजमार्गेषु गृहेषु वल्लभीष्वपि ।
हट्टेषु वेदिकास्वेव चैत्येषु दुर्गमस्तके ॥ ५ ॥
सौधेषु मध्यमार्गेषूद्यानेषु च समन्ततः ।
प्रजानना नरा नार्यो बालकृष्णं विलोकितुम् ॥ ६ ॥
उपस्थितास्तदाऽऽसँश्च धृतपूजाः करादिषु ।
नगर्यां गोपुरे कृष्णं पुपूजामात्यमण्डलम् ॥ ७ ॥
चत्वरेषु धनाढ्याश्चोद्यानकेषु प्रधानकाः ।
रथ्यासु चापणेष्वेते चत्वरेषु प्रजाजनाः ॥ ८ ॥
अपूजयन् हरिं पुष्पाम्बरभूषाफलादिभिः ।
हारैः पौष्पैर्हीरकाद्यैः रत्नमालाभिरित्यपि ॥ ९ ॥
अमर्यः कन्यकाश्चापि पुपूजुरक्षतादिभिः ।
स्थलपद्मादिहारैश्चोर्मिकाभिः शर्करादिभिः ॥१०॥
एवं भ्रमित्वा भगवान् नगर्यामथ मन्दिरम् ।
राज्ञः समाययौ तूर्णं जलपानमथाऽकरोत् ॥११॥
उपादिदेश भगवान् प्रजाभ्यश्च नृपादये ।
भुक्तिमुक्तिप्रदान् रम्यान् सद्धर्मान् वै निशीथके ॥१२॥
देशे काले तथा व्यक्तौ कालपर्याय उल्बणः ।
अनिष्टोऽपि समायाति विरागजनकः सदा ॥१३॥
लोकोऽयं बहुदोषोऽस्ति निर्दोषाः साधवोऽत्र वै ।
भगवद्योगयुक्तास्ते कालपाशविवर्जिताः ॥१४॥
आत्ममोक्षकराः सन्तो मम योगाद् भवन्ति वै ।
सर्वं विलोक्य निःसारं दुःखबाहुल्यसंभृतम् ॥१५॥

आत्ममोक्षनिमित्तं वै यतेत मतिमान् जनः ।
नष्टे धने च दारेषु पुत्रे पितरि स्वामिनि ॥१६॥
दुःखं याति विमूढोऽयं लोको ममत्वकर्षितः ।
तच्छोकं नाशयत्येव साधुरेव न चेतरः ॥१७॥
यथा काष्ठं च काष्ठं च समेयातां महाजले ।
समेत्य च व्यपेयातां तद्वद् देहिसमागमः ॥१८॥
एवं पौत्रास्तथा पुत्रा दाराः पुत्र्यश्च बान्धवाः ।
सत्यश्च पतयश्चापि वियोगोत्तरनिर्णयाः ॥१९॥
तत्र स्नेहो न कर्तव्यो वियोगो तर्हि वै ध्रुवः ।
अदृष्टश्चागतः पूर्वं गते पुनर्न दर्शनम् ॥२०॥
एवं ज्ञात्वा जगत् सर्वं महीमानस्वरूपवत् ।
यथा शोको न जायेत तथा वृत्त्यं सुधाजनैः ॥२१॥
तृष्णास्नेहोत्थदुःखं वै दुःखाद् दुःखं पुनः पुनः ।
प्राप्तौ सुखं गते दुःखं शोको दुखं पुनः पुनः ॥२२॥
सुखदुःखे जनानां वै जायेते चक्रमे मुहुः ।
शरीरं विद्यते त्वायतनं द्वयोर्विवर्ततोः ॥२३॥
तद् दुःखं न पुनः स्याद्वै वर्तितव्यं तथा पथि ।
अनादिश्रीहरिः पन्थाः सर्वदुःखविनाशकृत् ॥२४॥
आश्रयणीयः सोऽहं दुःखान्तौषधमस्मि यत् ।
अनाश्रितास्तु साधून् ये मां तथा परमेश्वरम् ॥२५॥
विदन्ति दुःखभागं ते सुखशून्या भवन्ति हि ।
स्नेहपाशैरनेकैस्ते निबद्धा विषयेहया ॥२६॥
अकृतार्था हि सीदन्ति मृगतृष्णाजलभ्रमाः ।
स्नेहेन तिलवद् यन्त्रे सर्गे सर्वं निपीड्यते ॥२७॥
स्नेहबद्धः करोत्यस्मै कर्म पापभरं ततः ।
तेन क्लेशानवाप्नोति परत्रेह पुनः पुनः ॥२८॥
पुत्रदारकुटुम्बेषु प्रसक्ताः सर्वदेहिनः ।
शोकसागरमग्नास्ते सुखिनो न भवन्ति वै ॥२९॥
इष्टनाशे यथा प्राप्तो दावाग्निस्तत्समो जनः ।
दह्यते वै वृथा भस्मीभवितुं न फलं शुभम् ॥३०॥
नालं सुखं प्रदातुं वै सुहृदो बान्धवा अपि ।
नाऽलं दुःखं प्रदातुं च शत्रवोऽन्ये परेऽपि च ॥३१॥
नालं चार्थाः सुखं दातुं नालं तत्साधनान्यपि ।
न दारिद्र्यं दुःखदातृ प्राज्ञो जानाति नाऽपरः ॥३२॥
विवेकी च विरागी च मद्भक्तो वै भवेत् सुखी ।
अहं धेनुस्वरूपोऽस्मि दोग्धारः सुखिनो मम ॥३३॥
धेनुर्वत्सस्य गोपस्य स्वामिनस्तस्करस्य च ।
पयःपिबस्य सर्वस्य सुखदा वै तथान्वहम् ॥३४॥
मम भक्तेः पानकर्ता सुखी स्यान्नात्र संशयः ।
बुद्धिमाश्रित्य जननीं विवेकिनीं च पोषिणीम् ॥३५॥
सुखं समर्जयेत् प्राज्ञो नाऽन्तरे क्लेशवान् भवेत् ।
विवेकाल्लभ्यते शान्तिः सुखं चानन्द इत्यपि ॥३६॥
ये विवेकसुखं प्राप्ता द्वन्द्वातीता निरीहकाः ।
तान्नैवाऽर्था न चाऽनर्था व्यथयन्ति कदाचन ॥३७॥
अबुद्धाश्चाऽविवेकाश्च मूढाः स्वभावकर्षिताः ।
प्रहृष्यन्ति च यावन्तस्तप्यन्ते शतधाऽधिकम् ॥३८॥
विवेकप्रसवा शान्तिः सन्तोषसहकारिणी ।
भूतिः स्मृद्धिः श्रिया सार्धं दक्षे वसति नाऽलसे ॥३९॥
मूढं स्मृतिहनं तृष्णायुतं च स्पर्द्धिनं तथा ।
ईर्ष्यायुक्तं जनं शोकश्चाविशति सहस्रधा ॥४०॥
ममाश्रितं सतां भक्तं विवेकिनं सुबुद्धिकम् ।
असूयेर्ष्याविवर्जितं तु शोको न स्पृशति क्वचित् ॥४१॥
आत्मसत्तासमोपेतं ब्रह्मनिष्ठानिषेविणम् ।
सत्समागमकर्तारं न शोकः स्प्रष्टुमर्हति ॥४२॥
यन्निमित्तो भवेच्छोकस्तापो दुःखं च विघ्नता ।
अशान्तिर्वा यतो मूलात् तत् त्यजेत् स सुखी भवेत् ॥४३॥
ममत्वेन निजस्वार्थे कल्पितं यन्नितं च वा ।
सद्यस्तत्परितापार्थं सम्पद्यते निजात्मनि ॥४४॥
कामानां त्यागकर्ताऽत्र सुखेन पूर्यते सदा ।
कामानुपाती सतृष्णः कामाननु विनश्यति ॥४५॥
तृष्णाक्षयो महान् प्रोक्तो योगिनां सुखरूपकः ।
तृष्णायुतस्य लोकस्य धावतश्चेहयाऽभितः ॥४६॥
अतिशोकोऽभिपद्येत किल देहात्मवादिनः ।
खड्गधारेऽमृतं लिप्तं जिह्वया लेढुमिच्छतः ॥४७॥
अप्राप्तिर्भेदनं कष्टं त्रेधा दुःखं प्रजायते ।
तथा प्रियेषु मग्नस्य कामलेढुर्जनस्य वै ॥४८॥
क्षणाद्दुःखं प्रजायेत कामं त्यक्त्वा सुखी भवेत् ।
सर्वान् कामान् जुगुप्सेद्वै कामो मृत्युर्मनोभवः ॥४९॥
संहृत्य कामसंकल्पान् भयं त्यक्त्वा भवेत् सुखी ।
यदा नेच्छा न च द्वेषस्तदा ब्रह्मगतो भवेत् ॥५०॥
दुर्मतिभिर्या दुस्त्याज्या न या जीर्णा तु जीर्यतः ।
प्राणग्रासकरो रोगस्तां तृष्णां त्यजतः सुखम् ॥५१॥
मृत्युनाऽभ्याहतो लोको जरया वेष्टितः सदा ।
कालग्रस्तोऽपि न वेत्ति त्वात्मश्रेयःप्रसाधनम् ॥५२॥
दिवा रात्रिर्विना भक्तिं मोघा यातो हि देहिनः ।
एवं जानन् भजेत् कृष्णनारायणं तु मां हरिम् ॥५३॥

याते प्रयाते दिवसे जनायुः क्षीयते सदा ।
विना भक्तिं दिवा वन्ध्यो देहिना याति सर्वथा ॥५४॥
अतीव तृष्णया याति सुखार्थी गहने तले ।
अनवाप्ते तु कामे वै मृत्युरभ्येति भक्षकः ॥५५॥
विचिन्वन्तं सुखं रक्तं दूरे च्यासक्तमानसम् ।
सर्पो भेकीमिवाऽऽसाद्य मृत्युर्ग्रस्त्वा प्रगच्छति ॥५६॥
अद्यैव श्रेयः कर्तव्यं कालक्षेपो न लाभकृत् ।
असंपूर्णेषु कार्येषु मृत्युरादाय यास्यति ॥५७॥
आत्मकार्यं द्रुतं चाऽद्य कुर्वीत सावधानकः ।
अस्याऽपूर्णमिदं कार्यं चेति कालो न पश्यति ॥५८॥
कदा मृत्युर्भवेत् कस्य नैव जानाति कश्चन ।
तस्मान्मोक्षार्थकं कार्यं प्राक् कर्तव्यं विजानता ॥५९॥
आबाल्याद्वै भजनीयः श्रीपतिः पुरुषोत्तमः ।
तुष्टे कृष्णे भवेत् सौख्यं शाश्वतं निर्मलं यशः ॥६०॥
मोहाविष्टं धनदारपुत्रक्षेत्रातिमग्नकम् ।
क्षेत्रपश्वादिसम्पन्नं सुप्तं मृत्युर्हरिष्यति ॥६१॥
अवितृप्तं यतमानं कामार्थे बहुवेगिनम् ।
धावन्तं चानुधावन् वै मृत्युरादाय गच्छति ॥६२॥
करिष्ये श्वः परं कार्यं ततोऽन्यच्च ततः परम् ।
एवं वै चिन्तयानं तं कृतान्तः सन्नयिष्यति ॥६३॥
आरब्धानां फलं नाऽऽप्तं संसक्तं चान्यकर्मणि ।
कृतानां दुःखभोक्तारं यमश्चादाय गच्छति ॥६४॥
राजानं च दरिद्रं च विज्ञं भृत्यमनाथकम् ।
सर्वथा रक्षितं चापि मृत्युरादाय गच्छति ॥६५॥
मृत्युं जरां च शैथिल्यं पारवश्यं विमाननाम् ।
व्याधिमशक्तिं देहेऽत्र वीक्ष्य विज्ञो हरिं भजेत् ॥६६॥
जातोऽनिर्धारितो बालोऽनिर्धारिता मृतिस्तथा ।
आगमिष्यत्यकस्माद्वै तद्विचार्य हरिं भजेत् ॥६७॥
मृत्युस्थानं विषयेषु रतिरेव हि देहिनः ।
विरतिर्वै महारण्यं योगिनामिव शान्तिदा ॥६८॥
पाशरज्जुर्विषयाख्या वृत्तिर्या देहिनां सदा ।
छित्वा तां श्रीहरेः पादौ समाश्रयेत् स बुद्धिमान् ॥६९॥
न योद्धा जयति कश्चिदायान्तीं मृत्युवाहिनीम् ।
सत्ययोद्धा जयत्येनां हरौ सत्येऽमृतं स्थितम् ॥७०॥
सत्यं ब्रह्मेति वै प्रोक्तं परब्रह्मपरो भवेत् ।
सत्यव्रते स्थितश्चापि सत्ययोगं समाश्रितः ॥७१॥
सत्समागमनिरतः सद्योगेनाऽन्तकं जयेत् ।
मोहमृत्युं विजित्यैवाऽमृतं सत्संगतो लभेत् ॥७२॥
साध्वर्थी परमेशार्थी सेवार्थी चात्मनिष्ठितः ।
मृत्युं तीर्त्वा महानन्दाऽमृतं प्राप्नोति मोदते ॥७३॥
साधुयज्ञस्थितो दान्तो ब्रह्मयज्ञे रतिं गतः ।
परब्रह्मार्पणमग्नो महामोक्षं प्रयाति हि ॥७४॥
यस्य कृष्णः सदा तुष्टः साधवोऽनुग्रहान्विताः ।
कृपावर्षिणः पितरः स वै सर्वमवाप्नुयात् ॥७५॥
विद्याचक्षुर्दिव्यनेत्रं ब्रह्मव्रतं परं तपः ।
साधुसेवा परं पुण्यं त्यागः सुखं तु शाश्वतम् ॥७६॥
आत्मना वर्तमानस्य परमेशे स्थितस्य च ।
वीतरागस्य मुक्तस्य किं पुनस्तारकान्तरम् ॥७७॥
वित्तं दिव्यं साधवो वै रत्नं दिव्यं हरिः स्वयम् ।
प्रवृत्तिर्भजनं यस्य तस्य किमन्यसाधनैः ॥७८॥
अकिञ्चनः सुखं शेते सुखं प्रबोधतेऽपि च ।
सुखं पथ्यं शिवं कृष्णं प्राप्य प्रमोदते सुखी ॥७९॥
हरिं विना न यस्याऽस्ति द्रव्यं चाकिंचनो हि सः ।
आकिंचन्यं परं सौख्यं सृष्टित्रयातिरेकि तत् ॥८०॥
आकिंचन्ये तथा राज्ये विशेषो वर्तते महान् ।
राज्यवान्नित्यमुद्विग्नो निरुद्वेगो ह्यकिञ्चनः ॥८१॥
नाऽग्नेर्मृत्योश्चाऽस्य भीतिर्न चौराऽरिष्टकादपि ।
न शत्रोः कालवेगाद्वा भयं तस्य प्रजायते ॥८२॥
त्यागिनं भगवद्भक्तं देहगृहं हरिश्रयम् ।
साधुसेवापरं शान्तं प्रशंसन्ति हरादयः ॥८३॥
नाऽत्यक्त्वा सुखमाप्नोति नाऽत्यक्त्वा ब्रह्म विन्दति ।
नाऽत्यक्त्वा निर्भयश्चास्ते त्यागं लब्ध्वा सुखी भवेत् ॥८४॥
ईहाकृष्टस्य दीनस्य प्रमादमाविशेद् भृशम् ।
प्रमत्तं त्यक्तमर्यादं ह्युपयान्ति महापदः ॥८५॥
तासां विनाशकं श्रेष्ठं भेषजं साधुसेवनम् ।
येषां संगाज्ज्ञानलाभश्चेहानां विलयो भवेत् ॥८६॥
स्नेहधारा भवेत् कृष्णे मयि श्रीशे परेश्वरे ।
शाश्वतानन्दसम्पूर्णे मद्योगान्मामकः सुखी ॥८७॥
शाश्वतानन्दपूर्णः स्यात् तत्कार्यं मानवैरिह ।
इत्युक्त्वा राधिकेऽनादिश्रीशनारायणः प्रभुः ॥८८॥
'ओंनमः श्रीकृष्णनारायणाय पतये स्वाहा' ।
इतिमन्त्रं ददौ सर्वेभ्यश्च सर्वाभ्य इत्यपि ॥८९॥

'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा'।
इत्येवं शरणं ददौ सर्वेभ्य एव सः ॥९०॥
'कालमायापापकर्मशत्रुयाम्य कुद्वन्द्वयात्।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥९१॥
इत्येवं रक्षणमन्त्रं जनेभ्यः प्रददौ तदा।
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ॥९२॥
अनादिश्रीकृष्णानारायणः स्वामी पतिश्च मे'।
इत्येवं वै ब्रह्मभावमनुं ददौ च वै हरिः ॥९३॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः।
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ॥९४॥
आत्मनिवेदनमन्त्रं ददावेवं हरिः स्वयम्।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने नमः' ॥९५॥
इत्येवं श्रावयामास नमस्कारार्चनं ततः।
'श्रीश्रीकृष्णस्य भक्तोहं श्रीहरिः शरणं मम' ॥९६॥
'श्रीकृष्णवल्लभेशोऽयं श्रीस्वामी शरणं मम'।
'श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ॥९७॥
इत्येवं निजमन्त्रांश्च प्रददौ भगवान् स्वयम्।
अथ प्रजा हरिं नत्वा पूजयामासुरादरात् ॥९८॥
श्रीसतीशनृपराज्ञी पुपूज परमेश्वरम्।
श्रीसतीशनृपकन्यास्तिस्रो युवत्य एव तम् ॥९९॥
हरिं कान्तं मनोभाव्यं प्राप्य कण्ठे तु मालिकाः।
वरमालात्मिका दत्वाऽर्पणं न्यवेदयन् स्वकम् ॥१००॥
हरिस्तासां करान् धृत्वा तासां नाथो बभूव ह।
राज्ञी राजा मुमुदाते कृतकृत्याश्च कन्यकाः ॥१०१॥
तदुत्सवं नृपश्चक्रे यौतकं बहुधा ददौ।
आरार्त्रिकं ततश्चक्रे राजा स भोजनं ददौ ॥१०२॥
महीमानान् मिष्टवर्यैर्भोजयामास वै ततः।
विशश्राम हरी रात्रौ त्रिकन्यास्तं सिषेविरे ॥१०३॥
प्रातर्मांगल्यवाद्यैश्च गीतिकाभिः स्तवादिभिः।
प्रबुबोध हरिकृष्णो नारायणो नराधिपः ॥१०४॥
कृताह्निकं कृतपूजं हरिं राजा ह्युपाययौ।
दुग्धं वै पाययामास सर्वान् सुखेन भूपतिः ॥१०५॥
सिषेवे चेष्टदानाद्यैराशीर्वादानवाप च।
तावत्तत्र समायातो नेतुं श्रीहरिमच्युतम् ॥१०६॥
त्रेताकर्कशराजर्षिः कर्णफालर्षिसंयुतः।
बालावित्तकराष्ट्रेशः फान्कलाशीपुरीं प्रति ॥१०७॥
नेतुं समार्थयत् कृष्णं दण्डवत् प्रचकार ह।
तथास्त्विति हरिः प्राह स्वागतं भूपतेर्नृपः ॥१०८॥
व्यधात्ततोऽभवत्सज्जो राधिके परमेश्वरः।
राजा विदायं प्रददौ सैन्येन माननं ददौ ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सञ्चालनगर्यां हरेर्भ्रमणं पूजनं चोपदेशनं भोजनं रात्रौ विश्रमणं द्वितीयाप्रातर्विदायं सम्माननं चेत्यादिनिरूपणनामा नवदशाधिकद्विशततमोऽध्यायः ॥२१९॥

श्रीकृष्ण उवाच—

ततो वै राधिके कृष्णनारायणो महाप्रभुः।
सज्जो भूत्वाऽर्हणां लब्धाऽम्बरे विमानगोऽभवत् ॥ १ ॥
कुटुम्बं च विमाने चाऽभवन्महर्षिसंयुतम्।
ब्रह्मप्रियाद्याः सर्वाश्च निषेदुस्तद्विमानके ॥ २ ॥
कर्णफालऋषिश्चापि विमाने हरिणा सह।
न्यषीदच्च नृपस्त्रेताकर्कशस्तु विमानके ॥ ३ ॥
निजे चारुह्य शीघ्रं वै प्राग् ययौ स्वागतार्थकः।
हरेर्विदाये वाद्यानि त्ववाद्यन्त प्रजारवाः ॥ ४ ॥
जयकीर्तनरागाश्चाऽभवन् दिगन्तघोषिणः।
प्रससार विमानं तु क्षणान्तरे ह्यवाप ह ॥ ५ ॥
बालावित्तकराष्ट्रं वै त्वम्बरे द्योततेऽर्कवत्।
त्रेताकर्कशनृपतिः स्वागतं त्वाचरत्तदा ॥ ६ ॥
वाद्यैर्निनादैर्गीत्याद्यैः प्रजानां हर्षनादनैः।
जयशब्दैः सैन्यवाद्यैर्नमनैः पुष्पकाऽक्षतैः ॥ ७ ॥
ऋषिदर्शितमार्गेणाऽवातारयद् विमानकम्।
हरिस्तूर्णं विमानाद्वै बहिश्चाग्रे समाययौ ॥ ८ ॥
स्वर्णबृस्यां निषसाद राजा तं समपूजयत्।
स्वर्णहारैरम्बराद्यैश्चन्दनाक्षतसत्फलैः ॥ ९ ॥
राज्ञी पादौ जलैश्चाभिषिच्य पपौ जलामृतम्।
प्रजाः पुपूजुरीशेशं हरिर्दुग्धं पपौ तदा ॥१०॥
महीमानान् समस्तांश्च पाययामास सत्पयः।
भूपतिश्च तदा राज्ञी पाययामास योषितः ॥११॥
अथ सैन्यं महाशोभं तदा शृंगारितं ह्यभूत्।
नगर्यां ब्रह्मणार्थं वै राजोद्यानमुखात्पुरः ॥१२॥
महास्वर्णरथे कृष्णं शतैकवृषयोजिते।
न्यषादयन्महाराजस्त्रेताकर्कशभूपतिः ॥१३॥
शतैकस्वर्णकलशैश्चैकविंशतिचक्रके।
बहुविस्तारके राजपथमात्रप्रवाहणे ॥१४॥

हरिणा सह मुनयः ऋषयः पार्षदास्तथा ।
भ्रातरश्च तथा राजा नृपस्यापि कुमारकाः ॥१५॥
निषेदुस्त्वन्यरथगा ब्रह्मप्रियास्तदाऽभवन् ।
वाद्यघोषैश्च नगरे वाहिनी सा विवेश ह ॥१६॥
जयशब्दाः प्रजानां वै तदाऽभवन् समन्ततः ।
पुष्पवृष्टिः फलवृष्टिश्चन्दनानां कणार्पणम् ॥१७॥
स्वर्णमुद्रार्पणं हारार्पणं पुष्पातिसारणम् ।
नमनं दर्शनं दानं पूजनं च व्यधुः प्रजाः ॥१८॥
अमरीणां गीतयश्चाऽभवन् व्योमाभिबोधनाः ।
दिव्यभावयुता नार्यो वर्धयामासुरच्युतम् ॥१९॥
प्रधानाः श्रेष्ठिनश्चापि प्रजाश्च परमेश्वरम् ।
पुपूजुः सर्वरत्नाद्यैर्भावनाभिः स्थले स्थले ॥२०॥
फांकलाशीनगर्यां संभ्रमित्वैवं नृपालयम् ।
समाययौ नृपस्तत्र पुपूज परमेश्वरम् ॥२१॥
स्वर्णसिंहासने रम्ये न्यषादयत् प्रभुं मुदा ।
कर्णफालऋषिर्न्यराजयत् कृष्णं परात्परम् ॥२२॥
राज्ञी कृष्णस्य तिलकं कुंकुमेनाऽक्षतैस्तथा ।
केसरेण व्यधात् हारं सुवर्णस्य ददौ गले ॥२३॥
युवत्यः कन्यकाः सप्त राज्ञ्या कृष्णं मनोहरम् ।
वीक्ष्य निश्चित्य हृदये कान्तं व्यधुः पतिं तदा ॥२४॥
मात्राज्ञया वरमालाः कृष्णकण्ठे न्यधुर्मुदा ।
आरार्त्रिकं प्रचक्रुश्चार्पिता इति जगुर्मुहुः ॥२५॥
राज्ञी राजा प्रसन्नौ च कृतकृत्याश्च कन्यकाः ।
अभवन् राधिके मोक्षे प्राप्यः प्राप्तोऽत्र माधवः ॥२६॥
उत्सवं नृत्यगीताद्यैर्नृपश्चक्रे दिने तथा ।
अनादिश्रीकृष्णनारायणश्चोपादिदेश ह ॥२७॥
मानवस्य तु देहस्य प्राप्तेः फलं सुखं हरेः ।
भक्त्युत्तरं महामुक्तिः सेवा सतां फलं महत् ॥२८॥
अरागद्वेषभावश्च सदा कृष्णकथारुचिः ।
तितिक्षा च विवेकश्च यस्य सः स्यात्सुखी जनः ॥२९॥
अरागता सुखं श्रेष्ठं द्वेषाभावः प्रशान्तिदः ।
सुखं स्वपिति निर्विण्णो निर्द्वेषः क्षमया युतः ॥३०॥
यः कामानाप्नुयात् सर्वान् यश्च कामान् परित्यजेत् ।
तयोस्त्यागी महासौख्यं विन्दति न तु सर्ववान् ॥३१॥
नान्तं गतोऽस्ति कामानां पूर्वैः कश्चिन्न चाऽपरः ।
गमिष्यतीति तृष्णायाः क्षयात् प्रसाधयेत् सुखम् ॥३२॥
भुक्तमुक्तस्य कामस्य नान्तं गच्छति कश्चन ।
सञ्चितस्य धनस्यापि नान्तं गच्छति कश्चन ॥३३॥
त्यक्त्वा सर्वसमारंभान् सुखमाप्नोति मानवः ।
अधनस्य भवेद् रागो लब्ध्वा तु वर्धते पुनः ॥३४॥
लब्धनाशे तु मृत्युः स्याद् यद्वा शोचति नित्यशः ।
पुनर्लब्धं न भवति ततो दुःखतरं नु किम् ॥३५॥
न हि तुष्टिस्तु लब्धेन भूय एव च मृग्यति ।
अनुतर्षुल एवात्र दुःखी स्याद्वै मुहुर्मुहुः ॥३६॥
धननाशेऽधिकं दुःखं सर्वेभ्यश्चाऽवमाननम् ।
धने सुखकला या सा सहस्रदुःखमातृका ॥३७॥
धनवन्तं विनिघ्नन्ति दस्यवोऽन्ये हरन्ति च ।
तस्मादाशां परित्यज्य माधवं समुपाश्रयेत् ॥३८॥
निर्वेदं च निवृत्तिं च तृप्तिं शान्तिं क्षमा दमम् ।
आश्रयेच्चापि सन्तोषं सा स्यात् सुखी सदाऽत्र वै ॥३९॥
कामं लोभं च तृष्णां च स्पृहां कार्पण्यमित्यपि ।
त्यक्त्वा भवेज्जनो लोके सुखी मुक्तो जनो यथा ॥४०॥
स्वीयप्रकाशं पप्रच्छ भगवान् नारदः पुरा ।
कथं त्वं वर्तसे ब्रह्मन् सुखे यत्र न शोचनम् ॥४१॥
यदा यदा तु पश्यामि तदा तदा सुखेऽसि वै ।
न शोके वै मया दृष्टः किमत्र कारणं वद ॥४२॥
स्वीयप्रकाशस्तं प्राह शृणु विद्वन् मतिं मम ।
सदा पश्यामि सुखिनं कथं किं सुखमस्य नु ॥४३॥
साधनं चास्य वै कीदृक् कथं चास्ते सुखी तथा ।
वृषभः शकटीं कर्षन् मया पृष्टः कथं सुखी ॥४४॥
स चाह मे न वै चिन्ता भोज्यवस्त्रगृहादिभिः ।
कर्षुकेण धृता सा तु मद्बलाधीनवर्तिना ॥४५॥
तथाऽहं त्रिविधार्थं सञ्चिन्तयामि न सर्वथा ।
तस्मात् सुखी सदा चास्मि भोज्यवस्त्रगृहादिभिः ॥४६॥
सत्रभोजी मया पृष्टः कथं त्वं वर्तसे सुखी ।
स चाह मेऽन्नपूर्त्यर्थं धनं चार्जयते धनी ॥४७॥
अपरोऽयं पाचयित्वा मह्यं ददाति नित्यशः ।
ततो धनान्नपाकानां चिन्ता मे नास्ति सर्वथा ॥४८॥
तद्विचार्यं मया सापि क्रियते न वृथा यतः ।
शुकः पृष्टो मयाऽरण्ये किं त्वं प्रमोदसे वने ॥४९॥
स चाह मे न बन्धोऽस्ति यत्र क्वापि चरामि वै ।
नीडे वा गृहनाले वा स्वपिम्यपि यथामनः ॥५०॥
उड्डीयाऽऽरण्यकं गत्वा भक्षयामि फलादिकम् ।
नास्ति चिन्ता सञ्चयस्य नास्ति मे रक्षणस्य च ॥५१॥
नास्ति गृहादिचिन्ता वा कुटुम्बं नास्ति मे यतः ।
तस्मात्सुखी प्रमोदेऽहं सदा चिन्ताविवर्जितः ॥५२॥

तद्विचार्य मया सापि त्यक्ता निर्बन्धनोऽस्मि च ।
अथ पृष्टो महा सिंहः कथं सुखी विभाससे ॥५३॥
स चाह भोजनं दैवगत्या प्राप्य त्र्यहान्तरे ।
न मे हन्ता वने कश्चिदिति मत्वा स्वपिम्यहम् ॥५४॥
तद्विचार्य मया भीतिः कालादेः परिवर्जिता ।
तस्मात् सुखी निर्भयश्च विचरामि स्वपिम्यपि ॥५५॥
सुखं जीवन्ति मुनयः परब्रह्मसमाश्रिताः ।
ह्रासं वृद्धिं विनाशं चोद्भवं भूतगतानिमान् ॥५६॥
न मां लुम्पन्ति मत्वैवं विचरामि सदा सुखी ।
संयोगान् विरहान्तांश्च संचयान् शीर्णतान्नकान् ॥५७॥
उत्पन्नान् चान्तयुक्तांश्च ज्ञात्वा शोचामि नैव च ।
शयनं निद्रया व्याप्तं रोदनं हानिलेपितम् ॥५८॥
हर्षणं प्राप्तिसञ्जन्यं त्रयं त्यक्त्वा सुखी सदा ।
सती शंभोः मया पृष्टा पराधीना कथं सुखा ॥५९॥
साऽऽह मां वै मया दार्ढ्यं कृतं स्वामिनिदेशनम् ।
मम धर्मो न चान्योऽस्ति ममानुकूल एव सः ॥६०॥
अतो मया महत्सौख्यं स्वामिन्येवाऽनुभूयते ।
तद्विचार्य मया चेशे परमेशेऽनुकूलता ॥६१॥
सर्वविधा कृता चास्ते पातिव्रत्यविधोत्तमा ।
आत्मनिवेद्यहं कृष्णनारायणे परेश्वरे ॥६२॥
तस्येच्छा मम भाग्यं वै भाग्यचिन्ताऽर्पिता हरौ ।
विशेषतश्च तेनाऽहं सुखी सुखाश्रयेण वै ॥६३॥
श्रुत्वैवं नारदश्चापि जग्राह तादृशीं स्थितिम् ।
सुख्यभूच्च सदा लोके निरालम्बश्चरन् मुनिः ॥६४॥
स्वीयप्रकाशो भगवान् सनत्कुमारकस्तथा ।
लोमशर्षिस्तथा शंभुः सुखिनस्ते हि शाश्वताः ॥६५॥
इन्द्रियाणि तदर्थाश्च वशे येषां भवन्ति वै ।
ऐश्वर्याणि च भूतानि वशे येषां भवन्ति वै ॥६६॥
चमत्काराः सिद्धयश्च वशे येषां भवन्ति वै ।
कालः कर्म स्वभावश्च माया येषां वशे सदा ॥६७॥
आत्मा वशे च येषां वै ये वशे परमात्मनः ।
ते सदा सुखिनः सन्ति सृष्टौ वाऽक्षरधामनि ॥६८॥
सती रमा ब्रह्मप्रियास्तथा मुक्तास्तथाविधाः ।
सुखिनः शाश्वताश्चैते हर्यर्थात्मनिवेदिनः ॥६९॥
तस्मात्सर्वैर्हरेर्वश्यैर्भाव्यं नान्यवशानुगैः ।
हरिः शाश्वतसुखवान् सुखीकरोति सेवकान् ॥७०॥
इत्युपादिश्य भगवान् ददौ मन्त्रान् ततः परम् ।
उपारराम नृपतिस्त्वानर्च राधिके हरिम् ॥७१॥
तावत्तत्र विमानेन प्रार्थनार्थं समाययौ ।
अथश्चिलीराष्ट्रशास्ता आण्डजराख्यभूपतिः ॥७२॥
मन्त्राग्निकर्षिसहितो ननाम बहुभावतः ।
लब्धस्वागतसम्मानोऽर्थयास हरिं नृपः ॥७३॥
भगवन्मे पुरीमन्तःप्रागस्थां पावय प्रभो ।
तथास्त्विति हरिः प्राह सज्जस्तूर्णो बभूव ह ॥७४॥
त्रेताकर्कशराजा च विदार्य यौतकं ददौ ।
सैन्येन च व्यधात् कृष्णनारायणस्य माननम् ॥७५॥
हरिः कुटुम्बसहितो विमाने चाऽम्बरेऽभवत् ।
मन्त्राग्निकर्षिसहितस्तथा सार्थसमन्वितः ॥७६॥
राजा चाण्डजराभूपः पूर्वं स्वागतकार्थकः ।
ययौ राष्ट्रं तदा तूर्णं सैन्यं प्राक् समसज्जयत् ॥७७॥
तावद्धरिः समायातो विमानवरवाहनः ।
दृष्ट्वा प्रजाजनाः कृष्णनारायणो जयत्विति ॥७८॥
हर्षनादान् जयनादान् तूर्यनादान् प्रचक्रिरे ।
राजदर्शितमार्गेण ऋषिणा सह माधवः ॥७९॥
उद्यानेऽन्तःप्रागस्थाया नगर्याः सन्निधौ निजम् ।
श्रृण्वन् स्वागतघोषाँश्चाऽवतारयद् विमानकम् ॥८०॥
आययौ श्रीहरिस्तूर्णं विमानाग्रे बहिस्तदा ।
चिल्ल्यो नार्यो हर्षनादैः श्रीपतिं कृष्णवल्लभम् ॥८१॥
चिरंजीवेति वचनै रक्षरक्षेतिभावनैः ।
सुखं देहीति हृदयैर्वर्धयामासुरच्युतम् ॥८२॥
राजा पूजां चकारादौ चन्दनाऽक्षतपुष्पकैः ।
राज्ञी पूजां चकाराऽपि प्रजा नेमुश्च भावतः ॥८३॥
ततो राजा बालकृष्णं न्यषादयन्महागजे ।
स्वर्णाम्बालिकया युक्ते तथाऽन्याश्च रथादिषु ॥८४॥
हारगुच्छार्चितान् सर्वान् ससैन्यो भूपतिस्तदा ।
निन्ये स्वां नगरीमन्तःप्रागस्थां च विभूषिताम् ॥८५॥
भ्रामयितुं राजमार्गे वाद्यकीर्तनगीतिभिः ।
गोपुरेऽपूजयत् कृष्णं प्रधानाः श्रेष्ठिनस्ततः ॥८६॥
चत्वरादौ धनाढ्याश्चापणेषु पणिनस्तथा ।
रथ्यामुखेषु चिल्ल्यश्च नार्यो भावभरास्तदा ॥८७॥
पुपूजुः परमात्मानं हारचन्दनकुंकुमैः ।
अक्षताद्यैः फलैर्नारिकेलाद्यैः शर्करादिभिः ॥८८॥
कृतकृत्याश्चाभवंश्च वीक्ष्य प्रपूज्य माधवम् ।
ततो राजाऽऽनयत् कृष्णं निजं विशालमन्दिरम् ॥८९॥
आरार्त्रिकं चकाराऽथ मुकुटं मस्तके ददौ ।
कण्ठे सौवर्णरत्नानां हारान् ददौ नृपस्तदा ॥९०॥

चरणामृतपानं च प्रचकाराभिपूज्य च ।
कृतार्थोऽस्मीत्युवाचाऽथ राज्ञी पूजां व्यधापयत् ॥९१॥
सुवर्णमुद्रास्थालं श्रीहरेश्चरणयोर्न्यधात् ।
चन्दनाऽक्षतपुष्पाद्यैरानर्च परमेश्वरम् ॥९२॥
अस्यास्तु कन्यकाश्चिल्ल्यो युवत्यो भक्तिसंयुताः ।
चतस्रोऽपि हृदि कृत्वा मात्राज्ञया तु मालिकाः ॥९३॥
हरेः कण्ठे न्यधुर्हृष्टाश्चार्पणविधिना पतिम् ।
प्राप्य कृतार्थकार्यास्ता बभूवुर्भाग्यनोदिताः ॥९४॥
राजा चातिप्रसन्नोऽभून्महोत्सवमकारयत् ।
हरिश्चोपादिदेशाऽथ राधे प्रजाजनान् निशि ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आश्विनकृष्णद्वितीयायां प्रातः फान्कलाशीनगर्यां गमनं भ्रमणं पूजनं भोजनमुपदेशनं विदार्य मध्याह्नोत्तरम् आण्डजरानृपराष्ट्रगमनम् आन्तःप्रागस्थानगर्यां भ्रमणं पूजनं चेत्यादिनिरूपणनामा विंशत्यधिकद्विशततमोऽध्यायः ॥ २२० ॥

**श्रीकृष्ण उवाच—**

राधिके श्रीहरिः स्वस्थः स्वर्णसिंहासनस्थितः ।
उपादिदेश चिल्ल्याख्यप्रजाभ्यः सुहितावहम् ॥ १ ॥
प्रज्ञा प्रतिष्ठा जीवानां प्रज्ञा मोक्षकरी मता ।
मानवं देहमासाद्य प्रज्ञया हरिमाप्नुयात् ॥ २ ॥
प्रज्ञा निःश्रेयसी शुद्धा प्रज्ञा स्वर्गसुखप्रदा ।
प्रज्ञया प्राप्यते चार्थः प्रज्ञावान् वै सदा सुखी ॥ ३ ॥
पाणिपादयुतो लोके मानवः पुण्यवान्मतः ।
पाणिभ्यां प्रज्ञया बुध्वा प्रसेवेत प्रभुं सतः ॥ ४ ॥
नान्यसक्तमनाः स्याद्वै विहाय परमेश्वरम् ।
भवन्त्येके सुखितराः सन्त्यन्ये भृशदुःखिताः ॥ ५ ॥
नैकान्तं सुखमेवेह भवते कस्यचित् क्वचित् ।
जना धनाढ्यतां प्राप्य राज्यमिच्छन्ति चोत्तमम् ॥ ६ ॥
ततो देवत्वमिच्छन्ति ततश्चेन्द्रादिपूज्यताम् ।
ब्रह्मतां चेश्वरभावं मोक्षं नेच्छन्ति वै क्वचित् ॥ ७ ॥
प्रज्ञा विवेकसम्पन्ना मोक्षदात्री भवत्यतः ।
प्रज्ञया लभ्यते मोक्षो ब्रह्मलोके ध्रुवा स्थितिः ॥ ८ ॥
प्रज्ञानं ब्रह्म चेत्येतत् हृदयेऽपि व्यवस्थितम् ।
उपासनीयं सततं परंब्रह्म सनातनम् ॥ ९ ॥
ब्रह्मरसप्रसक्तस्य कामोऽन्यो नैव जायते ।
संस्पर्शाद् दर्शनाद्वाऽपि श्रवणाद् ब्रह्मणस्तथा ॥१०॥
सेवनाद्ध्यानकरणाद्ब्रह्मरसपरो भवेत् ।
तं विना न भवेत् तृप्तिः प्रियलाभेऽपरे क्वचित् ॥११॥
तृष्णा शाम्यति नाद्भिर्वै भूयो ज्वलति भोगकैः ।
प्रज्ञया सा समूला वै नश्यत्येव न संशयः ॥१२॥
काम्यकर्मोद्भवं छित्वेन्द्रियाणि विनियम्य च ।
आत्मभावेन वर्तेत तस्य तृष्णा विनश्यति ॥१३॥
अप्राशनमसंस्पर्शमसन्दर्शनमित्यपि ।
अरसनं चाऽश्रवणं चाऽघ्राणनं च नेहनम् ॥१४॥
इत्येवं नियमे श्रेयः परं प्रज्ञाकृतं भवेत् ।
पाणियन्तो बलवन्तो धनवन्तोऽपि देहिनः ॥१५॥
तृष्णादास्यपरा भूत्वा क्लिश्यन्ते वधबन्धनैः ।
रुदन्त्यपि रमन्ते च मोदन्ते च हसन्त्यपि ॥१६॥
एवं लोका बहुबला लब्धविद्या मनोहृताः ।
जुगुप्सितां कृपणां च हीनवृत्तिमुपासते ॥१७॥
उत्सहन्ते च वर्धन्ते पतन्त्यपि रुदन्ति च ।
न भेको वा वराहो वा श्वाऽऽत्मानं त्यक्तुमिच्छति ॥१८॥
पुष्कसो वाऽपि चाण्डालो बद्धः कीटोऽपि वर्ष्मणि ।
स्वया योन्या महातुष्टः स्थातुमिच्छति मायया ॥१९॥
दृष्ट्वा व्यंगान् पक्षहतान् कुणीन् कुष्ठिन इत्यपि ।
स्वस्थोऽपि भजते नैव हरिं मां मायया हतः ॥२०॥
तस्माद् विचार्य मनसा विनिर्णीय च प्रज्ञया ।
भजेन्मां परमात्मानं त्यक्त्वाऽऽसक्तिं च मोहनम् ॥२१॥
ध्यानं शुद्धिं जपं पूजां वृद्धपित्रादिसेवनम् ।
सतां सेवां मम भक्तिं कुर्याच्छ्रेयो विधित्सया ॥२२॥
सति राज्ये गृहस्मृद्धौ सत्कार्याणि समाचरेत् ।
सुनक्षत्रे पुण्यकाले सुतिथौ सुमुहूर्तजाः ॥२३॥
यज्ञदानादिभिः पुण्ये यतन्ते साधुशीलिनः ।
तेषां प्रज्ञा परब्रह्मयोगाच्छीघ्रं प्रकाशते ॥२४॥
प्रज्ञया याति परमं धाम मे शाश्वतं सुखम् ।
ये नक्षत्रेष्वासुरेषु दुःस्थितौ दुर्मुहूर्तजाः ॥२५॥
ते पतन्त्यासुरीं योनिं प्रज्ञाहीनाः क्रतुद्विषः ।
शृगालश्वखरनिं यान्ति श्रेयस्तेषां न विद्यते ॥२६॥
सन्तुष्टश्चाऽप्रमादश्च यज्ञदानतपःप्रियः ।
साधुसेवापरः प्रज्ञाश्रयो याति परां गतिम् ॥२७॥
प्रियदेवाऽऽतिथेयाश्च सेवकाः प्रियसाधवः ।
हर्यर्थे कृतसर्वस्वाः प्रयान्ति परमां गतिम् ॥२८॥
उत्सवादुत्सवं यान्ति हर्षाद्धर्षं पुनः पुनः ।
स्वर्गात्स्वर्गं परं यान्ति साधोर्मे च प्रसेविनः ॥२९॥

खलाः शठाश्च धूर्ताश्च वञ्चका ये तु पापिनः ।
आत्मनाऽनर्थयुक्तेन निविशन्तेऽघकर्मसु ॥३०॥
पुनश्च कलुषं कृत्वा कृच्छ्रे लोके भवन्ति ते ।
दुर्भिक्षादेव दुर्भिक्षं क्लेशात्क्लेशं पुनः पुनः ॥३१॥
भयाद्भयं तथोद्वेगादुद्वेगं सम्प्रयान्ति ते ।
मृत्योर्मृत्युं पुनर्यान्ति दरिद्राः पापकर्मिणः ॥३२॥
तुषा यथा तु धान्येषु मशका इव पक्षिषु ।
तद्विधास्ते मानवेषु धर्मकर्मविवर्जिताः ॥३३॥
पच्यन्ते कणवत् गर्भवह्नौ कालेन भर्जिताः ।
विना प्रज्ञां परं श्रेयो नाप्नुवन्ति कथंचन ॥३४॥
उद्विग्नास्ते प्रधावन्ति संसारारण्यमुन्मुखाः ।
कृतं कर्माऽनुगं भूत्वा धर्तुं धावति ताँस्ततः ॥३५॥
सुप्तौ सुषुप्तौ विजने जाग्रत्यपि न मुञ्चति ।
लग्नं छायेव सततं तं विमुच्य न गच्छति ॥३६॥
कर्माकृष्टं पराधीनं वासनापरिसंवृतम् ।
विलोक्य च महाकालो दुःखाब्धौ परिकर्षति ॥३७॥
स्वकर्मफलनिःक्षेपं कालो ददाति कर्मिणे ।
यथावृक्षेषु कालेन पुष्पाणि च फलानि च ॥३८॥
जायन्ते नातिवर्तन्ते तथा कर्म पुराकृतम् ।
आत्मना कृतशेषेण गर्भशय्यां प्रयाति च ॥३९॥
बालो युवा च वृद्धश्च तत्फलं प्रतिपद्यते ।
प्रज्ञाऽग्निना विशुद्धस्य दीर्घं सुखमनन्तकम् ॥४०॥
प्रज्ञया धूतपापानां नष्टरागद्विषां सताम् ।
परमेशे प्रसक्तानां प्रपद्यतेऽक्षयं सुखम् ॥४१॥
प्रज्ञावान् कुरुते यद्यत् तत्सर्वं बन्धनाय न ।
प्रज्ञया मयि युक्तो यस्तस्य कर्म न विद्यते ॥४२॥
जले झषाणां गगने पक्षिणां न यथा पदम् ।
दृश्यते न तथा कर्म मयि भक्तस्य वेदिनः ॥४३॥
ज्ञानविदां गतिश्चैषा ब्रह्मधामपरायणा ।
साध्या तु प्रज्ञया साध्व्या मानवैर्वै मुमुक्षुभिः ॥४४॥
सर्वभूतेषु गूढोऽहं चान्तरात्मा वसामि वै ।
प्रज्ञया त्वग्र्यया तत्त्वदर्शिन्या लभ्य एव ह ॥४५॥
मत्प्रसादकृताहारो मत्साधुकृतसमागमः ।
युञ्जानो मयि चात्मेशे ब्रह्मतुल्यः प्रजायते ॥४६॥
चित्तस्य च प्रसादेन समर्प्य मयि मानसम् ।
निर्मलात्मा प्रसन्नात्मा निवेदितात्मा तिष्ठति ॥४७॥
मयि कृष्णे परे स्थित्वा सुखाऽऽनन्त्यं समश्नुते ।
अनन्ताऽपारमानन्दं समश्नुते स्थिरायतिः ॥४८॥
सर्वोपायैर्महातृष्णां लोभं क्रोधं जयेत् सदा ।
तदा प्रज्ञाकृतं ज्ञानं पावित्र्यं समुपैति ह ॥४९॥
आत्मसंयम एवास्ति मोक्षात्मा वृषसत्तमः ।
तेनाऽऽत्मनाऽऽत्मनि तिष्ठेन्मयि नारायणे सदा ॥५०॥
एवं वै वर्तमानस्य मोक्षः करतले स्थितः ।
हृदयस्थोऽहमेवाऽस्य मुक्तिदोग्धा भवामि वै ॥५१॥
इत्युपादिश्य भगवान् कांभरेयो महाप्रभुः ।
मन्त्रान् ददुः प्रजाभ्यश्च चक्रुः पूजां हरेः प्रजाः ॥५२॥
द्रव्याणि चार्पयामासुर्वस्त्राणि भूषणानि च ।
सुवर्णानि च रूप्याणि ददुः श्रीहरये प्रजाः ॥५३॥
ततो रात्रौ नृपतिर्वै भोजयामास माधवम् ।
कुटुम्बं च महर्षींश्च भोजयामास कन्यकाः ॥५४॥
ततो विश्रान्तिमापाऽथ निद्रां जग्राह केशवः ।
कन्यकास्ता निजं कान्तं परेश्वरं सिषेविरे ॥५५॥
प्रातर्वाद्यनिर्घोषैश्च गीतिभिर्मंगलस्वनैः ।
वेदघोषैश्च विप्राणां प्रबुबोध हरिस्ततः ॥५६॥
कृताह्निकः कृतपूजः कृतदुग्धफलादनः ।
राज्ञा राज्ञ्या पूजितश्च स्वर्णसिंहासने स्थितः ॥५७॥
अन्यान्नृपः पयःपानं कारयामास सार्थकान् ।
तावत्प्रजाः पूजनार्थं दर्शनार्थं समाययुः ॥५८॥
मन्त्राग्निकर्षये कृष्णो धनादीनि ददौ तदा ।
समागतश्चाण्डजरान्नृपभ्राता हरिं नमन् ॥५९॥
कुर्वंश्च दण्डवत् प्राह निजां पुरीं सुशोभनाम् ।
मन्त्रिणांगां पावयितुं नाम्ना बाल्यरजो नृपः ॥६०॥
हरिस्तथाऽस्त्विति प्राह चाण्डजराप्रपूजितः ।
विदायेन यौतकेन सह सम्वन्दितः प्रभुः ॥६१॥
महीमानैर्युतः शीघ्रं विमानमारुरोह च ।
राजाऽनुजो ययौ सार्धं विमानेन तदाऽम्बरे ॥६२॥
विदायमानवाद्यानि चावाद्यन्त मुहुर्मुहुः ।
प्रससार विमानं च हरेरग्रेऽम्बरे तदा ॥६३॥
राज्ञो विमानं पुरतो याति वै वेगतस्तदा ।
मन्त्रिणांगां तु नगरीं प्रति चाध्व्यनुमार्गगम् ॥६४॥
सैन्यमासीत्तत्र युक्तं स्वागतार्थं पुरैव ह ।
तद् दृष्ट्वा च विमानं वै सूर्यतुल्यं महोज्ज्वलम् ॥६५॥
स्वागतं मानवाश्चक्रुर्ध्वजैः पताकिकादिभिः ।
राजा ह्यवातरत् पूर्वं ततो हरेर्विमानकम् ॥६६॥
अवातरत् समुद्याने मन्त्रिणांगासमीपतः ।
सम्मानं तत्र वै राज्ञी पुरः स्थित्वा चकार ह ॥६७॥

विमानस्थं हरिं नत्वा पुपूज हारपुष्पकैः ।
अक्षतैश्चन्दनैश्चापि प्रक्षाल्य चरणौ पपौ ॥६८॥
राजसौधे हरिं नीत्वा वासयामास चेश्वरी ।
आरार्त्रिकं चकाराऽथ कन्यैका युवती सती ॥६९॥
अनादिश्रीकृष्णनारायणाय वरमालिकाम् ।
कण्ठे ददौ तदा राजा महोत्सवमकारयत् ॥७०॥
भोजनं प्रददौ बालकृष्णादिभ्यस्ततः परम् ।
आश्वरथे निषाद्यैव भ्रामयामास पत्तने ॥७१॥
प्रजाः पुपूजुः श्रीकृष्णवल्लभस्वामिनं मुदा ।
मध्याह्ने तु विशश्राम हरिस्तावन्नृपः स्वयम् ॥७२॥
पादसंवाहनं चक्रे बालकृष्णस्य वै तदा ।
सायं विमानमारुह्य बभ्राम सागराम्बरे ॥७३॥
तृतीयायां तदा सायं नेतुं श्रीबालकृष्णकम् ।
पात्रगोनयराष्ट्रेशो रायसोमनभूपतिः ॥७४॥
निजं देशं पावयितुं नेतुं कृष्णं समाययौ ।
हरिर्विहृत्य चावासं त्वाययौ तत्र भूपतिः ॥७५॥
नेमे रायसोमनश्च प्रार्थयत्परमेश्वरम् ।
हरिस्तथाऽस्त्विति प्राह जलं पीत्वा विमानकम् ॥७६॥
अध्यारुरोह शीघ्रं च सर्वसार्थसमन्वितः ।
वायुमाननगरीं वै गन्तुं सज्जोऽभवत्तदा ॥७७॥
राजा विदायं पूजां च यौतकं प्रददौ मुदा ।
विमानं प्रैरयत् कृष्णो रायसोमनबोधितः ॥७८॥
शृण्वन् विदायमानार्थवाद्यानि भगवान् स्वयम् ।
आययौ नगरीं दिव्यां वायुमानां सुशोभनाम् ॥७९॥
नदीतीरस्थितां रम्यां दृष्ट्वा कृष्णो विमानकम् ।
राजदर्शितमार्गेणाऽवातारयन्नदीतटे ॥८०॥
तदा वाद्यान्यवाद्यन्त स्वागतं बहुधाऽभवत् ।
वर्धयामासुरत्यर्थं पुष्पाक्षतादिभिः प्रजाः ॥८१॥
हरिर्विमानतश्चायाद् बहिः स्वर्णासने तदा ।
निषसाद स्वयं राजाऽपूजयत् पुष्पमालया ॥८२॥
चन्दनाक्षतपुष्पाद्यैः सुगन्धिद्रवसेचनैः ।
राज्ञी पुपूज च प्रीत्या नीराजनं चकार ह ॥८३॥
राजा गजे निषाद्यैव भ्रामयामास पत्तने ।
प्रधानाः श्रीहरिं तत्राऽऽनचुर्गोपुरचत्वरे ॥८४॥
महापथे समानर्चुः श्रेष्ठिनो धनिनस्तथा ।
रथ्यामुखेषु नार्यश्च स्थानिनो गृहसन्निधौ ॥८५॥
पुपूजुः श्रीपतिं नार्यो गीतिभिः कीर्तनं जगुः ।
एवं हरिं भ्रामयित्वा नगर्यां च नृपो निजे ॥८६॥
मन्दिरे त्वानयामास रात्रौ कृष्णनरायणम् ।
आरार्त्रिकं चकारापि राज्ञी पुपूज वस्तुभिः ॥८७॥
तिस्रः कन्या हरेः कण्ठे वरमालां न्यधुस्तदा ।
पतिं प्राणेश्वरं प्राप्य कृतकृत्याश्च ताः शुभाः ॥८८॥
अभवन् राधिके श्रीमत्कृष्णनारायणः प्रभुः ।
भोजनानि तदा रात्रौ जग्राह सार्थकान्वितः ॥८९॥
आश्विनाऽसिततृतीयरात्रौ विश्रान्तिमाप च ।
सिषेविरे च नाथं स्वं कन्यास्तिस्रोऽतिभावतः ॥९०॥
हरिर्जग्राह वै निद्रां प्रातर्बुबोध मंगलैः ।
वाद्यघोषैर्गीतिभिश्च वेदमन्त्रैश्च कीर्तनैः ॥९१॥
सूतमागधबन्दीनां प्रशंसावाक्यकाव्यकैः ।
कृतस्नानाह्निकः कृष्णो ववन्दे पितरौ निजौ ॥९२॥
दुग्धपानादिकं चक्रे चतुर्थ्यां प्रातरेव सः ।
प्रजास्त्वाययुरीशेशपूजार्थं प्रातरेव ह ॥९३॥
राजा पुपूज पूर्वं तं प्रजाश्चानर्चुरच्युतम् ।
ततो ददौ हरिर्द्रव्यं बालद्विजर्षये धनम् ॥९४॥
रायसोमननृपतिर्बालद्विजऋषिस्तथा ।
सन्तुष्टौ परमौ जातौ प्रजास्तुष्टास्तथाऽभवन् ॥९५॥
हरिश्चोपादिदेशाऽथ राधिके हितकृत्तदा ।
अनादिश्रीकृष्णनारायणोऽवतारकारणम् ॥९६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आन्तःप्रागस्थनगर्यामुपदेशनं भोजनं रात्रौ विश्रमणम् आश्विनकृष्णतृतीयायां प्रातर्त्राल्यरजोनृपराष्ट्रगमनं मन्त्रिणांगानगर्यां भ्रमणं पूजनं भोजनं विदायं यौतकं सायं च रायसोमननृपराष्ट्रगमनं वायुमानानगर्यां स्वागतं भ्रमणं पूजनं भोजनं रात्रौ विश्रमणं चेत्यादिनिरूपणनामैकविंशत्यधिकद्विशततमोऽध्यायः ॥२२१॥

श्रीकृष्ण उवाच—

राधिके श्रीबालकृष्णश्चोपादिदेश तत्प्रजाः ।
प्रातरेव नृपसौधे विशाले हितकृत्प्रभुः ॥ १ ॥
रायसोमननृपतिः शुश्राव सकुटुम्बकः ।
नरा नार्यः प्रधानाद्याः सहस्रशोऽपि शुश्रुवुः ॥ २ ॥
हरौ त्यागः सदा कार्यः प्रवृत्तेः कर्मणां तथा ।
एवं त्यागी तु नैर्गुण्यं विन्दति मोक्षसाधनम् ॥ ३ ॥
त्यागे यस्य हुतं कर्म न तस्य फलदं भवेत् ।
निर्बन्धान् सम्परित्यज्य रागहीनो भवेत् सदा ॥ ४ ॥

अशोकं मां परब्रह्माऽऽतिष्ठेद् येन महत्सुखम् ।
अजितं तु जयेत् प्राज्ञो मनः संगेष्वसंगतः ॥ ५ ॥
इन्द्रियैर्गृह्यते यत् तत् त्याज्यं ग्राह्यं न भावतः ।
मनो निगृह्य वै प्राणान् धारयेत् परमात्मनि ॥ ६ ॥
एवं धारणया स्याद्वै निर्वाणं शाश्वतं सुखम् ।
सुखं वै ब्रह्मणः प्राप्यं ब्रह्मार्पणेन सर्वथा ॥ ७ ॥
सत्यं ब्रह्म सदा ग्राह्यं चानृतं हेयमेव च ।
अनृतं तु तमः प्रोक्तमान्ध्यप्रदं च गर्तदम् ॥ ८ ॥
वासनारज्जुयुक्तस्य गर्ते पतनमास्थितम् ।
अवासनस्य तृप्तस्य प्रकाशो धामदः स्मृतः ॥ ९ ॥
प्रकाशं तु समालम्ब्य यतेत दुःखहानये ।
तमोनाशाय सततं सतां समागमादिभिः ॥१०॥
शारीरैर्मानसैर्वापि दुःखैर्नोद्विजते तु यः ।
मम संगी सुखं वेत्ति स एव मम मार्गगः ॥११॥
यत्र दुःखं स निरयः सुखं तु परमं पदम् ।
त्यक्तदुःखसमारम्भः स्वर्गस्तस्य न दुर्लभः ॥१२॥
ब्रह्मव्रतेन दोषांश्च दग्ध्वा जयेत्परं पदम् ।
मुक्त्याश्रमं यश्चरते मुक्तबुद्धिर्हरिप्रियः ॥१३॥
सर्वं हुत्वा हरौ ब्रह्मलोकं जनः स विन्दति ।
सन्तः सेव्या ब्रह्मभक्ता ब्रह्मासिस्तेन जायते ॥१४॥
आचारनिरताः सन्तो मम भक्तिपरायणाः ।
पाल्यः सदा शुभाचारो गृहस्थैरपि भूतये ॥१५॥
शौचमावश्यकं कार्यं देवानां पूजनं तथा ।
पितॄणां तर्पणं चापि वृद्धानां माननं तथा ॥१६॥
सूर्यं सदोपतिष्ठेत सन्ध्याकाले हरिं स्मरेत् ।
शुचिः कुर्याद् भोजनं च न निन्द्यान्मानवादिकान् ॥१७॥
देवालयं गुरुं साधुं साध्वीं वृषं चतुष्पथम् ।
धार्मिकं दिव्यपुरुषं नित्यं कुर्यात् प्रदक्षिणम् ॥१८॥
अतिथीनां च भृत्यानां रक्षणं भोजनादिभिः ।
अनाथानां चोपकारं कुर्याच्छक्तो भवेद्यदि ॥१९॥
द्विवारं चैकवारं वा भोजनं नाऽन्तरा तु तत् ।
एवं भक्षयिता प्रोक्तश्चोपवासी सदा सुखी ॥२०॥
यज्ञकार्ये प्रदाता च ऋतौ दानी न चान्यथा ।
एवं दान्तो ब्रह्मचारी सदा भवति शोभनः ॥२१॥
अमृतं देवभुक्तं वै पथ्यं तथाऽमृतं मतम् ।
पांक्तं ग्राह्यं यस्य सोऽस्ति देववन्मानवः सुखी ॥२२॥
सन्तस्तूपासते देवप्रसादं चायुषः प्रदम् ।
सन्तश्चोपासनीया वै प्रसादकामनावता ॥२३॥
गुरोः सेवा प्रकर्तव्या कर्तव्यं चाभिवादनम् ।
गुरूनभ्यर्च्य युज्यन्ते ह्यायुषा यशसा श्रिया ॥२४॥
तीर्थानां गुरवस्तीर्थं शुचीनां गुरवः शुचिः ।
शिष्टकृतं प्रशस्तं तद् गोपुच्छं पावनं सदा ॥२५॥
दर्शने स्पर्शने नित्यं गुरुं साधुं हि सेवयेत् ।
साधोर्वै मस्तकं केशाः रोमाणि पावनानि वै ॥२६॥
सतां पादरजो मोक्षप्रदं पापप्रणाशकम् ।
साधूनां स्पर्शनं पुण्यं नेत्रे पुण्ये सदा मते ॥२७॥
कर्णौ पुण्यौ हि साधूनां नासा पुण्या सुगन्धिनी ।
भालं वै तु सतां पुण्यं गण्डगालौ हि पुण्यकौ ॥२८॥
कपोलौ सर्वथा पुण्यौ हास्यं पुण्यं मनोहरम् ।
दन्ता जिह्वा तथौष्ठौ च पुण्यदाः पावनाः सताम् ॥२९॥
कण्ठः पुण्यस्तथा शब्दो वाणी पुण्या सरस्वती ।
कथा पुण्या हि साधूनां पुण्यदा संगतिः सताम् ॥३०॥
स्कन्धौ पुण्यौ बाहुहस्तौ पुण्यौ करांगुलिव्रजाः ।
नखाः पुण्याश्च रेखाश्च प्रकोष्ठः पुण्यदस्तथा ॥३१॥
कफोणिका तथा चिपीटिका पुण्या सतां सदा ।
हस्ततले सदा पुण्यप्रदे वक्षश्च पुण्यकृत् ॥३२॥
स्तनचिह्नौ सदा पुण्यौ नाभिः पुण्या च पावनी ।
उदरं पुण्यकृच्चापि कटिः पुण्यतमा सताम् ॥३३॥
गुह्यं सुपावनं चापि जघनं पावनं सदा ।
नितम्बौ पावनौ चापि सक्थिनी पावने तथा ॥३४॥
इन्द्रियाणि पावनानि जानू च पावनौ सदा ।
जंघे पावनकारिण्यौ घूटिके पावने तथा ॥३५॥
पत्तले चरणौ चांगुलिका नखाश्च पावनाः ।
त्वङ्मांसं रुधिरं दिव्यं दिव्यं तथाऽस्थिमण्डलम् ॥३६॥
मज्जा मेदो रसश्चापि पावना धातवः सताम् ।
श्रीहरेरिव साधूनां सर्वं पावनकारकम् ॥३७॥
त्रिविधा भगवत्पुत्राः पावना भगवानिव ।
सन्तो वै भगवत्पुत्रा दीक्षिताश्च गृहाश्रमाः ॥३८॥
वंशोद्भवास्तथा पुत्रास्त्रयस्ते पावनोत्तमाः ।
भगवद्भक्तिसम्पन्नास्तुर्यास्ते पावना अपि ॥३९॥
दीक्षया कर्मणा भक्त्या ज्ञानेन च समन्विताः ।
सन्तः श्रीहरितुल्यास्ते पावना जगतां मताः ॥४०॥
तत्प्रसादः पापहर्ता तज्जलं गांगतोऽधिकम् ।
तत्सेवा पापहा सर्वा ब्रह्मार्पणं तदर्पणम् ॥४१॥
साधवो यं तु वृक्षादिं स्पृशन्ति तरवोऽपि ते ।
दिव्या मोक्षप्रदा लोके जायन्ते पापनाशकाः ॥४२॥

यद्वस्त्रं धार्यते सद्भिः कार्पासं वौर्णमेव वा।
कौशेयं द्रुत्वक्स्वरूपं दिव्यं तत्पावनं सदा ॥४३॥
पशुः पक्षी जनो वाऽन्यः साधुना स्पृष्ट एव यः।
स वै दिव्यो भवत्याशु भूतपिण्डोऽप्यलौकिकः ॥४४॥
अशुद्धं जायते शुद्धं साधुस्पर्शेन पावनम्।
पापं पापतरं वापि साधुस्पर्शाद् विशुद्ध्यति ॥४५॥
साधुना यद् धृतं देहे तच्छुद्धं नात्र संशयः।
जलं तीर्थं भवत्याशु साधुना सेवितुं तु यत् ॥४६॥
पृथ्वी सता सेविता च तीर्थीभूता भवत्यति।
पत्रं पुष्पं फलं तोयं धार्यं भक्ष्यं च वाऽपरम् ॥४७॥
यद्यत् साधुप्रसंगं वै प्राप्तं शुद्धं हि तन्मतम्।
साधुसेवी सदा शुद्धः साध्वी दिव्या हरेस्तनूः ॥४८॥
वाहनं चासनं वाच्यं शुद्धं साधुप्रसेवितम्।
सायं प्रातश्च साधूनां पूजनं स्वर्गमोक्षदम् ॥४९॥
साधुसेवा परो धर्मः साधुसेवा धनं परम्।
साधुसेवा परः कामो मोक्षोऽपि साधुसेवनात् ॥५०॥
हृदयं साधुवृत्तानां साधुतां याति सर्वथा।
सञ्चितं साधुताद्रव्यं परे धाम्नि सहायदम् ॥५१॥
साधुता सर्वभूतानां शान्तिदा क्षेमवाहिनी।
अर्जयेत् साधुतां तस्माद् धाममार्गे सहायिनीम् ॥५२॥
देवर्षिपितॄणां योनिः साधुता ब्रह्मसेविनाम्।
मुक्तानां साधुता योनिस्तां सेवेत सदा बुधः ॥५३॥
मरणं ध्रुवमेवाऽस्ति कृतं भुक्तं गतं तु तत्।
नूतनं नार्जितं पुण्यं भविष्यति किमत्स्यसि ॥५४॥
इत्येवं सम्विचार्यैव पुण्यप्रदा हि साधवः।
सेवनीया हि सततं पितरो देवतास्तथा ॥५५॥
सेवाफलं महत्स्वर्गं त्वग्रे स्थास्यति निश्चितम्।
प्रसन्नताफलं गुरोश्चाग्रे स्थास्यति निश्चितम् ॥५६॥
इति निर्णीय सततं सेव्यन्तां साधवोऽमलाः।
भगवन्मूर्तयः सन्ति साधवः सुप्रतिष्ठिताः ॥५७॥
यस्मात् सृष्टिरियं जाता यतोऽवतारकोटयः।
यस्मादैश्वर्यमासाद्य जायन्ते चेश्वरादयः ॥५८॥
ऋषयः पितरो देवा यमर्चयन्ति नित्यशः।
यतः सूर्यादयस्तेजःप्रधानाः संभवन्त्यपि ॥५९॥
यतो भूतानि जायन्ते यस्मात् ह्रियन्त एव च।
इन्द्रियाणि मनो बुद्धिर्यस्माज्जातानि सन्ति च ॥६०॥
तत्र साक्षी स्थितो देवश्चेतनोऽनुक्रियापरः।
तं नियम्याऽऽन्तरे चास्ते यः प्रभुः पुरुषोत्तमः ॥६१॥
येन सर्वमिदं व्याप्तं वर्तते चापियाति च।
तं समाश्रित्य देवेशं लभते शममुत्तमम् ॥६२॥
त्यक्त्वा वै प्राकृतं भावं दिव्यभावमुपेत्य यः।
आत्मरतिर्भवेद् भक्तः स गच्छेत्परमां गतिम् ॥६३॥
यथा वारिचरः पक्षी वारिणा नहि लिप्यते।
कृतप्रज्ञस्तथा लोके स्थितश्चापि न लिप्यते ॥६४॥
इष्टदेवकृपाप्राप्ततुष्टिसन्तोषवान् नरः।
अशोचन्नप्रहृष्यँश्च तिष्ठते चोर्णनाभिवत् ॥६५॥
वासनाख्यां दृढां ग्रन्थिं हृदयस्थां निजात्मनः।
विच्छित्वा सुखमासीत परंधाम स चाप्नुयात् ॥६६॥
मलिनो जलमादाय यथा शुद्ध्यति चाप्लुतः।
तथा मायाकलुषोऽपि शुद्धिं याति सतां ग्रहात् ॥६७॥
महारण्यस्य पारज्ञो न वै मुह्यति तत्र वै।
तथा मायान्तविज्ञाता न वै तत्त्वेषु मुह्यति ॥६८॥
त्रिवर्गो यस्य विदितः प्रेक्ष्य भुक्त्वा प्रमुञ्चति।
अबद्धस्य निरीहस्य ब्रह्ममार्गः प्रकाशते ॥६९॥
विदुषां न भयं चास्ति त्वज्ञानां निर्भयं न वै।
उभयेषां हरेर्योगे चात्यन्तिकभयं न वै ॥७०॥
यत्कार्यं जायते लोकेऽनभिसन्धिप्रपूर्वकम्।
न तद् बन्धाय जायेत प्रियं वाऽप्रियकं समम् ॥७१॥
लोकमातुरमालोक्य साधूँश्चाऽनातुराँस्तथा।
साधुवृत्तिं समाश्रित्य मां भजेद् यस्तरेद्धि सः ॥७२॥
शोचतो नैव पश्येद्धै येन शोको न नश्यति।
अशोचतः सदा पश्येद् येनाऽऽप्येत सतां सुखम् ॥७३॥
सतां मार्गानुसारेण ये प्रयान्ति जनास्त्विह।
सतां गतिं लभन्ते ते प्रयान्ति परमं पदम् ॥७४॥
यत्राऽहं सततं चाऽस्मि विराजितो महाहरिः।
अनन्तकोटिमुक्तैः संसेवितो ध्यात एव च ॥७५॥
इत्युक्त्वा राधिकेऽनादिकृष्णनारायणः प्रभुः।
विरराम ददौ मन्त्रान् वैष्णवान् वै तदा स्वयम् ॥७६॥
राजा प्रजाः पुनः कृष्णं पुपूजुर्बहुवस्तुभिः।
हरिर्गन्तुमियेषाऽथ राजा ददौ विदायकम् ॥७७॥
यौतकं च ददौ श्रेष्ठं हरिः सज्जो बभूव ह।
तावत्तत्र समायातो राजारायपतिर्नृपः ॥७८॥

राजगिरर्षिसहितः प्रार्थयितुं प्रभुं हरिम् ।
नेतुं स्वकीयभवनम् आर्षजतनुराष्ट्रकम् ॥७९॥
श्येनोजराशानगरीं परीभासरितस्तटे ।
आवासयितुं सततं भगवन्तं तदाऽऽर्थयत् ॥८०॥
हरिः कृपावशस्तस्मै तथास्त्विति न्यवेदयत् ।
अद्य वै समयो नास्ति गन्तव्यं त्वधरे द्रुतम् ॥८१॥
श्वः पञ्चम्यां भवेद् यज्ञारम्भो ब्राह्मीलराष्ट्रके ।
तस्माद् यज्ञं समाप्यैव त्रयोदश्यां प्रगे नृप ॥८२॥
भवद्राज्ये समायास्ये सायं नैवात्र संशयः ।
भवन्मनोऽनुसारेण स्थास्ये तवाऽऽलयेऽधिकम् ॥८३॥
भवता तु मखे तत्राऽऽगन्तव्यं पञ्चमीप्रगे ।
एकादश्यां तु मध्याह्ने समाप्तिः संभविष्यति ॥८४॥
इत्युक्तो हरिणा भूपः स्वीच्कार हरेर्वचः ।
पूजयित्वा ययौ नैजं राष्ट्रं तूर्णं विमानगः ॥८५॥
अथ राजा द्वितीयोऽपि समायाच्छ्रीहरिं प्रति ।
उरुगवाक्षनृपतिः रायग्रामापुरीपतिः ॥८६॥
उरोगमनराष्ट्रेशः प्रार्थयत्परमेश्वरम् ।
मानत्रिवेदऋषिराट् प्रार्थयच्चापि माधवम् ॥८७॥
मम राष्ट्रं प्रजाश्चापि पावयाऽऽगत्य केशव ।
हरिस्तथाऽस्त्विति प्राह सज्जो विमानगोऽभवत् ॥८८॥
सार्धा विमानगाश्चाप्यभवँस्तदा प्रजाजनाः ।
राजाद्याश्च विदाये वै जना नादान् समूचिरे ॥८९॥
बहुवाद्यान्यवाद्यन्त विमानं चाम्बरेऽभवत् ।
नतं प्रजाजनैः पुष्पाक्षताद्यैः पूजितं तु खे ॥९०॥
प्रससार ततश्चाग्रे उरोगमनराष्ट्रकम् ।
आययौ शीघ्रमेवेति राजा ह्यवातरत् पुरः ॥९१॥
सम्मानं स्वागतं चक्रे रायग्रामापुरीपतिः ।
शृंगारिताऽभून्नगरी प्रासादः शोभितोऽभवत् ॥९२॥
ध्वजाद्यैः पत्रकदलीस्तम्भतोरणस्वस्तिकैः ।
कलशै रंगवल्ल्याद्यैर्जलसेचनकैस्तथा ॥९३॥
एवंविधायाः पुर्याश्च सन्निधौ सागरान्तिके ।
विमानं श्रीहरेर्नैजं संकेतेनाऽनयद्भुवम् ॥९४॥
तदा वाद्यान्यवाद्यन्त जयशब्दास्तथाऽभवन् ।
मेर्याद्या नेदिरे नारीगीतयश्चाऽभवन् शुभाः ॥९५॥
यन्त्रीशब्दा गर्जनाश्च प्रजानां हर्षसद्गिरः ।
अभवन् स्वागतार्थं वै विमानं समवर्धयन् ॥९६॥
प्रजाः पुष्पाक्षताद्यैश्च हरिस्त्वग्रे समाययौ ।
वन्दितः पूजितो राज्ञा राज्ञ्या प्रजाभिरित्यपि ॥९७॥
निषसाद शुभे स्वर्णासने श्रीभगवाँस्तदा ।
राधिके स्तनकान् हारान् हरेर्गले ददौ नृपः ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पात्रगोनयराष्ट्रीयप्रजाभ्य उपदेशनं विदायं ततो राजारायपतिराज्यम् आर्षजतनुराष्ट्रं प्रति गमनप्रार्थनां स्वीकृत्य तत उरोगमनराष्ट्रं प्रति गमनं सम्माननमित्यादिनिरूपणनामा द्वाविंशत्यधिकद्विशततमोऽध्यायः ॥२२२॥

**श्रीकृष्ण उवाच—**

राधिके श्रीहरिं भ्रामयितुं स्वपत्तने नृपः ।
रायग्रामानगर्यां वै सैन्यं सज्जं समानयत् ॥ १ ॥
हरिं न्यषादयत्तत्र श्वेताऽश्वरथके शुभे ।
कुटुम्बं च तथा कन्या ब्रह्मप्रिया रथेषु च ॥ २ ॥
वादित्रनिनदैर्गीतैः सह कृष्णं पुरे नृपः ।
अभ्रामयत् सुखं तत्र गोपुरे तु प्रधानकाः ॥ ३ ॥
पुपूजुः परमात्मानं चत्वरे श्रेष्ठिसत्तमाः ।
रथ्यामुखेषु नार्यश्च मार्गे हट्टेषु वै प्रजाः ॥ ४ ॥
सुवर्णरूप्यमुद्राभिश्चन्दनाऽक्षतकुंकुमैः ।
अम्बरैः पुष्पहारैश्च नारिकेलफलादिभिः ॥ ५ ॥
एवं भ्रमित्वा नगरीं हरी राज्यालयं ययौ ।
उरुगवाक्षनृपतिः पुपूज परमेश्वरम् ॥ ६ ॥
चक्रेऽभिषेकं पयसा पादयोः परमात्मनः ।
ततो मिष्टजलैश्चापि शुद्धोदकेन वै ततः ॥ ७ ॥
पपुः राजकुटुम्बाद्याः श्रीहरेश्चरणामृतम् ।
राज्ञी पूजां चकाराथ नीराजनं व्यधादपि ॥ ८ ॥
कन्यके द्वे तदा कृष्णकण्ठे मालां तु कौसुमीम् ।
वरमालात्मिकां दीर्घां ददतुः शोभनव्रते ॥ ९ ॥
कृतकृत्ये तु ते जाते प्राप्य कान्तं श्रियाः पतिम् ।
राजा राज्ञी च मेनाते कृतकृत्ये तदा हृदि ॥१०॥
तदुत्सवं तदा राजा कारयामास शोभनम् ।
भोजयामास कृष्णं च महीमानान् समन्ततः ॥११॥
हरिर्द्रव्यं ददौ मानत्रिवेदमुनयेऽखिलम् ।
ततश्चोपादिदेशापि प्रजाभ्यस्तत्र माधवः ॥१२॥
वृत्तीनां विलये कृष्णो भासते हृदये सदा ।
ध्यानगम्यो भवत्येव नारायणपरेश्वरः ॥१३॥
ध्यानयोगेन मुनयः परां सिद्धिं गताः पुरा ।
गच्छन्ति च गमिष्यन्ति योगिनश्च परे तथा ॥१४॥

ध्यानज्ञानमहातृप्ता निर्वाणहृदया जनाः।
नाऽऽवर्तन्ते हि संसारे मुक्ताः संसारकर्दमात् ॥१५॥
रागद्वेषपरित्यक्ताश्चात्मभावे व्यवस्थिताः।
नित्यसत्त्वस्थिता मुक्ता नावर्तन्ते पुनः क्वचित् ॥१६॥
शान्तिप्रदानि कर्माणि संगहीनानि यानि च।
वादमायारहितानि कुर्वन्मां याति भक्तिमान् ॥१७॥
प्रातरुत्थाय च मनो नियम्य मम सन्निधौ।
मम मूर्तौ धारयेद्वै चिन्तयेत् प्रतिमां मम ॥१८॥
शब्दं स्पर्शं च रूपं वा रसं गन्धं ह्युपस्थितम्।
गृह्णीयान्नैव मद्ध्याता चिन्तयेन्नान्यवस्तुकम् ॥१९॥
इन्द्रियाणि मनः पिण्डीकृत्य मयि निरोधनम्।
कुर्याद् यस्तस्य मन्मूर्तिस्फुरणं हृदये भवेत् ॥२०॥
चञ्चलं वै मनो ध्याने मीनवद् यदि जायते।
समादध्यात्पुनर्मूर्तौ परावृत्य प्रसह्य तत् ॥२१॥
सभूषाम्बरवेषाढ्ये मयि ध्यानं पुरा चरेत्।
ततो वेषं विलीयैव मूर्तिमात्रं विचिन्तयेत् ॥२२॥
ततो दिव्यं हसन्तं च वदन्तं मां विचिन्तयेत्।
ततश्चानन्ददातारं त्वेकरूपं विचिन्तयेत् ॥२३॥
एवं मूर्तौ चेन्द्रियाणि मनोऽहंकारबुद्धयः।
विलीयन्ते शनैः प्रेम्णा तदा मोक्षमवाप्नुयात् ॥२४॥
योगिनां प्रगतिश्चैषा कर्मिणां न्यासलक्षणा।
बहिर्वृत्तानीन्द्रियाणि कृष्णार्थानि समानि च ॥२५॥
अर्पितानि विधेयानि सर्वार्पणेन कर्मिभिः।
शुद्धः सिद्धो मम भक्तः सर्वार्पणेन जायते ॥२६॥
शनैर्यत्रेन्द्रियग्रामो वेगलग्नो भवत्यपि।
विज्ञाय विषयं तं च मूर्तौ सम्परिकल्पयेत् ॥२७॥
तत्र तत्र स्थिरं चित्तं कर्तव्यं तु शनैः शनैः।
इष्टविषयदानेन तृप्तं स्थैर्यं व्रजिष्यति ॥२८॥
ततस्तं विषयं मूर्तौ विलीय प्रतिमां मम।
चिन्तयेत्तु शनैर्भक्तश्चैवं चिरेण शुद्ध्यति ॥२९॥
प्रसन्ने मम योगेन चित्ते सत्त्वोद्भवोत्तमः।
तेन स्नेहो मम भक्तिस्तेन मुक्तिर्भवेदनु ॥३०॥
ध्यानं तपो दमं क्षान्तिं व्यापारं चिन्तनादिकम्।
वाणीं चेष्टां गतिं सर्वां प्रवृत्तिं मयि चार्पयेत् ॥३१॥
एवं प्रवर्तकं यज्ञं मयि त्यक्त्वा सुखी भवेत्।
यद्वा सर्वविधेयानि पृष्ठे कृत्वा च निष्क्रियः ॥३२॥
भूत्वा प्रचिन्तयेन्मां वै मनसा मां जपेत् सदा।
विषयेभ्यो नमस्कुर्याद् व्यवहारं न भावयेत् ॥३३॥
हृद्यन्द्राण्य च मन्मूर्तिं तत्र लग्नो भवेत्ततः।
एवं मद्योगमापन्नश्चान्ते याति परं पदम् ॥३४॥
सर्वत्यागकृतश्चैवं निरिच्छस्य तु योगिनः।
ब्राह्मयास्तन्वाः समवाप्तिर्मत्तुल्यो जायतेऽक्षरे ॥३५॥
मम मूर्तिं स्मरेन्नित्यं जपेन्नाम ममोत्तमम्।
मदर्थं त्वाचरेत् सर्वं मम लोकमवाप्नुयात् ॥३६॥
ब्रह्मस्थित्या च निर्लिप्तो भूत्वा मायाऽऽमयोर्ध्वगः।
अमृतं चामृतपदं परात्मानं प्रपद्यते ॥३७॥
प्राप्तीनामुत्तमप्राप्तिः परेश्वररुचिः सदा।
सतां प्राप्तिर्हरेः प्राप्तिर्धामप्राप्तिर्न चेतरा ॥३८॥
अहंकारकृता लोकाः सर्वे निरयगामिनः।
ब्रह्मकारकृता लोकाः सर्वे त्वक्षरगामिनः ॥३९॥
आत्मघाती जनो याति निरयान् यमरक्षितान्।
ब्रह्मसम्बन्धमाप्तो वै नात्मघाती च धामगः ॥४०॥
अभिध्यानं भवेद् यत्र प्रेतभावे च तत्र च।
जीवो याति पुनर्भावं ब्रह्माभिध्यानमाचरेत् ॥४१॥
ऐश्वर्यध्यानपरमो याति मायां तु सात्त्विकीम्।
पुनर्भावप्रदां तस्माद् ब्रह्मध्यानपरो भवेत् ॥४२॥
ऐश्वर्यैः समधिव्याप्तो मदगर्वाद्यधिष्ठितः।
वर्तते मायया यश्च स एव निरयोऽस्य वै ॥४३॥
यस्य तृष्णा यक्षिणी च राक्षसी चेषणा स्थिता।
चिन्ता पिशाची यस्यास्ति तास्तिस्रो निरयात्मिकाः ॥४४॥
रागश्च राक्षसो यस्य मोहो यक्षोऽस्ति यस्य च।
द्वेषः पिशाचो यस्यास्ति ते त्रयो रौरवात्मकाः ॥४५॥
त्रयो यत्र भवन्त्यस्य तत्र तत्रोपपद्यते।
दुर्बुद्धिर्जायते तैश्च ताभिश्च मोहवर्तनम् ॥४६॥
अकृतप्रज्ञकस्तेन मृत्युं याति हि रौरवम्।
दुष्प्रज्ञानेन निरया बहवोऽत्र भवन्ति वै ॥४७॥
यज्ज्वाला देहिनश्चात्र दाहयन्ति क्षणे क्षणे।
नह्यतृप्तस्य सौख्यं वै निर्दुःखं समजायते ॥४८॥
दुःखमिश्रं सुखं यत्तन्निरयाख्यं मतं त्विह।
माया निरय एवास्ति निर्दुःखा न कदापि सा ॥४९॥
मायादेहवतः सौख्यं नैकान्तात्यन्तकं न हि।
तस्मात् सौख्यं निरयात्म विनाऽक्षरपदं ध्रुवम् ॥५०॥
वर्णयामि निरयान् वै ह्युच्चावचान् हि मायिकान्।
प्राकृतान् लयजुष्टाँश्च ब्रह्मभावे तु निष्फलान् ॥५१॥
मानवानां तु संभोगा निरया एव गोचराः।
देवानां च ऋषीणां च संस्थानानि गृहाणि च ॥५२॥

तादृशा एव निरया देहिनां देहसंस्थिताः ।
लोकपानां दिशांपानां ग्रहाणां मरुतां तथा ॥५३॥
साध्यानां विश्वदेवानां गान्धर्वाणां गृहाणि च ।
रुद्रादित्यवसूनां च सिद्धानां परमेष्ठिनः ॥५४॥
दिव्यानि कामचाराणि विमानानि सभालयाः ।
उद्यानानि च पद्मिन्यः काञ्चनेयगृहाणि च ॥५५॥
अमृतानि च भोगाश्च तेजोऽम्बराणि यानि च ।
समृद्धयः सुरादीनां देहाश्चामृतभोजिनः ॥५६॥
दिव्यांगना दिव्यशय्या दिव्यगन्धरसादयः ।
मायापाका निरयास्ते ब्रह्मधामाग्रतो मताः ॥५७॥
ईश्वराणां विराजानां प्रधानपुरुषस्य च ।
मायाधाम्नां च ये भोगाः सत्त्वमयाश्च मायिकाः ॥५८॥
ते सर्वेऽपि महत्तत्त्वात्मजा निरयसंज्ञकाः ।
अनादिश्रीकृष्णनारायणधामाऽग्रतो मताः ॥५९॥
गोलोकस्य तथा धाम्नो वैकुण्ठस्य समीपतः ।
मायामयाश्च ये लोका भोगास्ते निरया मताः ॥६०॥
ब्रह्मलोकसमं नान्यद्धामाऽस्ति दिव्यशाश्वतम् ।
गोलोकं चापि वैकुण्ठं ब्रह्मधामात्मकं हि तत् ॥६१॥
मायानिरयशून्यं वै चामायिकं हि मोक्षदम् ।
अहं श्रीकृष्णरूपोऽस्मि राधादिभिः प्रसेवितः ॥६२॥
गोलोके गोपगोपीभिर्मद्रूपाभिः प्रसेवितः ।
दिव्यशाश्वतरूपोऽस्मि यत्र माया न विद्यते ॥६३॥
अहं नारायणरूपो वैकुण्ठे परमे स्थितः ।
लक्ष्मीरमादिभिर्दिव्याभिः शक्तिभिः सुसेवितः ॥६४॥
पार्षदैर्दिव्यरूपैश्च सेवितो दिव्यशाश्वतः ।
दिव्यशाश्वतरूपोऽस्मि यत्र माया न विद्यते ॥६५॥
वासुदेवस्वरूपोऽस्मि त्वव्याकृते परे स्थले ।
यत्र माया न चाऽस्त्येव सोऽहं दिव्यस्वरूपवान् ॥६६॥
एवं यत्र मया स्थानं कृतं दिव्यं हि तन्मम ।
मद्योगाद् दिव्यतां प्राप्तं निरयस्तन्न विद्यते ॥६७॥
मद्वियुक्तानि सौधानि स्थानानि स्मृद्धयस्तथा ।
स्वामिनः स्थानिनः सर्वे निरया मायया हृताः ॥६८॥
इत्येवं संविलोक्यैव प्रज्ञया मत्प्रदत्तया ।
मद्योगं सर्वथा कुर्यान्निरयत्वं विलीयते ॥६९॥
दिव्यत्वं प्राप्यते चापि मदर्थयोगतां गतम् ।
यत्र मे नास्ति सम्बन्धश्चार्पणात्मक इत्यपि ॥७०॥
तत्र सम्पद्यते कालो मत्सम्बद्धे स न प्रभुः ।
अहं कालस्य शास्ताऽस्मि मयि प्रवर्तते न सः ॥७१॥

यत्राहं तत्र भक्तो मे गत्वा नैव हि शोचति ।
ईदृशं परमं स्थानं ब्रह्मसम्बन्धिनां सताम् ॥७२॥
तद्भिन्नानि तु निरयाः सर्वे एव यथायथम् ।
तद्विचार्य तु मतिमान् मत्सम्बन्धं समाचरेत् ॥७३॥
जडं वा चेतनं वापि मत्सम्बद्धं विधापयेत् ।
तदेवाऽनिरयं प्रोक्तं दिव्यं दिव्यसुयोगतः ॥७४॥
एवं ज्ञात्वाऽर्पयित्वैव भक्ता मे दिव्यतां गताः ।
सृष्टौ ते नैव जायन्ते कालग्रासं न यान्ति च ॥७५॥
अदुःखं सुखमाप्यैव वर्तन्ते शाश्वते सुखे ।
ममानन्दे परे धाम्न्यश्नुवते सर्वकामनाः ॥७६॥
मम जापप्रकर्तारो मम मूर्तिपरायणाः ।
अमृताश्चामृतं प्राप्य ब्रह्मभूता भवन्ति ते ॥७७॥
ब्रह्मस्थानमनावर्तमेकमक्षरसंज्ञकम् ।
अदुःखमजरं शान्तं प्रयान्ति मम योगिनः ॥७८॥
सरागश्चेक्षते लोकान् सर्वान्निरयसंज्ञिकान् ।
मद्युक्तः सर्वतो मुक्तोऽक्षरे तु रमते सुखम् ॥७९॥
नैकधा मम मूर्तौ स रमते च मया सदा ।
ममानन्दभृतो मुक्तो मत्तो न्यूनो न वर्तते ॥८०॥
इत्येवं चोपदिश्यैव ततो मन्त्रान् ददौ हरिः ।
प्रजाभ्यश्च नृपस्यापि कुटुम्बाय नृपाय च ॥८१॥
अथ कृष्णो मनश्चक्रे गन्तुं राजा तदा पुनः ।
द्रव्यं च यौतकं चापि विदार्यं बहुधा ददौ ॥८२॥
वाद्यघोषैः प्रजाद्वारा सम्मानं बहुधा व्यधात् ।
तावत् तत्र समायातो राजा पराङ्व्रताऽभिधः ॥८३॥
अलंव्रातर्षिसहितश्चाऽऽशानापुरीश्वरः ।
पारावातराष्ट्रपतिः प्रार्थयत्परमेश्वरम् ॥८४॥
मम देशान् समागत्य पावयाऽस्मान् कृपालय ।
हरिः श्रुत्वा तथाऽस्त्वाह सज्जोऽभूत् सकुटुम्बकः ॥८५॥
शीघ्रं पूजां परिगृह्य तदा विमानगोऽभवत् ।
ब्रह्मप्रियाद्याः कन्याश्च ऋषयोऽप्यखिलास्तदा ॥८६॥
विमानस्था अभवँश्च विमानं प्रससार ह ।
वेगेन चागतं पारावातराष्ट्रं तदा नृपः ॥८७॥
पराङ्व्रतो हि सहसाऽम्बरात् पूर्वमवाऽतरत् ।
स्वागतं निजसैन्येन श्रीहरेस्तु समाचरत् ॥८८॥
तदा वाद्यान्यवाद्यन्त जयनादास्तथाऽभवन् ।
प्रजाः स्वाञ्जलिभिः सुस्थाः स्वागतं वै समाचरन् ॥८९॥
राजदर्शितमार्गेणावातरद् वै विमानकम् ।
उद्याने सुभगे चाऽऽशासनापुर्याः समीपगे ॥९०॥

हरिं दृष्ट्वा प्रजा राजा राज्ञी प्राधानिकास्तथा ।
अन्येऽपि चागताः सर्वे स्वागतं नमनं व्यधुः ॥९१॥
राजा पूपुज पुष्पाद्यैः स्वर्णहारैः सुमौक्तिकैः ।
राज्ञी नीराजनं चक्रे हरिं न्यषादयत्ततः ॥९२॥
गजे स्वर्णाम्बालिकया युते चान्यान् रथादिषु ।
आशासनानगर्यां तु भ्रामयामास माधवम् ॥९३॥
पुपूजुर्मानवाः सर्वे सायं रत्नाम्बरादिभिः ।
द्रव्यसौवर्णमुद्राभिः पुष्पाक्षतस्रगादिभिः ॥९४॥
भ्रामयित्वा राजसौधं त्वानयामास केशवम् ।
पूजयामास च पुनर्भोजयामास भूपतिः ॥९५॥
ततः कन्याद्वयं राज्ञो मात्राज्ञया परेश्वरम् ।
पुपूज च हरिं वव्रे पतिं च वरमालया ॥९६॥
कण्ठे समर्प्य मालां ते कन्यके त्वर्पिते तदा ।
अभवतां स्वयं कृष्णे सर्वेशे परमेश्वरे ॥९७॥
राजा मुमोद हृदये राज्ञी प्रसन्नतामगात् ।
कृतकृत्ये कन्यके च जाते नृपो महोत्सवम् ॥९८॥
कारयामास वै रात्रौ हरिश्चोपादिदेश ह ।
राधिके राजसौधे वै सर्वेषां मोक्षसाधनम् ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः रायग्रामानगर्यां भ्रमणम् उपदेशनं पूजनं विदायं ततः पराङ्व्रतनृपस्य पारावातराज्ये गमनम् आशासनापुर्यां स्वागतं आश्विनकृष्णचतुर्थ्यां सायं भ्रमणं चेत्यादि-निरूपणनामा त्रयोविंशत्यधिकद्विशत-तमोऽध्यायः ॥ २२३ ॥

**श्रीकृष्ण उवाच—**

राधिके भगवानाह सर्वाः प्रजा नृपादिकान् ।
श्वोऽस्ति यज्ञो महान् श्रेष्ठो ब्राह्मीले राष्ट्रके शुभे ॥ १ ॥
यज्ञो यत्र भवत्येव देशः स पुण्यदो भवेत् ।
यज्ञो नारायणः साक्षात् स चास्मि पुरुषोत्तमः ॥ २ ॥
अहं यज्ञेन सततं प्रसन्नस्तृप्तिमेमि हि ।
मय्यर्पिताः क्रियाः सर्वा यज्ञ एव न संशयः ॥ ३ ॥
नहि खल्वनुपायेन कश्चिदर्थोऽपि सिद्ध्यति ।
यज्ञकार्येण यज्ञोऽयं सिद्ध्यतीह न संशयः ॥ ४ ॥
मृगैर्मृगाणां ग्रहणं पक्षिणां पक्षिभिर्यथा ।
गजानां च गजैरेवं यज्ञो यज्ञेन गृह्यते ॥ ५ ॥
यथा चन्द्रो ह्यमायां वै ह्यलिंगत्वान्न दृश्यते ।
तथाऽहं हृदि कलुषे दृश्यो भवामि नैव ह ॥ ६ ॥
यथा पूर्णां तिथिं प्राप्य भ्राजते चन्द्रमास्तथा ।
भक्तिपूर्णां मतिं प्राप्य विभ्राजेऽहं परेश्वरः ॥ ७ ॥
राहुग्रस्तोऽप्यपि चन्द्रो जायते विप्रकाशकः ।
मायाग्रस्तोऽपि जीवात्मा विप्रकाशः प्रजायते ॥ ८ ॥
अबुद्धिश्चाऽकृतप्रज्ञस्त्वाकृष्यते बहिर्मुखः ।
विषयेषु कृतावासः कदापि नहि तृप्यति ॥ ९ ॥
अतृप्तस्य न वै शान्तिरशान्तस्य न वै सुखम् ।
असुखस्य न वै मोक्षः पुनर्निरयगामिता ॥१०॥
विषयाश्चैको निरयश्चेन्द्रियाणि द्वितीयकः ।
मनस्तृतीयो निरयो वासना तु तुरीयकः ॥११॥
कर्माणि पञ्चमश्चापि षष्ठो निरयो दुर्गुणाः ।
सप्तमस्तु गृहे क्लेशश्चाष्टमश्च दरिद्रता ॥१२॥
नवमोनिरयो रोगो दशमः परवश्यता ।
एकादशश्चापकीर्तिर्द्वादशो बुद्धिहीनता ॥१३॥
त्रयोदशः कुटुम्बादिश्चतुर्दशस्तु भृत्यता ।
पञ्चदशो व्यंगता च शत्रवः षोडशोऽपि सः ॥१४॥
सप्तदशस्तु वै साक्षाद् देहो निरयसंज्ञकः ।
अष्टादशो विकाराश्च देहजा निरया इमे ॥१५॥
इत्येवं निरया लोके संलग्ना देहिनामिह ।
यज्ञेन यज्ञमासाद्य निर्निरयगतो भवेत् ॥१६॥
यावत् कल्मषमास्ते वै तृषाछेदो न तावता ।
निवर्तते तदा तृषा कल्मषान्तो भवेद् यदा ॥१७॥
विषयेषु तु संसर्गात् तर्षो विवर्धते सदा ।
विषयाणां विरागेणाऽतर्षो ज्ञानेन वर्धते ॥१८॥
ज्ञानाऽऽदर्शे निजात्मानं शुद्धं पश्यति पश्यकः ।
इन्द्रियाणां नियमेन सुखी भवति मानवः ॥१९॥
इन्द्रियेभ्यश्च रूपेभ्यो यच्छेदात्मानमात्मना ।
विमुच्येत्प्राकृतान् ग्रामान् मत्स्थितोऽमृतमश्नुते ॥२०॥
प्रणीतं कर्मणा मार्गं भुक्त्वा त्यक्त्वाऽथवा मयि ।
स्वर्गं वा शाश्वतं स्वर्गं मद्धाम परमं लभेत् ॥२१॥
आत्मा त्याज्यगुणैर्हीनो यदा मयि प्रवर्तते ।
तदा सम्पद्यते धाम ब्रह्मलोकं ममाश्रयम् ॥२२॥
आकृतयो विलीनाः स्युः समनोबुद्धिवृत्तयः ।
यदाऽऽत्मनि ब्रह्मरूपे परब्रह्म प्रकाशते ॥२३॥
आगतं विषयं दुःखं चिन्तयेन्न निवर्तते ।
भैषज्यमेतत्त्यागस्य यदेतेषां न चिन्तनम् ॥२४॥
अनित्यं जीवनं द्रव्यं प्रिययोगो गृहादिकम् ।
कालभक्ष्यं विचार्यैतन्न गृध्येत्तत्र चात्मवित् ॥२५॥

दुःखं त्यक्तं भवेत्तत्र सुखं यद्विषयोद्भवम् ।
दुःखमिश्रं च तदपि दुःखबहुलमित्यपि ॥२६॥
विचार्योभयमेवापि त्यजेदभ्येति मां हि सः ।
यदात्मना भवेद् भक्तिर्ब्रह्मभावेऽतिमायिके ॥२७॥
तदा प्रज्ञायते ब्रह्म लभ्यते च समाधिना ।
ब्रह्मभावं च निकषा गतो ध्यानमवाप्नुयात् ॥२८॥
ध्यातोऽहं चास्य वै ध्यात्रा चारोहामि तदन्तरम् ।
सर्वद्वारनिरुद्धस्य प्रकाशेऽहं तदात्मनि ॥२९॥
गुणानां विलयस्तस्याऽनायासेन प्रजायते ।
अगुणो दिव्यगुणवान् मद्रूपः स प्रजायते ॥३०॥
सगुणाः प्रकृतौ सर्वे प्रवर्तन्ते शरीरिणः ।
स्वर्गयोग्याश्च ते सर्वे निर्गुणास्तु मदर्हणाः ॥३१॥
यावदस्य वर्ततेऽत्र भूतावेशोऽतिकष्टदः ।
तावदस्य खनिश्वास्ते दुःखसंसारवस्तुजा ॥३२॥
यावदस्य च भूतानां वियोगो जायते भृशम् ।
सूक्ष्माणां चापि हेतूनां ब्रह्म सम्पद्यते तदा ॥३३॥
धर्माद् भक्तेर्विरागाच्चोत्कृष्यते श्रेय आत्मना ।
श्रेयसाऽऽढ्यो हरिं चैति मां परश्रेयसां निधिम् ॥३४॥
यथा साम्यरसा भूमिर्भिन्नबीजरसाऽनुगा ।
तथा साम्यरसश्चात्मा भिन्नकर्मजदेहगः ॥३५॥
यथा स्वर्णं लोहमिश्रं वह्निना शोधितं भवेत् ।
तथा देही मम भक्त्या प्रज्ञया शोधितो भवेत् ॥३६॥
प्रज्ञा पुराणी मद्दत्ता शोधितस्य प्रकाशते ।
प्रज्ञास्मृतिं समालम्ब्य भक्तिमान् मां प्रपद्यते ॥३७॥
प्रज्ञानां चापि भक्तीनां फलं मे दिव्यदर्शनम् ।
अप्रज्ञाश्चाप्यभक्ताश्च तं मां पश्यन्ति नैव ह ॥३८॥
कर्मिभ्यः सात्त्विकाः श्रेष्ठास्ततोऽपि शुद्धसत्त्वजाः ।
तेभ्यः कालो ममशक्तिर्बलवान् सर्वभक्षकः ॥३९॥
कालात्परं तु मे धामाऽक्षरं दिव्यं निवासनम् ।
नादिर्नमध्यं नैवान्तस्तस्य धाम्नः प्रविद्यते ॥४०॥
जन्ममृत्युजराजन्यं दुःखं यत्र न विद्यते ।
तद् ब्रह्म परमं स्थानं तद्धाम परमं पदम् ॥४१॥
कालमूर्ध्नि पदं धृत्वा मद्भक्ता यान्ति तत्पदम् ।
निवृत्तिलक्षणं धर्मं शुभं मदर्पणात्मकम् ॥४२॥
समाश्रित्य प्रयान्त्येव ततोऽनन्तं पराक्षरम् ।
न यत्नसाध्यं तद्ब्रह्म शब्दब्रह्म समं मतम् ॥४३॥
कृपासाध्यं हि तद्ब्रह्म परब्रह्मप्रसजकम् ।
पापात् साधनविरहादासक्तेः कर्मबन्धनात् ॥४४॥
मर्त्या नैव प्रपश्यन्ति स्वरूपं निर्मलं निजम् ।
विषयेषु तु विश्रान्तेर्ममाहंकारभावनात् ॥४५॥
बलात्तृष्णाप्रवाहस्य ब्रह्म नात्मा प्रपद्यते ।
सतां प्रसेवनाद् ध्यानान्मन्मूर्तेर्भक्तिभावनात् ॥४६॥
ब्रह्माभ्यासात् प्रवैराग्यात् स्नेहाद् ब्रह्म प्रकाशते ।
गुणमिष्टं प्रपश्यन्ति मिष्टतृष्णापराहताः ॥४७॥
परं नैवाभिकांक्षन्ति चामृतोत्तममाच्युतम् ।
अवरैश्च गुणैर्युक्ता नैव पश्यन्ति पारगान् ॥४८॥
अपारगा मुहुश्चात्र विचाल्यन्तेऽण्डराशिषु ।
सतां योगेन बहवः परं पारं गताः पुरा ॥४९॥
सन्तश्चरन्ति सततं श्रेयोमार्गजुषां पुरः ।
यदि नामाऽऽश्रयन्ते चेत् पारमेष्यन्ति सत्वरम् ॥५०॥
आशीर्वादात्पुण्यबलात् सेवाफलात् सुकर्मणः ।
चेदाश्रितास्तदा यन्ति तूर्णं ब्राह्मीं तनुं शुभाम् ॥५१॥
ध्यातॄणां सेविनां स्निग्धभक्तानां ब्रह्मवर्तिनाम् ।
सनातनी गतिर्याऽस्तिताममृतां प्रयान्ति ते ॥५२॥
इत्युपादिश्य च कृष्णो विरराम परेश्वरः ।
जलपानादिकं कृत्वा सुष्वाप भगवान् प्रभुः ॥५३॥
कन्यकासेवितः श्रीमत्कृष्णनारायणः प्रगे ।
प्रबुबोध सुवाद्याद्यैर्मंगलैर्गीतिभिस्ततः ॥५४॥
कृताह्निकः कृतपूजः शीघ्रं गन्तुमियेष ह ।
राजा विदायं प्रददौ यौतकं प्रददौ तथा ॥५५॥
स्वसार्थसहितः सज्जो बभूव ब्राह्मसंज्ञके ।
मुहूर्ते श्रीहरिः समारुरोह च विमानकम् ॥५६॥
तदा तूर्याण्यवाद्यन्त प्रजाश्च माननं व्यधुः ।
वर्धितः श्रीहरिर्द्रव्यं चालंत्रातर्षये ददौ ॥५७॥
शृण्वन् यशो निजं व्योम्नि विमानं चैरयद् द्रुतम् ।
आश्वीनकृष्णपञ्चम्यां प्रातरेव मखस्थलीम् ॥५८॥
ब्राह्मीलराष्ट्रे गोयाजानगर्याः सन्निधौ शुभे ।
आम्रजानिकनद्यास्तु तटे शीघ्रं समागमत् ॥५९॥
विमानं वै तदा जातं सूर्यसहस्रसत्प्रभम् ।
प्रतीक्षमाणाः ऋषयो राजाद्याश्च प्रजाजनाः ॥६०॥
विमानमागतं वीक्ष्य दुद्रुवुः स्वागतस्थलीम् ।
विशाले भूतले नद्यास्तीरेऽसंख्यजनाऽऽश्रिते ॥६१॥
स्थिरीभूता जनाः स्वस्थाः, अवातरद् विमानकम् ।
जयशब्दाः प्रजानां वै गगनप्रसरास्तदा ॥६२॥
अभवँस्तूपशब्दाश्च यन्त्रीशब्दाः सुमानदाः ।
प्रतिध्वनयो ध्वनिजाः प्रतिनेदुः समन्ततः ॥६३॥

गीतयो योषितां चाप्यश्रूयन्त हर्षसंभृताः ।
वाद्यानां च विचित्रा वै ध्वनयोऽप्यभवँस्तदा ॥६४॥
शंखनादाश्च परितो बिगूलानां निनादकाः ।
अभवन्मंगलघोषा विप्राणां त्वागते हरौ ॥६५॥
विमानं वर्धितं चापि राजन्यैः सम्प्रपूजितम् ।
सुरैर्देवगणैश्चापि कुसुमाञ्जलिकार्पितम् ॥६६॥
चन्दनैः प्रोक्षितं तिलकितं कुंकुमचन्द्रितम् ।
नमस्कृतं वन्दितं सम्मानितं चापि भावनैः ॥६७॥
श्रीहरिश्च विमानाद्वै क्षणमात्रं बहिर्ययौ ।
तदा हारान् हरेः कण्ठे ददुर्महर्षयस्तथा ॥६८॥
लोमशस्तिलकं चक्रे शंभुः पुष्पस्रजं ददौ ।
ईशानपानशिष्टश्च राजा स्वर्णस्रजं ददौ ॥६९॥
शान्तारामऋषिः कृष्णकण्ठे वृन्दास्रजं ददौ ।
अथ पित्रोश्च चरणौ पूजयामास भूपतिः ॥७०॥
ब्रह्मप्रियाणां पूजां च चकार राजपत्निकाः ।
राजकन्यास्तथा पूजां चक्रुर्वै सर्वयोषिताम् ॥७१॥
लालायनो महर्षिश्च तुषितो देवसत्तमः ।
स्वीयप्रकाशो भगवाँश्चैते प्राहुः परेश्वरम् ॥७२॥
मण्डपं च क्रतोः कुण्डं समित्कुशादिहव्यकम् ।
जनावासान् भक्ष्यभोज्यान् द्रुतं विलोकय प्रभो ॥७३॥
भवदाज्ञानुसारेण सर्वं समुपतिष्ठते ।
न्यूनं न विद्यते किञ्चिद् दृष्ट्या पावय सर्वतः ॥७४॥
इत्यर्थितः श्रीभगवान् जनावासान् सुवीक्षितुम् ।
विंशतियोजनभूस्थान् ययौ विमानगो द्रुतम् ॥७५॥
आमन्त्रणेन पत्रेण यज्ञमंगलबोधिना ।
समागतान् महामुक्तानक्षरं ब्रह्म दृष्टवान् ॥७६॥
मुक्तानीश्च ब्रह्मसतीर्दृष्टवान् मखमागताः ।
ऐश्वर्याणि समस्तानि गुणान् सर्वान् सुमूर्तिकान् ॥७७॥
आभूषणानि सर्वाणि हेतीन् सर्वान् समूर्तिकान् ।
दृष्टवान् भगवान् नैजावतारं कृष्णमित्यपि ॥७८॥
राधादिभिः सहाऽऽयातं गोपगोपीगवान्वितम् ।
नारायणं रमया श्रीकमलाभ्यां च लीलया ॥७९॥
भूलक्ष्मीतूलसीवृन्दापद्मादिभिः समन्वितम् ।
पार्षदैः पार्षदानीभिः सहितं दृष्टवान् प्रभुः ॥८०॥
वासुदेवादिकान् व्यूहान् प्रधानपुरुषादिकान् ।
महाकालादिसमयान् भूमानं दृष्टवाँस्तथा ॥८१॥
महाविष्णुं च वैराजं ब्रह्मादिदेवतात्रयम् ।
सशक्तिकं तथा मायां तत्त्वयुक्तां च दृष्टवान् ॥८२॥
सिद्धाँश्च योगिनः सर्वान् महर्षीन् पितृदेवताः ।
सुरान् सुरेश्वरान् लोकप्रपालान् दिक्प्रपालकान् ॥८३॥
सात्त्विकान् राजसाँश्चापि तामसान् दृष्टवान् प्रभुः ।
रुद्रान् वसून् तथाऽऽदित्यानश्विनौ मरुतस्तथा ॥८४॥
विद्याध्रान् देवगन्धर्वान् दिशो भुवर्निवासिनः ।
सागरान् सरितो वृक्षान् वल्लीस्तृणानि दृष्टवान् ॥८५॥
तीर्थानि कामधेन्वाद्याः स्वरान् वेदान् गुणादिकान् ।
खनीन् भूध्रान् मानवाँश्च नृपान् स्त्रीश्च नरान् प्रजाः ॥८६॥
ग्रहान् नक्षत्रताराश्च स्थावरान् चाण्डजाँस्तथा ।
जरायूजान् स्वेदजाँश्चोद्भिज्जकान् दृष्टवाँस्तथा ॥८७॥
यक्षराक्षसभूतादीन् गणान् गणेश्वराँस्तथा ।
यज्ञदेवान् समस्ताँश्च मातृका देविकास्तथा ॥८८॥
योगिनीर्ब्रह्मसरसश्चाप्सरसोऽपि सर्वशः ।
आर्षीर्विद्याधरीश्चापि शक्तीश्च सांख्ययोगिनीः ॥८९॥
वह्नीन् सर्वविधाँश्चापि काश्यपीश्च प्रजास्तथा ।
तल्लोकनिवासाँश्च यक्षराक्षसदानवान् ॥९०॥
दैत्यान् निरन्नमुक्ताँश्च तापसान् ऋत्विजस्तथा ।
मखीयान्मानवाँश्चापि गायकान् यजमानकान् ॥९१॥
होतृंश्च जापकाँश्चापि महीमानान् ददर्श सः ।
घृतकुल्या दधिकुल्यास्तक्रनिर्झरणाँस्तथा ॥९२॥
पयोह्रदानाममृतानां सरितोऽपि ददर्श सः ।
कणमिष्टान्नशाल्यादिपर्वतान् फलसञ्चयान् ॥९३॥
नारिकेलादिकान् शुष्कसरसार्द्रान् ददर्श सः ।
साधनानि रसशालाः पत्नीशाला ददर्श सः ॥९४॥
यूपशाला हव्यशाला देवशाला ददर्श सः ।
सर्वं सम्पूर्णमेवेति चोपस्थितं विलोक्य च ॥९५॥
लोमशं विश्वकर्माणं लालायनं च शंकरम् ।
स्वीयप्रकाशं चान्याँश्च महर्षीन् प्रशशंस सः ॥९६॥
समागतान् भूमिपालान् दृष्टवान् मखकर्मणे ।
अमरीभूप्रदेशानां राशियानभुवां तथा ॥९७॥
केतुमालप्रदेशानां प्राचीनोष्णभुवां तथा ।
प्राग्ज्योतिषां चाजनाभप्रदेशानां च भूपतीन् ॥९८॥
आन्तरभूप्रदेशानामब्रिक्ताऽऽरक्तसंभुवाम् ।
द्वीपातिद्वीपलोकानां भूपतीन् दृष्टवान् प्रभुः ॥९९॥
अलब्धमखलाभाँश्च दृष्टवान् स विशेषतः ।
दक्षामरीप्रदेशानां भूपतीन् यज्ञयोगिनः ॥१००॥
नृपं कालीमण्डलीनं वनजेलेशभूपतिम् ।
पारावारपिबं भूपं कोटीश्वरं नृपं तथा ॥१०१॥

श्रीसतीशं च राजानं त्रेताकर्कशभूपतिम् ।
पराङ्व्रतं नृपं राजारायपतिं च दृष्टवान् ॥१०२॥
रायसोमनराजं च तथाऽण्डजरभूपतिम् ।
बाल्यरजोनृपं चोरुगवाक्षं भूभृतं तथा ॥१०३॥
ईशानपानशिष्टं च सपत्नीकं स दृष्टवान् ।
सर्वान् पत्न्यादिसहितान् दक्षामरीप्रदेशजान् ॥१०४॥
नृपानाह महाकृष्णो यजमाना भवन्त्विति ।
ओमित्यंगीकृतं तैश्च परमेशवचः शुभम् ॥१०५॥
एवं संभावयित्वैव महीमानान् मखागतान् ।
न्यूनं प्रदापयित्वैव द्रुतं नैजालयं ययौ ॥१०६॥
तावद् वाद्यान्यवाद्यन्त क्रतोर्मुहूर्तवित्तये ।
सज्जा भूत्वा मण्डपे च द्रुतं समाययुर्जनाः ॥१०७॥
मुक्तास्तथाऽवताराद्या ईश्वराः सिद्धसत्तमाः ।
ऋषयः पितरो देवा देवेशा देववश्यगाः ॥१०८॥
देव्यो देवीवशिन्यश्च मानवा दैत्यदानवाः ।
काश्यप्यश्च प्रजाः सर्वाः स्थावरा जंगमास्तथा ॥१०९॥
मखार्था मखकर्तारः कर्मठाः साधनानि च ।
मन्त्राश्च हव्यकव्यानि सर्वं चोपस्थितं मखे ॥११०॥
राधिके मंगले श्रेष्ठे क्षणे कार्यमवर्तत ।
श्रीहरिर्मण्डपं चायात् सर्वप्रयोज्यपूजितः ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पारावातराष्ट्रप्रजादिभ्य उपदेशनं पूजनं भोजनं रात्रौ विश्रमणं विदायम्, आश्विनकृष्णपञ्चम्यां ब्राह्मीलराष्ट्रे मखस्थलीं प्रति चागमनं, महीमानादीनां संभावना चेत्यादिनिरूपणनामा चतुर्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२४ ॥

**श्रीकृष्ण उवाच—**

यज्ञस्य च शुभे श्रेष्ठे मुहूर्ते राधिके प्रगे ।
ऋषयो देवताश्चापि यज्ञमण्डपमाययुः ॥ १ ॥
गृणन्तः श्रीहरेर्नाम वदन्तो वेदकाण्डिकाः ।
जपन्तश्च वेदभुवं द्रष्टा मण्डपमाययुः ॥ २ ॥
देवा देवेश्वरः साक्षाद् ब्रह्माद्या ईश्वरेश्वराः ।
ईशाः प्रधानाः पत्न्यश्च देव्यश्च पार्षदादयः ॥ ३ ॥
साक्षाद्वै मण्डपे तत्राययुर्हर्षभृतो मखे ।
सामग्र्यश्चापि हव्यानि मूर्तिमन्ति शुभानि च ॥ ४ ॥
आसनानि साधनानि समिधश्च समाययुः ।
ध्वजः साक्षाद् घटः साक्षात् साक्षात्तथैव मण्डपः ॥ ५ ॥
मखः साक्षाद् वेदिकाश्च साक्षात् साक्षाच्च यूपराट् ।
कुण्डः साक्षाद् वास्तुपुमान् साक्षाद्वै समुपागतः ॥ ६ ॥
वेदाः साक्षाद् विधयश्च साक्षान्मन्त्राः समाययुः ।
साक्षात् सुविनियोगाश्च कुशा दर्भाः समाययुः ॥ ७ ॥
साक्षात् पात्राणि चरवो वह्नयश्च समाययुः ।
समस्तोपकरणानि त्वाययुर्मण्डपे तदा ॥ ८ ॥
स्वस्तश्चय समयश्च देशः पुण्याह आययुः ।
एवं तीर्थानि भौमानि पञ्चामृतानि चाययुः ॥ ९ ॥
उपस्थिताः समस्ताश्च तन्मखे कामधेनवः ।
कल्पलताः कल्पवृक्षाश्चिन्तामणय आययुः ॥१०॥
सर्वाण्यक्षयपात्राणि कल्पाऽऽपूरकपेटिकाः ।
अक्षयाः कोशनिधयश्चामृतानि समाययुः ॥११॥
रसाश्च फलजातानि पत्रपुष्पाऽक्षतादयः ।
मूर्तिमन्तो मखे तत्र राधिके वै समाययुः ॥१२॥
विनियोगानुसारेण विनियुज्यन्त एव ते ।
लक्ष्म्यः सर्वाश्च विद्याश्च सत्यः सर्वाश्च सिद्धयः ॥१३॥
चमत्कारास्तथा सिद्धास्तत्र यज्ञे समाययुः ।
मधुपर्काः सर्वविधाः सर्वे पक्वान्नपर्वताः ॥१४॥
पेयवस्तूनि मूर्तानि साक्षात् सर्वे सुगन्धकाः ।
स्वर्णरूप्यकमुद्राश्च साक्षाद्द्रव्यानि चाययुः ॥१५॥
एवं यावत्सु साक्षाद्वै ह्युपस्थितेषु मण्डपे ।
ब्राह्मणानां मंगलानि योषितां गीतयोऽभवन् ॥१६॥
स्वस्तिवाचोऽभवँस्तत्र विप्राणां सर्वमंगलाः ।
देशकालादिसंकल्पोऽकारयल्लोमशो मुनिः ॥१७॥
मण्डपे यजमानश्च ईशानपानशिष्टकः ।
राजा च दम्पतीरूपो मुख्यस्तत्र विधिं शुभम् ॥१८॥
ऋषिणा प्रेरितश्चक्रे तथाऽन्यनृपमण्डलम् ।
मण्डपे कुण्डसान्निध्येऽनुकल्पविधिमाचरत् ॥१९॥
प्रधानाख्यं च संकल्पं लोमशः समकारयत् ।
दिग्रक्षां च कलशस्याऽऽराधनां प्रचकार च ॥२०॥
गणेशस्य स्थापनं च पूजनं चाप्यकारयत् ।
स्वस्तिवाचश्च पुण्याहवाचनं प्रचकार च ॥२१॥
यजमानाद्यभिषेकं लोमशः समकारयत् ।
मातृकाणां स्थापनं च पूजनं समकारयत् ॥२२॥
नान्दीश्राद्धं तथाऽऽचार्यादीनां वरणमित्यपि ।
अर्घवन्दनमेवापि मधुपर्कमकारयत् ॥२३॥
वर्धनीकलशस्यापि स्थापनं चाप्यकारयत् ।
मण्डपे संप्रवेशं च मण्डपप्रोक्षणादिकम् ॥२४॥
वास्तुस्थापनमेवाऽपि वासुदेवप्रपूजनम् ।
मण्डपस्यार्चनं तत्र सर्वतोभद्रमण्डले ॥२५॥

देवानां स्थापनं पूजामकारयद्धि लोमशः ।
यन्त्रदेवस्थापनं च देवानां पूजनं तथा ॥२६॥
पीठस्य पूजनं वेदीपूजनं कुण्डपूजनम् ।
कुण्डदेवार्हणं चापि कुण्डेऽग्निस्थापनं तथा ॥२७॥
ग्रहाणां स्थापनं पूजां योगिनीस्थापनादिकम् ।
क्षेत्रपानां स्थापनं च पूजनं चाप्यकारयत् ॥२८॥
कुण्डे च मेखलादीनां पूजनं देवपूजनम् ।
अग्नेः पूजनमेवापि ग्रहाणां पूजनं तथा ॥२९॥

अन्वाधानस्य संकल्पं लोमशर्षिरकारयत् ।
आघाराज्यभागहोमं लोमशोऽकारयत्तदा ॥३०॥
वास्तुमण्डलदेवार्थे योगिन्यर्थे हवं तथा ।
प्रधानहोमं तत्रापि व्याहृतिहोममाचरत् ॥३१॥
बलिदानं मुनैवेद्यं ददौ वै लोमशो मुनिः ।
यूपारोपणमेवापि ततो जलाधिवासनम् ॥३२॥
जलमातृजलपूजां शंखघण्टादिपूजनम् ।
भूतशुद्धिं तथा प्राणप्रतिष्ठां चाप्यकारयत् ॥३३॥

सौवर्णप्रतिमापूजां बालकृष्णस्य चाचरत् ।
षोडशोपचारपूजां चरुनैवेद्यमार्पयत् ॥३४॥
सहस्राहुतिकाश्चापि सर्वहोममकारयत् ।
इदं मुक्तेभ्यो नमम समर्पयामि भोजनम् ॥३५॥
इदं ब्रह्मणे नमम समर्पयामि भोजनम् ।
मुक्तानीभ्य इदं नमम समर्पयामि भोजनम् ॥३६॥
अवतारेभ्यो नमम इदं ददामि भोजनम् ।
अवतारिणीभ्य इदं ददे नमम भोजनम् ॥३७॥
गुणैश्वर्यविभूतिभ्य इदं नमम भोजनम् ।
भूषाहेतिप्रशक्तिभ्य इदं नमम भोजनम् ॥३८॥

ईश्वरेभ्यश्चेश्वराणीभ्यो नमम भोजनम् ।
व्यूहेभ्यः पार्षदादिभ्य इदं नमम भोजनम् ॥३९॥

ब्राह्मीभ्यश्च सतीभ्यश्च इदं नमम भोजनम् ।
ब्रह्मप्रियाभ्यः सर्वाभ्य इदं नमम भोजनम् ॥४०॥
राधालक्ष्म्यादिशक्तिभ्य इदं नमम भोजनम् ।
माणिक्यादिसतीभ्यश्च इदं नमम भोजनम् ॥४१॥

गंगासरस्वतीश्रीभ्य इदं नमम भोजनम् ।
दासदासीसमेताभ्य इदं नमम भोजनम् ॥४२॥
महाविष्णुहिरण्यगर्भविराड्भ्यो भोजनं नमः ।
ब्रह्मविष्णुमहेशेभ्यो नम इदं च भोजनम् ॥४३॥
सावित्रीकमलादुर्गादिभ्यो नमम भोजनम् ।
कंभरायै महालक्ष्म्यै इदं नमम भोजनम् ॥४४॥

सन्तुष्टायै चामृतायै इदं नमम भोजनम् ।
पद्मावत्यै रमायै च इदं नमम भोजनम् ॥४५॥
मंजुलासद्गुणाहासाऽम्बाभ्यो नमम भोजनम् ।
बालकृष्णांगनादुःखहालक्ष्म्यादिभ्य इत्यपि ॥४६॥
भोजनं सर्वपत्नीभ्यः सिद्धर्षिभ्य इदं नमम ।
इदं पितृभ्यो नमम पितृकाभ्यश्च भोजनम् ॥४७॥
आर्षीभ्यो भोजनं चेदं सुरेभ्यो भोजनं नमम ।
सुराणीभ्यश्च देवीभ्यो देवताभ्यश्च भोजनम् ॥४८॥

दिक्पालेभ्य इदं लोकपालेभ्यो भोजनं नमः ।
आदित्येभ्यश्च रुद्रेभ्य इदं चेदं च भोजनम् ॥४९॥
वसुभ्यश्चाश्विनीभ्यां च इदम् इदं च भोजनम् ।
दिग्भ्यश्चापि च तत्त्वेभ्य इदम् इदं च भोजनम् ॥५०॥
निधिभ्यश्च ग्रहेभ्यश्च इदम् इदं च भोजनम् ।
सिद्धिभ्यश्च महर्षिभ्य इदम् इदं च भोजनम् ॥५१॥
कृत्तिकाभ्यो मनुभ्यश्च इदम् इदं च भोजनम् ।
मरुद्भ्यश्च कलाभ्यश्च इदम् इदं च भोजनम् ॥५२॥

तीर्थेभ्यश्च वालखिल्येभ्यश्चेदं भोजनं नमम ।
यक्षराक्षसभूतेभ्यः प्रेतेभ्यो भोजनं त्विदम् ॥५३॥
कूष्माण्डेभ्यः पिशाचेभ्य इदं चेदं च भोजनम् ।
विनायकेभ्यो गणेभ्य इदं चेदं च भोजनम् ॥५४॥
वेतालेभ्यश्चारणेभ्यः सूतेभ्यो भोजनं त्विदम् ।
मागधेभ्यश्च बन्दीभ्यो भृत्येभ्यो भोजनं त्विदम् ॥५५॥
डाकिनीभ्यः शाकिनीभ्यस्तामसीभ्यश्च भोजनम् ।
विद्याध्रेभ्यो गन्धर्वेभ्यः किन्नरेभ्यश्च भोजनम् ॥५६॥
किंपुंभ्यो विश्वदेवेभ्यो नमम भोजनं त्विदम् ।
दैत्येभ्यो दानवेभ्यश्च नागेभ्यो भोजनं त्विदम् ॥५७॥

सर्पेभ्यश्च फणिभ्यश्च सरीसृपेभ्यो भोजनम् ।
वृक्षेभ्यश्च विरुद्भ्यश्च तृणादिभ्यश्च भोजनम् ॥५८॥

तीर्थेभ्यः पर्वतेभ्यश्च सागरेभ्यश्च भोजनम् ।
सरिद्भ्यश्च तडागेभ्यश्चैत्येभ्यो भोजनं त्विदम् ॥५९॥
कल्पलताद्रुमेभ्यश्च कामधेनुभ्य इत्यपि ।
चिन्तामणिभ्य इदं चाक्षयपात्रेभ्य इत्यपि ॥६०॥

कुण्डेभ्यः कुण्डदेवेभ्य इदं नमम भोजनम् ।
मण्डपेभ्यो मण्डपस्थदेवेभ्यो भोजनं त्विदम् ॥६१॥
द्वारेभ्यो द्वारदेवेभ्यः शाखासुरेभ्य इत्यपि ।
ध्वजदेवेभ्य इदं च यूपदेवेभ्य इत्यपि ॥६२॥
स्रुक्स्रुवादिसाधनेभ्य इदं नमम भोजनम् ।
स्तंभेभ्यः स्तम्भदेवेभ्य इदं नमम भोजनम् ॥६३॥

मातृकाभ्यः सतीभ्यश्च साध्वीभ्य इदमित्यपि ।
इदं सांख्ययोगिनीभ्यो भोजनं च नमोनमः ॥६४॥
पतिव्रताभ्यो देवीभ्य इदं नमम भोजनम् ।
कामदेवाय च सप्तर्षिभ्यो नमम भोजनम् ॥६५॥
ईशानाय वरुणाय महेन्द्राय च भोजनम् ।
अग्नये च कुबेराय नैर्ऋताय च भोजनम् ॥६६॥
वायवे च यमायेदं दूतेभ्यो भोजनं त्विदम् ।
यादोभ्यो वायुवासेभ्य इदं नमम भोजनम् ॥६७॥
भूवासेभ्यो हिमस्थेभ्य इदं नमम भोजनम् ।
जरायुजेभ्योऽण्डजेभ्यश्च इदं नमम भोजनम् ॥६८॥
स्वेदजेभ्य उद्भिज्जेभ्यश्चेदं नमम भोजनम् ।
इदं कीटपतंगादिसूक्ष्मेभ्यो भोजनं नमम ॥६९॥
जडेभ्यश्चेतनेभ्यश्च मखिभ्यो भोजनं नमम ।
मेघेभ्यः स्तनयित्नुभ्य इदं नमम भोजनम् ॥७०॥
सुरासुरादिसर्वेभ्य इदं नमम भोजनम् ।
ब्रह्मसृष्टिस्थितेभ्यश्च इदं नमम भोजनम् ॥७१॥
ईशसृष्टिस्थितेभ्यश्च इदं नमम भोजनम् ।
जीवसृष्टिस्थितेभ्यश्च इदं नमम भोजनम् ॥७२॥
चतुरशीतिखनिजेभ्यश्चेदं भोजनं नमः ।
स्मृतेभ्यश्चाऽस्मृतेभ्यश्चेदं च नमम भोजनम् ॥७३॥
विशिष्टशिष्टतत्त्वेभ्य इदं नमम भोजनम् ।
समस्तेभ्यश्च व्यस्तेभ्य इदं नमम भोजनम् ॥७४॥
प्रत्येकेभ्यश्च यावद्भ्य इदं नमम भोजनम् ।
कर्मठेभ्यो ब्राह्मणेभ्य इदं नमम भोजनम् ॥७५॥
इदं नमम सर्वात्माननाय वह्नये स्वाहा ।
सहस्रधाराभिश्चेदं हव्यं च वह्नये स्वाहा ॥७६॥
एवं वै वह्नये हव्यं घृतं समित् फलानि च ।
मिष्टान्नानि रसाश्चापि द्रवाश्चापि समर्पिताः ॥७७॥
ततो बह्वाहुतिं होमं प्रचक्रे लोमशो मुनिः ।
महाघृताऽऽहुतिहोमं ततश्चाकारयन्मुनिः ॥७८॥
तदा प्रत्यक्षदेवाद्यास्तृप्ता अपि पुनः पुनः ।
जगृहुर्वह्निना सार्धं प्रदत्तं हव्यमुत्तमम् ॥७९॥
नीराजनं प्रचकार ततः श्रीलोमशो मुनिः ।
वादित्राणां निनदाश्चाऽभवँस्तदा समन्ततः ॥८०॥
वेदघोषा अजायन्त गीतयो योषितां तथा ।
पुष्पाञ्जलिं ततो राजा ददौ देवेभ्य एव च ॥८१॥
विप्राश्चक्रुर्यजमानाभिषेचनं तु पावनम् ।
श्रेयःप्रदानकं चक्रुः राजा च दक्षिणा ददौ ॥८२॥
विप्रा आशीर्वचनानि जगुर्हर्षभरास्ततः ।
वह्निं नत्वा च देवेभ्यो नमस्कृत्य क्षमार्थनाम् ॥८३॥
कृत्वा च कारयामास विसर्जनं हि लोमशः ।
आकाशं तु तदा व्याप्तमभूद् विमानपङ्क्तिभिः ॥८४॥
सृष्टित्रयाधिवासानां समागमेन सर्वतः ।
पञ्चम्यां राधिके चैवं मखकार्योत्तरं हरिः ॥८५॥
भोजयित्वा महीमानान् महर्षींश्च द्विजातिकान् ।
सर्वान् प्राघूणिकाँश्चापि धामधामादिवासिनः ॥८६॥
भोजयित्वा यथायोग्यान् ततश्चकार भोजनम् ।
यजमानैर्नृपैः सार्धं बुभुजे भगवान् स्वयम् ॥८७॥
एवं प्रवर्तितो यज्ञो राधिके सरितस्तटे ।
पितॄणां पिण्डदानाद्यैस्तर्पणं समजायत ॥८८॥
सायं स्नानं ततश्चक्रे भगवान् सर्वमानवैः ।
देवैश्च देहिभिः साकं वरुणं सम्प्रपूज्य च ॥८९॥
जलं प्रपूज्य भगवान् सस्नौ सर्वैः समन्वितः ।
अथाऽऽययौ निजं स्थानं ददौ दानानि वै तदा ॥९०॥
मुक्तेभ्यः पादुके सर्वावतारेभ्यः किरीटकान् ।
मुक्तानीभ्योऽवतारिणीभ्यो ददौ स्वर्णशाटिकाः ॥९१॥
मुकुटाँश्च ददौ चैशेभ्यश्च हारान् ददौ प्रभुः ।
ईशानीभ्यश्च स ददौ शृंखला रशनास्तथा ॥९२॥
ऋषिभ्यः स्वर्णकलशान् आर्षीभ्यः स्वर्णतन्तिकाः ।
सिद्धेभ्यः स्वर्णमालाश्च सिद्धिभ्यः स्वर्णकञ्चुकीः ॥९३॥
पितृभ्यश्चामृतस्थालीः पित्रिकाभ्योऽक्षयान् घटान् ।
देवेभ्यः स्वर्णछत्राणि देवीभ्यः कण्ठपत्रिकाः ॥९४॥
कटकानि ददौ चापि देवेशेभ्यश्च वेत्रकान् ।
भूतप्रेतपिशाचेभ्यः कञ्चुकान् प्रददौ प्रभुः ॥९५॥
मानवेभ्यः स्वर्णमुद्रा दैत्येभ्यश्च मणीन् ददौ ।
सूतमागधबन्दीभ्यः स्वर्णहाराँस्तदा ददौ ॥९६॥
अनाथबालवृद्धेभ्यो द्रव्याणि चाम्बराणि च ।
ददौ श्रीभगवाँस्तत्र येषां यद्यदपेक्षितम् ॥९७॥
जडेभ्यश्चेतनेभ्यश्च येषां यद्यदपेक्षितम् ।
संकल्प्य सर्वं प्रददौ परमात्मा दयानिधिः ॥९८॥
महादानानि सर्वाणि मध्यदानानि यानि च ।
क्षेत्रकन्यादिदानानि तद्गुरुभ्योऽप्यदापयत् ॥९९॥
राजानश्च ददुः सर्वं द्रव्यं चान्नं गृहाणि च ।
कन्यादानानि बहूनि गवाश्वगजदानकम् ॥१००॥
एवमारात्रिपर्यन्तं दानानि प्रददौ प्रभुः ।
ततस्त्वारात्रिकं चाभूद् बालकृष्णस्य राधिके ॥१०१॥

राजभिः संकृतं पश्चाद् भोजनान्यभवन् पुनः ।
अथोपदेशं भगवान् रात्रौ प्रजासु संव्यधात् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आश्विनकृष्णपञ्चम्यां प्रातर्हरिणा सह यज्ञभूमिं प्रति महीमानानामागमनम् मण्डपे सर्वेषामुपस्थितिः स्वस्तिवाचनादि घृतबह्वाहुतिहोमपर्यन्तकार्याणां विनिवर्तनं परिहारश्चेत्यादिनिरूपणनामा पञ्चविंशत्यधिकद्विशततमोऽध्यायः ॥ २२५ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके श्रीमत्कृष्णनारायणो हरिः ।
यमुपदेशं प्रददौ स्वात्मकल्याणकारकम् ॥ १ ॥
तमहं ते प्रवक्ष्यामि प्रजाभ्यः प्रददौ प्रभुः ।
परब्रह्मप्रयुक्तेन ब्रह्मणा चाक्षरेण वै ॥ २ ॥
प्रेर्यंत पुरुषो धाम्नि स्थितः सृष्टिविधापने ।
युयुजे निजशक्त्या स मायया तेन मायिकाः ॥ ३ ॥
मायालीनाऽनादिनो ये आत्मानस्ते स्वकर्मभिः ।
प्रेरिता ईश्वरा यद्वा जीवा भवन्ति देहिनः ॥ ४ ॥
देहेन्द्रियान्तःकरणतन्मात्राभूतसंज्ञकम् ।
संघातं तु निजं मत्वा बध्यते तत्र कर्मभिः ॥ ५ ॥
संघातरूपान् भावान् वै गृह्णन्ति प्राणिनो मुहुः ।
पुनर्वियोगं संयन्ति चक्रवत्परियन्ति च ॥ ६ ॥
शान्तघोरविमूढांश्च भावान् प्रयान्ति सर्वतः ।
रोमलोहितमांसानि भावा वै मातृसंभवाः ॥ ७ ॥
मज्जाऽस्थिस्नायवो भावा भवन्ति पितृसंभवाः ।
सुखदुःखविमोहाढ्याः शीतोष्णदाहकाः सदा ॥ ८ ॥
तान् भावान् समवाप्याऽपि तैर्न यो भावितो भवेत् ।
सोऽहं सोऽहं विचिन्त्य स्याद् भावबन्धनवर्जितः ॥ ९ ॥
नवद्वारं पुरं रम्यं तत्तद्भावैः समन्वितम् ।
व्याप्य शेते चेतनात्मा पुरुषः सोऽयमुच्यते ॥१०॥
तेभ्यः पुरुषसंज्ञेभ्योऽनन्तेभ्यश्चोत्तमोऽस्म्यहम् ।
अन्तरात्मा विराजेऽहं ब्रह्मलोके यथाऽस्म्यहम् ॥११॥
पुरुषोत्तम एवाऽहं भवामि सर्वशासकः ।
सर्वेषु चेतनेषु यद्वदहं निवसामि ह ॥१२॥
तथा सर्वजडेऽप्यस्मि शरीरी तत्त्वधारकः ।
तं मां विज्ञाय भक्तो मे विदेहो जायतेऽचिरात् ॥१३॥
अजरः सोऽमरश्चैव सूक्ष्मो मम वृषान्वितः ।
मम मूर्तौ मम भक्तौ सर्वार्पणो विमुच्यते ॥१४॥
अग्निश्चास्ते सदा दारौ दारुनाशे वियुज्यते ।
परे तत्त्वे प्रयात्येव तथाऽऽत्मा देहनाशने ॥१५॥
तं परं परमात्मानं मामाश्रित्याऽपि पापिनः ।
पुण्यवन्तो भवन्त्येवाऽङ्गारा इवाऽग्नियोगतः ॥१६॥
मम सतां प्रसंगेन ममैश्वर्यातियोगतः ।
ममांऽशगुणलाभाच्च भक्तो मत्समतां व्रजेत् ॥१७॥
स्वप्नदृश्यान् पदार्थान् वै त्यक्त्वा चायाति जाग्रति ।
तथा मायादिकास्त्यक्त्वा सर्वद्रष्टरि याति वै ॥१८॥
भूमिं त्यक्त्वा यथा वारि सरिद्द्वारा महार्णवम् ।
याति तद्वद् विहायेदं वर्ष्मात्मा मां पुमुत्तमम् ॥१९॥
कृतकार्या निवर्तन्ते यथा वै कर्मचारिणः ।
भुक्तभोगा निर्वतन्ते तथाऽऽत्मानश्च देहिनः ॥२०॥
वेगहीनः शरो यद्वन्निष्क्रियो याति भूतलम् ।
वासनावेगहीनोऽयं जीवो याति ममाऽक्षरम् ॥२१॥
निराशो जायते यद्वन्निवृत्तः कर्मणस्तथा ।
सर्वाशावर्जितो लोके निवृत्तो मां प्रयाति वै ॥२२॥
सर्वभावैर्वर्जितो यत् ततो याति ममास्पदम् ।
मदभ्यासान्मयि सक्तो न याति प्रकृतिं पुनः ॥२३॥
बीजान्यग्न्युपदग्धानि न प्ररोहन्ति सर्वथा ।
तथाऽस्य सर्वबीजानि न प्ररोहन्ति वै पुनः ॥२४॥
अमृतास्वादसंसक्तः स्वादान्तरे न सज्जते ।
मम स्वादे प्रसक्तः स गुणस्वादे न सज्जते ॥२५॥
दुर्लभा मम वेत्तारो जगत्यत्र भवन्ति वै ।
सुलभाः सर्वतो जीवा देहेन्द्रियार्थपोषकाः ॥२६॥
निम्नभावे वेगवन्तो यान्ति वारिप्रवाहणाः ।
निम्नग्राम्ये तथावेगा यान्ति वै प्रायशो जनाः ॥२७॥
वह्निस्वभावाः सन्तस्तु यान्त्यूर्ध्वं ब्रह्मवेदिनः ।
सतां प्रसंगतो भक्ताः प्रयान्तूर्ध्वं ममाऽक्षरम् ॥२८॥
एवं विचार्य सततं भजनीयः परेश्वरः ।
सतां संगेन कर्तव्या भक्तिर्मे धामदायिनी ॥२९॥
सर्वार्पणं मयि कृष्णे नारायणे परेश्वरे ।
ये कुर्वन्ति न वै तेषां माया बाधकरी भवेत् ॥३०॥
यः स्नेहः पुत्रवित्तादौ यः स्नेहः प्रमदादिषु ।
यः स्नेहो निजदेहादौ तं स्नेहं त्वर्जयेन्मयि ॥३१॥
या तृष्णा विषये सौख्ये या तृष्णा भोगसाधने ।
या तृष्णा मानयशसोः सा कार्या मयि माधवे ॥३२॥
यो वेगः स्वार्थसम्प्राप्तौ यो वेगोऽरिजयादिषु ।
यो वेगोऽहंकृतौ चास्ते स कार्यो मयि केशवे ॥३३॥

या तृप्तिश्चेष्टलाभेऽस्ति या तृप्तिर्भोगनिर्गमे ।
या तृप्तिर्बहुसन्तोषे सा कार्या मयि सर्वथा ॥३४॥
यत्सुखं सात्त्विके भावे निर्द्वन्द्वे चापि यत्सुखम् ।
यत्सुखं च विवेकेन तत् कार्यं मयि सर्वथा ॥३५॥
या पुष्टिः सम्पदा स्याच्च या पुष्टिर्बलसंग्रहैः ।
या पुष्टिः शास्त्रविषयैः सा कार्या मयि सर्वदा ॥३६॥
यत्स्थानं चाश्रये नित्यं यत्स्थानं च सहायदे ।
यत्स्थानं स्वस्य हृदये तत्कार्यं मयि सर्वथा ॥३७॥
यत् तादात्म्यं च देहादौ यत्तादात्म्यं च गौरवे ।
यत्तादात्म्यं निजे सौख्ये तत्कार्यं मयि सत्पतौ ॥३८॥
या शुभाशा निजे पुत्रे या चाऽऽशा त्वायतौ सुखे ।
या चाशा लाभसँल्लग्ना सा कार्या मयि सर्वदा ॥३९॥
उपार्जिते या ममता तादात्म्ये ममता च या ।
याऽभिमते च ममता सा कार्या मयि मुक्तये ॥४०॥
यः प्रयत्नो विषयार्थे धनार्थे यः प्रयत्नकः ।
प्राणार्थे यः प्रयत्नश्च कार्यः स मयि माधवे ॥४१॥
शरीरवानुपादत्ते मोहात् सर्वान् परिग्रहान् ।
तेन वै बन्धनं स्याच्च निरयं त्वभियाति सः ॥४२॥
नाऽशुद्धमाचरेत्तस्मात् समिच्छन् ब्रह्मसद्गतिम् ।
कर्मणां विघ्नरूपाणां फलं नेच्छेत् सुबुद्धिमान् ॥४३॥
यश्च कर्माऽऽचरेल्लोभान्मोहान्मदाच्च मत्सरात् ।
मोक्षपन्थानमुत्क्रम्य सानुबन्धः स नश्यति ॥४४॥
तस्माद् रागयुजा नैव भाव्यं क्वचिद् विवेकिना ।
बालिशेन न वै भाव्यं वा मुग्धेन जडात्मना ॥४५॥
मृन्मयं तु गृहं यद्वन्मृदा सम्परिलिप्यते ।
अन्नमयं तथा वर्ष्म लेपनीयं तथान्नकैः ॥४६॥
पार्थिवं वर्ष्म चैवैतत् पार्थिवैः पुष्टिमेति हि ।
नैतावता ममत्वेन कार्याऽऽसक्तिर्हि वर्ष्मणि ॥४७॥
मिष्टं तिक्तं घृतं तैलं स्निग्धं धान्यफलादिकम् ।
मृद्विकारा मृदो देहेऽपेक्षणीया हि सन्ति वै ॥४८॥
तावन्तश्चोपयोक्तव्या बन्धनादिविवर्जिताः ।
एवं यात्रां विनिर्वाह्य भवपारं प्रयाति वै ॥४९॥
यथाऽरण्यं गतो योगी क्वचिद्भोज्यं हि पत्तनात् ।
गृह्णात्यपि न तत्रापि बध्यते रागतस्तथा ॥५०॥
संसारारण्यमातिष्ठन् श्रमवान् यात्रिको भवन् ।
यात्रार्थमद्यादाहारं यथा बन्धाय नो भवेत् ॥५१॥
इन्द्रियैर्मनसा बुद्ध्या समीक्ष्य विषयानपि ।
शान्तिमिच्छन्न लुब्धः स्याच्चदा निर्बन्धनो भवेत् ॥५२॥
वासनाभिभूतलोका मोहिता मायया मम ।
चक्रवत् परिवर्तन्ते जन्ममृत्युभवभ्रमे ॥५३॥
तस्मादज्ञानजान् दोषान् त्यक्त्वा च बन्धनान्यपि ।
मम मार्गं समाश्रित्य मोक्षभाक् स्याद्विवेकवान् ॥५४॥
अकालपुरुषात् सर्वं चाहंकारे भ्रमत्यपि ।
फलं चाहंकृतं भुंक्ते पुनर्मायां प्रगच्छति ॥५५॥
रजोजन्यं स्वर्गरूपं स्थानं वै बन्धनं परम् ।
तमोजन्यं राक्षसादि स्थानं वै बन्धनं परम् ॥५६॥
तस्मादात्मवता वर्ज्यं रजश्च तम इत्यपि ।
रजस्तमोभ्यां शून्यं च सत्त्वं निर्मलतामियात् ॥५७॥
नैर्मल्ये चेतनः सम्यक् प्रसादवान् प्रजायते ।
प्रसादरूपः प्राप्नुयात् परमेशप्रसन्नताम् ॥५८॥
नित्यप्रसन्नताप्राप्तो मोक्षं समधिगच्छति ।
आत्मा नर इतिप्रोक्तो नारी तु वासना मता ॥५९॥
कृत्या ह्येषा घोरभावा गर्ते नयति कामिनः ।
रजस्तमोमयीमूर्तिरिन्द्रियाणां बलप्रदा ॥६०॥
वासना डाकिनी दुष्टा नरं क्षिपति सागरे ।
नरदेहे च वा नारीदेहे मोहस्य कारिणी ॥६१॥
पातयत्येव संघातेऽशुचौ मलिनमन्दिरे ।
असंस्कृतमहामार्गे रूपरागप्रलेपिते ॥६२॥
मोहात्पतितः पुरुषो बीजं वपति मायिकम् ।
जायन्ते जन्तवो बीजात् पुत्रपुत्रीतिनामकाः ॥६३॥
सादृश्येऽत्र विशेषोऽस्ति साम्येऽपि स्वेदजैः सुतैः ।
स्वेदजाः क्रमयः प्रोक्ता धातुजाः सुतसंज्ञकाः ॥६४॥
मोक्षार्थी तु क्रमीन् पुत्रान् स्वजातान् साम्यभाववान् ।
विरागेण विवेकेन विसृज्य मां समाश्रयेत् ॥६५॥
जनौ दुःखे पारवश्ये बालभावेऽपि दुःखकम् ।
यौवने विषयेच्छाभिश्चेन्द्रियपरतन्त्रता ॥६६॥
वार्धक्ये पारवश्ये च पुनर्दुःखं तदुत्तरम् ।
दुःखाद्यन्तैर्दुःखमध्यैर्नरः शारीरमानसैः ॥६७॥
विज्ञायेदं दुःखसौधं तदुपेक्षेत् मां श्रयेत् ।
उपादानान्निमित्ताच्च सहकारित इत्यपि ॥६८॥
आपूरकात्तथा सर्वं दुःखमेव हि वर्ष्मणि ।
तादृशं समनादृत्य त्यागान्निरोधमाश्रयेत् ॥६९॥
मयि रोधं प्रपन्नस्याऽतर्षुलस्य विवेकिनः ।
भक्तस्य मम योगेन मुक्तिरेव न संशयः ॥७०॥
तत्त्वज्ञानामृतभुजो भक्तिरसपिबस्य वै ।
मम स्नेहसुधाक्तस्य ममाऽक्षरपदं मतम् ॥७१॥

ब्रह्मचर्यं ब्रह्मरूपं शीलं चिदम्बरं मतम् ।
चिदाकाशं समालम्ब्य ममाकाशमुपाव्रजेत् ॥७२॥
देहाकाशं तथेन्द्रियाकाशं चान्तर्विकाशकम् ।
ब्रह्माकाशेन संयुज्य हर्याकाशेऽर्पयेत् कृती ॥७३॥
एवं मुक्तो भवत्येव मम योगमुपागतः ।
कृत्वैवं नित्यमभ्यासं कर्तव्यं नावशिष्यते ॥७४॥
इत्युक्त्वा विररामाऽसौ भगवान् कृष्णवल्लभः ।
राधिके स ततो मन्त्रान् ददौ भक्तेभ्य आर्थितान् ॥७५॥
ततो रात्रौ परां शान्तिं योगनिद्रात्मिकां ययौ ।
प्रातर्वाद्यादिमांगल्यैः कीर्तनैर्यशसां श्रवैः ॥७६॥
जजागार स्वयं नाथस्त्रैलोक्यां मंगलं व्यधात् ।
कृताह्निकः कृतपूजः कृतसम्भावनः प्रभुः ॥७७॥
सर्वान् भक्तान् महीमानान् संभाव्य मण्डपं ययौ ।
तदा वाद्यान्यवाद्यन्त मखोत्साहप्रवृत्तये ॥७८॥
मंगला गीतयश्चासन् नारीणां ब्रह्मयोषिताम् ।
वेदघोषा अभवँश्च वैदिकानां समन्ततः ॥७९॥
आययुश्च क्रतुस्थानं मखीयाः कर्मठा द्रुतम् ।
अवताराश्च मुक्ताश्चेश्वरा देवा महर्षयः ॥८०॥
पितरो मानवा दैत्या यक्षाः सुराश्च दानवाः ।
काश्यप्यश्च प्रजाः सर्वा देव्यश्च ब्रह्मयोषितः ॥८१॥
नागाः सर्पाः खनिजाश्चाययुर्वै जडचेतनाः ।
षष्ठ्यां प्रातर्यज्ञकार्ये पूर्ववन्मुनिभिस्तदा ॥८२॥
प्रवर्तितं यथायोग्यं स्वस्तिवाचनपूर्वकम् ।
देवानां पूजनं जातं तथा बलिनिवेदनम् ॥८३॥
हव्यदानं च वह्नौ चाहुतिप्रदानकं तथा ।
पितॄणां तर्पणं चापि पुष्पाञ्जलिश्च दक्षिणाः ॥८४॥
आरार्त्रिकं परिहारः सर्वं जातं यथोचितम् ।
विप्राणां भोजनं चापि महीमानादिभोजनम् ॥८५॥
यजमानादिलोकानां भोजनानि शुभान्यपि ।
जातान्यथ सुविश्रम्य हरिः सायं सभां शुभाम् ॥८६॥
अकारयत् स्वयं तत्र स्वामीश्रीकृष्णवल्लभः ।
आचार्यवर्यो भगवान् जनेभ्यः प्रददौ मनून् ॥८७॥
ततश्चोपादिदेशापि मोक्षदं हितकृच्च वै ।
राधिकेऽनादिकृष्णः श्रीपतिर्गोपालबालकः ॥८८॥
श्रीकृष्णवल्लभाचार्यः कोटिमुक्ताभिवन्दितः ।
धामधामेश्वरनाथः सर्वावतारकारणम् ॥८९॥
असंख्यब्राह्मीसेवाभिप्रसादितपरेश्वरः ।
यज्ञे तृप्तः सुराद्यैश्च पूजितो मोक्षदः प्रभुः ॥९०॥
कारुणिकः कांभरेयोऽनन्तशक्तिपतिर्हरिः ।
उपदेशक्षणे सर्वैस्त्वेकवृत्त्या विलोकितः ॥९१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पञ्चम्यां रात्रौ प्रजाभ्य उपदेशनं रात्रौ विश्रमणं षष्ठ्यां प्रातश्चाह्निकोत्तरं यज्ञसमस्तकार्यनिर्वर्तनं भोजनादि चेत्यादिनिरूपणनामा षड्विंशत्यधिकद्विशततमोऽध्यायः ॥ २२६ ॥

**श्रीकृष्ण उवाच—**

राधिके श्रीहरिकृष्णो ब्रह्मव्रतमुपादिशत् ।
शृणु सर्वव्रतेभ्यस्तच्छ्रेष्ठं ब्रह्मपदं शुभम् ॥ १ ॥
ब्रह्मचर्यमिति ख्यातं सर्वमूर्धन्यमेव यत् ।
भक्तश्चाऽप्यध्यवस्येद्वै ब्रह्मचर्यमकल्मषम् ॥ २ ॥
ब्रह्मव्रतिर्ब्रह्मचारी ब्रह्मसेवी च शीलवान् ।
कालं मायां च कर्माणि जित्वा मद्धाम चाप्नुयात् ॥ ३ ॥
सुकरं योगिनां तद्धि सिद्धानां च सतां तथा ।
सतीनां सुकरं चापि दुष्करं विषयैषिणाम् ॥ ४ ॥
सम्प्रदीप्तं बलिष्ठं चेन्द्रियग्रामं विशेषतः ।
निगृह्णीयात् सावधानः स वै जयति मृत्युदम् ॥ ५ ॥
कामस्य न स्वरूपं वै चिन्तयेद् विषयान्न च ।
कामचिह्नानि पश्येन्न रजोभागान् विवर्जयेत् ॥ ६ ॥
रजःपुष्टिकरान् भोगान् वर्जयेद् देहवानिह ।
धातुपुष्टिकरान् भोगाँस्तथैव परिवर्जयेत् ॥ ७ ॥
ज्ञानयुक्तेन मनसा विरागसहितेन च ।
रागभावं विनाश्यैव वर्तयेदात्मभाववान् ॥ ८ ॥
कुणपाऽमेध्यसंयुक्तं शरीरं कामनाश्रयम् ।
भविष्यन्निरयक्षेपकारकं विश्वसेन्न वै ॥ ९ ॥
वातपित्तकफागारं रक्तत्वङ्मांसकुण्डकम् ।
मज्जास्नाय्वस्थिनाड्याढ्यं मलमूत्रादिसंभृतम् ॥१०॥
कामाश्रयं च निकृष्टं ज्ञात्वा रागं विवर्जयेत् ।
धमन्यो मलवाहिन्यः प्रतायन्ते समन्ततः ॥११॥
आपगा इव चाब्धिं वै देहं पुष्णन्ति बाह्यकैः ।
तासु चैका तु धमनी मनोवाहाभिधा हृदि ॥१२॥
कामधात्वाश्रया चास्ते शुक्रं मुञ्चति कल्पजम् ।
शुक्रं बहुविधं प्रोक्तं तैजसं नेत्रयोर्गतम् ॥१३॥
कर्णयोर्द्रवरूपं च शब्दग्राहकमेव तत् ।
एवमन्येन्द्रियाणां मन्दिरे प्राप्तं प्रशक्तिदम् ॥१४॥

जले चास्ते तथा दुग्धे स्नेहो घृतं च वर्ष्मणि ।
तदेव शुक्ररूपं निर्मथ्यतेऽति तु मन्थनैः ॥१५॥
स्वप्नेऽप्येवं मनोजन्यं संकल्पजं रजोंऽशकम् ।
शुक्रं तूत्पद्य वेगेन बलहीनं विशत्यपि ॥१६॥
त्रीणि बीजानि शुक्रस्य ह्यन्नं रसो मनोवहा ।
एतत्त्रयं विदित्वैव शिथीलयेत् त्रिकं मुहुः ॥१७॥
ततश्च शुक्रानुत्पादाद् ब्रह्मव्रतं प्रपुष्यति ।
मनो भक्ष्यस्याऽणुतमो भागः पुष्टतमं ततः ॥१८॥
निर्वासनं विधायैव विरागेण जयेद्धि तत् ।
ज्योतिष्मद्विरजः स्वात्मरूपतामेति मानसम् ॥१९॥
रजोमयं परावृत्य सत्त्वमयं प्रजायते ।
सत्त्वभावभावितं च सच्चिदानन्दतामियात् ॥२०॥
तरुणाधिगतं तद्वै राजसं भाति यावता ।
तावता तल्लयार्थं वै ध्यानयोगं समाचरेत् ॥२१॥
एकाग्राऽभ्यसनं कार्यं तारुण्यं तेन लीयते ।
पक्वभावं गतं तच्च बलहीनं प्रजायते ॥२२॥
तदात्मानं समाश्रित्य जीवदात्मबलान्वितम् ।
ततश्चात्मानमुत्सृज्य न याति विषयं क्वचित् ॥२३॥
न चेन्द्रियाण्यभियाति नेश्वरादिप्चमत्कृतिम् ।
न सिद्धीर्न च वेगाद्यं न मायां न च तद्गुणान् ॥२४॥
एवंविधं वेगहीनं यदा स्याद्वै स्वमानसम् ।
तदा सुदुर्गं पन्थानं गुणराज्यानुयायिनम् ॥२५॥
अतीत्य परमं मार्गं चात्मराष्ट्रीयमृच्छति ।
आसीममार्गं चोल्लंघ्याऽक्षरेऽमृतं समश्नुते ॥२६॥
इत्येवं वर्तमानस्य ब्रह्मलोकः करस्थितः ।
ब्रह्मचर्यरतस्याऽत्र ब्रह्मलोको हि वर्तते ॥२७॥
दुरन्तेष्विन्द्रियार्थेषु सक्ताः सीदन्ति देहिनः ।
असक्ता ये ब्रह्मशीलास्ते यान्ति धाम मे परम् ॥२८॥
दृष्ट्वा सृष्टिं सन्ततां च जन्ममृत्युजरादिभिः ।
आधिव्याधिक्लेशदुःखैर्व्याप्तां यतेत मुक्तये ॥२९॥
शरीरेन्द्रियसंघातानन्तःकरणकान्यपि ।
संयुज्य श्रीपतौ भक्तो निरपेक्षश्चरेत् सुखम् ॥३०॥
मनःसंगं कृपयाऽपि नैव कुर्यान्मुमुक्षुकः ।
संगे ह्युपेक्षां कुर्वीत ज्ञात्वा संगफलं जगत् ॥३१॥
संगफलं विहायैव वर्तयन् कर्मठोऽपि सन् ।
नैव बध्नाति मुक्तात्मा पद्मपत्रमिवांभसा ॥३२॥
क्षमाऽऽर्जवं तथा द्रोहो यस्य स्यात् स सुखी भवेत् ।
दुःखान्निःसरणं ज्ञात्वा निःसरेत् स सुखी भवेत् ॥३३॥
नाऽपध्यायेन्न स्पृहयेन्नाऽयोग्यं चिन्तयेदसत् ।
चिन्तयेद्वै परंब्रह्म शृणुयान्मे कथामृतम् ॥३४॥
कल्कापेतां वदेद् वाचं धर्मं कार्ष्णमनुव्रजेत् ।
व्याहरेच्छ्रीहरेर्नाम चिन्तयेदर्थमुत्तमम् ॥३५॥
अनर्थं निरयाणां सम्प्रसञ्जकं विवर्जयेत् ।
प्रतिलोमां दिशं बुध्वा सांसारिकीं विवर्जयेत् ॥३६॥
अनीहश्च तथा मुक्तः सर्वैः परिग्रहैर्मुहुः ।
विविक्तचारी नियमी ज्ञानप्रदग्धकिल्बिषः ॥३७॥
आत्मावान् धृतिमान् भूत्वा हृत्प्रकाशं प्रमार्गयेत् ।
यत्र देवाः प्रकाशन्ते ततो ब्रह्म प्रकाशते ॥३८॥
एवं स्थितिं समापन्नो ब्रह्मभूयाय जायते ।
यद्वा योगमहावृत्तिं समाचरेच्छनैः शनैः ॥३९॥
आहारनियमं कृत्वा चिन्तानियममित्यपि ।
ध्यानवृद्धिं समासाद्य स्वात्मप्रकाशमर्जयेत् ॥४०॥
ज्ञानप्रकाशसंयुक्तश्चात्मप्रकाश एधितः ।
भक्तिप्रकाशसम्मिश्रः सूर्यवत्सम्प्रकाशते ॥४१॥
देवप्रकाशवान् पूर्वं पश्चादात्मप्रकाशकः ।
ततः स्वयंप्रकाशः स्यात् स स्याद्वै कृष्णवल्लभः ॥४२॥
एवं प्रकाशमार्गेण परान् स्वर्गान् विक्रम्य च ।
चित्प्रकाशो भवेत् शश्वद् ब्रह्मप्रकाशवान् हि सः ॥४३॥
सगुणो मञ्जुलो हंसः पारवान् स्वप्रभो यदा ।
वीतरागोऽपवर्गज्ञो भवेन्मामेति वै प्रभुम् ॥४४॥
गुणातीतो जरामृत्यू जित्वा मायामयं पुरम् ।
अक्षरामृतमाप्नोति यत्तद्ब्रह्म सनातनम् ॥४५॥
एतत्सर्वं ब्रह्मचर्यलभ्यं भवति शाश्वतम् ।
निद्रा व्रतहा संत्याज्या ब्रह्मचर्यं समिच्छता ॥४६॥
मनो निद्रायुतं व्यग्रं रजसा त्वभिभूयते ।
रजोभावस्य नैर्बल्ये व्यग्रता क्षीणतां व्रजेत् ॥४७॥
शान्तिर्भवेत् सत्त्ववृत्तिप्राधान्यं गुरुतालयः ।
तेन निद्रालयः स्याच्च ज्ञानवृत्त्या स्वपित्यपि ॥४८॥
संसारवृत्तिविलये स्वप्नं दूरतरं भवेत् ।
तेन ब्रह्मपरो भूत्वा ब्रह्मश्रेष्ठमवाप्नुयात् ॥४९॥
प्रसन्नमनसा यद्यत् संकल्पयति मानसम् ।
तत्तत्संस्कारमापन्नं स्मर्यते च मुहुर्मुहुः ॥५०॥
सात्त्विकेष्वपि देवेशं परेशं मां विचिन्तयेत् ।
सर्वभूतात्मभूतस्थं तेन मां चोत्तरे लभेत् ॥५१॥
लिप्सेत्तु मनसा भक्तो मम योगं सुखावहम् ।
आत्मप्रसादं सौम्यं च देवानां दर्शनं हृदि ॥५२॥

नित्यमेवं समभ्यासात् तत्संस्कारः सुरांस्ततः ।
हृदयं संस्थितान् पश्येत्ततो ब्रह्म प्रकाशते ॥५३॥
ब्रह्मचर्यं तदेवाहुर्यत्तद् ब्रह्मणि वर्तनम् ।
ब्रह्मसंसृष्टदेवेषु सत्सु यद्वर्तनं च तत् ॥५४॥
ब्रह्म तत्परमं ज्ञानं चामृताऽक्षरवेदनम् ।
एवं विदित्वा स्वात्मानं प्रयान्ति परमां गतिम् ॥५५॥
मायां त्यक्तुं प्रविद्याच्चाऽक्षरं विद्याद्विमुक्तये ।
प्रवृत्तिं सम्परित्यज्याऽक्षरो भूत्वाऽक्षरं व्रजेत् ॥५६॥
प्रवृत्तिः पुनरावृत्तिर्निवृत्तिः परमा गतिः ।
निवृत्तिलक्षणो धर्मो ब्रह्मदः शाश्वतप्रमुत् ॥५७॥
श्रियं दिव्यामभिप्रेप्सुः श्रीपतिं मां हृदि स्मरेत् ।
सर्वभावेन मत्प्राप्त्यै कुर्यान् मद्योगकृत्तपः ॥५८॥
ब्रह्मचर्यमहिंसा च शारीरं तप तन्मतम् ।
मत्स्मृतिर्मनसो रोधो मानसं तप एव तत् ॥५९॥
मत्प्रसादादनं श्रेष्ठं तपो वै पापनाशनम् ।
वासनाया विमर्दोऽपि बुद्धेस्तपः परं मतम् ॥६०॥
आत्मनिष्ठा चेतनस्य तपः परममुच्यते ।
मद्योगार्थे प्रयत्नश्च सततं तप उत्तमम् ॥६१॥
अव्याहता मतिर्यस्य मदन्यैर्जडचेतनैः ।
सस्थितिं ब्रह्मसाम्यां वै गतो यास्यति मामनु ॥६२॥
मायासर्गे याऽऽयतिः सा परसर्गे न विद्यते ।
आत्मज्ञानगुणाद्यैश्च दिव्यभावैः प्रमोदते ॥६३॥
आयुषोऽन्तेऽत्र मनुजाः सतः केचिदुपासते ।
केचिदक्षरभावं चाऽऽत्मानं केचिदुपासते ॥६४॥
परे देवं परं मां वै प्रस्थाने समुपासते ।
सर्वे एते परभावाः प्रयान्ति परमां गतिम् ॥६५॥
ब्राह्मीं तनुं लभन्ते ते विमुक्तामपरिग्रहाम् ।
मम विज्ञानसम्पन्ना मदाराधनतत्पराः ॥६६॥
ममाश्रयं परं लब्ध्वा प्रयान्ति परमां गतिम् ।
विद्यां लब्ध्वा परां ब्रह्मभूता यान्ति परां गतिम् ॥६७॥
यथाभावमुपासन्तः सर्वे यान्ति परां गतिम् ।
कषायवर्जिताः शान्ता मदाश्रयपरायणाः ॥६८॥
विमुच्यन्ते गुणक्लेशैः प्रयान्ति परमां गतिम् ।
भगवन्तमजं विष्णुं दिव्यं नारायणं प्रभुम् ॥६९॥
ज्ञात्वाऽऽत्मस्थं हरिं मां च शुद्धस्नेहसमन्विताः ।
भावतृप्ता हि मां यान्ति निवर्तन्ते न तेऽक्षराः ॥७०॥
मां वा मे साधुपुरुषान् मदंशान् संश्रयन्ति ये ।
प्राप्य ते परमं धाम मोदन्तेऽक्षरमव्ययम् ॥७१॥

तृष्णाबद्धं जगत् सर्वं चक्रवत् परिवर्तते ।
तृष्णातन्तुर्येन दग्धस्तस्य मद्धाममार्गणम् ॥७२॥
सूच्या सूत्रं यथावस्त्रे संसारयति वायकः ।
तद्वत् संसारसूत्रं हि तृष्णासूच्या प्रसार्यते ॥७३॥
तस्माद् विमुक्तः पुरुषो मे भक्त्या याति मामपि ।
तं स्नेहेन विमानेन नयामि धाम मामकम् ॥७४॥
इत्युपादिश्य भगवान् विरराम क्षणं ततः ।
राधिके प्रददौ मन्त्रं नूत्नेभ्यः श्रीहरिः स्वयम् ॥७५॥
सभासमाप्तिमकरोत् सन्ध्यावन्दनमाचरत् ।
रात्रौ च भोजनं चक्रुः सर्वेऽध्वरे समागताः ॥७६॥
महीमानेषु सर्वत्र रञ्जनान्यभवन्निशि ।
श्रीहरिः शयनं प्राप ब्रह्मप्रियादिसेवितः ॥७७॥
मखार्थिमहीमानानां शिविरेषु नटादयः ।
चक्रू रात्रौ नाट्यमग्र्यं पूर्वावतारबोधकम् ॥७८॥
मल्लाश्चक्रुर्मल्लयुद्धं बहुयुक्तिसमन्वितम् ।
गायकानां गायनानि गान्धर्वमण्डपेऽभवन् ॥७९॥
कुत्रचित्तु विदुषां वै कथाऽऽख्यानानि चाऽऽभवन् ।
सूतमागधबन्दीनां चारणानां च शास्त्रिणाम् ॥८०॥
काव्यानि चैतिहासानि मण्डपे त्वभवन्निशि ।
कुत्रचिद् वारनारीणां नृत्यानि गीतिमन्ति च ॥८१॥
राजन्यवर्गसंसत्सु भवन्ति स्म तदा निशि ।
कुत्रचिद् देवतानां च देवीनां देवयोषिताम् ॥८२॥
ब्रह्मसरसामप्सरसां गीतिनृत्यानि चाभवन् ।
कुत्रचिदीशसृष्टीनां महोत्सवा भवन्ति हि ॥८३॥
क्वचिद् दानवदैत्यानां मनोरञ्जनकानि च ।
भवन्ति विविधास्तत्र क्रीडा उत्सवबोधिकाः ॥८४॥
प्रदर्शनानि लोकानां पशूनां पक्षिणां तथा ।
योषितां च नराणां च देहिनामभवँस्तथा ॥८५॥
कुत्रचिद् वनवल्लीनां द्रुमाणां तृणपत्रिणाम् ।
फलानां शिबिकानां च प्रदर्शनानि चाभवन् ॥८६॥
कुत्रचिच्छिल्पकार्याणां काष्ठोपलमृदां तथा ।
कार्पासहीरकौशेयत्वगूर्णानां तदाऽभवन् ॥८७॥
एवं गजानामश्वानां गवां केसरिणां तथा ।
शरभाणां गरुडानामुष्ट्राणां दर्शनानि च ॥८८॥
रेण्डीयानां च हंसानां शुकानां दर्शनानि च ।
सैन्यानां च महिषीणां मृगाणां दर्शनानि च ॥८९॥
एवंविधानि नूत्नानि बहुदेशोद्भवानि च ।
बहुलोकसमुत्थानि वस्तूनि यानि यानि च ॥९०॥

कलात्मकानि सर्वाणि हेतुमुख्यानि यानि च ।
यन्त्रात्मकानि चान्यानि तत्राऽभवँस्तदा शुभे ॥९१॥
गोयाजनभूमौ वै प्रदर्शितानि पालकैः ।
एवं षष्ठीनिशा सर्वा महोत्साहसमन्विता ॥९२॥
व्यतीताऽर्धा ततो लोका निद्रायां संगताः सुखाः ।
सप्तम्यां प्रातरेवाऽथाऽवाद्यन्त तूर्यजातयः ॥९३॥
मंगलानि कीर्तनानि गीतयश्चाऽभवँस्तथा ।
स्तावकानां स्तवनानि निनादा यन्त्रसंभवाः ॥९४॥
वेदघोषाश्च विप्राणां सतां सद्भजनानि च ।
योषितां श्रीबालकृष्णयशोयुक्ताश्च गीतयः ॥९५॥
देवीनां देवतादिव्यकथाख्यानप्रगीतयः ।
ईश्वरीणां शेषवार्तागीतिकाश्च तदाऽभवन् ॥९६॥
निद्राशून्या अपि रात्रौ भूरीतिं परिगृह्य च ।
मौनं शान्तिं च निवृत्तिं प्राप्ताश्वासन्निशाह्वये ॥९७॥
प्रातश्चैवं तु विविधैर्मांगलिकश्रवादिभिः ।
स्वस्था भूत्वा कृतस्नानाः कृताह्निकास्तदाऽभवन् ॥९८॥
राधिके श्रीहरिः स्नातः कृताह्निकः कृतार्चनः ।
पितरौ च निजौ कृष्णो ववन्दे पादयोः पतन् ॥९९॥
राजाद्याश्च कृतकार्या हरिं पूजयितुं तदा ।
समाययुर्महासौधे श्रीनिवासालये शुभे ॥१००॥
पुपूजुः श्रीहरिं प्रीत्या पादोदकानि वै पपुः ।
आरार्त्रिकं प्रचक्रुश्च राजन्याः संगता गृहे ॥१०१॥
पुष्पांजलिं प्रदत्त्वैव नत्वा चाशीर्वचोऽन्विताः ।
कृतभाग्यास्तथा राज्ञ्यः पूजयित्वा तथैव तम् ॥१०२॥
आययुर्वै मण्डपं च यज्ञस्य भगवानपि ।
ऋषयश्चाययुस्तत्र कर्मठा देवतास्तथा ॥१०३॥
राधिके सर्वहव्यानि समिधो मन्त्रदेवताः ।
वह्नयः सर्व एवापि मण्डपे तत्र चाययुः ॥१०४॥
अथ प्रावर्तत कार्यं यज्ञीयं चादितः खलु ।
यथापूर्वं क्रमलाभं सावधानतया मखे ॥१०५॥

**इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने यज्ञभूमौ षष्ठ्यां सायं चोपदेशादि भोजनं शयनं सप्तम्यां प्रातर्यज्ञमण्डपागमनं चेत्यादिनिरूपणनामा सप्तविंश-त्यधिकद्विशततमोऽध्यायः ॥ २२७ ॥**

**श्रीकृष्ण उवाच—**

राधिके सप्तमीप्रातर्मुहूर्ते चोत्तमे पुनः ।
मखकार्यं लोमशाद्यैः कृतं पूर्वदिने यथा ॥ १ ॥
प्रोक्षणं स्वस्तिवागादि पुण्याहवचनं तथा ।
देवानां सम्प्रबोधश्च पूजनं च विधानतः ॥ २ ॥
आरार्त्रिकं बलेर्दानं महानैवेद्यकानि च ।
जलार्पणं तथा ताम्बूलार्पणं पितृतर्पणम् ॥ ३ ॥
अग्न्यावाहुतयश्चापि सर्वेषां हव्यलाभनम् ।
आरार्त्रिकं च देवानां विप्राणां दक्षिणादिकम् ॥ ४ ॥
पुष्पाञ्जलिस्ततः परिहारश्चेत्यभवन् क्रमात् ।
एवं निवर्तिते कार्ये राजभिर्यजमानकैः ॥ ५ ॥
श्रीहरेराज्ञया सर्वे महीमानोत्तमादयः ।
हव्यानि मिष्टभोज्यानि बुभुजुश्च ततः परम् ॥ ६ ॥
लक्षायुताद्या मनुजा बुभुजुर्दीनवर्गिणः ।
अथ विश्रान्तिमासाद्य सायं तत्राऽभवत्सभा ॥ ७ ॥
अनादिश्रीबालकृष्णस्वामी नारायणाधिपः ।
प्रजाभ्यो हितकृद्वाक्यान्यादिदेश कृपापरः ॥ ८ ॥
यज्ञश्चाहं परब्रह्म वह्निर्मुखं तु मे मतम् ।
तन्मुखेन हविः सर्वं ग्रसामि भक्षयामि च ॥ ९ ॥
मन्मूर्तौ ब्रह्मरन्ध्रे मेऽक्षरंधाम विराजते ।
केशेषु सर्वमुक्ता मे मुक्तान्यो भ्रकुटौ मम ॥१०॥
मुखे नेत्रे गण्डयोश्च कपोलयोश्च कर्णयोः ।
श्मश्रुषु चाप्यवताराः सर्वे वसन्ति मस्तके ॥११॥
चिबुके नासिकादण्डेऽवतारिण्यो वसन्ति मे ।
कण्ठे व्यूहा वासुदेवादयो वसन्ति चेश्वराः ॥१२॥
स्कन्धे पृष्ठे महामाया प्रकृतिर्या प्रकीर्त्यते ।
प्रधानपुरुषः कालो भूमा पुरुष इत्यपि ॥१३॥
महाविष्णुस्तथा रुद्रः सदाशिवो विराडपि ।
सर्वे त्वेते पार्श्वयोर्मे वर्तन्ते कुक्षिसंश्रिताः ॥१४॥
ईश्वराण्यो महादेव्यो महालक्ष्म्यश्च वै श्रियः ।
सर्वास्ताः शक्तयो वक्षोभागे वसन्ति मे स्त्रियः ॥१५॥
ब्रह्मविष्णुमहेशाद्याः सिद्धाश्चेश्वरकोटयः ।
वसन्ति नाभिभागे मे सपत्नीका ममोदरे ॥१६॥
ऋषयः पितरो देवा वसन्ति जघने मम ।
यक्षा रक्षांसि दैत्याश्च दानवा गुप्तरोमसु ॥१७॥
गुप्ते कामादिका देवा वसन्ति राजसा नृपाः ।
नितम्बे भूतकूष्माण्डाः प्रेतपिशाचकोटयः ॥१८॥
सक्थ्नोर्मे मानवाद्याश्च जान्वोर्मे चारणादयः ।
जंघयोर्मे तलवासा दैत्याद्याः संवसन्ति हि ॥१९॥
पत्फणयोः सर्पनागा वसन्ति च सरीसृपाः ।
वृक्षवल्लीप्रभृतयो वसन्ति रोमसु द्रुमाः ॥२०॥

कीटपतंगशलभाः पक्षिणः पशवस्तथा ।
शारीरक्षरणस्था मे वसन्ति परितः सदा ॥२१॥
इत्येवं मयि सर्वा वै जडचेतनसृष्टयः ।
वसन्तीति मयि तृप्ते तृप्ताः सर्वे मदात्मकाः ॥२२॥
विष्णुयागे महायागे मां प्रपूज्य परेश्वरम् ।
मद्भक्तान् भोजयेद् यस्तु फलं तस्याऽश्वमेधजम् ॥२३॥
लक्ष्मीनारायणं मां यः पूजयित्वा मखे द्विजान् ।
भोजयेत् स लभेदत्र वाजपेयक्रतोः फलम् ॥२४॥
कांभरेयं बालकृष्णं मखे यः पूजयेच्च माम् ।
साधून् संभोजयेत्तस्य राजसूयक्रतोः फलम् ॥२५॥
गोपालबालं गोविन्दं मखेऽत्र पूजयेत्तु माम् ।
सतीः साध्वीर्भोजयेच्च फलं तस्यातिरात्रजम् ॥२६॥
पुरुषोत्तमसंज्ञं मां मखेऽत्र पूजयेत्तथा ।
भोजयेद्बालकान् यः स पौण्डरीकफलं लभेत् ॥२७॥
कृष्णनारायणं मां यः पूजयेदध्वरे तथा ।
अनाथान् भोजयेत्तस्याऽग्निष्टोमाऽध्वरजं फलम् ॥२८॥
ब्रह्मप्रियापतिं मां योऽध्वरेऽत्र पूजयेत्तथा ।
कन्यका भोजयेद् यः स गवायनफलं लभेत् ॥२९॥
पिशंगीकान्तं मां भक्त्याऽध्वरेऽत्र पूजयेत्तु यः ।
ब्रह्मयतीन् भोजयेच्च लभेत् सोमक्रतोः फलम् ॥३०॥
श्रीराधामाणिकीनाथं श्रीकृष्णं मां प्रपूजयेत् ।
गोपगोपीर्भोजयित्वा यायाद्विश्वजितः फलम् ॥३१॥
प्रभापारवतीनाथं पूजयेन्मां मखे तथा ।
भोजयेच्च महीमानान् सौत्रामण्याः फलं लभेत् ॥३२॥
गौरीनाथं च मां भक्त्या पूजयेदध्वरेऽत्र यः ।
रुद्रयागफलं यायाद् भोजयित्वा हि कर्मठान् ॥३३॥
अमरीस्वामिनं मां यः पूजयेदत्र वै मखे ।
अमरीर्भोजयित्वा च ब्रह्मयज्ञफलं लभेत् ॥३४॥
ब्राह्मीनाथं च मां भक्त्या मखेऽत्र पूजयेत्तथा ।
ब्राह्मीः साध्वीर्भोजयित्वा महारुद्रफलं लभेत् ॥३५॥
लाक्ष्मणीस्वामिनं मां च मखेऽत्र पूजयेत्तथा ।
लभेन्नारायणफलं प्रभोज्य सांख्ययोगिनीः ॥३६॥
आब्रिक्तिस्वामिनं मां च मखेऽत्र पूजयेत्तथा ।
जलहारीर्भोजयित्वा जलमेधफलं लभेत् ॥३७॥
उष्णालीस्वामिनं मां च मखेऽत्र पूजयेत्तथा ।
पाचिनीर्भोजयेद् यः स लभेदन्नक्रतोः फलम् ॥३८॥
ईश्वरीस्वामिनं मां च मखेऽत्र पूजयेत्तथा ।
मखभृत्यान् भोजयेद् यः स लभेन्मखजं फलम् ॥३९॥

अनादिश्रीकृष्णनारायणं सर्वावतारिणम् ।
मुक्तपतिं च दुःखहालक्ष्मीकान्तं तु योऽध्वरे ॥४०॥
पूजयेद् भोजयेत् सर्वान् सर्वमेधफलं लभेत् ।
मूर्तिमन्तं गोचरं मां प्रीणयित्वाऽत्र चाध्वरे ॥४१॥
यद्यदिच्छेन्मम भक्तस्तत्तत्सर्वं समाप्नुयात् ।
दाताऽहं सर्वनाथोऽस्मि सर्वं ददामि सेविने ॥४२॥
दानान्यत्र मखे शक्त्या देयानि धर्मकर्मिणे ।
दानैर्यत् सुकृतं चात्र तद्भवेदक्षयं ध्रुवम् ॥४३॥
यज्ञविधो गृही दिव्यं किंकिणीजालमण्डितम् ।
अर्कप्रभं समारुह्य विमानं याति मत्पदम् ॥४४॥
अन्नानां च फलानां च दानं वै समिधां तथा ।
ओषधानामम्बराणां पत्राणां दानमित्यपि ॥४५॥
भवेद् ददानो दीर्घायुः स्वर्गभाङ् मोक्षभाक् ततः ।
संहितापुस्तकदानं यः करोति स गच्छति ॥४६॥
स्वर्गं सत्यं च वैराग्यं मोक्षं मे चाऽक्षरं पदम् ।
यद्यदिष्टतमं लोके यच्चापि दयितं गृहे ॥४७॥
तत्तत् स्वार्थं प्रदेयं वै तदेवाऽक्षयमिच्छता ।
न दानं यशसे दद्यान्न भयेन न लोभतः ॥४८॥
परलोकहितायैव देयं पात्राय मुक्तये ।
विद्यावते ह्यनाथाय चार्थिने शीलयोगिने ॥४९॥
साधवे दीयते स्यादक्षयं तद्वै महाफलम् ।
मम भक्ताः सर्वसहा निस्पृहा जितमानसाः ॥५०॥
सर्वभूतहिताः सन्तस्तेभ्यो दत्तं महाफलम् ।
सन्तस्तुष्टास्तारयन्ति दातॄन् सहस्रवंशजान् ॥५१॥
देवालयं धर्मशालां सन्मठान् कारयेद् दृढान् ।
यावत्य इष्टिकास्तत्र चिता देवालयादिषु ॥५२॥
तावन्त्यब्दसहस्राणि स्वर्गेषु मोदते कृती ।
मम मन्दिरनिर्माता मम धामाभिगच्छति ॥५३॥
प्रतिष्ठया पारमेष्ठ्यं प्रासादेनैश्वरं पदम् ।
पूजावृत्त्या ब्रह्मलोकं प्राप्नुयान्नात्र संशयः ॥५४॥
सुधादिभिर्लेपयित्वा जीर्णोद्धारं प्रकारयेत् ।
सम्मार्जयेल्लेपयेच्च सेवयेत् प्रतिमां मम ॥५५॥
कूपवापीतडागानि मदर्थं कारयेदपि ।
गावः पिबन्ति सलिलं साधवो मानवास्तथा ॥५६॥
सर्वाणि चापि सत्त्वानि तृषार्तानि पिबन्ति च ।
तीर्थालये च तत्पुण्यमप्रमेयं हि जायते ॥५७॥
प्रासादस्याऽभितो रोपणीया वृक्षा हि शाखिनः ।
आरामाश्चापि कर्तव्या विश्रान्त्यर्थं तु देहिनाम् ॥५८॥

फलोपयोगिनो वृक्षास्तथा पुष्पोपयोगिनः ।
समित्पत्रोपयोगाश्च पितृदेवोपभोगदाः ॥५९॥
एतत्पुण्यमनन्तं वै सर्वसमृद्धिप्रदं भवेत् ।
भक्तियुक्तं कृतं तत्तु मम धामप्रदं भवेत् ॥६०॥
गृहस्थैर्वा धनाढ्यैश्च राजभिस्तु विशेषतः ।
तीर्थभूमिः सदा कार्या सजीवना महोत्सवैः ॥६१॥
यज्ञभूमिः सदा पुण्या नदी पुण्या क्रतोस्तटी ।
गोयाजनी मेदिनी सा सदा मोक्षकरी मता ॥६२॥
अत्र वासेऽपि लोकानां याम्यानां दर्शनं न वै ।
अत्र मनुर्धृतो येन वैष्णवस्तस्य मोक्षणम् ॥६३॥
मम पूजा कृता येन तस्यापि मोक्षणं भवेत् ।
पत्रं पुष्पं फलं तोयं चान्नं येन मखेऽर्पितम् ॥६४॥
तस्य मुक्तिं करिष्यामि नयिष्ये मेऽक्षरं पदम् ।
अहो यज्ञ इति प्राज्ञो गुणग्राही भवत्यपि ॥६५॥
तस्य पापाब्धिमेवाऽहं ज्वालयिष्यामि केशवः ।
यज्ञे धृतं च वस्त्रं च पात्रं पायसमित्यपि ॥६६॥
यः प्रदास्यति भक्त्या तं नयिष्ये मेऽक्षरं पदम् ।
गोदानं पृथिवीदानं गृहदानं विधास्यति ॥६७॥
कन्यादानं पुत्रदानं कुमारदानमित्यपि ।
स्वर्णदानं रूप्यदानं यानवाहनदानकम् ॥६८॥
वाटिकोद्यानदानं च छत्रदानं गजार्पणम् ।
यः करिष्यति यज्ञेऽत्र तं नयिष्येऽक्षरं पदम् ॥६९॥
आत्मार्पणं तथा ब्रह्मार्पणं च गुरवेऽर्पणम् ।
सद्भयोऽर्पणं च यत्किञ्चिद् यथाशक्ति मखेऽत्र वै ॥७०॥
यः करिष्यति भक्तात्मा दास्येऽस्मै चाक्षरं पदम् ।
एवमुक्त्वा ततो राधेऽनादिश्रीबालकृष्णकः ॥७१॥
मन्त्रान् ददौ मनुष्येभ्यो मखिभ्यस्तत्र वैष्णवान् ।
ततः सन्ध्यां हरिश्चक्रे देवारार्त्रिकमाचरत् ॥७२॥
ईशानपानशिष्टाद्या राजाद्याः श्रीहरेरपि ।
आरार्त्रिकं प्रचक्रुश्च पूजां पुष्पाञ्जलीन् ददौ ॥७३॥
प्रजाश्च भोजयामासुर्महीमानान् समागतान् ।
यज्ञीयान् कर्मठान् देवान् सर्वांश्च देहिनोऽपि च ॥७४॥
आगन्तुकान् कौतूहलान्निरीक्षकान् जनानपि ।
आगतान् विगतांश्चापि भोजनानि जनादयः ॥७५॥
कारयामासुरत्यर्थं हरेः कुटुम्बकानि च ।
मिष्टान्नाद्यैर्विचित्रैश्च तत्तत्सृष्ट्युचितैरपि ॥७६॥
सर्वसृष्टिनिवासाँश्च भोजयामासुरीश्वराः ।
जलपानानि मिष्टानि ताम्बूलानि ददुस्ततः ॥७७॥
रात्रावासन् कथाश्रावाः प्रदर्शनानि वै ततः ।
निद्रारामास्ततश्चासन् सर्वे वै देहिनो निशि ॥७८॥
यथोचितं विरामस्थाः प्रातर्जजागरुर्द्रुतम् ।
मंगलैर्वाद्यघोषैश्च गीतिभिर्देवयोषिताम् ॥७९॥
सूतमागधबन्दीनां यशोगानैः समन्ततः ।
अष्टम्यां राधिके प्रातर्जजागार हरिः स्वयम् ॥८०॥
कृताह्निकः कृतपूजः पितरौ स्वौ पुपूज ह ।
ब्रह्मप्रियाद्याः सर्वाश्च हरिं पुपूजुरीश्वरम् ॥८१॥
श्रीहरिर्लोमशं नत्वा जग्राहाशीर्वचस्ततः ।
राजानो राजभृत्याश्च राज्ञ्यः कृष्णं परेश्वरम् ॥८२॥
पुपूजुश्चन्दनाद्यैश्च पपुश्च चरणामृतम् ।
ततो मुहूर्तसद्भावे श्रुत्वा वाद्यध्वनिं शुभम् ॥८३॥
हरिर्यज्ञस्थले भक्तैः समेतो मण्डपे ययौ ।
कृतशुद्धिर्हरिश्चापि राजानः कर्मठास्तथा ।
अपरा देवकोट्यश्चेश्वरावतारकोटयः ॥८४॥
मानवाः ऋषयो देवाः पितरः स्थावरास्तथा ।
जंगमा नरनार्यश्च मण्डपे तूर्णमाययुः ॥८५॥
सामग्र्यो हव्यरूपिण्यो हव्यवाहाश्च वह्नयः ।
हव्यदा यजमानाश्च यज्ञे तत्र समाययुः ॥८६॥
विप्राः कर्मप्रयोक्तारो वेदाः स्वराश्च गीतयः ।
काश्यप्यश्च प्रजाः सर्वा मण्डपे तत्र चाययुः ॥८७॥
प्रोक्षणं स्वस्तिवाचश्च पुण्याहवचनान्यपि ।
अभवन् देवतानां प्राबोधनं च समन्त्रकम् ॥८८॥
स्नानं प्रपूजनं पत्रपुष्पाक्षतादिवस्तुभिः ।
सर्वोपचारैः सुभगैर्धूपदीपादिभिस्तथा ॥८९॥
आरार्त्रिकं च नैवेद्यं जलपानं तथा तदा ।
ताम्बूलादिप्रदानं च महाऽऽहुतिप्रदानकम् ॥९०॥
पूर्वतोऽप्यधिकं जातं हव्यदानं तदाऽनले ।
चरोर्दानं पायसादिप्रदानं च फलार्पणम् ॥९१॥
एवं यावत्प्रदेहिभ्य आहुतयः समर्पिताः ।
तृप्त्युत्तरं च पितॄणां तर्पणं चाभवद् बहु ॥९२॥
देवीनां मातृकाणां चेश्वरीणां तर्पणं तथा ।
शक्तिनां वामिनीनां च श्राद्धं च तर्पणं ह्यभूत् ॥९३॥
सृष्टित्रयं प्रतप्तं च परिहारं क्रतोस्ततः ।
चकार श्रीहरिः पश्चाद् भोजनान्यभवँस्तदा ॥९४॥
मध्याह्नोत्तरवेलायां सर्वे बुभुजिरे जनाः ।
मिष्टान्नानि विचित्राणि सुधाऽमृतानि यानि च ॥९५॥

दिव्यान् रसाँस्तथा दिव्यपीयूषाणि शुभानि च ।
ब्रह्मरसान् धामरसान् सिद्धरसान् परोत्तमान् ॥९६॥
पपुर्बुभुजिरे देवाः सृष्टित्रयनिवासिनः ।
तृप्ता भोजनमासाद्य जलपानं ततः परम् ॥९७॥
तक्रपानं प्रचक्रुश्च फलादनं च तत्परम् ।
ताम्बूलग्रहणं कृत्वा विशश्रमुर्निवासके ॥९८॥
ततः सायं बालकृष्णः सभायां वै समाययौ ।
प्रजाभ्यो राधिके नैजं चोपदेशं ददौ हरिः ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सप्तम्यां प्रातर्मखकार्याणि निर्वर्त्य श्रीहरिणा कृतं स्वस्य सर्वात्मकत्वाद्युपदेशनं भोजनं रात्रावुत्सवः, ततः प्रातरष्टम्यां मखकार्यविनिर्वर्तनं भोजनं चेत्यादि-निरूपणनामाऽष्टाविंशत्यधिकद्विशततमोऽध्यायः ॥ २२८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके लोकानुपादिदेश माधवः ।
त्याग एव तु सर्वेषां महासुखप्रदो मतः ॥ १ ॥
त्यजनं त्याग एवाऽस्ति दूरीकरणमित्यपि ।
अनाग्रहणमेवापि त्याग एव हि सोऽर्थतः ॥ २ ॥
तृष्णात्यागे महाशान्तिरिच्छात्यागे निवर्तनम् ।
द्रव्यत्यागे कर्मशान्तिर्भोगत्यागे व्रतोद्भवः ॥ ३ ॥
सुखत्यागे तपःप्राप्तिः सर्वत्यागे विमोक्षणम् ।
त्यागमार्गो हि दुःखानां विप्रहाणाय जायते ॥ ४ ॥
यत्र येन भवेद् दुःखं तत्तत् त्यक्त्वा सुखी भवेत् ।
मायां त्यक्त्वा गुणातीतो ब्रह्मानन्दभरो भवेत् ॥ ५ ॥
गुणयोगे गुणभावाः सुखं दुःखं विमोहनम् ।
गुणत्यागे गुणभावविध्वंसश्चात्मनो भवेत् ॥ ६ ॥
सत्त्वं रजस्तमश्चेति शीतोष्णांगारसाधनाः ।
प्रहर्षः प्रीतिरानन्दः सुखं संशान्तचित्तता ॥ ७ ॥
सात्त्विकाः संभवन्त्येते वैराग्याद्वेष्टलाभतः ।
अतुष्टिः परितापश्च शोको लोभस्तथाऽक्षमा ॥ ८ ॥
राजसाः संभवन्त्येते रागाद्वा द्विष्टलाभतः ।
अविवेकस्तथा मोहः प्रमादः स्वप्नतन्द्रिते ॥ ९ ॥
तामसाः संभवन्त्येते जाड्याद्वा बुद्धिविभ्रमात् ।
इष्टतायाः परित्यागे सात्त्विकानां लयो भवेत् ॥१०॥
द्विष्टतायाः परित्यागे राजसानां लयो भवेत् ।
विभ्रंशस्य परित्यागे तामसानां लयो भवेत् ॥११॥
एवं गुणत्रयत्यागे गुणातीतस्थितिर्भवेत् ।
सच्चिदानन्दरूपं स्वं विन्दति चेतनः स्वयम् ॥१२॥
एवं सति रूपनामाकृतयोऽस्य न वै तदा ।
रूपनामाकृतिजन्याऽहन्ता न ममताऽपि न ॥१३॥
तयोस्त्यागे चेतनस्य मोक्षभावोऽभिजायते ।
लिप्यते कर्मभिर्नैव न बध्यतेऽपि मुच्यते ॥१४॥
दृढपाशा गताश्चास्य शरीरेन्द्रियसंभवाः ।
गताश्चान्तःकरणोत्थास्तदा मुक्तोऽग्रगो भवेत् ॥१५॥
अपरोक्षानुभववान् कालमृत्युभयातिगः ।
पुण्यापुण्यात्मपाथेयशून्यः फलविवर्जितः ॥१६॥
चिदम्बरात्मानमाप्य चिदाकाशे प्रमोदते ।
ऊर्णनाभिर्हि निर्बन्धः स्वजाले मुक्त एव सः ॥१७॥
गिरेः पतितो ग्रावा वै बन्धशून्यो यथैव सः ।
पुराणं रुरोः शृंगं त्यक्तं बन्धाय नैव तत् ॥१८॥
त्यक्ता जीर्णा न बन्धाय त्वक् सर्पस्य यथा तु वै ।
पिच्छं त्यक्तं न बन्धाय पिच्छिनस्तत्तथैव च ॥१९॥
नद्यां पतन् द्रुमस्त्यक्तः पक्षिणो बन्धनाय न ।
एवं देहालयं त्यक्त्वा विमुक्तो वै महासुखी ॥२०॥
देहे स्थितोऽपि यः प्रज्ञामेतामाश्रित्य वर्तते ।
मुक्तवन्मुक्त एवाऽयं गुणाऽसंगी महासुखी ॥२१॥
अथ लोके स्थितश्चापि गुणयोगेन वर्तते ।
तस्यापि सुखबाहुल्यसाधनं दम एव ह ॥२२॥
क्रियास्तपः सुखं सत्यं दमे सर्वं प्रतिष्ठितम् ।
दमस्तेजो वर्धयति भयं पापं निकृन्तति ॥२३॥
सुखं दान्तः प्रस्वपिति सुखं च प्रतिबुध्यते ।
सुखं लोकैः समन्वेति सुखं हृदि प्रसीदति ॥२४॥
दमेन वर्धते चात्मबलं भाग्यमुदेति च ।
सत्कार्याणां फलं सर्वं दमे दान्ते प्रतिष्ठति ॥२५॥
भवन्त्येते गुणा नित्या दमयुक्तस्य देहिनः ।
अकार्पण्यमसंरंभः सन्तोषः श्रद्दधानता ॥२६॥
अक्रोध आर्जवं सौम्यं नातिवादो न पैशुनम् ।
नाभिमानं नाप्यसूया दया च गुरुपूजनम् ॥२७॥
जनवादमृषावादस्तुतिनिन्दाविवर्जनम् ।
साधुकामः स्पृहाशून्यश्चाऽवैरः सूपचारवान् ॥२८॥
सुव्रतः शीलवान् जल्पवर्जितः सुप्रसन्नहृत् ।
प्रसन्नात्माऽऽत्मवान् दोषान् जित्वाऽऽत्मनिष्ठसंस्थितिः ॥२९॥
सर्वभूतहिते युक्तो न स्म द्विष्टेऽपरं तु यः ।
महाह्रद इवाऽक्षोभ्यः प्रज्ञातृप्तः प्रसादवान् ॥३०॥

कालाकांक्षी चरेल्लोकान् निरपाय इवात्मवान् ।
स्वर्गवन्मोक्षवच्चापि दान्तो गुणैरितीदृशैः ॥३१॥
नमस्यः सर्वभूतानां ब्रह्मवन्मोदते सुखी ।
त्यागस्तपः परं प्रोक्तं दान्तिस्तपः परोत्तमम् ॥३२॥
आर्जवं तपसां श्रेष्ठं मौनं शीलं परं तपः ।
अमृताशित्वमपरं तपः साधुप्रसेवनम् ॥३३॥
कृतप्रज्ञस्य दान्तस्य वितृष्णस्य निराशिषः ।
श्रीहरौ ध्यानशीलस्य स्थैर्यं तत्परमं तपः ॥३४॥
आर्जवेनाऽप्रमादेन प्रसादेन च सेवया ।
वृद्धशुश्रूषया शान्त्या तपः श्रेष्ठं प्रजायते ॥३५॥
प्रज्ञालाभात्तु पुरुषः सर्वं तुदति किल्बिषम् ।
विमायिको लभते शं शान्तिस्थः सम्प्रसीदति ॥३६॥
लब्धव्यान्येव लभति गन्तव्यान्येव गच्छति ।
प्राप्तव्यान्येव प्राप्नोति दुःखानि च सुखानि च ॥३७॥
एतद्विदित्वा कार्त्स्न्येन यो न मुह्यति देहवान् ।
कुशली स सदा चास्ते स वै सर्वधनो मतः ॥३८॥
तस्माद् गुणानुपार्ज्यैव सतो सेवेत चानयान् ।
सत्संगेन भवेद् वृद्धिर्गुणानां ब्रह्मगामिनाम् ॥३९॥
ब्रह्मप्राप्तिर्भवेत्तेन सर्वार्पणेन माधवे ।
इत्युक्त्वा भगवान् कृष्णनारायणः प्रजाजनान् ॥४०॥
मनूनश्रावयत् सम्यग् वैष्णवाँस्तान् व्यधापयत् ।
अष्टम्यास्तु रजन्यां वै दत्त्वोपदेशनं ततः ॥४१॥
भगवान् भोजयामास सर्वान् वै महीमानकान् ।
प्रजाश्च भोजयामास तथा नैजकुटुम्बकम् ॥४२॥
स्वयं भुक्त्वा च विश्रान्तिं लेभे सुयोगनिद्रिकाम् ।
नवम्यां मंगलध्वानैः सूतमागधगीतिभिः ॥४३॥
बन्दीगीतयशोव्रातैः प्रबुबोध महाप्रभुः ।
कृताह्निकः कृतपूजः कृतवृद्धाभिपूजनः ॥४४॥
मांगलिके मुहूर्ते त्वाययौ क्रतोः सुमण्डपम् ।
राजादयो यजमानाः समाययुस्तु मण्डपे ॥४५॥
यथापूर्वमभवच्च यज्ञकार्यं समस्तकम् ।
मध्याह्ने चाहुतिं दत्वा भगवान् बालकृष्णकः ॥४६॥
भोजयामास सर्वांश्च स्वयं च बुभुजे प्रभुः ।
सायं विमानमारुह्य समुद्रोपरि चाम्बरे ॥४७॥
राजभिः सह भगवान् विहारार्थं ययौ ततः ।
समागत्य निजं स्थानं सन्ध्यां चकार केशवः ॥४८॥
भोजयित्वा जनान् भुक्त्वा रात्रौ विश्रान्तिमाप च ।
दशम्यामपि प्रातः स कृताह्निकः परेश्वरः ॥४९॥
यज्ञमण्डपमागत्य यजमानैः समेतकः ।
महर्षिभिः क्रतोः कार्यं कारयित्वा तथा हवान् ॥५०॥
दत्वा मध्याह्नवेलायां भोजयामास वाडवान् ।
महीमानान् समस्तांश्च स्वयं च बुभुजे ततः ॥५१॥
सायं मनून् ददौ तत्र भक्तेभ्यो भगवान् प्रभुः ।
श्राद्धानि कारयामास वाडवैर्बहुतर्पणम् ॥५२॥
रात्रौ भोजनमासाद्य विश्रान्तिं चाप माधवः ।
एकादश्यां प्रगे शीघ्रं समुत्तस्थौ सुरेश्वरः ॥५३॥
अनादिश्रीकृष्णनारायणः श्रीभगवान् हरिः ।
कृताह्निकः कृतपूजो मण्डपं द्रुतमाययौ ॥५४॥
वस्तूनां प्रोक्षणं स्वस्तिवाचः पुण्याहवाचनम् ।
कारयित्वा सुरादीनां प्रबोधनं च पूजनम् ॥५५॥
बलिदानं महानैवेद्यकं पुष्पाञ्जलिं तथा ।
होमं हव्यविशेषाणां प्रददौ भगवाँस्ततः ॥५६॥
सहस्रघृतधाराभिस्तर्पयामास देवताः ।
तदा प्रत्यक्षरूपास्ते भुक्तवन्तः सुरादयः ॥५७॥
स्थावरा जंगमाः सर्वे तृप्तिं प्राप्ताः सुहव्यकैः ।
इयं चाक्षरधामाधिपतये चाहुतिर्नमः ॥५८॥
इमा मुक्तेभ्य एवापि चाहुतयश्च तान्नुमः ।
इमाः सर्वावतारेभ्यश्चाहुतयश्च तान्नुमः ॥५९॥
इमा ईशेभ्य आहुतयश्च तेभ्यो नमोनमः ।
इमाः ऋषिभ्यः सर्वेभ्य आहुतयश्च तान्नुमः ॥६०॥
इमाः पितृभ्यआहुतयस्तेभ्यश्च नमोनमः ।
इमा देवेभ्य आहुतयश्च तेभ्यो नमोनमः ॥६१॥
इमा भुवर्निवासिभ्य आहुतयश्च तान्नमः ।
इमा मानवजातिभ्य अहुतयश्च तान्नुमः ॥६२॥
इमाः सप्ततलवासिभ्यश्चाहुतयस्तान्नुमः ।
इमा द्रुमेभ्यः सर्वेभ्यो लतातृणेभ्य इत्यपि ॥६३॥
कन्दमूलादियावद्भ्य आहुतयश्च तान्नमः ।
इमाः कीटपतंगादिभ्यश्चाहुतयस्तान्नुमः ॥६४॥
सर्वयोषिद्भ्यश्च सृष्टित्रयस्थाभ्य इमा नुमः ।
जडेभ्यश्चेतनेभ्यश्च तत्त्वेभ्योऽपि नम इमाः ॥६५॥
आहुतयः प्रदत्तास्ते तृप्तिं यान्तु हि देहिनः ।
इत्येवं स्रुचि श्रेष्ठाज्यं श्रीफलं समिधस्तथा ॥६६॥
पत्रं पुष्पं फलं मिष्टं निधाय सर्वजातिकम् ।
महापूर्णाहुतिं नौमि नमस्कृत्य विचिन्तनम् ॥६७॥
अग्निर्नारायणः साक्षात्तस्मै ददामि ते नमः ।
इदमग्नये च वैश्वानराय परमात्मने ॥६८॥

इत्युक्त्वा प्रददौ वह्नौ नारिकेलादिकं हरिः ।
राजानः प्रददुश्चापि श्रीफलाद्यानि वै तदा ॥६९॥
नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये ।
नमश्चाहवनीयाय महावेदिस्थिताय च ॥७०॥
ब्रह्मणे गार्हपत्याय विष्णवे दक्षिणाग्नये ।
शिवायाऽऽहवनीयाय शक्तिवेदिस्थिताय च ॥७१॥
नमस्ते सभ्यरूपाय नमो गृह्याग्निरूपिणे ।
पञ्चाग्निरूपिणे तुभ्यं नमस्ते परमात्मने ॥७२॥
नमोऽग्निहोत्ररूपाय नमः पर्वेष्टिरूपिणे ।
चातुर्मास्यस्वरूपाय नमः पश्विष्टिरूपिणे ॥७३॥
सौत्रामणये तुभ्यं नमोऽग्निष्टोमाय ते नमः ।
अत्यग्निष्टोमरूपाय नमस्ते चोक्थरूपिणे ॥७४॥
नमः षोडशरूपाय वाजपेयाय ते नमः ।
अतिरात्रस्वरूपाय सर्वमेधात्मने नमः ॥७५॥
त्वं मुखं सर्वजीवानां त्वयाऽत्तं तर्पयेत् सुरान् ।
जीवसृष्टिरीशसृष्टिर्ब्रह्मसृष्टिश्च या मता ॥७६॥
तासां तृप्तिप्रदस्त्वं वै हव्यभुक् हव्यमावह ।
यान्तु हव्यानि सर्वेभ्यः स्वधास्वाहाद्युदीरणात् ॥७७॥
काली कराली धूम्रा च मनोभवा स्फुलिंगिनी ।
पिंगा रक्ता च ते जिह्वा ताभिर्ग्रस हविर्मुहुः ॥७८॥
पूगीफलानि च वह्नौ फलान्यन्यानि यानि च ।
प्रददुश्च तदा वह्नौ तृप्यतां परमेश्वरः ॥७९॥
इत्युक्त्वा श्रीहरिकृष्णो बालकृष्णो महाप्रभुः ।
महापूर्णाहुतिं चान्ते ददौ श्रीपतये तदा ॥८०॥
एवं होमं प्रदायैव ब्रह्मणे पात्रकार्पणम् ।
कृतवान् श्रीहरिर्ब्रह्मायजमानाभिषेचनम् ॥८१॥
कृत्वाऽमृताभिषेकं च श्रेयोदानं ततोऽकरोत् ।
दक्षिणार्पणमेवापि मण्डपे चाऽकरोद्धरिः ॥८२॥
स्वर्णगोभूतिलादीनां दानान्यदापयत् प्रभुः ।
राजानो राज्ययोग्यानि दानानि प्रददुस्तदा ॥८३॥
अथाऽभिषेकम् ऋषयो लोमशाद्या व्यधुस्तदा ।
पवमानानि ऋषयो ह्याशीर्वादाँस्तदा जगुः ॥८४॥
भूयसीं सम्प्रदायैवाऽऽशीर्वादाँश्च ददुस्तथा ।
स्मृद्धयः सन्तु दिव्या वोऽक्षयाः शाश्वतसौख्यदाः ॥८५॥
कुटुम्बवंशविस्ताराः प्रभवन्तु निरोगिणः ।
राज्यवैभवपशवो दासा दास्यो भवन्तु वः ॥८६॥
आयुर्दीर्घं यशो दिव्यं चान्ते स्वर्गं च मोक्षणम् ।
भवन्तु भोग्यजातानि भवतां सर्वदा त्विह ॥८७॥
सर्वे भवन्तु सुखिनः सर्वे सन्तु निरोगिणः ।
स्वर्गं दीर्घं परं भुक्त्वा प्रयान्त्वन्तेऽक्षरं पदम् ॥८८॥
इत्युक्त्वा यज्ञदेवानां पुष्पाञ्जलिं विदायकम् ।
प्रददुर्लोमशाद्याश्च परिहारस्ततोऽभवत् ॥८९॥
यज्ञप्रसादं हव्यं वै सर्वे बुभुजिरे मखे ।
येषां येषां च यान्येव हव्यानि तानि तानि वै ॥९०॥
तेभ्यस्तेभ्यो हरिकृष्णो दत्तवान् निजशक्तिभिः ।
सर्वविधानि भोज्यानि हव्यान्यमृतकानि च ॥९१॥
सुधारसाँश्च विविधान् पीयूषपानकोटिकाः ।
यथायोग्येभ्यः प्रददौ तृप्तयामास यावतः ॥९२॥
ततोऽधिकं भोजनं च ददौ भिक्षुकयायिने ।
भिक्षुकाऽनाथनारीभ्यो प्रददौ भोजनान्यपि ॥९३॥
सर्वेभ्यः प्रददावेकादश्यां मध्याह्नकोत्तरम् ।
भोजनानि समस्तानि पितृश्राद्धं ततोऽकरोत् ॥९४॥
अनेकानि फलादीनि जलादीन्यपि सन्ददौ ।
सायं सभायां भगवान् निषसाद शुभासने ॥९५॥
ददौ मन्त्रान् जनेभ्यश्च व्यधाद् वैष्णवसत्तमान् ।
निजं दिव्यं दर्शनं च ददौ त्वक्षरधामगम् ॥९६॥
ब्रह्मप्रियाभिर्मुक्तैश्च सेवितं पारमेश्वरम् ।
पुनस्तत्र बालकृष्णस्वरूपः सम्बभूव ह ॥९७॥
यज्ञतीर्थस्य माहात्म्यं जनेभ्यः प्रजगाद च ।
राधिके तत्तदा सृष्टित्रयं शुश्राव वै मुदा ॥९८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आश्विनकृष्णनवमीदशम्येकादशीषु यज्ञादिकार्यनिर्वर्तनं महापूर्णाहुतिप्रदानं परिहारो भोजनं चेत्यादिनिरूपण-नामा नवविंशत्यधिकद्विशत-तमोऽध्यायः ॥ २२९ ॥

श्रीकृष्ण उवाच—

राधिके यज्ञभूमौ च यानि तीर्थानि चावसन् ।
तान्याह श्रीबालकृष्णश्चाम्रजानीसरित्तटे ॥ १ ॥
यत्र नारायणश्चास्मि यज्ञकर्ता परेश्वरः ।
सा भूमिस्त्वक्षरतुल्या दिव्या दिव्यगतिप्रदा ॥ २ ॥
आम्रजानीनदी दिव्या स्वर्गंगा बदरीसुता ।
आम्रजान्यप्सरा दिव्या नरेण निजशक्तितः ॥ ३ ॥
आम्रमञ्जरिकाभिश्च प्रमृज्योत्पादिता पुरा ।
तपश्चर्याप्रविघ्नार्थे पुरा महेन्द्र आययौ ॥ ४ ॥

बहून्सरोभिः सहितो बदर्यां श्रीहरेः पुरः ।
नारायणेन ताः सर्वा नृत्यन्त्यश्चेन्द्रदेशिताः ॥ ५ ॥
विलोकितास्ततस्तासां गर्वभंगाय वै मया ।
बदर्यां च नरद्वारा ह्युर्वशी प्रकटीकृता ॥ ६ ॥
तस्यास्तु सन्निधौ सर्वास्तदा श्यामा इवाऽभवन् ।
रूपगर्वं विहायैव तत्र क्षमामयाचिरे ॥ ७ ॥
तदा मया तु ताः सर्वा मन्त्रेण वैष्णवीकृताः ।
आम्रजानीं ययाचे वै महेन्द्रो रूपसुन्दरीम् ॥ ८ ॥
सा मया तु महेन्द्रायाऽर्पिता त्वेकस्वरूपिणी ।
द्वितीया ब्रह्मचर्यस्था मत्पुत्री मम सन्निधौ ॥ ९ ॥
बदर्यां सा वसत्येव साऽत्र जलस्वरूपिणी ।
पाराकर्षितपश्चर्याफलदानार्थमागता ॥१०॥
पाराको नाम राजर्षिः पितॄणां मुक्तयेऽत्र वै ।
तपश्चचार परमं वर्षाणां तु सहस्रकम् ॥११॥
पूर्वजानां प्रतृप्त्यर्थं जलार्थं सोऽप्यकल्पयत् ।
मां ध्यायन् जललाभार्थं तीर्थं श्रेष्ठमयाचत ॥१२॥
मम मूर्तिं प्रतुष्टाव ध्यानमग्नोऽतिभावतः ।
मया हृदा प्रसन्नेन स्मृता पुत्री मदाश्रया ॥१३॥
सेयं जलस्वरूपाऽभूत् पुत्री ममाऽऽज्ञया तदा ।
सप्तधारास्वरूपा सा भूत्वा ब्राह्मीलभूतले ॥१४॥
प्रवाहेण गता यत्र यत्र पितर आसते ।
तत्र तत्र कृतस्तेषां मोक्षो ययुश्च तेऽक्षरम् ॥१५॥
सेयं चाऽम्रजनी दिव्या मोक्षदा वर्तते नदी ।
तस्या रूपाणि सप्ताऽत्र आम्रजानी वरीयसी ॥१६॥
राकान्तिकासना चापि द्वितीया सा प्रकीर्तिता ।
गोनिकषा तृतीया च गोयाज्ञी च चतुर्थिका ॥१७॥
माद्वारिका पञ्चमी च षष्ठी सा पुरुषा मता ।
मानासना सप्तमी च सर्वा मोक्षप्रदा हि ताः ॥१८॥
शान्तारामा पुरी चेयं पारेश्वरं च पत्तनम् ।
आम्रजानीसमुद्रसंगमश्च मोक्षदः सदा ॥१९॥
महापापातिपापानां क्षालकः संगमो ह्ययम् ।
अत्र भूमौ तु यज्ञानां तीर्थानां भूभृतां तथा ॥२०॥
मेर्वादीनां च सरसां नदीनां वास एव च ।
मया संकल्पितस्तस्मात् तीर्थान्यत्र वसन्तु वै ॥२१॥
आम्रजान्यां षडन्यासां नदीनां संगमेष्विह ।
मुक्तास्तथाऽवताराश्चेश्वरा देवा वसन्त्वपि ॥२२॥
देव्यश्च शक्तयश्चापि सागराः सरितस्तथा ।
सर्वतीर्थनिवासोऽत्र भवत्विति निदेशनम् ॥२३॥
बालकृष्णस्थली शान्तारामपारेश्वरान्तरे ।
सर्वतीर्थनिवासा वै पावन्यक्षरसन्निभा ॥२४॥
गोयाजन्या गवाक्षाया मध्ये पृथिवी यावती ।
त्रिशतक्रोशपर्यन्ता सर्वा मोक्षप्रदा शुभा ॥२५॥
अत्र स्नानेन मुक्तिः स्याद् वाप्यां कूपे तडागके ।
नदीनां जलपानेन मम धाम व्रजेज्जनः ॥२६॥
स्वल्पान्नदानकरणाद् यज्ञजं फलमाप्नुयात् ।
गोदानात् स्वर्णदानाच्च स्वर्गं लभेन्न संशयः ॥२७॥
कन्यादानं भुवो दानं वस्त्रदानं गवार्पणम् ।
भूषादानं चान्नदानं पात्रदानं करिष्यति ॥२८॥
अत्र भूमौ तस्य राजसूयफलं भविष्यति ।
ओषधानां प्रदानं च विद्यादानं जलार्पणम् ॥२९॥
रसदानं छत्रदानं चोपकरणदानकम् ।
गृहदानं वाहनानां दानं ज्ञानप्रदानकम् ॥३०॥
यः करिष्यति तस्याऽत्र सर्वयज्ञफलं भवेत् ।
वृक्षारोपं फलदानं धर्मशालां च वेदिकाम् ॥३१॥
गृहं सौधं नदीघट्टं कारयिष्यति यो जनः ।
तस्य स्वर्गे भवेद् श्रैष्ठ्यं त्वन्ते मोक्षो भवेदपि ॥३२॥
शुभे काले शुभे पात्रे दत्तं चात्राऽक्षयं भवेत् ।
शय्यादानं बृसीदानं चोर्णाम्बरप्रदानकम् ॥३३॥
दास्यत्यत्र भवेत्तस्य स्वर्गे चेह समृद्धयः ।
विविधा राजभोगाश्च वंशविस्तारसम्पदः ॥३४॥
अत्र तीर्थे तु ये लोकाः सप्तसरित्सु यत्र वा ।
करिष्यन्ति जलपानं स्नानं चैष्यन्ति ते दिवम् ॥३५॥
इत्युक्त्वा श्रीहरिस्तत्र राधिके विरराम ह ।
ईश्वराद्या निजावासं चक्रुस्तीर्थस्वरूपिणः ॥३६॥
सप्तनद्यः समायाताः कन्यकास्तत्र वै क्षणे ।
चन्दनाद्यैः स्वपितरं बालकृष्णं परेश्वरम् ॥३७॥
पुपूजुः पादयोर्नत्वा प्रादुर्वसाऽत्र सर्वदा ।
हरिस्तथाऽस्त्विति प्राह मूर्तिरूपः स्वयंप्रभुः ॥३८॥
तत आरभ्य तत्रैव मन्दिरेष्ववसत् सदा ।
राजभ्यश्च ददौ स्वर्णमूर्तीः श्रीहरिरच्युतः ॥३९॥
कन्यकास्ता ययुस्तीर्थरूपिण्यो वै निजालयान् ।
राजानोऽपि ततश्चक्रुर्मन्दिराणि सरित्तटे ॥४०॥
सुवर्णमूर्तीस्तेषु प्रातिष्ठिपन् विधिना नृपाः ।
एवं वै राधिके श्रीमद्बालकृष्णः परेश्वरः ॥४१॥
उपादिश्याऽथ प्रददौ पारितोषिकरूपिणः ।
सुवर्णस्थालान् महतः सुवर्णोत्थकमण्डलून् ॥४२॥

सुवर्णहारान् विविधान् मुकुटान् कानकाँस्तथा ।
स्वर्णस्रजः कुण्डलानि श्रृंखलाः कटकानि च ॥४३॥
हेमरत्नानि भूषाश्च हेमसूत्राम्बराण्यपि ।
स्वर्णहीरकसद्रत्नपात्राणि कलशाँस्तथा ॥४४॥
वेषान् शाटीः कञ्चुकीश्च कौशेयीः स्वर्णबुट्टिकाः ।
यानवाहनदासाँश्च दासीश्च मुद्रिकास्तथा ॥४५॥
एवंविधानि प्रददौ सम्पारितोषिकानि वै ।
ततो ददौ धन्यवादान् महीमानेभ्य चाध्वरे ॥४६॥
यज्ञसाहाय्यकर्तॄंश्चाशीर्भिस्तत्राप्ययूयुजत् ।
अत्र रात्रौ पायसानि भोजनानि फलानि च ॥४७॥
अकारयद्धि भगवान् सर्वांस्तत्र महोत्सवे ।
नृत्यगीतोत्सवान्ते च विशश्राम परेश्वरः ॥४८॥
निद्रां जग्राह भगवान् प्रातर्बुबोध मंगलैः ।
कृताह्निकः कृतपूजो मातापितृप्रसेवकः ॥४९॥
आसने निषसादाऽथाऽऽययुस्तत्र नृपादयः ।
अर्चनं श्रीहरेश्चक्रुः सन्न्यधुश्चोपदाः पुरः ॥५०॥
द्वादश्यां च ततः सर्वानभोजयत् प्रभुः स्वयम् ।
मिष्टान्नानि विचित्राणि रसान् पेयानि यान्यपि ॥५१॥
भक्ष्यभोज्यान्यनेकानि भोजयामास सर्वशः ।
स्वयं बुबुभुजे कृष्णस्ततः सभां चकार ह ॥५२॥
अवभृथार्थं प्रययुः सर्वे भगवता सह ।
आसँस्तत्र तु नारीणां देवीनां गीतिकाः शुभाः ॥५३॥
वाद्यानां निनदाश्चापि वेदघोषाश्च भूसदाम् ।
आम्रजान्यां गोनिकषासंगमेऽवभृथं तदा ॥५४॥
चक्रुर्मुख्यं महास्नानं वरुणाद्यर्चनं तथा ।
ये ये यत्राऽभवँश्चापि तत्र सस्नुश्च तत्र च ॥५५॥
तूर्यशब्दा यन्त्रशब्दाः शतघ्नीध्वनयोऽभवन् ।
सरित्सागरसंयोगे सरितां संगमे तथा ॥५६॥
विमानैर्दिव्ययानैश्च गत्वा सस्नुः प्रजाजनाः ।
ईश्वराश्चापि देवाद्या देहिनः सस्नुरित्यपि ॥५७॥
ततश्चाययुरावासान् श्रीहर्याद्या विमानकैः ।
मध्याह्नोत्तरवेलायां पितृश्राद्धानि चाचरन् ॥५८॥
सर्वेऽपि पितरस्तत्र मूर्तिमन्तः समागताः ।
तृप्तिं प्राप्य विमानैश्च ययुः स्वर्गं सहस्रशः ॥५९॥
अथ भोजनं मिष्टान्नं भोजयामास माधवः ।
सर्वे बुभुजुर्मिष्टान्नं पुनस्तत्र सभाऽभवत् ॥६०॥
विदायं श्रीहरिस्तत्र प्रददौ तु यथोचितम् ।
कर्मठेभ्यः कर्मकर्तृभ्यश्च सहायिवर्गिणे ॥६१॥
मुक्तेभ्यश्चेश्वरेभ्यश्चाऽवतारेभ्यश्च शोभनम् ।
ईश्वराणीभ्य एवापि मुक्तानीभ्यस्तथा ददौ ॥६२॥
देवीभ्यो देवताभ्यश्चाऽऽर्षीभ्यो मुनिभ्य इत्यपि ।
मानवीभ्यो मनुष्येभ्यो महर्षिभ्योऽपि सन्ददौ ॥६३॥
जडेभ्यश्चेतनेभ्यश्च सर्वेभ्योऽपि ददौ हरिः ।
यथोचितं विदायं वै कल्पयोषिद्भ्य इत्यपि ॥६४॥
कर्मकर्त्रीभ्य एवापि दासदासीभ्य इत्यपि ।
प्रददौ स्वर्णहाराँश्च स्वर्णमुद्रायथोचिताः ॥६५॥
आगन्तव्यं चेति पुनर्यदा यज्ञे स्मराम्यहम् ।
इत्येवं श्रीहरिः प्राह ततो लब्ध्वा विदायकम् ॥६६॥
सभां व्यसर्जयत् पश्चान्महीमानाः प्रतस्थिरे ।
निजाँल्लोकान्प्रदेशाँश्च ग्रामान् सायं हि सर्वशः ॥६७॥
द्वादश्यामेवमेवापि समाजाः स्वगृहान् ययुः ।
रात्रौ श्रीभगवानास्ते राजभिः सेवितः सुखम् ॥६८॥
ब्रह्मप्रियादिभिश्चापि कुटुम्बेन समन्वितः ।
निद्रां विश्रान्तिरूपां चावाप प्रातर्बुबोध च ॥६९॥
त्रयोदश्यां मांगलिकैर्वाद्यैर्गीतिभिर्हरिः ।
कृतस्नानाह्निकः कृष्णो निषसाद वरासने ॥७०॥
ईशानपानशिष्टश्च राजा राज्ञी च कन्यकाः ।
हरिं पूजयितुं प्रातश्चाययुस्ते तदा हरेः ॥७१॥
नीराजनां प्रचक्रुश्च पुपूजुश्चन्दनादिभिः ।
ब्राह्मील्यः कन्यकाश्चैकचत्वारिंशन्नृपस्य तु ॥७२॥
वरमालां हरेः कण्ठे ददुः कान्तं हरिं व्यधुः ।
राजा त्वतिप्रसन्नोऽभूद् यौतकं परमं ददौ ॥७३॥
राज्ञी चापि कृतकृत्या ह्यभूत् तत्र मुमोद ह ।
यौतकं हरये प्रादात् स्वर्णरूप्यधनादिकम् ॥७४॥
विमानं चायतं चापि दासान् दासीः शताऽधिकाः ।
राजा महोत्सवं चक्रे कन्यादाननिमित्ततः ॥७५॥
मध्याह्ने भोजनं श्रेष्ठं ददौ राजाऽतिभावतः ।
अन्येभ्यश्चापि सर्वेभ्यो राजभ्यो भोजनं ददौ ॥७६॥
विदायं प्रददौ पश्चाद् राजभ्यो नृपतिर्महान् ।
राजानः प्रययुर्नैजान् देशान् विमानसंस्थिताः ॥७७॥
तत्र तावत् त्रयोदश्यां श्रीमान् रायपतिर्नृपः ।
रायगिरर्षिसहितः प्रार्थयामास केशवम् ॥७८॥
निजदेशं समागन्तुं पावयितुं निजां पुरीम् ।
हरिस्तथाऽस्त्विति प्राह विश्वकर्मादिकाँस्ततः ॥७९॥
सर्वयज्ञीयवस्तूनां परिहारार्थमेव ह ।
मण्डपादिकदिव्यानां समादिदेश तूर्णकम् ॥८०॥

शीघ्रं सायं विश्वकर्मा तिरोभावयदेव तत् ।
अथ सज्जोऽभवत् कृष्णः कुटुम्बाद्यैर्युतस्तदा ॥८१॥
शंकराद्यैः पार्षदैश्च तथा सर्वमहर्षिभिः ।
तावद् राजा सैन्ययुक्तो विदाये मानने हरेः ॥८२॥
अवादयत्तदा रम्यवादित्राणि मुहुर्मुहुः ।
हरिः सम्मानमादाय पुष्पहारान् शुभान् शुभान् ॥८३॥
ब्राह्मीलीभिश्चाक्षताद्यैर्वर्धितः पूजितो हरिः ।
जयशब्दैः श्रावितश्चाऽऽरुरोह स्वविमानकम् ॥८४॥
कुटुम्बेन सह कृष्णो महर्षिशंकरादिभिः ।
विमानगोऽभवच्चाथ प्रससाराम्बरेऽग्रगम् ॥८५॥
विदाययन्त्रशब्दाश्चाऽभवँश्चाति नृपाज्ञया ।
राजारायपतिश्चाग्रे विमानेन ययौ द्रुतम् ॥८६॥
स्वागतार्थं हरेस्तत्र सैन्यं प्रासज्जयद् द्रुतम् ।
आर्षजतनुराष्ट्रे स्वे परीनासरितस्तटे ॥८७॥
व्येनोजराशापुर्यां वै महोद्याने विशालके ।
सम्मानार्थं सैन्ययुतस्तस्थौ राजा समालिकः ॥८८॥
तावदाकाशमार्गाद्वै विमानं शोभनं तदा ।
सूर्यवच्चाऽऽगतं शीघ्रं द्योतयन् विदिशो दिशः ॥८९॥
तदा वाद्यान्यवाद्यन्त जयशब्दास्तथाऽभवन् ।
पर्यैः समन्ततो वीक्षणार्थं दुद्रुवुरादरात् ॥९०॥
राजदर्शितमार्गेण विमानं श्रीहरिर्भुवि ।
उद्यानमध्ये भूभागेऽवातारयच्छनैः शनैः ।
हरिर्विमानतः शीघ्रं त्वग्रभागे बहिर्ययौ ॥९१॥
जनानां पुष्पवृष्टिर्वै विमानोपरि चाभवत् ।
अक्षताद्यैर्वर्धितश्च प्रजाभिः परमेश्वरः ॥९२॥
राजा स्वर्णस्रजः कण्ठे कृष्णस्याऽधान्ननाम च ।
तदा राज्ञी पुष्पमालां कृष्णकण्ठे न्यधान्मुदा ॥९३॥
कुमाराश्च कुमार्यश्चन्दनाद्यैरर्हणां व्यधुः ।
सिंहासने निषसाद हरिस्तत्र क्षणं ततः ॥९४॥
दत्वा स्वदर्शनं सिंहासनात्तूत्थाय चत्वरे ।
आययौ नृपतिर्स्तं सुगजे शृंगारिते मुदा ॥९५॥
कुटुम्बं श्रीहरेश्चापि न्यषादयद् गजादिषु ।
शकटीषु च वाहेषु यथायोग्यं च योषितः ॥९६॥
शिबिकासु तथा दिव्यगन्त्रीषु च न्यषादयत् ।
अथ वाद्यादिनिनदैर्गीतिभिश्च सुवर्धितः ॥९७॥
हर्षनादैर्जयशब्दैस्तथा गायनकीर्तनैः ।
व्येनोजराशापुर्यां श्रीहरिः संभ्रामितोऽभितः ॥९८॥
गोपुराग्रे च राजन्यैर्नगर्यां च प्रधानकैः ।
चत्वरेषु प्रजाभिश्च हट्टाग्रे धनिकैः प्रभुः ॥९९॥
पूजितश्चापि रथ्याग्रे योषिद्भिः कृष्णवल्लभः ।
स्वर्णमुद्रादिदानैश्च नारिकेलफलादिभिः ॥१००॥
वस्त्रपात्रविभूषाभिश्चन्दनाऽक्षतवारिभिः ।
वर्धितश्चाभितः पुर्यां भ्रमित्वा सैन्यशोभितः ॥१०१॥
समाययौ शुभावासं राजसौधं हरिस्ततः ।
जलपानं विधायैव विश्रान्तिमाप धर्मपः ॥१०२॥
गृहीत्वा भोजनं रात्रौ निद्रां जग्राह केशवः ।
ब्रह्मप्रियादिभिः संसेवितः कृष्णनरायणः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आम्रजान्यादिसप्तसरित्सु देवतीर्थानां वासो माहात्म्यमवभृथम्, पारितोषिकम्, रात्रियापनं, प्रातर्विदायं महीमानमण्डपादिपरिहारस्ततो राजारायपतिराष्ट्रगमनं व्येनोजराशापुर्यां भ्रमणं भोजनं रात्रौ शयनं चेत्यादिनिरूपणनामा त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३० ॥

**श्रीकृष्ण उवाच—**

चतुर्दश्याः प्रगे राधे आश्विनकृष्णपक्षके ।
मांगलिकैस्तूर्यनादैर्गीतिभिः प्रबुबोध सः ॥ १ ॥
बालकृष्णः कृतस्नानपूजः स्वासनमाविशत् ।
राजारायपतिः कृष्णं पूजयितुमुपाययौ ॥ २ ॥
ननाम पादयोर्भक्त्याऽभिषेकं पयसा तदा ।
पादयोः प्रचकाराऽथ प्रसादाऽमृतमापपौ ॥ ३ ॥
सकुटुम्बः श्रीपतिं तं चान्दनं तिलकं व्यधात् ।
सचन्द्रकं तथा रम्यनेत्रयोः कज्जलं ददौ ॥ ४ ॥
मुकुटं मस्तके चापि कुण्डले कर्णयोर्ददौ ।
कण्ठे सुवर्णरत्नाढ्यहारान् प्रशृंखलां ददौ ॥ ५ ॥
भुजबन्धौ च कटकावङ्गुलीयकमूर्मिकाः ।
रशनां नुपूरकौ च कट्यां पादप्रकोष्ठयोः ॥ ६ ॥
निधारयामास राजा भगवन्तं रमापतिम् ।
सुगन्धिगन्धसारादि व्यलेपयत्तदाऽङ्गके ॥ ७ ॥
यथोचितं पुष्पहारान् प्रददौ च सुगन्धिनः ।
राजवेषं रमणीयं धारयामास भूपतिः ॥ ८ ॥
हरिर्दधार प्रमुदा राज्ञः स्नेहाभिवृद्धये ।
ततो नीराजनं चक्रे राजा राज्ञीसमन्वितः ॥ ९ ॥

कन्याश्चास्य त्रयस्त्रिंशन् महानीराजनं व्यधुः ।
वरमाला ददुर्मुग्धा बालकृष्णस्य वक्षसि ॥१०॥
पतिं प्राप्य प्रभेशं ताः कृतकृत्यास्तदाऽभवन् ।
राजा तं कानके सिंहासने रम्ये नृपार्चिते ॥११॥
निषाद्य श्रीहरेः राज्यमुकुटं मस्तके ददौ ।
राज्यं च कन्यकाः कृष्ण ! मोक्षार्थं ते प्रदीयते ॥१२॥
अत आरभ्य राज्यं ते वयं ते दासदासिकाः ।
अत्रैव भगवँस्तिष्ठ कृपासिन्धो परात्पर ॥१३॥
त्वमात्मा त्वं त्वन्तरात्मा परमात्मा प्रभुर्मतः ।
सर्वप्राणपते विष्णो पाहि संसारसागरात् ॥१४॥
भवद्दत्तं मया राज्यं निर्वाहितं मखावधि ।
अथ श्रीभगवान् स्वामी समायातो धुरं वह ॥१५॥
त्वन्निदेशं पालयिष्ये भृत्यवत् तिष्ठ राज्यपः ।
अनायासेन भगवान् कृपयाऽस्माभिरर्जितः ॥१६॥
योगिनो यस्य लब्ध्यर्थं तपःसु कृच्छ्रसाधिषु ।
होमं निजायुषः प्रकुर्वन्त्यपि त्वं न चाप्यसे ॥१७॥
सिद्धाः समाधिभाजोऽपि सततं त्वामुपासते ।
साक्षात्तथापि त्वं तेषामक्षिदृश्यो न जायसे ॥१८॥
सोऽयं विना तपो मेऽत्र गृहेऽनुग्रहतः प्रभो ।
समागतो ममोद्धारकृते कुटुम्बिनश्च मे ॥१९॥
सर्वं समर्प्य ते हस्ते कृतकृत्यो भवामि तत् ।
गृहाण भगवन् दत्तं राज्यं मे मोक्षमर्पय ॥२०॥
मया ज्ञातो दिव्यरूपस्तथा मानुषवर्तनः ।
अवतारावतारी त्वं श्रुत्युक्तः परमेश्वरः ॥२१॥
ब्रह्मप्रियापते त्वं वै सांख्ययोगिनिकापते ।
लाक्ष्मणीकान्त कृष्ण त्वं चारक्तानां पतेऽव माम् ॥२२॥
उष्णीनां कान्त कृष्ण त्वं पिशंगीनां पते प्रभो ।
प्राचीनीनां पते कृष्ण हारितीनां पतेऽव माम् ॥२३॥
गौरीणां कान्त भगवन्नमरीणां पते विभो ।
ब्राह्मीलीनां परीणां च पते राधापतेऽव माम् ॥२४॥
लक्ष्मीपते कृपासिन्धो रमास्वामिन् सतां पते ।
राजपते सुरादीनां पते चेशपतेऽव माम् ॥२५॥
कमला चरणौ ते या सेवते ललिताऽपि यौ ।
बहुपुण्येन मिलितौ पुत्रीणां मम केशव ॥२६॥
सेवते दुःखहालक्ष्मीर्जया यौ मंजुला च यौ ।
नारायणी सद्गुणा यौ तौ दिव्यौ मिलितौ मम ॥२७॥
माणिक्या सेवते यौ च मुक्ता यौ सेवते सखी ।
पद्मावती सती हासा सेवते यौ प्रभुक्तिदौ ॥२८॥
चत्वारिंशत् शतं चापि तथाऽपरास्तु कोटिशः ।
सृष्टित्रयनिवासिन्यस्तव दास्यो भवन्ति हि ॥२९॥
ईश्वरा अवताराश्च मुक्ता देवा महर्षयः ।
चरणौ यौ प्रसेवन्ते ते कृपाप्लाविता यदि ॥३०॥
तौ सुप्राप्तौ मया कृष्ण चरणौ पावनौ गृहे ।
यत्र सर्वार्पणं पूर्वं राजानश्चक्रुरात्मनः ॥३१॥
आसादितौ मया तौ वै ततोऽर्पयेऽव मां विभो ।
महाकालभयं मायाभयं कर्मप्रबन्धनम् ॥३२॥
दूरयितुं समर्थं नेतरत् ततो भजेऽव माम् ।
शरणागतरक्ष त्वं शरण्योऽसि जनार्दन ॥३३॥
भवप्रवाहपतितं मामुद्धर महेश्वर ।
तव योगेन दिव्यं मे राज्यं गृहं धनादिकम् ॥३४॥
तीर्थरूपं महज्जातं धामाऽक्षरसमं भुवि ।
अहो भाग्यमहो भाग्यं राजारायस्य भूतले ॥३५॥
यद्गृहे कन्यकाकान्तः स्वयं श्रीपुरुषोत्तमः ।
अहो भाग्यमहो भाग्यं परीनासरितोऽपि च ॥३६॥
यत्र तीर्थानि सर्वाणि समायास्यन्ति ते बलात् ।
आर्षजतन्तुराष्ट्रस्य महाभाग्यं प्रवर्तते ॥३७॥
यत्र नारायणः साक्षाद्वर्तते परमेश्वरः ।
व्येनोजराशानगरी तवोपस्थितितः प्रभो ॥३८॥
सार्थकाऽद्य तु सञ्जाता सर्वपापविनाशिनी ।
मृत्युजरादिरहिता तव वासादजायत ॥३९॥
सदा तिष्ठ हरेऽत्र करिष्ये तव सेवनम् ।
इत्युक्त्वा श्रीहरेश्चाऽग्रे दण्डवत् प्रचकार ह ॥४०॥
राधिके सा ततो राज्ञी चकार दण्डवद्धरिम् ।
महोत्सवं ततश्चक्रे चतुर्दश्यां महत्तमम् ॥४१॥
प्रजाः प्रधाना नार्यश्च नराः समन्ततस्तदा ।
आययुर्दर्शनार्थं वै दूरातिदूरदेशतः ॥४२॥
तेभ्यो हरिर्ददौ मन्त्रान् सुखं दर्शनजं तथा ।
मानसानां निजमूर्तावाकर्षणेन सर्वथा ॥४३॥
भगवद्भावनां चापि कारयामास शाश्वतीम् ।
तत्कृतां सुप्रपूजां च जग्राह परमेश्वरः ॥४४॥
तेभ्यः प्रासादिकं दत्वा तोषयामास केशवः ।
दिव्यं स्वदर्शनं चापि प्रददौ पारमेश्वरम् ॥४५॥
अक्षरस्थं तथा गोलोकस्थं वैकुण्ठगं तथा ।
अव्याकृतस्थं रूपं स्वं चामृतस्थं तथा विभुः ॥४६॥
हिरण्मयं तथा वह्निमण्डलस्थं तथा पुनः ।
विशालास्थं श्वेतधामगतं क्षीराब्धिवासिनम् ॥४७॥

तथा कुंकुमवापीस्थं बालकृष्णं च गोचरम् ।
एवं त्वनेकरूपैर्वै परेशं स्वमदर्शयत् ॥४८॥
तेन ते कृतकृत्या वै नरा नार्योऽभवँस्तदा ।
तेभ्यो मन्त्रान् ददौ श्रीमत्स्वामिश्रीकृष्णवल्लभः ॥४९॥
राजा प्रपूज्य देवेशं भोजयामास वै ततः ।
पत्न्यः सर्वाः कृतकृत्याः पर्यसेवन्त तं पतिम् ॥५०॥
हरिः प्राह च राजानं मम राज्यं न संशयः ।
त्वयाऽर्पितं मया लब्धं पुनर्ददामि ते नृप ॥५१॥
ममाज्ञया महद्राज्यं प्रपालय यथोचितम् ।
इदं च मन्दिरं सार्त्तशिखरं संप्रकारय ॥५२॥
तत्र मां श्रीसमेतं वै प्रतिष्ठापय कानकम् ।
स्वर्णमूर्तौ सदा स्थास्ये ग्रहिष्ये च त्वया कृतम् ॥५३॥
पूजनं सर्वदा राजन् ममाज्ञां परिपालय ।
तथाऽस्त्विति नृपः प्राह राधिके द्रुतमेव ह ॥५४॥
सुवर्णमूर्तिं तत्रैव कारयामास सन्निधौ ।
श्रीसहितां तत्र कृष्णो विवेश गोचरः स्वयम् ॥५५॥
राजा गृहे ररक्षैव ततः कालेन मन्दिरे ।
न्यवेशयद्धरिं चैवं सिषेवे परमादरात् ॥५६॥
चतुर्दश्यां च मध्याह्ने भोजयामास भूपतिः ।
सायंकाले पितृपूजां परीनासरितस्तटे ॥५७॥
श्राद्धानि विविधान्येव चकार भगवान् स्वयम् ।
पितृणां जलपिण्डाद्यैस्तृप्तिं चकार केशवः ॥५८॥
ततः सन्ध्यां प्रचकार ततः सौधं समाययौ ।
रात्रौ कन्यास्तु ताः सर्वाः पतिं नैजं सिषेविरे ॥५९॥
प्रातर्हरिः प्रबुबोध मांगलिकप्रगीतिभिः ।
प्रवाद्यैश्च यशोभिश्च ततः सस्नौ नदीजलैः ॥६०॥
अमावास्यादिने पितृजलदानं चकार ह ।
प्लक्षमूले ददौ वारि सर्वसृष्टिभ्य एव सः ॥६१॥
आगताः पितरस्तत्र तृप्त्यर्थं हरिहस्ततः ।
मुक्ता अक्षरसंज्ञाश्च गोलोकावासगोपकाः ॥६२॥
पार्षदा वैकुण्ठवासा अव्याकृतनिवासिनः ।
अमृतस्थास्तथा मुक्ता अन्यवैकुण्ठवासिनः ॥६३॥
सत्यस्था ब्राह्मसंज्ञाश्च सिद्धा महर्षयस्तथा ।
ब्रह्मविष्णुमहेशाद्या मुनयो देवतादयः ॥६४॥
अर्यमाद्याश्च पितरो मातृकाः पितृयोषितः ।
तथाऽन्ये याम्यलोकस्थास्त्रिलोकिस्थाश्च सर्वतः ॥६५॥
तृप्त्यर्थं त्वाययुस्तत्र नारायणजलेच्छया ।
श्रीहरिः स्वकराभ्यामञ्जलिभिः सलिलं ददौ ॥६६॥
पपुः सर्वेऽपि पितरो मुक्तिं गताश्च मोक्षिणः ।
स्थानिनस्तृप्तिमापुश्च जग्मुर्निजं स्वरादिकम् ॥६७॥
सर्वे तृप्तिं गता ये ये पितृयोनिस्थितास्तदा ।
अथ श्रीभगवान् स्वस्यालयं सौधं समाययौ ॥६८॥
पितृश्राद्धानि विविधप्रकाराणि ततोऽकरोत् ।
पिण्डदानैः पायसाद्यैः क्षीरान्नभोजनादिभिः ॥६९॥
फलपुष्पौदनाद्यैः शर्कराद्यैर्मिष्टसद्रसैः ।
सुधामिष्टान्नकैश्चापि मुन्यन्नैस्तानतर्पयत् ॥७०॥
श्राद्धानि विधिना कृत्वा परिहारं ततोऽकरोत् ।
प्रासादिकानि भोज्यानि भोजयामास वाडवान् ॥७१॥
दीनाऽनाथान् कृपणाँश्च सतीः साध्वीः सतो यतीन् ।
आश्रितान् कन्यकाश्चापि कुमारान् कर्मचारिणः ॥७२॥
भक्तान् सर्वांश्च भृत्यान् संभोजयामास वै प्रभुः ।
राज्ञश्च राजवर्गांश्च वैश्यान् सेवापरायणान् ॥७३॥
भोजयामास भगवान् स राजाऽप्याज्ञया हरेः ।
बुभुजे तत्प्रसादान्नं मध्याह्नोत्तरमेव तु ॥७४॥
हरिः सभां सुमहतीं चक्रे तूपादिदेश वै ।
गृहस्थैः सर्वदा माता सेवनीया पिता तथा ॥७५॥
गुरुश्च सेवनीयोऽथ तदाज्ञायां यथोचितम् ।
स्थातव्यं मनसा वाण्या देहेन च धनेन च ॥७६॥
दशश्रोत्रीयसदृशश्चैकोपाध्याय उच्यते ।
दशोपाध्यायसदृशः पिता लोके महान् मतः ॥७७॥
माता दशगुणी श्रेष्ठा पितुः पुत्रप्रपालिनी ।
मात्रा धृतः स गर्भे वै बाल्येऽपि सेवितस्तथा ॥७८॥
यौवने योजितः पत्न्या तस्मान्माता गरीयसी ।
गुरुर्दशगुणो मातुर्गरीयान् ज्ञानदो मतः ॥७९॥
जन्ममृत्युजराहो यो वासनाबन्धनाशनः ।
पापनाशकरः पूज्यो गुरुर्जीवस्य मोक्षकृत् ॥८०॥
माता पिता गुरुर्मान्याः पूजनीया हितैषुभिः ।
त्रयस्ते पूजिता येन तस्य स्मृद्धिर्न रिष्यति ॥८१॥
त्रयस्ते देवरूपा वै त्रयोऽग्नयश्च ते मताः ।
तेषां सेवा कृता येन प्राप्तं जन्मफलं शुभम् ॥८२॥
भर्त्सनीया न ते पुत्रैस्ताडनीया न वै क्वचित् ।
उद्वेजनीया नाऽप्यत्र पोषणीयास्त्रयोऽपि ते ॥८३॥
मातरं यः प्रकुर्याद्वै प्रदक्षिणां नमस्तथा ।
तेन प्रदक्षिणा पृथ्व्याः कृता स्यान्नात्र संशयः ॥८४॥
पिता संपूजितो येन विष्णुस्तेन प्रपूजितः ।
गुरुश्च पूजितो येन तेनार्चिताः सुरादयः ॥८५॥

तेभ्यो देयं यथाशक्ति धनमन्नं तथाऽम्बरम् ।
यद्यद्योग्यं तथाऽपेक्ष्यं तत्तद्देयं हि सर्वथा ॥८६॥
वृथा क्लिश्यन्ति तीर्थेषु येषां तीर्थत्रयं गृहे ।
त्रयाणां सेवया सर्वाध्वरपुण्यं भवेद् ध्रुवम् ॥८७॥
त्रयाशीर्वादलाभेन याम्याः प्रयान्ति दूरतः ।
लक्ष्म्यः सर्वविधास्तस्य गृहे त्वायान्ति चान्यतः ॥८८॥
त्रयस्ते पितरः प्रोक्ताः सजीवाः सेवनाय वै ।
अत्रैते सेविता येन परलोकोऽस्य शोभनः ॥८९॥
एते दुःखीकृता येन स दुःखी स्यात्परत्र च ।
पुत्रादिभिः सेविताश्च तृप्ता मृत्युं प्रयान्ति ये ॥९०॥
पितरस्ते भवेयुर्वै मुक्ताः स्वर्गादिगामिनः ।
प्रेतत्वं नहि तेषां वै नैव कनीयसी गतिः ॥९१॥
न जन्म दुःखकृत् तेषां प्रसन्ना ये मृतिं गताः ।
अप्रसन्ना दुःखिताश्च मृतिं गताश्च ये जनाः ॥९२॥
क्रूरभावा हि ते वंश्यस्थानां रक्तं पिबन्ति वै ।
तेषां सद्गतिलाभार्थं श्राद्धं दद्यात् सुतादिभिः ॥९३॥
वंशे विघ्नानि नश्येयुर्वंशवृद्धिर्भवेत् तथा ।
अद्य कृतं प्रदत्तं च श्राद्धमन्नं जलं फलम् ॥९४॥
स्वर्गे प्रयाति यत्रैव सन्ति पितर एव ह ।
तृप्यन्ति पितरस्तत्र गृहीत्वा सुखिनः सदा ॥९५॥
तस्माच्छ्राद्धं प्रकर्तव्यं पितॄणां मोक्षसिद्धये ।
तन्नाम्नाऽन्नं जलं वस्त्रं फलं पायसमित्यपि ॥९६॥
शय्या पात्राणि धान्यानि रसा देया विशेषतः ।
भोजनानि प्रदेयानि पितृतृप्त्यर्थकानि हि ॥९७॥
तीर्थेषु सत्सु पात्रेषु देयं शक्त्या यथोचितम् ।
स्वर्णं च रजतं ताम्रं धनं देयं विशेषतः ॥९८॥
वाहनं यानमेवापि यदासीत्तस्य वै प्रियम् ।
तत्तद्देयं हि पात्राय तत्पुण्यं स्यादनन्तकम् ॥९९॥
इत्युक्त्वा विररामाथ प्रजाः पूजां प्रचक्रिरे ।
धनान्नाम्बरपात्राद्यैश्चन्दनाक्षतपुष्पकैः ॥१००॥
ततो धनं विशेषेणाऽऽगतं पूजात्मकं तु यत् ।
राजगिरर्षये कृष्णः प्रददौ दानरूपकम् ॥१०१॥
रात्रौ निद्रां च विश्रान्तिं प्राप गोपालनन्दनः ।
राधिके सेवितः सर्वप्रियाभिः परमेश्वरः ॥१०२॥
प्रातर्मंगलवाद्यैश्च नारीणां गीतिभिस्तथा ।
प्रबुबोध हरिकृष्णो ध्यानं स्वहृदयेऽकरोत् ॥१०३॥
कृतस्नानादिकः कृताह्निकः कृतगुरुस्तवः ।
निषसादाऽऽसने दिव्ये तावद् राजा समाययौ ॥१०४॥
कृतवान् स महापूजां श्रीहरेश्चन्दनादिभिः ।
पायसं पाययामास महीमानान् समस्तकान् ॥१०५॥
राज्ञी पूजां चकारापि पुपूजुश्च ततः प्रजाः ।
राजा चेयेष नगरान्तराणि नेतुमच्युतम् ॥१०६॥
हरिस्तथाऽस्त्विति प्राह सद्यः सज्जो बभूव ह ।
राधिके स्वविमानस्थोऽभवत् सह कुटुम्बकैः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः पूजनमुपदेशनम् पितृश्राद्धदानवारिदानादिकममावास्यायां कृत्वा रात्रौ विश्रम्याऽऽश्विनशुक्लप्रतिपदि प्रातः पूजनादिकं चेत्यादिनिरूपणनामैकत्रिंशदधिक-द्विशततमोऽध्यायः ॥ २३१ ॥

श्रीकृष्ण उवाच—

राधिके चाश्विनशुक्लप्रतिपद्वासरे प्रगे ।
राजारायनृपोक्त्या श्रीहरिः सज्जो बभूव ह ॥ १ ॥
खण्डराष्ट्रात्मके राज्ये लापलात्रीपुरीं ययौ ।
समुद्रतटवासिन्या नगर्याश्चोपसागरे ॥ २ ॥
महोद्याने द्वीपकल्पे मन्दिरे समवातरत् ।
राजा पुपूज कनकैर्मौक्तिकैर्विविधैरपि ॥ ३ ॥
हीरकैः रत्नवर्यैश्च मौक्तिकैर्मणिभिस्तथा ।
नगर्यां वाद्यघोषैश्च महासम्मानपूर्वकम् ॥ ४ ॥
राजारायनृपः कृष्णं भ्रामयामास सर्वतः ।
हरिस्तत्र महोद्याने कृतसेवः कृतश्रमः ॥ ५ ॥
कृतारामः समुवास दिनद्वयं प्रशान्तये ।
आश्विनस्य तृतीयायां दैत्यो वै नवजीवनः ॥ ६ ॥
मायावी बहुवेगश्च महाद्रितुल्यविग्रहः ।
समाकर्षन् बहून्मेघान् केशैर्मस्तकसंभवैः ॥ ७ ॥
गदया विद्युतो वेगान् संनिघ्नन् बहुसत्त्वया ।
आकाशं गर्जयन् हास्यैः समुद्रं क्षोभयन्नखैः ॥ ८ ॥
गृहाणिच्छादयन् देहस्थौल्येन निशि चाययौ ।
ज्ञात्वा दिव्यं विमानं स हस्तैक्येनाप्यतोलयत् ॥ ९ ॥
रुद्रो विज्ञाय दैत्यं तं गर्जनां प्रचकार ह ।
कोऽयं विमानं स्पृशति गच्छ दूरं मृतोऽसि वा ॥१०॥
श्रुत्वैतद् व्यनदच्छीघ्रं प्राट्टहासं मुमोच ह ।
गदया सहितो व्योम्नि गर्जन् जगाद भीतिकृत् ॥११॥
कस्त्वं विमानभूपोऽसि विमानं कस्य वा वद ।
अहं नेष्ये विमानं वा युद्धार्थं भव चित्तवान् ॥१२॥

शंकरः प्राह मा युद्धं समिच्छ याहि दूरतः ।
युद्धे ते नास्ति वै श्रेयो विमानं मुञ्च सत्वरम् ॥१३॥
दैत्यः प्राह विना युद्धं विजयो न भवेदिह ।
नेष्ये विमानं सर्वाश्च हरिष्ये योषितस्त्वितः ॥१४॥
इत्युक्त्वा गदया रुद्रं तताड मूर्ध्नि वेगतः ।
शंकरो वेगवान् शीघ्रं शूलेन तां बिभेद ह ॥१५॥
गदा भग्ना हि दैत्यस्य समुद्रे पतिता यदा ।
तावत् समुद्रवेलास्तु जलप्लुतास्तदाऽभवन् ॥१६॥
अथ वै गदया शून्यो दैत्यः क्षोभमवाप ह ।
किं कृत्वा चापि किं हृत्वा विद्रवामीत्यचिन्तयत् ॥१७॥
राजसौधे महोद्याने राजारायनृपस्य वै ।
कनिष्ठा भगिनी याऽऽसीत् सुप्ता मात्रा समं तु ताम् ॥१८॥
उत्तोल्य च निधायैव स्कन्धे व्योमगतोऽभवत् ।
विद्युन्मणिः रुरोदाति कुमारी दैत्यवाहिता ॥१९॥
हाहाकारो महानासीत् त्राहि त्राहीति नादिनाम् ।
मानवानां निनादा वै सभयास्त्वभवँस्तदा ॥२०॥
राजारायपतिः श्रुत्वा प्रबुबोध क्षणान्तरे ।
अनादिश्रीकृष्णनारायणश्चाप्युत्थितोऽभवत् ॥२१॥
प्रजाः प्रबुबुधुश्चापि कोलाहलसमन्विताः ।
महीमाना योषितश्चोन्निद्रा जाताः समन्ततः ॥२२॥
वृत्तान्तं शंकरेणोक्तं कन्यामादाय दैत्यराट् ।
नवजीवननामा वै द्रुतं धावति चाम्बरे ॥२३॥
एष नातिदूरगोऽस्ति त्वम्बरे याति पश्चिमे ।
मारणीयो मया कृष्ण तवाऽऽज्ञां प्राप्य सर्वथा ॥२४॥
तथास्त्विति हरिः प्राह राजारायपतिर्नृपः ।
मातोवाच तदाऽप्येवं तुभ्यं दत्ता हि कन्यका ॥२५॥
रक्ष रक्ष महाकृष्ण रक्ष शीघ्रं निवारय ।
कृष्णः प्राह तु राजानं विमानं सज्जमाविशन् ॥२६॥
एष प्रयामि रक्षार्थं त्वं विमानेऽत्र मे शुभे ।
यद्वा तव विमानेऽत्र मात्रा सहानुयाहि माम् ॥२७॥
एवमुक्त्वा हरिः शीघ्रं पश्चिमां ककुभं प्रति ।
दैत्यस्याऽनुजगामैव शीघ्रं कुटुम्बसंयुतः ॥२८॥
राजाऽपि स्वविमानं वै तत्पश्चाद् भृत्यसेवितः ।
वेगेनाऽवाहयद् व्योम्नि सूर्यतुल्योऽनुगोऽभवत् ॥२९॥
हरेर्विमानं वीक्ष्यैव तथा राजविमानकम् ।
दैत्यो भयेन दुद्राव व्योम्नि कन्यायुतोऽपि सन् ॥३०॥
वायुवेगेन लघुना वर्ष्मणा चोड्डितोऽभवत् ।
समुद्रोपरि दुद्राव रात्रौ सहस्रयोजनम् ॥३१॥
विमानं श्रीहरेः पश्चाद् राज्ञो विमानमित्यपि ।
अन्वधावद्धि वेगेन धर्तुं तं दैत्यपुंगवम् ॥३२॥
दैत्योऽपि बहुवेगेन दुद्रावाऽऽप्रातरेव ह ।
तावद् द्वीपः समायातः समुद्रान्तर्गतो महान् ॥३३॥
नवजीवनदैत्यश्चाऽप्यवाततार तां भुवम् ।
शतयोजनविस्तीर्णा द्वेधा भिन्नां जलान्तराम् ॥३४॥
प्राकारनगरीशोभां दैत्यसैन्यभयंकराम् ।
राजसौधादिशोभाढ्यां दैत्यावासमयीं पुरीम् ॥३५॥
शीघ्रं प्रविश्य दैत्यो वै ननर्दाऽन्यान् न्यबोधयत् ।
भेरीं प्रताडयामास युद्धावेदनकारिणीम् ॥३६॥
श्रुत्वा भेरीमहानादं दैत्या जगर्जुरुत्सुकाः ।
योधनार्थे धृतशस्त्रा निर्जग्मुः पर्वता इव ॥३७॥
नवजीवोऽपि शीघ्रं तां कन्यां निक्षिप्य गह्वरे ।
योधनार्थं त्वाजगाम दैत्यसैन्यसमन्वितः ॥३८॥
श्रीहरिर्यौवनं रूपं धृत्वा चक्रं सुदर्शनम् ।
ययौ तद्गह्वरं कन्यां निनाय स्वविमानके ॥३९॥
अन्यां मायामयीं कन्यां कृत्वा मृदा यथातथम् ।
निक्षिप्य गह्वरे सर्वदैत्यमोहकरीं प्रभुः ॥४०॥
यथार्थां भगिनीं राज्ञे त्वर्पयामास वै द्रुतम् ।
दैत्यास्त्वेतदजानन्तो युद्धायाऽभ्यपतन् बलात् ॥४१॥
कन्याभ्रात्रा च मात्रा सा कृष्णाऽर्पणं निवेदिता ।
हरेः कण्ठे करं दत्वा पतिं वव्रे विमानके ॥४२॥
करमालां वरमालां प्रगृह्य कृष्णकामिनी ।
अभवत् सा ततः श्रीमान् बालकृष्णः परेश्वरः ॥४३॥
ईशानाय ददावाज्ञां हन्तुं दैत्यान्मृधे तदा ।
शंकरो द्राक् जटां क्रोधाद् विकीर्य गणनायकान् ॥४४॥
दशलक्षानसृजत्तु रुद्ररूपान् भयंकरान् ।
संकल्पजन्यहेतींश्च योद्धुमाज्ञां ददौ तदा ॥४५॥
उत्प्लुत्योत्प्लुत्य दैत्याँस्ते निजघ्नुर्वै त्रिशूलकैः ।
आमध्याह्नं महद्युद्धं दैत्यनाशकरं ह्यभूत् ॥४६॥
सर्वे दैत्या विनष्टाश्च विंशतिलक्षसंख्यकाः ।
हाहाकारो महानासीत् स्त्रीणां प्ररोदनान्यपि ॥४७॥
दयालुः श्रीबालकृष्णस्तासां सुखाप्तये गणान् ।
आज्ञां चकार तद्देशे निवासार्थं गृहाश्रमे ॥४८॥
सर्वासां दैत्यपत्नीनां पाणिग्रहान् व्यधुर्गणाः ।
शांकरास्ते सुताः सर्वे वैष्णवाः कृष्णनोदिताः ॥४९॥
तां तां पत्नीं समगृह्य तत्तद्देशगृहाणि वै ।
ययुः सर्वे गणास्तत्र राजानं कामनायकम् ॥५०॥

कामनायकनामानं गणं चकार माधवः ।
अभिषिच्य महद्राज्ये गणकोटिं तथा ददौ ॥५१॥
महोत्सवं शुभं कृत्वा वल्लीलिङ्गपुरं प्रभुः ।
भ्रमित्वा श्रीहरिः सर्वं पावनं प्रचकार ह ॥५२॥
ततो विमानमारुह्य समुल्लंध्य च खाडिकाम् ।
द्विनेदिष्ठां पुरीं गत्वा भ्रमित्वाऽथ गणेश्वरान् ॥५३॥
वासयित्वा तत्कृतां सुपूजां लब्ध्वा परेश्वरः ।
राजानं भोजनं कर्तुमाज्ञां प्रदाय मापतिः ॥५४॥
मिलित्वा स्वविमाने वै भोजनानि हरिर्ददौ ।
वैमानिकेभ्यः सर्वेभ्यः सायं दत्वाऽभयं धनम् ॥५५॥
द्विनेदिष्ठपुरे राजसौधे निशामुवास सः ।
आश्विनशुक्लपञ्चम्यां प्रगे निद्रां विहाय च ॥५६॥
श्रीहरिः स्वविमानेन वीक्ष्य द्वीपं समन्ततः ।
राजानं तन्मातरं च ससैन्यं गन्तुमेव तु ॥५७॥
निजराज्यं समाज्ञाप्य ततः कुटुम्बसंयुतः ।
हरिर्विमानमारुह्य महीमानसमन्वितः ॥५८॥
व्योममार्गेण वै शीघ्रं समुल्लंध्य तु वारिधिम् ।
त्रासमानद्वीपमायात् हम्बार्तनगरीं प्रति ॥५९॥
वैमानिका हि मध्याह्ने जगृहुर्भोजनानि वै ।
ततो महर्षयो भक्ता उष्णालयप्रदेशजाः ॥६०॥
पूर्वं प्ररक्षितास्ते तु दर्शनार्थं विमानकैः ।
समाययुर्हरिस्तेषां स्वागतानि व्यधान्मुदा ॥६१॥
पूजां लब्ध्वाऽऽशिषो दत्वा विमानेन हरिर्द्रुतम् ।
समुद्रं तु समुल्लंध्य अल्लालीनगरीं ययौ ॥६२॥
उष्णालये भूशिरसो भागे वन्दारुकालये ।
उषित्वा रजनीं त्वेकां प्रातः कृत्वा प्रभोजनम् ॥६३॥
वृन्दारुकर्षिणा प्रातः कृतपूजो नरायणः ।
समुत्थाय ययौ विमानेन कुटुम्बशोभितः ॥६४॥
उत्तरस्यां तु काष्ठायां पञ्चाशद्योजनान्तरे ।
स्थितं सिंहलनामानं द्वीपं प्रापाऽब्धिमध्यगम् ॥६५॥
मध्याह्ने भोजनं कृत्वोड्डीय विमानगो हरिः ।
सायं पम्पासरः प्राप्य रात्रिं तीरे निनाय च ॥६६॥
सप्तम्यां वै ततः प्रातर्विमानमधिरुह्य च ।
गोपनाथं निजं तीर्थं सौराष्ट्रे त्वाययौ प्रभुः ॥६७॥
मध्याह्ने गोपनाथे तु कृत्वा पूजनभोजने ।
आश्विनशुक्लसप्तम्यां सायंकाले शनैः प्रभुः ॥६८॥
कुंकुमवापिकाक्षेत्रं त्वाययौ व्योममार्गगः ।
कुंकुमवापीजनताविरहार्ताः प्रतीक्षणम् ॥६९॥
कुर्वन्त्यः कृशतां प्राप्ता विनेक्षां श्रीहरेः सदा ।
ता नराः प्रमदा बाला बालिकाः स्वामिसेवकाः ॥७०॥
व्योम्नि तेजः समुदायं विलोक्याऽसुप्रियागमम् ।
प्रतर्क्यातिमुदा त्वश्वपट्टसरोवरान्तिके ॥७१॥
महोद्याने दुद्रुवुश्च दर्शनार्थं समुत्सुकाः ।
विमानं तावदेवाऽपि सन्निधौ समुपागतम् ॥७२॥
जयशब्दास्तूर्यनादाः शंखानां ध्वनयस्तथा ।
गीतिका योषितां चापि समन्तादभवँस्तदा ॥७३॥
क्षेत्रपालाश्च तीर्थानि देवास्तत्र निवासिनः ।
मुक्तास्तथेश्वराश्चाप्यवताराः पार्षदादयः ॥७४॥
महर्षयश्च राजन्या विप्राः सत्यश्च साधवः ।
योगिनः सिद्धपुरुषाः सन्तस्तथा व्रतस्थिताः ॥७५॥
अक्षरभूनिवासिन्यः कन्यकाश्च कुमारकाः ।
सौभाग्यवत्यो नार्यश्च सर्वमांगलिकान्विताः ॥७६॥
शीघ्रं प्रययुः कृष्णस्य स्वागतार्थं सरोन्तिकम् ।
लोमशाश्रमवासाश्च तथाऽऽप्रवणवासिनः ॥७७॥
तापसाः प्रययुः कृष्ण आयात इति हर्षिताः ।
चन्दनं पुष्पमालादि गन्धाक्षतफलानि च ॥७८॥
गन्धसारान् गृहीत्वापि त्यक्त्वा कार्याणि वै गृहे ।
सीम्नि विसृज्य कार्याणि कर्षुकाद्यास्तथा वने ॥७९॥
वनकार्याणि विसृज्य व्यापारादि वणिग्जनाः ।
सर्वे द्रुतं ययुश्चाऽश्वपट्टसरोऽभि वै हरेः ॥८०॥
स्वागतार्थं पूजनार्थं ययुस्त्यक्त्वा निजालयान् ।
हरेर्विमानं त्वरितं तत्र भूमौ ह्यवातरत् ॥८१॥
वर्धितं चन्दनाद्यैश्च पुष्पैरक्षतकुंकुमैः ।
भगवान् श्रीहरिस्तूर्णं विमानाग्रे स्थितोऽभवत् ॥८२॥
दर्शनं प्रददौ सर्वजनेभ्यो वै समन्ततः ।
कुशलं परिपप्रच्छ सर्वेषां स्नेहपूरितः ॥८३॥
सर्वे त्वनामयं प्राणपतेः पप्रच्छुरुत्सुकाः ।
ततः प्रेमाश्रुसहिता हरिं चाश्लिष्य वै मुहुः ॥८४॥
पुष्पहारान् हरेः कण्ठे न्यधुश्चन्दनकुंकुमैः ।
अक्षताद्यैर्गन्धसारैरर्हणं वै तदा व्यधुः ॥८५॥
पुंवर्गः सम्प्रणनाम श्रीमद्गोपालपादयोः ।
नारीवर्गः प्रणनाम कंभरापादयोर्मुहुः ॥८६॥

गणवर्गः प्रणनामेशानस्य पादयोस्तदा ।
योगिनीमण्डलाद्यं च ननाम सतीमीश्वरीम् ॥८७॥
ब्रह्मप्रियाभ्यः सर्वाभ्यो नमश्चक्रुर्हि योषितः ।
गौरीर्हारीतकीश्चामरीश्च वै ब्राह्मिलीस्तथा ॥८८॥
नेमिरे नूतनाः कृष्णवधूर्वै सर्वयोषितः ।
अथ वाद्यैश्च गीतैश्च मंगलैर्मन्दिरे हरेः ॥८९॥
प्रावेशयद्धरिं त्वार्घ्यैः कुटुम्बसहितं मुदा ।
मुनयः ऋषयः सर्वे पूजां चक्रुश्च दण्डवत् ॥९०॥
प्रजाश्चागत्य कुशलं पप्रच्छुर्विरहातुराः ।
हरिः कुशलमापृच्छ्य शुभां संभावनां व्यधात् ॥९१॥
कृतकार्याणि भक्तेभ्यस्त्वावेदयन्निशामुखे ।
ततश्चोत्थाय प्रययौ स्नानसन्ध्याकृते प्रभुः ॥९२॥
विनिर्वर्त्याऽर्हणं पश्चाद् भोजनानि व्यधापयत् ।
लोमशं सम्प्रपूज्यैव शंकरं पितरौ तथा ॥९३॥
महर्षीन् यवक्रीतादीन् भोजयामास माधवः ।
ब्रह्मप्रियास्तथा कृष्णो भोजयामास कन्यकाः ॥९४॥
सर्वाः कान्ता भोजयित्वा लोमशस्याऽऽश्रमे शुभे ।
सर्वास्ताः प्रेषयामास ब्राह्मीनां मण्डले तदा ॥९५॥
बालकृष्णश्च दिव्यानि सर्वोपकरणान्यदात् ।
बहुरूपधरः कृष्णस्ताभ्यः सुखं ददौ निशि ॥९६॥
एवं वै राधिके पृथ्व्यां सर्वदेशेषु सर्वतः ।
सर्वभक्तान् पावयित्वा राजतेऽक्षरक्षेत्रगः ॥९७॥
कुंकुमवापिका धन्या धन्यास्ताः कन्यका अपि ।
धन्या देशाश्च ते साक्षान्नारायणप्रसंगगाः ॥९८॥
इमं दिव्यं चरित्रं ये श्रोष्यन्ति भुवि मानवाः ।
पठिष्यन्ति कीर्तयिष्यन्त्यपि भावभरा जनाः ॥९९॥
तेषां पापविनाशः स्याद् मुक्तिः श्रेष्ठतमाऽत्र वै ।
मुक्तिश्चाऽन्तेऽक्षरलोके स्यादेवाऽत्र न संशयः ॥१००॥
यज्ञानां च कथां दिव्यामृषीणां भूभृतां तथा ।
भक्तानां च कथां केऽपि कीर्तयिष्यन्ति मानवाः ॥१०१॥
तेषां यज्ञफलं स्याच्च स्मृद्धयः स्युश्च तद्गृहे ।
ब्रह्मप्रियाणां चरितं श्रुत्वाऽऽप्स्यन्ति दिवं परम् ॥१०२॥
जपयज्ञफलं तीर्थफलं व्रतफलं तथा ।
सर्वपूजाफलं स्याच्च श्रवणादस्य भामिनि ! ॥१०३॥
एतद्दिव्यं चरित्रं वै प्रथमं पारमेश्वरम् ।
पृथ्व्यामभूत् सार्वभौमं भविष्यन्त्यपराण्यपि ॥१०४॥
संक्रुतान्यवतारैश्च मदाद्यैर्भगवत्कुलैः ।
भक्तैर्भागवतैश्चापि कल्याणदानि राधिके ! ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आश्विनशुक्लप्रतिपदि लापलात्रीपुरीं हरिर्ययौ, तत्र सामुद्रो दैत्यश्चागत्य नृपस्वसारं विद्युन्मणिनाम्नीं जहार, राजा च हरिश्च विमानाभ्यां तमनु दुद्रुवतुः, नवजीवद्वीपं गत्वा दैत्येन युद्धम्, शंकरोत्थदशलक्षगणैर्विंशतिलक्षदैत्यानां नाशः, कामनायकगणाय राज्यं ददौ हरिः, विद्युन्मणिनाम्नी कन्या हरिं वव्रे, द्विनेदिष्टपुरं पावयित्वा पञ्चम्यां विमानेन त्रासमानद्वीपमागत्य ततो वृन्दारुकामागत्य ततः सिंहलद्वीपमागत्य पम्पासरश्चागत्याऽऽश्विनशुक्लसप्तम्यां सायंपूर्वं कुंकुमवापिकामवाप, स्वागतं कुशलं भोजनं शयनादिकं चेत्यादिनिरूपणनामा द्वात्रिंशदधिकद्विशततमोऽध्यायः ॥२३२॥

**श्रीराधिकोवाच—**

गोपीपते हरेकृष्ण श्रावितं परमाद्भुतम् ।
अनादिश्रीकृष्णनारायणस्य चरितं शुभम् ॥ १ ॥
पावनं दिव्यमाद्यं च सृष्ट्यारंभे नवं नवम् ।
श्रुत्वा श्रुत्वाऽति मे श्रद्धा पुनः श्रोतुं प्रजायते ॥ २ ॥
न हि तृप्यामि कान्ताऽऽस्योद्गतवाण्या विशेषतः ।
भूयो मे श्रावय स्वामिन् बालकृष्णो महाप्रभुः ॥ ३ ॥
कुंकुमवापिकाक्षेत्रे किं ततः प्रचकार ह ।
यत्किंचिच्चरितं दिव्यं लौकिकं वापि मुक्तिदम् ॥ ४ ॥
कौटुम्बिकं तैर्थिकं वा चमत्कारयुतं च वा ।
स्वल्पं वापि महद्वापि श्रावयाऽऽलस्यमन्तरा ॥ ५ ॥

**श्रीकृष्ण उवाच—**

शृणु कान्ते प्रिये राधे पुरुषोत्तमसत्कथाः ।
भुक्तिमुक्तिप्रदा दिव्या भक्तानन्दप्रवर्षिणीः ॥ ६ ॥
मेऽपि कथयमानस्य तृप्तिर्नैवोपजायते ।
पुरुषोत्तमसंज्ञस्य मम मूलस्य सत्कथाः ॥ ७ ॥
अपि त्वं राधिके चासि ममार्धे पुरुषोत्तमी ।
सोऽहं त्वां मत् पृथक्कृत्वा गोलोकेऽस्मि पृथक् स्थितः ॥ ८ ॥
मूलरूपात् परब्रह्मस्वरूपात् कृष्णरूपवान् ।
त्वदर्थं चास्मि निष्पन्नस्तव कामप्रपूर्तये ॥ ९ ॥
त्वं चाहं च तथा लक्ष्मीर्नारायणश्च राधिके ।
पृथग्भूता दृश्यमाना अपि पृथङ्न मूलतः ॥१०॥

त्वादृश्यो मादृशा मूले परे ब्रह्मणि कोटिशः ।
अवतारा विराजन्ते ममैकस्य तु का कथा ॥११॥
तस्य श्रीबालकृष्णस्य कंभराश्रीसुतस्य वै ।
गोपालकृष्णनन्दस्य ब्रह्मप्रियापतेर्हरेः ॥१२॥
सर्वपतेः परेशस्याऽऽनन्दप्रदानि यानि तु ।
चरित्राणि परं चेतः कथयामि निबोध मे ॥१३॥
श्रोतॄणां चापि वक्तॄणां मोक्षदानीह सर्वथा ।
स्मर्तॄणां वासनानाशकारीणि शोभनानि च ॥१४॥
सात्त्विकार्थे सात्त्विकानि राज्यर्थे राजसानि च ।
तामसार्थे तामसानि मुक्तार्थे निर्गुणानि च ॥१५॥
निर्गुणोऽपि हरिर्मायां युक्त्वा तद्वानिवाऽनिशम् ।
वर्तते गुणिनां मध्ये तेषां सुखाभिसन्धये ॥१६॥
स्त्र्यपत्यवन्तो लोकास्तु स्वतुल्यं कल्पयन्ति तम् ।
स्त्रीपुत्राभिजनबद्धं न दिव्यं यद् गुणदृशः ॥१७॥
अहं राधे निर्गुणोऽस्मि का कथा मे परात्मनः ।
त्वं राधे निर्गुणा चास्से का कथा ब्रह्मयोषिताम् ॥१८॥
गोपा गोप्योऽपि दिव्या मे गोलोकस्थाश्च धेनवः ।
वैकुण्ठवासिनो दिव्याः का कथा परमात्मनः ॥१९॥
चमत्कारास्तस्य दिव्याः क्रिया दिव्या अबन्धनाः ।
योगो दिव्यो हरेस्तस्य रमणं रासनादिकम् ॥२०॥
दाम्पत्यं सर्वथा दिव्यं दिव्यश्चाभिजनोऽस्य च ।
दिव्यास्तस्य गुणाः सर्वे माया यत्र च तद्विधा ॥२१॥
सर्वं दिव्यं मोक्षदं च शाश्वतानन्ददायकम् ।
लौकिकाश्च क्रियाः कृष्णे दिव्या मुक्तिसुखप्रदाः ॥२२॥
महीमानं कथयतो हृदयं मे द्रवत्यपि ।
मद्गुणानां वर्णनं न कर्तुं शक्तो भवामि वै ॥२३॥
तद्धनन्तस्य देवस्य प्रभोः सर्वावतारिणाः ।
वर्णनं कर्तुमेवेशः को भवेद् राधिके प्रिये ॥२४॥
त्वदर्थे न च सन्तोषं लभे गुणानुवर्णने ।
सत्पात्रे यत्र लभ्येत तत्र तृप्तिर्न जायते ॥२५॥
अतृप्तोऽहं कथयामि मिष्टान् मिष्टान् हरेर्गुणान् ।
आश्विने भगवान् पूर्णिमायां चन्द्रोदयोत्तरम् ॥२६॥
निशीथे स्वप्रियाभिर्वै रासोत्सवं चकार ह ।
सरस्तटेऽतिधवले चाऽऽम्रवणेऽतिमञ्जुले ॥२७॥
विद्युन्मणिप्रिया प्राह बालकृष्णं सुसुन्दरम् ।
कृष्ण चन्द्रोदयो जातो धावल्यं सुवितन्यते ॥२८॥
दुग्धरात्रिः समुत्पन्ना मनो मे रन्तुमिच्छति ।
अन्यासामपि सर्वासां स्वसॄणां मानसान्यपि ॥२९॥
शारदे शीतले शान्ते रन्तुं त्वरां दधत्यपि ।
तन्नाथ रासरमणं विधेहि शं च देहि नः ॥३०॥
इत्युक्तो भगवान् श्रीमद्बालकृष्णोऽतिभावुकः ।
सर्वासां स्वांगनानां सम्पूरयितुं मनोरथान् ॥३१॥
दिव्यरूपं दधाराऽसौ यन्निजाक्षरधामगम् ।
मुरलीं चापि जग्राह वेषं रासार्हमादधे ॥३२॥
मस्तके च मयूराणां पिच्छानां मुकुटं दधे ।
कुंकुमस्य च तिलकं नेत्रयोः कज्जलं दधे ॥३३॥
कुण्डले कर्णयोश्चापि गण्डयोश्चन्द्रकं दधे ।
कपोलयो रंगबिन्दून् भाले च पत्रिकां दधे ॥३४॥
नारीकेशनिभान् केशान् स्कन्धयोर्विस्तृतान् दधे ।
कटके भुजबन्धौ च मणीन् प्रकोष्ठयोर्दधे ॥३५॥
कौस्तुभं मौक्तिकीर्मालाः पुष्पहारान् गले दधे ।
कञ्चुकं हेमताराढ्यं रक्तवर्णं शुभं दधे ॥३६॥
सुखालं शोणवर्णं कटिबद्धं दृढं दधे ।
रशनां स्वर्णसम्भूतां किंकिणीजालनादिताम् ॥३७॥
नुपूरे सन्दधे रम्ये किंकिणीस्तबकान्विते ।
ऊर्मिका हीरकाढ्याश्च गन्धं मुमोच सौरभम् ॥३८॥
स्नेहवृष्टिं पुपोषाऽपि ससर्जाऽनङ्गभावनाम् ।
युवभावं प्रकाशयामास युवतीभावनाम् ॥३९॥
मुग्धाभावं तथा मध्याभावं प्रौढादिभावनाम् ।
सम्प्राविर्भावयामास सर्वासु स्वप्रियासु सः ॥४०॥
राधिकेऽथ ततः कृष्णं प्रेरयितुं स्वयं प्रियाः ।
अन्याः सर्वाः समाकल्प्य वेषं श्रृंगारशोभितम् ॥४१॥
कान्तं प्रति समागत्य प्रार्थयामासुरेव ताः ।
कृष्णकृष्ण महाकृष्ण बालकृष्ण क्षपेश्वर ॥४२॥
क्षपां सार्थां मनःपूर्त्या विधेहि रमणोऽसि नः ।
एवं श्रुत्वाऽतिवेगाढ्यां वाणीं कान्तागणस्य सः ॥४३॥
राधिके श्रीबालकृष्णः शीघ्रमुत्थाय चाऽलयात् ।
बहिः सरः समागत्य दक्षिणे वै तटे शुभे ॥४४॥
मिष्टां निनादयामास मुरलीं हृदयंगमाम् ।
तन्मिष्टस्वरमाधुर्यैर्हृदयानि तु योषिताम् ॥४५॥
शैत्यं सुखं च कम्पं च प्राप्याऽपि द्रवितानि वै ।
कम्रकमाख्यां रतिं प्राप्य कृष्णं प्रति समाययुः ॥४६॥
सर्वास्तदा निजपत्न्यः कुमार्यो लोमशाश्रमात् ।
ऋषिं नत्वा समापृच्छ्य निजं कान्तमुपाययुः ॥४७॥
सर्वानन्दभराः कन्याः सर्वश्रृंगारशोभिताः ।
कान्तं स्मृत्वाऽग्रतो यान्तं दृष्ट्वा शीघ्रं प्रदुद्रुवुः ॥४८॥

कृष्णो दृष्ट्वा निजाः कोट्यर्बुदसंख्याककामिनीः ।
विशालं रासरमणं तलं दिव्यमकल्पयत् ॥४९॥
न तत्र दृश्यते दिव्ये तेजोमये स्तरेऽक्षरे ।
सरश्चाम्रवणं चाप्याश्रमो वा नगरी च भूः ॥५०॥
दिव्योद्यानो महाञ्जातः सर्वाऽक्षरद्रुमान्वितः ।
शतयोजनविस्तीर्णः शतस्तरोच्छ्रयस्तथा ॥५१॥
प्रतिस्तरं पञ्चलक्षप्रमदानां स्वयोषिताम् ।
दिव्यानां कन्यकानां वै रासाः क्लृप्ताः कृपालुना ॥५२॥
भूत्वा तावत्स्वरूपः स यावत्प्रियाः प्रसंख्यया ।
दिव्योद्यानः समस्तो वै दिव्ययुगलशोभितः ॥५३॥
रासभ्रामगशोभाढ्यः प्राजायत नवक्रियः ।
मुख्यास्तु माणिकी राधा लक्ष्मीः पद्मावती रमा ॥५४॥
सद्गुणा मञ्जुला हासा मुक्ता च ललिता जया ।
हेम्नी दया च चम्पाऽपि शान्तिर्मनुश्च मंगला ॥५५॥
श्रीश्चाययुस्तथा सौराष्ट्र्यश्च चत्वारिंशत् शतम् ।
मेघनाद्यश्चतुर्दशसहस्राणि तदाऽऽययुः ।
आजनाभ्यस्तदा मिश्राः देविकास्ताः समाययुः ॥५६॥
षष्ठ्याख्या मानसा दीपावल्यश्च कोटिराययुः ।
तलाजा कामधेनवीयकन्याः कोटिराययुः ॥५७॥
आर्जन्त्यश्च शतं क्रोधनिकैका कोटिगह्वराः ।
सूची लक्षवनदेव्यो लक्षराक्षस्य आययुः ॥५८॥
कंकताल्यः षट् तथा च दशसाहस्रमाययुः ।
पितृकन्याश्चैकलक्षमाययू रासमुत्सुकाः ॥५९॥
रासातल्यः पञ्चसहस्रं वासन्त्यश्च षोडश ।
साल्माल्यः पंचशतं नागकन्याश्च विंशतिः ॥६०॥
नागिन्यो दशसाहस्रं शावदीन्यः सहस्रकम् ।
ऐन्द्रजाल्यः सहस्रं च विद्याश्च पञ्चसप्ततिः ॥६१॥
लाक्ष्मण्यो द्वे सहस्रे च रासार्थं तत्र चाययुः ।
वैधस्यो द्वासप्ततिसहस्राणि त्वाययुस्तदा ॥६२॥
वैश्रावस्य्यस्त्रिशतं च जुम्मासेम्ल्यः सहस्रकम् ।
सान्तपन्यः पञ्चशतं सौरत्यश्च शतं तथा ॥६३॥
बालेश्वर्यश्च तिस्रश्चैलवीला त्वेकलाऽऽययौ ।
दाक्षजावंगरीशतं प्रजाकन्यासहस्रकम् ॥६४॥
पैत्र्यश्च विंशतिर्दशसहस्रसेविकास्तथा ।
प्राचीन्याद्याः प्रजाकन्याः कोटिस्तत्र समाययुः ॥६५॥
सान्तारण्यौ च द्वे कन्ये शैव्यः शतं समाययुः ।
शार्कूटस्थ्यः पंचाशच्च वीरजार्यः शतं तथा ॥६६॥
षष्टिः शाक्त्यक्षिकाः शतं पिचाशिन्यः समाययुः ।
शतद्वयं कालियाश्मस्त्रिशदुरलकेतुजाः ॥६७॥
क्राथक्यः पञ्च च पार्थराज्यो विंशतिराययुः ।
दशौष्ट्राल्यः पञ्च हांकार्यश्च काष्ठलीपञ्चकम् ॥६८॥
षट् तीराण्यश्चाल्वीनर्यः पञ्च सप्त तु वर्धिकाः ।
अनाथैका द्वे सहस्रे प्रकीर्णिकादिकन्यकाः ॥६९॥
सप्ताऽल्पकेत्व्यश्चैका च जयकृष्णवकन्यका ।
पारीशान्यश्चैकविंशतिर्द्वे चैन्दुरायीसुते ॥७०॥
पञ्चदश तु मौद्राण्ड्यो नव गण्डनृपात्मजाः ।
चतस्रश्चैव लीनोर्ण्यश्चैकादशबृहच्छराः ॥७१॥
चत्वारिंशद्वालालीन्यः पञ्चैव वारसैंहिकाः ।
रायगामलिकाः पञ्च तिस्रश्चान्याः समाययुः ॥७२॥
एकला स्तोकहोमी च काष्ठयानी तथैकला ।
एकला कोलकी द्वे च दिनमान्यौ समाययुः ॥७३॥
रायकिन्नरिकाश्चैकपञ्चाशत्तत्र चाययुः ।
रायरोकीश्वरीकन्याश्चैकविंशतिराययुः ॥७४॥
राणजित्यो विंशतिश्च तिस्रो वाकक्षिकास्तथा ।
मारीशयश्च तथा तिस्रो बालेश्वर्यश्च तिसृकाः ॥७५॥
षट् लाम्बार्यः सप्त नवार्क्यश्च नव तु हुण्डशाः ।
एका कूपेशिका चतस्रः कालीमण्डलीनिकाः ॥७६॥
जेलेरयः पञ्च तिस्रस्तु पारावार्यः समाययुः ।
कोटीश्वर्यौ द्वे च कन्ये तिस्रः सातीशिकास्तथा ॥७७॥
सप्त कर्कशिकाश्चापि चतस्रश्चाऽण्डजारिकाः ।
बाल्यराजसी चैका च तिस्रः सौमनिकास्तथा ॥७८॥
द्वे गवाक्ष्यौ पाराङ्वृत्त्यौ द्वे च रासे समाययुः ।
ऐशान्यश्चैकचत्वारिंशच्च रासे समाययुः ॥७९॥
रायपात्यश्चतुस्त्रिंशचत्वारिंशच्च मंगलाः ।
आजनाभ्यो विंशतिसाहस्रकन्याः समाययुः ॥८०॥
एताः सर्वाश्चतुष्कोट्यश्चतुर्लक्षं हि कन्यकाः ।
पञ्चपञ्चाशत्साहस्रास्तथा वै षट्शतानि च ॥८१॥
विंशतिः कन्यकास्ताश्च कृष्णपत्न्यो[१]ऽर्पणाऽऽगताः ।
तासां सख्यश्च कौबेर्यो माहेन्द्र्यो यमकन्यकाः ॥८२॥
वायव्यो वैश्वकर्म्यश्च वारुण्यौ रौद्र्यश्च वह्निजाः ।
श्रावण्यश्चापि खानिज्यः साम्वत्सर्यश्च गोपिकाः ॥८३॥
प्राचीन्यश्च पिशंगिन्यो राशियान्यः समाययुः ।
रौमायण्यश्च पारश्यो धैवर्यः किन्नरीगणाः ॥८४॥
अमर्यश्च तथा गौर्यः पर्यो हारितिकास्तथा ।
आब्रित्त्योऽपि च पाताल्यः स्वर्ग्यश्चाप्सरसस्तथा ॥८५॥

१. ( ४०, ४, ५५, ६, २२ ) चतुःकोटयः, चतुर्लक्षाणि, पंचपंचाशत्सहस्राणि, षट्शतानि, द्वाविंशतिश्च कन्याः ।

ब्रह्मसरसो गान्धर्व्यो युवत्योऽर्बुदमागताः ।
सशृंगाराः सचित्सुखप्रभामण्डलद्योतिताः ॥८६॥
रेमिरे भिन्नचक्रेषु मुष्ट्युच्चपतिना हि ताः ।
श्रीकृष्णवल्लभार्येण स्वामिनाऽसंख्यरूपिणा ॥८७॥
भूत्वा वर्षद्वयज्येष्ठो रेमे रामो रमात्रजैः ।
तालीवादनतालैश्च पादस्थगितभंगिभिः ॥८८॥
पार्श्वदानप्रदानैश्चाऽञ्जलिदानैश्च गीतिभिः ।
गण्डस्पर्शैः स्कन्धहस्तैर्वक्षःश्लेषैर्मुहुर्मुहुः ॥८९॥
भ्रामणैर्विविधैश्चाग्र्यैः पश्चापादैस्तथाऽग्रगैः ।
क्रमणैः क्षेपणैश्चापि नेत्रस्तनैर्मनोऽर्पणैः ॥९०॥
हावभावैर्गण्डदानै रेमे चाश्लेषणैस्तथा ।
कोटिशो मण्डलान्येवं तेजःस्तरेषु सर्वतः ॥९१॥
विद्यन्ते रासिनीनां वै रासे कान्तैः समन्ततः ।
सर्वाकर्षणकर्ताऽयं नारायणपरेश्वरः ॥९२॥
अन्तरात्मा निजैश्वर्यान्महानन्दोत्तमं ददौ ।
सर्वेन्द्रियाणामानन्दं दिव्यं सवेगिशाश्वतम् ॥९३॥
तथाप्यविप्लुतानन्दं ददौ चापातरेव ह ।
दर्शने स्पर्शने चापि श्रवणे घ्राणनेऽपि च ॥९४॥
रासने ग्रहणे चापि पादन्यासे च कीर्तने ।
आश्लेषणे पृष्ठभावे चाग्रे पार्श्वे च सन्निधौ ॥९५॥
युवतीनां स्वपत्नीनां सर्वेन्द्रियेषु सर्वथा ।
सर्वेन्द्रियाणामानन्दं बहुवेगं न्यधात्प्रभुः ॥९६॥
यदानन्देन चाकृष्टाः सर्वास्तल्लीनतां गताः ।
रत्यानन्दं पृथङ् नैव समैच्छँस्तृप्तिमागताः ॥९७॥
कान्ताऽऽनन्दप्रवाहाश्च ह्यात्मानन्दप्रवाहकैः ।
मिलिताः कामकाराश्च प्रवाहा लीनतो ययुः ॥९८॥
ब्रह्मानन्दप्रवाहे वै कामानन्दः किंमानकः ।
कोटिकोटिप्रकोटीनां पतीनां सुखदेऽक्षये ॥९९॥
बालकृष्णांगयोगोत्थे कोऽयं कामो हि कच्चरः ।
कामे कामत्वनिक्षेप्ता स्वयं पतिर्हि रासने ॥१००॥
रमते स्वप्रियाभिर्हि सर्वकामसुखप्रदः ।
तन्मूर्तेः संगमे राधे मूर्धा ययुर्हि योषितः ॥१०१॥
रासभ्रमणमुत्सृज्य शयनं तेन चक्रिरे ।
कृत्वा स्वोरःसु कान्तं स्वं महानन्दं प्रपेदिरे ॥१०२॥
युगदीर्घं सुखं प्राप्य विनिर्वृत्तिं ययुः स्त्रियः ।
विमूर्छाश्च निजं कान्तं समुत्थाप्य च रासने ॥१०३॥
पुनर्वै भ्रामणं चक्रुस्तावच्चन्द्रोऽन्धिमाप ह ।
बालकृष्णो मुरलीं स्वां व्यनादयन्मुहुर्मुहुः ॥१०४॥
कृकवाकुप्रबोधां तां श्रुत्वा प्रातः प्रबोधिनीम् ।
सर्वाः पत्न्यः समं वेषं शृंगारं संविधाय च ॥१०५॥
शीघ्रं कान्तं समाश्लिष्य तथाऽऽज्ञां प्राप्य सत्वरम् ।
प्रातःकृत्यविधानार्थं प्रययुस्तावदेव ताः ॥१०६॥
सर्वं तन्मण्डलं दिव्यं तैजसं संव्यलीयत ।
अश्वपट्टसरस्तत्राऽदृश्यताऽऽम्रवणं पुनः ॥१०७॥
आक्षरी पृथिवी भूमिश्चाश्रमो लोमशस्य सः ।
रासोऽयं रासखेलानां चिह्नानि रमणान्यपि ॥१०८॥
व्यलीयन्तेच्छया तस्य परेशस्य हि राधिके ।
सर्वाः स्नात्वा सरस्येव कृत्वा नित्यविधिं ततः ॥१०९॥
ययुर्निजान् समावासान् बालकृष्णो गृहं ययौ ।
राधिकेऽहं तदा राधां द्रष्टुं तत्र ह्युपागतः ॥११०॥
कीदृशी रमते राधा चाऽदृश्यश्चाऽभवं तदा ।
त्वया प्रसादितः कान्तो बालकृष्णो मनोहरः ॥१११॥
पश्याऽऽलस्यं कियत् प्राप्तं रमणेन समुत्थितम् ।
पश्य स्वहृदये कान्तं रमन्तं तत्रथास्थितम् ॥११२॥
स्फुरन्तं पश्य गोपि त्वं चाऽविस्मृतं परेश्वरम् ।
तस्यानन्दोत्तमलाभात् पूर्णकामाऽसि राधिके ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने आश्विनशरत्पूर्णिमारात्रौ सर्वनिजपत्नीभिर्बालकृष्णस्य रासानन्दरमणक्रीडावर्णननामा त्रयस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३३ ॥

**श्रीकृष्ण उवाच—**

राधिके तत आरभ्य शरद्रात्रिप्रभाततः ।
बालकृष्णं विना नाऽऽसां क्षणो याति सुखेच्छया ॥ १ ॥
शयने भोजने याने वने स्नाने तथाऽऽसने ।
वार्तने रमणे गाने सखीभिः सह नर्मणि ॥ २ ॥
बालकृष्णो हि नेत्राग्रे हृदयेऽपि स्फुरत्ययम् ।
स्मारं स्मारं महानन्दं भ्रमन्ति कृष्णवृत्तिकाः ॥ ३ ॥
कदाऽऽगच्छेत् पुनश्चैवं शारदोत्सवमाचरेत् ।
कान्ताऽऽनन्दप्रदं कान्तश्चेत्येवं संव्यचिन्तयन् ॥ ४ ॥
ब्रह्मानन्दं मुहुः स्मृत्वा कन्या निद्रां न लेभिरे ।
कृष्णस्तासां दिव्यरूपैः पूरयत्येव कामनाः ॥ ५ ॥
सदा सहैव ताः सर्वाः प्रार्थयामासुरच्युतम् ।
रक्षितुं मन्दिरे नैजे न तु वै लोमशाश्रमे ॥ ६ ॥
बालकृष्णस्तु ताः प्राह मार्गशीर्षे विधानतः ।
नयिष्ये मन्दिरे नैजे श्रुत्वा ता धैर्यमावहन् ॥ ७ ॥

अथोर्जकृष्णपक्षस्याऽष्टमी जनतिथिर्हरेः ।
आयाता चोत्सवं तत्र चक्रे गोपालकृष्णकः ॥ ८ ॥
चतुर्दशसमा जाता बालकृष्णस्य भूतले ।
पञ्चदशी जन्मजयन्त्यष्टम्यत्र प्रवर्तते ॥ ९ ॥
तत्र श्रीबालकृष्णस्य पिता कीर्त्यनुसारतः ।
महोत्सवं परं चक्रे पूर्वपूर्वातिवर्तिनम् ॥१०॥
सस्मार विश्वकर्माणं निर्मातुं मण्डपं शुभम् ।
शीघ्रं चोपाययौ विश्वकर्मा ननाम पादयोः ॥११॥
एष दासो हि कृष्णस्योपस्थितोऽस्मि निदेशनाम् ।
देहि करोमि शीघ्रं वै यथेष्टं शोभनं यथा ॥१२॥
श्रुत्वा पिताऽऽह पुत्रस्य बालकृष्णस्य शोभना ।
जन्मजयन्तिका प्राप्ता पञ्चदशीति मण्डपम् ॥१३॥
विशालं नूतनं दिव्यं दिव्यसामग्रिकोद्भवम् ।
प्रकारय विशेषेण देवेशसंसदुत्तरम् ॥१४॥
तथास्त्विति प्रणम्याऽथ श्रीकृष्णवल्लभं प्रभुम् ।
पूजयितुं ययौ पार्श्वे पूजयित्वा प्रसन्नताम् ॥१५॥
आज्ञां चाप्य द्रुतं दिव्यं मण्डपं हृद्यचिन्तयत् ।
अपूर्वं मण्डपं कर्तुं त्वाज्ञा जाताऽस्ति तत्तथा ॥१६॥
करोमि मण्डपं दिव्यं चतुःकम्मानिकोपरि ।
अश्वपट्टसरो यस्याऽधो निहितं यथा भवेत् ॥१७॥
इत्येवं संप्रकल्प्यैव प्रतिमां माण्डपीं हृदि ।
धनुश्चतुष्टयं तत्र सस्मार योजनायतम् ॥१८॥
ऐन्द्रं धनुः शांकरं च धनुर्धनुश्च वैष्णवम् ।
धनुर्मनोभवस्यापि दृढं भारसहं शुभम् ॥१९॥
अश्वपट्टसरःपूर्वदिशायां चैन्द्रमेव सः ।
दक्षोत्तरं दीर्घमस्थापयत् कम्मानिकात्मकम् ।
ऐशं धनुश्चोत्तरस्यामस्थापयत्तथैव च ॥२०॥
पश्चिमस्यां वैष्णवं चाऽस्थापयत् तत्तथैव च ।
दक्षिणस्यां च कामस्याऽस्थापयत्तत्तथैव च ॥२१॥
योजनायतभूभागे प्रान्ताष्टकं न्यधापयत् ।
कृत्वैवं चतुरस्रां वै चतुष्कीं पादरूपिणीम् ॥२२॥
तत्र न्यधापयत् सूर्यरश्मीन् तेजोनिधानकान् ।
सूर्यकान्तैश्चन्द्रकान्तैः स्फाटिकैर्मणिभिस्तथा ॥२३॥
समसूत्रां चतुष्कीं तां कृत्वाभित्तिस्वरूपिणीम् ।
प्राकारं गोपुराढ्यं सौवर्णं कम्मानिकायुतम् ॥२४॥
कारयामास शीघ्रं सः मध्ये सभां सुशोभनाम् ।
चान्द्रकिरणसम्पाद्यसुधाद्रव्यवितानिकाम् ॥२५॥
अमृतोद्भववल्ल्याढ्यशोभास्तंभसमन्विताम् ।
सौवर्णासनसंराजत्पार्श्ववर्तुलमध्यमाम् ॥२६॥
ग्रहनक्षत्रतारादिप्रदीपस्थानराजिताम् ।
कौस्तुभव्रातसंलग्नवितानच्छाययाऽन्विताम् ॥२७॥
यावल्लक्ष्मीस्वरूपाऽनुरूपश्रीधृतमालिकाम् ।
यावदप्सरसां नृत्याऽर्हणगीतिस्वभावगाम् ॥२८॥
सुधर्माब्राह्मभौमेशीसभाचतुष्टयांऽकिनीम् ।
कामधेनुकल्पलताचिन्तामणिसमन्विताम् ॥२९॥
कल्पवल्लीकल्पद्रुमाऽक्षयपात्रादिमण्डिताम् ।
सर्वगन्धरसास्वादसुखस्पर्शानिलान्विताम् ॥३०॥
दूरश्रवणदृश्यादिसर्वशक्त्याश्रयां शुभाम् ।
यत्र यावत्पदार्थेषु दृश्यते मूर्तिमान् हरिः ॥३१॥
स्वयंप्रकाशो भगवान् बालकृष्णस्य भक्तराट् ।
यथाऽदिदेश रूपाणि तथा त्वष्टा न्यधापयत् ॥३२॥
मुक्तरूपाणि सर्वाणि चाक्षरस्य स्वरूपकम् ।
मुक्तानीनां स्वरूपाणि त्वष्टा व्यकल्पयत्तथा ॥३३॥
तेषु श्रीबालकृष्णश्चान्तरात्मा दृश्यते शुभः ।
अवतारान् सर्वविधान् तथावतारयोषितः ॥३४॥
व्यूहाँश्च व्यूहपत्नीश्चेश्वरानीश्वरिणीस्तथा ।
तेषु श्रीबालकृष्णश्चान्तरात्मा दृश्यते शुभः ॥३५॥
सिद्धाश्च सांख्ययोगिन्यः सत्यः साध्व्यश्च साधवः ।
ऋषयः पितरो देवा देव्यस्तासां प्रयोषितः ॥३६॥
मानवा दिक्प्रपालाद्या लोकपालाः सयोषितः ।
काश्यप्यश्च प्रजाः सर्वा दिव्यतत्त्वानि सर्वशः ॥३७॥
आदित्या वसवो रुद्रा गणेशा भूभृतोऽपरे ।
पार्थिवाश्चापि विख्याता निहिता विश्वकर्मणा ॥३८॥
तेषु सर्वेषु दिव्यः श्रीबालकृष्णो विलोक्यते ।
एवंविधां सभां कृत्वा मण्डपाढ्यां सुनूतनाम् ॥३९॥
न्यवेदयद्धि सप्तम्यां पित्रे रात्र्यर्धके गते ।
प्रसन्नोऽभूत् पिता दृष्ट्वा सोपानानि समन्ततः ॥४०॥
यानमार्गान् विमानानामवकाशान् तदन्तरे ।
हस्तिनां गतिमार्गांश्च रथानां पादचारिणाम् ॥४१॥
मार्गान् विश्रान्तिविश्रामान् दृष्ट्वा मुमोद वै पिता ।
कृतोद्यानानि परितः फलपुष्पयुतान्यपि ॥४२॥
बहुरंगविचित्राणि वीक्ष्य जहर्ष वै पिता ।
तत्र सर्वत्र पुत्रं स्वं हृदयस्थं व्यलोकयत् ॥४३॥
सर्वं तत्त्वात्मकं चास्ते विशिष्टं तन्निदर्शनम् ।
रचितं चाऽऽज्ञया त्वष्ट्रा हरेः प्रेरणया भुवि ॥४४॥

दिव्यं भौमसरोमूर्ध्नि सरश्चाऽधः प्रदृश्यते ।
कोटिकमलशोभाढ्यं शेषकमठशोभितम् ॥४५॥
पातालदृश्यशोभाढ्यं तेजःपटं तथा कृतम् ।
इत्येवं मण्डपं दिव्यं वीक्ष्य सिंहासनं हरेः ॥४६॥
व्यलोकयन्महादिव्यं परं सर्वाऽऽसनोच्छ्रयम् ।
दिव्यसत्त्वोत्थसौवर्णरचितं हस्तिपीठगम् ॥४७॥
सिंहासनेऽवयवेषु सर्वसिंहासनानि वै ।
अन्तःकृतानि दिव्यानि सदेवानि शुभानि वै ॥४८॥
कार्ष्णं नारायणं वासुदेवीयं भौममाच्युतम् ।
सादाशैवं च हैरण्यगार्भं वैराजकं तथा ॥४९॥
ब्राह्मं चैन्द्रं वारुणं च याम्यं कौबेरकं तथा ।
आग्निकं चाऽनिलीयं चैशानं नैर्ऋतिकं तथा ॥५०॥
शेषीयं सौरमेवापि तथाऽन्यानि च यान्यपि ।
सिंहासनानि सर्वाणि कृष्णासनोदरेऽभवन् ॥५१॥
एवंविधं दिव्यगजासनं त्वष्टा ह्यवाऽऽन्यसत् ।
दिव्यमुक्तानिकावृन्दैः करमालैर्गजासने ॥५२॥
स्थितैः पुष्पाञ्जलिभिश्चाऽक्षतचन्दनभृत्करैः ।
सुशोभिते महादिव्ये मण्डपे च सुगन्धिनि ॥५३॥
आक्षरैस्तैजसैर्द्रव्यैर्भ्राजमाने समन्ततः ।
शुशुभेऽन्तर्गतः कृष्णोऽसंख्यरूपो महाप्रभुः ॥५४॥
श्रीमद्गोपालकृष्णः संवीक्ष्य पुत्रासनं परम् ।
दिव्योत्तमं हि मुमुदे मुमुदे च कुटुम्बकम् ॥५५॥
ब्रह्मप्रियाद्याः पत्न्यश्च मुमुदिरेऽतिकाष्ठया ।
निजकान्ताऽऽसने वीक्ष्य गौरवं सार्वभौमिकम् ॥५६॥
अथैवं संविधायैव त्वष्टा हर्षान्वितोऽभवत् ।
अपूर्वां स्वकृतिं दृष्ट्वा मेने कृपां हरेर्हि सः ॥५७॥
अनर्हं यत्स्वबुद्धेस्तत् समुद्भूतं महासनम् ।
आन्तरस्थं प्रभुं तस्य विधातारममन्यत ॥५८॥
अथ गोपालकृष्णोऽपि तेजोव्याप्तं हि मण्डपम् ।
वीक्ष्याऽक्षरं च तत्क्षेत्रं मण्डपस्य हि तेजसा ॥५९॥
दिनवद्भ्राजमानं च प्रातर्भ्रान्तोऽभवद् द्रुतम् ।
प्राबोधयद् गणेशं चेशानं सतीं च लोमशम् ॥६०॥
सच्चिदानन्दमेवापि तुषितं च सदाशिवम् ।
लक्ष्मीं नारायणीं चापि सनत्कुमारकम् ऋभुम् ॥६१॥
शीघ्रं त्वाज्ञापयामास क्षणाद् यान्तु समन्ततः ।
कृष्णजन्मजयन्त्यां वै ह्याशीर्वादपरायणाः ॥६२॥
ब्रह्मसृष्टीश्वरसृष्टिजीवसृष्टिस्थिता भुवि ।
सौराष्ट्रे वै समायान्तु गोपालकृष्णमन्दिरम् ॥६३॥

अष्टम्यामुत्सवे सर्वे वर्धयन्तु समागताः ।
इत्याज्ञां संगृहीत्वैव द्रुतं लोकान्तरं ययुः ॥६४॥
मुक्ता धाम ययुश्चापि गणेशः शांकरं पदम् ।
ईशानः सत्यलोकं च सतीसाध्व्यालयान् ययौ ॥६५॥
लोमशस्तु महर्षींश्च तुषितः पितृमण्डलम् ।
सदाशिवश्चेश्वराणां लोकेषु तूर्णमाययौ ॥६६॥
सच्चिदानन्दमुक्तश्च विष्णुधामानि वै ययौ ।
लक्ष्मीः सर्वप्रदेवीनां लोकेषु च ययौ तदा ॥६७॥
नारायणी बदर्यां च क्षीरे श्वेते ययौ तदा ।
सनत्कुमारो भगवान् सर्वलोकान् ययौ क्षणात् ॥६८॥
नैकरूपप्रधर्तारस्ते ययुः सर्वतोद्रुतम् ।
तत्तत्स्थानानि चासाद्य स्थानिभिश्च कृतार्हणाः ॥६९॥
निवेद्याऽऽमन्त्रणवाचोऽक्षरक्षेत्रमुपाययुः ।
आमन्त्रिताश्च सर्वे ते कुटुम्बपरिवारिताः ॥७०॥
प्रफुल्लहृदयास्तूर्णं शृंगारादिसमन्विताः ।
दिव्योपदाभिः संयुक्ता विमानैर्वाहनादिभिः ॥७१॥
आययुः कुंकुमवापीक्षेत्रं दिव्यसुमण्डपम् ।
प्रातरेव हरिः स्नातः कृतपूजाभिवन्दनः ॥७२॥
कृतवृद्धोपसेवश्च शृंगारितोऽपि सर्वथा ।
ब्रह्मप्रियाभिः सर्वाभिर्नतः प्रहर्षितस्तथा ॥७३॥
मात्राऽऽशीर्भिर्योजितश्च कृतकौतुकमंगलः ।
दिव्यरूपधरो भूत्वा महर्षिगणसेवितः ॥७४॥
ययौ तन्मण्डपे हस्त्यासने वाद्यसुघोषणैः ।
गीतिभिर्योषितां चापि वेदमन्त्रैः समन्वितः ॥७५॥
गत्वा कृष्णो निषसाद जयशब्दास्तदाऽभवन् ।
लोमशस्तं वेदमन्त्रैः पूजयामास चन्दनैः ॥७६॥
महर्षयोऽपि सर्वेऽपि पूजयामासुरच्युतम् ।
आशीर्भिर्वर्धयामासुश्चाऽक्षतैश्चक्रुरर्चनम् ॥७७॥
माता चक्रेऽस्य तिलकं पिताऽस्य मुकुटं ददौ ।
पुष्पहारान् ब्रह्मपत्न्यश्चन्द्रकं श्रीस्तदा व्यधात् ॥७८॥
आरार्त्रिकं व्यधुः सर्वाः सर्वे च मण्डपागताः ।
अथैवं दिव्यरूपं तं वीक्ष्य सौराष्ट्रवासिनः ॥७९॥
तल्लीनाश्चाऽभवँस्तत्र परं समाधिमागताः ।
विप्राणां तत्र जायन्ते वेदघोषाः समन्ततः ॥८०॥
भ्राता ज्येष्ठो भगवाँश्च शुकोऽपि वल्लभोऽप्यनु ।
महादानानि दानानि ददुस्तत्र समस्ततः ॥८१॥
अथाऽऽययुस्तदा मुक्ता मुक्तान्योऽक्षरलोकतः ।
प्रपूज्याऽऽरार्त्रिकं चक्रुर्बालकृष्णस्य ते ततः ॥८२॥

पार्षदैर्दर्शितरम्यासनेषु विविशुस्तदा ।
अथाऽऽययुश्चावताराः सपत्निकाः सपार्षदाः ॥८३॥
राधिके च त्वया सार्धमहं तत्राऽगमं तदा ।
नारायणोऽपि लक्ष्म्या युक् तत्राययौ मुदान्वितः ॥८४॥
अन्ये नारायणाः सर्वे स्वस्वशक्तिसमन्विताः ।
आययुश्च पुपूजुश्च विविशुर्दर्शितासने ॥८५॥
व्यूहास्तथेश्वराद्याश्चेश्वर्यस्तत्र समाययुः ।
पुपूजुश्चोपदाभिश्च विविशुर्दर्शितासने ॥८६॥
ब्रह्माद्याश्चाययुश्चापि त्रिलोकेशा ह्यसंख्यकाः ।
पुपूजुश्चोपदाभिश्च विविशुर्दर्शितासने ॥८७॥
मुनयो योषितां तेषामाययुः पितरस्तथा ।
देवा देव्यो लोकपाला दिक्पालाः सकुटुम्बकाः ॥८८॥
आदित्या वसवो रुद्राः सशक्तयः समाययुः ।
पुपूजुश्चोपदाभिश्च विविशुर्दर्शितासने ॥८९॥
मानवाः साधवश्चापि सत्यः साध्व्यः समाययुः ।
पातालस्था वनस्थाश्च पर्वतस्थाः समाययुः ॥९०॥
सिद्धचारणगन्धर्वा विद्याध्रोरगराक्षसाः ।
किन्नराः किंपुरुषाश्चाययुः पुपूजुरच्युतम् ॥९१॥
तीर्थानि सागरा नद्यः सरांसि चैत्यजातयः ।
द्रुमा वल्लिका दिव्याश्च गावः पतत्रिणस्तथा ॥९२॥
वाहनानि सुदिव्यानि दासा दास्यस्तथाऽऽययुः ।
पुपूजुश्चोपदाभिश्च वर्धयामासुराशिषा ॥९३॥
निषेदुश्चासनादौ च मण्डपे दिव्यतान्विते ।
लोकलोकनिवासानां देवादीनां हि मूर्तयः ॥९४॥
मण्डपे सर्वतश्चापि हस्त्यासने प्रवीक्ष्य ते ।
निजरूपाणि संवीक्ष्याऽऽश्चर्यं प्रपेदिरे ह्यति ॥९५॥
नेयं कृतिर्हि देवानां देवत्वष्टुर्न वा यतः ।
अक्षरादिस्वरूपाणां शिल्पने तस्य नो गतिः ॥९६॥
तस्मादस्य विधाता वै भवेत्त्वष्टाऽक्षरस्थितः ।
ब्रह्मधामनिवासेन निर्मितोऽयं प्रतर्क्यते ॥९७॥
इत्यासन् सन्देहभाजः सर्वे मण्डपमण्डिताः ।
लुलोकिरे हि तत्त्वेषु बालकृष्णं तदन्तरे ॥९८॥
मुग्धाः सर्वे तथा जाता वीक्ष्य कृष्णं हि गर्भगम् ।
आमध्याह्नं पूजनं चाशीर्भिः संवर्धनं तथा ॥९९॥
व्यवर्तत हरेस्तत्र नृत्यं चाप्सरसां तथा ।
गायनं त्वभवद् दिव्यं संहितावाचनं तथा ॥१००॥
आख्यानान्यभवँश्चापि यशोगानं हरेस्तथा ।
वेत्रधारेण च हेमन्तेन वसन्तकेन च ॥१०१॥
निनादनं महाकीर्तिविजयाढ्यं समीरितम् ।
सत्याऽम्बिकया च तत्र दुःखहाञ्जलिरास्थितः ॥१०२॥
मात्रा सुचन्द्रको भालेऽक्षतयुक्तेऽस्य वै कृतः ।
आशीर्वादास्तथा दत्ता ताम्बूलकं तथाऽर्पितम् ॥१०३॥
सभायां शर्कराद्यं खारिकाद्यं च वितारितम् ।
पानताम्बूलकाद्यं च योग्यं सम्पादितं तथा ॥१०४॥
अथागतानां सर्वेषां स्वागतं स्वस्तिना च वै ।
नाथेशेन कृतं भावभरं मिष्टवचोयुतम् ॥१०५॥
अमृतानां सुधानां च मिष्टान्नानां प्रभोजनम् ।
पानानां मिष्टगन्धानां ताम्बूलानां प्रदानकम् ॥१०६॥
मालानां पुष्पहाराणां गुच्छानां च प्रदानकम् ।
मण्डपार्थाऽऽगतानां सम्मानं वै बहुशः कृतम् ॥१०७॥
त्रैलोक्यं तत्र सम्प्राप्तं तूत्सवेऽभूत् समस्ततः ।
राधिकेऽथ परिहारोऽभवत् प्रातर्विधेस्ततः ॥१०८॥
महीमाना ययुर्यत्राऽऽवासास्तेषां समर्पिताः ।
विश्रान्तिं लेभिरे दिव्यसौधेषु दिवसार्धजाम् ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरेः पञ्चदशजन्मजयन्त्यष्टम्यां दिव्यमण्डपशोभा, आमन्त्रितानामागमः, श्रीकृष्णबालकृष्णस्वामिपूजनम्, महीमानसत्कारश्चेत्यादिनिरूपणनामा चतुस्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३४ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके तत्र समायाता जनादयः ।
सर्वे हरेः प्रसादं वै लब्धवन्तो मुदं ययुः ॥ १ ॥
मध्याह्ने बालकृष्णस्य विप्रा आशीर्विधिं जगुः ।
नार्यो जगुश्च गीतानि ततो नीराजनं ह्यभूत् ॥ २ ॥
बालकृष्णो निजं रूपं दर्शयामास वै तदा ।
अक्षरात्परधामस्थं दिव्यं दिव्योत्तमोत्तमम् ॥ ३ ॥
मण्डपे स्वासने चापि ये येऽन्तर्निहिताः सुराः ।
लोकाश्च लोकपालाश्चेश्वरावतारशक्तयः ॥ ४ ॥
ते ताः सामस्त्यभावेन बालकृष्णे समास्थिते ।
अदृश्यन्ताक्षरमुक्ताः सर्वसृष्टिनिवासिनः ॥ ५ ॥
ब्रह्माण्डं दृश्यते तत्र चतुर्दशस्तरात्मकम् ।
भूतलं दृश्यते चापि सौराष्ट्रं दृश्यते तथा ॥ ६ ॥
दृश्यते कुंकुमवापि सभा च दृश्यते तथा ।
दृश्यते मण्डपश्चेति दृश्यते कृष्णवल्लभः ॥ ७ ॥

इत्येवं श्रीहरौ सर्वे पारिषदाक्षिगोचरम् ।
समभूत् ते ततो ह्रस्तु बालकृष्णं व्यलोकयन् ॥ ८ ॥
दिव्यं दिव्यगुणागारं काम्भरेयं महाप्रभुम् ।
गोपालबालकं ब्रह्मप्रियादीनां पतिं प्रभुम् ॥ ९ ॥
अथ दिव्यं दर्शयित्वा निजं रूपं हरिस्ततः ।
बालरूपो बभूवाऽथ सभाविसर्जनं ह्यभूत् ॥१०॥
सर्वेभ्यो भोजनं प्रादाच्छ्रीमद्गोपालकृष्णकः ।
मिष्टान्नानि विविधानि पेयानि विविधानि च ॥११॥
ततो विदायं प्रददौ दानमानपुरःसरम् ।
ययुर्वै परलोकस्था देशान्तरेषु सर्वथा ॥१२॥
समाजस्तत्र सौराष्ट्रदेशीयानां स्थिरोऽभवत् ।
रात्रौ श्रीबालकृष्णाग्रे मल्लयुद्धमभूत्तथा ॥१३॥
नाटकानि विचित्राणि श्रीकृष्णाऽग्रेभवँस्तदा ।
गायनानि विचित्राणि संगीतकानि चाऽभवन् ॥१४॥
भोजनानि च पेयानि मुहुस्तत्राऽभवन्निशि ।
एवं रात्रौ नर्तनानि ह्यभवन् वारयोषिताम् ॥१५॥
पारितोषिकदानानि ह्यभवन् कर्मचारिणाम् ।
समाप्य सर्वे रात्र्यर्धे निद्रां श्रान्तिं ययुर्जनाः ॥१६॥
प्रातरुत्थाय वाद्याद्यैः कृतकौतुकमंगलाः ।
हरिं नत्वा विदायं च गृहीत्वा प्रययुर्गृहम् ॥१७॥
विश्वकर्मा निदेशं च प्राप्य मण्डपमुत्तमम् ।
तिरोऽभावयदेवापि प्रातरेव क्षणान्तरे ॥१८॥
तस्मै श्रीबालकृष्णश्च पारितोषिकमुत्तमम् ।
प्रददौ स्वर्णमुकुटं कण्ठहारमनुत्तमम् ॥१९॥
बुद्धिं च प्रददौ दिव्यां गतिं सर्वत्र सन्ददौ ।
सृष्टिक्रियाऽक्षिमत्त्वं च प्रददौ कृपया प्रभुः ॥२०॥
अश्वपट्टसरो द्रागदृश्यत मण्डपे ह्युत ।
सस्नुः प्रातर्जनाः सर्वे सन्ध्यावन्दनधर्मिणः ॥२१॥
इत्येवं राधिके जन्मजयन्ती पाञ्चदाशिकी ।
व्यतीता श्रीहरेर्वर्षे पञ्चदशे समायुजत् ॥२२॥
श्रीहरेर्दर्शनार्थं वै प्रायान्ति बहवो जनाः ।
मनुष्याणां सुसम्मर्दो जायतेऽहर्निशं ततः ॥२३॥
दीनाश्चाण्डालपर्यन्ताः समायान्ति प्रयान्ति च ।
राजाधिराजकरुणां लब्ध्वा प्रसादरूपिणीम् ॥२४॥
प्राप्यानन्दं भोजनादि भवन्ति सुखिनश्च ते ।
राधे ! तत्र जयन्त्यां वै चाण्डालः कश्चिदागतः ॥२५॥
आसीन्नाम्ना तामसाक्षिः पत्नीपुत्रसमन्वितः ।
हरेर्भक्तो यतो नैव चौर्यं करोति सर्वथा ॥२६॥
न व्याहरत्यसत्यं च कपटं न करोति च ।
चलालये वसन्नित्यं ग्राममार्जनकर्मभिः ॥२७॥
लब्धान्नैर्देहमात्रां च निर्वर्तयति वै सदा ।
किन्तु चान्नं न वै पूर्णं जायते मार्जनार्जितम् ॥२८॥
ग्रामेऽस्त्यन्यो न चाण्डालः कार्यं कर्तुं तु सम्मतः ।
नाऽयं हिंसां करोत्येव न त्वन्यायं करोत्यपि ॥२९॥
भिक्षुकवत्तथाऽन्नस्याऽर्जनार्थं न भ्रमत्यपि ।
मत्वा लोकास्तु चाण्डालं कुपात्रं न ददत्यपि ॥३०॥
ततः क्लेशं वरं प्राप्य क्षुधापीडातिकर्षितः ।
कुटुम्बेन सहितोऽयं पञ्चपुत्रसमन्वितः ॥३१॥
बालैरप्यनुजैश्च द्विकन्यासहितस्तथा ।
पत्नीयुतश्च नवमो जयन्त्यां स्वयमागतः ॥३२॥
अश्वपट्टसरस्तीरे वटच्छायामुपाश्रितः ।
दर्शनं बालकृष्णस्य करोति स्म नवं नवम् ॥३३॥
मालावर्तनमेवापि करोति सकुटुम्बकः ।
भिक्षान्नं तूत्सवे तेन लब्धं पूर्णे दिने निशि ॥३४॥
नवम्यां तेन सल्लब्धं दशम्यां लब्धमेव च ।
एकादश्यां तदान्नं न लब्धं वै व्रतकारणात् ॥३५॥
क्षुधितः सकुटुम्बो वै दिवानिशं व्रतेऽभवत् ।
रात्रौ तामसभावेन पत्न्यपत्यसमन्वितः ॥३६॥
क्षुधाद्यैर्भग्नहृदयो मर्तुकामोऽतिवेगवान् ।
निपपात सरस्येव पत्नी धर्तुं पपात तम् ॥३७॥
पुत्रीपुत्राश्च पतिता रुदन्तः पितराविति ।
जलागाधत्वयोगेन तलं प्राप्ताश्च ते तदा ॥३८॥
मध्यरात्र्युत्तरे काले नैतत् जानाति कश्चन ।
जलं ते सलिलं पीत्वा मृतप्रायास्तदाऽभवन् ॥३९॥
बालकृष्णं हृदये स्वे स्मरन्त्येते मृता इव ।
भगवान् बालकृष्णोऽपि प्रबुबोध द्रुतं तदा ॥४०॥
त्यक्त्वा शय्यां राधिके स्वां तमोरात्रौ सरो ययौ ।
वासुदेवस्वरूपः श्रीबालकृष्णो जलान्तरे ॥४१॥
चतुर्भुजो विवेशाथ धृत्वा भक्तं श्वपाकिनम् ।
तत्पत्नीं च बहिस्तीरे त्वानयामास सत्प्रभुः ॥४२॥
पुनर्जले हरिर्गत्वा पुत्रीद्वयं सुतं तथा ।
जलान्निष्कासयामास तटे न्यस्य पुनर्जले ॥४३॥
सम्प्रविश्य हरिस्तूर्णं पुत्रांश्चतुर इत्यपि ।
आनयामास च बहिस्तटे ररक्ष वै क्षणम् ॥४४॥
बालान् सुते च पत्नीं च पतिं च भगवाँस्ततः ।
वासुदेवश्चानिरुद्धः प्रद्युम्नः समकर्षणः ॥४५॥

चतूरुपधरो भूत्वा धृत्वा तान् पादयोः पृथक् ।
उत्तोल्याऽधोमुखान् कृत्वा घटिकामात्रमेव तान् ॥४६॥
तथैव धारयामास पीतजलस्य निर्गमम् ।
मुखतः सर्वथा कारयित्वा तान् लब्धचेतनान् ॥४७॥
वराधस्तात् संप्रस्वाप्य शैत्यनाशाय काण्डिकाः ।
वटपत्रादिसहिताः शलाकाश्च समन्ततः ॥४८॥
संप्रचित्वा द्रुतं तत्राऽनलं प्रादीपयत्प्रभुः ।
तत्र काष्ठानि विन्यस्य तपनं प्रचकार ह ॥४९॥
तापयामास तान् सर्वान् शनकैः श्रीहरिः स्वयम् ।
आनयामास तत्प्राणान् मूर्ध्नो हृदयगह्वरम् ॥५०॥
प्राप्तजाग्रत्प्रभावास्ते वीक्ष्य रूपचतुष्टयम् ।
वासुदेवादिकं तूर्णं नेमिरे पादयोः प्रभोः ॥५१॥
तुष्टुवुस्ते हरिं तत्रैकादशीरात्रितूर्यके ।
दीनाऽनाथदरिद्राणां नाथ धारक रक्षक ॥५२॥
नताः स्म ते पादयोर्वै चाण्डाला वयमादरात् ।
त्वं धाता त्वं चान्नदाता त्वं भर्ता त्वं हि पोषकः ॥५३॥
प्राणदाता त्वमेवाऽसि जीवयिता जलाद्धि नः ।
सदाऽन्नदुःखदुःखिनो वयं जीवनदुःखिनः ॥५४॥
दुःखैर्विरक्तभावेन प्राणान्तार्थे जलेऽर्पणम् ।
कृतवन्तो हि देहानां ते स्मृतिं प्राप्य वारिषु ॥५५॥
तत्र त्वं प्राणनाथो नः समागत्योद्धृतिं व्यधाः ।
देहरक्षा कृता यद्वत्प्राणरक्षा तथा कृता ॥५६॥
जीवनस्य प्रदानेन रक्षां वृत्त्या कुरु प्रभो ।
यद्वा ते ब्रह्मलोकं नो नय भक्तानुदासनान् ॥५७॥
त्वया रक्षा कृता गर्भे कृमियोगेऽपि जन्मनि ।
जन्ममार्गे कृता रक्षा बाल्यभावेऽपि रक्षिताः ॥५८॥
इदानीं यावदेवापि त्वयाऽन्नाद्यैर्हि रक्षिताः ।
वृक्षा वल्ल्यः पशवश्च कीटाः पतत्रिणस्तथा ॥५९॥
रक्ष्यन्तेऽपि त्वया नाथ रक्ष रक्षय नस्त्विह ।
अधमोद्धारकर्ता त्वं दुःखहर्ता च दुःखिनाम् ॥६०॥
अनाश्रितानां चाश्रयप्रदाता त्वं पिता मतः ।
बालानां चावलम्बस्त्वं जीवनं त्वं प्रजीविनाम् ॥६१॥
शरण्यश्चापद्गतानां तारकस्त्वं निमज्जताम् ।
आतुराणां चार्तिहास्त्वं ममार्त्तिं हर मापते ॥६२॥
अन्नवस्त्रैर्विहीनानामन्नवस्त्रप्रदो भव ।
दुर्भाग्यानां सुभाग्यस्य विधाता भव मापते ॥६३॥
अन्नदुःखेन भगवन्निमग्नोऽहं सरोवरे ।
कुटुम्बसहितो रात्रौ त्वया दयालुनोद्धृतः ॥६४॥
तस्मात् पूर्णां दयां कृत्वाऽन्नाम्बरकष्टमच्युत ।
विनाशय ते भक्तस्य शरणे पतितस्य मे ॥६५॥
इत्युक्त्वा च क्षितौ न्यस्य मस्तकं साञ्जलिं मुदा ।
प्रणनाम मुहुः श्रीमद्बालकृष्णं विलोकयन् ॥६६॥
भगवान् वासुदेवादिस्वरूपाणि व्यदर्शयत् ।
बालकृष्णस्वरूपश्च भूत्वाऽऽह तामसाक्षिकम् ॥६७॥
कुटुम्बसहितश्चात्र नगर्यां मे सदा वस ।
मार्जनादि विधेह्यत्र रथ्यासु राजमार्गके ॥६८॥
वृत्तिस्ते त्वन्नवस्त्रादिस्वरूपा निर्वहिष्यति ।
प्रातर्दास्ये निवासार्थं गृहं रम्यं तवोचितम् ॥६९॥
मा खिन्नो भव भक्त त्वं मैवं पुनः कृथाः क्वचित् ।
आत्मघातसमं पापं मोक्षहानिकरं महत् ॥७०॥
नेतरद् विद्यते तस्मान्मा कृथाश्चात्मघातनम् ।
आत्मजीवनदानेन तुल्यं पुण्यं महत्तरम् ॥७१॥
मोक्षसाधनदं नान्यत्तस्माद् रक्षेद्धि जीवनम् ।
गृहाणेदं भोजनं च मिष्टान्नं पूर्तमित्यपि ॥७२॥
इत्युक्त्वा वासुदेव्या चाहृतं मिष्टान्नकं ददौ ।
वस्त्राण्यपि ददौ तस्मै कुटुम्बाय दयापरः ॥७३॥
प्रातश्चायाहि मे गोपुराग्रे दास्ये गृहं तव ।
अहं गच्छामि सौधं मे भज मां निद्रितो भव ॥७४॥
इत्युक्त्वाऽन्तर्दधे श्रीमद्बालकृष्णो हि राधिके ।
चाण्डालश्च प्रसन्नोऽभूत् चक्रे तु भजनं हरेः ॥७५॥
तालिकावादनैः सर्वे प्रचक्रुः कृष्णकीर्तनम् ।
प्रातः स्नात्वा हरेर्द्वारं ययुः सर्वेऽति भावुकाः ॥७६॥
बालकृष्णो हि भक्तस्य रक्षार्थं स्वयमेव ह ।
गजासनात् समुत्थाय गोपुरं प्रययौ ततः ॥७७॥
गृहं संकल्पयामास चाम्रवणेऽतिसुन्दरम् ।
सुन्दरं नूतनं वृक्षवल्लीतृणविराजितम् ॥७८॥
विशालं मार्जनीचुल्लीकण्डन्यादिसमन्वितम् ।
उदकुंभीपेषणीभ्यां सहितं शयनादियुक् ॥७९॥
कुसूलधान्यपूर्णं च सर्वान्नसूपसंभृतम् ।
शाकपत्रादिवाट्याढ्यं कूपजलविराजितम् ॥८०॥
दोग्ध्रीगोसहितं रम्यं चतुःकक्षादिवर्तुलम् ।
एवं सुभवनं कृष्णो निजचित्रसमन्वितम् ॥८१॥
सर्वशोभायुतं तस्मै प्रददौ श्वप्रपाकिने ।
भक्तोऽयं गृहमासाद्य प्रसन्नोऽभून्मुमोद च ॥८२॥
मन्त्रं श्रीबालकृष्णाद्वै जग्राह वैष्णवं तदा ।
'नमः श्रीबालकृष्णस्य दासोऽस्म्युद्धर मां प्रभो' ॥८३॥

इति मन्त्रं ददौ तस्मै भगवान् कंभरासुतः ।
ग्रामे कुंकुमवाप्यां च पत्तने मार्जनादिकम् ॥८४॥
कर्तुं न्ययोजयत्तं वै स्वभक्तं तामसाक्षतम् ।
सोऽपि लब्ध्वा शुभं लाभं भक्तिं चक्रे त्वहर्निशम् ॥८५॥
कुटुम्बं श्रीहरिं नित्यं मूर्तौ प्रसेवतेऽस्य च ।
कन्यैका दुग्धिका देवी तस्थौ सा ब्रह्मचारिणी ॥८६॥
कृष्णभक्त्या समाधिस्था दिव्यदेहा बभूव ह ।
दुग्धिका देवता चाण्डालानां सा कुलदेविका ॥८७॥
सर्वदा त्वभवल्लोके बालकृष्णनिषेविणी ।
मन्त्रिका चाऽपरा कन्या बहुमन्त्रविधायिनी ॥८८॥
हरेर्भजनयोगेन साऽऽत्मबलवती ह्यभूत् ।
सत्यवक्त्री मनुं यं स क्लृप्त्वाऽन्यां शिक्षयत्यपि ॥८९॥
स एव मन्त्रो बलवान् जायते फलवाँस्तथा ।
एवं सा मन्त्रिका जाता मन्त्रोद्भावनकारिणी ॥९०॥
चाण्डालजातिमन्त्राणाम् आर्षी सा ह्यभवत्ततः ।
पुत्राः पञ्चापि सद्भक्ताः साधवो भजनान्विताः ॥९१॥
अजायन्ताऽऽश्रमे नैजे मण्डलीवाहिनोऽभवन् ।
चाण्डालानां गुरवस्तेऽभवन् सन्तो हि भक्तितः ॥९२॥
बहुकाले गते तेषां पितरौ भक्तिभाविनौ ।
सेविनौ दिव्यहृदयौ भूत्वा देहौ विहाय च ॥९३॥
ययतुः श्रीहरेर्धामाऽक्षरं मुक्तौ बभूवतुः ।
राधे कालान्तरे पुत्राः पुत्र्यौ साध्व्यौ च भक्तितः ॥९४॥
त्यक्त्वा देहान् ययुर्धाम बालकृष्णस्य शाश्वतम् ।
एवं श्रीभगवान् राधे भक्तरक्षां चकार ह ॥९५॥
पोषणं प्रचकारापि जीविकां प्रददौ तथा ।
मोक्षं त्वन्ते ददौ चापि श्वपचेभ्यो महाप्रभुः ॥९६॥
येऽनाथाश्च दरिद्रा वा दीना भाग्यविहीनकाः ।
अपि गत्वा हरेर्भूमौ कुंकुमवापिकाऽक्षरे ॥९७॥
भजनं ये करिष्यन्त्यर्पयिष्यन्ति निजं निजम् ।
देहं प्राणान् हृदयानि धनानि च कुटुम्बकम् ॥९८॥
तेषां रक्षां बालकृष्णः करिष्यत्येव सर्वथा ।
भुक्तिं समर्प्य लोकेऽत्र मुक्तिं दास्यति वै ततः ॥९९॥
पठनाच्छ्रवणाच्चाऽस्य कीर्तनात्पाठनादपि ।
भुक्तिर्मुक्तिर्भवेदेव राधिके नात्र संशयः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मण्डपस्य परिहारो महीमानविदायं तामसाक्षिनामकचाण्डालभक्तस्य सकुटुम्बस्य जलमग्नस्य रक्षणं पोषणं मोक्षणं चेत्यादिनिरूपणनामा पञ्चत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३५ ॥

श्रीकृष्ण उवाच—

राधिके बालकृष्णस्तु धनत्रयोदशीदिने ।
धनलक्ष्म्याः पूजनं सम्प्रचकार विधानतः ॥ १ ॥
लक्ष्मीं निजां प्रियां श्रीं च सौवर्णीं प्रतिमात्मिकाम् ।
कारयामास दानार्थे तां सुमूर्तिं विधानतः ॥ २ ॥
प्रापूजयत् षोडशाद्योपचारैश्चन्दनादिभिः ।
भोजयामास बहुधा पक्वान्नैर्नैवधान्यजैः ॥ ३ ॥
प्रत्यक्षां च ततो लक्ष्मीं पत्नीं निजां श्रियं तथा ।
स्वर्णसिंहासने निषाद्याऽऽर्चयच्चन्दनादिभिः ॥ ४ ॥
केशवेषादिकं चक्रे स्वयं कृष्णो हि योषितोः ।
कबरीं कृत्वा धम्मिलं ग्रन्थयामास वै स्वयम् ॥ ५ ॥
पुष्पहारान् विभूषाश्च ग्रन्थयामास तत्र च ।
शृंगारद्रव्यसद्रत्नैर्हीरकैः कज्जलादिभिः ॥ ६ ॥
कुंकुमैर्गन्धसाराद्यैः केसरैः करकादिभिः ।
पुष्पस्रग्भिश्च बिन्द्वाद्यैस्तयोः शृंगारमाचरत् ॥ ७ ॥
तयोश्चारात्रिकं चक्रे प्रत्यक्षयोर्हि कन्ययोः ।
ते ह्युभे सुप्रसन्ने च तदाशीर्वचनानि वै ॥ ८ ॥
प्राहतुः श्रीपते लक्ष्मीपते विवाहमावह ।
श्रीपतिश्च तथा लक्ष्मीपतिर्लग्नेन संभव ॥ ९ ॥
राधापतिः रमापतिः पद्मावतीपतिर्भव ।
माणिकीपतिरेवापि ब्रह्मप्रियापतिर्भव ॥१०॥
दुःखहालक्ष्मीपतिस्त्वं विवाहविधिना भव ।
असंख्यानीतपत्नीनां पतिर्लग्नेन संभव ॥११॥
समयोऽयं विवाहस्य तव कृष्ण उपागतः ।
योग्यो युवा भवस्यद्य यौवनांकुरवान् प्रभो ॥१२॥
शुभे समये श्रीकृष्णो लक्ष्मीकृष्णो द्रुतं भव ।
कन्यकाश्च वयं सर्वाः प्रतीक्षामो विवाहनम् ॥१३॥
लक्ष्मीवान् धनवान् श्रेष्ठः स्मृद्धिमान् वंशवान् भव ।
अद्यापि ब्रह्मचारी त्वं महायोगी प्रशस्यसे ॥१४॥
योगैश्वर्येण चास्माकं कामपूरो भवस्यपि ।
अविप्लुतः सदा चास्से किमसाध्यं हि योगिनः ॥१५॥
तथापि विधिना कृष्णोत्सवं वैवाहिकं वह ।
इत्युक्तो भगवान् कृष्णस्तथास्त्वेवं जगाद ह ॥१६॥
मार्गशीर्षे करिष्येहं लग्नं मे सर्वयोषिताम् ।
तावद्धैर्ये भवत्यौ चावहतां त्वपरास्तथा ॥१७॥
इत्युक्त्वा दक्षिणां दत्वा व्यसर्जयत् प्रपूजनम् ।
दक्षिणा विविधाश्चापि ददौ श्रीलोमशर्षये ॥१८॥

स्वर्णमूर्तिद्वयं चापि ददौ श्रीलोमशर्षये ।
विप्रेभ्यो दक्षिणाः स्वर्णपात्राण्यपि धनं ददौ ॥१९॥
एवं महोत्सवं कृत्वा सरोवरमगाद्धरिः ।
वासुदेवीयकं तीर्थं यत्र चाण्डाल उद्धृतः ॥२०॥
तत्र स्नात्वा व्यूहतीर्थे वटवृक्षं ययौ हरिः ।
तत्र ब्रह्मप्रियाः सर्वा विहर्तुं समुपागताः ॥२१॥
ताभ्यो दत्वा धनान्येव कुबेरोपहृतानि वै ।
प्रपूज्य सर्वपत्नीः स कन्यका दक्षिणादिभिः ॥२२॥
प्रसाद्य सर्वसामग्रीश्रेष्टां दत्वा तटान्तिकम् ।
विहर्तुं बर्बुरं वृक्षं दन्तधावनकैतवात् ॥२३॥
स्प्रष्टुं चापि ययौ बालकृष्णो हि राधिके ततः ।
ब्रह्मप्रियाद्याः सर्वास्ताः प्रपश्यन्ति तु माधवम् ॥२४॥
यान्तं बर्बुरवृक्षाग्रं गत्वा स्पृशन्तमेव तम् ।
दन्तधावनयोग्यां च प्रान्तप्रशाखिकां तदा ॥२५॥
गृहीत्वाऽऽकर्षयन्तं च प्रपश्यन्ति स्म योषितः ।
तावद् बर्बुरवृक्षः सः समूलश्चोत्पपात ह ॥२६॥
ननाम भूतले चापि तस्माद् दिव्यो महानरः ।
प्राविर्बभूव सहसा माहेन्द्रसदृशोऽपरः ॥२७॥
दृष्ट्वा हरिं नमश्चक्रे पृथ्व्यां पपात पादयोः ।
चकार दण्डवत्तूर्णं तुष्टाव परमेश्वरम् ॥२८॥
परमेश कृपासिन्धो स्मृत्वाऽहं तारितस्त्वया ।
त्वं जीवानां समुद्धर्ता मोक्षकर्ता परेश्वरः ॥२९॥
वर्तसेऽनुग्रहकर्ता समुद्धर्तुं जनानिह ।
चर्मचक्षुर्न जानाति भवन्तं पुरुषोत्तमम् ॥३०॥
मया प्राप्तः परेशस्त्वं वृक्षयोनिप्रमोक्षकः ।
अद्याऽहं वै प्रगच्छामि दिव्यं स्वर्गं तवाऽऽज्ञया ॥३१॥
इत्युक्त्वा प्रणनामापि पुष्पाणि बर्बुरस्य तु ।
अर्पयित्वा माधवस्य पादयोर्गन्तुमिच्छति ॥३२॥
तावत्तत्र समायाता आश्चर्यं परमं गताः ।
ब्रह्मप्रियाः समस्तास्ताः पप्रच्छुः कान्तमेव ताः ॥३३॥
कोऽयं वृक्षात् समुत्पन्नः कथं वृक्षो निपातितः ।
कौतूहलं परं नोऽत्र वदैतत्कारणं प्रभो ॥३४॥
श्रुत्वैतद् बालकृष्णोऽपि वर्णयितुं तु तं नरम् ।
वृत्तान्तं च निजं सर्वमाज्ञापयद्धि तत्पुरः ॥३५॥
राजा प्रणम्य सर्वास्ता आह वृत्तान्तमद्भुतम् ।
पुराहमासं सम्राड् वै गोर्जरे साभ्रिकातटे ॥३६॥
बर्बुरो नाम राजा वै धर्मकर्मपरायणः ।
प्रजापालनदक्षश्च देवसाधुप्रपूजकः ॥३७॥
व्रतदानपरो नित्यं नित्यवृद्धोपसेवनः ।
कृष्णकथापरश्चापि वैष्णवो दुष्टशासकः ॥३८॥
एकदा त्वगमं दीर्घेऽरण्ये साभ्रमतीतटे ।
वनानि वीक्षितुं परिमेयभृत्योऽतिगो वने ॥३९॥
दूरारण्ये प्रयातेन पद्भ्यां चाश्वो विलोकितः ।
सप्तरूपाश्रयो दिव्यः कान्तिमद्रोमवर्मकः ॥४०॥
मुखे शुक्लः शफे चौष्ठे रक्तश्च पुच्छपृष्ठयोः ।
भ्रमरेऽप्युदरे भागे श्यामो नीलस्तु वै गले ॥४१॥
पीतः कर्णे पार्श्वभागे जंघायां कपिशस्तथा ।
नाडीमार्गेषु हरितश्चित्रः सर्वांगसन्धिषु ॥४२॥
एवंविधं विचित्राश्वं दृढं पुष्टं बलान्वितम् ।
शोभनं संविलोक्यैव धर्तुं चाऽकरवं मनः ॥४३॥
शनैः पार्श्वं तथा गत्वा यथा विश्वसितो भवेत् ।
धृतवाँस्तं कर्णदेशे रश्मिना च गले ततः ॥४४॥
गृहीत्वैव च तत्पृष्ठासनं च कृतवानहम् ।
सोऽपि मया यथा संप्रेरितस्तथा जगाम ह ॥४५॥
न जाने त्वस्य सारल्यं कुतश्चार्जवमागतम् ।
यथा सञ्चालयाम्येनं तथाऽग्रे स तु गच्छति ॥४६॥
एवं दैवतुरंगं तं ज्ञात्वा निन्ये पुरीं मम ।
निजं भाग्यं मन्यमानो हर्षितश्चाऽभवं मुहुः ॥४७॥
दैवं तं तुरगं नाहं क्षणं दूरं करोमि वै ।
ततः स कोपमापन्नो मां शशाप रुषा वदन् ॥४८॥
यस्मान्मां मुञ्चसि नैव नैव जानासि मां तथा ।
नैव तृप्तिं प्रयास्येव दृष्ट्वा मां बन्धनान्वितम् ॥४९॥
नैव विज्ञाय तत्त्वं मे मिष्टं ददासि भावतः ।
पशुं ज्ञात्वा बन्धनेऽत्र निजं कृत्वा रुणत्सि माम् ॥५०॥
ततो राजन् मम शापाद् भव बर्बुरपादपः ।
कण्टकी सुवने तत्र दुःखं याहि दिवानिशम् ॥५१॥
इत्युक्तोऽहं तदा शीघ्रं ज्ञात्वा पूज्योत्तमं मुनिम् ।
पतितः पादयोस्तस्याऽश्वस्य शीघ्रं विमुक्तये ॥५२॥
प्रार्थितः स मया देवो मुनिर्वाऽन्योऽपि यो भवान् ।
अज्ञातो मम पूज्योऽसि क्षमां कुर्वत्र बालिशे ॥५३॥
शापदुःखं यथा शीघ्रं निवर्तेत तथा कुरु ।
निजरूपं च मे देव प्रदर्शय नमामि ते ॥५४॥
अपराद्धं मया चाविजानता नान्यथा प्रभो ।
तस्मात् क्षमां परां कृत्वा निजरूपं प्रदर्शय ॥५५॥
इत्यर्थितो मुहुः सोऽश्वस्तिरो भूत्वा महानृषिः ।
आश्वलायननामाऽभूद् राजवंशगुरुः स्वयम् ॥५६॥

अहं रुरोद बहुधा ज्ञात्वा कुलगुरुं तु तम् ।
क्षमां दिनतरो भूत्वाऽयाचं शापनिवृत्तये ॥५७॥
पुत्रोऽपराद्धान् सन्धत्ते पिता क्षमतेऽहर्निशम् ।
शिष्याद्धि गुरवश्चापि समिच्छन्ति पराभवम् ॥५८॥
मया ह्यजानता चाऽश्वलोभेन नृपभावतः ।
अपराद्धं तव पूज्य क्षमां कुरु विधेहि शम् ॥५९॥
इत्यर्थितो हि भगवान्नाश्वलायनको मुनिः ।
क्षमां कृत्वाऽऽह मां तत्र किं ते वदामि भूपते ! ॥६०॥
महतामवमानाद्वै महदासनलंघनात् ।
पूज्यपूजाविलोपाच्च पुण्यं नश्यति सर्वथा ॥६१॥
तव पुण्यं समग्रं वै नष्टं मत्पृष्ठरोहणात् ।
राजभाक्त्वं न चाऽत्राऽस्ति शापदग्धो भवस्यपि ॥६२॥
शापभोगोत्तरं स्वर्गं तव शीघ्रं भविष्यति ।
परस्त्रीसंगमाद् राजन् गुरूणामवमाननात् ॥६३॥
परपीडाकरणाच्चाऽऽयुष्यनाशो हि जायते ।
असत्पक्षग्रहाच्चापि देवसाधुविनिन्दनात् ॥६४॥
सतां द्रोहकरणाच्चायुष्यनाशो हि जायते ।
पित्रोः कष्टप्रदानाच्च पत्नीनां पीडनादपि ॥६५॥
हिंसायाः करणाच्चाप्यायुष्यनाशो हि जायते ।
मद्यमांसव्यवायादिदोषाद् धर्मप्रपीडनात् ॥६६॥
भूताऽऽवेशादिदोषाच्चाप्यायुर्नाशः प्रजायते ।
त्वयाऽपराद्धं चात्यर्थं मया नोक्तं तु लज्जया ॥६७॥
यदहं गुरुरस्याऽस्मि ह्यश्वरूपो वनेऽस्मि च ।
राजाऽयं दृष्टवान् मां स न जानीयाद् गुरुं यथा ॥६८॥
तथा रूपं मया न व्यावर्तितं तव सन्निधौ ।
दूरं क्षणान्तरे राजा गमिष्यति ततः परम् ॥६९॥
मम रूपं धरिष्येऽहं विचार्येत्थं तुरंगमः ।
अभवं चाऽवर्तयं च तावत्त भवताऽन्तिकम् ॥७०॥
समागत्य धृतश्चास्मि वाहितश्च गृहं प्रति ।
तथाप्यचिन्तयं नाऽस्मै दर्शयितव्यमन्ततः ॥७१॥
मद्रूपं यन्मन्दुरायां गृहे मोक्ष्यति मां यदा ।
निर्जनेऽत्राऽन्धकारे वा रूपं धृत्वा निजं गृहात् ॥७२॥
प्रयास्ये वै वनं तेन शोको नाऽस्य भविष्यति ।
गुरोरत्यपराधस्येत्येवमचिन्तयं नृप ॥७३॥
त्वया तु लोभभावेन नाहं त्यक्तो हि निर्जने ।
चौरवद् बन्धने क्षिप्तः कारागारे स्थिरो यथा ॥७४॥
ततोऽहं क्रोधमापन्नः शापं वै सृष्टवाँस्त्वयि ।
पुण्यं तेन विनष्टं ते कृपा मे कियती वद ॥७५॥
ततो राजत्वमत्रैव दग्धं ते दोषकारणात् ।
बर्बुरस्य द्रुमस्यैव शरीरं ते भविष्यति ॥७६॥
करोम्यनुग्रहं तेऽत्र शीघ्रं शापविनाशने ।
कुंकुमवापिकाक्षेत्रेऽक्षरभूमौ सरोऽन्तिके ॥७७॥
बर्बुरो भव राजेन्द्र जलपानसुखादिमान् ।
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ॥७८॥
राजते भगवाँस्तत्र तद्योगं त्वं प्रयास्यसि ।
दन्तधावनलाभार्थं तव शाखां ग्रहीष्यति ॥७९॥
स्वहस्तेन यदा साक्षात् तस्य स्पर्शेन वै भवान् ।
दिव्यभावं दिव्यदेहं समासाद्य हि दैवतम् ॥८०॥
शीघ्रं यास्यसि नाकं तद् यत्रेन्द्रो वर्तते सदा ।
तत्र कल्पं स्वर्गसुखं भुक्त्वाऽक्षरं प्रयास्यसि ॥८१॥
त्यज चिन्तां वासनां च राज्ये पुत्रे प्रियास्वपि ।
गताः पूर्वे हि राजानो गमिष्यन्त्यपरेऽपि च ॥८२॥
हरेर्योगाद् गता ये ते गता भवन्ति नेतरे ।
इत्येवं मां जगादाऽथ मुनिर्वनान्तरं ययौ ॥८३॥
स्वस्ति तेऽस्त्विति मां चोक्त्वा यान्तं दृष्ट्वा मृतोऽप्यहम् ।
अश्वपट्टसरस्तीरेऽभवं बर्बुरपादपः ॥८४॥
दशवर्षाणि जातानि मेऽत्र बर्बुरवर्ष्मणि ।
त्वया समुद्धृतः कृष्ण शापपापं विनाशितम् ॥८५॥
पुण्यवानस्मि सञ्जातस्तव स्पर्शेन मुक्तिद ।
किंकरोऽस्मि शरण्यस्त्वं देहि मंत्रं च वैष्णवम् ॥८६॥
येन त्वन्ते भवेन्मोक्षो मे तथा त्वं विधत्स्व वै ।
राजाऽहं राजरूपं त्वं नैजं मे त्वं प्रदर्शय ॥८७॥
यत्स्वरूपं सदा ध्यात्वा स्वर्गान्मोक्षमवाप्नुयाम् ।
इत्यर्थितस्तदा राधे हरिः राजस्वरूपधृक् ॥८८॥
पृथुराजस्वरूपोऽभूद् भक्तेच्छापूरणाय वै ।
ददौ मंत्रं च तस्मै स वैष्णवं षोडशार्णकम् ॥८९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
गृहीत्वा तु मनुं त्वेनं विमानवरमास्थितः ॥९०॥
पुष्पाद्यैर्वर्धयित्वैव श्रीकृष्णं पुरुषोत्तमम् ।
ब्रह्मप्रियास्तथा सर्वा ययौ स्वर्गं सुरार्चितः ॥९१॥
बालकृष्णं तदा ब्रह्मप्रियाः पृथुस्वरूपिणम् ।
व्यलोकयन् पतिं नैजं त्रैलोक्यनृपतिं प्रभुम् ॥९२॥
धनुश्चक्रधरं विष्णुं दृढं युवानमच्युतम् ।
मोहमाप्ताश्च ताः पत्न्यो रेमिरे पृथुना तदा ॥९३॥
आम्रवणे चिरं पश्चात् पूजयित्वा कृपानिधिम् ।
प्रययुः सरसस्तीरे सस्नुश्च पतिना सह ॥९४॥

तीर्थं तद् बर्बुराख्यं च पृथुतीर्थं ततोऽभवत् ।
तत्र वासाद् भवेत् स्वर्गं शापनाशश्च मोक्षणम् ॥९५॥
अनादिश्रीबालकृष्णः स्नात्वा धृत्वाऽम्बराणि च ।
ब्रह्मप्रियाः सुखयित्वा प्रेषयित्वाऽऽश्रमं ततः ॥९६॥
स्वगेहं चाययौ रात्रौ लक्ष्मीपूजां पुनस्ततः ।
चकार भगवान् रात्रौ घृतदीपान् चकार ह ॥९७॥
आरार्त्रिकं च नैवेद्यं प्रार्थयद्वै श्रियै तदा ।
प्रसन्ना साऽभवल्लक्ष्मीः स्मृद्धाऽभवद् गृहे गृहे ॥९८॥
इत्येवं राधिके कृत्वोत्सवं निद्रां जगाम सः ।
पठनाच्छ्रवणादस्य लक्ष्मीवान् मोक्षगो भवेत् ॥९९॥
शापितानां शापमोक्षश्चापराधविनाशनम् ।
अपुण्यानां पुण्यलब्धिर्भवेन्नात्राऽस्ति संशयः ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने हरिणा धनत्रयोदश्यां धनलक्ष्मीपूजा ब्रह्मप्रियापूजा बर्बुरनृपस्य आश्वलायनर्षिशप्तस्य बर्बुरवृक्षीभूतस्य मोक्षणं पृथुतीर्थस्थापनं बर्बुरस्य स्वर्गं प्रति प्रेषणं चेत्यादिनिरूपणनामा षट्त्रिंशदधिकद्विशततमोऽध्यायः ॥ २३६ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽथ चतुर्दश्यां काल्यां श्रीपरमेश्वरः ।
पूजां चकार वै शंभोर्निजक्षेत्रप्ररक्षितुः ॥ १ ॥
प्रातः स्नात्वा पितरौ च पूजयित्वा ततः परम् ।
ईशानदेवं चाहूय रुद्रानाहूय वै तथा ॥ २ ॥
शंकरं क्षेत्रपं देवं समाहूय सतीयुतम् ।
स्वर्णसिंहासने शंभुं समस्थापयदीश्वरम् ॥ ३ ॥
पुपूज बालकृष्णस्तं योगिनं पद्मजापतिम् ।
पाद्यमर्घ्यं ददावस्मै चन्दनं भस्म चाक्षतान् ॥ ४ ॥
धत्तूरपुष्पमालां च गले हरस्य सन्ददौ ।
भाले चन्द्रतिलकं च त्रिपुण्ड्रं चोर्ध्वपुण्ड्रकम् ॥ ५ ॥
व्यधाच्छ्रीभगवाँस्तस्य हासयँस्तं महेश्वरम् ।
कर्णयोः कुण्डले चापि कर्णिकाकुसुमानि च ॥ ६ ॥
रुद्राक्षमालिकां चापि ददौ तस्मै हराय च ।
व्याघ्रचर्म गजचर्म ददौ श्रीभगवान् स्वयम् ॥ ७ ॥
भंगां ददौ च मिष्टान्नं मिष्टपानं ददौ हरिः ।
पुष्पहारान् ददौ चापि श्रृंगारं प्रददौ तथा ॥ ८ ॥
सुगन्धसारं प्रददौ स्वर्णाम्बराणि सन्ददौ ।
स्वर्णहारान् ददौ चापि सत्यै भूषां ददौ तथा ॥ ९ ॥
अम्बराणि नवीनानि विभूषणानि सन्ददौ ।
यथेष्टानि समग्राणि श्रांगारिकाणि सन्ददौ ॥१०॥
आरार्त्रिकं चकाराऽथ मौक्तिकहीरकान् ददौ ।
एवं प्रपूज्य भगवान् भूतनाथं सतीयुतम् ॥११॥
उत्सवं दिवसे चक्रे रात्रावथ हरिस्ततः ।
भोजयित्वा पूजयित्वा शंभुं सतीं गणाधिपम् ॥१२॥
कार्तिकेयं नन्दिनं च योगिनीचक्रमित्यपि ।
नवदुर्गाः प्रपूज्यापि गंगां प्रपूज्य शांकरीम् ॥१३॥
वीरभद्रं तथा जालन्धरं च तारकासुरम् ।
तारकाक्षं गजं महिषकं चण्डप्रचण्डकौ ॥१४॥
श्रृंगिनं भृंगिनं चापि रीटिनं च किरीटिनम् ।
अग्निं चन्द्रमसं चापि मंगलं च विषं तथा ॥१५॥
खर्परं तस्य देवाँश्च तथा खर्परमालिकाम् ।
सिंहं रुद्राक्षकाँश्चापि वासुकीं शांकरीं प्रजाम् ॥१६॥
हनुमन्तं तथा निषादिनं गणानपूजयत् ।
भैरवं कालसंज्ञं च महाकालमपूजयत् ॥१७॥
भूतप्रेतपिशाचाँश्च कूष्माण्डानप्यपूजयत् ।
वैनायकाँश्च वेतालान् गणान् रोगानपूजयत् ॥१८॥
मृत्युं च मृत्युपाशाँश्च चण्ड्यादिनीरपूजयत् ।
मातृकाश्च ग्रहाँश्चापि तथा प्रेतानपूजयत् ॥१९॥
रोगिकाश्च महामारीप्रभृतिका अपूजयत् ।
कृत्याश्च कालिकाब्रह्मचारिणीश्चाप्यपूजयत् ॥२०॥
कैलासवासिनः सर्वान् शीतलाद्या अपूजयत् ।
गणाँश्च गणपत्नीश्च राक्षसीः समपूजयत् ॥२१॥
माषपिष्टादिपक्वान्नैरतर्पयत्तु ताँस्तदा ।
यक्षाँश्च राक्षसान् भूतपत्नीश्च डाकिनीस्तथा ॥२२॥
शाकिनीयोगिनीश्चापि वेतालिका ह्यपूजयत् ।
कालरात्रिं तथा रात्रिप्रजाः सर्वा ह्यपूजयत् ॥२३॥
एवं संपूजनं कृत्वा बलिं दत्वा ततो हरिः ।
होमं चकार विधिना घृताद्यैस्तृप्तये प्रभुः ॥२४॥
सर्षपाद्यैश्च माषाद्यैः कृष्णतिलफलादिभिः ।
कृष्णपुष्पादिभिश्चापि तर्पयामास देवताः ॥२५॥
एवं कृत्वा पूजनं च बलिदानं हवं तथा ।
सर्वत्र दीपदानं च ददौ श्रीभगवान् प्रभुः ॥२६॥
इत्येवं कार्तिकशुक्लचतुर्दश्यां निशीथके ।
कालीचतुर्दशीं चापि पूजयित्वा हरिः स्वयम् ॥२७॥
महालक्ष्मीं पूजयित्वा परिहारं चकार सः ।
ततः रात्रौ सुसुष्वाप प्रातर्दीपोत्सवे दिने ॥२८॥

प्रबुबोध सुवाद्यानां शब्दैश्च कीर्तनैस्ततः ।
कृताह्निकः कृतपूजः पितृपूजां व्यधात् प्रभुः ॥२९॥
ब्रह्मप्रियाश्च लक्ष्म्याद्याश्चाययुः श्रीहरेः पुरः ।
पूजनार्थं निजं कान्तं कृतकौतुकमंगलाः ॥३०॥
राधिके पूजयामासुः सर्वाः सर्वोपचारकैः ।
आशीर्वादान् गृहीत्वा च भोजयित्वा निजं पतिम् ॥३१॥
तत्प्रदत्तं प्रसादं च गृहीत्वा ययुराश्रमम् ।
सायं दीपोत्सवं चक्रे सर्वाभिः सह केशवः ॥३२॥
अश्वपट्टसरः सर्वं दीपैः पूरितमप्स्विति ।
स्वर्गवच्छोभते चापि नगरी हि तथाविधा ॥३३॥
रात्रौ श्रीभगवाँश्चक्रे शारदापूजनं तथा ।
साक्षाच्छ्रीं शारदां लक्ष्मीं सरस्वतीं सतीं तथा ॥३४॥
पञ्च कृष्णः समाहूय पुपूज परमेश्वरीः ।
नागवल्लीदलैः पूगीफलैर्मिष्टान्नभोजनैः ॥३५॥
सुगन्धसारैर्भूषाभिश्चाम्बरैः सद्द्रव्यादिभिः ।
तोषयामास भगवान् यथेष्टवस्तुदानकैः ॥३६॥
आरार्त्रिकं चकारापि रञ्जयामास नर्मभिः ।
स्वर्णादिदक्षिणा दत्वा भोजयामास पायसम् ॥३७॥
परिहारं ततश्चक्रे ततः सुष्वाप शान्तिमान् ।
कन्यकाश्चाश्रमं गत्वा निद्रां जगृहुरुत्सुकाः ॥३८॥
प्रातःकाले हरिस्तूर्णं प्रबुबोध सरो ययौ ।
सरोजले कृतस्नानः सस्मार स्वं पुरातनम् ॥३९॥
सनातनं स्वरूपं चाऽखिलरक्षाकरं तटे ।
निजयोगान्महातीर्थं यत्रास्ते वै सरोवरे ॥४०॥
राधिके श्रीहरिस्तत्र दध्यौ चात्मानमात्मनि ।
तावत्तत्र समायातं सैन्यं सम्पर्कभूपतेः ॥४१॥
महामारीदुःखखिन्नं हाहाकारकृतं तटे ।
कृशं क्षुधातृषाव्याप्तं श्रान्तं मरणसायुजम् ॥४२॥

**श्रीराधिकोवाच—**

संपर्को वै कथं सैन्यसहितस्तत्र चाययौ ।
कस्य देशस्य राजाऽभूत् कथं रोगोऽस्य सैन्यके ॥४३॥
बालकृष्णेन कृष्णेन कृतं किमस्य वै तदा ।
ब्रूहि कान्त कथां सर्वां संक्षेपेण हरेः शुभाम् ॥४४॥

**श्रीकृष्ण उवाच—**

शृणु राधे स राजाऽऽसीत् सम्पर्कः कच्छदेशजः ।
तीर्थयात्रानिमित्तं सः सोमनाथं गतो ह्यभूत् ॥४५॥
मदंशं पूर्वकल्पीयं दत्तात्रेयं गुरुं हि सः ।
भजते स्म सदा कच्छे कुर्वन् राज्यमकण्टकम् ॥४६॥
प्रातः स्नानपरश्चायं देवपूजनतत्परः ।
दानधर्मपरश्चान्नसत्रेष्वतिथिपूजकः ॥४७॥
नित्यं ध्यानपरश्चापि दीनानाथान्नदायकः ।
साधुसेवापरो वृद्धनिदेशाद्यनुवर्ततः ॥४८॥
गोविप्रभक्तसेवी च सतीसाध्वीप्रपूजकः ।
अहिंसकः सत्यवृत्तिश्चासीत् प्रजाऽभिपूजिताः ॥४९॥
साधून् दृष्ट्वा च वा श्रुत्वोत्थायाऽभियाति दासवत् ।
सेवते चाम्बरदानैर्भोज्यदानादिभिस्तथा ॥५०॥
यद्राज्ये च सतां सन्ति मण्डलानि समन्ततः ।
देवभक्तिपराण्येव कृष्णकथापराणि च ॥५१॥
यज्ञो भवति यद्राज्ये नारायणसरस्तटे ।
प्रतिसंवत्सरं श्रेष्ठो वैष्णवश्चातिदक्षिणः ॥५२॥
सोऽयं राजा राधिके वै सैन्यसामग्रिकाऽन्वितः ।
हस्त्यश्वोष्ट्रवृषभैनौयानवाहनशोभनः ॥५३॥
यात्रार्थं सोमनाथस्य सौराष्ट्रे त्वाश्विने ययौ ।
सहस्रजनसंघातो विप्रसाधुसमन्वितः ॥५४॥
कृत्वा तीर्थे हिरण्यायाः संगमे पितृतर्पणम् ।
स्नानदानादिकं चापि सोमेश्वरं प्रपूज्य च ॥५५॥
मूलद्वारिकिकातीर्थं कृत्वा प्रपूज्य गोपतिम् ।
प्राचीसरस्वतीं गत्वा नारायणबलिं व्यधात् ॥५६॥
ततो वामनभूमिं च स्वर्णरेखानदीं ततः ।
दृष्ट्वा कृत्वा चक्रतीर्थमिन्द्रेश्वरं जगाम सः ॥५७॥
ततः सीताफलारण्ये कृत्वा तीर्थं च तूरिकाम् ।
यायादाम्रवणं चाश्वपट्टसरोऽवगाहितुम् ॥५८॥
मार्गे श्रमविशेषेण भोजनाऽनियमेन च ।
तापप्रभावतश्चापि सैन्यं रुग्णमभूत्तदा ॥५९॥
महामारीमहारोगप्रपीडितं सरोऽन्तिकम् ।
आययौ तीर्थलाभार्थं रोगाधीनं च दुःखितम् ॥६०॥
राजा विलोक्य भृत्यादीन् पशून् वै रक्तसारिणः ।
स्वं च रुग्णं विलोक्याऽपि प्रसस्मार गुरुं निजम् ॥६१॥
दत्तात्रेयं भगवन्तं बालकृष्णक्षितौ नृपः ।
पाहि तीर्थप्रदेशेऽत्र पीडितान् मम मानवान् ॥६२॥
आगत्य सद्गुरो शीघ्रं जीवदानं प्रदेहि नः ।
रोगोऽयं नाशकृच्छक्तिहारको भृत्यवर्गिणाम् ॥६३॥
पशूनां घातकश्चापि रक्तसर्गोऽतिदारुणः ।
रक्ष रक्ष कृपासिन्धो दत्तात्रेय जगद्गुरो ॥६४॥

बालकृष्णः प्रभुश्चापि रक्षताच्छरणागतम् ।
इत्येवं त्वर्थयित्वैव सरसः सन्निधौ नृपः ॥६५॥
कदम्बानां द्रुमेष्वेवाऽऽवासं चकार सैन्ययुक् ।
सरस्तीरं समागत्य पीत्वा जलं तटे प्रगे ॥६६॥
ससार्थो नृपतिश्चक्रे कीर्तनं भजनं हरेः ।
तालीतालसमेतं वै नामानुगुणवर्णनम् ॥६७॥
"बालकृष्ण हरेकृष्ण नारायणाऽऽर्तिहन् हरे ।
दत्तात्रेय गुरो रक्ष परमेश्वर पाहि नः" ॥६८॥
इत्येवं भजनं चक्रे राजा सहस्रमानवैः ।
सहितो गर्जना चेयं दिगन्तं प्रगताऽभवत् ॥६९॥
अनादिश्रीकृष्णनारायणः श्रुत्वा स्थिरोऽभवत् ।
नगरं त्वभियातोऽपि वीक्षितुं भजनादिकम् ॥७०॥
सम्मर्दोऽभूत् सरस्येव परितस्तीरवासिनाम् ।
कुंकुमवापीवासानां दर्शकानां सरस्तटे ॥७१॥
राधिके भजने लीना पार्श्वे पश्यन्ति नैव ते ।
न चाग्रे नापि वै पृष्ठे नेत्राण्युन्मीलयन्ति न ॥७२॥
एकतानं हि भजनं चक्रुः रोगप्रशान्तये ।
बबन्धुश्च हरिं वृत्त्या रज्ज्वा स्वहृदयेषु ते ॥७३॥
दृष्ट्वा श्रुत्वा हरिस्तत्र बालकृष्णः स्वयं प्रभुः ।
दत्तात्रेयस्वरूपेण तूर्णं चोपस्थितोऽभवत् ॥७४॥
कुक्षौ पावटिकां हस्ते कमण्डलुं जटां तथा ।
कौपीनं जपमालां च दधानः पादुके शुभे ॥७५॥
कृष्ण कृष्ण जपन् राज्ञः सन्निधौ समुपागतः ।
राजा दृष्ट्वा च तं तूर्णं चकार दण्डवद् भूमौ ॥७६॥
सैन्यजनाश्चापि चक्रुर्दण्डवद् वै समन्ततः ।
प्रसन्नवदनो देवो दत्तात्रेयो जगाद तान् ॥७७॥
कथं स्मृतो भवद्भिश्च कारणं ब्रूत सत्वरम् ।
राजा प्राह महामारीकष्टं तस्मात् प्ररक्षय ॥७८॥
दत्तात्रेयो हि भगवान् कुक्षिकोष्ठलिकां तदा ।
व्यादाय तत्र यद्भस्म ददौ तद् भूभृतेऽल्पकम् ॥७९॥
मुखे क्षिपेत्युवाचैषश्चिक्षेप च मुखे नृपः ।
महामारी बहिर्याता समूर्ता विकृताननना ॥८०॥
भीता प्रणम्य तं देवं दुद्राव शंकरं प्रति ।
सैन्यं चापि तदा जातं निरुग् वै क्षणमात्रतः ॥८१॥
तावत्तत्र समायातो दत्तात्रेयोऽत्रिनन्दनः ।
काम्भरेयो द्रुतं जातस्तदा श्रीबालकृष्णकः ॥८२॥
राजा वीक्ष्य हरिं तत्र तथारूपं रमेश्वरम् ।
रक्षकं महदाश्चर्यं ह्यवाप सैन्ययुक् ततः ॥८३॥
पुपूज श्रीबालकृष्णं दत्तात्रेयो महाप्रभुम् ।
प्रसन्नः श्रीहरिस्तस्मै वरदानार्थमाह च ॥८४॥
दत्तात्रेयस्ततः प्राह रक्ष मामत्र सन्निधौ ।
तवांऽशोऽहं तव क्षेत्रे वस्तुमिच्छामि सर्वदा ॥८५॥
हरिः प्राह तथाऽस्त्वेव वसाऽस्य सरसो जले ।
दत्तात्रेयमहातीर्थं तव नाम्ना भविष्यति ॥८६॥
ततस्त्वं रेवतगिरेः शिखरे वासमाप्स्यसि ।
रैवताद्रिर्महेन्द्राख्यः पर्वतश्चागमिष्यति ॥८७॥
सौराष्ट्रे च कुमुदादिः परितोऽस्य निवत्स्यति ।
तदा ते शिखरे वासो दत्तात्रेय भविष्यति ॥८८॥
सदा तीर्थं महत् तत्स्याद् दत्तात्रेयस्य सानु तत् ।
अत्र तीर्थं जलरूपं सदा स्थास्यति मत्स्थले ॥८९॥
तत्र तीर्थं तु ते व्योम्नि सदा स्थास्यति रैवते ।
इत्युक्तो भगवान् दत्तात्रेयश्चोवास तज्जले ॥९०॥
दत्तात्रेयमहत्तीर्थं जातं सरोवरे हि तत् ।
सम्पर्कतीर्थमेवापि जातं रक्षाकरं हि तत् ॥९१॥
स राजा कारयामास तडागस्य तटान्तिके ।
दक्षिणे मन्दिरं रम्यं दत्तात्रेयविराजितम् ॥९२॥
निरुग ययौ निजं देशं बालकृष्णं प्रपूज्य वै ।
राधिके श्रीबालकृष्णश्चैवं रक्षति दुःखिनः ॥९३॥
अवतारस्य भक्तानां रक्षणं तत्स्वरूपवान् ।
भूत्वा करोति भगवानवतारी परात्परः ॥९४॥
सर्वेऽवतारास्तस्यैव सर्वं तस्मात् प्रवर्तते ।
सर्वनाथः सर्वरक्षां करोति स्मृत एव सः ॥९५॥
अरण्ये पर्वते नद्यां समुद्रे च वनेऽपि च ।
विषमे भयदे स्थाने स्मृतो रक्षति मापतिः ॥९६॥
शत्रुमध्ये कालमुखे वह्नौ वायुप्रकोपने ।
भूकम्पे च महायुद्धे स्मृतो रक्षति सर्वगः ॥९७॥
त्रिदोषे मर्दने कूपे रोगे दुर्भिक्षवत्सरे ।
निगडे परपाशे च स्मृतो रक्षति सर्वदृक् ॥९८॥
विषिमुखे हिंस्रमुखे शस्त्रपाते च वज्रके ।
व्योमपाते प्रपाते च स्मृतो रक्षति चात्मगः ॥९९॥
राजभये ग्रहभये विद्रावणभयेऽपि च ।
प्राणभये सर्वभये स्मृतो रक्षति शक्तिमान् ॥१००॥

राधिके ये निजा जातास्तेषां कृष्णो निजो भवेत् ।
तद्रक्षार्थं महाचिन्तां करोत्येव दिवानिशम् ॥१०१॥
पठनाच्छ्रवणाच्चास्य फलं तीर्थकृतं भवेत् ।
रक्षणं दुःखनाशश्च भवेदेव न संशयः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कालीचतुर्दश्यां शंकरतद्गणभृत्यदासदासीनां पूजनोत्तरं श्रीहरिणा दीपदानोत्तरं च दीपावल्यां शारदामहोत्सवपूजा कृता, प्रतिपदि महामारीरोगपीडिततीर्थयात्रिकसंपर्कनृपादीनां दत्तात्रेयरूपेण दर्शनदानेन रोगनाशनं दत्तात्रेयतीर्थं चेत्यादिनिरूपणनामा सप्तत्रिंशदधिकद्विशततमोऽध्यायः ॥ २३७ ॥

**श्रीकृष्ण उवाच—**

राधिके नूतने वर्षे प्रभुर्ब्रह्मप्रियापतिः ।
चकार कुंकुमवापीक्षेत्रेऽन्नकूटकोत्सवम् ॥ १ ॥
भोजयामास सर्वान् स , कुंकुमवापिकाजनान् ।
नरान्नारीर्बालवर्गान् यूनो वृद्धान् समस्ततः ॥ २ ॥
पशून् चागन्तुकाँश्चापि पक्षिणश्च जलेशयान् ।
भूशयान् चेतनान् सर्वान् भोजयामास वै हरिः ॥ ३ ॥
प्रतिपद्दिवसे श्रीमद्बालकृष्णो निजालये ।
लक्ष्मीं तथाऽन्नपूर्णां च प्राह भोजनकाम्यया ॥ ४ ॥
अद्य मे वर्तते वाञ्छा सर्वेषां भोजनार्थिकीम् ।
मध्याह्नोत्तरवेलायां यदि स्यात् कुरुतं तथा ॥ ५ ॥
आज्ञां प्राप्याऽन्नपूर्णा च प्राह श्रीपरमेश्वरम् ।
भगवन् पक्वभावार्थं घटिकापञ्चकं खलु ॥ ६ ॥
अपेक्ष्यतेऽत्र समयो वर्तते च तथाविधः ।
करिष्यामोऽन्नसामस्त्यं श्रुतं नास्त्यत्र संशयः ॥ ७ ॥
इत्युक्त्वा सा चान्नपूर्णा सस्मार स्वसखीं सुवम् ।
श्रियं सस्मार तूर्णं च वार्क्षीं सस्मार तत्र च ॥ ८ ॥
सुधां सस्मार धान्यानां लक्ष्मीं सस्मार वै द्रुतम् ।
चुल्लिकाश्च सखीः सर्वाः सस्मार समिधस्तथा ॥ ९ ॥
शाकपत्राणि सस्मार वेशवारान् समस्तकान् ।
नदीः सस्मार गंगाद्या धेनूः सस्मार कामदाः ॥१०॥
पाकलक्ष्मीः प्रसस्मार वह्नीन् सस्मार तत्र च ।
पात्राण्यक्षयनामानि तथा सस्मार सद्रसान् ॥११॥
ब्रह्मप्रियाः समस्ताश्च सस्मार चान्नपूर्णिका ।
आन्धसिकीः प्रसस्मार सस्मार परिवेषिकाः ॥१२॥
आरनालादिकर्त्रीश्च तक्रपेयविधायिनीः ।
प्रसस्मार तदा सर्वा सखीस्ताश्च समाययुः ॥१३॥
भुवं चाज्ञापयामास कुरु शीघ्रं महानसम् ।
क्रोशार्धं वर्तुलं शीघ्रं क्षणात् साऽपि तथाऽकरोत् ॥१४॥
नदीः प्राह जलार्थं च ता जलानि समानयन् ।
चुल्लिकाः प्राह योग्ये च स्थले स्थातुं स्थिताश्च ताः ॥१५॥
वह्नीन् प्राह निवासार्थं चुल्लीषु वह्नयः स्थिताः ।
कटाहान् प्राह चुल्लीनां मस्तके स्थातुमास्थिताः ॥१६॥
दर्व्याद्यास्तूर्णमेवाऽऽसन् स्वस्वकार्यनियोजिताः ।
सस्यानि चापि धान्यानि रसादीनाह पात्रके ॥१७॥
चुल्लीपात्रेषु च स्थातुं घृताद्याश्च तथाऽभवन् ।
आसमन्तात्ततो लक्ष्म्यश्चान्धसिक्यः स्थिताः पुरः ॥१८॥
ब्रह्मप्रियाः समस्ताश्चोपकारिण्यस्तदाऽभवन् ।
लक्ष्मीनां वै समस्तानामिच्छया च घृतादिकम् ॥१९॥
कटाहेषु च पात्रेषु त्वायान्ति च तपन्ति च ।
यथापेक्षं कणाद्याश्च पिष्टादिकानि तत्र च ॥२०॥
पक्वतार्थं समागत्य प्रविशन्ति समन्ततः ।
शर्कराद्यास्तथा पक्वा वेशवारादयोऽपि च ॥२१॥
अन्नपूर्णेच्छया तूर्णं समागत्य विशन्ति च ।
अष्ट वै सिद्धयस्तत्र सेवन्ते सर्वतः स्थिताः ॥२२॥
घटीद्वयान्ते सिद्धानि पक्वान्नानि बहून्यपि ।
आमन्त्रणानि शंभोश्च पार्षदाः क्षेत्रपा ददुः ॥२३॥
आक्षरक्षेत्रवासिभ्यो भोजनार्थं समस्ततः ।
पक्वान्नानामभवँश्च पर्वता वै महानसे ॥२४॥
अशार्करादिपाकाश्च ततोऽजायन्त भूरिशः ।
भक्ष्यान्यपि ततो जातान्यसंख्यरूपकानि च ॥२५॥
भोज्यान्यपि द्रुतं जातान्यसंख्यरूपकानि च ।
लेह्यान्यपि कृतान्येव बहुसंख्यानि तत्र च ॥२६॥
चोष्यान्यपि समस्तानि कृतानि सुबहून्यपि ।
पेयान्यपि समस्तानि रचितानि तदा द्रुतम् ॥२७॥
आरनालादीनि चापि चटन्यो विविधास्तथा ।
क्षारचणकमाषाद्यास्तत्र श्वतास्तथाविधाः ॥२८॥
शाकान्यपि विविधानि भाजा भाज्यस्तथाविधाः ।
मुरब्बारससाराश्च रायतानि बहून्यपि ॥२९॥
दधिघृतनवनीतपायसक्षीरतक्रकम् ।
सर्वं यथापेक्षकं तु पक्वापक्वं विधापितम् ॥३०॥
सर्वाभिर्ब्रह्मयोषिद्भिर्लक्ष्मीभिः कन्यकादिभिः ।
सतीभिः सिद्धिभिश्चापि सर्वं कृत्वोपरक्षितम् ॥३१॥

घटिकापञ्चमध्ये तु सर्वं सम्पादितं हितम् ।
प्रार्थयामासुरीश्वर्यः श्रीपतिं पुरुषोत्तमम् ॥३२॥
वर्तते सर्वमेवाऽत्र सिद्धं विभिन्नजातिकम् ।
वैश्वदेवं विधेहि त्वं घण्टानादं प्रकारय ॥३३॥
भोजनार्थं जनानां वै पंक्तयः सन्तु सर्वतः ।
मध्याह्ने भगवान् कृष्णनारायणो हि राधिके ॥३४॥
स्नात्वा कृत्वा वैश्वदेवं तर्पित्वाऽग्निं च पितृकान् ।
तर्पित्वा देवताः सर्वा घण्टानादमकारयत् ॥३५॥

आगच्छन्तु महाभागा भोजनार्थं हि पंक्तिषु ।
यथाज्ञं सर्वपात्राणि तदाऽभवन् हि पंक्तिषु ॥३६॥
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चान्येऽपि मानवाः ।
आययुस्तत्र शीघ्रं वै भोजनार्थं समन्ततः ॥३७॥
ब्राह्मणेभ्यो ब्रह्मवर्गाः परिवेषणमाचरन् ।
भोजयामासुरत्यर्थं नरनारीः समस्ततः ॥३८॥
दक्षिणाः प्रददौ तेभ्यो बालकृष्णो हि मुद्रिकाः ।
लड्डुकान् शष्कुलीश्चापि शतच्छिद्राणि खाजकान् ॥३९॥
मेशुभान् मोहनस्थालान् पर्पिकाखण्डकाँस्तथा ।
पिण्डकान् गुडकान् श्रेष्ठान् ग्रन्थिकान् मोदकाँस्तथा ॥४०॥

कलिकालड्डुकाँश्चापि मुद्गलड्डूँश्च मण्डकान् ।
सोहिलकाँश्च संयावं कंसारं घृतपूरकान् ॥४१॥
सेविकाः पोलिका मिष्टाः पूरिकाः पायसं तथा ।
चिरञ्जं सुखदां फेणीं गुन्द्रपाकमपूपकान् ॥४२॥
पूपाँश्च घुर्घुरांश्चापि वटकान् तिलपिष्टकान् ।
शाटकान् स्थिरकाँश्चापि रम्भाचूतफलानि च ॥४३॥
शाकानि भिण्डकान् स्वर्णदुग्धां कोशातकीं तथा ।
राजकोशातकीं गवाहाराँश्च मार्गरीं तथा ॥४४॥

कर्कोटिकां शिम्बिकां च कर्कटीं चिर्भटं तथा ।
रक्तालुं राजमाषादीन् शिम्बीबिम्बीफलानि च ॥४५॥
शर्कराकन्दमेवापि खर्बूजं कारवेल्लकम् ।
कूष्माण्डं सूरणं चापि मुनिशिम्बीः पटोलकम् ॥४६॥
कर्कटीमेथिकाश्चापि पारवल्लं च मूलकम् ।
शतपुष्पामम्ललोणीं जीवन्तीं स्यन्दिकां तथा ॥४७॥

वृन्तान्कं भर्जितं चापि राजिकाक्तानि यानि च ।
द्राक्षाखारिकसम्मिश्रान् दधिमिश्रवटीवटान् ॥४८॥
पुष्पवटीश्च भोज्यानि सौरभोदनमित्यपि ।
सूपः क्वथिकास्तक्राणि दधिमन्थानि यानि च ॥४९॥
तलितान् हरिमन्थाँश्च निष्पावान् पर्पटाँस्तथा ।
नवनीतं चारनालं चटनीं धान्यकादिजाम् ॥५०॥

दुग्धं च क्वथितं मिष्टं दधि घृतं सकेसरम् ।
मरीचानि सुतिक्तानि तथैलाकणकानि च ॥५१॥
भूफलीशर्कराबीजान्यपि वल्लान् वटाणकान् ।
कलिका मिष्टपोलीश्च घारिका मिष्टजम्बुकान् ॥५२॥
रोटकान् मूशलीपाकान् वासुदेवीं च मल्लिकाम् ।
श्रीखण्डं तरलां चापि माषलड्डून् कलावकम् ॥५३॥
एकोत्तरशतं तत्र पदार्थान् वाडवादयः ।
भुक्त्वा तृप्तिं परां प्राप्य ययुर्गृहाणि वै ततः ॥५४॥

क्षत्रिया वैश्यवर्गाश्च शूद्रा बुभुजिरे मुदा ।
दीना अनाथवर्गाश्च भिक्षुकाश्च निराश्रिताः ॥५५॥
दासवर्गा दासिकाश्च सर्वा बुभुजिरे तदा ।
कुंकुमवापिकाक्षेत्रस्थिता बुभुजिरेऽखिलाः ॥५६॥
तत्र तत्र पदार्थेषु न्यूनं नैव प्रजायते ।
वर्धते त्वक्षये पात्रे वस्तुनि परिवेषिते ॥५७॥
अक्षयं चाऽव्ययं सर्वं दीयमानं प्रजायते ।
महर्षयस्तथा सन्तः साध्व्यो बुभुजिरे तथा ॥५८॥
आबालवृद्धगोपालाः सर्वे बुभुजिरे तदा ।
क्षेत्रपाला देवताद्याः सर्वे बुभुजिरेऽपि च ॥५९॥

हरेः सर्वं कुटुम्बं च बुभुजे श्रीशवाञ्छया ।
ब्रह्मप्रियाद्याः सर्वाश्च भोजयितुं प्रियं पतिम् ॥६०॥
सोत्साहाश्चाययुर्बालकृष्णस्वामिपुरस्तदा ।
स्वर्णपट्टिकसंस्थानि पात्राणि च हरेः कृते ॥६१॥
पक्वान्नपूर्णकान्येव न्यधुर्हरेः पुरश्च ताः ।
स्वर्णासने हरिः सम्यङ्निषद्योर्णासने प्रभुः ॥६२॥
भोक्तुं चाचम्य च समारेभे व्याहृतिपूर्वकम् ।
आर्चिचन् श्रीहरिं ताश्चन्दनकुंकुमकेसरैः ॥६३॥

भोजयामासुरत्यर्थं प्रेमाल्यश्चातिभावतः ।
लक्ष्मीर्विशालं स्थालं च कानकं निदधौ पुरः ॥६४॥
राधे त्वया समन्ताच्च स्थापिता लघुवाटिकाः ।
माणिक्या कलशं पानपात्रं जलयुतं न्यधात् ॥६५॥
रमा च व्यजनं धृत्वा वायुदानं करोति हि ।
पद्मावती नक्तकं च धृत्वा पार्श्वे स्थिताऽभवत् ॥६६॥
ब्रह्मप्रियास्तथा सर्वाः सर्वदेशोद्भवास्तदा ।
विदधुर्वै पदार्थानां सर्वेषां परिवेषणम् ॥६७॥
अन्नपूर्णादिका देव्यः प्राहुः श्रीपरमेश्वरम् ।
भुंक्ष्व नाथ कृपाकान्त दिदृक्षामोऽत्र भाविताः ॥६८॥
अथ कृष्णः करे कृत्वा कवलं बुभुजे मुदा ।
अहो मिष्टमहो भोज्यं क्वेदं रन्धितं शुभम् ॥६९॥

प्रष्ट्वा तत्कर्त्रीनामानि प्रशशंस तु ता मुहुः ।
अतिस्वादु कृतं चेदं प्रशंस्य बुभुजे पुनः ॥७०॥

ब्रह्मप्रियाद्याः सर्वाश्च भुञ्जानं ददृशुर्हरिम् ।
वीक्षमाणाः प्राणपतिमाश्चर्यं लेभिरे स्त्रियः ॥७१॥

स्वल्पं भुक्त्वा समुत्थातुं समैहत यदा हरिः ।
शारदा तं स्थापयन्ती जगौ भुंक्ष्वेति कीर्तनम् ॥७२॥

सरस्वती सवादित्रा प्रीतये श्रीहरेः पुरः ।
जगौ भोजनपद्यानि भोजयितुं विशेषतः ॥७३॥

भोजनं विधेहि नाथ जीवन योगिन्
प्रसादं प्रदेहि कान्त हृदयेश योगिन् ।
कवलं गृहाण कृष्ण मिष्टमिष्टमेनम् ,
प्रास्वादय प्रकृष्टसौरभान्नकूटम् ॥७४॥

पुमर्थदातृ भगवन् प्रभुंक्ष्व काममेतत्,
समस्तपक्वमेतत् रे जीवन योगिन् ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त हृदयेश योगिन् ॥७५॥

मेशुभमोहनस्थालं रसालपायसान्नं,
सुशष्कुलीं च फेणीं श्रीखण्डमिष्टपोलीम् ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त जीवन योगिन् ॥७६॥

सुपर्पिकां रसाढ्यां च मोदकान् विरञ्जं,
सुगुन्द्रपाकमिष्टं सुशाटकाँश्च घुर्धुरान् ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त जीवन योगिन् ॥७७॥

स्वादुमिष्टचणकान् सुराजमाषवटकान्,
प्रशाकभाजिकादिप्रभोज्यपुष्पवाटीः ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त हृदयेश योगिन् ॥७८॥

पर्पराँश्च चटनीं शुभाऽऽरनालकानि,
सुतक्रदुग्धकानि समस्तभोजनानि ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त हृदयेश योगिन् ॥७९॥

सुगन्धि वारि मिष्टं सूपौदनं यदिष्टं,
प्रफुल्लपूरिकादिप्रपक्वघुर्धुरादीन् ।
भोजनं विधेहि नाथ जीवन योगिन्,
प्रसादं प्रदेहि कान्त हृदयेश योगिन् ॥८०॥

एलालवंगमिश्रं ताम्बूलकं सुधाक्तं,
चाऽऽकण्ठपूर्तमद्य प्रभुंक्ष्व देहि शिष्टम् ।
भोजनं विधेहि नाथ वल्लभ स्वामिन्,
प्रसादं प्रदेहि कान्त कामनेश भोगिन् ॥८१॥

इत्येवं राधिके सर्वा भोजयामास सत्पतिम् ।
भगवान् बुभुजे पूर्णं ततः सर्वा अपि स्त्रियः ॥८२॥

कवलानि करे कृत्वा भोजनाय निजं पतिम् ।
विश्वंभरं प्रसह्यैव यत्नं तत्र प्रचक्रिरे ॥८३॥

योगेश्वरो हरिस्तासां तादृङ्मानससिद्धये ।
सर्वपत्नीसमसंख्यस्वरूपोऽभूदसंख्यकः ॥८४॥

सर्वासां ब्रह्मपत्नीनां करेभ्यः कवलानि तु ।
बुभुजे समकालेन स्नेहेन ताः प्ररञ्जयन् ॥८५॥

जलं ताम्बूलकं चापि प्रत्येककरतो हरिः ।
पपौ प्रजग्रहे तत्र पूर्णकामाश्च तास्ततः ॥८६॥

अथ सर्वसखीभ्यश्च पक्वान्नानि मुहुर्मुहुः ।
भोजयामास भगवान् प्रसादानि करेण वै ॥८७॥

भोजयित्वा च ताम्बूलरसं ताम्बूलकानि च ।
पाययामास ताः सर्वाः कोट्यर्बुदाब्जकन्यकाः ॥८८॥

कृतकृत्याश्च ता जाता ब्रह्मप्रियास्तथाऽपराः ।
परिवेषणकर्त्र्यश्च पाककर्त्र्यस्तथा स्त्रियः ॥८९॥

पाकसाहाय्यकर्त्र्यश्च वस्तुहारिण्य इत्यपि ।
वस्तूद्भावनकर्त्र्यश्च रसदा योषितस्तथा ॥९०॥

अन्नपूर्णादिभिस्तत्र या याश्चाकारितास्तु ताः ।
सर्वाः श्रीमद्बालकृष्णप्रसादं दुर्लभं ह्यपि ॥९१॥

सुलभं प्राप्य च बुभुजिरे तृप्तिं गताश्च ताः ।
एवं भुक्त्वा त्वन्नकूटं प्रचक्रुः परिहारकम् ॥९२॥

जलजन्तुभ्य एवापि ददौ प्रसादमुत्तमम् ।
पक्षिभ्यश्च पशुभ्यश्च कीटादिभ्यः समन्ततः ॥९३॥

प्रददौ भगवाँस्तत्र प्रसादं त्वनिवारितम् ।
वृक्षेभ्यो वनवल्लीभ्यः स्तबकेभ्यः समन्ततः ॥९४॥

द्रवत्प्रासादिकं खाद्यं ददौ मूलेषु वै हरिः ।
प्रसादग्रहणार्थं वै देवा महर्षयस्तथा ॥९५॥

पितरश्चापि मुक्ताश्च दिव्यदेहाः समाययुः ।
यत्र यत्र प्रसादः स दृष्टस्तत्र तथाविधाः ॥९६॥

भूत्वा ते जगृहुः सर्वे प्रसादं त्वप्रकाशिताः ।
एवं चानुग्रहं प्राप्य स्वस्वलोकान् ययुर्हि ते ॥९७॥

ताः सर्वाः सिद्धयो मुक्त्वा लब्ध्वाऽऽज्ञां पारमेश्वरीम् ।
महानसप्रदेशस्य तिरोभावं व्यधुस्तदा ॥९८॥
सर्वे वै लीनतां यातं नगरी तृप्तिमागता ।
जयकारं जगौ कृष्णवल्लभस्य सुहर्षिता ॥९९॥
ततो निजालयं गत्वा विश्रान्तिमापुरेव तु ।
एवं महोत्सवं चक्रे राधिके कृष्णवल्लभः ॥१००॥
पठनाच्छ्रवणादस्य त्वन्नकूटफलं लभेत् ।
भुक्तिं मुक्तिं लभेच्चापि बालकृष्णस्य तर्पणात् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीहरिणाऽन्नकूटोत्सवो विहितः सर्वप्रजाभोजनादि कारितं चेत्यादिनिरूपणनामाऽष्टात्रिंशदधिकद्विशततमोऽध्यायः ॥ २३८ ॥

श्रीकृष्ण उवाच—

राधिकेऽथ शृणु चान्यं चमत्कारं हरेः प्रभोः ।
कार्तिकैकादशीरात्रिप्रान्ते व्यधात्तु यं प्रभुः ॥ १ ॥
पुण्डरीकोऽभवद्राजा गौर्जरो वैष्णवो महान् ।
सर्वधर्मान्वितो राज्यमपालयन्महीतटे ॥ २ ॥
प्रातः पूजां करोत्येव विष्णोर्लक्ष्म्याः सुवस्तुभिः ।
साधून् वृद्धान् पूजयित्वा गृह्णाति भोजनं सदा ॥ ३ ॥
नित्यमतिथयस्तस्य गृहे चायान्ति यान्ति च ।
हरेर्नाम्नां भजनं च कृत्वा त्वन्नानि भुंजते ॥ ४ ॥
हरेर्जयन्तिकाह्नानां करोत्यपि व्रतानि च ।
राज्ञा तेन निजे राज्ये श्रावितः पटहः शुभः ॥ ५ ॥
एकादश्यास्तु यावत्यः कार्या अशनवर्जिताः ।
सर्वाभिर्वै प्रजाभिश्च वृद्धबालातुरान् विना ॥ ६ ॥
प्रजाः सर्वास्तदाज्ञां च पालयन्त्येव सद्व्रताः ।
वैष्णव्यश्च प्रजास्तस्य भजन्ते च व्रते हरिम् ॥ ७ ॥
स राजा तीर्थयात्रार्थे त्वश्वपट्टसरो ययौ ।
कार्तिकैकादशी तेन कृता क्षेत्रेऽक्षराभिधे ॥ ८ ॥
कुंकुमवापिकायां स दशम्यामभिगम्य च ।
भोजयामास साधूँश्च विप्राँश्च बालकृष्णकम् ॥ ९ ॥
पूजयामास भक्त्यैव लोमशं चर्षिमण्डलम् ।
तीर्थेऽवगाहनं चक्रे चक्रे देवादिदर्शनम् ॥१०॥
व्यलोकयत् स नगरीं दिव्यां कुंकुमवापिकाम् ।
प्रदक्षिणां चकारापि सरोवरस्य सर्वतः ॥११॥
तटस्थदेवताः सर्वाः पूजयामास वस्तुभिः ।
रात्रौ त्वारार्त्रिकं चक्रे सरोवरस्य भूपतिः ॥१२॥
विश्रान्तिं प्राप शालायां प्रातरुत्थाय सत्वरम् ।
कृताह्निकः कृतस्नानः कृतविप्रप्रपूजनः ॥१३॥
कृततीर्थविधिः कृष्णदर्शनार्थे ययौ तदा ।
पूजयामास बालेशं कृष्णनारायणं प्रभुम् ॥१४॥
ददौ दानान्यनन्तानि स्वर्णरूप्याम्बराणि च ।
विप्रेभ्यः प्रददौ तैर्थिकेभ्यो राजा धनानि च ॥१५॥
साधुभ्योऽम्बरपात्राणि दीनेभ्योऽपेक्षितानि वै ।
गोदानानि ददौ चापि ह्यन्नदानान्यपि नृपः ॥१६॥
उद्यापनं व्रतस्यापि कारयामास सत्फलम् ।
सुवर्णघटकादानादि स्वर्णमूर्तिप्रदानकम् ॥१७॥
धनधान्याम्बरपात्रदानं चकार भूपतिः ।
लक्ष्मीनारायणसंहिताकथाश्रवणं तथा ॥१८॥
लोमशस्याऽऽश्रमे गत्वा चकार दिवसे नृपः ।
ऋषीणां सेवनं चक्रे साध्वीनां सेवनं तथा ॥१९॥
भक्तानां वन्दनं राजा चक्रे सायं प्रपूजनम् ।
आरार्त्रिकं चकारापि रात्रौ जागरणं व्यधात् ॥२०॥
निर्जलश्च निराहारः सर्वसार्थसमन्वितः ।
रात्रौ च भजनं चक्रे तालीवादनपूर्वकम् ॥२१॥
'हरेकृष्ण बालकृष्ण परमेश परेश्वर ।
कांभरेय परमात्मन् श्रीमद्गोपालनन्दन ॥२२॥
ब्रह्मप्रियापते लक्ष्मीपते राधापते प्रभो ।
अनादिश्रीकृष्णनारायण स्वामिपते विभो' ॥२३॥
एवं चकार भजनं रटणं कीर्तनं तदा ।
दध्यौ स्वहृदये साक्षाद् दृष्टं श्रीकृष्णवल्लभम् ॥२४॥
आप्रातर्भजनं कृत्वा ध्यानमग्नो बभूव ह ।
अनुगाश्च ययुः सर्वे स्नानार्थं च सरोवरे ॥२५॥
राजा ब्राह्मे मुहूर्ते स्वहृदये श्रीनरायणम् ।
ध्यात्वा सोऽहं च सोऽहं च सोऽहं सोऽहं जजाप ह ॥२६॥
सोऽहं हंसश्च हंसश्च हंसहंसं जजाप च ।
भगवान् श्रीबालकृष्णः श्रुत्वा जापं हृदि स्थितः ॥२७॥
प्रसन्नोऽभूद् द्रुतं स्मृत्वा हंसरूपं पुरातनम् ।
बभूव शीघ्रं तत्रैव हंसरूपो हरिः स्वयम् ॥२८॥
शुक्लवर्णः शुक्लकान्तिः शुक्लहंसस्वरूपवान् ।
दिव्यमानुषवक्त्रश्च हंसदेहः श्रिया युतः ॥२९॥
रूपानुरूपावयवः कोटिकन्दर्पसुन्दरः ।
सर्वविद्याशेवधिश्च तथा वेदादिशेवधिः ॥३०॥
शनैः शनैश्च पद्भ्यां स च्चाययौ नृपसन्निधौ ।
राजा स्वहृदये देशं ददर्श सरसस्तटम् ॥३१॥

हंसमायान्तमेवापि लक्ष्मीं ददर्श पार्श्वगाम् ।
आश्चर्यपूर्णहृदयः प्रेमपूरितविग्रहः ॥३२॥
उत्थाय भगवन्तं तं चाभियातुं त्वरान्वितः ।
अभवत्तावदेवाऽसौ जाग्रद्भावं गतोऽभवत् ॥३३॥
नेत्रे चोन्मील्य यावत्स राधे पश्यति सन्निधौ ।
पश्यति स्म महातेजःपुञ्जं दिक्षु समन्ततः ॥३४॥
तेजो योग्ये स्वके नेत्रे ह्यजायेतां क्षणान्तरे ।
ततस्तेजोगर्भके स ददर्श जगतां पतिम् ॥३५॥
श्वेतवर्णं हंसरूपं हसन्तं श्रीसमन्वितम् ।
उत्थाय सहसा राजा पपात दण्डवत् तदा ॥३६॥
कृतार्थोऽस्मीत्यभिधाय मुखे पादरजो न्यधात् ।
लुलुण्ठ भूतलेऽस्यापि पादयोः सन्निधौ मुहुः ॥३७॥
नेत्राश्रूणि मुमोचाऽपि हर्षेण महता नृपः ।
लक्ष्मीः कमण्डलोर्वारि नृपमूर्ध्न्यभिषिषेच ह ॥३८॥
प्रसादं प्राप्य राजा तज्जलं हर्षान्वितः पपौ ।
कृतकृत्योऽभवत्प्राप्य दर्शनं प्रजगाद ह ॥३९॥
अहोभाग्यमहोभाग्यं राजदेहस्य मे न्विदम् ।
यद्दृष्टौ परमानन्दः पूर्णब्रह्म परेश्वरः ॥४०॥
हंसरूपः श्रियायुक्तः साक्षात्करुणयाऽऽगतः ।
पावितोऽहं मोक्षितोऽहं समुद्धृतोऽस्मि सागरात् ॥४१॥
इत्युक्त्वा चरणौ धृत्वा हंसस्य मौनमावहत् ।
हंसः प्राह वरं राजन् वृणु यत्तेऽभिवाञ्छितम् ॥४२॥
राजा प्राह हरे चात्र मोक्षं देहि पदे नय ।
नमे वाञ्छाऽस्ति राज्यस्य लोकैषणा न विद्यते ॥४३॥
अन्यैषणास्तु सम्पूर्णा वर्तन्ते मोक्षमावह ।
यल्लाभो योगिनां नास्ति युगकाले गतेऽपि च ॥४४॥
स लाभोऽद्य मया प्राप्तश्चैकादशीव्रतेन ह ।
तस्माद् देहि कृपासिन्धो मोक्षणं सर्वथाऽत्र मे ॥४५॥
राधिके राजवाक्यानि स्वीकृत्य परमेश्वरः ।
तथाऽस्त्विति हसन्प्राह तावद्राजानुगादयः ॥४६॥
आयुयुर्वीक्ष्य तेजांसि तं हरिं समलोकयन् ।
कृतकृत्या हि ते जाता वीक्ष्य हंसस्वरूपिणम् ॥४७॥
तावत् तत्र समायातं विमानं सूर्यवर्चुलम् ।
राजा देहं विहायैव मुक्तदेहमवाप ह ॥४८॥
चतुर्भुजो विष्णुतुल्यो विमानस्थोऽभवत् क्षणात् ।
राज्ञी तस्यास्तदा शीघ्रं विमानं स्वकरेण वै ॥४९॥
सह यातुं दधारैव स्पर्शमात्राऽपि सा तदा ।
त्यक्त्वा भौतिकदेहं स्वं दिव्यदेहा बभूव ह ॥५०॥
विमानं शीघ्रमेवापि ततस्तत्राऽम्बरेऽभवत् ।
हंसः श्रीबालकृष्णोऽपि विष्णुश्चतुर्भुजोऽभवत् ॥५१॥
तद्विमानेन राजानं निन्ये वैकुण्ठमेव सः ।
बालकृष्णस्वरूपेण सरस्तीरे स्थितोऽभवत् ॥५२॥
तेजो विलीनतां यातं सार्थोऽप्याश्चर्यमाप्तवान् ।
देहक्रियां प्रचक्रुश्च सार्थाः सर्वे नृपानुगाः ॥५३॥
ततो ययुर्निजं देशं पुत्रं जगदुर्भूभृतः ।
वृत्तान्तं सर्वमेवैनं पुनः श्रुत्वा मुमोद ह ॥५४॥
राधिके हंसतीर्थं तत्त्वश्वपट्टसरोजले ।
अभवद् दक्षिणे पूर्वे कोणे मुक्तिप्रदं शुभम् ॥५५॥
स्नानाद्दानादवगाहाज्जलपानान्निषेवणात् ।
भुक्तिः स्वर्गं च मुक्तिश्च भवेयुर्नात्र संशयः ॥५६॥
आत्मज्ञानं भवेत्तत्र स्नानात्पानाज्जलस्य च ।
यज्ञपुण्यं भवेच्चापि हंसतीर्थेऽन्नदानतः ॥५७॥
द्वादश्यां त्वेकसाधोर्हि भोजनात्पुण्यमुत्तमम् ।
शतसाधुभोजनस्य पुण्यं भवेन्न संशयः ॥५८॥
एकादश्यां फलदानात् स्वर्णदानसमं फलम् ।
स्वर्णदानाद् राजसूयसमं चात्र भवेत् फलम् ॥५९॥
शृणु त्वं राधिके त्वन्यं चमत्कारं महाप्रभोः ।
रोलाख्यश्चोत्कलराजस्तीर्थार्थं सोमनाथकम् ॥६०॥
समाययौ स्वसैन्येन बहुमासैः शनैः शनैः ।
सोमनाथं महातीर्थं कृत्वा प्राचीसरस्वतीम् ॥६१॥
मूलद्वारिकिकातीर्थं कृत्वा च वामनस्थलीम् ।
भद्रावतीमहातीर्थं कृत्वा कुंकुमवापिकाम् ॥६२॥
अश्वपट्टसरस्तीरं पूर्णिमायां समाययौ ।
सायमागत्य विधिना कृत्वा तीर्थं जलं पपौ ॥६३॥
सैन्यं तृप्तं जलपानाद् रात्रौ भोजनमाप सः ।
देवाऽऽरात्रिकनादाँश्चाऽशृणोत् साधुकृतान् स्तवान् ॥६४॥
रात्रौ विश्रान्तिमासाद्य ततो निद्रावशोऽभवत् ।
सुप्तं सैन्यं चोत्थितं च प्रातस्तटाकप्राङ्तटे ॥६५॥
उद्यानः फलपुष्पाणामासीत्तत्राश्वशुण्डिनः ।
उद्याद्याः पशवो राज्ञस्तृणानि चरितुं ययुः ॥६६॥
उद्यानवृक्षः पशुभिर्भक्षिता नाशिता अपि ।
राजा सूर्योदये भूत्वा विनिद्रोऽश्वसरो ययौ ॥६७॥
स्नानं दानं विधिं कृत्वा स्वनिवेशमुपाययौ ।
तावन्नित्यं प्रपूजां स यस्याः करोति भूपतिः ॥६८॥
श्रीनृसिंहप्रतिमायाः सा तत्राऽदृश्यतां गता ।
राजा शुशोच मनसाऽपराद्धं त्वत्र वै मया ॥६९॥

नान्यथा प्रतिमालोपो भवेदेवं न संशयः ।
स तु तुष्टाव नृहरिं हृदयेन विदूयता ॥७०॥
कथं नाथ कृपापारावार रुष्टोऽद्य वै मयि ।
न जाने त्वपराद्धं किं मयाऽत्र यद्गतो भवान् ॥७१॥
मरिष्याम्यदनं त्यक्त्वा ग्रहीष्ये न जलं फलम् ।
अपराद्धुर्भवेदेव प्रायश्चित्तमिदं मम ॥७२॥
एवं प्रवदिते तेन व्योमवाणी ह्यजायत ।
अत्र राजन् फलपुष्पोद्यानं पूर्वदिशि ध्रुवम् ॥७३॥
कृष्णवल्लभकृष्णस्य विद्यते परमात्मनः ।
तन्नाशस्त्वत्पश्वाद्यैर्वै क्रियते पश्य मा चिरम् ॥७४॥
निवारय द्रुतं तांश्च महोद्यानं प्रकारय ।
अपराद्धं त्वया त्वेतच्छृणु चान्यत्त्वया कृतम् ॥७५॥
अत्र पूजा त्वया श्रीमद्बालकृष्णस्य नो कृता ।
अहं यस्याऽवतारोऽस्मि स मेऽवतारकारणम् ॥७६॥
तमपूज्य मम पूजा यदि स्यात् तेऽपराधनम् ।
ततोऽहं विलयं प्राप्तः पूर्वं तं त्वं प्रपूजय ॥७७॥
ततो मां सम्पूजयाऽत्र तेन तुष्टो भवामि ते ।
मम मूर्तिं स्थापयाऽत्र त्वश्वपट्टसरस्तटे ॥७८॥
मन्दिरे शोभने तत्र निवत्स्ये कृष्णसन्निधौ ।
उद्यानस्य प्ररक्षार्थं वन्यरक्षार्थमित्यपि ॥७९॥
ततोऽहं वै त्वया सार्धमागमिष्यामि नाऽन्यथा ।
इत्युक्तो राधिके राजा व्योमवाणीं प्रपूज्य च ॥८०॥
तूर्णं सैन्यान्तिकं गत्वा वारयामास तान् पशून् ।
वीक्ष्य भग्नं समुद्यानं परं शोकं जगाम सः ॥८१॥
वृत्तान्तं सैन्यपालेभ्यो विनिवेद्य ततो द्रुतम् ।
आज्ञाप्योद्यानरक्षार्थं नवोद्यानाभिक्लृप्तये ॥८२॥
शीघ्रं प्रासादनिर्मित्यै तथाऽऽज्ञां सम्प्रदाय च ।
पूजासामग्रिकायुक्तो बालकृष्णालयं ययौ ॥८३॥
रोलमायान्तमावीक्ष्य हसन् जगाद सत्पतिः ।
रोल ! राजन् ! कदा त्वस्मिन् क्षेत्रे प्राप्तो भवान् वद ॥८४॥
कच्चिन्निरामयं तेऽस्ति तव सैन्यस्य वै पुनः ।
कच्चित् सुखिनः पशवो मानवा यात्रिकास्तव ॥८५॥
भोजनं मद्गृहे त्वद्य गृहाण त्वं नरेश्वर ।
इत्युक्तो रोलराजः सः विमुच्याऽश्रूणि चाह तम् ॥८६॥
नारायण कृपासिन्धोऽपराद्धं ते मयाऽत्र वै ।
उद्यानो नाशितः सैन्यपशुभिस्तत्क्षमां कुरु ॥८७॥
कारयिष्यामि चोद्यानं कारयिष्यामि मन्दिरम् ।
नृसिंहस्य तव मूर्तेः स्थापनं सर्वदा त्विह ॥८८॥
क्षेत्रोद्यानस्य रक्षार्थं यास्यामि च स्वराष्ट्रकम् ।
तव पूजां विना कृष्ण नृसिंहो मे लयं गतः ॥८९॥
तमिमं मेऽपराद्धं प्रक्षमस्व पुरुषोत्तम ।
इत्युक्त्वा राधिके श्रीमद्बालकृष्णं समार्चयत् ॥९०॥
राजवेषाम्बरभूषागन्धमालाऽक्षतादिभिः ।
दण्डवत् प्रचकाराऽथ नैवेद्यं पिण्डकान् ददौ ॥९१॥
ताम्बूलकं ददौ चापि प्रसादं जगृहे हरेः ।
क्षमितं चेति हरिणा प्रोक्तो निजालयं ययौ ॥९२॥
तावन्नृसिंहभगवान् मूर्तिरूपो निजासने ।
प्रकटीभूय नृपतेः पूजां जग्राह भावतः ॥९३॥
राजाऽपि कारयामास मन्दिरं सुदृढं नवम् ।
नृसिंहं स्थापयामास मन्दिरे वृत्तिकां ददौ ॥९४॥
उद्यानं रोपयित्वा च नियुज्य रक्षकं ततः ।
ययौ चोत्कलदेशं स राधिके कृष्णभक्तिमान् ॥९५॥
एवं नृसिंहतीर्थं तत् सरोवरजलेऽभवत् ।
रोलतीर्थं सुरम्यं तन्मन्दिरं नृहरेस्तथा ॥९६॥
सर्वं तीर्थमयं चाऽभूद् बालकृष्णप्रतापतः ।
तत्र स्नानप्रकर्तारो भुक्तिं मुक्तिं शुभां गतिम् ॥९७॥
यास्यन्त्येव हि दातारो फलानां शाखिरोपिणः ।
पुष्पस्तवकरोपाश्च महोद्यानविधायिनः ॥९८॥
प्रयास्यन्ति हि ते सर्वे ब्रह्मधामाऽक्षरं ध्रुवम् ।
वृक्षमूले जलसेकप्रकर्तारोऽपि मानवाः ॥९९॥
स्वर्गं प्राप्य चिरं भुक्त्वा यास्यन्ति त्वक्षरं मम ।
पठनाच्छ्रवणाच्चास्योद्यानरोपफलं भवेत् ॥१००॥
अश्वपट्टसरःक्षेत्रे यत्र क्वापि क्षितौ तटे ।
वृक्षवल्लीरोपिणो ये ते यास्यन्ति परां गतिम् ॥१०१॥
अवंशा वंशमाप्स्यन्ति निर्धना धनिनस्तथा ।
अरसा रसपूर्णाश्च भविष्यन्ति द्रुपालनात् ॥१०२॥
धनधान्यसमृद्धाश्च फलमिष्टान्नभोजिनः ।
भविष्यन्ति वृक्षरोपादश्वपट्टसरोन्तिके ॥१०३॥
राधिके वृक्षपातारो भवन्त्येते मम प्रियाः ।
वनेषु वल्लवीव्राते फले पुष्पे वसाम्यहम् ॥१०४॥
वृक्षरक्षकलोकानां गृहे लक्ष्मीसमन्वितः ।
वसाम्यहं न सन्देहस्तन्नाशेऽपसरामि हि ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कार्तिकैकादशीव्रतेन पुण्डरीकनृपतेर्हंसरूपहरिं प्राप्तस्य मोक्षः, अश्वपट्टसरसि हंसतीर्थम्, चोलराज्ञाऽपि नृसिंहयोगेनाऽश्वपट्टसरस्तीरे नृसिंहस्थापनं नृसिंहतीर्थं चेत्यादिनिरूपणनामा नवत्रिंशदधिकद्विशततमोऽध्यायः ॥२३९॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चान्यं चमत्कारं श्रियःपतेः ।
कुंकुमवापिकाक्षेत्रे जातं योगेश्वरं प्रति ॥ १ ॥
वीतिहोत्रो महोयोगी वने योगेश्वरोऽभवत् ।
हिमाचले बदर्यां स तपस्तेपेऽतिदारुणम् ॥ २ ॥
सर्वयोगकलाः प्राप यथा शंभुस्तथाऽभवत् ।
तेन योगप्रतापेन दृष्टा वै दिव्यचक्षुषा ॥ ३ ॥
केतुमाले कृता यज्ञाः केनाटेऽपि कृता मखाः ।
अमरीणां प्रदेशेषु कृतं यद्धरिणा तु तत् ॥ ४ ॥
ऊर्जाकृष्णाष्टमीजन्ममहोत्सवश्च यः कृतः ।
शारदापूजनाद्यं च ह्यन्नकूटमहोत्सवः ॥ ५ ॥
एतत्सर्वं दिव्यदृष्ट्या विज्ञाय परमेश्वरम् ।
कांभरेयं बालकृष्णं द्रष्टुं साक्षादुपाययौ ॥ ६ ॥
आययौ कुंकुमवापीक्षेत्रे कृष्णनारायणम् ।
सहस्ररूपधर्ताऽसौ वीतिहोत्रः समाधिमान् ॥ ७ ॥
मार्गशीर्षतृतीयायामश्वपट्टसरस्तटे ।
सेतुमाश्रित्य च न्यग्रोधस्याऽधोऽधान्निजासनम् ॥ ८ ॥
सहस्ररूपधर्ताऽसौ संकल्प्य निषसाद ह ।
मम मूलस्वरूपं चागत्याऽऽश्लिष्येत् रमापतिः ॥ ९ ॥
ततः सहस्ररूपैश्चाऽऽश्लिष्येन्मां स प्रभुः पुनः ।
ऋषभस्य कारयेन्ये सद्गुरोर्दर्शनं यदि ॥१०॥
तदाऽहं श्रीहरेरग्रे निवत्स्येऽत्र सदाऽनुगः ।
मोक्षं प्रसाधयिष्येऽत्र बदर्या न प्रयोजनम् ॥११॥
न गुरोरपरस्यापि मोक्षदो हि गुरुर्यतः ।
यत्रात्मनो भवेत्पुष्टिर्येन तरति सागरम् ॥१२॥
यस्माच्चात्ममहाशान्तिस्तं गुरुं त्वाश्रयेज्जनः ।
यस्मात्पापविनाशश्च यस्मादज्ञाननाशनम् ॥१३॥
यस्माद् वृत्तिनिरोधश्च वासनाक्षपणं यतः ।
यस्मादात्मप्रकाशश्च तं गुरुं त्वाश्रयेज्जनः ॥१४॥
यस्माच्छिक्षामवाप्येतैश्वर्यं चमत्कृतिं तथा ।
दिव्यभावमधितिष्ठेत्तं गुरुं त्वाश्रयेज्जनः ॥१५॥
गुरवो बहवः सन्ति लौकिकाश्चाप्यलौकिकाः ।
लौकिकेन हि लोकस्थाः कार्या वै गुरवो यथा ॥१६॥
अलौकिकेन शिष्येणाऽलौकिका गुरवो धृताः ।
मयाऽप्यलौकिकः सोऽयं कर्तव्यो भगवान् गुरुः ॥१७॥
यत्र सर्वं हि कर्तव्यं हरौ परिसमाप्यते ।
माता गुरुर्हि जनुदा पिता गुरुर्हि बीजदः ॥१८॥
अन्ये रक्षाकराः सन्ति देहस्य गुरवो हि ते ।
भाषाज्ञानकराश्चान्ये बान्धवाद्याश्च योषितः ॥१९॥
तथा शिक्षाकराश्चान्ये विद्यादानकरा अपि ।
कलाकौशल्यशिक्षाया दातारो गुरवोऽपि च ॥२०॥
त एते देहयात्राया भवन्ति गुरवः खलु ।
आत्मज्ञानप्रदो यस्तु विष्णुमन्त्रप्रदश्च यः ॥२१॥
धर्मवृत्तिप्रदो यश्च गुरुः श्रेष्ठो हि सम्मतः ।
ब्रह्मस्थितिप्रदो यश्च योगसिद्धिप्रदश्च यः ॥२२॥
वैशारद्यप्रदो बुद्धौ गुरुः श्रेष्ठतरो हि सः ।
निर्मूलां वासनां कृत्वा परमेशप्रदर्शकः ॥२३॥
आत्मना परमात्मानं प्रापको दिव्यमोक्षदः ।
ब्रह्मलोकप्रेषकश्च गुरुः श्रेष्ठतमो हि सः ॥२४॥
गकारस्त्वन्धमज्ञानं रकारो ज्ञानमुज्ज्वलम् ।
अज्ञानहा ज्ञानदश्च गुरुर्गौरववान्मतः ॥२५॥
गमयत्यक्षरं धाम रमयत्यपि धामिना ।
गुरुः सोऽयं मोक्षदाता नान्यः श्रेष्ठस्ततो गुरुः ॥२६॥
गुरुर्योगी ब्रह्मचारी धर्मी ज्ञानी विरागवान् ।
साधुशीलो गुरुश्चापि नारायणः परो गुरुः ॥२७॥
भुक्तिदाता मोक्षदाता सर्वस्वदो हरिर्गुरुः ।
गुरोः साक्षात्कारयिता गुरोर्गुरुर्यतोऽत्र सः ॥२८॥
स एव श्रीहरिश्चाऽयं मुक्तानां परमो गुरुः ।
गुरुः सर्वावताराणां सतीनां च सतां गुरुः ॥२९॥
ईश्वराणां तथा धाम्नां योगिनां सर्गसम्विदाम् ।
पूर्वेषां सृष्टिकर्तॄणां महर्षीणां द्युवासिनाम् ॥३०॥
प्रजेशानां कर्मठानां भक्तानां च परो गुरुः ।
गुरूणां यावतामग्र्यो नारायणगुरोर्गुरुः ॥३१॥
अनादि श्रीकृष्णनारायणः श्रीकृष्णवल्लभः ।
श्रीकृष्णवल्लभः स्वामी कांभरेयः परात्परः ॥३२॥
श्रीमद्गोपालबालोऽयं स्वामी वै सर्वदेहिनाम् ।
मया लब्धः स मे पूर्णं करिष्यत्येव मानसम् ॥३३॥
निवत्स्यामि चरणेऽस्य प्राप्स्यामि धाम चाक्षरम् ।
सञ्चिन्त्येति वीतिहोत्रो ध्यानमग्नः सहस्रधा ॥३४॥
सहस्ररूपवान् जातो दृष्ट्वा तं मानवास्तटे ।
स्नातारोऽगुः पराश्चर्यं कस्येमानि समानि वै ॥३५॥
रूपाणि, के चागता वै योगिनोऽत्र सहस्रशः ।
समवेषाः समदेहाः समांगाः सन्ति सदृशाः ॥३६॥
समकेशाः समध्यानाः समानपरिमाणकाः ।
भ्रातरो वा भवन्त्येते धाममुक्ता भवन्ति वा ॥३७॥

बदरीवासिनो वाऽपि श्वेतमुक्ताः किमागताः ।
शंकरस्य गणाः किंवा देवास्तापसरूपिणः ॥३८॥
साध्या वा देवता यद्वा मेरुवासा हि तापसाः ।
क एते तु भवेयुर्वै चन्द्रास्या भास्करप्रभाः ॥३९॥
ध्यानयोगा योगिनो वा योगेश्वराः सहस्रशः ।
न वदन्ति न पश्यन्ति न प्राणान् चालयन्त्यपि ॥४०॥
स्थिरमौनाः स्थिरचित्ता ईश्वराः स्युश्च केन्विमे ।
इत्येवं तर्कयन्तो वै कुंकुमवापिकाजनाः ॥४१॥
संघशो वै समायान्ति द्रष्टुं कुतूहलान्विताः ।
केचिन्नमन्ति दृष्ट्वैव प्रशंसन्ति वदन्ति च ॥४२॥
प्रतापोऽयं बालकृष्णकृपानाथस्य वर्तते ।
अस्य दर्शनलाभार्थं नित्यमायान्ति योगिनः ॥४३॥
अदृश्या ईदृशाः सर्वेऽधुना ते दृश्यतां गताः ।
रुद्राः सहस्रशश्चापि विष्णवश्च सहस्रशः ॥४४॥
सहस्रशोऽपि ब्रह्माणो द्रष्टुमायान्ति सद्वरम् ।
तथा महर्षयो नित्यं पितरो देवतास्तथा ॥४५॥
साध्या विश्वे च मरुतो द्रष्टुमायान्ति नित्यशः ।
तीर्थान्यपि समायान्ति दिक्पालाः सृष्टिपालकाः ॥४६॥
अथवा पार्षदा दिव्या गोलोकादिनिवासिनः ।
समायान्ति च वैकुण्ठपार्षदा अपि नित्यशः ॥४७॥
ग्रहनक्षत्रताराश्च सूर्याश्चन्द्राः सहस्रशः ।
वैमानिकाः समायान्ति लोकान्तरेभ्य आदृताः ॥४८॥
वालखिल्याः समायान्ति यद्वा ब्रह्मसभाद्विजाः ।
किं वा भवेयुर्गान्धर्वा यक्षा वा धनदाश्च वा ॥४९॥
चारणाः पर्वतवासा मुनयो वा वनस्थिताः ।
परं सादृश्यमेवैषामपूर्वत्वं विगाहते ॥५०॥
ललाटे वैष्णवं पुण्ड्रं मस्तके तापसी जटा ।
नेत्रमुद्रा योगपुष्टाः ख्यापयन्त्यंशमाच्युतम् ॥५१॥
ये वा के वा भवेयुस्ते साक्षात्कृता यदत्र ते ।
अस्माभिर्दैवयोगेन पुण्यवद्भिः सुभाग्यकैः ॥५२॥
अवश्यमेषां विज्ञानं क्षणेऽत्रैव भविष्यति ।
इत्येवं ते वदन्तश्च प्रजाः संघश एव ह ॥५३॥
प्रपश्यन्ति सरस्तीरे सहस्रयोगिनस्तदा ।
अथ श्रीमद्बालकृष्णो नारायणगुरोर्गुरुः ॥५४॥
समाययौ सरस्तीरे सन्निधौ योगिनां तदा ।
हार्दं जानँस्तदा तूर्णं प्रवीक्ष्य मूलरूपिणम् ॥५५॥
समुत्तोल्य समाहूय नाम्ना तं वीतिहोत्रक ! ।
उत्तिष्ठेति करौ धृत्वा कृत्वा वक्षसि योगिनम् ॥५६॥
समाश्लिष्यद्द्रुतँस्तूर्णं स्वयं सहस्रधाऽभवत् ।
समुत्थितैः सहस्रस्वरूपैराश्लिष्यदच्युतः ॥५७॥
ततस्तूर्णं हरिश्चैकस्वरूपः सम्बभूव ह ।
वीतिहोत्रोऽपि सहसा त्वेकरूपो व्यजायत ॥५८॥
आश्चर्यचकिता लोका जयशब्दान् प्रचक्रिरे ।
तावच्छ्रीबालकृष्णोऽपि बभूव ऋषभो गुरुः ॥५९॥
वृद्धः श्वेतजटायुक्तो विवस्त्रो धूलिधूसरः ।
विचित्त इव चोन्मत्तो जितसर्वेन्द्रियो यतिः ॥६०॥
स्वभावतेजसा व्याप्तो ब्रह्मनिष्ठापरः पुमान् ।
अप्राकृत इव त्वास्ते विमना इव देहिषु ॥६१॥
वीतिहोत्रोऽपि च गुरुमृषभं वीक्ष्य दण्डवत् ।
चकार बहुधा तत्र तुष्टाव परमेश्वरम् ॥६२॥
त्वं गुरुस्त्वं चान्तरात्मा ऋषभस्त्वं च योगिराट् ।
योगेश्वरो भवानेव त्वं चेशस्त्वं परेश्वरः ॥६३॥
त्वं मुक्तस्त्वं महामुक्तो मुक्तेश्वरो भवानपि ।
अक्षरं त्वं भवान् ब्रह्म परब्रह्म भवानपि ॥६४॥
भगवान् कृष्ण एवासि कृष्णनारायणोऽसि च ।
अनादिश्रीकृष्णनारायणस्त्वं परमेश्वरः ॥६५॥
अवताराः ऋषभाद्यास्तवैव श्रीपते विभो ।
राधापतिस्त्वमेवाऽसि लक्ष्मीपतिस्त्वमेव च ॥६६॥
वासुदेवीपतिस्त्वं च नारायणीपतिस्तथा ।
मुक्तपतिर्ब्रह्मपतिर्धामपतिस्त्वमेव च ॥६७॥
महाकालस्य हेतुस्त्वं महाविष्णोश्च कारणम् ।
सदाशिवस्य हेतुस्त्वं वैराजस्य च कारणम् ॥६८॥
भूमा त्वं पूरुषसंज्ञः पुरुषोत्तम इत्यपि ।
ब्रह्मविष्णुमहेशानां रुद्राणां सर्जको भवान् ॥६९॥
देवानां लोकपालानां पितॄणां सर्जको भवान् ।
महर्षीणां यतीनां च साधूनां सर्जकः सताम् ॥७०॥
सतीनां कमलाद्यानां पतिः पाता च वै भवान् ।
सुराणां मानवानां च पशूनां पक्षिणां तथा ॥७१॥
वल्लीनां च द्रुमाणां च सर्जकस्त्वं रसप्रदः ।
कामधेनुकामवल्लीचिन्तामण्यादिसर्जकः ॥७२॥
यक्षरक्षःपिशाचानां सर्जकस्त्वं खचारिणाम् ।
वारिजानां वनस्थानां भूगर्भाणां प्रसर्जकः ॥७३॥
दैत्यानां दानवानां च सर्जकस्त्वं जनार्दनः ।
दीनाऽनाथदरिद्रानां रक्षकः पोषको भवान् ॥७४॥
आश्रितानामन्नदाता शरण्यश्चार्तिदेहिनाम् ।
कामुकानां कामदाता सकामानां प्रपूरकः ॥७५॥

त्वं नारी त्वं नरश्चाऽसे त्वं गर्भस्त्वं कुमारकः।
त्वं बीजं त्वं सस्यरूपस्त्वं पुष्पं फलमित्यपि ॥७६॥
त्वमिन्द्रस्त्वमिन्द्रियस्त्वं निद्रा त्वं जागरो भवान्।
त्वं सुषुप्तिर्महानन्दस्त्वं प्रीतिस्त्वं रतिस्तथा ॥७७॥
मन्मथस्त्वं मनोजन्यो मनःसंस्थो भवानपि।
ज्ञानं ज्ञाता ज्ञेयमेव त्वमेवाऽसि परेश्वर ॥७८॥
त्वम् ऋतुस्त्वं दिनं रात्रिस्त्वमुद्योगो विरामकः।
त्वं विश्वासश्चाश्रयश्च त्वं माता च पिता गुरुः ॥७९॥
धनं धान्यं त्वमेवाऽसि शक्तिर्बलं त्वमेव च।
नीतिर्भक्तिर्वृषो रागो वैराग्यं च त्वमेव ह ॥८०॥
त्वं प्राणस्त्वं जीवनं च नैकधा चैकधा भवान्।
प्रकाशस्त्वं प्रवृत्तिस्त्वं निरोधस्त्वं गुणात्मकः ॥८१॥
गुणातीतस्त्वमेवाऽसि सर्वसिद्धिगुणाश्रयः।
आश्चर्यं त्वं चमत्कारस्त्वमैश्वर्यं प्रभुत्वकम् ॥८२॥
त्वं भूर्जलं भवाँस्तेजोऽनिलस्त्वं त्वं तथाऽनलः।
त्वं खं त्वं मात्रकं त्वं च बुद्धिस्त्वं चैषणात्रयम् ॥८३॥
त्वं परीक्षा तितिक्षा त्वं त्वं बुभुक्षा मुमुक्षता।
त्वं स्नेहस्त्वं ध्यानवृत्तिस्त्वं समाधिः परात्परः ॥८४॥
उपास्तिस्त्वं चित्तचैत्यं त्वं जाड्यं त्वं तथाऽणुता।
त्वं साम्यं त्वं च वैषम्यं त्वमेव सर्वमेव ह ॥८५॥
अहं त्वं वीतिहोत्रस्त्वं त्वं गुरुः ऋषभस्तथा।
तवैवांऽशकलाऽऽवेशविभूतिसृष्टिजं त्विदम् ॥८६॥
यत् किंचिद् दृश्यते चापि भुज्यते लीयतेऽपि च।
यस्माद् यत्र च येनापि यदर्थं च त्वमेव सः ॥८७॥
तस्मै कृष्णाय नाथाय ब्रह्मणे परब्रह्मणे।
समर्पयामि चात्मानं वीतिहोत्राभिधं सदा ॥८८॥
दानमेव न तु न्यासं नापि कुसीदकं तथा।
यथेष्टविनियोगार्हं समर्पयामि मां त्वहम् ॥८९॥
इति स्तुत्वा राधिके सम्पपात पादयोर्हरेः।
वीतिहोत्रश्चाऽथ कृष्णस्तमुत्थापयदूर्ध्वकम् ॥९०॥
समाश्लिष्य पुनर्हस्तौ दत्वा तस्य च मूर्धनि।
न्ययुंक्त वरलाभार्थं वीतिहोत्रं हरिर्यदा ॥९१॥
वीतिहोत्रस्तदा प्राह स्थास्येऽत्र तवपादयोः।
अन्ते मोक्षं गमिष्यस्यक्षरं धाम तव प्रभो ॥९२॥
देहि वासं सदा चात्र तथास्त्वूवाच वै हरिः।
राधिके तन्महत्तीर्थम् ऋषभाख्यं सरोवरे ॥९३॥
वीतिहोत्राभिधं तीर्थं सहस्रयोगितीर्थकम्।
एवं नाम्ना तदेवासीत् प्रसिद्धं मोक्षदं शुभम् ॥९४॥
हरिर्बभूव सहसा बालकृष्णस्वरूपधृक्।
प्रययौ च निजावासं वीतिहोत्रस्तटे स्थितः ॥९५॥
वटवृक्षं समाश्लिष्य तापसो जनदर्शनः।
तत्र तीर्थे कृतस्नानाः प्राप्स्यन्ति परमां गतिम् ॥९६॥
योगसिद्धिमवाप्स्यन्ति योगाभ्यासं विनाऽपि च।
राधिके तत्र संस्नान्नाशमेष्यन्ति पातकम् ॥९७॥
आर्द्रं शुष्कं महत्स्वल्पं परपीडाकरं च यत्।
सर्वं नश्यति पापं तज्जलपानादपि द्रुतम् ॥९८॥
तत्राऽन्नदानतः स्यात्तु वाजिमेधसमं फलम्।
ऋषभस्याऽऽलयकर्तुर्मम धामाऽक्षरं भवेत् ॥९९॥
इत्येवं भगवानाह राधिके तीर्थवैभवम्।
पठनाच्छ्रवणाच्चास्य भवेत्तत्तीर्थजं फलम् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वीतिहोत्रयोगेश्वराय ऋषभरूपेण सहस्ररूपेण च हरेर्दर्शनम्, ऋषभतीर्थीकरणम्, स्तुतिश्चेत्यादिनिरूपणनामा चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४० ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके चान्यं चमत्कारं प्रभोस्ततः।
मार्गशीर्षस्य पञ्चम्यां कृष्णपक्षे तु योऽभवत् ॥ १ ॥
अक्षराधिपतेस्तस्य कृष्णनारायणस्य यः।
वासुदेवाभिधश्चास्तेऽवतारो व्यूहसंज्ञकः ॥ २ ॥
तस्यांऽशः सृष्टिसंहारव्यापारः समकर्षणः।
संकर्षणो यः शास्त्रेषु वर्ण्यते स तु जायते ॥ ३ ॥
रुद्ररूपो मुहुश्चापि शंभुरूपस्तथा मुहुः।
प्रलयात्मा स एवाऽऽस्ते स चास्ते शेषसंज्ञकः ॥ ४ ॥
हरिर्यत्र प्रशेते च शेषनारायणः स हि।
स एव तु महायोगी पतञ्जलिः प्रजायते ॥ ५ ॥
योगादेष्टा हरेरंशः पतञ्जलिमुनिः स वै।
दिव्यदेहोऽत्र भूमौ स काश्यामास्ते सदा प्रभुः ॥ ६ ॥
नित्यं प्रातर्योगदृष्ट्या दर्शनार्थं हरेः स च।
पूजनार्थं समायाति त्वश्वपट्टसरःस्थलीम् ॥ ७ ॥
प्रपूज्य परमात्मानमनादिश्रीनरायणम्।
आरार्त्रिकं विधायैव प्रसादं प्राप्य वै ततः ॥ ८ ॥
प्रयात्येव निजावासं क्षणात् काश्यां समाधिना।
एवं नित्यं समायाति महामुनिपतञ्जलिः ॥ ९ ॥

राधिके तं मुनिं तत्र पूजयन्तं हरिं प्रभुम् ।
ददर्श चमसो नाम्ना व्योम्ना चरन् हि योगिराट् ॥१०॥
अवातरत् स वै पृथ्व्यां पप्रच्छ तं पतञ्जलिम् ।
भगवन् पूज्यते त्वत्र त्वया श्रीपुरुषोत्तमः ॥११॥
साक्षात्सर्वावताराणामधीशो बालकृष्णकः ।
पुनश्च गम्यते काश्यां कथं त्यक्त्वा महाप्रभुम् ॥१२॥
वद मे कारणं विद्वन् तीर्थार्थे त्वहमागतः ।
कृत्वा तीर्थं ततश्चाहं गमिष्यामि त्वया सह ॥१३॥
पूजयामि प्रभुं चाहं ततो यास्यामि वै त्वया ।
इत्युक्त्वा दण्डवच्चक्रे पुपूज बालकृष्णकम् ॥१४॥
पूजयित्वा ह्युभौ चाज्ञामासाद्याऽश्वसरस्तटम् ।
ययतुः पूर्वसेतौ तौ धात्रीवृक्षमुपाश्रितौ ॥१५॥
पतञ्जलिमुनिः प्राह कारणं काशिकास्थितेः ।
चमसः त्वं शृणु हेतुं यतो यामि वराणसीम् ॥१६॥
अनादिश्रीकृष्णनारायणस्य परमात्मनः ।
महैश्वर्यस्वरूपा या त्वर्धस्वरूपधारिणी ॥१७॥
सर्वशक्त्यग्रगण्या या सर्वासां परमेश्वरी ।
कृष्णनारायणी याऽनादिनी त्वर्धांगना हरेः ॥१८॥
जगतां ब्रह्मलोकानां माताऽवतारयोगिनाम् ।
दुःखहर्त्री सुखकर्त्री मुक्तानां शक्तिदायिनी ॥१९॥
नारायणानां सर्वेषां सर्वसामर्थ्यरूपिणी ।
ब्रह्मप्रियाणां सर्वासां मूर्धन्या या तु वक्षसि ॥२०॥
अनादिश्रीकृष्णनारायणस्यैव विराजते ।
क्षणं दूरे न सा याति विमुक्ता नहि जायते ॥२१॥
दृश्याऽदृश्यस्वरूपा याऽविनाभावनियोजिता ।
राधारमादिदेवीनां सेवनीया परेश्वरी ॥२२॥
सा त्वास्ते धृतदेहाऽद्य कुमारी श्रीहरेः प्रिया ।
शिवस्वामिगृहे बाला सती पुत्री नरायणी ॥२३॥
नाम्ना तु सा धनलक्ष्मीः सर्वदुःखविनाशिनी ।
वर्तते सामह्रीदेवीसमुत्था दिव्यमानवी ॥२४॥
विजयस्यापि शशिनः कृष्णाया साऽनुजा शुभा ।
प्रतीक्षन्ती हरेर्वाटं कृष्णनारायणस्य सा ॥२५॥
तस्याः पूजां तथा सेवां कर्तुं दास्यं प्रयामि हि ।
अनादिश्रीकृष्णनारायणाऽऽज्ञया प्रयामि वै ॥२६॥
चमस ! त्वं विजानासि योगाल्लभ्यस्तु यो हरिः ।
स एवाऽयं परमात्मा राजते कुंकुमक्षितौ ॥२७॥
अस्य वै दर्शनं नित्यं समाधिर्निर्विकल्पकः ।
अस्य साक्षात्प्रसेवा च समाधेः फलमुत्तमम् ॥२८॥
यमास्त्वस्याऽनुवृत्तौ वै वर्तनं सम्मता मम ।
अहिंसा श्रीहरेर्ग्राह्या प्रसन्नता तदात्मिका ॥२९॥
सत्यं सत्यस्वरूपस्य हरेः सदावलम्बनम् ।
अस्तेयं श्रीहरेरग्रे दास्यभावेन वर्तनम् ॥३०॥
ब्रह्मचर्यं हरेर्मूर्तौ प्रेम्णा तल्लग्नता मता ।
अपरिग्रह एवापि तं विनाऽऽसक्तिर्न चेतरा ॥३१॥
नियमा अपि कृष्णस्य परिचर्यात्मिका मम ।
शौचं तस्य स्पर्शनेन हृदये धारणेन च ॥३२॥
सन्तोषः श्रीहरेः प्राप्त्या प्रसादेन सदा हृदि ।
तपस्तत्रैव वृत्तीनां निरोधयत्न एव ह ॥३३॥
स्वाध्यायस्तस्य वचनं स्तवनं भजनादिकम् ।
प्रणिधानं च तन्मूर्तौ मनसो न्यास एव तु ॥३४॥
इत्येवं श्रीहरिकृष्णे यमाश्च नियमाः शुभाः ।
आसनं वै तदाज्ञायां संस्थानं सन्निधौ तथा ॥३५॥
प्राणायामः प्राणनाथे प्राणानां प्रसमर्पणम् ।
प्रत्याहारश्चेन्द्रियाणामाहारः परमेश्वरः ॥३६॥
धारणा धार्यतेऽनादिकृष्णो निजात्मनि प्रभुः ।
ध्यानं हरौ सदा मे च प्रत्ययस्यैकतानता ॥३७॥
रूपध्यानं हरेर्मूर्तेः रसध्यानं हरेः रसे ।
गन्धध्यानं हरेर्गन्धे स्पर्शध्यानं हरेः स्पृशि ॥३८॥
शब्दध्यानं हरेर्वाक्ये हस्तध्यानं हरेः कृतौ ।
पादध्यानं हरेरर्थे वाचो ध्यानं हरेर्गुणे ॥३९॥
रतिध्यानं हरेर्योगे विघ्ननाशो विसर्जनम् ।
चिन्तनं हृदये तस्य मननं मानसे हरेः ॥४०॥
बोधनं श्रीहरेर्नित्यं चाऽहंभावो हरौ सदा ।
वासनाभावनालग्नवृत्तिः कृष्णनरायणे ॥४१॥
भोगस्तस्मान्महानन्दो नारायणात्परेश्वरात् ।
गुणत्यागो गुणानां दिव्यता तद्योगतश्च या ॥४२॥
नैर्गुण्यं श्रीहरेरर्थे या सेवा गुणतोऽपि वा ।
पुरुषख्यातिरेवाऽपि यद्धरेर्नित्यदर्शनम् ॥४३॥
गुणवैतृष्ण्यमेवापि हरेर्गुणेषु लोभनम् ।
वैशारद्यं च वै बुद्धेर्हरेः स्मृतिस्तु या ध्रुवा ॥४४॥
वृत्तिरोधः स एवाऽस्ति सर्वत्र हरिभासनम् ।
समाधिश्च सविकल्पः स्वार्थमिश्रं हि सेवनम् ॥४५॥
सवितर्कः स्थूलपूजा निर्वितर्को हि मानसी ।
सविचारः स्तोत्रभक्तिर्निर्विचारोऽङ्गभावनम् ॥४६॥
सानन्दश्च रसाऽऽदानं निरानन्दो रसार्पणम् ।
सास्मिता स्वामिभृत्यत्वे भेदेन भासनं हरौ ॥४७॥

नास्मिता भृत्यभावस्य लयः कृष्णे सनातने ।
ऐक्यं कृष्णावेशितस्य पार्थक्यं न यदा मम ॥४८॥
फलं कृष्णस्वरूपाप्तिः सालोक्यं सार्ष्टिरित्यपि ।
सामीप्यं चाऽविनाभावः सदा तत्र विलीनता ॥४९॥
सर्वैश्वर्यचमत्काराद्याप्तिस्तस्माच्च भिन्नता ।
इत्येवं चमसः प्राप्तं सर्वं योगमयं मया ॥५०॥
श्रीहरौ न ततोऽन्यद्वै भासते च मयि त्वयि ।
भज त्वं तेन भावेन वसाऽत्राऽश्वसरोवरे ॥५१॥

इत्यादिष्टश्चमसस्तु पतञ्जलिप्रयोगिणा ।
अश्वपट्टसरस्तीरे सदा वासमवाचरत् ॥५२॥
पतञ्जलिर्ययौ काशीं चमसश्च पतञ्जलेः ।
प्रत्यक्षं विश्रमार्थे च गोष्ठ्यर्थे सरसस्तटे ॥५३॥
पातञ्जलीं कुटीं श्रेष्ठां चकार काष्ठपर्णजाम् ।
पातञ्जलं तु तत्तीर्थं ख्यातं लोकेऽभवत्ततः ॥५४॥
यत्र वै चमसो नित्यं करोति योगगोष्ठिकाम् ।
सह स्थित्वा श्रीमत्पतञ्जलिना योगवेदिना ॥५५॥
अथाऽऽयात् तत्र तीर्थार्थे राजा वैवस्वतो मनुः ।
दृष्ट्वा स्थानं चमसस्य पतञ्जलेश्च पावनम् ॥५६॥
मन्दिरं कारयामास दृढं पाषाणजं तदा ।
विशालं द्रुसमूहे वै तत्र शेषं पतञ्जलिम् ॥५७॥
प्रतिष्ठाविधिना राजा मनुरस्थापयन्मुनिम् ।
शेषनारायणं फणासहस्रव्रातशोभितम् ॥५८॥
फणासु विद्यते स्वस्तिकस्य चिह्नं फणे फणे ।
सौवर्णं राजतं चापि हरिद्वर्णं च पाण्डुरम् ॥५९॥
रक्तास्यं मौक्तिकनेत्रं शेषिकाभिः प्रसेवितम् ।
शोभनं मृदुलं रम्यं कृतकुण्डलिकासनम् ॥६०॥
एवं शेषं तथा दिव्यं मुनिं पतञ्जलिं गुरुम् ।
महर्षिं मन्दिरे तत्र योगिनं चाप्यतिष्ठिपत् ॥६१॥
तत्पार्श्वे तत्प्रियां कुण्डलिनीं सिद्धिमतिष्ठिपत् ।
तथा पुत्रं च योगाख्यं चातिष्ठिपन्मनुर्हि सः ॥६२॥
तथा संकर्षणं देवं गदापद्मादिराजितम् ।
संकर्षणीप्रियायुक्तं मन्दिरे समतिष्ठिपत् ॥६३॥
रुद्रं रुद्राणिकायुक्तं त्रिनेत्रं चाप्यतिष्ठिपत् ।
ईशानं चेशिनीयुक्तं मन्दिरे समतिष्ठिपत् ॥६४॥
जीविकार्थे महाक्षेत्रवाटिकाः प्रददावपि ।
विप्रांस्तेषां पूजनार्थे न्ययुङ्क्त वेतनादिभिः ॥६५॥
प्रतिष्ठायां मनुस्तत्र महारुद्रं मखं शुभम् ।
कारयामास विधिना जापयामास रुद्रिकाः ॥६६॥

कारयामास कुण्डानि मण्डपानि शुभान्यपि ।
आह्वयामास योगीन्द्रान् मुनीन् महर्षिसत्तमान् ॥६७॥
विप्रान् क्षत्रप्रवरांश्च सुरान् देवान् प्रजापतीन् ।
गणांश्च पार्षदांश्चापि रुद्रशिष्यान् समस्तकान् ॥६८॥
कैलासस्थान् समस्तांश्च क्षीरस्थानपि सर्वशः ।
शेषजातीयनागांश्च शांभवान् योगिसत्तमान् ॥६९॥
योगिनीदेविकाश्चापि सतीः साध्वीश्च सर्वशः ।
अवधूतानिकाश्चापि मातृकाश्च समस्ततः ॥७०॥
वीरभद्रादिकांश्चापि नन्द्यादींश्च समस्ततः ।
गणेशान् कार्तिकेयांश्चाऽऽह्वयामास मखे मनुः ॥७१॥
अग्रगश्च महाचार्यः पुलस्त्यस्तत्र चाऽभवत् ।
महारुद्रप्रद्रष्टा वै सर्ववैद्यविशारदः ॥७२॥
कर्मठाः ऋषयस्तत्र सामग्रीः सुसमर्ज्य च ।
स्वस्तिवाचोऽवदन् मांगलिकस्वनास्तथाऽभवन् ॥७३॥
देहशुद्धिश्च संकल्पः कलशाराधनं तथा ।
गणेशपूजनं मातृकार्चनं च ततोऽभवन् ॥७४॥
नान्दीश्राद्धं मधुपर्कस्तथा पुण्याहवाचनम् ।
वर्धिनीकलशन्यासो जलयात्रा ततोऽभवन् ॥७५॥
वास्तुन्यासो मण्डपार्चा मण्डलदेवपूजनम् ।
पीठपूजा कुण्डपूजा वह्निन्यासोऽभवँस्ततः ॥७६॥
ग्रहन्यासो योगिनीस्थापनं क्षेत्रपस्थापनम् ।
भूतशुद्धिस्तथा प्राणप्रतिष्ठा मातृकान्यसिः ॥७७॥
शतरुद्रीयपाठश्च रुद्रनीराजनं तथा ।
क्रमहोमः सर्वदेवहोमश्चोर्ध्वाऽर्हणाऽभवन् ॥७८॥
अजाक्षीरेण वा मृगीक्षीरेण चेष्टिकोपरि ।
वायव्ये कोणभागेऽर्कपत्रेण हवनं तथा ॥७९॥
अध्वर्युश्च पठन् शतरुद्रीयं घृतधारया ।
अर्कक्षीरधारया च हवनं शंभवे ददौ ॥८०॥
रुद्रादिभ्यः समेतेभ्यो देवेभ्यो हवनं ददौ ।
पुष्पाञ्जलिर्महापूर्णाहुतिर्होमोऽभवत्ततः ॥८१॥
मन्दिरे देवतानां च दर्शनं च निवेदनम् ।
अभवच्च ततो महादक्षिणा सम्प्रदानकम् ॥८२॥
भोजनान्यभवंश्चापि सर्वेषां मखवर्तिनाम् ।
महीमानस्वागतं चाऽवभृथं च ततोऽभवत् ॥८३॥
इत्येवं राधिके वैवस्वतो मनुर्हि शंकरम् ।
शेषं पतञ्जलिं संकर्षणमीशानमित्यपि ॥८४॥
मन्दिरे नूतने प्रतिष्ठापयामास सोत्सवम् ।
अश्वपट्टसरःपूर्वदिशायां पावनी स्थली ॥८५॥

अर्कायनी महादिव्या शेषस्थली ततोऽभवत् ।
अश्वपट्टसरस्येव तीर्थं पातञ्जलं परम् ॥८६॥
चामसं तीर्थमेवाऽपि शेषतीर्थं तथा महत् ।
सांकर्षणं परं तीर्थं शतरुद्रीयतीर्थकम् ॥८७॥
आवभृथं महत्तीर्थं शंभुतीर्थं सुखप्रदम् ।
वैवस्वतं तथा तीर्थमित्येवमादिकानि च ॥८८॥
तीर्थानि चाभवन् मुक्तिमुक्तिप्रदानि सर्वदा ।
सुप्रख्यातानि जातानि त्वश्वपट्टसरोवरे ॥८९॥
गणाः स्नाता यत्र यत्र गणतीर्थानि तानि तु ।
गणेशतीर्थमेवापि स्कन्दतीर्थं तथाऽभवत् ॥९०॥
नागतीर्थं तथा तत्र पार्षदतीर्थमित्यपि ।
सतीतीर्थं च देविकासुतीर्थं पावनं ह्यभूत् ॥९१॥
इत्येवं राधिके पूर्वदिग्भागे तीर्थमण्डलम् ।
समुद्भूतं शेषयोगात् सर्वसिद्धिप्रदं शुभम् ॥९२॥
यत्र स्नानाज्जलपानादाचमनादपि स्पृशेः ।
योगस्य फलदं तीर्थं चात्मप्राप्तिकरं ह्यभूत् ॥९३॥
तत्र दानाद्भवेत्प्राप्तिर्नित्यकैलासकस्य वै ।
तत्र दीक्षाग्रहणाच्च वैकुण्ठवासमृच्छति ॥९४॥
तत्र यज्ञविधानाच्च स्वर्गं वै शाश्वतं लभेत् ।
तत्र मूर्तेः प्रतिष्ठानाद्धाम सांकर्षणं लभेत् ॥९५॥
तत्र नित्यनिवासाच्च महाकालभयं न वै ।
तत्र व्रतादिकरणात् फलं त्वनन्तकं भवेत् ॥९६॥
यतीनां योगिनीनां च वैष्णवानां विशेषतः ।
वृत्तिदानाद् भवेन्मुक्तिः शाश्वती ब्रह्मयायिनी ॥९७॥
राधिके रजसा तस्य स्नानेन पापनाशनम् ।
तत्प्रदेशे मृतानां च तिरश्चां देवजनुर्मतम् ॥९८॥
पतञ्जले हर शंभो रुद्र संकर्षण प्रभो ।
मनो शेष चमस प्रकुर्वन्तु मम मंगलम् ॥९९॥
इत्युक्त्वा प्रस्वपेद् रात्रौ दुष्टस्वप्नं न जायते ।
तान् स्मृत्वा व्यवहरेद् यस्तस्य लाभः पदे पदे ॥१००॥
प्रातस्तान् संविचिन्त्यैव क्रयविक्रयवस्तुषु ।
हस्तं दत्वाऽऽचरेत् पण्यं लाभस्तस्य क्षणे क्षणे ॥१०१॥
अन्नपूर्णा सती देवी पार्वती शेषिणी शिवा ।
सांकर्षणी योगिनी च कुर्वन्तु मम मंगलम् ॥१०२॥
इत्युक्त्वा व्यवहरेत् स्त्री कुमारी युवती च वा ।
सुवासिनी वा विधवा तस्य लाभः क्षणे क्षणे ॥१०३॥
दुःखदारिद्र्यनाशश्च पूर्णकामत्वमित्यपि ।
सुखसम्पद्यशोवृद्धिर्जायते तत्कृपालवात् ॥१०४॥
पठनाच्छ्रवणाच्चाऽस्य श्रावणान्मननादपि ।
सर्वपापविनाशश्च मुक्तिर्मुक्तिश्च राधिके ॥१०५॥
मानसेष्टप्रलाभश्च मायानाशोऽपि सत्वरम् ।
आत्मसिद्धिः प्रजायेत संकर्षणकृपावशात् ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पतञ्जलिचमसयोगेऽश्वपट्टसरसः पूर्वे तटे वैवस्वतकृतं संकर्षणपतञ्जलिशेषादिमन्दिरं जले च संकर्षण-शेषादितीर्थंजातमित्यादिनिरूपणनामैकचत्वारिंश-दधिकद्विशततमोऽध्यायः ॥ २४१ ॥

श्रीकृष्ण उवाच—

शृणु राधे कथां त्वन्यां पावनीं परमाऽद्भुताम् ।
आक्षरे परमे क्षेत्रे जातां चातिपुरातनीम् ॥ १ ॥
पंकिलो नाम ब्रह्मर्षिः पञ्चकल्पायुराभवत् ।
तस्य माताऽभवत् साध्वी दासी महर्षिसेविका ॥ २ ॥
कुमारी व्यचरच्चार्षे मण्डले मृतपितृका ।
आबाल्यादप्यनाथा चाऽबान्धवा मृतमातृका ॥ ३ ॥
ब्राह्मणी ब्रह्मवेत्री च महर्षिलब्धबोधिका ।
आत्मनिष्ठापरा योगेश्वरी समाधिसद्घना ॥ ४ ॥
सांख्ययोगाश्रया चात्मजडविवेकशेवधिः ।
समदुःखसुखा वृद्धसेवाधर्मपरायणा ॥ ५ ॥
मनसा वचसा साध्वी कायेन च गुणैरपि ।
प्रयत्नेन च दानेन ऋषिसेवापरायणा ॥ ६ ॥
आसीदेवमहाज्ञानानलदग्धाशया सती ।
द्वन्द्वाऽभिन्ना सदा ध्यात्री श्रीमन्नारायणस्य च ॥ ७ ॥
एवंविधा सा प्रमदा युवती समजायत ।
रजोभावविहीना च कामसंकल्पवर्जिता ॥ ८ ॥
ब्रह्मचर्यपरा साध्वी ऋषिभिक्षाऽदना शुभा ।
यस्या वस्त्रं तु पवनेऽम्बरे शुष्कायते सदा ॥ ९ ॥
यस्य भिक्षाजोलिका चाम्बरे वायुं प्रलम्बते ।
एतादृशी चमत्कारसिद्धिरूपाऽभवद्धि सा ॥१०॥
अश्रृणोत् सा कथां दिव्यां महर्षिजनसंसदि ।
सत्याः कथा गणेशस्य पुत्रबोधां समाश्रृणोत् ॥११॥
ब्रह्मणो मानसा जाताः सनकाद्याश्च तत्कथाम् ।
अश्रृणोदञ्जनीपुत्रकथां दिव्यां च पावनीम् ॥१२॥
ततः सापि पुत्रवतीकथाः श्रुत्वाऽविचारयत् ।
ममापि मानसः पुत्रो भवत्वेको गुणालयः ॥१३॥
पुत्रवतीसभामध्ये मानपात्रं भवामि यत् ।
पुत्रफलं निजं स्याद्धै योषितामवलम्बनम् ॥१४॥

मया भागवतः पुत्रः प्राप्तव्यश्चेत्यचिन्तयत् ।
पूर्वकल्पे चतुर्थे सा त्रेतायां वामदेवतः ॥१५॥
ऋषेः संस्पर्शमात्रेण मानसं पुत्रमाप ह ।
अगर्भो जातमात्रः स बालो युवाऽतिरूपवान् ॥१६॥
ज्ञानविज्ञानसम्पन्नो ब्रह्मचिन्तापरायणः ।
व्योममार्गे चरन्नित्यं चतुर्धाम्प्लवक्रियः ॥१७॥
चतुर्धाममहातीर्थविध्युत्तराऽदनस्तथा ।
समर्थो मातृवज्जातः पितृवत् सिद्धिमाँस्तथा ॥१८॥
वामदेवीयसवनप्रणेता दिव्यशक्तिमान् ।
दाक्षीदेवीं मातरं च पितरं वामदेवकम् ॥१९॥
हृदये बाह्यतश्चापि नित्यं प्रपूज्य वै ततः ।
नित्यं वन्यफलाद्यर्थं वने याति समुत्सुकः ॥२०॥
समित्फलानि पुष्पाणि चाहृत्य गांगवारिषु ।
पंके निजासनं कृत्वा समाधौ याति वै निशि ॥२१॥
पंकिलस्तेन नाम्ना स दाक्षीदेव्या प्रकीर्त्यते ।
पंकिलो नाम विप्रर्षिः प्रसिद्धः समजायत ॥२२॥
एकदा पंकमध्ये स दिवसेऽपि निजासनम् ।
कृत्वा समाधिमापन्नः प्राणरोधेन निश्चलः ॥२३॥
तत्राऽऽयाताः पञ्च सत्यो यदृच्छया नदीतटे ।
साध्व्यो ब्रह्मपराः शीलव्रता नारायणीसमाः ॥२४॥
योगीन्द्राण्यो वामदेवशिष्याः सिद्धिसमाश्रयाः ।
आपस्तम्बी द्रुमस्तम्बी मरुस्तम्बी तृतीयका ॥२५॥
फेनस्तम्बी चतुर्थी च धूम्रस्तम्बी च पञ्चमी ।
गंगाजले तु ताः स्नात्वा तटे तस्थुः क्षणं हि ताः ॥२६॥
मध्याह्ने पंकिलं पंके दृष्टवत्यः कुमारकम् ।
उज्ज्वलं ब्रह्मनिष्ठं च सूर्यवर्त्तुलमेव तम् ॥२७॥
ध्यानमग्नं दिव्यरूपं योगिनं वामदेवजम् ।
भगिन्यस्ता द्रुतं पार्श्वे गत्वा नेमुश्च तं मुनिम् ॥२८॥
मुनिश्चापि समाधौ ता वीक्ष्य निजासनान्तिके ।
बहिः शीघ्रं समागत्याऽऽसनं ददौ ननाम च ॥२९॥
भगिन्यो ब्रह्मवेत्र्यः स्थाऽग्रजा वन्दे मुहुर्मुहुः ।
इत्युक्त्वा पादयोस्तासां दत्वा चक्षुश्च मस्तकम् ॥३०॥
पादधूलीर्भगिनीनां मस्तके स मुनिर्न्यधात् ।
स्वागतार्थं द्रुतं संकल्पयामासाऽऽसनानि च ॥३१॥
तावत्तत्र समायातान्यासनान्यजिनानि वै ।
पाद्यार्थं च प्रसस्मार जलं कमण्डलुभृतम् ॥३२॥
उपस्थितं च तत्ततः सस्मार मधुपर्ककम् ।
मिष्टं चेष्टं मधु मिष्टफलानि शर्करादिकम् ॥३३॥
उपस्थितो मधुपर्को ददौ ताभ्यस्तु तं तदा ।
पूजाद्रव्याणि सर्वाणि चागतानि स्मृतेस्तदा ॥३४॥
पंकिलः पूजयामास भगिनीः सर्ववस्तुभिः ।
भोजनं प्रददौ रम्यं पक्वमिष्टकलात्मकम् ॥३५॥
सुधामिष्टं जलं चापि पानार्थं प्रददौ तदा ।
वल्कलानि सुरम्याणि शाट्यर्थं कञ्चुकीकृते ॥३६॥
तापसीनां सुयोग्यानि कंकणानि ददौ तथा ।
आशीर्वादाँस्तथा तासां ययाचेऽपि प्रसन्नताम् ॥३७॥
कृतातिथ्याश्च तास्तुष्टा भ्रात्रे ददुः शुभाशिषः ।
एका प्राह तदा भ्रातः! कल्पजीवी सुखी भव ॥३८॥
द्वितीयाऽपि तथा प्राह कल्पजीवी सुखी भव ।
तृतीयाऽपि चतुर्थी च पञ्चम्यपि च वै तथा ॥३९॥
प्राहुः प्रसन्नहृदयाः कल्पजीवी सुखी भव ।
स्वसॄणां स शुभाशीर्भिः पञ्चकल्पप्रजीवनः ॥४०॥
पंकिलर्षिः समभवद् राधिके स्वसृपूजनात् ।
एवं स पञ्चकल्पायुर्धर्मज्ञानविरागवान् ॥४१॥
ब्रह्मभक्तिपरो लोके यथेष्टं वर्तते ऋषिः ।
क्वचिद् याति सत्यलोकं वैकुण्ठं बदरीं तथा ॥४२॥
श्वेतद्वीपं तथा स्वर्गं याम्यलोकं प्रयाति च ।
ऐन्द्रं लोकं सूर्यलोकं पितृलोकं प्रयाति च ॥४३॥
क्वचिन्मेरुं क्वचिल्लोकालोकाख्यभूधरं प्रति ।
क्वचित्सप्तर्षिलोकं च ध्रुवलोकं क्वचित् क्वचित् ॥४४॥
याति चान्द्रं शीतलोकं क्वचित्पातालमित्यपि ।
यथेष्टं पंकिलः सोऽयं विहरत्येव योगिराट् ॥४५॥
क्वचित्समाधावेवाऽयं वर्षायुतं प्रतिष्ठति ।
क्वचिद्भूमौ क्वचिद्वार्धौ वज्रतुल्यशरीरभृत् ॥४६॥
क्वचिद् वह्नौ क्वचिद् वायौ क्वचित्तिष्ठति चाम्बरे ।
ब्रह्मवद् ब्रह्मगतिकः स्वसृमातृप्रसेवनात् ॥४७॥
पितृबलाद् योगबलादव्याहतगतिर्ह्यभूत् ।
अनेककायरूपश्च लीनकायो भवत्यपि ॥४८॥
सूर्यवत्तु क्वचिद् भाति चाम्बरेऽपि भुवि क्वचित् ।
क्वचिद् देवस्वरूपश्च क्वचिन्मानवरूपवान् ॥४९॥
क्वचिच्छुकस्वरूपश्च क्वचिद् वृषभरूपवान् ।
क्वचिन्मृगस्वरूपश्च क्वचिद्धंसस्वरूपवान् ॥५०॥
क्वचित्पर्वततुल्यश्च क्वचित्कणस्वरूपवान् ।
एवं स्वतन्त्रविधिवान् ब्रह्मनिष्ठो हि पंकिलः ॥५१॥
वामदेवसमश्चास्ते समस्तैश्वर्यशेवधिः ।
स चास्मिन् तस्य वै कल्पे पञ्चमे प्रातरेव ह ॥५२॥

विचरन् व्योममार्गेण ददर्शाऽश्वसरोवरम् ।
विशालं निर्मलजलं शान्तवारि महोज्ज्वलम् ॥५३॥
चन्द्रवद्भासमानं च नैकपद्मसुशोभितम् ।
राजहंसै राजशुकैर्मैनाभिर्मिष्टशब्दितम् ॥५४॥
भव्यसेतुचतुःशोभं पाताळाऽगाधवारिभृत् ।
क्षीरसरस्वतीतीर्थं ब्रह्मपादोदकीमयम् ॥५५॥
फलपुष्पमहोद्यानैः समन्ततो विराजितम् ।
देवदेवैः कृतावासं महर्षिगणसेवितम् ॥५६॥
ब्रह्मप्रियाभिः सततं स्नानाप्लवैः सुपावितम् ।
दिव्यसोपानघाटेश्च स्नानाऽवतरणैर्युतम् ॥५७॥
तापसनां सन्निवेशैर्वटाद्यैश्छायितं तटे ।
पानीयहारिकाभिश्च विश्वग् विराजितं महत् ॥५८॥
कुंकुमवापिकापुर्या पश्चिमेऽक्षरसन्निभम् ।
दक्षिणे तु महर्षीणामाश्रमैर्बहुपावनम् ॥५९॥
उत्तरे शिवतत्त्वानां क्षेत्रपाणां निवासनैः ।
दिव्यसौधैः शोभितं च पूर्वे साधुसतीश्रितम् ६०॥
योगिभिर्यतिभिश्चापि विरागैस्त्यागिभिस्तथा ।
न्यासिभिः सततं व्याप्तं ददर्शाऽश्वसरोवरम् ॥६१॥
ददर्श हेमकलशैर्मन्दिराणि महान्ति च ।
समन्ततः सुवर्णाढ्यान् देवालयान् ददर्श ह ॥६२॥
शुश्राव वाद्यनादाँश्च शंखशब्दान् स्तवाँस्तथा ।
गीतिका अप्सरसां च साधूनां स्तुतिवैभवान् ॥६३॥
श्रुत्वा वीक्ष्य समस्तं च व्यस्तं व्योम्ना यथाबलम् ।
अवातरत् ततो व्योम्नः पंकिलोऽश्वसरोवरे ॥६४॥
जलं पीत्वा तथा स्नात्वा परां शान्तिं जगाम ह ।
स्मरन्नारायणं श्रीमद्बालकृष्णं परेश्वरम् ॥६५॥
राधिके पंकिलः सोऽयं जले बासमरोचयत् ।
बहिः सर्वत्र लोकानां सम्मर्दशंकया खलु ॥६६॥
दिवा जले तले चास्ते रात्रौ सेतुं श्रयत्यपि ।
तापसानां निवासेषु यथेष्टं च भ्रमत्यपि ॥६७॥
महर्ष्याश्रमभागेषु सायं भ्रमति वा क्वचित् ।
प्रातर्नित्यं बालकृष्णं गत्वाऽऽलयेऽर्चयत्यपि ॥६८॥
क्वचित् स मनसा याति सोमनाथं सुपावनम् ।
क्वचित् स सहसा मूलद्वारिकां याति वर्ष्मणा ॥६९॥
क्वचित् कन्या स्वयं भूत्वा ब्रह्मप्रियासु तिष्ठति ।
क्वचित् कुमारको भूत्वा चास्ते गोपालबालकैः ॥७०॥
एवं स मुनिराड् राधे ! ह्यश्वपट्टसरोवरे ।
नित्यं वासं प्राचरद्व बालकृष्णाश्रये शुभे ॥७१॥
अथैकदा मुनिः श्रीमान् लोमशस्तं व्यलोकयत् ।
कन्यारूपं धृतवन्तं निजाश्रमे समागतम् ॥७२॥
प्राह का त्वं कुतश्चात्राऽऽयाताऽसि वद कन्यके ।
स चाह पंकिला त्वस्मि दाक्षीदेवीसुताऽस्मि हि ॥७३॥
कन्यकानां दर्शनार्थं त्वागताऽस्मि तवाऽऽश्रमे ।
वामदेवी भवाम्येव कालेऽन्यदा तु पंकिलः ॥७४॥
इत्युक्त्वा कन्यकारूपं विहाय पंकिलोऽभवत् ।
लोमशोऽपि विदित्वैनं प्राक्परिचितमेव तु ॥७५॥
मिमील हृदये कृत्वा सुसम्मानं व्यधात्तदा ।
प्राप्य मन्त्रं हरेः सोऽपि पंकिलो लोमशान्मुनेः ॥७६॥
'ओं नमः श्रीकृष्णनारायणायेति' जजाप ह ।
नत्वा ययौ जलगर्भे निवासं च जलेऽकरोत् ॥७७॥
अथ द्वितीयदिवसे लोमशस्तं समागतम् ।
प्राह वै पर्णकुट्यर्थं तत्राऽऽह पंकिलो मुनिः ॥७८॥
आसायं मे जीवनं वै कल्पोऽयं पञ्चमो मम ।
व्यत्येति ब्रह्मणोऽहश्च तत्र का पर्णशालिका ॥७९॥
तस्माज्जले निवत्स्येऽहं पंके निश्चिन्तने गृहे ।
इदानीं यावदेवात्र क्वापि लोकेऽपि वै मया ॥८०॥
पर्णशाला कृता नैव चान्ते कार्यापि नैव तु ।
स्वल्पकालेऽवशिष्टे चेत् करोमि पर्णशालिकाम् ॥८१॥
हसेयुर्माम् ऋषयस्ते चिरकल्पप्रजीविनः ।
इत्युक्त्वा नित्यमेवाऽयं जले वासमरोचयत् ॥८२॥
मानसं श्रीहरौ धृत्वा जले समाधिमास्तवान् ।
समाधौ वसतस्तस्य युगकालो ह्यगाद् यदा ॥८३॥
तदा राजा बलिर्लोके बलवान् वामनेन वै ।
प्रकटीभूय यज्ञे सौराष्ट्रेऽर्थितो भुवं प्रति ॥८४॥
बलिः प्रददौ पृथिवीं वामनाय तु छत्रिणे ।
वामनः कपटी कृष्णो वर्धयामास वर्ष्म च ॥८५॥
पादांगुष्ठांगुलयश्च तस्याश्वसारसे जले ।
न्यपतँस्तत्प्रतापेन सरोभूमिरपूर्यत ॥८६॥
जलान्यपासरन् शीघ्रं पार्श्वपृथ्व्यां तदाऽभितः ।
वरुणस्तज्जलानां वै शमनं प्रचकार ह ॥८७॥
पंकिलो निर्गतः पंकाज्जलरिक्ते सरोवरे ।
वामनांगुष्ठसंलग्नो बभूव लिक्षिका यथा ॥८८॥
सोऽपि निर्गत्य सरसाऽङ्गुष्ठं तुष्टाव वै क्षणम् ।
तावत् त्रिलोकान् जित्वैव वामनो बालरूपधृक् ॥८९॥
अभवत् तं प्रवीक्ष्यैव पंकिलः प्रेमहर्षितः ।
पुनर्जलाढ्यसरसि यावदिच्छति मज्जनम् ॥९०॥

तावच्छ्रीवामनः प्राह कुरु मे मन्दिरं शुभम् ।
सेतौ च वामनं मां त्वं प्रतिष्ठापय संवस ॥९१॥
ममाज्ञया सेवको मे भूत्वा मे मन्दिरे वस ।
इत्याज्ञाप्य ययौ वस्त्रापथं श्रीवामनः प्रभुः ॥९२॥
पंकिलो योगसामर्थ्यैः रात्रौ चकार मन्दिरम् ।
तत्र श्रीवामनं देवं स्थापयामास शोभनम् ॥९३॥
पंकिलं स्थापयामास सेवायां वामनस्य हि ।
सेवार्थं पंकिलः शिष्यं प्रकल्प्य जालकीलकम् ॥९४॥
तत्राऽदृश्योऽभवन्नित्यं वामनस्यालये मुनिः ।
चिरञ्जीवो जालकीलायाऽऽर्पयत् कालपर्यये ॥९५॥
योगसिद्धीर्हि विविधा जालकीलोऽपि योगिराट् ।
अभवद् ब्रह्मकल्पायुर्जालेश्वरो द्विजो हि सः ॥९६॥
अश्वपट्टसरस्तीरे वासं सोऽपि सदा व्यधात् ।
एवं तद् राधिके तीर्थं जालेश्वरं च पांकिलम् ॥९७॥
वामनं तीर्थमेवापि चांगुष्ठतीर्थमित्यपि ।
कन्यकातीर्थमेवापि चाश्वपट्टसरोजले ॥९८॥
अभवन्मोक्षदं पापप्रणाशकं सुखप्रदम् ।
योगसिद्धिप्रदं स्मृद्धिप्रदं स्वर्गप्रदं तथा ॥९९॥
तत्र स्नानात्तथा दानाद् वामनस्याऽर्चनात्तथा ।
स्वर्गराज्यं पारमेष्ठ्यं भूराज्यं वा लभेज्जनः ॥१००॥
कांभरेयं बालकृष्णं स्मृत्वाऽनादिनरायणम् ।
यः स्नायाद् वामने तीर्थे ब्रह्मधामगतिं व्रजेत् ॥१०१॥
वामनं पंकिलं स्मृत्वा स्नानदानादिकं चरेत् ।
दाक्षीदेवीं तथा स्मृत्वा कन्यादानादिकं चरेत् ॥१०२॥
कन्यकाभ्यो भोजनं च दद्यात् सद्भ्योऽपि भोजनम् ।
साध्वीभ्यो भोजनं दद्याद् राजसूयफलं लभेत् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने दाक्षीदेवीवामदेवयोर्मानसपुत्रस्य पंकिलस्य ज्येष्ठपञ्चभगिनीसत्कारलभ्याऽऽशीर्वादैः पञ्चकल्पचिरजीवित्वं युगपर्यन्तमश्वपट्टसरोवरे समाधौ स्थित्युत्तरं वामनपादांगुष्ठांगुलिस्पर्शेन जाग्रता तेन वामनमन्दिरमाज्ञया कारितं वामनादितीर्थे चेत्यादिनिरूपणनामा द्वाचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४२ ॥

श्रीकृष्ण उवाच—

श्रूयतां च त्वया राधे वामदेवस्य कन्यकाः ।
पञ्च विज्ञाय वै भ्रातुर्वासं त्वश्वपट्टसरोवरे ॥ १ ॥
मातरं दिव्यमुक्तानीं सत्यलोके स्थितां सदा ।
पृष्ट्वा समाययुः सर्वाश्चाऽश्वपट्टसरोवरम् ॥ २ ॥
अनादिश्रीकृष्णनारायणं श्रीकृष्णवल्लभम् ।
द्रष्टुं च वरितुं चापि लब्धुं च कृतकृत्यताम् ॥ ३ ॥
दिव्यदेहाः कौमुदिका यथा चान्द्रयस्तथाविधाः ।
कृतश्रृंगारसर्वस्वा नारायणस्य तुष्टये ॥ ४ ॥
मायांशवर्जिताश्चापि परब्रह्मांशमोहिताः ।
व्योममार्गेण सहसा चिरंजीव्यः समाययुः ॥ ५ ॥
मार्गशीर्षस्य वै षष्ठ्यां कृष्णे दलेऽक्षरक्षितौ ।
आगत्य भ्रातरं नैजं नेमुश्च वामनं प्रभुम् ।
पुपूजुः परया प्रीत्या भ्राता स्वागतमाचरत् ॥ ६ ॥
मात्राज्ञां चानुज्ञायापि कथयामासुरेव ताः ।
भ्राता प्रसन्नतां प्राप्तो भगिन्यो यद्धरिप्रियाः ॥ ७ ॥
यासां प्रसादतो जाता पञ्चकल्पान्तजीविता ।
तासां नारायणीत्वं वै श्रुत्वा मुमोद चाति हि ॥ ८ ॥
सप्तम्यां प्रातरेवैताः कृत्वा श्रृंगारशोभनाम् ।
मात्रा समं ययुः श्रीमद्बालकृष्णालयं प्रगे ॥ ९ ॥
सपूजाद्रव्यहस्ताश्च वरमालान्वितास्तथा ।
सर्वस्वार्पणभावाश्च कृष्णवल्लभसन्निधौ ॥१०॥
तत्र स्थितां मातरं श्रीकम्भरां प्रथमं तु ताः ।
पुपूजुः परया प्रीत्या ददुः परिचयं निजम् ॥११॥
पितरं चापि नत्वैव स्वसारं चाग्रजावपि ।
अमृतां भ्रातृपत्नीं च ततो नारायणं मुहुः ॥१२॥
नत्वा नत्वा पूजनं संप्रचक्रुर्बहुवस्तुभिः ।
भ्रात्रा निवेदितास्तास्तु सर्वस्वार्पणमागताः ॥१३॥
हरिर्भावं विलोक्यैव तथास्त्विति समग्रहीत् ।
भ्रात्रा पंकिलमुनिना तासां करा हरेः हरे ॥१४॥
अर्पिताः श्रीहरिः प्रेम्णा करान् जग्राह वै तदा ।
आपस्तम्बी प्रथमा च द्रुमस्तम्बी द्वितीयका ॥१५॥
मरुस्तम्बी तृतीया च फेनस्तम्बी चतुर्थिका ।
धूम्रस्तम्बी पञ्चमीति पत्न्योऽभवन् हरेः प्रियाः ॥१६॥
पूजयित्वा निजं कान्तं वरमाला ददुर्गले ।
हरिः पार्श्वे निजे ताश्च निषाद्य वरमालिकाः ॥१७॥
तासां कण्ठेष्वधात्तत्र प्रसादं प्रददौ ततः ।
ताश्च भुक्त्वा सह भ्रात्रा लोमशस्याऽऽश्रमं ययुः ॥१८॥
निदेशतो हरेः राधे ब्रह्मप्रियासु चाऽवसन् ।
इत्येवं प्राप्य राधेशं राधावत् ताः सदाऽभवन् ॥१९॥
अथाऽन्यत्पावनं रम्यं प्रिये श्रृणु कथानकम् ।
स्वर्णांगदस्य राज्ञो वै सौराष्ट्रीयस्य वंशजः ॥२०॥

हैमकलिंगनामवाँश्च राजाऽभूद् धर्मवर्मवान् ।
अनादिश्रीकृष्णनारायणभक्तो हि सात्त्वतः ॥२१॥
भजते श्रीपतिं नित्यं क्रियास्वपि दिवानिशम् ।
मालां न दूरमाधत्ते स्मरणं न त्यजत्यपि ॥२२॥
भोजने शयने कृष्णं हृदये संप्ररक्षति ।
बालकृष्णेति कृष्णेति हरिकृष्णेति वै मुहुः ॥२३॥
अनादिश्रीकृष्णनारायणेत्याह दिवानिशम् ।
वाक्यान्ते बालकृष्णेति कांभरेयेति सर्वदा ॥२४॥
प्रवक्ष्येवेति रटणं करोति परमात्मनः ।
तस्य पूजनवेलायां यत्र क्वापि गृहे वने ॥२५॥
सरस्तटे समुद्याने मण्डपे मन्दिरेऽथवा ।
निर्जने सजने मर्दे रहो वा प्रेमबन्धनः ॥२६॥
बालकृष्णो हि साक्षाद्वै गत्वा तिष्ठति चाग्रतः ।
गृह्णात्येवाऽर्पितद्रव्याण्यखिलानि प्रपूजने ॥२७॥
नैवेद्यं च फलं खाद्यं पायसाद्यं च पूरिकाः ।
सर्वं भुक्त्वा बालकृष्णः शेषं ददाति भूभृते ॥२८॥
ततस्तिरोभवत्येव राजा गृह्णाति भोजनम् ।
इत्येवं हैमकल्गेर्वा भक्त्या श्रीपतिरीश्वरः ॥२९॥
वशस्तस्य वर्तते स्म राधिके सुप्रसादितः ।
राज्ञी तस्य कुमुदाक्षीनाम्नी तथैव वर्तते ॥३०॥
सापि शीघ्रं समुत्थाय स्नात्वाऽन्नं मिष्टमुत्तमम् ।
पाचयत्येव भक्त्याढ्या बालकृष्णस्य तुष्टये ॥३१॥
पायसान्नं गवां क्षीरं सशर्करं सहौदनम् ।
पूरिका घृतपक्वाश्च तथाऽन्यद् ऋतुसम्मतम् ॥३२॥
गुन्द्रपक्वान्नमेवापि लड्डुकान् माषपिष्टजान् ।
कृत्वा ददाति प्रातर्वै राज्ञे पूजानिवेदने ॥३३॥
ताम्बूलकं जलं मिष्टं मधुरं शीतमुष्णकम् ।
यथाकालं ददात्येवाऽभ्यंगद्रव्याणि यानि च ॥३४॥
नित्यं सा गायति सौधे सखीमध्ये सुकीर्तनम् ।
सख्यस्तामनुगायन्ति तालीवाद्ययुताः सह ॥३५॥
श्रीबालकृष्णो जनसौख्यकारी श्रीकांभरेयो जनपापहारी ।
राजाधिराजो मम भाग्यधारी गोपालबालो जयते मुरारिः ॥३६॥
राधाविहारी भवभीतिहारी गोपीविचारी मम भोज्यकारी ।
स्नेहप्रसारी निजभक्ततारी नारीजनाऽऽर्तिक्षपणप्रकारी ॥३७॥
चक्षुःप्रकाशी हृदयाभिकाशी विज्ञानवासी बहुधामवासी ।
मायाविपाशी निजभक्तदाशी सेवाभिलाषिप्रसरत्प्रकाशी ॥३८॥
भक्तैर्विकासी निजरूपवासी लोकेऽस्युदासी वदतीति दासी ।
सा पालनीया सततप्रवासी गृहाभिवासी भव मेऽन्तरासी॥३९॥

इत्येवं राधिके नित्यं राज्ञी सखीसमायुता ।
गायत्येवाऽर्थयत्येव गुणान् गुणिनमेव तम् ॥४०॥
बालकृष्णोऽपि तच्छ्रुत्वा जायते तुष्टमानसः ।
एवं काले गते कृष्णो ददौ वर्मभयच्छिदम् ॥४१॥
यद् धृत्वा निर्भयश्चास्ते राजा राज्ञीयुतः सदा ।
महाकालोऽपि तद्वर्म दृष्ट्वा प्रयाति दूरतः ॥४२॥
योगसिद्धिप्रबन्धं तन्मध्यकौस्तुभराजितम् ।
परितः प्रान्तभागेषु चाष्टैश्वर्यसमन्वितम् ॥४३॥
मस्तके वर्मणो यस्य राजते तु सुदर्शनम् ।
स्कन्धे गदा च कुक्षौ तु पाशो यस्य विराजते ॥४४॥
एतादृशं सुवर्णातिसुवर्णं तैजसं मृदु ।
क्रूरं च रक्षणे सौम्यं दर्शने धारणे लघु ॥४५॥
वर्म वस्त्रस्वरूपं वै बालकृष्णेन चार्पितम् ।
राजा दधार तद्वर्म नैरन्तर्येण कञ्चुकम् ॥४६॥
यस्माज्जरा प्रयात्येव दूरं दण्डो यमस्य च ।
संकर्षणस्य संहारो दूरं यात्यपि वर्मतः ॥४७॥
पाशो वरुणदेवस्य भयं प्राप्नोति वर्मणः ।
कवचाच्छंकरगणा वेपन्ते मार्गगा अपि ॥४८॥
मृत्युर्मृत्युपदं याति यदि वर्मपथं गतः ।
तादृशं बालसामर्थ्ययुतं तु कवचं हि तत् ॥४९॥
राधिके नृपतिर्धृत्वा मुक्तवन्मोदते भुवि ।
यस्य कृष्णः स्वयं पार्श्वे का भीतिर्वद राधिके ॥५०॥
यस्य नारायणः पार्श्वे का भीतिर्वद भामिनि ।
राधिकेव रमेवाऽयं निर्भीको नृपतिर्वने ॥५१॥
अरण्ये विहरत्येव भजन् कृष्णनरायणम् ।
अथ राजा ययौ व्याघ्रारण्ये विहर्तुकाम्यया ॥५२॥
सिंहारण्यं ततश्चापि ययौ व्योम्ना विमानगः ।
प्रययौ दण्डकारण्यं धर्मारण्यं ततो ययौ ॥५३॥
नैमिषारण्यकं चापि माहेन्द्रारण्यमित्यपि ।
एवं विहृत्य वै राज्ञ्या साकं सौराष्ट्रकं ययौ ॥५४॥
तद्विमानं महत् क्षात्रतेजोभृतं विलोक्य तु ।
पर्शुरामः क्षत्रहन्ता चकम्पे कालनोदितः ॥५५॥
महेन्द्रपर्वताच्छीघ्रं गृहीत्वा परशुं निजम् ।
धनुर्धृत्वा शराँश्चापि खड्गं धृत्वाऽतिरोषवान् ॥५६॥
निपपात विमानस्य पृष्ठे व्योम्ना स सत्वरम् ।
महातेजःप्रगोलो वै पृष्ठे त्वायाति शीघ्रगः ॥५७॥
राजा नैतत्प्रजानाति निर्भयो हि विमानगः ।
प्रजानां हृदयेष्वासीत् क्षोभोऽनिलेऽन्तरीक्षके ॥५८॥

ग्रहचक्रं तदाक्षुब्धं चासीत् भाविभयंकरम् ।
चकम्पे पृथिवी चापि तदा तेजोद्वयाऽसहा ॥५९॥
सम्पाते प्रलयो भावी तेजसोरविनाशिनोः ।
एवं त्रेसुस्तदा देवा दिव्यनेत्राश्च योगिनः ॥६०॥
महर्षयोऽतिसंविग्नास्तदासन् भाविभीतितः ।
दिक्पालाः क्षेत्रपालाद्याः क्षयं लोकस्य मेनिरे ॥६१॥
प्रतुष्टुवुस्तदा सिद्धा विष्णुं नारायणं प्रभुम् ।
मा भूद्वै जगतां नाशः पर्शुवर्मसमागमे ॥६२॥
अथ राज्ञो विमानं तु मनोवेगं क्षणाद् द्रुतम् ।
अश्वपट्टसरस्तीरं समायातमवातरत् ॥६३॥

राजा चक्रे जलपानं बालकृष्णं मुदा स्मरन् ।
राज्ञी पानं प्रचक्रेऽपि पाययित्वा निजं प्रभुम् ॥६४॥
तावदाकाशमार्गेण सूर्यवत् क्रूरगोलकः ।
तेजोमयो रक्तवर्णः सत्वरं समवातरत् ॥६५॥
पृथिवी चुक्षुभे वारि सरसश्चुक्षुभे तदा ।
भयं तु मेनिरे तीर्थवासिनः कष्टमागतम् ॥६६॥
तर्कयन्ति व्योममार्गे दृष्ट्वा परशुगोलकम् ।
ग्रहो वा क्षुभितश्चायं भ्रष्टो वा स्थानतो निजात् ॥६७॥
सूर्यखण्डोऽथवाऽऽयाति वह्निज्वालासमन्वितः ।
यद्वा वह्निः स्वयं चास्ते किं वा कोपसमन्वितः ॥६८॥

किंवा संकर्षणो देवः शेषो वाऽऽयाति रोषवान् ।
ब्रह्मास्त्रं च वा क्षिप्तं केनचिदप्यवारितम् ॥६९॥
लोकानामपुनर्भावायाऽऽयात्यत्र तु वा किमु ।
यद्वा वै वाडवश्चाग्निः समुद्रादुत्थितः पुनः ॥७०॥
दग्धुं लोकान् समायाति को वाऽयं क्रूरदर्शनः ।
इत्येवं चाऽतर्कयँश्च मानसानि हि देहिनाम् ॥७१॥
तावत् सन्निधिमापन्नः स्फुटमूर्तिरदृश्यत ।
विकरालाननो हस्ते परशुभृग्जटाधरः ॥७२॥
सकच्छः सायुधश्चापि ब्रह्मसूत्रसमन्वितः ।
स्फारचक्षुःप्रदंष्ट्रौष्ठप्रान्तश्चोत्फुल्लविग्रहः ॥७३॥

कोऽयं क्षात्रकुले चास्ते जीवति पर्शुयोगिनि ।
विमानेन विनाशाय प्रच्छन्नोऽत्र प्रकाशते ॥७४॥
इत्येवं व्याहरँस्तूर्णं सरस्तटमवातरत् ।
तावल्लोकैः स विज्ञातः पर्शुरामोऽन्तकृद् द्विजः ॥७५॥
दुद्रुवुर्मानवा भीताः पशवः पक्षिणोऽपि च ।
हैमकल्गेर्विमानाग्रे पर्शुभ्रः समुपस्थितः ॥७६॥
आश्वपट्टतटे रम्ये गर्वगंजनशार्ङ्गिणः ।
बालकृष्णस्याऽऽक्षराख्ये क्षेत्रे कौपीनभूसुरः ॥७७॥

यावद् भूमौ पदं नैजं धृतवान् पर्शुधारकः ।
तावदंगुष्ठस्य नखः कंकरेण विभेदितः ॥७८॥
जातं विप्रस्य वै तच्चाऽमांगल्यं विजयार्थिनः ।
तथापि मानभावेन हन्तुं हैमं समाययौ ॥७९॥
कस्त्वं क्षत्रियदायाद मत्पर्शुक्षुत् प्रशिष्यसे ।
वद शीघ्रं प्रयुद्ध्यस्व यमलोकाभिगो भव ॥८०॥
इत्युक्तो नृपतिर्हैमः शीघ्रं क्षात्रेण तेजसा ।
विप्रस्य तु यथा न स्यादपराधो जगाद तम् ॥८१॥
विप्राः पूज्या जामदग्ने मा क्षत्रेण पराभवः ।
मा त्वं पूज्य प्रयुङ्क्ष्वाऽत्राऽस्थाने पर्शुं बलं च वा ॥८२॥

सम्भावितस्य चाऽस्थाने पराभवो गुरुर्मृतेः ।
क्षात्रोऽहं ब्राह्मणे विप्र नापराद्धुं प्रकांक्षये ॥८३॥
मा रोषं कुरु विप्रेन्द्र मा पुण्यं क्षालय द्विज ।
पूज्योऽस्यवध्य एवासि चाततायसि भूसुर ॥८४॥
तस्मात्पूजां प्रगृह्णासि क्षन्तुमर्हसि चानयम् ।
इत्युक्त्वा हैमराजो वै विप्रं पूजयितुं पुरः ॥८५॥
यावद्गच्छति राधे स तावत्पर्शुधरो द्विजः ।
हन्तुं प्रतत्परो जातो रोषतो युद्धमुद्रया ॥८६॥
हैमकल्गिद्रुतं स्मृत्वा श्रीमत्कृष्णनरायणम् ।
पर्शुभ्रं बन्धयामास सुदर्शनीयरश्मिभिः ॥८७॥

चक्रं सुदर्शनं दिव्यं श्रीहरिणाऽर्पितं तु यत् ।
तत् स्वकिरणैर्वाह्नियैर्जालं कृत्वा बबन्ध तम् ॥८८॥
पर्शुरामं सरोषं वै सायुधं सबलं क्षणात् ।
पर्शुभ्रस्तेजसा तत्र चक्रस्याऽऽवृतशक्तिकः ॥८९॥
जड इव क्षणाज्जातः पतात पृथिवीतले ।
राजा प्राह क्षमस्वाऽत्र श्रीमान् मामपराधिनम् ॥९०॥
विप्रेऽवमानकर्तारं मुञ्च क्रोधं द्रुतं व्रज ।
पर्शुभ्रः प्राह मुञ्चस्व न मे शक्तिः प्रवर्तते ॥९१॥
राजँस्तव प्रसन्नोऽस्मि वरदानं ददामि ते ।
पाशान् जालान् चक्रदेवं पूजयामि व्रजामि च ॥९२॥

द्रुतं मुञ्चस्व मां दह्यमानं चक्रस्य रश्मिभिः ।
राजा प्राह हरेर्भक्तं मा जिघांसतु वै भवान् ॥९३॥
क्षात्रं विप्रात् समुत्पन्नं भक्तं विप्रो न हन्तु तत् ।
वरं त्वेकं पालयस्वाऽपरं चात्रैव संवस ॥९४॥
अश्वपट्टसरःक्षेत्रे तिष्ठ मूर्तिस्वरूपधृक् ।
इत्युक्तः पर्शुरामो वै वरौ द्वौ प्रददौ तदा ॥९५॥
राज्ञा तु मन्दिरे पर्शुरामः संस्थापितस्ततः ।
स्नापितोऽश्वजले चापि पूजितश्चोपचारकैः ॥९६॥

राधिके तु ततस्तत्र परशुरामतीर्थकम् ।
पूर्वदिशि समभवत् हैमकलिंगप्रतीर्थकम् ॥९७॥
पर्शुरामो हरिं पूजयित्वा ययौ हि मन्दरम् ।
मूर्तिरूपस्तत्र नित्यं त्वास्तेऽश्वपट्टसागरे ॥९८॥
राजा ततो ययौ श्रीमत्कृष्णनारायणं प्रभुम् ।
पूजयित्वा हरिं नत्वा कथयित्वा ह्युदन्तकम् ॥९९॥
कृत्वा तीर्थं ययौ नैजां राजधानीं हिमावतीम् ।
अत्र तीर्थे स्नानदानाचमनैर्विजयो भवेत् ॥१००॥
पठनाच्छ्रवणाद् वाऽस्य दोषा नश्यन्ति वै हृदः ।
भुक्तिर्मुक्तिर्भवेच्चाप्यारोग्यं धनं सुतं लभेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वामदेवीयपञ्चकन्यानां श्रीकृष्णनारायणकान्तलब्धिः, हैमकलिंगनृपस्य भक्त्या हरेर्नित्यं प्रत्यक्षम्, नृपात् पर्शुरामपराभवः, अश्वपट्टसरसि परशुरामतीर्थं हैमकलिंगतीर्थं चेत्यादिनिरूपणनामा त्रिचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४३ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके चाश्वसरस्येव ततः परम् ।
मार्गकृष्णस्य चाष्टम्यां यज्ञारंभो बभूव ह ॥ १ ॥
नृपोऽश्वपाटलाख्यो वै वैष्णवस्त्वर्बुदाचलात् ।
आययौ मखकार्यार्थे लोमशं प्रति सानुगः ॥ २ ॥
गजाः शतं गृहे यस्याऽरण्यं क्षेत्राणि भूरिशः ।
राज्यं विशालं यस्यास्ते चार्बुदीयप्रदेशजम् ॥ ३ ॥
सहस्रमानवैर्युक्तः सहस्रगोवृषैस्तथा ।
बहुसामग्रिकाभिश्चाययौ सह मखार्थकः ॥ ४ ॥
अश्वपट्टसरस्तीरे त्वैशाने पावने शुभे ।
भागे सैन्यशिबिराणि चक्रे पालाशके वने ॥ ५ ॥
आहूय लोमशं चापि कृत्वा च दर्शनं हरेः ।
महर्षींश्च समाहूय क्रतुं श्रेष्ठं चकार सः ॥ ६ ॥
राधिके सोमयज्ञं तं पञ्चाहं प्रचकार सः ।
सोमलताः समाहृत्य सजीवाः कुण्डिकासु ताः ॥ ७ ॥
वर्धिताः पायिताश्चापि राज्ञा त्वश्वसरस्तटे ।
अहीनाख्यः सोमयज्ञः पञ्चाहोऽनुष्ठितस्तटे ॥ ८ ॥
मण्डपे सुविशाले संकारितः कुण्डसत्तमः ।
राजा सपत्नीक एव वृत्वा सोमप्रवाककम् ॥ ९ ॥
सोमप्रवाकं विप्रं सम्प्रेषयामास ऋत्विजाम् ।
वरणार्थं स विप्रोऽपि गत्वाऽऽनयत्तु भूसुरान् ॥१०॥
राजा दत्वा मधुपर्कं वरणं प्रचकार ह ।
अध्वर्युं च प्रतिप्रस्थातारं नेष्टारमित्यपि ॥११॥
उन्नेतारं ततश्चापि ब्रह्माणं च समावृणोत् ।
ब्राह्मणाच्छंसिनं चाग्नीध्रं पोतारं समावृणोत् ॥१२॥
होतारं च तथा मैत्रावरुणं च समावृणोत् ।
अच्छावाकं ग्रावस्तुतं चोद्गातारं समावृणोत् ॥१३॥
प्रस्तोतारं प्रतिहर्तारं सुब्रह्मण्यमावृणोत् ।
सदस्यानृत्विजश्चापि राजा तत्र समावृणोत् ॥१४॥
देवताः समुपस्थायाऽरण्योश्चारोप्य चाऽनलम् ।
सोमक्रतुस्थलीं गत्वा मथित्वा चारणी ततः ॥१५॥
समुत्पन्नं गार्हपत्याऽऽयतनेऽनलमेव तम् ।
प्रातिष्ठिपत् ततोऽध्वर्युः प्रणीयाऽऽहवनीयकम् ॥१६॥
चतुर्विंशतिहोमांश्च हुत्वा विसृज्य चाऽनलम् ।
प्रणीय गार्हपत्याच्च पुनर्होमांश्च सप्त च ॥१७॥
कृत्वाऽग्निं तं समुत्सृज्य दीक्षणीयेष्टिमाचरत् ।
एकादशकपालं च पुरोडाशं व्यधापयत् ॥१८॥
अग्नये विष्णवे चापि होमं ददौ ततः परम् ।
प्राचीनवंशशालां च निर्माय यजमानकः ॥१९॥
उत्तरे च बहिर्देशे कारयित्वा तु मुण्डनम् ।
तीर्थे स्नात्वाऽध्वर्युणा च दत्ते दुकूलके शुभे ॥२०॥
पर्यदधत् तथा राज्ञी नखनिकृन्तनादिकम् ।
स्नानं कृत्वा पर्यदधद् वस्त्रे दुकूलके शुभे ॥२१॥
ततो जायापती चान्नं बुभुजाते हि मण्डपे ।
नवनीतेन वै तत्र स्वाङ्गानि चानुलिम्पतः ॥२२॥
अञ्जाते चाञ्जनेनाप्यक्षिणी नैजे ततः परम् ।
अध्वर्युश्चानले तत्र हुत्वा दीक्षाहुतीश्च षट् ॥२३॥
प्रददौ यजमानाय ततः कृष्णाजिनद्वयम् ।
यजमानः परिगृह्याऽऽहवनीयसमीपगः ॥२४॥
तदास्तीर्योपविश्यापि बद्ध्वा कट्यां च मेखलाम् ।
मृगशृंगं तथोदुम्बरदण्डं दधार च ॥२५॥
पत्नी तथेषिकाजालं मुञ्जयोक्त्रं दधार च ।
यजमानो मुष्टिबन्धं चकाराऽध्वर्युराह च ॥२६॥
दीक्षितो यजमानोऽयं दीक्षिता ब्राह्मणा इमे ।
वाङ्यतो यजमानश्चाऽऽनक्षत्रोदयमेव ह ॥२७॥
अवर्तताऽध्वर्युणा चार्पितं पयोऽपिबत्ततः ।
पत्न्यपिबद् वाग्विसर्गं चक्रतुर्दम्पती ततः ॥२८॥
दधि धानानुदुम्बरफलसक्तूंश्च वोदनम् ।
भोजनं दम्पती तत्र यथेष्टं सम्प्रचक्रतुः ॥२९॥

याचका विप्रदेवाश्च यज्ञद्रव्योपलब्धये ।
याचनार्थं गताश्चाऽथ दम्पती जाग्रतो निशि ॥३०॥
व्रतं ररक्षतुश्चापि नानृतं संवदेदिति ।
नाश्नीयान्मांसमद्यादि नोपेयाच्च स्त्रियं तथा ॥३१॥
न खट्वादौ शयीतापि कृष्णाजिनादि धारयेत् ।
अष्टम्यां सोमयागस्य कृत्यं राजा तथा व्यधात् ॥३२॥
ततो रात्रौ सभायां च लोमशस्तूपदेशनाम् ।
ददौ त्वात्मप्रलाभार्थां ज्ञानविज्ञानसंभृताम् ॥३३॥
अध्वराः सर्वदा कार्या धनिकैः सुखहेतवे ।
आत्ममोक्षकरा यज्ञाः कर्तव्या देहिभिः सदा ॥३४॥
मोक्षयज्ञकरा लोकाः पुण्यहारा जितेन्द्रियाः ।
प्राप्नुवन्ति हरेः स्थानं यत्परं प्रकृतेर्ध्रुवम् ॥३५॥
न प्रीयन्ते वन्द्यमाना न कुप्यन्त्यपि निन्दिताः ।
एतां प्रज्ञां समासास्ते प्राप्नुवन्ति हरेः पदम् ॥३६॥
पक्वविद्या जितदोषा नापराध्यन्ति ये जनाः ।
अनीर्षवो न हिंसन्ति तप्यन्ते न परर्द्धिभिः ॥३७॥
निन्दाशंसे न कुर्वन्ति विक्रियन्ते न तत्र च ।
प्रशान्ताः सर्वभूतानां रता भवन्ति ये हिते ॥३८॥
न क्रुद्ध्यन्ति न हृष्यन्ति नापरान् वञ्चयन्त्यपि ।
विमुच्य हृदयग्रन्थिं ते प्रयान्ति हरेः पदम् ॥३९॥
न येषां बान्धवाः केचिद् ये चान्येषां न बान्धवाः ।
अमित्राः सन्ति येषां न ये चाऽमित्रा भवन्ति न ॥४०॥
ये धर्मं चानुरुद्ध्यन्ति सुखं जीवन्त्यरोषिणः ।
अमृतस्येव तृप्येरन्नवमानस्य योगिनः ॥४१॥
विषस्येवोद्विजेयुश्च सम्मानस्य विचक्षणाः ।
अवज्ञाताः सुखं चापि शेरते त्वकुतोभयाः ॥४२॥
वियुक्ताः सर्वदोषेभ्यो ये ते यान्त्यक्षरं पदम् ।
एतद्व्रतानि चासाद्य प्रेधन्ते साधवः सुखम् ॥४३॥
सर्वान् क्रतून् समासाद्य कृत्वा मनोऽतिनिर्मलम् ।
प्राप्नुवन्ति हरेर्धाम यत्परं प्रकृतेर्ध्रुवम् ॥४४॥
नैषां देवा न गन्धर्वा नर्षयः पितरोऽपि वा ।
पदं चान्ववरोहन्ति प्राप्तानां परमं पदम् ॥४५॥
येषां नैवाऽस्त्यहंकारो गुणचारित्रकृत् तथा ।
अभिन्नवाग्धृदयाश्च पूज्यन्तेऽत्र परत्र च ॥४६॥
अध्यात्मविधितत्त्वज्ञाः क्षान्ताः शक्ता जितेन्द्रियाः ।
ऋजवः सत्यवाचश्च पूज्यन्तेऽत्र परत्र च ॥४७॥
तेजसा यशसा बुद्धया ज्ञानेन विनयेन च ।
जन्मना तपसा युक्ताः पूज्यन्तेऽत्र परत्र च ॥४८॥
सुशीलाः सुखसंवेशाः सुभोज्याः स्वादरागताः ।
सुवाक्याश्चाऽप्यनीर्ष्याश्च पूज्यन्तेऽत्र परत्र च ॥४९॥
कल्याणं कुर्वतेऽन्येषां पापं यत्र न विद्यते ।
न प्रीयन्ते परकष्टैः पूज्यन्तेऽत्र परत्र च ॥५०॥
तितिक्षवः समवृत्ताः प्रियाऽप्रियसहास्तथा ।
हितार्थवादिनः शान्ताः पूज्यन्तेऽत्र परत्र च ॥५१॥
अदीनाः क्रोधहीनाश्चाऽलुब्धाः परोपकारिणः ।
धने कामेऽप्यकलहाः पूज्यन्तेऽत्र परत्र च ॥५२॥
दोषा येषां समुच्छिन्ना दृढभक्ता हरेस्तु ये ।
वीतसम्मोहमानाश्च पूज्यन्तेऽत्र परत्र च ॥५३॥
असक्ताः सर्वसंगेषु विनष्टसंशयाश्च ये ।
नात्मस्तुतिपरा लोकाः पूज्यन्तेऽत्र परत्र च ॥५४॥
नाऽसूयन्ति जनं कंचिन्न्यायमार्गे वहन्ति च ।
अवन्ध्यकाला मृदवः पूज्यन्तेऽत्र परत्र च ॥५५॥
कृतश्रमाः कृतप्रज्ञा न तृप्ता हरिकीर्तने ।
नित्ययुक्ताश्चाऽप्रमत्ताः पूज्यन्तेऽत्र परत्र च ॥५६॥
नाऽपत्रपाः परश्रेयोविघातारश्च दानिनः ।
परगुह्याऽप्रभेत्तारः पूज्यन्तेऽत्र परत्र च ॥५७॥
एवं सर्वगुणोपेतान् दक्षानात्महितार्थिनः ।
कालज्ञाँश्च प्रियज्ञाँश्च पूजयन्ति सुरा अपि ॥५८॥
अनाद्यन्तमजं दिव्यं परब्रह्म सनातनम् ।
ते जना आप्नुवन्त्येव तदर्थास्तत्समर्पणाः ॥५९॥
तपो निःश्रेयसं तस्य मूलं शमो दमस्तथा ।
तेन सर्वमवाप्नोति यद्यदिष्टतमं भवेत् ॥६०॥
तपसा जायते देही भूतानां धारणे प्रभुः ।
ईश्वरास्तपसा जाता महर्षयोऽपि तेन च ॥६१॥
शब्दब्रह्मपराश्चापि लभन्ते ब्रह्म चोर्ध्वगम् ।
रक्षाध्वराश्च वै क्षत्रा हविर्यज्ञा विशो मताः ॥६२॥
परिचर्यामखाः शूद्रास्तपोयज्ञाश्च भूसुराः ।
त्रेतायां संहता यज्ञा ब्रह्मप्राप्तिप्रदाः शुभाः ॥६३॥
तपसा विद्यया चापीज्यया दानेन वा जनाः ।
यशस्त्वखण्डितं प्राप्य संस्थाप्य भुवि तद्यशः ॥६४॥
ये प्रयान्ति परं स्वर्गं सुखाऽऽनन्त्यं प्रभुञ्जते ।
यज्ञे दातार एवात्र स्थापयन्ति यशोभुवम् ॥६५॥
यावद्यशोभूर्विद्येत तावत् स्वर्गमखण्डितम् ।
देवर्षिपितृगुर्वर्थे वृद्धातुरातिथिकृते ॥६६॥
अनाथदीननार्यर्थे सतीसाध्वीसतां कृते ।
नाऽदेयं विद्यते किंचिन्नेषां ते दिवमागताः ॥६७॥

गौतमोऽवग्रहे विप्रान् संसेव्याऽन्नादिभिः सदा ।
प्राप्य दिव्यं दिवं पश्चान्नारायणपदं गतः ॥६८॥
रन्तिदेवो वशिष्ठाय दत्वा वारि सुखप्रदम् ।
आशीर्वादेन वै स्वर्गं भुक्त्वा प्राप हरेः पदम् ॥६९॥
इन्द्रद्युम्नो मखे द्रव्यमनन्तं सम्प्रदाय च ।
ययौ दिव्यं दिवं भक्त्या नारायणपदं गतः ॥७०॥
शिबिः पुत्रं ब्राह्मणार्थे दत्वा स्वर्गं परं ययौ ।
प्रतर्दनः काशिकेशो दत्वा नेत्रे द्विजातये ॥७१॥
भक्त्या स्वर्गं प्रभुक्त्वैव नारायणपदं ययौ ।
धर्मांगदशिरो दत्वा स्वर्णांगदोऽक्षरं ययौ ॥७२॥
देवावृधो नृपश्छत्रं सौवर्णं भूसुराय तु ।
दत्वा सराष्ट्रः प्रययौ पारमेशं परं पदम् ॥७३॥
सांकृतिकश्च शिष्येभ्यश्चोपादिश्यान्तरस्थितम् ।
परब्रह्म ययौ दिव्यं परं पदं हरेः किल ॥७४॥
अम्बरीषश्च विप्रेभ्यो दत्वा गोत्रजमित्यपि ।
अर्बुदार्बुदमेवाऽपि स्वर्गं भुक्त्वाऽक्षरं गतः ॥७५॥
वृषादर्भिः सर्वरत्नं विप्रायाऽऽर्प्याऽक्षरं गतः ।
युवनाश्वः प्रियानारीः रम्याण्यावसथानि च ॥७६॥
विप्रेभ्यो दानमादत्त्वा स्वर्गं ततोऽक्षरं गतः ।
निमिः राष्ट्रं प्रदत्वैव वैदेहो जनकोऽभवत् ॥७७॥
जामदग्न्योऽपि पृथिवीं दत्वा नारायणोऽभवत् ।
गयो द्विजातये दत्वा स्वर्गं चेशपदं ययौ ॥७८॥
मरुत्तो नाम राजर्षिः समर्प्याङ्गिरसे सुताम् ।
दिव्यं जगाम दिव्यं स ततोऽक्षरपदं ययौ ॥७९॥
ब्रह्मदत्तोऽपि पाञ्चाल्यो निधिं शंखं द्विजातये ।
दत्वा स्वर्गं चिरं भुक्त्वा पारमेशपदं ययौ ॥८०॥
मित्रसहश्च राजर्षिर्वसिष्ठाय निजां प्रियाम् ।
मदयन्तीं प्रदत्वैव पत्न्या सहाऽक्षरं ययौ ॥८१॥
सहस्रजित् तथा राजा प्रियान् प्राणान् ददौ शुचिः ।
ब्राह्मणार्थे ययौ स्वर्गं भुक्त्वा मोक्षपदं ययौ ॥८२॥
शतद्युम्नो नृपो दत्वा सोपस्करालयं निजम् ।
हिरण्मयं मुद्गलाय स्वर्गं भुक्त्वाऽक्षरं ययौ ॥८३॥
द्युतिमान्नृपतिः राज्यमृचीकाय प्रदाय च ।
भुक्त्वा स्वर्गं चिरं भक्त्याऽक्षरं धाम ययौ ततः ॥८४॥
लोमपादः सुतां शान्ताम् ऋष्यशृंगाय योगिने ।
दत्वा दिव्यं दिवं भुक्त्वाऽक्षरं धाम ततो ययौ ॥८५॥
मदिराश्वश्च राजर्षिः कन्यां दत्वा सुशोभनाम् ।
हिरण्यकरऋषये ययौ स्वर्गं ततोऽक्षरम् ॥८६॥
प्रसेनजिद् गवां लक्षं दत्वा दानं द्विजातये ।
स्वर्गं भुक्त्वा ततो यातोऽक्षराख्यं श्रीहरेः पदम् ॥८७॥
चतुर्दशस्तरावासाः पितरश्च महर्षयः ।
देवा नृपाः प्रजाः कन्या निजा दत्वा तु शार्ङ्गिणे ॥८८॥
पूर्वपूर्वेषु कल्पेषु गोलोकं परमं गताः ।
गमिष्यन्ति परं चापि दत्वा हर्यर्थमेव च ॥८९॥
सर्वस्वं वापि किञ्चिच्च भक्त्या यास्यन्ति तत्पदम् ।
दानैस्तपोभिर्भक्त्या च बहवो वै दिवं ययुः ॥९०॥
येषां प्रतिष्ठिता कीर्तिर्ब्रह्मलोके सदाऽस्ति वै ।
पृथ्व्यां कीर्तिस्तथा चास्ते यावत्सूर्यादयः स्थिताः ॥९१॥
सद्गुरुय आगतविज्ञानाः शिष्टा नारायणार्पिताः ।
हर्यर्थकृतसर्वस्वास्तिष्ठन्ते शाश्वताऽक्षरे ॥९२॥
धृतिमन्तोऽप्रमत्ताश्च दान्ता धर्मविदो जनाः ।
वीतहर्षमदक्रोधा नाऽवसीदन्ति वै क्वचित् ॥९३॥
दानाध्ययनयज्ञैश्च तपोह्रीदमनार्जवैः ।
वर्धयते निजं तेजः पाप्मा सर्वो विनश्यति ॥९४॥
धूतपापा भक्तियुक्ताः प्रत्याहारजितेन्द्रियाः ।
कामक्रोधाऽनभिभूताः प्रयान्ति ब्रह्म शाश्वतम् ॥९५॥
अग्निं विप्रं सतीं सन्तं देवं वृद्धं नमेत् सदा ।
वाचं क्रूरां वर्जयेच्च ब्रह्म सम्पद्यते ततः ॥९६॥
प्रज्ञानिष्ठश्चात्मनिष्ठः कुर्वन्नपि न लिप्यते ।
संसारवासनादेहां नदीं तर्तुं यतेत च ॥९७॥
सर्वेन्द्रियजलाऽऽवाहां लोभमोहतटां तथा ।
क्रोधपंकां कालदीर्घां कुटुम्बस्नेहसज्झषाम् ॥९८॥
सेवाप्लवेन भक्त्या वा नावा सतां सहायतः ।
तरन्ति सात्त्वताः शान्ता धीराः पारगदृष्टयः ॥९९॥
अभक्ताश्चाप्यविज्ञाश्च नोत्तरन्ति नदीमिमाम् ।
तस्मादुन्मज्जनार्थं वै यतेत दानधर्मवान् ॥१००॥
यज्ञेन भक्त्या न्यासेन निस्तरेत्तां सदाश्रयः ।
सतां धर्मेण वर्तेत क्रियां सतां समाचरेत् ॥१०१॥
धर्मभक्तिविशेषज्ञा नदीं तरन्ति दुस्तराम् ।
साधवः श्रीहरेर्भक्त्या तारयन्त्यबुधान् प्लवाः ॥१०२॥
इत्येवं राधिके श्रीमान् लोमशो गुरुरेव तु ।
उपादिश्य विरराम परिहारस्ततोऽभवत् ॥१०३॥

भोजनान्यभवँश्चापि यथेष्टतृप्तिदानि वै।
ततोऽवापुश्च विश्रान्तिं राधिके सर्वशो जनाः॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मार्गशीर्षकृष्णाष्टम्याम् अश्वपट्टसरोवरतटेऽश्वपाटलनृपतिः सोमयागमारब्धवान्, प्रथमदिवसीयाऽनुष्ठानम्, लोमशकृतोपदेशश्चेत्यादिनिरूपणनामा चतुश्चत्वारिंशदधिकद्विशततमोऽध्यायः॥ २४४॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके मुनिर्द्वितीयेऽह्नि तु लोमशः।
सोमयागीयकृत्यं निर्वर्तयामास यच्च तत्॥ १॥
अवश्यसंकल्पाद्यं च कृत्वा सत्कर्म वै ततः।
प्रातरेव प्रापणीयेष्टिं चकार हि लोमशः॥ २॥
पथ्यादिपञ्चदेवाँश्चाऽस्थापयच्चाप्यपूजयत्।
पथ्या स्वस्तिः प्रथमैव द्वितीयोऽग्निः सुरस्तथा॥ ३॥
सोमस्तृतीयः सविता चतुर्थोऽदितिः पञ्चमी।
अदितेरोदनो द्रव्यं चतुर्णामाज्यमेव च॥ ४॥
पक्त्वौदनं चाहवनीयाऽग्नौ चाऽजुहवत् ततः।
सोमं च क्रीतवाँस्तत्र राजा दशभिर्वस्तुभिः॥ ५॥
ऐकहायन्या गवा च हिरण्येनाऽजया तथा।
धेन्वा सवत्सया चापि वृषभेण च भूपतिः॥ ६॥
शकटवाह्यनडुहा वत्सतरेण चापि वै।
वत्सतर्या वाससा च क्रीतवान् सोममेव सः॥ ७॥
क्रीतं सोमं यजमानश्चोरौ दक्षे निगृह्य च।
हविर्धानशकटे तं निक्षिप्य चाययौ मखम्॥ ८॥
प्राग्वंशस्याऽग्रतः स्थित्वा चातिथ्येष्टिं चकार ह।
विष्णवे च पुरोडाशं द्रव्यं नवकपालकम्॥ ९॥
ददौ चाथ च सोमं तं राजासन्द्यां न्यधापयत्।
ऋत्विजो यजमानश्चाऽवैराय शपथं व्यधुः॥१०॥
प्रवर्ग्यं कर्म च ततः प्रावर्तत ससाधनम्।
महावीराख्यपात्राणि त्रीणि, द्वे दोहपात्रके,॥११॥
आज्यस्थाली, तथाश्वौ द्वौ, कपाले द्वे हि मार्त्तिकाः।
वानस्पत्या उदुम्बरकाष्ठजा अपि तद्यथा॥१२॥
सम्राडासन्दी, स्रुचौ द्वे, द्वे चागर्ते स्रुचावपि।
द्वौ शफौ, द्वौ चापि धृष्टी, मेथी, च शंकवस्त्रयः॥१३॥
व्यजनानि त्रीणि, रुक्मौ द्वौ, तथैकाऽभिधानिका,।
निदाने, शाखदामानि, तथा मुञ्जतृणानि च,॥१४॥
एवं प्रवर्ग्यसंभारान् अध्वर्युश्चाहरत्ततः।
ब्रह्मणा चाप्यनुज्ञातः प्रवृञ्जनमथाऽकरोत्॥१५॥
रौहिणाख्यं पुरोडाशं विधिना समपादयत्।
द्वारान्तिके चतुःशंकून् कृत्वा स्थण्डिलमित्यपि॥१६॥
अग्निं प्रज्वाल्य तत्रैव महावीरं निधाय च।
आज्येनाऽऽपूर्य तन्मुखं पिधाय कनकेन च॥१७॥
पुनः पुनः प्रकृत्वैवं चाध्वर्युश्च ततः परम्।
शंकुषु गां च गोवत्समजां बध्वा दुदोह च॥१८॥
महावीरे पयस्तच्च चिक्षेपोष्मा ततोऽभवत्।
तप्ते घृते पयःक्षेपः प्रवृञ्जनं समुच्यते॥१९॥
प्रवर्ग्यं कर्म चैवैतच्चकाराऽध्वर्युरेव ह।
ततश्च प्रतिप्रस्थाता पुरोडाशं तु रौहिणम्॥२०॥
अगर्तया जुह्वयाऽऽहवनीये स्म च जुह्वति।
अध्वर्युश्चाऽऽश्रावणं च प्रत्याश्रावणमित्यपि॥२१॥
कृत्वा जुहाव च घृतं पयोमिश्रं च वीरऽऽगम्।
महावीरस्थितं दुग्धं हुतं घर्म प्रकीर्त्यते॥२२॥
अश्विनौ च महेन्द्रश्च देवतेऽस्य प्रकीर्तिते।
अवशिष्टेन च स्विष्टकृतं होमं चकार ह॥२३॥
दध्ना प्रापूर्य च महावीरं तद्धोममाचरत्।
वेद्यां शेषं निधायापि प्रतिप्रस्थाता ततः॥२४॥
रौहिणपुरोडाशस्य होमं किञ्चिच्चकार सः।
अध्वर्युश्च षट्शकलहोमाँश्चकार वै ततः॥२५॥
अग्निहोत्रं तथा होमं कृत्वा च शेषभक्षणम्।
होतृब्रह्माऽग्नीध्रयजमानैः सह चकार ह॥२६॥
एवं प्रातः प्रवर्ग्ये वै समपद्यत वै तदा।
सायं प्रवर्ग्यमेवापि तथैव तु भविष्यति॥२७॥
छिन्नस्य यज्ञशिरसः सन्धानार्थं प्रवर्ग्यकम्।
यज्ञो विष्णुः पुरा राधे देवैः सत्रमथाऽऽचरन्॥२८॥
यशो विष्णुरवापैव न देवास्ते ततः परम्।
युयुधुर्विष्णुना सार्कं विष्णुस्तु धनुषा सुरान्॥२९॥
विजित्य च धनुष्कोटिं चिबुकाऽधो विधाय च।
तस्थौ तदा तु वम्रयश्च भूतले ज्यामवस्थिताम्॥३०॥
भूमिकोटेश्चिच्छिदुश्च धनुर्वेगात् समुत्पतत्।
विष्णोः शिरः कण्ठदेशादुत्पाट्य गतमम्बरे॥३१॥
तस्य विष्णोर्यज्ञमूर्तेश्छिन्नमूर्ध्नः प्रपूजने।
निष्फला अभवन् देवाः प्रार्थयन्त तदाऽश्विनौ॥३२॥
शिरस्तत्प्रतिसन्धातुं तौ तदा प्राहतुः सुरान्।
सोमयागे हविर्भागस्त्वावयोरस्तु चाद्यतः॥३३॥

देवैर्मागः प्रदत्तश्च तावयोजयतां शिरः ।
तदेवैतत् प्रवर्ग्यं वै यज्ञशिरसो योजनम् ॥३४॥
महावीरो यज्ञशिरोरूपो बोध्यश्च राधिके ।
ततश्च प्रातरुपसद् इष्टिश्चापि ह्यजायत ॥३५॥
अग्निः सोमो विष्णुरेते प्रधानदेवतास्त्रयः ।
आज्यं द्रव्यं ददौ होमे तेभ्यो देवेभ्य एव तु ॥३६॥
सुब्रह्मण्याह्वानमेव विधाय विरतिस्ततः ।
सायंकाले प्रवर्ग्योपसदौ चकार वै तथा ॥३७॥
सुब्रह्मण्याह्वानमेव चकार विरतिस्ततः ।
एवं कर्म नवम्यां वै सोमस्य समजायत ॥३८॥
ततः सर्वे भोजनानि चक्रुर्मिष्टान्नकानि हि ।
रात्रौ श्रीलोमशश्चोपादिदेश मोक्षसाधनम् ॥३९॥
उपासनाविहीनस्य शिरश्छेदो भवेदतः ।
उपासनीयो भगवान् श्रीपतिः परमेश्वरः ॥४०॥
अन्येभ्यो वृत्तिमाहृत्य धारयेच्छ्रीहरौ यदा ।
तदैकतानतानिष्ठा जायते परमेश्वरे ॥४१॥
इन्द्रियाहारसंहारैर्मनआहारवर्जनम् ।
अहंलयेन वै बुद्ध्याऽऽत्मनो ज्ञानं प्रजायते ॥४२॥
ज्ञानेन यच्छेदात्मानं ततः शान्तिमवाप्नुयात् ।
इद्रियाणामनुद्रष्टा ह्यान्तराणामपि स्थिरः ॥४३॥
आत्मनश्चात्मना द्रष्टा दुर्गं तरति दुस्तरम् ।
स्वभावेन यदि व्याघ्रः श्वा वा सूकर एव वा ॥४४॥
सिंहो वा शरभो हस्ती मार्जारो वानरोऽपि वा ।
जम्बूकः काक एवापि नागो वा वृश्चिकोऽपि वा ॥४५॥
बको वा गर्दभो वापि स्वभावैरीदृशोऽपि यः ।
पापो वा पुण्यकृद्वापि क्लिष्टो वा क्लेशमध्यमः ॥४६॥
अक्लेशो वा व्यापृतो वा दरिद्रो वञ्चकोऽपि वा ।
पूर्वावस्थानिकृष्टोऽपि सांख्यधर्ममुपाश्रितः ॥४७॥
योगवान् साधुसंगी च कृष्णधर्मपरायणः ।
तरत्येवाऽऽशयदुर्गं वासनाब्धिं महार्णवम् ॥४८॥
यज्ञासनं ह्रीवरूथं धर्मवैराग्यकूबरम् ।
प्राणयुगं विचाराक्षं प्रज्ञामार्गं कृतोदरम् ॥४९॥
आचारनेमिं चेन्द्रियवाहनं ज्ञाननाभिकम् ।
शमप्रतोदकं पुण्यसारथिं हर्यधिष्ठितम् ॥५०॥
जीवरथं दीर्घमार्गे पारयेत् साधुवाहितम् ।
स्थापयेदक्षरोद्याने रक्षयेदालये परे ॥५१॥
ब्रह्मज्ञानप्रतिष्ठं च सर्वयज्ञपरायणम् ।
अनन्तैश्वर्यसम्पन्नं भक्त्या रङ्गीकृतान्तरम् ॥५२॥
भासते हृदये कृष्णः प्रकाशतेऽन्तरे बहिः ।
एतादृशे परे भक्ते सर्वं वै निहितं जगत् ॥५३॥
एवं माहात्म्यभावस्य सदृशं नास्ति किञ्चन ।
पृथ्वीं जित्वा जलं तेजो वायुं जित्वा तथाऽम्बरम् ॥५४॥
तन्मात्राणि ततो जित्वाऽहंबुद्धिं च जयेत्तु यः ।
ईशभावं जयेच्चापि परमेशपदं व्रजेत् ॥५५॥
पौरुषं कर्म दैवं च कालं ग्रहान् विजित्य च ।
स्वभावं वासनां मायां जित्वाऽक्षरपदं व्रजेत् ॥५६॥
तपोधर्मपराः प्रोक्ताः सत्ययुगिन एव ह ।
यज्ञधर्मपराः प्रोक्तास्त्रेतायुगिन एव ह ॥५७॥
दानधर्मपराः प्रोक्ता जना द्वापरयोगिनः ।
धर्मोत्सादपराः प्रोक्तास्तिष्ययुगिन एव च ॥५८॥
ब्रह्मधर्मपराः प्रोक्ता मोक्षयोगिन एव ते ।
परब्रह्मपराश्चेत् स्युस्ते भवन्त्यक्षरस्थिताः ॥५९॥
नाऽन्तरा विद्यातपसी नान्तरेन्द्रियनिग्रहम् ।
नान्तरा सर्वसन्त्यागं मोक्षं विन्दति मानवः ॥६०॥
स्रष्ट्रा सर्वाणि तत्त्वानि सर्जनस्य क्षणे पुरा ।
जीवात्मने प्रदत्तानि भोगस्वर्गविमुक्तये ॥६१॥
भूमिर्देहे जलं कुक्षौ तेजो मनसि नेत्रयोः ।
प्राणे वायुश्चावकाशः कोष्ठलादौ निवेशिताः ॥६२॥
तन्मात्राणि तु सर्वाणि गोलकेषु धृतानि वै ।
विषया अपि सन्न्यस्ताश्चेन्द्रियार्थाश्च वस्तुषु ॥६३॥
पादे विष्णुर्बले शुक्रो हस्ते चेन्द्रो निधापिताः ।
कोष्ठे त्वग्निर्दिशः कर्णे जिह्वायां तु सरस्वती ॥६४॥
चन्द्रो मनसि ब्रह्मा तु बुद्धौ चित्ते हरिस्तथा ।
निहिताः सर्वदेवास्ते जीवेऽन्तर्यामी केशवः ॥६५॥
इत्येते निहिताः सर्वेऽक्षरं तु ब्रह्मरन्ध्रके ।
तेजस्तु हृदये श्रेष्ठं सुषुम्णायां निवेशितम् ॥६६॥
सर्वं वै विद्यते त्वत्र मार्गयिताऽस्य दुर्लभः ।
प्रमार्ग्य परमं देवं ब्रह्मपथं समाधिना ॥६७॥
भक्तिशकटीं चारुह्य यायाद्धामाऽक्षरं कृती ।
स्वप्रदीपप्रकाशेन परात्मानं विलोकयेत् ॥६८॥
एवं पश्येत् स वै प्रेत्य कल्पते ब्रह्मभूयसे ।
परमेशो जंगमेषु ध्रुवेषु वसति प्रभुः ॥६९॥
तमात्मानं परं दृष्ट्वा ब्रह्मपरं प्रपद्यते ।
यावानात्मनिवेदात्मा तावान् परनिवेदवान् ॥७०॥
सततं न्यासवान् कृष्णे सोऽमृतत्वाय कल्पते ।
कालः पचति भूतानि कालो येन विपच्यते ॥७१॥

तं परं पाकिनं लब्ध्वा पुनर्ग्रासो न जायते ।
अक्षरं ब्रह्म भूत्वैव परब्रह्माऽभियाति च ॥७२॥
स सूक्ष्मः स महास्थूलः सोऽन्तरे स बहिः प्रभुः ।
अध्रुवेषु ध्रुवं तिष्ठन् बाह्यभासा न भाति सः ॥७३॥
दृश्यते चान्तरभासा भास्वता चात्मनाऽर्थितः ।
अनुग्रहवशः कृष्णो भक्त्या संभासतेऽन्तरे ॥७४॥
दिव्याऽमृताऽक्षरपदे तिष्ठन्नपीह तिष्ठति ।
तत्तुल्ये चात्मनि स्वाम्याश्रये कल्मषवर्जिते ॥७५॥
उपशान्तश्च दान्तश्चाऽध्यात्मशीलपटश्च यः ।
आत्मारामो बुद्धकृष्णो याति तत्परमं पदम् ॥७६॥
कामं क्रोधं भयं लोभं मानं स्वप्नं च भावनाम् ।
असंकल्पेन च शान्त्या चाऽप्रमादात् त्रयं जयेत् ॥७७॥
औदार्येण विचारेण सत्त्वेन च त्रयं जयेत् ।
धृत्या शिश्नोदरं चापि पाणिपादं च चक्षुषा ॥७८॥
चक्षुःश्रोत्रे च मनसा मनोवाचं च कर्मणा ।
कर्म सर्वार्पणेनापि जयेत् कृष्णनरायणे ॥७९॥
ब्रह्मतेजोमयं सर्वं पश्येद् रसात्मकं हरिम् ।
तेजस्तु वर्धते ध्यानाद् ध्यानं भक्त्या प्रवर्धते ॥८०॥
भक्तिः संवर्धते स्नेहात् स्नेहो माहात्म्यबोधनात् ।
बोधश्चापि सतां संगात् सन्तो हरेः कृपालवात् ॥८१॥
कृपा च शरणे पातात् प्रातः प्रयोजनात्तथा ।
प्रयोजनं सुखं जीवे यदर्थं च प्रवर्तते ॥८२॥
प्रवृत्तिश्चेच्छया चेच्छा ज्ञानाज्ज्ञानं तु शास्त्रजम् ।
कथाश्रवणमाहात्म्याज्जायते दिव्यभावना ॥८३॥
तस्माद् दिव्यां कथां प्राज्ञः शृणुयान्नित्यमेव तु ।
येन चिन्तामणिर्लब्धः कथात्मा तस्य किं पुनः ॥८४॥
एतैस्तु वर्धते तेजश्चैश्वर्यं परमार्थता ।
सर्वेह्यर्थाश्च सिद्ध्यन्ति ब्रह्मतेजः प्रकाशते ॥८५॥
तेजसा प्रकृतिं जित्वा प्रगच्छेद् ब्रह्म शाश्वतम् ।
इन्द्रियाणि प्रछिद्राणि प्रज्ञास्रावकराणि वै ॥८६॥
तानि रुन्ध्यान्मनो धृत्वा निजात्मनि परात्मनि ।
प्रसीदत्यान्तरं तत्त्वं तेन ब्रह्म प्रकाशते ॥८७॥
स्वयं ब्रह्मणि दिव्ये वै ब्रह्म निजात्मनि ध्रुवे ।
परस्परं प्रपश्येतां मुक्ताविव प्रयोगिणौ ॥८८॥
एवं रहः कृताभ्यासो गच्छेदक्षरसाम्यताम् ।
सिद्धीरैश्वर्योपसर्गाननादृत्याऽक्षरं व्रजेत् ॥८९॥
प्रातरुत्थाय तत्रैवाऽऽसने सञ्चिन्तयेद्धरिम् ।
ब्रह्मयज्ञं ध्यानयज्ञं पूजायज्ञं विधाय च ॥९०॥
द्रव्ययज्ञं चरेत् पश्चान्नियम्येत मनोजवम् ।
नाभिष्वजेत्पार्श्ववर्तिपदार्थे मनसापि तु ॥९१॥
नाभिध्यायेदवमानमाने हर्षप्रवेजने ।
ध्यायेदात्मनि देवेशं परमेशं मखाश्रितम् ॥९२॥
एवं ध्यानात्मनः साधोः समवृत्त्यभियोगिनः ।
शीघ्रं ब्रह्मपरं नैजे गह्वरे भासतेऽमलम् ॥९३॥
एतेन तु पथा नारी नपुंसकोऽपि वा जनः ।
प्रसाद्य ब्रह्म परमं प्रगच्छेत् परमां गतिम् ॥९४॥
मुक्तो भूत्वा प्रपश्येत मुक्तमनादिनं हरिम् ।
ब्रह्म भूत्वा प्रपश्येत ब्रह्माऽक्षरं सुखालयम् ॥९५॥
परब्रह्म प्रपश्येत ब्रह्मनेत्रेण मुक्तराट् ।
कर्मणा बध्यते जन्तुर्हरावनार्पितेन ह ॥९६॥
विद्यया मुच्यते जन्तुर्हरावर्पितया तथा ।
तस्मादुभौ हरेर्योगौ कर्तव्यौ यतिना त्विह ॥९७॥
सर्वार्पणौ तु तौ दिव्यौ नयतो धाम चाश्रितम् ।
यत्र गत्वा न मरणं न शोको न पुनर्भवः ॥९८॥
तदांऽशं स्वं विजानीयादात्मानं परमात्मनः ।
यज्ञं कर्म हवं भावं हरौ तस्मात् समर्पयेत् ॥९९॥
इत्युक्त्वा राधिके श्रीमान् लोमशो विरराम ह ।
परिहारः सभायाश्चाऽभवत् ततोऽदनानि च ॥१००॥
अभवँस्तृप्तिदान्येव रात्रौ विश्रान्तिमावहन् ।
रटन्तः श्रीहरेर्नाम ध्यायन्तश्च हरिं जनाः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सोमयागे द्वितीयदिवसीयं कृत्यं सुब्रह्मण्योपसदप्रवर्ग्यादिकं हवनपरिहारश्चोपदेशो लोमशकृतश्चेत्यादिनिरूपणनामा पञ्चचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४५ ॥

श्रीकृष्ण उवाच—

राधिकेऽथ ततो यज्ञतृतीये दिवसे पुनः ।
प्रावर्तत दशम्यां सोमाध्वरस्य विधानकम् ॥ १ ॥
लोमशश्चाययौ राजा चाययौ कृतपुण्यकः ।
प्रातः प्रवर्ग्योपसदावभ्यनुष्ठितवान् गुरुः ॥ २ ॥
महावेद्याश्च निर्माणं मण्डपात् षट्पदानि वै ।
दूरेऽपि पुरतश्चक्रे यथास्थविधितो गुरुः ॥ ३ ॥
प्राक्पश्चाद्द्वासप्ततिसंख्यकपदायता मता ।
दक्षिणोत्तरतः षष्टिपदाविस्तारिका च सा ॥ ४ ॥
श्रोणीभागे चांसभागेऽष्टाचत्वारिंशदायता ।
एतादृशीं समग्रां च वेदीं निर्माय वै ततः ॥ ५ ॥

यजमानो व्रतं दुग्धपानात्मकं दधार ह ।
हवनार्थं चकारापि सर्वानुष्ठेयमित्यपि ॥ ६ ॥
सायाह्निकीभ्यां प्रवर्ग्योपसद्भ्यां सायमित्यपि ।
पयोव्रतं प्रचर्यैव सुब्रह्मण्यां तु देवताम् ॥ ७ ॥
इन्द्रात्मिकां समाहूय व्रतं चक्रे ततः परम् ।
विरामश्च परिहारस्ततः प्रसादभोजनम् ॥ ८ ॥
यावतां महीमानानां मिष्टान्नैः पायसादिभिः ।
अभूदाकण्ठतृप्त्यात्म, ततः श्रीलोमशो मुनिः ॥ ९ ॥
उपादिदेश रात्रौ तु सभायां मोक्षकृद् यथा ।
ब्रह्मचर्येण वै लोकान् जयन्ति परमर्षयः ॥१०॥
शाश्वतं परमं श्रेयो विन्दन्ति च ततः परम् ।
वने मूलफलादाश्च तप्यन्तो विपुलं तपः ॥११॥
देवायतनवासाश्च भूतानां हितचिन्तकाः ।
सतां समागमे मग्नाः कल्प्यन्ते ब्रह्मभूयसे ॥१२॥
ब्रह्मचारा गृहचारा वनचाराश्च साधवः ।
स्वोक्ताचारा हरौ लग्ना गच्छन्ति परमां गतिम् ॥१३॥
नित्यकर्मसमाचारा ज्ञानदग्धफला हि ये ।
अकामद्वेषदोषास्ते विधीयन्तेऽक्षरे परे ॥१४॥
चतुष्पदी हि निःश्रेणी ब्रह्मारोहणसाधनी ।
तामारुह्य हरिं लम्बन् ब्रह्मलोकं प्रयाति वै ॥१५॥
ब्रह्मचारी ब्रह्मव्रते तिष्ठन् सर्वं लभेत ह ।
गुरुर्ब्रह्म व्रतं ब्रह्म वेदो ब्रह्म हरिस्तथा ॥१६॥
तान् प्रसेवेत सततं ब्रह्मलोकगतो भवेत् ।
गुरोः सेवां प्रकुर्याद्वै यज्ञतुल्यफलं लभेत् ॥१७॥
यत्तु शिष्येण कर्तव्यं दासेन वा च तच्चरेत् ।
किंकरः सर्वकारी स्यान्मानहीनोऽतिभावुकः ॥१८॥
आहूतः सर्वमुत्सृज्य समागच्छेद् गुरुं प्रति ।
इष्टं ब्रूयात् प्रेमपूर्णचक्षुषेक्षेत वै गुरुम् ॥१९॥
भोजयित्वा गुरूँस्ततोऽश्नीयात् पिबेत्तथोत्तरम् ।
पादसम्मर्दनं कुर्यात् पादावस्य मृदु स्पृशेत् ॥२०॥
आज्ञापय करोम्येष भगवन्निति सेवयेत् ।
गुरोः सेवार्थमेवाऽसौ समीपस्थो भवेद् वसेत् ॥२१॥
गृहस्थोऽपि प्रसेवेद्वै गुरुं देवं सतीं पतिम् ।
धर्मं चाऽनपवादं च भक्तिं कुर्यादतन्द्रितः ॥२२॥
देवाय गुरवे दद्यादन्नं पक्वं प्रवासिने ।
न्यासिनेऽपि प्रदद्याच्च नाऽऽत्मार्थे पाचयेत् क्वचित् ॥२३॥
नाऽस्याऽतिथिर्विसेत् कश्चिद् गृहागतो ह्यपूजितः ।
पूज्येभ्यो दीनबालेभ्योऽनाथाऽतिथिभ्य इत्यपि ॥२४॥
सद्भ्य सतीभ्यः साध्वीभ्यो हव्यं कव्यं ददेदपि ।
पूज्या भवन्ति सततं धार्मिकास्तापसा जनाः ॥२५॥
तथैवाऽपचमानाश्च तेभ्यो देयं गृहंजुषा ।
विघसाशी भवेच्चापि भवेदमृतभोजनः ॥२६॥
विघसं भृत्यशेषं च देवशेषं तथाऽमृतम् ।
सम्बन्धिभिः कुटुम्बेन बन्धुभिर्विवदेन्न च ॥२७॥
आचार्यो ब्रह्मलोकेशस्तेन वादं न चाचरेत् ।
पिता प्राजापत्यनाथस्तेन वादं न चाचरेत् ॥२८॥
अतिथिस्त्विन्द्रलोकेशस्तेन वादं न चाचरेत् ।
ऋत्विग् वै देवलोकेशस्तेन वादं न चाचरेत् ॥२९॥
जामिश्चाप्सरसां लोकेशस्तेन विवदेन्न वै ।
ज्ञातिर्वैश्वदेवलोकेश्वरी तया न भेदयेत् ॥३०॥
सम्बन्धिबान्धवा दिगीश्वरास्तैर्न विरोधयेत् ।
मातृमातुलवर्गाश्च पृथ्वी तया न भेदयेत् ॥३१॥
वृद्धबालातुरकृशा व्योम तेन न भेदयेत् ।
भ्राता पितृसमो भार्या पुत्रः पुत्री स्वका तनुः ॥३२॥
छाया स्वा दासवर्गाश्चाऽऽश्रिताश्च कृपणा जनाः ।
तस्मादेतैरधिक्षिप्तः सहेत न प्रतिक्षिपेत् ॥३३॥
कुर्वन् कर्माणि सर्वाणि गार्हस्थ्यनियतानि वै ।
कामलोभभयैर्व्यासश्चरेद् यदि मनो विना ॥३४॥
निर्द्वन्द्वो निरनुद्वसः साधुवद् यदि वर्तते ।
हरौ चालम्बनं प्राप्तो मुच्यते स न बध्यते ॥३५॥
स चक्रांकितलोके वै गतिं प्राप्नोति चोत्तमाम् ।
जितेन्द्रियाणां सदृशीं गतिं चाप्नोति शोभनाम् ॥३६॥
स्वर्गो दानिगृहस्थानां फलपुष्परसात्मकः ।
स्वर्गश्चार्पिगृहस्थानां द्वितीयः शाश्वतः परः ॥३७॥
स गृहस्थो निजं देहं वलीपलितमुद्वलम् ।
वीक्ष्य देवं परेशं वै भजेद् वननिवासवत् ॥३८॥
अल्पाहारो भवेत् सत्वाहारः कन्दफलाशनः ।
धर्मं चौपनिषदगं पालयेद् ब्रह्मसंजुषम् ॥३९॥
वनेऽरण्ये गृहे वा च वासं कृत्वा महर्षिवत् ।
परे ब्रह्मणि संलग्नो भवेन्मोक्षमवाप्नुयात् ॥४०॥
यज्ञं होमं तथा सर्वदक्षिणां प्रविधाय च ।
यद्वा साधुर्भवेद्वापि ब्रह्मपुत्रो ह्यमानवः ॥४१॥
जीवच्छ्राद्धं प्रकुर्यात्तु भवे दात्मात्मनिष्ठकः ।
स्वमात्मनि समारोप्य कर्मकाण्डं चरेद् व्रती ॥४२॥
भजनं पूजनं नित्यं ध्यानं नारायणस्य च ।
इज्यां च रटणं कृष्णस्मरणं ब्रह्मभावनम् ॥४३॥

तदर्थं सर्वकर्माणि चरेन्मुक्तवदास्थितः ।
अभयं त्वात्मनि श्रौव्यं लब्ध्वा दत्त्वाऽन्यगर्विणे ॥४४॥
प्रव्रज्यां परलोकाय गृह्णीयात् साधुधर्मवान् ।
लोकास्तेजोमयास्तस्योत्तरोत्तरमहासुखाः ॥४५॥
वर्तमानोऽपि लोकेऽत्र भवेदक्षयतृप्तिमान् ।
त्यक्त्वा देहं हरेर्योगादक्षराऽऽनन्त्यमश्नुते ॥४६॥
सदेहः पूर्णमेवाऽत्राऽऽकाशवद् वर्तते सदा ।
न कुद्धयेन्न च प्रहृष्येद् ब्रह्मवद् वर्तते शुचिः ॥४७॥
नाभिनन्देच्च मरणं जीवनं वा निसर्गजम् ।
ब्रह्मैव सम्प्रतीक्षेत स्वामिनं सेवको यथा ॥४८॥
अनभ्याहतचित्तः स्यान्निर्मुक्तः पाप्मनः सदा ।
अभयं च निजं चापि भूतानामपि यत्कृतम् ॥४९॥
मोहमुक्तस्य कस्माच्चिद् भयं यस्य न विद्यते ।
अमृते नित्यं वसति शरण्यः सर्वदेहिनाम् ॥५०॥
प्रज्ञातृप्तो निरीहश्च संगमुक्तोऽतिमृत्युगः ।
जीवितं यस्य धर्मार्थे धर्मो हर्यर्थमेव तु ॥५१॥
निर्मुक्तो बन्धनैः सोऽयं ब्रह्मविद् ब्राह्मणो भवन् ।
आत्मोद्भवं भावद्रव्यं जुहोति परमात्मनि ॥५२॥
होमजन्यां हरिस्तृप्तिं याति प्रसन्नतात्मिकाम् ।
तं पुण्यं च समर्ज्यैव याति ब्रह्म सनातनम् ॥५३॥
देवास्तमेव पुष्णन्ति स्पृहयन्ति परां गतिम् ।
तां स्पृहां सफलां प्राप्तः परमात्मानमीक्षते ॥५४॥
प्राकृतान् प्रविकारांश्च मृतान् वीक्ष्याऽमृतं गतः ।
प्रशान्तात्मोदासनः स ऋच्छत्येवाऽमृतं पदम् ॥५५॥
संकल्पान् संप्रहृत्यैव चित्तं सत्त्वेऽभिवेशयेत् ।
कालं जित्वाऽमृतं यायात् परमेशसहायतः ॥५६॥
चित्तप्रसन्नताप्राप्तौ शुभाऽशुभं निवर्तते ।
दिव्यात्मानं प्रपद्यैव सुखमानन्त्यमश्नुते ॥५७॥
निद्रा यस्य सुखाप्ता स्यात् प्रसादस्तस्य चात्मनि ।
प्रसादितो हरिश्चास्मै यच्छत्यानन्दशेवधिम् ॥५८॥
यस्य स्थानिकृते चाप्यामन्त्रणे फल्गुताऽस्ति च ।
तस्य प्रसादः सततं वर्ततेऽक्षरसदृशः ॥५९॥
इन्द्रियाणां यदा रश्मीन् मनसा सन्नियच्छति ।
मनो बुद्ध्या नियम्येत तदाऽऽत्मा संप्रकाशते ॥६०॥
विमुक्तान्तरबाह्यैश्च गुणदोषैर्न लिप्यते ।
अलिप्तस्य रतिस्तत्र जायेत परमात्मनि ॥६१॥
प्रध्वस्तगुणवृत्तिश्चाऽप्रवृत्तो गुणकर्मसु ।
हृदयग्रन्थिशून्यश्च ब्रह्मग्रन्थिं प्रविन्दति ॥६२॥

परब्रह्मपरां शान्तिं सामर्थ्यं चापि विन्दति ।
आत्मज्ञानं शमश्चेति ब्रह्मभावेऽतिसाधनम् ॥६३॥
ब्रह्मभावः परब्रह्माऽवाप्तिदोऽत्र न संशयः ।
न ह्यतोऽस्त्यधिका प्राप्तिर्हरेः प्राप्तेः पराः खलु ॥६४॥
यत्करोत्यनभिसन्धिपूर्वकं तत्तु निर्गुणम् ।
हर्यभिसन्धिपूर्वं च दिव्यं मुक्तिप्रदं हि तत् ॥६५॥
यस्माद्धर्मात्परो धर्मो नास्त्येवेह हरिं विना ।
ब्रह्मधर्मः परो धर्मः सर्वधर्मावगुण्ठनः ॥६६॥
हरौ सर्वप्रवृत्तीनां लयो धर्मं परं तपः ।
तपसा चात्मतृप्तः सन् फलानन्दं समश्नुते ॥६७॥
आन्तरं मार्गमासाद्य प्रासादस्थं परं प्रभुम् ।
सर्वात्मानं निजात्मनं प्रपद्यते प्रकाशितम् ॥६८॥
अन्तरात्मा तदा चास्मै सर्वस्वं प्रददाति ह ।
ज्ञानदीप्तिमते नैजस्वरूपापन्नयोगिने ॥६९॥
संसारवारिधिं सोऽयं तीर्णो मायामयं जगत् ।
ब्रह्ममयं प्रपन्नश्च ब्रह्माऽस्याऽत्रैव काशते ॥७०॥
नात्मा स्त्री वा पुमान्वापि नपुंसकोऽपि नैव ह ।
न जडो न स्वभावश्च ब्रह्मरूपः सनातनः ॥७१॥
परब्रह्माऽवगुप्तश्च परब्रह्माऽवबोधितः ।
परब्रह्मप्रपुष्टश्च परब्रह्मादनस्तथा ॥७२॥
परब्रह्मरसश्चापि परब्रह्माभिनन्दनः ।
परब्रह्मशरीरश्च परब्रह्मसुखप्लुतः ॥७३॥
परब्रह्मसखश्चापि परब्रह्मप्रयात्रिकः ।
परब्रह्मप्रसार्थश्च परब्रह्माश्रयश्रमः ॥७४॥
परब्रह्मकृतावासः परे ब्रह्मणि याति हि ।
परब्रह्मसुसर्वस्वो मुक्तिं विन्दति तन्मयीम् ॥७५॥
यदा न कुरुते भावं सर्वभूतेषु वै पृथक् ।
दुःखं च पापकं चापि ब्रह्म सम्पद्यते तदा ॥७६॥
वासना बन्धनं त्वेकं महत्तमं हि बन्धनम् ।
वासनाबन्धनान्मुक्तो ब्रह्मभूयाय कल्पते ॥७७॥
ज्ञानस्योपनिषच्छान्तिः शान्तेश्चोपनिषत् सुखम् ।
सुखस्योपनिषत् तृप्तिस्तृप्तेश्चोपनिषत् त्यजिः ॥७८॥
त्यागी न बन्धनं याति प्रसन्नात्मा हरौ स्थितः ।
परे ब्रह्मणि निष्ठात्मा सुखानन्त्यं समश्नुते ॥७९॥
अजन्यं चाप्यसंहार्यं नित्यसिद्धममिश्रितम् ।
परब्रह्माप्तिसंवेद्यं सुखमव्ययमश्नुते ॥८०॥
वेगशून्यं मनो यस्य प्रतिष्ठा परमेश्वरे ।
तृप्तिर्यस्य परे देवे तस्य तुष्टिर्हि शाश्वती ॥८१॥

येन तृप्यत्यभुञ्जानो येन तृप्यत्यवित्तवान् ।
येनाऽस्नेहो बलं धत्ते तं हरिं वृणुयात् कृती ॥८२॥
निजद्वाराणि संयम्योद्घाटयेद् द्वारमाच्युतम् ।
तेनात्मरतिपाथेयो विन्दते त्वच्युताऽक्षरम् ॥८३॥
सुविश्रान्तं परे कृष्णे दत्तकामं हरौ प्रभौ ।
सर्वतः सुखमायाति चाक्षयात् सुखसागरात् ॥८४॥
तं प्रबाधितमायं च प्रबाधितात्मकल्मषम् ।
अबाधितहरिध्यानं जरामृत्यू न विन्दतः ॥८५॥

एवं वै सर्वतो मुक्तो ब्रह्माऽमुक्तो विराजते ।
परमं ब्रह्म चैवाऽस्याऽमुक्तं भवति भाविनि ॥८६॥
एवमुल्लंध्य त्रिगुणान् प्राप्य धामाऽक्षरं त्विह ।
पुनरावर्तनं नैति सम्प्राप्तो हि परं पदम् ॥८७॥
अज्ञानमूलो वृक्षो यः कामकल्पः स उच्यते ।
विषयासिस्तबकश्च शाखास्तु विषया मताः ॥८८॥
संभोगा नालिकास्तस्य स्वादाः पत्राणि वै तरोः ।
प्रीतिः पुष्पाणि तस्यापि सुखं फलानि चास्य वै ॥८९॥
दुःखसंकरता तत्र दुष्टक्लेदप्रकर्दमः ।
मोहिनी रसतृष्णा च माया चाज्ञानमातृकाः ॥९०॥
हरिं प्राप्य च तां मायां विवासयेद्धि यान्त्रिकः ।
तेन सर्वं प्रयात्येव लीनतां यांत्रिकस्य वै ॥९१॥

सत्येवं स्वगृहे कृष्णः स्वर्गमणिः प्रकाशते ।
शीतलं तं प्रकाशं च लब्ध्वाऽक्षरप्रदं व्रजेत् ॥९२॥
तत्सुखं त्वक्षरसंज्ञं ब्रह्मपरात् समाहितम् ।
यत्राऽऽहितं च तत्पात्रं ब्रह्मरूपं निजात्मकम् ॥९३॥
अच्छिद्रं सुदृढं भक्त्युपासनालेपबन्धितम् ।
प्रेमरसे प्रपक्वं च स्नेहसुधाभिसंभृतम् ॥९४॥
हरिध्यानैकतानाख्यदिव्याकारनिवासितम् ।
मुक्तभावगतैः संरक्षितं यन्न विशीर्यते ॥९५॥
तदक्षयं चामृतं शाश्वतानन्दसंभृतम् ।
नैजं निजात्मसौख्यं श्रीहर्यापूरकपूरितम् ॥९६॥

य एतत् कृपया प्राप्तः प्राप्तो वा साधनैरपि ।
नाऽस्य कोशे सुखश्चास्ते प्रसादात्परमात्मनः ॥९७॥

यज्ञैर्दानैश्च हवनैः प्राप्तव्यं त्वेतदेव ह ।
आत्मनस्तु ततोऽन्यद्वै प्राप्तव्यं नावशिष्यते ॥९८॥
इत्येवं राधिके श्रीमल्लोमशः सद्गुरुः स्वयम् ।
उपादिश्य विरराम दुग्धपानं व्यधान्निशि ॥९९॥
सर्वेभ्योऽपि पयःपानं कारयामास भूपतिः ।
अथ रात्रौ प्रविश्रान्तिं जगृहुर्मखिनश्च ते ॥१००॥
नारायणं परं कृष्णं स्मरन्तो हृदये निजे ।
सुषुपुश्च महीमाना महर्षयोऽपरेऽपि च ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने तृतीयदिवसे दशम्यां सोमयागस्य कृत्योत्तरं भोजनोपदेशनादिनिरूपणनामा षट्चत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४६ ॥

श्रीकृष्ण उवाच—

राधिके प्रातरुत्थाय यजमानोऽश्वपाटलः ।
राजा कृताह्निकश्चापि लोमशोऽन्यमहर्षयः ॥ १ ॥
कृताह्निका यज्ञभूमिमाययुश्च समाहिताः ।
यावत्सामग्र्यादियुक्तास्तुर्येऽह्नयेकादशीदिने ॥ २ ॥
स्वस्तिवाचः प्रोक्षणादि स्वांगशुद्धिं तथाऽपरम् ।
सर्वं कर्म च नैत्योक्तं चक्रुर्यथोदितं तथा ॥ ३ ॥
विशेषतः प्रवक्ष्यामि शृणु समासतस्त्विदम् ।
प्रातः प्रवर्ग्योपसद्भ्यां प्रचर्य च ततः परम् ॥ ४ ॥
उद्वास्यापि प्रवर्ग्यं प्रक्षिप्य पात्राणि चोत्तरे ।
अग्नीषोमफलपशोस्तन्त्रमारब्धवान् गुरुः ॥ ५ ॥
इध्मकाष्ठानि चाधायाऽऽहवनीयेऽप्रकाशयत् ।
आदाय ज्वलितं वह्निं सीममादाय वै सह ॥ ६ ॥
महावेद्यन्तर्गतायां वेद्यां वह्निं न्यधापयत् ।
स वह्निर्गार्हपत्यश्च प्राजहिताख्य इत्यपि ॥ ७ ॥
सोमं चाऽस्थापयद्धविर्धानशकटे एव च ।
धृत्वा चात्वालपांसूंश्च तैश्च धिष्ण्यानुपाऽवपत् ॥ ८ ॥
वपायागं विधाय सुब्रह्मण्याह्वानमाचरत् ।
अध्वर्युर्वै ततः सोमाभिषवाय रसर्द्धये ॥ ९ ॥
तडागाद् वसतीवरीजलं घटे समाहरत् ।
शालामुखीयकं चास्थापयन् मध्यन्दिने ततः ॥१०॥
पशुपुरोडाशयागं प्रानिवर्तयदेव ह ।
सायाह्नेऽपि हृदयादिफलांगयजनं व्यधात् ॥११॥
कृत्वांगानि च पत्नीसंयाजान्तान्यसमापयत् ।
भोजनानि व्यधुः सर्वे यथायोग्यं यथाव्रतम् ॥१२॥
रात्रावध्वर्युरेवापि वसतीवरीश्चं घटम् ।
स्कन्धेनादाय वेद्याश्च परितो विहरन् न्यधात् ॥१३॥
ततश्च प्रतिप्रस्थाता वत्सापाकरणादिकम् ।
श्वोऽपेक्षितामिक्षार्थकं दध्ना संस्कारमाचरत् ॥१४॥
दधिग्रहार्थं च दधि पिच्छलं समपादयत् ।
सवनीयहविष्यार्थं बर्हिराहरणं व्यधात् ॥१५॥

विरामो यज्ञकार्यस्य ततस्तदा व्यजायत ।
सत्पनीको यजमानो रात्रौ जागरणं व्यधात् ॥१६॥
अनादिश्रीकृष्णनारायणोत्सवप्रपूर्वकम् ।
षोडशादिपदार्थैश्च पूजनं श्रीहरेर्व्यधात् ॥१७॥
व्रतस्योद्यापनं रात्रौ चकार नृपतिस्तथा ।
ऋषयोऽपि जनाश्चापि चक्रुः संकीर्तनं हरेः ॥१८॥
प्रातः पूर्वं हरिः साक्षान्मुरलीधर एव सः ।
अनादिश्रीकृष्णनारायणो राधारमायुतः ॥१९॥
दिव्यरूपधरो दिव्यतेजोमण्डलमण्डितः ।
साक्षाद्बभूव सर्वेषां धृताभूषो हसन् हरिः ॥२०॥
कंभरा दक्षिणे यस्य वामे गोपालकृष्णकः ।
माणिक्याद्या ब्रह्मसत्यः परितो यस्य चाऽभवन् ॥२१॥
प्रसन्नोऽस्मि व्रतेनाऽद्य यज्ञेनापि विशेषतः ।
फलदाताऽस्मि मोक्षात्म स्वर्गात्म यदभीप्सितम् ॥२२॥
ततो राजादयः कृष्णं पुपूजुः प्राप्तवस्तुभिः ।
हरिस्त्वदृश्यतां प्राप्तः स्वीयसार्थयुतः प्रभुः ॥२३॥
लोमशोऽपि ततः सर्वानुपादिदेश पावनम् ।
धर्मो नैकविधस्त्वस्ति लोकेषु च जनेषु च ॥२४॥
यज्ञधर्मः स्वयं नारायणात्मा ब्रह्मलोकदः ।
सेवाधर्मो महानाशीर्वादद्वारा दिवःप्रदः ॥२५॥
सर्वभूताऽद्रोहधर्मः परसौख्यप्रदोऽस्ति वै ।
प्रसन्नता परेषां वै महानन्दर्द्धिसम्प्रदा ॥२६॥
देवानां तुष्टिरेवापि महर्षीणां तथाविधा ।
आगन्तुकानां तुष्टिश्च परलोकसहायिनी ॥२७॥
पुरा महर्षिजटिलायननामा वने वसन् ।
तपश्चचार बहुधा स्थिरदेहोऽचलः सदा ॥२८॥
जटायामस्य चटका नीडं चकार गर्भिणी ।
तां दयावान् महर्षिः स तूपप्रैक्षत वै ततः ॥२९॥
तृणतन्त्वाढ्यनीडे वै जटायां चटका तु सा ।
अपातयत्तु स्वाण्डानि तान्यबुध्यत वै ऋषिः ॥३०॥
बुध्वाऽपि न चचालैषो धर्मे कृतमनास्तथा ।
सर्वभूताश्रयदानं धर्मः शरण्यरक्षणम् ।
अण्डेभ्यस्त्वथ पुष्टेभ्यश्चाजायन्त शकुन्तकाः ॥३१॥
व्यवर्धन्त च तत्रैव जातपक्षास्तथाऽभवन् ।
उड्डीयोड्डीय सायं ते पुनरायान्ति वै निशि ।
विश्रम्य च पुनर्यान्ति प्रातः कणाभिवाञ्छया ॥३२॥
अथ काले गते जातप्रवासाः पक्षिणस्तु ते ।
नोपावर्तन्त च यदा प्रातिष्ठत तदा ऋषिः ॥३३॥
स चाऽमन्यत धर्मोऽयं सिद्धो मम तपःपरः ।
स चाश्रयं ददात्येव कृत्वाऽऽश्रमं द्रुमान्वितम् ॥३४॥
अतिथीन् सर्वरूपांश्च पूजयत्येव सादरम् ।
नारायणः स्वयं तत्र समायातः परीक्षितुम् ॥३५॥
व्याधरूपो मृतं मृगं स्कन्धे कृत्वा समाययौ ।
देह्याश्रयं तथा चुल्लीं पात्रं च समिधस्तथा ॥३६॥
चाण्डालोऽहं कुक्कुरादो देहि ते यदि रोचते ।
जटायनो विचार्यैव ददौ चुल्लीं समित् तथा ॥३७॥
पात्रं वह्निं ददौ चापि पर्णशालां ददौ तथा ।
आश्रयाऽऽगतलोकस्य सेवने न क्षतिर्भवेत् ॥३८॥
इतिव्रताख्ये धर्मे मे चेतिकृत्वा ददौ तदा ।
श्वादः सर्वं परिपाच्य बुभुजे तृप्तिपूर्वकम् ॥३९॥
सर्वं तथाऽवशिष्टं च मांसं शालातलेऽक्षिपत् ।
सर्वामशुद्धां कृत्वैव निषसाद बहिः स्थले ॥४०॥
प्रमार्जयेति चाज्ञां स कृतवान् तन्महर्षये ।
महर्षिः सुप्रसन्नस्तां शालां शुद्धां व्यधापयत् ॥४१॥
श्वादाय प्राह चेत् किंचिदपेक्षितं ददामि ते ।
श्वादः प्राह चरणौ मे मर्दनं समपेक्षतः ॥४२॥
ऋषिस्तस्य पादसंवाहनं चकार भावतः ।
फलपत्रजलपानं ददौ भावेन वै पुनः ॥४३॥
प्रीयतां भगवानत्र शरणान्तर्वसन् प्रभुः ।
इत्युक्त्वा प्रददौ वारि तावदन्तर्हितोऽभवत् ॥४४॥
तेजसा व्याप्तदेहश्च दिव्यरूपो बभूव ह ।
चतुर्भुजः प्रभुः श्रीमान् लक्ष्मीश्रीसेवितो हरिः ॥४५॥
जटिलायन एवासौ ननाम पादयोः प्रभोः ।
कृपा कृता हरे चात्र कृतकृत्यः कृतस्त्वया ॥४६॥
देहि धामाऽक्षरं नाथ दर्शनोत्तरमेव ते ।
तथास्त्विति हरिः प्राह ऋषिर्देहं विहाय च ॥४७॥
ययौ धामाऽक्षरं तत्र सेवाधर्मेण सर्वथा ।
तस्माद् यज्ञैश्च दानैश्च गृहैश्च वस्तुभिस्तथा ॥४८॥
सेवनीया अतिथयस्तत्र नारायणो मिलेत् ।
शरणागतरक्षा वै नारायणस्य सेवनम् ॥४९॥
तदन्तरात्मा भगवान् प्रसन्नो जायते ध्रुवम् ।
तं प्रलक्ष्य समुद्दिश्य देहिनं सेवयेज्जनः ॥५०॥
स च यज्ञो महानास्ते यज्ञप्राप्तिप्रदः शुभः ।
हरिं विना महायज्ञा अयज्ञास्ते भवन्ति वै ॥५१॥
अथाऽन्येऽपि च मन्यन्ते क्रयविक्रयमोक्षणम् ।
लोकानामुपकारार्थं कृतं सर्वं च निर्गुणम् ॥५२॥

सर्वदेहिषु वै चास्ते परमेशोऽन्तरे स्थितः ।
क्रयी वा विक्रयी नारायणः स्वयं न चाऽपरः ॥५३॥
लाभं प्राप्याऽऽनन्दमेति चाहर्ता परमेश्वरः ।
दाता धनं तथा प्राप्याऽऽनन्दमेति परेश्वरः ॥५४॥
शाकविक्रयनामा वै पुरा कश्चिद् वणिग्जनः ।
सत्यमार्गे समाश्रित्याऽकरोद्वै क्रयविक्रयौ ॥५५॥
पूर्वं प्रातः स्वपितरौ प्रपूज्य स वणिग्जनः ।
भोजयित्वा निदेशं संगृहीत्वा याति चाऽऽपणम् ॥५६॥
शाकानि तुलया सोऽपि ददाति क्रयिणे तदा ।
क्रयी बालोऽथवा वृद्धो युवा वा चेतरोऽपि वा ॥५७॥
स्त्री वा कन्या च वाऽपक्वबुद्धिर्यः कोऽप्युपस्थितः ।
नमस्ते विष्णवे चोक्त्वा ददात्येव तदर्थितम् ॥५८॥
न न्यूनं वर्तते तत्र तुलायां वै मनागपि ।
ददाति चेश्वरभावाद् भिक्षुकायाऽपि वै फलम् ॥५९॥
क्रमवारेण सर्वेभ्यो ददात्येव न विक्रमात् ।
यथायोग्यं ददात्येव मत्वा तत्र नरायणम् ॥६०॥
स च नित्यं विक्रयं संकुर्वन् ज्ञानं करोति वै ।
क्रयिणः ! सर्वथा यूयं भजध्वं परमेश्वरम् ॥६१॥
सर्वेषां यः सुहृन्नित्यं सर्वेषां सुहिते रतः ।
कर्मणा मनसा वाचाऽन्तरात्मानं भजध्वमुत् ॥६२॥
द्वेषं कामं त्यजतैव स्मरत श्रीपरेश्वरम् ।
काँश्चिन्नैवाऽनुरुन्द्ध्वं मा विरोधयत कैः सह ॥६३॥
समं नारायणं तत्र ज्ञात्वा भजत तं हरिम् ।
दिव्यभावाश्च भवत समलोष्ठाश्मकाञ्चनाः ॥६४॥
यथाऽन्धा बधिरा नैव पश्यन्त्याकर्णयन्त्यपि ।
तथा भाव्यं विषयेषु प्रान्धैश्च बधिरैः सदा ॥६५॥
परमेशे त्वनन्धत्वं चाऽबाधिर्यं कथाश्रवे ।
मूकत्वं त्वन्यविषये परमेशे तु वाग्मिता ॥६६॥
एवं सर्वं विधातव्यं नारायणे सचेतनम् ।
अचेतनं विषयेषु प्राप्तव्यं मानवैरिह ॥६७॥
यथा वृद्धाऽऽतुरकृशा निस्पृहा वै निसर्गतः ।
तथा भाव्यं विषयेषु स्पृहाहीनैर्जनैरिह ॥६८॥
यदा स्वस्य भयं नास्ति स्वस्माद् भयं न विद्यते ।
रागद्वेषादिशून्यस्य ब्रह्मप्राप्तिः सुनिश्चिता ॥६९॥
पापभावावियुक्तस्य ब्रह्मसम्पत्तिरुत्तमा ।
यत्राऽभयं महान् धर्मः स प्राप्नोत्यभयं पदम् ॥७०॥
यस्माद् भयं परेषां स्यात् तस्य त्वायान्महद्भयम् ।
अहिंसाः साधवो लोके भयदा न यथा क्वचित् ॥७१॥
तथा वृत्तिं चाश्रयत प्रयात ब्रह्मशाश्वतम् ।
अद्रोहवृत्तिश्चाऽचौर्यं चाऽस्थार्थश्चाऽप्रतारणम् ॥७२॥
यस्य धर्मा इमे रूढास्तस्य ब्रह्म प्रकाशते ।
भवन्त्युभयदानेन समा नान्ये मखादयः ॥७३॥
लोके यः सर्वदेहिभ्यो ददात्यभयदक्षिणाः ।
स सर्वयज्ञैरीजानः प्राप्नोत्यभयदक्षिणाम् ॥७४॥
सर्वभूतात्मभूतो वै नारायणो निरीक्षकः ।
ददात्यभयदात्रे वै चाऽक्षरं निर्भयं पदम् ॥७५॥
कृष्याचारा हिंस्रभावास्तृणच्छेदादिकार्यकाः ।
वृषभादिवाहभावाः क्लेशदा हि भयान्विताः ॥७६॥
पशून् लोका वाहयन्ति बध्नन्ति दमयन्ति च ।
मानुषा मानुषानेव दासभावेन भुञ्जते ॥७७॥
अश्वादीन् वाहनान् कृत्वा नयन्ति बहुकर्दमान् ।
भयदा हिंस्रका लोकास्तत्फलं यान्ति वै भयम् ॥७८॥
अघ्न्या इति गवां नाम क एता हन्तुमर्हति ।
अग्निषोमे वत्सनाम प्रियं वृक्षफलं तु यत् ॥७९॥
वत्सापाकरणं तद्वै हृदयं रसपक्वता ।
अंगान्यपि फलस्यैव तेन कृष्णः प्रतुष्यति ॥८०॥
नाऽहं हन्मि तृणं वापि फलं वापि करेण वै ।
न शस्त्रेण नेतरेण चाऽभयं पालयामि यत् ॥८१॥
शाकपत्रादिकं योग्यं पक्वं वृक्षाद् वियुज्यते ।
तस्यैव क्रयणं कृत्वा विक्रयं प्रकरोमि वै ॥८२॥
सुखःदुखे समे मे स्तो न हि मे स्तः प्रियाऽप्रिये ।
एवं धर्मं पालयध्वं जनास्त्वभयदानकम् ॥८३॥
तेन मुक्तिमवाप्स्यन्ति भवन्तोऽभयवर्तनाः ।
नारायणो हि भगवाँस्तेन तुष्यति सर्वदा ॥८४॥
नमो ब्राह्मणयज्ञाय नमः प्रजाध्वराय च ।
नमः सेवाप्रवीणेभ्यो जनेभ्यश्च नमोनमः ॥८५॥
सुकृतेन सुहव्येन देवास्तुष्यन्ति सर्वदा ।
नमस्कारेण हव्येन स्तोत्रेण हृदयेन च ॥८६॥
यज्ञाहुत्या सुसन्तुष्टा आदित्या वर्षयन्ति हि ।
ततः सस्यरसान्नानि तेभ्यः प्रजाप्रवर्धनम् ॥८७॥
प्रजाः कुर्वन्ति यज्ञाँश्च ब्रह्म तुष्यति तत्र च ।
ब्रह्मतोषकरा भक्तास्तोषयन्त्यपरानपि ॥८८॥
तस्माद् भक्तिं प्रकुर्वन्तु सर्वे यद् ब्रह्मदैवतम् ।
ब्रह्मतृप्तौ जगत्सर्वं तृप्तमेव न संशयः ॥८९॥
यज्ञे तृप्ताः सर्वदेवाः स्युर्यस्य ब्रह्मतर्पणम् ।
तस्य प्रज्ञानतृप्तस्य नित्यतृप्तिः सुखोदया ॥९०॥

धर्माधारा धर्मोदया ब्रह्मध्यानपराश्च ये ।
भक्तिविज्ञानसम्पन्नाः परं पारं तितीर्षवः ॥९१॥
सर्वस्थितं परब्रह्म दृष्ट्वा लब्ध्वा विचार्य च ।
पुण्यात्पुण्यतमं स्थानं प्राप्नुवन्त्यक्षरं पदम् ॥९२॥
यत्र गत्वा न शोकोऽस्ति न च्यावो न व्यथा मृतिः ।
नैतादृशानां स्वर्गार्थं यजनं वा यशोऽर्थकम् ॥९३॥
सतामाचररूपं तद् यजनं द्रोहवर्जितम् ।
ब्रह्मतृप्तिपरं समिदोषधिफलमूलकैः ॥९४॥
स्वर्गार्थं पुण्यमेवाऽस्ति नैर्गुण्यं मुक्तये भवेत् ।
तदहं हृदये कृत्वा नैर्गुण्यं त्वाचरामि वै ॥९५॥
अन्ये यजन्ति यज्ञेषु स्मृद्ध्यर्थं कृतनिश्चयाः ।
तेन ते देवयानेन यथा यान्ति दिवं पुनः ॥९६॥
आवृत्तिं तेऽभिगच्छन्ति नाऽऽवर्तन्ते तु निर्गुणाः ।
स्वयं यूपानुपादाय यजन्ते स्वाप्तदक्षिणैः ॥९७॥
पुनः स्वर्गं पुनर्भूमिर्भ्रमावर्तो न लीयते ।
तस्माद् भवन्तु वै ब्रह्मयजना नान्ययाजिनः ॥९८॥
ब्रह्म वै दैवतं कृत्वा यज्ञे मोक्षं प्रयान्तु च ।
आत्मतीर्थे मखं शुक्लं कुर्वन्तु दिव्यभावनैः ॥९९॥
एवं कृतोपदेशश्च शाकविक्रयको वणिक् ।
सर्वसेवापरो नित्यं चाभजत् पुरुषोत्तमम् ॥१००॥
श्रीहरिस्त्वेकदा चायात् क्रयी भूत्वा तदन्तिकम् ।
देहि शाकं शाश्वतं मे पारवालिकमाह तम् ॥१०१॥
वणिग् बुध्वा पारवालं शाकं ददौ तु शार्ङ्गिणे ।
नमः पारवलायैव कृष्णाय क्रमिणेऽर्थिने ॥१०२॥
पारं यो बलयत्येव संसाराब्धेश्च ते नमः ।
इत्युक्त्वा दण्डवच्चक्रे चक्रिणे दिव्यदृष्टिमान् ॥१०३॥
ततश्चतुर्भुजो भूत्वा हरिस्तं पाणिनाऽस्पृशत् ।
मीनध्वजधनुःशूलास्वस्तिकचक्रचिह्निना ॥१०४॥
निन्ये विमाने संस्थाप्य दिव्यं कृत्वाऽक्षरं पदम् ।
इत्येवं मखमार्गेण ये भजन्ते हरिं सदा ॥१०५॥
ते प्रयान्ति हरेर्धाम हरिणा सह नैष्ठिकाः ।
तस्माद् भजन्तु सततं चान्तरस्थं नरायणम् ॥१०६॥
अनादिश्रीकृष्णनारायणं गोपालनन्दनम् ।
कम्भराबालकं श्रीशंप्रभुं श्रीकृष्णवल्लभम् ॥१०७॥
श्रीकृष्णवल्लभंनाथं भगवन्तं परात्परम् ।
इत्युक्त्वा लोमशो ब्राह्मे मुहूर्ते प्रययौ सरः ॥१०८॥
राधिके च ततः सर्वे स्नानार्थं प्रययुः सरः ।
जागरणं प्रकृत्वैव पूजां कृत्वा च नैत्यिकीम् ॥१०९॥
महर्षयो यजमानस्तथाऽन्ये मखिनो जनाः ।
सोमकर्मार्थमायाता मण्डपे पञ्चमे दिने ॥११०॥
नित्यप्राप्तं विधायैव विशेषं च समाचरन् ।
राधिके ते प्रवक्ष्यामि सर्वपुण्यप्रदं शुभम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चतुर्थे दिवसे सोमयागस्यैकादश्यां कृत्यं जागरणमुद्यापनमुपदेशनं चेत्यादिनिरूपणनामा सप्तचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४७ ॥

**श्रीकृष्ण उवाच—**

पञ्चमे दिवसे राधे प्रातः सोमस्य चोत्तरम् ।
विधिं सर्वं प्रवक्ष्यामि लोमशो यं चकार ह ॥ १ ॥
द्वादश्यां ब्राह्मकालस्याऽऽरंभे तु सर्वऋत्विजः ।
प्रबुध्य स्नात्वा सोमाभिषवकर्माणि चारभन् ॥ २ ॥
अध्वर्युस्तानि पात्राण्ययोजयत् तत्स्थलीषु वै ।
होता शस्त्रं चानुवाकाख्यमारभत वै ततः ॥ ३ ॥
सवनीयहविषां निर्वापं चक्रे च पञ्चभिः ।
धानाभिश्च करंभेन परिवापेन वै तथा ॥ ४ ॥
पुरोडाशेन च प्रतिप्रस्थातामिक्षया तथा ।
धाना भ्रष्टयवा बोध्याः करंभो यवसक्तवः ॥ ५ ॥
परिवापश्च वै लाजाः पयस्याऽऽमिक्षिका मता ।
तेषां च देवताः पञ्च हरिस्त्वानिन्द्र आदिमः ॥ ६ ॥
पूषण्वानिन्द्रो द्वितीयः सरस्वती तृतीयका ।
इन्द्रस्तुर्यो मित्रावरुणौ पञ्चमदेवता ॥ ७ ॥
ताः प्रपूज्य ततश्चक्रे दधिग्रहप्रचारकम् ।
तद्यथोदुम्बरपात्रे गृहीत्वा दधि ह्युत्तमम् ॥ ८ ॥
प्रजापतिदेवतायै जुहावौदुम्बरेण वै ।
ततोऽदाभ्यग्रहं चक्रे सोमदेवाय तद्यथा ॥ ९ ॥
दध्ना वा पयसाऽऽपूर्य पात्रं तथोपनह्य च ।
सोमलतावयवानामंशुत्रयं प्रगृह्य च ॥१०॥
ग्रहपात्रे स्थापयित्वा पञ्चकृत्वो ग्रहं हि तत् ।
सप्तकृत्वोऽथवाऽऽधूय तत्पात्रं सञ्जुहाव ह ॥११॥
ततश्चक्रेंऽशुग्रहं संगृह्यैकग्रहसोमकम् ।
क्षिप्त्वा पाषाणके सिक्त्वा वसतीवरीवारिणा ॥१२॥
अभिषुत्य ग्रावभिश्चाऽदाभ्यपात्रे निधाय च ।
जुहाव च प्रजापतिदेवतायै ततः परम् ॥१३॥
गृहीत्वैव च तत्पात्रं प्रविश्य च सदस्ततः ।
भक्षयित्वा पात्रगतं सोमरसं च वै ततः ॥१४॥

पात्रं खरेऽसादयश्चोपांशुग्रहं व्यधात्ततः ।
तत्र क्रीतं तथा वस्त्रे स्थापितं चोपनह्य च ॥१५॥
सोमं समवमुच्यैव गृहीत्वा सर्वमेव च ।
प्रविभज्य द्विधा प्रातस्सवनार्थं विशेषतः ॥१६॥
स्वल्पं माध्यन्दिनसवनार्थं कृत्वा च वै ततः ।
प्रातः स्तवनसोमाद्वै चैकग्रहार्थमेव ह ॥१७॥
सोमं धृत्वा होतृचमसे निधाय च वै ततः ।
वसतीवरीभिरद्भिः सिक्त्वा पिष्ट्वा च ग्रावभिः ॥१८॥
निष्पीड्य च रसं लब्ध्वाऽञ्जलिनाऽध्वर्युरेव तम् ।
उपांशुपात्रे त्रिवारं चानाय्य च जुहाव ह ॥१९॥
आधाराग्रह एवाऽयं देवताप्राण एव च ।
तस्यै दत्वा ततश्चक्रुर्धाराग्रहान् ध्रुवान्तकान् ॥२०॥
सोमाभिषवकः सोऽयं महाभिषवः सम्मतः ।
उपविश्याऽध्वर्यवश्च ह्यभिषवस्थले ततः ॥२१॥
ग्राग्णः प्राच्यामध्वर्युश्च प्रत्यङ्मुख उपाविशत् ।
दक्षिणे प्रतिप्रस्थाता चोदङ्मुख उपाविशत् ॥२२॥
पश्चिमे प्राङ्मुखो होता चोत्तरे दक्षिणामुखः ।
उन्नेता निषसादापि शिलायां न्यस्य सोमकम् ॥२३॥
सिक्त्वा वसतीवर्यद्भिः पिष्ट्वाऽभिषुणुयुस्तथा ।
दक्षस्तेनैवमेव वारत्रयं विधाय च ॥२४॥
पिष्टान् सोमलताखण्डान् निक्षिप्याऽधावनीयके ।
मृत्पात्रे च प्रपीड्यैव रसं निष्कास्य तं रसम् ॥२५॥
पात्रान्तरे गृहीत्वैव तुषान् पार्श्वे समक्षिपन् ।
अथाऽजलोमजां नाभिं प्रादेशमात्रनिर्मिताम् ॥२६॥
पवित्रवस्त्रखण्डे तामालम्ब्य द्रोणपात्रके ।
वितत्याऽधारयँस्तां चोद्गातारश्च ततः परम् ॥२७॥
उन्नेताऽऽधवनीयादुदच्चनेन च सोमकम् ।
रसं धृत्वाऽऽनिनयच्च होतृचमसे एव तम् ॥२८॥
यथा पवित्रवस्त्रांशे पतेद् रसस्तथाऽधरेत् ।
ततः स्रवन्त्या धाराया अन्तर्याम्याख्यपात्रके ॥२९॥
अन्तर्यामग्रहं न्यस्याऽध्वर्युर्जुहाव शेषकम् ।
सशेषमेवाऽऽग्रयणस्थाल्यां सम्पातमाप्य च ॥३०॥
सशेषं च ग्रहं खरेऽसादयच्च ततः परम् ।
इन्द्राख्यदेवतायै तं होमं ददौ गुरुः स्वयम् ॥३१॥
अथैन्द्रवायवाद्याँश्च ग्रहान् चक्रुस्ततः परम् ।
ऐन्द्रवायवं संगृहीत्वा धारातश्च ततो गुरुः ॥३२॥
पवित्रदशया बहिर्मृष्ट्वा खरेऽप्यसादयत् ।
एवं मैत्रावरुणं च, शुक्रं च, मन्थिनं रसम् ॥३३॥
आग्रयणं, तथाऽऽग्नेयम्, ऐन्द्रं सौर्यं समुक्थ्यकम् ।
ध्रुवं चेति क्रमाद् गृह्ये खरेऽसादयदेव सः ॥३४॥
ध्रुवग्रहग्रहणोर्ध्वं धाराविराममाचरत् ।
हविर्धानमण्डपाच्च पञ्चर्त्विजो बहिर्ययुः ॥३५॥
प्रासर्पन् समन्वारब्धा बहिष्पवमानकृते ।
अग्रेऽध्वर्युस्ततः कच्छं धृत्वा प्रस्तोताऽन्वसरत् ॥३६॥
कच्छं धृत्वा प्रतिहर्ता तत उद्गाताऽन्वसरत् ।
ततो ब्रह्मा यजमानस्ततः कच्छेन चाऽसरत् ॥३७॥
चात्वालदेशं गत्वोपविश्य कच्छमवाऽसृजन् ।
उद्गाता सम्प्रस्तोता च प्रतिहर्ता त्रयस्त्विमे ॥३८॥
अस्तुवँस्ते बहिष्पवमानस्तोत्रेण वै तदा ।
तेन सम्पावितौ चाश्विनौ ग्रहौ मखयोग्यकौ ॥३९॥
कृत्वाऽऽग्नीध्रेण धिष्ण्येषु प्रज्वालितेषु चाश्विनम् ।
अध्वर्युर्ग्रहमासाद्य द्रोणघटात् खरेऽन्यसन् ॥४०॥
ततः कृत्वा सवनीयफलोपाकरणादिकम् ।
वपायागान्तकं प्रातःसवनाय ततः परम् ॥४१॥
अध्वर्युब्रह्मयजमानसदस्याः सदःस्थलम् ।
प्रविश्य ग्रहचमचादिकपात्राणि वै तथा ॥४२॥
धृत्वा द्रव्याणि च ब्रह्मा यजमानस्ततः परम् ।
तैस्तैर्मन्त्रैरुपस्थाय सर्वपात्राणि वै ततः ॥४३॥
उत्तरेण हविर्धानं गत्वा च पूर्वया तथा ।
द्वारा सदः प्रविश्यैव स्वस्वस्थाने उपाविशन् ॥४४॥
ततश्चक्रुः सवनीयहविषामनुष्ठानकम् ।
धाराग्रहप्रचारं च चक्रुर्यथोचितं तथा ॥४५॥
स्विष्टकृदन्तकर्माऽनुष्ठायाऽध्वर्युः समाचरत् ।
ऐन्द्रवायवमैत्रावरुणाश्विनान् हि त्रिग्राहान् ॥४६॥
अध्वर्युर्णैन्द्रवायवे गृहीते च ततः परम् ।
प्रतिप्रस्थाता चादित्यपात्रे द्रोणघटात् खलु ॥४७॥
ऐन्द्रवायवनिग्राह्यं धृत्वा साकं जुहाव ह ।
परस्पररससेकोत्तरमादित्यपात्रके ॥४८॥
समानयच्च सम्पातं होत्रे पात्रं गुरुर्ददौ ।
एवमुत्तरग्रहयोरनुष्ठानं च पातनम् ॥४९॥
उन्नेता च ततश्चाच्छावाकचमसमेव च ।
वर्जयित्वा तत्र नवचमसानप्यपूरयत् ॥५०॥
होतुश्च ब्रह्मणश्चाप्युद्गातुर्यजयितुस्तथा ।
ब्राह्मणाच्छंसिनो मैत्रावरुणस्य तथा च वै ॥५१॥
पोतुर्नेष्टुस्तथा चाग्नीध्रस्य ते चमसा नव ।
परिप्लवया कलशादास्राव्य सोमकं रसम् ॥५२॥

पूतभृत्कलशात् सोममादाय चमसाँस्ततः ।
प्रपूर्य द्रोणकलशान्न्यस्याऽथ चमसेषु च ॥५३॥
अस्रावयत् प्रथमं स्रावणं चोपस्तरात्मकम् ।
द्वितीयं स्रावणं चाभिधारणस्थानकं मतम् ॥५४॥
एवं सर्वोन्नयनं कर्तव्यं प्रपूरणं खलु ।
ततोऽध्वर्युः शुक्रपात्रं गृहीत्वा सोमसंयुतम् ॥५५॥
मन्थिपात्रं प्रतिप्रस्थाता गृहीत्वा ससोमकम् ।
हविर्धानमण्डपस्य पूर्वद्वारि सुसन्मुखौ ॥५६॥
तिष्ठन्तौ स्वं गृहं वाऽरत्निं सन्धाय परस्परम् ।
मन्त्रकृत्वश्चाहवनीयस्य पुरोऽनुगम्य च ॥५७॥
पश्चमुखौ ग्रहहोमार्थं सज्जौ सम्बभूवतुः ।
तदा नवचमसाध्वर्यवः सचमसाः खलु ॥५८॥
आवहनीयदेशं च गत्वा पूर्वाननास्तदा ।
होमार्थमुद्यताश्चासन् चक्रुश्चाश्रवणं तथा ॥५९॥
चक्रुः प्रत्याश्रवणादि ददौ प्रैषं ततो गुरुः ।
होत्रा कृते वषट्कारेऽनुवषट्कारके कृते ॥६०॥
द्विर्हुत्वा चमसश्चाध्वर्युणा च प्रेषिता सदः ।
प्रतिभक्षार्थं चमसानाहरत् होतृकादयः ॥६१॥
मैत्रावरुणाद्याध्वर्यवश्चमसान् प्रपूर्य च ।
होमार्थमानयँश्चाप्याहवनीयं प्रति द्रुतम् ॥६२॥
अध्वर्युप्रतिप्रस्थातारौ च होमं प्रचक्रतुः ।
इन्द्रदेवतायै स्वाहाऽग्नये स्विष्टकृते स्वाहा ॥६३॥
प्रतिप्रस्थाता संस्रावहोममंगारकेऽकरोत् ।
रुद्राय स्वाहेति ततोऽध्वर्युश्चमसमाप्य च ॥६४॥
जुहाव मित्रवरुणाभ्यां स्वाहेति क्रमादपि ।
सर्वेऽध्वर्यवो जुहुवुः स्वं स्वं चमसमेव ह ॥६५॥
इन्द्राय मरुते त्वष्ट्रे चाग्नये स्वाहा नमम ।
ततश्चमसप्रसादं भक्षयामासुरेव ते ॥६६॥
अच्छावाकोऽपि चमसं भक्षयामास वै ततः ।
ऋतुग्रहप्रचारं चाऽकुरुतां द्वौ ततः परम् ॥६७॥
अध्वर्युप्रतिप्रस्थातारौ चक्रतुर्हवान् शुभान् ।
इन्द्राय मघवे स्वाहा मरुते माधवाय च ॥६८॥
त्वष्ट्रे शुक्राय च स्वाहाऽग्नये च शुचये स्वाहा ।
इन्द्राय नभसे स्वाहा मित्रावरुणनभस्येभ्यः स्वाहा ॥६९॥
द्रविणोदसे इषाय स्वाहा द्रविणोदसे ऊर्जाय स्वाहा ।
द्रविणोदसे सहाय स्वाहा द्रविणोदसे सहस्याय स्वाहा ॥७०॥
अश्विनाभ्यां तपसे स्वाहा, गृहपतये तपस्याय स्वाहा ।
ततश्चमसानां वै भक्षणं विधिनाऽभवत् ॥७१॥
ततः शस्त्रप्रपठनं प्रतिगरस्य पाठनम् ।
'अध्वर्यो शांसावो इम्, शोंसामोद इव' ॥७२॥
'ओं मो३थामोद इव, ओथामोद इव' ।
'ओं ओथामोद इवे'त्यादिपाठं समाचरन् ॥७३॥
ततो नाराशंसहोमं जुहावाऽध्वर्युरेव च ।
इन्द्राग्निभ्यामिदं स्वाहा पितृभ्यः स्वाहा नमः ॥७४॥
नाराशंसं विधायैवं प्रउगशस्त्रमुक्तवान् ।
विश्वेदेवताभ्यश्च स्वाहेति हवनं ददौ ॥७५॥
चमसाँश्च ततोऽभक्षयन् वै निरवशेषतः ।
उक्थ्यग्रहप्रचारं च होमं च सर्वभक्षणम् ॥७६॥
प्रक्षालनं खरे सादनं चेति सर्वमाचरत् ।
मित्रावरुणाभ्यां च स्वाहेन्द्राग्निभ्यां तथा स्वाहा ॥७७॥
ऋत्विजश्च विधायैवं सादनान्तं विधिं ततः ।
प्रातः सवनं निर्वर्त्य बहिर्ययुश्च मण्डपात् ॥७८॥
मध्याह्ने च प्रचक्रुश्च माध्यन्दिनं सवं च ते ।
प्रातर्वत् सर्वमाकृत्वा धारास्रावं व्यधुश्च ते ॥७९॥
शुक्राय मन्थिने चाग्रयणाय स्वाहा नमम ।
पवमानं जगुश्चापि दधियागं व्यधुस्ततः ॥८०॥
भक्षणं सादनं चक्रुरुच्चावर्चं च कर्म च ।
दक्षिणादानमेवापि यजमानश्चकार ह ॥८१॥
गावोऽश्वाश्चाश्वतराश्च गर्दभाऽजाऽवयस्तथा ।
तिलमाषव्रीहियवा गजवासोहिरण्यकम् ॥८२॥
सर्वस्वमेव राज्यादि कन्यागृहाणि वाटिकाः ।
दक्षिणायां प्रदत्तानि राज्ञा तदा मखोत्सवे ॥८३॥
मरुत्वतीयग्रहप्रचारस्ततोऽभवत् खलु ।
वैश्वदेवपञ्चहोमानध्वर्युः प्रचकार ह ॥८४॥
अध्वर्युः प्रतिप्रस्थाता हुत्वा चक्रतुर्भक्षणम् ।
होमं कर्म्पं प्रचक्रुश्च इन्द्राय मरुत्वते स्वाहा ॥८५॥
ऊर्वेभ्यः पितृभ्यः स्वाहा माहेन्द्राय नमः स्वाहा ।
अग्नये चेन्द्राय स्वाहा सूर्याय च स्वाहा नमम ॥८६॥
उक्थ्यविग्रहानुष्ठानं पञ्चस्तोत्रप्रपाठनम् ।
सवसमाप्तिहोमं च कृत्वा बर्हिर्ययुस्ततः ॥८७॥
तृतीयं सवनं चापि चक्रुर्होमं च भक्षणम् ।
आदित्येभ्यः स्वाहा नमः पयो दधीदं सोमकम् ॥८८॥
ततश्चार्भवपवमानाय प्रसर्पणं व्यधुः ।
धिष्ण्यान् प्रज्वालयामासुः कृत्वेडाभक्षणान्तकम् ॥८९॥
सवनीयहवींषि सम्प्रचर्याध्वर्युरेव तु ।
सकृद्धोमं प्रचकार होमं चक्रे तदुत्तरम् ॥९०॥

चमसिनः स्वस्वपितॄनुद्दिश्य ताननितिष्ठिपन् ।
ततो होमं सवित्रे च विश्वदेवेभ्य आददौ ॥९१॥
मक्षणं च ततः सौम्यचरुयागो ह्यवर्तत ।
अनवस्रावितस्तण्डुलपक्वौदनकं चरुम् ॥९२॥
जुहाव चाग्नये पत्नीवते स्वाहेति वै गुरुः ।
एकविंशतिकस्तोमं स्तोत्रं चागायत प्रखम् ॥९३॥
चमसान् जुहुवुश्चापि वैश्वानराग्नये स्वाहा ।
मरुद्भ्यः स्वाहेति नमम भक्षणं च ततः परम् ॥९४॥
ततो हारियोजनात्मग्रहप्रचारकं व्यधुः ।
उन्नेता च सोमरसं यवधानादिमिश्रितम् ॥९५॥
जुहावाऽन्येऽपजिघ्रँश्च पत्नीसंजायसं तथा ।
यजुर्होमादिकं प्रायश्चित्तहोमान् चकार ह ॥९६॥
यजमानस्य च ततो विष्णुक्रमणकादिकम् ।
एवं समाप्य तृतीयसवनं भोजनानि च ॥९७॥
व्यधुः सर्वे महीमाना जनाश्च तीर्थवासिनः ।
स्थायिनश्च ततश्चावभृथेष्टिः समजायत ॥९८॥
सपत्नीको यजमानः ऋत्विजश्चापरे जनाः ।
राजासन्द्यां सोमपात्राण्यादायाऽऽगृह्य जीषकम् ॥९९॥
ययुर्जलसमीपं च गायन्तः सामगीतिकाः ।
जलेऽग्नीवरुणाभ्यां च आज्यभागौ ददुस्तदा ॥१००॥
चतुःप्रयाजाँश्चक्रुश्च द्वावनूयाजकौ तथा ।
वरुणाय पुरोडाशं ददामि वै जले नमः ॥१०१॥
ऋजीषादीनि च जले क्षिप्त्वा पत्नीनृपस्तथा ।
सस्नतुश्चापरे चापि नेमुश्चादित्यमित्यपि ॥१०२॥
शालामुखे समागत्योदयनीयेष्टिमाचरन् ।
तत आनुबन्ध्यफलयागश्चामिक्षिकायजिः ॥१०३॥
मित्रावरुणाभ्यां स्वाहा दत्वा बलिं तथोचितम् ।
यजमानः केशश्मश्रुनखलोमानि वै ततः ॥१०४॥
वापयित्वा च स्नात्वा चेष्टिकल्पेन च पञ्च च ।
धाताऽनुमतिराकासिनीवालीकुहूरित्यपि ॥१०५॥
आज्येनेष्ट्वा देवतास्ता उदवसानीयेष्टिकाम् ।
अष्टाकपालपुरोडाशद्रव्यां तथाऽकरोत् ॥१०६॥
विष्णवे स्वाहेति दत्वाऽग्निहोत्रं निशि चाचरत् ।
ततश्चक्रुः परिहारं सोमयागस्य चर्षयः ॥१०७॥
सोमपानं प्रचकार राजा पत्नीयुतस्तदा ।
भोजनानि प्रचक्रुश्च सर्वे वै मखिनोऽध्वरे ॥१०८॥
एवं वै राधिके सोमयागो द्वादशिकादिने ।
सम्पूर्णश्चाऽभवद् रात्रौ यज्ञनारायणः स्वयम् ॥१०९॥
दर्शनं प्रददौ राज्ञे वरदानं ददौ तथा ।
स्वस्ति तेऽस्तु सदा राजन् चान्ते मोक्षपदं व्रज ॥११०॥
स्थापयाऽत्र च मां सौधे मूर्तिरूपं नरायणम् ।
स राजा राधिके तूर्णं मन्दिरं समकारयत् ॥१११॥
यज्ञनारायणस्तत्र याज्ञीपत्नीसमन्वितः ।
स्थापितस्तेन विधिना तीर्थं यज्ञाख्यमेव तत् ॥११२॥
सोमतीर्थं तथा चाऽभूत् स्नानाद् यज्ञफलप्रदम् ।
अश्वपट्टसरस्येवैशानकोणे हि पावनम् ॥११३॥
नृपोऽश्वपाटलः श्रीमद्बालकृष्णस्य हस्ततः ।
कण्ठीं च वैष्णवीं प्राप मन्त्रं जग्राह लोमशात् ॥११४॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
ततः प्रपूज्य देवेशं दत्वा दानानि सर्वशः ॥११५॥
ययौ नैजं प्रराष्ट्रं च राधिके सुखतो नृपः ।
ऋषयोऽन्ये देवताद्या ययुर्नैजान् प्रदेशकान् ॥११६॥
तत्र दानाज्जलपानादवगाहाच्च भोजनात् ।
पूजनादपि स्वर्गं स्यादन्तेऽक्षरपदं व्रजेत् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सोमयागे पञ्चमदिने मार्गकृष्णद्वादश्यां प्रातःसवनं माध्यन्दिनसवनं तदुत्तरसवनं पूर्णाहुतिरवभृथेष्टिः परिहारश्चेत्यादिनिरूपणनामाऽष्टाचत्वारिंशद-धिकद्विशततमोऽध्यायः ॥ २४८ ॥

श्रीकृष्ण उवाच—

राधिकेऽथ ततः सर्वे निद्रां जगृहुरेव ह ।
त्रयोदश्यां कृतस्नानार्हणा विदायमाप्नुवन् ॥ १ ॥
लोमशर्षिः सभायां वै ह्युपादिदेश देहिनः ।
श्रद्धायज्ञाः फलवन्तश्चाऽश्रद्धाः फलवर्जिताः ॥ २ ॥
आज्येन पयसा दध्ना सोमेन च फलेन च ।
पूर्णाहुत्या श्रद्धया च फलवन्ति क्रतवस्त्विह ॥ ३ ॥
अशक्ताश्च मखे ते तु पुच्छाभिषेचनेन वै ।
अभिषेकेण वा पादरजसा सन्तरन्त्यपि ॥ ४ ॥
श्रद्धां पत्नीं विधायैव सुसत्यैन व्रतेन तु ।
यजमानो यजेतेशं तरत्येव न संशयः ॥ ५ ॥
इष्टं तु दैवतं कृत्वा यजेत श्रद्धया मुहुः ।
भावेनाऽर्पणविधिना तरत्येव स यागकृत् ॥ ६ ॥
पुरोडाशः सदा मेध्यो देवानां तृप्तिकारकः ।
सर्वा नद्यः सरस्वत्यः सर्वे पुण्याः शिलोच्चयाः ॥ ७ ॥

सर्वा पृथ्वी हरेर्धाम ब्रह्मनिष्ठस्य देहिनः ।
श्रद्धा तु पोषिता येन सा तु पुष्णाति तं जनम् ॥ ८ ॥
श्रद्धां निहन्ति यो धर्मं सा हता हन्ति तं जनम् ।
साधूनां श्रद्दधानानां कुर्वतां यज्ञविस्तरम् ॥ ९ ॥
फलं सम्पद्यते सर्वं प्रसवित्री हि सा यतः ।
ज्ञानवृद्धं मनोवृद्धं श्रद्धा देवे हि रक्षति ॥१०॥
श्रद्धावृद्धं हरिर्नारायणः क्वापि न मुञ्चति ।
अश्रद्दधानो देवानां नार्हति हविरर्पणे ॥११॥
अहविरन्नदातुश्च भोक्तव्यं नैव सर्वथा ।
अश्रद्धा परमं पापं तन्मयं ग्राह्यमेव न ॥१२॥
पावयित्री ज्यायसी च निवृत्तिदा सुखप्रदा ।
श्रद्धा शान्तिप्रदा परब्रह्मरूपा हि पावनी ॥१३॥
श्रद्धा ब्रह्मप्रदा तद्वदहिंसा ब्रह्मदायिनी ।
अहिंसा सर्वधर्मेभ्यो भूतानां ज्यायसी मता ॥१४॥
सर्वयज्ञेषु वै विष्णुर्भुङ्क्ते हव्यं हि पायसम् ।
पायसैः सुमनोभिश्च फलैर्गुन्द्रैः रसैर्हवः ॥१५॥
पावनस्तृप्तिदो विष्णोर्जायते शुद्धभावनः ।
ओषध्यादि पवित्रं वै सर्वं देवार्हमेव तत् ॥१६॥
यथा शरीरं न ग्लेयात्तथौषधैः प्रजीवयेत् ।
कन्दमूलफलाद्यैश्च यज्ञं सन्तोषयेत् सदा ॥१७॥
श्रद्धा वै जननी सर्वफलावाप्तिप्रकारिणी ।
अहिंसा भगिनी तस्यास्ते ह्युभे देवदर्शिके ॥१८॥
जननी नैव हन्तव्या सदा बालोपकारिणी ।
अहिंसा परमो धर्मः स्वधर्मो मातृरक्षणम् ॥१९॥
श्रद्धां हत्वा मातरं च को हि जातु सुखी भवेत् ।
माता शरीरहेतुः सा मात्रा सनाथता सदा ॥२०॥
श्रिया हीनोऽपि सुजनश्चाम्बेति गेहमृच्छति ।
पुत्रपौत्रयुतश्चापि जननीं प्रति बालकः ॥२१॥
असमर्थं विचित्तं वा सुतं माता प्ररक्षति ।
तदा वार्धक्यमायाति दुःखदोषसमन्वितम् ॥२२॥
तदा शून्यं जगत्तस्य यदा मात्रा वियुज्यते ।
नास्ति मातृसमः कश्चिदाधारो भूतलेऽपि च ॥२३॥
नास्ति मातृसमं त्राणं प्रियं प्राणस्य भाजनम् ।
कुक्षिसंधारणाद् धात्री जननाज्जननी हि सा ॥२४॥
अंगानां वर्धनादम्बा माता मानकरी शिशोः ।
श्रद्धा धात्री स्वर्गकुक्षौ जननी देवयोनिषु ॥२५॥
अम्बाऽक्षरप्रदत्वाच्च माता मुक्तिप्रदा यतः ।
स्वर्गकामो यजेतेति श्रद्धया यजनं मतम् ॥२६॥
ओषध्यः समिधो वृक्षा वीरुदाज्यं पयो दधि ।
हविर्भूमिर्दिशः श्रद्धा कालः ऋचो यजूंषि च ॥२७॥
सामानि यजमानाग्निः सप्तदशांगकः क्रतुः ।
आज्येन पयसा दध्ना शकृताऽऽमिक्षया फलैः ॥२८॥
रसैश्च श्रद्धया विष्णुः प्रसीदत्येव चाध्वरे ।
ब्राह्मणप्रभवो यज्ञो ब्रह्मार्पणपरायणः ॥२९॥
अनुयज्ञं जगत् सर्वं यज्ञश्चानु जगत् सदा ।
ओमिति ब्रह्मणो नाम नमः स्वाहा स्वधा वषट् ॥३०॥
यस्यैतानि प्रयुज्यन्ते तस्य भयं न विद्यते ।
तस्याऽभयप्रदः श्रीमत्कृष्णनारायणः प्रभुः ३१॥
कांभरेयो हरिः साक्षादक्षरात्परतः परः ।
कुंकुमवापिकाक्षेत्रे भवद्भिरीक्षितो मखे ॥३२॥
स एव सर्वयज्ञानां फलं जानाति वै प्रभुः ।
ददात्येव फलं सम्यग् जनन्या चानुमोदितः ॥३३॥
तस्माद् यजेद् याजयेच्च यज्ञं श्रीकृष्णवल्लभम् ।
विधिना यजतः स्वर्गं शाश्वतं चाक्षरात्परम् ॥३४॥
नाऽयं लोकोऽस्त्ययज्ञानां नापि परश्च निश्चितः ।
नापि धर्मोऽस्ति गतिदश्चाऽयज्ञानामिह क्षितौ ॥३५॥

**अश्वपाटल उवाच—**

कथं लोकोऽयमुत्कृष्टः परलोकस्तथाऽऽप्यते ।
कथं धर्मश्च गतिदः क्षितौ स्यात्तद्वदाऽत्र मे ॥३६॥

**श्रीलोमश उवाच—**

साध्वाचारस्य च जितात्मनः समस्य देहिषु ।
सर्वसत्कारकार्यस्योत्कृष्टोऽयं लोक इष्यते ॥३७॥
सर्वत्र ब्रह्मदृष्टेश्च ब्रह्मपूजारतस्य च ।
ब्रह्मनिष्ठस्य भक्तस्य परलोकः प्रकाशते ॥३८॥
सर्वप्रसन्नतार्हस्य सर्वोपकारशालिनः ।
अहिंसासत्यधर्मस्य धर्मो वै गतिदो भवेत् ॥३९॥
मायाभावविहीनस्याऽक्षरभावगतस्य च ।
परब्रह्माश्रितस्यैव त्रयं करगतं हि तत् ॥४०॥
सैषोपनिषद्विद्या वै सन्निधियोजिका हरेः ।
ययाऽऽप्यते परब्रह्म धामाऽक्षरं च शाश्वतम् ॥४१॥
ज्ञानेन चाप्यते ब्रह्म ज्ञानं चोपनिषन्मता ।
भक्त्या संप्राप्यते ब्रह्म भक्तिश्चोपनिषन्मता ॥४२॥
भागवतेन धर्मेणाऽऽप्यते कृष्णः स एव सा ।
वैराग्येण च दुःखेन यदि गत्वा हरिं प्रति ॥४३॥

वासः सञ्जायते येन तत्तदुपनिषन्मता ।
देवस्य मन्दिरे वासो जायते येन हेतुना ॥४४॥
शुभाशयः स वै हेतुर्ब्रह्माप्त्युपनिषन्मता ।
बालः प्रसादलोभेन यदि गच्छति मन्दिरम् ॥४५॥
हरेर्वै सन्निधौ तस्योपनिषत् स प्रसादकः ।
कर्मणा शत्रुणा वापि वाञ्छया चेहयाऽपि वा ॥४६॥
हरेः सान्निध्यमाप्येत येन सोपनिषन्मता ।
यज्ञेन सेवया चापि सार्थेन स्वार्थकेन वा ॥४७॥
दानेन तृष्णया वापि देवसन्निधिराप्यते ।
येन केनापि वै सात्रोपनिषत् सम्मता भुवि ॥४८॥
साधुसंगोऽतिवेलं यो ब्रह्मप्राप्तिकरोऽस्ति वै ।
स चोपनिषत् संप्रोक्ता सत्संगिनां हरिप्रदा ॥४९॥
कथाश्रवणमेवाऽत्र नारीणां ब्रह्मयोगदम् ।
सा चोपनिषद् बोध्यैव येन नारायणो मिलेत् ॥५०॥
स्नेहस्तानं भावना च वृत्तिः रागोऽपि चेद् यदि ।
ब्रह्मप्राप्तिकरस्ते वै सर्वे चोपनिषन्मता ॥५१॥
गोपीनां कामतः प्राप्तिर्विप्राणां यज्ञतस्तथा ।
गोपानां मैत्र्यतः प्राप्तिर्दैत्यानां द्वेषतोऽपि च ॥५२॥
सुदाम्नो लोभतः प्राप्तिर्जीवनार्थं तु हस्तिनः ।
तपसा च ध्रुवस्याऽपि प्रल्हादस्य तु निश्चयात् ॥५३॥
पूतनाया वैरभावान्नारदस्य तु कीर्तनात् ।
एवं येनैव केनैव हेतुना चाप्यते हरिः ॥५४॥
हेतुः स चोपनिषत् सा ब्रह्मप्राप्तिकरी मता ।
ज्ञानं भक्तिश्च वा कर्म भावना वा समर्पणम् ॥५५॥
सर्वे चोपनिषत् प्रोक्ता यया ब्रह्म ह्यवाप्यते ।
अश्वपट्टल ! यज्ञेनाऽनादिकृष्णनरायणः ॥५६॥
प्राप्तस्त्वयाऽत्र वै दिव्यमूर्तिः श्रीकृष्णवल्लभः ।
सोमयज्ञस्तवाऽत्रैवोपनिषत्संमता ध्रुवा ॥५७॥
अनुग्रहेण जीवानां क्वचिद् योगः प्रभोर्मतः ।
क्वचिद् यत्नेन वा क्वचिज्जात्या योगो भवेदपि ॥५८॥
सा तेषां योगिनां हेतुः शुभ्रोपनिषत् संमता ।
यथा कर्माणि सर्वाणि फले परिसमाप्यते ॥५९॥
फलं शान्तौ सा च भोगे ब्रह्मण्येव समाप्यते ।
ब्रह्मभावः परे देवे परमेशे समाप्यते ॥६०॥
यतयस्तं विजानन्ति पश्यन्ति यान्ति तं प्रति ।
निर्द्वन्द्वा निर्बन्धनाश्च विमुक्ताः शुचयोऽमलाः ॥६१॥
अपवर्गे कृतनिष्ठा ब्रह्मिष्ठा ब्रह्मवासिनः ।
विमाया ब्रह्मभूताश्च गतिस्तेषां सनातनी ॥६२॥
अनारंभाः सुधृतयः शुचयो ब्रह्मसंश्रिताः ।
देवं परेश्वरं यज्ञैस्तर्पयन्त्यमृतैषिणः ॥६३॥
सर्वभूतात्मभूतस्य पश्यतः स्वेतराणि च ।
मार्गं यान्ति तत्प्रदत्तनेत्रवान् तस्य भक्तिमान् ॥६४॥
नवद्वारप्रगुप्तिं च कृत्वा हृदयोद्घाटनम् ।
ब्रह्ममार्गेण यातस्य परब्रह्मगृहे स्थितिः ॥६५॥
अग्निहोत्रं पूर्णमासो दर्शः प्रयाजकास्तथा ।
स्विष्टकृच्चानुयाजाश्च पितृयज्ञोऽङ्गयागकः ॥६६॥
चातुर्मास्यं वैश्वदेवः साकमेधश्च वारुणः ।
सोमयागश्च सवनं चाग्रयणेष्टिरित्यपि ॥६७॥
अवभृथेष्टिश्चोक्थं च षोडशी चातिरात्रकम् ।
अत्यग्निष्टोम एवापि वाजपेयश्च विष्टुतिः ॥६८॥
वायव्यः शतरुद्रीयो वासवो राजसूयकः ।
सौत्रामणिश्चाश्वमेधः पुंमेधः सर्वमेधकः ॥६९॥
गोमेधो ब्रह्ममेधश्च यज्ञा येऽन्ये क्रियापराः ।
ज्ञानपरास्तपःपरा द्रव्यपराश्च ये मखाः ॥७०॥
स्वागतार्थाश्चोपकारास्तथा ये दानदक्षिणाः ।
सर्वे ते कल्पिताः कृष्णे मोक्षदा ब्रह्ममार्गिणः ॥७१॥
कृता वा न कृता वापि नास्य किञ्चित् प्रशिष्यते ।
हरिः सन्तोषितः प्राप्तस्तेनाऽऽसं सर्वमेव ह ॥७२॥
कृतेष्वपि च यज्ञेषु तोयितेषु सुरेषु च ।
कृष्णभानविहीनेन कृतं चेन्मोक्षदं न तत् ॥७३॥
तस्मात् तेषु चाध्वरेषु कृष्णो धर्मः सनातनः ।
साधवो ब्रह्मयतयो बाह्यद्वारनिरोधिनः ॥७४॥
सर्वयज्ञेषु तं कृष्णं तर्पयन्त्यमृतैषिणः ।
अन्यद्वारं पिधायैव ब्रह्मद्वारं प्रसारयेत् ॥७५॥

**अश्वपाटल उवाच—**

कथं लोमश द्वाराणि पिधातव्यानि तद्वद ।
पिधानोत्तरमेवापि कृत्यं स्याद् वा फलं वद ॥७६॥

**श्रीलोमश उवाच—**

अमृतं ब्रह्मकोशेऽस्ति चात्मना रक्षितं परम् ।
अपिहितेन द्वारेण प्रयात्यन्यत्र दुर्लभम् ॥७७॥
देवनं यत्कराभ्यां वै पद्भ्यामन्यत्र धावनम् ।
कामना या च निकृष्टा चासनं त्वन्यचत्वरे ॥७८॥
वर्णनं चान्यविषयं रूपणं लोकमिश्रितम् ।
आस्वादनं प्रसादान्ये घ्राणनं क्लिन्नवर्ष्मणः ॥७९॥

स्पर्शनं मृदुमायायाः श्रवणं चलनाफलम् ।
मननं ममकारस्य बोधनं बहु मे भवेत् ॥८०॥
चिन्तनं चामरौ मे स्तोऽहंपदं नास्ति मादृशः ।
इत्येवं चामृतं सर्वं जाग्रति स्वप्नकेऽपि च ॥८१॥
सर्वं स्रवत्यजस्रं वै पात्रं रिक्तं भविष्यति ।
तस्मात् पिधानं कर्तव्यं विवेकेन विजानता ॥८२॥
नाऽक्षतुल्यैर्वै दीव्येच्च न धावेत् कर्दमस्थलीम् ।
न कामयेन्निकृष्टां क्ष्मां नासीत मोहचत्वरे ॥८३॥
न वर्णयेदुशत्याऽन्यद् रूपयेन्नहि रूपकम् ।
नाऽऽस्वादयेच्चार्पणाऽन्यज् जिघ्रेन्नैव हि दैहिकम् ॥८४॥
न स्पृशेन्मार्दवीं शय्यां शृणुयान्न कथेतरत् ।
मननं मापतेः कुर्याद् बोधनं ब्रह्म मे भवेत् ॥८५॥
चिन्तनं चामृतं मेऽस्तु चाहं तस्मिन् वसामि च ।
इत्येवं द्वारगुप्तिं वै कुर्याच्छ्रीहरिरूपिणीम् ॥८६॥
वृष्टेर्जलाद् यथा भौमं जलं वृद्धिं समेति वै ।
तथा गुप्त्याऽमृतं नैजं ब्रह्मगुप्त्या विवर्धते ॥८७॥
ग्रीष्मतापाद् यथा भौमं जलं शुष्कं विलीयते ।
तथा द्वाराऽपिधाने तु स्वामृतं लयमीयते ॥८८॥
वृथा गच्छेन्न वै लोके वृथाऽऽददीत नैव ह ।
वृथा कामं न भुञ्जीत वृथा नोपाविशेत् क्वचित् ॥८९॥
वृथा भाषां सत्यहीनां कृष्णहीनां न वै वदेत् ।
वृथा रूपं कृष्णहीनं न वै पश्येन्निरर्थकम् ॥९०॥
वृथा स्वादं न गृह्णीयाद् देहयात्रातिरेकिणम् ।
वृथा गन्धं नाऽऽददीत श्वासपूर्तं समाचरेत् ॥९१॥
वृथा स्पर्शं न कुर्वीत हरेः स्पर्शं विना सदा ।
वृथा ददीत कर्णौ न परमेशश्रवं विना ॥९२॥
मननं श्रीहरेः कुर्याच्छ्रीपतेः कमलापतेः ।
बोधनं श्रीपतेः कुर्याच्चिन्तनं श्रीहरेः सदा ॥९३॥
अहन्ता तस्य चैवाऽस्मि नाऽन्यस्याऽहं कदाचन ।
एवं लक्ष्मीपतेरर्थे सर्वं चाहं तदात्मकः ॥९४॥
सर्वेन्द्रियनिवासो मे परमेशे नरायणे ।
भवत्वेवेति वै द्वारगुप्तिर्बोध्याऽमृतार्थिनी ॥९५॥
यस्य द्वाराणि सर्वाणि विहारवर्जितानि वा ।
हरेः प्राप्तिर्भवेत्तस्याऽमृतवार्धिं पिबत्ययम् ॥९६॥
गुप्तद्वारस्य भक्तस्याऽमृतं शाश्वततां भजेत् ।
सर्वे यज्ञाः समाप्यन्तेऽमृतशाश्वततार्थिनः ॥९७॥
किं तस्य तपसा कृच्छ्रैर्यज्ञैः क्लेशैस्तथेतरैः ।
अर्जनीयं चार्जितं वै हृदि नारायणामृतम् ॥९८॥
अश्वपाटल ! संज्ञात्वा कोशस्थं त्वमृतं निजम् ।
न स्रावयेदमार्गेण मोघतां न नयेत्तथा ॥९९॥
यथापेक्षं त्वम्बरं च यथापेक्षं तृणासनम् ।
यथापेक्षोपधानं च यात्रामात्रादनं तथा ॥१००॥
द्वन्द्वारामान् विहायैवाऽऽन्तरारामं भजेत् सदा ।
अन्यसार्थं विहायैवान्तरसार्थं समाश्रयेत् ॥१०१॥
तेन दीर्घस्य मार्गस्य पारं यायात् सुगत्वरः ।
इत्येवं राधिके राज्ञे लोमशः प्राह चामृतम् ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायामश्वपाटलनृपतये श्रद्धोपनिषदमृतगुप्त्यादिरूपं लोमशदत्तज्ञानमितिनिरूपणनामा नवचत्वारिंशदधिकद्विशततमोऽध्यायः ॥ २४९ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽश्वपाटलस्तु श्रुत्वा श्रीलोमशं पुनः ।
पप्रच्छ त्यागमार्गं च प्रत्यक्षं फलदं तथा ॥ १ ॥

**अश्वपाटल उवाच—**

त्यागमार्गेण प्रत्यक्षं यत्फलं समजायते ।
तद्वदाऽत्र महर्षे मे किं प्रत्यक्षं च किं फलम् ॥ २ ॥
किमत्र प्रत्यक्षतमं यदुपास्ते भवानिह ।
प्रत्यक्षे खलु सर्वेषां समानताऽवलोक्यते ॥ ३ ॥
भवानपीह शोकं च यथा हर्षं च विन्दति ।
इन्द्रियार्थाश्च भवतः समानाः सर्वदेहिनाम् ॥ ४ ॥
समानानां हि सर्वेषां किं प्रत्यक्षं निरामयम् ।
भवतो हि किमाधिक्यं गृहमेधित एव यत् ॥ ५ ॥

**श्रीलोमश उवाच—**

हरौ त्यागस्त्यागमार्गः किमन्यत् त्यजनेन वै ।
सर्वस्वार्पणरूपोऽयं त्यागः सर्वोत्तमो हरौ ॥ ६ ॥
तेनाऽऽत्मनो हि साक्षात्त्वं तत्प्रदत्तदृशा खलु ।
फलं चात्मसुखं चापि परमेशप्रसादतः ॥ ७ ॥
अहमुपास्से प्रत्यक्षं बालकृष्णनरायणम् ।
अनादिश्रीकृष्णनारायणं श्रीकंभरासुतम् ॥ ८ ॥
चक्षुषोर्मनसश्चापि यः प्रत्यक्षतमोऽत्र वै ।
आत्मन्येव परब्रह्म स एवाऽऽस्ते श्रियाः पतिः ॥ ९ ॥

लक्ष्मीपतिः सतां स्वामीमुक्तपतिः परेश्वरः ।
कुंकुमवापिकाक्षेत्रलालः श्रीकृष्णवल्लभः ॥१०॥
ब्रह्मप्रियापतिश्चात्मपतिर्विद्यापतिः प्रभुः ।
मुक्तिपतिश्चाऽक्षरेशो धामेशाधिपतिर्हरिः ॥११॥
स प्रत्यक्षतमो मेऽत्र राजँस्तं त्वं विलोकय ।
हर्षे शोकं प्रविन्दामि राजन् नाम्यस्य वेषवत् ॥१२॥
समानानीन्द्रियाण्येव देहे समानताऽपि च ।
ग्रहणादिव्यवहारः समानोऽपि तथापि तु ॥१३॥
भूतावेशितवन्नित्यं चरामि परमात्मना ।
स भोक्ता स नियन्ता च स एवाऽऽलोचनादिमान् ॥१४॥
सर्वभूताधिभूतेनाऽऽवेशितोऽहं चरामि यत् ।
हर्षे शोकं स एवाऽत्र देहे वेत्ति न देह्ययम् ॥१५॥
तथापि नाम्यवत्सर्वे दर्शयामि यथा मयि ।
अहं वेद्मि तथा वेत्ति मार्कण्डेयो महामुनिः ॥१६॥
वेत्ति सनत्कुमारश्च नारदो वा नरायणः ।
स्वयंप्रकाशः शंभुर्वा वेत्ति नान्यो भुवंगतः ॥१७॥
कपिलाद्याश्च वर्तन्ते जले कमलवद्धि ते ।
निर्लेपास्ते वयं कृष्णलिप्ता अपि विलेपिनः ॥१८॥
राजाद्याः स्वार्थलिप्ताश्च प्रत्यक्षं सुखिदुःखिनः ।
वयं सन्तः कृष्णनारायणाऽजस्रपरायणाः ॥१९॥
तदर्थकृतसर्वस्वास्तन्मयास्तद्विशेषिताः ।
चिन्तारोगो न चास्माकं साधूनां विद्यते यतः ॥२०॥
यो रोगो जीवतां देहेन्द्रियात्मवादिनां त्विह ।
स रोगो विगतो नश्च तस्मान्निरामया वयम् ॥२१॥
वासना रोगमूलं च सा च नारायणेऽर्पिता ।
धन्वन्तरिमहावैद्ये नाडिका सर्वतोऽर्पिता ॥२२॥
तस्यान्निरामयाः स्मोऽत्र राजँस्त्वं तादृशो भव ।
हरिप्रदत्तज्ञानेन विहरामोऽत्र वर्ष्मसु ॥२३॥
तत्प्रेरितं प्रकुर्मश्च सर्वमर्थ्यं निरामयम् ।
तत्कृतं समनुष्ठानं सर्वं चास्ते निरामयम् ॥२४॥
तत्प्रदत्तं च विज्ञानं शोकं जहाति मूलतः ।
तं विना स्वार्थवृत्त्युत्थं ज्ञानं नाशयति प्रजाः ॥२५॥
अतो वयं ज्ञानवन्तो निरामया हि भूपते ।
ऐकात्म्यं ब्रह्मणा नारायणेनातं निरामयम् ॥२६॥
तत्त्वमबुद्ध्वा ब्रह्मवश्चाहंकारवशंगताः ।
वादबला न जानन्ति निरामयत्वमीदृशम् ॥२७॥
ततो भवन्ति ते ब्रह्मस्तेना मोहवशंगताः ।
तमोभावनिमग्नानामेषां तमः परायणम् ॥२८॥
प्रकृतिं स्वां दोषरूपां दंभाऽनृतमदात्मिकाम् ।
प्राकृताः सम्प्रयान्त्येव ब्राह्मास्तदूर्ध्ववर्तनाः ॥२९॥
एवमान्तरबोधास्ते सन्त्यजन्ति शुभाशुभम् ।
परां गतिं प्रपश्यन्तः सन्तो नारायणे रताः ॥३०॥
दानमध्ययनं यज्ञः प्रजा सन्तानमार्जवम् ।
हरिं विना साऽऽमयं तन्मोक्षः कृत्वाऽपि नास्ति चेत् ॥३१॥
धिक्कारपदमेतद् वै श्रमः सर्वो निरर्थकः ।
राज्येषु स्त्रीषु लोकेषु देहेन्द्रियाऽर्थभुक्तिषु ॥३२॥
वर्तमानोऽपि चेत् कृष्णार्पणः सोऽयं निरामयः ।
निर्वस्त्रो निर्जनश्चापि निष्पात्रो निष्परिग्रहः ॥३३॥
सर्वसहोऽपि वै कृष्णार्पणं विना क्षयाऽऽमयः ।
तस्माद् राजन् भव काण्डैस्त्रीभिश्चापि निरामयः ॥३४॥
शुष्कशक्त्या कर्मणा वा का निरामयता भवेत् ? ।
कृष्णभक्त्याऽर्पणभक्त्या ध्रुवं निरामयो भवेत् ॥३५॥
नामसंकीर्तनं शब्दब्रह्म बोध्यं निरामयम् ।
तत्र निष्णाततां प्राप्य परब्रह्माऽऽगमं व्रजेत् ॥३६॥
एवं शुद्धसमाचारश्चात्मा भवति ब्राह्मणः ।
कृष्णे त्यागक्रियावाँश्च परिग्रहविवर्जितः ॥३७॥
मनःसंकल्पसंसिद्धो विशुद्धबोधनिश्चयः ।
जन्म कर्म च विद्या च शुक्ला यस्य हरौ मताः ॥३८॥
प्रत्यक्षब्रह्मपरमः श्रद्दधानः परावरे ।
सत्संगतो भावितात्मा शीलसन्तोषसद्व्रतः ॥३९॥
धर्मं भागवतं कृच्छ्रे सत्यप्याचरतीह यः ।
तस्य ब्रह्मसुतस्यैव ब्रह्मांकशयनस्य वै ॥४०॥
निरामयत्वं चास्त्येव शाश्वतं निरुपद्रवम् ।
नास्य वै वर्तते किंचिद् विधातव्यं दिवं प्रति ॥४१॥
प्रायश्चित्तं न चैवास्य कर्मणां चार्पणाद्धरौ ।
एवं बहुविधा विप्रा यज्ञकर्मपरायणाः ॥४२॥
शुचयो व्रतवन्तश्च ग्यवदाना हरिस्थिताः ।
यजन्तोऽहरहर्यज्ञैराशाबन्धनवर्जिताः ॥४३॥
ऋजवः शमजित्याश्च ब्रह्मकर्मपरायणाः ।
ब्रह्म येषां परो धर्मः परार्थो ब्रह्म नित्यदा ॥४४॥
कामोऽपि ब्रह्म चैतेषां मोक्षो ब्रह्म सनातनम् ।
न्यूनं वाऽऽधिक्यमेवापि वर्तनं ब्रह्म शाश्वतम् ॥४५॥
व्युत्क्रमश्च क्रमश्चापि येषां ब्रह्म परात्परम् ।
तेषां कृष्णात्मनां ब्रह्मसत्तमानां तु शाश्वतम् ॥४६॥
स्वर्गं स्वर्गोत्तमं नित्यं निरामयं महासुखम् ।
शाश्वतानन्दपूर्णं ते यन्ति तत्परमं पदम् ॥४७॥

गृहे यद्वा वने यद्वा न्यासे वा ब्रह्मणि स्थिताः ।
यन्ति ते सात्त्वता राजन् परब्रह्म परेश्वरम् ॥४८॥
सकामास्ते तु दृश्यन्ते दिवि ज्योतिर्मयाः सुराः ।
धिष्ण्येषु बहुभोगाश्च नक्षत्रतारकागणाः ॥४९॥
अकामा नैव दृश्यन्ते दूरं पारं परं गताः ।
सकामाश्च पुनः सन्तो भूत्वा यास्यन्ति तत्पदम् ॥५०॥
ब्रह्मात्मनामतृष्णानां तेषामनामयं ध्रुवम् ।
धामाऽक्षरं परब्रह्मस्थानं परं निरामयम् ॥५१॥
सामयस्य कृते धर्मः परोपकारसंज्ञकः ।
पुण्यदः पुण्यशीलस्य गृहे जन्मप्रदस्तथा ॥५२॥
पुण्यजन्मतया चार्थः पुण्यलाभोऽस्य जायते ।
कामना रागहीना च कृतात्मनः प्रजायते ॥५३॥
त्यागसन्तोषसिद्धिश्च प्रज्ञा विशारदी भवेत् ।
अपवर्गमतिश्चापि ब्रह्मधर्मपरो भवेत् ॥५४॥
ब्रह्मणः पदमन्विच्छन् ब्रह्मलोकं प्रयाति च ।
गच्छन् क्षेमं समन्विच्छन् दुर्बलोऽत्राऽवसीदति ॥५५॥
भुंक्ते दत्ते च यजते प्राप्ताभिर्वस्तुभिर्यदि ।
परिग्रहः शुभोऽप्यस्य न त्यागसुखसदृशः ॥५६॥
कर्मपाकः शरीरं वै ज्ञानपाको निरीहता ।
भक्तिपाको ब्रह्मता च ब्रह्मपाकः परं पदम् ॥५७॥
दया क्षमा च सन्तोषः सत्यं शान्तिरहिंसनम् ।
आर्जवं ह्रीस्तितिक्षा च मानगर्वविवर्जनम् ॥५८॥
सत्संगो भक्तिभावश्च सेवा सतां सुरार्चनम् ।
पन्थानो ब्रह्मणस्त्वेते प्राप्नोत्येतैः परं पदम् ॥५९॥
गतिं गच्छन्ति सन्तो यां तामाहुः परमां गतिम् ।
संसारो वासनावर्गः सन्तोषस्त्वपवर्गकः ॥६०॥
साम्येऽपीन्द्रियवर्गेऽपि सामयाऽमयते नृप ।
एते निदेशिते तेऽत्र निरामयत्वमावह ॥६१॥

### अश्वपाटल उवाच—

धर्मार्थकामान् सततं चामनन्तीह देहिनः ।
मोक्षं केचित् समिच्छन्ति तस्माद्वै बलिनस्त्रयः ॥६२॥
तत्र लाभो विशिष्टो वै कस्याश्रयेण देहिनः ।
किं फलं कीदृशं चेति तन्मे लोमश दर्शय ॥६३॥

### लोमश उवाच—

राजन्पुरा ह्यहं कल्पे गतोऽभवं वनान्तरे ।
पुष्करारण्यसंज्ञे च तत्र विप्रो विशालिकः ॥६४॥
आसीत्तेन कृता मे च पूजा फलजलादिभिः ।
तपस्विना दुर्बलेन निर्धनेन च रागिणा ॥६५॥
ततोऽहं पृष्टवाँस्तस्य कुशलं स जगाद माम् ।
दारिद्र्यं दुःखदं लोके तन्निराकुरु लोमश ॥६६॥
ततस्तं च समादाय गतोऽहं चोत्तरां दिशम् ।
कुबेरनगरं दिव्यं व्योम्ना द्रव्यप्रलिप्सया ॥६७॥
कुबेरः स्वागतं चक्रे ददौ धनं यथेष्टकम् ।
विशालिकः प्रसन्नोऽभूद् द्रव्यं जग्राह शेवधिम् ॥६८॥
अथापि धनराजेन निशि निजपुरे शुभे ।
रक्षितौ मन्दिरे रम्ये त्वावामास्व च निद्रितौ ॥६९॥
अहं जानामि तत्सर्वं निद्रायां ब्राह्मणेन यत् ।
विलोकितं महाश्चर्यं कल्मषाढ्यं हि तच्छृणु ॥७०॥
अपश्यत जनान् काँश्चिद्धर्माढ्यान् शुद्धमानसान् ।
काँश्चित्कामाभिभूताँश्च नृत्यगीतपरायणान् ॥७१॥
काँश्चित्स्वर्णमणिरत्नद्रव्याभूषणसंभृतान् ।
कुबेराद् द्रव्यमादाय गच्छतः स्वपुरीं प्रति ॥७२॥
तावद् भूकम्पनं जातं भूतनाशकरं मुहुः ।
पृथ्वीगर्तगतास्ते वै मृता निष्पेषिता मृदा ॥७३॥
तत्रायाता यमदूता नेतुं मृताननेकशः ।
कामिनो नीतवन्तस्ते दृढबन्धनबन्धितान् ॥७४॥
धनिनोऽपि नीतवन्तो विना बन्धनमेव तान् ।
ततो ददर्श कामं च क्रोधं लोभं भयं मदम् ॥७५॥
निद्रां तन्द्रां महालस्यं पापं चावृत्य तान् स्थितान् ।
निरोधयितॄन् स्वर्गाणि भयदान् याम्यदुःखदान् ॥७६॥
विविधान् निरयाख्याँश्च पुरुषान् परितः स्थितान् ।
तानेव विप्रः स्वद्रव्ये ददर्श लीनतां गतान् ॥७७॥
भयं चावाप वै स्वप्ने विप्रो दोषान् विलोक्य च ।
तावद् देवाः समायाता धार्मिकान् नेतुमेव ह ॥७८॥
विमानैः शुभशोभैश्च स्मृद्धैः सम्मानितान् मृतान् ।
धार्मिकान् देवतुल्याँश्च कृत्वा निन्युर्हि तापसान् ॥७९॥
हर्षितान् धार्मिकान् प्राप्तदिव्यलोकान् विलोक्य सः ।
विप्रो विचारयामास तपोद्रव्यं परं सुखम् ॥८०॥
धनं दोषभृतं चास्ते कामः कल्मषसंभृतः ।
निरयाणां कारणे तौ धनकामौ न शान्तिदौ ॥८१॥
अथोऽनर्थस्वरूपोऽस्ति कामो दुःखस्वरूपवान् ।
तपोधर्मः स्वर्ग एव धर्मं चरामि वै ततः ॥८२॥
चरिष्येऽपि ततो धर्मं लोमशस्य कृपावशात् ।
अस्याऽनुग्रहमाप्यैव सुखं प्राप्स्ये वृषोद्भवम् ॥८३॥

पृथिवीं रत्नपूर्णां वा महान्तं रत्नसंचयम् ।
अवाप्य याम्यलोकानां द्वारं नैष्ये कदाचन ॥८४॥
इत्युक्त्वा तु धनं प्रातस्त्यक्त्वा तत्रैव मन्दिरे ।
तं कुबेरं नमस्कृत्य ययौ वै तपसे द्विजः ॥८५॥
लोमशेन समं श्रेष्ठं तपो दिव्यं चकार ह ।
देवार्चनपरो नित्यं नित्यं चातिथिपूजनः ॥८६॥
लोमशाश्रयमासाद्य पर्णाहारो बभूव ह ।
जलाहारस्ततश्चासीद् वायुभक्षो बभूव च ॥८७॥
दिव्यदृष्ट्या द्विजश्चापि यमपुर्यां नृपान् गतान् ।
कुण्डे राजसहस्राणि मग्नानि निरये तदा ॥८८॥
ददर्श तपसा चापि नारकान् काममोहितान् ।
ततः स्वप्नं क्षणात्तस्य तत्रैवान्तरधीयत ॥८९॥
विशालिको द्रुतं शय्यां त्यक्त्वा श्रीलोमशं मुनिम् ।
प्रणनाम जगादापि दृष्टं सर्वमनिष्टकम् ॥९०॥
कामोऽर्थश्च सदा याम्यलोकदौ दुःखदौ गुरो ! ।
मया दृष्टौ यमपुर्यां धर्मः स्वर्गप्रदो मतः ॥९१॥
धर्माद् दृष्टा गतिः श्रेष्ठा तपसा स्वर्गसंभृता ।
देवताः सविमानाश्च पूजयन्तीह धार्मिकान् ॥९२॥
न धनाढ्यान्नापि चात्र कामिनः पूजयन्ति ते ।
धर्मे सुखकला चास्ते चरिष्यामि वृषं हितम् ॥९३॥
नेदं धनं मया ग्राह्यं दुःखदोषानुसेवितम् ।
सर्वे दोषा निवसन्ति धने दृष्टा मया गुरो ॥९४॥
अद्य स्वप्ने मया दृष्टं कम्पनं वै भुवः खलु ।
धनारंभे महद्दुःखभरं यद्दर्शनं त्विह ॥९५॥
तदेवाऽमंगलं मेऽद्य तद्धनं न प्ररोचये ।
इत्युक्त्वा धनदायैव धनं दत्वा तु भूसुरः ॥९६॥
लोमशेन मया सार्धं चायात् कुंकुमवापिकाम् ।
भेजे कृष्णं परब्रह्म तपसा धर्मसंभृता ॥९७॥
भक्तिं जगाम परमां भक्त्या नारायणस्य च ।
वैशालिकं हि तत्तीर्थं जातं चात्र पुरा नृप ॥९८॥
तस्माद्धर्मो महास्वर्गमोक्षदः सुखशान्तिदः ।
निर्दोषः श्रीहरौ न्यस्तो धर्मो निष्कामसात्त्वतः ॥९९॥
सात्त्वतानां समाचारस्तपो ध्यानं क्रतुक्रिया ।
भजनं सेवनं देवदेवस्याश्रयणं सदा ॥१००॥
तन्मयत्वं तत्परत्वं तदर्थत्वं तदात्मता ।
तस्य सम्बन्धवत् सर्वं दिव्याचरणमेव यत् ॥१०१॥
स्नानसन्ध्यादिकं दैह्यं स्मृत्याराधनमान्तरम् ।
पूजार्चाद्यं सामयिकं सत्संगाद्यं तु सार्थजम् ॥१०२॥
सर्वं वै पावनं पुण्यं धर्माख्यं चात्मनो हितम् ।
पापनाशकरं चापि याम्यदूतनिरोधकम् ॥१०३॥
विष्णुधामप्रदं स्वर्ग्यं शाश्वतानन्ददायकम् ।
इत्युक्त्वा राधिके श्रीमान् लोमशो विरराम ह ॥१०४॥
राजा धर्मे मनः कृत्वा पुनः पप्रच्छ वै गुरुम् ।
लोमशं ज्ञानदं दिव्यात्मानं ब्रह्मपरायणम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायामश्वपाटलकृतस्त्यागमार्गप्रत्यक्षफलप्रश्नः, निरामयप्रश्नः, त्रिवर्गेषु किंश्रेष्ठप्रश्नः, लोमशकृतोत्तरं चेत्यादिनिरूपणनामा पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५० ॥

**श्रीकृष्ण उवाच—**

राधिके च ततो राजा चाऽश्वपाटलको गुरुम् ।
पप्रच्छ लोमशं धर्मक्रतुं ब्रूहीह कीदृशम् ॥ १ ॥
लोमशः प्राह राजन् यत् प्राणिनां द्रोहकृत् भवेत् ।
तत्सर्वथा परित्याज्यं धर्मक्रतुः स एव सः ॥ २ ॥
प्राणिनो दुःखिनः कृत्वा देवास्तुष्यन्ति नैव ह ।
सर्वे भवन्तु सुखिनो यथा देवास्तथाविधाः ॥ ३ ॥
वर्तन्तेऽनुग्रहपरास्तस्माद्द्रोहकः क्रतुः ।
अहिंसा वै धर्ममखो हिंसा यमगृहं मतम् ॥ ४ ॥
अद्रोहः सर्वजन्तूनां यज्ञः सतां स्वभावजः ।
स्नेहवृत्त्योपकारो वै धर्मयज्ञोऽस्ति भूतले ॥ ५ ॥

**अश्वपाटल उवाच—**

आत्मा शुद्धोऽस्ति चेत् केन पापात्मा जायते हि सः ।
कथं धर्मभृदात्मा च कथं रागं प्रमुञ्चति ॥ ६ ॥
कथं मुक्तिं प्रयात्येव कुत्र वासं करोति च ।
कीदृशं वर्तनं तत्र यस्मान्नावर्तते पुनः ॥ ७ ॥

**श्रीलोमश उवाच—**

सच्चिदानन्दरूपोऽयं चात्मा मायाविवर्जितः ।
अहंममत्वहीनश्च संगात् तद्वान् भवत्यपि ॥ ८ ॥
संगो मायाप्रसंगश्च सान्निध्यं चान्तरे सदा ।
तेनाऽऽकृष्टो भवत्येव पापात्मा दोषसंभृतः ॥ ९ ॥
ज्ञानाभावे च मायायाः संगं वै लभते यतिः ।
ज्ञानेन संगदोषाश्च नश्यन्त्येव विवेकिनः ॥१०॥

ज्ञात्वा ज्ञात्वा विषयाँस्तु चेच्छा तत्र प्रवर्तते ।
तदाप्त्यर्थं प्रवृत्तिश्च निवृत्तिर्वा प्रजायते ॥११॥
रागः प्रवर्तकस्तत्रेष्टताज्ञानेन जायते ।
द्वेषो निवर्तकश्चाप्यनिष्टताबोधनाद् भवेत् ॥१२॥
यदर्थं यतते तत्रारभते कर्म देहजम् ।
ऐन्द्रियिकं च वाऽभ्यासं तेन करोति देहभाक् ॥१३॥
रागाद्याः सुदृढास्तेन दोषा भवन्ति दुःखदाः ।
लोभो मोहः प्रजायेते धर्मस्थितिविनाशकौ ॥१४॥
व्याजेन जायते धर्मो व्याजतश्चरति वृषम् ।
वृषवद् रोचतेऽर्थे व्याजेनैव धनैस्ततः ॥१५॥
कुरुते देहवानज्ञः पापं परात्मदुःखकृत् ।
वर्धतेऽस्याऽधर्मसर्गश्चिन्तनात् कारणात्ततः ॥१६॥
एकशीला मिलित्वैव वर्धयन्ति च पापकम् ।
पापवृद्धावशान्तिश्चोद्वेजनं विघ्नदर्शनम् ॥१७॥
कलहो रोगयोगश्च धननाशो दरिद्रता ।
जननाशोऽवमानं चाऽयशश्चाऽगणना जने ॥१८॥
चौर्यं तेनाऽनृतवादः कापट्यं छलधर्मिता ।
प्रवर्तन्तेऽभयाः सर्वे पापात्मसु प्रकर्षतः ॥१९॥
न ते सुखिनश्चात्र कुत एव परत्र तु ।
पुनर्याम्यगतिश्चापि तिर्यग्योनिः पुनः पुनः ॥२०॥
अथ धर्मभृतां मार्गं शृणु राजन् सुखप्रदम् ।
पूर्वपूर्वानुपुण्येन सार्थसंगेन वा जनः ॥२१॥
सत्संगेन सदा देही शुभं सर्वं प्रवाञ्छति ।
कुशलं प्रकरोत्येव सत्यं वदति नाऽनृतम् ॥२२॥
सत्यं विचिन्तयत्येव सत्यं करोति साधनम् ।
सत्येन वर्तते नित्यं रागं द्वेषं न विन्दति ॥२३॥
विश्ववृत्त्या हितं स्वस्य परस्यापि करोति च ।
लोभं मोहं विहायैव प्रवर्तते शुभाय वै ॥२४॥
कुशलेनैव धर्मेण देहयात्रां करोति च ।
दानेन सेवया संकीर्तनेन भजनेन च ॥२५॥
यज्ञेन मालया देवपूजया तपसा तथा ।
सत्संगवृद्धया नित्यं च विन्दति धर्ममुत्तमम् ॥२६॥
वृद्धानां सेवया लोकसेवया वर्धते वृषः ।
दोषान् विज्ञाय सर्वान् स त्यजत्येव च दूरतः ॥२७॥
गुणान् विज्ञाय गृह्णाति गुणेषु रमते सदा ।
सत्संगसार्थमासाद्य वर्धयत्येव सद्वृषम् ॥२८॥
साधून् प्रसेवते नित्यं साधुधर्मान् प्रसेवते ।
साध्वाचाराऽभ्यासवशाद् वर्धन्तेऽस्य वृषाः सदा ॥२९॥

प्रज्ञा वृषे स्थिरा चास्य नान्यत्र रमते क्वचित् ।
धर्मप्रवृत्तिमान् देही धनार्थं यततेऽपि च ॥३०॥
धर्मधनं समवाप्य धर्मे व्ययं करोति च ।
धर्ममित्राणि जायन्ते धर्मिणो वै स्वभावतः ॥३१॥
धर्मात्मा धर्मशीलश्च धर्मसत्संगशोभितः ।
धर्मजन्यं सुखं चात्र लभतेऽपि परत्र च ॥३२॥
स्वर्गे स्वर्गपरे लोके प्रभुत्वं लभते तथा ।
शब्दे स्पर्शे रसे रूपे गन्धे भोगे प्रभुत्वकम् ॥३३॥
एवं धर्मफलं लब्ध्वा मोदते निस्पृहो यथा ।
ज्ञानदृष्ट्या च निर्वेदं पोषयत्येव मानसे ॥३४॥
भोगेषु सत्स्वपि विद्वान् नैव बध्नाति तत्र हि ।
अभावयतस्तस्यैव मनो वैराग्यवेगवत् ॥३५॥
न कामाननुसञ्चारं करोत्यस्य कदाचन ।
धर्मं नैव जहात्येव कष्टे चापदि वैशसे ॥३६॥
लोकं क्षयात्मकं दृष्ट्वा धर्मेऽपि रागहीनताम् ।
प्राप्यात्मनो मुक्तिमार्गं मार्गयत्येव यत्नवान् ॥३७॥
यतते चान्वहं मोक्षाभ्यासे ह्युपायमाश्रयन् ।
शनैः शनैश्च सोपानं मोक्षस्य लभते ततः ॥३८॥
पाप्मानं सर्वमेवाऽयं करोत्येव न वै क्वचित् ।
जहात्येव समायातं पापं शुद्धिं प्रविन्दति ॥३९॥
विमलात्मा च सन्तोषी देवाश्रयपरायणः ।
व्यर्थवार्तादिरहितो मोक्षं वै लभते परम् ॥४०॥
वैकुण्ठे चापि गोलोकेऽक्षरे धाम्नि परे च वा ।
यथोपास्ति प्रयात्येव मोक्षस्थलं परात्परम् ॥४१॥
तत्र ब्रह्महृदे स्नात्वा ब्रह्मतनुः हरिर्यथा ।
सम्पद्यते सुरूपेण दिव्यरूपेण तादृशः ॥४२॥
जक्षन् क्रीडन् रममाणश्चास्तेऽश्नुतेऽखिलेप्सितम् ।
एकधा वहुधा चापि भवत्येव यथेप्सितम् ॥४३॥
सर्वरसः सर्वगन्धः सर्वानन्दः प्रजायते ।
सर्वसुखः सर्वरूपः सर्वसिद्धिगुणाश्रयः ॥४४॥
परब्रह्मस्वरूपश्च तत्सामर्थ्यसमन्वितः ।
तत्सेवातत्परो मुक्तः प्रजायतेऽतिमोदनः ॥४५॥
ब्रह्ममूर्तेर्महत् सौख्यं प्रवाहैः स समेत्यपि ।
कराग्रे सर्वसृष्टीश्च प्रपश्यत्येव मुक्तराट् ॥४६॥
सार्वज्ञ्यं जायते चास्यैश्वर्यं संप्रजायते ।
नात्र वाऽन्यत्र लोकेऽस्याऽऽवर्तनं जायते क्वचित् ॥४७॥
यत्र यत्र प्रयात्येव तत्र धामाऽक्षरं पुरः ।
प्रकाशतेऽस्य नाऽन्यद्वै दिव्यनेत्रस्य सर्वथा ॥४८॥

क्रिया दिव्या भवत्यस्य मायाऽस्य संगतोऽपि च ।
दिव्यैव जायते तूर्णं तत्त्वादीनां तु का कथा ॥४९॥
मानवे सुरलोके वै पैतृके चार्षकेऽपि वा ।
ऐश्वरे वाऽवतारभ्यां दिव्यो मुक्तोऽयमेव ह ॥५०॥
यत्र क्वापि वसेद् वापि यत्र क्वापि चरेदपि ।
सर्वं दिव्यं करोत्येव मोक्षं ददाति देहिने ॥५१॥
अस्यैव दर्शनान्मुक्ताः स्पर्शनादपि मोक्षिणः ।
संगात् प्रसेवया मुक्ता जायन्ते स्त्रीनरादयः ॥५२॥
यथा धाम्नि तथा सृष्टौ देहे वा मुक्तसंस्थितौ ।
सर्वं समं भवेदस्य भिन्नता नाऽस्य वर्तने ॥५३॥
एवं प्राप्तां गतिं नित्यां सुखिनीं मोदिनीं सतीम् ।
आनन्दिनीं प्रियां मुक्तोऽनुभवत्येव सर्वदा ॥५४॥
राजँस्त्वं धर्ममार्गं वै साधूनामवलम्ब्य च ।
गतिं लभस्व वै प्रोक्तां किमन्येन विनाशिना ॥५५॥
विज्ञानं सारथिं कृत्वा भक्तिं कृत्वा सहायिनीम् ।
धर्मं चाग्रगतिं कृत्वा याहि ब्रह्म सनातनम् ॥५६॥

अश्वपाटल उवाच—

कथं दोषविनाशः स्याद् येन धर्मगतिर्भवेत् ।
विज्ञापय महर्षे त्वं येन श्रेयो हि देहिनः ॥५७॥

श्रीलोमश उवाच—

जयेत् क्रोधं क्षमयैव विचारेण पुनः पुनः ।
जयेत् कामं ह्यनाभोगात् संकल्पसंगवर्जनात् ॥५८॥
स्वप्नं जयेच्च तपसाऽनाहारेण च सत्त्वतः ।
भयं जयेत्तदुत्थानपरित्यागाद् विवेकतः ॥५९॥
आत्मशीलाभ्यसनाच्च मृत्युभीतिं सदा त्यजेत् ।
धैर्येण कामनामिच्छां द्वेषं जयेत् कलिं तथा ॥६०॥
भ्रान्तिं मोहं ममकारं भेदज्ञानान्निवर्तयेत् ।
याथार्थ्यज्ञानलाभेन विपर्यदादिकं त्यजेत् ॥६१॥
उपद्रवान् जयेत् सर्वान् कौशल्येन विधानतः ।
रोगान् जयेत् हेतुजयात् पथ्यजीर्णमिताशनात् ॥६२॥
लोभं तृष्णां विवेकाद्वा सन्तोषात् प्रजयेदपि ।
विषयान् विषबोधाद्वा तत्त्वदृष्ट्या जयेदपि ॥६३॥
अधर्मं चात्मकृपया जयेदनर्थभावतः ।
धर्मं पालनबुद्ध्या च जयेन्मोक्षप्रदं चरेत् ॥६४॥
आशां जयेन्निरुत्थानाद् भाविफल्गुविधानतः ।
अर्थं चानर्थबुद्ध्या च जयेत् संगविवर्जनात् ॥६५॥
स्नेहं चानित्यदृष्ट्या च बन्धनादिविवेकतः ।
क्षुधां जयेद् यात्रया च योगेनाऽऽवश्यकेन च ॥६६॥
मानं जयेदनावृत्त्या कारुण्येन विवेकतः ।
सन्तोषाच्च जयेद् गृध्नां विवेकज्ञानतस्तथा ॥६७॥
तन्द्रां जयेत् स्वस्थभावादुत्थानाच्च बलादपि ।
संशयं शास्त्रवचनाच्च निर्णयात् प्रजयेत् सदा ॥६८॥
वाग्दोषान् मुनिभावेन मनोदोषाँश्च विद्यया ।
पावित्र्येण जयेच्चापि कल्मषं तामसं सदा ॥६९॥
ज्ञानदृष्ट्या तमश्चापि जयेदज्ञानसंज्ञितम् ।
आत्मबोधेन च ज्ञानं मानसं प्रजयेद् यतिः ॥७०॥
आत्मानं च जयेत्परमेशे समर्पणेन तु ।
तदर्पणात् सर्वदोषाः शिष्टा नश्यन्ति द्राक् खलु ॥७१॥
तदा विवर्धते तेजो ब्रह्मलोकप्रकाशकम् ।
सिद्धयश्चोद्भवन्त्यस्य विज्ञानं सम्प्रवर्धते ॥७२॥
सतामाचारमाप्तः सन् वर्तमानः सताश्रये ।
स्वेच्छयैव निनीषेत् स ब्रह्माऽक्षरं परं पदम् ॥७३॥
एष मार्गो विमुक्तैर्वै राजन् शुभाश्रयः सदा ।
यत्र विघ्ना न जायन्ते निर्विघ्नस्य हरेः श्रयात् ॥७४॥
दिव्येन्द्रियक्रियाहारो दिव्यसद्गुणवर्तनः ।
दिव्यकृष्णे कृतस्थानो याति ब्रह्म सनातनम् ॥७५॥
संघाते संस्थितेश्चापि मुक्तो नैव हि तप्यते ।
बद्धो हि तप्यते तस्य सम्बन्धास्तापदायिनः ॥७६॥
नात्माऽस्ति कस्यचित् कश्चिन्नास्य कश्चन विद्यते ।
कथं गृह्णात्ययं दुःखं परोत्पन्नं निजात्मनि ॥७७॥
नैव सञ्जायते चात्मा नापि विपद्यते क्वचित् ।
मुक्त्वा देहं प्राप्य कृष्णं प्रयाति परमां गतिम् ॥७८॥
पुण्यपापमयो देहः कर्मक्षयेन नश्यति ।
ततो देही प्रमुक्तः सन् ब्रह्मत्वमुपगच्छति ॥७९॥
पुण्यपापक्षयार्थं हि कृष्णार्पणं विधीयते ।
तथा नैर्गुण्यमासाद्य याति ब्रह्मपरां गतिम् ॥८०॥
अर्थाः स्मृद्धिभराश्चापि बाढं दुःखभरा यतः ।
स्वादलालावगूढास्ते मोहयन्त्यविचक्षणम् ॥८१॥
सर्वेन्द्रियसुखं दिव्यं वितृष्णस्य तु कल्मषम् ।
सतृष्णेन ममत्वेन कल्पितं स्वार्थपूर्तिकम् ॥८२॥
तदेव परितापाय नाशे सम्पद्यतेऽधिकम् ।
तस्मात् तापकरं पूर्वं तापं मत्वा न चार्जयेत् ॥८३॥
कृतकृत्यः सदा मत्वा भूत्वाऽप्येवं न संज्वरेत् ।
इष्टानिष्टावुभौ त्यक्त्वा परेशे सर्वमर्पयेत् ॥८४॥

प्राणान्तिकं परं रोगं तृष्णात्मकं परित्यजेत् ।
अपूर्यमाणं पातालं तृष्णात्मकं च चाविशेत् ॥८५॥
शीलं सन्तोषमेवापि शान्तिं भक्तिं क्षमां मतिम् ।
सेवां समर्पणं कृत्वा ब्रह्मधाम समाविशेत् ॥८६॥
पश्यन् मृत्युं शिखावासं कालं च प्राणवासिनम् ।
कर्म चात्मकृतावासं ब्रह्मवासं समर्जयेत् ॥८७॥
अहोरात्राणि यान्त्येव यात्रा भवति खण्डिता ।
रात्र्यां रात्र्यां व्यतीतायामायुर्विन्दति ह्रस्वताम् ॥८८॥
पुष्पवद् देहिनं मृत्युर्नयत्यपूर्णकामिनम् ।
आत्मकार्यं तु प्रथमं कुर्वीत दैहिकं ततः ॥८९॥
देहसम्बन्धजं पश्चाद् येन न स्यात् प्रतारितः ।
अकृतेष्वपि कार्येषु मृत्युरादाय गच्छति ॥९०॥
नहि कश्चिद् विजानाति कदा मृत्युर्भविष्यति ।
सुप्तं वा जाग्रतं स्वस्थं मृत्युरादाय गच्छति ॥९१॥
कुर्वन्तं बहुसंकल्पान् पुत्रस्मृद्धिपशुस्थितिम् ।
अन्यव्यासक्तहृदयं मृत्युरादाय गच्छति ॥९२॥
न मृत्युप्रतनां कश्चिन्निवर्तयितुमुद्बलः ।
ब्रह्मबलो भक्तिबलो मृत्युं दूरयितुं क्षमः ॥९३॥
ब्रह्मविद्याप्रकाशाढ्यः सत्संगयानवाहनः ।
श्रीकृष्णसारथिं प्राप्तो मृत्युं तीर्त्वाऽक्षरं व्रजेत् ॥९४॥
मा मोहं व्रज राजेन्द्र कृते पुण्ये कथंचन ।
स्वर्गे च गत्वरसंज्ञे सन्नद्धो भव केशवे ॥९५॥
केशवः कालकालोऽस्ति मृत्योर्मृत्युः परेश्वरः ।
सर्वकर्मफलज्योष्टा तस्मिन् कार्यं समर्पय ॥९६॥
निर्भीको भव राजेन्द्र भयं कोशो हि कर्मणाम् ।
मुञ्च नारायणे देवे विकोशो भव पार्थिव ॥९७॥
गृहाऽनादिकृष्णनारायणपादं हि निर्भयम् ।
कांभरेयपदे स्थित्वा शाश्वतानन्दभाग् भव ॥९८॥
इत्युक्त्वा राधिके तत्र लोमशो विरराम ह ।
राजाऽश्वपाटलः शान्तिं चावाप पारमेश्वरीम् ॥९९॥
बहु मत्वाऽमृतं श्रीमल्लोमशाननवाहितम् ।
तृप्तोऽपि च पुनस्तृप्तिं नाधिजगाम भक्तराट् ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायामश्वपाटलकृतानाम् आत्मनः पापात्मकत्वे पुण्यात्मकत्वे मुक्तिभावे दोषविनाशभावे च प्रश्नानां श्रीलोमशकृतोत्तरदानमित्यादिनिरूपणनामैकपञ्चाशादधिकद्विशततमोऽध्यायः ॥ २५१ ॥

श्रीकृष्ण उवाच—

अथापि राधिके देवि राजाऽश्वपाटलस्ततः ।
पुनर्भागवतान् धर्मान् पप्रच्छाऽतृप्तमानसः ॥ १ ॥

अश्वपाटल उवाच—

किं व्रतः कीदृशाचारः किं बोधः किं समाश्रयः ।
अक्षराख्यं हरेर्धाम प्रयाति परतः परम् ॥ २ ॥

श्रीलोमश उवाच—

भक्तिव्रतः सदाचारो ब्रह्मात्मबोधवान् शुचिः ।
परब्रह्माश्रयो याति धामाऽक्षरं परात्परम् ॥ ३ ॥
गृहे गृहे वसन् शान्तः स्वार्थाऽनर्थौ विहाय च ।
अनुत्थितनवेहश्च निरपेक्षोऽक्षरं व्रजेत् ॥ ४ ॥
न दोषं विवृणुयाच्च साक्षात्परोक्षमेव वा ।
कल्पयेन्नान्तरे चापि निर्दोषकोऽक्षरं व्रजेत् ॥ ५ ॥
अद्रोहः सर्वभूतानामानन्ददो भवत्यपि ।
जीवनं चाऽजातशत्रुः कुर्वंस्तदक्षरं व्रजेत् ॥ ६ ॥
वादतर्कान्न कुर्याच्च नाभिमानं विवर्धयेत् ।
प्रियं च कुशलं कुर्यात् सोऽक्षरं धाम संव्रजेत् ॥ ७ ॥
प्राणयात्रिकमात्रः सन् विशेषं चार्जयेन्न च ।
पूजितो हर्षयेन्नैव स्निग्धे स्निग्धो न वै भवेत् ॥ ८ ॥
नान्नं निन्देन्न वाऽन्यं च नरं नारीं प्रनिन्दयेत् ।
वृक्षमूलमरण्यं वा गुहां वसेत् स्मरन् हरिम् ॥ ९ ॥
अज्ञातचर्यो विचरेत् नानुरुन्ध्यात्त देहिनम् ।
सदा तृप्तश्च सन्तोषी प्रसन्नमानसाननः ॥१०॥
जपन् कृष्णं रागहीनो निस्पृहः समदृष्टिमान् ।
परात्मनाऽऽत्मानन्दश्च सर्ववेगप्रशान्तकः ॥११॥
मध्यस्थ इव तिष्ठँश्च सर्वोदासीनवर्तनः ।
परब्रह्मकृतमैत्र्यः प्रयात्यक्षरधाम सः ॥१२॥

अश्वपाटल उवाच—

कदा सन्यासमाश्रित्य गन्तव्यं ब्रह्मणः पदम् ।
कदा वा गृहधर्माद्धि यायात् तद्ब्रह्मणः पदम् ॥१३॥

श्रीलोमश उवाच—

पुत्रपौत्रादि संवीक्ष्य निवृत्तिं चाभिवीक्ष्य च ।
अबाधितस्वभावं चाभ्यस्याश्रित्य च साधुताम् ॥१४॥

भक्तिं कृत्वा विहायाऽत्र वर्ष्मं गन्तव्यमक्षरम् ।
उद्योगिनो हि सान्निध्ये मुक्तिश्चायाति दुर्लभा ॥१५॥
कार्तिके मार्गशीर्षे वा माघे चैत्रेऽप्याषाढके ।
श्रावणे संप्रगृह्णीयात् सन्यासं साधुतान्वितम् ॥१६॥
यदा निवर्तेत जगतस्तदा प्रव्रजेत्तत्स्थलात् ।
प्रज्ञया च तमः सर्वं निरस्य श्रीहरेर्बलात् ॥१७॥
ब्रह्मप्रकाशमासाद्य यायात् कृष्णाऽक्षरगृहम् ।
अयत्नसाध्यं मुक्तानामन्येषां यत्नगोचरम् ॥१८॥
यत्नेन चेयते स्वर्गं पारमेष्ठ्यं पदं तथा ।
यत्नेन कर्मणा तच्च मतं नष्टं भवत्यपि ॥१९॥
तपसा लभ्यते भूयस्तपसा भुज्यते दिवम् ।
तपसाऽऽत्मजुषा धामाऽक्षरं चापि प्रलभ्यते ॥२०॥
धर्मेण सात्त्वतेनैव हरिर्नारायणः प्रभुः ।
प्राप्यते पुरुषोऽनन्तोऽनादिकृष्णनरायणः ॥२१॥
विष्णुः कृष्णः स्वर्णकेशः हिरण्यश्मश्रुरच्युतः ।
वैकुण्ठगोलोकवासो ब्रह्मप्रियाप्रियो विभुः ॥२२॥
तस्मिन् स्थितं जगत्सर्वं जडचैत्यं चराचरम् ।
सूक्ष्मं सर्वं ब्रह्मजुष्टं स्थौल्यं प्राप्य प्रजायते ॥२३॥
पुष्टिमेति ततश्चैव तस्मिन्नन्येति सर्वशः ।
स एषो भगवान् प्राप्यो भक्त्या च संयमेन च ॥२४॥
तद्भावभावितः प्राज्ञो निर्मलो ब्रह्मनिष्ठकः ।
ब्राह्मीं स्थितिं वशीकृत्य सुखानन्त्यं समश्नुते ॥२५॥
स्वर्णं वह्निसहस्रार्चिर्योजितं ध्मायितं मुहुः ।
शुद्धं सम्पद्यते चात्मा ज्ञानभक्त्यादियोजितः ॥२६॥
जन्मान्तरशतेनापि वैकेन जन्मनाऽपि वा ।
यत्नेन महता चात्मा कल्मषोऽपि विशुद्ध्यति ॥२७॥
अनादिश्रीकृष्णनारायणो हरिः श्रियाः पतिः ।
कृपया भक्तियोगे न सन्निधिं भजतेऽस्य च ॥२८॥
अक्षरे वा क्षरे लोके यथा तद्वद् भवद्गृहे ।
समायाति च रमतेऽनुग्रहप्रेरितः स्वयम् ॥२९॥
ब्रह्मलोकोऽस्य मूर्धाऽस्तीश्वरलोका हृदादिकम् ।
जीवलोकाश्चरणौ च त्रेधा सृष्टिर्व्यवस्थिता ॥३०॥
कर्मणां तपसां वापि ज्ञानानां विविधात्मनाम् ।
सेवानां चाकर्मणां च फलं नारायणः स्वयम् ॥३१॥
अण्डानि यस्य रोमांशे पारमेष्ठ्यधिकान्यपि ।
वेदाः सरस्वती चापि जिह्वा यस्यास्ति सृष्टिषु ॥३२॥
धर्मो भक्तिर्ब्रह्मपरौ ब्रह्म यद्धृदये स्थितम् ।
तत्र स्थितश्च यो देवो दिव्यः सः परमेश्वरः ॥३३॥
मन्त्राः प्रवर्तना देवाः पात्राणि च तदात्मकाः ।
ब्रह्मा च ब्राह्मणाच्छंसी पोताऽग्नीध्रो यदात्मकाः ॥३४॥
होताच्छावाककौ ग्रावः स्तोता ह्येते यदात्मकाः ।
अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता मदात्मकाः ॥३५॥
उद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इमे ।
यदात्मकाः क्रतुर्यदात्मकः स परमेश्वरः ॥३६॥
मुक्ता अक्षरलोकश्च गोलोकश्च यदात्मकाः ।
वैकुण्ठं चामृतं चाव्याकृतं च बदरीवनम् ॥३७॥
क्षीरालयं श्वेतभूमिर्यदात्मकाः स माधवः ।
राधा कृष्णस्तथा लक्ष्मीनारायणः सितारमः ॥३८॥
रमाकान्तः पद्मजेश कृष्णनारायणः स हि ।
वासुदेवादयो व्यूहा अवतारप्रकोटयः ॥३९॥
भूमाद्या ईश्वराश्चापि वैराजाद्याः प्रधानजाः ।
ब्रह्मविष्णुमहेशाश्च रुद्रा यदात्मका हि सः ॥४०॥
ऋषयः पितरश्चापि वसवः सिद्धसाधवः ।
आदित्याश्चाश्विनौ सूर्यादयो यदात्मका हि सः ॥४१॥
दिक्पाला लोकपालाश्च सुराश्च मानवादयः ।
सर्वं तदात्मकं राजन् पृथक् चापृथगेव तत् ॥४२॥
ज्ञानेन महता पश्यन् ब्रह्मप्रकाशवान् भवेत् ।
ब्राह्मप्रकाशतेजस्वी पश्यत्येव परेश्वरम् ॥४३॥
सर्वान् स्वर्गान् विजानाति साक्षात् करोति चांजसा ।
तत्तद्दृष्टिप्रतापेन परेश्वरानुभावितः ॥४४॥

अश्वपाटल उवाच—

तत्तत्सृष्टौ तु के सर्गा अनित्या नित्यकाश्च वा ।
यान् स पश्यति मुक्तात्मा तान्मे वद गुरो त्विह ॥४५॥

**श्रीलोमश उवाच—**

ब्रह्मसृष्टौ भवन्त्येव पञ्चधा ब्रह्मरूपणाः ।
परब्रह्म, ब्रह्मप्रियाः, अक्षरब्रह्म इत्यपि ॥४६॥
मुक्ता मुक्तान्य एवेति पञ्चरूपः स एव सः ।
ईशसृष्टौ भवन्त्येव सद्रा दशविधस्तथा ॥४७॥
अवतारा अवतारिण्यश्च व्यूहाः प्रधानकम् ।
भूमानश्च महाविष्णवश्च वैराजकोटयः ॥४८॥
सादाशैवा गवाद्याश्च पार्षदाण्यश्च पार्षदाः ।
गोपा गोप्यश्च रूपाणि द्वादशैतानि चापि सः ॥४९॥
जीवसृष्टौ दशधा च सर्गश्चेतनसंभृतः ।
त्रिदेवाः सिद्धपुरुषाः ऋषयः पितरः सुराः ॥५०॥

आसुरा मानवाश्चापि तिर्यञ्चः कीटजातयः ।
स्थावराश्चेति मुख्यास्ते तत्राऽवान्तरजातयः ॥५१॥
असंख्याताः प्रजायन्ते त्रिदेवेच्छानुसारतः ।
सप्तविंशकल्प एवाऽयं मुख्यो गौणास्त्वनन्तकाः ॥५२॥
स्थावराणां च कीटानां तिरश्चां शुभयोगतः ।
पुण्यक्षेत्रनिवासेन तीर्थयोगेन वा पुनः ॥५३॥
सतां देवेश्वराणां वा योगेन मानवी जनुः ।
आसुराणां कृष्णयोगात् सिद्धयोगाच्च मानवी ॥५४॥
तत्र धर्मादिलाभेन दैवी वै जायते गतिः ।
षण्णां भक्त्या च वा पुण्यैः पैत्री गतिः प्रजायते ॥५५॥
श्राद्धदानमहापुण्यैरार्षीगतिस्ततः परा ।
योगाभ्यासवशासिद्धगतिस्ततः परा शुभा ॥५६॥
तेषां योगजलभ्योपासनोत्था ब्राह्मवैष्णवी ।
शांभवी वा गतिस्तेषां सत्त्वप्रकर्षलाभजा ॥५७॥
गतिर्वैराजिकी तेषामुपास्तिसम्विशेषतः ।
जायते च गतिर्महावैष्णवी चाऽथवाऽपरा ॥५८॥
सादाशैवी गतिश्चापि ततश्चोपासनाबलात् ।
भूम्निका च गतिश्चापि प्राधानपौरुषी ततः ॥५९॥
व्यूहात्मिका ततश्चाप्यधिकोपासनया गतिः ।
गोपगोपीमयी चापि पार्षदादिमयी तथा ॥६०॥
अवतारिणी च गतिस्तथा मुक्तस्वरूपिणी ।
अवतारस्वरूपा च मुक्तानिकास्वरूपिणी ॥६१॥
ब्राह्मी ब्रह्मप्रियारूपा गतिश्चापि प्रजायते ।
आक्षरी च गतिश्चापि हरेश्चोपासनाबलात् ॥६२॥
जायते ब्रह्मपर्यन्ता परब्रह्म न जायते ।
स एवैकः परमात्मा सर्वान्तर्यामिमापतिः ॥६३॥
परब्रह्माऽवतारी च परमेश्वरसंज्ञकः ।
नारायणप्रकोटीनां नारायणोत्तमोत्तमः ॥६४॥
अश्वपाल यदा देही चाधर्मं श्रयति त्विह ।
तदा तिर्यक्कीटयोनिं याति स्थावरतामपि ॥६५॥
आसुरीं वा मानवीं वा निकृष्टां जनुमेति च ।
ततो याम्यां भुवं प्राप्य यथावशेषमेति हि ॥६६॥
अशुभं वा शुभं जन्म धर्मकृच्चिरकालिकः ।
मुच्यते न तु चाधर्ममार्गी क्वचिद् वियोनितः ॥६७॥
शुद्धेन तु हृदा कृष्णं विचिन्वन् ब्रह्मभावनः ।
शुद्धं च शाश्वतं ब्रह्माक्षरं चोपैति यत्परम् ॥६८॥
सर्वा सृष्टिर्हरेर्लोकात् प्रवर्तते विशत्यपि ।
तमेव भज चान्तःस्थं प्रत्यक्षं कृष्णवल्लभम् ॥६९॥

सृजोर्णनाभिवत् सूत्रं ग्रन्थस्व यावदर्थकम् ।
पुनर्निगिल कार्यान्ते निर्बन्धो भव जालके ॥७०॥
यदा त्यक्त्वा मोहजालं पुनर्नवं प्रकाशय ।
त्यक्त्वा धर्म्यं चान्यदेव विकाशय सुखप्रदम् ॥७१॥
जालं जालनिधानं वोभयं त्यक्त्वा सुखी भव ।
शाश्वते ब्रह्मणि क्ष्मेश भुङ्क्ष्वाऽनन्तप्रमोदनम् ॥७२॥
ग्रन्थयो हृदयस्येह भवन्ति वासनाश्रिताः ।
प्रध्वस्ता ब्रह्मविज्ञप्त्या पुनर्नवा न सन्ति च ॥७३॥
ग्रन्थिबन्धनहीनश्च प्रयाति ब्रह्म शाश्वतम् ।
नैव ताम्यन्ति सन्तो वै विज्ञानिनो हरिं श्रिताः ॥७४॥
ताम्यन्त्येवोर्मिभिर्लोका मोहाशादिसमन्विताः ।
ये जानन्ति च भूतं च भविष्यद् भव्यमित्यपि ॥७५॥
उपक्रमं च संहारं फलोदयं समाऽसमम् ।
तेषां दुःखं च वोद्वेगो जायते न विजानताम् ॥७६॥
कर्मणां गतयो भिन्ना धनाढ्या धनवर्जिताः ।
सुदृढदेहाश्चापथ्यरुग्णा वा चान्नवर्जिताः ॥७७॥
दरिद्रा वा बहुपुत्राः सती च दुष्टकान्तका ।
अपुत्रा वापि राजानो देवा दैत्यादिपीडिताः ॥७८॥
विद्वांसो मानहीना वा भृत्याश्चालस्यसेवकाः ।
सुरूपा अपि दुर्हृदः ख्याताश्च स्तेनकर्मिणः ॥७९॥
राज्यभोगाश्च सतृष्णाः पश्य संसारनिम्नताम् ।
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनोऽपि च ॥८०॥
दरिद्राः कोटिपतयो जीवन्ति चान्नभोजिनः ।
सर्वे प्रयान्ति निधनं सायासा निष्प्रयत्नकाः ॥८१॥
तद्विचार्य महाराज बन्धनं माऽवमर्शय ।
न बान्धवाः सुवर्णादि कौल्यं वीर्यं मनुर्बलम् ॥८२॥
दुःखात् त्रातुं प्रभवन्ति तस्मान्नारायणं श्रयेत् ।
प्रियं यद्धर्षजननं गर्वदं तत् त्यजेत् सदा ॥८३॥
ब्रह्मदं मोक्षदं शान्तिप्रदं प्रियं भजेत् सदा ।
अर्थकामौ महाबन्धौ धर्ममोक्षनिवर्तकौ ॥८४॥
तावेव माधवे न्यस्तौ धर्ममोक्षकरौ मतौ ।
एवं च वर्ततो नैव मृत्युः कालोऽपि बाधते ॥८५॥

**अश्वपाटल उवाच—**

तत्त्वज्ञानविहीनस्य बहुसंशयशालिनः ।
अप्राप्तनिर्णयस्येह श्रेयो येन वदाऽत्र तत् ॥८६॥

**श्रीलोमश उवाच—**

साधूनां च गुरूणां च वृद्धानां सेवनं सदा ।
देवानां पूजनं चापि शास्त्राणां श्रवणं तथा ॥८७॥

कर्तव्यं भावतो नित्यं मातापितृप्रसेवनम् ।
पतिसेवा सतीसेवा पूज्याशीर्वादसंग्रहः ॥८८॥
हरेर्भजनमित्येव श्रेयःप्रदानि सन्ति वै ।
परं नैःश्रेयसं भक्त्या परेशस्य प्रजायते ॥८९॥
गौणान्यपि च जायन्ते श्रेयांसि शुभसाधनैः ।
सतां शुभाशिषो नित्यं दानपुण्यस्वभाविता ॥९०॥
देवमन्दिरवासश्च श्रेयो नैःश्रेयसप्रदम् ।
सर्वत्र ब्रह्मभावश्च सर्वसेवाविधानकम् ॥९१॥
देवपित्रतिथिभृत्याऽर्हणा श्रेयस्तथाविधम् ।
मायाभ्रमविहीनत्वं सन्तोषश्चेषणालयः ॥९२॥
अन्तरात्मकृतावासः श्रेयो नैःश्रेयसप्रदम् ।
आत्मध्यानं तथा मोक्षसाधनादित्रतार्जनम् ॥९३॥
ज्ञानधनं चात्मनिष्ठा श्रेयो नैःश्रेयसप्रदम् ।
सर्वेषां शुभमिच्छेद्वै सर्वोत्कर्षं समाचरेत् ॥९४॥
अन्येषां शुभभावादीनत्युत्कर्षतया वदेत् ।
अन्येभ्यो मानमुत्साहं दद्यात् पूजां समाचरेत् ॥९५॥
अस्वपूजापरश्चापि परपूज्यविचारवान् ।
प्रज्ञालाभपरश्चापि श्रेयो विन्दति सर्वदा ॥९६॥
साधुषु वासमिच्छेच्च विद्वत्सु मार्जवं भजेत् ।
पुण्यशीलेषु मैत्रीं च कुर्यान्निःश्रेयसप्रदाम् ॥९७॥
श्रेयोहीना जना यत्र तत्र वासं न रोचयेत् ।
स्वाहास्वधावषट्कारा वर्तन्ते तत्र वै वसेत् ॥९८॥
यत्र सुखं मोक्षसुखं वसेन्मोक्षाय तत्र ह ।
मुक्ता बन्धनहीनाश्च चरन्ति सुखिनो जनाः ॥९९॥
संचये दत्तयत्नाश्च कीटाद्या अपि भूपते ।
असक्ताः सुखिनश्चैते सक्ता दुःखार्णवार्दिताः ॥१००॥
स्वजनेषु न वै चिन्ता कर्तव्या मद्विना कथम् ।
जीवेयुरिति विदुषा श्रेयोऽर्थिना विवेकिना ॥१०१॥
सर्वं कर्मवशं तिष्ठेन्निधनं याति कर्मतः ।
मेलनं विप्रकर्षश्च यथाकर्म भवत्यपि ॥१०२॥
मरणं सर्वथा सत्यं श्रेयोऽर्थं मरणं शुभम् ।
श्रेयांसि बहुधा कृत्वा मरणं मरणाय तत् ॥१०३॥
परार्थं कृतदुर्गश्च स्वार्थं खातं प्रसेवते ।
न तस्येह भवेच्छ्रेयः कथं नैःश्रेयसं परम् ॥१०४॥
तस्माद् राजन् प्रमादं वै त्यक्त्वा नैःश्रेयसं भज ।
दिवसे दिवसे कृष्णं रात्रौ रात्रौ हरिं भज ॥१०५॥
आत्मभावं ब्रह्मभावं पश्य मुक्तोऽत्र संभव ।
यस्य लोके न वै स्थातुं समीहा वर्ततेऽग्रगा ॥१०६॥
प्राणयात्रौषधाऽपेक्षा विहारोदासता तथा ।
विचित्तस्येव विषयाः स वै मुक्तोऽत्र निश्चितः ॥१०७॥
अन्नवस्त्रालयाद्याश्च यस्य जीर्णत्वचो यथा ।
जनर्द्धिसंगमो यस्य मर्मभेदायतेऽपि च ॥१०८॥
इन्द्रियाणां सौष्ठवेऽपि यस्य निरिन्द्रियात्मता ।
भोज्यभोग्यादिसम्पत्तौ विपत्तिवद् विवेकिता ॥१०९॥
सोऽयं मुक्तः सदा चाऽत्र परत्राऽपि च भूपते ।
तद्योगादन्यलोकानां मुक्तताऽपि भवेत् खलु ॥११०॥
ऋषीन्नृपान् सुसम्राजो मुक्त्वा भुवं गता मृतिम् ।
एवं पश्यन् भवेन्मुक्तो बन्धनाऽऽशाविवर्जितः ॥१११॥
दुःखानि सुलभान्यत्र सुखानि दुर्लभानि च ।
यत्नलब्धानि नश्यन्ति कथं मोक्षं न पूजयेत् ॥११२॥
सति द्रव्येऽभितः सर्वे शंसमाना अहो इति ।
भ्रातः पितः शुभां वाचं वदन्तोऽभ्यर्चयन्ति च ॥११३॥
स्वार्थमात्रपरास्ते वै गते द्रव्ये विरोधिनः ।
दारिद्र्ये वा न जानन्ति क्व भ्राता क्व पिता च वा ॥११४॥
कथं बुद्ध्वा स्वार्थपरान् न विरज्येत बुद्धिमान् ।
असारमिव मानुष्यं निष्फलं चापि जीवनम् ॥११५॥
तस्माद् भगवतो धर्मः श्रेयानत्र परत्र च ।
सतां धर्मोऽपि भक्तिश्च नैःश्रेयसप्रदाः सदा ॥११६॥
इत्येवं राधिके श्रीमान् लोमशश्चाऽश्वपाटलम् ।
उपादिदेश बहुधा राजा पप्रच्छ तं पुनः ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायामश्वपाटलस्याऽक्षरगतिसाधनप्रश्नः, सन्यासाद् गार्हस्थ्याद्वा गतिप्रश्नः, सृष्टित्रयसर्गप्रश्नः, श्रेयःप्रश्नः, लोमशकृतोत्तराणि चेतिनिरूपणनामा द्विपञ्चाशदधिक-द्विशततमोऽध्यायः ॥ २५२ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽश्वपाटलश्च श्रुत्वा नैःश्रेयसं परम् ।
लोमशं परिपप्रच्छ पुनश्चात्मविमोक्षणम् ॥ १ ॥

**अश्वपट्टल उवाच—**

वद मेऽत्र पुनः श्रेय इहाऽमुत्र सुखावहम् ।
कर्तव्यार्थेन निर्वर्त्यं चाभ्युदयोत्तरोत्तरम् ॥ २ ॥

**श्रीलोमश उवाच—**

शकटं रथिनो याति बहुभारं प्रवासिनः ।
देहयात्रापरे भारे तृप्तिहीनस्य भूतले ॥ ३ ॥

क्षुधातृषे द्वे वृषभौ शोकमोहौ च चक्रके ।
सुखदुःखे चाग्रपृष्ठौ वासना मध्यसंस्थिका ॥ ४ ॥
रथी स्वयं च शकटं नीत्वा यात्यधिकाय ह ।
यात्रामात्रातिरेकेषु लुब्धोऽनुविन्दतीह षट् ॥ ५ ॥
अत एव सदा क्लिष्टो निद्रां वेत्ति न वाहकः ।
शकटेन वहन् वस्तून्यसंख्यानि मुहुर्मुहुः ॥ ६ ॥
अरण्ये चेन्द्रियचौरै लुण्टितो जायतेऽवशः ।
सुखशान्त्यात्मकं द्रव्यं चौरा हरन्ति सर्वशः ॥ ७ ॥
तस्मान्न वृषभौ रक्ष्यौ रक्ष्यं न शकटं तथा ।
तत्त्यागे देहयात्रायां सुखं शान्तिर्हि योगिवत् ॥ ८ ॥
जायतेऽस्य रथिनो वै यात्रामात्रप्रयोगिणः ।
नाधिकं चाभिवाञ्छेच्च वस्त्रान्नजलमन्दिरम् ॥ ९ ॥
पुण्यकार्याणि कुर्वीत देवकार्याणि यानि च ।
परोपकारकार्याणि प्रकुर्वीतात्मसंदशा ॥१०॥
दुर्लभं मानवं चायुर्नैव क्षिपेत् प्रगर्तके ।
उत्कर्षाभ्युदयार्थं च प्रयतेत विमुक्तये ॥११॥
पुण्येन कर्मणाऽऽप्येतोत्कर्षश्चाभ्युदयस्तथा ।
व्रतयत्नाऽभ्यासभाग्यैः सतामाशीर्भिरेव च ॥१२॥
अकर्माणि दैवतानां मुनीनां च सतां तथा ।
महतां न चरेत्तानि तेजस्विनां न दूषणम् ॥१३॥
महतां चाऽघटितानि कुत्सयेन्न कदाचन ।
शुभं विदध्याच्छान्तात्मा भद्राण्येव स पश्यति ॥१४॥
नृशंसं नाऽर्जयेत्कर्म धनं मानं प्रशासनम् ।
तत्सर्वं याम्यलोकस्य दुःखदं भावि वै यतः ॥१५॥
प्रशस्तं चाचरेत् सर्वं ख्यातं धन्यपरायणम् ।
दैवं पैत्र्यं चातिथेयं मानवं पाशवं च यत् ॥१६॥
अव्ययकर्मणा यान्ति सिद्धिं सन्तो महर्षयः ।
व्ययेन कर्मणा भूपाश्चोपासनेन योगिनः ॥१७॥
सेवया योषितः शूद्रा दासा दास्येन वै तथा ।
पण्डिता ज्ञानमार्गेण कारवः शिल्पविद्यया ॥१८॥
गवाद्या दुग्धदानैश्च वृक्षाद्याः फलदानकैः ।
स्तम्बाः पत्रप्रदानेन वल्लिकाः पुष्पदानकैः ॥१९॥
मानवाश्चोपकारेण परस्परं सहायिनः ।
सिद्धिं वै यान्ति परमां मुक्तिसिद्धिं प्रयान्ति च ॥२०॥
हुत्वाऽपि हवनं वह्नौ मुनयोऽपि यतव्रताः ।
प्रयान्ति सिद्धिं परमामुद्दिश्य श्रीनरायणम् ॥२१॥
पत्नी चात्मा च माता च पिता जनयिता सुतः ।
गुरुः पुत्री च देवास्ते सेव्या येन फलं सुखम् ॥२२॥
ते सर्वे वह्नयः प्रोक्तास्तद्धोत्रं होत्रमेव तत् ।
तेषां तृप्तौ हरिस्तृप्तो भवत्येवान्तरे स्थितः ॥२३॥
तस्यास्तृप्तेः फलं चात्र सुखं परत्र शाश्वतम् ।
भक्त्या वा सेवया वापि दानेन च मखेन च ॥२४॥
तपसा कृच्छ्रसंज्ञेन चानर्हाश्चार्हतां गताः ।
उशना विश्वामित्रश्च वाल्मीकः सद्गतिं गताः ॥२५॥
उशनास्तपसा शंभोः शुक्रत्वं प्राप्य वै ततः ।
शुक्राचार्यो दैत्यगुरुः स्वर्गे सदा ह्यजायत ॥२६॥
क्षत्रियो विश्वामित्रश्च ब्रह्मर्षित्वमवाप ह ।
वाल्मीकिः शबरश्चापि सदा मुक्तो बभूव ह ॥२७॥
शुश्रूषया स्त्रियः शूद्रा गतिं यान्ति परां शुभाम् ।
सतां संगः सदा भाग्योदयप्रदः सुपुण्यदः ॥२८॥
सन्निकर्षेण च सतः साधुर्वै जायते जनः ।
सत्यश्रमोपार्जिता च कपर्दिकाऽपि सौख्यदा ॥२९॥
अन्यायोपार्जितं स्वर्णं दुःखदं निगडप्रदम् ।
अन्यायोपार्जितं चान्नं रोगाय वमनाय च ॥३०॥
अन्यायोपार्जितं क्षेत्रं वह्नये नरकाय च ।
अन्यायोपार्जिता नारी मृत्यवे चाप्यकीर्तये ॥३१॥
अन्यायोपार्जिता सम्पन्मूलनाशाय जायते ।
ब्रह्माऽसृजत् पुरा पुत्रं धर्मं प्रजासुखाय वै ॥३२॥
सर्वे वर्णाः स्वधर्मस्थाः स्वर्गस्थाः सुखिनो हि ते ।
तेषां मुक्त्यर्थमथ च धर्मोऽसृजन्निजांगतः ॥३३॥
भक्तिं यथा जना यान्ति स्वर्गं हरेर्हि शाश्वतम् ।
ताभ्यां स्वर्गं चिरं चापि शाश्वतं च ततो मिलेत् ॥३४॥
एवं प्रयत्नं कुर्वीत स्वर्गद्वयजयो भवेत् ।
यदा व्यपेतहृल्लेखं कर्माऽसंगं प्रजायते ॥३५॥
हृत्स्थाऽन्तर्यामिणं श्रित्वा कल्याणमर्जयेच्छुचिः ।
प्रायेण राजन् साधूनां त्यागिनां च विरागिणाम् ॥३६॥
प्रज्ञाबलेन भक्त्या वा बन्धनं न दृढं भवेत् ।
शैथिल्यं चाप्यते ज्ञानाद् विवेकाच्छास्त्रशीलनात् ॥३७॥
गृहस्थानां जडानां वा बन्धनं दृढतां व्रजेत् ।
गृहाण्याश्रित्य गाश्चापि क्षेत्राण्यपि धनानि च ॥३८॥
दारान् पुत्रांश्च भृत्यांश्च बन्धनं दृढतां व्रजेत् ।
रागद्वेषौ विवर्धेते भोगमोहादिभिः सदा ॥३९॥
रतिस्तैश्चाप्युदेत्येव रतो ग्राम्यसुखादिषु ।
नहि जानाति चात्मार्थे विवेकं मोक्षमित्यपि ॥४०॥
किन्तु यतते भोगी स्यां ततः पुनर्विनश्यति ।
तस्मान्निःसंगिना स्थेयं गृहदाराधनादिषु ॥४१॥

तपःफलं सम्पदश्च बन्धयन्ति जनानिह ।
आदित्या वसवो रुद्रा मरुतो मनवस्तथा ॥४२॥
विश्वेदेवा अश्विनौ च सिद्धाः साध्या महर्षयः ।
किंपुरुषाश्च गन्धर्वा वह्नीन्द्रसूर्यचन्द्रकाः ॥४३॥
पितरो लोकपालाश्च राक्षसा यक्षकिन्नराः ।
गणाश्च पार्षदाश्चापि ग्रहा देवाश्च दानवाः ॥४४॥
राजानो गुरुवर्गाश्चाऽऽचार्याः सिद्धाः सतीस्त्रियः ।
ते सर्वे तपसा सिद्धा भुञ्जते तपसां फलम् ॥४५॥
महाकुले प्रसूता ये समृद्धा मोदन्त ईश्वराः ।
कौशिकान्यम्बराण्येव स्वर्णहीरकभूषणम् ॥४६॥
वाहनासनभोज्यानि पानस्त्रीदासदासिकाः ।
शय्योत्तमाश्च मृद्वयश्च वासः प्रासादभूमिषु ॥४७॥
अभिप्रेतानि सर्वाणि सर्वं तत् तपसां फलम् ।
भोगार्थे जायते सर्वं कर्मणे नरकाय च ॥४८॥
असन्तोषः प्रदुःखाय प्रज्ञानाशकरस्तथा ।
भ्रामकश्च भवत्येव वृथाधावनकर्षितः ॥४९॥
इषुप्रपातमात्रं हि स्पर्शयोगेन कामजम् ।
औष्ण्यसुखं प्रदुःखाय सर्वथा निरयाय च ॥५०॥
तस्माद् विज्ञाय क्षणिकं दुःखबहुलमेव तत् ।
मेधावी च यतेताऽपि मोक्षार्थे गृहधर्म्यपि ॥५१॥
मोक्षं चानभिसन्धानाः कामानन्दादिसञ्ज्ञकाः ।
मनुष्या अपि पुण्यानि ध्वंसयन्तीव सूकराः ॥५२॥
योग्यं पात्रं युञ्जते न प्राप्तं कल्पलतासमम् ।
मर्दयन्ति शुष्कयन्ति नाशयन्ति हि दुर्भगाः ॥५३॥
प्राप्तं चिन्तामणिं देहं महिषीमाययाऽऽवृतम् ।
क्षपयन्ति नरा नार्यो मोक्षं कृत्वा तु निष्फलम् ॥५४॥
यद्यपि नृपते ! लोकः स्वभावात् कामनादिमान् ।
रुध्यते नाऽवशो नित्यं प्रवर्तते हि कर्मसु ॥५५॥
अनेकेषु विषयेषु दैहिकाऽऽमोददायिषु ।
तथापि गुरुवाक्येन तेषु कर्मस्वथाऽपरम् ॥५६॥
भक्त्याख्यं कर्म कर्तव्यं चाधिकं येन मुच्यते ।
सतां वृत्तमधिष्ठाय मग्ना अभ्युद्दिधीर्षवः ॥५७॥
पुण्यं सुखं शर्म प्राप्य स्वर्गं परमवाप्नुयुः ।
यद्यपि विषयासक्ता अपि द्रोहविवर्जिताः ॥५८॥
हर्यर्थं कर्म कुर्वाणा उद्धरन्तीव गोपिकाः ।
नैःश्रेयसं कर्मपथं समारुह्य हरेः रथम् ॥५९॥
सतां सार्था भक्तिपराः समर्पणविधायिनः ।
प्रयान्ति स्थानमजरं चाऽक्षरं स्वर्गमूर्ध्वगाः ॥६०॥
भक्ता जयन्ति सर्वत्र सगुणाश्चाऽगुणा अपि ।
पुत्राः शिष्या जयन्त्येव भक्तिमन्तः स्त्रियोऽपि च ॥६१॥
पिता सखा गुरुः पत्नी राजा माता पतिः सुरः ।
अभक्तानां न तुष्यन्ति पितरः साधवोऽपि च ॥६२॥
भक्तिर्हि साधनं श्रेष्ठं तोषणे सेवनं शुभम् ।
शुश्रूषणं तथा दास्यं प्रापणे श्रेष्ठमत्र ह ॥६३॥
तस्माद् भक्त्यादिभिः कृष्णनारायणः परेश्वरः ।
तोषणीयो हि सहसा देहेनाऽनेन जानता ॥६४॥
राजान् कश्चित् त्रायते न मृत्युपाशमुपागतम् ।
अवशिष्टे पुण्यपापे नापि कश्चिद् विकर्षति ॥६५॥
शत्रु रज्ञानतुल्योऽत्र वर्तते नाऽपरो नृप ।
तद्वशे मनुजो नित्यं करोति घोरवैशसम् ॥६६॥
तेन दुःखान्यपियन्ति नवं जन्म नवां मृतिम् ।
तस्य प्रबाधनायेह वृद्धानुपास्य वै सतः ॥६७॥
प्रज्ञामासाद्य शत्रुं तं ससार्थं विप्रवासयेत् ।
ततश्चिन्तामणिं गर्ते क्षिप्त्वा मोक्षात्पतेन्न वै ॥६८॥
चाण्डालत्वेऽपि मानुष्यं भक्त्यर्थं शोभनं यतः ।
मनुष्ययोनि श्रेष्ठा वै चात्मत्राणस्य साधनम् ॥६९॥
उपभोगैर्न देहोऽयं क्षपणीयो ह्यनर्थके ।
यावन्न विप्रणश्येत्र तावत् कुर्मः शुभं परम् ॥७०॥
एतादृशं कल्पबीजं प्राप्य मानुषविग्रहम् ।
द्विषते यो निजं मोक्षं स मतो वञ्चितः सदा ॥७१॥
लोकार्थे वै प्रकुर्वीतोपकारं दानकर्मभिः ।
कुटुम्बार्थे प्रकुर्वीत साहाय्यं धनवस्तुभिः ॥७२॥
पुत्राद्यर्थे प्रकुर्वीत व्यवसायं यथोचितम् ।
आत्मार्थे तु प्रकुर्वीत मोक्षदं साधनं परम् ॥७३॥
इष्टिं दानं च यजनं पुण्यं पित्र्यं च दैविकम् ।
भजनं सेवनं चापि श्रेयसोऽर्थे सदाऽऽचरेत् ॥७४॥

**अश्वपाटल उवाच—**

किं मूलं श्रेयसां यच्च कृतं नैव विनश्यति ।
क्व गतौ न निवर्तेत क्वापि ब्रूहि च मे गुरो ॥७५॥

**श्रीलोमश उवाच—**

सत्त्ववृत्तिरसंगश्च सतां सेवा समागमः ।
वृद्धाशीर्वादलाभश्च श्रेयसां मूलमक्षयम् ॥७६॥
तपो भक्तिस्तथाऽभयदानं नारायणाश्रयः ।
आत्मार्पणं कृतं चैतत् सर्वं नैव विनश्यति ॥७७॥

कायक्लेशेभ्य एवात्र तपोभ्यश्चोत्तमं तपः ।
हरौ वृत्तेर्निरोधो वै चाऽपरोक्षदृशिप्रदः ॥७८॥
साऽपरोक्षानुभूतिश्च लब्धा नैव निवर्तते ।
अभयं च परं दानं सर्वेभ्यश्चातिवर्तते ॥७९॥
सर्वाऽभयप्रदस्याऽत्र परत्राऽभयमक्षयम् ।
वसन् विषयमध्येऽपि विज्ञो नैव वसत्यपि ॥८०॥
अज्ञोऽसत्स्वपि विषयेष्वतीव वसतीति वै ।
धर्षयन्ति न विषयाः प्राज्ञं तेजस्विनं जनम् ॥८१॥
अप्राज्ञं चाधिकं स्वल्पा अपि वल्गन्ति वै दृढाः ।
दुष्कृतं तस्य कर्तारं नैव मुञ्चति कर्हिचित् ॥८२॥
कृतात्मानो न भिद्यन्ते विषयैः कर्मकोटिभिः ।
अकृतात्मानमेवाऽत्र भयं क्वचिन्न मुञ्चति ॥८३॥
वीतरागस्य वै जन्माऽदर्शनान्मुक्तिरेव ह ।
कृतेन कर्मणा तस्य लेपो नैवास्ति जीवतः ॥८४॥
मृतस्यापि न वै भोगः कर्मणामस्य विद्यते ।
भक्तिमार्गप्रयातस्य परधामगतिर्मता ॥८५॥
विस्तराः क्लेशसंयुक्ताः संक्षेपाः सुखदायिनः ।
परार्था विस्तरा दुःखास्त्यागं चात्महितं श्रयेत् ॥८६॥
अहो रात्रात्मके लोके देही मृत्युमुखे स्थितः ।
ग्रस्यते नित्यमेवाऽयं छिन्नायुर्जायतेऽनिशम् ॥८७॥
स्नेहपाशैश्च बहुभिः प्राकृतैर्मोहवृश्चिकैः ।
दंष्टो विषमयोद्विग्नो न सुखं लभते क्वचित् ॥८८॥
पाशान् छित्वा गृहं हित्वा परिग्रहान् प्रणम्य च ।
यः प्रयाति हरेर्मार्गे स वै पारगतो भवेत् ॥८९॥
अश्वपाटल ! लोकोऽयं स्वस्थे स्वास्थ्यविभागहृत् ।
अस्वास्थ्ये दूरगश्चास्ते स्वार्थमात्रपरायणः ॥९०॥
स्वार्थलोकात्परार्थो यः स वै श्रेष्ठो मतः सदा ।
परार्थपरतश्चापि तितिक्षुर्वै विशेषितः ॥९१॥
तितिक्षोरपि विज्ञश्च विज्ञाज्ज्यायाँश्च भक्तिमान् ।
स वै गुप्तं ब्रह्म बोध्यं भक्त्याढ्यं मोक्षकृत् सदा ॥९२॥
अमृतस्य परः कोशो मोक्षस्य द्वारमुत्तमम् ।
यानं स्वर्गस्य वै श्रेष्ठं धर्मस्य शेवधिस्तथा ॥९३॥
भक्तो वै मानुषे लोके मुक्तस्तिष्ठति मुक्तवत् ।
भक्तसंगेन भक्ता वै जायन्ते ब्रह्मगामिनः ॥९४॥
यादृशं सेवते जन्तुस्तादृशो जायतेऽपि सः ।
यदि सन्तं सेवतेऽत्र साधुः सञ्जायते स च ॥९५॥
देवास्तृप्यन्ति सद्भिश्च पितरः सिद्धकोटयः ।
मुक्तास्तृप्यन्ति साधुभ्यस्तस्मात् साधुत्वमाव्रजेत् ॥९६॥
स्वार्थमात्रपरान् लोकान् देवास्त्यजन्ति दूरतः ।
देवा मुक्ताः साधवश्च वसन्ति साधुभिः सह ॥९७॥
इत्येवं साधुयोगेन ब्रह्मलोकं प्रगच्छति ।
परब्रह्मस्थितो मुक्तोऽनन्तानन्दं समश्नुते ॥९८॥
इत्येवं राधिके श्रीमल्लोमशश्चाऽश्वपाटलम् ।
उपादिश्य विरराम राजा पप्रच्छ वै पुनः ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां नृपकृतोऽभ्युदयप्रश्नः, श्रेयोमूलादिप्रश्नः, लोमशदत्तोत्तराणि चेत्यादिनिरूपणनामा त्रिपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५३ ॥

**श्रीकृष्ण उवाच—**

राधिकेऽश्वपाटलश्च पप्रच्छ देवतोणषम् ।
आत्मनो रमणं चापि निर्विघ्नं येन जायते ॥ १ ॥

**अश्वपाटल उवाच—**

महर्षे सुरलोकेषु वासो वै सुरयाजिनाम् ।
ब्रह्मलोके निवासश्च जायते ब्रह्मयाजिनाम् ॥ २ ॥
ईश्वराणां तु लोकेऽपि तत्तदीश्वरयाजिनाम् ।
धामसु चावताराणां यजनाद्वसतिर्भवेत् ॥ ३ ॥
देवानां तोषणं येन येनोपायेन जायते ।
वदाऽत्र मे कृपां कृत्वेतरेषामपि धामिनाम् ॥ ४ ॥

**श्रीलोमश उवाच—**

देवास्तुष्यन्ति यज्ञेन पूजयोपास्तिभिस्तथा ।
नैवेद्यबलिभिश्चापि मन्त्राराधनतद्व्रतैः ॥ ५ ॥
सत्येनाऽहिंसया शुद्ध्या शीलेन च वृषेण च ।
आत्मसमर्पणेनाऽपि मानताशरणादिभिः ॥ ६ ॥
अनुष्ठानेन कृच्छ्रेण दानेन स्मरणेन च ।
उत्सवेन कीर्तनाद्यैर्देवास्तुष्यन्ति भूपते ॥ ७ ॥
आत्मशुद्ध्या विवेकेन पुण्यकर्मभिरादरात् ।
तुष्टा देवा ददत्यैवैहिकं स्वर्ग्यं सुखं निजम् ॥ ८ ॥
ईश्वराः पितरः श्राद्धैर्महोद्यापनकर्मभिः ।
पारायणैर्वेदविद्याध्ययनैः प्रतिमार्हणैः ॥ ९ ॥
मन्दिरे विधितः प्रतिष्ठापनैः पूजनादिभिः ।
महोत्सवैर्वेदधर्मैस्तुष्यन्तीश्वरकोटयः ॥१०॥
अवतारा हरेर्भावा भक्त्याराधनया तथा ।
पूजया मूर्तिसेवाद्यैस्तीर्थतद्व्रतभावनैः ॥११॥

आज्ञयाऽर्पणरीत्या च तत्कथाश्रवणादिभिः ।
अनन्यशरणागत्या निष्ठयैकैकतानया ॥१२॥
सततं चानुवृत्त्या च स्मृत्या ध्यानेन सेवया ।
पवित्रतया वृत्त्या च नैर्मल्ययुतयाऽनिशम् ॥१३॥
तच्छक्तितत्पार्षदादिसेवयाऽर्पणताश्रयैः ।
तत्तच्छृंगारदानाद्यैर्मानसैः पूजनादिभिः ॥१४॥
तद्भक्तानां स्त्रीनराणां सेवनैर्भोजनार्पणैः ।
अवताराः प्रतुष्यन्ति तत्तदैश्वर्यदायिनः ॥१५॥
तत्तद्धामप्रदातारो भवन्ति भक्तितोषिताः ।
परमात्माऽनादिकृष्णनारायणस्तु भूपते ॥१६॥
सर्वार्पणात्मभक्त्यैव तुष्यत्यत्र श्रियः पतिः ।
विश्वासभक्त्या न्यासेन दास्येन स्थिरसेवया ॥१७॥
आनुकूल्यानुवृत्त्या च वरणेनाऽर्हणेन च ।
कैंकर्येणाऽप्यसंगेन पूजनेन वृषेण च ॥१८॥
ध्यानेन भजनेनापि चाऽऽत्माऽर्पणेन तुष्यति ।
भावना तु महान् हेतुः स्नेहस्तस्य प्रतोषणे ॥१९॥
स्वल्पं वापि महद्वापि पूजनं भावनान्वितम् ।
तोषयत्येव गोविन्दं सर्ववृत्त्यैकनिर्मितम् ॥२०॥
येन केनापि भावेन सततस्मरणेन च ।
तन्मयवित्प्रवाहेण प्रेमरज्जुमयेन च ॥२१॥
सर्वान्तरात्मदृष्ट्या च सर्वतृप्तिक्रियादिभिः ।
तदीयानां स्वागतैश्च साधूनां सेवनादिभिः ॥२२॥
सात्त्वतानां तोषणैश्च दीनानामुपकारतः ।
अनाथानां पोषणैश्चाऽद्रोहैश्च सर्वदेहिनाम् ॥२३॥
सर्वैर्भागवतैर्धर्मैस्तत्त्वज्ञानैः स्ववेदनैः ।
तत्कथाकरणैश्चापि तद्गुणानां च वर्णनैः ॥२४॥
तन्नामरटनैश्चापि तदर्थन्यासयोजनैः ।
तन्मयाकारवृत्त्या च तत्सृष्टिधर्मरक्षणैः ॥२५॥
तत्स्नेहार्पणसर्वस्वैः परब्रह्म प्रतुष्यति ।
जडचेतनवर्गाणां यथापेक्षप्रदानकैः ॥२६॥
दानधर्मैः सत्त्वव्रतैरद्रोहाऽवञ्चनादिभिः ।
सतां धर्मैश्च भक्तानां भक्तानीनां च तोषणैः ॥२७॥
सर्वेषु संस्थितश्चास्ते हरिः श्रीकृष्णवल्लभः ।
सर्वास्त्वस्यैव कृष्णस्य प्रतिमा जडचेतनाः ॥२८॥
नरा नार्यश्चेतरच्च सर्वसृष्टिस्थदेहिनः ।
तत्र सर्वत्र तद्बुद्ध्या सत्त्वरजस्तमस्स्वपि ॥२९॥
तन्मूर्तिं सेवयाम्येव स वै तुष्यतु मत्पतिः ।
अनादिश्रीकृष्णनारायणः श्रीकम्भरासुतः ॥३०॥
गोपालनन्दनः कृष्णस्य वल्लभो प्रेष्ठ ईशिता ।
लक्ष्मीराधारमामाणिक्यारमापद्मजापतिः ॥३१॥
ब्रह्मप्रियापतिर्मुक्तपतिः श्रीपुरुषोत्तमः ।
सतां पतिश्चात्मपतिः सर्वपतिः पतिर्मम ॥३२॥
इतिकृत्वा भजेत्तं चाऽन्तर्यामिणं हि देहिषु ।
तद्दृष्ट्या तद्भावनया तदर्पणक्रियादिभिः ॥३३॥
अफलाकांक्षिणा भाव्यं तत्र सर्वत्र पूजने ।
तुष्यत्येव तथा कृष्णश्चादृतः सर्वदेहिषु ॥३४॥
तवाऽस्मीह परित्राहि रक्षेति प्रार्थयेत् सदा ।
हरेनाथ हरेकृष्ण बालकृष्ण तवास्म्यहम् ॥३५॥
यथा वर्तयसे मां च तथा वर्ते तवाऽऽज्ञया ।
तवैव सर्वमेवेदं नान्यत् त्वामन्तरा त्विह ॥३६॥
मम दृष्टिपथे सर्वं तवैव च त्वमेव च ।
इत्येवं भगवद्दृष्ट्या भावितस्य तु देहिनः ॥३७॥
कामात् क्रोधाच्च मोहाच्च स्वार्थाद् भक्त्याऽऽश्रयादपि ।
वर्तमानस्य शरणे पतितस्य तदात्मनः ॥३८॥
तूर्णं तुष्यति भगवान् दयालुर्भक्तवत्सलः ।
नाऽत्राऽन्यत् साधनं वापि द्रव्यं वा हवनादिकम् ॥३९॥
अपेक्षते तोषणार्थे यस्तस्य तस्य तुष्यति ।
अयं मे नाऽपरस्येति हरेः कृपा हि तत्प्रसूः ॥४०॥
कृपया लभ्यते कृष्णः कृपया नीयतेऽक्षरम् ।
कृपया स्वपदं चापि समर्पयति सत्पतिः ॥४१॥
हीनभावनया नैव भवन्ति वै सुरादयः ।
सन्तुष्टाः सर्वधर्मेभ्यो बहिष्कृतेन कर्मणा ॥४२॥
भक्तैः सह सुराद्या वै स्वामिनः सेवकैस्तथा ।
दासैर्नियामकाश्चापि तुष्टा रमन्त ईश्वराः ॥४३॥
अज्ञानावृतसत्त्वानां मात्सर्यादिमषीजुषाम् ।
लोभादिदोषकृष्टानां स्वर्गो मोक्षो न तोषणम् ॥४४॥
प्राज्ञो भक्तोऽक्षरं याति रमते सुखिभिः सह ।
बलं निजेष्टदेवस्य प्राप्य शान्तिं समश्नुते ॥४५॥
दैवतं देहिनां कर्म कृष्णार्थं यत् कृतं हि तत् ।
देवत्वं कृष्णभजनं शुद्धिः स्वाध्याय इत्यपि ॥४६॥
व्रतं शीलं जयश्चापीन्द्रियाणां साधुना मता ।
कलहो निन्दनं चापि कापट्यं धूर्ततादिकाः ॥४७॥
असाधुत्वं वेदितव्यं मृत्युस्तैः सह वर्तते ।
परीक्ष्य मृत्युर्यत्रास्ते विहाय तानि बुद्धिमान् ॥४८॥
मृत्युं विवासयेद् दूरे हरेराश्रयणादिह ।
मृत्युभीतिरहितश्च चरेदाक्षरसाधनम् ॥४९॥

परब्रह्मालयलब्धिर्यथा स्यात्तच्चरेन्नृप ।
इत्येवं वर्तमानस्य यस्मान्नैव निवर्तते ॥५०॥
तदक्षरस्य लोकस्य प्राप्तिर्भवेद्धि शाश्वती ।
भक्त्या संप्राप्यते धाम वासो निरवधिर्यतः ॥५१॥

अश्वपाटल उवाच--

आत्मानात्मविवेकेन मुक्तिर्वै कीदृशी भवेत् ।
हरेरुपास्त्या मुक्तिश्च कीदृशी संभवेद् गुरो ॥५२॥
योगाभ्यासेन वा मुक्तिः कीदृशी स्याद् वदात्र मे ।
धर्ममात्राश्रयेणाऽपि मुक्तिर्वै कीदृशी मता ॥५३॥
गुरोराश्रयमात्रेण भवेद्वा न भवेच्च सा ।
निःसंशयो मोक्षलाभः केनेति वद मे गुरो ॥५४॥

श्रीलोमश उवाच—

देहो वै पञ्चभूतैश्चेन्द्रियैरान्तरिकैरपि ।
करणैः प्राणैस्त्रिगुणैस्तन्मात्रैः संहतो मतः ॥५५॥
आत्मा तेभ्यः पृथङ् नित्यश्चेतनश्चाऽविबन्धनः ।
नित्यमुक्तो नित्यशुद्धो नित्यबुद्धो वसन् सदा ॥५६॥
जडचेतनविज्ञानादज्ञानक्षयकारणात् ।
तत्त्वाभ्यासान्नास्मि न मे नाऽहं चेति प्रकाशनात् ॥५७॥
कर्मक्षयेन देहाद्वै मुक्तो मुक्तो हि निर्गुणः ।
सच्चिदानन्दरूपो वै जन्यप्रकाशवर्जितः ॥५८॥
स्वरूपकल्पस्थितिको मुक्त्यात्मा चाभिपद्यते ।
न वै सुखी न चाकारः सदा जाड्याश्रयो भवेत् ॥५९॥
जाड्यस्य हारिणं कृष्णं परमेशं भजेद् यदि ।
ब्रह्मधाम्नि परमेशस्वरूपोऽभिनिष्पद्यते ॥६०॥
यथा हरिस्तथा भक्तः सालोक्यं सार्ष्टिमन्तिकम् ।
सारूप्यं समवाप्नोति सर्वामोदान् समश्नुते ॥६१॥
ब्रह्महृदे कृतस्नानो ब्राह्मीं तनुं ह्यवाप्य च ।
ब्राह्ममुक्तो दिव्यगुणः सम्पद्यते हरीच्छया ॥६२॥
न तत्राऽयं हि संघातो देहः प्राकृतकारणः ।
आत्मैव तत्त्वमेकं च समूर्तं स्वप्रभावतः ॥६३॥
उपासितहरेर्योगात् समर्थो मूर्तिरूपकः ।
मुक्तो भवति मुक्तौ वै माया तत्र न वर्तते ॥६४॥
सर्वकामरसस्वादः सर्वगन्धसुखाश्रयः ।
सर्वैश्वर्ययुतो नित्यानन्दामोदस्य शेवधिः ॥६५॥
अव्ययानन्दमग्नश्च ब्रह्मणा सह मोदते ।
सर्वान् कामानात्मसंस्थान् भुंक्ते ब्रह्मस्वरूपवान् ॥६६॥
परब्रह्मात्तयोगश्च सर्वानन्दभृतो भवेत् ।
न न्यूनं श्रीहरेश्चास्ति भक्तमुक्तस्य तत्र ह ॥६७॥
एवं चोपास्तियोगेन मुक्तिः श्रेष्ठा भवेत्परा ।
योगिनो योगयत्नस्था यदि कृष्णमुपासते ॥६८॥
तदा चोक्तां परां मुक्तिं विन्दति नात्र संशयः ।
यदि चान्यानीश्वरादीन् वैराजादीनुपासते ॥६९॥
तदेश्वरकृतान् लोकानाप्नुवन्तीश्वरा यथा ।
प्राकृतैश्वर्यमुक्तिः सा महालये क्षयावहा ॥७०॥
सिद्धीः प्राप्य स्थितिं लब्ध्वा चान्ते निजाऽवशेषवत् ।
लयं वाऽन्येश्वरभावं देवत्वं वाऽभियन्ति च ॥७१॥
सहस्रधाभवनादिसमैश्वर्याणि भुंजते ।
सा निकृष्टा पातदा च मुक्तिर्निम्नस्थलात्परा ॥७२॥
ध्यानयोगाच्च वा मूर्तौ हरेर्लीनत्वरूपिणी ।
ऐकात्म्यमुक्तिरेतेषामभिन्नादिसमाधिभिः ॥७३॥
स्वामिसेवकभावादिवर्जिता सा प्रजायते ।
परमेशे सदा तिरोभावरूपा न वै पृथक् ॥७४॥
राजन् ध्यानवशात्ते च तल्लीनास्तन्मयाः खलु ।
परमेशे परमेशाः सम्पद्यन्तेऽभवाः पुनः ॥७५॥
एषा श्रेष्ठतरा मुक्तिर्या स्थितिः पारमेश्वरी ।
दासरूपेण सेवाऽत्र शिष्यते न कथंचन ॥७६॥
धर्ममात्रेण या मुक्तिः सा तु भोगाऽवियोगिनी ।
स्वर्गसत्यादिलोकेषु सदेहो वास एव ह ॥७७॥
धर्मं भुक्त्वा पुनः पृथ्व्यां जन्मना च वृषार्जनम् ।
पुनः स्वर्गं पुनः पृथ्वी पुनरेव प्रचक्रकम् ॥७८॥
एवं जातेऽपि धर्मः स यदि भागवतात्मकः ।
ब्रह्मसम्बन्धरूपो वा नैर्गुण्यनामधेयकः ॥७९॥
सेवात्मको हरेः स्याच्चेदध्वरे दक्षिणात्मकः ।
दानात्मको हरेस्तुष्ट्यै तदा मुक्तिर्हि शाश्वती ॥८०॥
धर्मो वै स्वार्थमात्रेण कृतो नैव हि मुक्तये ।
परार्थबुद्ध्याऽनुष्ठितः कल्याणाय स जायते ॥८१॥
परमेशाऽर्पणबुद्ध्या कृतश्चेन्मोक्षदोऽक्षरे ।
एवं राजन् क्रियाः सर्वाः शुभा वाऽप्यशुभास्तथा ॥८२॥
असंगभावजाः कृष्णार्पणभावेन निर्वृताः ।
कृष्णस्मरणसम्पाद्याः सर्वा मोक्षप्रदा हि ताः ॥८३॥
अपि क्षेत्राधिपः क्षेत्रं संस्कृत्योत्खात्य कर्षति ।
वपते सस्यकणिशान् लुनात्यपि च खादति ॥८४॥
सर्वं ब्रह्मार्पणं कृत्वा करोति कुरुराजवत् ।
यद्वा जनकवच्चापि कूर्मिब्रह्मर्षिवच्च वा ॥८५॥

तत्सर्वं जायते निर्दोषकं कल्मषवर्जितम् ।
स्वर्णकारः सत्यवृत्त्या सम्पादयति भूषणम् ॥८६॥
कृष्णार्पणं कृतं चेत्तत् शैल्प्यं मोक्षप्रदं भवेत् ।
हर्यर्थं यत्कृतं सर्वं निर्गुणं मोक्षदं मतम् ॥८७॥
हरिं विना कृतं सर्वं निष्फलं दुःखदं च वा ।
अभ्यस्यन्ति द्विजा वेदान् हर्यनुस्मृतिवर्जितान् ॥८८॥
चेत्तदाऽभ्यसनं शुनो भक्षणं चैव जायते ।
विना मणेर्हि माहात्म्यं गोपालो महिषीगले ॥८९॥
बध्नाति कंकरं मत्वा मूल्यं तस्य फलं न च ।
अपि शालग्रामशिलां मत्वा विष्णुं सनातनम् ॥९०॥
रक्षन्ति वैष्णवाः सन्तः सेवयन्ति दिवानिशम् ।
तेषां विष्णुर्हि तद्रूपः सेवां मत्वा विभावितान् ॥९१॥
चतुर्भुजः प्राविर्भूय दृश्यते चाक्षिगोचरः ।
स एव भावभिन्नश्चेत् तिरोभवति द्राक् ततः ॥९२॥
स एवाऽऽराधनास्नेहपाशितश्चेत् परेश्वरः ।
परब्रह्माऽवतार्येव कृष्णनारायणः प्रभुः ॥९३॥
अवतारावतार्येवाऽनाद्यनन्तस्तथाऽऽन्तरः ।
प्रकाशते हृदि चाग्रे ततो नयति चाक्षरम् ॥९४॥
तस्माद् राजन् क्रियायोगाः कृता देहेन्द्रियादिभिः ।
स्वार्थार्थं बन्धका ह्येते हर्यर्थं मोक्षदा हि ते ॥९५॥
सन्तः कृष्णप्रसंगेन दिव्याः कृष्णहृदात्मकाः ।
कृष्णैश्वर्यभृता मोक्षप्रदा भवन्ति सौख्यदाः ॥९६॥
दिव्यलोकप्रदा दिव्यानन्ददाश्चाक्षरप्रदाः ।
भगवत्प्रतिमायोगप्रदाश्च ज्ञानदायिनः ॥९७॥
विघ्नघ्नाः प्राकृतावर्तनाशका भ्रमवारकाः ।
दुःखदोषनिवाराश्च ब्रह्मलोकस्य दायकाः ॥९८॥
तेषां सेवा प्रकर्तव्याः सर्वाः संशयवर्जिताः ।
यथा ते भगवन्मूर्तिविशेषा इतिमत्य वै ॥९९॥
यथा पत्न्यां च पुत्रे च पित्रोश्च बान्धवे निजे ।
प्रीतिश्चास्ते स्वार्थपराऽहंममत्वप्रयोजिता ॥१००॥
तथा प्रीतिः सदा कार्या सद्गुरौ मोक्षदा हि सा ।
धर्मो वा धर्मयज्ञो वा पुण्यं दानं शुभा क्रिया ॥१०१॥
अनादिश्रीकृष्णनारायणे सर्वं समर्पयेत् ।
तदा मुक्तिर्महामुक्तिर्ब्रह्मसायुज्यरूपिणी ॥१०२॥
ब्रह्मसार्ष्टिस्वरूपा च ब्रह्मलोकप्रदायिनी ।
परब्रह्मसममूर्तिकारिणी चोत्तमात्तमा ॥१०३॥
प्राप्यते मानवेनैव देहेन प्रभविष्णुना ।
प्रभुणा सह संयोगः प्राप्तव्यं नावशिष्यते ॥१०४॥
गोप्यः प्राप्ताः परं योगं तथा ब्रह्मप्रियाः खलु ।
मुक्ताः प्राप्ताः परं योगं नाऽन्ययोगस्य वाञ्छया ॥१०५॥
इत्येवं त्वं भूपतेऽत्र प्रत्यक्षं योगमावह ।
वपुः कृत्वा परं दिव्यं शाश्वतं योगमावह ॥१०६॥
राधिके ! लोमशस्त्वेवं राज्ञे प्रदाय चान्तरम् ।
विरामोपदेशं च मुमुदे नृपतिर्बहु ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां नृपकृतो देवादीनां तोषणहेतुप्रश्नः, विवेकोपासनायोगधर्मगुरुभिः कीदृशी मुक्तिरितिप्रश्नः, लोमशोक्तोत्तराणि चेत्यादिनिरूपणनामा चतुःपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५४ ॥

**श्रीकृष्ण उवाच—**

राधिके च ततश्चाश्वपट्टलो लोमशं मुनिम् ।
योगस्य च बलं चाप्यबलं पप्रच्छ कीदृशम् ॥ १ ॥

**अश्वपाटल उवाच—**

ऋषे योगबलं कीदृग् वेत्तुमिच्छामि चाबलम् ।
येन मुक्तो भवेद्वापि चावष्टभ्येत निर्बलः ॥ २ ॥

**श्रीलोमश उवाच—**

शौचं तपो दया सत्यमहिंसा स्तेयवर्जनम् ।
प्राणरोधो वृत्तिरोधो ध्यानं समा हि योगिनाम् ॥ ३ ॥
अभ्यासो बलवान् यस्य तस्य योगः प्रसिद्ध्यति ।
निर्बलस्याऽभ्यसनं च निर्बलं तेन बन्धनम् ॥ ४ ॥
कामं लोभं च मोहं च स्नेहं क्रोधं च रागिताम् ।
योगाच्छित्वाऽप्यबलस्तु पुनस्तेष्वपि सज्जते ॥ ५ ॥
यथा मत्स्याः स्थूलदेहा छित्वा जालं पुनर्जलम् ।
विशन्ति निर्बलास्तद्वत् षट्कं विशन्ति वै पुनः ॥ ६ ॥
यथा च बलवन्तो वै मृगाः पाशान् विभिद्य च ।
परं वनान्तरं यान्ति तद्वद् योगिवराः परम् ॥ ७ ॥
मायापारं प्रयान्त्येव बलिष्ठात्मपरायणाः ।
यथा च बलहीना वै शशाद्या बन्धनानि वै ॥ ८ ॥
आसाद्य नहि निर्गन्तुं समर्था योगिनस्तथा ।
निर्बला न समर्था वै निर्गन्तुं जालतो बहिः ॥ ९ ॥
झषाश्च निर्बला जालं छित्वा प्रयान्ति नैव ह ।
निर्बला योगिनस्तद्वन्मायां छित्वा प्रयान्ति न ॥१०॥

शकुना बलिनो जालं छित्वा यान्ति दिगन्तरम् ।
योगिनो बलिनो मायां छित्वाऽम्बरं प्रयान्ति हि ॥११॥
बलवाँश्च यथा वह्निः सर्वं दहति चागतम् ।
बलिष्ठा योगिनो मायां दहन्त्येव स्वतेजसा ॥१२॥
निर्बलस्तु यथा वह्निः शाम्यत्येवापि दारुभिः ।
योग्यपि निर्बलः षट्के पराभवं प्रयाति वै ॥१३॥
नदीस्रोतो बलहीनं त्वाकृष्य नयते जले ।
षट्कं तद्वन्निर्बलं चाकृष्य नयति मायिके ॥१४॥
वारणः सबलः स्रोतो विष्टभ्नाति च गच्छति ।
बलिष्ठश्च तथा योगी षट्कं निवार्य गच्छति ॥१५॥
सबलास्तु प्रमुच्यन्ते निर्बला यान्ति बन्धनम् ।
प्रलयोत्थमहादित्यो यथा शोषयते जगत् ॥१६॥
मोक्षबलोत्थितयोगी दोषान् शोषयते तथा ।
योगिनो योगबलतो विशन्तीश्वरमन्दिरम् ॥१७॥
देवानामालयान् प्रजापतिस्थानानि वापि च ।
सर्वदाऽभ्यासशीलस्य बलं योगस्य वर्धते ॥१८॥
ततः पुनर्विभिद्यैव मायां प्रयान्ति चाक्षरम् ।
कृताभ्यासो यथा धन्वी कुशलो लक्ष्यवेधकः ॥१९॥
विध्वा लक्ष्यं जयं याति तथाऽक्षरं प्रयाति सः ।
मस्तके स्नेहपात्रं च कृताभ्यासो निधाय च ॥२०॥
यथा रज्ज्वा नटो यात्यस्खलितो जयमेति च ।
तथाऽभ्यासबलर्द्धिश्चाक्षरं योगी प्रयाति हि ॥२१॥
यथाऽभ्यासी कर्णधारो नावा पारं प्रयाति च ।
तथा युक्तो बलेनापि जगत्पारं प्रगच्छति ॥२२॥
सारथिश्च बली चाश्वान्नियम्य याति निश्चितम् ।
तथा युक्तो योगिवर्यो यात्यक्षरं ध्रुवं पदम् ॥२३॥
निजात्मनि परेशं यः पश्यत्येव च योगवित् ।
मायाजालं स वै छित्वा प्रयात्येव परं पदम् ॥२४॥
चक्रेषु देहसंस्थेषु संविद्धत्य मलानि तु ।
दग्ध्वा दग्ध्वा ब्रह्ममार्गं याति वियाति वै बलात् ॥२५॥
यथेष्टं च यदा कल्पयत्येव गन्तुमक्षरम् ।
तदा वर्ष्म विहायैव स्वतन्त्रो याति धाम तत् ॥२६॥
बलिष्ठस्येष्टदेवस्योपास्त्या बलमवाप्नुयात् ।
अभ्यासेनात्मयोगेन संयमेन वृषेण च ॥२७॥
तपसा ध्यानयोगेन समाधिना बलं व्रजेत् ।
किन्तु राजन् महारण्ये पारं केचित्प्रयान्ति वै ॥२८॥
बलिष्ठानां विजेतारोऽरण्ये वसन्ति वै यतः ।
नारायणं विना पारं गन्तुं सन्देहवत्पदम् ॥२९॥

ह्रियन्तेऽपि बलिष्ठा वै प्रबलिष्ठतमाऽरिभिः ।
दिव्यैश्वर्यचमत्कारसिद्धिधामनिवासिभिः ॥३०॥
अनादिश्रीकृष्णनारायणश्चाग्रे यदा भवेत् ।
प्रगच्छन् स नयत्येव जित्वा बलिष्ठसत्तमान् ॥३१॥
निजं परं पदं दिव्यं शाश्वतं मोक्षमुत्तमम् ।
राजन् देहे गुणान् मत्वा मा भूर्बद्धः कदाचन ॥३२॥
विवेकेन प्रमातव्यं कल्माषाणां गृहं वपुः ।
अत्र सत्त्वं दशभावं मे निबोध वदामि तान् ॥३३॥
आनन्दः प्रीतिरुद्दर्पः प्रकाशः पुण्यकारिता ।
सन्तोषमार्जवं श्रद्धा त्याग ऐश्वर्यमित्यपि ॥३४॥
तथा रजो नवभावं मे निबोध वदामि तान् ।
आरितकत्वमकार्पण्यं द्वन्द्वोपसेवनं तथा ॥३५॥
कामो द्वेषो मदो दर्पो वादः परुषता तथा ।
तथा छाया तमोऽभावं मे निबोध वदामि ते ॥३६॥
तामसत्वं मोहनं च धूम्रभावो मतिक्षयः ।
निद्रा प्रमाद आलस्यं नाशश्चेति तथाविधाः ॥३७॥
बुद्धितत्त्वं सप्तभावं मे निबोध वदामि ते ।
अहन्ता ममता मानं दैर्घ्यं चाशा स्वपूज्यता ॥३८॥
ईशतेति मनश्चापि षड्भावं तान् वदामि ते ।
चाञ्चल्यं वेगवत्त्वं च संशयश्च स्वतन्त्रता ॥३९॥
स्निग्धत्वं चाप्यविश्वास्यं मानसे ते मताः सदा ।
इन्द्रियं पञ्चभावं च मे निबोध वदामि ते ॥४०॥
अतृप्तिः रंजनं चौदासीन्यं चालोचनं गतिः ।
चतुर्भावं भूततत्त्वं मे निबोध वदामि तान् ॥४१॥
आश्रयो बन्धनं नाशः प्रसवश्चेति सर्वदा ।
त्रिभावं कोशतत्त्वं च षट्कोशास्ते तनुस्थिताः ॥४२॥
रोमलोहितमांसानि मज्जास्थिस्नायवश्च ते ।
भावास्तु क्लेद्यता मालिन्यं तथा परिभोग्यता ॥४३॥
प्राणो वै द्विस्वभावश्च भावौ द्वौ तौ निबोध मे ।
जीवनं भ्रामणं चेति तत्त्वानि कथितानि ते ॥४४॥
राजन् तत्त्वविवेकेन भावास्ते दोषरूपिणः ।
आत्मनो मोक्षमार्गे वै विघ्नास्ते यदि ते तथा ॥४५॥
तान् विविच्यैकभावं वै सुखभावं निजात्मकम् ।
परमेशेऽर्पयेद् भक्त्या मोक्षस्तस्य स्थितो ध्रुवः ॥४६॥
यद्वा भावान् लोकयित्वा दिदृक्षान्तं विधापयेत् ।
मानुषान् विषयान् सर्वान् पैशाचान् विषयाँस्तथा ॥४७॥
यक्षाणां विषयाँश्चाप्यौरगाणां विषयाँस्तथा ।
गान्धर्वविषयाँश्चापि पितॄणां विषयाँस्तथा ॥४८॥

तिरश्चां विषयाँश्चापि मरुतां विषयाँस्तथा ।
पतत्रिविषयाँश्चापि राजर्षिविषयाँस्तथा ॥४९॥
ब्रह्मर्षिविषयाँश्चाप्यासुराणां विषयाँस्तथा ।
विषयान् विश्वदेवानां योगिनां विषयाँस्तथा ॥५०॥
प्राजापत्यानैश्वराँश्च ब्राह्मानीश्वरकोटिजान् ।
विषयान् सम्परिज्ञाय सुखःदुखेऽनुभूय च ॥५१॥
गुणदोषान् विलोक्यैव शान्तिं प्राप्य ततः परम् ।
आत्मना च विवेकेनात्मानं मोक्षे निवेशयेत् ॥५२॥
ज्ञानविज्ञानसम्पन्नश्चोपायैर्भाविलः स्वयम् ।
प्राप्नोति मोक्षणं दिव्यं नित्यानन्दाक्षरं पदम् ॥५३॥
राजन् संकोचयेत् प्राणं सषट्कोशं च भूतके ।
भूतानि मात्रयुक्तानि चेन्द्रियाणि च वै मनः ॥५४॥
अहन्तादियुतं बुद्धौ विलोपयेद् विवेकवान् ।
बुद्धिं समर्पयेन्निजे स्वरूपे त्वात्मसंज्ञके ॥५५॥
आत्मानं ब्रह्मरूपं च कृष्णनारायणे हृदि ।
तं मोक्षे योजयेत्तेन गच्छेदक्षरधाम यत् ॥५६॥
ज्ञात्वा कालस्य कवलान् देवान् प्रजापतीन् ऋषीन् ।
सप्तर्षीश्चापि राजर्षीन् सुरर्षीश्चावितान् सदा ॥५७॥
ब्रह्मर्षीश्चेश्वरर्षीश्च ज्ञात्वा कालकृतान्तकान् ।
न तत्र वै चरेद् ध्यानं मोक्षमार्गगतिं चरन् ॥५८॥
पापिनां च गतिं ज्ञात्वा याम्यलोकेऽभिसंवृताम् ।
विचित्रयोनिजन्मानि प्रेतभावान् विलोक्य च ॥५९॥
गर्भदुःखानि वै ज्ञात्वा जन्तूनां कुत्सितानि च ।
उपप्लवान् प्रघोराँश्च तारानक्षत्रपातनम् ॥६०॥
युगलानामकस्माच्च वियोगं कृपणं तथा ।
भूतानां भक्षणं चाप्यन्योन्यं विलोक्य निर्घृणम् ॥६१॥
विषयाणां च दौरात्म्यं गतासूनां न जीवनम् ।
पापिनां दुःखदाश्चापि गतीर्विज्ञाय दारुणाम् ॥६२॥
तिरश्चां दुःखमालक्ष्याऽऽयुषां क्षयं दिने दिने ।
देहिनां संक्षयं वीक्ष्य मृत्युदुःखं विलोक्य च ॥६३॥
देहदोषान् प्रविज्ञाय नरकागारतां तथा ।
न्यस्य देहं ब्रह्मरन्ध्राद् गन्तव्यं परमं पदम् ॥६४॥
आश्रयेत् प्राणदेवं च वायुदेवं ततः परम् ।
व्योमदेवं ततश्चापि सूर्यरश्मिं ततः परम् ॥६५॥
चान्द्ररश्मिं ततश्चापि पुण्यरश्मिं ततः परम् ।
सत्यरश्मिं ततश्चापि सत्त्वरश्मिं ततः परम् ॥६६॥
शरश्मिं ततश्चापि ब्रह्मरश्मिं ततः परम् ।
रश्मिं ततश्चापि परंब्रह्म समर्जयेत् ॥६७॥
परमात्मानमासाद्य तद्भूतायतनाऽमलः ।
अमृतं परमं प्राप्तो यत्पुनर्न निवर्तते ॥६८॥
परमा सा गतिः राजन् सतां च योगिनामपि ।
सात्वतानां च भक्तानां हर्यर्थकृतकर्मणाम् ॥६९॥
तत्र ज्ञानं हि सार्वज्ञ्यं चैश्वर्यव्रातसंभृतम् ।
तृप्तिः सर्वातिरेका चानन्दमात्रापि निर्भरा ॥७०॥
असंगस्य हि सार्वज्ञ्यं निर्द्वन्द्वाय सदा मतम् ।
अतः सार्वज्ञ्यभावेन युक्तास्ते नित्यतोषिणः ॥७१॥
नित्यानन्दा नित्यशान्ता नित्यतृप्ता निराशयाः ।
सर्वदर्शिन एवापि संसाराऽदर्शिनो हि ते ॥७२॥
संसारदर्शिनश्चापि तत्तद्भावविवर्जिताः ।
भावविकृतिशून्याश्च प्रत्याहारादिसिद्धिकाः ॥७३॥
ग्राह्याऽग्राह्यसमर्थास्ते सृष्टिदोषविवर्जिताः ।
निम्नसृष्टिकृतान् भावान् ज्ञाने सिन्वन्ति नैव ते ॥७४॥

**अश्वपाटल उवाच—**

किं तद्धामाऽक्षरं विद्वन् यस्मान्नावर्तते पुनः ।
किं च क्षरं ततो भिन्नं यस्मादावर्तते पुनः ॥७५॥

**श्रीलोमश उवाच—**

अक्षरं धाम सुभगं राजन् परेश्वरस्य यत् ।
अनादिश्रीकृष्णनारायणस्याऽत्यवतारिणः ॥७६॥
परब्रह्मण एवैतन्नारायणेश्वरस्य तत् ।
पुरुषोत्तमसंज्ञस्याऽक्षरातीतस्य शाश्वतम् ॥७७॥
शिवं क्षेमं चाभिलाषोपनीतं सर्वसिद्धिभृत् ।
सर्वेश्वरेश्वरस्थानं मुक्तावासं परात्परम् ॥७८॥
यन्न क्षरति पूर्वेण यावत्कालेन वै क्वचित् ।
आयत्या च न वै ग्रस्तं चाव्ययं ब्रह्मधाम तत् ॥७९॥
गोलोकाच्चापि वैकुण्ठादूर्ध्वं चानन्तमच्युतम् ।
यत्र धामान्यनन्तानि चावतारकृतानि वै ॥८०॥
नारायणानां विद्यन्ते नारायणीकृतानि हि ।
अवतारा निवसन्ति कोटिशो यत्र धामसु ॥८१॥
तानि यत्र प्रभासन्तेऽक्षरं तद्धाम सर्वगम् ।
ब्रह्मलोकश्चिदाकाशोऽखण्डतेजोभुवां निधिः ॥८२॥
यत्राऽक्षरं ब्रह्म चापि मूर्तिमद् राजते प्रभु ।
अक्षरं तत्परं धाम तस्मात्परं हरेः प्रियम् ॥८३॥
परंधामाऽस्ति वै यत्र परब्रह्मासनं सदा ।
वर्तते सर्वतः श्रेष्ठं गजासनशुभासनम् ॥८४॥

ब्रह्मप्रियाः समस्ता वै वर्तन्ते तत्र सेविकाः ।
अनादिश्रीकृष्णनारायणस्य मुक्तिदासिकाः ॥८५॥
मुक्तान्यो वै हरेर्मूर्तेः शक्तयोऽनन्तसिद्धयः ।
सिद्धाश्चानन्तसंख्याश्च साध्या देवा वसन्ति ते ॥८६॥
अनादयश्च ते मुक्ता वसन्ति धाम्नि तत्परे ।
आदिमुक्तास्त्वक्षरे वै वसन्ति धाम्नि सर्वदा ॥८७॥
एतदक्षरसंज्ञं तद्धाम मायापरं यतः ।
गुणातीतं महानन्दं नित्यानन्दादिसंभृतम् ॥८८॥
यद्रोमलेशसौख्येन धामान्यन्यानि यानि च ।
आनन्दामृतसौख्यैर्वै संभृतानि भवन्ति हि ॥८९॥
अन्याश्चेश्वरलोकाख्या भुवस्तत्सौख्यसंभृताः ।
सृष्टयः सर्वविधिकास्तदानन्देन नन्दिताः ॥९०॥
मायात्मिकाः सृष्टयश्च क्षरं क्षरन्त एव वै ।
त्रिगुणाश्च तमो माया चाऽव्यक्तं पुरुषाऽऽहितम् ॥९१॥
व्यक्तरूपं भवत्येव महत्तत्त्वमहं तथा ।
विद्याविद्ये पुण्यपापे विध्यविधी तथाऽपरौ ॥९२॥
धर्मो ज्ञानं विरागं चैश्वर्यं व्यक्ते प्रतिष्ठितम् ।
तद्विरुद्धं तथा चापि व्यक्ते सर्वं प्रतिष्ठितम् ॥९३॥
शब्दः स्पर्शः रसो रूपं गन्धो वै भूतसूक्ष्मकम् ।
मनश्चालोचनार्थं च श्रोत्रत्वङ्नेत्रजिह्विकाः ॥९४॥
घ्राणं चेति ततोऽन्ये च वाक्पाणिपादपायवः ।
उपस्थं चेति कर्मार्थे व्योमानिलानलास्तथा ॥९५॥
वारिक्ष्ये च ततश्चान्ये षाट्कौशिकतनुभृतः ।
एतत्सर्वं क्षरतेऽहर्निशं तत् क्षरमुच्यते ॥९६॥
सर्वेषां देहभावे वै चतुर्विंशतिभूमयः ।
न्यूना वा सन्ति क्षरिकाः क्षरं तस्मादुदीरितम् ॥९७॥
यत्तु मूर्तिमयं किञ्चित् सर्वं क्षरणधर्मकम् ।
जले भुवि तथाकाशे वायौ तेजसि तत्परे ॥९८॥
पुण्यस्तरे सिद्धिपरे सत्त्वपटलकेऽपि वा ।
क्षराधारं कृत्स्नमेतत् क्षरते व्यक्तसंज्ञितम् ॥९९॥
क्षरेऽक्षरं सदा चास्ते ह्यात्मा चाक्षर इत्यपि ।
अक्षरे चात्मनि स्थानं यस्य सः परमेश्वरः ॥१००॥
स एव हृदि सर्वासु मूर्तिष्वातिष्ठते हरिः ।
भजतं श्रीकृष्णनारायणं राजन् रमान्वितम् ॥१०१॥
शुक्लरक्तकृष्णसृष्टिस्वामिनं पद्मजेश्वरम् ।
पारगं चान्तरस्थं च कांभरेयं प्रियं प्रभुम् ॥१०२॥
श्रीकृष्णवल्लभं नाथं कुंकुमवापिकेश्वरम् ।
गोपालबालकं राजन् लोमशेष्टं पतीश्वरम् ॥१०३॥
अश्वपट्टसरःक्षेत्रादित्यं ब्रह्मप्रियापतिम् ।
बालकृष्णं चाक्षरेशं सर्वान्तर्यामिणं प्रभुम् ॥१०४॥
सृष्ट्यादौ तु भुवं चेमां भजमानं सुराष्ट्रिकाम् ।
महाविष्णुसुतं श्रीमन्महालक्ष्म्यंकबालकम् ॥१०५॥
ततोऽनेकस्वरूपं च बह्ववतारधारिणम् ।
ततो धर्मसुतं भक्तिसुतं कृष्णं हरिं च तम् ॥१०६॥
नरं नारायणं चापि ब्रह्मशीलपरायणम् ।
स्वामिनं त्यागिनं चापि सर्वज्ञं देशिकं तथा ॥१०७॥
आचार्यं सद्गुरुं धिष्ण्याधिपं सन्मण्डलेश्वरम् ।
ब्रह्मव्रतं सहाजीवं सर्वालोचकमच्युतम् ॥१०८॥
भज राजन् परां मुक्तिं व्रज तन्मत्कृपाकणात् ।
इत्येवं राधिके चाश्वपाटलं नृपतिमृषिः ॥१०९॥
उपादिश्य विरराम स्मरन् श्रीकृष्णवल्लभम् ।
राजाऽप्यानन्दसन्दोहात् संभृतान्तरहर्षितः ॥११०॥
अधिकस्वादमासाद्य परब्रह्मकथामृतं ।
सतृष इव पिपासुः पुनः पप्रच्छ लोमशम् ॥१११॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां नृपकृतो योगस्य बलाऽबलप्रश्नः क्षराऽक्षरलोकप्रश्नः, लोमशकृतोत्तराणि चेत्यादिनिरूपणनामा पञ्चपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५५ ॥

**श्रीकृष्ण उवाच—**

राधिके च ततो राजा पप्रच्छ लोमशं तु यत् ।
कथयामि समासेन हृदयेन निबोध मे ॥ १ ॥

**अश्वपाटल उवाच—**

क्षरश्चायं हि संसारस्तत्राऽक्षरो हि चेतनः ।
कथं न मुञ्चति त्वेतत् क्षरं यात्यक्षरं न सः ॥ २ ॥

**लोमश उवाच—**

गर्भे कर्मवशात् सुप्तः पच्यते पक्वमन्नवत् ।
भूतसंस्कारतादात्म्यम् आपन्न इव भर्जितः ॥ ३ ॥
क्षरधर्मान् समासाद्याऽज्ञानदशाऽभिभावितः ।
क्षरात्मा स्व इति भ्रान्तिं प्राप्तः प्रसूयते ततः ॥ ४ ॥
अहं बालो नरो नारी बाह्यशब्दैर्विबृंहितः ।
शुक्लोहितकृष्णार्थभानभ्रान्तिप्रमीलितः ॥ ५ ॥
संकीर्णकल्पनां प्राप्तः सार्थसंगैर्जडीकृतः ।
कृशः स्थूलो दुःखी सुखी ममाऽहंत्वंप्रबोधितः ॥ ६ ॥

कर्मपाशायुष्यरज्जुबन्धितश्चाऽवशीकृतः ।
प्राणकोष्ठलिकाग्रन्थिग्रथितश्चाऽविनाशितः ॥ ७ ॥
मायातापपरिषेकशोकितश्च दृढीकृतः ।
षाट्कौशिकरसैर्लिप्तस्तत्रैव च कृतासनः ॥ ८ ॥
महालेपैर्लेपितश्च नेष्टे निर्गन्तुमप्रभुः ।
तत्रैव तामसं वापि राजसं सात्त्विकं च वा ॥ ९ ॥
प्रवाहं च रसं पक्वं स्वादं चाभ्यस्तमेत्ययम् ।
पुष्टिमेति ततस्तैस्तैरिन्द्रियाहृतसद्रसैः ॥१०॥
सुखानन्दैश्च पुष्णाति धावत्येव तदर्थकः ।
तदर्थं यतते चापि ज्ञातुं प्राप्तुं पुनः पुनः ॥११॥
भोक्तुं त्यक्तुं नवीकर्तुं सञ्चयितुं नवं पुनः ।
तद्वेगवासनाक्षिप्तो मूढः क्षरे क्षरात्मकः ॥१२॥
अभिन्नश्चाऽपृथग्भूत्वा वर्तते केशकर्षितः ।
देहधर्मपरो भूत्वा देहानन्देन नन्दितः ॥१३॥
पुनः पुण्यं करोत्येव दिव्यदेहादिलब्धये ।
एवं चक्रेण वै गच्छन् देहात् कर्म ततो वपुः ॥१४॥
पुनः कर्म पुनर्देहश्चेत्येवं क्षरगर्तके ।
मुहुः पतति चाऽज्ञात्मा मुहुर्मोदं च वाञ्छति ॥१५॥
नाऽस्यैवं वर्तमानस्य क्षरान्मुक्तिः क्वचिद् भवेत् ।
प्रत्युत वर्धते मोहो बन्धनं संसृतिस्तथा ॥१६॥
मोहान्मोहं चानुव्रज्य दृष्ट्वा दृष्ट्वा नवं नवम् ।
प्राप्तुं भोक्तुं च यतते कर्म बध्नाति तन्मयम् ॥१७॥
देहाद् देहसहस्राणि कर्मभिश्चाभिपद्यते ।
तिर्यक्षु देववर्गेषु मानुषेषु च पक्षिषु ॥१८॥
दैत्यदानवरक्षस्सु जायते च पुनः पुनः ।
द्वन्द्वानेति च निर्द्वन्द्वस्तासु तास्वेव योनिषु ॥१९॥
देवभोगान् साध्यभोगान् सिद्धभोगाननुत्तमान् ।
ईश्वराणां तथा भोगानाप्तुं मथ्नाति सर्वशः ॥२०॥
रोगे भोगे विहारे चोद्वेगे क्षये क्षतौ क्षते ।
शरीरात्मा भ्रमभिन्नो ममेति चाभिमन्यते ॥२१॥
भिन्नदेहेषु कुर्वन् वै राज्यं शेते विभिन्नके ।
शयने गेन्दुके क्वापि बिले द्वैधे च कर्दमे ॥२२॥
इष्टिकायां च गगने गर्ते च गह्वरे क्षितौ ।
कण्टके भस्मनि क्षीणे जले फलेऽनिले नले ॥२३॥
दधन् वस्त्राणि रम्याणि और्णानि कम्बलानि च ।
तार्णानि राजसान्येव कार्दमेयानि चर्म च ॥२४॥
यद्यद्योनौ प्रजायेत तत्तद्वस्त्रपरिग्रहम् ।
भोजनानि विचित्राणि गन्धान्यगन्धकानि च ॥२५॥
क्लेदशैवालभक्ष्याणि मन्यते स्वानि वैभ्रमात् ।
विविधानि च कृच्छ्राणि भुंक्ते व्रतानि सिद्धये ॥२६॥
कुरुते चाऽप्यभीष्टानि तान्यनुद्रवति प्रगः ।
आत्मरूपगुणान् लाभान् विविधान् हृदयप्रियान् ॥२७॥
धावते चानुभोगार्थं भोक्तव्यानि मयेति च ।
ममत्वेनावृतो नित्यं तत्रैव परिवर्तते ॥२८॥
सर्गकोटिसहस्रेषु त्रिषु लोकेषु तत्फलम् ।
यथाकर्म समश्नाति मरणान्तासु मूर्तिषु ॥२९॥
अशनारहितश्चापि साशनः समजायते ।
निरिन्द्रियोऽपि मनुते सेन्द्रियं स्वं व्रणान्वितम् ॥३०॥
अलिंगो लिंगवन्तं चाऽमृत्युर्मृत्युभयान्वितम् ।
अदुःखो दुःखिनं चाप्यक्षरोऽपि मन्यते क्षरम् ॥३१॥
एवं क्षराभिमानेन क्षरान्निर्याति नैव सः ।
राजन्नज्ञानभावस्य नाऽस्यान्ते विद्यते क्वचित् ॥३२॥
ऋते गुरूपनिषदं शास्त्राणां परिशीलनम् ।
सत्संगं सत्कथालाभं हरेः सतां प्रसेवनम् ॥३३॥
अनुग्रहं हृत्स्थहरेर्मुक्तानामनुवर्तनम् ।
आराधनं हरेश्चापि ध्यानं तस्य परात्मनः ॥३४॥
एतानि साधनान्येव दिव्यानि दिव्यदानि हि ।
आत्मना युज्यते चात्मा परात्मा तत्र युज्यते ॥३५॥
तदा पारं परं यात्यक्षरात्परस्थितं प्रभुम् ।
यावद्धरिं श्रयेन्नैव सत्संगं नाचरेदपि ॥३६॥
भक्तिं विधापयेन्नैवोपासनां न समाचरेत् ।
प्रत्यक्षस्य हरेः सेवां गुरोः सेवां सतां तथा ॥३७॥
यावत्कुर्यान्न वै तावत्संसारोऽस्य न लीयते ।
सर्गकोटिसहस्राणि पतनान्तानि गच्छति ॥३८॥
धाम्ना धामसहस्राणि मरणान्तानि याति च ।
मायामायिकसेवाभिमायिकस्त्रिगुणो भवेत् ॥३९॥
मायासम्बन्धयोगेन मायागुणमयो भवेत् ।
रत्यर्थमभिसम्बन्धादन्योन्यगुणसंश्रयात् ॥४०॥
ऋतौ गर्भाश्रयाद् रूपं मायिकं लभते मुहुः ।
एवं वै जायमानस्य मोक्षधर्मः कुतो भवेत् ॥४१॥
तस्माद् ग्रन्थिं वासनाख्यां छित्वा भित्वा च संव्रजेत् ।
तृष्णाक्षयं तपसैव कृत्वा ज्ञानेन वापि च ॥४२॥
विवेकेन पृथक्कृत्वा मत्वाऽऽत्मानं ह्यमायिकम् ।
ज्ञानप्रकाशमार्गेण गन्तव्यं सत्पथेन च ॥४३॥
तदा गुणा वियुज्यन्ते निर्गुणाद्वै चिदात्मनः ।
आगर्भादेव पुण्येन गुणभिन्नं समीक्षते ॥४४॥

प्रल्हादवत्तथा मदालसाबाला इवापि च ।
श्रीहरेः कृपया यद्वा दिव्यचक्षुः प्रकाशते ॥४५॥
आत्माऽनात्मविवेकेन गुणहान्या निजं निजः ।
परं पश्यति युक्तात्मा परात्परं हरिं तथा ॥४६॥
एकाग्रता बलं तत्र ध्यानबलं च कारणम् ।
विमुक्तः सर्वसंगेभ्यो ब्राह्मे मुहूर्तके स्थिरः ॥४७॥
धारयेत्तु मनः कृष्णेऽपररात्रे हृदन्तरे ।
बुद्ध्या वृत्तिं स्थिरीकृत्याऽप्यकंपो निश्चलो भवन् ॥४८॥
हरिं पश्यति चान्तःस्थं तदा युक्तो भवत्ययम् ।
युक्तस्य सर्वदा भानं परमेशपरायणम् ॥४९॥
नान्यच्छृणोति चाघ्राति न रस्यति न पश्यति ।
नैव स्पृशति गृह्णाति याति वक्ति च मेहति ॥५०॥
न मनुते न च संकल्पयते मन्यते न च ।
न बुद्ध्यति तदा चात्मा परात्मनि प्रमोदते ॥५१॥
प्रकाशतेऽम्बरे सूर्यो निर्वाते दीपको यथा ।
तं प्रपश्यन्ति मुनयो ब्रह्मयोनय ईश्वराः ॥५२॥
तं परं परमात्मानं दृश्येतात्मदृशा तदा ।
आत्मदृष्टिर्मता विद्या अविद्या मानसी दृशिः ॥५३॥
अविद्या सर्गनाशाढ्या विद्या मुक्तिर्हि शाश्वती ।
अव्यक्तं सृजतेऽविद्यां विद्या चात्माऽभिपद्यते ॥५४॥
अविद्यया मृतिं यायाद् विद्ययाऽमृतमृच्छति ।
विद्यालाभे त्वात्मनो वै विवेको बहुशाखवान् ॥५५॥
कृतात्मनः प्रजायेत शृणु राजन् वदामि ते ।
किं मया कृतमेतावत्कालेन मायिकेन वै ॥५६॥
अज्ञेनेव झषेणात्र जालं समनुवर्तितम् ।
जलादन्यन्न जानाति मत्स्यो जलासजीवनः ॥५७॥
तथा नाऽहं परं कंचिज्ज्ञातवान् भ्रमछादितः ।
ममाचारे भ्रमे धिग्धिगस्तु मोहानुवर्तने ॥५८॥
मोहानुवर्तनं प्राप्य नाऽवेदिषं परेश्वरम् ।
माययाऽहं स्थितश्छन्नो वञ्चितः परमात्मनि ॥५९॥
माययाऽहं वशीकृतः कालमेतं न बुद्धवान् ।
वञ्चितोऽस्म्यनया यद्धि मोक्षमार्गे न लब्धवान् ॥६०॥
न चाऽयमपराधोऽस्या अपराधो ममापि च ।
योऽहमत्राऽवसं सक्तो लुब्धो विषयवासनः ॥६१॥
अरूपश्चाप्यमूर्तश्च रूपमूर्तोऽभवं तथा ।
प्राकृतेन ममत्वेन धर्षितो वञ्चितस्ततः ॥६२॥
ममकारविहीनेन मया ममत्वसञ्जुषा ।
किं कृतं प्रक्षिप्य मोक्षं निरयं यत् प्रलब्धवान् ॥६३॥

नानया मम कार्यं वै शिष्यते वारयोषिता ।
आत्मानं बहुधा कृत्वा या मां युनक्ति बन्धने ॥६४॥
अथेदानीं प्रबुद्धोऽस्मि कृपया सद्गुरोर्हरेः ।
अपेत्येमां श्रयाम्यद्य परमेशं गुरुं प्रभुम् ॥६५॥
साम्यं यास्यामि देवेन नानया कूटयोषिता ।
क्षेमं कृष्णेन यास्यामि व्रजिष्यामि परं पदम् ॥६६॥
एवं कृत्वा विवेकोत्थं निर्णयं चात्मना ततः ।
संगधर्मा हरेः संगाद्धरितुल्योऽभिपद्यते ॥६७॥
एतदुक्तं परब्रह्म यस्मान्नावर्तते पुनः ।
राजन् येन परं ज्ञानं प्राप्तं चेदं प्रमोक्षदम् ॥६८॥
येन क्षराऽक्षरे ज्ञाते भयं तस्य न विद्यते ।
श्रेयः प्रकुर्वतश्चात्र भयं चापि न यस्य ह ॥६९॥
तस्य भयं परे लोके कदापि नैव जायते ।
धर्मे सतां हितं पुंसां चाश्रयतो भयं न वै ॥७०॥
स्वादुकामुककामानां वैतृष्ण्यं निर्भयं सदा ।
ज्ञाने धर्मे परिचयं कुर्वतो न भयं क्वचित् ॥७१॥
नित्यं वै बहुदातुश्च साधूनां सेविनः सदा ।
सतां सत्कारशीलस्य भयं नैव भवेत् क्वचित् ॥७२॥
न्यायमर्हाय दातुश्च हृदा शुद्धस्य वेदिनः ।
विरक्तस्य विसंगस्य भयं नैव भवेत् क्वचित् ॥७३॥
सर्वनिर्हृतदोषस्य सर्वप्राणिप्रसेविनः ।
परोपकारशीलस्य भयं नैव भवेत् क्वचित् ॥७४॥
तितिक्षोः सहमानस्य क्रोधहीनस्य देहिनः ।
सरलस्य हितकर्तुर्भयं नैव प्रपद्यते ॥७५॥
शुभाश्रयस्य दातुश्च संयमिनो दयाजुषः ।
सर्वत्र मानभावस्य भयं नैव भवेत् क्वचित् ॥७६॥
धृतात्मनः प्रशान्तस्य प्राज्ञस्य भक्तिचारिणः ।
तपस्विनः सेवकस्य भयं नैव हि जायते ॥७७॥
धर्माधर्मविमुक्तस्य सर्वसंशयनाशिनः ।
जन्ममृत्युविमुक्तस्य परं श्रेयो हि निश्चितम् ॥७८॥
पुण्यपापविमुक्तस्य ब्रह्मानुग्रहयोगिनः ।
देहत्रयातिरिक्तस्य परं श्रेयो हि निश्चितम् ॥७९॥
मूलप्रकृतितत्त्वे च विकाराणां च षोडशे ।
प्रकृतिविकृतौ चापि यो बद्धः स मुच्यते ॥८०॥
अन्यं देहं निजं चान्यं विद्याद् यः स न लिप्यते ।
अन्यच्च मशकं विद्यादन्यदुदुम्बरं तथा ॥८१॥
नवोदुम्बरयोगेन मशकस्तत्र लिप्यते ।
अन्यं च मत्स्यकं विद्यादन्यद् विद्याजलं तथा ॥८२॥

न चापां संप्रसंगेन मत्स्यस्तत्र प्रलिप्यते ।
अन्यश्चाग्निश्चुल्लिकान्या चुल्लयाग्निर्नैव लिप्यते ॥८३॥
जलं चान्यत् पद्ममन्यदद्भिः पद्मं न लिप्यते ।
एतेषां सहवासश्च निवासो मिथ एव ह ॥८४॥
तथाप्येतत्पृथग्भावं यः पश्यति स पश्यति ।
एवं वै पश्यतस्तत्राश्रयनाशो न बन्धनम् ॥८५॥
तत्तज्जीवनपूराच्चेदधिकं जीवनं मिलेत् ।
ततो जीवनमासाद्य सुखं तत्र प्रमोदते ॥८६॥
परमात्मा जीवनं वै सर्वानन्दाऽमृतप्रदम् ।
तमाश्रयं समासाद्य भयं मृत्युर्न नाशनम् ॥८७॥
परंश्रेयः परंब्रह्म परामुक्तिः परं पदम् ।
अजरामरलोकश्चाऽव्ययानन्दसुखाब्धिकम् ॥८८॥
युक्तो मुक्तः सदा चात्र निजात्मनि समश्नुते ।
नित्यप्रसादस्तृप्तात्मा सुखस्वपननिर्वृतः ॥८९॥
मेघैर्यथा शिला नैव चलत्ययं तथाविधः ।
न कम्पेत्तु कृतैर्घोषगर्जनागीतवादनैः ॥९०॥
तैलपात्रं करे कृत्वा रज्ज्वा नटः प्रयाति च ।
स्थाल्याऽपि संयतात्मा वै निर्भयः कम्पवर्जितः ॥९१॥
नाऽस्य पात्रात् स्रवते च तैलबिन्दुर्मनागपि ।
प्रयाति चोत्तरप्रान्तं तथा युक्तो जयं लभेत् ॥९२॥
एतादृशो ब्रह्मयुक्तः पश्यति ब्रह्म चात्र ह ।
परब्रह्म समासाद्य मुक्तो मोक्षमवाप्नुयात् ॥९३॥
इत्येवं राधिके भूपं चोपदिश्य च लोमशः ।
शान्तिं चावाप राजा च पुनः पप्रच्छ तत्स्तुतिम् ॥९४॥
यथा मुक्ता महात्मानो मुक्ता नैःश्रेयसार्थिनः ।
प्रयान्ति चोत्क्रमणाद्यैस्तानि पप्रच्छ लोमिने ॥९५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायाम् आत्मनः क्षरमोचनं चाक्षरगमनं च कथं नेति प्रश्नः, तदुत्तर तन्मोचनं तद्गमनं चेत्यादिनिरूपणनामा षट्पञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५६ ॥

**श्रीकृष्ण उवाच—**

यदा देहात् पृथग्भूतः शुद्धश्चात्मा प्रयाति हि ।
राधे कथं प्रयात्येवं पप्रच्छ लोमशं नृपः ॥ १ ॥

**अश्वपाटल उवाच—**

ऋषे चोत्क्रमण कीदृक् कथं कस्मान् प्रयात्ययम् ।
आत्मा देहाद्विनिष्क्रम्य तद्वदस्व मम प्रभो ॥ २ ॥

**श्रीलोमश उवाच—**

यद्यत्स्थानाद् विनिर्याति यथा योगतपोबलात् ।
यथा भक्तिबलाच्चापि यथा पुण्यबलादपि ॥ ३ ॥
यथा पापबलाच्चापि यथा कर्मबलादपि ।
यथा मायाबलाच्चापि वासनाबलतोऽपि च ॥ ४ ॥
तत्तत्स्थानस्थदेवानां लोकान् प्रयाति तद्यथा ।
पद्भ्यां निर्गत्य चेद्याति विष्णुस्थानं प्रयाति वै ॥ ५ ॥
जंघाभ्यां चेत्प्रयात्येषो वसूनां याति मन्दिरम् ।
ऊरुभ्यां चेत्प्रयात्येषः प्रजापतिं प्रयाति सः ।
पायुना चेत्प्रयात्येषो मैत्रं स्थानं प्रपद्यते ॥ ६ ॥
लिंगाद् योन्या प्रयात्येषः सत्यलोकं प्रपद्यते ।
जघनेन प्रयात्येषो मेरुस्थानमवाप्नुयात् ॥ ७ ॥
नाभेश्चोत्क्रमते चेद्वै देवानां स्वर्गमाप्नुयात् ।
पार्श्वाभ्यां मरुतो लोकान् चेत्प्रयाति प्रपद्यते ॥ ८ ॥
बाहुभ्यां चोत्क्रमते चेदिन्द्रलोकमवाप्नुयात् ।
उरसा चेत् प्रयात्येषो रुद्रलोकमवाप्नुयात् ॥ ९ ॥
ग्रीवया याति चेदेषो नरलोकमवाप्नुयात् ।
मुखेन चेत्प्रयात्येषो विश्वेदेवानवाप्नुयात् ॥१०॥
श्रोत्रेणोत्क्रमणे चास्य दिक्पालत्वं भवेदिति ।
घ्राणेन गमने वायोर्लोकावाप्तिर्भवेदिति ॥११॥
नेत्राभ्यां गमने सूर्यलोकं चन्द्रालयं च वा ।
कपोलाभ्यां प्रयाणे च वह्निलोकं प्रयाति सः ॥१२॥
भ्रूभ्यामस्य प्रयाणे चाश्विनोर्लोकमवाप्नुयात् ।
ललाटेन प्रयाणे तु पितृलोकगतिर्भवेत् ॥१३॥
मूर्ध्नो चोत्क्रमणे याति ब्रह्मलोकं सनातनम् ।
चक्रेभ्यश्चेत् प्रयात्येव सुषुम्णामार्गमाश्रितः ॥१४॥
तदा तत्तदीश्वराणां लोकानेष प्रयाति ह ।
स्थानबलादिदं प्रोक्तमुत्क्रमणं नराधिप ॥१५॥
उपासनाबलाच्चाऽप्युत्क्रमणं वै विशिष्यते ।
पापपुण्यबलाच्चापि गमनं वै विभिद्यते ॥१६॥
शंभोरुपासनाद् याति कैलासं गणमण्डितम् ।
विष्णोरुपासनाद् याति श्वेतद्वीपं पयोदधिम् ॥१७॥
नरनारायणभक्त्या प्रयाति बदरीपतिम् ।
सूर्यगायत्रिकाभक्त्या याति सूर्यस्य मण्डलम् ॥१८॥
यज्ञाद्युपास्तिक्रियया स्वर्गं याति मखार्थवान् ।
पित्रुपासनया पितृलोकं याति हि मानवः ॥१९॥

ब्रह्मचर्यात् सिद्धलोकं सत्यलोकं तपोविधेः ।
पौरुषेण तु सूक्तेन याति वैराजधाम च ॥२०॥
महाविष्णोरुपास्त्या च वैकुण्ठं याति मानवः ।
नारायणोपासनया महावैकुण्ठमृच्छति ॥२१॥
राधाकृष्णोपासनया गोलोकं विन्दतीति वै ।
मायोपास्त्या मायिकाँश्च लोकानावरणादिकान् ॥२२॥
भूम्नश्चोपासनया चाव्याकृतं याति मानवः ।
वासुदेवोपासनयाऽमृतं धाम प्रयाति च ॥२३॥
कपिलाद्यवताराणामुपास्त्या तत्तदालयान् ।
अक्षरोपासनया यात्यक्षरं धाम शाश्वतम् ॥२४॥
परब्रह्मोपासनया परंधाम प्रपद्यते ।
अनुपास्त्या कर्ममिश्र याति योनिषु जन्मवान् ॥२५॥
तामसैः कर्मभिर्दैत्यो दानवो राक्षसो भवेत् ।
तिर्यग्योनिं प्रयात्येषः स्थावरादीन् विशत्यपि ॥२६॥
राजसैः कर्मभिर्याति राज्यं श्रेष्ठिनामित्यपि ।
वसून् गान्धर्वलोकाँश्च लोकपालान् द्यवासिनः ॥२७॥
सात्त्विकैर्जायते विप्रः साधुर्वा पुण्यदेवता ।
पापैः प्रजायते पक्षी पशुः कीटो मृगोऽपि वा ॥२८॥
पुण्यैः प्रजायते राजा देवो गुरुः सती व्रती ।
ऋणिनस्तु प्रजायन्ते वाहा अश्ववृषादयः ॥२९॥
दातारश्च प्रजायन्ते पूज्यासनविराजिताः ।
एवं वै भिन्नशकटैः प्रयान्ति भिन्नमन्दिरम् ॥३०॥
गार्हस्थ्ये वर्तमानाश्च ज्ञानाऽनलसमन्विताः ।
प्रदह्य सर्वकर्माणि प्रकाश्यात्मानमात्मनि ॥३१॥
प्रयान्ति परमं ब्रह्म यथा सन्यासिनोऽमलाः ।
असन्न्यस्ता हि सन्न्यस्ता ज्ञानसन्यासमाश्रिताः ॥३२॥

अश्वपाटल उवाच—

असन्न्यस्ताः कथं प्रोक्ताः सन्न्यस्ता इति वै गुरो ।
कथं यान्ति च गार्हस्थ्यस्थितास्तां परमां गतिम् ॥३३॥

श्रीलोमश उवाच—

आकर्णय नृपाऽत्राऽपि कथां तु परमाऽद्भुताम् ।
आनर्तनृपतेः कुशलायोगिन्या वै पुराभवाम् ॥३४॥
सौराष्ट्रे कृष्णभक्तो वै राजा आनर्तकोऽभवत् ।
येनेदं वासितं सुराष्ट्रकं चानाय्य कृष्णतः ॥३५॥
राजाऽसौ वैष्णवो भक्तो पत्नीव्रतद्विजानुगः ।
ज्ञानं ह्यवाप्तवान् पत्नीव्रताद् विप्राद्धि तात्त्विकम् ॥३६॥
वर्तते स्म च साधूनां सभायां ज्ञानतत्परः ।
ज्ञानशास्त्रेण संछिद्याऽहंममेतिप्रबन्धनम् ॥३७॥
योगे सन्तिष्ठते नित्यं समाधौ परमेश्वरे ।
साधूनां च महर्षीणां भवन्ति ज्ञानवार्तिकाः ॥३८॥
यत्सभायां सदा सायं चमत्कारपुरे नृप ।
तेन कीर्तिर्दिगन्तेषु व्याप्ता चानर्तयोगिनः ॥३९॥
तां श्रुत्वा कुशला साध्वी योगिनी सिद्धिसंभृता ।
कुंकुमवापिकाक्षेत्रवासिनी पारमेश्वरी ॥४०॥
यावद्योगकलापूर्णा परकायप्रवेशिनी ।
इष्टरूपधरा विज्ञा तत्त्वज्ञानार्थशेवधिः ॥४१॥
वैष्णवी जरठा देहधर्मान् विमत्य तापसी ।
आत्मधर्ममयी गुर्वी भूतधर्माऽहता सती ॥४२॥
वर्तमाना ब्राह्मभावेऽलक्ष्यलिंगा नरायणी ।
परमावं गता कृष्णे सर्वसन्न्यासवर्तिनी ॥४३॥
वशे यस्या यथा लक्ष्म्या जगत्सर्वं तथाविधा ।
यथाऽवतारिणी देवी सती च शिवशक्तिका ॥४४॥
कुशलाख्या तु सा साध्वी चमत्कारपुरं ययौ ।
कृत्वा रूपं सुन्दरं चाद्भुतयौवनमुत्तमम् ॥४५॥
आनर्त्तं नृपतिं प्राप्ता वृतं सदसि साधुभिः ।
योगिभिर्न्यासिभिश्चापि महर्षिभिश्च वैदिभिः ॥४६॥
सर्वे दृष्ट्वा सौकुमार्यं परं तस्या नवं वयः ।
केयं कस्य कुतश्चात्रेत्यासन् सम्प्राप्तविस्मयाः ॥४७॥
राजाऽपि स्वागतं चक्रे ददौ सदसि चासनम् ।
सत्कृता चापि सम्मानैर्योगिनी कुशला सती ॥४८॥
प्रष्टुं चेच्छावती भूपं योगबन्धैर्ववन्ध तम् ।
मोक्षधर्मे प्रसिद्धोऽयं राजा सर्वत्र गीयते ॥४९॥
मुक्तो राजा सात्त्वतोऽयं कीदृगास्ते विलोकये ।
आनर्तस्य बुद्धिसत्त्वे द्राक् स्वबुद्ध्या विवेश सा ॥५०॥
नेत्राभ्यां नेत्रयोरस्य रश्मीन् संयम्य रश्मिभिः ।
बुद्धिवृत्तीः प्रविवेश विजेतुं ज्ञानमार्गणैः ॥५१॥
द्वयोर्योगविदोर्बुद्धौ विवादो घटते हृदि ।
तयोरेकस्य योगित्वेऽपरस्य तु पराजयः ॥५२॥
अयोगी न जयं याति राजाऽयं तादृशो न वा ।
विचार्येति सती बुद्धौ वशीचकार तं नृपम् ॥५३॥
राजा विज्ञाय तद्भावं मूकां कुर्वे तु योगिनीम् ।
इति बुद्ध्या सती बुद्धिं जग्राह योगसद्बलैः ॥५४॥
नृपदेहे प्रविष्टां तां सत्कृत्य बुद्धिविग्रहे ।
लिंगदेहे ह्यवस्थाप्य राजा तस्थौ तया सह ॥५५॥

स्थूलदेहाऽसंगिनौ तौ लिङ्गदेहे स्थितौ तदा ।
योगिनौ स्वजयार्थं च मिथो वादं प्रचक्रतुः ॥५६॥

आनर्त उवाच—

योगसत्याः क्व चर्येयं कृता क्व च गमिष्यसि ।
कस्य च त्वं कुतो वेति का च कथं ह्युपस्थिता ॥५७॥
अहं राजाऽपि तच्चिह्नैर्मुक्तोऽस्मि योगमास्थितः ।
स त्वां ज्ञातुं समिच्छामि मानार्हे योगिनि द्रुतम् ॥५८॥
मया पत्नीव्रताख्याद् वै गुरोः प्राप्तं विशेषतः ।
योगज्ञानं विशालं च मोक्षश्चेति च मे शृणु ॥५९॥
तत्वज्ञाने च योगर्द्धौ राज्यविधौ च वै मया ।
त्रिविधे मोक्षदे प्राप्तं स्थैर्यं चराम्यरागकः ॥६०॥
मोक्षस्य कारणं रागाभावो ज्ञानेन चेयते ।
ज्ञानेनाऽरागताद्वारा मोक्षसिद्धिर्मया कृता ॥६१॥
अद्वन्द्वश्चाप्यसंगश्च तिष्ठाम्यचलबुद्धितः ।
शुष्कक्षेत्रं जलहीनं सबीजं चापि चांकुरे ॥६२॥
कारणं न भवत्येव तथाऽहं शुष्कतां गतः ।
नाऽभिरज्यामि मिष्टैश्च क्रूरैः खेदं करोमि न ॥६३॥
चन्दनेनाऽर्चयेद् दक्षे वामे शस्त्रेण भेदयेत् ।
कश्चिन्मां तुल्यता तत्र साध्वि ! मे वर्तते ऋता ॥६४॥
सुख्यहं कृतसर्वार्थः समकंकरकाञ्चनः ।
असंगो राज्यभावेऽपि वर्ते साधुसमागमे ॥६५॥
मोक्षे हेतु त्रिकं चास्ते ज्ञानं विवेकजं तथा ।
कर्मणां चापि सन्न्यासो भक्तिर्वा परमात्मनः ॥६६॥
मया त्रिकं गुरोः प्राप्तं मिश्रितं यत्तु मुक्तये ।
कर्म भक्त्यन्वितं सर्वं करोमि च विवेकतः ॥६७॥
यथा सन्न्यासिनः श्रेष्ठा नैष्कर्म्ये वै समाश्रिताः ।
तथा यमे च नियमे कामे द्वेषे परिग्रहे ॥६८॥
माने दंभे रतौ स्नेहे नैष्कर्म्यं प्राप्तवानहम् ।
यदि ते मोक्षगन्तारः कथं नाऽहं तथागतिः ॥६९॥
पर्णकुट्यां वसतां चेन्मोक्षो जायेत सर्वथा ।
महासौधे वसतो मे कथं मोक्षो न हस्तगः ॥७०॥
यस्यार्थो येन येनाऽस्ति तत्तदालम्बते जनः ।
कश्चिद् दण्डं च मालां च कश्चिच्छत्रं च चामरे ॥७१॥
गार्हस्थ्ये दोषमावीक्ष्य गत्वा त्यागाश्रमे यतिः ।
उत्सृजन् प्रथमान् धर्मान् गृह्णन् परान् यथोचितान् ॥७२॥
संगहानैः संगमाप्य स मुच्येत न संगतः ।
आधिपत्यं मम राज्ये तेषां वन्ये हि तुल्यकम् ॥७३॥
यदि मुच्येत वै भिक्षुर्नाऽहं मुच्ये कथं वद ।
भोजनं चाम्बरं पानं निद्राऽपेक्षितसंग्रहः ॥७४॥
आधिपत्यं क्वापि यत्र तुल्यं वै भिक्षुणा मम ।
ते यदि मुक्तिभागा वै ममापि मुक्तिरेव ह ॥७५॥
यदि ते बन्धभागा वै तदा तुल्याः कुटुम्बिभिः ।
अथ ज्ञानेन मोक्षोऽस्ति वृथा काषायधारणम् ॥७६॥
वृथा वेष्टनसन्त्यागो वृथा जटाप्रधारणम् ।
वृथा स्वर्णाम्बरत्यागो वृथाऽभिवस्त्रधारणम् ॥७७॥
वृथा पक्कान्नसद्ग्रासत्यागो भिक्षा वृथा ततः ।
यदि जिह्नेषु सत्स्वेव ज्ञानं वै मोक्षकारणम् ॥७८॥
आश्रमोचितचिह्नाढ्यं ज्ञानं मे मोक्षकारणम् ।
यद्वा दुःखानि पापानि वीक्ष्य त्यागाश्रमे मतिः ॥७९॥
तदा सुखानि पुण्यानि वीक्ष्य गृहाश्रमे समा ।
रागद्वेषप्रयुक्ता वा प्रवृत्तिर्बन्धने समा ॥८०॥
आकिञ्चन्यं विना ज्ञानं क्वाप्याश्रमे न विद्यते ।
कैंचन्यं बन्धनं सर्वाश्रमे तुल्यं च मेऽपि ते ॥८१॥
तस्मात् कुशले ! धर्मार्थकाममोक्षेषु सर्वथा ।
बन्धनायतनेष्वेव स्थितं मां विद्ध्यसंगिनम् ॥८२॥
राज्यैश्वर्यं ध्रुवः पाशः स्नेहकर्मादिबन्धनः ।
मोक्षधारावता ज्ञानाऽसिना छिन्नो मया सति ॥८३॥
ज्ञानात् त्यागे विचरामि संगं प्राप्नोमि नैव ह ।
नाऽहं राज्येऽपि राजेव निपतामि च बद्धवत् ॥८४॥
ज्ञानाग्निना मया दग्धा वासनाग्रन्थयस्ततः ।
देहराज्ये विचरामीन्द्रियादिभिः कुटुम्बिभिः ॥८५॥
निर्बन्धोऽहं विचरामि सतां समागमे स्थितः ।
मोक्षे स्थितोऽस्मि नो बन्धे नो राज्येऽपि तु वै वने ॥८६॥
सोऽहमेवं सदा मुक्तस्त्वयि जातादरः सति ।
पृच्छामि त्वां कथं मुक्ता विरुद्धरूपधारिणि ! ॥८७॥
सौन्दर्यं काञ्चनाभाढ्यं सौकुमार्यं नवं वपुः ।
वयोऽग्र्यं रूपसम्पन्नं सर्वाढ्या त्वं कथं सती ॥८८॥
साध्वी चेन्न भवेद् रक्ता सरागा साध्विका न वै ।
तवोभयं नानुरूपं वीक्ष्य योगर्द्धिमित्यपि ॥८९॥
मुक्तेयं वा नवेत्येवं संशयितः सभाजनः ।
भोगराजसभावाढ्या शृंगारतानसंयुता ॥९०॥
कथं त्वं योगसम्पन्ना साध्वीति संप्रकाशसे ।
मम योगं गता च त्वं स्पर्शदोषाभिसंवृता ॥९१॥
मे हृदो निग्रहकर्त्री कथं शास्त्री हि योगिनी ।
यस्त्वां राष्ट्रे सभायां मे सम्प्रवेशितवान् जनः ॥९२॥

तत्परिग्रहमापन्ना शीलाद् भ्रष्टा विभाव्यसे ।
पुनर्मां क्षत्रियं प्राप्य मा कृथा वर्णसंकरम् ॥९३॥
साध्वी त्वं मोक्षधर्माऽहं राजधर्मा गृहाश्रमी ।
आवयोश्च हृदौरैक्ये द्वितीयो धर्मसंकरः ॥९४॥
तस्मात् स्वातन्त्र्यमादाय वर्तसे चेत् प्रयोगिणी ।
योगिन्यास्तव धर्मादिश्रुतं विप्लवतेऽधुना ॥९५॥
भावेन जेतुमिच्छाऽस्ति जयाशा बन्धनान्विता ।
बद्धा त्वं मत्समा नाऽसि न ते हस्तपरिग्रहः ॥९६॥
यद्वा मत्पक्षगान् सर्वान् मां विजित्य जितानिति ।
दर्शयितुं भवत्यवष्टंभस्ते तर्हि मोहिनी ॥९७॥
अमर्षयुक्ता मोहेन मुग्धा जेतुं समिच्छसि ।
योगाख्यं च विषाक्तं तच्चामृतं त्वयि संस्थितम् ॥९८॥
इच्छतोर्योग उत्कृष्टोऽनिच्छतोस्तु विषोपमः ।
मा प्रदर्शय श्रैष्ठ्यं स्वं मुक्तो वा न नृपो ह्ययम् ॥९९॥
राज्ञां बलं महैश्वर्यं स्त्रीणां रूपाढ्ययौवनम् ।
बलं ब्रह्म हि मुक्तानां मा बलं मे प्रदर्शय ॥१००॥
आर्जवेनाऽभिगन्तव्या बलिनः सुखदा हि ते ।
अनार्जवेन बलिनो नाशयन्ति तथागतम् ॥१०१॥
सा त्वं धाष्ट्यं विहायैव जातिं कुलं श्रुतं तपः ।
वृत्तिं भावं स्थितिं चेच्छां कार्यं मे तत्त्वतो वद ॥१०२॥

**लोमश उवाच—**

इत्येवं बहुभिर्वाक्यैरयुक्तैरसमञ्जसैः ।
आनर्तेन निरादृष्टा कुशला न भयं ह्यगात् ॥१०३॥
अश्वपाटलः सा साध्वी ततोऽपि चारुदर्शना ।
चारुप्रज्ञा प्रपञ्चमोचयितुं ततोऽधिकम् ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमश-
गीतायामात्मनो देहाद् विनिष्क्रमणे हेतुप्रदर्शनं सन्य-
स्ताऽसन्न्यस्तविचारे आनर्तनृपकुशलायोगिनी-
सम्वादश्चेतिनिरूपणनामा सप्तपंचाशदधिक-
द्विशततमोऽध्यायः ॥ २५७ ॥

**श्रीकृष्ण उवाच—**

राधिके लोमशश्चाश्वपाटलं च ततः परम् ।
कुशलायाः प्रतिवादं प्राह यथाऽभिसंभवम् ॥ १ ॥

**श्रीलोमश उवाच—**

अश्वपाटल ! कुशला योगपारं गता सती ।
तत्त्वज्ञानानलदग्धकषायोवाच तच्छृणु ॥ २ ॥

**कुशलोवाच—**

शृण्वानर्त ! भवानास्ते तुलाढ्यकृतास्पदः ।
गार्हस्थ्यं रक्षयसे वाक्यैर्योगित्वं च वितन्यसे ॥ ३ ॥
कुशलायाश्चाऽकौशल्यं बोधयसे प्रदूषणैः ।
कल्मषं चेदृशं राजन् मुक्ते चास्ते कथं त्वयि ॥ ४ ॥
आप्तं वाक्यं प्रमाणं वै योग्यतादिसमन्वितम् ।
शक्त्योपबृंहितं जातिसारूप्यादिसभाजितम् ॥ ५ ॥
जल्पादिदोषशून्यं च भ्रान्तिक्षेत्राच्च चोद्गतम् ।
लक्षणाश्लेषभावाद्यैः स्पष्टं स्पष्टार्थसंभृतम् ॥ ६ ॥
वाक्यं तादृक्प्रमाणं मे चानर्तैकमनाः शृणु ।
यथा पिष्टं च पाषाणो मेघश्च धूम्रमण्डलम् ॥ ७ ॥
संश्लिष्टानि तथाऽऽनर्त ! संश्लिष्टाः प्राणधारिणः ।
शब्दः स्पर्शो रसो गन्धो रूपं खवाऽऽब्भूवह्नयः ॥ ८ ॥
संश्लिष्टाः पिष्टवद् राजन् शिलावत्ते तथाऽऽत्मनि ।
विलीयन्ते मेघवच्च विशीर्यन्ते च धूम्रवत् ॥ ९ ॥
न स्वत्वं ते विजानन्ति कथं परप्रवेदनम् ।
मनस्तैः सह संयुक्तं तदा बाह्येऽनुयन्ति च ॥१०॥
चोद्भूतत्वं च तत्रापि महत्त्वं बाह्ययोगिता ।
आत्मनो योगिता चापि ग्राह्ये भवन्ति हेतवः ॥११॥
एवं सर्वत्र बाह्यानां ग्रहणे हेतवः खलु ।
मनः संकल्प्य मद्भावं ततो बुद्धिर्विनिश्चयम् ॥१२॥
करोत्येवाभिमानेन मतं चात्मनि दर्पणे ।
निक्षिपति तदात्माऽयं ममेदमिति मन्यते ॥१३॥
वासना जायते तैश्च दृष्टमुक्तैः स्मृतिप्रदा ।
अविद्या च तमो वापि सौषुप्ताऽज्ञानमुत्तरम् ॥१४॥
भ्रमात्मकं च वा तत्र स्मरणं जायते मुहुः ।
ततः सुखासुखे लाभालाभौ प्रियाऽप्रियेऽपि च ॥१५॥
तत्र कालो भवेद्धेतुः प्रकृतिश्च प्रपूरिका ।
अदृष्टं यादृशं तादृक् फलं सम्पद्यते ततः ॥१६॥
चतुर्विंशतिसंघातश्चैवं वेदनकारणम् ।
अव्यक्तां न विजानाति जानाति व्यक्तरूपिणीम् ॥१७॥
स्थूलदर्शी स एवोक्तो ममाहंमिश्रितः स च ।
अव्यक्तां यो विजानाति स त्वात्मानं प्रपश्यति ॥१८॥
अध्यात्मचिन्तकः सोऽयं परं पारं प्रयास्यति ।
व्यक्ताः कलाः प्राकृता याः सर्वे वयं नराः स्त्रियः ॥१९॥
बिन्दुगर्भासनाः पूर्वे शुक्रशोणितपिण्डिकाः ।
कललं दशरात्रेण बुद्बुदं पेशिका ततः ॥२०॥

ततश्चांगानि जायन्ते नखरोमान्तकानि च ।
नवमे मासि बालश्च स्त्री वा पुमाँश्च वेतरत् ॥२१॥
लिंगाधीनानि नामानि ततः कुमारतादिकम् ।
सुकुमारावयवानां नाम कुमारसंज्ञकम् ॥२२॥
अबुद्धस्येव तस्यैव बालिशस्य तु बालता ।
युवभावेन कामेन युनक्तीति युवा मतः ॥२३॥
तिष्ठंस्तिष्ठन् प्रयात्येव वीरो भूत्वा स्थवीरकः ।
एवं क्षणेक्षणेऽन्येषां कलानां च विवर्तनात् ॥२४॥
नामरूपादिभेदश्च सूक्ष्मोऽयं न विभाव्यते ।
नात्ययो न प्रभवश्चैतेषां संलक्ष्यते नृप ॥२५॥
दीपार्चिवद् धावतोऽस्य सर्वलोकस्य सर्वदा ।
कः कोऽयं वा कुतश्चेति किमर्थं कस्य केन वा ॥२६॥
कुतो नो वा कथं कस्य केन वा नेति कः किमु ।
इत्येते खलु सम्बन्धा भूतानां स्वांगकैरपि ॥२७॥
नैवं परस्परं शक्त्या ज्ञातुं गत्वरशालिनाम् ।
आदित्यात् किरणान्येव समिद्भ्यो वह्नयो यथा ॥२८॥
जायन्ते क्षणिका ये वै शक्यन्ते नैव निश्चितुम् ।
तथा सर्वे प्राकृता वै जन्तवः संहतात्मनः ॥२९॥
संघातरूपा जायन्ते म्रियन्ते च क्षणे क्षणे ।
आत्मा नित्यः शाश्वतोऽस्ति स्वस्थोऽसंघात एव सः ॥३०॥
स चेद् योगं समापन्नो विवेकी मुक्तवस्थितः ।
पश्यत्येव च संघातं गत्वरं शाश्वतं निजम् ॥३१॥
आत्मन्येवात्मनाऽऽत्मानं यदि त्वं स्वं प्रपश्यसि ।
अनात्मानं पृथग्भावं क्षणिकं चेत् प्रपश्यसि ॥३२॥
एवमेवाऽऽत्मनाऽऽत्मानं परात्मानं समस्तगम् ।
युक्तयोगाभिलाभेन शाश्वतं चेत् प्रपश्यसि ॥३३॥
तथैवात्मनि चान्यस्मिन् समतां चेद् व्यवस्यसि ।
अथ मां काऽसि कस्येति किमर्थमनुपृच्छसि ॥३४॥
इदं मे स्यादिदं नेति द्वन्द्वैर्मुक्तस्य ते नृप ।
काऽसि कस्मात् किमर्थं वा वचनैः किं प्रयोजनम् ॥३५॥
तथाप्यनभिसन्धाय पृथग्भावं च गत्वरम् ।
ऐक्यं देहेन सन्धाय प्रश्ने का त्वयि मुक्तता ॥३६॥
राज्ये शत्रौ च मित्रे च मध्यस्थे चाजये जये ।
ममाहंवेदिनि क्षत्रे त्वयि का नाम मुक्तता ॥३७॥
धर्मार्थकामनासक्ते फलसंगानुयायिनी ।
राजभावेन गर्विष्ठे का नाम त्वयि मुक्तता ॥३८॥
नरे नार्यां सुरूपे च कुरूपे भेदलोकिनि ।
देहभावेन संव्याप्ते का नाम त्वयि मुक्तता ॥३९॥
देहधर्मान् पुरस्कृत्य संगदोषाभिधायिनी ।
प्राकृतं भावमापन्ने का नाम त्वयि मुक्तता ॥४०॥
योगेन वर्तमानेऽपि चायोगेन विडम्बिने ।
प्राकृतं स्पर्शमापन्ने का नाम त्वयि मुक्तता ॥४१॥
ज्ञानस्य शेवधिस्त्वं वै भाषसे मां स्त्रियं कृतिम् ।
मत्वा वीक्ष्य च राजेन्द्र का नाम त्वयि मुक्तता ॥४२॥
प्राकृते प्राकृतो भावश्चेतने चेतनो हि सः ।
यस्य नास्ति समं चक्षुः का तस्मिन् मुक्तता त्वयि ॥४३॥
कुशलोऽयं चेतनोऽस्ति संघाते परिवर्तिते ।
राजन् विद्धि च मां दिव्यं चेतनं संगवर्जितम् ॥४४॥
का कस्य च कुतः केन किमर्थं देहसंगतम् ।
तद्भिन्नोऽहं भवाम्येषः पश्यात्मानं नरीस्थितम् ॥४५॥
द्रष्टुं चेच्छक्यसे नैवं संघाताऽऽवृत्तिमान् भवान् ।
तद्युक्तस्य ते मोक्षेऽभिमतिर्निष्फला नृप ! ॥४६॥
साधुभिः सन्निवार्या सा ह्यपथ्यभोजिनस्तव ।
यज्ज्ञात्वा वर्तने नास्ति ज्ञाने नास्ति ततस्तरम् ॥४७॥
व्यवहारे सुतरां नास्तीति किं योगजं फलम् ।
वृथा श्रमो वृथा मानं वृथा वाग्दूषणं तथा ॥४८॥
वृथा सत्संगयत्नश्च यदि देहं प्रपश्यसि ।
आत्मा नारी नरो नापि नपुंसको न चास्ति च ॥४९॥
त्वं तथाऽऽस्से च चेद् राजन् चेक्षसे न कथं परे ।
प्राकृतानि प्रसंवीक्ष्य पृथक्कृत्वाऽऽत्मतत्त्वतः ॥५०॥
सर्वत्राऽऽत्मानमापश्येत् किमन्यन्मुक्तलक्षणम् ।
संगस्थानानि सर्वाणि पश्येत् परात्मनि प्रभौ ॥५१॥
आत्मक्रीड आत्मरतिर्मुक्तस्यैव हि लक्षणम् ।
मोक्षे स्थितस्य संगाढ्यस्थानान्यपि च मे शृणु ॥५२॥
राज्याद् राष्ट्रस्य सामान्याद् राजधानी हि बन्धनम् ।
ततोऽपि राजसौधश्च सामान्यं बन्धनं हि तत् ॥५३॥
ततोऽपि स्वगृहं तत्र शय्या स्वीया हि बन्धनम् ।
साऽपि चाऽर्धा स्त्रीसहिता विना स्त्रियं न बन्धनम् ॥५४॥
स्त्र्यपि कामक्रियामात्रं बन्धनं न ततः परम् ।
तत्रापि वासना चेत् स्याद् बन्धनं संगमूलकम् ॥५५॥
धातुलाभे कारणं च भोजनं चौषधादिकम् ।
बन्धनं वै ततो राज्ञः सेवकादि च बन्धनम् ॥५६॥
एवं स्त्र्यादिप्रसंगेन फलेनापीह युज्यते ।
भोजनाच्छादनवस्त्राभूषणेषु च बन्धनम् ॥५७॥
निग्रहानुग्रहौ चापि राज्ञो भवतो बन्धने ।
पारतन्त्र्यं सदा राज्ञः स्वल्पकार्येऽपि मानतः ॥५८॥

भृत्यवश्यत्वमेवापि युद्धसन्धिषु सर्वथा ।
स्त्रीषु क्रीडाविहारेषु मन्त्रे चामात्यमण्डले ॥५९॥
परोक्तात्ह्यनुगामित्वं कुतो राज्ञः स्वतन्त्रता ।
मन्त्रिवशे स्थितश्चास्ते नेष्टं चाप्यवशश्चरेत् ॥६०॥
निद्रां काले न लभते व्यापृतः स्वार्थिभिर्जनैः ।
शयनेऽपि क्वचित् सुप्तश्चोत्थाप्यतेऽरिदूतकैः ॥६१॥
दासीभिश्च क्वचिन्नित्यं चाज्ञायां क्रियते वशः ।
उत्तिष्ठ स्नाहि संगृह्ण पिब प्राश ब्रवीहि च ॥६२॥
शृणु चागच्छ च पश्य विरमस्व रमस्व च ।
इत्येवं परतन्त्रोऽयं राजा संगवशः सदा ॥६३॥
याचकाश्च समायान्ति दातुं नोत्सहतेऽपि च ।
दाने कोषक्षये चिन्ता वैरं चादानके भवेत् ॥६४॥
रक्षणे सततं चिन्ता चिन्तासंगी नृपः सदा ।
राजा सर्वान् शंकते वै मृत्युभयेन नोदितः ॥६५॥
परस्परं भयवन्तो भवन्ति नृपतज्जनाः ।
सर्वः स्वे स्वे गृहे राजा सर्वः स्वे स्वे गृहे गृही ॥६६॥
निग्रहानुग्रहवन्तः सर्वे तुल्या गृहे गृहे ।
पुत्रा दारा गृहं चात्मा कोशो मित्राणि संचयाः ॥६७॥
सर्वेषां तुल्यभावास्ते संगदा बन्धनानि वै ।
हतो देशश्च ग्रामश्च दग्धो वाहो हतो मम ॥६८॥
धनं नष्टं च सस्यानि दग्धानि च हिमाग्निना ।
पक्षिभिर्भक्षितं क्षेत्रं चौरैर्हृताश्च धेनवः ॥६९॥
रोगैर्हतं भोजनं मे स्वतन्त्रता हताऽरिभिः ।
वाग्बाणाद्यैर्धर्षितोऽहं चोत्थापितो नृपासनात् ॥७०॥
इत्येवं संगभावैश्च मिथ्याज्ञानैर्हि तप्यते ।
नियन्तृजन्यदुःखैश्च मानसै रागरोषजैः ॥७१॥
रोगाऽवमानजन्यैश्च दुःखैर्वै परितप्यते ।
अमुक्तसंगः सततं प्रसह्य दुःखभोगवान् ॥७२॥
तदल्पसुखमत्यर्थं बहुदुःखमसारवत् ।
तप्तांगारासनं राज्यं कोऽभिपद्येत योगवित् ॥७३॥
ममेदं नगरं राज्यं मन्यसे धनमुत्तमम् ।
कस्त्वं कस्य धनं राज्यं नगरं वद चात्मवित् ॥७४॥
पाञ्चभौतिकदेहोऽयं तव वह्नौ प्रवेक्ष्यति ।
ममापि च तथा तत्र तुल्यता न विशेषता ॥७५॥
देहस्य संगधर्मस्याऽसंगो नास्ति कुतश्चन ।
आधाराधेयभावस्य प्राकृतस्य क्षयार्थिनः ॥७६॥
चेतनस्य त्वसंगस्य नास्ति संगः कुतश्चन ।
आधाराधेयशून्यस्याऽप्राकृतस्य सदा सतः ॥७७॥
वद राजन् समर्थोऽहं ज्ञाने वक्तुं सहस्रधा ।
स्त्रीदेहे नाभिषंगो मे कुतस्तव परिग्रहे ॥७८॥
न स्त्रीं मत्वा संगभावं व्यक्तं वक्तुं त्वमर्हसि ।
ननु नाम त्वया मोक्षः कृत्स्नः पत्नीव्रताच्छ्रुतः ॥७९॥
असंगश्चाप्यपाशस्त्वं कथं सक्तोऽसि राज्यके ।
श्रुतं ते निष्फलं सर्वं देहभावेन संवृतः ॥८०॥
श्रुतं वा निर्गतं कर्णात् शाठ्यमात्रेण वर्तसे ।
यद्वा नैव धृतं वा चार्चितं नैव त्वयाऽऽत्मना ॥८१॥
येन त्वं तिष्ठसे संगे लौकिके दैहिकेऽधुना ।
बद्धस्त्वं दृश्यसे चात्मन् प्राकृतो भिक्षुको यथा ॥८२॥
मयाऽऽत्मना प्रवेशश्च कृतस्त्वय्यात्मनि प्रभो ।
किं तवाऽपकृतं तत्र नित्यमुक्तस्य मे वद ॥८३॥
साधूनां शून्यवासित्वं नियमोऽस्ति सदा नृप ।
शून्ये प्रवेशमासाद्य मया किं तेऽत्र दूषितम् ॥८४॥
न बाहुभ्यां न चोरुभ्यां नांगैः स्पृशामि सर्वथा ।
मा वक्तव्यं सभायां वै त्वया मया शुभाशुभम् ॥८५॥
स्त्रीपुंसोः समवायाख्यं सदसद्वा कृतं मिथः ।
साधवो गुरवश्चैते त्वं च राजा गुरूत्तमः ॥८६॥
योगिषु योगिवादा वै न वक्तव्याः कदाचन ।
पद्मपत्रे जलं तिष्ठदसंगं तिष्ठते यथा ॥८७॥
तथा त्वयि निवत्स्यामि निःसंगेन निजात्मना ।
योगिवृत्त्या निवत्स्यामि चात्मलाभाधिसिद्धये ॥८८॥
यत्र वै साधवो धीरा यतयो योगपारगाः ।
परमेशपदारूढाः समूर्ता निवसन्ति वै ॥८९॥
तत्र वासं योगवृत्त्या क आत्मा नाऽभिवाञ्छति ।
यदि त्वयि मम वासे स्पर्शं जानासि चेन्नृप ॥९०॥
ज्ञानं कृतमबीजं ते सर्वं वै वाग्विभूषणम् ।
स गार्हस्थ्याच्च्युतस्त्वं वै मुक्तिस्थितिं न विन्दसि ॥९१॥
उभयोरन्तरालस्थो भवसीह विडम्बकः ।
नहि मुक्तस्य मुक्तेन ज्ञस्य ज्ञेन समागमे ॥९२॥
जायते धर्मसांकर्यं सधर्मयोर्हि योजनम् ।
सत्त्वेन सत्त्वयोगश्चात्मना योगस्तथात्मनः ॥९३॥
योगिना योगिनो योगस्तत्र संकरता न वै ।
ब्रह्मज्ञस्त्वं तथा राजन् ब्रह्मज्ञाऽहं सवर्णिका ॥९४॥
आवयोर्मेलने नैव वर्णसंकरता मता ।
ब्रह्मपुत्रीदेहवाँश्च ब्रह्मा वै सोमनाथके ॥९५॥
सोमनाथप्रतिष्ठार्थं चाहूतः शशिना पुरा ।
तदा यज्ञे समुत्पन्ना मानसी कुशला क्रिया ॥९६॥

सतीरूपाऽहमेवास्मि क्रियाख्या कुशलाभिधा ।
क्रतुर्यशस्तस्य पत्नी देहभावेन चेदृशी ॥९७॥
आत्मभावेन साध्वी च योगपारंगताऽस्मि च ।
तस्माद् राजन् भवाम्यत्र चात्मा नास्मि नरी विधा ॥९८॥
नात्राऽस्ति संकरः कश्चित् समभावागमे पुनः ।
मोक्षे ते भावितां बुद्धिं श्रुत्वा च कुशलैषिणी ॥९९॥
कुशला तव मोक्षस्य जिज्ञासार्थमिहाऽऽगता ।
सौराष्ट्रेऽत्राऽश्वरे क्षेत्रे चाश्वपट्टसरोवरे ॥१००॥
कृतस्थाना कुंकुमाख्यवाप्यास्तीरे वसामि च ।
एकरात्रिं शरीरे ते स्थित्वा यास्यामि मत्स्थलीम् ॥१०१॥
नाऽहं लुब्धे चिरं राजन् तिष्ठामि ब्रह्मयोगिनी ।
आतिथ्येनाऽऽत्मभावेन मानिता ज्ञानभोजनैः ॥१०२॥
अप्राप्य तुल्ययोगरथं श्वो गमिष्यामि मत्स्थलीम् ।
यत्र तुल्यगतिश्चास्ते लोमशो योगवित्तमः ॥१०३॥
स्वीयप्रकाशो भगवानात्मवित्तम इत्यपि ।
तत्रैकीभूय कुशला ब्रह्मानन्दं वहामि वै ॥१०४॥
राजन् धृतं मया रूपं कियद्योगबलं सभाम् ।
वीक्षितुं वीक्षितं सर्वै यत्राऽग्र्यो देहदर्शनः ॥१०५॥
इमे स्तब्धा हि मुनयो देहदर्शनयोगिनः ।
किमहं ते प्रवक्ष्यामि मा स्तब्धो भव भूपते ॥१०६॥
नैवं चात्मबलं राजन् वर्धते देहदर्शिनाम् ।
नात्मलाभो भवेच्चापि सदृशानां विहारिणाम् ॥१०७॥
न गार्हस्थ्याद् भवेन्मुक्तिश्चात्मरूपो न यावता ।
वर्तते मुक्तसंगो वै तावत्संसारलग्नता ॥१०८॥
आनर्त ! मा रुषं धेहि तथ्यं भक्षय पाचय ।
योगेश्वरतासिद्ध्यर्थं चाश्वपट्टसरो व्रज ॥१०९॥
स्वीयप्रकाशं योगीन्द्रं लोमशं योगिसद्गुरुम् ।
सन्तुष्टां योगिनीं देवीं संभजस्वाऽच्युतो भव ॥११०॥

**श्रीलोमश उवाच—**

इत्येवं वदमानां तां त्वानर्तो भूपतिस्तदा ।
नेमे वासार्हहृदयं ददौ तत्र समाधिना ॥१११॥
संवादं चात्मनोस्तत्र चाप्रातश्चक्रतुर्युभौ ।
ऋषयो ज्ञातभावाश्च स्वस्वस्थानं ययुस्ततः ॥११२॥
अश्वपाटल ! चानर्तो ज्ञात्वा नैजां हि निम्नताम् ।
कुशलातः परां काष्ठां विवेद सद्योगिनः ॥११३॥
ततस्तया समं प्रायादश्वपट्टसरोवरम् ।
यत्र पूर्णं योगबलं ह्यवाप्य लोमशान्मुनेः ॥११४॥
स्वस्य प्रकाशादात्मीयं बोधं प्राप्य महोत्तमम् ।
सन्तुष्टायोगिनीतश्च ब्राह्मीं स्थितिं प्रशिक्ष्य च ॥११५॥
आनर्तः प्रययौ नैजं चमत्कारपुरं प्रति ।
तस्माद् राजन् गृहस्थानां त्यागित्वं समपेक्षते ॥११६॥
यद्वा त्यागवतां योगान्मोक्षो हस्तगतो भवेत् ।
साधूनां संगमात् कृष्णनारायणो मिलेद् ध्रुवम् ॥११७॥
अपूर्णस्यापि पूर्णत्वं सर्वयत्ने समाप्यते ।
असन्न्यस्ता गृहस्था वै सन्न्यस्ता गुरुयोगतः ॥११८॥
प्रजायन्ते कुशलाया योगेनाऽऽनर्तको यथा ।
तादृशानां सतां योगाद् गृहस्थाः परमां गतिम् ॥११९॥
प्रयान्त्येव न सन्देहो मायालुब्धा अपि ध्रुवम् ।
इत्युक्त्वा राधिके श्रीमान् लोमशो मौनमावहत् ॥१२०॥
अश्वपाटलराजाऽपि श्रुत्वा तृप्तिं जगाम ह ।
तत्तीर्थं कुशलातीर्थं चानर्ततीर्थमित्यपि ॥१२१॥
योगितीर्थं चाश्वपट्टसरोजले प्रविद्यते ।
यत्स्नानाद् यद्वारिपानादात्मदर्शनमृच्छति ॥१२२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायाम् आनर्तराजेन सह ब्रह्मपुत्रीकुशलासाध्व्या विवादो गार्हस्थ्येऽपि त्यागात् साधुसमागमाद्वा मुक्तिरित्यादिनिरूपणनामाऽष्टपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५८ ॥

**श्रीकृष्ण उवाच—**

समाकर्णय राधे त्वं ततश्चाश्वनृपः पुनः ।
पप्रच्छ लोमशं यत् तत् प्रवदामि सतां हितम् ॥ १ ॥

**अश्वपाटल उवाच—**

गुरो ! स्वीयप्रकाशस्य निर्वेदः शाश्वताश्रयः ।
कथं व्यजायत तत्त्वनिश्चयश्चाकृतेर्हरेः ॥ २ ॥

**श्रीलोमश उवाच—**

ब्रह्मकल्लोलसंज्ञस्य पूर्वकल्पतपस्विनः ।
भक्तविप्रस्य पुत्रोऽभून्नाम्ना त्रिविक्रमः प्रभुः ॥ ३ ॥
श्रीहरेरवतारः स पुनः कल्पान्तरे हरिः ।
त्रिविक्रमो बभूवाऽयं प्रबलेः राज्यहृत् तदा ॥ ४ ॥
सोऽयं स्वर्णनदीतीरे ददर्शाऽमानवं नरम् ।
अकस्माद् हृदये योगे नारायणहृदस्थले ॥ ५ ॥

शंखचक्रगदापद्मधनुःशूलशरान्वितम् ।
ध्वजस्वस्तिकवज्रादिचिह्नदक्षकरान्वितम् ॥ ६ ॥
हसन्तं तेजसा व्याप्तं प्रसन्नं दीर्घनेत्रकम् ।
आजानुभुजमत्यर्थं चोज्ज्वलं श्रीसमन्वितम् ॥ ७ ॥
स्वीयप्रकाशो भगवान् स्वं ददर्श तदन्तरे ।
ब्रह्मरूपं वामनं त्रिविक्रमं प्रबलेर्गुरुम् ॥ ८ ॥
निजां मूर्तिं विलोक्यैव श्रीमन्नारायणे तदा ।
क्षणं मुमोह सहसा कोऽयं पृथङ् व्यचिन्तयम् ॥ ९ ॥
ततो दिव्यदृशा नैजं मूलं रूपं बुबोध सः ।
तुष्टाव श्रीकृष्णदेवं स्वामिनं परमेश्वरम् ॥१०॥
अन्तरात्मन् परात्मँस्त्वं सर्वावतारधारक ।
सर्वाविर्भावहेतुस्त्वं सर्वेषां हृदये स्थितः ॥११॥
सर्वं ते हृदये चास्ते ब्रह्माऽब्रह्ममयं वपुः ।
अहं पृथङ्निवासोऽस्मि चाऽपृथङ्वासवाँस्त्वयि ॥१२॥
त्वमेव परमं तत्त्वं कृपया मेऽक्षि गोचरः ।
गोचरे मम रूपं चाऽपरोक्षानुभवाञ्चितम् ॥१३॥
आत्मदर्शनमासाद्य परमात्मप्रदर्शनम् ।
उभदर्शनमासाद्य कृतकृत्योऽद्य संवृतः ॥१४॥
आज्ञां देहि कृपासिन्धो जगद्बन्धो जनार्दन ।
प्राप्य त्वां परमात्मानं प्राप्तव्यं नाऽवशिष्यते ॥१५॥
कृत्वा त्वद्योगमुद्यानं कर्तव्यं नावशिष्यते ।
इति स्तुतः प्रभुः श्रीशोऽनादिकृष्णनरायणः ॥१६॥
स्वीयप्रकाशमूर्तौ तं निजस्थायां ततोऽधिकम् ।
सर्वं संसारचक्रं च दर्शयामास चैक्यतः ॥१७॥
ईश्वरान् ब्रह्मपुरुषान् मुक्तान् धामान्यनेकशः ।
देवानृषीन् पितृगणान् देवेश्वराँश्च मानवान् ॥१८॥
उरगान् राक्षसान् दैत्यान् दानवानासुरानपि ।
पशून् पक्षिण एवापि स्थावरान् जडचेतनान् ॥१९॥
महाभूतानि सर्वाणि तत्त्वानि प्रकृतिं स्थिराम् ।
विकारान् देहभाजश्च दर्शयामास तल्लयान् ॥२०॥
एवं प्रदर्शयित्वैव तिरोभावं चकार ह ।
तदिदं चाऽपरोक्षं च ज्ञानं शाश्वतमात्मगम् ॥२१॥
प्रकाशयित्वा तस्मै वै हृदयेऽस्थापयद् ध्रुवम् ।
वरदानं ददौ तस्मै नित्यं तेऽस्तु प्रभामयम् ॥२२॥
ज्ञानं चेदं स्वतःप्रकाशाख्यं मास्तु तिरोगतम् ।
ततः आरभ्य देवोऽयं त्रिविक्रमः स्वतःप्रभः ॥२३॥
स्वतःप्रकाशयोगी च ख्यातो बभूव योगिषु ।
स चार्थयद् विलोक्यैव क्षेत्रं चाक्षरसंज्ञकम् ॥२४॥
हृदये हरिवासाढ्यं चाश्वपट्टसरोन्वितम् ।
निजवासार्थमत्यर्थं रूपं दिव्यं तथाविधम् ॥२५॥
तथास्त्विति प्राह कृष्णनारायणश्च तत्क्षणम् ।
दिव्यदेहोऽभवत्तत्र चतुर्भुजो नरायणः ॥२६॥
मानसः श्रीहरेः शिष्यो नित्यज्ञानाश्रयः सुतः ।
नारायणहृदे तत्र कृष्णनारायणेन वै ॥२७॥
साकं स्नात्वा ततस्तूर्णं कुंकुमवापिकास्थलीम् ।
प्राप योगेन वेगेन बलेन कृपया हरेः ॥२८॥
एवं जन्मान्तरं देहान्तरं वृत्त्यन्तरं तथा ।
कायाकल्पं ह्यवापासौ पुत्रत्वं मुक्तसंज्ञया ॥२९॥
अवतारस्वरूपेण विष्णुरूपेण सर्वदा ।
अनादिश्रीकृष्णनारायणमानसजाकृतिम् ॥३०॥
दिव्यामवाप्य सततं जातमात्रो नरायणः ।
धर्मवैराग्यसम्पन्नो भक्तः षोडशहायनः ॥३१॥
बभूव कुंकुमे क्षेत्रे प्रभुः कुंकुमवर्णकः ।
नैसर्गशेवधिः सर्वविद्यानां स बभूव ह ॥३२॥
सार्वज्ञ्याश्रय एवापि सर्वैश्वर्यसमन्वितः ।
सर्वकल्याणकर्ताऽसौ योगिधर्मपरायणः ॥३३॥
सर्वातिरेककार्यश्च सर्वातिरेकवर्णनः ।
विचचाराऽक्षरे क्षेत्रे तस्मै कृष्णनरायणः ॥३४॥
अन्वशात् सकलान् धर्मान् गुरुपूर्वीप्रसिद्धये ।
लौकिकान् वैदिकाँश्चापि मानसाँश्च तदुत्तरान् ॥३५॥

श्रीकृष्णनारायण उवाच—

पुत्र त्वं सात्त्वतान् धर्मान् निषेवस्व हितावहान् ।
प्राणं जय सहस्वाऽपि क्षुत्पिपासे हिमातपौ ॥३६॥
जित्वेन्द्रियाणि तपसा सत्यं दमं प्रपालय ।
अद्रोहमनसूयां चाऽऽर्जवं शीलं प्रपालय ॥३७॥
देवपित्रतिथिप्राप्तशेषान्नयात्रिकां हव ।
भज कृष्णं परेशं मां मा स्वपिहि तमोमये ॥३८॥
फेनबुद्बुदवत्स्थैर्ये चेतनाश्रितगत्वरे ।
आकस्मिकेऽज्ञवत्पुत्र मा विश्वासं विधेहि वै ॥३९॥
अप्रमत्ता विनिद्राश्च नित्ययत्ना हि शत्रवः ।
छिद्रं पश्यन्ति देहेऽस्मिन् मा त्वं तैर्धर्षितो भव ॥४०॥
दिवसाः क्रमशो यान्ति कृन्तन्ति वै जनायुषम् ।
जीवनं क्षीयते नित्यं गुरुं शरणमात्रज ॥४१॥
अज्ञाश्चेच्छन्ति देहार्थैर्मांसशोणितवर्धनम् ।
यदन्ते गत्वरं सर्वं प्रसुप्ता मोक्षसाधने ॥४२॥

मा तन्मात्रेण पुत्र त्वं प्रयाहि प्राकृतो यथा ।
प्रान्तदुःखैकमात्रेण याम्यभवनवाहिना ॥४३॥
याहि सतां वृषस्थानां योगिनां च महात्मनाम् ।
धर्म्यं पन्थानमेवात्तं मोक्षदं चाक्षरान्तगम् ॥४४॥
उपास्स्व ततः सम्यक् पृच्छ धारय तद्वचः ।
मनोमन्थं सन्नियच्छ स्थैर्यमावह सत्पतौ ॥४५॥
धर्मं निःश्रेणिकां धृत्वा चारुह्य भक्तिभूमिकाम् ।
आत्मनिष्ठाप्रवेगेण याहि धाम सनातनम् ॥४६॥
वामतः कुरु विप्रेन्द्र नास्तिकान् भक्तिवर्जितान् ।
आशां तृष्णां रुषं मोहं त्यज पुत्र च दूरतः ॥४७॥
नावं योगं समालम्ब्य तर संसारवारिधिम् ।
लोकोऽयं मृत्युना नीतो जरया मर्दितोऽमितः ॥४८॥
वहत्येव वैतरण्यां ज्ञानपोतेन तं तर ।
तिष्ठन्तं वा वहन्तं वा पिबन्तं शयने गतम् ॥४९॥
मृत्युरन्वीक्षते मर्त्यं मा त्वं तत्करगो भव ।
सञ्चिन्वानं सुखार्थांश्चाऽतृप्तं लुब्धं च मानिनम् ॥५०॥
अनिर्वृत्तं विभ्रमर्चं गर्विष्ठं च विमार्गगम् ।
आकस्मिकगतिर्मृत्युः सुप्तमादाय गच्छति ॥५१॥
अन्धकारमयः कोष्ठो ब्रह्माण्डोदरनामकः ।
तद्बहिर्गमनार्थं त्वं दीपं ज्ञानं प्रधारय ॥५२॥
अनेकदेहचक्रेषु गच्छत्सु निष्फलेषु वै ।
दिव्यपुण्येन ब्राह्मण्यं प्राप्तं ब्रह्ममयं वह ॥५३॥
ब्रह्मदेहो महान् श्रेयान् क्षुद्रकामाय नोचितः ।
मोक्षाय धर्मलाभाय तपसे श्रेयसे मतः ॥५४॥
अमूल्यस्तादृशो मणिश्चिन्तितार्थफलप्रदः ।
हेलनीयो न निर्मूल्यः क्षुद्रा कपर्दिका यथा ॥५५॥
गूहते मुखमुपरिष्टादन्तरे कामसंभृता ।
लज्जां प्रदर्शयत्यस्मै भोक्त्रे परजनान्तिके ॥५६॥
अन्तर्विषामृतव्याप्ता बन्धयितु च तत्परा ।
यतते निजलाभार्थे भुक्त्वा दुःखाकरोति च ॥५७॥
त्यजन्तं न त्यजत्येषा याति स्थानान्तरं सह ।
तिरस्कृताऽपि संलग्ना वासनामूलबन्धना ॥५८॥
निरयाख्या स्वसौधेषु वासयत्यतिथिं चिरम् ।
प्रमत्तं मद्यपानेन पश्य मायाविचेष्टितम् ॥५९॥
को नु तत्र भवेद् बद्धो रक्तो वा दिव्यनेकत्रः ।
सुपात्रतां देहसंलग्नां माऽनुप्रसर कर्हिचित् ॥६०॥
देहः कर्मावनद्धश्च पुनः कर्माभिसर्जकः ।
कामनाशेवधिः कोषो मा तं नैजं निशामय ॥६१॥
यत्र राजभयं चास्ते यत्र चौरभयं तथा ।
तद्विहाय धनं दिव्यं पाथेयं चार्जयस्व ह ॥६२॥
परत्र जीव्यते येन न च क्वापि वियुज्यते ।
ध्रुवं तदक्षरं द्रव्यं समर्जयस्व पुत्रक ॥६३॥
माता पिता सुहृद् बन्धुः संकरे नानुयान्ति हि ।
कर्मैकं केवलं याति नैष्कर्म्यं तत्समाचर ॥६४॥
हिरण्यसञ्चया राज्यं दासा दास्यः प्रजाः प्रियाः ।
देहक्षये निवर्तन्ते प्रभुं सहचरं भज ॥६५॥
साक्षिणं चान्तरस्थं वै ब्रह्मानन्दप्रदं प्रभुम् ।
उद्धारकं मोदनिधिं परमेशं सदा भज ॥६६॥
गृहस्थधर्मिणो लोकाः प्रजापतेर्बृहस्पतेः ।
शतक्रतोश्च लोकान् संव्रजन्ति त्वान्तनाशिनः ॥६७॥
मा त्वं वृत्तिं समाधत्स्व गार्हस्थ्ये ब्रह्मपुत्रक ।
निर्भयं च निरन्तं च निधिं ब्रह्मव्रतं वह ॥६८॥
असंगो दिव्यदृष्टिस्त्वं ब्रह्मणः सन्निधिं कुरु ।
समर्प्य परमे कृष्णे मयि कर्म समस्तकम् ॥६९॥
नैर्गुण्यं परमं भुञ्जन् भव मुक्तोऽक्षरे यथा ।
ग्रामवासो बन्धनं वै तच्छित्त्वा वनमाविश ॥७०॥
किं ते धनेन सुहृदा बन्धुना च सुतेन च ।
स्वतःप्रकाशो भूत्वैव स्वीयं प्रकाशं संभज ॥७१॥
म्रियमाणान् समानाँश्च विलोक्य जगति स्थितान् ।
मरिष्यतश्च सञ्चिन्त्याऽन्विच्छाऽऽत्मानं गुहागतम् ॥७२॥
शुभं शीघ्रं प्रकुर्वीत श्वः कार्यं चाद्य वै द्रुतम् ।
क्षणान्तरे न जाने यन्मृत्युरादाय यास्यति ॥७३॥
मृत्युशिखे हि संसारे महाकालस्य भक्षणे ।
गुर्वाश्रये विवेकी सन् मोक्षं सर्वात्मना व्रज ॥७४॥
मरणं चात्मनो मोक्षस्तमेव साधय प्रधे ।
विद्वान् मोक्षार्जनपरस्तद्धीनो जडवर्गगः ॥७५॥
स्वर्गसोपानकं वर्ष्म मानुष्यं दुर्लभं त्विह ।
तेन साधय मोक्षोयं चानन्तं शाश्वतं सुखम् ॥७६॥
यस्य मतिर्मोक्षमार्गादन्यत्र नैव धावति ।
स एव पुण्यकर्माऽस्ति चाशोच्यः सर्वमानवैः ॥७७॥
मोक्षार्थं यन्मतिः शुद्धा दृढा चारब्धतत्कृतिः ।
अन्यभावादिरिक्ता च न तस्य कालतो भयम् ॥७८॥
हतस्य पुण्यपापैश्च लुब्धस्य विषयात्मनः ।
स्नेहसम्बन्धमग्नस्य विद्यते कालतो भयम् ॥७९॥
मातापितृसहस्राणि पुत्रदाराऽयुतानि च ।
अतीतानि गते काले कस्य ते कस्य चाऽप्ययम् ॥८०॥

एकोऽहं त्वात्मसंज्ञोऽस्मि त्वं चात्मा चैकलः स्वयम् ।
अन्येऽन्यत्र गताः सन्ति पश्यन्त्येते न वै मिथः ॥८१॥
न तेषां भवतां कार्यं न कार्यं तव तैरिह ।
स्वकर्मभिर्गतान्येव त्वं स्वकृत्यैर्गमिष्यसि ॥८२॥
लोकोऽयं स्वार्थबहुलः स्वार्थस्निग्धः स्वयोगकृत् ।
स्वार्थे प्रसाध्य सहसा त्यजन्ति निर्गुणं जनम् ॥८३॥
समृद्धानां धनिनां हि विजनः स्वजनायते ।
दरिद्राणां निर्धनानां स्वजनो विजनायते ॥८४॥
कलत्रयोगमासाद्य जनोऽशुभं चिनोति च ।
ततः क्लेशभृतं जन्म पुनर्दुःखं पुनर्जनिम् ॥८५॥
एवमावर्तमग्नस्य वासनाप्रेरितस्य च ।
मध्यसागरभागाद्धै तीरयानं न जायते ॥८६॥
तत्पुत्र धर्ममासाद्य वैराग्यसहचारवान् ।
ज्ञानदीपातिनेत्रश्च भक्त्या याहि परं पदम् ॥८७॥
कालः पचति भूतानि कटाहे मोहसंज्ञिते ।
सूर्याग्निना दिवाकाष्ठैर्मासर्तुदर्विकादिभिः ॥८८॥
नात्र त्रातारमीक्षेऽहमीक्षसे त्वं न नेतरः ।
न तं पश्यामि यस्याऽहं न तं पश्यामि यो मम ॥८९॥
तस्मात् सदा परेशं श्रीपतिं श्रीपरमेश्वरम् ।
कर्मभूमौ भजस्वात्र येन धामाऽक्षरं व्रजेः ॥९०॥
किं जन्मना च देहेन ज्ञानेन च वृषेण च ।
तपसा वनवासेन येन मोक्षो भवेन्न चेत् ॥९१॥
अश्वपाटल इत्युक्तः स्वतःप्रकाश एव ह ।
अनादिश्रीकृष्णनारायणोक्तं चावधार्य च ॥९२॥
दधौ मोक्षे मनो नित्यं ब्रह्मचर्ये वसन् सदा ।
क्वचिद् दृश्यः क्वचिच्चाऽप्यदृश्योऽवर्तत वै क्षितौ ॥९३॥
कुंकुमवापिकाक्षेत्रे दिव्यदेहोऽतिभासुरः ।
चिरञ्जीवो महामुक्तश्चातिमानववर्तनः ॥९४॥
सर्वसंगवियुक्तश्च ब्रह्मसंगमुपागतः ।
द्वेधा भूत्वैकदेहेन ययावक्षरमुत्तमम् ॥९५॥
अपरेण सदा चास्ते क्षेत्रेऽत्राऽक्षरसंज्ञके ।
अनादिश्रीकृष्णनारायणे भावपरायणः ॥९६॥
सर्वविद्याश्रयो भक्त्याचार्यो ज्ञाननिधिः प्रभुः ।
चतुर्भुजो द्विभुजो वा यथेष्टानन्दशेवधिः ॥९७॥
राजंस्तत्त्वं मम योगाज्ज्ञानमासाद्य सत्वरम् ।
भजैनं परमात्मानं दिव्यदेहो भवाऽत्र च ॥९८॥
तीर्थं स्वतःप्रकाशाख्यं चाश्वसरोजले हि तत् ।
वर्तते दिव्यतादात्म्यं स्नानपानादिभिर्नृप ॥९९॥
एतज्ज्ञानं समासाद्य मुक्तता स्यान्न संशयः ।
सर्वविद्याप्रकाशश्च भवेदात्मप्रकाशिता ॥१००॥
देवप्रकाशिता स्याच्च चिच्चैतन्यप्रकाशिता ।
पुत्र ज्ञानेन यन्नैव धर्मेण तपसाऽपि च ॥१०१॥
प्राप्यते तल्लभ्यते वै गुरोः प्रसादलेशतः ।
इत्युक्त्वा राधिके श्रीमान् लोमशो विरराम ह ॥१०२॥
अथ राजातिसन्तृप्तो हरिं स्वे हृदि संस्मरन् ।
कृतानां फलविषये पप्रच्छ स्वादकर्षितः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां ब्रह्मकल्लोलात्मजस्याऽनादिश्रीकृष्णनारायणोपदेशजन्यपावनाध्ययनं मोक्षस्थितिश्चेति नवपञ्चाशदधिकद्विशततमोऽध्यायः ॥ २५९ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके श्रीमानश्वपाटलभूपतिः ।
लोमशं यत्पुनश्चापि पप्रच्छ सुखसाधनम् ॥ १ ॥

**अश्वपाटल उवाच—**

दत्तमिष्टं तपश्चापि गुरोः शुश्रूषणादिकम् ।
योगिनाऽपि कृतं मोक्षे निष्फलं वा फलप्रदम् ॥ २ ॥

**श्रीलोमश उवाच—**

राजन् कृतं कदाचिन्न निष्फलं चेह लीयते ।
फलं भुक्त्वैव सहसा लीयते योगिनामपि ॥ ३ ॥
सर्वेषां फलभोगोऽस्ति कर्मणां सर्वसृष्टिषु ।
दाने कृते न वै तत्र भोगो दातुर्भवेदिति ॥ ४ ॥
सर्वकर्माणि देयानि चार्पणीयानि सत्पतौ ।
पुण्यं वा यदि वा पापं चार्पितं नैव भुज्यते ॥ ५ ॥
हरावर्पितमेवैतन्नैर्गुण्यं समपद्यते ।
अर्पणस्य फलं तत्र हरेः प्रसन्नता भवेत् ॥ ६ ॥
तया भक्तस्याऽर्पयितुर्लब्धिर्हरिश्रितात्मता ।
हरेर्धाम्नि निवासः स्यान्मोक्षाऽऽनन्दः फलं मतम् ॥ ७ ॥
प्राकृतं कर्म कृष्णे चेद् दत्तं फलमप्राकृतम् ।
कृष्णाऽनर्पितमेतद्धै भुज्यते चेश्वरादिषु ॥ ८ ॥
देवेषु मानवेष्वन्ययोनिभूच्चावचादिषु ।
कलुषं नीयते क्लेशे कर्तारं प्राप्तकालिकम् ॥ ९ ॥
दारिद्र्याच्चापि दारिद्र्यं रोगाद् रोगं भयाद् भयम् ।
दुर्भिक्षादेव दुर्भिक्षं यान्ति वै पापिनो मुहुः ॥ १० ॥

स्मृद्धेः स्मृद्धिं प्रमोदाच्च प्रमोदं च दिवो दिवम् ।
सुखात् सुखं प्रयान्त्येव पुण्यकृतो महोत्सवान् ॥११॥
अदातारो हस्तहीना व्यालाः सरीसृपादयः ।
जायन्ते तामसा नैजनास्तिक्यफलदेहिनः ॥१२॥
दातारो देवता वा च साध्याः स्थानिन ईश्वराः ।
प्रियदेवाऽतिथिविप्रसाधवः संभवन्ति वै ॥१३॥
अदातारो जना लोके धान्येषु पुलका इव ।
गजभुक्तकपित्था वा पूत्यण्डा इव पक्षिषु ॥१४॥
येषां धर्मो न चास्तिक्यं न दानं नाप्युपकृतिः ।
उदरं भरिणस्ते वै प्राप्स्यन्ति नोत्तरं नवम् ॥१५॥
भुंजते पापमेवाऽत्र स्वोदरंभरिणो जनाः ।
अदत्तेभ्यो न दास्यन्ति चान्ये चान्येषु जन्मसु ॥१६॥
श्वेताख्यो नृपतिः स्वर्गे न लेभेऽन्नं जलं तथा ।
यदत्र नैव दत्तं वै दाने मत्वाऽल्पकं हि तत् ॥१७॥
दत्तं स्वर्णहीरकादि यानं वाहनमित्यपि ।
तत्सर्वं तेन लब्धं वै स्वर्गे नाऽन्नं नवा जलम् ॥१८॥
क्षुधितश्च ततः स्वर्गादागत्य स्वशवोद्भवम् ।
भस्मलेहं विधायैव तृप्त्यर्थं यत्नमाचरत् ॥१९॥
तं दृष्ट्वा नारदेनापि तदर्थं श्राद्धमुत्तमम् ।
तत्पुत्रैः कारितं चान्नजलदानादिकं बहु ॥२०॥
ततस्तृप्तिमवापाऽसौ राजा श्वेताभिधः खलु ।
तस्माद् राजन् कर्मभूमौ दत्तं सर्वमवाप्यते ॥२१॥
नाऽदत्तं प्राप्यते क्वापि तस्माद् देयं विधानतः ।
कृतं कर्म सितं कृष्णं धावन्तमनुधावति ॥२२॥
तत्तदेवोत्तरं भुक्तं लग्नं छायेव चात्मनः ।
कर्मावृतं सविक्षेपं समिच्छन्तं सुखायतिम् ॥२३॥
विविधं भूतसंघातावृतं कालोऽपकर्षति ।
नैसर्गिकानि पुष्पाणि फलानि शाखिनं यथा ॥२४॥
तथा कालेन तिष्ठन्ति कृतकर्माणि देहिनः ।
तत्फलं च सुखं दुःखं लाभाऽलाभौ क्षयाऽक्षयौ ॥२५॥
मानावमाने दारिद्र्यस्मृद्धी चोत्सवशोचने ।
आमृत्यन्तं प्रवर्तन्ते निवर्तन्ते न ताडिताः ॥२६॥
आत्मना चार्जितं कष्टं गर्भशय्यादिकं ततः ।
पुनः कृतं कृतं पूर्वं सर्वं भुंक्ते क्रमात् क्रमात् ॥२७॥
यथा वत्सः स्वकां धेनुसहस्रेष्वपि मातरम् ।
मार्गयत्येव कमाऽपि स्वकर्तारं प्रपद्यते ॥२८॥
क्षारेण वस्त्रमालिन्यं सवारिणा विशीर्यते ।
तपसाऽऽन्तरमालिन्यं सधर्मेण विलीयते ॥२९॥
जले मत्स्यपदं नैव दृश्यते च तपस्विनि ।
तथा कर्मपदं नैव भासते ज्ञानशेवधौ ॥३०॥
अलमप्राप्तकरणैरलं कठिनसाधनैः ।
गुरोः शुश्रूषणेनैव सर्वा सिद्धिः करे स्थिता ॥३१॥
तपसेन्द्रियरोधेन सिद्धिमाप्नोति यादृशीम् ।
ततः सहस्रगुणितां योगेनाऽऽप्नोति मानवः ॥३२॥
ततश्चाऽयुतगुणितां प्राप्नोति कृपया गुरोः ।
अश्वमेधसहस्रादिफलं योगकलानिभम् ॥३३॥
योगं विना विना ज्ञानं विना विज्ञानमित्यपि ।
गुरोः सेवां विना चापि राजन् मोक्षो हि दुर्लभः ॥३४॥
गुरोर्ज्ञानं समासाद्य संसेव्य गुरुमुत्तमम् ।
भक्तिं कृत्वा हरेस्तूर्णं मोक्षं परममाप्नुयात् ॥३५॥
ज्ञानविज्ञानशुद्धात्मा गुर्वाशीर्वादपेटिका ।
भूत्वा ब्रह्मवती चापि मोक्षं शीघ्रमवाप्नुयात् ॥३६॥
प्रथमे त्वाश्रमे शीली गुरोर्वै कृपया द्रुतम् ।
मोक्षमासादयत्येव किमन्याश्रमयत्नकैः ॥३७॥
राजसाँस्तामसान् भावान् हित्वा ब्रह्मव्रताश्रमे ।
सत्त्वमार्गं समास्थाय पश्येदात्मानमात्मना ॥३८॥
सर्वात्मभूतमात्मानं परेशं चात्मनि स्थितम् ।
वीक्ष्य सर्वस्थितं तं च कर्मबन्धं प्रहापयेत् ॥३९॥
अब्धिं मेघा विहायैव यथा यान्ति स्थलीं प्रति ।
मुक्तास्तथा भुवं हित्वा यान्ति ब्रह्मस्थलीं प्रति ॥४०॥
ज्योतिरात्मनि संयुक्तं सर्वदेहेषु राजते ।
तपसा शक्यते द्रष्टुं भक्त्या च कृपयाऽपि च ॥४१॥
स्वस्माद् भयं परेषां न परेभ्यः स्वस्य नो भयम् ।
द्वेषरागविहीनस्य परब्रह्म प्रकाशते ॥४२॥
पापभावविहीनस्य ब्रह्मभावयुतस्य ह ।
आत्मनिष्ठास्थितस्यैव परब्रह्म प्रकाशते ॥४३॥
आत्मानं श्रीहरौ युक्त्वा त्यक्त्वा मायां तु मोहिनीम् ।
ब्रह्महृदे निमग्नस्य परब्रह्म प्रकाशते ॥४४॥
बाह्ये तथाऽऽन्तरे स्वाद्ये समवृत्तिमुपागतः ।
विषमेऽपि समश्चास्ते ब्रह्म सम्पद्यते तदा ॥४५॥
स्तुतिं निन्दाम् अयः स्वर्णं सुखदुःखे प्रियाऽप्रिये ।
अर्थाऽनर्थौ च शीतोष्णे जीवनं मरणं तथा ॥४६॥
नैजं परं जडं चैत्यं बाह्यमान्तरमित्यपि ।
यदेक्षेत समत्वेन ब्रह्म सम्पद्यते तदा ॥४७॥
तमोव्याप्तं गह्वरं च यथा पश्येत् स्वतेजसा ।
तथाऽऽत्मज्ञानदीपेन ब्रह्म शक्यं निरीक्षितुम् ॥४८॥

नास्ति ज्ञानसमं चक्षुर्नास्ति ब्रह्मसमं गृहम् ।
नास्ति तृष्णासमं दुःखं नास्ति तोषसमं सुखम् ॥४९॥
वासनाया विनिर्वृत्तिः सततं ब्रह्मशीलता ।
साधुवृत्तिः सतां सेवा श्रेय एतत् प्रमोक्षदम् ॥५०॥
संगी भूत्वा यदि कश्चिन्मन्येताऽहं सुखीति च ।
नाऽयं सुखीति मन्तव्यः संगो हि दुःखसंभृतः ॥५१॥
सक्तस्य बुद्धिश्चलति मोहजालं तनोति च ।
जालबद्धस्य परितो दुःखोपदा मिलन्ति वै ॥५२॥
श्रेयोघातकरौ चोभौ कामक्रोधौ हि देहिनः ।
रागद्वेषात्मकौ तौ च दोषौ निरयदौ मतौ ॥५३॥
आत्मानं सततं रक्षेत् ताभ्यां समाहितः शुभः ।
ताभ्यां हीनः सदा साधुस्ताभ्यां हीना सती तदा ॥५४॥
ययोस्त्यागे महाँस्त्यागः सर्वत्यागी स जायते ।
ताभ्यामसज्जमानो यः स चाप्नोत्यक्षरं पदम् ॥५५॥
ताभ्यां हीनो भूतहीनः संघातकर्षणोज्झितः ।
स विमुक्तः परंश्रेयो न चिरेणाऽतितिष्ठति ॥५६॥
अकैंचन्यं सुसन्तोषो निराशीस्त्वमचापलम् ।
एतत्प्रोक्तं श्रेय एव तेनाऽऽप्नुयात्परं पदम् ॥५७॥
परिग्रहे भवेच्छोकस्तच्छून्ये शोचनं कथम् ।
निर्गुणं नाश्रयन्तेऽभिजनाः पौराश्च राष्ट्रजाः ॥५८॥
विज्ञाय निर्गुणं शान्तं कान्ताऽपि विमनायते ।
मायापि निर्गुणं शान्तं त्यक्त्वा संगं विलीयते ॥५९॥
निरामिषं न वल्गन्ति सामिषा रागिणोऽम्वरे ।
उदासीनं न भाषन्ते भाषयन्त्यपि नैव च ॥६०॥
प्रज्ञातृप्तं ज्ञानतृप्तं ब्रह्मानन्दपरिप्लुतम् ।
भ्रममोहसुखा लोकास्त्यजन्ति च विच्चित्तवत् ॥६१॥
अन्तो नास्ति पिपासायास्तुष्टिर्वै परमं सुखम् ।
प्रज्ञासन्तोषमासाद्य ब्रह्मानन्दप्लुतो भवेत् ॥६२॥
अध्यात्मकुशलैर्वासं व्यवहारं च योगिभिः ।
मैत्रीं ब्रह्मविदां श्रेष्ठैः कृत्वा ब्रह्मसुखं लभेत् ॥६३॥
सर्वथा राजसा लोकास्तामसाश्चार्धसात्त्विकाः ।
गुर्वाशीर्वादरहिता दृश्यन्ते निरयार्हणाः ॥६४॥
वञ्चनायां कृतवासा हिंसायां कृतमानसाः ।
अनादृत्य गुरुं धर्मं जीवन्ते निरयाय तैः ॥६५॥
पूर्णसात्त्विकवर्गेषु श्रीः कंचिदुपतिष्ठते ।
यत्र नारायणवासस्तत्र सिद्धिः प्रमोक्षणम् ॥६६॥
उपर्युपरि लोकस्य सर्वो गन्तुं समीहते ।
यतते भिन्नमार्गेण न च याति यथेष्टकम् ॥६७॥
तस्माद् राजन् योगमार्गं हरेर्मार्गं परात्परम् ।
समालम्ब्य प्रयातव्यं कृपापाथेययोगिना ॥६८॥
न तु योगमृते शक्यं प्राप्तुं ब्रह्म सनातनम् ।
विना योगं कर्मबन्धः क्षेप्तुं शक्योऽपि नैव च ॥६९॥
राजन् कृष्णे चित्तवासो योगः परममोक्षदः ।
राजन् कृष्णे चात्मवासो मुक्तिः सा शाश्वती मता ॥७०॥
नरो नारायणश्चापि हरिः कृष्णश्च धर्मजाः ।
भ्रातरोऽपि परब्रह्म ध्यात्वा तन्मयतां गतः ॥७१॥
कपिलः ऋषभो दत्तः सनकाद्याश्च नारदः ।
पृथुश्च वामनः पर्शुरामो रामादयस्तथा ॥७२॥
श्वेतव्यासादयश्चान्ये ब्रह्मविष्णुमहेश्वराः ।
साधयित्वा परब्रह्मयोगं तन्मयतां गताः ॥७३॥
निर्वाणं सर्वधर्माणां निवृत्तिः परमा मता ।
अनादिश्रीकृष्णनारायणेऽर्पिता क्रिया हि सा ॥७४॥
श्रीर्लक्ष्मीः कमला राधा भूर्लीला पार्वती सती ।
रमा कृष्णा माणिकी च गंगा दुर्गा सरस्वती ॥७५॥
रमा जया च विरजा ब्रह्मप्रियादिकाश्च याः ।
साधयित्वा परब्रह्मयोगं तन्मयतां गताः ॥७६॥
यज्ञः प्रवृत्तिरूपोऽस्ति परे देवे समर्पितः ।
निवृत्तिरूप एवाऽयं त्वया राजन् विनिर्मितः ॥७७॥
तेन त्वं सर्वयज्ञानां फलं वै लब्धवान् परम् ।
यदत्राऽऽगत्य भगवाननादिश्रीनरायणः ॥७८॥
प्रातरेव ददौ तुभ्यं दर्शनं परमेश्वरः ।
देवाः सर्वे हरौ तृप्ते तृप्तास्तवाऽध्वरे नृप ॥७९॥
कृतकृत्यो भवस्यद्य पुरुषार्थचतुष्टये ।
स्वस्ति तेऽस्तु च लोकानां सेवाधर्मजुषां सदा ॥८०॥

**अश्वपाटल उवाच—**

कथं यज्ञेष्वग्रहरो भगवान् समजायत ।
कथं यज्ञे च भागार्हा देवता हरिणा कृताः ॥८१॥

**श्रीलोमश उवाच—**

यथावृत्तं हि कल्पादौ सृष्ट्यारम्भे च तच्छृणु ।
देवता ब्रह्मणा सार्धमृषयश्च तपोधनाः ॥८२॥
तेजोवृद्धीच्छया जग्मुः क्षीरोदोत्तरगं तटम् ।
तपश्चक्रुश्चोर्ध्वदृष्टिवाहवश्चैकपस्थिताः ॥८३॥
सहस्रवत्सरान्ते ते शुश्रुवुश्चाम्बरीं गिरम् ।
भोभोः सब्रह्मका देवाः ऋषयश्च तपोधनाः ॥८४॥

प्रवृत्तिकार्ये कर्तव्यं युष्मद्बलाभिवर्धनम् ।
ममाराधनतपसः फलं भोक्ष्यथ चोत्तमम् ॥८५॥
यूयं सर्वे यजध्वं मां कल्पयध्वं ममांशकम् ।
अध्वरे च भजध्वं मां मत्सेवा हि बलप्रदा ॥८६॥
राजँस्ते भुवमागत्य कृष्णमणिजनुं शुभाम् ।
सुराष्ट्राख्यां मखं चक्रुश्चात्र यत्र त्वया कृतः ॥८७॥
अहमासं तदा त्वत्र महर्षिमण्डले नृप ।
प्रथमोऽत्र क्रतुर्दिव्यो देवादिभिः कृतस्तदा ॥८८॥
वेददृष्टेन विधिना वैष्णवः सार्वमेधिकः ।
तत्र सत्रे स्वयं ब्रह्मा हरेर्भागमकल्पयत् ॥८९॥
देवा देवर्षयश्चापि हरेर्भागानकल्पयन् ।
स्वस्वभागेर्दधुः सर्वे यज्ञाय परमात्मने ॥९०॥
ते कार्तयुगधर्माणो भागा दिव्यास्तदाऽभवन् ।
अर्पिताः श्रीहरौ सर्वे ब्रह्मरूपास्तदाऽभवन् ॥९१॥
ते भागा मुक्तपुरुषा अस्तुवन् परमेश्वरम् ।
आदित्यवर्णं तमसः परस्तात् पुरुषोत्तमम् ॥९२॥
वरदानाय देवेभ्यस्ततः स वरदो हरिः ।
अशरीरोऽम्बरे स्थित्वा बभाषाऽश्वसरोऽन्तिकम् ॥९३॥
येन यः कल्पितो भागः स सर्वो मामुपागतः ।
प्रसन्नोऽहं वरं वोऽत्र ददामि बलदायकम् ॥९४॥
यूयं सर्वे स्वयं यज्ञैर्यजमानाः सुदक्षिणैः ।
युगे युगे भविष्यध्वं प्रवृत्तिफलभागिनः ॥९५॥
भवद्यज्ञानुसारेण ये यक्ष्यन्ति परे जनाः ।
भवद्भागान् कल्पयित्वा ते यास्यन्ति फलं परम् ॥९६॥
दीयमानांश्च वो भागान् तान् यूयं समवाप्स्यथ ।
युगे युगे भविष्यध्वं प्रवृत्तिफलभागिनः ॥९७॥
प्रवृत्तिर्निवृत्तिरूपा मय्यर्पिता भविष्यति ।
यथा भवद्भिर्ये भागाः कल्पिताश्चात्र ते तथा ॥९८॥
भागा भागप्रदातॄणां कल्प्यन्ते त्वध्वरे मया ।
यूयं लोकान् भावयध्वं यज्ञभागफलप्रदाः ॥९९॥
मम भागफलं प्राप्य बलं यूयं मखे सुराः ।
मुहुश्चाप्यायितबला लोकान् वै धारयिष्यथ ॥१००॥
यूयं वै भाविता यज्ञैः सर्वयज्ञेषु मानवैः ।
भावयिष्यथ मां चैषा भावना मम वो मता ॥१०१॥
सा विध्यर्थस्वरूपा वै वेदवाक्ये मयाऽऽहिता ।
यज्ञान् कृत्वा मखे भुक्त्वा चिन्तयध्वं प्रजाहितम् ॥१०२॥
वसिष्ठाद्याः ऋषयश्च सनकाद्या महर्षयः ।
ब्रह्माद्या ईश्वराश्चापि आदित्याद्याश्च देवताः ॥१०३॥
अन्येऽपि मानवाद्याश्च यज्ञमार्गेऽधिकारिणः ।
गच्छध्वं स्वानधिकारान् वर्तयध्वं महामखान् ॥१०४॥
प्रवर्तन्तां क्रियायज्ञाः प्रादिश्यत विधींस्तथा ।
इदं कृतयुगं नाम कालः श्रेष्ठः प्रवर्तते ॥१०५॥
चतुष्पात् सकलो धर्मः प्रवर्ततेऽत्र दैविकः ।
इत्युक्त्वा ब्रह्मणे कृष्णो नैजं रूपमदर्शयत् ॥१०६॥
हयग्रीवस्वरूपं वै वेदानावर्तयत् शुभम् ।
परिष्वज्याऽऽह च ब्रह्मन् भारं त्वयि क्षिपाम्यहम् ॥१०७॥
असह्ये सुरकार्येऽहं ज्ञानदस्ते मुहुर्मुहुः ।
प्राविर्भावं गमिष्यामीत्युक्त्वा चान्तरधीयत ॥१०८॥
हयग्रीवमहातीर्थं तत् सरसि व्यजायत ।
तत्र स्नानाजलपानाद् वेदविज्ञानवान् भवेत् ॥१०९॥
ब्रह्मा जगाम स्वलोकं देवा जग्मुर्दिवादिकम् ।
एवं राजन् हरिर्यज्ञेऽग्रहरः समजायत ॥११०॥
देवभागान् ददौ चापि प्रवृत्तिं च निवर्तनम् ।
नैष्कर्म्यं बलदं कृष्णः स्वयं चकार वै तदा ॥१११॥
एष एव परब्रह्माऽनादिकृष्णनरायणः ।
कथितस्ते जगतां मे मोक्षदः कम्भरासुतः ॥११२॥
क्रियतां मद्वचो राजन् सेव्यतां बालकृष्णकः ।
गीयतां सततं कृष्णः पूज्यतां चान्तरे स्थितः ॥११३॥
गम्यतां चाक्षरं धाम भुज्यतां शाश्वतं सुखम् ।
इत्युपादिश्य च राधे लोमशो विरराम ह ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां योगिनोऽपि दत्तेष्टगुरुशुश्रूषादिफलावाप्तिर्यज्ञे हरेर्देवतानां च भागाद्युत्पत्तिरित्यादिनिरूपणनामा षष्ट्यधिकद्विशततमोऽध्यायः ॥२६०॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके पश्चादाश्वपट्टलभूपतिः ।
प्रत्यक्षश्रीहरेर्बोधं पप्रच्छ मुनये तदा ॥ १ ॥

**अश्वपाटल उवाच—**

मुने योऽयमनादिश्रीकृष्णनारायणः प्रभुः ।
प्रत्यक्षो भगवानास्ते तद्बोधं कारय प्रभो ॥ २ ॥
तन्नाम्नां भजनं कुर्वे सार्थमानो यथाऽन्वहम् ।
शाधि सर्वार्थसम्पन्न बोधं मां पारमेश्वरम् ॥ ३ ॥

श्रीलोमश उवाच—

राजन्नैकान्तिका भक्ता विद्वांसो वेदपारगाः ।
निरुक्तानि हरेर्नाम्नां जानन्ति नेतरे जनाः ॥ ४ ॥
यतो ह्यैकान्तिनः श्रेष्ठा ये चैवाऽनन्यदेवताः ।
तदात्मानस्तत्परास्तच्छीलास्तत्सहक्रियाः ॥ ५ ॥
कदा कुत्र कथं नाम केन जातं विदन्ति ते ।
प्रगृणन्ति ततो भक्ताः पूर्वं प्रकाशितं च तैः ॥ ६ ॥
आदिर्जन्मोद्भवश्चापि देहेन्द्रियादियोजनम् ।
प्राग्विसर्गः पश्चसर्गे यन्मूर्तौ नैव विद्यते ॥ ७ ॥
कालोऽक्षरं यदादौ न यस्मिन् क्वचिद् विलीयते ।
सर्वेषां स्वेतरेषां स आदिरेव परः प्रभुः ॥ ८ ॥
नान्यदादि ह्यभूद् यस्य तस्मादनादिरेव सः ।
नित्यश्रीः श्रयति यं च दिव्यशोभोत्तमोत्तमा ॥ ९ ॥
दिव्यवेषश्च रचना वाणी सम्पद्विभूतिका ।
ऐश्वर्याणि गुणाः सर्वे श्रीपदा यत्र सन्ति ह ॥१०॥
तस्माच्छ्रीः स श्रीतादात्म्याद् रमालक्ष्म्यादिसंश्रयः ।
श्रीमान् स एव भगवान् प्रोक्तो वै परमेश्वरः ॥११॥
नराणामात्मनां योऽयमयनं वै चिरन्तनम् ।
नाराः सर्वा दिव्यरूपाः शक्तयस्तन्निवासनम् ॥१२॥
अरा माया च दारिद्र्यं नास्ति यत्र हि मुक्तिगाः ।
मुक्ता नरास्तन्निवासो नारायणः स वै मतः ॥१३॥
कर्षत्येव जगत्सर्वं सर्वाः सृष्टिस्तनौ क्वचित् ।
नयत्येव लयं सर्वं कृष्णस्तेन प्रकीर्तितः ॥१४॥
कृषिः कल्मषनाशश्च नश्च निर्वृत्तिरुच्यते ।
तादृशः श्रीकृष्ण एवाऽनादिकृष्णनरायणः ॥१५॥
कं सुखं शाश्वतं यच्च कं वा ब्रह्मपरं प्रभुम् ।
बिभर्ति या निजे गर्भे कंभरा हृदये च वा ॥१६॥
कंभरायाः सुतश्चात्र कांभरेयो हरिर्हि सः ।
गाः किरणानि कृष्णस्य पालयत्येव यः स्वयम् ॥१७॥
गाश्च धेनूः पृथिवीं गां गतिं दिव्यां च रक्षति ।
गोपालश्च पिता तस्य नन्दो गोपालनन्दनः ॥१८॥
पुराणि च शरीराणि चेतनानि जडानि च ।
उपत्येव च तेषु श्रीहरिर्वै पुरुषोत्तमः ॥१९॥
बृहत्वाद्व्यापकत्वाच्च परत्वाद् ब्रह्म यः परः ।
परब्रह्म हरिश्चैव स एव भगवान् स्वयम् ॥२०॥
परमाणि समग्राण्यैश्वर्याणि सन्ति तत्र च ।
परमेश्वर एवाऽसौ परेश्वरः प्रसिद्ध्यति ॥२१॥
क्षरं मायात्मकं सर्वं तत्परं धाम चाक्षरम् ।
तदतीतो हरिः सोऽयमक्षरातीत उच्यते ॥२२॥
अवतारा हरेरेवाविर्भवन्ति समस्ततः ।
अवतारी स्वयं तेषां मूलं श्रीहरिरुच्यते ॥२३॥
हरिश्चायं हरत्येव भक्तानां मानसानि वै ।
हरत्येव च दुःखानि हरिश्चायं प्रकीर्तितः ॥२४॥
हरः संकर्षणश्चासाज्जायते कार्यकृत्प्रभुः ।
हरी तेन तथोक्तश्चैश्वर्यवान् भगवानपि ॥२५॥
वसत्ययं समस्तेषु दीव्यत्येवान्तरस्थितः ।
वासुदेवः स वै प्रोक्तः परमेशः सनातनः ॥२६॥
प्रकृतिर्यस्य वाञ्छाऽस्ति शक्तिः शालोऽपि वै तथा ।
माया या प्रकृतिस्तस्य धवो माधव एव सः ॥२७॥
कालात्माऽपि प्रभुः प्रोक्तः सर्वसर्जनशक्तिमान् ।
विशन्ति सृष्टयो यत्र यस्माद्वा विष्णुरेव सः ॥२८॥
वेवेष्टि व्याप्नोति चैषो व्यापको विष्णुरुच्यते ।
दमनेन जना ऊर्ध्वमृच्छन्ति धाम मे परम् ॥२९॥
तेन दामोदरः कृष्णो दाने मोदे रमत्ययम् ।
केशास्तदंशवः प्रोक्तास्तद्वान् कृष्णो हि केशवः ॥३०॥
अग्निः सोमो मम रूपे मुखं रसश्च तावुभौ ।
अग्निष्टोमस्ततो नाम नारायणः स्वयं क्रतुः ॥३१॥
अग्निः क्षत्रं द्विजः सोमस्तयोरैक्यं हरो हरिः ।
अग्निर्नारी नरः सोमश्चाग्निष्टोमो नरायणः ॥३२॥
नष्टां गां पृथिवीं चायमविन्दच्च पुरा ततः ।
गोविन्द इति विख्यातो गोपालो गोप्रपालनात् ॥३३॥
हृषीकानीन्द्रियाण्येष ईशते स हरिस्ततः ।
हृषीकेशः समभवत् हृषीका तपसां स्थले ॥३४॥
अधः सर्वं परं सर्वं पश्यत्यधोक्षजस्ततः ।
वृषोधर्मस्तन्निवासः कपिर्वाराहरूप्ययम् ॥३५॥
रमन्ते योगिनस्तत्र रामो रमणवान् प्रभुः ।
गुणकर्मानुयोगेन नाम्नामस्यास्त्यनन्तकम् ॥३६॥
अनादिश्रीकृष्णनारायणं ब्रह्मपरं भज ।
बालरूपः स्वयं कृष्णः कुंकुमवापिकाऽक्षरे ॥३७॥
क्षेत्रे विराजते यस्तं बालकृष्णं सदा भज ।
बा-माया लयमेत्यत्र कृष्णेऽतो बालकृष्णकः ॥३८॥
बालानज्ञानसंव्याप्तान् जनानादिश्य सत्पथम् ।
कर्षत्यक्षरधामक्ष्मां परं सुखं ददाति च ॥३९॥
बालकृष्णो हरिकृष्णः श्रीकृष्णः पुरुषोत्तमः ।
अनादिश्रीकृष्णनारायणो ब्रह्मप्रियापतिः ॥४०॥

सतां पतिर्मुक्तपतिः सर्वपतिर्जनार्दनः ।
भक्तपतिर्निजपतिः सेव्यतां प्राप्यतां नृप ॥४१॥

**अश्वपाटल उवाच—**

अहो ज्ञानमहो बोधश्चाहोऽमृतं रसायनम् ।
पायितं मे मुरोऽजस्रं दिव्यं दिव्यविमुक्तिदम् ॥४२॥
तपोनिधे त्वयोक्तं मे नारायणकथामृतम् ।
ईदृशो भगवान् मह्यं दर्शितो बोधितोऽन्तरे ॥४३॥
अनादिश्रीकृष्णनारायणः साक्षान्निभालितः ।
अग्निषोमात्मकः सोऽयं भगवाँस्तर्पितो मया ॥४४॥
प्रसादितस्तथा साक्षात् समासादित एव सः ।
न ततोऽस्ति परः कश्चिन्न तत्समोऽस्ति वेतरः ॥४५॥
तत्कथातुल्यमाख्यानं नान्यत् सृष्टित्रयेऽपि वै ।
विद्यते फलदं सर्वतीर्थानां पावनं परम् ॥४६॥
न चात्राऽल्पं मम पुण्यं वर्धितं भवता बहु ।
कुंकुमक्ष्मां समासाद्य येनाऽहं दृष्टवान् हरिम् ॥४७॥
इत्येवं राधिके मत्वा कृतकृत्यं निजं नृपः ।
पपात दण्डवद्भूमौ लोमशं स्वगुरुं प्रति ॥४८॥
लोमशस्तं तदा प्राह हर्षाश्रुपुलकांचितम् ।
धन्योऽस्त्यनुगृहीतोऽस्ति यद्भवान् दृष्टवान् हरिम् ॥४९॥
अदृश्यदर्शने तत्र तद्दयैव हि कारणम् ।
अवतारी हि भगवान् दुर्दर्शः पुरुषोत्तमः ॥५०॥
नाऽस्य भक्तात् प्रियतरो लोके कश्चन विद्यते ।
ततः स्वयं दर्शितवान् स्वमात्मानं नृपोत्तम ॥५१॥
तस्मादुत्तिष्ठते राजन् क्षमा या वै क्षितौ स्थिता ।
तस्मादुत्तिष्ठते रसो येनाऽऽपो रससंभृताः ॥५२॥
तस्मादुत्तिष्ठते रूपं येनाऽर्काद्याः सुरूपिणः ।
तस्मादुत्तिष्ठते स्पर्शो येन प्राणाः सुयोगिनः ॥५३॥
तस्मादुत्तिष्ठते शब्दो येन लोका गृणन्ति च ।
तस्मादुत्तिष्ठते मनः प्रकाशगुणधारकम् ॥५४॥
तस्मादुत्तिष्ठते बुद्धिस्तत्त्वनिर्णयकारिणी ।
बुद्ध्या विदित्वा तं कृष्णं क्षेत्रज्ञं सात्त्वता नृप ॥५५॥
विशन्ति परमात्मानं हृदयस्थं समाहिताः ।
भजैनं परमेशं तं राजन् कृष्णनरायणम् ॥५६॥
दैवतं परमं यज्ञं परात्मानं सनातनम् ।
इज्यते सर्वयज्ञेषु नित्यं सोऽयं जगत्पतिः ॥५७॥
ये यजन्ति सुरान् पितॄन् गुरून् साधूँस्तथाऽतिथीन् ।
गाश्च विप्रान् दीनजनान् क्षितिं सतीं च मातरम् ॥५८॥
ऋषीन् सेवापरान् भृत्यान् पत्नीं पतिं च बालकान् ।
पूज्याननाथान् रंकाँश्च पशून् पतत्रिणस्तथा ॥५९॥
स्तम्बान् वृक्षान् पक्षिणश्च विष्णुमेव यजन्ति ते ।
अन्तर्गतः स भगवान् सर्वपिण्डे व्यवस्थितः ॥६०॥
गृह्णाति श्रद्धया दत्तं जीवतृप्तिं समावहत् ।
अनादिश्रीकृष्णनारायणः सोऽयं श्रुतौ श्रुतः ॥६१॥
भज तं परमात्मानं राजन् प्रत्यक्षगोचरम् ।
य एष गुरुरस्माकं कंभरानन्दनस्त्विह ॥६२॥
को यायात् तं विना चात्र सर्वत्र क्षितिमण्डले ।
प्रकुर्याच्च महायज्ञान् तारयेन्मोचयेज्जनान् ॥६३॥
कथं विना तं श्रीकृष्णं सर्वजगन्मनोहरम् ।
वृणुयुः कन्यका राज्ञां सहस्रशश्च कोटिशः ॥६४॥
कथं देवाश्च ऋषयश्चेश्वराश्चेश्वरेश्वराः ।
आगत्य पूजनं कुर्युर्मखेष्वस्य हरिं विना ॥६५॥
कथं राधारमालक्ष्मीकमलाद्याश्च कोटिशः ।
कृष्णपत्न्यश्चास्य सेवां कुर्युर्नारायणं विना ॥६६॥
कथं चिह्नानि सर्वाणि सृष्टित्रयोर्ध्वगानि वै ।
नारायणं विनाऽस्यैव मूर्तौ भवेयुरञ्जसा ॥६७॥
स वै वेदनिधिः कृष्णस्तपसां निधिरेव च ।
योगज्ञाननिधिश्चाऽयं सर्वोदरः स एव च ॥६८॥
परब्रह्मपरा वेदाः परब्रह्मपरा मखाः ।
परब्रह्मपरो मोक्षः परब्रह्मपरं तपः ॥६९॥
परब्रह्मपरं सत्यं परब्रह्मपरमृतम् ।
परब्रह्मपरं पुण्यं परब्रह्मपरा गतिः ॥७०॥
प्रवृत्तिनिवृत्तिधर्मः परब्रह्मपरायणः ।
परब्रह्मात्मको गन्धः पृथ्व्यां श्रेष्ठतमो नृप ॥७१॥
परब्रह्मपरा चापां गुणा रसात्मकाः शुभाः ।
परब्रह्मपरं रूपं ज्योतिषां रूपिणां तथा ॥७२॥
परब्रह्मात्मकः स्पर्शः सर्वस्पृश्यस्थितोऽनुगः ।
परब्रह्मात्मकः शब्दः सर्वशब्दानुपावृतः ॥७३॥
परब्रह्मपरं चित्तं मनोऽहं बुद्धिरीश्वरी ।
परब्रह्मात्मिका मात्राः परब्रह्मात्मका गुणाः ॥७४॥
परब्रह्मात्मकः कालः परब्रह्मपरा कृतिः ।
कीर्तिः श्रीर्देवता लक्ष्मीः परब्रह्मपरा च भूः ॥७५॥
परब्रह्मपरा भूतिर्लीला सरस्वती सती ।
परब्रह्मपराः सर्वाः ऋचो ब्रह्मप्रियास्तथा ॥७६॥
परब्रह्मपरं ज्ञानं योगस्त्यागः शुभाः क्रियाः ।
कारणानि समस्तानि परब्रह्मपराणि च ॥७७॥

तत्त्वं जिज्ञासमानानां परं तत्त्वं परेश्वरः ।
सर्वेषां स विजानाति मनीषितं परः प्रभुः ॥७८॥
दैवं पैत्र्यं तपो दानं सर्वाश्रयो हरिः स्वयम् ।
सर्वभूतकृतावासः कुंकुमवापिकाऽऽलयः ॥७९॥
अक्षरब्रह्मवासश्च बालकृष्णः स एव सः ।
अनादिश्रीकृष्णनारायणो नारायणेश्वरः ॥८०॥
स वै ह्येकान्तिनः सर्वान् प्रीणाति भगवान् हरिः ।
विधिकृतां सुपूजां च गृह्णाति भगवान् स्वयम् ॥८१॥
एकान्तिनो हि मनुजाः प्रयान्ति श्रीहरेः पदम् ।
एकान्तधर्मसर्वस्वं परब्रह्मपरायणम् ॥८२॥
सम्मितं सामवेदेन पुरैवादौ कृते युगे ।
धार्यते बालकृष्णेन नारायणेश्वरेण ह ॥८३॥
नारायणो यज्ञधर्मं स्वर्णरेखानदीतटे ।
नारायणह्रदे दैवं पैत्र्यं न्यवर्तयत् पुरा ॥८४॥
ऋषयो देवताद्याश्च सोमोऽपि मानवास्तथा ।
मखधर्मं पुराकल्पे न्यवर्तयन् हरिश्रिताः ॥८५॥
रुद्रः कृते युगे नारायणधर्मं ह्यपालयत् ।
अशिक्षयत्तथा विप्रान् चाद्ये कृते युगे हरः ॥८६॥
सुपर्णाख्यमहर्षिश्च प्राप्य श्रीपुरुषोत्तमात् ।
यज्ञधर्मं पृथिव्यां सः प्रावर्तयत सद्विधिम् ॥८७॥
समुद्रो यज्ञधर्मांश्च ततः प्रावर्तयन्नृप ।
अथाऽऽरण्यकनामाऽपि मुनिः प्रावर्तयत्ततः ॥८८॥
मनुस्ततो यज्ञधर्मान् प्रावर्तयत सात्त्ववान् ।
सनत्कुमारो भगवान् प्रावर्तयत तत्परान् ॥८९॥
वीरणः सुव्रतश्चापि बर्हिषदश्च दक्षकः ।
विवस्वान् स्थापितवन्तो धर्ममेनं सनातनम् ॥९०॥
सर्वार्पणात्मको धर्मः सात्त्वतो दुष्करो जनैः ।
धार्यतेऽनादिकृष्णेन स्थाप्यते च पुनः क्षितौ ॥९१॥
अनादिश्रीकृष्णनारायणेन मखरूपवान् ।
सर्वार्पणात्मको धर्मो भूगोले स्थापिते नृप ॥९२॥
स एव भगवाँल्लोके संस्थाप्य धर्ममाच्युतम् ।
यथेच्छति तथा पश्चात् क्रीडति शास्ति वै प्रजाः ॥९३॥
एवमेकान्तधर्मस्ते कथितो नृपसत्तम ।
एकान्तिनः क्षितौ राजन्! भवन्ति दुर्लभा जनाः ॥९४॥
यत्रैकान्तिभिराकीर्णे जगत् स्याद् वैष्णवं मिथः ।
भवेद् ब्रह्मपुरं चात्र कृतं युगं विदोषकम् ॥९५॥
यत्र चैकान्तिनः सन्ति परब्रह्मपरायणाः ।
नरा नार्यः पशवश्च पक्षिणो देवतादयः ॥९६॥
सर्वे वर्णा वैष्णवाश्च तत्राऽक्षरपदं मतम् ।
अधर्मस्तत्र नास्त्येव नाधर्मवंशजा अपि ॥९७॥
नरनारीव्यवहाराः सर्वे स्युर्मुक्तकोटिजाः ।
वैकुण्ठं वा च गोलोको श्वेतो वा बदरीवनम् ॥९८॥
भवेत्तत्र यदि क्ष्मायां सर्वे चैकान्तिनो जनाः ।
सात्त्वता भक्तिमन्तो वै भवेयुर्मुक्तये ध्रुवम् ॥९९॥
मनीषितं ह्यवाप्यैव भजेयुः पुरुषोत्तमम् ।
एकान्तभक्ताः सततं परब्रह्मपरायणाः ॥१००॥
तेषां हर्यैकनिष्ठानां योगक्षेमवहौ हरिः ।
जायमानं जनं नैजं कृत्वा यं वीक्षते हरिः ॥१०१॥
सात्त्वतः स भवेदत्र धर्मैकान्तिकवान् स च ।
परब्रह्मात्मके मोक्षे ततो याति परां गतिम् ॥१०२॥
नारायणेन दृष्टो यः प्रतिबुद्धो भवेद्धि सः ।
नात्मेच्छया तथा राजन् प्रतिबुद्धो भवेत् क्वचित् ॥१०३॥
प्रवृत्तिलक्षणैर्युक्तं नैवेक्षति हरिः स्वयम् ।
पश्यन्त्येनं महामाया ब्रह्मा देवाश्च मानवाः ॥१०४॥
ततस्ते विकृताः सर्वे मायाबद्धा भवन्ति वै ।
ते यदि सात्त्वतानां वै सेवां कुर्वन्ति भावतः ॥१०५॥
तदा कालान्तरे प्राप्य नैर्गुण्यं यान्ति चाक्षरम् ।
यद्वा सात्त्वतसंघाते कृपया सात्त्वतेक्षिताः ॥१०६॥
भवेयुस्ते यदा चैकान्तिकसाधुकृपेक्षिताः ।
तदा तेषां हृदयस्य परिवर्तनमाशु वै ॥१०७॥
भविष्यति न सन्देहोऽथवा प्रसादभोजनैः ।
हरेर्वा हरिभक्तानां जलान्नग्रासभोजनैः ॥१०८॥
शुद्धा बुद्धिर्निर्गुणाभिमुखी शनैः प्रजायते ।
निष्कल्मषा प्रसन्ना च ततः सात्त्वतमण्डले ॥१०९॥
निवासेन शनैः सात्त्वतत्वमासाद्य मोक्षणम् ।
गमिष्यन्ति न सन्देहः कृपासाध्या स्थितिर्हि सा ॥११०॥
इत्युक्त्वा विररामैव महर्षिर्लोमशस्ततः ।
राधिकेऽश्वपट्टलश्च पुपूज लोमशं मुनिम् ॥१११॥
बहुसामग्रिकाभिश्च कृतकृत्यो बभूव ह ।
अश्वपट्टसरसश्चोत्तरे तीर्थाभिवाञ्छया ॥११२॥
लोमशं प्रार्थयत्तेन लोमशेन समं ततः ।
सरस्तीर्थानि च ययौ सर्वसार्थसमन्वितः ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायां लोमशकृतमश्वपाटलायाऽनादिश्रीकृष्णनारायणसाक्षाद्भगवत्त्वबोधनं परब्रह्मपरायणधर्मबोधनं चेत्यादिनिरूपणनामैकषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६१ ॥

**श्रीकृष्ण उवाच—**

श्रृणु त्वं राधिके राजा त्वश्वपाटलसंज्ञकः ।
लोमशेन समं सोमतीर्थे वै प्रथमं ययौ ॥ १ ॥
तत्र स्नात्वा च विधिना दत्त्वा दानान्यनेकशः ।
यूपस्थलीं नमस्कृत्य रामतीर्थं ययौ ततः ॥ २ ॥

**अश्वपाटल उवाच—**

कथं तीर्थमिदं जातं महर्षे रामनामकम् ।
समासेन कथामेतां प्रश्रावय पुरातनीम् ॥ ३ ॥

**श्रीलोमश उवाच—**

भाणवीर्योऽभवत् सिंहज्ञातीयो नृपतिः पुरा ।
गोपनाथादिखण्डस्य राज्यं करोति शोभनम् ॥ ४ ॥
शत्रुंजयप्रदेशाँश्च शास्ति धर्मधरो नृपः ।
रामरामेतिरामेतिरामादित्येति सर्वदा ॥ ५ ॥
कृष्णकृष्णेतिकृष्णेतिकृष्णादित्येति वै तथा ।
जपति स्वकुटुम्बेन सहितो वैष्णवः खलु ॥ ६ ॥
प्रजास्तस्य सुखस्थानाः सुखालयाः सुखे स्थिताः ।
भजन्ते च सदा रामं कृष्णं गोविन्दमच्युतम् ॥ ७ ॥
धर्मं करोति नित्यं च भाणवीर्योऽतिथावपि ।
साधुषु देवकार्येषु दानहोमप्रदक्षिणाः ॥ ८ ॥
एवं वै वर्तमानस्यैकदा कष्टं हि भौतिकम् ।
समुत्पन्नं भालदेशनृपो नाम्ना क्षमाभृतः ॥ ९ ॥
विजयार्थं स्वसैन्येन निर्ययौ चाऽनुसागरम् ।
साभ्रमतीं समुत्तीर्य धवलाख्यान् प्रदेशकान् ॥१०॥
विजित्य भाणवीर्यस्य राष्ट्रं जेतुमुपाययौ ।
सैन्यं क्षमाभृतस्याप्युद्धतं ग्रामान् पुराणि च ॥११॥
लुण्टति स्म निजान् कृत्वा प्रदेशान् सिंहरायिकाम् ।
राजधानीं विजेतुं वै तूर्णमन्तिकमाययौ ॥१२॥
सिंहराज्या नगर्या वै परितः सैन्यचक्रकम् ।
कृत्वाऽऽवृणोद् राजधानीं दूतं चाप्रेषयन् नृपम् ॥१३॥
राजवाक्यं जगादापि दूतो गृहाण वश्यताम् ।
यद्वा युद्धं प्रदेह्यत्र राज्यं वा सकलं ततः ॥१४॥
भाणवीर्यो जगादापि दूतं क्षमाभृतस्य ह ।
नाऽन्यायो विद्यते राज्ये नाऽधर्मो विद्यते तथा ॥१५॥
ईज्यते भगवान् रामः कृष्णश्च सर्वदा मया ।
रक्ष्यन्ते साधवः सर्वे पूज्यन्तेऽतिथयः सदा ॥१६॥
राज्यं रामस्य शरणे मयाऽर्पितं विभाव्यते ।
नाऽत्राऽस्ति वश्यताऽन्यस्य युद्धं नैव नरैः सह ॥१७॥
राज्यदानं कृतं रामे कथमन्येन भुज्यते ।
अहं तु तत्प्रधानोऽस्मि योत्स्यते भगवान् स्वयम् ॥१८॥
वद दास्ये न वै राज्यं करिष्येऽपि न वश्यताम् ।
योधनं भगवानेव करिष्यति निजार्थकम् ॥१९॥
सन्नद्धो भव राजेन्द्र गर्वं मा वह चेति वै ।
वद क्षमाभृतं यद्वा याहि स्वभवनं प्रति ॥२०॥
यद्वा मित्रस्वरूपेण स्वागतं ते करोमि च ।
यथेष्टं मे पुनश्चात्राऽऽवेदयेति विलोकये ॥२१॥
दूतो गत्वा जगादेदं यथोक्तं च ततः स च ।
क्षमाभृतोऽप्रेषयच्च दूतं सज्जो भवेति च ॥२२॥
युद्धं कृत्वा गृहीष्येऽहं राज्यं मा मदमावह ।
नहि नारायणो युद्धे रक्षिष्यति प्रभक्तकम् ॥२३॥
इति संप्रेषयित्वैव दूतं युद्धस्य सूचकान् ।
भेरीर्व्यंगुलशंखानां निनादान् समकारयत् ॥२४॥
यन्त्रशब्दान् विविधाँश्चाऽकारयत् दुर्गसन्निधौ ।
दुर्गपालान् गोपुरस्थान् द्वाररक्षकराँस्तथा ॥२५॥
बन्धयित्वा स्ववशगान् कृत्वा क्षमाभृतो नृपः ।
प्रविवेश नगर्यां वै सिंहराज्यां ससैन्यकः ॥२६॥
प्रजास्त्रेसुः कम्पमानाः सस्मरुः राममच्युतम् ।
कृष्णनारायणं देवं रक्षकं परमेश्वरम् ॥२७॥
राजसौधं प्रगत्वैव क्षमाभृतो बलान्वितः ।
भाणवीर्याद् बाहुयुद्धं ययाचे राष्ट्रकं च वा ॥२८॥
भाणवीर्यो महाभक्तः समदृग् वै क्षमाभृतम् ।
स्वागतेन समदृष्ट्याऽमानयच्च जगौ तदा ॥२९॥
राजन् युद्धे मनुष्याणां नाशो हिंसा भवेदिति ।
जयो वाऽपजयो वाऽपि मयि त्वयि भविष्यति ॥३०॥
स्वस्वराज्ये स्थितौ चाऽवां विजयस्थौ न संशयः ।
नहि तृष्णाख्यतन्तूनां विच्छेदोऽन्तो भविष्यति ॥३१॥
भज कृष्णं हरिं रामं वृथा क्लेशं च मा वह ।
न मे राज्यं न ते राज्यं न क्षितिः सह यास्यति ॥३२॥
न सैन्यं बान्धवा भृत्या धनानि राष्ट्रकं प्रजाः ।
सह यास्यन्ति मरणे मृतौ न क्षणनिर्णयः ॥३३॥
मया कृष्णार्पितं राज्यं न मे राज्यं विशिष्यते ।
रामराज्ये वृथा गृध्नां मा समावह पार्थिव ॥३४॥
बाहुयुद्धं बलं पृथ्व्या न ते मेऽपि कथंचन ।
शस्त्रयुद्धं हि सैन्यस्य परस्यैव बलं हि तत् ॥३५॥

बलं रामात् प्रसंपाद्यं यद्बलं सहगं भवेत् ।
तद्विना चाऽफलं सर्वं बलं निर्बलमेव तत् ॥३६॥

**क्षमाभृत उवाच—**

राजा भूत्वा साधुवादान् वदस्येव हि निर्बलः ।
नेयं राजकुले साधो रीतिर्यशस्करी क्वचित् ॥३७॥
नात्र रामो नवै कृष्णो न युद्धे रक्षको हरिः ।
बलजय्यं भवेद् राष्ट्रं युद्धधर्मः सनातनः ॥३८॥
देहि युद्धेन वा राज्यं शरणागतिमावह ।
अन्यथा त्वां निगडे वै कृत्वा नेष्ये तमोगृहम् ॥३९॥

**भाणवीर्य उवाच—**

निगडा रचिताः श्रीमद्रामेण न त्वया नृप ।
दुष्टार्थे निगडा योग्या यद्वहं तादृशस्तथा ॥४०॥
निगडे संभविष्यामि मा चिन्तां तत्र वै कुरु ।
अदुष्टस्य न निगडो यथा ते रोचते कुरु ॥४१॥
परेश्वरेण रचिता भूमिर्जलं च वह्नयः ।
वायुः प्राणा गगनं च शब्दाद्याश्चेन्द्रियाणि च ॥४२॥
शरीरं रचितं तेन राज्यं तेनैव निर्मितम् ।
राजपदं प्रदत्तं च तेनैव परमात्मना ॥४३॥
यस्य राज्यं जगत् सर्वं यद्दत्तं प्रकरोम्यहम् ।
राज्यं राजन् करोम्येवं तद्दत्तं त्वं सुखी भव ॥४४॥
मा च गृधः परस्याऽन्नं परेशस्य करे स्थितम् ।
चातितृष्णो जनो नश्येत् समूलः सपरिग्रहः ॥४५॥
राज्ञा कार्यं सदा चेशदत्ताद् देयं परात्मने ।
पूजनेऽर्पणमेवाऽत्र त्वं तथा भक्तिमावह ॥४६॥
अनाददानो गृह्णानो राजँस्त्वं दोषमुग्रकम् ।
मा संवहाऽत्र भूमौ वै मानवे मोक्षसाधने ॥४७॥
पश्य राजन् राज्यभूमौ कर्षुका यदि वत्सरे ।
द्विवत्सरयोश्च वा त्रिवत्सरेषु करादिकम् ॥४८॥
यदि नैव ददत्येव राज्ञे ते दोषभागिनः ।
राजदण्ड्या भवेयुस्ते गृहान्निष्कासितास्तथा ॥४९॥
क्षेत्रवाटीविहीनाश्च भवेयुः राज्यदण्डिताः ।
करदानेन निर्दोषाः कराऽदानेन दोषिणः ॥५०॥
कर्षुकस्य गृहवाटीक्षेत्रोद्यानादिकं च यत् ।
नृपस्यैव भवत्येव कराऽऽदाननिमित्तकम् ॥५१॥
कर्षुकस्तत्र कृष्याद्यैर्जीवत्येव करप्रदः ।
कर्षुकेण नृपो नैव विस्मर्तव्यः कदाचन ॥५२॥
यदि राजा विस्मृतः स्यात् कर्षुको दण्डभाग् भवेत् ।
करं दत्वा नृपं स्मृत्वा जीवत्येव ह्यबाधितः ॥५३॥
एवमेव जगद् राजन् राज्यं श्रीपरमात्मनः ।
पृथिवी निर्मिता तेन जलं तेजोऽनिलोऽनलः ॥५४॥
शरीरं निर्मितं तेन द्रव्यमन्नं रसादयः ।
नरा नार्यः पुत्रपशुवृक्षवल्लीगृहादयः ॥५५॥
दिवा रात्रिः सूर्यचन्द्रौ सुखं शमः कुटुम्बकम् ।
सम्पद्भोज्यं च पेयं च सर्वं तस्यैव राष्ट्रकम् ॥५६॥
तस्मै राज्ञे समर्प्यो वै करो यज्ञात्मको हि सः ।
अनिवेद्याऽसमर्प्याऽपि करं नारायणस्य वै ॥५७॥
कर्षुकाश्च वयं सर्वे भुंक्ष्वहे चेदनर्पितम् ।
तर्हि दण्डस्य पात्राणि भवेम नात्र संशयः ॥५८॥
तस्माद् राजन् नहि पृथ्वी ते मे वापि कदाचन ।
पृथ्व्यां स्थितैश्च वाऽस्माभिः कर्षुकत्वेन पाल्यते ॥५९॥
स एव सम्राड् राजाऽस्ति मा युद्धं कुरु पार्थिव ।
मया वा तेन साकं वा भुञ्जीथास्तेन तेऽर्पितम् ॥६०॥
तेन वास्यमिदं सर्वं यत् किञ्चिज्जगत्यां हि तत् ।
तेन दत्तं प्रभुञ्जीथा मा गृधोः यत्परस्य वै ॥६१॥
नैजं भुक्त्वाऽर्पयित्वैव हरये मोक्षमावह ।
मोक्षराज्यं परं राज्यं प्राप्नुहीति निबोध मे ॥६२॥

**क्षमाभृत उवाच—**

भूपपथो मोक्षपथो ज्ञानपथः पृथक् त्रयः ।
युद्धपथो नृपाणां वै तत्र ज्ञानं न युज्यते ॥६३॥
सर्वं नारायणस्यैव बलवान् यः स विन्दते ।
भुंक्ते राज्यं समृद्धं चेद् राजधर्मो हि योधनम् ॥६४॥
एष त्वां निगडे कृत्वा राजन् हरामि राष्ट्रकम् ।
इत्युक्त्वा सहसा क्षमाभृतो बबन्ध भाणकम् ॥६५॥
सकुटुम्बं च सामात्यं कोशं च राजमन्दिरम् ।
भाणवीर्यो हरे राम रामकृष्ण हरेहरे ॥६६॥
बालकृष्ण कृष्णकृष्ण लक्ष्मीनाथ हरेहरे ।
एवं चकार भजनं निगडस्थोऽपि निर्भयः ॥६७॥
कुटुम्बं भजनं चक्रे निर्भयं भगवद्बलम् ।
क्षमाभृतश्च मुमुदे राज्यं प्राप्तमकण्टकम् ॥६८॥
भक्तप्रियो हि भगवान् भक्तसाहाय्यदः प्रभुः ।
वैकुण्ठस्थः प्रभुः श्रीमान् सितापतिः परेश्वरः ॥६९॥
शुश्राव भजनं तस्य भाणवीर्यस्य चोत्तमम् ।
सिता प्राह हरिं तत्र किमिदं कीर्तनं बहु ॥७०॥

श्रूयते तीव्रसंवेगं कान्त केन समीरितम् ।
रामादित्यस्तदा प्राह पश्य लक्ष्मि स्वभक्तकम् ॥७१॥
निगडस्थं भाणवीर्यं सुराष्ट्रे सिंहराजके ।
पत्तने च निजे क्षमाभृतेन निहितः खलु ॥७२॥
सिताऽपश्यन्निगडस्थं भक्तं राजानमेव सा ।
उत्थाय सहसा रामं समुत्थाय सपार्षदा ॥७३॥
आजगाम क्षणात् पृथ्व्यां चाश्वपट्टसरोऽन्तिकम् ।
अनादिश्रीकृष्णनारायणं ब्रह्मप्रियास्तथा ॥७४॥
सह नीत्वा सिता रामं सैन्यं व्यरचयत्तदा ।
चतुरंगं च युद्धार्थं व्योमगं शीघ्रगामि च ॥७५॥
भक्तस्य रक्षणार्थं वै युद्धतूर्याण्यवादयत् ।
सिंहराजीनगर्यास्तु प्राकारस्य समन्ततः ॥७६॥
चक्रव्यूहं पृतनायाः कृत्वा क्षमाभृतं नृपम् ।
चेतयामास युद्धार्थं सोऽपि सैन्येन संयुतः ॥७७॥
युद्धार्थं त्वाययौ शीघ्रं संग्रामोऽभून्महोल्बणः ।
दशसाहस्रयोद्धारः क्षमाभृतस्य मेदिताः ॥७८॥
शरैर्बाणैस्तोमरैश्च वज्रैश्चक्रैः कृपाणकैः ।
क्षमाभृतो धृतो जीवसहः पाशैर्महाभटैः ॥७९॥
भाणवीर्यं च निर्बन्धं चकार हि सिता स्वयम् ।
कृष्णनारायणो रामस्तस्मै ददौ स्वदर्शनम् ॥८०॥
ब्रह्मप्रिया ददुश्चापि दर्शनं नृपयोषिते ।
कुटुम्बाय प्रजाभ्यश्चाशीर्वादान् लोमशो ददौ ॥८१॥
अहं राजन् लोमशो वै मन्त्रं ददेऽस्य वैष्णवम् ।
राज्यं भक्ताय दत्त्वैव क्षमाभृतं निबध्य च ॥८२॥
विसृज्य तस्य देशं च कुंकुमक्षेत्रकं प्रति ।
भाणवीर्यं सवंशं च रामादित्यं सपार्षदम् ॥८३॥
आनाय्याऽश्वसरोवारौ स्नापयामास शुद्धये ।
हतानां मोक्षणं प्रादाद् भगवान् बालकृष्णकः ॥८४॥
रामादित्यः समुवास सपार्षदगणस्तदा ।
आदृतः सत्कृतश्चापि सरस्यत्राऽऽप्लवं व्यधात् ॥८५॥
तत्तीर्थं रामतीर्थं वै राजन्नेतत् ततोऽभवत् ।
सितातीर्थं मुक्तितीर्थं सरस्येतन्निगद्यते ॥८६॥
भाणवीर्येण वै चात्र मन्दिरं कारितं शुभम् ।
रामादित्यो हि सितया सहितश्चात्र शोभते ॥८७॥
पार्षदैः सहितश्चापि धृतकार्मुकहेतिकः ।
एवं भक्तस्य रक्षा वै कृता श्रीपरमात्मना ॥८८॥
भाणतीर्थं तथा ख्यातं वैकुण्ठतीर्थमित्यपि ।
ईशानतः पश्चिमे वै वर्तते सोमतीर्थकात् ॥८९॥
अत्र स्नाहि जलं पीत्वा तर्पित्वा भक्तितः पितॄन् ।
देहि दानानि विप्रेभ्यः सद्भ्यः सतीभ्य इत्यपि ॥९०॥
सर्वदानफलं चात्र लप्स्यसे त्वल्पदानतः ।
पृथ्वीदानफलं चात्र फलमात्रप्रदानतः ॥९१॥
स्वर्गदानफलं चात्र धेनुदानप्रदानतः ।
लक्ष्मीदानफलं चात्र कन्यादानप्रदानतः ॥९२॥
मोक्षदानफलं चात्राऽभयदानप्रदानतः ।
इत्युक्तो राधिके राजा भाणवीर्यो महाबलः ॥९३॥
भक्तराड् विधिना स्नानदानार्हणानि संव्यधात् ।
ध्यानं चक्रे क्षणं रामादित्यस्य परमात्मनः ॥९४॥
रामस्य दर्शनं तस्य तेजोमध्ये हृदन्तरे ।
जातं तुतोष राजाऽपि लोमशोऽपि समाधिना ॥९५॥
ददर्श दिव्यदृष्ट्या वै स्मारितः कृष्णवल्लभः ।
दृष्टः साक्षात्ततो रामोऽन्तर्धानं प्रजगाम ह ॥९६॥
इत्येवं चेतनं तीर्थं रामादित्याभिधं परम् ।
राधिके स्मरणाच्चापि रामदर्शनकारकम् ॥९७॥
पापतापहरं शत्रुसंकटादिविनाशकम् ।
वैकुण्ठवासदं रम्यं विष्णोश्च मन्दिरं शुभम् ॥९८॥
यत्र मृताः पशवोऽपि यान्ति वैकुण्ठमुत्तमम् ।
यत्र स्नाता नरा नार्यो यान्ति वैकुण्ठमुत्तमम् ॥९९॥
यत्र रामह्रदे स्नात्वा प्रयान्ति सत्यतः परम् ।
सकामाः सुरलोकं वा निष्कामाश्चाक्षरं पदम् ॥१००॥
प्रयान्ति राधिके सम्पूजिताः पार्षदसत्तमैः ।
श्रवणात्पठनाच्चास्य तत्सर्वं फलमाप्नुयात् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लोमशगीतायामश्वपाटलो रामादित्यतीर्थं प्राप्य भाणवीर्यभक्तकथां श्रुत्वा विधिना स्नानदानादिकं चकार राज्ञोः मिथः संवादश्चेत्यादिरूपणनामा द्वाषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६२ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके चान्यं तीर्थं वै लोमशोदितम् ।
सूर्यनारायणस्यैव सर्वकुष्ठविनाशनम् ॥ १ ॥
रामतीर्थं परं कृत्वा ययौ त्वग्रेऽश्वपाटलः ।
तीर्थं सरस्तटे रम्यं सूर्यभासुरसज्जलम् ॥ २ ॥
सूर्यवद् यत्र दृश्यन्ते शुक्तयोऽपि सुभासुराः ।
किरणानि विमुञ्चन्ति जालान्तरस्थिता अपि ॥ ३ ॥
जलं देदीप्यमानं तद्विलोक्य त्वश्वपाटलः ।
पप्रच्छ लोमशं देवं महाश्चर्यभरस्तदा ॥ ४ ॥

**अश्वपाटल उवाच—**

गुरो तीर्थमिदं सर्वतीर्थेभ्यो द्योतनाऽऽश्रयम् ।
कथं कस्मात् कदा त्वेवं जातं वै सूर्यवर्चुलम् ॥ ५ ॥
जलान्यपि प्रकाशन्ते सूर्यगर्भाणि वै यथा ।
किन्नाम किंगुणं किंसत्फलं तत् कथय प्रभो ॥ ६ ॥

**श्रीलोमश उवाच—**

शृणु राजन् महाश्चर्यं यदत्र समभूत् पुरा ।
स्तम्भपुरे पुरा त्वासीत् कायस्थो लेखकर्मकृत् ॥ ७ ॥
भजते स प्रभुं नित्यं राजकर्मचरोऽभवत् ।
न्यायकार्ये सहायो वै लेखकोऽभूत् सुबुद्धिमान् ॥ ८ ॥
दारिद्र्यदोषच्छन्नश्च लक्ष्मीतृष्णातिचञ्चलः ।
येन केन प्रकारेण द्रव्यं साध्यं धनादिकम् ॥ ९ ॥
लेखने शब्दमालानां पूर्वापरविछित्तया ।
अर्थस्याऽपि भवेद् यत्राऽनर्थोऽपि लाभहानिदः ॥१०॥
तथा शब्दान् लेखगुप्तान् कृत्वा तु लेखपत्रके ।
यो ददाति धनं तस्मै लुञ्चारूपं तदर्थिकाम् ॥११॥
लाभलिपिं विलिख्यैव ददात्येव जयप्रदाम् ।
द्व्यर्थरूपां संकरार्थां पदच्छेदे नवार्थिकाम् ॥१२॥
एवं लोभेन बहूनां न्यायाऽन्यायविलेखनात् ।
पापभारेण जातोऽयं गलत्कुष्ठी करद्वये ॥१३॥
ऊर्जव्रतो हि नाम्ना स कायस्थो हस्तरोगवान् ।
लेखकार्यं ततस्त्यक्त्वा तीर्थार्थे गोपनाथकम् ॥१४॥
कृष्णलीलामयं तीर्थं त्वाययौ स्नातवाँस्ततः ।
गुप्तप्रयागकं क्षेत्रं ददौ पापनिवारकम् ॥१५॥
स्नातस्तत्र ततो मूलद्वारिकां प्रययौ हि सः ।
ततो ययौ सोमनाथं प्राचीप्लक्षं ततो ययौ ॥१६॥
सरस्वत्यां कृतस्नानः प्लक्षमूलसमाश्रितः ।
जजाप मनसा जापं कृष्णकृष्णेतिमाधव ॥१७॥
नारायणहरेराम जनार्दन जनावन ।
कृपालो करुणासिन्धो रोगाद् रक्षय मां प्रभो ॥१८॥
कृतानां कर्मणं चात्र फलं तीव्रप्रयोगिणाम् ।
जायते मन्दवेगानां कालान्तरे प्रजायते ॥१९॥
जन्मान्तरे च वा सर्वं भोक्तव्यं वा यमगृहे ।
यत्र क्वापि गतं जन्तुं कृतं कर्म न मुञ्चति ॥२०॥
मया लेखे बहूनां वै सत्यादसत्यमुच्छ्रितम् ।
असत्याद् सत्यरूपं तु कृत्वा चाऽकुशलं कृतम् ॥२१॥
तेन पापेन भगवन् कुष्ठोऽगलन् करद्वये ।
अंगुलिषु प्रजातो मे तीर्थं पापविनाशनम् ॥२२॥
कृतं तथापि भगवन् रोगोऽयं न विलीयते ।
तस्मादुद्धर देवेश कृपया मां कृपानिधे ॥२३॥
नैवं पुनः करिष्येऽत्र लोके दोषं कदाचन ।
नमस्ते पापहर्त्रेऽत्र रोगहर्त्रे नमो नमः ॥२४॥
भक्तानां सुखकर्त्रेऽत्र तीर्थे गोप्त्रे नमोऽस्तु ते ।
नमस्ते सर्वकर्णाय नमस्ते सर्वचक्षुषे ॥२५॥
नमस्ते सर्वविज्ञाय सर्वहृत्स्थाय ते नमः ।
नमः कायस्थरूपाय नमो निकाययोजिने ॥२६॥
नमश्चादृश्यरूपाय शरणागतरक्षिणे ।
इत्येवं प्रार्थयामास कायस्थो विमना इव ॥२७॥
प्लक्षाऽधो निषसादाऽपि निराशश्चिन्तयन् मृतिम् ।
तावत्तत्र समायातः कश्चिद् विप्रो जटाधरः ॥२८॥
आराधयाऽर्कक्षेत्रं त्वं गत्वाऽन्तिकस्थितं त्विह ।
अर्कवृक्षाश्रयो भूत्वा सूर्यमन्त्रान् सदा जप ॥२९॥
सूर्यनारायणो देवः कुष्ठं ते नाशयिष्यति ।
सरस्वतीं नदीं स्नात्वा पीत्वा जलं च पावनम् ॥३०॥
'नमो ब्रह्मसवित्रे ते कुष्ठहर्त्रे नमो नमः' ।
इत्येवं जप गत्वैव सूर्यक्षेत्रं शुभप्रदम् ॥३१॥
इत्युक्तः स तु कायस्थो राजँस्ततोऽर्कतीर्थकम् ।
विश्वकर्मकृतः सूर्यः शाणोल्लीढो यदा पुरा ॥३२॥
यत्र खण्डश्च पतितो यत्राऽर्कवृक्षतां रविः ।
गतस्तत्र ययौ पृष्ट्वा तं जटाध्रं प्रणम्य च ॥३३॥
अर्कवृक्षवनं दृष्ट्वा तुतोषोर्जव्रतो हि सः ।
श्वेतार्कान् व्योमरंगार्कान् स्थूलपुष्पकान् ॥३४॥
बहुदुग्धान् स्तम्बरूपान् वल्लीरूपान् बहून् द्रुमान् ।
फलपुष्पदलाढ्यांश्च दृष्ट्वा तुतोष वै हि सः ॥३५॥
मार्गयामास बहुधा तीर्थस्थलं क्व वै भवेत् ।
श्रेष्ठार्कसन्निधौ चाऽहं निषद्य प्रजपामि ह ॥३६॥
तावत्तेनाऽर्कमूले वै बहुशाखदलावृते ।
बहुपुष्पाश्रये मूले शिखाचक्रं विलोकितम् ॥३७॥
तत्राऽस्य मानसं लग्नं कुटीतुल्येऽर्कसद्गृहे ।
तच्छायायां चकाराऽयं वासं मूले जपन् मनुम् ॥३८॥
'नमो ब्रह्मसवित्रे ते कुष्ठहर्त्रे नमो नमः' ।
इत्येवं प्रजपँस्तत्र क्षुत्पिपासाकुलोऽपि सन् ॥३९॥
रात्रिं निर्गमयामास निद्रां लेभे न वै मनाक् ।
प्रातरुत्थाय पुष्पाणां मालां कृत्वा तृणे गुणे ॥४०॥

शिलाचक्राय सूर्यायाऽर्पयामास स भक्तितः ।
जलं ददौ शिलायां च सीताफलं फलं ददौ ॥४१॥
तुलस्याः पत्रमेवाऽपि ददौ शिलास्वरूपिणे ।
स्तुतिं नमस्कृतिं चक्रे ततः सीताफलं हि सः ॥४२॥
प्रसादं बुभुजे पश्चाज्जजाप सततं हि सः ।
एवं मासे गते राजन् फलाहारपरायणे ॥४३॥
चक्रान् समुत्थितः कश्चिद्ज्ञानरूपसुन्दरः ।
पुरुषः श्वेतवर्णश्च बहुरश्मिसमन्वितः ॥४४॥
सुवर्णकुण्डलकर्णः समुकुटः सचक्रकः ।
समणिहारवक्षाश्च हिरण्यवर्ण उज्ज्वलः ॥४५॥
कटकांगदबाहुश्च हसन् स्नेहसमाकुलः ।
सौवर्णाम्बरसंराजत्कान्तिपरिधिमस्तकः ॥४६॥
शनैरागत्य चक्राद्वै दूरमूर्जव्रतं स्थितम् ।
जगाद वद पुत्र त्वं किमिच्छसि च मा चिरम् ॥४७॥
ऊर्जव्रतस्तदोवाच देवदेव जगद्गुरो ।
कुष्ठरोगप्रशान्तिं मे समिच्छामि दयां कुरु ॥४८॥
को भवान् भगवानास्ते सर्वतेजोऽन्वितस्त्विह ।
मन्ये सूर्यः स्वयं नारायणो मे कृपयाऽऽद्भुतः ॥४९॥
प्रकाशमागतस्त्वत्र भक्तानुग्रहकारकः ।
नमः सहस्ररूपाय नमः सहस्ररश्मये ॥५०॥
नमो भक्तकृपाकर्त्रे नमः सहस्रचक्षुषे ।
नमो जगत्प्रकाशाय सर्वभूतप्रचक्षुषे ॥५१॥
परब्रह्मस्वरूपाय मोक्षदात्रे नमो नमः ।
नमस्तेजोऽभिहन्त्रे च रोगहन्त्रे नमो नमः ॥५२॥
इत्युक्त्वा निपपाताऽसावूर्जव्रतोऽस्य पादयोः ।
सूर्यस्तिरोऽभवत्तूर्णं दिव्यवाण्या जगाद ह ॥५३॥
ऊर्जव्रत स्वस्ति तेऽस्तु रोगनाशो भविष्यति ।
अकृतनिष्कृतिस्त्वं वै न मां स्प्रष्टुमिहाऽर्हसि ॥५४॥
मन्मंत्रलक्षजापेन प्रायश्चित्तं भवेत् तव ।
तत्कुरु याहि चेतस्तु ह्यश्वपट्टसरोवरम् ॥५५॥
अनादिश्रीकृष्णनारायणाश्रयाऽक्षराभिधम् ।
कुंकुमवापिकाक्षेत्रं पुरुषोत्तमसंश्रितम् ॥५६॥
तस्यैव सरसस्तीरे चोत्तरे शंकराश्रये ।
अर्कवृक्षाश्रये स्थित्वा जपमन्त्रं ममोत्तमम् ॥५७॥
तव कुष्ठस्य वै नाशः शीघ्रं तत्र भविष्यति ।
श्रुत्वैवं शारदां दिव्यां नेमे तां दिशमेव सः ॥५८॥
प्रसन्नश्चोर्जव्रतको ययौ श्रीबलिखातकम् ।
ततो ययौ वामनस्य स्थलीं वस्त्रापथं ततः ॥५९॥
सुवर्णरक्षासलिले स्नात्वा नारायणे ह्रदे ।
इन्द्रेश्वरे महालक्ष्मीतीर्थे चक्रकतीर्थके ॥६०॥
शृंखलादेविकां नत्वा तुरादेवीं प्रणम्य च ।
व्याघ्रीं देवीं ततो नत्वा नत्वा श्रीखर्वरीं सतीम् ॥६१॥
राणिकां च ततो नत्वा ययौ कुंकुमवापिकाम् ।
महालक्ष्मीं वापिकायास्तीरे स्थितां प्रणम्य च ॥६२॥
प्रणम्य नगरीं स्वर्णवर्णां नारायणालयम् ।
प्रणम्याऽश्वसरो दृष्ट्वा ययावुत्तरगं तटम् ॥६३॥
शांकरं क्षेत्रपेशं च नत्वा पीत्वा जलं ततः ।
मार्गयामास वै चार्कवृक्षं ददर्श सन्निधौ ॥६४॥
भिक्षां याचित्वैव भुक्त्वा फलमूलदलात्मिकाम् ।
अर्कवृक्षतले तस्थौ क्षणं ध्यात्वा रविं प्रभुम् ॥६५॥
अर्कमूले स शुश्राव वाणीं त्वदृश्यरूपिणीम् ।
स्वस्ति तेऽस्तु हि कायस्थ तिष्ठ जप रविं स्मर ॥६६॥
अनादिश्रीकृष्णनारायणं नित्यं प्रगे भज ।
पूजयार्केश्वरं कृष्णं नारायणं सतां पतिम् ॥६७॥
अहं भजामि तं देवेश्वरेश्वरेश्वरेश्वरम् ।
मया लब्धं ततः सर्वं तेज ऐश्वर्यमित्यपि ॥६८॥
सूर्योऽहं तव कल्याणं करिष्यामि हरिं भज ।
लक्षजपोत्तरं हस्तौ स्नानमात्रेण सारसे ॥६९॥
जले पूर्णौ रोगहीनौ भविष्यतोऽर्कवैभवात् ।
इत्याश्रुत्य गिरं चोर्जव्रतश्चक्रेऽर्कपादपे ॥७०॥
मूलदेशे निवासं च वल्कलाद्यधिवासनम् ।
अयाचितोत्कर्षवृत्त्या जीवयात्रां करोति च ॥७१॥
फलमूलदलाहारो जलाहारः क्वचित्तथा ।
'नमो ब्रह्मसवित्रे ते कुष्ठहर्त्रे नमो नमः' ॥७२॥
जजापैनं महामन्त्रं सततं सूर्यमानसः ।
नित्यं पञ्चसहस्राणि जपान् करोति भक्तराट् ॥७३॥
एकविंशे दिने लक्षजपेषु निर्वृत्तेषु च ।
सोत्साहश्चोर्जव्रतकः स्मरन् सूर्यनरायणम् ॥७४॥
अश्वपट्टसरस्तीरे प्रातः स्नातुं ययौ द्रुतम् ।
सस्नौ राजन्नत्र तीरे जलेऽवगाह्य वै मुहुः ॥७५॥
निमज्ज्योन्मज्य च पुनः करौ पश्यति लेखकः ।
नैव पश्यति नीरोगौ तदा स्नाति पुनः पुनः ॥७६॥
पुनः पश्यति हस्तौ च नीरोगौ नैव पश्यति ।
एवं स्नात्वा श्रमं प्राप्य नीराशोऽयं व्यजायत ॥७७॥
जपे व्रते क्षतिं नैजां व्यतर्कयत लेखकः ।
सस्मार शोकमासाद्य सूर्यनारायणं तदा ॥७८॥

व्योमवाणी जगादैनं भक्त व्रतं तवाऽत्र वै ।
सम्पन्नं सर्वथा तत्र कर्तव्यं नाऽवशिष्यते ॥७९॥
अनादिश्रीकृष्णनारायणं मध्याह्नके क्षणे ।
ध्यात्वा स्नास्यसि तूर्णं ते हस्तौ रोहिष्यतस्तदा ॥८०॥
गलत्कुष्ठेन नष्टा या अङ्गुल्यश्च करद्वयम् ।
हस्ततलं समस्तं तत् सर्वं प्ररोहयिष्यति ॥८१॥
इत्युक्तश्चोर्जव्रतकः कायस्थोऽर्कस्थलीं ययौ ।
मध्याह्ने च तथा सस्नौ यथोक्तस्मृतिपूर्वकम् ॥८२॥
अनादिश्रीकृष्णनारायणः सूर्यनरायणः ।
द्वौ समानवयस्यौ वै भूत्वा बालस्वरूपिणौ ॥८३॥
सुन्दरौ मन्दहास्याऽऽस्यौ दिव्यकुण्डलधारिणौ ।
रूपानुरूपावयवौ देवदेवादिपूजितौ ॥८४॥
आगत्य जलमध्यस्थं स्नान्तं कायस्थभक्तकम् ।
कराभ्यां च करौ धृत्वोन्मज्ज्य निष्कास्य वै बहिः ॥८५॥
अस्थापयतां सरसस्तीरे पूर्णकराग्रजम् ।
सूर्येण तु धृतो वामकरः पूर्णतमोऽभवत् ॥८६॥
हरिणा सन्धृतो दक्षः करः पूर्णतमोऽभवत् ।
कायस्थः कृष्णवर्णोऽपि तेजसा तपसा तथा ॥८७॥
पुण्यैर्नारायणस्पर्शैः श्वेतरूपस्तदाऽभवत् ।
यथा सूर्यो यथा कृष्णस्तत्तुल्यः स तदाऽभवत् ॥८८॥
तुल्यरूपाँस्त्रीन् पुरुषान् देववद्भासमन्वितान् ।
जनास्तु ददृशुस्तत्र महाश्चर्यपरायणाः ॥८९॥
उभयोः श्रीमतोर्नारायणयोः पादयोस्तदा ।
पूर्णकामः स भक्तो वै निपपात मुहुर्मुहुः ॥९०॥
तारितोऽहं कुष्ठरोगाद् भवरोगाच्च तारितः ।
हस्तलाभे हरेकृष्ण यद्वहं तुष्टिमाप्नुयाम् ॥९१॥
मिलितयोर्भवतोर्मे पुनर्मेलनमध्रुवम् ।
तस्मात् त्यक्ष्ये न मिलितो पावितवन्तौ मां प्रभू ॥९२॥
ऊर्जव्रतः प्रधृत्वैव तयोश्चरणावेव ह ।
जगाद न मया स्थेयं भूलोके क्लेशसागरे ॥९३॥
युवां नारायणौ कृष्णौ ह्युद्धारं कुरुतं मम ।
सूर्यः प्राह च कायस्थ स्थित्वाऽत्र मम मन्दिरम् ॥९४॥
प्रकारय शुभं स्वल्पं प्रतिष्ठां मम कारय ।
कुष्ठिनां स्नानतः पश्चान्मम दर्शनमात्रतः ॥९५॥
अनादिश्रीकृष्णनारायणस्य पूजनात्तथा ।
रोगनाशस्तथा तीर्थयात्रा पूर्णा भवेदिह ॥९६॥
एवं कृत्वा ततस्त्वं वै संयाता रविमण्डलम् ।
ततः सत्यप्रलोकं च सिद्धानां मण्डलं ततः ॥९७॥
ततो वैकुण्ठमेवापि ततोऽक्षरं गमिष्यसि ।
इत्युक्त्वाऽन्तर्हितौ देवौ सूर्यः कृष्णनरायणः ॥९८॥
कायस्थो दिव्यदेहस्थः कारयामास मन्दिरम् ।
सूर्यनारायणं चात्र प्रातिष्ठिपत् तथोचितम् ॥९९॥
द्वयोर्नारायणयोश्च तेजांस्यत्र जलान्तरे ।
संव्याप्तान्यभवन् राजन् तदा काले समन्ततः ॥१००॥
मत्स्याश्च शुक्तयश्चापि मणयश्च जलानि च ।
रजःकणास्तदा तेजोव्याप्ताः सूर्या इवाऽभवन् ॥१०१॥
तादृश्यः प्रकृतयस्तास्ततोऽद्याऽपि जलान्तरे ।
ताभ्यो वै जायमानाश्च तेजोमय्यो हि शुक्तयः ॥१०२॥
मणयः कंकराश्चापि रजांसि जलजानि च ।
तदंशास्तत्किरणैः संव्याप्ता भवन्ति सर्वदा ॥१०३॥
सूर्यनारायणश्चात्र जले शुक्तौ मणावपि ।
मन्दिरेऽदृश्यरूपोऽपि वर्तते तेजसान्वितः ॥१०४॥
तत्तेजोऽयं सदा राजन् प्रसरत्येव सर्वतः ।
सूर्यतीर्थं ततो जातं प्रत्यक्षं सूर्यवर्चुलम् ॥१०५॥
ऊर्जव्रतस्ततः कालान्तरे सूर्यरथं ययौ ।
मुक्तिं जगाम भजनान्नारायणकृपावशात् ॥१०६॥
कुष्ठनाशकरं तीर्थं सूर्यप्रत्यक्षदर्शनम् ।
सूर्यतेजोभिसंव्याप्तजलशुक्त्यादिशोभनम् ॥१०७॥
अर्कतीर्थं तथा चोर्जव्रततीर्थमिदं शुभम् ।
कायस्थतीर्थकं चापि सर्वरोगविनाशकम् ॥१०८॥
इत्युक्तो राधिके राजा चक्रे तीर्थं विधानतः ।
ददौ दानानि संस्नात्वा पुपूजाऽर्कं नरायणम् ॥१०९॥
ततश्चाग्रे ययौ तीर्थान्तरं राजा सलोमशः ।
पठनाच्छ्रवणादस्याऽऽरोग्यं मुक्तिं व्रजेज्जनः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने गलत्कुष्ठिन ऊर्जव्रतकायस्थस्य सूर्योपासनया नीरोगित्वं मुक्तिश्च सूर्यतीर्थं चेत्यादिनिरूपणनामा त्रिषष्ट्यधिक-द्विशततमोऽध्यायः ॥ २६३ ॥

**श्रीकृष्ण उवाच—**

ततश्च राधिके चाश्वपट्टलो लोमशान्वितः ।
ययावग्रे च शार्ङ्गप्रतीर्थं परमपावनम् ॥ १ ॥

**अश्वपाटल उवाच—**

ऋषे तीर्थमिदं सौम्यं रमणीयं किमात्मकम् ।
यत्र मे स्फुरति विद्या वेदवेदाङ्गबोधिनी ॥ २ ॥

**श्रीलोमश उवाच—**

राजँस्तीर्थमिदं चैवं चमत्कारभरं परम् ।
विद्यते वै ऋषेर्योगाच्छार्ङ्गधरमहात्मनः ॥ ३ ॥
शार्ङ्गधरोमहात्माऽभूद् विप्रोऽपि बुद्धिवर्जितः ।
धर्मारण्यकृतावासः श्रृंगधरस्य वै सुतः ॥ ४ ॥
आबाल्यात्तु जडवत् स वक्तुं जानाति नैव ह ।
मूकवद् वर्तते चापि जिह्वाह्रस्वाख्यदोषतः ॥ ५ ॥

**अश्वपाटल उवाच—**

कथं जिह्वाऽभवत्तस्य ह्रस्वा मौर्ख्यं च मे वद ।
मूकवद्वा कथं चास्ते बाल्ये चाश्चल्यमन्दिरे ॥ ६ ॥

**श्रीलोमश उवाच—**

पूर्वजन्मनि शूद्रोऽभूद् दण्डकारण्यवासकृत् ।
हिंसापरस्तथा शास्त्रदेवनिन्दापरोऽप्यभूत् ॥ ७ ॥
ब्राह्मणान् यज्ञकर्तॄन् स क्लेशयत्येव वाग्रुषा ।
नारायणाऽवतारांश्च नास्तिको मनुते न वै ॥ ८ ॥
कथा यत्र च भवति तत्राऽसत्यां प्रवक्ति ताम् ।
सर्वामुदरपोषार्थं वक्ति स्वार्थपरायणाम् ॥ ९ ॥
एवं निन्दापरश्चाऽयं कदाचिद् गौतमीतटे ।
मृगयार्थं गतस्तत्र श्रृंगमृगं व्यलोकयत् ॥१०॥
मृगं हन्तुं शरं चानुसन्दधाति तु यावता ।
तावन्मृगो भयात् तूर्णं दुद्राव गौतमीं प्रति ॥११॥
अदृश्यतां गतो वृक्षघटायां च ततः परम् ।
शूद्रकोऽपि प्रदुद्राव मार्गयितुं तटं प्रति ॥१२॥
गोदावर्या जलप्रान्ते ददर्श तं मृगं पुनः ।
शरो मुक्तश्च शूद्रेण मृगपृष्ठे प्रवेशितः ॥१३॥
मृगश्चोत्प्लुत्य सरितः प्रवाहे निपपात ह ।
अमानो मूर्छितोऽगाधे जले वेगप्रवाहणे ॥१४॥
कर्षितः सशरो यातो जलयोगेन वै तलम् ।
मृतश्च जलमध्ये वै मकरेण स भक्षितः ॥१५॥
कृष्ण कृष्ण हरेकृष्ण नारायणेति संस्मरन् ।
मृगोऽपि तीर्थमाहात्म्यात् परेशस्मरणात्ततः ॥१६॥
पुण्यतीर्थमृतेर्जातो धर्मारण्ये स भूसुरः ।
श्रृंगचिह्नसमेतश्च बालः पर्णधरस्य वै ॥१७॥
विप्रस्य मन्दिरे कृष्णभक्तिमान् विप्रसद्गुणः ।
जातिस्मरोऽभवच्चापि भजत्येव हि माधवम् ॥१८॥
गंगे गोदावरि सिन्धो यमुने च सरस्वति ।
मृत्वा स्नाति हरेकृष्ण गृणात्येव दिवानिशम् ॥१९॥
ववृधे स च बालोऽपि पित्रा श्रृंगधरः कृतः ।
उपवीती च शास्त्राणि समध्यैत प्रतापवान् ॥२०॥
धर्मकर्मपरश्चाभूद्विवाहितश्च वै ततः ।
शूद्रो ममार च गोदावरी तटे वने तदा ॥२१॥
गोदावर्यां देहदाहो निष्पादितश्च बान्धवैः ।
तेन पुण्यप्रतापेन पापाण्यस्य प्रजज्वलुः ॥२२॥
मृत्युकालेऽस्मरत् सोऽपि मृगं तं शरसन्धितम् ।
तत्प्रतापेन शूद्रः स श्रृंगधरस्य पुत्रकः ॥२३॥
धर्मारण्येऽभवद् विप्रः शूद्राचारौ जडो यथा ।
पिता जानाति वै सर्वं जातिस्मरस्वभाववान् ॥२४॥
पुत्रो जानाति नैवाऽयं कोऽहमासं पुरा तनौ ।
बालः स शारदाहीनो मूक इव व्यजायत ॥२५॥
जिह्वा ह्रस्वा यतो वक्तुं जानात्येव न बाल्यतः ।
त्रुटितान् स्फोटितान् वर्णान् मम्मा चचा वदत्यपि ॥२६॥
मूको वक्तुं न जानाति नाम्ना शार्ङ्गधरः कृतः ।
उपवीती कृतः पित्रा ऋणानुबन्धनोऽपि सः ॥२७॥
पूर्वजन्मकृतनिन्दाफलं भुंक्ते हि मूकताम् ।
नास्तिक्यस्य फलं मौर्ख्यं भुंक्ते विचित्तवत्तथा ॥२८॥
मृगहत्याफलं तस्य पुत्रताभवनं ह्यपि ।
ऋणदानाय जन्माऽस्या भवच्छृंगधरालये ॥२९॥
तीर्थमृत्युफलं चास्य विप्रगृहे जनिर्मता ।
सोऽयं मौर्ख्यान्मूकभावाज्जडत्वान्मानवर्जितः ॥३०॥
जडवद्वै तपस्तप्तुं धर्मारण्ये मनोऽकरोत् ।
समारेभे स वै स्थित्वा वल्मीकशिखरे स्थितः ॥३१॥
तपश्चोग्रं चकाराऽसौ फलमूलदलाशनः ।
नित्यं त्रिषवणस्नायी मानसं जपमादधे ॥३२॥
लोका द्रष्टुं समायान्ति मूको वै तपसि स्थितः ।
नाऽयं पश्यति काँश्चित्तु बद्धनेत्रोऽभवत्तदा ॥३३॥
नाश्चर्यं मन्यते तत्र मालया जपमादधन् ।
सस्मार भगवन्तं तं जिह्वासरस्वतीप्रदम् ॥३४॥
वेदानां शेवधिं कृष्णं नारायणं परेश्वरम् ।
सर्वविद्याश्रयं सर्वविज्ञं श्रीकृष्णवल्लभम् ॥३५॥
दशवर्षं जजापैवं तपश्चकार सदृशम् ।
वल्मीकावास एवाऽसौ वर्षासु प्लक्षमूलगः ॥३६॥
पर्णकुटीविहीनश्च वितानरहितस्तथा ।
आसनादिविहीनश्च प्रावरणविवर्जितः ॥३७॥
जटाधरो रोमधरो भस्मधरोऽतितापसः ।
वल्कलकौपीनमात्रः करपात्रोऽभवत् सदा ॥३८॥

दशवर्षोत्तरं चोर्जे मासे प्रबोधिनीतिथौ ।
रात्रौ त्वाकाशगीश्चास्मै श्रवसोर्मध्यगा जगौ ॥३९॥
विप्र तपसा सिद्धोऽसि गतं ते कल्मषं बहु ।
पूर्वजन्माऽपराधानामन्तस्त्वया विनिर्मितः ॥४०॥
तपसा चाथ भजनैस्ततस्त्वं सावधानतः ।
याहि पद्भ्यां तीर्थमग्र्यमश्वपट्टसरोवरम् ॥४१॥
पश्चिमोदधिसान्निध्ये द्वीपे चानर्तसंज्ञके ।
सौराष्ट्रे देशके तत्राऽक्षरक्षेत्रं प्रविद्यते ॥४२॥
नाम्ना कुंकुमवापीति नगरी चाच्युताश्रया ।
अनादिश्रीकृष्णनारायणाऽऽवासा हि शाश्वती ॥४३॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
जप मन्त्रं च सततं याहि तं देशमुत्तमम् ॥४४॥
स्थानबलाद् देशबलादाश्रमस्य बलात्तथा ।
देवबलाद् यत्नबलादसाध्यमपि सिद्ध्यति ॥४५॥
इत्युक्त्वा विररामैषा वाणी ततः स भूसुरः ।
नत्वा पित्रे च मात्रे च तपःस्थानं प्रणम्य च ॥४६॥
वल्मीकं प्लक्षमेवाऽपि नत्वा प्रययौ तैर्थिकः ।
गयां काशीं प्रयागं च इन्द्रप्रस्थवनं यमीम् ॥४७॥
पुष्करं च नदीं सरस्वतीं सिद्धसमाश्रिताम् ।
बहुचरां सतीं तीर्थान्यावीक्ष्य प्रविधाय च ॥४८॥
सौराष्ट्रं चाविवेशाऽसौ मूकश्चतुष्टिलाचलम् ।
गत्वा कुंकुमवाप्याख्यं क्षेत्रमापाऽक्षराभिधम् ॥४९॥
दृष्ट्वा सरोवरं रम्यं सागराभं महत्तमम् ।
सर्वतीर्थाश्रयं देवदेवीसतीसदाश्रयम् ॥५०॥
महर्षिकृतसन्ध्यादिध्यानकर्मादिशोभितम् ।
तीर्थवासिप्रजाभिश्च स्नानदानादिबृंहितम् ॥५१॥
हंसगरुडमेनाद्यैः पक्षिव्रातैः समन्वितम् ।
आम्राऽमृतफलिवृक्षैरुद्यानैः परितोऽन्वितम् ॥५२॥
ईशानवश्यदेवाद्यैर्गणैः संरक्षितं सदा ।
यज्ञभूमण्डपाद्यैश्च वेदघोषैश्च नादितम् ॥५३॥
कामधेनुकामलताकल्पमणिविराजितम् ।
संकीर्तनपरैर्भक्तैः कृतवैष्णवसन्मखम् ॥५४॥
देवकन्याराजकन्याब्रह्मप्रियाऽभिशोभितम् ।
वैकुण्ठातिप्रभाशालिकुंकुमानगरीयुतम् ॥५५॥
तेजः परिधिसंव्याप्तमूर्द्धमुक्तप्रजान्वितम् ।
राधारमासतीलक्ष्मीकमलामन्दिरान्वितम् ॥५६॥
अनादिश्रीकृष्णनारायणमन्दिरमस्तके ।
सहस्रैकस्वर्णघटैः प्रसारितप्रभान्वितम् ॥५७॥
देवालयैः सतां स्थानैर्विमानैश्चातिसम्पदम् ।
विमानानां व्योममार्गैर्गतागतैः सुघोषितम् ॥५८॥
आर्तानां दुःखनाशेन संस्तुतं च निजार्थिभिः ।
चन्द्रशीतमधुमिष्टकस्तूरीगन्धसज्जलम् ॥५९॥
पावनं पापिनां चापि मुक्तिदं ब्रह्मदं सरः ।
विप्रो विलोक्य सहसा दिव्यभावमुपागमत् ॥६०॥
विस्मृत्य सर्वतीर्थानि परां शान्तिमुपागमत् ।
उत्तरे च तटे गत्वा जलपानमुपाचरत् ॥६१॥
सस्नौ सुविधिना कन्दं मूलं प्रभुज्य वै ततः ।
दैवं पैत्र्यं चकारापि प्रदक्षिणां ततोऽकरोत् ॥६२॥
उत्तरेऽत्र स्थले राजन् स्थित्वा मनुं जजाप च ।
नित्यं त्रिषवणस्नायी नित्यमहर्षिपूजकः ॥६३॥
नित्यं देवार्हणस्तोत्रपूजापरोऽभवच्छुचिः ।
वैकुण्ठं वापि गोलोकं प्राप्य यद्वत् प्रमोदते ॥६४॥
तथा मुदा मूकविप्रः कृतकृत्यं विवेद ह ।
अथ ज्ञात्वा लोमशस्याऽऽश्रमं ययौ मुदान्वितः ॥६५॥
नत्वा मुमोद बहुधा पपात पादयोः ऋषेः ।
पादसंवाहनं चक्रे ऋषेर्भावसमन्वितः ॥६६॥
जिह्वाग्रं च कराग्रैश्च धृत्वाऽप्यदर्शयत् तदा ।
चेष्टया त्वार्थयच्चापि वाणी मे भवतु प्रभो ॥६७॥
ऋषिस्तथाऽस्त्विति प्राह जिह्वाऽत्यजद्धि ह्रस्वताम् ।
वर्णग्रहणयोग्या सा राजन् ममाऽऽश्रमेऽभवत् ॥६८॥
ततो जग्राह मन्त्रं च मत्तो नारायणस्य सः ।
'अनादिश्रीकृष्णनारायणः स्वामी ममाऽस्तु सः' ॥६९॥
इति मन्त्रं गृहीत्वा च विप्रस्त्वत्र तटे पुनः ।
स्नात्वा जजाप विधिना मन्त्रद्वयं निशान्तरे ॥७०॥
तावद् ब्राह्मे मुहूर्ते वै द्वादश्यां कार्तिके सिते ।
प्राविर्बभूव भगवान् प्रत्यक्षस्तस्य गोचरः ॥७१॥
अश्वशिरा वेदधर्ता वेदमूर्तिर्महाप्रभुः ।
अश्वमुखो नरदेहः सर्वविद्याविराजितः ॥७२॥
शारदासहितः कृष्णो जगाद क्ष्मासुरं ततः ।
वद विप्र प्रसन्नोऽस्मि किं ते मनसि वर्तते ॥७३॥
विप्रो दृष्ट्वा तथा श्रुत्वा भगवन्तं पुरातनम् ।
सहसोत्थाय विधिना चकार दण्डवन्नमः ॥७४॥
भावपुष्पैः प्रपूज्यैव ववन्दे शुभया गिरा ।
धर्ममूर्ते धर्मपुत्र धर्मारण्ये प्रबोधकृत् ॥७५॥
धार्मिकं च तपन्तं च दृष्ट्वा कृपापरो भवान् ।
समुद्धार मां मग्नं संसारसागरे प्रभो ॥७६॥

कृपां विना न चान्यद्वै हेतुश्चात्र मयाऽर्जितः ।
यदहं पूर्वपापानां क्षालनं प्राप्तवानिह ॥७७॥
दर्शनं प्राप्तवानत्र दिव्यं दिव्यस्थलस्य ते ।
दिव्यमूर्ते कृपासिन्धो वाणी श्रीलोमशस्य वै ॥७८॥
आशीर्वादेन मे जाता दर्शनात्तव चाधुना ।
जातिस्मरो भवाम्यत्र स्मरामि निन्दनं तव ॥७९॥
प्राग्भवे शूद्रवर्णे यत् कृतं दण्डकसद्वने ।
सर्वं पापं नाशमाप्तं हतो मृगो मया तु यः ॥८०॥
स चास्ते मम जनकः शृंगधरः सश्रृंगकः ।
ऋणं तस्य प्रदातुं तु तद्गृहे मूकपुत्रकः ॥८१॥
जातोऽस्मि गोमतीतीर्थयोगाद् विप्रत्वमाप्तवान् ।
विप्रो विद्याविहीनश्चेत् पापः स नामधारकः ॥८२॥
तस्माद् विद्यां प्रदेह्यत्र पितृऋणविमोचिनीम् ।
इत्युक्त्वा प्रणनामाऽसौ नमो ओं परमात्मने ॥८३॥
अथ श्रीभगवानाह विप्र त्वं मम वाञ्छया ।
कृपालेशेन सरसा शार्ङ्गधर प्रवैदिकः ॥८४॥
सर्वौषधीनां विज्ञाता रसानां तत्त्ववेदनः ।
गुणज्ञश्च तथा दैवबलो भव हि सर्वथा ॥८५॥
इत्युक्त्वा भगवानत्र राजँस्तिरोदधे द्रुतम् ।
विप्रे सा शारदा देवी संहिता चौषधिप्रभा ॥८६॥
हरिद्वर्णा प्रविवेश विप्रश्चायुष्यवेदवान् ।
अभवत् तत्क्षणादेव करे विद्यामवाप्तवान् ॥८७॥
व्यरचयत्ततः शीघ्रं शार्ङ्गधराख्यसंहिताम् ।
कुंकुमवापिकाक्षेत्रे कृष्णनारायणान्तिके ॥८८॥
गत्वा निवेदयामास गृहीत्वाऽऽशीर्वचांसि सः ।
लोमशं च प्रपूज्याऽध्यापयामास च भूसुरान् ॥८९॥
एवं शार्ङ्गधरश्चात्र राजन्नश्वशिराहरेः ।
दर्शनं प्राप्तवाँस्तीर्थं शार्ङ्गधराख्यमेव तत् ॥९०॥
आश्वशिरसमेवापि शारदातीर्थमित्यपि ।
वर्तते चोत्तमं चेदं यत्र वै तपआदिभिः ॥९१॥
लभ्यते वेदविज्ञानं निन्दापापादिनाशनम् ।
स्नाहि देहि च विप्रेभ्योऽनाथेभ्यो दक्षिणाः शुभाः ॥९२॥
स विप्रश्च ततः कालान्तरे धर्मवनं ययौ ।
पितरं प्राप्य मुमुदे ख्यातिं चावाप शाश्वतीम् ॥९३॥
यत्र तपसा द्रव्येण यत्नेन नापि सम्पदा ।
तद्वै भवति ध्यानेनाऽऽशीर्वादैर्भजनेन च ॥९४॥
देवबलेन चाश्रयबलेन महिमदृशा ।
उपास्त्या जायते चापि दुर्लभं सुलभं नृप ॥९५॥
इत्युक्तो नृपतिस्तत्र शार्ङ्गधरं तथा द्विजान् ।
प्रपूज्य चाप्लवनं संप्रचक्रे सरसो जले ॥९६॥
ददौ दानानि विधिना बहुसोऽप्यभवत्तदा ।
तीर्थस्यैवं प्रतापं स जानन् वै राधिके ततः ॥९७॥
रत्नदानं च गोदानं विद्यादानं चकार सः ।
छत्रदानं वस्त्रदानं भूषादानं चकार सः ॥९८॥
अन्नदानं स्वर्णदानं चकार चाश्वपाटलः ।
नत्वा तीर्थं सुरान् नत्वा लोमशेन समं ततः ॥९९॥
ययौ चाग्रे शुभं तीर्थान्तरं माहात्म्यसंभृतः ।
पठनाच्छ्रवणादस्य विद्यावान् वै प्रजायते ॥१००॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने निन्दकशूद्रस्य हरिणघातिनो गोदावर्या मरणाद्वमारण्ये मूकविप्रजन्म, तपसा क्षीणपापस्य कुंकुमवाप्यामोषधिविद्याविज्ञानं, मूकतानाशः शार्ङ्गधरसहिताकर्तृत्वं, शार्ङ्गधरतीर्थमाश्वशिरसतीर्थमित्यादिनिरूपणनामा चतुष्षष्ट्यधिकद्विशततमोऽध्यायः ॥ २६४ ॥

**श्रीकृष्ण उवाच—**

राधिके च ततश्चापि शृणु तीर्थं क्षयापहम् ।
अश्वपाटलराजाऽसौ गत्वा पप्रच्छ लोमशम् ॥ १ ॥

**अश्वपाटल उवाच —**

एतत्तीर्थस्य माहात्म्यं वद मे नामसंयुतम् ।
फलं कीदृक् कदा जातं कस्येति ब्रूहि मे गुरो ॥ २ ॥

**श्रीलोमश उवाच—**

राजन् पुराऽभवच्छूद्रः पार्ष्णिरदाभिधः शुभः ।
अजासंरक्षको भद्रानदीतीरनिवासकृत् ॥ ३ ॥
आजबालान्नरवर्गानर्भकानेव वै वने ।
क्षुद्रबदरिकाजाले निक्षिपत्येव निर्दयः ॥ ४ ॥
स्वार्थपरो हि लोकोऽयं विना स्वार्थं न रक्षति ।
अजापुत्र्यो द्विवर्षान्ते भवन्त्येव पयःप्रदाः ॥ ५ ॥
अजापुत्रास्तु विफला बहवोऽस्य निरर्थकाः ।
रक्षणीया वृथा चेति मत्वा त्यजति निर्जने ॥ ६ ॥
अजाप्रसवकाले वै बालां बालं प्रवीक्ष्य सः ।
नराँस्त्यजति जालादौ कण्टकादौ हि निर्दयः ॥ ७ ॥
बालिकास्तु सदा चाजापाला रक्षन्ति चाशया ।
एवं वै जालके त्यक्ता अर्भका वनचारिभिः ॥ ८ ॥

शृगाल्यादिभिश्च रात्रौ भुज्यन्ते क्रूरप्राणिभिः ।
अर्भका बहुकष्टेन निधनं यान्ति वै तदा ॥ ९ ॥
शपन्ति चार्भकास्तत्र क्षेपकान् दुःखदाँस्तथा ।
यथा वयं वने क्षिप्ता व्यापादिताश्च भक्षिताः ॥१०॥
वनिभिः प्राणिभिस्तद्वत् त्वद्बालाः स्युश्च भक्षिताः ।
एवं शपन्ति पशवः पुत्रतुल्या हि पालिनः ॥११॥
एवं दुःखप्रदातॄणां बाला नश्यन्ति वै मुहुः ।
निर्वंशास्ते तु जायन्ते यैर्हताः पुत्ररूपिणः ॥१२॥
पुत्रा वै बहुधा प्रोक्ताः पत्न्यां चौरस एव सः ।
अपत्न्यां स तु दायादः परस्मादर्कके कृतः ॥१३॥
कुटुम्बपुत्रकश्चापि तथा भृत्योऽपि पुत्रकः ।
शिष्यश्च पुत्र एवापि शरणागतपुत्रकः ॥१४॥
पालितश्चापि पुत्रश्चाऽध्यापितः पुत्र इत्यपि ।
त एते मानवाः पुत्राः पुत्र्यः प्रोक्ताश्च भूमिप ॥१५॥
तातेति च वदन् नित्यं पुत्रो भवति सदृशः ।
अथ गोपशवश्चोष्ट्रा अश्वा मृगा अजावयः ॥१६॥
महिष्यो वृषभाः श्वानो गजा गर्दभगोवृषाः ।
पालिताः पशवः सर्वे पुत्राः पुत्र्यो भवन्ति ते ॥१७॥
स्वामिना पुत्रवत्पाल्याः सिंहाद्या वानरा अपि ।
शुका मेनाः शशाद्याश्च कपोताश्चक्रकादयः ॥१८॥
हंसाश्च गरुडाश्चापि दासा दास्यश्च पुत्रकाः ।
राज्ञां प्रजाः सदा पुत्र्यो गुरोः शिष्या हि पुत्रकाः ॥१९॥
वृद्धानां बालवर्गाश्च पुत्रतुल्या हि पुत्रकाः ।
फलिवृक्षाः पुष्पद्रुमा वर्धिता बीजतो हि ये ॥२०॥
सर्वे पुत्राः पुत्रसमा न घात्याः स्वामिना हि ते ।
हनने तु यथा हत्या तथैव निर्जने वने ॥२१॥
प्रक्षिप्ते मरणार्थं वै क्षुधातृषाप्रपीडिते ।
द्विगुणा बालहत्या सा जायते क्षेपिणो हि सा ॥२२॥
तत्पापं रौरवे दुःखं निर्वंशत्वमिहापि च ।
आपद्यते हि तत्कर्तुर्बालहत्याफलं नृप ॥२३॥
पार्ष्णिरदो ह्यजापालो बहुहत्याभिदूषितः ।
मृतपुत्रोऽभवच्चापि मृतभार्यस्ततोऽभवत् ॥२४॥
मृतवंशोऽभवच्चापि सर्वनाशार्दितस्त्विह ।
गृहं तस्याऽभवत् सस्यपुलाकैः छादितं तु यत् ॥२५॥
सर्वं तद् वह्निना दग्धं सोपस्करं हि भस्मसात् ।
नाऽवशिष्यत एवाऽस्य विना वै कम्बलद्वयम् ॥२६॥
अजाशाला प्रदग्धा च अजा दुद्रुवुरातुराः ।
रात्रौ चौरेण नीतास्ता अजाहीनो बभूव च ॥२७॥

इत्येवं सर्वपापानां बालहत्या महत्तमा ।
तत्फलं त्वाप्तवान् पार्ष्णिरदो जीवनवर्जितः ॥२८॥
समभूद् दुष्टभाग्याच्च क्षयरोगी प्रदुःखितः ।
त्यक्त्वा भद्रानदीं त्यक्त्वा वंशवटं पुरं निजम् ॥२९॥
श्रुत्वा जनेभ्यस्तीर्थं च कुंकुमवापिकास्थितम् ।
आश्वपट्टसरः श्रेष्ठं सर्वपातकनाशनम् ॥३०॥
उत्तरेऽत्र तटे राजन्नागत्य वीक्ष्य निर्मलम् ।
जलं पपौ ततस्तत्र सस्नौ नारायणं स्मरन् ॥३१॥
कम्बलद्वययुक्तोऽसौ तटेऽत्र वासमाचरत् ।
हरेकृष्ण हरेकृष्ण कृष्णकृष्ण जपत्यपि ॥३२॥
बालकृष्ण हरेकृष्ण नारायण जपत्यपि ।
प्रदक्षिणं चकाराऽपि सरसः परितस्तथा ॥३३॥
लोमशस्याऽऽश्रमे दिव्यां कथां शुश्राव मोक्षदाम् ।
लक्ष्मीनारायणसंहिताया नारायणाश्रयाम् ॥३४॥
महापापातिपापानि नश्यन्ति भजनाद्धरेः ।
साधूनां सेवया सर्वपापानि प्रज्वलन्ति हि ॥३५॥
रोगा नश्यन्ति भजनात् सौभाग्यं चाभिवर्धते ।
हरेः संकीर्तनात् कष्टं सर्वं विलीयते द्रुतम् ॥३६॥
अनादिश्रीकृष्णनारायणेत्यष्टोत्तरं शतम् ।
कीर्तितं येन भावेन कष्टं तस्य विलीयते ॥३७॥
हरेर्वशे भवन्त्येव कालकर्मस्वभावकाः ।
मृत्युभाग्यादिकं चापि लीयन्ते हरिकीर्तनात् ॥३८॥
हरेकृष्ण बालकृष्ण सततं येन कीर्तितम् ।
भुक्तिर्मुक्तिर्भवेत्तस्य स्वर्गो वा कामनान्वितम् ॥३९॥
साधूनां सेवया चापि भाग्योदयो भवेदिह ।
सतामाशीर्वचोभिश्च दारिद्र्यं प्रविलीयते ॥४०॥
अपि जन्मसहस्रस्य पापं पर्वतसन्निभम् ।
सत्संगाल्लीयते तूर्णं सेवया च सतां तथा ॥४१॥
इत्येवं चाशृणोद् वार्तां कथां वै संहितागताम् ।
हर्षं चावाप बहुधा भजनं प्रचकार ह ॥४२॥
हरेकृष्ण बालकृष्ण नारायण हरेहरे ।
वासुदेव परब्रह्म परमात्मन् श्रियःपते ॥४३॥
एवं चकार भजनं शृण्वतां सर्वदेहिनाम् ।
लज्जां विहाय सततं तालीवादनपूर्वकम् ॥४४॥
क्वचित्तु नर्तनं चापि करोत्येव सुतानवान् ।
क्वचित्तिष्ठन् समासीनः सुप्तश्चाऽकीर्तयत् प्रभुम् ॥४५॥
लोकयन्ति जनास्त्वेनं नाऽयं पश्यति कंचन ।
कीर्तने दत्तचित्तश्च दत्तजिह्वः सदाऽभवत् ॥४६॥

साधून् साधुसमाचारान् वीक्ष्य यतीन् सतो जनान् ।
काषायाम्बरधर्तॄंश्च नत्वा करोति दण्डवत् ॥४७॥
मूर्ध्नि देहे मुखे चापि साधुपादरजः शुभम् ।
निक्षिपत्येव च स्तौति दासं मां पावनं कुरु ॥४८॥
साधूनां पर्णशालासु ऋषीणामाश्रमेषु च ।
रटन्नारायणं गत्वा मार्जनादि करोति च ॥४९॥
पादसंवाहनं चापि करोति भावतः सदा ।
साधूनां भक्षितं चान्नं शिष्टं चादाय वै ततः ॥५०॥
मत्वा प्रसादमेवाऽन्नं सरोजलेऽवधूय च ।
पापहर्तृ समश्नाति मन्यते कृतकृत्यकम् ॥५१॥
राजन्नेवं तटे चात्र पार्ष्णिरदोऽतिभक्तिमान् ।
व्याजायत दिने याते भक्तिरस्य व्यवर्धत ॥५२॥
नारदो ब्रह्मणः पुत्रस्त्वेकदा भगवान् स्वयम् ।
अनादिश्रीकृष्णनारायणदर्शनहेतवे ॥५३॥
समाजगाम सजटः साधुवीणां निनादयन् ।
'हरेकृष्ण बालकृष्ण नारायण हरेहरे ॥५४॥
वासुदेव परब्रह्म परमात्मन् श्रियःपते' ।
कीर्तयन् स निजवीणास्वरैर्मेलं विधापयन् ॥५५॥
व्योम्नश्चावाततारैतत्तटे तद्दैवनोदितः ।
पार्ष्णिरदो द्रुतं दृष्ट्वा नारदान्तिकमाययौ ॥५६॥
मत्वा प्रभुं वा देवं वा नेमे तूर्णं हि दण्डवत् ।
धूलीं तस्य निजे देहे धृत्वा निक्षिप्य चानने ॥५७॥
'हरेकृष्ण बालकृष्ण नारायण हरेहरे ।
वासुदेव परब्रह्म परमात्मन् श्रियःपते' ॥५८॥
इत्येवं व्याजहाराऽपि संनृत्यन् तालिकायुतः ।
नारदस्तं विलोक्यैव प्रसन्नोऽभूत् हृदा तदा ॥५९॥
'स्वस्ति तेऽस्तु तथाऽऽरोग्यं भक्तिस्तेऽस्तु परेश्वरे ।
भक्त्यैवं भज गोविन्दं सदा नारायणं प्रभुम्' ॥६०॥
इत्येवं प्रददौ तत्राशीर्वादान् वै निसर्गजान् ।
तावत्तस्य तु पापानि निर्गतानि शरीरतः ॥६१॥
यानि तीर्थाऽवशिष्टानि जज्वलुर्भस्मसात्तदा ।
काकरूपाणि सर्वाणि जज्वलुर्भस्मसात्तदा ॥६२॥
ततो हत्या नरीरूपा विकृताः कृष्णवर्णिकाः ।
निर्ययुः शतशस्तस्य शरीरान्नग्निकाः स्त्रियः ॥६३॥
जज्वलुस्ताश्च तूर्णं वै भस्मसात्तत्र चाऽभवत् ।
ततोऽस्य देहतस्तत्र निर्ययुः क्षीणदेहिनः ॥६४॥
वृद्धाः स्थूलशिरसश्च क्षीणोदराः कृशोरसः ।
मक्षिकामशकाव्याप्ताः पुरुषाः पापरूपिणः ॥६५॥
कृष्णवर्णाः क्षुधिताश्च निर्दयाः पापमूर्तयः ।
प्रजज्वलुश्च सहसा तदोत्थितेन वह्निना ॥६६॥
भस्मसादभवँस्तेऽपि ततश्चाऽस्य शरीरतः ।
कफतन्तुप्रवाहाश्च रक्तजन्तुमयाः खलु ॥६७॥
विनिर्ययुर्द्रुतं तत्र रोगग्रहात्मका हि ते ।
जज्वलुस्ते धूम्रभूताश्चाऽम्बरे विगतास्तदा ॥६८॥
पार्ष्णिरदोऽभवच्छुद्धो देवतुल्यशरीरवान् ।
नारदेन कृतो दिव्यो दिव्यतीर्थप्रभावतः ॥६९॥
सस्नौ शीघ्रं जले तत्र पपौ वारि शुभं तदा ।
नारदस्य चरणौ वै प्रक्षाल्याचमनं पपौ ॥७०॥
स्वर्णाम्बरयुतो जातः स्वर्णकुण्डलमण्डितः ।
चन्द्रकान्त्याननः सूर्यप्रभः सुरालयोचितः ॥७१॥
ननर्त दिव्यदेहोऽपि धूलीं कृत्वा च वर्ष्मणि ।
मुहुर्नारदपादस्थां महिमानं विभाव्य सः ॥७२॥
'हरेकृष्ण बालकृष्ण नारायण हरेहरे ।
वासुदेव परब्रह्म परमात्मन् श्रियःपते' ॥७३॥
कीर्तयत्येव सततं नान्यद् वदति वै तदा ।
देवभूतोऽभवच्चापि विसस्मार न कीर्तनम् ॥७४॥
नारदोऽपि महाश्चर्यं प्राप्तो दृष्ट्वा तथाविधम् ।
भक्तं भक्तोत्तमं तत्र क्षणं तस्थौ हि सन्निधौ ॥७५॥
अहो भक्तोऽयमेवाऽस्ति वैकुण्ठयोग्य एव ह ।
अनादिश्रीकृष्णनारायणस्य दर्शनोत्तरम् ॥७६॥
एनं नेष्ये हि वैकुण्ठं कीर्तने सहयोगिनम् ।
विचार्येत्थं च तं नीत्वा ययौ कृष्णनरायणम् ॥७७॥
पुपूज परया प्रीत्या कुसुमाद्यैः परेश्वरम् ।
आरार्त्रिकं तथा कृत्वा कृत्वा नृत्यं च गायनम् ॥७८॥
नामसंकीर्तनं कृत्वा लब्ध्वा स्वागतमाननम् ।
पार्ष्णिरदं च वैकुण्ठं नेतुमाज्ञामवाप्य च ॥७९॥
नारदस्तेन युक्तश्च श्रीमद्गोपालकृष्णकम् ।
पितरं मातरं देवीं कंभरां सम्प्रणम्य च ॥८०॥
ईशानं लोमशं चापि नत्वा ब्रह्मप्रियास्तथा ।
स्मारयित्वा विवाहस्य क्षणं कृष्णस्य मार्गके ॥८१॥
शुक्ले चतुर्थदिवसे विहस्य च प्रसाद्य च ।
ययौ पार्ष्णिरदस्थानं पार्ष्णिरदं जगाद ह ॥८२॥
अत्र तीर्थे तव नाम्ना पार्ष्णिरदं भविष्यति ।
नारदाख्यं तथा तीर्थं नृत्यतीर्थं भविष्यति ॥८३॥
भक्त मासं वसात्रैव कुरु मत्पर्णकालयम् ।
मृत्तिकानारदं स्थाप्य दृष्ट्वा कृष्णविवाहनम् ॥८४॥

ततो यास्यसि वैकुण्ठं दिव्यदेहश्चतुर्भुजः ।
इत्युक्त्वा तं तटे त्यक्त्वा ततः कृष्णनरायणम् ॥८५॥
पुनर्गत्वा हरिं प्राह वक्तुकामोऽस्मि सेवकः ।
काश्यां श्रीदुःखहालक्ष्मीः शिवराजस्य पुत्रिका ॥८६॥
समीक्षते विवाहं च तथा ब्रह्मप्रियाः प्रभो ।
मार्गशीर्षस्य धवले चतुर्थ्यां श्रेयसां निधौ ॥८७॥
समये भगवाँस्तत्र विवाहविधिमाचर ।
स्मारयामि भगवन्तं सर्वज्ञमपि भक्तितः ॥८८॥
ब्रह्मप्रियाणां सर्वासां मानसैर्विनिवेदितः ।
इत्युक्त्वा प्रययौ चापि नारदश्च यदा तदा ॥८९॥
अनादिश्रीकृष्णनारायणः प्राह हि नारदम् ।
याहि त्वं काशिकां तत्र शिवेश्वरगृहं प्रति ॥९०॥
गत्वा सर्वं यथायोग्यं ज्ञात्वा मां विनिवेदय ।
तथास्त्वितिनिदेशं च प्राप्य नारदको मुनिः ॥९१॥
ययौ तीर्थनिमित्तेन ज्ञातुं वृत्तान्तकं नृप ।
तदिदं नारदं तीर्थं पार्ष्णिरदं च तीर्थकम् ॥९२॥
पापहं क्षयहं तीर्थं देवतीर्थं समुच्यते ।
अत्र स्नानात् समग्राणि नश्यन्ति पापकानि हि ॥९३॥
अत्र दानाश्च जायन्ते स्मृद्धयः स्वर्गसन्निभाः ।
अत्र वै तपसा चापि भजनेन च कीर्तनात् ॥९४॥
नर्तनाच्च भवेद् दिव्यं शरीरं दैवसन्निभम् ।
आयुष्यं वर्धते चापि भाग्यं प्रकाशते तथा ॥९५॥
सतां सेवासमो लाभश्चात्र वासाद् भवेन्नृप ।
सतां प्राप्तिर्भवेच्चापि शान्तानां मोक्षदायिनाम् ॥९६॥
अकामो लभते मुक्तिं सकामो लभते दिवम् ।
विष्णुभक्तस्तु वैकुण्ठं लभते नात्र संशयः ॥९७॥
राजन्नत्र जलं पीत्वा स्नात्वा नत्वा च नारदम् ।
देहि दानानि धेनूनां राजसूयफलानि वै ॥९८॥
इत्युक्तो राधिके राजा धेनुदानानि वै ददौ ।
दत्वा तथाऽन्यदानानि स्नानादिविधिमाचरत् ॥९९॥
ततस्तीर्थं पश्चिमं च ततो जगाम सान्वयः ।
लोमशेन तु सहितो राजाऽश्वपाटलः शुचिः ॥१००॥
पठनाच्छ्रवणादस्य पापनाशो भवेत्तथा ।
भुक्तिर्मुक्तिर्भवेच्चापि यथेष्टां च गतिं लभेत् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पार्ष्णिरदनामकाऽजापालशूद्रस्याऽश्वपट्टसरोवरे स्नानादिना क्षयरोगनिवारणं नारदतीर्थे चेत्यादिनिरूपणनामा पञ्चषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६५ ॥

**श्रीकृष्ण उवाच—**

रासेश्वरि प्रिये पश्चाद् राजा तीर्थाग्र्यमाययौ ।
पप्रच्छ लोमशं तत्र माहात्म्यं नाम चेत्यपि ॥ १ ॥

**अश्वपाटल उवाच—**

इदं तीर्थं कदा चात्र ख्यातिं प्राप कियद्बलम् ।
केन कृतं च तत्सर्वं ब्रूहि संक्षेपतो गुरो ॥ २ ॥

**श्रीलोमश उवाच—**

राजन् पुरा समारंभे सृष्टेर्व्यासो हरिः स्वयम् ।
श्वेतव्यासस्वरूपोऽत्राऽऽजगाम तीर्थवाञ्छया ॥ ३ ॥
अत्र तीर्थं परं कृत्वा स्नात्वा प्रपूज्य माधवम् ।
अनादिश्रीकृष्णनारायणं नत्वा ततःपरम् ॥ ४ ॥
वस्त्रापथं सोमनाथं मूलद्वारावतीं ययौ ।
गोपनाथं स्तंभतीर्थं कृत्वा च पुष्करं तथा ॥ ५ ॥
कुरुक्षेत्रं ययौ यत्र निजावासो हि वर्तते ।
तदा पृथ्व्यां बहवोऽस्य शिष्या वेदादिवेदिनः ॥ ६ ॥
अभवन् लोकमोक्षार्थं ज्ञानदानादिकारिणः ।
अत्र पूर्वं योजनाद्वै दूरे चाऽर्कपुरेऽभवत् ॥ ७ ॥
श्वेतव्यासस्य शिष्यो वै विप्रो धर्मसुमन्तुकः ।
व्यासतुल्यो महर्षिः सः सरोवरतटे सदा ॥ ८ ॥
वटवृक्षे निजावासं कृत्वा प्रजाजनान् बहून् ।
श्रेयोमार्गं ज्ञानरूपं भक्तिरूपं वृषान्वितम् ॥ ९ ॥
समादिशत्यजस्रं च ब्राह्मणैः सेवितोऽभवत् ।
पार्श्वग्रामजनास्तत्र कथां श्रोतुं समुत्सुकाः ॥१०॥
समायान्ति सदा सायं प्रयान्ति पुनरेव च ।
हरिं विना न कल्याणं भक्तिं विना न मोक्षणम् ॥११॥
ज्ञानं विना न तमसो विलयो मायिके गृहे ।
साधुं विना न साक्षाद्वै भगवत्प्राप्तिरेव ह ॥१२॥
अनादिश्रीकृष्णनारायणश्चान्तरगो हि नः ।
हरिं भजत कृष्णं तं श्वेतव्यासस्वरूपिणम् ॥१३॥
एवंददात्युपदेशं संहितां वाचयत्यपि ।
अश्वपट्टसरो नित्यं प्रातः स्नानाय याति च ॥१४॥
कृत्वा तीर्थविधिं चापि नत्वा श्रीपुरुषोत्तमम् ।
ऋषीन् नत्वा सुरान् सम्पूज्य प्रयाति स्वमन्दिरम् ॥१५॥
एवं वै वर्तमानस्य विप्रस्य वेदवेदिनः ।
सर्पदंशोऽभवन्मार्गे निर्जने तीर्थकारिणः ॥१६॥

तूर्णं योगपरो भूत्वा निषद्य च समाधिना ।
प्राणानायम्य मार्गस्य तीरे यान्तं फणाधरम् ॥१७॥
आह्वयामास विप्रः स प्रसह्य वशगं व्यधात् ।
फणाधरोऽपि बलवान् त्रासं प्राप्य ततः स्थलात् ॥१८॥
विद्रवितुं यततेऽपि न शशाक प्रधावितुम् ।
विप्राधीनस्तदा भूत्वा स्रुत्वा स्रुत्वा द्विजान्तिकम् ॥१९॥
आगत्य निपपातैव रक्ष रक्षेति संवदन् ।
दंशाख्यश्चापराद्धो वै मया तेऽत्र कृतो द्विज ॥२०॥
मा मां मारय विप्रेन्द्र ! प्राणाः प्रियाश्च ते च मे ।
क्षमां याचे तामसोऽहं स्वभावो मम तादृशः ॥२१॥
सात्त्विकस्त्वं स्वभावस्ते दयाधर्म इति द्विज ।
तिर्यग्योनौ व्रजतो मे कदा मोक्षो भवेदिति ॥२२॥
तव योगेन मे मोक्षो भवत्यत्राऽपराधिनः ।
मम मोक्षो यथा स्याद्वै तथा विप्र विधेहि च ॥२३॥
यद्वा ज्ञानं प्रदायैव पावनं मां विधेहि च ।
शत्रुबुद्धया तु मां माऽत्र मारयेति प्रप्रार्थये ॥२४॥
श्रुत्वा सर्पस्य वचनं धर्मसुमन्तुकस्तदा ।
भूत्वा दयापरस्तस्मै पप्रच्छ जन्मकारणम् ॥२५॥
कस्त्वं कस्मात् सर्पयोनिं प्राप्तोऽसि केन कर्मणा ।
वक्तुं जानासि सर्वं चेदात्मश्रेयः करोषि न ॥२६॥
किमत्र कारणं सर्प ज्ञाता सन् भ्राम्यसि कुतः ।
ज्ञाता मां संदशितवान् को लाभस्तेऽत्र संमतः ॥२७॥

## सर्प उवाच—

शृणु विप्र कथयामि सर्वं पश्चाद् यथातथम् ।
लाभवार्ता कथयामि प्रश्नोऽयं नोपयुज्यते ॥२८॥
स्रष्ट्रा सृष्टिः कृता त्रेधा सत्त्वरजस्तमोमयी ।
सात्त्विकाः शममिच्छन्ति राजसा रागमित्यपि ॥२९॥
तामसाः क्लेशमिच्छन्ति स्वभावोऽयं दुरत्ययः ।
वह्निः प्रज्वालयत्येव को लाभो दहनेऽस्य वै ॥३०॥
जलं तृषां च जन्तूनां निवारयति सर्वदा ।
वृष्टिर्वर्षति को लाभो जलस्याऽत्र वदस्व मे ॥३१॥
वायुर्वाति क्वचिद् रूक्षः क्रूरो मृदुश्च वेगवान् ।
को लाभोऽस्य भवेत् तत्र स्वभावस्तादृशो यतः ॥३२॥
सात्त्विकः शान्तिमभ्येति जलं शैत्यं वहत्यपि ।
चन्द्रः शीतः शिला शीता को लाभस्तत्र तत्कृते ॥३३॥
सागरो लवणात्मा च दुग्धं मिष्टं जलं तथा ।
तिक्तो निम्बः कटुः शुण्ठी को लाभस्तत्र तस्य वै ॥३४॥
रक्तं जपायाः कुसुमं रक्तं रक्तं च कुंकुमम् ।
राजसा देववर्गाश्च को लाभो राजसस्य वै ॥३५॥
विद्युत्पातस्तथा वज्रपातः कालश्च संक्षयः ।
मृत्युस्तथाऽन्धकारश्च तामसा वै स्वभावतः ॥३६॥
भंगा गंजा धत्तूरश्च तामसास्ते स्वभावजाः ।
वदात्र विद्वन् तेषां वै को लाभस्तामसोद्भवः ॥३७॥
स्वभावे स्वस्य लाभो न दृश्यते वै तमोव्रते ।
यथागुणं प्रवर्तन्ते भूतानि निम्नवारिवत् ॥३८॥
यथास्वभावा प्रवृत्तिर्दन्तानां चर्वणादिवत् ।
नैसर्गं तु भवेत् कर्म शस्त्रपातेन घातवत् ॥३९॥
तथा मया कृतं चेदं मां तत्र क्रोद्धुमर्हसि ।
लाभवार्ता न तेऽप्यस्ति स्नानं विप्रवृषो यथा ॥४०॥
रात्रौ निद्रा भवत्येव दिवसे जागरं तथा ।
स्वभावरचितं त्वेतत् को लाभस्तत्र संभृतः ॥४१॥
बाल्ये क्रीडामतिर्मध्ये कामेऽन्ते विमतिस्तथा ।
के लाभास्तत्र निहताः स्वभावेन प्रवर्तते ॥४२॥
भवन्ति साधवः केचित् केचिच्चौर्यादिकर्मिणः ।
केचिदीश्वरभावाश्च के लाभास्तत्र मे वद ॥४३॥
सर्पो वै तामसश्चाऽहं दंष्ट्रा मे तामसी मता ।
सा च क्षतं करोत्येव दंष्ट्रालाभोऽत्र को मतः ॥४४॥
विषं वह्निस्वभावं वै लालारूपं प्रवाहणम् ।
विद्युत्समं प्रवेशोऽपि व्यापने स्तनयित्नुवत् ॥४५॥
रुधिरे नाडिकाग्रामे वहत्येव जलादिवत् ।
स्वभावोऽयं विषस्यैव को लाभोऽत्र विषस्य वै ॥४६॥
पृथ्व्याद्या ये तु संयुक्ता वियोगाख्यस्वभाविनः ।
नाड्यो ग्रासस्वभावाश्च को लाभो विषसंग्रहे ॥४७॥
वद विप्र प्राणनाशे देहनाशे स्वभावजे ।
मयि नाशे त्वयि नाशे को लाभोऽत्र निजात्मनोः ॥४८॥
देहनाशे नात्मलाभो नश्वरं गत्वरं वपुः ।
गच्छत्येव स्वभावेन मा खेदं कुरु भूसुर ॥४९॥
गत्वरेण तु देहेन लाभो मोक्षो हि देहिनः ।
समर्थस्त्वं कृतकृत्यो मुक्तिं विधेहि मेऽनव ॥५०॥
मुक्तिलाभः परो लाभस्ते मेऽपि देहिनां तथा ।
मा क्रोधं वह विप्रेन्द्र रोषो वै निरयप्रदः ॥५१॥
मया रोषेण वै प्राप्ता योनिरियं विषोल्बणा ।
निरयाख्या ततो विप्र मा क्रोधं कुरु मां प्रति ॥५२॥

धर्मसुमन्तुरुवाच—

अहो विद्वन् ख्यायसे त्वं सर्पोऽपि मुनिराडिव ।
कोऽसि सर्पस्वरूपस्त्वं मम प्राणहरो वद ॥५३॥
मृत्युर्वा च महाकालो यमदूतो यमः स्वयम् ।
मत्प्रारब्धं च वा कर्म वनदेवोऽसि वा वद ॥५४॥
संकर्षणो वा शेषो वा ज्ञानी कस्त्वं नरोऽसि वा ।
प्रेतो वा सत्यसर्पो वा जातिस्मरोऽसि को न्विह ॥५५॥
सर्पभावेऽपि नैसर्गं भाषसे शास्त्रसम्मतम् ।
स्वभावेन प्रयातानां लाभो नास्ति जडात्मनाम् ॥५६॥
लाभः प्राप्तिर्हि संयोगो जडानां किं च तेन वै ।
लाभः प्राप्तिः सुखादेश्च भोगश्चात्मनि वै मतः ॥५७॥
सुखदुःखप्रवेदोऽयं जीवे भवति भोगकः ।
शत्रुनाशे भवेच्छान्तिर्मन्यते मूर्खमायिकः ॥५८॥
अजातशत्रुश्चात्माऽस्ति सुखदुःखपरं गतः ।
नास्य लाभश्च वा हानिर्देहयोगवियोगतः ॥५९॥
फणिन् किन्तु मोक्षहेतुर्मानवं वर्ष्म सम्मतम् ।
असम्पाद्य च मोक्षं वा साधनं श्रेयसां प्रदम् ॥६०॥
मध्ये मृत्युर्भवेच्चेत् सा मोक्षहानिर्भवेदिति ।
अलाभः स भवेदत्र तत्र निमित्तमात्रवान् ॥६१॥
सर्प त्वं ब्रह्महत्याया भागवानत्र दोषवान् ।
अमोक्षगो भवस्यत्र पापवान् नहि लाभवान् ॥६२॥
अहं चेत् त्वां मारयामि मेऽपि लाभो न विद्यते ।
देहनाशे न वै लाभो मोक्षहाना च नापि सः ॥६३॥
अलाभौ त्वावयोस्तुल्यौ वद कस्त्वं प्रवित्तिमान् ।
लाभो वाऽत्र त्वया दृष्टः कीदृशो वद मे फणिन् ॥६४॥

सर्प उवाच—

अहो विप्र स्वभावेन कोमलोऽसि दयापरः ।
ज्ञानेन च बृहस्पतिसमोऽसि व्यासदेववत् ॥६५॥
रागद्वेषरहितोऽसि लाभाऽलाभविवेचने ।
वदामि सूत्ररूपेण लाभाऽलाभौ श्रृणु त्विह ॥६६॥
लाभः समयसत्कारो हानिः सा समयच्युतिः ।
प्राप्ते वै समये योग्ये सत्कारेण युनक्ति न ॥६७॥
गतः स समयः पश्चान्नैवाऽऽयातिगतो गतः ।
ममाऽऽसीत् समयश्चात्र मानुषे क्षत्रवर्ष्मणि ॥६८॥
अर्कग्रामे तव ग्रामे स्मृद्धे स्मृद्धिसमन्विते ।
मम पुत्रा बान्धवाश्च भृत्या दासादयस्तथा ।
अश्वा गृहाणि क्षेत्राणि विद्यन्ते तव पत्तने ॥६९॥
मया विसृष्टास्ते सर्वे मां न जानन्ति मायिकाः ।
अहं जातिस्मरः सर्वान् जानामि त्वां तथा परान् ।
ग्रामस्थान् सर्वलोकाँश्च त्वं न जानासि मामिह ॥७०॥
श्रृणु विप्र कथयामि तव ग्रामनृपो हि यः ।
नाम्ना शार्दूलचन्द्रश्च सोऽहमासं जनाधिपः ॥७१॥
नास्तिको निन्दकश्चापि विप्राऽवमानकारकः ।
धर्मकर्मविहीनश्च हेतुवादे रतः सदा ॥७२॥
त्वं च विप्र मम ग्रामे कथां कुर्वन् जनान् दिशन् ।
मुहुर्मां च समागत्य धर्मार्थे समुपादिशः ॥७३॥
दानार्थे हवनार्थे परोपकारार्थमित्यपि ।
मया वाक्यं तवोक्तं वै नाङ्गीकृतं क्वचित्तदा ॥७४॥
तिरस्कृतो भवाँस्तत्र निन्दितश्च मया बहु ।
अथैकदा त्वं यज्ञार्थं याञ्चां वै कृतवान् शुभाम् ॥७५॥
सुवर्णस्य धनादेश्च मया ज्ञात्वा तु वञ्चकः ।
रुषा निष्कासितो ग्रामाद् बहिस्त्वं वटमाश्रितः ॥७६॥
शार्दूलोऽयं मां शशाप मृत्युमाप्नोतु निन्दकः ।
तेनाऽहं मरणं प्राप्तः सक्रोधस्त्वां प्रतीति च ॥७७॥
सर्पभावं चेह तिर्यग्योनिं प्राप्तोऽस्मि स नृपः ।
दुःखं पश्यामि च जातिं स्मरामि सर्वबान्धवान् ॥७८॥
दर्शयाम्यपि स्वं त्वेते नैव जानन्ति मामिमम् ।
ब्राह्मणा नावमन्तव्या ब्रह्मभक्ताः कदाचन ॥७९॥
विद्वांसो नावमन्तव्या ज्ञानाग्निमूर्तयः क्वचित् ।
अवमन्तुर्भवेन्नाशो नाशयितुर्विनाशनम् ॥८०॥
बलिष्ठेऽग्नौ पतद्वारि स्वयमेव प्रदह्यति ।
अहं प्रदग्धः शापेन सर्पयोनिं गतोऽस्म्यपि ॥८१॥
वैरबुद्धिं स्मराम्येव हन्तुं त्वां मार्गयामि च ।
अद्य त्वं निर्जने प्राप्तो मया दंष्टो विरोधतः ॥८२॥
वैरनिर्यापनार्थं वै मृत्युस्तेऽस्ति ध्रुवो द्विज ।
स्वस्वकर्मफलं भुंक्ते देहि क्वापि च वर्ष्मणि ॥८३॥
क्रोधेन शापदानेन राजहत्याकृतेन च ।
प्रायश्चित्तविहीनस्य तवाऽऽयुष्यमितिं गतम् ॥८४॥
मम राज्ञ्याश्च दुःखेन तवाऽऽयुष्यं क्षयं गतम् ।
सतीनां तु विनिःश्वासैर्ज्वलन्ति ब्राह्मणा अपि ॥८५॥
तत्तथैव हि विप्रेन्द्र तवाऽऽयुष्यं क्षयं गतम् ।
येषामायुष्यविगमस्ते न जीवन्ति वै क्षणम् ॥८६॥
कालदूताः समायान्ति प्रेरितास्तूर्णमेव ह ।
नाशयन्ति गतायुष्यं दूता निमित्तमात्रकाः ॥८७॥

सर्पाश्च वृश्चिकाश्चापि विषश्वानो विषौषधम् ।
भूतप्रेतपिशाचाद्या यमदूता ग्रहादयः ॥८८॥
वह्निर्जलं ज्वराद्याश्च शत्रवोऽपि निमित्तकम् ।
हन्यते स निमित्तेन हन्ताऽस्याऽस्ति परोऽपरः ॥८९॥
अविज्ञाय त्विदं तत्त्वं द्विषन्ति वृश्चिकादिकान् ।
तस्माद् विप्र मृतिस्तेऽत्र ध्रुवा मेऽपि मृतिर्ध्रुवा ॥९०॥
मुक्तये त्वं समर्थोऽसि ममाऽपि च तवाऽपि च ।
नरदेहः कर्मभूमिस्तेन सर्वमवाप्यते ॥९१॥
प्राणान्तेऽपि कृतं श्रेष्ठं रक्षत्येव प्रकारिणम् ।
मरणं ध्रुवमस्त्येव कुरु यन्मोक्षणं हि नौ ॥९२॥
जीवाऽभयप्रदानं वै सर्वमेधाधिकं फलम् ।
ददात्येव ततो विप्र मम मोक्षं विधेहि वै ॥९३॥
विप्रश्चोक्तस्ततस्तूर्णं सर्पाय कलशाज्जलम् ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥९४॥
इतिमन्त्रेण सम्मन्त्र्य ददौ पानार्थमेव च ।
तद्देहे प्रोक्षितवाँश्च सर्पो देहं विहाय च ॥९५॥
तूर्णं देवस्वरूपो वै भूत्वा स्वर्गं ययौ तदा ।
ब्राह्मणश्च प्रसस्मार विषदग्धो हरिं प्रभुम् ॥९६॥
देहं तत्याज तत्रैव मार्गाटव्यां हि निर्जने ।
आत्माऽस्य च समप्राप्तश्चाश्वपट्टसरोवरम् ॥९७॥
श्रीकृष्णचरणे तत्र तस्थावन्ते यथामति ।
अथ कर्षुकलोकेन विप्रो मृतो विलोकितः ॥९८॥
कर्षुकस्तु गतो ग्रामं विप्रेभ्यो वृत्तमाह तत् ।
द्विजा नीत्वा शवं दग्धुं त्वश्वपट्टसरोवरम् ॥९९॥
आययू रुरुदुः सर्वे बान्धवाः सरसस्तटे ।
शवं निधाय वै सर्वे गुणान् जगुर्द्विजस्य ह ॥१००॥
श्वेतव्याससमश्चायं धर्मकर्मपरायणः ।
मोक्षदश्चापि लोकानां दुर्लभो विप्र ईदृशः ॥१०१॥
श्वेतव्यासस्य शिष्योऽयं समाधिस्थितिपारगः ।
सर्पदंशनिमित्तेन मृतश्चाश्चर्यमेव तत् ॥१०२॥
आयुष्यं छिन्नतां प्राप्तं सन्धीयते न केनचित् ।
विना वै परमात्मानं विना गुरुं च योगिनम् ॥१०३॥
इत्येवं ते वदन्तश्च श्वेतव्यासं प्रसस्मरुः ।
सस्मरुः श्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ॥१०४॥
अथ राजंस्तस्य भार्या विप्राणी दुःखदुःखिता ।
सतीभावेच्छया तत्र चिताभ्याशे समाययौ ॥१०५॥
श्वेतव्यासं प्रसस्मार तथा कृष्णनरायणम् ।
शवं प्रपूज्य विधिना चितायां सा समार्पयत् ॥१०६॥
वह्निं प्रज्वाल्य पादाग्राद् यावद् दग्धुं समीहते ।
तावत्तत्र भक्तिवशो भगवान् कृष्णवल्लभः ॥१०७॥
अनादिश्रीकृष्णनारायणः श्वेतस्वरूपवान् ।
श्वेतव्यासात्मकस्तत्राऽऽययौ धर्मसुमन्तुना ॥१०८॥
सहैव स चितापार्श्वे गत्वा सतीं जगाद ह ।
एष ते पतिरास्ते वै गृहाण मा ह्यनु ज्वल ॥१०९॥
तावत् समुत्थितो विप्रो जीवन् श्वसन् हसन् क्षणात् ।
सती मग्नाऽभवच्चापि प्रसेदुर्ब्राह्मणा अपि ॥११०॥
तीर्थं कृत्वा ततः सर्वे ययुश्चार्कपुरं प्रति ।
श्वेतव्यासाख्यतीर्थं तत् सतीतीर्थं तथा नृप ॥१११॥
जीवतीर्थमिदं चास्ते स्नाहि तीर्थविधिं चर ।
इत्यादिष्टो नृपश्चाश्वपाटलस्तत्र राधिके ॥११२॥
श्वेतव्यासस्य वै पूजां चकार स्नानमाचरत् ।
ददौ दानानि बहूनि ततो ययौ स्थलान्तरम् ॥११३॥
लोमशेन समं तीरे तीर्थान्तरे स्थिरोऽभवत् ।
सस्मार श्रीहरिं चापि नेमे तीर्थे च मन्दिरम् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽर्कपुरी-
नृपस्य धर्मसुमन्तुऋषिशापेन सर्पता, विप्रस्य सर्पदंशः,
सर्पमोक्षः, अश्वपट्टसरोवरे श्रीकृष्णनारायणेन विप्रपत्न्याः
सत्याः प्रार्थनया विप्रो जीवितः, श्वेतव्यासतीर्थं
सतीतीर्थं चेत्यादिनिरूपणनामा षट्षष्ट्यधिक-
द्विशततमोऽध्यायः ॥ २६६ ॥

**श्रीकृष्ण उवाच—**

अथ राधे ततस्तीर्थं नारीणां धर्मवर्धनम् ।
गत्वाऽश्वपाटलो राजा पप्रच्छ लोमशं मुनिम् ॥ १ ॥

**अश्वपाटल उवाच—**

किमिदं शोभनं तीर्थं गुरो स्त्रीजातिमोक्षदम् ।
धर्मदं बहुसामर्थ्यप्रदं वद कदाऽभवत् ॥ २ ॥

**श्रीलोमश उवाच—**

शृणु राजन् सतीतीर्थं पावनं परमाद्भुतम् ।
सुराष्ट्रनृपतेः पत्नी वस्त्रापथनिवासिनी ॥ ३ ॥
पातिव्रत्यपरा चासीद् राणिकाख्या महासती ।
रक्षांगारकनामानं नृपं त्वीश्वरसन्निभम् ॥ ४ ॥
सेवते स्म सती कान्तं सर्वसेवाभिरुत्सुका ।
स्वर्णपत्तननाम्न्येव नगरे नगरोत्तमे ॥ ५ ॥
कृतस्मराद्रिमिकटे स्वर्णलेखानदीतटे ।
राजधान्यां सदुर्गायां सौवर्णे राजमन्दिरे ॥ ६ ॥

असूर्यम्पश्या प्रमदा सतीधर्मसमन्विता ।
भजते स्म हरिं नित्यं दामोदरं हि वामनम् ॥७॥
राज्यमाता राणिका सा साध्वीव्रतं करोति वै ।
अन्यो नरो न स्प्रष्टव्यः क्वापि स्वपतिमन्तरा ॥ ८ ॥
अन्यपुरुषवस्त्रं न स्प्रष्टव्यं नूतनं विना ।
अन्यनरमुखं नैव द्रष्टव्यं स्वपतिं विना ॥ ९ ॥
गृहाद् बहिर्न गन्तव्यं क्वापि स्वपतिमन्तरा ।
पत्युः सेवां सदा त्वेवं करोति स्वकरेण ह ॥१०॥
भोजनं जलपानं च ताम्बूलं देवतार्चनम् ।
सर्वं स्वमेव रणिका सम्पादयत्यतन्द्रिता ॥११॥
नित्यं दामोदरं कृष्णं पूजयत्यपि वामनम् ।
पत्रं पुष्पं फलं तोयं चान्नं निवेद्य विष्णवे ॥१२॥
दत्वाऽतिथये महते साधवे धेनवे तथा ।
पतये भृत्यवर्गाय ततश्चाश्नाति सा सती ॥१३॥
एवं धर्मपरा साऽऽस्ते शीलव्रतपरायणा ।
यस्या गृहे सदाऽऽयाति श्रीदेवी या भवेश्वरी ॥१४॥
महालक्ष्मीः सखीरूपा पूजां गृह्णाति तत्कृताम् ।
एवं वै वर्तमानायाः कोमलाङ्ग्या निशान्तके ॥१५॥
निद्रायां स्वप्नसृष्टौ वै म्लेच्छानां दर्शनं ह्यभूत् ।
सैन्यं राज्यं ग्रहीतुं वै समायातं समन्ततः ॥१६॥
राजा रक्षांगारकोऽपि युद्धार्थं निर्दंदौ ततः ।
मृतो युद्धे पतिश्चैवं त्वनिष्टं दर्शनं ह्यभूत् ॥१७॥
तूर्णमुत्थाय शयनात् सती पतिं जगाद ह ।
अद्य स्वप्नं मया नाथाऽनिष्टं दुष्टं विनाशकृत् ॥१८॥
ततोऽहं श्रीमहालक्ष्मीं पूजयामि भवेश्वरीम् ।
व्याघ्रेश्वरीं पूजयामि विघ्नराजं नमामि च ॥१९॥
इत्याज्ञां संगृहीत्वैव तूर्णं स्नात्वा पुपूज ताः ।
देवताश्च नमस्कृत्य प्रार्थयद् रक्षणं प्रति ॥२०॥
अमंगलविनाशार्थं विघ्नराजात्पुनः पुनः ।
प्रार्थयद् राणिकादेवी ददौ दानानि वै तथा ॥२१॥
कारयामास च ततो ग्रहशान्तिं द्विजादिभिः ।
अथ प्रसन्ना प्रत्यक्षा महालक्ष्मीर्भवेश्वरी ॥२२॥
जगादैनां राज्यविघ्नं भविता म्लेच्छजातिभिः ।
युद्धं चापि भवेदत्र सैन्ययोश्च द्वयोरपि ॥२३॥
राजा रक्षांगारकश्च मा सम्प्रयातु योधने ।
दुर्गाद् बहिर्न वै यातु तदा ते विजयोऽस्ति वै ॥२४॥
शत्रवश्च विनश्यन्ति दुर्गाद् बहिः समन्ततः ।
दुर्गमध्ये विजयस्ते दुर्गाद्बहिः पराजयः ॥२५॥

इत्युक्ता सा सती राज्ञेऽकथयत् सर्वमेव तत् ।
राजाऽपि सावधानश्च वर्ततेस्म निजालये ॥२६॥
तावन्म्लेच्छाः पश्चभागात् सैन्ययुक्ताः समाययुः ।
अयुताऽयुतसंख्याकाः सशस्त्रा गजवाहनाः ॥२७॥
अश्ववाहा रथस्थाश्च दुर्गद्वाराणि चाभितः ।
निरुद्ध्य द्वारबन्धं च रचयित्वाऽभवन् स्थिराः ॥२८॥
हता वै राजपुरुषाः सैन्यैश्च नगरान्तरे ।
द्वाराण्यावृत्य च तथा प्रतितस्थुः सशस्त्रकाः ॥२९॥
शत्रवो बहवश्चाभिभागेभ्यो यन्त्रगोलकान् ।
जेतुं च नगरं दुर्गं चिक्षिपुर्बहुनाशकान् ॥३०॥
बहुभिर्दिवसैश्चापि प्रवेष्टुं नैव शेकिरे ।
तदा भेदं समुपायं चक्रुस्ते म्लेच्छपुंगवाः ॥३१॥
धनानि स्वर्णरूप्याणि दत्वा वाण्याऽपि खर्वटान् ।
गुप्तं पुरप्रवेशस्य मार्गं विज्ञाय भेदकात् ॥३२॥
दुर्गं विभिद्य तद्द्वारे प्रविश्य म्लेच्छजातयः ।
युयुधुश्च प्रजह्रुश्च राजसौधालयं ययुः ॥३३॥
राजसैन्यानि तु तदा युयुधुः प्राणदानतः ।
हता म्लेच्छा हि बहवो हताश्च राजसैनिकाः ॥३४॥
सेनानां पतयश्चापि हता वै शस्त्रघाततः ।
यदा स्वभवनं प्राप्तं सैन्यं म्लेच्छजनाभिधम् ॥३५॥
तदा राजा स्वरक्षार्थं योद्धुं ह्यवातरन्मृधे ।
अथ प्रजाऽपि सबला म्लेच्छानमारयद् बहून् ॥३६॥
क्षत्रियाणां महासैन्यं रक्षांगारसमायुतम्
युयुधे तु महाम्लेच्छान् मारयामास जीवतः ॥३७॥
अन्ये प्रदुद्रुवुश्चापि नगरस्यैव मध्यतः ।
दुर्गं त्यक्त्वा दुद्रुवुश्च बहिर्म्लेच्छः समन्ततः ॥३८॥
राजा रणप्रमत्तो वै विस्मृत्य स्वसतीवचः ।
दुर्गाद् बहिर्ययौ योद्धुं हन्तुं म्लेच्छात् पलायितान् ॥३९॥
ते परावृत्त्य युयुधुः प्राणदानेन वै तदा ।
शस्त्राघातैश्च रक्षांगारकं जघ्नुः समन्ततः ॥४०॥
राजा ममार भूमौ च प्राणान् निपतितो जहौ ।
राणिका निजसौधे वै देवपूजां करोति च ॥४१॥
रक्षार्थं निजकान्तस्य तावद् ददर्श पादयोः ।
चिह्ने रक्ते चाक्षते च यथारेखे ह्युभे भुवि ॥४२॥
पृथ्व्यां कुंकुमपादौ स्वौ दृष्ट्वा सती भयं गता ।
हा नाथेति समुच्चार्य सतीसत्यं व्यलोकयत् ॥४३॥
सती सत्यारूढभावा व्यजायत क्षणान्तरे ।
दिव्यदृष्ट्या स्वकान्तस्य दृष्ट्वा सूक्ष्मां तनुं तदा ॥४४॥

समागतां गृहे नैजे तां गृहीत्वा द्रुतं बिलात् ।
विनिर्गत्य स्वभवनात् पराजयप्रधर्षिता ॥४५॥
पुंवेषेण सती साध्वी ह्यपासरद्धि तत्स्थलात् ।
बहिर्गत्वा महोष्ट्रं च प्राप्य भाग्यवशाद्धि सा ॥४६॥
गुप्तां द्रुमस्रुतिं गत्वा निर्ययौ भयभूमितः ।
राज्यं त्यक्त्वा दुःखभोक्त्री ययावश्वसरः प्रति ॥४७॥
दिनैकेनैव सम्प्राप्ता सरसश्चोत्तरे तटे ।
सरस्तीरे चावरुह्य सस्नौ रुरोद चान्तरे ॥४८॥
जलाञ्जलिं ददौ तत्र कान्ताय सहगाय च ।
सूक्ष्मरूपाय च ततः कृष्णनारायणं प्रभुम् ॥४९॥
स्मृत्वा नत्वा चार्थयित्वा तस्थौ तटे स्थिराशया ।
अनादिश्रीकृष्णनारायणस्य सन्निधाविह ॥५०॥
देहानलं समुत्पाद्य प्रयाम्येव दिवं शुभम् ।
एवं निश्चित्य वै सायं शीलव्रतपरायणा ॥५१॥
सतीं सत्यं प्रतुष्टाव तदा कृष्णनरायणम् ।
'सत्याः सत्यं नित्यसत्यं नारायणं नमाम्यहम् ॥५२॥
ओं नमो ब्रह्मसवित्रे सत्यानाथाय ते नमः ।
पातिव्रत्यस्वरूपाय पञ्चाग्नये च ते नमः ॥५३॥
त्रेताऽग्नये बीजस्वरूपाय च ते नमः ।
गर्भरूपाय बाल्याय युवरूपाय ते नमः ॥५४॥
कान्तायै चापि कान्ताय सर्वेशाय च ते नमः ।
युगलाय स्थविराय त्र्यात्मकाय च ते नमः ॥५५॥
नमो भगवते कृष्ण भगवत्यै च ते नमः ।
शीलरूपाय धर्माय धर्मलाभाय च ते नमः ॥५६॥
नमश्रितास्वरूपाय पतिरूपाय ते नमः ।
नमः पान्थस्य सार्थायाऽतिवाहिकायै ते नमः ॥५७॥
नमः सूर्याय मेघाय विद्युते शशिने नमः ।
नमो दिवास्वरूपाय निशारूपाय ते नमः ॥५८॥
अयनद्वयरूपाय नमो युगप्रवर्तिने ।
नमो दिवाय सत्याय नमो वैकुण्ठवासिने ॥५९॥
सतीनां पतये कृष्ण सतीलोकेशिने नमः ।
नमो गोलोककान्ताय नमोऽक्षरनिवासिने ॥६०॥
नमो मुक्तप्रपूज्याय सतां च पतये नमः ।
मुक्तेश्वरेशाय ब्रह्मप्रियेश ते नमः ॥६१॥
नमो माणिक्यमुक्तानां रमायाः पतये नमः ।
पद्मावतीसतीलक्ष्मीराधाश्रीपतये नमः ॥६२॥
सर्वेशाय परेशाय नमः श्रीपरमात्मने ।
लक्ष्मीशाय नमः श्रीपुरुषोत्तमाय ते नमः ॥६३॥
अनादिश्रीकृष्णनारायणाय स्वामिने नमः ।
अन्तर्यामिस्वरूपाय सयुजे ते नमोनमः ॥६४॥
गोपालनन्दनायेश कंभराजाय ते नमः ।
अश्वपट्टस्य चन्द्राय मायासूर्याय ते नमः ॥६५॥
स्मृद्धिदाय विरागाय सर्वहर्त्रे च ते नमः ।
एषाऽहं गृहसंज्ञाऽस्मि गृहं सत्यं भवान्मम ॥६६॥
रक्षांगारकनामा त्वं त्वत्परा गीश्च यावती ।
त्वां सहायं परं प्राप्य जुहोम्येनां गृहाण माम् ॥६७॥
विदित्वा चाऽविदित्वाऽपि सर्वं जुहृति चान्ततः ।
उभयेन विधानाऽत्र होमो भवामि वै त्वयि ॥६८॥
त्वं यज्ञस्त्वं यज्ञकुण्डे चाहवनीयरूपवान् ।
गार्हपत्यस्वरूपस्त्वं चावसथ्यस्वरूपवान् ॥६९॥
यज्ञकुण्डाग्निरेवाऽसि सर्वकुण्डाग्निरेव च ।
नय मां सत्यधर्मेण सतीलोके कृपां कुरु ॥७०॥
सतीधर्मो हि नारीणां जगदुद्धारकारकः ।
सती दाक्षी पुरा जाता वह्निनां त्वदहद् वपुः ॥७१॥
रेणुका च सती जाता शबरी चापि वै पुरा ।
कृतधर्माश्रिता नार्यः सतीत्वमुपयान्ति च ॥७२॥
तथाऽहं श्रीहरे कृष्ण सतीत्वमुपयामि च ।
इत्येवं भूपते सा तु कोमलांगी हि राणिका ॥७३॥
चितामारुह्य यावच्चेन्धितुं वह्निं समिच्छति ।
तावच्छ्रीलोमशो देवश्चेशानश्च सुरादयः ॥७४॥
अनादिश्रीकृष्णनारायणो लक्ष्मीश्च गोचराः ।
अभवन् सन्निधौ तत्र सती नेमे समन्ततः ॥७५॥
सती त्वं जयमाप्नुहि सतीलोकं प्रगच्छसि ।
पत्या समं सुखं भुङ्क्ष्व यावत् स्वर्गे प्रविद्यते ॥७६॥
इत्युक्त्वा प्रददुराशीर्वादान् पुष्पाणि चन्दनम् ।
सन्ती विष्णुं नमस्कृत्वा सस्मार च पुनः पतिम् ॥७७॥
स्थूलदेहात्मकं तावत् शंकरस्य गणस्तदा ।
नन्दी गत्वाऽऽनयच्छीघ्रं रक्षांगारशवं च खे ॥७८॥
ददौ चितायां सत्यै तत् सापि दृष्ट्वाऽमिलच्चनुम् ।
आश्लिष्यत् विधिना प्रेतं पश्यतां द्युसदां तथा ॥७९॥
मनुष्याणां पश्यतां साऽनलमौत्पादयत् पदात् ।
कृष्णकृष्णेति कृष्णेति राधाकृष्णेति सा जगौ ॥८०॥
गोपीनाथ सतीकान्त रमानाथ विलोकय ।
इत्युक्त्वा च चितायां साऽस्वपत् शवेन लम्बिका ॥८१॥
तावद् वह्निर्नाऽस्पृशत्तां पादे एव प्रकाशते ।
तावत्तत्र हरिः कृष्णो राधाकृष्णो बभूव ह ॥८२॥

मुरल्या सहितश्चास्ते दर्शनं प्रददन् प्रभुः।
स्वहस्तेन जलं सर्पिः पुष्पाणि च तिलानि च ॥८३॥
चन्दनं प्रददौ तत्र चितायां भगवान् स्वयम्।
आत्मानौ द्वौ सतीकान्तौ दिव्यरूपौ बभूवतुः ॥८४॥
निर्ययतुः शवदेशात् तस्थतुश्चाम्बरे क्षणम्।
विमानं चागतं स्वर्गाद् दिव्यं सूर्यनिभं तदा ॥८५॥
निषेदतुश्च तौ तत्राऽपश्यतां शवदाहनम्।
अग्निर्ददाह देहौ द्वौ नत्वा तौ परमेश्वरान् ॥८६॥
सतीलोकं ययतुश्च तत्र कल्पायुषौ च तौ।
स्थित्वा यास्यत एवाऽस्याऽक्षरं धाम परात्मनाः ॥८७॥
देवाश्चात्र सतीतीर्थं कृत्वा नारायणगृहम्।
गत्वा सम्पूज्य च श्रीमदनादि श्रीनरायणम् ॥८८॥
ययुर्निजं दिव्यलोकं कृष्णश्चान्तरधीयत।
शंभोर्गणाश्चिताभस्म जले चिक्षिपुरेव तु ॥८९॥
राणिकातीर्थमेवाऽपि रक्षांगारकतीर्थकम्।
समभूत् तत्परं ख्यातं स्त्रीणां सतीत्वबोधकम् ॥९०॥
सतीधर्माऽवनकर्तृ पापतापप्रणाशकम्।
अत्र राजन् स्नानदानाजलपानाद्विशेषतः ॥९१॥
सतीपूजाकरणाच्च सतीलोकफलं व्रजेत्।
या नारी विधवा चात्र पतिं स्मृत्वाऽऽप्लविष्यते ॥९२॥
सा तत्पुण्येन कान्तं वै सतीलोके हि नेष्यति।
या कन्या जलपानं च स्नानं वात्र करिष्यति ॥९३॥
सतीत्वं वै समासाद्य पतिं लब्ध्वा सुखप्रदम्।
पूर्णायुष्यं प्रभुक्त्वाऽत्र सतीलोकान् गमिष्यति ॥९४॥
सौभाग्ययुक्ता प्रमदा स्नानदानादिना त्विह।
पातिव्रत्यफलं लब्ध्वा सतीलोकान् गमिष्यति ॥९५॥
वृद्धापि स्नानमात्रेण शतैककुलमुक्तिदा।
नरोऽपि स्नानमात्रेण सत्यधर्मपरायणः ॥९६॥
गतां मृतां प्रियां प्राप्य स्वर्गलोकं प्रयास्यति।
एतादृशं सतीतीर्थं नारीणां पावनं त्विदम् ॥९७॥
राज्ञ्याद्याश्चात्र कुर्वन्तु स्नानं दानं जलाञ्जलिम्।
यथा च देवगंगायां सतीतीर्थं महत्तमम् ॥९८॥
यथा रेवापगायां च रेणुकातीर्थमित्यपि।
तथाऽत्र राणिकातीर्थं त्रैलोक्यां पावनोत्तमम् ॥९९॥
कृते युगे समारब्धे जातं पुरातनं नृप।
इत्युक्तोऽश्वपाटलश्च तत्स्त्रियो दासिका अपि ॥१००॥
राधिके सरसो वारौ सस्नुः सतीस्थले जले।
ते तर्पणं प्रचक्रुश्च दत्वा दानानि वै ततः ॥१०१॥
राजाद्याः प्रययुश्चाग्रे तीर्थं परं हि पावनम्।
लोमशेन च सहितास्तीर्थमाहात्म्यवेदिनः ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सौराष्ट्रे स्वर्णपत्तने म्लेच्छैः रक्षांगारकनृपे हते तत्पत्नी-राणिकासत्याः कुंकुमवाप्यामागत्याऽश्वपट्टसरस्तटे सतीभवनं सतीतीर्थं चेत्यादिनिरूपणनामा सप्त-षष्ट्यधिकद्विशततमोऽध्यायः ॥२६७॥

**श्रीकृष्ण उवाच—**

शृणु ततश्च वै तीर्थं गत्वा साधुसमाश्रितम्।
पप्रच्छ लोमशं राधे चाश्वपाटलभूपतिः ॥१॥

**अश्वपाटल उवाच—**

किमिदं साधुभिर्व्याप्तं तीर्थं परमपावनम्।
स्थावरं जंगमं चापि गुरो तीर्थद्वयं वद ॥२॥

**श्रीलोमश उवाच—**

अमोहाख्योऽभवद् राजा हिमाचलस्य सन्निधौ।
प्रबोधाख्यं गुरुं प्राप्य तोषयामास सेवया ॥३॥
गुरुस्तस्मै ददौ नैजे रूपे श्रीहरिदर्शनम्।
चतुर्भुजं शंखचक्रगदापद्मादिराजितम् ॥४॥
पुनर्गुरुस्वरूपश्चाऽभवत् तत्र क्षणान्तरे।
अमोहाख्यो विस्मितश्च संशिश्ये श्रीपतिं प्रति ॥५॥
गुरुश्चायं मानवोऽस्ति दृश्यते च चतुर्भुजः।
मन्ये नारायणं त्वेनं मिलितं मम भाग्यतः ॥६॥
तस्मादेनं भजाम्येव सेवे त्वेनं समस्ततः।
ध्यात्वा सम्पूज्य वै भक्त्या परं श्रेयो व्रजामि च ॥७॥
इत्येवं हृदये कृत्वा निश्चयं च प्रबोधकम्।
सेवते परया भक्त्या राजा गुरुं जनार्दनम् ॥८॥
राज्ञी पुत्राः प्रजाः पुत्र्यः सेवन्ते स्म गुरुं हरिम्।
अन्नजलप्रदानेन पादसंवाहनादिभिः ॥९॥
वचसां पालनेनापि वस्त्रक्षालनकादिभिः।
शयनासनदानैश्च पत्रफलदलार्पणैः ॥१०॥
चन्दनाऽक्षततैलैश्च सुगन्धिहारभूषणैः।
राजभोगैः सदा राजकुटुम्बं वै समस्तकम् ॥११॥
सेवते स्म प्रभुं मत्वा गुरुं हरिमतन्द्रितम्।
भजते स्म प्रबोधेति नाम्नां संकीर्तनेन च ॥१२॥

गुरुर्विचारयामास बन्धनं समुपस्थितम् ।
राजभोगा बन्धनानि जायन्ते निरयाय वै ॥१३॥
तस्माद्भोगाः परिहार्या दूरतो मुक्तिरोधिनः ।
प्रबोधं मायिकं पराभावयितुं न ह्यर्हति ॥१४॥
इत्येवं निश्चयं कृत्वा प्रबोधो वै शनैः शनैः ।
उपदेशैर्नियमैश्च भोगत्यागं चकार ह ॥१५॥
अमोहाक्षाय च प्राह धर्मवार्तां शुभावहाम् ।
राजन् राज्ञां पृथग्धर्मो धर्मश्चान्यस्तपस्विनाम् ॥१६॥
अहं साधुः प्रबोधोऽस्मि न भोगो मम युज्यते ।
गृहस्थानां भूषणानि साधूनां दूषणानि वै ॥१७॥
गृहस्थानां दूषणानि साधूनां भूषणानि वै ।
साधुधर्मः क्षमा प्रोक्ता राजधर्मो हि शासनम् ॥१८॥
साधुधर्मस्त्रिषवणं राजधर्मो ह्यवभृथम् ।
साधुधर्मः शीलरक्षा गृहिधर्मः स्त्रीयोगिता ॥१९॥
साधुधर्मश्चावमानं गृहिधर्मो हि माननम् ।
साधुर्भिक्षाजीवनश्च गृही भुजार्जितादनः ॥२०॥
साधुर्जीर्णाम्बरश्चापि गृही स्वर्णाम्बरादिमान् ।
साधुर्विहारशीलश्च गृही चैकत्र सौधवान् ॥२१॥
साधुः स्नेहविहीनश्च गृही कुटुम्बवासनः ।
साधुश्चात्मपरो नित्यं गृही गृह्यपरस्तथा ॥२२॥
साधुश्चाप्यनिकेतश्च गृही सम्बन्धिकेतनः ।
मिताहारः सदा साधुर्गृही पुष्ट्यदनः सदा ॥२३॥
द्वन्द्वहीनः सदा साधुर्गृही द्वन्द्वसमन्वितः ।
निराशश्च सदा साधुर्गृही त्वाशाभिरावृतः ॥२४॥
मोक्षदः साधुधर्मश्च गृहधर्मो हि नाकदः ।
इत्येवं धर्ममार्गेषु पार्थक्यं विद्यते हि नौ ॥२५॥
अथ ज्ञानेऽपि वै राजन् शृणु पार्थक्यमत्र नौ ।
मम पुत्रो मम पत्नी मम द्रव्यं गजादिकम् ॥२६॥
मम क्षेत्रं मम राज्यं गृहस्थस्य विभाति हि ।
न मे पुत्रो न मे पत्नी न मे द्रव्यं गजादिकम् ॥२७॥
न मे क्षेत्रं कुतो राज्यं साधुलोकस्य भाति ह ।
मम सम्बन्धिनश्चेमे कुटुम्बिनस्तथा मम ॥२८॥
मम भृत्या मे प्रजाश्च गृहस्थस्य विभाति ह ।
न मे सम्बन्धिनश्चापि न मे कुटुम्बिनस्तथा ॥२९॥
न मे भृत्याः कुतः प्रजाः साधुलोकस्य भाति ह ।
मम देहो मम रूपं ममाऽऽज्ञा च बलं मम ॥३०॥
मम सत्ता मम सर्वं गृहस्थस्य विभाति ह ।
न मे देहो न मे रूपं न चाऽऽज्ञा मे बलं न मे ॥३१॥

न मे सत्ता कुतः सर्वं साधुलोकस्य भाति ह ।
मम पुष्टिर्मम रोगो मे मिष्टं मम शीतलम् ॥३२॥
मम दुःखं मम गर्वो गृहस्थस्य विभाति ह ।
न मे पुष्टिर्न मे रोगो मिष्टं शैत्यं न मे न मे ॥३३॥
न मे दुःखं न मे गर्वः साधुलोकस्य भाति ह ।
अहं वृक्णो ह्यहं स्थूलः कुष्ठ्यहं खञ्जकोऽस्म्यहम् ॥३४॥
अहं बुद्धो जडश्चाऽहं गृहस्थस्य विभाति ह ।
नाऽहं वृक्णो न च स्थूलो न कुष्ठी न च खञ्जकः ॥३५॥
न वा बुद्धो जडो नैव साधुलोकस्य भाति ह ।
मम जन्म मम मृत्युर्मम स्वर्गे भवेदिति ॥३६॥
मम पूजा मम कीर्तिर्गृहस्थस्य विभाति वै ।
न मे जन्म न मे मृत्युर्न मे स्वर्गो न बन्धनम् ॥३७॥
न मे पूजा न मे कीर्तिः साधुलोकस्य भाति ह ।
तव ग्रामस्तव वाटी तवोद्यानं तव क्षितिः ॥३८॥
तवेदं च ममेदं च गृहस्थस्य विभाति ह ।
न ते ग्रामो न ते वाटी ते नोद्यानं न ते क्षितिः ॥३९॥
तवेदं न ममेदं न साधुलोकस्य भाति हि ।
एवं ज्ञानेऽपि पार्थक्यं वैराग्ये शृणु पार्थिव ॥४०॥
कमनीया मम भार्या कमनीयं गृहं मम ।
कमनीयश्च मे देहो गृहस्थस्य हि रक्तता ॥४१॥
न मे भार्या गृहं देहः कुतश्च कमनीयता ।
प्रत्युत क्लेदमिश्रास्ते कल्मषाश्च जुगुप्सिताः ॥४२॥
इत्येवं साधुलोकस्य स्वभावाद् रागहीनता ।
अहो द्रव्यमहो भोगा अहो तत्साधनानि च ॥४३॥
अहोऽहं च मदर्थं यद् गृहस्थस्य तु विस्मयः ।
किंस्विद् द्रव्यं च के भोगाः कानिस्वित् साधनानि च ॥४४॥
कोऽहंकारो ममकारः साधोर्नैवाऽस्ति विस्मयः ।
उत्सवोऽद्य विवाहोऽद्य नृत्यमद्य च गायनम् ॥४५॥
रङ्गोऽद्य नाटकं चाऽद्य गृहस्थस्य तु विभ्रमः ।
आत्मोत्सवो मोक्षवाहो नृत्यगीती हरौ सदा ॥४६॥
रङ्गनाट्ये परेशार्थं साधोः कृष्णे समर्पणम् ।
इदं द्यूतमिदं लब्धं जितं ग्रस्तं निजीकृतम् ॥४७॥
दत्तं चापि गृहीतं च गृहस्थस्य सरागता ।
आत्मद्यूतं ब्रह्मलब्धं जितं मनः स्थिरीकृतम् ॥४८॥
अदत्तमगृहीतं च साधोः रागविहीनता ।
सुखानुशयिता नित्यं तृष्णातन्त्वनुपातिता ॥४९॥
गृध्नभावानुयायित्वं गृहस्थस्य सरागता ।
आत्मानुशयिता नित्यं ब्रह्मसूत्रानुपातिता ॥५०॥

साधुभावानुयायित्वं साधोर्विरागता सदा ।
एवं वैराग्यपार्थक्यं भक्तौ चापि निशामय ॥५१॥
गृहस्थस्य गृहे भक्तिः साधोर्भक्तिस्तु माधवे ।
गृहस्थस्य रतौ भक्तिः साधोस्तु विरतौ हि सा ॥५२॥
स्वार्थे च गृहिणो भक्तिः साधोर्भक्तिः परार्थके ।
गृहस्थस्यैहिके भक्तिः साधोः सा परमार्थिका ॥५३॥
गृहस्थस्य स्थितौ भक्तिः साधोर्भक्तिः परस्थितौ ।
गृहस्थस्य रसे भक्तिः साधोः सर्वरसात्मनि ॥५४॥
गृहस्थस्य भ्रमे भक्तिः साधोर्भक्तिर्भ्रमातिगे ।
गृहस्थस्य ऋतौ भक्तिः साधोर्भक्तिः ऋते हरौ ॥५५॥
भक्तिः साधोरनावर्त्ते ह्यावर्ते गृहिणस्तु सा ।
भक्तिर्गर्भे गृहस्थस्य साधोर्भक्तिर्हिरण्मये ॥५६॥

गृहभक्ता गृहस्थाश्च साधवो ग्रहसेविनः ।
भक्तभक्ता गृहस्था वै साधवो नक्तभक्तकाः ॥५७॥

बहुभक्ता गृहस्थाश्च साधवश्चैकभक्तकाः ।
सभक्ता वै गृहस्थाश्च निर्भक्ताः साधवः सदा ॥५८॥
सर्वभक्ता गृहस्थाश्च ह्यभक्ताः साधवः खलु ।
एवं राजन् भक्तिमार्गे पार्थक्यं गृहिणां सताम् ॥५९॥
गतौ चापि साहचर्यं भवत्येव नहि क्वचित् ।
गृहस्थस्य गतिर्निम्ना साधोर्गतिः सदोर्ध्विका ॥६०॥
गृही त्वारामगतिकः साधुः रामगतिः सदा ।
गृहस्थो रक्तगतिमान् साधुः शुक्लगतिः सदा ॥६१॥
गृहस्थो द्वन्द्वगतिकः साधुर्द्वन्द्वाऽगतिस्तथा ।
गृहगतिर्गृहस्थश्च साधुर्ग्रहगतिः सदा ॥६२॥
कर्मगतिर्गृहस्थस्य साधोर्ब्रह्मगतिस्तथा ।

आत्मगतिर्गृहस्थस्य साधोश्चात्माऽऽत्मसद्गतिः ॥६३॥
साधोर्गतिर्भगवति गृहस्थस्य भगे गतिः ।
एवं राजन् गतेश्चापि पार्थक्यं गृहिणां सताम् ॥६४॥

वद त्वया समं मेऽत्र कथं स्यात् सहयोजनम् ।
रागाऽरागौ सहनस्तस्तेजस्तमसी नैव च ॥६५॥
बन्धमोक्षौ सहयोगौ न स्तो न स्तः कदाचन ।
तस्माद् वासं वने साधुसम्मतं समरोचये ॥६६॥
पश्य राजन् शरीरं वै कललं कललोद्भवम् ।
अपानस्य प्रदेशेन धातुद्वारा प्रजायते ॥६७॥
अपानस्य स्थले गर्भे पच्यते कललैः सदा ।
पुष्टिमेति बहिर्याति पयसा रन्धितान्नकैः ॥६८॥
सर्वं कललसंव्यासं निधानं कललस्य वै ।
कललं च मलं वापि सलिलं तत्र वर्तते ॥६९॥

भौतिकं चापि दुर्गन्धं त्वापादनखमस्ति यत् ।
मलात्मकं निधानं च मलस्यैव विलोक्यते ॥७०॥
सुगन्धाढ्यं प्रभुक्तं च पीतं गलादधोगतम् ।
दुर्गन्धं जायते शीघ्रं मलं कृत्वा प्ररक्षति ॥७१॥
सुगन्धो गन्धसारश्च घ्राणेन यः प्रपूरितः ।
कोष्ठले स तु दुर्गन्धो भूत्वा बहिः प्रयाति च ॥७२॥

नवद्वारेषु सर्वत्र दुर्गन्धानि मलानि वै ।
क्षरन्त्येव हि सर्वेषां नारकं कुण्डमेव यत् ॥७३॥
पश्य स्वांगजुगुप्सां च मा संसर्गं परैः कुरु ।
जलान्नग्रहणे योग्यं कललक्लेदविकृतौ ॥७४॥
मलमूत्रसर्जने च का तत्र शुभवासना ।
अशुभं शुभमाविद्य रमते निगडे यथा ॥७५॥

भुक्तविकाररूपाद् वै लालात्मसलिलात् खलु ।
भूतेजोवायुसम्मिश्राज्जायते कललोद्भवः ॥७६॥
तस्माद् देहस्ततस्तत्रेन्द्रियाणि गोलकादयः ।
तन्मात्राद्यास्तथा तेषां सञ्चालिका प्रशक्तयः ॥७७॥
ग्राह्यग्राहकभावाश्च तस्मादेव भवन्ति वै ।
तत्र को नाम संविद्वान् प्रमोदं लभतेऽवशः ॥७८॥

क्षणे क्षणेऽन्यरूपाणि दृश्यन्तेऽतर्कितानि वै ।
कुत्रक्षणेऽयं संघातो विघातं संप्रयास्यति ॥७९॥

अभ्रवद् धूम्रवद्वा च धूलीपटलवत्तथा ।
ज्ञात्वैवं देहपटलं ज्ञो न विश्वासमाप्नुयात् ॥८०॥
शून्यं क्षणान्तरे त्वेतत्प्राणस्य विगमे भवेत् ।
दुःखं चालोक्यते साक्षाद् यतः स्वलक्षणं हि तत् ॥८१॥
शरीरं चेदृशं तस्य सम्बन्धिषु तु का कथा ।
तस्माद् राजन्निवत्स्येऽहं त्वात्मन्यरण्यसंज्ञके ॥८२॥
अनरण्ये परमेशे वासं लप्स्ये ततः परम् ।
मदुक्तं यदि मिष्टं ते तं सुमार्गं प्रसाधय ॥८३॥

एष यामि वियोगस्य मा शोकं वर विज्ञक ।
गुरौ देहो यथोक्तश्च सदा चेत्तादृशोऽस्ति वै ॥८४॥
अरण्येऽपि तथैवास्ते तत्संगस्तु भयावहः ।
तत्संगे चेदरण्येऽपि वासस्ते संभविष्यति ॥८५॥
समद्रष्टुश्च तेऽरण्यं गृहं मेऽपि समं यतः ।
वासं त्वत्रैव सततं विधेहि याहि मा प्रभो ॥८६॥

**प्रबुद्ध उवाच—**

सत्यं राजन् त्वदुक्तं वै मयोक्तं चापि तत्तथा ।
अविघ्ने भवने गत्वा मोक्षं यास्यामि दुर्लभम् ॥८७॥

बहुविघ्नमयं राजन् भवनं ते विलोक्यते ।
स्वल्पविघ्नमरण्यं वै यतिष्ये च यथाबलम् ॥८८॥
आत्मवित्तिं प्राप्य प्रवेक्ष्यामि वै ब्रह्मवित्तिके ।
ब्रह्मवित्त्या परब्रह्म साधयिष्यामि शाश्वतम् ॥८९॥

**अमोहाक्ष उवाच—**

पूर्णब्रह्मस्वरूपस्य दर्शनं मे कथं भवेत् ।
गुरो त्वं मे प्रदेह्यत्र पूर्णब्रह्मप्रदर्शनम् ॥९०॥

**प्रबुद्ध उवाच—**

कर्मकषायदाहेन पूर्णं ब्रह्म प्रकाशते ।
राजन्नाऽहं तथा युक्तः कर्मजालसमावृतः ॥९१॥

**अमोहाक्ष उवाच—**

देहस्याऽस्य न विश्वासः क्षणान्तेऽयं विनश्यति ।
गुरोः सकाशाल्लाभो न परब्रह्मप्रगोचरः ॥९२॥
तदा शिष्येण तु कदा क्व स लाभो ह्यवाप्स्यते ।
त्वं प्रदेहि गुरो ज्ञानं चाऽपरोक्षं परात्मनः ॥९३॥

**प्रबुद्ध उवाच—**

नाहं तादृक् समर्थोऽस्मि सामर्थ्यं भजनाश्रयम् ।
मादृशा अवतारास्तु बुद्धा जाताः सहस्रशः ॥९४॥
भक्त्योपासनया यस्य परब्रह्मण एव ह ।
तदुपास्त्या भवान् राजन् तरिष्यति न संशयः ॥९५॥
यास्याम्यहं वने राजन् त्वं चेदिच्छसि सत्वरम् ।
ब्रह्मदर्शनमत्रैव विना साधनसम्पदम् ॥९६॥
कृपयाऽहं कथयामि देशे सुराष्ट्रसंज्ञके ।
अश्वपट्टसरःक्षेत्रेऽक्षरक्षेत्रे शुभावहे ॥९७॥
कुंकुमवापिकातीर्थे प्रत्यक्षो भगवान् स्वयम् ।
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ॥९८॥
विराजते परब्रह्म धृतमानुषविग्रहः ।
याहि शीघ्रं च तं देशं परब्रह्म मिलिष्यति ॥९९॥
प्रासादे मां गुरुं तत्र स्थापयित्वा ततः परम् ।
यास्यसि ब्रह्मलोकं च याहि शीघ्रं हि मा चिरम् ॥१००॥
एष यास्यामि राजँस्ते स्वस्ति भवतु सर्वदा ।
इत्युक्त्वा नृपते बुद्धो निर्ययौ वनविस्तरम् ॥१०१॥
अमोहाक्षो द्रुतं सज्जो भूत्वा समाजगाम ह ।
क्षेत्रमेतत्समागत्याऽनादिकृष्णनरायणम् ॥१०२॥
प्रत्यक्षं सन्ददर्शापि तीर्थेऽत्र न्यवसत्तथा ।
प्रबुद्धं स्थापयित्वाऽत्र ययौ मोक्षं परात्परम् ॥१०३॥
दिव्यविमानमारुह्याऽक्षरं धाम सनातनम् ।
तदिदं बुद्धतीर्थं वै तथा तीर्थममोहकम् ॥१०४॥
मोहनाशकरं पूर्णब्रह्मप्राप्तिकरं सदा ।
स्नाहि राजन् गुरुं ध्यात्वा दानान्यपि प्रदेहि च ॥१०५॥
इत्युक्तो राधिके राजा चाश्वपाटलकस्तदा ।
लोमशोक्तदिशा स्नानं दानं चकार शोभनम् ॥१०६॥
ययौ ततोऽग्रं सहसा तीर्थं चाऽपरमेव सः ।
पठनाच्छ्रवणाच्चास्य परब्रह्मगतिर्भवेत् ॥१०७॥
विवेको जायते चापि तथा ब्रह्मस्थितिर्भवेत् ।
भुक्तिर्मुक्तिर्भवेच्चापि स्वर्गं च शाश्वतं भवेत् ॥१०८॥
अत्र दानेन तपसा भजनेनाऽऽप्लवेन च ।
जलपानेन यज्ञस्याऽश्वमेधस्य फलं भवेत् ॥१०९॥
अपि पापिजनश्चात्राऽऽगत्य प्राणान् जहाति चेत् ।
प्रबुद्धश्चात्र संभूत्वा मोक्षपदं प्रयास्यति ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने अमोहाक्षनृपतेः प्रबुद्धगुरोरुपदेशेन कुंकुमवापीक्षेत्राऽऽगमे साक्षात्परब्रह्मप्राप्तिः, बुद्धतीर्थं, मोक्षश्चेत्यादिनिरूपण-नामाऽष्टषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके तत्र तीर्थे गत्वाऽश्वपाटलः ।
पुनः पप्रच्छ तीर्थस्य किंनामादि च लोमशम् ॥ १ ॥

**अश्वपाटल उवाच—**

गुरो तीर्थ मिदं ख्यातं किंनाम्ना च कदाऽभवत् ।
तत्सर्वं मे तु संक्षेपाद् ब्रूहि किं फलमस्य च ॥ २ ॥

**श्रीलोमश उवाच—**

शृणु राजन् प्रवक्ष्यामि तीर्थं परमपावनम् ।
लक्ष्मीतीर्थं तथा नारायणतीर्थमिदं नृप ॥ ३ ॥
पुरा राजा ह्यभयाक्षोऽभवत् पांचालभूपतिः ।
धर्मकर्मसमाचारो दानभक्तियुतो हरौ ॥ ४ ॥
यस्य गेहेऽतिथयश्च साधवो दीनदेहिनः ।
भुंजते शतशो नित्यं तृप्तिमायान्ति शाश्वतीम् ॥ ५ ॥
यत्र नारायणः साक्षात् साधुरूपेण राजते ।
अज्ञेयः सर्वलोकानां विप्रसंसेवितः प्रभुः ॥ ६ ॥

लक्ष्मीः राधा तथा साध्वीरूपेण च विराजते ।
देवा देव्यो विजानन्ति न च जानन्ति मानवाः ॥७॥
दिव्याक्षा ये मुनयश्च ते जानन्ति न चेतरे ।
राजा नित्यं सेवते श्रीप्रभुं श्रीपुरुषोत्तमम् ॥८॥
नारायणं भजते च चतुर्भुजं श्रियः पतिम् ।
कथां श्रृणोति सततं साधुविप्राननात् स च ॥९॥
कुटुम्बसहितो राजा त्वात्मज्ञानपरोऽभवत् ।
साधुसेवापरश्चापि प्रजारक्षापरायणः ॥१०॥
नाऽस्य प्रजायां चाऽधर्मो न स्तैन्यं नापि हिंसनम् ।
शौचं प्रजाः पालयन्ति सन्तुष्टा निजवस्तुषु ॥११॥
विप्रास्तु तापसास्तस्य भुंजते भोजनानि वै ।
वेदघोषपरा नित्यं षट्कर्मादिपरायणाः ॥१२॥
यज्ञयागपराश्चापि नारायणपरायणाः ।
ब्रह्मशीलपरा लोकाः कामं न बहु मन्वते ॥१३॥
अर्थं चापेक्षितं ह्येवार्जयन्ति नाधिकं ततः ।
शेषं तु समयं सर्वे मोक्षार्थं कल्पयन्ति वै ॥१४॥
नाऽस्य राज्येऽस्ति विधवा ह्यपुत्रा चाऽप्यपत्यकः ।
अपत्नीको गृहस्थो न धनधान्ययुताः प्रजाः ॥१५॥
प्रातः सर्वत्र नगरे कृष्णकृष्णस्वनाः शुभाः ।
मांगलिकाश्च जायन्ते श्रूयन्ते कीर्तनानि च ॥१६॥
नाऽस्नातो विद्यते कश्चिन् नाऽपूजो विद्यते तथा ।
मानवानां ललाटेषु तिलकं चन्द्रकान्वितम् ॥१७॥
दृश्यते चान्दनं चोर्ध्वं स्मारकं श्रीहरेः शुभम् ।
कण्ठे सर्वप्रजानां वै दृश्यन्ते तौलसीस्रजः ॥१८॥
करेऽपि तौलसीमाला जपकार्यप्रबोधिनी ।
जिह्वायां श्रीहरेर्नाम नमस्कारेऽपि वै हरिः ॥१९॥
दाने परोपकारेऽपि श्रीहरिः स्मर्यते जनैः ।
कन्यकाश्च कुमाराश्च विद्याभ्यासपराश्च ये ॥२०॥
शालायां प्रथमं कृत्वा कीर्तनं श्रीहरेस्ततः ।
अभ्यस्यन्ति पाठयन्ति चोपाध्याया हरिश्रिताः ॥२१॥
न्यायालयेऽपि सततं श्रूयतेऽग्रेऽवसानके ।
हरेराम हरेकृष्ण नारायण नमोऽस्त्विति ॥२२॥
नदीतीरे गृहे क्षेत्रे वाटिकासु वनेऽपि च ।
कर्षुकाः शिल्पिनः काष्ठहारास्तृणादिनिन्दकाः ॥२३॥
सर्वे कृष्णपराः कृष्णं स्मृत्वा कुर्वन्ति वै श्रमम् ।
आन्धसिका हरेर्भक्ताः स्थाले कृत्वा तु पाचितम् ॥२४॥
अन्नं सर्वविधं चापि फलमूलजलादिकम् ।
समर्प्य हरये पश्चाद् भोजयन्ति गृहेश्वरान् ॥२५॥
देवार्पणं प्रकुर्वैव भुंजते च पिबन्ति च ।
आपणस्थाः श्रेष्ठिवर्या गणेशार्चनमित्यपि ॥२६॥
कृत्वा घृतप्रदीपं च ततः श्रीकृष्णपूजनम् ।
व्यापारयन्ति दिवसे रात्रौ भजन्ति माधवम् ॥२७॥
पशुपाला हरिं नत्वा गां सम्पूज्य च मन्दिरम् ।
श्रीकृष्णस्य वीक्ष्य पश्चात् कृत्वा कृष्णस्य दर्शनम् ॥२८॥
यान्त्यरण्यभूभागान् हरिस्मृतिपरायणाः ।
काष्ठहाराः कृष्णकृष्ण भजन्तो यान्ति वै पथि ॥२९॥
रजका वस्त्रसम्पुटक्षालने रामनाम वै ।
कृष्णनारायणेत्युक्त्वा क्षालयन्ति जलाशये ॥३०॥
शुकाद्याः पक्षिणश्चापि वक्षन्ति श्रीनरायण ।
रंभंते पशवश्चाप्योंकारमिश्रं हि वैष्णवाः ॥३१॥
तौर्यत्रिका वादयन्ति कृष्णकीर्तनगीतिकाः ।
कवयश्चारणाद्याश्च कृष्णप्रबन्धकारिणः ॥३२॥
अभयाक्षं स्वकं नाम विवृत्य भूभुजा स्वयम् ।
अधोक्षजं हरेर्नाम ख्यापितं चोपनाम तत् ॥३३॥
प्रजानां चापि नामानि परेशार्थयुतानि च ।
कारितामीति राष्ट्रं सद् वैष्णवं संव्यजायत ॥३४॥
एवंविधोऽभयभक्तो विचार्य नश्वरं गृहम् ।
धनं राज्यं च सम्पच्च गत्वरं च वपुर्निजम् ॥३५॥
वैराग्यावेशतश्चायमश्वपट्टसरो ययौ ।
प्रजा विप्रास्तथा वृद्धास्तं राजानं समन्वयुः ॥३६॥
मार्गे कीर्तनभक्त्यैव समायातान् विलोक्य तान् ।
मार्गग्रामागता लोकाः कौतूहलसमन्विताः ॥३७॥
सह चाश्वसरस्तीर्थं प्रत्याययुः समुत्सुकाः ।
उत्तरे सरस्वतीरे वासं चक्रुर्द्रुमालये ॥३८॥
कृत्वा तीर्थानि सर्वाणि लोमशस्याश्रमं ययुः ।
ततोऽनादिकृष्णनारायणप्रासादमाययुः ॥३९॥
पुपूजुः परया प्रीत्या श्रीमत्कृष्णनरायणम् ।
मातरं पितरं नत्वा दृष्ट्वा कुंकुमवापिकाम् ॥४०॥
कुंकुमवापिकावारि पीत्वा श्रीपूजनं तथा ।
विधाय दत्वा दानानि ययुः सरस्तटं पुनः ॥४१॥
अधोक्षजः स राजाऽत्र स्थले चेयेष वै क्रतुम् ।
कर्तुं नारायणं सम्प्रसादयितुं महेज्यया ॥४२॥
लोमशं संप्रार्थयच्च यज्ञार्थे स ह्यधोक्षजः ।
लक्षसौवर्णमुद्राभिर्यज्ञं चकार वैष्णवम् ॥४३॥
देवानतर्पयद्धव्यैः पितॄन् श्राद्धैः सतोऽन्नकैः ।
जनान् दानैस्तथा चात्मार्पणैः साधून् सुरेश्वरान् ॥४४॥

पूर्णाहुतौ स्वयं कृष्णो नारायणश्चतुर्भुजः ।
शंखचक्रगदापद्मधरो वह्नावदृश्यत ॥४५॥
भुञ्जन् हव्यानि सर्वाणि लक्ष्म्या समन्वितः प्रभुः ।
रमानन्दसुनन्दादिसेवितो गरुडान्वितः ॥४६॥
प्रसन्नवदनः श्यामो युवा कोट्यर्कभास्वरः ।
विप्राश्चान्ये जनाः सर्वेऽभवन्नाश्चर्यसंभृताः ॥४७॥
अहो राज्ञः सुभक्तिश्च स्नेहो नारायणस्य च ।
लक्ष्मीनारायणः साक्षाद् भुंक्ते हव्यं नृपाऽर्पितम् ॥४८॥
राजानं भगवानाह मन्दिरं चात्र कारय ।
लक्ष्म्या साकं निवत्स्येऽहं प्रतिष्ठापय मां नृप ॥४९॥
साधुदीक्षां गृहीत्वैव त्वं मे पूजां विधेहि च ।
स्थास्ये वशे च ते राजन् साधोऽधोक्षज मां भज ॥५०॥
इत्युक्त्वा च प्रभुक्त्वा च हव्यानि भगवाँस्ततः ।
तिरोभवत् ततो राजाऽधोक्षजो भूसुरादिके ॥५१॥
दक्षिणा वितरय्यैव भोजयित्वा समस्तकान् ।
स्वतःप्रकाशऋषितस्त्यागिदीक्षां समग्रहीत् ॥५२॥
उपवासं चकाराऽसौ देहशुद्धिं चकार च ।
मुण्डनं कारयामास स्नात्वा चक्रेऽनले हवम् ॥५३॥
नारायणं पुपूजाऽपि सर्वतोभद्रमण्डले ।
गोदानं पृथिवीदानं स्वर्णदानादिकं ददौ ॥५४॥
लक्ष्मीनारायणस्याऽपि मन्दिरस्य निमित्तकम् ।
लक्षं सुवर्णमुद्राणां दानं च गुरवे ददौ ॥५५॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥५६॥
'कालमायापापकर्मशत्रुयाम्यकुद्वन्द्वयात् ।
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ॥ ५७ ॥
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वत ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥५८॥
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ।
पिता बन्धुः सुहृन् मित्रं रक्षकः पालकोऽस्तु सः' ॥५९॥
'श्रीकृष्णवल्लभोनाथः श्रीस्वामी शरणं मम ।
कृष्णवल्लभभक्तोऽहं श्रीहरिः शरणं मम' ॥६०॥
'श्रीकृष्णवल्लभस्वामी श्रीहरिः शरणं मम' ।
इतिमन्त्रान् स जग्राह स्वतःप्राकाशसद्गुरोः ॥६१॥
ततः काषायाम्बराणि धारयामास सद्व्रती ।
यज्ञोपवीतकं कण्ठीं तौलसीं च स्रजं करे ।
तिलकं चान्दनं चोर्ध्वपुण्ड्रं चक्रादिमुद्रिकाः ॥६२॥

पूजार्थं कानकीं कार्ष्णनारायणीं रमायुताम् ।
प्रतिमां चापि जग्राह गुरुपूजां चकार च ॥६३॥
अधोऽक्षजप्रकाशेति नाम नैजं ररक्ष वै ।
दीक्षांगं विधिवद्वैधं समाप्य सरसस्तटे ॥६४॥
पर्णकुट्यां सदावासं चक्रे त्वत्र मखस्थले ।
जजाप परया भक्त्या श्रीशं कृष्णनरायणम् ॥६५॥
कारयामास सुभगं लक्ष्मीनारायणालयम् ।
लक्ष्मीं नारायणं प्रतिष्ठापयामास मन्दिरे ॥६६॥
तदिदं मन्दिरं राजन् राजते श्रीहरिश्रितम् ।
कुरु वै दर्शनं तत्र श्रियो हरेश्च वै ततः ॥६७॥
दानानि देहि राजेन्द्र स्नानं चात्र समाचार ।
एतत्तीर्थं महातीर्थं सर्वयज्ञफलप्रदम् ॥६८॥
यज्ञतीर्थं साधुतीर्थं लक्ष्मीतीर्थं तथा मतम् ।
अधोक्षजाख्यतीर्थं च नारायणाख्यतीर्थकम् ॥६९॥
दीक्षातीर्थं तथा ख्यातं पावनं त्वेतदेव यत् ।
मार्गशीर्षे केशवं च प्रपूज्य विधिनाऽत्र वै ॥७०॥
मार्गशीर्षे स्नानदानादश्वमेधफलं लभेत् ।
पौषे स्नानाच्च दानाच्च श्रिया युक्तं नरायणम् ॥७१॥
प्रपूज्य लभते पुण्यं वाजपेयमखोत्थितम् ।
माघमासे स्नानदानान्माधवं सम्प्रपूज्य च ॥७२॥
तीर्थकृल्लभते चात्र राजसूयफलं परम् ।
फाल्गुने स्नानदानाच्च गोविन्दं सम्प्रपूज्य च ॥७३॥
अतिरात्राख्ययज्ञोत्थं फलं लभेद्धि तीर्थकृत् ।
चैत्रे स्नानात्तथा दानादत्र विष्णुं प्रपूज्य च ॥७४॥
पुण्डरीकफलं तीर्थकर्ता प्रयाति पावनम् ।
वैशाखे स्नानदानाच्च प्रपूज्य मधुसूदनम् ॥७५॥
अग्निष्टोमफलं राजन् लभतेऽत्र स तीर्थकृत् ।
ज्येष्ठे स्नानात्तथा दानात् त्रिविक्रमं प्रपूज्य च ॥७६॥
लभते तीर्थकृच्चात्र गवायनक्रतोः फलम् ।
आषाढे स्नानदानाच्च वामनं सम्प्रपूज्य च ॥७७॥
लभते तीर्थकृच्चात्र फलं वै सोमयागजम् ।
श्रावणे स्नानदानाच्च श्रीधरं सम्प्रपूज्य च ॥७८॥
लभते तीर्थकृच्चात्र विश्वजित्क्रतुजं फलम् ।
भाद्रे स्नानात्तथा दानात् हृषीकेशं प्रपूज्य च ॥७९॥
लभते तीर्थकृच्चात्र फलं सौत्रामणिक्रतोः ।
आश्विने स्नानदानाभ्यां पद्मनाभं प्रपूज्य च ॥८०॥
तीर्थकृल्लभते पुण्यं विविधं सोमयोगजम् ।
कार्तिके स्नानदानाभ्यां दामोदरं प्रपूज्य च ॥८१॥

लभतेऽत्र तीर्थशायी विष्णुयागोद्भवं फलम् ।
अधिमासे स्नानदानात् प्रपूज्य पुरुषोत्तमम् ॥८२॥
तीर्थकृल्लभते सर्वमेधयज्ञफलं परम् ।
यत्र क्वचिद्दिने त्वत्र स्नानाद् दानाज्जपादिभिः ॥८३॥
तीर्थकृल्लभते राजन् सर्वयज्ञफलानि वै ।
शिवरात्र्यां स्नानदानान्महारुद्रफलं भवेत् ॥८४॥
इत्येतत्पावनं क्षेत्रं लक्ष्मीनारायणोदितम् ।
कुरु स्नानं तथा पूजां लक्ष्मीनारायणस्य वै ॥८५॥
सर्वान् भगवतो ध्यात्वा सर्वपुण्यान्यवाप्नुहि ।
इत्युक्तो राधिके ! राजा त्वश्वपाटल एव ह ॥८६॥
सकुटुम्बो जले सस्नौ पुपूज मन्दिरे हरिम् ।
श्रिया युक्तं षोडशोपचारैर्नीराजनादिभिः ॥८७॥
तावत्तस्य श्रीहरौ वै प्रतिमायां चतुर्दश ।
केशवाद्या भगवन्तो ह्यदृश्यन्त यथोदिताः ॥८८॥
क्षणं स्वदर्शनं दत्वाऽनादिकृष्णनरायणे ।
लीनाः सर्वेऽवतारास्ते स चाऽप्यन्तरधीयत ॥८९॥
अश्वपाटलनृपतिर्महाश्चर्यं जगाम ह ।
कृतकृत्यं निजं मेनेऽधोक्षजे तीर्थके तदा ॥९०॥

**अश्वपाटल उवाच—**

लोमशाऽत्र मम जातं दर्शनं केशवादिजम् ।
कृतकृत्यो भवाम्येव किं तीर्थैर्दानविस्तरैः ॥९१॥

**श्रीलोमश उवाच—**

राजँस्तीर्थबलेनैतज्जातं सर्वं विभावय ।
अतीर्थस्य बलं नास्ति नास्ति पुण्यं पवित्रता ॥९२॥
नास्ति नैर्मल्यभावश्च नास्ति कृष्णप्रसन्नता ।
नास्ति भक्तिरतीर्थस्य नास्ति मोक्षो दिवं च वा ॥९३॥
जंगमं वा स्थावरं वा तीर्थं कल्मषनाशनम् ।
कल्मषाणां विनाशोर्ध्वे तीर्थी प्राप्नोति योग्यताम् ॥९४॥
योग्यतायां सुसत्यां वै हृदि ब्रह्म प्रकाशते ।
ब्रह्मरूपस्य भक्तस्य स्नेहस्तत्र प्रजायते ॥९५॥
परब्रह्मनिकटत्वं जायतेऽस्य निसर्गजम् ।
ततो भवति दुर्लभ्यं दर्शनं सुलभं हरेः ॥९६॥
एवं दर्शनमास्य लोकसंग्रहहेतवे ।
कर्तव्यतया तीर्थानि विहितान्येव सर्वदा ॥९७॥
तस्मात् तीर्थानि दानानि कर्तव्यानि कृपाजुषा ।
मुक्तः सिद्धश्च वा देवो दिव्यो वा ब्रह्मरूपधृक् ॥९८॥
यद्यदाचरते मोक्षप्रदं स्वर्गप्रदं च वा ।
पुण्यकृत् तत्समालम्ब्याऽऽचरते त्वपरो जनः ॥९९॥
तेन मुक्तिर्भवेद्देवाऽभयदानं भवेदपि ।
कर्मणा मनसा वाचा भावेन तीर्थमाचरेत् ॥१००॥
इत्युक्त्वा लोमशस्तं वै चाश्वपाटलभूपतिम् ।
अग्रे तीर्थान्तरं निन्ये विष्णुमन्दिरमुत्तमम् ॥१०१॥
राधिके यत्र वै विष्णोः श्वेता मूर्तिः सनातनी ।
राजते कमलायुक्ता गरुडेन प्रशोभिता ॥१०२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽभयाक्षनृपतेर्भक्तिवैराग्यं मखश्चाश्वपट्टसरस्तीरे त्यागिदीक्षाग्रहणं लक्ष्मीनारायणादिदर्शनं मन्दिरनिर्माणं लक्ष्मीतीर्थे नारायणतीर्थे चेत्यादिनिरूपणनामा नवषष्ट्यधिकद्विशततमोऽध्यायः ॥ २६९ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके पश्चादश्वपाटलभूपतिः ।
अग्रे तीर्थे च प्रपच्छ लोमशं तीर्थसंभवम् ॥ १ ॥

**अश्वपाटल उवाच—**

इदं तीर्थं च किन्नाम कदा केन कृतं प्रभो ।
किंफलं को विधिश्चात्र कर्तव्यो वद मे गुरो ॥ २ ॥

**श्रीलोमश उवाच—**

अस्य तीर्थस्य माहात्म्यं शृणु राजन् वदामि ते ।
देवानीकोऽभवद् वैश्यः कृषिकारोऽतिभक्तिमान् ॥ ३ ॥
उज्ज्वलग्रामवासोऽयं वाटिकायां दिवानिशम् ।
वर्षायां वै निजावासं कृत्वा तिष्ठति रक्षकः ॥ ४ ॥
भजते श्रीहरिं नित्यं प्रातः स्नात्वाऽर्चयत्यपि ।
मध्याह्ने भोजनं सर्वं निवेद्य हरयेऽत्ति च ॥ ५ ॥
वर्षायां यानि सस्यानि पत्राणि च दलानि च ।
शाकानि कन्दमूलानि फलानि च भवन्ति हि ॥ ६ ॥
क्षेत्रेषु वाटिकायां च नूतनानि हि तानि सः ।
निवेद्य हरये पश्चादुपभुंक्ते कुटुम्बवान् ॥ ७ ॥
इक्षुदण्डान् कणिशाँश्च बीजानि भाजिकादिकम् ।
मुन्यन्नानि च हव्यानि समिधश्च रसांस्तथा ॥ ८ ॥
मधूनि शर्करा गूडं गुन्द्रं दुग्धानि यानि च ।
भाजिका भर्जितकणाँस्तथा भर्जितशिम्बिकाः ॥ ९ ॥

रतम्बान् वल्लीश्च वै तृणजातीयानि च यानि च ।
मासे मासे प्रजातानि समर्प्य हरयेऽत्ति सः ॥१०॥
एवमात्मनिवेदी वै भक्तराट् कर्षुकोऽभवत् ।
राजन् वर्षानिशायां त्वेकदा वृष्टिरभूद् द्रुतम् ॥११॥
सवेगाः स्थूलबिन्द्वाढ्या रात्रौ चाप्रातरेव सा ।
दिवसेऽपि तथैवाऽभूत् ततो रात्रावभूत्तथा ॥१२॥
दिवानिशं प्रवर्षैश्च भूतलं जलसंभृतम् ।
क्षेत्राणि जलरूपाणि नद्यो जलातिगास्तथा ॥१३॥
अमार्गगा ह्यमर्वैश्च ग्रामाणां परितो जलम् ।
मार्गा नदीमयाश्चासन् वृक्षा यथा सरःस्थिताः ॥१४॥
एवं जातेऽतिभयदे वर्षणे कर्षुकः स तु ।
शैत्यार्द्रवस्त्रसंकम्पो वृक्षाश्रये स्थितोऽभवत् ॥१५॥
जलानि सरितस्त्यक्त्वा मार्गं त्यक्त्वाऽतिगानि वै ।
आयातानि निशायां वै वाटिकायां समन्ततः ॥१६॥
वृक्षा जलगताश्चासन् कर्षुको वृक्षमेव तम् ।
आरुह्य त्वात्मरक्षार्थे त्रिशाखे सुस्थिरोऽभवत् ॥१७॥
रात्रौ झंझावातवर्षा दैवयोगादवर्धत ।
वातेन द्रुम आक्षिप्तो भ्रामितश्च निपातितः ॥१८॥
शाखा भग्ना कर्षुकस्तु हरिं स्मृत्वा तु शाखिकाम् ।
प्रगृह्यैव सुलग्नोऽभूच्छाखायां सलिलोपरि ॥१९॥
पूराऽऽकृष्टाऽभवच्छाखा जलमध्ये गता तु सा ।
ऊढा सकर्षुकाऽऽकृष्टा नदीमध्ये गताऽभवत् ॥२०॥
पूरप्रवाहणैश्चोह्यमानाऽश्वपट्टमाययौ ।
शाखाऽऽर्द्रा भारयुक्ता वै सा ममज्ज सरोजले ॥२१॥
कर्षुकस्तु निराधारो जानाति तरितुं ततः ।
जलमध्ये तरत्येव किन्तु शैत्येन पीडितः ॥२२॥
कल्लोलैः श्रमितश्चापि स्तब्धहस्तो ममज्ज ह ।
हरे नारायण कृष्ण बालकृष्ण विभो प्रभो ॥२३॥
विष्णो हस्तीजले मग्नस्तारितो भवता तदा ।
सत्यव्रतो जले नावा तारितो भवता पुरा ॥२४॥
क्षितिर्मग्ना जले पूर्वे तारिता भवता प्रभो ।
संसारसागरात् त्वं वै तारयस्येह देहिनः ॥२५॥
कमलानि जलजानि चोर्ध्वे त्वं नयसि प्रभो ।
जले सुतः स्वयं पूर्वे वैराजं कृतवाँस्ततः ॥२६॥
क्षीराब्धौ शेषशयने सुप्तस्त्वं प्रलयेऽसि च ।
अद्य सुतोऽस्मि त विष्णो जलाब्धौ नय मां द्रुतम् ॥२७॥
स्वलोक स्वर्गलोकोर्ध्वे निजाग्रे मां प्ररक्षय ।
मे वाञ्छा मर्त्यलोके स्थातुं धाम तु ते नय ॥२८॥
नमः श्रीविष्णवे लोकजिष्णवे परमात्मने ।
सर्वज्ञाय नमस्ते त्वन्तरात्मने परात्मने ॥२९॥
एष प्राणाँस्त्यजाम्येव समर्पयामि ते पदे ।
इत्युक्त्वा मानसे दध्यौ विष्णुं कृष्णनरायणम् ॥३०॥
तावत्तत्र समायातो बालकृष्णः परेश्वरः ।
चतुर्भुजो युवा सौम्यः शंखचक्रगदाधरः ॥३१॥
हस्ते धृत्वा निजं भक्तं कर्षुकं जलमध्यतः ।
तीरे निन्ये हरिस्त्वेनं विष्णुर्गोपालनन्दनः ॥३२॥
गृहे नीत्वाऽनलेनाऽपि तापयामास सेवकम् ।
भोजयामास सुरसान् वस्त्राणि प्रददौ ततः ॥३३॥
स्वापयामास शयने रक्षयामास सर्वथा ।
यत्र भक्तो जलात्तीरे निष्कास्य स्थापितः क्षणम् ॥३४॥
विष्णुरूपेण कृष्णेन तदिदं तीर्थमुत्तमम् ।
विष्णुतीर्थं समभवत् तारकं सागरात् खलु ॥३५॥
कर्षुको रक्षितः पश्चाद् दिनान्तरे गृहं ययौ ।
आगत्य धनदानेन मन्दिरं विष्णुशोभितम् ॥३६॥
कारयित्वाऽतिष्ठिपच्च विष्णुं चतुर्भुजं त्विह ।
तदिदं मन्दिरं राजन् राजते विष्णुमण्डितम् ॥३७॥
तारकं तीर्थमेवाऽपि ख्यायते चोत्तमोत्तमम् ।
अत्र स्नानात्तरन्त्येव दानात् समृद्धिं लभन्त्यपि ॥३८॥
विष्णोः पूजाकरणाच्च वैकुण्ठं विन्दतेऽपि च ।
कुरु स्नानं ततश्चात्र दानं देहि यथेप्सितम् ॥३९॥
कृत्वा च दर्शनं विष्णोः पूजां कुरु जगद्गुरोः ।
इत्युक्तो राधिके राजा ह्यश्वपाटल एव ह ॥४०॥
पुपूज विष्णुं पुष्पाद्यैर्ददौ सौवर्णदानकम् ।
ततश्चाग्रे ययौ तीर्थे पुरुषोत्तमनामकम् ॥४१॥

**अश्वपाटल उवाच—**

इदं तीर्थं कथं जातं पुरुषोत्तमसंज्ञकम् ।
कदा केन निमित्तेन तद्विधिं च फलं वद ॥४२॥

**श्रीलोमश उवाच—**

शृणु राजन् प्रवक्ष्यामि तीर्थानां तीर्थमुत्तमम् ।
पुरुषोत्तमसंज्ञं वै साक्षाद् यत्र पुमुत्तमः ॥४३॥
आनर्तेषु प्रदेशेषु भद्रायने हि पत्तने ।
विप्रगृहे ब्रह्मस्तम्बो महर्षिः समजायत ॥४४॥
स त्वाबाल्याद्गुरौ मग्नोऽक्षरं ब्रह्म यदुच्यते ।
ब्रह्मात्मा ब्रह्मनिष्ठश्चाऽऽराधयत् पुरुषोत्तमम् ॥४५॥

सदा ध्यानपरो योगी योगसमाधिसंस्थितिः ।
पश्यत्येव दिव्यरूपं हृदये श्रीनरायणम् ॥४६॥

यस्य भित्त्यावरणं वै नास्ति नास्ति जलाऽऽवृतिः ।
आकाशे गमनं यस्याऽदृश्यतासिद्धिरस्ति च ॥४७॥

यो नित्यं स्वकृतपूजाकाले पश्यति वै हरिम् ।
अग्रे चागत्य दत्तं स गृह्णाति चन्दनादिकम् ॥४८॥

साक्षाद् भुंक्ते प्रदत्तं च पायसाद्यं परेश्वरः ।
एवंविधस्य विप्रस्य ब्रह्मस्तम्बस्य मानसे ॥४९॥

तपसे त्वभवद् वाञ्छा हर्याराधनशान्तिदा ।
स तु गत्वा करमर्दिह्रदे तस्थौ हि वत्सरम् ॥५०॥

ततो ययौ प्रसिद्धं वै चाश्वपट्टसरोवरम् ।
अत्रागत्य तटे तस्थौ वासं चकार चाम्रके ॥५१॥

आम्रमूले शुभच्छाये स्वस्थध्यानपरोऽभवत् ।
स्नानं ध्यानं जपं पूजां तर्पणं चेश्वरार्पणम् ॥५२॥

करोत्येव निजं कर्म पावनं पुण्यसम्प्रदम् ।
अनादिश्रीकृष्णनारायणस्य दर्शनं सदा ॥५३॥

करोति नित्यं प्रातश्च प्रत्यक्षं पूजयत्यपि ।
एवं संपूजयतोऽस्य नित्यं प्रातः परेश्वरः ॥५४॥

साक्षाद् भवति विश्वात्मा दिव्यरूपधरो हरिः ।
योगशास्तं प्रपश्यन्ति दिव्यदृशोऽतिमानुषाः ॥५५॥

ब्रह्मस्तम्बेन तु तत्र कृपा पर्णकुटी शुभा ।
अश्वपट्टसरस्तीरे पुरुषोत्तमकुट्टिका ॥५६॥

तत्रेदं मन्दिरं तेन शोभनं च ततः कृतम् ।
यत्र संराजते साक्षान्मूर्तिमान् पुरुषोत्तमः ॥५७॥

पुरुषोत्तमतीर्थं तत् अश्वपट्टसरस्तटे ।
ब्रह्मस्तम्बाभिधं तीर्थं प्रोच्यते दिव्यमोक्षदम् ॥५८॥

अत्र स्नानाद् भवेत्प्राप्तिः पुरुषोत्तमशार्ङ्गिणः ।
अत्र दानाद् भवेद् प्राप्तिर्ब्रह्मलोकस्य शाश्वती ॥५९॥

पुरुषोत्तमपूजायाः फलं राजन्न वर्ण्यते ।
नारायणस्वरूपो वै जायते पूजकोऽस्य ह ॥६०॥

ब्रह्मरूपो महाभुक्तश्चोपासकोऽस्य जायते ।
स्नानं दानं जपं पूजां कुरु राजन् हरेरिह ॥६१॥

इत्युक्तो राधिके चाश्वपाट्टलो नृपतिर्हि सः ।
सर्वभावैश्चकारैव स्नानदानाऽर्हणादिकम् ॥६२॥

अथ पश्चाद् ययौ तीर्थं महाविष्णुप्रतीर्थकम् ।
अश्वपट्टसरस्तीरे क्षीरिकासंगमे शुभम् ॥६३॥

**अश्वपाटल उवाच—**

गुरो तीर्थमिदं कस्मान्महाविष्णवभिधानकम् ।
कदा जातं कथं चेति फलाद्यं चापि मे वद ॥६४॥

**श्रीलोमश उवाच—**

देवमूलस्य भक्तस्य दुहिताऽमरकन्यका ।
पुरा त्वत्र तपस्तेपे दुष्करं हरिलब्धये ॥६५॥

फलमूलाशना साध्वी महाविष्णुपरायणा ।
आकाशवासा सजटा सुवल्कलादिधारिणी ॥६६॥

पश्चात् पवनभक्षा च पादैकेन स्थिताऽभवत् ।
नेत्रे प्रमील्य सततं जपमालापरायणा ॥६७॥

एवं बहुगते काले महाविष्णुः परेश्वरः ।
सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥६८॥

अदृश्यत प्रसन्नास्यस्तेजोमध्ये सुरूपवान् ।
सायुधः सुमुकुटाद्यैर्भूषणैः शोभितः प्रभुः ॥६९॥

ततोऽभूत् स द्विभुजश्चाऽमरकन्यां जगाद ह ।
वद देवि प्रसन्नोऽस्मि किं ते मनसि वर्तते ॥७०॥

यद्यद् वाञ्छसि दास्येऽत्र त्वदर्थं समुपागतः ।
तदा नेत्रे समुन्मील्य ददर्श सुन्दरी हरिम् ॥७१॥

महाविष्णुं ततश्चापि द्विभुजं परमेश्वरम् ।
कान्तं कान्ताकृते योग्यं युवानं सद्गुणाश्रयम् ॥७२॥

पतिर्मे भव भगवन्नित्येवमार्थयत् सती ।
पतिता पादयोस्तस्य महाविष्णोस्तदा हरिः ॥७३॥

तथास्त्विति सती प्राह तापसीं च करे निजे ।
संजग्राह क्षणं साऽपि ददौ प्रेमावशा निजम् ॥७४॥

करमालां गले विष्णोर्लग्नाऽभूत् कृष्णवक्षसि ।
भगवाँस्तां निजां कृत्वा जगाद वैष्णवीं सतीम् ॥७५॥

अहं गृह्णामि सुभगेऽमरकन्येऽतिशोभने ।
महाविष्णुस्वरूपोऽहं भगवानत्र भूतले ॥७६॥

अनादिश्रीकृष्णनारायणाऽग्रे निवसामि हि ।
भज मां तं भगवन्तं गृह्णामि विधिनाऽधुना ॥७७॥

ततो देवी मानसीं च पुष्पमालां गले ददौ ।
अनादिश्रीकृष्णनारायणश्चाविर्बभूव ह ॥७८॥

अहं च लोमशस्तत्र तदा ह्युपस्थितोऽभवम् ।
वह्निं शीघ्रं प्रकाश्यैव मयाऽमराविवाहनम् ॥७९॥

कारितं विष्णुना साकं सा सती राजते गृहे ।
महाविष्णुर्भगवाँश्च राजते मानवो भवन् ॥८०॥

भगवन्तं पतिं कृष्णाऽग्रजं सर्वगुणान्वितम् ।
संप्राप्य साऽमरीकन्या कृतकृत्या सुखाऽभवत् ॥८१॥
तदिदं तपसः स्थानं ह्यमरीकन्यकाश्रितम् ।
अमरीतीर्थमेवाऽपि भगवत्तीर्थमित्यपि ॥८२॥
विवाहतीर्थं च महाविष्णुतीर्थं तथोच्यते ।
अत्र स्नानाच्च दानाच्च महाविष्णोः प्रपूजनात् ॥८३॥
महाविष्णुपदं लब्ध्वा ब्रह्मलोके महीयते ।
राजन्नत्राऽलये रम्येऽमरीविष्णुं प्रपूजयेत् ॥८४॥
भुक्तिं मुक्तिं व्रजेद् भक्तः शाश्वताऽऽनन्दभाग्भवेत् ।
इत्युक्तो राधिके राजा सस्नौ ददौ पुपूज तम् ॥८५॥
ततो ययौ परं तीर्थं सनत्कुमारसंज्ञकम् ।
पुण्यपुञ्जप्रदं श्रेष्ठं सर्वपापविनाशकम् ॥८६॥

### अश्वपाटल उवाच—

सनत्कुमारतीर्थं तत्कथं कदाऽभवत्पुरा ।
वद मेऽत्र गुरो तस्य माहात्म्यं च विधिं फलम् ॥८७॥

### श्रीलोमश उवाच—

कुप्यवालः काष्ठहारोऽभवच्चात्र वने स्थितः ।
काष्ठजीवी सदाऽरण्ये कुठारसाधनोऽभवत् ॥८८॥
भजते स्म हरिकृष्णं नारायणं जगद्गुरुम् ।
सनत्कुमाररूपं तं ब्रह्म पुत्रं सुसाधुकम् ॥८९॥
साधुसेवापरः सतां सत्संगं स करोत्यपि ।
कर्मणा मनसा वाचा तन्वा साधून् हि सेवते ॥९०॥
साधुरेव भगवान् वै साधुरेव परागतिः ।
साधुसेवा महत्पुण्यं पावनाः साधवो यतः ॥९१॥
काष्ठहारश्च तत्पत्नी सेवेते साधुमण्डलम् ।
दिवसे काष्ठभेदादिकार्यं कृत्वा निशामुखे ॥९२॥
सतां सेवां कुरुतस्तौ नारायणपरायणौ ।
सनत्कुमारशिष्याणां साधूनां सेवने रतौ ॥९३॥
वने यातौ हि काष्ठानामादानार्थं तदा वने ।
हस्तिना संधृतः काष्ठहारः सस्मार सद्गुरुम् ॥९४॥
सनत्कुमारं सहसा सत्यलोकस्थितं प्रभुम् ।
सनत्कुमारो भगवान् सहसा गोचरोऽभवत् ॥९५॥
वने स हस्तिनं प्राह रे पशो किं करोषि वै ।
मा वन्यं मित्ररूपं तं कष्टे क्षिप वृथाऽत्र वै ॥
मा मा मारय काष्ठघ्नं न ते शत्रुरयं खलु ॥९६॥

### हस्ती प्रोवाच—

सनत्कुमार भगवान् वैरं निर्यापयाम्यहम् ।
अयं कच्छे ब्राह्मणोऽभूद्धर्मकर्मादितत्परः ॥९७॥
कर्मकाण्डपरो विद्यादानादिपुण्यतत्परः ।
अहं राजाऽभवं चापि नाम्ना रायधनेश्वरः ॥९८॥
अयं मे गुरुतां कुर्वन् शासनं प्रचकार ह ।
मया चाऽसहमानेन शासनेऽयं निवारितः ॥९९॥
तदा शशाप मह्यं स हस्ती वनान्तरे भव ।
मया शप्तः काष्ठहारो भव तत्र वनान्तरे ॥१००॥
सोऽहं राजा काष्ठहारं मारयिष्ये न संशयः ।
मा साधो मम वैरस्य यापने विघ्नमाचर ॥१०१॥

### सनत्कुमार उवाच—

वैरस्य यापने तेऽत्र किंफलं स्यान्नरघ्नता ।
मा मैवं कुरु वन्येन्द्र मोक्षं गृहाण मद्विधात् ॥१०२॥
सनत्कुमारो भगवान्नहमस्मि समागतः ।
गृहाण मन्त्रं देहं च त्यक्त्वा याहि परं पदम् ॥१०३॥

### गज उवाच—

देहि मन्त्रं कृपासिन्धो मोक्षं देहि कृपां कुरु ।
पुनर्यथा न जननं संसारो न भवेन्मम ॥१०४॥

### सनत्कुमार उवाच—

एहि हस्तिन् सरस्तीरं पीत्वा जलं सुखाश्रयम् ।
मन्त्रं प्राप्य प्रयाह्येव परं धामाऽक्षरं पदम् ॥१०५॥
एवं राजन् गजकाष्ठहारौ सनत्कुमारकः ।
त्रयस्तेऽच समायाताः ऋषिः सनत्कुमारकः ॥१०६॥
जलं वै पाययामास स्नपयामास चात्रवै ।
मन्त्रं ददौ वैष्णवं च ददौ मुक्तिं हि हस्तिने ॥१०७॥
काष्ठहारोऽभवत् स्वस्थः कारयामास पूजनम् ।
पर्णकुटीं काष्ठमयीं तत्र सनत्कुमारकम् ॥१०८॥
स्थापयामास साधुं तं ब्रह्मपुत्रं परेश्वरम् ।
सनत्कुमारो भगवान् मूर्तिरूपेण राजते ॥१०९॥
दिव्यरूपो गतः सत्ये तीर्थं तस्येदमुत्तमम् ।
सनत्कुमारतीर्थं वै हस्तितीर्थं तथा शुभम् ॥११०॥
काष्ठहारप्रतीर्थं वै प्रोच्यते चोत्तमोत्तमम् ।
इत्येवं तीर्थमत्रैव जातं स्नाहि नृपाऽत्र वै ॥१११॥

प्रपूजय मुनिं सनत्कुमारं परमेश्वरम् ।
भुक्तिर्मुक्तिर्भवेदत्र स्नानाद् दानात्प्रपूजनात् ॥११२॥
इत्युक्तो नृपतिस्तत्र राधिके स्नानमाचरत् ।
पुपूजर्षि सनत्कुमारकं दानं ददौ तथा ॥११३॥
तत्रश्चाग्रे ययौ तीर्थान्तरं पापविशोधनम् ।
स्मरणात्पठनाच्चाऽस्य श्रवणान्मोक्षणं भवेत् ॥११४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने देवानीक कर्षुकस्य जलमग्नस्य विष्णुना उद्धृतस्य विष्णुतीर्थं, भद्रा-यनग्रामीणस्य ब्रह्मस्तम्बविप्रस्य तपतः पुरुषोत्तमदर्शनात् पुरुषोत्तमतीर्थं, देवमूलककन्यया अमर्या तपसि स्थि-तयाऽऽराधितो महाविष्णुर्भगवाँस्तां विवाहविधिना जग्राहेति महाविष्णुतीर्थं, कूप्यवालकाष्ठहारस्य गजतो रक्षां कृतवान् सनत्कुमार इति सन-त्कुमारस्तीर्थं, चेत्यादिनिरूपणनामा सप्तत्य धिकद्विशततमोऽध्यायः ॥ २७० ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके पश्चात् नृपोऽश्वपाटलस्ततः ।
तीर्थं प्रययौ कुंकुमेश्वरं सदाशिवाश्रयम् ॥ १ ॥

**अश्वपाटल उवाच—**

गुरो तीर्थमिदं कस्मात् कथं जातं वदस्व मे ।
यथाविधि फलं तस्य नियमादि च सर्वथा ॥ २ ॥

**श्रीलोमश उवाच—**

शृणु राजन्दूरदेशात् पुरा कश्चन घातकः ।
स्वज्ञातिक्लेशदुःखश्च सौराष्ट्रे प्रसमाययौ ॥ ३ ॥
ज्ञात्वा तीर्थं त्वश्वपट्टसरस्तत्र न्युवास ह ।
हिंसाकर्म परित्यज्य भिक्षाऽदनोऽभवत्ततः ॥ ४ ॥
साधूनां योगतो नाम हरेकृष्णनरायण ।
बालकृष्ण परब्रह्म श्रीपते परमेश्वर ॥ ५ ॥
जजाप भजनं चक्रे तीर्थस्नानादिकं तथा ।
एवं पुण्यं कृतवाँश्च सेवां सतामहर्निशम् ॥ ६ ॥
प्रारब्धान्ते मृतस्तत्र क्षेत्रे चाऽक्षरसंज्ञके ।
तीर्थयोगेन वै स्वर्गं ययौ देवत्वमाप ह ॥ ७ ॥
ततः पुनश्च मानुष्ये कुंकुमो ब्राह्मणोऽभवत् ।
धर्मकर्मरतो दैवकार्ये च सावधानकः ॥ ८ ॥
जातिस्मरोऽभवच्चापि पुपूज शंकरं तथा ।
पार्थिवं शंकरं कृत्वाऽतिष्ठिपच्चाऽत्र भूसुरः ॥ ९ ॥
वर्षान्ते पञ्चवर्षान्ते दशवर्षान्तके तथा ।
महोत्सवं करोत्येव विप्राणां भोजनादिकम् ॥१०॥
शिवरात्र्यां शंकरस्योत्सवं करोति वार्षिकम् ।
एवं विंशतिवर्षान्ते साक्षाद् बभूव शंकरः ॥११॥
प्रसन्नोऽस्मि च ते भक्त्या विप्र वृणु यथेप्सितम् ।
विप्रः प्राह महामोक्षं देहि मे पार्वतीपते ॥१२॥
शंभुः प्राह शृणु भक्त देवोऽहं पारमेश्वरः ।
कैलासो मम धामाऽस्ति ततः परं गवायनम् ॥१३॥
गोलोकः श्रीकृष्णधाम तस्मात् परं तथाक्षरम् ।
गोलोके यदि गन्तुं त्वं प्रेच्छसि भज गोपतिम् ॥१४॥
गोपालं श्रीराधिकेशं मुरलीहस्तकं प्रभुम् ।
अक्षरे चेत् प्रगन्तुं त्वं समिच्छसि हरिं भज ॥१५॥
अनादिश्रीकृष्णनारायणं श्रीपुरुषोत्तमम् ।
कैलासं मम धामाऽस्ति सदाशिवनिवासनम् ॥१६॥
वैकुण्ठतुल्यं यश्चास्ते तत्र चेद् गन्तुमिच्छसि ।
नयामि गणमध्ये त्वां स्थापये वद चेप्सितम् ॥१७॥

**कुंकुम उवाच—**

धामाऽक्षरं प्रयास्यामि मोक्षात्मकं परात्परम् ।
नान्यधाम्नि तु मे वाञ्छा तत्साधनं वदाऽत्र मे ॥१८॥

**शंभुरुवाच—**

गृहाण मन्त्रं दिव्यं श्रीबालकृष्णस्य चाऽनघ ।
भज तं श्रीकृष्णनारायणं यास्यसि चाऽक्षरम् ॥१९॥
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ।
भजैनं च जपैनं च स्मरैनं च परेश्वरम् ॥२०॥
इत्युक्त्वा शंकरस्तूर्णं तिरोऽभवच्च भूसुरः ।
कुंकुमेश्वरनामानं महादेवं शिलामयम् ॥२१॥
स्थापयित्वा मन्दिरे चाऽभजत् कृष्णनरायणम् ।
तदिदं पावनं तीर्थं सदाशिवनिवासनम् ॥२२॥
कुंकुमेश्वरतीर्थं च कृत्वा वै कुंकुमो द्विजः ।
भजित्वा श्रीकृष्णनारायणं धामाऽक्षरं ययौ ॥२३॥
अत्र स्नानात्तथा दानान्महादेवः प्रसीदति ।
वैष्णवं च मनुं दत्वा प्रापयत्यक्षरं पदम् ॥२४॥
तस्माद् राजन् स्नाहि शीघ्रं दानं देहि च कानकम् ।
इत्युक्तश्चाश्वपटलो राधिके लोमशेन ह ॥२५॥

स्नानं दानं पूजनं च चक्रेऽग्रतीर्थकं ययौ ।
सतीशातीर्थनाम्ना वै प्रसिद्धं पावनं परम् ॥२६॥

**अश्वपाटल उवाच—**

गुरो कथं सतीशाख्यं तीर्थं जातं शुभं त्विदम् ।
संक्षेपाद् वद मे चाऽस्य विधिं च फलमित्यपि ॥२७॥

**श्रीलोमश उवाच—**

शृणु राजन् वदाम्येतत् सतीशातीर्थसंभवम् ।
चारणानां कुलान्यत्र गोपालानां कुलान्यपि ॥२८॥
वसन्ति सन्निधौ राजन् देरिकाखेटसीम्न्यपि ।
पालयन्ति शतशो गाः अजाः सहस्रशस्तथा ॥२९॥
वृषभान् वत्सतरांश्च पालयन्ति धनं यथा ।
चारयन्ति सीमभागे पाययन्तीह वार्यपि ॥३०॥
अश्वपट्टसरस्तीरे रात्रौ विश्रामयन्ति च ।
प्रातः पुनः प्रयान्त्येव पशुचारमरण्यकम् ॥३१॥
इत्येवं पशुपालास्ते चारणाः कुंकुमेश्वरम् ।
परितः सरसः सेतौ वृक्षाऽधो निवसन्ति वै ॥३२॥
पर्णपल्ल्यां त्वेकदा वै सुताऽऽसीच्चारणी सती ।
श्रीमहादेवभक्ता सा सतीशाख्या पतिव्रता ॥३३॥
महादेवस्य दुग्धेन प्रातःस्नानाऽभिषेचनम् ।
कारयत्येव भावेन हार्देन पार्वतीपतेः ॥३४॥
तादृशीं भक्तियुक्तां तां चौराः प्रविश्य तद्गृहे ।
पतिशून्ये प्रधर्षितवन्तस्त्वेकाकिनीं सतीम् ॥३५॥
पतिर्गतोऽभवद्ग्रामान्तरं सम्बन्धिनो गृहे ।
एवं छिद्रं प्रलब्ध्वैव चौराः प्राधर्षयन् सतीम् ॥३६॥
सतीशा सा धर्मवती सस्मार पार्वतींसतीम् ।
दुष्टसंहारकर्त्री च चण्डीं शंकरयोगिनीम् ॥३७॥
मातः शीघ्रं मम रक्षां कुरु चौरेभ्य एव ह ।
प्रातः क्षीरं प्रपाच्यैव करिष्ये ते निवेदनम् ॥३८॥
एवं स्मृता सती दुर्गा तूर्णं खड्गकरा तदा ।
कुंकुमेश्वरपार्श्वाद् वै सतीशाऽङ्गनमाययौ ॥३९॥
सखड्गा सकृपाणा च मुशलाढ्या ससिंहिका ।
अष्टहस्ता गर्जनां च कृत्वा जग्राह चौरकान् ॥४०॥
जघान चौरान् सहसा सतीशां सा ररक्ष ह ।
चौरा हतास्तु खड्गेन मृताः पञ्च नरास्तदा ॥४१॥
सतीशा दुर्गया साकं सरोवारि समाययौ ।
उभे पानीयकं पीत्वा ययतुः कुंकुमेश्वरम् ॥४२॥
तत्र लीनाऽभवद् दुर्गा सतीशा मन्दिरेऽवसत् ।
प्रातर्गता गृहं नैजं गणा निन्युर्हताङ्जनान् ॥४३॥
सतीशा सा सती यत्र दुर्गया सहिता पपौ ।
जलं तत्र तटे देवीं दुर्गामस्थापयत् सतीम् ॥४४॥
दुर्गातीर्थं सतीतीर्थं सतीशातीर्थमित्यपि ।
पार्वतीतीर्थमेवापि धर्मरक्षाकरं ह्यभूत् ॥४५॥
अत्र स्नानेन दानेन सतीशादर्शनेन च ।
चौरादीनां भयनाशो धर्मरक्षा भवेद् ध्रुवम् ॥४६॥
राजन् स्नानं तथा दानं सतीशादर्शनं कुरु ।
दुर्गापूजनमेवापि दुर्गातीर्थे समाचर ॥४७॥
इत्युक्तो राधिके राजा सस्नौ ददौ पुपूज च ।
ततो ययावग्रभूमौ सेतौ तीर्थान्तरं नृपः ॥४८॥

**अश्वपाटल उवाच—**

किमिदं तीर्थवर्यं मे समादिश गुरो प्रभो ।
कथं कस्मात् कदा जातं किंफलं पावनेऽत्र वै ॥४९॥

**श्रीलोमश उवाच—**

धन्येश्वरी वणिक्पत्नी सेवाभक्तिपरायणा ।
आसीत् कुंकुमवाप्यां स सुभक्ता वैष्णवी ह्यपि ॥५०॥
लोभवशा क्वचित् क्वापि परस्वं त्वाददात्यपि ।
एकदा सा कम्भराया महालक्ष्म्या गृहं ययौ ॥५१॥
बालकृष्णं रामयित्वा नत्वा श्रीकंभरां सतीम् ।
रत्नानां दशकं नीत्वा चौर्येण स्वगृहं गता ॥५२॥
गृहस्थे च घटे यत्र रत्नानि च धनानि च ।
रक्षत्येव घटे तत्र न्यधाच्चौर्याऽऽहृतान्यपि ॥५३॥
ततः काले गते स्वल्पे संक्रान्तौ शुभपर्वणि ।
स्नातुं दानं प्रकर्तुं च घटमादाय वै तटे ॥५४॥
अश्वपट्टसरसोऽत्र समायाता कुटुम्बिनी ।
स्नात्वा दानानि दातुं च यावद्घटे करं निजम् ॥५५॥
प्रावेशयित्वा रत्नानि गृह्णाति तावदेव तु ।
हस्तौ रत्नानि सर्वाणि घटे लग्नानि चाऽभवन् ॥५६॥
पिण्डवद् घटमध्ये तत्सर्वं तदा व्यजायत ।
हस्तो लग्नः पिण्डमध्ये पिण्डश्च घटमध्यगः ॥५७॥
घटो लग्नः पृथिव्यां च सर्वं त्वेकीमयं ह्यभूत् ।
धन्येश्वरी भयं प्राप्ता किमिदं मे करेऽभवत् ॥५८॥
हस्तं वियोजयितुं सा यत्नं चकार सुन्दरी ।
खिन्ना श्रमयुता जाता बहुलोकैर्विलोकिता ॥५९॥

तदा घटस्य गर्भाद्वै शब्दः समभवच्छुभः ।
त्वया चौर्येण रत्नानि घटेऽत्र निहितानि वै ॥६०॥
तत्फलं ते समुत्पन्नं पिण्डभावो न नश्यति ।
यदि वियोजयितुं ते वाञ्छा चेद्वर्तते सखि ॥६१॥
अहं लक्ष्मीः स्वयं चाऽस्मि मन्मन्दिरं प्रकारय ।
लोमशाय धनं सर्वं समाहूय प्रदेहि च ॥६२॥
तदा हस्तो मोक्ष्यते ते नान्यथा तु कदाचन ।
इत्युक्ता सा लोमशं मामत्राऽऽहूतवती ततः ॥६३॥
चक्रे घटप्रदानस्य संकल्पं मन्दिरार्थकम् ।
एतत्स्थले ततस्तस्य हस्तोऽभवत् पृथग्घटात् ॥६४॥
तदा लक्ष्मीः स्वयं चतुर्भुजा घटात् प्रकाशिता ।
क्षणं रूपं प्रदर्श्यैव स्थलेऽत्रैव तिरोगता ॥६५॥
मन्दिरं तु ततो लक्ष्म्या मया चाऽत्र प्रकारितम् ।
लक्ष्मीश्चात्र वसत्येव धन्येश्वरी प्रपूजिता ॥६६॥
लक्ष्मीतीर्थं तथा धन्येश्वरीतीर्थं घटस्थली ।
प्रसिद्धं समभूत्त्वेतच्चौर्यदोषनिवारकम् ॥६७॥
पापपिण्डादिहारं च भुक्तिमुक्तिप्रदं तथा ।
स्नानदानादितश्चात्र कल्मषाणां विनाशनम् ॥६८॥
लक्ष्मीपूजनतश्चात्र लक्ष्मीवान् धनवान् भवेत् ।
लक्ष्मीलोकं प्राप्नुयाच्च लक्ष्मीसेवापरो भवेत् ॥६९॥
स्नाहि देहि समर्हां च प्रकारय श्रिया नृप ।
इत्युक्तस्त्वश्वपटलः सस्नौ ददौ पुपूज ताम् ॥७०॥
राधिके स ततो यातो लोमशेन समं पुरः ।
शाल्ग्राममहातीर्थं मन्दिरेण विराजितम् ॥७१॥

**अश्वपाटल उवाच—**

गुरो तीर्थमिदं श्रेष्ठं शाल्ग्रामकृतस्थितिम् ।
कदा कथं प्रजातं तद्विधिं फलं च शाधि मे ॥७२॥

**श्रीलोमश उवाच—**

चैत्यब्रह्माऽभवन्नाम्ना द्विजो निकृष्टवर्तनः ।
निकृष्टेषु कृतावासो निकृष्टभोजनोऽभवत् ॥७३॥
पापिनां संगमासाद्य सदा पापपरोऽभवत् ।
मदिरां स पपौ चौर्यं चक्रे प्रसंगतश्च सः ॥७४॥
पारदार्यं तथा चक्रे ह्येवं चाण्डालवर्तनः ।
समजायत विप्रोऽपि भ्रष्टो जातिकुलादितः ॥७५॥
अथैकदा निशायां तद्गृहे साधुः समाययौ ।
तं तिरस्कृतवान् विप्रोऽतिथिं क्षुद्रं जनं यथा ॥७६॥
साधुर्ज्ञात्वा दुराचारं सस्मार यमदूतकम् ।
यमदूतस्तदा शीघ्रं चाययौ नृप तद्गृहे ॥७७॥
मारयामास बहुधा पशुमारं ततश्च सः ।
क्षमामयाचत यदा तदा साधुर्दयापरः ॥७८॥
मोचयामास दुष्टं तं यमदूतभयात्ततः ।
साधुर्ययौ यथामार्गं दुष्टविप्रस्तु लोमशम् ॥७९॥
उद्धारवाञ्छया तदाश्रमं ययौ गुरुं हि माम् ।
प्रार्थयामास बहुधा स्वोद्धारं प्रतिमां तदा ॥८०॥
लोमशोऽहं दत्तवाँश्च प्रायश्चित्तं हि वत्सरम् ।
चान्द्रायणद्वादशकव्रतं सोऽपि तथाऽकरोत् ॥८१॥
शुद्धाय तस्मै विप्राय शालग्रामं प्रदत्तवान् ।
पूजनार्थं स च विप्रोऽपूजयत्तं यथोचितम् ॥८२॥
ततो मन्त्रो मया तस्मै दत्तो वैष्णवभावतः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥८३॥
करोति मन्त्रजापं स शालग्रामप्रपूजनम् ।
करोत्यपि दिवारात्रौ ध्यानं च भजनं हरेः ॥८४॥
प्रातर्ब्राह्ममुहूर्ते स शालग्रामयुतोऽत्र वै ।
तटे त्वागत्य च पूजामासूर्योदयमेव ह ॥८५॥
करोति स सदा सेतौ तुलसीद्रुमसन्निधौ ।
एवं बहुतिथे काले याते भक्तिं विलोक्य च ॥८६॥
शालग्रामः प्रसन्नोऽभूद् दिव्यविष्णुर्बभूव ह ।
शालग्रामशिला तत्र लयं प्राप्ता तदा द्विजः ॥८७॥
रक्ष रक्ष कृपासिन्धो समुद्धारं कुरु प्रभो ।
इत्युक्त्वा पतितस्तस्य विष्णोश्चरणयोस्तदा ॥८८॥
तावद्वै तुलसीवृक्षाल्लक्ष्मीर्देवी व्यजायत ।
उवाच श्रीर्ब्राह्मणं वै तुलसीमन्दिरं त्विह ॥८९॥
शालग्रामालयं चापि प्रकारय सरस्तटे ।
तेन भुक्तिं तथा मुक्तिं प्रयास्यसि न संशयः ॥९०॥
इत्युक्त्वा सा तिरोभूता वृक्षरूपा बभूव ह ।
विष्णुश्चापि तिरोभूय शाल्ग्रामशिलाऽभवत् ॥९१॥
तदिदं मन्दिरं राजँस्तेन विप्रेण कारितम् ।
तन्मध्ये तुलसी दिव्या द्रुमरूपा विराजते ॥९२॥
तन्मूले भगवान्नास्ते विष्णुः शालशिलात्मकः ।
अत्र स्नानात्तथा दानात्पूजनात्तुलसीप्रभोः ॥९३॥
तुलसीलग्नकरणाद् भुक्तिर्मुक्तिर्भवेदपि ।
सर्वपापप्रणाशश्च स्वर्गातिस्वर्गमाप्नुयात् ॥९४॥
शालग्रामं शुभं तीर्थं तुलसीतीर्थमित्यपि ।
चैत्यब्रह्माख्यतीर्थं च विद्यते पावनं त्विदम् ॥९५॥

स्नाहि देहि समर्हां च कुरुमन्दिरवर्तिनोः ।
तुलसीकृष्णयोः राजन् कृष्णप्रसन्नतां व्रज ॥९६॥
इत्युक्तो राधिके राजा सस्नौ ददौ पुपूज च ।
जलामृतं तथा प्रसादामृतं परिगृह्य च ॥९७॥
प्रदक्षिणं दण्डवच्च कृत्वाऽग्रेऽपरतीर्थकम् ।
ययौ लोमशयुक्तो वै प्रसन्नो मानसे ह्यति ॥९८॥
अहो तीर्थानि सर्वाणि श्रीभगवन्मयानि हि ।
मया कृतानि कृतिना कृपापात्रेण वै हरेः ॥९९॥
इत्याश्चर्यपरो राजा महाशान्तिं ययौ हृदि ।
क्षणं दध्यो हृदये स्वे लोमशं ज्ञानदं गुरुम् ॥१००॥
अनादिश्रीकृष्णनारायणं च पुरुषोत्तमम् ।
वायुकोणगतो राजा स्मृत्वा नेमे सरोवरम् ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कुंकुमविप्रकृतं कुंकुमेश्वरतीर्थं सतीशाचारणीकृतं दुर्गासतीतीर्थं वणिक्पत्नीधन्येश्वरीकृतं लक्ष्मीतीर्थं चैत्यब्रह्मद्विजकृतं शालग्रामतीर्थं चेत्यादिनिरूपणनामा एकसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७१ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे ततो राजा नरनारायणाह्वयम् ।
तीर्थं गत्वा लोमशं च पप्रच्छ मुनिसत्तमम् ॥ १ ॥

**अश्वपाटल उवाच—**

कथं कस्मादिदं तीर्थं नरनारायणाह्वयम् ।
को विधिः किंफलं चात्र वद मे लोमश प्रभो ॥ २ ॥

**श्रीलोमश उवाच—**

शृणु राजन् प्रवक्ष्यामि तीर्थं तीर्थोत्तमोत्तमम् ।
अत्र गोपालकृष्णौ वै गोस्वामी च पिता हरेः ॥ ३ ॥
प्रथमं खलु पुत्रार्थं तपश्चचार दारुणम् ।
यश्च देवो नरनारायणश्चास्ते हिमाचले ॥ ४ ॥
तपस्विनां धर्मपोष्टा ब्रह्मचर्यपरायणः ।
तापसानां परं श्रेष्ठं ध्यात्वा तपश्चचार ह ॥ ५ ॥
प्रथमं त्यक्तवानन्नं ततः कन्दपरोऽभवत् ।
पत्राहारस्ततश्चापि शुष्कपर्णाशनस्ततः ॥ ६ ॥
जलाहारस्ततो वाय्वाहारस्ततो व्यजायत ।
जजाप श्रीनरनारायणं वै हृदये सदा ॥ ७ ॥
एवं वर्षशतान्तेऽत्र नरो नारायणस्तथा ।
कृष्णो हरिश्च चत्वारो भगवन्तः समाययुः ॥ ८ ॥
प्रत्यक्षं ते समागत्योचुस्तं गोपालकृष्णकम् ।
महाविष्णो कथं तपश्चरसि वै नरायण ॥ ९ ॥
वासुदेव जगद्धाता किं ते तपसि कारणम् ।
प्रसन्नाः स्मो वयं नारायणाश्चत्वार एव ह ॥१०॥
यथेष्टं ब्रूहि दद्मोऽत्र वरदानं यथेप्सितम् ।
श्रुत्वा गोपालकृष्णश्च प्राह कल्याणहेतवे ॥११॥
लोकानां च सुराणां च पितॄणां योषितां तथा ।
पक्षिणां च पशूनां च वल्लीनां शाखिनां तथा ॥१२॥
स्तम्बानां च तृणानां च भवन्तु पुत्रका मम ।
तथा चास्त्विति जगदुर्विविशुस्तत्तनौ तदा ॥१३॥
चत्वारस्ते परमेशा नारायणो नरस्तथा ।
कृष्णो हरिश्च ते पुत्रा बभूवुस्तस्य मानसाः ॥१४॥
कंभराबालकाश्चांऽशा लोककल्याणहेतवे ।
नारायणोऽभवज्ज्येष्ठो नाम्ना श्रीभगवानिति ॥१५॥
नरस्ततोऽभवन्नाम्ना शुकदेवो द्वितीयकः ।
कृष्णोऽनादिकृष्णनारायणः श्रीकृष्णवल्लभः ॥१६॥
अक्षराधिपतिः सोऽयमवतारी तृतीयकः ।
हरिश्चतुर्थो नाम्ना श्रीवल्लभश्चाऽभवत्तदा ॥१७॥
समानाश्च समैश्वर्याः समदेहप्रभायुताः ।
परमेशाश्चात्र ते वै ह्यभवन् बालका नृप ॥१८॥
यत्र गोपालकृष्णेन तपस्तप्तं सुदारुणम् ।
भूमिरियं पावनी सा मन्दिरं चेदमेव यत् ॥१९॥
अत्र गोपालकृष्णः स नारायणं नरं तथा ।
कृष्णं हरिं प्रतिमाख्यान् प्रातिष्ठिपद्धि मन्दिरे ॥२०॥
तदिदं सर्वमूर्धन्यं तीर्थं तीर्थोर्ध्वधाम यत् ।
विश्रान्तिं चात्र संगृह्य ध्याने गृह्ण चतुष्प्रभून् ॥२१॥
स्मरणाद् दर्शनादत्र स्नानात्पानात् प्रपूजनात् ।
दानात् प्रसेवनाच्चापि मुक्तिरेव फलं महत् ॥२२॥
नैतत्तुल्यं मखानां वा व्रतानां फलमस्ति वै ।
नैतत्तुल्यं दक्षिणानां दीक्षानां फलमस्ति च ॥२३॥
अत्राऽऽसीद् भूतलं राजन् विशालं ब्रह्मसंज्ञितम् ।
यदिदं दृश्यते त्वद्य अश्वपट्टसरोवरम् ॥२४॥

**अश्वपाटल उवाच—**

कदा मुनेऽत्र संजातं भूतले वै सरोवरम् ।
सर्वतीर्थमयं रम्यं सर्वनारायणाश्रयम् ॥२५॥

श्रीलोमश उवाच—

अहमासं पुरा धाम्नि वैकुण्ठे तत्र चैकदा ।
आश्रौषं चाक्षरेशो योऽनादिकृष्णनरायणः ॥२६॥
चतुर्मुखाऽजब्रह्माण्डे गोपालकृष्णमन्दिरे ।
मानवो भवितुं याति लोककल्याणहेतवे ॥२७॥
तदा नारायणाः सर्वे मुक्ताः सर्वे तथेश्वराः ।
ऋषयः पितरश्चापि पृथ्व्यामत्र समाययुः ॥२८॥
देव्यश्चेश्वरपत्न्यश्च मुक्तान्यो गोपिकास्तथा ।
नारायण्यो ब्रह्मपुत्र्योऽप्सरसः सुरयोषितः ॥२९॥
ब्रह्मसरसः सर्वाश्च ब्रह्मप्रिया हरिप्रियाः ।
वैष्णव्यः शक्तयश्चापि सर्वास्तत्र समाययुः ॥३०॥
स्वागतार्थं च पूजार्थं सहवासार्थमित्यपि ।
सेवनार्थं तथा ते ताः पुपूजुः परमेश्वरम् ॥३१॥
ते च ताश्च तदा प्रतीक्षन्ते प्राकट्यमेव च ।
तदा चाहं सर्वमेनं व्यलोकयं समुत्सवम् ॥३२॥
अक्षरे तु परे धाम्नि ज्ञातं माणिक्यया तदा ।
पतिर्मे भगवान् सर्वेश्वरेश्वरेश्वरेश्वरः ॥३३॥
अनादिश्रीकृष्णनारायणः प्रयाति भूतले ।
सा पूर्वं धामतः पृथ्व्यां व्याघ्रारण्ये समागता ॥३४॥
ब्रह्मचर्यव्रतस्याऽस्य वाहनं भवितुं सती ।
समैच्छदश्विनीरूपं कन्यारूपं समैच्छिकम् ॥३५॥
अश्वीभूत्वा पराऽज्ञाता भूभागेऽपर्यटत् सती ।
अत्राऽक्षरे शुभे तीर्थे कृष्णनारायणार्थिनी ॥३६॥
ईश्वराद्यैर्लोकिता सा दिव्यरूपा प्रिया हरेः ।
यत्र यत्राऽभवत् सा च सा भूमिश्चाश्वपट्टिका ॥३७॥
तीर्थरूपाऽभवच्चापि निर्णयोऽप्यभवच्च नः ।
अनादिश्रीकृष्णनारायणश्चात्र निवत्स्यति ॥३८॥
तावत्तत्र समायातो ब्रह्महृदोऽक्षरात्पदात् ।
जलरूपो दिव्यधामा चाश्वपट्टसरोमयः ॥३९॥
अत्र भूमौ जलात्मा सं दिव्यसरोवरोऽभवत् ।
स्मर राजन् ब्रह्महृदो यश्च दिव्यसरोवरः ॥४०॥
स एव सोमयागस्य कर्ता राजाऽश्वपाटलः ।
त्वमेव मानवं रूपं धृत्वा पृथ्व्यां विराजसे ॥४१॥
इत्युक्तः खलु राजाऽसौ राधिके स्वं व्यलोकयत् ।
ब्रह्ममुक्तं ब्रह्महृदं सरोजलाऽवतारकम् ॥४२॥
आश्चर्यं परमं मेने ज्ञानं क्षणं ह्यभूद्धि तत् ।
पुनर्लयं गतं सर्वं प्राकृतं स्वं ह्यमन्यत ॥४३॥
ततः श्रीलोमशः प्राह राजेंस्तीर्थमिदं परम् ।
पावनीमाणिकीतीर्थं चाश्विनीतीर्थमित्यपि ॥४४॥
ब्रह्महृदमहातीर्थं चाश्वपाटलतीर्थकम् ।
मया दृष्टमिदं सर्वं प्रत्यक्षं च ततः परम् ॥४५॥
अहमत्र सदावासं कृतवानाश्रमे शुभे ।
अवतारास्तथा मुक्ता ईश्वरा देवतादिकाः ॥४६॥
सर्वे न्यूषुर्हरेः क्षेत्रेऽक्षराऽश्वपट्टसागरे ।
सर्वा देव्यश्च देवाश्च प्राविर्भावोत्तरं हरेः ॥४७॥
पुपूजुः परया प्रीत्याऽनादिकृष्णनरायणम् ।
राधा लक्ष्मीः पार्वती च पद्मा रमा जया रतिः ॥४८॥
ललिता पद्मिनी रंभा माणिकी श्रीः सरस्वती ।
गंगा दुर्गा च सावित्री संज्ञा यमुना रोहिणी ॥४९॥
मंजुला सद्गुणा हासा हैमी शान्तिः सुपुष्पिका ।
मनुः कस्तूरिका देवी चम्पाऽम्बोजस्वती वृजा ॥५०॥
सर्वा देव्यो ब्रह्मपत्न्यः कोट्यर्बुदाब्जसंख्यकाः ।
आगत्य न्यूषुश्चात्रैव सरस्येव हरेः पदे ॥५१॥
गण्डकी स्वर्णरेखा च नर्मदा तुंगभद्रिका ।
गोदावरी ब्रह्मपुत्रा कावेरी फल्गुरीश्वरी ॥५२॥
कृष्णा शोणा गोमती च सिन्धुश्चोरलिका तथा ।
शोणभद्रश्चेरावती साल्वीना मेनकांगिका ।
मन्नाम्नी चांगशिक्षांगी तथा कांचनगंगिका ॥५३॥
व्यंगहा चामूरका च वीना यानासना तथा ।
ओम्बा च त्रिवली चामू वालगा नीपरा तथा ।
देविका दीन्युबा चापि उत्क्रोशी नाइली तथा ॥५४॥
प्रपत्तिका सेविका च नास्तिजरा च कङ्कुकी ।
क्युबगंगा रञ्जिका च विषतूरा च जम्पिका ॥५५॥
श्वेता नारायणी चापि मर्कुंजा यूकनायिका ।
निरशाणा मिश्रजला आमजना परानिका ।
श्वाना च ग्रासकायाना विषतूर्या कलिंगिनी ॥५६॥
मूरास्तथाऽन्या नद्यश्च सर्वास्तत्र सरोवरे ।
आययुस्तीर्थरूपास्ताः सदा वासार्थमेव ह ॥५७॥
मानसं चेन्द्रद्युम्नं च नारायणं च पुष्करम् ।
पम्पा चेन्द्रप्रस्थरूपं सुदर्शनं च रैवतम् ॥५८॥
शिवसरस्तथा त्रिकूटसरः कौलरकं सरः ।
शिवशीलं मीनकंगुसरः साभरकं सरः ॥५९॥
बालकृष्णसरश्चापि द्विकलं च सरोवरम् ।
सटालफं सरश्चापि विषतूरसरोवरम् ॥६०॥
उरलं च खरश्चापि त्रिगुणोरसकं तथा ।
फेरुमण्डं लूरासरो मशाकाख्यं सरस्तथा ॥६१॥

रुक्मं त्रिनासिकं चापि एबालं च सरस्तथा ।
सटात्पकं चात्परूक्षम् आर्द्रवार्तं सरस्तथा ॥६२॥
किमु त्र्यंगानकं चापि मयोरसं सरस्तथा ।
बन्नापालं न्यूनजामी शिरावासं सरस्तथा ॥६३॥
ऐतसं चौनियागारं लेन्दुगं पायुगं तथा ।
योनिगम् औरसं तूरोनसं गौरं सरस्तथा ॥६४॥
गोग्रासं वालरीशं च उब्रासं सरस्तथा ।
जयशानं ग्रातवारं ग्रातस्लावं सरस्तथा ॥६५॥
क्रीतस्लावं चेष्टवासं पीलिपार्श्वं सरस्तथा ।
सुपारयारं कालीयम् ईतरीशं सरस्तथा ॥६६॥
एतान्यपि सरांस्यत्र तस्थुरतत्रागतानि वै ।
वृन्दावनं महाकालवनं तपोवनं तथा ॥६७॥
इन्द्रप्रस्थवनं धर्मारण्यं पौष्करकं वनम् ।
सिंहारण्यं बदर्यारण्यकं सुन्दरकं वनम् ॥६८॥
प्राग्ज्योतिषारण्यकं च काशमारण्यमित्यपि ।
इरारण्यं तथा शिक्षारण्यं राशवनं तथा ॥६९॥
उरलारण्यकं चापि खासीनारण्यकं तथा ।
वालायनमहारण्यं सहारारण्यमित्यपि ॥७०॥
वालजीवारण्यकं च शादयानवनं तथा ।
अमरीवनमेवापि चाब्रिस्तारण्यकं तथा ॥७१॥
सिंहारण्यं तथा दैववनानि चात्र चाययुः ।
स्वागतं पूजनं कृत्वा हरेश्चात्र निवासनम् ॥७२॥
प्रचक्रुः सर्वदा चाश्वपट्टसरसि तानि वै ।
एवं राजन् परं तीर्थं चाश्वपट्टसरस्त्विदम् ॥७३॥
तीर्थानां पावनं चापि शुभं ब्रह्महृदात्मकम् ।
पृथिव्यां स्वर्गलोके च तथाऽन्यत्रापि यानि तु ॥७४॥
सन्ति तीर्थानि तान्यत्र विरजादीनि सन्ति च ।
समुद्रा दिव्यजलिनो वसन्त्यत्र जलेऽनिशम् ॥७५॥
यत्राऽनादिकृष्णनारायणः श्रीकृष्णवल्लभः ।
तत्र सर्वेऽवताराश्च मुक्ता धामानि यान्यपि ॥७६॥
ईश्वरा ईश्वराण्यश्च देवा देव्यो वसन्ति च ।
ऐश्वर्याणि समग्राणि सिद्धयः प्रवसन्ति च ॥७७॥
अनादिश्रीकृष्णनारायणतीर्थं परं हि तत् ।
अत्राऽऽवासं समालेभे भगवान् पुरुषोत्तमः ॥७८॥
तदा तेन समं मूर्तौ सर्वास्तस्य प्रियाः शुभाः ।
अनादिश्रीकृष्णनारायणस्य वामभागगाः ॥७९॥
पट्टांगना आययुश्च शतं च पञ्चविंशतिः ।
ताश्च सरोवरे रम्ये पश्चिमे सेतुभाजिते ॥८०॥
न्यूषुस्तीर्थस्वरूपिण्यः शततीर्थं तदुच्यते ।
अनादिश्रीकृष्णनारायणप्राकट्यके दिने ॥८१॥
गोपगोपांगनायुक्तः श्रीकृष्णस्तत्र चाययौ ।
गोपीतीर्थं गोपतीर्थं गोलोकतीर्थमित्यपि ॥८२॥
कृष्णतीर्थं च तज्जातं परं गोलोकमुक्तिदम् ।
श्रीकृष्णो राधिकां प्राह यदाऽत्र स समाययौ ॥८३॥
राधिके त्वं निबोधाऽत्रेत्युवाच राधिकां प्रियाम् ।
वैराजेन कृतान्येव ब्रह्माण्डानि सहस्रशः ॥८४॥
तत्र तत्र प्रवेष्टुं च व्यवस्थापयितुं हरिम् ।
अनादिश्रीकृष्णनारायणं प्रार्थयति स्म सः ॥८५॥
हरेकृष्ण हरेकृष्ण नारायणेश्वरेश्वर ।
सर्वेषु मन्निर्मितेषु ब्रह्माण्डेषु भवान् प्रभुः ॥८६॥
यावन्नायास्यति तावद् व्यवस्थां धर्मकर्मिणाम् ।
जीवानां व्यवहाराणां कः करिष्यति माधव ॥८७॥
दैत्यानां तामसानां च कः शिक्षां प्रकरिष्यति ।
पापिनां पापनाशानि त्वां विना कः करिष्यति ॥८८॥
वेददीक्षाविधानादि त्वां विना कः करिष्यति ।
यज्ञयागादिकं दैवं पैत्र्यं पुण्यप्रदं विधिम् ॥८९॥
मर्यादां देहिनां चापि त्वां विना कः करिष्यति ।
आत्मज्ञानप्रदानं च साधूनां धर्मरक्षणम् ॥९०॥
सतीनां सुविधानं च वैवाह्यं कः करिष्यति ।
रागद्वेषनिमग्नानां देहिनां भ्रमवर्तिनाम् ॥९१॥
विना त्वां त्वत्प्रसंगं च को वा मुक्तिं करिष्यति ।
पूजाधर्मं तथा रक्षाधर्मं चोत्पन्नधर्मकम् ॥९२॥
सेवाधर्मं विना त्वां को मानवेभ्योऽभिधास्यति ।
शीलधर्मं गृहिधर्मं वन्यधर्मं यतिक्रियाम् ॥९३॥
त्यागधर्मं चात्मनिवेदनं नीतिं पुरातनीम् ।
पद्धतिं वार्णिकीं चापि त्वां विना कः करिष्यति ॥९४॥
विनाऽपि तव प्राकट्यं ब्रह्माण्डानि च तानि तु ।
श्मशानभूमयः सर्वा जन्ममरणसूतिकाः ॥९५॥
त्वां विना साधवो मुक्ता न यास्यन्त्यक्षरात्पदात् ।
पार्षदाश्च तथा लक्ष्म्यो न यास्यन्त्यण्डकोटिषु ॥९६॥
त्वां विना मंगलं नैव भविष्यति सुरादिषु ।
त्वां विना रक्षणं नैव भविष्यति यथातथम् ॥९७॥

विना त्वां भगवन् सर्वं गृहं शून्यं भविष्यति ।
योगिनामपि वासाश्च भविष्यन्ति न सर्वथा ॥९८॥
अवतारास्तथा तेऽपि गमिष्यन्ति न तेषु च ।
विना सर्वसृष्टिसार्वभौमं कः प्रथमं व्रजेत् ॥९९॥
मोक्षमार्गादिविज्ञानं तथोपास्त्यादिकं प्रभो ।
सात्त्विका अपि देवाद्या ज्ञास्यन्त्येव न सर्वथा ॥१००॥
मायापटलमासाद्य तदावृत्ता हि देहिनः ।
दिव्यतां त्वां समुत्सृज्य पतिष्यन्ति तमोमये ॥१०१॥
तस्मात्त्वं भगवन् सर्वब्रह्माण्डेषु प्रकाशताम् ।
याहि नाथ कृपासिन्धोऽनादिश्रीपुरुषोत्तम ॥१०२॥
इत्येवं प्रार्थितोऽनादिकृष्णनारायणोऽक्षरे ।
परे धाम्नि स्थितः श्रुत्वा दिव्यवाण्या विराजकम् ॥१०३॥
समुवाच तथाऽस्त्वेवं यामि ब्रह्माण्डकोटिषु ।
इत्यभिधाय भगवान् परधाम्नः परेश्वरः ॥१०४॥
समैच्छद् बहुभवितुं सर्वकल्याणहेतवे ।
प्रत्यण्डं प्रतिमूर्तिः स बभूव परमेश्वरः ॥१०५॥
अनेकाण्डेषु सर्वत्र गुणैश्वर्यविभूतिभिः ।
पार्षदैर्दिव्यमुक्तैश्च पत्नीभिः शक्तिभिः सह ॥१०६॥
भक्तैश्च धर्मभोगैश्चोपासनाभक्तिभिः सह ।
स वै प्रादुर्बभूवाऽसौ राधे कृष्णनरायणः ॥१०७॥
यत्र ब्रह्मा स्वयंभूश्च शंकरः सोमनाथकः ।
नरनारायणो विष्णुस्तत्र कृष्णनरायणः ॥१०८॥
नरनारायणखण्डे पश्चिमे तु सुराष्ट्रके ।
भूतले स्वक्षरक्षेत्रे भाविरैवतप्राग्दिशि ॥१०९॥
कुंकुमवापिकातीर्थे चाश्वपट्टसरस्तटे ।
कुंकुमायां नगर्यां श्रीहरिः प्रादुर्बभूव सः ॥११०॥
अयमेव परः कृष्णो यस्मात् कृष्णा अनन्तकाः ।
आविर्भवन्ति राधे त्वं निबोधाऽस्य हि गौरवम् ॥१११॥
इत्येवं वै स्वयं कृष्णस्तदा श्रीराधिकां प्रियाम् ।
समुवाच मया तत्तु श्रुतं साक्षान्नराधिप ॥११२॥
सोऽयं श्रीकम्भरापुत्रः श्रीशो गोपालनन्दनः ।
राजते बालकृष्णोऽसौ कुमारः कृष्णवल्लभः ॥११३॥
सर्वावतारा धामानि मुक्तास्तथेश्वरादयः ।
देवास्तर्थानि सन्तश्च सत्यश्चात्र वसन्ति वै ॥११४॥
मोक्षो मुक्तिर्मूर्तिमन्तौ विराजेतेऽत्र भूतले ।
तस्माद् राजन्नत्र तीर्थे यदन्यं तद्विधेह्यपि ॥११५॥
इत्युक्तो लोमशेनैष राजा दीक्षां तु वैष्णवीम् ।
जग्राह विधिना त्यक्त्वा मोहं राज्यं गृहाणि च ॥११६॥
साधुर्बभूव राजा स वैष्णवीं प्राप्य दीक्षिकाम् ।
राधिके ! चित्प्रकाशेतिनाम्ना ऋषिस्ततोऽभवत् ॥११७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने नरनारायणतीर्थे हरिकृष्णतीर्थे माणिकीतीर्थमश्वपाटलप्राग्वृत्तान्तमश्वपट्टसंज्ञासर्वतीर्थागमः, वैराजस्तुत्या परब्रह्मागमः, अश्वपाटलस्य साधुदीक्षेत्यादिनिरूपणनामा द्वासप्तत्यधिकद्विशततमोऽध्यायः ॥ २७२ ॥

श्रीकृष्ण उवाच—

राधिके कुंकुमवाप्यां चित्प्रकाशस्य दीक्षया ।
प्रेरिताः ऋषयश्चान्ये पञ्चशतं हरिश्रिताः ॥ १ ॥
लोमशं सद्गुरुं नत्वा दीक्षार्थं जगदुर्द्रुतम् ।
लोमशोऽपि ददौ दीक्षां वैष्णवीं तत्स्थले शुभाम् ॥ २ ॥
सर्वमन्त्रयुतां काषायाम्बरीं साधुसम्मताम् ।
कृतोपवासाः सर्वे ते कृतदेहप्रशुद्धयः ॥ ३ ॥
कृतहोमा जगृहुश्च मन्त्रान् काषायधारिणः ।
'शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥ ४ ॥
इत्येनं शरणं मन्त्रं जगृहुर्दृढमानसाः ।
'ओं नमः श्रीकृष्णनारायणाय स्वामिने स्वाहा' ॥ ५ ॥
समर्पणाख्यं मन्त्रं तं जगृहुश्च ततः परम् ।
'कालमायापापकर्मशत्रुयाम्यकुद्धन्द्वयात् ॥ ६ ॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
इत्येनं रक्षणमन्त्रं जगृहुश्च ततः परम् ॥ ७ ॥
'ब्रह्माऽहं श्रीकृष्णनारायणभक्तोऽस्मि शाश्वतः ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥ ८ ॥
ब्रह्मभावाभिधं मन्त्रमेनं जगृहुरन्ततः ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥ ९ ॥
पिता बन्धुः सुहृन् मित्रं रक्षकः पालकोऽस्तु सः' ।
इत्येनं चात्मनिवेदं मन्त्रं च जगृहुस्ततः ॥१०॥
अथ ते मुनयो राधे ! नत्वा श्रीलोमशं मुनिम् ।
पप्रच्छुः पाल्यधर्मांश्च लोमशः प्राह वै ततः ॥११॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
सर्वान् साधुसमर्हांश्च धर्मान् स्वयं प्रवक्ष्यति ॥१२॥

अथ राज्ञी राजपत्नी साध्वीदीक्षां ततः परम् ।
जग्राह तत्र सरस्तटे वै राधिके शुभाम् ॥१३॥
बह्वयस्ततः प्रजगृहुः साध्वीदीक्षां हि योषितः ।
दीक्षातीर्थं साधुतीर्थं साध्वीतीर्थं ह्यभूद्धि तत् ॥१४॥

ततः साधुपञ्चशतं साध्वीपञ्चशतं तथा ।
लोमशेन समं श्रीमद्बालकृष्णालयं शुभम् ॥१५॥
गत्वा सर्वे च सर्वाश्च साधुधर्मान् हरेर्मुखात् ।
प्रपूज्य च निषद्यैव शुश्रुवुः प्रश्नितस्य वै ॥१६॥
स्थूलदेहे सूक्ष्मदेहः सूक्ष्मदेहे तु वासना ।
वासनायां जीवनं च जीवने साक्षिभावना ॥१७॥
साक्षिभावे च नैर्गुण्यं नैर्गुण्ये लेपवर्जनम् ।
अलेपे ब्रह्मनिष्ठा च ब्रह्मभावे प्रमुक्तता ॥१८॥
प्रमुक्तौ परमानन्दः परब्रह्मकृतो भवेत् ।
एवं दशविधां वेदीं चारुह्याऽऽनन्दमश्नुते ॥१९॥
दशांगं च समाधानं कर्तव्यं साधुभिः सदा ।
देहस्य वशता कार्या तपसा निग्रहेण च ॥२०॥
तितिक्षया च क्षमया शीलेन सेवयाऽनिशम् ।
सूक्ष्मेन्द्रियाणां वशता कर्तव्या धैर्यभावनैः ॥२१॥
अप्रवृत्त्या विषयाणामदानेन धिया तथा ।
विवेकेन विचारेण शान्तवृत्त्या निरन्तरम् ॥२२॥
वासनायास्ततो नाशः कर्तव्योऽनिच्छया सदा ।
अस्मृत्या चरमस्मृत्या दैर्घ्येण च चिरेण च ॥२३॥
जीवनं प्राणसञ्चारः कर्मफलाऽविनोद्भवः ।
फलार्पणेन वै कृष्णे प्राणसंयमनेन च ॥२४॥
यात्रामात्रग्रहणेन कुंभकाद्यैः पुनः पुनः ।
प्राणसंयमनं कुर्यात् प्राणदोषान् परित्यजेत् ॥२५॥
साक्षिभावं सुखे दुःखे स्वाभिमानं निजस्य यत् ।
त्यजेन्निर्ममतायुक्तो निरहंकार इत्यपि ॥२६॥
स्वार्थभावे हि साक्षित्वं पारार्थ्ये साक्षिता कुतः ।
एवं जयेत् साक्षिभावं ममाऽहंत्यजनाद् यतिः ॥२७॥
ततोऽस्य गुणसंस्पर्शाः सुखदुःखविमोहिनः ।
प्रकाशप्रवृत्तिनियमाः शीतोष्णमध्यमास्तथा ॥२८॥
न जायन्ते यतोऽस्यैव नैर्गुण्यं समपद्यते ।
गुणानामर्पणं कृष्णे नैर्गुण्यं चान्तरेऽपि च ॥२९॥
मनसा मननं यत्तत् कृष्णेऽर्पितं न लेपकृत् ।
चित्तेन चिन्तनं कृष्णेऽर्पितं नैव हि लेपकृत् ॥३०॥
बुद्ध्या च बोधनं कृष्णेऽर्पितं नापि च लेपकृत् ।
अहन्तयाऽभिमननं कृष्णेऽर्पितं न लेपकृत् ॥३१॥
तन्मात्राऽऽलोचनं तेन सुतरां लेपकृन्न वै ।
भावना वासना वापि संस्कारश्च हरौ धृतः ॥३२॥
सुतरां दिव्यतां प्राप्तो लेपकृन्नैव निर्गुणः ।
एवं सर्वार्पणे सर्वे निर्गुणं हरियोगतः ॥३३॥
कर्तव्यं साधुभिश्चापि साध्वीभिः सर्वथा त्विह ।
मायागुणैरलोपे च जाते फलाग्रयोगिनि ॥३४॥
ब्रह्मता ब्रह्मनिष्ठा वै ब्रह्मवद् वर्तनं स्थितिः ।
जायते सर्वथा साधोः सर्वदाऽक्षरसाम्यता ॥३५॥
यथाऽक्षरे सृष्टयो वै जायन्तेऽन्तःप्रयन्ति च ।
ब्रह्मणि सृष्टिस्पर्शो न मायास्पर्शोऽपि नैव च ॥३६॥
ततोऽस्य बन्धनं नैव मायास्पर्शो हि बन्धनम् ।
अमायिकस्य साधोश्च द्वन्द्वाभावो निरन्तरम् ॥३७॥
साक्षात्कारोऽपरोक्षश्च चिदात्मन्येव जायते ।
अपरोक्षानुभूत्या च मिथ्या सर्वं विलीयते ॥३८॥
तेन दोषविनाशश्च प्रवृत्तेश्च विनाशनम् ।
फलसम्बन्धनाशश्च सर्वदुःखादिनाशनम् ॥३९॥
आत्ममात्रप्रसक्ताकः साधुर्यदा भवेत्त्विह ।
सोऽयं तदा विमुक्तो वै जीवन्नपि निरुच्यते ॥४०॥
एतादृशप्रयुक्तस्य ब्रह्मानन्दः प्रजायते ।
निजात्मानं ब्रह्मरूपं प्राप्तस्येह सतः सदा ॥४१॥
परे ब्रह्मणि चित्तैर्वै तादात्म्यं संप्रसज्यते ।
तादात्म्यमिव तादात्म्यं जायते पारमेश्वरम् ॥४२॥
यथा जिह्वा मधोर्भिन्ना मधोः रसं प्रविन्दते ।
यथा चक्षुर्गोलकस्थं वस्तुरूपं प्रविन्दते ॥४३॥
यथा मनोऽन्तरस्थं च विप्रकृष्टं प्रविन्दते ।
यथा बुद्धिश्चात्मगता परात्मज्ञा प्रजायते ॥४४॥
स्ववेत्त्री जायते चापि स्वात्माधिकप्रगोचरा ।
तथाऽऽत्मा स्वप्रकाशोऽस्ति स्ववेत्ता स्वं प्रकाशते ॥४५॥
स्वप्रकाशयुतोऽस्वं स्वान्वितं कृष्णं प्रकाशते ।
कृष्णः प्रकाशयत्येनं परस्परं प्रकाशते ॥४६॥
द्वयोः प्रकाशयोरैक्ये तादात्म्यमिव जायते ।
गुणसाजात्यतादात्म्याद् गुणिनोस्तादृशात्मता ॥४७॥
एवं भूतावेशनीत्या परब्रह्मतदात्मता ।
जायते वै तथा साध्वोर्द्वयोश्चात्मपरात्मनोः ॥४८॥
परब्रह्मात्मभावेन ब्रह्मानन्दं समश्नुते ।
अयं दशांगयोगो वै साधुधर्मः सदोत्तमः ॥४९॥
कथितः सुसतां सेव्यः परब्रह्मनिवासिनाम् ।
स्वभानं परभानं च यदि स्यादपरा स्थितिः ॥५०॥
स्वभावर्ज्यं परभानं सा बोध्या परमा स्थितिः ।
एतादृशो भवेत् साधुस्त्वसम्प्रज्ञातनामकः ॥५१॥
नारायणस्वरूपः स वेदशास्त्रैः प्रगीयते ।
सनत्कुमारः शंभुश्च शेषनारायणस्तथा ॥५२॥

लोमशोऽयं महर्षिश्च त्वेते नारायणा मताः ।
ब्रह्मप्रियास्तथा सर्वा राधालक्ष्मीरमादिकाः ॥५३॥
गरुडाद्याश्च मे वाहाः सर्वे नारायणा इमे ।
कुंकुमवापीनगरी सर्वा नारायणी मम ॥५४॥
प्रमुक्ता वर्तते त्वत्र साधवः साध्विकाः समाः ।
परब्रह्मात्मका लीलाविभूतयो वसन्ति मे ॥५५॥
केचनात्र भवन्त्येव मद्गुणा वै सहस्रशः ।
केचनात्र भवन्त्येवैश्वर्याणि मम सिद्धयः ॥५६॥
केचनात्र भवन्त्येव दिव्यानि भूषणानि मे ।
केचनात्र भवन्त्येव शक्तयो मम मूर्तिजाः ॥५७॥
केचनात्र भवन्त्येव तेजांसि मम भाः प्रभाः ।
केचनात्र भवन्त्येव भोग्यजातानि यानि मे ॥५८॥
सर्वा कुंकुमवापीयं ममोपकरणात्मिका ।
मन्मूर्तिर्विद्यते सर्वा निर्लेपा निर्गुणा परा ॥५९॥
परब्रह्मस्वरूपा वै ब्रह्मधामनिवासिनी ।
भूरियं ब्रह्मधामाऽस्ति साधवो मामकी तनुः ॥६०॥
इतीत्येवं निजरूपं परब्रह्मात्मकं सदा ।
चिन्तयत ध्यायताऽपि प्राप्नुताऽऽनन्दमुत्तमम् ॥६१॥
एवं धर्मा मया वोऽत्र साधूनां गदितास्त्विह ।
दिव्याः सूक्ष्मा ज्ञानगम्याः साधवो हि तथा मताः ॥६२॥

साधव ऊचुः—

भगवन् सूक्ष्मधर्मा वै भवत्तोऽवगतास्त्विह ।
स्थूलधर्माः कीदृशा वै कथं रक्ष्या वद प्रभो ॥६३॥

परब्रह्मोवाच—

देहो नरो च वा नारी साधुभावे यदा स्थितः ।
तदा देहस्य दोषा वै त्याज्या ग्राह्या गुणास्त्विह ॥६४॥
आलस्यं च प्रमादं च स्त्यानं त्यक्त्वा प्रगे सदा ।
विनिद्रस्त्वरितो भूत्वा ब्राह्मे स्नानं समाचरेत् ॥६५॥
जलेन भस्मना वा च वायुना मार्जनेन वा ।
देहशुद्धिं प्रकुर्याद्वै तैलाद्यभ्यंजनेन च ॥६६॥
आन्तरे भगवद् ध्यानं शौचं श्रेष्ठं सदाऽऽचरेत् ।
ततो वै पूजनं कृष्णनारायणस्य वै हरेः ॥६७॥
विष्णोः शंभोर्गणेशस्य लक्ष्म्याः सूर्यस्य वै तथा ।
साधूनां पूजनं चारार्त्रिकं नैवेद्यकाऽर्पणम् ॥६८॥
स्तवनं नामरटणं मालावर्तनमाचरेत् ।
हरेः कथं प्रकुर्याच्च भिक्षां वै पाकमाचरेत् ॥६९॥
भूत यज्ञं देवयज्ञं पितृयज्ञं समाचरेत् ।
ब्रह्मयज्ञं नैजयज्ञं कृत्वा भोजनमाचरेत् ॥७०॥
सायं चाराधनं कुर्यान्नवधा श्रीहरेः शुभम् ।
यथोचितं श्रद्धयैव सर्वकल्याणमाचरेत् ॥७१॥
सन्तोषेण च सौम्येनाऽपरिग्रहेण निर्वहेत् ।
नात्याहारं नातितपः प्रकुर्यात् साधुधर्मवान् ॥७२॥
अनाचारं नाचरेच्चाऽकर्तव्यं नाचरेत्तथा ।
क्लेशं हिंसां मृषा निन्दां परवादं विवर्जयेत् ॥७३॥
परोपकारं कुर्याच्च देहेन मनसा गिरा ।
क्रियया परसौख्यार्थं हितं सौख्यं समाचरेत् ॥७४॥
आत्ममार्गं मोक्षमार्गं विशेषेण प्रसाधयेत् ।
परेषां पापनाशार्थं शरण्यः संभवेत् सदा ॥७५॥
मम मन्त्रान् प्रदद्याच्च दीक्षां दद्याच्च मामकीम् ।
स्वाध्यायं मोक्षदं ज्ञानं प्रकुर्याच्छृणुयात्तथा ॥७६॥
तीर्थानि विचरेच्चापि गृह्णीयाच्छुद्धभोजनम् ।
शुद्धं जलं प्रपेयाच्च गालितं पय आदि च ॥७७॥
रागं तृष्णां मदं लोभं नैव कुर्यात् कदाचन ।
तिरस्कारं न कस्यापि कुर्याद् वै ब्रह्मभावनः ॥७८॥
प्रतारणं न वै कुर्याद् द्वेषं क्वचिन्न चाचरेत् ।
दानं दद्याद् यथाशक्ति मोक्षस्याऽप्यभयस्य च ॥७९॥
आश्रितस्य स्नेहभक्तिं स्वीकुर्यान्मोक्षयोगिनीम् ।
साधवः पावनाः सन्ति सत्संगश्चापि पावनः ॥८०॥
सदा समागमे नैजे चानीय देहधारिणः ।
पावयेत् परया प्रीत्या प्रेषयेन्मम धाम च ॥८१॥
इन्द्रियाण्यन्तःकरणादीनि प्रत्याहरेत् हृदि ।
ध्यानं कुर्यान्मम नित्यं ब्रह्मानन्दं समर्जयेत् ॥८२॥
मम मूर्तौ प्रलीनत्वं कुर्यात् कर्तव्यमुत्तमम् ।
उपासनां प्रकुर्याच्च नित्यं मे मननात्मिकाम् ॥८३॥
एवं भवद्भिः स्थातव्यं कर्तव्यं साधुभिर्मम ।
साध्वीभिश्च तथैवाऽत्र कर्तव्यं सेवनं सताम् ॥८४॥
नारीणां सर्वदा मोक्षदानं ज्ञानं समर्पणम् ।
शिक्षणं च साधुसाध्वीदीक्षणं मुक्तये भवेत् ॥८५॥
व्यसनानि न कार्याणि मोक्षरोधीनि यानि च ।
पतिर्नारायणश्चाऽहं साध्वीनां च सतां सदा ॥८६॥
पातिव्रत्येन धर्मेण सेवनीयोऽहमिष्टदः ।
आत्मनिवेदनं मह्यं कर्तव्यं शाश्वतं सुखम् ॥८७॥
भोक्तव्यं तु मया सार्धं मम दिव्यसमागमात् ।
अहं क्वचिन्न वै त्याज्यः सर्वक्रियासु सर्वदा ॥८८॥

इत्येषा जीवनी मुक्तिः परमुक्तिविधायिनी ।
दिव्यधर्ममयी प्रोक्ता मया सन्तः ! शुभाश्रया ॥८९॥
देहधर्माः साधुभिर्वै पालनीया यथोचितम् ।
नाधिक्येनाऽनुरक्तव्या मे सेवाविघ्नरूपिणः ॥९०॥
स्वस्ति वोऽस्तु साधवो मे साध्व्यश्च स्वस्ति वोऽस्त्वपि ।
इत्युक्त्वा राधिकेऽनादिकृष्णनारायणः प्रभुः ॥९१॥
विरराम ततः सन्तोऽर्हणां नीराजनं व्यधुः ।
रक्षणीया मोक्षणीया भवतः स्मेति सञ्जगुः ॥९२॥
ययुश्चाशीर्गृहीत्वैव सरस्तीरे निजालयान् ।
तावत् काशीगतो यश्च नारदो हरिमाययौ ॥९३॥
मंगलपत्रिकायुक्तगुरुणा सह चोत्सुकः ।
चकार दण्डवत् कृष्णनारायणं ततः परम् ॥९४॥
पितरं मातरं नत्वा मंगलं प्रजगाद सः ।
बृहस्पतिर्देवगुरुः प्रणम्य प्राप्य माननम् ॥९५॥
स्वागतं मधुपर्कादि कुशलं विनिवेद्य च ।
शिवेश्वरस्य तत्पुत्र्या लक्ष्म्याः सौख्यं नमस्कृतिम् ॥९६॥
पत्रं कुंकुमसूत्रेण वेष्टितं च सरत्नकम् ।
पत्रं च राधिके ! दत्वा वृत्तं न्यवेदयच्छुभम् ॥९७॥
कुशलं सर्वदा लक्ष्म्या युगलत्वमुहूर्तकम् ।
मार्गशीर्षस्य शुक्लायां चतुर्थ्यां च न्यवेदयत् ॥९८॥
वर्धयित्वा च तत्पत्रं प्रपूज्य च बृहस्पतिम् ।
गोपालकृष्णकस्तत्र नारदं चाऽप्यपूजयत् ॥९९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽनादिश्रीकृष्णनारायणेन साधुसाध्वीभ्यो मन्त्रदीक्षाज्ञानोपदेशादि दत्तम्, काशीतः शिवेश्वरप्रेषितमंगलपत्रिकासहितस्य बृहस्पतेर्नारदेन सह कुंकुमवाप्यामागमनं तत्पत्रप्रदानं चेत्यादिनिरूपणनामा त्रिसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७३ ॥

**श्रीकृष्ण उवाच—**

राधिके ! श्रीबालकृष्णो मुमुदे वीक्ष्य पत्रिकाम् ।
बृहस्पतिं प्रणेमे च रत्नहारं ददौ गले ॥ १ ॥
बृहस्पतिर्हरेस्तस्य जन्मदिनं व्यलोकयत् ।
चान्द्रे मासि कार्तिके च दले कृष्णेऽष्टमीदिने ॥ २ ॥
कृष्णनारायणजन्म सतीश्रीकम्भरोदरात् ।
जातं तस्य चतुर्दशसमा मासो दिनानि षट् ॥ ३ ॥
व्यतीतः समयश्चात्र वर्तते तु चतुर्दशी ।
मार्गशीर्षस्य कृष्णस्योद्वाहस्वीकृतियुग्दिनम् ॥ ४ ॥
प्रोत्सवो भविता काश्यामितश्च पञ्चमे दिने ।
मार्गशुक्लचतुर्थ्यां वै सर्वश्रेष्ठमुहूर्तके ॥ ५ ॥
योगपत्री तथा चावेदयत्येव सुमंगलम् ।
शिवेश्वरेण देवेन प्रेषितोऽहं सपत्रकः ॥ ६ ॥
सर्वं शुभं सुभगं स्याद् गोपालकृष्ण ! चोत्तमम् ।
गोपालकृष्णो देवर्षिं विलोक्य लोमशं मुनिम् ॥ ७ ॥
आह्वयामास तूर्णं स मुनिस्तत्र समाययौ ।
कृतादरः कृतदेवगुरुपूजः शुभासने ॥ ८ ॥
निषसाद कुशलं च पृष्टवान् स बृहस्पतिम् ।
गोपालकृष्णदत्तां च पत्रिकां स व्यलोकयत् ॥ ९ ॥
कृतनारदशंसां तां वाचयामास लोमशः ।
श्रावयामास मांगल्यं वर्धयामास सोऽपि च ॥१०॥
बालकृष्णस्तु मुमुदे कंभरा मुमुदे भृशम् ।
कुटुम्बिनो मुमुदिरे श्रुत्वा तां योगपत्रिकाम् ॥११॥
सर्वा ब्रह्मप्रियाश्चापि श्रुत्वा हर्षं परं ययुः ।
परीगौरीहारितीशक्तयमर्याद्या मुदं ययुः ॥१२॥
गोपालकृष्णो वाद्यानि वादयामास वै तदा ।
गुरवे प्रददौ पारितोषिकं दक्षिणां शुभाम् ॥१३॥
भोजयामास विधिना पायसान्नं सुमिष्टकम् ।
पूजयामास शनकैश्चन्दनाद्यैस्ततः परम् ॥१४॥
गोपालकृष्णो भगवान् पप्रच्छ नारदर्षये ।
कन्यागुणान् लक्षणानि कन्याया नारदोऽवदत् ॥१५॥
ब्रह्मांशः शंकरो देवः शिवेश्वरो विराजते ।
महाभागवतश्चापि महालक्ष्मीर्हि पार्वती ॥१६॥
उभौ नारायणांशौ हि गरिष्ठौ च वरिष्ठकौ ।
पूजितौ सर्वलोकैश्च गरीयांसौ परेश्वरौ ॥१७॥
तयोः पुत्री स्वयं लक्ष्मीर्दुःखदारिद्र्यनाशिनी ।
कन्यकानां योषितां च वरा चातीव सुन्दरी ॥१८॥
कां प्रशंसामहं कुर्वे शंभुपुत्र्या विशेषतः ।
रमणीयाऽतिरम्या सा रमा रामासु पूजिता ॥१९॥
उद्भिन्नेषद्यौवना च निधिर्वै सर्वसम्पदाम् ।
लक्ष्मीचिह्नसहस्रैश्च शोभिता परमेश्वरी ॥२०॥
पीतचम्पकवर्णाभा रत्नाभरणभूषिता ।
विद्युल्लतेव चाञ्चल्यहासविलासमण्डिता ॥२१॥
तप्तकाञ्चनभायुक्ता तेजसोज्ज्वलिता सती ।
दिव्यांगा दिव्यतत्त्वा च शुद्धसत्त्वान्विता सदा ॥२२॥
सत्यदयाकृपाशीला तापसी च हरिव्रता ।
शान्ता दान्ता च सुभगाऽनन्तौदार्यनिधानिका ॥२३॥

मस्तके स्वस्तिकस्वर्णगूढलेखाविराजिता ।
वक्रदीर्घस्वर्णवर्णप्रान्तकृष्णमनोहरैः ॥२४॥
सतेजस्कैश्च चचद्भिः शिरःकेशैर्विराजिता ।
स्वर्णरेखसमं रम्यं तिलकं तु विशालके ॥२५॥
भाले नैसर्गचन्द्रं च दधाना राजते हि सा ।
राधा वा कमला वा सा माणिकी वाऽर्कजा च किम् ॥२६॥
पार्वती सारमा वापि सरस्वती च शारदा ।
वैराजी वासुदेवी वा नारायणी सदाशिवा ॥२७॥
पद्मा वा विरजा वापि सावित्री वा च वैष्णवी ।
इन्द्राणी च वरुणानी चन्द्राणी रोहिणी च वा ॥२८॥
कुबेराणी सूर्यपत्नी स्वाहा वाऽहल्यिका च वा ।
द्यौः स्वयं किं च वा ब्राह्मी शक्तिर्वा शीलिका स्वयम् ॥२९॥
यद्वाऽन्यासु रमणीषु श्रेष्ठाः सन्ति मनोहराः ।
ताः सर्वाः शिवकन्यायाः कलां नार्हन्ति षोडशीम् ॥३०॥
शरत्पूर्णेन्दुशोभाढ्या शरत्कमललोचना ।
तव पुत्रसमा मूर्तिः किमयं तत्तनुं गतः ॥३१॥
विवाहयोग्या युवती वर्तते सातिशोभना ।
दिव्यदेहा नारिकाऽपि भौतिकांशविवर्जिता ॥३२॥
बालकृष्णस्वरूपा सा कृष्णनारायणी हि सा ।
मन्ये चायं परब्रह्म द्वेधा भूतो विराजते ॥३३॥
किमत्र वर्णनीयं वै या हि साक्षाद्धरिर्हि सा ।
गोपालकृष्ण ! पुत्रस्ते भाग्यवान् भगवान् स्वयम् ॥३४॥
पुरुषोत्तमसंज्ञाय सर्वसृष्टिषु गीयते ।
सेयं तदंशा सर्वांगी श्रीलक्ष्मीः पुरुषोत्तमी ॥३५॥
बालकृष्णकृते जाता लोकेऽत्र मुक्तिदा नृणाम् ।
जगन्माता सर्वमाता किमु तां वर्णये त्विह ॥३६॥
शृणु चिह्नानि सर्वाणि यैः सा ज्ञायेत चेदृशी ।
कीदृशी वा स्वयं का वा निर्णेतव्यं न यत्परम् ॥३७॥
यानि लोकाः समाकर्ण्य मुक्तिमीयुर्न संशयः ।
दिव्यदृष्ट्या गुरुभावान्मया दृष्टानि वर्णये ॥३८॥
शिवकन्याहृदयेऽस्ति बालकृष्णाकृतिः शुभा ।
पादयोः पुण्ड्ररेखोर्ध्वरेखे स्तः शोभने शुभे ॥३९॥
जघने बाणरेखाऽस्या ललाटे मुकुटाकृतिः ।
गण्डे तु दक्षिणे भाले शोणबिन्दुः प्रशोभते ॥४०॥
उरसि विष्णुरेखा च वामबाहौ गदा शुभा ।
वामसक्थ्नि पादुका च वैजयन्ती हृदि स्थिता ॥४१॥
करेऽस्याः कमलं चास्ते गजचिह्नं तथाऽपरम् ।
दक्षे पादे शंखचिह्नं नौकाचिह्नं विमानकम् ।
गदा मत्स्यः शिखरं च झषस्ताम्बूलवल्लिका ॥४२॥

वामे पादे यवरेखा प्रासादश्छत्रमित्यपि ।
ऊर्ध्वरेखा कमलं च ध्वजोऽङ्कुशो घटोऽपि च ।
कुमुदं श्रीफलं चापि स्थलपद्मं च चन्द्रमाः ॥४३॥
दशचक्राणि पूर्णानि स्वर्णरेखाऽङ्गुलीषु च ।
ललाटे पौरटो हारः स्वर्णरेखाश्च बिन्दुकः ॥४४॥
चिबुके बिन्दुको हस्तरेखा दक्षस्तनोपरि ।
चक्रं वामस्तने कण्ठे हारो वक्षसि कानकः ॥४५॥
ध्वजो मत्स्यश्च वंशी च स्वस्तिश्च दक्षिणे करे ।
धनुर्मत्स्यः कलशश्च दक्षे करे च सन्त्यपि ॥४६॥
प्राकारस्तोरणं चापि कमलं सन्ति दक्षके ।
पादफणायामश्वश्च लांगलं च करी तथा ॥४७॥
वृक्षो यूपस्तथा बाणस्तोमरं सन्ति पादके ।
हस्ते च मालिकारेखा दीपरेखा च चामरम् ॥४८॥
शोलश्च कुण्डलं वेदी चक्रं सन्ति शुभानि वै ।
शोभनानि सुचिह्नानि सन्त्यस्याश्चेतराण्यपि ॥४९॥
नाऽन्या त्वेतादृशी दृष्टा त्रैलोक्ये कमलां विना ।
नैतादृशानि चिह्नानि सर्वाणि वै श्रियं विना ॥५०॥
गोपालकृष्ण ! पुत्रोऽयं तव साक्षात् परेश्वरः ।
सर्वं जानाति तद्वृत्तं नित्यं गत्वा च पूजनम् ॥५१॥
तया कृतं प्रगृह्णाति तत्पितृभ्यां कृतं तथा ।
तथाऽप्यत्र इवाऽऽस्तेऽत्र मायां कुर्वन् हरिः स्वयम् ॥५२॥
हेमशालायननामा जानाति मुनिराडिदम् ।
हनुमाँश्च विजानाति लक्ष्यास्तपो हरेः कृते ॥५३॥
बालकृष्णो वरदानं स्वयोगार्थे ददौ तदा ।
सर्वमेतच्छुभं चास्ते लक्ष्म्यर्पणं नरायणे ॥५४॥
गोपालराज ! पश्येमं देवगुरुं बृहस्पतिम् ।
मांगलिके महाकार्ये पत्रं नीत्वा तव गृहे ॥५५॥
आगतं यत्पादपद्मे पूजयन्ति सुरेश्वराः ।
धन्यं पुण्यं यशस्यं ते गृहं तेनापि पावितम् ॥५६॥
अहो भाग्यमहं मन्ये योऽहं गोदोहनस्थिरः ।
लक्ष्मीनारायणयोगोत्सवदर्शनभाग्यवान् ॥५७॥
भविष्यामि निवत्स्यामि ह्यश्वपट्टतटे सदा ।
प्रसेविष्येऽसंख्यपत्नीपतिं श्रीपुरुषोत्तमम् ॥५८॥
सुभक्त्या बालकृष्णं तं श्रावयिष्ये च गीतिकाः ।
उत्सवेषु सदा सार्धं विचरिष्यामि शार्ङ्गिणा ॥५९॥
इदं वै जन्मसाफल्यं हरेर्योगो भवेदिह ।
येन केनापि भावेन भजनीयः परेश्वरः ॥६०॥
गोपालकृष्ण ! धन्योऽसि धन्योऽस्ति शिवशंकरः ।
धन्याऽस्ति कम्भरालक्ष्मीर्धन्या देवी च पार्वती ॥६१॥

धन्या कुंकुमवापी च धन्या वाराणसी क्षितिः ।
धन्यो बृहस्पतिश्चापि धन्यो देवर्षिनारदः ॥६३॥
येषां हृदि चक्षुषोश्च वसति श्रीनरायणः ।
धन्यश्चतुर्थीदिवसः सर्वपूज्यो भविष्यति ॥६३॥
भविष्यन्तोऽवताराश्च विधास्यन्त्यत्र चोत्सवम् ।
तत्र दिनेऽर्पिता कन्या लक्ष्मीतुल्या भविष्यति ॥६४॥
इत्युक्त्वा नारदो मौनं जग्राह च बृहस्पतिः ।
विश्रान्तिं शान्तिभवने जगृहतुश्च तौ ततः ॥६५॥
अथ श्रीनारदर्षिश्च लक्ष्म्युक्तं सुरहस्यकम् ।
निवेदयितुं कृष्णाय बालकृष्णालयं ययौ ॥६६॥
बालकृष्णोऽपि भगवान् लक्ष्म्युक्तं वेत्तुमातुरः ।
प्रतीक्षते नारदो मे कदा हृद्यं वदिष्यति ॥६७॥
तावच्छ्रीनारदस्तत्र कृष्णसौधे समाययौ ।
नत्वा श्रीबालकृष्णं तं विहस्य भगवन्नमः ॥६८॥
समुच्चार्याऽऽनन्दितश्च निषसाद हि भूतले ।
तावच्छ्रीबालकृष्णोऽसौ समुत्थाप्य च सत्वरम् ॥६९॥
देवर्षिं कानके नैजे पर्यङ्के तं न्यषादयत् ।
कृत्वा वक्षसि हर्षेण समसङ्क्त महामुनिम् ॥७०॥
प्रपप्रच्छ कुशलं लक्ष्म्या वद नारद हृद्गतम् ।
किं स्वित् सुखं समास्ते सा कियन्मद्धर्षसंभृता ॥७१॥
किंस्विद्विचारवत्यास्ते मदर्थं शिवकन्यका ।
किमुक्तवती वा किञ्चिद् रहस्यं ज्ञापितं तया ॥७२॥
वद मे नारद शीघ्रं जिज्ञासितं सुखावहम् ।
इत्युक्तो नारदो राधे ! वक्तुकामः प्रहर्षवान् ॥७३॥
उवाच विधिवत् सर्वं यथोक्तं शिवकन्यया ।
आकर्णय हरेकृष्ण सुखमास्ते त्वदर्थिनी ॥७४॥
यदाऽहं गतवान् काश्यां वरणायास्तटे शुभे ।
उद्यानरम्यभूभागे शिवेश्वरगृहान्तिके ॥७५॥
सौवर्णकलशैर्व्याप्ते शोभने विष्णुमन्दिरे ।
तदा सा मातृसहिता स्वस्रा च कृष्णया युता ॥७६॥
दर्शनार्थं त्वागता वाऽभवद् विष्णुं प्रणम्य च ।
प्रदक्षिणायां सहसा यान्तीं चाञ्चल्यशोभना ॥७७॥
मया दृष्टा देहचिह्नैर्लक्ष्मीस्तेऽर्धशरीरिणी ।
अहं विचित्ररूपश्च बालको वै तदाऽभवम् ॥७८॥
तत्समो वयसा येन बालखेलनके स्थितः ।
प्रदक्षिणप्रमिषेण तया सह च मन्दिरम् ॥७९॥
अभ्रमं वेगतश्चापि बालकृष्णोऽवदं मुहुः ।
अश्वपट्टसरश्चापि शिवेश्वरसुतेति च ॥८०॥
एवं शब्दानश्रृणोत् सा मन्मुखाच्च तदा हि सा ।
अपृच्छन्मां नमस्तेऽस्तु किशोर त्वमितः कुतः ॥८१॥
समागतोऽसि वद मे जानासि बालकृष्णकम् ।
अश्वपट्टसरोवासं तथ्यमावेदय द्रुतम् ॥८२॥
तदाऽहं धृतवाँस्तत्र रूपं नारदसम्मतम् ।
सा तु विज्ञाय मां तूर्णं जहास प्रणनाम माम् ॥८३॥
ततोऽहं बालरूपश्च पुनस्तत्राऽभवं च सा ।
प्रकाशे चत्वरभागे कदम्बद्रुमशोभिते ॥८४॥
खेलनादिप्रमिषेणाऽऽहूयाकथयदान्तरम् ।
कथं कस्माद् वद मेऽत्र महर्षे यदि तद्भवम् ॥८५॥
मया निवेदिता साध्वि ! बालकृष्णाऽऽज्ञयाऽप्यहम् ।
आगतोऽस्मि विवाहस्य जिज्ञासार्थं शिवं प्रति ॥८६॥
वद शीघ्रं तव हृद्यं जानीयान्न यथा सती ।
पञ्चकंकरखेलादिमिषेण वद मा चिरम् ॥८७॥
सा कृष्ण ! मां विलोक्यैव मोदप्रमोदसंभृता ।
अकथयन्मम प्राणपतिः कृष्णनरायणः ॥८८॥
कदा त्वायास्यति शीघ्रं कदा मां स्वीकरिष्यति ।
अहं क्षणवियोगं वै सोढुं शक्नोमि नैव ह ॥८९॥
शीघ्रं च सत्वरं कृष्णं वदाऽऽगच्छेद्धि सत्वरम् ।
अयं मे समयश्चास्ते प्रदानस्य गुरो वद ॥९०॥
तेन मे वचनं दत्तं चतुर्दशसमोत्तरः ।
स्वयमागत्य भगवान् ग्रहीष्यति करं मम ॥९१॥
यद्यद्य वत्सरे कृष्णो न मां चेत् संग्रहीष्यति ।
प्राणाँस्त्यक्त्वा दिव्यरूपा तत्राऽऽयास्यामि निश्चितम् ॥९२॥
वद मे जनकाय त्वं मात्रे चापि निवेदय ।
मा मद्वाचं तयोरग्रे प्रकाशं कुरु बुद्धिमन् ॥९३॥
शीघ्रं यथा स वा मे स्यात्तथा क्लर्सि विधापय ।
इत्युक्त्वा पुलकांगी सा प्रेमप्लुता तदाऽभवत् ॥९४॥
स्नेहाश्रुभृतनेत्रा च समाधिमिव संगता ।
पुनः स्वल्पं प्राकथयत् निवेदय समर्पिताम् ॥९५॥
नाऽधिकं श्रीहरेरग्रे वद नारद याहि च ।
मद्गृहे त्वागतां तत्र मातरं पितरं वद ॥९६॥
इत्युक्त्वा च नमस्कृत्य मत्पादयोर्हि लीलया ।
उत्थाय खेलानासक्ता शीघ्रं प्रदक्षिणं गता ॥९७॥
मन्दिरे तत्र सा मात्रा सह दृष्ट्वा हरिं पुनः ।
याता निजं गृहं कृष्ण नारदोऽहं ततः परम् ॥९८॥
वरणायां च गंगायां स्नात्वा तत्र गतोऽभवम् ।
नारदेन स्वरूपेण नारायणेति संवदन् ॥९९॥

जटाधरं विलोक्यैव सती मे नमनं व्यधात् ।
मया त्वाशीः प्रदत्ता च सा मां दृष्ट्वा मुदं ह्यगात् ॥१००॥
अपृच्छत् कुशलं सर्वं दत्तासने स्थितं च माम् ।
गृह्णन्तं मधुपर्कादि तत्राऽकस्मात् समागतम् ॥१०१॥
अहं नारायण विष्णो बालकृष्ण हरे प्रभो ।
अनादिश्रीकृष्णनारायणेत्याश्रावयं तदा ॥१०२॥
तव नामानि सर्वाणि पावनानि शुभानि च ।
स्मारकाणि तव कृष्ण ततोऽपिबं जलं मनाक् ॥१०३॥
अथ शान्तिं समागृह्य विवक्ष्यामि यदा तदा ।
समायाच्च ममाऽग्रे सुखदालक्ष्मीः श्रवाऽऽतुरा ॥१०४॥
ज्येष्ठा कृष्णा तथा सख्यश्चापरा दिव्यदृष्टिकाः ।
अनमन्मां सतीं चापि न्यषीदंस्ताः समन्ततः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बृहस्पतिप्रदत्तमंगलपत्रिकाया लोमशकृतसविधिपूजन-वाचनादिकम् , गोपालकृष्णाद्याः स्वागतमधुपर्काद्युत्तरं भोजयामासुः, नारदो गोपालकृष्णाय कन्यैश्वर्यगुण-दिव्यलक्षणान्याह, बालकृष्णाय कन्योक्तरहस्यार्थं चाहेत्यादिनिरूपणनामा चतुःसप्तत्यधिक-द्विशततमोऽध्यायः ॥ २७४ ॥

श्रीकृष्ण उवाच—

राधिके ! नारदस्ताभ्यस्ततोऽकथयद् यद्धि तत् ।
कथयामि समस्तं ते शृणु त्वेकाग्रमानसा ॥ १ ॥

नारद उवाच—

आगतोऽहं सत्यलोकादश्वपट्टसरोवरम् ।
पृथ्व्यां पश्चिमसौराष्ट्रे यत्राऽऽस्ते पुरुषोत्तमः ॥ २ ॥
तेन साकं पृथिव्यां च व्यचरं यज्ञकर्मणे ।
यत्राऽऽयाता धाममुक्तास्तथाऽन्यधामपार्षदाः ॥ ३ ॥
पार्षदान्यस्तथा सत्य ईश्वराण्यश्च देवताः ।
मानव्यो नागकान्ताश्च साध्व्यः सिद्धिवरास्तथा ॥ ४ ॥
अवताराः समस्ताश्चेश्वराश्चापि च साधवः ।
सिद्धा ब्रह्मव्रताश्चापि पितरश्च तथर्षयः ॥ ५ ॥
आर्ष्यः सर्वास्तथा देवा देवान्यश्च समागताः ।
मानवाश्च दिवःपाला लोकपाला महेश्वराः ॥ ६ ॥
आदित्या वसवो रुद्रा अश्विनौ तत्स्त्रियस्तथा ।
वह्नयश्च मरुतश्च निधयश्च ग्रहास्तथा ॥ ७ ॥
दिशः कामश्च मनवस्तिथयश्च कलास्तथा ।
तत्त्वानि सर्वतीर्थानि नद्यः सरांसि सागराः ॥ ८ ॥
पर्वताश्च वालखिल्या वायुदेहाऽसुरादयः ।
दैत्या भक्ता दानवाश्च पक्षाश्च राक्षसास्तथा ॥ ९ ॥
सिद्धचारणगन्धर्वा विद्याधाः किन्नरास्तथा ।
उरगाः किंपुरुषाश्च वृक्षास्तृणानि वल्लयः ॥१०॥
धर्माद्या याम्यभक्ताद्याः शैवाः कैलासवासिनः ।
वैकुण्ठश्वेतदुग्धाब्धिवासा बदरीवासिनः ॥११॥
मेरुवासा आवरणवासाः पातालवासिनः ।
असंख्यदेवकोट्यश्च प्राययुर्वै मखे मखे ॥१२॥
सर्वे प्रशंसन्ति कृष्णं बालकृष्णं परेश्वरम् ।
वन्दन्ते तं चार्हयन्ति स्तुवन्ति कंभरासुतम् ॥१३॥
तत्प्रसादं तच्चरणामृतं पिबन्ति ते तदा ।
लोकपाला धामपालाः सृष्टिपाला नरायणाः ॥१४॥
नारायणाश्च ये ते च तदाज्ञामुद्वहन्ति च ।
एतत् सर्वं मया तत्र प्रत्यक्षं त्ववलोकितम् ॥१५॥
शंकरस्तु स्वयं यस्याऽक्षरक्षेत्रे निवासकृत् ।
क्षेत्रपालतया चास्ते ह्यश्वपट्टसरोऽभितः ॥१६॥
श्रीकृष्णः श्रीरामदेवो नरो नारायणस्तथा ।
वासुदेवादयो व्यूहाः सनत्कुमारयोगिराट् ॥१७॥
तथाऽन्ये चेश्वराः श्रेष्ठाः संकर्षणादयोऽपि च ।
महाविष्णुस्तथा भूमा वैराजश्च सदाशिवः ॥१८॥
यस्याऽऽज्ञां संवहन्ते च कालमायायमेश्वराः ।
यस्माद् भवन्ति भूतानि पुष्यन्ते चाभियन्ति च ॥१९॥
अन्तरात्मा तु यः प्रोक्तः साक्षी च भगवान् स्वयम् ।
परब्रह्म च यः प्रोक्तो यस्मात् सर्वमिदं ततम् ॥२०॥
विद्युतो भानि सूर्यश्च चन्द्रो वह्निस्तथा ध्रुवः ।
यत्तेजसा प्रविद्यन्ते तेजस्विनः प्रभाकराः ॥२१॥
यत्प्रवेशेन भूतानि भवन्ति ज्ञानवन्त्यपि ।
येनास्ते जीवलोकस्य प्रकाशं वै निजात्मनि ॥२२॥
सर्वप्रकाशदाता सः कुंकुमवापिकास्थले ।
विराजते हि भगवानक्षरातीत एव यः ॥२३॥
मानवेन स्वरूपेण गोपालकृष्णबालकः ।
इत्येवं ते प्रशंसन्ति वै महीमानका मखे ॥२४॥
कोटिरूपधरः सोऽपि बालकृष्णो जनार्दनः ।
कोटिभक्तानेकपदे मिलत्येव च वक्षसि ॥२५॥
मया दृष्टं हि साक्षात्तत् श्रुतं सर्वं प्रशंसितम् ।
श्रुता च योषितां वाणी स्थले स्थल्यां महोत्सवे ॥२६॥

धन्या वयं सुरूपस्य सर्वेश्वरस्य योगिनः ।
दर्शनं त्वद्य कुर्मो यत्पुण्यपारो न विद्यते ॥२७॥
अहोऽस्य दर्शनाच्छान्तिः शाश्वती समजायते ।
अस्माकं नेत्रयोर्दैर्ध्यं साफल्यं विन्दतेऽद्य वै ॥२८॥
दूरतोऽपि महानन्दो जायतेऽस्य विलोकने ।
अभिन्नपूरवेगाढ्यं यावत्सुखोत्तरं सुखम् ॥२९॥
अनुभूयते चास्माभिः सर्वेन्द्रियसुखं महत् ।
यस्य दूरावलोकेन यदीदृशं परं सुखम् ॥३०॥
तदा साक्षात्तस्य पत्न्याः पार्श्वशयनयोषितः ।
शिवेश्वरसुता लक्ष्म्या दिव्यायाः कीदृशं भवेत् ॥३१॥
अर्धांगी चेश्वरी या वै नारायणी परेश्वरी ।
सूर्यचन्द्रनिभौ यस्याः कपोलौ गण्डकौ तथा ॥३२॥
सुवर्णसदृशं यस्या वपुश्चम्पकपुष्पवत् ।
अलक्तकनिभे यस्याः करपादतले तथा ॥३३॥
पक्वबिम्बसमौ यस्या ओष्ठौ प्रीतिनिवासिनौ ।
कदलीस्तम्भसदृशे सक्थिनी चापि शोभने ॥३४॥
पद्मपत्रायतनेत्रे यस्या रूपं ह्यनुत्तमम् ।
कृष्णनारायणवक्षोवासा या परमेश्वरी ॥३५॥
या च वासयति कृष्णं कान्तं वै निजवक्षसि ।
साक्षात् सर्वांगसंयुक्ता कीदृशी सुखिनी भवेत् ॥३६॥
अहो धन्या शिवपुत्री सुखं कृष्णात् समश्नुते ।
धन्या सा पार्वती देवी यत्सुखात् सुखिनी शिवा ॥३७॥
रमायाः कमलाया वा श्रिया वा कृष्णयोषितः ।
वृन्दाया वा तुलस्या वा भार्गव्या वा च तत्सुखम् ॥३८॥
ललाटे लिखितं कार्ष्णे यल्लक्ष्म्या लिखितं सदा ।
अहो नेदृक्परं भाग्यमस्माकं यन्न चेयते ॥३९॥
न चाऽस्माकं पतिः सोऽयं कृष्णनारायणः प्रभुः ।
व्यर्थं जन्म स्त्रिया लोके कृष्णयोगसुखं विना ॥४०॥
व्यर्थं सर्वं पातिव्रत्यं पतिः कृष्णो न चेद् यदि ।
अहो वै शिवकन्यायाः साफल्यं गौरवं तथा ॥४१॥
सर्वरसान् सर्वगन्धान् सर्वस्पर्शान् सुखैर्भृतान् ।
सर्वशब्दान् सर्वदृश्यान् सर्वानन्दान् भुनक्ति या ॥४२॥
सर्वानन्दाश्रयं कृष्णं कान्तं लब्ध्वा जितेन्द्रियम् ।
अखण्डवीर्यं सर्वेशं भुंक्ते या शिवकन्यका ॥४३॥
काशीस्थाऽपि सदा कृष्णे लग्ना चास्तेऽप्रकाशिता ।
पश्यन्ति दिव्यनेत्राश्च सत्यः साध्व्यो दिवानिशम् ॥४४॥
इत्येवं वै मया कीर्तिः श्रुता नारीगणान्मुहुः ।
सोऽहं दिदृक्षुरेवाऽसं जिज्ञासुश्च पुनः पुनः ॥४५॥
पृष्ट्वा पृष्ट्वा शनैश्चाऽत्र भवतीगेहमागतः ।
संश्रुतं दुःखहालक्ष्मीरितिनामापि वै मुहुः ॥४६॥
कीदृशी सा कस्य कन्या कीदृग्गुणा भवेदिति ।
यदि स्यादत्र सा देवी द्रष्टव्या सा मया सति ॥४७॥
क्वाऽऽस्ते कीदृक् स्वरूपा सा किमवस्था किमम्बरा ।
किंनिसर्गा किंसुपिण्डा किंसंस्थाना भवत्यपि ॥४८॥
किमाकृतिः किंसुप्रभा कियद्वर्षा हि भामिनी ।
किमानना च किंवेगा किंभावा किंसुलक्षणा ॥४९॥
किंकला किंस्वरा किंसंवर्णा किंपत्करोज्ज्वला ।
किंमाला किंसुष्ठुकेशी किमात्मा किंसुसिद्धिका ॥५०॥
किंप्रभावा किंसुखाढ्या किंमाना किंसुबोधिनी ।
किंकार्या किंभक्तिमती किंदिव्या च किमान्तरा ॥५१॥
किंविद्या किंचिह्नशोभा किमुच्छ्रया च किंगतिः ।
किंवासा च किंसखी च किंभूषा किंघटाछटा ॥५२॥
किंबला किंसुसत्त्वा च किंभोजना किंतापसी ।
किंसन्तोषा च किंशौचा किंस्वाध्याया च किंव्रषा ॥५३॥
किंहार्दा किंप्रेमपात्रा किंकौशल्या च किंमतिः ।
किमंगा किंधना किंचंचला किंलेखना हि सा ॥५४॥
किंरुचिः किंप्रवादा च किंवृत्तिः किंप्रवर्तना ।
किंत्रिका किंसमारंभमध्यप्रान्तफला तथा ॥५५॥
किंक्रिया किंविशेषा च किंसामान्या किंमध्यमा ।
किंविश्वासा च किंयोगा किंबोधा किमुपासना ॥५६॥
किमाराधनिका किंशृंगारा किंसंविरागिणी ।
किंतुष्टा किंग्रधिनका च किमाशा च किमिच्छुकी ॥५७॥
किंतर्का किंनिश्चया च किंवादा किंप्रमाणिका ।
किंप्रमेया किंप्रयोगा किंसिद्धान्ता किंनिग्रहा ॥५८॥
किंवेदा किंसाधना च किंप्रिया किंवितर्जिनी ।
किंयमा किंनियमा च किंध्याना च किमासना ॥५९॥
किंप्राणा किंरतिश्चास्ते किंकामा शिवकन्यका ।
एवंद्रष्टुं च जिज्ञासा मे जाताऽस्ति ततोऽप्यहम् ॥६०॥
समागतोऽयं देवर्षिर्नारदो भगवन्मनः ।
ब्रह्मपुत्रश्च रुद्रस्य भ्राता देवर्षिकीर्तिमान् ॥६१॥
विष्णुभक्तः स्थैर्यहीनः सर्वथा कलहप्रियः ।
येषां गृहं प्रगच्छामि ते यदि मानयन्ति मे ॥६२॥
वचांसि वै मयोक्तानि तेषां सुखकरोऽस्म्यहम् ।
नाऽऽद्रियन्ते यदि लोका वचांसि तोषयन्ति न ॥६३॥
तदा तेषां गृहे कृत्वा कलहं चातिदुःसहम् ।
प्रव्रजामि परं गेहं यत्र मे माननं भवेत् ॥६४॥

कन्यका मे दर्शयन्ति करौ भाग्यं विलोकितुम् ।
अहं दृष्ट्वा समस्तं च कथयामि सुखप्रदम् ॥६५॥
असुखं च भवेत् किञ्चित् तदहं नाशयाम्यपि ।
असत्कारं मम कृत्वा लभन्ते न सुखं जनाः ॥६६॥
सुसत्कारं लभन्ते ते मम वाचोऽनुवर्तिनः ।
मम गोदोहमात्रं वै वासश्चैकत्र जायते ॥६७॥
तथापि भक्तिमावीक्ष्य वसाम्यपि दिवानिशम् ।
ततो विशेषवासो मे स्मृद्धिस्वर्गप्रदो भवेत् ॥६८॥
ततोऽप्यधिकवासो मे नारायणाप्तिदायकः ।
ततोऽप्यधिकवासश्च परब्रह्मप्रदायकः ॥६९॥
भुक्तिं ददामि वचनान्मुक्तिं ददामि कीर्तनात् ।
क्लेशं ददामि कलया सुखं ददामि तोषणात् ॥७०॥
विषं ददामि वार्तायां यत्र नाऽहं प्रतोषितः ।
पाययाम्यमृतं चापि यत्राऽहं सेवितोऽभवम् ॥७१॥
जिज्ञासा यत्र पूर्णा मे तत्र स्वर्गोत्तमं सुखम् ।
दत्वा प्रयामि चान्यत्र जानन्त्विति व्रतं मम ॥७२॥
हरेकृष्ण हरेकृष्ण बालकृष्ण हरेहरे ।
श्रीपते कंभरापुत्र लक्ष्मीपते हरेहरे ॥७३॥
शिवेश्वरसुताकान्त हरे गोपालनन्दन ।
ब्रह्मप्रियापते कृष्ण बालकृष्ण हरेहरे ॥७४॥
अनादिश्रीकृष्णनारायण ब्रह्मपते हरे ।
सत्पते सर्वकान्तानां कान्त कृष्ण हरेहरे ॥७५॥
श्रीकृष्णवल्लभस्वामिन् कुंवरकृष्णरूपवान् ।
देशिक श्रोत्रिय स्वात्मन् सर्वात्मन् शेषणाश्रय ॥७६॥
इत्येवं भजनं कृत्वा विरराम स नारदः ।
लक्ष्मीर्वै मनसा वाचा कर्मणा नारदं प्रति ॥७७॥
दत्तेन्द्रियान्तरवृत्तिरतल्लीना हि तदाऽभवत् ।
सती शिवाऽऽह देवर्षिं धन्यं भाग्यमृषे मम ॥७८॥
भवान् कृष्णस्वरूपो यन्मद्गृहं समुपागतः ।
मत्पुत्र्याश्च महद्भाग्यं यत् सतस्तेऽत्र दर्शनम् ॥७९॥
नारदोऽहं विजानामि शतजन्मकृतं यदि ।
पुण्यं सम्मिलितं तेन जन्म वै मानवं लभेत् ॥८०॥
पुनस्तत्र कृता यज्ञाः स्युः शतं तर्हि वै दिवम् ।
प्राप्येतेन्द्रसमकालं ततोऽत्र भूतले स तु ॥८१॥
शेषपुण्यप्रभावेण श्रेष्ठमानवतां लभेत् ।
तत्र विप्रप्रतापेन सतामाशीर्भिरित्यपि ॥८२॥
राज्यं भक्तिमयं श्रेष्ठं प्राप्नुयात् सुखदं शुभम् ।
तत्र देवकृता सेवा सेवाऽतिथिजनस्य च ॥८३॥
प्रापयत्येव सद्बुद्धिं स्मृद्धिं वंशस्य वल्लिकाम् ।
पितृतोषेण तत्रापि पुत्राः पुत्र्यो भवन्ति च ॥८४॥
सतां सेवाप्रतापेन जायन्ते सुखिनो जनाः ।
सतां सेवा धनदात्री भूमिदात्री सुखप्रदा ॥८५॥
सा च धर्मेण भक्त्या च तपसा च तथा व्रतैः ।
मिलत्येवाऽन्यथा नैव सतां सेवा हि दुर्लभा ॥८६॥
अनुग्रहेण दयया सतां सेवाऽभिपद्यते ।
पातिव्रत्येन धर्मेण सतां सेवाऽभिपद्यते ॥८७॥
परोपकारशीलानामन्नसत्रविधायिनाम् ।
सदादानपराणां वा सतां लाभः प्रजायते ॥८८॥
भक्तानां सौम्यभावानां सर्वार्पणविधायिनाम् ।
सतां सत्कारकर्तॄणां सतां लाभः प्रजायते ॥८९॥
नित्यं तीर्थस्वभावानां नित्यं कथां सुश्रृण्वताम् ।
नित्यं वन्दनशीलानां सतां लाभः प्रजायते ॥९०॥
नित्यं देवार्हणस्थानां नित्यं सत्कारकारिणाम् ।
नित्यं साधुस्मृतिमतां सतां लाभः प्रजायते ॥९१॥
आत्मश्रेयोऽभिलाषाणां सेवावृत्तिजुषां तथा ।
जिज्ञासूनां सेवकानां सतां लाभः प्रजायते ॥९२॥
सतो मार्गयमाणानां सतां गुणानुशालिनाम् ।
सतां गृहे सतां योगे सतां लाभः प्रजायते ॥९३॥
सद्गुरूणां निवासेषु सतां महोत्सवादिषु ।
सतां प्रसंगात् सततं सतां लाभः प्रजायते ॥९४॥
सत्यव्रतस्थितानां च सत्परब्रह्मयाजिनाम् ।
हरेः पार्षदयोगानां सतां लाभः प्रजायते ॥९५॥
हरेर्भक्तिमतां गेहे भक्तानां योषितां गृहे ।
विरक्तानां समूहेषु सतां लाभः प्रजायते ॥९६॥
सन्मित्राणां प्रसंगेन सद्देशस्य निवासनात् ।
सत्कालस्य च योगेन सतां सेवा प्रजायते ॥९७॥
सतां दीक्षाप्रसंगेन सतां मन्त्रग्रहेण च ।
सतां स्नेहवशेनाऽपि सतां सेवा प्रजायते ॥९८॥
आस्तिक्येनाऽऽमन्त्रणेन यशसा सत्कुलेन च ।
सम्बन्धेन च महतां सतां सेवा प्रजायते ॥९९॥
श्रीहरेः कृपया वापि हरेः पत्न्याः समाश्रयात् ।
हरेर्वासेन वा नित्यं सतां सेवाऽभिपद्यते ॥१००॥
अद्य नारद वासो मे श्मशानः शंकरालयः ।
पावितो भवता साधो सता भक्तिमता हरेः ॥१०१॥
तव पादप्रसंगेन पावितं सकलं जगत् ।
मुक्तिमार्गं प्रयात्येव मद्गृहं चापि पावितम् ॥१०२॥

श्रावितं शुभदं सर्वं कृष्णसम्बन्धजं सुखम् ।
कृष्णनारायणकीर्तिः श्राविता पावनी त्वया ॥१०३॥
पावितं हृदयं मेऽत्र मत्पुत्र्याश्चाऽपि तेऽन्तिके ।
स्थितायाः स्वर्णवर्णाया लक्ष्म्या नारद जीव यत् ॥१०४॥
अहो भाग्यं मम पुत्र्या यन्नाम जगतीत्रये ।
ख्यायते सर्वभूतेषु धन्याऽहं मम पुत्रिका ॥१०५॥
पुत्रि लक्ष्मि नमस्कारं कुरु श्रीनारदाय वै ।
पादसंवाहनं चापि तैलांगमर्दनं कुरु ॥१०६॥
जलमन्नं मिष्टमिष्टं गरिष्टं देहि मा चिरम् ।
पर्यंकं च मधुपर्कं देहि पानं मनस्तथा ॥१०७॥
यथेच्छति सतां वर्यो नारदोऽयं हरिः स्वयम् ।
तथैनं च परीक्षां ते कर्तुं देहि समस्तिकाम् ॥१०८॥
ब्रह्मभ्रातुश्च वै शंभोः कन्या त्वं दुःखहे सुते ।
अयं पुत्रो ब्रह्मणश्च मम पुत्रो तवाऽग्रजः ॥१०९॥
सम्बन्धतो भवत्येव गुरुश्चापि महानृषिः ।
नारदोऽयं हरेरंशस्तव पूज्योऽस्ति मेऽपि च ॥११०॥
पुत्रि यथा सुसन्तुष्टो भवेत्तथा प्रसेवय ।
इत्युक्ताऽऽजाकरीलक्ष्मीर्नारदाय ननाम ह ॥१११॥
जलपानं तथा मिष्टमन्नं ददौ शुभासनम् ।
पर्यंकं स्वर्णवर्णं च ददौ पुष्पस्रजादिकम् ॥११२॥
पादसंवाहनं चक्रे लक्ष्मीः श्रीनारदस्य च ।
राधिके श्रमनाशं च विश्रम्य नारदो व्यधात् ॥११३॥
नारदोऽपि यथोक्तानि लक्षणानि न्यभालयत् ।
सर्वश्रेष्ठानि वै तत्र पूर्वदृष्टानि वै पुनः ॥११४॥
सती च जानकी शीघ्रं शिवेश्वरं पतिं निजम् ।
आह्वयत् सुमहोद्यानगतं विश्वेश्वरं मुदा ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने पार्वती-सत्यै नारदोक्तश्रीकृष्णनारायणमहिमा, लक्ष्मीमहिमा, सतां समागमलाभकारणानि, नारदसम्मानञ्चेत्यादि-वृत्तान्तावेदननामा पञ्चसप्तत्यधिकद्विशत-तमोऽध्यायः ॥ २७५ ॥

**श्रीकृष्ण उवाच—**

राधिके नारदश्चैवं प्राह श्रीपतये तदा ।
बालकृष्णाय वै सर्वं वृत्तं शिवगृहे तु यत् ॥ १ ॥

**नारद उवाच—**

हरे मया विश्रमितं तावच्छ्रीशिवसर्जकः ।
विश्वसूरो दिव्यदेहस्त्र्यक्षो गृहं समागतः ॥ २ ॥
धन्योऽहं कृतकृत्योऽहं वैष्णवो मद्गृहेऽद्य वै ।
तत्रापि भ्रातृजो मेऽद्य वत्सलः समुपागतः ॥ ३ ॥
अहो नारद पुत्र त्वं कुतः खलु समागतः ।
शुभं च कुशलं चास्ते तव भ्रातुश्च मे तथा ॥ ४ ॥
विष्णोश्च कुशलं चास्ते कच्चित् कुटुम्बिनः सुखाः ।
इत्युक्त्वा सहसा मां स शिवो वै वक्षसाऽमिलत् ॥ ५ ॥
मया वै सत्यलोकस्य पितुर्मे ब्रह्मणस्तथा ।
मातुश्चापि च सावित्र्याः कुशलं परिकीर्तितम् ॥ ६ ॥
ततो वै सनकादीनां रुद्रस्यापि प्रकीर्तितम् ।
दक्षादीनां ततश्चापि कुशलं परिकीर्तितम् ॥ ७ ॥
ततो विष्णोर्महालक्ष्म्या उदन्तं सर्वमेव तु ।
सुखं च कुशलं चापि वैकुण्ठस्थं प्रकीर्तितम् ॥ ८ ॥
ततो वैकुण्ठके जातं प्राग्वृत्तं स्मारितं पुनः ।
शिवताण्डवकाले वै लक्ष्म्याः शापादिकं तु यत् ॥ ९ ॥
शिवस्य भूतले जन्म शिवेश्वरो भवानिति ।
लक्ष्म्याश्च त्यजनं चापि नारायणेन यत् कृतम् ॥१०॥
भक्तार्थं त्वाययौ नारायणो वै भूतले ह्यनु ।
अनादिश्रीबालकृष्णस्तन्मिषेण परेश्वरः ॥११॥
परब्रह्म समायातश्चाश्वपट्टसरोवरे ।
श्रावितं वै मया तत्तु लक्ष्मीश्चापि समागता ॥१२॥
शिवस्वामिगृहे पुत्री जातेयं श्राविताऽपि सा ।
शिवेयं पार्वती देवी तत्सर्वं श्रावितं मया ॥१३॥
स्मारं स्मारं शिवेशश्चाऽश्रूण्यपि ह्यवासृजत् ।
परिष्वज्य स मां गाढं पुत्र पुत्रेत्यवाऽमिलत् ॥१४॥
अहं वै शंकरं नत्वाऽऽश्रावयं मम हृद्गतम् ।
कन्यामेतां भगवाँश्च स्मरत्येवाऽगदं च तम् ॥१५॥
प्रदानकालस्त्वस्या वै समुपस्थित एव ह ।
योग्यं यथार्थं कर्तव्यं तेन सम्पत्स्यते सुखम् ॥१६॥
कृष्णस्य तु भवान् शंभो पूजां करोति नित्यदा ।
दृष्ट एव मुहुर्दिव्यः स एव सुन्दरो वरः ॥१७॥
परब्रह्म स्वयं ते तु निश्चितोऽस्ति जनार्दनः ।
मया दृष्टो भवताऽपि दृष्टो मानवरूपवान् ॥१८॥
क्षेत्रपालस्वरूपेण द्रष्टव्यो नावशिष्यते ।
तथापि चेत् समायाहि यदि वाञ्छा प्रविद्यते ॥१९॥
इत्युक्तश्च मया शंभुः सस्मारैव बृहस्पतिम् ।
स च तूर्णं समायातो मधुपर्कादिकं हरः ॥२०॥
प्रददौ गुरवे सर्वं न्यवेदयन्मयोदितम् ।
बृहस्पतिः शुभं प्राह सर्वं यथोत्तमं तथा ॥२१॥

ततो निश्चित्य वै शंभुः कन्यादानं तु मौखिकम् ।
ममाऽग्रे त्ववदच्चापि गुरोरग्रे पुनः पुनः ॥२२॥
मया शुभं मुहूर्तं च दृष्ट्वा भूषाम्बराणि च ।
श्रीफलं तिलकं चापि कन्यायै त्वर्पितानि वै ॥२३॥
त्वत्तो जाता प्रसन्ना सा परिधायाऽम्बराणि च ।
सद्भूषा विविधाश्चापि तदा साऽपि गुरूदिता ॥२४॥
हर्षं गता वरार्थी स्वां मत्वा सखीषु शोभना ।
हरो बृहस्पतिं प्राह कदा महोत्सवो भवेत् ॥२५॥
बृहस्पतिश्चतुर्थ्यां वै मार्गे शुक्लेऽवदत्तु तम् ।
श्रुत्वा मोदं गताः सर्वे बृहस्पतिवचःस्थिताः ॥२६॥
निर्णीय च मया साकं ततो वाचस्पतिर्द्रुतम् ।
योगपत्रं समादाय कन्यामनो विलोक्य च ॥२७॥
पार्वत्याश्च मनो वीक्ष्य पूजयित्वा गणाधिपम् ।
कुंकुमार्द्रं द्रवं कृत्वा दृष्ट्वा मुहूर्तकं शुभम् ॥२८॥
अलिखत्पत्रमेवाऽपि नारदस्यैव साक्षिकम् ।
वादित्राणि जनास्तत्राऽवादयन् वै हराज्ञया ॥२९॥
मंगलानि तथा नार्यश्चागायन् देवतास्त्रियः ।
गूडधानादिकं श्रीमान् नारदश्च बृहस्पतिः ॥३०॥
शंकराद्यास्तथा सर्वे समाश्नन् मंगलावहम् ।
ततोऽयं सुरगुरुराट् शिवेन योगपत्रयुक् ॥३१॥
संप्रेषितो मया सार्धं कुंकुमवापिकाऽऽलयम् ।
सोऽयं सुरगुरुर्देवः समायातोऽस्ति निश्चितः ॥३२॥
वाग्दत्तां तां निजीकृत्वा कृष्णाऽऽनय प्रियामिह ।
प्रतीक्षमाणा ते मार्गं वर्तते विह्वलेव सा ॥३३॥
कदा कृष्णः समागच्छेत् कदा मां च निजां क्रियात् ।
त्यक्त्वा पूर्वं कदा त्वेनं प्राप्नुयां प्राणजीवनम् ॥३४॥
कदा सा कम्भरालक्ष्मीः प्रेम्णा मां समलोकयेत् ।
द्विवारं या समागत्य मां विलोक्य गता गता ॥३५॥
विमानेनाऽध्वरेभ्यश्च यदाऽऽयातो हरिस्तदा ।
पुनः पूज्या न साऽऽयाति कथं मां न स्मरत्यपि ॥३६॥
पूर्वं दृष्टा तया चाऽहं बालिका तु तदाऽभवम् ।
मम पुत्रस्य योग्येयं कृत्वाऽङ्के मां न्यषादयत् ॥३७॥
मन्ये सा वर्तते देवी सदा निश्चितनिर्णया ।
तृप्ता प्रसन्ना सन्तुष्टा या मां नैव निषेधति ॥३८॥
नारद त्वं समायातस्तदा सा कंभरा रमा ।
किं मां मन्मातरं वा चाऽकथयद् वद तत्त्वतः ॥३९॥
इत्येवं सा मुहुर्मां सम्पृष्टवती रहस्यकम् ।
वक्तव्यं तन्मया सर्वं कम्भरायै समाह्वय ॥४०॥
शीघ्रं कुरु कृपासिन्धो सर्वं हृद्यं फलिष्यति ।
इत्युक्तो राधिके तत्र बालकृष्णः सुरर्षिणा ॥४१॥
समुत्थाय गतः शीघ्रं मातरं कंभरां प्रति ।
प्रणम्य मातरं प्राह नारदो मम मन्दिरम् ॥४२॥
ज्ञापयितुं रहस्यं तु समाह्वयति सोत्सुकः ।
सन्तुष्टां मत्स्वसारं च तथा भ्रातृवधूं सतीम् ॥४३॥
अमृतां श्रीं सह नीत्वा समायाहि ममालयम् ।
इत्युक्ता बालकृष्णेन माता स्वसृसमायुता ॥४४॥
भ्रातृपत्नीसुयुक्ता च बालकृष्णेन संयुता ।
आयात् समुत्सुका राधे ! बालकृष्णालयं सती ॥४५॥
नारदस्तां विलोक्यैव मन्दहासोऽनमत् सतीम् ।
उत्थाय स्वागतं चक्रे वाण्या वै नम्रकंधरः ॥४६॥
कृतहस्ताञ्जलिश्चापि तदा स प्रोत्थितोऽभवत् ।
यावन्माता स्वर्णसिंहासने तूपाविशत् ततः ॥४७॥
स्वसा भ्रातृगृहिणी च यावच्चोपाविशत्ततः ।
सम्मानितः पूजितश्च वन्दितो नारदो मुनिः ॥४८॥
नमस्कृत्य यथातथ्यमगदत् कृष्णसन्निधौ ।
मातर्नमामि चरणौ रहस्यं प्रवदामि च ।
यन्मामुक्तवती शैवी रहोऽर्थे वै पुनः पुनः ॥४९॥

**श्रीकंभरालक्ष्मीरुवाच—**

किं महर्षे बालिका सा नारायणी परेश्वरी ।
उक्तवती मदर्थे यत् सर्वं त्वत्र निवेदय ॥५०॥
किं सा रूपवती बाला ह्यव्यंगा पूर्णलक्षणा ।
किंस्विदारोग्यमस्या वै किं स्वित् तन्निर्मलं मनः ॥५१॥
किंस्विदिच्छति मत्पुत्रं किं स्विदास्तेऽत्र हृन्मयी ।
कच्चित् सा स्नेहभावा मां किंस्विन्मत्पुत्रमानसा ॥५२॥
प्रसन्नहृदया किंस्विदास्ते मां स्मृतवत्यपि ।
यदा यज्ञोऽभवच्चापि पिंगाऽरण्ये तदा सतीम् ॥५३॥
समागतां तु तां वीक्ष्य प्रसन्ना त्वभवं ह्यति ।
स्नुषाभावं प्रदर्श्यैव स्वांऽके नीतवती च माम् ॥५४॥
पुनः साऽहं निजं देशं गत्वा ततोऽध्वरान्तरे ।
राशियानप्रदेशेषु गत्वा पुनश्च तां गता ॥५५॥
निजपुत्रेण साकं वै तां दृष्ट्वा हर्षिताऽभवम् ।
तां निजस्य सुतस्याऽर्थे विज्ञाप्य रहसि स्थिताम् ॥५६॥
तन्मात्रेऽपि तदा सर्वं तत्सम्बद्धं प्रभाष्य च ।
निर्णीतमिव निश्चित्याऽऽगता गता न तां पुनः ॥५७॥
सा कन्या मत्पुत्रयोग्या किं निवेदितवत्यपि ।
वद मे सर्वमेवाऽत्र किंगुणा किंप्रशिक्षणा ॥५८॥

कीदृशी सा बुद्धियुक्ता कलायुक्ता ततोऽस्ति सा ।
वद मे सर्वमेवाऽत्र यद्बोध्यं वै स्नुषाकृते ॥५९॥

**नारद उवाच—**

मातः सा कंभरालक्ष्मीर्नाम श्रुत्वाऽतिगौरवात् ।
प्रेमभावाद्धर्षिता साऽभवत्तथाऽश्रुसंयुता ॥६०॥
क्षणं भूत्वा धैर्ययुक्ता मां विहस्य समब्रवीत् ।
कच्चित् सुखं ममाऽर्हायाः कच्चिन्मां सा स्मरत्यपि ॥६१॥
किंवृत्तान्ता मम पूज्या कियद्भावा च मां प्रति ।
सा किं मह्यं यत्नवती प्रसन्ना किं च मां प्रति ॥६२॥
वद मह्यं महर्षे त्वं गुणस्थानां यथास्थिताम् ।
यद्वा ज्ञातव्यमेवाऽन्यत् कथितं मां निवेदय ॥६३॥
ततोऽहं चाऽवदं कन्यां श्रवणे दत्तमानसाम् ।
लक्ष्मि ! त्वां कंभरादेवी न वै विस्मरति क्वचित् ॥६४॥
भोजने त्वां सदा स्मृत्वा कृष्णं त्वां स्मारयत्यपि ।
क्वचित् क्वचिच्च ते वार्तामग्ना त्वद्गुणवर्णना ॥६५॥
स्नेहाश्रुभृतनेत्रा वै जायते किं वदामि ते ।
सुखं श्वश्र्वाः सदा चास्ते सुखिनीं त्वां प्रतीक्षते ॥६६॥
सर्वशोभनवृत्तान्ता देहगेहसुतान्विता ।
सर्वसम्पत्समृद्धा सा लक्ष्मि ! त्वां सम्प्रतीक्षते ॥६७॥
यथा पुत्रीं च सन्तुष्टां प्रति सा कम्भरा सदा ।
तथा त्वां प्रति चाधिक्यभावाऽऽस्ते कम्भरा सती ॥६८॥
त्वदर्थे सा यत्नवती कदाऽऽयान्मे सुतप्रिया ।
सदा प्रसन्ना चास्ते त्वां प्रतीश्वरी हि कंभरा ॥६९॥
क्वचिद् वदति कल्याणी स्नुषा मे किंव्रता भवेत् ।
कृष्णो मे तां विना नैव शोभते सदृशीं प्रियाम् ॥७०॥
इत्येवं वै मया मातः सर्वं तस्यै निवेदितम् ।
आशीर्वादाः प्रदत्ताश्च त्वदुक्ताश्च तदाऽवदम् ॥७१॥
प्रसन्ना सा स्नेहवती चास्ते सद्गुणशालिनी ।
इत्येवं चाऽवदं तस्यै सा पुनः प्राह मां नमः ॥७२॥
नमस्काराश्च मे तस्याः पादयोः सन्निवेदय ।
प्राणास्त्वास्ते तव पुत्रे तथाऽऽर्यायै निवेदय ॥७३॥
आत्मा तत्राऽऽगतोऽस्त्येव पूज्यायै सन्निवेदय ।
क्षन्तव्या बाल्यभावा मेऽनार्यायाश्चेति वेदय ॥७४॥
यादृशी तादृशी चास्मि पर्वतारण्यवासिनोः ।
पुत्री जाड्यमयी चाऽहं क्षन्तव्या चेति वेदय ॥७५॥
नाऽहं विद्यावती चार्ये नाऽहं कलानिधानिका ।
नाऽहं विज्ञानसम्पन्ना नाऽहं चातुर्यशोभना ॥७६॥
नाऽहं मायाकरी चापि नाऽहं तीक्ष्णप्रयोगिणी ।
नाऽहं कृष्णा कृष्णयोग्या तथापि मां न विस्मरेः ॥७७॥
पूज्यायाः पुत्रिका चाऽहं पूज्यापुत्रस्य पत्निका ।
कन्यकाऽस्मि द्रुतं स्नुषां विधेहि चाऽलमीदृशाम् ॥७८॥
वचनं कन्यकाप्रोक्तं दानकालो हि विद्यते ।
इत्युक्त्वा प्रददौ मह्यं मिष्टाऽमृतफलानि हि ॥७९॥
देयानि कम्भरालक्ष्म्यै तत्पुत्राय च विष्णवे ।
इत्युक्त्वा प्राणमन् मह्यं रहस्यं कथितं तव ॥८०॥
कृष्णं विना क्षणं नैव यापयत्येव सा सती ।
लक्ष्मीतुल्या तु सा लक्ष्मीर्नान्यतुल्या कदाचन ॥८१॥
सर्वतेजांसि पिण्डानि तत्स्वरूपे वसन्ति हि ।
उज्ज्वला तादृशी चास्ते यौवनोद्भेदनांकुरा ॥८२॥
साध्व्यवस्था सदा चास्ते चिदम्बराऽम्बरोत्तमा ।
शाश्वतिकनिसर्गा च सच्चिदानन्दपिण्डिका ॥८३॥
ब्रह्मसंस्थानिका चास्ते मुक्ताकृतिर्हरिप्रभा ।
द्वादशोत्तमवर्षा च पुरुषोत्तममानिनी ॥८४॥
स्नेहवेगा हरौ पातिव्रत्यभावा विराजते ।
हृदो मध्ये हरिश्चास्ते कृष्णलक्षणलक्षिता ॥८५॥
सर्वकलाऽभिसम्पन्ना किमु मातः प्रवर्णये ।
जानाति पाकशास्त्रं सा जानाति ग्रथनक्रियाः ॥८६॥
जानाति गृहकार्याणि गणकार्याणि यानि च ।
बालशास्त्रं प्रजानाति कलाः शृंगारजा अपि ॥८७॥
नेपथ्यरचनां सर्वां जानाति सुन्दरीक्रियाः ।
भृत्यकार्याणि सर्वाणि दास्यकार्याणि यान्यपि ॥८८॥
सेवाकार्याणि सर्वाणि मनोरञ्जनकानि च ।
नाट्यकार्याणि सर्वाणि नृत्यकार्याणि यानि च ॥८९॥
वाद्यकार्याणि सर्वाणि गीतिकार्याणि सर्वशः ।
उत्सवादीनि यावन्ति सभाकार्याणि सर्वथा ॥९०॥
व्याख्यानानि समस्तानि न्यायवाक्यानि वै तथा ।
आत्मबोधान् समग्रांश्च कला योगोद्भवांस्तथा ॥९१॥
जानाति सर्वसिद्धीश्च तत्त्वज्ञानं च वैद्यकम् ।
आयुर्वेदं विजानाति यज्ञकर्माणि सर्वशः ॥९२॥
सर्वान् वेदान् विजानाति सर्वान् विनिमयाँस्तथा ।
सर्वान् हेतूनृतून् सर्वान् विवृत्तिं परिणामकान् ॥९३॥
सर्वं शैल्प्यं विजानाति वक्ति सर्वाश्च नीतिकाः ।
सर्वच्छन्दांसि जानाति वंशोद्भवं गृहिक्रियाः ॥९४॥
आतिथेयं विजानाति पैत्र्यं दैवं समर्हणम् ।
सत्कारं स्वागतं चापि विजानाति च माननाम् ॥९५॥

परोपकारं दानं च विजानाति समुद्भवम् ।
स्नेहं प्रीतिं स्वामिभक्तिं पातिव्रत्यं वृषं निजम् ॥९६॥
प्रजानाति रसान् मिश्रान् मिष्टान्नानि समस्ततः ।
तक्रसंस्कारकरणं पयःपाकादिकं तथा ॥९७॥
विजानाति च वयनं शुद्धिं व्रतानि चांजसा ।
पण्डावती समास्ते सा दृश्यते च बहुश्रुता ॥९८॥
शारदा वा किमास्ते सा किं वा राधा हि रञ्जनी ।
रंगकलां विजानाति धेनुसेवादि वेत्ति च ॥९९॥
कृषिकार्यं सस्यपुष्टिं जानात्यपि वनानि च ।
सर्वौषधानि समिधो जानात्यारोग्यमित्यपि ॥१००॥
जलकलां विजानाति वह्निकलां प्रवेत्ति च ।
मन्त्रकलाः समग्राश्च प्रवासान् संप्रवेत्ति च ॥१०१॥
लाभाऽलाभौ सुजानाति पुरुषार्थचतुष्टयम् ।
सामदानादिकं चापि विजानाति विवेचनाम् ॥१०२॥
कथाः सर्वा विजानाति महोद्यानकलास्तथा ।
मिष्टमाधुर्यकण्ठी सा मिष्टस्वराऽर्तिविद्यते ॥१०३॥
स्वर्णवर्णा ब्रह्मवर्णा रक्तपत्करपल्लवा ।
उज्ज्वला शारदी ज्योत्स्ना यद्देहे वसति ध्रुवा ॥१०४॥
विशालोन्नतचन्द्राभभाला चन्द्रादिशोभना ।
कृष्णकेशी च कृष्णात्मा कृष्णैश्वर्यादिसिद्धिका ॥१०५॥
सर्वसम्पत्प्रभावा च ब्रह्मसौख्यसमन्विता ।
परब्रह्मप्रभाना च परब्रह्मप्रबोधिनी ॥१०६॥
स्मृद्धिकार्या हरौ भक्तिमती मुक्तानिका सदा ।
बालकृष्णोऽन्तरे त्वस्या राजते मोक्षकृत्प्रभुः ॥१०७॥
सा चास्ते कंभरे ! चतुर्दशविद्यासमाश्रिता ।
शंखचक्रगदापद्मधनुःशूलसमन्विता ॥१०८॥
पूर्वोक्तचिह्नयुक्ता च कमलाचिह्नशोभिता ।
लक्ष्मीचिह्नसहस्रैः शोभिता वर्ष्मणि सर्वतः ॥१०९॥
द्वासप्ततिप्रमुख्यानि मुख्यानि सन्ति तत्र ह ।
बालकृष्णस्य चाऽऽकण्ठं समुच्छ्रया विराजते ॥११०॥
गजहंसगतिश्चास्ते परहंसगतिः सदा ।
स्वर्णवासा सुगन्धा च कोट्यब्जसखिका तथा ॥१११॥
राधारमासतीपद्मामाणिकीपद्मजाश्रियः ।
शारदाद्याश्च सख्योऽस्या वर्तन्ते कृष्णपत्निकाः ॥११२॥
सर्वाभरणसंयुक्ता सर्वसंघटनाश्रिता ।
चमत्कारछटायुक्ता शीलकृष्णबलाऽस्ति च ॥११३॥
शुद्धसत्त्वमयी ब्राह्मी ब्रह्मानन्दाऽदना सदा ।
पायसाद्यदना साध्वी सती कृष्णार्थनिग्रहा ॥११४॥
कृष्णध्यानतपोयुक्ता बालकृष्णार्थतोषिणी ।
सर्वतृष्णाक्षयतोषा अमाया शुद्धिशोभना ॥११५॥
वेदविद्यासमध्याया महासात्त्वतसद्वृषा ।
मोक्षहार्दा चात्मनिवेदनहार्दा समर्पणे ॥११६॥
निर्वाणप्रेमपात्रा श्रीकृष्णप्रेमपरायणा ।
कृष्णसाधनकुशला चागामिबोधसन्मतिः ॥११७॥
कृष्णांगा चाच्युतधना ह्यमक्ते चञ्चला सदा ।
कृष्णचाञ्चल्ययुक्ता च तथा कृष्णार्थखेलना ॥११८॥
मुक्तिरुचिः कृष्णकथाप्रवादा स्थिरवृत्तिका ।
परब्रह्मप्रवृत्तिश्च पुरुषार्थत्रयान्विता ॥११९॥
सृष्टित्रयविधात्री च यज्ञभोगप्रहाफला ।
यज्ञस्वर्गमोक्षफला चाऽऽपूरकक्रियावती ॥१२०॥
ब्रह्मलाभविशेषा च सृष्टिसौख्यसमानिका ।
सूक्ष्माऽऽत्मानन्दमध्या च माधवश्वासयोगिनी ॥१२१॥
कृष्णयोगा सर्वबोधा सर्वज्ञोपासनावती ।
वृद्धाराधनिका नित्यं कृष्णशृंगारशोभना ॥१२२॥
कृष्णेतरे विरक्ता च नारायणे सुतोषिणी ।
मुक्ता सत्संगगृह्ना च कृष्णाऽऽशा कम्भरेच्छुकी ॥१२३॥
कदा वै कम्भरालक्ष्म्या गृहं पश्यामि चेच्छति ।
यदि नाऽहं च कृष्णार्था तदा मे जीवनं कुतः ॥१२४॥
यतो मे जीवनं चास्ते कृष्णाऽर्थाऽस्मीति तर्कगा ।
परब्रह्मोरुयुगलं गृहं मे चेतिनिश्चया ॥१२५॥
अनादिश्रीकृष्णनारायणवादा पदे पदे ।
प्रत्यक्षः श्रीबालकृष्णः प्रमाणं दिव्यशाश्वतम् ॥१२६॥
तस्या वै वर्तते मातस्तन्मूलान्यपराण्यपि ।
विशिष्टं सर्वमेवास्ते प्रमेयं तत्कृते सदा ॥१२७॥
परब्रह्म महातत्त्वं यत्समं नाधिकं परम् ।
तद्योगः सुप्रयोगोऽस्या कृष्णसिद्धान्तसिद्धिका ॥१२८॥
कृष्णतन्त्रसुसिद्धान्ता सर्व-स्व-प्रति-वर्जिता ।
बालकृष्णगृहबन्धा कृष्णाज्ञावेदसंभृता ॥१२९॥
साध्यो नारायणश्चाऽस्याः साधनं न शमादिकम् ।
बालकृष्णप्रिया कान्ता कान्तेतरवितर्जिनी ॥१३०॥
महाभागवतधर्मयमा कृष्णयमान्विता ।
कृष्णार्थे नियता कृष्णनियमा नाऽपराऽऽश्रिता ॥१३१॥
बालकृष्णाननध्याना कुंकुमवापिकासना ।
तव पुत्रे प्राणवती कृष्णे रतिक्रियावती ॥१३२॥
अनादिश्रीकृष्णनारायणकामावसायिनी ।
श्रीकृष्णस्यवल्लभातिप्रिया सा कृष्णवत्प्रिया ॥१३३॥

वर्तते सा महालक्ष्मि ! कम्भरे गुणसंभृता ।
कृष्णवियोगो रोगोऽस्या मानसं तेन कल्मषम् ॥१३४॥
त्वत्पुत्रेच्छाऽर्बुदयुक्ता हृदयेनाऽत्र राजते ।
सर्वस्नेहा कंभरायां प्रेमस्नेहा सुते तव ।
विवाहमानसा नित्यं प्रसन्नहृदयाऽपि च ॥१३५॥
सदा स्मरति त्वां मातः पुत्रं नित्यं पुनः पुनः ।
मां जगाद सा सद्वेगा शृणु त्वं कंभरे पुनः ॥१३६॥
यदा यज्ञोऽभवत् पिंगाऽरण्ये श्वश्रूस्तदाऽऽगता ।
स्नुषाभावं प्रदर्श्यैव स्वांके नीतवती च माम् ॥१३७॥
राशियानप्रदेशेषु गत्वा पुनः समागता ।
मां निजस्य सुतस्याऽर्थे विज्ञाप्य रहसि स्थिताम् ॥१३८॥
साऽक्षतं चन्द्रकं गुप्तं कृत्वा गता गतैव सा ।
नाद्याऽपि त्वागता माता पूज्याऽऽर्या पारमेश्वरी ॥१३९॥
कदा चायास्यति श्रीशा वद मे नारद द्रुतम् ।
कथनीयाः प्रणामा मे चेत्यवदत् पुनः पुनः ॥१४०॥
मातः सर्वगुणोपेता सर्वकार्येषु शिक्षिता ।
गृहकार्यनिपूणा सा दानयोग्या प्रकाशते ॥१४१॥
तस्माच्छीघ्रं प्रगत्वैवोत्सवपत्रानुबोधितम् ।
चतुर्थीदिवसं मत्वा कुरु तयोर्हि मंगलम् ॥१४२॥
इत्युक्त्वा राधिके विप्रो नारदस्तां प्रणम्य च ।
स्वासने सम्प्रयातश्च विश्रान्तिं चाप्तवान् पुनः ॥१४३॥
कंभरा शान्तिमापन्ना सन्तुष्टा मुमुदे तदा ।
अमृताऽपि प्रमोदं चानुमोदं प्रददौ तदा ॥१४४॥
बालकृष्णः प्रसन्नश्चाऽभवत् श्रुत्वा ह्युदन्तकम् ।
सुष्वुपुश्च ततः सर्वे सुखं चतुर्दशीनिशि ॥१४५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सरहस्यलक्ष्म्युक्तोदन्तं नारदो बालकृष्णाय प्राह, ततः कंभरा-देव्यै प्राहेत्यादिनिरूपणनामा षट्सप्तत्यधिकद्विशततमोऽध्यायः ॥ २७६ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिकेऽमायां प्रातर्गोपालकन्यका ।
विप्रकन्या युवत्यश्च प्रजगुर्मंगलानि वै ॥ १ ॥
सुवासिन्यस्तथा वृद्धा बालिका मंगलात्मकम् ।
योगपत्रागमं श्रुत्वा प्रजगुर्मंगलानि वै ॥ २ ॥
कुंकुमवापिकाक्षेत्रे बृहस्पतेः शुभागमात् ।
हरेर्मंगलमाश्रुत्य जगुर्गीतीर्गृहे गृहे ॥ ३ ॥
ब्रह्मप्रियाः समस्ताश्च तथैव सर्वकन्यकाः ।
कृष्णप्रिया जगुर्गीतीः कान्तस्य मंगलावहा ॥ ४ ॥
गोप्यः सर्वा मिलित्वा चाऽऽययुः श्रीकंभरागृहम् ।
साध्व्यश्च ब्रह्मचारिण्यो गायन्त्यो मंगलानि वै ॥ ५ ॥
क्षत्रपत्न्यो वैश्यनार्यः पाटलाश्चान्यसेविकाः ।
महोत्साहभरा गीतीर्गायन्त्यश्चाययुर्गृहम् ॥ ६ ॥
देव्यो नित्यनिवासिन्योऽक्षरक्षेत्रं समुत्सुकाः ।
श्रुत्वा हरेर्लग्नवार्तां गायन्त्यश्चाययुर्गृहम् ॥ ७ ॥
कामरूपधराः सख्यश्चतुःखनिसमुद्भवाः ।
कामवल्ल्यश्च गायन्त्यस्त्वाययुः कृष्णमन्दिरम् ॥ ८ ॥
अश्वपट्टसरस्तीर्थनिवासिन्यश्च मातृकाः ।
सुराण्यश्च गुरुं लग्नं श्रुत्वा ज्ञात्वा सुमंगलम् ॥ ९ ॥
गायन्त्यो दिव्यवेषाश्च कृष्णमन्दिरमाययुः ।
आर्ष्यः सर्वाः पूजनीया राजपत्न्यश्च कन्यकाः ॥१०॥
कुंकुमवापिकानार्यो गायन्त्यस्तत्र चाययुः ।
सर्ववर्ण्युवत्यश्च सर्वा नार्यः समाययुः ।
सतीं श्रीं कंभरालक्ष्मीं कृतस्नानार्हणां च ताः ॥११॥
प्रणम्य कानके सौधे निषद्य मंगलानि वै ।
बालकृष्णस्य कृष्णस्य कीर्तिमयानि सञ्जगुः ॥१२॥
कृतस्नानार्हणं मात्रा कृतमंगलचन्द्रकम् ।
कुंकुमाऽक्षतयुग्भालं कृतशृंगारमच्युतम् ॥१३॥
भ्रातृपत्न्या कृतवेषं परमेशं प्रियं प्रभुम् ।
गायन्त्यो योषितः सर्वा वर्धयामासुरुत्सुकाः ॥१४॥
चक्रुस्ताश्चन्द्रकं भाले साऽक्षतं पुष्पवर्धनम् ।
प्रगीय गीतिकाश्चापि प्रदर्श्याऽऽनन्दमान्तरम् ॥१५॥
आशीर्दत्वा गुरुं बृहस्पतिं नत्वा कृताह्निकम् ।
पीत्वा मात्राऽर्पितं दुग्धं सशर्करं सकेसरम् ॥१६॥
गृहीत्वा ताम्बूलमिष्टं शुभमुक्त्वा ययुर्गृहम् ।
गृहे गृहेऽत्र सौराष्ट्रे कृष्णोत्सवस्य वार्तिका ॥१७॥
बृहस्पतेर्नारदस्याऽऽगमश्चाऽप्रसरद् द्रुतम् ।
सर्वाः प्रजास्तु तच्छ्रुत्वा प्रापुर्हर्षं महोत्सवम् ॥१८॥
आनन्दमग्ना अभवन् दर्शनार्थं समागमन् ।
मांगलिकानि तूर्याणि त्ववाद्यन्त च मन्दिरे ॥१९॥
सुरवाद्यानि सर्वाणि राजवाद्यानि यानि च ।
गृहवाद्यानि यावन्ति देशवाद्यानि यानि च ॥२०॥
करवाद्यानि च श्वासवाद्यानि पावनानि च ।
दण्डवाद्यानि सर्वाणि विद्युद्वाद्यानि यानि च ॥२१॥

अंगवाद्यानि च संगप्रवाद्यानि च यानि च ।
प्रभिन्नदेशवाद्यानि त्ववाद्यन्त समन्ततः ॥२२॥
मिष्टा वै शंखिकानादा जलयन्त्रस्वनास्तथा ।
तारस्वना अजायन्त वंशीस्वना गृहे गृहे ॥२३॥
गायकाश्चापि गायन्ति नृत्यन्ति चाप्सरःसमाः ।
नार्यस्तदा बालकृष्णोत्सवं श्रुत्वाऽतिहर्षिताः ॥२४॥
संनृत्यन्ति मयूराश्च कूजन्ति कोकिलास्तथा ।
शकुनानि प्रगायन्ति शुका मेनाश्च सारसाः ॥२५॥
प्रद्योतन्ते ग्रहाश्चापि तेजस्विनश्च वह्नयः ।
साधवः स्नेहतेजोभिर्व्याप्तास्तत्कीर्तनं जगुः ॥२६॥
भट्टभूसुरविद्याश्रा विद्वांसो वेदवेदिनः ।
सामगीतीस्तदाऽगायन् चारणाः कवितां जगुः ॥२७॥
अन्ये जय जय त्वं श्रीकृष्णेत्यूचुः प्रभुं प्रति ।
एवं वै राधिके हर्षवाचोऽभवन् जने जने ॥२८॥
श्रुत्वाऽन्ये बालकृष्णस्योत्सवपत्रं समागतम् ।
गुरुं च नारदं श्रुत्वा दर्शनार्थमुपाययुः ॥२९॥
आशीर्वादान् वदन्तश्च चिरंजीवेतिवादिनः ।
अपि भेका भेकसमा गालयन्त्रमनादयन् ॥३०॥
ओष्ठयन्त्रं तम्मरिकासमाश्चाऽऽवादयँस्तदा ।
करतालं वादयन्तो जयवादान् व्यधुश्च ते ॥३१॥
किं बहुना राधिकेऽत्र कथितेन तवाऽग्रतः ।
धर्मसंस्थापनार्थाय गृहधर्मं ग्रहीष्यति ॥३२॥
विशिष्टं यत्परं तत्त्वं विशिष्टं सर्वदाऽस्ति तत् ।
आवेदयितुं लोकेभ्यो गृहधर्मं चरिष्यति ॥३३॥
इत्येवं संविचिन्त्यैव लग्नपत्रकृतोत्सवम् ।
प्रकाशं कर्तुमिच्छन्तो मुदा रासोत्सवं व्यधुः ॥३४॥
नरो नारी नरो नारी नरो नारी भ्रमात्मकाः ।
भ्रमन्तोऽपि च गायन्तो बालकृष्णगुणान् जगुः ॥३५॥
दृष्ट्वा कुंकुमवाप्यां तद् दिव्यदृष्ट्या पुरादिषु ।
सौराष्ट्रे सार्वभौमे च गुरुर्विस्मयमावहत् ॥३६॥
अहो भागवती भक्तिर्भूरिस्नेहमयी भुवि ।
महःपत्रप्रसंगेन मया दृष्टा जनेष्विह ॥३७॥
ईदृशा भक्तिमन्तोऽत्र लोके मुक्ता न संशयः ।
येषां हृत्सु हरेर्भावो दिव्यातिदिव्यकोऽस्ति यत् ॥३८॥
अहो नारायणी धन्या लक्ष्मीः सा शिवकन्यका ।
या वै प्राप्स्यति धामेशं ख्यातं कान्तं हि शाश्वतम् ॥३९॥
राधातोऽपि परं चास्याः सोपानं ज्ञायते मया ।
यस्याः पतिः परश्चास्ते सोर्ध्वसोपानगा यतः ॥४०॥
कन्याऽपि कृष्णपत्नी चेज् जगन्माता प्रगद्यते ।
वृद्धापि कुब्जिका लोके कृष्णयोगा प्रशस्यते ॥४१॥
वृन्दा तुलसी दैत्यस्य जलंधरस्य वै तथा ।
शंखचूडस्य पत्न्यौ ते विष्णुयोगे रमानिभे ॥४२॥
पूजनीये जगद्वन्द्ये मोक्षदेऽभवतां सदा ।
अहो कृष्णस्य माहात्म्यं ब्रह्मप्रिया असंख्यकाः ॥४३॥
वर्तन्तेऽस्यास्तु वै लक्ष्म्या गौरवं नैव यान्ति ताः ।
लक्ष्म्यर्थं लिख्यते लग्नपत्रं यन्नाऽन्यसदृशम् ॥४४॥
लक्ष्म्यर्थं गम्यते येन नान्यसमो बृहस्पतिः ।
लक्ष्म्यर्थं गीयते त्वद्य यशोऽपि नान्यसदृशम् ॥४५॥
लक्ष्म्यर्थं हर्षजननं नान्यतुल्यमिदं पुरा ।
लक्ष्म्यर्थं बालकृष्णस्य हृदयं नान्यसदृशम् ॥४६॥
लक्ष्म्यर्थं लौकिकी वाणी दिव्या चाद्य विभाव्यते ।
लक्ष्म्यर्थं लोकचाञ्चल्यं कल्याणकृद् विलोक्यते ॥४७॥
अहो लोकस्य लोकत्वं लक्ष्मीकृष्णावलोकनात् ।
याथार्थ्यं भजते त्वद्य दिव्यालोकात्मकं हि यत् ॥४८॥
अहो मे भाग्यमूर्ध्वं वै तत्स्थानं सार्थकं मम ।
गुरुश्चोर्ध्वः सदा जातो लक्ष्मीपत्रप्रप्रेषणात् ॥४९॥
इत्याश्चर्यमयो विप्रो देवानां स बृहस्पतिः ।
राधिके वीक्ष्य सर्वं तद् बालकृष्णाश्रितोऽधिकः ॥५०॥
महाभागवतो भक्तश्चात्मनिवेदितां ययौ ।
स्वरूपं हरये समार्पयत् सर्वस्वदानतः ॥५१॥
अथ गन्तुमना बृहस्पतिर्गोपालकृष्णकम् ।
प्राहाऽद्य काशिकां यातुं समिच्छामि निवेदय ॥५२॥
अमायां तत्र शिवराट् मत्प्रतीक्षां करोति हि ।
तथास्त्विति च गोपालः प्राह चान्यद् बृहस्पतिम् ॥५३॥
याहि शीघ्रं गुरो ! काशीं शिवेश्वरं निवेदय ।
भवद्वाञ्छा प्रपूर्णाऽस्तु पालयामि वचस्तव ॥५४॥
लग्नपत्रं प्रपूज्य स्वीकृतवानस्मि भावतः ।
भवद्विधानां देवानां निश्चितं तत्सुखावहम् ॥५५॥
विपरीतं वैपरीत्ये परिणमेत कष्टदम् ।
कन्या योग्या कुमारोऽपि योग्योऽस्तीति तथास्त्विति ।
मौखिकीं स्वीकृतिं प्रोक्त्वा प्रतिपत्रं ददौ तदा ॥५६॥

श्रीराधिकोवाच—

कीदृशं योगपत्रं तत् कीदृशं प्रतिपत्रकम् ।
तदहं श्रोतुमिच्छामि चावेदनं तदुत्तरम् ॥५७॥

श्रीकृष्ण उवाच—

शृणु राधे कथयामि तूभये पत्रिके शुभे ।
यथार्थे लिखिते गांभीर्यादिसद्गुणमण्डिते ॥५८॥

स्वस्तिश्रीश्वरपूजनीयरजसि ब्रह्माऽक्षरक्षेत्रके,
श्रीमत्कुंकुमवापिकाऽभिधवरे यो राजते श्रीपतिः ।
यद्गेहे परमेश्वरो विलसति श्रीबालकृष्णो हरिः,
कोट्यब्जेश्वरवन्दितो विजयते गोपालकृष्णः प्रभुः ॥५९॥

यो वैराजपिता भवन्ननु महाविष्णुः स्वयं राजते,
यः सृष्टौ प्रथमं मनुष्यचरितश्चास्ते हरेराज्ञया ।
सृष्टिस्थ्यर्थितयद्यशाः शुभगुणाऽऽवासस्त्विह ख्यायते,
तस्मै वै भवते नमामि सततं श्रीकंभरास्वामिने ॥६०॥

येषां पुण्यसुपुञ्जशेवधिरिह प्राकट्यमापद्यते,
येषां साधुजनाशिषोऽतिबहुलाः काले फलन्त्यायतौ ।
येषां यज्ञतपःफलं ह्युदयते वृद्धोपसेवाफलं,
तेषां त्वादृशविष्णुना सह भवेत् सम्बन्धिता दुर्लभा ॥६१॥

यत्पुत्रस्य पदेऽर्पयन्ति कृतिनः पुण्यानि शंदान्यपि,
धामेशाश्च समर्पयन्ति मुकुटान् मूर्धस्थितान् पूजने ।
ईशा दिव्यसमृद्धिमुत्तममणीन् रत्नादिकं देवता,
भूपा राज्यमनुत्तमं क्षितिधराः स्वर्णादिकं श्रेष्ठिनः ॥६२॥

तस्मै चाक्षरवासिने भगवते सर्वेश्वरेशाय वै,
योग्यायाऽतिगुणालयाय हरये श्रीबालकृष्णाय ह ।
काशीस्थस्तु शिवेश्वरो हि सुरराट् कैलासवासीश्वरः,
कन्यां मे प्रददामि दानमनघां श्रीपार्वतीशो न्वहम् ॥६३॥

या लक्ष्मीर्हरिधामतस्त्विह पुरा नारायणेच्छावशा,
तद्भक्तस्य हरस्य मे शुभगृहे प्राकट्यमासादिता ।
सेयं साम्प्रतमस्ति योग्यवरणा दानप्रदानोचिता,
तस्या दानविधिश्चतुर्थदिवसे मार्गस्य शुक्ले दले ॥६४॥

पुण्यात्पुण्यतमे मुहूर्तकवरे तद्दानकार्योत्सवे,
यावच्छैष्ट्यविशेषित शुभतमे चाऽस्माभिरानिश्चिते ।
सत्सम्बन्धिसुहृत्प्रसन्नहृदयैरागत्य मन्मन्दिरं,
श्रीमद्भिः स्वसुतेन हस्तधरणाद्यात्मा विनिर्वर्त्यताम् ॥६५॥

भक्तोऽहं भुवि सात्वतोऽत्र च हरः श्रीबालकृष्णस्य वै,
यावच्छक्ति सुसेवनं विधियुतं वः संविधास्येऽन्वहम् ।
निर्विघ्नं गणनायकस्य कृपया सम्पारमाप्त मखं,
द्रक्ष्यामि सुतोषण तत इमां गृह्णन्तु मत्प्रार्थनाम् ॥६६॥

या वै मे मतबोधिका हि लिखिता पत्री मया शोभना,
श्रीमत्कुंकुमबिन्दुमंगलपदाऽऽसिक्ता प्रदानार्थिका ।
द्व्यर्षैः साक्षियुता बृहस्पतिकरे दत्वा मया प्रेषिता,
सा वो हस्तगता करोतु च सुते वो मत्सुता मंगलम् ॥६७॥

शीघ्रं देवगुरुं कृतादरममुं सम्प्रेषयित्वा च माम्,
आश्वासं हि समर्प्य चोर्ध्वकरणे निर्बन्धनं सोत्सवम् ।
कर्तुं योग्यतमान् हि नो विदधतु श्रीकाशिकावासिनो,
भक्तान् ब्रह्मपरान् हरिश्रुतधरान् नः सात्त्वतान् सेवकान् ॥६८॥

यद्वाऽन्यत् कुशलादिशोभि च दिनं यच्छ्रीमतां शोभनं,
तद्वा सद्गुरुणा समं द्रुततरं दानार्हमावेद्यताम् ।
अन्यच्चापि यथाकुलं स्वसरणिप्राप्तं मदर्हं च यत्,
तत्सर्वं विनिवेद्यतामिति वदन् शंभुः शमं यामि ओम् ॥६९॥

इत्येवं राधिके दानपत्री शंकरप्रेषिता ।
मयोक्ता तेऽनुरोधाद्वै शृणूत्तरप्रपत्रिकाम् ॥७०॥
श्रीमद्गोपालकृष्णो यां लिलेख प्रति शंकरम् ।
सर्वमंगलमांगल्यां बह्वर्थसंभृतां शृणु ॥७१॥

ओं श्रीकृष्णनिवासभूतसुभगागोलोकभूमौ पुरा,
श्रीकृष्णात् प्रकटीभवन् स्ववनिताऽर्धांगश्च कैलासके ।
स्वीये धाम्नि शिवः सदाशिवभिधः संराजते वैष्णवो,
वैकुण्ठे हरिसन्निधौ सवनितो नृत्यं चकारोत्तमम् ॥७२॥

श्रीलक्ष्म्या विदितो ह्यकालगमनो विघ्नो विलासे हरेः,
शप्तश्चापि मनुष्यभावनियतः पत्न्या युतः संभव ।
श्रुत्वा श्रीहरिरेव भक्तमनुगोऽभूच्छ्रीं विहायाऽपि वै,
सा लक्ष्मीर्हरिलब्धिलोभमनुगा चास्ते भवत्पुत्रिका ॥७३॥

एवं वै शिवरूपरूपिण इह श्रीपार्वतीसत्पते-
र्लक्ष्म्याश्चापि करोतु कृष्णभगवान् सन्मंगलं सर्वदा ।
त्वत्पुत्रश्च गणाधिपः सवनितो भद्रं क्रियान्मंगलं,
श्रीमत्कुंकुमवापिकानिवसतिर्गोपालकृष्णोऽर्थये ॥७४॥

मद्भाग्यं बहुलीकृतं हि भवता दत्वा सुतां शार्ङ्गिणे,
मत्पुत्राय नरायणाय हरिणे श्रीबालकृष्णाय ह ।
सम्प्रेक्षवाऽपि बृहस्पतिं सुरगुरुं सम्पावितं मद्गृहं,
तेनाऽप्यर्पितदानपत्रमिह वै प्रेम्णा मयाऽङ्गीकृतम् ॥७५॥

तत्राऽऽदिष्टशुभोत्तमाऽवसरके सम्प्राप्य काशीं पुरीं,
शंभो ! दर्शनमुत्तमं हि भवतः प्राप्स्येऽद्य शं शान्तिदम् ।
एवं सर्वविधानवैधमपि सन्निर्वर्त्य तीर्थस्थले ।
दम्पत्योः खलु शाश्वतं विधिकृतं संलोकयिष्ये सुखम् ॥७६॥

यत्तत्राऽहमुमापतेऽम्बरविमानैरागमिष्ये द्रुतम् ,
मध्याह्नोत्तरमेव शुक्लगतृतीयायां कुटुम्बाऽब्जयुक् ।
अन्ये ये च नृपाः क्षितौ कृतमखाः श्रीबालकृष्णे रता-
स्तत्साहस्रमपीह वाह्निमनुजैः कोट्यर्बुदैः संगतम् ॥७७॥
मुक्ता धामनिवासिनोऽप्यगणिता नारायणा ईश्वराः,
सिद्धा आर्षगणास्तथा च पितरो देवास्तथा मानवाः ।
दिव्या देहयुजोऽपि चेतनगणा भूतानि तीर्थानि वै,
देव्यः सृष्टिपरस्थिता अपि परार्धोर्ध्वाः प्रयास्यन्त्यपि ॥७८॥
कन्याः कोट्य इह स्थिता अपि तथा ब्रह्मप्रिया योषित-
श्चाऽऽयास्यन्ति भवत्सुमन्दिरमनादिब्रह्मयोगोत्सुकाः ।
सर्वज्ञे शिवरूपिणि त्वयि मया किं चान्तरं गूढवद्,
वक्तव्यं कुशले सुयोगिनि हरे वैशालभूमिस्थिते ॥७९॥
इत्येवं समभिप्रणम्य च तथा सम्प्रार्थ्य काशीपतिम्,
पत्रं चेदमथाऽर्पयामि गुरवे सत्कृत्य रत्नाऽयुतैः ।
न्यूनाऽऽधिक्यमथोत्तरं ह्यरुचिरं मिष्टं गरिष्टं कटु,
क्षन्तव्यं मम सर्वथा विलसितं युक्तात्मना शंभुना ॥८०॥
इत्येवं राधिके पत्रोत्तरं ददौ हराय च ।
श्रीमद्गोपालकृष्णो वै नारदेनाऽनुमोदितः ॥८१॥
बृहस्पतेर्महापूजां चकार रत्नकोटिभिः ।
सद्वस्त्रैश्चन्दनैश्चापि मौक्तिकैर्हारतर्पणैः ॥८२॥
भोजनैः पानसत्कारै रञ्जयामास सद्गुरुम् ।
विमानं प्रददौ रम्यं संभृतं रत्नभूषणैः ॥८३॥
कल्पलतान्वितं रम्यं समारुरोह सद्गुरुः ।
प्रतिपद्दिवसे प्रातर्ययौ काशीं विहायसा ॥८४॥
ददौ पत्रोत्तरं पत्रं शंभवे मुमुदे हरः ।
वाचयामास मांगल्यपत्रं च मुमुदे पुनः ॥८५॥
नमस्कारादिकं चापि विनयं स्नेहमात्मनि ।
श्रीमद्गोपालकृष्णस्य बालकृष्णस्य वै तथा ॥८६॥
लोमशस्य तथाऽन्येषां कथयामास सद्गुरुः ।
आगमोऽत्र महान् भावी वाह्निन्याः सार्वलौकिकः ॥८७॥
उभयोः ख्यातयोः सतोः प्राधान्येन जगत्त्रयम् ।
आगमिष्यति वै दाने समये गुरुरब्रवीत् ॥८८॥
शंभुः प्रसन्नहृदयः प्राह गुरुं यथाबलम् ।
पुण्यपात्रस्यांऽगणे वै भवेत् त्रैलोक्यमागतम् ॥८९॥
यथायोग्यं करिष्यामः सेवां लोकोत्तरां शुभाम् ।
कोटिकोट्यर्बुदाब्जा मे गणा लोके वसन्ति च ॥९०॥
कोटिकोट्यर्बुदा देव्यः सतीरूपा भवन्ति मे ।
संकर्षणो महाकालो महारुद्रोऽपि रुद्रकः ॥९१॥
हरोऽहं मम रूपाणि भवन्ति कोटिशोऽपि च ।
मम साक्षात् पिता कृष्णो गोलोको मम सर्वथा ॥९२॥
महामाया मम सृष्टिर्हनूमान् मम वै सुतः ।
गणेशश्चेति कोट्यब्जार्बुदाब्जाः पार्षदा मम ॥९३॥
सर्वे मे शुभकृच्चास्ते भवान् देवगुरुस्तथा ।
किं न्यूनं मे वर्ततेऽत्र सर्वं सम्पन्नमस्ति मे ॥९४॥
इत्युक्त्वा त्वासनस्थं तं बृहस्पतिं प्रपूज्य च ।
शंकरो भोजयामास कारयामास मण्डपम् ॥९५॥
वादित्राणां निनादाँश्च कारयामास दिग्गतान् ।
दूतान् सम्प्रेषयामासाऽऽमन्त्रणार्थे जगत्त्रये ॥९६॥
कुंकुमपत्रिकायुक्तान् शंकरो लोकशंकरः ।
राधिके त्वभवन् सर्वमंगलानि हरालये ॥९७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्तानेऽमा-वास्यायां गोपालकृष्णालये त्रैलोक्ययोषितां मंगलगीतयो गृहे गृहे महोत्सवाः, बृहस्पतेः सम्मानं दानपत्रिकावर्णनं तदुत्तरं प्रगृह्य प्रपूजितबृहस्पतेः काशीं प्रत्यागमनं, त्रैलोक्ये शंभुकृताऽऽमन्त्रणं चेत्यादिनिरूपणनामा सप्तसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७७॥

**श्रीकृष्ण उवाच—**

राधिके ! श्रीकृष्णनारायणस्य मंगलानि वै ।
प्रतिपद्दिवसे नार्यो जगुः प्रातः शुभानि हि ॥ १ ॥
वादित्राणि समस्तानि त्ववाद्यन्त समस्ततः ।
गृहे गृहांगणे रंगवल्ल्यः प्रपूरिता जनैः ॥ २ ॥
तोरणानि सुरम्याणि नवपल्लवभाञ्जि च ।
गृहद्वार्षु प्रमदाभिर्निहितानि समस्ततः ॥ ३ ॥
घृतदीपाः कृताश्चापि ध्वजाः पताकिका धृताः ।
बद्धा व्योमप्रदेशेषु बावटा रंगशोभिताः ॥ ४ ॥
कुंकुमवापिकाशोभा समस्ता धामसदृशी ।
प्रजाभिः संप्रहृष्टाभिर्विहिता चित्रयोजनैः ॥ ५ ॥
रथ्याश्च राजमार्गाश्च गौणमार्गाः प्रतोलिकाः ।
मार्जिताश्च जलैः सिक्ता रंगचित्रैश्च चित्रिताः ॥ ६ ॥
आपणानि कृतान्येव तोरणैः रंगवल्लिभिः ।
दर्भाऽङ्कुरैर्नागवल्लीपत्रैर्मंगलभाञ्जि च ॥ ७ ॥
आलयाश्च मन्दिराणि प्रासादाः सौधपंक्तयः ।
शाला विशालाश्चारामाः शृंगारिता जनैः शुभाः ॥ ८ ॥
अश्वपट्टसरश्चापि शृंगारितं च रंगकैः ।
तारणैः शुभदीपैश्च चत्वरा विमलीकृताः ॥ ९ ॥

वितर्दिका वेदिकाश्च द्वारशाखाः सुदुर्गकाः ।
गोपुराणि च रम्याणि कलशैः सप्तसंख्यकैः ॥१०॥
सपत्रपल्लवसूत्रफलैः शृंगारितानि वै ।
बालकृष्णालयस्तत्र चन्द्रकान्तादिभिः शुभः ॥११॥
कल्पलतासमारामैः फलिवृक्षादिभिस्तदा ।
सूर्यकान्तादिमणिभिः शृंगारितः समन्ततः ॥१२॥
सहस्रैककलशो यः प्रासादः श्रीहरेर्हि सः ।
शृंगारितोऽभितो नव्यैः शोभाद्रव्यादिभिस्तदा ॥१३॥
वैकुण्ठं चापरं वा किं गोलोकश्चापरोऽपि किम् ।
ब्रह्मधामाऽपरं वा किं चाऽमृतं धाम वेतरत् ॥१४॥
स्वर्गो वाऽन्यत् समस्तं किं तर्कितः स प्रजाजनैः ।
एवंविधायां पुर्यां वै नार्यो नरा नवाम्बराः ॥१५॥
नवभूषा नवरंगा नवशृंगारशोभनाः ।
नवोत्साहा नवबला नवर्द्धयोऽभवँस्तदा ॥१६॥
नवभोजनपानाश्च नवकीर्तनगायनाः ।
नवसंकल्पकोदारा नवसद्गुणशालिनः ॥१७॥
अभवन् पशवश्चापि नवोत्साहाश्च पक्षिणः ।
धेनवो नवदुग्धाश्च महिष्यो नवतेजनाः ॥१८॥
वृषभा नववीर्याश्च गजाद्या नवकौतुकाः ।
अश्वाद्या नवहर्षाश्चाऽभवन् वै प्रतिपद्दिने ॥१९॥
वृक्षा नवफलाश्चापि वल्लिका नवपुष्पिकाः ।
शाखाः सर्वनवरसाः सस्यानि कणिशानि च ॥२०॥
मधूनि नवपुष्टानि तदाऽभवन् समन्ततः ।
विप्राश्च नवहर्षा वै साधवो नवभक्तयः ॥२१॥
विद्वांसो नवमतयस्तत्त्वानि नूतनानि च ।
तैजसानि नवतेजोमन्ति तदाऽभवन् खलु ॥२२॥
विशेषतस्तु लोकानां निर्मलान्यान्तराणि वै ।
भावोद्रेकादभवँश्च शाश्वताऽऽनन्ददानि हि ॥२३॥
इत्येवं राधिके कुंकुमवापी नूतना यथा ।
नवयौवनसम्पन्ना सर्वशृंगारशोभिता ॥२४॥
लक्ष्मीर्दिव्या नवा चायास्यतीति नूतनाऽभवत् ।
नूतनायाः सपत्न्या वै नवहर्षोपलब्धये ॥२५॥
अनादिश्रीकृष्णनारायणस्य स्नेहभूतये ।
मण्डपश्चाक्षरधाम्नो दिव्यस्तत्र समाययौ ॥२६॥
नेमे श्रीभगवन्तं स नेमे गोपालकृष्णकम् ।
नत्वा च मातरं मुक्तस्वरूपो मण्डपः स च ॥२७॥
अनादिश्रीकृष्णनारायणसंकल्पमात्रतः ।
दिव्यं मुक्तस्वरूपं च दर्शयित्वा क्षणान्तरे ॥२८॥
प्रार्थयत् परमात्मानं प्रसादयितुमागतः ।
यथाऽऽज्ञं मण्डपं रम्यं भवाम्यक्षरधामगम् ॥२९॥
हरिः प्राह तथाऽस्त्वेवं तदर्थं वै स्मृतो भवान् ।
करोतु मण्डपं रम्यं यथाऽक्षरेऽस्ति राजते ॥३०॥
ओमित्याज्ञां समगृह्य राधिके ! मण्डपः स्वयम् ।
महामुक्तो मण्डपात्मा माण्डपं रूपमग्रहीत् ॥३१॥
रूपद्वयं समगृह्य स्वल्पं च महदित्यपि ।
स्वल्पं रूपं बालकृष्णप्रासादाग्रे स्थिरं ह्यभूत् ॥३२॥
शतैककलशाढ्यं च शतस्तंभसुशोभितम् ।
सप्तभौमं च परितो मध्ये चाम्बरमार्गवत् ॥३३॥
उपरि मध्यकलशेनाऽमूल्येन विराजितम् ।
यथा चान्द्री कौमुदी च पृथ्व्यां पूर्णातिथौ भवेत् ॥३४॥
तथाऽस्य धवला कान्तिः पयोनिभा समन्ततः ।
आक्षरे भूतले तत्र प्रासरच्चान्द्रलोकवत् ॥३५॥
मध्ये सूर्यमणिर्यत्र नैसर्गिको विराजते ।
सहस्रकिरणैः सौम्यैर्मृदुभिः संप्रकाशते ॥३६॥
विद्युन्नालानि पार्श्वेषु प्रदीपकान्तिभाञ्जि च ।
दुग्धधावल्यभावन्ति विद्योतन्तेऽभितस्तदा ॥३७॥
मणयो नद्धभावाश्च श्वेता रक्ताश्च कर्बुराः ।
नीलाः पीताश्च हरिताः कपीशाश्चित्रभानवः ॥३८॥
प्रतिकोणं प्रणद्धास्ते प्रकाशन्ते हि तारकाः ।
यथा तथा विचित्राश्च तत्पार्श्वे पत्रवल्लिकाः ॥३९॥
ओषधयः पत्रदीपाः प्रकाशन्ते स्थले स्थले ।
स्तम्भाः कुण्डसमाधाराः कुण्डाः पट्टीविराजिताः ॥४०॥
पट्टिका जलवाहिन्यो गुप्ततेजःप्रणालिकाः ।
गुप्ततेजःप्रवाहाश्च प्रकाशन्ते यथास्थलम् ॥४१॥
वंशाः स्तंभाः पुत्तलिकाः कम्मानिकाश्च तोरणम् ।
शाखाः प्रशाखा वंशाद्याः प्रकाशन्ते प्रवाहकैः ॥४२॥
तेजसां न्यूनता नास्ति प्रकाशन्तेऽक्षरे यथा ।
एक एव हि मुक्तोऽसौ मण्डपात्मा यतोऽस्ति वै ॥४३॥
तेजांसि शीतभावन्ति चोष्णभावन्ति वै तथा ।
शीतोष्णभाप्रभावन्ति चाऽनुष्णशीतभानि च ॥४४॥
मिष्टामृतस्पर्शवन्ति ब्रह्मानन्दप्रदानि च ।
सर्वेन्द्रियाणामानन्दप्रदान्यपि भवन्ति च ॥४५॥
इत्येवं दीपयुक्तेऽत्र महातेजस्विमण्डपे ।
स्तंभेषु कदलीरूपेष्वखण्डपत्रयोगिषु ॥४६॥
शतेष्वपि सप्तभौमस्थितेषु प्रविभागिषु ।
सप्तरंगानि दिव्यानि वेष्टितान्यम्बराणि वै ॥४७॥

तन्मध्ये तेजसां वासे प्रवाहे सर्वसृष्टयः ।
विलोक्यन्ते स्तंभमध्ये मेरौ यथा सुराश्रयाः ॥४८॥

क्वचित् स्तंभे हि मुनयः क्वचित् सिद्धा भवन्ति च ।
क्वचित्तिष्ठन्ति मुक्ताश्च हर्याकारा अनन्तशः ॥४९॥

क्वचित्तिष्ठन्त्यवताराः क्वचित्तिष्ठन्ति पार्षदाः ।
क्वचिन्मुक्तानिकाः साध्व्यो ब्रह्मप्रियाः क्वचित् खलु ॥५०॥

क्वचित्कृष्णस्य गोलोकः क्वचिद्वैकुण्ठमित्यपि ।
क्वचिच्चाऽव्याकृतं धाम क्वचित्प्रकाशतेऽमृतम् ॥५१॥

क्वचिद्धिरण्मयं धाम क्वचिद्वैराजकं स्थलम् ।
क्वचिद्ब्राह्मं वैष्णवं च रौद्रं धाम प्रकाशते ॥५२॥

क्वचित्स्तंभे सत्यलोकः क्वचित् पितृनिवासनम् ।
क्वचिद् देवाश्च दिक्पालाः क्वचिद्विश्वाधिनायकाः ॥५३॥

क्वचित्स्तंभे विराजन्ते सूर्यचन्द्रादयो ग्रहाः ।
क्वचित्तिष्ठन्ति वसवश्चेन्द्रा महर्षयः क्वचित् ॥५४॥

क्वचित्स्तंभे मानवाश्च क्वचिद् दैत्याश्च दानवाः ।
क्वचित्समुद्रा नद्यश्चाऽऽरण्यकानि वनानि च ॥५५॥

पर्वताश्च क्वचित्स्तंभे क्वचित्पातालवासिनः ।
जलेशयाः क्वचित्स्तंभे क्वचित्स्थलेशया अपि ॥५६॥

क्वचिद्बिलेशयास्तत्र दृश्यन्तेऽपि गजादयः ।
गरुडाः शुकसाराश्च मेनकाश्च मयूरकाः ॥५७॥

भासा हंसाश्चातकाश्च दृश्यन्ते देवयोनयः ।
अप्सरसो ब्रह्मसरसोऽपि क्वचिच्च नर्तकाः ॥५८॥

दृश्यन्ते स्तंभगर्भेषु चित्रावलियुतेषु च ।
सृष्टित्रयं मण्डपे वै निहितं चाक्षरात्मके ॥५९॥

भूतले स्वर्णभूमौ वै राजन्ते दिव्यभूमिकाः ।
क्वचिज्जलं क्वचित्तेजः क्वचिद्भूमिर्विराजते ॥६०॥

क्वचिद्भवन्ति सामुद्राः क्वचिद्वनानि सन्ति च ।
क्वचिच्च पर्वताः सन्ति सरांसि सरितस्तथा ॥६१॥

उद्यानानि सुरम्याणि क्वचिच्च नगराण्यपि ।
भूगर्भे परिदृश्यन्त चोपरि समस्तले ॥६२॥

एवं क्षीरसमुद्रश्च नारायणस्तथा प्रभुः ।
मध्ये तु मण्डपे तत्र भूगर्भे दृश्यते हरिः ॥६३॥

स्तंभमूलेषु सर्वत्र दृश्यन्ते वास्तुदेवताः ।
मण्डपेऽपि यथास्थाना लोक्यन्ते क्षितिगर्भके ॥६४॥

शाखादेवा विलोक्यन्ते द्वारदेवा भवन्त्यपि ।
तोरणस्य तथा सख्यः पर्यो देव्यः स्रगन्विताः ॥६५॥

विलोक्यन्ते चित्रकम्मानिकाधाराः सुयौवनाः ।
सुवेषाः साम्बरभूषा दिव्यालोकप्रकाशिताः ॥६६॥

मध्ये दीपप्रदीपाश्च लम्बन्ते वर्तुलाश्रिताः ।
प्रतोल्यां समराजन्ते देव्यो हास्यरसान्विताः ॥६७॥

रतिजातिस्त्रियः सर्वा विविधाश्चेतना इव ।
विराजन्ते वर्तुलाग्रे दर्शनाधारसंस्थिताः ॥६८॥

गायकाश्चापि गान्धर्वा विद्यन्ते युगलात्मकाः ।
ध्वजाभिः सम्प्रकाशन्ते मण्डपान्तरभूमिकाः ॥६९॥

कोणे कोणे कलशाश्च सौवर्णाः सप्त सप्त च ।
एकसूत्रे स्थापिताश्च शोभन्ते सूर्यभास्वराः ॥७०॥

फलशाखाश्च लम्बन्ते स्तंभस्तम्बाश्रयास्तथा ।
रज्जवस्तत्र प्रणद्धाश्च मणिमौक्तिकमालिकाः ॥७१॥

वैचित्र्यं दृश्यते चाऽत्र मण्डपे दर्शनेऽमितः ।
एकतः कोटिलक्ष्म्यश्चैकतो वै कोटिराधिकाः ॥७२॥

एकतश्च सरस्वत्यश्चैकतः कोटिदुर्गिकाः ।
दृश्यन्ते सायुधाः सर्वाः सर्वाभरणभूषिताः ॥७३॥

तोरणोपरिभूमीनां सर्वसृष्टिमनोहराः ।
तदूर्ध्वे पार्षदाश्चापि गोपाश्चापि स्वरूपिणः ॥७४॥

गान्धर्वाश्चापि सकला गणाश्च शांकरास्तथा ।
आयुधानि च दिव्यानि यानि सृष्टित्रयेऽपि तु ॥७५॥

विद्यन्ते तानि सर्वाणि तदूर्ध्वे संस्थितानि वै ।
तदूर्ध्वे ध्रुवभागाश्च सूर्यद्वादशकान्विताः ॥७६॥

तेजोऽम्बरसमृद्धाश्च द्योतन्ते वृत्ततानिकाः ।
चतुष्किकास्तथा रम्या मण्डोवराः समुज्ज्वलाः ॥७७॥

सोपानानि समस्तानि स्वर्णरूप्यास्तराणि च ।
भित्तिकाः पटवस्त्राणां रत्नानां स्वर्णपत्रिणाम् ॥७८॥

वितानानि समस्तानि द्योतन्ते कौशिकानि च ।
यथा यथोर्ध्वभूमौ च दिव्यं वैकुण्ठमन्यकम् ॥७९

विकासितं महोद्यानै रासरमणशोभितम् ।
गजसिंहगरुडादिवाहनानि शुवासिनाम् ॥८०

यानि श्रेष्ठानि रम्याणि शुभानि तत्र सन्ति च ।
तानि सर्वाण्यूर्ध्वभूमौ निहितानि क्रमादिव ॥८१॥

कल्पवल्लीकल्पवृक्षकल्पदीपान्वितः शुभः ।
कल्पतेजोविशिष्टश्च कल्पभूफलदस्तथा ॥८२॥

मण्डपो ह्यभवत् सोऽयं कल्पमौक्तिकमाल्यवान् ।
कल्पवायुसुखस्पर्शः कल्पगन्धविराजितः ॥८३॥

कल्पाम्बरप्रदः कल्पताम्बूलवल्लिकाऽन्वितः ।
कल्पपानप्रदाता च कल्पस्वल्पविमानकः ॥८४॥
कल्पशय्यास्तरणश्च कल्पपर्यंकराजितः ।
कल्पगेन्दुककशिपुप्रदः कल्पोपसाधनः ॥८५॥
कल्पबृसीकल्पमृद्वासनसिंहासनान्वितः ।
कल्पपीठसभाशोभः कल्पपट्टिकमण्डितः ॥८६॥
कल्पप्रावरणैर्वस्त्रैरखण्डाम्बरकैर्युतः ।
काचतोरणयुक्तश्च मणिरत्नादितोरणः ॥८७॥
मणिरत्नान्वितकपाटाढ्यपेटिकभित्तिकः ।
प्रेंखादोलादिसंशोभत्पार्श्वभूमिविराजितः ॥८८॥
विद्युद्दर्शनयन्त्रैश्च विद्युद्वाग्यन्त्रकैर्युतः ।
विद्युच्छ्रावणयन्त्रैश्च चान्द्रस्पर्शसुयन्त्रवान् ॥८९॥
कल्पवेधे कृतकल्पं चानुकल्पविवर्तनः ।
कालकल्पनयन्त्राढ्यः सर्वज्ञत्वप्रवर्तकः ॥९०॥
पिण्डे ब्रह्माण्डके चक्रोत्तमेषु योगकल्पवान् ।
कल्पयन्त्रात्मतूर्यादिस्वरगीतिप्रकाशनः ॥९१॥
पिण्डब्रह्माण्डसर्वस्वदर्शकयन्त्रशोभितः ।
कामतृप्तिप्रदस्पर्शोत्तमचमत्कृतिप्रदः ॥९२॥
स्मृतमात्रस्य चेष्टस्य क्षणमात्रेण सम्प्रदः ।
प्राच्यसृष्ट्याश्चर्ययुतः सच्चिदानन्दचेतनः ॥९३॥
शाश्वताऽऽनन्ददाता च घण्टशंखमृदंगवान् ।
भोग्यजातहृद्ययुक्तोऽमृतवार्धिसुसंभृतः ॥९४॥
सर्वसृष्टिस्थिता या या यादृश्याः प्रमदोत्तमाः ।
तास्ताः सर्वा भिन्नरूपाश्रयास्तत्र विधापिताः ॥९५॥
कोणे माणिक्यनामा च स्तंभो यत्र सुवर्णजः ।
रक्तरंगाभिसंशोभश्चतुःकर्णसुमस्तकः ॥९६॥
पूजितः सिन्दूरपुष्पैरक्षतैः कमलादिभिः ।
तथा वै चान्दनपट्टिकायां चाक्षतमण्डले ॥९७॥
वार्धिनीकलशः स्वर्णः सजलः पूजिकायुतः ।
कण्ठसूत्राम्बरशोभो मध्ये जलेन पूरितः ॥९८॥
चूताऽशोकसुचम्पकनागवल्लीदलान्वितः ।
सश्रीफलः सरत्नश्च सधातुः शोभनः कृतः ॥९९॥
गणेशेन सुवर्णेन पूजितेन सुराजितः ।
सिद्धिबुद्धिसहितेन शुभलाभान्वितेन च ॥१००॥
इत्येवं मण्डपस्तत्र दिव्यमुक्तो बभूव ह ।
लोके भेदेन याः शोभास्तत्र तेन कृताः स्वयम् ॥१०१॥
राधिके वर्णनं यस्य कर्तुं नैव प्रशक्यते ।
सर्वमांगलिक्कांऽकुराऽक्षतकुंकुमपात्रवान् ॥१०२॥
पूजासत्कारवस्तूपसम्पत्सामग्रिकाभृतः ।
देदीप्यमानो ह्यभवद् बालकृष्णालयाऽग्रगः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मार्गशुक्लप्रतिपदि प्रातर्मंगलानि, कुंकुमवापीसरसोः शोभा, दिव्यांगणमण्डपशोभेत्यादिनिरूपणनामाऽष्टसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७८ ॥

**श्रीराधिकोवाच—**

माणिक्यस्तंभ एवाऽत्र मण्डपे स्थाप्यते कथम् ।
कलशस्थापनं तत्र किमर्थं वै विधीयते ॥ १ ॥
गणेशस्थापनं चापि मातृकास्थापनं तथा ।
वास्तुस्थापनमेवाऽपि विष्णोः स्थापनमित्यपि ॥ २ ॥
कुलदेवस्थापनं च कथं कृष्ण विधीयते ।
किं फलं स्थापने प्रोक्तमस्थापने किमप्रियम् ॥ ३ ॥
तत्सर्वं वद मे कृष्ण संसारिसुखकारणम् ।
यज्ज्ञात्वा चोत्तरे लोकाः करिष्यन्ति विधानतः ॥ ४ ॥
सर्षयो भगवद्भक्ताः सर्वतोभद्रमण्डलम् ।
स्थापयन्ति सदेवं च किमत्र कारणं प्रभो ॥ ५ ॥

**श्रीकृष्ण उवाच—**

शृणु राधे प्रवक्ष्यामि दम्पतीहितकृत्सुखम् ।
गृहस्थस्य विशेषेण पत्युस्तत्र विशेषतः ॥ ६ ॥
मणिस्वर्णादिसम्पत्कृद् गृहस्थस्य गृहे सदा ।
पूजितश्चैन्द्रदैवत्यश्चाग्निदैवत्य इत्यपि ॥ ७ ॥
धेनुदैवत्य एवापि माणिक्यस्तंभ उच्यते ।
मण्डपे स्थापितः सोऽयमिन्द्राऽग्निधेनुदैवतः ॥ ८ ॥
गृहस्थस्य सदा चेन्द्रसमं कुर्यात् समृद्धिभिः ।
अग्नितुल्यं प्रोज्ज्वलं च कुटुम्बं नित्यदा भवेत् ॥ ९ ॥
धेनुः सदा रसान् दद्याद् गृहं वै रसवद् भवेत् ।
इन्द्रस्य समृद्धयः सन्तु गृहस्थस्य गृहे सदा ॥१०॥
वह्नेः समृद्धयः सन्तु गृहस्थस्य गृहे सदा ।
धेनूनां समृद्धयः सन्तु गृहस्थस्य गृहे सदा ॥११॥
इत्येवं देवतास्तत्र स्थिता आशीर्ददत्यपि ।
अन्यथा त्रिविधं चास्य दारिद्र्यमुपजायते ॥१२॥
असमृद्धं चाऽपचनं चाऽरसं गृहं भवेत् खलु ।
सर्वं दुःखमयं स्याद्वै माणिक्याऽपूजनादिह ॥१३॥
यत्र माणिक्यवासो वै तत्र वासो हरेः सदा ।
यत्र हरेर्निवासश्च तत्र लक्ष्मीनिवासनम् ॥१४॥
यत्र लक्ष्म्या निवासश्च तत्र समृद्धिनिवासनम् ।
तस्मान्माणिक्ययूपं वै पूजयन्ति पुराविदः ॥१५॥

पार्थिवा बहवो दोषा निद्रालस्यगुरुत्वकम् ।
जडता शुष्कता चैते लीयन्ते तस्य पूजनात् ॥१६॥
विनाशो विधवात्वं च विधुरत्वं च रुग्णता ।
अनपत्यत्वमेवैते लीयन्ते तस्य पूजनात् ॥१७॥
प्रवासित्वमनाश्रयता चापि गृहशून्यता ।
फलिवृक्षादिशून्यत्वं लीयन्ते तस्य पूजनात् ॥१८॥
दम्पत्योः प्रेमशून्यत्वं वरालयेऽमनस्कता ।
वध्वाः सौभाग्यशून्यत्वं लीयन्ते तस्य पूजनात् ॥१९॥
भूमावभागिता वध्वा गृहे चाऽभागिता तथा ।
कुले चाऽभागिता वध्वा नश्यत्येवाऽस्य पूजनात् ॥२०॥
राक्षसानामृणं चापि कुमारीदेवताऋणम् ।
पित्रादीनामृणं याति माणिक्यस्य प्रपूजनात् ॥२१॥
इन्द्राग्निधेनुसाक्ष्यं वै परलोकादिसाधकम् ।
गार्हस्थ्यं सर्वकर्माऽपि जायते फलदं ततः ॥२२॥
इत्येवं राधिके बोध्यं फलं माणिक्यपूजनात् ।
शृणु त्वं कलशस्यापि पूजनस्य फलं शुभम् ॥२३॥
कलशे जलमध्ये वै वरुणः संविराजते ।
तीर्थानि तत्र चायान्ति समुद्रसरितस्तथा ॥२४॥
सरांसि देवताश्चापि कलशेऽजहरीश्वराः ।
तत्साक्ष्यं च विवाहस्य कर्म शान्तिसुखप्रदम् ॥२५॥
जलान्नदायकं सर्वरसानां च प्रदायकम् ।
शारीरं कामकर्माऽपि पावनं तस्य पूजनात् ॥२६॥
पुत्रसम्पत्प्रदं सर्वं गृहं सदा च पावनम् ।
नैसर्गी याऽप्यशुद्धिश्च नारीदेहे नरेऽपि च ॥२७॥
वरुणस्य जलैः सेके सा च सर्वा निवर्तते ।
तीर्थरूपो भवेत्तेन पतिस्तीर्थफलप्रदः ॥२८॥
तीर्थरूपा भवेत्पत्नी सर्वतीर्थफलप्रदा ।
युगलं तीर्थमेवाऽस्तीत्याह वरुणदेवता ॥२९॥
यत्र वै वारुणं स्थानं तत्र ऋणं न जायते ।
सर्वे रसाः सर्वगन्धास्तत्र भवन्ति वारुणाः ॥३०॥
ब्रह्मविष्णुमहेशानां निवासस्तद्गृहे भवेत् ।
यद्गृहे कलशस्थानं कलशोऽस्य पयोभृतः ॥३१॥
पयसा च घृतेनाऽपि नवनीतेन सर्वदा ।
दध्ना तक्रेण सोमेनाऽमृतेन संभृतो वसेत् ॥३२॥
एवं कलशजातीया धातवोऽस्य वसन्ति च ।
स्वर्णरूप्याणि रत्नानि सरत्नकलशाऽर्हणात् ॥३३॥
कन्याः कलशमांगल्याश्चास्य स्नुषाश्रितं गृहम् ।
भवेद् वंशस्मृद्धियुक्तं स्वर्णकलशशोभितम् ॥३४॥
एवं वै राधिके ! प्रोक्तं कलशाऽर्हाफलं मया ।
अस्थापने कलशस्य प्रोक्तं सर्वं न जायते ॥३५॥
विपरीतं भवेत् सर्वं दुःखदारिद्र्यवर्धनम् ।
गणेशाऽर्हाफलं वच्मि कृष्णोऽहं वै गणाधिपः ॥३६॥
भगवान् सम्पदां दाता सर्वकामप्रपूरकः ।
सर्वसम्पत्प्रदश्चापि सिद्धिऋद्धिप्रदस्तथा ॥३७॥
शुभलाभप्रदश्चापि सर्वविघ्नविनाशकः ।
सर्वदा रक्षकश्चापि भवामि मम पूजनात् ॥३८॥
लड्डुकादिकमिष्टान्नं मम पूजाकृतो भवेत् ।
स्वर्णरूप्यगृहाण्यस्य जायन्ते पूजकस्य मे ॥३९॥
हस्त्यश्वरथबाहुल्यं वाहनाढ्यं गृहं भवेत् ।
पीताम्बरादिसंशोभो वेषोऽस्य सर्वदा भवेत् ॥४०॥
गणेशस्य मुखं शुण्डान्वितं पशुधनप्रदम् ।
उदरं स्त्रीसमं भोज्यप्रदं पुत्रादिसम्प्रदम् ॥४१॥
कट्यधः कामनाभागः सर्वकामप्रपूरकः ।
दुष्टप्रारब्धनाशश्च भवेद् गणेशपूजनात् ॥४२॥
उपद्रवो भवेन्नाऽस्य गणानां दुष्टयोगिनाम् ।
इत्येवं राधिके तेऽत्र प्रोक्तं गणेशपूजनात् ॥४३॥
फलं श्रेष्ठं कृष्णरूपो गणेशोऽहं गृहे स्थितः ।
तत्र सर्वत्र भुक्तिं च मुक्तिं च लभते गृही ॥४४॥
मातृकास्थापनं चापि राधिके शृणु सत्फलम् ।
शंकरस्य तु योगिन्यश्चतुष्षष्टिप्रसंख्यकाः ॥४५॥
मातृकाश्च तथाऽन्याश्च ऋषिपत्न्यश्च मातृकाः ।
तथाऽन्या जलदेव्यश्च चण्ड्याद्याश्च तथाऽपराः ॥४६॥
बालग्रहस्वरूपिण्यः कोटराद्याश्च मातृकाः ।
षष्ठीदेवीप्रभृतिका राक्षस्योऽपि च मातृकाः ॥४७॥
इत्येवं बहुधा सन्ति पूजिताः सुखदाः सदा ।
अपूजिता गृहं बालं गर्भं चादन्ति कुपिताः ॥४८॥
वधूं वरं च वा रुष्टा भक्षयन्ति क्वचिद् गृहे ।
तस्मात् पूज्या भवन्त्येतास्तुष्टाः स्मृद्धिं ददत्यपि ॥४९॥
जलतो वह्नितश्चापि वारयन्त्यागतं भयम् ।
एवं सदा पूजनीयाः कुलदेव्यो भवन्ति च ॥५०॥
कुलवृद्ध्यर्थमेवापि सम्पद्वृद्ध्यर्थमित्यपि ।
विनाशपरिहारार्थं पूज्यन्ते कुलदेविकाः ॥५१॥
वास्तुः पुरुषः सम्पूज्यः सदा पृथ्वीप्रतुष्टये ।
गृहकार्ये मण्डपे च वेदिकायां च कुण्डके ॥५२॥
जन्तुनाशजपापानां नाशकं वास्तुपूजनम् ।
दिग्दोषाः पृथिवीदोषा भूतदोषाः समन्ततः ॥५३॥

नाश्यन्ते सर्वथा राधे ! पूजितेन हि वास्तुना ।
वासप्रदो भवत्येव दम्पत्योश्चिरमेव सः ॥५४॥
भूमौ भाग्यं भवेद् वध्वा वरस्यापि ध्रुवाऽभिधम् ।
सर्वकर्मार्पणं देवे वास्तौ कृते भवेच्छुभम् ॥५५॥
इत्येवं कथितं तेऽत्र रोगघ्नं वास्तुपूजनम् ।
विष्णोः स्थापनमेवाऽपि लक्ष्मीदं मंगलप्रदम् ॥५६॥
यत्र विष्णुस्तत्र चास्ते स्मृद्धिः सर्वसुखप्रदा ।
पूजितो वन्दितो विष्णुः कुर्याद् वैकुण्ठवद् गृहम् ॥५७॥
भक्तिं दद्यात् कुले तस्य दम्पत्योः श्रेयसं तथा ।
यशः कीर्तिं सत्त्वभावं दद्याद् विष्णुः सनातनः ॥५८॥
सुदर्शनेन चक्रेण रक्षां कुर्यात् प्रपूजितः ।
धर्मं दद्यात्तथा दद्याज्ज्ञानं विवेकसंभृतम् ॥५९॥
आन्तरं दिव्यमेवाऽपि नेत्रं दद्यात् सुपूजितः ।
आराधितश्च निर्वाणं दद्यात् सर्वसमर्पणात् ॥६०॥
इत्येवं कथितं राधे ! फलं देवादिपूजने ।
मण्डपस्य फलं चापि शृणु राधे शुभास्पदम् ॥६१॥
मण्डपश्चाश्रयः प्रोक्तो मण्डपो देवतालयः ।
सर्वसृष्टिनिवासश्च मण्डपः परिगीयते ॥६२॥
पटमण्डप एवापि धातुमण्डप इत्यपि ।
पुष्पमण्डप एवापि काष्ठमण्डप इत्यपि ॥६३॥
मणिमण्डप एवापि गृहमण्डप इत्यपि ।
वृक्षमण्डप एवापि ह्युद्यानमण्डपस्तथा ॥६४॥
काण्डमण्डप एवापि पार्थिवो मण्डपस्तथा ।
कल्पमण्डप एवापि भवन्ति मण्डपा हि ते ॥६५॥
तत्र सर्वत्र देवाद्या भूतानि यानि यानि च ।
गुणत्रयस्थितान्येव समायान्ति समुत्सवे ॥६६॥
तस्मान्मण्डपपूजा वै सर्वपूजाफलप्रदा ।
सर्वे तुष्टा भवन्त्येव देवाद्या मण्डपाऽर्हणात् ॥६७॥
मन्दिरं सुभगं स्याच्च स्वर्गे च सुभगं मिलेत् ।
सर्वस्मृद्धिर्मिलेच्चापि मण्डपस्य प्रपूजनात् ॥६८॥
स्वागते च प्रसत्कारे मण्डपश्चाग्रतो मतः ।
मनःशान्तिकरश्चापि शान्तिं चास्मै प्रयच्छति ॥६९॥
मण्डं तक्रामृतं चापि ददाति सर्वदा शुभः ।
दधिमण्डं ददात्येषो हवनं कारयत्यपि ॥७०॥
तन्मूलिकां परां स्मृद्धिं करोति मण्डपः सदा ।
हवनं सर्वदेवानां तृप्तिदं सुखदं मतम् ॥७१॥
गृहस्थस्य सदा राधे हवनं पापनाशनम् ।
सर्वभोगप्रदं प्रोक्तं सर्वायुष्यविवर्धनम् ॥७२॥

सर्वारोग्यप्रदं सर्वऋणमोचनकं मतम् ।
सर्वतोभद्रमेवाऽपि स्थाप्यते मण्डपे शुभम् ॥७३॥
तत्फलं ग्रहकृतपीडानाशनं पापनाशनम् ।
स्वर्णरूप्योपकरणप्रदं गृहप्रदं तथा ॥७४॥
स्मृद्धिप्रदं परं पुण्यं शय्योपस्करसम्प्रदम् ।
पात्रभूषाप्रदं चापि छत्रचामरसम्प्रदम् ॥७५॥
राज्यर्द्धिराज्यसत्तादिसम्प्रदं भद्रदं तथा ।
शकुनानां महच्चैतच्छकुनं भद्रमण्डलम् ॥७६॥
पुण्यदानां परमं च पुण्यकृद् भद्रमण्डलम् ।
स्वर्गाणां परमं स्वर्गप्रदं वै भद्रमण्डलम् ॥७७॥
मोक्षस्यापि च भक्तेश्च धर्मस्याऽप्यध्वरस्य च ।
इष्टापूर्तस्य सर्वस्य वृक्षारोपस्य वै तथा ॥७८॥
कन्यादानस्य च तथा कुमारदानकस्य च ।
सर्वधर्मस्य पुण्यानां प्रदं वै भद्रमण्डलम् ॥७९॥
योगानां पुण्यदं चापि सेवानां पुण्यदं तथा ।
परोपकारकार्याणां पुण्यदं भद्रमण्डलम् ॥८०॥
भद्रं पश्येत् सदा कन्या भद्रं पश्येत् सदा पतिः ।
भद्रं पश्येत् कुटुम्बं च भद्रमण्डलपूजनात् ॥८१॥
सौभाग्यं लभते कन्या गृहित्वं लभते नरः ।
पतिपुत्रवती साध्वी भवेद् भद्रप्रपूजनात् ॥८२॥
वियोगो न भवेत् पत्न्याः पत्युश्च भद्रपूजनात् ।
विघ्नानां वारकं त्वेतत् सम्पदां च प्रपूरकम् ॥८३॥
यत्र वै पूज्यते कृष्णः पूज्यन्ते यत्र देवताः ।
ऋषयः पार्षदाश्चाप्यवताराश्च ग्रहादयः ॥८४॥
दिक्पाला यत्र पूज्यन्ते गृहपालास्तथाऽपरे ।
ईश्वरा ईश्वराण्यश्च पूज्यन्ते शारदादिकाः ॥८५॥
एकादश्यः प्रपूज्यन्ते राधाद्याश्च सुशक्तयः ।
पूज्यन्ते देववंशाश्च भद्रदं भद्रमण्डलम् ॥८६॥
तस्माद्वै राधिके ! तत्र मण्डपे भद्रमण्डलम् ।
पूजनीयं विधानेन पूजनीयो हरिस्तथा ॥८७॥
यत्र क्वापि क्रियायोगे महोत्सवे सुखोत्सवे ।
विवाहे वरयानादौ कन्यादाने सतीस्थले ॥८८॥
ब्रह्मदाने मन्त्रदाने दीक्षादाने व्रतादिषु ।
महादाने जन्मदिने पूजनीयो हरिः सदा ॥८९॥
परमेशस्य पूजा वै सर्वपूजाफलप्रदा ।
सर्वसंकल्पसिद्धीनां प्रदा कामप्रपूरिका ॥९०॥
सर्वयज्ञफलदा च सर्वकर्तव्यपूरिका ।
सर्वारम्भफलाढ्या च पूजाऽऽदौ श्रीहरेः सदा ॥९१॥

लक्ष्मीपूजा तथा चादौ कार्यारम्भे सुखप्रदा ।
सम्पत्प्रदा भवत्येषा शान्तिसौभाग्यदा तथा ॥९२॥
अलक्ष्मीनाशिनी चापि दुःखदारिद्र्यनाशिनी ।
कृपणत्वस्य वै नाशो भवेल्लक्ष्मीप्रपूजनात् ॥९३॥
कन्यारत्नं वररत्नं धनरत्नानि यानि च ।
निर्विघ्नानि भवेयुश्च लक्ष्म्याश्चादौ प्रपूजनात् ॥९४॥
इत्येवं राधिके ! प्रोक्तं फलं पृष्टं त्वया यतः ।
सुखसम्पद् भवेदेव यत्र क्वाऽप्यपि पूजनात् ॥९५॥
प्रायो लोका भवन्त्येव शारीरसुखवासनाः ।
तेषामुक्तप्रपूजाभिः सुखसम्पद् विवर्धते ॥९६॥
पठनाच्छ्रवणाच्चापि फलाध्यायस्य तत्फलम् ।
यत्फलं पूजनाच्चापि जायते दानतस्तथा ॥९७॥
कन्यादानसमं दानं त्रैलोक्ये नैव विद्यते ।
यदाधारः सर्वधर्मो वंशविस्तार इत्यपि ॥९८॥
यदाधारं जगत् सर्वं सृष्टिः सर्वा यदाश्रिता ।
यद्विना प्रलयः प्रोक्तो यद्विना शून्यता मता ॥९९॥
इन्द्रत्वं यद्विना नास्ति चात्मनां योषितं विना ।
योषिद् राज्यं चात्मनोऽस्ति त्वात्मा राजा तया कृतः ॥१००॥
तस्माद् राधे ! विवाहेन गृह्यते स्त्री नरेण वै ।
वरराजः प्रतिष्ठां वै विन्दते योषिता तदा ॥१०१॥
विना राज्यं वरराजो भवत्येव वरा प्रिया ।
तस्या राज्यं कुमारेऽत्राऽऽरूढं स्याद्वरराजके ॥१०२॥
अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
दानग्रही महाराजो भविष्यति दिनद्वये ॥१०३॥
मम पुत्रस्य शंभोश्च पुत्र्याः स्वामी भविष्यति ।
श्रुत्वा ते जायते हर्षश्चोक्त्वा मेऽपि प्रजायते ॥१०४॥
इत्येवं राधिके ! स्वल्पमण्डपेन निजालयम् ।
शोभितं कृतवान् श्रीमद्बालकृष्णः परः प्रभुः ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मण्डपे माणिक्यस्तंभस्य कलशस्य गणेशस्य मातृकाणां वास्तोर्विष्णोः कुलदेवतायाः सर्वतोभद्रस्य च प्रपूजने फलादेशनिरूपणनामा नवसप्तत्यधिकद्विशततमोऽध्यायः ॥ २७९ ॥

श्रीकृष्ण उवाच—

शृणु त्वं राधिके ! चान्यं महान्तं मण्डपं शुभम् ।
मण्डपाख्यो महायुक्तः स्वात्मकं रूपमादधत् ॥ १ ॥
दशयोजनविस्तीर्णं दशयोजनमायतम् ।
ऊर्ध्वं योजनमात्रं च षट्पञ्चाशत्प्रभूमिकम् ॥ २ ॥
दशसाहस्रकलशाः सध्वजाः सपताकिकाः ।
राजन्ते यत्र सौवर्णाः सूर्यसाहस्रसदृशाः ॥ ३ ॥
मध्ये शतैककलशाश्चोपर्युपरि भान्ति च ।
किं वा ग्रहाश्च नक्षत्रा द्योतन्ते कलशा इव ॥ ४ ॥
सौवर्णं च वितानं वै दिव्यं यत्र प्रभाति च ।
चिदाकाशाम्बरं यद्वन्महदाकाशमिश्रितम् ॥ ५ ॥
दशसाहस्रशृंगाणि विद्योतन्ते परेऽम्बरे ।
मेघा कक्ष्यां मण्डपान्तः प्रविश्य यान्ति निर्मलाः ॥ ६ ॥
सहस्रचन्द्रतुल्याश्च तिष्ठन्ति प्रतिभूमिकम् ।
पूर्णाः श्वेताः श्वेतभासश्चन्द्रमसोऽक्षरात्मकाः ॥ ७ ॥
ज्योत्स्नास्तेषां मण्डपान्तर्गर्भागारेषु यान्ति च ।
कानक्यो भित्तिकाः सर्वाः सर्वा ब्रह्मप्रभाश्रिताः ॥ ८ ॥
ब्रह्माऽमृतप्रवाहिण्यो महानन्दप्रवर्षिकाः ।
दशसाहस्रवैकुण्ठात्मकवितानमण्डलम् ॥ ९ ॥
मण्डपे चोर्ध्वभागे वै गर्भे विलोक्यते शुभम् ।
मध्ये रात्नकुम्मराणि चान्द्रतेजोभृतानि वै ॥१०॥
परितः शिखरागारे मुक्तान्यो विलसन्ति वै ।
कल्पवल्ल्यः कल्पवृक्षाः संकल्पमणयस्तथा ॥११॥
स्तंभशिरस्सु शोभन्ते सर्वसंकल्पपूरकाः ।
स्तंभेषु घृतकुल्याश्च दधिकुल्याः समन्ततः ॥१२॥
मधुकुल्या जलकुल्याः पेयकुल्या वहन्ति च ।
शरत्पानप्रकुल्याश्चाऽमृतकुल्याः स्रवन्ति च ॥१३॥
सुधाकुल्या नवनीतकुल्याः पीयूषवापिकाः ।
सुधाधाराः स्तंभगर्भे वसन्ति प्रवहन्ति च ॥१४॥
तत्तद्धामनिवासानां पेयाऽग्र्यरसवाहिकाः ।
सरितस्तत्र तिष्ठन्ति तोरणेषु समन्ततः ॥१५॥
कामकल्पलतास्तत्र कामस्त्रीदासदासिकाः ।
कामभोग्यप्रदाः सर्वाः कम्मानिकाः प्रकल्पिताः ॥१६॥
तोरणानि समस्तानि विचित्ररंगभाञ्जि च ।
क्लृप्तानि मण्डपे तत्र मण्डपाख्येन योगिना ॥१७॥
जलस्थानं स्नानशालाः स्नानोपकरणान्यपि ।
शोभन्ते चेन्द्रशालावत् सुगन्धिद्रव्यभाञ्जि च ॥१८॥
लेपकज्जलकस्तूरीचन्दनाद्यैः समन्विताः ।
सुगन्धिसाररसकैर्युक्ताः शाला भवन्ति च ॥१९॥
पानभोजनशालाश्च तत्तद्धामनिवासिनाम् ।
तत्तद्धाम्नां कल्पलतामणियुक्ता विनिर्मिताः ॥२०॥

तेषां संकल्पफलिका यथापेक्षितसम्प्रदाः ।
तत्तद्भोगविलासाढ्या भोज्यशाला भवन्ति च ॥२१॥
तत्तत्पात्रोपकरणासनसाधनसंभृताः ।
शय्याऽऽरामप्रशालाश्च विश्रान्तिमन्दिराणि च ॥२२॥
दिव्यपर्यंकयुक्तानि दिव्यगेन्दुकवन्त्यपि ।
दिव्याऽऽस्तरणशोभानि दिव्याऽऽवरणभाञ्ज्यपि ॥२३॥
दिव्यवेषोपयुक्तानि दिव्याम्बरभृतानि च ।
दिव्यविलासद्रव्याणि दिव्यभावकराणि च ॥२४॥
दिव्यसुगन्धवासानि दिव्यरतिप्रदान्यपि ।
दिव्यानन्दप्रदान्येव भवन्ति तत्र मण्डपे ॥२५॥
यत्स्मृतं भोजने पाने शयने च रतावपि ।
युगलानां दिव्यमेव सर्वं समुपतिष्ठति ॥२६॥
द्यूतशाला विचित्राश्च रंगशालाः शुभास्तथा ।
सर्वसाधनसम्पन्ना विद्योतन्ते तु मण्डपे ॥२७॥
नाट्यशालाश्च विविधा मल्लशालाः पृथक् तथा ।
नृत्यशाला वेषशालास्तथा नेपथ्यभूमिकाः ॥२८॥
दृश्यशाला ह्यनन्ताश्च श्रोतव्ययन्त्रशालिकाः ।
वार्तागृहाणि सौम्यानि गन्धागाराणि चापि वै ॥२९॥
स्पर्शाश्रमाणि रम्याणि रस्यालयाः पृथग्विधाः ।
गीतिशालाः शोभनाश्च विद्यन्ते तत्र मण्डपे ॥३०॥
पञ्चभूतानि तत्त्वानि विषयाः स्थूलसूक्ष्मकाः ।
तथा तत्त्वानि कार्याणि कारणानि च मण्डपे ॥३१॥
ब्रह्मह्रदाः कृतास्तत्र विरजाद्याश्च वै कृताः ।
अमृतानां च सरितः कृताः कुण्डाः स्थले स्थले ॥३२॥
उद्यानानि विचित्राणि फलपुष्पभृतान्यपि ।
शर्करारसदण्डाद्यवाटिकास्तत्र मण्डपे ॥३३॥
मिष्टाऽम्लरसभोगाश्च नागपूगीलवंगकाः ।
एलात्वक्खाद्यभागाश्च विद्योतन्त हि मण्डपे ॥३४॥
तेषां तेषां प्रवेषाणां गृहाणि सन्ति मण्डपे ।
तेषां तेषां चायुधानां मन्दिराण्यपि मण्डपे ॥३५॥
तासां तासां कन्यकानां बालक्रीडनकान्यपि ।
बालानां खेलनाभागा विद्योतन्त हि मण्डपे ॥३६॥
राजमार्गास्तथा रथ्याश्चत्वराश्च वितर्दिकाः ।
महास्थाला विरामाश्च विलसन्ति च मण्डपे ॥३७॥
वल्लभ्यश्चन्द्रशालाश्च गवाक्षाणि समन्ततः ।
ह्रस्वान्यपि च दीर्घाणि द्वारवेषाणि सन्ति च ॥३८॥
छत्रजातानि सौम्यानि कुञ्जवत् संस्थितान्यपि ।
द्वारवेषोर्ध्ववासानि शोभन्ते तत्र मण्डपे ॥३९॥
शुकाश्च सारसाश्चापि मेना मयूरकास्तथा ।
हंसाः कारण्डवाश्चापि गरुडा भासपक्षिणः ॥४०॥
श्येनाः कपोतका दिव्याश्चक्रवाकाश्च तित्तिराः ।
नीलकण्ठाश्चातकाश्च दिव्याः पारावतास्तथा ॥४१॥
एवमन्ये पक्षिणश्च तोरणेषु समन्ततः ।
नूतना नवदृश्याश्च विद्योतन्ते सुखभृतः ॥४२॥
कोकिलाश्च प्रकूजन्ति कूजयन्त्यपरानपि ।
स्तंभानां मूर्धभागेषु दर्शनेषु वसन्ति च ॥४३॥
हस्तिनः शरभाः सिंहाः केसरिणश्च धेनवः ।
द्वीपा व्याघ्रा नारद्विपा भल्लुका गवयास्तथा ॥४४॥
गण्डकाश्च मृगाः खड्गाश्चित्राश्च शृंगसाभराः ।
रेण्डकाश्च शशाश्चापि श्वेताश्वाश्चाश्वजातयः ॥४५॥
वृषभा उष्ट्रकाश्चापि मकराः कच्छपास्तथा ।
तिमिंगिला झषाश्चापि विद्योतन्ते समन्ततः ॥४६॥
रत्नहीरकमौक्तिकात्मकमण्यादिशोभिताः ।
मध्यभागाः प्रकाशन्ते प्रत्यालयं तदाऽम्बरे ॥४७॥
मालाः पुष्पप्रकाण्डाश्च दिव्याः स्रजोऽतिगन्धिताः ।
तेजोभृताः प्रशोभन्ते कौस्तुभाश्च स्थले स्थले ॥४८॥
पर्यो देव्यश्चेश्वराण्यः सुराण्यः कन्यकोत्तमाः ।
साध्व्यः सत्यो विलसन्ति द्वारवेषेषु संस्थिताः ॥४९॥
चन्द्रशाला विमानैश्च कामवाहैर्युतास्तदा ।
मण्डपे शतसाहस्राः शोभन्ते व्योमसंगताः ॥५०॥
उद्यानवाटिकावल्ल्यः पुष्पस्तम्बा भवन्त्यपि ।
कमलानां निवासाश्च सुगन्धयन्ति मण्डपम् ॥५१॥
मन्दसुगन्धिसंस्पृश्यशीतलाऽनिलपूरकाः ।
आगच्छन्ति वनमार्गान्मण्डपे वै गृहे गृहे ॥५२॥
भोग्यानां न्यूनता नास्ति वेषाभूषाम्बरात्मनाम् ।
मिष्टान्नानां राशयश्च मण्डपेऽत्र गृहे गृहे ॥५३॥
तत्तद्धामनिवासानां योग्यभोग्यानि सन्ति हि ।
दर्पणादर्शभागाश्च प्रतिबिम्बद्रवास्तथा ॥५४॥
सिद्धयश्चाणिमाद्याश्च विद्योतन्ते हि मण्डपे ।
दासा दास्योऽप्यनन्ताश्च कन्यकाः कोटिशोऽपि च ॥५५॥
अमृतानन्ददायिन्यो वर्तन्ते मण्डपे तदा ।
वैचित्र्यं खलु तत्राऽऽसीद् राधिके ! नूतनं शृणु ॥५६॥
गृहे गृहे तु देहल्यां निहितश्चैकको मणिः ।
यत्र विलोक्यते स्वच्छः समस्तः सर्वमण्डपः ॥५७॥
सर्वे मण्डपभागाश्च सर्वे माण्डपिनस्तथा ।
महीमानाः समस्ताश्च दिवसे न तु वै निशि ॥५८॥

किं मया राधिके ! वाच्यं त्वत्समाश्चाऽर्बुदस्त्रियः ।
मुक्तान्यः सेविकास्तत्र वर्तन्ते परिचारिकाः ॥५९॥
गोलोकस्थोऽप्यहं स्मृत्वा दृष्ट्वा मोहमुपागमम् ।
विलासस्ते शून्यभूतो दृश्यते तत्समीपतः ॥६०॥
स्थले स्थले च गोलोको वैकुण्ठो वर्ततेऽपि च ।
ऊर्ध्वे स्थलं कृतं तत्राऽक्षरधामनिवासिनाम् ॥६१॥
ततोऽधः सर्वधाम्नां च सर्वगोलोकवासिनाम् ।
ततोऽधश्च कृतं श्रीमद्वासुदेवस्थलं शुभम् ॥६२॥
ततोऽधश्च कृतं रम्यं वैकुण्ठं परमं शुभम् ।
ततोऽधश्च कृतं दिव्यं चाऽव्याकृतं शुभं स्थलम् ॥६३॥
ततोऽमृतं कृतं चाधस्ततो भौमं कृतं स्थलम् ।
ततो हैरण्यगर्भं च वैराजं च कृतं ह्यधः ॥६४॥
महामायास्थलं चापि सादाशैवं कृतं तथा ।
वैष्णवं च कृतं चापि वैकुण्ठं च द्वितीयकम् ॥६५॥
ब्राह्मं रौद्रं तथा शैवं सैद्धं स्थानं ततोऽप्यधः ।
ईश्वराणां निवासाश्च ऋषीणां च ततोऽप्यधः ॥६६॥
पितॄणां च कृताश्चापि सुराणां च ततोऽप्यधः ।
त्रयस्त्रिंशत्प्रदेवानां स्थानानि च ततोऽप्यधः ॥६७॥
भुवर्लोकनिवासानां मानवानां ततोऽप्यधः ।
अतलादिनिवासानां भक्तानां दितिजन्मिनाम् ॥६८॥
दनुजानां च नागानां यादसां भूभुवां तथा ।
वन्यानां सर्वसत्त्वानां कामरूपप्रगात्मनाम् ॥६९॥
कामधेनुप्रकुलानां स्थावराणां तथाऽऽत्मनाम् ।
तीर्थानां पर्वतादीनां स्थानानि मण्डपेऽप्यधः ॥७०॥
कृतानि मण्डपाख्येन मुक्तेन मण्डपे निजे ।
अनादिश्रीकृष्णनारायणेच्छया हि नूतने ॥७१॥
यज्ञशाला देवशाला जपशालाः कृतास्तथा ।
वेदशाला वैद्यशाला वेधशालास्तथा कृताः ॥७२॥
आपणानां पंक्तयश्च भृज्यशालास्तथा कृताः ।
विहारवनशालाश्च कृता बह्वयो ह्यधो भुवि ॥७३॥
सोपानानि विचित्राणि सर्वरत्नमयानि च ।
निःश्रेणिका विचित्राश्च यथासंकल्पचञ्चलाः ॥७४॥
आरोहाऽवरोहकुल्यः संकल्पशृंखलान्विताः ।
संकल्पदर्शकाश्चापि पार्षदाश्च स्थले स्थले ॥७५॥
विहिताः प्रश्रमिणां च श्रमघ्नाः पादवाहकाः ।
राज्ञः रंकस्य च हरेः समर्द्धिर्ब्राह्ममण्डपे ॥७६॥
साधूनां प्रणिवासाश्च यतीनां ब्रह्मचारिणाम् ।
साध्वीनां च सतीनां च मुक्तानीनां कृताः शुभाः ॥७७॥
मण्डपे वनवासाश्च कृताश्चारण्यकालयाः ।
सूतमागधबन्दीनां मालयाश्च तथा कृताः ॥७८॥
तूर्यवतां स्तावकानां वैदिकानां तथाऽऽलयाः ।
विद्यानां सर्वकामानामालयाश्च तथा कृताः ॥७९॥
भृत्यानां दिग्गजानां चालयाश्च फणिनां कृताः ।
कच्छपानां च शेषाणां निरन्नानां तथाऽऽलयाः ॥८०॥
महर्षीणां तापसानां भक्तानां ब्रह्मयोगिनाम् ।
सन्न्यस्तानां तथा चावऽधूतानामालयाः कृताः ॥८१॥
प्रजानां भिन्नवर्णानां भिन्नदेशनिवासिनाम् ।
भिन्नस्वभावयुक्तानां निवासा मण्डपे कृताः ॥८२॥
शीतोष्णादिनिवासानां यथापेक्षालयाः कृताः ।
स्थूलसूक्ष्मस्वरूपाणां यथापेक्षालयाः कृताः ॥८३॥
दिव्याऽदिव्यस्वरूपाणां यथापेक्षालयाः कृताः ।
मायिकानाममायानां यथादेहालयाः कृताः ॥८४॥
विमानानां महामार्गा मण्डपे चाम्बरे कृताः ।
सोपानरीतिमाश्रित्य पत्सृतयोऽपि निर्मिताः ॥८५॥
लोकानां नामसंज्ञाश्च निवासिनां तथाऽभिधाः ।
प्रतिगृहं कृतास्तत्र नैसर्गिकाऽक्षरात्मिकाः ॥८६॥
यथा वेदे तथा चात्र मण्डपे त्वभिधाः कृताः ।
और्णान्यास्तरणादीनि कौशेयानि मृदूनि च ॥८७॥
कैसराणि सुवर्णानि रौप्याणि च कृतानि वै ।
पादपीठानि रम्याणि सिंहासनानि मण्डपे ॥८८॥
कौशिकानि च वस्त्राणि सत्त्वमयानि तत्र च ।
आक्षराणि समस्तानि निहितानि स्थले स्थले ॥८९॥
यावन्ति भक्ष्यभोज्यानि लेह्यचोश्यानि सर्वशः ।
पेयस्वाद्यानि सर्वाणि वह्निपक्वानि यानि च ॥९०॥
वनपक्वानि सर्वाणि भर्जितानि तथापि च ।
अपक्वपिष्टचूर्णानि ताम्बूलकानि यानि च ॥९१॥
मादकानि समस्तानि सर्वपाकानि सर्वथा ।
रसपाकानि सर्वाणि पत्रपाकानि यानि च ॥९२॥
क्षारपाकानि रम्याणि घृतपक्वानि यानि च ।
पायसानि समस्तानि शार्कराणि तथापि च ॥९३॥
ऐक्षवाणि समस्तानि कान्दविकैः कृतानि च ।
निहितानि चटन्यश्च सूपश्च पाचकालये ॥९४॥
सर्वप्रकारमिष्टानि मधूनि विविधानि च ।
गुन्द्रपाकानि सर्वाणि निहितान्यदनालये ॥९५॥
राधिके ! किमु वक्तव्यं मण्डपे यत्प्रदर्शितम् ।
ब्रह्मलोके विशिष्टं यदीशलोके विशिष्टकम् ॥९६॥

सत्ये स्वर्गे विशिष्टं यन्मानवे च विशिष्टकम् ।
पाताले धामलोकेषु विशिष्टं रत्ननामकम् ॥९७॥
तत्सर्वं निहितं तत्र मण्डपे मण्डपात्मना ।
दीर्घिका निहितास्तत्र सरांसि शोभनान्यपि ॥९८॥
तेजोमार्गाश्च विहिताः सच्चिदानन्दसंभृताः ।
विदुषां च कथाभागा व्याख्यानमन्दिराणि च ॥९९॥
सृष्टिषु याः सभास्थल्यो विख्याताः स्थानिनां मताः ।
ताः सर्वा दर्शिताश्चात्र मण्डपे मण्डपात्मना ॥१००॥
आश्चर्यं चाधिकं राधे ! मया दृष्टं ततोऽधिकम् ।
प्रत्यालयं तु देहल्यां निहितो यो मणिः शुभः ॥१०१॥
यत्र विलोक्यते स्वच्छः समस्तः सर्वमण्डपः ।
तत्रापि मण्डपे दृष्टो मणिर्मयाऽपरः शुभः ॥१०२॥
यत्र दृष्टं मया सृष्टित्रयं जडच्चिदात्मकम् ।
सर्वधामानि दृष्टानि सर्वेश्वरप्रभूमयः ॥१०३॥
सर्वेऽपि जीवलोकाश्च मया दृष्टाः समस्तकाः ।
यत्किञ्चिद्वै मया दृष्टं द्रष्टव्यं नावशिष्यते ॥१०४॥
देहल्यां वै मणिस्तत्र मण्डपस्तत्र वै मणिः ।
तत्र सर्वं समापन्नं वैचित्र्यं चेदमेव हि ॥१०५॥
न गोलोके न वैकुण्ठे नाऽन्यधामसु तत् खलु ।
विद्यते वै महाश्चर्यं स्वगृहे सर्वदर्शनम् ॥१०६॥
अतएवाऽक्षरमुक्ताः सर्वज्ञा वै भवन्त्यपि ।
प्रत्यक्षदर्शिनः सर्वे मण्यन्तर्मणिदर्शिनः ॥१०७॥
मया ते दर्शितं राधे ! कथं न स्मर्यसेऽधुना ।
इत्येतत् कथितं राधे ! मण्डपस्याऽभिरूपणम् ॥१०८॥
श्रुत्वाऽपि दिव्यतां यायाज्जिज्ञासुतां मुमुक्षुताम् ।
मुक्ततां ब्रह्मतां चापि ब्रह्मवासस्य योग्यताम् ॥१०९॥
नाल्पमत्या धारणीयं भवेदेतत्परात्मनः ।
मण्डपस्य स्वरूपं वै सर्वधाममयं शुभम् ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महामुक्तकृतमहामण्डपदिव्यतावर्णनं नामाऽशीत्यधिकद्विशततमोऽध्यायः ॥ २८० ॥

श्रीकृष्ण उवाच—

अथैवं मण्डपे जाते सर्वलोकसमुज्ज्वले ।
सूर्यतेजांसि सौराष्ट्राद् व्यवर्तन्ताऽम्बराद् दिवः ॥ १ ॥
मण्डपस्यैव तेजांसि सौराष्ट्रे दिनतां व्यधुः ।
रात्रिर्देशान्तरं याता तेजोनिस्सारिता तदा ॥ २ ॥
रात्रिमानं तु लोकानामक्षरक्षेत्रवासिनाम् ।
मण्डपान्निःसरद्भिश्च तेजोभिरानुमानिकम् ॥ ३ ॥
मण्डपान्तर्गतानां तु मणौ यत्सर्वदर्शनम् ।
तद्यदा जायते नैव तदा निशाऽनुमानकम् ॥ ४ ॥
यदा मणौ चान्तर्मणौ प्रकाशन्ते हि सृष्टयः ।
तदा भानं दिवसस्य जायते भानिवासिनाम् ॥ ५ ॥
इत्येवं मण्डपे जाते किमाश्चर्यं हरेर्गृहे ।
सर्वं वै घटते तस्य स्वल्प एषस्तु मण्डपः ॥ ६ ॥
एवं मण्डपनिर्माणे ततोऽवाद्यन्त तद्गताः ।
दिव्यवाद्यविशेषाश्च तथा लौकिकवाद्यकाः ॥ ७ ॥
द्रष्टुं तन्मण्डपं लोका आययुश्च समन्ततः ।
देवा वै हंसरूपाश्च व्योम्नाऽऽययुः पुनर्ययुः ॥ ८ ॥
अथ कुंकुमपत्रीं च लिलेख भगवत्पिता ।
लोमशं तु समाहूय नारदं च महामुनिम् ॥ ९ ॥
स्वतःप्रकाशं देवं च पप्रच्छ तन्मुहूर्तकम् ।
सूर्योदयोत्तरं सार्धघटीद्वयादनन्तरम् ॥१०॥
प्रतिपत्त्रीमुहूर्तं च विलोक्याऽऽहुश्च ते त्रयः ।
सर्वविजयदः कालो वर्ततेऽद्य शुभावहः ॥११॥
प्रवर्तते तु समयः शुभो लिखतु पत्रिकाम् ।
इत्युक्त्वा विप्रवर्यास्ते स्वस्तिमंगलमन्त्रकान् ॥१२॥
जगुर्वेदगतान् सूक्तान् सर्वमंगलशोभनान् ।
पत्रं च लेखिनीं चापि द्रवपात्रं च पट्टिकाम् ॥१३॥
रक्तद्रवं तथा सर्वे पूजयामासुरुत्सुकाः ।
गणेशपूजनं चक्रुर्धूपदीपाऽक्षतादिभिः ॥१४॥
श्रीविष्णुपूजनं चक्रुस्तथा गोपालपूजनम् ।
तथा श्रीबालकृष्णस्य चक्रुर्वै पूजनं तदा ॥१५॥
बालकृष्णः पितृयुक्तः पूजयामास तानपि ।
दत्तासनेषु ऋषयो विप्राश्चान्येऽपि मानिताः ॥१६॥
निषेदुः पूज्यवर्गास्ते नार्योऽगायँस्तु गीतिकाः ।
कुंकुमपत्रिकां चामन्त्रणार्थां योगबोधिकाम् ॥१७॥
अलिखच्छ्रीमहाविष्णुर्गोपालकृष्णकः पिता ।
नत्वा देवानृषीन् वृद्धान् स्मृत्वा श्रीपुरुषोत्तमम् ॥१८॥
श्रीमद्ब्रह्मपुराधिपो हि भगवान् सर्वावतारेश्वरः,
श्रीकृष्णश्च नरायणोऽपि च हरिः श्रीवासुदेवः शिवः ।
श्रीविष्णुश्च नराग्रजश्च धवलद्वीपस्थनारायणः,
शेषस्थश्च हरिर्गणेश्वर इमे कुर्वन्तु नो मंगलम् ॥१९॥

श्रीमद्ब्रह्मसरूपिणी भगवती सर्वावतारेश्वरी,
श्रीराधा च नरायणी च हरिणी श्रीवासुदेवी शिवा ।
श्रीर्लक्ष्मीः कमला रमा च धवलद्वीपस्थनारायणी,
सावित्री च सरस्वती विदधतु ह्यस्थाश्च नो मंगलम् ॥२०॥
श्रीकान्तः पुरुषोत्तमश्च विभवा व्यूहाश्च धामाधिपा,
लक्ष्मीशाश्च तथेश्वराश्च पितरश्चार्षाः सुरास्तत्स्त्रियः ।
आदित्या वसवोऽश्विनौ दिगधिपा रुद्रास्त्रिदेवेश्वरा,
दम्पत्योर्गृहधर्मसंभृतमिदं तन्वन्तु शं मंगलम् ॥२१॥
श्रीकाशीनगरीश्वरस्य विबुधैः संपूजितस्यैव च,
श्रीमच्छ्रीनिधिशंकरस्य तनुजालक्ष्म्याः परं मंगलम् ।
श्रीकाश्यां भविता सुतेन तु मम श्रीबालकृष्णे न वै,
मार्गे शुक्लचतुर्थिकानिशि, सुतोगन्ताऽक्षरक्षेत्रतः ॥२२॥
ब्रह्माण्डे तु चतुर्मुखस्य च विधेः पद्मासनस्यैव वै,
भूलोकेऽपि च मेरुदक्षिणदिशाखण्डे ह्यजानाभिके ।
आयान्त्वेव सुराष्ट्रके स्थितवतो गोपालकृष्णस्य मे,
ख्याते कुंकुमवापिकाख्यनगरे तूर्णं स्वकैः संयुताः ॥२३॥
अद्याऽऽद्येऽह्नि तु मण्डपस्य समयस्ताम्बूलपानस्य च,
श्वो भावि श्रीमतः सुतस्य तु तनौ सत्पिष्टिकामर्दनम् ।
तार्तीये तु दिने सुराऽर्हणमथो यात्रा च काशीं प्रति,
तुर्ये हस्तसमग्रहो हि भविता तद्दीपयन्त्वर्थये ॥२४॥
ये वै ब्रह्मसुसृष्टिगाऽक्षरजना धामादिवासाश्च ये,
ये चापीश्वरसृष्टिगाश्च जडगाश्चाऽष्टाऽऽवृतिस्था अपि ।
ये वै जीवनसृष्टिगाश्च विविधा लोकाश्च लोकाधिपा,
राजानश्च निजाः प्रजाश्च सुहृदश्चायान्तु सम्बन्धिनः ॥२५॥
स्वस्वैश्वर्ययुताः स्वभृत्यसहिताः सर्वानुगैः संयुताः,
स्वस्वैर्दिव्यसमाश्रितैश्च सहिताः स्त्रीपुत्रपुत्रीयुताः ।
तत्तन्मित्रयुताः प्रमित्रसहिताश्चाबालवृद्धान्विता,
मत्पुत्रस्य सुमंगलेऽभित इहाऽऽयान्त्वेव शोभावहाः ॥२६॥
श्रेष्ठः श्रीभगवान् तदग्रज इति भ्राजन् शुकश्चाऽपरः,
श्रीमद्वल्लभनामकोऽनुगरतिस्ते बान्धवाः सर्वथा ।
तद्वच्चान्यकुटुम्बिनोऽपि च वयं सर्वान्प्रतीष्टाऽर्थनां,
कुर्मो यद् भवतामवश्यमनवं सन्दर्शनं स्तादिह ॥२७॥
मुक्ता ब्रह्मगताश्च धामसु गता ये पार्षदाः श्रीपते-
रीशेशादिकधामगा अपि महैश्वर्याश्च मुक्ताश्च ये ।
ब्रह्माद्याऽभिमताश्च सिद्धपुरुषाः सन्तश्च ये साधवो,
दम्पत्योश्च शुभं सुमंगलमयं कुर्वन्तु शं शाश्वतम् ॥२८॥
इत्येवं राधिके ! तत्राऽलिखद् गोपालकृष्णकः ।
कुंकुमाक्तां पत्रिकां चाऽप्रेषयत् सर्वसृष्टिषु ॥२९॥

ऋषीन् ब्रह्माण्डगोलेषु मुक्तानक्षरधामसु ।
नारदादीनीशलोकेष्वप्रेषयत् प्रदाय च ॥३०॥
पूजितां कुंकुमैश्चाप्यक्षतैः पुष्पादिभिस्तथा ।
पुटितां पर्णके चापि दोरकेणाभिवेष्टिताम् ॥३१॥
तुलसीपत्रसंयुक्तां कोट्यर्बुदप्रतिकृतिम् ।
समादाय ययुः सर्वे त्वाज्ञप्तास्ते मनोजवाः ॥३२॥
ददुश्च कुंकुमपत्रं प्राप्य सत्कारमाययुः ।
मण्डपेऽत्र तदा राधे ! गोपालकृष्णको ददौ ॥३३॥
दुग्धपानं च मिष्टान्नं ताम्बूलकं समुत्सवे ।
समागतान् नृपान् भक्तान् विप्रान् लोकान् प्रजाजनान् ॥३४॥
श्रेष्ठिनश्चाप्यनाथाँश्च महतोऽपि दरिद्रकान् ।
मान्यान् पूज्यान् वन्दनीयान् वैश्यान् दासाँश्च दासिकाः ॥३५॥
भृत्यान् कार्यकराँश्चापि स्थानिनस्तैर्थिकानपि ।
आगन्तुकान् महीमानान् प्रसंगाच्च समागतान् ॥३६॥
पानं पूगीफलं दुग्धं पायसं मिष्टमन्नकम् ।
फलं जलं दलं चापि ददौ गोपालकृष्णकः ॥३७॥
वाद्यन्ते तत्र वाद्यानि तूर्याणि विविधान्यपि ।
गीतिकाश्चापि जायन्ते सर्वस्त्रीणां च मण्डपे ॥३८॥
आयान्ति च प्रयान्त्येत्य प्राप्य ताम्बूलकादिकम् ।
सौराष्ट्रं सर्वमेवेति नगरं च समस्तकम् ॥३९॥
समायादुत्सवे तत्र राधे ! ताम्बूलकोत्सवे ।
ताम्बूलदानकं तत्र दीयते सततं प्रिये ॥४०॥
भोजनार्थं पंक्तयश्चाऽभवन् मध्याह्नकेऽपि तु ।
मण्डपं वीक्षितुं तत्राऽऽययुः सहस्रशो जनाः ॥४१॥
तेऽपि सर्वे भोजनानि जगृहुः श्रीहरेर्गृहे ।
महीमाना नगरस्था देशेभ्य आगता अपि ॥४२॥
वर्धयित्वा बालकृष्णं प्राप्य सुस्वागतं ततः ।
भोजनानि कृतवन्तो विश्रान्तिं परमां ययुः ॥४३॥
ब्राह्मणाश्च तदन्याश्च स्वामिनो भृत्यजातिकाः ।
दीनाऽनाथा भिक्षुकाश्च भोजनानि प्रचक्रिरे ॥४४॥
मिष्टान्नानि पायसानि क्षीराणि भक्ष्यकाणि च ।
लवणानि स्वादवन्ति बुभुजिरेऽतितृप्तिकम् ॥४५॥
ताम्बूलानि तथा पूगीफलानि प्राप्य वै ततः ।
आगन्तुका भोजनानि कृत्वा यान्ति निजालयम् ॥४६॥
महीमाना येऽद्य पत्र्याऽऽमन्त्रिता देशगा अपि ।
विदेशगास्तथा भिन्नलोकगा भिन्नसृष्टिगाः ॥४७॥
आगच्छन्ति मनोवेगा योगिनस्तत्र चोत्सवे ।
मण्डपे ते स्वादवन्ति मधुपर्काणि भावतः ॥४८॥

ताम्बूलकं तथा लब्ध्वा विलोक्य मण्डपं तथा ।
बालकृष्णं वर्धयित्वा गृहीत्वा भोजनानि च ॥४९॥
मिलित्वा च महीमानान् ततो यान्त्यर्पिताऽऽसनम् ।
तूर्याणां निनदाश्चाव्याहता जायन्त उत्तमाः ॥५०॥
गीतिकाः कन्यकानां च प्रवर्तन्तेऽपि सर्वतः ।
दीयतां दीयतां चेति भुज्यतां भुज्यतामिति ॥५१॥
सत्कारं गृह्यतां चेति शब्दा रोधं व्रजन्ति न ।
भूमिमार्गाद् वायुमार्गान्महीमानव्रजाश्च खात् ॥५२॥
आयान्ति स्म विमानाद्यैर्वाहनैश्च मनोजवैः ।
महन्मण्डपमध्ये तान् गोपालकृष्णसेवकाः ॥५३॥
निवासयन्ति च यथाकल्पितेषु गृहेषु वै ।
स्वागतार्थे पार्षदाश्च तिष्ठन्ति सततं पुरः ॥५४॥
कन्यका दासदासाश्च सेवन्ते कृतिनस्तदा ।
एवं वै राधिके ! सायंपर्यन्तं पानदानकम् ॥५५॥
ताम्बूलादेः प्रदानं च भोजनं संव्यवर्तत ।
ततः सन्ध्यावन्दनादि नीराजनं हरेस्तथा ॥५६॥
अभवच्च ततो रात्रौ महोत्सवः कृतोऽभवत् ।
गायका वाद्ययुक्ताश्च गायन्ति तालमानतः ॥५७॥
गायन्ति गीतिकाश्चापि गान्धर्व्यो गायिकास्तदा ।
नृत्यन्ति नृत्यकारिण्यः सुवेषाः सुमनःप्रियाः ॥५८॥
अप्सरसो ब्रह्मसरसश्च गायन्ति गीतिकाः ।
नृसरसस्तथा पर्यो गायन्ति नृत्यसंयुताः ॥५९॥
कन्यका विविधाऽऽयामा भिन्नभंगीकृतश्रमाः ।
देहयष्टीः प्रविवृत्य दर्शयन्त्यासनीकलाः ॥६०॥
एवं वै राधिके जाते ततो रासार्थमागताः ।
रंगमण्डपमध्ये ताः कन्यका रासमादधुः ॥६१॥
सर्वास्ताः समवेषाश्च समकान्तिसमाम्बराः ।
समभूषाः समभावा रासयन्ति हि मण्डपे ॥६२॥
वादिका वादयन्त्येव गायन्ति गायिकास्तथा ।
मध्यपरे नृत्यवत्यौ द्वे स्त्रियौ नृत्यतस्तदा ॥६३॥
अन्याश्चक्रभ्रमेणैव गायन्ति च भ्रमन्ति च ।
हस्ततालीप्रदानैश्च पादन्यासैश्च विक्रमैः ॥६४॥
पृष्ठपादैर्वक्रपादैर्वक्रदेहैश्च मण्डले ।
वक्रग्रीवादिभिश्चापि वक्रनेत्रैः रमन्ति च ॥६५॥
एवं रासे कृते पश्चान्मल्लास्तत्र समाययुः ।
सबलाः शिखरप्रायाः पुष्टा नादविनादिनः ॥६६॥
स्वभावचञ्चलाः पृष्ठकूर्दनैर्हास्यकारिणः ।
मण्डले मण्डलाकारे द्वौ द्वावाजग्मतुस्तदा ॥६७॥

योधनं चक्रतुश्चापि विकर्षणाऽपकर्षणैः ।
उत्तानक्षेपणैश्चापि भूमुखक्षेपणादिभिः ॥६८॥
स्वमुखक्षेपणैश्चापि स्वाम्याकर्षणकादिभिः ।
पृष्ठताडनकैश्चापि सक्थिताडनकैस्तथा ॥६९॥
अग्रे वेगक्षेपणैश्चाऽम्बरे क्षेपणकैस्तथा ।
भ्रामणै रेचनैश्चापि पादबाहुप्रयोधनैः ॥७०॥
वक्षोयोधनकैश्चापि जयाजयपरायणैः ।
गुरुभारवहाश्चाऽन्ये दन्तभारप्रतोलकाः ॥७१॥
वक्षःपाषाणभेदाश्च पृष्ठहस्तिगमास्तथा ।
करेणशकटीरोधाः स्कन्धे दशजनाश्रयाः ॥७२॥
इत्येवं बहुधा भेदान् मल्लाः प्रदर्शयन्ति च ।
ततो याता नाट्यकरा नेपथ्यधारिणः शुभाः ॥७३॥
बालाश्च बालिकाश्चापि चक्रुर्नेपथ्यमंगलम् ।
नाटकं बालकृष्णस्याऽवतारस्य यथातथम् ॥७४॥
चक्रुः सुशोभनं चाकर्षणकारि मनोहरम् ।
वैकुण्ठादागमो यद्वल्लक्ष्म्या नारायणस्य च ॥७५॥
शंभोः सुनर्तनं चापि पृथ्व्यास्तले तथाऽऽगमः ।
लक्ष्म्यास्तपस्तथा श्रीमद्बालकृष्णस्य दर्शनम् ॥७६॥
एवं वै नाटकं पुरावृत्तं चक्रुर्हरेर्हि ते ।
नाट्यरंगे विनिर्वृत्ते विद्वांसस्तत्र चाययुः ॥७७॥
सूताश्च मागधाश्चापि बन्दिनः कवयस्तथा ।
काव्यानि नूतनान्येव श्रावयन्ति समाजके ॥७८॥
नारायणगुणाँश्चापि प्राचीनचरितान्यपि ।
गुणाँश्च दुःखहालक्ष्म्याः सत्याश्चापि शिवस्य च ॥७९॥
श्रीमद्गोपालकृष्णस्य कंभराया हरेस्तथा ।
अथाऽभवन् कथा रम्याः संहितासु तु याः स्थिताः ॥८०॥
ततः श्रीबालकृष्णस्य पूजनं च निशार्धके ।
अभवत् पानदानाद्यैर्वस्त्राम्बरविभूषणैः ॥८१॥
ताम्बूलानि भोजनानि मिष्टपेयानि वै तदा ।
ददौ गोपालकृष्णश्च सर्वरंगेभ्य एव ह ॥८२॥
बालो वापि प्रमत्तो वा दीनो वा नाऽवशिष्यते ।
सर्वैर्लब्धं भोजनं च ताम्बूलकं च दक्षिणा ॥८३॥
ददौ कार्यकरेभ्यश्च रंगेभ्यो भगवत्पिता ।
पारितोषिकपात्रेभ्यः पारितोषिकमुत्तमम् ॥८४॥
स्वर्णरूप्यकरत्नानि मणिमौक्तिकहीरकान् ।
अमूल्यहाराऽऽभूषाँश्चाम्बराणि दिव्यकान्यपि ॥८५॥
कण्ठस्रजः प्रकोष्ठकसौवर्णकटकानि च ।
मुद्राश्चान्योपकरणान्यपि ददौ हरेः पिता ॥८६॥

सन्तुष्टास्तै दर्शकास्तु रंगशोभाकरा अपि ।
आयासिनश्च सन्तुष्टाः कलाकौशल्यशालिनः ॥८७॥
स्वस्वविद्याकलाप्रदर्शकास्तोषमगुर्घनैः ।
धन्या धन्या वदन्तश्च नेमुः कृष्णं च गोपकम् ॥८८॥
पितरं ते प्रणेमुश्च तथा नार्यः कलाक्रियाः ।
नर्तक्याद्या गायिकाश्च वस्त्रभूषाम्बराण्यपि ॥८९॥
पारितोषिकमासाद्य रत्नमौक्तिकमालिकाः ।
हीरकाँश्च शाटिकाश्च कञ्चुकीः स्वर्णसूत्रजाः ॥९०॥
शृंगारोपकरणानि सम्प्राप्य तोषणं ह्यगुः ।
पीत्वा भुक्त्वा नमःकृत्वा स्वस्वावासं ययुस्ततः ॥९१॥
महीमाना ययुश्चापि महामण्डपगालयान् ।
पत्तनीया ययुर्नैजालयान् महर्षयः कुटीः ॥९२॥
सन्तो निजाश्रमाँश्चापि भृत्याः स्वस्वालयान् ययुः ।
श्रीमद्गोपालकृष्णोऽपि कृत्वा सात्त्विकभोजनम् ॥९३॥
भोजयित्वा गृहजनान् बालकृष्णादिकाँस्ततः ।
परावृत्याऽमूल्यवेषं सामान्यं वेषमाप्य च ॥९४॥
विश्रान्त्यर्थं ययौ नैजे त्वालये निद्रितोऽभवत् ।
बालकृष्णोऽपि भगवान् निद्रामवाप योगिनीम् ॥९५॥
वाद्यानां वादकाश्चापि विरम्य भोजनानि च ।
कृत्वा नैजानालयाँश्च प्रययुर्निद्रिता अपि ॥९६॥
क्षेत्रपालाः शंकराद्या भुक्त्वा च देवतागणाः ।
स्वस्वमन्दिरमास्वाद्य विश्रान्तिं लेभिरे निशि ॥९७॥
कान्दविकाः सेवकाश्च परिहारकरास्तथा ।
कर्मचाराः प्रभुक्त्वैव स्वस्थानेषु च निद्रिताः ॥९८॥
तदा रात्रौ राधिके! ये रक्षकाः पालकाः जनाः ।
रात्रिंचरा जाग्रतास्ते कुर्वन्ति क्षेत्रवीक्षणम् ॥९९॥
सशस्त्राश्चापि वाहाद्यैर्भ्रमन्ति परितोदशः ।
जागरूका निद्रितानामालयान् रक्षयन्ति च ॥१००॥
इत्येवं राधिके! रात्रिर्व्यतीता चोज्ज्वला हि सा ।
प्रातर्जातं सर्वदिव्यमांगल्यसंभृतं पुनः ॥१०१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लिखित्वा कुंकुमपत्रिकायाः सर्वसृष्टिषु प्रेषणं, ताम्बूलपूगीफलादिमहोत्सवः रात्रौ गायिकानृत्यवाद्यनाट्यमल्लकाव्यपारितोषिकभोजनाद्युत्सवाः, परिहारो निद्राचेत्यादिनिरूपणनामैकाशीत्यधिकद्विशततमोऽध्यायः ॥ २८१ ॥

श्रीकृष्ण उवाच—

राधिकेऽथ समुन्निद्रा महीमाना बभूविरे ।
प्रातर्मंगलवाद्याद्यैः सूतमागधगीतिभिः ॥ १ ॥
बन्दीजनानां प्रस्तावैर्नैसर्गिकैश्च तूर्यजैः ।
सुस्वरैश्च यशोगानैर्जजागरुर्जनाः प्रगे ॥ २ ॥
चतुर्घटिकवादित्रैर्ब्राह्मस्मरणकारकैः ।
कृष्णकीर्तननादैश्च जजागरुर्जना प्रगे ॥ ३ ॥
सौभाग्यस्त्रीजनगीतैः कन्यकाकृतकीर्तनैः ।
गायकानां गायनैश्च जजागरुर्जनाः प्रगे ॥ ४ ॥
अश्वपट्टसरस्तीरे मण्डलीजनकीर्तनैः ।
वेदिकानां स्तोत्ररावैर्जजागरुर्जनाः प्रगे ॥ ५ ॥
उत्साहैश्चिन्तनैर्भावैः श्रद्धाभिः सत्त्ववृत्तिभिः ।
प्रवर्तनाभिः सौम्याभिर्जजागरुर्जनाः प्रगे ॥ ६ ॥
अन्तर्यामिप्रेरणाभिः प्रेमभावभरैस्तथा ।
विमानानां गर्जनैश्च जजागरुर्जनाः प्रगे ॥ ७ ॥
शकुन्तानां कलरवैः स्वप्ने कृष्णोत्सवेक्षणैः ।
गृहपत्नीगीतिकाभिर्जजागरुर्जनाः प्रगे ॥ ८ ॥
दोग्ध्रीणां वत्सरंभैश्च वादित्रयन्त्रगायनैः ।
महीमानाऽऽगमघोषैर्जजागरुर्जनाः प्रगे ॥ ९ ॥
पुण्यानां प्रेरणाभिश्च चाञ्चल्यवृत्तिभिस्तथा ।
किंजिज्ञासाप्रवेगैश्च जजागरुर्जनाः प्रगे ॥१०॥
स्नात्वा सन्ध्यादिकं कृत्वा चाश्वपट्टसरोजले ।
कृतशृंगारशोभाश्च द्वार्षु स्वस्त्यादिकान् व्यधुः ॥११॥
रंगवल्लीर्व्यधुश्चापि प्रभृज्य दधिचूर्णकैः ।
आंगणेषु चित्रवर्णतोरणानि न्यधुस्तथा ॥१२॥
दत्तकज्जलनेत्राश्च कृतकबरीवेषिकाः ।
धृतभूषोज्ज्वलवस्त्रा मंगलानि स्त्रियो जगुः ॥१३॥
गणेशपूजनं विप्राश्चक्रुर्मण्डपपूजनम् ।
श्रीकृष्णपूजनं चक्रुर्बालकृष्णस्य पूजनम् ॥१४॥
कुलदेवस्य च पुरुषोत्तमस्य प्रपूजनम् ।
चक्रुः श्रीशंकरस्यापि सूर्यस्यापि च पूजनम् ॥१५॥
पूजनं सर्वतोभद्रदेवानां च व्यधुस्ततः ।
धेनूनां पूजनं चापि कन्यकानां च पूजनम् ॥१६॥
मातृकापूजनं विष्णोः पूजनं ते व्यधुस्ततः ।
नीराजनं सुनैवेद्यं प्रददुर्दक्षिणादिकम् ॥१७॥
विप्राणां पूजनं चक्रुर्हरिद्रापूजनं तथा ।
हरिद्रापिष्टिकां नार्यश्चक्रुः सम्मृद्य ग्रन्थिकाः ॥१८॥

गन्धसारं तिलपिष्टं कस्तूरिकां च केसरम् ।
सुगन्धतैलं श्रेष्ठं च मिश्रयामासुरुत्सुकाः ॥१९॥
अथ श्रीबालकृष्णस्य स्नानार्थं तपनोदकम् ।
तीर्थजलं समाजह्रुर्नार्यः सौभाग्यशोभिताः ॥२०॥
कन्यकाः स्वर्णकलशैराजह्रुः सलिलं शुभम् ।
सवाद्यघोषगीतैश्च समाजह्रुर्जलं हि ताः ॥२१॥
कानके स्वासने न्यस्य प्रपूज्य जलदेवताम् ।
रत्नानि पञ्च निक्षिप्य सुगन्धिद्रव्यकं तथा ॥२२॥
देवाँश्च सागराँस्तत्र तीर्थान्यावाह्य चामृतम् ।
सुधामावाह्य च पट्टे स्नापयामासुरच्युतम् ॥२३॥
मर्दयन्ति तदा नार्यः शरीरं सांगमुज्ज्वलम् ।
कोटिसूर्यसमाभं च कोटिचन्द्रशुभाननम् ॥२४॥
कोटिविद्युत्समांगं च कोटिगन्धनिवासकृत् ।
कोटिरूपभृतं चापि कोटिरसविशिष्टकम् ॥२५॥
सर्वसद्गुणकोशं च सर्वलावण्यसंभृतम् ।
सर्वसौन्दर्यपात्रं च सर्वकामगुणाश्रयम् ॥२६॥
सर्वपुष्टिभरं कृष्णनारायणं परेश्वरम् ।
मर्दयामासुरत्यर्थं निर्मलस्य मलापहाः ॥२७॥
तैलैः सुगन्धरसनैर्गन्धिद्रव्यैर्मलापहैः ।
आमलकैस्तिलपिष्टैः क्षारद्रव्यैः समुज्ज्वलैः ॥२८॥
मृदुभिर्नवनीताद्यैः कर्दमैः पौष्टिकैस्तथा ।
सुगन्धचन्दनाद्यैश्च स्नपयामासुरुत्सुकाः ॥२९॥
अथ क्षौरं यथायोग्यं नापितः प्रचकार ह ।
ततोऽयं मधुना सस्नौ शर्करावारिभिस्ततः ॥३०॥
दुग्धेन च घृतेनापि दध्ना सस्नौ स्वयं प्रभुः ।
ततश्च मधुना चापि पुनः शर्करयाऽपि च ॥३१॥
क्षारद्रव्येण च ततः सस्नौ सुगन्धिभिस्ततः ।
तैलैः कस्तूरिकाभिश्च चन्दनैः केसरैस्ततः ॥३२॥
पिष्टिकामर्दनैश्चापि सस्नौ चम्पकभोऽभवत् ।
एवं वै पिष्टिकास्नानं कृत्वा वस्त्राणि चादधौ ॥३३॥
भूषाम्बराणि सर्वाणि तिलकादीनि चन्द्रकम् ।
ततः सिंहासने स्वर्णे निषसाद प्रभुः स्वयम् ॥३४॥
लोकास्तिलकदानार्थं पूजनार्थं हरेस्तदा ।
समायान्ति तथा नार्यो महीमानास्तथाऽपरे ॥३५॥
एवं सम्पूज्यते श्रीमद्बालकृष्णः सपिष्टिकः ।
सुगन्धोऽस्य शरीराद्वै निःससार समन्ततः ॥३६॥
सुगन्धितं हि सौराष्ट्रं तदाऽभवत्प्रदूरतः ।
महीमानाः समायान्ति त्वाकाशयानतस्तदा ॥३७॥
समन्ततः सर्वदेशेभ्यश्च लोकेभ्य इत्यति ।
शंकरः क्षेत्रपालश्च नारदश्च महामुनिः ॥३८॥
भगवान् भावयिच्चापि शुकश्चास्याऽनुवर्तनः ।
स्वतःप्रकाशो भगवाँस्तथा सन्तुष्टिकादिकाः ॥३९॥
ब्रह्मप्रियाः समस्ताश्च व्यधुः स्वागतमुत्सुकाः ।
भोजनानि प्रवर्तन्ते दुग्धपानानि चापि वै ॥४०॥
भक्ष्यभोज्यानि सर्वाणि दीयन्ते च महानसात् ।
पंक्तयोऽपि भवन्त्येव सर्वलोकनिवासिनाम् ॥४१॥
भुञ्जते प्रेमभावैश्च मिष्टान्नानि बहून्यपि ।
लेह्यचोष्याणि सर्वाणि प्रलिहन्ति रसानपि ॥४२॥
पिबन्ति दुग्धपाकादीन् खादन्ति क्षारभर्जितान् ।
आस्वादयन्ति दध्यादि नवनीतघृतान्यपि ॥४३॥
मल्लयिकाः पिण्डकाँश्च शष्कुलीर्भक्षयन्त्यपि ।
अमृतानि सुधास्वादून्यपि पिबन्ति भावतः ॥४४॥
शाकानि रूपभेदाँश्चौदनान्यपि सुगन्धिकाः ।
फुल्लवटीर्भक्षयन्ति घृतमिष्टप्रपोलिकाः ॥४५॥
पूपानपूपान् लड्डूँश्च खाजकान्मोहनस्थलान् ।
मेशुमान् बहुमिष्टाँश्च भक्षयन्ति जनास्तदा ॥४६॥
घृतकुल्या दधिकुल्या मधुकुल्या वहन्ति च ।
पिबन्ति पाचनशक्ता भक्षयन्ति च भोगिनः ॥४७॥
तत्तद्धामनिवासानां तत्तद्योग्यानि सर्वथा ।
उपस्थाप्यन्त एवात्र लक्ष्म्यादिभिश्च कल्पकैः ॥४८॥
कल्पपात्रादिभिश्चाप्यक्षयपात्रादिभिस्तथा ।
ताम्बूलकानि दीयन्ते मुखाच्छकानि भुज्यन्तु ॥४९॥
जलपानं तथा चूर्णं मुखशुद्धिकरं शुभम् ।
ततो यान्ति वासमन्दिराणि वै महीमानकाः ॥५०॥
इत्येवं राधिके ततोत्सवो भवति शोभनः ।
आयान्ति सर्वतस्तत्र महीमाना हि कोटिशः ॥५१॥
ब्रह्मधामगता मुक्तास्तथा धामेतरस्थिताः ।
सर्वधामनिवासाश्च मुक्तास्तत्र समाययुः ॥५२॥
मुक्तान्यः सांख्ययोगिन्यो ब्रह्मप्रियास्तथाऽऽययुः ।
ईश्वरा ईश्वराण्यश्च समुत्सुकाः समाययुः ॥५३॥
अवताराऽवतारिण्यस्तत्रोत्सुकाः समाययुः ।
ईश्वराणामीश्वराश्चेश्वराण्यः प्रसमाययुः ॥५४॥
मायालोकगता मुक्ता मुक्तान्यश्च समाययुः ।
अष्टावरणमुक्ताश्च तन्मुक्तान्यः समाययुः ॥५५॥
सत्यलोकगता मुक्ताः साधवश्च महर्षयः ।
ब्रह्मचर्यपराः सन्तः सिद्धास्तत्र समाययुः ॥५६॥

पितरो मुनयो वृद्धाः सिद्धान्यश्च समाययुः ।
सत्यः साध्व्यो विरागिण्यो देव्यस्तत्र समाययुः ॥५७॥
मातृका योगिनीनार्यो योगिनश्च समाययुः ।
देवा देवेश्वराश्चापि देवताश्च समाययुः ॥५८॥
ध्रुवस्थाश्चापि नाक्षत्रलोकस्था ग्रहवासिनः ।
अन्तरीक्षस्थिताश्चापि ऋषिमण्डलवासिनः ॥५९॥
सूर्यचन्द्रनिवासाश्च देवास्तत्र समाययुः ।
ब्रह्मपुत्र्यो देवपुत्र्यः पितृपुत्र्यः समाययुः ॥६०॥
विद्युद्वासा मेघवासा मेरुवासाः समाययुः ।
दिक्पाला लोकपालाश्च पुर्यष्टेशाः समाययुः ॥६१॥
भुवर्लोकनिवासाश्च वायुदेहाः समाययुः ।
गान्धर्वाश्चारणाः सिद्धेश्वराश्च तापसा अपि ॥६२॥
जलेचराः स्थलेचरा व्योमचराः समाययुः ।
यक्षाश्च राक्षसा भक्ता भूतप्रेतपिशाचकाः ॥६३॥
वैनायकाश्च कूष्माण्डा वैष्णवास्तत्र चाययुः ।
गृहदेवा ग्रामदेवा वनदेवाः समाययुः ॥६४॥
आरण्यकास्तथा देवा मुनयो मानवा अपि ।
गान्धर्वाद्यास्तथा सर्वास्तापस्यश्च समाययुः ॥६५॥
सिद्धयो वसवः साध्याः किन्नराः किंजना अपि ।
विद्याध्राः कामदेवाद्यास्तत्पत्न्यश्च समाययुः ॥६६॥
धर्मो धर्मस्य वंशश्च धर्मपत्न्यः समाययुः ।
जातिस्मराः पशवः तिर्यञ्चः पक्षिणस्तथा ॥६७॥
कीटाः पतंगका वृक्षा वल्ल्यस्तृणानि चाययुः ।
कामदुघाः कल्पलताः कल्पपात्राणि चाययुः ॥६८॥
रसाः श्रृंगारभेदाश्च शारदा च स्वरास्तथा ।
गुणाश्चायुधजातानि मूर्तिमन्ति समाययुः ॥६९॥
विषयो यज्ञपुरुषा वह्नयो वैष्णवास्तथा ।
उपचारोपकरणान्याययुर्मूर्तिमन्ति च ॥७०॥
नदा नद्यः समुद्राश्च वाप्यः कूपाः सरांस्यपि ।
तीर्थानि पर्वताश्चारण्यकानि तत्र चाययुः ॥७१॥
चातुर्वर्णा जनाश्चापि नरा नार्यः समाययुः ।
दक्षिणात्पूर्वदेशाच्च प्राग्ज्योतिषात् समाययुः ॥७२॥
उष्णदेशादुष्ट्रभागाद् ब्रह्मदेशात् समाययुः ।
प्राचीनदेशात् पिंगाच्च जलपानात् समाययुः ॥७३॥
राशियानात् त्रिविष्टाच्च समाययुश्च शांभवात् ।
हिमदेशात् काश्मिराच्चोरलदेशात् समाययुः ॥७४॥
किंपुरुषात् केतुमालाच्चाब्धिद्वीपेभ्य आययुः ।
आरक्ताच्चाऽऽब्रिक्तदेशात् सामुद्रद्वीपतस्तथा ॥७५॥

उत्तरात्तर्कदेशाच्चाययुस्तत्र महोत्सवे ।
आरात्रिकप्रदेशाच्च भूगर्भाच्च समाययुः ॥७६॥
उत्तरकुरुतश्चापि केनारकात्तथाऽऽययुः ।
ब्राझीलसंप्रदेशाच्च हारीतकप्रदेशकात् ॥७७॥
अमरीकप्रदेशाच्चाययुस्तत्र महोत्सवे ।
अरासनप्रदेशाच्च माक्षिकाख्यप्रदेशकात् ॥७८॥
अरजस्कप्रदेशाच्चाययुः सर्वे समुत्सुकाः ।
सामुद्रद्वीपवासाश्चाययुर्विमानगामिनः ॥७९॥
राजानो भृत्यवर्गाश्च कन्यकापितरश्च ये ।
बालकृष्णश्वशुराद्याः कुटुम्बिनः समाययुः ॥८०॥
ऋषयो राशयश्चापि नदा नद्यश्च कन्यकाः ।
स्मृद्धयः सिद्धयश्चापि समन्ततः समाययुः ॥८१॥
अतलादिनिवासाश्च देवा दैत्याश्च दानवाः ।
आसुरा भक्तिमन्तश्च भक्तास्तत्र समाययुः ॥८२॥
नागाः सर्पा दिग्गजाश्च शक्तयः सृष्टिरक्षिकाः ।
वेदा विद्याः समस्ताश्च कलाः सर्वाः समाययुः ॥८३॥
मातृपक्षाः पितृपक्षा दुहितृपक्षगास्तथा ।
स्वसृपक्षावधूपक्षास्तत्तत्सम्बन्धिनस्तथा ॥८४॥
परम्परासु सम्बद्धाः सम्बन्धिनः समाययुः ।
शिष्यपक्षा भक्तपक्षाः ऋषिपक्षाः समाययुः ॥८५॥
मन्त्रपक्षा देशपक्षाः प्रजापक्षाः समाययुः ।
कुटुम्बस्य पक्षीयाणां पक्षीयाणा च पक्षगाः ॥८६॥
नरा नार्यो देवदेव्यस्तत्रोत्सवे समाययुः ।
सभृत्याः ससुहृदः समित्राः सानुगास्तथा ॥८७॥
सयोगाः सव्यवहाराः सहवासाः समाययुः ।
अनादिश्रीकृष्णनारायणः श्रीकान्तमाधवः ॥८८॥
श्रीकृष्णो वहते लक्ष्मीं कृष्णां शिवोद्भवां भुवि ।
शिवेश्वरसुता श्रीशालक्ष्मीर्नारायणीस्वयम् ॥८९॥
अनादिश्रीकृष्णनारायणे देवे समर्प्यते ।
लक्ष्मीस्तं तु सदाऽऽप्ता स्यात् श्रीकृष्णं पुरुषोत्तमम् ॥९०॥
लक्ष्मीः कृष्णार्धदेहा च कृष्णा कृष्णात्मिका हि सा ।
कृष्णो लक्ष्म्यर्धदेहश्च लक्ष्मीनारायणो हि सः ॥९१॥
कृष्णेन सह कृष्णायाश्चैकात्म्यं जायते भुवि ।
अहो गन्तव्यमेवाऽपि सुयोगः कृष्णयोरिति ॥९२॥
धाममुक्तास्तथा चेशा देवाश्च मानवा अपि ।
आयान्त्युत्सुकहृदयाः सुयोगः कृष्णयोरिति ॥९३॥
बाला वृद्धा युवानश्च तृतीयप्रकृतिस्थिताः ।
नरा नार्यः समायान्ति सुयोगः कृष्णयोरिति ॥९४॥

सरःसेतौ नारदेन श्रुतं पिपीलिकावचः ।
आल्यो भोज्यं सुप्राप्स्यामः सुयोगः कृष्णयोरिति ॥९५॥
धर्मराजस्य दूता वै शृण्वन्ति नरके गिरः ।
मोक्षं शीघ्रमवाप्स्यामः सुयोगः कृष्णयोरिति ॥९६॥
कारागारवचांस्येव श्रुतवन्तो निरीक्षकाः ।
विबन्धनमवाप्स्यामः सुयोगः कृष्णयोरिति ॥९७॥
साधवः श्रुतवन्तश्च भिक्षुकाणां वचांस्यपि ।
दानं श्रेष्ठमवाप्स्यामः सुयोगः कृष्णयोरिति ॥९८॥
निर्धनानामृणवतामश्रूयन्त वचांस्यपि ।
अनृणत्वमवाप्स्यामः सुयोगः कृष्णयोरिति ॥९९॥
दासानां समश्रूयन्त वचांस्युत्साहवन्त्यपि ।
पारितोषिकमाप्स्यामः सुयोगे कृष्णयोरिति ॥१००॥
सार्थानां मार्गमाप्तानां वार्तायां श्रूयते वचः ।
शीघ्रं शीघ्रं प्रगन्तव्यं सुयोगे कृष्णयोरिति ॥१०१॥
कन्याकुलानि चायान्ति त्वश्वपट्टसरोवरम् ।
वाहिन्या सममेष्यामः सुयोगे कृष्णयोरिति ॥१०२॥
यादसां स्नानकाले वै श्रुतं वचो महर्षिभिः ।
वयं भक्ष्यमवाप्स्यामः सुयोगे कृष्णयोरिति ॥१०३॥
पितॄणां समश्रूयन्त वचांसि हर्षजान्यपि ।
श्राद्धे तृप्तिमवाप्स्यामः सुयोगे कृष्णयोरिति ॥१०४॥
हिंसकाणां वने वाचोऽश्रूयन्त नियमान्विताः ।
हिंसितव्यं न सप्ताहे सुयोगः कृष्णयोरिति ॥१०५॥
देवानामप्यश्रूयन्त धर्मवाचोऽष्टवासराः ।
ब्रह्मचर्यपराः पाल्याः सुयोगे कृष्णयोरिति ॥१०६॥
पण्डितानामश्रूयन्त वचांसि सोत्सुकानि वै ।
साम तत्रैव गास्यामः सुयोगे कृष्णयोरिति ॥१०७॥
कर्मठानां श्रुता वाचो यास्यामो दर्शनाय ह ।
पद्धतिं सुप्रशिक्ष्यामः सुयोगे कृष्णयोरिति ॥१०८॥
अमंगलानि तत्त्वानि विवदन्ते परस्परम् ।
अमांगल्यं विहातव्यं मंगले कृष्णयोरिति ॥१०९॥
वदन्त्यपशकुनानि मिलित्वा स्वस्थले द्रुतम् ।
कुस्वभावो विहन्तव्यः प्रयोगे कृष्णयोरिति ॥११०॥
ग्रहाश्चापि विवदन्ते क्रौर्यं त्याज्यं दिनाष्टके ।
फलं नैव प्रदातव्यं मंगले कृष्णयोरिति ॥१११॥
कश्चिद् वृद्धः शुष्कगात्रो वक्रकटिः सयष्टिकः ।
श्वसन् शीघ्रं वदन् याति प्रोद्वाहः कृष्णयोरिति ॥११२॥
कुंकुमपत्रिकां दृष्ट्वा सर्वलोकनिवासिनः ।
सज्जा भवन्त्यागमार्थे प्रोद्वाहः कृष्णयोरिति ॥११३॥
कामदुघा धेनवश्च सवत्साः सोत्सुकाः शनैः ।
आयान्त्यश्वसरो रम्यं मंगलं कृष्णयोरिति ॥११४॥
स्वव्यापारं समुत्सृज्य व्यापारिणः प्रयान्त्यपि ।
अश्वपट्टसरःक्षेत्रं मंगलं कृष्णयोरिति ॥११५॥
कर्षुकाश्च कृषिं त्यक्त्वा नीत्वोद्यानफलान्यपि ।
प्रयान्त्यश्वसरो दृष्टा मंगलं कृष्णयोरिति ॥११६॥
सूतकिनो व्रतिनश्च निर्धूय कृच्छ्रतो हि तत् ।
यान्ति चाश्वसरो दृष्टा सुयोगे कृष्णयोरिति ॥११७॥
उपदाः परिकुर्वन्ति सर्वलोकनिवासिनः ।
दातव्या वै यथाशक्ति सुयोगे कृष्णयोरिति ॥११८॥
असाध्यं साधयित्वाऽपि गन्तव्यं मण्डपं द्रुतम् ।
इति गृणन्ति भूतानि प्रोद्वाहः कृष्णयोरिति ॥११९॥
इत्येवं राधिके ! वाचोऽश्रूयन्त भगवत्पराः ।
पठनाच्छ्रवणादासां भवेत् स्वर्गं च मोक्षणम् ॥१२०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने द्वितीयायां प्रातर्मंगलदृश्यानि देवपूजनानि बालकृष्णस्य पिष्टिकामर्दनं स्नानं शृंगारो महीमानादीनां भोजनादीनि सृष्टित्रयागमः, कृष्णयोर्मंगलयोगजन्योत्साहलाभादिचेतिनिरूपणनामा द्व्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८२ ॥

**श्रीकृष्ण उवाच—**

मध्याह्ने च यथा तद्वद् रात्रौ सद्भोजनान्यपि ।
अभवन् सर्वयोग्यानि भुक्त्वा पीत्वा जलादिकम् ॥ १ ॥
ताम्बूलकं समगृह्य रात्रिरञ्जनकानि वै ।
द्रष्टुं रंगे गताः सर्वे दृष्टवन्तो नवान् नवान् ॥ २ ॥
दृश्यान् बोध्यान् कलाकाण्डान् परिहारोत्तरं ततः ।
निद्रां शान्तिं जगृहुश्च तृतीयाप्रातरागमत् ॥ ३ ॥
ब्राह्मे मुहूर्ते सततं मंगलैस्तूर्यनिःस्वनैः ।
गीतिभिर्बन्दिकवाग्भिर्जजागरुश्च देहिनः ॥ ४ ॥
ब्रह्माण्डे यानि वाद्यानि तान्यवाद्यन्त तत्र वै ।
स्नाता हृष्टाः कृतसन्ध्यावन्दनाश्च महर्षयः ॥ ५ ॥
आशीर्वादान् प्रदातुं वै बालकृष्णं समाययुः ।
कृतस्नानं कृतवेषं समासीनं परासने ॥ ६ ॥
दत्ताशीर्वचना विप्रास्तिलकं चन्द्रकं व्यधुः ।
गणेशपूजनं चक्रुः कलशस्य प्रपूजनम् ॥ ७ ॥
नान्दीश्राद्धादिकं चक्रुर्गुरोश्च पूजनं व्यधुः ।
कुलदेवाऽर्हणं स्रक्रुर्वेदघोषान् व्यधुस्तथा ॥ ८ ॥

सर्वतोभद्रदेवानां विष्णोश्च पूजनं व्यधुः ।
दुग्धपानादिकं चक्रुर्महीमानाः समन्ततः ॥ ९ ॥
भोजनानि व्यधुश्चापि प्रातरारभ्य देहिनः ।
कोट्यर्बुदाब्जपद्माब्जपरार्धजनतास्तदा ॥१०॥
तृतीये प्रहरे कृत्वा परिहारं समन्ततः ।
शुभे मुहूर्ते सज्जाश्च बभूवुः सर्वतोजनाः ॥११॥

काशीं प्रति प्रगन्तुं वै योगयात्रानुयायिनः ।
विमानानां सहस्राणां सहस्राणि तदाऽभवन् ॥१२॥
शृंगारितानि सर्वाणि सज्जानि वाहनान्यपि ।
व्योमगान्येव सर्वाणि योगयात्रात्मकानि वै ॥१३॥
उद्घोषितं वरपित्रा काशीमायान्तु पावनीम् ।
योगयात्रात्मकाः सर्वे शिवेश्वरः समीहते ॥१४॥
शंकरो गणयुक्तोऽत्र क्षेत्रं पास्यति सर्वथा ।
नगरं चाश्रमाँश्चापि मण्डपाद्यं च पास्यति ॥१५॥

श्रुत्वा सज्जा बभूवुश्च सर्वे वै महीमानकाः ।
सुराष्ट्रीयप्रजाग्र्याश्च सृष्ट्यग्र्याश्च समर्हणाः ॥१६॥
सर्वा ब्रह्मप्रियाश्चापि समस्तकृष्णयत्निकाः ।
तासां पित्रादिकाः सर्वे सर्वभूमिनिवासिनः ॥१७॥
शृणु राधे तदाऽऽश्चर्यमभूच्चमत्कृतिप्रदम् ।
व्योमवाणी स्पष्टभावा चाश्रूयन्त समन्ततः ॥१८॥

सृष्टित्रयेऽपि यैः कन्या दत्ता निजाः परात्मने ।
पञ्चदशसमामध्ये बालकृष्णाय शार्ङ्गिणे ॥१९॥
तैः सर्वैस्तत्र पित्राद्यैरागन्तव्यं ध्रुवं यतः ।
तत्र वै शांभवीलक्ष्म्या योगे स्युर्लग्निताश्च ताः ॥२०॥
यावता वेदविधिना विधिना मानवेन च ।
वाह्नेयविधिना चापि कन्यादानविधानतः ॥२१॥
न्यूनतापरिहारार्थं देशधर्मानुरोधतः ।
वह्निं प्रदक्षिणीकृत्य विधानं संभविष्यति ॥२२॥

सर्वाभिश्चापि कन्याभिर्लोमशाश्रमवृत्तिभिः ।
अनादिश्रीकृष्णनारायणकान्ताभिरेव ह ॥२३॥
आगन्तव्यं श्रीकृष्णस्य वाह्निन्या सममेव वै ।
स्वपित्रादिकुटुम्बाद्यैः सार्धं रोधो न विद्यते ॥२४॥
श्रुत्वा सर्वे जनकाश्च कुटुम्बाः सर्ववस्तुभिः ।
योग्योपकरणैः सर्वे नारीयुक्ताः समुत्सुकाः ॥२५॥
सज्जा अभवन् कन्याश्चाऽभवन् सज्जाः समस्ततः ।
लोमशो मुनयश्चाऽन्ये महर्षयश्च साधवः ॥२६॥
सज्जा अभवन् सन्तश्च महीमानाः समन्ततः ।
भूषाम्बरविमानाद्यैः सहिताः कोटिशोऽपरे ॥२७॥

राधे तदा तु कन्यानामानन्दो न ममौ तनौ ।
सर्वशृंगारभूषादिपेटायुक्ताः समन्ततः ॥२८॥
सज्जा अभवँस्तूर्णं वै कृष्णालयं समाययुः ।
कन्यानां पितरश्चापि मातरोऽपि द्रुतं तदा ॥२९॥
कृष्णालयं समागत्य कन्याऽऽगमं सहाऽपि च ।
वाह्निन्या च प्रनिश्चिक्युर्बभूवुर्हृष्टमानसाः ॥३०॥

शकुनान्यभवँस्तत्र सर्वेषां तु तदा मुहुः ।
शुभान्येव हि सर्वाणि सर्वासामपि सन्ति च ॥३१॥
श्रेष्ठयोगप्रदान्येव यशःकीर्तिकराण्यपि ।
अविघ्नकार्यफलकान्यभवन् सूचनानि च ॥३२॥
प्रसन्नाननवत्यश्चाऽऽनन्दभृताः सवत्सकाः ।
दुग्धस्रावं प्रमुञ्चन्त्यो मिलिताः कामधेनवः ॥३३॥
सर्वशृंगारभूषाढ्याः सर्वानन्दपरिप्लुताः ।
कन्यका मिलिताश्चापि मिलिता वारयोषितः ॥३४॥

सफलार्द्राणि सस्यानि दधि गजाः सुभूषिताः ।
साऽम्बालिका राजराज्ञीयुक्तास्तत्र समागताः ॥३५॥
हंसाश्च राजहंसाश्च कन्यकाश्च जलान्विताः ।
गान्धर्व्यो मिलिताश्चापि गायन्त्यः सुविभूषिताः ॥३६॥
देवानां दर्शनं चापि प्रत्यक्षं चाऽम्बरेऽभवत् ।
लक्ष्मीनां कमलानां च दर्शनान्यभवँस्तदा ॥३७॥

वादित्राणां निनदाश्चाऽऽश्रूयन्त मंगलावहाः ।
यज्ञहोमा वेदमन्त्रा अश्रूयन्त शुभावहाः ॥३८॥
स्वाभाविकं चाऽभवच्च श्वेतवस्तुप्रदर्शनम् ।
दक्षिणा वह्नयश्चाप्यनुकूला वायवोऽभवन् ॥३९॥
गुर्वाशीर्वादवाचश्चाऽभवँस्तत्राऽतिशोभनाः ।
कृतवस्तूपसंग्राहाः सर्वे नराश्च योषितः ॥४०॥
कुंकुमवापिकासंस्थाः कृतभोजनपानकाः ।
कृतोपहाराः सद्वेषाः कुटुम्बसहिता जनाः ॥४१॥

महीमानाः सर्ववर्गाः सभृत्यमित्रबान्धवाः ।
सज्जा बभूवुः शीघ्रं ते सज्जविमानकोटयः ॥४२॥
अथ मंगलशंखस्य पाञ्चजन्यस्य वै तदा ।
यात्रामुखे निनादोऽभूद् विधये मंगलाय वै ॥४३॥
तदा गोपालकृष्णो वै ददौ दानानि कोटिशः ।
कन्याभ्यश्चापि विप्रेभ्यो बालेभ्यश्च विशेषतः ॥४४॥
मिष्टान्नानि शर्कराश्च फलानि विविधान्यपि ।
वस्त्राभूषाश्च पात्राणि रत्नानि च धनानि च ॥४५॥
गोदानानि स्वर्णरूप्यप्रदानानि तदा ददौ ।
यात्रामुखे गणेशस्य पूजनं प्रचकार ह ॥४६॥

सर्वतोभद्रपूजां च वृद्धानां पूजनं नमः ।
कुलदेवस्य च तथा पुरुषोत्तमशार्ङ्गिणः ॥४७॥
श्रीविष्णोर्दर्शनं चापि पूजनं वै श्रियास्तथा ।
चकार तत्र दानानि ददावसंख्यकान्यपि ॥४८॥
तीर्थदेवान्नमस्कृत्य द्वारदेवानपूजयत् ।
गाः सम्पूज्य ततो यानं विमानं समपूजयत् ॥४९॥
वैदिकाँश्चाऽपूजयच्च बालकृष्णोऽपि वै तदा ।
शंखचक्रगदापद्मधरो मुकुटशोभितः ॥५०॥
सकुण्डलोऽभवद्धस्ते स्वर्णखड्गधरोऽभवत् ।
वरवेषोऽभवत्तूर्णं हीरहारादिशोभितः ॥५१॥
सर्वकौशेयसौवर्णवेषोऽभवद् वरोत्तमः ।
कृतकुंकुमतिलकः सुवासितसुगन्धवान् ॥५२॥
प्रकोष्ठबाहुकव्यंगांऽगुलीभूषणभूषितः ।
कृताऽक्षताऽन्वितचन्द्रः शुशुभे तेजसाऽन्वितः ॥५३॥
माता श्रीकंभरालक्ष्मीस्तिलकं तस्य संव्यधात् ।
सन्तुष्टाख्या स्वसा चन्द्रं व्यधाद् कण्ठे स्रजं ददौ ॥५४॥
मणिमौक्तिकहाराँश्चोज्जयिनी शुकपत्निका ।
न्यधारयद्वरेः कण्ठेऽमृता च कज्जलं ददौ ॥५५॥
चक्षुषोः, शंवती केशानसाधयत् सतैलकान् ।
रमाऽलक्तकमेवाऽपि करयोश्च तले ददौ ॥५६॥
पदयोश्च तलेऽलक्तकमर्पयद्धि माणिकी ।
लक्ष्मीः कमलहाराँश्च स्वर्णहारान् ददौ तदा ॥५७॥
हासा ददौ पुष्पगुच्छं केयूरं मञ्जुला ददौ ।
अम्बा तेजोमणिं चक्रे सुगन्धं सगुणाऽक्षिपत् ॥५८॥
एवं विभूषयित्वैव ब्रह्मप्रियास्तथाऽपराः ।
कन्यकाः कृतवेषाश्च सज्जा भूत्वा व्यवस्थिताः ॥५९॥
तथाऽन्ये भ्रातरश्चापि गोपालकृष्णपूर्वजाः ।
अन्ये चापि भ्रातरश्च बालकृष्णस्य पितृजाः ॥६०॥
कन्यकाः शतशश्चापि बालाश्च बालिकास्तथा ।
पुत्रपौत्राः स्वसारश्च सम्बन्धिनः सहस्रशः ।
सज्जा बभूवुस्तूर्णं ते कृतपानादनास्तदा ॥६१॥
राजानो ये पितरौ वै कन्यकानां च भूमिपाः ।
तेऽपि सज्जा अभवँश्च कृतपानादनाः खलु ॥६२॥
तावद्भेरीनिनादोऽभूच्छंखनादस्तथाऽभवत् ।
विमानेषु समारोहसूचको लम्बगर्जनः ॥६३॥
तदा गोपालकृष्णश्च लक्ष्मीः श्रीकम्भरासती ।
कुटुम्बं सुविमाने वै चारुरोह सवस्तुकम् ।
ब्रह्मप्रियाः समस्ताश्चारुरुहुश्च विमानकम् ॥६४॥

लोमशाद्याः ऋषयश्चारुरुहुः सुविमानकम् ।
साधवोऽश्वपट्टवासाश्चारुरुहुर्विमानकम् ॥६५॥
कुंकुमवापिकालोकाश्चारुरुहुर्विमानकम् ।
राजा स्वर्णांगदोऽप्यारुरोह सवंशविस्तरः ॥६६॥
रणंगमोऽप्यारुरोह लक्ष्मणश्चारुरोह वै ।
तीर्थदेवाश्चारुरुहुश्चारुरुहुः प्रजाजनाः ॥६७॥
महीमानाश्चारुरुहुर्विमानान्ययुतान्यपि ।
शृणु राधेऽग्रगण्यानां नामान्यपि समासतः ॥६८॥
मेघनाद्यश्चतुर्दशसहस्राणि च सज्जिताः ।
षष्ठी या मनसादेवी बालरक्षाकरी सदा ॥६९॥
तस्या रूपाणि कन्या वै दीपावल्यो हि कोटिशः ।
ताः सज्जाश्च विमानो वै लोमशस्याऽऽश्रमात्तदा ।
आरुरुहुः कृतवेशाः सोत्साहाश्चाच्युताऽऽज्ञया ॥७०॥
तलाजा या तलपुत्री राक्षसी दिव्यतां गता ।
साऽपि विमानमेवाऽत्राऽऽरुरोह माधवाऽऽज्ञया ॥७१॥
कामधेन्वात्मककन्याः कोटिसंख्या विमानकम् ।
आरुरुहुस्तदा तत्र बालकृष्णाज्ञया द्रुतम् ॥७२॥
वसुमत्या समं कन्याशतमर्जन्तरक्षसः ।
आरुरोह विमानं च बालकृष्णाज्ञया तदा ॥७३॥
आरुरोह हरकन्या क्रोधना माधवाज्ञया ।
धरापुत्र्योऽयुतसहस्राणि धरासमन्विताः ॥७४॥
कोटिसंख्या गह्वराख्याश्चारुरुहुर्विमानकम् ।
सर्वाभरणवस्त्राढ्या दिव्याः प्रोत्साहितास्तदा ॥७५॥
सूच्याख्या वेधसः पुत्री विमानमारुरोह च ।
वनदेवीसुताःलक्षं चारुरुहुर्विमानकम् ॥७६॥
वनदेव्या समं मात्रा ओषध्याख्या हि कन्यकाः ।
दमनादिरक्षसां च नूत्नाख्या लक्षकन्यकाः ॥७७॥
आरुरुहुर्विमानं च भूषाम्बरादिभूषिताः ।
कंकताल्यो नूतनाः षट् चारुरुहुश्च कन्यकाः ॥७८॥
कंकतालादिनार्यश्च दिव्याऽयुतसुकन्यकाः ।
आरुरुहुर्विमानं च सर्वाभरणभूषिताः ॥७९॥
अर्यमादिकपितॄणां दिव्याश्च लक्षकन्यकाः ।
पितृयुक्ता निषेदुश्च विमाने सुविभूषिताः ॥८०॥
रसातलीयदैत्यानां पञ्चसहस्रकन्यकाः ।
कृष्णाज्ञया चारुरुहुर्विमानं सुविभूषिताः ॥८१॥
वासन्तिक्यः कन्यकाश्च विभूषिताश्च षोडश ।
आरुरुहुर्विमानं वै बालकृष्णाज्ञया तदा ॥८२॥

सालमालस्य दैत्यस्य कन्याः पञ्चशतानि च ।
स्वलंकृताः कृष्णवाक्याच्चारुरुहुर्विमानकम् ॥८३॥
नागकन्या विंशतिश्च तथा दशसहस्रकम् ।
स्वलंकृताश्चारुरुहुर्विमानं माधवाज्ञया ॥८४॥
शावदीनस्य वै कन्यासहस्रं सुविभूषितम् ।
आरुरोह विमानं च बालकृष्णाज्ञया तदा ॥८५॥
ऐन्द्रजालिककन्यानां सहस्रं च विमानकम् ।
आरुरोह तदा कृष्णाज्ञया श्रृंगारशोभिताः ॥८६॥
सरस्वती तथा चतुर्दशविद्याख्यकन्यकाः ।
षष्टिकन्यास्तथाऽन्याश्चारुरुहुश्च विमानकम् ॥८७॥
भूगर्भाच्चागतस्तत्र राजा लक्ष्मणनामकः ।
सोऽपि विमानकं चारुरोह नैजं परोत्तमम् ॥८८॥
स्वकीयद्विसहस्रकन्यकाभिः सह वै द्रुतम् ।
द्वासप्ततिसहस्राणि कन्यका नाडिकाभिधाः ॥८९॥
वेधसः पुत्रिकाश्चारुरुहुर्निजविमानकम् ।
विश्वावसुः स्वकन्याभिस्त्रिशतैश्च विमानकम् ॥९०॥
आरुरोह तदा कृतश्रृंगाराभिः समुत्सुकः ।
सहस्रं कन्यका जुमासेम्लाराज्ञो विमानकम् ॥९१॥
आरुरुहुः स्वपित्रा च कृतश्रृङ्गारशोभनाः ।
शतं कन्याः सौरत्यश्च विप्रैः पितृभिरेव ताः ॥९२॥
सहिता भूषिताश्चाप्यरुरुहुश्च विमानकम् ।
महावालेश्वरीकन्यात्रयं पित्रा समं तदा ॥९३॥
आरुरोह विमानं च स्वलंकृतं विभूषितम् ।
दक्षजवंगरो राजा उष्णालयस्य भूपतिः ॥९४॥
स्वकन्याशतकं रम्यं प्रजाकन्यासहस्रकम् ।
गृहीत्वा चारुरोहापि विमानं सुविभूषितम् ॥९५॥
अर्यम्णो विंशतिकन्या अन्या दशसहस्रकम् ।
अर्यम्णा सह सर्वास्ताश्चारुरुहुर्विमानकम् ॥९६॥
प्राचीनभ्वाः प्रजाकन्याः कोटिरेवाऽपि भूषिताः ।
स्वस्वपितृयुताश्चारुरुहुर्दिव्यं विमानकम् ॥९७॥
सन्तारणस्य विप्रस्य कन्याद्वयं विभूषितम् ।
विमाने च समारुरुहतुः पित्रा समं मुते ॥९८॥
इत्येवं राधिके कन्या लोमशाश्रमसंस्थिताः ।
पित्रादिभिर्लोमशेनर्षिभिर्मात्रादिभिस्तथा ॥९९॥
कृष्णकान्ताशया तूर्णं निषेदुर्व्योमवाहने ।
श्रृङ्गारिताः सोत्सुकाश्च प्रोद्वाहः कृष्णयोरिति ॥१००॥
निजां कृष्णां मन्यमानाः कृष्णार्थे कृतकाऽर्पणाः ।
कृष्णाऽविनाभावबद्धाः प्रोद्वाहः कृष्णयोरिति ॥१०१॥
उत्साहसंभृताः सर्वा वाहिन्यां कृतयत्निकाः ।
जगुर्निजोत्सवाऽऽनन्दाः प्रोद्वाहः कृष्णयोरिति ॥१०२॥
अथाऽन्या अपि कन्याश्चारुरुहुश्च विमानकम् ।
कथयिष्ये राधिके ते कृष्णकान्ता विभूषिताः ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने मार्गशुक्लतृतीयायां प्रातःकृत्यानि, मध्याह्नभोजनादीनि, ततः काशीं प्रति मंगलयोगयात्रार्थं सज्जता, श्रीहरिश्रृङ्गारः, मांगलिककर्तव्यानि, ब्रह्मप्रियादिकन्यकानां विमानाधिरोहश्चेत्यादिनिरूपणनामा त्र्यशीत्यधिकद्विशततमोऽध्यायः ॥ २८३ ॥

श्रीकृष्ण उवाच—

श्रृणु राधे ! राशियानादिकदेशोद्भवा अपि ।
कृष्णकान्ताः कन्यकाश्चारुरुहुर्यद् विमानकम् ॥ १ ॥
शिबिदेवो नृपः कन्याशतेन सह वै तदा ।
आरुरोह विमानं स्वं कुटुम्बादिसमन्वितः ॥ २ ॥
थर्कूटस्थो महाराजः पञ्चाशत्कन्यकान्वितः ।
आरुरोह विमानं स्वं वरयात्रार्थमुत्सुकः ॥ ३ ॥
वीरजारो महाराजः शतकन्यासमन्वितः ।
आरुरोह विमानं स्वं वरयात्रार्थमुत्सुकः ॥ ४ ॥
शक्त्यक्षिक्ष्मापतिश्चापि षष्टिकन्यासमन्वितः ।
एकाधिकशतपिशाचिनीकन्यायुतस्तथा ॥ ५ ॥
आरुरोह विमानं स्वं वरयात्रार्थमुत्सुकः ।
कालिमाशनृपकन्याः शते द्वे च विमानकम् ॥ ६ ॥
पितृभ्यां सहिताः सर्वाश्चारुरुहुर्विभूषिताः ।
अनादिश्रीकृष्णनारायणस्तदा च राधिकाम् ॥ ७ ॥
माणिक्यां श्रीं रमां लक्ष्मीं पद्मजां च विमानके ।
अम्बां हासां सद्गुणां मञ्जुलां चापि विमानके ॥ ८ ॥
पराविद्यादिकाश्चापि चत्वारिंशत् शतं तथा ।
न्यषादयद् विमाने वै सर्वश्रृङ्गारपूर्वकम् ॥ ९ ॥
उरलकेतुको राजा त्रिंशत्कन्यासमन्वितः ।
विमानं सुभगं चाध्यरोहद् यात्रार्थमुत्तमम् ॥१०॥
क्रथको नृपतिः पञ्चकन्यायुतो विमानकम् ।
आरुरोह तथा सौम्यो काशीयात्रार्थमुत्तमम् ॥११॥
पृथुराजस्तदा नैजं विमानं चारुरोह वै ।
विंशतिकन्यकाभिश्च सहितो यात्रिकोत्तमः ॥१२॥

उष्ट्रालस्य दशकन्या आरुरुहुर्विमानकम् ।
हंकारनृपतिः कन्यापञ्चकेन समन्वितः ।
आरुरोह विमानं च काशीयात्रार्थमेव सः ॥१३॥
जयकाष्ठलनृपतिः पञ्चकन्यासमन्वितः ।
आरुरोह विमानं च काशीयात्राकृते तदा ॥१४॥
तीराणनृपतिः कन्याषट्केनापि समन्वितः ।
आरुरोह विमानं च काशीयात्रार्थमेव तु ॥१५॥
आल्वीनरः पञ्चकन्यायुतो विमानमुत्तमम् ।
आरुरोह काशीयात्राकृते कुटुम्बवाँस्तथा ॥१६॥
जीनवर्द्धिनृपः सप्तकन्यायुतो विमानकम् ।
आरुरोह काशीयात्राकृते तत्र समुत्सुकः ॥१७॥
अनाथविप्रस्तत्रैककन्यया सह वै तथा ।
आरुरोह विमानं च रथयात्राकृते तदा ॥१८॥
राक्षसेभ्यो मोचिता या प्रकीर्णकास्तु कन्यकाः ।
आरुरुहुर्विमानानि शते द्वे च सहस्रकम् ॥१९॥
अल्पकेतुर्नृपः सप्तकन्याभिश्च विमानकम् ।
जयकृष्णवराजर्षिश्चैककन्यायुतस्तथा ॥२०॥
समारुरुहतुश्चैकं विमानं वरयात्रिकम् ।
परीशानो नृपश्चैकविंशतिकन्यकायुतः ॥२१॥
आरुरोह विमानं च सर्वशृंगारसंभृतम् ।
इन्दुरायो नृपः कन्याद्वययुक्तो विमानकम् ॥२२॥
आरुरोहातिसंहृष्टः सर्वशृंगारसंभृतम् ।
मुद्राण्डो नृपतिः पञ्चदशकन्यासमन्वितः ॥२३॥
आरुरोह विमानं च योगयात्राकृते तदा ।
गण्डराजो नवकन्यायुतो विमानमुत्तमम् ॥२४॥
आरुरोह समृद्धं च काशीयात्रार्थमित्यपि ।
लीनोर्णनृपतिः कन्याचतुष्टयसमन्वितः ॥२५॥
आरुरोह विमानं च कृष्णयात्रार्थमुत्सुकः ।
बृहच्छराख्यो नृपतिश्चैकादशसुतायुतः ॥२६॥
आरुरोह विमानं च योगयात्राकृते तदा ।
बललीनो नृपश्चत्वारिंशत्कन्यासमन्वितः ॥२७॥
स्मृद्धं नैजं विमानं चाध्यारुरोह विभूषितम् ।
वरसिंहो नृपः कन्यापञ्चकेन समन्वितः ॥२८॥
आरुरोह विमानं च काशीयात्राकृते तदा ।
रायगामलभूपश्च पञ्चकन्यायुतस्तदा ॥२९॥
आरुरोह विमानं चाऽपरकन्यात्रयाऽन्वितः ।
स्मृद्धं राज्ञीद्वयं चाप्यारुरोह च विमानकम् ॥३०॥
फेनतन्तुनृपः कन्याद्वययुक्तो विमानकम् ।
आरुरोह तदा स्मृद्धं काशीयात्रार्थमेव ह ॥३१॥
स्तोकहोमनृपश्चैककन्यायुक्तो विमानकम् ।
आरुरोह समृद्धं च काशीयात्राकृते तदा ॥३२॥
काष्ठयाननृपस्याऽपि कन्यैका जनकान्विता ।
आरुरोह विमानं च सुस्मृद्धं योगयात्रिकम् ॥३३॥
कोलकक्ष्मापतेः कन्या चैका तदा विमानकम् ।
आरुरोह सुसमृद्धं काशीयात्राकृते तदा ॥३४॥
इत्येवं राधिके गौर्यः कृष्णकान्तार्थमेव ताः ।
उत्सुकाः कृतशृंगारा विभूषिता मुदं ययुः ॥३५॥
दिनमानार्कनृपतिः कन्याद्वयसमन्वितः ।
आरुरोह विमानं स्वं योगयात्राप्रसिद्धये ॥३६॥
रार्याकिन्नरराजश्च सर्वस्मृद्धे विमानके ।
आरुरोहैकपञ्चाशत्कन्याभिः स्मृद्धिशोभनः ॥३७॥
रायरोकीश्वरो राजा चैकविंशतिकन्यकाः ।
आदाय स्वविमानं च समारुरोह वै तदा ॥३८॥
रायरणजिद्भूपश्च विंशतिकन्यकायुतः ।
आरुरोह विमानं स्वं स्मृद्धं यात्रार्थमुत्तमम् ॥३९॥
रायवाकक्षको राजा कन्यात्रयसमन्वितः ।
आरुरोह विमानं स्वं दिव्ययात्रार्थमेव ह ॥४०॥
रायमारीशभूपश्च कन्यात्रयसमन्वितः ।
आरुरोह विमानं स्वं स्मृद्धं यात्रार्थमेव च ॥४१॥
रायबलेश्वरो राजा कन्यात्रयसमन्वितः ।
आरुरोह विमानं स्वं काशीयात्रार्थमुत्सुकः ॥४२॥
रायलम्बारभूपश्च कन्याषट्कयुतस्तदा ।
आरुरोह विमानं च स्मृद्धं यात्राकृते तदा ॥४३॥
रायनवार्कभूपश्च कन्यकासप्तकाऽन्वितः ।
आरुरोह विमानं स्वं स्मृद्धं यात्राकृते तदा ॥४४॥
रायहुण्डेशभूपश्च नवकन्यासमन्वितः ।
आरुरोह विमानं च सर्वस्मृद्धिभृतं तदा ॥४५॥
रायकूपेशभूपश्च ह्येककन्यासमन्वितः ।
आरुरोह विमानं च काशीयात्रार्थमित्यथ ॥४६॥
कालीमण्डलीनभूपश्चतस्रकन्यकायुतः ।
आरुरोह विमानं च स्मृद्धं यात्रार्थमुत्तमम् ॥४७॥
वनजेलेशभूपश्च पञ्चकन्यासमन्वितः ।
समारुरोह च तदा विमानं शोभनं स्वयम् ॥४८॥
पारावारपिब्रक्ष्मेशः कन्यात्रयसमन्वितः ।
आरुरोह विमानं च सर्वस्मृद्धिभृतं तदा ॥४९॥

अथ कोटीश्वरो राजा कन्याद्वयसमन्वितः ।
आरुरोह विमानं च सर्वस्मृद्धं तदा शुभम् ॥५०॥
श्रीसतीशनृपकन्यास्तिस्रः पित्रा समं तदा ।
आरुरुहुर्विमानं च स्मृद्धं यात्रार्थकं शुभम् ॥५१॥
त्रेताकर्कशराजश्च सप्तकन्यासमन्वितः ।
आरुरोह विमानं च स्मृद्धं यात्राकृते तदा ॥५२॥
आण्डजरानृपश्चापि चतुःकन्यासमन्वितः ।
काशीयात्राकृते नैजं विमानं चारुरोह च ॥५३॥
वाल्यरजोनृपश्चैककन्यायुक्तो विमानकम् ।
आरुरोह तदा स्मृद्धं कृष्णयात्राकृते शुभम् ॥५४॥
रायसोमनभूपश्च कन्यात्रयसमन्वितः ।
आरुरोह विमानं च कृष्णयात्राकृते तदा ॥५५॥
उरुगवांक्षनृपतिः कन्याद्वयसमन्वितः ।
आरुरोह विमानं स्वं स्मृद्धं यात्राकृते तदा ॥५६॥
पराङ्व्रतस्तथा भूपः कन्याद्वयसमन्वितः ।
आरुरोह विमानं च काशीयात्राकृते तदा ॥५७॥
ईशानपानराजा च स्मृद्धं निजं विमानकम् ।
आरुरोह चैकचत्वारिंशत्कन्यासमन्वितः ॥५८॥
राजा रायपतिर्भूपः स्मृद्धं निजं विमानकम् ।
त्रयस्त्रिंशत्सुताभिश्च सहारुरोह यात्रिकम् ॥५९॥
राजारायनृपस्यापि भगिनी स्वविमानकम् ।
कृष्णनारायणपत्नी समारुरोह कन्यका ॥६०॥
मंगला ललिता रेवा भार्गवी च सरस्वती ।
रमा गंगा दया भक्तिर्मुक्तिश्चैकादशी रतिः ॥६१॥
कामदुघा च तुलसी कमला विरजा सती ।
मूर्तिश्च गोमती स्वर्णरेखा जया च नन्दिनी ॥६२॥
वनिता मोहिनी दोला पुष्पा प्रीतिः कलावती ।
माधवी बदरी चम्पा कुशला च मनुर्मणिः ॥६३॥
शान्तिः शान्ता रमा हैमी ऊर्जा विमानमास्थिताः ।
लोमशेन शर्मं अन्याश्चापि विभूषिताः ॥६४॥
उक्तानां चापि सर्वासां सख्यश्चाप्यर्बुदा हि ताः ।
विभूषिता हि कौबेर्यो माहेन्द्यो यमकन्यकाः ॥६५॥
वायव्यो वैश्वकर्म्यश्च वारुण्यो रौद्र्यश्च वह्निजाः ।
श्रावण्यश्चापि खानिज्यः सांवत्सर्यश्च गोपिकाः ॥६६॥
प्राचीन्यश्च पिशंगिन्यो राशियान्यः समुष्ट्रिकाः ।
रोमायन्यश्च पारद्यो धैवर्यः किन्नरीगणाः ॥६७॥
अमर्यश्च तथा गौर्यः पर्यो हारितिकास्तथा ।
आब्रित्त्यश्चापि पाताल्यः स्वर्ग्यश्चाप्सरसस्तथा ॥६८॥
ब्रह्मसरसौ गान्धर्व्योऽर्बुदकन्याश्च भूषिताः ।
लोमशेन समं स्वस्वपित्रा समं विमानकम् ॥६९॥
आरुरुहुः स्वं स्वमर्घ्यं स्मृद्धं सामग्रिकाऽन्वितम् ।
इत्येवं राधिके कृष्णकान्ताः सज्जास्तदाऽभवन् ॥७०॥
अथाऽन्ये कृष्णयात्रायामागता महीमानकाः ।
हेमशालायनाद्याश्चर्षयः सेदुर्विमानकम् ॥७१॥
चक्रवाक्युर्वशी चापि हनुमान् समगस्त्यकः ।
मंकणकाद्याः ऋषयो देवायतनकोऽपि च ॥७२॥
मेषायनाद्याः ऋषयो मुनिर्लोलासनः प्रधीः ।
पञ्चसाहस्रसन्तश्च तथा वृकायनादयः ॥७३॥
यवक्रीतादयश्चापि श्वेतव्यासादयस्तथा ।
सनत्कुमारप्रभृतयो निषेदुश्च विमानकम् ॥७४॥
तुषितश्च हारितश्च दिधिमानायनादिकाः ।
कुशला योगिनी चापि सांख्ययोगिन इत्यपि ।
शावदीना महाकाली वारिनरश्च क्षेत्रपः ॥७५॥
आर्यायनाद्याः ऋषयो द्वारपो ब्रह्मनादकः ।
वशिष्ठाद्याः ऋषयश्च वालखिल्यादिकास्तथा ।
आरुरुहुर्विमानानि कृष्णयात्राकृते तदा ॥७६॥
राधिके! चाऽक्षरमुक्ता मुक्तान्यश्च समन्ततः ।
अवताराः समस्ताश्चाऽवतारिण्यस्तथा तदा ॥७७॥
आरुरुहुर्विमानानि सर्वशृंगारभूषिताः ।
पार्षदा धामगाः सर्वे तथा वैकुण्ठवासिनः ॥७८॥
वासुदेवादयश्चापि भूमा विष्णुर्विराजकः ।
सात्त्विका मुनयश्चापि सिद्धाश्च साधवस्तथा ॥७९॥
आरुरुहुर्विमानानि सुस्मृद्धानि विभूषिताः ।
पितरस्त्वर्यमाद्याश्च लोकपाला दिशां प्रपाः ॥८०॥
आदित्या वसवश्चापि कुमारावश्विनौ तथा ।
आरुरुहुर्विमानानि कृष्णयात्राकृते तदा ॥८१॥
मरुतः सिद्धयश्चापि निधयश्च ग्रहाः शुभाः ।
सूर्याचन्द्रौ सप्तर्षयो ध्रुवौ च मातरो दिशः ॥८२॥
कामदेवो मनवश्च कलाश्च तिथयस्तथा ।
तत्त्वानि भानि च गुणास्तीर्थानि सरितो नदाः ॥८३॥
ब्रह्मचारा न्यासवन्तो दिव्यदेवाख्यपादपाः ।
कल्पवल्ल्यः कल्पशिला गृहदेवादयस्तथा ॥८४॥
देवालयास्तथा चैत्याश्चारुरुहुर्विमानकम् ।
नागाः सर्पाश्च दैत्याश्च दानवा राक्षसास्तथा ॥८५॥
सूताश्च मागधाश्चापि बन्दिनश्चारणास्तथा ।
विप्राश्च पण्डिताश्चापि किंपुंसः किन्नरास्तथा ॥८६॥

गान्धर्वाः कथकाश्चापि दासा दास्यश्च कोटिशः ।
आरुरुहुर्विमानानि सर्वशृंगारशोभनाः ॥८७॥
शिल्पिनः स्वर्णकाराश्च धनाढ्या मखिनस्तथा ।
गुरवो लोमशोक्ताश्च सर्वा कुंकुमवापिका ॥८८॥
आरुरुहुर्विमानानि प्रोद्वाहः कृष्णयोरिति ।
मही तत्र समायाता संस्मृता मेदिनी स्वयम् ॥८९॥
ऋतवश्च समायाता धर्मदेवः स्वयं स्मृताः ।
नरश्चापि समायातो बदरीवनतस्तदा ॥९०॥
पीठिका च समायाता देवी त्वक्षरवासिनी ।
मर्दनानि सुमूर्तानि द्रवाणि चाध्यरोहयन् ॥९१॥
मण्डपाख्यस्तथा मुक्तः समायातः स्मृतस्तदा ।
माणिक्यस्तंभ एवापि श्रीकृष्णाग्रे समाययौ ॥९२॥
सुदर्शनं तथा चक्रं क्षेत्ररक्षाकरो हरः ।
श्रीहरेः सन्निधौ नत्वा कृतमानाः शुभासने ॥९३॥
निषेदुस्ते ततः श्रीमद्गोपालकृष्णकः पिता ।
नवैतान् कुंकुमवापीक्षेत्ररक्षार्थमाह च ॥९४॥
रक्षन्तु क्षेत्रमेतद्वै वयं यामो वराणसीम् ।
इत्युक्त्वा योग्यसामग्रीर्हेतींश्च पारितोषिकम् ॥९५॥
दत्वा सज्जं प्रचकार विमानं सूर्यवर्चुलम् ।
शृंगारितं बालकृष्णं भ्रातॄन् भगवदादिकान् ॥९६॥
भ्रातृपत्नीस्तथा पितृवर्गानाबालवृद्धकान् ।
कुटुम्बिनो जनान् सम्बन्धिनः सर्वान् विमानके ॥९७॥
नरनारीवर्गसम्बन्धिनः परम्परागतान् ।
न्यषादयद्विमानेषु जयनादानकारयत् ॥९८॥
दुन्दुभयोऽप्यवाद्यन्त यात्राप्रस्थानसूचकाः ।
व्यंगुलानां शुभशब्दाः सर्वश्रवणयोगदाः ॥९९॥
अभवँश्च तदा गान्धर्वाणां वाद्यनिनादकाः ।
तूपशब्दा मेघवच्चाऽभवन् यात्राप्रयाणके ॥१००॥
अनादिश्रीकृष्णनारायणो विजयतेतमाम् ।
इत्युवाच तदा वाणी दिव्या व्योमविहारिणी ॥१०१॥
पुष्पाक्षतादिमांगल्यैर्वर्धितं देविकादिभिः ।
बालकृष्णविमानं च पूर्वाशां गतिमाचरत् ॥१०२॥
गीतिकानादितान्येव विमानानि तदाऽम्बरे ।
सहर्षजनशोभानि तत्पश्चाद् गतिमाचरन् ॥१०३॥
इत्येवं राधिके चाग्रे ययौ विमानवाहिनी ।
कृष्णयात्रात्मिका शीघ्रं स्वर्गं यातीव शोभते ॥१०४॥
मुदं ममौ न हृदये प्रत्येकस्य च देहिनः ।
उज्जगाम महानन्दः प्रोद्वाहः कृष्णयोरिति ॥१०५॥
मरुदेशं समुल्लंघ्य कोशलान् मध्यदेशकान् ।
प्रयागं च समुल्लंघ्य वाहिनी काशिकां ययौ ॥१०६॥
कृष्णयानीं गर्जमानां सहस्रचन्द्रसदृशीम् ।
विमानरूपिणीं वीक्ष्य शिवेश्वरोऽतिहर्षितः ॥१०७॥
काशीवासाः प्रजाश्चापि समुत्सुका ययुः प्रति ।
वदन्त्यो राधिके ! यामः प्रोद्वाहः कृष्णयोरिति ॥१०८॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने महीमानानां राज्ञां कन्यकादीनामृषीणां च विमानेष्वारोहणं, कृष्णयान्याः काशीं प्रतिगमनं चेत्यादिनिरूपणनामा चतुरशीत्यधिकद्विशततमोऽध्यायः ॥ २८४ ॥

श्रीकृष्ण उवाच—

राधिके ! वाहिनीं वीक्ष्याऽम्बरे विमानरूपिणीम् ।
शंकरस्य महीमानाः शिवेश्वरस्तथा नृपः ॥ १ ॥
कृष्णयानीं नमस्कृत्य स्वागतार्थं द्रुतं तदा ।
वादित्रकुशलान् सर्वानाज्ञापयन् गवादिकान् ॥ २ ॥
वादयितुं च वादित्रोत्तमानि तूर्यवेदिनः ।
वाद्यघोषा अभवँश्च तदाऽम्बरान्तगाः सुखाः ॥ ३ ॥
मांगलिकास्तारजन्या भेरीजन्याश्च शोभनाः ।
व्यंगुलादिकजन्याश्च शंखजन्याश्च दूरगाः ॥ ४ ॥
मयूरोत्थास्तथा शब्दा वंशीवीणानिनादनाः ।
जलयन्त्रादिजन्याश्च गालजन्याः शुभावहाः ॥ ५ ॥
मृदंगकरतालादिजन्याश्चाऽनलयन्त्रजाः ।
वायुस्तरकृताः शब्दा व्योमगीतानि चाऽभवम् ॥ ६ ॥
अप्सरसां कण्ठशब्दा योगिनीनां च गीतयः ।
मिष्टा वेदादिनारीणां सरस्वतीनिनादनाः ॥ ७ ॥
दूरमिष्टस्वरास्तत्राऽभवन् व्योमान्तगामिनः ।
अश्रूयन्त शुभास्ते च विमानेषु विहायसि ॥ ८ ॥
तान् शब्दान् वै समाकर्ण्याऽऽश्चर्यपरा विमानगाः ।
ददृशुस्तां विशालां सुभूमिं वाराणसीमयीम् ॥ ९ ॥
सर्वे विमानगा गंगावरणामध्यगां पुरीम् ।
दशयोजनविस्तीर्णां वैकुण्ठसदृशीं तदा ॥१०॥
पश्चोत्तरे ददृशुश्च विशालं नूतनं कृतम् ।
वरणायास्तटे शिवपुरं विंशतियोजनम् ॥११॥
मयं च विश्वकर्माणं समाहूय विधापितम् ।
कैलासमपरं किं वा गोलोकमपरं च वा ॥१२॥
स्थितं कोटिविधुक्लृप्तं तथा कोटिरविप्रभम् ।
बहुभौमं चाम्बरे संस्थितं किं वा त्रिशूलगम् ।
दिव्यं कैलासमेवैतन्मेनिरे तद्विमानगाः ॥१३॥

शवेश्वरेण स्वपुत्र्याः मांगल्योत्सवसिद्धये ।
निर्मापितं महीमाननिवासार्थं पुरं हि तत् ।
स्वर्णप्राकारसंशोभं कोटिप्रासादराजितम् ॥१४॥
स्वर्णमन्दिरसच्छालं सुवर्णकलशान्वितम् ।
सुवर्णध्वजसंबोध्यं शतभौमं समन्ततः ॥१५॥
कुवेरनगरी यत्र यत्रेशानपुरी तथा ।
इन्द्रपुरी तथा कोणे वह्निपुरी प्रकोणके ॥१६॥
वारुणी नगरी यत्र धर्मपुरी प्रकोणके ।
मरुतां नगरी कोणे ब्रह्मपुरी प्रकोणके ॥१७॥
सूर्यपुरी तथा विष्णुपुरी कोणे विराजते ।
मध्ये देवनिवासाश्च प्रासादाः शतभूमयः ॥१८॥
उद्यानाऽऽवृतप्रपार्श्वाश्चातिसुगन्धिसंभृताः ।
धवला हिमशैलाश्च यद्वत् शशिनिभास्तथा ॥१९॥
सर्वस्मृद्धिश्रिताः सर्वे प्रासादा नूतनाः कृताः ।
चन्द्रशालाः प्रशोभन्ते ग्रहमार्गगता इव ॥२०॥
नैसर्गिकप्रभास्रावा मणयो यत्र भित्तिषु ।
नैसर्गिकप्रकाशाश्च कम्मानिकासु सन्ति हि ॥२१॥
तोरणेषु सुधास्रावा विद्यन्ते कामवल्लिकाः ।
स्तंभेषूर्ध्वप्रदेशेषु विद्यन्ते कामपादपाः ॥२२॥
वल्लभीषु च विद्यन्ते पयोनद्यश्च कामजाः ।
ऊष्मा यथापेक्षिता च कल्पतारोद्भवाऽस्ति च ॥२३॥
शिवपुर्यां च परितः प्रतिप्रासादके तथा ।
प्रतिप्रासादभूमौ च विद्यन्ते कामधेनवः ॥२४॥
कामरूपधरा दिव्या व्योमचाराः सुखप्रदाः ।
कल्पकन्याश्च विद्यन्ते प्रत्येकभूमिमास्थिताः ॥२५॥
दासा दास्यो दिव्यवर्णा विद्यन्ते सेवकास्तथा ।
सर्वे संकल्पजा दिव्याः सेवार्थं निहितास्तदा ॥२६॥
देहसंवाहिकाश्चापि गायिका नृत्ययोषितः ।
सर्वाः संकल्पजास्तत्र शंकरेण निधापिताः ॥२७॥
सर्वरसाः सर्वगन्धाः सर्वरूपाः सुशोभिनः ।
प्रासादाः सर्वशब्दाश्च सर्वस्पर्शा भवन्ति च ॥२८॥
सौवर्णासनशोभाश्च सिंहासनगजासनः ।
मृदुकोमलशय्याश्च विद्यन्ते यत्र वेदिकाः ॥२९॥
बृस्यो बहुविधाः सन्ति पर्यंकाः सुखदायिनः ।
आस्तरणानि दिव्यानि कौशेयानि समन्ततः ॥३०॥
और्णानि मृदुरम्याणि विचित्राणि शुभानि च ।
रंगचित्राणि चञ्चद्भावन्ति प्रत्याश्रयाणि च ॥३१॥
गेन्दुकानि पार्श्वकानि कशिपवश्च कोमलाः ।
गुप्तदोराण्यमूल्यानि स्वर्णकटानि यानि च ॥३२॥
निहितानि च तेष्वेव प्रासादेषु हि शंभुना ।
प्रेंखा दोलाः सवल्ल्यश्च मृदुशय्यासमन्विताः ॥३३॥
लम्बन्ते यत्र वल्लीभिः शोभिताऽऽन्दोलनार्थिकाः ।
विमानानि स्वल्पदेहान्यपि भूमिगमानि च ॥३४॥
वायुमार्गेण च गतिमन्ति सन्ति गृहे गृहे ।
यद्द्वारा चोर्ध्वभूमौ च जनाः स्वस्वनिवासने ॥३५॥
व्योममार्गात्प्रविशन्ति निस्सरन्ति विमानकैः ।
सोपानान्यपि निःश्रेणीबद्धानि मणिमन्ति च ॥३६॥
स्वर्णपात्राणि सर्वाणि कल्पपात्राणि सन्ति च ।
अक्षय्यस्थालिकास्तत्र कल्पघटाः प्रसन्ति च ॥२७॥
मणिमन्ति समग्राणि तलानि च गृहे गृहे ।
आदर्शाः स्वच्छभावन्तः प्रकाशन्ते गृहे गृहे ॥३८॥
कपाटानि च देवानां सृष्टिदृष्टिमयानि च ।
पेटिका मञ्जुषाद्याश्चाऽक्षयार्थवत्य एव च ॥३९॥
वेषाः समस्ताः सुशोभा विद्यन्ते च गृहे गृहे ।
सुगन्धद्रव्यपात्राणि तैलकेसरकाणि च ॥४०॥
कस्तूरीकर्पूरस्थाल्यो भवन्ति वै गृहे गृहे ।
रसकुल्या दधिकुल्या मधुकुल्याश्च शर्कराः ॥४१॥
इक्षुदण्डा घृतकुल्याः सुधावाप्यो गृहे गृहे ।
पीयूषकुण्डिकाः सन्ति चामृतानां ह्रदास्तथा ॥४२॥
फलानां चापि पुष्पाणां कमलानां ह्रदास्तथा ।
कन्दानामार्द्रशुष्काणां बीजानां चापि संग्रहाः ॥४३॥
हेतीनां रम्यरंगाणां द्यूतानां साधनान्यपि ।
श्रवाणां दर्शनानां च यन्त्राण्यपि गृह गृहे ॥४४॥
चैत्यपुत्तलिकाः सन्ति कर्मचार्यो गृहे गृहे ।
रसशालाः पाकशाला विद्याशालाश्च भूगृहाः ॥४५॥
गह्वराणि स्नानशालाश्चान्नशाला गृहे गृहे ।
पेयशालाः शान्तिशाला रतिशाला गृहे गृहे ॥४६॥
प्रच्छन्ननिद्राशालाश्च वितर्दिका गृहे गृहे ।
शृंगारशाला विविधा वधूशालाः पृथग्विधाः ॥४७॥
वृद्धशालाश्च सुगमाः कल्पवस्तुसमन्विताः ।
शौचशालास्तथा शुद्धिशालाः सन्ति गृहे गृहे ॥४८॥
भोग्यशाला विचित्राश्च सर्वसाधनसंभृताः ।
सभाशालास्तथा विहारालयाश्च गृहे गृहे ॥४९॥
वाहनानि समस्तानि स्थलजाऽर्णवजानि च ।
वायुजानि च तिर्यञ्चि द्वारि द्वारि कृतानि च ॥५०॥

गोपुरेषु महासिंहा गजाश्चत्वरवर्तिनः ।
गरुडा मन्दिरोर्ध्वे च शार्दूला गोपुरोपरि ॥५१॥
पर्यश्चाप्सरसश्चापि गण्यश्च योगिनीगणाः ।
चेतनास्तत्र तिष्ठन्ति महीमानप्रसेविनः ॥५२॥
विशेषो राधिके ! तत्र शंकरेण विधापितः ।
यस्य वासार्थमेवाऽस्ति यद् गृहं तत्र तत्र तु ॥५३॥
स एव स्वकुटुम्बेन राजते प्रतिमाविधः ।
सचेष्ट इव राजा वा देवो दैत्योऽसुरोऽपि वा ॥५४॥
प्रासादेषु तथा तत्त्वं निहितं गुप्तभित्तिषु ।
यो यो वसति प्रासादे स द्विरूपः प्रजायते ॥५५॥
भ्रमो भवति सर्वेषां कोऽत्र सत्यः परश्च कः ।
न विदन्ति च ये बिम्बं भ्रमन्ति प्रतिबिम्बके ॥५६॥
अफलाश्च परावृत्य बिम्बं ते मार्गयन्ति हि ।
तत्तद्भ्रमाविधुरास्ते भ्रमे प्रमां हि मन्वते ॥५७॥
जले स्थलं स्थले जलं जले तेजोभिलोकिता ।
पृथ्व्यामाकाशमानं च भ्रमन्ति महीमानकाः ॥५८॥
सर्वत्रशंकरश्चापि सूक्ष्मरूपः प्रदृश्यते ।
मायैषा शांकरी तत्र प्रासादेषु विधापिता ॥५९॥
व्यजनैश्चाऽनलदेवः सेवायां प्रतिमानवम् ।
वर्तते च यथापेक्षं सर्वमानसरञ्जनः ॥६०॥
अदितिश्चान्नदात्री च वर्तते कन्यकात्मिका ।
संकल्पोपस्थिता भूत्वा दत्वा याति तिरःस्थितिम् ॥६१॥
ओषधयः शंकरेण प्रासादेषु गृहे गृहे ।
स्थापिताः कानका वृक्षा विजयास्तबका नवाः ॥६२॥
सिंहव्याघ्रादिचर्माणि चेतनानीव मध्यतः ।
प्रासादेषु स्थापितानि सुन्दराणि गृहे गृहे ॥६३॥
आभूषणानि नारीणां वेषाश्च सुभगास्तथा ।
शृंगारद्रवपात्राणि स्थापितानि गृहे गृहे ॥६४॥
भक्ष्यभोज्यानि सर्वाणि लेह्यचोष्यानि यानि च ।
आस्वाद्यानि च पेयानि निहितानि गृहे गृहे ॥६५॥
एकैका चन्द्रमःस्थाली पयोदाऽमृतदायिनी ।
सुखदा स्थापिता पूर्णा शंकरेण गृहे गृहे ॥६६॥
वसन्तश्च समाहूतः स्थापितः शिवपत्तने ।
एतादृशं शिवपुरं वरपक्षनिवासनम् ॥६७॥
ददृशुर्व्योमगाः सर्वे चाऽद्भुतं विश्वकर्मकृत् ।
द्वितीयं ददृशू रम्यं पार्वतीपत्तनं वरम् ॥६८॥
कन्यापक्षमहीमानाऽऽवासार्थं कारितं तु यत् ।
न न्यूनमस्मात् सर्वांशे वस्तुष्वपि मनागपि ॥६९॥
विंशतियोजनायामं वरणाप्राग्भुवस्तले ।
द्वयोर्दिव्याऽभिनवयोः पुरयोर्मध्यवर्ती च ॥७०॥
राजते पार्वतीशस्य प्रासादोऽयुतशृंगवान् ।
विश्वकर्मकृतश्चायं मयेन च परिष्कृतः ॥७१॥
निशेशाऽऽदित्ययोर्मध्ये मेरोः शृंगमिवाऽऽबभौ ।
पार्वतीपत्तने राधे ! शिवसम्बन्धिनः खलु ॥७२॥
कन्यापक्षाश्च ये त्वासन् न्यूषुस्ते तत्र शोभने ।
भूतनाथः कोटिगणसमन्वितो हि शंकरः ॥७३॥
पिंगराजः शंकरश्च ईशानः केतुमालगः ।
कामरूपा सती कामाक्षिणी न्यूषुश्च तत्र ते ॥७४॥
नवजीवद्वीपराजः कामनायकनामवान् ।
त एते शंकराः सर्वे न्यूषुः पार्वतीपत्तने ॥७५॥
श्रीकृष्णो भगवान् साक्षाच्छंकरस्य पिता हि सः ।
कोटिगोपांगनागोपैः सहोवास च तत्र ह ॥७६॥
संकर्षणो व्यूहरूपो भगवान् कोटिपार्षदः ।
उवास पार्वतीपुर्यां कोटिकृष्णसमन्वितः ॥७७॥
महामाया कृष्णशक्तिः साऽप्युवास च तत्र ह ।
महाकालो जगद्धर्ता जरामृत्युसमन्वितः ॥७८॥
कोटिशक्तिसमैश्वर्ययुतश्चोवास तत्र च ।
सदाशिवो हि भगवान् वैराजस्य पिता हि सः ॥७९॥
सोऽपि शिवायुतस्तत्रोवासैव पार्वतीपुरे ।
रुद्राः सर्वे तथा रुद्र्यः रुद्रसृष्टिगणादिकाः ॥८०॥
महीमाना पार्वतीपत्तने न्यूषुः सुखान्विताः ।
शिवः कैलासवासश्च तथा कोटिगणान्वितः ॥८१॥
यमराजः कोटिदूतैर्युतश्चोवास तत्पुरे ।
अग्निश्च देवताः सर्वविधा न्यूषुश्च तत्पुरे ॥८२॥
कुबेरश्च निर्ऋतिश्च योगिनीचक्रमित्यपि ।
यक्षाश्च राक्षसाश्चापि भूताः प्रेताः पिशाचकाः ॥८३॥
वैनायकाश्च कूष्माण्डा वेतालका गणास्तथा ।
वेतालिन्यश्च शाकिन्यो डाकिन्यश्चण्डिकादिकाः ॥८४॥
ब्रह्मचर्यो मातरश्च दुर्गाश्च शक्तयश्च याः ।
काल्यश्चापि महाकाल्यो भैरवा भद्रकास्तथा ॥८५॥
न्यूषुस्ते पार्वतीसौधनगरे सुखशायिनः ।
ईश्वरा वैकुण्ठवासाश्चाव्याकृतपरास्तथा ॥८६॥
अमृतस्थास्तथा सौराश्चान्द्रा न्यूषुश्च तत्र ह ।
मुनयः सिद्धयोगाश्चाऽवधूता लिङ्गिनस्तथा ॥८७॥
योगिनश्चर्षयश्चापि पितरो न्यूषुरित्यपि ।
ग्रहाश्च तारकाश्चापि नक्षत्राणि च केतवः ॥८८॥

दैत्याश्च दानवाश्चापि न्यूषुस्तत्र पुरे तदा ।
स्वर्गीया लोकपालाश्च क्षेत्रपालादिकास्तथा ॥८९॥
भुवर्वासाः पावनाश्च कुलदेवो हनूयुतः ।
मानवाश्चापि राजानः पातालस्थाः फणीश्वराः ॥९०॥
हाटकेशस्तथा ज्योतिःस्वरूपाश्च प्रशक्तयः ।
गान्धर्वा गणिकाश्चापि सूताश्च मागधादयः ॥९१॥
विद्याध्राः किन्नराश्चापि शैला हिमालयादयः ।
ऋषयोऽपि ज्वराश्चापि विघ्नाश्च विषसाधकाः ॥९२॥
वृक्षा वल्ल्यश्च तत्त्वानि क्रूराः कालस्य मूर्तयः ।
वृश्चिकाद्याः कामरूपा न्यूषुः पार्वतीपत्तने ॥९३॥
एते चान्ये महीमानाः शंकरस्य गणादयः ।
पार्वतीपत्तनवासाः सर्वेऽम्बरं विलोक्य च ॥९४॥
कृष्णस्य वाहिनी व्योम्ना त्वायातेत्यवगत्य च ।
तूर्णं व्यंगुलनादैश्च भूत्वा सज्जाः शिवगृहम् ॥९५॥
कुटुम्बाद्यैश्च सहिताः सवाद्यमंगलश्रयाः ।
सभूपावेषशोभाश्चाऽऽययुः स्वागतहेतवे ॥९६॥
प्रजाश्चापि तदा वाराणस्याः सर्वाः समाययुः ।
धन्यं भाग्यं स्वं मन्वाना प्रोद्वाहः कृष्णयोरिति ॥९७॥
सोपदाः सफलाश्चापि सपुष्पहारमालिकाः ।
अन्वीयुः पार्वतीशस्य मन्दिरं तूर्णमेव ताः ॥९८॥
शिवेश्वरो द्रुतं नैजं कैलासं दिव्यपूरुषम् ।
हिमाद्रिं च तथा दिव्यं पूरुषं बहुविस्तृतम् ॥९९॥
जगादाऽम्बरदेशे च विमानाधारकं स्थलम् ।
सुदिव्यं भवितुं तत्र क्षणं स्वागतहेतवे ॥१००॥
राधिके ! द्रुतमेवाऽभू कैलासश्च हिमालयः ।
अन्तरीक्षे स्तरं दिव्यं भूमिरूपं स्थिरास्पदम् ॥१०१॥
कैलासमपरं तत्र व्यधातां धामनूतनम् ।
शिवाद्याः शिवपक्षाश्च तूर्णं ययुस्तदम्बरे ॥१०२॥
धाम्नि वै नूतने रम्ये वाहिनीस्वागताय ह ।
आश्चर्ये चाम्बरे प्रापुर्विमानस्था जनाऽनुगाः ॥१०३॥
शिवेश्वरमहैश्वर्यं वीक्ष्य मुग्धास्तदाऽभवन् ।
प्रशशंसुर्ब्रह्मरूपं ब्रह्मात्मानं हरं तदा ॥१०४॥
समृद्धं वै महालक्ष्मीपितरं पार्वतीपतिम् ।
श्रीमद्गोपालकृष्णाद्याः प्रसेदुर्वीक्ष्य सम्पदः ॥१०५॥
शंकराद्याः कृष्णयानीं वीक्ष्य प्रसेदुरेव च ।
परस्परं महैश्वर्यं वीक्ष्याऽतिमुमुदुस्तदा ॥१०६॥
राधिके यद् द्वयोर्गर्वहरा लक्ष्मीः कुमारिका ।
गर्वहरो बालकृष्णः स्वयं कुमारकोऽस्ति च ॥१०७॥
द्वयोर्भगवतोश्चात्राऽऽश्रयोर्योग्यसमागमे ।
विकसन्ति तदंशा वै प्रोद्वाहः कृष्णयोरिति ॥१०८॥
यत्राऽहं तव कान्तोऽस्मि कृष्णः संकर्षणः शिवः ।
यत्र विष्णुर्महाविष्णुर्बालकृष्णः परेश्वरः ॥१०९॥
सर्वे सृष्टिप्रणेतारस्तत्राऽऽश्चर्यं नु किं भवेत् ।
सर्वं संघटते राधे ! प्रोद्वाहः कृष्णयोर्यतः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने काशी-वाहिनीसम्मानार्थं शिवेश्वरकारितवादित्रनिनादनानि, अम्बरात् काशिकायाः शिवपुरस्य पार्वतीपुरस्य वीक्षणम्, पुरवर्णनम्, पार्वतीपत्तनीयकन्यापक्षीयमहीमानसहितस्य शिवेश्वरस्य वाहिनीस्वागतार्थमम्बरे घटिकास्थायि कैलासरचनमित्यादिनिरूपणनामा पञ्चाशीत्यधिकद्विशततमोऽध्यायः ॥ २८५ ॥

**श्रीकृष्ण उवाच—**

राधिके तत्र कैलासे विशालेऽम्बरसंस्थिते ।
पञ्चाशद्योजनायामे सर्वापेक्ष्यर्द्धिसंयुते ॥ १ ॥
महोद्यानान्तरे रम्ये सौवर्णे मण्डपे शुभे ।
प्रवेशार्हे राजमार्गे तस्थुः श्रीशंकरादयः ॥ २ ॥
दर्शयामासुरेतांश्च विमानगान् समीपगाम् ।
दिव्यभुवं शनैश्चावतरितुं व्योमकल्पिताम् ॥ ३ ॥
सर्वां काञ्चनवर्णां च कैलासाऽपररूपिणीम् ।
हिरण्मय्या नगर्या च शोभितां कल्पपादपाम् ॥ ४ ॥
सर्वर्तुफलिभिर्वृक्षैस्तदानीमृद्धिसंभृताम् ।
कोटिविश्रान्तिभवनैर्महाकुञ्जान्तरैः शुभैः ॥ ५ ॥
यावत्पुष्पिप्ररम्यैश्च गन्धिद्रुमैः समन्विताम् ।
विमानानामवतारस्थलीभिः परितः स्थिताम् ॥ ६ ॥
एतादृशीं विशालां तां नगरीं दर्शितां तदा ।
अभितः स्थितियोग्यासु स्थलीषु च समासु च ॥ ७ ॥
राधिके स्वविमानानि बालकृष्णादयस्तथा ।
महर्षयो नृपाः कन्याः साधवो देवतादयः ॥ ८ ॥
मुक्ताश्चेशास्तथेश्वर्यः पितरो मानवादयः ।
निजवाहिनीस्वरूपा विमानानि निजानि वै ॥ ९ ॥
कैलासभूमाववतारयामासुः समुत्सुकाः ।
तदा वाद्यानि सर्वाणि लक्षशश्च शुभानि वै ॥१०॥
वादयामासुरुग्राणि मिष्टानि शंप्रदानि च ।
गोलोकस्याऽमृतस्याऽप्यव्याकृतस्य च यानि च ॥११॥

कैलासस्य कुबेरस्य पृथ्व्याश्चासुरलोकिनाम् ।
दैत्यानां भूतजातीनां गणानां योगिनां तथा ॥१२॥
योगिनीनां गणिकानां गान्धर्वाणां च योषिताम् ।
चण्ड्यादीनामवाद्यन्त वादित्राणि समन्ततः ॥१३॥
हिरण्मय्या नगर्याश्च प्राकाराग्रे द्रुमान्विते ।
महाप्रासादकाऽग्रे च बालकृष्णविमानकम् ॥१४॥
अवाततार च शनैः स्थिरं द्रुमण्डले ह्यभूत् ।
अन्यान्यपि विमानानि पृथक् पृथक् द्रुकुञ्जके ॥१५॥
अवतीर्य स्थैर्यमापुः प्रासादाग्रे निजे पृथक् ।
तदाऽऽश्चर्यं मया दृष्टं राधिके ! शंकरस्य वै ॥१६॥
यावन्त्यासन् विमानानि तावद्रूपधरोऽभवत् ।
बृहस्पतिस्तथा तत्र तावद्रूपधरोऽभवत् ॥१७॥
अहं तु श्रीबालकृष्णविमानाग्रे स्थितोऽभवम् ।
शंकरेण गुरुणा च वामदेवादिभिः सह ॥१८॥
व्यासैर्विप्रैश्च ऋषिभिर्धृतपूजार्हपात्रकैः ।
पुष्पाऽक्षतद्रवलाजाकुंकुमश्रीफलान्वितैः ॥१९॥
सुगन्धपुष्पहाराद्यैर्युक्तैश्च वेदघोषिभिः ।
सन्मांगल्यवचोभिश्च पूजाजलघटाऽन्वितैः ॥२०॥
मिष्टान्नजलपानार्थं स्वर्णादिस्थलसंयुतैः ।
अनेकैश्च गणैश्चापि स्थालवद्भिश्च सेवकैः ॥२१॥
दासीभिश्चाप्यसंख्याभिर्मिष्टस्थालयुतादिभिः ।
तावद्रूपधराभिश्च जलपात्रयुतादिभिः ॥२२॥
चामरव्यजनाद्यैश्च युक्ताभिः सेविकादिभिः ।
छत्रपात्रादिभिर्युक्तैर्गणैर्देवैश्च सेवकैः ॥२३॥
फलताम्बूलकैर्युक्तैर्गन्धसत्कारवेदिभिः ।
वेत्रधरैर्हेतिधरैराज्ञाप्रैश्च गणैः सह ॥२४॥
मानसम्मानपूर्णज्ञैः सर्वमिष्टवचोयुतैः ।
श्रेष्ठोत्तमासनैश्च पादक्षालनवेदिभिः ॥२५॥
इङ्गितज्ञैः कर्मवाहैश्चापेक्षितप्रदैर्गणैः ।
कल्पकुमारकैश्चापि कल्पकुमारिकादिभिः ॥२६॥
संकल्पवर्तिभिस्तत्र युतोऽहं शंकरस्तथा ।
बृहस्पतिस्तथाऽन्ये चाऽभवामः स्वागतार्थिनः ॥२७॥
यथा सर्वं मया साकमभवत् सर्वमेव तत् ।
सर्वस्थलेऽभवत् प्रतिविमानं स्वागतार्थकम् ॥२८॥
शृणु राधे तदा त्वन्यदाश्चर्यं बालकृष्णजम् ।
वीक्ष्य श्रीशंकरं नैकरूपधरं तदा प्रभुः ॥२९॥
बालकृष्णोऽपि भगवान् कुटुम्बेन समन्वितः ।
लोमशेन युतश्चापि तावद्रूपधरोऽभवत् ॥३०॥

अवाततार सहसा विमानेभ्यः पृथक् पृथक् ।
शंकरोऽपि महाश्चर्यं जगाम वीक्ष्य माधवम् ॥३१॥
शंकरेण हि सर्वेषां विमानस्थप्रदेहिनाम् ।
सत्कारार्थं धृतान्येव सह रूपाणि वै तदा ॥३२॥
किन्तु विमानगानां वै चात्मनिवेदिता यतः ।
बालकृष्णमनर्प्यैव गृह्णन्ति न दलाद्यपि ॥३३॥
तेषां तदा चाऽप्रसादपूजाद्रव्यग्रहे भवेत् ।
आत्मनिवेदिताहानिः शंकरो दोषभाग् भवेत् ॥३४॥
तद्दोषपरिहारार्थं विज्ञाय भगवान् प्रभुः ।
बालकृष्णो हि पूजाया ग्रहणार्थं पृथक् पृथक् ॥३५॥
विमानेभ्यो हि सर्वेभ्यश्चावातरत् तदाऽग्रगः ।
शंकरः सर्वभावैश्च सर्ववस्तुभिरित्यपि ॥३६॥
चकाराऽर्हां तु कृष्णस्य परब्रह्मण एव ह ।
लब्ध्वा पूजां हरिस्तावन्नत्वा पूज्यान् हरादिकान् ॥३७॥
कुशलं च समापृच्छ्य निवेद्य स्वमनामयम् ।
प्राप्याऽऽशीर्वादवाचश्च तिरोऽभवत् स्थलान्तरात् ॥३८॥
मुख्ये नैजे विमाने च तदा स्थिरोऽभवत् प्रभुः ।
शंभुर्बृहस्पतिश्चान्ये महीमानप्रपूजनम् ॥३९॥
वेदमन्त्रैः प्रचक्रुश्च मंगलं विधिवत्तदा ।
परस्परं सुकुशलं पप्रच्छतुर्निरामयम् ॥४०॥
वरकन्यापितरौ वै तथा सम्बन्धिबान्धवाः ।
पप्रच्छुः कुशलं सर्वे मिमिलुर्वक्षसा तदा ॥४१॥
स्वागतं शोभना वाचो जगदुश्च समुत्सुकाः ।
सम्मानं विदधुः शीघ्रं पादप्रक्षालनादिभिः ॥४२॥
आसनैश्च मधुपर्कैः सुगन्धवारिदानकैः ।
पुष्पहारैश्चन्दनाद्यैर्मालिकादिप्रदानकैः ॥४३॥
लाजाभिश्चाक्षतैश्चापि वर्धयामासुरीश्वराः ।
पुष्पाञ्जलिप्रदानैश्च वक्षोभ्यां मेलनादिभिः ॥४४॥
निषादनैर्योग्यभूमौ स्वर्णसिंहासनादिषु ।
निकुंजेषु स्वर्णसौधे जलगण्डूषदानकैः ॥४५॥
ततो मिष्टान्नदानैश्च पयःपानादिभिस्तथा ।
ताम्बूलदानकैश्चापि सुसत्कारं व्यधुः शुभम् ॥४६॥
व्यजनैश्चामरैश्चापि वेत्रियशःप्रकाशनैः ।
पादसंवाहनाद्यैश्च स्वागतं विविधं व्यधुः ॥४७॥
मुख्यं विमानकं श्रीमद्बालकृष्णस्य वै तदा ।
संवर्धितं सुलाजाभिरक्षतैः कुसुमादिभिः ॥४८॥
जयशब्दैस्तथा श्रीशो ह्यवातरद् विमानतः ।
स्वागतैः पुष्पमालाभिः पुष्पाञ्जलिभिरित्यपि ॥४९॥

यवांकुरादिभिश्चापि चन्दनैः स विवर्धितः ।
पृष्टो गोपालकृष्णश्च कुशलं प्रति शंभुना ॥५०॥
कार्ष्णाश्च शांकरैः पृष्टाः कुशलं च निरामयम् ।
अथ देव्यः कुमार्यश्च कात्यायन्यादिकास्तथा ॥५१॥
दुर्गाद्याश्च सती चापि कंभरादिकयोषितः ।
कन्यकाश्चापि पप्रच्छुः कुशलं च निरामयम् ॥५२॥
स्वागतं मधुपर्काद्यैर्जलमिष्टान्नदानकैः ।
ताम्बूलकादिभिश्चक्रुः पुपूजुश्च स्रगादिभिः ॥५३॥
आसनैर्विविधैश्चापि तथाऽनुवृत्तिभिः स्त्रियः ।
महीमानीयोषितां वै व्यधुः संवर्धनं तदा ॥५४॥
दुःखहाऽञ्जलिभिश्चापि वक्षःसम्मेलनादिभिः ।
सर्वयोग्यप्रदानैश्च मधुवाक्यैश्च सेवनैः ॥५५॥
जयश्चन्द्रो धेनुपालस्तथाऽन्ये शिवपक्षिणः ।
बालकृष्णकुटुम्बानां सम्मानं स्वागतं व्यधुः ॥५६॥
अशोकसुन्दरीदेवी सख्यस्तस्याँश्च कन्यकाः ।
सन्तोषादिककन्यानां स्वागतं संव्यधुस्तदा ॥५७॥
कन्यकाः कोटिशश्चापि शांकर्यश्च व्यधुस्तदा ।
कन्यकानां स्वागतं च पूजाभोजनसेवनैः ॥५८॥
प्रजाश्चापि प्रजानां च पप्रच्छुः कुशलानि हि ।
राजानश्च नृपाणां वै पप्रच्छुः कुशलं तदा ॥५९॥
देवाश्चापि सुराणां च मुक्तानां मुक्तकोटयः ।
ऋषीणामृषयश्चापि पप्रच्छुः कुशलं तदा ॥६०॥
ईश्वरा ईश्वराणां च प्रचक्रुः स्वागतादिकम् ।
नारीणां नारिकावर्गाः सम्मानं संव्यधुस्तदा ॥६१॥
शंकरः प्राह धन्योऽहं यद्गृहे भगवान् स्वयम् ।
समायातो भिक्षुको मे पुण्यपात्रं सुताकृते ॥६२॥
धन्येयं नगरी रम्या काशिका तत्प्रजा अपि ।
धन्या सती तथा लक्ष्मीर्यद्गृहे भगवान् स्वयम् ॥६३॥
धन्योऽहं यद्गृहे चाऽद्य धाममुक्ता भवन्ति हि ।
वासुदेवः प्रभुः साक्षाद् विष्णवश्च भवन्ति हि ॥६४॥
नारायणाश्च यद्गृहे सन्तो नारायणोपमाः ।
तीर्थानि यद्गृहे त्वद्य धन्योऽहं भाग्यवानपि ॥६५॥
धन्या वृक्षास्तथा वल्ल्यो धन्याः कीटपतंगकाः ।
धन्या महीमानिनो मे येषां योगोऽत्र शार्ङ्गिणः ॥६६॥
यद्गृहे सात्त्वताः सन्ति भागवता हि साधवः ।
सृष्टित्रयं पुनानाश्च यद्गृहे मुनयोऽपि च ॥६७॥
मम कैलासकं त्वद्य जातं परमवैष्णवम् ।
यत्र मे प्राणनाथस्य वासोऽद्य वर्ततेऽम्बरे ॥६८॥
अद्य मे तु गणाः सर्वे जाताः परमवैष्णवाः ।
अद्य मे शिवसंज्ञेति सदा त्वान्वर्थिकी मम ॥६९॥
इत्युक्त्वा निजनेत्रेषु प्रेमाश्रूणि रुरोध ह ।
आविलं चापि त्रिनेत्रमनाविलं व्यधान्मुदा ॥७०॥
श्रीमद्गोपालकृष्णोऽपि राधिके ! शंकरं तदा ।
प्राह धन्या वयं येषां जायते तेऽद्य दर्शनम् ॥७१॥
यः परब्रह्मरूपश्च संकर्षणः स्वयंप्रभुः ।
महाकालस्वरूपश्च तद्गेहे नः समागमः ॥७२॥
धन्या वयं महायोगिन् जगत्संहारकारक ।
भवत्कृपाऽवलेशेन दानार्हस्तेऽद्य मे सुतः ॥७३॥
धन्यो मे बालकृष्णश्च लक्ष्मीं प्राप्स्यति ते सुताम् ।
सर्वलोकस्य जननीं ब्राह्मीं नारायणीं सतीम् ॥७४॥
गोलोकेशो हरिकृष्णो राधया गोपिकादिभिः ।
सहाऽद्य वर्तते त्वत्र शिवेश्वरः पिता च वः ॥७५॥
अस्याऽनन्तस्वरूपस्य पुमुत्तमस्य दर्शनम् ।
लब्ध्वा धन्या वयं चान्यत् किं भाग्यं श्रेष्ठकं त्वितः ॥७६॥
इत्युक्त्वा प्रणनामाऽपि शंकरं कृष्णमित्यपि ।
कंभराश्रीः सतीं चापि तदाह भाग्यगौरवम् ॥७७॥
सती च निजभाग्यस्य गौरवं प्राह शोभनम् ।
अहो पुत्री मम धन्या यत्सेव्या कंभरा सती ॥७८॥
पावनं मे गृहं त्वद्य महालक्ष्म्याः समागमात् ।
पावनं च कुटुम्बं मे सर्वसृष्टिसमागमात् ॥७९॥
पावनं काशिकाक्षेत्रं मोक्षदं संभविष्यति ।
अनादिश्रीकृष्णनारायणस्य परब्रह्मणः ॥८०॥
समागमात्तथेशानां मोक्षदानां सतां तथा ।
साध्वीनां कन्यकानां च देवीनां च समागमात् ॥८१॥
मातृणां चाप्सरसां च ब्रह्मसरसां चागमात् ।
ईश्वरीणां चागमाच्च राधारमासमागमात् ॥८२॥
कमलातुलसीलक्ष्मीमाणिकीशारदाऽऽगमात् ।
रमापद्मावतीश्रीभूलीलाविभूतिकागमात् ॥८३॥
मुक्तानीनामागमाच्च वैष्णवीनां विशेषतः ।
भक्तानां चापि राज्ञीनां धन्या समागमादिह ॥८४॥
अद्य मे सफलं जन्म चाऽद्य मे सफलाः क्रियाः ।
अद्य मे सफला समृद्धिः कंभराश्रीसमागमात् ॥८५॥
अद्य मे सफला विद्या साम्राज्यं सफलं मम ।
दासा दास्यश्च सफलाः कंभराश्रीसमागमात् ॥८६॥
शिवेश्वरगृहे चास्मि विवाहिता हि पार्वती ।
सफलाऽस्मि सकुटुम्बा लक्ष्मीमाताऽस्मि शोभना ॥८७॥

पार्वती त्वद्य जानाति भाग्यं सर्वोत्तमं निजम् ।
यत्पुत्रीं कंभराबालो भगवान् वै ग्रहीष्यति ॥८८॥
इत्युक्त्वा प्रणनामाऽपि कंभराश्रीं तथाऽपराः ।
कंभराश्रीस्तदा प्राह साफल्यं त्वद्य नोऽपि च ॥८९॥
यद्गेहे वयमागत्य पश्यामो गिरिजां सतीम् ।
मम गेहे सतीपुत्री लक्ष्मीश्चाप्यागमिष्यति ॥९०॥
सर्वलोकपोषयित्री भाग्यं मे परमं त्विह ।
सती ब्राह्मी मम पुत्रमानार्हा संभविष्यति ॥९१॥
यन्नेत्रमिषमात्रेण सृष्टित्रयं विलीयते ।
स मे पुत्रस्य पूज्याऽद्य तस्याः पूज्यश्च मे सुतः ॥९२॥
अहो भाग्यं त्रिलोक्यां मे समं नान्यस्य विद्यते ।
इत्युक्त्वा प्रणनामाऽसौ कंभराश्रीः सतीं तदा ॥९३॥
अद्रिजाश्रीः क्षणं सर्वाः प्रपूज्याऽऽगतयोषितः ।
कृत्वा च मधुपर्काद्यैः स्वागतं च पुनः पुनः ॥९४॥
सुधापानप्रदानैश्च मिष्टपयःप्रपादनैः ।
विरेमे सोदरौ द्वौ तु जयचन्द्रौ मुदा तदा ॥९५॥
निजभाग्यौ सुमन्वानौ मुमुदतुर्हि निर्भरौ ।
कन्यापक्षो विरराम ब्रह्मनादो बभूव ह ॥९६॥
कृष्णवाहिन्यास्तदा वै गन्तुं शिवपुरं प्रति ।
नन्दीश्वरश्चकारैव ब्रह्मनादं मुहुर्मुहुः ॥९७॥
बृहस्पतिर्हरिं सम्पूज्य चोत्थितोऽभवत् ततः ।
विश्रम्य च नरा नार्यः समुत्थितास्तदाऽभवन् ॥९८॥
आवासान् प्रतिगन्तुं च तावदाश्चर्यमद्भुतम् ।
जातं राधे ! महाचमत्कारमयं हि तच्छृणु ॥९९॥
सर्वे वदन्ति गन्तव्यं शिवेश्वरपुरं प्रति ।
अम्बरात् केन विधिना कैलासं प्रविहाय च ॥१००॥
तावद्वै शंभुना तत्र द्रुतं योगबलेन वै ।
कैलासकं समग्रं वै शनैः समवतारितम् ॥१०१॥
भुवं प्रति यथायोग्यं शिवेश्वरपुरं प्रति ।
कैलासनगरं सर्वं शिवसृज्यपुरे तदा ॥१०२॥
अवतीर्याऽन्तर्भावं प्रजगाम समविग्रहे ।
उद्यानेषु तदुद्यानाः कुंजेषु च निकुंजकाः ॥१०३॥
प्रासादेषु तथा प्रासादकाश्चान्तर्हितास्तदा ।
विमानानामाश्रयेषु विमानान्यभवँस्तदा ॥१०४॥
येषां कृते तु ये तत्राऽऽवासाः पूर्वं प्रकल्पिताः ।
महीमानास्त एवैते तदावासेषु तत्र ह ॥१०५॥
निषेदुः सुखसम्पन्नाः कन्यावासेषु कन्यकाः ।
राजाऽऽवासेषु राजानः साध्वावासेषु साधवः ॥१०६॥
ऋष्यावासेषु ऋषयो देवावासेषु देवताः ।
ईशावासेष्वीश्वराश्च मुक्तावासेषु मुक्तकाः ॥१०७॥
कृष्णाऽऽवासे हरिश्चापि त्वन्यावासेषु चान्यकाः ।
सृष्टित्रयनिवासेषु यथायोग्यं हि राधिके ॥१०८॥
सृष्टित्रयनिवासो वै नैसर्गिकोऽभवत्तदा ।
कैलासं लीनतां यातं दृश्यते शिवपत्तनम् ॥१०९॥
आवासाँस्तूर्णमापाद्य स्नानशुद्धिं प्रचक्रिरे ।
ततश्चक्रुर्भोजनानि स्मृद्धेषु मन्दिरेषु वै ॥११०॥
ताम्बूलं जगृहुश्चापि विश्रान्तिं जगृहुस्ततः ।
मनोरञ्जनदृश्यानि वीक्ष्य निद्रामगुस्ततः ॥१११॥
दासा दास्यो देहसंवाहनाद्यं चक्रिरे तदा ।
शिवेश्वरादयो नैजान् गृहान् रात्रौ समाययुः ॥११२॥
कन्यापक्षा महीमानाः कृत्वा भोजनमुत्तमम् ।
विश्रान्तिं लेभिरे निद्रां राधिके सुखिनोऽभवन् ॥११३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चाकाशकैलासे वादित्रैः कृष्णवाहिन्याः शंकरेण बहुरूपैः कृतं स्वागतं चाभिवर्धनं पूजनं सम्मानं, मिष्टान्नजलपयःपान-ताम्बूलदानं, नरनारीणां परस्परं कुशलाऽनामयप्रश्नाः, कैलासस्य तिरोभावः, शिवपुरेऽवतरणं, भोजनादि, रात्रौ विश्रान्तिश्चेतिनिरूपणनामा षडशीत्यधिक-द्विशततमोऽध्यायः ॥ २८६ ॥

**श्रीकृष्ण उवाच—**

राधिके ! सुखमापन्नाः सेवाभिर्महीमानकाः ।
अपूर्वसुखभोक्तारोऽभवन् शिवपुरे तदा ॥ १ ॥
संकल्पानुसृतं सर्वं यत्र समुपतिष्ठते ।
दिव्ये शिवपुरे तत्र चतुर्थ्यां तु प्रगे जनाः ॥ २ ॥
वादित्रैर्मंगलैश्चापि यशःश्रवणगीतिभिः ।
निद्रां जहुर्महीमानाः सस्नुः शुद्धिप्रपूर्वकम् ॥ ३ ॥
पुपूजुश्च हरिं चक्रुः स्वाध्यायं च जपादिकम् ।
कन्यकानां गीतयश्चाऽजायन्त तत्र मंगलाः ॥ ४ ॥
गृहे गृहेऽगणे दध्ना यवांकुरैश्च केसरैः ।
रंगैश्च कुंकुमैश्चापि रंगवल्ल्योऽभवन् कृताः ॥ ५ ॥
स्वस्तिकाश्चापि पद्मानि कृतान्यासन् पुरः पुरः ।
तोरणानि धृतान्यासन् बद्धाश्चासन् ध्वजास्तथा ॥ ६ ॥
वाद्यानां निनदाश्चासन् मण्डपे च गृहे गृहे ।
प्रातश्चोष्णजलाद्यैश्च विधयोऽपि तदाऽभवन् ॥ ७ ॥

सर्वेषां तु प्रगे दुग्धपानं मिष्टान्नसंयुतम् ।
शिवस्वामिसकाशाद्वै तदाऽभवद्यथेष्टकम् ।
वृद्धानां पूजनं चापि तदाऽभवद् यथोचितम् ॥ ८ ॥
अथ स्नाता शिवपुत्री शृंगारिता विभूषिता ।
सखीभिः पितरं नत्वा नत्वा च मातरं तथा ॥ ९ ॥
कोटिचन्द्रानना रम्या सर्वाऽऽभूषणशोभिता ।
कुलदेवप्रपूजार्थं पद्भ्यां सामग्रिकायुता ॥१०॥
प्रययौ हनुमन्तं च दुर्गां पूजयितुं सती ।
कोटिकन्यायुता चापि सौभाग्यप्रमदान्विता ॥११॥
गायिकाभिः समायुक्ता वादित्रनादरञ्जिता ।
स्वर्णकलशमूर्धाभिर्नारीभिर्वेष्टिता सती ॥ १२॥
पञ्चगव्यादियुक्ताभिः कन्याभिर्वेष्टिता ह्यपि ।
पूजासामग्रिकास्थालयुक्ताभिः सह शोभना ॥१३॥
वह्न्युज्ज्वलांऽशुकाभिश्च सौभाग्याभिश्च वर्धिता ।
प्रथमं सा ययौ दुर्गां पुपूज परमेश्वरीम् ॥१४॥
पञ्चामृतैश्चन्दनाद्यैः पयोभिस्तीर्थवारिभिः ।
कुंकुमाऽक्षतकस्तूरीकैसरद्रवद्रव्यकैः ॥१५॥
सुगन्धिपुष्पहाराद्यैर्नैवेद्यैः पायसादिभिः ।
मिष्टान्नैर्जलपानाद्यैस्ताम्बूलकैः सुवर्णकैः ॥१६॥
दक्षिणाभिश्च पात्रैश्च नीराजनैः स्तवैस्तथा ।
प्रदक्षिणैर्नमस्कारैः क्षमापराधनार्थनैः ॥१७॥
पुपूज दुर्गां च ततः शाटीं च कञ्चुकीं तथा ।
घर्घरीं नक्तकं प्राऽऽर्प्य नुपूरे चोर्मिकास्तथा ॥१८॥
शृंखले रशनां चापि स्वर्णहारान् मणीन् शुभान् ।
कटके वलये चाऽङ्गुलीयकानि च पञ्चकम् ॥१९॥
तन्तिका नत्थिकां स्वर्णकुण्डले पत्रिकां तथा ।
चन्द्रकं च प्रकोष्ठयोर्वलये भूषणान्यपि ॥२०॥
समस्तानि ददौ दुर्गादेव्यै प्रोवाच वै ततः ।
मातर्मे भगवद्योगे प्रोद्वाहे स्यादविघ्नता ॥२१॥
द्रष्टव्याऽहं त्वया दुर्गे सर्वदा यामि यत्र वै ।
दुर्गाऽपि राधिके तत्र विहस्याऽऽह तथास्त्विति ॥२२॥
एवं दुर्गां प्रपूज्यैव प्राप्य प्रासादिकं फलम् ।
ययौ श्रीहनुमन्तं सा तपोऽर्थं त्वाश्रयप्रदम् ॥२३॥
गत्वा नत्वा वायुपुत्रं शांकरं भ्रातरं सुरम् ।
पञ्चामृतं जलं दत्वा चन्दनं चार्कमालिकाम् ॥२४॥
कुंकुमं चाक्षतान् स्वर्णमालां सिन्दूरकं तथा ।
तैलं सुगन्धिसारं च भूषाम्बराणि चापि वै ॥२५॥
शर्करां वटकान् दत्वा मिष्टान्नानि शुभानि च ।
जलपानं मुखशुद्धिं फलं दत्वा च दक्षिणाम् ॥२६॥
नीराजनं ततः कृत्वा स्तवनं च प्रदक्षिणम् ।
क्षमामयाचत लक्ष्मीस्तपःसिद्धिसहायक ॥२७॥
भ्रातः रक्ष सदा मां त्वं भगवद्योगकारक ।
निर्विघ्नो मे सुयोगः स्याद् बालकृष्णेन शार्ङ्गिणा ॥२८॥
जगन्नाथेन नाथेन सुख्यहं स्यां तथा कुरु ।
इत्यभ्यर्थित एवाऽसौ हनूमानाह वै स्वसः ॥२९॥
तथास्त्विति सदा सौभाग्यवती भव दुःखहे ।
अथ नत्वा प्रसादं च गृहीत्वा स्वसखीयुता ॥३०॥
समाययौ हि विश्वेशं पितरं मन्दिरस्थितम् ।
विश्वेश्वरं सुबहुधा पयसा मधुना तथा ॥३१॥
दध्ना घृतेन च शर्करया तीर्थजलेन च ।
स्नापयित्वा गन्धसारैः सम्पूज्याऽऽर्प्य निवेदनम् ॥३२॥
आरार्त्रिकं ततः कृत्वा क्षमां कृपामयाचत ।
निर्विघ्नतां मंगले चाऽयाचताऽपि तथास्त्विति ॥३३॥
विश्वेश्वरः पिता प्राह ययौ ततोऽन्नपूर्णिकाम् ।
प्रपूज्य मातरं तथा प्राऽऽर्प्य शृंगारकं तथा ॥३४॥
निवेदनं ददौ चापि नीराजनं व्यधात्ततः ।
अन्नपूर्णा चकाराऽस्या भाले साऽक्षतचन्द्रकम् ॥३५॥
अखण्डसौभाग्यवती शाश्वतजीवनी भव ।
आशीर्वादं ददौ चाथ कन्या नत्वा गणेशकम् ॥३६॥
दूर्वासिन्दूरलड्डूभिः प्रपूज्य तु सरस्वतीम् ।
गंगां ययौ पंचगंगां धर्मं देवं पुपूज च ॥३७॥
नत्वा दत्वा च दानानि स्वर्णरूप्यमयानि हि ।
मणिमाणिक्यहारांश्च रत्नानि मौक्तिकानि च ॥३८॥
आशीर्वादान् समगृह्य प्रजानां च ततो गृहम् ।
निजालयं प्राययौ च नत्वा शिवपुरं सती ॥३९॥
मध्याह्ने त्वथ सर्वाभ्यः सखीभ्यो भोजनं ददौ ।
लक्ष्मीश्चक्रे सखीभ्यश्च परिवेषणमुत्सुका ॥४०॥
हिमजानगराऽऽवासमहीमानस्त्रियस्तदा ।
बुभुजुः कोटिशः पंक्तौ मिष्टान्नानि समन्ततः ॥४१॥
आबालवृद्धा नार्यो वै तृप्ता जाता हि भोजनैः ।
नार्यश्च शिवपुरगा महीमानस्त्रियस्तथा ॥४२॥
बुभुजुर्भोजनान्येव समस्ताः कन्यकादिकाः ।
ततो नराश्च बुभुजुः पत्तनोभयवासिनः ॥४३॥
शिवराजगृहस्थाश्च काश्याश्चापि प्रजाजनाः ।
बुभुजुः कोट्यर्बुदाब्जा ईशा देवाश्च मानवाः ॥४४॥

मेशुमान् मोहनस्थालान् माषलड्डून् सुमौक्तिकान् ।
चूर्णलड्डून् दुग्धपाकान् पायसान् क्षीरपोलिकाः ॥४५॥
मिष्टपोलीः पूरिकाश्च सूत्रफेणीं च बर्फिकाम् ।
दुग्धसारां विरंजं च शष्कुलीं खाजकान् वटीः ॥४६॥
अपूपान् पूपसंयावान् बिन्दुलड्डून् प्रभर्जिकान् ।
श्रीखण्डान् शतछिद्रांश्च जाम्बूकान् घेवरांस्तथा ॥४७॥
पिण्डकान् ग्रन्थकांश्चापि कलिका घुर्घुरांस्तथा ।
वटान् फुल्लवटीश्चापि शर्करात्का बदामिकाः ॥४८॥
चणकांस्तण्डुलांश्चापि भर्जितान् पाचितानपि ।
सूपौदनं च क्वथिकाः शाकानि विविधानि च ॥४९॥
भाजाश्च विविधाश्चापि सुधाश्चाऽमृतकानि च ।
तक्राणि पेयद्रव्याणि चोश्यानि सत्फलानि च ॥५०॥
रसान् लेह्यान् भक्ष्यकणानारनालानि चापि ह ।
पर्पटान् चटनीश्चापि क्षारिकाः संस्कृतानपि ॥५१॥
मिष्टफलानि च तथा चार्द्रबीजानि यानि च ।
शिम्बिकाश्च तथा वल्लान् गुन्द्रपाकादिकांस्तथा ॥५२॥
कन्दपाकान् विचित्रांश्च फलपाकान् गरिष्टकान् ।
राजिकाराद्धमेवापि फलचूर्णानि यानि च ॥५३॥
वन्यान् कन्दान् कृषिकन्दान् चाऽकृष्टपच्यकौषधीः ।
कल्पपादपसञ्जातान् भक्ष्यभोज्यान् प्रमिष्टकान् ॥५४॥
बुभुजुश्च पपुश्चापि पीयूषाणि विशेषतः ।
तत्तल्लोकीयभोज्यानि तेभ्यो तेभ्यो ददौ हरः ॥५५॥
तत्तज्जातीयपेयानि तेभ्यो तेभ्यो ददौ हरः ।
ताम्बूलकानि रम्याणि स्वाद्वन्त्याननशोधिकाः ॥५६॥
वाटिकाश्च ददौ श्रीमान् शंकरो लोकशंकरः ।
बुभुजुश्च महीमानास्ततोऽतिथिजना अपि ॥५७॥
भिक्षुकाश्च दीनजना अनाथा नरयोषितः ।
कर्मचारास्तथा भृत्या दासा दास्योऽनुगाऽनुगाः ॥५८॥
पार्षदा द्वारपालाश्च तथैव परिवेषकाः ।
रक्षका दर्शकाश्चापि बुभुजुर्हृष्टमानसाः ॥५९॥
जडाश्च चेतनाश्चापि ईशा देवाश्च मानवाः ।
सृष्टित्रयनिवासाश्च महीमानाश्च येऽत्र च ॥६०॥
सर्वे ते पूर्णतृप्ता वै जाता भोजनसत्तमैः ।
सर्वे विश्रान्तिमापुश्च महीमानास्ततः क्षणम् ॥६१॥
अथ श्रीबालकृष्णोऽसौ ज्ञातुं दार्ढ्यं शिवस्य तु ।
भूत्वा श्रीकृष्णरूपोऽसौ शिवेश्वरः ययौ द्रुतम् ॥६२॥
रहस्ये शिवदेवं तु गत्वा प्राह शृणु प्रिय ।
पुत्रः योग्यं च वाऽयोग्यं कथयामीह मे शृणु ॥६३॥
भवान् जानातु यं कं वा जानाम्येनं वदामि च ।
पत्नीव्रतस्य पुत्रोऽयं विप्रो वै भिक्षुकोऽस्ति हि ॥६४॥
बालकृष्णोऽस्ति वै नाम्ना बालशो दीनजन्मवान् ।
भिक्षुकाय सुता नैव देया राज्ञा कथंचन ॥६५॥
विदेशस्थाय तत्रापि नैव देया कथंचन ।
जात्या समेन कन्याया प्रदानं शोभते सुखः ॥६६॥
विजातिना तु लोकेऽत्र दुःखं स्यान्नात्र संशयः ।
अन्यच्चापि शरीरेण कृष्णोऽयं दृश्यतेऽबलः ॥६७॥
धवलायास्तव पुत्र्या यौगल्ये शोभतेऽपि न ।
तथाऽन्यत्ते कथयामि पुराणोऽयं विलोक्यते ॥६८॥
कन्येयं कोमला स्वल्पवर्षीया दीयते कथम् ।
तथाऽन्यच्चापि राजेन्द्र कुमाराय कुमारिका ॥६९॥
देया चेत् सुखमिच्छेथाः कन्यायाः शाश्वतं तदा ।
बालकृष्णोऽत्र वै कोटिवधूभिः सह चागतः ॥७०॥
तत्रेयं कियती बाला गणनायां भविष्यति ।
सपत्नीनां कलहस्तु विषाद् वह्नेस्तु दुःसहः ॥७१॥
शृणु त्वन्यत्तथा चाऽस्य सर्वभक्षित्वमस्ति हि ।
भुंक्ते सर्वप्रदत्तं च ह्येकधर्मोऽस्य नास्त्यपि ॥७२॥
अमायी चापि तु सदा निर्गुणोऽयं प्रविद्यते ।
किं चाऽयं वर्तते नित्यं मुनिवृत्तिपरायणः ॥७३॥
रन्तुं नैवाऽपि जानाति कामनावर्जितोऽस्ति च ।
मायामारो विद्यतेऽसौ मायां कर्तुं न वेत्त्यसौ ॥७४॥
पश्य गोपालकर्माऽस्य पिता गोपालसदृशः ।
गोपालकृष्णनामाऽस्ति भिन्नकर्मसमाश्रितः ॥७५॥
क्षत्रियेण न विप्राय भिन्नकर्मकृते सुता ।
देयेति सर्वथा बुध्वा यथेष्टं ते तथा कुरु ॥७६॥
इत्युक्त्वा विररामाऽसौ श्रीकृष्णो बालकृष्णकः ।
विश्वेश्वरस्तु पितरं नत्वा प्राह विचार्य वै ॥७७॥
पितः पुत्र्या भालरेखा सञ्चितं च तथा पुरा ।
विद्यते विप्ररूपेण साकं तत्र प्रदानकम् ॥७८॥
पत्नीव्रतो महाविष्णुः स्वयं पृथ्व्यां हि वर्तते ।
जानामि योगदृष्ट्यैव तत्पुत्रं पुरुषोत्तमम् ॥७९॥
सदाभिक्षाकरश्चायं भक्तानां स्नेहशालिनाम् ।
परब्रह्म स्वयं चास्ते कथं देया न पुत्रिका ॥८०॥
दीनार्थं जन्मवानास्ते बालिनां शंप्रदो हरिः ।
बालात्मनां निर्मलानां कृषिं मोक्षं करोति सः ॥८१॥
बालकृष्णो हरिश्चास्तेऽक्षरधामाधिपः प्रभुः ।
राज्ञा मया महाराज्ञे भिक्षुकाय तु शार्ङ्गिणे ॥८२॥

प्रदातव्या सुता तत्र यशोलाभोदयोऽस्ति हि ।
विदेशोऽस्याऽक्षरं ब्रह्म तस्मै देया कथं न वै ॥८३॥
जात्या समा मम पुत्री ब्रह्मणा ब्राह्मणी त्वियम् ।
जातिर्न देहजा क्वापि गुणजा विद्यते सदा ॥८४॥
ब्राह्मी लक्ष्मीर्मम कन्या ब्रह्मणा सह युज्यते ।
कृष्णोऽयं सार्थकश्चास्ते पापसंकर्षणात् तथा ॥८५॥
स्वधामनयनाच्चापि कृष्णोऽयं च यथा भवान् ।
पुराणोऽयं तु पुरुषः पुरुषोत्तमसंज्ञकः ॥८६॥
पुराणी मे कन्यका नारायणी पुरुषोत्तमी ।
पुरुषोत्तमसंज्ञस्य तन्वः सर्वाः प्रजा मताः ॥८७॥
वध्वः सर्वा हरेस्ताश्च समर्थस्य न दूषणम् ।
बालेयं दृश्यते त्वत्र सुग्राह्या तेन शार्ङ्गिणा ॥८८॥
सर्वासामग्रगण्या च गणना सा महोत्तमा ।
सापत्न्यं नास्ति कृष्णाग्रे रागद्वेषहरो हि सः ॥८९॥
सर्वभक्षित्वमेवाऽस्य परात्मनो हि युज्यते ।
भूषणं धर्मधर्तुर्वै सर्वधर्मात्मनः प्रभोः ॥९०॥
माया वै बन्धदा यत्र नास्ति सन्ति न तद्गुणाः ।
साधुवर्तन एवाऽसौ सर्वकर्मफलप्रदः ॥९१॥
न्यायवर्तन एवाऽसौ वर्तते चाप्यहिंसकः ।
मुनिरेव सदा चास्ते वेदाः श्वासास्तथाऽस्य ह ॥९२॥
गायन्ति सुगुणान् शश्वत् मौनं चास्यैव भूषणम् ।
अपूर्णस्य पितः सञ्जायते वै कामना मुहुः ॥९३॥
सर्वसम्पत्प्रपूर्णस्य सर्वानन्दभृतस्य च ।
सर्वात्मकस्य कृष्णस्याऽकामत्वं तु गुणो महान् ॥९४॥
रमणं विषयोऽर्थं वै नाऽयं जानाति यत्परः ।
पुत्री मेऽपि तथा चास्ते मायापरा रमात्मिका ॥९५॥
बन्धदायाश्च प्रकृतेर्नाशकोऽयं परेश्वरः ।
कुहकं न करोत्येव मायापरो हि सोऽस्ति च ॥९६॥
गोपालस्त्वं पिता चास्से गोपालः सोऽपि तत्पिता ।
वैश्ययोः सहमेलस्तु भाग्यादेवाऽत्र संगतः ॥९७॥
विश् प्रवेशनेऽतो वेष्टा चान्तर्यामी प्रभुर्हि सः ।
लक्ष्मीः सृष्टित्रये सर्वप्रविष्टाऽन्तर्नियामिका ॥९८॥
तयोस्तु संगतिर्योग्या सर्वदैव प्रशस्यते ।
क्षत्रियः सर्वदा रक्षाकरः शरणवासिनाम् ॥९९॥
भगवान् श्रीबालकृष्णः क्षत्रियो वै कथं न हि ।
क्षत्रिया मम पुत्री च क्षत्रियो भगवानपि ॥१००॥
द्वयोर्योगोऽस्ति वै भाग्याद् प्रोद्वाहः कृष्णयोरिति ।
शुभो मे भाति तस्मात्त पितः शंका न रोचते ॥१०१॥
इत्युक्तवन्तं श्रुत्वैव हृदये हृष्टमानसः ।
पुत्रं तथास्त्वभिधाय श्रीकृष्णः प्रययौ ततः ॥१०२॥
राधिकेऽथ ततश्चापि बालकृष्णः स्वयं प्रभुः ।
शांभवी चापि विज्ञातुं स्त्रीभूत्वा प्रययौ गृहम् ॥१०३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चतुर्थ्यां प्रगे कृतं मंगलं, कन्याकृतं कुलदेवता-पूजनम्, महीमानानां भोजनादि, बालकृष्णस्य श्रीकृष्णरूपस्य शिवेश्वरेण सह कन्या न देयेति—संवादः, तदुत्तराणि, चेत्यादिनिरूपणनामा सप्ताशीत्यधिकद्विशततमोऽध्यायः ॥ २८७ ॥

**श्रीकृष्ण उवाच—**

राधिके च ततः श्रीमद्बालकृष्णस्ततः परम् ।
राधारूपः स्वयं भूत्वा ययौ श्रीपार्वती गृहम् ॥ १ ॥
त्वां सा स्नुषा पार्वती च वीक्ष्योत्थायाऽऽसनं ददौ ।
रहस्येऽस्यै राधिका प्रोवाच शृणु हितावहम् ॥ २ ॥
माता सा कथ्यते पुत्र्याः श्रेयस्करी सदा भवेत् ।
दानमात्रं न द्रष्टव्यं द्रष्टव्योऽस्यास्तथाऽऽयतिः ॥ ३ ॥
उत्तरे स्यात् सुता नित्यसुखिनीति मता मतिः ।
नारीवर्गेषु दुःखं चेत् सापत्न्यं सर्वतोऽधिकम् ॥ ४ ॥
मया त्वत्र श्रुतं तद्वै यस्मै प्रदीयते सुता ।
स चास्ति बाल्यतो भूमौ पतिर्वै कोटियोषिताम् ॥ ५ ॥
यास्ताः सर्वाश्चागता वै पित्रादिभिः समं त्विह ।
प्रत्यक्षं वर्तते त्वेतत् पुत्री स्यात् तत्र दुःखिता ॥ ६ ॥
ममाऽस्ति तत्र वैमत्यं तस्माद् देया न पार्वति ! ।
बहुस्त्रीणां समवाये भोगा भिन्ना भवन्ति हि ॥ ७ ॥
सम्पदा च विभागाः स्युः पर्याप्ताः स्युर्न ते ततः ।
बहुनारीमतः पुंसो नार्यस्तृप्तिं न यन्ति हि ॥ ८ ॥
राज्ञां संघट्ट सर्वे पृथ्वीराज्यवतः खलु ।
अयं तु विद्यते विप्रो जामाता वैश्यकर्मवान् ॥ ९ ॥
नास्ति ग्रामोऽस्य वाटी वा क्षेत्रं वा चापणादिकम् ।
भिक्षा त्वस्याऽस्ति वृत्तिर्वै कथं स्यात् सुखिनी सुता ॥१०॥
गृहे नाऽस्याऽस्ति वित्तं वै दर्शयत्यधिकं बहिः ।
नारदोक्त्याऽर्पिता चापि वाग्दानेऽपि वियुज्यत ॥११॥
तस्माद् देया न वै लक्ष्मीः सुसुखा दुःखिनी भवेत् ।
वद स्नुषे मतं तेऽत्र मयोक्तं तपता हृदा ॥१२॥

अरोगाय कुमाराय सुशीलाय सुयोगिने ।
धनवतेऽद्विभार्याय सुता देया सुरूपिणे ॥१३॥
कुटुम्बिने समस्थाय गोधनाय महीमते ।
स्वबाहूपार्जितसम्पद्युक्ताय गुणशालिने ॥१४॥
कीर्तिमते समर्थाय कामनापूरकाय च ।
पत्नीं तु देवतां मत्वा सुखदात्रे यशस्विने ॥१५॥
रामाय धर्मयुक्ताय कन्या देया सुवेदिने ।
अन्ये गुणास्ततो वीक्ष्या असापत्न्योत्तरं तदा ॥१६॥
सापत्न्यं दूषणं त्वग्र्यं नरकं सर्वदा गृहे ।
अपत्यानां मान्यता च ध्रुववन्नैव स्याच्च वा ॥१७॥
रोहिण्यां पक्षपातश्च चन्द्रस्येव भवेत्तथा ।
विरजायाश्च राधाया मे यथा तु कलिः पुरा ॥१८॥
गोलोकेऽप्यभवत्तेन दुःखं सापत्न्यमेव यत् ।
मयोक्तं मे तु यद्वार्तं स्नुषे कुरु यथोचितम् ॥१९॥
इत्येवं राधिके ! राधावाक्यं श्रुत्वा तु पार्वती ।
शिवेश्वरप्रिया प्राह पूज्यां निर्णयमुत्तमम् ॥२०॥
पुण्योऽयं बालकृष्णोऽस्ति परब्रह्म सनातनः ।
पतिः पूर्णानन्दश्च सागरः सरितां यथा ॥२१॥
पूर्णस्मृद्धः पूर्णवीर्यः पूर्णगुणो विराजते ।
अस्मादेव समुत्पन्नं सर्वं वै सृष्टिमण्डलम् ॥२२॥
रोगश्चिन्ता च सा नास्ति पूर्णकामस्य वै प्रभोः ।
कुमारत्वं सदा चास्तेऽविप्लुतस्याऽस्य योगिनः ॥२३॥
शीलाख्यं च व्रतं त्वस्य गीयते श्रुतिमूर्धसु ।
योगी चायं योगवेत्ता निरोधवान् सदाऽस्ति च ॥२४॥
सर्वं धनं कृतं येन सोऽयं वै श्रेष्ठिसत्तमः ।
मेदिनी च कृता तेन वसवस्तेन निर्मिताः ॥२५॥
कुबेरत्वं निर्मितं च तेनाऽतो धनवत्तमः ।
यावत्योऽस्य भवेयुश्च भार्यास्तावत्तनूधरः ॥२६॥
भार्यां भार्यां पृथग् भुंक्ते वर्ततेऽपि पृथक् सदा ।
अद्विभार्यस्ततश्चाऽयं चन्द्रमोवन्न दूषणम् ॥२७॥
रूपं रूपं प्रतिरूपो बभूवाऽयं सुरूपवान् ।
कुटुम्बं चाऽक्षरे धाम्नि चाऽसंख्यं यस्य विद्यते ॥२८॥
यस्यैव प्रतिबिम्बानि सन्त्यवतारकोटयः ।
ईश्वरा मनवो रुद्रा लोकपालाश्च विष्णवः ॥२९॥
अस्यैव सन्त्यवतारा आदित्याः ऋषयोऽमलाः ।
कुटुम्बं त्वस्य विद्यते सार्वभौमं मया श्रुतम् ॥३०॥
सर्वासु समभावेन त्वास्तेऽयं पुरुषोत्तमः ।
प्रत्युताऽधिकभावेन यावत् तृप्तिः प्रजायते ॥३१॥
समस्थो विषमस्थो वा पत्न्याः सुखप्रदोऽस्ति सः ।
गोधनं चापि गोलोके श्रेष्ठं मतं त्वया मया ॥३२॥
कामदुघाः सदा त्वस्य सेवायां सन्ति संश्रुतम् ।
मही चाऽस्य समग्राऽस्ति राजानः श्वशुरा यतः ॥३३॥
स्वबाहूपार्जिता सम्पत् साक्षादत्र विलोक्यते ।
काशीयात्राऽस्य वै चास्ते कोटिसृष्टिसमन्विता ॥३४॥
अस्य माता स्वयं महालक्ष्मीरेव विराजते ।
पिता चास्य महाविष्णुर्गोपालोऽस्ति विराजकृत् ॥३५॥
अष्टौ महागुणाश्चात्र विद्यन्ते श्रुतिबोधिताः ।
नित्या अपहतपाप्मत्वादयः परमेश्वरे ॥३६॥
सत्यं शौचं तथाऽन्ये च नवत्रिंशद्गुणास्तथा ।
असंख्याश्च गुणास्त्वत्र विद्यन्ते नित्ययोगिनः ॥३७॥
कीर्तिर्वैदेषु चास्याऽस्ति धामसु चेश्वरेष्वपि ।
देवेषु मानवे लोके सर्वपातालकेष्वपि ॥३८॥
समर्थोऽस्ति मोक्षदोऽस्ति मोक्षार्थं कन्यका मया ।
दत्ताऽस्ति दीयते चापि का तत्र परिवेदना ॥३९॥
कामनापूरकश्चाऽयं विद्यते परमेश्वरः ।
भक्तकामप्रपूरोऽस्ति सर्वकामप्रपूरकः ॥४०॥
पत्नीं स्वां देवतातुल्यां मन्यतेऽसौ सदीश्वरः ।
सुखदोयं यशोयुक्तो रामो रमणको हि सः ॥४१॥
सर्वधर्मभरोऽस्त्येव विद्वानस्ति पुरातनः ।
असापत्न्यं सदा चात्र बहुभार्ययुतेऽस्त्यपि ॥४२॥
नात्र न्यूनगुणैश्वर्यं येन वै ध्रुववद् भवेत् ।
चन्द्रवद् वा च गोलोकवद्वा नात्र तु संभवेत् ॥४३॥
हस्तेऽस्य सन्ति चिह्नानि मत्स्यध्वजधनूंषि च ।
शरशूलस्वस्तिचक्रदण्डाद्याः पारमेश्वराः ॥४४॥
शरीरेऽस्य भवन्त्येव सामुद्रलक्षणान्यपि ।
मया श्रुतं समस्तं तन्नारदस्य मुखात्ततः ॥४५॥
कन्या दत्ता स्थले स्थानेऽर्पणयोग्ये परेश्वरे ।
तस्मान्मातः सुपुत्री मे सुखिनी भाग्यशालिनी ॥४६॥
अनादिश्रीकृष्णनारायणं लब्ध्वा वरोत्तमम् ।
तया तपः पुरा बाल्ये घोरं तप्तं हिमालये ॥४७॥
हनूमदाश्रमे तत्र सोऽयं दिव्यस्वरूपधृक् ।
वरं लक्ष्म्यै पतित्वेन दत्वा चाऽदृश्यतां गतः ॥४८॥
ततः पुत्री गृहं याता मामाह तमुदन्तकम् ।
तत आरभ्य सा प्रतीक्षते द्वादशवर्षकम् ।
स्वस्याः कृष्णस्य तु वर्षे पूर्णे चोक्तं चतुर्दशम् ॥४९॥

सोऽयं वै विद्यते श्रेष्ठः समयः समुपागतः ।
मम गृहे समायातो भगवान् पुरुषोत्तमः ॥५०॥
कृतकृत्या भवाम्यद्य पूज्यो मे पुरुषोत्तमः ।
महालक्ष्मीर्विधात्र्यस्या विद्यते भाग्यशालिनी ॥५१॥
कृतकृत्या च मे पुत्री तव पौत्री सदाऽऽर्यके ।
इत्युक्ता राधिका सा च मौनमाश्रित्य चाशिषा ॥५२॥
समायुज्य ययौ नैजालयं साऽपि तिरोऽभवत् ।
बालकृष्णो ह्दं ज्ञात्वा भावं तु वृद्धयोर्निजे ॥५३॥
मुमुदे चातिहृष्टश्च लक्ष्मीं प्रति ययौ रहः ।
विप्ररूपो बालकृष्णः प्रोवाच हृदयाऽऽगमम् ॥५४॥
शृणु पुत्रि प्रदानं ते मया श्रुतं प्रवर्तते ।
राजपुत्रीं परिणेतुमागतोऽस्त्यपि भूसुरः ॥५५॥
भिक्षुकोऽसौ राज्यहीनः श्रुतो मयाऽब्धितीरगः ।
धीवरो हि यथा तद्वद् गोपालो वर्ततेऽप्यसौ ॥५६॥
नाऽस्य गृहेऽस्ति वै सम्पन्नाऽयं वधूव्रतोऽस्ति च ।
परं नैव कुमारोऽपि कोटिनारीपतिर्हि सः ॥५७॥
श्रुतो मयैवंविधिको नार्योऽस्याऽप्यागतास्त्विह ।
विद्यन्ते हि समानार्थे त्वया सह स्थितास्त्विह ॥५८॥
मण्डपे त्वागमिष्यन्ति भ्रमिष्यन्ति प्रदक्षिणम् ।
वह्निं साक्ष्येऽत्र संस्थाप्य सपत्न्यस्ते हि कन्यके ॥५९॥
किमिदं रोचते तुभ्यं सपत्न्यस्तव मण्डपे ।
मा तं वृणु राजपुत्रि बहुनारीपतिं द्विजम् ॥६०॥
राजानं वृणु राजेन्द्रि नारायणांशमेव ह ।
धर्मिष्ठं च गरीयांसं दातारं सर्वसम्पदाम् ॥६१॥
त्वं चासे सुन्दरी रम्या रमा रामासु पूजिता ।
नवयौवनसंवेशा तेजसोज्ज्वलिता सती ॥६२॥
तप्तकाञ्चनवर्णाभा शुद्धसत्त्वस्वरूपिणी ।
पतिव्रता सत्यशीला शान्ता श्रेष्ठगुणान्विता ॥६३॥
इन्द्राणी वरुणानी च रोहिणी च कलावती ।
स्वाहा संज्ञा च सावित्री कुबेराणी च विद्यसे ॥६४॥
अन्यासु श्रेष्ठकान्तासु श्रेष्ठतमा विराजसे ।
शरत्पूर्णेन्दुशोभाढ्या शरत्कमललोचना ॥६५॥
मा विप्रं वृणु राजेन्द्रि भिक्षुकं दूरवासिनम् ।
श्रुत्वैवं कन्यका प्राह विप्ररूपं निजं पतिम् ॥६६॥
विप्रोऽसि मम पूज्योऽसि माऽवोचस्तद्वचः पुनः ।
अन्यथा दण्डपात्रं स्याः, याहि तत्राऽऽगतो यतः ॥६७॥

भिक्षुको यादृशो वापि तादृशो वा भवेदपि ।
मया परीक्षितः पूर्वं पश्चादंगीकृतो मम ॥६८॥
राज्यं यस्याऽस्ति वै सार्वभौमं सृष्टित्रयात्मकम् ।
क्षीराब्धितीरगः सोऽयं सर्वज्ञो धीवरो पतिः ॥६९॥
गवां च तेजसां चापि पालकोऽसौ विराजते ।
सर्वाश्च सम्पदस्तस्य चेशावास्यमिदं यतः ॥७०॥
भक्तिमतीव्रतो नित्यं वर्तते हि प्रियाव्रतः ।
कोटिनारीपतिश्चापि सदोर्ध्वसत्त्ववानयम् ॥७१॥
सदा कुमारकश्चास्ते जानाम्येनं पुराभवे ।
तथा विदितोऽस्त्येवाऽखण्डोर्ध्वरेताः प्रयोगवान् ॥७२॥
विप्र नार्यः कोटिसंख्या यदि मे मण्डपे त्विह ।
मम पृष्ठे भ्रमिष्यन्ति तत्र मे गौरवं भवेत् ॥७३॥
सपत्नीनां हि सर्वासामग्रपूज्या भवामि यत् ।
अग्निसाक्ष्ये मम साम्ये भवन्तु कोटियोषितः ॥७४॥
अस्य ततोऽप्यधिकाश्च भवन्तु मेऽत्र गौरवम् ।
परिपूर्णो मिलेन्नाथस्तदाऽशं वृणुयाद्धि का ॥७५॥
यथा सोऽयं दूरवासा तथाऽहं दूरवासिनी ।
द्वयोर्वै मेलनं योग्यं मा चिन्तां वह भूसुर ॥७६॥
इन्द्राद्या यद्वशे सन्ति ब्रह्माद्याश्च वशेऽस्य तु ।
वैराजाद्या वशे चाऽस्य व्यूहाश्चास्य वशेऽपि च ॥७७॥
अवतारा वशे चास्य का कन्या वृणुयान्न तम् ।
पूर्वाख्यानं च वेदोक्तं जानास्येव न तच्छृणु ॥७८॥
कृपया भगवान् साक्षाच्छ्रीपतिः पुरुषोत्तमः ।
उद्धारार्थं हि लोकानां भक्तानां चापि सर्वथा ॥७९॥
बालकृष्णोऽयमेवाऽऽस्ते परिपूर्णतमः प्रभुः ।
कम्भराश्रीसकाशाद्वै गोपालकृष्णसद्गृहे ॥८०॥
जातोऽस्ति परमेशः स राधारमासतीपतिः ।
विधातुश्च विधाता सः ब्रह्मेशशेषवन्दितः ॥८१॥
ज्योतिःस्वरूपो भगवान् परमात्मा परात्परः ।
निर्लिप्तश्च निरीहश्च साक्षी च सर्वकर्मणाम् ॥८२॥
हृदयस्थश्च सर्वस्थस्तदर्थं चाहमागता ।
धाम्नः पूर्वं तमेवाऽत्र वरयामि न चेतरम् ॥८३॥
समर्पिताऽहं तत्रैव स्वात्मना परमात्मनि ।
विधात्रा लिखिता रेखा तस्यार्थे मम भूसुर ॥८४॥
पश्य तं परमात्मानं भक्तानुग्रहविग्रहम् ।
ध्यानानुरोधहेतुं च नित्यदिव्यसुरूपिणम् ॥८५॥

दर्शनात् कुरु विप्रेन्द्र स्वजन्मकर्मखण्डनम् ।
यं न जानन्ति चत्वारो वेदाः सन्तश्च देवताः ॥८६॥
सद्देन्द्राश्च मुनीन्द्राश्च देवा ब्रह्मादयो ह्यपि ।
ध्यायन्ते ध्यानमग्नाश्च योगिनोऽपि न यन्ति यम् ॥८७॥
सरस्वती जडीभूता वर्णने यस्य जायते ।
सहस्रवक्त्रः शेषोऽपि पञ्चवक्त्रः सदाशिवः ॥८८॥
चतुर्मुखो जगद्धाता कुमारः कार्तिकस्तथा ।
ऋषयो मुनयश्चापि भक्ताः परमवैष्णवाः ॥८९॥
अक्षमाः स्तवने यस्य ध्यानाऽसाध्यश्च योगिनाम् ।
बालिकाऽहं विप्रवर्य ! तद्गुणान् कथयामि किम् ॥९०॥
वृताऽस्मि तं सदा विप्र तदर्थं चास्मि भामिनी ।
कन्या चापि तदर्थाऽहं विश्वेश्वरस्य पुत्रिका ॥९१॥
भक्तपुत्रीह सञ्जाता भूमौ भगवदर्थिनी ।
पातिव्रत्यं हि तन्नाम कन्यात्वे यो हृदि स्थितः ॥९२॥
मनसा च धृतो नाथः स एव जीवनं सदा ।
हृदयस्य प्रदानं वै हृदयेन प्रजायते ॥९३॥
स्थूलदेहप्रदानं तु पश्चात्स्थूलेन जायते ।
व्यवहारप्रवाहार्थं लोकेऽस्ति कल्पितः स्थूलः ॥९४॥
सोऽयं मेऽद्य विजानीहि याहि तद्दर्शनं कुरु ।
यावत्त्वया न दृष्टोऽस्ति सर्वकान्तो महाप्रभुः ॥९५॥
अनादिश्रीकृष्णनारायणः श्रीप्राणवल्लभः ।
तावद्वै भाषसे मेऽत्राऽश्राव्यं विप्र क्षमां वह ॥९६॥
इत्युक्तो भगवानाह दार्ढ्यं चेदृक् तवाऽस्ति चेत् ।
क्षन्तव्यं यन्मयोक्तं तत् प्रयामि पश्य मां पुनः ॥९७॥
इत्युक्त्वा निजनामाढ्यं ददौ स्वर्णाङ्गुलीयकम् ।
दर्शनं दिव्यरूपं च ददौ स्वपरिचायकम् ॥९८॥
हारकेयूरकटककुण्डलाद्यैर्विराजितम् ।
शंखचक्रगदापद्मपीताम्बरादिशोभितम् ॥९९॥
लक्ष्मीर्नाथं द्विजात्मानं दृष्टं वीक्ष्य यथार्थकम् ।
पादयोः पतिता शीघ्रं क्षणं तं परिषस्वजे ॥१००॥
प्रिये सायं समायामीत्युक्त्वा मिष्टं वचः प्रियम् ।
तूर्णं तिरोबभूवैव सा त्वानन्दपरिप्लुता ॥१०१॥
विवेद न क्षणं तत्रात्मानं तद्गतमानसा ।
भानमासाद्य शनकैः प्रमोदान्वितविग्रहा ॥१०२॥
धन्यभाग्यं निजं मेने राधिके ! रमणीवरा ।
गाम्भीर्यं रक्षमाणा सा नोवाचेदं प्रकाशने ॥१०३॥
इत्येवं भगवान् भावं विविदाऽन्यत्स्वरूपधृक् ।
आत्मनिवेदिभक्तानां भक्तिवश्योऽभवद्धि सः ॥१०४॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णस्य राधारूपस्य पार्वत्या सह 'कन्या न देयेति'-सम्वादः, विप्ररूपस्य 'मा विप्रं भिक्षुकं वृणु' इति लक्ष्म्या सह संवादः, तदुत्तराणि, दार्ढ्यं चेत्यादिनिरूपणनामाऽष्टाशीत्यधिकद्विशततमोऽध्यायः ॥ २८८ ॥

श्रीकृष्ण उवाच—

अथ वै राधिके ! तत्र प्रहरे तु तृतीयके ।
कृतदुग्धजलपानः श्रीमद्गोपालकृष्णकः ॥ १ ॥
महीमानैस्तथा श्रेष्ठजनैश्च देवतादिभिः ।
राजभिः सह सौभाग्यवतीभिः सह वै तदा ॥ २ ॥
स्थालेषु प्रविशालेषु सौवर्णराजतेष्वपि ।
सज्जयामास कन्यार्थं दिव्यवेषाम्बराणि च ॥ ३ ॥
आभूषणानि सर्वाणि हारांश्च विविधांस्तथा ।
सर्वसौभाग्यरत्नानि सौभाग्योपकराणि च ॥ ४ ॥
सौभाग्यद्रव्यगन्धानि शतधा वै नवानि हि ।
मिष्टान्नानि समस्तानि ताम्बूलादीनि यानि च ॥ ५ ॥
चमत्कृतिप्रकाण्डानि वस्तून्यपि शुभानि च ।
स्वर्णपात्रेषु च निधापयामासोत्तमानि च ॥ ६ ॥
सुवर्णघर्घरीः रम्याः शतधा भिन्नरंगिकाः ।
वह्निशुद्धाः शाटिकाश्च शतधा स्वर्णबुट्टिकाः ॥ ७ ॥
भिन्नरंगा भिन्नचित्राः कौशेयिकास्तथाऽपराः ।
स्वर्णतारावलीशोभाः स्वर्णप्रान्ताः सहीरकाः ॥ ८ ॥
स्वर्णवर्णा रक्तवर्णाः कंचुकीः रत्नसंहिताः ।
कौशेयिकास्तारहारिग्रन्थिग्रथनशोभनाः ॥ ९ ॥
चोलिकाश्च तथा रम्याः शतधा तारराजिताः ।
अमूल्याश्च केशलीनाः कुचलीश्चाप्यमूल्यकाः ॥१०॥
चट्टिकाश्चाप्यमूल्याश्च स्वर्णप्रावरणानि च ।
स्वर्णजा नाडिकाश्चापि सौवर्णीर्देहबन्धिकाः ॥११॥
सगुच्छहीरदोरांश्च केशबन्धानमूल्यकान् ।
कुचबन्धान् कटिबन्धांश्चान्तर्धार्याणि यानि च ॥१२॥
कौशेयानि सुवस्त्राणि शतधा कल्पितानि च ।
स्वर्णस्थालेषु वै निधापयामास तदा पिता ॥१३॥
मखमल्ल्यौ स्वर्णयुज्यौ कोमले चाप्युपानहौ ।
रञ्जिते स्थलपद्माभे शतधा च न्यधापयत् ॥१४॥

केशसाधनकान्येव सर्वाणि शोभनान्यपि ।
विष्णुतैलानि चान्यानि गन्धसाराणि वै तथा ॥१५॥
कस्तूरिकादिपंकानि चान्दनादीनि यानि च ।
कज्जलानि विविधानि रक्तद्रव्याणि यानि च ॥१६॥
कुंकुमानि च सिन्दूरकर्दमानि शुभानि च ।
चञ्चन्मृदुप्रचूर्णानि नवनीतद्रवाणि च ॥१७॥
मार्दनार्हद्रवाँश्चापि स्नानार्हगुटिकास्तथा ।
नखरञ्जनतत्त्वानि तलरंगद्रवाँस्तथा ॥१८॥
अलक्तादीनि चित्राणि पत्रिकार्थद्रवाणि च ।
चञ्चद्धीरकचन्द्राँश्च चञ्चच्चूर्णानि यानि च ॥१९॥
स्वर्णस्थालेषु सर्वाणि न्यधापयत्तदा पिता ।
स्थलपद्मादिपक्कानि सुगन्धिसलिलानि च ॥२०॥
हरिकमणिमाणिक्यमौक्तिकै रत्नकैस्तथा ।
नद्धाः सुवर्णजा रम्या ऊर्मिकाः शतशस्तथा ॥२१॥
भ्रमिकाः कटिकाश्चाऽङ्गुलीयकानि शुभानि च ।
प्रकोष्ठकटकाँश्चापि व्यंगिडीः कानकीस्तथा ॥२२॥
नद्धहीरकरम्याँश्चांऽगदान् सुकटकोत्तमान् ।
भुजबन्धान् प्रसौवर्णान् शृंखला बहुशोभनाः ॥२३॥
पत्रिकाः शृंखलायुक्ता रञ्जिताः फुल्लपत्रिकाः ।
सिंहाननान् सुवलयान् कंकणानि बहूनि च ॥२४॥
नथिकाश्चिबुकीश्चापि टिबकीर्बिन्दुकीस्तथा ।
सताराश्च सुचन्द्राँश्च बहुरंगाँश्च शाभनान् ॥२५॥
कानकीः कर्णमालाश्च कर्णिकाः कर्णशृंखलाः ।
सौवर्णान् वर्धकाँश्चापि त्रोटिकाः फुल्लग्रन्थिकाः ॥२६॥
सौवर्णस्तबकाँश्चापि शिंघोटकान् कदम्बकान् ।
सौवर्णहीरकनद्धान् आरायकान् सुबुद्बिकाः ॥२७॥
वालिकास्तारिकाश्चापि कुंचिका रूप्यकानकीः ।
तन्तीं भाग्यमयीं चान्द्रीं चन्द्रपत्रीं तथाऽयताम् ॥२८॥
सौवर्णं कमलं चापि स्वर्णमालां सुशोभनाम् ।
सौवर्णसूर्यं शोभाढ्यं भालोपरिनिवासिनम् ॥२९॥
केशचिप्पिकसूचीश्च सौवर्णी राजतीस्तथा ।
धम्मिलबन्धवालीश्च सौवर्णीः शृंखलात्मिकाः ॥३०॥
कबरीपार्श्वचन्द्राँश्च वस्त्रावगूहवालिकाः ।
ओष्ठरञ्जनचूर्णं च कपोलगण्डचूर्णकम् ॥३१॥
न्यधापयद्धि पात्रेषु कन्यार्थं तत्र चोत्सुकः ।
कण्ठहारान् पत्रिकाढ्यान् फलग्रन्थिप्रहारकान् ॥३२॥
शृंखलाहारकाँश्चापि प्लक्षपत्रं सुवर्णजम् ।
मंगलं कानकं चापि मादलीं कानकीं तथा ॥३३॥
स्वस्तिकं कानकं चापि चक्रं वै कानकं तथा ।
हस्तपद्मं कण्ठपद्मं कानकं भालपद्मकम् ॥३४॥
गलार्थं वलयं चापि कानकं सिंहिकाननम् ।
तिलहारान् मुद्गहारान् माषहारान् सुगण्ठिकान् ॥३५॥
सूक्ष्मपत्रीप्रहाराँश्च तारहाराँश्च शोभनान् ।
कुचपुटाँश्च सौवर्णान् कुन्तलान् कुन्तशोभितान् ॥३६॥
सूर्यमुखीं च सौवर्णीं सौवर्णकलशीस्तथा ।
स्वर्णपट्टान् स्वर्णमाला मौक्तिकहारसत्तमान् ॥३७॥
कटिपाशाँश्च सौवर्णान् शृंखला रशनास्तथा ।
कन्दूरिकाश्च सौवर्णीस्त्रिसरीः शोभनास्तथा ॥३८॥
नुपूरान् किंकिणीयुक्तान् झंझरीः स्वर्णनिर्मिताः ।
कदलीः कम्बिकाश्चापि शृंगला घुर्घुराँस्तथा ॥३९॥
सर्वविधानि सौभाग्याऽऽभूषणानि नवानि च ।
ताम्बूलपानदानीश्च शूटिकाः कंकतीस्तथा ॥४०॥
आदर्शान्नक्तकाँश्चापि करपोषाँश्च मोजिकान् ।
आच्छादकान् शिरस्त्राणान् हीररज्जूः सुशोभिताः ॥४१॥
पुष्पिकाः कलिकाश्चापि सौवर्णीश्चोर्णपट्टिकाः ।
पृष्ठपत्रीं कटिकत्रीं दन्तपत्रीं सुशोभनाम् ॥४२॥
मुक्ताहारान् पद्मरागमणिमालाः सुशोभनाः ।
मारकतीः स्रजश्चापि वैदूर्यमणिमालिकाः ॥४३॥
इन्द्रनीलस्रजश्चापि पुष्परागादिपत्रिकाः ।
कर्केतनक्तमालाः पुलकस्फटिकस्रजः ॥४४॥
विद्रुमनद्धपत्त्राणि स्थालेष्वपि न्यधापयत् ।
गालीचकानि रम्याणि हारीतकानि यानि च ॥४५॥
और्णानि च तथा कौशेयानि चास्तरणानि च ।
गुलालानि च रक्तानि कुंकुमानि शुभानि च ॥४६॥
अक्षतानि सुतीक्ष्णानि यवमालाः शुभास्तथा ।
पुष्पहाराँश्च पात्राणि गन्धधानीश्च कानकीः ॥४७॥
इत्येवं राधिके कोटिकोट्यब्जार्बुदमूल्यकम् ।
ततोऽब्जमूल्यकं शृंगारकं न्यधापयत् पिता ॥४८॥
स्थालेषु सूर्यतुल्येषु निधाप्य कंभरापतिः ।
वाद्यघोषैर्युतः कन्यागीतिकाभिर्युतस्तथा ॥४९॥
ययौ कन्यानिवासं वै शिवस्वाम्यालयं तदा ।
कन्यकायाः कृते सर्वं कृष्णाल्लब्धं शिवेन च ॥५०॥
तेषां तासां स्वागतं च सम्मानं स्वीकृतिं तथा ।
विधाय बहुभावेन जलपानं हरस्तदा ॥५१॥
अकारयच्च मिष्टान्नभोजनं स्वल्पमंगलम् ।
ताम्बूलकं ददौ चापि बहु बह्वित्यभाषत ॥५२॥

हृष्टो गोपालकृष्णश्च ददौ सर्वं शिवाय ह ।
आज्ञामवाप्य तूर्णं वै स्वावासं चाययौ ततः ॥५३॥
चतुर्थे प्रहरे तत्र कन्याशृंगारमाचरन् ।
सर्वाः सख्यः सुमिलिताः प्रोवाहोचितमुत्सुकाः ॥५४॥
कृष्णस्यापि पिता स्थाने शृंगारं समकारयत् ।
गजं सुवाहनं चतुर्दन्तं साम्बालिकं शुभम् ॥५५॥
पिता शृंगारयामास धवलं सर्वतोऽधिकम् ।
सौवर्णचन्द्रकूथेन स्वर्णाम्बालिकयायुतम् ॥५६॥
शुण्डायां चित्रशूलं च कपाले च सुदर्शनम् ।
कर्णयोर्व्यजने चापि गण्डयोः सूर्यकौ तथा ॥५७॥
दन्तेषु स्वर्णवलयाः कण्ठे सौवर्णघण्टिकाः ।
पादेषु पार्षदाश्चित्रस्वरूपाश्चोदरे गदा ॥५८॥
पुच्छे सौवर्णमालाश्च निःश्रेणी पार्श्वके तथा ।
इत्येवं च गजं शृंगारयामास पिता तदा ॥५९॥
भूमिस्पर्शानि च तदा मन्दविमानकानि च ।
पिता शृंगारयामास वाहिन्यर्थं तदा मुदा ॥६०॥
मुक्तानां सुगजाश्चापि गरुडाश्च तदाऽभवन् ।
स्मृतमात्रा आगताश्च शृंगारिताः सुशोभिताः ॥६१॥
अश्वाश्चोष्ट्रास्तथा हंसा मेनाश्च चातकास्तथा ।
वृषभा गवयाश्चापि मृगाश्च मकरास्तथा ॥६२॥
गेण्डूकाश्च तथा सिंहाः शार्दूलाः शरभास्तथा ।
वाहनानि यथा येषां स्मृतानि कल्पपादपे ॥६३॥
कामदुघानिर्मितानि तूर्णं तत्राऽऽगतानि च ।
व्योमयानानि रम्याणि स्वल्पानि भूमिगानि च ॥६४॥
शृंगारितानि सर्वाणि रथाश्च रथिकास्तथा ।
शिबिकास्तापदानानि नरवाह्याः स्वलंकृताः ॥६५॥
ध्वजडंकानिशानादिवेत्रछत्राणि यानि च ।
शृंगारितानि सर्वाणि सज्जीकृतानि वै द्रुतम् ॥६६॥
वाहिनीस्था नरा नार्यः शृंगारशोभितास्तदा ।
नवचञ्चद्वर्णवेषा आभूषादिविराजिताः ॥६७॥
अन्यूनसर्वशृंगारा अभवन् वै तदा मुदा ।
वाद्यकारा नर्तकाश्च नटा दुन्दुभिनादकाः ॥६८॥
सर्ववादित्रविज्ञाश्च वेषैर्भिन्नैर्विभूषिताः ।
देवा देव्यः समस्ताश्च सृष्टित्रयनिवासिनः ॥६९॥
शृंगारिता अभवंश्च वरयात्रोचितास्तदा ।
लग्नयात्रोचिताः कन्याश्चतुष्कोटिप्रसंख्यिकाः ॥७०॥
तथाऽन्याः कोटिशश्चापि कोट्यर्बुदाब्जसंख्यिकाः ।
पित्रादिभिः सखीभिश्च शृंगारितास्तदाऽभवन् ॥७१॥
कण्ठमालायुताः सर्वाः सर्वाऽऽभरणभूषिताः ।
वह्नेः प्रदक्षिणं सर्वाश्चेहमाना हरीच्छया ॥७२॥
लोमशस्य निदेशेन सर्वाऽऽभरणभूषिताः ।
दानयोग्या अभवंश्च यथा लक्ष्मीस्तु कन्यका ॥७३॥
चतुर्थप्रहरस्याऽन्ते कृत्वा शृंगारमद्भुतम् ।
सुशुभे समये शिवपुराद् कृष्णो विनिर्ययौ ॥७४॥
कोटिकोट्यब्जजनतासहितो वर्धितो जनैः ।
पूजितो वन्दितश्चापि फलपुष्पधनार्पणैः ॥७५॥
वाराणस्यां भ्रमित्वैव महाराजपथे ततः ।
देवतादर्शनं कृत्वा विश्वेश्वरं प्रणम्य च ।
गंगावारि शुभं पीत्वा सहस्रायुतवाहनः ॥७६॥
लक्षविमानयुक्तश्च सर्वस्त्रीनरवर्धितः ।
युक्तो यावन्महीमानैश्चायाति योगमण्डपम् ॥७७॥
वरणायास्तटे रम्ये कापिलधारिकास्थले ।
विशाले साररूपे वै क्षेत्रे ह्युद्यानशोभिते ॥७८॥
शिवस्वामिनश्च प्रासादाग्रे कैलासरूपिणम् ।
शतयोजनविस्तारं कैलासात्मकमण्डपम् ॥७९॥
यो वै कैलासरूपोऽभूत् गगने स्वागतार्थकः ।
स एव नित्यकैलासो मण्डपोऽत्र विराजते ॥८०॥
तत्र का न्यूनता राधे ! यत्र वै मण्डपेऽभितः ।
समस्तं शिवनगरं पार्वतीनगरं तथा ॥८१॥
काशीनगरं चाप्यन्तर्भावमीयुः प्रशोभया ।
तादृशीमण्डपे शोभा शंभुना तत्र निर्मिता ॥८२॥
गंगागोगराभूभागे विस्तृतोऽभूद्धि मण्डपः ।
शतयोजनविस्तारः कुण्डवेदीप्रशोभितः ॥८३॥
उच्छ्रये योजनश्चापि दिव्यतेजोऽभिसंभृतः ।
गोलोकीयसमस्ताभिः सामग्रीभिश्च पूरितः ॥८४॥
सिंहासनादिभिर्युक्तो मणितेजोऽभिराजितः ।
पार्षदैः सर्वतः सेवापरायणैर्गणैर्युतः ॥८५॥
कामधेनुसमस्ताभिः कल्पलताभिवर्तितः ।
रासमण्डलशोभाढ्यगोपगोपीविराजितः ॥८६॥
सर्वलोकनिवासानां पुत्तलैरभिमण्डितः ।
घृतकुल्यादधिकुल्यामधुकुल्याभिराजितः ॥८७॥
सर्वाऽसनैश्च मृदुभिर्बृसीभिः पट्टिकादिभिः ।
और्णास्तरणकौशेयास्तरणैश्च तलीकृतः ॥८८॥
मनोहारिस्वरयुक्तगीतिभिश्चाभिकर्षितः ।
नृत्यनाट्यकलाज्ञाभिर्हास्यज्ञाभिर्विराजितः ॥८९॥

दूरदृश्यदूरश्रावदूरस्पृशैश्च निर्मितः ।
संकल्पयानवाहाद्यैः क्षणे क्षणे प्रसेवितः ॥९०॥
शीतैर्विद्युत्प्रवाहैश्च सर्वथा तूज्ज्वलीकृतः ।
सुधाऽमृतप्रवर्षिभिस्तारैः समन्ततोऽन्वितः ॥९१॥
स्तंभेषु तोरणेषूर्ध्वभागेषु त्वासनान्वितः ।
वरकन्याविवाहस्य प्रतिबिम्बार्थदर्शनः ॥९२॥
स्वर्गे ताराश्च यावत्यस्तावन्तो मणयस्त्विह ।
कैलासे मण्डपे तत्र राजन्ते योगमण्डपे ॥९३॥
सृष्टिपानां तु यावन्ति सभास्थानानि सन्ति हि ।
तावन्ति मण्डपे तत्र कृतानि विश्वकर्मणा ॥९४॥
दानार्हकन्यकानां चाऽऽसनानि मध्यगोलके ।
कृतानि कण्ठमालार्थं सन्निधौ विश्वकर्मणा ॥९५॥
कैलासः पुरुषस्तत्र राजते मूर्तिमानपि ।
सर्वार्हवस्तुदानार्थं प्रोवाहे तत्र वै महे ॥९६॥
न भूतो न भविष्यँश्च मण्डपश्चेदृशः क्वचित् ।
आरपारदृशा दृश्यो विद्यते धामवत् स्थितः ॥९७॥
यूपकलशदेवाधिवासनैः स्वस्तिकादिभिः ।
अधिष्ठितो महीमानैः पार्वतीनगरीजनैः ॥९८॥
काशीनगरीलोकैश्च सृष्टित्रयनिवासिभिः ।
संकुलितो वदद्भिश्च प्रोद्वाहः कृष्णयोरिति ॥९९॥
मण्डपस्योत्तमे श्रेष्ठे गोपुरे मंगलात्मके ।
वीरभद्रोऽम्बरे वक्ति मंगलं कृष्णयोरिति ॥१००॥
वदन्ति व्योमयन्त्राणि समायान्तु महोत्सवे ।
पश्यन्तु परमात्मानं प्रदानं कृष्णयोरिति ॥१०१॥
सामवेदो मूर्तिमाँश्चाऽम्बरे स्थित्वाऽभिवन्दते ।
आगच्छन् श्रीशराजोऽसौ हरिर्विजयतेतमाम् ॥१०२॥
ऋग्वेदश्च गोपुराग्रे स्थितः पश्यति वाहिनीम् ।
समायान्तीं महादीर्घामसूचयच्छिवादिकान् ॥१०३॥
सती श्रीपार्वतीदेवी तूर्ध्वभूमौ गता तदा ।
कियती कीदृशी चेति वाहिनीति प्रविक्षितुम् ॥१०४॥
शिवपुरात् काशिकां संगृह्य मण्डपसन्निधौ ।
आतां चातिदीर्घां संवीक्ष्य स्तब्धाऽभवत् क्षणम् ॥१०५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कन्यार्थं भूषाऽम्बरोपकरणादिप्रेषणम्, वाहिनीजनमहीमानकृष्ण-शृंगारादि, श्रीकृष्णस्य मण्डपं प्रति निर्याणं, मण्डप-शोभा चेत्यादिनिरूपणनामा नवाशीत्यधिक-द्विशततमोऽध्यायः ॥ २८९ ॥

श्रीकृष्ण उवाच—

पार्वतीं चोर्ध्वगां वीक्ष्य कोटिशो योषितस्तदा ।
कृष्णयान्या विलोकार्थं चारुरुहुर्निजालयान् ॥ १ ॥
मण्डपस्योर्ध्वशालासु त्वास्थिता वीक्षणोत्सुकाः ।
ऋग्वेदं गिरिजा प्राह बृहस्पतेः समीपतः ॥ २ ॥
दृश्यते त्वग्रतः किं तत् सान्तं मे सन्निबोधय ।
मम पुत्र्याः कृते के के महीमाना ममाऽत्र वै ॥ ३ ॥
के सन्ति कीदृशाश्चापि सुतास्वाम्यपि कीदृशः ।
महत्तमोऽस्ति सर्वं तज्जिज्ञासे वद मेऽखिलम् ॥ ४ ॥
सर्वज्ञः ऋग्वेद एवं पृष्टो हर्षमवाप ह ।
सतीं श्रीगिरिजां वक्तुं समारेभे क्रमातत्तः ॥ ५ ॥
पश्य मातः प्रथमं वै मंगलाख्यो हि पार्षदः ।
चतुर्भुजः सतिलकः सर्वाऽऽभरणभूषितः ॥ ६ ॥
मंगलादेविकायुक्तः सर्वमांगल्यकान्वितः ।
साममन्त्रान् प्रगायन् वै समायाति शुभावहः ॥ ७ ॥
स्वल्पहंससमारूढः सर्वशोभासमन्वितः ।
तथाहंससमारूढा मंगला च सरस्वती ॥ ८ ॥
शारदा च समायान्ति सर्वाभरणभूषिताः ।
एतद्वै दर्शनं सर्वमंगलानां सुमंगलम् ॥ ९ ॥
ततो वैकुण्ठवाद्यानि वादकैर्वादितानि वै ।
समायान्ति त्रिलोक्यां यन्निनादाश्च ध्वनन्ति हि ॥१०॥
पश्य ततः समायाति सध्वजः शोभनो गजः ।
अक्षरस्यैव मुक्तोऽसौ महाद्रिरिव राजते ॥११॥
पश्य ततः समायान्ति जयशब्दप्रवर्तकाः ।
ब्रह्मचर्यपराः पारेसहस्रं स्नातका इमे ॥१२॥
पश्य ततः समायाति डंकानिशानवान् शुभः ।
श्यामकर्णो धवलाश्वोऽक्षरमुक्तो हि वर्तते ॥१३॥
पश्य भेरीभृतं पश्चाद् रथं वृषभवाहितम् ।
सौवर्णं स्वर्णकलशध्वजाऽवरूथशोभितम् ॥१४॥
पश्य ततोऽश्ववाराँश्च सहस्रशः सहेतिकान् ।
पश्य मातस्ततश्चोष्ट्रस्थितान् निर्ऋतराक्षसान् ॥१५॥
सर्वे शृंगारशोभाढ्यान् वैष्णवान् विष्णुसेवकान् ।
पश्य मातस्ततो यक्षान् पदातीन् दानकारिणः ॥१६॥
स्वर्णरूप्यादिवृष्टिं च कुर्वतो धनसंभृतान् ।
सहस्रशो हि मुकुटैरन्वितान् स्वर्णभूषणान् ॥१७॥
पश्य मातस्ततो रासकृतान् वै वैष्णवान् जनान् ।
सहस्रशः सवाद्याँश्च कीर्तयतो हरेर्गुणान् ॥१८॥

पश्य मातस्ततो नारीर्वैष्णवीर्गीतिकापराः ।
कृष्णकीर्तनकर्त्रीश्च सहस्रशो विभूषिताः ॥१९॥
पश्य ततः शिबिकासु नरयानेषु संस्थितान् ।
ब्रह्मध्यानपरान् पूज्यान् महर्षींश्च सहस्रशः ॥२०॥
पश्य मातः पितृदेवान् अर्यम्णा सहिताँस्ततः ।
सौवर्णनरयानेषु लक्षकन्यायुतानपि ॥२१॥
पश्य ततः सिद्धजनान् साधून् रथाद्यधिष्ठितान् ।
पारेसहस्रं दिव्यांश्च पावनान् लोकपावनान् ॥२२॥
पश्य मातस्ततो वंशीवाद्ययुक्तान् हि कोमलान् ।
पार्षदान्नवयूनश्च दिव्यवेषविभूषितान् ॥२३॥
पश्य मातः शरभस्थान् दैत्यान् प्रवैष्णवाँस्ततः ।
शृंगारितान् जयनादान् प्रकुर्वतः सहस्रशः ॥२४॥
पश्य मातस्ततो रौद्रान् गणान् वृषभवाहनान् ।
वैष्णवान् बहुवेषांश्च रूपिणः शिवसदृशान् ॥२५॥
भूतान् प्रेतान् पिशाचांश्च पश्य वैष्णवसेवकान् ।
पश्य मातस्ततो दिव्यान् गान्धर्वान् वाद्यगायकान् ॥२६॥
स्वर्णचम्पकवर्णाभान् तालमानसमन्वितान् ।
पश्य मातस्ततः सर्वतीर्थानि मूर्तिमन्ति च ॥२७॥
पावनानि समायान्ति लक्षशो दिव्यभानि च ।
पश्य मातस्ततो देवीः कोटिशो गीतिकायुताः ॥२८॥
विभूषिता दिव्यवेषा नरयानस्थिताः शुभाः ।
पश्य मातस्ततो वृद्धान् सौराष्ट्रीयान् नरान् शुभान् ॥२९॥
पश्य देवान् वाहनस्थान् छत्रचामरभूषितान् ।
लक्षशो भानुवर्णान् वै दासदासीसमन्वितान् ॥३०॥
स्वल्पकल्पविमानस्थान् स्थलगान् व्योमगानपि ।
चन्द्रवर्णान् भानुवर्णान् वह्निवर्णान् सुराँस्तथा ॥३१॥
पश्य मातस्ततो यातान् पातालस्थान् फणाधरान् ।
बहुरूपान् कामरूपान् कोटिशोऽत्र समागतान् ॥३२॥
पश्य मातः सूतलोकान् मागधान् किन्नराँस्ततः ।
किंपुंसः पश्य विद्याध्रान् देववाद्यनिनादकान् ॥३३॥
पश्य मातस्ततो विप्रान् वेदघोषकरान् द्विजान् ।
पश्य ततो गजस्थांश्च नृपान् भूगोलभूपतीन् ॥३४॥
जुम्मसेम्लनृपं हस्तिस्थितं तथाऽभितोऽस्य च ।
सहस्रकन्यका यानगताः पश्य हरेः प्रियाः ॥३५॥
पश्य मातस्ततो दक्षजवंगरं नृपं गजे ।
शताधिकसहस्रकन्यका यानगतास्तथा ॥३६॥
शिबिराजं पश्य मातर्गजस्थं शोभनं नृपम् ।
नरयानगताः कन्याः शतं पश्य विभूषिताः ॥३७॥
थर्कूटस्थं महाराजं पञ्चाशत्कन्यकायुतम् ।
स्वर्णसिंहासनस्थं विष्टिस्कन्धेषु विलोकय ॥३८॥
वीरजारमहाराजं शतकन्यायुतं ततः ।
नरयानस्थितं पश्य सर्वाभूषणशोभितम् ॥३९॥
शक्त्यक्षिनृपतिं षष्टिकन्यकासहितं तथा ।
शतपिशाचिनीकन्यायुतं पश्य सुशोभितम् ॥४०॥
कालिमाशं नृपं पश्य कन्याशतद्वयान्वितम् ।
स्वर्णयानस्थितं सर्वशृंगारसंविभूषितम् ॥४१॥
एते नृपा राशियानाः किंपुरुषप्रजातिकाः ।
देवतुल्याः प्रविघ्नन्ते तव गृहे समागताः ॥४२॥
अथ वादित्रनिनदान् शृणु पश्य नवोत्तमान् ।
केतुमालीयजातींश्च सुशोभान् यन्त्रवादितान् ॥४३॥
उरलकेतुकं पश्य राजानं स्वल्पयानगम् ।
त्रिंशत्कन्यासहितं च केतुमालप्रखण्डगम् ॥४४॥
क्रथकं पश्य राजानं पञ्चकन्यायुतं शुभम् ।
स्वल्पयानस्थितं पृथुं विंशतिकन्यकायुतम् ॥४५॥
उष्ट्रालराजकं दशकन्यान्वितं विलोकय ।
हंकारं पंचकन्यासंयुतं याने विलोकय ॥४६॥
जयकाष्ठलभूपं च पञ्चकन्यासमन्वितम् ।
तीराणराजकं मातः पश्य षट्कन्यकायुतम् ॥४७॥
अल्वीनरं नृपं पश्य सप्तकन्यासमन्वितम् ।
जीनवर्द्धिनृपं पश्य यानस्थमेककन्यकम् ॥४८॥
ततः पश्य महादेवि राज्ञां पृष्ठे च मण्डलम् ।
कन्यकानां द्विशतसहस्रद्वयसुशोभितम् ॥४९॥
महाविमानगं सर्वं सर्वाभरणभूषितम् ।
विमानं भूतले याति कल्पलतासुशोभितम् ॥५०॥
अल्पकेतुं नृपं पश्य सप्तकन्यासमन्वितम् ।
जयकृष्णवभूपं च मातः पश्यैककन्यकम् ॥५१॥
परीशानं नृपं पश्य त्वेकविंशतिकन्यकम् ।
स्वल्पविमानगं सर्वशोभाभूषणभूषितम् ॥५२॥
ततः पश्य द्विकन्यं च नृपमिन्दुरयं शुभम् ।
मुद्राण्डं नृपतिं पञ्चदशकन्यायुतं ततः ॥५३॥
स्वल्पविमानगं पश्य सर्वाभरणभूषितम् ।
गण्डनृपं नवकन्यायुतं पश्य विमानगम् ॥५४॥
लीनोर्णं च नृपं पश्य चतुःकन्यं विमानगम् ।
बृहच्छरं नृपमेकादशकन्यासमन्वितम् ॥५५॥
बललीनं ततः पश्य चत्वारिंशत्सुकन्यकम् ।
स्वल्पविमानगं सर्वसामग्रीशोभितं शुभम् ॥५६॥

वरसिंहाख्यराजानं पश्य वै पञ्चकन्यकम् ।
रायगामलभूपं च पश्याऽष्टकन्यकं शुभम् ॥५७॥
फेनतन्तुनृपं पश्य कन्याद्वयसमन्वितम् ।
स्तोकहोमं तथा पश्य कन्यैकं यानगं शुभम् ॥५८॥
काष्ठयाननृपं पश्य कन्यैकं कोलकं नृपम् ।
कन्यैकं चेति केतुमालीया नृपा भवन्ति ते ॥५९॥
एते सर्वे महीमानास्तव गृहे निबोध मे ।
अथ वादित्रकुशलान् पश्य गरिमदेशजान् ॥६०॥
हारीतकान् दिव्यवेशान् पश्य मातः क्रमाच्छुभान् ।
पश्य विमानगं भूपं कन्याद्वययुतं ततः ॥६१॥
दिनमानार्कनृपतिं स्वतन्त्रं सुविभूषितम् ।
पश्य मातस्ततो यान्तं रायकिन्नरभूपतिम् ॥६२॥
एकपञ्चाशत्कन्यकायुतं स्वर्णविमानगम् ।
किन्नाटकप्रदेशानां नृपं चाऽमरिकान्वितम् ॥६३॥
अमरीदेशजान् पश्योत्तरकुरुनृपानथ ।
भूतलस्पर्शिसंवेगमहाविमानगान् शुभान् ॥६४॥
रायरोकीश्वरं भूपमेकविंशतिकन्यकम् ।
रायरणजिद्भूपं च विंशतिकन्यकायुतम् ॥६५॥
रायवाकक्षकं पश्य त्रिकन्यं सुविमानगम् ।
रायमारीशभूपं च त्रिकन्यं च विमानगम् ॥६६॥
रायबालेश्वरं भूपं त्रिकन्यं च विमानगम् ।
रायलम्ब्रारभूपं च षट्कन्यं वै विमानगम् ॥६७॥
रायनवार्कभूपं च सप्तकन्यं विमानगम् ।
रायहूणेशभूपं च नवकन्यं विमानगम् ॥६८॥
रायकूपेशभूपं च कन्यैकं स्वविमानगम् ।
पश्यैतान् छत्रशोभाढ्यान् दासदासीसमन्वितान् ॥६९॥
पश्य मातस्ततो वाद्यवादकान् कृष्णवेषकान् ।
पश्य मातस्ततो भूपान् दक्षिणकुरुदेशजान् ॥७०॥
कालमण्डलीनभूपं कन्याचतुष्टयान्वितम् ।
गजयानगतं पश्य सर्वशोभासमन्वितम् ॥७१॥
वनजेलेशभूपं च पञ्चकन्यासमन्वितम् ।
गजयानगतं पश्य मातश्छत्रादिशोभितम् ॥७२॥
पारावारपिबं भूपं कन्यात्रयसमन्वितम् ।
गजयानगतं पश्य सर्वभृत्यादिसंयुतम् ॥७३॥
कोटीश्वरं नृपं पश्य कन्याद्वयसमन्वितम् ।
गजयानगतं मातः सर्वभृत्यसमन्वितम् ॥७४॥
श्रीसतीशनृपतिं कन्यात्रयसमन्वितम् ।
त्रेताकर्कशभूपं च सप्तकन्यायुतं तथा ॥७५॥
आण्डजरानृपं पश्य कन्याचतुष्टयान्वितम् !
बाल्यरजोनृपं पश्य कन्यैकं गजयानगम् ॥७६॥
रायसोमननृपतिं शुभं कन्यात्रयान्वितम् ।
उरुगवाक्षभूपं च पश्य कन्याद्वयान्वितम् ॥७७॥
पराङ्व्रतं नृपं पश्य कन्याद्वययुतं ततः ।
ईशानपानभूपं च महागजचतुष्टये ॥७८॥
याने स्थितं त्वेकचत्वारिंशत्कन्यासमन्वितम् ।
पश्य चामरछत्रादिदासीदाससुसेवितम् ॥७९॥
राजारायपतिं पश्य त्रयस्त्रिंशत्सुकन्यकम् ।
चतुर्गजमहायानस्थितं छत्रादिशोभितम् ॥८०॥
पूर्वदेशप्रजाश्चापि पश्य मातर्विमानगाः ।
कोटिकन्यायुताः सर्वाः कोटिकुमारशोभिताः ॥८१॥
आबालवृद्धसर्वस्वा दृष्टिर्यासु न गच्छति ।
विशालां वाहिनीं पश्य तवाऽङ्गणे ह्युपागताम् ॥८२॥
महाब्रालेश्वरान् पश्य सुरतीयान् प्रपश्य च ।
सान्तपनीः प्रजाः पश्य पञ्चसाहस्रकन्यकाः ॥८३॥
सर्वा विमानगाः शृंगारिताश्चाभरणान्विताः ।
भूगर्भस्य नृपस्यापि लक्ष्मणस्य विमानकम् ॥८४॥
पश्य मातर्द्विसहस्रकन्यान्वितं विशालकम् ।
शावदीनस्य कन्यानां सहस्रं च विमानगम् ॥८५॥
नागकन्याविमानानि नागारूढानि पश्य च ।
सहस्राणां सहस्राणि पश्यांगणे तवात्र वै ॥८६॥
पश्य मातस्ततो देवान् छत्रचामरशोभितान् ।
नरयानगतान् नैजवाद्यवेत्रधरान्वितान् ॥८७॥
कुबेरोऽयं समायाति वैष्णवः पूर्वकल्पगः ।
निजकुटुम्बसहितः सर्वशोभासमन्वितः ॥८८॥
महेन्द्रोऽयं समायाति पश्य तं देवतान्वितम् ।
महासिंहासनस्थं वै स्वर्गराजं रविप्रभम् ॥८९॥
पश्य मातस्ततो वायुं समायान्तं सुरान्वितम् ।
राजाधिराजशोभं च पश्य रुद्रं गणान्वितम् ॥९०॥
वह्निं पश्य ततो यान्तं पश्य सूर्यं विमानगम् ।
पश्य चन्द्रं बुधं शुक्रं कोटिदेवप्रसेवितम् ॥९१॥
महाविमानसंस्थं च पश्य मातर्मुनीश्वरम् ।
ऋभुं सनत्कुमारं च कोटिसत्पुरुषान्वितम् ॥९२॥
वादित्राणि सत्यलोकस्थानि शृणु ततोऽपि च ।
पश्य मातर्जनवासिपितॄन् वै कोटिकन्यकान् ॥९३॥
विमानसैन्यसंस्थाँश्च पश्य विश्वावसुं ततः ।
कन्याशतत्रययुतं गान्धर्वगणसेवितम् ॥९४॥

रसातलीयदैत्यांश्च पश्य भक्तान् समागतान् ।
प्रल्हादादीन्नृपानत्र पञ्चसाहस्रकन्यकान् ॥९५॥
संवरणं च धरणिं कोटिकन्यासमन्विताम् ।
पश्य मातर्भूषितां च विमानोत्तमसंस्थिताम् ॥९६॥
कामधेनुकुटुम्बानि मुक्तात्मकानि पश्य च ।
कोटिकुलानि चायान्ति तव गृहं सुखाश्रयम् ॥९७॥
पश्य मातस्ततो विष्णुं कोटिपार्षदसंयुतम् ।
वैकुण्ठवाद्यशोभाढ्यैर्जनैश्चाऽग्रे प्रयायिभिः ॥९८॥
जयनादैर्वर्धितं च कोटिदीपावलीयुतम् ।
आर्जन्तीशतयुक्तं च रमाकोटिसमन्वितम् ॥९९॥
पश्य मातस्ततो यान्तं ब्रह्माणं परमेष्ठिनम् ।
दिशां पालैर्लोकपालैः कोटिभिश्चाऽभिवर्धितम् ॥१००॥
सरस्वत्यादिभिः सार्धं ब्रह्मसरोभिरन्वितम् ।
द्वासप्ततिसहस्रकन्यकायुक्तं विमानगम् ॥१०१॥
ऐन्द्रजालिककन्यानां सहस्रेणापि राजितम् ।
पश्य मातर्लोमशं च महर्षिकोटिसेवितम् ॥१०२॥
महाविमानसंस्थं च गुरुं लक्ष्मीपतेः प्रभोः ।
पश्य मातस्तस्य पृष्ठे कन्यागणान् हि कोटिशः ॥१०३॥
विमानगान् वनदेवीकन्यालक्षगणानपि ।
द्रुमान् स्तबकान् कल्पलताः पश्य स्थावरदेहिनः ॥१०४॥
महीमानान् शोभनान् वै देवसदृशविग्रहान् ।
पश्य मातस्ततो लक्षकन्यानां मण्डलं परम् ॥१०५॥
दामनीनां विमानस्थं सौदामिनीकुलं परम् ।
पश्य मातस्ततोऽयुतकंकतालीयकन्यकाः ॥१०६॥
विमानस्था भूषिताश्च गीतिकातत्परास्तथा ।
सालमालीयकन्याश्च वासन्तिकाश्च कन्यकाः ॥१०७॥
पश्य मातर्विमानस्थाः सहस्राणि तथाऽपराः ।
पश्य मातर्यमजाश्च वायुजाः कन्यकास्ततः ॥१०८॥
मेघनाद्यश्चतुर्दशसहस्राणि तथाऽपराः ।
वार्क्ष्यो रौद्र्यश्च खानिज्यः सांवत्सर्यश्च गोपिकाः ॥१०९॥
श्रावण्या वैश्वकर्म्यश्च प्राचीन्यश्च पिशंगिकाः ।
राशियान्यश्च रोमाण्यः पारश्यः किन्नरीगणाः ॥११०॥
धैवर्यश्चापि पर्यश्चाऽमर्यो गौर्यश्च भूषिताः ।
हारित्यश्चापि वै स्वर्ग्याः पाताल्यश्चाऽऽग्निरिक्तजाः ॥१११॥
भौम्यश्चापि च दानव्यः कोट्यर्बुदाब्जसंख्यकाः ।
पश्य मातस्तव पुत्र्या मानार्थं सन्ति तास्त्विह ॥११२॥
आयान्ति चोत्सुकाः सर्वा प्रोद्वाहः कृष्णयोरिति ।
पश्य मातस्ततो यान्तं सहस्रकलशान्विते ॥११३॥
महाविमानके श्रीमद्वैराजं पुरुषं परम् ।
अनेकेश्वरयुक्तं च सहस्रभुजशोभितम् ॥११४॥
पश्य मातस्ततो यान्तं सहस्रवदनं ह्यजम् ।
ब्रह्मणश्च तथा विष्णून् सहस्रवदनान् शुभान् ॥११५॥
पश्य सर्वेश्वरान् मातर्महाविष्णुं विलोकय ।
पश्य मातर्हि भूमानं परेश्वरं विमानगम् ॥११६॥
कोटीश्वरयुतं पश्य प्रद्युम्नं चानिरुद्धकम् ।
पश्य मातस्तथा वासुदेवं कुटुम्बकान्वितम् ॥११७॥
प्रकृतिं पुरुषं पश्य सर्वतत्त्वान्वितं ततः ।
पश्य मातश्चेश्वराणां वादिश्ववादकांस्ततः ॥११८॥
पश्य मातश्चेश्वराणीमण्डलानि ततः परम् ।
विमानस्थानि गरुडस्थानि हस्तिगतानि च ॥११९॥
रथस्थानि पश्य मातः पार्षदाणीर्विभूषिताः ।
अहो मातस्ततः पश्य भगवन्तं सनातनम् ॥१२०॥
मत्स्यरूपं कूर्मरूपं ततः पश्य नृसिंहकम् ।
वाराहं च ततः पश्य हंसं हरिं विलोकय ॥१२१॥
कपिलं च ततः पश्य पृथुं पश्य ततः परम् ।
दत्तात्रेयं ततः पश्य ऋषभं पश्य वामनम् ॥१२२॥
पर्शुरामं ततः पश्य यज्ञं पश्य ततः परम् ।
रामं पश्य ततो मातर्हयग्रीवं विलोकय ॥१२३॥
नारदं पश्य मातर्वै राजराजं विलोकय ।
व्यासं श्वेतं पश्य मातर्बुद्धं पश्याऽश्विनीसुतम् ॥१२४॥
धन्वन्तरिं ततः पश्य पश्य नारायणान् बहून् ।
कोटिविमानगान् पश्य पार्षदांस्तत्प्रियांस्ततः ॥१२५॥
पश्य मातस्ततो मुक्तान् धामधामनिवासिनः ।
पश्य मातर्हि मुक्तानीः सांख्ययोगवतीस्तथा ॥१२६॥
पश्य मातर्ब्रह्मसखीर्ब्रह्मप्रियास्तथाऽपराः ।
चत्वारिंशदूर्ध्वशतं षट्कं पश्य च योषिताम् ॥१२७॥
राधां लक्ष्मीं रमां पद्मावतीं श्रीं माणिकीं तथा ।
कार्ष्णीः पश्यैता मातस्ते गृहं सर्वाः समागताः ॥१२८॥
माधवी सुगुणा हासा दया शान्ता सुमाऽम्बिका ।
चम्पा हैमी मुक्तिका देविका ललन्तिका जया ॥१२९॥
अन्याश्च शतशो मातस्त्वागताः पश्य ते गृहम् ।
कृष्णाकृष्टाः कृष्णजीवास्त्वत्पुत्रीस्वसृभावनाः ॥१३०॥
मातः पश्य महान्तं वै विमानं गजवाहनम् ।
यत्र पिता च माता च भ्रातरश्च कुटुम्बकम् ॥१३१॥
श्रीहरेस्तु समास्ते वै कोटिसूर्यसमप्रभम् ।
पश्य मातस्ततो दिव्यं सहस्रगजवाहितम् ॥१३२॥

विमानं कलशाढ्यं वै सहस्रशिखरान्वितम् ।
सहस्रायुतयानैश्च समन्तात् परिवारितम् ॥१३३॥
कोटिसौभाग्यवतीभिर्वर्धितं सेवितं तथा ।
वीक्षितं दिव्यशोभं श्रीकृष्णकान्तं विलोकय ॥१३४॥
अनादिश्रीकृष्णनारायणं श्रीबालकृष्णकम् ।
श्रीकृष्णं वल्लभं सर्वं स्वामिश्रीकृष्णरूपिणम् ॥१३५॥
भ्रातृजायादिभिश्चापि स्वसृभिश्चाभिवर्धितम् ।
पुरुषोत्तममेवैनं सर्वाविर्भावकारणम् ॥१३६॥
अहो मातस्तव भाग्यं न भूतं न भविष्यति ।
कृष्णायती चेदृशी वै न भूता न भविष्यति ॥१३७॥
पश्यमातस्ततः कृष्णयातीस्थमहीमानकान् ।
सर्वलोकभवान् चाश्ववारान् पश्य च कोटिशः ॥१३८॥
पश्य मातस्ततो गीतिकारिणीर्वरयोषितः ।
भौमीः सर्वा भूषिताश्च पश्य ततश्च दर्शकान् ॥१३९॥

**श्रीगिरिजोवाच—**

अहो मे परमं भाग्यं चक्षुर्मे बालकृष्णके ।
निरुद्धं ऋक्! न पश्यामि चेतरं वद मा त्विह ॥१४०॥
धन्या पुत्री मम जाता यदर्थं त्वीश्वरा इह ।
यामि शीघ्रं स्वागतार्थं चायाहि मण्डपान्तिकम् ॥१४१॥
इत्युक्त्वा राधिके! सा तु हिमजा तूर्णमेव ह ।
सम्मानार्थं स्वागतार्थं त्वधश्चावाऽतरद् गृहे ॥१४२॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने श्रीशांकरीदेव्यै ऋग्वेदेन कृष्णयातीवर्णितमहीमानपरिचयः प्रकारित इत्यादिनिरूपणनामा नवत्यधिकद्विशततमोऽध्यायः ॥ २९० ॥

**श्रीकृष्ण उवाच—**

राधिके! कृष्णवाहिन्यां हरिं दृष्ट्वा तु कोटिशः ।
स्त्रीगणाः मुमुहुश्चाति युवानं परमेश्वरम् ॥ १ ॥
कोटितेजोभिरापूर्णं कोटिलावण्यशोभनम् ।
कोट्यानन्दभरं पुष्टं कोटिभूषणभूषितम् ॥ २ ॥
कोटिसद्गुणवासं च कोटिकामभृतं प्रभुम् ।
वीक्ष्य वीक्ष्य नवा नार्यस्तल्लीनाः स्थिरदृष्टयः ॥ ३ ॥
यावत्यः कन्यकाश्चापि संबभूवुः समाधिगाः ।
अपि नराश्च लोकाश्चेश्वराश्च लीनतां गताः ॥ ४ ॥
देवाः सर्वेऽपि मुमुहुर्योषितां तत्र का कथा ।
साधवो योगिनश्चापि मुक्ताश्च पार्षदा अपि ॥ ५ ॥
मुमुहुर्यतयश्चापि मुक्तानीनां तु का कथा ।
महामाया प्रधानं च प्रकृतिर्धामयोषितः ॥ ६ ॥
मोहिन्यश्चापि मुमुहुर्लौकिकीनां तु का कथा ।
आजनाभ्यो युवत्यश्च कुटुम्बसहिता ययुः ॥ ७ ॥
दर्शनार्थं सोत्सुका वै प्रोवाहः कृष्णयोरिति ।
ता अपि मुमुहुस्तत्र परेशे परमात्मनि ॥ ८ ॥
राजानो राजकन्याश्च दशसाहस्रसंख्यकाः ।
कृष्णयान्यागताश्चापि निश्चिक्युस्तं निजेश्वरम् ॥ ९ ॥
प्रजाकन्यास्तथा तत्र . दशसाहस्रसंख्यकाः ।
निश्चिक्युः श्रीबालकृष्णं चेशं नैजं विमोहिताः ॥१०॥
तत्पराश्च समासन् वै कण्ठमालाः प्रगृह्य च ।
वह्निसाक्ष्ये भविष्यामो दास्यः कृष्णस्य चार्पिताः ॥११
इत्येवं कोट्यर्बुदा वै कन्यकास्तत्परास्तदा ।
सर्वसज्जीकृताऽऽवेषाः प्रतीक्षन्ते तु मंगलम् ॥१२॥
विद्याधर्यः कोटिशश्च मुमुहुर्वीक्ष्य माधवम् ।
अप्सरसः कोटिशश्च मुमुहुर्वीक्ष्य केशवम् ॥१३॥
गान्धर्व्यश्च कोटिशोऽपि मुमुहुर्वीक्ष्य चाच्युतम् ।
किन्नर्यश्च कोटिशोऽपि मुमुहुर्वीक्ष्य कामदम् ॥१४॥
नर्तक्यः कोटिशश्चापि मुमुहुर्वीक्ष्य मायिनम् ।
शिल्पिन्यो मुमुहुश्चापि वादिन्यो मुमुहुस्तथा ॥१५॥
पुष्पिण्यो मुमुहुश्चापि यतिन्यः कोटिशस्तथा ।
साध्व्यश्च मुमुहुश्चापि सन्यासिन्यश्च कोटिशः ॥१६॥
मुमुहुर्ब्रह्मचारिण्यो विप्राण्यो मुमुहुस्तथा ।
बालकृष्णं वीक्ष्य राधे! मुमोह सकलं जगत् ॥१७॥
काश्चिद्धरिं प्रवीक्ष्यैव त्वाकृष्टाः केशवं प्रति ।
कश्चित् तत्कलगिं वीक्ष्य सौवर्णतान्तवीं स्थिराम् ॥१८॥
पिशंगीं किरणैर्व्याप्तां स्थिरास्तत्रैव चाऽभवन् ।
लक्ष्म्याश्रयं च मुकुटं सौवर्णं कोटिहीरकम् ॥१९॥
नैकरत्नमणिव्याप्तं सूर्यचन्द्रास्वरं शुभम् ।
वीक्ष्य काश्चित्तत्र लग्नाः स्थिरा मग्नास्तथाऽभवन् ॥२०॥
कश्चिन्मुकुटसंस्थाँश्च रत्नहारान् सुमस्रजः ।
पुष्पपंक्तीश्च कलिकाः शेखरान् पुष्पराजिकाः ॥२१॥
प्रदानसूचकान् वीक्ष्य मुमुहुस्तत्र च स्थिराः ।
काश्चित्केशान् मञ्जुलाँश्च चाकचिक्यप्रभान्वितान् ॥२२॥
कृष्णान् वक्रान् भङ्गिकाढ्यान् सूक्ष्मान् नेत्रहरान् शुभान् ।
सुगन्धितैलपानाँश्चाऽऽकर्णाग्रकृततोरणान् ॥२३॥

पश्चभागे छादकाँश्च वीक्ष्य प्रकीर्णकस्थितान् ।
दन्तिकाभिः संस्कृताँश्च समीकृतान् समान्तकान् ॥२४॥
प्रान्तपिशंगकान् वीक्ष्य मुमुहुस्तत्र सुस्थिराः ।
काश्चित्तेजःपरिधिं च वीक्ष्य महान्तमुज्ज्वलम् ॥२५॥
अन्तःपरिधिसाहस्रं कोटिकिरणभाभृतम् ।
बहुरंगं मिष्टकृष्टिचमत्कारभृतं शुभम् ॥२६॥
दिव्यं वीक्ष्य च तत्रैव मुमुहुश्चाऽभवन् स्थिराः ।
काश्चिद्भालं प्रवीक्ष्यैव विशालं त्वर्धचन्द्रवत् ॥२७॥
उज्ज्वलं त्वेकरेखाढ्यं प्रान्तयोश्चन्द्रभाभृतम् ।
मध्ये सूर्यसमं भास्वत् प्रोज्ज्वलं चोन्नतं भृतम् ॥२८॥
पुष्टं रम्यं मनोहारि वीक्ष्य मुग्धाः स्थिरास्तदा ।
काश्चिच्चन्द्रं कौंकुमं च मध्ये स्थितं सुशोभनम् ॥२९॥
बालसूर्यसमं वीक्ष्य मुग्धाः स्त्रियोऽभवन् स्थिराः ।
काश्चिद् वीक्ष्य सुतिलकं चोर्ध्वपुण्ड्रं हि कानकम् ॥३०॥
स्वर्णवर्णं चान्दनं च कौंकुमं मिश्रितं तनु ।
तत्रैव मुग्धा अभवन् स्थिरानन्दभरास्तदा ॥३१॥
काश्चित्तु प्रान्तयोर्वीक्ष्य पत्रिके चान्दनीकृते ।
मध्ये कुंकुमसूक्ष्माल्पबिन्द्वीबाहुल्यशोभिते ॥३२॥
तास्वेव मुमुहुर्नार्यः पत्र्यां बिन्द्वीषु च स्थिराः ।
काश्चिद् भ्रूयुगले रम्ये कामकम्मानिकात्मके ॥३३॥
सूक्ष्मनीलाऽतिचञ्चत्सद्रोमावलिविराजिते ।
प्रान्ततनुसूक्ष्मकाग्रे मुग्धास्तत्राऽभवन् स्थिराः ॥३४॥
काश्चिद् भ्रुवोर्मध्ययोगे श्वेततेजोविराजिते ।
चान्द्रपिण्डसमशोभे मुमुहुस्तत्र च स्थिराः ॥३५॥
काश्चिद् भ्रनिम्नभागे च नासामूले मनोहरे ।
चक्षुषोर्मध्यके द्योतमाने मुमुहुः सुस्थिराः ॥३६॥
काश्चित्तिलसुमाभां च नासिकां वीक्ष्य भाभृताम् ।
नमणीं रमणीं निम्नां तत्र मुग्धास्तथा स्थिराः ॥३७॥
काश्चिद् गोलकपोलौ च रंगशोभौ सुरञ्जितौ ।
मध्योन्नतौ सुगोलौ च चुम्बनार्हौ सरत्नकौ ॥३८॥
हास्यभृतौ चोन्नतौ च सूर्यचन्द्राभकान्तिकौ ।
प्रपुष्टौ मदवाहौ च वीक्ष्य मुग्धास्तथा स्थिराः ॥३९॥
काश्चिन्नेत्रे चाकर्णान्तायते मदनवासिते ।
तीक्ष्णकोणे प्रेमवाहे चेङ्गितसूचके भरे ॥४०॥
रक्तरेखे कज्जलाढ्ये श्वेतगोले च चञ्चले ।
कृष्णकनीनिके रम्ये भावज्ञे भावबोधके ॥४१॥
चेकान्तबोधके चान्तश्चेष्टाप्रमाणपूरिते ।
आकर्षके मोहभृते मेषोन्मेषविराजिते ॥४२॥
सूक्ष्मरोमावलिराजद्रक्षिकाछज्जिकायुते ।
जगतां सर्वसृष्टीनां प्रतिबिम्बाश्रये शुभे ॥४३॥
सागरौ प्रेमसरितां निधाने सर्वतेजसाम् ।
सर्वप्रमाणसंस्थाने मुमुहुस्तत्र च स्थिराः ॥४४॥
काश्चिच्च कर्णयोः शष्कुलिकासंस्थानयोस्तदा ।
स्वर्णकुण्डलसौवर्णफुल्लिकास्वर्णचिप्पिभिः ॥४५॥
स्वर्णशृंखलिकाभिश्च रत्नबद्धस्थलैस्तथा ।
युक्तयोश्चन्द्रभयोश्च मुमुहुस्तत्र च स्थिराः ॥४६॥
काश्चित्तु बुट्टिकां वीक्ष्य स्वर्णस्थलविराजिताम् ।
तत्रैव मोहमापन्नाः स्थिरास्तत्राऽभवन् स्त्रियः ॥४७॥
काश्चिद् वीक्ष्योर्ध्वकौष्ठस्य पृष्ठं सौवर्णकोज्ज्वलम् ।
सूक्ष्मातिसूक्ष्मरोमालिं कामसम्बोधकारिणीम् ॥४८॥
श्मश्रुलेखां पिंगवर्णां मुमुहुस्तत्र सुस्थिराः ।
काश्चिदोष्ठं समसंस्थानकं दीर्घं यथोचितम् ॥४९॥
रक्तभृतं पक्वबिम्बफलाभं रससंभृतम् ।
चुम्बनार्हं चोष्ठरसं मध्ये धनुष्यमध्यवत् ॥५०॥
प्रान्तयोर्धनुषः प्रान्तौ यथा तथा सुघट्टितम् ।
सर्वेषां धनुषां रूपं दधत्प्रेमनिधानकम् ॥५१॥
इषत्कुञ्चत्प्रेमभावबोधकं हास्यमन्दिरम् ।
प्रसन्नताश्रयं रम्यं ताम्बूलरसराजितम् ॥५२॥
क्वचित् क्वचिच्च दन्तैश्च क्वचिच्च जिह्वया तथा ।
क्वचिच्चाऽधरकौष्ठेन विधापित सुचुम्बनम् ॥५३॥
मध्यबिन्दौ निम्नभागं नासा दण्डिकया कृतम् ।
ऊर्ध्वौष्ठं वीक्ष्य वै कान्ता मुमुहुस्तत्र च स्थिराः ॥५४॥
सुगन्धसम्भृतं श्वासं चेहमानं स्त्रियोऽपराः ।
प्रसरन्तं सर्वदिक्षु सुगन्धयन्तमीश्वरान् ॥५५॥
मादयन्तं शान्तयन्तं घ्रात्वा मुग्धास्तथा स्थिराः ।
अधरौष्ठं रक्तवर्णं ताम्बूलरसवेदिनम् ॥५६॥
अधरौष्ठसखायं तं वीक्ष्य मुग्धाः स्त्रियः स्थिराः ।
चिबुकं स्वर्णचिबुकपिंगबिन्दुविराजितम् ॥५७॥
शोभनं समसंस्थानं योग्यनिम्नत्वशोभनम् ।
समनिकासहनुसंशोभावर्धितसुन्दरम् ॥५८॥
दिव्यं नवनीतकाभं स्थलपद्माकृति प्रभम् ।
वीक्ष्य नार्यो मुमुहुश्च कृत्वा हृद्यभवन् स्थिराः ॥५९॥
कम्बुकण्ठं सुस्वरं च हन्वधः पुष्टपेशिकाः ।
गलं पुष्टं यथाघट्टं मुमुहुर्वीक्ष्य च स्थिराः ॥६०॥
सिंहस्कन्धौ हरेर्वीक्ष्य पुष्टौ बलभृतौ तथा ।
वीक्ष्य काश्चित्तु मुमुहुः स्थिरास्तत्राऽभवँस्तदा ॥६१॥

काश्चिद् वीक्ष्योन्नतं पुष्टं विशालं वक्ष उत्तमम् ।
दुग्धचम्पकभाभ्यासं सर्वबलाश्रयं शुभम् ॥६२॥
नरत्वाऽऽवेदकं शूरमनःक्षोभकरं क्षणम् ।
नार्यभिवाञ्छितं राधारमाऽऽश्लेषविभावितम् ॥६३॥
स्वर्णरेखायुतं रोम्णां दक्षावर्तसमन्वितम् ।
श्रीवात्सल्यभृतं सूर्यचन्द्राभस्तनराजितम् ॥६४॥
आयतं चापि वै दीर्घं दृढबन्धविभासितम् ।
कुक्षिकोमलतायुक्तं पार्श्वमार्दवसुस्पृशम् ॥६५॥
पृष्ठवंशदृढस्थानं बाहुमूलातिशोभनम् ।
एवंविधं हरेर्वक्षःस्थलं सुखस्थलं परम् ॥६६॥
सम्पत्सौख्यसमीहाढ्यं वीक्ष्य वै सुन्दरीगणाः ।
मुमुहुश्चाति तत्रैवाऽभवन् मग्नाः सुखस्थिराः ॥६७॥
सौवर्णं कण्ठलं कण्ठे भूषणं रत्नघट्टितम् ।
तथा सौवर्णपत्रीं च शृंखलां कानकीं तथा ॥६८॥
प्लक्षपत्रीं च सौवर्णां पञ्चसरीं च कानकीम् ।
बदरीमालिकां स्वर्णां गोक्षुराणां स्रजं तथा ॥६९॥
सौवर्णां सूक्ष्मपत्रीं च मालिकां मुद्रमालिकाम् ।
यवमालां कानकीं च कानकीं राजमाषिकाम् ॥७०॥
कानकं पूर्त्तलायं च त्वष्टकोणमणिस्रजम् ।
कण्ठिकां तौलसीं स्वर्णसूक्ष्ममणिप्रकण्ठिकाम् ॥७१॥
मालिकां कानकीं चापि पौष्पान् हारान् सुगन्धकान् ।
सौवर्णबुट्टकौशेयकञ्चुकोपरि संस्थितान् ॥७२॥
धृतान् हारान् मणिरत्नहीरकादिविराजितान् ।
मौक्तिकाँश्च धृतान् हारान् कौस्तुभान् वीक्ष्य वै स्त्रियः ॥७३॥
चन्द्रकान्तान् सूर्यकान्तान् वह्निकान्तान् मणीन् शुभान् ।
वीक्ष्य कण्ठे धृताँस्तत्र मुमुहुर्वै सुरस्त्रियः ॥७४॥
अन्याः सर्वाश्च मुमुहुः क्षणंस्तत्राऽभवन् स्थिराः ।
भुजौ पुष्टौ च कदलीगर्भाभौ शोभनौज्ज्वलौ ॥७५॥
पूर्तद्रव्यौ कटकाढ्यौ शृंखलाभिविराजितौ ।
सिंहाननभुजबन्धाभूषाविराजितौ शुभौ ॥७६॥
वीक्ष्य नार्यो हि मुमुहुः स्थिरास्तत्राऽभवन् क्षणम् ।
प्रकोष्ठौ कामफलकौ स्वर्णशृंखलिकान्वितौ ॥७७॥
मणिमौक्तिकरत्नाढ्यमांगल्यभूषणान्वितम् ।
पुष्पशृंगारशोभाढ्यं वीक्ष्य मुग्धाः स्त्रियः स्थिराः ॥७८॥
हस्ततले यावकाभे नखान् रक्तभराँस्तथा ।
ह्रस्वचन्द्रनिभान् वीक्ष्याङ्गुलीश्चांगुलिकास्रजः ॥७९॥
युक्तास्तथा कानकाङ्गुलीयकैर्मणिरत्नजैः ।
ऊर्मिकाभिः शोभिताश्च मृदुरक्ताग्रिकाः स्त्रियः ॥८०॥
सुपर्वाढ्याः सुखस्पर्शा वीक्ष्य मुग्धास्तथा स्थिराः ।
हस्तयोः पद्मजौ रम्यौ नीलबिन्द्वीसमन्वितौ ॥८१॥
वीक्ष्य नार्यो मुमुहुश्च स्थिरास्तत्र तदाऽभवन् ।
दक्षे हस्ततले वीक्ष्य मीनं ध्वजं त्रिशूलकम् ॥८२॥
धनुर्बाणं स्वस्तिकं च वज्रं दण्डं च चक्रकम् ।
गदां पद्मं शंखमसिं खड्गं सौवर्णशोभितम् ॥८३॥
मुमुहुर्वै स्त्रियः सर्वाः स्थिरास्तत्र तदाऽभवन् ।
खड्गाधानं भिन्नमणिनद्धं चर्म तथाविधम् ॥८४॥
वीक्ष्याऽपि मुमुहुः सर्वाः कण्ठे मंगलसूत्रकम् ।
भुजे मंगलतन्तुं च वीक्ष्य मुग्धाः सुरस्त्रियः ॥८५॥
जिह्वां रक्तां स्वादयोग्यां सर्वस्वादभृतां स्त्रियः ।
विशालां मोहकाग्रां च स्थलपद्मनिभाऽऽभिकाम् ॥८६॥
दन्तान् हास्ये कुन्ददलीसमान् दाडिमबीजभान् ।
श्वेतकान्तियुतान् चञ्चत्प्रभान् वीक्ष्य च मोहिताः ॥८७॥
स्पृहां चक्रुर्हि लब्ध्यर्थे स्थिरास्तत्राऽभवँस्तथा ।
त्रिवल्या सहितं रम्यमुदरं प्रोज्ज्वलं शुभम् ॥८८॥
शीतलं निम्ननाभ्या च मध्यवल्ल्याढ्यया युतम् ।
वीक्ष्य तत्र च मुमुहुः स्थिरास्तत्राऽभवँस्तदा ॥८९॥
आर्धभेदेन च धृतं सौवर्णपटकं गले ।
स्कन्धे लम्बत्प्रान्तभागं वीक्ष्य मुग्धाः स्थिरास्तदा ॥९०॥
काश्चिद् ध्यात्वा तु जघनं गुप्तं चापि कटिद्वयम् ।
श्यामलं मुमुहुस्तत्र कच्छ्यां बद्धे तथाऽम्बरे ॥९१॥
सौवर्णतारयुक्ते च बहुमूल्यकबुट्टके ।
सुरवाले राजयोग्ये कौशेयवरनिर्मिते ॥९२॥
कोटिरत्नाश्रिते स्वर्णबुट्टिमौक्तिकयोजिते ।
फुल्लकुम्मकिकायुक्तनाडिकाऽभिप्रवेशिते ॥९३॥
धृते चापादरम्ये च मुमुहुर्युवतीस्त्रियः ।
सर्वकामाश्रये काम्ये त्वन्तरंगेऽखिलाः स्त्रियः ॥९४॥
सर्वमोहाश्रये मुग्धा विविदुर्नेतरत् क्षणम् ।
कम्मानिकानिभे रम्ये पादप्रकोष्ठकाग्रतः ॥९५॥
पादयोः पद्मजौ भागौ सूक्ष्मरोमविराजितौ ।
मृदुपानहुसुसंयुक्तौ स्वर्णशोभालिसंवृतौ ॥९६॥
रञ्जितौ संप्रवीक्ष्यैव मुग्धाः स्त्रियः स्थिरास्तथा ।
सक्थ्नोः सक्थिमूलमध्येऽनङ्गेऽतिमुमुहुः स्त्रियः ॥९७॥
अंगुलिकाः स्वर्णभूषोर्मिका वीक्ष्य तथा स्त्रियः ।
किंकिणिकायुतौ वीक्ष्य सौवर्णौ पादभूषणौ ।
कटकौ झंझरीनालौ त्रोटकौ मुमुहुः स्थिराः ॥९८॥

आजानुलम्बहस्तौ च जघने करिशुण्डवत् ।
करभौ करगौ करिकरवद् वीक्ष्य योषितः ॥९९॥
मुमुहुस्तत्र च स्थिरा अभवन् वै समाधिगाः ।
गजविमानगे स्वर्णसिंहासने मृदुस्थले ॥१००॥
आसीनं राजराजेश्वराजराजं वरं प्रभुम् ।
वीक्ष्य मुग्धाः स्त्रियः सर्वा आयान्तं गोपुरं प्रति ॥१०१॥
कुंकुमाऽक्षतबिन्द्वाढ्यं वीक्ष्य श्रीपरमेश्वरम् ।
चक्रुर्वै दर्शनं लोका जयशब्दान् जगुस्तथा ॥१०२॥
एवं वै राधिके प्राप्ता महान्तं गोपुरं प्रति ।
वाद्यनादैश्च लोकानां मनोज्ञा योगयात्रिका ॥१०३॥
भावज्ञो भगवाँस्तत्र शात्रायां स्वासने स्थितः ।
दर्शनं प्रददौ तत्र विभिन्नं शृणु राधिके ॥१०४॥
पुरुषोत्तमरूपेण मुक्तेभ्यो दर्शनं ददौ ।
गोपेभ्यः कृष्णरूपेण गोपीभ्यो दर्शनं ददौ ॥१०५॥
पार्षदेभ्यो दर्शनं नारायणात्मतया ददौ ।
ईश्वरेभ्यो वासुदेवरूपेण दर्शनं ददौ ॥१०६॥
सिद्धसाधुगणेभ्यश्च विष्णुरूपेण तद् ददौ ।
महर्षिभ्यस्तदा ब्रह्मात्मना स्वं दर्शनं ददौ ॥१०७॥
पितृभ्यश्चार्यमरूपात्मना स्वं दर्शनं ददौ ।
सुरेभ्यः क्षीरनाथात्मनाऽपि स्वं दर्शनं ददौ ॥१०८॥
मानवेभ्यो नरनारायणात्मना च तद् ददौ ।
पातालवासिलोकेभ्यः श्वेतप्रभ्वात्मना ददौ ॥१०९॥
नारीभ्यः कामदेवात्मरूपेण दर्शनं ददौ ।
कन्याभ्यः स्वामिरूपेण माल्याग्र्यं दर्शनं ददौ ॥११०॥
पूज्याभ्यो बालरूपेण कौमारं दर्शनं ददौ ।
भक्तानां भगवद्रूपं मोक्षदं दर्शनं ददौ ॥१११॥
सर्वायुधं चतुर्हस्तं रमावृन्दनिषेवितम् ।
नरेभ्यो दर्शनं साक्षान्नारायणात्मना ददौ ॥११२॥
अन्तरात्मस्वरूपं चाऽऽवेदयद्धृदि देहिनाम् ।
इत्येवं राधिके! श्रीमद्बालकृष्णो हरिः प्रभुः ॥११३॥
विज्ञातो ह्यधिराजोऽसौ मण्डपाख्यपुरस्य ह ।
गोपुराग्रे चाययौ संलेभे स्थैर्यं क्षणं तदा ॥११४॥
वाहिन्यपि समग्रा च क्षणं तस्थौ प्रपूजिता ।
समीपे त्वागतैः श्रेष्ठैः कृष्णबृहस्पतिद्विजैः ॥११५॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सुवेषिते श्रीबालकृष्णे प्रत्येकांगे नरनारीणां वृत्त्याकर्षणेन मुग्धता, दिव्यदर्शनं, गोपुरं प्रति प्रागमनं चेतिनिरूपणनामैकनवत्यधिकद्विशततमोऽध्यायः ॥ २९१ ॥

श्रीकृष्ण उवाच—

कोटिभिर्मुनिभिः साकं राधिके! श्रीबृहस्पतिः ।
संस्थितोऽभूदक्षतादिपूजापात्रैर्हरेः पुरः ॥ १ ॥
मण्डपाख्यं पुरं रम्यं पञ्चाशद्योजनात्मकम् ।
अभिव्याप्यैश्वरराजदर्शनार्थं स्थिताः प्रजाः ॥ २ ॥
श्रीकृष्णः श्रीहरिं तत्र प्रणनाम स्वयं त्वहम् ।
ब्राह्मणाः संप्रणेमुश्च वेदमन्त्रान् जगुस्तदा ॥ ३ ॥
यवांकुरान् ददुश्चापि बालकृष्णकरे तदा ।
पुष्पगुच्छं ददौ कृष्णः करे गले च मालिकाम् ॥ ४ ॥
बृहस्पतिः पुष्पहारं कादम्बकं ददौ गले ।
साक्षतकुंकुमचन्द्रं भाले गुरुस्तथाऽकरोत् ॥ ५ ॥
लाजाभिर्वर्षयामासुर्नार्यः कन्याप्रपक्षिकाः ।
जलपानं ददौ तत्रेश्वराय च बृहस्पतिः ॥ ६ ॥
पुरं प्रवेशयामास बालकृष्णस्य वाहिनीम् ।
सर्वां दिव्यस्वरूपां च ददृशुः सर्वथा प्रजाः ॥ ७ ॥
देवकन्या नागकन्या राजकन्याश्च योषितः ।
मुनिकन्याश्चेशकन्याः प्रपश्यन्तीश्वरं हरिम् ॥ ८ ॥
पश्यन्ति योषितः सर्वा निमेषरहितेन वै ।
शिवस्वामी प्रपूजार्थं गोपुराग्रे समाययौ ॥ ९ ॥
प्रपूज्य कुशलं पृष्ट्वा प्रसन्नं प्रचकार ह ।
वसुं च पितरं चापि तथाऽन्यान्महीमानकान् ॥१०॥
महीमानस्त्रियो नेमुः प्रपश्य परमेश्वरम् ।
प्रसन्नवदनं कान्तं मनोहरं सुरूपिणम् ॥११॥
सर्वशोभान्वितं पूज्यं सर्वेष्टं हृदयंगमम् ।
रत्नेन्द्रसारशोभाढ्यभूविमानस्थितं प्रभुम् ॥१२॥
सर्वेषां परमात्मानं भक्तानुग्रहगोचरम् ।
नवीनचान्द्रधवलं शोभितं हारराजिभिः ॥१३॥
चन्दनोक्षितसर्वांगं बहुमालाविभूषितम् ।
रत्नकेयूरवलयरत्नमालाभिरुज्ज्वलम् ॥१४॥
रत्नकुण्डलभूषाभिर्गण्डस्थलीविराजितम् ।
रत्नेन्द्रसारनिर्माणक्वणन्मंजिररञ्जितम् ॥१५॥
सस्मितं गुच्छहस्तं च पश्यन्तं रत्नदर्पणम् ।
मुक्तैः संसेवितं श्वेतचामरैश्छत्रकेन च ॥१६॥
पार्श्वे स्वतःप्रकाशेन मुख्येश्वरेण राजितम् ।
नवयौवनसम्पन्नं शरत्कमललोचनम् ॥१७॥
शरत्पूर्णेन्दुतुल्यास्यं सर्वानुग्रहकारकम् ।
कोटिकन्दर्पसौन्दर्यं चाक्षरातीतमच्युतम् ॥१८॥

तीर्थपूतं कीर्तिपूतं सुरेश्वरादिवन्दितम् ।
परमाह्लादकं देवेश्वरं सौन्दर्यशेवधिम् ॥१९॥
दूर्वया पट्टसूत्रं च कदल्याः स्फुटमञ्जरीम् ।
दधानं च प्रचूडायां मालमाल्याभिमालिकाम् ॥२०॥
पुष्पं नारीप्रदत्तं च सुगन्धिगुच्छमुत्तमम् ।
एतादृशं हरिं दृष्ट्वा मूर्च्छामापुः स्त्रियस्तदा ॥२१॥
लक्ष्म्यास्तु जीवनं धन्यं श्लाघ्यमित्यूचुरीप्सितम् ।
हिमजा श्रीः ददर्शापि तारकं तं पुनः पुनः ॥२२॥

शिवेश्वरः विप्रयुक्तः सामात्यः सपुरोहितः ।
समागत्य ननामाऽपि देवदेवं हरिं प्रभुम् ॥२३॥
वस्वग्रे मण्डपे दीर्घे कारयामास नर्तनम् ।
नर्तकानां चातिरम्यं गान्धर्वाणां च गायनम् ॥२४॥
गायिकानां गीतिकाश्च नर्तकीनां च नृत्यकम् ।
वाद्यानां शब्दभेदांश्च कारयामास वै पुरः ॥२५॥
आस्फोटानां स्फोटनानि विद्युत्खेलनकानि च ।
यन्त्राणां स्फोटननादान् दुन्दुभीनां सुगर्जनाः ॥२६॥

कारयामास वाहिन्याश्चाग्रे त्वग्रे शिवस्तदा ।
वर्धयामासुरेवाऽपि प्रजाः श्रीबालकृष्णकम् ॥२७॥
एवं तदा पुण्ययात्रा विश्रान्तिगृहमाययौ ।
कृष्णो विमानकात् समुत्तीर्य गोपुरमास्थितः ॥२८॥
पार्वत्या वर्धितो दुःखहाञ्जलिभिः पुनः पुनः ।
तीर्थजलेन चरणौ प्रक्षालितौ हरेस्तु वै ॥२९॥
चन्दनाक्षतपुष्पाद्यैः पूजितो मंगलद्रवैः ।
यवांकुरैश्च दूर्वाभिः पूजितश्च सुगन्धिकैः ॥३०॥
लाजाभिश्च तथा नीराजनैः सम्पूजितस्तदा ।
विप्रैश्च गुरुणा चाशीर्वाक्यैः संवर्धितस्तदा ॥३१॥
प्रोक्षितश्च ततः पार्श्वे विश्रान्तिमन्दिरे क्षणम् ।
स्वर्णसिंहासने नीत्वा सर्वशान्तिप्रदे शुभे ॥३२॥
हरिं निषादयामास तथा सर्वाग्र्यपूज्यकान् ।
पितरौ शिवदेवेश्च पुपूज स्वागतेन ह ॥३३॥
भोजनं मधुपर्काख्यं जलपानेन संयुतम् ।
ददौ तदा शिवस्वामी शान्त्यर्थं व्यावहारिकम् ॥३४॥
तदा कन्याः कोटिशोऽपि नैजं शृंगारमादधुः ।
योगयोग्याऽम्बरभूषा धारयामासुरुत्सुकाः ॥३५॥
गन्धसुगन्धदेहाश्च रंगरागयुतास्तथा ।
बिन्दुबिन्द्रीयुताश्चापि सज्जास्तदाऽभवन् स्थिताः ॥३६॥
प्रतीक्षन्ते यदा लक्ष्म्याः दानं हरिर्ग्रहीष्यति ।
तदाऽस्माकं करान् कृष्णनारायणो ग्रहीष्यति ॥३७॥

इति लक्ष्म्याश्च शृंगारं सख्यस्तदा व्यधुः शुभम् ।
नखान् वै रञ्जयामासुः स्थलपद्मनिभान् शुभान् ॥३८॥
अलक्तकेन करयोः पादयोश्च तलान्यपि ।
ओष्ठौ रक्तेन रंगेण रञ्जयामासुरेव च ॥३९॥
कुंकुमकर्दमेनापि कपोलौ द्वौ च कर्णकौ ।
लोचने कज्जलेनाऽपि त्वञ्जयामासुरेव ह ॥४०॥
ललाटं कैसरेणाऽपि चन्दनेन सुशोभितम् ।
देहं च चन्दनेनापि चक्रुः सुगन्धिसंभृतम् ॥४१॥

गन्धसारैस्तथा देहं सुगन्धाढ्यं व्यधुश्च ताः ।
केशान् प्रसाधयामासुस्तैलसारेण गन्धिना ॥४२॥
कबरीं च पचक्रुस्ताः शोभनामुज्ज्वलां शुभाम् ।
धम्मिलं बन्धयामासुः स्थलपद्मस्रगन्वितम् ॥४३॥

सुकुन्दकलिकाहारयुक्तं च परितस्तथा ।
मालतीपुष्पसंयुक्तं गुम्फितं चित्रतन्तुभिः ॥४४॥
प्रान्ते रम्याऽम्बरखण्डं कौशेयं चित्रशोभितम् ।
पारिजातप्रसूनानां शेखरेण विराजितम् ॥४५॥
सौवर्णमणिमालाभिर्गोलायितं शुभास्पदम् ।
चन्द्रकान्तमणिं तत्र न्यधुः प्रकाशहेतवे ॥४६॥
सूर्यकान्तं ब्रह्मरन्ध्रस्थले न्यधुश्च तैजसम् ।
स्त्रीयोग्यं सुमुकुटं ता न्यधुश्च मस्तकोपरि ॥४७॥
मणिहीरकरत्नाढ्यं सौवर्णं रंगरंगितम् ।
शेखरास्तत्र लम्बन्ते मणिमौक्तिकपुष्पजाः ॥४८॥
तन्तिका स्वर्णपाराणां बहुरत्नादिगुम्फिता ।
भाले ता धारयामासुः कारयामासुरेव च ॥४९॥
मध्ये सुचन्द्रिकाबिन्द्रीं काश्मीरेण द्रवेण ह ।
साऽक्षतां च तथा विशालके भाले च कैसरीः ॥५०॥
रेखा वक्रा व्यधुश्चोर्ध्वाः कोणवक्राः शुभास्तदा ।
मध्ये मध्ये चतुष्कयां च बिन्द्रीश्चक्रुश्च कौंकुमीः ॥५१॥
चाकचक्यकरं चूर्णं मनाग् विकीरितं व्यधुः ।
पुष्पहारान् निदधुश्च दानयोग्यान् हि मंगले ॥५२॥
सौवर्णां मौक्तिकाढ्यां च नथिकां सुमनोहराम् ।
धारयामासुरेवापि स्वल्पां च श्रेष्ठवालिकाम् ॥५३॥

चिबुकं हीरकाढ्यं च सौवर्णं प्रददुस्तथा ।
बिन्द्रीं गाले ददुश्चापि कर्णयोः कुण्डले ददुः ॥५४॥
ईरिकेऽपि च सौवर्णे हीरकादिसमन्विते ।
ददुश्च कर्णयोः पञ्चसरिके कर्णशृंखले ॥५५॥
सूक्ष्महीरकसन्नद्धे फुल्लिके पत्रिके ददुः ।
सौवर्णीं कण्ठहठिकां मणिनद्धां ददुस्तदा ॥५६॥

कौशेयीं कुचबन्धीं च कौशेयकीं च कंचुकीम् ।
स्वर्णबुट्टालिशोभाढ्यां स्वर्णतारालिसंभृताम् ॥५७॥
दिव्यहीरकरत्नादिगुम्फितां हीरग्रन्थिताम् ।
केशाऽचलीं निदधुश्च स्कन्धयोश्चिपिकान्विताम् ॥५८॥
सौवर्णरूप्यकजन्यां शलाकां बन्धिकां ददुः ।
और्णीं सौवर्णताराढ्यां कार्पटिकां ददुस्तथा ॥५९॥
रञ्जितां रक्तशोभाढ्यां कुचयोः कुंकुमं ददुः ।
शाटीं स्वर्णमयीं रम्यां सूक्ष्महीरकसंभृताम् ॥६०॥
सूक्ष्मतारमयीं मृद्वीं धारयामासुरुत्सुकाः ।
कंसदोरकबन्धाद्यैर्बन्धयामासुरम्बरम् ॥६१॥
चिप्पिटैः सूक्ष्मरूपाभिः शलाकाभिस्तथाऽऽन्तरम् ।
भुजान्तरे तथा वक्षोऽन्तरे कट्यन्तरेऽम्बरम् ॥६२॥
बन्धयामासुरेवाऽपि ददुश्चान्तरघर्घरीम् ।
महतीं घर्घरीं चापि सौवर्णतारगुम्फिताम् ॥६३॥
हरिकैः स्वल्पकाऽऽदर्शैर्मणिभिः खचितां शुभाम् ।
रक्तवर्णां चित्रयुक्तां प्रान्तपिशंगिनीं तथा ॥६४॥
कट्यां कैसरपट्टयाढ्यां संहितहीरनाडिकाम् ।
पादयोश्च ददुः पत्राणिके मखमलात्मिके ॥६५॥
कोमले स्थलपद्माभे सौवर्णरत्नगुम्फिते ।
अंगुलीयकमेवाऽपि प्रत्यंगुलं सश्रृंखलम् ॥६६॥
पंचांगुलप्रपर्याप्तं सौवर्णं च ददुस्तदा ।
पद्मजयोश्चोर्ध्वभागे सौवर्णां कच्छपीं ददुः ॥६७॥
ऊर्मिका अपि निदधुर्हीरकादिसमन्विताः ।
पद्मकं हस्तके चापि नुपूरे पत्प्रकोष्ठयोः ॥६८॥
सौवर्णे सिंहशोभाढ्ये किंकिणीजालनादिते ।
काम्बिके च तथा कटकिके माणिक्यसंयुते ॥६९॥
मञ्जीरके च सौवर्णे ददुः प्रकोष्ठयोः श्रियाः ।
रशनां चापि सौवर्णीं कट्यां ददुः समौक्तिकीम् ॥७०॥
कटके हीरकनद्धे व्यंगिडिकाः सुवर्णजाः ।
रत्नहीरकसन्नद्धाः श्रृंगले तु प्रकोष्ठयोः ॥७१॥
पद्मकाढ्ये कंकणे च वलयानि ददुस्तथा ।
भुजबन्धौ कानकौ च मंगले दलके ददुः ॥७२॥
सौवर्णे शुभकटके ददुश्च श्रृंखलेऽपि च ।
स्वस्तिकं कानकं चापि चन्द्रकं भुजयोर्ददुः ॥७३॥
कण्ठे हेममयान् हारान् रत्नहीरकशोभितान् ।
मुद्रमालां यवमालां जम्बूमालां ददुस्तथा ॥७४॥
प्लक्षपत्रं कानकं च कण्ठीं मौक्तिकमालिकाम् ।
सप्तश्रृंखलिकाहारं सूक्ष्मपत्रीं शुभां न्यधुः ॥७५॥
चतुष्किकादलीं मालां बद्रीमालां च माषिकाम् ।
हीरकैः संभृतां श्रेष्ठां कोटिमूल्यां च तैजसीम् ॥७६॥
सर्वशोभाकरीं नेत्रचौरीं पट्टिककञ्चुकीम् ।
धारयामासुरेवाऽपि नक्तकं करयोर्ददुः ॥७७॥
इति श्रृंगारिता कन्या लक्ष्मीर्लक्ष्मीसखीजनैः ।
सर्वाः कन्याः कोटिशोऽपि श्रृंगारितास्तदाऽभवन् ॥७८॥
उद्वहिष्यति नः कृष्णो सुयोगे कृष्णयोरिति ।
अथ वाद्यान्यवाद्यन्त सर्वाणि वसुयात्रिणाम् ॥७९॥
आप्ते शुभे क्षणे श्रेष्ठे नक्षत्रे मंगलावहे ।
सर्वसौभाग्यदे योगे माहेन्द्रे सम्पदां प्रदे ॥८०॥
महानन्दप्रदे श्रेष्ठोदये सिद्धिसमन्विते ।
लग्नेशान्वितसल्लग्ने प्रोद्वाहोचितशोभने ॥८१॥
सद्ग्रहाणां दृष्टिशुद्धे चाऽसतां दृष्टिवर्जिते ।
चन्द्रताराशुद्धियुक्ते वेधदोषादिवर्जिते ॥८२॥
शलाकादिकहीने च सदा सुखप्रदे क्षणे ।
दम्पत्योः सुखयोग्ये च समये बालकृष्णकः ॥८३॥
आययौ शिवदेवस्य कैलासमण्डपाऽङ्गणम् ।
बृहस्पतिना विप्रैश्चर्षिभिर्निरर्थितो हरिः ॥८४॥
लोमशाद्यैश्च सहितो ज्ञातिभिर्बान्धवैः सह ।
पित्रा मात्रा नृपैः सार्धं सम्बन्धिभिः सुहृज्जनैः ॥८५॥
सुरैश्च पितृभिः सार्धं साधुभिर्यतिभिः सह ।
पार्षदैश्चेश्वरैर्मुक्तैर्भक्तैश्चापि पुरोहितैः ॥८६॥
सृष्टिपालैः समस्तैश्च वेदीमण्डपमाययौ ।
रंभास्तम्भसहस्रैश्च स्वर्णपट्टविभूषितैः ॥८७॥
चम्पकाऽशोकचूतानां चन्दनानां च तोरणैः ।
सर्वरूपाढ्यपुष्पाणां मालाभिः सुपरिष्कृतम् ॥८८॥
मंगलस्वर्णकलशैः फलपल्लवशोभितैः ।
कस्तूरिकाऽक्षतैर्लाजादूर्वाकुंकुमपूजितैः ॥८९॥
पुष्पैः पर्णैश्चन्दनैश्च रत्नैर्वस्त्रैः समन्वितैः ।
परितो भ्राजमानैश्च मण्डितं सुमनोहरम् ॥९०॥
शंभोर्वैं पक्षगैः सर्वैर्महीमानैश्च वेष्टितम् ।
पार्षदैश्चाऽवतारैश्च संकर्षणपुरोगमैः ॥९१॥
ईश्वरैर्देवताभिश्चर्षिभिर्नृपैर्दिगीश्वरैः ।
कैलासवासिभिश्चापि सृष्टित्रयनिवासिभिः ॥९२॥
पुरोहितैर्ब्राह्मणैश्च यतिभिश्चाऽवधूतकैः ।
गणैश्च योगिनीभिश्च कन्यापितृभिरित्यपि ॥९३॥
रत्नेन्द्रसारनिर्माणवेदीयुक्तं शुभास्पदम् ।
रंगैश्चान्दनचूर्णैश्च कस्तूरीकुंकुमादिभिः ॥९४॥

सुगन्धिसारकैश्चापि सुगन्धितं सुरंगितम् ।
नानामणिप्रभाव्याप्तं धूपसुगन्धवासितम् ॥९५॥
चित्रशोभान्वितं रम्यं गान्धर्वीगीतिकायुतम् ।
संगीतनादितं विद्याधरीनृत्यसुशोभितम् ॥९६॥
परितो युवतीभिश्च वीक्षितं मंगलायनम् ।
मांगलिकं घटं धृत्वा गुरुणा च पुरोधसा ॥९७॥
शोभितं कल्पवल्ल्यादिराजितं दानमण्डपम् ।
कुशहस्तेन भूपेन दानार्थं चोपतिष्ठता ॥९८॥
दानवस्तुसहितेन शोभितं यज्ञमण्डपम् ।
समन्तादूर्ध्वभागेषु कोट्यब्जकन्यकादिभिः ॥९९॥
प्रोद्वाह्याभिर्भूषिताभिः पित्रादिकयुतादिभिः ।
कृताधिवासं रम्यं तं मण्डपं बालकृष्णकः ॥१००॥
मुख्यद्वारं त्वाजगाम पूजितो वर्धितो द्विजैः ।
शिवेश्वरस्तत्र चाग्रे पूजनार्थं समाययौ ॥१०१॥
बालकृष्णो हि भगवान् समयं प्राप्य सत्वरम् ।
सर्वा आज्ञापयामास कान्ता याः स्वस्य तास्तदा ॥१०२॥
मयाऽर्पितानि वस्त्राणि भूषाः शृंगारकाणि च ।
सर्वाण्युद्वाहयोग्यानि धृत्वाऽऽयान्तु सुमण्डपे ॥१०३॥
उद्वाहो भवतीनां वै कार्यो मया श्रिया सह ।
श्रुत्वा सर्वाः सज्जीभूयाऽऽययुर्त्वर्ध्याऽपि मण्डपे ॥१०४॥
स्वस्वपित्रादिसहिता दानार्थे समुपस्थिताः ।
शिवस्वामिकृते नैजकन्यार्थे तु विधौ तदा ॥१०५॥
सर्वासां विधिरेवास्मिन् विधौ तत्राऽप्यवर्तत ।
शृण्वाश्चर्यं राधिके कोट्यर्बुदाब्जाधियोषिताम् ॥१०६॥
कृते कृष्णो यच्चमत्कारादि तत्र व्यदर्शयत् ।
शिवेश्वरः कर्मकाण्डं प्रावर्तयद्धि सर्वतः ॥१०७॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने बालकृष्णस्य गोपुरे पूजनं दर्शनं, तदग्रे नर्तनं चास्फोटनं, विश्रान्तिमन्दिरे विश्रमणं मधुपर्कदानं, सर्वकन्यकानां लक्ष्म्याश्च शृंगारः, देवस्य तुदानमण्डपमुख्यद्वारं प्रत्यागमनमित्यादिनिरूपणनामा द्वानवत्यधिकद्विशततमोऽध्यायः ॥ २९२ ॥

**श्रीकृष्ण उवाच—**

शिवेश्वरो महान् भक्तो महिमानं विदन् हरेः ।
राधिके धन्यभाग्यं स्वं मेने गृणन्निदं तदा ॥ १ ॥
अद्य मे सफलं जन्म त्वद्य मे सफलाः क्रियाः ।
अद्य मे सफलं सर्वं यद्गृहे पुरुषोत्तमः ॥ २ ॥
अद्य मे जीवनं जातं सर्वं सुप्रजीवितम् ।
यज्जातं जन्मकोटीनां कर्ममूललयान्वितम् ॥ ३ ॥
यत्पादपद्मं मुनयो ध्यायन्ति सततं हृदि ।
सर्वफलप्रदाता श्रीहरिर्मे प्रांगणेऽद्य वै ॥ ४ ॥
सृष्टित्रयं च मे त्वद्य प्रांगणे तीर्थकृत्तमम् ।
अहो कल्पान्तपर्यन्तं तीर्थीभूतं ममांगणम् ॥ ५ ॥
अनादिश्रीकृष्णनारायणः श्रीपरमेश्वरः ।
अदृश्यश्चक्षुषामद्य दृश्यो मे प्रांगणे हरिः ॥ ६ ॥
कर्मणां फलदं तं त्वां ज्योतीरूपं सनातनम् ।
अन्तःस्थितं परात्मानं मदात्मानं नमाम्यहम् ॥ ७ ॥
एवं स्तुत्वा राधिके च शिवस्तुतं स्मरन् हरिम् ।
पाद्यं पद्मार्चिते पादपद्मे तत्र मुदा ददौ ॥ ८ ॥
अर्घ्यं च प्रददौ तत्र दूर्वापुष्पफलान्वितम् ।
मधुपर्कं मनाक् चापि ददौ भाले सुचन्द्रकम् ॥ ९ ॥
कुंकुमाक्षतकस्तूरीकृतं च तिलकं ददौ ।
चान्दनं च सुगन्धं च गन्धसारं ददौ तनौ ॥१०॥
पारिजातस्य मालां च स्वप्रियां तद् गले ददौ ।
रत्नहारं गले चापि प्रकोष्ठे मणिभूषणम् ॥११॥
वह्निशुद्धांशुकेदिव्ये मुकुटं भास्वरं ददौ ।
कुण्डले कटके चापि शृंगलां चोर्मिकादिकम् ॥१२॥
रत्नचामरयुगलं छत्रं सौवर्णमित्यपि ।
स्वहीरकहारांश्च कौस्तुभस्रग्विभूषणम् ॥१३॥
कोटिकोटिसुवर्णानि न्यधाद् कृष्णस्य पादयोः ।
धूपं रत्नप्रदीपं च तथा नीराजनं ददौ ॥१४॥
स्वर्णसिंहासनं रम्यं ददौ दाने हरेस्तु वै ।
सप्ततीर्थोदकं चापि मधुपर्कं पुनस्तथा ॥१५॥
आचमनं च ताम्बूलं जलपानं सुगन्धि च ।
शय्यां श्रेष्ठतमां चापि भूषणानि ददौ तदा ॥१६॥
पुष्पांजलिं ददौ चापि ननाम पादयोस्तथा ।
गिरिजा चापि तं पुत्र्याः कान्तं पुपूज चादरात् ॥१७॥
पादप्रक्षालनं चक्रे लाजाभिः समवर्धयत् ।
चन्दनाद्यैः पुपूजापि स्वर्णमुद्रादिकं ददौ ॥१८॥
गृहोपकरणान्येवोत्तारयामास मस्तकात् ।
कोशस्य कुञ्चिकां चापि लेखिनीं तरवारिकाम् ॥१९॥
मूशलं तर्कटीं चापि मार्जनीं वेल्लणं तथा ।
दर्वीं च शृंखलां चापि कीलकं यष्टिकां तथा ॥२०॥
त्रिशूलं चापि शंखं च चक्रं गदां च चर्म च ।
रज्जुं कंगतिकां चापि दर्पणं कलशं तथा ॥२१॥

स्थालीं सौभाग्यवटिकां दूर्वां काण्डं च वंशिकाम् ।
फलं चान्नं जलं शाकं भूषणं समिधं तथा ॥२२॥
एवमादीनि सर्वाण्युत्तारयामास मस्तकात् ।
कृष्णस्यैव ततो नीराजनं कृत्वा च मस्तकात् ॥२३॥
अञ्जलिना दुःखहानिं चिन्तयामास पञ्चषः ।
ततः प्रवेशयामास द्वारं तत्र च भूतले ॥२४॥
ब्रह्माण्डसम्पूटकं च कपालद्वयनिर्मितम् ।
मायातन्तुप्रबद्धं च स्थापितं वीक्ष्य माधवः ॥२५॥
न्यस्योपरि स्वपादं तद् बभञ्ज च ततो हरिः ।
विघ्ननाशं परं कृत्वा स्वर्णसिंहासनं वरम् ॥२६॥
कुण्डस्य सन्निधौ न्यस्तं जगृहे त्वासनं हि तत् ।
उपाविवेश तत्रैव ननाम यूपमित्यपि ॥२७॥
कलशं मातृकाश्चापि गणेशं देवतास्तथा ।
मण्डपं च तथा कुण्डं गुरुं ननाम सर्वतः ॥२८॥
शिवेश्वरो द्विजाश्चैनं वर्धयामासुरक्षतैः ।
एवं वै वरणं प्राप्तः शुशुभे भगवान् हरिः ॥२९॥
एतस्मिन्नन्तरे लक्ष्मीःसुखदा शिवपुत्रिका ।
आजगाम सखीभिश्च मण्डपे वेदिकाऽन्तिकम् ॥३०॥
अवाद्यन्त सुवाद्यानि चाऽगीयन्त च गीतिकाः ।
वेदमन्त्रध्वनयश्चाऽजायन्त वेदवेदिनाम् ॥३१॥
लक्ष्मीस्तत्राऽऽगता रम्या मात्रा सखीभिरन्विता ।
भक्त्या पद्भ्यां चागता सद्रत्नालंकारभूषिता ॥३२॥
वह्निशुद्धांशुकाधाना कबरीभारभूषिता ।
सन्दृश्य दर्पणं साध्वी चन्दनादिसुगन्धिता ॥३३॥
कस्तूरीबिन्दुभिर्युक्ता भाले सिन्दूरबिन्दुना ।
तप्तकांचनवर्णाभा तेजःपरिधिशोभना ॥३४॥
यावद्भूषाधारिणी च पूजामालादिकान्विता ।
भ्रात्रादिभिः समायुक्ता त्वाययौ वरसन्निधौ ॥३५॥
ददृशुस्तां चन्द्रतुल्यां महीमानास्तु कोटिशः ।
राधा वै सर्वसृष्टीनां नारीषु चोज्ज्वलोत्तमा ॥३६॥
ततोऽपि चोज्ज्वलां वीक्ष्य प्रशशंसुः पुनः पुनः ।
पतिव्रता तु सा लक्ष्मीः प्रणम्य मण्डपं तथा ॥३७॥
प्रणम्य स्वपतिं देवान् सप्तप्रदक्षिणा व्यधात् ।
सिषेच शीततोयेन स्निग्धचन्दनपल्लवैः ॥३८॥
सिषेच तां बालकृष्णः कान्तां लक्ष्मीं सुसस्मिताम् ।
ददर्श कान्तः कान्तां तां कान्ता कान्तं च तत्क्षणे ॥३९॥
तदाऽऽश्चर्यं परं जातं राधिके ! शृणु सर्वथा ।
लक्ष्मीं सिषेच भगवान् यदा तदाऽभिषेचनम् ॥४०॥
प्रोद्वाह्यानां कन्यकानां सर्वासां मस्तकोपरि ।
सर्वतश्चापतत् सर्वा हर्षिता वै तदाऽभवन् ॥४१॥
ततो लक्ष्मीर्निषसादाऽऽसने कृष्णं प्रणम्य च ।
वामे स्थित्वा देवपूजां चकार स्वामिनाऽन्विता ॥४२॥
बृहस्पतिर्लोमशश्च कारयामासतुश्च तौ ।
देशकालौ प्रसंकीर्त्य कन्यादानस्य सिद्धये ॥४३॥
चतुर्थ्यां मार्गशीर्षस्य शुक्ले गणेशपूजनम् ।
कारयामासतुश्चापि श्रीविष्णोः पूजनं तथा ॥४४॥
रुद्रस्य पूजनं चापि मातृकापूजनं तथा ।
मण्डपस्य च देवानां योगिनीनां च पूजनम् ॥४५॥
ग्रहाणां दिक्प्रपालनां वसूनां चाश्विनोस्तथा ।
आदित्यानां पूजनं चर्षीणां पितृदिवौकसाम् ॥४६॥
पूजनं ब्रह्मणश्चापीश्वराणां पूजनं तथा ।
सर्वेश्वराणां पूजां च विघ्नानां पूजनं तथा ॥४७॥
कन्यारक्षाकराणां च रक्षसां पूजनं तथा ।
वह्नीनां कुण्डदेवानां शाखातोरणवासिनाम् ॥४८॥
द्वाःस्थानां मण्डपस्थानां माणिक्यस्तंभवासिनाम् ।
कारयामासतुश्चापि लक्ष्म्याश्च पूजनं तथा ॥४९॥
पार्वत्याः पूजनं चापि हनूमतश्च पूजनम् ।
दुर्गायाः पूजनं श्राद्धं कारयामासतुस्तथा ॥५०॥
यथा यथा कृता पूजा तां प्रपश्यन्ति कन्यकाः ।
तथा तथा प्रकुर्वन्ति सर्वा वै कृष्णकन्यकाः ॥५१॥
इत्येवं पूजनं कृत्वा वह्निं कुण्डगतं तदा ।
आहवनीयं सम्पूज्य कन्या चोत्थाय पुष्पजाम् ॥५२॥
कण्ठमालां स्वकान्तस्य गले न्यधात् सुविस्तृताम् ।
पादयोः प्रणनामाऽपि ललाटे कुंकुमाऽक्षतैः ॥५३॥
तिलकं चन्द्रकं चापि चकार कुसुमांजलिम् ।
तवाऽस्मीति समुवाच निषसाद निजासने ॥५४॥
कृष्णश्चास्यै गले मालां ददौ साक्षतकुंकुमम् ।
आर्द्रं धृत्वा च भालेऽस्याश्चन्द्रकं प्रचकार ह ॥५५॥
कबर्यां च ददावस्याः सिन्दूरकं च मंगलम् ।
पुष्पांजलिं ददौ चापि गुलालमुष्टिकां ददौ ॥५६॥
साऽपि गुलालप्रसृतिं ददौ कृष्णाय मंगलाम् ।
ततः पुरोहितौ दानमन्त्रान् जगदतुर्मुदा ॥५७॥
सर्वा प्रदानकन्याश्च तथैवाऽनुप्रचक्रिरे ।
कामफले द्वयोर्हस्तप्रकोष्ठयोस्तदा गुरू ॥५८॥
बबन्धतुस्तथा वस्त्रप्रान्तग्रन्थिं बबन्धतुः ।
कण्ठमालां द्वयोः कण्ठे त्वेकां दीर्घां प्रचक्रतुः ॥५९॥

राधिके च तदा सर्वाः कन्याः कोट्यर्बुदानि तु ।
विना कान्तं निजाग्रे च चिन्तामापुः क्षणं यदा ॥६०॥
तदा श्रीबालकृष्णोऽसौ चमत्कारमदर्शयत् ।
कोटिरूपधरो जातः कोटिकोट्यधिमालिकः ॥६१॥
यावत्यः कन्यकाः पूर्वमुपार्जिताश्च ताः प्रति ।
प्रतिकन्यं प्रतिकान्तो बभूवाऽब्जस्वरूपवान् ॥६२॥
या या यत्र स्थिताश्चासन् तत्र तत्र विधानतः ।
यथा लक्ष्म्या दक्षपार्श्वे सर्वासां पार्श्वकेऽभवत् ॥६३॥
कण्ठमालां स जग्राह ददौ सिन्दूरकादिकम् ।
प्रकोष्ठे बन्धनं चापि कामफलस्य चन्द्रकम् ॥६४॥
सर्वं वै लब्धवाँस्तत्र पश्यतां सर्वदेहिनाम् ।
आश्चर्यं चाऽपरं तत्र जातं शृण्वत्र राधिके ॥६५॥
बृहस्पतिर्लोमशश्च तत्राऽब्जरूपिणौ तदा ।
अभवतां बालकृष्णेच्छया मण्डपकुण्डकाः ॥६६॥
अब्जादिरूपा अभवन् देवताश्चकितास्तदा ।
कन्यानां पितरश्चापि महाश्चर्यमगुस्तथा ॥६७॥
शिवेशः पार्वती वीक्ष्य श्रीकृष्णस्य परेशताम् ।
महीमानास्तथा वीक्ष्यैश्वर्यं श्रीपरमात्मनः ॥६८॥
तुष्टाः प्रसन्नाः सञ्जाता ववन्दिरे मुहुर्मुहुः ।
मुग्धाश्च ददृशुः सर्वे कन्यादानविधिं तदा ॥६९॥
कन्यानां पितरस्तत्र तिष्ठन्ति दानहेतवे ।
यासां तु पितरो नैव सन्ति ये मरणं गताः ॥७०॥
बालकृष्णस्मृतास्तत्राऽऽयातास्तूर्णं सुमूर्तिकाः ।
अदृश्यन्त दानकाले सर्वे मुदान्विताः शुभाः ॥७१॥
लोमशोऽपि महाश्चर्यं प्राप्तः प्राप्तो बृहस्पतिः ।
नैतादृशश्चमत्कारो भूतो वा च भविष्यति ॥७२॥
प्रकाशं पश्यतां सर्वलोकानामिदमास ह ।
अथैवं कन्यकानां वै कान्तपार्श्वसमागमे ॥७३॥
पितृभिर्दानविधिना दीयन्ते कन्यका निजाः ।
लज्जया नम्रवदना भासुरास्तेजसा शुभाः ॥७४॥
स्वस्वकन्या ददुः सर्वे परिपूर्णतमाय ह ।
बालकृष्णस्य वै हस्ते दक्षे कन्याकरांस्तदा ॥७५॥
ददुः सर्वे जनकाश्च शिवेशं प्रददावपि ।
प्रददुः सम्प्रदानेन वेदमन्त्रेण राधिके ॥७६॥
अनादिश्रीकृष्णनारायणाय परमात्मने ।
बालकृष्णाय ऋषये दीयते कन्यका मया ॥७७॥
इत्येवं ते समुच्चार्य धृत्वा हस्ते जलं तदा ।
मुमुचुश्चाग्निसाक्ष्ये वै भूमौ गणेशसन्निधौ ॥७८॥
बालकृष्णस्तदा पित्राज्ञया स्वस्तीत्युवाच ह ।
जग्राह लक्ष्मीं श्रीकृष्णनारायणो हि कन्यकाः ॥७९॥
अर्बुदाब्जास्तदा त्वेकक्षणे तावत्स्वरूपधृक् ।
दृष्ट्वैवं सुमहैश्वर्यं तुष्टाव शिवसत्तमः ॥८०॥
शिवभावं समासाद्य दिव्यरूपं विधाय च ।
धृत्वा स्वडमरूं हस्ते निनादं च ननर्त च ॥८१॥
यो हि सर्वजगत्साक्षी सृष्टिचक्रप्रवर्तकः ।
परमेशोऽक्षरे धाम्नि राजमानस्त्वमेव सः ॥८२॥
मम गृहे समायातः कोटिकन्यासुसिद्धये ।
धन्यं चाऽद्य गृहं मेऽत्र यशो मे शाश्वतस्तथा ॥८३॥
यद्गृहेऽर्बुदकोट्यश्च कन्यकाः परमेशिने ।
अर्प्यन्ते दिव्यग्रन्थ्या वै धन्योऽयं शिवसत्तमः ॥८४॥
त्वामेकमीशेश्वरपालपालं परेश्वराख्यं पुरुषं पुराणम् ।
नमामि कान्तं मम कन्यकायाः कान्तं तथा चाऽर्बुदकन्यकानाम् ८५
अणोरणीयान्महतो महीयान् हिरण्यवर्णो जगदन्तरात्मा ।
समस्तकान्ताहृदि सन्निविष्टश्चानन्तरूपं प्रणमामि तं त्वाम् ॥८६॥
ओंकारनामाऽक्षरमुक्तिबीजं स्वयंप्रभस्त्वं पुरुषोत्तमोऽसि ।
समस्तनाथोऽच्युतमस्तकस्त्वं सनातनस्त्वं पुरुषोत्तमोऽसि॥८७॥
त्वामेव वेद्म्यद्य पुरातनं तमादित्यवर्णं तमसः परस्तात् ।
मन्मोक्षणार्थं समुपागतोऽसि तवैव कान्ता हि पुरातनीयम्॥८८॥
भक्तोऽहमेवाऽस्मि पुरातनस्त्वं संगृह्य सर्वे ननु तारिता वै ।
अनन्तरूपं वररूपजन्मप्रदं सुपूज्यं शरणं प्रपद्ये ॥८९॥
इत्युक्त्वा राधिके श्रीमद्बालकृष्णाय शंकरः ।
यौतकं प्रददौ सर्वे राजानः प्रददुस्तदा ॥९०॥
सुवर्णानां कोटिकं च विमानं सूर्यभास्वरम् ।
कल्पलतां शिरश्छत्रं चामरे रत्नदण्डके ॥९१॥
ताम्बूलार्थं स्वर्णपात्रं तथा चाऽक्षयपात्रकम् ।
कल्पघटं तथा स्वर्णपादुके मणिरत्नकम् ॥९२॥
कामदुधानां धेनूनां सहस्रकं सवत्सिकम् ।
वारणानां सहस्रं च तुरगाणां च लक्षकम् ॥९३॥
गृहोपकरणानां च शय्यादीनां समस्तकम् ।
हरये प्रददौ शंभुर्बालकृष्णाय हस्तगम् ॥९४॥
राजानोऽपि ददुस्तत्र शय्या रतिप्रदाः शुभाः ।
कोशाँश्च विविधांश्चापि स्वर्णहीरकमौक्तिकम् ॥९५॥
हरेःपक्षास्तदा चाऽपि ददुः कृष्णाय सर्वथा ।
हस्तग्रहं धनं स्वर्णं रूप्यं सिंहासनादिकम् ॥९६॥

वासुदेवो ददौ दिव्यं मुकुटं च गजासनम् ।
महाविष्णुर्ददौ तत्र व्योमयानं विमानकम् ॥९७॥
वैराजः प्रददौ स्वर्णकुण्डले स्वर्णछत्रकम् ।
ब्रह्मा ददौ कल्पघटं विष्णुश्चक्रं ददौ तदा ॥९८॥
पितरः प्रददौ स्वर्णपात्राणि विविधानि च ।
सुरा ददुश्चामृतानां कोशान् दिव्याम्बराणि च ॥९९॥
दिक्पाला दिव्यसौवर्णनाणकानि ददुस्तदा ।
मुक्ताहारान् सागराश्च मौक्तिकानां स्रजस्तथा ॥१००॥
वृक्षा रसान् ददुस्तत्र राजानो मणिरत्नकम् ।
गोवाजिगजवृषभाऽऽनन्त्यं ददुस्तदा मुदा ॥१०१॥
दासीनां चापि दासानां कोटिकं च तदा ददुः ।
सृष्टित्रयेऽपि यच्छ्रेष्ठं यस्य यस्याऽभवत्तदा ॥१०२॥
ददुर्हस्तग्रहं सर्वे वरद्रव्यं हि दानकम् ।
कन्यापक्षगताश्चापि ददुस्तदा च यौतकम् ॥१०३॥
श्रीकृष्णः प्रददौ गोपीसहस्रं मणिशोभितम् ।
हीरहारान् रत्नमणिस्रजो भूषा ददौ तथा ॥१०४॥
मुकुटं च सतीयोग्यं ददौ संकर्षणस्तथा ।
रत्नहारान् ददौ सदाशिवः कालोऽम्बरं ददौ ॥१०५॥
दिव्यां शाटीं जराहीनां कंचुकीं नवयौवनाम् ।
शाश्वतीं प्रददौ चापि रुद्रा ददुः स्रजस्तथा ॥१०६॥
कानकीर्दिव्यमालाश्च शृंगाराभूषणानि च ।
असंख्यानि ददू रुद्राः शंकरश्छत्रिकां ददौ ॥१०७॥
सिंहासनं ददौ देवी कुबेरः कोटिकानकम् ।
द्रव्यं ददौ तदा लक्ष्म्यै लोकपाला धनं ददुः ॥१०८॥
स्वर्गीयाश्च तलवासाः शेषाद्याश्च मणीन् ददुः ।
भूतप्रेतगणाः सर्वेऽम्बरभूषास्तदा ददुः ॥१०९॥
नरा नार्यो लोकरीत्या देवरीत्या यथायथम् ।
कन्याभ्यश्च स्वामिनेऽपि ददुर्दानानि भूरिशः ॥११०॥
परब्रह्म स्वयं योऽस्ति सर्वं यस्याऽस्ति रूपवत् ।
तेनाऽद्य स्वीकृतं दानं मण्डपे न ममौ हि तत् ॥१११॥
एवं दानोत्तरं कन्यापितरश्च तदा करे ।
जलमादाय वै प्रोचुर्गोत्रनामादि वै तदा ॥११२॥
परब्रह्मप्रगोत्राय बालकृष्णाय शार्ङ्गिणे ।
कृष्णाऽक्षरनरायणप्रवराय महात्मने ॥११३॥
सामवेदिप्रविप्राय पत्नीव्रतीयशाखिने ।
श्रीमद्गोपालबालाय वह्नेः साक्ष्ये स्वयं शिवः ॥११४॥
श्रीकृष्णगोत्रकश्चाऽहं सदाशिवप्रशाखकः ।
रुद्रकालयमाख्यत्रिप्रवरः ऋक्प्रवेदवान् ॥११५॥
दत्तवान् मम कन्यां श्रीं लक्ष्मीं लक्ष्मीस्वरूपिणीम् ।
तेन दानेन भगवान् प्रीयतां पुरुषोत्तमः ॥११६॥
इत्युक्त्वा च जलं भूमौ मुमोच पुनरेव च ।
गृहीतवानहं चेत्युवाच तत्र हरिः पुनः ॥११७॥
एवं सर्वे जनकाश्च तथोचुर्मुमुचुर्जलम् ।
ततः पुरोहितौ वस्त्रदिव्यग्रन्थिं बबन्धतुः ॥११८॥
वह्नेः प्रदक्षिणं चतुर्वारं वै प्रभुकन्ययोः ।
कारयामासतुस्तत्र मालिकागलयोर्गुरू ॥११९॥
वह्निं नत्वा युगलानि निषेदुः स्वासनेषु वै ।
वह्नौ तत्र शुभे गार्हपत्ये च हवनं व्यधुः ॥१२०॥
घृतेन च तिलैश्चापि शर्करया च सत्फलैः ।
व्रीहिभिर्हव्यद्रव्यैश्च विविधैर्हवनं व्यधुः १२१॥
ततः प्रासादिकं परस्परं च मधुपर्ककम् ।
कृष्णकान्तेर्जगृहतुः कवलं च मुखार्पितम् ॥१२२॥
परस्परं ततो हस्ताञ्जलिं स्पृष्ट्वा च नेमतुः ।
प्रकोष्ठस्वेदभावोऽभूद् श्रियास्तत्र तदा द्रुतम् ॥१२३॥
रोम्णां पुलकभावश्च कृष्णस्यापि तदाऽभवत् ।
सर्वाः कन्या कण्ठमालायुताः वह्निप्रदक्षिणम् ॥१२४॥
चक्रुश्च जगृहुर्मुखकवलं हरयोऽपि च ।
हवनादि तथैव ताः समकालं व्यधुश्च ते ॥१२५॥
राधिके ! राधिका लक्ष्मीः श्रीः रमा माणिकी तथा ।
पद्मावतीति षट्सत्यः कन्यकाश्च प्रदक्षिणम् ॥१२६॥
सहैव वह्नेश्चकुस्ता कृष्णेन सह मण्डपे ।
हेमन्तेन प्रदत्तेऽत्र रमा पद्मावती ह्युभे ॥१२७॥
नारायणेन संदत्ताश्चान्याश्च हरयेऽपि ताः ।
सहैव वह्नेश्चकुस्ताः स्वामिनाऽग्निप्रदक्षिणाम् ॥१२८॥
अन्याः समस्ताः कान्ताश्च चक्रुर्वह्निप्रदक्षिणाम् ।
कान्तेन साकं मुमुदुर्विधिं वीक्ष्यातिमोददम् ॥१२९॥
चत्वारिंशच्चाधिशतं कन्यका धामवासिकाः ।
सह प्रदक्षिणाश्चक्रुः कवलं हरये ददुः ॥१३०॥
तथा सर्वा ब्रह्मकन्याश्चेशकन्यास्तथाऽपराः ।
राजकन्या लोककन्याः प्रकीर्णकाः प्रदक्षिणाः ॥१३१॥
प्रचक्रिरे च कवलं मिथो ददुर्वरं निजाम् ।
वरस्य च वधूटीनां कवलग्रासतस्त्वनु ॥१३२॥

अंगुलीयकरमणं रंगपात्रजलेऽभवत् ।
तत्र राधे ! कृष्णपत्नीर्लग्निताः श्रृणु मत् त्विह ॥१३३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने शिवेश्वरकृतं कृष्णपूजनं, पार्वतीदेवीकृतं गृहोपकरणोत्तारणे, कृष्णस्य मण्डपासने निषीदनं, कन्यायाः कन्यकानां चागमः कृष्णपूजा देवपूजा, कामफलबन्धनं, कन्यादानम्, हस्तग्रहे दानानि, कोट्यर्बुदाब्जकन्याकृते कृष्णस्य तावद्रूपधारित्वं, सर्वकन्याकरग्रहः, सर्वकण्ठमालाधृतिः, सर्ववह्निप्रदक्षिणम्, गोत्रादिविधिनाऽर्पणं चेत्यादिनिरूपणनामा त्रिनवत्यधिकद्विशततमोऽध्यायः ॥ २९३ ॥

**श्रीराधिकोवाच—**

मे सर्वाः कथयाऽत्रैव काः काः परिणताः प्रियाः ।
यासां स्मरणमात्रेण मायातो मुच्यते जनः ॥ १ ॥

**श्रीकृष्ण उवाच—**

श्रृणु त्वं राधिके बालकृष्णेन सह वै तदा ।
यथा लक्ष्मीर्यथा षट्कं राधा लक्ष्मीश्च माणिकी ॥ २ ॥
रमा पद्मावती श्रीश्च चत्वारिंशद्युतं शतम् ।
ब्रह्मप्रिया मुख्यकन्या अशनाद्याः समर्पिताः ॥ ३ ॥
वह्निं प्रदक्षिणं चक्रुः पुष्पमालासमन्विताः ।
मेघनाद्यश्चतुर्दशसहस्राणि समर्पिताः ॥ ४ ॥
तथा षष्ठी मनसा च दीपावल्यश्च कन्यकाः ।
कोटिसंख्या अग्निं प्रदक्षिणं कृत्वा समर्पिताः ॥ ५ ॥
तलाजा त्वेकला कामधेन्वाख्याः कोटिसंख्यिकाः ।
आर्जन्त्यो वसुमत्याद्याः कोटिसंख्याः समर्पिताः ॥ ६ ॥
शांभवी क्रोधना कन्या धरापुत्र्यश्च गह्वराः ।
कोटिसंख्या धरया चार्पितास्तत्र मुदान्विताः ॥ ७ ॥
वेधःपुत्री सुची वनदेवीकन्याश्च लक्षकम् ।
वनदेव्याऽर्पिता वरमालायुक्ताः सुखान्विताः ॥ ८ ॥
दामन्यो राक्षसकन्या लक्षं दमनकाऽर्पिताः ।
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रगुतदाश्रिताः ॥ ९ ॥
षट्कन्याः कंकताल्यश्चाऽयुतं च कांकतालिकाः ।
कंकतालार्पिता वह्निं प्रदक्षिणं विधाय च ॥१०॥
पुष्पमालायुता बालकृष्णेन संनिजीकृताः ।
पितृकन्यालक्षकं चाऽर्यम्णा दत्ता निजीकृताः ॥११॥
जनपितृकन्यकाश्च विंशतिश्च निजीकृताः ।
पितृदास्यो दशसाहस्रं च तत्र निजीकृताः ॥१२॥
रासातल्यः पञ्चसाहस्रं कन्या दैत्यजास्तथा ।
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रगनिजीकृताः ॥१३॥
वसन्तकान्ताः कन्या वै षोडशाऽपि निजीकृताः ।
वसन्तेन तदा दत्ता वह्निं कृत्वा प्रदक्षिणम् ॥१४॥
सालमालीयदैत्यस्य पञ्चशतं च कन्यकाः ।
शतमातृयुता दैत्यार्पितास्तत्र निजीकृताः ॥१५॥
स्वस्तिकनागकन्याश्च विंशतिश्चाऽयुतं पराः ।
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रगनिजीकृताः ॥१६॥
शावदीनन्नृपकन्याः सहस्रं ससुमस्रजः ।
वह्निं प्रदक्षिणं कृत्वा नृपार्पिता निजीकृताः ॥१७॥
ऐन्द्रजालिककन्याश्च शंभुजाः शंभुनाऽर्पिताः ।
सहस्रं सपुष्पमाला वह्निसाक्ष्ये निजीकृताः ॥१८॥
सरस्वती, चतुर्दशविद्याश्च षष्टिकन्यकाः ।
ब्रह्मणा चार्पिता वह्निसाक्ष्ये स्रग्भिर्निजीकृताः ॥१९॥
भूगर्भीयाश्च लाक्ष्मण्यो द्वे सहस्रे हि कन्यकाः ।
लक्ष्मणेनाऽर्पिता वह्निसाक्ष्ये तत्र निजीकृताः ॥२०॥
वेधःकन्या द्वासप्ततिसहस्राणि तु नाडिकाः ।
वेधसा संप्रदत्ताश्च वह्निसाक्ष्ये निजीकृताः ॥२१॥
गान्धर्व्यस्त्रिशतं कन्या विश्वावसुसमर्पिताः ।
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रगनिजीकृताः ॥२२॥
जुम्मासेमलानृपकन्याः सहस्रं जुम्मलाऽर्पिताः ।
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रगनिजीकृताः ॥२३॥
सान्तपन्यश्च राक्षस्यः पञ्चसहस्रकन्यकाः ।
सान्तपनार्पिता वह्निसाक्ष्ये स्रग्भिर्निजीकृताः ॥२४॥
सौरत्यः शतमेवाग्निं प्रदक्षिणं विधाय च ।
सुरतर्ष्यर्पिताः कन्याः सपुष्पस्रङ्निजीकृताः ॥२५॥
महाबालेश्वर्य एव त्रिकन्या वह्निसाक्षिकाः ।
बलेश्वराऽर्पिताः पुष्पमालायुक्ता निजीकृताः ॥२६॥
ऐलवीलैककन्या च ईलविलाऽर्पिता तदा ।
वह्निसाक्ष्ये पुष्पमालायुता तत्र निजीकृता ॥२७॥
दक्षजवंगरभूपकन्याः शतं सुमस्रजः ।
प्रजाकन्यासहस्रं चोष्णालयस्य निजीकृताः ॥२८॥
अग्निं प्रदक्षिणं कृत्वा पुष्पमालासमन्विताः ।
प्राचीनदेशकन्याश्च नृपजाश्च प्रजोद्भवाः ॥२९॥
वह्निसाक्ष्ये तज्जनकैरर्पिताः कोटिसंख्यकाः ।
पिशंगराजदत्ताश्च वरस्रग्भिर्निजीकृताः ॥३०॥

सन्तारणद्विजकन्ये द्वे पुष्पमालिकायुते ।
सन्तारणाऽर्पिते वह्निसाक्ष्ये तत्र निजीकृते ॥३१॥
शिविदेवनृपकन्याः शतं शिव्यर्पितास्तदा ।
वह्निसाक्ष्ये पुष्पमालायुतास्तदा निजीकृताः ॥३२॥
थर्कूटस्थनृपकन्याः पञ्चाशद्वह्निसाक्षिकाः ।
थर्कूटस्थाऽर्पिता पुष्पस्रग्युक्ताः संनिजीकृताः ॥३३॥
वीरजारनृपकन्याः शतं वै वह्निसाक्षिकाः ।
वीरजारार्पिताः पुष्पमालायुक्ता निजीकृताः ॥३४॥
शक्त्यक्षिनृपकन्याश्च षष्टिश्च वह्निसाक्षिकाः ।
पिशाचिन्यः शतं कन्याः शक्त्यक्षिणा समर्पिताः ॥३५॥
वह्निं प्रदक्षिणं कृत्वा सपुष्पस्रङ्निजीकृताः ।
कालिमाशनृपकन्याः शतद्वयं नृपाऽर्पिताः ॥३६॥
वह्निसाक्ष्ये योगमालायुतास्तत्र निजीकृताः ।
उरलकेतुभूपस्य त्रिंशत्कन्या नृपाऽर्पिताः ॥३७॥
वह्निसाक्ष्ये योगमालायुतास्तत्र निजीकृताः ।
क्रथकक्ष्मापतेः कन्याः पञ्च वै वह्निसाक्षिकाः ॥३८॥
पित्राऽर्पिता योगमालायुक्तास्तत्र निजीकृताः ।
पृथुराजेन दत्ताः स्वकन्या विंशतिरग्निकम् ॥३९॥
प्रदक्षिणं विधायैव सयोगस्रङ्निजीकृताः ।
उष्ट्रालराजकन्याश्च दशोष्ट्रालेन चार्पिताः ॥४०॥
वह्निसाक्ष्ये पुष्पमालायुतास्तत्र निजीकृताः ।
हंकारनृपतेः पञ्च जयकाष्ठस्य पञ्च च ॥४१॥
तीराणनृपतेः षट् च अल्वीनरस्य पञ्च च ।
जीनवर्द्धिनृपस्याऽपि सप्ताऽनाथा तथैकला ॥४२॥
तत्तद्राजाऽर्पिता वह्निं कृत्वा प्रदक्षिणं हि ताः ।
योगमालायुता बालकृष्णेन संनिजीकृताः ॥४३॥
प्रकीर्णिकाः शते द्वे च सहस्रं कन्यकाः शुभाः ।
क्षोरुद्धा वह्निसाक्ष्ये ससुमस्रङ्निजीकृताः ॥४४॥
भल्पकेतो सप्तकन्या जयकृष्णवजैकला ।
परीशाननृपस्यैकविंशतिः कन्यकास्तथा ॥४५॥
इन्दुरायनृपस्यापि कन्ये द्वे शोभने तदा ।
मुद्राण्डनृपतेः कन्या पञ्चदश विभूषिताः ॥४६॥
गण्डभूपस्य च नव लीनोर्णजाप्चतुष्टयम् ।
बृहच्छरनृपस्यापि तथैकादशकन्यकाः ॥४७॥
चत्वारिंशत्कन्यकाश्च बललीनस्य भूपतेः ।
वरसिंहस्य पञ्चैव रायगामलजाष्टकम् ॥४८॥
फेनतन्तुनृपस्य द्वे स्तोकहोमस्य चैकला ।
काष्ठयाननृपस्यैका कोलकस्यापि चैकला ॥४९॥
दिनमाननृपस्य द्वे कन्याः सयोगमालिकाः ।
वह्निं प्रदक्षिणं कृत्वा स्वस्वपित्रा समर्पिताः ॥५०॥
राजभिरर्पिता बालकृष्णेन ता निजीकृताः ।
रायकिन्नटराजस्यैकपञ्चाशत्सुपुत्रिकाः ॥५१॥
रायकोटीश्वरस्यैकविंशतिः कन्यकास्तथा ।
रायरणजिद्भूपस्य विंशतिः कन्यकास्तथा ॥५२॥
रायवाकक्षभूपस्य तिस्रः कन्यास्तथा तदा ।
रायमारीशभूपस्य तिस्रः कन्याश्च शोभनाः ॥५३॥
रायबलेश्वरस्यापि तिस्रः कन्यास्तथा पराः ।
रायलम्बारभूपस्य षट् कन्या यौवनान्विताः ॥५४॥
रायनवार्कभूपस्य सप्त कन्याः सुमञ्जुलाः ।
रायहूण्डेशभूपस्य नव कन्याः सुकोमलाः ॥५५॥
रायकूपेशभूपस्यैकला पुत्री सती शुभा ।
कालीमण्डभूपतेश्च चतस्रः कन्यकास्तथा ॥५६॥
वनजेलेशनृपतेः पञ्च कन्याः सुपाण्डुराः ।
पारावारपिबस्यापि तिस्रः कन्याः सुरक्तिकाः ॥५७॥
कोटीश्वरनृपस्य द्वे तिस्रः सतीशभूपतेः ।
त्रेताकर्कशनृपतेः सप्त कन्याः सुगौरिकाः ॥५८॥
आण्डजरानृपस्यापि चतस्रः कन्यकाः शुभाः ।
बाल्यरजोनृपस्यापि कन्यैका धर्मशालिनी ॥५९॥
रायसोमनभूपस्य तिस्रः कन्याः सुशोभनाः ।
ऊरुगवाक्षनृपतः कन्ये द्वे शोभने तथा ॥६०॥
पराङ्व्रतनृपस्य द्वे राजारायस्वसैकला ।
ईशानपानभूपैकचत्वारिंशत्सुकन्यकाः ॥६१॥
राजारायपतिक्ष्मेशत्रयस्त्रिंशत्सुकन्यकाः ।
एताः सर्वास्तदा तत्र योगमालाविभूषिताः ॥६२॥
राजश्रृंगारशोभाश्च स्वस्वपित्रा समर्पिताः ।
वह्निं प्रदक्षिणं कृत्वा बालकृष्णनिजीकृताः ॥६३॥
त्रिंशत्कन्या मंगलाद्या महर्षिभिः समर्पिताः ।
ऋषीणां ता विभिन्नानां बालकृष्णनिजीकृताः ॥६४॥
आजनाभप्रदेशानां राज्ञां कन्याः समुज्ज्वलाः ।
सहस्राणि दश तत्तत्पित्रादिभिः समर्पिताः ॥६५॥
प्रजाकन्या दशसहस्राणि प्रजाभिरर्पिताः ।
सर्वश्रृंगारशोभाढ्या योगमालाविभूषिताः ॥६६॥
वह्निं प्रदक्षिणं कृत्वा बालकृष्णनिजीकृताः ।
पृथक् पृथक् प्रकुण्डेषु पृथग् वह्नेः प्रसाक्षिकम् ॥६७॥
करग्रहणमेतासां सर्वासामभवत्तदा ।
राधिके ! च तथाऽन्याश्च कौबेर्यश्च सहस्रशः ॥६८॥

सहस्रशश्च माहेन्द्यो यमकन्याः सहस्रशः ।
वायव्यो वैश्वकर्म्यश्च वारुण्यो रौद्र्यश्च वह्निजाः ॥६९॥
श्रावण्यश्चापि स्वानिज्यः सांवत्सर्यश्च गोपिकाः ।
प्राचीन्यश्च पिशंगिन्यो राशियान्यश्च कोटिशः ॥७०॥
रौमायन्यश्च पारश्यो धैवर्यश्च सहस्रशः ।
किन्नर्योऽमर्य एवापि गौर्यः पर्यश्च कोटिशः ॥७१॥
आब्रित्त्यश्चापि हारित्यः पाताल्यः स्वर्ग्य इत्यपि ।
अप्सरसो ब्रह्मसरसो गान्धर्व्यः कोटिशोऽपि च ॥७२॥
विद्युन्मणिश्च, कुशला योगिनी, द्वे तथाऽपरे ।
भौम्यश्चापि च दानव्यः कोट्यर्बुदाब्जसंख्यकाः ॥७३॥
कः कर्तुं तत्र शक्येत् संख्यां चार्वाग्दृशिर्जनः ।
ताः सर्वाः स्मृतपित्राद्याः पित्रुपस्थितिसन्निधौ ॥७४॥
विभूषिताः कृतवस्त्रप्रान्तबन्धाः सुयौवनाः ।
योगमालायुता वह्निं कृत्वा प्रदक्षिणं तदा ॥७५॥
तत्तत्पित्राद्यर्पिताश्च करग्राहेण वै तदा ।
अनादिश्रीकृष्णनारायणेनाऽङ्गीकृताः पृथक् ॥७६॥
सर्वेषां पश्यतां बालकृष्णेन परमात्मना ।
उद्वाहिता वह्निसाक्ष्ये सर्वसाक्ष्ये समर्पिताः ॥७७॥
राधिके ! ते श्राविताास्ताः सृष्ट्यादौ परमात्मना ।
उद्वाहिता हि विधिना सर्वा ब्रह्मप्रिया इमाः ॥७८॥
हरेर्मूर्तेः समुत्पन्ना हरेः शक्तय एव ताः ।
हर्यर्थं चागताः पृथ्व्यां सृष्टौ सर्वत्र तत्र च ॥७९॥
यथेष्टं संस्थिताः काले कृष्णकान्ताश्च सर्वथा ।
अनादिश्रीकृष्णनारायणं काश्यां समाश्रिताः ॥८०॥
शिवेश्वराऽङ्गणे दत्ता कालो यासु न जंभृते ।
शिवः कालस्वरूपो वै तेनाऽर्पितास्ततोऽतिगाः ॥८१॥
कालातीताः कृष्णमूर्तिमय्यः सर्वा हि मोक्षदाः ।
सौराष्ट्रं मन्मणेर्जातं बालकृष्णोऽत्र राजते ॥८२॥
काश्यां प्रोद्वाहमापन्नः सृष्टित्रये प्रकाशते ।
प्रतीक्षमाणाः सर्वास्ताः प्रोद्वाहं प्राप्य चाऽद्य वै ॥८३॥
कृतकृत्या बभूवुश्च शाश्वतानन्दसंभृताः ।
लक्ष्मीः प्राप्ता निजं कान्तं शिवेश्वरसुता क्षितौ ॥८४॥
दिशां पुत्री पद्मवती सूर्यपुत्री सुभास्वरा ।
कल्पद्रुमसुता श्रीश्च लक्ष्मीः क्षीरोदपुत्रिका ॥८५॥
दिव्यविभूतिपुत्री च माणिक्याचाक्षरीसती ।
कमलाद्यास्तथा चान्याः प्राप्य कान्तं हरिं शुभम् ॥८६॥
कृतकृत्या बभूवुश्च सर्वसौभाग्यसंभृताः ।
सर्वा उद्वाहितास्तत्र सुयोगे कृष्णयोः शुभे ॥८७॥
शृणु राधे तदा काशीराजश्च शिवछत्रकः ।
धेनुपालस्तथा शिवेश्वरस्यापि सुभक्तराट् ॥८८॥
वीक्ष्यैश्वर्यं बालकृष्णे चानन्तं पारमेश्वरम् ।
तदैव प्रददौ काशीराजः कन्या दशाऽपि च ॥८९॥
धेनुपालो ददौ तिस्रो वह्निसाक्ष्ये तदन्तरे ।
योगमालायुतास्ताश्च मण्डपेऽत्र नजीकृताः ॥९०॥
यौतकं प्रददौ राजा तदा सौवर्णलक्षकम् ।
नरयानं तथा दासीशतं विभूषणानि च ॥९१॥
प्रजाश्चापि ददुस्तस्मै बालकृष्णाय मण्डपे ।
दानं बहुविधं पश्चात्तत्कुण्डे हवनं तदा ॥९२॥
वह्नौ दत्वा गुरूंश्च गार्हस्थ्यसद्वृषान् वरः ।
अंगनासहितस्तत्राऽश्रृणोत् पाल्यान् समन्ततः ॥९३॥
सह धर्मं युगलस्याऽभिन्नं पालय माधव ।
अर्धांगनास्तव चेमास्ताः सर्वाः परिपालय ॥९४॥
सुखे सुखं तथा दुःखे दुःखं पश्य परेश्वर ।
कान्ता कान्तो न वै भिन्नौ देहयोरैक्यमावह ॥९५॥
स्वात्मवत् सर्वकान्तास्त्वं विभावय प्रमोदय ।
कान्तानां चान्तरे देहे तव देहो विराजते ॥९६॥
मस्तके मस्तकं मुखे मुखं च हृदयं हृदि ।
उदरे उदरं मध्ये मध्यं पादौ च पादयोः ॥९७॥
कान्तादेहं स्वदेहं च मत्वा ताः परिपालय ।
कुरु धर्मान् सहैवाऽत्र वंशवर्धनहेतुकान् ॥९८॥
कान्ताभिश्चापि कान्तः स्वो मन्तव्यः प्राण एव ह ।
प्राणसेवा प्रकर्तव्या सर्वथा चेशवत् सदा ॥९९॥
पातिव्रत्यं सदा पाल्यं कान्ताभिः सुखहेतवे ।
आज्ञा प्रभोः सदा पाल्या प्राणैरपि क्रियादिभिः ॥१००॥
ऐक्यभावेन मन्तव्यो भजनीयः स्वयं प्रभुः ।
इत्येवं वीक्ष्य युगलैर्वर्तितव्यं निरन्तरम् ॥१०१॥
सापत्न्यं न समुद्भाव्यं परस्परं कदाचन ।
सपत्नीभिः स्वसृवच्च वर्तितव्यं निरन्तरम् ॥१०२॥
सन्तोष्टव्यं परस्यै वै सुखं दत्वा सदा सुताः ।
प्रभोरंशाः स्वांशका वै मन्तव्या नान्यथा क्वचित् ॥१०३॥
इतिमात्रे वृषे स्थेयं स्वस्त्यस्तु वः सुखं च शम् ।
इत्युक्त्वांऽकुरसलिलैः प्रोक्षणं चक्रतुर्गुरू ॥१०४॥

दक्षिणां प्रददौ कृष्णो भूयसीं कन्यकास्तथा ।
कोटिरत्नानि च मणीन् कोटिसंख्यं सुवर्णकम् ॥१०५॥
परिहारं ततो गुरू चक्राते यज्ञकर्मणः ।
देवविसर्जनं चापि सर्वविसर्जनं ततः ॥१०६॥
अनेकरूपविलयं हरिश्चक्रेऽथ सत्वरम् ।
एतस्मिन्नन्तरे देवी गिरिजा तूर्णमागता ।
पतिपुत्रवतीभिश्च साध्वीभिः सहिताग्रगा ॥१०७॥
सर्वसृष्टिनिवासिन्यो मातरोऽपि तदाऽऽगताः ।
सुकृत्वा मंगलं सर्वास्तत्र निर्मञ्छनादिकम् ॥१०८॥
दम्पतिर्वेशयामासुः रत्ननिर्माणमन्दिरम् ।
कोट्यर्बुदाब्जकन्यानां वासार्हं दीपितं यथा ॥१०९॥
द्वितीयमिव गोलोकं द्राक् कृतं विश्वकर्मणा ।
कैलासाख्यस्य मुक्तस्य साहाय्येन नवीकृतम् ॥११०॥
रत्नसिंहासनेष्वेव वासयामासुरेव च ।
भोजयामासुरेवाऽपि स्वामिना सह कन्यकाः ॥१११॥
सकर्पूरं सताम्बूलं प्रददुर्वासितं जलम् ।
सरस्वती तदोवाच सर्वाः सृष्टेश्च मातरः ॥११२॥
देव्यः सत्यस्तथा साध्व्यो नारायण्यः पतिव्रताः ।
कन्यकाः सौभाग्यवत्यः कुर्वन्तु मंगलं परम् ॥११३॥
यथा स्वामी तथा कन्या योजिताः परमात्मना ।
विदग्धानां विदग्धेन भवन्तु संगमाः शुभाः ॥११४॥
अथ सर्वान् महीमानान् नरान्नारीः शिवापतिः ।
पूजयामास विधिना भोजयामास सादरम् ॥११५॥
खाद्यतां भुज्यतां स्वेष्टं चूष्यतां लिह्यतां मुहुः ।
दीयतां दीयतां चापि गृह्यतां तृप्यतामिति ॥११६॥
पीयतां स्वाद्यतां चेति शब्दोऽनवरतोऽभवत् ।
घोषो बभूव शालासु वाद्यसंगीतमंगलैः ॥११७॥
एवं रात्रौ भोजनान्ते ताम्बूलेऽपि निवर्तिते ।
महीमानाः परां शान्तिं विश्रान्तिं निद्रिकां शुभाम् ॥११८॥
जगृहुश्चोभयपक्षा विशाले कलतपत्तने ।
दम्पतीमन्दिरे श्रीमद्बालकृष्णोऽप्यनन्तकः ॥११९॥
यावत्यः सन्ति कान्तश्च तावद्रूपधरः प्रभुः ।
ताभिर्मृद्वीषु शय्यासु सेवितः सुखदोऽभवत् ॥१२०॥
राधिकेऽनन्तसत्त्वस्याऽनन्तवीर्यस्य योगिनः ।
कोट्यर्बुदाब्जपत्न्योऽपि न विजेतुं क्षमाः क्वचित् ॥१२१॥
निशायां नृत्यखेलाद्या मल्लानां युद्धसत्कलाः ।
वाद्यानां च सभाश्चावा नाटकानां कलाद्दशः ॥१२२॥
अभवन्नगरे तत्र प्रोद्वाहोत्सवलम्बिताः ।
रात्र्यर्धोर्ध्वं ततः शान्तं सर्वं वै सत्यमण्डलम् ॥१२३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने वह्निसाक्ष्ये प्रोद्वाहितानां निर्देशः, गृहधर्मोपदेशः, प्रोद्वाहकार्यपरिहारः, दम्पतीभोजनम्, सर्वभोजनम्, कोट्यर्बुदाब्जरूपपरिहारः, सर्वाभिः सह सर्वरूपेण कृष्णस्य दम्पतीमन्दिरे विहारः, सर्वशयनं, चेत्यादिनिरूपणनामा चतुर्नवत्यधिकद्विशततमोऽध्यायः ॥ २९४ ॥

**श्रीराधिकोवाच—**

कति कन्यास्तदा कान्ताः प्रसंख्याता रतिगृहे ।
या वै पूर्वं सुलब्धाश्च ततो लब्धाश्च वै कति ॥ १ ॥

**श्रीकृष्ण उवाच—**

राधिके निजपित्राद्यैरर्पिता यास्तु कन्यकाः ।
तास्तु कान्ताश्चतुष्कोट्यश्चतुर्लक्षाणि वै तथा ॥ २ ॥
पञ्चपञ्चाशदपि च सहस्राणि तथाऽधिकाः ।
षट् शतानि द्वाविंशतिर्नूत्नकन्या निजीकृताः ॥ ३ ॥
अथाऽन्याः कन्यकाः कौबेर्याद्याः सृष्टित्रयाऽऽगताः ।
अर्बुदं ताः स्वागता वै तथाऽब्जं सूक्ष्मवर्तिकाः ॥ ४ ॥
राधिके सख्य एवैता बालकृष्णस्य मन्दिरे ।
अनादिश्रीकृष्णनारायणस्य शयनेऽभवन् ॥ ५ ॥
कोट्यर्बुदाऽब्जास्ताः सर्वाः कान्ता वै रतिमन्दिरे ।
कोट्यर्बुदाब्जशय्यासु चासन् तावद्वरान्विताः ॥ ६ ॥
अथ प्रातस्ततो जाते पञ्चम्यां श्रीहरिस्तदा ।
मंगलैर्गीतिकाभिश्च सुवाद्यानां निनादनैः ॥ ७ ॥
भाटचारणबन्दीनां यशोगानैर्द्विजेरितैः ।
वेदस्तोत्रस्वराद्यैश्च वेत्रधारप्रशंसनैः ॥ ८ ॥
जजागार प्रभुश्चापि प्रभ्व्यः सर्वा जजागरुः ।
कृतस्नानाह्निकः कृतशृंगारो बालकृष्णकाः ॥ ९ ॥
कृतशृंगारशोभाभिः कान्ताभिः सहितः प्रगे ।
वृद्धान्पूज्यान्गुरून्श्रेष्ठान्सतीः साध्वीः प्रपूज्य च ॥१०॥
वृद्धाशीर्वादमादाय कोटिस्त्रीनरशोभितः ।
सज्जोऽभवन्नगर्यां हि भ्रमणार्थं सयात्रिकः ॥११॥
योगयात्री तदा वृद्धनिदेशेन यथायथम् ।
सज्जा कृता सशोभा च फुल्लेकार्था सुशोभना ॥१२॥
गजशोभं विमानं रत्नं चाधिरुरोह सद्धवः ।
विशालं बहुशोभं च विश्वकर्त्रा तदा कृतम् ॥१३॥

मार्गयोग्याऽऽयतं चापि दैर्घ्ये तु बहुयोजनम् ।
कोट्यर्बुदाब्जसंख्यस्वनवोढाभिः सुसेवितः ॥१४॥
व्यराजत विमाने भूस्पर्शे तस्मिन् परेश्वरः ।
कैलासाख्यशिवमुक्तप्रेरितं नवसंस्थकम् ॥१५॥
रंगगुलालकाश्मीरकस्तूरीगन्धशोभितम् ।
पुष्पाहारावलिराजत्सर्ववर्तुलसुन्दरम् ॥१६॥
स्वर्णसिंहासनाऽसंख्ययुतं दृश्यं मनोहरम् ।
पुष्पप्रक्षेपणद्रोणीकृतं गुलालकोशवत् ॥१७॥
महीमानाग्रणीभिश्च नरैरग्रे प्रवासितम् ।
महीमानाग्रणीस्त्रीभिः पृष्ठे गीत्यभिघोषितम् ॥१८॥
तथा वै दम्पतीसम्बन्धिभिः पित्रादिभिर्युतम् ।
सर्वाग्रे सर्ववाद्यैश्च निनादितं सुमानितम् ॥१९॥
विमानं श्रीशंकरस्य गृहांगणे प्रपूजितम् ।
फुल्लगुलालप्रसृतिक्षेपकृद्दम्पतीश्रितम् ॥२०॥
शनैश्चाऽग्रेऽप्रसरद्वै महानन्दप्रदर्शकम् ।
वाहिनी सा शिवप्रासादकादग्रे ससार ह ॥२१॥
वर्धयन्ति युगलानि प्रजाजनाः फलादिभिः ।
द्रव्यैर्हारैर्हस्तदानैः पुष्पैः शुभाशिषा तदा ॥२२॥
गिरिजानगरं सर्वं भ्रमित्वा फुल्लयात्रिका ।
सर्वपूजां समगृह्य वर्धयिनीं प्रजाकृताम् ॥२३॥
काशीपत्तनमेवाऽपि समस्तं स्वान्तमित्यथ ।
भ्रमित्वा कुलदेव्याश्च दुर्गाया दर्शनं तथा ॥२४॥
हनूमतो दर्शनं च विश्वेश्वरस्य दर्शनम् ।
अन्नपूर्णादर्शनं च गणेशस्यापि दर्शनम् ॥२५॥
पञ्चगंगातटे धर्मदेवस्यापि च दर्शनम् ।
पूजनं च धनैर्दानैः पुष्पपत्रफलादिभिः ॥२६॥
कृत्वा सर्वत्र च ततो बिन्दुमाधवमाययौ ।
तत्र श्रीमाधवं प्राच्यं दत्वा दानानि दक्षिणाः ॥२७॥
विमानं पावनीगंगाजलोपरि ह्यपासरत् ।
योगग्रन्थियताः कान्ताः कान्तश्चापि नदीजलम् ॥२८॥
आचमनं प्रगृह्यैव प्रपूज्य तीर्थमुत्तमम् ।
क्षमाप्य श्रीमतीं गंगां दीपदानं प्रदाय च ॥२९॥
मुखे प्रददुर्दानं बहुस्वर्णं समन्त्रकम् ।
सद्गुरुर्लोमशस्तत्र योगग्रन्थीन् व्यमोचयत् ॥३०॥
ततो नगरमध्ये च विमानेन पुनः प्रभुः ।
महाराजपथेनापि निर्गतो वाद्यनादकैः ॥३१॥
नरा नार्यश्च वै द्रष्टुं सत्वराः सर्वतः स्थिताः ।
दृष्ट्वा दृष्ट्वा कान्तकान्ताः कान्तं योग्यं सुसुन्दरम् ॥३२॥
प्रशशंसुर्हि बहुधा दम्पतीसुखमुत्तमम् ।
ऊचुः परस्परं तत्र मुग्धाः कृष्णनरायणे ॥३३॥

अयमेव चैति भगवान् कृपानिधिः,
सखि नः कदा स च मिलिष्यति प्रभुः ।
बहुकन्यकाभिरिह लब्ध ईश्वरः,
कृपयैव नैव निजपुण्यसंग्रहात् ॥३४॥
इह मानवं हि वपुराऽऽप्य दुर्लभं,
सखि चेन्न कृष्णभगवान्निषेव्यते ।
भवबन्धनानि च तदा न यान्ति शं,
निजनेत्रकैः प्रभुरयं विलोक्यताम् ॥३५॥
परमाऽक्षरेऽनिशमनन्तपार्षदैः,
सुखदाभिरीश्वरसतीभिरर्चितः ।
भुवनान्तरेष्वपि च कन्यकार्चितः,
सुखदः समागत इह प्रसेव्यताम् ॥३६॥
बहुकोटिरूपधरशक्तिको ह्ययं,
निखिलाभिकामरसपूरको ह्ययम् ।
हृदये स्थितोऽपि निजनेत्रगोचरो,
भवतीह तं पतितया प्रगृह्यताम् ॥३७॥
श्रुतयः पुराऽस्य यशसां प्रगायनै-
रथ कन्यकातनुधरा ह्यसेवयन् ।
सुरपत्निकाश्च नृपकन्यकादिकाः सह,
यानगा हरिवतीर्विपश्यत ॥३८॥
ननु पुण्यनाणकधनैः सुगम्यकं,
वयमत्र तादृशधनेन वर्जिताः ।
नहि लब्धवत्य इह यः परेऽक्षरे,
भजनेन चापि च लयेऽपि चेष्यते ॥३९॥
सखि कान्तकोटिरिह भुज्यते यथा,
निजकर्मणाऽपि च हरिर्न लभ्यते ।
यदि लभ्यतेऽपि नहि भुज्यते त्विह,
स्वजनुस्तदाऽपि विफलं विलोक्यते ॥४०॥
विजयन्तु तस्य सुममालिकायुता,
बहुवत्सराणि च सुखाब्धिमग्निकाः ।
शतकोटिकामवररूपशोभनं,
सुखयन्तु चापि च लभन्तु सत्सुखम् ॥४१॥
अपि नः स्पृहाऽस्य मुखपंकजे सखि,
ह्यतिजायते किमिह लब्धिसाधनम् ।
इयमर्थनाऽस्ति हृदयस्थितो भवान्,
प्रददातु तत्र नवसंगमं हि नः ॥४२॥

अयि वध्व ! ईश्वरकृताऽभिवन्दनाः,
प्रणिभालयन्तु निजदासिका हि नः ।
समये क्वचिन्निजपतिं रतिस्थले,
स्मरणं दधत्विति हि नोऽर्थनाऽस्ति वै ॥४३॥
राधिके चेति ताः स्तुत्वा नत्वा धृत्वा हरिं हृदि ।
पुष्पाद्यैर्वर्धयामासुः कृष्णं नारायणं प्रभुम् ॥४४॥
शृणु राधे परब्रह्म विलोक्य वारयोषितः ।
सहस्रशः पुपूजुश्च वर्धयामासुरुत्सुकाः ॥४५॥
मुमुहुश्चाऽक्षताः कन्यास्तिस्रः चतुःशतं तथा ।
मात्राज्ञया तदा ताश्च मार्गे मार्गे वरं प्रभुम् ॥४६॥
प्रपूज्य पुष्पमालाश्च कण्ठे प्रभोस्तु वै न्यधुः ।
अर्पितास्ताश्च मातृभिर्विमानमध्यरोहयन् ॥४७॥
कृष्णपत्न्यश्च ता जाता गान्धर्व्यैः सेविकाः सदा ।
एवं राधेऽनादिकृष्णनारायणस्य पत्निकाः ॥४८॥
चतुःकोट्यश्चतुर्लक्षाण्यपि चापि ततोऽधिकाः ।
षट्पञ्चाशत्सहस्राण्यभवँश्च पूर्ववृंहिताः ।४०४,५६००० ॥४९॥
कोट्यर्बुदाऽब्जसंख्याश्च तदन्याश्च निजीकृताः ।
ता एताः सह मोदन्ते समरूपैः समस्तकैः ।
( कोटयः, अर्बुदानि, अब्जानि च ) ॥५०॥
अनादिश्रीकृष्णनारायणैः श्रीबालकृष्णकैः ।
त्रेतायां फुल्लयात्रीया वाहिनी च ततः परम् ॥५१॥
शिवस्वामिपुरं याता निजावासमनुत्तमम् ।
फुल्लयात्रापरिहारस्ततो जातः शुभावहः ॥५२॥
शिवेश्वरादयो याता निजावासं समुत्सुकाः ।
श्रीकृष्णाद्यास्ततो याताः पार्वतीपत्तनं शुभम् ॥५३॥
भोजनानि ततः सर्वान् महीमानान् हि शंकरः ।
कारयामास विधिना बहुमिष्टान्नकानि वै ॥५४॥
पायसानि विविधानि ओदनान्युत्तमान्यपि ।
शाकानि द्विदलाश्चापि भक्ष्यभोज्यानि यानि च ॥५५॥
लेह्यचोष्याणि सर्वाणि मिष्टपानानि यानि च ।
अमृतान्यपि सर्वाणि भोजयामास शंकरः ॥५६॥
महीमानान् समस्तांश्च दम्पतीपक्षकानथ ।
ग्रामप्रजा दीनभिक्षून् भोजयामास शंकरः ॥५७॥
सर्वसेवकवर्गांश्च तथा नाट्यादिवर्गकान् ।
सर्वान् स्तावकवर्गांश्च वादकान् वै समस्तकान् ॥५८॥
वाहकांश्च समस्तांश्च रक्षकान् गायकांस्तथा ।
कर्मचारान् यतीन् साधूँश्चातिथीन् प्रसमागतान् ॥५९॥
विप्रान् सर्वान् गुरून् सर्वान् ब्रह्मप्रियाः प्रभुं तथा ।
कृष्णस्य पितरं भ्रातॄन् कुटुम्बं च समस्तकम् ॥६०॥
भोजयामास शिवराड् जलपानानि संददौ ।
पातालवासिनः सर्वान् सर्वान् पृथिवीवासिनः ॥६१॥
स्वर्गादिवासिनः सर्वान् सर्वानैश्वरवासिनः ।
भोजयामास बहुधा सर्वानक्षरवासिनः ॥६२॥
मुनीन् साधून् सतीः साध्वीर्ब्रह्मचर्यधृतास्तथा ।
त्यागिवर्गान् योगिवर्गान् भोजयामास चेश्वरान् ॥६३॥
अपि कीटपतंगादीन् पशून् पक्षिगणांस्तथा ।
स्वेदजान् जलजाँश्चापि भूजान् स्थावरजंगमान् ॥६४॥
तीर्थानि पर्वतांश्चापि नदीनदांश्च सागरान् ।
कल्पलतादिकान् सर्वान् देवान् चैत्यान् समस्तकान् ॥६५॥
भूतप्रेतपिशाचादीन् गान्धर्वान् किन्नरांस्तथा ।
चारणान् काशिकावासान् भोजयामास शंकरः ॥६६॥
जलपानान्यदाच्चापि ताम्बूलकानि सन्ददौ ।
दक्षिणा भूयसीश्चापि स्वर्णरूप्यसुमौक्तिकीः ॥६७॥
सौवर्णमुद्रिकाश्चापि भूषाम्बराणि मालिकाः ।
ददौ तदा शिवस्तत्र कोटिकोट्यर्बुदात्मिकाः ॥६८॥
यौतकं प्रददौ पश्चात् कोटिसौवर्णमुद्रिकाः ।
कल्पपेटीं कल्पपात्रं चाक्षयां स्थालिकां तथा ॥६९॥
अव्ययं कोशमेवापि चाऽविघ्नं छत्रकं तथा ।
सर्वरसां पात्रिकां च सर्वगन्धां सुवल्लिकाम् ॥७०॥
सर्वरूपां पुत्तलीं च स्थिरयौवनिकां गुटीम् ।
चामरं व्योमगतिदं कवचं कालवारकम् ॥७१॥
शय्यां चाऽऽनन्दनिधिकां पारशं च मणिं तथा ।
चिन्तामणिं ददौ चापि बालकृष्णाय वै तदा ॥७२॥
काशीराजो ददौ चापि विमानं सूर्यवर्चुलम् ।
हस्तिशतं सहस्राश्वान् कामधेनुसहस्रकम् ॥७३॥
लक्षकं वृषभाणां च श्यामकर्णाऽश्वलक्षकम् ।
दासीनां च सहस्रं वै रत्नसिंहासनं तथा ॥७४॥
मृत्युभक्षां महायष्टिं रोगघ्नीं वेत्रिकां तथा ।
आजनाभाश्च राजानो प्रददुर्यौतकान्यपि ॥७५॥
आजनाभ्यः प्रजाश्चापि यौतकानि तथा ददुः ।
कन्यानां पितरश्चापि भ्रातरश्चापि मातरः ॥७६॥
कन्याधनं ददुश्चापि भूषाम्बरादि शोभनम् ।
रत्नहीरकमाल्यानि हारान् मणिकृतांस्तथा ॥७७॥
सौवर्णराजतरत्नपात्राणि मौक्तिकानि च ।
विमानानि सुयानानि शय्याः पर्यंकशोभिताः ॥७८॥

मुक्तास्तथेश्वराश्चाप्यवतारा ईश्वरीगणाः ।
देवाश्च पितरश्चापि महर्षयश्च मानवाः ॥७९॥
सर्वे ददुर्यौतकानि यथायोग्यानि सर्वथा ।
यौतकस्य परिहारे कृतो ततो हरिः स्वयम् ॥८०॥
ददौ यथार्हपात्रेभ्यः सौवर्णं पारितोषिकम् ।
दासेभ्यो भृत्यवर्गेभ्यः सेवकेभ्योऽयुताऽयुतम् ॥८१॥
सौवर्णानां ददौ चापि कर्मचारिभ्य इत्यपि ।
गायकेभ्यो नापितेभ्यः संवाहकेभ्य इत्यपि ॥८२॥
देहमर्दकलोकेभ्यः सेविकाभ्यस्तथा ह्यपि ।
मार्जिकाभ्यः क्षालिकाभ्यो मञ्जिकाभ्यो ददौ धनम् ॥८३॥

नर्तकीभ्यो वादिनीभ्यो गायिकाभ्यो ददौ धनम् ।
भाटचारणबन्दीभ्यो विद्याग्रेभ्यो ददौ धनम् ॥८४॥
गान्धर्वेभ्यस्तथा शिल्पिचित्रकेभ्यो ददौ धनम् ।
यानिभ्यो मार्गदर्शिभ्यो जयिभ्यः प्रददौ धनम् ॥८५॥
जलिभ्यः पवनिभ्यश्च शमनिभ्यो ददौ धनम् ।
शाकटिभ्यो विमानिभ्यो रथिभ्यः प्रददौ धनम् ॥८६॥
पताकिभ्यो वादकेभ्यो यन्त्रिभ्यः प्रददौ धनम् ।
रक्षिभ्यः सहयायिभ्यो भिक्षुकेभ्यो ददौ धनम् ॥८७॥
कन्यकाभ्यः कुमारेभ्यः सतीभ्यः प्रददौ धनम् ।
नालिनीभ्यः शोधिनीभ्यस्तालिनीभ्यो ददौ धनम् ॥८८॥

वंशिनीभ्यो द्विजेभ्यश्च तैर्थिकेभ्यो ददौ धनम् ।
दर्शकेभ्यो लम्बहस्तकेभ्यश्चापि ददौ धनम् ॥८९॥

मनसा वाञ्छकेभ्योऽपि ददौ कृष्णनरायणः ।
राजानश्च ददुः स्वर्णं रूप्यकं मुद्रिकास्तथा ॥९०॥
पात्राम्बराणि च तथा पारितोषात्मकं धनम् ।
सीवकेभ्यश्च मालिभ्यः कार्दमिभ्यो ददुर्धनम् ॥९१॥
गन्धसारिभ्य एवापि पत्रिभ्यश्च ददुर्धनम् ।
कैलासाय मण्डपाय मूर्तिमते हरिः स्वयम् ॥९२॥
कोट्यर्बुदाब्जमूल्याँश्च सौवर्णमुकुटान् ददौ ।
गणेभ्यश्चापि सर्वेभ्यः सौवर्णं पारितोषिकम् ॥९३॥
अनादिश्रीबालकृष्णो ददौ चान्येभ्य इत्यपि ।
भगिनीपुत्रकेभ्यश्च पुत्रीभ्यः पारितोषिकम् ॥९४॥
भूषाम्बरादिकं तत्र ददौ सौवर्णमुत्तमम् ।
विश्वकार्याय देवाय ददौ श्रीबालकृष्णकः ॥९५॥
कण्ठहारं च सौवर्णं कोटिहीरकगुम्फितम् ।
स्वर्णमणिकृतं चापि मुकुटं शोभनं तदा ॥९६॥
शिवेश्वराय भगवान् परमेश्वरभाववान् ।
ददौ सिंहासनं दिव्यं चाऽविकुण्ठं जगत्त्रये ॥९७॥

शिवेश्वरोऽपि च ददौ सर्वस्वं परमात्मने ।
बृहस्पतये सर्वस्वं हरिस्तदा तु सन्ददौ ॥९८॥
इत्येवं प्रददुस्तत्र पारितोषं यथार्थकम् ।
ततः स्वल्पां प्राप्तवन्तो विश्रान्तिं मध्यसूर्यके ॥९९॥
अथ तीर्थे स्नानवाञ्छां कृतवान् भगवान् पुनः ।
सर्वस्त्रीभिर्महीमानैः सह गंगां ययौ पुनः ॥१००॥
तीर्थविधिं चकाराऽथ दानानि विविधानि वै ।
प्रायश्चित्तानि कृत्वैव ददौ सस्नौ पुनः पुनः ॥१०१॥
सर्वाः कान्ता प्रसस्नुश्च ददुर्दानानि भूरिशः ।
शंभुस्तत्र विप्रवेषः समाययौ हि भिक्षुकः ॥१०२॥
भिक्षां ययाचे भगवान् प्रददौ स्वर्णलक्षकम् ।
पुनर्ययाचे च ततो ददौ तुलसीमालिकाम् ॥१०३॥
पुनर्ययाचे च ततो ददौ मूर्तिं निजां हरिः ।
कानकीं सर्वरूपाढ्यां स्वस्तीत्युवाच शंकरः ॥१०४॥
पुनर्ययाचे वचनं हरिः प्राह वदाऽत्र मे ।
शंभुर्ययाचे गंगायां वासं तीर्थार्थमेव ह ॥१०५॥
वरणायां तथाऽऽवासं ययाचे परमात्मनः ।
हरिस्तथास्त्विति प्राह पञ्चगंगाजले तटे ॥१०६॥
बालकृष्णं महातीर्थे कृत्वोवास ततो हरिः ।
अदृश्यदिव्यरूपेण सर्वदाऽन्येन वर्तते ॥१०७॥
मार्गशीर्षे शुक्लपक्षे चतुर्थ्यां पञ्चमीदिने ।
प्रतिवर्षे समायाति ब्रह्मप्रियासमन्वितः ॥१०८॥
अनादिश्रीकृष्णनारायणः श्रीकृष्णचन्द्रकः ।
तदा स्नानात्तथा दानान्मोक्षात्मकं फलं ध्रुवम् ॥१०९॥
अथ स्नात्वा सकान्तः श्रीहरिः शिवपुरं ययौ ।
दुग्धपानादिकं कृत्वा लेभे विश्रान्तिमच्युतः ॥११०॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने कान्तानां संख्या, पञ्चम्यां प्रातः फुल्लकयात्राभ्रमणं, गंगायां ग्रन्थिमोचनम्, मध्याह्नभोजनम्, शिवपुरे चागत्य विश्रान्तिः, पारितोषिकाद्यर्पणम्, गंगायां पुनस्तीर्थस्नानं, बालकृष्णतीर्थं, पंचगंगायां ग्रन्थितीर्थम्, शंकराय भिक्षादानं चेत्यादिनिरूपणनामा पञ्चनवत्यधिकद्विशततमोऽध्यायः ॥ २९५ ॥

**श्रीकृष्ण उवाच—**

राधिके यत्र भगवान् समुवाह च मण्डपे ।
कन्यकास्तत्र वै तीर्थमुद्वाहसंज्ञकं सदा ॥ १ ॥
वरणायां तथा कोटितीर्थे मोक्षप्रदं शुभम् ।
कोट्यर्बुदाऽब्जरूपेण भगवांस्ता गृहीतवान् ॥ २ ॥

तदा शिवपुरं तीर्थं पार्वतीपत्तनं तथा ।
मण्डपाख्यं यज्ञतीर्थं सारभूतलमुच्यते ॥ ३ ॥
पंचम्यां त्रिप्रहरान्ते विदायं शंकरो ददौ ।
कृष्णपक्षसमस्तेभ्यो बहुद्रव्याणि सन्ददौ ॥ ४ ॥
कृष्णस्य पूजनं चक्रे पितुश्चापि क्षमापनम् ।
महीमानादिवर्गाणां न्यूनसेवाक्षमापनम् ॥ ५ ॥
अर्थयामास सगलत्कण्ठो वै शिवराट् स्वयम् ।
शिवछत्रोऽपि राजाऽसौ क्षमां तदाऽऽर्थयन्मुहुः ॥ ६ ॥
भोज्यपानादिकं श्रेष्ठं प्रपक्वान्नं घृताक्तकम् ।
पाथेयं प्रददौ चापि रक्षकप्रापकार्थकम् ॥ ७ ॥
यौतकं च न्यधात् सर्वं श्रेष्ठे विमानके हरः ।
वैमानिकं ददौ चापि गणं विमानवाहकम् ॥ ८ ॥
अथ वाद्यान्यवाद्यन्त विदायसूचकानि तु ।
यन्त्रशब्दा अजायन्त गीतिशब्दाः शुभास्तदा ॥ ९ ॥
शिवेश्वरो मिमेलाऽपि गोपालं कृष्णकं हृदा ।
क्षमापनीयः सेवायां न्यूनत्वेहमुवाच ह ॥१०॥
आगन्तव्यं निजं मत्वा गृहं मां च कुटुम्बकम् ।
पुत्री च भवदीयेति मत्वा रक्ष्या हि मानद ॥११॥
कुशलं लेखनीयं च प्राप्य कुंकुमवापिकाम् ।
तद्भ्रातृभ्यो लक्ष्मिणश्च कुटुम्बिजनतस्तथा ॥१२॥
भाववद्भ्यस्तथा भ्रातृपुत्रेभ्यः सकलो हरिः ।
देवमयसमस्तेभ्यः क्षमामयाचतेश्वरः ॥१३॥
अक्षरान्मुक्तवृन्दाश्च वासुदेवात्तथा क्षमाम् ।
प्रद्युम्नादनिरुद्धाच्च भूम्नश्चापि विराजकात् ॥१४॥
अवतारसमस्तेभ्यो नारायणान्नरात्तथा ।
विष्णोश्चापि महाविष्णोर्ब्रह्मणः शंकरात्तथा ॥१५॥
अर्यम्णश्च सनत्कुमारादिभ्यश्च सतस्तथा ।
मुनिसाधुदेवदेवीर्नारीभ्योऽयाचत क्षमाम् ॥१६॥
नृपविप्रलोकपालदिक्पालदेवधिष्ण्यगात् ।
मानवेभ्यो बालकृष्णसम्बन्धिस्त्रीभ्य इत्यपि ॥१७॥
क्षमामयाचताऽथाऽपि योग्यं विदायकं ददौ ।
नागलोकगतेभ्यश्च भूसंस्थसर्वदेहिनः ॥१८॥
सौराष्ट्रीयनरनारीभ्योऽयाचतेश्वरः क्षमाम् ।
विदायं जलपानं च मिष्टमिष्टं सुमस्रजः ॥१९॥
ददावेभ्यः शिवस्वामी मिमेल वक्षसा च तान् ।
पूज्याऽऽर्याभ्याः क्षमामयाचत हस्ताञ्जलिर्हरः ॥२०॥
शिवा च पार्वती देवी सर्वा मातृस्तदा द्रुतम् ।
कंभरां श्रीं नमस्कृत्य क्षमां ताभ्योऽभ्ययाचत ॥२१॥
अन्या आर्याः समर्च्यैव नत्वा दीनस्वभाविनी ।
क्षमामयाचताऽभ्यो वाग्दोषात्मिकां च सेवने ॥२२॥
वस्तुदाने रक्षणे च मानने स्वागते तथा ।
भोजने स्वापने पाने न्यूने क्षमामयाचत ॥२३॥
मम पुत्री तव पुत्री मातस्तां त्वं प्ररक्षय ।
वृत्तान्तं च क्वचित् हृद्यं सम्प्रेषय सुवत्सले ॥२४॥
वधूटीभ्यः क्षमामयाचत रक्षत नैजिकीम् ।
लक्ष्मीं चेति समुवाच विदायं तूर्चितं ददौ ॥२५॥
पुष्पहारान् ददौ चापि जलपानादिकं ददौ ।
शिवछत्रोऽपि च तदा क्षमां वरमयाचत ॥२६॥
शिवेश्वरोऽपि च तदा क्षमां वरमयाचत ।
शैवछत्री नृपी क्षमां कम्भराया अयाचत ॥२७॥
कान्ताः सर्वा मातापितॄन् नेमिरे चाश्रुलेक्षणाः ।
जयाद्याश्चन्द्रपालाद्यास्तेऽपि क्षमामयाचिरे ॥२८॥
ज्येष्ठाऽशोका स्वसा लक्ष्म्याः ननान्दतस्तदा द्रुतम् ।
सन्तोषाया वरस्वसृतः क्षमामप्ययाचत ॥२९॥
भ्रातृजायाः क्षमामयाचिरे स्त्रियोऽपरास्तदा ।
एवं परस्परं नार्यः क्षेमं च कुशलं नराः ॥३०॥
पृष्ट्वा दत्वा विदायं च पुष्पहारान् ददुर्मिथः ।
कन्यापक्षा महीमाना श्रीकृष्णाद्यास्ततः परम् ॥३१॥
संकर्षणस्तथा रुद्रः शंकरः शेष इत्यपि ।
महाकालो यमश्चापि यक्षेशो भूतभैरवाः ॥३२॥
स्कन्दो गणेशो नन्दी च वीरभद्रादयस्तथा ।
कोटिकोट्यधिकाः सर्वे तथा चण्ड्यादिशक्तयः ॥३३॥
बालकृष्णात् कांभरेयात्तथा गोपालकृष्णतः ।
वासुदेवाद्व्यासदेवात् कपिलाच्च नरायणात् ॥३४॥
विष्णोर्धर्माद् विराजाच्च क्षमां तदा ययाचिरे ।
कुशलं च सुखं क्षेमं स्नेहभावं ययाचिरे ॥३५॥
राधा लक्ष्मीः सती दुर्गा सरस्वती नरायणी ।
कमला ऋषिपत्न्यश्च देव्यश्च गणिकास्तथा ॥३६॥
गणाश्च सेवकाश्चापि कंभरामातरं तदा ।
महालक्ष्मीं तथा लक्ष्मीं सावित्रीं वैष्णवीं तथा ॥३७॥
सूर्यं चन्द्रं वसून् साध्यान् संज्ञां च रोहिणीं तथा ।
नत्वाऽऽभ्योऽयाचन् क्षमां तु देवीर्देव्यः सुखं च शम् ॥३८॥
विदायं प्रददुश्चापि पुष्पहाराऽक्षतादिकम् ।
एवं सर्वे महीमानाः सृष्टित्रयनिवासिनः ॥३९॥
नरा नार्यो मिलित्वैव क्षमां मिथो ययाचिरे ।
श्रीहरये च कान्ताभ्यश्चाशीर्वादान् ददुस्तदा ॥४०॥

सज्जा बभूवुः सर्वे वै स्वस्वपक्षा नराः स्त्रियः ।
कृष्णः कान्ताश्चोपविष्टं यदा विमानमाययुः ॥४१॥
मातापितृपदे न्यस्य मस्तकानि च कन्यकाः ।
क्षणं तु रोदनं चक्रुस्तदा स्नेहवियोगजम् ॥४२॥
जानक्याद्या मातरश्च कन्याः कृत्वा स्ववक्षसि ।
मुमुचुश्चाश्रूणि चैव सिषिचुर्नेत्रजैर्जलैः ॥४३॥
जीवामश्च कथं पुत्र्यो वो विना प्राणदुर्लभाः ।
नो गृहाच्छ्रीबालकृष्णगृहं याथ हि वत्सिकाः ! ॥४४॥
इत्युक्त्वा पुत्रिका नैजा न्यषादयन् विमानके ।
पितरोऽपि तदा धैर्यं ददुर्न्यषादयन् सुताः ॥४५॥
मुमोचाऽप्यश्रूणि स्वामी बालकृष्णोऽपि मायया ।
विमानं चारोहयामास श्रीगोपालकृष्णकः ॥४६॥
पुत्रं कान्ताः कुटुम्बं च तदा शिवादयः खलु ।
विशिष्टं यौतकं चाप्यर्पयामासुः समुत्सुकाः ॥४७॥
गजाँश्च तुरगान् दासीः किंकराँश्च सुवर्णकम् ।
रत्नान्यमूल्यभूषाश्च पात्राणि सुरभीस्तथा ॥४८॥
अम्बराण्यासनोपकरणान्यपि शुभानि च ।
सज्जाः सर्वे निजपक्षाः पुष्पहारादिपूजिताः ॥४९॥
आरुरुहुर्विमानानि नैकोऽप्यत्राऽवशिष्यते ।
तत्र भेरीनिनादश्च गतेरश्रूयतोत्तमः ॥५०॥
वादित्राणां निनादैर्मिश्रितो व्यञ्जलनादनैः ।
जयारावैर्वर्धितश्चाऽव्याप्नोत् समन्ततस्तदा ॥५१॥
द्रुतं सर्वाण्यपि विमानानि कामगमानि वै ।
व्योम्ना ययुः सुखं पश्चिमां दिशं वै सहस्रकम् ॥५२॥
आगन्तव्यरवास्तत्राऽजायन्त शिवयोगिनाम् ।
शिवस्वामी तदा कृष्णनरायणात् परेश्वरात् ॥५३॥
अप्रार्थयद् द्रुतं नैजामन्तिमां जन्ममोक्षिकाम् ।
कदा नाथ कृपासिन्धो चास्मान् सम्मोक्षयिष्यसे ।
जातिस्मरोऽस्मि देवेश लक्ष्मीर्लब्धा त्वया तव ॥५४॥

श्रीबालकृष्ण उवाच —

वर्षोत्तरं मोक्षयिष्ये स्मर मां हृदयेऽन्वहम् ।
आमन्त्रयामि सर्वांश्चाऽऽगन्तव्यं मे जनुर्दिने ॥५५॥
कुंकुमवापिकाक्षेत्रे चोर्जकृष्णाष्टमीदिने ।
ततो मनोरथं शंभो पारयिष्ये तवाऽर्थितम् ॥५६॥
इत्युक्त्वा भगवान्नैजं विमानं चैरयत्तदा ।
शिवेश्वरश्चाऽऽप्रयागं नैजविमानकेन वै ॥५७॥
काशीराजस्तथा कृष्णः संकर्षणादयोऽपि च ।
प्रहितं प्रययुश्चापि पीत्वा त्रिवेणिकाजलम् ॥५८॥
न्यवर्तन्त ततः सर्वे प्रावर्तन्त पुरोऽम्बरे ।
इन्द्रप्रस्थवनं व्योम्नो दृष्ट्वा वीक्ष्य सरस्वतीम् ॥५९॥
आनर्तं चाययुः क्षेत्रं कुंकुमवापिकाऽक्षरम् ।
सायं प्रापुश्चाऽश्वपट्टसरस्तीरं विशालकम् ॥६०॥
तदा वाद्यान्यवाद्यन्त जयशब्दाश्च खेऽभवन् ।
भूतले जनताशब्दा जयघोषास्तदाऽभवन् ॥६१॥
शावदीना महाकाली क्षेत्रपा मुमुदे तथा ।
वारिनरः क्षेत्रपालो मुमुदे च जगर्ज च ॥६२॥
जयनादान् प्रचक्रुश्च देवास्तीर्थानि पादपाः ।
मण्डपाख्यस्तथा मुक्तो भूमिपाश्च समागताः ॥६३॥
प्रजा जयनिनादाँश्च प्रचक्रुश्चातिहर्षिताः ।
यात्रिका जयनादाँश्च चक्रुस्तदा प्रवीक्ष्य खम् ॥६४॥
दर्शनार्थं प्रजाः सर्वा दुद्रुवुरम्बरदृशः ।
हरिं प्रसस्मरुश्चापि हरिणीः सस्मरुस्तथा ॥६५॥
अवतेरुर्विमानानि सहस्रं व्योममार्गतः ।
यथावकाशं भूमौ तु हरेर्विमानमित्यपि ॥६६॥
पश्चिमे शोभने भागेऽवाततार सुशोभनम् ।
श्रीमद्गोपालकृष्णश्चाऽवतीर्य सर्वसंगतः ॥६७॥
प्रविश्य स्वपुरीं रम्यां कारयामास मंगलम् ।
वाद्यानि वादयामास द्रुतं मनोहराणि वै ॥६८॥
कम्भरा चामरीदेव्यस्तथाऽन्या योषितस्तदा ।
लक्ष्मीं तस्याः सखीः सर्वा विलोक्य सत्वरं तदा ॥६९॥
अक्षरब्रह्मणा तत्र स्वस्मान्नवं विनिर्मितम् ।
कोट्यर्बुदाब्जकन्यानां कान्तानां भिन्नवेशनम् ॥७०॥
ब्रह्मप्रियापत्तनं च प्रभुं श्रीकृष्णमीश्वरम् ।
चतुःकोटिचतुर्लक्षषट्पञ्चाशत्सहस्रकाः ॥७१॥
कान्ताः प्रवेशयामासुर्लक्ष्मीं चाभ्युदये क्षणे ।
मंगलं कारयामासुः प्रवेशविधिपूर्वकम् ॥७२॥
गणेशादेः पूजनं च मण्डपस्य प्रपूजनम् ।
गुरोश्च पूजनं यूपपूजनं देवतार्चनम् ॥७३॥
विप्राद्यैः कारयामासुर्जलपानं ददुस्ततः ।
महीमाना महामण्डपोत्तमे जग्मुरेव ह ॥७४॥
ततो गोपालकृष्णो वै भोजनानि निशागमे ।
कारयामास सर्वांश्च महीमानान् प्रजा अपि ॥७५॥
सर्वान् दासान् दासिकाश्च क्षेत्रपान् कर्मचारिणः ।
हरिणीर्बालकृष्णं च भोजयामास कंभरा ॥७६॥
चतुर्विधं भोजयित्वा मुक्तानीशान् सुरादिकान् ।
महीमानान्नरान्नारीर्मुनीन्नृपाँश्च बान्धवान् ॥७७॥

सृष्टित्रयनिवासाँश्च विप्रान् भक्तान् निजान् परान् ।
ताम्बूलादि प्रदायैव परिहारं चकार ह ॥७८॥
धनं च दापयामास विप्रेभ्यो दक्षिणास्तदा ।
सुरत्नानि विचित्राणि धनान्यपि बहूनि च ॥७९॥
मंगलं कारयामास गोपालः कृष्णरंजनम् ।
भुक्त्वा विश्रान्तिमापुश्च प्रस्वापं लेभिरे ततः ॥८०॥
युवत्यो बालकृष्णस्य प्रतिस्त्रीरूपयोगिनः ।
प्रतिगृहं प्रचक्रुश्च सेवनं नवहर्षिताः ॥८१॥
अविप्लुतमहासत्त्वमहावीर्यैः परेश्वरः ।
परब्रह्मनिजानन्दं ददौ ताभ्यो ह्यसीमकम् ॥८२॥
महानन्दसमाधौ मूर्छिताः क्षणेन सदृशीम् ।
निशां बुबुधुः कामिन्यो कान्तकृतां युगायिताम् ॥८३॥
राधिके रासरात्रिर्मे तस्या अग्रे लवायते ।
परेशस्य तु सामर्थ्यं केनापि नैव पार्यते ॥८४॥
अथ श्रीशिवदेवाऽऽद्याः प्रयागात्प्रययुर्गृहम् ।
वर्णयन्तो गुणान् स्वेषां सम्बन्धिपारमेश्वरान् ॥८५॥
धन्यभाग्यान्यमन्यन्त कृष्णाद्या अपि माधवाः ।
पार्वतीपत्तनं गत्वा सर्वेऽपि बुभुजुस्ततः ॥८६॥
पानताम्बूलकं लब्ध्वा सुष्वुपुः सुखनिद्रया ।
षष्ठ्यां प्रातर्विनिद्राश्चाभवन् मंगलवाद्यकैः ॥८७॥
कृतस्नानार्हणाः सर्वे दुग्धपानं व्यधुस्ततः ।
भोजनानि प्रचक्रुश्च मिष्टान्नपायसानि च ॥८८॥
जलपानानि जगृहुस्ताम्बूलकानि वै तथा ।
मध्याह्ने च प्रलेभुस्ते विश्रान्तिं च ततः परम् ॥८९॥
सम्मिलित्वा नरा नार्यः सम्बन्धिनः सुहृज्जनाः ।
गोप्य ईशान्यश्च सत्यः साध्व्यो देव्यस्तथाऽऽर्षिकाः ॥९०॥
मानव्यश्च सुराण्यश्च गण्यश्च फणिकास्तथा ।
भूत्यश्चापि तथाऽन्याश्च गणाश्च पार्षदास्तथा ॥९१॥
गोपाश्च कुशलं क्षेमं न्यूनसेवाक्षमापनम् ।
परस्परं समभ्यर्थ्य शिवेश्वरश्च पार्वती ॥९२॥
क्षमां तु महीमानानां याचित्वाऽथ विदायकम् ।
ददतुश्च यथायोग्यं तथोचतुस्तदा खलु ॥९३॥
भवतां चागमैः सर्वविधिः सुशोभनोऽभवत् ।
सर्वेषामुपकार्योऽस्मि क्षन्तव्यो मेऽपराधकः ॥९४॥
गिरिजाऽपि सतीभ्यश्च क्षमामयाचताऽपि वै ।
पुनश्चागन्तव्यमत्राऽपि कृपा कार्या सदा मयि ॥९५॥
इत्युवाच ततो विदायकं धनादिकं ददौ ।
पुरुषान् वै शिवस्वामी पूजयामास हारकैः ॥९६॥
नारीवर्गान् हिमपुत्री तथाऽशोककुमारिका ।
पूजयामासतुश्चापि विदार्यं ददतुस्तथा ॥९७॥
भूषाम्बराणि पात्राणि साधनान्युत्तमान्यपि ।
ततश्चक्रे परिहारं महीमानाश्च वै ततः ॥९८॥
सज्जा भूत्वा विमानानि चारुरुहुः समस्तकाः ।
श्रुत्वा गमनवाद्यानां घोषान् व्योम्नि द्रुतं तदा ॥९९॥
गमयामास सहसा विमानानि समन्ततः ।
यथामार्गं ययुः सर्वे शिवराजस्ततः खलु ॥१००॥
आज्ञापयामास गणान् चक्रुस्ते परिहारकम् ।
शिवपुरं मण्डपं च पार्वत्यानगरं तथा ॥१०१॥
कैलासं सहसा तिरोऽभावयन्नतिवेगतः ।
शिवेश्वरः शिवछत्रः पारितोषिकमुत्तमम् ॥१०२॥
कर्मचारिभ्य एवापि ददतुश्च यथोचितम् ।
विश्रान्तिं चावायतुश्च स्मरन्तौ कृष्णमीश्वरम् ॥१०३॥
अनादिश्रीकृष्णनारायणं च भेजिरे सदा ।
राधिके लोकरीत्यैव लोकेशाश्चाचरन्त्यपि ॥१०४॥
पाथेयानि चोत्तमानि प्रार्पितानि दिनान्तरे ।
प्राघूणिकेभ्य एवैते प्रशंसन्तो ययुर्गृहान् ॥१०५॥
विदार्यं बहुमानं च गृहीत्वा यश उत्तमम् ।
शिवशक्तिप्रेरिताश्च ययुर्नैजालयानिति ॥१०६॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने प्रोद्वाहतीर्थे कोटितीर्थे यज्ञतीर्थे, महीमानानां विदार्य, मिथः क्षमायाचना, वियोगे शोकः, विमानानां प्रगमनं, कुंकुमवापिक्षेत्रागमो दानं मंगलं गृहप्रवेशो भोजनानि नागरीणामानन्दविहारानिद्रादि चेतिनिरूपणनामा षण्णवत्यधिकद्विशततमोऽध्यायः ॥ २९६ ॥

श्रीकृष्ण उवाच—

राधिके षष्टिकाप्रातर्जजागरुः सुमंगलैः ।
वादित्रनिनदैः सर्वाः सकृष्णा महीमानकाः ॥ १ ॥
कृष्णगृहे कृतस्नानसन्ध्यावन्दनपूजनाः ।
सोपवीत्यः सर्वकान्ताः स्वाध्यायं चक्रुरुत्सुकाः ॥ २ ॥
पौरुषं सूक्तकं नारायणसूक्तं तथाऽपरम् ।
विष्णुसूक्तं च श्रीसूक्तं लक्ष्मीसूक्तं तथा च वै ॥ ३ ॥
देवीसूक्तं बृहत्साम वाचयामासुरेव च ।
वह्नौ च हवनं चक्रुः पञ्चयज्ञांश्च संव्यधुः ॥ ४ ॥

वृद्धपूजां तथा चक्रुः पतिपूजां तथा व्यधुः ।
शतरुद्रीयकं लक्ष्मीर्नित्यवच्च पपाठ ह ॥ ५ ॥
मालाजपं तथा चक्रुः 'ओं श्रीकृष्णनरायण' ।
'श्रीकृष्णश्रीपतिस्वामिन् स्वामिन् गोपालनन्दन' ॥ ६ ॥
इत्येवं राधिके नित्यं कुर्वन्ति स्म विधानतः ।
अनादिश्रीकृष्णनारायणस्वामिप्रपूजनम् ॥ ७ ॥
कुर्वन्त्यमूल्योपचारैः पतिपादजलं पपुः ।
आत्मनिवेदनमन्त्रं ददौ ताभ्यः पतिः स्वयम् ।
'ओं शरणं श्रीकृष्णनारायणोऽस्तु मम सर्वदा' ॥ ८ ॥
इत्येवं शरणं मन्त्रं ददौ हरिः पृथक् ततः ।
'ओं नमः श्रीकृष्णनारायणाय पतये स्वाहा' ॥ ९ ॥
एवं समर्पणमन्त्रं ददौ ताभ्यः स्वयं प्रभुः ।
'कालमायापापकर्मशत्रुयाम्यकुदृद्भयात् ॥१०॥
शूलमीनध्वजधनुश्चक्रस्वस्तिकवानव' ।
एवं रक्षणमन्त्रं च ददौ ताभ्यः स्वयं प्रभुः ॥११॥
'ब्राह्मयहं श्रीकृष्णनारायणभक्ताऽस्मि शाश्वती ।
अनादिश्रीकृष्णनारायणः स्वामी पतिश्च मे' ॥१२॥
एवं वै ब्राह्ममन्त्रं च ददौ ताभ्यः स्वयं प्रभुः ।
'बालकृष्णः परब्रह्म मम वै शाश्वतः पतिः ॥१३॥
पिता बन्धुः सुहृन्मित्रं रक्षकः पालकोऽस्तु सः' ।
आत्मनिवेदनमन्त्रमेवं ददौ स्वयं प्रभुः ॥१४॥
'अनादिश्रीकृष्णनारायणः श्रीपुरुषोत्तमः ।
कंभराश्रीनन्दनः श्रीगोपालकृष्णबालकः ॥१५॥
परब्रह्माऽक्षरातीतोऽवताराणां स्वरूपधृक् ।
अन्तर्यामी सदाऽस्मासु भगवान् सर्वकारणम् ॥१६॥
सर्वान्तरात्मा सर्वेशो निर्लेपो मोक्षदः स हि ।
पावनः सेवितो भुक्तिमुक्तिदश्च सदाऽवतु' ॥१७॥
इत्येवं ज्ञानमन्त्रं च स्वयं ताभ्यो ददौ प्रभुः ।
'कृष्णप्रियाप्रभक्ताऽहं श्रीहरिः शरणं मम' ॥१८॥
'श्रीकृष्णश्रीहरिः श्रीस्वामी साक्षात् शरणं मम' ।
'श्रीकृष्णदेवो मे स्वामी श्रीहरिः शरणं मम' ॥१९॥
एतान् शरणमन्त्रांश्च तादात्म्यबोधकान् ददौ ।
'ब्रह्मप्रियाः समस्ताश्च राधालक्ष्म्यादियोषितः ॥२०॥
परब्रह्मस्वरूपाश्च परब्रह्मार्धमूर्तयः ।
परब्रह्मार्थसर्वस्वा दिव्या मुक्तिप्रमुक्तिदाः ॥२१॥
तत्सम्बन्धिक्रियाश्चापि निर्गुणा मोक्षदाः सदा' ।
इति ज्ञानमयं मन्त्रं ताभ्यः स्वयं ददौ प्रभुः ॥२२॥
'यो यो या या बालकृष्णं तत्प्रियाश्च भजन्ति वै ।
स स सा सा तत्स्वरूपा दिव्या मोक्षप्रदाः सदा' ॥२३॥
इतिज्ञानं ददौ चापि निर्गुणत्वादिदायकम् ।
इत्येवं ज्ञानमन्त्राढ्याः सर्वा विद्याधराः स्त्रियः ॥२४॥
सिषेविरे सदा राधे स्वामिश्रीकृष्णमीश्वरम् ।
अथ श्रीकम्भरादेवी प्रातः कृताह्निका सती ॥२५॥
सुता विलोकयितुं चागतस्त्रीणां सुमाननम् ।
व्यधाद् भोजनपानाद्यैस्ताम्बूलादनसत्कैः ॥२६॥
प्रशशंसुस्तथा नार्यो लक्ष्मीं सर्वास्तथाऽपराः ।
कान्ता वीक्ष्य सुरूपाश्च ददुश्चाशिष ता मुहुः ॥२७॥
सुखिन्यः शाश्वतिकाश्च भवन्तु कृष्णयोषितः ।
पुत्रपुत्र्यादिमत्यश्च सदा सौभाग्यसंयुताः ॥२८॥
दत्त्वैवमाशिषो नार्यो प्राप्य पूजां ययुर्गृहान् ।
श्रीमद्गोपालकृष्णश्च महीमानान् समस्तकान् ॥२९॥
कृतस्नानप्रपूजांश्च भोजयामास पायसम् ।
मिष्टान्नानि विभिन्नानि शाकानि विविधान्यपि ॥३०॥
अमृताऽऽस्वादयुक्तानि पक्वान्नान्योदनानि च ।
सूपः क्वथिका रम्याश्च दधिदुग्धानि यानि च ॥३१॥
केसरशर्करायुक्तान्यम्ब्लतिक्ता वटीस्तथा ।
जलपानानि मिष्टानि सुगन्धीनि शुभानि च ॥३२॥
ताम्बूलकानि दिव्यानि ददौ सर्वेभ्य एव सः ।
कुंकुमवापिकावासिप्रजाः सौराष्ट्रवासिकाः ॥३३॥
भोजयामास षष्ठ्यां वै कृष्णोत्सवनिमित्ततः ।
कोटिशो मानवा बुभुजिरे श्रीकम्भराऽऽलये ॥३४॥
सर्वाः पुत्र्यस्तत्र चक्रुः परिवेषणमुत्सुकाः ।
आमध्याह्नं प्रोत्सवः सः कृतो भोजनसंभृतः ॥३५॥
अश्वपट्टसरस्तीरे मध्याह्नोत्तरमुत्तमः ।
निर्जग्मुस्तास्ततो वनान्याद्रष्टुं पतिसंयुताः ॥३६॥
महीमानास्तदा सर्वे विशश्रमुः सुखालये ।
कान्तानां च हरेर्विमानकं चोत्तरदिग्भवम् ॥३७॥
प्रदेशं चाभिलक्ष्यैव प्रससार विहायसा ।
ताश्च शालवनं बिल्ववनं वीक्ष्योत्तरे ततः ॥३८॥
पालाशारण्यमावीक्ष्य वीक्ष्याऽपि चान्दनं वनम् ।
देवदारुवनं वीक्ष्य तुलसीवनमुत्तमम् ॥३९॥
चम्पकानां वनं पूर्वदिशि वृन्दावनं तथा ।
चन्दनानां वनं वीक्ष्य कर्णिकानां वनं तथा ॥४०॥
आम्राणां च वनं वीक्ष्य कुन्दानां स्थलपद्मिनाम् ।
अशोकानां वनं वीक्ष्य केतकानां वनं तथा ॥४१॥

कमलानां पारिजातादीनां कदम्बशाखिनाम् ।
दक्षिणे त्वाश्रमान् वीक्ष्य लोमशादिऋषिकृतान् ॥४२॥
जम्बीरनारिकेलादिसमुद्यानं व्यलोकयन् ।
पश्चिमे चामृतानां च कदलीनां वनानि च ॥४३॥
वीक्ष्य भूमिं रमणीयां बद्रीवनसुशोभिताम् ।
बकुलानां वनं वीक्ष्य जाम्बूवनं प्रवीक्ष्य च ॥४४॥
गुन्द्रवनं तथा सीताफलवनं विलोक्य च ।
समाययुश्चाश्वपट्टसरो दृष्ट्वा निशामुखे ॥४५॥
अवतीर्य विमानात्ताः सन्ध्यावन्दनमाचरन् ।
ततो ययुर्निजावासान् बालकृष्णेन संयुताः ॥४६॥
भोजनं चक्रिरे सर्वास्ततः शृंगारमाचरन् ।
बालकृष्णो महीमानानां सेवनार्थं ययौ तदा ॥४७॥
पित्रा भ्रात्रादिभिः साकं महामण्डपमन्दिरे ।
सर्वान् संभोजयामास बहुमानपुरःसरम् ॥४८॥
ताम्बूलकादि प्रददौ ददौ तत्राऽप्यपेक्षितम् ।
सर्वं चास्ते प्रपूर्णं वै किं न्यूनं माधवीगृहे ॥४९॥
महीमानाः प्रसन्नाश्चाऽभवन् वरविवेकतः ।
विश्रान्तिं परमां रात्रौ लेभिरे नरयोषितः ॥५०॥
अनादिश्रीकृष्णनारायणो मन्दिरमाययौ ।
प्रतीक्षन्ते नवोढास्ताः कान्तं सुखयितुं तदा ॥५१॥
सर्वासां नवपत्नीनां पूरयितुं मनोरथान् ।
कोट्यर्बुदाब्जरूपाणि दधार श्रीपतिः प्रभुः ॥५२॥
प्रत्येकस्यास्तु भवने भवने स रतिप्रदः ।
प्रवर्तते निशायां स महायोगेश्वरेश्वरः ॥५३॥
शृणु राधे तदा त्वेका कन्या दिव्या समागता ।
द्रष्टुं प्रशंसितं हंसरूपदेवैर्हि मण्डपम् ॥५४॥
स्वल्पं चापि महान्तं च वीक्षितुं समुपागता ।
सा तु पूर्वं महान्तं वै मण्डपं कोटिरूपिणी ॥५५॥
भूत्वा व्यलोकयत् सर्वं महाश्चर्यं गता तदा ।
पुनश्चाल्पं मण्डपं च व्यलोकयत् स्थिरदृशा ॥५६॥
सृष्टित्रयं प्रवीक्ष्यैव महाश्चर्ये पुनर्गता ।
मण्डपाय नम उक्त्वा क्षणं मौनं स्थिताऽभवत् ॥५७॥

**श्रीराधिकोवाच—**

का सा कन्या कथं तत्रागत्य पुनर्गता क्व सा ।
वद मे भगवन् सर्वं आश्चर्यं चेद् विद्यते परम् ॥५८॥

**श्रीकृष्ण उवाच—**

राधिके मण्डपं दृष्ट्वा हंसरूपा हि देवताः ।
स्वर्गे गत्वा प्रशशंसुर्मण्डपं बहुशोभनम् ॥५९॥
तच्छ्रुत्वा द्यौः स्वयं द्रष्टुं तदा मनोऽकरोद् द्रुतम् ।
द्यौः स्वयं कन्यका भूत्वाऽऽगता कुंकुमवापिकाम् ॥६०॥
सकुण्डला समुकुटा सशृंखला सभूषणा ।
सर्वतेजोभृता पूर्णाऽमृतपीयूषसंभृता ॥६१॥
रूपानुरूपावयवा मोहिनीवाऽपरा यथा ।
राधा वा कमला वा चापरेव तत्र चागता ॥६२॥
अदृष्टं चाऽश्रुतं वापि तया पूर्वं क्वचित्तु यत् ।
तत्सर्वं मण्डपे वीक्ष्य महाश्चर्यं गता सती ॥६३॥
स्वल्पे तु मण्डपे देवी यूपपार्श्वे स्थिताऽभवत् ।
नमस्कारयुतादेव्या मण्डपः स्वागतं व्यधात् ॥६४॥
समागच्छ स्वर्गदेवि स्वागतं करवाणि ते ।
पाद्यमर्घ्यं मधुपर्कं गृहाण भोजनं जलम् ॥६५॥
इत्युक्त्वा प्रददौ तस्यै सिंहासनं जलादिकम् ।
मधुपर्कं ददौ चापि भोजनं प्रददौ शुभम् ॥६६॥
लब्ध्वा सा मण्डपं प्राह मुक्तराट् मण्डप ! शृणु ।
यस्याऽयं मण्डपश्चेदृग् बालकृष्णस्य विद्यते ॥६७॥
तत्प्रासादः कीदृशः स्यात् कीदृश्यश्च समृद्धयः ।
तद्भोक्त्र्यश्चापि तत्कान्ताः कीदृश्यः स्युः सुदिव्यकाः ॥६८॥
कीदृशः स्याच्च वै तासां कान्तश्चाऽस्याऽपि वैभवाः ।
कीदृशाश्चापि वै स्युश्च द्रष्टुमिच्छामि द्यौरहम् ॥६९॥
कोट्यर्बुदाब्जकान्तानामेक एव पतिः स तु ।
श्रुतो मयाऽद्य देवानां बृहस्पतेर्मुखादितः ॥७०॥
कथं स सर्वसेव्यः स्याद् द्रष्टुमिच्छामि द्यौरहम् ।
मयि देवा निवसन्ति तेभ्यश्चार्यं तु किंबलः ॥७१॥
किमैश्वर्यश्च किंवीर्यश्च कियोगबलोऽस्ति वा ।
किंरूपो वा वर्ततेऽप्येकलः सर्वपतिर्हि वै ॥७२॥
इन्द्रोऽपि मत्पतिर्नेदृक्समर्थोऽस्तीति वै श्रुतम् ।
साऽहं द्रष्टुं समायातोर्वश्या सम्प्रेरिता सती ॥७३॥
उक्ता च देवगुरुणाऽसहमाना समागता ।
देवैश्चाऽहमधिक्षिता न त्वं मण्डपसदृशी ॥७४॥
न त्वं श्रीबालकृष्णस्यैश्वर्यकोट्यंशगाऽपि वा ।
तदहं त्वागता चाऽद्य संदृष्ट्वा मण्डपं त्विह ॥७५॥
अदृष्टं चाश्रुतं वापि मणिं च देहलीस्थितम् ।
विगर्वाऽस्मि हि सञ्जाता द्रष्टुमिच्छामि तच्छ्रियः ॥७६॥
तत्समृद्धीस्तं दिव्यकान्तं ताश्च कोट्यब्जयोषितः ।
विशेषतो नवां लक्ष्मीं द्रष्टुमिच्छामि द्यौरहम् ॥७७॥
इत्युक्तो मण्डपस्तूर्णं श्रीकृष्णस्यैव मन्दिरम् ।
गत्वा लक्ष्मीगृहद्वारि वेत्रधारमजिज्ञपत् ॥७८॥

वेत्रधरो रत्नयुक्तो गत्वाऽऽशं समवाप्य च ।
द्यां तां प्रवेशयामास कन्यां लक्ष्मीसुमन्दिरम् ॥७९॥
कोट्यर्बुदाब्जरूपा द्यौर्भूत्वा वै समकालिनी ।
प्रविवेश तु सर्वासां गृहाणि वीक्षितुं तदा ॥८०॥
सा ददर्श दिव्यरूपं प्रत्येकया सह स्थितम् ।
विभिन्नचेष्टकं कृष्णनारायणं गृहे गृहे ॥८१॥
लक्ष्म्या गृहे तु दोळायां दोलायमानमच्युतम् ।
लक्ष्म्या साकं ददर्शैनं पुपूज द्यौर्ननाम ह ॥८२॥

माणिक्यास्तु गृहे कृष्णं भुञ्जानं सा ददर्श ह ।
पद्मावत्या गृहे कान्तं पर्यंकस्थं ददर्श सा ॥८३॥
रमायास्तु गृहे दुग्धं पिबन्तं सा ददर्श ह ।
राधायास्तु गृहे शय्यास्थितं कृष्णं ददर्श सा ॥८४॥
श्रीगृहे तु श्रिया साकं रमन्तं द्यूतमेव सा ।
ददर्श कुशलासौधे भक्षयन्तं हि ताम्बुलम् ॥८५॥
सरस्वतीगृहे तं च गायन्तं वीणया स्थितम् ।
गंगागृहे गंगया वै पादसंवाहितं च सा ॥८६॥
ददर्श विरजागेहे विहरन्तमितस्ततः ।
दुर्गागृहे हसन्तं च नर्मवाक्यैर्ददर्श सा ॥८७॥

शारदामन्दिरे माला जपन्तं तं ददर्श ह ।
काशीराजस्य पुत्रीणां गेहेषु कृष्णरूपिणम् ॥८८॥
श्रृंगारयन्तं वनिताः ददर्शाऽऽनन्दकारिणम् ।
आजनाभीगृहेष्वेनं ददर्श द्यौः पृथग्विधम् ॥८९॥
ऐतिहासिकवार्तास्थं कलाकौशल्यवर्तिनम् ।
अशनादित्रिंशदूर्ध्वशतपत्नीगृहे तु तम् ॥९०॥
शय्यासुयोगभावेन रमन्तं सा ददर्श ह ।
मंगलादियोषितां तु गेहेषु केशसाधनम् ॥९१॥
प्रकुर्वन्तं बालकृष्णं ददर्श द्यौस्तदा प्रभुम् ।
औष्णालयीयनारीणां गेहे ताभिः प्रमर्दितम् ॥९२॥
स्नपितं तैलसाराद्यैर्भूषाभिर्भूषितं प्रभुम् ।
ददर्शाऽथ च प्राचीनीयकान्तानां तु मन्दिरे ॥९३॥
अलक्तकादिभिस्ताभिः रज्यमानं च चित्रितम् ।
रमन्तं हासयन्तं च ददर्श द्यौः सुभाग्यगा ॥९४॥
राशियानीयकान्तानां गृहेषु स्वामिनं हरिम् ।
तत्तद्देशीयवृत्तान्ते मग्नं ददर्श शोभनम् ॥९५॥
किंपुरुषीयपत्नीनां गृहेषु कम्भरात्मजम् ।
संगीतमग्नं सर्वाभिः सह ददर्श सा तदा ॥९६॥
केतुमालीयकान्तानां मन्दिरेषु शुकाऽनुजम् ।
राजभूषा धारयन्तं ददर्श राजरीतिगम् ॥९७॥

अमरीणां गृहेष्वेनं नृत्यन्तं ताभिरन्वितम् ।
ललनाभिः सह द्यौश्च ददर्शाऽऽनन्दसंभृतम् ॥९८॥
हारीतीनां निवासेषु सम्बन्धिजनसेवितम् ।
आसीनं चासने स्त्रीभिर्वेष्टितं तं ददर्श सा ॥९९॥
ब्राह्मीलीनां निवासेषु देवपूजापरायणम् ।
रात्रौ ददर्श तं द्यौश्च दिव्यरूपधरं प्रभुम् ॥१००॥
आब्रिक्तीनां मन्दिरेषु गायनं वाद्यतालकैः ।
रजोभावभरं कृष्णं स्वमग्नं सन्ददर्श सा ॥१०१॥
पैतृकीनां गृहे कृष्णं श्राद्धयुक्तं ददर्श सा ।
देवीनां रतिभावाद्यैर्युक्तं ददर्श माधवम् ॥१०२॥
कुत्रचिन्नाट्यखेलं च लोकयन्तं स्त्रिया सह ।
कुत्रचित् प्रेमभावेन स्पृशन्तं तं ददर्श सा ॥१०३॥
कुत्रचिद्योगिवद्ध्याने मग्नं ददर्श सा तदा ।
कुत्रचित् तं सुप्तमेव निद्रायां सा ददर्श ह ॥१०४॥
कुत्रचिद्वै शिक्षयन्तं योषितो ब्रह्मवेदनम् ।
कुत्रचित्पूरयन्तं च मनांसि योषितां तदा ॥१०५॥
ददर्श कुत्रचिन्मालां ग्रथ्नन्तं पुष्पजातिभिः ।
द्यौर्ददर्श तं गृहाङ्गणे स्थितं वै तदैकलम् ॥१०६॥

कुत्रचित्तु समायान्तं पार्श्वगृहाद् गृहान्तरम् ।
कुत्रचिद गृहमध्ये तु तपन्तं वह्निना च तम् ॥१०७॥
ददर्श बहिरेवैनं द्वारि वा कुत्रचित्प्रभुम् ।
कुत्रचिद् भार्यया साकं यान्तं ददर्श भूषितम् ॥१०८॥
कुत्रचिद् दर्पणे नैजां पत्नीं मुखं सचन्द्रकम् ।
दर्शयन्तं च कुर्वन्तं चन्द्रकं सा ददर्श ह ॥१०९॥
कुत्रचित्प्रमदानेत्रेऽञ्जयन्तं कज्जलं च तम् ।
कुत्रचित् स्वप्रियाभाले कुर्वन्तं पत्रिकां तदा ॥११०॥
कुत्रचित् पादयोश्चापि लेपयन्तमलक्तकम् ।
कुत्रचिच्चातितादात्म्यात् समाश्लिष्यन्तमित्यपि ॥१११॥
कुत्रचित्तं भोजयन्तं कवलेन निजाश्रिताम् ।
कुत्रचित्ताम्बूलरसं चार्पयन्तं मुखेन ह ॥११२॥
ददर्श श्रीकृष्णनारायणं द्यौर्व्यजनान्वितम् ।
क्वचिद्ददर्श तं राजाधिराजं त्वासनेस्थितम् ॥११३॥
क्वचिच्च मर्दितं संवाहितं बह्वीभिरेव तम् ।
क्वचिन्नेत्रमिषेणापि त्वाह्वयन्तं निजां प्रियाम् ॥११४॥
क्वचिल्लिखन्तं पत्रं च क्वचिन्निगूढचेष्टकम् ।
एवं भिन्नक्रियं श्रीमत्कृष्णनारायणं विभुम् ॥११५
ददर्श द्यौः सर्वमन्दिरेषु सर्वायुतं प्रभुम् ।
पुपूज परया प्रीत्या दम्पती सा गृहे गृहे ॥११६

लक्ष्म्याद्याश्चापि तां ज्ञात्वा द्यां महीमानिकां निजाम् ।
स्वागतं परमं चक्रुर्भोजयामासुरुत्सुकाः ॥११७॥
ददुश्च पुष्पहारादीन् पारितोषिकमुत्तमम् ।
कान्तलीलास्मरणं च मोक्षदं प्रददुः स्त्रियः ॥११८॥
स्मृद्धिं विलोकयामास द्यौस्तु सर्वोत्तमोत्तमाम् ।
या न स्वर्गे न वै सत्ये नेश्वरेष्वपि सन्ति च ॥११९॥
तास्ताः स्मृद्धीश्चाम्बराणि विभूषाश्चासनानि च ।
पर्यंकान् शयनार्हांश्च पात्राणि मणिहीरकान् ॥१२०॥
कोशान् चतुष्किकान् यन्त्रोत्तमानि स्वर्णपेटिकाः ।
विमानानि विलोक्यापि महाश्चर्यं गताऽभवत् ॥१२१॥
इन्द्रगृहे ब्रह्मसौधे सूर्यगृहे शशिगृहे ।
ध्रुवालये कुबेरस्याऽऽलये स्मृद्धिर्न याऽस्ति ताम् ॥१२२॥
विलोक्यैकगृहे द्यौः स्वगर्वहीना बभूव ह ।
आशिषं च क्षमां प्राप्याऽऽगत्य वै मण्डपं ततः ॥१२३॥
ययौ स्वर्गं भासयन्ती दिशो दश विहायसा ।
इत्येवं राधिके ! श्रीमद् बालकृष्णस्य चेष्टितम् ॥१२४॥
कोट्यैश्वर्यसमायुक्तं कोट्यर्बुदाब्जपत्निकम् ।
तावतीभिः सहशश्वत् शृंगारभावसंभृतम् ॥१२५॥
दिव्यमेव हि मन्तव्यं निर्गुणं मोक्षदं शुभम् ।
नित्यमेवं सुखदो वै भगवान् भक्तिसेविनाम् ॥१२६॥
नवोढानां रात्रिसखः प्रसुष्वाप सुखोत्तरम् ।
सर्वकामप्रपूरः स भगवान् भाग्यगोचरः ॥१२७॥
अथ द्यौः राधिके ! स्वर्गगताऽपि मोहिता हरौ ।
पत्नीं भवितुं सततं चेयेषाहर्निशं ततः ॥१२८॥
कदाचित कामभोगेच्छावत्यायात् श्रीहरिं रहः ।
तृप्तां चक्रे हरिर्भुक्त्वा सा ययौ मुदिता दिवम् ॥१२९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने षष्ट्याः प्रातः कृताह्निकाः कान्ता मन्त्रान् जगृहुः, महीमानानां भोजनम्, युवतीनां विमानेन वनावलोकनार्थं व्योमविहरणम्, रात्रिभोजनम्, लीलां द्रष्टुं द्यौः कन्या समायाता, कोट्यर्बुदाब्जयोषितां सौधेषु भिन्नलीलं श्रीकृष्णनारायणं वीक्ष्य मुग्धा द्यौः स्वर्गं गता, हरेर्निद्रा चेत्यादिनिरूपणनामा सप्तनवत्यधिकद्विशततमोऽध्यायः ॥ २९७ ॥

श्रीकृष्ण उवाच—

राधिके युगपद् रात्रौ स्वांगनानां सुखप्रदः ।
जजागार हरिर्वाद्यैर्मंगलैः स्तवनैः प्रगे ॥ १ ॥
जजागरुर्विधेयार्था ब्राह्मे मुहूर्तके तदा ।
हरिः प्राह च सर्वाभ्यो ध्याने तिष्ठत मे क्षणम् ॥ २ ॥
मम योगेन दिव्याः स्थो भवत्यश्चाऽत्र योषितः ।
मुक्ता मायाविहीनाश्चाऽऽवरणादिविवर्जिताः ॥ ३ ॥
इत्युक्ता राधिके ! सर्वाः कृष्णमाधवयोषितः ।
पतिव्रताः स्वकान्ताज्ञां लब्ध्वा ध्याने स्थिताः क्षणम् ॥ ४ ॥
तावद्भगवति सर्वा नाडीप्राणवशास्तदा ।
संहृत्य नाडिकाप्राणान् समाधौ हृदये ययुः ॥ ५ ॥
विस्मृता देहभानं ता हृदये कान्तसन्निधौ ।
ददृशुः कान्तमूर्तिस्थं ब्रह्मतेजोतिभासुरम् ॥ ६ ॥
तेजसां राशयस्तत्र महार्णवा इवाऽभवन् ।
तत्र व्यलोकयन् स्वर्गं सर्वदेवालयाँस्ततः ॥ ७ ॥
ततोऽग्रे स्वविमानेन स्वामिना सह तत्परम् ।
ययुः पितृप्रदेशाँश्चाऽऽलोकयन् पुण्यभासुरान् ॥ ८ ॥
ययुस्ततोऽपि चाग्रे वै कृष्णकान्तेन संयुताः ।
सत्यलोकं ययुः सर्वास्तन्निवासैश्च सत्कृताः ॥ ९ ॥
दिव्यभावं समापन्नाः पृथिव्यावरणं दृढम् ।
विभिद्य प्रययुः सर्वाः सलिलावरणं ततः ॥१०॥
अग्रे ता दृष्टवत्यश्च वैकुण्ठं तेजसोऽन्तिकम् ।
आवरणस्य सन्धौ वै तत्र श्रीरामसेविकाः ॥११॥
सीतारमाद्यास्तासां वै स्वागतं संव्यधुर्मुदा ।
रामादित्यश्चकाराऽपि स्वागतं परमात्मनः ॥१२॥
ततश्चाऽग्रे ययुस्तत्र मरुत्पटं विहाय च ।
व्योमपटं तथाऽहंभित्तिकां विहाय चोर्ध्वके ॥१३॥
महत्तत्त्वात्मकं चावरणं विहाय चोपरि ।
ययुः कान्तेन सहिताः शुभं वैराजमन्दिरम् ॥१४॥
तत्र तेनाऽर्चितः कृष्णनारायणः परेश्वरः ।
पूजिताश्च हरेः सर्वा वैराज्या राजयोषिता ॥१५॥
ततश्चाग्रे ययुः सर्वा हिरण्यगर्भमण्डलम् ।
महाविष्णोर्महाराज्यं यत्र गोपालकृष्णकः ॥१६॥
निजेश्वरः श्रीदेव्या च महालक्ष्म्याख्ययोषिता ।
तथा श्रीकम्भरादेव्या सह तत्र विराजते ॥१७॥
ताभिश्च पूजितो देवः कान्तपिता ततश्च वै ।
कान्तमाता पूजिता च ताभ्यां श्रियश्च सत्कृताः ॥१८॥
भोजिता आश्लिष्य चाशीर्वादैः सम्यक् प्रयोजिताः ।
पतिश्च पूजितश्चाज्ञामादाय चोर्ध्वके स्तरे ॥१९॥
पतियुक्ता विमानस्था ययुर्भूम्नो महास्थलम् ।
भूम्न्या देव्या सत्कृतास्ता भूम्ना च सत्कृतो हरिः ॥२०॥

तद्विभूतीर्विलोक्याऽग्रे वासुदेवाऽऽलयं ययुः ।
वासुदेवी चकाराऽऽसां सत्कारं बहुभाविता ॥२१॥
सुसत्कारं हरेश्चक्रे वासुदेवनरायणः ।
अमृतानां प्रपानं च पीयूषभोजनादिकम् ॥२२॥
वासुदेव्यः कारयामासुः प्रपूजां व्यधुस्तथा ।
अथाऽवतारधामानि प्रदर्श्य भगवाँस्ततः ॥२३॥
अक्षरं धाम परमं निजं जगाम वै हरिः ।
ब्रह्महृदे स्नपयित्वा निष्कास्याऽक्षरतेजसि ॥२४॥
निजमूर्तौ ततो लीनीकृत्य सर्वाश्च वै तदा ।
मुक्ता दिव्याश्च सारूप्यान्विता विधाय वै तदा ॥२५॥
स्वेन रूपेण निष्पन्नाः सर्वावरणवर्जिताः ।
पुरुषोत्तमभावाश्च परब्रह्मात्मिकाश्च ताः ॥२६॥
रूपधर्मस्वभावैश्च गुणैः सर्वात्मना हरिः ।
स्ववद् व्यधात् तदा चात्र राधे किं वै वदामि ते ॥२७॥
कुंकुमवापिकाक्षेत्रे शरीराणि स्वयोषिताम् ।
धामयोग्यानि जातानि मायिकत्वं लयं गतम् ॥२८॥
चैतन्यैकरसानन्दात्मकानि सन्ति सर्वदा ।
सार्वज्ञ्यात्मज्ञानपिण्डविकासाढ्यानि तानि हि ॥२९॥
सम्पन्नान्यभिनिष्पन्नान्येव धामगतानि वत् ।
प्रजातानि ततो ब्रह्महृदे स्नानात्ततोऽपि च ॥३०॥
ब्राह्मीतनुस्वरूपाणि मुक्तात्मकानि सन्ति च ।
अक्षरब्रह्मरूपाणि तेजोमयानि तानि वै ॥३१॥
प्रजातान्यथ मूर्तिस्थितिलाभतोऽधिकानि वै ।
भगवद्रूपं प्राप्तानि भागवतानि सन्ति वै ॥३२॥
प्रजातानीति चैतन्यब्राह्मभागवतानि हि ।
ज्ञानतेजःसुसारूप्याभिधानानि भवन्ति हि ॥३३॥
तत्राऽसंख्याभिरेताभिर्मुक्तानीभिः प्रसेवितः ।
मुक्तैश्च सेवितः श्रीमान् कृष्णनारायणः प्रभुः ॥३४॥
दर्शयामास ताभ्यो वै साम्राज्यं त्वक्षरात्मकम् ।
सार्वभौमं महाराज्यं सृष्टित्रयोर्ध्वसंस्थितम् ॥३५॥
निजैश्वर्याणि सर्वाणि विभूतीः सकला अपि ।
नित्यानन्दानि भोग्यानि दर्शयामास माधवः ॥३६॥
समृद्धीर्दिव्यां मण्डलानि मुक्तानीनां समन्ततः ।
मुक्तानां मण्डलकोटीर्दर्शयामास कान्तकः ॥३७॥
उद्यानानि विचित्राणि मन्दिराणि शुभानि च ।
सर्वासां निजवासाँश्च दर्शयामास कृष्णकः ॥३८॥
सम्पदः सर्वदिव्याश्च सर्वसौभाग्यकानि च ।
सर्वेष्टकल्पमणिकान् दर्शयामास कौस्तुभान् ॥३९॥
निजमूर्तेः किरणानि पुष्टिदानि समन्ततः ।
तृप्तिदानि सुखावाप्तिप्रदान्यानन्ददानि च ॥४०॥
रतिप्रीतिहर्षदानि कामकल्पप्रदानि च ।
नित्यानन्दभृतान्येव दर्शयामास वै पतिः ॥४१॥
सर्वविधास्तथा शालाः सेवायोग्या नवा नवाः ।
यथेष्टाऽव्याहताश्चापि विहाराणां स्थलीः शुभाः ॥४२॥
अनादिश्रीकृष्णनारायणव्याप्ता ह्यदर्शयत् ।
वेषभूषाम्बरशृंगारादीन् दिव्यानदर्शयत् ॥४३॥
रहस्यभाववासाँश्च शय्या रम्या अदर्शयत् ।
तत्रत्यं सर्वमेवाऽऽभ्यो दर्शयित्वा ततःपरम् ॥४४॥
परब्रह्मानन्दमयं भोजनं पानमुत्तमम् ।
ताम्बूलकं ददौ ताभ्यो विहारं प्रददौ सुखम् ॥४५॥
ऐकान्तिकं सुखं चापि रहस्यजं ददौ प्रभुः ।
ततो धाम्नो महामुक्तकृतां पूजां शुभोचिताम् ॥४६॥
जग्राह भगवाँस्तासां सन्निधौ मुक्तयोषिताम् ।
मुक्तानीभिश्च मुक्तैश्च कृतां पूजां च ता अपि ॥४७॥
जगृहुर्दिव्यरूपाश्च स्वागतं माननं बहु ।
एवं निजं गृहं सर्वं प्रदर्श्य भगवान् हरिः ॥४८॥
अक्षरात् प्रययौ श्रीमद्गोलोकं धाम वै ततः ।
श्रीकृष्णेन कृतं तत्र स्वागतं परमात्मनः ॥४९॥
राधादिभिः कृतं तत्र सम्मानं हरियोषिताम् ।
कामधेनुपयःपानं ददू राधादयस्तदा ॥५०॥
पायसान्नानि भोज्यानि शृंगाराणि ददुस्तथा ।
ततः शीघ्रं च वैकुण्ठं ययौ ताभिः सह प्रभुः ॥५१॥
तत्र कृतं स्वागतं च लक्ष्म्या कमलया तथा ।
भार्गव्या च श्रिया विकुण्ठया चान्याभिरित्यपि ॥५२॥
नारायणेन च कृतं सम्मानं श्रीहरेस्तदा ।
पूजनं स्तवनं चापि प्राप्य प्रदर्श्य भूतिकाः ॥५३॥
सादाशैवं हि कैलासं दिव्यं ययौ स्वयं प्रभुः ।
तत्रत्याश्च समग्राश्च विभूतीर्भगवान् प्रियाः ॥५४॥
दर्शयामास शैवीश्च दुर्गाद्याश्चाप्यपूजयन् ।
गणाः सर्वेऽपि वै तत्र चक्रुर्हरेः प्रपूजनम् ॥५५॥
ततो ययौ स ताभिर्वै सहितः श्रीहरिः खलु ।
कौतुकार्थं महामायाधाम मायामयं शुभम् ॥५६॥
व्यलोकयन् हरेः कान्तातुल्याः कान्ताश्च कोटिशः ।
सर्वा ब्रह्मप्रियास्तत्र सम्मानं बहु लेभिरे ॥५७॥
मायाभिश्च विचित्राभिः कन्याभिश्चाभिपूजिताः ।
सेविता बहुधा तत्र मायिकैर्वस्तुसत्तमैः ॥५८॥

भोज्यपानसुभोगैश्चाम्बरभूषाप्रसाधनैः ।
सर्वोत्तेजकचूर्णैश्च शृंगाररसवर्धकैः ॥५९॥
सर्ववेषोपकरणैः सर्वसौभाग्यवस्तुभिः ।
सर्वानन्दप्रदैर्भावैः सेविताः पूजिताः स्त्रियः ॥६०॥
महामाया स्वयं तत्र पादसंवाहनं हरेः ।
चकारेति महाश्चर्यं प्रापुः सर्वा हरिस्त्रियः ॥६१॥
राजराजेश्वरी सर्वेश्वरी राज्ञीश्वरी हि सा ।
स्वपतिं सेवमाना वै सर्वाभिरवलोकिता ॥६२॥
प्रदर्श्य च हरिर्मायाधाम पश्चाद् द्रुतं ततः ।
विष्णोर्धाम ययौ तत्र वैष्णव्यो मानन व्यधुः ॥६३॥
सर्वासां स्वागतं नीराजनं प्रपूजनं तथा ।
भोजनं पानमिष्टं च ददुर्वस्त्राम्बराणि च ॥६४॥
ततः श्रीबालकृष्णोऽसौ ययौ प्रियाभिरञ्जनः ।
शतमस्तकविष्णोश्च सहस्राननशार्ङ्गिणः ॥६५॥
लक्षाननस्य विष्णोश्च कोट्याननस्य शार्ङ्गिणः ।
अब्जनेत्रस्य शंभोश्च पद्माननस्य वेधसः ॥६६॥
परार्धाननसंशोभद्वेधसोऽण्डानि वै हरिः ।
दर्शयामास सर्वाणि सृष्ट्यानन्त्यमयानि हि ॥६७॥
तैस्तैः सम्पूजितः कृष्णनारायणः प्रियोनिजः ।
दर्शयामास तेषां च विभूतीः स्वसमर्पिताः ॥६८॥
अनादिश्रीकृष्णनारायणार्पिता विभूतिकाः ।
भुञ्जते सर्व एवैते ब्रह्मप्रियाभिरेव तत् ॥६९॥
विलोकितं हि साक्षाद्वै समाधौ राधिके तदा ।
ततस्ता वै समादाय सूर्यचन्द्रादिकान् ग्रहान् ॥७०॥
दर्शयामास लोकस्थान् निरयात्मकसंस्थितान् ।
तान् विलोक्य तदा तासां मनो लग्नं न तत्र वै ॥७१॥
शीघ्रं ता आनयामास क्षेत्रं कुंकुमवापिकाम् ।
नैजे दिव्याक्षराख्ये वै मण्डपे भवने शुभे ॥७२॥
आक्षरेण समे तत्र मनः स्थैर्यमवाप ह ।
समाधितश्च ताः सर्वा जजागरुस्तदा निजान् ॥७३॥
देहान् धामगतान् दिव्यान् प्राप्तानमानवान् परान् ।
ददृशुश्चावरणभाववर्जितानप्यभौतिकान् ॥७४॥
अमायिकान् सदा त्वेकरूपान् क्षुत्तृड्विवर्जितान् ।
मायागुणैर्विहीनाँश्च धामैश्वर्यसमन्वितान् ॥७५॥
सर्वधामस्वभावाँश्चाऽक्षरतुल्यसुखात्मकान् ।
ब्रह्मानन्दभराँश्चापि दिव्यवेषाभिशोभितान् ॥७६॥
पत्यन्यूनसमैश्वर्यान् दिव्यताशेवधिस्थितीन् ।
महानन्दभरा जाताः समर्था बालकृष्णवत् ॥७७॥
एवमासाद्य दिव्यत्वं पतिं प्राप्य च तास्तदा ।
सार्वज्ञ्यं लेभिरे पत्न्यो वधूट्योऽप्यवधूटिकाः ॥७८॥
एवं ददौ हरिस्ताभ्यो निजसाम्यं हि शाश्वतम् ।
राधिके त्वं मया यद्वत् कृता स्वसाम्यशोभिता ॥७९॥
कृष्णनारायणेनैवं कृता वै निजयोषितः ।
पृथिव्यावरणं भित्त्यावरणं च गृहावृतिम् ॥८०॥
यासां न विद्यते व्याघातश्च द्वारपिधानके ।
जलमध्ये समुद्रादौ नदीप्रवाहणे हिमे ॥८१॥
वृष्ट्याद्याभिः पराभूतिर्यासां देहे न विद्यते ।
वह्निदाहो न चासां वै दाहः सूर्यातपैर्न च ॥८२॥
वाडवानल एवैता विद्युद्वा न दहत्यपि ।
सूर्ये चन्द्रे ग्रहान्ये च स्वतन्त्रा गन्तुमेव ताः ॥८३॥
श्वासाधीना न चैताश्च न वायुः शोषयत्यपि ।
प्राणायामोर्ध्वभावास्ता विद्यन्ते ब्रह्मयोषितः ॥८४॥
तन्द्रालस्यगुरुत्वानि विद्यन्ते नैव सर्वथा ।
विषेण वा नैव चासां पराभवो भवत्यपि ॥८५॥
शस्त्रघातो नापि देहे भेदको जायते क्वचित् ।
रोगाः स्थातुं न च शक्नुवन्ति तासु च मायिकाः ॥८६॥
दूरश्रवणसिद्धिश्च दूरप्रत्यक्षसिद्धिका ।
दूरग्रहणसिद्धिश्च दूरालापादिसिद्धयः ॥८७॥
मनोजवित्वमेवाऽऽसां सूक्ष्मभावित्वमित्यपि ।
महद्भावित्वमेवाऽपि सर्वकामावसायिता ॥८८॥
सर्वस्य वशता चापि कोटिरूपादिधारिता ।
ब्रह्माण्डान्तरगमनं शीतोष्णानभिभूतता ॥८९॥
संकल्पसृष्टिकर्तृत्वं सिद्ध्यैश्वर्याणि यानि च ।
तान्यासां सम्प्रवर्तन्ते बालकृष्णकृपावशात् ॥९०॥
कल्पलताः कल्पगावः कल्पपात्राणि यानि च ।
कल्पमणयश्चाप्यासां वर्तन्ते कल्पनावशाः ॥९१॥
इत्येवंविधमैश्वर्यं चातुलं च क्षणे क्षणे ।
तासामवर्तत राधे ! ददृशुर्व्युत्थितास्तदा ॥९२॥
शरीराणि धाममुक्तमयानीत्यवलोकयन् ।
प्रसन्नाश्चाभवन् सर्वा मायागर्वविवर्जिताः ॥९३॥
ततः सर्वाः समुत्थाय बालकृष्णं निजेश्वरम् ।
दिव्यरीत्याऽप्यसेवन्त स्नानपूजनभोजनैः ॥९४॥
श्रीमद्गोपालकृष्णश्च बालकृष्णादयस्तथा ।
कृतस्नानाह्निकेभ्यश्च महीमानेभ्य आर्पयन् ॥९५॥
पूजनानि भोजनानि सत्काराणि धनानि च ।
तृप्तास्ताम्बूलकान्याप्य सर्वे गन्तुं निजान् निजान् ॥९६॥

देशान् लोकान् महीमाना अर्थयामासुरच्युतम् ।
श्रीमद्गोपालकृष्णं च तथा श्रीकम्भरासतीम् ॥९७॥
हरेः पिता क्षमां तेभ्यो ययाचे न्यूनसेवने ।
भवतामागमेनाऽयं प्रोत्सवः शोभनोऽभवत् ॥९८॥
पुनर्भगवतां योगो दर्शनं वा कदा भवेत् ।
अवश्यमत्राऽऽगन्तव्यं ज्ञात्वा नैजं वशानुगम् ॥९९॥
इत्युक्त्वा प्रणनामाऽपि विदायं प्रददौ बहु ।
पूजां चकार बहुधा द्रव्याणि प्रददौ तथा ॥१००॥
स्वर्णरूप्यकहीरकान् पूजायां प्रददौ पिता ।
कर्मचारिभ्य एवाऽसौ पारितोषिककान् ददौ ॥१०१॥
दीनाऽनाथाऽतिथिवर्गेभ्यश्च ददौ यथेष्टकम् ।
दासभृत्यकलाविद्भ्यः प्रददौ तुष्टिकृद्धनम् ॥१०२॥
राजभ्यश्चापि सर्वेभ्यो ददौ सुमुकुटानि वै ।
देवेभ्यश्चेश्वरेभ्यश्च किरीटान् प्रददौ प्रभुः ॥१०३॥
देवीभ्यश्चापि नारीभ्यो वेषाभूषादि सन्ददौ ।
सर्वेभ्यः प्रददौ स्वेष्टं सर्वेष्टं पारितोषिकम् ॥१०४॥
अवतारास्तथा व्यूहा भूमाद्याश्च विराजकाः ।
विष्णवोऽजाः पितरश्च सुराः सिद्धा महर्षयः ॥१०५॥
मानवास्तलवासाश्च तीर्थाद्रिसरितादिकाः ।
सर्वे तुष्टा अवदँश्च सन्तुष्टाः स्म सदा तव ॥१०६॥
गोपालकृष्ण ! यास्यामः स्वस्त्यस्तु ते सुतस्य वै ।
कन्यकानां तथा स्वस्ति कुशलं वोऽस्तु सर्वदा ॥१०७॥
इत्युक्त्वा सज्जभावास्ते सज्जोपकरणादिकाः ।
विमानानि सज्जयित्वाऽभवन् प्रस्थानतत्क्षणाः ॥१०८॥
परस्परं महीमानाः सम्बन्धिनः सुहृज्जनाः ।
मिमिलुर्वक्षसा वक्षो दत्वा नार्योऽपि तत्तथा ॥१०९॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने सप्तम्यां प्रातः सर्वासां समाधौ सृष्टित्रयाऽक्षरधामादिप्रदर्शनं, तासां शाश्वतदिव्यमुक्तस्वभावीकरणम्, महीमानभोजनपूजनदानक्षमाविदायादि, क्षेत्रदेवपारितोषिकादि चेतिनिरूपणनामाऽष्टनवत्यधिकद्विशततमोऽध्यायः ॥ २९८ ॥

**श्रीकृष्ण उवाच—**

शृणु त्वं राधिके ! गन्तुं समये सर्वकन्यकाः ।
मातृभिः पितृभिः परिरब्धाः स्नेहभृतान्तराः ॥ १ ॥
वियोगाऽश्रूणि संस्राव्य मौनं वै जडवत् स्थिताः ।
दिव्याश्च दिव्यदेहाश्च पूर्वतोऽब्जगुणोदिताः ॥ २ ॥
वीक्ष्य सम्बन्धिनां चासु स्नेहं चाऽभ्यधिवर्धितम् ।
सोढुं तेषां वियोगं चाऽशक्ता मनाक् तदाऽभवन् ॥ ३ ॥
तदा तन्मातरः पुत्रीर्वीक्ष्य वियोगदुःखिताः ।
मुग्धास्ता अर्थयामासुर्मातरो बालकृष्णकम् ॥ ४ ॥
सह नेतुं निजाः पुत्रीः स्वल्पसमयमेव ह ।
विलोकयितुं राष्ट्रं स्वं कुटुम्बिनः सुहृज्जनान् ॥ ५ ॥
वीक्षार्था स्वसृसहजा उदारं श्रीहरिं मुहुः ।
प्रभो प्रेषय नः पुत्रीर्नः सुखार्थहेतवे ॥ ६ ॥
पुनः शीघ्रं च मासान्ते प्रेषयिष्याम तारिह ।
सेवायां तव भो कृष्ण कृपालोऽर्थितमावह ॥ ७ ॥
हरिः प्राह तथास्त्वेवं तासां वात्सल्यहेतवे ।
सर्वा आज्ञापयामास गन्तुं मात्रादिभिः सह ॥ ८ ॥
प्रसन्नास्तास्तदा सर्वाः श्रुत्वा प्रभोरुदारताम् ।
सहसा ताः हरिं गत्वा नेमुः सस्वजिरे प्रभुम् ॥ ९ ॥
द्रुतं समागमिष्यामश्चेत्युक्त्वाऽप्यन्तसेवनम् ।
क्षणं चक्रुस्तृप्तिदं वै पुनरागमनाय ताः ॥१०॥
स्वकान्तं ता मुहुः संसेव्य च सज्जा विभूषिताः ।
शृंगारिता ह्यभवँश्च पुपूजुः परमेश्वरम् ॥११॥
पितरं मातरं विष्णोः स्वसारं पूज्ययोषितः ।
सर्वा वृद्धान् कुटुम्बस्थान् नत्वाऽऽभाष्य सुखागतम् ॥१२॥
सुखायतिं प्रभाष्याऽपि योग्योचिताम्बरान्विताः ।
योग्यभूषा विमानान्यारुरुहुः स्वामिनिर्देशिताः ॥१३॥
आगन्तव्यं चेत्युवाच सर्वा वै भगवाँस्तदा ।
मुमोचाऽश्रूणि विश्वात्मा मायया चाऽप्यमायिकः ॥१४॥
तदा वाद्यान्यवाद्यन्त पुष्पाक्षतैश्च पूजनम् ।
विमानानामभवच्च कृतं सौभाग्यिकादिभिः ॥१५॥
ऋतवो धर्मदेवश्च नरो देवी च पीठिका ।
मही च मण्डपो मुक्तो माणिक्यस्तंभ इत्यपि ॥१६॥
सुदर्शनं तथा चक्रं हरो गणाधिनायकः ।
नव ते दर्शनार्थं वै मातॄणां समुपाययुः ॥१७॥
कृतवन्तो दण्डवच्च क्षन्तव्याः क्षेत्रपालकाः ।
इत्युक्त्वा स्थितवन्तश्च तदा तेभ्यो हरिस्तथा ॥१८॥
हरिप्रियाः समस्ताश्च वासुदेवादयोऽपि च ।
आशीर्वादान् प्रददुश्च ददुश्च पारितोषिकम् ॥१९॥
रत्नान्यनेकरूपाणि हीरकादिस्रजस्तथा ।
मुकुटानि सुरम्याणि पात्रभूषाम्बराणि च ॥२०॥
नामपट्टानि सौवर्णाक्षरयुक्तानि वै तथा ।
धनानि चोपकरणान्युत्तमानि शुभानि च ॥२१॥

ते संगृह्य सुखापन्नाः सञ्जाताः क्षेत्रदारकाः ।
व्यंगुलानां तदा शब्दा यन्त्रशब्दास्तथाऽभवन् ॥२२॥
भेरीशब्दा जयशब्दाश्चाभवन्नम्बरेऽभितः ।
कन्यका हर्षिताः पितृविमानेषु स्थितास्तदा ॥२३॥
अश्वपट्टसरःक्षेत्रे कान्तं विलोकयन्त्यपि ।
लोमशं पुष्पवृष्ट्या च प्रणामैश्चाप्यपूजयन् ॥२४॥
अथाऽम्बरे विमानानि गतिमन्त्यभवँस्ततः ।
कोट्यर्बुदाब्जकन्यास्ताः सर्वाः पित्रादिभिः सह ॥२५॥
काशीश्वरीं विना जग्मुर्नैजान् देशान् समातृकाः ।
आक्षराण्यश्च मुक्तान्यो ब्राह्मयस्तत्र प्रभुं विना ॥२६॥
न गन्तव्यमिति कृत्वाऽवसन् स्वकान्तमन्दिरे ।
राधिके ! बालकृष्णोऽपि चान्तरात्मा सह स्थितः ॥२७॥
आत्मनिवेदिनीस्त्रीभिः सहाऽदृश्यो ययौ सहः ।
सृष्टित्रयस्य कान्तास्ताः स्वस्वलोकं गतास्तदा ॥२८॥
क्षेत्रे कुंकुमवाप्याख्ये शून्यमिवाऽभवत् क्षणात् ।
हर्याज्ञया ततो मुक्तो मण्डपोऽपि तिरोऽभवत् ॥२९॥
सुस्वल्पो मण्डपश्चापि शीघ्रं तत्र तिरोऽभवत् ।
एवं जातः परिहारो बालकृष्णेच्छया द्रुतम् ॥३०॥
यास्तु सख्योऽवसन् स्वामिसेवायां काशिकासुताः ।
ता असेवन्त श्रीकृष्णंनारायणं मुदाऽनिशम् ॥३१॥
दिव्या दिव्यस्वरूपा वै पातिव्रत्यपरायणाः ।
कर्मणा मनसा वाचा देहेन सेवनं व्यधुः ॥३२॥
लक्ष्मीर्विशेषभावेन सेवते परमेश्वरम् ।
सत्सु दासीसहस्रासु समानासु सतीष्वपि ॥३३॥
स्नपनं वस्त्रदानं चाऽभ्यंगं प्रकेशसाधनम् ।
वेषं वस्त्रक्षालनं च दन्तधावनमित्यपि ॥३४॥
कज्जलं मस्तके तैलं चांगमर्दनमित्यपि ।
पादसंवाहनं वारिपानदानं च भोजनम् ॥३५॥
ताम्बूलकं व्यजनेन वायुदानं च नक्तकम् ।
फलदानं तथा शय्यास्तरणं कलशार्पणम् ॥३६॥
यत्किंचिन्निजतन्वा स्यात् तत्सर्वं स्वयमाचरत् ।
निजेशस्य समस्तं सेवनं परिपरायणा ॥३७॥
लक्ष्मीरेवाऽस्ति लक्ष्मीर्वै नेतरा तत्समा क्वचित् ।
एवं वै वर्तमानायां लक्ष्म्यां कृष्णस्य वै क्वचित् ॥३८॥
क्षतिर्न दृश्यते सेवाकृते तद्वै विशिष्यते ।
तथापि समदृक् कृष्णः सर्वासु समतायुतः ॥३९॥
वर्तते सुखदश्चातिस्नेहवान्नतु पक्षवान् ।
औदार्ये परमे कान्ते तदेव वर्तते सदा ॥४०॥
सर्वासां कामपूरत्वं तृप्तिदत्वं यथेष्टकम् ।
पद्मावत्या रमायाश्च लक्ष्म्यधिकं हि सेवनम् ।
आभ्यां विस्मारिता लक्ष्मीः स्वाम्यर्थाभ्यां सदा त्वनु ॥४१॥
अथ राधे वसन्ते चोत्सवं कृष्णश्चकार ह ।
पुष्पदोलोत्सवं चापि प्रचकार सुखावहम् ।
चातुर्मास्योत्सवं चापि प्रचकार व्रतात्मकम् ॥४२॥
ऊर्जमासः समायातश्चाऽष्टमी जन्मबोधिका ।
कार्ष्णी समीपगा चास्ते चेति विचार्य योषितः ॥४३॥
सर्वाः पितृगृहात्तूर्णमारूढाः सुविमानकम् ।
आययुः श्रीबालकृष्णगृहं पित्रादिसंहिताः ॥४४॥
स्वामिगृहं समासाद्य सुखिन्यो वै तदाऽभवन् ।
सर्वेषां वै महीमानोत्तमानां सुखमाननम् ॥४५॥
श्रीमद्गोपालकृष्णो वै यथार्थमकरोत्तदा ।
राजानोऽपि तथा चक्रुः श्रीकृष्णस्य प्रभोस्तमा ॥४६॥
पञ्चदशे पूर्णवर्षे षोडशे जन्मसूत्सवे ।
सुतानां पितरः सर्वे सर्वसृष्टिनिवासिनः ॥४७॥
समायाताश्चाक्षराख्ये क्षेत्रे वर्धयितुं हरिम् ।
प्रातरेव कृतस्नानश्चाष्टम्यां कृतमंगलः ॥४८॥
कृतशृंगारवेषश्च हरिः संसदमाययौ ।
लोमशाद्यैः पूजितश्च वर्धितोऽपि शुभाशिषा ॥४९॥
पूजादानैः पावितश्चाऽऽनन्दितो यशसां स्तवैः ।
राजाधिराजशोभाढ्यः शुशुभे परमेश्वरः ॥५०॥
प्रातश्चैवं वर्तमाने जन्माहसुमहोत्सवे ।
दीयन्ते तत्र दानानि गजवाजिगवादयः ॥५१॥
गोमहिषीवृषभोष्ट्रयानवाहनकानि च ।
गृहक्षेत्रारामवाटीधनस्वर्णात्मकानि च ॥५२॥
वाद्यन्ते तत्र वाद्यानि गीयन्ते तद्यशांसि च ।
परिहारे ततो जाते मध्याह्ने भोजनादिकम् ॥५३॥
अभवत् सर्वलोकानां कान्तानां श्रेष्ठमेव ह ।
अतिथीनां प्रसत्कारा अन्नवस्त्रादिभिः कृताः ॥५४॥
रात्रौ नाट्यं चाऽभवत्तु तदा दृश्यं मनोहरम् ।
मल्लानां खेलनं चापि संगीतानां रवास्तथा ॥५५॥
काव्यानि कविवर्याणां नृत्यानि वारयोषिताम् ।
उपदेशाश्च साधूनामभवन् जन्मसूत्सवे ॥५६॥
एतस्मिन्नुत्सवे राधे ! रमापद्मावतीपिता ।
नारायणःसुतश्चार्कोदेवश्चाऽक्षरक्षेत्रके ॥५७॥
स्वयं दिव्यावतारो यः सूर्यांशः सम्प्रकीर्तितः ।
काशीतश्चागतस्तत्र संस्मृत्वा वचनं हरेः ॥५८॥

मोक्षणार्थं स्वयं जातिस्मरः शिवो यतो हि सः ।
मानवं भावमुत्सृज्य शिवभावं समीहते ॥५९॥
धेनुपालोऽपि स्वराज्यं दत्वा पुत्राय योगिने ।
धर्मपालाय च ततस्तेन सहागतोऽभवत् ॥६०॥
सर्वे ते कृतसंकल्पा मुक्त्यर्थं त्वरितास्तदा ।
अभवँस्ते तु वै कृत्वा शुभं जन्मोत्सवं ततः ।
प्रार्थयन् परमात्मानं देहमोचनहेतवे ॥६१॥
हरिः प्राहोत्तरायणस्थितं सूर्यं विलोक्य वै ।
गन्तव्यं मम धामाऽत्र स्थेयं तावद् गृहेऽत्र च ।
इत्याज्ञां शिरसि धृत्वा सर्वे कुटुम्बकं श्रियाः ॥६२॥
तस्थौ लक्ष्म्या गृहे नित्यं विशाले मन्दिरान्तरे ।
शिवः स्वयं हरिं पुत्रीपतिं पप्रच्छ साधनम् ॥६३॥
मोक्षस्यैव तदा कृष्णः स्वप्रियं प्रजगाद तम् ।
शृणु शंभो कथयामि मोक्षसाधनमुत्तमम् ॥६४॥
ये वै मोक्षे स्थिताः सन्तो मायाभावविवर्जिताः ।
तेषां समागमात् प्रसेवनान्मोक्षोऽभिलभ्यते ॥६५॥
योऽहं मोक्षे निवसामि निवसामि सदाऽऽत्मसु ।
तं मामुपास्य सततं मोक्षं विन्दति मानवः ॥६६॥
मया कालः कर्म धर्मो ज्ञानं मे शक्तयस्त्विमाः ।
मत्वैवं शक्तिमन्तं मां यस्त्वाश्रयति मुच्यते ॥६७॥
देहेन कर्मणा वाचा मनसा स्वीयवस्तुभिः ।
सर्वात्मनाऽर्पितो यः स्यान्मयि द्राक् स प्रमुच्यते ॥६८॥
मां पश्येन्मां रसयेच्च मां सदा संप्रकीर्तयेत् ।
मां जिघ्रेन्मां स्पृशेन्मां संश्रृणुयाच्चिन्तयेच्च माम् ॥६९॥
मां गृह्णीयात् प्रसेवेत संवाहयेच्च मां सदा ।
मामभिगच्छेद् रहसि चानन्दयेच्च मां हृदि ॥७०॥
स्थापयेन्मां प्रमन्वीत निर्णयेन्मां हृदन्तरे ।
अहमयेच्च मां नित्यं मद्योगे सर्वदा वसेत् ॥७१॥
मां ध्यायेन्मां स्नेहपूर्णः समाश्लिष्येन्मिलेच्च माम् ।
मामेकीकृत्य चाऽऽदद्याद् भोग्यजातं मयि क्षिपेत् ॥७२॥
मां प्रत्यक्षं निजीकृत्य चेष्टां कुर्यान्मदर्थिकाम् ।
शिवराजैवमासाद्य मद्योगं मोक्षमाव्रजेत् ॥७३॥
रमणं भ्रमणं विहरणं च नर्तनं रणम् ।
जागरणं स्वपनं च प्रवर्तनं निवर्तनम् ॥७४॥
आचरणं विचरणं सदाचरणमीरणम् ।
सर्वं कुर्यान्मदर्थं वै ध्रुवमोक्षमवाप्नुयात् ॥७५॥
इत्युक्तः शिवराजोऽयं राधिके शीतजा तथा ।
जयश्चन्द्रो धेनुपालोऽशोका च हरौ स्थिराः ॥७६॥
स्थिरध्याना अभवँश्च स्थिरसेवापरायणाः ।
दिव्यभावं समापन्नाः सर्वस्वार्पणसेविनः ॥७७॥
उत्तरायणगे सूर्ये समुत्सुकाश्च ते ततः ।
स्वपुत्रीं प्रसमाश्लिष्य लक्ष्मीं मोक्षाभिकांक्षिणः ॥७८॥
अश्वपट्टसरस्येव स्नात्वा कृत्वाऽर्हणं हरेः ।
धेनुपालोऽपि च सुतात्रयमाभाष्य वै तदा ॥७९॥
वृत्तीः सर्वाः पराहृत्य ध्यानमग्नास्तदाऽभवन् ।
ज्ञानदः श्रीकृष्णदेवः सर्वस्वामी हृदिस्थितः ॥८०॥
तथा प्रत्यक्षवर्ती तान् ज्ञात्वा निर्वाणमानसान् ।
स्वासक्तान् प्रति तूर्णं स दिव्यविमानमास्थितः ॥८१॥
निजदिव्यस्वरूपेण मुक्तिं दातुं समाययौ ।
लक्ष्मीपतिहरिस्तेभ्यस्तैरेव वर्ष्मभिस्तदा ॥८२॥
आरोहयामास दिव्ये विमाने पश्यतां सताम् ।
तदा दुन्दुभयो नेदुर्देवानां सर्वतोदिशि ॥८३॥
सदाशिवः परं मोक्षं याति नित्यकिलासकम् ।
देवाद्यैर्वर्धिताः सर्वे ययुः कैलासमुत्तमम् ॥८४॥
पार्षदाश्च ययुर्नित्यं वैकुण्ठं कृष्णिका तथा ।
लक्ष्मीस्तथा कृष्णनारायणार्यः परमेश्वरः ॥८५॥
सर्वं कर्तुं समर्थौ तौ तेनैव वर्ष्मणा हि तान् ।
राधे ! मोक्षं नीतवन्तौ महाश्चर्यमिदं ह्यभूत् ॥८६॥
तदुत्तरविधिं तत्र स्वेशेन सह पुत्रिका ।
चक्रे लौकिकदानानि श्राद्धोत्सवादिकानि च ॥८७॥
अथ श्रीबालकृष्णोऽपि धेनूनामुत्तरायणे ।
प्रपूजनं व्यधात्तत्र पुण्यकार्यप्रवृत्तये ॥८८॥
धेनुभ्यः प्रददौ त्वार्द्रघासान् सस्यानि वै तदा ।
गूडं च धान्यखाद्यानि दापयामास सर्वतः ॥८९॥
धेनवश्च तदा सर्वलोकेभ्यो दिव्यविग्रहाः ।
भौमस्थाश्चाययुस्तूर्णं तदा प्रसादलालसाः ॥९०॥
भुक्त्वा नत्वा हरिं प्राप्य पूजां स्वस्वाश्रमान् ययुः ।
अथ द्विजेभ्यो भगवान् ददौ दानानि भूरिशः ॥९१॥
सद्भ्यो ददावम्बराणि भोजनान्युत्तमानि च ।
दीनाऽनाथेभ्यश्च ददौ भिक्षुकेभ्योऽपि सर्वथा ॥९२॥
मिष्टान्नाम्बररूप्यादि स्वर्णं पात्राणि वै तदा ।
एवं कृत्वा दानविधिं सप्तधान्यान्वितां नवाम् ॥९३॥
तरलां रन्धितां चापि घृतान्वितां सपर्पटाम् ।
मुदध्ना चारनालेन समं संबुभुजे हरिः ॥९४॥
भोजयामास सर्वांश्च कान्ताः कृशरसंज्ञिताम् ।
क्वथिकासहितां श्रेष्ठां स्वादवतीं सुगन्धिनीम् ॥९५॥

इत्येवं राधिके ! कृष्णकान्तायों हि महोत्सवम् ।
उत्तरायनयोगस्य चक्रे गोपालकृष्णजः ॥९६॥
षोडशे वत्सरे त्वेवं ब्रह्मप्रियासमन्वितः ।
बुभुजे बहुभोगाँश्च सर्वकल्याणकारकः ॥९७॥
राधिके ! तं स्मरेत् कृष्णनारायणं नरायणीः ।
लीलाः षोडशवर्षोत्थाः मुक्तिदाः शान्तिदा हरेः ॥९८॥
सर्वमोक्षफलं त्वासां श्रवणे जायतेऽक्षयम् ।
ब्रह्मपूजाफलं त्वासां श्रवणे जायतेऽक्षयम् ॥९९॥
पुरुषोत्तमयोगोऽयं सर्वयोगोत्तमोत्तमः ।
सर्वावतारयोगोऽयं सर्वज्ञानोत्तमोत्तमः ॥१००॥
सर्वलक्ष्मीप्रदश्चायं सर्वमुक्तिप्रदस्तथा ।
सर्वसौभाग्यदश्चाऽयं त्वेवं श्रुत्वा रमापिता ॥१०१॥
शाश्वतं चापि मोक्षं स्वं समीप्सत् तममोक्षयत् ।
ययौ धामाऽक्षरं सोऽस्य क्रियां श्रीभगवाँस्तथा ॥१०२॥
सम्बन्धिनस्ततश्चक्रुर्हरिसंलग्नमानसाः ।
राधिके ! श्रीहरेर्योगः सर्वमुक्तिप्रदस्त्वयम् ॥१०३॥
सर्वसौभाग्यदश्चापि त्रेतासन्ताननामकः ।
सर्वव्रतानां यज्ञानां दानानां पुण्यकर्मणाम् ॥१०४॥
सर्वेषां तपसां दीक्षायोगानां त्यागधर्मणाम् ।
सन्न्यासधर्मणां चापि भक्तीनां च फलप्रदः ॥१०५॥
सर्वाश्रमाणां धर्माणां श्रवणात्फलदो मतः ।
लक्ष्मीनारायणसंहिताया वै हृदयं ह्ययम् ॥१०६॥
प्राणानां जीवनं चायं कृष्णनारायणात्मकः ।
सर्वप्रतिष्ठाफलदः सर्वतीर्थफलप्रदः ॥१०७॥
सर्वसेवाफलदश्च सर्वविद्याफलप्रदः ।
सतीधर्मफलदश्च पातिव्रत्यफलप्रदः ॥१०८॥
सर्वभोगप्रदः सर्वसमृद्धिदः श्रवणाद् ध्रुवम् ।
दिव्यताऽऽपादकः सर्ववासनाक्षयकारकः ॥१०९॥
सर्वेषां चात्र पापानां प्रज्वालकः सुपुण्यदः ।
निष्कामकर्म चैतद्वै यदस्य श्रवणं सदा ॥११०॥
पूजनं चास्य वै तद्वद् दानं चास्य महत्फलम् ।
रक्षणं गृहमध्येऽस्य कालमायादिनाशनम् ॥१११॥
अस्य खण्डस्य भावेन श्रवणाच्छ्रीहरिः स्वयम् ।
लक्ष्म्यादिब्रह्मशक्त्याढ्यो दद्यात् दिव्यं स्वदर्शनम् ॥११२॥
अस्य कथा कारणीया पुरश्चरणमित्यपि ।
अगतीनां भवेन्मोक्षो भूतादीनां प्रमोक्षणम् ॥११३॥
दुःखदारिद्र्यनाशश्च लक्ष्मीकुलकुटुम्बकम् ।
यत्रायं वर्तते तत्र सर्वदा वासमाप्नुयात् ॥११४॥
वंशवृद्धिर्भवेत् पुत्रधनदारपतिश्रियः ।
भवन्ति यत्र खण्डोऽयं पूज्यते पठ्यतेऽपि च ॥११५॥
राधिकेऽस्य कथा यत्र तत्र कृष्णनरायणः ।
ब्रह्मप्रियाः समस्ताश्च मुक्तमण्डलमित्यपि ॥११६॥
अहं कृष्णस्तथा नारायणः सर्वस्वमण्डलः ।
वसावस्तां कथां श्रोतुं सर्वदेवेश्वरान्वितौ ॥११७॥
वाचकस्य प्रपूजा च कारणीया विधानतः ।
नरनारीविभूषाश्चाम्बराणि धनमित्यपि ॥११८॥
गृहक्षेत्रग्रामवाटीगजाश्वहीरकादिकम् ।
यथाशक्ति प्रदातव्यं वाचकाय श्रवार्थिभिः ॥११९॥
मोक्षदाय हि सर्वस्वं दातव्यं परमार्थिने ।
उद्यापनं कारणीयं महोत्सवः शुभस्तथा ॥१२०॥
सकृच्छ्रवणे माया वै नश्यत्येव न संशयः ।
कल्पलता कल्पवृक्षः कल्पधेनुस्त्वयं मतः ॥१२१॥
कल्पमणिः कल्पपात्रं त्रेताखण्डो हि राधिके ! ।
श्रीकृष्णोऽहं वदाम्यत्र त्रेतासन्तानसेवनात् ॥१२२॥
नार्यै राधापदं दास्ये विष्णुपदं नराय वै ।
'ओं नमः श्रीकृष्णनारायणाय परमात्मने ॥१२३॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने चिरेण लोमशाश्रमस्थितानां कान्तानां पित्रादिभिः सह स्वदेशगमनं, मण्डपादिपरिहारः, लक्ष्म्यादिकाशिकांऽगनाकृतसेवाप्रकारः, षोडशजन्मोत्सवे ऊर्जकृष्णाष्टम्यां सर्वजनानामागमनम्, महोत्सवः, शिवेश्वरादीनां मोक्षोपदेशान्मोक्षः, षोडशे वत्सरे उत्तरायणदानादि, संहितायास्त्रेतासन्तानस्य माहात्म्यमितिचेतिनिरूपणनामा नवनवत्यधिकद्विशततमोऽध्यायः॥ २९९ ॥

**श्रीराधिकोवाच—**

कृष्णकान्त ! कथाः सर्वाः संक्षेपात् कथयाऽस्य मे ।
त्रेताखण्डस्य वै शान्तिः श्रवणे मेऽतिजायते ॥ १ ॥

**श्रीकृष्ण उवाच—**

राधिके भगवान् श्रीमल्लक्ष्मीनारायणोऽभवत् ।
अनादिश्रीकृष्णनारायणो लक्ष्म्या युतो यदा ॥ २ ॥
तमेनं परमात्मानं हृदयेक्षणवर्जिताः ।
न जानन्ति यथार्थं वै परब्रह्म सनातनम् ॥ ३ ॥

सोऽयं समागतः पृथ्व्यां कृपयोद्धारहेतवे ।
भक्तानां मानसपूर्त्यै नराणां योषितां तथा ॥ ४ ॥
धन्यास्तास्तनवश्चात्र याभिः प्राप्तो हरिः स्वयम् ।
धन्यानि तानीन्द्रियाणि हरेर्योगं गतानि वै ॥ ५ ॥
धन्यास्ताः ऋद्धयश्चापि धन्या देशाश्च ते तथा ।
धन्याः कुटुम्बिनश्चापि पुरुषोत्तमयोगिनः ॥ ६ ॥
यत्र वै पठ्यते लक्ष्मीनारायणस्य संहिता ।
धन्यो देशः स एवाऽपि यत्राऽऽस्ते पुरुषोत्तमः ॥ ७ ॥
लक्ष्मीनारायणसंहितायाः खण्डे द्वितीयके ।
त्रेतासन्तानके नाम्ना प्रोक्तमात्रं सुमंगलम् ॥ ८ ॥
सार्वभौमं च माहात्म्यं परब्रह्मण ईरितम् ।
ततो हिरण्यमयाण्डस्य कोशकूर्चसमुद्भवौ ॥ ९ ॥
हिरण्यकूर्चहिरण्याण्डाभिधावसुरावुभौ ।
युयुधाते सह संकर्षणेन गदया ततः ॥१०॥
मेरोर्भागा व्यवच्छिन्ना ये ये ते त्वभवन् ग्रहाः ।
सर्वधाम्यर्थितः कृष्णः प्रकटीभूय धामतः ॥११॥
सेवां गृह्णाति च पृथ्व्यां कम्भराश्रीगृहेऽपि च ।
प्रादुर्भावजयन्त्यां चोत्सवे दानस्तवादयः ॥१२॥
देवदेवीजननानिवृक्षवल्ल्यादिषु क्षितौ ।
दशमे दिवसे दैत्यैः प्रभोरपकृतिः कृता ॥१३॥
पक्षीभूतकशोषाद्यैर्बालकृष्णावनं कृतम् ।
सूतकस्य समुत्पत्तिः सूतात्मवरदानकम् ॥१४॥
नामकार्योत्सवे साणासुरो व्याघ्रासुरो हतौ ।
एकादशेऽह्नि प्रेंखाऽऽरोहोऽनन्तस्वरूपकैः ॥१५॥
तलाजाराक्षसीनार्या मोहो हरौ सुभक्तता ।
लाजा स मंगलकार्यकरी जाता कृपावशा ॥१६॥
दुग्धपानदिने नैकरूपैर्धेनुपयोऽशनम् ।
गोरूपराक्षसीनां सप्राणस्तन्यस्य पानकम् ॥१७॥
हरेर्भूम्युपवेशाख्यसंस्कारे सिंहिकादरी ।
अन्याश्चापि बालकृष्णं सिषेविरे हरिं प्रभुम् ॥१८॥
कर्णवेधेऽस्य संस्कारे सूच्याद्या देवता अपि ।
सेवां कृत्वाऽभजन् कृष्णं पतिं बहुस्वरूपिणम् ॥१९॥
अन्नप्राशनसंस्कारे ददावन्नानि भूरिशः ।
ओषधयो भोजयित्वा कान्तं कृष्णं प्रपेदिरे ॥२०॥
वृत्तिज्ञानाय वै द्वात्रिंशद्वस्तूनि सहैव सः ।
तावद्वस्तैः प्रजग्राह दिव्यताऽस्य प्रकीर्तिता ॥२१॥
ततो दैत्यस्त्रियो युद्धं विधवाः कर्तुमाययुः ।
राक्षसीनां कन्यकानां तुमुलं युद्धमाभवत् ॥२२॥
कन्यकानां विजये राक्षसीनां शरणागतिः ।
दिव्यता कन्यकाकारात्मता श्रीहरिणा कृता ॥२३॥
ताभ्यः श्रीलोमशः प्राह सेवामोक्षव्रतांस्ततः ।
आश्रमीयाः सर्वकन्याः व्रतं वर्षासु चक्रिरे ॥२४॥
शत्रुञ्जयाद्रिसंवासाः कंकताला हता मृधे ।
कंकताल्यश्च राक्षस्यो युद्धे दिव्या हरिप्रियाः ॥२५॥
अभवँश्च न्युषुर्लोमशाश्रमे चात्मवेदिकाः ।
पितृकन्या हरेः पूजां चक्रिरे प्रेतमोक्षणम् ॥२६॥
राशिभिः कृतपूजा च कृष्णप्रासादवर्णनम् ।
महामण्डपशोभा च हरेः शृंगारवर्णनम् ॥२७॥
प्रह्लादस्य मृधं नारायणेन भक्तितो जयः ।
दानवानां मोक्षणं च कन्यानां वरणं हरेः ॥२८॥
श्रीहरेश्चौलसंस्कारे रोम्णां नारायणात्मता ।
जीवानां रोमरूपाणि त्वघानीति प्रकीर्तितम् ॥२९॥
सालमालासुरनाशस्तत्स्त्रीणां हरिसंग्रहः ।
यज्ञसूत्रोत्सवे दैत्या सालमालादिजातयः ॥३०॥
विनाशितास्तथा मोक्षधर्मा लोमशवर्णिताः ।
सुकेशिनः समाख्यानम् अशून्यशयनव्रतम् ॥३१॥
देवस्वापा भिन्नभिन्नतिथिष्वपि च पूजनम् ।
पातालेशस्य वै कारण्डवस्य नाशनं ततः ॥३२॥
कन्यका रक्षिता लोमशालये स्वस्तिकस्य वै ।
आरक्तदेशीयभूपशावदीनसुतार्थकम् ॥३३॥
पूजनं शावदीनायै देव्यै बालबलिकृतम् ।
देव्या राजादिसंहारः कृतोऽथ बदरीवनम् ॥३४॥
कुरु क्षेत्रं हरेः कुंकुमवापीं प्रति चागमः ।
बालार्पणं तत्पितृभ्यो मातॄणां मोक्ष ईरितः ॥३५॥
पुराधर्मे श्वेतकेतोर्मर्यादा सम्प्रदर्शिता ।
सौदासपत्न्यां वासिष्ठोऽश्मको जातस्तथा वृषः ॥३६॥
उतथ्यभार्याभोगं वै चक्रे बृहस्पतिर्बलात् ।
दीर्घतमा बलेः पत्न्यां पुत्रानजनयद् बहून् ॥३७॥
सर्वे बालग्रहाः प्रोक्ता ये ये या याः स्वभावतः ।
अथ व्याघ्रासुराणां वै विनाशो हरिणा कृतः ॥३८॥
पञ्चमाऽब्दोत्सवे गान्धर्वाणां प्रगायनानि च ।
सिंहव्याघ्रादिचर्मभ्यः सिंहाः सजीवनीकृताः ॥३९॥
हरो नटनटीयुक्तो नाट्यानि विदधे ततः ।
प्रसन्नहरिणा तत्र क्षेत्रे संवासिताः सदा ॥४०॥
श्रीहरेः सर्वविद्यासिर्वेराटकतपोहतिः ।
वराटकाऽनीकनाशो दण्डादि चेरितं तथा ॥४१॥

दिक्फरम्लेच्छसंहारो हरिणा कृत ईरितः ।
शंकरे वस्त्ररहिते ऋष्याश्रमगते द्विजाः ॥४२॥
ताडयामासुरीशं ते सतीशापाद्धि राक्षसाः ।
तेषां विनाशितं राक्षसत्वं श्रीहरिणा ततः ॥४३॥
षष्ठवर्षारम्भमहे कृष्णाद्यैः पूजनं कृतम् ।
देवायनद्विजस्य तत्पत्न्याः श्वपचता हृता ॥४४॥
लक्ष्मीनारायणसंहिताकथायां चमत्कृतिः ।
स्तुतिस्तीर्थे चोर्जव्रतऋषिकृतमुदीरितम् ॥४५॥
कन्थाधरस्य चरितं चमत्कारोऽतिमृत्युता ।
ढुड्डुकायनिकास्वामित्वं नास्तिक्यं कुरुंगतः ॥४६॥
मृतस्य विप्रपुत्रस्य वृषपर्वेतिजीवनम् ।
नास्तिक्येन मरणेऽस्य म्लेच्छजन्म, सुतेन तु ॥४७॥
कृतोद्धारो द्वयोर्भूत्वा वैष्णवो लोमशान्मुनेः ।
रणंगमकृते यज्ञे यक्षकन्यादिवाहनम् ॥४८॥
श्रीहरेश्च कृतः श्रेष्ठः सप्तमो जननोत्सवः ।
रणंगमे गते दक्षिणध्रुवेक्षणवाञ्छया ॥४९॥
अन्ताऽर्किदेशभूपेन लक्ष्मणार्येण सत्कृतिः ।
पत्नीमातृद्रोहकर्तृमात्रागस्कर राक्षसात् ॥५०॥
पत्नीमातृरक्षणं च श्रीहरिकृतमीरितम् ।
युद्धे रणंगमस्यैव जयोऽथ लक्ष्मणार्पिताः ॥५१॥
सहस्रद्वयकन्या वै लोमशस्योपदेशनम् ।
पुत्रपुत्रीपतिपत्नीशिष्यशिष्यादिवर्णनम् ॥५२॥
वेधःपुत्र्यः सुषुम्णेडापिंगलाः स्वामिभावतः ।
हरिं वीक्ष्य ययुर्देशान् लोकयितुं विमानगाः ॥५३॥
सत्यलोकं ययुस्ताभ्यः श्रुत्वा हरिं सुवीक्षितुम् ।
प्रस्थिता द्वासप्ततिकन्यका यानेन वेधसः ॥५४॥
अब्रिक्तेशेन स्वसैन्यैः रुद्धं विमानमम्बरे ।
दत्ताद्युक्तिस्तत्र शुक्राऽरजादण्डादिवर्णना ॥५५॥
विश्वकर्मचित्रांगदासुरथानां च वर्णना ।
तो युद्धे म्लेच्छकोट्यो विनष्टा लक्षशोऽपि च ॥५६॥
सद्विवेकाऽविवेकौ वर्णितौ च शरणागमः ।
पुनः कापट्ययुद्धे च मृता म्लेच्छाः सहस्रशः ॥५७॥
म्लेच्छस्त्रियो लक्षशोऽपि युयुधुर्मुहुर्हरौ ।
कृत्याभिर्नाशिताश्चाऽथ राज्ञः श्रीहरिदर्शनम् ॥५८॥
तस्य प्राग्जन्मपुण्यादि चोक्तं प्रसंगतः खलु ।
अब्रिक्तदेशसाम्राज्यं भक्ताभ्यां प्रददौ हरिः ॥५९॥
आरबीजप्रदेशानां राज्यं युद्धे विजित्य च ।
धर्मराट् प्रददौ देवमरुद्भ्यो दैत्ययोनिषु ॥६०॥

जन्मान्तरकथा देवमरुतां तत्र कीर्तिता ।
रक्तबीजाऽऽरबीजादिधुन्धुदैत्यकथोदिता ॥६१॥
नदीपूरोढनौकाया उदयाख्यनृपस्य च ।
रक्षा कृता तु हरिणा प्रजानां चेति वर्णितम् ॥६२॥
क्रूरसिंहस्य वै राक्षसत्वं हरिप्रमोचितम् ।
अष्टमाऽब्दे रुग्णव्यंग्यादीनां नैरोग्यमाहितम् ॥६३॥
जलमग्नवसुमेधश्रेष्ठिरक्षोदिता ततः ।
गोपनाथमहातीर्थे सौराष्ट्रे वर्णितं ततः ॥६४॥
बालकृष्णस्योपवीतमहोत्सवस्तु वर्णितः ।
नारदोक्तपराविद्योपदेशस्तत्र वर्णितः ॥६५॥
पारितोषिकदानानि तथोपदार्पणान्यपि ।
प्रभोः सेवार्चनपूजादिफलं परिवर्णितम् ॥६६॥
षड्भिर्जन्मभिर्वै जाड्यमघदृष्टान्तदानतः ।
पूर्वस्वभाववैचित्र्यं विस्तरात् सुनिरूपितम् ॥६७॥
नैष्कर्म्ययोगः सम्प्रोक्तो ज्ञानमाध्यात्मिकं तथा ।
आत्मनिवेदितभक्त्या राजराज्ञ्योः प्रमोक्षणम् ॥६८॥
आमोदनगरावाससुधनाख्यस्य रक्षणम् ।
चौरेभ्यो वै कृतं दिव्यरूपेण हरिणेरितम् ॥६९॥
त्र्यष्टकारोरन्त्यजस्य सस्त्रीकस्यापि मोक्षणम् ।
कौशिकाम्बर्षियोगेन कुष्ठजलोदरक्षयः ॥७०॥
विप्रबालषट्शतानां नाशकान् राक्षसान् हरिः ।
नाशयामास युद्धे जीवयामासाऽर्भकान् पुनः ॥७१॥
तिर्थीकरणं सरितां, घोरप्रतिग्रहैः फलम् ।
विप्राणां नाशितं प्रोक्तं हरिणा कृपयेरितम् ॥७२॥
बालेश्वरनृपस्यापि परीक्षा पुत्ररन्धनात् ।
कन्यापत्नीग्रहणाच्च कृता श्रीहरिणेरितम् ॥७३॥
जयध्वजस्य यज्ञे श्रीहरेर्दर्शनमीरितम् ।
द्रोणादिपर्वतानां चावभृथे पापनाशनम् ॥७४॥
कोलारचिलशंभलनारायणसरांस्यपि ।
दिव्यतां मोक्षणं प्रापुः कथा चेयं सुवर्णिता ॥७५॥
धर्माश्चतुर्युगाणां वै पुलस्त्योक्ताः प्रदर्शिताः ।
अक्षरक्षेत्रमाहात्म्यं प्रोक्तं कौंकुमवापिकम् ॥७६॥
हरिवंशीयप्रजानां सह्याद्रौ वास ईरितः ।
खरपुत्राऽधर्मजीवाऽसुरनास्तिकता हरौ ॥७७॥
दर्शिताऽसद्गतिः पश्चाद् गत्यर्थे वरदानकम् ।
अथ कुंभे प्रयागे चागततीर्थादिकोटयः ॥७८॥
सनत्कुमारवचनात् कुंकुमवापिकां ययुः ।
अथ सिंहलवासानां राक्षसीनामुपद्रवः ॥७९॥

महामार्यादिभिर्विनाशितौ बद्रीं गते हरौ ।
आगत्य हरिणा प्रजीविता मृतास्तु ये पुरा ॥८०॥
अथ ज्ञानं विशेषाऽद्वैताऽद्वैतं मोक्षदं मतम् ।
हरेर्विभूतयो मोक्षप्रदास्ततोऽभिवर्णिताः ॥८१॥
व्यूहचतुष्टयस्याऽपि स्वतःप्रकाशरूपता ।
वर्णिता कुंकुमवाप्यां तीर्थरूपेण वासिता ॥८२॥
उष्ट्रालये महाखण्डे झंझावाते महत्यथ ।
कृता श्रीहरिणा रक्षा जीविता ये मृतास्तदा ॥८३॥
उर्वश्याश्चक्रवाकीत्वं मार्जारीत्वं तथा ऋषेः ।
सनत्सुजातसंज्ञस्य मिथः शापान्निवारितम् ॥८४॥
चक्रवाक्यै पायितं वै वारि शृंगे गिरेस्तथा ।
मार्जारिकाबालकानां भ्राष्ट्रे रक्षाऽग्नितः कृता ॥८५॥
कृतं च मोक्षणं शापात् कृष्णनारायणेन वै ।
मातुर्माहात्म्यमप्युक्तं ततो वैकुण्ठधामनि ॥८६॥
नारायणस्य वै लक्ष्मीशयने संरतस्य तु ।
दर्शनार्थं चागतेषु धेनुपालादिकेषु च ॥८७॥
नृत्यादावधिके काले याते लक्ष्मीः रुषाऽशपत् ।
ततः शिवादयः पृथ्व्यामवापुर्मानवीं जनुम् ॥८८॥
लक्ष्मीं विहाय भगवान् ययौ यत्र शिवादयः ।
लक्ष्मीः सख्यश्च शोकं वै कृत्वा जन्मानि चाददुः ॥८९॥
लक्ष्म्युर्वश्यौ तपोऽर्थं जग्मतुः श्रीहनुमद्वने ।
नारायणः प्रसन्नस्तत्फलं दातुं समाययौ ॥९०॥
चक्रवाक्यै जलपानं शिखरे हरिणाऽर्पितम् ।
शिववर्मकुटुम्बादेः काश्यामागमनं तथा ॥९१॥
राजमानं निवासादि लब्ध्वा हरिर्निजालयम् ।
आययौ कुंकुमवापीक्षेत्रं चेति समीरितम् ॥९२॥
उष्ट्रालये महादेशे हेमशालायनगृहे ।
विष्णुयज्ञः कृतो राज्ञा दक्षजवंगरेण वै ॥९३॥
राजकन्याशतं प्रजाकन्यकानां सहस्रकम् ।
प्राप्य कृष्णाय राजाद्याः कुंकुमवापिकां ययुः ॥९४॥
तीर्थं कृत्वा पुनरुष्ट्रालयं ययुर्विमानकैः ।
अथाऽऽययुर्दर्शनार्थं पितृकन्याश्च तास्तदा ॥९५॥
तासां विमाने रुरुधुः, राक्षसाः हरिणा हताः ।
प्राग्ज्योतिषप्रदेशेषु विमानेनागमो हरेः ॥९६॥
यज्ञस्याऽन्ते महायुद्धं तत्राऽसुरास्तु कोटिशः ।
विनाशितास्ततो राज्ये स्थापिता वैष्णवा नृपाः ॥९७॥
यज्ञं कृत्वा हरिः स्वीयं नगरं स्वतनौ तदा ।
दर्शयित्वा कन्यकाभ्यः स्वाकृष्टास्ताश्चकार ह ॥९८॥
लाशहासरितां मूर्तिप्रतिष्ठामहिमोदितः ।
नवधा भक्तिरूपाणि विघ्ननाशाः फलानि च ॥९९॥
साधूनां स्वात्मरूपत्वं श्रैष्ठ्यं सर्वत ईरितम् ।
भूतालयाऽऽसामकामरूपश्यामादिराज्यकम् ॥१००॥
निर्णीतं ब्रह्मराज्यं चाऽक्षरक्षेत्रागमस्ततः ।
पुष्पदोलोत्सवं चक्रे, जन्मोत्सवं चकार च ॥१०१॥
समीरणनृपस्यापि मृगयार्थे गतस्य वै ।
वने पार्ष्णिग्रहर्षेस्तु शापेन शरभत्वकम् ॥१०२॥
रैवताद्रौ हरिद्दत्तात्रेयदर्शनतो गतम् ।
अश्वपट्टसरस्येतद् दत्तात्रेयसुतीर्थकम् ॥१०३॥
वाराहतीर्थकं चापि सोपाख्यानं समीरितम् ।
पवमानाख्यतीर्थे च जातमश्वसरोवरे ॥१०४॥
कच्छपरूपिणा सन्तारणाद्या ब्राह्मणा जले ।
मग्ना उद्धारिताः कच्छपाख्यतीर्थं ततोऽभवत् ॥१०५॥
देवायतनभक्तेन दिक्पालानां प्रजाः कृताः ।
मुक्ताः श्रीहरिनाम्नां वै श्रावणेनेति चेरितम् ॥१०६॥
राशियानादिदेशेषु राशिद्वादशकस्य वै ।
कथेरिता, च मुक्तिश्च, बालकृष्णसरोवरे ॥१०७॥
महायज्ञश्च कथितो देवायनाटनं तथा ।
यज्ञान्ते शिबिना कन्याशतदानं हि शार्ङ्गिणे ॥१०८॥
कृतं चाथ गुणार्थाः सम्बर्णिताः साधुयोगिनाम् ।
तीर्थान्युक्तानि सरसि पित्रुद्धारस्तथा कृतः ॥१०९॥
द्विकलाख्यसरोभूमौ यज्ञार्थं श्रीहरिर्ययौ ।
तत्र धर्मोपदेशश्च प्रेतानामुद्धृतिस्तथा ॥११०॥
राज्ञे नीत्युपदेशश्च तृतीयाध्वरमागतिः ।
यज्ञेऽर्कलोकवासानां वीरजारादियुसदाम् ॥१११॥
मुक्तिः प्रोक्ता तथा दानं कन्यानां चोपदेशनम् ।
अवभृथस्य तत्त्वार्थः कथितस्तत्फलादिकम् ॥११२॥
चतुर्थे तु क्रतौ पश्चात् स्वस्य मूर्त्यादि देशितम् ।
पञ्चमे तु क्रतौ सर्वाः पिशाचिन्यो हि तारिताः ॥११३॥
पिशाचित्वे कारणानि प्रोक्तानि मन्त्रदीक्षणम् ।
पूजाश्च दिव्यसद्रूपं स्वस्य तत्र प्रदर्शितम् ॥११४॥
लालासनाख्यसाधुर्वै यज्ञान्ते समुपाययौ ।
वैष्णवीं साधवीं दीक्षां स जग्राह हरेस्तदा ॥११५॥
अन्ये पञ्चसहस्राणि दीक्षामापुश्च साधवीम् ।
लालायनो ययावुत्तरान् कुरून् कृष्णवाञ्छया ॥११६॥
श्रीहरिः स्वकुटुम्बेन विमानेनाऽक्षरस्थलीम् ।
आययौ तत्र वै देवायनस्य मन्दिरात्मता ॥११७॥

दर्शिता हरिणा सांगदेवालयस्वरूपिता ।
देवालयस्य खाताद्यारभ्य ध्वजान्तमीरितम् ॥११८॥
स्वरूपं चान्तरीयका विभागाश्च स्फुटीकृताः ।
सिंहासनानि देवाद्याः प्रासादाभिन्ननामिनः ॥११९॥
मेरुजातीयप्रासादाः कात्स्न्र्येनापि प्रवर्णिताः ।
वेदानां देवतानां च मूर्तिमानानि वै तथा ॥१२०॥
आयुधादीनि वै चापि वर्णितानि ततः परम् ।
ध्वजादयश्च कथिताः कुण्डाश्च होमसंख्यया ॥१२१॥
वास्तुपुरुषसंस्थानं देवकर्माढ्यमीरितम् ।
आचार्यवरणं श्रीमद्गणेशादिप्रपूजनम् ॥१२२॥
देवानां स्थापनं नान्दीश्राद्धाद्यं च प्रपूजनम् ।
वास्तुपीठस्थदेवानां स्थापनं स्वस्तिवाचनम् ॥१२३॥
पूजनं योगिनीनां च क्षेत्रपालादिपूजनम् ।
स्तंभदेवार्चनं शाखातत्तद्देवादिपूजनम् ॥१२४॥
अग्निस्थापनकुण्डाङ्गयोनिग्रहादिपूजनम् ।
षट्पञ्चाशद्देवपूजा प्रत्यधिदेवतार्चनम् ॥१२५॥
लोकपालग्रहावाहनादिपूजनमीरितम् ।
योगिनीक्षेत्रपालादिनैकदेवाहुतिस्तथा ॥१२६॥
राधादिषट्कं पराविद्यादिचत्वारिंशदयुक्शतम् ।
परमेशावतारादि बलिदानेन चार्चितम् ॥१२७॥
नेत्रांजनाभरणादिनैकन्यासादि वर्णितम् ।
पूर्णाहुतिः श्रृंगस्नानं चरुश्रपणप्रभृति ॥१२८॥
रथोपवेशनं ग्रामे भ्रामणं प्राणयोजनम् ।
आरात्रिकं पूर्णहोमश्चाशीर्वादा अवभृथम् ॥१२९॥
कलशारोहणं मानस्तंभध्वजाधिरोहणम् ।
चलमूर्तिप्रतिष्ठादि जोर्णोद्धारश्च कीर्तिताः ॥१३०॥
धनमेधधीवरस्य तुरीलक्ष्मीप्रसादतः ।
कुंकुमवापिकातीर्थान्मोक्षः श्रीहरिणा कृतः ॥१३१॥
शिबिकावाहवोढोश्च ज्ञानासिस्तपसोदिता ।
द्युविश्रामकृषिकारगोधनं सिंहतोऽवितम् ॥१३२॥
हरिणा चेति कथितं चाथ वृकायनादयः ।
केतुमाले गतास्तत्र षष्टिगांगेयमेलनम् ॥१३३॥
केतुमाले महायज्ञः कथितो हरिणा कृतः ।
सर्वभूभृदुपप्राप्तिस्तद्देशेषु हरेर्गतिः ॥१३४॥
सर्वसृष्टिजनाऽऽयश्च मनोरञ्जनकान्यपि ।
रात्रौ, प्रातर्भोजनानि मन्त्रदानानि कात्स्न्र्यतः ॥१३५॥
विधिवत् सर्वदेवादिपूजनं हवनं मखे ।
धृतानि हरिणा कोट्यब्जादिरूपाणि तत्र च ॥१३६॥
अवभृथकुमारोत्पत्तिश्च तृप्तिकुमारिका ।
उत्पन्नाऽस्यै कुमारस्य दानं विवाहतः कृतम् ॥१३७॥
अथोरलकेतुराजधान्यां सुस्वागतं हरेः ।
मोक्षणं भूभृत्पूर्वजानां श्रीहरिणा कृतम् ॥१३८॥
निजस्वरूपविज्ञानं सम्प्रदायस्य संस्थितिः ।
कथिताऽथ क्रथकस्य राजधान्यां हरेर्गतिः ॥१३९॥
मन्दिरादिककार्येषु कालाद्याः कीर्तिताः शुभाः ।
नक्षत्रयोगकरणचक्रचन्द्रभतारकाः ॥१४०॥
शुभाऽशुभाः सुकथिता मुहूर्तानीरितानि च ।
जरस्थाल्यां राजधान्यां स्वागतं पूजनं हरेः ॥१४१॥
षड्विंशतिनृपाणां प्राग्जन्मवृत्तान्त ईरितः ।
अथ प्रभुर्ययावुष्ट्रालराष्ट्रं सकुटुम्बकः ॥१४२॥
सत्कारं प्राप्य तीराणाराजधानीं ययौ ततः ।
योगिभ्यो गृहधर्माद्या इन्द्रेणोक्ताः प्रमोक्षदाः ॥१४३॥
पूजां प्राप्याऽऽययावल्वीनरराज्यं हरिस्ततः ।
अर्थश्रीनगरीं गत्वा मुक्तिं तुषितराक्षसे ॥१४४॥
दत्वाऽथ जिनवर्द्धिभूभृद्राजधानिकां ययौ ।
रामपुर्यां परिभ्रम्य जनहार्याख्यरक्षसः ॥१४५॥
विनाशार्थं ययौ चापिनायाऽद्रिं परमेश्वरः ।
राक्षसान् हतवान् रुद्रद्वाराऽद्रेश्चक्रवह्निना ॥१४६॥
आरसमयिता, कन्यादानग्रहोऽथ रक्षणम् ।
प्रजानां निगडस्थानां ततोऽवनमुदीरितम् ॥१४७॥
मृताऽस्थिभ्यो जीवदानं, जीवनीनगरीं गतिः ।
लिखितस्य शंखवाप्यां चौर्यं हस्तसुछेदनम् ॥१४८॥
बाहुदायां स्नानतस्तु हस्तयो रोहणं पुनः ।
जयकृष्णवभूपस्य वरणानगरीक्षणम् ॥१४९॥
कृत्वा हरिर्ययौ परीशानराज्यं ततोऽभ्रमत् ।
पावयित्वा ययौ परीजराष्ट्रं चापपूजनम् ॥१५०॥
वायूनानगरीयानम् इन्दिरावारिणा हरेः ।
स्नानं तत्र च वेतालानां तु प्रमोक्षणं कृतम् ॥१५१॥
राज्ञे चतुर्भुजं दत्तं दर्शनं च ततः परम् ।
मुद्राण्डराष्ट्रागमनं मद्रिरापुरिकेक्षणम् ॥१५२॥
पूजां प्राप्योपदिश्याऽथ शैवालनगरीक्षणम् ।
कृत्वा लीशवनं प्राप पत्तनं गण्डकेशितुः ॥१५३॥
पूजां प्राप्योपदिश्याऽथ ययौ लीनोर्णराष्ट्रकम् ।
भ्रमित्वा वारुणीपुर्यां धीवरापुरिकां ययौ ॥१५४॥
मिलीन्दानगरीं चापि भ्रमित्वा वालिनीपुरीम् ।
बललीननृपराष्ट्रे बहुमानमवाप ह ॥१५५॥

व्रतोपदेशनं वाशीलापुरीं गमनं ततः ।
पूजोपदेशो भ्रमणं रायगामलराष्ट्रके ॥१५६॥
गमनं तत्र च रिमानगर्यां स्वागतं महत् ।
फेनतन्तुनृपराष्ट्राऽऽगमनं पूजनादिकम् ॥१५७॥
भ्रामणं त्रिनयापुर्यां चोपदेशः प्रपूजनम् ।
ध्वांक्षदृष्टान्तमन्त्रोक्तं स्तोकहोममुवं गतिः ॥१५८॥
उमापुर्यां विचरणं काष्ठयानस्य राष्ट्रकम् ।
भ्रमित्वा च तुन्नवायां नगर्यां चोपदेशनम् ॥१५९॥
ततः कोलकभूपस्य राष्ट्राभिगमनं हरेः ।
मुरमाषानगर्यां सुस्वागतं पूजनादिकम् ॥१६०॥
हरेः स्नानं बहुरूपैर्गांगेयकन्यकादिषु ।
ततो हारितदेशेषु त्वपरानाविकापुरे ॥१६१॥
दिनमानार्कराजर्षेगरिमापृथिवीतले ।
विमानेन ययौ स्वामी कृष्णनारायणः प्रभुः ॥१६२॥
अपरानाविकापुर्यां स्वागतं देशलोकनम् ।
केनाटकप्रदेशेषु विनिपारसरोगतिः ॥१६३॥
यज्ञार्थपत्रिकासम्प्रेषणं च यज्ञपत्तने ।
यज्ञे कार्यकराः प्रोक्ताः प्रतिमाः कृष्णयोषिताम् ॥१६४॥
स्फूर्तिनारीनगर्यां तु रायरोकीश्वरेच्छया ।
भ्रामणं चाप्यध्वरस्य स्थलीं प्रत्यागमः पुनः ॥१६५॥
विप्रस्वतःप्रकाशस्य सर्वद्रष्टृत्वमध्वरे ।
साक्षाद् देवा व्यराजन्त देवपूजाहवोऽनले ॥१६६॥
पूर्णाहुतिस्ततो रायरणजिद्राष्ट्रलोकनम् ।
विंशतिकन्यकापूजापुष्पमालाग्रहादिकम् ॥१६७॥
रायवाकक्षकभूभृद्राज्ये द्वीपत्रये गतिः ।
रायमारीशभूपम्वां व्यचरद् द्वीपतुर्यके ॥१६८॥
रायबालेश्वरराष्ट्रे वायुफेनाख्यपत्तने ।
स्वागतं च ततो यज्ञमहापूर्णाहुतिः कृता ॥१६९॥
आशीर्वादा दक्षिणाद्या अवभृथं विदायकम् ।
रायलम्बरराज्येऽपि किमुवक्रापुरीं गतिः ॥१७०॥
रायनवार्कनृपतेः स्वर्लतिकापुरीं गतिः ।
रायहण्डेश्वरराष्ट्रे मक्षिकानगरीं गतिः ॥१७१॥
रायकूपेश्वरराष्ट्रे हवानायापुरीं गतिः ।
कालीमण्डलीनराष्ट्रे विगोष्ठिकापुरीं गतिः ॥१७२॥
वनज्वालाराष्ट्रके च सानुज्योष्ट्रीपुरीं गतिः ।
ततो गतैनसराष्ट्रे कायनीनगरीं गतिः ॥१७३॥
कोटीश्वरक्ष्मेशराष्ट्रे पेयिस्थायां गतिर्हरेः ।
पारूपराष्ट्रे सञ्जालनगर्यां स्वागतादिकम् ॥१७४॥

बालावित्तकराष्ट्रेऽगात् फान्कलाशीपुरे हरिः ।
आण्डजरानृपराष्ट्रे आन्तःप्रागस्थपत्तने ॥१७५॥
स्वागतं च ततो बाल्यरजोनृपस्य पत्तने ।
मन्त्रिणांगानगर्याख्ये स्वागतादि ततः पुनः ॥१७६॥
रायसोमननृपतेर्वायुमानापुरेऽपि तत् ।
पात्रगोनयराष्ट्रीयप्रजाभ्य उपदेशनम् ॥१७७॥
राजारायपतिराज्यम् आर्षजतनुराष्ट्रकम् ।
उरोगमनराष्ट्रं च ययौ श्रीभगवाँस्ततः ॥१७८॥
रायग्रामानगर्यां स्वागतं च्चाशासनापुरे ।
पराङ्व्रतनृपराज्ये स्वागतं भ्रमणं तथा ॥१७९॥
उपदेशोऽथ च ब्राह्मीलाख्यराष्ट्रे मखस्थले ।
आगमनं च देवानां स्थापनं पूजनादिकम् ॥१८०॥
आहुतिदानमंत्राऽथोपदेशादि प्रकीर्तितम् ।
ब्रह्मचर्यस्य माहात्म्यं तत्र यज्ञे प्रकीर्तितम् ॥१८१॥
सर्वात्मकत्वं स्वस्याऽपि महापूर्णाहुतिस्तथा ।
परिहारोऽध्वरस्याऽपि सप्तसरित्सु तीर्थता ॥१८२॥
लापलात्रीपुरीयानं सामुद्रदैत्यनाशनम् ।
विद्युन्मणिकरग्राहो द्विनेदिष्ठपुरे गतिः ॥१८३॥
त्रासमानद्वीपे वृन्दारुकाद्वीपे च सिंहले ।
पम्पासरसि चागत्य कुंकुमवापिकागमः ॥१८४॥
शरत्पूर्णारासखेलः स्वांगनाभिर्हरेस्ततः ।
चतुर्दशजन्मजयन्त्यष्टम्यामुत्सवः कृतः ॥१८५॥
दिव्यसभाऽद्भुततावर्णनं महःसमापनम् ।
तामसाक्षिश्वपचस्य सकुटुम्बस्य मोक्षणम् ॥१८६॥
अश्वरूपधरस्याऽऽश्वलायनर्षेः प्रशापतः ।
बर्बुरनृपतेर्बर्बुरद्रुत्वान्मोक्षणं कृतम् ॥१८७॥
कालीचतुर्दशीरात्रौ शंकरादिप्रपूजनम् ।
दीपावल्यां शारदाया उत्सवो हरिणा कृतः ॥१८८॥
सम्पर्कनृपरोगस्य नाशः श्रीहरिणा कृतः ।
दत्तात्रेयस्वरूपेण तीर्थं चापि कृतं शुभम् ॥१८९॥
अन्नकूटोत्सवः प्रोक्तस्ततो हंसस्वरूपिणा ।
पुण्डरीकनृपमुक्तिस्ततो नृहरिरूपिणा ॥१९०॥
चोलराज्ञोऽपि मुक्तिश्चेरिता तीर्थद्वयं तु तत् ।
वीतिहोत्रयोगिना वै सहस्ररूपधारिणा ॥१९१॥
सहस्ररूपतश्चापि ऋषभस्यापि रूपतः ।
दर्शनं हरिणा दत्तं स्तुतिश्चापि समीरिता ॥१९२॥
सरस्तीरे कृते वैवस्वतेन शेषमन्दिरे ।
शेषसंकर्षणपतञ्जल्यादिस्थापनोदिता ॥१९३॥

तत्तत्तीर्थं तथा प्रोक्तं वामनांगुष्ठतीर्थकम् ।
पंक्तिलर्षिप्रसंगेन जातं समभिव्याहृतम् ॥१९४॥
हैमकलिंगनृपात् प्रोक्तः पर्शुरामपराभवः ।
अश्वपारत्ननृपकृत् सोमयागो निरूपितः ॥१९५॥
प्रवर्ग्योपसदौ सुब्रह्मण्याह्वानं निरूपितम् ।
सवनानि महापूर्णाहुतिश्चावभृथादि च ॥१९६॥
श्रद्धोपनिषद्विज्ञानं विशालिकनिदर्शनम् ।
लोमशर्षेराश्वपाटलयोः संवाद ईरितः ॥१९७॥
सेयं लोमशगीतोक्ता सर्वमोक्षनिदर्शिनी ।
अस्यामानर्तराजस्य कुशलायोगिनीस्त्रियाः ॥१९८॥
संवादोऽपि दर्शितोऽथ स्वतःप्रकाशयोगिनः ।
पूर्ववृत्तान्त उदितश्चोपदेशो गुरोरपि ॥१९९॥
भाणवीर्यभक्तकथा रामादित्यनिमित्तजा ।
ऊर्जव्रतस्य कायस्थस्य कुष्ठरोगनाशनम् ॥२००॥
शूद्रस्य मूकविप्रस्य शार्ङ्गधराख्यसंहिता ।
कृतिरुक्ताऽऽख्यानयुक्ता तपसा भावितात्मनः ॥२०१॥
पार्ष्णिरदस्य शूद्रस्य क्षयरोगो निवारितः ।
अर्कपुरीशितुर्विप्रशापेन सर्पता ततः ॥२०२॥
विप्रस्य सर्पदंशश्च मृतिः कृष्णात्तु जीवनम् ।
रक्षांगारकनृपतेः राणिकायाः कथेरिता ॥२०३॥
अमोहाक्षनृपमोक्षः प्रबुद्धगुरुवाक्यतः ।
अभयाक्षनृपस्यापि त्यागिदीक्षानिरूपणम् ॥२०४॥
सरोवारिमग्नदेवानीकरक्षोदिता ततः ।
ब्रह्मस्तम्बाख्यविप्रस्य पुरुषोत्तमदर्शनम् ॥२०५॥
अमरीं कन्यकां तुष्टो महाविष्णुः समुद्वहत् ।
गजतो रक्षणं कूप्यवालकाष्ठहरस्य च ॥२०६॥
कुंकुमस्य सतीशाया धन्येश्वर्या उदन्तकम् ।
चैत्यब्रह्मद्विजस्यापि चमत्काराः प्रकीर्तिताः ॥२०७॥
हरिकृष्णनरनारायणतीर्थे तथोदितम् ।
माणिकीतीर्थमथ चाश्वपद्माभिधनिश्चयः ॥२०८॥
अश्वपाटलसंज्ञस्य साधुदीक्षोदिता ततः ।
काशीतः शिवशंभुप्रेषितयोगाख्यपत्रिकाम् ॥२०९॥
नीत्वा बृहस्पतिश्चापि नारदः प्रापतुर्हरिम् ।
कन्यैश्वर्यगुणदिव्यलक्षणान्याह नारदः ॥२१०॥
योगपत्री प्रतिपत्री दर्शिते गुणगर्भिते ।
मण्डपो वर्णितो दिव्यो माणिक्यस्तंभपूजनम् ॥२११॥
कलशस्य गणेशस्य मातृकाणां च पूजनम् ।
वास्तोर्विष्णोः कुलदेवसर्वतोभद्रपूजनम् ॥२१२॥
फलादेशान्वितं प्रोक्तं महामण्डपवर्णनम् ।
कुंकुमपत्रिकासम्प्रेषणं ताम्बूलकोत्सवः ॥२१३॥
रात्रौ गीतिनृत्यवाद्यमल्लकाव्याऽदनोत्सवाः ।
पिष्टिकामर्दनं शृंगारो हरेश्च जनागमः ॥२१४॥
काशीयात्रासज्जता चाऽसंख्यकन्यासुसज्जता ।
योगवाहिनिका काशीं प्राप्ता शिवपुरे स्थिता ॥२१५॥
पार्वतीपुरमप्यत्र वर्णितं शिवपत्तनम् ।
सम्मानं कुशलप्रश्नाः कैलासस्याऽवतारणम् ॥२१६॥
शिवपुर्यामथ पूजा कुलदेव्यास्तथा हरिः ।
कृष्णरूपेण च राधारूपेण च परीक्षणम् ॥२१७॥
चक्रे कन्या न देयैति बालकृष्णाय सर्वथा, ।
शिवशंभुपुरोऽथाऽपि गिरिजायाः पुरोऽपि च ॥२१८॥
लक्ष्म्याः पुरोऽपि हरिणा प्रोक्त्वा दार्ढ्यं परीक्षितम् ।
कन्यार्थाऽम्बरभूषादिप्रेषणं समवर्णितम् ॥२१९॥
वर्णनं योगवाहिन्या पार्वत्यै दर्शितं ऋचा ।
मुमुहुर्दर्शकनार्यः कृष्णांगेषु प्रवीक्ष्य तम् ॥२२०॥
विश्रान्तिमन्दिरे कृष्णस्याऽभवन्मधुपर्ककः ।
कन्यकानां सुशृंगारो हरेर्मण्डप आगमः ॥२२१॥
कोट्यर्बुदाब्जरूपैश्च हरिः कन्याः समग्रहीत् ।
विधिः सर्वः कृतश्चापि कान्तोद्देशः प्रकीर्तितः ॥२२२॥
सर्वरूपादिविलयो प्रोद्वाहविधिपूर्णता ।
सर्वाभिः सह शयने विहारो नैकरूपतः ॥२२३॥
प्रातः फुल्लकयात्रा च योगग्रन्थिविमोचनम् ।
गंगायां, सर्ववर्गेभ्यः पारितोषादिकाऽर्पणम् ॥२२४॥
पञ्चगंगातटे बालकृष्णाभिधसुतीर्थकम् ।
शंभवे भिक्षिकादानं शिवपत्तनमागमः ॥२२५॥
सत्कारपूजनं चापि विदायः क्षान्तियाचना ।
कुंकुमवापिकाक्षेत्रमागमो योगयात्रिगाम् ॥२२६॥
गृहप्रवेशः कान्तानां विहारोऽथ विनोदनम् ।
गुरुमन्त्रग्रहणं च वनानामवलोकनम् ॥२२७॥
द्यौः कन्यारूपिणी लीलां कोट्यर्बुदाब्जरूपिणः ।
कान्ताभिः रममाणस्य हरेर्दृष्ट्वा मुमोह सा ॥२२८॥
अथ सर्वकन्यकानां समाधिं हरिरैरयत् ।
सृष्टित्रयाक्षरधामादिकं त्वदर्शयद्धरिः ॥२२९॥
महीमानविदायं च मिथः क्षमादियाचनम् ।
मातृभिर्भिक्षिताः कन्याः सर्वाः श्रीहरिणाऽर्पिताः ॥२३०॥
मण्डपादिपरिहारो लक्ष्मीसेवा सुरीतिका ।
जन्मोत्सवे षोडशे स्वसतीनां पुनरागमः ॥२३१॥

शिवशंभ्वादिमोक्षस्त्रेतासन्तानश्रुतेः फलम् ।
त्रेतासन्तानविषयोद्देशः खण्डसमापनम् ॥२३२॥
त्रेतामाहात्म्यमुक्तं च संक्षिप्ता विषयास्त्विमे ।
त्रेतासन्तानके राधे! वर्णिता मोक्षदाः खलु ॥२३३॥
नृपाणां चापि भक्तानां यज्ञानां योषितां तथा ।
तीर्थानां च कथा दिव्याः सन्ति चात्र सहस्रशः ॥२३४॥
वै द्वात्रिंशत्सहस्राणि श्लोकाः सन्तानकेऽत्र च ।
अध्यायास्त्रिशतान्येव परब्रह्मपरायणाः ॥२३५॥
पटनाच्छ्रवणाच्चापि स्मरणात् कीर्तनादपि ।
रक्षणाद्वा गृहे भुक्तिमुक्तियुक्ता भवन्ति हि ॥२३६॥
कृताध्यायाः पञ्चशतं नवतिश्चेति संहिताः ।
त्रेताध्यायैस्तेऽष्टशतं नवतिश्च भवन्ति हि ॥२३७॥
सप्ताशीतिसहस्राणि श्लोका भवन्ति संहिताः ।
अथोत्तरं तृतीयो द्वापरसन्तानकाभिधः ॥२३८॥
खण्डः सम्पत्स्यते राधे ! कृष्णनारायणगोचरः ।
षोडशाब्दात्मकात्रस्थकृष्णस्वरूपवर्णनः ॥२३९॥
कृष्णकान्ता योषितश्च नराः कृष्णस्य सेवकाः ।
भवन्त्येतत्कथायोगाच्छ्रीकृष्णोऽहं ब्रवीमि वै ॥२४०॥
स्वस्ति वोऽस्तु परब्रह्म श्रीकृष्णः स्वस्ति वः क्रियात् ।
माता पिता पतिः पत्नी स्वस्ति वंशा भवन्तु वः ॥२४१॥
वाचकायाऽस्य सर्वस्वं देयं व्यासाय मुक्तये ।
समृद्धये श्रद्धया दिव्यबुद्ध्या श्रोतृभिरों नमः ॥२४२॥
स्वर्णं रत्नानि शय्यादि हीरका मौक्तिकानि च ।
गजवाजिगवादीनि विमानं वाहनानि च ॥२४३॥
यानं सौधं वाटिकादि देयं व्यासाय शार्ङ्गिणे ।
श्रीकृष्णोवल्लभःस्वामिस्वरूपो व्यास एव यत् ॥२४४॥
सौभाग्यानि समस्तानि देयान्यस्मै प्रश्नण्वता ।
धनसम्पत्पुत्रपत्नीराज्यमानं हि लभ्यते ॥२४५॥
ब्रह्मप्राप्तिकरं शास्त्रं सर्वविद्याप्रसंभृतम् ।
त्रेतासन्तानकं कृष्णात्मकं विजयतेतमाम् ॥२४६॥
सर्वदुःखविनाशोऽस्य श्रवणाद् दानतस्तथा ।
सर्वशान्तिसमायोगः सर्वसिद्धिप्रसंजनम् ॥२४७॥
विद्याभूकन्यकास्वर्णदानानां फलदा श्रुतिः ।
मोक्षदानफलदा च कृष्णस्वाम्यप्रदायिनी ॥२४८॥
ओमार्यः कम्भराबालः सर्वस्वामी सतीश्वरः ।
सतां रूपः परमात्मा जयत्यहर्निशं प्रभुः ॥२४९॥
तस्मिन्नेव परे ब्रह्मण्यर्पितोऽयं द्वितीयकः ।
सन्तानः सन्तनोत्वत्र शश्वत्त्वं सुभगं व ओम् ॥२५०॥
वै द्वात्रिंशत्सहस्राणि द्वे शते च शतार्धकम् ।
चत्वारश्च भवन्त्यत्र श्लोकास्त्रेतासुतानके ॥२५१॥

इतिश्रीलक्ष्मीनारायणीयसंहितायां द्वितीये त्रेतासन्ताने लक्ष्मीनारायणमहिमा, त्रेतासन्तानखण्डस्थविषयाणां संक्षिप्तनिर्देशः, द्वापरसन्तानप्रस्तावः, आशीर्वादाश्चेति निरूपणनामा त्रिशततमोऽध्यायः ॥ ३०० ॥

इतिश्रीलक्ष्मीनारायणसंहितायां द्वितीयस्त्रेतायुगसन्तानखण्डः समाप्तः

**ओं श्रीकृष्णनारायणस्वाम्यर्पणमस्तु**